ॐ नमः ॥

वाचस्पत्यम्

VĀCASPATYAM

Sri Taranatha Tarkavachaspati



राष्ट्रिय संस्कृत संस्थान

नई दिल्ली

॥ श्रीमद्भगवद्गीता ॥

वाचस्पत्यम्

(बृहत् संस्कृताभिधानम्)

कालिकातास्थ गवर्नमेन्टसंस्कृतमहाविद्यालय-दर्शन-व्याकरणाध्यापक-

श्रीतारानाथतर्कवाचस्पतिभट्टाचार्येण

सङ्कलितम्
तेनैव संस्कृतम्

षष्ठो भागः

राष्ट्रिय संस्कृत संस्थान
५६-५७, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-११० ०५८

प्रकाशक :

प्रो. वी. कुटुम्ब शास्त्री

निदेशक

राष्ट्रिय संस्कृत संस्थान

५६-५७, इन्स्टीट्यूशनल एरिया, जनकपुरी

नई दिल्ली-११० ०५८

पुनर्मुद्रित संस्करण, २००२

मूल्य : रु० ८०९.०० (छः भागों का सेट)

मुद्रक

चौखम्बा संस्कृत सीरीज आफिस

के. ३७/९९, गोपाल मन्दिर लेन

गोलघर (मैदागिन) के पास

पोस्ट बॉक्स नं० १००८, वाराणसी-२२१ ००१ (भारत)

फोन : ३३३४५८ (आफिस), ३३४०३२ एवं ३३५०२० (आवास)

e-mail : cssoffice@satyam.net.in

VĀCASPATYAM

(A Comprehensive Sanskrit Dictionary)

Compiled by

Sri Taranatha Tarkavachaspati

Professor of Grammar and Philosophy
Govt. Sanskrit College, Calcutta.

Vol. VI

RASHTRIYA SANSKRIT SANSTHAN
56-57, Institutional Area, Janakpuri
New Delhi - 110 058

Publisher

Prof. V. Kutumba Shastri

Director

RASHTRIYA SANSKRIT SANSTHAN

56-57, Institutional Area, Janakpuri

New Delhi - 110 058

Reprinted, 2002

Price : Rs. 809.00 (Set of six vols.)

Printer :

CHOWKHAMBA SANSKRIT SERIES OFFICE

K. 37/99, Gopal Mandir Lane

Near Golghar (Maidagin)

Post Box No. 1008, Varanasi-221 001 (India)

Phone : Off. 333458, Resi. : 334032 & 335020

e-mail : cssoffice@satyam.net.in

पूर्णमुख पु० जनमेजयसर्पसत्रे दग्धनागभेदे भा० आ०५७अ०।

पूर्णयोग पु०बाहुयुद्धभेदे तत्प्रकारः भा०प०२२अ०उक्तो यथा

"ततस्तौ नरशार्दूलौ बाहुगस्तौ समीयतुः। वीरौ परमसंहृष्टावन्योऽन्यजयकाङ्क्षिणौ। करयहणपूर्वं तु कृत्वा पादाभिवन्दनम्। कक्षैः कक्षां विधुनुवानावास्फोटं तत्र चक्रतुः। रुक्मे दोर्भ्यां समाहत्य निहत्य च मुहुर्मुहुः। चक्रमक्रेः समाश्लिष्य पुनरास्फालनं विभो!। चित्रहस्तादिकं कृत्वा कक्षाबन्धं च चक्रतुः। गलगण्डाभिघातेन सस्फुलिङ्गेन चाशनिम्। बाहुपाशादिकं कृत्वा पादाहतशिरोधुभौ। उरोहस्तं ततश्चक्रे पूर्णकुम्भौ प्रयुज्य तु। करसंपीडनं कृत्वा गर्जन्तौ वारणाविव। नर्दन्तौ मेघसङ्काशौ बाहुप्रहरणावुभौ। तलेनाहन्यमानौ तु अन्योऽन्यं कृतयोधिनौ। सिंहाविव सुसंक्रुद्धावाजघ्राजघ्रतुर्मुखम्। अङ्गेनाङ्गं समापीड्य बाहुभ्यामुभयोरपि। आहत्य बाहुभिश्चापि उदरं च प्रचक्रतुः। उभौ कक्षां सुपार्श्वं तु तत्रस्थौ च शिक्षितौ। अधोहस्तं स्वकण्ठे तूरस्युरसि चाक्षिपत्। सर्वातिक्रान्तमर्यादं पृष्ठभङ्गं च चक्रतुः। स पूर्णमुष्टिं बाहुभ्यां पूर्णकुम्भं प्रचक्रतुः। तृणपीडं यथाकामं पूर्णयोगं सतृष्टिकम्। एवमादीनि युद्धानि प्रकुर्वन्तौ परस्परम्" भा०,"कक्षैर्मूलैः कक्षां प्रकोष्ठगतां रज्जुं धुन्वानौ यत्र यत्र कक्षे आस्फोटं चक्रतुः बाहुमूलास्फालनेनाङ्गदबन्धरज्जुश्लेषं कम्पयन्तावित्यर्थः। चित्रहस्तादिकं हस्तस्थातिवेगेनाकुञ्चनप्रसारणोपर्यधश्चालनं सृष्टीकरणानि चित्रहस्ताः। आदिपदात् पादस्याधाकुञ्चनादि। कक्षाबन्धं परस्परकक्षायां हस्तौ कृत्वा बन्धनम् गले गण्डेन भालदेशेनाभिघातस्तेन पाषाणसदृशाङ्गत्वात्तयोरभिघातेन विस्फुलिङ्गोत्पत्त्याऽशनिं यजमिव सृजन्तुरित्यर्थः। बाहुपाशादिकं चरणपाश आदियब्दार्थः। पादाभ्यामाहताः शिराः स्थायवो याभ्यां तौ दृढप्रहारेण नाड़ीपर्यन्तमपि वेदनावन्तावित्यर्थः। उरोहस्तमुरसि चपेटाप्रहारं पूर्णकुम्भौ व्यधिताङ्गुलिभ्यां हस्ताभ्यां परशिरसः पीड़नं पूर्णकुम्भः हित्वं परस्परं द्वावपि चक्रतुरिति वक्तुम्। तलेन चपेटया, आहत्य जत्रुदेशे पृष्ठं कृत्वा बाहुभिर्वक्षस्थौ द्वावपि मिथ उदरमादाय प्रचक्रतुः प्रचिक्षिपतुः कृ विक्षेपेऽस्य रूपम्। एवं कक्षां सुपार्श्वं च प्रचक्रतुः। तत्रस्थौ तत्तत्स्थानुकरणं गात्रसङ्कोच इत्यर्थः वर्तन्तौ। अधोहस्तमुदरस्याधस्ताद्धस्तं कृत्वा हस्ताभ्यामुदरमाबेष्ट्य स्वकण्ठे स्वोरसि च कण्ठोरःसमीपे आनीयाक्षिपदाक्षालितवान्। पृष्ठस्य भूमस्पर्शेन जातं भङ्गं पराभवं बाहुभ्यामुदरादीनि पीड़ने सम्पूर्णमूर्जम्" नीलकण्ठः।

पूर्णवैनाशिक पु० सर्ववैनाशिके सर्वशून्यत्वसाधिनि बौद्धभेदे सर्ववैनाशिकोऽप्यत्र।

पूर्णहोम पु० पूर्णो होमः। पूर्णाहुतौ।

पूर्णा स्त्री "नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात्" ज्यो०त०उक्ते पक्षयोः पञ्चमीदशमीपञ्चदशीरूपे तिथिभेदे

पूर्णाङ्कद पु० नागभेदे भा० आ० ५७ अ०।

पूर्णान(ल)क न०। वर्द्धापनायाम् पूर्णपात्रे मेदि० पूर्णपात्रशब्दे दृश्यम्। [कारे विहङ्गेदे च।

पूर्णानन्द पु० पूर्णे आनन्दो यत्र। १परमेश्वरे २तन्त्रप्रकरण-

पूर्णाभिषेक पु० कर्म०। तन्त्रोक्ते कौलाभिषेकभेदे।

पूर्णायुस् पु० १प्राधेये गन्धर्वभेदे भा०आ०६५अ०। पूर्णमायुरस्य। २शतायुष्के कर्म०। ३शतवर्षमिते जीवनकाले न०।

पूर्णावतार पु० कर्म०। १नृसिंहे २रामे ३श्रीकृष्णे च तेषां भगवतः संपूर्णावतारत्वात् तथात्वं अन्येषान्तु कलावतारत्वम्। "पूर्णो नृसिंहो रामश्च श्वेतद्वीपविराड् विभुः। परिपूर्णतमः कृष्णो वैकुण्ठे गोकुले स्वयम्। वैकुण्ठे कमलाकान्तो रूपभेदाच्चतुर्भुजः। गोलोके गोकुले राधाकान्तोऽयं द्विभुजः स्वयम्" ब्रह्मवै०जन्मख०१८अ० उक्तेऽस्य तथात्वम्।

पूर्णाशा स्त्री नदीभेदे भा० भी० ६ अ०।

पूर्णाहुति स्त्री पूर्णा आहुतिः। होमसमाप्तौ होत्याया-माहुतौ शत०ब्रा० २।२।।१।

पूर्णि स्त्री पॄ–क्विप्। पूर्तौ पूर्णिमा।

पूर्णिका स्त्री नासाक्षिश्रोणासकण्डने तिलका०।

पूर्णिमा स्त्री पूर्णिं पूर्त्तिं सिनोति सा–क। १पौर्णमास्यां तिथौ मरीचेः कलायां पत्न्यां जाते २कन्याभेदे "भार्य्या मरीचेस्तु कला सुषुवे कर्दमात्मजा। कन्यां पूर्णिकाञ्चैव तयोरापूरितं जगत्। पूर्णिकाऽकूत विरजं विश्वगञ्च परन्तप!।। भाग०४।१।१२ तत्तिथिस्वरूपं द्वैधे खण्डभेदेन कर्मभेदे श्राद्धतादिकं च कालमा० न्यरूपि यथा "तत्र शुक्लायां पञ्चदश्यां चन्द्रमण्डलं स्वकलाभिः सर्वात्मना पूर्यते सेयं मण्डलपरिपूर्त्तिः पूर्णिमेत्यनेन नाम्ना ज्ञायते। तदुक्तं ब्रह्माण्डसूत्रपुराणयोः "कालस्वे व्यतिक्रान्ते दिवापूर्णौ परस्परम्। चन्द्रादित्यौ यः

राह्णे तु पूर्णत्वात् पूर्णिमा स्मृता" इति। अह्नः परो भागः पराह्णः सूर्य्योत्तमयकाल इत्यर्थः। तत्र यथादित्यः संपूर्णमण्डलः सन्नस्तमेति तथोत्तरस्यां चन्द्रः सम्पूर्णमण्डलः सन्नुदेतीति। दृष्टान्तदार्ष्टान्तिकभावस्य विवक्षितत्वाद् द्वयोरादित्यचन्द्रयोरुपन्यासः। यथा मण्डलपूर्णत्वविवक्षया पूर्णिमाशब्दः प्रयुज्यते तथा मासपूर्णत्वविवक्षया पौर्णमासीशब्दः प्रयुज्यते। तदुक्तं भविष्योत्तरे "पौर्णमासी महाराज! सोमस्य दयिता तिथिः। पूर्णो मासो भवेद् यस्मात् पौर्णमासी ततः स्मृता" इति। पूर्णिमामावास्ययोर्विकल्पेन मासान्तत्वं मासप्रस्तावे दर्शितम्। अतएव पौर्णमास्या अत्यन्तविप्रकर्षे सत्यनभिभूतत्वान्नक्षत्रमण्डलः सम्पूर्णो दृश्यते। तावेतौ सन्निकर्षविप्रकर्षौ गोभिल आह "यः परो विप्रकर्षः सूर्य्याचन्द्रमसोः सा पौर्णमासी। यः परः सन्निकर्षः सामावास्येति"। तदेवं पर्वाभिधायाः पञ्चदश्याः पूर्णमादिनामनिर्वचनेन स्वभावविशेषो ज्ञापितो भवति। ते च पूर्णमासामावास्ये प्रत्येकं द्विविधे। तत्र पुराणे दर्शितम् "राका चानुमतिश्चैव पौर्णमासी द्विधा स्मृता। सिनीवाली कुहूश्चैवममावास्या द्विधैव तु" इति। एतासां चतसृणां स्वरूपं काठकगार्ह्यायां विस्पष्टं श्रूयते "या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका। या पूर्वाऽमावास्या सा सिनीवाली योत्तरा सा कुहूः" इति। बृहद्विष्णोऽपि "राका चानुमतिश्चैव पौर्णमास्यौ द्वयं विदुः। राका संपूर्णचन्द्रा स्यात् कलोनाऽनुमतिर्मता। पौर्णमासी दिवा दृष्टे शशिन्यनुमतिः स्मृता। रात्रिदृष्टे पुनस्तस्मिन् सैव राकेति कीर्त्तिता"। अतस्तन्नक्षत्रपुराणयोः "यस्मात्तामनुमन्यन्ते पितरो दैवतैः सह। तस्मादनुमतिर्नाम पूर्णिमा प्रथमा स्मृता। अत्यर्थं राजते यस्मात् पौर्णमास्यां निशाकरः। रङ्गनाच्चैव चन्द्रस्य राकेति कवयो विदुः" इति। "अथ पञ्चदशी निरूप्यते। सा द्विविधा पौर्णमास्यमावास्या च। तत्र पौर्णमास्यां परस्परविरुद्धानि वाक्यान्युपलभ्यन्ते। तत्र परविद्धाया ग्राह्यत्वं विष्णुधर्मोत्तरे "एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी। अमावास्या तृतीया च उपोष्या स्युः परान्विताः"। परविद्धानिषेधः पूर्वविद्धाविधिश्च ब्रह्मपुराणपद्मपुराणयोः "षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाऽष्टमी। पूर्णिमा परविद्धा च नोपोष्या तिथिपञ्चकम्। पूर्वविद्धा तु कर्त्तव्या सप्तमी व्रतिभिर्नरैः। पौर्णमासी, महीपाल-पराया निशमाकृता" इति। पूर्वविद्धाग्राह्यत्वं च युग्मवाक्ये। "चतुर्दशग्रा च पूर्णिमेति"। एवं परस्परविरोधे सति या व्यवस्था सा ब्रह्मवैवर्त्ते दर्शिता "पूर्वविद्धा न कर्त्तव्या अमावास्या च पूर्णिमा। वर्जयित्वा तु निम्बेह! सावित्रीव्रतसप्तमम्" इति। सावित्री राजकन्या तया चीर्णं व्रतं सावित्रीव्रतम्। तच्च भविष्योत्तरपुराणे दर्शितम् "कथयामि कुरुश्रेष्ठां महिम्नो वर्जनं परम्। यथा चीर्णं व्रतं पूर्वं सावित्र्या राजकन्यया" इति। एतच्च पौर्णमास्यामावास्यायां च विहितम्। तस्मिन् व्रते पूर्वविद्धा त्याज्या। व्रतान्तरे पूर्वविद्धा न कर्त्तव्या किन्तु परविद्धैव कर्त्तव्येति परस्परविरुद्धस्य शास्त्रद्वयस्य व्यवस्था। यदा तु चतुर्दशग्रहादशमाडिका भवति तदा सावित्रीव्रतमपि तत्र परित्याज्यम्। "भूतोऽहादशमाड्योर्भिर्दृश्यत्युत्तरां तिथिमिति" स्मृतेः। योऽयं पौर्णमासीनिर्णयः स एवामावास्यायामप्यवगन्तव्यः। तत्रापि सावित्रीव्रतं पूर्वदिने कर्त्तव्यं व्रतान्तरागत्युत्तरदिने। अस्यां च व्यवस्थायां ब्रह्मवैवर्त्तवचनं पूर्वमुदाहृतम्। स्कन्दपुराणेऽपि "भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत्। वर्जयित्वा तु सावित्रीव्रतं तु शिखिनाहन!" इति। एवं च सति युग्मशास्त्रं सावित्रीव्रतव्यतिरिक्तेषु व्रतेषु द्रष्टव्यम्। प्रचेता अपि "नागविद्धा तु या षष्ठी सप्तम्या च युताष्टमी। दशम्येकादशीविद्धा त्रयोदश्या चतुर्दशी। भूतविद्धाप्यमावास्या न त्याज्या मुनिपुङ्गवैः। उत्तरोत्तरविद्धाम्नाः कर्त्तव्याः काठकी स्मृतिः" इति। पद्मपुराणेऽपि "षष्ठ्यष्टमी तथा दर्शः क्षयपक्षे त्रयोदशी। एताः परयुताः कार्याः पराः पूर्वेण संयुताः" इति। यत्तु नारदीयपुराणे "दर्शं च पौर्णमासं च विद्युः सांवत्सरं दिनम्। पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते" इति तत् सावित्रीव्रतविषयं आब्दिकविषयं वा। अमावास्यायामिव पौर्णमास्यामपि आब्दं विहितम् तथाच पितामहः "अमावास्याव्यतीपातपौर्णमास्यष्टकासु च। विद्वान् आब्दमकुर्वाणः प्रायश्चित्तीयते हि सः" इति। अमावास्याश्राद्धस्य च पार्वणरूपत्वमपराह्णस्य तत्कर्मकालत्वं कुतपस्य प्रारम्भकालत्वमित्येतच्चितयं प्रतिपत्प्रकरणे प्रत्याब्दिकनिर्णये प्रपञ्चितम्"।

"या चतुर्दशीयुता ग्राह्या युग्मात्। यमः "पञ्चान्ते को-

तसि स्नायात् तेन नायाति मत्पुरम्" विष्णुः "इयं प्रेते सङ्क्रान्तौ यस्यां दिवि चन्द्रदर्शनम्। पौर्णमासी न सङ्क्रान्तौ ज्ञेया संवत्सरे तु सा। तस्यां स्नानोपवासा श्यामत्रयं परिकीर्त्तितम्"। सङ्क्रान्तौ मासमंज्ञानिमित्तकृत्तिकादिनक्षत्रगतौ सङ्क्रान्तिव्यादिदर्शनात्। तथा च राजमार्त्तण्डः "मासमंज्ञे यदा कृत्स्ने चन्द्रः सम्पूर्णमण्डलः। रूक्षया याति संयोगं सा तिथिः पौर्णमासिका मृता"। स्नानदानयोः "पौर्णमासीषु चैतासु मासर्क्षसहितासु च। एतासु स्नानदानाभ्यां फलं दशगुणं स्मृतम्" तिथितत्त्वम्।

पूर्णेन्दु पु० कर्म०। पञ्चदशभिः कलाभिः पूर्णे चन्द्रे।

पूर्णोत्कट पु० पु० प्राच्ये देशभेदे मार्क०५८अ०। [इदम्।

पूर्णोपमा स्त्री उपमालङ्कारभेदे अलङ्कारशब्दे २६६ पृ०

पूर्त्त त्रि० पूर-क्त नि०। १पूरिते २कृते त्रिका०। पृ-पालने कर्मणि क्त। १पालिते। भावे क्त। ३पालने न०५यत्नर०। ५स्नानादिकर्मणि न० अमरः। आह्निकसूत्रे "वापी कूपतड़ागादिदेवतायतनानि च। अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते"। आरामः पुष्पफलोपायश्चेतुर्भूभागः। "अग्निहोत्रं तपः सत्यं वेदानामनुपालनम्। आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते। अग्न्युपरागे ब्रह्मदानं पूर्त्तमित्यभिधीयते। इष्टापूर्त्तं द्विजातीनां धर्मः सामान्य उच्यते। अधिकारी भवेच्छूद्रः पूर्त्ते धर्मे न वैदिके"। वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति" रत्नाकरः। एवं स्त्रीणामपि पूर्त्ताधिकारः। यथा नारीत्यनुवृत्तौ बृहस्पतिः "पितृव्यगुरुदौहित्रान् भर्तुः स्वसीयमातुलान्। पूजयेत् कन्यपूर्वाभ्यां दत्त्वाचार्यातिथीन् स्त्रियः"। एतेन "जलाशयोत्सर्गे गोरवतरत्वानुमन्त्रणयोर्यजमानकर्तृकमन्त्रपाठः तत्रामन्त्रकतया स्त्रीशूद्रयोरनधिकारेण तदुक्तौ यागेऽप्यनधिकारः विशेषोपदेशविरहादिति" दैवनिर्णयोक्तं निरस्तम्। अतएव तयोर्जलाशयोत्सर्गादिपक्षयज्ञवेदीहोमादिसमाचारः। अत्र होमो वक्ष्यो न साक्षात् कल्पतरुरत्नाकरधृतापस्तम्बवचनात्। तदुक्तं यथा ज्ञारत्नयाद्युपक्रम्य "तदुक्तमङ्गतत्त्वाग्नौ न स्त्री जुह्वयात्तानुपेतः इति" अनुपेतः अनुपनीतः, किन्तु ब्राह्मणद्वारा करणीयः। "श्रौतस्मार्त्तक्रियाहेतोर्द्विगुणादक्षिणत्विजः स्वयम्" इति याज्ञवल्क्योक्तेः "ऋत्विग्वादे नियुक्तौ च समौ संपरिकीर्त्तितौ। यज्ञे स्वाध्याप्नुयात् पुण्यं हानिं वादेऽथ वा जयम्" इति बृहस्पत्युक्तेः। वैदिकेतरमन्त्रपाठे शूद्रादेरप्यधिकारः। "वेदमन्त्रवर्जं शूद्रस्येति" ऊन्दोगाङ्गिराचारचिन्तामणिधृतबृहत्पराशरौ वेदेतिविशेषणात्। "शूद्रोऽप्येवंविधः प्रोक्तो विना मन्त्रेण संस्कृतः। न केनचित् समसृजत् ऊन्दसा तं प्रजापतिः" इति यमस्मृतौ ऊन्दसा वेदेन इत्युक्तेश्च। तं शूद्रम्। यज्ञयज्ञानश्राद्धेषु वैदिकेतरमन्त्रोऽपि निषिद्धः। शूद्रमधिकृत्य "नमस्कारेण मन्त्रेण पञ्चयज्ञाञ्च हापयेत्" इति याज्ञवल्क्यीयेन "ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते। तूष्णीमेव हि शूद्रस्य स्नानमस्कारकं मतम्" इति योगियाज्ञवल्क्यीयेन श्राद्धमधिकृत्य "अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः। अमन्त्रस्तु तु शूद्रस्य विप्रो मन्त्रेण भक्षयेत्" इति वराहपुराणीयेन च नमस्कारेणेति तूष्णीमिति मन्त्रवर्जित इत्यभिधानात्"।

पूर्त्ति स्त्री पृ-भावे क्तिन्। १पूरणे "क्तिन्तिः पूर्तिश्च पूरणे" ज्योत्स्नोक्तेः २गुणने च। [ङीप्।

पूर्त्तिम् त्रि० पूर्त्तमनेन इष्टा० इनि। कृतपूरणे। स्त्रियां ङीप्।

पूर्द्वार न० ष० त०। पुरस्य द्वारे गोपुरे अमरः। [अपूर्वोक्तेषु।

पूर्धि याच्ञायां भ्वा०प०सक०सेट्। निघण्टुः। पूर्धयति

पूर्व निमन्त्रणे सक० निवासे सक० चु०उभ० सेट्। पूर्वयति ते अपुपूर्वत् त। ओष्ठ्यान्तोऽयम्।

पूर्य्य त्रि० पृ-क्यप् पूर-गत्यर्थो वा। १पूरणीये २परिपाल्ये च

पूर्व निवासे अक० निमन्त्रणे सक० भ्वा० प० सेट्। अन्तस्थान्तोऽयम्। पूर्वति अपूर्वीत्।

पूर्व(र्व)त्रि०पूर्व(र्व)-अच्। १प्रथमे आद्ये यस्यां दिशि येषां सूर्यस्य प्रथमं दृष्टिः तेषां तस्यां २दिशि स्त्री तदुपलक्षिते २देशे यस्य यदपेक्षया प्रथमं जन्मादि तस्य ४तादृशकाले ५तदुपलक्षिते च। तस्य दिग्देशकालव्यवस्थापाचित्ये सर्वनामकार्यं पूर्वके इत्यादि जसि ङिङसोस्तु वा पूर्वे पूर्वाः पूर्वस्मात् पूर्वात् पूर्वे पूर्वस्मिन्। स्त्रियां तु न विभाषा पूर्वस्यै पूर्वस्याम् इत्यादि। सर्वनामत्वेन वृत्तिमात्रेऽस्य पुंवद्भावः। पूर्वस्यां स्थितं पूर्वस्थितम्। पूर्वस्या रूपं पूर्वरूपम् इत्यादि।

पूर्व(र्व)कर्मन् न० कर्म०। प्रथमे कर्मणि "कर्म त्रिविधं पूर्वकर्मप्रधानकर्म पश्चात्कर्मेति" स्मृतेः। पूर्वभागे।

पूर्व(र्व)काय पु० पूर्व(र्व) कायस्य एकदेशस्थित०। कायस्य

पूर्व(र्व)कालिक त्रि० पूर्व (र्वः)कालः साधनतयाऽस्यास्य ठन्। पूर्व(र्व)कालसाध्ये "दर्शनं पूर्व(र्व)कालिकम्"

मा०सौ०टच०। पूर्व(र्व)काले भवः ठञि ठद्धिः। पौर्व्य(र्व)-कालिक इत्येव तत्रार्थे त्रि० स्त्रियां ङीप् इति भेदः।

पूर्व(र्व)कृत् पु० पूर्वां(र्वां) करोति कृ-क्विप् वृक्षौ पुंवत्। १पूर्व(र्व)दिगवयवके आदित्ये २तदधिपे इन्द्रे च यजु० १०३६। ३पूर्व(र्व)कारकमात्रे त्रि०।

पूर्व(र्व)कोटि स्त्री विप्रतिपत्तौ पूर्वोपाक्षे विषये पूर्वपक्षे

पूर्व(र्व)गङ्गा स्त्री नित्यक०। नर्मदानद्यां हेम०।

पूर्व(र्व)चित्ति त्रि०चित-भावे क्तिन् पूर्वं(र्वं) चित्तिः स्मरणं यस्य। १पूर्वानुभवविषये यजु०१२।११।१३।४३। २अप्सरोभेदे स्त्री हरिवं० १२अ०।

पूर्व(र्व)ज पु० पूर्वस्मिन् काले जायते जन-ड। १ज्येष्ठभ्रातरि रघुः १०।२६। २ज्येष्ठभगिन्यां स्त्री अमरः। ३पूर्वकालजातमात्रे त्रि०। "ज्येष्ठाभ्रूणीयमिच्छन्ति मासमाषाद पूर्व(र्व)जम्"। ४चन्द्रलोकस्थे दिव्यपितृगणे "अथ पूर्व(र्व)जाः" पितरश्चन्द्रगोलस्था न्यङ्क्षशब्दाः स्वधाभुजः। कव्यवाळादयस्ते च" त्रिका०। ५पितामहादौ "स पूर्व(र्व)जानां कपिलेन रोषात्" रघुः। [त्रिका०

पूर्व(र्व)जिन पु० कर्म०। प्राचीने जिनभेदे मङ्घुघोषप्रभृतौ

पूर्व(र्व)दक्षिणा स्त्री पूर्व(र्व)स्या दक्षिणस्यामन्तराला दिक् "दिङ्नामान्यन्तराले" पा० स०। पूर्वदक्षिणयोर्दिशोरन्तरालायां दिशि १अग्निकोणे २तद्दिक्स्थे देशे च मार्क० पु० ५८ अ०।

पूर्व(र्व)दिक्पति पु० कर्म०६त०। इन्द्रे हेम०। पूर्व(र्व)दिगादयोऽप्यत्र। २मेषसिंहादिराशिषु। "प्रागादिककुभां नाथा यथासंख्यं प्रदक्षिणम्। मेषाद्या राशयो ज्ञेया स्थिरादृत्तिपरिभ्रमात्" ज्यो०त०।

पूर्व(र्व)दिग्बल न० दिग्बलशब्दे २५७१ पृ० उक्ते सूर्यादिग्रहाणां कालभेदे पूर्वस्यां दिशिभवे बलभेदे

पूर्व(र्व)दिग्वदन न० पूर्वदिशि वदनमस्य। दिग्वदनशब्दे २५७५ पृ० उक्ते मेषसिंहधनूरूपराशित्रिके

पूर्व(र्व)दिश् स्त्री कर्म०। प्राच्यां दिशि यस्यां दिशि येषां सूर्यस्य प्रथमदृष्टिः तेषां सा दिक्प्राची। तज्ज्ञानो यायश्च दिग्ज्ञानशब्दे २५७४ पृ० दृश्यः।

पूर्व(र्व)दिष्ट त्रि० पूर्व(र्वं) दिष्टं भाग्यं साधनत्वेनास्त्यस्य अच्। पूर्वभाग्यानुरूपेण जाते १दुःखादौ "दैवैर्मत्यस्य यत्प्रोक्तं पूर्व(र्व)दिष्टं हि तत् स्मृतम्" भाग० ६।१७ श्लो०। पूर्वं(र्वं) दिष्टम्। २पूर्वविहिते त्रि०।

पूर्व(र्व)देव पु० पूर्व(र्वं) देवाः। १अक्षरे अमरः। तेषां प्रथमं देवत्वेन जायमानत्वेऽपि अन्यायाचरणात् ततो भ्रष्टानां दैत्यभावं प्राप्तिरिति पौराणिकी कथानुसन्धेया। कर्म०। पूर्वतनयोः देवयोः २नरनारायणयोः द्वि० व०। भा० उ० ४८ अ०।

पूर्व(र्व)देवता स्त्री कर्म०। अनादिदेवभावेषु पितृषु "अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः। न्यस्तशस्त्रा महाभागाः पितरः पूर्व(र्व)देवताः" मनुः। तदधिकं पितृशब्दे दृश्यम्।

पूर्व(र्व)देश पु० पूर्व(र्व)स्यां देशः। जम्बुद्वीपस्थे देशभेदे स च देशः वृ० सं० १४ अ० कूर्मविभागे दर्शितः।

पूर्व(र्व)नदी स्त्री कर्म०। कूर्मविभागे उक्तायां पूर्वदिक्स्थायां नद्याम् ततो नद्यन्तत्वात् ढक् उत्तरपदवृद्धिः पूर्वनादेव तत्र-भवे त्रि०।

पूर्व(र्व)पक्ष पु० कर्म०। १शुक्लपक्षे अमरः। शास्त्रीयसंशयनिराकरणप्रस्तावे २पक्षिकायाम्। ३सिद्धान्तविरुद्धकोटौ "विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरम्" इत्युक्ताधिकरणावयवभेदे व्यवहारे प्रतिज्ञापरपर्य्याये भाषापत्रस्थे ४प्रथमावयवभेदे। तल्लक्षणादिकं वीरमि० उक्तं यथा "पूर्वपक्षः स्मृतः पादो द्वितीयस्तूत्तरस्तथा। क्रियापादस्तृतीयस्तु चतुर्थो निर्णयस्तथा" इति वृद्धस्मृतिवचनस्थं निर्णयफलकपरामर्शरूपप्रत्याकलितपरमेव निर्णयपदमुपचारादित्याह "दूरतस्तु पूर्वोदाहृतवचनविरोधः स्यात्। तत्र प्रतिज्ञावादी कः स्यादित्यपेक्षिते नारदः "राज्ञे कुर्यात् पूर्वमावेदनं यस्तस्य क्षेपः पूर्ववादो विधिज्ञैः" इति पूर्ववादः प्रतिज्ञा। पूर्ववादकस्यैव प्रतिज्ञावादित्वस्यापवादमाह स एव "यस्य वाभ्यधिका पीड़ा कार्य्ये वाभ्यधिकस्मयेत्। तस्यार्थिवादो दातव्यो न यः पूर्वं निवेदयेत्"। अर्थिवादः प्रतिज्ञा। वृद्धस्मृतिः "अहं पूर्वि(र्व)कया यातावर्थिप्रत्यर्थिनौ यदा। वादो वर्णानुपूर्वेण ग्राह्यः पीड़ामवेक्ष्य चेति"। मनुरपि "व्यर्थानर्थाकुभौ बुद्ध्या धर्मावर्थौ च केवलौ। वर्णक्रमेण सर्वाणि प्रगृह्येत् कार्य्याणि कार्य्यिणाम्"। ब्राह्मणादीनां युगपदुभयार्थिकरणं प्राप्तानां वर्णानुक्रमेण ब्राह्मणस्यादौ ततः क्षत्रियस्येत्येवमादिक्रमेण चतुष्पाद्व्यवहारः प्रवर्त्तनीयो राज्ञा पीड़ाधिक्यकार्य्यगौरवं चेदर्थिप्रत्यर्थिनोरन्यतरस्य तदा न पूर्वावेदनक्रमो नापि वर्णक्रमः। यदा तु सर्वे सवर्णास्तदा आवेदनक्रमः। युगपदावेदने समानवर्णत्वे समानपीड़त्वे च दशभ्यसभापतीक्ष्येति

निर्गलितोऽर्थः । प्रतिज्ञालक्षणमाह याज्ञवल्क्यः "प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना । समामासतद्वर्षैश्चाभिजात्यादिचिह्नितम्" । अर्थ्यत इत्यर्थः साध्यः सोऽस्यास्तीत्यर्थी तद्विपरीतः प्रत्यर्थी तस्याग्रतः पुरतो लेख्यं लेखनीयं सभ्येन समाप्तिना यथावेदितं पूर्ववेदनमनतिक्रम्य येन प्रकारेणावेदनसमये स्ववचनं लेखितं तथैव प्रत्यर्थिसमक्षमपि न पुनरन्यथा । तथा सत्यन्यथावादित्वेन भङ्गप्रसङ्गात् । अन्यथादीत्यादि हीनलक्षणे वक्ष्यते । प्रागेवार्थिना स्वप्रतिज्ञातार्थस्य लिखितत्वादधुना लेखनमनर्थकमित्याशङ्क्याभिप्रायाह समामासेति । संवत्सरमासपक्षतिथिधाराधिप्रत्यर्थिनामतदीयजातिभिरादिशब्दोपात्तैश्च द्रव्यसङ्ख्यातच्छाति क्षणयक्षणादिस्थानवेलाक्षमालिङ्गादिभिर्यथोपयोगं चिह्नितमिति कार्यमात्रमावेदनकाले लिखितमधुनोपयुक्तसंहितं लिख्यत इति नानर्थक्यमिति भावः । आदिशब्दयाह्यानि च कात्यायन आह "निवेश्याः कालं वर्षं च मासं पक्षं तिथिं तथा । वेलां प्रदेशं विषयं स्थानं जात्याकृतो वयः । साध्यं प्रमाणं द्रव्यञ्च सङ्ख्या नाम तथात्मनः । राज्ञां च क्रमशो नाम निवासं साध्यनाम च । क्रमात् पितृणां नामानि पीडामाहर्तृदायकौ । क्षमालिङ्गानि चान्यानि पक्षं सङ्कल्प्य कीर्तयेत्" । कालो धनप्रयोगादिकालः । वर्षं पक्षलिखनकालीनम् एवं मासपक्षतिथयोऽपि सन्ध्यावन्दनादिक्रियोपलक्षितः कालो वेला । प्रदेशः क्षेत्रादिस्थलविशेषः । विषयोऽन्तर्वेद्यादिविषयः स्थानं विवादास्पदीभूतगृहादिग्रामादि आकृतिरवयवसंस्थानविशेषः वयस्तारुण्यादि प्रमाणं निवर्तनप्रस्थादि । आत्मनो राज्ञां च क्षेत्रादिभोगकालीनानां बन्धुवचनं तदीयपित्रादिप्राप्त्यर्थं निवासो निकटगृहादिः । पितरोऽर्थिप्रत्यर्थिनोः । पीडा प्रतिभूप्रभृतीनां धनिकादिकृता । आहर्त्तारो प्रतिग्रहादिविषयवस्तूनि आनेता दायको दाक्षविक्रेतादिः । क्षमालिङ्गान्यात्मीयधनादेः परोपभोगाद्यपराधसूचनचिह्नानि । अन्यत् सुबोधम् । सम्यक्कारोऽपि "अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलम् । साध्यवद्बाधकपदं प्रकृताभ्युदन्वि च । प्रसिद्धमविरुद्धञ्च लिखितं साधनक्षमम् । संक्षिप्तं चित्रलिखितार्थं च देशकालाविरोधि च । वर्षर्तुमासपक्षाहर्वेलादेश्यप्रदेशवत् । स्थानावयवसाध्याख्याजात्याकारवयोयुतम् । साध्यप्रमाणं सङ्ख्यावदात्मप्रत्यर्थिनाम च । परापूर्वजानेकराजनामभिरङ्कितम् । क्षमालिङ्गात्मपीडावत् कथिताहर्तृदायकम् । यदावेद्यते राज्ञे तद्राजेत्यभिधीयते" इति । अर्थवत् प्रयोजनवत् । धर्मसंयुक्तम् अल्पाक्षरप्रभूतार्थत्वादिगुणयुक्तम् । परिपूर्णमध्याहारादानपेक्षम् । अनाकुलमसन्दिग्धाक्षरम् । साध्यवत् साधनीयार्थयुतम् । बाधकपदम् गौणलाक्षणिकपदरहितम् । प्रकृतबाधाविरोधि प्रागावेदितार्थेन सह संवादि । प्रसिद्धं लोकप्रसिद्धप्रतिक्रान्तम् अविरुद्धं पुरराष्ट्रग्राड्विवाकराज्याविरुद्धम् । पूर्वापराविरुद्धं व्यवहारिकधर्माविरुद्धञ्च । निश्चितं संशयरहितम् । साधनक्षमम् साधनार्हम् । संक्षिप्तं शब्दाडम्बरशून्यम् । लिखितार्थं निरवशेषवक्तव्यार्थप्रतिपादकम् । देशलोकाविरोधि मध्यदेशीयमसुक्षेत्रम् शरत्कालीनशस्याढ्यं सदीयमपहृतमित्यादिदेशकालविरोधविधुरम् । परात्मनोः प्रतिवादिप्रादिनोर्ये पूर्वजाः पित्रादयस्तयः अनेके राजानः क्षेत्रादिभुक्तिकालीनास्तेषां नामभिरङ्कितं युक्तम् । अत्रार्थवत्त्वादीनि देशकालविरोधित्वमर्थिप्रत्यर्थिनामाम्नुन्यत्वं चेति सर्वत्र भाषायामवश्यमाश्रयणीयानि तैर्विना साध्यनिर्देशासिद्धेः । वर्षादीनि तु यत्र यावन्त्युपयुज्यन्ते तत्र तावन्त्येव निवेशनीयानि सर्वाणि न सर्वत्र अदृष्टार्थत्वप्रसङ्गात् । तत्र वर्षादीनां कालानां दक्षिणदक्षिणगुणत्वादिविवादेन प्रतिपक्षक्रयादिपौर्वापर्यविवादे वोपयोगः । देशप्रदेशस्थानानामाहर्तृदायकयोरात्मादिपूर्वजराजादिनाम्नां च स्थावरक्षेत्रादिविवादेषु । साध्याख्याजात्याकारवयसां चौर्यादिलक्षस्यविक्रयादिविवादेषु । प्रमाणसंख्ययोर्मेयतुलितादिद्रव्यविवादे चौर्यादिविवादे च क्षमालिङ्गानामुपेक्षितपरोक्षभुज्यमानभग्नादिविवादे । आत्मपीडाया ऋणिकप्रतिभ्वादिविवादे एवमन्यदप्यूह्यम् । अतएवाशयाद्याह कात्यायनः "देशञ्चैव तथा स्थानं संक्षिवेशस्तथैव च । जातिः संज्ञाधिवासश्च प्रमाणं क्षेत्रनाम च । पितृणामहञ्चैव पूर्वराजानुकीर्तनम् । स्थावरेषु विवादेषु दशैतानि निवेशयेत्" इति । एतेषां तत्तदुपयोगित्वात् । हारीतोऽपि "आसनं शयनं यानवस्त्रं कांस्यमयोमयम् । धान्यशस्त्रसयं यच्च द्विपदञ्च चतुष्पदम् । मणिमुक्ताप्रवालानि हीरका रूप्यकाञ्चनम् । यदि द्रव्यसमूहः स्यात् संख्या कार्या तदैव तु । यस्मिन् देशे च यद्द्रव्यं येन मानेन क्रीयते । तेन तस्मिंस्तदा सङ्ख्या कर्त्तव्या व्यवहारिभिः" इति ।

मानसंख्याशब्दाक्तान्योऽन्योपलक्षणम् । अत्रैतावदुविवक्षितं यत्र यावदुपयुज्यते तत्र तावन्निवेश्यं भाषापत्रे । अन्यथा साध्यनिर्देशस्यापूर्णत्वात् पत्राभासतापत्तेरधिकनिवेशेऽदृष्टार्थतापत्तेरिति । कात्यायनोऽर्थत एवाह "देशकालविहीनस्य द्रव्यसङ्ख्याविवर्जितः । क्रियामानविहीनश्च पत्रो नादेय इष्यते" । क्रिया प्रमाणम् । मानं साध्यपरिमाणम् ।" यद्यपि पूर्वोक्तपत्रलक्षणरहितानां पत्राभासत्वमर्थसिद्धं तथापि नारदादिभिः स्वतार्थं प्रपञ्चितम् । तत्र नारदः "अन्यार्थमर्थहीनञ्च प्रमाणागमवर्जितम् । लेख्यहीनाधिकं भ्रष्टं भाषादोषा उदाहृताः" । एतान् स एव विवृतवान् । "व्यर्थं साधारणेऽर्थे को सम्बन्धोऽधानियुक्तकः । लेखयेद् यत्तु भाषार्थमन्यार्थं तं विदुर्बुधाः" । धनकार्यमेको वा यदसम्बन्धी तदनियुक्तो वा लेखयेद् यस्यां भाषायामित्यर्थः । "ब्रह्महत्यामिति द्वेषात् क्रोधाद्वापि वदेत्तु यः । साध्यं च मोचयेत् पश्चादर्थहीनान्तु तां विदुः" । उक्तं साध्यं वादिना यस्मान्त्यज्यते सा भाषार्थहीनेत्यर्थः । "गणिते लिखिते मेये तथा क्षेत्रघटादिषु । यत्र सङ्ख्या न निर्दिष्टा सा प्रमाणविवर्जिता" । सङ्ख्यानं सङ्ख्येति व्युत्पत्त्या सङ्ख्याशब्देन गणनतोलनमानानां परिग्रहः । "विद्यया प्राप्तमर्थं च लब्धं क्रीतं क्रमागतम् । नत्वेवं लिख्यते यत्र सा भाषा स्यादनागमा । समासासक्तया पक्षस्तिथिवारक्षयैव च । यत्रैतानि न लिख्यन्ते लेख्यहीनान्तु तां विदुः" । अवश्यं यद् यत्र पूर्वोक्तरीत्या लेख्यं तद्रहिता लेख्यहीनेत्यर्थः । "लेखयित्वा तु तां भाषामनिर्दिष्टे तथोत्तरे । निर्दिशेत् साक्षिणः पूर्वमधिकां तां विनिर्दिशेत्" । साक्षिण इति प्रमाणोपलक्षणम् । व्युत्क्रमादसाधिक्यन्तेनाप्राप्तकालता फलिता । "यत्र स्यात्तु यथापूर्वं निर्दिष्टं पूर्ववादिना । सन्दिग्धमेव लेख्येन भ्रष्टां भाषान्तु तां विदुः" उभयं पूर्वमिति पाठे पक्षद्वयमपि प्रतिज्ञादिनैव निर्दिष्टं स्यादित्यर्थः" । प्रसङ्गात् पत्राभासोऽपि तत्र निर्णीतोऽत्र प्रदर्श्यते । तत्र कात्यायनः "अप्रसिद्धं निरावाधं निरर्थं निष्प्रयोजनम् । असाध्यं वा विरुद्धं वा पत्राभासं विवर्जयेत्" । अप्रसिद्धमाह बृहस्पतिः "न केनचित् कृतो यस्तु सोऽप्रसिद्ध उदाहृतः । यथा फलबृहत्फलक्षेत्रमयं कृतमिति मदीयं गजविषाणं गृहीत्वा न प्रयच्छतीत्यादाप्रसिद्धमित्याह विज्ञानेश्वरः । बृहस्पतिना तिद्मसाध्योदाहरणमुक्तं तच्च वक्ष्यते । निरावाधमिरूपद्रवं मम मन्दिरे दीप्यमानदीपकप्रकाशेनायं खमन्दिरे व्यवहरतीतिप्रभृति निरर्थकमभिधेयहीनं मदीयं कपटतपश्चवगडदशं वा गृहीत्वा न ददातीत्यादि विज्ञानयोगी । बृहस्पतिवचनात् त्वन्यथा निरर्थकपदार्थः प्रतीयते यथाह "स्वल्पापराधः स्वल्पार्थो निरर्थक इति स्मृतः" इति । एतस्योदाहरणं स्मृतिचन्द्रिकायाम् "अहमनेन सञ्चितलीचितः । मामकी शिक्षाऽनेनापहृतेत्यादि निष्प्रयोजनं यथायं देवदत्तोऽमुष्मादृष्टहस्तसन्धौ सुस्वरमधीते इत्यादि मिताक्षरास्मृतिचन्द्रिकयोरुदाहृतम् । बृहस्पतिना तथैव लक्षितम् । "कार्यबाधाविहीनस्तु विज्ञेयो निष्प्रयोजनः" इति । स एव प्रकारान्तरेणापि निरर्थकनिष्प्रयोजनौ लक्षितवान् "कुसीदादौ: पदैर्हीनो व्यवहारो निरर्थकः । वाक्पारुष्यादिभिश्चैव विज्ञेयो निष्प्रयोजनः" । कुसीदृणदानं तत्प्रभृतिभिश्चतुर्दशभिरर्थविषयव्यवहारैर्हीनो निरर्थकः । वाक्पारुष्यादिभिर्हिंसात्मकैश्चतुर्भिर्हीनो निष्प्रयोजनः इत्यर्थः । अष्टादशपदाविषयः पक्षो दुष्ट इत्याशयः । असाध्यविरुद्धावाह स एव "समानेन प्रदातव्यं यशश्चक्रुकृतं धनुः । असम्भाव्यमसाध्यन्तं पक्षमाहुर्मनीषिणः । यस्मिन्नावेदिते पक्षे प्राड्विवाकेऽथ राजनि । पुरराष्ट्रे विरोधः स्यादिरुद्धः सोऽभिधीयते" इति । मिताक्षरायामसाध्यविरुद्धावन्यथोक्तौ "देवदत्तेनाहं सम्भूभक्षणप्रक्षित इत्याद्यसाध्यसाधनासम्भवात् अल्पकालत्वाच्च साध्यादिसम्भवो लिखितं दूरतोऽल्पत्वाच्च दिव्यमिति । मूकेनाहं धृत इत्यादि विरुद्धमिति" । पुरराष्ट्रादिविरुद्धमपि विरुद्धपदेन व्याख्याय राज्ञा विवर्जित इत्यादिस्मृत्यन्तरञ्च तदर्थतयोदाहृतमस्माभिरनादेयव्यवहारनिरूपणे लिखितम् । अन्येऽपि पत्राभासाः स्मृतिचन्द्रिकोदाहृतवचनोक्ता ज्ञेयाः । यथा "भिन्नक्रमो व्युत्क्रमार्थः प्रकीर्णार्थो निरर्थकः । अतीतकालो विहितः पक्षो नादेय इष्यते । यथाख्यानानिवेशेन नैव पक्षार्थकल्पना । यस्यते तेन पक्षः स भिन्नक्रम उदाहृतः" । व्यत्यस्ताक्षरसन्निवेशो भिन्नक्रम इति यावत् । व्युत्क्रमार्थो व्यवहितास्वयेनार्थावबोधकः । प्रकीर्णार्थोऽसङ्गतार्थः । "मूलमर्थं परित्यज्य सद्गुणो यत्र लिख्यते । निरर्थकः स वै पक्षो भूतसाधनवर्जितः । भूतकालमतिक्रान्तं द्रव्यं यत्र हि लिख्यते । अतीत-

कालः पक्षोऽसौ प्रमाणे सत्यपि स्मृतः। यस्मिन् पक्षे द्विधा साध्यं भिन्नकालनिर्णयनम्। विस्मृयते क्रियाभेदः स पक्षोद्दिष्ट उच्यते"। भूतसाधनं भूतभूतं साधनं तेन वर्जितः। भूतकालः साध्यकालः। अन्यानपि पक्षाभासानाह स एव "अन्याक्षरनिवेशेन अन्यार्थगमनेन च। आकुलत्वं भवेल्लेख्यं क्रिया चैवाकुला भवेत्। साधनं सह साध्येन निर्दिष्टं यत्र लेखयेत्। पक्षक्रमविहीनत्वात् सोऽपि पक्षो न सिध्यतीति। विरुद्धशाविरुद्धस्य द्वावप्यर्थौ निवेशितौ। एकस्मिन् यत्र दृश्यते तं पक्षं दूरतस्त्यजेत्। परस्परविरुद्धानि यः पदानि निवेशयेत्। विरुद्धपदसङ्कीर्णा भाषा तस्य न सिध्यतीति"। यत्तु "पुरराष्ट्रविरुद्धस्य यत्र राज्ञा विवर्जितः। अनेकपदसङ्कीर्णः पूर्वपक्षो न सिद्ध्यतीति" स्मरणात् तस्यायमर्थः। राज्ञा विवर्जितो राजलक्ष्मुल्कादिविषयकर्षादानादिपदमिश्रितस्तु क्रियाभेदेन युगपत्र सिद्ध्यतीति मदीया रूपका दृयन्तोऽनया दृष्टान्तेन स्टष्टीताः सुवर्णञ्च मयां निक्षेपोक्तमवधिदं मदीयमेतमपहरतीत्यनेकपदविषयस्यापि पक्षस्य क्रमेणाप्यनुपादेयत्वे तत्त्वनिर्णयाभावप्रसङ्गेन युक्तिविरोधात्। "बहुप्रतिज्ञं यत्कार्यं व्यवहारेषु निश्चितम्। कामं सटपि स्टष्टोयाद्राजा तत्त्वबुभूत्सयेति" कात्यायनवचनविरोधाच्च। तस्मादुयमपत् पक्षाभासतेत्येव रमणीयम्। अनेकवस्तुसङ्कीर्णस्यापक्षत्वन्त्वतत्पदसम्बद्धम्। स्थिरगयदृष्टकवासंशि वानेन मत्तो दृष्ट्वा स्टहीतान्यस्य हस्तो मया निक्षिप्तान्यनेनापहृतानि वेत्येकस्मिन्नपि पदे युगपदपीदृशपक्षोपन्यासस्यादुष्टत्वात्। साध्यञ्च विधिमुखेन प्रतिषेधमुखेन वा पक्षनिक्षेपणीयमित्याह कात्यायनः "न्यायं संयच्छते कर्तुमन्यायं वा करोत्ययम्। न सेत्स्यति यस्त्वेवं तस्य पक्षो न सिद्ध्यति"। न्यायं करोत्ययमित्यनेन ममैतावद्धनमादाय न ददातीत्यादि प्रतिबन्धसुखताऽपि लक्षिता। अन्यायं करोत्ययमित्यनेन ममेदमपहरतीत्यादि विधिसुखता प्रदर्शिता। दृष्टस्मृतिरपि "प्रतिज्ञादोषनिर्मुक्तं साध्यं यत्कारणान्वितम्। निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः" इति। प्रतिज्ञादोषैः प्रतिज्ञासंन्यासादिभिर्मुक्तं रहितम्। ते च दर्शिताः प्राक्। साध्यं साधनार्हम्। यत्कारणान्वितं स्फुटदोषरहितहेतुसहितम्। निश्चितं सन्देहाजनकवाक्यरचनायुक्तं न तु संशयमेव निश्चितं विप्रतिपत्तावर्थनिश्चयाभावात्। लोकसिद्धं व्यवहारिकधर्माविरुद्धम्। अतएव मनुः "सत्या न भाषा भवति यद्यपि स्यात् प्रतिष्ठिता। बहिस्तेद्वाभ्यते धर्माच्चियतादव्यवहारिकात्"। प्रतिष्ठिता प्रसिद्धत्वादिदोषनिर्मुक्ता। भाषा प्रतिज्ञा व्यावहारिकधर्माद्विरुद्धा च सत्या साध्या न भवति राजादोनामित्यर्थः। भवदेवस्तु "यत्र श्रुतमात्र एव सति लोकानां सम्प्रत्ययस्तल्लोकसिद्धं तेन निर्धनत्वतो लक्षादिद्रव्यधनाक्षेपो न पक्ष इति व्याचक्षो तद्व्याधरूपप्रतिज्ञादोषवत्त्वेनैव ताडयपक्षस्य निराकरणात्। प्रतिज्ञादोषनिर्मुक्तमित्यनेनैव गतार्थम्"। ततः गर्हा० भवार्थे क्र। पूर्वपक्षीय तद्भवे त्रि०।

पूर्व(र्वे)पद न० कर्म०। पूर्ववर्त्तिनि विभक्त्यन्ते पदे "पूर्वपदात् संज्ञायामगः" पा०। २पूर्ववर्त्तिस्थाने च। पूर्वपदमधीते "पूर्वोत्तरपदात्" वार्त्ति० ठक्। पूर्वपदिक तद्वेत्तरि तदध्यायिनि च।

पूर्व(र्वे)पर्वत पु० नित्यक०। उदयाचले अमरः।

पूर्व(र्वे)पाञ्चालक त्रि० पूर्वस्मिन् पञ्चाले भवः वुञ् उत्तरपदवृद्धिः। पूर्वपञ्चालभवे। पूर्वं पञ्चालानाम् एकदेशिस० तत्र भवः अपि तु नोत्तरपदवृद्धिः। पौर्वपञ्चाल इत्येव त्रि० कौ०।

पूर्व(र्वे)पाटलिपुत्रक त्रि० पूर्वपाटलिपुत्रे भवः वुञ् न पूर्वपदवृद्धिः। पूर्वपाटलिपुत्रनगरभवे। [औ०४।६।४

पूर्व(र्वे)पाद पु०पूर्वं पादस्य एकदेशिस०। ऋषचरणे कात्या०

पूर्व(र्वे)पालिन् पु०पूर्वं देशं दिशं वा पालयति पालि-णिनि। १पौरस्त्यदेशपालनरूपभेदे २पूर्वादिगीशे इन्द्रे च। [१वृ०।

पूर्व(र्वे)पितामह पु०पूर्वः पितामहात्। प्रपितामहे भा०वि०

पूर्व(र्वे)पीठिका स्त्री कर्म०। कथाग्रन्थावतरणिकाभेदे।

पूर्व(र्वे)पुरुष पु० कर्म०। पित्रादित्रिके पुरुषे।

पूर्व(र्वे)पूर्व(र्वे) त्रि० पूर्व+वीप्सायां द्वित्वम्। वीप्सार्थके पूर्वशब्दार्थे। [अङ्गेषाशब्दे नदीवादि दृश्यम्।

पूर्व(र्वे)फल्गुनी स्त्री अश्विन्यादिषु एकादशे नक्षत्रे।

पूर्व(र्वे)फल्गुनीभव पु० पूर्व(र्वे)फल्गुन्यां भवति भू-अच्। दृहस्पतौ शब्दमाला।

पूर्व(र्वे)भ(भा)द्रपदा स्त्री भद्रस्य दृषस्येव पदं चरणमस्य तस्येदमण् वा कर्म०। अश्विन्यादिषु पञ्चविंशतितमनक्षत्रे तत्स्वरूपादिकं अङ्गेषाशब्दे उक्तम्।

पूर्व(र्वे)भाव पु० पूर्वो भावः। १पूर्ववर्त्तित्वे कारणत्वे येन सह पूर्वभावः कारणमादाय वा यस्य" भाषा० कर्म०।

२पूर्ववर्त्तिनि भावे पदार्थधर्ममेदे ह्रङ्कारस्य पूर्वरागापरपर्य्याये २भावभेदे ।

पूर्व(र्व)भाविन् त्रि० पूर्वं भवति भू-णिनि । १कारणे २पूर्ववर्त्तिनि पदार्थमात्रे च सां०का०१ ७५ ।

पूर्व(र्व)यज्ञ पु० नित्यक० । अग्निमङ्गादौ त्रिलोक्यसे शिक्षा०

पूर्व(र्व)रङ्ग पु०पूर्वं रज्यतेऽस्मिन् रज-घञर्थे कः । "यज्ञाद्य वस्तुनः पूर्वं रङ्गविघ्नोपशान्तये । कृशीलवाः प्रकुर्वन्ति पूर्व(र्व)रङ्गः स उच्यते" दशरूपकोक्ते नान्दीपाठादौ ।

पूर्व(र्व)राग पु० पूर्वो रागः । नायकनायिकयोर्मैलनात् पूर्वजाते ह्यनुरागभेदे "अवणाद्दर्शनाद्वापि विभावंकूढ रागयोः । दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते । अवणन्तु भवेत्तत्र दूतवन्दिसखीसुखात् । इन्द्रजाले च चित्रे च साक्षात् स्वप्ने च दर्शनम् । अभिलाषश्चिन्ता स्मृतिगुणकथनोद्वेगसंप्रलापाश्च । उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशाः । अभिलाषः स्मृतिश्चिन्ता प्राप्त्युपायादिचिन्तनम् । उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि । अनवस्थावाक् प्रलापः स्यात् चेतसो भ्रमणादुद्भ्रमः । व्याधिस्तु दीर्घनिःश्वासः पाण्डुताङ्गशनादयः । जडता हीनचेष्टत्वमज्ञानां मनसस्तथा । रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते । जातप्रायन्तु तद्वाच्यं चेतसा चापि काङ्क्षितम् । "वर्ण्यतेऽपि यदि प्रत्युक्तीवनं स्यादद्भुतः" । "आदौ वाच्यः स्त्रिया रागः पुंसः पश्चात्तदिङ्गितैः । नीलीकुसुम्भमञ्जिष्ठाः पूर्वरागोऽपि च त्रिधा । न चातिशोभते यद्वाऽपैति प्रेम मनोभवम् । तन्नीलीरागमाख्यान्ति यथा श्रीरामसीतयोः । कुसुम्भरागं तं प्राहुर्यदपैति च शोभते । मञ्जिष्ठारागमाहुस्तं यन्नापैत्यतिशोभते" सा० द० ।

पूर्व(र्व)रात्र पु० पूर्वं रात्रेः एकदेशिस० अच्समा० रात्रान्तत्वात् पुंस्त्वम् । रात्रेः पूर्वभाग्ये ।

पूर्व(र्व)रूप न० कर्म० । अर्थालङ्कारभेदे अलङ्कारशब्दे ४००पृ० दृश्यम् । भविष्यद्रोगस्य प्रागजातरूपे तस्य लक्षणविशेषो भाविरोगलक्षणत्वं चोक्तं यथा

"प्राग्रूपं येन लक्ष्यते । उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः । लिङ्गमव्यक्तमल्पत्वादित्यर्थीनां तद्वयाख्यायम् । द्विविधं हि पूर्वरूपं भवति सामान्यं विशिष्टञ्च सामान्यं येन दोषदुष्टसंसर्ज्जनावस्थाजनितेन भाविज्वरादि व्याधिमात्रं प्रतीयते न तु वातादिजनितत्वादिविशेषं । यथा "श्रमोरतिर्विवर्णत्वमिति" । तथा बालग्रहवाक्यप्रहेलिकादि । सामान्याभिप्रायेणैव सन्तानान्तरं यथा "व्याधेर्जातिर्बुभुक्षा च पूर्वरूपेण लक्ष्यते । भावः किमात्मकत्वञ्च लक्ष्यते लक्षणेन तु" इति । तथाच पराशरः "पूर्वरूपं नाम येन भाविव्याधिविशेषो लक्ष्यते न तु दोषविशेषः" इति । विशिष्टं यथा उपाध्यायादौ सिङ्क्ष्यैव वातादिज्वाल्यव्यक्तिति । यदुक्तं तत्रैव "अव्यक्तं लक्षणं तेषां पूर्वरूपमिति स्मृतिः" । तथाच सुश्रुतः "सामान्यतो विशेषाच्च जृम्भान्यर्थं समीरणात् । पित्तात्क्षयतश्चोष्णः कफाज्ज्ञास्यभिनन्दनमिति" । हारीतेनाप्युक्तम् "इति पूर्वरूपाणां ज्वराणां सामान्यतो विशेषाच्च जृम्भाङ्गमर्दभूयिष्ठं हृदयोद्वेगि वातजमिति" । प्राग्रूपं येन लक्ष्यते इत्यव्याप्तेराह रक्षितः "येन व्याधिना उत्पित्सुः ज्ञानभीनाकल्यादुत्पादेच्छुरामयो रोगः दोषविशेषेण वातादिजन्यासाधारणवेषाद्यादिना व्यनधिष्ठितोऽसम्बद्धो लक्ष्यते ज्ञायते तत् प्राग्रूपमिति" । लिङ्गमव्यक्तमल्पत्वादित्यस्यार्थमाह स एव "प्राग्रूपलिङ्गेन पूर्वोक्तेन सम्बन्धि लिङ्गं लक्षणम् अव्यक्तं नात्यभिव्यक्तं तत्र हेतुरल्पत्वात् नत्वावरणादियोगाद्व्यक्तत्वमित्यर्थः । अन्ये तु पूर्वरूपलक्षणमाहुः "स्वामर्षव्रियणः कृत्वा भाविव्याधिप्रबोधनम् । दोषाः कुर्वन्ति यल्लिङ्गं पूर्वरूपं तदुच्यते" इति । संक्षेपतस्तु लक्षणं भाविव्याधिबोधकमेव लिङ्गं पूर्वरूपम्" इति माधवकरविजयरक्षितौ ।

पूर्व(र्व)वत् अव्य० पूर्वस्येव पूर्वेण तुल्यं वा क्रियावति । १पूर्वेण तुल्यक्रियान्वितभेदे पूर्वस्य २तुल्ये च । पूर्वं कारणं विषयतयास्त्यस्य मतुप् अस्य वः । ३कारणेन कार्य्यानुमाने न० । "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टञ्च" गौत० सू० । "पूर्वं कारणं तद्वत् कारणलिङ्गकम् यथा मेघोन्नतिविशेषेण कार्य्यानुमानमिति" गौत० वृत्तिः । "तत्रैकं दृष्टसजातीयसामान्यविषयं यत् तत् पूर्ववत्, पूर्वं प्रसिद्धं दृष्टसजातीयसामान्यमिति यावत् तदस्य विषयत्वेनास्त्यनुमानमस्येति पूर्ववत् यथा धूमादुपचीयमानसामान्यविशेष पर्वतेऽनुमीयते तस्य च वह्निसामान्यविशेषस्य सजातीयो वह्निविशेषो दृष्टो रसवत्त्वात्" सां०त०कौ० ।

पूर्व(र्व)वयस् त्रि० पूर्वं वयः कालावस्थाभेदोऽस्य । बाल्यावस्थान्विते । कर्म० । २बाल्यावस्थायाम् न० । वेदे बा० अच्समा० । पूर्ववयस बाल्यवयसि न० । शत० ब्रा० १२।२।२।४।

पूर्व(र्व)वर्त्तिन् त्रि० पूर्वं वर्त्तते वृत-णिनि । अन्यथा-सिद्धिशून्ये १प्राग्वर्त्तिनि कारणे २प्राग्वर्त्तिमात्रे च त्रि० ।

पूर्व(र्व)वाद पु० पूर्वो वादः । व्यवहारे प्रथमावेदने पक्षभाषा-ऽपरपर्य्याये पूर्वपक्षवादे । "पूर्ववादं परित्यज्य योऽन्य-मालम्बते पुनः । पदसंक्रमणात् श्रेयो हीनवादी स वै नरः" मिताक्षरा ।

पूर्व(र्व)वादिन् त्रि० पूर्वं वदति वद-णिनि । पूर्ववादकारके व्यवहारे प्रथमावेदनकर्त्तरि अर्थिनि । "मिथ्योक्तौ पूर्व-वादी तु प्रतिपत्तौ न सा भवेत्" । "मिथ्योत्तरे पूर्ववादी कारणे प्रतिवादिनि च" मिता० ।

पूर्व(र्व)वार्षिक त्रि० पूर्वं वर्षाणाम् एकदेशिस० ततः "कालात् ठञ्" पा० ठञ् "अवयवाद्तोः" पा० उत्तरपदवृद्धिः । वर्षाणां पूर्वभागभवे अवयवादित्युक्तेः पूर्वासु वर्षासु भवः इत्यर्थे ठञि पूर्वपदवृद्धिः पौर्ववर्षिक इत्येव सि० कौ० ।

पूर्व(र्व)वाह् पु० पूर्वे वयसि वहति वह-क्विप् ७त० । पूर्व-वयसि वाहके शत०ब्रा० २।३।४।१७ ।

पूर्व(र्व)वृत्त न० पूर्वं वृत्तम् । कर्म० । प्राचीने वृत्ते वृत्तिहासे ।

पूर्व(र्व)शारद त्रि० पूर्वे शरदः एकदेशिस० । तत्र भवः वृद्धत्व "अवयवाद्तोः" पा० उत्तरपदवृद्धिः । शरदः पूर्वभवे ।

पूर्व(र्व)शैल पु० कर्म० । उदयाचले जटा० । पूर्वाचलादयोऽप्यत्र ।

पूर्व(र्व)शकथ न० पूर्वं शकथ्नः एकदेशिस० अच्समा० । शकथ्नः पूर्वभागे । [दयोऽप्यत्र ।

पूर्व(र्व)समुद्र पु० कर्म० । पूर्ववर्त्तिनि समुद्रे पूर्वसागरा-

पूर्व(र्व)सर त्रि० पूर्वः सृ गतौ अरप्रत्यये कर्त्तरि उप पदे एव सृ+ट उप० स० । पूर्वाभ्यूगामिनि स्त्रियां ङीप् । अन्यत्र पूर्वं सरतीति वाक्ये अच् पूर्वसार अग्र-गामिनि त्रि० ।

पूर्वा(र्वा)तिथि पु० गोत्रप्रवरर्षिभेदे ।

पूर्वा(र्वा)दि पु० पूर्वः आदिर्यस्य । व्यवस्थायामसंज्ञायां सर्व-नामकर्मनिमित्ते १शब्दभेदे स च यथा:"पूर्व अर अपर द-क्षिण उत्तर अपर स्व-अन्तर । "पूर्वादिभ्यो नवभ्यो वा" पा० पूर्वे पूर्वा इत्यादि। पूर्वा आदिर्येषाः ।२पूर्वादिकवृत्ति स्त्री

पूर्वा(र्वा)निल: पु० कर्म० । पूर्वदिक्स्थवायौ तद्गुणाश्च "पूर्वस्तु मधुरो वातः स्निग्धः कटुरसान्वितः । गुरुर्विदाह्य-मनो वातदः पित्तनाशनः" राजनि० । "प्राग्वातो मधुरः क्षारो वह्निमान्द्यकरो गुरुः । वैरस्यगौरवौ-ष्ण्यानि करोत्यक्षोषधीषु च । भग्नोत्पिष्टक्षतादीषु रागशोथप्रदाहकृत् । सन्निपातज्वरश्वासत्वग्दोषार्शो विषक्रिमीन् । कोपयेदामवातञ्च घनसंघातकारणम्" राजवल्लभः ।

पूर्वा(र्वा)नुयोग पु० दृष्टिवादभेदे "प्रतिकर्मसूत्रपूर्वानुयोग पूर्वगतचूलिकाः । पञ्च स्युर्दृष्टिवादभेदाः" हेम० ।

पूर्वा(र्वा)पर त्रि०द्वन्द्व० । पूर्वश्चिन् अपरश्चिन् च देशे तयो-र्भावः ष्यञ् । पौर्वापर्य्य तद्भावे न० । क्वचित्र पूर्वपद वृद्धिः । पूर्वापर्य्य सत्यार्थे न० ।

पूर्वा(र्वा)पहाना स्त्री पूर्वमपहीयते अप-हा-कर्मणि ल्युट् अजा० टाप् । पूर्वापहानकर्मणि अजादिगणः ।

पूर्वा(र्वा)र्द्ध त्रि० पूर्वार्द्धं भवः पक्षे यत् । पूर्वार्द्धभवे । पक्षे ठञ् । पौर्वा(र्वा)र्द्धिक तत्रार्थे त्रि० ।

पूर्वा(र्वा)षाढ़ा स्त्री कर्म० । अश्विन्यादिषु विंशे नक्षत्रे तत्-स्वरूपादिकमक्षरोषाशब्दे उक्तम् ।

पूर्वा(र्वा)ह्ण पु० पूर्वभागः एकदेशिस० अच्समा० अह्नादेशः "रात्राह्नाह्नाः पुंसि" पा० पुंस्त्वम् । दिनस्य पूर्वभागे पूर्वार्द्धश्च त्रिधा विभक्तदिनस्य प्रथमभागः । "पूर्वाह्णो वै देवानां मध्याह्नो मनुष्याणामिति"श्रुतिः । अह्नः प्रथम-प्रहरद्वयकालश्च । "आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परम्"स्कन्दपु० । "आवर्त्तनात् पश्चिमदिग्वर्त्तिच्छायायाः परिवर्त्तनम्" । अतएव "अश्वत्थं वन्द्येन्नित्यं पूर्वाह्णे प्रहरद्वये" मलमा० ।

पूर्व(र्वा)ह्ण(ह्णे)तन त्रि० पूर्वाह्णे काले भवः श्रु तुट् च "कालसमयेति" सप्तम्यालुक् । पूर्वाह्णभवे स्त्रियां ङीप् । पूर्वाह्णः षोडशोऽस्य इति विग्रहे तु पूर्वाह्णतन इत्येव । २पूर्वाह्णसहनकर्त्तरि त्रि० ।

पूर्वा(र्वा)ह्णिक त्रि० पूर्वाह्णः साधनतयाऽस्त्यस्य ठन् पूर्वाह्णः साध्ये कर्मणि । "दैवं पूर्वाह्णिकं कुर्य्यादपराह्णे तु पैतृकम्" भा० आ० २५ अ० ।

पूर्वि(र्वि)न् त्रि०पूर्वं कृतमनेन "पूर्वादिनिः" पा० इनि । १पूर्व क्रियाकारके । वेदे तु "पूर्वैः कृतमिनयौ च" पा० इन । पूर्विण पूर्वैः कृते "आयान्तु नः पितरः सोम्यासो गम्भी-रेभिः पथिभिः पूर्विणेभिः" पित्रावाहनमन्त्रः । छान्दसी रूपसिद्धिः । [स्मिन् दिने इत्यर्थे ।

पूर्वे(र्वे)द्युस् अव्य० पूर्वस्मिन् अहनि पूर्व(र्व)+एद्युस् । पूर्व-

पूर्व(र्व)षुकामशमी स्त्री कर्म० । पूर्वदिग्वर्त्तिनगरभेदे अन्तोदात्तताऽस्य । पूर्वैषुकामशस्यां भवः अण् उत्तरपद वृद्धिः पूर्वैषुकामशम तद्भवे त्रि० । [ईशानकोणे दिक्पाल

पूर्वी(र्वी)त्तरा स्त्री पूर्वस्याः उत्तरस्याश्चालरालादिक् ब०व०।

पूर्व्य (र्व्यं) त्रि० पूर्वैः कृतम् "पूर्वैः कृतमिनयौ" पा० यत्ने य। पूर्वैः कृते पुराणे निघण्टुः।

पूल संहतौ (राशीकरणे) वा चु० उभ० पक्षे भ्वा०पर०सक० सेट्। पूलयति ते पूलति। अपुपूलत् त अपूपूलीत्।

पूलक पु० पूल-स्वुल्। १तृणादेस्तूपे २धान्यतृणादिसुष्टौ कात्या०श्रौ० २२।३।२०।

पूलाक पु० पुलाक+पृषो०। क्षुद्रधान्ये। तस्य विकारः अवयवो वा पलाशा० अञ्। पौलाक तदवयवे तस्य विकारे च त्रि०।

पूलास त्रि० पूल-राशीकरणे घञ् तमस्यति अस-क्षेपे अण्। तृणादिसूपक्षिप्तके तेन निर्वृत्तम् बहुला० अच्। पौलास तच्चिर्वृत्ते त्रि०।

पूलासककुण्ड न० कुण्डस्य पूलासकः राजद० परनि०। कुण्डस्य तृणादेर्निरासके।

पूलिका स्त्री पूरिका+रस्य लः। पूपभेदे हेमच०।

पूष वृद्धौ अक०भ्वा०पर०सेट्। पूषति अपूषीत्। पुपूष।

पूषक पु० पूष-स्वुल्। ब्रह्मदारुवृक्षे राजनि०।

पूषणा स्त्री पूष-ल्यु। कुमारानुचरमातृभेदे भा०शा०३७अ०। पूष्णः पृथिव्याः इदम् अण् वेदे न वृद्धिः नौपधा लोपः। पार्थिवे पदार्थे त्रि० ऋ०१०।५।५।

पूषदन्तहर पु० पूष्णः सूर्यभेदस्य दन्तं हरति हृ-अच्। दक्षयज्ञकाले पूष्णो दन्तोत्पाटके शिवांशे वीरभद्रे अदन्तशब्दे ११२ पृ० दृश्यम्।

पूषन्न पु० वैवस्वतमनोः पुत्रभेदे। मार्कण्डे० १११ अ०।

पूषन् पु० पूष-कनिन्। १सूर्ये आदित्यभेदे भा० आ०६४अ० ऊतौ तु पूषणं पूषाणञ्च पूषि। २पृथिव्यां स्त्री निघण्टुः। पूषणा शब्देऽस्य। अयमन्तोदात्तः। स्वार्थे क। तत्रार्थे। पूषा अस्त्यस्य मतुप् वेदे नुट् अत्वम्। पूषण्वत् सूर्य-युक्ते पृथिवीयुक्ते च त्रि०। ऋ०१।८२।६।भा० [जटाध०।

पूषभासा स्त्री पूष्णेव भासते भास-अच्। इन्द्रनगर्याम्

पूषराति पु० पूषा तदाख्यो देवो रातिर्दाता यस्य। सूर्यदेये वस्तुनि ऋ० १।२२।८।

पूषात्मज पु० ६त०। १मेघे २इन्द्रे देवे च। "आदित्याज्जायते वृष्टिरित्युक्ते र्वृष्ट्यधिपमेघस्य आदित्याज्जायमानत्वात् तथात्वम्। "वृष्टिम् पूषानुजो यथा" भा० व०२० अ०। तत्र पूषात्मजेति पाठान्तरं वृष्ट्यधिपस्य मेघस्य सूर्याज्जातत्वात् तथात्वम्।

पूषासुहृत् पु० ६त०। शिवे तस्य स्वांशवीरभद्रेण पूष्णो दन्तोत्पाटनात् तथात्वम्। अदन्तशब्दे दृश्यम्।

पृ व्यापारे तु०आत्म०अक० अनिट् प्रायेणायम् व्याङ्पूर्वः। व्यापिपृते व्यापृत। व्यापपृपे। व्यापिपृते। व्यापृतः व्यापारः। [अपापरीत्। पपार।

पृ प्रीतौ अक० प्रीणने सक० स्वा० पर० अनिट्। पृणोति पृ पालने पूरणे च जुहो० पर० सक०अनिट् वा दीर्घे सेट्। पिपर्त्ति पिपृतः पिपूर्त्तः। अपारीत्-अपारीत्। पपार अमृतः पपरतुः। पूर्णः।

पृ पृत्तौ चु० उभ० सक० सेट्। पारयति ते-अपीपरत्-त।

पृक्का स्त्री पृच-कनृ न्वङ्क्का० कुत्वम्। (पिड़िङ्) शाक-भेदे रत्नमाला।

पृक्त त्रि० पृच-क्त। १सम्पृक्ते २मिश्रे न० हेमच०।

पृक्ति स्त्री पृच-भावे क्तिन्। १सम्पर्के २सर्गे च अमरः।

पृक्वस् पु० पृच-वा० अस्सि नुट् च। अन्ने निघण्टुः। ऋ० २।७।१०।

पृक्षे अव्य० पृच-वा० क्से। संग्रामे निघण्टुः ऋ० १।६२।१

पृक्षुध् स्त्री प्र+क्षुध्-क्विप् वेदे वा० ह्रस्व धस्प्रधारणम्। प्रक्षुदचुधाम्याम् ऋ० १।१४१।४। [ईदित्। पृक्षुधः।

पृच सम्पर्के अदा०आत्म०अक०सेट्। पृक्ते अपर्क्षिष्ट। पपृक्षे

पृच संयमने सक० सम्पर्के अक०चु०उभ०पक्षे भ्वा०पर०सेट्। पर्चयति-ते पर्चति। अपीपृचत्-त अपप्रर्चत्-त अपर्चीत्। [कथनार्थ प्रेरणे अमरः।

पृच्छा स्त्री प्रच्छ-अङ् समप्रसारणम्। प्रश्ने १ज्ञातुमिच्छया

पृच्छ्य त्रि० प्रच्छ-वा० कर्मणि क्यप् सम्प्र०। जिज्ञास्ये।

पृज सम्पर्के, अदा० आ० अक० सेट्। पृक्ते अपर्जिष्ट। ईदित् पृजृषः।

पृड हर्षे तु०पर०अक०सेट्। पृणति। अपर्डीत् अपृडे।

पृण तर्पणे तु०पर०सक०सेट्। पृणति अपर्णीत्। प्रपर्ण।

पृत् स्त्री पृ-पालने क्विप्। सेनायाम् ऋ० २।२७।१५।

पृतना स्त्री पृ-तनन्-किच्च। १सेनायाम् २सङ्ग्रामविशेषान्वित-रथहस्त्यश्वादिसैन्यभेदे च (रथाः २४३ मत्ताः २४३ अश्वाः ७२९ पदातयः १३१५)। अमरः। अनीकिनी शब्दे १६९ पृ० रथादिसंख्या दृश्या। ३संग्रामे ४मनुष्ये च निघण्टुः।

पृतनाज्य न० संग्रामे निघण्टुः। "पृतनाजामजनाद्वा पृतनाज्यं जयनाद्वा" निरु० ९।२३।

पृतनाषाह् पु० पृतनां सहते सह-क्विप्। इन्द्रे त्रिका०।

यस्य झलि पदान्ते च तस्य त्वम्। पृतनाषाट् अन्यत्र न षत्वम् पृतनासाहम् इत्यादि।

पृत्सुध पु० पृत्सु धीयते धा-कर्मणि घञर्थे क अलुक्स०। १संग्रामे निघण्टौ पाठान्तरम्।

पृथ प्रक्षेपे चुरा०उभ०सक०सेट्। पार्थयति-ते अपीपृथत् त अपपर्थत्-त। [अमरः।

पृथक् अव्य०पृथ-वा०ककि। १भिन्ने २नानारूपे ३विनार्थे च।

पृथक्त्व न० पृथक् इतस्य भावः त्व। वैशेषिकोक्ते पृथक्त्व-बुद्धिसम्पादके गुणभेदे। तत्परीक्षा च कणा० सू० इत्त्योर्दर्शिता यथा "तथा पृथक्त्वम्" सू०। "एकत्वबुद्धिवत्तयैकपृथक्त्वमपि साधयितुमाह अपोद्धार व्यवहारस्तावदस्ति इदमस्मात् पृथगन्यदर्थान्तरमित्याकारः अपेक्षाबुद्धिमपेक्ष्य य उद्धारो निर्द्धारणं सङ्ख्योद्धारः तत्र च न रूपादि तन्त्वं व्यभिचारादवध्यनिरूपत्वाच्च। नन्वन्योन्याभाव एव पृथक्त्वम् इदमस्मात् पृथगन्यदर्थान्तरमितिबुद्धिनिमित्तं प्रतीतेरन्योन्याभावावलम्बनत्वात्, न, पृथगादिशब्दानां पर्य्यायत्वेऽपि नान्योन्याभावार्थत्वं तत्र पञ्चमीप्रयोगानुपपत्तेः इदमस्मात् पृथक् इदमिदं न भवतीति प्रतीत्योर्भिन्नविषयत्वात्, न चान्योन्याभाववानर्थः पृथक्त्वम् अघटः पट इत्यत्रापि पञ्चमी प्रयोगापत्तेः। नन्वेकाकारत्वाद्वैशिष्ट्यमेव पृथक्त्वमिति चेन्न मैत्रस्य दण्डवैशिष्ट्यदशायां मैत्राद् पृथगयं मैत्र इत्यपि प्रतीत्यापत्तेः। एवं शब्दविशिष्टे व्योम्नि बुद्धिविशिष्टे चात्मनि पृथक्त्वव्यवहारापत्तेः। अतएव वैधर्म्यमपि न पृथक्त्वं पाकरक्ते घटे अग्न्यासङ्गदशायां पृथगयं घट इति व्यवहारापत्तेः तद्विरोधिधर्मवत्त्वमेव हि तद्वैधर्म्यं तच्च अग्न्यासङ्गानन्तरं रक्तत्वादशायामपि। न च सामान्यमेव पृथक्त्वं सामान्यस्यावध्यनिरूपत्वात् जातिसङ्करप्रसङ्गाच्च। अस्मात्तद्वृत्तित्वे सत्तया, द्रव्यमात्रवृत्तित्वे द्रव्यत्वेनान्यूनानतिरिक्तवृत्तित्वापत्तेः" इत्तिः। "एकत्वैकपृथक्त्वयोरेकत्वैकपृथक्त्वाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः" क०सू०। "नन्वेकमेकत्वं रूपादिभ्यः पृथक्पृथक्त्वमिति व्यवहारादेकत्वेऽप्येकत्वं पृथक्त्वेऽपि पृथक्त्वमेवं तत्र तत्रानीत्यत आह यथाऽणुत्वमहत्त्वे नाणुत्वमहत्त्ववती तद्व्यवहारस्तत्र भाक्तस्तथैकत्वैकपृथक्त्वे नैकत्वैकपृथक्त्ववती तद्व्यवहारस्तत्र भाक्त इत्यर्थः। कर्मभिः कर्माणि गुणैर्गुणाः इत्यपि दृष्टान्तस्तत्रद्वयं पूर्वदृष्टान्तस्तत्रैवैकवाक्यतापन्नमेवात्र भासते यथा कर्माणि न कर्मवन्ति गुणाश्च न गुणवन्तस्तथैकत्वैकपृथक्त्वे न तद्वती इत्यर्थः" इत्तिः।

पृथक्त्वचा स्त्री पृथक् त्वचा यस्याः। मूर्वायाम्। रत्नमा०

पृथक्पर्णी स्त्री पृथक् पर्णान्यस्याः ङीप्। (चाकुलिया) क्षुपभेदे अमरः।

पृथक्क्षेत्र पु० पृथक् भिन्नं क्षेत्रमुत्पत्तिस्थानमस्य एकस्मात् पितुर्विभिन्नमातृजाते पुत्रे मिता०। [१भेदे २विशेषे।

पृथगात्मता स्त्री पृथक् आत्मा स्वरूपं यस्य तस्य भावः तल्।

पृथगात्मिका स्त्री पृथक् आत्मा स्वरूपं यस्याः कप् नलोपे कापि अत इत्त्वम्। व्यक्तौ। बहुत्वे नैकरूपाणामपि वह्नीनां महानसीयत्वादिरूपेण तेषां स्वरूपभेदात् तथात्वम्।

पृथग्जन पु० पृथक् भिन्नो जनो महाजनो यस्मात्। १नीचे २मूर्खे ३पामरे च अमरः। [अमरः।

पृथग्विध त्रि० पृथक् भिन्ना विधा यस्य। नानारूपे

पृथग्बीज पु०पृथक् बीजान्यस्य। भल्लातकवृक्षे (भेला) राजनि०

पृथा स्त्री कुन्तिभोजकन्यायाम् कुन्त्याम् जटाधरः।

पृथाज पु० पृथायां जायते जन-ड ७त०। १युधिष्ठिरादौ कुन्तीपुत्रे २अर्जुनवृक्षे राजनि०।

पृथापति पु० ६त०। पाण्डुराजे त्रिका०।

पृथिका स्त्री पृथ्वथञर्थे-क स्वार्थे क शतपद्याम् अत इत्त्वम्। शतपद्याम् शब्दमाला।

पृथिन् पु० प्रथ-वा० किनि संप्र०। वेनपुत्रे पृथुनामके नृपे "पृथी ह वै वैन्यो मनुष्याणां प्रथमोऽभिषिषेचे" शत०ब्रा०५।३।५।४"पृथी यद्वां वैन्यः" ऋ०८।६।१०"लोकेऽस्य पृथुसंज्ञा"।

पृथ्व(थि)(वि)वी स्त्री प्रथते विस्तारमेति प्रथ-क्विबन् (क्वन्) वा नि० संप्रसारणं क्वित्वात् ङीष् पृथो० वा ह्रस्वः। धरायाम् क्षितौ तद्गुणादिकं यथा

"रूपवत्त्वप्रत्यक्षयोगि स्यात् प्रथमलिकम् 4 गुरुत्वी द्वे रसवती द्वयोर्नैमित्तिकोद्भवः। स्पर्शादयोऽष्टौ वेगश्च द्रव्यत्वञ्च गुरुत्वकम्। रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश। स्नेहहीना गन्धयुता क्षितावेते चतुर्दश"। "तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता। षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मतः। स्पर्शस्तु तस्या विज्ञेयो ह्यनुष्णाशीतपाकजः। नित्या नित्या च सा द्वेधा नित्या स्यादणुलक्षणा। अनित्या तु तदन्या स्यात् सैवावयवयोगिनी। सा च त्रिधा भवेद्देहेन्द्रियं विषयस्तथा। योनिजादिर्भवेद्देहमिन्द्रियं घ्राणलक्षणम्।

विषयो द्व्यणुकादिषु ब्रह्माण्डान्त उदाहृतः" भाषाप०। तस्या अध्यात्मादिभेदा यथा "पृथिवी पञ्चभं भूतं घ्राणञ्चाध्यात्ममुच्यते। अधिभूतं तथा गन्धो वायुस्तत्राधिदैवतम्" भा०आश्व० ४२अ०। तस्या उत्पत्तिकारणं यथा "भूयतां वसुधाजन्म सर्वमङ्गलकारणम्। विघ्नविघ्नकरं पापनाशनं पुण्यवर्द्धनम्। यद्दो केचिद्वदन्तीति मधुकैटभमेदसा। बभूव वसुधा जन्म तद्विरुद्धमतं शृणु। जघ्नतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा। यावां जहि न यत्रोर्वीं पाथसा संवृतेति च। तयोर्जघ्निकाले च प्रत्यक्षा साऽभवत् स्फुटम्। ततो बभूव मेदश्च मरणस्थान्तरत्नयोः। मेदिनीति च विख्यातेत्युक्ता यैस्तन्मतं शृणु। जलौघा कथा पूर्वं वर्णिता मेदसा यतः। कथयामि च तज्जन्म सार्थकं सर्वसम्मतम्। पुरा श्रुतं यदे श्रुत्वा धर्मवक्त्राच्च पुष्करे। महाविराट् शरीरस्य जलस्थस्य चिरं स्फुटम्। मलो बभूव कालेन सर्वाङ्गव्यापको ध्रुवम्। स च प्रविष्टः सर्वेषां तल्लोम्नां विवरेषु च। कालेन महता तस्माद्बभूव वसुधा मुने!। प्रत्येकं प्रतिलोम्नाञ्च कूपेषु सा स्थिरा स्थिता। आविर्भूता तिरोभूता सा जले च पुनःपुनः। आविर्भूता सृष्टिकाले तज्जलोपर्य्यवस्थिता। प्रलये च तिरोभूता जलाभ्यन्तरसंस्थिता। प्रतिविश्वेषु वसुधा शैलकानन संयुता। सप्तसागरसंयुक्ता सप्तद्वीपयुता सती। हिमाद्रिमेरुसंयुक्ता ग्रहचन्द्रार्कसंयुता। ब्रह्मविष्णुशिवादैश्च सुरैर्लोकैस्तदालये। पुण्यतीर्थसमायुक्ता पुण्यभारतसंयुता। पातालसप्त तदधस्तदूर्द्धं ब्रह्मलोककः। ब्रह्मलोकश्च तत्रैव सर्वविश्वञ्च तत्र वै। एवं सर्वाणि विश्वानि पृथिव्यां निर्मितानि च। ऊर्द्धौ गोलोकवैकुण्ठौ नित्यौ विश्वपरौ च तौ। नश्वराणि च विश्वानि सर्वाणि कृत्रिमाणि च। प्रलये प्राकृते ब्रह्मन्! ब्रह्मणश्च निपातने। महाविराड़ादिसृष्टौ सृष्टेः कृष्णेन चात्मना। नित्यैः स्थिता च प्रलये काष्ठाकाशेश्वरैः सह। चित्याधिष्ठातृदेवी सा वाराहे पूजिता सुरैः। मुनिभिर्मनिभिर्विप्रैर्गन्धर्वादिभिरेव च। विष्णोर्वराहरूपस्य पत्नी सा श्रुतिसम्मता। तत्पुत्रो मङ्गलो देवो यद्गोत्रो मङ्गलात्मजः। भवनं यत्र सर्वेषां भूमिरूपेण कीर्त्तिता। वसुरत्नं सा दधाति वसुधा सा वसुन्धरा। धरेरूरौ च या जाता सा चोर्वी परिकीर्त्तिता। धरा धरित्री धरणी सर्वेषां धारणात्तु या। दृज्याय यानाधाराच्च क्षौणी क्षीणा नये च या। महान्तये लयं याति क्षितिस्तेन प्रकीर्त्तिता। काश्यपी कश्यपस्येयमचला स्थिररूपतः। विश्वम्भरा जगद्रत्नाज्ञानन्तानन्तरूपतः। पृथिवी पृथुकन्यात्वाद्विस्तृतत्वात् महास्पृते!" ब्रह्मवै०प्र०ख०७अ०।

तस्याः सर्वमहत्वेऽपि केषाञ्चित् भारासहनकथा यथा "कृष्णभक्तिविहीना ये ये च तद्भक्तनिन्दकाः। तेषां महापातकिनामशक्ता भारवाहने। स्वधर्माचारहीना ये नित्यकृत्यविवर्जिताः। श्रद्धाहीनाश्च वेदेषु तेषां भारेण पीड़िता। पितृमातृगुरुस्त्रीणां पोषणं पुत्रपोष्ययोः। ये न कुर्वन्ति तेषाञ्च न शक्ता भारवाहने। ये मिथ्यावादिनस्तात! दयासत्यविहीनकाः। निन्दका गुरुदाराणां तेषां भारेण पीड़िता। मित्रद्रोही कृतघ्नश्च मिथ्यासाक्ष्यप्रदायकः। विश्वासघ्नः स्वाध्यहारी तेषां भारेण पीड़िता। कल्याणयुक्तनामानि हरेर्नामैकमङ्गलम्। कुर्वन्ति विक्रयं ये वै तेषां भारेण पीड़िता। लोकघाती गुरुद्रोही ग्रामयाजी च लुब्धकः। शूद्रान्नभोजी तेषां भारेण पीड़िता। पूजायज्ञोपवासादि व्रतानि नियमानि च। ये ये मूढ़ा विहन्त्यारक्तेषां भारेण पीड़िता। सदा द्विषन्ति ये पापा गोविप्र हरवैष्णवान्। हरिं हरिकथां भक्तिं तेषां भारेण पीड़िता। अशक्तादीनाञ्च भारेण पीड़िताऽहं यथा विधे!। ततोऽधिकेन दैत्यानां तेषां भारेण पीड़िता" ब्रह्मवै० जन्मख० ४ अ०।

पृथिवीचित् पु० चि–ऐश्वर्य्ये क्विप् ६त०। भूमीशे नृपे।

पृथिवीजय पु० पृथिवीं जयति जि–वा० खश् मुम् च। दानवभेदे हरिवं० २३२ अ०।

पृथिवीतीर्थ न० तीर्थभेदे भा० वन० ८३ अ०।

पृथिवीपति पु० ६त०। १भूमिपतौ राजनि २कटभनामौषधौ च मेदि०। ३यमे हेम०। पृथिवीमाधाद्योऽपि राजनि।

पृथिवीपाल पु० पृथिवीं पालयति पालि–अण् उप०स०। भूमिपाले। ण्वुल्। पृथिवीपालक तत्रार्थे पु०।

पृथिवीभुज् पु० पृथिवीं भुनक्ति अवति भुज अवने क्विप्। भूपाले क। पृथिवीभुजोऽपि तत्रार्थे।

पृथिवीरुह पु० पृथिव्यां रोहति रुह–क। भूमिरुहे वृक्षे।

पृथिवीशक्र पु० पृथिव्यां शक्र इव। राजनि हेमच०। पृथिवीन्द्रभूभीन्द्रादयोऽप्यत्र।

पृथु त्रि० प्रथ–कु सम्प्र०। १विस्तीर्णे स्त्रियां गुणवचनोदन्त-त्वात् ङीप्। २आदिराजे वेनपुत्रे सूर्य्यवंशजे नृपभेदे पु० तदुत्पत्तिकथा भाग० ४।१५ अ०।

अथ तस्य (वेनस्य) पुनर्विप्रैरपुत्रस्य महीपतेः। बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत। तदृष्ट्वा मिथुनं जात-मृषयो ब्रह्मवादिनः। ऊचुः परमसन्तुष्टा विदित्वा भगवत्-कलाम्। एष विष्णोर्भगवतः कला भुवनपालिनी। दुहितृत्वं गतो लक्ष्मीं संभूतिः पुरुषस्यानपायिनी। अत्र यः प्रथमो राज्ञां पुमान् प्रथयिता यशः। पृथुर्नाम महाराजो भवि-ष्यति पृथुश्रवाः"। तेन च भगवदवतारेण पृथिवी समीक्षता नानोषधीश्च मथिता दुहितृत्वेन कल्पिता च। तत्कथा उत्तरखण्डाध्याये दृश्या ४।१८ अ०।

"एवं पृथ्वादयः पृथ्वीं दुदुहुः स्वसमात्मनः। दोह-वत्सादिभेदेन क्षीरभेदं कुरूद्वह!। ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः। दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः। चूर्णयन् स्वधनुःकोट्या गिरिकूटानि राजराट्। भूमण्डलमिदं वैन्यः प्रायसक्रे समं विभुः" श्रीहरिदेवे भा० आस्व० ६ अ०। चतुर्थमन्वन्तरे काव्ये ४सप्तर्षिभेदे हरिवं० ७अ०। काकुत्स्थे अनेनसः पुत्रे पूरुवंशे १७अ०। अजमीढवंशजे पारपुत्रस्य ६पुत्रभेदे हरिवं० ३० अ०। क्रोष्टुवंशजे चित्ररथ पुत्रे ७नृपभेदे ३१ अ०। दनुवंशभेदे २६अ०। ६अग्नौ मेदि०। १०क्षण-क्षीरके पु० अमरः ११लक्षपर्णी १२हिङ्गुपत्र्यां स्त्री मेदि०१३अहिफेने शब्दरत्ना० १४मरुति त्रि० शब्दर० १५विष्णौ पु०। "प्राणदः प्रणवः पृथुः" विष्णुस०।

पृथुक पु० पृथु कं जलं मेयत्वेनास्यास्य अच्। १चिपिटके अमरः। तस्य पर्वते बहुजलशोषणात् तस्य तथात्वम्। अस्य क्लीवत्वमपि "द्विःखण्डमम्लं पृथुकं गुरु देशविशेषके" ब्रह्मवै०ख०२१अ०। पृथु कं शिरोऽस्य। २बालके पुंस्त्री० मेदि०। ३हिङ्गुपत्र्यां स्त्री शब्दरत्ना०।

पृथुकीय त्रि० पृथुकाय हितं अपूपा०क। पृथुकहिते। पक्षे यत् पृथुकस्य तत्रार्थे त्रि०।

पृथुकीर्त्ति स्त्री पृथानुजायाम् वसुदेवभगिनीभेदे "पृथु-कीर्त्त्यां तु संजज्ञे तनयो दन्तवक्त्रभाक्। करूषाधिपति-वीरो दन्तवक्त्रो महाबलः"। हरिवं० २७ अ० पृथुः कीर्त्तिरस्य। २बहुयशस्के त्रि०।

पृथुकोल पु० कर्म०। राजबदरे राजनि०।

पृथुग्रीव पु० १राक्षसभेदे रामा०आ०६स०। २विस्तीर्णग्रीवे त्रि०

पृथुच्छद पु० पृथु छदोऽस्य। १हरिद्रे राजनि०। २बहुल पत्रयुक्ते त्रि०।

पृथुपत्र पु० पृथूनि पत्राण्यस्य। रक्तलशुने राजनि०।

पृथुपलाशिका स्त्री पृथूनि पलाशान्यस्याः कप् टाप् अत इत्त्वम्। शल्लाम् राजनि०।

पृथुरुक्म पु० क्रोष्टुवंशजे रुक्मकवचपुत्रभेदे हरिवं० ३७अ०।

पृथुरोमन् पु० पृथूनि रोमाणि रोमस्थानीयशल्कान्यस्य। १मत्स्ये अमरः। २बहुरोमयुक्ते त्रि० स्त्रियां वा ङीप्।

पृथुल त्रि० पृथु+स्वार्थे लच् पृथुः पृथुत्वमस्त्यस्य सिध्मा० लच् वा। १स्थूले अमरः। २हिङ्गुपत्र्यां स्त्री जटाध०।

पृथुलाक्ष त्रि० पृथुले अक्षिणी यस्य बहुव्री०। १बहुनेत्र-युक्ते २पुरुवंशजे चतुरङ्गपुत्रभेदे पु० हरिवं० २१ अ०।

पृथुवक्त्र त्रि० पृथु वक्त्रमस्य। १बहुमुखयुक्ते। २कुमारानु-चरमातृभेदे स्त्री भा० श० ४७ अ०।

पृथुशिम्ब पु० पृथ्वी शिम्बा यस्य। श्योनाकभेदे राजनि०

पृथुशेखर पु० पृथु शेखरं यस्य। पर्वते त्रिका०

पृथुश्रव(स) त्रि० पृथु श्रवः कर्णोऽस्य। १बहुकर्णे अतन्तः २कुमारानुचरभेदे भा० श० ४६ अ०। बान्तस्तु। २यद-विन्दुनृपपुत्रभेदे पु० हरिवं० १६अ०।

पृथुसेन पु० अनुवंशजे रुचिरन्नृपपुत्रभेदे हरिवं० २० अ०।

पृथुस्कन्ध पुंस्त्री पृथुः स्कन्धोऽस्य। शूकरे राजनि० स्त्रियां जातित्वात् ङीष्।

पृथूदक न० तीर्थभेदे भा० ४० ६८ अ०।

तस्य सरस्वत्यंशस्थितत्वं यथोक्तम् "जातिस्मरोऽपि-ङ्गुस्तु गङ्गाद्वारे तदास्थितः। अनकालं ततो दृष्ट्वा पुत्रान् वचनमब्रवीत्। इह श्रेयो न पश्यामि नयध्वं मां पृथूदकम्। विज्ञाय तस्य तद्भावं ऋषयोऽस्तं तपो-धनाः। तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम्। स तैः पुत्रैः समानीतः सरस्वत्यां समीपतः। स्नात्वा तीर्थगुणान् सर्वान् प्राहेदमृषिसत्तमः। सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम्। पृथूदके जन्म परो नैनं श्वो मरणं लभेत्। तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्मिता" वामनपु० ३८ अ०।

पृथूदर पुंस्त्री० पृथु उदरं यस्य। १मेघे स्त्रियां जातित्वात् ङीष्। २बहुतुकुक्षौ त्रि० हारा०। स्त्रियां स्वाङ्गत्वात् वा ङीष्।

पृथ्वादि पु० "पृथ्वादिभ्य इमनिच् वा" पा० भावे इमनिच् प्रत्ययनिमित्ते शब्दगणे स च पा०गः उक्तो यथा

"पृथु मृदु महत् पटु तनु लघु बहु साधु आशु ऊरु गुरु बहल खण्ड दृढ चण्ड अकिञ्चन क्षोड़ पाक वत्स मन्द स्वादु हस्व दीर्घ प्रिय दृप्त ऋजु क्षिप्र क्षुद्र अणु"।

पृथ्वी स्त्री पृथुत्वगुणयुक्ता स्त्री ङीष्। १पृथुत्वयुक्तायां स्त्रियां २भूमौ ३क्षितिकुपत्रायां ४कृष्णजीरके च। ५स्थूलैलायाम् हुषनर्नवायाम् मेदि०। ७वृत्तार्हेन्मात्रभेदे छन्दः० स्वार्थे क। पृथ्वीका। वृहदेलायाम् क्षितिकुपत्रायां कृष्णजीरके च। तत्र पृथिव्याः पृथुराजेन दुहितृत्वस्य कल्पनात् पुंयोगे ङीष्। "दुहितृत्वमनुप्राप्ता देवी पृथ्वी तथोच्यते" अग्निपु०। "जसौ जसयलाश्चतुष्पदयतिश्च पृथ्वी गुरुः ह० र० उक्ते दशाक्षरपादके छन्दोभेदे।

पृथ्वीकुरवक पु० पृथ्व्यां भूमौ कुरवक इव शुभ्रत्वात्। श्वेतमन्दारके राजनि०। [२गणेशे हेमच०।

पृथ्वीगर्भ पु० पृथ्वीव लम्बमानो गर्भ उदरमस्य। १लम्बोदरे

पृथ्वीज त्रि० पृथ्व्यां जायते जन-ड ७त०। १भूमिजाते २गडलबणे न० राजनि०।

पृथ्वीधर पु० पृथ्वीं धरति धृ-अच्। महीधरे पर्वते।

पृदाकु पु० सृज्-वा० आकु सलोपश्च। सर्पे अमरः १वृश्चिके २व्याघ्रे शितिकण्ठे मेदि०। ४गजे ५वृक्षे च। संक्षिप्तसारोणादिवृत्तिः। [८।१७।१५।

पृदाकुसानु पु० पृदाकुः गज इव सानुः यस्यसतः। इन्द्रे त्रि०

पृश्न्य पु० स्पृश-भावे क्यु पृषो० सलोपः पृश्नं स्पर्शः तस्य साधु यत्। स्पर्शसाध्ये ऋ० १।७१।५ आत्मनः पृश्नमिच्छति क्यच् उ। पृश्नायु तदिच्छौ ऋ० १।८४।११।

पृश्नि त्रि० स्पृश-क्नि-वा नि किच्च पृषो० सलोपः। १स्वल्पे २दुर्बलास्थियुक्ते ३खर्वे च अमरः। ४रङ्गौ श्रीकृष्णस्य जन्मान्तरे मातृभूतायां देवकीरूपेण द्वापरे प्रादुर्भूतायां ५वसुदेवपत्न्यां स्त्री। "त्वमेव पूर्वसर्गे भूः पृश्निः स्वायम्भुवे सति!। तदायं सुतपा नाम प्रजापतिरकल्मषः। अहं सुतो वामभव पृश्निगर्भ इति श्रुतः। तयोर्वां पुनरेवाहमदित्यामास कश्यपात्। उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः। तृतीयेऽस्मिन् भवेऽहं वै तेनैव वपुषा हि वाम्। जातौ भूयस्त्रयोरेव" भाग०१०।३ अ०। देवकीं प्रति वासुदेववाक्यम्। ५साधरथे त्रि० निघण्टुः ६सवितुःपत्नीभेदे स्त्री भाग० ६।१८।१। ७अग्निभेदे पु०भा० द्रो० १६१अ०। सुधाजिद्भूपस्य मातृभ्यां जाते दशपुत्रभेदे अग्निपु०। [शब्दमाला।

पृश्निका स्त्री पृश्नि स्वार्थे कं जातत्व। कुक्षिकायां (पाना)

पृश्निगर्भ पुंस्त्रे० सुतपःप्रजापतिपत्न्याः गर्भः साधनत्वेनास्यास्य अच्। नारायणे पृश्निशब्दे दृश्यम्।

पृश्निशृङ्ग त्रि० पृश्निवोभानावर्णत्वात् साधरणा गावो रश्मयोऽस्य। नानावर्णदीप्तिके ऋ० १।११२।७। वेदे क्वचित् "गोस्त्रियोरुपसर्जनस्येति न ह्रस्वः" ऋ० ७।१८।१०। उदा० दृश्यम्। [विख्यातायां लतायाम् अमरः।

पृश्निपर्णी स्त्री पृश्नि स्वल्पं पर्णमस्याः ङीष्। (चाकुलिया)

पृश्निभद्र पु० ७त०। पृश्निगर्भजाते नारायणांशभेदे।

पृश्निमात पु० पृश्निः नानावर्णा भूमिर्मातेव जन्मभूमिर्यस्य समासान्तविधेरनित्यत्वात् न कप्। नानावर्णभूमिजाते ऋ० १।२३।१७।

पृश्निशृङ्ग पु० पृश्नि वृङ्गमग्रमस्य। गणेशे त्रिका०। तस्य मुखे गजमुखत्वेन वृङ्गाकारत्वात् तथात्वम्। पृश्निः वृङ्गमिवास्य उत्पत्तिस्थानत्वेन। पृश्निगर्भजाते २विष्णौ शब्दमाला। [(पाना) शब्दमाला।

पृश्नी स्त्री पृश्नि+ऋदिकारान्तत्वात् वा ङीप्। कुक्षिकायां

पृष सेके भ्वा०आ०सक०सेट्। पर्षते अपर्षिष्ट। पपृषे।

पृषत् न० पृष-अति कित् शतवच्च कार्यं तेन पृषन्ति। १बिन्दौ अमरः। २सेकयुक्ते त्रि०। अस्य बिन्दौ बहुत्वमिच्छन्त्येके।

पृषत पुंस्त्री० पृष-अतच् किच्च। १शुभ्रबिन्दुमति मृगभेदे स्त्रियां जातित्वात् ङीष्। २बिन्दौ पु० अमरः। ३वायुवाहने रथे पुंस्त्री निघण्टुः। "पृषत्यो मरुताम्" इत्यत्र स्त्रीत्वमविवक्षितम्। भरद्वाजसुते ४नृपभेदे पु० भा० आ० १२ अ०।

पृषतांपति पु० ६त० अलुक्स०। वायौ शटा०।

पृषताश्व पु० पृषतो मृगभेदोऽश्व इव गतिसाधनं यस्य। वायौ अमरः।

पृषत्क पु० पृषन्ति बिन्दव इव को वायुरत्र। बाणे अमरः।

पृषदंश पु० पृषति बिन्दौ अंशोऽस्य। वायौ ततः उत्सा० अवादौ अञ्। पार्षदंश तद्भवादौ त्रि०। [वायौ अमरः

पृषदश्व पु० पृषन् मृगभेदोऽश्व इव वाहकत्वात् यस्य।

पृषदाज्य न० पृषद्युक्तं दधिबिन्दुयुक्तं दधिसेकयुक्तं वा आज्यम् शाक०त०। दधिसिक्ते हते अमरः।

पृषदम्बल पु० पृषन्नेव बलमस्य। वायोरश्वे शब्दमाला।

पृषदश्व पु० वैवस्वतमनोःपुत्रभेदे हरिवं० १० अ०। [१५६अ०

पृषदध्रु पु० द्वापरयुगीये युधिष्ठिरपक्षस्थे नृपभेदे भा०द्रो०

पृषन्ति पु० पृष-वा क्ति। बिन्दौ। "पयः पृषन्तिभिः सृक्वा

यान्ति वाताः शनैः शनैः" जाम्बवतीविजयपद्यम् ।

पृषभाषा स्त्री पृष–सेके क तादृशी भाषा यस्याः । अमरः-वत्सामिन्द्रनगर्याम् शब्दमाला० ।

पृषाकरा स्त्री पृषादिवाक्षण्यते आ+कृ–कर्मणि अच् पृषो० । क्षुद्रशिलायाम् (शटखारा) शब्दच० ।

पृषातक न० पृषन्तं पृषदाज्यं तकते हसति तक-अच् । पृषो० । दधियुक्तहते हेमच० ।

पृषोदर त्रि० पृषदिवोदरं यस्य पृषो० तलोपः । १चित्रोदरे पृषन्ति उदरे यस्य । २बाघौ पु० ।

पृषोदरादि "पृषोदरादीनि यथोपदिष्टम्" पा० विहित लोपादिनिमित्ते शब्दगणे स च गणः पा० ग० सू० उक्तो यथा "पृषोदर पृषोत्यान बलाहक जीमूत मुसल शान खलू-खल पिशाच दधी मयूर", "वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्त दुच्यते पञ्चविधं निरुक्तम्" । एतच्च समासविषयकमेवेति नियमो न प्राचीनकारिकायां हंसमिंङादिशब्दानामपि पृषोदरादित्वात् सिद्धत्वोक्तेः । अस्यार्थः त्रि० को० अनोरमादौ यथा

"पृषोदरप्रकाराणि शिष्टैर्यत्नोच्चारितानि तथैव साधूनि स्युः । पृषत् उदरम् पृषोदरम् । तलोपः । वारि-वाहको बलाहकः । पूर्वपदस्य वः उत्तरपदादेश्च लत्वम् । "अदेङ्गुणोगमात् हंसः सिंहो वर्णविपर्ययात् । गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्" इति शब्देष्वस्तीरस्य तार-भावो वा । दक्षिणतारम् दक्षिणतीरम् । उत्तरतारम् उत्तरतीरम् । दुरो दाशनाशदभ्यो दूरुत्तरपदादेरिष्टत्वञ्च । दुःखेन दाश्यते दूडाशः । एवं दुःखेन नाश्यते दुर्णाशः दुःखेन दह्यते दूडभः । खल् क्षिप्यः । दम्भेर्नलोपो निपात्यते । दुष्टं ध्यायतीति दृध्यः । आतश्चेति कः । ब्रुवन्तोऽस्यां सीदन्तीति ब्रुवी । ब्रुवश्छन्दस्य ट आदेशः । सदेरधिकरणे डट् । आज्ञातिगणोऽयम्" । हन्तेः प्रचाद्यादि सुमागमे हंस इति हिंसेस्तु पचाद्यादि ह-कारसकारयोः स्थानव्यत्ययात् सिंह इति गूढोत्मेत्यत्र आकारविकृत्या अकारादेशः पृषोदरमित्यत्र तकारवर्ण-लोपः इत्येवं रीत्या सर्वत्र बोध्यम् । एतन्मूलकमेव "लुप्ते दृश्यमः क्त्वे लुप् कामनननसोरपि । समो वा हिततत्ययोर्मोऽस्य चिचियुज्यजोरिति" । अन्तमिति शेषः अन्तपत्ययान्ते उत्तरपदे अवश्यमृशब्दस्थान्यसकारं लु-प्तमेव । अवश्यद्रष्टव्यः । तथा कामशब्दमनशब्दयोः परतः तुमृशब्दस्थान्तम् । हन्तुकामः मन्तुमनाः । तुमिति षष्ठ्यर्थे प्रथमा । हितततयशब्दयोः परतः समोऽन्त्यं मकारम् वा लुप्येत् । सङ्गितः संगितः मततः मन्तः । युजधजपरपचिधातौ परे मांसशब्दान्त्याकारं लुप्येत् । मांसपचनः मांसपचनः मांसपाकः मांसपाक इत्यादि ।"

पृष्ट त्रि० पृषु सेके प्रच्छ–वा क्त । १सिक्ते–यजु०२१।८ । २जिज्ञासिते "नापृष्टः कस्यचिद् ब्रूयात्" मनुः ।

पृष्टहायन पु० नित्यक० । १धान्यभेदे २गजे पुंस्त्री मेदि० । स्त्रियां जातित्वात् ङीष् ।

पृष्टि स्त्री पृष+सेके भावे क्तिन् । सेके शत०ब्रा० ७।५३।१२। २।१।१५। प्रच्छ–क्तिन् । २जिज्ञासायाञ्च । पृष–कर्त्तरि क्तिच् दीर्घः, ३पार्श्वस्थे स्त्री ऋ०१०।८।१० पृष्टीः पार्श्व-स्थान् भा० । ४पृष्ठदेशे यजु० २।८ । "पृष्टीः पृष्ठ-देशः" वेददीप० । पृष्टिवह पृष्टग्रावहः । पृष्ठवहे त्रय० १८।४।१०

पृष्ठ न०पृष–स्कृ–वा थक् नि० तनोः पश्चाद्भागे अमरः । नि-रुक्ते ४।२"पृष्टं संस्पृष्टमङ्गैः"इत्युक्तं युक्तञ्चैतत् पृषधा-तोस्तु तदूर्ध्वसङ्गेः निपातनानुपपत्तेः अतः स्पृषधातोरेव निपा० । २स्तोत्रविशेषे स च ता०मं० भाष्ये उक्तो यथा "एकस्मिन् सूक्ते विद्यमानानां तिसृणामृचां 'ब्राह्म-णोक्तविधानेन सप्तदशधाभ्यासः सप्तदशस्तोमः तादृशेषु स्तोत्रेषु पृष्ठशब्दः श्रूयते "सप्तदशानि पृष्ठानि भवति" तानि पृष्ठानि विभजति षोडशमात्रत्वात् तत्पृष्ठशब्देनान-न्त्ये इत्येकः पक्षः । रथन्तर पृष्ठ बृहद्पृष्ठयोर्ज्योति-ष्टोमे विकल्पितयोरपि षोडशेन विकल्पाप्तौ सर्व-शब्देन सर्वग्रहणं विधीयते । तथा सत्यनुवादलक्षं वैयर्थ्यं न भविष्यति इति द्वितीयः । सर्वत्र वक्तुं सुखं न तु द्वयोः । तस्मादनेन सर्वपृष्ठशब्देन षट् संख्याकानि पृष्ठान्यतिदिश्यन्ते षड्हे प्रतिदिनमेकैकं पृष्ठं विहि-तम् । तानि च पृष्ठानि षट् रथन्तरबृहद्रूपै-रैराजशाक्वररैवतसामभिः निष्पाद्यानि" ।

पृष्ठगोप पु० पृष्ठं गोपायति गुप–वा० अयामादौ ण्वुल् । पृष्ठदेशरक्षके योधभेदे भा० आ० २०१ अ० ।

पृष्ठयन्त्रि त्रि० पृष्ठे यन्त्रिर्यस्य । (कुजो) कुब्जे हेमच० ।

पृष्ठचक्षुस् पु० पृष्ठे पश्चाद्भागे चक्षुः दृष्टिः तद्व्यापारोऽस्य । पश्चाद्दृष्टियुक्ते भल्लूके शब्दार्थक० ।

पृष्ठज त्रि० पृष्ठे पश्चात् जायते जन–ड । पश्चाद् जाते भा० आ० ६२ अ० ।

पृष्ठजाह त्रि० पृष्ठस्य मूलं कर्म्म० मूले जाहच्। पृष्ठमूले।

पृष्ठतल्पन न०तल्पमिवाचरति तल्प+क्विप् ल्यधातुः भावे ल्युट्। पृष्ठस्य तल्पनं तल्पवदाचरणम्। (पिठे शोओया) प्रवेष्टे त्रिका०।

पृष्ठतस् अव्य० पृष्ठ+तसिल्। पश्चाद्भागे इत्यर्थे।

पृष्ठदृष्टि पु० पृष्ठे दृष्टिस्तद्व्यापारोऽस्य। भल्लूके राजनि०।

पृष्ठमर्म्मन् न० ७त०। सुश्रुतोक्ते पृष्ठस्थमर्मभेदे स च तत्रोक्तो यथा

"अत ऊर्द्धं पृष्ठमर्म्माण्यनुव्याख्यास्यामः। तत्र पृष्ठवंशसमयतः प्रतिश्रोणीकाण्डमस्थिनी कटीकतरुणे नाम मर्म्मणी तत्र शोणितक्षयात् पाण्डुर्विवर्णौ क्षीनरूपश्च म्रियते। पार्श्वजघनवस्तिभागे पृष्ठवंशसमयतो नातिनिम्ने कुकुन्दरे नाम मर्म्मणी तत्र स्यन्दाज्ञानमधःकाये चेष्टोपघातश्च। श्रोणीकाण्डयोरुपर्य्याशयाच्छादनौ पार्श्वान्तरप्रतिबद्धौ नितम्बौ नाम तत्राधःकायशोषो दौर्ब्बल्यात्तु मरणम्। अधःपार्श्वान्तरप्रतिबद्धौ जघनपार्श्वमध्ययोस्तिर्य्यगूर्द्ध्वञ्च जघनात् पार्श्वसन्धी नाम तत्र लोहितपूर्णकोष्ठतया म्रियते। स्तनमूलादुभयतः पृष्ठवंशस्य हृच्छती नाम तत्र श्लेष्मितातिप्रवृत्तिनिमित्तैरुपद्रवैर्म्रियते। पृष्ठोपरि पृष्ठवंशसमयतस्त्रिकसम्बद्धे अंसफलके नाम तत्र बाह्वोः स्वापः शोषो वा। बाहुमूर्द्धग्रीवासध्येऽंसपीठस्कन्धनिबन्धनावंसौ नाम तत्र सन्धिवाहुता। एवमेतानि चतुर्दश पृष्ठसमाश्रितानि व्याख्यातानि"।

पृष्ठमांस न० पृष्ठस्य मांसम्। पश्वादीनां पृष्ठस्थे मांसे। तस्याभक्ष्यता मार्कपु० उक्ता यथा "पृष्ठमांसं शुनोमांसं गर्ह्यमांसं च पुत्रक!। न भक्षयेत सततं प्रत्यक्षलवणानि च"।

पृष्ठमांसाद त्रि० पृष्ठे परोक्षे मांसाद इव। १परोक्षे श्लेषेण वाक्याभिधायिनि पुरुषे दोषोद्घोषके त्रिका०। "कृत्स्नया विभक्त्यन्वेषीत्यतः कृत्स्नेति समाकर्षात् वाक्याभिधानेऽन्वये तथार्थत्वम्। पृष्ठमांसादनशब्दे ३य उदाहृतम्। पश्वादेः २पृष्ठमांसभक्षके त्रि०।

पृष्ठमांसादन न०पृष्ठे परोक्षे मांसादनमिव। "पृष्ठमांसादनं तत् यत् परोक्षे दोषकीर्त्तनम्" हेमच० उक्तोऽर्थे २पश्वादीनां पृष्ठमांसस्य भक्षणे च।

पृष्ठयज्वन् पु० पृष्ठैः रथन्तरादिभिरिष्टवान् यज-क्वनिप्। रथन्तरादिभिः षड्भिःस्तोत्रसमूहैरिष्टवति ऋ० ५।५४।१

पृष्ठयान न० पृष्ठेन यानं गमनम्। (पिठे याओया) पृष्ठेन गमने। तच्च अर्शोरोगे निदानं सुश्रुते उक्तं अर्शश्शब्दे दृश्यम्।

पृष्ठवंश पु० ६त०। (पिटेर दाँडा) पृष्ठास्थि हेमच०। "चतुर्विंशतिः पृष्ठवंशे" सुश्रुतोक्तेः तत्र चतुर्विंशति रस्थीनि। पृष्ठमर्म्मनशब्दे दृश्यम्।

पृष्ठवास्तु न० ७त०। बलिदातुः पृष्ठभागस्थे वास्तुनि "पृष्ठवास्तुनि कुर्वीत बलिं सर्वात्मभूतये" मनुः। "स्टहो परिष्टहं पृष्ठवास्तु" २कुल्लूकभट्टोक्तोऽर्थे च।

पृष्ठवाह त्रि० पृष्ठं पश्चाद्भागं वहति वह-खिच्। १पश्चाद्भागवाहके हरिवं० १६६ श्लो०। अत्रे वाहछठ्। पृष्ठौहः। स्त्रियां ङीप्। पृष्ठं युगपार्श्वं वहति वह-ण्वि। २युगपार्श्ववाहकवृषे [वृषे हेमच०।

पृष्ठवाह्य पु० पृष्ठेन वाह्यं वहनं यस्य। पृष्ठेन भारवाहके।

पृष्ठशय त्रि० पृष्ठे शेते पृष्ठरूपाधिकरणोपपदे कर्त्तरि अच्। पृष्ठे शायिनि उत्तानशये।

पृष्ठशृङ्ग पुंस्त्री० पृष्ठे पृष्ठस्थं शृङ्गमस्य। वनच्छागे हेमच०। स्त्रियां जातित्वात् ङीष् [मेदि०।

पृष्ठशृङ्गिन् पु० ७त०। १महिषे २नपुंसके ३भीमसेने च

पृष्ठसुख पु० पृष्ठे सुखमस्य बहुव्री०। कुमारानुचरभेदे भा०श०४६अ०।

पृष्ठोदय पु० पृष्ठेनोदयो यस्य। ज्योतिषोक्ते पृष्ठेनोदययुक्ते राशिभेदे "अजो गोपतियुग्मञ्च कर्किधन्विमृगास्तथा। निशासंज्ञाः स्मृताश्चैते शेषास्त्वन्ये दिनात्मकाः। निशा संज्ञा मिथुनाः स्मृताः पृष्ठोदयास्तथा। शेषाः शीर्षोदया ज्ञेते मीनश्चोभयसंज्ञकः"।

पृष्ठ्य न० पृष्ठानां स्तोत्रभेदानां समूहः "पृष्ठ्योपसंख्यानम्" वार्त्ति० समूहे यत्। १स्तोत्रसमूहे। पृष्ठे भवः यत्। २पृष्ठभवे त्रि०। "सोमयागेषु ऋग्वेदैः क्रियमाणाः पृष्ठ्यादि संज्ञिका स्तुतिः स्तोमः" मि०कौ०। पृष्ठेन वहति यत्। ३पृष्ठेन भारवाहके अश्वे (वेटोघोड़ा) अमरः।

पृष्ठ्यस्तोम पु० पृष्ठ्यस्तोमः साधनतयाऽस्त्यस्य अच्। साम-वेदप्रसिद्धेषु षट्सु क्रतुभेदेषु "पृष्ठ्यस्तोमास्त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशाः" कात्या०श्रौ०२२।६।२६ "पृष्ठस्तोमसंज्ञकाः षट् क्रतवो भवन्ति त्रिवृदादयः" कर्कः

पृष्णि पु० पृश्नि+पृषो०। नानावर्णयुक्ते मृगे २पार्ष्णिभागे स्त्री उणादि०।

पॄ पालने पूर्त्तौ च क्र्या० स्वा० पर० सक० सेट् आप्रत्यये पक्षे

ह्रस्वः । पृणाति अपारीत् । पपार पपरतुः पपरुः ।

पॄ पूर्त्तौ चु० उभ० सक०सेट् । पारयति-ते अपीपरत् त ।

पेचक पु०स्त्री० पच-वुन् अतएच । (पँचा) १छलूके स्त्रियां जातित्वात् ङीष् । २गजपुच्छमूलोपान्ते शुदाच्छादक-मांसपिण्डभेदे पु० अमरः । ४पर्य्यङ्के ५यूके पु० विश्वः । ६मेघे शब्दर० । [शब्दरत्ना० स्त्रियां ङीप् ।

पेचकिन् पु० पेचकः पुच्छमूलोपान्तोऽस्यास्य इनि । गजे

पेचिल पुंस्त्री० पच+वा० इलच् अतएच । गजे त्रिका० । स्त्रियां जातित्वात् ङीष् ।

पेचु न० पच-उन् अत एत्वम् । पेचुल्यां त्रिका० । [त्रिका०

पेचुलो स्त्री पच-उलच् अतएत् गौरा० ङीष् । शाकभेदे ।

पेट पु० पिट-अच् । १मत्स्ये राजनि० । २संहतिकारके त्रि०

पेटक पु०न० पिट-ण्वुल् । पुस्तकादीनां स्थापनार्थे वेत्रादि-निर्मिते १पदार्थे २कदम्बके ३समूहे च मेदि० । ४शाटि-निर्मिते ससुद्गकाकारे (पेटारा) पदार्थे पु० अमरः ।

पेटाक पु० पेटक+पृषो० । पेटके द्विरूपकोषः ।

पेटिका स्त्री पिट-ण्वुल् कापि अत इत्वम् । (टेपारि) क्षुद्रभेदे रत्नमाला ।

पेटी स्त्री पिट-अच् स्वल्पार्थे ङीप् । क्षुद्रपेटके अमरः ।

पेडा स्त्री पेट+पृषो० । बृहत्पेटिकायां भरतः ।

पेढाल पु० अवसर्पिण्यां जिनोत्तमभेदे हेमच० ।

पेण गतौ भेषे च सक० श्लेषे अक० भ्वा० पर० सेट् । पेणति अपेणीत् । कृदिट् चङि न ह्रस्वः अपिपेणत् त ।

पेत्व न० पा--पाने कर्मणि इत्वन् । १अम्बुते २घृते च उज्ज्वल०

पेदु पु० राजभेदे कथा० १।११६।१० भा० ।

पेय त्रि०पा-पाने कर्मणि यत् । १पातव्ये २जले मेदि०।३दुग्धे शब्दच० । ४अष्टविधान्नान्तर्गते तरलयवागूवादौ अन्नभेदे "भोज्यं मेयंतथा चूष्यं लेह्यं खाद्यञ्च षड्विधम् । निष्पेय श्चैष भक्ष्यं स्यादन्नमष्टविधं स्मृतम्" राजनि० । ५सिक्थ युक्तमेयद्रव्ये स्त्री । "पेया खेदाग्निजननी वातमूत्रशकृद्भेदनी । क्षुत्तृष्णाग्लानिदौर्बल्यकृच्छ्रिरोगविनाशिनी" राजव० । ६म्राणायां मेदि० ।

पेयूष पु०न० पीय-ऊष० जश्त्व वाऽन्तलोपात् पक्षे गुणः । १अम्बुते २नवघृते । "अपरात्रप्रसूतायाः क्षीरं पेयूष-मुच्यते" हारा० उक्ते आसप्तरात्राभ्यन्तरकालीने ३दुग्धे च ।

पेरज न० उपमणिभेदे राजनि० । पिरोजशब्दे दृश्यम् ।

पेरा स्त्री पि-बा० रे । वाद्यभेदे भक्तिः १७।७ ।

पेरु पु०पीयते रसान् पी-रु । १आदित्ये २वङ्गौ च उज्ज्वल० । पुर-उ नृगव्यादेराकृतिगणत्वात् नि० । ३समुद्रे त्रिका० ।

पेरुक पु० राजभेदे कथा० ६।६३।६

पेरोज न० उपमणिभेदे (पीरोजा) राजनि० । तच्च द्विविधं पी-तामं हरितामञ्च । तस्य गुणाः "पेरजं रुक्षकषायं स्यान्म-धुरं दीपनं परम् । स्यावरं जङ्गमञ्चैव संयोगाच्च यथा-विधम् । तत्सर्वं नाशयेत् शीघ्रं शूलं भूतादिदोषजम् । पाठान्तरं यथा "पेरजं रुक्षकषायं स्यान्मधुरं दीपनं द्वयोः । स्थावरादिविभिन्नं स्याद्धरितञ्चापरं स्मृतम् । पीतामं नाशयेच्छीघ्रं शूलं तिमिरभूतजम्" राजनि० ।

पेल कम्पे अक०गतौ सक०भ्वा०पर०सेट् । पेलति अपेलीत् । कृदिट् चङि न ह्रस्वः अपिपेलत् त । निघण्टौ अयं गतिकर्मतया चुरादित्वेन पठितः । तेन पेलयति ते

पेल न० पेल-अच् । पुंचिह्ने अङ्गभेदे (अण्डकोष) हेमच० ।

पेलव त्रि० पेल-घञ् पेलं वाति वा-क । १कोमले त्रिका० २क्षये हेमच० । ३विरले अमरः ।

पेलि पु०पेल-इन् । गन्तरि इत० । तत्परं शालायाः न क्लीबत्वम् । आद्युदात्तता चास्य ।

पेव सेवने भ्वा०सक०आत्म०सेट् । पेवते अपेविष्ट । कृदिट् चङि न ह्रस्वः । अपिपेवत् त । ओष्ठान्त्यतयाऽयं धातुपाठे पठितस्तेनोभयरूपता ।

पेश पु० पिश-अच् । रूपे निघण्टुः पेशलशब्दे दृश्यम् ।

पेश ष)(स)ल त्रि० पिश(ष)(स)-अलच् । १सुन्दरे २दक्षे ३कोमले च अमरः । मूर्द्धन्यदन्त्यमध्योऽप्युक्तार्थेषु भरतः । ४घृते शब्दर० । पेशोरूपमस्त्यस्य सिध्मा०लच् । ५विष्णौ पु० । "अक्रूरः पेशलो दक्षः" विष्णुस० ।

पेशस् न० पिश-असुन् । १रूपे २हिरण्ये च निघण्टुः । ३कोषे च ।

पेशस्कार त्रि०पेशो रूपान्तरं करोति खण्डकीटस्य कृ-अण् उप०स० । खण्डरूपकरे कीटभेदे स्त्रियां ङीप् । यजु०३०।८।

पेशस्कृत् त्रि० पेशो रूपान्तरं खण्डकीटस्य करोति कृ-क्विप् । कीटभेदे (काँचपोका) "कीटः पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः । याति तत्सात्मतां राजन् ! पूर्वरूपमसंत्यजन्" भाग० ११।९।२४

पेशि(शी) स्त्री पिश-इन् वा ङीप् । १वज्रे २मांसविदले च उणादि० दीर्घान्तः ३अण्डे अमरः । ४क्षुपक्कलिकायां ५मांसां ह्रस्वङ्गविधाने (खाप) ७मांसपिण्डां च मेदि० । ५नदीभेदे ६पिशाचीभेदे ७राक्षसीभेदे शब्दरत्ना० दक्षभा-

वेष्टनचर्ममये कोषे च "बिन्दुसांसादयोऽवस्थाः शुक्रशोणितसम्भवाः। यासामेव निपातेन कललं नाम जायते। कललात् बुदबुदोत्पत्तिः पेश्यो च बुदबुदात् स्मृता। पेश्यास्वकृप्रतिनिर्वृत्तिः" भा० शा०३२२अ०। हवाद्यभेदे "तथा मेर्य्यश्च पेश्यश्च क्रकचा गोविषाणिकाः" भा०भी०४३अ०।

पेशीकोष पु० ६त०। अण्डकोषे हेमच०।

पिष सेवने निश्चये च भ्वा०आ०सक०सेट्। पेषते अपेषिष्ट पिपेषे छदित् चङि न झलः। अपिपेषत् त।

पिषण न० पिष-भावे ल्युट्। १अवयवविभागेन चूर्णने। आधारे ल्युट्। २खले औषधादेर्मर्दनपात्रभेदे (तेकाटासिज) ३दृज्जभेदे पु० शब्दच०।

पेषणि(णी) स्त्री पिष-करणे अनि। (शिल) ख्याते हरिद्रादेश्चूर्णनसाधने शिलामये द्रव्यभेदे वा ङीप्।

पेषाक पु० पिष-आकन्। पेषणयामे उणा०।

पेषि पु० पिष-इन्। वज्रे उज्ज्वलदत्तः।

पेस गतौ भ्वा० पर० सक०सेट्। पेसति अपेसीत् पिपेसे। छदित् चङि न झलः। अपिपेसत् त। [१८] भा०

पेसुक त्रि० पिस-बा० उक। अभिषङ्कनशीले शत०ब्रा०१।७।३

पेस्वर त्रि० पिस-शीलार्थे वरच्। गतिशीले।

पै शोषे भ्वा०पर०सक०अनिट्। पायति अप्रासीत् अपौ।

पैङ्ग पु० ऋषिभेदे भा०स० ४अ०।

पैङ्गराज पु० पक्षिभेदे यजु० २४।२४ मा०।

पैङ्गल पु० ब०व०। पिङ्गलस्यापत्यं गर्गा० यञ्। पैङ्गल्य तस्य छात्राः कण्वा० अण् यलोपः। पिङ्गलस्यापत्यस्य छात्रेषु। [फक्। तन्नामकर्षेरपत्ये।

पैङ्गरा(ला)यन पुंस्त्री० पिङ्गर(ल)ऋषेर्गोत्रापत्यम् नडा०

पैङ्गलोदायनि पुंस्त्र० पैङ्गलोदायनस्यापत्यम् इञ्। प्राच्यभवे तन्नामकर्षिगोत्रापत्ये ततः यूनि फक् तस्य पैङ्गा० लुक्। तदीये युन्यपत्ये। [गोत्रापत्ये।

पैङ्गल्य पुंस्त्री० पिङ्गलस्य गोत्रापत्यं गर्गा०यञ्। पिङ्गलर्षे-

पैङ्गि पुंस्त्री० पिङ्गस्यापत्यमिञ्। पिङ्गस्यर्षेः पुत्रे स्त्रियां ङीप्। "पैङ्गीपुत्रात् पैङ्गीपुत्रः" शत०ब्रा०१४।६।४।३०।

पैङ्गिन् पु० पिङ्गेनर्षिणा प्रोक्तः कल्पः इनि। पिङ्गर्षिप्रोक्ते कल्पशास्त्रे। [प्रवरर्षिभेदः।

पैङ्ग्य पु० पिङ्ग बा० अपत्ये यञ्। पैङ्गर्षिपुत्रे स च गोत्र-

पैयवन पु० पीयवनस्यापत्यमृष्यण्। पैयवने नृपे मनुः ८।११० पैयवन इति पाठान्तरम्।

पैच्छूष पु० पिच्छ-अञ स्वार्थे अण्। अर्शे क्लीबे हेमच०।

पैठर त्रि०पिठरे संस्कृतं पक्वम्। स्थालीपक्वमांसादौ अमरः।

पैठिक पु० असुरभेदे हरिवं० १६१ अ०। [प्रवरा०।

पैठिनसि पु० १उपस्मृतिकारके २ऋषिभेदे ३गोत्रर्षिभेदे च

पैण्डायन पुंस्त्री पिण्डर्षेर्गोत्रापत्यम् नड्वा०फक्। पिण्डर्षिगोत्रापत्ये।

पैण्डिक्य(न्य) पिण्डं परपिण्डं भक्ष्यतयाऽस्त्यस्य ठन् ष्ट्यञ् वा पिण्डिक पिण्डिन् वा तस्य भावः पुरोहिता० यक् ष्यञ् वा। परपिण्डोपजीवित्वे भिक्षोपजीवने त्रिका०।

पैण्ड्य त्रि० पिण्ड्या भवः कुवा० यत्। पिण्डीभवे।

पैतरावण पु० गोत्रप्रवर्षिभेदे प्रवरा०।

पैतृक त्रि० पितृत आगतं पितुरिदं वा ठञ्। १पितृतः प्राप्ते २पितृसम्बन्धिनि च। पैतृकभूमिमाहात्म्यं ब्रह्मवै० ब्रह्मख० १०२ अ० दर्शितं यथा

"वासुदेव! न यास्यामि भूमिं तां, पैतृकीं पुनः। सर्वतीर्थपरा शुद्धा दैवे कर्मणि पैतृके। पारक्यं भूमिदेये च पितृणां निर्वपेत्तु यः। तन्नूमिस्वामिपितृभिः श्राद्धकर्म निकृन्यते। पितॄणां निष्फलं श्राद्धं देवानामपि पूजनम्। किञ्चित्फलप्रदञ्चैव सम्पूर्णं पैतृके स्थले। पुत्रपौत्रकलत्रेभ्यः प्राणेभ्यः प्रेयसी सदा। दुर्लभा पैतृकी भूमिः पितुर्मातुर्गरीयसी। तच्छ्रेष्ठञ्च पवित्रञ्च दैवे कर्मणि पैतृके। क्रीतञ्च तद्दत्ते दानं परदत्तमशाश्वतम्। म्रियते पैतृकभूम्यां तीर्थतुल्यफलं लभेत्। गङ्गाजलसमं पूतं पितृस्नातोदकं हरे!। पितॄणां तर्पणं तत्र पवित्रं देवपूजनम्। पैतृकी जन्मभूमिस्तेत् स्वर्गं तद्द्विगुणं लभेत्। पैतृकभूमितुल्या न दानभूमिः शतामपि"।

पैतृमत्य त्रि० पितृमत्यां अनूढायां कन्यायां भवः कुवा० यत्। कन्यायां भवे कानीने। [पितृश्वसुरपत्ये।

पैतृष्वसेय पुंस्त्री पितुः श्वसुरपत्यम् ढक् अन्त्यलोपः अत्वम्

पैतृष्वस्रीय पुंस्त्री०पितुः श्वसुरपत्यम् छण्। पितृश्वसुरपत्ये

पैत्त त्रि०पित्तात् आगतः अण्। धातुविशेषपित्तजाते ज्वरादौ

पैत्तिक त्रि० पित्तेन निर्वृत्तः ठञ्। धातुविशेषपित्तजाते व्याधौ।

पैत्र त्रि०पितुरिदम् अण्। १पितृसम्बन्धिनि श्राद्धादौ। अङ्गुष्ठतर्जन्योर्मध्यस्थाने २पितृतीर्थे न०। ३पितृसम्बन्धिदिने च तन्मानं च अङ्गुष्ठशब्दे ५७६पृ० उक्तं द्रष्टव्यम्।

पैद्द पुंस्त्री अश्वे निघण्टु। ऋ० ६।८८।४। स्त्रियां जातित्वात् ङीष्।

पैनङ्गक त्रि॰ पिनङ्ग+चतुरर्थ्यां वराह॰कक्। पिनङ्गसमीपादौ।

पैप्पलाद पु॰ब॰व॰। पिप्पलादेन ऋषिणा प्रोक्तमधीयते अण्। १पिप्पलर्षिप्रोक्ताध्यायिषु तदर्थस्य २वेत्तृषु च कार्त्तकौज॰ सौभेन सह द्वन्द्वे पूर्वं प्रकृतिस्वरः।

पैप्पलादि पुंस्त्री पिप्पलादस्यर्षेरपत्यम् इञ्। पिप्पलादर्षेरपत्ये स च गोत्रप्रवरर्षिभेदः प्रवराध्यायः स्त्रियां ङीष्।

पैल(लेय) पुंस्त्री॰ पीलाया अपत्यं "पीलाया वा" पा॰ अण् पक्षे ढक्। पीलाया अपत्ये स्त्रियां ङीष्। यून्यपत्ये तु "अनो द्व्यचः" पा॰ फिञ् तस्य पैलादि॰ लुक्। तस्य यून्यपत्येऽपि। तथा च पैलः पिता पुत्रश्च।

पैलगर्ग पु॰ कर्म॰। ऋषिभेदे तदाश्रमस्य च तीर्थत्वम् भा॰ श॰ १८७ अ॰।

पैलव त्रि॰ पीलौ दीयते कार्ये वा व्युट्टा॰ अण्। पीलौ दीयमाने २कार्ये च। व्युट्टा॰ गणे पीलुमूलेति व्यक्तमित्येके समस्तमित्यन्ये। इदमर्थेऽण्। पीलुसम्बन्धिनि त्रि॰ मनुः २।४०। [जलादिभवे।

पैलवक त्रि॰पीलुवृक्षे भवः वहाल्लत्वात् वुञ्। पीलुवृक्षभवे।

पैलादि "पैलादिभ्यश्च" पा॰ युवप्रत्ययलुगर्थनिमित्ते शब्दगणे स च गणः "पैल शालङ्कि सात्यकि सात्यङ्कामि राहवि रावणि औदञ्जी औदन्वजी औदमेढि औदमज्जि औदमज्जि दैवस्थानि पैङ्गलोटायनि राहवति भौलिङ्गि रायि औदन्यि औद्राहमानि औज्जिहानि औदगुडि (तद्राजा चाणः) (आकृतिगणोऽयम्)। तद्राजसंज्ञकात् परस्य युवप्रत्ययस्य लुगित्यर्थः।

पैशाच पु॰ पिशाचेन निर्वृत्तः अण्। "सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति। स पापिष्ठो विवाहानां पैशाचः" मनुक्ते १विवाहभेदे २पिशाचकर्मतेऽतृसम्बन्धिनि च त्रि॰। स्त्रियां ङीप् "पैशाचीं योनिमापन्नाः" पुरा॰। "यश्चाक्रुध्य ददाति दत्त्वा वा क्रोशति असत्कृतं पैशाचमिति" हारीतोक्ते ४दानभेदे स्वार्थे अण्। ५पिशाचशब्दार्थे पु॰ पक्षा॰अण्। ६आयुधजीविसङ्घभेदे। बहुषु तस्य लुक्।

पैशुन न्य) न॰ पिशुनस्य भावः युवा॰अण् ब्राह्मणा ष्यञ् वा। पिशुनत्वे

पैष्ट त्रि॰पिष्टस्येदम्। अण् १पिष्टसम्बन्धिनि स्त्रियां ङीप् सा च २सुरायाम्। "पैष्टी कट्वम्लतीक्ष्णा स्यादोषघ्नी रोचनी च सा" राजनि॰।

पैसुकायन पु॰ गोत्रप्रवरर्षिभेदे प्रवराध्यायः।

पो त्रि॰ पवते पुनाति वा पु-पू-वा विच् १शुद्धे २शोधके च।

पोगण्ड पु॰ पोः शुद्धो गण्ड एकदेशो यस्य। १विकलाङ्गे २न्यूनाधिकाङ्गे। स्वार्थे कण्। "पौगण्डः पञ्चमाद्वर्षादर्वाक् च दशमाद्व्रतः" इत्युक्तवयस्के बालके पु॰ हला॰।

पोट पु॰ पुट-श्लेषे घञ्। १संश्लेषे-आधारे घञ्। २वेश्मभूमौ जटा॰।

पोटगल पु॰ पोटेन संश्लेषमात्रेण गलति गल-अच्। १नले २काशे च अमरः। ३तृणभेदे पुंस्त्री मेदि॰ स्त्रियां ङीष्।

पोटलक न॰ पोटेन लीयते ली-ड स्वार्थे क। (पुँटलि) ख्याते संक्षिप्तवस्त्रादौ कात्या॰ श्रौ॰ ७।६।४। कर्कः। तत्रार्थे स्त्री कापि अत इत्त्वम् पोटलिका। [अमरः।

पोटा स्त्री पुट-अच्। पुरुषलक्षणयुक्तायां स्त्रियाम्।

पोटलिका स्त्री पोटलिका+पृषो॰ (पुँटलि) ख्याते पदार्थे पोट्टलीत्यपि तत्रार्थे "शुद्ध्यर्थं त्रिफलाक्काथे गुडूच्याः क्काथ एव वा। दोलायन्त्रे पुरः पाच्यः पोट्टल्या वस्त्रवद्यया" वैद्यक॰।

पोट्टिल पु॰ अवसर्पिण्यां जिनोत्तमभेदे हेमच॰।

पोडु पु॰ पुड-उन्। कपालास्थितले राजनि॰।

पोत पुंस्त्री पू-तन्। १बालके २वह्नित्रे च अमरः। ३गृहस्थानभेदे (पोँता) ४वस्त्रे च मेदि॰। ५दशवर्षीयगजे हेमच॰। ६समुद्रयाने नौकाभेदे (जाहाज) ततः समूहे प्राग्वा॰ य। पोत्या पोतसमूहे स्त्री।

पोतक पु॰पोत इव कायति कै-क स्वार्थे क वा।१पोतपदार्थे २नागभेदे भा॰उ॰१०२अ॰। गौरा॰ ङीष्। ३पूतिकाशाके स्त्री ४श्लोनाके च स्त्री राजनि॰।

पोतज पु॰ पोतः सन् जायते जन-ड। शिशुभूततया जायमाने गजाश्वादौ हेमच॰। [गौरा॰ ङीष्।

पोतन त्रि॰ पू-तन। १पवित्रे २पवित्रताकारके च स्त्रियां

पोतप्लव पु॰ पोतेन प्लवते प्लु-अच्। नौकया तारके ह॰सं॰ १०।१०। [अमरः।

पोतवणिज् पु॰ पोते वणिक्। नौकया वाणिज्यकारके

पोतरज्जु पु॰ पोतं रज्जति अण् उप॰स॰। (हालि) ख्याते पदार्थे कोनिपातके शब्दमा॰।

पोतनकप्रिय त्रि॰ बुद्धभेदे त्रिका॰।

पोतवाह पु॰ पोतं नावं वहति वह-अण् उप॰स॰। नौकावाहके (दाँड़ि) अमरः।

पोताच्छादन न॰ पोतस्येवाच्छादनम्। वस्त्रकुटीरे हारा॰

पोताधान पु॰पोतानां शिशूनामगण्डजातमत्स्यानामाधानम्। क्षुद्रमत्स्यसङ्के (पोनारझाँक) अमरः। [राजनि॰।

पोतास पु॰ पोत इवासति अस-दीप्तौ अच्। कर्पूरभेदे

पो(पौ)तिमत्स्यक पु॰ नदभेदे भा॰ उ॰ ३अ॰।

पोतिका स्त्री पूतिका+पृषो॰। पूतिकायां १शाकभेदे भरतः २शतपुष्पायां ३मूलपोत्यां च राजनि॰।

पोतु पु॰ पु-तुन्। मानसाण्डशोधके हेमच॰।

पोत्र पु॰ पुनाति पु-तृन्। ऋत्विग्भेदे अच्छावाकशब्दे ८८५ पृ॰ दृश्यम्। होत्रादिशब्देन द्वन्द्वे ऋत आत्। पोताहोतारौ।

पोत्र न॰ पू-त्र। १वज्रे २शूकरमुखाग्रे ३नाङ्गलमुखाग्रे, ४वह्नितेजे च मेदि॰। [स्त्रियां जातित्वात् ङीष्।

पोत्रायुध पुंस्त्री पोत्रमायुधमिवास्य। शूकरे राजनि॰।

पोत्रिन् पु॰ पोत्रमस्त्यस्य इनि। शूकरे अमरः। पोत्रयुक्ते त्रि॰। स्त्रियां ङीप्। [यन्त्रिभेदे त्रिका॰।

पोत्रिरथा स्त्री पोत्री रथ इव गतिसाधनमस्याः। जिन-

पोत्रीय त्रि॰ पोत्रः कर्म छ। पोतृकर्त्तव्ये कर्मणि। कात्या॰ श्रौ॰ २४।४।४२।

पोथकी स्त्री "कण्डूलावान्विता गुर्व्वी रक्तसर्षपसन्निभाः। पिड़काश्च रुजावत्यः पोथक्य इति संज्ञिताः" सुश्रुतोक्ते पिड़काभेदे। [स्त्री गौरा॰ ङीष्।

पोल त्रि॰ पुल-ज्वला॰ण। १रूक्षत्वयुक्ते। २पिष्टकभेदे

पोलिका स्त्री पूरिकाभेदे कृतान्नशब्दे २१८१ पृ॰ दृश्यम्।

पोलिन्द पु॰ पोतस्यालिन्द इव पृषो॰। नौकांशभेदे त्रिका॰।

पोषयित्नु त्रि॰ पुष-णिच्-इत्नु। १पोषके २काकपोत्रपिके च उज्ज्वल॰।

पोषुक त्रि॰ पुष-वा॰ उक। पोषणकरणशीले "तमनुपोषं पोषुको भवति" षड्विंशब्रा॰। [पक्षे त्रि॰ शब्दच॰।

पोष्टृ पु॰ पुष-तृच्। (काँटा करमजा) १करञ्जभेदे। २पो-

पोष्य त्रि॰पुष-कर्मणि ण्यत्। १पोषणीये। आवश्यके ण्यत्। २अवश्यपोषणे। अवश्यपोष्यत्व दर्शितो यथा "भरणं पोष्यवर्गस्य दृष्टादृष्टफलोदयम्। मत्वा वयोऽप्यभरणे कर्त्तव्यन्तत् प्रयत्नतः। माता पिता गुरुः पत्नी त्वपत्यानि समाश्रितः। अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्गो अमी नव" काशी॰ख॰ ४५ अ॰। "ज्ञातिर्बन्धुजनः क्षीणस्त्वनाथः समाश्रितः। अन्यैश्चधनयुक्तैश्च पोष्यवर्ग उदाहृतः" दक्षसं॰।

पोष्यपुत्र पु॰ कर्म॰। [पोषणादिना पुत्रत्वापादे 'अधुना क्षत्तिकादीनां षण्णां यः पोष्यपुत्रकः। तन्नाम चक्रुस्ता प्रेम्णा कार्त्तिकेयेति कौतुकात्" ब्रह्मवै॰गण॰ख॰१४अ॰। अधुना दत्तकपुत्रस्य पोष्यपुत्रत्वं व्यवह्रियते तद्विधान दत्तकशब्दे २४३८पृ॰ दृश्यम्।

पौंश्चलेय पुंस्त्री पुंश्चली+अपत्ये ढक्। पुंश्चल्या अपत्ये

पौंश्चल्य न॰ पुंश्चल+भावे ष्यञ्। १असतीत्वे परपुरुषगामित्वे २पुंस्त्रियोर्मिथोव्यभिचारे च मनुः ९।१५।

पौंसायन पु॰ सौत्रामण्यां याज्ञके दुष्टरीतौ राजभेदे शत॰ब्रा॰ १२।९।३।२

पौंस्न न॰ पुंसो भावः कर्म वा ष्ण्यञ्। पुंस्त्वे।

पौंस्य न॰ पुंस अभिमर्दने ष्यञ्। तत्र साधु वा॰ यत्। १वले निरु॰। २संग्रामे च निघण्टुः कर्म॰१।१८।१०।

पौगण्ड न॰ पौगण्डस्य भावः। १पञ्चमावधिदशमवर्षान्तावस्थाभेदे पौगण्डशब्दे दृश्यम्। स्वार्थे अण्। २वयःवस्थायुते त्रि॰।

पौच्चिष्ठ पुंस्त्री अन्त्यजातिभेदे यजु॰ ३०।८। वेदटी॰।

पौटायन पुंस्त्री पुटायानर्षेरपत्यम् अण्। पूटायनर्षेः गोत्रापत्ये। [गोत्रस्त्रियाम्।

पौणिक्या स्त्री पुणगोत्रस्य स्त्री यण् स्त्रियां षाप्ङीप्।

पौण्डरीक न॰ पुण्डरीकमिव शर्करा॰ अण्। पुण्डरीकतुल्ये प्रपौण्डरीके राजनि॰

पौण्ड्यं न॰पुण्ड्यर्षेरेव ष्यञ्। पुण्ड्यर्षेः भरतः।

पौण्ड्र पु॰ १देशभेदे स च ६त॰स॰१४० पूर्वशब्दोक्तः भा॰भी॰८अ॰ सोऽस्य अभिजनः तस्य राजा वा अण्। २तद्देशशब्दमे शिलादिक्रमेण तद्देशवासिनि च। "पौण्ड्रश्च बलिनां वरः" हरिवं॰९१अ॰। स च लक्ष्मणेन निहतः "पाण्ड्रं पौण्ड्रं कलिङ्गञ्च मागधञ्चैव जनार्दनः। जघान सहितान् सर्वान्" हरिवं॰ १६१ अ॰। "वसुदेवस्य सुतनूपत्नीजाते ४पुत्रभेदे। "सुतनूञ्च नराची च शौरेरास्तां परिग्रहः। पौण्ड्रस्य कपिलस्यैव वसुदेवस्य तौ सुतौ। नराच्यां कपिलो जज्ञे पौण्ड्रस्य सुतनूसुतः। तयोर्ज्येष्ठोऽभवत् पौण्ड्रः कपिलस्य वनं ययौ" हरिवं॰१६२ अ॰। ५भीमसेनशङ्खे ६क्षुपभेदे पु॰ शब्दमा॰। ७क्रियालोपेन क्षत्रजातप्राप्ते क्षत्रियभेदे मनुः १०।४४ स्वार्थे क। तत्रार्थे ८क्षुपभेदे (पुड़ि)।

पौण्ड्रनागर पु॰ पौण्ड्रनगरे भवः अण् तस्य प्राचुर्य्यत्वेऽपि नगरान्तत्वेन उत्तरपदवृद्धिः। पौण्ड्रनगरभवे।

पौण्ड्रमात्स्यक पु॰ राजभेदे भा॰ अ॰ ३७ अ॰।

पौण्ड्रवर्द्धन पु०(बेहार) ख्याते देशभेदे शब्दर० तत्र पौण्ड्रेषु प्राचुर्य्यात् तथात्वम्। [२गोत्रप्रवरर्षिभेदे प्रवराध्यायः।

पौण्ड्रिक पु० पुण्ड्र+स्वार्थे ठञ्। १इक्षुभेदे शब्दच०।

पौण्य त्रि० पुण्येषु भौतघातकर्मसु साधु अण्। पूर्वकर्मकारके कात्या० २३।२।५।

पौतव न० पौतव-पृषो०। परिमाणे हेमच०।

पौतिक त्रि० पूतिकेन दुर्गन्धिना निर्वृत्तम् सङ्घला० अण्। पूतिकद्रव्यनिर्वृत्ते।

पौतिमाष पु० ब०व०। पूतिमाषस्यर्षेः गोत्रापत्यं गर्गा० यञ्। तस्य छात्राः कण्वा० अण् यलोपः। पौतिमाषयच्छात्रेषु।

पौत्तक न० पोतृरिदं ठञ्। ऋत्विग्भेदपोतृसम्बन्धिनि।

पौत्तिक न० पुत्तिकाभिर्मधुमक्षिकाभेदैर्निर्वृत्तम् ठञ्। मधुनि रत्नमा०।

पौत्र पुंस्त्री पुत्रस्यापत्यं शिवा०अण्। पुत्रस्य पुत्रे नप्तरि "पौत्रेष्वानन्त्यमश्नुते" इति स्मृतिः। स्त्रियां ङीप्।

पौदन्य पु० अश्मकस्यपनगरे भा० आ० १७७ अ०।

पौनःपुनिक त्रि०पुनःपुनर्भवः ठञ् टिलोपः। पुनःपुनर्भवे।

पौनःपुन्य न० पुनः पुनरेव स्वार्थे चतुर्वर्णा० ष्यञ् टिलोपश्च। १पुनःपुनरित्यर्थे भावे ष्यञ्। २आभीक्ष्ण्ये

पौनरुक्त न० पुनरुक्तस्य भाव ऋगयनाण्। पुनर्वारोक्तौ

पौनरुक्तिक न० पुनरुक्तमर्थं वेत्ति तत्पठं वाऽधीते वकण्ठक्। १पुनरुक्तार्थाभिज्ञे २पुनरुक्तपदाध्येतरि च।

पौनर्भव पुंस्त्री पुनर्भू+विदा० अपत्ये अञ्। पुनर्भूपत्ये १द्वादशपुत्रमध्ये पुत्रभेदे "पत्या वा च परित्यक्ता विधवा-'या स्वयेच्छया। उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते" मनुः। २तथाविधकन्यायां स्त्री स्वार्थे अण्। तत्रार्थे "सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः। वाचादत्ता मनोदत्ता कृतकौतुकमङ्गला। उदकस्पर्शिता या च या च पाणिग्रहीतिका। अग्निं परिगता या च पुनर्भूप्रभवा च। दृश्यन्ते काश्यपेनोक्ता दहन्ति कुलमग्निवत्" काश्यपोक्ते सप्तविधे ३कन्याभेदे च। आर्षत्वात् ङीभावः। अजादेराकृतिगणत्वात् वा टाप् इत्येके। पुनर्भुवं विन्दति अण्। ४पुनर्भूवेदके भर्त्तरि। "सा चेदक्षतयोनिः स्यात् गतप्रत्यागताऽपि वा। पौनर्भवेन भर्त्रा सा पुनःसंस्कारमर्हति" मनुः।

पौर त्रि० पुरे वसति भवे[ष्]ठिकोऽण्। १पुरवासिनि २रोहिषतृणे न०(रामकर्पूर) अमरः। पूरः पूरक एव स्वार्थे अण्। ३उदरपूरके त्रि०ऋ०२।११।११भा०। पुरोभवः पुरस्+अण् टिलोपः। १पूर्वठिगदेशकालभवे "पौरा बुधगुरुर्विजा नित्यम्" बृ०सं० १७ अ०।

पौरक न० पौर इव कायति कै-क। स्वङ्गवाद्याख्याने हेमः।

पौरकुत्सी स्त्री पुरुकुत्सापत्यं स्त्री इञ् ङीप्। गाधिराजमातरि हरिवं० २७ अ०। [समीपादौ।

पौरगीय त्रि० पुरग+ऋशाद्या० चतुरर्थ्यां छण्। पुरगतः

पौराण पु० "पूरणप्रभृतिभ्यश्चेत्यनेनाश्वमित्रदेवरातपौरणेति आश्व०श्रौ०१२।१४।५ उक्ते गोत्रप्रवरर्षिभेदे। पुराण+स्वार्थे अण्। २पुराणे स्त्रियां ङीप्। "पौराणीं भूषणक्रियाम्" हरिवं० ६८अ०।

पौरन्दर त्रि० पुरन्दरस्येदम् पुरन्दरोदेवताऽस्य वा अण्। १शक्रसम्बन्धिनि २ज्येष्ठानक्षत्रे च बृ०सं०१५अ०।

पौरव पुंस्त्री० पु(पू)रोर्गोत्रापत्यमण्। १ययातिपुत्रभेदस्य पु(पू)रोरपत्ये २तत्सम्बन्धिनि च। ३उत्तरदेशभेदे बृ० सं०१४अ०। मार्क०पु०५८ अ० तस्य पूर्वोत्तरदिक्स्थत्वमुक्तं यथा "विनेतुः पौरवाश्चैव गन्धर्वाश्च द्विजोत्तम!। पूर्वोत्तरन्तु कूर्मस्य पादमेते व्यवस्थिताः" सोऽनिजनोऽस्य तस्य राजा वा अण्। शिवादिकत्वेन ४तद्देशवासिनि ५तद्भूपे च। [भक्तियुक्ते सि०कौ०।

पौरवीय त्रि० पौरवो राजा भक्तिरस्य छ। पौरवत्पपौरश्चरणिक त्रि०पुरश्चरणस्य व्याख्यानस्तत्र भवो वा ठञ्। १पुरश्चरणप्रतिपादकग्रन्थव्याख्यानग्रन्थे २तत्र भवे च।

पौरस्त्य त्रि०पुरस्+भवार्थे त्यक्। १पुरोभवे २प्रथमे च अमरः

पौरागोत्र त्रि० पुराग+ऋशाद्या० चतुरर्थ्यां छण्। पूर्वकालगतस्यादूरदेशादौ। [१च०।

पौराण त्रि० पुराणे पठितः अण्। पुराणपठिते भा० आ०

पौराणिक त्रि० पुराणं वेत्त्यधीते वा "आख्यानाख्यायिकेतिहासपुराणेभ्यश्च" वार्त्ति० ठक्। १पुराणार्थाभिज्ञे २तदध्येतरि च। पुराणे पठितः ठक्। ३तत्र पठिते त्रि० स्त्रियां ङीप्।

पौरिक पु० दाक्षिणात्ये देशभेदे मार्कपु० ५७ अ०।

पौरुकुत्स पु० गोत्रप्रवरर्षिभेदे प्रवराध्यायः।

पौरुष न० पुरुषस्य भावः कर्म वा युवा० अण्। १पुरुषत्वे २विक्रमे ३उद्यमे च। पुरुषस्येदम् अण्। ४ऊर्द्ध्वविस्तृतबाहुपाणिकमनुष्यपरिमाणे अमरः। "जवेऽपि मानेऽपि च पौरुषाधिकम्" नैष०। स्वार्थे अण्। ५पुरुषशब्दार्थे शत०ब्रा० १४।७।१।१२।

पौरुषांशकिन् पु० ब०व०। पुरुषांशकेन ऋषिणा प्रोक्त-

मधीयते शौनका० णिनि । पुरुषांशकर्षिणा प्रोक्ताध्येष्टषु ।

पौरुषेय पु० पुरुषस्य बधादि "पुरुषाद्वधविकारसमूहतेन कृतेषु" पा० ठञ् । पुरुषस्य १वधे २विकारे ३समूहे ४तेन कृते च ।

पौरेय त्रि० पुरस्यादूरदेशादि सख्या० ढञ् । नगरसमीपादौ

पौरोगव पु० पुरोऽग्रे पाचत्रवस्तुषु गौर्नेतं यस्य पुरोगुः ततः स्वार्थे प्रज्ञा० अण् । पाकशालाध्यक्षे अमरः ।

पौरोहित त्रि० पुरोहितस्य धर्म्यम् महिषया० अण् । पुरोहितस्य धर्म्ये । [कर्मभेदे आश्व० श्रौ०२।१८।६ ।

पौर्णदर्व न० पूर्णया दर्व्या निष्पाद्यं कर्म अण् । वैदिके

पौर्णमास पु० पौर्णमास्यां भवः सन्धिवेला० अण् । १पौर्णमासीविहिते यागे "दर्शपौर्णमासाभ्यां यजेत" श्रुतिः स च द्विविधः यावज्जीवकालिकः पञ्चदशीप्रतिपत्सन्धिकाले कर्त्तव्यश्च । तत्कालादिविधानं कात्या० श्रौ० २।१ कण्डिकादौ दृश्यम् । पूर्णोमासचन्द्रमासस्येयम् अण् पूर्णो मासो यस्यां वर्त्तते "पूर्णमासाद्यण् यक्तव्यः" वा० अण् वा । २शुक्लपक्षीयपञ्चदशकलाक्रियायां तदुपलक्षितकालरूपायां वा ३तिथौ स्त्री ३तदुत्तरप्रतिपदि च "द्वे ह वै पौर्णमास्यौ पूर्वा उत्तरा च तत्र पञ्चदशी पूर्वा प्रतिपदुत्तरा" इति श्रुतेः तत्र पञ्चदशी मुख्या प्रतिपद्गौणी इत्यर्थः ।

पौर्णमासिक त्रि० पूर्णमास्यां भवः कालाट् ठञ् । पौर्णमासभवे यागादौ वा० यत् । पौर्णमास्य तत्रार्थे ।

पौर्णमी स्त्री पूर्णतया चन्द्रो-मीयतेऽत्र मा--आधारे घञर्थे क स्वार्थे अण् ङीप् । पूर्णिमातिथौ त्रिका० । [३।१७८

पौर्त्तिक त्रि० पूर्त्ताय साधु ठक् । पूर्त्तसाधने कर्मणि मनु०

पौर्य पुंस्त्री०पुरस्यापत्यं कुर्वा०ण्य । पुरनामकस्य क्षत्रस्यापत्ये

पौर्वनगरेय त्रि० पूर्वनगर्यां भवः नद्या०ढक् । पूर्वनगरीभवे

पौर्वपदिक त्रि० पूर्वपदं गच्छति ठञ् । पूर्वपदगामिके ।

पौर्वातिथ पु० गोत्रप्रवरर्षिभेदे आश्व० श्रौ० १२।१४।१।

पौर्वापर्य्य न० पूर्वापरयोर्भावः ष्यञ् । पूर्वापरत्वे ।

पौर्वार्द्ध(र्द्धिक)र्द्धिक त्रि० पूर्वार्द्धे भवः यत् अञ् ठञ् वा पूर्वार्द्धभवे । [च । पूर्वाह्णेतन तत्रार्थे त्रि० ।

पौर्वाह्णिक त्रि० पूर्वाह्णे भवः ठञ् । पूर्वाह्णभवे पक्षे ञु तट्

पौर्विक त्रि० पूर्वस्मिन् काले भवः ठञ् । पूर्वकालभवे स्त्रियां ङीप् । "जातिं स्मरति पौर्विकीम्" मनुः ४।१४८ ।

पौलस्त्य पुंस्त्री० पुलस्त्यस्यापत्यं गर्गा०यञ् । पुलस्त्यापत्ये १कुबेरे २रावणादौ च मेदि० । स्त्रियां ङीप् यलोपः । पौलस्त्री शूर्पनखायाम् । [विकारे ।

पौलाक त्रि० पुलाकस्य विकारः पलाशा० यञ् । पुलाक-

पौलि पु०पुल--इन् बा० इञ्च । १ईषद्दग्धे धारव्यपक्वधान्ये कलायादौ अमरः । स्वार्थे क । तत्रार्थे हेमच० ।

पौलस्ति पु० पुलस्त्यवंशजे सत्ययज्ञे ऋषिभेदे शत०ब्रा०१०।६।१।१

पौलोमी स्त्री पुलोम्नोऽपत्यम् अण् अनोलोपः । पुलोमजायां शच्यां हेमच० ।

पौष पु० पुष्येण युक्ता पौर्णमासी पुष्य-अण् यलोपः ङीप् पौषी सा यत्र मासे अर्द्धमासे वर्षे वा पुनरण । १पुष्यनक्षत्रयुक्तपौर्णमासीयुक्ते १मासे २पक्षे ३अहोरात्रे वर्षभेदे कार्त्तिकशब्दे १६४६पृ० दृश्यम् । "मीनादिस्थो रविर्यत्रारभ्यः प्रथमक्षणे" इत्यादिरीत्या धनुःस्थरव्यारब्धः शुक्लप्रतिपदादिदर्शान्तात्मको मुख्यचान्द्रपौषः कृष्णपक्षादिपौर्णमासान्तः गौणः पौषः, धनूराशिस्थरविकः सौरः पौष इति भेदः तेनान्यत्र भक्तिः ।

पौष्कर न०पुष्करस्याकारोऽस्यस्य मूले प्रज्ञा०अण् । १पुष्करमूले राजनि० पुष्करस्येदम् अण् । २पुष्करसम्बन्धिनि त्रि० विष्णोः पद्मतया प्रादुर्भावयुते ३पाद्मे कल्पे पु० ।

पौष्करमूल न०स्वार्थे अण् । पुष्करमूले सुगन्धिद्रव्यभेदे भरतः

पौष्करिणी स्त्री पुष्कराणां समूहः अण् स्वार्थे अण् वा ततोऽस्त्यर्थे इनि ङीप् । पुष्करिण्यां शब्दच० ।

पौष्करेयक न० पुष्करे जातादि कत्त्या० ढकञ् । पुष्करे जातादौ स्त्रियां ङीप् ।

पौष्कल त्रि० पुष्कलेन निर्वृत्तम् सङ्कला० अण् । १पुष्कलनिर्वृत्ते २सामभेदे न० "उष्णिहि शर्फं ककुभि पौष्कलम्" सामसं०भा०धृता श्रुतिः "तच्च गीतं प्रवक्ष्ये मधुमत्तम"इति प्रगाथे (उत्तरा० १प्र०१६) तस्मिन् पूर्वा ककुप् उत्तरा पङ्क्तिः । तत्र (ककुभि) पौष्कलं साम । (तच्च) ऊह गा०१प्र–१६ दर्शितम् ।

पौष्कलावत पु० दिवोदासधन्वन्तरिं प्रति आयुर्वेदज्ञानार्थं प्रश्नकारके सुश्रुतसंहाध्यायिभेदे सुश्रुते १।१अ० दृश्यम् ।

पौष्कलेयक त्रि० पुष्कले जातादि कत्त्या०ढकञ् । पुष्कलेजातादौ स्त्रियां ङीप् ।

पौष्टिक त्रि० पुष्ट्यै हितम् ठक् । पुष्टिसाधने कर्मभेदे "पुष्टिधनजनादीनां वृद्धिरित्यभिधीयते । तद्धेतुभूतं यत् कर्म पौष्टिकं तदिहोच्यते" स्मृतिदुर्गभञ्जनः ।

पौष्टी स्त्री पुरोर्न्द्रस्य स्त्रीभेदे भा० आ० ६४ अ० ।

पौष्ण त्रि० पुषा देवताऽस्य तस्येदं वा अण् षणन्तत्वात् उपधालोपः। १पूषदेवताके चर्वादौ २रेवतीनक्षत्रे न० ३पूषसम्बन्धिनि त्रि० स्त्रियां ङीप्।

पौष्य न० पुष्येण निर्वृत्तः तस्येदं वा अण्। १पुष्यसाध्ये २मद्यभेदे स्त्री। ३कुसुमसम्बन्धिमात्रे त्रि० स्त्रियां ङीप्। ४पाटलिपुत्रनगर्यां स्त्री ङीष् शब्दरत्ना०।

पौष्य पु०करवीरपुराधिपे पूष्णः पुत्रे १नृपभेदे तत्कथा "पुष्णः पुत्रोऽभवत् पौष्यः सर्वशास्त्रार्थपारगः" कालिकापु०। उतङ्केनर्षिणा गुरुदक्षिणार्थं याचिते तस्मै कुण्डलदातरि २नृपभेदे भा०आ०६अ०। तदधिकृत्य कृतो ग्रन्थः अण्। भा० आ० पर्वान्तर्गते ३पर्वभेदे न०।

प्याट् अव्य० प्याय–वा० डाटि। सम्बोधने अमरः।

प्याय वृद्धौ भ्वा०आ०अक०सेट्। प्यायते, अप्यायि–अप्यायिष्ट इदित् ओदिच्च पीनः।

प्यायस्थूण पु० गोत्रप्रवर्त्तकभेदे।

प्युक्ण न० अपि–उक्ण–वा० नक् अमेरक्लोपः। १क्षारयुक्ते २अजगरसर्पे कर्मणि च कात्या०श्रौ० १५।२।२१ कर्के।

प्युष उत्सर्गे चु०उभ०सक०सेट्। प्योषयति ते। अपुप्युषत् त

प्युष विभागे दाहे च दि० पर० सक० सेट्। प्युष्यते इदित् अप्युषत् अप्यौषीत् पुषोष। [अप्योषीत् पुषोष।

प्युस विभागे दिवा०पर०सक०सेट्। प्युस्यते इदित् अप्युसत्

प्यै वृद्धौ भ्वा०आ०अक०अनिट्। प्यायते अप्यास्त।

प्र अव्य०प्रथ–ड। १आरम्भे २गतौ ३उत्कर्षे ४प्राथम्ये ५सर्वतोभावे ६उत्पत्तौ, ७ख्यातौ ८प्रशंसायां च पुरुषोत्तमः। अस्य क्रियायोगे उपसर्गत्वम्। गतित्वञ्च। अस्यार्थभेदोदाहरणानि गणरत्नटी० उक्तानि यथा

"प्र आदिकर्मदीर्घेशभृशसम्भवतृप्तियोगशुश्रियक्तीच्छाशान्तिपूजाप्रदर्शनेषु" प्रयातः। प्रबालभूषिकः प्रभुर्दैवस्य। प्रवदन्ति दायादाः। हिमवतो गङ्गा प्रभवति। प्रभुक्तमन्नम्। प्रोषितः। प्रसन्नं जलम्। प्रशक्तः। प्रार्थयते। प्रशान्तोऽग्निः। प्राञ्जलिः। प्रबालम्। प्रलोकयति"।

प्रउग न० प्राग्युगस्य पृषो०। १प्रागवर्त्तिनि युगे ईषदन्तरे कात्या० ७।६।५। कर्के। तत्र चीयमानस्याग्नेः प्रउगचित्संज्ञा कात्या० १६।५।६। २यज्ञविशेषे प्रउगसंज्ञकस्यैवयायै "यजु०१५।११। "प्रउगं शंसति निष्केवल्यं शंसति" सा०स०भाष्यधृता श्रुतिः "प्रउगनिष्केवल्यशब्दौ यज्ञविशेषनामनी" इत्युक्त्वा "अप्रगीतमन्त्रसाध्या स्तुतिः यज्ञमिति भाष्ये यज्ञशब्दार्थमाह भाष्यकृत्।

प्रकङ्कत पु० १प्रकृष्टविषे २प्रकृष्टगमने सर्पभेदे वृ०-१।१६।५

प्रकट त्रि० प्र+कट–अच्। स्पष्टे।

प्रकटित त्रि० प्र+कट–क्त। प्रकाशिते हेमच०।

प्रकण्व पु० प्रकृष्टाः कण्वा यत्र। कृष्यभिज्ञत्वात् न सुट्। देशभेदे सि०कौ०। कृषौतु सुट् प्रस्कण्व इत्येव।

प्रकम्पन पु० प्र+कपि–णिच्–युच्। १वायौ "प्रकम्पनेनानु चकम्पिरे सुराः" माघः। २नरकभेदे च शब्दरत्ना०। ३प्रकम्पनकारके त्रि०।

प्रकर पु० प्र+कृ–भावे अप्। १समूहे २व्याप्तिक्षेपे च। कर्मणि अप्। ३प्रकीर्णे पुष्पादौ त्रि०। ४अगुरुचन्दने न० मेदि०

प्रकरण न० प्र+कृ–ल्युट्। १प्रस्तावे २अभिनेयनायकादिके दृश्यकाव्यभेदे हेमच०। ३अन्यस्यस्यो ४एकार्थप्रतिपादकग्रन्थांशे च त्रिका०। नाटकादिनी दश दृश्यकाव्यरूपकाणि विभज्य सा०द० तल्लक्षणमुक्तं यथा

"भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्। शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथ वा वणिक्। सापाय धर्मकामार्थपरो धीरप्रशान्तकः"। विप्रनायकं यथा मृच्छकटिकम्। अमात्यनायकं मालतीमाधवम्। वणिङ्नायकं पुष्पभूषितम्। "नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्। तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः। कितवद्यूतकारादिविटचेटकसङ्कुलः"। कुलस्त्री पुष्पभूषिते। वेश्या तरङ्गदत्ते द्वे अपि मृच्छकटिके। अस्य नाटकप्रकृतित्वात् शेषं नाटकवत्"। कर्त्तव्यस्य इतिकर्त्तव्यताकाङ्क्षया वचनं प्रकरणम् इति शबरभाष्योक्ते ५अर्थे च "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्" जै० ३।३।१०५। तत्र विनियोगसाधने तस्य श्रुतिलिङ्गवाक्यबाध्यत्वं स्थानसमाख्ययोर्बाधकत्वञ्च स्थितम्"। "श्रुतिर्द्वितीया चमता च लिङ्गं वाक्यं पदान्येव तु संहतानि। सा प्रक्रिया या कथमित्यपेक्षा स्थानं क्रमो योगबलं समाख्या" पार्थसारथिमिश्रः। शास्त्रसिद्धान्तप्रतिपादके ६ग्रन्थभेदे "अस्य च च वेदान्तप्रकरणत्वात्" वेदान्तसा०।

प्रकरणसम पु०गौतमोक्ते सत्प्रत्यवस्थानपर्य्याये १हेत्वाभासभेदे "यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः" गौ०सू०। "क्रमप्राप्तं प्रकरणसमं लक्षयति। स हेतुः स्वसाध्यस्य परसाध्याभावस्य वा निर्णयार्थमपदिष्टः प्रयुक्तः प्रकरणसम उच्यते स क इत्याकाङ्क्षायामाह यस्मात् प्रकरणचिन्तेति करणं "पक्षप्रतिपक्षाविति" भाष्यं

साध्यतदभावन्यायेति तदर्थस्तथा च निर्णयार्थं हेतुर्यत्र निर्णयं जनयितुमशक्तस्तुल्यबलेन परेण प्रतिबन्धात् किन्तु धर्मिणः साध्यवत्त्वं तदभावत्त्वं वेति चिन्तां जिज्ञासां प्रवर्त्तयति स प्रकरणसमः। यद्वा प्रकृष्टं करणं लिङ्गं परामर्शो वा को हेतुरनयोः साधकः एतयोः कः परामर्शः प्रमेति वा यत्र जिज्ञासा भवतीत्यर्थः। यच्चादित्यादि वस्तुस्थितिमात्रं लक्षयन्तु तुल्यबलविरोधिपरामर्शकालीनपरामर्शविषयत्वं स्वसाध्यपरामर्शकालीनतुल्यबलविरोधिपरामर्शो वा। विरोधिपरामर्शस्य च हेतुनिष्ठत्वमेकज्ञानविषयत्वसम्बन्धेन अन्यथा हेतोर्दुष्टत्वं न स्यात्। अयञ्च दशाविशेषे दोषः इत्यतः सद्धेतोरपि विरोधिपरामर्शकाले दुष्टत्वमिष्टमेवेत्यवधेयम्" दीधितिः।

२जातिरूपासदुत्तरभेदे गौ० ५।१।१६।८८ सू०।

"उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः" सू०

"उभयसाधर्म्यात् अन्वयसञ्चारादितरेकसञ्चारादा प्रक्रिया प्रकर्षेण क्रिया साधनं विपरीतसाधनमिति फलितार्थः तत्सिद्धेस्तस्य पूर्वमेव सिद्धेः तथाचाधिबलत्वेनारोपितप्रमाणान्तरेण बाधेन प्रत्यवस्थानं प्रकरणसमः यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते नैतदेवं श्रावणत्वेन नित्यत्वसाधकेन बाधात् बाधादेशनाभासा चेयम्। इ०। "प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः" सू०। अत्रोत्तरमाह प्रतिपक्षादिपरीतसाध्यसाधकत्वेनाभिमताच्छ्रावणत्वादितः प्रकरणसिद्धिद्वारा सदीयसाध्यस्य यः प्रतिषेधः त्वया क्रियते तस्यानुपपत्तिः कुतः प्रतिपक्षोपपत्तेः स्वत्पक्षापेक्षया प्रतिपक्षस्य सदीयपक्षस्योपपत्तेः साधनात्। अयमाशयः श्रावणत्वेन पूर्वं नित्यत्वस्य साधनाद्यो बाध उच्यते स नोपपद्यते पूर्वं साधितस्य बलवत्त्वाभावात् कदाचित् कृतकत्वेनानित्यत्वस्यापि पूर्वं साधनादिति स्वत्पक्षप्रतिषेधोऽपि स्यात्" दीधितिः।

प्रकरणी न० नाटिकाभेदे "नाटिकैव प्रकरणी स्यात्र वाहादिनायका। सम्भवंशजा नेतुर्भेदे यत्र च नायिका" सा०द०

प्रकर्ष पु० प्र+कृष-घञ्। १उत्कर्षे २प्रकृष्टतया कर्षणे च।

प्रकर्षण न० प्र+कृष-ल्युट्। १उत्कर्षे २आकर्षणे च।

प्रकलविद् पु० प्रकलां कलां वेत्ति विद्-क्विप् पृषो० हुस्वः। १वणिग्जने निरु०६।६। २अज्ञातरि त्रि०ऋ०७।८८।१५भा०

प्रकाण्ड पु०प्रकृष्टः काण्डः प्रा०त०। वृक्षस्य मूलादारभ्य शाखान्ते भागे। २प्रशस्ते न०। ३विटपे पु० मेदि०।

प्रकाण्डर पु० प्रकाण्ड+अस्त्यर्थे बा० र। वृक्षे शब्दच०।

प्रकाम त्रि०प्रगतः कामम् प्रा०स०। १यथेष्टे अमरः। प्रा०ब०। २प्रकृष्टकामके त्रि०। ३देवभेदे पु०यजु० ३०।१२।

प्रकामम् अव्य०प्र+कम-णमुल्। अत्यर्थे अनुमतौ च अमरः।

प्रकामोद्य पु० देवभेदे यजु०३०।६

प्रकार पु० प्र+कृ+घञ्। १भेदे २आदरे च अमरः। ३विशिष्टज्ञाने विशेषणतया भासमाने पदार्थे "स्वव्यधिकरणप्रकारावच्छिन्ना या या विषयता तदनिरूपकत्वम् सर्वांशे भ्रमभिन्नत्वमिति" मदाधरः।

प्रकारता स्त्री प्रकारस्य भावः तल्। १विषयताभेदे ज्ञायमानविशेषणप्रतियोगिकसंसर्गावच्छिन्नविषयत्वे।

प्रकालन त्रि० प्रकालयति प्र+कालि ल्यु। १हिंसके २सर्दभेदे पु० भा०आ०७५ अ०। भावे ल्युट्। ३मारणे न०।

प्रकाश पु०प्र+काश-घञ्। १ज्ञातमे २विकाशे च। कर्त्तरि अच्। ३विकाशयुक्ते त्रि०अमरः। प्रकाशश्च सत्त्वज्ञानतेजःसाधारणः यथोक्तम् "जड़प्रकाशायोगात् प्रकाशः" सां०सू० "वैशेषिका आहुः। प्रागप्रकाशरूपस्य जड़स्यात्मनो मनःसंयोगाज्ज्ञानाख्यप्रकाशो जायत इति तच्च। लोके जड़स्याप्रकाशस्य लोष्टादेः प्रकाशोत्पत्त्यदर्शनेन तद्योगात्। अतः स्फट्यादिवत् प्रकाशस्वरूप एव पुरुष इत्यर्थः। तथा च स्मृतिः "यथा प्रकाशतमसोः समन्वयो नोपपद्यते। तद्वदैक्यं न संसर्ग प्रपञ्चपरमात्मनोः"। इति। "यथा दीपः प्रकाशात्मा ह्रस्वो वा यदि वा महान्। ज्ञानात्मानं तथा विद्यात् पुरुष सर्वजन्तुषु" इति च। प्रकाशत्वं च तेजःसत्त्वचैतन्येष्वनुगतमखण्डोपाधिरनुगतव्यवहारादिति। ननु प्रकाशस्वरूपेऽपि तेजोवद्धर्मधर्मिभावोऽस्ति न वा तत्राह सां०प्र०भा० "निर्गुणत्वान्न चिद्धर्मौ" सू० "पुरुषस्य प्रकाशरूपत्वे सिद्धे तद्धर्मत्वज्ञानेनान्वयव्यवहारोपपत्तौ प्रकाशात्मकधर्मकल्पनागौरवमित्यपि बोध्यम्। तेजसश्च प्रकाशाख्यरूपविशेषाग्रहेऽपि स्वार्थपुरस्कारेण ग्रहात् प्रकाशतेजसोर्भेदः सिद्ध्यति। आत्मनस्तु ज्ञानाख्यप्रकाशाग्रहकाले ग्रहणं नास्तीत्यतो लाघवाद्धर्मधर्मिभावमूल्य प्रकाशरूपमेवात्मद्रव्यं कल्प्यते। तस्य च न गुणत्वम् संयोगादिमत्त्वात् अनाश्रितत्वाच्चेति। तथा च स्मर्यते "ज्ञानं नैवात्मनो धर्मो न गुणो वा कथञ्चन। ज्ञानस्वरूप एवात्मा नित्यः

पूर्णः सदा शिवः" सां०प्र०भा०। वैवस्वतमनोः २पुत्रभेदे हरिवं०७अ०।

प्रकाशक त्रि० प्रकाशयति प्र+काश-णिच् ण्वुल्। १प्रकाशकारके सूर्य्यादौ सांख्यमतसिद्धे २सत्त्वगुणे च "तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्" गीता।

प्रकाशकज्ञात पु० प्रकाशकस्य पूर्वं ज्ञाता। कुक्कुटे शब्दच० तस्य प्रथमं प्रकाशकसूर्य्यज्ञातृत्वात्तथात्वम्।

प्रकाशन त्रि० प्रकाशयति प्र+काश-णिच्-ल्यु। १प्रकाशकारके २विष्णौ पु०। "नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः" विष्णुस०।

प्रकाशात्मन् पु०प्रकाश आत्मा स्वरूपमस्य। १विष्णौ "प्रकाशात्मा प्रतापनः" विष्णुस०। २व्यक्तस्वभावे त्रि०।

प्रकाशित त्रि०प्र+काश+णिच्-कर्मणि क्त। १प्रकटिते हेम० प्र+काश-कर्त्तरि क्त। २प्रकाशयुते त्रि०। भावे क्त। ३प्रकाशे न०।

प्रकाश्य त्रि० प्र+काशि-कर्मणि यत्। १प्रकाशनीये श्यामोऽयमर्णशुक्लादौ नवके न० काशी० १० अ०। नवनवकशब्दे ३६८८ पृ० दृश्यम्।

प्रकीर्ण न० प्र+कॄ-कर्मणि क्त। १चामरे जटा०। २ग्रन्थविच्छेदे त्रिका०। ३विक्षिप्ते ४मिश्रिते विभिन्नजातीये त्रि०। ५पूतिकरञ्जे पु० राजनि०। भावे क्त। भिन्नजातीयानां ६मिश्रणे ७विक्षेपे ८विस्तारे च न०। स्वार्थे क। तत्रार्थे। अनुक्तप्रायश्चित्तविशेषे पातकविशेषे पातकशब्दे ४२६६ पृ० विष्णुवाक्यम् दृश्यम्। "अनुक्तं तत्प्रकीर्णकम्" अनुक्तमनुक्तनिष्कृतिकं पापं प्रकीर्णकमित्यर्थः। "अनुक्तनिष्कृतीनां तु पापानामपलत्तये। शक्तिज्ञावेक्ष्य पापञ्च प्रायश्चित्तं प्रकल्पयेत्" विश्वामित्रः "प्रकीर्णपातके ज्ञात्वा गुरुत्वसमय लाघवम्। प्रायश्चित्तं बुधः कुर्य्यात् ब्राह्मणानुमतः सदा" विष्णुः। "क्रयविक्रयदुष्टभोजनप्रतिग्रहेषु अनादिष्टप्रायश्चित्तेषु चान्द्रायणं प्राजापत्यं वा" शङ्खलिखितौ। भट्टिकाव्ये नानाजातीयप्रत्ययोदाहरणबोधककाण्डं प्रकीर्णकाण्डम्। संज्ञायां कन्। लुरङ्गमे पुंस्त्री० स्त्रियां जातित्वात् ङीष्।

प्रकीर्य्य पु० प्रकीर्य्यतेऽसौ प्र+कॄ-क्यप्। (खाटाकरमचा) १करञ्जभेदे अमरः। २धृतकरञ्जे (रीठाकरमचा) राजनि०। ३विक्षेप्ये ४व्याप्ये च त्रि०।

प्रकुञ्च पु० "प्रकुञ्चः षोडशी विश्वं पलमेवात्र कीर्त्यते" भावप्र० उक्ते पलरूपे मानभेदे। "चूर्णप्रकुञ्चम्" इत्यादि सुश्रुतः

प्रकुल न० प्र+कुल-कर्त्तरि क। प्रशस्तदेहे त्रिकाण्डशेषः।

प्रकूष्माण्डी स्त्री दुर्गायां हेमच०।

प्रकृत त्रि० प्र+कृ-क्त। १अधिकृते २आरब्धे ३प्रकरणप्राप्ते च। ४ऋषिभेदे पु०। प्रकृतस्यार्षगोत्रापत्यम् अश्वा० फञ्। प्राकृतायन तद्गोत्रापत्ये पुंस्त्री०।

प्रकृति स्त्री प्र+कृ-कर्त्तरि क्तिच् भावादौ क्तिन् वा। १स्वभावे २योनौ ३लिङ्गे ४स्वाम्यमात्यादौ राज्याङ्गे अमरः। ५गिल्लिनि हेम०। ६शक्तौ ७योषिति शब्दर०। ८परमात्मनि धरणिः। १०आकाशादिभूतपञ्चके ११करणे १२गुणे १३जन्तौ च १४एकविंशत्यक्षरपादके छन्दोभेदे। १५मातरि १६प्रत्ययनिमित्ते शब्दभेदे तल्लक्षणं शब्द०प्र० उक्तं यथा "स्वोपस्थाप्यपदार्थस्य बोधने यस्य निश्चयः। तत्त्वेन हेतुरथवा प्रकृतिः सा तदर्थिका। तत्त्वेन यच्चिश्चयत्वेन स्वोपस्थाप्यपदार्थस्यान्वयबोधं प्रति स्वाव्यवहितोत्तरत्वसंसर्गेण यादृशशब्दवत्तानिश्चयत्वेन हेतुत्वं तादृश एव शब्दस्तथाविधार्थे प्रकृतिरिति तु पर्य्यवसितार्थः। बहुगुडो द्राक्षेत्यादौ बहुजाद्यर्थस्यान्वयबोधं प्रति गुडादिपदधर्मिकबहुजादिनिश्चयत्वेन न हेतुत्वमपि तु सुबादिधर्मिकबहुगुडादिपदनिश्चयत्वेन अन्यथा केवलादपि बहुगुडादिशब्दात् द्राक्षादौ बहुजाद्यर्थस्यान्वयबोधापत्तेरिति न तत्र प्रसङ्गः"। "निरुक्ता प्रकृतिर्द्वेधा नामधातुप्रभेदतः। यत् प्रातिपदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते। निरुक्ता न तु सांख्यानामिव जगदुपादानभूता। यच्च पाणिनिप्रभृतिभिः प्रातिपदिकं प्रकृतिरित्युक्तं तदपि नाम्नो नातिरिच्यते नातो विभागन्यूनता"। वैयाकरणमते तल्लक्षणन्तु शब्दार्थरत्नेऽस्माभिरुक्तं यथा एवं प्रकृतिप्रत्ययादिसमुदायरूपपदस्वरूपे तद्विभागे च दर्शिते इदानीं तदवयवरूपप्रकृतिप्रत्ययस्वरूपविभागौ प्रदर्श्येते। तत्र प्रकृतिर्नाम अर्थावबोधहेतुः प्रत्ययविधानावधिभूतः शब्दविशेषः सर्वेषामेव च प्रत्ययानां प्रकृतिं निमित्तीकृत्यैव विधानात्। प्रत्ययानाञ्च प्रत्ययकत्वरूपेणैव निवेशः न तु वक्ष्यमाणप्रत्ययत्वेन तेन नान्योन्याश्रयः। अवधित्वञ्च पूर्वापरत्वरूपं ग्राह्यं तेन बहुजादेर्निमित्तीकृतौ नाप्रसङ्गः। वस्तुतस्तु सिद्धान्ते वृत्तिशब्दानां समुदायशक्तिस्वीकारात् सङ्घातादीनां निरर्थकत्वाच्च तत्र प्रकृतिप्रत्ययादिविभागः। अत एव भाष्ये "तावेव सुप्तिङौ यौ ततः परौ नैव प्रकृतिरादेशेति" सुप्तिङन्तयोरेव प्रत्ययत्वमिति कृत्य।

ततोविधानावधेः यौ परौ तावेव सन्निहितौ या च तयोराद्या विधानावधिभूता सैव प्रकृतिरिति तदर्थः। एतदभिप्रायेणैव हरिणा "यः शब्दः स्वेतरस्यार्थे स्वार्थस्यान्वयबोधने। यदपेक्षस्तयोः पूर्वा प्रकृतिः प्रत्ययः परः" इति प्रकृत्यादिलक्षणमुक्तम्। अत्र च पूर्वत्वं बोधकशब्दविधानावधित्वमेव बोध्यं भाष्यैकवाक्यत्वात् नत्वेतत्कारिकोपात्तपूर्वापरत्वं तथासति पचतीत्यादौ तिङादेरेव धात्वर्थे स्वार्थप्रकारकान्वयबोधजनकत्वस्वीकारात् तत्रातिव्याप्तेः। एवञ्च निरुक्तपूर्वत्वरूपलक्षणेनैव प्रसङ्गातिप्रसङ्गादिवारणसम्भवे प्रकृतिप्रत्ययोरर्थबोधकत्वसाकाङ्क्षत्वद्योतनायैव यः शब्द इत्यादिकथनं बोध्यमेवञ्च यस्यार्थे इत्यत्र विशेष्यतया विशेषणतया वान्वयबोधने इत्यर्थः तेन सिद्धान्ते तिङर्थप्रकारकान्वयबोधेऽपि न क्षतिः। तथा च तदर्थान्वितस्वार्थबोधने तदपेक्षत्वे सति तद्विधानावधिभूतत्वं तत्प्रकृतित्वमिति फलितम्। एवञ्चावयवशक्तिस्वीकारेऽपि वक्तृजादावतिप्रसङ्गादिरपि नोद्देति वक्तृजादेः प्रकृतिविधानावधित्वाभावात् अवधित्वस्य पूर्वापरत्वरूपस्य निवेशाच्च। अत एतत्पक्षे भाष्ये सन्निहशब्दौ प्रत्ययान्तरव्याप्युक्तकाङ्क्षितौ द्रष्टव्यम्। तथा शेखरकारेणापि प्रत्ययविधानोद्देश्यतावच्छेदकाक्रान्तत्वमेव प्रकृतित्वमित्यभिप्रेत्य पूर्वसिद्धवस्तुन एव उद्देश्यत्वसम्भवात् पूर्वत्वमर्थात् वक्तृजादेरपि सुप उद्देश्यत्वाच्च किञ्चिदूनमवतरतीति। इदञ्च प्रकरोति प्रत्ययं बोधयतीत्युत्पत्तिसत्त्वात् प्रकृतिशब्दो योगरूढ इति बोध्यम्"। १७उपादानकारणे "प्रकृतिश्च दृष्टान्तानुपरोधात्" वा०सू० "सतो ऽविद्यमाना वा प्रकृतिः परिणामिनो" हरिका०। १८उपदिष्टवाँल्लुके कर्मभेदे। तदेतत् सप्तप्रकारं निर्णीतं यथा "ननु का प्रकृतिः का विकृतिरिति चेत् उच्यते यत्र कर्त्तव्यं सर्वं प्रकर्षेण कर्मान्तरैरपेक्ष्येणोपदिश्यते सा प्रकृतिः यत्र विशेषरूपमेव कर्त्तव्यं श्रुत्योपदिश्यते इतरत् सर्वं कर्मान्तरादतिदिश्यते सा विकृतिः। सचातिदेशः प्रत्यक्षवचनाद्वा सामर्थ्याद्वा लिङ्गाद्वाऽवगन्तव्यः। तत् सर्वं सप्तमाष्टमाध्यायाभ्यां बहुधा विचारितम्। प्रकृतिश्च द्विविधा मूलप्रकृतिरवान्तरप्रकृतिश्चेति। सर्वात्मना कर्मान्तरनिरपेक्षा मूलप्रकृतिः कतिपयेष्वङ्गेषु कर्मान्तरं चापेक्षते सा च कैश्चित् कर्मभिरपेक्षणीया भवति सैवमवान्तरप्रकृतिः। तत्र तिस्रोमूलप्रकृतयः ताश्चाष्टमाध्यायस्य प्रथमपादे तृतीयाधिकरणस्य द्वितीयवर्णके विचारिताः। "दर्शपूर्णमासयोर्नानां मूलप्रकृतिता न हि। अस्ति वा नालौकिकत्वादियत्तानवधारणात्। लोकवत् सन्निपत्योपकारिद्वयश्रुतेः। इयत्तायानिश्चितत्वान्मूलप्रकृतिता त्रिषु। अलौकिकत्वेनैतावद्भिरङ्गैः सम्भूय उपकार इति निश्चेतुमशक्यत्वात् दृष्टादीनां नास्ति मूलप्रकृतित्वमिति चेत् कथं लौकिकसदृशत्वात्। यथा लोके भुञ्जिक्रियायामोदनः करणं तस्य सन्निपत्योपकारिण्यः शाकसूपादयः, दूरादुपकारिण्यः पीठप्रदीपादयः। तथा भावनायां यागः करणम् अवघातादयः सन्निपातिनः, प्रयाजादयः दूरादुपकारिण्यः। अतो नात्यन्तिकमलौकिकत्वम्। इयत्ता लौकिके यथा प्रत्यक्षेण निश्चीयते तथा श्रौते श्रुत्या निश्चीयतां तथादिदर्शपूर्णमासयोर्नानां मूलप्रकृतित्वमस्ति"।

१९सत्त्वरजस्तमसां साम्यावस्थायां साम्यावस्थोपलक्षिते सत्त्वादिगुणे। "सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम्। साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता। केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः। एतदेव प्रजासृष्टिं करोति विकरोति च" भारते ४अ०।

"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः" सा०सू०। "तेषां सत्त्वादिद्रव्याणां या साम्यावस्थाऽन्यूनानतिरिक्तावस्थान्यूनाधिकभावेनासंहतावस्थेति यावत् सकार्य्यावस्थेति निष्कर्षः। सकार्य्यावस्थोपलक्षितं गुणसाम्यं प्रकृतिरित्यर्थः। यथाश्रुते वैषम्यावस्थायां प्रकृतिनाशप्रसङ्गात् "सत्त्वं रजस्तम इति एषैव प्रकृतिः सदा। एषैव संसृतिर्जन्तोरस्याः पारे परं पदम्" इत्यादि स्मृतिभिर्विरोधाच्चैव प्रकृतित्ववचनाच्च। सत्त्वादीनामनुग्रहाय सामान्येति। पुरुषव्यावर्त्तनाय गुणेति। महदादिव्यावर्तनाय चोपलक्षितान्तमिति। महदादयोऽपि हि कार्यसत्त्वादिरूपाः पुरुषोपकरणतया गुणाश्च भवन्तीति। तदत्र प्रकृतेः स्वरूपमेवोक्तम्। "अस्या विशेषस्तु पश्चाद्वक्ष्यते" प्र०भा०। "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृति र्न विकृतिः पुरुषः" सां० का०। "संक्षेपतो हि शास्त्रार्थस्य चतस्रो विधाः। कस्यिदर्थः प्रकृतिरेव, कस्यिद् विकृतिरेव, कस्यिच्च प्रकृतिविकृतिः कस्यिदुभयरूप इति। तत्र का प्रकृतिरेवेत्यत्र चोक्तम् मूलप्रकृतिरविकृतिरिति प्रकरोतीति प्रकृतिः प्रधानं सत्त्वरज-

साम्यावस्था सा अविकृतिः। प्रकृतिरेवेत्यर्थः कस्मादित्यत उक्तम् मूलेति मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः विश्वस्य कार्यसंघातस्य सा मूलं नत्वस्या मूलान्तरमस्तीति भावः। कतमाः पुनः प्रकृतिविकृतयः कियत्यस्तत्येवमत उक्तम् महदाद्याः प्रकृतिविकृतयः सप्तेति प्रकृतयश्च ता विकृतयश्च ता इति। तथा हि महत्तत्त्वमहङ्कारस्य प्रकृतिर्विकृतिश्च मूलप्रकृतेः। एवमहङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणाञ्च प्रकृतिर्विकृतयश्च महतः। एवं पञ्चतन्मात्राणि भूतानामाकाशादीनां प्रकृतयो विकृतयश्चाहङ्कारस्य। अत्र विकृतिरेव कियती चेत्यत उक्तं षोड़शकस्तु विकार इति। षोडशसंख्यापरिमितो गणः षोड़शकः तुशब्दोऽवधारणे भिन्नक्रमश्च पञ्चमहाभूतान्येकादशेन्द्रियाणि चेति षोड़शको गणो विकार एव "न प्रकृतिरिति। यद्यपि च पृथिव्यादीनामपि गोघटवृक्षादयो विकाराः एवं तद्विकारभेदानां दध्यक्षुरादयस्तस्यापि गवादयो बीजादयो वा न पृथिव्यादिभ्यस्तत्त्वान्तरं तत्त्वान्तरोपादानत्वञ्च प्रकृतित्वमिहाभिप्रेतमिति न दोषः सर्वेषां गोघटादीनां स्थूलेन्द्रियग्राह्यता च समेति न तत्त्वान्तरत्वम्। अतुभयरूपमुक्तं तदाह न प्रकृतिर्न विकृतिः पुरुषः" इति त०कौ०। शब्दस्पर्शविहीनं तद्रूपादिभिरसंयुतम्। त्रिगुणं तत् जगद्योनिः" स्मृतिः। तद्गुणाश्रयाः कार्यभेदाः तद्धर्माश्च सा०सू० भाष्यादुक्ता यथा "तनः प्रकृतेः" सा० सू० "ततो महत्तत्त्वात् कार्यात् कारणतया प्रकृतेरनुमानेन बोध इत्यर्थः। अन्तःकरणसामान्यस्यापि कार्यत्वं तावदेकदा पञ्चेन्द्रियज्ञानानुत्पत्त्या मध्यममरिमाश्रयतया देहादिवदेव सिद्धं श्रुतिस्मृतिप्रमाणाच्च। तस्य च प्रकृतिकार्यत्वेऽयं प्रयोगः। सुखदुःखमोहधर्मिणी बुद्धिः सुखदुःखमोहधर्मकद्रव्यजन्या कार्यत्वे सति सुखदुःखमोहात्मकत्वात् कान्तादिवदिति कारणगुणानुसारेणैव कार्यगुणौचित्यं यावानुकूलतर्कः श्रुतिस्मृतयोऽपीतिमन्तव्यम् भा० "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्" सू० कारणानुमापकत्वाच्चयगमनाद्यत्र लिङ्गं कार्यजातम् न तु महत्तत्त्वमात्रमत्र विवक्षितं हेतुमत्त्वादीनामखिलकार्यसाधारण्यात्। "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्। सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" इति कारिकायामत एव व्यक्ताख्यं सर्वं कार्यमेव लिङ्गमित्यायातम्। तथा च तल्लिङ्गं हेतुमत्त्वादिधर्मकमिति वाक्यार्थः। तत्र हेतुमत्त्वं कारणवत्त्वम् अनित्यत्वं विनाशिता प्रधानस्य या व्यापिता पूर्वोक्ता तद्विपरीतत्वमव्यापित्वम्। सक्रियत्वमध्यवसायादिरूपावयवकार्यकारित्वम्। प्रधानस्य तु सर्वक्रियासाधारण्येन कारणत्वान्न कार्यैकदेशमात्रकारित्वम्। न च क्रिया कर्मैव वक्तुं शक्यते प्रकृतित्वोभात् सृष्टिस्वरूपेण प्रकृतेरपि कर्मवत्तया सक्रियत्वापत्तेरिति। अनेकत्वं सर्गभेदेन भिन्नत्वम्। सर्गेष्वसाधारण्यमिति यावत्। न पुनः सजातीयानेकव्यक्तिकत्वम् प्रकृतावतिव्याप्तेः प्रकृतेरपि सत्त्वाद्यनेकरूपत्वात् "सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वात्" इत्यागमिकत्वादिति। आश्रितत्वं चावयवेष्विति सा०प्र०भा०। एतद्विपरीतत्वमेव तद्धर्मत्वम्। २०प्रकृत्यंशदेवीपञ्चकरूपशक्तिभेदे "गणेशजननी दुर्गा१ राधा२ लक्ष्मी:३ सरस्वती४। सावित्री५ च सृष्टिविधौ प्रकृतिः पञ्चमी स्मृता"। प्रकृतिशब्दनिरुक्तिर्यथा "प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः। सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्त्तिता। सृष्टौ प्रकृष्टे सत्त्वे च प्रशब्दो वर्त्तते श्रुतौ। मध्यमे रजसि कृश्च तिशब्दस्तामसः स्मृतः। त्रिगुणात्मस्वरूपा या सर्वशक्तिसमन्विता। प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते। प्रथमे वर्त्तते प्रश्च कृतिश्च सृष्टिवाचकः। सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्त्तिता"। तथा आविर्भूतिः स्वरूपञ्च यथा "प्रोगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः। पुमांश्च दक्षिणार्द्धाङ्गात् वामार्द्धात् प्रकृतिः स्मृता। सा च ब्रह्मस्वरूपा च यथा नित्या सनातनी। यथात्मा च यथाशक्तिर्यथाम्बो दाहिका स्मृता। अत एव हि योगीन्द्रः स्त्रीपुंभेदं न मन्यते। सर्वं ब्रह्ममयं ब्रह्मन्! यत्पश्यति नारद!। स्वेच्छामयं स्वेच्छया च श्रीकृष्णस्य विग्रहयो। आविर्बभूव सहसा मूलप्रकृतिरीश्वरी। तथा श्रेया पञ्चविधा सृष्टिकर्त्रीति भेदतः। सर्वाः प्रकृतिसम्भूता उत्तमाधममध्यमाः। सत्त्वांशाश्चोत्तमा ज्ञेयाः सुशीलाश्च प्रतिव्रताः। मध्यमा राजसांशाश्च भोग्याः प्रकीर्त्तिताः। सुखसम्भोगवत्याश्च स्वकार्ये तत्पराः सदा। अधमास्तामसांशाश्च कलहकुशलस्त्रियः। दुर्भगाः कुत्सिता मूर्खाः कलत्राः कलहप्रियाः। पृथिव्यां कुत्सिता याश्च स्वर्गे चाप्सरसां गणाः। प्रकृतेस्तामसांशाताः पुंश्चल्यः परिकीर्त्तिताः। एवं निगदितं सर्वं प्रकृतेः परिकीर्त्तनम्"।

इति स्त्रीमात्रस्य प्रकृत्यंशतया प्रकृतिवाचकशब्दस्यैव प्राशुत्कीर्त्यत्वं निर्णीतं यथा

आदौ राधां समुच्चार्य्य पश्चात् कृष्णं विदुर्बुधाः। निमित्तमस्य मां भक्तं वद भक्तजनप्रिय !" श्रीनारायण उवाच 'निमित्तमस्य त्रिविधं कथयामि निशामय। जगन्मात्रा च प्रकृतिः पुरुषस्य जगत्पिता। गरीयसीति जगतां माता श्रुतिगुणैः पितुः। राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः। कृष्णराधेशगौरीति लोके न च कदा श्रुतः। प्रसीद रोहिणीचन्द्र ! गृहाणार्घ्यमिदं मम। गृहाणार्घ्यं मयादत्तं संज्ञया सह भास्कर !। प्रसीद कमलाकान्त ! गृहाण मम पूजनम्। इति दृष्टं सामवेदे कौथुमे सुनिशामय !। राशब्दोच्चारणादेव स्फीतो भवति माधवः। धाशब्दोच्चारतः पश्चाद्धावत्येव समभ्रमः। आदौ पुरुषमुच्चार्य्य पश्चात् प्रकृतिमुच्चरेत्। स भवेन्मातृगामी च वेदातिक्रमणे सुने !" ब्रह्मवैपु० जन्म० ख० ५० अ०।

प्रकृतिज त्रि० प्रकृत्या जायते जन–ड। १स्वभावजे। प्रकृतिरूपेण जायते जन–ड। प्रकृतिस्वभावरूपे सांख्यमतसिद्धे सत्त्वादिगुणे "गुणाः प्रकृतिजाश्चताः" गीता।

प्रकृतिधर्म पु० ६त०। सांख्यमतसिद्धे प्रकृतिधर्मभेदे स च प्रकृतिशब्दे हेतुमदनित्यादिविपरीतधर्मरूपेण दर्शितः। सम्प्रति तु "यत्र ह्यहं" प्रकृतिपुरुषयोः साधर्म्यवैधर्म्ये व्याख्यास्यामः। तद्यथा "उभावप्यनादी उभावप्यनन्तौ उभावप्यलिङ्गौ उभावपि नित्यौ उभावप्यपरौ उभौ च सर्वगताविति। एका तु प्रकृतिरचेतना त्रिगुणा बीजधर्मिणी प्रसवधर्मिण्यप्रमध्यस्थधर्मिणी चेति। बहवस्तु पुरुषाश्चेतनावन्तोऽगुणा अबीजधर्मिणोऽप्रसवधर्मिणो मध्यस्थधर्मिणश्चेति"।

प्रकृतिमण्डल न० ६त०। १राज्याङ्गेषु स्वाम्यमात्यादिषु २प्रजासमुदाये च रघुः ८।२ श्लोकव्या० मल्लिनाथः।

प्रकृतिवत् अव्य० प्रकृत्या तुल्यम् प्रकृति+वति। व्याकरणप्रसिद्धे आदिश्यमानस्य प्रकृतिभूतस्यानितुल्यकार्य्ये।

प्रकृत्यादि पु० प्रकृतिशब्द आदिर्यस्य। सर्वविभक्त्युपपद तृतीयानिमित्ते शब्दगणे स च गणः "प्रकृति प्राय गोत्र सम विषम द्विरोण पञ्चक साहस्र"। प्रकृत्या प्रायेण याज्ञिकः इत्यादि। आकृतिगणोऽयम्। तेन नाम्ना स्तुतीक्ष्णचरितेन दान्तः" भट्टिः इत्यादि।

प्रकृष्ट त्रि० प्र+कृष–क्त। उत्कर्षयुक्ते हेमच०।

प्रकृष्य त्रि० प्र+कृष–कर्मणि क्यप्। भूमिसंलग्नतया कर्षणीये "उलूखलमुभौ मूषः प्रकृष्यतः" कात्या० श्रौ० २४।५।२७। प्रकृष्यतः देशान्तरनयनेन प्रकर्षणीयः भूमिसंलग्नतया प्रेरणीयो न तु तत्पाठेनेति तदर्थः।

प्रकृति स्त्री प्र+कृप–भावे क्तिन्। उपकृतौ विद्यमानतायां कात्या० १।८।२२

प्रकेत त्रि० प्र+कित-णिच–अच्। १प्रकर्षेण ज्ञापके ऋ०१।११२।भा०। प्रकर्षेण कं सुखमीयतेऽनेन प्र–ई-वा०करणे क्त। २प्रकृष्टसुखसाधने यजु० १५।६० वेददीपः।

प्रकोथ पु० प्र+कुथ–पतितत्वे भावे घञ्। १प्रकृष्टपतने २संशोषे च "शीघ्रं स्रुतो हि रुद्रमांसतयोपनद्धः सर्वं प्रकोथमुपयात्यवदीर्य्यते च" सुश्रुतः।

प्रकोष्ठ पु० प्रगतः कोष्ठं प्रा०स०। कूर्परस्याधोभागस्थे मणिबन्धपर्यन्ते १हस्तावयवे २गृष्टहारपिण्डे च अमरः। गृष्ट्यन्तरप्रदेशभेदे सुकुटः।

प्रक्ख(च्च)र पु० प्रखर+पृषो०प्र+चर अच् वा। १अश्वतरीहेतौ शब्दमाला तत्र द्विधा पाठः। २कुक्कुरे ३अश्वतरे च ४अत्यन्ततीव्रे त्रि० मेदि०।

प्रक्रम पु० प्र+क्रम–भावे घञ्। १उपक्रमे अमरः २प्रथमारम्भे ३अवसरे मेदि० भग्नप्रक्रमः काव्यदोषभेदः। भावे ल्युट्। प्रक्रमण-तत्रार्थे प्रकर्षेण क्रमणे न०।

प्रक्रान्त त्रि० प्र+क्रम–क्त। १आरब्धे २प्रकरणप्राप्ते

प्रक्रिया स्त्री प्र+कृ–भावे श। १प्रकरणे "सा प्रक्रिया वा कर्मसित्यपेक्षा" पार्थसारथिमिश्रः। २अधिकारे नृपादीनां चामरव्यजनच्छत्रधारणादिव्यापारे च ३शब्दप्रयोगसाधनावस्थायाम् ४पक्षप्रतिपक्षयोः प्रवृत्तौ मौक्तिकस्य ५।१।१६ अमरसा०। [युक्ते त्रि०।

प्रक्लिन्न त्रि० प्र+क्लिद–कर्त्तरि क्त। क्लृप्ते जटा० २क्लुक्लोट०

प्रक्ल(क्ला)ण पु० प्र+कृण–भावे घञ् क्यप् वा। वीणादेः कणिते शब्दे अमरः।

प्रक्षाल त्रि० प्रक्षालयति क्षालि-अच्। शोधके प्रायश्चित्ते न० "परिपुष्टिका वैद्यसिकाख्यप्रक्षालास्त्रयैव च" (यतयः) भा० आत्म० ६२अ०। "अप्रक्षालाः (निष्कापतया) शोधकहीनाः" नीलकण्ठः। अत्र सुहितपुस्तके "परिपुष्टिका वैद्यसिकाख्यप्रख्यालास्त्रयैव च" इत्यपपाठः।

प्रक्षेप पु० प्र+क्षिप–भावे घञ्। १अर्पणे २स्वकृद्रव्यमध्ये अपरार्थांशनिवेशने च।

प्रक्ष्वेड्न पु० प्र+क्ष्वेड–ल्यु। नाराचास्त्रे हेमच०।

प्रख्या स्त्री प्र+ख्या–भावे अङ्। १ख्यातौ २उपमायां च

उत्तरपदस्थः बहु० । उपमावृत्तौ यथा वज्रप्रख्यः इत्यादि

प्रख्यात त्रि० प्र+ख्या--क्त । विख्याते उपरिष्टे ।

प्रख्यातवंशक पु० प्रख्यातो वंशो जनविता यस्य कप् । विख्यातपितृके अस्मत्पुत्रके हेमच० ।

प्रख्यास् पु०प्र+ख्या-असि 'बहुलं णिच्' इत्युक्तेर्न णित्तेन ख्यादेशः । प्रजापतौ उज्ज्वल० ।

प्रगण्ड पु० गडि--वदनैकदेशे अच् प्रकृष्टो गण्डः अवयवः मा०स० । १ऊर्ध्वरोपरिकक्षपर्य्यन्तभागे अमरः । दुर्गप्राकारभित्तौ २शूराणां निवेशनस्थाने च स्त्री गौरा० ङीष् । "सत्कारो यत्र लोकानां दूरादेवावबुध्यते । प्रगण्डी सा च विज्ञेया बहिःप्राकारसंज्ञिता । प्रक्षिधिस्तत्र यत्नेन कर्त्तव्यो भूतिमिच्छता । स एवाकाशरक्षीति ह्युच्यते शस्त्रकोविदैः" भा०टी०धृतवाक्यम् । "प्रगण्डीः कारयेत् सम्यगाकाशजननीस्तथा" भा० शा० ६६ अ० । "प्रगण्डोर्दुर्गप्राकारभित्तौ शूराणामुपवेशनस्थानानि । आकाशजननीस्तत्रैवैककक्षायां भित्तौ तत्त्राणां रक्षणभूतायां बाह्यार्थदर्शनार्थानि क्षुद्रछिद्राणि यद्द्वारा आग्नेयास्त्रगुलिकाः प्रक्षिप्यन्ते" नीलकण्ठः ।

प्रगतजानु(क) त्रि० प्रगते परस्परसंश्लिष्टे जानुनी यस्य वा कप् । असंहतजानुके पक्षौ यस्य जानुनोर्मध्ये महदन्तरालं तस्मिन् अमरः । युक्ते त्रि० ।

प्रगल्भ पु० प्रकृष्टो गल्भोऽस्य । १पर्वते राजनि० । २प्रकृष्टगल्भ-

प्रगल्भ त्रि० प्र+गल्भ-अच् । १प्रत्युत्पन्नमतौ २प्रतिभान्विते च अमरः । २नायिकाभेदे स्त्री तल्लक्षणादि नायिकाशब्दे ४०४१ पृ० दृश्यम् ।

प्रगल्भता स्त्री प्रगल्भस्य भावः तल् । १औद्धत्ये २उत्साहे च हेमच० । "निःशङ्कता प्रयोगेषु बुधैरुक्ता प्रगल्भता" उज्ज्वलनाम्युक्ते प्रयोगेषु १निःशङ्कत्वे च ४प्रतिभान्वितत्वे च ।

प्रगाढ़ त्रि० प्रकर्षेण गाढम् गाढ-क्त । १अत्यन्तभये २अत्यन्ते च अमरः । २दृढे भरतः ।

प्रगात्र त्रि० प्र+गै ष्ट्रन् । उत्तमगायके शब्दरत्ना० ।

प्रगाथ पु० प्र+गम्-घा० आधारे घञ् "छन्दसः प्रगाथेषु" निर्देशात् णि०नरयोर्लोपे उपधावृद्धिः । वेदे द्वे ऋचौ यत्र तिस्रः क्रियन्ते १तत्रार्थे विस्तरस्तु सामसंहिताभाष्ये द्रष्टव्यः । दिङ्मात्रं ततः समाधृत्येहोच्यते । "काक्षुभः प्रगाथः" इत्यत्र प्रगाथशब्दार्थपर्य्यालोचनेनापि अयनं गम्यते प्रकर्षेण अयनं यत्र स प्रगाथः प्रकर्षो नाम आस्नातादकपाठादाधिक्यम्, तच्च पूर्वीकरीत्या पादास्वासपुरःसरमुत्तरसम्पादनेनोपजायते । तच्च द्वोत्पत्तिकक्षौ महीतव्ये किन्तर्हि प्रयत्नेन द्वे उत्तरे कक्षौ सम्पाद्य ताभ्यां तिसृषु रथन्तरं गातव्यम् । रौधसनामक किञ्चित् साम तथा यौधाजयनामकसामपरम् तयोः साम्नोर्हृतीयोक्तन्त्रक्षत्रं च आश्रय इति उत्तरार्धन्वे तु तस्य सासंहत्यस्याश्रय एकः प्रगाथः आम्नातः तस्मिंश्च प्रगाथे पुनानः सोमेत्यसावृक् प्रथमा सा च हृहती "हृहान उषहिष्यमिति" द्वितीया सा तु विष्टारपङ्क्तिः तामेतां विष्टारपङ्क्तिमपनीय तस्याः स्थाने उत्पत्तिहृत्यौ द्वे ऋचौ आनेतव्ये इति पूर्वपक्षः । हृहतीविष्टारपङ्क्त्योः प्रयत्नविशेषेण द्वे हृहत्यावुत्तरे सम्पादनीये इति राद्धान्तः । प्रगाथत्वेन ध्येये २मन्त्रे च यजु०१६।२४वेददी०

प्रगुण त्रि० प्रस्तुतो गुणो यत्र प्रकृष्टो गुणो यस्य वा प्रा०ब० । १ऋजुतायुते २दक्षे च अमरः । प्रकृष्टगुणोऽत्यत्र ।

प्रग्रह्य न० प्र+ग्रह-क्यप् । व्याकरणोक्ते स्वरसन्धिराहित्ययोग्ये १पदभेदे २स्थितौ ३वाक्ये च अमरः ।

प्रगे अव्य० प्रगीयतेऽत्र प्र+गै-क । अतिप्रातःकाले अमरः । तत्र भवः ख्यु टट् च । प्रगेतन प्रातर्भवे त्रि० राजनि०

प्रगोमिणा त्रि०प्रगे प्रातःकाले निर्गेव स्वापहेतुर्यस्य । प्रातःकालशायिनि । "उत्तूर्य्यशायिनश्चासन् सर्वे चासन् प्रगेनिशाः" भा०शा० २२८अ० ।

प्रग्रथन न० प्रकर्षेण ग्रथने । प्रगाथशब्दे दृश्यम् ।

प्रग्रह पु०प्र+ग्रह कर्मकरणादौ पक्षे अप् । १लगामरज्जौ २इषादिसंयमनरज्ज्वो ३बन्धां च अमरः । ४निगलने ५भुजे ६सर्पाणांहस्ते मेदि० । ७कर्षिकारवृक्षे राजनि० । प्र+ग्रह-कर्त्तरि अच् । ८विष्णौ "प्रग्रहो निग्रहो व्यग्रः" विष्णुस० "भक्तैरुपाहृतं पत्रपुष्पादिकं प्रगृह्णातीति प्रग्रहः" भा० । [२हयादिसंयमनदामनि च अमरः ।

प्रग्राह पु० प्र+ग्रह-कर्मकरणादौ वा घञ् । १लगामरज्जौ

प्रग्रीव पु०न०प्रकृष्टा ग्रीवा यस्य । १मृगादौ प्रान्तार्थदारुपट्टयौ २वातायने सुभूतिः ३छत्रग्रीर्य्यके गोवर्द्धनः । ४प्रकृष्टग्रीवान्विते त्रि० ।

प्रघटाविट् पु०प्रकृष्टा घटा आडम्बरः तां वेत्ति विद्-क्विप् । याज्ञवल्क्ये याज्ञाभिज्ञे त्रिका० ।

प्रघट्टक पु० प्र+घट्ट-ण्वुल् । एकार्थप्रतिपादनार्थं प्रबन्धावयवभेदे सां०प्र०भाष्ये दृश्यम् ।

प्रघ(घा)ण(न) पु० प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते

ह्वन-कर्मणि घञ् अप् वा घात्यम् । १व्यञ्जिते अमरः । २प्रकोष्ठे सि॰कौ॰। अवन्तः १ताम्रवृक्षे ४लोहसङ्करे च मेदि॰ । सङ्कटमतेऽयमण्यन्तेभ्यः ।

प्रग्रस पु॰ प्र+ग्रह-अप् घसादेशः । १प्रकृष्टभक्षणे २राक्षसभेदे पु॰ भा॰ व॰ २८४अ॰ ३असुरे ४दैत्ये च त्रिका॰ कुमारानुचरमातृभेदे स्त्री भा॰श॰ ४७अ॰ ।

प्रघात न॰ प्रहन्यतेऽत्र हन-आधारे घञ् । १युद्धे हेमच॰ भावे घञ् । २प्रहनने पु॰ ।

प्रघास पु॰ प्र+घस-कर्मणि घञ् । प्रकर्षेण भक्षणीये कविरादौ वरुणप्रघासशब्दितसोमयागभेदः । प्रघासोऽस्यास्ति भूम्ना इनि । प्रघासिन् मरुत्व॰ "प्रघासिनोऽवामहे मरुतश्च" यजु॰ २।४४ वेदटीकायां दृश्यम् ।

प्र(प्रा)घुण पु॰ प्र(+आ+वा) घुण-क । अतिथौ हेमच॰ ।

प्रघूर्ण पु॰ प्र+घूर्ण-अच् । अतिथौ हेमच॰ ।

प्रघोष पु॰ प्र+घुष-भावे घञ् । १प्रकृष्टघोषणे अल्पार्थे कन् । २अव्यक्तशब्दे ध्वनौ घटा॰ ।

प्रचक्र न॰ प्रगतश्चक्रं मा॰ स॰ । स्वचक्रात् परचक्रं प्रति चलिते सैन्ये अमरः ।

प्रचक्षस् पु॰प्र+चक्ष-असि न ख्यादेशः । इक्ष्वाकौ भागवते ।

प्रचण्ड त्रि॰ प्रकर्षेण चण्डः प्रा॰स॰ । १दुर्वृत्ते २दुर्वृत्ते ३दुरन्ते ४प्रतापान्विते च ५श्वेतकरवीरे पु॰मेदि॰ ६दुर्गायां नायिकाभेदे स्त्री "चण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका" कालिकापु॰। ७श्वेतदुर्वायां स्त्री राजनि॰।

प्रचण्डमूर्त्ति पु॰ प्रचण्डा मूर्त्तिरस्य । १वरुणवृक्षे २भयानकमूर्त्तियुक्ते त्रि॰ शब्दच॰ ।

प्रच(चा)य पु॰ प्र+चि-"हलादाने चेरस्तेये" पा॰ हलादाने चौरस्तेये घञ् अन्यत्र "एरच्" पा॰ अच् । तत्र अजन्तः यज्ञादिना हलाद्यवस्थानां पुञ्जाणां १चयने २समूहे शब्दच॰ ३उपचये ४शिथिलसंयोगभेदे परिमाणशब्दे ७२५॰पृ॰ दृश्यम् "संख्यातः परिमाणाच्च प्रचयादपि जायते । प्रचयः शिथिलाख्यो यः संयोगस्तेन लभ्यते । परिमाणन्तूलकाद्यै नाशस्त्राभ्रवनाशतः" भाग्रा॰ हलादाने ल घञ् । हलेन पुञ्जप्रचाय इत्येव चौर्ये ल अच् । प्रचय इत्येव चौर्येण हलेन पुञ्जादेश्चयने । [धरणिः ।

प्रचर पु॰ प्र+चर+गोचरसञ्चरौ नि॰ आधारेऽप् । मार्गे

प्रचल त्रि॰ प्र+चल-अच् । प्रकृष्टचलनयुक्ते चञ्चले ।

प्रचलक पु॰ प्र+चल+वा कन् । कीटभेदे सुश्रुतः कीटशब्दे २०५८पृ॰ दृश्यम् ।

प्रचलाक पु॰ प्र+चल-वा॰ आकन् । १प्ररोहाते २वटवृक्षशिखरजे ३भुजङ्गमे पुंस्त्री॰ मेदि॰ स्त्रियां ङीप् ।

प्रचलाकिन् पु॰ प्रचलाक +मत्वर्थे इनि । मयूरे त्रिका॰ ।

प्रचलाय नामधातुः प्रचल+क्यङ्वा॰ अभूततद्भावे क्यङ् वा॰ अक॰सेट् । प्रचलायते अप्रचलायिष्ट पाचलायिष्ट इत्यन्ये

प्रचलापित त्रि॰ प्रचलाय+नामधातुः कर्त्तरि क्त । निद्रादिना घूर्णिते अमरः ।

प्रचायिका स्त्री प्र+चि+भावे एवुल् । १परिव्राज्या पुष्पादेश्चयने । प्र+चि-एवुल् टाप् कापि अत इत्त्वम् । प्रचयनकर्त्र्यां २स्त्रियां स्त्री ।

प्रचार पु॰ प्र+चर-भावे घञ् । १प्रसरणे २गतौ ३प्रकाशे च । ततः तारका॰ इतच् । प्रचारित अज्ञातप्रचारे त्रि॰ । प्रकाशिते च ।

प्रचाल पु॰ प्रकृष्टचालः । यूपस्य कटकभेदे । भा॰द्रो॰६१ अ॰।

प्रचिकीर्षु त्रि॰प्र+कृ-सन्+उ । प्रतीकारेच्छौ भाग॰४।१८।१७

प्रचित त्रि॰ प्र+कर्मणि क्त । १कृतप्रचयने पुष्पादौ स्वार्थे क तत्रार्थे । २प्रचयस्वरयुक्ते त्रि॰। संज्ञायां कन् । दण्डकभेदे "प्रचितकसमभिधो धीरधीभिः कृतो दण्डको लघ्वयाद्यैरैः" छं॰र॰ । [सुश्रुतः ।

प्रचीबल न॰ पृचेर्यं बलं यत्र पृषो॰। वीरघे (वेणार मूल)

प्रचीर पु॰ वत्सप्रोक्तस्य १क्षुनन्दाग्रभंजाते २पुत्रे नृपभेदे मार्कपु॰ ११८ अ॰ । [२वस्त्रे अमरः ।

प्रचुर त्रि॰ प्र+चुर-क प्रगतश्चुरायां वा प्रा॰त॰ । १चौरे

प्रचुरपुरुष पु॰ प्र+चुर-क नित्यक॰ । चौरे त्रिका॰ ।

प्रचेतसी स्त्री प्रकर्षेण चेतयति मूर्च्छितं चित-णिच्-असच् गौरा॰ङीष् । कट्फले राजनि॰ तस्यूर्ध्वस्य हि मूर्च्छानाशकता वैद्यकप्रसिद्धेति तस्यास्तथात्वम् ।

प्रचेतस् पुं॰ प्र+चित-असुन् । १वरुणे अमरः । २मुनिभेदे ३प्रकृष्टहृदये त्रि॰मेदि॰ । ४अनुवंश्ये नृपभेदे हरिवं॰ ३२ अ॰ । ५प्राचीनबर्हिषः सावर्णेर्भार्यायां जातेषु पुत्रेषु राजभेदेषु ब॰व॰ । हरिवं॰२अ॰ । ६प्रकृष्टज्ञानयुक्ते ऋ॰ २।३३।२ भा॰ ।

प्रचेत त्रि॰प्र+चि-असुन् । १प्रचयनकर्त्तरि २सारथौ पु॰हेमच॰

प्रचेतुन त्रि॰ प्र+चित-उन । प्रकृष्टज्ञानयुक्ते ऋ॰१।२१।६

प्रचेल न॰ प्र+चिल-चेल-वा अच् । पीतकाष्ठे शब्दच॰ ।

प्रचेलक पुंस्त्री॰ प्र+चेल-गतौ एवुल् । १क्षोटके शब्दमा॰ । स्त्रियां जातित्वात् ङीष् । २प्रकृष्टगतियुक्ते त्रि॰ स्त्रियां टाप् ।

प्रचोदक त्रि० प्र+चुद्–प्रेरणे ण्वुल् । १प्रेरके स्त्रियां टापि अत इत्त्वम् । प्रचोदिका । सा च दुःसहस्य नियोजिताख्यायां कन्यायां जाते २कन्याभेदे मार्कपु० ५१ अ० ।

प्रचोदनी स्त्री प्रचोद्यते अपसार्य्यते रोगोऽनया चुद्–णिच् ल्युट् ङीप् । १कण्टकारिकायाम् अमरः । भावे ल्युट् । २प्रेरणे न० ।

प्रच्छ जिज्ञासायां तु०पर०द्विक०अनिट् । पृच्छति अप्राक्षीत् । अपप्रच्छ । द्विकर्मकत्वेन दुहादि०गोत्रे कर्मणि लकारादि । पृच्छ्यते शिष्येण गुरुः धर्मं, जिज्ञासाविषयकज्ञानानुकूलव्यापारः कथं धर्मं आचरितव्य इत्यभिलाषादिः पृच्छेरर्थः, ज्ञानविषयत्वेन धर्मस्य, तज्ज्ञानाश्रयत्वाच्च गुरोः कर्मत्वम् ।

प्रच्छद् न० प्रच्छादयति प्र+छद्–णिच् क्विप् ह्रस्वः । वस्त्रे "वस्त्रं वा प्रच्छच्छन्दोऽन्नं प्रच्छद इति श्रुतेः" यजु० ५।५ वेददीपे दृश्यम् । [आच्छादने वस्त्रादौ ।

प्रच्छद पु०प्रच्छाद्यतेऽनेन प्र+छद्–णिच्–करणे घ ह्रस्वः ।

प्रच्छदपट पु०प्रच्छाद्यतेऽनेन प्र+छद्-णिच्–घ ह्रस्वः कर्म० । (पाचुड़ि) प्रावरणवस्त्रे अमरः ।

प्रच्छना स्त्री प्रच्छ+बा० ल्यु । व्याजन्तरणे जटा० ।

प्रच्छन्न न० प्र+छद्-क्त । १गुप्तद्वारे २अन्तर्द्वारे । ३आच्छन्ने त्रि० अमरः ।

प्रच्छर्दन न० प्र+छर्द्-भावे ल्युट् । १वमने २कोष्ठस्य वायोर्नासिकापुटाभ्यां निःसारणप्रयत्नभेदे रेचने "प्रच्छर्दनविधारणाभ्यां वा प्राणस्य" पात० सूत्रे भाष्यं दृश्यम् । कुम्भकशब्दे २११४ पृ० दृश्यम् ।

प्रच्छर्दिका स्त्री प्र+छर्द्–रोगाख्यायां ण्वुल् पा० ण्वुल् तृचः स्त्री । १वमनरोगे अमरः । कर्त्तरि ण्वुल् । २प्रच्छर्दके वमनकारके त्रि०स्त्रियां टाप् कापि अत इत्त्वम् ।

प्रच्छादन न० प्रच्छाद्यतेऽनेन छद्–णिच्-ल्युट् । १उत्तरीयवस्त्रे हेमच० भावे ल्युट् । २आच्छादने "नवोदके नवान्ने च गृहप्रच्छादने तथा" स्मृतिः ।

प्रच्छान न०प्र+च्छो–भावे ल्युट् । १प्रकृष्टच्छेदने २सुश्रुतोक्ते शस्त्रविस्रावणभेदे "तत्र द्विविधं शस्त्रविस्रावणं सिराव्यधनञ्च" सुश्रुतः ।

प्रच्छिल त्रि० प्रच्छ बा० इलच् । निर्जले जलशून्ये हेमच०

प्रच्यव पु० प्र+च्यु–अच् । १प्रच्युतियुते । भावे अप् । २प्रचरणे स्वभावचरणे "प्रकृतेः स्वभावप्रच्यव" इति सां० प्र०भाष्यम् । भावे ल्युट् । प्रच्यवन चरणे न० ।

प्रज पु० प्रविश्य जायायां जायते जन–ड । पत्यौ भरतः

प्रजङ्घ पु० प्रकृष्टा जङ्घाऽस्य । राक्षसभेदे रामा०ल०१८श्लो०।

प्रजगिम त्रि० प्र+गम–ज्ञाने कि द्वित्वम् उपधालोपः । प्रज्ञाशीले शत०ब्रा० ५।१।१।१५

प्रजन पु० प्र+जन–घञ् न वृद्धिः । १प्रजनने । प्रजायतेऽनेन करणे घञ् । स्त्रीगम्यादिषु २पुङ्गवादीनामभिगमने गर्भग्रहणार्थमैथुने २उपसरे (पालदेओया) अमरः ।

प्रजनन न० प्रजायतेऽत्र प्र+जन–आधारे ल्युट् । १योनौ भावे ल्युट् । २जन्मनि मेदि० करणे ल्युट् । ३उपसरे विश्वः । जनयति जनि–ल्यु । ४जनके त्रि० यजु०१६।४८

प्रजनिका स्त्री प्रजनयति प्र+जनि–ण्वुल् । मातरि जटा० ।

प्रजनिष्णु त्रि०प्र+जन–ष्णुच् । जनने शत०ब्रा०६।४।१७

प्रजनुक त्रि० प्र+जन बा० उक । प्रजननशीले हेमच० ।

प्रजनू स्त्री प्र+जन–बा० ऊ । प्रजनने तैत्ति०३।१।१।४२

प्रजय पु०प्र+जि–अच् । प्रकृष्टजये घञादि०अन्तोदात्तताश्च ।

प्रजल्प पु०प्र+जल्प–भावे घञ् । "अस्मयेर्यांमदयुजा योऽवधीरणसूदया । प्रियस्य कौशलोद्गारः प्रजल्पः स तु कथ्यते" उज्ज्वलमणिलक्षिते १वाक्यभेदे २प्रकृष्टकथाभेदे च ।

प्रजविन् त्रि० प्र+जू–इनि । प्रकृष्टवेगयुक्ते अमरः ।

प्रजहित पु० १पुराणे २गार्हपत्ये वह्नौ तारण्ड्य० ब्रा० १।४।१० भाष्यप्रदर्शितवाक्यं दृश्यम् ।

प्रजा स्त्री प्र+जन–ड । १सन्ततौ २जने च अमरः "नञ्दुःसुभ्यः परस्य वह्न०असिच्समा० । अप्रजाः दुःप्रजाः ।३जनने च

प्रजागर पु० प्र+जाग्–अप् । प्रकर्षेण जागरणे १निद्राक्षये हला० । कर्त्तरि अच् । २विष्णौ "पुष्पहासः प्रजागरः" विष्णुस० "नित्यं प्रबुद्धत्वात् प्रजागर्त्तीति प्रजागरः" भा० प्रजागरयति णिच्–अच् । ३अप्सरोभेदे स्त्री भा०व०४३अ० ।

प्रजाता स्त्री प्रजातं प्रजननं गर्भमोचनमस्त्यस्याः अर्श आद्यच् । १प्रसूतायां स्त्रियाम् हला० । प्र+जन-क्त । प्रकर्षेण जाते त्रि० । २अश्वभेदे पु० "बडवायां कृतरेतस्कन्दनः प्रजात इत्युच्यते" कात्या०श्रौ०२०१।२०भाष्यम्

प्रजातन्तु पु० प्रजायाः प्रजननस्य तन्तुरिव । सन्ताने तैत्तिरीय० ।

प्रजाति स्त्री प्र+जन-क्तिन् । १प्रजायां २प्रजनने च ३पौत्रेऽपत्ये "प्रजा च स्वाध्यायवचने च प्रजनस्य स्वाध्यायवचने च प्रजातिश्च स्वाध्यायवचने च" तैत्तिरीय० "तत्र प्रजा स्वयमुत्पाद्या प्रजनस्य प्रजननमृतौ भार्य्या

गमनं प्रजातिः पौत्रोत्पत्तिः" भा० । ४पुत्रादिदृष्टौ श्रुतः ब्रा०७।२।१।४६। ५प्रांशुन्टपपुत्रभेदे पु० मार्क०पु०११८अ०

प्रजादा स्त्री प्रजां नष्टेतुगर्भं ददाति सेवनात् दा--क । गर्भधात्रीवृक्षे राजनि० ।

प्रजादान न० ६त० । १प्रजाया दाने २आदाने च । प्रजातः जन्मतः दानं शुद्धिरस्य । ३रजते न० शब्दच० ।

प्रजानाथ पु० ६त० । लोकनाथे रुद्रे प्रजापालादयोऽस्यत्व ।

प्रजाप पु० प्रजां पाति पा--क । रुद्रे हेमच० ।

प्रजापति पु० ६त० । १चतुर्मुखे ब्रह्मणि अमरः । २दक्षादौ रुद्रे च मेदि० । ३जामातरि ५सूर्ये ६वह्नौ ७त्वष्टरि हेमच० । प्रजापतयश्च बहुविधाः यथोक्तम् "आत्मार्थं चाहूजत् पुत्रान् लोककर्तॄन् पितामहः । विश्वे प्रजानां पतयो येभ्यो लोका विनिःसृताः । विश्वेशं प्रथमं नाम महातपसमात्मजम् । सर्वौषधमयं पुण्यं नाम्ना धर्मं च सृष्टवान् । दक्षं मरीचिमत्रिञ्च पुलस्त्यं पुलहं क्रतुम् । वशिष्ठं गौतमञ्चैव भृगुमङ्गिरसं मनुम् । अथर्वभूता इत्येते ख्याताश्चैव महर्षयः । त्रयोदश सुता यस्य वंशास्तु संप्रतिष्ठिताः" हरिवं० २०४अ० "ससर्ज सृष्टिं तद्रूपं सृष्टुमिच्छन् प्रजापतीन् । मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम् । वशिष्ठञ्च महातेजाः सोऽसृजत् सप्त मानसान् । सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः" हरिवं० १अ० । एकविंशतिः प्रजापतयो यथा "ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्धर्मस्तथा यमः । मरीचिरङ्गिरात्रिश्च पुलस्त्यः पुलहः क्रतुः । वशिष्ठः परमेष्ठी च विवस्वान् सोम एव च । कर्दमश्चापि यः प्रोक्तः क्रोधोऽवौक्कीत एव च । एकविंशतिरुत्पन्ना ते प्रजापतयः स्मृताः" महाभारते मोक्षधर्मः । अन्येऽपि प्रजापतयः पुराणादौ प्रसिद्धा यथा "शंयुः प्रजापतिः" स्मृतिः । ८विष्णौ पु० "पद्मनाभः प्रजापतिः" विष्णुस० । ९यज्ञे निघण्टुः । १०स्वनामख्याते कीटभेदे ।

प्रजापतिहृदय न० सामभेदे "प्रजापतेर्हृदयं गायति" श्रुत०ब्रा० ६।१।२।४० "प्रजासु च प्रजापतौ च गायति प्रजापतेर्हृदयमिति किञ्चित् साम तदत्र गायेत् । प्रजापतेर्हृदयं गायत्रादि सामवत् कस्यांचिदृचि न गीयते अपि तु केवलं प्रजाशब्दे प्रजापतिशब्दे च गीयते" भा० ।

प्रजावत् पुंस्त्री० प्रजाऽस्त्यस्य मतुप् मस्य वः । १सन्तानयुक्ते स्त्रियां ङीप् । ङीबपि । २भार्यायामपि स्त्री अमरः ।

३प्रकृतियुक्ते नृपे पु० । [यजु० १९।४८

प्रजासनि त्रि० प्रजां सनोति ददाति सन--इन् । सन्तानदातरि

प्रजाहित त्रि० प्रजायै हितम् । सन्तानजनयोर्हितकारके जले न० शब्दमाला ।

प्रजिन पु० प्र+ज्या-वा० नक् सम्प्र० । वायौ शब्दमा० ।

प्रजेश पु० ६त० । रुद्रे प्रजेश्वरादयोऽप्यत्र त्रिका० ।

प्रज्ञ त्रि० प्रजानाति प्र+ज्ञा कर्त्तरि क । १प्रज्ञायुते प्रज्ञा एव प्रज्ञादि० स्वार्थे अण् । प्राज्ञ तत्रार्थे त्रि० भावे अङ् । २बुद्धौ स्त्री । प्रज्ञा अस्त्यस्य प्रज्ञा० अ । प्राज्ञ प्रज्ञायुते त्रि० ।

प्रज्ञप्ति स्त्री प्र+ज्ञपि--भावे क्तिन् । १बुद्धौ हेमच० "कृतस्मरा तत्र प्रज्ञा" पात०सू० "तत्र सप्तधा प्रान्तभूमिः प्रज्ञा" पात०सू० । २सङ्केते ३देवीभेदे च त्रिका० ।

प्रज्ञाकाय पु० प्रज्ञा काय इव यस्य । सङ्घुघोषे त्रिका० ।

प्रज्ञाचक्षुस् पु० प्रज्ञैव चक्षुरिवास्य । धृतराष्ट्रे शब्दर० ।

प्रज्ञादि पु० स्वार्थेऽण्प्रत्ययनिमित्ते १शब्दगणे स च गणः "प्रज्ञ वच्चिज् उच्चिज् उच्चिज् प्रत्यच् विदस् विदन् योडन् विद्या मनस् (श्रोत्र शरीरे) (जुहूत् ब्राह्मणे) चिकीर्षत् चोर शत्रु योध चक्षुस् वस्तु एनस् मरुत् क्रुच सत्वत् दयार्ह वयस् व्याकृत असुर रक्षस् पिशाच अशनि कर्षापण देवता वस्तु ।। अस्त्यर्थे णप्रत्ययनिमित्ते २शब्दगणे च । स च गणः प्रज्ञा श्रद्धा (ऋचः आर्चः) (छत्तेच वार्त्तः)" वार्त्ति० ।

प्रज्ञान न० प्र+ज्ञा—भावे ल्युट् । १बुद्धौ । करणे ल्युट् । २चिह्ने अमरः । प्रज्ञानमस्त्यस्य अच् । २पण्डिते त्रिरूपकोषः ।

प्रज्ञाल त्रि० प्रज्ञाऽस्त्यस्य सिध्मा० लच् । बुद्धियुते त्रि० ।

प्रज्ञिन् त्रि० प्रज्ञाऽस्त्यस्य इनि । पण्डिते द्विरूपकोषः पक्षे मतुप् मस्य वः । प्रज्ञावत् तत्रार्थे उभयतः स्त्रियां ङीप् ।

प्रज्ञिल त्रि० प्रज्ञा+अस्त्यर्थे पिच्छा० इल । बुद्धियुते

प्रज्ञु त्रि० प्रगते विरले जानुनी यस्य जानुनोर्वा । विरलजानुके जने अमरः ।

प्रडीन न० प्र+डी--क्त । खगगतिभेदे खगगतिशब्दे दृश्यम् ।

प्रण त्रि० पुराभवः प्र+"नञ पुराणात् प्रात्" ५।४।२० वार्त्ति० न । पुराणे प्राचीने चकारात् पक्षे ल प्रत्ययः प्रीण तत्रार्थे त्रि० ।

प्रणख पु० प्रकृष्टः नखः पूर्वपदात् संज्ञम् । नखाग्रे "आप्रणखात् सर्व एव सुवर्णः" छान्दो० । [२विनयपुते क्ष्

प्रणत त्रि० प्र+नम-कर्त्तरि क्त। कृतप्रणामे त्रिका०। प्रह्वे

प्रणति स्त्री प्र+नम-भावे क्तिन्। प्रणामे करशिरःसंयोगादिरूपे स्वापकर्षबोधकव्यापारे।

प्रणदन पु० प्र+नद्-भावे ल्युट्। प्रणादे अमरः।

प्रणपात् त्रि० प्रकर्षेण नपात् नभ्राड्यादिना नस्य प्रकृतिभावः पूर्वपदात् षत्वम्। प्रकर्षेण न पातयितरि ऋ० ८।१७।११ [३विश्वासे ४निर्वाणे च मेदि०।

प्रणय पु० प्र+नी-अच्। १प्रेम्णि अमरः २प्रार्थनायां

प्रणयन न० प्र+नी-भावे ल्युट्। १प्रकर्षेण नयने २करणे च ३अग्नेः संस्कारभेदकरणे कात्या० श्रौ० ६।१०१४।

प्रणयनीय त्रि० प्र+नी-कर्मणि अनीयर्। १प्रकर्षेण नेतव्ये २संस्कार्य्ये वह्नौ च प्रणयनस्य वह्निसंस्कारस्येदम् छ। ३वह्निसंस्कारसम्बन्धिनि द्रुह्यकाष्ठादौ कात्या० १।२।२१

प्रणयिन् त्रि० प्रणयोऽस्त्यस्य सखा० गणे पाठात् "नैकास्वरात् कृतोजातेरिति" निषेधस्याप्रवृत्तेः इनि। १प्रणययुते २स्वामिनि पु० हेमच०। ३भार्य्यायां स्त्री ङीप्।

प्रणव पु० प्रकर्षेण नूयतेऽनेन प्र+नू-अप्। १ओङ्कारे वेदादौ माङ्गल्ये शब्दभेदे अमरः। १५५८ पृष्ठादौ दृश्यम्। ओङ्कारादीनां गानारम्भात् प्राक् यजमानेन ओमित्युक्त्वा गेये २स्तोमावयवभेदे च। प्रणूयते प्र+णू-कर्मणि अप्, प्रणववाच्यत्वाद्वा। ३परमेश्वरे पु० "प्राणदः प्रणवः पृथुः" "प्राणदः प्रणवः पणः" विष्णुस०। द्विधा व्युत्पत्तियोगात् द्वे नामनी। [त्वत्व, प्रणतनासिके

प्रणस त्रि० प्रगता नासिका अस्य नसादेशः बहुव्री०

प्रणाडी स्त्री प्रणाली+लस्य डः। १प्रणालीशब्दार्थे २द्वारमात्रे च "तस्यां स्थितो व्याप्रियमाणं धनं प्रणाड्या प्रतिपक्षं निष्पादयति" दायभागः।

प्रणाद पु० प्र+नद्-घञ्। अनुरागजे शीत्कृतादौ १शब्दे अमरः। "अनुरागजनो शब्दः प्रणादः शीत्कृतादिति शब्दार्णवः। २तारशब्दे ३श्रवणमात्रे च मेदि०। श्रवणमात्रस्य कर्णनादः "कर्णशोतःस्थिते वाते शब्दं शृणोति विविधान् खरान्। भेरीपटहशङ्खानां कर्णनादः स उच्यते" स्मृतेः।

प्रणाम पु० प्र+नम-भावे घञ्। प्रणतौ १स्वापकर्षबोधकव्यापारे करशिरःसंयोगादौ "पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा। मनसा वचसा चैव प्रणामोऽष्टाङ्ग उच्यते" इत्युक्ते २अष्टाङ्गव्यापारभेदे च प्रणामस्य चतुर्द्धा अभिवादनम् अष्टाङ्ग पञ्चाङ्गः करशिरसंयोगश्च। तत्राभिवादनशब्दे अभिवादनलक्षणं दृश्यम्। अष्टाङ्गलक्षणमुक्तं हतीयो यथा "बाहुभ्यामेव जानुभ्यां शिरसा वचसा दृशा। पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवरः स्मृतः"। नतिविशेषस्तु जामले "शिरोणाकारा सर्वत्र नतिः शक्तेः समीरिता। दक्षिणाद्यायतीं गत्वा दिशं तस्याच्च मामकीम्। ततश्च दक्षिणां गत्वा नमस्कारक्रियोच्यते" एकहस्तप्रणामनिषेधो यथा "एकहस्तप्रणामस्य एकं वापि प्रदक्षिणम्। अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम्" इति तत्त्वसारः। स च कायिकवाचिकमानसभेदेन प्रत्येकं त्रिविधः यथा "कायिको वाचिकश्चैव मानसस्त्रिविधः स्मृतः। नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः। प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ। जानुस्थानवर्त्ती गत्वा शिरसाऽस्पृश्य मेदिनीम्। क्रियते यो नमस्कार उत्तमः कायिकस्तु सः। जानुभ्यां क्षितिमस्पृश्य शिरसाऽस्पृश्य मेदिनीम्। क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः। पुटीकृत्य करौ शीर्षे दीयेते यदुपर्यधः। अस्पृश्य जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते। यः स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः। क्रियते भक्तियुक्तैर्वा वाचिक स्तूत्तमः स्मृतः। पौराणिकैर्वैदिकैर्वा मन्त्रैर्यां क्रियते नतिः। मध्यमोऽसौ नमस्कारो भवेद्भावनिकः सदा। स कायिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ!। दृष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं पुनः। मननं मानसं प्रोक्तमुत्तमाद्यमध्यमम्। त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः। कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः। अयमेव नमस्कारो दण्डोऽतिपतितश्च निः। प्रणाम इति विज्ञेयः सूर्य्यं प्रतिपादितः" कालिकापु० ७०अ०। शूद्रसंस्कृतपूजितदेवताप्रणामनिषेधो यथा "यः शूद्रेणार्च्चितं लिङ्गं विष्णुं वा प्रणमेदुभौ। निष्कृतिस्तस्य नास्त्येव प्रायश्चित्तायुतैरपि" इति कर्मलोचनम्। "नमेत् यः शूद्रसंस्कृतम्" इत्यादि च।

प्रणाय्य त्रि० प्र+नी-क्यप् "प्रणाय्योऽसभ्यतौ" पा०नि०। १चौरे २प्रोत्यर्हे ३विरक्ते च त्रि०कौ० ४अभिलाषवर्जिते मेदि०। ५साधौ त्रिका० ६प्रिये च। अस्मत्प्रतिभिन्नेषु प्रणेय इत्येव।

प्रणाली स्त्री प्र+नल-घञ्+गौरा०ङीष् वत्वम्। १जलप्रवहनमार्गे (पनाला) अमरः २परम्परायाञ्च। प्रणालोऽप्यत्र पुं०।

प्रणिधान न० प्रणिधीयते प्र+नि+धा-ल्युट्। १प्रयत्ने २अ०

निनिवेशे २योगशास्त्रोक्ते चिन्तनविशेषरूपे समाधिभेदे ४भक्तिविशेषे च "ईश्वरप्रणिधानाद्वा" पात० "प्रणिधानात् भक्तिविशेषात्" भाष्यम्। ५अर्पणे ६कर्मणां फलत्यागे च "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" पात० "ईश्वरप्रणिधानं सर्वक्रियाणां तस्मिन् परमगुरावर्पणं फलसन्न्यासो वा" भा० ७अनर्थो विषयान्तरसञ्चारा-भावरूपे ऐकाग्र्ये च गौत० १।२।३६ सूत्रवृत्तिः।

प्रणिधि पु० प्रणिधीयते प्र+नि+धा-कि। १गुप्तचरे अमरः। २अनुचरे च। भावे कि। ३याचने ४अवधाने च मेदि०। काश्यपस्य दक्षदृषस्य ५पुत्रभेदे भा०व० २१६अ०।

प्रणिपात पु० प्र+नि+पत-घञ्। प्रणामे हेमच०। "तद्विद्धि प्रणिपातेनेति" गीता। [क्षिते च मेदि०।

प्रणिहित त्रि० प्र+नि+धा-क्त। १प्राप्ते २स्थापिते ३समा-

प्रणी त्रि० प्रणयति प्र+नी-क्विप्। १कारके २ईश्वरे च "सायन्तनीं तिथिप्रणीः" भट्टिः।

प्रणीत त्रि०प्र+नी-कर्मणि क्त। पाकेन रूपरसान्यथाभावापादिते १पदार्थे २क्षिप्ते ३निवेशिते ४विहिते च हेमच०। ५यज्ञे संस्कृताग्नौ पु०अमरः। ६यज्ञपात्रभेदे स्त्री मेदि० अग्निपदसान्निध्ये ७मन्त्रसंस्कृतमात्रे "यथाध्वरे वह्निरभिप्रणीतः" भट्टिः। ८मन्त्रसंस्कृतासु अप्सु स्त्री ब०व०। तदाधारपात्रौ तु उपचारात् प्रणीताशब्दवाच्यौ। "प्रणीतानाम आपो मन्त्रसंस्कृता आहवनीयस्योत्तरतो निहिताः" आश्व०श्रौ० १।१।५ नारा०। "तदापः प्राणयंस्तस्मादापः प्रणीतास्तत्प्रणीतानां प्रणीतात्वम्" शत० ब्रा० १२।६।२।८।

प्रणीय त्रि० प्र+नी-कर्मणि भेदे क्यप्। १यज्ञे मन्त्रेण संस्कारः कृतस्तस्मिन्। लोके तु प्रणेय इत्येव।

प्रणूत त्रि० प्र+णू-स्तुतौ कर्मणि क्त। स्तुते अमरः।

प्रणेय त्रि० प्र+नी-यत्। १वश्ये अधीने २कृतलौकिकसंस्कारे च हेमच० ३प्रापणीये।

प्रतक्वन् पु० प्र+तक-गतौ वनिप्। प्रकर्षेण गतियुक्ते "नभोऽस्ति प्रतक्वा" ता०ब्रा० १।४।३२ "प्रकर्षेण प्रतक्वा स्वावयवैः पांशुभिः सर्वान् धिष्ण्यान् प्रति गन्ता तकतिर्गतिकर्मा" भा०।

प्रतति स्त्री प्र+तन-भावे क्तिन्। १विस्तारे। कर्तरि क्तिच् वा ङीप्। २वल्लयाञ्च अमरः।

प्रतदस् पु० प्रतत् प्राप्तं वसु धनं येन। १प्राप्तधने वसुके २विक्लीर्णधने च ऋ० ६।१३।२७।

प्रतन त्रि० प्र+"नञ्य पुराणात् प्रातः" वार्त्ति० चकारात् ष्यु, ट्ट च। पुरातने अमरः।

प्रतनु त्रि० प्रकृष्टस्तनुः प्रा०स०। १अतिसूक्ष्मे २अतिसूक्ष्मे च

प्रतमा(रा)म् अव्य०प्र+आङ तरप् तमप् वा। अत्यन्तप्रकर्षे

प्रतर पु० प्र+तॄ-भावे अप्। प्रकर्षेण १तरणे आधारे घञ्। २प्रवरणाधारे गोप्रतरशब्दे दृश्यम्। [प्रतर्क तत्रार्थे।

प्रतर्कण न० प्र+तर्क-भावे ल्युट्। वितर्के शब्दर०। घञ्।

प्रतर्दन न० प्र+तृद-भावे ल्युट्। १ताडने। कर्तरि ल्यु। २ताडके त्रि० ३दिवोदासपुत्रभेदे पु० हरिवं० २९अ०। ४इन्द्रोपदेशप्रभेदे प्रतर्दनं प्रति इन्द्रेण ब्रह्मविद्योपदिष्टेति वेदान्ते प्रसिद्धम्।

प्रतल न० न० प्रकृष्टं तलम्। १पातालभेदे मेदि०। प्रकृष्टं तलमस्य। २विस्तृताङ्गुलिके पाणौ चपेटे पु० अमरः।

प्रतान पु० प्र+तन-घञ्। १विस्तारे २ऋषिभेदे च तस्य गोत्रापत्यम् इञ्। प्रातानि तद्गोत्रापत्ये बहुत्वे तु तस्य उपजा० लुक्। प्रताना इत्येव। ३तन्तुयुक्ते वस्त्रादौ। "गुच्छगुल्मन्तु विविधं तथैव तृणजातयः। बीजकाण्डरुहाण्येव प्रताना वल्ल्य एव वा" अमरः। "प्रतानास्तन्तुयुक्तास्तत्पुष्पाद्यावृष्पश्चतयः" कुल्लू०।

प्रतानिन् त्रि० प्र+तन-णिनि। १विस्तीर्णे २विस्तृतलतायाम् स्त्री ङीप् अमरः।

प्रताप पु० प्र+तप-घञ्। १कोषदण्डजाते नृपादेः तेजसि अमरः। २तापे ३चर्कटवृक्षे च राजनि०।

प्रतापन पु० प्रतापयति तप-णिच्-ल्यु। १नरकविशेषे २तापके त्रि० शब्दरत्ना०। भावे ल्युट्। ३पीडने शब्दर०। कर्तरि ल्यु। ४विष्णौ पु०। "प्रकाशात्मा प्रतापनः" विष्णुस०"सूर्यप्रभृतिभिर्विश्वं प्रतापयतीति प्रतापनः" भा०।

प्रतापवत् त्रि० प्रताप+अस्त्यर्थे मतुप् मस्य वः। १प्रतापयुक्ते २स्कन्दानुचरगणभेदे पु० भा० श० ४६ अ०।

प्रतापस पु० तपसि साधु अण् प्रकृष्टस्तापसः प्रा०स०। १प्रकृष्टतापसे २शुक्लार्कवृक्षे च अमरः।

प्रतास् अव्य० प्र+तस बा० खि-स्वरादि। ग्लानौ मनोरमा।

प्रतारक त्रि० प्र+तॄ-णिच्-ण्वुल्। १वञ्चके २धूर्ते च।

प्रतारण न० प्र+तॄ-णिच्-भावे ल्युट्। १वञ्चने अन्यपदार्थस्य अन्यथारूपेण ज्ञापने। युच्। प्रतारणाऽपि तत्रार्थे स्त्री। "प्रतारणावलम्बस्य विद्यया किं प्रयोजनम्" रुद्रटः।

प्रतारित त्रि० प्र+तॄ-णिच्-क्त। १वञ्चिते त्रिका०।

प्रति अव्य० प्रथ-डति। १व्याप्तौ २लक्षणे ३कञ्चित्प्रकारभागलक्ष्य कथने ४भागे ५प्रतिदाने ६प्रतिनिधीकरणे मेदि० ७स्तोके ८लक्षणे ९निश्चये १०व्याहत्तौ ११आभिमुख्ये १२स्वभावे च शब्दर०। अस्य निपातत्वेऽपि क्रियायोगे उपसर्गत्वम् गतित्वञ्च। अस्यार्थभेदोदाहरणादि गणरत्नमहोदधिटी० उक्तं यथा "प्रति सादृश्यादानहिंसाङ्गीकृतिप्रतिनिधिव्याप्त्यभिमुख्यव्याप्तिवारणेषु। प्रतिदेवता। प्रतिगृह्णाति। प्रतिहन्ति प्रतिज्ञानम्। अभिमन्युरर्जुनतः प्रति। प्रतिश्यायः। प्रतिसूर्यं गतः। प्रतिकीर्णम् पांशुभिः। प्रतिघट्टः" तत्र लक्षणेवम्भूताख्यानभागवीप्सायामस्य कर्मप्रवचनीयसंज्ञा तद्योगे द्वितीया परिगृह्टे उदा० दृश्यम्। प्रतिनिधिप्रतिदानयोः कर्मप्रवचनीयसंज्ञा तद्योगे पञ्चमी। प्रद्युम्नः कृष्णात्प्रति प्रतिनिधिरित्यर्थः। तिलेभ्यः प्रतियच्छति माषान्, माषान् गृहीत्वा प्रतिरूपतया तिलान् ददातीत्यर्थः। मात्रार्थेऽस्याव्ययीभावे परनिपातः। शाकप्रतिशाकस्य लेश इत्यर्थः। कर्मप्रवचनीयत्वे नोपसर्गसंज्ञा तेन हत्वं हत्वं प्रतिषिञ्चतीत्यादौ न षत्वं तथा गतिसंज्ञापि न, तेन गतिर्गतावितिनिघातो न।"प्रतेरंश्वाद्यस्तत्पुरुषे या० प्रतेः परस्यांश्वादेः अन्तोदात्तता अंश्वादिशब्दे २७पृ० दृश्यम्।

प्रतिक त्रि०कार्षापणेन क्रीतः ठिठन् (इकार उच्चारार्थः) प्रतिरादेशश्च। कार्षापणेन क्रीते स्त्रियां टित्त्वात् ङीप्। ततः पुरोहिता० भावे यक्। प्रातिक्य तद्भावे न०

प्रतिकण्ठ अव्य० वीप्सार्थे समीप्ये वा अव्ययीभावः। १कण्ठे कण्ठे इत्याद्यर्थे २कण्ठसामीप्ये च। प्रतिकण्ठं गृह्णाति ठक्। प्रातिकण्ठिक कण्ठसमीपग्राहिणि।

प्रतिकर पु० प्रति+कृ-विक्षेपे भावे अप्; १स्त्रिस्तीर्णतायां २विक्षेपे च। [प्रतीकारकर्त्तरि।

प्रतिकर्त्तृ त्रि० प्रति+कृ-तृच्। कृतस्यापकारस्य प्रत्यपकारके

प्रतिकर्म्मन् न० प्रति+कृ-मनिन्। १विद्यमानस्य गुणान्तराधाने २कृत्रिमभूषायां प्रसाधने अमरः।

प्रतिकर्ष पु० प्रति+कृष-भावे घञ्। १समाकर्षणे अन्वर्थं पूर्व्योपात्तस्य पदादेर्ग्रहणे काल्या० १५।८।१० कर्के।

प्रतिक(ष्क)ष्य प्रति+कष-गतिशासनयोः अच् सुट् नि०। सुड्मध्यः। १सहाये २पुरोगे च त्रि०कौ०। ३वार्त्ताहरे मेदि०। प्रतिगतः कषाम् प्रा०स०। प्रतेः न कषिं प्रत्युपसर्गत्वम् किन्तु गमेरेवोपसर्गत्वमतो न सुट्। ४कषाघातप्राप्तेऽश्वे त्रि०कौ०। [२तर्जनौ च।

प्रतिकष्ट न० प्रतिरूपं कष्टं प्रा०त०। १कर्मानुरूपकष्टे

प्रतिकाम अव्य० कामं कामं प्रति अव्ययी०। प्रत्येककामे

प्रतिकाय पु०प्रति+चि-घञ् क्यादेशः। १प्रतिरूपके २शरव्ये लक्ष्ये च जटा०।

प्रति(ती)कार पु० प्रति+कृ-घञ् वा दीर्घः। १वैरनिर्यातने कृतस्यापकारस्य तुल्यरूपापकारकरणेन २शोधने ३रोगादेश्चिकित्सायाञ्च शब्दरत्ना०।

प्रति(ती)काश पु० प्रतिरूपः काशः प्र+काश-घञ् वा प्रा०स० दीर्घः। तत्त्वे अस्य निभा० निपात०। अमरदीकायां रमानाथेनायं दन्त्यान्ततया पठितः।

प्रतिकितव पु०प्रतिकूलः कितवः प्रा०त०। द्यूतकारस्य प्रतिकूले द्यूतकारे येन सह द्यूतप्रवृत्तिस्तस्मिन्।

प्रतिकूप पु० प्रतिरूपः कूपः प्रा०त०। परिखायां हारा०।

प्रतिकूल त्रि० प्रतिरूपं कूलं पक्षोऽस्य प्रा०ब०। १अननुकूले विरुद्धपक्षावलम्बिनि प्रतीपे अमरः प्रा०त०। २विपरीताचरणे न०।

प्रतिकृति स्त्री प्रति+कृ-कर्मादौ क्तिन्। १प्रतिमायां २सादृश्ये ३प्रतिनिधौ अमरः। ४प्रतिकाशे मेदि०।

प्रतिकृष्ट त्रि० प्रति+कृष-क्त। १गर्ह्ये २द्विराहृत्तायां श्रेष्ठक्षेत्रादौ च मेदि०। [प्रति कोपे च

प्रतिकोप पु०प्रतिरूपः कोपः। १रोगस्यानुरूपे कोपे २विपक्षे

प्रतिक्रिया स्त्री प्रति+कृ-भावे श। प्रति(ती)कारे

प्रतिक्षण अव्य०क्षणं क्षणं व्याप्य व्याप्तौ अव्ययी०। आभीक्ष्ण्ये

प्रतिक्षय पु० प्रति+क्षि-ऐश्वर्ये अच्। रक्षके शब्दर०

प्रतिक्षिप्त त्रि० प्रति+क्षिप-कर्मणि क्त। १प्रेषिते २वारिते मेदि०। ३बाधिते ४तिरस्कृते च अमरः। "आहूय प्रेषितो यस्तु प्रतिक्षिप्तः स उच्यते" इत्युक्ते ५आहूयप्रेषिते कृष्णदासः। [२तिरस्कारे च।

प्रतिक्षेप पु० प्रति+क्षिप-भावे घञ्। १निरासे मेदि०।

प्रतिखुर पु० सुश्रुते एकीयमतोक्ते मूढगर्भभेदे "निःसृतहस्तपादशिरःकायमङ्गी प्रतिखुरः" इति तत्र लक्षितम्।

प्रतिख्याति स्त्री प्रति+ख्या-भावे क्तिन्। १विख्यातौ २अतिख्यातौ अमरः।

प्रतिगत न० प्रति+गम-भावे क्त। "गतागतप्रतिगतसंख्यातास्याश्च पक्षिणाम्" जटाधरोक्ते १खगगतिभेदे २पराहृत्यगमने च। कर्त्तरि क्त। ३पराहृत्ते त्रि०।

प्रतिगर पु०प्रतिगीर्य्यते प्रत्युच्चार्य्यते प्रति+गृ-भावे अप्। वैदि-

कमन्त्रभेदश्च उच्चारणभेदे। तस्य प्रकार आश्व॰श्रौ॰५।८।४ सूत्रवार्दौ दर्शितो यथा "शस्त्रस्वरः प्रतिगर ओथामो दैवेति" सू॰ "शस्त्रस्य स्वर इव स्वरो यस्य स शस्त्रस्वरः। उत्तरपदलोपोऽत्र द्रष्टव्यः। शस्त्रतुल्यस्वर इत्यर्थः। सवनस्वरस्याविधेयत्वादन्योऽपि यो विशिष्टः स्वरो विहितः शस्त्रस्य तस्य प्रापणार्थं वचनम्। ओथामोदैव कर्त्तव्यं प्रतिगरसंज्ञो भवति प्रतिगरः। प्रत्युच्चार्यते इति प्रतिगरः। यज्ञमाणविशेषविशिष्टतया सकृदेव विधातुं शक्येऽपि सामान्यत्व पृथग्विधानं प्रतिगरशब्दव्यवहारेऽपि सामान्येनास्य ग्रहणार्थम्" नारा॰ द्र॰ "शंसामो दैवेत्याहावे" सू॰ "प्रतिगरो भवतीति शेषः। यः पुनरयं प्रतिगरोऽपरो विधीयते तज्ज्ञापयति। प्रतिगरान्तरमध्यवर्त्तिन्याहावेऽयं निमज्जते। तेन शस्त्रमध्येऽयमेव स्याद् शस्त्राद्यवं ब्राह्मणोक्तः शंसामोदैवामिति वा" ना॰द्र॰। "प्रुतादिः प्रणवेऽप्लुतादिरवसाने" सू॰। "व्यवहितस्य तौ विशेषविधी। अनन्तरस्य प्रणवावसानरूपेण विषयभेदासम्भवात्" द्र॰। "प्रणवे प्रणव आहावोत्तरे" सू॰। "प्लुतादेरयमपवादः। आहावोत्तरे प्रणवे प्रणव एव प्रतिगरो भवति"। "अवसाने च" सू॰। प्रणवः प्रतिगरो भवतीति शेषः। शस्त्रान्तरे शस्त्रमध्ये चावसानेऽयं विधिर्भवति" वृत्तिः। "प्रणवान्तो वा" सू॰। विषयद्वयेऽयं विकल्पः यत्र यत्र चान्तःशस्त्रं प्रणवेनावसति। प्रणवान्त एव तत्र प्रतिगरः" वृत्तिः। शस्त्रान्ते तु प्रणवः" द्र॰।

प्रतिग्रह पु॰ प्रति+ग्रह-अप्। १स्वीकारे २यदर्थादत्तद्रव्यस्य ग्रहणे ३सैन्यपृष्ठे ४प्रतदुपहे च मेदि॰। प्रतिग्रहशब्दार्थस्यास्य द्रव्यस्वीकारः। तत्र दानस्यैव स्वस्वत्वध्वंसमिव परस्वत्वोत्पत्तिं प्रति हेतुता प्रतिग्रहस्य तु यथेष्टविनियोगार्हतानुयोजकस्वत्वं प्रति कारणता यथोक्तं दायभागे

"दृष्टश्च लोकेऽपि दाने हि चेतनोद्देशविशिष्टत्यागादेव दातुव्यापारात् सम्प्रदानस्य द्रव्ये स्वामित्वम्। न च स्वीकरणात् स्वत्वं स्वकर्तुरेव दातृत्वापत्तेः परस्वत्वापत्तिफलेन हि दानरूपता तच्च फलं सम्प्रदानाधीनं यथा देवतोद्देशेन द्रव्यत्यागं कुर्वन्नपि यजमानो न होता किन्तु मन्त्रेण त्यागस्य होमाभिधाननिमित्तं प्रक्षेपं कुर्वन् ऋत्विजेव होतेत्युच्यते तद्वदत्रापि स्यात्। किञ्च मनसा पात्रसंहित्येत्यादिशास्त्रे स्वीकारात् प्रागेव दानपदं दृष्टम्। ननु ग्रहणं स्वीकारः अभूततद्भावे चिप्रयोगात् स्वस्वं कुर्वन् व्यापारः स्वीकारो भवति कथं तत् प्रागेव स्वत्वम्। उच्यते उत्पन्नमपि स्वत्वं सम्प्रदानव्यापारेण ममेदमिति ज्ञानेन यथेष्टव्यवहारार्हं क्रियत इति स्वीकारशब्दार्थः। याजनाध्यापनसाहचर्याच्च प्रतिग्रहस्य स्वत्वमजनयतोऽपि यजेर्गुरूपता न विरुद्धा याजनादौ दक्षिणादानादेव स्वत्वात्" मूलम्। व्याख्यासमेतं श्लोकेन यथा "ननु त्यागात् केवलं स्वत्वनाशः सम्प्रदानस्वर्गं तु ममेदमिति मानसस्वत्वसाक्षितत्स्वीकारादेवेति मतं निराकरोति नचेति। स्वीकर्तुरेवेत्येवकारेण त्यक्तृव्यवच्छेदः। दृष्टफलपादवति परस्वत्वापत्तिफलेन हीति। अत्रायमाशयः धात्वर्थतावच्छेदकफलानुकूलव्यापारवत्क एव ऋजन्ततद्धातुव्यपदेश्यत्वं यथा धात्वर्थतावच्छेदकोत्तरदेशसंयोगानुकूलव्यापारवति चैत्रे गच्छतीति व्यवहारः। स्वीकारस्य स्वत्वहेतुत्वे धात्वर्थतावच्छेदकपरस्वत्वानुकूलस्वीकाररूपव्यापारवतः स्वीकर्तुरेव दातृपदव्यपदेश्यत्वापत्तिरिति पूर्वस्वत्वध्वंसरूपफलस्य न तद्व्यपदेशनियामकता तथात्वे उपेक्षितत्वेऽपि दातृपदव्यपदेश्यत्वापत्तिरिति। केचित्तु स्वीकारस्य स्वत्वहेतुत्वे परस्वत्वफलोपहितत्यागात्मकदाने सर्वांशे एकस्यापि कर्तृत्वासम्भवात् एकांशमादायैव दातृत्वव्यवहारे वक्तव्ये प्रधानीभूतफलांशानुकूलव्यापारवत्त्वेव दातृव्यवहारः स्यादिति व्याचक्षते। दृष्टान्तेनेदं दृढयति यथा होतेति। होमाभिधाननिमित्तमिति। विशिष्टदेशावच्छिन्नप्रक्षेपोपहितत्यागस्य होमत्वात् प्रक्षेपस्य तदभिधाननिमित्तत्वमित्यर्थः। तेन ऋधात्वर्थतावच्छेदकप्रक्षेपानुकूलव्यापारवति ऋत्विजि होतेति व्यपदेशो यथा तथेत्यर्थः। त्यागस्य स्वत्वहेतुत्वे स्फुटमेव शास्त्रं प्रमाणयति किञ्चेति। क्षत्रिया भूमौ नोप्यं विनिःक्षिपेदित्युत्तरप्रतीकपरिग्रहः। शास्त्रे शास्त्रबोधितत्यागे। दानपदं दृष्टमिति। "विद्यते क्षत्रियस्यान्तो दानस्यान्तो न विद्यते" इति तदुपक्रमश्लोकोत्तरार्द्धे दानपदं प्रयुक्तमित्यर्थः। तथाच निरन्तरयोरेव स्वस्वतध्वंसपरस्वत्वोत्पत्तिफलयोर्दानधात्वर्थतावच्छेदकत्वात् दानस्य परस्वत्वहेतुता शास्त्रसिद्धैवेति भावः। स्वीकारात् प्रागेव स्वत्वे ग्रहणस्य स्वीकारपर्य्यन्तत्वसम्भवमाशङ्क्य ते नन्विति। स्वीकारशब्दार्थ इति। तथाच स्वपदस्य यथेष्टविनियोगार्हत्वविशिष्टे लक्षणेति भावः। ननु यज-

नाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमार्जयेदित्यत्र राजसूयेन यजेतेत्यादिवत् याजनाद्यालक्ष्यैवार्जनमर्जयेदित्यन्वयात् प्रतिग्रहस्यार्जनरूपता सिद्धा प्रतिग्रहस्य स्वत्वहेतुत्वे च तद्विरुद्धं स्वत्वहेतुव्यापारस्यैवार्जनत्वादत आह याजनेति। अर्जनरूपता अर्जनपदव्यपदेशः। अविरोधसपपादयति याजनादाविति तथा च याजनादीनां स्वत्वाहेतुत्वेन तद्व्ययानुरोधवत् अर्जयेदित्यत्रार्जनत्वं न स्वत्वजनकत्वं किन्तु स्वत्वप्रयोजकत्वमेव तच्च प्रतिग्रहेऽप्यस्तीति दत्ते स्वयं प्रतीग्रहीतीत्यवधारण एव तदुद्देशेन दातुस्त्यागात् तत्स्वत्वोदयात् प्रतिग्रहवैलक्षण्ये तद्व्यतिरेकाच्चेति भावः"।

"न च दानस्य स्वत्वहेतुत्वे प्रमाणाभावः "सप्त वित्तागमा धर्म्याः दायो लाभः क्रयो जयः। प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च" इत्यादिमन्वादिवचनैस्तस्य स्वत्वहेतुत्वाप्रतिपादनादिति वाच्यं ब्राह्मणाय त्यक्तायां गवि मदीयेयं ब्राह्मणस्य न तु ममेत्यादिसार्वजनीनप्रतीतेरेव तत्र प्रमाणत्वात् प्रदानं स्वाम्यकारणमितिवचनाच्च अत एव विदेशस्थं पात्रमुद्दिश्य त्यक्तधने स्वीकारमन्तरेणैव पात्रस्य मरणस्थले पितृदायत्वेन तद्धनं पुत्रादिभिर्विभज्य गृह्यते अन्यथा तैरेव उदासीनैरपि तद्धनस्वीकरणस्य कुशदेरिवोपादाने यज्ञेऽनियोगे च प्रत्यवाये न स्यात्। नन्वेवं दानादेव स्वत्वसिद्धेर्दत्तवस्तुनि स्वीकारो व्यर्थ इति चेन्न "लब्ध्वा चाष्टगुणं फलमित्यादि"स्मृतेः प्रतिग्रहादिरि द्रव्यदानस्य फलविशेषं प्रति हेतुत्वेन तादृशफलसम्बन्धार्थमेव प्रतिग्रहस्योपयोगात् याजनाध्यापनप्रतिग्रहैर्द्विजो धनमर्जयेदित्यादिस्मृत्या प्रागुक्तकृत्या च प्रतिग्रहस्यापि स्वत्वहेतुत्वबोधनात् स्वत्वजनकव्यापारस्यैवार्जनपदार्थत्वात्" शब्दरत्नप्र०। "अधिकं दानग्रन्थे द्रष्टव्यम्। एतच्चैतन्निग्रहे दोषस्तु अयाज्ययाजने उक्तत्वात्

अयाचितस्य विषयभेदे प्रतिग्रहे न दोषः यथा "अयाचितोपपन्नं तु नास्ति दोषः प्रतिग्रहे। अमृतं तं विदुर्देवास्तस्मात्तच्चैव निर्णुदेत्। गुरुश्चात्मोच्छिष्टोऽग्निर्मुखं यत्र देवतातिथेः। सर्वतः प्रतिगृह्णीयात् न तु दृष्येत् स्वयं तता। साधुतः प्रतिगृह्णीयादयं वाऽसाधुतो द्विजः। गुणवानल्पदोषस्य निर्गुणो हि निमज्जति। एवं तस्मादृतेत्या वा कृत्वाभरणमात्मनः। कुर्यादिशुद्धिं परतः प्रायश्चित्तं द्विजोत्तमः"। गारुडे २१५ अ०। अधिकम् अत्रो दर्शयिष्यमाणे शुक्लपक्षे दृश्यम्। तीर्थप्रतिग्रहनिषेधो यथा "स्वकार्यं पितृकार्यं वा देवताभ्यर्चनेऽपि वा। निष्क्रयं तस्य तत्तीर्थं यावत् तद्धनमश्नुते। यतस्तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु च" कौर्मे २२अ०। राजादेः प्रतिग्रहनिषेधे यथा "न राज्ञः प्रतिगृह्णीयाच्छूद्रयाजितादपि। न चान्त्यादशक्तस्य निन्दितात् वर्जयेद्बुधः" कौर्मे १५अ०। आपदि गर्हितप्रतिग्रहस्यादोषः दृष्टान्तश्च। "मोक्षप्रतिग्रहाभावे प्राप्तायां हरिदापदि। विप्रोऽश्नन् प्रतिगृह्णन् वा यतस्ततोऽपि नाधभाक्। गुर्वादिपोषणार्थं देवार्थेषु सर्वशः। प्रत्यादद्यादृद्विजो यस्तु भक्ष्यमेमात्मनोऽपि च। दधिक्षीरान्नमांसानि मद्यपुष्पाम्बुमत्स्यकान्। शय्यामांसासनं शाकं प्रत्याख्येयं न कर्हिचित्। अपि दुष्कृतकर्मभ्यः समादद्यादयाचितम्। पतितेभ्यस्तथाऽन्त्येभ्यः प्रतिग्राह्यमसंशयम्"। प्रतिगृहीतुं शक्तस्य तत्त्यागे तत्रैव स्थानान्तरे स्वर्ग उक्तो यथा "शक्तः प्रतिग्रहीतुं यो वेदवृत्तः सुसंयतः। लभ्यमानं न गृह्णाति स्वर्गस्तस्य सुनिश्चितम्। प्रतिग्रहसमर्थं वापि याचितं यो न यच्छति। तत्कोटिगुणितप्रेतो मृतो दासत्वमृच्छति"। दाता च न स्वरेद्दानं प्रतिग्राही न याचते। तावुभौ नरकं यातो दाता चैव प्रतिग्रही। वदन्ति कवयः केचिद्दानप्रतिग्रहौ प्रति। प्रत्यक्षं लिङ्गमेवेह दातृयाचकयोर्वचः। दातृहस्तो भवेदूर्ध्वमधस्तिष्ठेत् प्रतिग्रही। यद्दानं प्रतिगृह्णीयात् प्रतिग्राही व्रजत्यधः।" तस्य प्रकारमाह शुक्ल० विष्णुधर्मोत्तरे "भूमेः प्रतिग्रहं कुर्याद्भूमेः कृत्वा प्रदक्षिणम्"। प्रदक्षिणं न सर्वस्या भूमेः किन्तु तत्रस्थस्य प्रदक्षिणावर्त्तनमात्रं, भूमेरसन्निधाने तात्पर्यात्। "करे गृह्य तथा कन्यां दासदासौ द्विजोत्तमाः!। करन्तु हृदि विन्यस्य धर्मो ज्ञेयः प्रतिग्रहे" "आरुह्य च गजस्योक्तः कर्णे चाश्वस्य कीर्त्तितः। तथाऽनड्वाहमानान्तु सर्वेषामविशेषतः। प्रतिगृह्णीत गां पुच्छे पुच्छे कृष्णाजिनं तथा। आरुह्याः पशवस्त्वन्ये ग्राह्याः पुच्छे विचक्षणैः। प्रतिग्रहमधोमुखस्य आरुह्य च तथाऽऽचरेत्। बीजानां सप्तिमादाय रत्नान्यादाय सर्वशः। वस्त्रं दशार्द्धं आदद्यात् परिधाय तथा पुनः। आरुह्योपानहौ यानमारुह्यैव च पादुके। ईषायान्तु रथं ग्राह्यं कृत्वा दण्डे च धारयेत्। आयुधानि समादाय तथाऽऽभूषणं विभूषणम्। वर्मध्वजौ तथा स्पृष्ट्वा प्रविशेत्तु च तथा गृहम्। अवतीर्य च सर्वाणि जल-

स्थानानि वै द्विजाः। द्रव्यागमन्यान्यथादाय स्नृहा यो ब्राह्मणः पठेत्। प्रतिग्रहीता सावित्रीं सर्वत्रैव प्रकीर्त्तयेत्। ततस्तु सार्द्धं द्रव्येण तस्य द्रव्यस्य देवतम्" भूमिर्विष्णुदेवताकेत्यादि कीर्त्तयेदित्यर्थः। "समाप्येत्ततः पश्चात् कामस्तुत्या प्रतिग्रहम्। विधिं धर्ममथो ज्ञात्वा यस्तु कुर्य्यात् प्रतिग्रहम्। दात्रा सह तरत्येव नानादुर्गाण्यसौ द्विजः"। ब्रह्मपुराणे "ब्राह्मणः प्रतिगृह्णीयादृत्त्यर्थं साधुतस्तथा। अव्यञ्चमपि मातङ्गतिलनौहांश्च वर्जयेत्। कृष्णाजिनहयग्राही न भूयः पुरुषो भवेत्। शय्यालङ्कारवस्त्रादि प्रतिगृह्य मृतस्य च। नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा"। तथा "ब्रह्महत्या सुरापानमपि स्तेयं तरिष्यति। आत्मराद् यद्गृहीतन्तु तत्कथं वै तरिष्यति" एतदादिद्रव्यदानं ग्रहीतुर्दोषजनकम्। अनिच्छवे विद्यारहितत्वेनासमर्थाय च दातुरपि दोषजनकमाह दक्षः "न केवलं हि तद्याति शेषमस्य च नश्यति"। तत् द्रव्यं शेषं द्रव्यस्य अतएव याज्ञवल्क्यः "विद्यातपोभ्यां हीनेन न तु याह्यः प्रतिग्रहः। गृह्णन् प्रदातारमधो नयत्यात्मानमेव च"। अधो नरकम्। एतद्दानप्रतिग्रहणोत्तरं तपोजपादिभिरात्मतारणसमाय स्वेच्छया प्रतिग्रहीत्रे दानं न दोषायेत्याह विष्णुः "एतानि यदि गृह्णाति स्वेच्छयाभ्यर्थितो न तु। तस्मै दाने न दोषोऽस्ति यस्तात्मानन्तु तारयेत्"। तारणप्रकारमाह हारीतः "मणिवाधोगवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत् पञ्चमध्यमे दशोत्तमे द्वादशशतं पयोव्रतं शतसहस्रं सप्तप्रतिग्रहेष्विति" अष्टसहस्रमष्टाधिकसहस्रम् असत्प्रतिग्रहेषु उभयतोमुखादिप्रतिग्रहेषु तथाचादिपुराणे "किं करिष्यत्यसौ मूढो गृह्णात्युभयतोमुखीम्। सहस्रं वाहवाः पाशाः क्षुरधाराऽग्निसन्निभाः। पूर्णे वर्षसहस्रे तु पाश एकः प्रमुच्यते"। अत एव देवलः "प्रतिग्रहसमर्थो हि कृत्वा विप्रो यथाविधि। निस्तारयति दातारमात्मानञ्च स्वतेजसा"। स्कान्दे "वेदाङ्गपारगो विप्रो यदि कुर्य्यात् प्रतिग्रहम्। न स पापेन लिप्येत पद्मपत्रमिवाम्भसा" एवं "तीर्थे न प्रतिगृह्णीयात् पुण्येष्वायतनेषु च। निमित्तेषु च सर्वेषु न प्रसक्तो भवेच्चरः" इति महाभारतवचनम्। प्रतिग्रहीतृदोषजनके गङ्गातीरादिदेशग्रहणादिकाले दानेऽपि बोध्यम्। किन्त्विदानीन्तथाविधपात्राभावात् "मनसा पात्रमन्विच्छ" इत्यादि प्रागुक्तवचनात्तत्तद्देशकालयोरुत्कृष्टे देशान्तरे कालान्तरे च प्रतिपादनाचारः सर्वथा समीचीनः। गङ्गावाक्यावल्यर्थेवम्। याज्ञवल्क्यः "प्रतिग्रहसमर्थो हि नादत्ते यः प्रतिग्रहम्। ये लोका दानशीलानां स तानाप्नोति पुष्कलान्"। अपवादमाह स एव "कृशराः शाकं पयो मत्स्या गव्याः पुष्पं दधि क्षितिः। मांसमाश्यासनं धानाः प्रताख्येवं न वारि च"। चकारादृष्टादि "मयाष्टहान् कृशान् मन्थावपः पुष्पं मधीन् दधि। मत्स्यान् धानाः पयोमांसं शाकञ्चैव न निर्णुदेत्" इति वचनात्। मधीन् विषादिनिवारकान्। तथा "एधोदकं फलं मूलमन्नमभ्युद्यतञ्च यत्। सर्वतः प्रतिगृह्णीयात् मध्वथाभयदक्षिणाम्"। अभयदक्षिणाम् अभयदानं अभयप्रद इति वक्ष्यमाणवचनात्। अभ्युद्यतम् अभ्यर्थ्य दत्तम्। किमिति प्रत्याख्येवम् इत्याह। तथा च मनुः "अयाचितादुपन्नं ब्राह्ममप्यहुष्कृतकर्मणः। अन्यत्र कुलटापण्डपतितेभ्यस्तथा द्विषः" एतद्वचनं याज्ञवल्क्यस्येति मिताक्षराकल्पतरुभट्टसाधवाचार्याः। अनेरिति शूलपाणिः। भरद्वाजः "अयाचितोपपन्नं तु नास्ति दोषः प्रतिग्रहे। अस्मृतं तद्विदुर्वास्तस्मात्तं नैव निर्णुदेत्"। अपवादान्तरमाह स एव "देवातिथ्यर्थ्यनक्षते गुरुभृत्यार्थमेव च। सर्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थमेव च" भृत्या भरणीयाः भार्य्यापुत्रादयः। तथा च मनुः "द्वावेव न भवाप्रियतरौ साधो भार्य्या सुतः शिशुः। अयज्ञार्य्यं शतं कृत्वा भर्त्तव्या मनुरब्रवीत्"। आत्मवृत्त्यर्थं जीवनमात्रम्। "न तु तृप्येत् स्वयं ततः" इति मनुस्मृतेः। प्रयोगसारे "प्रतिग्रहं न गृह्णीयादात्मभोगोपलिप्सया। देवतातिथिपूजार्थं धनं यत्नादुपार्जयेत्"। अङ्गिराः "कुटुम्बार्थं द्विजः सीदन् प्रतिगृह्णीत याचितम्। कर्त्तव्यमात्मने चैव न हि याचेत कर्हिचित्"। अत एव यज्ञार्थं याचकत्वे निन्दामाह याज्ञवल्क्यः "याज्यान्तो जायते यज्ञकरणाच्छूद्रयाजकात्" शूद्रयाजकादपि अयाचितदानत्वमाह नृसिंहपुराणम् "अयाचितप्रदाता च ऋत्विगित्यर्थमाचयेत्। पुराणं श्रवणयाचित्वं नरसिंहस्य पूजनम्

प्रतिग्रहीत्र त्रि॰ प्रति+ग्रह+क्त्र्। प्रतिग्रहकर्त्तरि प्रतिग्रहीत्रधर्मौ दानशब्दे १पृ॰ दृश्यौ।

प्रतिग्राह त्रि॰ प्रति+ग्रह-कर्त्तरि ण। १प्रतिग्रहकारके २पतङ्गग्रहे (पिकदानी) पु॰ अमरः।

प्रतिघ पु॰ प्रति+हन-ड न्यङ्वा॰ कुत्वम्। १प्रतिघाते मेदिः

२कोपे अमरः । कामप्रतिघातेन तस्य जातत्वात्तथात्वम् । २मूर्च्छायां शब्दर० ।

प्रतिघात पु० प्रति+हन–घिञ् भावे अप् । १मारणे २क्षतचिह् विघाते च । ल्युट् प्रतिघातन तत्रार्थे न०अमरः ।

प्रतिघ्न न० प्रति+हन–घञर्थे क । अङ्गे शब्दच० ।

प्रतिचक्ष्य त्रि० प्रति+चक्ष–ण्यत् वा ख्यादेशाभावः । प्रकर्षेण दृश्ये ऋ० १।११२।११ भा० ।

प्रतिच्छन्दस् त्रि० छन्दोभिप्रायः प्रतिगतश्छन्दः अव्या०स० । १अभिप्रायानुरूपे २प्रतिरूपे ३अनुरोधे च त्रिका० । वेदश्छन्दः साकल्ये अव्ययी० । ४प्रतिवेदमित्यर्थे अव्य० ।

प्रतिच्छन्दक त्रि० प्रति+छन्द–ण्वुल् । प्रतिनिधौ ६।१८० श्लोके कुल्लूकभट्टः ।

प्रतिच्छाया स्त्री प्रतिरूपा छायायाः मा०स० । प्रतिरूपायां १प्रतिमायां २सादृश्ये च अमरः । [हेमच० ।

प्रतिजङ्घा स्त्री प्रतिगता जङ्घाम् अव्या०स० । अपजङ्घायाम्

प्रतिजन अव्य० वीप्सायाम् अव्ययी० । जनं जनं प्रतीत्यर्थे तस्य अंशा० अन्तोदात्तता । तत्र साधु प्रतिजना० खञ् । प्रातिजनीन प्रत्येकजनसाधौ त्रि० ।

प्रतिजनादि "प्रतिजनादिभ्यः खञ्" पा० उक्ते खञ्प्रत्ययनिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा "प्रतिजन इदंयुग संयुग सनयुग परयुग परकुल परस्यकुल अन्यकुल सर्वजन विश्वजन महाजन पञ्चजन"

प्रतिजन्य न० प्रतिभूतं जन्यं सुखं यस्य, प्रतिजने विपक्षजनपदे भवः यत् वा । १प्रतिपक्षे २प्रतिपक्षजनपदभवे च ऋ०४।५।७ भा० ।

प्रतिजल्पक पु० "दुष्टाभासत्वभाक्तेऽस्मिन् प्राश्निमार्क्षत्यतुद्धतम् । दूतस्य क्रमेणोक्तं यत्र स प्रतिजल्पकः" उज्ज्वलभरतोक्तलक्षणे दूतवाक्यभेदे ।

प्रतिजागर पु० जागरस्य प्रतिनिधिः । १प्रातर्बोधनाय अहरहरवेक्षणेति नियोगे अमरटी० रायमुकुटः । ल्युट् । प्रतिजागरण तत्रार्थे न० मार्क०पु० ६६अ० ।

प्रतिजिह्वा स्त्री प्रतिरूपा जिह्वा मा०स० । ताम्बूलस्थे लिङ्गाकारे मांसपिण्डे (आलजिभ) स्वार्थे क । तत्रार्थे त्रिका० ।

प्रतिज्ञा स्त्री प्रति+ज्ञा–भावे "आतश्चोपसर्गे" पा० अङ् । १अर्थे ज्ञातप्रकारकज्ञानानुकूलव्यापारे स च करिष्यामीत्यादिवाक्यरूपः "साध्यनिर्देशः प्रतिज्ञा" गौ०सू०उक्ते साध्यवत्त्वेन पक्षनिर्देशरूपे २पञ्चावयवन्यायवाक्यभेदे "यथा यत्रैधो वह्निमान् धूमादित्याकारम् तत्र भाष्यम् "प्रज्ञापनीयेन धर्मेण विशिष्टस्य परिग्रहवचनम् साध्यनिर्देशः प्रतिज्ञा यथा यद्धोऽनित्य इति" । अवयवशब्दे अनुमानचिन्तामण्यादिदीधितौ विस्तारः । अवहारे पक्षाभिधायके ३पूर्वपक्षभाषाद्यपरपर्याये वाक्ये यथा ममेदं द्रव्यमनेन स्वीकृतं न ददातीत्यादि । पूर्वपक्षशब्दे ४४०६पृ० दृश्यम् । ४अङ्गीकारे अमरः भावे ल्युट् । प्रतिज्ञान तत्रार्थे न० ।

प्रतिज्ञात त्रि० प्रति+ज्ञा–क्त । प्रागुक्तप्रतिज्ञाविषये "ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्" इति स्मृतिः ।

प्रतिज्ञान्तर न० अन्या प्रतिज्ञा मयू०स० । "प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम्" गौ०सू० उक्ते निग्रहस्थानभेदे विवृतश्चेदं वृत्तौ "प्रतिज्ञान्तरं लक्षयति । प्रतिज्ञातस्यार्थस्य प्रतिषेधे सति तद्धर्मसम्बोद्धिधीर्षया धर्मस्य धर्मान्तरस्य विशिष्टः कल्पोविकल्पः तस्माद्विशेषणान्तरविशिष्टतया प्रतिज्ञातार्थस्य वचनमिति फलितार्थः । प्रतिषेध इत्यनेन झटितिसंवरणे विवक्षयेमापि स्वयं दूषणं विभाव्य विशेषणे न दोष इत्युक्तं, प्रतिज्ञातार्थस्योपलक्षणम् हेत्वन्तरिक्षार्थस्येति तत्त्वं तेन तदाहरणान्तरस्वपक्षान्तरत्व प्रतिज्ञान्तरत्वेन संगृहीतं भवति । इदञ्च पक्षसाध्यविशेषभेदात् प्रत्येकं द्विविधं यथा यद्धोऽनित्य इत्युक्ते ध्वनौ साधने परेण प्रत्युक्ते यत्कालः यद्यः पक्ष इति प्रतिज्ञान्तरं, न चेदमर्थान्तरं प्रकृतोपयोगात् न चेयं प्रतिज्ञाहानिः पूर्वोक्तस्यापरित्यागात् एवं पर्वतो वह्निमान् सुरभिचन्दनधूमवत्त्वादित्युक्ते असमर्थविशेषणत्वेन च परेण प्रत्युक्ते क्षणाद्युपलक्षणवह्निमानित्यत्र, एवं तादृशपक्षे साध्ये यः सुरभिचन्दनधूमवान् स वह्निमानित्युदाहरणे न्यूनत्वेन प्रत्युक्ते च तादृशवह्निमानित्यत्र, एवमन्यदप्यूह्यम् ।

प्रतिज्ञापत्र न० प्रतिज्ञारूपं पत्रम् मा०त० । भाषापत्रभेदे ।

प्रतिज्ञाविरोध न० "प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः" गौ० सू० उक्ते निग्रहस्थानभेदे विवृतश्चेदं वृत्तौ "प्रतिज्ञाविरोधं लक्षयति अत्र च प्रतिज्ञाहेतुपदे कथाकालीनवाक्यपरे तथा च कथायां स्ववचनार्थविरोधः प्रतिज्ञाविरोधः यद्यपि काञ्चनमयः पर्वतो वह्निमान् पर्वतः काञ्चनमयवह्निमान् क्षुद्रो वह्निमान् क्षुद्रत्वात् पर्वतो वह्निमान् काञ्चनमयधूमादित्यादौ हेत्वाभासान्तरसाकूत्यं तथाप्युपाधेयसङ्करेऽप्युपाधेरसाकूत्यांश दोषः । न चासङ्कीर्णत्वाभावः पर्वतो न वह्निमान् धूमात् यो

यो धूमवान् स निरग्निरित्युदाहरणे निरग्नित्वावमित्युपनये तत्सत्त्वात् एवं निगमनेऽपि बोध्यम् ।

प्रतिज्ञासंन्यास न० "पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः" गौ०सू०उक्ते निग्रहस्थानभेदे विवृतश्चेदं वृत्तौ "प्रतिज्ञासंन्यासं लक्षयति । पक्षस्य स्वाभिहितस्य परेण प्रतिषेधे कृते सति तत्परिग्रहीषया प्रतिज्ञातार्थस्यापनयनमपलाप इत्यर्थः यथा शब्दोऽनित्य ऐन्द्रियकत्वादित्युक्ते सामान्ये व्यभिचारेण परेण प्रत्युक्ते क एवमाह शब्दोऽनित्य इति ।

प्रतिज्ञाहानि न० "प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः" गौ०सू० उक्ते निग्रहस्थानभेदे विवृतश्चेदं वृत्तौ "प्रतिज्ञाहानिं लक्षयति प्रतिकूलो दृष्टान्तो यत्र स प्रतिदृष्टान्तः परपक्षः स्वः स्वीयः दृष्टान्तो यत्र स स्वदृष्टान्तः स्वपक्षः तथा च स्वपक्षे परपक्षधर्माभ्यनुज्ञा प्रतिज्ञाहानिः स्वयं विशिष्याभिहितपरित्याग इति फलितार्थः अपसिद्धान्तस्तु स्वयं विशिष्य नाभिधीयते इति नापसिद्धान्तसाङ्कर्यं सेयं पञ्चहेतुदृष्टान्तसाध्यतदन्यहानिभेदात् पञ्चधा भवति यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते प्रत्यभिज्ञया बाधितविषयोऽयमित्युच्चरिते अस्तु तर्हि घट एव पक्ष इति, एवं तत्रैव ऐन्द्रियकत्वादिति हेतोरनैकान्तिकत्वमिति प्रत्युक्ते अस्तु कृतकत्वादिति हेतुरिति, एवं पर्वतो वह्निमान् धूमादयोगोलकवदित्युक्ते दृष्टान्तः साधनविकल इति प्रत्युक्ते अस्तु तर्हि महानसवदिति, एवम् अत्रैव सिद्धसाधने च प्रत्युक्ते अस्तु तर्हि इच्छनवानिति अन्यहानिस्तु विशेषणहान्यादिः यथा तत्रैव नीलधूमादित्युक्ते असमर्थविशेषणत्वेन प्रत्युक्ते अस्तु तर्हि धूमादिति हेतुरित्यादि ।

प्रतितन्त्र न० प्रतिकूलं तन्त्रं शास्त्रम् प्रा०स०। स्वमतविरुद्धे शास्त्रे तन्त्रस्येतरेतराभिमतसम्बन्धस्यार्थस्योपदेशः शास्त्रमिति ।

प्रतितन्त्रसिद्धान्त पु० "समानतन्त्रसिद्धः परतन्त्रसिद्धः प्रतितन्त्रसिद्धान्तः" गौ०सू०उक्ते सिद्धान्तभेदे विवृतं चेदं वृत्तौ "प्रतितन्त्रसिद्धान्तं लक्षयति । समानशब्दः एकार्थस्तन्त्रैकतन्त्रसिद्ध इत्यर्थः स्वतन्त्रसिद्ध इति पर्य्यवसितोऽर्थः तथा च वादिप्रतिवाद्येकतरभात्राभ्युपगतस्तदेकतरस्य प्रतितन्त्रसिद्धान्त इति फलितार्थः । यथा मीमांसकानां शब्दनित्यत्वम् । उदाहृतं च भाष्ये यथा नासत आत्मलाभः नासत आत्मज्ञानं निरतिशया चेतनाः देहेन्द्रियमनःसु विषयेषु तत्तत्कारणेषु च विशेष इति संख्यानम् । पुरुषकर्मनिमित्तो भूतसर्गः कर्महेतवो दोषाः प्रवृत्तिश्च स्वगुणविशिष्टाश्चेतनाः व्यवदुत्पद्यते उत्पन्न निरुध्यते इति योगानाम् ।

प्रतितर पु० प्रतितीर्यतेऽनेन प्रति+तॄ–करणे अप । तरणसाधने नौकाप्लवनदण्डादौ स्मृतः ।

प्रतिताल पु० संगीतसा० उक्ते तालभेदे तल्लक्षणभेदादिकं तत्रोक्तं यथा "कान्तारः समराख्यश्च वैकुण्ठो वाञ्छितस्तथा । कल्पिताः शङ्करेणैव चत्वारः प्रतितालकाः । कान्तारः प्रतितालस्तु चन्द्रक्रीडे द्रुतद्वयम् । दशाक्षरपदैर्नाद्यं झङ्कारे वर्त्तते रसे ।१ लघुद्वौ लघुश्चान्ते न्यपताल उदाहृतः । रुद्रसंख्याक्षरपदः समरो वीरके रसे" ।२ "रुद्रलयस्तु वैकुण्ठे प्रतितालेऽमीरिताः । अर्कसंख्याक्षरैः पादो हास्ये त्रिपुटतालके" ।३ "वाञ्छितस्तृतीय ताले लघुरेको द्रुतस्तथा । त्रयोदशाक्षरैर्युक्तो रसेऽद्भुते प्रकीर्त्तितः" ।

प्रतिताली स्त्री प्रतिगता तालं गौरा० ङीष् । (चाबि) तालकोद्घाटके यन्त्रभेदे ख्यातः ।

प्रतितूणी स्त्री सुश्रुतोक्ते वातरोगभेदे "आहत्य वायुः सकफो धमनीः शब्दवाहिनीः । नरान् करोत्यकिञ्चनकान् मूकमिन्मिणगद्गदान् । अधिका वेदना यातिं सर्वोभूताधयोत्थिता । भिद्यन्ते गुदोपस्थं सा तूणीत्युपदिश्यते । गुदोपस्थोत्थिता सैव प्रतितूणीविसर्पिणी ॥ वेगैः षड्भाश्रयं याति प्रतितूणी तु सा स्मृता" । तूणीशब्दोऽत्र तत्र लक्षितवातरोगभेदे स्त्री ।

प्रतिदान न० प्रतिरूपं तुल्यरूपं दानम् प्रा०स०। विनिमयेऽतुल्यरूपदाने न्यस्तस्य द्रव्यस्य २अन्यार्पणे च अमरः ।

प्रतिदारण न० प्रति–दॄ+णिच्–आधारे ल्युट् । युद्धे शब्दभाषा भावे ल्युट् । भेदने ।

प्रतिदिवन् पु० प्रतिदीव्यति दिव–कनिन् । प्रत्यहं १दीप्तिशीले स्त्र्यां त्रिका० अस्य भत्वेऽङ्गोपे दीर्घविधौ परनिमित्तनोपरूपाजादेशस्य स्थानिवत्त्वाभावात् दीर्घः । प्रतिदीवः प्रतिदीव्नेत्यादि । शब्दरत्ना० प्रतिदीवन् इति शब्दान्तरं कृतं तत्र पृषो० तत्वार्थं । [३१०१ पृ०इत्यादिकम् ।

प्रतिदृष्टान्तसम पु० गौ०सू० उक्ते जात्युत्तरभेदे जातिशब्दे

प्रतिद्वन्द्व न० प्रतिरूपं द्वन्द्वम् प्रा०स०। तुल्ययुद्धे भार्क०१६अ०।

प्रतिद्वन्द्विन् त्रि० प्रतिद्वन्द्वोऽस्यास्य इनि । १तुल्यरूपेण येन सह द्वन्द्वं युद्धं क्रियते २तस्मिंश्च ।

प्रतिधर्त्तृ त्रि॰ प्रति+धृ+तृच्। निराकारके यजु॰१५।१०वेददी॰
प्रतिधा स्त्री प्रति+धा–भावे क्विप्। प्रतिविधाने भावे ल्युट्। प्रतिधान निराकरणे न॰।
प्रतिधि पु॰ पु॰ प्रतिमुखं धीयते प्रति–धा कर्मणि कि। प्रातःसवनान्ते पाठ्ये १स्तोत्रभेदे ताण्ड्य॰ब्रा॰ भा॰। २ईषातिर्य्यग्गतकाष्ठे ऋ॰ १६।८५।८ भा॰। ३चक्रे यजु॰ ६८ वेददी॰। [जायमाने शब्दे प्रतिशब्दे हेमच॰।
प्रतिध्वनि पु॰ प्रतिरूपोध्वनिः प्रा॰ स॰। शब्दानुसारेण
प्रतिध्वान पु॰ प्रति+ध्वन–घञ्। प्रतिशब्दे अमरः।
प्रतिनन्दन न॰ प्रति+नन्द्–भावे ल्युट्। आशीर्वादादिना सम्भावने। [हेम॰।
प्रतिनप्तृ पु॰ प्रतिनिक्षितो नप्ता पौत्रः प्रा॰स॰। प्रपौत्रे
प्रतिनव त्रि॰प्रतिगतो नवं नूतनत्वम् अत्या॰स॰। नूतने जटा॰
प्रतिनाद पु॰ प्रतिरूपो नादः प्रा॰स॰। प्रतिध्वनौ
प्रतिनायक पु॰ प्रतिकूलो नायकः प्रा॰स॰। वीररसादौ प्रतिकूले नायके नायकस्य यं प्रति कोपादि तस्मिन् "धीरोद्धतः पापकरी व्यसनी प्रतिनायकः" सा॰द॰। यथा रामस्य रावण इत्यादि।
प्रतिनिधि पु॰ प्रतिरूपं निधीयते तुल्यरूपतया स्थाप्यते प्रति+नि+धा–कि। १प्रतिरूपे तुल्यरूपे अमरः। वैदिककर्माङ्गद्रव्यादीनां मुख्यानामलाभे २तुल्यरूपतयान्यस्मिन् निधीयमाने। क्वच प्रतिनिधिर्भवति क्वच वा न भवति तत्तर्कं विशेषसहितं कात्या॰श्रौ॰१।४ कण्डिकायां व्यवस्थापितं तस्य संक्षिप्तार्थस्तु कात्यायनशब्दे १८६५ पृष्ठादौ दर्शितः। तदनुसारेण स्मार्त्तादिसम्मतव्यवस्था प्रदर्श्यते तत्र एकादशीतत्त्वे उक्तं यथा स्कन्दपुराणम् "पुत्रश्च विनियोक्तेतं भगिनीं भ्रातरन्तथा। एवामभाव एवान्यं ब्राह्मणं विनियोजयेत्"। गरुड़पुराणम् "भार्य्यां भर्त्ता व्रतं कुर्य्याद्भार्य्यावाच पतिस्तथा। असामर्थ्ये द्वयोस्त्वन्यां व्रतभङ्गो न जायते"। वराहपुराणे "पितृमातृपतिभ्रातृसद्गुर्वादिभूभुजाम्। अदृष्टार्त्तवपोषित्वा स्वस्य च फलभाग् भवेत्"। अत्रैव विषये कात्यायनः "दक्षिणा नाम कर्त्तव्या शुश्रूषा विहिता च या" नन्वत्र प्रतिनिधौ समेऽपि धर्मे इत्यादिसन्दर्भेण फलं कृत्स्नेऽपि इति चेत् प्रधान एव। तथाच शारीरकभाष्ये श्रुतिः "यां वै काञ्चन यज्ञ आशिषमाशासते यजमानायैव तामाशासते इति होवाच" इति। ब्राह्मण सर्वस्वे यजमानायेत्यत्र यजमानस्येति पाठः। कल्पतरौ स्कन्दे "यां वै काञ्चन ऋत्विगाशिषमाशास्ते सा यजमानस्यैवेति'। अत्र ऋत्विग्यजमानपदे प्रतिनिधिप्रधानपरे आकाङ्क्षितत्वात्। अतएव प्रतिनिधिपुत्रादिना "आयान्तु नः पितरः" इत्यादिरनूह एव यजते वाक्यस्य काल्पनिकत्वाच्च तथेति। कालमाधवीये "काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि सः। काम्येष्वुपक्रमाद्दुर्ब्बलन्यो प्रतिनिधिं विदुः" यथा नित्यं नैमित्तिकञ्च प्रतिनिधिनाप्युपक्रम्य कारयेत् काम्ये तु स्वसामर्थ्यं परीक्ष्य स्वयमेवोपक्रम्य कुर्य्यात्। असामर्थ्ये उपक्रमाद्दुर्ब्बलं प्रतिनिधिनापि कारयेत्। एतच्च श्रौतकाम्यपरं स्मार्त्तकाम्यन्तु अन्यद्वाराप्युपक्रम्य कार्य्यम्। तथा च पराशरभाष्ये शातातपः "श्रौतं कर्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत्। अशक्तौ श्रौतमन्यः कुर्य्यादाचारमन्ततः"। अन्तत उपक्रमात् परतः। एतच्च काम्येऽपि प्रतिनिधिविधायकं नैमित्तिकमात्रपरत्वे श्रौतस्मार्त्तभेदोपादानं व्यर्थं स्यात् तयोरविशेषादेव प्रतिनिधिलाभात्। अत एव भारतपाठादौ तथा समाचारः। स्मृत्यर्थसारे "नाभावस्य प्रतिनिधिरभावान्तरमिष्यते"। सजातीयत्वेऽप्यभावान्तरमभावस्य प्रतिनिधिर्नेष्यते। भावस्तु कदाचिदुपवासादौ ब्राह्मणभोजनादीति। "नापि प्रतिनिधातव्य निषिद्धं वस्तु कुत्रचित्। श्रोत्रियायामभोज्यं यद्दुष्टं हि तदशेषतः। प्राह्यं प्रतिनिधित्वेन होमकार्य्ये न कुत्रचित्। द्रव्यं वैकल्पिकं किञ्चिद् यत्र सङ्कल्पितं भवेत्। तदभावे षडङ्गं प्राह्यं न तु वैकल्पिकान्तरम्। उपात्ते तु प्रतिनिधौ मुख्यार्थो लभ्यते यदि। तत्र मुख्यमनादृत्य गौणेनैव समाधयेत्। संस्काराद्यमयोग्योऽपि मुख्य एव हि लभ्यते। न तु संस्कारयोग्योऽन्यो गृह्यते प्रतिरूपकः। मुख्ये कार्य्यासमर्थे तु लब्धेऽप्येतस्य नादरः। प्रतिरूपकमादाय शुद्धमेवोपजायते। कार्य्ये रूपैस्तथा पत्रैः क्षीरैः पुष्पैस्तथा फलैः। गन्धैरसैः षडङ्गं प्राह्यं पूर्वाभावे परं परम्। याज्याप्रान्तु भवेद्ग्राम्यमारण्यानामरण्यजम्। यवाभावे तु गोधूमास्तथा रेणुयवादयः। हविष्ये गोर्हितं प्राह्यं तदभावेऽपि साहिषम्। आज्यं वा तदभावे तु साज्यात्तैलं प्रयुज्यते। तैलाभावे ग्रहीतव्यं तैलजं तिलसम्भवम्"। तैलजं तैलबीजं तिलबीजसम्भवम् तिलपिष्टादि। "तदभावे तु सर्व्वेषां कौशुम्भं सर्षपोद्भवम्। वृक्षबीजैस्तथा प्राह्यः पूर्वाभावे

वरः परः। तदभावे गवादीनां क्रमात् क्षीरं विधीयते। तदभावे दधि आज्यमलाभे तिल दृश्यते। यत्र शुष्कं दधि क्षीरं तत्रापि तदनाभतः। अजादेः क्षीरदध्यादि तदभावेऽपि गोष्टतम्। शुष्कामक्षोऽथ वा ग्राह्यः कार्य्यकारणसन्ततौ"। अत एव घृताभावे पूर्वं दधि ततः पयः। तथा "सर्वत्र गौणकालेषु कर्मचोदितमाचरेत्। प्रायश्चित्तं व्याहृतिभिर्हुत्वा कर्म समाचरेत्"। मत्स्यसूक्ते "घृतं न लभ्यते यत्र शुष्कक्षीरेण होमयेत्। क्षीरस्य च दधि ज्ञेयं मधुनश्च गुडो भवेत्"। आयुर्वेदेऽपि "मधु यत्र न लभ्येत तत्र जीर्णो गुडो भवेत्"। काण्डमूलपर्णपुष्पफलप्ररोहरसगन्धादीनां सादृश्येन प्रतिनिधिं कुर्यात्। सर्वाभावे यवप्रतिनिधिर्भवतीति" काण्डं नालं प्ररोहोऽङ्कुरः। सर्वाभावे यव इति कल्पतरुः अवयव इति नारायणोपाध्यायः। शान्तिदीपिकायां नारदीयपञ्चरात्रम् "अभावे चैव धान्यानां हरितालं विधीयते। बीजानामप्यभावे तु यव एकः प्रशस्यते। ओषधीनामभावे तु सर्वदेवी प्रशस्यते। रत्नानामप्यभावे तु मुक्ताफलमनुत्तमम्। लौहानामप्यभावे तु हेमपात्रं प्रकल्पयेत्"। लौहानां तैजसपात्राणाम्। न्यायप्राप्तप्रतिनिधिमधिकृत्य जैमिनिः "न देवताग्निशब्दक्रियाणामिति"। अस्यार्थः देवताया अग्नेश्च आहवनीयादेः शब्दस्य मन्त्रस्य क्रियायाः प्रयाजाद्यदृष्टार्थकर्मणश्चादृष्टमात्रार्थकत्वेनाराद्युपकारकत्वान्न प्रतिनिधिः, व्रीह्यादीनान्तु सन्निपत्योपकारकाणां पुरोडाशसाधनं दृष्टमेव प्रयोजनमिति तत्र प्रतिनिधिरुचित इत्युक्तम्। परिशिष्टम् "शुष्ककाले तु शुष्कश्चेत् साधनं नैवं लभ्यते। तत्कालद्रव्ययोः कस्य गौणता शुष्कतापि वा"। तत्र भरद्वाजः "शुष्ककालमपाश्रित्य गौणमप्यस्तु साधनम्। न शुष्कद्रव्यलाभेन गौणकालप्रतीक्षणम्। गौणेषु तेषु कालेषु कर्म चोदितमारभेत्। प्रायश्चित्तप्रकरणप्रोक्तां निष्कृतिमाचरेत्"। उत्तरमतं सिद्धान्तमिति केचित्। तदभिप्रायकं मीमांसाषष्ठाध्यायसूत्रम्। "पौर्वापर्येऽपि पूर्वदौर्बल्यं प्रकृतिवदिति"। ज्योतिष्टोमेऽन्योन्यं सम्बध्य यज्ञशालातो बहिर्निर्गच्छता ऋत्विजां विच्छेदनिमित्तं प्रायश्चित्तं श्रूयते यद्युद्गाता विच्छिन्द्याद्दक्षिणेन यजेत यदि प्रतिहर्त्ता सर्वस्तदक्षिणेनेति"। तत्र उद्गातृप्रतिहर्तृोःक्रमेण विच्छेदे विरुद्धप्रायश्चित्तयोः बलबत्त्वायत्त्वात्। किं पूर्वं कार्य्यम् उत वा परमिति संशये हि अनुपजातविरोधात् पूर्वमिति पूर्वपक्षे राद्धान्तः पौर्वापर्ये सति निमित्तयोः पूर्वस्यैव निमित्तस्य दौर्बल्यम्। उत्तरस्य पूर्वनिरपेक्षस्य तद्बाधकतया उदितत्वात् पूर्वोदयकाले उत्तरस्याप्राप्तत्वेन पूर्वेण बाध्यत्वायोगात्। उक्तं हि "पूर्वं परमजातत्वादबाधित्वैव जायते। परस्यानन्यथोत्पादादुक्तबाधेन सम्भवः" इति प्रकृतिवदिति यथा हि प्रकृतौ क्रत्वोपकाराः क्रमाः प्रथमनिर्देशेन विकृतावुपकारकाङ्गिणां प्राप्ताः कल्पोपकारतया चरमभाविभिरपि चरैर्निरपेक्षैर्बाध्यन्ते तद्वदिति। अत एव शारीरकभाष्यटीकायां वाचस्पतिमिश्राः "ज्येष्ठस्वज्ञानापेक्षितस्य बाध्यत्वे हेतुर्न बाधकत्वे रजतज्ञानस्य च्यायसः शुक्तिज्ञानेन कनीयसा बाधदर्शनात् तद्बलबाधने तद्बाधात्मनस्तस्योत्पत्तेरनुत्पत्तेः तथाच "पूर्वापरबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योन्यनिरपेक्षाणां यत्र तुल्यधियां भवेत्" इति। यदि च पूर्ववचनस्य पूर्वपक्षत्वे वैयर्थ्यं स्यात् अत उभयवचनार्थौ विवक्षणीयौ तदा विषयभेदेन व्यवस्थापनीयौ। तथाहि यत्राष्टकाश्राद्धादौ कालान्तराभावस्तत्र तत्कालानुरोधादिहितद्रव्यान्तरेऽपि प्रतिनिहितद्रव्यमादाय मुख्यकाल एव तत्करणं न तु वचनानुपात्तस्वेच्छाकालप्रशस्तकालप्रतीक्षणम्। तथाच छन्दोगपरिशिष्टम् "स्थालीपाके पशुस्थाने कुर्याद्वा यद्यनुकल्पितम्। अपवेत्तं सवत्सायास्तरुणायाः प्रयत्नतः" इत्यादि। यत्रावदिकाश्राद्धादौ क्षणैकादशाद्यहर्गौणकालोऽस्ति तत्र कृताहादावश्राद्धाद्यभावे तदनुरोधेन उपवासादिरूपं प्रायश्चित्तं कृत्वा गौणकाले तत् कर्त्तव्यम्। तथाच लघुहारीतः "एकोद्दिष्टन्तु कर्त्तव्यं प्राक्तनैव सदा खलु। अभावे प्राक्तनान्नाद्यां तदहः सदुपोषणम्"। तथाच छन्दोगपरिशिष्टम् "संस्कारा अतिपत्तेरन् स्वकालाच्चेत् कथञ्चन। कृत्वैतदेव कुर्वीत ये तूपनयनादधः"। यत्र तु विनिगमकवचनाभावस्तत्र यद्यपि क्रियायाः प्राधान्यात् कालो द्रव्यं वयमपि गुणभूतमेव तथाप्युभयोपसंहारान्नाम्नश्चे द्रव्यादेः कालस्य च्यवादिक्रियाघटितस्य कर्त्तव्यीनत्वाभावाद्वर्जनीयत्वसिद्धिः असन्निधिकत्वाद्विनियोक्तृत्वाभावेन बहिरङ्गत्वात्। कालस्य निमित्तत्वं व्यक्तं भविष्ये "अतः कालं प्रवक्ष्यामि निमित्तं कर्मणामिह"। द्रव्यस्य तु यागाङ्गकपनियोज्यकत्वेनाभ्यर्हितत्वात् कर्मणः कारकत्वेनान्तरङ्गत्वाच्च। गुणादि-

प्रतिनिध्यभावे तु ब्रह्मवैवर्त्तः "उपवासासमर्थश्चेदेक विप्रन्तु भोजयेत्। तावद्धनानि वा दद्याद् यद्भुक्ताद्द्विगुणं भवेत्। षड्रसस्मितां देवीं जपेद्वा प्राणसंयमान्। कुर्य्याद्द्वादशसंख्याकान् यथाशक्ति व्रते नरः"। देवीं गायत्रीम्। अत्र चान्द्रायणादौ परिसंख्या। काश्यपश्चरात्रे "मज्जने मद्दत्याने मत्पार्श्वपरिवर्त्तने। फलमूलजलाहारी हृदि शल्यं समार्पयेत्। अत्र यो दीक्षितः कश्चिद्वैष्णवो भक्तितत्परः। निर्निमित्तमदीक्षायां न च क्षुद्व्याधिपीड़ितः। अन्नं वा यदि भुञ्जीत मूलं फलमथापि वा। अपराधमहं तस्य न क्षमामि तु कश्यप!। क्षिपामि नरके घोरे कृच्छ्रलक्षं मम जायते"। निमित्तं प्रारब्धचान्द्रायणादिव्रतविरोध इत्यादि, दीक्षायां चरुशेषप्राशनस्य विहितत्वाद्दीक्षायामित्युक्तम्। क्षुद्व्याधिना पीड़ितः सर्वमेतत्प्रदर्शनमात्रं शक्तौ निर्विरोध इत्यर्थः। अन्नादिकमप्युपलक्षणमिति जीमूतवाहनः। अत्र निमित्तं प्रारब्धचान्द्रायणादीति यदुक्तं तच्च चान्द्रायणादौ भोजनस्यावश्यकत्वाभावात् किन्तु निमित्तं रविवाराद्युपवासधारणं जलपानरूपं दीक्षायामपि चरुप्राशनं प्राणरूपम् अन्यथा "पुरोडाशोऽपि लोभो वा संग्राम्ये हरिवासरे। अभक्ष्येण समः प्रोक्तः किं पुनश्चाशनक्रिया" इति वारदीयं विरुध्येत। तद्घ्राणस्य भोजनरूपतामाह कालादर्शे श्रुतिः "पित्रमाघ्रेयं तस्मैवं प्राशितं भवति" इति पित्रनुपलक्षणम् आकाङ्क्षाया अवशिष्टत्वात्। तेनैकादश्यां तदुभयोर्जलपारणं चरुशेषघ्राणञ्च कृत्वा उपवासः कार्य्यः"।

प्रारब्धकार्त्तिकादिस्नाने तु व्याधादिनाऽसामर्थ्ये पुत्रादिभिः प्रतिनिधिना कारयितव्यं मातृकल्पविधिना नित्यस्नान एव तद्विधिनादिति" इति मल०तत्त्व स्वयं करणाऽसामर्थ्ये अन्यद्वारा कारयितव्यं यथा दक्षः "स्वयं होमे फलं यत्तु तदन्येन न जायते। ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः। एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि" विट्पतिर्जामाता। एवञ्च ऋत्विगादीनरत्व क्रियत्वन्यूनता। अत्राशौचाशङ्कया बोधनदिनात् पूर्वं श्रुचितत्कालजीवित्वरूपाधिकाराभावेऽपि यद्वरणादिकं क्रियते तत्कर्मकाले तस्य वारदोक्तस्वयंप्रवर्त्तनवत् प्रवर्त्तनाय न तु तदानीं प्रतिनिधीयते अथ वा "निःक्षिप्ताग्निं खदारेषु परिकल्पप्रवर्त्तिजन्तथा। प्रवसेत् कार्य्यवान् विप्रो हृष्टश्चैव न चिरं वसेत्" इति छन्दोगपरिशिष्टवदन्यत्रापि प्रतिनिधीयते एवं वरणं विनापि कश्चिद्यदि ऋत्विक् प्रवर्त्तते तथापि तत्कर्मसिद्धिः। दक्षिणा च तस्मै शुक्लिकाले दातव्येति तथा च नारदः "ऋत्विक् च त्रिविधो दृष्टः पूर्वैर्जुष्टः स्वयं कृतः। यदृच्छया वा यः कुर्य्यादार्त्विज्यं प्रीतिपूर्वकम्" यदृच्छया स्वेच्छया" ति०त०। परार्थस्नाने स्वयमशक्तौ कुशमयप्रतिमूर्त्तिस्नानेऽपि फलविशेषः प्रा०त०। उक्तो यथा "प्रतिकृतिं कुशमयीं कृत्वा तीर्थवारिषु मज्जयेत्। यस्तद्दिश्य निमज्जेत सोऽष्टभागं फलं लभेत्। मातरं पितरं भ्रातरं चैव दृष्ट्वा गुरुम्। यस्तद्दिश्य निमज्जेत दशांशं फलं लभेत्"। "अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा। पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः" दत्तकमी०।

प्रतिनियम पु० प्रत्येकं नियमः। १एकमेकं प्रति नियमे २व्यवस्थायाम् "प्रतिनियमाद्युगपत्प्रवृत्तेश्च पुरुषबहुत्वं सिद्धम्" सा० का०।

प्रतिनिर्देश त्रि० प्रति+निर्—दिश-कर्मणि घञ्। प्रथमनिर्दिष्टस्य पुनर्गुणान्तरविधानार्थं बुभुत्सितार्थप्रतिपादनार्थं च निर्देशविषये यथा "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" अत्र ताम्रतयोदितस्य पुनस्ताम्रगुणविशिष्टतयास्तत्वकीर्त्तनाय पुनर्निर्देशः। तत्र च कथित पदता न काव्यदोषः तदुक्तं काव्यप्रकाशे

"उद्देशप्रतिनिर्देशव्यतिरिक्तो विधेय एकपदप्रयोग निषेधस्य, तद्गति विधये प्रत्युत तस्यैव पदस्य सर्वनाम्नो वा प्रयोगं विना दोषः। तथा हि "उदेति सविता ताम्रस्ताम्र एवास्तमेति च। सम्पत्तौ च विपत्तौ च महतामेकरूपता"। अत्र रक्त एवास्तमेतीति यदि क्रियते तदा पदान्तरप्रतिपादितः स एवार्थोऽर्थान्तरतयेव प्रतिभासमानः प्रतीतिं स्खलयति"। "तद्गतीति उद्देशप्रतिनिर्देशत्ववतीत्यर्थः दोष इति आपाततोऽर्थान्तरताभासरूप इत्यर्थः। अयं भावः "न सोऽस्ति प्रत्ययो लोके यत्र शब्दो न भासते" इति नियमाच्छब्देनोपस्थाप्यमानोऽर्थः शब्दविशिष्ट एव भासते अतः शब्दभेदेनोपादाने तच्छब्दविशिष्टेऽर्थे भासमाने विभिन्नशब्दरूपविशेषणभेदाद्भेदावभास इति। सर्वनाम्नापि पूर्वोपात्तशब्दविशिष्टभासनाच्च भेदावभास इत्याह सर्वनाम्नोवेति" नागेशः।

प्रतिनिवर्त्तन न० प्रति+निर्—वृत-भावे ल्युट्। १अभीष्टवस्तुतः निवृत्तौ णिच्-ल्युट्। २निवारणे

प्रतिन्याय अव्य० प्रति+नि+अय इ—वा यञ्। न्यायो

युक्तिभेदो वा अनुक्रमे अवतिक्रमे वा अव्ययी० वा। १यथागतं प्रत्यागमने "पुनः प्रतिन्यायं यथा योन्या द्रवति" इ०उ० "प्रतिन्यायम् यथागतम् नि+आयो न्यायः। अयनमायो निगमनं पुनः पूर्वमनवैपरीत्येन यदागमनं स प्रतिन्यायः यथागतं पुनरागच्छतीत्यर्थः" भाष्यम्। २युक्तिमनतिक्रम्येत्यर्थे च।

प्रति(ती)प पु० प्रति–पाति+पा–क वा दीर्घः। शान्तनुराज पितरि भा०आ० ९४अ०। ह्रस्वमध्यः शब्दरत्ना०।

प्रतिपक्ष पु प्रतिकूलः पक्षः प्रा०स०। १विरुद्धपक्षे "विरुद्धस्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः" गौत०सू०। निर्णयशब्दे ४५९१ पृ० अस्यार्थो दृश्यः। प्रतिकूलः पक्षो यस्य प्रा०व०। २शत्रौ ३सदृशे च त्रि०। ४व्यवहारे प्रतिवादिनि विपक्षे च।

प्रतिपक्षित पु० प्रतिपक्षो जातोऽस्य तारका० इतच्। १सत्प्रतिपक्षरूपदोषयुक्ते हेतौ हेत्वाभासभेदे "अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः। कालात्ययापदिष्टश्च हेत्वाभासाश्च षड्विधा" भाषा०। "सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः। अत्र तु हेतुरेवेति विशेषः। साध्याभावसाधक एव साध्यासाधकत्वं न उपन्यस्त इत्यशक्तिविशेषोपस्थापकत्वाच्च विशेषः। सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः। अदृष्टार्थापरामार्थकतया साध्यव्याप्यवत्त्वेनोपस्थितिकालीनायाः साध्याभावव्याप्यवत्त्वेनोपस्थितेर्विषयस्तया इत्यन्ये। अत्र च परस्पराभावव्याप्यवत्ताज्ञानात् परस्परानुमितिप्रतिबन्धः फलम्। अत्र केचित् यथा घटाभावव्याप्यवत्ताज्ञाने विद्यमानेऽपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते। यथा च सत्यपि पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने पित्तादिदोषेण पीतः शङ्ख इति धीर्जायते एवं कोटिद्वयव्याप्यवत्ताद्यर्थने कोटिद्वयप्रत्यक्षरूपः संशयो भवति तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवत्येव यत्र चैककोटिव्याप्यदर्शनं तत्राधिकबलतया द्वितीयकोटिभानप्रतिबन्धाच्च संशयः फलबलेन चाधिकसमबलभावः कल्प्यते इति वदन्ति। तच्च तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभावविशेषशाब्दबोधादेरनुदयात् लौकिकसन्निकर्षजन्यदोषविशेषाजन्यत्वज्ञानमात्रे तस्य प्रतिबन्धकता लाघवात्। न तूपनीतभावविशेषे शाब्दबोधे च पृथक् प्रतिबन्धकता गौरवात्। तथा च प्रतिबन्धकसत्त्वात् कथमनुमितिः। न हि लौकिकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापि विशेषणीयम् यत्र कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्रा प्रामाण्यज्ञानात् संशयो नान्यथाऽदृष्टचौतापामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वादिति" कि०स०।

प्रतिपण पु० प्रतिरूपः पणः प्रा०स०। १तुल्यरूपे पणे मूल्ये अम० ३।१५।४।

प्रतिपत्ति स्त्री प्रति+पद–क्तिन्। १प्रष्टव्ये २प्रायलभ्ये ३गौरवे ४प्राप्तौ ५पदप्राप्तौ ६कर्त्तव्यताज्ञाने च मेदि०। "विषादल्पप्रतिपत्तिविस्मितम्" इति रघुः। मीमांसकमते ७फलशून्यकर्माङ्गभेदे यथा चान्द्रादौ दत्तद्रव्यस्य कृशसत्ब्राह्मणपक्षे जलादौ निक्षेपः। पूजितप्रतिग्रादेश्च जलादौ निक्षेपः। दत्त्वापनमात्रे च कात्या०श्रौत०

प्रतिपत्तिपटह पु० वाद्यभेदे (नागरा) ढक्का०।

प्रतिपत्तुर्य न० द्रुगड़वाद्ये (दुगडकाडा) त्रिका०।

प्रतिपत्फला स्त्री प्रतिपत्तं फलं यस्याः। क्षुद्रकलरवेक्षे (छोटछछे) राजनि०।

प्रतिपद् स्त्री प्रतिपद्यते उपक्रम्यते पक्षोमासो वाऽनया प्रति+पद–करणे क्विप्। पक्षयोः प्रथमायां १तिथौ तिथिशब्दे सत्स्वरूपं २२९१पृ० दर्शितं कर्मभेदे तत्कालव्यवस्था च २२९२ पृ० दर्शिता। २द्रुगडवाद्ये त्रिका०। भावे सम्प०क्विप्। ३दाने ४उपक्रमे कालमा० तच्छब्दस्योपक्रमार्थत्वमुक्तं यथा

"तत्र प्रतिपच्छब्द उपक्रमे वर्त्तते। चान्द्रः पक्षो मासो वा प्रतिपद्यते प्रारभ्यते यस्यां तिथौ वा तिथिः प्रतिपत्। प्रारम्भशक्तित्वं प्रतिपच्छब्दस्य बह्वृचु ब्राह्मणानुवाक सूत्रेषु प्रयोगादवगम्यते तथा च श्रुतिः "आत्मारथं यथोतय इदं वसोरहतमस्य इति मरुत्वतीयस्य प्रतिपदनुचरावि"ति। अयमर्थः मरुत्वतीयं नाम किञ्चिच्छस्त्रम्। तस्मात्मारथमित्यत्र मन्त्रः प्रतिपत् प्रथमं पाठ्यः। इदं वसोरहतमस्य इत्ययं मन्त्रोनुचरः पश्चात् पाठ्य इति। तथा तैत्तिरीया आश्वमेधब्राह्मणे आमनन्ति "पवस्व वाजसातय इत्यनुष्टुप् प्रतिपदूवतीति" तथा त एव दर्शपूर्णमासब्राह्मणे पठन्ति "सामिधेनीरनुवक्ष्यन्नाधीहवनीयः पुरस्ताद्ध्यात् ब्रह्मैव प्रतिपदं कुरुतः" इति।

तद्विधौ बह्वृचैर्जन्य यथोक्तं बह्वृचपु०

"देवानामथ यज्ञानां गन्धर्वाणाञ्च सत्तम !। आदौ प्रतिपदो येन त्वमुत्पन्नोऽसि पावक !। तत्प्रदात् प्रातिपादिकं

क्षंभविष्यन्ति देवताः। यतस्ते प्रतिपद्यान्न निधिरेषा भविष्यति"। ४बर्हिष्यमानस्तोत्रस्य प्रथमस्तुतौ तारुण्यब्रा० ४।२।१५ यथा "कवन्ते वाजसातये सोमाः सहस्र याजस इति सहस्रवती प्रतिपत्कार्या"। "प्रतिपद्यते प्रकल्प्यते बर्हिष्यमानस्तोत्रे एषा प्रतिपत् सा सहस्रवती सहस्रशब्दोपेता एषा कार्या" भा०। वा ङाप् तत्रार्थे

प्रतिपन्न त्रि० प्रति+पद्-क्त। १अवगते अमरः २स्वीकृते मेदि० "प्रतिपन्नं हि विचेतनैरपि" कुमारः। ३विक्रान्ते च हेमच० आचिता० अस्य गतिपूर्वकत्वेऽपि नान्तोदात्तता। [राजनि०।

प्रतिपर्णशिफा स्त्री प्रतिपर्णं शिफाऽस्याः। ब्रुवन्तीक्षुवे

प्रतिपाण पु० प्रति+पण-घञ्। प्रतिरूपदेवने

प्रतिपादक त्रि० प्रति+पद्-णिच्-ण्वुल्। बोधके।

प्रतिपादन न० प्रति+पद्-णिच्-भावे ल्युट्। १दाने २बोधने ३प्रतिपत्तौ च मेदि०।

प्रतिपाद्य त्रि० प्रति+पद्-णिच् कर्मणि यत्। बोधनीये

प्रतिपूजन न० प्रतिरूपं पूजनं प्रा०स०। केनचित् पूजने कृते तदनुरूपे तेन पूजकस्य १पूजने २आभिमुख्येन पूजने च।

प्रतिप्रदान न० प्रति+प्र+दा-भावे ल्युट्। १प्रतिदाने २प्रत्यर्पणे च।

प्रतिप्रसव पु० प्रति+प्र+सू-अप्। १निषिद्धस्य पुनःप्राप्तिसम्भावनायाम्। साकल्ये अव्ययी०। २प्रसवसाकल्ये प्रतिजन्मनीत्यर्थे। [भेदे वाच्छावाकशब्दे ८५१पृ०दृश्यम्।

प्रतिप्रस्थाता पु० प्रति+प्र+स्था-तृच्। सोमयागीये ऋत्विग्-

प्रतिप्रस्थान न० प्रतिकूलं प्रस्थानम् मा०स०। १विरुद्धप्रस्थाने अन्यत्र प्रतिकूलं प्रस्थानं यस्य मा०ब०। २तद्वति त्रि० ३निषाद्यो यजु०१८। १६ वेददी०।

प्रतिप्रहार पु० प्रतिरूपः प्रहारः मा०स०। १प्रहृतप्रहारानुरूपप्रहारे २प्रतिघातभेदे च।

प्रतिप्रेष पु०प्रतिरूपः प्रेषः मा०स०। नियोजितेन नियोक्तारं प्रति पुनःप्रेषणे कात्या० २५।१०।३ कर्मणः।

प्रतिफल त्रि० प्रतिफलति प्रति+फल-अच्। १प्रतिबिम्बे येन यत्कर्म कृतं २तत्सदृशरूपप्रतीकारे। साकल्ये अव्ययी०। ३फलसाकल्ये अव्य०।

प्रतिफलन न०प्रति+फल-भावे ल्युट्। प्रतिबिम्बने आदर्शे

प्रतिफुल्लक त्रि० प्रति+फुल्ल-विकाशे ण्वुल्। प्रफुल्ले शब्दच०

प्रतिबद्ध त्रि०प्रति+बन्ध-कर्मणि क्त। १प्रतिरुद्धे २साकल्येन सम्बन्धे व्याप्ते च प्रतिबन्धशब्दे दृश्यम्।

प्रतिबन्ध पु०प्रति+बन्ध-भावे घञ्। १प्रतिरोधे २साकल्येन सम्बन्धे व्याप्तौ च "प्रतिबन्धदृशः प्रतिबद्धज्ञानमनुमानम्" सा०सू० "प्रतिबन्धो व्याप्तिर्व्याप्तिदर्शनाद्व्यापकज्ञानमनुमानम्" म०भा०।

प्रतिबन्धक त्रि० प्रतिबध्नाति प्रति+बन्ध+ण्वुल्। १प्रतिरोधके। स्त्रियां टाप् कापि अत इत्त्वम्। "बलवद्विहितहेत्वभावतः स्यात् प्रतिबन्धिका" भाषा०। २विघ्ने शब्दच० प्रतिबन्धकत्वञ्च कारणीभूताभावप्रतियोगित्वम् तच्च मणाद्यभावत्वेन न तु प्रतिबन्धकाभावत्वेनेति नान्योन्याश्रयः। एवं प्रतिबन्धकाभावकूट एव कारणं तेन मणिषड्भावे मन्त्राद्यभावेऽपि न कार्यमिति अनुमा० चि०व्यतिरिक्तशक्तिनिरासे। तच्च पञ्चधा भवति यथा सदृत्तावुद्धिं प्रति तदभावव्याप्यज्ञानिश्चयत्वेन प्रतिबन्धकत्वम्१। तदभावव्याप्यवत्तानिश्चयत्वेन२ तदभावावच्छेदकतया गृहीतधर्मवत्तानिश्चयत्वेन३। तदसमानाधिकरणधर्मवत्तानिश्चयत्वेन४। तदव्याप्यकतावच्छेदकतया गृहीतधर्मावच्छिन्नाभाववत्तानिश्चयत्वेन५ चेति। तत्राद्यं यथा ह्रदो वह्निमानिति बुद्धिं प्रति ह्रदो न वह्निमानिति निश्चयस्य प्रतिबन्धकत्वम्। द्वितीयं ह्रदो वह्न्यभाववान्न वानिति निश्चयस्य। तृतीयं जलवान्वह्न्यभाववानिति निश्चयविशिष्टस्य जलवान् ह्रदः इति निश्चयस्य। चतुर्थं वह्न्यसमानाधिकरणजलवान् ह्रद इति निश्चयस्य। पञ्चमं ह्रदो धूमवानिति बुद्धिं प्रति धूमव्यापकतावच्छेदकतया गृहीतं यद्वह्नित्वं तादृशवह्नित्वावच्छिन्नाभाववान् ह्रद इति निश्चयस्येति। कार्यमात्रं प्रति तु कामिनी जिज्ञासायाः स्वातन्त्र्येण प्रतिबन्धकत्वम्। क्वचित् मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वम् यथा दाहं प्रति मणेः प्रतिबन्धकत्वम् इति।

प्रतिबन्धि(न्धी) प्रति+बन्ध-इनि वा ङीप्। प्रस्तुतैककर्त्रे प्रवृत्ते पुरुषसृष्ट्यादिप्रस्तुतकर्त्रन्तरापादने प्रतिबन्धिसमेतेऽनिष्टान्तरप्रसञ्जकवाक्ये तत्रार्थे प्रतिबन्धीशब्दोऽपि तन्मूलं दृश्यम्। [भ्वादौ भा० प० १२०क० ३

प्रतिबन्धु पु० प्रतिरूपो बन्धुः मा०स०। बन्धुतुल्ये दौहि-

प्रतिबल पु०प्रतिकूलं बलं यस्य। १शत्रौ "प्रतिबलजघेरिति" वेणी०। प्रतिरूपं बलं यस्य। २तुल्यबले त्रि० "यो मे प्रतिबलो लोके" इति चण्डी। प्रतिगतं बलम् प्रा०प०। ३सामर्थ्ये न० त्रिका०।

प्रतिबाहु पु० प्रतिगतो बाहुम् अत्या०स०। बाहोरग्रे हस्ता०

५८।२५ स्वफलकस्य २पुत्रभेदे स्वक्रव्याप्तरि भाग०६।२४।६

प्रतिबुद्ध त्रि० प्रति+बुध-कर्त्तरि क्त। १जागरिते। कर्म्मणि क्त। २ज्ञाते च।

प्रतिबोध पु० प्रति+बुध-भावे घञ्। १जागरणे २ज्ञाने च कर्त्तरि अच्। ३जागरिते ४ज्ञापिनि च त्रि०। तस्यापत्यम् विदा०अञ्। प्रातिबोध तदपत्ये यूनि तु फरिता० फक्। प्रातिबोधायन तदीये यून्यपत्ये पुंस्त्री०।

प्रतिबोधिन् त्रि० प्रति+बुध-भविष्यति गम्या० णिनि। भाविप्रतिबोधयुते गम्यादि० द्वितीयात०। शास्त्रप्रतिबोधी

प्रतिभट पु० प्रतिकूलो भटः प्रा० स०। प्रतियोधे येन सह युध्यते तस्मिन्।

प्रतिभय त्रि० प्रतिगतं भयमस्मात् निरा०ब०। १भयहेतौ भयङ्करे अमरः। प्रतिगतं भयम् प्रा०स०। २भये न०।

प्रतिभा स्त्री प्रति+भा-भावे अङ्। १बुद्धौ २प्रत्युत्पन्नबुद्धौ च हेम०। "प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता" रुद्रः ३दीप्तौ च। [पदार्थे २प्रदीप्तियुते च।

प्रतिभात त्रि० प्रति+भा-कर्त्तरि क्त। १ज्ञानेभासमाने

प्रतिभान्वित त्रि० ३त०। प्रतिभायुक्ते प्रगल्भे अमरः।

प्रतिभामुख त्रि० प्रतिभान्वितं मुखं मुख्यव्यापारोऽस्य। प्रतिभान्विते हेमच०। [अच्। २प्रकाशमाने च।

प्रतिभास पु० प्रति+भास-भावे घञ्। १प्रकाशे कर्त्तरि

प्रतिभू पु० प्रतिरूपो भवति प्रति+भू-क्विप्। (जामिन) ख्याते पदार्थे स्त्री। दर्शनप्रतिभूशब्दे २४७५ पृष्ठादौ दृश्यम्। [२भेदने च।

प्रतिभेदन न० प्रति+भिद्-भावे ल्युट्। १नेत्रादेरुन्मोटने

प्रतिमण्डल त्रि० प्रतिरूपं मण्डलं प्रा०स०। सूर्य्यादिमण्डलस्य १परिधौ परिवेषे हरिवं० २०६अ०। अव्ययी०। २प्रत्येकमण्डले अव्य०।

प्रतिमल्ल पु० प्रतिकूलो मल्लः प्रा०त०। प्रतियोधे

प्रतिमा स्त्री प्रति+मा-भावे अङ्। १सादृश्ये। करणे अङ्। २मृदादिनिर्मितदेवतादिमूर्त्तौ तन्त्रानन्दादि देवताप्रतिमाशब्दे २६८५ पृष्ठादौ दृश्यम्। ३व्रतभेदे ४गजदन्तवस्त्रे हेमच० उत्तरपदस्थः। ५सदृशार्थे त्रि० हेमच०। यथा देवप्रतिमः।

प्रतिमान न० प्रतिमीयतेऽनेन प्रति+मि-मा-वा ल्युट्। १प्रतिबिम्बे २प्रतिमायां ३गलकुम्भस्याधोभागे ४तद्दन्तयोर्मध्यस्थाने च अमरः।

प्रतिमार्गक पु० मौभपुरे व्योमचारिपुरे त्रिका०।

प्रतिमित्र पु० स्त्रिपभेदे भा०द्रो० १०२अ०। अव्ययी०। २प्रत्येकमित्रे अव्य०। [अमरः।

प्रतिमुक्त त्रि० प्रति+मुच-क्त। १परिहिते २परित्यक्ते च

प्रतिमुख न० सा०द० षष्ठे नाटकाङ्गसन्धिभेदे यथा "यथासङ्ख्यमवस्थाभिरभियोगात्तु पञ्चभिः। पञ्चधैवेतिवृत्तस्य भागाः स्युः पञ्च सन्धयः" इत्युपक्रमे तल्लक्षणमाह "अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति"। एकेन प्रयोजनेनान्वितानां कथाङ्गानामवान्तरैक्यमयोजनसम्बन्धः सन्धिः। तल्लक्षणाह "मुखं प्रतिमुखं गर्भो विमर्षः उपसंहृतिः। इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते"। तत्र प्रतिमुखाङ्गलक्षणं भेदोदाहरणादि यथा "विलासः परिसर्पश्च विधूतं तापनं तथा। नर्म नर्मद्युतिश्चैव तथा प्रगमनं पुनः। विरोधश्च प्रतिमुखे तथा स्यात् पर्युपासनम्। पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि"। तत्र "समीक्षा रतिभोगार्था विलास इति कथ्यते"। रतिसञ्चयस्य भावस्य यो हेतुभूतो ओत्सुक्य विषयः प्रमदा पुरुषो वा तदर्था समीक्षा विलासः यथा शाकुन्तले "कामं प्रिया न सुलभा मनस्तु तदभावदर्शनाश्वासि। अकृतार्थेऽपि मनसिजे रतिव्यतिरेकाङ्गमिदमुभयप्राप्तिसुखं कृतं"। "दृष्टनष्टानुसरणं परिसर्पश्च कथ्यते" यथा शाकुन्तले राजा। भवितव्यमत्र तथा। तथा हि "अत्युन्नता पुरभादवगाढा सघनगौरवात्यत्वात्। हारेऽस्य प्राणदुषिकते पदपङ्क्तिर्दृष्टेऽभिनवा"। "कृतस्यानुनयस्यादौ विधूतं स्वपरिग्रहः" यथा तत्रैव "अलं वो अनुत्तरविरुद्धपव्वुस्सुएण राएसिणा उवरुज्झिअ"। केचित्तु "विधूतं स्यादरतिरिति" वदन्ति। "उपायादर्शनं यत्तु तापनं नाम तद्भवेत्" यथा रत्नावल्यां सागरिका "दुल्लहजणाणुराओ लज्जा गुरुई परवसो अप्पा। पियसहि! विसमं मेम्मं मरणं सरणं नरह एक्कं"। "परिहासवचो नर्म—यथा रत्नावल्याम् सुसङ्गता। "सहि जस्स किदे तुमं आवदा सो अयं दे पुरदो चिट्ठदि। सागरिका साभ्यसूयम्। कस्स किदे अहं आवदा। सुसं! अदं अप्पसंकिदं चित्तफलअस्स"।—प्रतिमुखे परिहासजा"। "नर्मद्युतिः—यथा तत्रैव। सुसङ्गता "सहि अदक्खिण्णा दाणिं सि तुमं जा एवं भट्टिणा कत्थावलम्बिदावि कोवं ण मुञ्चसि"। सागः। सभ्रूभङ्गमीक्षणमिति दृश्य "सुसङ्गदे दाणिं वि कीलिदुं ण विरमसि"। केचित्तु "दोषस्याच्छादनं हास्यं नर्मद्युतिरिति" वदन्ति।—प्रग-

अनं वाक्यं स्यादुत्तरोत्तरम्"। यथा विक्रमोर्वश्याम् उर्वशी "जअदु जअदु भट्टारओ। राजा। जया नाम जितं यस्य त्वया जय उदीर्यते इत्यादि"। "विरोधो व्यसनप्राप्तिः—यथा चण्डकौशिके राजा "नूनमसमीक्ष्यकारिणा मयान्धेनेव स्कुरच्छिखाकलापो ज्वलनः पद्भ्यां समाक्रान्तः"—कृतस्यानुनयः पुनः" "साम्यं पापनं—रत्नावल्याम् विदू "भो मा कुप्प एसा हि अद्धीघरन्तरं गदेत्यादि" —पुष्पं विशेषवचनं मतम्"। यथा तत्रैव राजा "हस्ते गृहीत्वा सूर्यं नाटयति" विदू "भो वअस्स एसा अवरेज्ज दिसा तए आमासादिदा" राजा। वयस्य सत्यम् "श्रीरेषा पार्थिवस्यास्याः पतिजातस्य पद्मवः। कुतोऽन्यथा पतत्येष स्वेदच्छद्मास्रुतद्रवः"। "प्रत्यक्षनिष्ठुरं वक्त्रं—यथा तत्रैव राजा "कथमिह कोऽहं त्वया ज्ञातः" इत्यं। न केवलं तुल्यं चित्तजन्मनि ता जाव गदुअ देवीए णिवेदइस्सं"। —उपन्यासः प्रसादनम्"। यथा तत्रैव इत्यं। भट्टा अलं वल्लाए मएवि भट्टिणीए पसादेण कीदिदं व्वेव एदिहिं वा किं कल्लाभरणेण। अदोवि मे गरुअरो पसादो एसो जं तए अहं एत्थ आणिहिदात्ति कुविदा मे पिअसही सागरिआ एसा व्वेव पसादो दुअ"। केचित्तु "उपपत्तिलभो योऽर्थ उपन्यासः स कीर्त्तितः" इति वदन्ति उदाहरन्ति च। तत्रैव "अदिसक्करा क्खु सा गव्वधारीति। "जातुर्वक्त्रोपगमनं वर्णसंहार इष्यते" यथा वीरचिते तृतीयेऽङ्के "परिवदियब्भणीआमेण वीरो युधाजित् वसन्नधिभिरसात्वैर्लोभपादश्च दृष्टः। अयवविरतयज्ञो ब्रह्मवादी पुराणः प्रभुरपि जनकानामद्रुहो याजकास्ते"। [प्रतिमायाम्।

प्रतिमूर्त्ति स्त्री प्रतिरूपा मूर्त्तिः प्रा०स०। देवादिमूर्त्तिसदृशि०

प्रतियत्न पु० प्रति+यत-नञ्। १याच्ञायाम् २उपपत्तौ ३विग्रहादौ ४वन्दायाम् अमरटीकायां भरतसुकुटादयः। ततो शुश्रूषानराधानरूपे ५संस्कारे मेदि० ६प्रकृष्टे ७प्रतिसदृशे च त्रिका०। प्रतिरूपो यत्नो यस्य ब्राव०। ८प्रतियत्नयुक्ते त्रि०। ९रचनायां जटाधरः।

प्रतियातना स्त्री प्रति+यात्यतेऽनया पु० यत-युच्। १प्रतिमायाम् प्रा०स०। २तुल्यरूपयातनायाम् अमरः।

प्रतियायिन् त्रि० प्रति+या-भविष्यति अर्थे णिनि। आविष्कारयुते भा०श० ५७७।श्लो०। [व्यञ्जे च।

प्रतियोग पु० प्रति+युज-भावे घञ्। १विरोधे २विरुद्धसम्बन्धे च यथा संयोगेन घटवद् भूतलमित्यादौ संयोगस्य घटः प्रतियोगी भूतलमनुयोगि। चन्द्रतुल्यसुखमित्यादौ सादृश्यस्य चन्द्रः प्रतियोगी सुखमनुयोगि। तत्र विशिष्टबुद्धौ प्रकारतया भासमानं संसर्गस्य प्रतियोगि विशेष्यतया भासमानं संसर्गस्यानुयोगीति भेदः। तस्य भावः त्व प्रतियोगित्व न० तत्र प्रतियोगिता स्त्री तद्भावे। सा च "अभावविरहात्मत्वं वस्तुनः प्रतियोगिता" इत्याचार्योक्ता। स्वरूपसम्बन्धविशेषरूपा दीधितिकारः। यथा घटो नास्तीत्यादौ घटेऽभावप्रतियोगिता। यथा वा घटवद्भूतलमित्यादौ घटे भूतलानुयोगिकसंयोगसम्बन्धप्रतियोगिता। अवच्छेदोपाधिर्धर्मविशेष इति सम्प्रदायः। विशिष्टबुद्धित्वमित्यन्ये यथा चन्द्रवन्मुखमित्यादौ चन्द्रस्य सादृश्यप्रतियोगित्वम्। अन्वयित्वमित्यपरे। यथा चैत्रस्य पुत्र इत्यादौ षष्ठ्यर्थस्य चैत्रे प्रतियोगित्वम्। घटाभावादिबुद्धे र्विशिष्टवैशिष्ट्यावगाहिबुद्धितया अभावबुद्धिः विशेष्यविशेषणसंसर्गावगाहिनी विशिष्टबुद्धित्वात् संयोगेन घटवद्भूतलमित्यादिबुद्धिवत् इत्यनुमानेन अभावे घटादिविशिष्टबुद्धौ सम्बन्धतया अतिरिक्तप्रतियोगितासिद्धिरिति नव्यनैयायिकाः। श्रीहर्षस्तु घटनादौ तस्य स्वरूपसम्बन्धविशेषरूपत्वेन प्रतियोगिस्वरूपत्व० अनुयोगिस्वरूपत्वं वा स्वीकार्य्य० नैवोपपत्तौ नातिरिक्तपदार्थकल्पनेति स्थितम् विस्तरभयान्नोक्तम्।

प्रतियोगितावच्छेदक त्रि० ६त०। येन रूपेण यस्या भावादौ प्रतियोगिता १ताडशे धर्मे यथा घटाभावे घटस्य घटत्वरूपेण प्रतियोगिता अतस्तत्र घटत्वं प्रतियोगितावच्छेदकं तच्च क्वचित् एकं क्वचिदनेकं तत्र वह्निनास्तीत्यत्र वह्नित्वमेकं महानसीयवह्निनास्तीत्यादौ महानसीयत्व वह्नित्वत्वेत्यादिकमनेकमित्याकरे दृश्यम्। येन सम्बन्धेन प्रतियोगितायाः अभावांशे भानं २ताडशसम्बन्धे च यथा संयोगेन घटो नास्तीत्यादौ संयोगेन घटस्याभावांशे प्रतियोगितायाभानं तत्र संयोगसम्बन्धः प्रतियोगितावच्छेदकसम्बन्ध एवमन्यत्राप्यूह्यम्।

प्रतिर अदरे चिरकालावस्थाने अ० ८।३८।१०।

प्रतिरथ पु० प्रतिरूपो रथो यस्य प्रा०व०। १प्रतियोधे अनाश्वसंज्ञे तंत्रधारिरूपभेदे हरिवं०१२अ०। य द्रु०

वंशे १वसुदेवपुत्रे हरिवं० १६२अ०। अध्ययी०। २प्रत्ये करणे अव्य०।

प्रतिरश्म पु० प्रतिगता+रश्मेः रः। प्रतिसूर्ये दिवाकरोपः।

प्रतरव पु०प्रतिरुध्यन्ति प्रति+रु-कर्त्तरि अप्। १प्राणेषु यजु० ३८।१५ "प्राणा वै प्रतिरवाः" शत०ब्रा० १४।२।२।२४। भावे अप् प्रतिकूलो रवः प्रा०स०। २प्रतिकूलशब्दे मदीयं धनं न मोक्तव्यमनेन मदीयं धनं बलाद्भुज्यते इत्यादि लोकेषु उद्घोषणं प्रतिरवः।

प्रतिरूप न०प्रतिगतं रूपम् प्रा०स०। १तुल्यरूपे प्रतिमायाम् त्रिका०। २दानवभेदे पु० भा०शा०२८७अ०। ३मेरुसावर्णेर्द्वाविंशभेदे स्त्री भाग० ५।२।२३ प्रतिगतं रूपं येन प्रा०व०। ४तुल्यरूपयुते त्रि० "रूपं रूपं प्रतिरूपो बभूव" श्रुतिः। [प्रतिबिम्बे जटा०।

प्रतिरूपक न० प्रतिगतं रूपं बिम्बस्य येन प्रा०व० कप्।

प्रतिरोध पु० प्रति+रुध-भावे घञ्। १निरोधे। स्वार्थे क। २प्रतिबन्धे ३तिरस्कारे अमरः। कर्त्तरि अच्। ४प्रकृत साध्यानुमितिनिरोधके अत्यन्तदोषदुष्टे हेतौ "पक्षसाध्यसाधनाप्रसिद्धिविरुद्धरूपासिद्धिबाधप्रतिरोधानां निरासः" दीधितिः। भावे घञ्। ५कठचौर्य्ये।

प्रतिरोधक पु०प्रति+रुध-ण्वुल्। १प्रतिबन्धके (डाकाइत) २कठचौरे हेमच०। तस्य रोधनेन ज्ञेयकर्तृत्वात् तथात्वम्।

प्रतिरोधिन् त्रि० प्रति+रुध-णिनि। १प्रतिबन्धके २प्रतिरुध्य कठहारिणि चौरे अमरः। [लम्भ" नैष०।

प्रतिलम्भ पु० प्रति+लभ-अप् सुट्। लाभे "कथमदः प्रतिलम्भ"

प्रतिलोम त्रि० प्रतिगतं लोम यस्यानुलोम्यगत्यात् प्रा०व० अच् समा०। वामे विपरीते हेमच०।

प्रतिलोमज पुंस्त्री० प्रतिलोमात् जातेः जन-ड। उत्तमवर्णस्त्रियाम् अधमवर्णात् जाते सङ्कीर्णवर्णे ते च मनुनोक्ता १०।२५ पट्। तथा याज्ञ० "ब्राह्मण्यां क्षत्रियात् सूतो वैश्याद्वैदेहकस्तथा। शूद्राच्चाण्डालश्च सर्वधर्मबहिष्कृतः। क्षत्रिया मागधं वैश्याच्छूद्रात् क्षत्तारमेव तु। शूद्रादायोगवं वैश्या जनयामास वै सुतम्"। विष्णुना नामान्तरं वृत्तिश्चैषामुक्ता यथा "तत्र वैश्यापुत्रः शूद्रेणायोगवः१। पुक्कसमागधौ२।३ क्षत्रियापुत्रौ वैश्यशूद्राभ्याम्। चाण्डालवैदेहकसूतांश्च ४।५।६ ब्राह्मणीपुत्राः शूद्रविट्क्षत्रियैः सङ्करसङ्कराख्यांस्त्रीन्। रङ्गावतरणमायोगवानाम्। व्याधता पुक्कसानाम्। स्तुतिक्रिया मागधानाम्। वधश्चाण्डालानाम्। चाण्डालानाम् स्त्रीरत्ना तत्कीवनन्तु वैदेहकानाम् अश्वसारथ्यं सूतानाम्। चाण्डालानां बहिर्ग्रामनिवसनं मृतचेलधारणमिति विशेषः"। कर्त्तरि क्त। प्रतिलोमजातोऽप्यत्र।

प्रतिवचन न०प्रतिरूपं वचनम् प्रा०स०। १प्रतिवाक्ये २उत्तरे ३विरुद्धवाक्ये च त्रिका०। प्रतिकथादयोऽप्यत्र स्त्री।

प्रतिवसथ पु० प्रति+वस-आधारे अथच्। आसे संवसथ हेमच०।

प्रतिवस्तु न० प्रतिरूपम् वस्तु प्रा०स०। तुल्यरूपे वस्तुनि।

प्रतिवस्तूपमा स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ६०६अग्रम्

प्रतिवात त्रि० प्रतिगतो वातो यतः प्रा०व०। यस्मात् प्रदेशात् वायुः आगच्छति तस्मिन् देशे "प्रतिवातेऽनुवाते च" मनुः। अव्ययी०। २वाताभिमुखेऽव्य०।

प्रतिवाद पु० प्रति+वद-भावे घञ्। वादिप्रयुक्तन्यायविरुद्धन्यायवाक्यप्रयोगे प्रतिवादिन्शब्दे दृश्यम्।

प्रतिवादिन् त्रि० प्रतिकूलं वदति वद-णिनि। १वादिप्रयुक्तन्यायवाक्यविरुद्धवाक्यवादिनि यथा पर्वतो वह्निमान् भूयादित्यादौ साध्यसिद्धये वादिना प्रयुक्ते येन पर्वतो न वह्निमान् पाषाणमयत्वात् इत्यादि वाक्यं प्रयुज्यते तस्मिन्। व्यवहारे २अन्यर्थिनि (आसामी) "कारणे प्रतिवादिनि" याज्ञ०।

प्रतिवारण त्रि० प्रति+वारि-कर्त्तरि ल्यु। १निवारके २दैत्यभेदे पु०भाग०५।१८।१६ भावे ल्युट्। ३निवारणे न०

प्रतिवार्त्ता स्त्री प्रा०स०। प्रत्युत्तरस्थानीये वृत्तान्तभेदे

प्रतिवासिन् त्रि० प्रत्यासन्नं वसति प्रति+वस-णिनि। (पड़सि) गृहाद्यासन्नवासिनि स्त्रियां ङीप्।

प्रतिवाह पु० अक्रूरकपुत्रभेदे अक्रूरानुजे हरिवं० ३२अ०।

प्रतिविधान न०प्रति+वि+धा-ल्युट्। १प्रतिकारे २प्रकृतस्योपयोदनाद्यर्थसुसाधावलम्बने च। [६२अ०।

प्रतिविन्ध्य पु० १युधिष्ठिरस्य पुत्रे २क्षत्रियभेदे च भा०आ०

प्रतिविम्ब प्रति+आचारे क्विप् नामधातुः पर०अक० सेट्। प्रतिविम्बति अप्रतिविम्बीत्। प्रत्यविम्बीत् इत्यपरे।

प्रतिविम्ब पु०न०वी+गतौ उल्वा०नि०चस्य नुट्च विम्बं प्रतिरूपं विम्बम् प्रा०स०। विम्बानुरूपे प्रतिच्छायायुक्ते दर्पणे। तस्य विम्बज्ञैर्दोषभेदो वेतिसंशये विवरणप्रमेयसं० निरणायि यथा

"ननु जीवस्याहङ्कारस्यप्रतिविम्बत्वे विम्बाङ्गैटः स्यात् दर्पणगतसुखप्रतिबिम्बवत् तत्र हि ग्रीवास्यदर्पणस्यवोः

र्ष्ठस्वयोरन्योन्याभिसुखत्वेन भेदोऽनुभूयते, नैवं मदीयामदं सुखमित्यैक्यप्रत्यभिज्ञया भेदानुभवस्य बाधात्। न च प्रत्यभिज्ञैवेतरेण बाध्येति वाच्यं सति भेदे प्रतिबिम्बासम्भवात् किं प्रतिबिम्बोनाम सुखलाञ्छितसुद्रा ? उत दर्पणावयवा एव बिम्बस्य सन्निधिवशात्तथा परिणमन्ते ? नाद्यः दर्पणस्यसुखशेखरत्वादल्पत्वात् यत्र तु प्रौढदर्पणे प्रौढं सुखमुपलभ्यते तत्रापि तस्य न सुद्रात्वम् दर्पणसुखयोः संयोगाभावात्। न द्वितीयः निमित्तकारणस्य बिम्बस्यापायेऽपि तस्यावस्थानप्रसङ्गात् न हि तथाऽवतिष्ठते। तेनैव पुरुषेण दर्पणे तिर्यङ्निरीक्षिते पुरुषान्तरेण सम्यगवलोकिते वा तन्मुखानुपलम्भात्। न चैवं मन्तव्यं क्वचिन्निमित्तापाये कार्यमप्यपैति हस्तसंयोगजन्यस्य कटप्रसारणस्य हस्तसंयोगापायेऽपायदर्शनात्। न तत्र निमित्तापायात् कार्यापायः चिरकालसंवेष्टनाहितेन संस्कारेण संवेष्टनलक्षणविरुद्धकार्योत्पादात् अन्यथा चिरकालप्रसारणेन संवेष्टनसंस्कारे विनाशितेऽपि हस्तापाये प्रसारणमपेयात् न चैवमपैति। इह तु चिरकालबिम्बसन्निधानप्रयुक्ते बिम्बापाये प्रतिबिम्बोऽपि गच्छत्येवेति न बिम्बः परिणामस्य निमित्तम्। अथ मन्यसे चिरकालस्थितोऽपि कमलविकाशः सवितृकिरणस्य निमित्तस्यापायेऽप्यपगच्छतीति। तत्र तत्रापि प्राथमिकसुकुलत्वहेतुभिः पार्थिवैरापैश्च कमलावयवैः पुनरपि रात्रौ सङ्कुलत्वे विरुद्धकार्ये जनिते विकाशापायात् अन्यथा तादृशावयवरहिते स्थाने कमलेऽपि रात्रौ विकाशोऽपगच्छेत्। आदर्शे तु सुखाकारपरिणते पुनः केन हेतुना समतलाकारपरिणामः स्यात् तदवयवानां कारकमन्तरेकेणाकिञ्चित्करत्वात्। अतएव बिम्बसन्निधिमात्रेण सादृश्यावयवा सुखाकारेण परिणमेरन्, अन्यथा दर्पणद्रव्ये प्रतिभासुखे कर्त्तव्ये सति लौकिका बिम्बमेव सन्निधापयेयुः न तु कांस्यकारमपेक्षेरन्। दर्पणद्रव्यस्यान्याकारपरिणामे कारकमपेक्षायामपि प्रतिबिम्बपरिणामे पुनःस्वरूपपरिणामे वा न तदपेक्षेति चेत् एवमपि न सुखप्रतिबिम्बाकारपरिणामो युक्तिसहः चक्षुर्नासिकादिनिम्नोन्नतभागस्य स्वयंनाऽनुपलम्भात् समतलमेव हि पाणिनाऽभृश्यते। समतलेन व्यवहितं सुखमिति चेत् तर्हि चाक्षुषमपि न स्यात्। तत एतत् सिद्धं बिम्बतः आदर्शोसुखमात्रान्तररहितत्वज्जन्यकारणशून्यत्वात् यथा विषाण जन्यकारणशून्यं विषाणरहितं शशमस्तकमिति। ननु तर्हि शुक्तिरजतयन्मिथ्यात्वापत्तेर्न विम्बैक्यसिद्धिः प्रत्यभिज्ञा तु व्यभिचारिणी मिथ्यारजतेऽपि मदीयमिदं रजतमिति तद्दर्शनादिति चेत् विषमो दृष्टान्तः नेदं रजतमिति हि तत्र रजतस्वरूपबाधया रजताभिज्ञाया भ्रमत्वे तत्प्रत्यभिज्ञाया अपि भ्रमत्वमुचितम् अत्र न तथा नेदं सुखमिति स्वरूपबाधः किन्तु नात्र सुखमिति देशसम्बन्धमात्रबाधे सति उत्पन्ना मदीयमेव सुखमिति प्रत्यभिज्ञा कथं भ्रमः स्यात्। न च सुखावयवानामचाक्षुषत्वात् कथं प्रत्यभिज्ञानमिति वाच्यं नासाद्यादिकृतिपयावयवदर्शनादपि घटादिवदवयविनश्चाक्षुषत्वोपपत्तेः। यः पुनर्दर्पणापगमे प्रतिबिम्बापगमः नासौ स्वरूपबाधः दर्पणेऽपि तत्प्रसङ्गात्। ननु तत्त्वमसिवाक्येन जीवरूपः प्रतिबिम्बो बाध्यते यथा स्थाणुरसौ न पुरुष इति यद्बाधायां सामानाधिकरण्यदर्शनात् संसार्यविनाशे च मोक्षानुपपत्तेः सोऽयं देवदत्त इति यदैक्यपरत्वेनापि सामानाधिकरण्यसम्भवात् विरुद्धांशबाधमात्रेण मोक्षोपपत्तेः कृतघ्नस्य जीवस्य बाधे मोक्षस्यापुरुषार्थत्वात्। यस्तु मन्यते प्रतिबिम्ब एव नास्ति दर्पणप्रतिफलिता नेत्ररश्मयः पराहत्य बिम्बमेव दर्पणादविविक्तं गृह्णन्तीति स्वं प्रत्यङ्मुखत्वाद्यनुभवेनासौ निराकरणीयः। कथं तर्हि मूर्त्तद्रव्यस्य सुखस्यैकस्य भिन्नदेशद्वये युगपत् कात्स्न्र्येन वृत्तिः, दर्पणदेशवृत्तेर्मायाजनितत्वादिति ब्रूमः। न हि मायायामसम्भावनीयं नाम खरशिरश्छेदादिकमपि स्वप्ने माया दर्शयति। नन्वेवमपि जलमध्येऽधोमुखस्य वृक्षप्रतिबिम्बस्य तीरवृक्षेणैक्ये सति तीरस्थवृक्षोऽधिष्ठानं तत्र च मायया जलगतत्वमधोमुखत्वञ्चाध्यस्तमिति वक्तव्यं न चाध्यासहेतुरस्ति अधिष्ठानस्य साकल्येन प्रतीतेः तत्कथमसावध्यासः, उच्यते किमत्र वृक्षावरणाभावादध्यासाभावः ? किं वा दोषाभावात् ? उतोपादानाभावात् ? आहो स्विदध्यासविरोधिनोऽधिष्ठानतत्त्वज्ञानस्य सद्भावात् ? नाद्यः चैतन्यावरणस्यैवाध्यासोपादानतया जड़े पृष्ठगावरणानुपयोगात्। एतेन तृतीयोऽपि निरस्तः। न द्वितीयः सोपाधिकभ्रमेष्वुपाधेरेव दोषत्वात्। न चतुर्थः निरुपाधिकभ्रमस्यैवाधिष्ठानतत्त्वज्ञानविरोधित्वात्। तर्हि सोपाधिकभ्रमस्य कर्तृत्वादेः नात्मतत्त्वज्ञानान्निवृत्तिः किन्तु अहङ्कारोपाध्यपगमादिति चेत् बाढं तारमार्थिकदर्पणाद्युपाधेस्तत्कृतभ्रमस्य च ज्ञानादनिवृत्तावप्यज्ञानज-

न्योपाधेरहङ्कारस्य निरुपाधिकब्रह्मरूपस्यात्मतत्त्वज्ञानान्निवृत्तौ कर्तृत्वादेर्ज्ञानान्निवृत्तिरपपद्यते सिध्यति। ननु कथं तत्त्वज्ञानं जीवेनाऽनात्मतादात्म्यं जानाति न विरुद्धात्मतामात्मनोऽवगन्तृमलं प्रतिबिम्बत्वात् दर्पणगतप्रतिबिम्बवदिति चेत् न अचेतनत्वस्योपाधित्वात्। यस्तु लोकायतः शरीरस्यैव चैतन्यं मन्यते तं प्रति दर्पणगतजाड्येन प्रतिरुद्धत्वात् प्रतिबिम्बस्याचेतनत्वं सुसम्पादं चेतनत्वे तु बिम्बचेष्टया विनापि स्वयं चेष्टेत जीवस्य तु प्रतिबिम्बत्वेऽपि नोपाधिजाड्येन प्रतिबन्ध इत्यनुभवसिद्धं, यद्यपि लोके बिम्बभूतस्यैव देवदत्तस्य भ्रमनिवर्त्तकतत्त्वज्ञानाश्रयत्वं दृष्टम्। तथापि न तत् बिम्बत्वं प्रयोजकं किन्तु भ्रमाश्रयत्वं जीवस्य भ्रमाश्रयः अविद्यायाश्चिन्मात्राश्रयत्वेऽपि जीवपक्षपातित्वेन भ्रमोत्पादनात्। ननु ब्रह्म स्वस्य जीवैक्यं न जानाति चेत् असर्वज्ञं स्यात् जानाति चेत् जीवगतभ्रमं स्वगतत्वेन पश्येदिति चेत् न स्वतुल्यतत्प्रतिबिम्बयोरैक्यं जानतापि देवदत्तेन स्वतुल्ये प्रतिबिम्बगतालस्यत्वमलिनत्वाद्यदर्शनात्। न च जीवस्य प्रतिबिम्बत्वे मानाभावः श्रुतिस्मृतिसूत्रेभ्यस्तत्सिद्धेः "रूपं रूपं प्रतिरूपो बभूवेति" श्रुतिः "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" इति स्मृतिः। "अतएव चोपमा सूर्यकादिवदिति सूत्रम्। न चामूर्त्तस्य ब्रह्मणः प्रतिबिम्बासम्भवः अमूर्त्तस्याप्याकाशस्य स्वाश्रितताम्रत्वनीलत्वादिविशिष्टस्य जले प्रतिबिम्बभावदर्शनात्। जलान्तराकाश एवाकाशादिप्रतिबिम्बाधार इति चेत् न अनुमात्रेऽपि जले दूरविशालाकाशदर्शनात्। जीवो घटाकाशवदुपाध्यवच्छिन्नो न प्रतिबिम्ब इति चेत् न तथा सति जीवोपाधिमध्ये ब्रह्मणोऽपि सत्त्वे चैतन्यं तस्य विगुणं स्यात् न चैवमाकाशस्य घटे द्वैगुण्यं दृष्टं ब्रह्मणस्तत्त्वासत्त्वे च सर्वगतत्वनियन्तृत्वादिहानिः। उभयानुगतचिद्रूपाकारस्यैव सर्वगतत्वनियन्तृत्वादि न ब्रह्मण इति चेत् न "य आत्मानमन्तरो यमयतीति" श्रुतौ प्रकरणलभ्यस्य ब्रह्मण एव जीवमध्ये नियन्तृत्वेनावस्थानसम्भवात्। अतः प्राक्ते सर्वत्र घटाकाशदृष्टान्तोऽसङ्गत्वसाधको न जीवत्वबाधकः। प्रतिबिम्बपक्षे तु विगुणोक्त्यदर्शनं दोषाय जलमध्ये स्वाभाविकजानुमात्राकाशस्य प्रतिबिम्बितविशालाकाशस्य च दृष्टेः। तस्मादहङ्कारोपाधिकतो ब्रह्मप्रतिबिम्बो जीवः"।

प्रतिबिम्बन न० प्रतिबिम्ब+नामधातोः भावे ल्युट्। अनुकरणे "दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्" भा० टी०

प्रतिबिम्बवाद पु० इत०। जीवस्य ईश्वरप्रतिबिम्बतास्थापनार्थे वादे। द्विधा हि वेदान्तिमते जीवेश्वरयोर्विभागकल्पना प्रतिबिम्बभावेन तत्तदवच्छिन्नभावेन च। तत्राद्याः पक्षः विवरणानुसारिभिर्मन्यते द्वितीयः पक्षोऽन्यैर्मन्यते तदेतत् सिद्धान्तलेशे प्रदर्शितं यथा

विवरणानुसारिणस्त्वाहुः। "विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणोभेदमसन्तं कः करिष्यतीति" स्मृत्या एकस्यैवाज्ञानस्य जीवेश्वरविभागोपाधित्वप्रतिपादनाद्विम्बप्रतिबिम्बभावेन जीवेश्वरयोर्विभागः। नीभयोरपि प्रतिबिम्बभावेन उपाधिद्वयमन्तरेणोभयोः प्रतिबिम्बत्वायोगात्। तत्रापि प्रतिबिम्बो जीवः बिम्बस्थानीय ईश्वरः। तथा सत्येव लौकिकबिम्बप्रतिबिम्बदृष्टान्तेन स्वातन्त्र्यमीश्वरस्य तत्पारतन्त्र्यं जीवस्य च युज्यते। "प्रतिबिम्बगताः पश्यन् ऋजुवक्रादिविक्रियाः। पुमान् क्रीडेत् यथा ब्रह्म तथा जीवस्यविक्रियाः" इति कल्पतरुकरीत्या "लोकवत्तु लीलाकैवल्यमिति" सूत्रमपि संगच्छते। अज्ञानप्रतिबिम्बे तस्य जीवस्यान्तःकरणरूपोज्ञानपरिणामभेदोविशेषाभिव्यक्तिस्थानम् सर्वतः प्रसृतस्य सच्चिद्प्रकाशस्य दर्पण इव। अतस्तस्य तदुपाधिकत्वव्यवहारोऽपि न तावताज्ञानोपाधिपरित्यागः। अन्तःकरणोपाधिपरिच्छिन्नस्यैव चैतन्यस्य जीवत्वे योगिनः कायव्यूहाधिष्ठानानुपपत्तेः। न च योगप्रभावादुयोगिभोऽन्तःकरणं कायव्यूहाभिव्यक्तियोग्यं वैपुल्यं प्राप्नोतीति तदवच्छिन्नस्य कायव्यूहाधिष्ठातृत्वं युज्यत इति वाच्यम्। "प्रदीपवदावेशस्तथा हि दर्शयतीति" शारीरोपन्यासाधिकरणभाष्यादिषु कायव्यूहे प्रतिदेहमन्तःकरणस्य चक्षुरादिवदविच्छिन्नस्यैव योगप्रभावात् रूढेरूपपत्तेः। प्रतिबिम्बबिम्बाभेदसाक्षात्साध्यत्वेन स्वरूपेण तस्य सत्यत्वात् न प्रतिबिम्बरूपजीवस्य मुक्तप्रत्ययासम्भव इति न तदतिरिक्तेन मुक्तप्रत्ययावच्छिन्नरूपं जीवान्तरं वा प्रतिबिम्बजीवातिरिक्तं जीवेश्वरविलक्षणं कूटस्थचिद्रूपं चैतन्यान्तरं कल्पनीयम् "अविनाशी वाऽरे अयमात्मेति" श्रवणाज्जीवस्य तदुपाधिनिवृत्तौ प्रतिबिम्बभावापगमेऽपि स्वरूपं न विनश्यतीत्येतत्परं, न तदतिरिक्तकूटस्थनामकचैतन्यान्तरपरम्। जीवोपाधिनाऽन्तःकरणादिनावच्छिन्नं चैतन्यं बिम्बभूत ईश्वर एव "यो विज्ञाने तिष्ठन्नित्यादि" श्रुत्या ईश्वरस्यैव जीवसन्निधानेन तदन्तर्यामिभावेन

विकारान्तरस्थानत्वयादिति"। यतः परमवच्छिन्नत्वाद्-स्तत्र दर्शितः प्रसङ्गात् पूर्वमनुक्तत्वाच्चात्रोच्यते "अन्ये तु रूपानवच्छितप्रतिबिम्बो न युक्तः सुतरां नीरूपे गगन प्रतिबिम्बोदाहरणमत्ययुक्तं गगनाभोगव्यापिनि सविह-करमण्डले सलिले प्रतिबिम्बिते गगनप्रतिबिम्बत्वव्यवहा-रस्य भ्रममात्रमूलत्वात्। ध्वनौ वर्णप्रतिबिम्बत्वयादो-ऽप्ययुक्तः व्यञ्जकतया सन्निधानमात्रेण ध्वनिधर्माणा-मुदात्तादिस्वराणां वर्णेष्वारोपोपपत्तेर्ध्वनेर्वर्णप्रतिबिम्ब-त्वप्राप्तित्वकल्पनायानिःप्रमाणकत्वात्। प्रतिध्वनिरपि न पूर्वशब्दप्रतिबिम्बः पक्षीकरणप्रक्रियया षट्टपयो-निधिप्रभृतिशब्दानां क्षितिसलिलादिशब्दत्वेन प्रतिध्वने-रेवाकाशशब्दत्वेन तस्याश्शब्दप्रतिबिम्बत्वायोगात्। वर्ण रूपप्रतिशब्दोऽपि न पूर्ववर्णप्रतिबिम्बः वर्णाभिव्यञ्जक-ध्वनिनिमित्तकप्रतिध्वनेर्मूलध्वनिवदेव वर्णाभिव्यञ्जकत्वेनो-पपत्तेस्तस्मादुघटाकाशवदन्तःकरणावच्छिन्नं चैतन्यं जीवः तदनवच्छिन्नमीश्वरः। न चैवमण्डान्तर्वर्त्तिनश्चैतन्यस्य तत्तदन्तःकरणोपाधिभिः सर्वात्मना जीवभावेनावच्छेदा-त्तदवच्छेदरहितचैतन्यरूपस्येश्वरस्याण्डाद्बहिरेव सत्त्वं स्यादिति "यो विज्ञाने तिष्ठन्नित्यादावन्तर्यामिभावेन वि-कारान्तरस्थानश्रवणं विरुध्यते। प्रतिबिम्बपक्षे तु जलगतस्वाभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनादेकत्व द्विगुणीकृत्य वृत्तिरूपपद्यत इति वाच्यम्। यतः प्रतिबिम्ब-पक्षेऽपि उपाधावनन्तर्गतस्यैव चैतन्यस्य तत्र प्रतिबिम्बो वाच्यः। न तु जलचन्द्रन्यायेन बहिःस्थप्रतिबिम्बं तदन्तर्गतभागस्य तत्र प्रतिबिम्बासम्भवात्। न हि मेघा-वच्छिन्नस्याकाशस्यालोकस्य वा जले प्रतिबिम्बवज्जलान्त-र्गतस्यापि तत्र प्रतिबिम्बो दृश्यते। न वा सुखादीनां बहिःस्थितिसमय इव जलान्तर्निमज्जनेऽपि प्रतिबि-म्बोऽस्ति। यतो जलप्रतिबिम्बं प्रति मेघाकाशादेरि-वान्तःकरणाद्युपाधिप्रतिबिम्बं प्रति तदन्तर्गतस्यैव बि-म्बत्वं स्यादिति बिम्बभूतस्य विकारान्तरस्थानायोगात् ईश्वरेऽन्तर्यामिब्राह्मणाश्रुत्याभावस्तुल्यः। एतेनावच्छि-न्नस्य जीवत्वे कर्तृभोक्तृसमयथोक्तत्व तत्रान्तःकरणाव-च्छेद्यचैतन्यप्रदेशस्य भिन्नत्वात् कृतहानाकृताभ्यागम-प्रसङ्ग इति निरस्तम्। प्रतिबिम्बपक्षेऽपि स्वान्तर्गतस्य स्वसंछिन्नस्य चैतन्यप्रदेशस्यान्तःकरणे प्रतिबिम्बस्य वक्तव्यतया तत्र तदन्तःकरणस्य गमने बिम्बभेदात् तत्-प्रतिबिम्बस्यापि भेदावश्यम्भावेन दोषतौल्यात्। न चान्तःकरणप्रतिबिम्बो जीव इतिपक्षे दोषतौल्येऽप्य-विद्याप्रतिबिम्बो जीवस्तस्य च तत्र गतिद्वारम-न्तःकरणं जलाशयव्यापिनो महामेघमण्डलप्रतिबिम्बस्य तदुपरि विस्तृतरस्रोतालोक इव तत्र विशेषाभिव्यक्ति-हेतुरिति पक्षे नायं दोषः। अन्तःकरणवद्विद्यायागत्य-भावेन प्रतिबिम्बभेदानापत्तेरिति वाच्यम्। तथैवावच्छेद-पक्षेऽप्यविद्यावच्छिन्नो जीव इत्यभ्युपगमसम्भवात् तत्रा-प्येकस्य जीवस्य क्वचित्प्रदेशे कर्तृत्वं प्रदेशान्तरे भोक्तृ-त्वमित्येवंकृतहानाकृताभ्यागमदोषापनुत्तये वस्तुतो जीवैक्यस्य शरणीकरणोपयत्वेन तन्न्यायादन्तःकरणोपाधि-पक्षेऽपि वस्तुतश्चैतन्यैक्यस्य तदवच्छेदकोपाध्यैक्यस्य च तत्राभ्युपगमेन दोषनिराकरणसम्भवात्। न चावच्छेदपक्षे "यथाह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा"। "अतएवोपमा जलसूर्यकादिव-दिति" स्मृतिसूत्राभ्यां विरोधः। "अम्बुवदग्रहणात्तु तथा त्वम्" इत्युदाहृत सूत्रानन्तरसूत्रेण यथा सूर्यस्य रूपवतः प्रतिबिम्बोदययोग्यता ततो विमलतरदेशं रूपवज्जलं प्र-पद्यते नैवं सर्वगतस्यात्मनः प्रतिबिम्बोदययोग्यं किञ्चि-दस्ति ततो विमलतरमिति प्रतिबिम्बासम्भवमुक्त्वा "वृद्धिह्रास भाक्त्वम् अन्तर्भावादुभयसामञ्जस्यादेवमिति" तदनन्तरसूत्रेण यथा जलप्रतिबिम्बितः सूर्यो जलवृद्धौ वर्द्धत इव जल-ह्रासे ह्रसतीव जलचलने चलतीवेति तस्याध्यासिकतद्-धर्मयोगाद्वृद्धिह्रासादिभाक्त्वमित्येवं दृष्टान्तदार्ष्टान्तिकयोः साम्यांशस्यादविरोध इति स्वयंसूत्रकृतैवावच्छेदपक्षे तयोस्तात्पर्यकथनात्। "घटसंवृतमाकाशं नीयमाने यथा घटे। घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः"। "अंशो नानाव्यपदेशादिति" स्मृतिसूत्राभ्यामवच्छेदपक्ष-स्यैव परिग्रहाच्च। तस्मात् सर्वगतस्य चैतन्यस्यान्तःकरणा-दिनावच्छेदोऽवश्यं भाषीत्यावश्यकत्वादवच्छेदो जीव इति पक्षं रोचयन्ते"।

प्रतिविम्बित त्रि० प्रतिविम्ब+तार० इतच्। जातप्रतिविम्बे दर्पणादौ—प्रतिफलिते प्रतिच्छायापन्ने सुखादौ।

प्रतिविषा स्त्री प्रतिषिद्धं विषं यया प्रा०ब०। अतिविषायाम् (आतइच) अमरः।

प्रतिविष्णुक पु० प्रतिकूलो विष्णुर्यस्य प्रतिविष्णुः सुपुक्-न्दपत्तन्नाम्ना कायति शब्दायते कै—शब्दे क। क्षुद्र-कुन्दक्षे राजनि०।

प्रतिवेश पु० प्रत्यासन्नो वेशः प्रा०स०। प्रत्यासन्ने प्रतिवासिगृहे शब्दरत्ना०। प्रति+विश–घञ् वा दीर्घः। तत्रार्थे।

प्रतिवेशिन् त्रि० प्रत्यासन्नं विशति प्रति+विश–णिनि। प्रत्यासन्नगृहवासिनि स्त्रियां ङीप् "दृष्टिं हि प्रतिवेशिनि! त्वयनिहायसद्गृहे दास्यसि" सा०द०।

प्रतिव्यूह पु०प्रतिरूपः व्यूहः प्रा०स०। बलविन्यासस्य प्रतिरूपे व्यूहे भा०भी० ५०अ०।

प्रतिशब्द पु० प्रतिरूपः शब्दः प्रा०स०। प्रतिध्वनौ शब्दानुरूपे शब्दजन्ये शब्दभेदे। प्रतिविम्बवादशब्दे दृश्यम्।

प्रतिशयन न० प्रति+शी–भावे ल्युट्। प्रतिस्वापे अभीष्टलाभाय प्रत्यादेशाशया देवोद्देशेन स्नानभोजनादिवर्जनपूर्वकस्वापे (छत्याद्देव्योया) दशकु० ५ उ०।

प्रतिशयित त्रि० प्रति+शी+क्त। प्रतिशयनकारिणि

प्रतिशासन न० प्रति+शास–भावे ल्युट्। भृत्यादेर्निकृष्टस्य नियोगे अमरः। [ख्याते च त्रिका०।

प्रतिशिष्ट त्रि० प्रति+शास–कर्मणि क्त। १प्रेषिते २प्रत्या-

प्रतिश्या स्त्री प्रति+श्यै–वा० करणे अङ्। प्रतिश्राये पीनसे रोगभेदे शब्दच०।

प्रतिश्याय पु० प्रति+श्यै–करणे घञ्। पीनसे रोगभेदे तल्लक्षणादि सुश्रुतोक्तं यथा

"अथातः प्रतिश्यायप्रतिषेधं व्याख्यास्यामः। नारीप्रसङ्गः शिरसोऽभितापो धूमो रजः शीतसतिप्रतापः। सन्धारणं मूत्रपुरीषयोश्च सद्यः प्रतिश्यायनिदानमुक्तम्। त्वयङ्कृता मूर्द्धनि मारुतादयः पृथक्समस्ताश्च तथैव शोणितम्। प्रकोप्यमाना विविधैः प्रकोपणैर्नृणां प्रतिश्रायकरा भवन्ति हि। शिरोगुरुत्वं श्वसथोः प्रवर्त्तनं तथाङ्गमर्दः परिकृत्तरोमता। उपद्रवास्याप्यपरे पृथग्विधा नृणां प्रतिश्रायपुरःसराः स्मृताः। आनह्य पिहिता नासा तनुस्रावप्रवर्त्तिनी। गलतालोष्ठशोषश्च निस्तोदः शङ्खयोस्तथा। स्वरोपघातश्च भवेत्प्रतिश्राये ऽनिलात्मके। उष्णः सपीतकः स्रावो घ्राणात् स्रवति पैत्तिके। क्रमोऽतिपाण्डुः सलसो भवेत्तृष्णाभिपीडितः। सधूमं सहसा वह्निं वमतीव च मानवः। कफः कफक्लान्ते घ्राणाच्छुक्लः शीतः स्रवेन्नृणाम्। शुक्लाभासः शूनाक्षो भवेद्रुधिरोत्तरः। शिरोगलौष्ठतालूनां कण्डूयनमतीव च। भूत्वा भूत्वा प्रतिश्रायो योऽकस्मादिनिवर्त्तते। सन्धक्षो नाशयत्येको वा स सर्वप्रभवः स्मृतः। लिङ्गानि चैव सर्वेषां पीनसानां च सर्वजे। रक्तजे तु प्रतिश्राये रक्तस्रावः प्रवर्त्तते। ताम्राक्षश्च भवेज्जन्तु रुरोघ्राति प्रतीड़ितः। दुर्गन्धोच्छ्वासवदनस्तथा गन्धान्न वेत्ति च। मूर्च्छन्ति चास्रजमयः श्वेताः कृष्णास्तथाऽण्वः। कृमिमूर्द्धविकारेण समानं चास्य लक्षणम्। प्रक्लिद्यति पुननासा पुनश्च परिशुष्यति। सङ्घरानह्यते चापि सङ्घर्विच्छिद्यते तथा। निश्वासोच्छ्वासदौर्गन्ध्यं तथा गन्धान्न वेत्ति च। एवं दुष्टं प्रतिश्रायं जानीयात्कृच्छ्रसाधनम्। सर्व एव प्रतिश्राया नरस्याप्रतिकारिणः। कालेन रोगजनना जायन्ते दुष्टपीनसाः। बाधिर्य्यमान्यमघ्राणं घोरांश्च नयनामयान्। कासाग्निसादशोफांश्च दृष्ट्वा कुर्वन्ति पीनसाः"।

प्रतिश्रय पु०प्रतिश्रीयते प्रति+श्रि–आधारे अच्। १यज्ञगृहे जटा० २सभायां ३आश्रये च मेदि० ४गृहे हेमच०।

प्रतिश्रव पु० प्रति+श्रु–भावे अप्। स्वीकारे अमरः।

प्रतिश्रवण न०प्रति+श्रु–भावे ल्युट्। १अङ्गीकारे। प्रतिगतः श्रवणं कर्णम् अव्या०स०। २श्रवणानुगते त्रि० अस्य तत्पुरुषे अश्वा० अन्तोदात्तता प्रतिगतं श्रवणं येन प्रा०व०। डु न। [नृपभेदे भा०आ० ९५अ०।

प्रतिश्रवस् पु०१गोत्रप्रवरर्षिभेदे। २परिक्षित्पुत्रभीमसेनात्मजे

प्रतिश्रुत् स्त्री प्रतिरूपं श्रूयते श्रु–क्यप्० बा०कर्मणि क्विप्। प्रतिशब्दे प्रतिध्वनौ अमरः।

प्रतिश्रुत्का स्त्री देवताभेदे यजु०२४।३२। ३।१९ [नौ च।

प्रतिश्रुति स्त्री प्रति+श्रु–भावे क्तिन्। १अङ्गीकारे २प्रतिध्व-

प्रतिषिद्ध त्रि० प्रति+सिध–कर्मणि क्त। निषिद्धे

प्रतिषेध पु०प्रति+सिध–भावे घञ्। १निषेधे 'मा कुरु इत्यादिना निवारणे "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानता" मीमांसकका०। २अर्थालङ्कारभेदे अर्थालङ्कारशब्दे ४०० दृश्यम्। ३दूषणाभिधाने च। ल्युट्। प्रतिषेधन तत्रैव न०

प्रतिषेधोपमा स्त्री "न जातु यक्षिरिन्द्रोक्ते सुखेन प्रतिगर्जितुम्। कलङ्किनी जडश्चेति प्रतिषेधोपमैव सा। काव्याद०। उक्ते अर्थालङ्कारभेदे सादृश्यप्रतिषेधेन अधिक्वैचित्र्य प्रकटनात् तथात्वमस्याः।

प्रतिष्क पु०प्रति+स्कन्द–बा०ड घञ्। द्यूते शब्दर०। [जटा०।

प्रतिष्कष पु० प्रति+कष–अच् वा०सुट् घञ्। चर्मरज्ज्वो

प्रतिष्कस पु०प्रति+कस–अच् वा० सुट् घञ्। खरे शब्दर०

प्रतिष्टम्भ पु०प्रति+स्तभ–भावे घञ् घञ्। १प्रतिबन्धे अमरः २क्रियाराहित्यापादने 'बाङ्प्रतिष्टम्भविष्टब्धमन्युः" रघुः

प्रतिष्टुति स्त्री प्रति+स्तु-क्तिन्। प्रतिस्तुत्यीकृत्य स्तुतौ ऋ० ८।१२।२

प्रतिष्ठ त्रि०प्रतिष्ठा अस्त्यस्य अच् प्रति+स्था-क वा। १ख्यातियुक्ते २जैनभेदे पु० हेमच० ३कुमारानुचरमातृभेदे स्त्री भा०श०४७अ०। ४चतुरक्षरपादके वर्णवृत्तभेदे स्त्री वृ०र०।

प्रतिष्ठा स्त्री प्रति+स्था-भावाधारादौ अङ्। १स्थितौ २स्थाने ३गौरवे ४यागादिसमाप्तौ कर्त्तव्ये कर्मभेदे मेदि०। देवादीनां पूज्यतादिप्रयोजके ५संस्कारभेदे देवताप्रतिष्ठाशब्दे तद्विवरणं द्रष्टव्यम्। ६स्थैर्ये ७दृढत्वे स्त्री निघण्टुः पाते० सू० स्थैर्यभेदे फलभेद उक्तो यथा

"अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः" सू०। "सर्वप्राणिनां भवति" भा०"सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्" सू०"धार्मिकोभव इति भवति धार्मिकः, स्वर्गं प्राप्नुहीति स्वर्गं प्राप्नोति यमोवास्य वाग्भवति" भा० "अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्" सू० "सर्वदिक्स्थान्यस्योपतिष्ठन्ते रत्नानि" भा० "ब्रह्मचर्य्यप्रतिष्ठायां वीर्य्यलाभः" सू० "यस्य लाभादप्रतिमान् गुणानुत्कर्षयति शिष्यस्य विनेयेषु ज्ञानमाधातुं समर्थो भवति इति" भा०। ८आम्नाये "ब्रह्म पुच्छं प्रतिष्ठा" श्रुतिः।

प्रतिष्ठान न० प्रति+स्था-भावे ल्युट्। १व्रतादेः समाप्तौ कर्त्तव्ये कर्मभेदे देवादीनां पूज्यताप्रयोजके २संस्कारभेदे ३विख्यातौ च। आधारे ल्युट्। (विठोर) ख्याते ४नगरभेदे "गङ्गायमुनयोर्मध्ये प्रयागं जघनं स्मृतम्। प्रयागं जघनस्थानमुपस्थमृषयो विदुः। प्रयागं प्रतिष्ठानं कम्बलाश्वतरौ तथा। तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः" भा०व० ८५अ०। "प्रतिष्ठाने नरपतिर्ययातिः प्रत्युपस्थितः" भा०श०११३०अ०।

"एवंप्रभावो राजासीदैलस्तु पुरुषोत्तम!। देशे पुण्यतमे चैव महर्षिभिरभिष्टुते। राज्यं स कारयामास प्रयागे पृथिवीपतिः। उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः" हरिवं०२६अ०। ५स्थाने च

प्रतिष्ठित त्रि० प्रतिष्ठा जातास्य तारका० इतच्। १जातप्रतिष्ठे देवादौ २विख्यातियुक्ते च। ३विष्णौ पु० "अप्रमत्तः प्रतिष्ठितः" विष्णुस०।

प्रतिष्णिका स्त्री प्रति+ष्ण्या-क स्वार्थे क कापि अत इत्वम् सुधामा० पत्वम्। प्रतिष्ठानकर्त्र्यां स्त्रियाम्।

प्रतिसङ्क्रम पु० प्रतिरूपः संक्रमः प्रा०स०। १प्रतिच्छायायाम् प्रा०म०। २प्रतिसंक्रान्ते प्रतिच्छायापन्ने त्रि०। ३संचारे च "चितिशक्तिरपरिणामित्वप्रतिसंक्रमा दर्शितविषया शुद्धाऽनन्ता चेति" पात०भा०। "प्रतिसंक्रमः संचारः" विवरणम्।

प्रतिसंख्या स्त्री प्रति+सम्+ख्या-भावे अङ्। १प्रसंख्याने २सांख्यादिसिद्धे ज्ञानभेदे च तस्य पञ्चविंशतिसंख्यान्वितत्वनिरूपणात् तदीयज्ञानस्य संख्यानियतत्वेन तथात्वम्।

प्रतिसंख्यानिरोध पु० प्रतिसङ्क्रमपूर्वकोनिरोधः श०त०। बुद्धिपूर्वके भावानां नाशे बौद्धमतसिद्धे पदार्थभेदे अप्रतिसंख्यानिरोधशब्दे ५६१पृ० दृश्यम्।

प्रतिसञ्चर पु० प्रतिसञ्चरन्ति क्रियाशून्यतया विलीयन्तेऽस्यां प्रति+सम्+चर-आधारे घञ्। १प्रलयभेदे "यदा तु प्रकृतौ याति लयं विश्वमिदं जगत्। तदोच्यते प्राकृतोऽयं विद्वद्भिः प्रतिसञ्चरः" मार्क०पु०७६अ०। २संसारमात्रे च।

प्रतिसन्देश पु० प्रतिरूपः सन्देशः प्रा०स०। सन्देशानुरूपे प्रत्युत्तररूपतया वाचिकवृत्तान्तभेदे।

प्रतिसन्धान न० प्रति+सम्+धा-भावे ल्युट्। १अनुसन्धाने अनुचिन्तने ज्ञानभेदे नष्टस्य द्रव्यस्योपलब्धिहेतुव्यापारे २अन्वेषणे च।

प्रतिसन्धि पु० प्रतीपः सन्धिः प्रा०स०। १वियोगे २उपरमे "अदृष्टतोऽनुपायाच्च प्रतिसन्धिश्च कर्मणः" भा०शा०२०६अ० टी० नील० प्रति+सम्+धा-कि। ३प्रतिसन्धाने च वीप्सायाम् अव्ययी०। ४सन्धौ सन्धौ इत्यर्थे।

प्रतिसन्धेय त्रि० प्रति+सम्-धा-कर्मणि यत्। प्रतीकार्य्ये भा०उ० ६५अ०।

प्रतिसम त्रि० प्रतिकूलः समः। विसदृशे

प्रतिसमन्त त्रि० प्रतिगतं समन्तात् येन प्रा०ब० पृषो०। प्रा०प्रशस्तलक्षणे शत०ब्रा० ३।७।१।१२ भा०।

प्रतिसमासन न० प्रति+सम्+आ+अस-ल्युट् भावे ल्युट्। निरसने निवारणे भा०व० १६२१ श्लो०।

प्रतिसर पु० प्रति+सृ-अच्। १सैन्यपश्चाद्भागे २वस्त्रसूत्रे च त्रिका०। ३मन्त्रभेदे ४माल्ये व्रणशुद्धौ च मेदि०। ६भूषणे ७रक्षाबन्धनसूत्रे पु० न० अमरः। ८नियोज्ये त्रि० मेदि० स्त्रीत्वमपि। "प्रतिसरया तुरगाणां भल्लातकशालिकुष्ठसिद्धार्थं कण्ठेषु निबध्नीयात्" वृ०सं०४२अ०।

प्रतिसर्ग पु०प्रतिरूपः प्रतिकूलो वा सर्गः। १ब्रह्मणः सृष्टितुल्यायां सरीच्यादिसृष्टौ २प्रलये च "आदिसर्गस्तु यः प्रोक्तो विस्तरैण च। प्रतिसर्गश्च ये येषामधिपास्तान् वदस्व नः" इति प्रश्ने प्रतिसर्ग उक्तः कालिकापु०।

"प्रतिसर्गे तु मृत्पिण्डं हेमपिण्डं वा घटकुण्डलसुकुटादयो विशन्तोऽव्यक्तीभवन्ति तत्कारणरूपमेवाभिव्यक्तं कार्यमपेक्ष्याव्यक्तम् भवति। एवं पृथिव्यादयस्तन्मात्राणि विशन्तः स्वापेक्षया तन्मात्राण्यव्यक्तयन्ति एवं तन्मात्राण्यहङ्कारं विशन्ति अहङ्कारमव्यक्तयन्ति एवमहङ्कारो महान्तमाविशन्महान्तमव्यक्तयति महान् प्रकृतिं स्वकारणं विशन् प्रकृतिमव्यक्तयति प्रकृतेस्तु न क्वचिन्निवेश इति सा सर्वकार्याणामव्यक्तमेव" सा०त०कौ०

प्रतिसर्य पु० प्रतिसरे भवः यत्। रुद्रभेदे यजु०१६।२२

प्रतिसव्य न० प्रतिगतं सव्यं वामं येन प्रा०ब०। १प्रतिकूले २विरुद्धाचारिणि जटा०।

प्रतिसान्धानिक पु० सन्धानं प्रयोजनमस्य ठक् प्रतिरूपः सान्धानिकः प्रा०स०। मागधे स्तुतिपाठके शब्दरत्ना०।

प्रतिसाम वीप्सायाम् अव्ययी० अच् समा०। प्रत्येकसामनि

प्रतिसारण त्रि० प्रतिसारयति प्रति+सृ-णिच् ल्यु। १अपसारके २दूरीकारके। भावे ल्युट्। २दूरीकरणे। करणे ल्युट्। सुश्रुतोक्ते ३अग्निकार्यभेदे। बलयबिन्दुविलेखा प्रतिसारणानीति दहनविशेषाः। व्रणचिकित्साङ्गे ४उपक्रमभेदे "सासादुर्व्व" तैलेन व्रणमालेपयेदुव्रणम्। कुक्कुटाण्डकपालानि कतकं मधुकं समम्। तथा सहदेवीं मणिचूर्णञ्च दापयेत्। शुटिकामूलपिष्टा वा व्रणानां प्रतिसारणम्" सुश्रुतः। प्रतिसारणं व्रणस्य स्वस्थानात् स्थानान्तरनयनम् इत्यर्थः "दन्तजिह्वास्वस्थानां यच्चूर्णकल्कावलेहकैः। अनैर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम्। वैरस्यं मुखदौर्गन्ध्यं मुखशोषं तथा रुषाम्। अरुचिं दन्तपीडाञ्च निहन्ति प्रतिसारणम्। क्षीणे जाड्यकफोत्क्लेशावरसंज्ञानमेव च। अतियोगान्मुखे पाकः शोषस्तृष्णा वह्निः क्षयः" भावप्र० उक्ते ४दन्तघर्षणभेदे।

प्रतिसारणीय त्रि० प्रति+सृ-णिच्-कर्मणि अनीयर्। स्थानान्तरनयनीये सुश्रुतोक्ते क्षारपाकविधिभेदे "स द्विविधः प्रतिसारणीयः पानीयश्च। तत्र प्रतिसारणीयः कुष्ठकिटिभदद्रुकिलासमण्डलभगन्दरार्बुददुष्टव्रणनाडीचर्मकीलतिलकालकन्यच्छव्यङ्गमशकबाह्यविद्रधिक्रमिविषार्शःसूपदिश्यते"।

प्रतिसारिन् त्रि० प्रतीपं सरति सृ-णिच्-णिनि। १प्रतीपगामिनि २नीचगामिनि स्त्रियां ङीप्। भा०श० ५१अ०।

प्रतिसीरा स्त्री प्रतिसिनोति सीयते वा प्रति+सि-रक् दीर्घश्च। जवनिकायाम् (परदा) अमरकोषः।

प्रतिसूर्य पुंस्त्री०प्रतिरूपः सूर्यः प्रा०स०। १चक्रलाञ्छे त्रिका०। २द्वितीयसूर्यप्रादुर्भावरूपे आन्तरीक्षोत्पातभेदे च। स्वार्थे क। तत्रार्थे तच्छुभाशुभलक्षणं बृ०सं०३७अ० यथा "प्रतिसूर्यकः प्रशस्तो दिवसलघुतुवर्णसप्रभः स्निग्धः। वैदूर्यनिभः स्वच्छः शुक्लश्च क्षेमसौभिक्षः। पीतो व्याधिं जनयत्यशोकरूपश्च यक्षकोपाय। प्रतिसूर्यौ भानोर्दक्षुभयानङ्गुष्ठपर्वस्थौ। दिवसक्षतः प्रतिसूर्यौ जलदोदग्दक्षिणे स्थितोऽनिलकृत्। उभयस्थः सन्निभयं नृपस्योपरि निहन्त्यधो जनहा"।

प्रतिसृष्ट त्रि० प्रति+सृज-कर्मणि क्त। १प्रेरिते २प्रत्याख्याते च मेदि०। ३सक्ते धरणिः। [हिंसवल्लभाम् रत्नमि०।

प्रतिसोमा स्त्री प्रतिरूपा सोमः सोमयज्ञो यस्याः प्रा०ब०। स०

प्रतिस्कन्ध पु० १कुमारानुचरभेदे भा०श० ४६अ०। २नियमसन्ध्यङ्गभेदे पु० "परिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते। स्कन्धोपनेयं तं प्राहुः सन्धिं सन्धिविदो जनाः" कामन्द०।

प्रतिस्त्री स्त्री प्रतिरूपा स्त्री प्रा०स०। १परनार्याम् आभिमुख्ये अव्य०। २स्त्रिया आभिमुख्ये अव्य०। "उपमन्त्रयते स हिङ्कारोन्नयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रतिस्त्रि सह शेते स प्रतिहारः कालं गच्छति तद्विधनं पारं गच्छति तद्विधनमेतत् वामदेव्यं मिथुने प्रोतम्" छा०उ०। "प्रतिस्त्रियमयनम् स्त्रियोऽभिमुखीभावेन शयनम्। सहशयनमेकपर्यङ्के शयनम्" भा०।

प्रतिस्पर्द्धा स्त्री प्रति+स्पर्द्ध-भावे अङ्। प्रतिरूपस्पर्द्धायां प्रतिकक्षायाम् शब्दरत्ना०।

प्रतिस्पश पु० प्रतिरूपः स्पशः। प्रतिदूते

प्रतिस्रोतस् न० प्रतीपं स्रोतः प्रा०स०। स्रोतसोगमनप्रतिकूले

प्रतिस्वर पु० प्रति+स्वृ-शब्दोपतापयोः भावे आधारे वा अप्। १प्रतिशब्दे २उपतापाधारे आदित्यात् अग्नौ च स्यादनसाधने शुष्कगोमयादौ च। तत्प्रकारः निरुक्ते उक्तः यथा "उदीचि प्रथमसमाहृत आदित्ये कंसं वा मणिं वा परिमृज्य प्रतिस्वरे यत्र शुष्कगोमयं संस्पर्शयन्धारयति तत्प्रदीप्यते सोऽयमेव संपद्यते"। प्रतिस्वरे उपतापाधारे सूर्यकिरणसम्पर्कस्थाने इत्यर्थः।

प्रतिहत त्रि० प्रति+हन-क्त। १हिंसिते २रुद्धे ३निरस्ते ४प्रतिस्खलिते च मेदि०। भावे क्त। ५निराशे न०अमरः।

प्रतिहति स्त्री प्रति+हन-भावे क्तिन्। १प्रतिघाते आहत्य-

प्रदाष्टौ २रोधे च । तस्य कामप्रतिहत्या आयमानत्वात् तथात्वम् ।

प्रतिहर्तृ त्रि॰ प्रति+हृ-तृन् । १पुनराहरणकर्त्तरि २ऋत्विग्भेदे पु॰ऋक्शाकशब्दे ८५८८०दृश्यम् । स च प्रतिरूपसामभेदगाता प्रतिहारशब्दे दृश्यम् ।

प्रतिहर्षण न॰प्रतिरूपं हर्षणम् प्रा॰स॰। १हर्षणानुरूपे हर्षे णिच्-ल्युट् । २प्रतिरूपसन्तोषसम्पादने च ।

प्रतिहस्तक पु॰ प्रतिरूपः हस्तो यस्य प्रा॰ब॰ कप् । हस्तसाध्यक्रियाप्रतिरूपक्रियाकारिणि प्रतिनिधौ हितो॰ ।

प्रति(ती)हार पु॰ प्रत्येकं हरति स्वामिपार्श्वमानयति अण् वा दीर्घः । १द्वारपाले अमरः । स्त्रियां ङीप् गौरा॰ङीष् वा । आधारे घञ् । तदधिष्ठानस्थाने २द्वारे च शब्दर॰। प्रतिरूपं हरति हृ-अण् उपस॰ । ३सामाकारे भरतः । सामस्तृतीयभागे उद्गात्रा गेये ४सामावयवभेदे उद्गीथशब्दे ११७०पृ॰दृश्यम् । तस्य देवता च अत्र यथोक्तं छा॰उ॰ "अथ हैनं प्रतिहर्तोपससाद प्रतिहर्तर्यां देवता प्रतिहारमन्वायत्ता तान्वेदविद्वान् प्रतिहरिष्यन्ति भूत्वा ते व्यपतिष्यतोक्तस्य वयेति" ।

प्रतिहारक पु॰प्रति+हृ-ण्वुल् । १मायाकारे भरतः २स्थानान्तरप्रापके त्रि॰ ३प्रतिहारूपसामावयवगातरि पु॰ ।

प्रति(ती)हास पु॰प्रतिरूपः हासः प्रा॰स॰ वा दीर्घः । १येन हासः कृतः तं प्रति हासे प्रा॰ब॰। २तत्कारके त्रि॰ । ३करवीरवृक्षे पु॰ अमरः ।

प्रतिङ्कर पु॰ प्रति+कृ-आधारे अप् । समीपे ऋ॰७।६६।१४

प्रतीक पु॰प्रति+कन् नि॰ दीर्घः । १अवयवे अमरः । २प्रतिरूपे ३विलोमे च मेदि॰ प्रतीकोपासनं च ब्रह्मप्रतीकानामादित्यादीनां ब्रह्मदृष्ट्युपासनं तच्च शा॰ सू॰ भा॰ दर्शितं यथा

"न प्रतीके न हि सः" सू॰ "मनो ब्रह्मेत्युपासीतेत्यध्यात्मयादिदैवतमाकाशो ब्रह्म" (छा॰ ३।१८) इति, तथा "आदित्यो ब्रह्मेत्यादेशः,(छा॰।३।१९) स यो नाम ब्रह्मेत्युपास्ते" (छा॰।७।५) इत्येवमादिषु प्रतीकोपासनेषु संशयः, किमेष्वप्यात्मग्रहः कर्त्तव्यो न वेति । किं तावत् प्राप्तमेतेष्वप्यात्मग्रह एव युक्तः, कस्मात्, ब्रह्मणः श्रुतिष्वात्मत्वेन प्रसिद्धत्वात् । प्रतीकानामपि ब्रह्मविकारत्वात् ब्रह्मत्वे सत्यात्मत्वोपपत्तेरित्येवं प्राप्ते ब्रूमः । न प्रतीकेष्वात्मबुद्धिं कुर्वीयात्, न हि स उपासकः प्रतीकानि व्यस्तान्यात्मत्वेनाकलयेत् । यत्पुनर्ब्रह्मविकारत्वात् प्रतीकानां ब्रह्मत्वं ततश्चात्मत्वमिति । तदसत् प्रतीकाभावप्रसङ्गात् । विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्वमेषाभिप्रेतं भवति, स्वरूपोपमर्दे च नामादीनां श्रुतः प्रतीकत्वस्यात्ययो वा । न च ब्रह्मण आत्मत्वात् ब्रह्मदृष्ट्युपदेशेष्वात्मदृष्टिः कल्प्या, कर्त्तृत्वादिनिराकरणात्, कर्त्तृत्वादिसर्वसंसारधर्मनिराकरणेन हि ब्रह्मण आत्मत्वोपदेशस्तदनिराकरणेन चोपासनविधानम्, अतश्चोपासकस्य प्रतीकैः समत्वादात्ययो नोपपद्यते, न हि कृचकस्वस्तिकयोरितरेतरात्मत्वमस्ति, सर्वात्मनैव तु ब्रह्मात्मत्वेनैकत्वे प्रतीकाभावप्रसङ्गसमो दोषः । अतो न प्रतीकेष्वात्मदृष्टिः क्रियते" भा॰ "ब्रह्मदृष्टिरुत्कर्षात्" सू॰ "तेष्ववोदाहरणेषु अन्यः संशयः, किमादित्यादिदृष्टयो ब्रह्मण्यध्यारोपितव्याः किंवा ब्रह्मदृष्टिरादित्यादिष्विति । कुतः संशयः, सामानाधिकरण्ये कारणानवधारणात् । अत्र हि ब्रह्मशब्दस्यादित्यादिशब्दैः सामानाधिकरण्यमुपलभ्यते, "आदित्यो ब्रह्म प्राणो ब्रह्म विद्युद्ब्रह्म" इत्यादिसमानविभक्तिनिर्देशात् । न चात्राङ्गं सामानाधिकरण्यमवकल्पते अर्थान्तरवचनत्वात् ब्रह्मादित्यादिशब्दानां, न हि भवति गौरश्व इति सामानाधिकरण्यम् । नन्वेवं प्रकृतिविकारभावस्य ब्रह्मादित्यादीनां कृष्णसारादिवत् सामानाधिकरण्यं स्यात्, नैतदुच्यते, विकारप्रविलयोद्भवं प्रकृतिसामानाधिकरण्यात् स्यात्, ततश्च प्रतीकाभावप्रसङ्गसमो दोषः, परमात्मवाक्येष्वेदानीं स्यात्, ततश्चोपासनाधिकारो बाध्येत, परिमितविकारोपासनञ्च व्यर्थम् । तस्मात् ब्राह्मणोऽग्निर्वैश्वानर इत्यादिवदन्यतरत्रान्यतरदृष्ट्यध्यासे सति क्व किंदृष्टिरध्यस्तव्येति संशयः तत्रानियमः, नियमकारणाभावादित्येवं प्राप्तम् । अथ वाऽऽदित्यादिदृष्टय एव ब्रह्मणि कर्त्तव्या इत्येवं प्राप्तम् । एवं हि आदित्यादिदृष्टिभिर्ब्रह्मोपासनस्य फलवदिति शास्त्रमर्यादा । तस्मात् न ब्रह्मदृष्टिरादित्यादिष्वित्येवं प्राप्ते ब्रूमः । ब्रह्मदृष्टिरेवादित्यादिषु स्यादिति । कस्मात् उत्कर्षात्, एवमुत्कर्षे आदित्यादयो दृष्टा भवन्त्युत्कृष्टदृष्टेश्चाभ्यासात् । तथा च

लौकिको न्यायोऽनुगतो भवति, उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यासितव्येति लौकिको न्यायः। यथा राजदृष्टिः क्षत्तरि, स चानुगन्तव्यो विपर्यये प्रत्यवायप्रसङ्गात्। न हि क्षत्तृदृष्टिपरिग्रहीतो राजा निकर्षं नीयमानः श्रेयसे स्यात्। ननु शास्त्रप्रामाण्यादनाशङ्कनीयोऽत्र प्रत्यवायप्रसङ्गः, न च लौकिकेन न्यायेन शास्त्रीया दृष्टिर्नियन्तुं युक्तेति। अत्रोच्यते, निर्द्धारिते शास्त्रार्थे एतदेवं स्यात्, सन्दिग्धे तु तस्मिन् तन्निर्णयं प्रति लौकिकोऽपि न्याय आश्रीयमाणो न विरुध्यते, तेन चोत्कृष्टदृष्ट्यध्यासे शास्त्रार्थेऽवधार्यमाणे निकृष्टदृष्टिसंन्यास प्रत्यवेयादिर्हि सिध्यति। प्रायस्याच्चादित्यादिशब्दानां सुख्यार्थत्वमविरोधात् परीतव्यम्। तैः स्वार्थवृत्तिभिरवरुद्धाबां बुद्धौ पश्चादवतरतो ब्रह्मशब्दस्य सुख्यवृत्त्या सामानाधिकरण्यप्रसञ्जनात् ब्रह्मदृष्टिविधानार्थतैवावतिष्ठते। इतिपरत्वादपि ब्रह्मशब्दस्यैव एवार्थो न्याय्यः। तथा हि ब्रह्मेत्यादेशः ब्रह्मोपासीत ब्रह्मोपास्त इति च सर्वत्रेतिपरं ब्रह्मशब्दमुच्चारयति षड्वांस्यादित्यादिशब्दान्। ततश्च यथा शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्तिवचन एव शुक्तिकाशब्दः रजतशब्दस्तु रजतप्रतीति लक्षणार्थः प्रतीत्यैव हि केवलं रजतमिति न तु तत्र रजतमस्ति, एवमत्राप्यादित्यादीन् ब्रह्मेति प्रतीयादिति गम्यते। वाक्यशेषोऽपि च द्वितीयानिर्देशेनादित्यादीनेवोपास्तिक्रियया व्याप्यमानान् दर्शयति "स य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते" (छा०३।१९) "यो वाचं ब्रह्मेत्युपास्ते"(छा०७।५।२) "यः सङ्कल्पं ब्रह्मेत्युपास्ते" (छा०७।५।१) इति। यच्चोक्तं ब्रह्मोपासनमेवात्रादरणीयं फलवत्त्वायेति, तदयुक्तं उक्तेन न्यायेनादित्यादीनामेवोपास्यत्वावगमात्। फलवत्त्वमित्यादुपासन इवादित्यादुपासनेऽपि ब्रह्मैव दास्यति सर्वाध्यक्षत्वात्। वर्णितञ्चैतत्, "फलमत उपपत्तेः" इत्यत्र (वे०सू०३।२।३८)। ईदृशाच्चात्र ब्रह्मण उपास्यत्वं यत्प्रतीकेषु तद्दृष्ट्यध्यारोपणं प्रतिमादिष्विव विष्णादीनाम्"।

तत्फलविशेषोऽपि तत्र निर्णीतो यथा

"अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽदोषात् तत्क्रतुश्च" सू० "स्थितमेतत् कार्यविषया गतिर्न परविषयेति। इदमिदानीं सन्दिह्यते, किं सर्वान् विकारालम्बनानविशेषेणैवाभानवः पुरुषः प्रापयति ब्रह्मलोक उत कांश्चिदेवेति। किं तावत् प्राप्तं सर्वेषामेवैषां विदुषामसंन्यत्र परस्मात् ब्रह्मणो गतिः स्यात्। तथा हि "अनियमः सर्वेषाम्" इत्यत्राविशेषेणैवैषा विद्यान्तरेष्वतारितेत्येवं प्राप्ते प्रत्याह अप्रतीकालम्बनानिति। प्रतीकालम्बनान् वर्जयित्वा सर्वानन्यान् विकारालम्बनान्नयति ब्रह्मलोकमिति बादरायण आचार्यो मन्यते। न ह्येवमुभयथाभावाभ्युपगमे कश्चित् दोषोऽस्ति। अनियमन्यायस्य प्रतीकव्यतिरिक्तेष्वप्युपासनेषूपपत्तेः। तत्क्रतुश्चास्योभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः। यो हि ब्रह्मक्रतुः स ब्राह्मसैश्वर्यभागीदेदिति श्रूयते "तं यथा यथोपासते तदेव भवन्ति" इति स्मृतेः। न तु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति प्रतीकप्रधानत्वादुपासनस्य। नन्वब्रह्मक्रतुमानपि ब्रह्म गच्छतीति श्रूयते" यथा पञ्चाग्निविद्यायाम् "स एतान् ब्रह्म गमयति" इति। भवतु यत्रैवमपवाद उपलभ्यते, तदभावे त्वौत्सर्गिकेन तत्क्रतुन्यायेन ब्रह्मक्रतूनामेव तत्प्राप्तिर्नेतरेषामिति मन्यते" भा० "विशेषञ्च दर्शयति" सू० "नामादिषु प्रतीकोपासनेषु पूर्वस्मात् पूर्वस्मात् फलविशेषमुत्तरस्मिन्नुत्तरस्मिन्नुपासने दर्शयति "यावद्वाम्नो गतं तत्रास्य यथा कामचारो भवति" "वाग्वाव नाम्नो भूयसी यावद्वाचो गतं तत्रास्य यथा कामचारो भवति" "मनो वाव वाचो भूयः"इत्यादिना। स चायं फलविशेषः प्रतीकतन्त्रत्वादुपासनानामुपपद्यते, ब्रह्मतन्त्रे तु ब्रह्मणोऽविशिष्टत्वात् कथं फलविशेषः स्यात्। तस्माच्च प्रतीकालम्बनानामितरेष्वतुल्यफलत्वमिति" भा०। यजुष्टपस्य ४पुत्रभेदे भाग० ६।२।१२

प्रती(ति)कार पु०प्रति+कृ घञ् दीर्घः। १कृतापकारस्य प्रत्यपकारे वैरनिर्यातने अमरः २रोगनिवारणोपाये चिकित्सायाम् शब्दमा०। [अमरः। अस्य नित्यसमासः। मेघप्रतीकाशः।

प्रती(ति)काश पु० प्रति+काश-घञ् वा दीर्घः। उपमायाम्

प्रतीकाश्व पु० भानुमच्छ्रुतस्य पुत्रभेदे भाग० ६।१२।६

प्रतीक्षा स्त्री प्रति+ईक्ष-भावे अङ्। अपेक्षायाम्। भावे ल्युट्। प्रतीक्षण तत्रार्थे न०।

प्रतीक्ष्य त्रि० प्रति+ईक्ष-कर्मणि यत्। १पूज्ये २अपेक्षणीये च "प्रतीक्ष्यं तत् प्रतीक्ष्यायै पितृष्वस्रे प्रतिश्रुतम्" इति माघः।

प्रती(ति)घात पु०प्रति+हन-भावे घञ् वा दीर्घः। प्रतिघाते

प्रतीची स्त्री पृषोदरा०+स्त्रियां ङीप् अञ्चोपे दीर्घः। पश्चिमायां दिशि यदपेक्षया सूर्यास्ताचलसन्निहिता या दिक् सा तदपेक्षया तस्य प्रतीची कर्मा० उप० वृत्तिः।

प्रतीचीन त्रि॰ प्रतीचि भवः प्रत्यच्+ख अल्लोपे दीर्घः। १प्रत्यगभवे २पश्चिमदिग्भवे च। स्वार्थे ख। ३प्रतीचि पदार्थे हेमच॰। शत॰ब्रा॰ ५।२।४।२० प्रतीचीनफलम्।

प्रतीच्य त्रि॰ प्रतीचि भवः प्रत्यच्-भवार्थे यत्। १प्रत्यग्भवे २पुलस्त्यमातरि स्त्री भा॰ड॰११६अ॰। ३अन्तर्हिते त्रि॰ निघण्टुः। [मनुः ४।१६।४ श्लो॰।

प्रतीच्छक त्रि॰ प्रतिगता इच्छा यस्य प्रा॰ब॰ कप्। याचके

प्रतीत त्रि॰ प्रति+इण-क्त। १ख्याते २ज्ञाते अमरः। ३हृष्टे ४सादरे च राजनि॰। ५विश्वेदेवगणभेदे पु॰भा॰अनु॰९१अ॰

प्रतीति स्त्री प्रति-इण-भावे क्तिन्। १ज्ञाने २ख्यातौ ३आदरे ४हर्षे च।

प्रतीतोद पु॰ "ऊर्द्ध" शाकरभट्टाचरभाष्यवत् तस्य ह्यचरान् पदादीन् प्रतीतोदा इत्याचक्षते" इत्युक्तेऽर्थे।

प्रतीन्धक पु॰ विदेहदेशे रामा॰ अयो॰ ७१।९ श्लो॰।

प्रतीप त्रि॰ प्रतिगता आपोऽत्र अच्समा॰ नि॰ प्रतिप+पृषो॰ वा। १प्रतिकूले चन्द्रवंश्ये २नृपभेदे पु॰ हेमच॰। प्रतिपशब्दे दृश्यम्। ३अलङ्कारभेदे अलङ्कारशब्दे २८८पृ॰ दृश्यम्। क्लान्ते परेऽन्योदात्तताया वा परनिपातः प्रतीक्षतः क्षतप्रतीप इति वा। स्वार्थे क। ४तत्रार्थे। "हर्य्यश्वप्रतिपुत्रयदोः पुत्रे भाग॰ ९।१३।१२ तत्र प्रतिपक इति पाठान्तरम् तत्रार्थे। ततः सुखा॰ अस्त्यर्थे इनि। प्रतीपकिन् तद्युते त्रि॰ स्त्रियां ङीप्। सुखादिपाठात् ततः ठनृभतुपौ न स्तः।

प्रतीपदर्शिन् त्रि॰प्रतीपं वामं पश्यति दृश-णिनि। १प्रतिकूलदर्शके स्त्रियां ङीप्। सा च २स्त्रियाम् अमरः।

प्रतीपाक्ष पु॰ राजभेदे विष्णुपु॰।

प्रतीर न॰ प्रतीर्य्यते प्र+तीर-क। १तटे तीरे अमरः। २औत्तमभृत्यपुत्रभेदे मार्क॰पु॰ १००अ॰।

प्रतीवाप पु॰ प्रति+वप-घञ् दीर्घः। १गलितक्षणादेरवचूर्णने अमरः। २मेथोषधिभेदे औषधविशेषसंयोगभेदे च "तत्र वीरतर्णादिसिद्धं जलमूषकादि प्रतीवापं पाययेत्" [भाग॰ ५।१५।२ सुश्रुतः।

प्रतीह पु॰ भरतवंश्ये सुवर्चलायां जाते परमेष्ठिनः पुत्रभेदे

प्रतुद पु॰ प्र+तुद-क। खगभेदे "हारीतो धवलः पाण्डुश्चित्रपक्षो दृढच्छुकः। पारावतः खञ्जरीटः पिकाद्याः प्रतुदाः स्मृताः"। "प्रतुद्य भक्षयन्त्येते तुण्डेन प्रतुदास्ततः" "प्रतुदा मधुराः पित्तकफघ्नास्वादुरा हिमाः। लघवो बह्ववर्चस्का किञ्चिद्घातकराः स्मृताः" भावप्र॰।

प्रतूर्त्त त्रि॰प्र+तूर-वेगे क्त। १प्रकृष्टवेगान्विते भावे क्त। २प्रकृष्टवेगे न॰। ततो गोषदादिभत्वर्थे वुन्। प्रतूर्त्तक तद्युते त्रि॰

प्रतूलिका स्त्री प्रकृष्टं तूलमत्र कप् कापि अतइत्त्वम् (तोषक) शय्याभेदे काशी॰७अ॰। [नदग्रे (चाबुक्) अमरः।

प्रतोद पु॰ प्रतुद्यतेऽनेन प्र+तुद-करणे घञ्। अश्वादिताड़-

प्रतोली स्त्री प्र+तुल-अच् गौरा॰ङीष्। १रथ्यायाम् २पुराभ्यन्तरवर्त्मनि अमरः। हट्टादौ निर्मिते ३पथि च भरतः।

प्रतोष पु॰प्र+तुष-भावे घञ्। १सन्तोषे प्रकृष्टस्तोषोऽस्य प्रा॰ब॰। २सन्तोषयुते त्रि॰। ३स्वायम्भुवमनोः पुत्रभेदे पु॰ भाग॰ ४।१।७ श्लो॰। [पुराणनामसु निघण्टुः।

प्रत्न त्रि॰ पुराणार्थे प्र+भवार्थे त्न। १पुरातने अमरः।

प्रत्यंशु त्रि॰प्रतिगतोऽंशुम् अत्या॰स॰। १प्राप्तांशुके। तत्पुरुषे कृति॰ अन्तोदात्तताम्। प्रतिगतोऽंशुर्येन प्रा॰ब॰। २प्रतिगतांशुके त्रि॰ तत्पुरुषे इत्युक्तेः बहुव्रीहौ नान्तोदात्तता।

प्रत्यक्चेतन पु॰प्रतीपं विपरीतमञ्चति जानाति प्रति+अञ्चू-क्विप् कर्म॰। १सांख्यमतसिद्धे पुरुषे। "ततः प्रत्यक्चेतनाधिगमः अन्तरायाभावश्च" योगसू॰ भाष्यम्। प्रत्येकम् अञ्चति अञ्चते कर्म॰। सर्वेषु २अन्तरात्मनि परमेश्वरे तदभिन्ने ३जीवे च प्रत्यक्शब्दे दृश्यम्। [अमरः

प्रत्यक्पर्णी स्त्री प्रत्यक् पर्णान्यस्याः ङीप्। १अपामार्गे

प्रत्यक्पुष्पी स्त्री प्रत्यक् पुष्पमस्याः ङीप्। अपामार्गे अमरः

प्रत्यक्श्रेणी स्त्री प्रतीची श्रेणीव अस्याः समासान्तविधेरनित्यत्वात् न कप्। १दन्तीवृक्षे २मूषिकपर्णाञ्च अमरः।

प्रत्यक्ष अव्य॰ अक्ष्णः लक्षणम् "लक्षणेनाभिप्रती" पा॰ लक्षणार्थे प्रतिनाऽव्ययी॰ शरदा॰ अच्समा॰ अक्षिशब्देन इन्द्रियमात्रम् लक्ष्यते। १इन्द्रियलक्षणे ततोऽस्त्यर्थे अच्। २इन्द्रियसन्निकर्षजन्ये ज्ञाने न॰। इन्द्रियाणाञ्च ज्ञानमात्रं प्रत्येव सन्निकर्षद्वारा हेतुत्वात् तथार्थत्वम्। ततः अस्त्यर्थे पुनः अर्श आद्यच्। ३प्रत्यक्षविषये त्रि॰। प्रत्यक्षत्वं च ज्ञानत्वव्याप्यजातिविशेषः तल्लक्षणन्तु इन्द्रियार्थसन्निकर्षोत्पन्नज्ञानत्वमिति नैयायिकाः। अधिकमपरोक्षशब्दे २२५ पृ॰ दृश्यशब्दे च २६७२ पृ॰ दृश्यम्। वेदान्तमते तल्लक्षणन्तु "तत्तदिन्द्रिययोग्यवर्त्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम्। स्वाकारवृत्त्युपहितप्रमाणचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति वर्त्तमानयोग्यत्वं विषयस्य प्रत्यक्षत्वम्" वेदा॰प॰। तच्च लौकिकालौकिकभेदात् द्विधा।

प्रत्यक्षदर्शन त्रि० प्रत्यक्षेण पश्यति दृश्–ल्यु। साक्षिणि साक्षाद्दर्शिनि शब्दमाला। णिनि। प्रत्यक्षदर्शिन् तत्रार्थे त्रि० स्त्रियां ङीप्।

प्रत्यक्षलवण न० प्रत्यक्षं पृथक्तयोपलभ्यमानं लवणम्। पाकनिष्पत्त्युत्तरं व्यञ्जनादौ दीयमानलवणे। तस्य श्राद्धे अदेयतोक्ता यथा आ०त० ब्रह्मपु० "सिद्धाः कृताश्च ये भक्ताः प्रत्यक्षलवणीकृताः" श्राद्धे तस्य वर्ज्यतयोक्तेः "सिद्धाः कृताः सिद्धूत्तरकालं प्रत्यक्षलवणप्रक्षेपकृताः" आ०त० रघु०। तत्रैव विष्णुना श्राद्धवर्ज्येषु "आरक्तास्यैव नियोसाः प्रत्यक्षलवणानि च" इत्युक्तम्। शु०त० ब्रह्मपु० "सैन्धवं लवणं चैव यच्च सामुद्रकं भवेत्। पक्वे परमे होते प्रत्यक्षेऽपि च नित्यशः"। "पृथक्तयोपलभ्यमानं लवणं प्रत्यक्षलवणं न तु व्यञ्जनादिसंस्कारकं संस्कारप्रत्यक्षयोर्भेदात्" शु०त०रघु०। वस्तुतः सैन्धवादेरपि प्रत्यक्षलवणत्वेऽभक्ष्यता आर्द्रकादियोगे प्रतिप्रसवः न तु सिद्धूत्तरकालप्रक्षेपेऽपि प्रतिप्रसवः। अतः सिद्धूत्तरकालं लवणमात्रस्यैव प्रक्षेपे सर्वत्र भक्षणे दाने च निषेधः इति बोध्यम्।

प्रत्यक्षवादिन् पु०प्रत्यक्षमेव प्रमाणतया वदति वद्–णिनि। चार्वाके चार्वाकशब्दे २६२१पृ० दृश्यम्।

प्रत्यक्षिन् त्रि० प्रत्यक्षमस्यास्य इनि। १साक्षाद्द्रष्टरि व्यक्तं दृष्टार्थे त्रिका० स्त्रियां ङीप्।

प्रत्यक्स्रोतस् पु० प्रत्यक् प्रतीचीगामि स्रोतो यस्य। १पश्चिमदिग्वाहिनि नदे "प्राक्स्रोतसो नद्यः प्रत्यक्स्रोतसो नदा नर्मदां विना" भाघ ४।६६श्लो० व्याख्यायां मल्लिनाथधृतवाक्यम्। २नर्मदायां स्त्री भा० व० ८६अ०। प्रतीचि प्रत्यगात्मनि स्रोतश्चित्तप्रवाहोऽस्य। प्रत्यगात्मैकप्रवणचित्तवृत्तियुते ३यतिभेदे पु०।

प्रत्यगात्मन् प्रतीचो जीवस्यात्मा स्वरूपम्। १परमेश्वरे ब्रह्मचैतन्ये भागव०३।२४।४५ श्रीधरः। "कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" कठो० भाष्ये तु अन्यथोक्तं यथा "प्रत्यक् चासावात्मा चेति प्रत्यगात्मा प्रतीच्येवात्मशब्दो रूढो लोके नान्यस्मिन् व्युत्पत्तिपक्षेऽपि तत्रैवात्मशब्दो वर्त्तते। "यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते" इत्यात्मशब्दव्युत्पत्तिस्मरणात्। तं प्रत्यगात्मानं स्वस्वभावमैक्षत पश्यतीत्यर्थः" "स्वस्वभावं स्वस्वरूपमित्यर्थः" आनन्दगिरिः।

प्रत्यगाशापति पु० ६त०। पश्चिमदिक्पाले वरुणे दृश्यायुधः

प्रत्यगुदच् स्त्री प्रतीच्या उदीच्याश्च अन्तराला दिक् ब०व०। पश्चिमोत्तरदिशोरन्तरालायां विदिशि वायुकोणे आश्व० श्रौ० २ ६।४।

प्रत्यग्र त्रि० प्रतिगतमग्रमस्यत्वम् अव्या०स०। १नूतने २प्रोक्षिते च अमरः। उपचरितचरन्तपर्वतभेदे २वृहद्रथपुत्रे नृपभेदे पु० भाग० ६।२२।४

प्रत्यग्रथ पु० अहिच्छत्रदेशे देशच०। तत्र भवः तस्य राजा वा "साल्वावयवप्रत्यग्रथकालकूटाश्मकादिञ्" पा० ६ञ। प्रात्यग्रथि तत्र भवे तद्भूपे च।

प्रत्यग्रह पु० चेदिदेशराजे नृपभेदे भा०आ० ६१अ०।

प्रत्यङ्ग न०प्रतिगतमङ्गम् अव्या०स०। अङ्गानुगताङ्गभेदे अङ्गाङ्गभेदे कर्णादौ "तलाङ्गान्यन्तराधिसक्थिबाहुशिरांसि तदवयवाः प्रत्यङ्गानि" सुश्रुतः। अङ्गशब्दे ७२पृ० दृश्यम्। [भेदे हरिवं० २अ०।

प्रत्यङ्गिरस् पु० चाक्षुषमन्वन्तरे आङ्गिरसे अक्स्वरूपे ऋषि-

प्रत्यङ्गिरा स्त्री देवीभेदे "अथ प्रत्यङ्गिरां वक्ष्ये परशत्रुनिवर्हिणीम्" इत्यादिना मन्त्रमहौषधौ दक्षरङ्गे तत्प्रयोग उक्तः।

प्रत्यङ्मुख त्रि० प्रत्यङ्मुखं यस्य। पश्चिमाभिमुखे "स्त्रियं प्रत्यङ्मुखो भुङ्क्ते" मनुना तन्मुखभोजने स्त्रीलाभः फलमुक्तम्। कर्मविशेषे सायंसन्ध्यावन्दने च तन्मुखता विहिता स्मृतौ दृश्या।

प्रत्यच्(ञ्च्) पु० प्रत्यञ्चति अनच्–क्विप् विच् वा। १स्वात्मनि प्रत्यगात्मनृशब्दे दृश्यम्। २पश्चिमे देशे ३काले च ४पश्चिमायां दिशि स्त्री ङीप् मत्वे अस्योमे दीर्घः प्रतीची। एवं यशब्दादचि प्रतीचः प्रतीचेत्यादि। विचि तु नलोपाभावात् न तथा प्रत्यञ्चः प्रत्यञ्चौ" इति। ततः समस्यर्थे अचि तस्य लोपः। प्रत्यच् पूर्वसमस्यर्थवृत्तौ पश्चिमदिग्देशकालादौ त्रि० अव्य०। [सुश्रुतः।

प्रत्यञ्जन न० प्रतिरूपमनुरूपमञ्जनं प्रा०स०। अनुरूपाञ्जने

प्रत्यनन्तर त्रि० प्रतिप्राप्तमनन्तरम् अव्या०स०। प्रत्यासन्ने सन्निहिते मनुः १०।८०।

प्रत्यनीक पु०प्रतिकूलमनीकं यस्य प्रा०ब०। १रिपौ २विघ्ने च हेम० उपचारात् ३प्रतिवादिनि ४अलङ्कारभेदे न० अलङ्कारशब्दे ४०१ पृ० दृश्यम्।

प्रत्यनुमान न० प्रतिरूपमनुमानं प्रा०त०। प्रतीपानुमाने यथा पर्वतो वह्निमान् धूमादिति वादिनोक्ते पर्वतो वह्न्यभा-

यवात् पाषाणमयत्वादिति प्रतिवादिनः प्रतिषेधानुमानम् ।

प्रत्यन्त पु० प्रतिगतोऽन्तम् अत्या० स० । इष्टेऽदेशे इषद्विनष्टे त्रि० अमरः । [पक्षे पर्वते हेमच० ।

प्रत्यन्तपर्वत पु० प्रत्यन्तः सन्निकृष्टः पर्वतः । इषत्पर्वतसमीपे

प्रत्यभिज्ञा स्त्री प्रतिगता अभिज्ञाम् अत्या० स० । १अभिज्ञानरूपे तज्जन्यसंस्कारसहकारेण जनिते प्रत्यक्षभेदे यथा सोऽयं देवदत्त इत्यादि । तत्स्वरूपादिकं विवरणप्रमेयसंग्रहे निर्णीतं यथा

"ननु कोयं प्रत्यभिज्ञा नाम न तावदेकस्यातीतवर्त्तमानकालद्वयसम्बन्धविषयं प्रत्यक्षज्ञानं प्रत्यभिज्ञा, प्रत्यक्षज्ञानस्य वर्त्तमानमात्रार्थव्याप्तित्वात् । पूर्वानुभवसंस्कारसहितादिदानीन्तनवस्तुप्रमितिकारणाज्ज्ञातस्य तस्य तथात्वमिति चेत् एवमप्यात्मनि सोऽहमिति प्रत्यभिज्ञा न सिद्धेत् नित्ये स्वयंप्रकाशे तस्मिन् संस्कारस्य जन्यज्ञानस्य वाऽसम्भवात् । नापि स्वरूपज्ञानमेव प्रत्यभिज्ञातस्य प्रदीपप्रभावत् वर्त्तमानार्थप्रकाशिनः पूर्वापरपरामर्शात्मकत्वायोगात्, अस्मर्य्यते हि सोऽहमित्याकारद्वयोपप्लुतं ज्ञानद्वयमेतस्य प्रत्यभिज्ञा । तस्मादनया दुर्निरूपया प्रत्यभिज्ञया कथमैक्यसिद्धिः । उच्यते । केवले चिदात्मनि जन्यज्ञानतत्संस्कारयोरसम्भवेऽन्तःकरणविशिष्टे तत्सम्भवाद्भवा प्रत्यभिज्ञा किं न स्यात् । न च विशिष्टस्य प्रत्यभिज्ञाविषयत्वे तस्यैव प्रत्यभिज्ञातृत्वमपीति कर्मकर्तृविरोधः शङ्कनीयः, सर्ववादिनां देहव्यतिरिक्तात्मानुमानविषयतयात्मनि कर्मकर्तृभावस्य संप्रतिपन्नत्वात् । अथ मतं नानुमानादौ विषयस्य कर्मकारकत्वम् अतीतादेरनुमाने विषयस्याविद्यमानस्य ज्ञानजनकत्वायोगात् विषयस्वत्वेऽविद्यमानस्यापि कथञ्चित् सम्बन्धविशेषात् ज्ञानस्य तदाकारत्वात् अतोऽनुमानादौ कर्तृत्वमेवात्मनः, प्रत्यक्षे तु विषयस्य ज्ञानजनकतया कर्मकारकत्वम् अतो विरोधस्तदवस्थ इति चेन्न, अन्तःकरणविशिष्टतयैवात्मनः प्रत्यभिज्ञातृत्वं पूर्वापरकालविशिष्टतया च प्रत्यभिज्ञेयत्वमित्युपाधिभेदेनाविरोधात् । किमेतावता प्रयासेन प्रत्यभिज्ञैव मा भूदिति चेत् न, सोऽहमिति प्रत्यभिज्ञायाः स्वानुभवसिद्धत्वात् अविसंवादित्वेन च भ्रान्तित्वायोगात् । यदुक्तं सोऽहमित्याकारद्वयोपप्लुतं ज्ञानद्वयमिति तदसत् तथासति विज्ञानं क्षणिकमित्यत्रापि ज्ञानद्वयप्रसङ्गेन विज्ञानस्य क्षणिकत्वासिद्धिप्रसङ्गात् । विज्ञानमात्रवादिनां क्षणिकत्वादिधर्माणां क्वचिदात्मन्यवेति चेत् तर्हि स्थायित्वादिधर्माणां क्वचिदात्मन्यवेति किं न स्यात् । अनुभवानुसारित्वात् । यच्च प्राभाकरा मन्यन्ते सोऽहमितिप्रत्यभिज्ञायां विषयत्वेनात्मयोनात्मा सिद्ध्यति किं तर्हि सोऽयं घट इत्यादि प्रत्यभिज्ञास्थलेनेति, तदयुक्तं पूर्वापरकालविशिष्टस्य क्षणमात्रवृत्तिप्रत्यभिज्ञास्थलासम्भवेन प्रत्यभिज्ञया स्थायित्वासिद्धिप्रसङ्गात् । अथ मतं मम संवेदनं जातमिति इदानीमनुस्मर्य्यमाणा पूर्वकालीना घटादिसंवित् स्वाश्रयं तदानीन्तनमात्मानं साधयति स्मृतिश्च स्वाश्रयमिदानीन्तनमात्मानं साधयति ततश्च स्याद्यात्मसिद्धिः न पुनरप्रामाणिकं सोऽहमित्यात्मविषयकं प्रत्यभिज्ञानं किञ्चित् कल्पनीयमिति चेत् नैतत् सारम् स्मृतिपूर्वानुभवौ ह्यभिज्ञाद्वयवत्तत्कालीनमात्मानं यद्यपि साधयतः तथाप्येकस्यात्मनः कालद्वयसम्बन्धो न केनापि सिध्यति । संवित्तुद्वयमेव सम्बन्धस्यापि साधकमिति चेत् तर्हि तथैव घटादिष्वपि स्थायित्वसिद्धौ तत्सिद्धये प्रत्यभिज्ञा नापेक्ष्येत । दार्ढ्याय प्रत्यभिज्ञेति चेत् एवमपि प्रकृते संवित्तुद्वयं किं साक्षात्सम्बन्धस्य साधकमुत प्रत्यभिज्ञातृत्वाद्य, आद्ये न तावदेकैकं तत्साधकम् एकैकस्य कालद्वयविशिष्टात्मन्यनाश्रितत्वात् नापि संभूय तत्साधकम्, अतीतानुभवस्य वर्त्तमानस्मृतेश्च यौगपद्यायोगात् । द्वितीये स्वाश्रयात्मविषयं सोऽहमिति प्रत्यभिज्ञानं त्वयैवाङ्गीकृतं स्यात् । न च वाच्यं क्वचिदपि न ज्ञानविषयत्वमात्मनस्तत्कथं प्रत्यभिज्ञाविषयत्वमिति । मम संवेदनं जातमिति स्मृतिज्ञानविषयत्वात् यद्यप्यनेन स्मृतिज्ञानेन स्वोत्पत्तिकालीन आत्मा स्वाश्रयत्वेनैव प्रकाश्यते न विषयत्वेन तथापि स्मर्य्यमाणसंवेदनाश्रयभूतस्तत्संवेदनकालीन आत्मा विषयीक्रियत एव । अथोच्यते स्मृत्या संवेदनमेव विषयीक्रियते तच्च संवेदनं स्मृतं सत् स्वाश्रयमात्मानमाश्रयत्वेन प्रत्याययिष्यतीति तदसत् स्मृतिकाले संवेदनस्याविद्यमानस्य स्वाश्रयसाधकत्वायोगात् । स्वयंप्रकाशमानं हि संवेदनमाश्रयं साधयति न तु स्मृतिविषयतया परप्रकाश्यम् अन्यथा धर्मादीनामपि परतः सिद्धानां स्वाश्रयात्मसाधकत्वप्रसङ्गात् । तस्मादतीतकालीन आत्मा स्मृतिविषय एवेत्यभ्युपेयम् । तथाच सोऽहमिति प्रत्यभिज्ञाप्यात्मानं विषयीकरिष्यतीति प्राभाकरैरप्यात्मविषयप्रत्यभिज्ञयैव संविदात्मना क्षणिकत्वं निराकरणीयम्" ।

प्रत्यभिज्ञादर्शन न० प्रत्यभिज्ञायाः दर्शनम् ष० त० । माहे-

स्वरशास्त्रभेदे तन्मतं च सर्वदर्शनसंग्रहे दर्शितं यथा "अत्रामेच्छाविहीनानां जडानां कारणत्वं दुष्प्रतीत्यपरिहृषप्रन्नो मतान्तरसन्निषप्रन्नः परमेश्वरेच्छावशादेव जगच्चित्रमाणं परिघुषप्रन्नः स्वसंवेदनोपपत्त्यागमसिद्धप्रत्यगात्मतादात्म्यो, नानाविधमानमेयादिभेदाभेदशाली परमेश्वरोऽनन्यसुखप्रेक्षित्वलक्षणस्वातन्त्र्यभाक् स्वात्मदर्पणे भावान् प्रतिबिम्बवदभासयेदिति भगवतो बाह्याभ्यन्तरचर्यांप्राणायामादिक्लेशप्रयासकलावैधुर्येण सर्वसुलभमभिनवं प्रत्यभिज्ञामात्रं परापरसिद्धुपायमस्यृगच्छन्तः परे माहेश्वराः प्रत्यभिज्ञाशास्त्रमभ्यस्यन्ति। तस्येयत्तापि न्यरूपि परीक्षकैः "स्तवं दृक्तिविदृतिर्लब्धी दृक्तीलुभे विमर्शिन्यौ। प्रकरणविवरणपञ्चकमिति शास्त्रं प्रत्यभिज्ञायाः" तत्रेदं प्रथमं सूत्रम्। "कथञ्चिदासाद्य महेश्वरः स्वात्मानं जनस्याप्युपकारमिच्छन्। समस्तसम्पत्समवाप्तिहेतुं तत्प्रत्यभिज्ञामुपपादयामि" इति। कथञ्चिदिति परमेश्वराभिन्नगुरुचरणारविन्दयुगलसमाराधनेन परमेश्वरघटितेनैवेत्यर्थः आसाद्येति या समन्तात् परिपूर्णतया सादयित्वा स्वात्मोपभोग्यतां निरर्गलां गमयित्वा तदनेन विदितवेद्यत्वेन परार्थशास्त्रकरणेऽधिकारो दर्शितः अन्यथा प्रतारणमेव प्रसजेत्। मायोत्तीर्णा अपि महामायाधिकृता विष्णुविरिञ्चाद्या यदीयैश्वर्यलेशेनेश्वरीभूताः स भगवाननवच्छिन्नप्रकाशानन्दस्वातन्त्र्यपरमार्थो महेश्वरः तस्य दास्यं दीयतेऽस्मै स्वामिना सर्वं यथाभिलषितमिति दासः परमेश्वरस्वरूपस्वातन्त्र्यप्राप्तिमित्यर्थः। जनशब्देनाधिकारिविषयनियमाभावः प्रादर्शि। यस्य यस्य हीदं स्वरूपकथनं तस्य तस्य महाफलं भवति प्रधानस्यैव परमार्थफलत्वात्। तथोपदिष्टं शिवदृष्टौ परमगुरुभिर्भगवत्सोमानन्दनाथपादैः "एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः। ज्ञाते शिवत्वे सर्वस्मे प्रतिपत्त्या दृढात्मना। करणेन नास्ति कृत्यं क्वापि भावनया सकृत्। ज्ञाते सुवर्णे करणं भावनां वा परित्यजेत्" इति। अपिशब्देन स्वात्मनस्तदभिन्नतामाविष्कुर्वता पूर्णत्वेन स्वात्मनि परार्थसम्पत्त्यतिरिक्तप्रयोजनान्तरावकाशस्य परास्तः। परार्थस्य प्रयोजनं भवत्येव तल्लक्षणयोगात् न त्वयं देवशापः, स्वार्थ एव प्रयोजनं न परार्थ इति। अत एवोक्तभाष्येण "यमर्थमधिकृत्य प्रवर्त्तते तत्प्रयोजनम्" इति। उपशब्दः सामीप्यार्थः तेन जनस्य परमेश्वरसमीपताकरणमात्रं फलम् अत एवाह समस्तेति परमेश्वरतालाभे हि सर्वाः सम्पदन्तर्निषण्णाः सम्पन्ना एव रोहणाचललाभे रत्नसम्पद इव। एवं परमेश्वरतालाभे किमन्यत् प्रार्थनीयम्। तदुक्तमुत्पलाचार्यैः "भक्तिनम्रशिरस्कानां किमन्यदुपयाचितम्। एतया वा दरिद्राणां किमन्यदुपयाचितम्" इति। इत्थं षष्ठीसमासपक्षे प्रयोजनं निर्दिष्टम्। चतुर्थीसमासपक्षे तूपायः समस्तस्य बाह्याभ्यन्तरस्य नित्यसुखादेर्या सम्पत्सिद्धिः तथात्वप्रकाशः तस्याः सम्यगवाप्तिर्यस्याः प्रत्यभिज्ञायाः हेतोः सा तथोक्ता तस्य महेश्वरस्य प्रत्यभिज्ञा प्रतिसन्धानाभिमुख्येन ज्ञानम्। लोके हि स एवायं चैत्र इति प्रतिसन्धानेनाभिमुखीभूते वस्तुनि ज्ञानं प्रत्यभिज्ञेति व्यवह्रियते इहापि प्रसिद्धपुराणसिद्धागमानुमानादिज्ञातपरिपूर्णशक्तिके परमेश्वरे सति स्वात्मन्यभिमुखीभूते तच्छक्तिप्रतिसन्धानेन ज्ञानमुदेति नूनं स एवेश्वरोऽहमिति। तामेतां प्रत्यभिज्ञामुपपादयामि उपपन्नः सम्भवतीति तत्समर्थाचरणेन प्रयोजनव्यापारेण सम्पादयामीत्यर्थः। यदीश्वरस्वभाव एवात्मा प्रकाशते तर्हि किमनेन प्रत्यभिज्ञादर्शनप्रयासेनेति चेत् तत्रायं समाधिः स्वप्रकाशतया सततमवभासमानेऽप्यात्मनि मायावशात् भागेन न प्रकाशते पूर्णतावभाससिद्धये हक्क्रियात्मकशक्त्याविष्करणेन प्रत्यभिज्ञा प्रदर्श्यते। तथा च प्रयोगः अयमात्मा परमेश्वरो भवितुमर्हति ज्ञानक्रियाशक्तिमत्त्वात् यो यावति ज्ञाता कर्त्ता च स तावतीश्वरः प्रसिद्धेश्वरवत् राजवद्वा आत्मा च विश्वज्ञाता कर्त्ता च तस्मादीश्वरोऽयमिति अवयवपञ्चकस्याश्रयणं मायावादेन नैयायिकमतस्य कक्षीकारात्। तदुक्तमुदयकरज्वलुना "कर्त्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे। अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः। किन्तु मोहवशादस्मिन् दृष्टेऽप्यनुपलक्षिते। शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते"। तथा हि "सर्वेषामपि भूतानां प्रतिष्ठा जीवदाश्रया। ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतम्। तत्र ज्ञानं स्वतः सिद्धं क्रिया कार्यास्थिता सती। परैरप्युपलक्ष्येत तयाऽन्यज्ञानमुच्यते" इति। "या चैषां प्रतिभा तत्तत्पदार्थक्रमरूपिता। अक्रमानन्दचिद्रूपः प्रमाता स महेश्वरः" इति च। सोमानन्दनाथपादैरपि "सदा शिवात्मना वेत्ति सदा वेत्ति सदात्मना" इत्यादि। ज्ञानाधिकारपरिसमाप्तावपि "तदैक्येन विना नास्ति संविदां लोकपद्धतिः। प्रकाशैक्यात्तदैक्यं

कार्तैकः स इति स्थितः। स एवार्थक्रियात्वेन नियतेन महेश्वरः। विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः" इति। विवृतं चाभिनवगुप्ताचार्यैः "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति" श्रुत्या प्रकाशविद्रूपमहिम्ना सर्वस्य भावजातस्य भासकत्वमभ्युपेयते ततश्च विषयप्रकाशस्य नीलप्रकाशः पीतप्रकाश इति विषयोपरागभेदाद्भेदः। वस्तुतस्तु देशकालाकारसङ्कोचवैकल्यादभेद एव स एव चैतन्यरूपः प्रकाशः प्रमातेत्युच्यते। तथा च पठितं शिवसूत्रेषु "चैतन्यमात्मेति"। तस्य चिद्रूपत्वमनवच्छिन्नविमर्शत्वघनत्वोन्मुखमानन्दैकघनत्वं साम्येश्वर्यमिति पर्यायैः स एष ह्यं भावात्मा विमर्शः शुद्धे पारमार्थिक्यौ ज्ञानक्रिये तत्र प्रकाशरूपता ज्ञानं, स्वतो जगद्विमर्शनत्वं क्रिया। तच्च निरूपितं क्रियाधिकारे "एष चानन्दशक्तित्वादेवमाभासयत्यमून्। भावानिच्छामयादेषा क्रिया निर्मीलताऽस्य तु"। उपसंहारेऽपि "इत्थं तथा घटपटाद्याकारस्वतन्त्रात्मना। निष्ठासोरेवमिच्छैव हेतुकर्तृकता क्रियेति। तस्मिन् सतीदमस्तीति कार्यकारणतापि या। साप्येषेच्छाविहीनानां जडानां नोपपद्यते" इति न्यायेन यतो जड़स्य न कारणता न वा अनीश्वरस्य चेतनस्यापि तस्मात्तेन तेन जगदुत्तज्जन्मस्थित्यादिभावविकारतत्तद्भेदक्रियासङ्कल्पेन स्वातन्त्र्यिच्छोः स्वतन्त्रस्य भगवतो महेश्वरस्येच्छैवोत्तरोत्तरमच्छस्वभावा क्रिया विश्वकर्तृत्वं वोच्यते इति। इच्छामात्रेण जगच्चिन्मणित्वप्रदृष्टान्तोऽपि स्पष्टं निर्दिष्टः "योगिनामपि बहवीजं विनैवेच्छावशेन यत्। घटादि जायते तत्तत् स्थिरस्वार्थक्रियाक्षमम्" इति। यदि घटादिकं प्रति मृदादेव परमार्थतः कारणं स्यात्तर्हि कथं योगीच्छामात्रेण घटादिजन्म स्यात्। अथोच्येत अन्य एव मृद्बीजादिजन्या घटाङ्कुरादयो योगीच्छाजन्यास्त्वन्या एवेति तत्रापि बोध्यते सामग्रीभेदात्तावत् कार्यभेद इति सर्वजनप्रसिद्धम्। ये तु वर्णयन्ति नोपादानं विना घटाद्युत्पत्तिरिति योगी स्वेच्छया परमाणून् व्यापारयन् सङ्घटयतीति तेऽपि बोधनीयाः। यदि परिदृष्टकार्यकारणभावविपर्ययो न लक्ष्येत तर्हि घटे मृद्दण्डचक्रादिदेहे स्त्रीपुरुषसंयोगादि सर्वमपेक्ष्येत तथा च योगीच्छासमनन्तरसञ्जातघटदेहादिसम्भवो दुःसमर्थ एव स्यात्। चेतन एव तु तथा भाति समवान् भूरिभगो महादेवो नियत्यनुवर्त्तनोल्लङ्घनघनतरस्वातन्त्र्य इति पक्षे न काचिदनुपपत्तिः। अत एवोक्तं वसुगुप्ताचार्यैः "निरुपादानसम्भारमित्तावेव तन्वते। जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने" इति। ननु प्रत्यगात्मनः परमेश्वराभिन्नत्वे संसारसम्बन्धः कथं भवेदिति चेत्तत्रोक्तमाममाधिकारे "एष प्रमाता मायान्धः संसारी कर्मबन्धनः। विद्यादिद्यापितैश्वर्यश्चिदुघनो मुक्त उच्यते" इति। ननु प्रमेयस्य प्रमात्रभिन्नत्वे बद्धमुक्तयोः प्रमेयं प्रति को विशेषः? अत्राप्युक्तरूपं तत्त्वार्थसंग्रहाधिकारे "मेयं साधारणं सूत्रैः स्वात्मभेदेन मन्यते। महेश्वरो यथा बद्धः पुनरत्यन्तभेदवृत्तिः" नन्वात्मनः परमेश्वरत्वं स्वाभाविकं चेत्कार्थः प्रत्यभिज्ञाप्रार्थनया न हि बीजमग्न्यभिज्ञातं सत् सहकारिसाकल्ये अङ्कुरं नोत्पादयति। तस्मात् कस्माद्धेतोरात्मप्रत्यभिज्ञाने निर्बन्ध इति चेदुच्यते। शृणु तावदिदं रहस्यं द्विविधा ह्यर्थक्रिया बाह्याङ्कुरादिना प्रमातृविश्रान्तिचमत्कारसारा प्रीत्यादिरूपा च तत्राद्या प्रत्यभिज्ञानं नापेक्षते द्वितीया तु तदपेक्षत एव॥ इदंप्रथहमीश्वर इत्येवम्भूतचमत्कारसारा परापरविभिन्नचक्रजीवात्मसदाशिवविभूतिरूपार्थक्रियेति स्वरूपप्रत्यभिज्ञानमपेक्षणीयम्। ननु प्रमातृविश्रान्तिसारार्थक्रिया प्रत्यभिज्ञानेन विना दृष्टा सती तस्मिन् दृष्टेति का दृष्टम्। अत्रोच्यते नायकगुणगणसंश्रवणप्रहृष्टानुरागा का चन कामिनी मदनविह्वला विरहक्लेशमसहमाना मदनलेखावलम्बेन स्वावस्थानिवेदनानि विधत्ते तथा वेगात्तन्निकटमटत्यपि तस्मिन्नवलोकितेऽपि तत्रावलोकनं तदीयगुणपरामर्शाभावे जनसाधारणत्वं प्राप्ते हृदयङ्गमभावं न लभते। यदा तु मूर्च्छिवचनादस्तदीयगुणपरामर्शं करोति तदा तत्क्षणमेव पूर्वभावमश्नुते। एवं स्वात्मनि विश्वेश्वरात्मना भासमानेऽपि तद्भासनं तदीयगुणपरामर्शविरहसमयं पूर्णं भावं न समादधाति यदा तु गुरुवचनादिना सर्वज्ञत्वसर्वकर्तृत्वादिलक्षणपरमेश्वरोत्कर्षपरामर्शो जायते तदा तत्क्षणमेव पूर्णात्मतालाभः। तदुक्तं चतुर्थे विमर्शे "तैस्तैरप्युपायैश्चितैरपनतसंशयाः स्थितोऽप्यन्तिके कान्तो लोकवदान एवमपरिज्ञाता न रन्तुं यथा। लोकस्यैव तथानपेक्षितगुणः स्वात्मापि विश्वेश्वरो नैवायं विजवैभवाद् तदियं तत्प्रत्यभिज्ञोदिता" इति। अभिनवगुप्तादिभिराचार्यैर्विवृतप्रतानोऽपि व्यसमर्थः संक्षेपसुपक्रमसमये रक्षाभिर्विस्तरभिया न प्रतानित इति सर्वं शिवम्।

प्रत्यभियोग पु० प्रतिरूपोऽभियोगः प्रा०स०। अभियुक्तेन प्रतिवादिना स्वाभियोगिनं प्रति अभियोगान्तरकरणे।

प्रत्यभिवाद पु० प्रति+अभि+वद्–घञ्। अभिवादकस्य तत्प्रतिरूपे आशीर्वचनादौ। भावे ल्युट्। प्रत्यभिवादन तत्रार्थे न०। तत्प्रकारः मनुना कुल्लूकभट्टेन च दर्शितो यथा "आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने। अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः। यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम्। नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः" "अभिवादने कृते प्रत्यभिवादयित्वा अभिवादको विपादिः आयुष्मान् भव सौम्येति वाच्यः। अस्य चाभिवादकस्य यस्यास्ति तस्यान्ते योऽकारादिः स्वरो नाम्नामकारान्तत्वनियमाभावात् स प्लुतः कार्य्यः स्वरापेक्षत्वेदकारान्तत्वं व्यञ्जनान्तेऽपि नाम्नि सम्भवति स्वरान्तस्य च व्यञ्जनान्ते नाम्नोऽसम्भवात् आह पूर्वाक्षर इति। पूर्वनामसम्बन्धेन संश्लिष्टं यस्य स पूर्वाक्षरः तेन नामाक्षरं पठित्वा चाकारादिः स्वरः प्लुतः कार्यः। एतच्च वाक्यस्य टेः प्लुत उदात्तः इत्यस्यानुवृत्तौ "प्रत्यभिवादेऽशूद्रे" इति प्लुतं स्मरन् पाणिनिः स्फुटमुक्तवान्। व्याख्यातञ्च वृत्तिकृता वामनेन टेरिति किं व्यञ्जनान्तस्यैव टेः प्लुतो यथा स्यादिति। तस्मादीदृशं प्रत्यभिवादनवाक्यम् आयुष्मान् भव सौम्य! शुभमर्मश्न्! एवं क्षत्रियस्य वसुवर्मश्न् एवं वैश्यस्य वसुभूतिश्" "प्लुतो राजन्यविशां वेति कात्यायनवचनात् क्षत्रियवैश्ययोः पक्षे प्लुतो न भवति। शूद्रस्य प्लुतो न कार्यः अशूद्र इति पाणिनिवचनात्। "स्त्रियामपि निषेध" इति कात्यायनवचनात् स्त्रियामपि प्रत्यभिवादनवाक्ये न प्लुतः"। [भियोगे त्रिका०।

प्रत्यभिस्कन्दन न० प्रति+अभि+स्कन्द्–भावे ल्युट्। प्रत्यक्षप्रत्यय पु० प्रति+इण–भावकरणादौ अच्। १अधीने २अपथे ३स्थाने ४विश्वासे प्रामाण्येन निश्चये ५हेतौ ६क्लिष्टे ७शब्दभेदे अमरः। ८आचारे ९ख्यातौ मेदि०। १०निश्चये ११स्वादुनि हेमच०। १२षड्विधकारिकारणे त्रिका०। शब्दभेदप्रत्ययलक्षणन्तु शब्दशक्ति० प्रका० उक्तं यथा "खाघवादन्यथा निर्वक्ति "इतरार्थानवच्छिन्ने स्वार्थे यो बोधनाक्षमः। तिङर्थेष्वन्वयं निभादन्यः स वा प्रत्यय उच्यते"। यः शब्दः शब्दान्तरार्थावच्छिन्ने वाचकस्वार्थे धर्मिणि तिङर्थेष्वन्वयबोधने स्वरूपायोग्यः स वा निभादिशब्देभ्यो भिन्नत्वाद्यर्थे प्रत्यय इत्यर्थः। चैत्रोऽस्तीत्याद्यर्थानवच्छिन्ने स्वार्थे नाम्नां तिङर्थान्वयबोधकत्वम्। एवं यजेत स्वीयेतेत्यादौ यजादिधातूनाम्। पचतीत्यादौ तिङां पाचकोऽस्तीत्यादौ कृतां कार्यप्रपित्रित्यादौ च तद्धितानाम् प्रकृत्यर्थावच्छिन्ने एव स्वार्थे कृत्यादौ तिङर्थस्य वर्त्तमानत्वादेर्बोधकत्वं न तु तदनवच्छिन्ने इति न तेष्वप्रसङ्गः। निभनिपातादिकन्तु शब्दान्तरार्थानवच्छिन्ने सदृशसम्बन्धादिस्वार्थे तिङर्थान्वान्वयं प्रति स्वरूपायोग्योऽपि निभादिरेवेति न तत्र प्रसङ्गः"।

वैयाकरणमते तु स्वस्वाभिधानसमवेतं शब्दार्थत्वेनोक्तं यथा "प्रत्ययस्तु प्रकृतिसमवधीकृत्य विधीयमानः स्वार्थबोधकः शब्दविशेषः प्रकृतिशब्दार्थितभाग्योक्तेः। "स्वीयमर्थं प्रत्यायतीति" प्रत्ययलक्षणे भाष्यप्रयोक्तेश्च तथैवावगम्यते। अवधिश्च पूर्वापरूपो द्वारः तेन बहुषि नाप्रसङ्गः तथापि प्रकृत्यवधिकत्वेन विधीयमानत्वात्। खिलान्ते तु वृत्तिशब्दानां समुदायशक्तिस्वीकारेण बहुत्वादेर्निरर्थकतया प्रत्ययप्रत्ययत्वाभावादेव पूर्वत्वरूपावधित्वप्रवेशेऽपि न क्षतिः। अतएव प्रकृतिशब्देन्दुशेखरकारिकायां "प्रत्ययः परः" इत्यनेन परत्वेन विधीयमानत्वं प्रत्ययत्वमुक्तं तस्य च शब्दत्वद्योतनार्थं स्वार्थकत्वमाकाङ्क्षत्वमवधनाय च कृतरूपं विशेषणम् तथा च तदर्थान्वितस्वार्थबोधने तदपेक्षत्वे सति तदवधिकत्वेन विधीयमानत्वं तत्प्रत्ययत्वमिति फलितमेवार्थः। अन्वितत्वञ्च विशेषणतया विशेष्यतया वा आद्यं तेन तिङा धात्वर्थविशेषणप्रकाश्यत्वस्य बोधकत्वेऽपि न क्षतिः। यदि धात्वर्थप्रकृतिस्वीकारस्तदा परपदेनावधिमात्रं लक्ष्यीयम् अवधिश्च पूर्वापरान्यतरएव निवेशनीयः। एवञ्च प्रत्ययनिमित्तकप्रकृत्यर्थकार्यविशेषे विकरणागमादीनां प्रत्ययत्वस्वीकारेण परत्वमात्रं प्रत्ययत्वमिति बोध्यम्। अथवा प्रत्यय इत्यधिकृत्य पञ्चमाध्यायसमाप्तेर्विधीयमानत्वं पारिभाषिकप्रत्ययत्वं तत्रैव स्वार्थबोधकत्वे सतीति विशेषणे सुबन्तप्रत्ययत्वसामान्यलक्षणं पर्यवस्यति तत्तत्प्रत्ययत्वन्तु मूलमेव। स्वार्थिकप्रत्ययानामपि प्रकृत्यर्थानुवादितया स्वार्थबोधकत्वमतएवाभिप्रेतं वाक्यपदीये "स्वार्थिकाः प्रत्ययाः केचित् प्रकृत्यर्थानुवादिनः" इति। अतदनुरोधेनैव शेखरादौ स्वस्वप्रकृत्यर्थान्यतरप्रत्याय्यकत्वं प्रत्ययानामुक्तम्। विकरणादयः पुनः सर्वथा निरर्थकाः तेषां द्योतकत्वाद्यनङ्गीकारात् तद्व्यतिरेकेणापि कृदादौ धात्वाद्यादेरर्थप्रतीतेर्दर्शनात्। उक्तञ्च वाक्यपदीये "अत्र वाऽभिचारेण तयोः शक्तिप्रकल्पनम्। नियमस्तु

नियमो न त्वेवं ध्यनृषयादिष्विति"। यत्र त्वयोरव्यभिचारेणान्वयव्यतिरेकाभ्यां, नियमः अर्थप्रतीतिनिबन्धनयोः प्रकृतिप्रत्ययोः शक्तिकल्पनम्। यत्र चैवं न नियमस्तत्र ध्यनृषयादिषु नेत्यक्षोटयित्वा शक्तिकल्पनं नेत्यर्थः"। १९विष्णौ पु० "प्रत्ययः सर्वदर्शनः" विष्णुसं०। तस्य ज्ञानरूपत्वात् तथात्वम् भाष्ये दृश्यम्। प्रत्ययस्य बुद्धिरात्मगुण इति नैयायिकाः। सङ्खसत्त्वधर्म इति सांख्याः। "एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टीनाम्" सां०का०। "प्रतीयतेऽनेनेति प्रत्ययो बुद्धिस्तस्य सर्गः तत्र विपर्ययोऽज्ञानमविद्या च बुद्धिधर्मः अशक्तिरपि करणवैकल्यहेतुका बुद्धिधर्म एव तुष्टिसिद्धी अपि वक्ष्यमाणे बुद्धिधर्मावेव, तत्र विपर्ययाशक्तितुष्टिषु क्रमायोगं सप्तानां धर्मादीनां ज्ञानवर्जमलाभैः सिद्धौ च ज्ञानस्येति" त०कौ०। "बुद्धिभिन्नो भावो द्रव्यस्य प्रकाश्यते" इति न्यायात् सर्गपदं सृज्यमानपरं तथा चाविद्यादेर्बुद्धिधर्मत्वात् तत्सृष्टत्वम्।

प्रत्ययकारिन् त्रि०प्रत्ययं करोति कृ-णिनि। १विश्वासकारके स्वमतत्वस्थापके २सद्भावेदे(भोक्षर)त्रिका०। [च अमरः

प्रत्ययित त्रि० प्रति+अय-क्त। १आप्ते २विश्वस्ते ३प्रतिगते

प्रत्यरा स्त्री प्रतिनिक्षिताः अराः प्रा०स०। अराद्दाढ्यार्थं उपनिक्षिते कीलके "अनाङ्गारं विंशतिप्रत्ययाभिः" श्वेताश्व०उ०"पूर्वोक्तानामराणां दाढ्यार्थं ये प्रतिविधीयन्ते खीलकास्ते प्रत्यरा इत्युच्यन्ते" भाष्ये उक्तम्।

प्रत्यरि पु०प्रति+अर-इन्। १शत्रौ २जन्मतारातः पञ्चमचतुर्दशत्रयोविंशतितारासु "जन्मसम्पद्विपत्क्षेमं प्रत्यरिः साधकोवधः। मित्रं परममित्रं च जन्मर्क्षात्तु त्रिधा पुनः" ज्यो०त०। "तारा पुनः पापाख्या त्रिविधा पञ्चचतुर्दशविंशतिस्थिता। सिद्धिफला वृद्धिकरी विनाशसंज्ञा क्रमात् कथिता" ज्यो०त०। तेन तृतीयस्यैव विशेषत आवश्यककार्यादौ निषेधात् त्याज्यता आद्ययोर्द्वयोस्तु प्रतिपक्षवः इति द्रष्टव्यम् "प्रत्यरौ जवणं दद्यादिति" दानमपि तृतीयप्रत्यरावेवेति विवेचनीयम्।

प्रत्यर्थिन् त्रि० प्रत्यर्थयते प्रति+अर्थ-णीङने णिनि। १शत्रौ अमरः। प्रतिभूतमर्थयते णिनि, प्रतिपक्षः अर्थिनः प्रा०स० वा। व्यवहारे २प्रतिवादिनि मेदि०। "प्रत्यर्थिनोऽयतो लेख्यं प्रतिज्ञातार्थसाधनम्" याज्ञ०।

प्रत्यर्पण न० प्रति+ऋ-णिच्-युक्-ल्युट्। प्रतिदाने गच्छीतस्य धनादेः पुनर्दाने प्रतिसमर्पणे।

प्रत्यवनेजन न० प्रतिरूपमवनेजनम् प्रा०स०। श्राद्धे प्रथमजलादिदानरूपानुरूपे पिण्डोपरि क्रियमाणे पुनरवनेजने तच्च छन्दोगेतरपरं यथोक्तम् "छन्दोगानान्तु पिण्डपात्रप्रक्षालनेन पूर्ववनेजनम्। यथा छन्दोगपरिशिष्टं "तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत्" अथाप्यवनेजयेदिति स्मृतेर्द्वितीयावनेजनेऽपि अवनेनिक्ष्वेति वक्तव्यं न तु प्रत्यनेनिक्ष्वेति" आ०त० रघु०।

प्रत्यवमर्श पु० प्रति+अव-मृश-भावे घञ्। अनुसन्धाने "स्मृतिः प्रत्यवमर्शश्च तेषां जात्यन्तरेऽभवत्" हरिवं०२१अ०

प्रत्यवमर्ष पु० प्रति+अव+मृष-घञ्। सहने "स्वल्पसङ्करः सपरिहारः समन्वयमर्षः" पञ्चशिखाचार्यः। "स्वल्पसङ्करः ज्योतिष्टोमादिजन्मनः प्रधानापूर्वस्य स्वल्पेन पशुहिंसादिजन्मनाऽनर्थहेतुना अपूर्वेण सङ्करः, सपरिहारः क्रियतामपि प्रायश्चित्तेन परिहर्त्तुं शक्यः। अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्मविपाकसमये च पच्यते तथापि यावद्वर्षावधिं स्मृते तावत् स प्रत्यवमर्षः प्रत्यवमर्षेण सहिष्णुतया सह वर्त्तत इति स्वप्ने हि पुण्यसञ्चारोपनीतस्वर्गसुधामहाह्रदावगाहनः क्षपणाः पापमात्रोपपादितां दुःखवह्निकणिकाम्" त०कौ०। भावे ल्युट्। प्रत्यवमर्षण तत्रार्थे न०।

प्रत्यवर त्रि० प्रतिरूपोऽवरः प्रा०स०। अतिनिकृष्टे "प्रतिग्रहादुयाजनाद्वा तथैवाध्यापनादपि। प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः" मनुः।

प्रत्यवरोह पु० प्रति+अव+रुह-घञ्। (नाना) अवरोहे ल्युट्। प्रत्यवरोहण तत्रार्थे न०।

प्रत्यवसान न० प्रति+अव+सो-क्त। भोजने हेमच०।

प्रत्यवसित त्रि० प्रति+अव+सो-कर्मणि क्त। भुक्ते अमरः।

प्रत्यवस्कन्द पु० प्रति+अव+स्कन्द्-करणे घञ्। अवस्कारे उत्तरभेदे उत्तरग्रन्थे १०६०पृ० दृश्यम्। करणे ल्युट्। प्रत्यवस्कन्दन तत्रार्थे न०।

प्रत्यवस्था स्त्री प्रति+अव+स्था-भावे अङ्। १प्रतिपक्षतया अवस्थाने। भावे ल्युट्। प्रत्यवस्थान तत्रार्थे न०। "साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानम्" गौ०त०

प्रत्यवस्थातृ त्रि० प्रति+अव+स्था-तृच्। १प्रतिपक्षतया अवस्थातरि प्रतिवादिनि। २शत्रौ हेम०।

प्रत्यवहार पु०प्रति+अव-हृ-भावे घञ्। १संहारे रघुः ४।४४ २युद्धार्थमुद्युक्तानां सैन्यानां युद्धात् निवारणे भा०व० २८२अ०।

प्रत्यवाय पु॰प्रति+अव–इण्–करणे घञ्। १पापे "अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्वते" जावालिः। भावे घञ्। २वैगुण्याचरणे मनुः ४।२४५।

प्रत्यवेक्षण न॰ प्रति+अव+ईक्ष–भावे ल्युट्। पूर्वापरालोचने २एतावत्कृतमेतावत् न कृतमित्यर्थानुसन्धाने च। प्रति+अव+ईक्ष–भावे क्त। प्रत्यवेक्षा तत्रार्थे स्त्री रघुः १७।५२।

प्रत्यश्रम् पु॰ प्रतिरूपः अश्मा प्रा॰स॰। गैरिके हेम॰।

प्रत्यष्ठीला स्त्री सुश्रुतोक्ते अष्ठीलातुल्ये रोगभेदे "अष्ठीलावद्घनं यन्यिमूर्ध्वमायतमुन्नतम्। वाताष्ठीलां विजानीयाद्वह्निमांगैरोधिनीम्। एतामेव रुजायुक्तां वातविण्मूत्ररोधिनीम्। प्रत्यष्ठीलामिति वदेच्छठरे तिर्य्गुत्थिताम्"।

प्रत्याकार प्रतिकृत आकारः खड्गाकारो येन प्रा॰व॰। खड्गकोषे त्रिका॰। [२दूरीकृते अमरः।

प्रत्याख्यात त्रि॰ प्रति+आ+ख्या–कर्मणि क्त। १निराकृते

प्रत्याख्यान न॰ प्रति+आ+ख्या–भावे ल्युट्। निराकरणे अमरः। [(फिरे आशा) हरिवं॰ १२५अ०।

प्रत्यागति स्त्री प्रति+आ+गम–भावे क्तिन्। प्रत्यागमने

प्रत्यागम पु॰ प्रति+आ+गम–भावे घञ्। (फिरे आशा) बन्धात् गतस्तद्भिन् पुनरागमने "तीर्थात् प्रत्यागमेऽपि च" प्रा॰त॰। भावे ल्युट्। प्रत्यागमन तत्रार्थे न॰।

प्रत्यादिष्ट त्रि॰ प्रति+आ+दिश–कर्मणि क्त। निरस्ते अमरः

प्रत्यादेश पु॰प्रति+आ+दिश–भावे घञ्। १निराकरणे अमरः भक्तान् प्रति आदेशः। २भक्तान् प्रति अभीष्टसिद्ध्यर्थं देवानादेशे च।

प्रत्याधान न॰ प्रतिपत्त्या धीयते प्रति+आ+धा–कर्मणि ल्युट्। १अग्नौ "यो ह वै यिशु साधानं प्रत्याधानम्" शत॰ब्रा॰ १४।५।२।१ भाष्यम्। "सप्तकस्य सर्वदेवेष्ववयवेषु आधीयमानत्वात् तथात्वम्। भावे ल्युट् प्रा॰स॰। २द्वितीयाधाने च॰।

प्रत्याध्मान पु॰ वातव्याधिभेदे। तस्य लक्षणमाह "विसृक्तपार्श्वहृदयं तद्वेगाभ्रयोत्थितम्। प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलम्"। विसृक्तपार्श्वहृदयं पार्श्वे हृदयं च विहाय जातं तद्वेगाध्मानम्। कफव्याकुलितानिलं कफेनावरुद्धवातम्" भावप्र॰।

प्रत्यापत्ति स्त्री प्रति+आ+पद–भावे क्तिन्। १वैरान्धे भा॰ शा॰ २९३ अ॰ नीलकण्ठः। २पुनरायमने च।

प्रत्याम्नान त्रि॰ प्रतिरूपतया आम्नायते प्रति+आ+म्ना–कर्मणि ल्युट्। प्रतिनिधौ "यजमानकर्तृत्वेन विधीयन्ते प्रत्याम्नानाच्च ऋत्विजो निवर्त्तन्ते" कात्या॰ श्रौ॰ १।६।१२ पद्धतौ।

प्रत्याम्नाय पु॰ प्रतिरूपतया आम्नायते प्रति+आ+म्ना–कर्मणि घञ्। प्रतिनिधित्वेन विधीयमाने।

प्रत्यायक त्रि॰प्रति+इ–ण्वुल्। १विश्वासकारके २बोधके च।

प्रत्यायन न॰ प्रति+आ+इ–णिच् "स्मृ गमिरबोधने" पा॰ उक्तेः न गमादेशः भावे ल्युट्। १बोधने २विश्वासजनने भा॰अनु॰२४४८ श्लो॰।

प्रत्यारम्भ पु॰ प्रतिरूप आरम्भः प्रा॰स॰। आरम्भात् पश्चात् आरम्भे गत्यर्थशब्दे २५६२ पृ॰दृश्यम्।

प्रत्यालीढ न॰ धन्विनां युद्धार्थेऽवस्थितिभेदे आलीढावयवरीतरूपतया स्थितौ आलीढशब्दे ८२४ पृ॰ दृश्यम्

प्रत्यावर्त्तन न॰ प्रति+आ+वृत–णिच्–ल्युट् वा भावे ल्युट्। १प्रतिनिवृत्तौ २प्रतिनिवारणे च।

प्रत्याशा स्त्री किञ्चित् वस्तु प्रति+आशा प्रा॰स॰। किञ्चिद्वस्तु प्रति वाञ्छायाम्।

प्रत्याश्रावं पु॰ प्रति+आ+श्रु–णिच्–घञ्। १चर्हिष्य आवणे कर्मणि घञ्। २चमसभेदे यजु॰१९।२४वेददी॰

प्रत्याश्रावण न॰ प्रति+आ+श्रु–णिच् भावे ल्युट्। अग्नीध्रकर्तृके अध्वर्यु प्रति मन्त्रविशेषस्य आश्रवणे शत॰ब्रा॰ १२।२।९ भाष्ये दृश्यम्। [नार्थमाश्वासने।

प्रत्याश्वासन न॰प्रति+आ+श्वस–णिच्-भावे ल्युट्। सान्त्व-

प्रत्यासत्ति स्त्री प्रति+आ–सद–भावे क्तिन्। १वैकट्ये न्यायमते २अलौकिकप्रत्यक्षजनके सम्बन्धमात्रे "आसत्तिरासन्नायाणान्तु" भाषा॰ "आसत्तिः प्रत्यासत्तिः" त्रि॰स॰।

प्रत्यासन्न त्रि॰ प्रति+आ+सद–क्त। १अतिनिकटस्थे जटा॰ २सम्बद्धे च।

प्रत्यास(सा)र पु॰ प्रति+आ+सृ–आधारे घञ् अप् वा। अवन्तः १सैन्यपश्चाद्भागे घञन्तः तत्रार्थे अमरः। यत्र व्यूहस्य पश्चाद्व्यूहान्तरं क्रियते २तत्रार्थे भरतः।

प्रत्यास्वर पु॰ प्रत्यास्वरति प्रति+आ+स्वृ–अच्। १प्रत्यागते अस्तभावात् पुनः २प्रत्यागते आदित्ये च "स्वर इतीमं (प्राणम्) आचक्षते स्वर इति प्रत्यास्वर इति चासुम्" (आदित्यम्) का॰श्रौ॰। "किञ्च स्वर इतीमं प्राणमाचक्षते कथयन्ति तथा स्वर इति प्रत्यास्वर इति चासुं सवितारम्। यस्मात् प्राणः स्वरत्येव न पुनर्हृतः प्रत्यागच्छति।

विना व्यक्तमित्या पुनरभ्यङ्क्त्यङ्गानि प्रत्याङ्क्षति । अतः प्रत्याक्षरोऽक्षादुद्गतो नामतश्च समानक्षितरेसरं प्राणादिष्वो" मा० । [विषयेभ्यो निवारणे ।

प्रत्याहरण न० प्रति+आ+हृ–भावे ल्युट् । १चित्तेन्द्रियादेः

प्रत्याहार पु० प्रति+आ+हृ–भावे घञ् । चित्तेन्द्रियादेः विषयेभ्यो निवारणे योगाङ्गभेदे तल्लक्षणं च अष्टाङ्गयोग शब्दे ५२४पृ० उक्तं तत्कालमानञ्च "प्राणायामेन्द्रियाहारैर्ध्यानं" इत्यादिना प्रत्याहार उदाहृतः" याज्ञव्य०३१अ०शब्दम् । "स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः" पात०सू० "स्वविषयसम्प्रयोगाभावे चित्तस्वरूपानुकार इवेति चित्तनिरोधे चित्तवन्निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवदुपायान्तरमपेक्षन्ते । यथा मधुकरराजं मक्षिका उत्पतन्तमनूत्पतन्ति निषीदमानमनुनिषीदन्ते तथेन्द्रियाणि चित्तनिरोधे निरुद्धानीत्येष प्रत्याहारः" भा० । "ततः परमा वश्यतेन्द्रियाणाम्" पात०सू० शब्दादिष्व व्यसनमिन्द्रियजय इति केचित् अनिष्टार्थेषु व्यसनं व्यसनेन श्रेयस इति अविरुद्धा प्रतिपत्तिर्न्याय्या शब्दादिविषयेषु रागद्वेषाभावे सुखदुःखशून्यं शब्दादिज्ञानमिन्द्रियजय इति केचित् चित्तैकाग्र्यादमश्चित्तेवेति जैगीषव्यः । तस्य परमा स्थिरं वक्ष्यता यश्चित्तनिरोधे निरुद्धानीन्द्रियाणि नेतरेन्द्रियजयवत् प्रयत्नान्तरसपेक्षन्ते योगिनः इति" भा० ।

अत्र चित्तस्यैव प्रत्याहारेऽन्येन्द्रियस्य प्रत्याहारोऽर्थसिद्ध इति बोध्यम् तत्फलञ्च । अनुक्रमे उक्तम् "प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान्" । प्रत्याक्षियन्ते संक्षिप्य दृश्यन्ते वर्णा अनेन प्रति+आ+हृ–करणे घञ् । "आदिरन्येन सहेता" पा०सूत्रेण २सहसंज्ञायां च यथा "अण् इति अ इ उ" इति वर्णानां ग्रहणम् एवं सुप् तिङ्प्रभृतिष्वपि ज्ञादीनां तिबादीनाञ्च ग्रहणमिति । "प्रत्याहारेष्विति न ग्रहणमिति" तेन अत्र प्रत्याहारे चाक्षुषां न ग्रहणम् बोध्यम् । भावे घञ् । ३उपादाने पु० अमरः । [वाक्येन २निराकृते च ।

प्रत्यक्त त्रि० प्रति+अच–कर्मणि क्त । १उत्तरिते प्रतिवाक्ये

प्रत्यक्ति स्त्री प्रति+अच–भावे क्तिन् । प्रतिवाक्यकथने शब्दर०

प्रत्युज्जीवन न० प्रति+उद्+जीव–भावे ल्युट् । पुनर्जीवने मरणोत्तरं पुनर्जीवने । "रसविच्छेदहेतुत्वात् मरणं नैव वर्ण्यते । वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्यादद्भुतः" काव्यादर्शः । यथा कादम्बरीग्रन्थे महाश्वेतस्य ।

प्रत्युत अव्य० प्रति–उत द० । १स्वपक्षस्थापनाय परपक्षनिराकरणाय वा उक्तस्य तदैपरीत्यभावे २वैपरीत्यद्योतने च "न दोषः पुनरुक्तोऽपि प्रत्युतेयमनङ्क्रिया" काव्यादर्शः ।

प्रत्युत्क्रम पु०प्रति+उद्+क्रम–घञ् न वृद्धिः । १युद्धार्थोद्योगे २प्रधानप्रयोजनोद्देशेनाप्रधानारम्भे च अमरः । क्लिन् । प्रत्युत्क्रान्ति तत्रार्थे स्त्री भरतस्वामी ।

प्रत्युत्तर न० प्रतिरूपमुत्तरस्य प्रा०स० । उत्तरस्योत्तरवाक्ये वादिनोपन्यस्तपक्षस्य तन्निरूढपक्षप्रतिपादके वाक्ये ।

प्रत्युत्थान न० प्रति+उद्+स्था–ल्युट् । अभ्युत्थाने आगतस्य सम्मानार्थमासनादुत्थितौ "प्रत्युत्थानाभिवादाभ्यां पुनरेनं प्रतिपद्यते" मनुः ।

प्रत्युत्पन्नमति त्रि० प्रत्युत्पन्ना तत्कालोचिता मतिर्यस्य । १तत्कालोचितबुद्धौ स्त्रियाम० । २प्रतिभान्विते जटाध० । अनागतविधातृशब्दे १५४पृ० दृश्यम् ।

प्रत्युदाहरण न० प्रतिरूपमुदाहरणं प्रा०स० । उदाहरणस्य वैपरीत्येन उदाहरणे । "अन्यैतत्प्रतितोर्नुक्" पा० सू० इत्तौ अनयैतो प्रतिपत्तीत्युदाहृत्य "प्रत्युदाहरणन्तु अनरत्यस्यां शालायां घटः । प्रतिहतो दृष्टिषी" सि०कौ० ।

प्रत्युद्गम पु०प्रति+उद्+गम–घञ् न वृद्धिः । १प्रत्युत्थाने (स्वागताद्यर्थोया) प्रतिगमने २च भावे ल्युट् । प्रत्युद्गमन तत्रार्थे न० ।

प्रत्युद्गमनीय न०प्रति+उद्+गम–अनीयर् । १औतथ्यसम्पन्ने अमरः "सङ्गीतप्रत्युद्गमनीयवक्ता" इति कुमारे पाठान्तरं प्रत्युद्गेति ण्यन्तस्य रूपम् । २सम्पूजनीयेऽभ्युत्थानयोग्ये पूजनीये च त्रि०

प्रत्युन्नमन न० प्रतिकूलमुन्नमनं प्रा०स० । ऊर्ध्वमनप्रतिकूले अधोनमने । "अङ्गुल्याऽवपीड्यते प्रत्युन्नमनम्" सुश्रुतः व्रणचिकित्साङ्गक्रियोक्तौ ।

प्रत्युपकार पु० प्रतिरूपः उपकारः प्रा०स० । १कृतोपकारेण कृते उपकारकस्य उपकारानुरूपे हिताचरणे ।

प्रत्युपदेश पु० प्रतिरूपः उपदेशः प्रा०स० । १उपदेशकस्य प्राप्तोपदेशेन कृते शिष्यभेदे कुमा० १।२४

प्रत्युपहार पु० प्रतिरूप उपहारः प्रा०स० । अनुरूपे उपकारे उपढौकनीये द्रव्ये ।

प्रत्युरस अव्य०उरसि विभक्त्यर्थेऽव्ययी० । "प्रतेरुरसः प्रणीष्या" पा० कच् समा० । उरस्यित्यर्थे । उपमीत्यादिलुप्तोपमालक्षणार्थं "तेन च्वि । प्रत्युरस इत्येव ।

प्रत्युलूक पु० प्रतिकूल उलूकस्य प्रा०ष० । १काले मासा०

१४।१४। "प्रत्युलूकः काकः" श्रीधरः। प्रतिरूपः उलूको यस्य कप्। प्रत्युलूकश्च उलूकानुरूपे पक्षिभेदे "उलूका प्रत्युलूकाश्च" हरिवं० ३अ०।

प्रत्यूष पु०प्रति+उष–टाके आधारस्य कर्तृत्वविवक्षायां क। प्रातःकाले मथुरेशः।

प्रत्युषस् न०प्रति+उष–आधारे कसुन्। प्रातःकाले अमरः। "याति व्यक्तिं पुरस्ताद्दृश्यकिंसख्ये प्रत्युषः पारिजातः" सूर्य्यशतकम्।

प्रत्यूष पु० प्रत्यूषति दहति कालुकान् प+ऊष–दहायां क। १प्रभाते अमरः "प्रत्यूषपवनाधारैः" हरिवं० ८२अ०। २वसुमध्ये २वसुभेदे च जटा०। धरशब्दे २८४७पृ० दृश्यम्। ३सूर्य्ये शब्दर०।

प्रत्यूषस् न० प्रति+ऊष–दहायाम् असुन् ऋषि वा। प्रभाते अमरः "स्नानमत्यधिकं कार्य्यं प्रत्यूषाज्जलो जले" हरिवं० १४अ०। [प्रतिबन्धकत्वात्तथात्वम्।

प्रत्यूह पु० प्रति+ऊह–घञ्। विघ्ने अमरः तस्य ऊहां प्रति

प्रत्यृच अव्य०ऋचमृचं प्रति वीप्सायाम् अव्ययी०अच् समा०। एकैकस्मिन्नृचौ व्याश्व० ६।३

प्रत्येक अव्य० एकमेकं प्रति वीप्सायामव्ययी०। एकैकस्मिन् वीप्सायुते एकशब्दार्थे।

प्रत्येकबुद्ध पु० बुद्धभेदे त्रिका०।

प्रत्वच् त्रि० प्र+त्वच्–तनूकरणे असुन्। प्रकर्षेण तनूकारके शतुघ्नतिनि च्छा० १।८१।१ भा०।

प्रथ ख्यातौ भ्वा०आ०अक० सेट्। प्रथते अप्रथिष्ट घटा०णिच् प्रथयति। भावे अञ् प्रथा। [ति अपप्रथत् त।

प्रथ ख्यातौ अक०विस्तारे सक०चुरा०उभ०सेट् घटा०। प्रथयति-

प्रथम त्रि० प्रथ–अमच्। १प्रधाने २आद्ये च अमरः। अथवा सर्वनामताच्च पृथमे पृथमाः। तस्य भावः ष्यञ्। प्राथम्य आद्यत्वे प्राधान्ये च न०।

प्रथमज त्रि०प्रथमं जायते जन–ड। १पूर्वजाते २प्रथमगर्भजाते पुंस्त्री० यजु०१६।२५ जन–क। प्रथमजात तत्रार्थे त्रि०

प्रथमवयसिन् त्रि० प्रथमवयोऽस्यास्य बा० इनि सान्तत्वात् न पदत्वम्। प्रथमवयोयुक्ते शत०ब्रा० १२।१।७।८स्त्रियां ङीप्।

प्रथमविवाहा स्त्री प्रथमं विवाहा विवाह लक्षा। प्रथमपरिणीतायां स्त्रियां महिषीत्रां कात्या० १६।२।२१।५

प्रथमसाहस पु० "पञ्चानां हे शते साहे प्रथमः साहसः स्मृतः" विष्णुः उक्ते सार्द्धशतपणात्मकरूपे दण्डभेदे

प्रथमाङ्गुलि पुंस्त्री० कर्म०। तत्राङ्गुष्ठे "अङ्गुष्ठयं मन्त्रप्राणं प्रथमाङ्गुलियोगतः" प्रथमाङ्गुलिर्ब्राह्मणः तन्त्रसारः।

प्रथमाश्रम पु०न०कर्म०। ब्रह्मचर्य्याश्रमे "शरीरजन्म प्रथमाश्रमो यथा" कुमा०।

प्रथा स्त्री प्रथ–घटा० भावे अङ्। ख्यातौ अमरः।

प्रथित त्रि० प्रथ–क्त। १ख्याते अमरः। २खारोचिषमनोः पुत्रभेदे पु० हरिवं० ७अ०। ३विष्णौ पु० "अच्युतः प्रथितः प्राणः" विष्णुस०।

प्रथिमन् पु० पृथोर्भावः पृथु+इमनिच् पृथादेशः। पृथुत्वे स्थूलत्वे। अतिशयेन पृथुः इमनिच्। अतिशयेन पृथुत्वयुते

प्रथिमिनी स्त्री पृथिमाऽस्यस्याः "संज्ञायां मन्त्राभ्याम्" पा० इनि टिलोपः। पृथुत्वयुतस्त्रीभेदे। असंज्ञायां तु मतुप् मस्य वः। पृथिमवत् इत्येव स्त्रियां ङीप्।

प्रथिवी स्त्री पृथिवी+पृथोः। पृथिव्यां भा०वि०११अ०।

प्रथिष्ठ त्रि० अतिशयेन पृथु–इष्ठन् पृथादेशः। पृथुतरे। तत्रार्थे ईयसुन् प्रथीयस् पृथुतमे स्त्रियां ङीप्।

प्रथु पु० प्रथते प्रथ–कनु। विष्णौ "प्राग्वंशः प्रथनः प्रथुः" विष्णुस०।

प्रथुक पु० प्रथ–बा० उक। पृथुके चिपिटके राजनिघण्टुः।

प्रदक्षिण न० प्रगतो दक्षिणात् अत्या०स०। दक्षिणपार्श्वोद्गते देवेभ्यः स्वदक्षिणदर्शनेन प्रणामभेदे तल्लक्षणफलादिकं यथा "प्रणार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः। दक्षिणं दर्शयन् पार्श्वं मनसापि च दक्षिणः। वल्मीकिर्वा वेष्टयेत्तु देव्याः प्रीतिः प्रजायते। स च प्रदक्षिणो ज्ञेयः षड्भेदैर्यो घटद्विदः। अशोत्तरशतं यस्तु देव्याः कुर्य्यात् प्रदक्षिणम्। सर्वान् कामान् समासाद्य पश्चान्मोक्षमवाप्नुयात्। मनसापि त्रयो दद्याद्देव्यै भक्त्या प्रदक्षिणम्। प्रदक्षिणाद्दयमट्टे भरकाणि न पश्यति" कालिकापु० ७०अ०। "एकं देव्यां दशौ सूर्य्ये त्रीणि कुर्य्याद्विनायके। चत्वारि केशवे कुर्य्यात् शिवे चार्द्धं प्रदक्षिणम्" कर्मलोचनम्। "दक्षिणाद्वायवीं गत्वा दिशं तस्याश्च यामतोमृ। तत्र च दक्षिणां गत्वा नमस्कारश्चिकोणवत्। अर्द्धचन्द्रं महेशस्य पृष्ठतश्च प्रकीर्तितम्। शिवप्रदक्षिणे मन्त्रो अर्द्धचन्द्रक्रमेण तु। शब्दाशब्दक्रमेणैव सोमसूत्रं न लङ्घयेत्"। सोमसूत्रं जलनिःसरणस्थानम्। "प्रणार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः। दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणः। त्रिधा च वेष्टयेत् सम्यक् देवतायाः प्रदक्षिणम्" तन्त्रसारः।

प्रदक्षिणित् न० प्रदक्षिण+इनो०। प्रदक्षिणशब्दार्थे अ०२।४३। १। माल्ये हयग्रम्। [प्रदत्ते प्रकर्षेण दत्ते।

प्रदत्त त्रि० प्र+दा–कर्मणि क्त वा तादेशाभावे दङ्भावः।

प्रदर पु० प्र+दृ–भावादौ अप्। १भङ्गे दारणसाधने २वाद्ये अमरः। ३विदारे ४स्त्रीणां योनिरोगभेदे भेदि० तान्त्र० दानकर्म च ऋतुभारतोक्तं कर्मविपाकशब्दे १७६८ पृ० दर्शितम्। स च असृग्दराख्यः स्त्रीणां योनिरोगभेदः। तल्लक्षणादि माधवनिदाने उक्तं यथा

"विरूक्षमद्याध्यशनादजीर्णादुगर्भस्रवातादतिमैथुनाच्च। यानाध्वयोकादतिकर्षणाच्च भाराभिघाताच्छयनाद्दिवा च। असृग्दरं भवेत् सर्वं साङ्गसर्गं सवेदनम्। तस्यातिवृत्तौ दौर्बल्यं श्रमो मूर्च्छा मदस्तृषा। दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः"। स च असृग्विधो यथा "तं श्लेष्मपित्तानिलसन्निपातैश्चतुःप्रकारं प्रवदन्ति वैद्याः। आमं सपिच्छाप्रतिमं सफेनं पुनश्च कृष्णारुणतोयप्रतिमं कफात्तु। सपीतनीलासितरक्तवर्णं पित्तार्त्तियुक्तं श्रयतेऽति पित्तात्। क्षयारुणं फेनिलमल्पमल्पं वातार्त्ति वातात् पिच्छिलोदकाभम्। सक्षौद्रसर्पिर्हरितालवर्णं लाजप्रकाशं कृमिपं त्रिदोषात्। तत्साध्यसाध्यं प्रवदन्ति तज्ज्ञा न तत्र कुर्वीत भिषक् चिकित्साम्"।

प्रदल पु० प्रकर्षेण दलति प्र+दल-अच्। वाद्ये जटा०

प्रदव पु० दुनोति दु-अच् "दुस्योरनुपसर्गे" पा० अनुपसर्गे दुस्तुरुक्षेः न ष। १प्रकृष्टतापके। भावे अप्। २प्रकृततापे पु०

प्रदव्य पु० प्रदवाय हितं वा० यत्। १दावाग्नौ आत्मा०औ० २५।४।१२ कर्के। [२प्रकृष्टदायके त्रि०।

प्रदा स्त्री प्र+दा–भावे अङ्। प्रकृष्टदाने। कर्त्तरि क।

प्रदान न० प्र+दा–भावे ल्युट्। प्रकृष्टदाने "प्रदानं स्वाम्यकारणम्" मनुः।

प्रदि त्रि० प्र+दा–"उपसर्गे घोः किः" पा०कि। प्रदानकर्त्तरि

प्रदिग्ध त्रि० प्र+दिह–कर्मणि क्त। १लिप्ते २भक्षणविशेषयुते मांसे न०"मांसं वसाघृतैर्भृष्टं सिक्थं चोष्णाम्बुना सुहृत्। जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते। तदेव घृत तक्राढ्यं प्रदिग्धं बलिजातकम्" शब्दच०।

प्रदिव् त्रि०प्रकर्षेण द्योतते प्र+दिव–क्विप्। १प्रकर्षेण द्योतमाने ऋ० १।१८५ भा०स०। २प्रकृष्टदिने स्त्री १पूर्वदिने ऋ० १।३७।११ ३पुरातने निघण्टुः वस्तुवः।

प्रदिश् स्त्री दिशोरन्तरालं प्रगता दिक् प्रा०स०। विदिशि दिशोरन्तरालदिशि अटा०।

प्रदीप पु० प्र+दीप–अच्। दीपे अमरः। दीपशब्दे १६०५ पृ० दृश्यम्। तत्र हितः अमूपा० क। प्रदीपाय तद्धिते त्रि० पक्षे यत्। प्रदीप्त तत्रार्थे

प्रदीपन पु० प्रदीप्यते प्र+दीप–ल्यु। १क्षारके २विषभेदे तल्लक्षणं राजनि० उक्तं यथा "वर्णतो लोहितो यः स्यात् दीप्तिमान् दहनप्रभः। मक्षादाहकरः पूर्वैः कथितः स प्रदीपनः"। णिच्–ल्यु। ३प्रकाशके त्रि०।

प्रदुह् त्रि० प्र+दुह–क्तसूदिषेत्यादिना क्विप् पा० प्रकर्षेण दोग्धरि पदत्वेऽस्य हस्य घत्वे दस्य धः। प्रधुक् प्रधुग् भ्यामित्यादि। [न्यङ्कुवर्णिते देशे श्रमितौ च मेदि०।

प्रदेश पु० प्रा०स०। १एकदेशमात्रे राजनि० २क्षाने तर्क०

प्रदेशन न० प्र+दिश–भावादौ ल्युट्। १उपदेशे कर्मणि ल्युट्। २राजादेरुत्कोचने उपहारे(भेटि) द्रव्ये अमरः

प्रदेश(शि)नी स्त्री प्रदिश्यतेऽनया प्र+दिश-करणे ल्युट ङीप्। तर्जन्यां तया हि वस्तु निर्दिश्यते। प्रदेशः अङ्गुष्ठादिमध्यस्थानसख्यस्य इनि ङीप्। अत्रैव अमरः।

प्रदेह पु० प्र+दिह–भावे घञ्। १प्रलेपे व्रणाद्युपशमार्थं द्रव्यविशेषस्य व्रणादौ २लेपने सुश्रुतः।

प्रदोष पु० प्रकान्ता दोषारात्रिरत्र काले प्रा०स०। रात्रेः प्रथमभागभेदे तिथिभेदस्य प्रदोषेऽनध्यायः ति०त० उक्तो यथा "सारस्वतादिप्रदोषमाह स्मृतिः "त्रयोदश्यामष्टम्यां च समस्या द्वादशीतिथेः। प्रदोषेऽध्ययनं धीमान् न कुर्वीत यथाक्रमम्। सारस्वतो नागपतः सौरस्य वैष्णवस्तथा" प्रदोषशब्दोऽत्र प्रथमप्रहर इति हेमाद्रिः। रात्रिपर इति निर्णयामृतकारः। तथा व्रतभेदे रात्रिप्रथमयाम परता हेमाद्रौ व्रत०उक्ता "त्रयोदश्यां तथा रात्रौ सोपहारं त्रिलोचनम्। इदं प्रथमे यामे शुच्यते सर्वपातकैः"। इदं प्रदोषव्रतमिति हेमाद्रिः। शिवरात्रिव्रते तु "प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी" हेमाद्रिस्मृतिः। तत्रैव वह्निः "प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते"। घटिकाद्वयम् "त्रयोदश्यामतीते सूर्ये चतसृष्वपि नाडिषु। भूतविद्धा तु सा तत्र शिवरात्रिव्रतं चरेत्" ति०त० वायुपु० वाक्यैकवाक्यत्वात्। तथा च प्रदोषशब्दस्य रात्रिमात्रं रात्रेः प्रथमयामः प्रथमप्रहरचतुष्टयं चार्थः कर्मभेदे तस्य ग्राह्यता। तत्रानध्याये शर्वरीमात्रपरता प्रदोषव्रते प्रथमयामपरता शिवरात्रिव्रतादौ प्रहरचतुष्टयपरतेति विवेकः। "प्रदोषोरजनीमुखम्" इत्यमरोक्तिः रात्रेः प्रथमप्रहरप्रथमप्रहरचतुष्ट-

यपरत्वाभिप्रायेण रात्रिमात्रे भक्त्रेति बोध्यम् ।

प्रदोषक त्रि० प्रदोषे भवः कालात् ठञं बाधित्वा पूर्वाह्णे त्यादिना वुन् । प्रदोषकालभवे ।

प्रद्युम्न पु० प्रकृष्टं द्युम्नं बलं यस्य । १कन्दर्पे अमरः । स च वासुदेवस्य रुक्मिण्यां जातः हरिवं० ११८अ० । सनत्कुमारांशजातस्य भा० आ० ६७अ० । २वैष्णवाभिधोक्ते चतुर्व्यूहात्मकविष्णोरंशभेदे च व्यनिरुद्धशब्दे १६२पृ० चतुर्व्यूहशब्दे २८७६ पृ० च दृश्यम् । मनोर्नड्वलायां जाते ३पुत्रभेदे पु० भाग० ४।१३।१४

प्रद्यो त्रि० प्रकृष्टा द्यौर्दिनं यत्र । प्रकृष्टदिने क्लीबत्वे ह्रस्वः प्रद्युत्तस्य क्लीब एव ह्रस्वत्वेने गन्तत्वेऽपि भाषितपुंस्कत्वा भावात् टाद्यचि न पुंवत् प्रद्युना इत्यादि सि०कौ०सुब्ध० प्रद्यकाप्रद्युनेत्युदाहृतं तच्चिन्त्यम् । [भा०स० १६अ० ।

प्रद्योत पु० प्र+द्युत–अच् । १रश्मौ हला० । २यत्नभेदे पु०

प्रद्योतन पु० प्र+द्युत–"चनुदात्तेत्त्व हलादेः" पा० युच् । १सूर्य्ये हला० । २द्योतमशीले त्रि० । भावे ल्युट् । ३दीप्तौ न० ।

प्रद्रव पु० प्रकृष्टो द्रवः प्रा०स० । पलायने अमरः ।

प्रद्राणक त्रि० प्र+द्रा–कुत्सितायां गतौ क्त स्वार्थे क । कुत्सितां गतिं प्राप्ते अन्त्यावस्थां प्राप्ते "उपसर्गे चाक्रोशयति इत्यर्थाभावे" क्त० उ० "प्रद्राणकः कुत्सितां गतिं गतोऽन्त्यावस्थां प्राप्त इत्यर्थः" भा० ।

प्रद्राव पु० प्र+"प्रकृत्सुस्रुवः" पा० अप् बाधित्वा घञ् । पलायने अमरः । घाघादि० अन्तोदात्तता ।

प्रद्राविन् त्रि० प्र+द्रु–ताच्छील्ये णिनि । पलायनशीले ।

प्रद्वार न० प्रगतं द्वारं प्रा०स० । द्वारप्रान्तभागे

प्रधन न० प्र+धा- क्यु । १युद्धे अमरः । प्रकृष्टं धनमस्य । २प्रकृष्टधनयुक्ते त्रि० । निघण्टौ संग्रामनामसु सङ्गमे इत्यत्र प्रधने" पाठान्तरम् । एदन्तमव्ययं तत्रार्थे ।

प्रधमन न० प्र+सौ० धम–ध्याने भावे ल्युट् । सुखमारुतव्यापारभेदे सुश्रुतः ।

प्रधा स्त्री प्र+धा–भावे अङ् । १निधाने २दत्तसुतायां कश्यपपत्नीभेदे भा० आ० ६५अ० । प्रधायां अपत्यं ढञ् । प्रधेय तदपत्ये पुंस्त्रियां । "प्राधेयास्तपसांनिधाः" मार्क० तत्कन्याश्च अलम्बुसादयोऽप्सरसः भा०आ० ६५अ० ।

प्रधान न० प्र+धा–ल्युट् । सांख्यमतसिद्धायाम् सत्त्वरजस्तमोरूपगुणत्रयात्मिकायां १प्रकृतौ प्रकृतिशब्दे दृश्यम् । तत्कार्य्ये २बुद्धितत्त्वे ३परमात्मनि ४प्रधाने ५सचिवे च । ६सेनापत्यध्यक्षे पु० ७श्रेष्ठे त्रि० अमरः "सेनाध्यक्षः प्रधानः स्यात्" अस्य पुंस्त्वमिति बोपालितः ।

प्रधानधातु पु० कर्म० । चरमधातौ वीर्य्ये शुक्रे त्रिका० । शुक्रस्य चरमधातुत्वम् अस्मत्कारभाष्ये ५५८पृ० उक्तं दृश्यम् ।

प्रधि पु० प्रधीयन्ते काष्ठान्यत्र प्र+धा-आधारे कि । चक्रावयवकाष्ठासञ्जनस्थाने रथनाभौ अमरः ।

प्रधी त्रि० प्रकृष्टा धीर्यस्य । १प्रकृष्टबुद्धियुक्ते पा०स० । २प्रकृष्टायां बुद्धौ स्त्री । प्रकृष्टं ध्यायति ध्यै–कर्त्तरि क्विप् । ३प्रकृष्टध्यानकर्त्तरि त्रि० । तत्र तृतीयार्थे गतिपूर्वकत्वात् यण् प्रध्यः प्रध्या इत्यादि आद्ययोस्तु प्रगृह्यस्य ह्रस्वधातु प्रत्ययोपसर्गत्वम् न यण् किन्तु इयङ् । प्रधिया इत्यादौ त्वन्ये सि०कौ० तु "हस्तिकरादीनां मते लक्ष्मीवद्रूपम् पदान्तरं विनाऽपि स्त्रियां वर्त्तमानत्वं नित्यस्त्रीत्वमिति स्वीकारात् लिङ्गान्तरानभिधायकं तदिति कैयटमते पुंवद्रूपम् प्रकृष्टा धीरिति विग्रहे तु लक्ष्मीवत् असि शसि च पध्यं प्रध्य इति विशेषः" इत्युक्तम् ।

प्रधूपित त्रि० प्र+धूप-क्त । सन्तापिते "व्यसनप्रधूपितास्" इति कुमारः । ज्योतिषोक्तायां २सूर्य्यगन्तव्यायां दिशि स्त्री । तत्र प्रधूसिता इति पाठान्तरम् । [तावस्थायाञ्च ।

प्रध्वंस पु० प्र+ध्वनस–भावे घञ् । १नाशे सांख्यमते २अतीन्द्रियभेदे पु० "एकोनविंशत्यर्णो वा यो मन्त्रस्तारसंयुतः । हृल्लेखाङ्कुशबीजाढ्यं प्रध्वस्तं तं प्रचक्षते" तन्त्रसा० ।

प्रध्वस्त त्रि० प्र+ध्वनस-क्त । १नाशप्रतियोगिनि २अतीन्द्रिये च ३मन्त्रभेदे पु० "एकोनविंशत्यर्णो वा यो मन्त्रस्तारसंयुतः । हृल्लेखाङ्कुशबीजाढ्यं प्रध्वस्तं तं प्रचक्षते" तन्त्रसा० ।

प्रनप्तृ पु० प्रगतो नप्तारं अनङ्कतया व्यधा० स० । पौत्रपुत्रे प्रपौत्रे उज्ज्वलद० । [प्रकर्षेण नर्त्तकर्त्तरि ।

प्रनर्त्तक त्रि० प्र+नर्त्–ण्वुल् णोपदेशत्वाभावात् न णत्वम् ।

प्रनष्ट त्रि० प्र+नश–क्त शान्तत्वाभावात् न णत्वम् । नाशप्रतियोगिनि "प्रनष्टस्वामिकं द्रव्यं राजा तद्वद्धनं निधापयेत्" मनुः ।

प्रना(णा)यक त्रि० प्रकृष्टो नायकोऽस्य प्रशब्दस्य नयतिं प्रति उपसर्गत्वाभावात् न णत्वम् । प्रकृष्टनायकयुक्ते । प्र+नी–ण्वुलि तु णत्वम् । प्रणयकारके इति भेदः ।

प्रपच्च पु० प्रगतः पच्चम् अत्या० सं० । पक्वान्ने भा० स्त्री० २०अ० ।

प्रपञ्च पु० प्र+पचि–आधारे घञ् । १विस्तारे २वैपरीत्ये ३प्रतारणे । कर्त्तरि पचा० अच् । ४संसारे च अमरः । तत्र वैपरीत्यं भ्रमो माया वेति स्वामी ।

प्रपञ्चित प्र+पञ्च–णिच्-कर्मणि क्त । १विस्तारिते २प्रतारिते भ्रान्तिज्ञानविषयतया ३सत्यमादिते च भाग० १०।१४अ०

प्रपतन न० प्रपतत्यस्मात् प्र+पत-भीमा० अपादाने ल्युट्। १पतनापादाने दृक्षादौ। भावे ल्युट्। प्रकर्षेण २पाते तत्प्रयोजनमस्य क०। प्रपतनीय प्रपातसाधने त्रि०।

प्रपथ पु० प्रकृष्टः पन्थाः प्रकृष्टः पन्था यत्र वा अच्समा०। १प्रकृष्टमार्गे २तद्युक्ते त्रि० ऋ०१।१६६।६ [स्त्री राजनि०।

प्रपथ्य त्रि० प्रकृष्टं पथ्यं प्रा०स०। १अत्यन्तहिते २हरीतक्यां

प्रपद् न० प्रारब्धं पदम् प्रा०स०। पादस्याग्रभागे अमरः। प्रपदं व्याप्नोति ख। प्रपदीन पादाग्रव्यापके त्रि० आप्-पदीनशब्दे माघः ३।१२उदा०दृश्यम्। [इति चण्डी।

प्रपन्न त्रि०प्र+पद-क्त। शरणागते "प्रपन्नार्त्तिहरे! देवि!"

प्रपन्नाड पु० प्रपन्नान् अलति भूषयति अल-अच् उप०स० लस्य डः। १चक्रमर्दे रत्नमा०। तस्य दद्रुरोगिभिः सेवने तेषां रोगनिवारणेन भूषकत्वात्तथात्वम्।

प्रपा स्त्री प्रपीयतेऽस्यां प्र+पा-घञर्थे क। पानीयशालायाम्। पानीयशालिकाशब्दे ४२०६ पृ० दृश्यम्।

प्रपाठक पु०प्रकृष्टः पाठोऽत्र कप्। १वेदस्याध्यायांशभेदे २श्रौतग्रन्थांशभेदे च। [तले राजनि०।

प्रपाणि पु० प्रकृष्टः पाणिः प्रा०स०। करस्याधोभागे पाणि-

प्रपात पु० प्रपतत्यस्मात् पत-अपा०घञ्। १तटरहिते २निरवलम्बे ३पर्वतस्थानभेदे अमरः। ४निर्झरे ५कूपे च मेदि० यस्मात् पतने अवस्थानाय क्रियाभेदो न भवति ६तादृशे स्थाने। भावे घञ्। ७अवस्कन्दे हेमच०।

प्रपानक न० प्रकृष्टं पानमस्य कप्। खण्डमरिचादिमिश्रिते पानीयद्रव्यभेदे "प्रपानकरसन्यायाच्चूर्ण्यमाणो रसो भवेत्" यथा खण्डमरिचादीनां सम्मेलनादपूर्व इव कश्चिदास्वादः प्रपानकरसे जायते विभावादिसम्मेलनादिहापि तथेत्यर्थः" सा०द०। क्षतात्रशब्दे २०८४पृ०दृश्यम्।

प्रपापूरणीय त्रि० प्रपापूरणं प्रयोजनमस्य "छप्रकरणे विधि पूरिपतिरुहिप्रक्षतेरनात्" वार्त्ति० छ। प्रपापूरणप्रयोजनके। [शब्दमाला।

प्रपावन न० प्रपेव कामपूरकं वनम्। कामारण्ये वनभेदे

प्रपितामह पु० प्रगतः पितामहं कार्यत्वेन अत्या०स०। १पितामहपितरि अमरः। तस्य पत्नी ङीष् २प्रपितामही तत्पत्न्यां स्त्री "स्वेन भर्त्रा सह श्राद्धं माता भुङ्क्ते स्वधामयम्। पितामही च स्वेनैव स्वेनैव प्रपितामही" दायभागधृतवचनम्। पितामहस्य प्रजापतिजनकस्य अतुर्ख्यस्वब्रह्मणः जनके ३परब्रह्मणि "भूर्भुवः स्वस्तस्मात्तस्माच्च पिता प्रपितामहः" विष्णुस०।

"यो वै ब्रह्माणं विदधाति पूर्वम्" श्रुतेस्तस्य पितामहब्रह्मसृष्टृत्वात्तथात्वम्। "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः। अप एव ससर्जादौ तासु बीजमवासृजत्। तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः" मनुना सर्वपितामहस्यापि तेन सृष्टत्वात्तस्य तथात्वम्।

प्रपित्वे अव्य० उत्तरायणे निघण्टुः।

प्रपुन्नाड(ट) पु० पुमांसं नाटयति नडयति नड-भ्रंशे नट-अवस्यन्दने वा अण् प्रकृष्टः पुन्नाडः (पुन्नाटः) प्रा०स०। १चक्रमर्दे (चाकुन्दा) वृक्षे। डस्य लत्वे प्रपुन्नालोऽप्यत्र। २दद्रुमर्दने अमरः। पृषो० प्रपुनाड (पुपुन्नाड) इत्येतावपि तत्रार्थे अमरे पाठान्तरम्।

प्रपूरिका स्त्री प्रकर्षेण पूर्यते कण्टकैः पूर-कर्मणि घञ् स्वार्थे क टाप् कापि अत इत्त्वम्। १कण्टकार्यां हेमचन्द्रः २प्रकर्षेण पूरके त्रि०।

प्रपूर्वग पु० प्रकृष्टः पूर्वगः पूर्ववर्त्ती प्रा०स०। सृष्टेः प्राग्वर्त्तिनि १परमेश्वरे "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतेः तस्य तथात्वम्। तद्रूपेण ध्येये २कश्विनीकुमारद्वये द्वि०व०। भा०आ०३अ० अश्विनीकुमारस्तुति।

प्रपौण्डरीक पु० पुण्डरीक+स्वार्थेऽण् प्रकृष्टं तादृक् पुण्ड्रं यस्य। गजमनुष्याणां चक्षुर्हितकारके शालपर्णीतुल्यपत्रके क्षुपभेदे अमरः।

प्रपौण्डरीकाद्य न० "प्रपौण्डरीकमधुकपिप्पलीचन्दनोत्पलैः। सिद्धं घात्वीरसे तैलं नस्येनाभ्यञ्जनेन वा। सर्वान्नूर्ध्वमदान् हन्ति पलितानि च शीलितम्" चक्रपाणिदत्तोक्ते तैलभेदे।

प्रपौत्र पुंस्त्री०प्रगतः कारणतया पौत्रम् अत्या०स०। पौत्रस्य १पुत्रे तत्कन्यायां स्त्री ङीप्।

प्रफर्वी स्त्री प्रकृष्टं पर्व नितम्बस्थानं यस्याः स्त्रियां ङीप् पृषो०। प्रशस्तनितम्बायां स्त्रियां ऋ०१०।८५।१२ भा०। फर्वति गतिकर्मा इति वेददीपः। २प्रकृष्टगतियुक्ते त्रि० यजु०१२। ७६ वेददीपः।

प्रफुल्त(ल्ल) त्रि० प्र+फल-क्त आदित्वात् टोऽभावे ऋत इत्त्वम् प्र+फुल्ल-विकाशे अच् वा (लडयुतः)। विकाशयुते अमरः। "लौध्रद्रुम मानुमतः प्रफुल्त(ल्ल)म्" रघुटीकायां मल्लिनाथेन द्विलपाठः समर्थितः। [विका०।

प्रबन्ध पु० प्र+बन्ध-भावे घञ् छन्दसि ग्रन्थादेः ३रचने च

प्रबन्धन न० प्र+बन्ध–भावे ल्युट् । ग्रन्थेन ग्रन्थने बन्धने
प्रबन्धकल्पना स्त्री ६त० "प्रबन्धकल्पनां लोकसत्यां प्राज्ञाः कथां विदुः" इत्युक्तलक्षणायामलीकसत्यायां वञ्चनिप्याकथायाम् अमरः । [अमरः ।

प्रब(व)र्ह त्रि० प्र+बर्ह स्तुतौ (दृढ) बृद्धौ वा अच् । प्रधाने
प्रबल त्रि० प्रकृष्टं बलमस्य । १प्रकृष्टबलयुते । प्रकृष्टं बलति बल–धान्यावरोधे अच् । २पक्षिभे शब्दमाला ३प्रसारिण्यां लतायां स्त्री राजनि० ।

प्रबलहिका स्त्री प्रबल्ह-आच्छादने एबुल् । प्रहेलिकायाम् अमर० अयनोष्ठादिः इन् । प्रबलहि वा ङीप् प्रबलही च तत्रार्थे ।

प्रबाल न० प्र+बल–धान्यावरोधे अलादि० य । १किसलये नवपल्लवे २वीणादण्डे च अमरः । ३रत्नभेदे पु० किं रत्नं कस्य ग्रहस्य प्रीतिकारित्वेन दोषहरं भवतीति प्रश्ने तदुत्तरमाह ज्यो० रत्नमालायां "माणिक्यमुक्तरणेः सुजातमसलं. कुक्षाफलं पीतगोमेदेयस्य तु विद्रुमो निगदितः, सौम्यस्य गारुत्मतम् । देवेज्यस्य च पुष्पराग मसुराचार्य्यस्य वज्रं, यनेनैवं निर्मलमन्ययोर्निगदिते गोमेदवैदूर्य्यके" । "पुंसि क्लीबे प्रबालः स्यात् पुमानेव तु विद्रुमः" भावप्र० अत्रार्थेऽस्य पुंनपुंसकत्वमुक्तं रत्नानां गुणास्तत्रोक्ता यथा "रत्नानि भक्षितानि सुर्मधुराणि सराणि च । चक्षुष्याणि च शीतानि . विषघ्नानि घृतानि च । मङ्गल्यानि मनोज्ञानि यहदोषहराणि च" । युक्तिकल्पतरौ तस्योत्पत्त्यादिकं भेदादिकञ्चोक्तं यथा "सूत उवाच आदाय शेषस्तस्यान्तं यमाधाकम्बलादिषु । चिक्षेप तत्र जायन्ते विद्रुमाः सुमहागुणाः । तत्र प्रधानं शशलोहिताभं गुञ्जाजवापुष्पनिभं प्रदिष्टम् । सनीलकं देवकरोलकञ्च स्थानानि तेषु प्रभवं सुरागम् । अन्यत्र जातच्च न तत् प्रधानं मूल्यं भवेच्छिल्पिविशेषयोगात् । प्रसच्छं कोमलं स्निग्धं सुरागं विद्रुमं हि तत् । धनधान्यकरं लोके विषार्त्तिभयनाशनम् । परीक्षा पुलहेनोक्ता रुधिराख्यस्य वैभवेः । स्फटिकस्य विद्रुमस्यः रत्नज्ञानाय यौनक !" इति गारुड़े ८०अ० । "श्वेतसागरमध्ये तु जायते वल्लरी तु या । विद्रुमा नाम रत्नाख्या दुर्लभा वज्ररूपिणी । पाषाणं प्रभजत्येषा प्रयत्नात् कथिता सती । विद्रुमं नाम यद्रत्नमाभनन्ति मनीषिणः । ब्रह्मादिजातिभेदेन तच्चतुर्विधमुच्यते । अरुणं शशरक्ताख्यं कोमलं स्निग्धमेव च । प्रवालं विप्रजातिः स्यात् सुखवेध्यं मनोरमम् । जवाबन्धूकसिन्दूरदाडिमीकुसुमप्रभम् । कठिनं स्निग्धदुर्वेधं क्षत्रजातिः तदुच्यते । पलाशकुसुमाभं तथा पाटलसन्निभम् । वैश्यजातिर्भवेत् स्निग्धं वर्णाढ्यं मन्दकान्तिमम् । विद्रुमं शूद्रजातिः स्यादायुर्वेध्यं तथैव च । रक्तता स्निग्धता दार्ढ्यं चिरद्युति सुवर्णता । प्रवालानां गुणाः प्रोक्ता धनधान्यकराः पराः । स्निग्धाद्यै यत्तु संजातं तद्रक्षमतिनिष्ठुरम् । तत्र स्निग्धो भवेच्छिल्पिकलकोऽतिमधुरः स्मृतः । तस्य धारणमात्रेण विषवेगः प्रशाम्यति । विवर्णता तु खरता प्रवाले दूषणद्वयम् । रेखा काकपदी विन्दुर्यथा वज्रेषु दोषकृत्" । तथा प्रवाले सर्वत्र वज्रेनीयं विचक्षणैः । रेखा कृन्याद्व्ययो, लक्ष्मीभावर्त्तः कुलनाशनः । पट्टलो रोगकृत् ख्यातो विन्दुर्धनविनाशकृत् । त्रासः संजनयेत् त्रासं नीलिका मृत्युकारिणी । मूल्यं शुद्धप्रवालस्य कथ्यतेगुणसञ्चयः । धारणेऽप्यपि नियमो जातिभेदेन पूर्ववत्" । तथा हि "विप्रजातिं विषघ्नं विवर्णं खरप्रवालं प्रवदन्ति ये ये । ते मृत्युसेवालनि वै वदन्ति सत्यं वदन्त्येष यतो मुनीन्द्रः' । तस्य शुभाशुभलक्षणे राजनि० उक्ते यथा "शुद्धं दृढं घनं दृत्तं स्निग्धं पात्रसरक्तकम् । समं गुरु शिराहीनं प्रवालं धारयेत् शुभम् । गौर रक्तजलाक्रान्तं रक्तस्रच्छ्रं सकोटरम् । रूक्षकृष्णं लघु श्वेतं प्रवालमशुभं त्यजेत्" ।

प्रबालक पु० यक्षभेदे भा०स० १०अ० ।
प्रबालफल न०प्रबाल इव रक्तं फलमस्य । रक्तचन्दने भावप्र० तत्फलस्य प्रबालतुल्यरक्तत्वात् तथात्वम् ।
प्रबालाश्मन्तक पु० प्रबाल इवाश्मन्तकः रक्तत्वात् । रक्ताश्मन्तकवृक्षे सुश्रुतः । [राजनि० ।
प्रबालिक पु०प्रबालो नवपल्लवोऽस्यास्य भूम्ना ठन् । नीवृक्षके
प्रबाहु पु० प्रगतो बाहुम् अत्या०स० । बाहुमूले ह्रस्वः ५०अ० ।
प्रबाहुक अव्य० प्रकृष्टो बाहुरत्र कप् स्वरादि० । १समकाले २ऊर्द्ध्वार्थे च मनोरमा । पृषो०प्रबाहुक प्रबाहुम् पाठान्तरम् तत्रार्थे अव्य० "प्रबाहुग् जुहोति" नैत्ति०२।६।१।
प्रबुद्ध त्रि०प्र+बुध–कर्त्तरि क्त । १प्रबोधयुते २प्रविकसिते ३प्रफुल्ले पुष्पादौ च हेमच० । ४जागरिते खापरहिते ५भागवतधर्मप्रधाने ऋषभदेवपुत्रभेदे पु० भाग०५।४।११
प्रबोध पु० प्र+बुध–भावाधारादौ घञ् । १निद्रागमे तस्य प्रकृष्टज्ञानाधारत्वात् तथात्वम् । २यथार्थज्ञाने च ।
प्रबोधन न० प्र+बुध–भावे ल्युट् । १यथार्थज्ञाने २निद्रा-

पगमे। प्र+बुध-णिच्-भावे ल्युट्। २प्रकृष्टबोधने ३उद्बोधने ५पूर्वगन्धस्य न्यूनतायां पुनः सौगन्ध्योत्पादनाय व्यापारभेदे अमरः।

प्रबोधनी स्त्री प्रबोध्यते हरिरत्र प्र+बुध-णिच्-आधारे ल्युट् ङीप्। कार्त्तिकशुक्लैकादश्याम् तत्र शयितस्य हरेरुत्थापनानुकूलव्यापारस्याचरणात्तस्यास्तथात्वम्। तस्यामेकादशीशब्दे तस्याः खण्डभेदस्य माहात्म्यं दर्शितम्। तन्माहात्म्यं च पद्मपु०उ०ख०१२६अ० उक्तं यथा "ब्रह्मोवाच प्रबोधन्याश्च माहात्म्यं पापघ्नं पुण्यवर्द्धनम्। सकृदेतत्शृणुतां नृणां शृणुष्व मुनिसत्तम!। तावद्गर्जन्ति तीर्थानि पुण्यान्यायतनानि च। यावत् प्रबोधनी विष्णोस्तिथिर्नायाति कार्त्तिके। अश्वमेधसहस्राणि वाजपेयशतानि च। एकेनैवोपवासेन प्रबोधन्यां भवन्ति हि। मेरुमन्दरतुल्यानि पापानि सुबहून्यपि। भस्मसात् कुरुते मर्त्यो हरिबोधन्युपोषणात्। पूर्वजन्मसहस्रेषु यत्पापं समुपार्जितम्। जागरणं प्रबोधन्यां दहते तूलराशिवत्। उपवासं प्रबोधन्यां यः करोति समाहितः। विधिवच्च मुनिश्रेष्ठ! यथोक्तं लभते फलम्। यानि कानि च तीर्थानि त्रैलोक्ये संवसन्ति वै। तानि तस्य गृहे सम्यक् कृता येन प्रबोधनी। किं तस्य बहुभिः पुण्यैः सुरलोकसुखप्रदैः। अर्जे सन्तोषिता येन संपूर्णा हरिबोधनी। बोधनीं समुपोष्यैव मुक्तिभागी भवेन्नरः। प्रबोधन्यां नरश्रेष्ठ! न पुनर्गर्भमाविशेत्। स्नानं दानं जपो होमः समुद्दिश्य जनार्दनम्। नरैर्यत् क्रियते अर्जे प्रबोधन्यां तदक्षयम्। येऽर्चयन्ति नरास्तस्यां भक्त्या विष्णुं जगत्पतिम्। उषित्वा बोधनीं ते तु प्रभवेयुर्द्विलोकपः। महाव्रतमिदं पुत्र! महापापौघनाशनम्। प्रबोधन्यां मुने! विष्णोर्विधिवत् समुपोषणम्। स ज्ञानी च स योगी च स तपस्वी जितेन्द्रियः। स्वर्गमोक्षौ च तस्यास्तां य उपास्ते प्रबोधनीम्। यत्तु जन्मकृतं पापं स्वल्पं वा यदि वा बहु। करोति भस्मसाद्विष्णुः प्रबोधन्यां प्रपूजितः। हरिपूजा विधातव्या कार्त्तिके बोधवासरे। गीतशास्त्रविनोदेन प्रबोधन्यान्तु जागरात्। चन्द्रसूर्य्योपरागे च यत् फलं परिकीर्त्तितम्। तस्मात् सहस्रगुणितं प्रबोधन्यां हि जागरात्। स्नानं दानं जपो होमः स्वाध्यायस्तार्चनं हरेः। एतस्मात् कोटिगुणितं प्रबोधन्यां हि जागरात्"। स्कान्दे "जन्मप्रभृति यत्पुण्यं नरैरुपार्जितं भुवि। तथा भवति तत्सर्वं न कृत्वा बोधवासरम्"। "प्रबोधन्याश्च माहात्म्यं पापघ्नं पुण्यवर्द्धनम्। सकृदेतत्शृणुतां नृणां शृणुष्व त्वं मुनिसत्तम!। तावद्गर्जति विप्रेन्द्र! गङ्गाभागीरथी क्षितौ। यावन्नायाति पापघ्नी कार्त्तिके हरिबोधनी। तावद्गर्जन्ति तीर्थानि आयतनसरांसि च। यावत् प्रबोधनी विष्णोस्तिथिर्नायाति कार्त्तिके। वाजपेयसहस्राणि अश्वमेधशतानि च। एकेनैवोपवासेन प्रबोधन्यां लभेन्नरः। दुर्लभञ्चैव दुष्प्रापं त्रैलोक्ये सचराचरे। तदापि प्रार्थितं विप्र! ददाति हरिबोधनी। ऐश्वर्यं सन्ततिं प्रज्ञां राज्यञ्च सुखसम्पदः। ददात्युपोषिता विप्र! हेलया हरिबोधनी। मेरुमन्दरतुल्यानि पापान्यत्यर्जितान्यपि। एकेनैवोपवासेन दहते हरिबोधनी। पृथिव्यां यानि दानानि दत्त्वा यत् फलमाप्नुते। एकेनैवोपवासेन ददाति हरिबोधनी" हरिभ०वि०।

प्रभञ्जन न० प्रभञ्जति वृक्षादीन् प्र+भञ्ज-युच्। वायौ अमरः। लतायां स्त्री राजनि०।

प्रभद्र पु० प्रकृष्टं भद्रमस्मात् ५ब०। १नक्षत्रभेदे २प्रकारिण्यां

प्रभद्रक न० "भवति नजौ भजौ रसहितौ प्रभद्रकम्" छ०र० उक्ते पञ्चदशाक्षरपादके छन्दोभेदे।

प्रभर्त्तृ पु० भृ-भावे कर्त्तरि वा तृच् प्रकृष्टो भर्त्ता भर्त्ता ऋत्विक् वा यस्मिन्। १यज्ञे त्रिका० ८२।१ भाष्ये दृश्यम्। प्र+भृ-भावे क्तिन्। २प्रकृष्टे भरणे सम्पादने न० ऋ० १।७६।७

प्रभव पु० प्रभवत्यस्मात् "भुवः प्रभवः" पा० भूकर्त्तरि अपादाने वाच्ये अप्। १प्रथमकल्पाब्दस्याने २उत्पत्तेः सिद्धस्य प्रथमोपलब्धस्थाने हेमच० ३मूले ४मुनिभेदे ५जन्महेतौ। भावे अप्। ६जन्मनि। करणे घञ्। ७पराक्रमे मेदि०। ८षष्टिवत्सरमध्ये वत्सरभेदे तत्फलमस्य ज्यो०त० भविष्यपु० "बहुतोयास्तथा मेघा बहुशस्या च मेदिनी। बहुक्षीरास्तथा गावो व्याधिरोग विवर्जिताः। प्रशान्ताः पार्थिवाश्चैव प्रभवे परिकीर्त्तिता"। ९विष्णौ पु० "संभवो भावनो भर्त्ता प्रभवः प्रभुरीश्वरः" विष्णुस०

प्रभवादि पु० प्रभव आदिर्येषाम्। प्रभवप्रभृतिषष्टिसंवत्सरेषु स च गुरुमध्यभोगात् गणनीयः। "ज्योतिर्विद् दृज्य मध्यात् प्रभवादेश मस्मारम्। उच्चस्थहृत् समाद्यादि वर्षाणामपि सम्भवम्" ज्यो०त०। ते च ज्यो०त० फलसहिताः दर्शिता तच्छब्दे तद्वाक्यञ्चैतत् दृश्यते च वदान्यवत्स

ज्यो॰त॰ "अर्केन्द्वोर्युतिः पृथग्गतिः २२ भ्रः प्रभाह्वनन्दाश्वियुगैः ४२९१ समेतः। शरादिवस्विन्दु१८७५कृतः स लब्धः षट्त्रावशिष्टाः प्रभवादयोऽब्दाः। वर्षवर्जन्तु यच्छेषं खर्थैः१२ संपूर्य खोर्भिभिः६०"(भक्तम्)। प्रभवादिवर्षानयनप्रकारश्च "आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता। तृतीया रुद्रदैवत्या शेषा मध्यामका भवेत्"। इ॰सं॰टच॰अन्यथोक्तं युगवर्षशब्दे २६२२पृष्ठादावुक्तम्।

प्रभविष्णु त्रि॰ प्र+भू-णिनायर्थे इष्णुच्। १प्रभावशीले २विष्णौ पु॰ भा॰अनु॰ ७१च॰।

प्रभा स्त्री प्र+भा-भावे अङ्। १दीप्तौ राजनि॰। प्र+भा-क। २प्रदीप्तियुते त्रि॰ २कुबेरपूर्व्यां स्त्री हेमच॰। ४दुर्गायां स्त्री "प्रभा प्रभानयोगत्वात् ज्योत्स्ना चन्द्रार्कभाजिनी" देवीपु॰ तन्नामनिरुक्तौ। ५सूर्य्यपत्नीभेदे "विश्वात् कश्यपात् पूर्वमदित्यामभवत् पुरा। तस्य पत्नीत्रयं तद्वत् संज्ञा राज्ञी प्रभा तथा। रेवतस्य सुता राज्ञी रेवन्तं सुषुवे सुतम्। प्रभा प्रभावं सुषुवे त्वाष्ट्री संज्ञा तथा मनुम्" मत्स्यपु॰ ११च॰। ६सभर्त्तृनोः कन्याभेदे नक्तप्रभातरि हरिवं॰ २च॰। ७अप्सरोभेदे भा॰अनु॰ १४२५ श्लो॰ ८गोपीभेदे "इदन्तु प्रभया गोपा युक्तो इन्द्रायमे वने। प्रभा देहं परित्यज्य जगाम सूर्यमण्डलम्" ब्रह्मवै॰प्र॰ख॰ ६च॰।

प्रभाकर पु॰ प्रभां करोति क-ट। १सूर्य्ये २वह्नौ ३चन्द्रे ४यक्षे च शब्दर॰। ५सूर्यकेतौ अमरः। ६मीमांसकभेदे स च गुरुत्वेन प्रसिद्धः। सप्तिबंधे ७हस्तिभेदे हरिवं॰ २१च॰। ८कुशद्वीपस्थे वर्षभेदे भा॰भी॰ १२अ॰। अष्टमन्वन्तरे ९देवगणभेदे मार्के॰पु॰ ८०अ॰।

प्रभाकोट पु॰ प्रभान्वितः कोटः श्रा॰त॰। खद्योते राजनि॰।

प्रभाञ्जन पु॰ शोभाञ्जने त्रिका॰।

प्रभात न॰प्र+भा--भावे क्त प्रह्लङ् भातमत्र वा। १प्रातःकाले अमरः। प्र+भा कर्त्तरि क्त। २प्रभायुक्ते त्रि॰ ३रवेर्भेदे पु॰। प्रभास इत्यत्र प्रभात इति भिता॰ पाठः। 'धरशब्दे २८४७पृ॰दृश्यम्। प्रभातकाले दृष्ट्वा उक्ता राजवल्लभेन "वैद्यः पुरोहितो मन्त्री दैवज्ञोऽथ चतुर्थकः। प्रभातकाले द्रष्टव्यो नित्यं स्वश्रियमिच्छता" ऊन्द्योगपरि॰ तत्र दृश्याद्यानाह यथा "गोमियं सुभगामग्निं गाञ्चैवाब्भिश्चितन्नया। प्रातरुत्थाय यः पश्येदापद्भ्यः स विमुच्यते। धात्रिष्टं दुर्भगां सद्यं नक्तमुत्तृज्य तन्नासिकम्। प्रातरुत्थाय यः पश्येत् कलेरुपलक्षयम्"।

प्रभातकाले स्मरणीयाः काशीखण्डे ३५अ॰ दर्शिता यथा "स्मरेच्चित्तं चिन्तयेत् प्रातस्त्रिलोचनाय सर्वदा। गुरुवाक्यं संस्मरेदादौ ततः देवं सदाम्बया। श्रीकान्तं श्रीपतिं तत्र ब्रह्माणं कमलोद्भवम्। इन्द्रादीन् मरुतोऽन्द्वादीन् वसिष्ठादीन् मुनीनपि। गङ्गाद्या सरितः सर्वाः श्रीशैलाद्यखिलान् गिरीन्। क्षीरोदादीन् समुद्रांश्च सामसादिसरांसि च। वनानि नन्दनादीनि धेनूः कामदुघादिकाः। कल्पवृक्षादिवृक्षांश्च धातून् काञ्चनसंयुतः। दिव्यस्त्रीरप्सरोमुख्या गरुडादीन् पतत्रिणः। नागांश्च शेषप्रमुखान् गजानैरावतादिकान्। अश्वानुच्चैःश्रवो मुख्यान् कौस्तुभादीन् मणीन् शुभान्। कारंदरुन्धती मुख्याः पतिव्रतवतीर्नृपः। नैमिषादीन्यरण्यानि पुरीः काशीपुरीमुखाः। विष्वेशादीनि लिङ्गानि वेदान्हरमुखानपि। गायत्रीप्रमुखान् मन्त्रान् योगिनः सनकादिकान्। प्रणवादिमहाबीजं नारदादींश्च वैष्णवान्। शिवभक्तांश्च बाणादीन् प्रह्लादादीन् दृढव्रतान्। वदान्यांश्च दधीच्यादीन् हरिश्चन्द्रादिभूपतीन्। जननीं पितरौ स्मृत्वा सर्वतीर्थात्तमोत्तमौ। पितरं च गुरुं स्मृत्वा हृदि ध्यात्वा प्रसन्नधीः। ततस्त्यक्त्वा कर्तुं मैथुनं दिवमाव्रजेत्", "प्रभातायां तु शर्वर्यां" भार॰नागाख्याने।

प्रभातीर्थ तीर्थभेदे शिवपु॰।

प्रभातोर पु॰ नागभेदे भा॰आ॰ ३५अ॰।

प्रभाव पु॰ प्र+भू-घञ्। राज्ञां कोषदण्डजाते १तेजसि अमरः २तेजसि शब्दसामर्थ्ये हेमच॰ ४विक्रमे ५शान्तौ ६उद्भवे च मेदि॰। ७स्वारोचिषमनोः पुत्रभेदे मार्क॰पु॰ ७६च॰। ८वसुभेदे प्रभास इत्यत्र पाठान्तरम्। ९प्रभागर्भजाते सूर्य्यपुत्रभेदे प्रभाशब्दे दृश्यम्।

प्रभावज न॰ प्रभावात् जायते जन-ड। प्रभुशक्तिभेदे कोषदण्डाभ्यां साध्ये तेजसि।

प्रभावत् त्रि॰प्रभा+अस्त्यर्थे मतुप् मस्य वः। १दीप्तियुक्ते स्त्रियां ङीप्। सा च वज्रनाभासुरस्य २कन्याभेदे। प्रद्युम्नेन तस्याहरणकथा च हरिवं॰ १५२अध्यायादौ दृश्या। ३तापसीभेदे भा॰व॰२८४अ॰। ४कुमारानुचरमातृभेदे भा॰श॰ ४७अ॰। ५रङ्गेश्वरस्य चित्ररथस्य भार्य्यायाम् भा॰अनु॰ ४२अ॰। ६मरुत्तनृपस्य पत्न्यां विदर्भराजदुहितरि मार्क॰ १२२अ॰। ७अग्निनामकोनविंशतिहोत्रान्तरि ८गन्धर्वानां वीणायाञ्च स्त्री हेमच॰। ९त्रयोदशाक्षरपादके छन्दोभेदे "यस्यां मिथे प्रथमषष्ठचतुरङ्घ्रयं तूर्यन्तथा गुरु-

नवमं दशान्तिमम् । सान्त्यं भवेद्यतिरपि चेदुयुगपद्ग्रहैः सा लक्षितास्तनरुचिरे ! प्रभावती" इति स्मृतबोधः ।

प्रभाष पु० प्र+भाष–अच् । १अष्टवसुमध्ये वसुभेदे २प्रकृष्टभक्षके त्रि० जटा० । घरशब्दे ३८१७पृ० दृश्यम् । तत्र षान्तत्वेन पाठः जटाधरस्मृतः ।

प्रभास त्रि०-प्रभासते प्र+भास–अच् । १प्रकृष्टदीप्तियुते २जैनगणाधिपभेदे पु० हेमच० । ३कुमारानुचरगणभेदे पु० भा० श०४६अ० । ४ऋषिभेदे पु० भा०शा० १६६अ० । ५वसुभेदे पु० हरिवं० २अ० सान्तत्वेन पाठः । अष्टममन्वन्तरे ६देवगणभेदे पु० मार्क०पु०८०अ० । ७सोमतीर्थभेदे त्रिका० "पुण्यं प्रभासं वसुपाजगाम यतोऽराट् यक्ष्मणा क्लिश्यमानः" इत्युपक्रमे एवं तु तीर्थप्रवरं पृथिव्यां प्रभासनात्तस्य तु सः प्रभासः" इत्यादिना तत्तीर्थोत्पत्तिमाहात्म्यादिकथा भा०श०३६अ० आदौ दृश्या ।

प्रभासन्त पु० प्र+भास–बा० झ । १परमेश्वरे २रुद्रे च हरिवं० १११अ० । [त्वात् क्षरन्मदे २गजे पु० अमरः ।

प्रभिन्न त्रि० प्र+भिद्-क्त । १प्रकृष्टभेदयुक्ते प्रभिन्नकटादिस्वञ्च-

प्रभु त्रि०प्र+भू–डु । १स्वामिनि २कार्य्यसम्पादनशक्तियुते "निग्रहानुग्रहे शक्तः प्रभुरित्यभिधीयते" इत्युक्ते ३निग्रहानुग्रहसमर्थे ४विष्णौ पु० "प्रभवः प्रभुरीश्वरः" विष्णुसं० "कामः कामप्रदः प्रभुः" तत्रैव नामान्तरं तत्र प्रकर्षेण भवनात् प्रभुरितिति भाष्योक्तेः "सर्वासु क्रियासु सामर्थ्यातिशयात् प्रभुः" भाष्योक्तेश्च व्युत्पत्तिभेदात् नामद्वयम् । ५अष्टमन्वन्तरे देवगणभेदे मार्क०पु० ८०अ० ।

प्रभुत्वाक्षेप पु० अर्थालङ्कारभेदे "धनस्य वस्तु लभ्यते सुखं क्षेमस्य वर्त्मनि । न च मे प्राणसन्देहस्तथापि प्रिय ! मा स्म गाः । इत्याज्ञाप्रार्थया हेतून् प्रियप्रात्यानुबन्धिनः । प्रभुत्वेनैव रुद्धस्तत् प्रभुत्वाक्षेप उच्यते" । "हे प्रिय ! ते विदेशगमने इति अभ्याहार्य्यं वस्तुधनं सुखस्य तथा वर्त्मनि पथि क्षेमं कुशलस्य लभ्यम् । अत्र च मे प्राणसन्देहः न तव शीघ्रप्रत्यागमनस्य वस्तुधनलाभस्य च सम्भवादिति भावः । तथापि मास्म गाः मा गच्छ अत्र प्रियप्रात्यायाः प्रियस्य विदेशगमनस्य अनुबन्धिनः पोषकान् हेतून् आज्ञाप्रार्थया कीर्त्तयन्त्या कयाचित् स्वाधीनपतिकयेति शेषः प्रभुत्वेन स्वाधीनतया एव पतिः रुद्धः विदेशगमनात् निवर्त्तितः तस्मात् एषः प्रभुत्वाक्षेप उच्यते" प्रेम० टीका ।

प्रभुभक्त त्रि० ७त० १स्वामिवत्सले । "वङ्गाधी खलसन्तुष्टः सुनिष्टः शीघ्रचेतनः । प्रभुभक्तस्य शूरस्य ज्ञातव्याः षड्गुणाः शुनः" चाणक्यः । कुत्तीने उक्तमे २घोटके पु० शब्दच० ।

प्रभूत त्रि० प्र+भू-क्त । १प्रचुरे अमरः २उद्गते मेदि० ३भूते ४उद्गते च शब्दर० । ततः गोषदा०अस्त्यर्थे वुन् । प्रभूतक प्रचुरबलादियुक्ते त्रि० प्रभूतमाह्न "आह्नौ प्रभूतमादिभ्यः" वार्त्ति० ठक् । प्राभूतिक प्रचुरवक्तरि त्रि० । द्वितीयान्तात् प्रभूतशब्दात् आह्नौ परे धातुनिर्देशे इक् ठक् । एवम् आदिपदात् पर्य्याप्तमाह्न पार्य्याप्तिक तद्वक्तरि त्रि० ।

प्रभूति स्त्री प्र+भू–भावे क्तिन् नित्तकारादिप्रत्यये परे पूर्व्यगतेः प्रकृतिस्वरः । प्रकर्षेण भवने ।

प्रभूवन् त्रि० प्र+भू–क्वनिप् । सामर्थ्ययुते स्त्रियां ङीप् "वनोर च" पा० नस्य रः । प्रभूवरी यजु०२१।२१

प्रभूष्णु त्रि० प्र+भू–ग्स्नु । १प्रभावशीले २प्रभौ समर्थे

प्रभृति अव्य० प्र+भृ-क्तिच् । तदारभ्येत्यर्थे । वङ्ग०समासे उत्तरपदस्थः । तदादिके त्रि० अमरः ।

प्रभृथ त्रि० प्र+भृ–बा० थक् । प्रकृष्टभरणे ऋ० १।१५२।१२

प्रभेद पु० प्रभिद्यतेऽनेन प्र+भिद–घञ् । १प्रकारे विशेषे । भावे घञ् । २भेदे अमरः ।

प्रभेश्वर पु० तीर्थभेदे शिवपु० ।

प्रस्रंथु पु० "प्रस्रथ्यते नासिकयैव यस्य स्रान्दो विदग्धो लवणः कफस्तु । प्राक्सञ्चितो मूर्ध्नि च पित्तसङ्घं प्रस्रंथुं व्याधिसदाहरन्ति" सुश्रुतोक्ते नासागतरोगभेदे ।

प्रस्रष्ट त्रि० प्र+भ्रस्ज–क्त । भ्रंशयुक्ते संज्ञायां कन् । शिखावलम्बिमाल्ये चूड़ातोलम्बमानमाल्ये अमरः ।

प्रमगन्द पु० द्वैगुण्यादिलक्षणवृद्धियुतोर्थो यासेव गमिष्यतीति बुद्धा परेषामर्थं ददातीति मगन्दो वार्द्धुषिकः निरु० प्रगतो मगन्दं कारणतया अस्या०स० । वार्द्धुषिकपुत्रे ऋ० १।५१।१४ भा० ।

प्रमण(न)स् त्रि० प्रकृष्टं मनोऽस्य मंज्ञात्वे णत्वम् अन्यत्रा-णत्वम् । १हर्षयुते अमरः । २सुमनस्के च ।

प्रमति पु० प्रतीचीश्वरसुनयज्ञपुत्रस्य पुरोहिते कश्यपवंश्ये १ऋषिभेदे मार्क०पु०११८अ० । २च्यवनर्षेः पुत्रभेदे भा०अनु० ५अ० । गृत्समदर्षिवंश्ये वागिन्द्रर्षेः ३पुत्रे ऋषिभेदे भा०अनु०३०अ० । नहुषस्य पुत्रे ४नृपभेदे । तद्वंश्ये वत्सप्रीतेः ५पुत्रे नृपभेदे भाग० ६।२।१६। ६प्रकृष्टमतियुक्ते त्रि० ।

प्रमत्त त्रि० प्र+मद–क्त । १अनवधानतायुक्ते प्रमादयुक्ते कर्त्तव्येऽकर्त्तव्यताज्ञानेन अकर्त्तव्ये वा कर्त्तव्यताधिया तत्रावधानशून्ये "मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं

जड़म्। प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवित्" भाग० १।७अ० "मत्तं मद्यादिना, प्रमत्तमनवहितम्" उन्मत्तं ग्रहवातादिना जड़म् अनुद्यमम्। प्रपन्नं शरणागतम्, विरथं भग्नरथम्" श्रीधरस्वामी। "सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति" मनुः। "सन्ध्या पूजाविहीनश्च प्रमत्तः परिकीर्त्तितः" ब्रह्मवै०पु० ७अ० उक्ते २सन्ध्यादिहीने च।

प्रमत्तगीत न० प्रमत्तेन गीतम् तत्र "इत्यभूतेन कृतमिति च" पा० क्तान्तमुत्तरपदमन्योदात्तम्। प्रमत्तेन गीते।

प्रमथ पु० प्रमथ्नाति प्र+मथ-अच्। १धृतराष्ट्रपुत्रभेदे भा० आ०११७अ०। २कोटिके शिवपारिषदभेदे च शब्दरत्ना० तत्स्वरूपसंख्यादि यथा

"नानारूपधरा ये वै जटाचन्द्रार्द्धमण्डिताः। ते सर्वैश्वर्य्ययुक्ता ध्यानपरायणाः। योगिनो महदात्मैश्वर्य्यं दम्भाहङ्कारवर्जिताः। क्षीणपापा महाभागाः शम्भोः प्रीतिकराः पराः। न ते परिग्रहं रागं काङ्क्षन्ति च कदाचन। संसारविमुखाः सर्वे यतयो योगतत्पराः। ध्यानावस्थं महादेवं परिवार्य्य स्थिताः। स्तुत्वा परि नत्वा तिष्ठन्ति विगतलज्जाः। यदैव परमं ज्योतिः चिन्तयत्यम्बिकापतिः। तदैव ते पारिषदाः सर्वे संवेष्टयन्ति तम्। ते षोड़श समाख्याताः कोटयो वै धृतव्रताः। सिंहव्याघ्रादिसदृशा अणिमादिसमायुताः। अपरे कांस्यिनः शम्भोः शूलशक्तिधराः स्मृताः। विचित्रवस्त्राभरणा जटाचन्द्रार्द्धमण्डिताः। हरस्य तुल्याः रूपेण विशदा वृषभध्वजाः। उमासदृशरूपाभिः प्रमदाभिः समागताः। विचित्रमाल्याभरणा दिव्यस्रग्गन्धभूषणाः। उमासहायं क्रीड़न्तमनुगच्छन्ति भूषिताः। हङ्कारवेशाभरणा अष्टौ ते कोटयो गणाः। अर्द्धनारीश्वरात्मान्ये ह्यर्द्धनारीश्वरं हरम्। अनुयान्ति महाभागास्तुल्यरूपा हरस्य ये। उमासहायो हि यदा रमते स सुखं हरः। अर्द्धनारीश्वरीरास्तु हारपाला भवन्ति ते। आकाशमार्गे गच्छन्तमनुगच्छन्ति नित्यशः। ध्यानस्थं परिचर्य्यन्ति सलिलादिभिरीश्वरम्। नानाशस्त्रधराः शम्भोर्गणास्तु प्रमथाः स्मृताः। प्रमथन्ति च युद्धेषु युध्यमानान्महाबलान्। ते वै महाबलाः शूराः संख्याता वसुकोटयः। अपरे गायनाश्चान्यवाद्यनृत्यविशारदाः। नृत्यन्ति वाद्यं कुर्वन्तो गायन्ति मधुरस्वरम्। नानारूपधरास्ते वै संख्यया कोटयस्त्रयः। सततं चानुगच्छन्ति विचरन्तं महेश्वरम्। सर्वे मायाविनः शूराः सर्वे शास्त्रार्थपारगाः। सर्वे सर्वत्र सर्वज्ञाः सर्वे सर्वत्रगाः सदा। शङ्करात्तु सर्वभुवनं गत्वाऽऽयान्ति पुनःपुनः। अणिमाद्यष्टकैश्वर्य्ययुक्तास्ते वै महाबलाः। अपरे रुद्रनामानो जटाचन्द्रार्द्धमण्डिताः। देवेन्द्रस्य नियोगेन वर्त्तन्ते विदिते सदा। तेषां संख्या चैककोटिस्ते सर्वे बलवत्तमाः। कुर्वन्ति हि सदा सेवां हरस्य सततं गणाः। विघ्नयन्ति पापिष्ठान् धार्मिष्ठान् पालयन्ति च। अनुगृह्णन्ति सततं धृतपाशुपतव्रतान्। विघ्नांश्च सततं घ्नन्ति योगिनां प्रयतात्मनाम्। षट्त्रिंशत् कोटयस्तेषां हरस्य सकला गणाः" कालिकापु० २६अ०। तेषामुत्पत्तिः कथा तत्रैवाध्याये दृश्या। ४हरीतक्यां स्त्री मेदि०।

प्रमथन न० प्र+मथ-भावे ल्युट्। १वधे २क्लेशने ३विलोड़ने च अमरः।

प्रमथाधिप पु० ६त०। शिवे अमरः प्रमथपत्वादयोऽप्यत्र।

प्रमथित न० प्रकर्षेण मथितम्। १निर्ज्जलतक्रे राजनि०। २प्रकर्षेण मथिते त्रि०।

प्रमद पु०प्र+मद--अप्। १हर्षे अमरः। प्रमाद्यत्यनेन करणे अप्। २धुस्तूरफले न० शब्दच०। कर्त्तरि अच्। ३प्रमत्ते त्रि० मेदि०। ४दैत्यभेदे पु० हरिवं० ३अ०। ५तृतीयमन्वन्तरे वार्क्षिके ५सप्तर्षिभेदे पु०।

प्रमदक पु० "प्रमदको योऽयमेव लोकोऽस्ति न परः" इति प्रेषुस्तुरिति निरु० ६।१२ उक्ते परलोकासत्त्ववादिनि नास्तिकभेदे।

प्रमदकानन न०प्रमद्यतेऽनेन प्र+मद-करणे घञ्। या०अ०। ६त० "ऊधसोनसिकाक्षिभ्रुवां कर्णशृङ्गयोः" पा० ङीष् वा। प्रमदावने राज्ञामन्तःपुरोचिते उद्याने भरतः प्रमदावनादयोऽप्यत्र अमरः।

प्रमदा स्त्री प्रमाद्यत्यनया प्र+मद-करणे अप्। १उत्तमयोषिति अमरः। "नजसजला गुरुश्च भवति प्रमदा" छन्दः० उक्ते एकादशाक्षरपादके २वर्णवृत्तभेदे।

प्रमदाकानन न० प्रमदोचितं काननं वनं या०त०। १राज्ञामन्तःपुरोचितवने भरतः। २प्रमदावन तत्रार्थे शब्दरत्ना०

प्रमद्वरा स्त्री शुनकर्षिमातरि रुरोर्भार्य्यायां भा०आ० ५अ०।

प्रमन्यु पु० प्रियव्रतवंश्ये वीरव्रतस्य भोजायां भार्य्यायां जाते पुत्रे नृपभेदे भाग० ५।१५।१५

प्रमय पु० प्र+मी-वधे-भावे अच्। वधे हेमच०।

प्रमयु त्रि० प्र+मी--वधे कर्त्तरि उन्। हिंसके अथ०८।१।१६।

प्रमर्दन त्रि॰ प्रमृद्नाति+प्र+मृद-ल्यु। १प्रकर्षेण मर्दके २दैत्यभेदे पु॰ हरिवं॰ १६४अ॰। ३विष्णौ पु॰ "लोहितास्तः प्रमर्दनः" विष्णुसं॰। तत्र प्रतर्दन इति पाठान्तरं तत्रार्थे "प्रलये सर्वभूतानां नाशकत्वात्" भाष्योक्तेस्तस्य तथात्वम्। "तर्पित! भक्षातृप्तित! प्रमर्दन" भा॰शा॰ २४अ॰विष्णुस्तुतौ।

प्रमा स्त्री प्र+मा--भावे अङ्। १यथार्थज्ञाने भ्रमभिन्ने ज्ञाने तल्लक्षणं तदुत्पत्तौ गुणाश्च भाषा॰ उक्ता यथा

"दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्। प्रत्यक्षे तु विशेषेण विशेषणवता समम्। सन्निकर्षो गुणस्तु स्यादथ लिङ्गमितौ पुनः। पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत्। शाब्दबोधे योग्यतायास्तात्पर्यस्यापि वा प्रमा। गुणः स्याद्भ्रमभिन्नस्तु ज्ञानमात्रोच्यते प्रमा। अथ वा तत्प्रकारं यत् ज्ञानं तद्विशेष्यकम्" भाषा॰। दोषशब्दे ८७६६पृ॰ भ्रमकारणं दृश्यम् तथा च तद्वति तत्प्रकारकज्ञानत्वं प्रमात्वं प्रामाण्यापरपर्यायम् तच्च मतभेदेन स्वतोग्राह्यं परतोग्राह्यञ्च तच्च परतोग्राह्यशब्दे ४२३४पृ॰ उक्तम्। तस्य विस्तरस्त्वत्रोच्यते। तत्र न्यायमते "प्रमात्वं न स्वतोग्राह्यं संशयानुपपत्तितः" भाषा॰ व्याकृतञ्च सि॰मु॰ यथा

"मीमांसका हि प्रमात्वं स्वतोग्राह्यमिति वदन्ति। तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशरूपत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यते इति। भट्टानां मते तु ज्ञानमतीन्द्रियम्। ज्ञानजन्या ज्ञातता प्रत्यक्षा। तया च ज्ञानमनुमीयते। मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते। सर्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते। विषयनिरूप्यं हि ज्ञानम्। अतो ज्ञानविज्ञातवेद्यो विषयः। तन्मतं दूषयति। न स्वतोग्राह्यमिति। संशयेति। यदि ज्ञानप्रामाण्यं स्वतोग्राह्यं स्यात् तदाभ्यासदशोत्पन्नज्ञाने तत्संशयो न स्यात्। तत्र हि यदि ज्ञानं ज्ञातं तदा प्रामाण्यं ज्ञातमेवेति कथं संशयः। यदि तु ज्ञानं न ज्ञातं तदा धर्मिज्ञानाभावात् कथं संशयः। तस्माज्ज्ञानप्रामाण्यमनुमेयम्। तथा हि इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात् यत्रैवं तत्रैवं यथाऽप्रमा। इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात्। एवम् इदं जलज्ञानं प्रमा स्नेहवति जलत्वप्रकारकज्ञानत्वात्। न च हेतुज्ञानं कथं ज्ञातमिति वाच्यम्। पृथिवीत्वप्रकारकत्वस्य स्वतोग्राह्यत्वात् तत्र गन्धवद्विशेष्यकत्वस्यापि सुग्रहत्वात्। तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं परं न गृह्यते संशयानुरोधात्। न च प्रमात्वस्य साध्यस्य प्रसिद्धिः कथमिति वाच्यम् इदंज्ञानप्रमात्वस्य स्वतोग्राह्यत्वात्। न च प्रकारभेदेन प्रामाण्यभेदात् घटत्ववति घटत्वप्रकारादेः कथं प्रसिद्धिरिति वाच्यम् घटत्वप्रकारकत्वस्य स्वविशेष्यकत्वस्य च स्वतोग्राह्यत्वात्। घटस्य च पूर्वमुपस्थितत्वाद् घटविशेष्यकं घटत्वप्रकारकमिति ज्ञाने प्रामाण्यस्य बाधकाभावः। व्यवसायपरन्तु प्रामाण्यं न गृह्यते। तत्र संशयसामग्रीसत्त्वे संशयस्यैवोपपत्तेः। किञ्चाभ्यासदशायां तत्तोयानुव्यवसायादिना प्रामाण्यस्य स्वत एव ग्रहसम्भवात् प्रथमानुव्यवसायपरं न तद्ग्राहकत्वमिति कल्प्यते संशयानुरोधात्। अथ प्रामाण्यानुमितौ प्रामाण्यग्रहे न तस्य विषयनिश्चयरूपत्वार्थं तत्र प्रामाण्यग्रहो वाच्यः सोऽप्यनुमित्यन्तरेणेति फलसुखी कारणसुखी वा नानवस्थेति चेन्न अगृहीतप्रामाण्यग्रहकस्यैव निश्चयरूपत्वात्। यत्र च प्रामाण्यसंशयस्तत्रैव परं प्रामाण्यानुमितेरपेक्षया यावदाश्रयं प्रामाण्यानुमितिरिष्यत एव सर्वत्र तु न संशयः क्वचित् कोट्यनुपस्थितेः क्वचिद्विशेषदर्शनादितः क्वचिद्विषयान्तरसञ्चारादिति सङ्क्षेपः। ननु सर्वेषां ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद्विशेष्यकत्वं विशेषणं व्यर्थम्। न च रङ्कं रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात् तव मते भ्रमस्याभावादिति वाच्यम्। तत्र हि दोषाधीनस्य पुरोवर्त्तिनि स्वतन्त्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात्। सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात् तदेव कारणम्। अस्तु वा तत्रापि भेदाग्रह एव कारणमिति। न चाऽन्यथाख्यातिः सम्भवति रजतप्रत्यक्षकारणस्य रजतसदृशवर्णस्याभावात् रङ्के रजतभ्रमेरनुपपत्तेरिति चेन्न सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः कृप्तत्वात् अन्यत्रापि तत्कल्पनात्। न च संवादिप्रवृत्तौ तु भेदाग्रहः कारणमिति वाच्यम् लाघवात् प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात्। इत्थञ्च रङ्के रजतत्वविशिष्टवुद्ध्यनुरोधेन ज्ञानलक्षणाप्रत्यासत्तिकल्पनेऽपि न क्षतिः। फलसुखगौरवस्यादूषणत्वात्। किञ्च यदु रङ्करजतयोरिमे रजते इति ज्ञानं जातं न कारणबोधोऽपि। अपि च यत्र रङ्करजतयोरिमे रजतरङ्के इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्तिनिवृत्ती स्याताम्। रङ्के रङ्क-

भेदग्रहे रजते रजतभेदग्रहेऽन्यथाख्यातिभयात् । स्वस्मिन् रङ्गे रङ्गभेदाग्रहस्य रजते रजतभेदाग्रहस्य च सत्त्वात् किञ्चानुमितिं प्रति भेदाग्रहस्य हेतुत्वे जलह्रदे वह्नि-व्याप्यधूमवदभेदाग्रहाद् अनुमितिर्निर्बाधा । यदि च विशिष्टज्ञानं कारणं तदाऽयोगोलके वह्निव्याप्यधूमज्ञान-मनुमित्यनुरोधादापतितम् । इत्थम् अन्यथाख्यातौ प्रत्य-क्षमेव प्रमाणम् । रङ्गं रजततया जानामीत्यनुभवा-दिति सङ्क्षेपः" ।

वेदान्तिमते तस्य स्वतोग्राह्यता वेदान्तपरिभाषायां व्यवस्था-पिता यथा "एवञ्चज्ञानं प्रमाणानां प्रामाण्यं स्वतएव उत्पद्यते ज्ञायते च तथा हि घटत्वानुमवबाधाद्यं संशा-दादिप्रवृत्त्यनुकूलं तद्वति तत्प्रकारकज्ञानत्वं प्रामाण्यं तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं न त्वधिकं गुणमपेक्षते प्रमामात्रेऽनुगतगुणाभावात् । नापि प्रत्यक्षप्रमायां भू-योऽवयवेन्द्रियसन्निकर्षः, रूपादिप्रत्यक्षे आत्मप्रत्यक्षे च तदभावात् सत्यपि तस्मिन् पीतः शङ्ख इति प्रत्यक्षस्य भ्रमत्वाच्च । अतएव न सन्दिग्धपरामर्शादिकमपि अनुमि-त्यादिप्रमायां गुणः असन्दिग्धपरामर्शादिस्थलेऽपि विषया-बाधेनानुमित्यादेः प्रमात्वात् । न चैवमप्रमापि प्रमा स्यात् ज्ञानसामान्यसामग्र्यविशेषादिति वाच्यं दोषाभावस्यापि हेतुत्वाङ्गीकारात् । न चैवं परतस्त्वम् "आगन्तुकभावका-रणापेक्षायामेव परतस्त्वात्" ज्ञायते च प्रामाण्यं स्वतः, स्वतोग्राह्यत्वञ्च दोषाभावे सति यावत्स्वाश्रयग्राहकसा-मग्रीग्राह्यत्वम् । स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं सा-क्षिज्ञानं तेनापि वृत्तिज्ञाने गृह्यमाणे तद्गतं प्रामाण्य-मपि गृह्यते । न चैवं प्रामाण्यसंशयानुपपत्तिः तत्र संशयानुरोधेन दोषस्यापि सत्त्वेन दोषाभावघटितस्वा-श्रयग्राहकाभावेन तत्र प्रामाण्यस्यैवाग्रहात् । यद्वा यावत्स्वाश्रयग्राहकग्राह्ययोग्यत्वं स्वतस्त्वं संशयस्थले प्रामाण्यस्योक्तयोग्यतासत्त्वेऽपि दोषवशेनाग्रहात् न संशयानुपपत्तिः । अप्रामाण्यन्तु न ज्ञानसामान्यसामग्री प्रयोज्यं प्रमायामप्रमात्वापत्तेः किन्तु दोषप्रयोज्यं नाप्यप्रामाण्यं यावत्स्वाश्रयग्राहकग्राह्यम् अप्रामाण्य-ग्रहकतदभावघटकत्वादेर्वृत्तिज्ञानानुपनीतत्वेन साक्षिणा ग्रहीतुमशक्यत्वात् किन्तु विसंवादिप्रवृत्त्यादिलिङ्गकानु-मित्यादिविषय इति परत एवाप्रामाण्यमुत्पद्यते ज्ञायते चेति" । अधिकं प्रमाणशब्दे द्रष्टव्यम् ।

प्रमाण न० प्र+मा-भावे करणे वा ल्युट् । (प्रमाकरणज्ञाने २विष्णौ "प्रमाणं प्राणनिलयः" विष्णुस० । प्रमाणं "प्रज्ञानं ब्रह्मेति" श्रुतेर्ब्रह्मज्ञानरूपत्वात् तथात्वम् "प्र-माणं बीजमव्ययम्" विष्णुस० प्रत्यक्षादिप्रमाणरूपत्वात्तस्य तथात्वं व्युत्पत्तिद्वययोगात् नामद्वयम् । ३सत्यवादिनि ४दृढसत्यायां परिच्छेदे ५हेतौ ६प्रमातरि च मेदि० । ७प्रमितिकरणे चक्षुरादौ "यस्येष्टप्राप्तिहेतोः प्रवृत्तिः स प्रमाता स येनार्थं प्रतिपद्यते तत्प्रमाणम्" वात्स्या० "तच्च साधनाश्रयव्यतिरिक्तत्वे सति प्रमाव्याप्यं प्रमाणमिति" सर्वद० अक्षपाददर्शने । "तद्वति तत्प्रकार-कत्वरूपप्रकर्षविशिष्टज्ञानकरणत्वम्" गौ० ह० । "अनुभव-स्वव्याप्यजात्यवच्छिन्नप्रमाहेतुत्वकार्यतानिरूपितकारणता-श्रयत्वे सति व्यापारवत्त्वम् तत्त्वम्" तर्कप्रकाशे शिति-कण्ठः । प्रमात्वं च अनधिगतार्थकानुभवकारणत्वम् । तच्च गृहीतग्राहीतरानुभवकारणत्वम् । अनुमानादि-करणस्याव्यवहितपूर्ववर्त्तिलिङ्गजमानाकारनिश्चयविषयविषय-केतरतद्विशेषप्रकृतप्रकारकानुभवकारणत्वमिति भा-वतृ न्यायकुसुमाञ्जलिटी० । "यज्जातीयविशिष्टज्ञानत्वा-वच्छेदेन यमानाकारमिच्छोत्तरत्वं तज्जातीयाव्यवसा-यत्वज्ञानस्यैवाग्रहीतग्राहित्वेन प्रमात्वात् अतएव धारा-वाहिप्रत्यक्षव्यक्तीनां यमानाकारव्यक्तोत्तरवर्त्तित्वेऽपि न तासां प्रमात्वहानिः ग्रहिष्यमाणयमानाकारानुभवस्य-त्वानां स्मृतीवादिति" मद्र० प्र० । न्यायमते चत्वारि-प्रमाणानि । प्रत्यक्षम् । अनुमानम् । उपमानम् । शब्दः गौ० ह० प्रकारान्तरेण प्रमाणं द्विविधम् "शब्दोपजीवि अशब्दानुपजीवि" कुसुमाञ्जलिटी० । प्रत्यक्षमेवैकं प्रमा-णमिति चार्वाकाः सङ्गिरन्ते । प्रत्यक्षमनुमानं चेति द्वे प्रमाणे इति वैशेषिका बौद्धा आर्हताश्च । प्रत्यक्षं शब्दश्चेति द्वे प्रमाणे इति श्रीमदानन्दतीर्थभगवत्पादाचार्याः । प्र-त्यक्षमनुमानमाप्तवचनमिति त्रीण्येव प्रमाणानीति सांख्या वेदान्तिनश्च । प्रत्यक्षानुमानोपमानानि त्रीणीति नैया-यिकैकदेशिनः । प्रत्यक्षानुमानोपमानशब्दा अर्थापत्तिश्चेति पञ्च प्रमाणानीति प्राभाकराः । प्रत्यक्षानुमानोपमानशब्दा अर्थापत्तिरनुपलब्धिश्चेति षट्प्रमाणानीत्यपरे भाट्टवेदा-न्तिभेदाश्च । सम्भवैतिह्ये अर्थापत्तिरिक्ते प्रमाणे इति पौ-राणिकाः । चेष्टाप्यतिरिक्तं प्रमाणमिति तान्त्रिकाः । तत्र सांख्यपातञ्जलवेदान्तिमते अलःकरणवृत्तीनां बोध्य-मेयचित्तवृत्तिप्रकाशरूपबोधे करणत्वम् । अन्तःकरण-वृत्तिस्तु च ज्ञानत्वारोपेण तत्करणत्वमित्यिष्टसाधनमिति

भेदः । यथोक्तं सां०प्र०भा० "प्रमाता चेतनः शुद्धः प्रमाणं वृत्तिरेव नः । प्रमाऽर्थाकारवृत्तीनां चेतने प्रतिबिम्बनम् । प्रतिबिम्बितवृत्तीनां विषयो मेय उच्यते । साक्षाद्दर्शनरूपं च साक्षित्वं वक्ष्यति स्वयम् । अतः स्यात् कारणाभावाद्वृत्तेः साक्ष्येव चेतनः । विष्णुदेः सर्वसाक्षित्वं तौरण 'लिङ्गाद्यभावतः' । "प्रमाणविपर्ययविकल्पनिद्राः स्मृतयः" पात०सू० "इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात् तद्विषयसामान्यविशेषात्मनोऽर्थस्य विशेषावधारणं प्रधाना वृत्तिः प्रत्यक्षं प्रमाणं, फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः" भाष्यम् "अनधिगततत्त्वबोधः पौरुषेयो व्यवहारहेतुः प्रमा तत्करणं प्रमाणम् । ननु पुरुषवृत्तौ बोधः कथं चित्तगतायावृत्तेः फलं न हि खड्गिगोचरव्यापारेण परशुना पलाशे छिदा क्रियते इत्यत आह अविशिष्ट इति । न हि पुरुषगतो बोधो जन्यते अपि तु चैतन्यमेव बुद्धिदर्पणप्रतिबिम्बितं बुद्धिवृत्त्या अर्थाकारया तदाकारतामापाद्यमानं फलम् । तच्च तथाभूतं बुद्धेरविशिष्टं बुद्ध्यात्मिका वृत्तिः वृत्तिश्च बुद्ध्यात्मेति सामानाधिकरण्याद्युक्तः प्रमाणफलभाव इत्यर्थः" विव० । प्रमाणस्य भावः ष्यञ् प्रामाण्य न० तल् प्रमाणता स्त्री त्व प्रमाणत्व न० प्रमाणभावे प्रमितिकरणत्वे प्रमात्वे च । उद्देश्यविधेयभावेनान्वयस्थले प्रमाणशब्दस्य प्रमाकरणपरत्वे क्वचिदेकवचनता यथा "वेदाः प्रमाणं स्मृतयः प्रमाणम्" इत्यादौ । क्वचित्तु बहुवचनता यथा "प्रत्यक्षानुमानोपमानागमाः प्रमाणानि" गौ०सू० । तत्र पूर्वत्र शाब्दत्वरूपप्रमात्वजातेरेकत्वात् एकवचनत्वम् । उत्तरत्र प्रत्यक्षत्वादिजातिचतुष्टयकरणानां बहुत्वात् बहुवचनता इति प्रथमाव्युत्पादे गदाधरेण प्रपञ्चितम् तत्र द्रष्टव्यम् । सामान्यत्वात् क्लीबतैवास्य । क्वचित्तु विशेषपरत्वे स्त्रीत्वपरता यथा प्रमाणी । स्त्री प्रमाणी यस्य ब०व्री० "अप् पूरणीप्रमाणीभ्यः" पा०अप्समा० न कप् । श्रीप्रमाण इत्येव सि०कौ० । ८परिमाणभेदे च । "प्रमाणे मात्रजुदयसज्दघ्नञः" पा० वृत्तौ द्रष्टव्यम् ।

प्रमाणबाधितार्थक पु० प्रमाणेन बाधितोऽर्थो यस्य कप् । तर्कभेदे तर्कशब्दे ३२५५ पृ० दृश्यम् ।

प्रमाणिक त्रि० प्रमाणं सिद्धिहेतुतयाऽस्त्यस्य ठन् । प्रमाणसिद्धे "प्रमाणिका जटी लगी" ह०र० उक्ते अष्टाक्षरपादके २छन्दोभेदे स्त्री । ३परिमाणभेदयुते मध्यमाङ्गुलकूर्परान्तरमितपरिमाणयुते हस्ते हेमच० ।

प्रमातामह पु०प्रगतो मातामहं कार्यत्वेन अत्या०स० । मातामहस्य पितरि अमरः । तस्य पत्नी ङीष् । प्रमातामह्यौ २तत्पत्न्यां स्त्री ।

प्रमाति त्रि० प्रमिनोति प्र+मि-क्तिच् । प्रमाज्ञानकर्त्तरि । न्यायनये "यस्येप्सेज्जिज्ञासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता" वात्स्या० । सांख्यमते शुद्धचेतनो वृत्तिसाक्षी स । प्रमाणशब्दे तद्वाक्यम् दृश्यम् । वेदान्तिमते "मेरुवातीतो विशुद्धो घनिभिरभिहितो मेरुसंक्रान्तमूर्त्तिः साक्षी संवित् प्रमा तत्प्रतिफलितवपुर्गीयतेऽसौ प्रमाता" इत्युक्तदिशा अन्तःकरणवृत्तिप्रतिबिम्बितं तदवच्छिन्नं वा चैतन्यमेव प्रमाता ।

प्रमाथ पु०प्र+मथ-भावे घञ् । १बलाद्धरणे २प्रपीडने च । बा० कर्त्तरि ण । ३कुमारानुचरभेदे भा० श० ४६अ० । स्वार्थे अण् । ४शिवपारिषदप्रमथगणे पु०हरिवं०१८३अ० ५श्वतरराष्ट्रपुत्रभेदे पु० भा०द्रो० १५७अ० ।

प्रमाथिन् त्रि० प्रमथ्नाति प्र+मथ-णिनि । १बलाद्धारके २पीडके च । "इन्द्रियाणि प्रमाथीनि" गीता । स्त्रियां ङीष् । सा च १अप्सरोभेदे भा०आ० १२४अ० । ४राक्षसभेदे पु० भा० व० २८४अ०

प्रमाद पु० प्र+मद-घञ् । १कर्त्तव्ये अकर्त्तव्यबुद्धया तयो निषिद्धयो अकर्त्तव्ये कर्त्तव्यबुद्धया तत्र प्रवृत्तौ वा अनवधानतायाम् अमरः । अनवधानताशब्दे १५२पृ०दृश्यम् । स च तमोगुणकार्य्यः तमस्शब्दे ३२३५ पृ० दृश्यम् । तस्य तमोरूपत्वात्तत्कार्य्यत्वं बोध्यम् ।

प्रमादवत् प्रमादोऽस्त्यस्य मतुप् मस्य वः । १प्रमादयुते २असमीक्ष्यकारिणि जटाध० ।

प्रमादिन् त्रि० प्रमादः नित्ययोगे इनि न तु अभ्यस्तैकाक्षरकृदन्तात् तस्य निषेधात् । नित्यप्रमादयुक्ते "एकः प्रमादी स कथं न हन्यते" श्रीधरधृतवाक्यम् ।

प्रमापण न० प्र+मीञ्-हिंसायां स्वार्थे णिच्-आधारे ल्युट् । मारणे अमरः ।

प्रमायुक त्रि०प्र+मी-ताच्छील्ये उकञ् । प्रमरणशीले "तस्य चास्य प्रियं प्रमायुकं भवति" ह०व० । "प्रमायुक मारणशीलम्" भा० । [च जटाध० । ३परिमिते ।

प्रमित त्रि० प्र+मि-भी वा क्त । १ज्ञाते २प्रथमाक्षरधारिते

प्रमिताक्षरा स्त्री प्रमितानि परिमितानि अक्षराणि यस्याम् । सिद्धान्तशिरोमणिव्याख्यानरूपायां टीकायां सुब्रह्मण्यचिन्तामणिटीकाभेदे च "प्रमिताक्षरा सजसमैं

कदिता" छ०र० उक्ते द्वादशाक्षरपादके १वर्णवृत्तभेदे ।

प्रमिति स्त्री प्र+मि–मा–वा क्ति । प्रमाज्ञाने अमरः ।

प्रमीढ त्रि० प्र+मिह–क्त । १मूत्रिते २घने च मेदि० ।

प्रमीत त्रि० प्र+मीञ्-हिंसायां क्त । १मृते "प्रमीतौ पितरौ यस्य" इति स्मृतिः । २यज्ञार्थे हतपशौ पु० अमरः ।

प्रमीला स्त्री प्र+मील–भावे अ । तन्द्रायाम् अमरः ।

प्रमुख न० प्रकृष्टं मुखमारम्भः । १तदादित्वे त्रिका० प्रकृष्टं मुखमस्य । २प्रथमे १प्रधाने अमरः ४मान्ये पूज्येऽर्थे च त्रि० मेदि० ६पुन्नागवृक्षे पु० शब्दरत्ना० ७समूहे पु० शब्दच० । वहु० । उत्तरपदस्थः । तदादिके त्रि० ।

प्रमुच पु० १ऋषिभेदे भा०शा० २०८अ० । प्रमुञ्चति प्र+मुच–क । २प्रकर्षेण मोक्तरि त्रि० ।

प्रमुचु ऋषिभेदे भा०अनु० १५०अ० ।

प्रमुद् त्रि० प्रकृष्टा मुद् यस्य । १हृष्टे २हर्षयुक्ते अमरः । ३देवभेदे पु० यजु० २०।१०। मा०स०। ४प्रकृष्टहर्षे स्त्री ।

प्रमुदित त्रि०प्र+मुद–कर्तरि क्त ।१हृष्टे २हर्षयुक्ते अमरः ।

प्रमुदितवदना स्त्री "प्रमुदितवदना भवेद्यौ च रौ" छ०र० उक्ते द्वादशाक्षरपादके छन्दोभेदे । [युक्ते स्याने

प्रमृग अव्य० प्रकृष्टा मृगा यत्र तिष्ठ० अव्ययी०। प्रकृष्टमृग-

प्रमृत न० प्रकृष्टं मृतं प्राण्यहिंसितं यत्र । मनूक्ते कर्षणरूपे जीवनोपायभेदे "मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम्" मनुः । "कर्षणञ्च भूमिगतप्रचुरप्राण्यहिंसारूपनिमित्तत्वात् बहुदुःखफलकं प्रकर्षेण मृतमिव प्रमृतम्" कुल्लू० ।

प्रमेय त्रि० प्र+मा–कर्मणि यत् । १प्रमाज्ञानविषये पदार्थे २परिच्छेद्ये ३व्यवधार्ये च । तत्र वेदान्ते शुद्धचैतन्यं प्रमेयम् अन्यस्याध्यासमूलकत्वेन व्यवहारिकप्रमाज्ञानविषत्वेऽपि न परमार्थप्रमेयत्वम् । न्यायनये "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" गौ०सू० उक्ताः आत्मादयः । पृथ्वीयत्वं च केवलान्वयि सर्वेषामीश्वरज्ञानरूपप्रमाविषयत्वात् ।

प्रमेह पु० प्र+मिह–आधारे करणे वा घञ् । रोगभेदे तल्लक्षणभेदादिकं भावप्र० उक्तं यथा

"आस्यासुखं स्वप्नसुखं दधीनि ग्राम्यौदकानूपरसः पयांसि । नवान्नपानं गुडवैकृतं च प्रमेहहेतुः कफकृच्च सर्वम् । मेदश्च मांसञ्च शरीरजञ्च क्लेदं कफोवस्तिगतं प्रदूष्य । करोति मेहान् सहजांश्च सर्वांस्तानेव पित्तं परिदूषयञ्च यापि । क्षीणेषु दोषेष्ववलम्बनञ्च धातून् संदूष्य मेहान् कुरुतेऽनिलश्च । साध्याः कफोत्था दश पित्तजाः षट् याप्या न साध्या पवनाच्चतुष्काः । समक्रियत्वाद्विषमक्रियत्वान्मेहाल्पयत्वाच्च यथाक्रमन्ते । कफश्च पित्तं पवनश्च दोषा मेदोऽस्रशुक्राम्बुवसालसीकाः । मज्जारसौजःपिशितञ्च दूष्याः प्रमेहिणां विंशतिरेव मेहाः । दलाटीनां बलाढ्यत्वं प्राग्रूपं पाणिपादयोः । दाहश्चिक्कणता देहे लट्स्वाहास्यञ्च जायते । सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता । दोषदूष्यविशेषेऽपि तत्संयोगविशेषतः । मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते । स्वच्छं बहुतरं शीतं निर्गन्धसदृकोपमम् । मेहत्युदकमेहेन किञ्चिच्चाविलपिच्छिलम् । कृशोरसमिवात्यर्थं मधुरञ्चेक्षुमेहतः । सान्द्रो भवेत् पर्युषितं सान्द्रमेहेन मेहति । सुरामेहि सुरातुल्यसुपर्यच्छमधोघनम् । संहृष्टरोमः पिष्टेन पिष्टवद्बहलं सितम् । शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति । मूर्त्तीभून पिटकामेही सिकताश्मपिष्टो मलान् । शीतमेही सुबहुशो सधुरं मूत्रयेच्छीतलम् । शनैःशनैः शनैर्मेही मन्दं मन्दं प्रमेहति । लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् । मज्जवसारसस्यौ क्षारेण क्षारतोयवत् । नीलमेहेन नीलाभं कालमेही मषीनिभम् । हारिद्रमेही कटुकं हरिद्राभासमं दहत् । विस्रं माक्षिकमेहेन मक्षिकाभालिकोपमम् । विस्रसस्यं सबर्णं रक्ताभं रक्तमेहिनः । वसामेही वसाभिस्रं वसाभं भूरयेन्मुहुः । मज्जाभं मज्जमिश्रं वा मज्जमेही सुदुर्दुहः । क्षारायं मधुरं रूक्षं क्षौद्रमेहं वदेत् बुधः । हस्ती मत्त इवाजस्रं मूत्रवेगविवर्जितम् । बालसीकं विबद्धञ्च हस्तिमेही प्रमेहति । अविपाकोऽरुचिस्कर्दिर्निद्राकासः सपीनसः । उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् । वस्तिमेहनयोस्तोदो मुष्कावदारणं ज्वरः । दाहस्तृष्णाग्निकामूर्च्छाविड्भेदः पित्तजन्मनाम् । वातजानामुदावर्त्तकम्पहृद्ग्रहशोषता । शूलसुप्तिरुजा शोषः श्वासः कासश्च जायते । यथोक्तोपद्रवाविष्टमतिप्रभुतमेव च । पिडकापीडितं गाढं प्रमेही हन्ति मानवम् । मूर्च्छाच्छर्दिज्वरश्वासकासवीसर्पशोफवैः । उपद्रवैरुपेतो यः प्रमेही दुःप्रतिक्रियः । रजः प्रवर्त्तते यस्मात् तस्मिन् तस्मिन् विशोधयेत् । सर्वान् शरीरदोषांश्च न प्रमेहन्त्यतः स्त्रियः । जातः प्रमेहो मधुमेहिनो वा न साध्यरोगः सहि बीजदोषात् । ये चापि केचित्कुलजा विकाराः सर्वन्ति तां

स्यापि पदन्यसाध्यान्। सर्वएव प्रमेहास्तु कालेनाप्रतिकारिणः। मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति च। मधुमेहो मधुनिभो जायते स किल द्विधा। क्रुद्धे धातुक्षयाद्वायौ दोषादृतपथेऽथ वा। व्याहतो दोषलिङ्गानि स्वोऽनिमित्तं प्रदर्शयन्। क्षीणक्षीणात् क्षणात् सूर्यो भजते कृच्छ्रसाध्यताम्। मधुरं यच्च सर्वेषु प्रायो ऽभ्येव मेहति। सर्वेऽपि मधुमेहाख्यं साधुर्व्याधिं ततोऽतः। शरविकाकङ्कपिका जालिनी विनतालजी। कच्छूरिका सर्षपिका पुत्रिणी सविदारिकाः। विद्रधिश्चेति पिडकाः प्रमेहोपेक्षया दश"।

प्रमेहनिमित्तकर्मभेद या० त० उक्तः। कर्मविपाकशब्दे १०७६ पृ० दृश्यम्। तत्र मधुमेहस्यैव महारोगभेदरूपता "मधुमेहभगन्दरौ" इत्युक्तेः।

प्रमेहिन् पु० प्र+मिह-णिनि। प्रमेहरोगयुते।

प्रमोचनी स्त्री प्रकर्षेण मुच्यते निस्त्वचीक्रियते भोजनार्थम् मुच-कर्मणि ल्युट् ङीप्। १गोडुम्बायाम् (गोलुका) अटा० २प्रमोचनसाधने त्रि०। भावे ल्युट्। ३प्रकर्षेण मोचने क्ली०।

प्रमोद पु० प्र+मुद-हर्षे भावे घञ्। १हर्षे प्रियलाभनिमित्ते प्रकृष्टहर्षे आनन्दशब्दे ७१७पृ० तैत्ति०उ० भाष्यवाक्यं दृश्यम्। प्रकृष्टो मोदोयस्य प्रा०व०। २प्रमोदयुते त्रि० ३नागभेदे पु० भा०आ०५७अ०। ४स्कन्दानुचरभेदे पु० भा०श० ४६अ०। सा०त०कौ० उक्ते ५सुख्यसिद्धिभेदे "तिस्रश्च मुख्याः सिद्धयः प्रमोदमुदितमोदमानाः"। तत्राध्यात्मिकदुःखविघातस्य सर्वोत्कर्षेण इष्टत्वात् प्रमोदत्वं बोध्यम्। आधिभौतिकदुःखविघातस्य मोदाधारत्वात् मुदितत्वम् आधिदैविकदुःखविघातस्य मोदमानत्वं मोदस्य मानं भानं यत्रेति व्युत्पत्त्येति विवेकः।

प्रमोदन त्रि० प्रमोदयति प्र+मुद-णिच्-ल्यु। १हर्षकारके २विष्णौ पु० "जितामित्रः प्रमोदनः" विष्णुस०। भावे ल्युट्। ३हर्षसम्पादने न०। [२कुबेरे पु० शब्दमाला।

प्रमोदित त्रि० प्रमोदो जातोऽस्य तारं० इतच्। १जातप्रमोदे

प्रमोदिन् त्रि० प्रमोदयति प्र+मुद-णिच्-णिनि। १प्रहर्षजनके। स्त्रियां ङीप्। सा च २त्रिष्टिनीवृत्ते भाषम०।

प्रमोहन न० प्रमुह्यतेऽनेन प्र+मुह-करणे ल्युट्, प्रमोहयति प्र+मुह+णिच्-ल्यु वा। १प्रमोहसाधने प्रमोहकारके २अस्त्रभेदे च यदस्त्रप्रयोगे विपक्षस्य प्रमोहो जायते तत्तदस्त्रे। भा०भी०७७अ०। ३प्रमोहकारकमात्रे त्रि०।

प्रम्लोचन्ती स्त्री प्रम्लोचति नरं प्रति आत्मानं दर्शयति प्र+म्लुच-शतृ-ङीप्। अप्सरोभेदे यजु० १५।१७

प्रम्लोचा स्त्री प्रम्लोचति नरं प्रत्यात्मानं दर्शयति प्र+म्लुच-अच्। अप्सरोभेदे गरुड़पु० ६०अ०।

प्रयज्यु त्रि० प्र+यज "यजिमनिशुन्धिदसिदम्यो युच्" उणा० युच् निरनुनासिकत्वात् चनादेशो न। अध्वर्यौ उज्ज्व० ऋ० १।२६।६

प्रयत त्रि०प्र+यम-कर्त्तरि क्त। १पवित्रे संयते अमरः। प्र+यत-अच्। २प्रयत्नविशिष्टे त्रि०। पूर्वक यमेर्दानार्थकात् कर्मणि क्त। ३दत्ते च। "प्रयतदक्षिणम्" ऋ० १२१।१५

प्रयत्न पु० प्र+यत-भावे नङ्। प्रयासे। स च न्यायमते त्रिविधः यथा "प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्। एवं प्रयत्नवैविध्यं तान्त्रिकैः परिदर्शितम्। चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा। उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत्। निवृत्तिस्तु भवेद्द्वेषात् दृष्टसाधनताधियः। यत्नो जीवनयोनिस्तु सर्वदाऽतीन्द्रियो भवेत्। शरीरे प्राणसञ्चारे कारणं तत्प्रकीर्त्तितम्" भाषा० "प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः" सा०द० उक्ते २फलार्थिभिः प्रारब्धस्य कर्मणोऽवस्थापञ्चकान्तर्गतेऽवस्थाभेदे ततोऽस्त्यर्थे मतुप् मस्य वः। प्रयत्नवत् तदुक्ते त्रि० त्रिका० स्त्रियां ङीप्।

प्रयत्नशैथिल्य ६त०। स्वाभाविकप्रयत्नस्योपरमपूर्वकप्रयत्नभेदे-तच्च योगाङ्गासनसिद्धिकारणं यथोक्तं "प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्" पा०सू०। "भवतीति शेषः प्रयत्नोपरमात् सिद्ध्यत्यासनं येन नाङ्गमेजयो भवति अनन्ते वा समापन्नं चित्तमासनं निर्वर्त्तयतीति" भा०। "सा सिद्धिर्नोहि प्रयत्नः शरीरधारको न योगाङ्गस्योपदेष्टव्यासनस्य कारणं तस्य तत्कारणत्वे उपदेशवैयर्थ्यात् स्वरसत एव तत्सिद्धेः तस्मादुपदेष्टव्यस्यासनस्यायमसाधकः विरोधी च स्वाभाविकः प्रयत्नः। तस्य च यादृच्छिकासनहेतुतयासननियमोपकर्तृत्वात्। तस्मादुपदिष्टनियमासनमभ्यस्यता स्वाभाविकप्रयत्नशैथिल्यात्मा प्रयत्न शास्त्रेयो नान्यथोपदिष्टमासनं सिध्यतीति स्वाभाविक प्रयत्नशैथिल्यमासनसिद्धिहेतुः अनन्ते वा नागनायके स्थिरतरफणासहस्रविधृतविश्वम्भरामण्डले समापन्नं चित्तमासनं निर्वर्त्तयतीति" विव०। [१।५१।१५ भाष्यम्।

प्रयत्नत त्रि०प्र+यत्न-तृच्। प्रकर्षेण १यत्नकरि २दातरि च ऋ०,

प्रयस् न०प्रय+असुन्-आधारे किप्। अन्ने निघण्टुः
अय इत्यत्र प्रय इति पाठान्तरं च०१।४५।८ ऋदा०।
प्रयस्त्र त्रि०प्र+यस-आधारे क्त्र। १प्रयासेन लभ्ये हतचत्वलौ-
तकादिना ह्रस्वे च प्रयत्नसंलभ्ये २अन्ने न० अमरः।
प्रयाग पु० प्रकृष्टो यागो यत्रफलं यस्य यस्मात् वा। मङ्गा-
यमुनयोः सङ्गमस्थाने १तीर्थभेदे २यज्ञकर्त्तरि इन्द्रे च।
२अन्ये अश्वमेधाङ्गयज्ञस्य यज्ञसाधनत्वात् तथात्वम्।
कर्म०। ३प्रकृष्टे यज्ञे अमरः। तस्य तीर्थभेदे पुंन० पुराणे
तथा प्रयोगात्। अन्यत्राप्यत्वञ्च मत्स्यपु०१०२अध्यायादिके
१०७अध्यायान्ते उक्तम् एवमन्यान्यपुराणेष्युक्तम्। ततो
दिग्मात्रं पुराणसमुच्चये दर्शितमत्र प्रदर्श्यते।
"एतत् प्रजापतेः क्षेत्रं त्रिषु लोकेषु विश्रुतम्। न तत्कर्म
क्वचित् राजन्! फलं वर्षशतैरपि। संक्षेपेण तु वक्ष्यामि
तस्य तीर्थस्य यत् फलम्। यस्मिन्नीरे कृताभिषेकः तत्र
रक्षन्ति जाह्नवीम्। यमुनां रक्षति सदा सविता सप्त-
वाहनः। तं वटं रक्षति शिवः शूलपाणिर्महेश्वरः।
स्थानं रक्षन्ति वै देवाः सर्वपापहरं शुभम्। प्रयागं
जरमाणस्य यान्ति पापानि संक्षयम्। दर्शनात्तस्य
तीर्थस्य सर्वपापैः प्रमुच्यते। मृत्तिकालम्भनाद्यापि नरः
पापात् प्रमुच्यते। यच्च कुरुषे राजेन्द्र! येषां मध्ये
तु जाह्नवी। प्रयागस्य प्रभावाद्वै पापं नश्यति तत्-
क्षणात्। मनसा चिन्तितान् कामान् सर्वान् प्राप्नोति
पुष्कलान्। ततो गत्वा प्रयागन्तु सर्वदेवाभिरक्षितम्।
ब्रह्मचारी शुचिर्भूत्वा पितॄन् देवांस्तर्पयेत्। तपनस्य
सुता देवी त्रिषु लोकेषु विश्रुता। यमागता महा-
भाग! यमुना यत्र निम्नगा। तत्रोपस्पृश्य राजेन्द्र!
स्वर्गलोकमवाप्नुते। व्याधितो यदि वा क्षीणः क्रुद्धो
वापि भवेन्नरः। गङ्गायमुनमासाद्य वसु प्राणान् परि-
त्यजेत्। दीप्यमानैर्विमानैः सूर्यवर्चसैः।
गन्धर्वाप्सरसां मध्ये स्वर्गे तिष्ठति मानवः"।
"देशस्थो यदि वाऽरण्ये विदेशे यदि वा गृहे। प्रयागं
स्मरमाणोऽपि वसु प्राणान् परित्यजेत्। ब्रह्मलोक-
मवाप्नोति वह्नि शुचिपुरुषवः। सर्वकामफला दृष्टा
ब्रह्मविद्विहिरण्मयी। क्षीरोदस्याकुले रम्ये मन्दाकि-
न्यास्तटे शुभे। मोदते सुरभिभिः सार्द्धं स्वर्गे तेनेह
कर्मणा। विमानवरमास्थाय पूज्यते दिवि दैवतैः।
ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत्। ततः
कर्माणि कर्माणि चिन्तयन् पुनःपुनः। गुप्तवान् पित्त-
कर्म्मणो भवतीह न संशयः। सर्वदुःखैः क्षयकरीं
वेदकर्त्तीं पयस्विनीम्। प्रयागे भारतिं यागं आह-
यित्वा यथाविधि। स्वर्गे च तत्फलं भुङ्क्ते प्रदाता
यज्ञकोटिषु। पुत्रान् दारांस्तथा भृत्यान् गौरेका प्रति-
तारयेत्। ऐश्वर्य्यलोभमोहाद्वा गच्छेदुद्यानेन यो
नरः। निष्फलं तस्य तत्तीर्थं तस्मादुद्यानन्तु वर्जयेत्।
तत्र दानं प्रदातव्यं यथाविभवसम्भवम्। तेन तीर्थफल-
स्यैव वर्द्धते नात्र संशयः। स्वर्गे तिष्ठति राजेन्द्र! याव-
दाहूतसंप्लवम्। वटमूलं समासाद्य यस्तु प्राणान्
परित्यजेत्। सर्वलोकानतिक्रम्य रुद्रलोकं स गच्छति।
तत्र ते द्वादशादित्यास्तपन्ते रुद्रमाश्रिताः। निर्दहन्ति
जगत्सर्वं वटमूलं न दह्यते। नष्टचन्द्रार्कपवनं यदा
चैकार्णवं जगत्। स्वपते तत्र वै विष्णुर्युगान्तः पुनः-
पुनः। देवदानवगन्धर्वा यक्षवः सिद्धचारणाः। यदा
क्षेपन्ति तत्तीर्थं गङ्गायमुनसङ्गमम्। ततः पुण्यतमं
नास्ति त्रिषु लोकेषु भारत!। अवगाह्यैतत् तीर्थं
नामसङ्कीर्त्तनादपि। मृत्तिकालम्भनाद्वापि नरः पापात्
प्रमुच्यते। तुल्यं फलमवाप्नोति राजसूयाश्वमेधयोः। न
देववचनात्तात न लोकवचनादपि। मतिरुत्क्रमणीया ते
प्रयागमरणं प्रति। दश तीर्थसहस्राणि षष्टिकोट्यस्तथा
पराः। तेषां सान्निध्यमत्रैव माघे वै कुरुनन्दन!। यो
मतिर्योगयुक्तस्य सत्यस्थस्य धीमतः। सा गतिस्त्य-
जतः प्राणान् गङ्गायमुनसङ्गमे। कम्बलाश्वतरौ नागौ
विपुले यमुनातटे। तत्र स्नात्वा च पीत्वा च सर्वपापैः
प्रमुच्यते। तत्र गत्वा च संस्थानं ब्रह्मदेवस्य धीमतः।
नरस्तारयते पूर्वान् पुरुषानेकविंशतिम्। कृत्वाभिषेकन्तु
नरो ह्यश्वमेधफलं लभेत्। स्वर्गलोकमवाप्नोति याव-
दाहूतसंप्लवम्। पूर्वपार्श्वे च गङ्गायास्त्रिषु लोकेषु
विश्रुतम्। कूपश्चैव तु साङ्क्ष्यं प्रतिष्ठानञ्च नामतः।
तत्र स्नात्वा विशुद्धात्मा अश्वमेधफलं लभेत्। उत्तरेण
प्रतिष्ठानाद्भागीरथ्यास्तु पूर्वतः। हंसप्रपतनं नाम
तीर्थं त्रैलोक्यविश्रुतम्। अश्वमेधमवाप्नोति स्नान-
मात्रेण भारत!। यावच्चन्द्रश्च सूर्यश्च तावत्स्वर्गे
महीयते। उर्वशीपुलिने रम्ये विपुले हंसपाण्डरे।
परित्यजति यः प्राणान् शृणु तत्रापि यत् फलम्।
षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च। मोदते
पितृभिः सार्द्धं स्वर्गलोके नरोत्तमः। ततः स्वर्गात्
परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः। उर्वशीवचनान्तु

कन्यानां दिव्यतेजसाम्। मध्ये नारीसहस्राणां वह्नेर्नाम्ना पतिर्भवेत्। दशग्रामसहस्राणां भर्त्ता भवति भूमिपः। काञ्चीनूपुरशब्देन सुप्तोऽसौ प्रतिबुध्यते। अथ सन्ध्यावटे रम्ये ब्रह्मचारी जितेन्द्रियः। उपासीत शुचिः सन्ध्यां ब्रह्मलोकमवाप्नुयात्। कोटितीर्थं समासाद्य यस्तु प्राणान् परित्यजेत्। कोटिवर्षसहस्राणि स्वर्गलोके महीयते। ततः स्वर्गात् परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः। सुवर्णगणिसुक्षात्रे कुले जायेत रूपवान्। ततो भानोरथौ गत्वा वासुकेरुत्तरेण तु। दशाश्वमेधिकं नाम तत्र तीर्थं परं भवेत्। कृत्वाभिषेकन्तु नरो ह्यश्वमेधं फलं लभेत्। धनाढ्यो रूपवान् दक्षो दाता भवति धार्मिकः। चतुर्वेदिषु यत् पुण्यं सत्यवादिषु यत्फलम्। अहिंसायाश्च यो धर्मो गङ्गायामेव तत् फलम्। तथैव मानसं नाम गङ्गाया दक्षिणे तटे। त्रिरात्रमुषितः स्नात्वा सर्वान् कामानवाप्नुयात्। पृथिव्या आसमुद्रायां यत्फलं प्रतिभवेत्। षष्टितीर्थसहस्राणि षष्टितीर्थशतानि च। माघे मासि समिष्यन्ति गङ्गायमुनसङ्गमम्। गवां शतसहस्रस्य सम्यगुद्दत्तस्य यत् फलम्। प्रयागे माघमासे वै त्र्यहं स्नातस्य तत् फलम्। गङ्गायमुनयोर्मध्ये योऽग्नौ स्वाङ्गं परित्यजेत्। अहीनाङ्गोऽपरोगश्च पञ्चेन्द्रियसमन्वितः। यावन्ति रोमकूपाणि तस्याङ्गेषु च धीमतः। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। जलप्रवेशं यः कुर्यात् सङ्गमे लोकविश्रुते। राहुमुक्तो यथा सोमो विमुक्तः सर्वपातकैः। सोमलोकमवाप्नोति सोमेन सह मोदते। षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च। स्वर्गलोकमवाप्नोति ऋषिगन्धर्वसेवितः। परिभ्रष्टश्च राजेन्द्र! सम्भवे जायते कुले। अधःशिरास्तु यो ज्वालामूर्ध्वपादः पिबेन्नरः। शतं वर्षसहस्राणां स्वर्गलोके महीयते। परिभ्रष्टश्च राजेन्द्र! अग्निहोत्री भवेन्नरः। यस्तु स्वदेहं कर्त्तित्वा शकुनिभ्यः प्रयच्छति। विल्वमेरुपमुक्तस्य शृणु तस्यापि यत् फलम्। शतं वर्षसहस्राणि सोमलोके महीयते। तस्मादपि परिभ्रष्टो राजा भवति धार्मिकः। यमुने चोत्तरे कूले प्रयागस्य च दक्षिणे। ऋणमोचनकं नाम तत्तीर्थं परमं स्मृतम्। एकरात्रोषितः स्नात्वा ऋणैः सर्वैर्विमुच्यते। अश्वमेधफलं तस्मात् स्नातस्तु पदे पदे। पुरुषांस्तारयेद्राजन्! दश पूर्वान् दशापरान्। अतीतान् पुरुषान् सप्त भविष्यांश्च चतुर्दश। मरुत्तारयते सर्वान् यस्तु प्राणान् परित्यजेत्। अन्धधामाः पुरुषाः पापोपहतचेतसः। न प्राप्नुवन्ति तत् स्थानं प्रयागे देवरक्षितम्। अज्ञानेन तु यस्येह तीर्थयात्रोदिकं भवेत्। सर्वकामसमृद्धन्तु स्वर्गलोके महीयते। अग्नितीर्थमतिख्यातं यमुनादक्षिणे तटे। उत्तरेण तु वक्ष्यामि आदित्यस्य महात्मनः। तीर्थं निरुदकं नाम यत्र देवाः सवासवाः। उपासते सदा सन्ध्यां नित्यकालं युधिष्ठिर!। गङ्गा च यमुना चैव उभे तत्सङ्गमे स्मृते। केवलं ज्येष्ठभावेन गङ्गा सर्वत्र पूज्यते। नैमिषं पुष्करञ्चैव गोमती सिन्धुसागरम्। मया च हेतुकञ्चैव गङ्गासागरमेव च। एते चान्ये च बहवो ये च पुण्याः शिलोच्चयाः। दश कोटिसहस्राणि षष्टिकोट्यस्तथा पराः। प्रयागे संस्थिता नित्यमेवमाह मनीषिणः। कुरुक्षेत्रसमा गङ्गा यत्र तत्रावगाहिता। तस्माद्दशगुणा प्रोक्ता यत्र विन्ध्येन सङ्गता। तस्माच्छतगुणा प्रोक्ता काश्यासुत्तरवाहिनी। काश्याः शतगुणा प्रोक्ता गङ्गायमनसङ्गमे। सहस्रगुणिता चापि भवेत् पश्चिमवाहिनी। सा राजन्! दर्शनादेव ब्रह्महत्यापहारिणी। पश्चिमाभिमुखी गङ्गा कालिन्द्या सह सङ्गता। हन्ति जन्मकृतं पापं सा माघे नृप! दुर्लभा। अमृतं कथ्यते राजन्! सा वेणी परिकीर्त्तिता। तस्यां माघे सकृत्स्नात्वा देवानामपि दुर्लभम्। षष्टितीर्थसहस्राणि षष्टितीर्थशतानि च। माघे मासि समिष्यन्ति गङ्गायमनसङ्गमम्। ब्रह्मविष्णुमहादेवरुद्रादित्यमरुद्गणाः। गन्धर्वा लोकपालाश्च यक्षकिन्नरगुह्यकाः। अग्निमादिगुणैः सिद्धा ये चान्ये तत्त्वदर्शिनः। ब्रह्माणी पार्वती लक्ष्मीः शची मेधावती रतिः। सर्वास्ता देवपत्न्यश्च तथा नागाङ्गना ह्यपि। घृताची मेनका रम्भा सर्वज्ञी च तिलोत्तमा। अप्सरोगणाश्च तद्वत् पितृगणाश्च ये। स्नातुमायान्ति ते सर्वे माघे वेणां नराधिप!। कृते युगे स्वर्गदेशः कलौ प्रच्छन्नरूपिणः। सर्वतीर्थानि क्षेत्राणि पापिनां सङ्गदोषतः। भवन्ति शुक्लवर्णानि प्रयागे माघमज्जनात्। स्वर्गभारसहस्रेण तुलायां रविसूनुजे। यत् फलं लभते माघ वेण्यां तच्च दिने दिने। यत्तीर्थतपोभिश्च न तत् प्राप्नोति मानवः। यत् फलं समवाप्नोति वेण्यां स्नानाच्च संशयः। प्रयागे माघमासे तु यस्त्र्यहं स्नाति मानवः। पापं त्यक्त्वा दिवं याति जीर्णं त्वचमिवोरगः। प्रयागे माघमासे तु त्र्यहं स्नातस्य यद्भवेत्।

वाश्वमेधसहस्रेण तत् फलं लभते भुवि। तत्प्रच्छन्नफलं माघे पुरा काञ्चनमालिने। राज्ञसाय ददौ भूप! तेन मुक्तः सपातकात्। योगाभ्यासेन यत् पुण्यं संवत्सरशतेन च। गवां कोटिप्रदानस्य सम्यग्दत्तस्य यत् फलम्। प्रयागे माघमासे तु तत्प्रच्छं स्नातस्य तत् फलम्। किं गयापिण्डदानेन काश्यां वा मरणेन किम्। किं कुरुक्षेत्रदानेन प्रयागे वपनं यदि। प्रयागे वपनं कृत्वा गयायां पिण्डपातनम्। दानं दद्यात् कुरुक्षेत्रे वाराणस्यां तनुं त्यजेत्। सितासितेषु ये स्नान्ति माघे मासि युधिष्ठिर!। न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि। स्वल्पं स्वल्पतरं पापं यद्वा यस्य नराधिप!। प्रयागं स्मरमाणस्य सर्वमायाति संक्षयम्। दर्शनात्तस्य तीर्थस्य नामसंकीर्त्तनादपि। मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते। प्रयागस्य प्रवेशात्तु पापं नश्यति तत्क्षणात्। कीर्त्तनान्मुच्यते पापाद्दृष्ट्वा भद्राणि पश्यति। अवगाह्य च पीत्वा च पुनात्यासप्तमं कुलम्। गङ्गायमुनयोर्मध्ये स्नातो मुच्येत किल्बिषात्। मनसा चिन्तितान् कामांस्तांस्तान् प्राप्नोति पुष्कलान्। प्रयागन्तु ततो गत्वा सर्वदेवाभिरक्षितम्। ब्रह्मचारी भवेन्मासं पितॄन् देवांश्च तर्पयेत्। ईप्सितान् लभते कामान् यत्र कुत्रापि जायते। तत्राभिषेकं यः कुर्य्यात् सङ्गमे संयितव्रतः। स प्राप्नोति फलं तुल्यं राजसूयाश्वमेधयोः। पञ्चयोजनविस्तीर्णं प्रयागस्य च मण्डलम्। प्रवेशाद्दुष्यते भूमौ तु अश्वमेधः पदे पदे। प्रयागमनुगच्छेद्वा वसते वापि यो नरः। सर्वपापविशुद्धात्मा विष्णुलोके महीयते। मकरस्थे रवौ माघे गोविन्दाच्युत! माधव!। स्नानेनानेन मे देव! यथोक्तफलदो भव। तत्र दानं प्रदातव्यं यथाविभवविस्तरम्। तेन तीर्थफलञ्चैव वर्द्धते नात्र संशयः। स्वर्गे तिष्ठति राजेन्द्र! यावदाहूतसंप्लवम्। योजनानां सहस्रेषु गङ्गां यः स्मरते नरः। अपि दुष्कृतकर्माऽपि लभते परमां गतिम्। स्नातास्तु ये प्रकारभास्करोदये तीर्थे प्रयागे सुरसिन्धुसङ्गमे। तेषां गृहद्वारमलङ्करोति भद्रावती कुञ्जरकर्णताडिता" मत्स्यपु०।

तत्र मुण्डनविधिर्यथा "गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरौ मृते। आधाने सोमपाने च वपनं सप्तसु स्मृतम्" इति स्मृतिसमुच्चयलिखितवचनं प्रयागावच्छिन्नगङ्गाया विधायकम्। भास्करक्षेत्रं प्रयागः अपि च प्रयागमधिकृत्य "केशानां यावती संख्या छिन्नानां जाह्नवीजले। तावद्वर्षसहस्राणि स्वर्गलोके महीयते"। प्रयागे स्त्रीणामपि मुण्डनं न तु केशानां ह्यङ्गुलच्छेदनमात्रं यथा "केशमूलसमाश्रित्य सर्वपापानि देहिनाम्। तिष्ठन्ति तीर्थस्नानेन तस्मात्तान्यत्र वापयेत्। प्रयागे मुण्डनाकरणे दोषोऽपि "गङ्गायां भास्करक्षेत्रे मुण्डनं यो न कारयेत्। स कोटिकुलसंयुक्तः श्वाकल्पं रौरवे वसेत्" इति प्रा०त०।

प्रयागभय पु० प्रयागात् प्रस्थानकर्त्तृजनात् विभेति स्वपदच्युतिशङ्कया भी-अच्। इन्द्रे शब्दमाला।

प्रयागसेतु पु० त्रिस्थलीसेतुग्रन्थांशे प्रयागमाहात्म्यादिप्रतिपादके ग्रन्थे।

प्रयाज पु०प्र+यज-घञ् यज्ञाङ्गत्वात् न कृत्यम्। दर्शपौर्णमासाद्यङ्गे यागभेदे। प्रयाजाश्च यथा "समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीत्येवं रूपाः सुयुक्ताः। "पञ्च प्रयाजान्" कात्या० श्रौ०३।२।१।१७। श्वापस्तम्बोऽपि "पञ्च प्रयाजान् प्राचः प्रतिदिशं वा, समिधः पुरस्तात्, तनूनपातं दक्षिणतः, इडः पश्चात्, बर्हिरुत्तरतः, स्वाहाकारं मध्ये" तत्कर्मस्थानमाह। कर्मभेदे तेषां मध्ये कस्यचिदाहुत्या षट्सप्तनवैकादशसंख्याऽपि कात्या० श्रौ० उक्ता दशग्रा। विस्तरभयात् नोक्ता। प्रयाजादयश्चारादुपकारकाः यथोक्तं लौकाक्षि० "द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म त्वारादुपकारकम् यथा प्रयाजादि। चारादुपकारकञ्च परमापूर्वोत्पत्तावेवोपयुज्यते। सन्निपत्योपकारकन्तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपेऽप्युपयुज्यते। इदमेव धात्वर्थिकर्मेत्युच्यते"।

प्रयाजवत् पु० प्रयाज+अस्त्यर्थे मतुप् मस्य वः। प्रयाजरूपकर्मभेदपञ्चकयुते प्रधानयागे दर्शादौ।

प्रयाण न० प्र+या-भावे ल्युट्। प्रस्थाने पुरादितो बहिर्गमने हेमच०। राज्ञां प्रयाणे वर्णनीयपदार्थाः कविकल्पलतायामुक्ता यथा "भेरीशब्दः भूमिकम्पः सैन्यधूलिप्रसरणं करभः वृषः (द्रव्याहरणार्थं) ध्वजः क्रयं वणिक् शकटमित्यादयः। स्वार्थे क। तत्रार्थे हेमच०।

प्रयात त्रि० प्र+या-कर्त्तरि क्त। १प्रकर्षेण गन्तरि कर्मणि क्त। २प्रयासेनप्राप्ते ३भृगौ उच्चदेशे ४सौम्यिके च पु० हेम०

प्रयाम पु०प्र+यम-घञ्। महार्घ्यतावशात् धान्यादौ १जनानामादरातिशये अमरः। २क्रयदेये हलायुधे ३मूल्याधिक्यपरिच्छेदने भरतः।

प्रयास पु० प्र+यस-भावे घञ्। १प्रयत्ने २परिश्रमे ३क्लेशे च

हैमच०। प्रयस्यतेऽनेन करणे घञ्। ४अविद्यादिषु पञ्चसु क्लेशदायकेषु। [युते ऋ० ८।१६।३७

प्रयियु त्रि०प्र+या-वा०कु द्वित्वे अभ्यासस्यात इत्त्वम्। प्रयाण

प्रयुक्त त्रि०प्र+युज-क्त। १प्रकर्षेण संयोगयुते २प्रेरिते ३प्रयोज्ये परम्परया कार्ये च। तस्य भावः प्रयुक्तत्व तद्भावे न०। स च स्वरूपसम्बन्धभेदः कारणाभावेन कार्याभाव इत्यादिप्रतीतिसिद्धः गौ०स्व०।

तदुक्तं गौ०स्व० १।१।२। दण्डी प्रयोज्यत्वं प्रयोजकत्वं वा पञ्चम्यर्थः दण्डाभावात् घटाभाव इतिवत् स्वरूपसम्बन्धविशेष एव तत्"।

प्रयुक्ति स्त्री प्र+युज-भावे क्तिन्। १प्रयोगे २शब्दोच्चारणभेदे "कृष्णस्य राजमातङ्गा इति न स्युः प्रयुक्तयः" व्या० कारिका ३प्रेरणे प्रा०स०। ४प्रकृष्टायां युक्तौ च।

प्रयुत न० १दशलक्षसंख्यायां २तत्संख्याते च "लक्षप्रयुतकोट्यः" क्रमशः इति लीला०। २प्रकर्षेण युते त्रि०।

प्रयुति स्त्री प्र+यु-भावे क्तिन्। १प्रकर्षेण योगे २प्रयोगे ऋ० १०।२७।१२

प्रयुतेश्वर पु० तीर्थभेदे स्कन्दपु०।

प्रयोक्तृ त्रि० प्र+युज-तृच्। १प्रयोगकर्त्तरि २क्षणदानादौ धनप्रयोगकर्त्तरि उत्तमर्णे ३प्रयोजकमात्रे च अमरः।

प्रयोग पु० प्र+युज-भावकर्मकरणेषु यथायथं घञ् कुत्वम्। १अनुष्ठाने २शब्दादीनामुच्चारणभेदे ३वशीकरणाद्युपाये कार्मणे कर्मणि। ४घोटके च मेदि०। प्रयोगैर्निर्वृत्तः ठञ्। आनुप्रयोगिक प्रयोगसाध्ये त्रि० स्त्रियां ङीप्। तत्र वाक्योच्चारणं च अनुमानाङ्गपक्षावयववाक्योच्चारणं यथा "अत्रायं प्रयोगः पर्वतो वह्निमान् धूमादित्यादि" यथायोगं समभिव्याहृतत्वेनोच्चारणं प्रयोग इति याज्ञिकाः। यज्ञादिक्रियाकलापेतिकर्त्तव्यताबोधकानां मन्त्राणां समुच्चयप्रतिपादके ब्राह्मणपरपर्याये ग्रन्थे इति याज्ञिकाः। भूतग्रहादेरुच्चाटनादिसाधने मन्त्रोच्चारणभेदे तान्त्रिकाः। ५शस्त्रादिमोचने योद्धारः। ६नायकयोर्मेलने क्रियाभेदे इत्यालङ्कारिकाः।

प्रयोगविधि पु०प्रयोगज्ञापकोविधिः ष०त०। प्रयोगस्याविलम्बज्ञापके विधिभेदे तल्लक्षणादि लौगाक्षि० उक्तं यथा "प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। स च साङ्गवाक्यैकवाक्यतापन्नः प्रधानविधिरेव। स हि साङ्गधानमनुष्ठापयन् विलम्बे प्रमाणाभावाद्विलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते। न च तद्विलम्बेऽपि प्रमाणाभाव इति वाच्यं विलम्बे ह्यङ्गप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तिः विलम्बेन क्रियमाणयोः पदार्थयोः इदमनेन सह कृतमिति साहित्यव्यवहाराभावात्। स चाविलम्बो नियते क्रमे आश्रियमाणे भवति। अन्यथा हि किमेतदनन्तरमेतत् कर्त्तव्यमेतदनन्तरं वेति प्रयोगविच्छेदापत्तेः। अतः प्रयोगविधिरेव स्वविषेय प्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि पदार्थविशेषण तया विधत्ते। अतएवाङ्गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्षणम्। तत्र क्रमोनाम विततिविशेषः पौर्वापर्यरूपो वा। तत्र षट् प्रमाणानि। श्रुत्यर्थपठनस्थानमुख्यप्रवृत्त्याख्यानि। क्रमसन्नायकहेतवश्च क्रमभङ्गे २२६० पृष्ठादावुक्ताः।

प्रयोगातिशय पु० सा०द० नाटकाङ्गप्रस्तावनाभेदे "यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते। तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा"। यथा कुन्दमालायाम् "नेपथ्ये इतोऽवतरत्वार्या। सूत्रधारः। कोऽयं खलु आर्याङ्गालेन साहायकं मे सम्पादयति। विलोक्य। कष्टमतिकरुणं वर्त्तते। लङ्केश्वरस्य भवने सुचिरं स्थितेति रामेण लोकपरिवादभयाकुलेन। निर्वासितां जनपदादपि गर्भगुर्वीं सीतां वनाय परिकर्षति लक्ष्मणोऽद्यम्"। अत्र नृत्यप्रयोगार्थं स्वभार्याङ्गानमिच्छता सूत्रधारेण सीतां वनाय परिकर्षति लक्ष्मणोऽयमिति सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयान एव प्रयोगः प्रयोजितः"।

प्रयोगार्थ पु०प्रयोगस्यार्थम् "अर्थेनसह नित्यसमासोविभक्तेश्च लोपश्च" वार्त्ति०स०प्रयोगोऽर्थः प्रयोजनमस्य वा। प्रधानप्रयोगानुष्ठानानुकूले व्यापारभेदे प्रत्युत्क्रमे अमरः।

प्रयोगिन् त्रि० प्र+युज-णिनि। प्रयोगकर्त्तरि।

प्रयोग्य त्रि०प्रयुज्यते प्रयुज-कर्मणि यत्। १प्रयोज्ये २अश्वे च "यथा प्रयोग्य आचरणे(रथे)नियुक्तः" का०श्रौ०भाष्यम्।

प्रयोजक त्रि०कार्य्यादौ भृत्यादीन् प्रयुनक्ति प्र+युज-ण्वुल्। निकृष्टस्य भृत्यादेः १प्रेरके व्याकरणोक्ते हेतुसंज्ञे २कर्त्तरि च। "तत्प्रयोजकोहेतुश्च" पा० तस्य स्वतन्त्रसंज्ञा विहिता। प्रयोजकस्य हेतृत्वं भा०वि० निर्णीतं यथा "नरान्तरव्यापाराव्यवधानेन बधनिष्पादकः कर्त्ता, यः कर्त्तारं कारयति स प्रयोजकः। सोऽपि द्विविध एकः स्वतोऽप्रवृत्तं पदार्थं वेतनादिना बधार्थं प्रवर्त्तयति अपरः स्वतः प्रवृत्तमेव मन्त्रोपायोपदेशादिना प्रोत्साहयति"।

तस्य मूलञ्च व्यापत्तम्बवाक्यं यथा "प्रयोजयितरि अनुमन्तरि कर्त्तरि चेति सर्वे स्वर्गनरकफलभोक्तारो यो भूय आरभते तस्मिन् फले विशेषः"। तस्य भावः त्व प्रयोजकत्व न० तद्भावे तच्च स्वरूपसम्बन्धभेदः तन्निष्ठान्यथासिद्धिभिन्नान्यथासिद्धिशून्यत्वे सति कार्य्याव्यवहित पूर्ववर्त्तित्वम्"।

प्रयोजन न० प्रयुज्यतेऽनेन प्र+युज-करणे ल्युट्। यमर्थमधिकृत्य प्रवर्त्तते १तस्मिन् प्रवृत्त्यङ्गेच्छाविषये यमर्थमाप्तव्यं हातव्यं वा अवसाय तदाप्तिप्रहाणोपायमनुतिष्ठति प्रयोजन तद्वेदितव्यम्। प्रवृत्तिहेतुत्वादु इममर्थमाप्स्यामि हास्यामि वेति व्यवसायोऽर्थस्याधिकारः। एवं व्यवसीयमानोऽर्थोऽधिक्रियते इति" वात्स्या० १।१।२४। करणे ल्युट्। २हेतौ। कर्मणि ल्युट्। ३कार्य्ये च मेदि०। प्रयोजनञ्च द्विविधं मुख्य गौणं च। यत्र अन्येच्छानधीनेच्छाविषयत्वं मुख्यप्रयोजनत्वम् अन्येच्छाधीनेच्छाविषयत्वं गौणप्रयोजनत्वम्। तत्राद्यम् दुःखाभावः सुखञ्च द्वितीयं तदुपकारिभोजनादि। तस्य मुख्यप्रयोजनेच्छयैव जन्याया इच्छायाविषयत्वात् तथात्वम्। "येन प्रयुक्तः प्रवर्त्तते तत्प्रयोजनम्। यमर्थमभीप्सन् जिहासन् वा कर्मारभते तेनानेन सर्वे प्राणिनः सर्वाणि कर्माणि सर्वाश्च विद्याव्याप्ताः। तदाश्रयश्च न्यायः प्रवर्त्तते" वात्स्या० १।१।१

प्रयोज्य त्रि० प्र+युज-ण्यत्। प्रयोक्तुं शक्ये १भृत्यादौ २मूलधने क्ली० "प्रयोज्यस्यास्तु कर्त्तृत्वं गत्यादेर्विधितोचिता" इत्युक्ते ३णिजन्तधातुप्रकृत्यर्थकर्त्तरि च। तस्य भावः त्व प्रयोज्यत्व स्वरूपसम्बन्धभेदे न० प्रयुक्तयत्वे दृश्यम्।

प्रस्थ अव्य० प्रगतो रथो यत्र तिष्ठद्गु० अव्ययी०। प्रगतरथयुक्ते देशे। [ऋ० १।१०१।१५।

प्ररिक्वन् त्रि० प्र+रिच-ल्युनिप्। प्रकर्षेण विरेचनकर्त्तरि

प्ररुज त्रि० प्र+रुज-क। १प्रकृष्टरोगकारके २दैवसैन्याधिपभेदे ए० भा० आ० २२अ० ३राक्षसभेदे पु० भा० व० २८४अ०।

प्ररूह त्रि० प्र+रुह-क। प्ररोहणकर्त्तरि अङ्कुरादौ

प्ररूढ त्रि० प्र+रुह-क्त। १प्ररोहणकर्त्तरि २संजाते वृक्षादौ ३वृद्धमूले च ४जटरे न० मेदि०। ५जाते ६प्रबुद्धे त्रि० शब्दरत्ना०।

प्ररोचन न० प्र+रुच-णिच्-भावे ल्युट्। १रुचिसम्पादने यथाऽश्ववादादीनां विश्वर्यानुष्ठाने प्ररोचनार्थं प्रवृत्तिः। यच्च प्ररोचना तत्रार्थे स्त्री। सा च २प्रस्तावनाङ्गभेदे।

"तस्याः प्ररोचना वीथी तथा प्रहसना मुखे। अङ्गान्यन्योन्यमुखीकारः प्रशंसातः प्ररोचना" सा० द० यथा "श्रीहर्षोनिपुणः कविरित्यादि रत्नावल्याम्। ३नाटकाङ्गविमर्शाङ्गभेदे स्त्री "प्ररोचना विमर्शे स्यात्" विमर्शाङ्गोपक्रमे "प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी" इति तत्र लक्षिता यथा वेणीसंहारे पाञ्चालकः अहं देवेन चक्रपाणिना सहित इत्युपक्रमे कृतं सन्देहेन पूर्व्यन्तां सलिलेनेत्यादि।

प्ररोह पु० प्र+रुह-अच्। १अङ्कुरे "लक्षप्ररोह इव सौधतलं विभेद" इति रघुः। २आरोहे च हेमच०। भावे घञ्। ३वृक्षपत्तौ पु०। भावे ल्युट्। प्ररोहण तत्पत्तौ न०

प्रलपन न० प्र+लप-भावे ल्युट्। १प्रलापे २अनर्थकवाक्ये सा० द० १८८ कारिकायां दृश्यम्। भावे क्त। प्रलपित तत्रार्थे न०। "प्रलपितमिदं केनापि" मिता० काश्यते

प्रलम्ब त्रि० प्रलम्बते प्र+लम्ब-अच्। १प्रलम्बमाने २वनुपुत्रे असुरभेदे पु० अग्निपु०। ३वृक्षपुत्रे (शमी) ४पयोधरे ५लताङ्कुरे ६गाधायां ७हारभेदे मेदि०। भावे घञ्। ८प्रलम्बने

प्रलम्बघ्न पु० प्रलम्बमसुरं हन्ति हन-क। १बलरामे अमरः तेन तस्य हननकथा हरिवं० ७१अ० दृश्या। प्रलम्बभिदादयोऽप्यत्र।

प्रलम्बाण्ड पु० प्रलम्बः अण्डोऽस्य। दीर्घाण्डकोषयुते हेमच०

प्रलम्भ पु० प्र+लभ-घञ् सुम्। प्रकर्षेण लाभे। भावे ल्युट्। प्रलम्भन तत्रार्थे भाग० ५।२५।११।

प्रलय पु० प्रलीयतेऽस्मिन् प्र+ली-आधारे अच्। भूतादिलयाधारे कालभेदे स च चतुर्विधः नित्यनैमित्तिकप्राकृतात्यन्तिकभेदात् यथोक्तं कूर्मपु० ४२।४३ अ०

"कूर्म उवाच-नित्यं नैमित्तिकञ्चैव प्राकृतात्यन्तिकौ तथा। चतुर्धायं पुराणेऽस्मिन् प्रोच्यते प्रतिसञ्चरः"। नित्यो यथा "योऽयं संदृश्यते नूनं नित्यं लोके क्षयन्विह। नित्यं संकीर्त्यते नाम्ना मुनिभिः प्रतिसञ्चरः" नैमित्तिको यथा "ब्राह्मो नैमित्तिको नाम कल्पान्ते यो भविष्यति। त्रैलोक्यस्यास्य कार्यतः प्रतिसर्गो मनीषिभिः" प्राकृतो यथा "महदाद्यं विशेषान्तं यदा संयाति संक्षयम्। प्राकृतः प्रतिसर्गोऽयं प्रोच्यते कालचिन्तकैः" आत्यन्तिको यथा "ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि। प्रलयः प्रतिसर्गोऽयं कालचिन्ता परैर्हि जैः। आत्यन्तिकश्च कथितः प्रलयो लयसाधनः"। नैमित्तिकप्रलयविस्तारो यथा तत्रैव "नैमित्तिकमिदानीं

कीर्तयिष्ये समासतः। चतुर्युगसहस्रान्ते संप्राप्ते प्रतिसञ्चरे। आत्मसंस्थाः प्रजाः कर्तुं प्रतिपेदे प्रजापतिः। ततोऽभवन्महादृष्टिस्तीव्रा सा शतवार्षिकी। भूतक्षयकरी घोरा सर्वभूतभयङ्करी। ततो यान्यत्सारांणि शस्यानि पृथिवीतले। तानि चाग्ने प्रलीयन्ते भूमित्वमुपयान्ति च। सप्तरश्मिरथो भूत्वा वसुक्षिप्तः दिवाकरः। असह्यरश्मिर्भवति पिबन्सर्वोगमस्तिभिः। ततस्ते रश्मयः सप्त पिबन्त्यम्बु महार्णवे। तेनाहारेण ते स्थूला दीप्ताः सप्त भवन्ति हि। तस्य ते रश्मयः सप्त स्थूला भूत्वा चतुर्दिशम्। चतुर्लोकमिदं कृत्स्नं दहन्ति शिखिनो यथा। व्याप्नुवन्तश्च ते विप्रास्तूर्ध्वाधश्च रश्मिभिः। दीप्यन्ते भास्कराः सप्त दहन्तोऽग्निप्रतापिनः। ते स्थूला वह्निवत् दीप्ता बहुमाहुरश्मयः। खं समाहत्य तिष्ठन्ति निर्दहन्तो वसुन्धराम्। ततस्तेषां प्रतापेन दह्यमाना वसुन्धरा। सार्द्रनद्यर्णवद्वीपा निःस्नेहा समपद्यत। दीप्तामिः सप्ततामिश्च ज्वालाभिश्च समाहतः। अधश्चोर्द्धं च तिर्यक् च समाहत्य महाद्युतिः। स्थूर्याग्निना प्रदग्धानां संदग्धानां परस्परम्। एकत्वमुपजातानामेकज्वालो भवेत् प्रभुः। सर्वलोकप्रणाशश्च सोऽग्निर्भूतान्महाबलः। चतुर्लोकमिदं कृत्स्नं निर्दहत्यात्मतेजसा। ततः प्रलीने सर्वस्मिन् जङ्गमे स्थावरे तथा। निर्दग्धा निःसृणा भूमिः कूर्मपृष्ठे प्रकाशते। अम्बरीषमिवाभाति सर्वमापूरितं जगत्। सर्वमेव तदार्चिर्भिः पूर्णं जाज्वल्यते नभः। पाताले यानि तीर्थानि महोदधिगतानि तु। तत्र तानि प्रलीयन्ते भूमित्वमुपयान्ति वै। द्वीपांश्च पर्वतांश्चैव वर्षाण्यथ महोदधीन्। तान् सर्वान् भस्मसात्कृत्वा सप्तात्मा पावकः प्रभुः। समुद्रेभ्यो नदीभ्यश्च पातालेभ्यश्च सर्वशः। पिबन्नपः समिद्धोऽग्निः पृथिवीमाश्रितोऽज्वलत्। ततः संवर्तकः शैलानतिक्रम्य महांस्तथा। लोकान् दहति दीप्तात्मा रुद्रतेजोविजृम्भितः। स दग्ध्वा पृथिवीं देवो रसातलमशोषयत्। अधस्तात् पृथिवीं दग्ध्वा दिवमूर्ध्वं दहिष्यति। योजनानां शतानीह सहस्राण्ययुतानि च। उत्तिष्ठन्ति शिखास्तस्य वायुः संवर्तकस्य च। मन्वन्तरांश्च पिशाचांश्च सयक्षोरगराक्षसान्। तदा दहत्यसौ दीप्तः कालरुद्रप्रचोदितः। भूर्लोकञ्च भुवर्लोकं स्वर्लोकञ्च तथा महः। दहेद्येषं कालाग्निः कालो विश्वतनुः स्वयम्। व्युष्टेषु तेषु लोकेषु तिर्यगूर्ध्वमथाग्निना। तत् तेजः समनुप्राप्य कृत्स्नं जगदिदं पुनः। क्षयोल्कनिभं सर्वं तदेवैकं प्रकाशते। ततो गजकुलोच्चादाः स्तनितैः समलङ्कृताः। उत्तिष्ठन्ति तदा व्योम्नि घोराः संवर्तका घनाः। केचिन्नीलोत्पलश्यामाः केचित् क्षुद्रसन्निभाः। धूम्रवर्णास्तथा केचित्तथा पीताः पयोधराः। केचिद्भल्लाभवर्णाश्च स्थूलाः चारनिभास्तथा। भृङ्गकुन्दनिभाश्चान्ये जात्यञ्जननिभाः परे। मनःशिलानिभास्त्वन्ये कपोतसदृशाः परे। केचित् रुद्राक्षवर्णाभास्तथान्ये क्षीरसन्निभाः। तथा कर्बूरवर्णाभा भिन्नाञ्जननिभास्तथा। इन्द्रगोपनिभाः केचिद्धरितालनिभास्तथा। काकाण्डकनिभाः केचिदुत्तिष्ठन्ति घना दिवि। केचित् पर्वतसङ्काशाः केचिद्गजकुलोपमाः। कूटागारनिभाश्चान्ये केचिन्नीलकुलोद्वहाः। बहुरूपा घोररूपा घोरस्वरनिनादिनः। तदा जलधराः सर्वे पूरयन्ति नभस्तलम्। ततस्ते जलदा घोरा वारिणा भास्करात्मजाः। सप्तधा संवृतात्मानस्तमग्निं शमयन्त्युत। ततस्ते जलदा वर्षं वर्षन्तोऽहिमौषधवत्। सुघोरमग्निं सर्वं नाशयन्ति च पावकम्। प्रवृत्तेन तदात्यर्थमम्भसा पूर्यते किल। वह्निस्तेजोऽभिभूतत्वात्तदाग्निः प्रविशत्यपः। नष्टे चाग्नौ वर्षशतैः पयोदा जलसम्भवाः। प्लावयन्तोऽथ भुवनं महाजलपरिप्लवैः। धाराभिः पूरयन्तोर्वीं क्षोद्यमानाः स्वयम्भुवा। उद्यन्तः सलिलौघैश्च वेला इव महोदधेः। सार्द्रद्वीपा तथा पृथ्वी जलैः संप्लाव्यते भृशम्। आदित्यरश्मिभिः पीतं जलमम्बुषु तिष्ठति। पुनः पतति तद्भूमौ पूर्यन्ते तेन चार्णवाः। ततः समुद्राः स्वां वेलामतिक्रान्तास्तु कृत्स्नशः। पर्वताश्च विलीयन्ते महो चाप्सु निमज्जति। तस्मिन्नैकार्णवे घोरे नष्टे स्थावरजङ्गमे। योगनिद्रां समास्थाय शेते देवः प्रजापतिः। चतुर्युगसहस्रान्तं कल्पमाहुर्महर्षयः। वाराहो वर्तते कल्पो यस्य विस्तार ईरितः। अस्मिंस्तस्तथा कल्पा ब्रह्मविष्णुशिवात्मकाः। कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः। सात्त्विकेष्वथ कल्पेषु माहात्म्यमखिलं हरेः। राजसेषु शिवस्योक्तं राजसेषु प्रजापतेः। सोऽयं प्रवर्तते कल्पो वाराहः सात्त्विको मतः। अन्ये च सात्त्विकाः कल्पा अस्मिन्नेव परिग्रहः। ध्यानलब्धया ज्ञानं लब्ध्वा तेष्वेव योगिनः। आराध्य गिरिशं यत्नात् याति तत् परमं

यदम्। सोऽहं सत्त्वं समाधाय मायी मायामयं स्वयम्। एकार्णवे जगत्यस्मिन् योगनिद्रां व्रजामि तु। मां पश्यन्ति महात्मानः सुप्तं काले महर्षयः। जनलोके वर्त्तमाना-स्तपसा योगचक्षुषा। अहं पुराणपुरुषो भूर्भुवःप्रभवो विदुः। सहस्रचरणः श्रीमान् सहस्राक्षः सहस्रपात्। मन्त्रोऽग्निर्ब्राह्मणा गावः कुशाश्च समिधो ह्यहम्। प्रोक्षणी च स्रुवश्चैव सोमो हुतमयोऽस्म्यहम्। संवर्तको महानात्मा पवित्रं परमं यशः। वेदवेद्यः प्रभुर्गोप्ता गोपतिर्ब्रह्मणोसुखम्। अनन्तसारको योगी गति-र्मतिमतांवरः। हंसः प्राणोऽथ कपिलो विश्वमूर्त्तिः सनातनः। क्षेत्रज्ञः प्रकृतिः कालो जगद्बीजमयाव्रतम्। माता पिता महादेवो नान्यो ह्यन्यच्च विद्यते। आदित्य-वर्णो भुवनस्य गोप्ता नारायणः पुरुषो योगमूर्त्तिः। मां पश्यन्तो यतयो योगनिष्ठा ह्यात्मात्मानमस्तत्वं व्र जन्ति"। प्राकृतप्रलयविस्तारो यथा तत्रैव "कूर्म उवाच अतःपरं प्रवक्ष्यामि प्रतिसर्गमनुत्तमम्। प्राकृतं च समा-सेन शृणुध्वं गदतो मम। गते परार्द्धद्वितये काले लोक-प्रकालकः। कालाग्निर्भक्षयात् कर्त्तुं करोति निखिलं मतिम्। आत्मन्यात्मानमावेश्य भूत्वा देवो महेश्वरः। दहेदशेषं ब्रह्माण्डं सदेवासुरमानुषम्। तमाविशत्र महादेवो भगवान्नीललोहितः। करोति लोकसंहारं भीषणं लोकभाषितः। प्राविशत्र मण्डलं सौरं कृत्वा-ऽसौ बहुधा पुनः। निर्दहत्यखिलं लोकं सप्तसप्तिस्वरूप धृक्। स दग्ध्वा सकलं सत्त्वं मन्त्रं ब्रह्म शिरो महत्। देवतानां शरीरेषु क्षिपत्यखिलदाहकः। दग्धेष्वशेष-देहेषु देवी गिरिवरात्मजा। एका सा साक्षिणः सम्भो-स्तिष्ठते वैदिकी श्रुतिः। शिरःकपालैर्देवानां कृत स्रग्धरभूषणः। आदित्यचन्द्रादिगणैः पूरयन् व्योम-मण्डलम्। सहस्रहस्तचरणः सहस्रार्चिर्महाभुजः। दंष्ट्राकरालवदनः प्रदीप्तानललोचनः। त्रिशूली क्षत्ति-वसनो योगमैश्वरमास्थितः। पीत्वा तत् परमानन्दं प्रभूतममृतं स्वयम्। करोति ताण्डवं देवीमालोक्य परमेश्वरः। पीत्वा नृत्यामृतं देवी भर्तुः परममङ्गला। योगमाख्याय देवस्य देहमायाति शूलिनः। स त्यक्त्वा ताण्डवरसं स्वेच्छयैव पिनाकधृक्। याति स्वभावं भग-वान् दग्ध्वा ब्रह्माण्डमण्डलम्। संस्थितेष्वथ देवेषु ब्रह्मविष्णु पिनाकिषु। गुणैरनेकैः पृथिवी विलयं याति वारिषु। स वारितत्त्वं सगुणं ग्रसते हव्यवाहनः। तैजसं गुणसंयुक्तं वायौ संयाति संक्षयम्। आकाशे सगुणो वायुः प्रलयं याति सत्तमाः!। भूतादौ च तथा-ऽऽकाशं लीयते गुणसंयुतम्। इन्द्रियाणि च सर्वाणि तैजसे यान्ति संक्षयम्। वैकारिके देवगणाः प्रलयं यान्ति सत्तमाः!। वैकारिकस्तैजसश्च भूतादिस्थेति सत्तमाः!। त्रिविधोऽयमहङ्कारो महति प्रलयं व्रजेत्। महान्तमेभिः सहितं ब्रह्माणमसितौजसम्। अव्यक्तं जगतो योनिः संहरेदेकमव्ययम्। एवं संहृत्य भूतानि तत्त्वानि च महेश्वरः। नियोजयत्यथान्योन्यं प्रधानं पुरुषं परम्। प्रधानपुंसोरजयोरेष सञ्चार ईरितः। महेश्वरेच्छाजनितो न स्वयं विद्यते लयः। गुणसाम्यं तदव्यक्तं प्रकृतिः परिगीयते। प्रधानं जगतो योनि-र्मायातत्त्वमचेतनम्। कूटस्थश्चिन्मयो ह्यात्मा केवलः पञ्चविंशकः। गीयते मुनिभिः साक्षी महानेकः पिता-महः। एवं संहारकरणी शक्तिर्माहेश्वरी ध्रुवा। प्रधानाद्यं विशेषान्तं दहेद्रुद्र इति श्रुतिः। योगिना-मथ सर्वेषां ज्ञानविज्यस्तचेतसाम्। आत्यन्तिकश्चैव लयं विदधातीह शङ्करः"। आत्यन्तिकप्रलयविस्तारो यथा विष्णु पु० पराशर उवाच "आध्यात्मिकादि मैत्रेय ज्ञात्वा तापत्रयं बुधः। उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम्! आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा। शारीरो बहुभिर्भेदैर्भिद्यते श्रूयताञ्च सः। शिरोरोग-प्रतिश्यायज्वरशूलभगान्दरैः। गुल्मार्शःश्वयथुश्वासच्छर्दी-दिभिरनेकधा। तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः। भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि। कामक्रोध-भयद्वेषलोभमोहविषादजः। शोकासूयावमानेर्ष्यामात्-सर्य्यादिभवस्तथा। मानसोऽपि द्विजश्रेष्ठ! तापो भवति नैकधा। इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः। नृपशुपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः। सरीसृपा-द्यैश्च नृणां जन्यते चाधिभौतिकः। शीतोष्णवातवर्षाम्बु वैद्युतादिसमुद्भवः। तापो द्विजवरश्रेष्ठ! कथ्यते चाधि-दैविकः। तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितैः। गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः। निरस्ताति-शयाह्लादसुखभावैकलक्षणा। भेषजं भगवत्प्राप्तिरेका-न्तात्यन्तिकी मता। तस्मात् तत्प्राप्तये यत्नः कर्त्तव्यः पण्डितैर्नरैः। तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म चोक्तं महा-मुने!। आगमोत्थं विवेकोत्थं द्विधा ज्ञानं तथोच्यते। शब्दब्रह्मागमभवं परं ब्रह्म विवेकजम्। अधीत्य सम्य-

ज्ञानं दीपवच्चेन्द्रियोद्भवम्। यथा सूर्यस्तथा ज्ञानं यदुविप्रर्षे! विवेकजम्। मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम!। तदेतच्छ्रूयतामत्र साधु ते गदतो मम। द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति। द्वे विद्ये वेदितव्ये वै इति चाथर्वणी श्रुतिः। परया त्वक्षरप्राप्तिर्ऋग्वेदादिमयाऽपरा। यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम्। अनिर्देश्यमरूपञ्च पाणिपादाद्यसंयुतम्। विभुं सर्वगतं नित्यं भूतयोनिमकारणम्। व्याप्यव्याप्यं यतः सर्वं तं वै पश्यन्ति सूरयः। तद्ब्रह्म परमं ध्येयं मोक्षकाङ्क्षिणाम्। श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्। तदेव भगवद्वाच्यं स्वरूपं परमात्मनः। वाचको भगवच्छब्दस्तस्यादस्याचरात्मनः। एवं निगदितार्थस्य सतत्त्वं तस्य तत्त्वतः। ज्ञायते येन तज्ज्ञानं परमत्रयीमयम्। अशब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज!। पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः। शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते। मैत्रेय! भगवच्छब्दः सर्वकारणकारणे। सर्वाणि तत्र भूतानि वसन्ति परमात्मनि। भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः। खाण्डिक्यः जनकायाह पृष्टः केशिध्वजः पुरा। ज्ञानव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः। भूतेषु वसते सोऽन्तर्वसन्त्यत्र च तानि यत्। धाता विधाता जगतां वासुदेवस्ततः प्रभुः। स सर्वभूतप्रकृतिर्विकारगुणांश्च दोषांश्च सदा व्यतीतः। व्यतीतसर्वावरणाखिलात्मा तेनास्तृतं यद्भुवनान्तरालम्। समस्तकल्याणगुणात्मको हि स्वशक्तिलेशावृतभूतसर्गः। इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ। तेजोबलैश्वर्यमहावबोध स्ववीर्यशक्त्यादिगुणैकराशिः। परः पराणां सकलो न यत्र क्लेशादयः सन्ति परावरेशे। स ईश्वरो व्यष्टिसमष्टिरूपो व्यक्तस्वरूपः प्रकटस्वरूपः। सर्वेश्वरः सर्वदृक् सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः। स ज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम्। संदृश्यते चाप्यवगम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तम्" विष्णु पु०। "नारद उवाच। कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम्। दिनमेकं युगं ज्ञेयं तस्य या चैकसप्ततिः। मन्वन्तरन्तु तज्ज्ञेयं ते तु यत्र चतुर्दश। स कल्पो नाम वै कालस्तदन्ते प्रलयस्तु यः। सा ब्राह्मरात्री राजेन्द्र! यत्र शेतेऽम्बुजासनः। त्रयोलोकास्तदा राजन्! लीयन्ते तन्निमित्ततः। नैमित्तिको लयो नाम दैनन्दिन इतीर्यते। एवं दिनप्रमाणेन ब्रह्मणः शतवार्षिकम्। आयुः पूर्वं परार्द्धं तु परार्द्धं द्वे प्रकीर्त्तिते। द्विपरार्द्धे व्यतीते तु ब्रह्मणो जगदात्मनः। तदा प्रकृतयः सप्त प्रलयं यान्ति भूमिप! लयः प्राकृतिको ह्येष लीने ब्रह्मणि भूपते!। अण्डकोषोऽपि सकलः प्रलयं याति सर्वशः। पूर्वन्तु वह्निभिः प्रलयस्तस्य भूपते!। शतवर्षाणि भूमौ हि पर्जन्यो नैव वर्षति। दुर्भिक्षे निर्जले लोके प्रजाः सर्वाः क्षुधार्दिताः। परस्परं भक्ष्यमाणाः क्षयं यास्यन्ति भूमिप!। सप्तद्रे च धरण्याञ्च वृक्षेषु च लतासु च। देहे च यो रसस्तं हि रविर्हरति रश्मिभिः। ततः संवर्त्तको नाम ज्वालामाली हुताशनः। सङ्कर्षणमुखोत्पन्नो दहत्यनिलसारथिः। सर्वं ब्रह्माण्डभाण्डं वै तत्कालक्षोभगर्जितः। एवं दग्धं महाराज! वह्निभ्यां सप्तभिः। दग्ध्वा गोमयपिण्डाभं ब्रह्माण्डं सारवर्जितम्। प्रचण्डः पवनो राजंस्ततोवर्षशतं पुनः। संवर्त्तको नाम महान् ब्रह्माण्डं ग्रासविष्यति। ततो मेघा महाघोरा नानावर्णा भयंकराः। शतं वर्षाणि वर्षन्ति गर्जन्ति च महास्वनाः। एकोदकं ततो विश्वं निर्गुणं निर्विकारकम्। भूमेर्गन्धगुणं राजन्! ग्रसन्त्याप समन्ततः। गुणनाशात् क्षयं पृथ्वी प्रलयं प्राप्नुते तदा। तेजस्त्वपां रसगुणं सगुणं ग्रसते बलात्। ततः प्रलयमायान्ति राजन्नापोऽपि तत्क्षणात्। तेजस्तु ततो रूपं रसगन्धसमन्वितम्। वायुर्हरति चण्डात्मा, तेजः प्रलयमृच्छति। आकाशस्तु ततो वायोः स्पर्शं परगुणैः सह। समादत्ते महाराज! तस्मिंस्तु प्रलीयते। आकाशस्य गुणं शब्दं गुणैरन्यैः समन्वितम्। अहङ्कारः समादत्ते नभस्तस्मिन् प्रलीयते। तैजसेन्द्रियाणञ्च देवा वैकारिका तथा। अहङ्कारे प्रलीयन्ते जगदेतच्चराचरम्। तमोऽहङ्कारं भक्षयन्ति ततः सत्त्वादयो गुणाः। यस्ते तामसः महाराज! आद्या प्रकृतिरुच्यते। न तस्याः कालदोषेण परिणामो नरर्षभ!। आद्यन्तरहिता सा हि नित्यं कारणमव्ययम्। शक्तिर्भगवतः सा हि तटस्थपरमा च सा। इत्युक्ताः प्रलयो राजन्! विश्वस्यास्य महामते!। यथोत्पत्तिक्रमेणास्य व्युत्क्रमेण लयस्तथा" स च प्रलयो न्यायादिमते द्विविधः खण्डप्रलयो महा-

प्रलयश्च तत्र जन्यद्रव्यानधिकरणकालत्वं खण्डप्रलयत्वं जन्यभावानधिकरणकालत्वं महाप्रलयत्वं महाप्रलयश्च न प्रमाणसिद्ध इति नव्यनैयायिकाः। तत्र नैमित्तिकप्रलयकालश्च कल्पतुल्यः "यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्। यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते" इति मनुना हिरण्यगर्भस्य निद्रासमये तत्प्रलयस्योक्तेः "शर्वरी तस्य तावती" इति तत्कालस्य च कल्पतुल्यकालत्वश्रुतेश्च। यतदभिप्रायेण अमरे "प्रलयो नष्टचेष्टता" इत्युक्तम् नैमित्तिकप्रलयकाले सर्वभूतानां चेष्टाशून्यत्वात्। "प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिरोक्तितः" सा०द० उक्ते २सात्त्विकभावभेदे।

प्रलव पु० प्र+लू–भावे अप्। १प्रकर्षेण छेदने याथा० अन्तोदात्तताऽस्य। प्रलूयते। कर्मणि अप्। २खण्डभेदे २लेशे च कात्या० श्रौ० २६।१।१० (सुश्लक्ष्णप्रलवान्) सूक्ष्मलेशान्।

प्रलवित्र न० प्रलूयतेऽनेन प्र+लू+करणे इत्र। छेदनसाधने अस्त्रादौ याथा० अन्तोदात्ततास्य।

प्रलाप पु०प्र+लप–भावे घञ्। १अनर्थकवाक्ये २निष्प्रयोजने उन्मत्तादिवाक्ये च अमरः। ३रोगाणामुपसर्गभेदे "मूर्च्छा सांसक्त्योर्मोहः प्रलापो करणमिति ज्ञेये" सुश्रुते जयोपसर्गौक्तौ। [राजनि०।

प्रलापहन् पु० प्रलापं हन्ति हन–क्विप्। कुलत्थजातेऽङ्कुरे

प्रलापिन् त्रि० प्र+लप–णिनौ णिलुक् चिनुण्। प्रलपनशीले

प्रलीन त्रि० प्र+ली–कर्त्तरि क्त। १प्रलयं प्राप्ते २चेष्टाशून्ये च। तस्य भावः तल्। प्रलीनता चेष्टानाशे इन्द्रियनाशे च।

प्रलेप पु० प्र+लिप–भावे घञ्। व्रणादिशोधनार्थे द्रव्यविशेषेण लेपनविशेषे। सुश्रुते आलेपोपक्रमे "स त्रिविधः प्रलेपः प्रदेह आलेपश्चेति। तेषामन्तरं प्रलेपः शीतस्तनुरविशोषी विशोषी च। प्रदेहश्चूर्णः शीतो वा बहलोऽवहरविशोषी च। रक्तपित्तप्रसादनक्रतालेपः" इति आलेपनभेदलक्षणान्युक्त्वा तत्र द्रव्यभेदास्तत्रोक्ता इत्याः

प्रलेपक त्रि० प्र+लिप–ण्वुल्। १प्रलेपकर्त्तरि स्त्रियां टाप् कापि अत इत्वम् प्रलेपिका सञ्ज्ञा धर्म्यम् मत्वियत्रा० अन्। २प्रलेपिकाधर्म्ये त्रि०। सुश्रुतोक्ते २व्रणभेदे पु० "तथा प्रलेपको ज्ञेयः शोणितस्थं प्राक्प्रभञ्जनः। दुष्टिकृत्स्तनतो मन्दः सुकष्टो धातुशोषकृत्" प्रलेपकं कालबलाद्व कश्चकाधिक्येन वदन्ति तज्ज्ञाः" सुश्रुते तल्लक्षणाद्युक्तम्।

प्रलेह पु० प्रलिह्यतेऽसौ प्र+लिह–कर्मणि घञ्। व्यञ्जनभेदे (कोरमा) पाकराजेश्वरः।

प्रलोलुप त्रि० प्रा०स०। १अत्यन्तलोलुपे गरुडवंश्ये कुन्तिपुत्रे २पक्षिभेदे पु० मार्क०पु० ७अ०।

प्रवक त्रि०प्र+मतौ साधुकारित्वे द्योत्ये वुन्। प्रयोगतियुते तत्र साधुकारिणि तत्त्ववोधिनी।

प्रवक्तृ त्रि०प्रवक्ति प्र+वच–ट्वुच्। प्रकर्षेण वक्तरि १अर्थानुसन्धानपूर्वकवेदादिवाचके २तदर्थोपदेशके च मनुः ६।१ ८६ याज्ञ० २।३५।२

प्रवग पुंस्त्री० प्रवग+नस्य रः। खगे अमरटीका। एवं प्रवङ्ग प्रवङ्गभावपि रस्य लत्वे तत्रार्थे। सर्वत्र जातित्वात् स्त्रियां ङीप्।

प्रवचन न० प्रोच्यते प्र+वच–कर्मणि ल्युट्। १वेदादौ शास्त्रे भावे ल्युट्। २अर्थानुसन्धानपूर्वकपठने च "नायमात्मा प्रवचनेन लभ्यः" कठोप०। अस्य तिङः परस्य गोत्रा० कृत्सायामुदात्तता।

प्रवचनीय त्रि० प्र+वच–कर्मणि अनीयर्। प्रकर्षेण व्याख्यानेन १वाच्ये। "भव्य गेयेत्यादि" पा० कर्त्तरि अनीयर्। प्रवक्तरि कर्मप्रवचनीयाः तच्छब्दे दृश्यम्।

प्र(प्रा)वट पु०प्र+वा०वट–स्वार्थे अण् वा। यवे जटाधरः।

प्र(क)वण पु०प्र+व(क)ण–अच्। १चतुष्पथे अमरः २निम्नस्थाने ३उदरे ४नद्यै मेदिनिः। ५आयते ६प्रगुणे ७नम्रे शब्दर०। ८प्रसुते ९स्त्रिग्धे त्रि० विश्वः १०क्षीणे च त्रि० धरणिः। ११आसक्ते त्रि० हेमच०।

प्रवत् त्रि० प्रवणे याति या–का० डति। १प्रवणदेशे निम्नस्थाने गन्तरि ऋ०७।६०।४ अतोऽस्यर्थे मतुप मस्य वः तान्तत्वात् न पदत्वम्। प्रवत्वत् तद्युते त्रि०। ऋ० १।१८१।३भाष्यम्। स्त्रियां ङीप्। सोपसृष्टे धात्वर्थे वर्त्तमानात् सोपसर्गात् वति। २प्रकृष्टगमनादौ च।

प्रवत्स्यत्पतिका स्त्री प्रवत्स्यन्पतिर्यस्याः। यस्याः पतिः परदेशं गमिष्यति तादृश्यां स्त्रियां रसमञ्जरी। तस्या लक्षणभेदादिकमुक्तं यथा "यस्याः पतिरग्रिमक्षणे देशान्तरं यास्यत्येव सा प्रवत्स्यत्पतिका। अस्याश्चेष्टा काकुस्खलनत्वातरप्रेक्षणमसनविस्रोपदर्शननिर्वेदसन्तापमोहनिश्वासवाष्पादयः। सा च सुग्धामध्याप्रौढापरकीया धारखीभेदात् पञ्चविधा तदुदाहरणानि तत्र द्रष्टव्यानि।

प्रवद्यामन् त्रि० या–भावे वा० मनिन् प्रवत् प्रकृष्टगतियुक्तः यामा गतिर्यस्य। प्रकृष्टगमनेन शीघ्रयायिनि ऋ० १।१

१८।३ भाषायां दृश्यम्। तत्र टास्थाने "स्वपांसुलोपः" इत्यादिना पा० यात्। अतो नोपधालोप इति बोध्यम्।

प्रवयन न० प्र+वय–गतौ भावे ल्युट्। १प्रकर्षेण २गमने करणे ल्युट्। २प्रतोदे हेमच०। [२पुराणे निघण्टुः

प्रवयस् त्रि० प्रकृष्टं वयोऽस्य। १वृद्धे स्थविरे हेमच०।

प्रवया स्त्री प्र+वि–यत् "अव्ययप्रवये छन्दसि" पा०नि०। प्रकर्षेण गतियुतायां स्त्रियां स्त्रियामेवास्य निपातः पुंसि कर्मणि तु यत् प्रवेय इति सि०कौ०।

प्रवर पु० प्र+वृ–अप्। १यज्ञतौ २गोत्रे गोत्रप्रवर्तकऋषिनिव्यावर्त्तके ३ऋषिभेदे च। ४श्रेष्ठे त्रि० ५अगुरुचन्दने न०। मेदि०। गोत्रभेदे गोत्रप्रवर्तकऋषिनिगणाश्च आर्षशब्दे ८१४अ० दृश्याः। तदधिकं प्रवराध्यायादौ दृश्यम्।

प्रवरललित न० "यस्मोनः सो रोगः प्रवरललितं नाम वोध्यम्" वृ०र० टीकोक्ते षोडशाक्षरपादके छन्दोभेदे।

प्रवरवाहन पु० द्वि०व०। प्रवरं वाहनं ययोः। अश्विनीकुमारयोः हेमच०।

प्रवर्ग पु० प्रवृज्यतेऽसौ प्र+वृज–घञ्। १विष्णौ हरिवं० ४२ अ०। २प्रवर्ग्ये महावीरे हेमच०। तत्र प्रवर्ग्य इत्येव पाठो न्यायः।

प्रवर्ग्य पु० प्र+वृज–कर्मणि यत् कुत्वम्। १महावीरे तत्प्रकारः कात्या० श्रौ० २६अ० प्रवर्ग्याध्याये दृश्यम्। अस्त्यर्थे मतुप्। प्रवर्ग्यवत्। २तद्युते २यज्ञभेदे पु० शत०ब्रा० ३।४।४।

प्रवर्त्तक त्रि० प्रवर्तयति प्र+वृत–णिच्-ण्वुल्। प्रवृत्तिजनके "बलवदनिष्टानुबन्धीष्टसाधनत्वे सति कृतिसाध्यताविषयकं ज्ञानम् इष्टसाधनताविषयकं कृतिसाध्यताज्ञानं वा प्रवर्तकमिति जगदीशीयाः। यथा वा स्वविशेषवक्तृताप्रतिसन्धानजन्यं कार्य्यताज्ञानं प्रवर्तकमिति गुरवः। "चोदनेति क्रियायाः प्रवर्तकं वचनम्" चोदनासूत्रे शबरभाष्यम् "क्रियाया नियोक्तृ ज्ञानद्वारा प्रवर्तकं वाक्यं चोदनेत्यर्थः।

प्रवर्त्तना स्त्री प्र+वृत–णिच्-युच्। प्रवृत्तिजनकव्यापारे विध्यादौ "अस्ति प्रवर्तनारूपमनुरूपं चतुर्ष्वपि" इति भर्तृहरिः। भावे ल्युट् तत्रार्थे आरम्भे च न०।

प्रवलाकिन् पु० १मुञ्जके २चित्रमेखलके च विश्वः।

प्रवसु पु० दक्षिसप्तपुत्रे दुष्मन्तभ्रातरि नृपभेदे भा०आ०९४अ०।

प्रवह पु०प्र+वह–अच्। "यस्मात् ज्योतींषि वह्निमि प्रवहस्तेन कीर्त्तितः" उक्ते १वायुभेदे। भावे अप्। २नगराद्बहिर्गमने

प्रवहण न० प्र+वह–करणे ल्युट्। १मनुष्यवाह्ये २वस्त्राच्छादिते स्त्रीवाहने कर्णीरथे (महायान) अमरः।

प्रवह्लि स्त्री प्रवलह्लि-पृषो०अन्तस्यादिवर्णव्यत्ययश्च। पृक्केनिकायां भरतः वा ङीप् तत्रार्थे स्वार्थे क। तत्रार्थे अम०

प्रवा पु० प्रकर्षेण वाति गच्छति वा–किप्। अश्वे यजु०१५।६ वेददी०।

प्रवाच् त्रि० प्रकृष्टा वाक् यस्य। युक्तियुक्तवाक्यवक्तरि जटा०।

प्रवाणी स्त्री प्र+वे–ल्युट् ङीप्। १तन्तुवायशलाकायाम् (माकु) निष्क्रान्ता प्रवाणयाः निरा०स० गौणत्वे प्रवाणिशब्दस्य ह्रस्वे सम्भवति भरतेन यत् वाणिशब्दस्यापि ह्रस्वान्तत्वं कल्पितं तच्चिन्त्यम्।

प्रवात त्रि० प्रकृष्टो वातो यत्र। १सुखसेव्यवातयुक्तदेशादौ प्र+वा–क्त। २निम्ने प्रवणे च प्रवातैजस्शब्दे दृश्यम्।

प्रवाट त्रि० प्रकर्षेण वाति प्र+वा–अटच्। १प्रकृष्टगतियुते २प्राणे पु० "प्राणो वै प्रवाट्" शत०ब्रा० १।४३।३

प्रवातैजस् त्रि०प्रवातं प्रवणं तेज ओजो यस्य। प्रवाततेजस्वि निरु० ९।८ [लोकवाहे २परस्परकथोपकथने च।

प्रवाद पु०प्र+वद–घञ्। १परम्परागतवाक्ये लोकेषु २प्रसिद्धे

प्रवादिन् त्रि० प्र+वद–ताच्छील्ये णिनि। परस्परकथनकारके स्त्रियां ङीप्।

प्रवाह पु० प्र+वह–आच्छादने करणे घञ्। आच्छादने वस्त्रे विभाषेत्यनुवर्तमानात् अपि प्रवर तत्रार्थे सि०कौ०।

प्रवारण न०प्र+वृ–णिच्-ल्युट्। १काम्ये दाने २काम्यस्य उत्तमवस्तुनो दाने च अमरः। ३प्रकर्षेण वारणे मेदि०। ४महादाने त्रिका०तस्य उत्तमवस्तुनो दानरूपत्वात्तथात्वम्

प्रवास पु० प्रस्थितस्य वासः। स्वगृहात् प्रस्थितस्य भिन्नदेशे वासे चिरप्रवासगतस्य पुनर्गतस्य वार्त्ताद्यश्रवणे कालविशेषे तस्य प्रेतत्वावधारणोक्तं त्रि०त० "सन्देहे त्वाह यमः "गतस्य न भवेत् वार्त्ता यावत् द्वादशवार्षिकी। प्रेतावधारणन्तस्य कर्त्तव्यं सुतबान्धवैः। यन्मासि यद्दिवसे यस्यां तिथौ तन्नक्षत्रे तन्मासि तद्दिवसे तिथौ तत्क्रिया। दिनाद्याने कृष्णस्य आषाढस्याथ वा कृष्णः"। नि०सि० हेमाद्रौ मनुः "प्रोषितस्य तथा कालो गतस्य द्वादशाब्दिकः। प्राप्ते त्रयोदशे वर्षे प्रेतकार्य्याणि कारयेत्"। वृद्धयमः "यस्य न न श्रूयते वार्त्ता यावद्द्वादश वत्सरान्। [पुत्रकृ०] दाहेन तस्य श्राद्धावधारणा"। भविष्ये "पितरि प्रोषिते अस्य न वार्त्ता नैव चागमः। जीवं षष्ठ्यब्दमाद्यात् कृत्वा मृतप्रतिरूपकम्। कुर्य्यात्तस्य तु संस्कारं यथोक्तविधिना

ततः । तदादीन्येव दर्भाणि प्रेतकर्माणि कारयेत्" । शाद्धशब्दप्रतीत्या पिण्डभिन्नविषयेति मदनरत्ने उक्तम् । मत्स्यसूत्रादिकाले तु "तत्र पूर्ववयस्कस्य विंशत्यब्दोर्ध्वतः क्रिया । अर्वाक् षण्णवतेर्दातृ च मध्यमे वयसि स्मृता । शाद्धमाशतवरादूर्ध्वं शतरे वयसि स्मृता । चान्द्रायणत्रयं कृत्वा त्रिव्रतं कृच्छ्रमेव वा सुतैः । सुतैः प्रतिकृतिं दग्ध्वा कार्याः षोडशदिकाः क्रियाः" इत्युक्तम् । परावरः "देशान्तरगतो यस्तिष्ठेत्तिथिं नावगते यदि । तस्याहनी कृत्स्नमावास्या तस्या चैकादशी च वा । उदकं पिण्डदानं च तस्य सायं न कारयेत्" । इदं च सपिण्डने" प्रवासादानतेन सुतादेः शाद्धयोर्यं कृत्यपूर्वकम् पुत्रादयो विदुः यथा "विप्रोऽत्र शाद्धकृच्चतस्रश्चाभिवादनम् । शुश्रूषारेषु कुर्वीत यतां धर्ममनुस्मरन् । मातृश्वसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा । पत्नी तथा गुरुपत्नीत्य मातृवर्गो गुरुर्मातुश्च । भ्रातृभार्योपसंग्राह्या सवर्णाऽन्यत्वन्यपि । विप्रोऽत्र नूपसंग्राह्या शातिसम्बन्धि योषितः । पितुर्भगिन्यां मातुश्च न्यायस्थाश्च स्वसर्यपि । मातृवद्वृत्तिमातिष्ठेन्माता तास्यो गरीयसी" कौर्मपु० १३अ०

प्रवासन न० प्र+वस्-णिच्-भावे ल्युट् । १विदेशवासने "दीर्घप्रवासनपटोः कस्य वा कुलस्त्रियः" उत्तरचरितम् । २वधे अमरः । ३निर्वासने पुरात् बहिर्गमने ।

प्रवासिन् त्रि० प्र+वस-णिनि । १विदेशे वासिनि हेमच० । "प्रवासी सुखमाप्नोति" षट्पदाधिका । स्त्रियां ङीप् ।

प्रवास्य त्रि० प्र+वह-णिच्-कर्मणि यत् । पुरान्निर्वास्ये मनुः ८।२८४

प्रवाह पु० प्र+वह-घञ् । १प्रकर्षे २जलादिस्रोतसि मेदि० ३व्यवहारे विश्वः ४जलमात्रे नानार्थरत्नमा० । ५वहनतौ व्यापारे देशेन वा विच्छेदाभावे "प्रवाहरूपेणानादि"

प्रवाहक त्रि० प्र+वह-ण्वुल् । १प्रकर्षेण वोढरि २राजसे पुंस्त्री० मेदिनी ।

प्रवाहण पु० १क्षत्रिये ऋषिभेदे शत० ब्रा० १४।८।१। तस्यापत्यं युवा० ढक् पूर्वपदस्य वा वृद्धिः । प्रावाहणेय प्रवाहणेय तदपत्ये पुंस्त्री० ततोऽपत्ये इञ् प्रादहणेयि प्रवाहणेयि प्रवाहणेयस्यापत्ये पुंस्त्री० । प्रवाहयति प्र+वह-णिच्-ल्यु । २प्रवाहयितरि "विभुरसि प्रवाहण्यः" यजु० ५।२१

प्रवाहिका स्त्री प्र+वह-रोगाख्यायाम् ण्वुल् । अक्षणीरोगे अमरः अक्षणीशब्दे २७५२पृ० दृश्यम् । ततः अपनयने तसि । प्रवाहिकातः शुक्रं प्रवाहिकायाः प्रतीकारं कुर्वित्यर्थः सि० कौ० ।

प्रवाहिन् त्रि० प्र+वह-णिनि । १प्रवाहयुते त्रि० । प्रवाह+पृषोदरा० ईये इनि ङीप् । २प्रवाहिण्यां प्रवाहयुतदेशे स्त्री

प्रवाही स्त्री प्र+वह-णिच्-अच् गौरा० ङीष् । वालुकायां राजनि० ।

प्रवाह्य पु० प्रवाहे भवः यत् । १स्रोतसि मेदे यजु० १६।४१। प्र+वह-कर्मणि यत् । २प्रकर्षेण वाह्ये च । [अमरः

प्रविख्याति स्त्री प्र+वि+ख्या-भावे क्तिन् । अतिप्रसिद्धौ

प्रविदारण न० प्रविदार्यतेऽत्र प्र+वि+दृ-णिच्-आधारे ल्युट् । १मुखे अमरः । भावे ल्युट् । २व्यवदारणे मेदि० । कर्मणि ल्युट् । ३आकीर्णे त्रि० मेदि० । कर्तरि ल्यु ४प्रविदारणकारके त्रि० ।

प्रविरल न० प्रकृष्टं विरलं छिद्रमस्य । १पीलुवृक्षे शब्दच० । २प्रकृष्टच्छिद्रयुते त्रि० । [श्लेषयुते च अमरः ।

प्रविश्लेष त्रि० प्रकर्षेण विश्लेषो यस्य । १विधुरे २परस्परविश्लेषयुक्ते च अमरः ।

प्रविषा स्त्री प्रहतं विषं यया । अतिविषायाम् (आतइच्) अमरः ।

प्रविष्ट त्रि० प्र+विश-कर्तरि क्त । १प्राप्ते प्रवेशयुक्ते २प्रवेशादिकैर्विशयोगान्तरि स्त्री हरिवं० १६।५० ।

प्रवीण त्रि० वीणया प्रगायति प्र+वीणा+णिच्-अण् । १विशुद्धे वीणया गायकत्वे नैपुण्यप्रसिद्धेः तत्तुल्यनैपुण्यवत्यादावप्यस्मात् । औत्सर्ग्यतो मनोः २वृद्धभेदे पु० हरिवं० ७अ० ।

प्रवीर पु० मा०व० । १प्रकृष्टवीरे २सुभटे २७प्रशस्ते त्रि० अमरः ४कर्दमब्रह्मपुत्रभेदे पु० विष्णुपु० ५पूरोः पौत्र्यां भाय्यायां जाते पुत्रभेदे पु० भा० आ० ८४अ० । ऐक्ष्वाकस्य अयोध्याधिपस्य ६पुत्रभेदे पु० हरिवं० २२अ० । ७पुरुवंश्ये प्रसिद्धस्य पुत्रे ८यदुभेदे पु० हरिवं० २१अ० ।

प्रवीरमानु पु० राजयभेदे रामा० ६।२५ स० ।

प्रवृक्षणीय पु० प्र+वृक्ष-कर्मणि अनीयर् । १प्रवर्ग्ये २अग्नौ वीरे आत्मा० २६।७।१४ [वेददीपः ।

प्रवृत् न० प्रवृण्वन्ति भूतानि प्र+वृ-क्विप् । जले अमरः १५।८

प्रवृतहोम पु० होमभेदे कात्या० श्रौ० ८।८।१६८

प्रवृत्त त्रि० प्र+वृत-कर्तरि क्त । १जातप्रवृत्तिके प्रवृत्तियुते २आरब्धे च "प्रवृत्तमन्यथा कुर्यात् यदि कोऽपि कथञ्चन" ज्योतिष० । २प्रवृत्तिविषये धर्मभेदे । भावे क्त । ४प्रवृत्तौ न० ।

प्रवृत्तनाक न० "यदा रवेर्मीनयुगस्थितौ पूर्णं योभवति तत्प्रवृत्त-

कर्म" इ०र० उक्ते वैतालीयप्रकरणीये मात्राप्रवृत्तभेदे।

प्रवृत्तचक्र पु० प्रवृत्तं स्वाज्ञानुसारेण चक्रं राष्ट्रादि यस्य। राष्ट्रादिस्वप्रतिकृताज्ञे "प्रवृत्तचक्रतां चैव वाणिज्यं प्रभुतां तथा" याज्ञ० व्या० मिताक्षरा।

प्रवृत्ति स्त्री प्र+वृत-क्तिन्। १प्रयाणे २वार्त्तायाम् ३व्यवस्थादिदेशे मेदि० ४हस्तिमदे हेमच०। ५न्यायोक्ते चिकीर्षाकृतिसाध्यताज्ञानाधीने ६प्रयत्नभेदे च प्रयत्नशब्दे दृश्यम्। "चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा। उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं मतम्" भाषा०।

"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" गौत०सू० "एतस्मान्मिथ्याज्ञानादनुकूलेषु रागः प्रतिकूलेषु द्वेषः रागद्वेषाधिकाराज्ज्ञस्येषद्गुणसाक्षात्कारोद्भवादयो दोषा भवन्ति। दोषैः प्रयुक्तः शरीरेण मनसा वाचा यत्किञ्चिदनुपरोधपरपीडनसमर्थानि, मनसा परद्रोहं परद्रव्याभिध्यां नास्तिक्यबुद्धिं मैत्रं पापात्मिकाऽधर्माय अथ शुभा शरीरेण दानं परित्राणं परिचरणञ्च। वाचा सत्यं हितं प्रियं स्वाध्यायञ्चेति मनसा दयामस्पृहां श्रद्धानेति सेयं धर्माय। अत्र प्रवृत्तिसाधनौ धर्माधर्मौ प्रवृत्तिशब्देनोक्तौ। यथा अन्नसाधनाः प्राणाः। अन्नं वै प्राणिनः प्राणा इति। सेयं कृत्स्नस्याभिपूजितस्य च ज्ञानस्य कारणम्" भाष्यम्। "प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः" गौ० सू० "प्रवृत्तिदोषजनितोऽर्थः फलम्" गौ०सू० "प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम्" कणा०। "प्रत्यगात्मनीति स्वात्मनीत्यर्थः इच्छाद्वेषजनिते प्रवृत्तिनिवृत्ती प्रयत्नविशेषौ ताभ्याञ्च हिताहितप्राप्तिपरिहारफलके शरीरकर्म्मणी चेष्टालक्षणे जन्येते तथा च परशरीरे चेष्टां दृष्ट्वा इयं चेष्टा प्रयत्नजन्या चेष्टात्वात् मदीयचेष्टावत् स च प्रयत्न आत्मजन्य आत्मनिष्ठो वा प्रयत्नत्वात् मदीयप्रयत्नवदिति परात्मनोऽनुमानम्" उप०वृ०। "इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिः" गौ०सू०। "विहितकर्मण्यि रागनिबन्धना निषिद्धे कर्मणि हिंसादौ द्वेषनिबन्धना प्रवृत्तिः। तत्र रागनिबन्धना वाग्दादौ प्रवृत्तिर्धर्मं प्रसूते द्वेषनिबन्धना हिंसादौ प्रवृत्तिरधर्मम्। तावेतौ रागद्वेषौ संसारमनुवर्त्तयतः" वात्स्या०। प्रवृत्तिस्तु द्वयी। कारणरूपा कार्य्यरूपा च। तत्राद्या यत्नत्वजातिमती प्रत्यक्षसिद्धा। द्वितीया तु धर्माधर्मरूपा यागादेरगम्यागमनादेश्च चिरध्वस्तस्य व्यापारतया कर्मनाशाजलस्वर्गादेः प्रायश्चित्तादेश्च साध्यतया सिध्यतीति। (गौ०इ० ४।१) भट्टमते प्रवृत्तिर्द्वेधा। स्वेच्छाधीना परप्रेरणाजन्या। तत्राद्यायां प्रवर्त्तनायामनुपयोगोऽपि द्वितीयप्रवृत्तौ सा प्रयोजिका। यथा आचार्य्यप्रेरणयेदं करोमीति" दि०क०।

७शब्दानामर्थबोधनशक्तिभेदे "प्रवृत्तिराशीरुच्छब्दानां चरितार्था चतुष्टयी" कुमा०। दक्षस्वविषये इन्द्रियादीनां व्यापारे च। [भिक्षे २स्वरभेदे पु० त्रिका०।

प्रवृत्तिज्ञ त्रि०प्रवृत्तिं वृत्तान्तं जानाति ज्ञा-क। १वृत्तान्तज्ञे।

प्रवृत्तिनिमित्त न० ६त०। १शब्दानां बोधनाशक्तेर्निमित्ते शक्यतावच्छेदके। यथा घटशब्दस्य प्रवृत्तिनिमित्तं घटत्वमेवं शुक्लादिशब्दस्य शुक्लत्वं पाचकादेः पाकः देवदत्तादेः तत्तत्तद्व्यक्त्यादि। "सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च" काव्यप्र०।

प्रवृद्ध त्रि० प्र+वृध-क्त। १वृद्धियुक्ते २प्रौढे च हेमच०।

प्रवृद्धादि न० उत्तरपदस्यान्तोदात्ततानिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा "प्रवृद्ध प्रयुत अवरूढ अनवरूढ खड्गारूढ कविशस्तः आकृतिगणः"।

प्रवेक त्रि० प्र+विच-कर्मणि घञ्। प्रधाने अमरः।

प्रवेट पु० प्र+वी-ट। यवे त्रिका०।

प्रवेणि(णी) स्त्री प्र+वेण-इन् वा ङीप्। १गजस्कन्धस्थे कूपे चित्रकन्बले २वेण्यां जलादिप्रवाहे च मेदि०।

प्रवेल पु० प्र+वेल-अच्। पीतसुङ्गे (सोनासुग) हेमच०।

प्रवेश पु० प्र+विश-घञ्। अन्तर्गमने हेमच०।

प्रवेशक त्रि० प्रविशति प्र+विश-ण्वुल्। १मध्ये गन्तरि साहि० उक्ते अर्थोपक्षेपके २रूपकाङ्गभेदे "अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ" इत्युपक्रमे "प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः। अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा"। अङ्कद्वयान्तरित्युक्तेः प्रथमाङ्के चरमाङ्के चास्य प्रतिषेधः। यथा वेण्यामन्यत्यामाङ्के राक्षसमिथुनप्रयोजितः" एवमन्यत्रापि।

प्रवेशन न० प्रविशत्यनेन प्र+विश-करणे ल्युट्। १प्रधानद्वारे २सिंहद्वारे च। भावे ल्युट्। ३प्रवेशे हेमच०। प्र+विश+णिच्-ल्युट्। ४प्रवेशसम्पादने। प्रवेशनं प्रयोजनमस्य क। प्रवेशनीय प्रवेशनयोग्ये त्रि०।

प्रवेष्ट पु० प्र+वेष्ट-अच्। १बाहौ अमरः २बाह्वग्रीवभागे शब्दच० ३कञ्चिदन्तर्भागे शब्दर०। ४गजपृष्ठस्थाने त्रिका०। स्वार्थे प्राग्वत्ये क। प्रवेष्टक हस्तिपृष्ठे "प्रविश्य

प्रवेष्टकेन निर्मितं स्तवित्वा" इत्युक्तेः "प्रवेष्टकेन दक्षिणबाहुना तदुत्सन्देन निर्मितं स्त्रीशोभकरूपमुभस्तचकं भक्तनं स्तवित्वा "वामेतरभुजस्तन्दोवरस्त्रीसूचकः" यादवोक्तेः तत्कथ्यस्य स्त्रीशोभसूचकत्वम् ।

प्रव्यक्त त्रि० प्रकर्षेण व्यक्तः । स्फुटे अमरः ।

प्रव्याध पु०प्रकृष्टो व्याधो यत्र । यत्राधिक्येन क्षिप्तशरस्य पतनं यत्र ताडये स्थाने यत० ब्रा० ५।१।५।१२। आत्मा०१४।३।१६

प्रव्रजन न० प्राप्य गृहादि व्रजनम् । गृहस्थाश्रमं पुत्रादीन् च परित्यज्य व्रजने सन्न्यासे ।

प्रव्रजित पु० प्र+व्रज–क्त । १सन्न्यासिनि त्रिका० २सांख्यां २३ण्डीयां ४तापस्यां च स्त्री ५दृढव्रतभिक्षुकीभेदे मेदि० । परनिपाते प्रव्रजिताशब्दस्य पाठात् कुमारप्रव्रजिता पुंसि तु न प्रव्रजितकुमार इत्येव ।

प्रव्रज्या स्त्री प्राप्य पुत्रादीन् व्रज्य व्रज–भावे क्यप् । पुत्रादीन् परित्यज्य गमने सन्न्यासाश्रमे ।

प्रव्रज्यावसित पु० प्रव्रज्यातोऽवसितः । सन्न्यासच्युते "प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजोत्तमाः । निर्वासं कारयेद्दिग्यं दासत्वं क्षत्रवैश्ययोः" कात्यायनवचनम् । तत् प्रायश्चित्तसङ्गतम् या०स्मृ० भाष्यधृतस्मृतौ "वानप्रस्थो दीक्षाभेदे लक्षं द्वादशरात्रं चरित्वा महाव्रतं वर्त्तयेत् भिक्षुर्वानप्रस्थव्रतं सोमयज्ञविवर्जम्" । कृतप्रायश्चित्तानामपि तेषामब्यवहार्य्यता यथोक्तम्

"बहिस्तूभयथापि कृतेराचाराच्च" ब्रा० सू०। यद्यूर्ध्वरेतसां स्वाश्रमेभ्यः प्रच्यवनं महापातकं यदि वोपपातकं तदुभयथापि शिष्टैस्ते बहिः कर्त्तव्याः "आरूढपतितं विप्रं मरणान्तात् विनिःसृतम् । उदुवृत्तं क्रमिदष्टञ्च स्पृष्ट्वा चान्द्रायणं चरेत्" इति चैवमादिनिन्द्यातिशयदुष्कृतिभ्यः शिष्टाचाराच्च । न हि यज्ञाध्ययनविवाहादीनि तैः सहाचरन्ति शिष्टाः "भाष्यम् ।

प्रव्राज पु० प्र+व्रज-आधारे घञ् १अत्यन्तनिम्ने देशे रघु० ७।६०। भावे घञ् । २सन्न्यासे च ।

प्रशंसन न० प्र+शंस–भावे ल्युट् । गुणकीर्त्तनेन स्तुतौ । युच् । प्रशंसनाऽप्यत्र स्त्री ।

प्रशंसा स्त्री प्र+शंस–भावे अ । गुणाविष्कारेण स्तुतौ हेम०

प्रशंसोपमा स्त्री काव्यादर्शोक्ते अर्थालङ्कारभेदे यथा

"ब्रह्मणोऽभ्युदयः पद्मचन्द्रः शम्भुशिरोधृतः । तौ तुल्यौ तन्मुखेनेति सा प्रशंसोपमोच्यते" । तौ पद्मचन्द्रौ तन्मुखेन तुल्यौ इति पद्मचन्द्रयोः प्रशंसितयोरपि तन्मुखाग्रेण प्रशंसातिशयात् सकस्य च समधिकोत्कर्षव्यञ्जनात् प्रशंसोपमा उच्यते ।

प्रशस्वन् पु०प्र+शंस-क्वनिप् नुट् च । १यज्ञे उज्ज्वल० स्त्रियां ङीप् वनोर च । प्रशस्वरी २नद्यां उज्ज्वल० ।

प्रशम पु० प्र+शम--घञ् न हृस्वः । १शान्तौ २निवृत्तौ च । प्रशाम्यति प्र+शम-अच् गौरा०ङीष् । २अप्सरोभेदे स्त्री भा०शल्य १८अ० ४रन्तिदेवस्य पुत्रे पु० भाग० ९।२३।२५

प्रशमन न०प्र+शम–णिच्-ल्युट् । १वधे २शान्तताकरणे च "लक्ष्यप्रशमनस्त्वास्यम्" रघुः "सर्वाबाधाप्रशमनम्" चण्डी शम–भावे ल्युट् । ३शान्तौ हेमच० । [शब्दच० ।

प्रशस्त त्रि० प्र+शंस–क्त । १प्रशंसनीये २श्रेष्ठे ३शुभे च

प्रशस्तादि पु० ष०त० १४अ० उक्ते मध्यदेशस्थे गिरिभेदे ।

प्रशस्ति स्त्री प्र+शंस-भावे क्तिन् । १प्रशंसायाम् २स्तुतौ ऋ०१।७४।१

प्रशस्य स्त्री प्र+शंस--कर्मणि क्यप् । १प्रशंसनीये । तस्य इष्ठेयसुनोः परता आदेशः अतिशयेन प्रशस्यः श्रेष्ठः श्रेयान् भावे क्यप् । २प्रशंसने न० ।

प्रशाखा स्त्री प्रगता शाखाम् अत्या०ब० । अग्रशाखायाम् भा०कर्ण० १०६८ श्लोक० ।

प्रशान् अव्य० प्र+शो बा० अनि सलोपः । क्षिप्रार्थे

प्रशासन न० प्र+शास–भावे ल्युट् । शिष्टादीनामिष्टादिबोधनाय कर्त्तव्यताबोधकवाक्योच्चारणे "ज्ञात्वैव प्रशासनमभूत्" रघु० ७० ।

प्रशास्तृ पु० प्र+शास-- तृच् सू० हल् संज्ञायां अनिट् च । यज्ञकरूपशंसनकर्त्तरि ऋत्विग्भेदे असंज्ञायाञ्च हच् टच् । प्रशास्त्रिक । यज्ञशंसनकर्त्तरि राजादौ ।

प्रशास्त्र त्रि० प्रशास्तुमिदम् अण् संज्ञापूर्वविधेरनित्यत्वात् न वृद्धिः । यज्ञकरूपशंसनकर्त्तरि सञ्जातेऽपि ।

प्रशिष्य पु० प्रगतः शिष्यमध्यापकत्वेन आत्मा०ब० । शिष्यप्रशिष्ये "शिष्यप्रशिष्यैरुपगीयमानचरित्र तन्नाथ नमोऽधाम" भट्टरहरिविजयः ।

प्रश्न पु० प्रच्छ--भावे नङ् । जिज्ञासायाम् ज्ञातुमिच्छया १कथनाय प्रेरणे अमरः । अविज्ञातार्थज्ञानार्थम् इच्छाप्रयोज्यवाक्ये "अविज्ञातप्रवचनं प्रश्न इत्यभिधीयते" । जिज्ञासाशब्देन तत्प्रयोज्येच्छानुकूलव्यापारोऽभिधीयते को भवानिति किमेतस्य लक्षणम् ? इत्यादि । २अपनिषद्वेद्ये पु० देवज्ञं प्रति भाविशुभाशुभज्ञानाय दैवज्ञस्य वचनात्मके व्यापारे तद्बोधकशब्दे च स्त्री प्रश्नसनोरादिः ।

प्रश्नदूती स्त्री प्रश्नस्य दूतीव । प्रहेलिकायाम् त्रिका० ।

प्रश्नविवाक पु० कृतान् प्रश्नान् विवक्षि उत्तरयति वि+वच--कर्त्तरि संज्ञायां घञ् । प्रश्नोत्तरदायके ज्योतिर्विद्भेदे "मध्यादाये प्रश्नविवाकम्" बृजु० २०।१० वेदट्टी० ।

प्रश्नव्याकरण पु० प्रश्नान् शिष्यकृतप्रश्नान् व्याकरोति उत्तरयति वि--आ-कृ-ल्युट् ६त० । १जैनभेदे हेमच० । भावे ल्युट् । २दृष्टार्थोत्तरज्ञापने न० ।

प्रश्नि पु० १ऋषिभेदे भा०आ०२६अ० प्रच्छ--बा-नि वा ङीप् । २कुम्भिपाकायां (घानां) त्रिका० ।

प्रश्नोपनिषद् प्रश्नाधिकारेण प्रवृत्ता उपनिषत् । ब्राह्मणोपनिषद्भेदे "भगवन् ! कुतो वा इमाः प्रजाः प्रजायन्ते" इत्यादि पञ्चप्रश्नाधिकारेण तस्याः प्रवृत्तेस्तथात्वम् ।

प्रश्रय पु० प्र+श्रि-करणे अच् । प्रणये अमरः ।

प्रश्रित त्रि० प्र+श्रि--क्त । १विनीते अमरः ज्ञानिदेवस्य २पुत्रभेदे पु० भाग० ९।२४।२५

प्रस्रथ त्रि० प्रस्रष्टः स्रथः प्रा०ब० । प्रस्रष्टे शिथिले त्रिका० ।

प्रश्लिष्ट त्रि० प्र+श्लिष--क्त । सुसम्बद्धे युक्तियुक्ते आर्चिका० नाद्यान्तोदात्तता ।

प्रश्वास पु० प्र+श्वस--भावे घञ् । कोष्ठस्य वायोर्बहिर्निःसारणे "श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" पा०त० वृ० भाष्यम् । कुम्भकशब्दे २१।४पृ० दृश्यम् ।

प्रष्टृ त्रि० प्रच्छ--तृच् । प्रश्नकारके स्त्रियां ङीष् ।

प्रष्टि पु० प्रच्छ--कर्त्तरि क्तिच् । दाहनक्षत्रसमीपवर्त्तिनि ऋक्षभेदे बृ० १।१९।६

प्रष्ठ त्रि० प्र+स्था-क "प्रष्ठाऽग्रगामिनि" पा० सूत्रम् । १अग्रगामिनि । २श्रेष्ठे च अमरः । तस्य पत्नी ङीष् । २तत्पत्न्यां स्त्री । गौरा०ङीष् । ३चक्रकीलभेदे स्त्री राजनि० ।

प्रष्ठवाह् त्रि० प्रष्ठं वहति वह--क्विप् । १युगवाह्ये पृष्ठवहोजिते देशे अमरादौ अमरः युगपार्श्वे योजिते गवादिके शिक्षार्थं यं प्रथमं वाहयन्ति सः । भावे वाह ऊठ् प्रष्ठौहः प्रष्ठौहा इत्यादि । स्त्रियां ङीष् प्रष्ठौही तथाविधस्त्रियाम् २पृष्ठवर्त्तिनि त्रिषु धरणिः ।

प्रस प्रसवे भ्वौ प च सक०द्विगा० आ० सेट् । प्रसते अप्रसित । णित् जटादि क्विप् प्रसवति ते ।

प्रसक्त त्रि० प्र+सञ्ज--क्त । १प्रसङ्गविशिष्टे "प्रसक्तं हि प्रतिषिध्यते" लीलावतीटी० । २निरन्तरे निरन्तरायुक्ते त्रि०जटा०

प्रसक्ति स्त्री प्र+सञ्ज-भावे क्तिन् । १प्रसङ्गे २आपत्तौ ३अनुमितौ हेमचन्द्रः । ४व्याप्तौ च "अतिप्रसक्तिरव्याप्तिर्लक्षणे" सा०ल० । अतिव्याप्तिशब्दे दृश्यम् । [१०] भाष्ये दृश्यम् ।

प्रसञ्जिन् पु० प्र+सञ्ज--बा० णिनि । प्रसङ्गशीले ऋ०८।१।

प्रसंख्यान न० प्र+सम्+ख्या--भावे ल्युट् । १सम्यग्ज्ञाने "हरः प्रसंख्यानपरो बभूव" कुमा० । प्रा०व० । २पूर्णसंख्यायुते त्रि० भा० व० १२१अ० ।

प्रसङ्ग पु० प्र+सञ्ज--भावे घञ् । १प्रकृष्टसङ्गे २व्याप्तिरूपे सम्बन्धे यथाऽतिप्रसङ्गः अप्रसङ्ग इत्यादौ ३सङ्गतिभेदे "प्रसङ्गः उपोद्घातो हेतुनावसरस्तथा । निर्वाहकैककार्यत्वे शोभा सङ्गतिरिष्यते" । तत्र "प्रसङ्गत्वम् स्वतत्वे सत्युपेक्षानर्हत्वं तच्च स्मृतिविषयतापन्नत्वे सति हेत्वविषयतानापन्नत्वम्" अनुमितौ गदाधरः । ४अनुरक्तत्वे ५प्रकाशे ६मैथुनासक्तौ ७प्राप्तौ च "क्रताक्रतप्रसङ्गि नित्यं तद्विपरीतमनित्यम्" व्या०परिभाषा । तत्र प्रसङ्गः प्राप्तिरेव "यङ्लान्तरम् प्रायुङ्क्त विधिरनित्यो भवति यङ्लान्तरात् प्रायुङ्क्तः यङ्लान्तरेऽप्रायुङ्क्तस्य लघूपान्तरेऽप्रायुङ्क्त विधिरनित्यः" नागेशः । क्वचित् क्रताक्रतप्रसङ्गे ज्ञापेऽपि नित्यता" व्या० परिभाषा । प्रसङ्गश्चात्र प्राप्तेरेव ज्ञाप्यता । अन्योऽन्येन प्रकृतौ अन्यस्यापि टञ्विधौ तत्र यथान्यस्य विधित्सया तदुदाहरणादिकञ्च पा०त० उक्तं यथा "अन्योऽन्येन प्रकृतावन्यस्यापि विधिः प्रसङ्गः यथा पशुर्यमनुष्ठितेन पुरोडाशस्यापि उपकारः सिध्यति । यथा वा "अग्नौ प्रक्षिप्ते दध्यानयति आ वैश्वदेव्यामिक्षा भवति वाजिभ्यो वाजिनम्" इत्यत्रामिक्षार्थं प्रकृतौ अनूहेऽश्ववाजिनस्यापि विधिः" । यथा वा ज्ञापकयागनिष्पत्त्यर्थमनुष्ठितैराग्नेयादिभिर्निरूढपशादिविधिरिति निताक्षरोक्तम् । यथा दक्षनिपातप्रायश्चित्तेनैव गुरुस्त्रीतल्पान्तरोपकामनोरपप्रायश्चित्तमपि सम्पद्यत इति प्रायश्चित्तविवेकोक्तम् । तथा ब्राह्मणवधोऽहेयेन द्वादशवार्षिके व्रते कृते ब्रह्मवधनिमित्तकत्वेनाधिकप्रायश्चित्तस्य विधिः । एवञ्च तत्प्रसङ्गयोरनाद्यत्वेन कर्मणा नानाऽदृष्टकल्पितौ नानैव हेतुः । तत्त्वमसोरक्षमालिखवधप्रायश्चित्तयोः कथं प्रसङ्गेन विधिः सङ्कल्पारम्भात्, तयोः सङ्कल्पादिः कृत इति चेत् प्रायश्चित्तत्वात् तथापि कथं सङ्कल्प इति चेत् आवश्यकात्" । "एवञ्च ब्राह्मस्य सर्वप्रायश्चित्तस्य स्वर्गफलोपेतस्यैव फलवत्त्वाभिधानात् तथापि प्रसङ्गविषयत्वे ब्राह्मे हि ब्राह्मणिकापसर्पितकृच्छ्रातिकृच्छ्रात्मकः सङ्कल्पः ब्राह्मार्थं इति पञ्चसाधिक-

रुक्तेन "प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत्। प्रायश्चित्तमुपासीनो वाग्यतश्चिन्तयेत्" इति लिखितवचने प्रत्येकं नियतं कालमिति तत्तद्व्रतकाल संख्यामु आत्मनो व्रतमु आत्मसम्बन्धित्वेन आत्मकर्तृत्वेन इति यावत्। तेनाशक्तव्रतमहङ्कुरिष्ये इति चादिशेदुक्तेयं कृच्छ्रात् इत्यनेन प्राप्तस्य सङ्कल्पस्य बाधः" इत्यादयश्च तत्र समाहितं यथा "प्रायश्चित्तस्य नित्यत्वेनाकृत्वैकस्मिन्नपि क्रतुविधिः"। अत्रेदं बोध्यम् प्रसङ्गपदेन व्याप्तिरेवोच्यते तथा च दृष्टिकर्मणा व्याप्तस्य यत्र सिद्धिस्तत्रैवास्य प्रवृत्तिः। दृष्टिकर्मणः व्याप्यत्वञ्च देशकालकर्तृादीनां प्रयोगानुबन्धिनां वैधहेतुभूतानामेवैकस्मे भवति अतस्तन्नबद्धत्वादपि कालदेशाद्यन्तर्भावेनैव ज्ञाप्यता"।

प्रसङ्गसम पु० ज्ञापनाहेतुप्रयोगे प्रतिषेधहेतुरूपजात्युत्तरभेदे "दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ" गौ०सू०। १।९"साधनस्यापि साधनं वक्तव्यमिति प्रसङ्गे प्रत्यवस्थानं प्रसङ्गसमः प्रतिषेधः क्रियाहेतुगुणयोगी क्रियासिद्धेष्ट इति हेतुर्नोपदिश्यते। न च हेतुमन्तरेण सिद्धिरस्तीति। दृष्टान्तस्य कारणं प्रमाणं तदनुपदेशोऽनभिधानम् अभिधानं ज्ञानप्रयोजनकं तथा च दृष्टान्तस्य साध्यत्वे प्रमाणाभावात् प्रत्यवस्थानमयुक्तः। यद्यपीदं सदुत्तरमेव तथापि दृष्टान्ते प्रमाणं वाच्यं तत्रापि प्रमाणान्तरमित्यनवस्थया प्रत्यवस्थाने तात्पर्यं तद्भाष्याचार्यैरनवस्थाभासप्रसङ्गः प्रसङ्गसम इति एतन्मते हेतोर्हेत्वन्तरमित्यनवस्थाऽपि प्रसङ्गसम एव पूर्वमते तु हेत्वनवस्थादिकं वक्ष्यमाणाङ्गतिगम्येऽन्तर्भूतमिति विशेषः। अनवस्थादेशनाभासा चेयं प्रतिदृष्टान्तसमः प्रत्येतव्यः"वृत्तिः। अस्योत्तरं तत्रोक्तम्। 'प्रदीपादावप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः" गौ०सू०। "इदं तावदयं प्रष्टो वक्तुमर्हति अथ के प्रदीपमुपादद्यते किमर्थं वेति दिदृक्षमाणाः दृश्यदर्शनार्थमिति। अथ प्रदीपं दिदृक्षमाणाः प्रदीपान्तरं कस्मान्नोपादद्यते अन्तरेणापि प्रदीपान्तरं दृश्यते प्रदीपः तत्र प्रदीपदर्शनार्थं प्रदीपोपादानं निरर्थकम्। अथ दृष्टान्तः स किमर्थमुच्यत इति। अप्रज्ञातस्य ज्ञापनार्थमिति अथ दृष्टान्ते कारणापदेशः किमर्थं दृश्यते यदि प्रज्ञापनार्थम् प्रज्ञातो दृष्टान्तः स खलु लौकिकपरीक्षकाणां यत्किमर्थं बुद्धिमत्तं स दृष्टान्त इति. तत्प्रज्ञानार्थः कारणापदेशो निरर्थक इति प्रसङ्गसमस्योत्तरम्"। प्रसङ्गसमे प्रत्युत्तरमाह। दृष्टान्तो हि निदर्शनस्थानत्वेनसाध्यनिश्चयार्थमपेक्ष्यते न तु दृष्टान्तदृष्टान्ताद्यनवस्थितपरम्परा लोकसिद्धा युक्तिसिद्धा वा अन्यथा घटादिप्रत्यक्षाय प्रदीप इव प्रदीपप्रत्यक्षार्थमनवस्थितप्रदीपपरम्परा प्रसज्येत तदीयसाधनमपि व्याकुर्वीत" वात्स्या०।

प्रसज्य पु० भीमो भीमसेनवत् प्रसज्यप्रतिषेधस्यान्यत्वोपः। प्रसज्यप्रतिषेधे अत्यन्ताभावे अत्र रोगीति निन्द्याश्रयत्वात् प्रसज्यता" मल०त० रघु०।

प्रसज्यप्रतिषेध पु० प्रसज्य प्रसक्तिं सम्पाद्यारोप्येति यावत् प्रतिषेधः। अत्यन्ताभावे "प्रसक्तं हि प्रतिषिध्यते" इति न्यायेन आरोपितप्रसङ्गस्यैव निषेधः जेन वायौ रूपं नास्तीत्यादावपि वायौ रूपारोपं कृत्वैव निषेधो नञा बोध्यते इति विवेकः। कलञ्जाधिकरणशब्दे १७७७पृ० नञ्शब्दे २१४२ पृष्ठादौ मतभेदेन नञः पर्युदासप्रसज्यप्रतिषेधपरता दृश्या। "अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्" शाब्दिकाः। न कलञ्जं भक्षयेदित्यत्र बलवदनिष्टासाधनत्वविशिष्टेष्टसाधनत्वरूपस्य विध्यर्थस्याभावो नञा बोध्यते तेन विधेरप्राधान्यं नञर्थाभावस्य च प्राधान्यं तेन तत्र क्रियापदान्वयिनञ्प्रसज्यप्रतिषेधार्थकः। गुरुमते तु कलञ्जभक्षणाभावविषयकं कार्यमिति बोधेन अभावविशेषप्रकबोधेऽपि प्रतिषेधस्य प्राधान्यात् तथात्वं तथा च तन्मते क्वचित् विधेरप्राधान्येन क्वचिच्च प्रतिषेधस्य प्राधान्येन इति व्यक्तमेव प्रसज्यप्रतिषेधप्रबोधकप्रयोजकमिति बोध्यम्।

प्रसत्ति स्त्री प्र+सद्-क्तिन्। १नैर्मल्ये २प्रसन्नतायाम् जटा०

प्रसत्वन् पु०प्र+सद्-क्वनिप्। १धर्मे २प्रजापतौ च मं०ब्रा०। ३प्रतिपत्तौ स्त्री ङीप् वनोर च। [वन्तौ च।

प्रसन्धि पु० १मनुपुत्रभेदे भा०आश्व०४अ०। प्रा०त०। २प्रजङ्घ-

प्रसन्न त्रि० प्र+सद्--कर्मरि क्त। १निर्मले २सन्तुष्टे ३क्षतात्रपङ्कभेदे अमरः। ४सुरायां स्त्री मेदि० "प्रसन्ना गुरुसमवातार्शोविबन्धानाहनाशिनी। शूलप्रवाहिकाटोपकफवातार्तिहा हिता" राजवल्लभः। तस्य भावः तल् प्रसन्नता स्त्री त्व प्रसन्नत्व न० तद्भावे प्रसादे नैर्मल्ये च।

प्रसन्नात्मन् त्रि०प्रसन्नो निर्मलः आत्मा यस्य। १प्रसन्नान्तःकरणे २विष्णौ पु० "सुप्रसादः प्रसन्नात्मा" विष्णुस०। तत्सहस्रस्य निदोषत्वात्तथात्वम्।

प्रसन्नेरा स्त्री कर्म्म०। मदिराभेदे भरतः।

प्रसभ त्रि०प्रगता सभा सभाधिकारोऽस्मात् प्रा०व०। बलात्कारे अमरः "प्रसभोद्भूतारिः" रघुः।

प्रसयन न०प्र+सि-बन्धने करणे ल्युट्। बन्धनसाधने १सन्तौ २आले च "प्रसितिः प्रसयनात् तन्तुर्वा आलं वा" निरु० ६।१२।

प्रसर पु० प्र+सृ-भावाधारादौ अथायथम् अप् कर्त्तरि अच् वा। तन्तुविटपादेः प्रकर्षेण १सर्पणे प्रकर्षेण २सरणे अमरः ३वेगे ४प्रक्षये च मेदि०। ५समूहे शब्दर० ६युद्धे विश्वः। ७नाराचास्त्रे ८विसर्पणकर्त्तरि त्रि०।

प्रसरण न० प्र+सृ-भावे ल्युट्। १सैन्यादेः सर्वतो गमने तत्याद्याहरणार्थं सैन्यानामितस्ततो गतौ २आसारे अमरः। अनि प्रसरणि तयार्थे स्त्री रामाश्रमः वा ङीप्

प्रसर्पण न० प्र+सृप-ल्युट्। सैन्यानां सर्वतोव्याप्तौ अस्य स्त्रीत्वञ्च तत्र ङीप्। [काले क्षेमच०।

प्र(ग)सल पु० प्र+गल-अच् पृषो० शस्य (षोदा) क्षेमन्त-

प्रसलवि अव्य० प्रदक्षिणे शत०ब्रा० २।६।११।१५ भाष्यम्।

प्रसव पु०प्र+सू-भावादौ अप्। १गर्भमोचने २उत्पत्तौ ३कार्य्ये ४फले ५कुसुमे ६अपत्ये च मेदि० नारीणां गर्भमुक्ति कालस्य भावप्र० उक्तो यथा

"नवमे दशमे मासि नारी गर्भं प्रसूयते। एकादशे द्वादशे वा ततोऽन्यत्र विकारतः"। वैकृतं यथा "गर्ग उवाच "अकालप्रसवा नार्य्यः कालातीताः प्रजास्तथा। विकृतप्रसवास्चैव युग्मप्रसवनास्तथा। अमानुषा अवयवाश्च नखातव्यञ्जनास्तथा। स्त्रीणाञ्चा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः। पशवः पक्षिणश्चैव तथैव च सरीसृपाः। विनार्त्तं तस्य देशस्य नृपस्य च विनिर्दिशेत्। निर्वासयेत्तां नृपतिः स्वराष्ट्रात् स्त्रियश्च, पूज्याश्च ततो द्विजेन्द्राः। किमिच्छिकैर्बाह्मणतर्पणञ्च लोके ततः शान्तिरुपैति पापम्" मात्स्ये २०६अ०। "भानौ सिंहगते चैव यस्य गौः संप्रसूयते। मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः। अत्र शान्तिं प्रवक्ष्यामि येन सम्पद्यते शुभम्। प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत्। ततो होमं प्रकुर्वीत हताक्षैराज्यसर्षपैः। आहुतीनां हताक्षानामयुतं जुहुयात्ततः" नारदः। "प्रसवविकारे स्त्रीणां द्वित्रिचतुःप्रभृति सम्भवतो वा। स्त्रीणातिदिष्टकाले च देशकुलसङ्कयो भवति। बहवोऽप्यहिंसयोऽहिंसनीय मनसोऽन्ये मरणमेनासु। अप्यनाथात् स्मृतिमुखं शान्तौ स्त्रीको च गर्गोक्तौ "नाश्य परस्य विषये त्यक्तव्यास्ता हितार्थिना। तर्पयेच्च द्विर्कामैः शान्तिं चैवात्र कारयेत्। चतुष्पदाः स्वयूथेभ्यः क्षिप्तव्याः परभूमिषु। नगरं स्वामिनं यूथमन्यथा हि विनाशयेत्" इ०सं० ४६अ०। सुखप्रसवप्रकारः ज्यो० त० उक्तो यथा "अस्ति गोदावरीतीरे जन्मला नाम राक्षसी। तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत्"। "षष्ठ रेखाः षडालिख्य तिर्य्यगूर्द्ध्वक्रमेण हि। एकादि१६ षड्दशान्तान्त्वेकमादौ त्यजेत्ततः। नवमे सप्त दद्यात्तु बाणं५ पञ्चदशे तथा। द्वितीयेऽष्टाव-ष्टमे षट् दिशि१०ह्यौ षोड़शे स्मृतिम्। एकादिना समं देयमिच्छाङ्कं त्रिकोणके। तदा द्वात्रिंशदादिः स्यात् चतुःकोष्ठेषु सर्वतः। दर्शनाद्धारणात्तासां शुभं स्यादेषु कर्मसु। द्वात्रिंशत् प्रसवे नार्य्याश्चतस्त्रिंशद्गमे नृणाम्। भूतारिष्टेषु पञ्चाशद् मृतापत्यासु वै शतम्। द्वासप्ततिस्तु सन्ध्यायां चतुःषष्टीरथाध्वनि। विषे विंशो धान्यकोटे-श्चत्वारिंशतिरेव च। चतुरशीतिश्च बालानां रोदने मरि कीर्त्तिता"। स्थानविशेषादिस्थप्रभेदानां विकृत-प्रसवस्चकताभेदः ह०जा० उक्तो यथा

"उदयस्थेऽपि वा मन्दे कुजे वास्तं समागते। स्थिते वाऽन्तःक्षपानाथे शशाङ्कसितशुक्रयोः। शशाङ्के पाप-लग्ने वा दृक्काणेशे(कुज) त्रिभागगे। शुभैःखाय२।११। स्थितैर्जातः सर्वसम्पद्दृष्टोऽपि वा। चतुष्पदे गते भानौ शेषैर्वीर्य्यसमन्वितैः। द्वितनुस्थैश्च यमलौ भवतः कोष्ठवेष्टितौ। क्षाणसिंहसुतैर्लग्ने तत्स्थे सौरेऽथ वा कुजे। राशिप्रसवदृश्ये नाले जायते नालवेष्टितः"।

स्थानभेदे प्रसवसूचकयोगः ह०जा० उक्तो यथा

"पूर्णे शशिनि स्वराशिगे सौम्ये लग्नगते शुभे सुखे। लग्नः जलजेऽस्तगेऽपि वा चन्द्रे पोतगता प्रसूयते। आप्योदयमाश्रगः शशी सम्पूर्णः समवेक्षतेऽथ वा। मेषूरण वस्तुलग्नः ग स्यात् सुतिः सलिले न संशयः। उदयोडुप-योर्व्ययेऽस्थिते गुप्ता पापनिरीक्षिते यमे। अलिकर्कि-युते विलग्नगे सौरे शीतकरेक्षितेऽथटे। मन्देऽङ्गगते विलग्नगे बुधसूर्य्येन्दू निरीक्षिते क्रमात्। क्रीड़ाभवने सुरालये शेषरभूमिषु च प्रसूयते। नृलग्नगं प्रेक्ष्य कुजः प्रसूयाने रन्ध्रे सितेन्दू गुरुरन्निहोत्रे। रविर्नरेन्द्रामरगो-कुलेषु शिल्पाश्रये भ्रः प्रसवं करोति। राक्षसप्रसवलग्नो-दये मांसं जन्म चरे स्थिरे मृदे। स्वर्णाग्निगते स्वलग्नस्थिरे

बलयोगात् फलसंयुक्तर्क्षयोः। आरार्कजयोस्त्रिकोणगे चन्द्रेऽस्ते च विलग्नतेऽब्दया। दृष्टेऽमरराजमन्त्रिणा दीर्घायुः सुखभाक् च स स्मृतः। पापेक्षिते तुहिनगा वुदये कुजेऽस्ते॥ लग्नो विनश्यति कुजार्कजयोस्तथाये। सौम्येऽपि पश्यति तथाविधदृक्समेति सौम्येतरेषु पर-दृक्समगतोऽब्दनायुः। पित्तसाल्यदृष्टेषु तदुबलात्तदृग्बलादिषु नीचगैः शुभैः। यदि नैकगतौ तु वीक्षितौ लग्नेन्दू विजने प्रसूयते। मन्दार्कांशे शशिनि क्षिपुत्रे मन्ददृष्टेऽङ्गगे वा तद्युक्ते वा तमसि शयने नीचसंस्थैश्च भूमौ। यद्वद्राधिर्व्रजति हरिजं गर्भमोक्षस्तु तद्वत् पापैरन्द्रात् स्मरेऽसुखगतैः क्लेशमाहुर्जनन्याः"। अथ सूतिकाग्रहमानम् "अष्टदलायतचक्रं चतुर्दलविभानकम्। प्राचीद्वारक्रमुद्वारं विद्यात् सूतिकाग्रहम्"। आसन्नप्रसवायालक्षणमाह "याते हि शिथिले कुक्षौ सुप्ते हृदयबन्धने। सशूले जघने नारी विज्ञेया प्रसवोत्सुका। आसन्नप्रसवायास्तु कटीपृष्ठन्तु सव्ययम्। भवेन्मुहुः प्रवृत्तिश्च मूत्रस्य च मलस्य च"। यथासन्नप्रसवाया उपचारः "तैलेनाभ्यक्तगात्राणां संस्नातासुखवारिणा। यवागूम्प्रायवेत् कोष्णां मात्रया हृतसंयुताम्। कृतोपधाने मृदुभिर्विस्तीर्णे शयने शनैः। आभुग्नसक्थि चोत्तानां नारीं विद्यात् प्रसूयतीम्"। (आभुग्नसक्थि असक्थोचितोरुः) अथ धात्री "चतस्रोऽभङ्गनीयास्तु धात्र्यो कुशला हिताः। दक्षाः परिचरे युक्ताः सम्यक् छिन्ननखाः स्त्रियः"। अथ तत्कृत्यम् "अपत्यमार्गं तैलेन समभ्यज्य समन्ततः। एका तु तासु कुशले! प्रवाहस्वेति तां वदेत्। अन्यथा मा प्रवाहिष्टाः प्रवाहेथा व्यथा यदि। प्रवाहेथाः शनैः पूर्वं प्रगाढन्तु ततःपरम्। ततो मारुतरं गर्भं योनिद्वारमुपागते। अपरासक्तितो गर्भो यावत् पतति भूतले"। अथाकर्षितायाः प्रवाहणाद्दोषमाह "मूकं वा बधिरं कुब्जं श्वासकासक्षयान्वितम्। कृते त्वत्यन्तं बालमकाले च प्रवाहणात्" भावप्र०। नवममासादिप्रसवकालश्च नारीणामन्यजन्तूनां जातिभेदादन्यतो ज्ञेयः

प्रसवक पु० प्रसवेन पुष्पादिना कायति कै-क। पियालवृक्षे शब्दरत्ना०। [कन्ने (वोंटा) अमरः।

प्रसवबन्धन न०बन्ध-करणे ल्युट् प्रसवस्य पुष्पादेः बन्धनम्। [कन्ने (वोंटा) अमरः।

प्रसवस्थली स्त्री ङीप्-तत्र प्रसवस्य स्थलीव वा। उत्पत्तिस्थाने ख्यातेषु च।

प्रसविट् पु० प्रसूते उत्पादयति प्र+सू-सूतेः उत्पादनात्-कृत्यव्यापारार्थत्वात् क्विच्। १पितरि शब्दरत्ना० निरु० ६।२१। प्रसूतौ २मातरि स्त्री ङीप्।

प्रसविन् त्रि० प्र+सू-णिनार्थे इनि। प्रसवशीले।

प्रसव्य त्रि० प्रगतं सव्यं वामत्वम्। १प्रतिकूले अमरः। कर्मणि यत्। २प्रसवनीये त्रि०।

प्रसह त्रि० सहति प्र+सह-अच्। १प्रकर्षेण सोढरि प्रसह्य बलात्कारेण भक्षयतीति प्रसहः। बलात्कारेण भक्षके २खगभेदे "काको गृध्र उलूकश्च चित्रश्च शशघातकः। चाषो भासश्च कुरवः इत्याद्याः प्रसहाः स्मृताः" शशघातकः (बाज) इति लोके "प्रसहाः कीर्त्तिता एते प्रसह्याछिद्य भक्षणात्। प्रसहाः खलु वीर्य्योष्णाक्लान्तांसं भक्षयन्ति ये। ते शोषमुखकोना दैः शुक्रक्षीणा भवन्ति हि" भावप्र०।

प्रसहन त्रि० प्रगतं सहनं यस्य। १क्षमारहिते २क्लिंपशुभेदे पुंस्त्री० "यादृङ्लक्षिंहशरभर्क्षतरक्षुख्यायेऽन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते। ते कीर्त्तिताः प्रसहनाः पलङ्कं तदीयमर्थःप्रमेहजठरामयशान्तहारि" राजनि०। भावे ल्युट्। ३आलिङ्गने प्रकर्षेण ४क्षमायां च।

प्रसह्य अव्य० प्र+सह-ल्यप्। १हठादित्यर्थे अमरः "प्रसह्य तेजोभिरसंख्यता कृतैः" माघः। प्र+सह-कर्मणि यक्यार्थे यत्। प्रकर्षेण २सोढुं शक्ये त्रि०। [यचौरे त्रिका०।

प्रसह्यचौर पु०प्रसह्य बलात्कारेण चौरः। (डाकाइत)प्रकार-

प्रसह्यहरण न० प्रसह्य बलात्कारेण हरणम्। १कन्यायाः बलाद्धरणे भा०आ० २१६अ०। २हठेन हरणे (डाकाइति) प्रसह्यहरणं च साहसभेदः। [२१।४।२१।

प्रसहन् त्रि० प्र+सह-क्विप्। प्रसहनकर्त्तरि क्ष्मे कात्या०

प्रसातिका स्त्री को-क्तिन् प्रगता सातिरस्याः कप् प्रा०व०। अणुधान्ये सूक्ष्मधान्ये रत्नमाला।

प्रसाद पु०प्र+सद-भावे घञ्। १नैर्मल्ये २अनुग्रहे ३काव्यगुणभेदे ४स्वास्थ्ये ५प्रसन्ने ६देवभेदे ७गुरुजनभुक्तावशिष्टे च अमरः। काव्यगुणभेदस्य रसस्यैव धर्मभेदः शब्दानां तथात्वसमुपचारात् यथोक्तं सा०द० "रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा"। गुणाः यथा स्वस्याङ्गित्वमाप्तस्यात्मन उत्कर्षहेतुत्वात् शौर्यादयो गुणशब्दवाच्याः तथा काव्येऽङ्गित्वमाप्तस्य रसस्य धर्माः। स्वरूपविशेषाः माधुर्यादयोऽपि स्वसम्बन्धिकिंपदसन्दर्भस्य काव्यव्यपदेशभाजः इत्यर्थः"। यथा चैषां

रसमात्रस्य धर्मत्वं तथा दर्शितम्। "एवं माधुर्य्यमोजोऽथ प्रसाद इति ते त्रिधा" इत्युपक्रमे "चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः। स प्रसादः समस्तेषु रसेषु रचनासु च"। व्याप्नोति आविष्करोति। "शब्दास्तदर्थबोधकाः स्मृतिमात्रतः" यथा "स्रुचीमुखेन यज्ञदेव जतव्रत! त्वं सुक्षाजजाप। लुठसि स्तनयोः प्रियायाः। वाणैः शरस्य शतशो विनिकृत्तमर्म्मा स्वप्नेऽपि तां कथमहं न विलोकयामि" सा०द०"प्रसादवत् प्रसिद्धार्थमिन्दोरिन्दीवरद्युति। लक्ष्मलक्ष्मीं तनोतीति प्रतीतिं सुभगं वचः" काव्यादर्शः। धर्मस्य पत्न्यां मूर्त्तौ जाते ऽष्टपुत्रभेदे भाग० ४। १।२६।

प्रसादना स्त्री प्र+सद-णिच्-युच्। १सेवायां हेमच०। भावे ल्युट्। २प्रसादन तत्रार्थे न०"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनाश्चित्तप्रसादनम्" पा०सू०। चित्तप्रसादनशब्दे २६१४ पृ०दृश्यम्।

प्रसादपट्ट पु० प्रसादसूचकः पट्टः शा०त०। अनुग्रहसूचके इ०सं०५०अ० उक्ते पट्टभेदे पट्टशब्दे ४२०१पृ० दृश्यम्।

प्रसाधक त्रि० प्रसाधयति प्र+साधि-ण्वुल्। १भूषके स्त्रियां कापि क्वत इत्वम्। २अलङ्कर्त्र्यां २नीवारधान्ये स्त्री भावप्र०। राज्ञां प्रसाधनार्थे ४सेवकभेदे पु० "सूदव्यञ्जनकर्त्तारस्तल्पका व्यजकास्तथा। प्रसाधका भोजकाश्च गात्रसंवाहका अपि। जलताम्बूलकुसुमगन्धभूषणदायकाः" कामन्द०।

प्रसाधन न० प्र+सिध-णिच्-साधादेशः ल्युट्। १क्लृप्तिमभूषणे वेशे। करणे ल्युट्। २कङ्कतिकायाम् स्त्री ङीप् अमरः। ३निष्पादने ४सिद्धौ च मेदि०।

प्रसाधित त्रि०प्र+साधि-क्त। १अलङ्कृते २निष्पादिते च।

प्रसारण न० प्र+सृ-णिच्-ल्युट्। १विस्तारकरणे २क्रियाभेदे च भाषा० कर्मनृत्यभेदे १७२०पृ०दृश्यम्। विप्रकृष्टदेशसंयोगहेतुक्रिया प्रसारणम्। करणे ल्युट् ङीप्। (गन्ध भादाल) ३लताभेदे स्त्री राजवल्लभः।

प्रसारिन् त्रि० प्र+सृ-णिनि। १विस्तारयुते स्त्रियां ङीप्। सा च २बल्लालुलतायां स्त्री राजनि०।

प्रसित त्रि० प्र+सो-क्त। १आसक्ते अमरः तद्योगे विषयाधारे सप्तम्यर्थेऽपि आसक्तार्थपरत्वे तृतीयासप्तम्यौ हरिणा हरौ वा प्रसित इति तत्त्वबो० प्रा०स०। २प्रकृष्टबन्धे त्रि० ३पूर्वे न० शब्दच०। तस्य प्रकृष्टबन्धत्वात् तथात्वम्।

प्रसिति स्त्री प्र+सि-बन्धने क्तिन्। बन्धनसाधने १निगडादौ अमरः। २तन्त्रौ ३जाले च प्रसयनशब्दे निरु०।

प्रसिद्ध त्रि० प्र+सिध-क्त। १भूषिते २ख्याते च मेदि०।

प्रसिद्धि स्त्री प्र+सिध-भावे-क्तिन्। १ख्यातौ २टङ्कारे त्रिका० ३भूषणे च।

प्रसुप्त पु० १सुप्तादेशसमीपस्थे देशे २तत्सृप्ते च भा०स०२८अ०।

प्रसू स्त्री प्र+सू-क्विप्। १मातरि अमरः २घोटक्यां च ३कदल्यां ४ओषधि च मेदि०। स्वार्थे क। प्रसूका वाजिन्यां राजनि०।

प्रसूत त्रि० प्र+सू-कर्मणि क्त। १जातप्रसवे कर्त्तरि क्त। २संजाते ३प्रकटीकृते त्रि०। ४कुसुमे न० मेदि०। ५जायापत्न्यायां स्त्रियां स्त्री अमरः। चाक्षुषमन्वन्तरे दैवतभेदे पु०मार्क०पु० ७६अ०।

प्रसूति स्त्री+सू-क्तिन् क्तिच् वा। १प्रसवे अमरः २उद्भवे ३जनये ४दुहितरि च मेदि० ५मातरि। स्वार्थे क। प्रसूतिका जातप्रसवायां स्त्रियाम् अमरः।

प्रसूतिज न० प्रसूतेः उद्भवादारभ्य जायते जन-ड। १दुःखे अमरः। २प्रसवजातमात्रे त्रि०।

प्रसून न० प्र+सू-क्त ओदित्वात् तस्य नः। १कुसुमे २फले च अमरः। ३जाते त्रि०मेदि०। [नखरादयोऽप्यत्र।

प्रसूनेषु पु० प्रसूनमिषुर्यस्य। पुष्पशरे कामे त्रिका० प्रसून-

प्रसृत न० प्र+सृ-क्त। १पलद्वये शब्दमा० २अञ्जलौ न०। कर्त्तरि क्त। ३प्रसरणयुते त्रि० अमरः। ४विक्षिप्ते ५वेगिते त्रि० मेदि०। ६गते त्रि० त्रिका० ७नियुक्ते त्रि० हला०। ८अञ्जल्यां स्त्री मेदि०।

प्रसृतज पु० १कृष्णगोलकरूपे पुत्रभेदे "आत्मा पुत्रस्य विज्ञेयस्तत्सम्बन्धानन्तरजश्च यः। निरुक्तजस्य विज्ञेयः सुतः प्रसृतजस्तथा" भा०अनु० ४६अ०। "निरुक्तजः स्वजेत्वेऽन्योरेतःसेकार्थसङ्कल्पज्ञः (क्षेत्रजः) प्रसृतोऽनिरुक्तो यो लोल्यात् परक्षेत्रे रेतः सिञ्चति तज्ज्ञः प्रसृतजः" (कृष्णगोलकरूपः) नीलक०।

प्रसृति स्त्री प्र+सृ-क्तिन्। प्रसृते अञ्जलिमाने रावण०।

प्रसृष्ट त्रि० प्र+सृज-क्त। १प्रकर्षेण सृष्टे "तत्रैवंजातिया तैव प्रसृष्टाभिजनैव च" भा०वि० १३अ० व्याख्याने "अकुल्याः प्रसृता वासु ताः प्रसृष्टा उदीरिताः" नीलकण्ठोक्तायां २प्रसृतायामकुल्यायां स्त्री।

प्रसेक पु०प्र+सिच-भावे घञ्। १आसिञ्चने २क्षुतौ च मेदि०

प्रसेकिन् पु० प्र+सिच–घञ् विनुण् । १प्रसेचनशीले प्रसेक-युक्ते २व्रणभेदे वाग्भ्यो रोगभेदे पु० सुश्रुतः "मांस-पिण्डवदुन्नताः प्रसेकिनोऽन्तःपूयवेदनावन्तोऽम्बाऽपानव-दुन्नतोष्ठाः" (व्रणभेदाः)।

प्रसेदिका स्त्री खुद्रारामे हेमच० ।

प्रसेन पु० १अनमित्रपौत्रे सत्राजिद्भ्रातरि यदुवंशीयभेदे हरिवं० १९अ० "सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः" श्यमन्तकोपाख्यानम् । [पत्तिर्दृश्या ।

प्रसेनजित् पु० क्षत्रभेदे भा०स० ८अ० । हरिवं०१२अ० तदु-

प्रसेव पु० प्र+सिव–कर्मणि घञ् । १वीणाङ्गे २सूते ३स्थिते च मेदि० । प्र+सेव–भावे घञ् । ४प्रकृष्टसेवने पु० ।

प्रसेवक पु० प्र+सिव–ण्वुल् । वीणाप्रान्तवद्धे १काष्ठे वीणा-दण्डाधः यद्दारुमात्रीयार्थम् अलाबुमयं भाण्डं यत्त्र-मौदिना आच्छाद्य दीयते तस्मिन् पदार्थे अमरः । २सूत्ररचितपात्रे (धोकड़ा) ३प्रकृष्टसूतिकारके त्रि० ।

प्रस्कण्व पु० प्रगतः कण्वं कारणत्वेन नि० ऋषौ सुट् । कण्वपुत्रे ऋषिभेदे च च बह्वृचां वेदमन्त्राणां द्रष्टृत्वात् ऋषिः ।

प्रस्कन्दन न० प्र+स्कन्द–भावे ल्युट् । १आस्कन्दने 'अग्नि-प्रस्कन्दनपरः" भा०आ० ८४अ० । अपादाने ल्युट् । आस्कन्दनापादाने यत आस्कन्दनं क्रियते२तस्मिन् । भावे ल्युट् । ३विरेके रत्नमा० तत्रार्थे प्रस्यन्दनमित्येव न्याय्यः पाठः स्यन्देर्धातोरर्थानुगमात् तत्रार्थे प्रस्क-न्दनमिति पाठस्तु लिपिकरप्रमादात् । कर्त्तरि ल्यु । ४यमहादेवे भा० व० १७अ० ।

प्रस्कुन्द पु०प्रगतः कुन्दम् चक्रम् अत्रा०स० पारस्करा०सुट् । कुन्दाख्यचक्राकारवेदिकायाम् "प्रस्कुन्देन प्रतिष्कभ्य" भा०उ०७२अ० । "प्रस्कन्देनेति पाठे मध्यमस्थिकयेत्यर्थः" । नीलकण्ठः ।

प्रस्तर पु०प्र+स्तृ–अच् । १पाषाणे (पातर) २पल्लवाद्यैरचिते शयनीये शब्दर० ३सख्यौ मेदि० ४दर्भमुष्टौ "अध्वर्युः प्रस्तरं प्रहरति" ताण्ड्य०ब्र० ६।७।१६ "प्रस्तरो दर्भ-मुष्टिः" भाष्यम् । तं प्रशंसति "यजमानो वै प्रस्तरः" १७ । "प्रस्तरस्य हविरासादनादिद्वारा यागसाधन-त्वात् यजमानोऽपि यज्ञसाधनमिति यागसाधनत्वसाम्यात् प्रस्तरो यजमानत्वेन स्तूयते" भा० ।

प्रस्तरिणी स्त्री प्रस्तरस्तदाकारोऽस्त्यस्य इनि ङीप् । गो-धोमिकायां राजनि० ।

प्रस्तरेष्ठा पु०प्रस्तरे तिष्ठति स्था–क्विप् अलुक्स०। विश्वदेवभेदे यजु० २।१७।

प्रस्तार पु० प्र+स्तृ–घञ् । १दलप्रधानवने हेमच० । २पल्ल-वादिरचितशयनीये शब्दर० । ३शय्यामात्रे हारा० । प्रस्तार्य्यन्ते विस्तार्य्यन्ते गुरुलघुरूपतया वर्णा मात्रा वा अनेन प्र+स्तृ–णिच्–करणे घञ् । ४लघुगुरुवर्णमात्रा-वनक्रियाभेदे तत्प्रकारश्च छ०र० उक्तो यथा

"पादे सर्वगुरावाद्यान्न्यसेत् गुरोरधः । यथोपरि तथा शेषं भूयः कुर्यादतः विधिम् । जने दद्याद्गुरून् शेष यावत् सर्वलघुर्भवेत् । प्रस्तारोऽयं समाख्यातश्छन्दो-विचितिवेदिभिः" । "प्रस्तारपीयवृत्तादीनां सर्वगुरुके पादे पाद इत्युपलक्षणं वर्णानामपि । प्रथमपङ्क्तौ लिखिते आद्यात् प्रथमगुरोरुत्तरमारभ्येत्यर्थः । द्वितीयप-ङ्क्तौ अधः तस्यैव अधस्तात्पङ्क्तौ प्रथमं लघुं न्यस्य यथा उपरि अन्त्यपङ्क्तौ अपरे अवशिष्टाः सन्निवि-शन्ते तथा तस्य दक्षिणपार्श्वेषु गुर्वादयो लेख्याः । तृतीय-पङ्क्तौ तु प्रथमाया गुरुव्यक्तेरधस्तात् लघुं न्यस्य शेषान् उपरिस्थद्वितीयपङ्क्तिस्थान् गुर्वादीन् न्यसेत् एवञ्च तृतीयपङ्क्तौ आद्यस्थानस्य न्यूनता तत्र किं देयमि-त्याकाङ्क्षायामाह, जने प्रस्तार्यसंख्यातो न्यूने सति यावन्मात्रे गुरून् दद्यात् एवं भूयो लघुः कुर्यात् यावच्च सर्वलघुकः पादो भवेत्, तावदेवं कुर्यादित्यर्थः । तत्र च-रप्रस्तारे लघुगुर्वोः ऋजुवक्रतया तदाकारयोदाहरणम्

प्रथमः भेदः ऽऽऽ मगणः द्वितीयो भेदः ।ऽऽ यगणः
तृतीयो भेदः ऽ।ऽ रगणः चतुर्थो भेदः ।।ऽ सगणः
पञ्चमो भेदः ऽऽ। तगणः षष्ठो भेदः ।ऽ। जगणः
सप्तमो भेदः ऽ।। भगणः अष्टमो भेदः ।।। नगणः ।

मात्राप्रस्तारे विशेषस्तु पिङ्गलादौ द्रष्टव्यः ।

मात्रावृत्तप्रस्तारेऽयं विशेषः जने गुर्वादिक्रमेण वर्णा देयाः । मात्रावृत्ते अवशेषे एको गुरुः त्रिमात्रावशेषे एको गुरुः तदग्रे एको लघुरेवं रीत्या वृत्तमात्रासंख्यया न्यून मात्रावारा संख्यापूरणार्थं गुरुलघुदानमिति बोध्यम् ।

प्रस्तारपङ्क्ति स्त्री छन्दोभेदे छन्दश्शब्दे २९७८पृ०दृश्यम् ।

प्रस्तार्य्यमाण न० "श्मश्रुनादिस्तृतः श्यावो रक्तो वा मांस-सञ्चयः । सन्निपातेन दोषाणां प्रस्तार्य्यमाणं तदुच्यते" वैद्यकोक्ते नेत्ररोगभेदे ।

प्रस्ताव पु० प्र+स्तु– "प्रे स्तु स्तुक्लुवः" पा० भावकरणादौ घञ् । १पर्य्याय लवे २अवसरे अमरः । ३प्रसङ्गे भाव०

दीक्षितः ४प्रकरणे काव्यप्र० । ५सामावयवभेदे स च प्रस्तोतृनामकेन ऋत्विजा गेयः साम्नः प्रथमो भागः । "प्रस्तोतव्यां देवता प्रस्तावमन्वायत्ता" छा० उ० । तस्य देवता च ब्रह्मरूपः प्राणस्तत्रैवोक्तः ।

प्रस्तावना स्त्री प्र+स्तु-णिच्-ल्युट् । १आरम्भे अटा० "आर्य्यावाक्यचरितप्रस्तावनाभिश्चित्रम्" वीरच० । प्रस्तावयति प्र+स्तु-णिच्-ल्यु । नाटकाङ्के आरम्भार्थके आमुखे स्त्री तल्लक्षणभेदादिकं सा० द० उक्तं तच्च आमुख शब्दे ७६६ पृष्ठादौ दृश्यम् ।

प्रस्तर न० प्र+स्तृ वा० क ऋत इत्वं रपरत्वं च । पल्लवादिरचिते शयनीये शब्दर० । [संहते २ध्वनिते च ।

प्रस्तीत(क) त्रि० प्र+स्यै-क्त तस्य ओवा सञ्ज्ञासारणञ्च ।

प्रस्तुत त्रि० प्र+स्तु-कर्मणि क्त । १प्रकरणप्राप्ते २प्राक्तनिके ३उपस्थिते ४उद्यते ५प्रतिपन्ने ६प्रकर्षेण स्तुते च ।

प्रस्तृत त्रि० प्र+स्तृ-क्त । १अन्तरिते त्रिका० । २प्रकर्षेण विस्तारिते त्रि० ।

प्रस्तोतृ त्रि० प्रकर्षं स्तौति प्र+स्तु-तृच् । १प्रकर्षेण स्तोतरि २साम्नः प्रथमभागगायके ऋत्विग्भेदे पु० अच्छावाकशब्दे ८३१ पृ० दृश्यम् । प्रस्तोतुर्हितं तस्येदं वा ष । प्रस्तोतिय तत्सम्बन्धिनि साम्नः प्रथमभागे तत्सम्बन्धिनि च त्रि० ।

प्रस्थ त्रि० प्र+स्था-क । १प्रकर्षेण स्थितियुते २गन्तरि च प्रपूर्वकतिष्ठतेर्गन्त्यर्थत्वात् । ३आढकचतुर्थांशरूपे परिमाणभेदे पु० आढकशब्दे ६५५ पृ० दृश्यम् । ४द्विशरावपरिमाणे वैद्यकम् । आधारे घञर्थे क । ५पर्वतसमभूभागे स्थितियोग्यस्थाने स्थानौ पु० न० । ६उन्नततरस्थलि मेदिनिः ७विस्तारे च "दीर्घस्य समानस्य न कुर्यान्मन्दिरं बुधः" ब्रह्मवै० पु० ब्र० ख० १०३ अ० । प्रस्थं पचति पच-ख तम् । प्रस्थम्पच प्रस्थमितपाचके त्रि० ।

प्रस्थपुष्प पु० प्रस्थमित पुष्पमस्य । १मधूके अमरः २अल्पपत्र तुलस्यां ३अम्बीरभेदे त्रिका० ।

प्रस्थल यमराजसम्बन्धिनि देशभेदे भा० भी० ७५ अ० ।

प्रस्थान प्र+स्था-भावे ल्युट् । १लिंगीभोर्युद्धार्थगमने २समनमात्रे च प्रस्थानं वर्ण्यतयाऽस्यास्त्र ठन् । प्रस्थानप्रतिपादके ग्रन्थे यथा युधिष्ठिरादीनां महाप्रस्थानप्रतिपादकः भारतान्तर्गतपर्वभेदः ।

कार्य्यवशात् यात्रादिने स्वयंगमनासम्भवे दूत्यभेदानां लिङ्गादिभेदे प्रस्थापनमाह स्मृ० चि० पी० यथा

यमिष्ठः "तस्मिन् मुहूर्त्ते स्वयमप्रयाणे प्रयोजनापेक्षितथा च दैवात् । तत्रैव तन्निर्मथनं च कार्यं स्त्रीबालानाञ्चापि तदुच्यमानम् राजमार्त्तण्डः । "प्रस्थाने ब्राह्मणादीनां यच्चक्रत्वमथाऽऽयुधम् । मध्यमलफलं चैव प्रशस्तं दक्षिणोत्तरम्" वसिष्ठः "श्वेतातपत्रध्वजचामरादिविभूषणोष्णीषगजाम्बरादि । आन्दोलिका रत्नरथाश्ववारान् यथासनाद्यं मनसस्त्वभीष्टम्" इति नारदोऽपि "अप्रयाणे स्वयं कार्यमपेक्ष्य भूपतिस्तथा । कुर्यात्तिर्गमनं छत्रध्वजवाहनसंयुतमिति" "गेहाङ्गेहान्तरमपि गमस्तर्हि यात्रेति गर्गः सीम्नः सीमान्तरमपि भृगुर्षाणक्षेपमात्रम् । प्रस्थानं स्यादिति कथयतेऽथो भरद्वाज एवं यात्रा कार्य्या बहिरिह पुरात् स्यादधिको नवीति" । "प्रस्थानमत्र धनुषां हि शतानि पञ्च केचिच्छतद्वयमुशन्ति दशैव चान्ये । संप्रस्थितो य इह मन्दिरतः प्रयातो गन्तव्यदिक्षु तदपि प्रयतेन कार्य्यम्" । "प्रस्थाने भूमिपालो दशदिवसमभिव्याप्य नैकत्र तिष्ठेत् सामन्तः सप्तरात्रं तदितरमनुजः पञ्चरात्रं तथैव । अर्द्धं गच्छेच्छुभाङ्गेऽप्यथ गमनदिनात् सप्तरात्रात्परं पूर्वं चायकौ तद्दिनेऽसौ रिपुविजयमनाश्चैव कुर्यात्" इत्यादि० । श्रीपतिरपि "वसेच्च चैकत्र दश क्षितीशो दिनान्यधो सप्त च मण्डलीकः । यः प्राकृतः सोऽहि न पञ्चरात्रं भद्रेण यात्रा परतः प्रयोज्या" । राजमार्त्तण्डः "आद्यामहानि सुनयः प्रवदन्ति सप्त यात्रास्वतीव शुभदानि दिनानि पञ्च । लोकेषु पश्चिमदिशि क्षितिनायकानां प्रस्थानकेषु दिवसत्रयमुत्तरस्याम्" प्रस्थानप्रकारमाह हरः "पूर्वं दक्षिणमुद्धृत्य पादं यायान्नरोत्तमः । ह्यालिंगनं पदं गत्वा यानमारुह्य संव्रजेत्" । करणे ल्युट् । ३मार्गे ४उपदेशोपाये च यथा श्रुतिस्मृतिन्यायप्रदर्शकम् उपनिषद्गीताशारीरकसूत्ररूपप्रस्थानत्रयम् । यथा वा भाष्यटीकायां पञ्चपादिकाभामतीकल्पतरुप्रस्थानत्रयम् ।

प्रस्थापित त्रि० प्र+स्था-णिच्-पुक् कर्मणि क्त । १प्रेरिते प्रेषिते च । २प्रकर्षेण स्थापिते त्रि० ।

प्रस्थायिन् त्रि० प्र+स्था-गम्या० भविष्यति णिनि । १भाविगमनकर्त्तरि । "प्रे स्थः" छा० इनि णिच्च । २गन्तुमनसि च तच्चरितः । [भाग० ।

प्रस्थिका स्त्री प्रस्थस्तदाकारोऽस्त्यस्याः ठन् । अम्बष्ठालतायां

प्रस्नुषा स्त्री स्नुषायाः स्नुषा भ्रुवो० । नप्तृवधूम् ।

"स्नुषास्च प्रस्नुषाश्चैव दुहितृश्च विशेषतः" भा० अ०

ई० अ०। नीलकण्ठः।"[जलादौ कात्या०श्रौ० २०।२।१३।

प्रस्नेय त्रि० प्रस्नातुमर्हति प्र+स्ना–अर्हार्थे यत्। स्नानार्हे

प्रस्यन्दन न० प्र+स्यन्द्–भावे ल्युट्। प्रकर्षेण स्यन्दने चलनक्रियाभेदे तच्च सुश्रुते देहे वायुलक्षणतया उक्तम् "तत्र प्रस्यन्दनोद्वहनपूरणविरेकधारणलक्षणो वायुः पञ्चधा प्रविभक्तः शरीरं धारयति"।

प्रस्फुट त्रि० प्र+स्फुट–क। १प्रफुल्ले विकसिते पुष्पादौ शब्दरत्ना०। २सुस्पष्टे सुव्यक्ते च।

प्रस्फोटन न० प्रस्फुट्यते अनेन प्र+स्फुट–करणे ल्युट्। १शूर्पे (कुलो) ख्याते अमरः। भावे ल्युट्। २ताडने ३प्रकाशे च मेदि०।

प्रस्यन्द पु०प्र+स्यन्द्–भावे घञ्। १प्रकर्षेण चरणे "ह्रदभिहितो भावो द्रव्यवत् प्रकाशते" उक्तेः २स्यन्दमाने इतादौ कर्त्तरि अच्। ३प्रस्रवणकर्त्तरि त्रि०"प्रस्यन्दमाध्वोकभूः" कुसुमा०।

प्रस्रवण न०प्र+स्रु–भावे ल्युट्। १अविच्छेदेन जलादिस्रवणे २स्रवे च। आधारे ल्युट्। यत्र स्थाने स्रवज्जलं निपत्य बहुलीभवति तादृशे ३स्थाने पर्व्वते चीरस्वामी। अप्। प्रस्रव तत्रार्थे हेमच०। माल्यवति पर्व्वते पु० हेमच०।

प्रस्राव पु०प्र+स्रु–भावे घञ्। १प्रकर्षेण चरणे ह्रदभिहितभावसद्द्रव्यपरत्वेन २मूत्रे अमरः।

प्र(स्रा)स्वन पु० प्र+स्वन–भावे अप् पक्षे घञ्। उच्चैःशब्दे

प्रस्रादस् त्रि० प्र+स्रद–क्विप्–असुन्। प्रकर्षेण स्रादयितरि ऋ० १०।१२।६६

प्रस्राप पु० प्रस्राप्यते शत्रुरनेन प्र+स्रप–णिच्–करणे अच्। शत्रोः प्रस्रापनसाधने अस्त्रभेदे भा० उद्यो० १८४अ०। करणे ल्युट्। प्रस्रापन तथाविधार्थे भा०व० ४१अ०।

प्रस्रापिनी स्त्री सत्यभामायाः भगिन्यां कृष्णभार्य्याभेदे हरिवं० १८अ०। [१८८अ० उक्तम्।

प्रस्वेद पु०प्र+स्विद–भावे घञ्। अत्यन्तस्वेदे तत्साधके औषधं गरुड़पु०

प्रहत त्रि० प्र+हन–क्त। १विक्षते २क्षुण्णे च शब्दरत्ना०।

प्रहनेमि ह० प्रहन्ति प्र+हन–ड तादृशो नेमिरिवाग्रं यस्य बहुव्री० अच्। चन्द्रे त्रिका०। [दिवसस्याष्टमे भागे अमरः।

प्रहर पु०प्रह्रियते यामिकैरुद्घोषादिरत्रिन् प्र+हृ–आधारे अप्।

प्रहरकुटुम्बी स्त्री कुटुम्बिनीभेदे राजनि०।

प्रहरण न० प्रह्रियतेऽनेन हृ–करणे ल्युट्। १अस्त्रे २अस्त्रमात्रे च अमरः। आधारे ल्युट्। २युद्धे। भावे ल्युट्। ३प्रहारे ४दले च।

प्रहरणकलिका स्त्री "ननभनलघुगैः प्रहरणकलिका" छ०र० उक्ते चतुर्दशाक्षरपादके छन्दोभेदे।

प्रहरिन् पु० प्रहरोऽधिकारकालत्वेनास्त्यस्य इनि। १यामिके २प्रहरकालाधिकृते ३सैन्यभेदे।

प्रहर्षण त्रि० प्रहर्षयति प्र+हृष–णिच्–ल्यु। १प्रकर्षेण हर्षकारके २बुधग्रहे पु० त्रिका० करणे ल्युट्। ३प्रहर्षसाधने त्रि०। स्त्रियां ङीप्। सा च ४हरिद्रायां हारा०। "स्नौ जौ गस्त्रिदशैः१०यतिः प्रहर्षणीयम्" छ०र० उक्ते त्रयोदशाक्षरपादके छन्दोभेदे च।

प्रहस पु० राक्षसभेदे रामा०क० ३६अ०।

प्रहसन न०प्र+हस–भावे आधारे वा ल्युट्। १प्रकर्षेण हासे परिहासे २दृश्यकाव्यरूपकभेदे मेदि०। ३व्याजेपे हेमच० रूपकभेदस्य लक्षणमुक्तं सा०द० यथा

"भाणवत् खल्विसन्ध्यङ्गास्याङ्गाङ्कैर्विनिर्मितम्। भवेत् प्रसहनं वृत्तं निन्द्यानां कविकल्पितम्। अत्र नाऽऽरभटी नापि विष्कम्भकप्रवेशकौ। अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा"। तत्र "तपस्विभगवद्विप्रप्रभृतिस्तत्र नायकः। एको यत्र भवेद्वृष्टो हास्यं तच्छुद्धसङ्क्ष्यते" यथा कन्दर्पकेलिः।

प्रहसन्ती स्त्री प्र+हस–शतृ ङीप्। १यूथ्यां त्रिका० २यासनीलतायां राजनि०। प्रा०स०। २प्रकृष्टाङ्कारधान्याम्।

प्रहस्त पु० प्रततो हस्तो यत्र। १विस्तृताङ्गुलिपाणौ चपेटे अमरः। रावणसैन्याधिपे २राक्षसभेदे भा०व० २७३अ०।

प्रहाणि प्र+हा–नि खत्वम्। अपचये।

प्रहार पु० प्र+हृ–भावे घञ्। आघाते।

प्रहारण न० प्र+हृ–णिच्–ल्यु। काव्यदाने शारदातनयी।

प्रहारयष्टी स्त्री प्रहारस्य वेदनोपशमनार्थं यष्टी शाक०त०। मांसरोहिण्याम् भावप्र०। [रामा०आर० २१।१६

प्रहारिन् त्रि०प्र+हृ–णिनि। १प्रहारकर्त्तरि पु०२राक्षसभेदे

प्रहास पु० प्रकृष्टो हासोऽस्य। १शिवे त्रिका० २नटे धरणि० ३सोमतीर्थे जटा०। प्रा०स०। ४अतिहासे पु०शब्दर०। ५नागभेदे पु० भा० आ० ५७अ०।

प्रहासिन् त्रि० प्रकृष्टं हासयति हसति वा हासि–हस–वा णिनि। १परस्य हासस्य कारके (भाँड) २स्वयं हासके ३विदूषके पु० हेमच०।

प्राहि पु०प्रह्रियते अत्र प्र+हृ–आधारे इन् णित्। सूपे अमरः

प्राहृत त्रि०प्र+हृ–क्त। १प्रेरिते २क्षिप्ते ३दत्ते न०हेमच०

प्रहुत न० प्र+हु-भावे क्त। भूतयज्ञे जटा०। "अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च। ब्राह्म्यं हुतं प्राशितञ्च सप्तयज्ञान् प्रचक्षते" इत्युपक्रम्य "प्रहुतो भौतिको बलिः" मनुनाऽस्य पारिभाषिकत्वमुक्तम् आर्षं पुंस्त्वम् "देवानभाजयत् हुतञ्च प्रहुतञ्च यद्वैश्वो जुह्वति प्रजुह्वति" ह०च०

"ये ह्ये अन्ने सृष्टा देवानभाजयत् के ते ह्ये इत्युच्यते हुतञ्च प्रहुतञ्च। हुतमित्यग्नौ हवनम्। प्रहुतं हुत्वा बलिहरणम्। यस्माद्ध्ये एते अन्ने हुतप्रहुते देवानभाजयत्। तस्मादेतर्ह्यपि यद्दक्षिणः काले देवेभ्यो जुह्वति देवेभ्य एवैतन्मनसाभिदीयमानमिति मन्वानाः एव जुह्वति प्रजुह्वति च हुत्वा बलिहरणञ्च कुर्वते इत्यर्थः" भा०।

प्रहृत न० प्र+हृ-भावे क्त। १प्रहारे २आघाते। कर्मणि क्त। ३क्षतप्रहारे त्रि० ४ऋषिभेदे पु०। तस्यापत्यम् अश्वा० फञ्। प्राहृतायन तदपत्ये पुंस्त्री०।

प्रहेण(ल)क न० पित्तकभेदे हारा०।

प्रहेलिका स्त्री प्र+हेल-इन् संज्ञायां कन्। दुर्विज्ञानार्थप्रश्ने (हेँयालि) अमरः। तल्लक्षणादि विदग्धमुखमण्डने उक्तं यथा "व्यक्तीकर्तुं कमप्यर्थं स्वरूपार्थस्य गोपनात्। यत्र वाक्यान्तरार्थौ कथ्येते सा प्रहेलिका। सा द्विधार्थी च शब्दी च विख्याता प्रश्नगोचने। आर्थी स्यादर्थविज्ञानात् शाब्दी शब्दस्य भङ्गतः" आर्थी यथा "तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः। गुरूणां सन्निधानेऽपि कः कूजति सुरतोद्यतः"(दृषदूनजलपूर्णकुम्भः उत्तरम्) शाब्दी यथा "सदारिसध्यापि न वैरियुक्ता नितान्तरक्ताथचितैव नित्यम्। यथोक्तवादिन्यपि नैव दूतौ का नाम कान्तेति निवेदयन्ती" (सारिका उत्तरम्) काव्यादर्शे तु "प्रहेलिका मकाराणां पुनरुद्विग्नते गतिः। क्रीडागोष्ठीविनोदेषु तज्ज्ञैराकीर्णमन्त्रणे। परव्यामोहने चापि सोपयोगाः प्रहेलिकाः। आहुः समायतां१ नाम गूढार्थां पदसन्धिना। वञ्चिता२ऽन्यत्र रूढेन यत्र शब्देन वस्तुना। व्युत्क्रान्ता३ऽतिव्यवहितप्रयोगान्मोहकारिणी। सा स्यात् प्रसृष्टिता४ यस्यां दुर्बोधार्था पदावली। समानरूपा५ मौनार्थैरोपितैर्यथिता पदैः। परुषा६ऽलक्षणाक्लिष्टसाकल्यव्युत्पादितश्रुतिः। संख्याता७ नाम संख्यानं यत्र व्यामोहकारणम्। अन्यथा भाषते यत्र वाक्यार्थः सा प्रकल्पिता८। सा नानान्तरिता९ नाम यस्यां नानार्थकल्पना। निश्चिता१० निश्चितान्यार्था तुल्यधर्मस्य सा गिरा। समानशब्दो११ऽन्यत्तुल्यशब्दप्रत्यायसाधिता। संमूढा१२ नाम या साक्षान्निर्दिष्टार्थापि मूढये। योगमालालिका नाम या स्यात् सा परिहारिका१३। एकच्छन्ना१४ऽऽश्रितं व्यक्तं यस्यामन्यगोपनम्। सा भवेदुभयच्छन्ना१५ यस्यामुभयगोपनम्। सङ्कीर्णा१६ नाम सा यस्यां नानालक्षणसङ्करः। एताः षोड़श निर्दुष्टाः पूर्वाचार्यैः प्रहेलिकाः। दुष्टप्रहेलिकाश्चान्यास्तैरधीताश्चतुर्दश" । एताः समागताप्रश्नतयः षोड़श प्रहेलिकाः पूर्वाचार्यैः निर्दुष्टाः अदुष्टत्वेन कथिता इत्यर्थः, तैः पूर्वाचार्यैरेव अन्याः चतुर्दश दुष्टाः प्रहेलिकाः च्युताक्षरादिकाः अधीता पठिताः सदोषत्वेन कीर्त्तिता इत्यर्थः"। एतासामुदाहरणानि तत्र द्रष्टव्यानि। तासामुद्देश सरस्वतीकण्ठा० दृश्यताः। "काव्यान्तर्गतभूतत्वात् नालङ्कारः प्रहेलिका" सा०द०।

प्रहोषिन् त्रि० प्र+हु-वा० इनि सुगागमश्च। प्रकर्षेण हवनकर्त्तरि ऋ० ८९२।४

प्रज्ञा(ज्ञा)द पु० १हिरण्यगर्भिपोः पुत्रभेदे भा०आ० ६५अ०। तद्धरितं भाग० ७.५ अध्यायादौ दृश्यम्। तस्य पूर्वजन्मकथा पाद्मे भूमि०५अ०। २नागभेदे भा०स०९अ०। ह्लाद-भावे घञ्। ३प्रमोदे विश्वः ह्लाद-भावे घञ्। ४शब्दे धरणिः। [ज्वल०। २आसक्ते हेमच०।

प्रह्व त्रि० प्र+हृ त्यागे वन् नि० आलोपः। १नम्रे उज्ज्व०

प्रह्वलीका स्त्री प्रह्वीक+पृषो०। प्रहेलिकायां हला०।

प्रा पूर्त्तौ अदा० प०सक० अनिट्। प्राति अप्रासीत् पपौ कविकल्पद्रुमे प्रा इति पाठः तत्रार्थे।

प्रांशु त्रि० प्रकृष्टा अंशवोऽस्य। १उन्नते उन्नते अमरः। वैवस्वतमनोः २पुत्रभेदे पु० हरिवं०१०अ०। वत्सप्रीष्टपत्न्यां सुदक्षिणायां जाते ३पुत्रभेदे पु० मार्क०पु० ११८अ०।

प्राकर पु० द्युतिमच्छब्दस्य पुत्रभेदे मार्क०पु० ५२अ०।

प्राकरणिक त्रि० प्रकरेण प्राप्तं ठक्। प्रकरणप्राप्ते।

प्राकर्षिक त्रि०प्रकर्षं नित्यमर्हति ऋहा०ठञ्; नित्यप्रकर्षार्हे

प्राकर्षिक पु० प्र+आ+कृष-किकन्। १स्त्रीणां नर्त्तके २परदारोपजीविनि च उज्ज्वलद०।

प्राकाम्य न० प्रकामस्य भावः ष्यञ्। १अष्टविधैश्वर्य्यमध्ये इच्छानभिघातरूपे ऐश्वर्ये २स्वाच्छन्द्यानुमतौ च हेमच० "प्राकाम्यं ते विभूतिषु" कुमारः। अणिमन्शब्दे ६६९ पृ० ऐश्वर्यशब्दे १५४६ पृ० दृश्यम्।

प्राकार पु०प्रकीर्यते प्र+कृ-आधारे घञ् दीर्घः। इष्टकादि-

रचिते वेष्टनाकारे प्राचीरादौ "अद्रेः विंशतिहस्तेभ्यः प्राकारं न शुभावहम्। अस्य हस्तद्वयात् पूर्वं दीर्घं हस्तत्रयं तथा। गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च। न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिकं शुभम्" ब्रह्मवै० पु० ११३अ० तन्माहात्म्यादुक्तम्। अस्य क्लीवत्वमार्षम्। भावे घञ्। २सर्वतो विस्तारे पु०।

प्राकारमर्दिन् त्रि० प्राकारं खण्डयति खण्ड-णिनि ह्रस्वः। प्राकारभेदके। ततः वाह्वा० अपत्ये इञ् संयोगोपधेनन्तत्वात् न टिलोपः। प्राकारमर्दिनि तदपत्ये पुंस्त्री०।

प्राकारीय त्रि० प्राकाराय हितम् छ। १प्राकारप्रकृतौ इष्टकादौ। प्राकार आसामिष्टकानां स्यात् प्राकारोऽस्मिन् वा स्यात् छ। २सम्भवत्प्राकारायामिष्टकायाम् ३सम्भवत्प्राकारे देशे च।

प्राकृत त्रि० प्रकृष्टप्रकृतमपकार्य्यं यस्य। १नीचे। प्रकृतेरवम् अण्। २प्रकृतिसम्बन्धिनि। प्रकृत्या स्वभावेन निर्वृत्तः अण्। ३स्वभावसिद्धे "बभूव प्राकृतः शिशुः" भाग० १०। प्रकृतेः संस्कृतशब्दात् आगतः अण्। ४नाटकादौ प्रसिद्धे अपभ्रंशशब्दभेदे अमरः। प्राकृतभाषायाः संस्कृतशब्दप्रकृतिकत्वात् तथात्वं प्राकृतलङ्केश्वरादौ वररुचिप्रादिप्रणीते अन्येऽस्य विस्तरो दृश्यः। स्वभावतः सिद्धयोः पूर्णिमाणिमयोः। स्वदेशानन्तरदेशवर्त्ती नृपः प्राकृतः शत्रुः यस्मिन्नुद्दिष्टविषयव्याप्तित्वसम्बन्धात्तस्य तथात्वम् तदानन्तरविषयस्थो नृपः प्राकृतं मित्रं मध्यवर्त्तिन्नृपविषयस्य उभयोः जिघृक्षासम्भवात् तथात्वम्। "स्यातामरिमित्रौ मित्रे च सहजप्राकृतावपि" माघ २यसर्गश्लोकव्याख्याने मल्लिनाथः।

प्राकृतज्वर पु० "वर्षाशरद्वसन्तेषु वातादैः प्राकृतः क्रमात्" ज्वराधिकारे माधवोक्ते ज्वरभेदे।

प्राकृतप्रलय कर्म०। प्रलयभेदे प्रलयशब्दे दृश्यम्।

प्राकृतमित्र न० कर्म०। स्वभावसिद्धे मित्रे विषयानन्तरस्य नृपस्योपात् प्राकृतशत्रोः अव्यवहितोत्तरविषयस्थे नृपे।

प्राकृतशत्रु पु० कर्म०। विषयानन्तरवर्त्तिनि नृपे। [सिद्धे

प्राकृतिक त्रि० प्रकृत्या निर्वृत्तः ठञ्। प्रकृतिसाध्ये स्वभाव-

प्राक्काय त्रि० प्राक् पूर्ववर्त्तिनी काया यत्र दिने। हस्तिनः हस्तनक्षत्रस्य पूर्ववर्त्तिकायायुते दिने "प्राक्काये कुञ्जरस्य च" मनुः। कुञ्जरच्छायशब्दे २०६८पृ०दृश्यम्।

प्राक्तन त्रि० प्राचि काले देशे प्राच्यां दिशि वा भवः ट्यु, ट्युट्च। प्रागभवे "प्रपेदिरे प्राक्तनजन्मविद्याः" कुमा०। स्त्रियां ङीप्। २पूर्ववर्त्तिनि कारणे च।

प्राक्तनकर्म न० प्राक्तनं कारणं कर्म यस्य। कर्मरूपकारणहेतुके अदृष्टे १पापे २पुण्ये च जटा०।

प्राक्पद पु० कर्म०। पूर्ववर्त्तिनि पदे।

प्राक्पुष्पा स्त्री प्राक् पुष्पं यस्याः अजा० टाप्। प्राग्वर्त्तिपुष्पान्वितलतायाम्। (काँटाल) जटाधरः।

प्राक्फल पु० प्राक्फलमस्य। पुष्पं विना फलयुते पनसे

प्राक्फल्गुनी स्त्री कर्म०। पूर्वफल्गुनीनक्षत्रे तत्र भवः ठञ्। प्राक्फल्गुनिक दृक्षस्तौ। [दृक्षस्तौ हारा०।

प्राक्फल्गुनीभव पु० प्राक्फल्गुन्यां भवति भू-खच्।

प्राक्फाल्गुन पु०प्राक्फाल्गुन्यां भवः अण्। दृक्षस्तौ शब्दच०

प्राक्शङ्कवत् पु० वृक्षभेदे भा०श०५३अ०। [सन्ध्यायाम्।

प्राक्सन्ध्या स्त्री कर्म०। पूर्वसंख्यायां सूर्य्योदयसन्ध्यायां

प्राक्सवन न० प्राक्कालिकं सवनम्। यज्ञिये प्रथमसवने।

प्राक्सौमिक त्रि०सोमात् सोमयागात् प्राक् अव्ययी० प्राक्सोमं तत्र भवः ठञ् उत्तरपदवृद्धिः। सोमयागात् प्राक्कर्त्तव्ये अग्निहोत्रदर्शपौर्णमासपशुयागचातुर्मास्ययागरूपे १क्रियाकलापे २वृद्धौ स्त्री ङीप्। "प्राक्सौमिकीः क्रियाः कुर्य्यात् यस्यात्तं वार्षिकं भवेत्" याज्ञ० वैश्वव्याख्यायां मिता० दृश्यम्।

प्राक्स्रोतस् स्त्री प्राग्वाहि स्रोतोऽस्याः। १नद्यां "प्राक्स्रोतसो नद्यः प्रत्यक्स्रोतसो नदा नर्मदां विभेत्याहुः" मल्लि० धृतवाक्यम्।

प्राग्ग्र त्रि० प्राक् अग्रं यस्य। पूर्वाभिमुखे।

प्राग्दश त्रि० प्रगदिनोऽदूरदेशादि प्रगदा० चतुरर्थ्यां ञ्य। प्रगदिनोऽदूरदेशादौ।

प्रागभाव पु० प्राग्वर्त्ती अभावः। इह कपाले घटो भविष्यतीत्यादिप्रतीतिसिद्धे संसर्गाभावभेदे "प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च। एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते" भाषा०। तल्लक्षणन्तु ध्वंसप्रतियोगित्वे सत्यभावत्वम्। स च उपादानदेश एव वर्त्तते नान्यत्र। तस्य च सामान्यधर्मावच्छिन्नप्रतियोगितात्वं नास्ति किन्तु तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगितात्वम्। स च प्रतियोगिजनकः इति न्यायमते। सांख्यादिमते भावस्यानागतावस्थैव प्रागभावपदवाच्येति भेदः।

प्रागल्भ्य न० प्रगल्भस्य भावः ष्यञ्। १प्रगल्भतायां "प्रागल्भ्यहीनस्य नरस्य विद्या शस्त्रं यथा कापुरुषस्य हस्ते"

ख्यो० त०। "निःसाध्वसत्वं प्रागल्भ्यम्" सा० उक्ते २भयशून्यत्वरूपे स्त्रीणां सात्त्विकभावभेदे च।

प्रागुदीची स्त्री प्राच्या उदीच्या अन्तराला दिक् स०स०। पूर्वोत्तरदिशोरन्तरालायां दिशि विदिशि ईशानकोणे।

प्राग्ज्योतिष पु०कामरूपदेशे हेमच०। तत्र पूर्वं नरकासुरस्य पुरी आसीत् यथा कालिका० २७अ० "करतोया सदा गङ्गा पूर्वभागावधिश्रिता। यावल्लिखितकालान्ति तावद्देयं पुरं तव। तत्र देवी महामाया योगनिद्रा जगत्प्रसूः। कामाख्यारूपमास्थाय सदा तिष्ठति शोभना। तत्रास्ति सदराजोऽयं लौहित्यो ब्रह्मणः सुतः। तत्रैव दश दिक्पालाः स्वे स्वे पीठे व्यवस्थिताः। तत्र स्वयं महादेवो ब्रह्मा याऽहञ्च(हरिश्च)सर्वदा। चन्द्रः सूर्यश्च सततं यसेत् तत्रैव पुत्रक!। सर्वे क्रीडार्थमायाता रङ्गदेशसत्तमम्। तत्र स्त्रीः सर्वतो भद्रा भोग्यमत्र सदा वसु। अत्रैव हि स्थितो ब्रह्मा प्राङ् नक्षत्रं ससर्ज ह। ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा। अत्र त्वं वस भद्रन्ते ह्यभिषिक्तो मया स्वयम्"। नरकं प्रति भगदुक्तिः। द्वापरे तत्र भगदत्तो नृप आसीत् यथोक्तम् "तेरेव रक्षितः सर्वैः प्राग्ज्योतिषिभिषाढ्यवत्। यत्र राजा महानासीद्भगदत्तो विशाम्पते!" भा०स०२९अ०।

प्रागभक्त न० स्मृतोक्ते भक्तभक्षणात् प्राक्कालरूपे औषधसेवनकालभेदे "अत ऊर्द्धं दशौषधकालान्वक्ष्यामः। तत्र निर्भक्तं १ प्रागभक्तं२ मध्येभक्तं३ मन्तराभक्तं ४ सभक्तं ५ साहचर्यं ६ सङ्कुसङ्कुयावं (सभक्तनभक्तं वा) ७ आसान्वरा८ चेति दशौषधकालाः" इत्युपक्रमे "प्रागभक्तं नाम यत्तु प्रागभक्तस्योपयुज्यते। शीघ्रं विपाकमुपयाति बलं न हिंस्यादल्पाहृतं न च सङ्कुवैदनाश्चिरेति। प्रागभक्तसेवितमयो बलमादधाति दद्याच्च दुर्बलगुभीरुवराङ्गनाभ्यः"।

प्रागभार पु०प्रकृष्टो भारः प्रा०स०। १उत्कर्षे २परभागे "मांसमस्तिष्कपङ्क प्रागभारः" प्रबोधचन्द्रोदयः। ३पर्वताग्रभागे त्रिका०। प्रागभाव तत्रार्थे त्रिका० पाठान्तरम्। स च प्राग्वर्त्तित्वे च। [अमरः।

प्राग्रहर त्रि० प्राग्रे प्रकृष्टाग्रे स्थितेऽर्थे हृ-अप्। श्रेष्ठे

प्राग्राट न० प्राग्रे अटति अट-अच्। अवनदभि (पातालादद) त्रिका०।

प्राग्र्य त्रि० अकर्षेणाग्रे भवः यत्। श्रेष्ठे अमरः।

प्राग्वंश पु० प्राक् वंशः सपत्नीक यजमानादिसदायोऽत्र। हविर्दानात् पूर्वभागस्थे यजमानादिस्थित्यर्थे गृहे अमरः। २विष्णौ च "प्राग्वंशो वंशवर्द्धनः" विष्णुसं०। "अन्यस्य वंशः पाश्चात्त्यः अस्य तु वंशः प्रपञ्चः प्रागेव न पाश्चात्त्यः" भा०।

प्राग्वचन न०प्रागुक्तं वचनम्। मन्वादिभिः पूर्वमुक्ते वचने। "यथोक्तमेतद्वचनं प्रागेव मनुना पुरा। प्रागिदं वचनं प्रोक्तमतः प्राग्वचनं विदुः" भा० शा० १२१अ०।

प्राग्वत् अव्य० प्रागिव वति। पूर्वदेशकालतुल्ये। [हेमच०।

प्राघात पु० प्राहन्यतेऽत्र प्र+आ+हन-आधारे घञ्। युद्धे

प्राघार पु० प्र+घृ-चरणे भावे घञ् दीर्घः। यज्ञादौ वह्नेरुपरि घृतादेश्चरणे अमरः।

प्राघुण पु० प्र+आ-घुण-क। अतिथौ त्रिका०।

प्राघुणिक पु० प्रघुण+स्वार्थे ठक्। अतिथौ [तिथौ हेमच०

प्राघूर्णिक पु० प्र+आ+घूर्ण-भावे घञ् तत्र साधु ठञ्।

प्राङ् न०प्रहृतं प्रकृष्टं वाङ्मनस्य प्रा०ब०। १पद्यबन्धादौ मन्दर० २प्रकृष्टदेहयुते त्रि० स्त्रियां स्वाङ्गत्वात् ङीष्।

प्राङ्गण न० प्रकृष्टमङ्गनं पूर्व० णत्वम्। १गृहभूमौ मन्दर० (उठान) २अजिरे १पद्यबन्धादौ च हेमच०। "अभङ्गं सूर्यवेधं प्राङ्गण्यञ्च तथैव च" ब्रह्म०वै०अ०ख०१०२अ०उक्तेः तत्र सूर्यविद्धत्वमशुभम्। पूर्वपश्चिमायतत्वे हि तस्य सूर्यविद्धत्वं दक्षिणोत्तरायतत्वे च चन्द्रविद्धत्वमिति भेदः।

प्राङ्न्याय पु० "आचारेणावसन्नोऽपि पुनर्लंक्षयते यदि। सोऽभिधेयो लिखितः पूर्वं प्राङ्न्यायस्य स उच्यते" इत्युक्ते व्यवहारविषये उत्तरभेदे १०६० पृ० दृश्यम्।

प्राङ्मुख त्रि० प्राक् पूर्वदिक्स्थं मुखमस्य। पूर्वदिङ्मुखे स्त्रियां ङीप्। यत्र विशेषो नोक्तः तत्र प्राङ्मुखत्वं आश्वलायनगृह्यसूत्रादौ दृश्यम्।

प्राच् अव्य० प्राञ्चि सप्तम्यर्थे ऋचि तस्य लुक्। प्राचीयर्थे।

प्राच् त्रि०प्र+अञ्च-क्विप्। पूर्वे १देशे २काले च ३दिशि स्त्री ङीप्। ४पूज्यपूजयोरन्तरालदिशि स्त्री "यत्रैव भानुस्तु वियत्युदेति प्राचीति तां वेदविदो वदन्ति। तथा पुरः पूजकपूज्ययोस्तु सदागमज्ञा प्रवदन्ति तन्त्रे" ति०त० धृतवाक्यम्। एतच्च "शिवपूजाव्यतिरिक्तविषयम्" वाचस्पतिमिश्राः। टित्त्वात् वा टाप्। "प्राचामन्तः" ऋ० १।१४०।२। "प्राचामन्तः" ऋ०८।६१।६ "प्राची वै दैवी दिक् पुरस्ताद्वै देवाः, प्रत्यञ्चो मनुष्यास्तद्रूपाश्चः तस्मात्तेभ्यः प्राङ्तिष्ठन् जुहोति" श्रुत० २।१।१।६

प्राच पु०प्र+आ+अञ्च-क्विप् वा०ङ। १प्रकर्षेण रञ्चके "प्राचो-

ऽस्पृक्षे" ताण्ड्य॰ ब्रा॰ १।६२स्तु॰। प्र+अनृच-यञर्थे भावे यञ्। २प्रकृष्टगमने प्राचैःशब्दे ऋ॰भाष्ये दृश्यम्।

प्राचिका स्त्री प्राचिनोति मधु प्र+आ+चि-ड स्वार्थे कापि अत इत्त्वम्। वनमक्षिकायाम् अमरः।

प्राचिन्वत् पु॰ राजभेदे "जनमेजयः खल्वनन्तां नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान्नाम। यः प्राचीं दिशं जिगाय यावत् सूर्योदयात् ततस्तस्य प्राचिन्वत्त्वम्" भा॰ आ॰ ९५ अ०।

प्राचीन त्रि॰ प्राक्+भवार्थे ख। १पूर्वदिग्देशादौ भवे। २वनतिक्तायाम् (आकनादि) अमरः ३रास्नायाञ्च स्त्री गौरा॰ ङीष्।

प्राचीनगर्भ पु॰ ऋषिभेदे भा॰शा॰ ३५१ अ०।

प्राचीनपनस पु॰ नित्यकर्म॰। बिल्वे त्रिका॰।

प्राचीनबर्हिस् पु॰। १इन्द्रे २नृपभेदे च हेमच॰। "अत्रिवंशे समुत्पन्नो ब्रह्मयोनिः सनातनः। प्राचीनबर्हिर्भगवां तस्मात् प्रचेतसो दश" भा॰शा॰ २०८अ०। "प्राचीनबर्हिर्भगवान् महानासीत् प्रजापतिः। हविर्धानात् द्विजश्रेष्ठ! येन संवर्द्धिताः प्रजाः। प्राचीनाग्राः कुशास्तस्य पृथिव्यां विश्रुता मुने!। प्राचीनबर्हिर्भगवान् ख्यातो भुवि महाबलः" वह्निपु॰ उक्ते २हविर्धानेः पुत्रे भा॰ अनु॰ १४७ अ०।

प्राचीनयोग पु॰ प्राचीनो योगोऽस्य। ऋषिभेदे तस्य गोत्रापत्यं गर्गा॰यञ्। प्राचीनयोग्य तदुगोत्रापत्ये पुंस्त्री॰

प्राचीनयोगिनीपुत्र यजुर्वेदवंश्यस्थे ऋषिभेदे शत॰ब्रा॰ १४।९।४।२१।

प्राचीनामलक न॰ नित्यकर्म॰। पानीयामलके अमरः।

प्राचीनावीत न॰ "सव्यं बाहुं सगृह्य दक्षिणे तु द्विजातयः। प्राचीनावीतमित्युक्तं पैतृके कर्मणि योजयेत्" इत्युक्ते श्राद्धादौ कर्त्तव्ये वामकरे बर्हिष्कृते सति दक्षिणस्कन्धार्पिते यज्ञसूत्रादौ।

प्राचीनावीतिन् पु॰ प्राचीनावीतमस्त्यस्य इनि। तद्युते "उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः। सव्ये प्राचीनावीतो निवीती कण्ठसज्जने" मनुः। गोभिलः "दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येंऽसे प्रतिष्ठापयति दक्षिणं कक्षमवलम्बं भवति एवं यज्ञोपवीतो भवति। सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेंऽसे प्रतिष्ठापयति सव्यं कक्षमवलम्बनं भवत्येवं प्राचीनावीती भवति"।

प्राचीपति पु॰ ६त॰। इन्द्रे त्रिका॰।

प्राचीर न॰ प्राचीयते प्र+या-चि-क्रन् दीर्घश्च। सर्वतो वेष्टनाकारे इष्टकादिनिर्मिते आवरणे (पाँचिर) अमरः अस्य पुस्त्वं तन्मानादि च युक्तिकल्पतरावुक्तं यथा "गजैरभेद्यामनुजैरलङ्घ्याः प्राचीरखण्डा नृपतेर्भवन्ति। राजदण्डोद्यताः सर्वे प्राचीराः पृथिवीभुजः। विंशतिस्ते तु पञ्चाग्ये पार्श्वयोः पञ्च पञ्च च। पश्चात् पञ्च च विज्ञेयाः प्राचीराः पृथिवीभुजः। सर्वमान्ते त्वावरणो नाम प्राचीर उच्यते। प्रतिप्राकारसंस्थानं द्वारं नाभिसुखस्थितम्"। "राजच्छत्रान्तरे पञ्च राजद्वारे महीपतेः। राजदण्डत्रये सार्द्धं जयद्वारे प्रतिष्ठिताः। अद्वारे राजदण्डार्द्धे प्राचीराः पृथिवीपतेः। एवं व्यवस्थिते स्थाने मध्यमे तद्वि तिष्ठति। राजच्छत्रद्वयं सार्द्धमायामे जयवस्तुनि। परिणाहे पञ्च राजदण्डान्तिष्ठन्ति मध्यतः। राजपट्टाभिधानेन स्थानमेतन्निगद्यते। अस्मिन् गृहं नृपः कृत्वा सुचिरं सुखमश्नुते"

प्राचेतस पु॰ प्रचेतस्+अपत्यादौ अण्। १वाल्मीकिमुनौ २प्राचीनबर्हिषो नृपस्य पुत्रे ३वरुणस्य पुत्रे च।

प्राचैस् न॰ प्र+आ+चि-वा॰डैसि। प्राचीने ऋ॰१।८३।२भाष्ये। तत्र च पञ्चान्तरे प्राचैरित्यत्र प्राचशब्दस्तृतीयावहुवचनान्त इत्युक्त्वा प्राचैः प्राञ्चैरित्युक्तम्।

प्राच्य त्रि॰ प्राचि भवः यत्। १शरावत्या नद्याः प्राग्दक्षिणे देशे अमरः। प्राच्यां दिशि प्राचि देशे काले वा २भवे त्रि॰। "प्राच्यैर्हालिका कर्त्तव्या" दायभा॰।

प्राच्यवाट न॰ प्राच्यो वाटो यस्य। प्राग्देशस्थे दशकुमा॰।

प्राच्यवृत्ति स्त्री "पूर्वेण युतोऽथ पञ्चमः प्राच्यवृत्तिरुदितेऽन्त्ययुग्मयोः" वृ॰र॰उक्ते १छन्दोभेदे। कर्म॰। २प्राचीनायां वृत्तौ स्त्री व॰स॰। ३तथावृत्तियुते त्रि॰।

प्राच्यसप्तसम त्रि॰ सप्त समाः प्रमाणमस्य साल्च् तस्य द्विगुत्वात् लुक् कर्म॰। प्राचीने सप्तसमे "द्विगौ प्रमाणे" पा॰ तस्य प्रकृतिस्वरः।

प्राच्यायन पुंस्त्री॰ प्राचस्य गोत्रापत्यम् अश्वा॰ फञ्। प्राचस्य गोत्रापत्ये। [प्राङ्विवेकः।

प्राच्छ् त्रि॰ पृच्छति प्रच्छ-क्विप् निपा॰ दीर्घश्च। जिज्ञासके

प्राजक पु॰ प्र+अज-एवुल् वीभावाभावः। सारथौ "यत्राप वर्त्तते युग्यं वैगुण्यात् प्राजकस्य च" मनुः।

प्राजन न॰प्र+अज-करणे ल्युट् वीभावः। तोदने पश्वादेश्चालनदण्डे (पाचनी) अमरः। [प्राजयाञ्चक्रे प्रजया कृत्वा वा।

प्राजया अव्य॰ प्राजनक्रियायासु साक्षा॰ वा गतिसंज्ञा।

प्राजरुहा अव्य० रुहिक्रियायासु सप्ता० वा गतिसंज्ञा। प्राजरुहाकृत्य प्राजरुहा कृत्वा वा।

प्राजहित पु० गार्हपत्येऽग्नौ कात्या०श्रौ० ८।६।१२

प्राजापत त्रि०प्रजापतेः धर्म्यं महिष्या०अण्। प्रजापतेर्धर्म्ये

प्राजापत्य पु० प्रजापतिर्देवताऽस्य यक्। १अष्टविवाहभाग्ये विवाहभेदे "ब्राह्मोदैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः" मनुना अष्ट विवाहानुद्दिश्य "सहोभौ चरतां धर्ममिति वाचानुभाष्य च। कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः" इति लक्षितः "तत्राहं प्रातस्त्यहं सायं तत्राहमद्याद्याचितम्। तत्राहं परश्व नाश्नीयात् प्राजापत्यमिति स्मृतम्" इति स्मृत्युक्ते द्वादशाहसाध्ये २व्रतभेदे न०। ३प्रजापत्यधिदेवताके चतुर्थ्यादौ त्रि०। ४प्रजन्यात्मभाङ्गे सर्वस्वदक्षिणकेष्टिभेदे स्त्री "प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम्। आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्" याज्ञ०। ५रोहिणीनक्षत्रे न० ६प्रयागतीर्थे न० त्रिका० ७जैनभेदे पु० हेमच०। [जायाया धर्म्ये।

प्राजावत त्रि० प्रजावत्या धर्म्यं महिष्या० अण्। भावे-

प्राजिन् पु०प्र+अज-णिनि व्यभावः। पक्षिभेदे मेदि० अमरः

प्राजित्र पु० प्र+अज-इत्र वीभावाभावः। सारथौ।

प्राजेय न०प्रजेयो देवताऽस्य अण्। १रोहिणीनक्षत्रे २प्रजापतिदेवताके चतुर्थ्यादौ त्रि०। प्राजेश्वरादयोऽप्यत्र।

प्राज्ञ पु०प्रकर्षेण जानाति प्र-ज्ञा-क स्वार्थे अण्। १पण्डिते अमरः २राजगुरौ राजनि०। प्रज्ञाऽस्यस्य अण्। ३बुद्धिमति ४दक्षे च त्रि०। प्रज्ञा+स्वार्थे ण। ५बुद्धौ स्त्री टाप्। प्राज्ञस्य पत्नी ङीप्। प्राज्ञी ७प्राज्ञपत्न्यां स्त्री। ७कल्किनो ज्येष्ठभ्रातरि पु० कल्किपु० २अ०। प्रकर्षेण अज्ञः। वेदान्तसारोक्ते दृश्यपदार्थसंचैतन्ये एकाज्ञानमात्रभासके जीवचैतन्ये पु० "एतदुपहितचैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते। एकाज्ञानावभासकत्वादस्य प्राज्ञत्वम् अस्यैवोपाधितयाऽनतिप्रकाशकत्वम्" वेदान्तसारः। प्रज्ञ+स्वार्थे अण् स्त्रियां ङीप्। प्राज्ञी ६सूर्यपत्न्यां स्त्री। [त्रि० हेमच०।

प्राज्य न०प्रकृष्टमाज्यं प्र+अञ्ज-क्यप् वा। १प्रकृष्टघृते २प्रचुरे

प्राच् त्रि० प्र+अञ्च्+क्विप्। पूर्वदेशकालवर्त्तिनि। अक्षेर्नलोपाभावात् भवे प्राक्षः प्राक्ष इत्येव।

प्राञ्जल त्रि० प्र+अञ्ज-अलच्। १सरले २सुबोधे च जटा०।

प्राञ्जलि त्रि० प्रवृद्धोऽञ्जलिर्येन प्रा०ब०। १बद्धाञ्जलिपुटे प्रा०ब०। २बद्धाञ्जलौ पु०।

प्राञ्जलिन् त्रि० प्राञ्जलिरस्त्यस्य ब्रीह्या० इनि। बद्धाञ्जलियुक्ते स्त्रियां ङीप्।

प्राडाहत पु० हृत०। प्रज्ञाकारकेणाहृते तस्यापत्यमिञ् प्राडाहति तदपत्ये ततः यूनि फक् तौल्व० न लुक्। प्राडाहतायन तदीये यून्यपत्ये पुंस्त्री०।

प्राड्वि(वा)वेक पु० अर्थिप्रत्यर्थिनौ पृच्छति प्रच्छ-क्विप् प्राट्, तयोर्वाक्यं विरुद्धाविरुद्धतया विवेचयति वक्ति वा वि+विच-वि+वच-वा संज्ञायां घञ् कर्म०। व्यवहारदर्शनाय राजनियुक्ते १विचारके स्वयं विचारके २नृपसहाये च तल्लक्षणादिकं वीरमि० उक्तं यथा "विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च। क्रियापूर्वं प्रागुवदति प्राड्विवाकस्ततः स्मृतः" बृहस्पतिः। व्यासोऽपि "विवादानुगतं पृष्ट्वा सभ्यस्तत् प्रयत्नतः। विचारयति येनासौ प्राड्विवेकस्ततः स्मृतः" गौतमेन तु बृहस्पतिवदुयोगार्थः प्राड्विवाकशब्दस्य दर्शितः। "प्राड्विवाको वादिप्रतिवादिनौ पृच्छतीति प्राट् ताभ्यामुक्तं सभ्यैः सह विविच्य वक्तीतिप्राड्विवाकः" इति बृहस्पतिना। विचारयतीत्यभिधानाद्विवेक्तीति विवेकशब्दस्य व्युत्पत्तिरुक्ता। विविच्य वक्तीति विवाक इति। इति गौतमेन। नारदहारीतौ "यथा शल्यं भिषक्कायादुद्धरेदुद्यतायुक्तितः। प्राड्विवाकस्तथा शल्यमुद्धरेदुव्यवहारतः" इति। शल्यञ्च धर्मस्याधर्ममिश्रत्वम्। यथा च मनुः "विद्धो धर्मो ह्यधर्मेण सभां यत्रोपतिष्ठते। शल्यञ्चास्य निकृन्तन्ति विद्धास्तत्र सभासदः" इति। अयञ्च राज्ञा स्वयंव्यवहारदर्शने क्रियमाणोऽस्य सहायः "सप्राड्विवाकः" इति स्मरणात्। यदा तु राजा कार्य्यान्तरव्यग्रतया स्वास्थ्याभावेन वा स्वयं व्यवहारदर्शनासमर्थस्तदा तत्प्रतिनिधिः। "यदा स्वयं न कुर्यात् तु नृपतिः कार्यदर्शनम्। तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं कार्यदर्शने। सोऽस्य कार्याणि सम्पश्येत्सभ्यैरेव त्रिभिर्वृतः। सभामेव प्रविश्याग्र्यामासीनः स्थित एव सः" इति मनुवचनात्। सभ्यग्रहणादमात्यादिनिवृत्तिः त्रिग्रहणात् संख्यान्तरनिवृत्तिः। असभ्यानामिति स्मृतिचन्द्रिकाकारः। तत्र बृहदर्थत्वप्रसङ्गादयुक्तमित्युपलक्षणत्वमेव न्याय्यम्। "अवश्यता कार्यवशाद्व्यवहाराङ्गदर्शने तु। सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्" इति याज्ञवल्क्यवचनाच्च। "यदा न कुर्यात्नृपतिः स्वयं कार्यविनिर्णयम्। तदा तत्

नियुञ्जीत ब्राह्मणं शास्त्रपारगम्। दान्तं कुलीनं मध्यस्थमनुद्वेगकरं स्थिरम्। परत्वभीरुं धर्मिष्ठ-मद्युत्तं क्रोधवर्जितम्" इति कात्यायनस्मरणाच्च। शास्त्रपारगं बहुशास्त्राभियोगशालिनम्। यथा ह स एव "एकं शास्त्रमधीयानो न विद्यात् कार्यनिर्णयम्। तस्माद्बहुश्रुतागमः कार्यो विवादेष्वृत्तमो नृपैः"। एवंविध-ब्राह्मणाभावे क्षत्रियं वैश्यं वा प्रतिनिदधीत न शूद्रम्। तथा च स एव "यत्र विप्रो न विद्यात् स्यात् क्षत्रियं तत्र योजयेत्। वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्" मनुः "जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः। धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथञ्चन। यस्य राज्ञस्तु कुरुते शूद्रो धर्मविवेचनम्। तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः"। व्यासः "द्विजान् विहाय यः पश्येत् कार्याणि वृषलैः सह। तस्य प्रक्षुभ्यते राष्ट्रं बलं कोशश्च नश्यति"। इदं वचनं स्मृतिचन्द्रिकायामस्मा-दादिस्थानेऽपि शूद्रं वर्जयेत् किन्तु धर्मनिर्णय इत्येवंपरमुक्तम् दोषातिशयकीर्त्तनात्। कल्पतरौ-टिप्पे तु प्रकरणाद्व्यवहारदर्शन एव शूद्रवर्जकत्वेन लि-खितम्। व्यवस्था प्रतिषेधोऽदृष्टार्थ एव राष्ट्रक्षोभादे-रदृष्टद्वारकफलस्यैव सङ्कीर्त्तनात्। चण्डेश्वरेण तु शू-द्रस्य धर्मज्ञानेऽपि वेदाविरोधप्रतिसन्धानविरहात् तत्-प्रतिसन्धानस्य च सम्यगनिर्णयोपायत्वात् त्याग इति युक्तिरप्युक्ता। सा बणिगादिष्वतिप्रसक्तेत्यन्वाचयमात्रम्। एते च सर्वे व्यवहारसम्बद्धाः प्रतिषेधा अभिषिक्तक्ष-त्रियाधिकारिकास्तत्स्थानापन्नाद्यधिकारिकाश्च। प्राड्-विवाकादयस्त्वर्थार्थितया ऋत्विक्स्थानीयाः। सप्राड्-विवाक इत्यादिना तेषां गुणभावेनसमाश्रियोगोक्तेश्च। "राजाभिषेकसंयुक्तो ब्राह्मणो वा बहुश्रुतः। धर्मासनगतः पश्येद्व्यवहारानृतुल्यगः" इति प्रजापतिवचनात्। अत्र राजशब्दोऽवश्यत्यधिकारसामान्यन्यायेन क्षत्रियजातिवचनः। अभिषेकसंयुक्त इति वचनात् कृत्यन्तरेऽप्यभिषिक्तक्षत्रियं प्रकृत्य तदभिधानाज्ञानभिषिक्तक्षत्रियस्य नाधिकारः। अतश्च तत्प्रयुक्तशुभाशुभफलयोस्तद्गामितैव। प्राड्-विवाकादीनान्तु प्राकप्रदर्शितेभ्यो न्यायेनापि तं यान्त-मित्यादि वाक्येभ्यो राज्ञोऽनिवारणे परं दृष्टादृष्टदोषभा-गिता। अनियुक्तानान्तु न तत्रापीत्यादि मिताक्षरादौ व्यक्तम्। ब्राह्मणो वेत्यनुकल्पत्वाभिप्रायको वाशब्दो न तूल्यकक्षाधिकारपरः। अनुल्लणोऽनुद्धतः"।

प्राण पु० प्राणिति प्र+अन—क्विप् पदान्तत्वेऽपि णत्वम्। प्राणे प्राण पु० प्र+अण—करणे घञ्। १ब्रह्मणि त्रिका० "अतएव प्राणः" शा०सू० १।२।१२ अतएव तल्लिङ्गात् प्राणशब्देन ब्रह्मैव तथा हि "सर्वाणि ह वा इमानि भूतानि प्राण-मेवाभिसंविशन्ति प्राणमभ्युज्जिहते" इति छान्दो०७०। सर्वभूतोत्पत्तिप्रलयहेतुरूपलिङ्गात् ब्रह्मण एव प्राणशब्द वाच्यता १।१।१२ स्तत्रभाष्ये दृश्यम्। २पञ्चवृत्तिके देहस्थे वायौ ३बोले काव्यजीवने ४रसे ५घनिले ६चले च ७पूरिते त्रि० मेदि०। ८सूक्ष्मदेहसमष्ट्यु-पहितचैतन्ये पु० वेदान्तसा०। ९प्राणोपाधिके जीवे "प्राणोऽहं माता प्राणः पितेति" श्रुतिः। भावे घञ्। १०जीवने च नासाग्रवर्त्तिनि प्रागनवति ११वायौ 'तस्य कर्म नामाग्रतो बहिर्गतिः" श्रीधरस्वामीः। देहस्थः पञ्चवृत्तिकः वायुश्च प्राणापानसमानोदानव्यानरूपः तत्रार्थे व०व०। तेषां स्वरूपादि भा०ति०व्या० योगार्णवे उक्तं यथा "इन्द्रनीलप्रतीकाशं प्राणरूपं प्रकीर्त्तितम्। व्यास्यना-सिकयोर्मध्ये हृन्मध्ये नाभिसंश्रये। प्राणास्य इति प्राज्ञः पादाङ्गुष्ठेऽपि के चन। अपानयत्यपानोऽयमा-हारं च मलादिकम्। शुक्रं मूत्रं तथोत्सर्गसपानस्तेन मारुतः। इन्द्रगोपप्रतीकाशः सन्ध्याभ्रसदृशप्रभः। स च मेढ्रे च पायौ च ऊरुवङ्क्षणजानुषु। जङ्घोदरे नाभ्यां च नाभिमूले च तिष्ठति। व्यानोव्यानयते चाङ्गं सर्वव्याधिप्रकोपनः। सङ्कोचप्रसरक्षेपो ह्यानो-पादानकारकः। स चात्तिकर्णयोर्मध्ये कण्ठेऽपि गुल्फ-योरपि। ओष्ठस्थाने स्फिगुष्ठेऽपि तिष्ठत्यत्र निरन्तरम्। स्रन्द्यत्यधरं वक्त्रं गात्रनेत्रप्रकोपनः। उद्वेजयति भू-र्मांसि उदानो नाम मारुतः। विद्युत्पाकसवर्णः स्याद्-बहुक्षूनाशनकारकः। पादयोर्हस्तयोश्चापि तत्सन्धिषु च वर्त्तते। पीतं भक्षितमाघ्रातं रक्तपित्तकफानिलात्। समं नयति गात्राणि समानो नाम मारुतः। गोक्षीरस-दृशाकारः सर्वदेहे व्यवस्थितः"। स च सांख्यमते इन्द्रियाणां सामान्यकरणवृत्तिरूपः न तु वायुविकारः यथोक्तं सां०सू० प्र०भा०

"सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च" इ०। "प्राणादिरूपाः पञ्च वायुवत्सञ्चारात् वायवो ये प्रसिद्धास्ते सामान्या साधारणी करणस्यान्तःकरणत्रयस्य वृत्तिः परिणामभेदा इत्यर्थः। तदेतत् कारिकयोक्तम्। "श्वा-लक्षणं वृत्तिलक्षणस्य सैषा भवत्यसामान्या। साधारणकर-

वृत्तिः प्राणाद्या वायवः पञ्चः" । इति यत्र कचित् प्राणाद्या वायुविशेषा एव ते चान्तःकरणवृत्त्या जीवनयोनि प्रयत्नरूपया व्याप्नियन्त इति कृत्वा प्राणाद्यात्मनः करणवृत्तिरित्यभेदनिर्देश इत्याह। तत्र। "न वायुक्रिये पृथगुपदेशादिति" वेदान्तसूत्रेण प्राणस्य वायुत्ववायुपरिणामत्वयोः स्फुटं प्रतिषेधादत्रापि तदेकवाक्यतौचित्यात् मनोधर्मस्य कामादेः प्राणत्वोभकतया सामानाधिकरण्येनौचित्याच्च। वायुप्राणयोः पृथगुपदेश श्रुतयस्तु "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी" इत्याद्याः। अतएव लिङ्गशरीरमध्ये प्राणानामगणनेऽपि न न्यूनता बुद्धेरेव क्रियाशक्त्या स्वात्मप्राणादिनामकत्वादिति। अन्तःकरणपरिणामेऽपि वायुतुल्यसञ्चारविशेषाद्वायुदेवताधिष्ठितत्वाच्च वायुव्यवहारोपपत्तिरिति" प्र०भा०। १२इन्द्रियस्थाने "सप्त शिरसि प्राणाः प्राणाः इन्द्रियाणि" ताण्ड्य० ब्रा० १।१५।२ "सप्त वै शीर्षण्याः प्राणाः सप्तं नासिके अक्षिणी इन्द्रियाधिष्ठानत्वात्" भा०। १३ब्राह्मे यज्ञशब्दे २७४६पृ० मू०। १४देवस्यच्छन्दे च

तत्र प्राणोत्पत्तिमभिधाय तस्य गौणसङ्ख्याभावः संख्याविशेषावधारणम् इन्द्रियसामान्यवृत्तितो भेदादिकञ्च भा०सू०भा० २।४ पादे समर्थितं यथा

"सप्त गतेर्विशेषितत्वाच्च" सू० "उत्पत्तिविषयः श्रुतिविप्रतिषेधः प्राणानां परिहृतः, संख्याविषय इदानीं परिहियते। तत्र सप्तं प्राणस्यपरिष्टाद्वक्ष्यति। सप्तेति तु कतीतरे प्राणा इति सम्यधारयति। श्रुतिविप्रतिपत्तेश्चात्र विषयः। क्वचित् सप्त प्राणाः सङ्कीर्त्यन्ते "सप्त प्राणाः प्रभवन्ति तस्मात्" इति। क्वचिदष्टौ प्राणा अवृत्तेन गुणेन सङ्कीर्त्यन्ते "अष्टौ अक्षरा अष्टावतिशक्वरीः" इति, क्वचिन्नव "सप्त वै शीर्षण्याः प्राणा द्वावधस्ताद्" इति। क्वचिद्दश "नव वै पुरुषे प्राणा नाभिर्दशमी" इति। क्वचिदेकादश "दशेमे पुरुषे प्राणा आत्मैकादशः" इति। क्वचिद्द्वादश "सर्वेषां स्तोमानां त्वमेकादशतनम्" इत्यत्र। क्वचित्त्रयोदश "चक्षुश्च द्रष्टव्यञ्च" इत्यत्र। एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः। किं तावत् प्राप्तं सप्तैव प्राणा इति। श्रुतः गतेः, यतस्तावन्तोऽवगम्यन्ते "सप्त प्राणाः प्रभवन्ति तस्मात्" इत्येवंविधासु श्रुतिषु। विशेषितात्वेते "सप्त वै शीर्षण्याः प्राणाः" इत्यत्र। ननु "गुहाशया निहिताः सप्त सप्त" इति वीप्सा श्रूयते, सा सप्तभ्योऽतिरिक्तान् प्राणान् गमयतीति। नैष दोषः, पुरुषभेदाभिप्रायेयं वीप्सा प्रतिपुरुषं सप्त सप्त प्राणा इति न तत्त्वभेदाभिप्राया सप्त सप्तान्येऽन्ये प्राणा इति। नन्वष्टत्वादिकापि संख्या प्राणेषूद्दाहृता कथं सप्तैव स्युः। सत्यमुदाहृता विरोधाभावन्यतमा संख्याध्यवसातव्या, तत्र लोककल्पनोपरोधात् सप्तसंख्याध्यवसानं वृत्तिभेदामेक्षञ्च सङ्घातान्तरश्रवणमिति गम्यते। अतोऽत्रते" भा० "हृत्तादयस्तु स्थितेऽतो नैवम्" सू० "हृत्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः श्रूयन्ते, "हृत्तो वै यकृतः स कर्मणातिग्रहेण गृहीतः, हृत्ताभ्यां हि कर्म करोति" इत्येवमाद्यासु श्रुतिषु। एवं स्थिते च (अष्टादिसंख्यत्वे) सप्तत्वमन्तर्भावाच्छक्यते समाधयितुम्। हीनाधिकसङ्घाविप्रतिपत्तौ ह्यधिका सङ्घा संपाद्या भवति, तस्यां हि हीनानन्तर्भवति, न तु हीनायामधिका। अतश्च नैवं मन्तव्यं लोककल्पनानुरोधात् सप्तैव प्राणाः स्युरिति। उत्तरसङ्घानुरोधात्त्वेकादशैव ते प्राणाः स्युः। तथा चोदाहृता श्रुतिः "दशेमे पुरुषे प्राणा आत्मैकादशः" इति। आत्मशब्देन चात्मान्तःकरणं परिगृह्यते करणाधिकारात्। ननु एकादशत्वादधिके द्वादशत्वयोदशत्वे उदाहृते, न त्वेकादशभ्यः कार्यजातेभ्योऽधिकं कार्यजातमस्ति यदर्थम् अधिकं करणं कल्प्येत। यद्दशगोचरसगन्धविषयाः पञ्च बुद्धिभेदास्तदर्थानि पञ्च बुद्धीन्द्रियाणि, वचनादानविहरणोत्सर्गानन्दाः पञ्च कर्मभेदास्तदर्थानि च पञ्च कर्मेन्द्रियाणि, सर्वार्थविषयं त्रैकाल्यवृत्ति मन एकमनेकवृत्तिकं तदेव वृत्तिभेदात् क्वचिच्चित्तबुद्ध्यादिशब्दैरुपदिश्यते "मनो बुद्धिरहङ्कारश्चित्तञ्च" इति। तथा च श्रुतिः कामाद्या नानाविधा वृत्तीरनुक्रम्याह "एतत् सर्वं मन एव" इति। अपि च सप्तैव शीर्षण्यान् प्राणानभिसन्धायमानस्य चत्वार एव प्राणा अभिमताः स्युः स्थानभेदाश्रयेते चत्वारः सन्तः सप्त गण्यन्ते, "द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके एका वाक्" इति। न च तावतामेव वृत्तिभेदा इतरे प्राणा इति शक्यते वक्तुं, हृत्तादिवृत्तीनामत्यन्तविजातीयत्वात्। तथा "नव वै पुरुषे प्राणा नाभिर्दशमी" इत्यत्रापि देहच्छिद्रभेदाभिप्रायेणैव दश प्राणा उच्यन्ते, न प्राणतत्त्वभेदाभिप्रायेण "ना-

भिर्दशमी" इति वचनात्। न हि नाभिर्नाम कश्चित् प्राणः प्रसिद्धोऽस्ति, मुख्यस्य तु प्राणस्य भवति, नाभिरपि एकं विशेषायतनमित्यतो नाभिर्दशमीत्युच्यते। क्वचिदुपासनार्थं कतिचित् प्राणा गण्यन्ते, क्वचित् प्रदर्शनार्थम्। तदेवं विचित्रे प्राणेयत्तासाने सति क किं परमाननमिति विवेक्तव्यम्। कार्यज्ञानवधात्त्वेकादश्यत्वान्नानं प्राणविषयं प्रमाणमिति स्थितम्। इयत्तावरा स्वत्वव्ययोजना। सप्तैव प्राणाः स्युः यतः सप्तानामेव गतिः श्रूयते "तस्तत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इत्यत्र। ननु सर्वशब्दोऽत्र श्रूयते कथं सप्तानामेव गतिः प्रतिपाद्यत इति, विशेषितत्वादित्याह। सप्तैव हि प्राणाश्चक्षुरादयः त्वक्पर्यन्ताः विशेषिताः इह प्रकृताः, "स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्त्तते अथारूपज्ञो भवति एकीभवति न पश्यतीत्याहुरित्येवमादिनानुक्रमणेन। प्रकृतगामी च सर्वशब्दो भवति। यथा सर्वे ब्राह्मणा भोजिता इति ये निमन्त्रिताः प्राकृता ब्राह्मणास्त एव सर्वशब्देनोच्यन्ते नान्ये, एवमिहापि ये प्रकृताः सप्त प्राणास्त एव सर्वशब्देनोच्यन्ते नान्ये इति। ननवत्र विज्ञानमष्टममनुक्रान्तं कथं सप्तानामेवानुक्रमणं नैष दोषः। मनोविज्ञानयोरत्यन्तभेदादवृत्तिभेदेऽपि सप्तत्वोपपत्तेः। तस्मात् सप्तैव प्राणा इत्येव प्राप्ते ब्रूमः। इत्यादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः प्रतीयन्ते "इन्द्रो वै बहुः" इत्यादिस्मृतिषु। बहुत्वञ्च बन्धनभावो गृह्यते बध्यते क्षेत्रज्ञोऽनेन बहुसंज्ञकेन बन्धनेनेति। स च क्षेत्रज्ञो नैकस्मिन्नेव शरीरे बध्यते शरीरान्तरेऽपि तुल्यत्वादुबन्धनस्य। तस्माच्छरीरान्तरसञ्चारीदं बहुसंज्ञकं बन्धनमित्यर्थादुक्तं भवति। तथा च स्मृतिः "पुर्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते। तेन बद्धस्य वै बन्धो मोक्षो मुक्तस्य तेन च" इति। प्राङ्मोक्षाद्बहुसंज्ञकेनानेन बन्धनेनावियोगं दर्शयति। आथर्वणे च विषयेन्द्रियानुक्रमणे "चक्षुष्य द्रष्टव्यञ्च" इत्यत्र तुल्यवद्वस्त्रादीनीन्द्रियाणि सविषयाण्यनुक्रामति "हस्तौ चादातव्यञ्च उपस्थश्चानन्दयितव्यञ्च पायुश्च विसर्जयितव्यञ्च पादौ च गन्तव्यञ्च" इति। तथा "दशेमे पुरुषे प्राणा आत्मैकादशः ते यदाच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति" इत्येकादशानां प्राणानामुत्क्रान्तिं दर्शयति। सर्वशब्दोऽपि च प्राणशब्देन लक्ष्यमाणोऽशेषान् प्राणानभिदधानो न प्रकरणवशेन सप्तस्वेव व्यवस्थापयितुं शक्यते, प्रकरणाच्छ्रुत्या च बलीयस्त्वात्। सर्वे ब्राह्मणा भोजिता इत्यत्रापि सर्वेषामेव अवनिवर्त्तिनां ब्राह्मणानां ग्रहणं न्याय्यं सर्वशब्दसामर्थ्यात्। सर्वभोजनासम्भवात् तु तत्र निमन्त्रितमात्रविषया सर्वशब्दस्य वृत्तिराश्रिता, इह तु न किञ्चित् सर्वशब्दार्थसङ्कोचकारणमस्ति, तस्मात् सर्वशब्देनात्राशेषाणां प्राणानां परिग्रहप्रदर्शनार्थं सप्तानामनुक्रमणमित्यनवद्यम्। तस्मादेकादशैव प्राणाः शब्दतः कार्यतश्चेति सिद्धम्"भा० "अणवश्च"सू०"अधुना प्राणानामेव स्वभावान्तरमभ्युच्चिनोति। अणवश्चैते प्रकृताः प्राणाः प्रतिपत्तव्याः। अणुत्वञ्चैषां सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं, क्रियावद्देहव्यापिकार्य्यानुपपत्तिप्रसङ्गात्। सूक्ष्मा एते प्राणाः स्थूलाश्चेत् स्युः मरणकाले शरीराच्चिर्गच्छन्तो बिलादचिरिवोपलभ्येरन् म्रियमाणस्य पार्श्वस्थैः। परिच्छिन्नाश्चैते प्राणाः सर्वगताश्चेत् स्युः उत्क्रान्तिगत्यागतिश्रुतिव्याकोपः स्यात्, तद्गुणसारत्वञ्च जीवस्य न सिध्येत्। सर्वगतानामपि वृत्तिलाभः शरीरदेशे स्यादिति चेत्, न, वृत्तिमात्रस्य करणत्वोपपत्तेः। यदेव तूपलब्धिसाधनं वृत्तिः अन्यद्वा तस्यैव नः करणत्वं तेन संज्ञामात्रे विवाद इति करणानां व्यापित्वकल्पना निरर्थिका। तस्मात् सूक्ष्माः परिच्छिन्नाश्चैते प्राणा इत्यध्यवस्यामः"भा० "श्रेष्ठश्च" सू० "मुख्यस्य प्राणः इतरप्राणवद्ब्रह्मविकार इत्यतिदिशति। नन्वविशेषेणैव सर्वप्राणानां ब्रह्मविकारत्वमाख्यातम्,"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इति, सेन्द्रियमनोव्यतिरेकेणापि प्राणस्योत्पत्तिश्रवणात्,"स प्राणमसृजत" इत्यादिश्रवणेभ्यश्च। किमर्थः पुनरतिदेशः, अधिकाशङ्काकारणार्थः। नासदासीये हि ब्रह्मप्रधाने सूक्ते मन्त्रवर्णो भवति, "न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परं किञ्च नास" इति। आनीदिति प्राणकर्मोपादानात् प्राग्उत्पत्तेः सन्तमिव प्राणं सूचयति। तस्मात् व्रजः प्राण इति जायते क्वचिन्मतिः, तामतिदेशेनापनुदति। आनीच्छब्दोऽपि न प्रागुत्पत्तेः प्राणसद्भावं सूचयति। अवातमिति विशेषणात् "अप्राणो ह्यमना शुभ्रः" इति च मूलप्रकृतेः प्राणादिसमस्तविशेषरहितत्वञ्च दर्शयितुम्। तस्मात् कारणसद्भावप्रदर्शनार्थं एवाऽऽनीच्छब्द इति। श्रेष्ठ इति च मुख्यं प्राणमभि-

दधाति, "प्राणो वाव ज्येष्ठः श्रेष्ठश्च" इति श्रुतिभिर्दै-
श्रात्" भा० "ज्येष्ठश्च प्राणः" सू० "शुक्रनिषेककालादारभ्य
तस्य वृत्तिलाभात्, न चेत् तस्य तदानीं वृत्तिलाभः स्यात्
योनौ निषिक्तं शुक्रं पूयेत न सम्भवेद्वा, श्रोत्रादीनान्तु
कर्णशष्कुल्यादिस्थानविभागनिष्पत्तौ वृत्तिलाभात्र ज्येष्ठ-
त्वम्" भा० "श्रेष्ठश्च प्राणः गुणाधिक्यात्" सू० "न वै
प्राण्यामस्त्यृते जीवित्वम्" इति श्रुतेश्च भा० । "न वायुक्रिये
पृथगुपदेशात्" सू० "स पुनर्ज्येष्ठः प्राणः किंलक्षण
इतीदानीं जिज्ञास्यते । तत्र प्राप्तं तावत् श्रुतेर्वायुः प्राण
इति, एवं हि श्रूयते, "यः प्राणः स एष वायुः पञ्च-
विधः प्राणोऽपानो व्यान उदानः समानः" इति । अथ
वा तन्त्रान्तरीयाभिप्रायात् सप्तसु करणेषु वृत्तिः प्राण इति
प्राप्तं, एवं हि तन्त्रान्तरीया आचक्षते । "सामान्या
करणवृत्तिः प्राद्याद्या वायवः पञ्च" इति । अत्रोच्यते ।
न वायुः प्राणः नापि करणव्यापारः श्रुतः पृथगुप-
देशात् । वायोस्तावत् प्राणस्य पृथगुपदेशो भवति,
"प्राण एव ब्रह्मणश्चतुर्थः पादः, स वायुना ज्योतिषा
भाति च तपति च" इति । न हि वायुरेव सन् वायोः
पृथगुपदिश्यते तथा करणवृत्तेरपि पृथगुपदेशो भवति,
वागादीनि करणान्यनुक्रम्य तत्र तत्र पृथक्प्राणस्यानु-
क्रमणात् । न हि करणव्यापार एव सन् करणेभ्यः
पृथगुपदिश्येत । तथा "एतस्माज्जायते प्राणो मनः सर्वे
न्द्रियाणि च । खं वायुः" इत्येवमादयोऽपि वायोः कर-
णेभ्यश्च प्राणस्य पृथगुपदेशा अनुसर्त्तव्याः । न च सम-
स्तानां करणानामेका वृत्तिः सम्भवति, प्रत्येकमेकैक-
वृत्तित्वात्, वस्तुदायस्य चाकारकत्वात् । नन्वेकपञ्जर-
न्यायेन एतद्विधमिति यथैकपञ्जरवर्त्तिनः एकादश
पक्षिणः प्रत्येकं प्रतिनियतव्यापाराः सन्तः समूयैकं
पञ्जरं चालयन्ति एवमेकशरीरवर्त्तिनः एकादश प्राणाः
प्रत्येकं नियतवृत्तयः सन्तः समूयैकां प्राणाख्यां वृत्तिं
प्रतिलभन्ते इति । नेत्युच्यते, युक्तम् तत्र प्रत्येक-
वर्त्तिभिरवान्तरव्यापारैः पञ्जरचालनानुरूपैरेवोपेताः प-
क्षिणः समूयैकं पञ्जरं चालयेयुरिति तथा दृष्टत्वात् ।
इह तु अवयवान्तरव्यापारोपेताः प्राणा न समूय
प्राणन्तीति युक्तं, प्रमाणाभावात् अत्यन्तविजातीयत्वाच्च
अवयवेभ्यः प्राणनस्य । तथा प्राणस्य श्रेष्ठत्वाद्यु-
क्तं गुणभावोपगमश्च तं प्रति वागादीनां न करणवृत्ति-
त्वात्ते प्राणेऽवकल्पन्ते, तस्माद्यो वायुक्रियात्मा प्राणः"
कथं तर्हीदं श्रुतिः, "यः प्राणः स वायुः" इति,
उच्यते । वायुरेवावयव्यात्मनापन्नः पञ्चव्यूहो विशेषा-
त्मनावतिष्ठमानः प्राणो नाम भण्यते न तत्त्वान्तरं नापि
वायुमात्रं, अतस्तेभ्यो अपि भेदाभेदश्रुती न विरुध्येते ।
स्यादेतत्, प्राणोऽपि तर्हि जीववदस्मिन् शरीरे स्वातन्त्र्यं
प्राप्नोति, श्रेष्ठत्वात् गुणभावोपगमाच्च तं प्रति वागादी-
नामिन्द्रियाणाम् । तथा हि अनेकविधा विभूतिः प्रा-
णस्य श्राव्यते "सुप्तेषु वागादिषु प्राण एकैको जा-
गर्त्ति प्राण एकैको मृत्युनाऽनाप्तः प्राणः संवर्गो वागा-
दीन् संदधत्ते प्राण इतरान् प्राणान् रक्षति मातेव
पुत्रान्" इति । तस्मात् प्राणस्यापि जीववत् स्वातन्त्र्य-
प्रसङ्गः, तं परिहरति" भा० "चक्षुरादिवत्तु तत्सह-
शिष्टादिभ्यः" सू० "इयत्ताः प्राणस्य स्वातन्त्र्यं व्याव-
र्त्तयति । यथा चक्षुरादीनि राजप्रकृतिवत् जीवस्य
दर्शनं भोक्तृत्वं च प्रत्युपकरणानि न स्वतन्त्राणि
तथा श्रेष्ठोऽपि प्राणो राजवन्निवत् जीवस्य सर्वार्थत्वेन
उपकरणभूतो न स्वतन्त्रः । तस्मात् तत्सहशिष्टादिभ्यः
तैश्चक्षुरादिभिः सहैव प्राणः शिष्यते, प्राणसंवादादिषु
समानधर्माणाञ्च सह पाठनं युक्तं दृष्टकूपवन्नरादिवत् ।
आदिशब्देन संहतत्वाचेतनत्वादीनां प्राणस्य स्वातन्त्र्यनि-
राकरणहेतवः दर्शयति । स्यादेतत् यदि चक्षुरादिवत्
प्राणस्य जीवं प्रति करणभावोऽभ्युपगम्येत विषयान्तरं
रूपादिवत् तस्य प्रसज्येत रूपालोचनाद्याभिर्वृत्तिभिर्यथा
चक्षुरादीनां जीवं प्रति करणभावो भवति । अपि
चैकादशैव कार्यजातानि रूपालोचनादीनि परिगणि-
तानि यदर्थमेकादश प्राणाः संदृब्धाः न तु द्वादशम-
परं कार्यजातमवगम्यते यदर्थमयं द्वादशः प्राणः प्रतिज्ञा-
यत इति । अत उत्तरं पठति" भा० "अकरणत्वाच्च
न दोषस्तथा हि दर्शयति" सू० "न तावद्विषयान्तरप्र-
सङ्गो दोषः अकरणत्वात् प्राणस्य । न हि चक्षुरादि-
वत् प्राणस्य विषयपरिच्छेदेन करणत्वमभ्युपगम्यते ।
न चास्यैतावता कार्यांभाव एव । कस्मात्, तथा हि
श्रुतिः प्राणान्तरेभ्यस्तमाख्यायमानं सप्तप्राणस्य वैशे-
षिकं कार्यं दर्शयति । प्राणसंवादादिषु "अथ ह प्राणा
अहं श्रेयसि व्यूदिरे" इत्युपक्रम्य "तस्मिन् व तत्प्राणान्
इदं शरीरं पारिप्लवमिव दधते स यः श्रेष्ठः" इति
चोपन्यस्य प्रत्येकं वाक्याद्युपक्रमेण तत्तत्प्राणस्य
तथापूर्वं जीवनं सप्तप्राणस्य वैशेषिकं कार्यं दर्शयित्वा

प्राणोत्क्रमणिमार्थं वागादिदौर्बल्यापत्तिं शरीरपातप्रसङ्गं च दर्शयन्ती श्रुतिः प्राणनिमित्तां शरीरेन्द्रियस्थितिं दर्शयति। "तानु वरिष्ठः प्राणः उवाच मा मोहमापद्यथाहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि" इति च। एतमेवार्थं श्रुतिराह। "प्राणेन रक्षन्नवरं कुलाये" इति च। सुप्तेषु चक्षुरादिषु प्राणनिमित्तां शरीररक्षां दर्शयति। "यस्मात् कस्माच्छरात् प्राण उत्क्रामति तदेव उच्छुष्यति तेन यदश्नाति यत् पिबति तेनेतरान् प्राणानवति" इति च प्राणनिमित्तां शरीरेन्द्रियपुष्टिं दर्शयति। "कस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भविष्यामि ? कस्मिन् ? वा प्रतिष्ठितेऽहं प्रतिष्ठास्यामीति स प्राणमसृजत" इति प्राणनिमित्त एव जीवस्योत्क्रान्तिप्रतिष्ठे दर्शयति" भा०। "पञ्चवृत्तिर्मनो वदव्यपदिश्यते" सू०। "इतश्चास्ति सूक्ष्मप्राणस्य वैशेषिकं कार्यं यत्कारणं पञ्चवृत्तिरयं व्यपदिश्यते श्रुतिषु "प्राणोऽपानो व्यान उदानः समानः" इति। वृत्तिभेदस्यायं कार्यभेदापेक्षः। प्राणः प्रागवृत्तिरुच्छ्वासादिकर्मा, अपानोऽवागवृत्तिर्निश्वासादिकर्मा, व्यानः तयोः सन्धौ वर्त्तमानो वीर्यवत्कर्महेतुः, उदानः ऊर्ध्ववृत्तिरुत्क्रान्त्यादिहेतुः, समानः सम्यं सर्वेष्वङ्गेषु योऽन्नरसान्नयति इति। एवं पञ्चवृत्तिः प्राणः मनोवत् यथा मनसः पञ्च वृत्तयः एवं प्राणस्यापीत्यर्थः। श्रोत्रादिनिमित्ताः शब्दादिविषयाः मनसः पञ्च वृत्तयः प्रसिद्धाः। न तु कामः सङ्कल्प इत्याद्याः परिपठिताः परिगण्यन्ते, पञ्चसङ्ख्यातिरेकात्। नन्वत्रापि श्रोत्रादिनिरपेक्षा भूतभविष्यदादिविषयाऽपरा मनसो वृत्तिरस्तीति समानः पञ्चसङ्ख्यातिरेकः। एवं तर्हि परमतमप्रतिक्षिप्तमनुमतं भवतीति न्यायादिहापि योगशास्त्रप्रसिद्धा मनसः पञ्च वृत्तयः परिगण्यन्ते प्रमाणविपर्ययविकल्पनिद्रास्मृतयो नाम। बहुवृत्तित्वमात्रेण वा मनः प्राणस्य निदर्शनमिति द्रष्टव्यम्। ज्ञानोपकरणत्वमपि प्राणस्य पञ्चवृत्तित्वान्मनोवदिति योजयितव्यम्" भा०। "अणुश्च" सू०। "अणुश्चायं मुख्यः प्राणः प्रत्येतव्यः इतरप्राणवत्। अणुत्वेऽपि चौत्क्रान्त्यपरिच्छेदो न परमाणुतुल्यत्वं, पञ्चभिर्वृत्तिभिः कृत्स्नशरीरव्यापित्वात्। कृत्स्नः, प्राण उत्क्रान्तौ पार्श्वस्थेनानुपलभ्यमानत्वात्, परिच्छिन्नोत्क्रान्तिमत्त्वागमश्रुतिभ्यः। ननु विभुत्वमपि प्राणस्य कुतोऽवगम्यते, "कस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भविष्यामि ? कस्मिन् ? वा प्रतिष्ठिते

तत् परिच्छिद्यते" भा०। "प्राणवता शब्दात्" सू०। "सतीष्वपि प्राणानामधिष्ठातृषु देवतासु प्राणवता कार्यकरणसङ्घातस्वामिना शारीरेणैवैषां प्राणानां सम्बन्धः श्रुतेरवगम्यते। तथा हि श्रुतिः "अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणम्" इत्येवंजातीयका शारीरेणैव प्राणानां सम्बन्धं दर्शयति। अपि चानेकत्वात् प्रतिकरणमधिष्ठातृणां देवतानां न भोक्तृत्वमेकस्मिन् शरीरेऽवकल्पते। एको ह्ययमस्मिन् शरीरे शारीरो भोक्ता प्रतिसन्धानादिसम्भवादवगम्यते" भा०। "तस्य च नित्यत्वात्" सू०। "तस्य च शारीरस्यास्मिन् शरीरे भोक्तृत्वेन नित्यत्वं पुण्यपापोपलेपसम्भवात् सुखदुःखोपभोगसम्भवाच्च न देवतानाम्। ता हि परस्मिन्नेवार्थे परेऽवतिष्ठमाना न हीमेऽस्मिंश्छरीरे भोक्तृत्वं प्रतिलब्धुमर्हन्ति। श्रुतिश्च भवति "पुण्यमेवासुं गच्छति न ह वै देवान् पापं गच्छति" इति शारीरेणैव च नित्यः प्राणानां सम्बन्धः" भा०। "उत्क्रान्त्यादिषु तदनुवृत्तिदर्शनात्" सू०। "तस्मादुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इत्यादिश्रुतिभ्यः। तस्मात् सतीष्वपि करणानां नियन्तृषु देवतासु न शारीरस्य भोक्तृत्वमपगच्छति, करणपक्षस्यैव हि देवता न भोक्तृत्वपक्षस्येति" भा०। "त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्" सू०। "मुख्यश्चैकः इतरे चैकादश प्राणा अनुक्रान्ताः, तत्रेदमपरं सन्दिह्यते किं मुख्यस्यैव प्राणस्य वृत्तिभेदा इतरे प्राणा आहोस्वित् तत्त्वान्तराणीति। किन्तावत् प्राप्तं मुख्यस्यैवेतरे वृत्तिभेदा इति। कुतः श्रुतेः। तथाहि श्रुतिर्मुख्यमितरांश्च प्राणान् सन्धिधाय मुख्यात्मतामितरेषां ख्यापयति "हन्ताहमेव सर्वं रूपमसामेति तत्र तस्यैव सर्वं रूपमभवत्" इति। प्राणैकशब्दत्वाच्चैकत्वाध्यवसायः, इतरथा ह्यन्याश्रमनेकार्थत्वं प्राणशब्दस्य प्रसज्येत एकत्वं वा मुख्यत्वमितरत्व वा लाक्षणिकत्वमापद्येत। तस्माद् यथैकस्यैव प्राणस्य प्राणाद्याः पञ्च वृत्तयः एवं वागाद्या अप्येकादशेत्येवं प्राप्ते ब्रूमः। तत्त्वान्तराण्येव प्राणाद्वागादीनीति कुतः व्यपदेशभेदात्। कोऽयं व्यपदेशभेदः, ते प्रकृताः, प्राणाः श्रेष्ठं वर्जयित्वाऽवशिष्टा एकादशेन्द्रियाणीत्युच्यन्ते श्रुतावेवं व्यपदेशभेददर्शनात्। "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इत्येवं जातीयकेषु श्रुतिप्रदेशेषु पृथक् प्राणो व्यपदिश्यते पृथक् चेन्द्रियाणि। ननु मनसोऽप्येवं वर्जनम् इन्द्रियत्वेन प्राणवत् स्यात् "मनः सर्वेन्द्रियाणि च" इति पृथक् व्यपदेशभेददर्शनात्। सत्यमेतत् श्रुतौ तु एकादशेन्द्रियाणीति मनोऽपीन्द्रियत्वेन श्रोत्रादिवत् संगृह्यते, प्राणस्य त्विन्द्रियत्वं न श्रुतौ स्मृतौ वा प्रसिद्धमस्ति। व्यपदेशभेदश्चायं तत्त्वभेदपक्षे उपपद्यते। तत्त्वैकत्वे तु स एवैकः मनः प्राण इन्द्रियव्यपदेशं लभते न लभते च इति विप्रतिषिद्धं, तस्मात्तत्त्वान्तरभूता मुख्यादितरे। कुतश्च तत्त्वान्तरभूता मुख्यादितरे" भा०। "भेदश्रुतेः" सू०। "भेदेन च वागादिभ्यः प्राणः सर्वत्र श्रूयते "ते ह वाचमूचुः" इत्युपक्रम्य वागादीनसुरपाप्मविध्वंसानुपन्यस्योपसंहृत्य वागादिप्रकरणम्, "अथ हैनमासन्यं प्राणमूचुः" इत्यसुरविध्वंसिभ्यो मुख्यस्य प्राणस्य पृथगुपक्रमात्, तथा "मनो वाचं प्राणं तान्यात्मनेऽकुरुत" इत्येवमाद्या अपि भेदश्रुतय उदाहर्तव्याः। तस्मादपि तत्त्वान्तरभूता मुख्यादितरे। कुतश्च तत्त्वान्तरभूता मुख्यादितरे" भा०। "वैलक्षण्याच्च" सू०। "वैलक्षण्यञ्च भवति मुख्यप्राणस्येतरेषाञ्च वृत्तिषु वागादिषु मुख्य एको जागर्त्ति "स एव चैको मृत्युनाऽऽप्तः। आप्नोत्येतरे" तस्यैव प्राणस्यावस्थित्युत्क्रान्तिभ्यां देहधारणपातनहेतुत्वं नेन्द्रियाणां विषयालोचनहेतुत्वञ्चेन्द्रियाणाम्। न प्राणस्येत्येवंजातीयको भूयान् लक्षणभेदः प्राणेन्द्रियाणाम्। तस्मादन्येषां तत्त्वान्तरभावसिद्धिः। यदुक्तं "तत्र तस्यैव सर्वं रूपमभवत्" इति श्रुतेः प्राणएवेन्द्रियाणीति तदयुक्तम् तत्रापि पौर्वापर्यालोचनाद्भेदप्रतीतेः। तथा हि "वदिष्याम्येवाहमिति वाग्दध्रे" इति वागादीनीन्द्रियाण्यनुक्रम्य "तानि मृत्युः श्रमो भूत्वोपयेमे तस्माच्छ्राम्यत्येव वाक्" इति च श्रमरूपेण मृत्युना ग्रस्तत्वं वागादीनामभिधाय "अथेममेव नाप्नोत् योऽयं मध्यमः प्राणः" इति पृथक्प्राणं मृत्युनानभिभूतमनुक्रामति। "अयं वै नः श्रेष्ठः" इति च श्रेष्ठतामस्यावधारयति। तस्मात्तदविरोधेन वागादिषु परिस्पन्दाभस्य प्राणायत्तत्वं तद्रूपभवनं वागादीनामिति मन्तव्यं न तु तादात्म्यम्। अत एव प्राणशब्दस्येन्द्रियेषु लाक्षणिकत्वसिद्धिः। तथा च श्रुतिः "तत्र तस्यैव सर्वं रूपमभवत् तस्मादेते एते नाख्यायन्ते प्राणाः" इति मुख्यप्राणविषयस्यैव प्राणशब्दस्य इन्द्रियेषु लाक्षणिकीं वृत्तिं दर्शयति। तस्मा-

स्वप्नान्तरापि प्राचादुद्गमादीन्द्रियाणीति" याज्ञवल्क्यभा०। अतएव वेदान्तसारादौ आकाशादिपञ्चतन्मात्राणां समस्तानां रजोऽंशेभ्यः पञ्चवृत्तिकप्राणस्योत्पत्तिमङ्गीचकार तेनापि इन्द्रियेभ्यस्तस्य पृथक्त्वं गम्यते। १५देहस्थे दशवृत्तिके वायुभेदे प्राणकर्मनृशब्दे दृश्यम्। १६ धातुभेदे पु० "भाव्यं धातुविधातोक्तं तयोर्जातौ सुतावुभौ। प्राणश्चैव सृकण्वश्च" मार्क०५२अ०। वैवस्वतमन्वन्तरे १७सप्तर्षिभेदे पु० हरिवं० १अ०। धराख्यवसोः १८पुत्रभेदे पु०हरिवं०६अ०। १९विष्णौ पु०"ईशानः प्राणदः प्राणः" विष्णुस०। 'प्राणस्य प्राणः' इति श्रुतेस्तस्य तथात्वम्। प्राणयति प्राणः "अच्युतः प्रचितः प्राणः" विष्णुस०। "सूतात्मना प्राणयति चेष्टयति प्रजाः प्राणः" भा० व्यु-त्पत्तिद्वययोगात् नामद्वयम्।

प्राणस्य जलेनैवोपचयस्य करणात् जलमयत्वम् यथोक्तं छा० उ० "आपः पीतास्त्रेधा विधीयन्ते तासां यःस्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः सः प्राणः" इत्युक्त्वा "अन्नमयं हि सोम्य! मन आपोमयः प्राणस्तेजोमयी वाक्" इति च संक्षिप्योक्त्वा तत्समर्थितं यथा "यथा दध्नः सोम्य! मथ्यमानस्य योऽणिमा ऊर्द्धः समुदीषति तत्सर्पिर्भवति" इतिदृष्टान्तीकृत्य "एवमेव खलु सोम्य! पीयमानानां योऽणिमा स ऊर्द्धः समुदीषति स प्राणो भवतीति" छा०उ०। "यथायं दृष्टान्तः एवमेव खलु सोम्याद्यादेरस्य भुज्यमानस्यौदर्य्याग्निना वायुसहितेन खजेनेव मथ्यमानस्य योऽणिमा स ऊर्द्धः समुदीषति तन्मनो भवति मनोऽवयवैः सह संभूय ह्युपचिनोति तद्वत् तथाऽपां सोम्य! पीयमानानां योऽणिमा स प्राण इत्यादि" भाष्यम्। २०मूलाधारस्थे वायौ च "मूलाधारोद्गतः प्राणः" शा०ति०। [इच्] । स्वार्थे क। २कोले च मेदि०।

प्राणक पु० प्राणेन कायति कै-क। १जीवनाम्नि २जीवक-

प्राणकर त्रि० प्राणं बलं करोति कृ-ट। बलकारके "सद्योनांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम्। इतस्तण्डोदकं चैव सद्यः प्राणकराणि षट्" चाणक्यः।

प्राणकर्मन् न० ६त०। प्राणानां दशानां कर्मभेदे तानि च कर्माणि "सर्वाणीन्द्रियकर्माणि, प्राणकर्माणि चापरे" गीता भाष्ये टी० आनन्दगिरिरुक्तानि यथा "प्राणानाञ्च दशानां कर्माणि, प्राणस्य बहिर्गमनस्य अपानस्याधोगमनं व्यानस्य व्यायामाकुञ्चनप्रसरणादीनि समानस्याशितपीतादीनां समुद्धयनं उदानस्योर्द्धनयनम् "उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः। कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे। न जहाति मृतस्यापि सर्वव्यापी धनञ्जयः" इत्येवं रूपाणि।

प्राणग्रह पु० "प्राणो वै ग्रहः" तैत्ति० उक्ते प्राण्याख्ये इन्द्रिये ग्रहशब्दे २७४६ पृ० दृश्यम्। तत्र प्राणशब्देन घ्रायतेऽनेन इति भाष्ये समर्थितम्।

प्राणजीवन त्रि०प्राणं जीवयति जीवि-ल्यु। १प्राणस्यापके २प्राणपोषके विष्णौ पु०"प्राणभृत्प्राणजीवनः" विष्णुस० "प्राणयति प्राणिनो जीवान् जीवयति प्राणजीवनः "न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवेत यस्मिन्नेतावुपाश्रितौ" मन्त्रवर्णात्" भा०।

प्राणतज पु० कल्पप्रभेदे वैमानिकभेदे हेमच०। प्राणयज इत्येव साधुःपाठः। [ज्वल०।

प्राणद पु० प्र+अन-अच्। १प्राणशब्दार्थे २बलवति च त्रि०

प्राणद न० प्राणं प्राणनं बलं वा ददाति पुष्णाति द्यति वा दा दो-वा-क। १जले तस्य यथा प्राणोपकारकत्वं तथा प्राणशब्दे छा०उ०वाक्ये दर्शितम्। २रक्ते च हेमच०। ३जीवकवृक्षे पु० राजनि० ४हरीतक्याम् ५क्षत्रियवृक्षे च स्त्री राजनि०। ६प्राणदात्रमात्रे त्रि० "किमाश्चर्य्यं चारदेशे प्राणदा यमदूतिका" तट्टीकृतः। ७विष्णौ पु० तस्य प्रलये सर्वप्राणच्छेदकत्वात्तथात्वमिति नामद्वयम् प्राणशब्दे उदा० दृश्यम्।

प्राणदा स्त्री चक्रदत्तोक्ते गुटिकाभेदे "छगणरोचकारहरिद्वारकं गुडेन या मोदकमत्युदारकम्। अग्निमन्थदुर्नामकरोगदारकं करोति हृद्यं मुखसैवकारकम्। चूर्णं चूर्णसमो ज्ञेयो मोदके द्विगुणो गुडः। त्रिपलं छगणेरस्य चतस्रो मरिचस्य च। पिप्पल्याः कुडवौ द्वौ तु चव्यायाः पलमेव च। नागेशपत्रस्य पलं पलार्द्धं केसरस्य च। द्वे पले पिप्पलीमूलादर्द्धकर्षञ्च पत्रकात्। कृष्णाकर्षमेकन्तु कर्षं त्वचमृणालयोः। गुडात् पलानि त्रीणि चूर्णमेकत्र कारयेत्। अत्रप्रमाणा गुटिका प्राणदेति च सा स्मृता"। [ल्युट्।] २जले पु० शब्दच०।

प्राणन न० प्र+अन-भावे ल्युट्। १जीवने भटा०। करणे

प्राणनाथ पु० ६त०। पत्यौ भवद्भरत्ना०। प्राणपत्यादयोऽप्यत्र

प्राणनिग्रह पु०प्राणो निगृह्यतेऽनेन नि+ग्रह-करणे अप्। प्राणायामे प्राणनिरोधादयोऽप्यत्र।

प्राणन्त पु० प्र+अन-करणे झ। १वायौ षड्ब्रह्मं ३रक्षा-

ञ्जने चक्षुर्जनभेदे २क्षुधायां ४हिक्कायाञ्च स्त्री उणादि०।

प्राणप्रद त्रि० प्राणं बलं प्रददाति प्र+दा-क। १बलदायके २रक्तचिनावकौषधौ स्त्री रत्नमा०।

प्राणभक्ष पु० प्राणेन प्राणेन भक्षः ३त०। प्राणेनावप्राण-मात्रे आत्मा० १०।२६ कर्के:। [शब्दच०।

प्राणभास्वत् पु० प्राणेन वायुना भास्वान् इवोष्मः। समइे

प्राणभृत् त्रि० प्राणं बिभर्त्ति भृ-क्विप् ६त०। १प्राणिनि जीवे जन्तुमात्रे २प्राणपोषके त्रि० ३विष्णौ पु०"प्राणभृत् प्राणजीवनः" विष्णुस०।

प्राणमय पु०प्राण+प्राचुर्य्ये मयट्। "कर्मेन्द्रियैः पञ्चभिरञ्चितोऽसौ प्राणो भवेत् प्राणमयस्तु कोषः" विवेकच० उक्ते जीवस्वरूपावरके कोषभेदे "नैवात्मापि प्राणमयो वायुविकारो गन्ताऽऽगन्ता वायुवदुल्लेखविरेषः। यस्मात् किञ्चित् क्वापि न वेत्तीष्टमनिष्टं स्वं वाऽन्यं वा किञ्चन नित्यं परतन्त्रः" तस्य तत्त्वैवात्मनोभेदे हेतुरुक्तः।

प्राणयम पु० प्राणो यस्यतेऽनेन यम-करणे घञ् अदुपधः। प्राणायामे हेमच० प्राणरोधप्राणनियमप्राणसंयमादयोऽप्यत्र।

प्राणयात्रा स्त्री ६त०। प्राणस्य श्वासप्रश्वासादिके १व्यापारे उपचारात् तत्साधने २भोजनादौ। भोजनेन हि देहे प्राणयात्रानिर्वाहोऽन्यथा मरणेनोत्क्रान्तिः प्राणस्य भोजनं विना स्थित्यभावात्। प्राणयात्राऽस्त्यस्य प्रयोजनत्वेन ठन्। प्राणयात्रिक प्राणधारणभोजनयुक्ते विधिष्टभोगपरे मनुः ६।५७

प्राणयोनि पु० ६त०। १परमेश्वरे जगत्प्राणे २वायौ च।

प्राणवत् त्रि०प्राण+मतुप् मस्य वः। प्राणिनि जीवे जन्तुमात्रे

प्राणशरीर पु० प्राणः शरीरं स्वरूपं यस्य। प्राणात्मत्वेन ध्येये परमेश्वरे "स क्रतुं कुर्वीत मनोमयः प्राणशरीरः" छा० उ० "प्राणो लिङ्गात्मा विज्ञानक्रियाशक्तिद्वययुतः "यो वै प्राणः सा प्रज्ञा या प्रज्ञा स प्राणः" इतिश्रुतेः" स शरीरं यस्य सः" भाष्यम्।

प्राणसंवाद पु० ६त०। प्राणानामिन्द्रियाणां मुख्यप्राणस्य च अहं श्रेष्ठत्वविषये विवादे। स च छा०उ० "अथ ह प्राणाः अहं श्रेयसि व्यूदिरेऽहं श्रेयानस्मीत्युपक्रमे दर्शितः।

प्राणसंशय पु० ६त०। १प्राणस्य स्थित्यस्थितिसन्देहे उपचारात् २मरणफलकव्यापारभेदे च।

प्राणसद्मन् न० ६त०। प्राणायतने देहे।

प्राणसम पु०६त०। १प्राणतुल्ये प्रिये २पत्यौ २पत्न्यां स्त्री।

प्राणहर त्रि० प्राणं हरति देहात् देहान्तरं प्रापयति बलं वा हरति हृ-अच्। १प्राणस्य देहात् देहान्तरप्रापके २बलनाशके। "शुक्लं मांसं स्त्रियो दृष्ट्वा बालार्कोत्तरुणं दधि। प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट्" चाणक्यः। ३विषादौ च याज्ञ० २।२२७।

प्राणहारक त्रि०प्राणं हरति हृ-ण्वुल्। १देहात् प्राणस्य हारके २नाशके ३वत्सनाभविषे न० राजनि०।

प्राणाग्निहोत्र न० प्राणरूपेऽग्नौ होत्रम्। १वैश्वानरविद्याप्राणाग्निहोत्रात्मके भोजने। तस्य यथा कर्त्तव्यता तथा छा० उ० "तदुयद्भक्तं प्रथमं भागमश्नीयात् तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात् प्राणाय स्वाहेति" इत्युपक्रम्य दर्शितम्। तत्र प्राणाहुतिशब्दे दृश्यम्। तत्प्रतिपादके २कृष्णयजुर्वेदीयोपनिषद्भेदे च।

प्राणात्यय पु० ६त०। १प्राणधारणाऽसम्भावनायाम्। ब०व०। २तदुपलक्षिते काले च "प्राणात्यये च संप्राप्ते योऽन्नमत्ति यतस्ततः। न स पापेन लिप्येत पद्मपत्रमिवाम्भसा" स्मृतिः "सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्" या०स्मृ०।

प्राणाधिनाथ पु० ६त०। पत्यौ हेमा०।

प्राणान्त पु० ६त०। मरणे। प्राणान्तः प्रयोजनमस्य ठञ्। प्राणान्तिक। मरणफलके प्रायश्चित्तादौ।

प्राणापान पु०इ०द्वि०व०। प्राणे अपाने च १वायौ "प्राणापानान्तरे देवी वाग्वै नित्यं प्रतिष्ठिता" मन्त्रभाष्टतवाक्यम्। २अश्विनीकुमारयोः "तस्यां स्वाङ्गप्रसवरूप्यां मार्त्तण्डक्षोद्भवतेजसा। बीजं निर्वापयामास तच्चलं तद्द्विधाऽपतत्। तत्र प्राणस्त्वपानस्य योनौ चाश्वजितौ पुरा। अरदानेन च पुनर्मूर्त्तिमन्तौ बभूवतुः। तौ स्वाङ्गप्रसवरूपिण्यां जातौ येन नरोत्तमौ। ततश्चाश्विनौ देवौ, कीर्त्येते रविनन्दनौ" वराहपु०।

प्राणायतन न० ६त०। "अक्षिणी कर्णरन्ध्रे च पायूपस्थञ्च नासिकाः। नवच्छिद्राणि तान्येव प्राणस्यायतनानि तु" याज्ञ० उक्ते प्राणस्य छिद्ररूपेऽवयवस्थानभेदे

प्राणायन पुंस्त्री० प्राणस्यापत्यं नडा० फक्। प्राणस्यापत्ये

प्राणायाम पु० प्राण आयम्यतेऽनेन आ+यम-करणे घञ्। प्राणवायोर्गतिविच्छेदकारकव्यापारभेदे तद्विधिस्तन्त्वसारोक्ता यथा "तत्र प्राणायामेऽङ्गनियमो ज्ञानार्णवे "भूतशुद्धिं ततः कुर्यात् प्राणायामक्रमेण च। कनि;

ष्ठानाधिकाङ्गुष्ठैर्वक्षोबाहुपुटधारणम्। प्राणायामः स विघ्नैर्यत्सर्जनीमध्यमे विना', प्राणायामो द्विविधः सगर्भो निर्गर्भश्च। तथा च "सगर्भो मन्त्रजापेन निर्गर्भो मात्रया भवेत्"। मात्रा च "यावज्जानुनि तद्धस्तभ्रामणं यावता भवेत्। कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः"। तत्र च मूलमन्त्रस्य बीजस्य प्रणवस्य वा षोडशवारादिजपेन यावनासापुटादिना वायुपूरकादिकं कुर्य्यात्। तथा च कालीहृदये "प्राणायामत्रयं कुर्य्यात् मूलेन प्रणवेन वा। अथ वा मन्त्रबीजेन यथोक्तविधिना सुधीः"। यथा तस्य षोडशवारजपेन वायुं रेचयेत्। तस्य चतुःषष्टिवारजपेन वायुं कुम्भयेत्। तस्य द्वात्रिंशद्वारजपेन वायुं रेचयेत्। पुनर्दक्षिणेनापूर्य्य उभाभ्यां कुम्भयित्वा वामेन रेचयेत्। पुनर्वामेनापूर्य्य उभाभ्यां कुम्भयित्वा दक्षिणेन रेचयेत्। त्रिपुराभारसमुच्चये "विपरीतक्रमो विद्वान् बुधः पुनरेव वा तद्विपरीतमिति"। यौगिके पुनर्मात्रानियमः। तथा च गौरक्षीये "मन्त्रप्राणायामः प्रोक्तो यौगिकं कथयामि ते। पूरयेद्वामया विद्वान् मात्रयोडशसंख्यया" इत्यादि। यद्वा चतुःषोडशवारजपेन पूरकादिकं कुर्य्यात्। तथा च तन्त्रान्तरे "पूरयेत् षोडशभिर्वायुं धारयेत्तु चतुर्गुणैः। रेचयेत् कुम्भकार्द्धेन क्रमशश्चा सतुरीयकम्। तदशक्तौ तच्चतुर्थमेव प्राणस्य संयमः। अस्य नित्यता माह "प्राणायामं विना मन्त्रपूजने न हि योग्यता" मन्त्राङ्गप्राणायामस्वरूपफलादिकं ब्राह्मणसर्वस्वे दर्शितं यथा तत्राग्निपुराणे "गायत्रीं प्रति ब्रह्मवाक्यम् "कुर्वन्तोऽपीह पापानि ये त्वां ध्यायन्ति पावनि!। उभे सन्ध्ये न तेषां हि विद्यते तु विपातकम्। त्रिः षष्ठेदायतप्राणः प्राणायामेन यो द्विजः। वर्त्तते न स लिप्येत पातकैरुपपातकैः"। हरीतः "प्राणायामान् द्विजः कुर्य्यात् सर्वपापापशान्तये। दह्यन्ते सर्वपापानि प्राणायामैर्द्विजस्य तु"। विष्णुधर्मोत्तराग्निपुराणयोः "सर्वदोषक्षरः प्रोक्तः प्राणायामो द्विजन्मनाम्। ततस्त्वथभिकं नास्ति पापप्रशमकारणम्"। अत्रिः "कर्म्मणा मनसा वाचा अज्ञा पापं कृतञ्च यत्। आसीनः पश्चिमां सन्ध्यां प्राणायामैर्व्यपोहति"। अग्निपु० "प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिर्निशि। अहोरात्रकृतात् पापान्मुच्यते नात्र संशयः"। वशिष्ठः "प्राणायामान् धारयेत् त्रीन् यथाविधि सुयन्त्रितः। अहोरात्रकृतं पापं तत्क्षणादेव नश्यति"। हरीतस्मृतः "पूर्वोक्तेषु चैतेषु तथान्येष्वपि सर्वशः। प्राणायामास्त्रयोऽभ्यस्ताः सूर्य्योदयनं प्रति। जायन्ते तद्दिनाद्याय तमसामिव भास्करः। सूर्य्योदयनं प्राप्य निर्मला धूतकल्मषाः। भवन्ति भास्कराकारा विधूमा इव पावकाः"। योगियाज्ञवल्क्यः "यदह्ना कुरुते पापं कर्म्मणा मनसापि वा। त्रिकालसन्ध्याकरणात् प्राणायामैर्व्यपोहति"। हरीतस्मृतिः "प्राणायामैर्दहेद्दोषान् मनोवाग्देहसम्भवान्"। प्राणायामानुक्त्वा यौधायनः "यतदाद्यं तपः श्रेष्ठमेतन्मर्म्मस्य लक्षणम्। सर्वदोषोपघातार्थमेतदेव विधियते"। अत्रिवशिष्ठौ "आवर्त्तयेत् सदा युक्तः प्राणायामान् पुनःपुनः। आकेशाग्रान्नखाग्राच्च तपस्तप्यत उत्तमम्"। विष्णुधर्मोत्तराग्निपुराणयोः "आकेशाग्रान्नखाग्राच्च तपस्तप्येत मुद्गरणम्। आत्मानं शोधयत्येव प्राणायामः पुनःपुनः। दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः। तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात्। प्राणायामैर्दहेद्दोषान् प्राणायामः परं तपः"। हरीहरयमः "यथा हि शैलधातूनां ध्मायतां धम्यते रजः। इन्द्रियाणां तथा दोषान् प्राणायामेन निर्दहेत्"। हरीहरयमः "ध्मायमानं यथा ह्येतज्जातूनां संस्थितं मलम्। तथेन्द्रियकृतो दोषः प्राणायामेन दह्यते"। योगियाज्ञवल्क्यः "यथा पर्वतधातूनां दोषान् दहति पावकः। एवमन्तर्गतश्चैनः प्राणायामेन दह्यते"। अत्रिवशिष्ठौ "निरोधाज्जायते वायुर्वायोरग्निः प्रजायते। अग्नेरापो व्यजायन्त तैरन्नः शुष्यते त्रिभिः"। विष्णुधर्मोत्तराग्निपुराणयोः "निरोधाज्जायते वायुस्तस्मादग्निस्ततो जलम्। त्रिभिः शरीरं सकलं प्राणायामैर्विशुध्यति"। योगियाज्ञवल्क्यः "तथा निरोधसंयोगात् देवतात्मयश्चित्तगात्। अग्नेर्वायोरपां योगादात्मा शुध्यति वै त्रिभिः"। मनुः "प्राणायामाद्ब्राह्मणस्य त्रयोऽपि विधिवत् कृताः। व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः" विष्णुधर्मोत्तराग्निपुराणयोश्च "प्राणसंधारणं मार्गं कुशाग्रेणाथ तद्विन्दुना। यः कुर्य्यादन्नया राजन्! प्राणायामस्य तत्फलम्"। हरीहरयमः "व्याहृतिं प्रणवं गायत्रीं शिरसा सह। त्रिः षष्ठेदायतप्राणः प्राणायामः स उच्यते। गायत्रीं शिरसा सार्द्धं व्याहृतिप्रणवं विदुः। प्रतिप्रणवसंयुक्तां शिरसं प्राणसंयमः"। योगियाज्ञवल्क्यः "भूर्भुवः स्वर्महर्जनश्चेत्यादि तथैव च। प्रणवोङ्कारसंयुक्तं सप्तव्याहृतिरुच्यते।

ओमापोज्योतिरित्येतच्छिरः पश्चात् प्रयोजयेत् । एवं मन्त्रप्रयोगस्तु प्राणायामनिवेशने । त्रिरावर्त्तनयोगेन प्राणायामस्तु सम्मितः" । योगियाज्ञवल्क्यः "ओङ्कारं ब्रह्म गायत्र्याश्छिरः सूतम् । ओमापोज्योतिरित्येष मन्त्रो यस्तु प्रकीर्त्यते । तस्य प्रजापतिर्ऋषिर्यजुश्छन्दस्तथा विभुः । ब्रह्माग्निवायुसूर्य्याश्च देवताः समुदाहृताः । प्राणस्यायमने चैव विनियोग उदाहृतः । गायत्रीशिरसा सार्द्धमेवं स्तुतिनिदर्शनम् । प्रणव व्याहृतियुतां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते । आदानं रोधसंसर्गं वायोस्त्रिः समभ्यसेत् । ब्रह्माणं केशवं शम्भुं ध्यायेदेताननुक्रमात् । रक्तं प्रजापतिं ध्यायेत् विष्णुं नीलोत्पलप्रभम् । शङ्करं त्र्यम्बकं श्वेतं ध्यायन्मुच्येत बन्धनात् । पूरके ब्रह्मसायुज्यं कुम्भके ब्रह्मणोऽन्तिकम् । रेचकेनाद्वितीयन्तु प्राप्नुयादैश्वरं पदम्" अथ प्राणायामविधिः तत्र व्यासपद्यम् "आदौ छन्द ऋषिर्देवताविनियोगान्विरूप्यते "गायत्रीं शिरसा सार्द्धं सप्रणव्याहृतिपूर्विकाम् । प्राणायामेन त्रिरावर्त्तयेत् ततः शनैः प्रस्रवेच्च प्राणायामैर्दग्धदोषोऽयं यत् श्रेयः तत् सकलं भवति" । व्यासः "गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च । त्रिष्टुप् च जगती चेति छन्दांस्याहुरनुक्रमात् । अग्निवायुर्यमादित्यो बृहस्पतिवरुणा इन्द्रस्तथा विश्वेदेवाः व्याहृतीनां देवतानि यथाक्रमम् । विनियोगः स्मृतस्तासां प्राणायामे महर्षिभिः" । योगियाज्ञवल्क्यः "व्याहृतीनाञ्च सर्वासामार्षञ्चैव प्रजापतिः । सप्त छन्दांसि प्रोक्तानि छादनानि तु सर्वशः । गायत्र्युष्णिगनुष्टुप् च बृहती बृहतेव च । पङ्क्तिश्च जगती चैव सप्त छन्दांसि तानि वै । अग्निवायुसूर्यादित्यो बृहस्पत्यम्बु एव च । इन्द्रश्च विश्वदेवाश्च देवताः समुदाहृताः । अभ्यासातेषु नित्येषु प्रायश्चित्तेषु सर्वदा । प्राणायामप्रयोगे च विनियोग उदाहृतः" । बृहस्पतिः "वस्त्रासनं नियम्याक्षून् कृत्वा ब्रह्मादिकं तथा । संनिमीलितदृङ् मौनी प्राणायामं समभ्यसेत्" । विष्णुधर्मोत्तरे "सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते । आदानं रोधसंसर्गं मनसा त्रिः समभ्यसेत् । ब्रह्माणं केशवं शम्भुं ध्यायन्मुच्येत बन्धनात् । रक्तं पितामहं ध्यायेद्विष्णुं नीलोत्पलप्रभम् । सुरेशं शम्भुमेकञ्च एव संसारमोक्षतारणम्" । योगियाज्ञवल्क्यः "वाह्यस्थितं नासपुटेन वायुमाकृष्य तेनैव शनैः समस्तम् । नाड़ीश्च सर्वाः प्रतिपूरयेत् स पूरको नाम महान्निरोधः । न रेचकोनैव च पूरको वा नासाग्रचारी स्थित एव वायुः । अन्तश्चलं धारयति क्रमेण कुम्भाख्यमेतं प्रवदन्ति तज्ज्ञाः । निष्कृष्य नासाविषयादशेषं प्राणं बहिः शून्यमिवानिलेन । निरुच्छ्वसंस्तिष्ठति चोर्द्ध्ववायुः स रेचको नाम महान्निरोधः । नासिक्यायाऽऽकृष्योच्छ्वासं ध्यानं पूरक उच्यते । कुम्भोनिश्चलनिश्वासो रिच्यमानस्तु रेचकः" । योगियाज्ञवल्क्यः "प्राणेनाप्यपयानेन वेगवायुं समुत्सृजेत् । येन शब्दनधस्याँश्च निश्वासेन च चालयेत् । शनैर्नासापुटे वायुमुत्सृजेत्तु वेगतः" । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि" पात० सू० तस्य योगाङ्गतोक्ता । तस्य च योगाङ्गप्राणायामस्य लक्षणादि: पात० सू० भा० विवरणेषूक्तं यथा "तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः" सू० । "सत्यासनजये बाह्यस्य वायोराचमनं श्वासः । कोष्ठ्यस्य वायोर्निःसारणं प्रश्वासः, तयोर्गतिविच्छेद उभयाभावः प्राणायामः" भा० । स तु "बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मः" सू० । "यत्र प्रश्वासपूर्वको गत्यभावः स बाह्यः यत्र श्वासपूर्वको गत्यभावः स आभ्यन्तरः स्तम्भवृत्तिर्यत्रोभयाभावः सकृत्प्रयत्नाद्भवति यथा तप्ते चरुसुपले जलं सर्वतः सङ्कोचमापद्यते । तथा द्वयोर्गमनागमनयोर्गत्यभावे सति त्रयोऽभ्येते देशेन परिदृष्टाः दृश्यानुविद्धो देश इति । कालेन परिदृष्टाः क्षणानामियत्तावधारणेनावच्छिन्ना इत्यर्थः । सङ्ख्याभिः परिदृष्टाः, एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातस्तावद्भिर्निःसृतैस्तावद्भिः द्वितीय उद्घातः एवं तृतीयः एवं मृदुरेवं मध्य एवं तीव्र इति सङ्ख्यापरिदृष्टः स खल्वयमेवमभ्यस्तो दीर्घसूक्ष्मः" भा० "बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः" सू० । "देशकालसङ्ख्याभिर्व्याप्तविषयः परिदृष्ट आक्षिप्तः तथाभ्यन्तरविषयः परिदृष्ट आक्षिप्त उभयथा दीर्घसूक्ष्मः ततःपूर्वको भूमिजयात् क्रमेणोभयोर्गत्यभावश्चतुर्थः प्राणायामः । तृतीयस्तु विषयानालोचितो गत्यभावः सकृदारब्ध एव देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मश्चतुर्थस्तु श्वासप्रश्वासगतिविषयावधारणात् क्रमेण भूमिजयाद्द्वयाक्षेपपूर्वको गत्यभावश्चतुर्थः प्राणायामः इत्ययं विशेष इति" भा० । "ततः क्षीयते प्रकाशावरणम्" सू० । "प्राणायामानभ्यस्तोऽस्य

योगिनः क्षीयते विवेकज्ञानावरणीयं यत्तदाच्यते महामोहमयेन इन्द्रजालेन प्रकाशशीलं सत्त्वमात्मकं तदेवार्थे नियुङ्क्ते इति तदस्य प्रकाशावरणं कर्म संसारनिबन्धनं प्राणायामाभ्यासात् दुर्बलं भवति प्रतिक्षणं च क्षीयते। तथा चोक्तम् "तपो न परं प्राणायामान्ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति"। किञ्च धारणासु च योग्यता मनसः प्राणायामाभ्यासादेव। "प्रच्छर्दनविधारणाभ्यां वा प्राणस्येति" वचनात्" भा०।

"प्राणायामविशेषत्रयलक्षणपरं सूत्रमवतारयति सप्तमिति। वृत्तिग्रन्थः प्रत्येकं संबध्यते। रेचकमाह यत्र प्रश्वासेति। पूरकमाह यत्र श्वासेति। कुम्भकमाह तृतीय इति। तदेव स्फुटयति यत्रोभयोः श्वासप्रश्वासयोः सकृदेव विधारकात् प्रयत्नादभावो भवति न पुनः पूर्ववदापूरणप्रयत्नौघप्रविधारकः प्रयत्नो नापि रेचकप्रयत्नौघविधारणप्रयत्नोऽपेक्ष्यते किन्तु यथा तप्ते उपले निक्षिप्तं जलं परिशुष्यत् सर्वतः सङ्कोचमापद्यते एव मयमपि प्राणतो बहुतरशोषो बलवद्विधारकप्रयत्न निरुद्धक्रियः शरीर एव क्षीणोऽवतिष्ठते न तु रेचयति येन रेचक इति। इयानस्य देशो विषयः पादेशवितस्तिहस्तादिपरिमितो निर्वाते प्रदेशे दीपिका हस्तादिक्रियानुमितो बाह्य एवाभ्यन्तरोऽप्यापादतलमस्तकं पिपीलिकास्पर्शमदशेनानुमितः। स्पर्शननिमेषक्रियावच्छिन्नस्य कालस्य चतुर्थो भागः क्षणस्तेषामित्यवधारणेनावच्छिन्नः स्वजानुमण्डलं प्राप्तिना लिः परावृत्य क्षोटिकावच्छिन्नः कालो मात्रा ताभिः अष्टत्रिंशन्मात्राभिः परिमितः पृथम उद्घातो मन्द्रः। स एव द्विगुणोक्षतो द्वितीयो मध्यमः स एव त्रिगुणोक्षतस्तृतीय उदात्तस्त्रिमं सङ्ख्यापरिहृतं प्राणायाममाह सङ्ख्याभिरिति। स्वस्थस्य हि पुंसः श्वासप्रश्वासक्रियावच्छिन्नेन कालेन यथोक्तक्षोटिकाकालः समानः पृथमोद्घात कर्मता नीतः उद्घातो विजितो वशीकृतो निरुद्धीतः अर्धनाभियकालो विवक्षितः श्वासप्रश्वासेयत्ता संख्येति कथञ्चिद्भेदः। स खल्वयं पृथक्षमभ्यासो दिवसपक्षमासादिक्रमेण देशकालपूरणव्यापितया दीर्घः परमनैपुण्यं साधयितव्यः तथा च सूत्रं न तु मन्दतया" विवृतिः। योगसूत्राणायामविधिः दत्तात्रेयसंहितायामुक्तो यथा "तस्मिन् शुभे समाक्षीर्ये आसने विष्टरादिके। तत्रोपविश्य मेधावी पद्मासनसमन्वितः। समकायः प्राङ्मुखो वाप्युदङ्मुखो वा। नासाभ्यन्तरसंचारिणौ वायू निरुद्ध्य पूरयेद्वायुमिडया तु शनैः शनैः। यथाशक्त्यविरोधेन ततः कुर्याच्च कुम्भकम्। ततस्त्यजेत् पिङ्गलया शनैरेव न वेगतः। पुनःपिङ्गलयाऽऽकृष्य पूरयेदुदरं शनैः। धारयित्वा यथाशक्ति रेचयेन्मारुतं शनैः। यया त्यजेत्तयाऽपूर्य धारयेदविरोधतः। एवं प्रातः समासीनः कुर्यादुर्विंशतिकुम्भकान्। कुम्भकः सहितो नाम सर्वपापविवर्जितः। मध्याह्नेऽपि तथा कुर्यात् पुनर्विंशतिकुम्भकान्। एवं सायं प्रकुर्वीत पुनर्विंशतिकुम्भकान्। कुर्वीत रेचकपूराभ्यां सहितान् प्रतिवासरम्। कुर्यादेवं चतुर्वारमनालस्यो दिने दिने। एवं मासत्रयं कुर्यान्नाडीशुद्धिस्ततो भवेत्"। वृहज्जाबाले त्रयोदशपटले "प्राणायामस्त्रिधा प्रोक्तो रेचकपूरककुम्भकैः। सहितः केवलश्चेति कुम्भको द्विविधो मतः। रेचपूरकयुक्तो यः स वै सहितकुम्भकः। यावत् केवलसिद्धिः स्यात् सहितं तावदभ्यसेत्। रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणम्। प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः। गुरूपदिष्टमार्गेण प्राणायामं समाचरेत्। यावद्वायुः स्थितो देहे तावज्जीवितमुच्यते। मरणं तस्य निष्क्रान्तिस्ततो वायुं निबन्धयेत्। सनाकुलासु नाडीषु यावतो नैव मध्यगः। कथं स्यात् निर्मलीभावः कायशुद्धिः कथं भवेत्। शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलम्। तदैव जायते योगी प्राणसंग्रहणे क्षमः। प्राणायामं ततः कुर्याच्छित्यं सात्त्विकया धिया। तथा सुषुम्णापार्श्वस्था मलाः शोषं प्रयान्ति हि। वज्रपद्मासनाद्योगी प्राणं चन्द्रेण पूरयेत्। धारयित्वा यथाशक्ति पुनः सूर्येण रेचयेत्। प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः। विधिवत् कुम्भकं कृत्वा पुनश्चन्द्रेण रेचयेत्। येन त्यजेत्ततैवेद पूरयेदविरोधतः। रेचयेच्च ततोऽन्येन रेचयेन्न वेगतः" चन्द्रेण वामनासया सूर्येण दक्षिणनासया। "प्राणं चेदिडया पिबेच्छियमितं भूयोऽन्यया रेचयेत् पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेदन्यया। सूर्याचन्द्रमसोरनेन विधिना विंशद्वयं ध्यायतां शुद्धा नाडिगणा भवन्ति नलिना मासत्रयादूर्ध्वतः। प्रातर्मध्यन्दिने सायं अर्धरात्रे च कुम्भकान्। चतुरश्चोत्तिपर्यन्तं चतुर्वारं समभ्यसेत्। प्राणायामे सहानू धर्मो योगिनो मोक्षदायिनि। प्राणायामे दिवारात्रौ देहचालं सहि-

जिजेत्। अधमे द्वादशी मात्रा मध्यमे द्विगुणा मृता। उत्तमे त्रिगुणा ज्ञेया प्राणायामस्य निर्णये। कनीयसि भवेत् स्वेदः कम्पो भवति मध्यमे। उत्तिष्ठत्युत्तमे प्राणी सङ्गपद्मासनो मुदः। जघन्येन समजातेन गात्रमार्जनमाचरेत्। दृढता लघुता दीप्तिस्तेन गात्रस्य जायते। यदा तु नाडीशुद्धिः स्यात्तदा चिह्नानि बाह्यतः। जायन्ते योगिनो देहे तानि वक्ष्याम्यशेषतः। शरीरलघुता दीप्तिर्जठराग्निविवर्द्धनम्। जघन्यस्य शरीरस्य तस्य जायेत निश्चितम्। पूर्वोक्तकाले कुर्वीत परमाभ्यासमेव च। ततःपरं यथेष्टन्तु शक्तिः स्याद् वायुधारणे। यथेष्टधारणाद्वायोः सिद्धिः कुम्भस्य केवला। केवले कुम्भके सिद्धे रेचपूरकवर्जिते। न तस्य दुर्लभं किञ्चित् त्रिषु लोकेषु विद्यते"। [हेमच०।

प्राणावाय न० प्राणेनावैति अण्-ट अच्। क्रियाविशाले

प्राणासन न० "एतत् प्राणासनं नाम सर्वसिद्धिप्रदायकम्। वायुं मूले समारोप्य ध्यात्वाऽऽकुञ्च्य प्रसारयेत्। जिह्वां पादमेकञ्च स्कन्धे धारोप्य यत्नतः। एकपादेन गगने तिष्ठेत् सदण्डवत् प्रभो!। प्राणासनमेतत् हि सर्वेषां पूरकाच्चयम्"। कृत्वा कुम्भयोर्युग्मे समारोप्याथ वायुभिः। तदाखिन्नो भवेत् मर्त्यः प्राणापानसमागमम्। अपानासनयोगेन कृत्वा योनेश्वरो भुवि। कूर्दयासनोक्ते पूजाङ्गे आसनभेदे।

प्राणाहुति स्त्री प्राणरूपेभ्योऽग्निभ्य आहुतिः। भोजनात् प्राक् सदस्यकर्त्तव्ये प्राणरूपान्यदेव्यकाहुतौ तत्प्रकारश्च याज्ञि० दर्शितो यथा

छान्दोगपरिशिष्टे "प्राणेभ्यस्त्वेत्य पञ्चभ्यः स्वाहा प्रणवसंयुताः। पञ्चाहुतीस्तु जुहुयात् प्रलयाग्निनिभेषु च"। प्राणाहुतिसङ्ख्याह शौनकः "तर्जनीमध्यमाङ्गुष्ठैर्लग्ना प्राणाहुतिर्भवेत्। मध्यमानामिकाङ्गुष्ठैरपाने जुहुयात्ततः। कनिष्ठानामिकाङ्गुष्ठैर्व्याने च जुहुयादविः। तर्जनीस्तु बहिष्कृत्य उदाने जुहुयात्ततः। समाने सर्वरूपेण मुदायाहुतिर्भवेत्"। सङ्ख्यार्थसारे "प्राणाहुतौ हुतायाञ्च पश्चात् भुञ्जीत नो हुतम्" अत्र पाठक्रमेण प्राणापानव्यानोदानसमानरूपेभ्य आहुतिरुक्ता। वैश्वानरविद्यास्तु छान्दो० उ० अन्यक्रम उक्तो यथा "तदयङ्कं प्रथमयागस्तत्तन्नामीयं, स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहेति प्राणमृणोति"। "अथ यां द्वितीयां जुहुयात्तां जुहुयादुदानाय स्वाहेति व्यानमृणोति"। "अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानमृणोति"। "अथ यां चतुर्थीं जुहुयात्तां जुहुयात् समानाय स्वाहेति समानमृणोति"। "अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानमृणोति"।

प्राणिद्यूत न० ६त०। समाङ्गद्यूताख्ये विवादपदभेदे अमरः। द्यूतशब्दे ३७७२ पृ० दृश्यम् "एष एव विधिर्द्यूते प्राणिद्यूते समाङ्गके" याज्ञ० द्यूतधर्मोऽयमितिदिष्टः। [मात्रे।

प्राणिन् नित्यम् त्रि० प्राणोऽस्त्यस्य इनि। जीवे चेतने जन्तु।

प्राणिमात्र स्त्री प्राणिनो मात्रेव। गर्भदात्रीवृषे राजनि०।

प्राणिहित त्रि० ६त०। १प्राणिनो हितसाधने २पादुकायां स्त्री त्रिका०। [प्रामीत्य तत्रार्थे पाठान्तरम्।

प्राणीत्य न० प्रणीतस्य प्रयुक्तस्य भावः ष्यञ्। ऋणे त्रिका०

प्राणेश पु० ६त०। १पत्यौ जटा०। २भार्यायां स्त्री हेमच०। ३वायौ पु० त्रिका०। प्राणेश्वरादयोऽप्यत्र।

प्राणेङ्ग न० ६त०। प्राणिनोऽङ्गे अवयवे हस्तपादादौ तत्र उपसर्जने "अङ्गं मूर्तिमति स्वाङ्गं प्राणिस्थमविकारिजम्। अतत्स्थं तत्र दृष्टञ्च तेन तद्वत् तथा युतम्" इत्युक्तलक्षणस्वाङ्गरूपकत्वे असंयोगोपधत्वे ङीष्। तत्र क्रोडादिवङ्क्षो नाभिकोदरजङ्घादन्तदष्टङ्गाधास्तु पुच्छस्य च विशेषोक्तेः संयोगोपधत्वेऽपि ङीष् स्यात्।

प्रातःकृत्य न० ७त०। शास्त्रविहिते प्रातःकर्त्तव्ये कर्मणि तच्च आचारशब्दे ६२३पृ०दर्शितम्। एवमन्यत्रापि यथायथं नानाशास्त्रे उक्तं द्रष्टव्यम्।

प्रातःकाल पु० कर्म०। १प्रभातकाले "प्रातःकालो मुहूर्त्तौ द्वौ त्रीन् सङ्गवस्तावदेव तु" स्मृतिपरिभाषिते सूर्योदयादधि मुहूर्त्तत्रयमिते २काले च।

प्रातःसन्ध्या स्त्री सन्धौ भवः यत् सन्ध्या ७त०। १गतरात्रेरनन्तरं मुहूर्त्तात्मके भाविसूर्योदयस्य मध्यवर्त्तिनि २दण्डचतुष्टयात्मके सा काले "स्त्रियामां रजनीं प्राहुस्यङ्क्वाद्यन्तचतुष्टयम्। नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" ति०त०। सन्ध्या च ब्रह्मणो मनोजाता कन्या सा च वसिष्ठोपदेशेन तपः कृत्वा पूर्वप्रतिज्ञातस्याग्नौ शरीरत्यागस्य सौभाग्यार्थं विष्णुवरेण पुरोडाशमयं देहमवाप्य मेधातिथियज्ञाग्नौ शरीरं जुहाव। तस्याः पूर्वाह्णे प्रातःसन्ध्या। एतद्व्याख्या तत्कथा कालिकापु० ३२अ० यथा "तदा विष्णोः प्रसादेन सा विवेश विधेः सुता। यज्ञिस्तस्याः शरीरं तद्गृह्य स्वर्गं स जग्मिवान्। शुभं प्रवेश-

यामास विष्णोरेवाज्ञया पुनः। सूर्यो द्विधा विभज्याथ तच्छरीरं तदा रथे। स्वके संस्थापयामास प्रीतये पितृदेवयोः। यदर्द्धभागस्तस्यासु शरीरस्य द्विजोत्तमाः!। प्रातःसन्ध्याभवत् सा तु अहोरात्रान्तमध्यगा। यः शेषभागस्तस्यासु अहोरात्रान्तमध्यगः। स सायमभवत् सन्ध्या पितृप्रीतिप्रिया सदा। सूर्योदयाच्च प्रथमं यदा स्यादरुणोदयः। प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी। अस्तं गते ततः सूर्ये शोणपद्मनिभा सदा। उदेति सायंसन्ध्यापि पितृणां मोदकारिणी। सन्धौ काले उपास्या सन्ध्या ७त०। पूर्वसन्ध्याकाले उपास्यायां गायत्रीप्रतिपाद्यपरमेश्वररूपायां १देवतायाञ्च यथोक्तं भरद्वाजकृतौ ७अ० यथा

"गायन्तं त्रायते यस्मात् गायत्रीति स्मृता ततः। प्राणा गया इति प्रोक्तास्त्रायते तानथापि वा। गायत्रीति भवेन्नाम केवलं त्रायतीति वा। व्यानश्चे प्राणजिह्वासु सदा वाग्रूपवर्तनात्। सरस्वतीति नाम्ना च समाख्याता महर्षिभिः। सवितृप्रकाशकरणात् सावित्रीत्यभिधा भवेत्। जगतः प्रसवित्रीति हेतुनानेन वापि च। तस्मादियं सदोपास्या निशादिवसयोर्द्विजैः। गायत्री सन्धिवेलायां सैव सन्ध्येति कीर्त्तिता। यो जपेदनं ज्ञात्वा नश्यन्त्यंहांसि तत्क्षणात्। ऋषिच्छन्दो देवताश्च जपेत्तास्वन्विताः क्रमात्। ज्ञात्वा पदानि त्रीण्याथ तुरीयं पादमव्ययम्। ब्रह्मणा याति तत्साम्यं पदं ज्ञात्वा तुरीयकम्। या गायत्री त्रिचरणा सा त्रिमूर्त्तिस्वरूपिणी। उपास्यानन्तरं विप्रैस्त्रिसन्ध्यासु त्रिमूर्त्तिषु। तुरीयपादमेतस्या ज्ञात्वा योपासिमाचरेत्। सा रत्नपूर्णां पृथिवीं प्रदक्षिणो दोषभाग्भवेत्। ब्रह्मविष्णुरुद्रादिदेवताभिरुपासिता। सन्ध्यान्तां कोन सेवेत विप्रः स्यादभिलाषुकः। प्रातः सतारकां सन्ध्यां सायं सन्ध्यां सभास्कराम्। स्नानकर्मणि तन्मध्यासुपासीत यथाविधि। मातरेवमुपास्यैव प्रकुर्य्यात् हवनं जपम्। स्नानस्यानन्तरं कुर्य्यात् तर्पणञ्च मखाक्रतून्। सायं सन्ध्यामुपासीत होमं कुर्वीत यासनात्। सन्ध्योपासनहीनो यो न योग्यः सर्वकर्मसु। तस्मादुपास्य विधिना सन्ध्यामन्यक्रियास्चरेत्। नोपासयेदुद्विजः सन्ध्यां योऽसौ शूद्रत्वमाप्नुयात्। कर्माण्यन्यानि संत्यज्य सन्ध्यां यः केवलं द्विजः। उपास्ते, सर्वपुण्यानि कृतवान् स भवेदलम्। सन्ध्योपासिं विना विप्रः पुण्यान्यन्यानि चाचरेत्। यस्तस्य तानि पापानि भवन्त्येव न संशयः। नाशयेत् सन्मार्जनितं पापं दशजपादहो। पुराकृतं शतजपात्त्रायत्र्यास्तु द्विजन्मनः। कृतं युगेऽपि चैकस्मिन् सहस्रेण जपेन तु। सङ्कल्पा जपतस्तस्यास्त्रायत्र्यो सर्वदा जपेत्। समस्तयज्ञतन्तुर्यो जपयज्ञः परं कृतः। हिंसया ते प्रवर्तन्ते जपयज्ञो न हिंसया। यावन्तः कर्मयज्ञास्च दानानि च तपांसि च। ते सर्वे जपयज्ञस्य कलां नार्हन्ति षोडशीम्। जपेन देवता नित्यं स्तूयमाना प्रसीदति। प्रसन्ना विपुलान् भोगान् दद्यान्मुक्तिञ्च शाश्वतीम्। यक्षराक्षसवेतालग्रेतभूतपिशाचकाः। जपाढ्यं द्विजं दृष्ट्वा दूरतो यान्ति भीतितः। तस्माज्जपः सदा श्रेष्ठः सर्वस्मात् पुण्यसाधनात्। इत्येवं सर्वथा ज्ञात्वा विप्रो जपपरो भवेत्। एवं जपपरः सन्ध्यां भक्त्योपासीत यो द्विजः। नियमेन सदा गच्छेदक्षित्वं नात्र संशयः। तस्माज्जितेन्द्रियो नित्यं सन्ध्योपासिं समाचरेत्। स सर्वलोकान् जित्वाऽथ विप्रः स्वयमानयेत्। तदन्ते ब्रह्मभावेन यावदाभूतसंप्लवम्। तावत्तिष्ठो निरातङ्को भवेदत्र न संशयः। एवं सन्ध्याविधिं सर्वं यो विप्रोऽध्यापयेत् द्विजः। अध्यापको यथाध्येयः श्रोता चैकाग्रमानसः। स सर्वपापनिर्मुक्तः सर्वविद्याविशारदः। अथ धान्यधनोपेतो जीवेद्वर्षशतं सुखी। एतद्विधानं योऽधीत्य भावयेत् ब्राह्मणोत्तमान्। प्रीतिपूर्वं प्रयत्नेन ब्राह्मणो नियमेन च। अज्ञानेन प्रमादेन दुरितं यत् समुत्थितम्। तस्य तत् सकलं नाशं व्रजेदत्र न संशयः। याः सन्ध्योपासयश्चित्रो यस्य स्नानं विधीयते। पर्वणि श्रावणी यस्य तत् सर्वं पूर्णतामियात्। कामान्मोहाच्च लोभाच्च सन्ध्यां नातिक्रमेद् द्विजः। सन्ध्यातिक्रमणाद्विप्रो ब्राह्मण्याच्च्यवते यतः। अनागतां तु ये पूर्वामनतीताञ्च पश्चिमाम्। सन्ध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः?। सायं प्रातः सदा सन्ध्यां ये न विप्रा उपासते। कामान्तान् धार्मिको राजा शूद्रकर्मसु योजयेत्। विधानमेतत्तो देयं रहस्यं यस्य कस्यचित्। वेदाध्यायाभिजाताय प्रदेयं स द्विजन्मने"। ब्राह्मणस० योगियाज्ञवल्क्या "अतःपरं प्रवक्ष्यामि सन्ध्योपासनमुत्तमम्। अहोरात्रकृतैः पापैर्यैरुपास्य प्रमुच्यते"। तथा "यावन्तोऽस्यां पृथिव्यां हि विकर्मस्थास्तु वै द्विजाः। तेषां वै भावनार्थाय सन्ध्या सृष्टा स्वयम्भुवा। या सन्ध्या सा तु गायत्री

द्विधा भूता प्रतिष्ठिता"। तथा "सा सत्यं कर्म विप्राणामक्षोरात्मजतस्य तु। पापापनुत्तये यस्मात् तस्मान्नित्यं समाचरेत्" यमः "सन्ध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्"। आपस्तम्बः "अन्तं मद्यगन्धञ्च दिवास्वैरिमैथुनमेव च। पुनाति दुष्कृतस्याग्रं बहिः सन्ध्यां ह्युपासिता"। याज्ञवल्क्यः निशायां वा दिवा वापि यदज्ञानकृतं भवेत्। त्रिकालसन्ध्याचरणात् तत्सर्वं विप्रणश्यति"। देवलः "सायं प्रातः सदा सन्ध्यामुपासीत शुचिर्बहिः"। विष्णुपु० "सर्वकालमुपस्थानं सन्ध्यायां पार्थिवेष्यते। अन्यत्र सूतकाशौच विघ्नमात्रमपीतितः"। योगियाज्ञवल्क्यः "सर्वावस्थोऽपि यो विप्रः सन्ध्योपासनतत्परः। ब्राह्मण्याच्च न हीयेत अन्यलक्षणगतोऽपि सन्। सन्ध्या नोपासिता येन तेन विष्णुरुपासितः। दीर्घमायुः स विन्देत सर्वपापैः प्रमुच्यते"। तथा "सायं प्रातस्तु यः सन्ध्यां सक्षयां पर्युपासिते। जप्त्वैव पावनीं देवीं सावित्रीं लोकमातरम्। स तया पावितो देव्या ब्राह्मणो धूतकिल्बिषः। न क्षीयेत प्रतिग्रहानोऽपि पृथ्वीं सप्तसमुद्राम्"। अग्निपुराणे सुनय ऊचुः "कथं मुने! दिवं याति ब्राह्मणो धूतकिल्बिषः। अनग्निको हि नो ब्रूहि यदुक्तं वह्निना पुरा" उत उवाच "सायं प्रातस्तु यः सन्ध्यामुपास्ते ऽनुदिनं मानवः। जपते पावनीं देवीं गायत्रीं वेदमातरम्। तया स भावितो देव्या ब्राह्मणः धूतकिल्बिषः। न क्षीयेत प्रतिग्रहानोऽपि पृथिवीञ्च सप्तसमुद्राम्। ये चान्ये दारुणाः केचिदुत्पाताः स्वर्गादयो दिवि। ते चास्य क्षीणतां यान्ति शिवाः शिवतरास्तथा। यत्र तत्र गतश्चैनं दारुणाः पिशिताशनाः। घोररूपा महाकायाः प्रभवन्ति न राक्षसाः। यावन्त्य पृथिव्यां हि क्षीणवेदव्रता द्विजाः। अक्षीणव्रतवेदा वा विकर्मपथमाश्रिताः। तेषान्तु पावनार्थाय गायत्री नित्यमेव हि। हे सन्ध्ये ह्युपतिष्ठेत तदन्वर्थं महाव्रतम्"। तथा "हे सन्ध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः। यत्किञ्च दुष्कृतं नौक्ति पूर्वतः परतोऽपि वा। एवं किल्बिषयुक्तो हि विनिर्दहति पातकम्। उभे सन्ध्ये ह्युपासीत तस्माद्विप्रं द्विजोत्तमः"। तथा "सन्ध्या येन न विज्ञाता सन्ध्या नैवाप्युपासिता। जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते"। मनुः "न तिष्ठति तु यः पूर्वां नोपास्ते यस्तु पश्चिमाम्। स साधुभिर्बहिष्कार्यः सर्वस्मात् द्विजकर्मणः"। व्यासः बहिः सन्ध्या दशगुणा गोष्ठप्रस्रवणादिषु। स्नाते तीर्थे दशगुणा स्नाहुती जाप्यजप्ये"। बहिरिति अनाच्छादितस्थाने प्राङ्मुखादौ। यातातपः "गृहेषु प्राक्ततो सन्ध्या गोष्ठे शतगुणा स्मृता। नदीषु शतसाहस्रा अनन्ता शिवसन्निधौ"। गृहेषु गृहवीथ्यादौ। योगियाज्ञवल्क्यः "सन्धौ सन्ध्यामुपासीत नास्तगे नोदुगते रवौ। सन्ध्यात्रयन्तु कर्त्तव्यं द्विजेनात्मविदा सदा"। संवर्त्तः "प्रातःसन्ध्यां सनक्षत्रामुपासीत यथाविधि। सावित्र्यां पश्चिमां सन्ध्यामर्कोल्लसितभास्कराम्"। नरसिंहपुराणे "पूर्वां सन्ध्यां सनक्षत्रामुपक्रम्य यथाविधि। गायत्रीमभ्यसेत्तावदुयावदादित्यदर्शनम्"। मनुः "ऋषयो दीर्घसन्ध्यत्वात् दीर्घमायुरवाप्नुयुः। पूजां यशश्च कीर्त्तिञ्च ब्रह्मवर्चसमेव च। उपास्ते यस्तु नो सन्ध्यां ब्राह्मणो हि विशेषतः। सजीवन्नेव शूद्रः स्यान्मृतः श्वा चाभिधीयते"। तथा "सन्ध्याहीनो ह्यशुचिर्नित्यमनर्हः सर्वकर्मसु। यदन्यत् कुरुते किञ्चित् न तस्य फलभाग्भवेत्"। यमः "अनागतान्तु ये पूर्वामतीतां चापि पश्चिमाम्। ये विप्रा नानुतिष्ठन्ति सन्ध्यां ते वृषलाः स्मृताः"। छन्दोगपरिशिष्टे कात्यायनः "सन्ध्यां नोपास्य यश्चास्तं स्नानदानस्य यः सदा। तं दोषा नोपसर्पन्ति वैनतेयमिवोरगाः" तथा "एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम्। यस्य नाध्यादरस्तस्य न स ब्राह्मण उच्यते"। कूर्मपुराणे "न तिष्ठति तु यः पूर्वां नोपास्ते यस्तु पश्चिमाम्। स शूद्रेण समो लोके सर्वधर्मविवर्जितः"। सन्ध्याकाले सन्ध्यावन्दनाकरणे प्रायश्चित्तमाह। व्यासः "आदित्योऽभ्युदियादुयस्य सन्ध्योपासिमकुर्वतः। ज्ञात्वा प्राणांश्चिराचम्य गायत्र्यष्टशतं जपेत्" पारिजाते तु "कालातिक्रमणे चैव चतुर्थ्यार्घं प्रदापयेत्" इत्युक्तम्। मलमासतत्त्वे तु "कालातीता दृथा सन्ध्या सन्ध्यास्नानमैथुने यथा। गायत्रीं दशधा जप्त्वा पुनःसन्ध्यां समाचरेत्" काशीखण्डोक्तं प्रायश्चित्तान्तरमुक्तम्। अथ यथाचारं व्यवस्था। सङ्गवपर्य्यन्तप्रातः सन्ध्यावा गोधूलिकालः आप्रदोषावसानं सायंसन्ध्यायाः इति मलमासतत्त्वम्। "उदयास्तमयादूर्द्धं यावत् स्यादृटिकात्रयम्। तावत् सन्ध्यामुपासीत प्रायश्चित्तमतःपरम्" इति स्कान्दे विशेष उक्तेः। मध्याह्ने तु दक्षः "आध्यर्द्धयामादासायं सन्ध्या माध्याह्निकीष्यते। अर्घ्यं प्रदानतः पूर्वमुदयास्तमयेऽपि वा। गायत्र्यष्टशतं जप्यं प्रायश्चित्तं द्विजा-

तिभिः" इति। गौणकालेऽप्यसम्भवे यमः "दिवोदितानि कर्माणि प्रमादादकृतानि चेत्। पूर्वस्याः प्रथमे यामे तावत् कुर्याद्व्यतिक्रमम्"। यत्र मुख्यकालानुरोधात् सायंसन्ध्योपासनं पूर्वं कृत्वा "आगन्तूनामन्ते निवेश" इति न्यायेनातीतकालं कर्म पश्चात् कार्यमिति न्यायतः प्राप्तं तस्य निषेधार्थं यथाक्रममिति वचनमिति। "दिवोदितानि कर्माणि प्राप्नुवन्तीतराणि च। दिवोदितानि कृत्वैव विदध्यादुत्तराणि तु" मदनपारिजाते वसिष्ठोक्तेः। सूतके विशेषः सूतके इत्यनुवृत्तौ "अवगाह्यं ब्रह्मयज्ञं सौरजप्यञ्च वर्जयेत्" इति "स्नानं सन्ध्यां त्यजन् विप्रः सप्ताहाच्छूद्रतां व्रजेत्। तस्मात् स्नानञ्च सन्ध्याञ्च सूतकेऽपि न सन्त्यजेत्। सूतके मृतके चैव सन्ध्याकर्म समाचरेत्। मनसोच्चारयेन्मन्त्रान् प्राणायामस्तते द्विजः" इत्यनयोरविरोधाय न स्नानसन्ध्यानिषेध इति कल्पम्। किन्तु प्राणायाममन्त्रा मनसापि नोच्चार्य्यौ इत्यर्थः। पैठिनसिस्तु "मृतके सावित्र्याञ्जलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यात्" इत्यर्घ्यदानान्तां सन्ध्यामाह। अन्ये तु उच्चार्य्य वाचा गायत्रीं दद्यादर्घ्यांश्चीनपि। अष्टविंशतिकृत्वोऽत्र गायत्रीं मनसा जपेत्" इति गायत्रीजपमप्याहुः। "मृतके कर्मणान्त्यागः सन्ध्यादीनां विधीयते" इति यद्यपि सन्ध्यायानिवृत्तिः श्रूयते तथाप्यञ्जलिप्रक्षेपादिकं कार्य्यम्। "मृतके सावित्र्या चाञ्जलिमक्षिप्य प्रदक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यादिति" पैठिनसिस्मरणात् इति मिताक्षरा सन्ध्यादीनामप्यपवादमाहापरार्के पुलस्त्यः "सन्ध्यामग्निं चरुं होमं यावज्जीवं समाचरेत्। न त्यजेत् मृतके वापि त्यजन् गच्छेदधो द्विजः। सूतके मृतके चैव सन्ध्याकर्म समाचरेत्। मनसोच्चारयेन्मन्त्रान् प्राणायामस्तते द्विजः"?। यत्तु चन्द्रिकायां जाबालः "सन्ध्यां पञ्च महायज्ञान् नैत्यिकं स्मृतिकर्म च। तन्मध्ये क्षपयेत्तेषां दशाहान्ते पुनः क्रिया" यच्च संवर्त्तः "मृतके कर्मणां त्यागः सन्ध्यादीनां विधीयते" यच्च विष्णुपु० "सर्वकालमुपस्पृश्य तु सन्ध्ययोः पार्थिवेष्वृते। अन्यत्र सूतकाशौचविस्मयात्तुरभीतितः" इति। तत् संपृक्तसन्ध्यानिषेधपरम्। "अष्टौन्ना मानसी सन्ध्या क्षणवारिविवर्जिता" इति शुद्धिदीपे व्यासोक्तेः। पैठीनसिस्तत्र मन्त्रोच्चारणमप्याह" सूतके सावित्र्याञ्जलिं प्रक्षिप्य सूर्यं ध्यायन्नमस्कुर्यात्"। प्रयोगपरिजाते भरद्वाजोऽपि "मृतके मृतके कुर्यात् प्राणायाममसम्भवम्। तथा मार्जनमन्त्रांस्तु मनसोच्चार्य मार्जयेत्। गायत्रीं सकृदुच्चार्य मूर्ध्न्यर्घ्यं निवेदयेत्। मार्जनं तु न वा कार्य्यं मुपस्थानं न चैव हि"। इत्येवं मिताक्षरापरिज्ञातादौ अशौचे सन्ध्याकरणविशेषस्योक्तेः मौढानां तदनाचरणमनाचार एव तस्य शीतत्वेन कृत्वा बाधानुचित्वादपि मिताक्षराद्युक्तं युक्तमिति द्रष्टव्यम्।

प्रातःसवन न० सवनं यज्ञाङ्गकर्मभेदः सोमाभिषवादि प्रातः कर्त्तव्यम् सवनम्। प्रातःकर्त्तव्ये यज्ञाङ्गकर्मभेदे। अप प्रातःसव तत्रार्थे पु०।

प्रातःस्नान ७त०। प्रातःकर्त्तव्ये जलावगाहनादिरूपे स्नाने तस्य कर्मोक्तताद्युक्तं मरुड़पु० "ऊर्ध्वः काले तु संप्राप्ते कृत्वा चावश्यकं बुधः। स्नायाद्दीर्घं शुद्धाय शौचं कृत्वा यथाविधि। प्रातःस्नानेन पूयन्ते येऽपि पापकृतो जनाः। तस्मात् सर्वप्रयत्नेन प्रातःस्नानं समाचरेत्। प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टशुभं हि तत्। सुखसुप्तस्य सततं नाशाद्याः संश्रयन्ति हि। यतो नैवाचरेत् कर्म सांगत्यकृत्वा स्नानमादितः। व्यतीपाते गण्डे च दुःस्वप्नं दुर्विचिन्तितम्। प्रातःस्नानेन पापानि धूयन्ते नात्र संशयः। न च स्नानं विना पुंसां प्राशस्त्यं कर्म संस्कृतम्। होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत्। अशक्तावशिरस्कान्तु स्नानमस्य विधीयते"।

प्रातःस्मरणीय त्रि० ७त०। प्रातःकीर्त्तनीये देवादौ पुण्यचरिते। प्रभातशब्दे ४४७५ पृ० दृश्यम्।

प्रातर् अव्य० प्र+अत-असुन्। १प्रभाते अमरः "प्रातःकालो मुहूर्त्तौ द्वौ"ति स्मृत्युक्ते २सूर्य्योदयावधिमिहूर्त्तकाले च

प्रातर त्रि०प्रकृष्टं प्रातरो यत्र। प्रकृष्टातररूपतरणपथ्ययुक्ते देशे ततः कथाद्या०चतुरर्थ्यां रूण्। प्रातरीय तत्रादरदेशादौ त्रि०।

प्रातरत्रक पु० सर्पभेदे भा०शा० ५७अ०।

प्रातरनुवाक पु० प्रातःपाठ्ये अनुवाके वेदांशभेदे श्रुतौ "प्रातरनुवाकं जाग्रदुपासीत" कात्या० श्रौ० ८।१।१२ "पुरा प्रातरनुवाकस्य" ऋ०च० "प्रातरनुवाकस्य प्रारम्भात्" भा० "अप्रगीतस्तृगजातं यस्तं यत् प्रातःकाले शस्यते प्रातरनुवाकस्तस्मिन्नि यावत्" श्यानन्द०। [त्रिका०

प्रातराश पु० अश+भावे घञ् ७त०। प्रातःकालिके भोजने

प्रातर्गेय पु० प्रातर्गेयसम्ब०। १स्तुतिपाठके त्रिका० २प्रातःकाले गातव्ये सामादौ च त्रि०।

प्रातर्दिन न० कर्म०। पूर्ववर्त्तिनि दिवसे त्रिकाण्डशेषः।
प्रातर्भोक्तृ पु० ७त०। कालो शब्दच०।
प्रातर्भोजन न० ७त०। प्रातराशे जटाध०।
प्रातस्तरा(रा)म् अव्य० प्रातर्+तरप् तमप् वा आद्यु। अत्यन्तप्रातःकाले "प्रातस्तरां पतत्त्रिभ्यः" भट्टिः।
प्रातस्त्विवर्गा स्त्री प्रातः प्रातःस्नानेन त्रिवर्गो यस्याः। गङ्गायां भा०अनु० २६अ०।
प्राति स्त्री प्रा+भावे क्तिन्। १पूर्त्तौ २लाभे च मेदि०।
प्रातिकण्ठिक त्रि० प्रतिकण्ठं गृह्णाति प्रतिकण्ठ+ठक्। प्रतिकण्ठग्राहके।
प्रातिका स्त्री प्र+यत-ख्वुन् टाप्। जवाङ्कुरे राजनि०।
प्रातिकामिन् दुर्य्योधनस्य दूतभेदे भा०भी० ६५अ०।
प्रातिकूलिक त्रि० प्रतिकूलं वर्त्तते प्रतिकूल+ठञ्। प्रतिकूलं वर्त्तमाने स्त्रियां ङीप् "तां प्रातिकूलिकीं मत्वा" भट्टिः
प्रातिक्य न० प्रतिकस्य भावः पुरोहितादि० यक्। प्रतिकभावे
प्रातिजनीन त्रि० प्रतिजनं साधु प्रतिजना० खञ्। प्रतिजनं साधौ। कात्या०श्रौ०२५।१२।४
प्रातिनिधिक पु० प्रतिनिधि+स्वार्थे ठक्। प्रतिनिधौ
प्रातिपथिक त्रि० प्रतिपथमेति ठञ्। प्रतिपथं गन्तरि स्त्रियां ङीप्। [तिथौ भवे।
प्रातिपद त्रि० प्रतिपदि भवः सञ्जिवेला० अण्। प्रतिपदि-
प्रातिपदिक त्रि० प्रतिपदायां तिथौ भवः "कालाट् ठञ्" पा०ठञ्। १प्रतिपदायां तिथौ भवे २तत्राविर्भूते यज्ञे पु० "त्वादौ प्रतिपदा येन त्वत्तुत्पन्नोऽसि पावक!। त्वत्सदात् प्रातिपदिकं कुंभविष्यन्ति देवताः" वराहपु०। ३नाम्नि शब्दभेदे "यत् प्रातिपदिकं नाम तस्मान्नो नातिरिच्यते" शब्दर०। तल्लक्षणन्तु "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" "कृत्तद्धितसमासाश्च" पा०व्याख्याने चैते सरलायामस्माभिः "अधातुरप्रत्यय इति पुंलिङ्गनिर्देशस्तु परवल्लिङ्गं द्वन्द्व तत्पुरुषयोरित्यभिधानात्। एतत्सूत्रे परसूत्रे चार्थवत्त्वमेतत्संज्ञाफलीभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थबोधजनकत्वम् अन्यथाऽधातुरिति पर्युदासेन व्याख्यानाच्चार्थवत्त्वे साक्षात्प्रत्ययेन सिद्धे उत्तरसूत्रे कृदादीनामनर्थकानामसिद्धे स्वार्थवत्त्वग्रहणं व्यर्थं स्यात्। अकृत्रिति धातौ कार्ये इत्यादि प्रत्ययान्ते च एतत्साध्यविभक्त्यनपेक्षत्वेऽपि तदितरानपेक्षत्वसत्त्वेऽपि अधातुरप्रत्यय इति तत्पर्युदासः। एकदेशवर्त्ते ऽर्थबोधजनकत्वाभावान्नातिप्रसङ्गः। अत्र प्रत्ययपदं प्रत्ययप्रत्यान्तपरं तन्त्रावृत्त्यैवोभयग्रहणादित्याहुः (प्रत्ययं प्रत्ययान्तञ्चेति) सि०कौ०)। अतएव भाष्ये "न लोके केवलेन प्रत्ययेनार्थोऽवगम्यते कोन तर्हि सप्रकृतिकेन" इत्युक्तम् परिभाष्युक्तम्। "धात्वादीनां विशुद्धानां लौकिकार्थो न विद्यते। कृत्तद्धितानामर्थस्तु केवलानामलौकिकः। प्रातिपदिकस्यैतदुभयस्य तथैवार्थो न विद्यते" इति। भू सत्तायामित्यादौ कर्मण्यण्यणित्यादौ चार्थकथनन्तु अलौकिकार्थकथनमात्रं प्रक्रियादशायामिति वेदितव्यम्। "ब्राह्मणार्थो यथा नास्ति कश्चिदु ब्राह्मणकम्बले। देवदत्तादयो वाक्ये तथैव सुनिरर्थकाः" इत्युक्तेरखण्डवाक्यस्यापि बोधकत्वात्तस्यापि प्रातिपदिकत्वापत्त्या तदुत्तर स्वादिप्रसङ्ग इति तन्निवारणायेदं नियमसूत्रमित्याहुः "पूर्वसूत्रेणेति" सि०कौ०। प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणमिति न्यायादेव प्रत्ययान्तत्वलाभात् कृत्तद्धितादीनामपि प्रत्ययत्वात् पूर्वसूत्रेण संज्ञाविधेरिति भावः। पदमिति स्वातन्त्र्येण प्रयोगार्हमर्थवदित्यर्थः। अनुकरणस्य शब्दमात्रपरतया न प्रातिपदिकत्वमनुकरणस्यानितिपरस्य प्रयोगार्हत्वेऽपि इतिपरस्य पृथक् प्रयोगार्हत्वादिति गवित्यश्वमाहेत्यादौ न प्रसङ्गः" परिभाष्युक्तम्। अतएव "गवित्यादि भू सत्तायामिवोदश्वम्। न प्रातिपदिकं नापि पदं साधु तु तत् स्मृतम्"। प्रातिपदिकार्थे द्वीत्थे प्रथमैव। तदर्थश्च नामार्थाः "स्वार्थो द्रव्यञ्च लिङ्गञ्च संख्या कर्मादिरेव च। अमी पञ्चैव नामार्थास्त्रयः कोप्यन्वितोन्विता" इत्युक्ताः। तत्र त्रिलिङ्गा, नियतलिङ्गाश्च प्रातिपदिकार्थे प्रथमाया उदाहरणम्" सि० कौ०।
प्रातिपीय पु० ऋषभेदे भा०द्रो०१९७अ०। २सोमप्रकर्षिभेदे च प्रवराध्यायः।
प्रातिपेय पु० ऋषभेदे भा०स० ६८अ०।
प्रातिभ त्रि० प्रतिभाऽस्यास्य प्रज्ञा० अण्। १प्रतिभान्विते योगिनां योगविघ्नकारके २उपसर्गभेदे मार्कण्डेयपु० ४० अ० यथा "प्रातिभः श्रावणो दैवो ह्यभावर्त्तौ तथापरौ। पञ्चैते योगिनां योगविघ्नाय कटुकोदयाः। वेदार्थाः काव्यशास्त्रार्थाः विद्याः शिल्पान्यशेषतः। प्रतिभान्ति यदङ्गेति प्रातिभः१ स तु योगिनः। शब्दार्थानखिलान् वेत्ति शब्दं गृह्णाति चैव यत्। योजनानां सहस्रेभ्यः श्रावणः२ शोऽभिधीयते। रसत्वाद्दीयते चासौ स यदा देवतोपमः। उपसर्गत्वमप्यस्य दैवश्छन्नमवत्तवद् बुधाः। स्मर्यते यस्त्रिरात्रञ्च मनो दोषेण योगिनः। स्मरणा-

चारभिभ्रंशाद् ध्वनेः ४ च परिकीर्त्तितः । आवर्त्तं इव तोयस्य ज्ञानावर्त्तो यदाकुलः । नाशयेच्चित्तभावर्त्तं ५ उपसर्गः स उच्यते । एतैर्नाशितयोगास्तु सकला देवयोनयः । उपसर्गैर्महाघोरैरावर्त्तन्ते पुनःपुनः" ।

प्रातिभाव्य न० प्रतिभुवो भावः ष्यञ् द्विपदवृद्धिः । (आभिनि) १प्रतिभूभावे प्रतिभूत्वेन देये २ऋणे च अनु० ८।१५। ५९ दर्शनप्रतिभूशब्दे २४७५ पृ० दृश्यम् ।

प्रातिभासिक त्रि० प्रतिभासादागतः ठक् । प्रतिभासाधीन सत्त्ववति मिथ्यारजतादौ वेदान्तमते हि सत्त्वं त्रिविधं पारमार्थिकं व्यवहारिकं प्रातिभासिकं च तत्र ब्रह्मणः सत्त्वं पारमार्थिकं त्रिकालाबाध्यत्वात्, घटादीनां सत्त्वं व्यवहारिकं व्यवहारकालेऽबाध्यत्वात्, शुक्तौ रजतादेः सत्त्वं प्रातिभासिकम् अधिष्ठानज्ञानबाध्यत्वात् प्रतिभासकालमात्रसत्त्वाच्चेति वेदान्तपरिभाषायां स्थितम् ।

प्रातिशाख्य त्रि० प्रतिशाखं भवः परिषद्० अञ् । प्रतिशाखं भवे व्याकरणभेदे न० ।

प्रातिश्रुत्क पु० प्रतिश्रुति तत्समये भवः ठञ् । प्रतिश्रवणवेलायां भवे पुरुषे "यत्र वायं श्रौतः प्रातिश्रुत्कः पुरुषः" बृ० ४० । [२प्रतिव्यक्तिभवे च ।

प्रातिस्विक त्रि०प्रतिस्वं भवः ठक् । १असाधारणधर्म्मे त्रिका० ।

प्रातिहर्त्त्य न० प्रतिहर्तुर्भावः कर्म्म वा ष्यञ् । प्रतिहर्तृरूपस्य ऋत्विग्भेदस्य कर्म्मणि १प्रतिहरणे २तद्भावे च ।

प्रातिहारक पु० प्रतिहारक एव स्वार्थे अण् । प्रतिहारकशब्दार्थे अमरः । [कारके अमरः ।

प्रातिहारिक त्रि० प्रतिहारः प्रयोजनमस्य ठक् । मायाकारके अमरः ।

प्रातीतिक त्रि०प्रतीत्या निर्वृत्तः ठञ् । प्रातिभासिके पदार्थे

प्रातीप प्रतीपस्यायम् अण् । प्रतीपन्यस्यापत्ये गालवौ ऋषी त्रिका० । [कूलाचारिणि ।

प्रातीपिक त्रि० प्रतीपं वर्त्तते ठञ् । प्रतीपं वर्त्तमाने प्रतिकूलाचारिणि ।

प्रात्तट पु० ऋषिभेदे यत०ब्रा० १४।८।१२।२

प्रात्ययिक त्रि० प्रत्ययाय स्थितः ठक् । प्रतिभूभेदे "दर्शनप्रतिभूर्यत्र स्थितः प्रात्ययिकोऽपि वा" याज्ञ०। दर्शनप्रतिभूशब्दे २४७८ पृ०दृश्यम् ।

प्राथमकल्पिक त्रि० प्रथमकल्पे भवः ठक् । १प्रथमारम्भोचिते वेदाध्ययनादौ । प्रथमं कल्पमधीते कल्पाल्लुक् ठक् । २प्रथमकल्पकृतशिक्षाप्रन्थाध्यायिनि अमरः ।

प्राथमिक त्रि० प्रथमे भवः ठञ । १प्रथमभवे स्त्रियां ङीप् । प्रथममधीते प्रथम+ठक् । वेदादेः २प्रथमाध्येतरि च ।

प्रादि पु० उपसर्गसंज्ञार्थं पा०उक्ते शब्दभेदे स च यथा पा० ग०उक्तौ यथा "प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत्(दु) अभि प्रति परि उप" एते प्रादयः । निस् दुस् शब्दौ "निसस्तपतावनासेवने इति (८।३।१०७) सूत्रे निस इति निर्देशात् निष्कृतं दुष्कृतमित्युदाहृत्य "इदुदुपधस्य यो विसर्जनीयः" इति भाष्योक्तेश्च । निरः कुषः इति (७।२।४६) "इदुरोरधिकरणे" इति च निर्देशात् रात्रावपि सनो० । उदिति दान्तोऽपि "उदोऽनूर्ध्वे चेष्टायामिति" । "उपसर्गाः क्रियायोगे" पा० "गतिश्च" पा० प्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः" त्रि०कौ० ।

प्रादुराच्चि पु० गोत्रप्रवरर्षिभेदे प्रवराध्यायः ।

प्रादुर्भाव पु० प्रादुस्+भू–भावे घञ् । आविर्भावे प्रथमप्रकाशे

प्रादुस् अव्य० प्र+अद–उसि । प्राकाश्ये अर्थात् अस्य क्रियायोगे गतिसंज्ञा प्रादुष्कृत्य प्रादुर्भूय । स्वार्थे यत् न द्विर्लोपः प्रादुष्य प्रादुर्भावे न० उज्ज्वलदत्तः ।

प्रादेश पु० प्र+दिश–घञ् दीर्घः । १तर्जनीसङ्कुचितविस्तृताङ्गुष्ठे अमरः २देशमात्रे भेदि० "अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते" इत्युक्ते ३परिमाणभेदे च देवीपु० ।

प्रादेशन न० प्र+आ+दिश–ल्युट् । दाने अमरः ।

प्रादेशिक त्रि० प्रदेशे भवः ठक् । प्रदेशभवे [स्त्रियां ङीप् ।

प्रादोष(षि)क त्रि० प्रदोषे भवः वा अण्ठञौ । प्रदोषभवे

प्रादोहनि पु०स्त्री प्रदोहनस्यापत्यम् इञ् । तदपत्ये । ततः युनि फञ् तौल्व० तस्य न लुक् । प्रादोहनायनि तदीये युव्यपत्ये पुंस्त्री० । [करणे भाग०३।८।२१ ।

प्राधनिक त्रि० प्रधनं संग्रामः प्रयोजनमस्य ठक् । युद्धोपकरणे भाग०३।८।२१ ।

प्राधा स्त्री प्रधैव स्वार्थे अण । दक्षकन्याभेदे साध्यैकजनन्यभेदे हरिवं०२२६अ० । तस्याः अपत्यं ढक् । प्राधेय तदपत्ये पुंस्त्री० तदपत्यानि च देवगन्धर्वदैत्यः भा०आ०६५ अ० । अग्निपुराणे प्राधेया इत्येव पाठः शब्दकल्पद्रुमे प्राधेय शब्दकल्पनं लिपिकरप्रमादजपाठदर्शनात् इति बौध्यम् ।

प्राधानिक त्रि० प्रधान+स्वार्थे ठक् तस्येदं ठक् वा । १प्रधानशब्दार्थे २प्रधानसम्बन्धिनि च "प्राधानिकरहस्यञ्च" इत्यादि देवीभागवतव्याख्यायां गुप्तवत्यां स्थितम् ।

प्राधान्य न० प्रधानस्य भावः ष्यञ् । श्रेष्ठत्वे । भावे त्वप्रधानत्व न० तत्र प्रधानता स्त्री तत्रार्थे । "अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता" प्राल्लिकारिका ।

प्राध्व त्रि० प्रकृष्टोऽध्वा अत्यसमा० । १दूरपथे २प्रकृष्टे मार्गे ३चिरे च हेमच० ब०स्त्री० । ४चक्षुर्दूरगामिनि रश्मौ च ।

प्राध्वम् अव्य० प्र+आ+ध्वन्–डमि । १आतुकूल्ये २चिरत्वे ३दीर्घतायाञ्च अमरः ।

प्रान्त पु० प्रकृष्टोऽन्तः । १शेषसीमायाम् हेमच० । २क्षुद्रपिण्डभेदे पु० । ततः गोत्रापत्ये कण्वा० फञ् । प्रान्तायन तदपत्ये पुंस्त्री० । [शब्दार्थक० ।

प्रान्तदुर्ग न० प्रान्ते दुर्गं न्यायाश्रयस्थानभेदः । दुर्गभेदे

प्रान्तर नं० प्रकृष्टमन्तरं व्यवधानं यत्र । १दूरगम्ये पथि । २वृक्षादिच्छायाशून्ये पथि ३वने ४कोटरे च मेदि० ।

प्रान्तशून्य पु० प्रान्ते शून्यमस्य । छायादिरहिते पथि शब्दर०

प्रापणिक पु० प्र+आ+पण–"प्राड्डि पणिभ्यः" उणा० किकन् । पण्यविक्रेतरि उज्ज्वलद० ।

प्राप्त त्रि०प्र+आप–कर्मणि कर्त्तरि वा क्त । १लब्धे २आसादिते ३भूते अमर० । ४उपस्थिते च ।

प्राप्तकाल पु० प्राप्तः कालोऽस्य । मरणयोग्ये काले ३।३। १२३ पा० स्मृते त्रयम् ।

प्राप्तपञ्चत्व त्रि० प्राप्तं पञ्चत्वं मरणं येन । मृते अमरः । मरणे देहस्य पञ्चभूतात्मकताप्राप्तेस्तस्य तथात्वम् । प्रेतशब्दे दृश्यम् । [दृषादौ शब्दरत्ना० ।

प्राप्तभार पु० प्राप्तः भारः तद्वहनकालोऽस्य । भारसहे

प्राप्तरूप त्रि० प्राप्तं रूपं येन । १समोऽरे २पण्डिते अमरः । ३रूपवति च ।

प्राप्ति स्त्री प्र+आप–भावे क्तिन् । १वृद्धये २धनादिलब्धौ ३लाभे च अमरः । ४प्रागल्भे ५संहतौ शब्दरत्ना० अणिमाद्यष्टविधैश्वर्यमध्ये ६ऐश्वर्यभेदे ऐश्वर्यशब्दे दृश्यम् । बाह्येन्द्रियजरोगशस्त्रपक्षतभेदे ७कंसकलत्रभेदे भा० स० १२अ० ; हरिवं० ६१अ० "अप्राप्तस्यैव या प्राप्तिः सैव संयोग उच्यते" भाषा० उक्ते दसंयोगस्वरूपे द्रव्यगुणभेदे च । सा०द०उक्ते ६लक्षणाङ्गभेदे "युक्तिः प्राप्तिः समाधान मिति" लक्षणान्तरमुद्दिश्य "संप्रधारणा चार्थानां युक्तिः, प्राप्तिः सुखागमः" लक्षिता । कामस्य भार्यांभेदे भा० आ० १६अ० । नीलत०ता० उक्ते दसंस्कारभेदे ।

प्राप्तिसम न० गो०उक्ते जात्युत्तरभेदे "प्राप्य साध्यमप्राप्य वा हेतोः प्राप्ता विशिष्टत्वात् प्राप्तिसमः" सू० । "हेतुः प्राप्य वा साध्यं साधयेदप्राप्य वा ? । न तावत् प्राप्य । प्राप्तग्रामविशिष्टत्वादसाधकः द्वयोर्विद्यमानयोः प्राप्तौ सत्यां किं कस्य साधकं साध्यं वा ? । अप्राप्यसाधकं न भवति । नाप्राप्तः प्रदीपः प्रकाशयतीति । प्राप्तप्रा प्तव्यस्थानं प्राप्तिसमः" वात्स्या० "प्राप्तप्रा विशेषादनिष्टा पादनेन प्रत्यवस्थानम्" गो०सू० ५।७ यथा आत्मा स क्रियः क्रियाहेतुगुणवत्त्वात्तित्यादौ क्रियाहेतुगुणवत्त्वे नैव क्रियमिति क्रियावत्त्वं साध्यते । क्रियमिति क्रियावत्त्वेन तादृशगुणवत्त्वं न ? उभयोरविशेषादिति" ।

प्राप्त्याशा स्त्री ६त०। १लाभेच्छायाम् २प्रारब्धकार्यसाधनस्थाभेदे "व्यवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः । आरम्भो यत्र प्रत्याशा नियताप्ति फलाशया" इत्युद्दिश्य "उपायापायशङ्काभ्यां प्राप्तप्राप्ती प्राप्तिसम्भवौ" इति सा०द० लक्षिता ।

प्राप्य त्रि० प्र+आप–ण्यत् । १गम्ये २लभ्ये च ३व्याकरणोक्ते "क्रियाजन्यविशेषाणां सिद्धिर्यत्र न विद्यते । दर्शनादनुमानाद्वा तत्प्राप्यमिह कथ्यते" इत्युक्ते ४कर्मभेदे कर्मशब्दे १७२०पृ० दृश्यम् । प्र+आप–ल्यप् । लब्ध्वेत्यर्थे अव्य० ।

प्राप्यकारिन् त्रि० प्राप्य विषयदेशं गत्वा करोति विषयप्रकाशम् कृ–णिनि । विषयदेशं गत्वा विषयप्रकाशकारके चक्षुरादौ इन्द्रिये । तत्र न्यायमते चक्षुष एव प्राप्यकारिता नान्यस्य । वेदान्तमते श्रवणस्यापीति भेदः ।

प्राबोधिक पु० प्रबोधाय हितं ठक् । १ऊषःकाले शब्दमा० प्रबोधः प्रबोधनं तत्र नियुक्तः तत्प्रयोजनमस्य वा ठञ् । २मागधे प्रातःस्तुतिपाठकभेदे ।

प्राभञ्जन न० प्रभञ्जनो देवताऽस्य अण् । स्वातिनक्षत्रे तस्य तद्देवताकत्वात् तथात्वम् । तस्यापत्यम् इञ् । प्राभञ्जनि हनूमति "वायूंश्च त्वञ्जु निर्भिद्य प्राभञ्जनिरनोदयत्" भट्टिः ।

प्राभव न० प्रभोर्भावः अण् । १प्रभुत्वे २श्रेष्ठत्वे च ।

प्राभवत्य न० प्रभवतो भावः ष्यञ् । विभुत्वे मनुः ८।४१२

प्राभाकर न० प्रभाकरस्य इदम् तन्मतं वेत्ति वा अण् । १मीमांसकभेदप्रभाकरसम्बन्धिनि २तन्मतज्ञे च ।

प्राभृत न०प्र+आ+भृ–कर्मणि क्त । उपढौकनद्रव्ये अमरः । स्वार्थे क । २प्राभृतक तत्रार्थे हारा० ।

प्रामधि पु० पौलस्त्ये अग्निमध्ये ऋषिभेदे हरिवं० ७अ० ।

प्रामाणिक त्रि० प्रमाणेन निर्वृत्तः सिद्धः ठञ् । १प्रत्यक्षादिप्रमाणसिद्धे २शास्त्रसिद्धे च स्त्रियां ङीप् । ३वैद्ये ४व्यवहारादिसिद्धे ५शास्त्रज्ञे ६परिच्छेदके ७प्रमाणकर्त्तरि च ।

प्रामाण्य न० प्रमाणस्य भावः । तद्वति तत्प्रकारकत्वरूपे

ज्ञानधर्मभेदे तच्च व्यायमते परतोग्राह्यं मीमांसकादिमते स्वतः, स्वमात्रग्रा वा ग्राह्यमिति भेदः। प्रमात्वशब्दे दृश्यम्। [ङ्ते शब्दच०। भावे क्यप्। २प्रमादे न०।

प्रामाद्य पु०प्रमादत्वेन प्र+मद बा० करणे क्यप्। १व्यासक-

प्रामीत्य न० प्र+मी–भावे क्तिन् नञ् साधु ष्यञ्। १ऋणे त्रिका०पाठान्तरम्। प्रमीतस्य भावः ष्यञ्। २मरणे न०।

प्राय पु० प्र+अय–इण्–वा घञ्–अच् वा। १मृत्यौ २अन-शनमृत्यौ ३बाहुल्ये च मेदि० "प्रायेण सामग्र्यविधौ गुणानाम्" कुमारः। ततः प्रकृत्यादि० सर्वविभक्त्य-न्तात्स्तोकाद्य प्रायेण गम्यः सि०कौ०।

प्रायण न०प्र+अय–भावे ल्युट्। १देहत्यागेन स्थानान्तरगमने मनुः ८।३२१ श्लो० उदा०। २प्रारम्भे च "सैषा त्रि-वृत्प्रायणा" ताण्ड्य०ब्रा० २।१५।२ "त्रिवृत् स्तोमस्तवकः प्रायणे प्रारम्भे यस्याः" भा०।

प्रायणीय त्रि० प्रायणं प्रारम्भदिनं तत्र विहितः छ। १प्रारम्भदिने २गवामयनप्रथमाहादौ च विहिते अतिरात्रे यागभेदे च "प्रायणीयेऽह्न सुत्यामेके" कात्या० श्रौ० १२।६।२६ 'प्रायणीयोऽतिरात्र एवाह्न साध्यः" देव-नाथः। ताण्ड्य० ब्रा०४।२।१२ भाष्ये द्वितीयाहस्यैव प्रायणीयसंज्ञा तद्विरुक्तिश्च दर्शिता यथा प्रायणीयमेतदहर्भवति" भ०। "एतद्वै यज्ञमाणमहः प्रा-यणीयं प्रकर्षेण यान्ति गच्छन्ति स्वर्गमनेनेति व्युत्-पत्तेः। एतत्संज्ञं गवामयनस्य द्वितीयमहरनुष्ठेयं भ-वति। यद्यपि सुत्यन्तरे प्रथमविहितस्यातिरात्रस्यैव प्रायणीय इति संज्ञा प्रसिद्धा तथापि प्रथमोत्तमयोरति-रात्रयोः सर्वत्र साधारणत्वादस्यैवाह्नो वयामयने असा-धारणं प्रायण्यमिति ज्ञात्वा एतदादिकं गवायनस्वरूप-मित्यज्ञित्वा द्वितीयेऽहनि प्रायणीयशब्दोऽत्र प्रयुज्यते। उक्तमहश्चौनिर्वचनद्वारा प्रशंसति" भा० "प्रायणीयेन वा अङ्गा देवाः स्वर्गं लोकं प्रायन् यत् प्रायंस्तत् प्रायणीयस्य प्रायणीयत्वम्" भू० "पुरा देवाः प्रायणीयेन प्रायणीया-ख्येन खल्वङ्गा स्वर्गं लोकं प्रायन् प्राप्ताः यद्यस्मात् प्रायन् स्वर्गं प्रागमन् तस्मादस्याह्नः प्रायणीयत्वं प्राय-णीयसाधारणत्वात् प्रायणीयमिति नाम सम्पन्नम्" भा०। तदहः कर्त्तव्यत्वादतिरात्रस्य प्रायणीयसंज्ञेति बोध्यम्।

प्रायश्चित्त न० पापक्षयमात्रसाधनत्वेन विधियोधिते कर्म-भेदे यथोक्तं प्रा०वि०

अत्राङ्गिराः "प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते। तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्। निश्चयसंयुक्तं पापक्षयसाधनत्वेन निश्चितमित्यर्थः। तथा हारीतः "प्रयतत्वाद्वोपचितमशुभं नाशयतीति प्राय-श्चित्तम्"। एतेन पापक्षयमात्रसाधनं कर्म प्रायश्चित्त-मिति तल्लक्षणम्। मात्रशब्दात् तुलापुरुषाश्वमेधादिव्या-वृत्तिः। तच्च पापविशेषस्यैव कामाकामकृतस्य शक्तिविशेषस्य ततो नाशः मतभेदेन व्यवहार्यशब्दे ४७०, ७१दर्शितः। "प्रायश्चित्तैरपैत्येनो यदज्ञानं कृतं भवेत्। कामतो व्य-वहार्यास्तु वचनादिह जायते" याज्ञ० वचनस्य प्रा०वि० व्याख्यानं मतभेदेन दर्शितं यथा

"कामत इति अज्ञानकृतपापप्रायश्चित्तेन कामकृतपापप्राय-श्चितं न भवति। किन्तु व्यवहार्यतामात्रम्। नन्वेवं सति पापे कथं व्यवहार्यतामात्रम् अत्राह वचनादिति। अय-मभिप्रायः अत्र प्रायश्चित्तानुष्ठानेनार्द्धपापक्षयात् सम्भा-षणस्पर्शनदर्शनादिलघुव्यवहारो न दुष्टः न तु भोजन-परिणयनव्यवहारोऽपि वचनादेव यथा कृतनिश्चित्यादि-सूचितमहापापप्रश्नेषसद्भावे व्यवहार्यतेति। अथ वा चकारप्लक्षेपादुभयोक्तेन प्रायश्चित्तेन कामतोऽपि पापक्षयो भवत्येव किन्त्वव्यवहार्यः पापाभावेऽपि वचनात्। अत एव मनुः "बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः। शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत्"। याज्ञवल्क्यो "शरणागतकालघ्नीक्षिसकान् संवसेच्च न। चीर्णव्रतानपि सदा कृतघ्नसहितानिमान्। कृतनिर्णेजनांश्चैव न जुगु-प्सेत कर्हिचित्" इति मनुवचनं स्वज्ञानकृतमहापापार्थं बो-द्धव्यमिति। भवदेवस्तु सर्वत्र "स्मृतः शुद्धिमवाप्नुयादिति" दर्शनादत्राव्यवहार्यतावचनं निन्द्यार्थमित्याह। जिक-नस्तु पापकर्षणा हि हयं जन्यते शरीरगतमप्रायत्यमात्म-गतञ्च पापं तच्च स्पर्शादौ वैदिककर्मणि चानर्हत्वलक्षणं तेनात्र कामकृते केवलशरीरदोषः प्रायश्चित्तेनापनीयते जन्मान्तरकृतदुरितस्यैवात्मनः शरीरान्तरस्य व्यवहारा-धिकारित्वम् आत्मगतञ्च पापं भोगादेव क्षीयते" तच्च काम-कारकृतेऽप्याङ्गिरसेके स्मृतिनिदर्शनात् इति मनुवचनादज्ञ-स्मृतिविरोधाच्च"। मिताक्षरामतन्तु व्यवहार्यशब्दे दर्शितम्। प्रायश्चित्तस्य काम्यत्वं नैमित्तिकत्वं नित्यत्वञ्च यथाह जाबालः "काम्यानां सफलार्थञ्च दोषघातार्थमेव च। अतः काम्यं नैमित्तिकञ्च प्रायश्चित्तमिति स्थितिः। च-रितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये। निन्द्यैश्च ल-क्षणैर्युक्ता जायन्तेऽनिष्कृतैनसः"। ज्ञानाज्ञानकृत-

पापयोः प्रायश्चित्तभेदो यथा अङ्गिराः "अकामतः कृते पापे प्रायश्चित्तं, न कामतः। स्मार्त्तकामकृते यत्तु द्विगुणं बुद्धिपूर्वके"। प्रायश्चित्ताकथने दोषो यथा "श्रोत्रियाणां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः! जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः। अनर्हितैरनाक्षतैरदृष्टैश्चैव संसदि। प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः। न्यायतो मार्गमाणस्य क्षत्रियादेः प्रमाणिनः। अन्तरा ब्राह्मणं कृत्वा व्रतमेतत् समादिशेत्" हारीतः "यथाबलो यथाकालं यथाप्राणञ्च ब्राह्मणे। प्रायश्चित्तं प्रदातव्यं ब्राह्मणैर्धर्मपाठकैः। तस्मात् कृच्छ्रमर्द्धार्द्धं पादं वापि (पादमेव मतो न्यूनम्) विधानतः। ज्ञात्वा बलाबलं कालं प्रायश्चित्तं प्रकल्पयेत्। अप्रकृतानुग्रहमाह पराशरः। "दुर्बलेऽनुग्रहः कार्य्यः क्षयो वै त्रिगुणद्वयोः। अतोऽन्यथा भवेद्दोषस्तस्मात्तानुग्रही भवेत्"। स्नेहादिनानुग्रहे दोषो यथा "स्नेहाद्वा यदि वा लोभात् मोहादज्ञानतोऽपि वा। कुर्वन्त्यनुग्रहं ये तु तत् पापं तेषु गच्छति। शास्त्रीयप्रायश्चित्तमुद्दाहृत्य पश्चादनुग्रहः कार्य्य इत्याङ्गिराः "ज्ञात्वा पूर्वमुदाहारं यथोक्तं धर्मवक्तृभिः। पश्चात् कार्य्यानुसारेण शक्त्या कुर्य्यादनुग्रहम्"। लघुत्वादिभेदात् प्रायश्चित्तं यथा "अप्रीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च"। पापनिष्क्रयणोपायानाह मनुः "ख्यापनेनानुतापेन तपसाऽध्ययनेन च। पापकृन्मुच्यते पापात्तथा दानेन चापदि"। चापदीत्यनेन स्वाध्ययनतपसोर्दानमनुकल्पं इत्युक्तम्। एतद्धिंसाव्यतिरिक्तविषयम्। हिंसायान्तु दानं मुख्यम्। यथा भविष्ये "हिंसात्मकानां सर्वेषां कीर्त्तितानां मनीषिभिः। प्रायश्चित्तप्रदर्शानां दानं प्रथममुच्यते"। तथा मनुः दानेन वधनिर्णेकं सर्पादीनामशक्तवन। एकैकशस्त्रेत् कृच्छ्रं द्विजः पापापनुत्तये"। समान्यप्रायश्चित्तान्याह संवर्त्तः "हिरण्यदानं गोदानं भूमिदानं तथैव च। नाशयन्त्याशु पापानि महापातकजान्यपि"। यमः "शोषणेन शरीरस्य तपसाऽध्ययनेन च। पापकृन्मुच्यते पापात् दानेन च दमेन च"। मनुः "कृत्वा पापं हि सन्तप्य तस्मात् पापात् प्रमुच्यते। नैवं कुर्य्यां पुनरिति निवृत्त्या पूयते नरः"। विष्णुपुराणम् "प्रायश्चित्तान्यशेषाणां कृष्णानुस्मरणं परम्"। यमः "गवाह्निकं देवपूजा वेदाभ्यासः सरित्प्लवः। नाशयन्त्याशु पापानि महापातकजान्यपि"। गौतमः "हिरण्यं गौर्वासोऽश्वो भूमिस्तिला घृतमन्नमिति देयानि"। एतान्येवानादेशे विकल्पेन क्रियेरन् एनसि लघुनि लघूनि गुरुणि गुरूणि"। विष्णुपुराणम् "एवं विषयभेदाद्वै व्यवस्थाप्यानि पुत्रक!। प्रायश्चित्तानि सर्वाणि गुरूणि च लघूनि च। अन्यथा हि महाबाहो! लघूनामुपदेशतः। गुरूणामुपदेशो हि निष्प्रयोजनतां व्रजेत्"। महाभारते "यदकार्य्यशतं कृत्वा कृतं गङ्गाभिषेचनम्। सर्वं दहति गङ्गाम्भस्तूलराशिमिवानलः"। शुद्धिकारणानि व्रतान्याह विश्वामित्रः "कृच्छ्रचान्द्रायणादीनि शुद्ध्युदयकारणम्। प्रकाशे वा रहस्ये वा संशयेऽनुक्तकेऽपि वा। प्राजापत्यं सान्तपनं त्रिगुणकृच्छ्रं पराकवत्। अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यकृच्छ्रोऽतिकृच्छ्रकः। महासान्तपनः शुद्ध्यै तप्तकृच्छ्रस्तु पावनः। जलोपवास कृच्छ्रश्च ब्रह्मकूर्चस्तु शोधकः। एते समस्ता व्यस्ता वा प्रत्येकमेकशोऽपि वा। पातकादिषु सर्वेषु पापकेषु प्रयत्नतः। कार्य्याश्चान्द्रायणैर्युक्ताः केवला वा विशुद्धये। त्रिगुणचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा। यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति। उपवासस्त्रिरात्रं वा मासं पक्षं तदर्द्धकम्। षड्दहादशाहादि कार्य्यं शुद्धिफलार्थिना। उपपातकयुक्तानामनादिष्टेषु चैव हि। प्रकाशे च रहस्ये च अभिसन्ध्याद्यपेक्षया। जातिशक्तिगुणान् दृष्ट्वा सकृद्दुष्टिकृतं तथा। अनुबन्धादिकं दृष्ट्वा सर्वं कार्य्यं यथाक्रमम्"। प्रकाशकृते कामे व्रतानि मुख्यानि रहस्यकृते जपादीनि यथा प्राजापत्यादीन्यभिधाय मनुः "एतैर्द्विजातयः शोध्या व्रतैरापिव्यकृतैनसः। अनाविष्कृतपापांस्तु मन्त्रैर्हौमैस्तु शोधयेत्"। देवलः "प्रकाश उक्तं यत्किञ्चित् त्रिंशभागो रहस्यके। त्रिंशभागः षष्टिभागः कल्पो जात्याद्यपेक्षया" प्रा० वि०। क्वचिद्विषयभेदे प्रायश्चित्ताभावः यथोक्तं प्रा०त०

अथ गोवधाद्यपवादः। पराशरः "धूर्त्तेषु वक्ष्यमाणेषु दण्डेनाभिहतस्य च। काष्ठेन लेष्टुना वापि पाषाणेन च ताडितः। मूर्च्छितः पतितश्चैव स्रुतो वा रक्त एव च। एवं मतानां धूर्त्तानां प्रवक्ष्यामि यथाविधि; उत्थितस्तु पदं गच्छेत् पञ्च सप्त दशाष्ट वा। श्वासं वा यदि गृह्णाति तोयं वा पिबति स्वयम्। पूर्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते" यदि व्याधिप्रयुक्तानां क्षुधार्त्तानां

कृत्वयोजनमात्रेण स्वल्पतरदण्डाघातेन वा मूर्च्छया यतनं भवति यतनन्तरं गमनं यावादौ कृते मरणं भवति तदा गमनयावयत्नतोयपानैस्तदानीन्तनमरणे हेत्वभावं निश्चित्य पूर्वव्याधिविनष्टत्वं ज्ञायते। यदि तु पूर्वव्याधिरहित एव प्रहारजनितव्याधिना यावादि लब्धापि म्रियते तदा प्रायश्चित्तमस्त्येव। संवर्त्तः "यत्नवे गोचिकित्सायां भ्रूणगर्भविमोचने। यत्ने कृते विपत्तिः स्यात् प्रायश्चित्तं न विद्यते। औषधं क्षेत्रमाहारान् दद्याद् गोब्राह्मणेषु च। प्राणिनां प्राणरक्षार्थं प्रायश्चित्तं न विद्यते। दारुच्छेदशिराभेदप्रयत्नैरुपकुर्वताम्। द्विजानां गोहितार्थं वा प्रायश्चित्तं न विद्यते" भ्रूणगर्भः अन्तर्हतगर्भः सह वैचित्र्ये इत्यनेन तथार्थत्वात्। याज्ञवल्क्यः "क्रियमाणोपकारे तु मृते मित्रे न पातकम्। विपाके गोहयाणाञ्च मेषलाग्निक्रियासु च"। विश्वेषमाहाङ्गिराः "भ्रूणभङ्गेऽण्डभङ्गे च कर्मनिर्णोचनेऽपि वा। दशरात्रं चरेत् कृच्छ्रं कृत्वा वा यदि वा भवेत्"। द्विजानां गवाञ्च हितार्थमित्यर्थः। अत्र प्राणरक्षार्थमाहारादिदानैर्मरणे दोषाभावस्य वाचनिकत्वात् गलनत्राद्य मरणे नात्मघातादि। एवं "गोपालको गवां गोष्ठे धूमं यस्तु न कारयेत्। मक्षिकालीननरके मक्षिकाभिः स भक्ष्यते" इति देवीपुराणानुसारादग्निं प्रज्वाल्य तत्रैव स्थितस्य दैवात्तदग्निना मरणे दोषाभावः। तत्रास्थितस्य तु स्वपालननिमित्तगोवधजन्यदोषः। मिताक्षरायां पराशरः "कूपे पाते च धर्मार्थं गृहदाहे च ये मृताः। ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते" इदन्तु वचनरहितस्य पशोः कदाचित् दाहादिना मृतविषयम्। इतरत्वापस्तम्बोक्तम् "क्षान्तारेष्वथ वा दुर्गे गृहदाहावटादिषु। यदि तत्र विपत्तिः स्यात् पाद एको विधीयते"। इति ज्ञेयम्। एतद्वचनं यमस्येति भवदेवभट्टः। चिकित्सायां पापाभावो यथायथमुपचारे बोध्यः। न पुनः सन्निपातादिभूतस्योदकप्रानादिना। अतएव मनुः "चिकित्सायाञ्च सर्वेषां विधिप्रहरतां दमः"। काश्यपोऽप्यत्र प्रायश्चित्तमाह "दोग्ध्री दमनातिदोहाद्वासाग्राग्रदामघण्टाभरणयोजनात् तैलघृतौषधविनियोगाद्व्यापन्नानां प्रायश्चित्तं ब्राह्मणेभ्यो विनिवेद्य शिखिखपनं कृत्वा प्राजापत्यकृच्छ्रमाचरेत्। क्षीणान्ते गां दक्षिणां ब्राह्मणाय दद्यात् प्रेतं तिलधेनुं नेति"।

प्रायश्चित्तपूर्वाङ्गकृत्यम्। यच्च लिखितौ "वाग्यतो भोजनस्थानं पूर्वं हृतं प्राग्य बर्हिर्निधि। प्रत्येकं नियतं कायमात्मनो व्रतमादिशेत्। प्रायश्चित्तमुपासीनो वाग्यतश्चिन्तनं स्मृशेत्"। क्षेत्रधारणेच्छायां द्विगुणव्रतादिकमाह हारीतः "राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः। क्षेत्राणां वपनं कृत्वा प्रायश्चित्तं समाचरेत्। क्षेत्राणां धारणार्थं तु द्विगुणं व्रतमाचरेत्। द्विगुणे तु व्रते चीर्णे द्विगुणा दक्षिणा भवेत्। विद्वद्विप्रवपस्त्रीणां नेष्यते क्षेत्रवापनम्। कृते महापातकिनो गोहन्तुश्चापकीर्णिनः"। अथवास्त्रीणां विशेषमाह भवदेवभट्टधृतं वचनम्। "वपनं नैव नारीणां नातुव्रज्या जपादिकम्। न गोष्ठे शयनं तासां न च दध्याद्गवाह्निकम्। क्षेत्राणि क्षेत्रवत्कृत्य क्षेदयेदङ्गुलिद्वयम्। सर्वत्रैवं हि नारीणां शिरसो मुण्डनं स्मृतम्"। पापभेदेषु प्रायश्चित्तभेदाः प्रायश्चित्तविवेकादौ द्रष्टव्याः विस्तरभयान्नोक्ताः। तच्चेदं ऊ। प्रायश्चित्तीय तदाचरणे न०।

प्रायश्चित्ति स्त्री प्रायः (अव्ययम्) । तपश्चित्तिः चित-भावे क्तिन् हृत०। प्रायश्चित्तशब्दार्थे

प्रायश्चित्तिन् त्रि०प्रायश्चित्तं कर्त्तव्यत्वेनास्त्यस्य इनि। प्रायश्चित्तार्हे स्त्रियां ङीप्। "प्रायश्चित्ती भवेत् पूतस्तत् पापं तेषु गच्छति" मा०त०। ठन् प्रायश्चित्तिक तत्रार्थे

प्रायस् अव्य० प्र+अय-असि। १बाहुल्ये २तपसि व्रतादौ च "प्रायः पयोधरसङ्गतिरत्र हेतुः" चक्रटः। "प्रायो नाम तपः प्रोक्तम्" स्मृतिः।

प्रायाणिक त्रि० प्रयाणाय हितं ठक्। यात्रिकहृव्ये शङ्खचामरादौ प्रायात्रिकादयोऽप्यत्र।

प्रायिक त्रि० प्रायेण भवः ठक्। प्रायभवे। [शब्दश्च०।

प्रायुद्धेषिन् पु०प्रायुधि प्रकृष्टयुद्धार्थं इच्छते इष-णिनि। अश्वे

प्रायोग पु० प्रयुज्यते शकटादौ प्र+युज-कर्मणि घञ् कृत्वम् दीर्घः। शकटादौ नियोगार्हे वृषे ऋ० १०।१०६।२ भा०।

प्रायोगिक त्रि० प्रयोगं नित्यमर्हति इदा० ठञ्। नित्यप्रयोगार्हे।

प्रायोज्य न० प्र+आ+युज-णिच्-कर्मणि यत्। प्रयोजनीये "प्रायोज्यं न विभज्येत" कात्या०श्रौ०। "प्रायोज्यम् प्रयोजनार्हं यथा पतिव्रतस्य पुत्रकादि न तन्मूर्खैर्विभजयोयमिति" दायभागः।

प्रायोपविष्ट त्रि० प्रायाय अनशनकृत्याय उपविष्टः उप+

त्रिय-क्त। अनशनेन मरणायोद्युक्ते भ०आश्व०८अ०।

प्रायोपवेश पु० प्रायाय अनशनकृत्यये उपवेशः स्थितिः। सङ्कल्पपूर्वकम् सकलकार्यत्यागेन अनशनमरणार्थमुपवेशने भा०व० २५० श्लो०। भावे ल्युट्। प्रायोपवेशन तत्रार्थे न०। भा०व० १५१२८ श्लो०।

प्रायोपेत त्रि० भीमो भीमसेन यत् प्रायः प्रायोपवेशः तेन उपेतः। प्रायोपवेशनयुते भा०स्त्री० १६ज०।

प्रारब्ध न० प्र+आ+रभ-आरम्भे क्त प्रकृष्टमारब्धं सकार्य्यं जननाय कृतारम्भं येन। १देहाद्यारम्भके २अदृष्टभेदे तस्य च भोगेनैव क्षय इति शास्त्रे प्रसिद्धम्। "अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्। नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" शास्त्रेण प्रारब्धकर्मणो भोगं विना नाशाभावस्योक्तेः "ज्ञानानि सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन!" गीतायां ज्ञानस्य सर्वकर्मनाशकत्वोक्तिः प्रारब्धकर्मातिरिक्तविषयेत्याकरे दृष्टव्यम्। २कृतारम्भे त्रि०।

प्रारब्धि स्त्री प्र+आ+रभ-करणे क्तिच। १गजबन्धनदामनि त्रिका०। भावे क्ति। २आरम्भे।

प्रारम्भण न०प्र+आ+रभ-ल्युट् नुम्। प्रकर्षेणारम्भे। प्रारम्भणं प्रयोजनमस्य अतुम०क्। प्रारम्भणीय तत्प्रयोजनके त्रि०। प्र+आ+रभ-भावे घञ् नुम्। प्रारम्भ प्रकर्षेण आरम्भे पु० [स्त्रियां टाप्।

प्रारोह त्रि० प्ररोहः यौगमस्य अच्। प्ररोहणशीले

प्राण न०प्रकृष्टं क्षणिः। १प्रकृष्टे क्षणे मा०व०। २तद्युते त्रि०

प्रार्थना स्त्री प्र+अर्थ-युच्। १याच्ञायां २क्षिप्सायाञ्च। ३गर्भाङ्कभेदे सा०द० "संयक्षचानुमानञ्च प्रार्थना क्षिप्सिरेव च" गर्भाङ्कान्तु द्विधा "रतिहर्षोत्सवानान्तु प्रार्थनं प्रार्थना भवेत्" इति लक्षिता। ल्युट्। प्रार्थन याचने क्षिप्सने च न०। ४सङ्कल्पभेदे "प्रकृताकुलिको हृष्टो निषःक्षिप्तौ च सम्मुखे। कुर्यात् स्वहृदये धैर्यं तद्वा स्यात् प्रार्थनाभिधा" तन्त्रसा०।

प्रार्थनीय त्रि० प्र+अर्थ-कर्मणि अनीयर्। १याचनीये अर्थयतेर्याचनार्थत्वेन द्विकर्मकत्वात् गौणे कर्मणि अनीयर्। यतोयाच्यते तस्मिन् तस्याश्रिक्षायां सख्ये याचनाकर्मणि इति बोध्यम्। २द्वापरयुगे यज्ञेर०।

प्रार्थित त्रि० प्र+अर्थ+क्त। १याचिते २अभिक्षिते मेदि० ३शब्दसंयते च त्रिका०।

प्रालम्ब न० प्रकर्षेणालम्बते प्र+आ+लम्ब-अच्। १कृत्रिमया कण्ठात् लम्बमाने आभरणादौ अमरः। २प्रकर्षेण लम्बमानमात्रे त्रि०। संज्ञायां कन् अत इत्वम्। प्रालम्बिका स्वर्णादिरचितलम्बिकायां स्वर्णकारभेदे स्त्री अमरः।

प्रालेय न०प्रकर्षेण लीयते प्र+आ-ली-यत्। आम्बे एत्वम्, प्रलयाय हितम् अण् नि० एत्वम् वा। हिमे अमरः।

प्रालेयांशु पु० प्रालेयमंशौ यस्य। १चन्द्रे कर्पूरे च। प्रालेयकरादयोऽप्यत्र पु०।

प्रावट पु० प्र+अव-अट्। यवे जटा०।

प्रावण न० प्र+आ+वन संभक्तौ करणे घञ्। प्रनिरित्यादिना णत्वम्। अनिते। प्रकर्षेणावन्यते संक्षिप्यते स्फुटनेन क०२।२२।४भाष्ये दृष्टम्। वर्ण समासे अनोदात्तत्वम्

प्रावणि स्त्री प्र+अव-अनि। "हिनुमीनानि क्षोट्" प ८ ४ १५।१६। हिनुमीनानीति छित्वा उज्ज्वलदत्तेन पठित्वा तत्र णत्वमुक्तम्। प्रस्तावनौ तस्यायमाशयः "हिनुमीनाभ्यानि क्षोट्" सूत्रद्वये सम्बुद्धरेण हिनुमानीति ज्ञायते हिनुमीना अनि इत्येषां णत्वम्। योगविभागाच्च अनि क्षोट् इत्यप्यापीति।

प्रावर पु० प्र+आ+वृ-करणे अप्। १प्राचीरे शब्दरत्ना०। २देवभेदे भा०भी० १२अ०। [उत्तरीयवस्त्रे हेच०।

प्रावरण न० प्र+आ+वृ-करणे ल्युट। १आच्छादनवस्त्रे

प्रावार पु० प्र+आ+वृ-करणे घञ्। १उत्तरीयवस्त्रे अमरः भावे घञ्। २प्रकर्षेण आवरणे पु०।

प्रावारकर्ण पु० वस्त्रभेदे भा० व० १६८अ०।

प्रावारकोट पु० ७त०। कोटभेदे जटाधरः।

प्रावास त्रि० प्रवासे दीयते कार्यं वा प्रवृत्ता० अण्। १प्रवासे दीयमाने २तत्र कार्ये च।

प्रावासिक त्रि० प्रवासाय प्रभवति वलादा० ठञ्। १प्रवाससाधने। प्रवासे साधु गुडा० ठञ्। प्रवासे साधौ च।

प्रावृट्काल पु०कर्म०। वृत०वा। वर्षाकाले प्रावृट्शब्दस्यादेरण्।

प्रावृट्कालवहा स्त्री ७त०। नदीभेदे मार्कण्डेयपु०६७अ०।

प्रावृडत्यय पु०वृत०। १वर्षातिक्रमे वर्षाणामभे ब०व०। २शरत्काले राजनि०। [प्रकर्षेण २आवृतमात्रे त्रि०।

प्रावृत न० प्र+आ+वृ-कर्मणि क्त। १प्रकर्षेण आवृते वस्त्रे

प्रावृति स्त्री प्र+आ+वृ-करणे क्तिन्। प्राचीरे शब्दर०।

प्रावृत्तिक पु० प्रवृत्तौ तत्करणे हितः ठक्। प्रवृत्तिवाहके दूतभेदे हरिवं० १०४अ०।

प्रावृष्(षा) स्त्री प्रवृष्यतेऽस्यां प्र+वृष-आधारे क्विप् दीर्घः वृ-वलत्वात् षा टाप्। वर्षाकाले स च श्रावणभाद्रात्मकः

"अश्वस्य नभस्यस्य वार्षिकावृतू" यजु० । शतपथब्रह्मे १४१२ पृ० अस्य सौरचान्द्रत्वविकल्पश्च द्रष्टव्यः ।

प्रावृषायणी स्त्री प्रावृषा प्रयनं यस्याः गौरा०ङीष् । कपिकच्छाम् (आलकुशी) अमरः ।

प्रावृषिक पुंस्त्री प्रावृषि कायति शब्दायते कै-क अलुक्स० । १भयूरे धरणिः । स्त्रियां जातित्वात् ङीष् । प्रावृषि भवः ठञ् । २वर्षाकालभवे त्रि० स्त्रीयां ङीप् ।

प्रावृषिज पु० प्रावृषि जायते जन-ड अलुक् स० । १भृङ्गारनिले त्रिका० । २वर्षाकालजाते त्रि० "जे विभाषा" वा अलुक् स० । तेन प्रावृड्ज तत्रार्थे त्रि० ।

प्रावृषीण त्रि० प्रावृषि भवः वा० ख । वर्षाकालभवे भट्टो० । १०२।७ भाषव्र ।

प्रावृषेण्य त्रि० प्रावृषि भवः एन्य । १वर्षाकालजाते २कदम्बवृक्षे पु० मेदि० । ३कुटजवृक्षे ४धाराकदम्बे च पु० राजनि० । ५कपिकच्छाम् ६रक्तपुनर्नवायां स्त्री राजनि० । प्रावृषि दीयते कार्यं वा एन्य । ७वर्षाकाले देये करादौ दत्ते कार्ये च त्रि० । ८प्राचुर्ये न० शब्दर० ।

प्रावृषेय पु० १देशभेदे भा०भी०ढञ० । प्रावृषायां भवः ढक् । २वर्षाकालभवे त्रि० स्त्रियां ङीप् ।

प्रावृष्य पु० प्रावृषि भवः वा० यत् । १धाराकदम्बे २कुटजे ३विकङ्कतवृक्षे च राजनि० ।

प्राविशन त्रि० प्रवेशने दीयते कार्यं वा व्युष्टा० यण् । १प्रवेशने दीयमाने २तत्कार्ये च । [ङीप् ।

प्राविशिक त्रि० प्रवेशाय साधुः ठञ् । प्रवेशसाधने स्त्रियां

प्राशन न० प्र+अश-भावे ल्युट् । अन्नादेः प्रकर्षेण भोजने अन्नप्राशनम् ।

प्राश्वास्त्र न० प्रश्वास्तुभावः कर्म वा उक्षा० अञ् । प्रश्वास्तुकर्तृत्विजः कर्मणि १अश्वशंसने २तद्भावे च ।

प्राशित त्रि० प्र+अश-भोजन कर्मणि क्त । १भक्षिते । भावे क्त । २भक्षणे न० ३पितृयज्ञे तर्पणे जटा० "प्राशितं पितृतर्पणम्" मनुना तत्रार्थे परिभाषितत्वात् ।

प्राशित्र न० यज्ञिये यवमात्रं पिण्डमात्रं वाऽवत्तं ब्रह्मोद्देश्यके भागे शिक्षाभेदे "शिक्षात् प्राशित्रावदानम्" कात्या० १११७। "सवस्त्वा चक्षुषा प्रतीक्ष इति प्राशित्रं प्रतीक्षते" २।२।१५ "प्राशित्रमवदीयमानमाहियमाणं च प्राशित्रं ब्रह्मणो भागः यवमात्रं पिण्डमात्रं वाऽवत्तः" कर्कः "स यत् प्राशित्रमवद्यति" इत्युपक्रमे । अथास्य ब्रह्मभागं पर्यौहरन्ति । ब्रह्मा वै यज्ञस्य दक्षिणत आस्तेऽभिगोप्ता स एतं भागं प्रतिविद्वान आस्ते यत् प्राशित्रं तदस्मै पर्यौहार्षुस्तत्प्राशीदथ यस्मै ब्रह्मभागं पर्यौहरन्ति तेन आत्मा स यदतऊर्ध्वमसंस्थितं यज्ञस्य तदभिगोपायति तस्माद्वा एकं ब्रह्मभागं पर्यौहरन्ति" शत०ब्रा० १।७।४।१८

प्राशित्राहरण प्राशित्रं ह्रियतेऽनेन हृ-करणे ल्युट् । प्राशित्रस्वभागहरणसाधने गोकर्णाकृतिपात्रभेदे शत० ब्रा० १।३।१।६ भाष्यम् ।

प्राश्य पु० प्र+अश-भोजने ण्यत् । भक्षणे प्राशवे हितः यत् । प्राशव्य प्रकृष्टभक्षणहिते भट्ट० ८।३१।६ भा० । प्रा०म० । २प्रकृष्टशीघ्रे निघण्टुः । [यज्ञ०२४।२७

प्राशृङ्ग त्रि० प्रकृष्टं शृङ्गमस्य बहु० दीर्घः । प्रकृष्टशृङ्गयुक्ते

प्राश्निक पु० प्रश्नाय तदुत्तरदानाय साधु ठक् । १सभ्ये त्रिका० २प्रश्नोत्तरदानाय साधौ त्रि० ।

प्राश्नीपुत्र पु० यजुर्वेदवंशस्थे ऋषिभेदे शत०ब्रा० १४।६।४।३२

प्राष्टवर्ण पु० प्रकर्षेण अष्टः प्राप्तो वर्णः । पृश्निवर्णे नानावर्णे निरु० १०।३६

प्रास पु० प्रास्यते प्र+अस-क्षेपे कर्मणि घञ् । कुन्तास्त्रे अमरः । कुन्तशब्दे २००।८ पृ० दृश्यम् ।

प्रासक० पु०प्रास+संज्ञायां कन् । प्रासके हेमच० तस्य देवकैः क्षिप्यमाणत्वात् तथात्वम् । स्वार्थे क । २प्रासास्त्रे पु० ।

प्रासङ्ग पु० प्र+भञ्ज-कर्मणि घञ् दीर्घः । दम्यवत्सानां स्कन्धे शिक्षार्थमासज्यमाने युगभेदे अमरः । तं वहति अत् । प्रासङ्ग्य तद्वाहके दम्यवृषे अमरः ।

प्रासङ्गिक त्रि०प्रसङ्गादागतः ठञ् । प्रसङ्गागते स्त्रियां ङीप् ।

प्रासाद पु० प्रसीदत्यस्मिन् प्र+सद-आधारे घञ् दीर्घः । देवन्तपयोर्दृहे अमरः देवन्तशब्दे २६७८ पृ० दृश्यम्

प्रासादकुक्कुट पुंस्त्री० प्रासादे कुक्कुट इव । पारावते त्रिका० स्त्रियां जातित्वात् ङीष् ।

प्रासिक पु०प्रासः प्रहरणमस्य ठक् । कुन्तेन योद्धरि अमरः

प्रास्तारिक त्रि० प्रस्तारे व्यवहरति ठक् । प्रस्तारे व्यवहारिणि । [ह्यादौ मङ्गलद्रव्ये स्त्रियां ङीप् ।

प्रास्थानिक त्रि० प्रस्थाने साधु ठञ् । यात्रिके शब्दर०

प्रास्थिक त्रि०प्रस्थस्य वापः ठञ् । १प्रस्थमितधान्यावपनाधारे क्षेत्रे २भूमौ स्त्री ङीप् । प्रस्थं वहत्यनेन (स्थिप्रस्थं समावेशयति) व्यवहरति पचति वा ठञ् । प्रस्थमितधान्यादेः स्थिप्रस्थं ३समावेशके ४व्यवहारके ५पाचके च त्रि० स्त्रियां ङीप् । प्रस्थः परिमाणमस्य ठञ् । ६प्रस्थपरिमाणयुक्ते

धान्यराश्यादौ त्रि० प्रस्थेन क्रीतम् ठञ् । ७प्रस्थेन क्रीते त्रि० स्त्रियां ङीप् । प्रस्थस्य निमित्तं संयोग उत्पातो वा ठञ् । प्रस्थस्य निमित्ते ६संयोगे १०उत्पाते वा ।

प्राह्ण पु० प्रकर्षेण आह्नेति शब्दोऽत्र । न्लोपदेशे शब्दमा० ।

प्राह्ण पु० प्रारम्भोऽङ्गः प्रा०स०अच्समा० अङ्गादेशः चत्वञ्च । त्रिघाविभक्तदिनस्य पूर्वभागे १पूर्वाह्णे अमरः । प्रशस्तमह्नि वर्त्तते निष्ठन् अव्ययी० । २प्रशस्तदिनयुते अव्य० ।

प्राह्णेतन त्रि०प्राह्णे भवः ट्यु तट् च निपात्यत्वम् । पूर्वाह्णभवे स्त्रियां ङीप् ।

प्राह्णेतरा(मा)म् अव्य० अतिशयेन प्राह्णे तरप् तमप् वा आद्यै धंकालेत्यादिना सप्तम्या अलुक् । अत्यन्तप्रातःकाले इत्यर्थे ।

प्रिय त्रि० प्रीणाति प्री–तर्पणे क । १भर्त्तरि पत्यौ अमरः २भार्य्यायां स्त्री । ३प्रियके खगभेदे पु०स्त्री अटा०४क्षौद्रनामौषधौ ५हृद्ये त्रि० मेदि० ६जीवकौषधौ राजनि० ।

प्रियंवद त्रि०प्रियं वदति वद–खच् मुम् । १प्रियकरवादिनि मधुरभाषिणि । २खेचरे ३गन्धर्वभेदे पु० शब्दमा० वदेरन्तःस्यत्वादित्वात् प्रियमुवदेति मयूरव्यंसकत्वेन प्रागादिकमेव । "भुवि भवेत्तमजरैः प्रियंवदा" छ०र० उक्ते द्वादशाक्षरपादके ४छन्दोभेदे स्त्री । ५शकुनलताषट्चरीभेदे स्त्री शकु० दृश्यम् ।

प्रियक पु० प्रिय+स्वार्थे क संज्ञायां कन् वा । १पीतसालके (पियासाल) २नीपे ३चित्रकृक्षे ४भ्रमरे ५प्रियङ्गौ ६कुङ्कुमे मेदि० ७धाराकदम्बे ८व्यसनवृक्षे राजनि० । ९स्कन्दानुचरभेदे भा०श० ४६अ० । तस्यापत्यं विदा० यञ् । प्रैयक चित्रकृक्षापत्ये पुंस्त्री० ।

प्रियकृत् त्रि० प्रियं करोति कृ–क्विप् तुक् । १प्रियकारिणि २विष्णौ पु० "प्रियकृत् प्रीतिवर्द्धनः" विष्णुस० ।

प्रियङ्कर त्रि० प्रियं करोति कृ–खच् मुम् । १प्रियकारिणि २श्वेतकण्टकार्य्यां १हरिद्रायाम् ४अगस्त्यवृक्षे स्त्री राजनि० गौरा० ङीष् ।

प्रियङ्करण त्रि० अप्रियं प्रियं करोत्यनेन कृ–करणे ल्युट् । अप्रियस्य प्रियताकरणसाधने ।

प्रियङ्गु स्त्री प्रिय+गम–डु नि०मुम् च । १खनामख्याते वृक्षे अमरः "प्रियङ्गुः शीतला तिक्ता त्वराविषपित्तहृत् । रक्तादियोगदौर्गन्ध्यश्लेष्मदाहज्वरापहा । गुरुर्मलङ्विषनोऽग्नी तद्वदुत्तमप्रियङ्गुका । तत्फलं मधुरं रूक्षं कषायं शीतलं गुरु । विषनाशनमत्यन्तं संग्राहि कफपित्तजित्" भावप्र० । "प्रियङ्गुकलिकारम्" इति नुधप्रणाममन्त्रः । २राजिकायां राजनि० ३पिप्पल्याम् ४कङ्गौ (काङ्गनी) धान्ये मेदि० ५कटुक्यां धरणिः । [लमणिः ।

प्रियजन पु०कर्म० । १हृद्ये जने । २प्रौढभावानुविद्धे उज्ज्व-

प्रियजीव पु०प्रियो जीवो यस्मिन् । श्योनाकवृक्षे राजनि० ।

प्रियतम पु० अतिशयेन प्रियः तमप् । १मयूरशिखावृक्षे २अतिप्रिये त्रि० शब्दच० ।

प्रियता स्त्री प्रियस्य भावः तल् । १स्नेहे २प्रेमणि अमरः । त्व । प्रियत्व तत्रार्थे न० शब्दर० ।

प्रियतोषण त्रि० प्रियं तोषयति तुष–णिच् ल्यु । १प्रियसन्तोषकारके "नारीधादौ स्वहस्तेन धारयेत् जघनोपरि । स्तनापीड़करः कामी कामयेत् प्रियतोषणः" रतिमञ्जर्य्युक्ते २रतिबन्धभेदे ।

प्रियदत्ता स्त्री दीयमानपृथिव्याम् "नामास्याः प्रियदत्तेति युग्मं देव्याः सनातनम् । दाने वाऽप्यथ वाऽऽदाने नामास्याः प्रथमं प्रियम् । य एतां विदुषे दद्यात् पृथिवीं पृथिवीपतिः । पृथिव्यामेतदिष्टं स राजा राज्यमितो व्रजेत्" भा०अनु० ६२अ० ।

प्रियदर्शन पु० प्रियं दर्शनमस्य । १चौरिकावृक्षे २शुकखगे च जटा० ३हृद्ये त्रि० । [हेमच० ।

प्रियप्रायस् न० प्रियस्य प्रायः बाहुल्यं यत्र । प्रियवाक्ये

प्रियप्रेप्सु त्रि० ७त० । इष्टार्थोद्युक्ते जटा० । [प्रिये त्रि० ।

प्रियमधु पु०प्रियं मधु मद्यं यस्य । १बलरामे हेमच० २मद्य-

प्रियमाल्यानुलेपन त्रि० प्रियं माल्यमनुलेपनं च यस्य । १माल्यानुलेपनप्रिये २स्कन्दानुचरभेदे पु०भा०श० ४६अ० ।

प्रियमेध पु० १अजमीढस्य पुत्रभेदे "अजमीढस्य वंशाः स्युः प्रियमेधादयो द्विजाः" भाग० ९।२१।१७श्लो० । २यज्ञोमेते ऋषिभेदे ऋ० १।४२।४ भा० ।

प्रियम्भविष्णु त्रि०अप्रियः प्रियो भवति भू–कर्त्तरि स्नुच् । अप्रिये प्रिये भवितरि । खुरुञ् प्रियम्भावुक तत्रार्थे त्रि० ।

प्रियरूप त्रि०प्रियं रूपमस्य । १हृद्यरूपे । तस्यभावः मनोज्ञा० वुञ् । प्रैयरूपक तस्य भावे न० कर्म० । २हृद्ये रूपे न० ।

प्रियवचन त्रि०प्रियं वचनं वैद्यकवचनं वा यस्य । १प्रियवादिनि वैद्यकोक्तवाक्ये भक्तिमति २रोगिणि राजनि० । कर्म० । २हृद्ये वाक्ये न० ।

प्रियवर्णी स्त्री प्रियो वर्णो यस्याः गौरा० ङीष् । प्रियङ्गौ जटाधरः । [लतायाञ्च ।

प्रियवल्ली स्त्री नित्यकर्म० । १प्रियङ्गौ राजनि० २हृद्यायां

प्रियंवादिन् त्रि० प्रियं वदति वद्–णिनि । प्रियवाक्यभाषके स्त्रियां ङीप् "भाष्यै प्रियंवादिनी" चाणक्यः ।

प्रियव्रत त्रि० प्रियं व्रतमस्य । १व्रतप्रिये स्त्रियामनुशतरूपायां मनोः २पुत्रभेदे पु० हरिवं० २अ० । [१।६।३१।

प्रियश्रवस् पु० प्रियं श्रवः श्रवणं यस्य । परमेश्वरे भाग०

प्रियसख पु० कर्म० इत० वा, अलुक्स० । १कृष्णे सख्यौ २प्रियस्य सख्यौ च । स्त्रियां ङीप् । ३खदिरे शब्दच० ।

प्रियसङ्गमन त्रि० प्रिययोः सङ्गमनं यत्र । १प्रिययोर्मेलनस्थाने २कश्यपादित्योर्मेलनस्थाने देशभेदे पु० "गत्वादितिः कश्यपञ्च महात्मानौ ददर्शतौ । प्रियसङ्गमनं नाम तं देशं मुनयोऽवदन्" हरिवं० १२अ० ।

प्रियसत्य न० कर्म० । १तथ्ये यथ च प्रिये मुन्दरसाधौ हेमच० प्रियं सत्यं यस्य । २सत्यप्रिये त्रि० ।

प्रियसन्देश पु० प्रियं सन्दिश्यते सम्+दिश्–कर्म्म० घञ् ष० स० । १चित्तकढ़ाने भावे घञ् इत० । २प्रियसंवादे शब्दच० ।

प्रियसाल(क) पु० कर्म० स्वार्थे क वा । असनवृक्षे (पियासाल) राजनि० ।

प्रियादि विशेषणवाचिनि सर्वनामाधिकरणस्त्रीलिङ्गशब्दे परे न० स्त्री० पूर्वस्य पुंवद्भावे पर्युदस्ते शब्दगणे च यथा मा० म० स० उक्तो यथा "प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भद्रि सचिवा सखा सखा कान्ता क्षान्ता सखा सपत्नी दुहिता वामना तनया" । सुन्दरी प्रिया यस्य । सुन्दरीप्रिय इत्यादि ।

प्रियाम्बु पु० प्रियं प्रियतमं प्रियमस्त्वस्मूले सिक्त जलमस्य । १आम्रवृक्षे राजनि० । २जलप्रिये त्रि० ।

प्रियार्ह त्रि० प्रियमर्हति अर्ह–अण् ष० स० । १प्रियवाक्यादियोग्ये २विष्णौ पु० "अभिप्रायः प्रियार्होऽर्हः" विष्णुस० ।

प्रियाल पु० प्रियाय वलति पर्य्याप्नोति अल–अच् । प्रियालवृक्षे (पियासाल) २वृक्षान्तरे स्त्री राजनि० भावप्र० पियाल इत्येव पाठः "पियालस्तु खरस्कन्धसारो नक्षत्रवल्कलः । राजादनस्तापसेष्टः सक्तकट्टुर्नुषप्रियः । सारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु । स्निग्धं सरं अरुत्पित्तदाहज्वरतृषापहम् । पियालमज्जा मधुरो हृद्यः पित्तानिलापहः । वृष्योऽतिदुर्जरः स्निग्धो विदग्धो वातवर्द्धनः" भावप्र० ।

प्रियोदित न० कर्म० । चाटुवाक्ये शब्दरत्ना० ।

प्री तर्पणे स्वा० उभ० सक० अनिट् । प्रयति ते अप्रैषीत् अप्रेष्ट प्रिप्राय प्रिप्रियें ।

प्री प्रीतौ कान्तौ (इच्छायाम्) सक० दिवा० आत्म० अनिट् । प्रीयते अप्रेष्ट प्रिप्रिये ।

प्री तर्पणे सक० कान्तौ तृप्तौ अक० क्र्या० उभ० अनिट् । प्रीणाति प्रीणीते अप्रैषीत् अप्रेष्ट प्रिप्राय प्रिप्रिये । प्रीत । णिच् सक० । प्रीणयति ते । [अत्रापि सुक् प्रीणयतीत्येके ।

प्री तर्पणे सक० च० उभ० अनिट् । प्रीणयति ते अप्रिणत् अप्रेष्ट । प्रीण त्रि० प्री–णिच् कर्त्तरि अच् । १प्रीणनकारके अन्यत्रे अच् । २नर्मणि मेदि० । पुरुषार्थप्रशब्दात् भवार्थे अण् । २पुराणे त्रि० त्रिका० ।

प्रीणन न० प्री–णिच्–ल्युट् । तर्पणे अमरः ।

प्रीणस पु० प्रीणि–मा० असच् । नपुंसके राजनि० ।

प्रीत त्रि० प्री–कर्त्तरि क्त । हृष्टे अमरः ।

प्रीति स्त्री प्री–भावे क्तिच् । १हर्षे २व्यामोहे ३लक्ष्म्यौ च । विष्ण्वाद्यर्थयोगेषु ४द्वितीययोगे । ५कामस्य पत्नीभेदे रत्या सपत्न्याञ्च "वेश्याऽनङ्गवती नाम विभ्रतिर्हादगीरता । समाप्य साधभावस्य हादग्यां त्वयाचनम् । निवेदयन्ती शुश्रूषे मय्याज्ञोपस्करान्विताम् । अलङ्कृत्य सुरीकेशं सौवर्णैरुरुपादपम् । स चानङ्गवती वेश्या कामदेवस्य सम्मतम् । पत्नी, सपत्नी कंजाता रत्याः प्रीतिरिति श्रुता" मात्स्ये ८२अ० ।

प्रीतिजुष त्रि० प्रीतिं जुषते जुष–क । १प्रीतिभाजि २व्यभिचारिण्यां स्त्री शब्दरत्ना० "विश्वकेतुः प्रीतिजुषा सुतः" भिक्षा० तत्पुरुषौ । [प्रज्ञादिषु पु० ह्रस्वश्च० ।

प्रीतिद त्रि० प्रीतिं ददाति दा–क । प्रीतिदायके (भाँड़)

प्रीतिदत्त त्रि० इत० । १प्रीत्या दत्ते २स्त्रीधनभेदे न० यथाह सिता० कात्यायनः "प्रीत्या दत्तं तु यत्किञ्चित् श्वशुरेण वा । पादवन्दनिकं चैव प्रीतिदत्तं तदुच्यते" । अन्ये प्रीतिदत्तस्यावरे तु विशेषः दाय० उक्तो यथा "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृते तत् । स्व० यथा कामं भक्षीयात् दद्याद्वा स्थावरादृते" ।

प्रीतिदाय पु० प्रीत्या दीयते दा–कर्म्मणि घञ् । प्रीत्या दत्ते "श्वशुरात् प्रीतिदायं तु प्राप्य सा प्रीतमानसा" भा० आश्व० ८६ अ० ।

प्रीतिभोज्य न० प्रीत्या भोज्यम् । प्रीत्यैव भोज्ये आद्यादौ "यत्तानि प्रीतिभोज्यानि आपद्भोज्यानि वा पुनः । न च संप्रीयसे राजन् ! न चैवापदुपस्थिता" भा० उ० ६० अ० । "संप्रीतिभोज्यान्यन्नानि" इति शुद्धितत्त्वधृते पाठे ।

प्रीतिवर्द्धन त्रि० प्रीतिं वर्द्धयति वृध–णिच्–ल्यु । १सन्तोष-

वर्द्धके २विष्णौ पु० "प्रियकृत् प्रीतिवर्द्धनः" विष्णुस० ।
प्रुष् सर्पणे भ्वा० आत्म०सक० अनिट् । प्रुषते अप्रोष्ट प्रुप्रुषे ।
प्रुट् मर्दने भ्वा० पर०सक० सेट् । प्रोटति अप्रोटीत् पुप्रोट । अयं धातुपाठे पठितः ।
प्रुष् भस्मीकरणे भ्वा० पर० सक० सेट् । प्रोषति अप्रोषीत् पुप्रोष । ओदित् क्त्वा वेट् । प्रुषित्वा प्रुष्ट्वा प्रुष्टः ।
प्रुष् सेके पूर्त्तौ च सक० क्षेपे अक० क्र्या० पर०सेट् । प्रुष्णाति अप्रोषीत् पुप्रोष ।
प्रुष्ट त्रि० प्रुष्–क्त । दग्धे । [विन्दो त्रि०को० ।
प्रुष्व प्र० प्रुष–क्वन् । १क्षरणे २स्पर्शे च उज्ज्वल० । इजब-
प्रेक्षा स्त्री प्र+ईक्ष–भावे अङ् । १विषयगुणागुणभव्यालोचनायां २सद्विपूर्वककर्मकरणे ततः प्रेक्षादि० चतुरर्थ्यामिनि । प्रेक्षिन् आलोचनानिर्णेतादौ । अक्षिनृचन्द्रे परे घोषादि० पूर्ववदसदात्तम् । [प्रेक्षाप्रेक्षादयोऽप्यत्र ।
प्रेक्षागार न० ६त० । राज्ञां मन्त्रणार्थगृहे हरिवं० ८५अ० ।
प्रेक्षादि चतुरर्थ्यामिनि प्रत्ययनिमित्ते यञ्छघः स च गणः पा०ग० शब्दो यथा "प्रेक्षा इक्षका नस्तुका भ्रुवका शिपका न्यग्रोध रक्कट कङ्कट सङ्कट कटङ्कट घुष्क पुष्क पुट भङ्ग परिवाप उवास धुवका गर्त्त कूपक हिरण्य" ।
प्रेक्षावत् त्रि० प्रेक्षा अस्त्यर्थे मतुप् मस्य वः । समीक्षकारिणि ।
प्रेङ्खण न० प्र+इङ्ख–ल्युट् णत्वम् । १प्रकर्षेण चलने अदादिरूपकालगते २रूपकभेदे तल्लक्षणं साद० उक्तं यथा "नभोवेगमरुद्धूतं प्रेङ्खणं क्षीणनायकम् । अल्पप्रधारमेकाङ्कमविष्कम्भप्रवेशकम् । निर्युद्धसम्फोटयुतं सर्ववृत्तिसमाश्रितम् । नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना" ।
प्रेङ्खा स्त्री प्र+इङ्ख वा० आधारे अङ् । १दोलायाम् अमरः भावे अङ् । २परिभ्रमणे ३स्वार्थकगतौ अन्यगतौ इति पाठान्तरम् । ४गृहभेदे मेदि० ५लम्बे च धरणिः ।
प्रेङ्खित त्रि० प्र+इङ्ख–क्त । कम्पिते अमरः ।
प्रेङ्खोल दोलने भ्वा०चुरा०उभ०सक० सेट् । प्रेङ्खोलयति ते अपिप्रेङ्खोलत् त । प्रेङ्खोपवर्गत्वमपीच्छन्तीत्यन्ये तेन प्राप्रिङ्खोलत् त इत्यत्रेष्टम् ।
प्रेष्य गतिप्रेरणाक्षेपेषु भ्वा०पर० सक० सेट् माधवः । प्रेषति अप्रेषीत् ओदित् अपिप्रेषत् त ।
प्रेषि त्रि० प्रेष–इन् । प्रेरके ऋ० १।११२।१० भा० ।
प्रेत त्रि० प्र–इ–क्त । १मृते अमरः । २नरकस्थे जीवभेदे ३पिशाचभेदे आश्विनाश्विकदेहोत्तरं ४आद्यश्राद्धदेहभेद-युते और्द्धदैहिकक्रियाऽभावे तद्रूपप्राप्तिकर्त्रा पाद्मोत्त० ख० १६अ० यथा "ततो वसुमतिर्देवे काले स राजर्षिसत्तमः । वैदिकेन विधानेन न लेभे और्द्धदैहिकम् । विष्णुप्रदेषमात्रेण युगानां रुद्रविंशतिम् । भुक्त्वा च यातनां घोरां निर्मोर्यनरको नृपः । सनया गिरिराजस्य पितुराघोऽभवत्सुतः महात्मा । तस्य रूपं यथा "देवद्युतिरधीयानः सुभ्रुवा कनकाननम् । समागत्य ततस्तत्र पितुश्चक्रे दृशं सुतः । विकरालमुखं दीनं पिशङ्गनयनं भृशम् । अर्द्धभुग्नजलप्राङ्गं यमदूतनिषादरम् । वक्त्रजिह्वञ्च लम्बोष्ठं दीर्घजङ्घशिराकुलम् । दीर्घाङ्गुलिनखं गर्त्तं शुष्कपञ्जरम्" ।
और्द्धदैहिकरूपेऽपि केषाञ्चित् कर्मविशेषेण प्रेतत्वप्राप्तिलक्षणोक्ता यथा "हरिर्मुक्तिं नान्यो ये गोविन्दं नार्चयन्ति ये । नमन्ते नात्मविद्याञ्च स्तुतीर्यविमुखाश्च ये । सुवर्णं वस्त्रताम्बूलं रत्नमन्नं फलं जलम् । आर्त्तेभ्यो न प्रयच्छन्ति सर्वेषु ज्ञतदारकाः । ब्रह्मस्वञ्च क्षौधनानि लोभादेव हरन्ति ये । वचेन कर्मणा वापि धूर्त्ताश्च परवञ्चकाः । मालिका ब्रह्मकाशैरा ये चान्ये वकवृत्तयः । वाचस्पत्यारस्त्रीषु निर्दयाः सत्यवर्जिताः । अग्निदा मरदा ये च ये चान्ये कूटसाक्षिणः । अगम्यागामिनः सर्वे ये चान्ये याजयाजिनः । आधाचरणसम्भ्रष्टा वर्णाश्रमधर्मवर्जिताः । ये चोपदेवदनुजरक्षोयक्षादिसेविनः । सर्वदा मादकद्रव्यपानमत्ता हरिद्विषः । देवतोद्दिष्टपतितश्राद्धान्नभोजिनः । अयत्नधर्मरता नित्यं सर्वपातकपापिनः । पाषण्डधर्माचरणाः गुरोधोक्तिलोपिनः । पितृमातृसुमाधन्यसदारत्यागिनश्च ये । ये वटाश्वत्थ कुशाश्च मालिका धर्मदूषकाः । त्यजन्ति जाह्नवीं दृष्ट्वा भजन्ति मरणागतम् । नवां भूमेश्च हरीरो ये चान्ये रत्नदूषकाः । महाक्षेत्रेषु सर्वेषु प्रतिषेधरताश्च ये । परद्रोहरता ये च नरा ये प्राणहिंसकाः । परापवादिनः पापा देवतासुहृन्निन्दकाः । कुमतिपाखिनः सर्वे भस्मवन्ति पुनःपुनः । प्रेतराजपुरे घोरे यान्तिर्यग्गतयश्च ये । तेषां मुक्तिरुपायोऽस्ति दृष्ट श्रोते परन्तप" । पाद्मोत्तरखण्डे १८ अ० । पद्मप्रेतोपाख्यानं तत्रैव यथा "ब्राह्मण उवाच प्रेतानां नाम आहोनां युष्माकं यक्षसत्तमाः । किं तत् कारणमुद्दिश्य दूरदौरात्म्यमास्थिताः" । प्रेता ऊचुः "अहं ब्राह्मण पूर्वं वृद्धो दृष्ट्वा परस्त्रियं

खदा। एतत्कारणमुद्दिश्य नाम पर्य्युषितं भवेत्। सूचिता बहवोऽनेन विप्राद्या ह्यन्नकाङ्क्षिणः। एतत्कारणमुद्दिश्य सूचीमुखमिमं विदुः। शीघ्रं गच्छति विप्रेण याचितः क्षुधितेन वै। पश्चाद्भुङ्क्ते द्विजः शिष्टमेष शीघ्रक उच्यते। रूक्षोपरि खदा भुङ्क्ते स्वादु द्विजभयेन हि। द्विजाय कुत्सितं दत्त्वा एष रोहकः उच्यते। मौनेनापि स्थिरो नित्यं याचितो विलिखन्महीम्। अक्षाकमपि पाणिस्थो लेखकोऽयं नाम एष वै। मेढ्रेण लेखको याति रोहकः पार्वतःशिराः। शीघ्रकः पङ्गुतां प्राप्तः सूची सूचीमुखोऽभवत्"। प्रेताहारस्तत्रोक्तो यथा"द्विज उवाच "ये जीवा भुवि तिष्ठन्ति सर्वे आहारभूतकाः। युष्माकमपि चाहारं श्रोतुमिच्छामि तत्त्वतः" प्रेता ऊचुः "शृणु आहारमस्माकं सर्वसत्त्वविगर्हितम्। श्लेष्ममूत्रपुरीषेण योषितान्तु मलेन च। रूक्षाणि त्यक्तभोज्यानि प्रेता भुञ्जन्ति तत्र वै। स्त्रीभिर्जग्धानि जीर्णानि संकीर्णापहृतानि च। मलेनातिजुगुप्सानि प्रेता भुञ्जन्ति तत्र वै। भयलज्जाविहीनानि पतितैः सेवितानि च। अन्योन्यदत्तयुक्तानि प्रेता भुञ्जन्ति तत्र वै। कलहान्वितशोकानि त्यक्तशोभानि मानवैः। सपर्चस्कानि भाण्डानि प्रेता भुञ्जन्ति तत्र वै। बलिमन्त्रविहीनानि द्विजाद्दष्टानि यानि तु। नियमव्रतहीनानि प्रेता भुञ्जन्ति तत्र वै। गुरवो नैव पूज्यन्ते स्त्रीजितानि गृहाणि च। सक्रोधान्यपवित्राणि प्रेता भुञ्जन्ति तत्र वै। भुञ्जन्ति भिन्नभाण्डेषु मर्य्यादारहितेषु च। अन्योन्योच्छिष्टयुक्तेषु तत्र प्रेतास्तु भुञ्जते। सक्लेशमाक्षिकोच्छिष्टं पूति पर्युषितं तथा। सक्रोधञ्च सशोकञ्च तच्च प्रेतेषु भोजनम्। सनग्नं भोजनं यच्च नोत्तरीयं पदासनम्। शीर्णोष्णं सासुरीकञ्च तच्च प्रेतेषु भोजनम्। अर्द्धभुक्तं महाघासं सोत्क्षिप्तं पतितं तथा। दुर्भुक्तं गोधिकञ्चैव तच्च प्रेतेषु भोजनम्। सौतिकं सूतकञ्चैव राजसं कलुषीकृतम्। निर्दीपं क्षत्रियक्षाग्र्ये यद्भुक्तं प्रैतिकन्तु तत्। एतत्ते कथितं सर्वं यत् प्रेतेष्वेव भोजनम्। निर्वाणाः प्रेतजात्या वै मुच्यामस्त्वां द्विजोत्तम"। प्रेतत्वाभावकारणं यथा न प्रेतो जायते येन येन चैवेह जायते। एतत्सर्वं समासेन ब्रूहि मे वदतां वर!" ब्राह्मण उवाच "एकरात्रं त्रिरात्रं वा कृच्छ्रं चान्द्रायणादिकम्। प्रेतेष्वप्युषितो यस्तु न प्रेतो जायते नरः। सिद्धान्नपानदाताथ सततं अन्नयान्वितः। देवपूजापरो नित्यं न प्रेतो जायते नरः। त्रिरग्निरेकपक्षाग्निर्निरग्निर्योऽपुपासकः। सर्वभूतदयापन्नो न प्रेतो जायते नरः। तुल्यमानापमानश्च तुल्यः काञ्चनलोष्टयोः। तुल्यः शत्रौ च मित्रे च न प्रेतो जायते नरः। देवतातिथिपूजासु गुरुजातिषु नित्यशः। वेदशास्त्ररतो नित्यं न प्रेतो जायते नरः। जितक्रोधो मदैश्वर्यतृष्णामङ्गविवर्जितः। क्षमाऽक्रोधसुशीलश्च न प्रेतो जायते नरः। देवतातिथिपूजासु पर्वतांश्च नदीस्तथा। पश्येद्देवालयांश्चैव न प्रेतो जायते नरः"। प्रेतत्वकारणं यथा "शूद्रान्नं यो द्विजो भुङ्क्ते यः क्रामति द्विजोत्तमम्। वृत्तिहा द्विजदेवेषु स प्रेतो जायते नरः। मातरं पितरं हत्वा भ्रातिं साधुजनं तथा। लोभात् त्यजति यः स्निग्धं स प्रेतो जायते नरः। अयाज्ययाजकश्चैव याज्यस्य परिवर्जयेत्। शूद्रान्नोपहतश्चैव स प्रेतो जायते नरः। कुज्योतिषी कुविद्यासु कुजनेषु कुदेशकः। शूद्रसेवाकरो राज्ञां स प्रेतो जायते नरः। सेवनायापहृतो यः सेवकस्वपरिग्रहः। तायुभावपि जायेते प्रेतौ काष्ठान्न किंग्रहौ। द्विजान्नमन्नितो भुङ्क्ते शूद्रान्नं वा द्विजस्य तु। शूद्रेष्वेव द्विजः प्रेतो निरयानुपगच्छति। गीतवाद्यरतो नित्यं सदाप्रस्त्रीनिषेवणात्। द्यूतसांसक्रियो यस्तु स प्रेतो जायते नरः। वृथारेता वृथामांसो वृथावादो वृथामतिः। निन्दको द्विजदेवानां स प्रेतो जायते नरः। वृद्धं बालं गुरुं विप्रं योऽवमन्य भुनक्ति वै। कन्यां ददाति शुल्केन स प्रेतो जायते नरः। न्यासापहर्त्ता मित्रस्य परपाकरतस्तथा। विश्वस्तघाती कूटस्थ स प्रेतो जायते नरः। निर्दोषान् दुष्टदो मारोऽन्यजेच्च कालाद्यः पाति यः। धनमीहेत यस्तेषां स प्रेतो जायते नरः। दुष्टस्त्रीस्वरथयानानि मृतशय्यासनादि यः। अध्यास्ते गृह्यानि अनापत्सुगतो द्विजः। सधोभयसुखीं काञ्चं सधेनां मेदिनीं द्विजः। कुरुक्षेत्रञ्च यद्दानं काञ्चनात् पतितात्तथा। सासिकोऽपि नवश्राद्धे भुञ्जन् प्रेतान्नभुङ्नतः। ब्रह्महा गोवधी स्त्रैयी सुरापो गुरुतल्पगः। भूमिकन्यापहर्त्ता यः स प्रेतो जायते नरः। नानासङ्करकर्त्रित्यं वर्णसङ्करकस्तथा। योनिसङ्करकश्चापि स प्रेतो जायते नरः। विक्रीणाति विषं शस्त्रं तिलानां लवणस्य तु। गवां केशस्त्रियां मोहात् विक्रयात् प्रेततां व्रजेत्। कूटमार्घेण तौल्येन क्रयं स्त्री-

खाति विक्रयात्। अद्यतक्रपयोदध्नां च प्रेतो जायते नरः। क्षीरक्षौद्रमद्यपाने तु सप्तरात्रमनुध्यायति। नित्यनैमित्तिकेऽदाता च प्रेतो जायते नरः" अग्निपु०। मनुष्याणाञ्च दाहादिक्रियया आतिवाहिकदेहानन्तरं प्रेतदेहो भवति यथाह विष्णुधर्मोत्तरे

"तत्क्षणादेव गृह्णाति शरीरमातिवाहिकम्। आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव!। केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्। प्रेतपिण्डेक्षतो दत्तैर्देहमाप्नोति भार्गव!। भोगदेहमिति प्रोक्तं क्रमादेव न संशयः। प्रेतपिण्डा न दीयन्ते यस्य तस्य विशोच्यताम्। प्रज्ञाशानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते। तस्यास्य यातना घोराः शीतवातातपोद्भवाः। ततः सपिण्डीकरणे बान्धवैः स कृते नरः। पूर्वं संवत्सरे देहमतोऽन्यं प्रतिपद्यते। ततः स नरके याति स्वर्गे वा स्वेन कर्मणा" शु०त०। पुनः पितृलोके "अत ऊर्द्धं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात्" गोभिलः "प्रेतलोकं परित्यज्य आगता ये महालये" ति०त०।

प्रेतकर्मन् न० ६त०। मृतोद्देशेन कर्त्तव्ये दाहादि सपिण्डनान्तकर्मणि भा०हो०५२अ०। प्रेतकार्य्यादयोऽप्यत्र। "प्रेतपितृलोकोद्देशकृत्ये" श्राद्धादौ च "अलब्ध्वा प्रेतकार्य्याणि प्रेतस्य धनहारकः। पत्नीनां यदृक्थे प्रोक्तं तदृतं नियतश्चरेत्" दाय०त० वचनम्।

प्रेतगृह न० प्रेतस्य मृतस्य गृहमिव। मृतस्य शरीराधारे श्मशाने शेषश्च०। प्रेतावासाद्योऽप्यत्र।

प्रेततर्पण न० ६त०। मृतोद्देशेन वर्षपर्य्यन्तं प्रेतशब्दोल्लेखेन कर्त्तव्ये तर्पणविशेषे तद्विधानं शु०ति० यथा

त्रिशाखार्घ्यं पृथ्वीधरधृतविष्णुवक्त्रम् "अतः सर्वे अवश्यार्घिनो गत्वा पितृपदस्थाने प्रेतपदोक्तेन द्वितीयान्तं तर्पयेयुः पितृशब्दोच्चारेण पितृहा भवति"। यातातपः "प्रेतान्नदासगोत्राभ्यामुत्सृजेदुपतिष्ठताम्" इति प्रेतान्नेति तत्पुरुषः न बहुव्रीहिः सर्वजघन्यत्वात् तेन प्रेतान्नदासगोत्रमुक्तेति समासः एतद्वचनाच्चितापिण्डदाने उपतिष्ठतामिति पितृदयितायाश्च्युक्तम्। एतेन प्रेतकार्यं समन्त्रार्थकपदप्रयोगो वैधिनोक्तो ज्ञेयः। एतेनाशुशर्माणमसुरदेवशर्माणं तर्पयामीति मागधानां प्रयोगः। अत्र प्रेततर्पणे सपिण्डीकरिष्यति विशेषोपादानात् मृत्यूर्द्ध्वदिवसेऽपि त्रिभिरेव तर्पणं प्रतीयते। व्यक्तमाह गङ्गाधारजातकर्त्ता मृतिः "अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च। उपाकर्मणि चोत्सर्गे युगादौ मृतवासरे। सूर्य्यशुक्रादिवारे च न दोषस्त्रितर्पणे"। तथा "तीर्थे तिथिविशेषे च कार्य्यं" प्रेते च सर्वदा"। तिथिविशेषे अमावस्यादशकरादौ। अत्र दक्षिणाङ्गुष्ठसहितमध्यमादिना वामहस्ते तिलदानं "वामहस्ते तिलान् दत्त्वा जलमध्ये तु तर्पयेत्। शुक्लहस्तन्तु कर्त्तव्यं न कदाचित्तु दर्शयेत्" इति विद्याकरधृतवचने वामहस्त इति सप्तम्यन्तत्वश्रवणात् "तिलान् संभिश्रयेज्जले" इति तिलाधिकरणोपक्रम्याभिधानाच्च। "सव्येन च तिलाः पात्राः" इत्यत्रापि वामहस्ते स्थाप्या इत्यर्थः। सव्येनेति स्थाल्या पक्वौदनवदधिकरणे तृतीया "विवक्षातो हि कारकाणि भवन्ती"त्युक्तेः। सूत्रे अङ्गुष्ठदर्भान्यात्मकयोगरूपा तिलत्रयकरणायेति शेषः"।

प्रेतधूम पु०६त०। चिताधूमे मनुः ४।६९। [नदीभेदे शब्दच०।

प्रेतनदी स्त्री प्रेतगम्या नदी। यमद्वारस्थे वैतरणीनामके

प्रेतनिर्हारक पु०प्रेतं निर्हरति गृहात् श्मशानभूमिं निर्+हृ-ण्वुल्। यमद्वारके "प्रेतनिर्हारकाश्चैव वर्जनीयाः प्रयत्नतः" तस्य श्राद्धकृत्यता मनूक्ता। तच्च कुल्लू० धनग्रहणपूर्वकहरणपरतया व्याख्यातं यथा

"प्रेतनिर्हारको धनग्रहणेन न तु धर्मार्थम्। "एतद्वै परमन्नपो यत् प्रेतस्यान्नं हरन्ती"ति श्रुत्या विहितत्वात्"

प्रेतपक्ष पु० प्रेतानां पितॄणां प्रियः पक्षः श०त०। गौणाश्विनकृष्णपक्षे अस्य मृतयोः पित्रोः पार्व्वणविधिना सपुरुषिकं श्राद्धं करणीयं यथाह श्रा०त० शङ्खः

"सपिण्डीकरणादूर्द्धं यत्र यत्र प्रदीयते। तत्र तत्र त्रयं कुर्यात् त्यजेत्वित्वा मृताहनि। अमावस्यां क्षयो यस्य प्रेतपक्षेऽथ वा पुनः। सपिण्डीकरणादूर्द्धं तस्योक्तः पार्व्वणो विधिः"। त्रयं सम्भवानानां त्रयं कुर्यात् त्रिभ्यो दद्यादित्यर्थः। मृताहपर्य्युदासविधेयत्वञ्च प्रतिपुरुषमाह अमावस्यामिति प्रेतपक्षोऽत्र पितृपक्षः अश्वयुक्कृष्णपक्ष इति यावत् न तु कृष्णपक्षमात्रं कृष्णपक्षसामान्यपरत्वे अमावास्यापदवैयर्थ्यापत्तेः पितृपक्षं विशेषयति हेमाद्रिधृतार्य्यभट्टीयं नाम रत्नखण्डम् "नभो वाऽथ नभस्यो वा मलमासो यदा भवेत्। सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः"। अत्र श्रावणभाद्रयोरन्यतरस्य मलमासत्वे आषाढ़पौर्णमास्या सप्तमपक्षस्य पितृपक्षत्वात् अत्र मृतस्यैव प्रेतपक्षसूतत्वं न तु मलमासभाद्रकृष्णपक्षे मृतस्य। ततश्च तत्र मृतस्य

सर्वान्नरेऽन्ययुक्तस्य ज्येऽपि तच्छ्राद्धकरणे न पार्वणं किन्त्वेकोद्दिष्टमिति । अत्र पार्वणो विधिः पार्वणेतिकर्तव्यताकैकोद्दिष्टविधिरिति मध्यवर्त्तिमानपुमृतयः । तत्र पूर्ववचनोक्तापूरणिकस्य मृताहे पर्युदस्तस्य पार्वणोविधिरित्यनेन प्रतिप्रसवात् । तस्मात् षट्कोद्दिष्टं नैपुरुषिकं न तु षाट्पौरुषिकं "कर्तृसमन्वितं सङ्घा तथाद्यं श्राद्धषोडशम् । प्रत्याब्दिकन्तु ग्रेषेषु पिण्डाः स्युः षड्डितिस्थितिः" इति छन्दोगपरिशिष्टवचनेन प्रत्याब्दिकव्यतिरेकेण षट्संख्यानियमात् एवममावस्यादिमरणनिमित्तेन मात्रादिपि पुत्राब्दिकं पार्वणविधिनैव "अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये । तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणम्" इति व्यासस्मृतवचने व्यपुत्रा इति विशेषणोपादानात् सपुत्राणां पार्वणाभ्यनुज्ञानात् । एतच्च मात्रादित्रितयदैवतं कार्यम् । "मात्रे पितामह्यै प्रपितामह्यै पूर्ववम् ब्राह्मणान् भोजयित्वा" इत्यन्वष्टकायां तथादर्शनात् . व्यक्षयानदिननिमित्तेन पार्वणविधिना छन्दोगैरपि मात्रादित्रिकायां श्राद्धं कर्त्तव्यम् "न ओषधीः पृथग् दद्यादृक्षसाम्नटिनाहते" । इति छन्दोगपरिशिष्टवचने विशेषतः प्रतिप्रसवात् । एवं सपिण्डीकरणेऽपि । एतच्च मृताहपार्वणं मातापित्रोरेव । तथा च हेमाद्रिधृतकात्यायनवचनम् "सपिण्डीकरणादूर्द्धं पित्रोरेव हि पार्वणम् । पितृव्यभ्रातृमातृणामेकोद्दिष्टं सदैव तु" । मातृपदं सपत्नीमातृपरम् । सपत्नीमातृत्वञ्च मातृपदस्य राजदन्तादिस्वात् परनिपातः ततश्च वाक्ये मातृसपत्नीति न प्रयोज्यं किन्तु सपत्नीमातरित्यादिकम् । एवं साग्निकौरसक्षेत्रजाभ्यां मृताहे पार्वणं कर्त्तव्यम् "औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु । प्रत्यब्दमितरे कुर्युरेकोद्दिष्टं सुता दश" इति जाबालवचनस्य "यच्च यत्र प्रदातव्यं सपिण्डीकरणात् परम् । पार्वणेन विधानेन देयमग्निमता सदा" इति मत्स्यपुराणवचनस्य चैकवाक्यत्वात् । एतेन च "प्रत्यब्दं दर्शवच्छ्राद्धं साग्निः कुर्वीत वै द्विजः । एकोद्दिष्टं सदा कुर्यादिरग्निः श्राद्धदः सुतः" । अत्र निर्णि० विशेषमाह हेमाद्रिपराशरः "संग्रामे संस्थितानाञ्च प्रेतपक्षे मृतिञ्चये । तेषां पार्वणमेवोक्तं जयाद्देऽपि च सत्तमैः" । "चन्द्रग्रहणयोगेषु यः प्रेतपक्षे मृतवान् सपिण्डः । सपिण्डितानामपि चाब्दिकानि भवन्ति तेषामपि पार्वणानि" । तथा "श्राद्धज्ञैस्तस्य कुर्वीत ज्येष्ठो भ्रातासुतस्य च । दैवहीनं तु तत्कुर्यादिति धर्मविदब्रवीत्" । दैवहीनमेकोद्दिष्टम् ज्येष्ठो भ्रातानाद्यगर्भजः तथा च तत्रैव सातातपः "अनाद्यगर्भोज्येष्ठोऽपि भ्राता सद्भिर्निगद्यते । मृते सपिण्डनात्तस्य नैव पार्वणमाचरेत्" । आद्यगर्भे तु पार्वणमेकोद्दिष्टं वेत्यर्थः । मातरस्तु हेमाद्रौ कात्यायनः "प्रत्यब्दं यो यथा कुर्यात् पुत्रः पित्रे सदा द्विजः । तथैव मातुः कर्त्तव्यं पार्वणं चान्यदेव वा" । यत्तु तेनैवोक्तम् "सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणम् । पितृव्यभ्रातृमातृणामेकोद्दिष्टं सदैव तु" इति तत् सापत्नमातृपरम् । यत्तु हेमपराशरः "अपुत्रस्य पितृव्यस्य ततपुत्रो भ्रातृजो भवेत् । स एवास्य तु कुर्वीत पिण्डदानादिकक्रियाम् । पार्वणं तेन कार्य्यं स्यात् पुत्रवद्भ्रातृजेन तु । पितृस्थाने तु तं कृत्वा शेषं पूर्ववदाचरेत्" इति तत्पितृवद्देशाचारवद्व्यवस्थितमिति पृथ्वीचन्द्रः । श्राद्धदीपकलिकायां चतुर्विंशतिमते तु "पितृव्यभ्रातृसातृणां ज्येष्ठानां पार्वणं भवेत् । एकोद्दिष्टं कनिष्ठानां तस्यैवोः पार्वणं त्रियः । अपुत्रस्य पितृव्यस्य भ्रातुश्चैवाग्रजन्मनः । मातामहस्य तत्पत्न्याः श्राद्धं पार्वणवद्भवेत्" इत्युक्तं तत्पत्न्याः कर्तृत्वेऽपि पार्वणमेव "अभावे स्वयं पत्न्याः स्वभ्रातृव्यामभल्लकम् । सपिण्डीकरणं कुर्युस्ततः पार्वणमेव च" इति जीमूतवाहनेः । "ततः पत्न्यापि कुर्वीत सापिण्ड्यं पार्वणं तथेति" शुद्धितत्त्वेति निर्णयामृते उक्तम् । अन्ये तु तत्पार्वणिकं पार्वणपरमाहुः अतएव "भर्तुः श्राद्धं तु या नारी कोहात्पार्वणमाचरेत् । न तेन तृप्यते भर्त्ता सा तु नरकं व्रजेत्" इति वचनं व्याख्याने पार्वणिकैकोद्दिष्टप्रशंसार्थं न पार्वणनिषेधार्थमित्युक्तं निबन्धेषु तथा भट्टचरणैः । स्वभर्तृप्रभृतित्रिभ्य इत्यनेन विरोधाच्च अपुत्राणामुद्दाहहेमाद्रावापस्तम्बः "अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये । तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणम् । नित्यवत्सपिण्डेभ्यः स्त्रीकुमारीभ्य एव च । दद्याद्वै मासिकं श्राद्धं सांवत्सरमतोऽन्यथा" । पारिजाते तु अन्यथा पार्वणमित्युक्त्वा सर्वत्र पार्वणमित्युक्तम् एकोद्दिष्टवाक्यानि तु तीर्थमहालयपराण्युक्तम् । पृथ्वीचन्द्रोदये हरिहरगार्ग्यः "मातुः सहोदरा या च पितुः सहभवा च या । तयोश्च नैव कुर्वीत पार्वणं पिण्डमाहते" प्रचेताः "सपिण्डीकरणादूर्ध्वं

मेकोद्दिष्टं विधीयते। अपुत्राणां च सर्वेषामपत्नीनां तथैव च"। अपत्नीनां ब्रह्मचर्य्यादीनाम्। मार्कण्डेयपुराणे "प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियाः। मृताहनि यथान्यायं न्यूनं यदधिकोदितम्"। न्यूनाधिके दृष्टान्तात् सोदिष्टप्रकृतपार्वणश्राद्धादीनां सपिण्डनाभावेऽपि सांवत्सरमेकोद्दिष्टं कार्यमेवेति मूलपाणिः। स्मृतिसङ्ग्रहवचनेऽपि "सपिण्डीकरणादूर्ध्वं यत्र यत्र प्रदीयते। श्राद्धे भक्तिर्न्यसेत् पुत्रात्र स्वामिने भ्रातृजाय च। पितृव्यगुरवे श्राद्धमेकोद्दिष्टं न पार्वणम्"। यत्तु भ्रातृकार्य्ये; "पितृव्यभ्रातृमातृणामपुत्राणां तथैव च। भ्रातामहस्यापुत्रस्य श्राद्धादि पितृवद्भवेत्" इति तदावश्यकत्वार्थं न तु पार्वणार्थमिति हेमाद्रिः। युक्तञ्चैतत् "त्रयः पितरमारभ्य त्रयो मातामहाः स्मृताः। तेषां तु पितृवच्छ्राद्धं कुर्युर्दौहित्रसूनवः" इति पुत्रस्योक्तेर्मातामहस्य पार्वणमेव तत्साहचर्य्यात् पितृव्यादौ तथा "पितृव्यभ्रातृमातृणामेकोद्दिष्टं न पार्वणमिति" चयाद्देोपक्रमे पुत्रस्योक्तेश्च विकल्पः। केचित्त्वापस्तम्बादिवाक्यात् "व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिण्डता" इत्यस्य पितृव्यादिपरत्वादकृतसपिण्डनपितृव्यादिपराणीत्याहुः। माता अपत्नीमाता। एकोद्दिष्टं तु कनिष्ठपरमिति पृथ्वीचन्द्रोदयेऽप्येवम्। विशेषस्त्वधिकारिनिर्णये वक्ष्यते। केचित्पुत्राभावेऽपि पितामहवार्षिकश्राद्धप्रकरणम् "पुत्राभावे च तत्पुत्रः पत्नी माता तथा पिता। वित्ताभावेऽपि सञ्चित्यः कुर्य्यात्तस्यौर्ध्वदेहिकम्" इति मार्कण्डेयपुराणादित्याहुस्तच्च "प्रेतेनैकादशाहादि कर्त्तव्यं श्राद्धषोड़शमिति" कातीये विशेषोक्तेः।

प्रेतपक्षे श्राद्धकालादिनिरूपणम् आ॰वि॰ यथा ब्रह्मपुराणे "अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्य्याद्दु दिने-दिने। त्रिभागहीनं पक्षं वा त्रिभागं त्रयमेव वा। न सन्ति पितरश्चेति कृत्वा मनसि यो नरः। श्राद्धं न कुरुते तत्र तस्य रक्तं पिबन्ति ते। यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः। तावत् श्राद्धस्य कालः स्यान्न्यूनं प्रेतपुरं तदा"। दिने दिने इति वीप्सया पक्षे श्राद्धार्थौ तेन पञ्चदश श्राद्धानि दर्शितानि। नन्वेवं तिथिह्रासादेकस्मिन्नेव पक्षे चतुर्दशत्वादूर्द्धं चतुर्दश श्राद्धानि प्राप्नुवन्ति। एवं तिथिद्वयाहर्द्धौ षोड़श स्युः। न पञ्चदशतिथ्यात्मकत्वाच्छ्राद्धपक्षस्य दिने दिने पञ्चदशतिथिस्मिन्नर्थः तथा च एकस्मिन् दिने श्राद्धयोग्यतिथिद्वयलाभे श्राद्धद्वयम् अहोरात्रद्वयो वा श्राद्धदृष्टिः। तथा च विष्णुधर्मोत्तरप्रथमकाण्डम् "तिथिनैकेन दिवसश्चान्द्रमानेन कीर्त्तितः। अहोरात्रेण चैकेन सावनो दिवसः स्मृतः"। त्रिभागहीनं पक्षं वा इति षष्ठ्यादिकल्पं उक्तः त्रिभागमित्येकादश्यादिकल्पं उक्तः अर्द्धमेवेति त्रयोदश्यादिकल्पः। न तु अर्द्धमिति पञ्चार्द्धमिति व्याख्यानं कल्पतरूक्तं युक्तम् उत्तरोत्तरलघुकालोपदेशात् सन्निधानाच्च त्रिभागार्द्धप्रतीतेः। त्रिभागहीनत्रिभागपदयोरपि पञ्चम्यादिविवेचनं कल्पतरोर्न युक्तमेव पक्षामेच्चया पञ्चम्यादेस्त्रिभागहीनादिपदार्थत्वानुपपत्तेरसङ्गत्वात्। मोतषोडशपक्षस्यादिकल्पस्य सामान्योपक्रमात्साश्वयुक्परत्वम्। अतएव विष्णुधर्मोत्तरप्रथमकाण्डम् "उत्तरायणात् श्राद्धे श्रेष्ठं स्याद्दक्षिणायनम्। चातुर्मास्यञ्च तत्रापि प्रसूते केशवे स्थितम्। प्रौष्ठपद्याः परः पक्षस्तत्रापि च विशेषतः। पञ्चम्यूर्ध्वञ्च तत्रापि दशम्यूर्ध्वमतोऽपि च। सप्तम्यूर्ध्वा च तत्रापि ग्रस्ता राजन्त्रयोदशी। पञ्चम्यूर्ध्वदशम्यूर्ध्वमित्यनेन षष्ठ्यादेकादश्यादिकल्पावुक्तौ। न चैतेनैवाकरणे प्रत्यवायदर्शनं नित्यत्वज्ञापनार्थं तत्र च पक्षश्राद्धादिकल्पानां विषमशिष्टत्वेनेच्छाविकल्पाऽसम्भवादेकादेया तिस्रो देयाः अष्टेया इतिवत् फलभेदा कल्पनीयः। एतेषामेव कल्पानां दर्शितत्वादाश्विने कृष्णपक्षे एकस्मिन्नपि दिने श्राद्धं कर्त्तव्यमिति पक्षस्थितिर्नीयः सामान्यमासविहितन्तु स्यादेव। अत्र संशयः प्रौष्ठपद्यूर्ध्वं यः कृष्णपक्षः स पौर्णमास्यन्तमासस्यवस्थयाऽश्वयुक्कृष्णपक्षो भवति स यदा कन्योपक्रमः कन्यासमाप्यश्च तदा तत्र पक्षश्राद्धमविवादमेव यदा सिंहोपक्रमः कन्यासमाप्यश्च समस्त एव वा सिंहसमाप्यः तदा कीदृशः श्राद्धार्थः। अत्र त्रिकनिर्णयः। ब्रह्मपुराणादिवचनैरेवात्र व्यवस्था द्रष्टव्येत्याहुः। यथा ब्रह्मपुराणम् "यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः। तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा"। तथा भविष्यपुराणे "कन्यां गते सवितरि पितराजानुशासनात्। तावत् प्रेतपुरी शून्या यावदुत्थिकदर्शनम्। ततो दुश्चिक आयाते निराशाः पितरो नृप!। पुनः स्वभवनं यान्ति शापं दत्त्वा सुदारुणम्। हंसे वर्षासु कन्यास्थे श्राद्धेनापि गृहे वसन्। पञ्चम्या उत्तरे दद्यादुभयोर्वंशयोर्हितम्। स्थूर्ये कन्यास्थिते श्राद्धं यो न कुर्य्याद्गृहाश्रमी। कृतस्तस्य पुनं

पुत्राः पितृनिःश्वासपीडनात्" । इंधे ह्यर्थे इति । अत्र यदि कर्त्रं पितृश्राद्धकर्तुस्तदैवमर्थं परिशोध्यम् इत्यर्थः । तेनैवमादिवचनैः कन्यामत्स्यत्वेनैव श्राद्धप्रतिपादनात् एतस्यापि वचनस्य तदेकवाक्यतया गौरान्वितपरत्वम् । गौरपरत्वे लक्षणा स्यादिति चेन्न पौर्णमास्यन्तेऽपि तथात्वात् । अतः सिंहोपक्रमे लक्षणपक्षे कन्यावस्थस्थित्येव भागे श्राद्धं स्यात् न सिंहस्थस्थितौ अतः पञ्चश्राद्धं तत्र निवर्त्तते एव सिंहामङ्गीनसित्यादयः पक्षाकृत्य यथास्थानं द्रोलनीयाः । कन्यास्थस्थित्यपरपक्षे श्राद्धविधानात् उपक्रमे सिंहस्थत्वेऽपि पक्षस्य कन्यास्थत्वाऽऽख्येति चेन्न एकस्य पक्षावयविनः पक्षदर्शनिष्यानक्षत्राभावात् अत एव पक्षदशम्यादिषण्णमुदायमध्ये एकस्य पुरुषोत्तमस्थर्क्षे च सर्वेषां पुण्यभागिता एतत्कूर्मवेदं वचनं "ऋक्षाद्यैरन्वितं वारा या रविसुताः । नैते संयोगसालेख्ये वर्जनीया तिथिम्" । एकस्य तिथ्यवयविनोऽभावाद्विशेषः इतरथा तु पूर्वदिने रात्रौ चतुर्दशीयोगवादयोगे बुधवारेऽपि औदयुक्तचतुर्दशीविहितस्नानदानाद्यापत्तेः । यदा यस्य यत्रापरपक्षः सिंहार्के निवर्तेत तदा तं पक्षं विहाय कन्यागतापरपक्ष एव श्राद्धम् । अन्येषं पक्षसप्तकविरोधः । तथा जाबालिनिः "शुक्लध्वजनिपातात्तु यः स्यात् पक्षस्तु पञ्चमः । स विज्ञेयोऽपरः पक्षः श्राद्धं तत्र विधीयते । पुत्रमायुर्धनं धान्यं भूतिमारोग्यमेव च । प्राप्नोति पञ्चमे दत्त्वा श्राद्धं कामांस्तथा परान् । अतादेव हि सिंहस्थे पक्षमं यो व्यतिक्रमेत् । मघाक्षर्क्षातिक्रमेतु विहाय पञ्चमे पैतृकं विधिम्" । तथा शातातपः "श्राद्धाहोऽपरपक्षे कन्यां प्राप्ते सकृत्तु यः स्यात् पक्षस्तु पञ्चमः । तत्र श्राद्धं प्रकर्त्तव्यं कन्यां प्राप्नोतु वा न वा" । जाबालः "सप्तमेऽपि रवौ कन्यां श्राद्धं कुर्वीत मानवः । श्राद्धाद्याः पञ्चमः पक्षः प्रशस्तः सिंहकर्मणि" । अत्रते यूनेश्वरा लक्षणायां औदयिकतिथिविशिष्टत्वेन प्राशस्त्याभावात् प्रत्युत पूर्वादिकर्मस्थस्य वशमात् काम्यं तद्विधत्ते । कन्यागतस्य च नित्यत्वं प्रागेव दर्शितम् । न च श्राद्धाधिकारनिमित्ताधिकारयोरैक्यात्स्थित्वं श्राद्धकर्त्रधिकरणविरोधात् । तदयदि कन्यादित्या कन्यास्थस्थरहित एव श्राद्धं तथापि कन्यायास्थत्वं कर्त्तव्यम् । वस्तुतस्तु श्राद्धभेदे विधिगौरवापत्तेः कन्यागतश्राद्ध एव फलातिशया पञ्चमपक्षाश्रयफलविधिः तथा च केवलाशुनपक्षे श्राद्धमकृतमेव "कन्यां गच्छतु वा मेषं" पञ्चमपक्षस्तुल्यर्क्षं न तु कन्यास्थस्थाभावेऽपि श्राद्धविधायकं प्राप्ते कन्यागतत्वार्थं गुणफलविधित्वात् तदकृतं ब्रह्मपुराणे "पौर्णमास्यन्तमासेनैव समस्तिथिक्रमाभिधानात् अत्रयुक्तस्यापि पौर्णमास्यन्तपरत्वात् न गौरान्वितपरत्वम् "आश्वयुक्तां तु कन्यायां तयोदश्यां मघासु च" इति ब्रह्मपुराणेऽपि अत्रयुक्तपदस्यापि पौर्णमास्यन्तपरत्वावधारणात् पौर्णमास्यन्तान्वित एव मघा त्रयोदशी भवति न दर्शान्ते, लक्षणा च गौरेऽव्यविशिष्टा । अतएव न सूक्ष्मत्वाय दर्शान्तपरतापि ब्रह्मवाक्यानुपपत्त्या लक्षणाया धात्वसमधिकरणे दर्शितत्वात् । इदन्तु उच्यते उक्तयुक्तेः पौर्णमास्यन्तान्वितपरत्वे कन्यानिरपेक्षपक्षमपक्षे पक्षश्राद्धादिकल्पा नित्यतयाऽवश्यमनुष्ठेये न कन्याविशिष्टानिरपेक्षश्रुतेः अत एव न गुणफलविधिः । अत एव कन्यास्थस्थाद्वैरेव प्रौष्ठपदपूर्वे पक्षमपक्षे लक्षणपक्षश्राद्धादिकं दर्शयति विष्णुधर्मोत्तरपक्षमश्राद्धस्य "उत्तराद्यमात् श्राद्धे श्रेष्ठं स्यात् दक्षिणायनम् । यातुर्मास्यस्य तत्रापि पक्षमे केशवे स्थिते । प्रौष्ठपद्याः परः पक्षस्तत्रापि च विशेषतः । पक्षस्यूर्ध्वं तत्रापि दशम्यूर्ध्वं ततोऽपरे । मघा युक्ता च तत्रापि यस्यां रात्रौ त्रयोदशी । तत्राक्षयं भवेत् श्राद्धं मधुना पायसेन तु । अर्थस्थेऽपि कर्त्तव्यं श्राद्धमत्र पराधिप !। पराह्णभोजी त्वपरः श्राद्धमत्र तु कारयेत्" । अपि च कन्यास्थितयाश्च तथमानं तु कारयेत्" । अपि च कन्यास्थितयाश्च तथमानं पञ्चमपक्षानपेक्षयाङ्गान्तरविधायकत्वेन । कन्यागतस्यापि प्रौष्ठपद्यूर्ध्वपञ्चमपक्षमसङ्ख्येऽपि कन्यागतस्यापि श्राद्धस्य नित्यत्वेनावश्यमानस्य तत्तादेयसिद्धेर्न पृथक्करणम् । यदा न कन्यास्थसूर्यस्तदा कन्यागतेऽपि नित्यत्वात् कर्त्तव्यमेव परन्तु पक्षश्राद्धादिकल्पेषु प्रामाण्याभावात् अशक्ते अतः शास्त्रार्थ इति न्यायात् सकृदेव श्राद्धं कर्त्तव्यम् । अधिमासपाते तत्र श्राद्धं न कर्त्तव्यं यथा शातातपः "अधिमासकरणाद्धि" यत्किञ्चित् आब्दिकं धनेन । इदं वाप्यथ वा पूर्तं तत्र कुर्यान्नवेति च" । एवमधिमासदोषेऽपाटवादिना च तत्र श्राद्धाकरणे तु लाभां कर्त्तव्यतामाह ब्रह्मपुराणे "यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः । तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा" । अत्र कन्यातुलयोर्दिवाकरावस्थितेः क्रमादेव प्राप्तत्वात् क्रमात् श्राद्धस्य कालः स्यादित्यस्य सत्यकल्पानुकल्पभावेनेत्यर्थः ।

यस्य वा मृततिथिस्तस्य प्रेतपक्षं तत्सजातीयतिथिः पौर्णमासीमृतस्य तु भौष्रपद्येव पार्वणश्राद्धकालः इति हेमाद्रिप्रभृतिव्यवस्थेति पाश्चात्यदक्षिणात्यानां तथाचारः। प्रा०वि० तन्मूलवचनानामप्रामाण्यकत्वेनाक्षमत्वेनोपेक्षानां न तथाचार इति बोध्यम्। अधिकमपरपक्षशब्दे २११ पृ० द्रष्टव्यम्। [श्राद्धभेदे शिक्षा०।

प्रेतपटह प्रेतस्य प्रेतत्वसूचकः पटहः। मरणकालवाद्यनीये

प्रेतपति पु० ६त०। यमराजे

प्रेतपर्वत पु० प्रेतोद्धारणार्थः पर्वतः। गयातीर्थस्थे श्रमाख्याते पर्वते वायुपु० गयाप्र०।

प्रेतपिण्ड पु० प्रेताय देयः पिण्डः। पूरकपिण्डे तस्य प्रेतस्य पिण्डरूपदेहविशेषपूरकत्वात् पूरकसंज्ञा यथोक्तं ब्रह्मपु० "शिरस्यादेन पिण्डेन प्रेतस्य क्रियते यदा। द्वितीयेन तु कर्णाक्षिनासिकासु समाचरेत्। गलांसभुजवक्षांसि तृतीयेन तथा क्रमात्। चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च। जानुजङ्घे तथा पादौ पञ्चमेन तु सर्वदा। सर्वमर्माणि षष्ठेन सप्तमेन तु नाड्यः। दन्तलोमादयष्टमेन वीर्यं च नवमेन तु। दशमेन तु पूर्णत्वं तृप्तता तृप्तिपर्य्यायः"।

प्रेतपुर न० ६त०। यमालये "सूक्ष्मं प्रेतपुरं भवेत्" ब्रह्मपु०

प्रेतमेध पु० ६त०। पित्र्येऽग्नौ श्राद्धरूपे यज्ञे।

प्रेतराक्षसी स्त्री प्रेतस्य भूतभेदस्य राक्षसीव क्रूरतोऽपसर्पणकारित्वात्। तत्संज्ञायां रत्नमाला।

प्रेतराज पु० ६त० टच्समा०। यमे तस्य मृतस्य शुभाशुभकर्मविभजनेन शासनात् तथात्वम्।

प्रेतलोक पु० ६त०। यमलोके "प्रेतलोकं परित्यज्य आगता ये महालये" उक्तदानमन्त्रः।

प्रेतवन न० प्रेतानां मृतानां वनमिवाधारत्वात्। श्मशाने हेमच०। प्रेतशब्दनादयोऽस्य।

प्रेतवाहित त्रि० ३त०। भूतावेशे शिक्षा०।

प्रेतशिला स्त्री गयातीर्थस्थे प्रेतोद्धारणार्थे शुक्लपृष्ठपर्वतादिस्थे शिलाभेदेवायुपु० गयाप्र०। गरुडपु० ८५ अ० तन्माहात्म्यादि यथा "येयं प्रेतशिला ख्याता गयायां वा विधा स्थिता। प्रभासे प्रेतकुण्डे च गयासुरशिरस्यपि। धर्मेण धारिता भूत्वै सर्वदेवमयी शिला। प्रेतत्वं ये गता नृणां पित्राद्या बान्धवादयः। तेषामुद्धरणार्थाय यतः प्रेतशिला ततः। अतोऽत्र मुनयो भूपा राजपात्रादयः सदा। तस्यां शिलायां श्राद्धादिकर्त्तारो ब्रह्मलोकगाः। गयासुरस्य यन्मुण्डं तस्य दृष्टे शिला यतः। सुरम्यपृष्ठो गिरिस्तस्मात् सर्वदेवमयो ह्ययम्। सुरम्यपृष्ठस्य पार्श्वेषु यतो ब्रह्मसरोसुखाः। अरविन्दवनन्तेषु तेन चैवोपलक्षितः। अरविन्दगिरिर्नाम क्रौञ्चपादाङ्कितो यतः। तस्मात्गिरिः क्रौञ्चपादः पितृणां ब्रह्मलोकदः। गदाधरादयो देवा आद्या आदौ व्यवस्थिताः। शिलारूपेण च व्यक्तास्तस्मादेवमयी शिला। गयाशिरस्काद्दयित्वा गुरुत्वादास्थिता शिला। स्नात्वा प्रेतशिलादौ तु चरणाम्बुसुतेन च। पिण्डं दद्यादिभैर्मन्त्रैराद्यान्ते पितृन् परान्"।

प्रेतशुद्धि स्त्री प्रेते सति कालविशेषे शुद्धिः। विप्रादीनां मृतानां मरणनिमित्तकाशौचापगमे शुद्धौ "प्रेतशुद्धिं प्रवक्ष्यामि" मनुनोपक्रम्याशौचरूपतद्विरोधिनो दर्शनेन तदपगमे शुद्धिः प्रतिपादिता।

प्रेतशौच न० प्रेते सति शौचम् ६त०। प्रेते सति तन्निमित्ताशौचापगमे १शौचे २प्रेतसंस्कारभेदे च तत्प्रकारः गरुडपु० १०६अ० उक्तो यथा

"प्रेतशौचं प्रवक्ष्यामि तच्छृणुध्वं यतव्रताः!। जनद्वित्रिदिनं स्थित्वा कुर्यादुदकमन्वहः। आप्तप्रयाणादनुव्रज्य दूतरो ज्ञातिभिर्मृतः। यमलक्षं तथा जप्यं जपद्भिर्लौकिकाग्निना। स दग्धश्च यमेतत्तेदाहितान्नग्राहतार्थवत्। स्नानादुदयमाहापि ज्ञातयो ह्युपयन्त्यपः। अप नः शोशुचदघमनेन पितृदिङ्मुखाः। एवं मातामहाचार्यप्रेतानाप्योदकक्रियाः। कामोदकाः सखिसुहृत्सखीश्वशुरत्विजः। नामगोत्रेण शुद्धकं सकृत् सिञ्चन्ति वाग्यताः। पात्रस्थपतितस्नेहौ न कुर्युरुदकक्रियाम्। न ब्रह्मचारिणो स्नात्वा योषितः कामगास्तथा। सुरापास्त्वात्मघातिनो नाशौचोदकभाजनाः। अतो न रोदितव्यं हि श्रुत्वा जीवसंस्कृतिः। क्रिया कार्या यथाशक्ति ततो गच्छेद् गृहान् प्रति। विदध्य बिल्वपत्राणि नियता द्वारि वेश्मनः। आचम्याथाग्निसदकं गोमयं गौरसर्षपान्। प्रविशेयुः समाक्रम्य अश्मानि षट् शनैः। प्रवेशनादिकं कर्म प्रेतसंस्थर्षिणामपि। ईक्षतां तत्क्षणाच्छुद्धिः परेषां ज्ञानसंक्षयात्। क्षौतवस्त्रावृता भूमौ स्वपेयुस्ते पृथक् पृथक्। पिण्डवच्छादृता देयं प्रेतायाज्यं दिनत्रयम्। अन्नमेकाहमाकाशे स्थाप्यं क्षीरघृतान्वये। वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदिताः"।

प्रेतश्राद्ध न० प्रेतोद्देश्यकं श्राद्धम् । प्रेतोद्देश्यके आत्मश्राद्धादिसपिण्डीकरणान्तश्राद्धे तस्य गौणकालादि तिं०त० उक्तम् यथा "आमेऽन्यस्मिन् तिथौ तस्मिन् तदा दद्याद्द्विजत्रयः" । तथा श्रा०त० दर्शितं यथा "षोडशश्राद्धानां यत्प्रतिनवं कृष्णैकादश्यां तत्कर्त्तव्यम् । तथा च लघुहारीतः "श्राद्धविघ्ने समुत्पन्ने मृताहाऽविदिते तथा । एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः" । विशेषत इत्यभावस्थापेक्षया तस्यामपि विघ्नादौ विधानात् । यथा हेमाद्रिधृतं षट्त्रिंशन्मतम् "मासिके चाब्दिके त्वब्धि संग्रामे मृतसूतके । वदन्ति शुद्धौ तत्कार्यं दर्शे चापि विचक्षणैः" । राजमार्त्तण्डे "श्राद्धविघ्ने समुत्पन्ने अन्तरा मृतसूतके । एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः । श्राद्धविघ्ने समुत्पन्ने मृताहाविदिते तथा । अभावस्यां प्रकुर्वीत वदन्त्येके मनीषिणः" । अत्र मृतसूतकोपादानात् कृष्णपक्षवचनेऽशौचपदमेतत्परम् । यत्त्वन्तरा मृतसूतकेऽप्येकादश्यां श्राद्धविधानं तत् "हये पितृणां श्राद्धे तु अशौचं जायते यदि । तदशौचे व्यतीते तु तेषां श्राद्धं विधीयते । शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते । सा तिथिस्तस्य कर्त्तव्या नत्वन्या वै कदाचन" इति कृष्णपक्षवचनविरोधात् अशौचान्तदिने मलमासादिरूपविघ्नान्तरेण तत्करणे । अतएव श्राद्धविवेके व्यपाटवाद्यशौचाभ्यामपि पतितमेकोद्दिष्टमेकादश्याशौचान्ते च मलमासे न कर्त्तव्यं किन्तु मलमासाद्यापन्नकृष्णैकादश्यामेवेत्युक्तम्" ।

प्रेति पुं० प्रकर्षेण इतिर्गमनं देहेऽस्य । १अन्धे यजु० १५।६ वेददी० । प्र+इ–भावे क्तिन् । २मरणे स्त्री भट्टि० १।२१।४५।

प्रेतीषयि त्रि० प्राप्तगमने ऋ० ६।११।८

प्रेत्य अव्य० प्र+इ–ल्यप् । १लोकान्तरे अमरः "प्रेत्य संज्ञा नास्ति" श्रुतिः । २मृत्वेत्यर्थे प्रकर्षेण देहत्यागेन अन्यदेहं गत्वेत्यर्थे च । प्रेत्यजातिः प्रेत्यभावः ।

प्रेत्यजाति स्त्री प्रेत्य मृत्वा जातिर्जन्म । मृत्वा जन्मनि ।

प्रेत्यभाव पुं० प्रेत्य मृत्वा भावः । मरणोत्तरं पुनर्जन्मनि । "पुनरुत्पत्तिः प्रेत्यभावः" गौ०सू० १।१।१९ "उत्पन्नस्य कचित् सत्त्वनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभाव । उत्पन्नस्य सम्बन्धस्य सम्बन्धस्तु देहेन्द्रियमनोबुद्धिवेदनाभिः पुनरुत्पत्तिः पुनर्देहादिभिः सम्बन्धः पुनरित्यभावाभिधानम् यत् कचित् प्राणभृच्चिकाये वर्त्तमानः पूर्वोपात्तान् देहादीन् जहाति तत् प्रेति यत् ततोऽन्यत् देहादीनन्यानुपादत्ते तद्भवति प्रेत्यभावो मृत्वा पुनर्जन्म सोऽयं जन्ममरणप्रबन्धाभ्यासोऽनादिरपवर्गान्तः प्रेत्यभावो वेदितव्य इति" वात्स्या० । प्रवाहरूपेणानादिसम्बन्धः संसारः प्रेत्यभावः यथोक्तं कणा० सू० उप०ह० "इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिः" "ततसंयोगो विभागः" सू० "इदानीं धर्माधर्मयोः प्रयोजनं प्रेत्यभावश्च । ताभ्यां धर्माधर्माभ्यां संयोगोजन्म अपूर्वाभिः शरीरेन्द्रियवेदनाभिः सम्बन्धः संयोग इहोच्यते विभागस्तु शरीरमनोविभागो मरणम् तथा चायं जन्ममरणप्रबन्धः संसारः प्रेत्यभावापदनाम्ना धर्माधर्माभ्यामित्यर्थः अस्यैव च प्रेत्यभावस्याजरामरीभाव इति वैदिकी संज्ञा" । "जातस्य च ध्रुवोमृत्युर्ध्रुवं जन्म मृतस्य च" गीतायां च जन्ममरणप्रवाहस्य ध्रुवत्वमुक्तम् ।

प्रेत्वन् पुं० प्र+इ–क्वनिप् । १इन्द्रे २वाते मेदि० ।

प्रेमन् पुं०न०प्रियस्य भाव इमनिच् प्रादेशः एकाचकत्वात् न टिलोपः । १सौहार्दे २स्नेहे ३हर्षे मेदि०(यायौ स्त्री) शब्दलोमोक्तिः प्रामाटिकी । "यद्भावबन्धनं युवोः स प्रेमा परिकीर्त्तितः" उज्ज्वलनीलमणौ ४भावबन्धभेदे पुं०

प्रेमपालन न० प्रेम्णा स्नेहेन पालनं यत्र । १नेत्रजले २तदुपलक्षिते शोचने शब्दच्० ।

प्रेमबन्ध पुं० ६त० । गाढानुरागे ।

प्रेमभक्ति स्त्री प्रेम्णा भक्तिः । श्रीकृष्णे प्रेम्णा स्नेहेन भक्तौ तल्लक्षणं नारदपञ्चरात्रे उक्तं यथा "अनन्यममता विष्णौ ममता प्रेमसङ्गता । भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैरिति" । प्रेमभक्तेश्च माहात्म्यं भक्तेर्नोक्तमतः परम् । सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम्" । तच्चिह्नानि भाग०७स्क० उक्तानि यथा "निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि । यदाऽतिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति नृत्यते च । यदा यदभ्यस्त इव क्वचित्ह्वसति क्रन्दते ध्यायति वन्दते जनः । उद्भः शयन् वक्ति हरे ! जगत्पते ! नारायणेत्यात्ममतिर्गतत्रपः । तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुभयाकृताकृतिः । निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम्" ।

प्रेमिन् त्रि० प्रेमाऽस्यास्ति इनि टिलोपः । प्रेमयुते

प्रेयस् त्रि० अतिशयेन प्रियः प्रिय+इयसुन् प्रादेशः एकाचकत्वात् न टिलोपः । प्रियतमे स्त्रियां ङीप् "प्रेयस्यपि प्रोच्यते" प्रबोधच० । १पत्यौ पुं० ६त्र्याख्यायां स्त्री हेम० ।

प्रेरक त्रि० प्र+ईर–एवुल्। प्रयोजके प्रवृत्त्यनुकूलव्यापारबोधके।

प्रेरण न० प्र+ईर–णिच्–ल्युट्। प्रेषणे निजस्य भृत्यादेः कार्य्यादौ नियोगे। णिच्–युच्। प्रेरणायत्र स्त्री।

प्रेर्त्वन् पु० प्र+ईर–वनिप् तुट् च। १सागरे २नद्यां स्त्री ङीप् वनोर च। प्रेर्तुरी उज्ज्वलट०।

प्रेष गतौ भ्वा०पर० सक० सेट्। प्रेषति अप्रेषीत्। कदित् ष्वङ्ग न क्षुब्धः। अपिप्रेषत् त।

प्रे(प्रै)ष पु० प्र+इष–घञ् वृद्धिः ऐष–वा घञ् गुणः। १प्रेषणे २पीडने च जटा०।

प्रेषण न० प्र+इष–ल्युट्। प्रेरणे नियोगे। णिच्–युच्। प्रेषणाऽप्यत्र स्त्री। प्रेषणेन जीवति वेतना० टक्। प्रैषणिक तदुपजीविनि त्रि०। प्रेषणं नित्यमर्हति छेदा० ठक्। प्रैषणिक नित्यप्रेषणार्हे त्रि०।

प्रेष्ठ त्रि०अतिशयेन प्रियः प्रिय+इष्ठन्, प्रादेशः एकाच्कत्वात् न टिलोपः। १प्रियतमे अमरः। स्त्रियां टाप्। सा च २प्रियतमायां २जङ्घायाञ्च शब्दच०।

प्रे(प्रै)ष्य त्रि०प्र+इष–कर्म्मणि यत् वृद्धिः ऐष–वा यत् गुणः। १प्रेरणीये नियोज्ये २दासे अमरः। भावे यत्। ३प्रेरणे न० तत्करोति तत्–ट। प्रेष्यकर नियोगकारके "यन्तुः प्रेष्यकरोऽभवत्" भा०द्रो० २१अ०।

प्रेहिकटा स्त्री प्रेहि कट इत्युच्यते यस्यां क्रियायाम् मयू० स०। कटसम्बोधनक प्रगमनार्थक्रियानियोगे।

प्रेहिकर्दमा स्त्री प्रेहिकर्दम इत्युच्यते यस्यां क्रियायाम् मयू०स०। कर्दमसम्बोधनकप्रगमननियोगे। एवं प्रेहिद्वितीया प्रेहिवाचिका एतावपि शब्दौ मयू० समा०। द्वितयवाचिकसम्बोधनकप्रगमननियोगक्रिययोः। [स्त्रेहे

प्रेय न० प्रियस्य भावः पृथ्वा० इमनिचोऽभावे अण्। प्रियत्वे

प्रेयव्रत त्रि० प्रियव्रतस्येदम् अण्। प्रियव्रतसम्बन्धिनि वैवस्वतमनोः पुत्रभेदे अपत्ये तु इञ् प्रैयव्रति तत्रार्थे पु०।

प्रैष पु० प्र+इष घञ् वा पररूपाभावः। १क्षोभे २मर्दने ३उन्मादे ४प्रेरणे च मेदि०।

प्रोक्त न० प्र+वच–भावे कर्म्मणि वा, तस्याविवक्षायां मुख्ये वा कर्म्मणि क्त। १कथिते यं प्रति किञ्चित् वस्तु कथ्यते तस्मिन् २वचेर्मुख्यकर्म्मणि पदार्थे च।

प्रोक्षण न० प्र+उक्ष–भावे ल्युट्। १यज्ञार्थं पशुसेचने अमरः। २वधे ३सेचने च मेदि०। ४उक्षणकर्त्तरि तृच्–प्रोक्षितृ तत्पर्य्याये ३१२पृ० दृश्यम्। प्रोक्ष्यतेऽनया करणे ल्युट् ङीप्। ५प्रोक्षणसाधनेषु अपसु। स्त्री "अवभृथे प्रोक्षणीर्निधाय" कात्या० श्रौ० २।३४० "याभिरद्भिर्हविषः पुरोडाशानाञ्च प्रोक्षणं कृतं ताः प्रोक्षण्यः" कर्कः। उपचारात् ७तदाधारपात्रेऽपि स्त्री।

प्रोक्षित त्रि० प्र+उक्ष–कर्म्मणि क्त। १सिक्ते २निक्षिप्ते मेदि० यज्ञार्थं संस्कृते ३पश्वादौ च "भक्षयेत् प्रोक्षितं मांसम्" इति स्मृतिः "आरण्याः सर्व्वदैवत्याः प्रोक्षिताः सर्व्वशो मृगाः। अगस्त्येन पुरा राजन्! मृगया येन पूज्यते" तिथ्या०।

प्रोज्जासन न० प्र+उद्+जस–णिच्–ल्युट्। मारणे हेमच०

प्रोञ्छन न० प्र+उञ्छ–ल्युट्। मार्जने (पोँछा)।

प्रोज्झित त्रि० प्र+उज्झ–कर्म्मणि क्त। प्रकर्षेण त्यक्ते "धर्मः प्रोज्झितकैतवोऽत्र" भाग०१।१।२ श्लो० "तत्र प्रशब्देन मोक्षाभिसन्धिरपि निरस्तः" श्रीधरः।

प्रो(प्रौ)ढ त्रि० प्र+वह–क्त वा वृद्धिः। १वृद्धे अमरः २प्रगल्भे हेमच० ३निपुणे राजनि०। ४प्रकर्षेण ऊढे च। स्त्रियां टाप्। सा च ५नायिकाभेदे नायिकाशब्दे ४०४२ पृ० दृश्यम्। "त्रिंशद्वर्षादूर्ध्वं एव उच्चागदर्शनर्यन्नं प्रौढावस्था यथा"आ षोडशात् भवेद्बाला तरुणी त्रिंशता मता। पञ्चपञ्चाशता प्रौढा भवेद्वृद्धा ततःपरम्"। अस्या वयस्त्वकारणं यथा "बालङ्कारादिभिर्बाला तरुणी रतियोगतः। प्रेमदानादिभिः प्रौढा वृद्धा च वृद्धताऽऽनात्" । तस्या रसगे दोषो यथा "बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी। प्रौढा करोति वृद्धत्वं वृद्धा मरणदा भवेद्" रतिम०। चत्वारिंशद्वर्षादूर्द्धं वयसि "षोडशाब्दो युवा प्रौढस्त्वारिंशद्भिर्मनुः" तत्त्वसा०। "अर्थवद् ग्रहणेनार्थकस्येति" परिभाषया ऊढेः पृथग्यत्वाद्वा क्त वति न वृद्धिः किन्तु यथाकृतं प्रोढवान् इत्येव।

प्रो(प्रौ)ढपाद् त्रि०प्रौढः पादो यस्य। आसनारोपितपादादिके "आसनारूढपादस्तु जानुनोर्ऊर्ज्वन्योस्तथा। जङ्घायां सक्थिको यस्तु प्रौढपादः स उच्यते। स्नानभोजनं होमं भोजनं देवतार्चनम्। प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम्" इति कूर्म्मपु०। "अनेकवाक्ये दारुशिले भूमिसमे इष्टकाश्च संकीर्णीभूता" इति बौधायनवचनात्तथाविधे आरूढपादोऽपि न कुर्यात्" श्रा०त०।

प्रो(प्रौ)ढि स्त्री प्र+वह–क्तिन् वा वृद्धिः। १सामर्थ्ये २सामर्थ्यहेतुके क्रियासु योग्यताध्यवसाये ३दृढोक्तौ च प्रौढिवादः।

प्रोष्ठ पु० प्र+ओष्ठ–गतौ कर्त्तरि घञ् पृषो०। पतद्गृहे हारा०।

प्रोत त्रि० प्र+वे–क्त तौ क्त सम्प्रसारणम्। १प्रकर्षेण स्यूते २ग्रथिते वस्त्रे न० जटा०। भावे क्त। ३वीवने न०।

प्रोतोत्सादन न० प्रोतं सद् उत्सादयति उत्+सद–णि–ल्यु। १वस्त्रकुट्टिमे २छत्रे च त्रिका०।

प्रोत्फल पु० प्रकर्षेण उत्फलति प्र+उद्–फल–अच्। सिंहलाङ्गूलाकारपुष्पवति वृक्षभेदे शब्दमाला।

प्रोत्फुल्ल त्रि० प्र+उत्+फुल्ल–विकाशे अच्। विकसिते।

प्रोत्साहन न० प्रकर्षेण उत्साहनम्। प्रवृत्तस्य कर्त्तव्ये कर्मणि १प्रकर्षेण यत्नसम्पादने सा०द०उक्ते २नाट्यालङ्कारभेदे। प्रोत्साहनञ्च इत्यादिना तान्युद्दिश्य "प्रोत्साहनं स्यादुत्साहगिरा कर्मणि योजनम्" इति लक्षितम्। यथा "कान्तरात्रिकरालेयं स्त्रीति किं विचिन्तितं त्वया। तज्जगन्त्रितयं त्रातुं तात! ताड्यं ताड्यताम्"।

प्रोथ परिपूर्णतायाम् सामर्थ्ये च भ्वा०उभ०अक०सेट्। प्रोथति ते अप्रोथीत् अप्रोथिष्ट प्रुप्रोथ थे। छन्दसि चङि न ह्रस्वः। अप्रुप्रोथत् त।

प्रोथ पु०न० प्रु+थक्। १प्रस्थिते "हस्त्यश्वरथकान्तञ्च प्रियं प्रोथमनुव्रजेत्"। २अश्वनासिकायाम् अमरः। ३कव्यां पु० मेदि० ४भाटके पु० त्रिका०। ५स्त्रीगर्भे पु० विश्वः ६गर्त्ते ७भीषणे ८स्फिग्देशे ९अश्वसुखे च संक्षिप्तसारः १०पथिके त्रि० ११प्रथिते त्रि० त्रिका० १२स्थापिते त्रि० वि०कौ०।

प्रोथथ पु० प्रोथ–वा० अथ। सुखशब्दे ऋ० १०।९४।६भा०।

प्रोष पु० प्रुष–टाङे भावे घञ्। सन्तापे राजनि०।

प्रोषक पु० देशभेदे भा० भी० ९अ०।

प्रोषित त्रि० प्र+वस–क्त षट्। प्रवासं गते विदेशं गते। "आर्त्ताँस्तै स्तुदिता क्षुधे प्रोषिते मलिना कृशा" काशीख० पतिव्रतालक्षणम्।

प्रोषितभर्तृका स्त्री प्रोषितः भर्त्ता यस्याः कप्। यस्याः पतिः विदेशं गतस्तस्यां स्त्रियाम् "नानाकार्य्यवशाद् यस्याद्दूरदेशं गतः पतिः। सा मनोभवदुःखार्त्ता भवेत् प्रोषितभर्तृका" सा०द०।

प्रो(प्रौ)ष्ठ पु०प्रकृष्टः ओष्ठोऽस्य वा वृद्धिः। (पुँटि) मत्स्यभेदे रायमुकुटः। स्त्रियां ङीष्। २देशभेदे भा०भी० ९अ०। ३वर्षे च पुंस्त्री० बि०सौ०। प्रोष्ठपदशब्दे दृश्यम्।

प्रो(प्रौ)ष्ठपदा स्त्री प्रो(प्रौ)ष्ठो नौस्तत्स्थे पदं यस्याः। नक्षत्रविशेषे। तद्युक्ता पौर्णमासी अण् सा यत्र मासे पुनरण् वा न वृद्धिः। १चान्द्रभाद्रमासे अमरः। प्रोष्ठपदात् जातः अण् उत्तरपदवृद्धिः। प्रोष्ठपाद तच्छब्दे दृश्यम्। "जे प्रोष्ठपदानाम्" पा० षष्ठेः अबादौ नोत्तरपदवृद्धिः प्रौष्ठपद इत्येव।

२अश्विन्यादिषु सप्तविंशतिनक्षत्रयोः स्त्री ब०व० पूर्वोत्तरभाद्रपदयोः प्रत्येकं द्वित्वेन चतुष्कत्वात् बहुत्वम्। प्रोष्ठपदाभिर्युक्ता पौर्णमासी अण्। प्रौष्ठपदी चान्द्रभाद्रपौर्णमास्यां स्त्री ङीप् "प्रौष्ठपद्यामतीतायाम्"। प्रेतशब्दे दृश्यम्।

प्रोष्य अव्य० प्र+वस–ल्यप्। विदेशं गत्वेत्यर्थे तस्य पापीयसा वृत्तं भवू० समा० प्रोष्यपापीयस्। विदेशं गत्वा पापवत्करे त्रि०स्त्रियां ङीप्। "राघवः प्रोष्यपापीयान्" भट्टिः

प्रो(प्रौ)ह पु० प्र+वह–क्त वा वृद्धिः। प्रकृष्टवाहके

प्रोहकरटा पु० प्रोह करट इत्युच्यते यस्यां क्रियायाम् मयूर० समा०। करटसम्बोधनकप्रकृष्टोहार्थनिदेशक्रियायाम्। एवं प्रोहकर्दमा इत्यपि तस्य पाठान्तरे कर्दमसम्प्रदानकोहनिदेशक्रियायाम्।

प्रोह्यपद्दि अव्य० प्रोह्यौ पादौ यत्र प्रहरणे बहुव्रीहौ स०दच् समा० पद्भावः। प्रकर्षेण हाभ्यां पादाभ्यां प्रहरणे

प्रौढमनोरमा प्रौढानां प्रगल्भानां मनोरमयति रम्+णिच् युच्। अष्टोत्तरशतोक्तनायायाम् सिद्धान्तकौमुदीव्याख्यायाम्। [२निपुणे च धरणिः।

प्रौण त्रि० प्र+ओषृ–अपसारके अच्। १प्रकर्षेण अपसारके

प्रौष्ठिक त्रि० प्रोष्ठोऽस्यास्य ठक्। प्रकृष्टौष्ठयुते ततः शिवा० अपत्ये अण् प्रौष्ठिक तदपत्ये। [भाषावृत्तम्।

प्लक पु०प्र+कै–क रस्य लः। स्त्रीणामधोऽङ्गभेदे ऋ०८।२१।१९

प्लक्ष भक्षणे भ्वा०उभ०सक० सेट्। प्लक्षति ते अप्लक्षीत् अप्लक्षिष्ट पप्लक्ष क्षे। प्लक्षः।

प्लक्ष पु० प्लक्ष्यते कोटिः प्लक्ष–कर्मणि घञ्। (पाकुड़) १वृक्षे अमरः। प्लक्षसमीपस्थानात् २निःस्रुतायां सरस्वत्यां च भा०व० ८४अ०। तस्याः प्लक्षप्रस्रवणात् जातत्वात् तथात्वम् "प्रभवश्च सरस्वत्याः प्लक्षप्रस्रवणं यतम्" भा०भी० ५०अ०। ३प्लक्षद्वीपपरिक्षिप्ते द्वीपभेदे पु०

"प्लक्षो जम्बूप्रमाणो द्वीपः स्वादिकरो द्विरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकल्प स्वयमात्मयोगेनोपरराम। शिवं यवसं सुभद्रं शान्तं क्षेमसुखतमभयमिति वर्षाणि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः मणिकूटो

वज्रकूटः शतशृङ्ग इन्द्रसेनो ज्योतिष्मान् सुवर्णो हिरण्यष्ठीवो मेघमाल इति सप्तसैलाः । अरुणा नृम्णाऽऽङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः । यासां जलोपस्पर्शनविधूतरजस्तमसोहंसपतङ्गोर्ध्वायनसत्याङ्गसंज्ञास्त्वारो वर्णाः सहस्रायुषो विबुधोपमसन्दर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते" भाग० ५।२०। "क्षारोदेन यथा द्वीपो जम्बुसंज्ञोऽभिवेष्टितः । वेष्ट्येक्षारसदर्पिः प्लक्षद्वीपस्तथा स्थितः । जम्बुद्वीपस्य विस्तारः शतसाहस्रसंज्ञितः । स एव द्विगुणो ब्रह्मन् ! प्लक्षद्वीपोऽप्युदाहृतः । यज्ञ मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै । ज्येष्ठः शान्तभयो नाम शैशिरस्तदनन्तरः । सुखोदयनथानन्दः शिवः क्षेमक एव च । ध्रुवश्च सप्तमस्तेषां प्लक्षद्वीपेश्वरा इमे । पूर्वं शान्तभयं वर्षं शिशिरं सुखदं तथा । आनन्दञ्च शिवञ्चैव क्षेमकः ध्रुवएव च । मर्य्यादा कारकास्तेषां तथान्ये वर्षपर्वता । सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम ! । गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा । सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः । वर्षाचलेषु रम्येषु सर्वेष्वेतेषु चानघाः । वसन्ति देवगन्धर्वसहिताः सतत प्रजाः । तेषु पुण्याः जनपदाश्चिराञ्च म्रियते जनः । नाधयो व्याधयो वापि सर्वकालसुखं हि तत् । तेषां नद्यश्च सप्तैव वर्षाणान्तु सप्तदृगाः । नामतस्ताः प्रवक्ष्यामि शृताः पापं हरन्ति याः । अनुतप्ता शिखा चैव विपाशा त्रिदिवा क्रमुः । अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः । एते शैलास्तथा नद्यः प्रधानाः कथितास्तव । क्षुद्रनद्यश्च शैलास्तत्र सन्ति सहस्रशः । ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते । अपसर्पिणी न तेषां वै न चैवोत्सर्पिणी प्रजा । न तत्रास्ति युगावस्था तेषु स्थानेषु सप्तसु । त्रेतायुगसमः कालः सर्वदैव महामुने !" विष्णुपु०। कल्पभेदाख्यामभेदः । तदुत्तरं वनस्य घत्वम् प्लक्षवणम् । प्लक्षस्यादूरदेशादि छ नडा० कुकुच् । प्लक्षीय तत्समीपादौ त्रि० ।

प्लक्षजाता स्त्री प्लक्षात् तत्समीपस्थप्रस्रवणात् जाता । सरस्वत्यां नद्यां भा०व्या० १७०अ० । [२६अ० ।

प्लक्षतीर्थ न०प्लक्षसमीपस्थं तीर्थं शाक०त०। तीर्थभेदे हरिवं०

प्लक्षप्रस्रवण न० प्लक्षस्य समीपस्थं प्रस्रवणम् । सरस्वत्युत्पत्तिस्थाने भा०श० ५०अ० ।

प्लक्षराज पु० ६त०। शोभनतीर्थस्थिते प्लक्षभेदे भा०श०४४अ०

प्लक्षादि पु०फले अण्प्रत्ययलुगनिमित्ते शब्दभेदे स च गणः पा० ग० उक्तो यथा "प्लक्ष न्यग्रोध अश्वत्थ इङ्गुदी शिंशु रुरु कक्षत इङ्गती" ।

प्लक्षावतरण न० अवतरत्यस्मात् अव-तॄ-अपादाने ल्युट् प्लक्षः तन्निकटस्थितप्रस्रवणरूपमवतरणम् । सरस्वत्या अवतरणस्थाने प्लक्षप्रस्रवणे भा०व० ८६अ० ।

प्लति पु० प्लु-वा० डति । ऋषिभेदे ऋ० १०।८४।१७

प्लव न०प्लु-अच् । १कैवर्त्तीसुस्तके २गन्धरसे मेटि० । प्लुत्वा ३गन्तरि त्रि० । भावे अप् । ४प्लवने (भासा) कर्त्तरि करणे वा अप । ५भेके ६भेलके (भेला) ७मेघे ८अश्वपचे ९वानरे १०जलकाके ११कुलके १२प्रवणे १३पर्वतोद्देशे १४कारण्डवखगे १५शब्दे १६प्रतिगतौ च पु० मेदि० । जातित्वे स्त्रीत्वमपि स्त्रियां ङीष् । १७मेरणे १८अश्वतरौ च पु०शब्दरत्ना० । १९जालभेदे हेमच०२०पलवे (पोलो) सत्सुधारणयन्त्रभेदे त्रिका० । २१जलकुक्कुटे मिता० २२जलचरपक्षिगणभेदे यथोक्तं भावप्र० "हंससारसकाचाक्षचक्रीकुररारिकाः । नान्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः । प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः" । एतेषां मांसगुणाः । "प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः । वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः" ।

प्लवक त्रि० प्लु-वा० अक । १प्लुतगतिकारके २खगधारादौ नर्त्तके त्रिका० ३चण्डाले हला० ४भेके ६प्लक्षे राजनि०

प्लवग पु० प्लवेन सन् गच्छति गम-ड नि० । १वानरे २भेके ३सूर्य्यसारथौ मेदि० ४प्लवसंज्ञखगे शब्दर० । ५शिरीषवृक्षे राजनि० । [भेकानां गतौ स्त्री ।

प्लवगति पु० प्लवेन गतिरस्य । १भेके शब्दच० । ६त० । प्लवानां

प्लवङ्ग पु० प्लवेन् सन् गच्छति गम-ड खच् मुम् नि० । १वानरे २मृगे शब्दच० । ३प्लक्षवृक्षे राजनि० । [३वानरे अमरः ।

प्लवङ्गम पु० प्लवेन् सन् गच्छति गम-खच् मुम् नि० । १भेके ।

प्लवन त्रि० प्लु-ल्यु । १निम्ने प्रवणे क्रमनिम्नतां गन्तरि "प्रागुदक् प्लवनां भूमिं कारयेत् यत्नतो नरः" ति०त० सत्सुपु० । भावे ल्युट् । जलोपरि गतौ न० (भासा) ।

प्लविक त्रि० प्लवेन तरति ठन् । प्लवेन तारिणि ।

प्लाक्ष न० प्लक्षस्य समूहः, तस्य विकारस्य फलं वा अण् न लुप् । १प्लक्षवृक्षफले २तद्विकारे ३तत्समुदाये च ।

प्लायोगि पु० प्रयोगनाम्नः राज्ञः पुत्रः इञ् वेदे रक्ष लः । प्रयोगनाम्नः राज्ञः पुत्रे ऋ० ८।१।२२

म्लावन न० म्लु–णिच्–ल्युट् । (उपलान) द्रवद्रव्यस्य समन्ता-
द्गतौ "तापयं घृततैलादेः प्लावनं गोरसस्य च । तन्मात्र-
सुद्धृतं कुर्य्यात् कांठनं तु पयोदधि" शु०त० । २निमज्जनस-
म्पादने २अवतरणसंयोजने च । करणे ल्युट् ङीप् ।
४भूतानां धारणाभेदे स्त्री "तत्रानी प्लावनी चैव गौरणी
भामनी तथा । स्तोचनी च भवत्येताः भूतानां पञ्च
धारणाः" कालीख० ४४अ० । [माघः १२२६ ।

म्लावित त्रि० म्लु–णिच्–क्त । जलादिना समन्तात् व्याप्ते

म्लायि स्त्री प्रकर्षेणाश्नाति भुङ्क्तेऽनया प्र+अश–करणे इ
रेटे रुट् चः । गिरिमूलम्बनाद्याम् यजु० २५।७

म्लाशुक पु० प्रकर्षेण आशु काशते भवति कै–क बेटे रुट् चः । प्रकर्षेणाशु पच्यमाने व्रीहौ "प्लाशुकानां व्रीहीणां
सविता वै देवानां प्रसविता सवितृप्रसूतः शूद्र एतद्यत्
यत् प्लाशुकानां व्रीहीणां क्षिप्रे मा प्रसुवानिति" शत०
ब्रा० ५।३।१।२ "प्लाशुनां क्षीरे" आर्द्रपर्णं यावत् क्षुद्रे
तदेनमग्निरेव गृहपतिर्गार्हपत्यमभिपरिणयत्यथ यदा
प्लाशुनां क्षिप्रे मा परिणयानिति" श्रु० "प्लाशुकानाम्
प्रकर्षेणाशु शीघ्रं पच्यमानानां पुनः प्ररूढानां व्रीही
णाम्" रेफस्य छान्दसो लत्वनिर्देशः । प्रसुवान् प्रसुवन्तु
प्रेरयन्तु । प्लाशुकाः पुनःप्ररूढव्रीहय इत्युक्तम् ततो-
ऽप्यधिककाले पच्यन्ते पाच्यमानाः षष्टिका व्रीहयःप्लाश-
वः तेषामायुत्वं च त्रिचतुरमासनियतपरिपाकव्रीह्यपे-
क्षम्" भा० ।

म्लाशुचित् अ० शीघ्रे प्राशु इत्यस्य पाठान्तरं निघण्टुः ।

म्लिह् गतौ भ्वा०पर०सक०सेट् । म्लेहति अम्लेहीत् म्लिग्धः ।

घि(म्ली)हन् पु० म्लि–कनिन् पृषो० वा दीर्घः । (घिला)
१वामकुक्षिपार्श्वस्थे प्लीहाख्ये यन्त्रे तद्वृद्धिहेतुके २रोगभेदे
च तच्चिह्नादि भावप्र० उक्तं यथा
"विदाह्यभिष्यन्दिरसस्य जन्तोः प्रदुष्टमत्यर्थमसृक्कफाभ्यां ।
प्लीहाभिवृद्धिं कुरुतः प्रवृद्धौ तं प्लीहसंज्ञं गदमाक्सनन्ति ।
वामे स पार्श्वे परिवर्द्धमेति विशेषतः सीदति चातुरोऽत्र ।
मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः प्लीहवतोऽतिमात्रम् ।" । विदाहि कुलत्थमाषसर्षपशाकादि ।
अभिष्यन्दि माहिषं दध्यादि । कफपित्तलिङ्गैरुपद्रुत इ-
त्यर्थः । प्रदुष्टमत्यर्थमसृक्कफाभ्यामिति संप्राप्तिः असृजः पि-
त्तस्य च स्थानधर्मत्वात् । रक्तजमाह "श्लक्ष्णो श्यामो
विदाहश्च वैवर्ण्यं गात्रगौरवम् । प्लीहो रक्तोद्भवस्यैतं
ज्ञेयं रक्तजलक्षणम् । पैत्तिकस्य लक्षणमाह "ज्वरः
सपिपासश्च सदाहो प्लीहसंयुतः । पीतगात्रो विशे-
षेण प्लीहा पैत्तिक उच्यते" । श्लैष्मिकलक्षणमाह
"प्लीहा मन्दश्यावस्निग्धः कांठनो गौरवान्वितः । अरो-
चकेन संयुक्तः प्लीहा कफज उच्यते" । वातिकमाह
"नित्यमानद्धकोष्ठः श्वासित्योदावर्त्तपीडितः । वेद-
नाभिः परीतश्च प्लीहा वातिक उच्यते" । तमसाध्यमाह
"दोषत्रितयरूपोऽन्यः प्लीहाऽसाध्यो भवत्यपि" भावप्र० ।
तत्रैवान्यत्र तत्स्थानसक्तं यथा "अथ शरीरावयवविशेषस्य
यकृत्प्लीहस्वरूपमाह "अधो दक्षिणतश्चापि हृदयादुदयतः
स्थितिः । तत्तु रक्तकफिलस्य स्थानं गोधिमलं मतम्"

प्ली गतौ क्रया० पर० सक० अनिट् । प्लीनाति अप्लैषीत् ।
अयं धातुः कविकल्पद्रुमे न दृश्यते धातुपाठे पाठान्त-
रेऽस्ति । [कुत्सयति दुग्धभेदे शब्दच० ।

प्लीहघ्न पु० प्लीहानं हन्ति हन–क । (रोहा) दाडिमवृक्ष-

प्लीहगत्रु पु० ६त० । प्लीहग्रहणे अमरः ।

प्लीहा स्त्री प्लिह–क पृषो० दीर्घः । प्लीहरोगे भरतः ।

प्लीहारि पु० ६त० । अश्वत्थवृक्षे शब्दच० ।

प्लीहोदर न० उदररोगभेदे उदरशब्दे ११४६ पृ० दृश्यम् ।

प्लु गतौ उदात्तः प्लुत्य गतौ च भ्वा०आत्म०सक० अनिट् । प्लवते
अप्लोष्ट प्लुप्लुवे । अयं त्रिमात्रतयोच्चारणे च प्लुतशब्दे
स्त्रि०कौ० प्लवते इति निर्देशात् । गतौ निघण्टुः ।

प्लुञ्चि पु० प्लुच–दाहे किच्च । १वञ्चौ उज्ज्वलद० । २वृक्षे
३वटवृक्षदाहे संक्षिप्तसारः ।

प्लुत न० प्लु–भावे क्त । १अश्वगतिभेदे अमरः । २तिर्य्यग्-
गतौ १लम्फेन गतौ त्रिमात्रकालेनोक्तार्थे वर्णे पु० "एक-
मात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु
प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्" प्रबोधकारिका । अस्य
ह्रस्वदीर्घाभ्यां त्रिमात्राकारभेदाभावेन तदुत्तरवर्त्तित्वमुक्तं नैव
तथात्वसूचनं न तु लेखनेऽप्याकारविशेषोऽस्ति । प्लुतत्व
विधायकानि पा०सूत्राण्यपि वृत्तिकानि संदर्शनायात्र
प्रदर्श्यन्ते "वाक्यस्य प्लुत उदात्तः" पा० इत्यधिकृत्य
"प्रत्यभिवादेऽशूद्रे" पा० "अस्यूद्रविषये प्रत्यभिवादे अदू-
राक्य तस्य टेः प्लुतः स्यात् । अभिवादये देवदत्तोऽहम् ।
भो आयुष्मानेधि देवदत्त ।३। स्त्रियाञ्च अभिवादये गा-
र्य्यहं भो आयुष्मानेधि गार्गि ।। नामगोत्रं वा यत्र
प्रत्यभिवादवाक्यानि प्रयुज्यते तत्रैव प्लुत इष्यते नेह
आयुष्मानेधि भोः । राजन्यविशामिति वाच्यम् । आयुष्मा-
नेधि भो । आयुष्मानेधीन्द्रवर्मन्नु आयुष्मानेधीन्द्रपालित

सि॰कौ॰ "दूराद्धूते च" पा॰ । "दूरात् सम्बोधने यदाक्यन्तस्य टेः प्लुतः स्यात् । यज्ञदत्त पिब देवदत्त३ !" हे हे प्रयोगे हैहयोः" पा॰ । एतयोः प्रयोगे दूराद्धूते यदाक्यन्तस्य हैहयोरेव प्लुतः स्यात् । हे३ राम ! राम ! हे३ "गुरोरनोऽनन्त्यस्याप्येकैकस्य प्राचाम्" पा॰ दूराद्धूते यदाक्यन्तस्य कङ्गिन्नस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात् । देवदत्त । देवदत्त३ । देवदत्त३ । गुरोः किम् । वकारात् परस्य वकारस्य मा भूत् । अन्तः किम् । ब्राह्मणाः एकैकपदस्थं पर्यायार्थम् । इह प्राचामिति योगो विभज्यते तेन सर्वः प्लुतो विकल्प्यते "अप्लुतवदुपस्थिते" पा॰। उपस्थितोऽनार्ष इतिशब्दस्तस्मिन् परे प्लुतोऽप्लुतवद्भवति । अप्लुतकार्यं यणादिकञ्चरोति । इलोक३ इवि । श्लोकेति । वत् किम् कप्लुत इत्युक्ते प्लुत एव निषिध्येत तथा च प्रश्नाख्याने प्रकृतिभावे प्लुतस्य श्रवणञ्च स्यात् । अग्नी३ इति । "३१ चाक्रवर्मणस्य" पा॰३१ प्लुतोऽचि परेऽप्लुतवद्वा स्यात् । चिनुहीति चिनु हि३ इति । चिनु हि३ इदं चिनुहीदम् । उभयत्र विभाषेयम् "ओमभ्यादाने" पा॰ ओंशब्दस्य प्लुतः स्यात् आरम्भे । ओ३म् अग्निमीले पुरोहितम् । अभ्यादाने किम् ओमित्येकाक्षरम् "ये यजामहे" पा॰ येऽ यजामहे । यजेति किम् ये यजामहेऽ "प्रणवष्टेः" पा॰ यज्ञकर्मणि टेरोमित्यादेशः स्यात् । अपां रेतांसि जिन्वतोऽम् । टेः किम् कृष्णन्ने अत्रस्य मा भूत् । "याज्यान्तः" पा॰ ये याज्यान्ता मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि । जिह्वामग्ने ! चकृषे हव्यवाहम्। अन्तः किम् । याज्यानान्तु यां वाक्यसंदायरूपाणां प्रतिवाक्यं टेर्न स्यात् । इषान्तस्य चेष्यते "ब्रूहिप्रेष्यश्रौषडयौषडाङ्गैनामादेः" पा॰ एषामादेः प्लुतो यज्ञकर्मणि । अग्नये३ऽनुब्रूहि । अग्नये गोमयानि प्रेष३य । अग्नु श्रौ३षट् । सोमस्याग्ने ब्रूहि वौ३षट् । अग्निमा३वह "अग्नीत् प्रेषणे परस्य च" पा॰ अग्नीधः प्रेषणे आदेर्यः प्लुतस्तस्मात् परस्य च । ओ३ आवह गेह अग्नीदग्नीत् विधत्र३ । अङ्गिन्नृणोहि३ । "विभाषा पृष्टप्रतिवचने हेः" पा॰ प्लुतः । अकार्षीः कटम् अकार्षं हि३ । अकार्षं हि । पृच्छेति किम् कटं करिष्यति हि३ । हेः किम् करोमि ननु "निषेधानुयोगे च" पा॰ यत्र यदाक्यस्य टेः प्लुतो वा । अद्यामावास्येत्यत्र३ । अत्र अमावास्येत्येवंवादिनं वृक्त्वा स्वयंतात् प्रत्याह एवमनुयुज्यते । "आम्रेडितस्यर्तने" पा॰ दस्रो दस्रो३ घातमिषमूर्जाम् त्वाम् । आम्रेडितग्रहणं किमोषत्स्पष्टतार्थम् । चोर३ चोर । "अङ्गयुक्तान्निङाकाङ्क्षम्" पा॰ अङ्गेत्यनेन युक्तान्निङन्तं प्लुतते । अङ्ग कूजन्३ इदानीं ज्ञास्यसि लालम्य ! । तिङ किम् ? अङ्ग देवदत्त । मिथ्या वदसि३ । आकाङ्क्षं किम् अङ्ग पच नैतदपरमाकाङ्क्षति । भर्त्सन इत्येव । अङ्गाधीष्व भक्तन्ते दास्यामि । "विचार्यमाणानाम्" पा॰ वाक्यानां टेः प्लुतः । श्रोतव्यं दीक्षितस्य गृहान्३ इ । (वक्ष्यमाणेन एतः स्थाने इः) न श्रोतव्यान्३मिति । श्रोतव्यञ्च श्रोतव्यमिति विचार्यते । प्रमाणैरस्तुतत्त्वपरीक्षणं विचारः । "पूर्वन्तु भाषायाम्" पा॰ विचार्यमाणानां पूर्वमेव प्लुतते । अग्निर्तु३ रज्जुर्तु । प्रयोगापेक्षत्वं पूर्वत्वम् । इह भाषायङ्गणात् पूर्वयोगस्यच्छन्दसीति ज्ञायते । "प्रतिश्रवणे च" पा॰ वाक्यस्य टेः प्लुतोऽभ्युपगमे प्रतिज्ञाने श्रवणाभिमुख्ये च । गां मे देहि भो इन्द्रदत्ते ददामि३ । नित्यः शब्दो भवितुमर्हतीति३ । देवदत्त ! किमात्थ३ । "अनुदात्तं प्रश्नान्ताभिपूजितयोः" पा॰ अनुदात्तः प्लुतः स्यात् । दूराद्धूतादिर्न सिद्धस्य प्लुतस्यानुदात्तत्वमात्मनेभाषेयो यते । अग्निभूत३ इ । पटो३ ऽ । अग्निभूते पटो एतयोः प्रश्नान्ते टेरनुदात्तः प्लुतः । शोभनः खल्वसि३माणवक३। "चिदिति चोपमार्थे प्रयुज्यमाने" पा॰ वाक्यस्य टेरनुदात्तः प्लुतः । अग्निचिद्वायाश्३त् । अग्निचिदिव भायात् उपमार्थं किम् कथञ्चिदाह । प्रयुज्यमाने किम् अग्निर्माणवको भायात् "उपरिस्विदासीदिति च" पा॰ टेः प्लुतोऽनुदात्तः स्यात् । उपरिस्विदासीद३त् । अधःस्विदासीद३दित्यत्र तु विचार्यमाणानामित्युदात्तः प्लुतः । "स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु" पा॰ स्वरितः प्लुतः स्यादाम्रेडिते परेऽसूयादौ गम्ये । अस्रुवायाम् अभिरूपक३ अभिरूपक रिक्तान्न आभिरूप्यम् । सम्मतौ । अभिरूपक३ अभिरूपक शोभनोऽसि । कोपे । अविनीतक३ अविनीतक इदानीं ज्ञास्यसि लालम्य ! । कुत्सने । याक्षीक३ याक्षीक रिक्ता ते शक्तिः । "क्रियाशीःप्रैषेषु तिङाकाङ्क्षम्" पा॰ आकाङ्क्षस्य तिङन्तस्य टेः स्वरित प्लुतः स्यात् आचारभेदे आशिषि प्रैषेषु गम्यमानेषु । स्वयं ह रथेन यातिर३ उपाध्यायं पदातिं गमयति । प्रार्थनायाम् । पुत्रांश्च लपसीद३ धनञ्च तात । व्यापारणे । कटं कुरु३ ग्रामं गच्छ । आकाङ्क्षं किम्

दीर्घायुरसि अग्नीदग्नीन्विहर। "अनन्त्र्यस्यापि प्रश्नाख्यानयोः" पा० अनन्त्र्यान्त्रश्नाख्यापि पदस्य टेः स्वरितः प्लुत एतयोः। प्रश्ने। अगमश्चः पूर्वांश्चन् आमाश्चन्। सर्वपदानामयम्। आख्याने अगमश्चम् पूर्वांश्चन् आमाश्चन्। "प्लुतावैचइदुतौ" पा० यत्र दूराद्धूतादिषु प्लुतो विहितस्तत्रैव ऐचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लवेते। ऐ३ तिकायन!। औ३ प्रगव। चतुर्मात्रावत्र ऐचौ सम्पद्यते। "एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यादुत्तरस्येदुतौ" पा० अप्रगृह्यस्य एचोऽदूराद्धूते प्लुतविषये पूर्वस्यार्द्धमाकारः प्लुतः स्यादुत्तरस्य स्वर्णस्य इदुतौ स्तः। प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाच्यान्तेषेव। प्रश्नान्ते। अगमश्चः पूर्वांश्चन् आमाश्चन् अग्निभूतश्च इ। अभिपूजिते। भद्रं करोषि पटश्च उ। अर्थमाक्षे। होतव्यन्होत्रितस्य गृहश्च इ। प्रत्यभिवादयुष्मानेधि अग्निभूतश्च इ। याच्यान्ते। सोमैर्वधेमान्नवश्च इ। परिगणनं किमु विष्णुभूतेश्च धातयिष्यामि त्वाम्। अदूराद्धूत इति न वक्तव्यम्। पटान्यपहरन्तु कर्त्तव्यम्। इह मा भूत् भद्रं करोषि गौरिति। अप्रगृह्यस्य किमु शोभने माङेश्च। "आमन्त्रिते कन्दसि प्लुतविकारोऽयं वक्तव्यः। अम्बश्च इ पत्नीव" त्रि०कौ०

प्लुति स्त्री प्लु–भावे क्तिन्। प्लवने उत्प्लुत्यगमने। प्लुतिश्च यथादीनामिव गतिः (क्वचिदपि) समन्तात् अजादेर्गतिश्च। त्रिमात्रप्लुतयोश्चारण्ये च।

प्लुष दाहे भ्वा०पर०सक० सेट। प्लोषति अप्लोषीत्। प्लुष्टवान् क्त्वा वेट। प्लुषित्वा प्लुष्ट्वा।

प्लुष दाहे दिवा०पर०सक० सेट्। प्लुष्यति अदित् अप्लुषत्।

प्लुष सेके पूर्त्तौ च सक० स्नेहे अक० क्र्या० पर० सेट्। प्लुष्णाति अप्लोषीत् पुप्लोष।

प्लुषि पु० प्लुष–वा० कि। वकतुल्यतुण्डयुक्ते १खगभेदे यजु० २४।२९ वेददीपः। २दाहके सर्पभेदे ऋ० १।९१।१भा०। ३अल्पपरिमाणपुत्तिकादेहे शत०ब्रा० १४।४।१।२४ माधवे ६अग्रम्। [अदङ्गम् भाग०

प्लुष्ट त्रि० प्लुष–क्त। दग्धे अमरः। "द्रोणयस्त्वविप्लुष्टमिदं

प्लुस दाहे विभागे च दिवा०पर०सक० सेट्। प्लुस्यति इरित् अप्लुसत् अप्लोसीत् पुप्लोस। [तैत्ति० ७।५।८।५

प्लेङ्ख पु० प्र+इङ्ख–घञ् वेदे रस्य लः। प्रेङ्खणे प्रकृष्टकम्पने

प्लेव सेवने भ्वा०आत्म०सक०सेट्। प्लेवते अप्लेविष्ट। पिप्लेवे क्वदित् च ङः न हस्वः।

प्लोत न० प्र+वे–क्त संप्र०रस्य लः। सुश्रुतोक्ते शस्त्रकर्मोपकरणभेदे "अतोऽन्यतमं कर्म चिकीर्षता वैद्येन पूर्वमेवोपकल्पयितव्यानि तद्यथा यन्त्रशस्त्रक्षाराग्निशलाका घृतङ्गजलौकालाबूजाम्बवोष्ठपिचुप्लोतसूत्रपत्रपट्टमधुघृतवसापयस्तैलतर्पणकषायालेपनकल्कव्यञ्जनशीतोष्णोदकशकटाद्यादीनि"। [दाहे न०

प्लोष पु० प्लुष–भावे घञ्। दाहे अमरः। भावे ल्युट्। प्लोषण

प्सा भक्षणे अदा०पर०सक० अनिट्। प्सातति अप्सासीत्। पप्सौ। गतौ निघण्टुः।

प्सा स्त्री प्सा–भावे अङ्। भक्षणे त्रिका०।

प्सात त्रि० प्सा–कर्मणि क्त। भक्षिते अमरः।

प्सान न० प्सा–भावे ल्युट्। भोजने हेमच०।

प्सु पु० प्सा–वा कु। रूपे निघण्टुः।

प्सुर त्रि० प्स+वा० अर्थे र। रूपवति ऋ०१०।२६।२भाष्ये

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसंकलिते वाचस्पत्ये
फकारादिशब्दार्थसङ्कलनम्।

फकारादिषु शब्देषु केचित् शब्दा न सङ्कलिता केषाञ्चिच्चार्थभेदा भ्रमात्रोक्तास्ते
इतःपरं परिशिष्टे प्रदर्श्यन्ते।

परिशिष्टम्

४२२५पृष्ठस्यपद्मशब्दपरिशिष्टम्

"अष्टकासु भवेत् पद्मं तत्र दत्तं तथाऽक्षयम्" हेमा० श्रा० जातूकर्ण्योक्ते १५ अष्टकाश्राद्धे ।

४२२५पृष्ठस्य पद्मकशब्दपरिशिष्टम्

"यदा विष्टिर्व्यतीपातो भानुवारस्तथैव च । पद्मकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणम्" हेमा०श्रा० पद्मोक्ते श्राद्ध-५कालभेदे न० ।

४२१४पृ० पारावतशब्दस्य परिशिष्टम्

सर्वार्थचिन्तामण्युक्ते क्षेत्रहोराटङ्काणादिदशवर्गमध्ये येषु केषु चित् षट्सु शुभांशेषु । प्रसङ्गात् क्षेत्रादिदशवर्ग-निरूपणेन तत्र दित्यादिवर्गे एकैकस्य योगे नव विशेष-संज्ञाः तत्फलञ्च तत्रोक्तं प्रदर्श्यते तत्र क्षेत्रशब्दे क्षेत्रपतय उक्ताः टङ्काणाद्यधीश्वराः सर्वार्थ०उक्ता यथा "राशिं त्रिधाहृत्य टङ्काणमाद्यस्तदीश१ पुत्रेश२ शुभाधि-नाथाः६। युजीन्दुसूर्यौ भवने रवीन्दू नाथौ त्वयुग्मे भवनस्य चाद्ये" । चरेऽंशकानामधिपास्तदंशा राशौ स्थिरे तन्नवमेश्वराद्याः । द्विर्देहभे तत्सुतराशिनाथाहदन्ति शास्त्रार्थविदो महान्तः । तत् क्षेत्रपा द्वादशभागनाथा लग्नस्य वर्गाधिपतिस्तदीशात् । त्रिभांशपा भौमशनीज्य सौम्यशुक्रा भवन्त्योजगटहे समे तु । विलोमतः पन्नग-राक्षसप्रवाणाः क्रमाद्दुचरनैकशास्त्रैः । सप्तांशपास्त्वोज-गटहे तदीशाद्युग्मे गटहे सप्तमराशिपात्तु । दशांशपा-नामधिपास्तदीशादोजे समे तन्नवमेश्वराद्याः । ओजे १५कलानामधिपास्तदीशास्तर्क्षो (अंश) विष्णु४५हरौ दिनेश५०। युग्मे क्रमाद्व्ययमेव राशौ षष्ट्यंश१०कानाम-धिपास्त्वयुग्मे । घोरांशको१ राक्षस२ देवभागौ३ कुबेर४ रक्षोगण५ किन्नरांशाः६ । भद्र७ कुलघ्नो८ गरलाऽग्नि-संज्ञौ९० मायांशकः११ प्रेतपुरीशभागः १२ । व्यपां पति-१३र्दैत्यगणेशभागः१४ कालाग्नि१५रहिभागा१६वमृतांशु१७ चन्द्रौ१८ । मृद्वंशकः१९ कोमल२० पद्मभागौ२१ ल-क्ष्मीश२२ वागीश२३ दिगम्बरांशाः२४ । देवार्द्रभागौ२५ २६। कलिनाशभागः२७ क्षितीरश्वांशः२८ कमलाकरांशः २९ । क्रमेण मन्दालज३० मृत्यु३१काल३२ दा-वाग्निघोराऽ३३मय३५ कण्टकाश्च३६ । सुधास्रुतांशुः३८ परिपूर्णचन्द्र३९ विप्रप्रदग्धौ४० कलिनाश४१सुख्यौ४२ । वंशक्षयोत्पातककालरूपाः ४३।४४।४५ सौम्य४६श्च मृद्वंश ४७ सुशीतलांशु ४८। दंष्ट्रा४९ करालो दुष्टश५१प्रणीता-५२ कालाग्नि५३दण्डायुध५४निर्मलांशाः५५ । शुभाशु-भांशा५६।५७ वतिर्शीतलांशः५८ सुधापयोधिभ्रमणेन्दु-रेखाः५९।६०। क्षेयाः क्रमाद्व्ययमेव युग्मे शुभान्वि-तांशो यदि शोभनाप्तिः । क्रूराः षष्ट्यंश(६०)गाः सर्वे नाशयन्ति स्वचारिणः । परिपूर्णबलैर्युक्ता स्वोच्चमूलत्रि-कोणगाः । स्वर्क्षकेन्द्रोक्तमांशस्था मित्रक्षेत्रत्रिकोणगाः । सप्तवर्गोद्भवाः स्वांशाः स्वाधिमित्रांशकान्विताः । वर्गास्तु ये दश प्रोक्ताः पूर्वाचार्यैर्महर्षिभिः । भवन्ति वर्गसंयोगे पारिजातादिसंज्ञकाः१० दुःस्थारिनीचमूढस्था अनहा बल-विवर्जिताः । मरणावस्थगाश्चैतु पारिजातादिनाशकाः" । अयं पक्षो नादरणीयः । सूक्ष्मपक्षस्तु स्वत्रांशे स्वनवांशके स्वभवन इति ग्राह्यः।"उत्तमे१ तु त्रिवर्गैक्यं चतुर्वर्गन्तु गोपुरम्२। वर्गपञ्चकसंयोगे सिंहासन३भिधो-च्यते । वर्गद्वयं पारिजातः४षष्ठां पारावतांशकः५ । सप्तमं देवलोकः६स्यादष्टमं च तथा भवेत् । ऐरावतं७ तु नवमं फलं तेषां पृथक् पृथक् । दशवर्गस्य संयोगे विदुर्वैशेषिकां-शकात् १० । ऐरावते सार्वभौमः सर्वैश्वर्यसमन्वितः । देव-लोके६ महादानकर्त्ता राजा क्षितीश्वरः । पारावते५ मा-तुलिकः सर्वशास्त्रविशारदः । सिंहासने३ भवेद्भूमिपतिः सर्वैः स्तुतो महान् । गोपुरे२ धनवान्नित्यं सर्वविद्याविशा-रदः । उत्तमे१ सकला सम्पत् पारिजाते४ धनान्वितः । स्वांशे १० यशस्वी मतिमान् सर्वसौख्यसमन्वितः" ।

४१२८पृ० पिण्डशब्दपरिशिष्टम् ।

तत्र संहतस्य एकीकृतः यथा"अणूनां तु संपिण्डः कालं तत्सन्निधिः सह" सू०सि० व्याख्याने "संपिण्डः एकी-कृत्य रज्जनायः । संपिण्डं मिश्रितं मिलितं कृत्वेत्यर्थः । तथा च अङ्कगणानयने प्रथममवटानां छन्मेकत्र कार्य-मिति बोध्यम् । केरलशब्दे २२४१पृ० पद्मनाभेरभाष-र्णिते "वर्गवर्गप्रमाणञ्च सस्वरं ताडितं मिथः । पिण्ड-संज्ञा भवेत् तस्य यथाभागैस्तु कल्पना" इत्युक्ते २१पदार्थे च ।

४१२४पृ० पित्तपक्षशब्दपरिशिष्टम्

गौणाश्विनकृष्णपक्षे ४प्रेतपक्षे तच्छब्दे द्रष्टव्यम् ।

४१२६ पृष्ठस्यपित्तलशब्दपरिशिष्टम् ।

सुश्रुतोक्ते योनिरोगभेदे स्त्री स्त्रीणां ५योनिरोगा विंश-तिविधा उदावर्त्तशब्दे ११६२ पृ० सुश्रुतोक्ता दर्शिताः । तेषां लक्षणान्यत्रोच्यन्ते "सफेनिलसुदावर्त्ता रजःकृच्छ्र-५सृजौ । वन्ध्यां नष्टार्त्तवां विद्याद्विप्लुतां२नित्यवेदनाम् । पैत्ररक्तात्तां३ भवति सास्रपर्वेव रुजा ज्वरम् । वातलां५

कर्कशत्वका शूलनिस्तोदपीड़िता। चतस्रश्चापि चाद्यासु भवन्त्यनिलवेदनाः। सदाहं प्रकिरत्यस्रं यस्याः सा लोहितक्षराः। सवातस्रोतसैरेवं वामिनी ७रजसा युतम्। प्रसंसिनीऽस्रन्दते तु क्षोभिता दुःप्रजस्य या। स्थितं स्थितं हन्ति गर्भं पुत्रघ्नीऽ रक्तसंक्षयात्। अत्यर्थं पित्तला१० योनिर्दीप्तपाकज्वरान्विता। चतस्रश्चापि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत्। अत्यानन्दा११ न सन्तोषं भाग्यधर्मैण गच्छति। कर्णिन्यां१२ कर्णिका योनौ श्लेष्मास्रग्भ्यान्तु जायते। मैथुनाचरणात् पूर्वा १३ पुरुषादतिरिच्यते। बहुशश्चातिचरणादन्या१४ बीजं न विन्दति। श्लेष्मला१५ पिच्छिला योनिः कण्डूयुक्तातिशीतला। चतस्रश्चापि चाद्यासु श्लेष्मलिङ्गोच्छ्रितिर्भवेत्। अनात्तवस्त्रना पत्नी १६ खरस्पर्शा च मैथुने। व्यतिकायगृहीतायास्त्रुटगात्राः फलिनी१७ भवेत्। विप्लुता मक्षती१८योनिः सूचीवक्त्रा१९ ऽतिसंहता। सर्वलिङ्गसमुत्थाना सर्वदोषप्रकोपजा २०। चतस्रश्चापि चाद्यासु सर्वलिङ्गोच्छ्रितिर्भवेत्"।

४३१९ पृ०पिष्टपचनशब्दात् परत्र परिशिष्टम्

पिष्टपशु पु० पिष्टमयः पशुः। यज्ञे पशुस्थाने पिष्टमये पशौ तथा हि पिष्टपशुमीमांसायाम् अनिष्टसाधनस्यापि हिंसायाः वैदिकमन्त्रद्वारा संस्कारविशेषे जनिते इष्टसाधनत्वं यथा विषादेरनिष्टसाधनस्यापि वैद्यकोक्तसंस्कारभेदे सति इष्टसाधनत्वम्। एवञ्च वैद्यकोक्तविषसंस्कारस्य क्षिप्रमृत्युजनकत्वे यथा नेष्टसाधनत्वमेवं वैदिकप्रयोगे मन्त्रादीनां यथोक्तस्वरादिदोषेऽपि न हिंसाया इष्टसाधनत्वम्। विशेषतः श्रूयते हिंसाया इष्टसाधनत्वेऽपि अनिष्टफलसाधनत्वस्मरणीकृतम्। तथा च वेदोच्चारणादौ सामर्थ्यहीनानामिदानीन्तनानां स्तुतरां पशुयागादौ पिष्टपशुनैव यागो विधेयः न तु साक्षात् पशुनेति व्यवस्थापितम्। मनुनापि "कुर्य्यात् हतपशुं सङ्के कुर्य्यात् पिष्टपशुं तथा इत्यनेन कामनाविषयत्वे पिष्टपशोरेव विधानञ्च क्रमः। एतन्न्यायानुसारेणैव भा०आश्व०३।५०"आलम्भसमये तस्मिन् गृहीतेषु पशुष्वथ। महर्षयो महाराज! बभूवुः क्षयशङ्किताः। ततो दीनान् पशून् दृष्ट्वा ऋषयस्ते तपोधनाः। ऊचुः यज्ञं समागम्य नायं यज्ञविधिः शुभः। अपरिज्ञानजनितं महान्तं धर्ममिच्छतः। न हि यज्ञे पशुगणा विधिदृष्टाः पुरन्दर!। धर्मोपघातकरणे समारम्भस्तव प्रभो!। नायं धर्मकृतो यज्ञो न हिंसा धर्मउच्यते। आगमेनैव ते यज्ञं कुर्वन्तु यदि चेच्छसि। विधिदृष्टेन यज्ञेन धर्मस्ते सुमहान् भवेत्। यज्ञ बीजैः सहस्राक्ष! त्रिवर्षपरिरोषितैः। एष धर्मो महान् शक्र! महागुणफलोदयः"।

४३९२ पृष्ठस्यपुष्यानशब्दात् परत्र परिशिष्टम्।

पुष्यानुग न० चक्रदत्तोक्ते चूर्णभेदे "अम्बष्ठकोशीरसोमवल्कपद्मकेशरान्। वाल्लीकातिविषामुस्तं बिल्वं लोध्रं सगैरिकम्। कट्फलं मरिचं शुण्ठीं मृद्वीकां रक्तचन्दनम्। कट्वङ्गवत्सकालान्तधातकीमधुकार्जुनम्। पुष्येणोद्धृत्य तुल्यानि श्लक्ष्णचूर्णानि कारयेत्। तानि क्षौद्रेण संयुज्य पाययेत् तण्डुलाम्बुना। अस्रगुदरातिसारेषु रक्तं यश्चोपवेशयते। दोषागन्तुजता ये च वातानां तांश्च नाशयेत्। योनिदोषं रजोदोषं श्वेतं नीलं सपीतकम्। स्त्रीणां व्यावरुणं यच्च तत् प्रसह्य निवर्त्तयेत्। चूर्णं पुष्यानुगं नाम हितमालेयपूजितम"।

४४२७पृ० प्रकृतिशब्दस्य परिशिष्टम्

राज्ञां पुरोहितादिषु२१ दशसु सुमन्त्रादिषु२२ अष्टासु च यथोक्तं शुक्रनीतिसारस्यपरिशिष्टे

"पुरोधाश्च प्रतिनिधिः प्रधानः सचिवस्तथा। मन्त्री च प्राड्विवाकश्च पण्डितश्च सुमन्त्रकः। अमात्यो दूत इत्येता राज्ञः प्रकृतयो दश। दशमांशाधिकाः पूर्वा दुर्लाभाः क्रमशः स्मृताः। अष्टप्रकृतिभिर्युक्तो नृपः कैश्चित् स्मृतः सदा। सुमन्त्रः पण्डितो मन्त्री प्रधानः सचिवस्तथा। अमात्यः प्राड्विवाकश्च तथा प्रतिनिधिः स्मृतः। एताभ्यतिसमास्त्वष्टौ राज्ञः प्रकृतयः सदा"। एतेषां लक्षणानि तत्रैवोक्तानि दृश्यानि विस्तरभयान्नोक्तानि।

४४११ पृष्ठस्यप्रगल्भशब्दात् पूर्वत्र परिशिष्टम्

प्रगदिन् त्रि० प्रगदति वा० णीकार्थे इनि। प्रकर्षेण कथनशीले स्त्रियां ङीप् ततः प्रगद्या० अतरर्थ्यां अत्र। प्रागाद्य तदूरदेशादौ त्रि०।

प्रगद्यादि पु० चतुरर्थ्यां अत्रप्रत्ययनिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा "प्रगदिन् सगदिन् सगदिन् कविल खरिहत गहित चूड़ार मड़ार मन्दार कोविदार"

४४९९पृष्ठस्यप्रसाधनशब्दस्य परिशिष्टम्

प्रसाधनीकरणप्रकारश्च युक्तिकल्पतरावुक्तो यथा

"प्रसाधनी दिङ्नवनागषण्मसंख्याभिरुक्ताङ्गुलिभिः क्रमेण। चतुर्विधानां पृथिवीपतीनां सम्यक्सिसौभाग्ययशःसमृद्ध्यै। काष्ठजा धातुजा चैव दन्तजा च यथाक्रमम्। जाङ्गलानूपसाधारणजानां मही भुजाम्।

कृतदण्डवदुच्चेयः काष्ठजाया विनिश्चयः । कनकं रजतं ताम्रं पित्तलं सीसकं तथा । लौहं सर्वञ्च सर्वार्द्धमादित्यादिदशामुषाम् । राज्ञामेवोपयुज्येत कालकीर्त्तिप्रसाधनी । मृगाणां महिषाणाञ्च शृङ्गजाता प्रसाधनी । गजदन्तसमुद्भूता राज्ञामेवोपयुज्यते । अत्रापि रत्नविन्यासो ज्ञेयश्चामरदण्डवत्" ।

४५०४ पृष्ठस्यप्राकृतशब्दस्य परिशिष्टम्

प्राकृतभाषा च अष्टादशभाषामध्ये भाषाभेदः । तासां दादश सा०द० उक्ता यथा "पुरुषाणामनीचानां संस्कृता१ स्यात् कृतात्मनाम् । शौरसेनी२ प्रयोक्तव्या तादृशीनाञ्च योषिताम् । आसामेव तु गाथासु महाराष्ट्रीं३ प्रयोजयेत् । अत्युक्ता मागधी४ भाषा राजान्तःपुरचारिणाम् । चेटानां राजपुत्राणां श्रेष्ठिनां चार्द्धमागधीं५ । प्राच्या६ विदूषकादीनां धूर्त्तानां स्यादवन्तिका७ । योधनागरिकादीनां दाक्षिणात्याऽपि हि दीव्यताम् । शकाराणां शकादीनां शाकारीं८ समयोजयेत् । बाह्लीकधाम्नां९० दिव्यानां द्राविडी११ द्रविडादिषु । आभीरेषु तथाऽऽभीरी१२ चाण्डालीं१३ पुक्कसादिषु । आभीरी शाबरी१४ चापि काष्ठपत्रोपजीविषु । तथैवाङ्गारकारादौ पैशाची१५ स्यात् पिशाचवाक् । चेटीनामनीचानामपि स्यात् शौरसेनिका१६ । बालानां षण्ढकानाञ्च नीचग्रहविचारिणाम् । उन्मत्तानामातुराणां सैव स्यात् संस्कृता क्वचित् । ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपस्कृतस्य च । भिक्षुवन्धकरादीनां प्राकृतां१७ समयोजयेत् । संस्कृतं समयोक्तव्यं लिङ्गिनीषूत्तमासु च । देवीमन्त्रिसुतावेश्यास्वपि कैश्चित्तथोदितम् । यद्देवं नीचपात्रन्तु तद्देवं तस्य भाषितम् १८ । कार्य्यं तत्तोत्तमादीनां कार्य्यो भाषाविपर्य्ययः । योधिन्मन्त्रीणालवेश्याकितवाप्सरसां तथा । वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा" । तच्छाकारलक्षणानि भाषार्णवे दृश्यानि ।

४५२२ पृष्ठस्य प्रातर्शब्दस्य परिशिष्टम्

"प्रहरोऽर्द्धसंयुक्तः प्रातरित्यभिधीयते" निर्णयसि० गो० उक्ते दक्षिणाद्धार्द्धे ३सार्द्धप्रहरात्मके काले ।

फ

फकारः पञ्चमवर्गस्य द्वितीयवर्णः सर्ववर्णेषु द्वाविंशतितमः । ओष्ठोच्चारणस्य स्थानमोष्ठौ तयोच्चारणे चाभ्यन्तरः प्रयत्नः जिह्वाग्रस्य ओष्ठाभ्यां सह स्पर्शः अतएवास्य स्पर्शवर्णता । बाह्याः प्रयत्नाः विवारश्वासाघोषाः महाप्राणश्च । अस्मिन् परे विसर्गस्य स्थाने उपाध्मानीयः स्यात् । तन्त्रे वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा "फः सुखी दुर्गिणी धूम्रा वामपार्श्वो जनार्दनः । जया पादशिखा रौद्री फेत्कारः शाखिनी प्रियः । दृष्टा विरूक्षः कण्ठः कुञ्जिनी प्रियपावकौ । प्रलयाग्निर्नीलपादोऽक्षरः पशुपतिः यशी । फुत्कारो यामिनी भञ्जनाशयनो मोहश्चर्जनः । निष्फलश्चागरुद्धारः प्रयागो यामणी फलम्" । तदीयदेवताध्यानं यथा "प्रलयाम्बुदवर्णाभां लम्बजिह्वां चतुर्भुजाम् । भक्ताभयप्रदां नित्यां नानालङ्कारभूषिताम् । एवं ध्यात्वा फकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम् । अस्य ध्येयस्वरूपं यथा "फकारं शृणु चार्वङ्गि ! रक्तविद्युल्लतोपमम् । चतुर्वर्गप्रदं वर्णं पञ्चदेवमयं सदा । पञ्चप्राणमयं वर्णं सदा त्रिगुणसंयुतम् । आत्मादितत्त्वसंयुक्तं त्रिबिन्दुसहितं सदा" कामधेनुतन्त्रम् । मातृकान्यासेऽस्य वामपार्श्वे न्यासः । काव्यादावस्य प्रथमविन्यासफलं फकारशब्दे उक्तं दृश्यम् ।

फ न० फक्क-ड । १हसिते २निष्फलवाक्ये ३फुत्कारे च मेदि० ४भञ्जायाते ५वर्द्धके ६ऋजुत्वाविष्कारे ७फलभागे च पु० विश्वः ।

फकार पु० फ+स्वरूपे कार । फस्वरूपे वर्णे ।

फक्क अवदाचारे मन्दगतौ च भ्वा०पर०अक० सेट् । फक्कति अफक्कीत् पफक्क ।

फक्किका स्त्री फक्क-धातुनिर्देशे भावे ण्वुल्-टाप् अतइत्त्वम् । १ऋजुव्यवहारे (फाँकि) २तत्त्वनिर्णयार्थं पूर्वपक्षे च "फणिभाषितभाष्यफक्किका" इति नैषधम् ।

फगुन पु० गोत्रप्रवरर्षिभेदे प्रवराध्यायः ।

फञ्जिका स्त्री भञ्जति रोगान् भनज्ज-मर्दने ण्वुल् पृषो० । (वामनहाटि) १छत्रे अमरः । २देवताडे ३दूरालभायां शब्दरत्ना० ।

फञ्जिपत्रिका स्त्री भनज्-णिनि पृषो० फञ्जि रोगमर्दि-पत्त्र यस्याः । आखुकर्ण्यां (उन्दुरकानि) रत्नमा० ।

फञ्जि(ञ्जी) स्त्री भनज–इन् पृषो० वा ङीष्। भाग्यौस् (वामनहाटि) राजनि०।

फट पुंस्त्री० स्फुट–विकाशे अच् पृषो०। १सर्पाणां फणायाम् अमरः स्त्रियां टाप्। सा च २दंशे मेदि० ३कितवे पु० हेमच०।

फट् अव्य० स्फुट–क्विप् पृषो०। १योगे तन्त्रोक्ते २अस्त्रनामके मन्त्रभेदे च। ३अनुकरणशब्दे तस्य नस आदिवद् द्रव्यविशेषस्य त्यागार्थताऽपि। शान्तिकुम्भचालने, अर्घ्यपात्रचालने, अर्घ्यजलेन पूजाप्रकरणाभ्युक्षणे, अन्तरीक्षगविघ्नोत्सारणाय विकिरक्षेपणे, गन्धपुष्पाक्ष्यां करणार्घने, अघनर्षणे पापपुरुषताडने, कराङ्गन्यासे, नैवेद्यप्रोक्षणे, होमाग्नेः क्रव्यादांशत्यागे, होमाग्न्याद्याहुने, तद्विनप्रोक्षणादौ च इत्याद्येषु कर्मसु अस्य प्रयोगः नानातन्त्रेषु दर्शितः। [ख्यातायां झिल्लिकायां शब्दच०।

फडिङ्गा स्त्री फडिति इङ्गत इङ्ग-अच्। (फड़िङ)

फण अनायासेनोत्पत्तौ भ्वा०पर० सक० सेट् फणति अफणीत्-अफणीत् पफाण। फणा० फेणतुः पफणतुः।

फण गतौ भ्वा०पर०सक० सेट्। फणति अफाणीत् अफणीत् सित् वा घटादि०। णिचि फाणयति फणयति फणादि०।

फण पुंस्त्री० फण–अच्। दर्व्याकारे सङ्कोचविकाशवति सर्पस्तके अमरः।

फण(णा)कर पु०फण:(णा) कर इव यस्य। सर्पे शब्दरत्ना०।

फणादि न० "फणाञ्च सप्तानाम्" पा० किति लिटि सेटि खनि च परे एत्त्वाभ्यासलोपनिमित्ते धातुसप्तके तच्च धातुपाठे उक्तं यथा "फण राज भ्राज भ्रास भ्राश भ्रन भ्रन" सि०कौ० भ्वादौ दृश्यः।

फण(णा)धर पुंस्त्री० फण(णां) धरति भृ–अच्। सर्पे शब्दरत्ना०। स्त्रियां जातित्वात् ङीष्। फण(णा)भृदादयोऽप्यत्र।

फणाभर पुंस्त्री० फणां बिभर्त्ति भृ–अच्। सर्पे हारा० स्त्रियां जातित्वात् ङीष्। [छत्रः।

फणिक्कार पु० देशभेदे स च देशः वृ०सं० १४अ० दक्षिणस्या-

फणिकेसर पु० फणिनामकः केसरः। नागकेसरे राजनि०।

फणिखेल पुंस्त्री० फणिना खेलति खेल–अच्। (भारुइ) खगे त्रिका० स्त्रियां ङीष्।

फणिचक्र न० फणाकारं चक्रम्। विवाहादौ शुभाशुभसूचकलाङीकृतज्ञापनार्थं चक्रभेदे उपयमशब्दे १२५४

फणिजा स्त्री फणीव जायते जन–ड। (फणिमनसा) वृक्षे नैघण्टु०। [शताव्र्याम् २महासमङ्गायाञ्च राजनि०।

फणिजिह्वा स्त्री फणिजिह्वा आकारोऽस्यस्य अच्। १सहा

फणिज्झक पु० फणिनमज्झति खञ् पृषो०। १तुलसीभेदे २जन्तुरसामान्ये च अमरः।

फणितल्पग पु० फणिरूपे तल्पे गच्छति तिष्ठति गम–ड। शेषशायिनि विष्णौ शब्दार्थकल्प०।

फणिन् पु० फणा अस्त्यस्य इनि। दर्वीकरे सर्पभेदे अमरः। अहिशब्दे ५८१ पृ० तद्भेदाः दृश्याः। २सर्पिणीनामकौषधौ स्त्री राजनि०। ३शेषावतारे पतञ्जलमुनौ पु० स च पाणिनीयभाष्यप्रकारकः योगसूत्रकारकश्च तयोर्भेदं ऐक्यं वा

फणिप्रिय पु० फणिनां प्राणप्रदत्वात् प्रियः। वायौ शब्दर० सर्पाणां वायुभक्षकत्वेन वायोस्तत्प्रियत्वम्।

फणिफेन न०फणिनां फेन इव। (आफिङ) अहिफेने रत्नमा०

फणिभुज् पु०फणिनं भुङ्क्ते भुज–क्विप्। पन्नगाशने गरुडे

फणिमुख न०फणिन इव मुखमस्य। स्नेहसाधनोपयोगिनि स्नुक्काक्षेपणार्थे यज्ञभेदे दशकुमा०।

फणिवल्ली स्त्री फणिसदृशी दीर्घा, फणिनोऽस्या वा वल्ली। नागवल्ल्याम् (पानलता) फणिलतादयोऽप्यत्र हेमच०।

फणिहन्त्री स्त्री फणिनं हन्ति हन–टच् ङीप्। गन्धनाकुल्याम् राजनि०। [इङ्गुदीवृक्षभायां राजनि०।

फणिहृत् स्त्री फणिनं हरति अपसारयति हृ–क्विप्। छु-

फणीन्द्र पु० ६त०। सर्पेश्वरे अनन्ते २वासुकौ च।

फणीश्वर पु० ६त०। १अनन्ते २वासुकौ शब्दरत्ना०।

फणीश्वरचक्र न० नक्षत्रभेदे गणित्वा सप्तद्वीपस्थ शुभाशुभसूचके चक्रभेदे चक्रशब्दे २८२० दृश्यम्।

फण्ड पु० फण-गतौ ड तस्य नेत्त्वम्। जठरे उणादिकोषः।

फल्गादिन् पु० फल्गित्यव्यक्तं करोति कृ–णिनि। खगमात्रे शब्दच०।

फर न० फल+अच् लस्य रः। फलके भरतः।

फरुवक न० पूगफले हारा०। [शफरी फर्फरायते"उद्भटः।

फर्फर त्रि० स्फुर-अच् पृषो०। अत्यन्तचले "गण्डूषजलमात्रेण

फर्फरीक न० स्फुर–ईकन् "फर्फरीकादयश्च" उणा० नि०। १नवपल्लवे उज्ज्वल०। २चपेटे पु० ३क्षुद्रत्वे न० मेदि०। ४व्याधुकायां स्त्री संक्षिप्तसारः।

फर्व गतौ भ्वा०पर०सक० सेट्। फर्वति अफर्वीत् पफर्व। "प्रफर्व्यं च पीयरी" यजु० १२।७। वेददी०"फर्वतिः प्र-

फर्वर त्रि० फर्व-पूरणे अरन्। पूरके ऋ० १०।१०६।२मा०।

फल भेदने भ्वा०पर०सक० सेट्। फलति अफालीत् पफाल फेलतुः आदित् आरम्भे भावे क्त वा इट्। फुल्तः फलितः। फुल्तम् फलितम् अन्यत्र फलितः इत्येव। क्ष्वीत् वर्त्तमाने क्त। फलितः।

फल निष्पत्तौ भ्वा०पर०अक०सेट्। फलति अफालीत्। पफाल फेलतुः। क्त० फलितः।

फल गतौ भ्वा०पर०सक० सेट्। फलति अफालीत्। ण्यन्ता० कर्त्तरि या ण। फलः फालः। फलयति फालयति।

फल न०फल-अच्। १वृक्षादीनां शस्ये २लाभे ३मस्तके (ढाल) ४कार्य्ये ५उद्देश्ये ६प्रयोजने अमरः ७जातीफले ८त्रिफलायां ९कक्कोले मेदि० १०बाणाग्रे ११आर्त्तवे शब्दर० १२फाले हेम० १३दाने धर०। १४सस्ये च। १५कुटजवृक्षे पु० शब्दर०। १६धात्वर्थनिष्पाद्ये प्रधानोद्देश्ये प्रयोजने "खरितजित खात्मनेपदं कर्त्रभिप्राये क्रियाफले" पा०। "यस्यार्थेन प्रयुक्तः प्रवर्त्तते तत् प्रयोजनम्" हरिः। तेन पाकादिजन्यं भोजनं यागादिजन्यञ्च पुण्यमेव फलम्। न वेतनादिलाभरूपं फलं तेन सूदकस्य ऋत्विगादेर्वा न धात्वर्थजन्यफलभागित्वम्। धात्वर्थजन्ये १७संयोगादौ च "फलव्यापारयोर्धात्वर्थयोः फले प्रधानं व्यापारविशेषणत्वे तु तिङः स्मृताः। फले प्रधानं व्यापारविशेषणं तु विशेषणम्" हरिः। धात्वर्थशब्दे दृश्यम्। मौनभोक्ते १८प्रमेयभेदे तल्लक्षणञ्च तत्रोक्तं यथा

"आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" गौ० सू०। उद्दिश्य "प्रवृत्तिदोषजनितोऽर्थः फलम्" गौ० सू०। "सुखदुःखसंवेदनं फलम् सुखविपाकं धर्म्म दुःखविपाकञ्च तत् पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सह देहादिभिः फलमभिप्रेत्य तथा हि प्रवृत्तिदोषजनितोऽर्थः फलमेतत् सर्वं भवति नैतत् फलमुपात्तमुपात्तं हेयं, यत्तं तत्फलमुपादेयमिति नास्य ज्ञानोपादानयोर्निष्ठा, पर्य्यवसानं वाऽस्ति न खल्वयं फलस्य ज्ञानोपादानमोक्षलोलुप्तो लोक इति" वात्स्या०। "अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम्। भवत्यात्मनां प्रेत्य न तु ब्रह्मात्मनां क्वचित्" गीता। ऋणादिसंयोगे मरणात्मकमस्य यथा "तस्य तु कोऽग्निसंयोगात्मकत्वेन च विनाशः। पार्थिवत्वसंयोगादस्य भवति तत्त्वात्मकं दामार्थेनन्त्रिकाष्टतक्षणम्" १९निरुक्ते त्रि०॥

फलक न० स्वार्थे क। (ढाल) इति ख्याते चर्म्मणि अस्त्रप्रतिघातनिवारके १पदार्थे। २अस्थिखण्डे जटाध० ३नागकेशरे ४काष्ठादिपट्टके च मिता०।

फलकत्त्व पु० यज्ञभेदे भा०श० १०अ०।

फलकण्टक पु०फले कण्टकं यस्य। कण्टकिफलवृक्षे नैषधटु०।

फलकपाणि पु०फलकं पाणौ यस्य। (ढालि) चर्म्मणि अमर०

फलपुर न० पुरभेदे तस्य नान्नोदाहृतता।

फलकयन्त्र न० त्रि०यि० उक्ते यन्त्रभेदे यथा

"कर्त्तव्यं चतुरस्रकं शुभ्रकं खाङ्गाष्टकुलैर्विस्तृतं विस्तारादृद्विगुणा१८यतं सुगणकैर्नाभ्यामध्ये तथा। आधारः खचतुष्कुलादिघटितः कार्य्या च रेखा ततस्तिर्य्याधारदलम्बसूत्रसदृशी सा लम्बरेखोच्यते। लम्बं नवत्यष्टकुलैर्विभज्य प्रत्यङ्कुलं तिर्य्यगतः प्रसार्य्य। रेखाणि तत्प्रायतसूत्ररेखा जीवाभिधानाः सुधिया विधेयाः। आधारतोऽधः खगुणा२०ङ्गुलेषु व्यालम्बयोर्नेत्रं छिद्रं च सूक्ष्मम्। दृष्टप्रमाणा सुषिरे शलाका क्षेत्राऽक्षसंज्ञा खलु सा प्रकल्प्या। षड्भिर्ङ्गुलैश्चालमनस्य रन्ध्रात् लम्बा कुहनं परिधौ तदङ्कम्। षड्भा घटीनां भगणांश २६०कैश्च प्रलंबकं चाक्षपदैश्च दिग्भिः। अधो धरन्त्रा तनुपट्टिकैका षड्भिर्ङ्गुला दीर्घतया तथाङ्कैः" सू०। "अक्षादौ धातुमयं औपस्यादिदारुमयं वा फलकं चतुरस्रं सूक्ष्मं समं कर्त्तव्यम्। तच्च नवत्यङ्गुलविस्तारं त्रिगुणा१८विस्तारदैर्घ्यम्। तन्मध्ये दैर्घ्यमध्ये तथाधारः शिरिवृत्तः षड्ङ्गुलादिः कार्य्यः। आधारे धृतं यन्त्रं यथा भ्रम्यमाणं स्यात् तथा धृते फलके आधाराद्धःखमभवलम्बरेखा कार्य्या। सा च लम्बसंज्ञा। तं लम्बं नवभिर्भागं कृत्वा भागे भागे तिर्य्यग्रेखा दीर्घा कार्य्या। तिर्य्यक्त्वं तु लम्बभावात्तृतीयात्। सा रेखा ज्यासंज्ञा ज्ञेया। आधाराद्यस्मिन् यदङ्गुलान्तरे या ज्या तस्याः खण्डस्य च ज्ञायते सुषिरम्। तत्प्रमाणा शलाका ज्ञेया भाजकसंज्ञा। तस्माद्भ्रात् त्रिंशदङ्गुलेन कर्कटकेन धृतरेखा कार्या। सा षष्टिह० घटिकाभिर्भगणांशकैः खषडब्धिसंख्यैः २६० प्रलंबं दृग्मितैर्यमिः यानोन्नतफलैश्चाङ्कयेत्। अथ ताम्राद्यिवी वंशजा काष्ठमयी वा पट्टिका षड्ङ्गुलाह० दीर्घतया तैरेव फलकाङ्गुलैस्तथैवाङ्किता कार्य्या। सा पट्टिकाधोङ्गुलविस्तृता। एकाङ्गुलोऽङ्गुलविस्तृता कुठाराकारा कार्या। तत्र विस्तारमध्ये छिद्रं कार्यम्। अक्षगोलायाः पट्टिकायाः खच्छे-

घोर घृतावा एवं पार्श्वं यथा लक्ष्मरेखां न जहाति तथा सरनृप्रा कार्य्यं सर्वः" त्रि०मि० व्याख्या प्रमिताक्षरा।

फलकर्कश स्त्री फलेन कर्कशा कठोरा। बनकोल्याम्।

फलकसकच्छ त्रि० फलकविव सकिच्च यस्य बहुव्री०। फलकतुल्यसकच्छियुक्ते स्त्रियां ङीष्। फलकमिव सकच्छि। कर्म०ब० टच् बना०। फलकतुल्यसकच्छि न०।

फलकाम त्रि० फलं कामयते कमि-अच् उप०स०। विहितकर्मणां फलकामनायुक्ते। तस्य निन्दा भग०त०विष्णु धर्मोत्तरे उक्ता यथा "धर्मबाधिजका मूढाः फलकामा नराधमाः। अर्चयन्ति जगन्नाथं ते कामं नाशुवन्मुत"। "कामाज्ञता न प्रशस्ता" स्मृतेः "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" गीतया च।

फलकिन् पु० फलकं तद्वाकारोऽस्यास्ति इनि। (कठुर) १वृक्षभेदे २फलकान्विते त्रि० मेदि०। संज्ञा भङ्गिरिष्टत्व एव स्वार्थे क। फलका तमः चतुरर्थां प्रज्ञा०इनि। २तद्वृक्षसमीपादौ त्रि० स्त्रियां ङीप्।

फलकोवन न० वनस्पतीर्थभेदे भा०व० ८१अ०।

फलक्रया पु० फलेन क्रयणः। १पानीयामलके शब्दच०। फलं क्रय्यमस्य। २क्रय्यफलयुक्ते त्रि०।

फलकेशर पु० फले केशरा इवास्य। वारिकेलवृक्षे जटाध०।

फलकोष पु० फलस्य सस्यस्य कोष इव। सस्याबरणचर्मणि युते अण्डकोषे तद्वृद्धिहेतुत्वात्तस्य तथात्वम्। "वातपित्तश्लेष्मोच्छितमेढ्रोमूलान्ननिमित्ताः अष्ट व्याधयः। वाधां मूलान्ननिमित्ते द्वौ वातसम्भवे केवलसम्भवहेतुरन्यतमे अधः प्रकुपितोऽन्यतमो हि दोषः फलकोषवाङ्क्षणीरभिप्रपद्य धमनीः फलकोषयोर्वृद्धिं जनयति तां वृद्धिमित्याचक्षते"।

फलकोषक पु०फलं सस्य एव कोषोऽस्य कप्। सस्ये अण्डकोषे त्रिका०।

फलग्रहि पु०ग्रह-इन् ह्रस्व। स्थितकालफलधरे वृक्षे भरतः

फलग्राहिन् पु०फलं गृह्णाति ग्रह-णिनि। १वृक्षे धरणिः २फलग्राहके त्रि० स्त्रियां ङीप्।

फलघृत न० फलजनकं घृतम् या०त०। शुक्रादिवृद्धिकारके चक्रदत्तोक्ते घृतभेदे "मज्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा बला। मेदा पद्मका काकोली मूलघैवाश्वगन्धकम्। अजमोदा हरिद्रे द्वे क्षिप्त्वा कटुरोहिणी। एतत्सर्वं कुसृद कूष्माण्डकोलयो चन्द्रनद्वयम्। एतेषां कार्षिकैर्भागैर्घृतस्थं विपाचयेत्। मनावरीरसक्षीरं घृताद्दृगुणं क्षिपेत्। सर्पिरेतत्वरः पीत्वा निस्तं स्त्रीषु वृषायते। पुत्रान् जनयते नारी मेधाढ्यान् प्रियदर्शनान्। या चैवास्थिरगर्भा स्यात् वा वा जनयते मृतम्। अल्पायुषं वा जनयेत् वा च कन्यां प्रसूयते। योनिदोषे रजोदोषे परिस्रावे च शस्यते। प्रजावर्द्धनमायुष्यं सर्वव्याधिनिवारणम्। नाम्ना फलघृतं ह्येतत् व्याधिभ्यो परिकीर्त्तितम्। अनुक्तलक्षणे मूढे क्षिपन्त्यत्र चिकित्सका। जीवद्वत्सैवयाया घृतमत्र प्रशस्यते। आरण्यगोमयेनापि वह्निरुत्थाप्य दीयते"।

फलचमस पु०दधिमिश्रितघटत्वक्चूर्णे तदधिकृत्यभक्षके न्यायभेदे च "फलचमसमक्षेभ्यं ददातीति" श्रुत्या क्षत्रियभक्ष्यत्वेन फलचमसविधानात् क्षत्रियभक्षस्य च यज्ञसोमद्रव्यत्वेन ततृद्धिः यज्ञेऽपि फलचमसलाभः। फलचमसस्य दधिमिश्रितघटत्वक्चूर्णमिति" भट्ट०त० रघु०।

फलचोरक पु० फलं चोर इव अस्य कप्। चोरनामगन्धद्रव्ये राजनि०। [फलकाम्रचोरकेषु च त्रिषु फलेषु।

फलत्रय न० द्वन्द्व०। १यद्यस्यामलकोत्करीतकीवृक्षेषु २हरीतक्यादिफलत्रिके न० द्वन्द्व०। त्रिफलायाम् गण्डीरपिप्पलीमरिचरूपायाम् अमरः। त्रि०।

फलद पु० फलं ददाति दा-क। १वृक्षपाले २फलदातरि

फलपक्वान्न न० अम्लपञ्चफले पक्वान्ने २११ पृ० उक्तम्।

फलपाक पु० फलेषु पाको यस्य। १करमर्दके भरतः २पानीयामलके शब्दच०। ३त्रि० ४फलस्य पाके च।

फलपाकान्त स्त्री फलपाकेनान्तो नाशोऽस्याः। कदलीधान्यौषधौ अमरः। [रम्भा०।

फलपाकिन् पु० फलपाकोऽस्त्यस्य इनि। गर्दभाण्डे वृक्षे

फलपुच्छ पु० फलं पुच्छ इवास्य। वरपत्रालौ त्रिका०।

फलपुष्पा स्त्री फलानि पुष्पाणीव यस्याः। पिण्डखर्जूर्याम् राजनि०। [तत्रैवार्थे अमरः।

फलपूर(क) पु०फलेन पूरः पूर्णः। बीजपूरे स्वार्थे क।

फलप्रिया स्त्री फलेन प्रीणाति प्री-क। प्रियङ्गौ राजनि०।

फलबन्ध्य पु० फले बन्ध्यः। शाकवृक्षिणि फलशून्यवृक्षे हेमच०।

फलभूमि स्त्री फलभोगार्थं कर्मफलभोगार्थं भूमिः। कर्मभूमिव्यतिरिक्ते भूदेशे "भारतान्यैरावतानि विदेहाश्च कुरून् विना। वर्षाणि कर्मभूम्यः स्युः शेषाण्यपि फलभूमयः" हेमच०। [भोगे चतुर्व्रते

फलभोग पु० द्वन्द्व०। फलानां कर्मफलानां सुखदुःखादीनां

फलमुख्या स्त्री फलेन मुख्या श्रेष्ठा। अजमोदायाम् राजनि०

फलमुष्टिका स्त्री मुष्टं गिरति ग-क-इत्व फलं मुष्टिर्यत्र

यस्याः कप्। पिण्डखर्जूर्याम् (पिण्डीखेजुर) शब्दमा०

फलयोग पु०ष६त०। फलसम्बन्धे नाटकाङ्गकार्यस्य अवस्था "बीजस्य फलयोगः स्याद् यः समग्रफलागमः सा० द० लक्षिते २अवस्थाभेदे च।

फललक्षणा स्त्री फलहेतुका लक्षणा। प्रयोजनहेतुकायां लक्षणायाम् "व्यङ्ग्यस्य गूढागूढत्वादुद्विधा स्युः फललक्षणाः" सा०द०।

फलवत् त्रि० फल+अस्त्यर्थे मतुप् मस्य वः। १फलयुते पुरुषे २तत्साधने यागादौ च "फलवत्सन्निधावफलं तदङ्गमिति न्यायः। ३फलयुते वृक्षे पु० अमरः। [न० राजनि०।

फलवर्तुल पु०फलं वर्तुलं यस्य। १कालिङ्गवृक्षे। २तत्फले

फलवृक्षक पु० फलप्रधानो वृक्षः संज्ञायां कन्। पनसवृक्षे राजनि०।

फलशाक न० "पत्रं पुष्पं फलं नालं कन्दं संवेदजं तथा। शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम्" भावप्र०उक्ते षड्विधशाकमध्ये फलरूपशाके तच्च कूष्माण्डादि तल्लोक्तम्

फलशाडव पु० दाडिमवृक्षे राजनि०।

फलशालिन् त्रि०फलेन शालते शाघते शाल-णिनि। फलयुक्ते स्त्रियां ङीप्। [वदरवृक्षे राजनि०।

फलशैशिर पु० शिशिरं शाम्यस्य अण् फलं शैशिरं यस्य। कर्कन्धौ

फलश्रुति स्त्री श्रु-करणादौ क्तिन् ६त०। १वैदिककर्मणां फलप्रतिपादनार्थशब्दे २फलश्रवणे च "फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्। श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनम्"। अपिच "वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे। नैष्कर्म्यां लभते सिद्धिं रोचनार्थां फलश्रुतिः" भाग०११स्क० सन्त० धृतवचनम्।

फलश्रेष्ठ पु० फलेन श्रेष्ठः प्रशस्यतरः। आम्रवृक्षे शब्दच०।

फलश्व पु० फल+दृश्या० श्व। १फलयुक्ते २पनसे भरतः फलस्व इति पाठान्तरं तत्रार्थे।

फलस्थापन न० फलयोरौडम्बरफलयोः स्थापनमत्र। सीमन्तोन्नयनसंस्कारे "फलस्थापनात् मातापितृजं पापमानमपोहति" हारीतः "फलस्थापनात् फलस्थापनाङ्गसीमन्तोन्नयनात्" सं०त० रघु०। तत्र पश्चात् पतिरवस्थाय युगमन्तमौडुम्बरं शलाटु पन्थमावध्नाति" गोभिलेन औडुम्बरफलयुगस्थापनस्य विधानात् तथात्वम्।

फलस्नेह पु० फले स्नेहो यस्य। अक्षोटवृक्षे राजनि०।

फलहारिन् त्रि० फलं हरति हृ-णिनि। फलहारके।

फलहारी स्त्री फलानां हारो हरणं यस्यां गौरा० ङीष्। कालीभेदे तत्पूजादिनञ्च "ज्येष्ठे मासि अमायां वै मध्यरात्रे महेश्वरि!। पूजयेत् कालिकां देवीं नानाद्रव्योपहारकैः। तत्रैवाश्वितपक्षे तु पञ्चदश्यां निशार्द्धके। पूजयेच्च फलैर्नैवैः शक्तितो वापि कालिकाम्" मायातन्त्र १७पटले।

फलाढ्या स्त्री फलेनाढ्या सम्पन्ना ३त०। १काष्ठकदल्याम्।

फलादन पुंस्त्री० फलमदनमस्य। १शुकशुगे शेमच० स्त्रियां जातित्वात् ङीष्। फलाशन तत्रार्थे त्रिका०। २फलभक्षके त्रि० स्त्रियां टाप्।

फलाध्यक्ष पु० फलमध्यक्षमिव यस्य। १राजादने अमरः। २फलदानाध्यक्षे देवरे च। फलस्याध्यक्षोऽधीश्वरे।

फलान्त पु० फलेनान्तोऽस्य। १वंशे शब्दमा०। ६त०। २फलस्थाने च।

फलाफलिका स्त्री फलसहितमफलं शा०त०तदस्त्यस्य ठन् टाप् कापि अत इत्त्वम्। फलसहितफलयुतायां स्त्रियाम्।

फलाबन्ध्य पु० फलेनाबन्ध्यः। फलयोग्ये वृक्षे शेमच०।

फलाम्ल न० फलमम्लं यस्य। १वृक्षाम्ले २अम्लवेतसे पु० राजनि०।

फलाम्लपञ्चक न० अम्लपञ्चके तच्छब्दे दृश्यम्।

फलि पु० फल-इन्। (फलुइ) मत्स्यभेदे रायमु०।

फलिका स्त्री फल+अस्त्यर्थे ठन् टाप्। निष्पाव्याम् राजनि०

फलिग पु० फलिनं मञ्जति गम-ड। मेघे निघण्टुप०।

फलित त्रि० फल-निष्पत्तौ क्त फलं जातमस्य तारा० इतच् वा। १निष्पन्ने २जातफले वृक्षे पु० धरणिः। ३ग्रहभेदे न० राजनि०।

फलिन् त्रि० फल+अस्त्यर्थे इनि। १फलयुते स्त्रियां ङीप् २वृक्षे पु०अमरः ३प्रियङ्गौ स्त्री ङीप् अमरः। [अमरः।

फलिन पु०फल+अस्त्यर्थे इनच्। १फलयुक्ते २तादृशे वृक्षे पु०

फली स्त्री फलमस्त्यस्याः अच् गौ० ङीष्। प्रियङ्गुवृक्षे अमरः

फलीकार पु० फल+च्वि-कृ कर्मणि घञ्। फलेच्छायां भाग० ४।८।२६ श्रीधरः। भावे घञ्। २विह्वलीकरणे अफलस्य १फलसम्पादने [यज्ञिकृष्णादौ च।

फलीय त्रि०फल+छत्करा०चतुरर्थ्यां छ। १फलयुक्ते २फल-

फलेग्रहि पु० फले फलं (कर्मणि आधारत्वविवक्षा) गृह्णाति धारयति स्वीकरोति वा इनि अलुक्स०। १योग्यकाले फलधारके वृक्षे यथाकालं फलस्वीकारिणि च। 'फलेग्रहीन् हंसि वनस्पतीनाम्' भट्टिः। लुकि तु फलग्राहि तच्छब्दे दृश्यम्। पुंसो० फलेग्राहिरयत्र शब्दरत्ना०।

फलेन्द्र पु० फलेन इन्द्र ऐश्वर्यान्वितः। राजजम्बुवृक्षे। "फलेन्द्रा कथितानन्दा राजजम्बूर्महाफला" भावप्र०।

फलेपुष्पा स्त्री फले फलसदृशे पुष्पमस्याः। द्रोणपुष्पीवृक्षे भावप्र०

फलेरुहा स्त्री फले तन्निमित्तं रोहति रुह-क। पाटलिवृक्षे अमरः।

फलोत्तमा स्त्री फलेन उत्तमा। १द्राक्षाभेदे राजनि०। २त्रिफलायां नैघण्टुप्र०। [हृत०। २फलस्योत्पत्तौ स्त्री।

फलोत्पत्ति पु० फलाय उत्पत्तिरस्य। १आम्रवृक्षे शब्दच०।

फलेच्छक पु० १यज्ञभेदे भा० स० १०अ०। २फलकामे त्रि०।

फलोदय पु०हृत०।१फलोत्पत्तौ २लाभे ३स्वर्गे ४हर्षे च शब्दर०

फल्क पु० फल-क नेत्रम्। विशोधिताङ्गे उज्ज्वलद०।

फल्गु त्रि०फल-उगुक् च। १रम्ये मेदि० २असारे अमरः। ३निरर्थके त्रिका०४मिथ्यावाक्ये शब्दर०५गयातीर्थस्थनद्यां स्त्री। मेदि० (फागु) इति ख्याते धूलिरूपे हृदर्थे ७वसन्तसमये, जटा०। दक्षाकोडुम्बरिकायाम् अमरः। फल्गुतीर्थमाहात्म्यं यथा "फल्गुतीर्थं व्रजेत् तस्मात् सर्वतीर्थोत्तमोत्तमम्। सन्निधत्ते पितॄणां कर्तॄणां श्राद्धतः सदा। ब्रह्मणा प्रार्थितो विष्णुः फल्गुको ह्यभवत् पुरा। दक्षिणाग्निरुतं न्यूनं तद्रजः फल्गुतीर्थकम्। तीर्थानि यानि सर्वाणि भुवनेष्वखिलेष्वपि। तानि स्नातुं समायान्ति फल्गुतीर्थं सुरैः सह। गङ्गापादोदकं विष्णोः फल्गुस्तीर्थादिगदाधरः। स्वयं हि हरूपेण तस्मात्तत्तुल्यधिकं विदुः। अश्वमेधसहस्राणां सहस्रं यः समाचरेत्। नासौ तत्फलमाप्नोति फल्गुतीर्थं यदाप्नुयात्" वायुपु० गयामा०।

फल्गुदा स्त्री फल्गुनद्यां "तत्र देवे गया नाम पुण्यदेशोऽस्ति पावनः। नद्यो च फल्गुदा नाम पितॄणां स्वर्गदायिनी" हरिवंशे पु०। [मासि २अर्जुने च भरतः।

फल्गुन पु० फल्गुषु पूर्वभेदो योगतोऽस्यास्ति नी-ड। १फल्गुने

फल्गुनी स्त्री फल-ल्युनि गुक् च गौरा०ङीष्। १काकोडुम्बरिकायाम् राजनि० अश्विन्यादिके एकादशे द्वादशे च २नक्षत्रे च ब०व० भरतः।

फल्गुलुका वाङ्गदेशस्थे देशभेदे हृ०पं० १३अ०।

फल्गुवाटिका स्त्री फल्गूनां वाटीव इवार्थे कन्। काकोडुम्बरिकायाम् राजनि०।

फल्गुवृन्ताक पु० फल्गुना रम्येण वृन्तेन आकारवति आ+कै-क। स्योनाकभेदे। राजनि०।

फल्गूत्सव पु० फल्गुनिनिमित्तक उत्सवः। फाल्गुनपौर्णमास्यादिषु कर्त्तव्ये (आबीर)फल्गुद्रव्यकरणे उत्सवे गोविन्दानुगृहीतन्तु यात्राङ्गं तत्प्रकीर्त्तितम्। फल्गूत्सवं प्रकुर्वीत पञ्चाहानि त्रयहाणि वा" दोलयात्रापद्धतिः।

फल्य न० फलाय हितं यत्। पुष्पे शब्दच०।

फल्लकिन् पु० फल्लक+पृषो० तदाकारोऽस्यास्य इनि। (फलुई) मत्स्यभेदे शब्दार्थकल्प०।

फल्लफल पु० धूर्पवाते जटाधरः।

फा पु० फल-वा० डा। १निष्क्रान्तभाषणे शब्दर०। २सन्तापे ३दहने ४यज्ञे के च विश्वः। [उपधातुभेदे राजनि०।

फाटकी स्त्री स्फुट खुल् पृषो० गौरा० ङीष्। (फटकिरी)

फाणि स्त्री स्फाव-नि पृषो०। १गुडविकारे, २करम्बे (दधिसक्तौ) च उणादिकोषः।

फाणित न० फण-णिच्-क। गुडविकारभेदे (फेणी) अमरः "इक्षोः रसस्तु यः पक्वः किञ्चिद्घनतरो द्रवः। स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया" भावप्र०। "फाणितं गुर्वभिष्यन्दि दृंहणं कफगुक्कृत्। वातपित्तश्रमहरं मूत्रवस्तिविशोधनम्" तद्गुणास्तत्रोक्ताः।

फाराट न० फण-क नि०। १अनायासेन कृते अमरः। "क्षिप्तोप्तोये स्फुटितः फाराट इत्यभिधीयते इत्युक्ते २क्वाथभेदे पु०। "क्षुद्रद्रव्यफले सम्यक् जलक्षुण्णं विनिःक्षिपेत्। पात्रे चतुःफलमितं ततस्तु स्रावयेज्जलम्। सोऽयं चूर्णद्वयं फाराटः भिषग्भिरभिधीयते" वैद्यक०।

फाल न० फलाय शस्याय हितम् अण्, फाल्यते विदार्य्यते भूमिरनेन वा घञ्। १खनित्रशब्दाते लाङ्गलसम्बन्धे लौहभेदे अमरः। फालमस्यास्ति अच्। २बलदेवे शब्दरत्ने च पु०। फलस्य विकारः अण्। ४कापीसवृक्षे मेदि। ५तप्तफालकरणपरीक्षाभेदे न०। फलेषु भवः अण्। ६लवणक्षारभेदे पु० शब्दचन्द्र। फालदिव्यप्रकारस्तु विष्णुधर्म्मोत्तरे यथा "बृहस्पतिः "आयसं द्वादशपलघटितं फालमुच्यते। अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तरम्। अग्निवर्णं ततश्चौरो जिह्वया लेढयेत् सकृत्। न दह्यते क्षुद्भिर्यादन्यथा च तु दह्यते" चौरोऽत्र शोधारः "शोधारस्य प्रदातव्यं तप्तफालावलेहनम्" इति स्मृतेरिति मेधिथिः। अत्रापि तप्तमज्जे इत्यादिपक्षानन्तरम्। "आयसं लेलिहानस्य जिह्वयापि समादिशेत्" इति पितामहोक्तेः प्राङ्विवाकशोध्यत्वाभावमभिप्रेत्यैवमुक्तं कार्य्यम्। अत्र प्रयोगः लौकिकचत्वारिंशत्पलोन्मितं तथाविध-लौहघटितसप्तयवमध्यात्मकाङ्गुलाष्टदीर्घम्

चतुरङ्गुलप्रस्तारं फालमग्नौ तापयेत्। तत्र प्राङ्-विवाकोधर्मावाहनादिहवनान्तं कर्म कृत्वा दक्षिणां दत्त्वा सयन्त्रकं प्रतिग्राहयं शोध्यशिरसि निधाय ओम् "त्वमग्ने वेदास्त्वारस्त्वञ्च यज्ञेषु ह्रूयसे। त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम्। जठरस्थो हि भूतानां ततो वेत्सि शुभाशुभम्। पाप्मं पुनासि वै यस्मात् तस्मात् पावक उच्यसे। पापेषु दर्शयात्मानमर्चिष्मान् भव पावक!। अथ वा शुद्धभावेषु शीतो भव हुताशन!। त्वमेव सर्वभूतानामन्तश्चरसि साक्षिवत्। त्वमेव देव! जानीषे न विदुर्योनि मानवाः। व्यवहारानियुक्तोऽयं मानुषः शुद्धिमिच्छति। तदेनं संशयादस्माद्भूतस्तस्मात्समर्हसि"। इत्यैतैः फालस्थमग्निमभिमन्त्रयेत्। शोध्यस्तु "त्वमग्ने सर्वभूतानामन्तश्चरसि पावक!। साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं कवे! नमः" इत्यनेनाभिमन्त्र्याग्निवर्णं फालं जिह्वया स्पृशेत्। न दह्यते शुद्धः"।

फाल्गुन पु० फल्गुनीयुक्ता पौर्णमासी अण् वा यस्य मासे जेवे वर्षे अर्द्धमासे वा अण्। चैत्रावधिके द्वादशे १क्षनामख्याते मासभेदे २तद्युक्ते पूर्णे ३जैवे वर्षभेदे च कार्त्तिकशब्दे १६४६ पृ० दृश्यम्। "अन्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुन्यस्त्रिभोषित" इत्युक्तेः पौर्णमास्यां फाल्गुनीरूपनक्षत्रसंयोगात् तथात्वम्। स च मासः त्रिविधः सौरसौम्यचान्द्रसौरभेदात्। तत्र मीनस्थरव्यारभ्य शुक्लप्रतिपदादिदर्शान्तो सौरचान्द्रः। तथाभूतशुक्लप्रतिपदादिपौर्णमास्यन्तो सौम्यः, कृष्णस्थरविकः सौरः इति। अवयवशब्दः दन्त्यनान्ते मेदिनिकोषे पठितः। फाल्गुने गगने ज्ञेने यत्तमिच्छन्ति वर्वराः" कारिकायाम् अणन्तत्वमिति-कल्पनं मेदिनिविरोधात् प्रामादिकमेव। ४तत्पौर्णमास्यां स्त्री ङीप्। ५अर्जुनाख्ये पादपे तस्यामकत्वे कारणम् भा०वि०४४अ०उक्तं यथा "उत्तराभ्यां फल्गुनीभ्यां नक्षत्राभ्यामहं दिवा। जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः"। ६अर्जुनवृक्षे पु० मेदि०।

फाल्गुनानुज पु० फाल्गुनादनुजायते अनु+जन-ड। १चैत्रे मासि २वसन्तकाले हारा०। ३नकुलसहदेवयोः द्वि० व०।

फाल्गुनिक पु० फाल्गुनीनक्षत्रयुक्ता पौर्णमासी अस्मिन् मासे ठक्। चैत्रावधिके द्वादशे मासे। [१कोपे शब्दर०

फि पु० फल-वा०डि। १निष्क्रमणवाक्ये २पापे च एकाक्ष०को०

फिङ्क पु० कङ्क+पृषो०। (पिङ्गा) पक्षिभेदे शब्दमा०।

फिरङ्ग पु० खनामख्याते क्षुद्रदेशे१ रोगविशेषे२ भावप्र०

तत्र फिरङ्गस्य निरुक्तिमाह। "फिरङ्गसङ्गक देशे बाहुल्येनैष यद्भवेत्। तस्मात् फिरङ्ग इत्युक्तो व्याधिर्व्याधिविशारदैः"। तस्य विप्रकृष्टं निदानमाह गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम्। फिरङ्गि-णोऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः। आधिरागन्तुजो ह्येष दोषाणामनुसंक्रमः। भवेत्ता लक्षयेत्तेषां लक्षणैर्भिषजां वरः"। फिरङ्गिण्याः प्रसङ्गत इति विशेषार्थम्। रूपमाह "फिरङ्गिविविधो ज्ञेयो बाह्या-भ्यान्तरतस्तथा। बहिरन्तर्भवश्चापि तेषां लिङ्गानि च ध्रुवम्। तत्र बाह्यः फिरङ्गः स्यादिस्फोटसदृशोऽल्परुक्। स्फुटितो व्रणवद्ज्ञेयः सुखसाध्योऽपि स स्मृतः। सन्धे-राश्रयन्तरः स स्यादभयोर्लक्षणैर्युतः। कष्टोऽतिचिर-स्थायी कष्टसाध्यतमश्च सः"। उपद्रवानाह "कार्श्यं बलक्षयो नासाभङ्गो वक्त्रेण मन्दता। अस्थिशोषो-ऽस्थिवक्रत्वं फिरङ्गोपद्रवा अमी। साध्यत्वादिकमाह बहिर्भवो भवेत् साध्यो नूतनो निरुपद्रवः। आभ्य-न्तरस्तु कष्टेन साध्यः स्यादयमामयः। बहिरन्तर्भवो जीर्णः क्षीणक्षोपद्रवैर्युतः। बोध्यो व्याधिरसाध्योऽय-मित्यूचुर्वैद्यनयः पुरा"। ततोऽस्यर्थे इनि। फिरङ्गिन् तद्रोगयुक्ते तद्रोगयुते च त्रि०स्त्रियां ङीप्। [विश्वः।

फु पु० फल-डु। मन्त्रोच्चारणपूर्वके १फुत्कारे २तच्छब्दयुक्ते च

फुक पु० खगे शब्दच०। [फणायां पु०हेमच०।

फुट त्रि० स्फुट-क पृषो०। १विदीर्णे २प्रस्फुटिते च। ३सर्ष-

फु(फू)त् अव्य० फल-डुति पृषो०वा दीर्घः। अनुकरणशब्दे।

फुत्कर पु०फुदित्यव्यक्तं शब्दं करोति क-ट। वञ्चौ शब्दच०

फुत्कार पु० क-भावे घञ् फुदित्यव्यशब्दस्य कारः। फुदित्य-व्यक्तशब्दकरणे। फुत्कारयुक्ते वञ्चौ आकृतिनिषेधो यथा "अल्पे कक्षे सस्फुलिङ्गे वामावर्त्ते भयानके। आर्द्रकाष्ठैः सस्तृपत्रे फुत्कारवति पावके। कृष्णार्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम्। आकृतिं जुहुयाद्-यस्तु तस्य नाशो भवेद्ध्रुवम्" त्रि०त०।

फुप्फुस पु०सुश्रुतोक्ते हृदयस्य वामपार्श्वस्थिते (फुलका) इति ख्याते कोषभेदे "स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च। हृदयकुक्षः फुप्फुसस्य कोष्ठ इत्यभिधीयते" व्याख्यौ चेदम् "आमस्य स्थानमामाशयः नाभेरूर्द्धम्। अग्नेः स्थानं पक्वाशयः नाभिमध्यम्। पक्वस्य स्थानं पक्वाशयः नाभेरधः। मूत्रस्य स्थानं वस्तिः। रुधिरस्य स्थानं यकृत्प्लीहानौ। हृदु हृदयम्। हृच्छुरसपाकमलवद्धृ यः

शोणितमलसञ्ज्ञः उपयुक्तः स चाम्बदेशे व्यवस्थितः पुरीषाधानम्। फुप्फुसः हृदयस्य वामपार्श्वे स्थितः। (फुस्सा) इति ख्यातः" इति विलयरक्षितः।

फुल्ल(त्त) त्रि० फल-आरम्भे भावे क्त वा तयोर्नेट् अत इत्त्वम्। फलनारम्भयुते २फलने च। पक्षे फलित इति। अन्यत्र फलित इत्येव। भावे क्तिन् फुल्लति फलने स्त्री।

फुल्ल विकाशे भ्वा०पर०अक०सेट्। फुल्लति अफुल्लीत् पुफुल्ल।

फुल्ल त्रि० फुल्ल-विकाशे अच्। विकशिते पुष्पे अमरः।

फुल्लकाल पु० फुल्लं फलति फल-अण्। सूर्यतापे त्रिका०।

फुल्लदामन् न० ई०त०। १फुल्लानां दामनि "भोगो भौ तौ गो यरहयतरगैः फुल्लदाम प्रसिद्धम्" छ०र० उक्ते अर्धविषम-वृत्तरचनाढ्ये छन्दोभेदे।

फुल्ललोचन त्रि०फुल्लं विकसितं लोचनमस्य। १विकसितनेत्रे स्त्रियां स्वाङ्गत्वेऽपि बहुव्रीहित्वात् टाप्। २खगभेदे पुंस्त्री०शब्दच० स्त्रियां जातित्वात् ङीष्। [संक्षिप्तसा०।

फुल्लरीक पु० फल-फर्फरीकादि० नि० इष्टभेदे २वर्षे च

फेण(न) पु० स्फाय-न पृषो० मतान्तरे णत्वम्। दुग्धजलादि-रूपस्य परिस्रे बुद्बुदाकारे पदार्थे (फेना) अस्य यान्तत्व-मपि "हंसश्रेणयो नदीतीरे निनदैः संप्रतीविरे। यथा सारस्वता मन्त्रा अन्तरे फेणसङ्गता" इत्युक्तौ पक्षे अन्त-रेफेण अन्तःस्थकारेण संयुता इत्यर्थः। २क्लिन्ने च ३गुडविकारभेदे स्त्री ङीप्। "वटो वेणुवारात् खवक्त्रेण फेणो यमं पर्पटः शिग्रुबीजेन याति जीर्णमङ्गरो।" "वा-नीरं गगनं फेनमूनञ्च दन्त्यनान्वितम्। आढ्यः फाल्गुन-सिक्थानि केचिन्मूर्ध्न्यणान्वितम्" भरतधृतसाक्यम्।

फेण(न)क स्वार्थे क संज्ञायां कन् वा। १फेनशब्दार्थे २पिष्टकभेदे त्रिका०।

फेण(न)नका स्त्री फेण(न) इव कायति के-क। लव-णक्षतक्षुत्चूर्णे (काइ) शब्दच०।

फेण(न)दुग्धा स्त्री फेण(न) इव दुग्धं निर्यासोऽस्य। (दुधफेणा) क्षुपभेदे राजनि०।

फेण(न)वाहिन् पु० (फेण(न)मिव वहति श्वेतताम्। वह-णिनि। वह्नौ शब्दमाला। [राजनि०।

फेणा(ना) स्त्री फेण(न) अस्त्यर्थे अच्। सातलाक्षुपे

फेणा(ना)ग्र न० ई०त०। बुद्बुदे। हारा०।

फेणि(नि)का स्त्री (खाजा) इति ख्याते पक्वान्नभेदे क्षुताक्ष-शब्दे २।८४।२४ पृ० दृश्यम्।

फेणि(नि)ल त्रि० फेन(ण)+अस्त्यर्थे इलच्। फेन(ण)वि-शिष्टे। २कोलिफले ३मदनवृक्षफले च म०मेदि०। ४पदरहृक्षे राजनि० ५परिष्टहृक्षे च पु० अमरः।

फेत्कारिणी स्त्री तन्त्रभेदे।

फेत्कारीय पु० तन्त्रभेदे। [स्त्रियां जातित्वात् ङीष्।

फेर पुंक्लो० फे इत्यव्यक्तं रौति रु-वा० ड। १हगाले शब्दर०

फेरण्ड पुंक्लो० फे इत्यव्यक्तं रण्डति रण्ड-अच्। १हगाले हेमच० स्त्रियां जातित्वात् ङीष्।

फेरव पुंस्त्री फे इत्यव्यक्तो रवोऽस्य। १हगाले अमरः। २राक्षसे मेदि०। स्त्रियां ङीष् १धूर्ते त्रि० शब्दर०।

फेरु पु० फे इत्यव्यक्तं रौति रु-कु। १हगाले अमरः।

फेल गतौ भ्वा०पर०अक०सेट्। फेलति अफेलीत् पिफेल। क्वचित् चङि न हस्वः। अपिफेलत् त।

फेल(ला) न०क्लो० फेल-अच् वा टाप्। १भुक्तावशिष्टे उच्छिष्टे शब्दरत्ना० न०। अमरे स्त्री।

फेलि स्त्री फेल-इन्। उच्छिष्टे भुक्तावशिष्टे जटाध० स्वार्थे क फेलिका तत्रार्थे

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य-सङ्कलिते वाचस्पत्ये फकारादिशब्द-सङ्कलनम्।

फाल्गुनशब्दपरिशिष्टम्—"तद्वै नवनीतं भवति घृतं देवानां फाल्गुं मनुष्याणाम्" शतब्रा०। "नवनीतभावात् प्रागवस्थापन्नं इव फाल्गुमित्युच्यते" भाष्यम्।

ब

बकारः पवर्गस्य तृतीयवर्णः कादिषु त्रयोविंशतितमो व्यञ्जनवर्णः जिह्वाग्रेण ओष्ठयोः स्पर्शन उच्चार्यत्वात् स्पर्शवर्णः। अस्योच्चारणस्य स्थानमोष्ठौ। उच्चारणे घोष-जिह्वाग्रेण स्पर्शः आभ्यन्तरप्रयत्नः। बाह्यप्रयत्नाः संवार-नादघोषाः अल्पप्राणश्च। अस्य वाचकशब्दाः तन्त्रे वर्णा-भिधानोक्ता यथा "बो वनी भूधरो मार्गो वर्षरी लोचन-प्रियः। प्रचेताः कलसः पक्षी स्थलगरुडः कपर्दिनी। पृष्ठवंशोऽभया मत्तः शिखिवाहो युगन्धरः। सख-विन्दुर्बकी घण्टा योद्धा त्रिलोचनप्रियः। क्रोदिनी तापिनी भूमिः कुलस्त्रिस्त्रिवलिप्रियः। सुरभिर्वज्र-विष्णुश्च मंहारो वसुधाप्रियः। षष्ठी पुरं चमेटा च मोदको गगनं पतिः। पूर्वाषाढा मध्यजिह्वः अग्निः क्रूर तृतीयका"। तस्याधिष्ठातृदेवताध्यानं यथा "नीलवर्णां

त्रिनयनां नीलाम्बरधरां पराम्। नागहारोज्ज्वलां देवीं द्विभुजां पद्मलोचनाम्। एवं ध्यात्वा वकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम्। अस्य ध्येयस्वरूपं यथा "वकारं शृणु चार्वङ्गि! चतुर्वर्गप्रदायकम्। अरुन्द्र प्रतीकाशं पञ्चदेवमयं सदा" कामधेनुतं०। साहित्यासेऽस्य पृथ्वंशे न्यसता। काव्यादौ प्रथमप्रयोगे वकारशब्दोक्तं फलम्।

व पु० बल-ड। "वः पुमान् १वरुणे २सिन्धौ ३भगे ४तोये ५गते तु वा। ६गन्धने ७तन्तुसन्ताने पुंस्येव ८वपने स्मृतः" मेदि०। ९कृष्णे शब्दर०।

बंहिष्ठ त्रि० अतिशयेन बृहन् दृढन् बंहादेशः। अतिशयबृहति अमरः। [बृहति स्त्रियां ङीप्।

बंहीयस् त्रि० अतिशयेन बृहन् दृढन् बंहादेशः। अतिशयभङ्कुर त्रि० भास्कर+भयङ्कर+वा पृषो०। १भास्करे २भयङ्करे च ऋ० १।११७।२१ भा०।

बठ दृढौ सामर्थ्ये च भ्वा०पर०सक०सेट्। बठति अबठीत् अबाठीत्। बबाठ बेठतुः। [अमरः।

बड़वा स्त्री बलं याति या-क लस्य डः। १घोटक्याम्, २अश्विनीनक्षत्रे स्त्रियो०। ३दास्याञ्च। बड़वाक्षतशब्दे उदा०

बड़वाक्ष(क्ष्ट)त न० बड़वया दास्या क्षतः (क्षुतः) वा। दासभेदे "भक्तदासश्च विख्येयस्तथैव बड़वाक्ष(क्ष्ट)तः" स्मृतिः।

बड़वाग्नि पु० बड़वायाः अश्वरूपधारिण्याः सुवर्चलाया सुखस्योऽग्निः। समुद्रस्थिते घोटकीमुखस्थे कालानले। कालिकापु०४१अ०। तयोत्पत्तिरुक्ताऽस्य। और्वशब्दे १५८१।८२पृ० अन्ययोत्पत्तिरुक्ता दृश्या। बड़वानलादयोऽप्यत्र।

बड़वामुख पु० बड़वाया मुखं स्थानत्वेनास्यास्य अर्श आदित्वादच्। समुद्रस्थे कालानले हेमच०।

बड़वासुत पु० द्वि० व० ईत०। अश्विनीकुमारयोः। अश्विनीकुमारशब्दे दृश्यम्। [त्रेयतुः

बण शब्दे भ्वा०पर०सक०सेट्। बणति अबाणीत्-अबणीत्

बण पु० बण-अच्। शब्दे भरतः।

बणिक्पथ पु० ईत० अच्समा०। हट्टे। [शब्दच०

बणिग्बन्धु पु० बणिजां बन्धुरिव पोषकत्वात्। नीलीवृक्षे

बणिग्भाव पु० ईत०। वाणिज्ये आजीवनार्थं क्रयविक्रयकरणे अमरः।

बणिग्वह पु० बणिजं वहति वह-अच्। हट्टे शब्दच०

बणिज्(ज) पु० पण्यायते व्यवहरति पण-इजि इजो वा मुण्डा०। आजीवनार्थं क्रयविक्रयव्यवहारकर्त्तरि अमरः। २ज्योतिषोक्ते वणादितः धने करणे च ४वाणिज्ये स्त्री मेदि०। स्वार्थे अण् वाणिज तत्रार्थे अमरः।

बणिज्य न० बणिजो भावः कर्म वा य। वाणिज्ये आजीवनार्थं क्रयविक्रयादिव्यवहारे भरतः स्त्रीत्वमपि। "चतुरेण चतुर्वर्गचिन्तामणिवणिज्यवेति" सुक्तिफलम्। ष्यञ्। वाणिज्य तत्रार्थे न०।

बद स्थैर्ये निश्चलभवने भ्वा०पर०सक०सेट्। बदति अबादीत् अबदीत्। बबाद बेदतुः।

बद भाषणे वा चु०उभ०पक्षे भ्वा०पर०सक०सेट्। बादयति ते अबीबदत्-त। पक्षे बदतीत्यादि।

ब(व)दर पु० बदति स्थिरीभवति छिन्नस्यापि पुनः प्ररोहेण बद+स्थैर्ये अरच्। १कोलिवृक्षे २देवसर्षपवृक्षे राजनि०। तस्य फलम् अण् तस्य लुक्। २कोलिफले राजनि०। कर्कन्धुशब्दे दृश्यम्। ४कार्पासफले ५कोलिफले न० ६कोलिभेदे (सेओयाकुल) कार्पासास्थि पु० मेदि०। अन्तस्यादित्वमस्यान्यत्रैवम्। दवराहक्रान्तायां १कार्पासवृक्षे स्त्री अमरः।

बदर(प)पाचन न० तीर्थभेदे भा०श०४६अ० तत्र इन्द्रोपदेशेन कुमार्यां पञ्चबदराणां पचनात्तथात्वम्।

ब(व)दरफली स्त्री ब(व)दरस्येव फलमस्याः ङीप्। भूमिब(व)दर्याम् राजनि०।

ब(व)दरवल्ली स्त्री ब(व)दरफलप्रधाना वल्ली श०त०। भूमिब(व)दरीतिख्याते लताभेदे राजनि०।

ब(व)दरामलक न० ब(व)दरमिवामलकम्। १प्राचीनामलके हारा०। समा०ह०। २बदरामलकफलयोः समाहारे न०

ब(व)दरिकाश्रम पु० न०। बदरी+स्वार्थे क तस्याः समीपे तच्चिह्नितोवाश्रमः। तीर्थविशेषे। ब(व)दरीशैलोऽप्यत्र। भा० व० ९२ अ० दृश्यम्। बदरिकावनमप्यत्र तच्च हिमालयपर्वतैकदेशे श्रीनगराख्यदेशसमीपे अलकनन्दानदीपश्चिमभागे स्थितम्।

ब(व)दरी स्त्री ब(व)दर+गौरा०ङीष्। १कोलिवृक्षे अमरः २कार्पासे शब्दर० कपिकच्छ्वाम् राजनि०। ततः पीलादयाके कृणच्। बदरीकृण तत्पाके न०।

ब(व)दरीच्छदा स्त्री ब(व)दर्या इव च्छदो यस्याः। १वृक्षिकोलिवृक्षे २शङ्खनखाख्ये च राजनि०।

बदरीपत्र पु० ब(व)दर्या इव पत्रमस्याः। नखीनामगन्धद्रव्ये जटा०। स्वार्थे क। तत्रैव। [लिकायाम् शब्दमा०

बदरीफला स्त्री ब(व)दर्या इव फलमस्याः। नीलमेषशृङ्ग त्रि० बन्ध-कर्मणि क्त। बन्धनकर्मणि अमरः।

बद्धगुद न० बद्धं गुदमत्र । कोष्ठमन्धकारके रोगभेदे "यस्यान्त्रमन्त्रैरुपलेपिभिर्वा बालाम्बुभिर्वापिहितं यथावत् । सञ्जीयते तस्य मलः सदोषात् शनैः शनैः सङ्कटत्वञ्च नाड्याम् । निरुध्यते तस्य गुदे पुरीषं निरेति कृच्छ्रादपि वाल्पमल्पम् । हृन्नाभिमध्ये परिवर्द्धितेति तद्बद्धगुदं वदन्ति" भावप्र० ।

बद्धफल पु० बद्धानि फलान्यस्य । करञ्जवृक्षे राजनि० ।

बद्धमुष्टि त्रि० बद्धः दानायाप्रसारितो मुष्टिर्यस्य । कृपणे ।

बद्धमूल त्रि० बद्धं मूलमस्य । दृढमूले ।

बद्धरसाल पु० नि०क० । राजाम्रभेदे राजनि० ।

बद्धशिख त्रि० बद्धा शिखा येन यस्या वा । "सदोपवीतेन भाव्यं सदा बद्धशिखेन च" प्रा०त०उक्ते १शिखावन्धनयुक्ते २उच्चटायां स्त्री मेदि० ।

बध पु० हन–घञ् । वधादेशः । हनने प्राणवियोगसाधने व्यापारे अमरः । वधपदार्थविशेषं वधिभेदञ्च प्रा० वि० उक्तो यथा

"अथ वधो निरूप्यते । ननु कोऽयं वधः किं वधित्वं कतिविधं च तत्, ? उच्यतेप्राणवियोगफलकव्यापारो वधः तच्चिप्रादकत्वञ्च साक्षात्परम्परोद्देशीनं श्रुतिस्मारपरिगणितं वधित्वम् अतो नेषुकारादिव्यतिव्याप्तिः तच्च षड्विधं श्रुतिस्मरणात् कर्त्ता प्रयोजकोऽनुमन्ता अनुव्याहको निमित्ती चेति यथाह याज्ञवल्क्यः "प्रयोजयिता अनुमन्ता कर्त्ता चेति समं स्वर्गनरकफलभोक्तारो यो यूय व्यारभते तस्मिन् फले विशेषः" । अनुव्याहकमाह याज्ञवल्क्यः "चरेद्व्रतमहत्वापि यत्तार्थन्तु समागतः" । तथा मनुः "बहूनामेककार्य्याणां सर्वेषां शस्त्रधारिणाम् । यदेको घातकस्तत्र सर्वे ते घातकाः स्मृताः" । भविष्ये "यदेकं बहवो विप्रा घ्नन्ति विप्रमनागसम् । तदैषां निष्कृतिं वक्ष्ये शृणुध्वं समना मुने ! । तेषां यस्य प्रहारेण स विप्रो निधनं गतः । सरस्वतीं प्रतिस्रोतः सन्ध्यायां पापशुद्धये" । स च द्विविधः । एको वध्यप्रतिरोधकः अन्यः स्वयंप्रहर्त्ता । निमित्तिनमाह विष्णुः "अन्यायेन गृहीतस्तो न्यायमर्हयते तु यः । यस्तद्विद्यं जयेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" । अत्र परान्तरव्यापाराव्यवधानेन वधनिष्पादकः कर्त्ता, यः कर्त्तारं कारयति स प्रयोजकः सोऽपि द्विविधः । एकः स्वतोऽप्रवृत्तमेव पदातिं वेतनादिना वधार्हं प्रवर्त्तयति अपरः स्वतः प्रवृत्तमेव मन्त्रोपांशूपदेशादिना प्रोत्साहयति । अनुमतिदाता अनुमन्ता । अनुमतिश्च द्विविधा । एका यदिरोधाङ्गनं न सम्भवति तस्य विरोधिनो मया निरोधः कर्त्तव्य इति प्रवृत्तिः । अपरा एनं हन्तीति वचने शक्तस्यापतिषेध एव" । हिंसायाः पापाद्यनिष्टजनकत्वेऽपि वैधहिंसाया दृष्टफलजनकत्वात् नानिष्टजनकता "यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा । अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः" ति० त० उक्तेः अनुमापि "या वेदविहिता सा नियतास्मिंश्चराचरे । अहिंसामेव तां विद्याद् वेदात् धर्मो हि निर्बभौ" उक्तेश्च । अवधः अहिंसा च तज्जन्यपापाजनकत्वेन तद्विरोधीत्यर्थः । बहूनां रक्षणार्थमेकस्य वधेऽपि पुण्यजनकत्वमुक्तम् "एकस्य यत्र निधने प्रवृत्ते दृष्टकारिणः । बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः । ब्रह्मघ्नस्त्वयी सुरापश्च ब्रह्महा गुरुतल्पगः । आत्मानं घातयेद्यस्तु तस्य पुण्यप्रदो वधः" कालिका० २० अ० । ब्रह्मघ्नस्य वधेऽपि न राज्ञो दोषः प्रा० वि० स्थितः "तथा नाततायिवधे दोषो हन्तुर्भवति कश्चन" स्मृतेः आततायिवधेऽपि नानिष्टफलमिति यथायथं बोध्यम् ।

बध संयमने चु० उ० अक० सेट् । बाधयति–ते अबीबधत्–त ।

बध निन्दायां बन्धने च आदि० आत्म० अक० सेट् । बीभत्सते अबीभत्सिष्ट । निन्दनेऽर्थं एव स्वार्थे सन् बन्धने तु न तेन तस्य बधते अबधिष्ट इत्येव ।

बधक त्रि० बध–ण्वुल् । १वधकर्त्तरि त्रि० स्त्री० । २हिंस्रे २व्याधौ ४म्लेच्छौ च संक्षिप्तसा० ।

बधत्र न० बध–करणे अत्रच् । चर्म्मणि उणादि० । [हारा० ।

बधस्थली स्त्री ङीप् न० । प्रस्थाने त्रिका० । बधस्थानमप्यत्र न०

बधाङ्क न० बधः अङ्कोऽत्र कप् । कारागृहे त्रिका० ।

बधार्ह त्रि० बधमर्हति अर्ह–अण् उ० स० । बधदण्डार्हे ।

बधिर त्रि० बन्ध–किरच् । श्रोत्रेन्द्रियरहिते अवयवशक्तिशून्ये । तस्यानन्दिता मनुनोक्ता यथा "अनंधो क्लीबपतितौ जात्यन्धबधिरौ तथा" । ततः अरीहणा० अतरत्यां वुञ् । बाधिरक तत्सदृशटदेशादौ त्रि० । ततः दृढ़ा०भावे वा इमनिच् पक्षे व्यञ् । बधिरिमन् पु० बाधिर्य्य न० तद्भावे तद्विधानादि साधनकरेणोक्तं यथा "यदा यद्यङ्गं वायुः स्रोतसाऽल्पं निहन्ति । युक्तः स्नेहान्वितो वापि बाधिर्यं तेन जायते" ।

बध्(ब)नू स्त्री बध्नाति अनतया बन्ध–ऊ नलोपः, बध्नते बद्ध–ऊ पचाद्यजादेशो वा । १नाड्याम्, २मुक्तायाञ्च अमरः

श्वश्रूषायां, ४नवोढायाम्, भाषायां ५पारिभाषिकौषधौ ६गुडूच्याम्, च मेदि०।

ब(व)धूटी स्त्री अल्पा ब(व)धूः अल्पार्थे टि वा ङीप्। अल्पवयस्कायां नार्याम् "गोपवधूटीदुकूलचौराय" भाषापः।

ब(व)धूत्सव पु०ब(व)ध्वा उत्सव आर्त्तवम् रजः स इव प्रसवः पत्वादिर्यस्य। रक्ताख्याने राजनि०।

बधोद्यत त्रि०बधाय उद्यतः। मारणार्थमुद्युक्ते आततायिनि, अमरः। आततायिनशब्दे ६४७ पृ० दृश्यम्।

बध्य त्रि०बधमर्हति बध+यत्। १बधार्हे अमरः। बन्ध-कर्मणि क्यप्। २कारारोद्धव्ये। आधारे क्यप्। ३बन्धनस्थाने च

बध्यपाल पु० बध्यं कारागारं पालयति पालि-अण् उप० स०। कारागृहरक्षके। विष्णु० पु० २अंशे ६अ०।

बध्यभूमि स्त्री हन-भावे यत् बधादेयः बध्यस्य भूमिः। प्रसिद्धाने बधस्थाने बध्यस्थानादयोऽप्यत्र [नदुगोत्रापत्ये पुंस्त्री०

बध्योग पु०ऋषिभेदे ततो विदा० गोत्रापत्ये यञ्। बाध्योग

बभ्र न० बन्ध-ष्ट्रन् नलोपः। १सीसके, २चर्मसवरज्वां स्त्री ङीप्। पृषो० नस्य रः। बभ्रीत्यत्र स्त्री अमरः।

बन याचने तना० आत्म० सक० सेट्। वनुते अवनिष्ट। बेने उदित्त्वा वेट् वनित्वा वान्त्वा वान्तः। [बबन्ध बध्यते।

बन्ध बन्धने क्या० पर०सक०अनिट्। बध्नाति अभान्त्सीत् उद्+उत्क्षिप्य बन्धने "उद्बध्नन्नसता ये च" स्मृतिः। अनु+नियतपूर्ववर्त्तित्वे अनुगमने च। "तेषु किं भवतः स्नेहमनुबध्नाति मानसम्" देवीभा०।

नि+नियमेन बन्धने निबन्धशब्दे दृश्यम्।

निर्+आग्रहे निर्बन्धशब्दे दृश्यम्।

प्र+प्रबन्धने कालनिरूपणे च प्रबन्धशब्दे दृश्यम्।

प्रति+निरोधे "प्रतिबध्नाति हि श्रेयः" रघुः। व्याप्तौ च प्रतिबन्धशब्दे दृश्यम्।

सम्+सम्यक्बन्धे संसर्गे च।

बन्ध संयमने चुरा०उभ०सक०सेट्। बन्धयति ते अबबन्धत् त

बन्ध पु०बन्ध-घञ्। १संयमने निगडादिना गतिरोधने २रज्जुप्रभृतिश्लेषणसाधने च। रज्जुशब्दे २६३५ पृ०दृश्यम्। करणे कर्मणि वा घञ्। ३देहे ४ऋणशोधनविश्वासाय स्थापिते द्रव्ये आधौ च। आधिशब्दे ७११पृ० दृश्यम्। करणे घञ्। ५गतिरोधसाधने शब्दर०। रतिबन्धभेदाश्च रतिमञ्जर्युक्ता यथा "बन्धनो नागपदो जतावेष्टोऽर्द्धसंपुटः कुलिशं सुन्दरश्चैव तथा केसर एव च। हिल्लोलो नरसिंहोऽपि विपरीतस्तथाऽपरः। अम्बो वै मेलुकश्चैव शशूलकश्च ततः परम्। सिंहासनो रतिनागो विद्याधरस्तु षोडशः" तत्तच्छब्दे तेषां लक्षणानि दृश्यानि। अरदीपिकोक्ता अन्येऽपि बन्धाः सन्ति यथा

"कामप्रदो विपरीतो नागरो रतिपाशकः। केयूरः प्रियतोषश्च ततः समपदस्तथा। ततश्चैकपदो ज्ञेयः सम्पुटसार्द्धसम्पुटः। ततः स्तनभरश्चैव ततोऽनुरतिसुन्दरः। ऊरुपीडामरुबन्धौ ततश्चोरुक्रमः स्मृतः। वेष्टको हंसकीलस्तु ततो लीलासनस्तथा। अष्टादश क्रमादुक्ता स्त्रीणां बहुसुखप्रदाः। पुंसां सुखकराश्चैव कथितास्तु क्रमात्ततः"। प्रवाहरूपेण सततं देहाद्देहान्तरगतिरूपे ६संसारे च।

बन्धक न० बन्धे स्थापितं धनम् कन्। ऋणशोधार्थम् विश्वासहेतुतया आधीक्रियते १पदार्थे शब्दर०। स्वार्थे क। २विनिमये पु० मेदि०। ३रतक्रियाभेदे नानार्थमाला। ४पुंश्चल्यां स्त्री अमरः। ५हस्तिन्यां मेदि० उभयत्र गौरा० ङीष्। ६पद्मपुरुषगामिन्यां स्त्रियाम् भा० आ० १२२अ०।

बन्धन न० बन्ध-भावे ल्युट्। १निगडादिना २संयमने अमरः ३बधे मेदि०। करणे ल्युट्। ४तद्धेतौ रज्ज्वो। हेमच०

बन्धनवेश्मन् न० ६त०। कारागारे हारा०। बन्धनागारादयोऽप्यत्र। बन्धनालयोऽपि तत्रार्थे अमरः।

बन्धनस्तम्भ पु० ६त०। हस्तिसंयमनकाष्ठे आलाने अमरः।

बन्धित्र पु०बन्ध इत्र। १कामदेवे उणादि०। २चर्मव्यजने संक्षि०

बन्धु पु० बध्नाति मनः स्नेहादिना बन्ध-उ। १भ्रातरि मातुलपुत्रादौ अमरः। "२बन्धुभ्यः पितृमातृतः" इति स्मृतिः। बान्धवे ३मित्रे ४पितरि ५मातरि ६भ्रातरि ७बन्धुजीववृक्षे च स्वार्थे अण्। बान्धव तत्रार्थे बन्धवश्च त्रिविधाः पारिभाषिका आत्मबन्धुशब्दे पितृबन्धुशब्दे उक्ता मातृबन्धुशब्दे वक्ष्यमाणाश्च दृश्याः। अतएव "तत्सुतो गोत्रजो बन्धुरिति" याज्ञ० तएव आत्मा इति मिता०। दायभागमते तु मातामहादयोऽपि बन्धवः अतएव "तत्सुतो गोत्रजो बन्धुरिति" याज्ञ०व्या० तेन बन्धुपदेन असगोत्राणां मातामहादीनां ग्रहणमित्युक्तम्। अतो मतभेदेन धनग्रहणे व्यवस्थाभेदः।

बन्धुक पु० बन्ध-उक। बन्धुजीववृक्षे शब्दरत्ना०।

बन्धुजीव(क) पु०बन्धुरिव जीवयति जीवि-अच् खुल् वा। बन्धुजीववृक्षे। (बांधुलि) इत्ते अमरः। [च अमरः

बन्धुता स्त्री बन्धु+संघे भावे तल् वा। १बन्धुसमूहे, २तद्भावे

बन्धुदत्त न० ६त०। १स्त्रीधनभेदे "बन्धुदत्तं तथा शुल्क

बन्धाधेयकमेव च। अप्रजायामतीतायां बान्धवास्तद्-वाप्नुयुः" याज्ञ०। "बान्धवा भ्रातरः बन्धुदत्तप्रदेन कन्या-दशायां यत् पितृभ्यां दत्तं तदुच्यते" दायभागः। तन्मते कन्यादशायां बन्धुभ्यां पितृभ्यां दत्ते स्त्रीधने च।

बन्धुर न० बन्ध-उरच्। १शकुटे शब्दर० २स्त्रोचिह्ने ३तिल-कल्के ४बन्धुजीववृक्षे ५वधिरे हंसे च मेदि० ७विड्भङ्गे हेमच०। ८वृक्षभौषधौ राजनि० ९वके विहङ्गे च पु० शब्दर०। १०रम्ये ११नम्रे १२वेशग्रायां स्त्री १३सप्तसु पु० ब० मेदि०। १४उन्नतानते च त्रि० अमरः पाठान्तरम्।

बन्धुल पु०बन्ध-उलच्। १असतीपुत्रे अमरः २बन्धुके शब्दर० ३सुन्दरे ४रम्ये ५नम्रे च त्रि० अजयपालः।

बन्धूक पु०बन्ध-ऊक। (बन्धुली)वृक्षे अमरः"बन्धूकपुष्पसङ्का-शम्" रविप्रणाममन्त्रः। रक्तपीतादिपुष्पे मध्याह्ने प्रकाश-वति पुष्पवृक्षे २पीतशालके मेदि०। "ऋतुपीतलोहितपुष्प विशेषाच्चतुर्विधो बन्धूकः। ज्वरहारी विषहारी वातपि-त्तापचयनः प्रसादनः सविषुः स्यात्" राजनि०।"बन्धूकः कफकृद्गुरुर्वातपित्तहरो लघुः" भावप्र०। (बन्धुक) इति ख्याते ३खधूपे न० हेमच०।

बन्धूर पु०बन्धू-जरच्। १छिद्रे उणा०। २रम्ये ३नम्रे च त्रि० रभसः ४उन्नतानते क्वचिदुन्नते क्वचिच्च नते त्रि०अमरः।

बन्धूलि पु० बन्ध-ऊलि। बन्धुजीववृक्षे शब्दर०।

बन्ध्य त्रि० बन्ध-यत्। कालप्राप्तावपि १ फलशून्ये वृक्षे अमरः। २निष्फले राजनि० "अबन्ध्यकोपस्य निहन्तु-रापदाम्" किरा०। ३बन्धनीये च त्रि०। ४अप्रसूतायां स्त्रीजातौ स्त्री शब्दच०। ५बालाख्ये गन्धद्रव्ये स्त्री मेदि०। प्रा०वि० बन्ध्यायाः दुष्टत्वसङ्कः यथा "बन्ध्या च दुष्टा ज्ञेया दुष्टा च रजस्वला। अथ वा दुष्टा ज्ञेया कुमारी या रजस्वला" दुष्टोनिरोगभेदे स्त्री भावप्र०। ३५४७पृ० पित्तलशब्दे परिशिष्टे दृश्यम्।

बन्ध्यफल पु०फले बन्ध्यः पूर्वनि०। फलहीने वृक्षे अमरः।

बन्ध्याकर्कटी स्त्री बन्ध्राया उपकारिणी पुत्रप्रदत्वात् कर्कटी। तिक्तकर्कट्याम् अस्याः पुत्रदात्रित्वेन बन्ध्रो पकारित्वम्। स्वार्थे क प्रत्ययः दृश्यम्। बन्ध्राकर्कटिका तत्रैव भावप्र० "बन्ध्याकर्कटिका तिक्ता कटुष्णा च कफा-पहा। स्थावरादिविषघ्नी च रसायनकरी परा" तद्गामस्तु तत्र पुत्रदेति कीर्त्तनात् तस्य बन्ध्रोपकारित्व बोध्यम्।

बन्ध्यातनय पु० बन्ध्रायास्तनय इव। अजीके पदार्थे बन्ध्रा सुतादयोऽप्यत्र।

बभ्र गतौ भ्वा०पर०सक०सेट्। बभ्रति अबभ्रीत् बबभ्र।

बभ्रु पु० भृ-कु-द्वित्वम् बभ्र-उ वा। १अग्नौ २विष्णौ ३नकुले ४बभ्रौ, ५विशाले देशभेदे हृतद्देशवासिनि ब०व० मेदि०। ७मुनिभेदे च ८पिङ्गलवर्णे पु०। ९तद्वति त्रि० अमरः। स्त्रियाम् ऊङ्। १०खलपौ बल्लकरे पु०हेमच०। ११सिता-वरकषाये राजनि०। गर्गा० अपत्ये यञ्। बाभ्रव्य तन्मु-नेरपत्ये पुंस्त्री०। स्त्रियां ङीप् यलोपः बाभ्रवी।

बभ्रुधातु पु० कर्म०। १स्वर्णे २गैरिके च राजनि०।

बभ्रु गतौ भ्वा०पर०सक०सेट्। बभ्रति अबभ्रीत् बबभ्रु।

बभ्रुरि त्रि० भृ-इन् द्वित्वं अभ्यासे सम्। सर्वस्य भर्त्तरि "बभ्रुरिरवभ्रुरसि" नागेशभट्टा०।

बर न० वृ-अच् १कुङ्कुमे। २आर्द्रके ३त्वचे ४बालके गन्ध-द्रव्ये राजनि०। कर्मणि अच्। ५जामातरि देवादिभ्यः ६आशासे ७विड्गे जारे च पु०। भावे अप्। ८वरणे ९तिक्तफलायां मेदि०। १०गुडूच्यां,११मेदायां १२ब्राह्म्याम् १३विड्भङ्गे १४पाठायां १५हरिद्रायाञ्च स्त्री टाप् राजनि०। १६शतावर्य्यां स्त्री मेदि० गौरा० ङीष्।

बरम् अव्य०वृ-वा० अमु। ईषदिष्टे अयमन्त्यस्यवादिरित्येके।

बर्जह न० गवादीनां दुग्धस्रोतःपत्तिस्थाने ऋ० १।६२।४ भा०

बर्ब गतौ भ्वा०पर०सक०सेट्। बर्बति अबर्बीत् बबर्ब।

बर्बट पु०बर्ब-अटन्। १राजमाषे (बरबटी) त्रिका०। गौरा० ङीष्। २तत्रैव व्रीहौ ३वेशग्रायाञ्च स्त्री मेदि०।

बर्बणा स्त्री बर्ब-ल्यु। नीलमक्षिकायाम् अमरः।

बर्बुर न० न० बर्ब-उरच्। उदके निघण्टुः।

बर्ह दाने बधे स्तुतौ वाचि च भ्वा०आ०सक०सेट्। बर्हते अबर्हिष्ट "विगर्हितं धर्मधनैर्निबर्हणम्" नैष०।

बर्ह न० बर्ह-अच्। १मयूरपिच्छे अमरः। २पत्रे ३परीवारे हेमच० मयूरपिच्छे पुंस्त्वमपि। "कं हरेदेष बर्हः" इति विक्रमो० प्रयोगात् "यथा बर्हाणि चित्राणि बिभर्त्ति भुजगाशनः" क्लीबे प्रयोगः। [पृ०६४अ०

बर्हकेतु पु०बर्हं केतुचिह्नं यस्य। मयूरध्वजयोः पुत्रभेदे मार्क०

बर्हवत् पु० बर्ह+अस्त्यर्थे मतुप् मस्य वः। मयूरपिच्छयुक्ते ततः विन्धकादि० अण्। बार्हवत तत्सम्बन्धिनि त्रि०।

बर्हस् न० बर्ह-स्तुतौ असुन्। आशीरर्थे ऋ० १।११४।१०।

बर्हि न० बर्ह-इन्। कुशे।

बर्हिण पु० बर्ह+इन। मयूरे अमरः।

बर्हिन् पु० बर्ह+अस्त्यर्थे इनि। मयूरे अमरः।

बर्हिवाहन पु० बर्हिं मयूरो वाहनमस्य। कार्त्तिकेये।

बर्हिपुष्प पु० बर्हि बर्हियुक्तमिव पुष्पमस्य । मयूरपिच्छवृक्षे भावप्रकाशमादयोऽस्य ।

बर्हिर्मुख पु० बर्हिर्बर्हिर्मुखमस्य । देवे अमरः ।

बर्हिःशुष्मन् पु० बर्हिः कुशः बलमस्य । ब्रह्मणि अमरः ।

बर्हिषद् पु० ब०व० बर्हिषि सीदति सद-क्विप् षत्वम् । पितृगणभेदे पितृशब्दे दृश्यम् ।

बर्हिष्केश पु० बर्हिः केश इव यस्य । वह्नौ ।

बर्हिष्मत् त्रि० बर्हिरस्यास्य मतुप् । कुशयुक्ते स्त्रियां ङीप् ।

बर्हिष्य त्रि० बर्हिषि दत्तम् यत् । कुशे दत्ते पिण्डादौ ।

बर्हिष्ठ त्रि० बर्हिषि कुशे तिष्ठति स्था-क ७त० वा विसर्गलोपः षत्वम् । कुशस्थिते ।

बर्हिस् न० बर्ह-कर्मणि इसि । कुशे १यज्ञिये कुशे "निर्होता यक्षि बर्हिषि" सामार्चिकम् ।।।१। "उपमूललूनं बर्हिः पितृणां पर्वसु लूनं देवानाम्" कौ०त० । प्राचीनबर्हिस्शब्दे दृश्यम् २दीप्तौ ३अग्नौ च "बर्हिषि रजतं न देयम्" स्मृतिः ।

बल जीवने, धान्यावरोधे च भ्वा०पर०सक०सेट् । बलति । अबालीत् अबलीत् । बेलतुः । ज्वलादि०कर्त्तरि ण । बलः बालः ।

बल दाने बधे निरूपणे च भ्वा०उभ०सक०सेट् । बलति-ते अबालीत् अबलिष्ट । बेलतुः बेलेते । [बलत् त ।

बलं जीवने चु०उभ०अक०सेट् सित् घटा० । बलयति-ते अबीबलत ।

बल निरूपणे चु०आत्म०सक०सेट् । बालयते अबीबलत ।

बल न० बल-अच् । १सैन्ये २देहजे सामर्थ्ये ३स्थौल्ये ४गन्धरसे ५रूपे मेदि० ६शुक्रे हेमच० ७८देहे जटा० ८पक्षिणि शब्दर० ९रक्षे च शब्दच० । १०बलयुक्ते त्रि० मेदि० ११काके १२बलदेवे अमरः । १३वरुणवृक्षे शब्दच० । १४दैत्यभेदे पु० मेदि० । तत्र पारिभाषिकबलानि ब्रह्मवैपु० २५ अ० उक्तानि यथा

"क्षत्रियाणां बलं युद्धं व्यापारश्च बलं विशाम् । भिक्षाबलं भिक्षुकाणां शूद्राणां विप्रसेवनम् । हरौ भक्तिर्हरेर्दास्यं वैष्णवानां बलं हरिः । हिंसा बलं खलानाञ्च तपश्च तपस्विनाम् । बलं वेशस्य शस्त्राणां योषितां यौवनं बलम् । बलं प्रतापो भूपानां बालानां रुदितं बलम् । सतां सत्यं बलं, मिथ्या बलमेषामसतां सदा । अनुमानामनुगमः खलस्खलनाञ्च संशयः । विद्या बलं पण्डितानां वाग्मित्वं वक्तृजां बलम् । शास्त्रसत्कर्मशीलानां गाम्भीर्यं साहसं बलम् । धनं बलं च धनिनां शुचीनां शौचमेव च । बलं विवेकः शान्तानां गुणिनां बलमैक्यता । गुणो बलं च गुणिनां चौराणां चौर्यमेव च । विप्रबलञ्च कामश्च कामुकानां बलम् । हिंसा च हिंस्रजन्तूनां सतीनां पतिसेवनम् । वरस्यापो सुराणाञ्च शिष्याणां गुरुसेवनम् । बलं धर्मो गृहस्थानां भक्त्यानां राजसेवनम् । बलं स्तवः स्तावकानां ब्रह्म च ब्रह्मचारिणाम् । यतीनाञ्च सदाचारो न्यासः सन्न्यासिनां बलम् । पापं बलं पातकिनां शुभक्षानां हरिर्बलम् । पुण्यं बलं पुण्यव्रतां प्रजानां नृपतिर्बलम् । फलं बलञ्च वृक्षाणां जलधीनां जलं बलम् । जलं बलञ्च सत्त्वानां मत्स्यानाञ्च जलं बलम् । शान्तिर्बलञ्च भूपानां विप्राणाञ्च विशेषतः" । "विद्याभिजनमित्राणि बुद्धिसत्त्वं धनानि च । तपःसहायवीर्याणि दैवञ्च दशमं बलम्" । भा० शा० ।

वैद्यके सद्योबलकरपदार्थाः संज्ञाश्च दर्शिता यथा

"सद्यो बलकरं क्षीरं बालाभ्यङ्गः सुभोजनम् । सद्यो बलकरं क्षीरं सर्पिश्च मांसमप्युत" । "धातूनां यत् परं तेजस्तत्सत्त्वोजस्तदेव बलमित्युच्यते" वैद्य० वायुदत्ते १५स्कन्दानुचरभेदे पु० । "बलज्ञातिबलश्चैव महाबलो महाबलौ" भा० श० २५।२६ श्लो० । असुरभेदश्च इन्द्रेण हतः इन्द्रपर्य्याये बलारातिशब्ददर्शनात्" देवीपु० ४७अ० तु स विष्णुना हतः "तदा दत्ता तनुस्तेन दानवेन महात्मना । विष्णुनापि स्वचक्रेण शिरस्यभिहतो बलः । प्राक्तनं देहमुत्सृज्य दिव्यकायस्त्वभूत्तदा । तस्यास्थिसंभवा वज्रात्तस्माद्रत्नजातयः । लोचने सुर तेजांसि पद्मरागाणि चाभवन् । विष्णुचक्रप्रहारेण कायो रत्नाकरोऽभवत्" । [अमरः । अन्त्यस्यवादिरयमिति स्वामी ।

बलज्ञ पु०बलं ज्ञायतेऽनात् ज्ञै-क । १शुक्लवर्णे । २सहति त्रि० ।

बलज न० बलात् जायते जन-ड । १क्षीरे २पुरद्वारे ३अस्थि ४युद्धे च । ५बलजाते त्रि० मेदि० । ६वरयोषायां ७यूथिकायां च स्त्री मेदि० ।

बलद पु० बलं ददाति दा-क । "पौष्टिके बलदः स्मृतः" १ पौष्टिककर्माङ्गे यक्षिभेदे । २ अश्वगन्धायां स्त्री । राजनि० २बलदातरि त्रि० । ४जीवके पु० राजनि० ।

बलदीनता स्त्री ३त० । स्वल्पबले हेमच० ।

बलदेव पु० बलेन दीव्यति दिव-अच् बलोद्रिक्तो देवो वा शाक०त० । १बलराभे "बलदेवो बलोद्रेकात्" ब्रह्मवै० ब्र०ख० ४२ अ० । २लाङ्गलायुधप्रभौ स्त्री अमरः । ३यौधे पु० मेदि० ।

बलप्रसू स्त्री ६त०। रोहिण्यां वसुदेवभार्य्यांभेदे स्त्री शब्दच०। तज्जनन्यादयोऽप्यत्र।

बलभद्र पु०बल+अर्शआद्यच बलो बलवानपि भद्रः सौख्यः। १बलदेवे, अमरः। २गवये राजनि०। ३अनन्ते पु० ४बलयुते त्रि० हेमच०। ५लोध्रे शब्दच०। बलेषु भद्रा। ६त्रायमाणौषधौ ६घृतकुमार्य्यां च स्त्री मेदि०। स्वार्थे क। बलभद्रिका तत्रार्थे स्त्री अमरः।

बलराम पु० बलेन रमते रम-संज्ञायां कर्त्तरि घञ् बलोपपदको वा रामःषा० त०। कृष्णाग्रजे रोहिणीनन्दने संकर्षणे रामस्य दाशरथिपरशुरामबलरामभेदेन त्रित्वात् अस्य बलोपपदकत्वात्तथात्वम्। [भरतः।

बलल पु० बलं लाति ला-क बल-कलच् वा। बलरामे

बलवत अव्य० बल+अतिशये मतुप् मस्य वः। १अतिशये अमरः। "बलवपि शिक्षितानाम्" शकुन्तला। २बलविशिष्टे सांसले त्रि० अमरः स्त्रियां ङीप्। [जटाधरः।

बलवर्द्धिनी स्त्री० बलं वर्द्धयति वृध-णिनि। जीवकौषधौ

बलविन्यास पु० बलानां सैन्यानां विन्यासेन दुर्भेद्यतायै न्यासः स्थापनम्। व्यूहे सेनासन्निवेशविशेषे अमरः।

बलशालिन् त्रि० बलेन शालते शाल-णिनि। बलविशिष्टे स्त्रियां ङीप्। [इन्द्रे हेमा०। बलनिसूदनोऽप्यत्र।

बलसूदन पु० बलं तन्नामकमसुरं सूदयति सूद-ल्यु।

बलस्थिति स्त्री स्था-आधारे क्तिन् ६त०। शिविरे त्रिका०।

बलहन् पु०बलनामासुरं बलं वा हन्ति हन-क्विप्। बलारातौ १इन्द्रे २श्लेष्मधातौ शब्दर०। ३बलरामे हरिवं० १११ अ०।

बला स्त्री० बलं कार्य्यत्वेनास्त्यस्याः। (बालियड़ा) १क्षुपभेदे, अमरः। "बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत्। स्निग्धं वातहरं वृष्यं शुक्रवृद्धिकरं परम्। बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम्। मूत्रातिसारं हरति दुष्टमेतच्च संशयः" भावप्र०। विश्वामित्रेण रामाय दत्ते २अस्त्रविद्याभेदे अतिबलशब्दे दृश्यम्।

बलाका स्त्री० बल-संवरणे आक। १वकपङ्क्तौ २वके विषकण्टिकायां ३वकभेदे ४कासक्यां च शाश्वतः।

बलाकाश्व पु० अजकन्दपपुत्रे नृपभेदे हरिवं० ७अ०।

बलाकिन् त्रि० बलाका+व्रीह्यादित्वात् इनि। १बलाकायुक्ते स्त्रियां ङीप् २धृतराष्ट्रपुत्रभेदे पु० भा० आ० ६७अ०।

बलाङ्क पु० बलयुक्तमङ्कमत्र कप्। वसन्तकाले हेमच०।

बलाञ्चिता स्त्री ३त०। बलरामवीणायां शब्दरत्ना०।

बलाट पु०बलाय तद्दानाय अटति गच्छति उदरम् अट-अच्। शुक्रे (शुक्र) हेमच०।

बलात् अव्य० बलं सामर्थ्यं कारणत्वेनातति अत-क्विप्। हठादित्यर्थे। पञ्चम्यन्तबलशब्देनास्य न गतार्थता बलात्कार इत्यादिसिद्धये तस्यावश्यमङ्गीकार्य्यत्वात्। [च।

बलात्कार पु०बलात्+कृ-घञ्। बलपूर्वककरणे हठात्करणे

बलात्मिका स्त्री० बलमेवात्मा स्वरूप कारणत्वात् यस्याः कप् अत इत्त्वम्। (हातिशुड़ा) हस्तिसृण्डीवृक्षे शब्दर०

बलादि पु० चतुरर्थ्यां यः प्रत्ययनिमित्ते १शब्दगणे स च गणः पा०ग० उक्तो यथा "बल चुल नल दल वट लकुल उरल पुल मूल उल डुल वन कूल"। अस्त्यर्थे वा १मतुप्रत्यय निमित्ते २शब्दगणे च स च गणः पा०ग०मूले उक्तो यथा "बल उत्साह उद्भास उद्हास उद्हास शिखा कुल चूड़ा शुल कूल व्यायाम व्यायाम उपयाम आरोह अवरोह परिणाह युद्ध"।

बलाढ्या स्त्री० बलाय आढ्या। (बेलियाड़ा) क्षुपभेदे राजनि

बलाध्यक्ष पु० ६त०। सेनापतौ मनु० ७।१८६।

बलानुज पु० अनुजायते अनु+जन-ड ६त०। श्रीकृष्णे।

बलाबलाधिकरण न०बलञ्च अबलञ्च ते अधिक्रियेते अस्मिन् अधि+कृ-आधारे ल्युट्। आकाङ्क्षानाकाङ्क्षारूपबलाबलयोर्निश्चायके जैमिन्युक्ते न्यायभेदे यथा "सा वैश्वदेवी सामिक्षा भवति वाजिभ्यो वाजिनम्" इत्यत्र वैश्वदेवीयामस्यामिक्षान्वितत्वेन वाजिनाकाङ्क्षेति न तत्र तन्नान्वयः वेदान्तप०।

बलामोटा स्त्री० बलमामोटयति आ-मुट-अच्। नागदन्त्याम् भवप्र०

बलाय पु० बलस्यायः स्थानम्। वरुणवृक्षे शब्दच०।

बलारति पु० बलस्य तन्नामासुरस्यारातिः। इन्द्रे अमरः। बलशत्रु प्रभृतयोऽप्यत्र। [खल्।

बलालक पु० बलाय सामर्थ्याय अलति पर्य्याप्नोति अल-धातौ हेमच०। "गौरवं कफसंज्ञावोऽरुचिस्तम्भोऽग्निमार्दवम्। माधुर्य्यमपि चास्यस्य बलासावहते हृदि" सुश्रु०

बलासकन्द पु० बलं सामर्थ्यमास्रवयति आ+स्रु-क तादृशः कन्दः। गुलुञ्चकन्दे राजनि०।

बलि पु० बल-इन्। १ पूजायाम् २उपहारे, "दद्यात् स्त्री बलिं चैव निजगात्रासृगुक्षितमिति" चण्डी ३राजग्राह्ये अमरः ४चामरदण्डे, ५भूतयज्ञे, हेमच०। "बलिकर्म ततः कुर्य्यादिति" स्मृतिः।

विरोचनपुत्रे दैत्यभेदे च "येन बद्धो बलीराजा दानवेन्द्रो महाबलः" रत्नावल्यनमन्त्रः। ऊर्जया क्लथचर्मणि स्त्री० ङीप्। "गृहस्थस्तु यदा पश्येत् वलीपलितमात्मनः" इति मनुः। ऊदरावयवभेदे "बलिलयं चाद्य बभार बाला" इति कुमारः। दनुजस्त्रे अङ्गुराकारे मांसपिण्डे, वैद्यकम् अर्शःशब्दे दृश्यम्। दृढ़हृदारुभेदे च (पाड़)स्त्री० स्वार्थे क। बलिका तत्रार्थे अतिबलायाश्च राजनि०। १०ययातिवंशप्रसूतपौरवपुत्रे विष्णु पु०। दानवभेदकथा भाग० ४स्क० दृश्या।

वैश्वदेवबलिकरणप्रकारः मार्क० पु० उक्तो यथा। "ततोऽग्नेस्तर्पणं कुर्याद्दद्याच्च बलिमित्यथ। ब्रह्मणे गृहमध्ये तु विश्वेदेवेभ्य एव च। धन्वन्तरिं सप्तर्षिभ्य प्रागुदीच्यां बलिं क्षिपेत्। प्राच्यां शक्राय, याम्यायां यमाय बलिमाहरेत्। प्रतीच्यां वरुणायैव सोमायोत्तरतो बलिम्। दद्याद्वास्तु विधास्तु च बलिं द्वारे गृहस्य च। वर्ष्मण्ये च बलिं दद्याद् गृहेभ्यश्च समन्ततः। नक्तञ्चरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत्। पितृभ्यां निर्वपेच्चैव दक्षिणाभिमुखस्थितः। गृहस्थस्तत्परो भूत्वा सुसमाहितमानसः। ततस्तोयमुपादाय तिष्ठेदाचमनाय वै। स्थानेषु निक्षिपेत् प्राज्ञस्तान्या उद्दिश्य देवताः। एवं गृहबलिं कृत्वा गृहे गृहपतिः शुचिः। आप्यायनाय भूतानां कुर्यादुत्सर्गमादरात्। श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्च वपेद्भुवि। वैश्वदेवं हि नामैतत् सायं प्रातरुदाहृतम्"।

देवोद्देश्यकबलिविशेषादिकं यथा

"साधकैर्बलिदानेषु याह्याः सर्वसुरस्य तु। पक्षिणः कच्छपा ग्राहा मत्स्या नवविधा मृगाः। महिषो गोधिका गावश्छागो वभ्रुश्च शूकरः। खड्गस्य कृष्णसारस्य गोधिका सरभो हरिः। शार्दूलस्य नरस्यैव मृगाजरुधिरं तथा। चण्डिकाभैरवादीनां बलयः परिकीर्तिताः। बलिभिः साध्यते मुक्तिर्बलिभिः साध्यते सुखम्। बलिदानेन सततं जयेत् शत्रून् नृपान्नृपः। मत्स्यानां कच्छपानाञ्च रुधिरैः सततं शिवा। मासैकं तृप्तिमायाति ग्राहैर्मांसांस्तु मीनथ। मृगाणां शोणितैर्देवी नराणामपि शोणितैः। अष्टौ मासानवाप्नोति तृप्तिं कल्याणदा च सा। गोगोधिकानां रुधिरैर्वार्षिकीं तृप्तिमाप्नुयात्। कृष्णसारस्य रुधिरैः शूकरस्य च शोणितैः। आप्नोति सततं देवी तृप्तिं द्वादशवार्षिकीं। महिषाणाञ्च खड्गानां रुधिरैः शतवार्षिकीम्। तृप्तिमाप्नोति परमां शार्दूलरुधिरैस्तथा। सिंहस्य सरभस्याथ खगमस्य च शोणितैः। देवी तृप्तिमवाप्नोति सहस्रं परिपत्सरान्। मांसैरपि तथा प्रीतीरुधिरैर्वेस्य यावती। कृष्णसारमृते खड्गं तथा मत्स्यञ्च रोहितम्। वार्ध्रीणसयुगञ्चापि फलं तेषां पृथक् शृणु। कृष्णसारस्य मांसेन तथा खड्गेन चण्डिका। वर्षान् पञ्च शतान्येव तृप्तिमाप्नोति केवलाम्। रोहितस्य तु मत्स्यस्य मांसैर्वार्ध्रीणसस्य च। तृप्तिमाप्नोति वर्षाणां शतानि त्रीणि मत्प्रिया। त्रिःपिबंस्त्रीन्द्रियश्रोणः श्वेतो दृङ्खजापतिः। वार्ध्रीणसः प्रोच्यतेऽसौ हव्ये कव्ये च सत्तमः। नीलग्रीवो रक्तशीर्षः कृष्णपादः सितच्छदः। वार्ध्रीणसः स्मृत पक्षीशो मम विष्णो रतिप्रियः। "मत्स्यपूतं शोणितन्तु पीयूषं जायते सदा। मत्स्यकञ्चापि तस्यापि मांसञ्चापि सदा शिवा। तस्मात्तु पूजने दद्यादुबले शीर्षञ्च लोहितम्। भोज्ये होमे च मांसानि नियुञ्जीयाद्विचक्षणः। पूजायाञ्च नाऽऽर्द्रं मांसानि दद्याद्वै साधकः क्वचित्। क्षते तु लोहितं शीर्षमशुद्धं तत्तु जायते। कृष्णाखुमिश्रुदण्डञ्च मद्यमांसवमेव च। एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा। चन्द्रहासेन खड्गेन वा छेदनं सुखमिष्यते। दात्रासिधेनुकुकचसङ्कुलाभिस्तु मध्यमम्। क्षुरक्षुरप्रभल्लैश्चाधमं परिकीर्त्तितम्। एभ्योऽन्यैः शक्तिबाणप्रासैर्बलिश्छेद्यः कदापि न। नाप्नोति देवी बलिं तन्तु दाता मृत्युमवाप्नुयात्। छत्तेन च्छेदयेद्यस्तु प्रोक्षितं साधकः पशुम्। पक्षिणं वा ब्रह्मघ्नां सोऽवाप्नोति सुदुःसहाम्। नामन्त्र्य खड्गन्तु बलिं नियुञ्जीत विचक्षणः।" "पशूनां पक्षिणाञ्चापि नराणाञ्च विशेषतः। स्त्रियं न दद्यात्तु बलिं दत्त्वा नरकमाप्नुयात्। सङ्कल्पितबलिदानेषु योजितं पशुपक्षिणोः। बलिं दद्यान्मानुषीन्तु त्यक्त्वा सङ्कल्पपूजितम्। न क्लिष्टासीयकाक्ष्णूनं पशुं दद्यात् शिवाबलिम्। न च क्लिष्टकाक्ष्णूनं प्रदद्याद्वै पतत्रिणम्। काणाभ्यङ्गादिदुष्टन्तु न पशुं पक्षिणन्तथा। देव्यै दद्याद्यथामन्त्रं तथैव पशुपक्षिणौ। छिन्नलाङ्गूलकर्णाहिभग्नदन्तन्तथैव च। भग्नशृङ्गादिकञ्चापि न दद्यात्तु कदाचन।" "नारं सद्ये शिरोरक्तं देव्याः सम्यक् निवेदयेत्। छागन्तु वामतो दद्याच्छिरं वितरेत् पुरः। पक्षिणं वामतो दद्याद्यतो देह

शोणितम् । क्रव्यादीनां पशूनान्तु पक्षिणाञ्च शिरोऽसृजम् । वामे निवेदयेत् पार्श्वे जलजानाञ्च सर्व्वशः । कृष्णसारस्य कूर्मस्य खड्गस्य शशकस्य च । व्याघ्राणामथ मत्स्यानामग्र एव निवेदयेत् । सिंहस्य दक्षिणे दद्यात् खड्गिनोऽपि च दक्षिणे । पृष्ठदेशे न दद्यात्तु शिरो वा ऋषिरं बलेः" कालिकापु० नानाख्यानीयम् । "बलिदानेन विप्रेन्द्र! दुर्गाप्रीतिर्भवेच्छ्रणु । हिंसाजन्यञ्च पापञ्च लभते नात्र संशयः । उत्सर्गकर्त्ता दाता च छेत्ता योद्धा च दर्शकः । अष्टपञ्चाशिरोद्धा च सप्तैते बधभागिनः । यो यं घ्नन्ति स तं घ्नन्ति चेति वेदोक्तमेव च । कुर्व्वन्ति वैष्णवीं पूजां वैष्णवास्तेन हेतुना" ब्रह्मवै० प्रकृ० ६१ । ६२ अ० । बलिदाननिन्दा यथा "पार्व्वत्युवाच । ये मदार्चनमित्युक्त्वा प्राणिहिंसन तत्पराः । तत् पूजनं ममामेध्यं यद्दोषात्तदधोगतिः । अदर्थं शिव ! कुर्व्वन्ति तामसा जीववातनम् । चाकल्पकोटि निरये तेषां वासो न संशयः । मम नाम्नाथ वा यज्ञे पशुहत्यां करोति यः । क्वापि तन्निष्कृतिर्नास्ति कुम्भीपाकमवाप्नुयात् । दैवे पैत्रे तथात्मार्थे यः कुर्य्यात् प्राणिहिंसनम् । कल्पकोटिशतं शम्भो ! रौरवे स वसेत् ध्रुवम् ! यो मोहान् मानसैर्दैहिंत्यां कुर्य्यात् सदाशिव ! । एकविंशतिजन्मत्वः स तत्तद्योनिषु जायते । वस्तु यज्ञे पशून् हत्वा कुर्य्यात् शोणितकर्दमम् । स पचेन्नरके तावद् यावल्लोमानि तस्य वै । हन्ता कर्त्ता तथोत्सर्गकर्त्ता धर्त्ता तथैव च । तुल्यभवन्ति सर्व्वे ते ध्रुवं नरकगामिनः । मूढोऽत्र यः पशून् हत्वा नरक्तं पात्रसंस्थं कुर्य्यात् । यो मूढः स तु पूयोदे वसेद् देव ! न संशयः । देवतान्तरसद्भावव्याजेन स्वेच्छया तथा । हत्वा जीवांस्ततो मोहात् नित्यं नरकमाप्नुयात् । यूपे बद्ध्वा पशून् हत्वा यः कुर्य्याद्रक्तकर्दमम् । तेन चेत् प्राप्यते स्वर्गो नरकं केन गम्यते । उपदेष्टा वधे हन्ता कर्त्ता धर्त्ता च विक्रयी । उत्सर्गकर्त्ता जीवानां सर्व्वेषां नरकं भवेत् । मध्यस्थस्य वधायापि प्राणिनां क्रयविक्रये । तथा दृष्ट्वा स्खलायां कुम्भीपाकोभवेद् ध्रुवम् । स्वयंकामाशयो भूत्वा योऽज्ञानेन विमोहितः । हन्यन्यात् विविधान् जीवान् कुर्य्यान्मद्याम शङ्कर ! । तद्द्रव्यवंशसम्पत्तिज्ञातिदारादिसम्पदाम् । अचिराद्वै भवेन्नाशो मृतः स नरकं व्रजेत् । देवयज्ञे पितृश्राद्धे तथा माङ्गल्यकर्म्मणि । तत्रैव नरके वासो यः कुर्य्याज्जीवघातनम् । मद्यमांसेन पशून् हत्वा यो भक्षेत् सह बन्धुभिः । तदुगात्रलोमसंख्याब्दैरसिपत्रवने वसेत् । आवयोरन्यदेवानां नाम्ना च परकर्म्मणि । यः कंपोष्य पशून् हन्यात् सोऽसृतामिस्रमाप्नुयात् । पशून् हत्वा तथा त्वां मां योऽर्चयेन्मांसशोणितैः । तावत्तद्धरके वासो यावच्चन्द्रदिवाकरौ । निर्विघ्नमखतुल्यं तत् बहुद्रव्येण यत् कृतम् । यस्मिन् यज्ञे प्रभो ! शम्भो ! जीवहत्या भवेद्ध्रुवम् । यज्ञमारभ्य चेत् शक्रः कुर्य्याद्वै पशुघातनम् । स तदाऽधोगतिं गच्छेदितरेषाञ्च का कथा । आवयोः पूजनं मोहाद्ये कुर्य्युर्मांसशोणितैः । पतन्ति कुम्भीपाके ते भवन्ति पशवः पुनः । फलकामास्तु वेदोक्तैः पशोरालभनं मखे । पुनस्तत्तत् फलं भुक्त्वा ये कुर्वन्ति पतन्त्यधः । स्वर्गकामोऽश्वमेधं यः करोति निगमाज्ञया । तदुभोगान्ते पतेद्भूयः स जन्मनि भवार्णवे । ये हताः पशवो लोकैरिह स्वार्थेषु कोविदैः । ते परत्र तु तान् हन्युस्तथा खड्गेन शङ्कर !। आत्मपुत्रकलत्रादिसम्प्राप्तिकुलेच्छया । यो दुरात्मा पशून् हन्यात् स्वात्मादीन् घातयेत् स तु" । जानन्ति नो वेद पुराणतत्त्वं ये कण्ठाः पण्डितमानयुक्ताः । लोकाधमास्ते नरके पतन्ति कुर्वन्ति मूर्खाः पशुघातनञ्चेत् । येऽज्ञानिनो मन्दधियोऽकृतार्था भवे पशुं घ्नन्ति न धर्मशास्त्रम् । जानन्ति नाकं नरकं न मुक्तिं गच्छन्ति घोरं नरकं नरास्ते । मूढा अकार्य्यां न विदन्ति शास्त्रं न धर्ममार्गं परमार्थतत्त्वम् । पापं न पुण्यं पशुघातका ये पूयोदवासो भवतीह तेषाम् । जीवानुकम्पां न विदन्ति मूढा भ्रान्ताश्च येऽस्तृपधिनोन धर्मम् । क्षान्तौ भवे प्राणिवधं तु कुर्य्युस्ते यान्ति मत्स्याः खलु रौरवाख्यम् । ततस्तु खलु जन्तूनां घातनं नो करिष्यति । शुद्धात्मा धर्मवान् ज्ञानी प्राणान्तेनैव मानवः । यदीच्छेदात्मनः क्षेमं त्यक्त्वाऽज्ञानं तदा नरः । जीवान् कानपि नो हन्यात् सङ्कटापन्न एव चेत् । सम्पत्तौ च विपत्तौ वा परलोकेच्छुकः पुमान् । कदाचित् प्राणिनो हत्यां न कुर्य्यात् तत्त्ववित् सुधीः । मानवो यः परत्रेह तर्त्तुमिच्छेत् सदाशिव ! । सर्वविष्णुमयत्वेन न कुर्य्यात् प्राणिनां वधम् । वधाद्रक्षति यो मर्त्यो जीवान् तत्त्वज्ञ ! धर्मवित् । किं पुण्यं तस्य वक्ष्येऽहं ब्रह्मापञ्चं स तु रक्षति । यो रक्षेत् घातनात् शम्भो ! जीवमात्रं दयापरः । क्षणप्रयत्नतो नित्यं सुखरक्षां करोति सः । एकस्मिन्क्षिते जीवे त्रैलोक्यं तेन रक्षि-

तस्य । वराह शङ्कर ! वै येन तत्राहत्यस्य घातयेत् । पशुहिंसाविधिर्यत्र पुराणे निगमे तथा । तत्तो रजस्तमोभ्यां स केवलं मनसापि वा । नरकस्वर्गसेवार्थं संसाराय प्रवर्त्तितः । तयोक्तकर्मभोगेन गमनागमनं भवेत् । सत्त्वेन सात्त्वतग्रन्थे स विधिर्नैव शङ्कर ! । प्रवृत्तितो निवृत्तिस्तु यत्नापि सात्त्विकी क्रिया । एवं नानाविधं कर्म पशोराहत्यनादिकम् । कामाशयः फलाकाङ्क्षीकृत्वाऽज्ञानेन मानवः । पशाज्ज्ञानासिना छित्वा भ्रान्त्याशां तामसीं सदा । यमभीतिहरं भक्त्या यदि गोविन्दमाश्रयेत् ।" पाद्मोत्तरखण्डे १०४ १०५ अ० ।

बलिध्वंसिन् पु० बलिं ध्वंसयति खण्डनात् पातयति ध्वंस-णिच्-णिनि । विष्णौ वामनावतारेण हि तस्य तथात्वम् । तत्कथा च वामनपु० २२ अ० द्रष्टव्या ।

बलिनन्दन पु० हृत० बाणासुरे शब्दर० । [वर्त्तते अमरः ।

बलिन(म) त्रि० बलि+अस्त्यर्थे-इन भ वा । जरया शिथिल-

बलिन् त्रि० बलमस्त्यस्य इनि । १बलवति । २पुष्टे, ३मांसिके, ४हृष्टे, ५शूकरे, ६कन्दहृत्ते, ७कपौ पु० मेदि० । ८बलरामे शब्दर० (बेलियाड़ा) । ९लुप्ते स्त्री ङीप् शब्दच० ।

बलिपुष्ट पु० बलिना वैश्वदेवबलिद्रव्येण पुष्टः पुष-क्त इत० । काके अमरः स्त्रियां ङीप् ।

बलिपोदकी स्त्री उपोदक्यां राजनि० ।

बलिप्रिय पु० बलिनं प्रीणाति प्री-क । लोध्रवृक्षे शब्दच० ।

बलिबिन्ध्य पु० रैवतकमनोःपुत्रभेदे भाग० ८।५।२ ।

बलिभुज् पु० बलिं वैश्वदेवद्रव्यम् अदृष्टस्यदत्तबलिं भुङ्क्ते भुज-क्विप् । काके अमरः ।

बलि(ली)मुख पु० बलि(ली)युक्तं मुखमस्य शाक० त० । वानरे अमरः । [बलि । २दुष्टे पु० राजनि० ।

बलिष्ठ त्रि० अतिशयेन बली बलिन्+इष्ठन् । १अत्यन्तबल

बलिष्णु त्रि० बल-संवरणे इष्णु । अपमानिते उणा० ।

बलिसद्मन् न० हृत० । पातालेऽमरः बलिसम्मिदादयोऽत्र ।

बलीक पु० न० बाधयति आदृणोति बल-ईकन् नि० । पटल प्रान्ते (काँच) अमरः । [युते स्त्रियां ङीप् ।

बलीयस् त्रि० अतिशयेन बली बलिन्+ईयसुन् । अत्यन्तबल-

बलीवर्द पु० वै बल्लीः व-क्विप् बट् तौ ईवरौ उदाति ट-क ईवर्दः बली वासौ ईवर्दश्चेति । वृषे अमरः । ततः शुभ्रा० अपत्ये ढक् । बालीवर्देय तदपत्ये पु स्त्री०

बलूल त्रि० बल+सिध्मा० वा लच् ऊङ् । बलयुक्ते ।

बलोत्कटा स्त्री ७स्कन्दानुचरमातृकाभेदे भा० शा० ४५ अ० । २बलेनोत्कटे त्रि० ।

बल्य न० बलाय हितं बल+यत् १प्रधानधातौ शुक्रे, २बल-साधने च ३अश्वगन्धायाम्, ४अतिबलायां, ५शिखण्डीचुपे ६प्रसारिण्यां च स्त्री राजनि० । बलाऽर्हतुरश्वौ यत् । ७बल-निर्हृत्ते त्रि० ८बहुभिक्षुके पु० त्रिका० । [तृणभेदे हेमच

बल्वजा स्त्री० बल-क्वण् तं वजति वज-गतौ अच् । उलपे

बल्ह स्तुतौ दाने, वधे, च सक० याचने दिक० भ्वा० आत्म० सेट् । बल्हते अबल्हिष्ट बबल्हे ।

बल्हि पु० बल्ह-इन् । १क्षत्रियभेदे २जनपदभेदे स्वार्थे क तत्रा र्थे । ततः कोपधत्वात् भवे अण् । वाल्हिकस्तिङ्कनि न०

बव पु० प्रथमे तिथ्यङ्गभूते करणभेदे करणशब्दे दृश्यम् ।

बष्क(स्क)यि(यो)नी स्त्री बष्क गतौ अयन् पृषो० षस्य वः सस्य वा षत्वम् । बष्क(स्क)योऽस्यास्ति इनि ङीप् षस-ध्यत्वे णत्वम् । चिरप्रसूतायां गवि अमरः । बष्क(स्क)यं नयतीति नी-ड गौ० ङीष् षसध्यत्वे पूर्व० णत्वम् । बष्क(स्क)यणी(नी) इत्यपि स्त्री ।

ब(व)ह वृद्धौ भ्वा० आत्म० अक० सेट् इदित् । बं(वं)हते अबं(वं)हिष्ट । बबंहे महिसाहचर्य्यादयमोष्ठ्यादिरिति पाणिनीयाः । दन्तोष्ठ्यादिरिति बोपदेवः ।

बहल त्रि० बहि-कलच् नलोपश्च १स्थूले २बहुशब्दार्थे च ।

ब(व)हु त्रि० बं(व)हि-कु नलोपः । १तिप्रभृत्यनेकसङ्ख्यान्विते, २विपुले च । ब(व)ह्वादि० स्त्रियां वा ङीप् ।

बहुत्वं च त्रित्वपर्य्यवसायि कपिञ्जलन्यायात् अपेक्षाबुद्धिवि-शेषजन्यत्वं तच्च पर्य्याप्तप्रा सर्वत्र वर्त्तते समवायेन प्रत्येकं वृत्तिमत् । यस्य संख्यायत् कार्य्यम् तेन बहुशः बहुत्व बहुतिथ इत्यादि । [४दात्यूहे खगे ५जलखातके च मेदि०

बहुक पु० बहु+संज्ञायां कन् । १कर्कटे २खर्ये ३कर्कटके

ब(व)हुकण्टक पु० ब(व)ह्वि कण्टकान्यस्य । १क्षुद्रगोक्षुरे । २यवासे (गोखुरी) ३हिन्तालेऽमरः ४अग्निदग्धस्थां स्त्री० चुप-भेदे राजनि० । [कण्टकारिकायाम् राजनि० ।

ब(व)हुकण्टा स्त्री ब(व)ह्वयः कण्टाः कण्टकाः यस्याः ।

ब(व)हुकन्द पु० ह्व० । १शूरणे । २कर्कट्यां स्त्री० राजनि० ।

बहुकर त्रि० स(ष)ह्वि किरति क-अच् । (फराश) १बहुभाषा-लंनकरे अमरः । करणे अण् । २सम्मार्जन्यां स्त्री हेम० गौरा० ङीष् । क्ल-अच् हृत० । ३दुष्टे त्रिका० । ४अनेककार्य्यकरे त्रि० । [कण्ड्यौ राजनि० ।

ब(व)हुकर्णिका स्त्री० ब(व)ह्वः कर्णा इव पर्णान्यस्य । आखु

बहुकूर्च पु० बह्वनि कूर्चान्यस्य । मधुमालिकेविके राजनि० ।

ब(ब)हुगन्ध पु० ६त० । १कुन्दुरुके । २त्वचे, (तेजपात) न० । ३चम्पकलिकायां ४यूथिकायां५कृष्णजीरके च स्त्री राजनि०

बहुगन्धदा स्त्री० ब(ब)हुगन्धं ददाति दा–क । मृगमदे । राजनि० ।

ब(ब)हुग्रन्थि पु० ६त० । झाबुके (झाऊ) । शब्दर०

बहुच्छिन्ना स्त्री ब(ब)हु यथा स्यात् छिद्यते या छिद्–क्त तस्य दस्य च नः । कन्दगुडूच्याम् राजनि० ।

बहुतरकणिश पु० ६त० । रागीधान्ये राजनि० ।

बहुतिक्ता स्त्री ब(ब)हुतिक्तो रसोऽस्याः । काकमाच्याम् राजनि० ।

ब(ब)हुतिथ त्रि० ब(ब)हूनां पूरणः ब(ब)हु+डट् तिथुक् च । अनेकसंख्याते, "काले गते बहुतिथे" इत्युक्टः ।

ब(ब)हुत्व अव्य० ब(ब)हुषु तल् । अनेकेषु दिग्देशकालेषु ।

ब(ब)हुत्वच(क) पु० ६त० वा कप् । भूर्जपत्रवृक्षे शब्दर० कैवन्तः हेमच० ।

ब(ब)हुदुग्ध पु० ब(ब)हूनि दुग्धानीव चूर्णानि शुभ्रवर्णत्वात् यस्य । १गोधूमे राजनि० । २ प्रचुरक्षीरवत्यां ३गवि, स्त्री हेमच०।वा कप् अत इत्वम् । बहुदुग्धिका क्षुद्रक्षीरवृक्षे स्त्री शब्दच० ।

ब(ब)हुधा अव्य० ब(ब)हु+प्रकारे–धाच् । अनेकप्रकारे

ब(ब)हुधार न० ६त० । वज्रास्त्रे राजनि० तस्य षट्कोणत्वात् सर्वत्र कोणेषु धारायुक्तत्वात्तथात्वम् ।

बहुनाड़ीक पु० ६त० । अक्षाङ्गत्वात् कप् । १अनेकदण्डयुते २दिवसे ३तन्मे च त्रि०कौ०।नाड्या न कप् न वा ह्रस्वः । बहुनाड़ी इत्येव अनेकान्वयुते एवं तन्त्रीशब्देऽपि ह्रस्वकपोर्भावाभावौ उह्यौ ।

बहुनाद पु० ६त० । शङ्खे राजनि० ।

ब(ब)हुपत्र पु० ६त० । १पलाशवृक्षे २अनेकपर्णयुक्ते त्रि० । ३लिङ्गिन्याम् ४हतशुभायां ५तुलस्यां ६बृहत्यां,७गोरक्षदुग्धायां, ८जतुकायाञ्च स्त्री राजनि० । गौरा० ङीष् । ९तरुणीपुष्पे स्त्री टाप् । ततः संज्ञायां क । बहुपत्रिका भूम्यामलक्यां, मेथिकायां, महाँशतावर्य्याञ्च राजनि० ।

ब(ब)हुपर्ण पु० ६त० । १सप्तच्छदवृक्षे तस्य प्रतिपर्वं सप्तसप्तपर्णत्वात् तथात्वम् । २अनेकपर्णयुक्ते त्रि०३मेथिकायां स्त्री ङीष् । ततः संज्ञायां क । बहुपर्णिका आखुकर्ण्यां स्त्री टाप् । राजनि० ।

ब(ब)हुपाद(द्) पु० ६त० वा अन्त्यलोपः । वटवृक्षे हेमान्तः अमरः । अदन्तः राजनि०।तस्यानेकशिफावत्त्वात्तथात्वम् ।

ब(ब)हुपुत्र ब(ब)हवः पुत्रा इव पर्णान्यस्य ।१सप्तच्छदे शब्दच० अनेके पुत्रा इव मूलान्यस्य ।२शतमूल्यां स्त्री ङीष् रत्नमा० ६त० । ३अनेकतनयान्विते त्रि० ।

ब(ब)हुपुष्प पु०६त० । निम्बवृक्षे । संज्ञायां कन् अत इत्वम् । बहुपुष्पिका धातक्यां स्त्री राजनि० ।

ब(ब)हुप्रज त्रि० ६त० । १बहुसन्तानवति । २शूकरे पु० हेम० । प्रजातुल्यप्रचुरतृणवत्त्वात् ३तृणभक्षणे पु० राजनि० ।

बहुप्रतिज्ञ पु०७त० । अनेकविषयकप्रतिज्ञायुक्ते व्यवहारे यथा मदीयं रूपकमनेन गृहीतं, सुवर्णञ्चास्य, हस्ते निक्षिप्तं न ददाति,मदीयं क्षेत्रमपहरतीत्येवमादीनां पञ्चत्वमिश्रत एव किन्तु क्रियाभेदात् क्रमेण व्यवहारो न युगपदित्येव "बहुप्रतिज्ञं यत् कार्य्यं व्यवहारेषु निश्चितम् । कामं तदपि गृह्णीयात् राजा तत्त्वबुभुत्सया" कात्यायनोक्तेः [अमरः । मिता०

बहुप्रद त्रि०बहूनि प्रददाति प्र+दा–क । दानशौण्डे वदान्ये

ब(ब)हुफल पु०६त० । १कदम्बवृक्षे मेदि०२विकङ्कते, ३तेजःफले च राजनि०। ४अनेकफलयुक्ते त्रि०।५माषपर्ण्यां, ६क्षविकायां, ७काकमाच्यां, ८त्रिपुष्यां,(यम्या)९क्षुद्रकारवेल्लयां, स्त्री राजनि० १०भूम्यामलक्या भावप्र०स्त्री । ११धात्रीलक्यां स्त्री ङीष् मेदि० १२सूर्यवीरौ राजनि०। संज्ञायां कन् इत्वम् । बहुफलिका । भूम्यामलक्यां स्त्री राजनि०।

बहुफेना स्त्री ६त० । सातलायां राजनि० । [बले त्रि०

बहुबल पु० ६त० । १सिंहे राजनि० स्त्रियां ङीष् । २अतिबहुबली स्त्री नित्यक० । डोडिशुभे राजनि० ।

ब(ब)हुमञ्जरी स्त्री० ६त० संज्ञात्वात् न कप् । लक्षायाम् भावप्र० । [युक्ते त्रि० ।

ब(ब)हुमल पु० ६त० । १सीसके रत्नमा० । २अनेकमलयुते त्रि० ।

बहुमार्ग न० ७त० ।१चत्वरे हेमच० । २अनेकपथयुते त्रि० ।

ब(ब)हुमूर्त्ति स्त्री ६त०।१घनकायांसे शब्दच०। २नानाकारयुते त्रि० । [तथात्वम् ।

बहुमूर्द्धन् पु० ६त० । विष्णौ सहस्रशीर्ष्यत्वात्तस्य

ब(ब)हुमूल त्रि० ६त० । १अनेकमूलयुते । २शिफौ १क्षुद्रवरे पु०राजनि०। ३शाकवृक्षे ४शतावर्य्यां स्त्री टाप् । ५वनछागले त्रि० ङीष् राजनि०। ७नागभेदे भा० आ० ३५अ०। संज्ञायां कन् । बहुमूलक उशीरे न० भावप्र० ।

बहुमूल्य त्रि० ६त० । महार्घे महाधने अमरः । [राजनि०।

बहुरन्ध्रिका स्त्री ६त० वा कप् अत इत्वम् । भेदायाम्

ब(ब)हुरसा स्त्री० ६त० । १महाज्योतिष्मत्याम् राजनि० । २नानारसयुक्ते त्रि० ।

बहुरुहा स्त्री बहु रोहति रुह-क । कन्दगुडूच्यां राजनि०

ब(ब)हुरूप पु० ६त० । १सर्जरसे (धुना)अमरः । २शिवे, ३विष्णौ ४सरटे ५कामे मेदि० ६केशे ७ब्रह्मणि शब्दर० । "८बहुरूपभेदे त्रिका० ९नानारूपयुक्ते त्रि० ।

बहुरेतस् पु० ६त० । ब्रह्मणि चतुर्मुखे शब्दरत्ना० । [हारा

ब ब(ब)हुरोमन् त्रि०६त० । १अनेकरोमयुक्ते रोमशे । २मेषे पु०

ब(ब)हुल त्रि०ब(ब)हि-कुलच् नि० नलोपः । १अनेकसंख्यान्विते २प्रचुरे । ब(ब)हूनि लाति ला-क । १अग्नौ ४कृष्णपक्षे पु० मेदि० "ब(ब)हुलेऽपि गते निशाकरः" कुमारः । ५व्याकाशे ६सितमरिचे न० ७कृष्णवर्णे ८तडति त्रि० ९एलायां १०नीलिकायां ११गवि स्त्री मेदि० । १२देवीभेदे स्त्री कालिकापु० २१अ० अग्निदैवतत्वात् १३कृत्तिकानक्षत्रे स्त्री ब०व० मेदि० ।

बहुलगन्धा स्त्री० ६त० । एलायाम् राजनि० ।

ब(ब)हुलच्छद पु०६ ब० । रक्तगोभाङ्गे राजनि० ।

बहुलवण न० नित्य०क० । जघरभ्रंभजे लवणभेदे राजनि० ।

बहुलाश्व पु० मैथिलवंश्ये नृपभेदे भाग० ९।१३।१६ ।

ब(ब)हुलीकृत त्रि० ब(ब)हुल+च्वि-कृ-क्त । (चागड़ा) बहुस्यापसारणेन रागीकृते खलस्थे १धान्ये, अमरः । २रागीकृतमात्रे च ।

बहुवचन न० बहुत्वं वक्ति वच-ल्यु । "द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनम्" पा० उक्ते बहुत्वबोधके जसप्रभृतौ सुब्विभक्तौ अभ्रभृतौ २तिङ्विभक्तौ च ।

ब(ब)हुवल्क पु० ६क० । प्रियाले । (पियासाल) राजनि० ।

ब(ब)हुवारक पु० ब(ब)हूनि वारयति ण्वुल् वा । क्षेत्रजातके (लोना चाता) शब्दर० ।

बहुविध त्रि० ६त० । नानाप्रकारे अमरः ।

ब(ब)हुविस्तीर्णा स्त्री० ब(ब)हु यथा तथा विस्तीर्णा वि+स्तृ-क्त । (कुचुई) १कुचिकाहृच्छे शब्दच० । २अनेकविस्तारयुते त्रि० [वीजवति त्रि०

ब(ब)हुवीज पु०६ब० । १व्याघ्रनखे हृच्छे(चाता) शब्दच०।२प्रचुर-

ब(ब)हुवीर्य्य पु० ६त० । १विभीतके, (बयड़ा) जटा० । २तण्डुलीयशाके, (नटेयाक) ३शालमलिवृक्षे ४मरुवके च राजनि । ५भूम्यामलक्यां स्त्री राजनि० ।

ब(ब)हुव्रीहि त्रि० ६त० । १अनेकधान्यादियुक्ते "अनेकमन्यपदार्थे । कर्म धारय येन यस्यां सदा बहुव्रीहिः" उद्भटः । व्याकरणोक्ते प्रायेण अन्यपदार्थप्रधाने २समासभेदे पु० । तल्लक्षणादिकं शब्दशक्तिप्रकाशिकायामुक्तं यथा बहुव्रीहिं लक्षयति । "बहुव्रीहिः स्वगर्भार्थसम्बन्धित्वेन बोधकः । निरूढया लक्षणया स्वांशशक्तापकशब्दवान्" समास इति प्रकृतं तथा च स्वांशस्य निरूढलक्षणया शक्तापकेन शब्देन घटितः स्वगर्भस्य यादृगार्थस्य सम्बन्धित्वप्रकारेणान्वयबोधं प्रति समर्थः समासः स्वगर्भतादृगार्थसम्बन्धिबोधेन बहुव्रीहिरित्यर्थः । आरूढवानरोहच्च इत्यत्राऽरूढोवानरो यमिति व्युत्पत्त्या स्वकर्मकारोहणकर्तृवानरसम्बन्धित्वेन वृक्षं, पीतपयस्कं पात्रमित्यत्र पीतं पयोयेन इति रीत्या स्वकरणकपानकर्मजलसम्बन्धित्वेन पात्रम्, पक्वतण्डुलश्चैत्र इत्यत्र पक्वस्तण्डुलो येनेति दिशा स्वकर्तृकपाककर्मतण्डुलसम्बन्धित्वेन चैत्रं, दत्तदक्षिणोद्विज इत्यत्र दत्ता दक्षिणा यस्मै इति क्रमेण स्वसम्प्रदानकदानकर्मदक्षिणासम्बन्धित्वेन द्विजं, पतितपत्रस्तरित्यत्र पतितं पत्रं यस्मादिति विग्रहेण स्वापादानकपतनाश्रयपत्रसम्बन्धित्वेन तरुं, चित्रगुरित्यत्र चित्रा गौर्यस्येति वाक्यानुसारेण चित्राभिन्नस्वगोसम्बन्धित्वेन चैत्रम् रक्तपटः काय इत्यत्र रक्तः पटो यत्रेति व्युत्पत्त्या रक्ताभिन्नस्वदृत्तिपटसम्बन्धित्वेन कायम्" एवं वाणच्छिन्नकरोनर इत्यादावपि । वाणेन छिन्नः करो येन यस्य वा इत्यादि विग्रहे वाणकरणकस्वकर्तृकच्छिदाकर्मकरसम्बन्धित्वादिना नरादिकं बहुव्रीहिर्बोधयतीति सर्वत्र स्वगर्भतत्तदर्थसम्बन्धित्वेन धर्मिणामवगमः । दक्षिणपूर्वा पूर्वोत्तरेत्यादिदिग्बहुव्रीहिस्थले दक्षिणया पूर्वा यस्या इत्यादिविग्रहेण स्वपार्श्वस्थदक्षिणसंयुक्तपूर्वदिक्सम्बन्धित्वादिना आग्नेयीप्रभृतीनां विदिशां बोधः । अस्तिक्षीरा गौरीत्यादावस्ति क्षीरं यस्या इत्यादिविग्रहेणास्तित्ववत्क्षीरसम्बन्धित्वादिप्रकारेण गवादेरवगतिः । इयांस्तु विशेषो यत्तत्रैकेषामस्तेरस्तीत्यादिकं तिङन्तमन्येषां मते तत्प्रतिरूपकाव्ययमिति । उप समीपे दश येषामिति समीपगणितस्वार्थकत्वात् विग्रहादुपदशाः शकुनय इत्यादौ स्वसमीपगणितदशसम्बन्धित्वेन नवानामेकादशानाञ्च पक्षिणामवगमस्तत्र दशशब्दस्य दशत्वलक्षणया स्वपर्य्याप्तसंख्यासमीपगणितदशत्वसम्बन्धित्वेनैव नवादेर्बोध इति दुर्गप्रभृतयः । अधिका दश येषामित्यादिविग्रहे अधिकदशाः पुरुषा इत्यादावपि स्वपर्य्याप्तसंख्याधिकदशत्वसंख्या-

पर्य्याप्तप्रधिकरणदशसम्बन्धित्वेन नवादिपुंसां प्रत्ययः। द्वौ त्रयो वा येषां इत्यन्यतरार्थकवाशब्देन विग्रहे द्वित्राः पवित्राः इत्यादौ। द्वित्रान्यतरपर्य्याप्तसपर्य्याप्तसंख्यासम्बन्धित्वेन द्वयोस्त्रयाणां वा पवित्राणां बोधः। पटे घटे वा घटत्वमित्याद्यनुरोधेन वाकारस्यान्यतरार्थकतया व्युत्पाद्यत्वात् तस्य च दृष्टौ गतार्थत्वादश्रुतिः पञ्च षड् वा येषामित्यादिविग्रहात् पञ्चषाः पुरुषाः इत्यादावप्युक्तरीत्यैवान्वयौद्रष्टव्यः। परे तु द्वौ वा त्रयो वा येषामित्यादिविग्रहे वाशब्दस्य संशयकोट्यर्थकतया द्वित्रा इत्यादि बहुव्रीहेः स्वधर्मिकसंशयकोटिताप्रद्वित्वसम्बन्धित्वेन द्विप्रभृतिबोधकत्वमित्याहुः"। वैयाकरणास्तु बहुव्रीहिप्रकरणपठितत्वमेव तत्त्वमित्याहुः तेन उन्मत्तगङ्गाद्यव्ययीभावे नातिव्याप्तिः। तद्गुणे च तद्गुणातद्गुणसंविज्ञानौ तद्गुणसंविज्ञानशब्दे ६२१७ पृ० उक्तौ तत्र समानाधिकरणपदघटितस्वेव प्रायेण साधुत्वम्।

बहुगत्व पु० ६त० । १घटके शब्दच० । २अनेकगत्वयुते त्रि० । "बहुगत्वः पटोले स्यात्" ति० त० । [युक्ते त्रि०।

ब(व)हुगल्य पु० ६त० । १रक्तखदिरे राजनि० । २अनेककीलयुक्ते त्रि० ।

ब(व)हुगस् अव्य० ब(व)हु+गस् । अनेकवारानित्यर्थे 'गुणकाल्ये ब(व)हौ नियोजिता' इति कुमारः ।

ब(व)हुगाल पु० ब(व)हुभिः गालते गाल-संज्ञायां कर्त्तरि घञ् । १क्षुद्रोष्टचे राजनि० । [२अनेकजिह्वायुक्ते त्रि०

ब(व)हुजिह्विका स्त्री० ६त० । १जलपिप्पल्याम् । राजनि० ।

बहुशिरस् पु० ६ब० । विष्णौ "बहुशिरा बभ्रुः" विष्णुस० ।

बहुशृङ्ग पु० ६ब० । विष्णौ हेमकरः "चत्वारि शृङ्गा" "त्रयो अस्य पादाः" इत्यादिश्रुत्या तस्य तथात्वम् ।

बहुश्रुत त्रि० श्रु-भावे क्त ६ब० । अनेकशास्त्रश्रुतियुक्ते मनुः ४।१२५। [अनेकश्रेयस्कीयुक्ते ।

बहुश्रेयसी त्रि० । ६ब० श्रेयस्त्वात् न कप् न वा ह्रस्वः ।

बहुसन्तति पु० बहुः सन्ततिर्विस्तारोऽस्य (बेड़ाँस) १वंशभेदे शब्दच० । २अनेकसन्तानयुक्ते त्रि० ।

बहुसम्पुट पु० ६ब० । विष्णुकन्दे राजनि० ।

ब(व)हुसार पु० ६ब० । १खदिरे राजनि० २अनेकसारवति त्रि०

ब(व)हुसुता स्त्री० ब(व)हवः सुता इव मूलान्यस्याः । १शतमूल्याम् अमरः । २अनेकपुत्रयुते त्रि० ।

बहूक् स्त्री बहून् स्तुते स्तु-क्विप् । १शूकर्यां शब्दर० २अनेकप्रशस्तकर्त्र्यां स्त्रियाञ्च ।

ब(व)हुस्तुति स्त्री० ६ब० । १अनेकप्रस्तवयुतायां २गवि अमरः । २ब(व)हुप्रस्तवयुते स्त्रीमात्रे च ।

ब(व)हुस्रवा स्त्री० ब(व)हु यया तया स्रवति स्रु-अच् । १शल्लकीवृक्षे शब्दच० । २अनेकधा क्षरणवति त्रि० ।

बहूदक न० बहूनि उदकानि शौचाङ्गतया यस्य । सन्ध्यासिभेदे क्षुटीचक्रशब्दे द्रष्टव्यम् । [कात्मजयुते त्रि० ।

बह्वपत्य पु० ६ब० । १शूकरे २मूषिके च राजनि० । २अने-

बह्वादि विभाषया स्त्रियां ङीषप्रत्ययनिमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा "बह्व पङ्क्ति अञ्जति अञ्छति अंहति अकटि अक्षि (अक्षे) अरि वारि रात्रि रात्रि अहि कपि यष्टि मुनि (इतः प्रागयङ्गात्) चण्ड अराल कपण कमल विकट विशाल विसङ्कट भरुज ध्वज चन्द्र-भाग (अनद्याम्) कल्याण उदार पुराण अहन् क्रोड नख खुर शिखा बाल अक गुद" आकृतिगणोयम् "तेन भग गल राग इत्यादि अहण्यम्"।

बह्वाशिन् त्रि० बहु अश्नाति अश-णिनि । १बहुभोजनशीले स्त्रियां ङीप् । "बह्वाशी स्वल्पहृष्यस्य सुनिद्रः शीघ्रचेतनः । प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् गुणो गुणाः" चाणक्यः । २धृतराष्ट्रपुत्रभेदे पु० भा० आ० ६७ अ० ।

ब(व)ह्वृच्(च) त्रि० ६ब० अध्येतर्य्येव अचस्समा०नात्यत्व ।१ऋग्भेदे २ऋक्ते न० । ३तदध्येतरि पु० । ४तत्संख्यां स्त्री ।

बा(वा)ड अ स्नावने सक० स्नाने अक० भ्वा० आ० सेट् । बा(वा)ड़ते अवा(वा)ड़ीत् । ब्रूदित् चङि न ह्रस्वः अववाड़त् त ।

बाड़व न० बड़वानां समूहः अण् । १घोटकीसमुदाये । बाड़ घञ् वल-घञ् लस्य डो वा बाड़ो ह्रस्वः तं वाति वा-क वा । २ब्राह्मणे पु० । बड़वायां जातः अण् । ३ओर्व्व ऋषिदग्धे कालाग्निभेदे पु० हेमच० । बाड़वाग्नयोऽप्यत्र पु० । [शब्दमा० ।

बाड़वेय पु० द्वि० बड़वायाः अपत्यम् ढक् । अश्विनीकुमारयोः

बाड्य न० बाड़व+संघे-यत् । विप्रसमुदाये । [रत्नमा० ।

बाडिङ्गन पु० बाड़े इङ्गते इङ्ग-ल्यु । वार्त्ताकौ स्त्री भेदि० । मेदिन्यां दन्त्योष्ठ्यादित्वेन पठितः रायमुकुटादयस्तु वण शब्दे इति धातुप्रकृतिकत्वमाश्रुरतोऽस्त्रीभयविधादित्वम् । बल-भावे घञ् । इशब्दे १०तदधिशब्दे स्त्रियां सरस्वत्यां स्त्री उपचारात् ११वाक्ये अमरः ।

बाण पु०वण-शब्दे घञ्-गतौ वा संज्ञायां कर्त्तरि घञ् । १शरे, २मोक्षणे, (बांट) ३शिरोवेष्टनवस्त्रे ४दैत्यभेदे, ५क्लेशे च ६शरपुङ्खे ७नीलझिण्टिकाम् पुंस्त्री० अमरः टबाणमूले स्त्री भेदि० । मेदिन्यां दन्त्योष्ठ्यादित्वेन पठितः रायमुकुटादयस्तु वण शब्दे इति धातुप्रकृतिकत्वमाश्रुरतोऽस्त्रीभयविधादित्वम् । बल-भावे घञ् । इशब्दे १०तदधिशब्दे स्त्रियां सरस्वत्यां स्त्री उपचारात् ११वाक्ये अमरः ।

बाणगङ्गा स्त्री रावणबाणनिर्भेदेन प्रवृत्तायां नद्याम् "सो-मेशाद्दक्षिणे भागे बाणेनाभिविनिद्य वै। रावणेन प्रकटिता जलधारातिपुण्यदा। बाणगङ्गेतिविख्याता या स्नानादघहारिणी" वराहपु०। [२तत्पु० केमच०।

बाणधि पु० बाणाधीयन्तेऽस्मिन् धा-आधारे कि। १इषुधौ

बाणपङ्क्ति स्त्री बाणस्य पङ्क्तिरिवाका० ५ब०। शरपङ्क्तायां राजनि०

बाणपुर न० ६त०। बाणासुरनगरे शोणितपुरे त्रिका०।

बाणमुद्रा स्त्री "यथा फलगता बाणास्तथा फलाङ्कुरं प्रिये!। बाणमुद्रा समाख्याता रिपुवर्गनिकृन्तनी" तन्त्रसा० उक्ते मुद्राभेदे।

बाणयुद्ध न० ६त०। कृष्णेन सह शिवबाहायकस्य बाणस्य युद्धे तच्च युद्धं भाग०१०।६१ अध्यायादौ दृश्यम्।

बा(ब)णलिङ्ग न० बाणदैत्येन संपूज्य अभिमृज्य नर्मदायां निक्षिप्ते शिवलिङ्गभेदे। नर्मदासङ्गमशब्दे १६८७ पृ० विवृतिः।

बाणवार न० बाणं वारयति वारि-अण् उप०स०। १कञ्चुके सन्नाहे हारा०।

बाणिज्य न० वणिजो भावः, कर्म वा ब्राह्मणादित्वात् ष्यञ्। क्रयविक्रयादौ 'बाणिज्येन गतस्य मे बृहस्पतेर्वार्त्तापि न श्रूयते" सा०२ परि०।

तत्र विहितनिषिद्धानि भिता० उक्तानि यथा

"मानेन तुलया वापि षोडशकमकं हरेत्। दण्डं सहाप्यो द्विगतं हानौ च कल्पितम्"। यः पुनर्वणिक् त्रीव्हिकार्षादेः पञ्चत्राष्टमकंशं कूटमानेन कूटतुलया वाऽन्यथापहरत्यसौ पणानां द्विगतं दण्डनीयः। अपहृतस्य पुनर्द्रव्यस्य वृद्धौ हानौ च दण्डस्यापि वृद्धिहानी कल्पे। "भेषजक्षौद्रवणगन्धधान्यगुडादिषु। पञ्चत्रेषु प्रक्षिपन् हीनं पणान् दाप्यस्तु षोडश" याज्ञ०। भेषजमौषधद्रव्यं क्षौद्रो मृतादिः। गन्धद्रव्यसुधीरादि आदिशब्दात्त्रिफलमरिचादि। गतेष्वसारद्रव्यं विक्रयार्थं मिश्रयतः षोडशपणो दण्डः। किञ्च। "कृष्णमणिसूत्रायःकाष्ठवल्कलवाससाम्। अजातौ जातिकरणे विक्रेयाष्टगुणोदयः" याज्ञ०। "न विद्यते वस्तुमूल्याज्जातिर्यस्मिन् कृष्णमादिके तदजाति तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णरसान्तरसञ्चारेण वस्तुमूल्यजातीय वादृक्षसम्पादने यथा मल्लिकामोदसञ्चारेण कृत्रिकायां सुगन्धापादनमिति। छागीरचर्मणि वर्णोत्कर्षापादनेन व्याघ्रचर्मेति स्फटिकमणौ वर्णान्तरकरणेन पद्मराग इति कार्पासिके वस्त्रे गुणोत्कर्षाधानेन पट्टसूत्रमिति कार्पासिके वर्णोत्कर्षाधानेन रजतमिति बिल्वकाष्ठे चन्दनामोदसञ्चारणेन चन्दनमिति कक्कोले त्वगाख्यं लवङ्गमिति कार्पासिके आसक्ति गुणोत्कर्षाधानेन कौशेयमिति विक्रेयस्यापादितस्य दृश्यस्य मूल्यादेः पण्यस्याष्टगुणो दण्डो वेदितव्यः। "वस्तुपरिवर्त्तञ्च सारभाण्डञ्च कृत्रिमम्। आधानं विक्रयं वापि नयतो दण्डकल्पना। भिन्ने पण्ये तु पञ्चाशत्पणे तु शतमुच्यते। द्विपणे द्विगतो दण्डो मूल्यहानौ च द्विगुणः" याज्ञः। सह विधानं सहेन सह वर्त्तत इति सहं करण्डकम्। परिवर्त्तनं व्यत्यासः। योऽन्यदेयसहकानां पूर्णं करण्डकं दर्शयित्वा कृत्रिमत्वेनान्यदेव स्फटिकानां पूर्णकरण्डकं समर्पयति यश्च सारं भाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमार्धं वा नयति तस्य दण्डकल्पना वक्ष्यमाणा वेदितव्या। कृत्रिमकस्तूरिकादेर्मूल्यभूते पण्ये भिन्ने न्यूने न्यूनपणमूल्यमिति"।

"लोकेऽस्मिन् द्विविधं पण्यं जङ्गमं स्थावरं तथा। षड्विधस्यास्य तु बुधैर्दानादानविधिः स्मृतः। गणिकन्तु लिखितं मेयं क्रियया रूपतः स्त्रियेति" गणितं कृष्णकफलादि लिखितं कुङ्कुमादि मेयं घृतादि क्रियया वाहदोहादिरूपयोपलक्षितमश्वमहिष्यादि। रूपतः पण्यस्त्रीनादि स्त्रिया दीप्तश्यामरक्तपद्मरागादि। इत्येतत् षट् प्रकारमपि पण्यम्" सिता०। तस्य विप्रैरार्यादि स्वयं कार्य्यत्वं विदधे बृहस्पतिः "कृषीदकृषिवाणिज्यं प्रकुर्वीतास्वयं कृतम्। आपत्काले स्वयं कुर्वन् नैनसा लिप्यते द्विजः। लब्धलाभैः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत्। ते तृप्तास्तस्य तं दोषं शमयन्ति न संशयः। वणिक् कृषीदोदद्यात्तु वस्त्रगोकाञ्चनादिकम्। कृषीबलोऽन्नपानादि यानशय्याशनानि च। पण्येभ्यो विंशकं दत्त्वा पशुस्वर्णादिकं शतम्। वणिक् कृषीद्यदोषः स्यात् ब्राह्मणानाञ्च पूजनात्। राज्ञे दत्त्वा तु षड्भागं देवतानाञ्च विंशकम्" आ०त०। अधिकं कृषिशब्दे २२०५ पृ०दृश्यम्।

बाणिनी स्त्री वणि-णिनि ङीप्। १विदग्धायां स्त्रियां २नर्त्तक्याम् ३उत्तमस्त्रियाञ्च अजयपालः।

बा(वा)दर पु० ब(व)दर+स्वार्थेऽण्। १कार्पासवृक्षे, मेदि०। ब(व)दरस्येदं तस्य विकारो वा अण्। २कार्पासवस्त्रे न०। ३तद्वृक्षादौ त्रि०अमरः। ४कार्पासवृक्षे स्त्री अनन्तत्वेऽपि अजादेराकृतिगणत्वात् टाप् शब्दच०। [बा(वा)दरिरण्य।

बा(वा)दरायण पु०ब(व)दर्यां भवः फक्। वेदव्यासे। दृज्जि।

बादरिक त्रि० बदराण्युञ्छति बदर-ठक्। बदरफलस्य भूमौ पतितस्यैकैकस्याच्छिनि।

बाध विलोडनौ भ्वादि०आत्म०सक० सेट्। बाधते अबाधिष्ट। क्वचित् चङि न ह्रस्वः अबबाधत् त।

बाध पु० बाध भावे-घञ्। १प्रतिरोधे। २प्रतिबन्धे, पीड़ने, ३उपद्रवे च। न्यायमते ४अभावत्वप्रदार्थे यथा वह्नयनुमितौ वह्न्यभाववान् द्रुदो बाधः। "साध्याभाववत्त्वप्रमाविषयमपक्षत्वम्" तल्लक्षणम्। ५हेत्वदोषभेदे अनुचिन्ता० बाध-कर्त्तरि अच्। ३प्रतिबन्धके त्रि०।

बाधक त्रि० बाध-ण्वुल्। १प्रतिबन्धके। २स्त्रीणामृतुकाले प्रजाजननशक्तिप्रतिरोधके रोगभेदे पु०।

स च रोगश्चतुर्विधस्तल्लक्षणं वैद्यके उक्तं यथा "व्यधा कट्यां तथा नाभेरधः पार्श्वे क्षतेऽपि च। रक्तमाद्रीप्रदोषेण जायते फलहीनता। आममेकं द्वयं वापि ऋतुयोगो भवेद्यदि। रक्तमाद्रीप्रदोषेण फलहीना तदा भवेत्। नेत्रे हृत्ते भवेज्ज्वाला योनौ चैव विशेषतः। ज्वालासंयुक्तरक्तञ्च षष्ठी बाधकयोगतः। आमेकेन भवेद् यत्र ऋतुस्थानद्वयं तथा। मलिना रक्त योनिः स्यात् षष्ठीबाधक योगतः। उद्वेगो गुरुतादेहे रक्तस्रावो भवेद् बहुः। नाभेरधो भवेत् शूलं चाङ्गुरः१ स तु बाधकः। ऋतुहीना चतुर्मासं त्रिमासं वा भवेद् यदि। कक्षाङ्गी करणादे च ज्वाला चाङ्गुरयोगतः। स्थूला च सगर्भा च शुष्कादेहाल्परक्तिका। जलकुमारस्य३ दोषेण जायते फलहीनता। या कक्षाङ्गी भवेत् स्थूला बहुकालऋतुस्तथा। गुरुस्तनी स्वल्परक्ता जलकुमारस्य दूषणात्" वैद्यकम्। [बन्धे च।

बाधन न० बाध-भावे ल्युट्। १पीड़ायां शब्दर०। २प्रतिबाधा स्त्री बाध-भावे १व्यथायां २निषेधे ३प्रतिबन्धे च।

बाधित त्रि०बाध-कर्मणि क्त। १प्रतिबद्धे। २बाधज्ञानविषये च

बाधिर्य्य न० बधिरस्य भावः ब्राह्मणादित्वात् ष्यञ्। श्रवणशक्तिराहित्ये रोगभेदे बधिरशब्दे दृश्यम्।

बान्धकिनेय पु०स्त्री०बन्धक्याः अपत्यं ढक् ढिनङ् च। अमत्या अपत्ये अमरः।

बान्धव पु० बन्धु+स्वार्थे, इदमर्थे वाञ्। १बन्धुशब्दार्थे, २पितृमातृसम्बन्धिनि ३भ्रातरि ४मातुलादौ च। "बान्धवाञ्छादवाप्नुयुः" कात्या० स्मृतिः। [स्मृते हेमच०

बार्बटोर पु० १रङ्गे धातौ २आच्छास्ये, ३अङ्कुरे ४गणिका-

बार्हत न० बृहत्याः फलम् तस्य० अण्। १बृहतीफले बृहतिभवः उत्सा० अञ्। २बृहतिभवे त्रि०।

बार्हदग्न पुंस्त्री० बृहदग्नेरपत्यम् कण्वा० अण्। बृहदग्निनामकर्षेर्गोत्रापत्ये। [न्पद्यते २तत्सम्बन्धिनि त्रि०।

बार्हद्रथ पुंस्त्री० बृहद्रथस्यापत्यम् गैकिकोऽण्। १बृहद्रथ-

बार्हस्पत पु० बृहस्पतेरिदम् सप्रदेवताऽस्य वृद्ध-अण्। गुरुसम्बन्धिनि १वत्सरे २चन्द्रे च। पत्यन्तत्वात् पुरोहिता०यक्। बार्हस्पत्य तत्रार्थे त्रि०। "बार्हस्पत्येन षष्टब्दं ज्ञेयं नान्यैस्तु नित्यशः" स्मृ०सि०।

बार्हिण त्रि० बर्हिणो विकारः तस्य० अण्। बर्हिविकारे।

बाल पु०न० बालाख्ये १गन्धद्रव्यभेदे। २मूर्खे ३शिशौ मेदि० "बाल आषोड़शात् वर्षात्" स्मृतिपरिभाषित ४षोडशवर्षावधिकवयस्के च त्रि०। ५केशे पु० अमरः। वर्ण आदित्वादस्यर्थे अच्। ६अश्वशिशौ अमरः ७अश्ववालधौ ८हस्तिबालधौ ९नारिकेले मेदि० १०पशुपुच्छे च पु० हेमच०। मत्स्यभेदे शब्दच०। "पञ्चवर्षो गता कालः" हेम० उक्ते पञ्चवयस्कपदे।

"बालाचतुष्टयं शीतं मधुरं बलकान्तिकृत्। स्निग्धं वाहि समीरास्रपित्तास्रक्षयनाशनम्"। "बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम्। मूत्रातिसारं हरति दुष्टमेतत्र संशयः। हरेन्महाबला कृच्छ्रं भवेद्बलानुलोमनी। हन्यादिति बलामोहं पयसा सितया सह" भावप्र०। बालादेरवधिमाह सुश्रुतः "वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा। ऊनषोड़शवर्षस्तु नरो बालो निगद्यते। त्रिविधः सोऽपि दुग्धादो दुग्धान्नादो तथान्नभुक्। दुग्धादो वर्षपर्य्यन्तं दुग्धान्नादो शरद्द्वयम्। तदुत्तरं स्यादन्नादो एवं बालस्त्रिधामतः"।

"यथोक्त विधिना बालं मासि षष्टेऽष्टमेऽपि च। अन्नं सम्प्राशयेत्किञ्चित् ततस्तद्वर्द्धयेत् क्रमात्" अथ बालस्य परिचर्य्याविधिः। "बालमङ्के सुखन्दध्या नचैनन्तर्जयेत् क्वचित्। सहसा बोधयेच्चैव नायोग्यं सुपवेशयेत्" अयोग्यं सुपवेशनासमर्थम्। "नाऽतप्रं स्थापयेत् क्रोड़े न क्षिप्रं शयने क्षिपेत्। रोदयेच्च क्वचित् कार्य्ये विधिभावशुद्धिं विना" आवश्यको विधिः भेषज दान सैन्धव्यङ्गोद्वर्त्तनादिः। "तच्चित्तमनुवर्त्तेत तं सदैवानुमोदयेत्। निन्द्योच्चस्थानतस्त्राप्ति रक्षेद् बालं प्रयत्नतः" बालस्य स्वभावश्चितान्याह। "अभ्यङ्गोद्वर्त्तनं स्नानं नेत्रयोरञ्जनन्तथा। वसनं स्वदु यत् तच्च तथा मधुलेपनम्। जन्मप्रभृतिपथ्यानि बालस्यैतानि सर्वथा"

बालस्य कवलाद्दः समयमाह । "कवलः पञ्चमाद्यर्धादष्टमान्तस्य कर्म च । विरेकः षोड़शाद्यर्धादुर्विंशतेश्चैव नैथुनम्" । ततः पृषो० इनच् बालिमन् बालभावे पु० पक्षे ष्यञ् बाल्य तत्रार्थे न० ।

बालक पु० बाल+स्वार्थे क। १शिशौ (बाळा) २मन्थद्रव्ये न० राजनि०। ३क्षौद्रवेरे ४अङ्कुरीयके ५पारिहार्य्ये न०विश्वः । ६अश्वकरिपुच्छयोः ७वर्त्तुले मेदि० ८केशे च पु० विश्वः ।

बालकप्रिया स्त्री बालकं प्रीणाति प्री–क। १इन्द्रवारुण्यां (राखलयशा) २कट्फल्याञ्च राजनि० ३शिशुप्रियमात्रे त्रि०।

बालकृमि पु० ६त० । केशकीटे (उकुन) जटा० ।

बालक्रीड़नक पु० बालः क्रीड़त्यनेन क्रीड़–करणे ल्युट् । स्वार्थे क । कपर्दके (कड़ि) राजनि० २तत्क्रीड़ासाधनमात्रे त्रि० ।

बाल(लि)खिल्य पु० ब० अङ्गुष्ठपर्वमितेषु षष्टिसहस्रसंख्येषु "क्रतोश्च सन्ततिर्भार्य्या बालखिल्यानसूयत । षष्टिर्यानि सहस्राणि ऋषीणामूर्ध्वरेतसाम्" मार्कपु०उक्तेषु १मुनिभेदेषु । तेषां परिमाणञ्च अङ्गुष्ठमात्रं यथोक्तं भा० स० ५१ अ० । "अथापश्यद्ददर्शोनं छुस्वान् अङ्गुष्ठोदरवर्च्चसः । पलाशवल्किकामेकां वहितान् वहतः पथि । प्रलीनान् स्नेहिवाङ्गेषु निराहारांस्तपोधनान् । क्लिश्यमानान् मन्तवस्त्रान् मोक्षदे संस्तुतोदके"।"प्राणा वै बालखिल्याः" चरणस्य ऋषाख्येषु २प्राणेषु च । [अमरः ।

बालगर्भिणी स्त्री बालैव गर्भिणी । प्रथमगर्भवत्यां गवि

बालगोपाल पु० कर्म० । श्रीकृष्णमूर्त्तिभेदे शिशुरूपे गोपाले नारदपञ्चरात्रे ६अध्यम् ।

बालग्रह पु०६त० । बालानां पीड़के उपग्रहभेदे 'बालग्रहाभिभूतानां बालानां शान्तिकारकमिति" चण्डी । कुमारसम्भवटीकायाञ्च २१०८ पृ० ६अध्यम् । [२शिशुचर्य्यायां स्त्री

बालचर्य्य पु० बालस्येव चर्य्याऽस्य । १कार्त्तिकेये त्रिका० ६त० ।

बालतनय पु० बालास्तनया इव पत्त्राण्यस्य ।१खदिरे अमरः २शिशुसुते पु०स्त्री० ।

बालतन्त्र न० बालार्थं तद्रक्षार्थं तन्त्रमुपायः ।

गर्भिणीचर्य्यायाम् कुमारभृत्यायां त्रिका०२१०८पृ०६अध्यम्

बालतृण न० कर्म० । नवतृणे भक्ष्ये अमरः ।

बालदलक पु०बाल इव खल्वं दलमस्य कप् । खदिरे भरतः

बालधि पु० बाला धीयन्तेऽत्र धा–आधारे कि । केशयुक्तलाङ्गूले अमरः ।

बालपत्र पु० बाल इव क्षुद्रं पत्रमस्य । १यवासे राजनि० । २खदिरवृक्षे भरतः । ३नवपत्रयुते त्रि० कर्म० । ४नवीने पत्रे न० वा कप् । बालपत्रक खदिरे त्रिका० ।

बालपाश्या स्त्री बालस्य केशस्य समीपस्था पाश्या । सीमन्तानिकस्यखण्डिरचितपट्टिकारूपे भूषाभेदे (सिँती) अमरः

बालपुष्पी स्त्री० बालानि क्षुद्राणि पुष्पाण्यस्याः ङीप् । यूथिकायाम् राजनि० कप् बालपुष्पिका तत्रार्थे जटाधरः ।

बालभद्रक पु० बालेऽपि भद्र इव कायति कै–क । विल्वभेदे शब्दच० । [वृक्षे च ।

बालभैषज्य न० ६त० । १रसाञ्जने राजनि० २शिशूनामौषधे

बालभोज्य पु० ६त०।१चणके राजनि० २बालकभक्षणीये त्रि०

बालमूषिका स्त्री० कर्म० । क्षुद्रमूषिकायां गिरिकायाम् अमरः ।

बालयज्ञोपवीतक न०बालस्य यज्ञोपवीतमिव कायति कै–क । वरुकटे (वुकवाछाड़ि) त्रिका० । [शब्दर० ।

बालराज न०बालः स्वल्पोऽपि राजते राज–अच् । वैदूर्य्यमणौ

बालरोग पु० भावप्र० उक्ते बालस्य रोगभेदे तन्निदानादि तत्रोक्तं यथा

"अथ बालरोगाणां निदानानि लक्षणानि चाह । "धात्र्यास्तु गुरुभिर्भोज्यैर्विषमैर्दोषलैस्तथा । दोषा दूषयन्ति ततः स्तन्य प्रदूषयति । मिथ्याहारविहारिण्या दुष्टा वातादयस्तस्याः । दूषयन्ति पयस्तेन जायन्ते व्याधयः शिशोः । क्षीरं शर्करा क्षौद्रं पीतं तृष्णा हरं परम्।" इति तृष्णायाम् । "वातदुष्टं शिशुः स्तन्यं पिबन् वातगदाहतः । श्वासस्वरः क्षयाङ्गः खादद्विण्मूत्रमाकुलः । खिन्नो भिन्नमलो बालः कामलापित्तरोगवान् । तृष्णालुरुष्मसर्वाङ्गः पित्तदुष्टं पयः पिबन् । श्लेष्मदुष्टं पिबन् क्षीरं लालायुक् श्लेष्मरोगवान् । निद्रार्दितो जड़ः स्तब्धो वक्राक्षश्छर्दनः शिशुः । [राद्याः व्याधयः सर्वे वक्ष्यन्ते महतान्तु ये । बालानामपि ते तद्वद्बोद्धव्या भिषगुत्तमैः । बालानामेव ये रोगा भवन्ति महतां न ते । तालुकण्टकमुख्यांस्तानवधार्य यतः ।" तत्रादौ तालुकण्टकमाह । "तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम् । तेन तालुप्रदेशस्य निम्नता सूर्द्धि जायते । तालुघातात् स्तनद्वेषः क्षुच्छ्वासः पानं भक्तदुर्दिनम् । तृड्हिक्काकण्ठास्यरुजा शोषादुर्दरता वमिः ।" पानं स्तनस्य, भक्तदुर्दिनं दुर्दिनरूपम् । महापद्मानाह । "वीसर्पस्तु शिशोः प्राणनाशनः शीर्षवक्त्रजः । पद्मवर्णो महापद्मरोगोऽ दोषत्रयोद्भवः । भ्रूभ्यां

हृदयं याति हृदवाच्च गुदं व्रजेत्।" पद्मवर्णः लोहित वर्णः तस्य शोणितो वोसर्गः। शङ्खाभ्यां हृदयं याति हृद० याच्च गुदं व्रजेत् एवं वस्तिनो गुदं याति गुदतः हृदयं हृदयाच्छिरो याति इति बोद्धव्यम्। कुकूणकमाह "कुकूणकं श्लीपदोषाक्ष्णिमूलानेव वर्त्मनि। जायते सरुजं नेत्रं कण्डूरं प्रस्रवेदुजड। शिथुः शुष्यौष्ठलाटा-क्षिकूटनासाप्रघर्षणम्। शक्नो नार्कप्रभां द्रष्टुं न चाक्ष्णुन्मीलनक्षमः।" कुकूणकं (कोथु) इति लोके। अथ लण्डीगुदपाकमाह। "वातेनाध्मापिता नाभिः सरुजा लण्डिरुच्यते। बालस्य गुदपाकाख्यो ४व्याधिः पित्तेन जायते।" अहिपूतनमाह। यवक्षारमूलसमायुक्तो क्षौते पाने शिशोर्भवेत्। स्विन्ने वा स्राव्यमानस्य कण्डू रक्तकफोद्भवा। कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते। एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम्।" स्विन्ने स्वेदिते। अजगल्लीमाह। स्निग्धा सवर्णा ग्रथिता नीरुजा सृङ्गसन्निभा। कफवातोत्थिता श्वेया बालानामजगल्लिका। ग्रथिता गुम्फितेव सृङ्गसन्निभा सृङ्गाकृतिः। परिगर्भिकमाह सात्तः। कुमारो गर्भिण्याः स्तन्यं प्रायः पिबन्नपि। कार्श्वाग्निसादवमथुतन्द्राकाश्यां-ऽरुचिभ्रमैः। युज्यते कोष्ठहृद्रुा च तस्माद्धः परिगर्भिकम्७। रोगं परिभवाख्यञ्च तत्र युञ्जीत दीपनम्। पिबन्नपीत्यपिशब्दात्पिबन्नपि परिगर्भिकः (अहीडोति) लोके। परिभवाख्यं परिभवेति नाम्नान्तरम्। अथ दन्तो-द्भेदकान् रोगानाह "दन्तोद्भेदः शिशोः सर्वं रोगाणां कारणं स्मृतम्। विशेषात् ज्वरविड्भेदकासच्छर्दिशिरो-रुजाम्। अभिघ्नन्तश्च पोथक्यावीसर्पश्च जायते"। कारणमित्यन्वयः पोथक्या वर्त्मरोगविशेषश्च।"

बालव पु० तिथ्यङ्गभेदेषु करणेषु द्वितीये करणे ज्यो० त०।

बालवायज न० वैदूर्यमणौ त्रिका०।

बालवाह्य पु० बालो वाह्यो यस्य। दृङ्कटे वनछागे हारा०

बालव्यजन न० बाला एव व्यजनम्। चामरे हेमच०। 'कुर्वन्ति बालव्यजनैश्चमर्यः' इति कुमारः। [हेमच०।

बालसभ्याभ पु० बाल सभ्यायाः इवाभा यस्य। अरुणवर्णे

बालसूर्य्य न० बालः सूर्य इवार्कोऽस्य। १वैदूर्यमणौ त्रिका० कर्म०। २अभिरोदिते सूर्ये पु०। [शब्दर०।

बालसूर्य्यक न० बालसूर्य इव कायति कै-क। वैदूर्यमणौ

बालहस्त पु० बालाः केशा हस्त इव यत्र। १पद्मानां वाङ्मूले अमरः। बाल+संघे हस्तप्र०। २केशसंघे च पु०।

बाला स्त्री० बालाः केशाकाराः पदार्थाः सन्त्यस्य अच्। १नारिकेले २हरिद्रायां ३नख्लिकाभेदे, ४बलये, ५मेध्ये च ६वटौ स्त्री मेदि० ७दशवर्षवयस्कायां (बाला) दशवर्षदेश्यभेदे, शब्दच०। ८अस्वडायां, १०नीलझिण्टिकायां स्त्री राजनि० ११षोडशवर्षीयायां स्त्रियां १२कन्यायाञ्च "वर्षमाता भवेद् बाला" प्रा०त०उक्तायामेकवर्षीयायां १३गवि स्त्री १४देवी मूर्त्तिभेदे तन्त्रसारः। स्वार्थे क। अत इत्वम्। बालिका तत्रैव। बालुकायां, पलकाङ्क्षायां मेदि० कर्णभूषणे (कानबाला) मेदि० एलायां शब्दर०।

बालाकि पु० बलाकाया अपत्यम् वा० इञ्। "इन्द्रबालाकि हौनूचानो गार्ग्य आस" बृ०उ०उक्ते गार्ग्ये ऋषिभेदे।

बालाङ्गी स्त्री बालः केशा इवाविद्यमानं पुष्पफलाः षष्ठ्यसमा० स्त्रियां ङीष्। केशपुष्पीवृक्षे शब्दच०।

बालायनि पुंस्त्री० बालाया अपत्यं तिका० फिञ्। बा-लाया अपत्ये स्त्रियां ङीप्। [याज्ञवल्क्य।

बालार्क पु० कर्म०। प्रातःकालीनसूर्ये "बालार्कसदृशं दधि"

बालि पु० बाले केशे जातः इञ्। केशे पुच्छस्फलशुक्लजाते वानरभेदे। बालः उत्पत्तिस्थानत्वेनास्त्यस्य इनि। बालिन् तत्रार्थे तिका०।

तदुत्पत्तिकथा रामा० उत्तरा० ३७ स० यथा "उत्पत्य तरसा तत्र ह्रदादुत्थितः श्रमः पुनः। तस्मि-न्नेव क्षणे राम! स्त्रीत्वं प्राप च वानरः। तद्रूपमद्भुतं दृष्ट्वा त्यक्तौ धैर्य्यसमन्वितौ। तत्रस्थौ सुरेन्द्रेण स्वर्ग धिरपि यातितम्। अनासाद्यैव तां नारीं सञ्जिघृक्षुस्तथा भवत्। ततः सा वानरपतिं जगे वानरीश्वरम्। अ-मोघरेतसस्तस्य वासवस्य महात्मनः। बालेषु पतितं बीजं बाली नाम बभूव ह। भास्करेणापि तस्यां वै कन्दर्प-वशवर्त्तिना। बीजं निषिक्तं ग्रीवायां विज्ञानमनुवर्त्तता। ग्रीवायां पतितं बीजं सुग्रीवः समजायत"।

बालिश त्रि० बाड-इन् बाडिं डलिं श्यति शो-क डस्य लः। १मूर्खे, २शिशौ च मेदि० "बालिशमाजि! प्रयानम्" उद्भटः। बालाः बलस्य इति वाली मूर्खो शैतेऽत्र शी-घा० आधारे ड। १उपधाने न० शब्दमा०।

बालीश पु० मूलकशूकरोगे शब्दर०।

बालिहन् पु० बालिं बालिनं वा हति हन-क्विप्। रामे बालिहन्नादयोपम पु०। तत्कथा रामा० सुन्दराकाण्डे दृश्या।

बालु पु० बल-उच्। १दलबालुकनामगन्धद्रव्ये उणादि०।

बालुक न॰ बालु+स्वार्थे क। १तत्रैव अमरः। पु॰ बाल-उक। २पानीयामलके पु॰ राजनि॰। ३सिकतासु स्त्री। ४कर्कट्यां जटा॰ ५कर्पूरे ६यन्त्रभेदे शब्दच॰।

बालुकायन्त्र न॰ ६त॰। १औषधपाकार्थे यन्त्रभेदे।

"भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके। कूपिका कण्ठपर्य्यन्तं बालुकाभिश्च पूरिते। मेषलं कूपिकासंस्थ वह्निना यत्र पच्यते। बालुकायन्त्रमेतद्धि यन्त्रतन्त्रबुधैः स्मृतम्" भावप्र॰। २कालज्ञापने रत्नमा॰ प्रदर्शिते यन्त्रभेदे "सप्तत्रैरेणुगर्भेण सम्यक् कालं प्रसाधयेत्" सू॰सि॰ व्याख्यायां "सूत्राकारेण रेणवः सिकतांशगर्भे उदरे यस्यैतादृशं यन्त्रं बालुकायन्त्रं प्रसिद्धम्" रङ्गनाथः।

बालुकास्वेद पु॰ ३त॰। भावप्र॰ उक्ते तप्तबालुकाभिः स्वेदने। "वातश्लेष्मजिते स्वेदान् कारयेद्बालुकान्वितान्। स्निग्धः स्वेदो निषिद्धोऽत्र विना केवलवातजान्। खर्परश्लक्ष्णपटस्थितकाञ्जिकसंसिक्तबालुकास्वेदः। शमयति वातकफामयमलकगुल्वाङ्गभङ्गादीन्। क्षोतसां मार्दवं कृत्वा नीत्वा पाचकसाम्यम्। कृत्वा वातकफजन्यं स्वेदो ज्वरमपोहति"। [पृषो॰तुक्। बालुकीत्यप्यत्र लिङ्गा॰

बालुकी स्त्री॰ चु॰बल-उक गौरा॰ङीष्। कर्कोटीभेदे राजनि॰

बालूका पु॰ चु॰ बाल-अक। विष्णुभेदे हेमच॰।

बालेय पु॰बलेरपत्यं, बलये हितं वा ढक्। १राक्षसे, अमरः २दैत्यभेदे, धरणिः ३अङ्गारवल्लयां स्त्रियः। ४प्राचक्रमूलके पु॰ ५बालहिते च त्रि॰मेदि॰। [अमरः।

बालेयशाक पु॰बलये हितं ढक् कर्म॰(वास्तुकशाटि) शाकभेदे

बालेष्ट पु॰ बालानामिष्टः १ब(व)दरे राजनि॰। २बालकामाभीष्टे त्रि॰।

बालोपवीत न॰६त॰ उरक्षटे बालयज्ञोपवीतशब्दार्थे स्मृतिः

बाल्वजभारिक त्रि॰ बल्वजानां भारं वहति वंश्या॰ ठक्। बल्वजतृणभारवाहके।

बाल्य न॰ बालस्य भावः, कर्म वा बलोवयसत्वात् यञ्। 'आषोडशाद्भवेद्बाल्य' इत्युक्ते अवस्थाभेदे।

बाल्हक न॰ बल्हिदेशे भवः बा॰ वुञ्। शुण्ठ्यां अमरः पाठान्तरम्। [हिङ्गुनि न॰।

बाल्हायन त्रि॰ बल्हौ जातम् फक्। १बल्हिदेशोद्भवे

बाल्हि(ह्री)क पु॰ बल्हि+स्वार्थे ठञ्। ईक वा। १शुण्ठ्यां हिङ्गुनि च न॰ मेदि॰ २देशभेदे ३तद्देशीये च पु॰मेदि॰। ४तद्देशभवे हरिवं॰६अ॰। दीर्घसत्त्वः गन्धर्वभेदे पु॰शब्दर॰

बाष्कल पु॰ ऋषिभेदे आश्व॰श्रौ॰ २।७।४।

बाष्प(स्प) पु॰बाष्प-पृषो॰ह्रस्वः प्रत्ये वा। १नेत्रजले, २ऊष्मणि च अमरः। लोहे च मेदि॰ तत्र अयमन्त्यस्यादितयोक्तः।

बास्कल पु॰ दैत्यभेदे हरिवं॰ ४अ॰।

बा(वा)ह प्रयत्ने भ्वादि॰ आत्म॰ अक॰ सेट्। बा(वा)हते अबा(वा)हिष्ट। बहिस् चक्ति न क्षुसः अबवाहत् त।

बाहु पुंस्त्री बाह्+पृषो॰। बाहुशब्दार्थे रमानाथः।

बाहा(ह्व)बाह्वि अव्य॰ बाहुभ्यां बाहुभ्यां प्रहृत्य प्रहृत्य युद्धम् दृश्यमा॰ पूर्वपदे आदृ दीर्घो वा। बाहुभ्यां बाहुभ्यां प्रहृत्य प्रवृत्ते युद्धे। [अमरः।

बाहु पु॰ बाध-कु धस्य हः। भुजे कक्षाबध्यकूर्परान्तेऽवयवे

बाहुक पु॰ अनुपर्णन्यस्य अश्वपालत्वादिरूपेण स्थिते नलरूपे तद्कथा भा॰व॰६७अ॰दृश्या। २नागभेदे भा॰आ॰ ५७ अ॰।

बाहुकुण्ड त्रि॰ ३त॰। कुण्डितबाहुके (कोपा) जटा॰।

बाहुकुल्य पु॰ बाहुरिव कुल्यति कुल्य-अच्। विहगानां बाहुस्थानीये पक्षे शब्दच॰। [आते।

बाहुकुलेयक त्रि॰ बहुकुले जातादि ढकञ्। बहुकुलजाते

बाहुज पु॰बाहुभ्यां भ(ब्र)ह्मबाहुभ्यां जायते जन-ड। १क्षत्रिये अमरः। 'बाहुजा राजन्याद्यि'ति स्मृतिः। २कीरे ३स्वर्ये आतपत्रे च मेदि॰ ४बाहुजातमात्रे त्रि॰।

बाहुत्र पु॰न॰बाहुं त्रायते त्रै-क। बलाघातवारणार्थं हस्तबद्धे लौहवर्मादौ हेमच॰।

बाहुत्राण न॰बाहुं त्रायते अनेन त्रै-करणे ल्युट्। बलाघात वारणार्थं बाहुबद्धवर्मणि हेमच॰।

बाहुदन्तक पु॰ बहवश्चत्वारो दन्ता अस्य कप् ह्रेरायतः उपजातात् दन्तः तेन प्रोक्तमस्य। पुरन्दरप्रोक्ते पक्षिकृक्षायुर्वेके नीतिग्राह्यभेदे भा॰आ॰५६अ॰। [दन्ते हेमच॰।

बाहुदन्तेय पु॰ बहुदन्तशब्दस्येन ह्रेरायस्यनकेति वा॰ ढ।

बाहुदा स्त्री बाहवोऽस्त्यस्याः १नदीभेदे। सा च प्रसेनजिद्भार्या गौरी नाम, तस्यां यस्या नदीरूपा जाता हरिवं॰१२अ॰। सा हि यदुवंश्यस्य बाहोः क्षत्रधरस्य शत्रुभिरुपद्रवेण क्षिप्तं चिन्तयतश्च मुनेः कृपया सगरात्मजात् पुनर्दर्शनमिति कथा भा॰आ॰ २३ अ॰ यथा "स राजा बाहुदां गीत्वा तर्पयित्वा यथाविधि। देवान्पितॄंश्च विप्रांश्च वा चार्थमनः कृधाः। तस्य तद्वचनं श्रुत्वा बाहुदा चिन्तितस्तदा। अवगाह्यापगां पुण्यामुदकार्थं प्रचक्रमे। आदरात्तां ततस्तस्य करौ जगृहतुर्जलम्। ततः स चिन्तितो भ्रातृदर्शयामास तौ करौ"।

२घरौचित्रिग्राध्यायभेदे भा० आदिपर्वणि ९५ अध्याये ।

बाहुयुद्ध न० ६त० । युद्धोपयोगिनि बाहुविक्रमे ।

बाहुभूषा स्त्री ६त० । केयूरे हेमच० ।

बाहुमात्र त्रि० बाहुः प्रमाणमस्य बाहु+मात्रच् । बाहुपरिमाणे स्त्रियां ङीप् "बाहुमात्राः क्षुच." कात्या० श्रौ० १।२।२७ ।

बाहुमूल न० ६त० । कक्षे (काँख) (बगल) ख्याते अमरः ।

बाहुयुद्ध न० ३त० । निर्युद्धे अमरः ।

तत्प्रकारः भा० वि० १३ अ० यथा

"क्षतप्रतिक्षतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः । सन्निपातावधूतैश्च प्रमाथोत्मथनैस्तथा । क्षेपणैर्मुष्टिभिश्चैव वराङ्गोद्धूतनिःस्वनैः । तलैर्वज्रनिपातैश्च प्रक्षणाभिरतैश्च ह । गलाकानखपातैश्च पादोद्धूतैश्च दारुणैः । जानुभिश्चाप्युरोभिश्च शिरोभिश्चावधूतनैः । तदुद्भवभवद्घोरमयुद्धं बाहुतेजसा । बलप्राणेन मूढानां समाजोत्सव वर्द्धिनौ । वराजत जनः सर्वः श्रोत्रह्लादनिनादोत्थितः । बलिनोः संयुगे राजन् ! इलवाक्षययोरिव । प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षयोः । आकर्षद्भरयान्योन्यं जानुभिरापि जघ्नतुः" । मू० "क्षतं क्वचिद्दृढे निपीडनं प्रतिक्षतं तस्य योधनम् । सुसङ्कटैः सुष्ठिप्रहणेन लक्षीकृतैः सकङ्कटैरिति पाठे सकवचैः दक्षिणैर्वा "कङ्कटो बाहुवरणे कवचे कठिने त्रिषु" इति विश्वः सन्निपातोऽङ्गसंघट्टनम् अवधूतं तेनैव दूरीकरणं प्रमाथादय उक्ता मल्लयुद्धे "निपात्य क्षेपणं भूमौ प्रमाथ इति कथ्यते । तत्पूर्वा बाहुमथनं तदुत्थयनमुच्यते । क्षेपणं कथ्यते यस्तु स्थानात् प्रच्यावनं कृतात् । उभयोर्भुजयोर्मुष्टिरुरोमध्ये निपात्यते । मुष्टिरित्युच्यते तज्ज्ञैर्मल्लविद्याविशारदैः । य बाहुमुखं स्वाङ्गगतं भ्रामयित्वा तथैव च । क्षिप्यते यत्नः स भवेद्वराङ्गोद्धूतनिःस्वनः । तलैर्वज्रनिपातैर्वल्लवट्टनपातैश्चपेटैः । "कङ्कुल्यः प्रहृताश्चास्य प्रक्षणा वा वटीरिताः । कट्यो दृढा कृपा चित्रप्रयोगा बाहुजा मताः" । तत्स्थानखपातैः पादोद्धूतैः पादप्रसारणेनाक्षेपैः जानुभिः शिरोभिश्च क्षतैरवघट्टनैराक्षानुभिः वज्रनिर्घोषैरित्युभयविशेषणम् । अयुद्धं निन्द्यं यथोक्तं तत्रैव "बाहुयुद्धं हि मल्लानामयुद्धमयुधिभिः स्मृतम् । स्मृतश्च तत्र न स्वर्गो यशोमेऽपि विद्यते" इति । बलप्राणेन बलेन शारीरबलेन प्राणेन मानसबलेन च । श्रोत्रह्लादनिनादः श्रीश्रीयट्टोल्लारणेन यच्छ्रितश्च सङ्कल्पनम् । तत्रस्थितः । "आकृष्य क्रोडीकरणं प्रकर्षणोदाहृतम् । आकर्षणं स्त्रीलयैव धनुःशीकरणं स्मृतम् । पुरः पश्चात् पार्श्वयोश्चाभ्याकर्षो भ्रमणं तथा । पश्चात् प्रपातनं वेगादिकर्षणमुदाहृतम्" नीलक० ।

बाहुल पु० बहुलानां कृत्तिकानामयं खार्थे अण् । १मार्गशीर्षे मासे अमरः । बहुलाभिर्युक्ता पौर्णमासी अण् । २कार्त्तिकपौर्णमास्यां स्त्री ङीप् । सा यत्र मासे पुनरण् । ३चान्द्रकार्त्तिकमासे पु० अमरः । ४बाहुलाश्वे हेमच० । बहुलेन निर्वृत्तम् बहुला०अण् । ५अनेकसाध्ये त्रि० । पृषो०दस्यलोपेऽभावे भावे अण् । ६बाहुल्ये न० ।

बाहुलक न० बहुलेन बहुलमुपादानेन निर्वृत्तं बहुला०अण् संज्ञायां कन् । व्याकरणोक्तसर्वोपाधिरहिते विधानादौ यत्र यद्विधीयते तत्र क्वचिन्न स्यात् क्वचिदा स्यात् क्वचित्ततोऽन्यत्रापि स्यादित्येवं परे विधाननिषेधादौ । मनोज्ञा० भावे कुञ् । २यांकुचिका बहुलभावे स्त्री ।

बाहुलेय पु० बहुलानामपत्यं ढक् । कार्त्तिकेये अमरः

बाहुशालिन् त्रि० बाहुभ्यां शालते तदुविक्रमाधिक्येन शोभते शाल-णिनि । बाहुवीर्याधिक्ययुते स्त्रियां ङीप् ।

बाहुसम्भव पु० बाहू ब्रह्मबाहू सम्भवोऽस्य । १बाहुजे क्षत्रिये हेमच० । २बाहुजातमात्रे त्रि० ।

बाहुसहस्रभृत् पु० बाहुसहस्रं बिभर्त्ति भृ-क्विप् तुक् च । कार्त्तवीर्ये त्रिका० कार्त्तवीर्यशब्दे दृश्यम् ।

बाह्य त्रि० बहिर्भवः यञ् टिलोपः । बहिर्भवे

बाह्यकर्ण पु० नागभेदे भा० आ० ३५अ० ।

बाह्यकुण्ड पु० नागभेदे भा०शल्य० १०२ अ० ।

बाह्वादि पु० इञ्प्रत्ययनिमित्ते शब्दगणे च गणः पा०गणोक्ता यथा "बाहु उपबाहु उपधाकु निवाकु शिवाकु वटाक उपबिन्दु इलबी इलका घुड़ा अलाका अलिका जुगला लगला भुवका घुषका कुमिला दुर्मिला पुष्करसद्मन् अन्तरस देवसद्मन् अभिसद्मन् भद्रवर्मन् सुवर्मन् सुनामन् सुनाभन् वसुन् वसुमन् वसुजन् अजिनौजसः (सखीयस) सुधामन् सदसु शिरस् नाभ घरात्रिन् अरीषी क्षेमदृष्टिन् इक्षुलतोदिन् खरनादिन् भयंकरादिन् प्राकारमर्दिन् लोमन् अजोगर्त अश्व 'युधिष्ठिर अर्जुन वास्व सद प्रद्युम्न राम सदस्य उदक्षः (संज्ञायाम्) अश्वं योऽश्वसोः (सलोपश्च) बाह्वादिः । बाह्वि कार्त्तिः ।

बि(वि)ट आक्रोशे स्वा०पर०सक०सेट् । बे(वे)टति अबे(वे)टीत्

बिटक पु० पिट्क+कुत्वे० । शिटके अमरः पीठासनरूप ।

बि(वि)ठ न० विट-क पृषो० अलरीक्षे निरुक्तकारः ६।३०।

बिट् अवयवे भ्वा०पर०सक० सेट् कुदिङ्। बिन्दति अबिन्दीत्

बिदल न०विदि-अलच् नि०नलोपः।१दिदले अमरः २अंशे च

बिन्दवि पु०विदि-अवयवे भा० अवि। बिन्दौ अंशे। ततः गहा०छ। बिन्दवीय तत्रभवस्त्रिनि।

बिन्दु पु०विदि-उ। १अल्पेऽंशे अमरः। २राजभेदे ततोऽपत्ये विदादि० अञ् बैन्दव तदपत्ये पुंस्त्री०। २रेखागणित प्रसिद्धे स्थूलत्वदीर्घत्वहीने लक्षयितुं शक्ये २यदार्थे जैनशब्दे २२८६ पृ० दृश्यम्।

भा०द० उक्ते ३अर्थप्रकृतिभेदे "बीजं बिन्दुः पताका च प्रकरी कार्यमेव च। अर्थप्रकृतयः पञ्च" उद्दिश्य "अवान्तरार्थविच्छेदे बिन्दुरुच्छेदकारणम्" लक्षितम्। ४अनुस्वारमूचके रेखाभेदे। "बिन्दुर्द्विबिन्दुमात्रौ" सुग्धबो० भा०ति० उक्ते ५नादजन्ये क्रियाप्राधान्यलक्षणे चिच्छक्तेरवस्थाभेदे यथा "सच्चिदानन्दविभवात् सकलात् परमेश्वरात्। आसीच्छक्तिस्ततो नादो नादाद् बिन्दुसमुद्भवः"। तद्व्याख्यायां राघवभट्टधृतम् "सा तस्यवंशा चिन्मात्रज्योतिषः सच्चिदेकदा। विचिकीर्षुर्घनीभूता क्वचिदभ्येति बिन्दुताम्" "अभिव्यक्ता परा शक्तिरविना भावलक्षणा। अक्षरब्रह्मपरिच्छिन्नजीवा चिद्रूपिणी विभुः। समस्ततत्त्वभावेन विवर्त्तेच्छासमन्विता। प्रयाति बिन्दुभावञ्च क्रियाप्राधान्यलक्षणम्"। तस्मादेव रौद्रीरुद्रयोराविर्भावः यथोक्तं भा० ति० "रौद्रौ बिन्दोस्ततो नादात् ज्येष्ठा बीजादजायत। समेताभ्यः समुत्पन्ना रुद्रब्रह्मरमाधिपाः"। ६बीजभेदे "बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः। समवायः समाख्यातः सर्वागमविशारदैः" भा० ति०।

बिन्दुचित्रक पु० बिन्दुरूपं चिह्नमस्य कप्। मृगभेदे शब्दर०

बिन्दुजाल न० ६त०। १बिन्दुसमूहे २रश्मिसंशुष्कोपरिस्थ बिन्दुसमूहे हेमच०। संज्ञायां कन्। बिन्दुजालक गजसम्मखादिस्थे तत्समूहे पद्मके अमरः। [३पाशके हारा०

बिन्दुतन्त्र पु०। १शारीफलके २चतुरङ्गक्रीडने च मेदि०।

बिन्दुदेव पु० ६त०। बिन्दुवर्णस्येश्वरे शिवे मेदि०।

बिन्दुपत्र पु० बिन्दुचिह्नितं पत्रमस्य। भूर्जपत्रवृक्षे रत्नमा०।

बिन्दुमाधव पु० काशीस्थे वेणीमाधवे काशीख०।

बिन्दुरेखक पु० बिन्दुरूपा रेखा सूचिकाऽस्य कप्। १अनुस्वारे वर्णे २यक्षिभेदे शब्दच०।

बिन्दुसरस् न० बिन्दुजातं सरः या०त०। सरोवरभेदे यत्र गङ्गावतारार्थं भगीरथेन तपस्तेपे तद्यथा "अयोध्यारेव कैलासात् मैनाकं पर्वतं प्रति। हिरण्यशृङ्गः कुबेरात् महाभक्तिमयो गिरिः। रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः। दृष्ट्वा भागीरथीं गङ्गां तोषयामास वत्सरान्" भा० स० ३अ०। माहात्म्ये १०१ अ० तदुत्पत्तिर्यथा उक्ता यथा

"तस्य शिखण्डिनो देवी प्रभवन्ती प्रतिष्ठिता। सोमपादात् प्रसूता सा सप्तधा प्रविभज्यते। यूपा सप्तिसमायुक्तं चितयश्च हिरण्मयाः। तत्रेदा ऋतुभिः सिद्धैः यज्ञैः सुरगणैः सह। दिव्यस्त्रीगणसंयुक्तं नक्षत्राणान्तु मण्डलम्। दृश्यते भास्करो रात्रौ देवी त्रिपथगा तु सा। अन्तरीक्षं दिवञ्चैव भावयित्वा भुवङ्गता। अवोत्तमाङ्गे पतिता संरुद्धा योगमायया। तस्या ये बिन्दवः केचित् शुभ्रायाः पतिताभुवि। ऋतन्तु तैर्बिन्दुसरस्ततो बिन्दुसरः स्मृतम्"। बिन्दुच्छुदोऽप्यत्र पु०।

बिल भेदने वा चुरा०उभ०पक्षे तु०पर०सक० सेट्। बेलयति ते बिलति। अबीबिलत् त अबेलीत्।

बिल न०त०बिल+क। रन्ध्रे १छिद्रे अमरः।२गुहायाम् ३वर्त्मनि अवधि पु० मेदि०। ४वेतसे शब्दच० ५गर्त्ते च। ततः ब्रह्मा० चतुरर्थ्यां ष। बिलस्य तददूरदेशादौ त्रि०।

बिलकारिन् त्रि० बिलं करोति कृ-णिनि। १गर्त्तकारके स्त्रियां ङीप्। २मूषके पुंस्त्री० राजनि०।

बिलवास पु० बिले वासोऽस्य। जाहकजन्तौ राजनि०।

बिलवासिन् पु० बिले वसति वस-णिनि। १सर्पे शब्दरत्ना०। २गर्त्तवासिनि त्रि० स्त्रियां ङीप्। अलुक्स० बिलेवासिन् तत्रार्थे। [स्त्रियां योपधत्वात् टाप्।

बिलशय पुंस्त्री० बिले शेते शी-अच्। सर्पे शब्दरत्ना०।

बिलेशय पुंस्त्री० बिले शेते शी-अच् अलुक्स०, १सर्पे अमरः २मूषिके जटा० ३गोधायां ४अजे ५अलर्कायाञ्च भावप्र०। "गोधायामजजङ्घासु अलर्क्यादौ बिलेशयाः। बिलेशया वातहरा मधुरा रसपाकयोः। इक्ष्वाकवो बहुविषमलर्कबीर्य्योष्णा अपि कीर्त्तिताः" तत्र तन्नामगुणा उक्ताः।

बिल्व न० तु०बिल-बा०मन्। भाषने निरु० १।२०। ऋ०२।३५।१२। २शिरस्त्राणे यजु०१६।३५। तदस्त्यस्मिन् इनि। बिल्विन् तद्वति त्रि०ऋभेदे पु०यजु०तन्नाम्नि द्रव्यम्।

बिल्ल न० बिलं क्लिम् लं लाति ला-क। १आलवाले त्रिका०। २छिद्रुनि शब्दच०।

बिल्लमूला स्त्री बिल्लमिव मूलमस्याः। वाराहीकन्दे शब्दच०

बिल्वसू स्त्री "बिल्वस्यैवपुत्रा स्यादिति" शब्दर० शब्दावां प्रसूतदलपुत्रायां स्त्रियाम्।

बिल्व पु० विल-उल्व०नि०। १ फलनामख्याते वृक्षे अमरः "श्रीफलः शर्करिल्लो याज्ञो रुचोऽग्निपित्तहृत्। वातः श्लेष्महरो बल्यो लघुरुष्णश्च पाचनः" भावप्र०। "बिल्वं बालं कषायोष्णं पाचनं वह्निदीपनम्। संग्राहि तिक्तकटुकं तीक्ष्णं वातकफापहम्। पक्वं गुरु मधुरं दुर्जरं ग्राहि दोषलम्। फलेषु परिपक्वेषु यो गुणः समुदाहृतः। बिल्वादन्यत्र सर्वेषु बिल्वमायं गुणोत्तरम्। कफवातामपित्तघ्नी ग्राहिणी बिल्वमेदिका" राजवल्लभः। "काञ्चिके संस्थितं बिल्वमग्निसन्दीपनं परम्" इति वैद्यकम्। २तत्फले न० मेदि०। ३पलपरिमाणे न० शब्दमाला। तदुत्पत्त्यादिर्यथा "भगोर्लक्ष्मीश्च या धेनुर्गोरूपा सा गता महीम्। तद्गोमयभवो बिल्वः श्रीश्च तस्मादजायत। "बिल्ववृक्षः प्रियः शम्भोरुत्तम योनिर्भविष्यति। सर्वपुष्पोत्तमः श्रेष्ठो देवाहारो मनोरमः। अच्छेद्यः सर्व्वलोकानां छेदाज्ञाशः यदा कृताम्। ये च पापा दुराचारा श्चौरोच्छेदकारिणः। ते त्वचीच्यादिनरके पात्यन्ते ब्रह्मणोदितम्। सदुःखिता भविष्यन्ति नरा दुष्कृतिनः सदा। तस्य देशे भयं नित्यं चिरं राजा न जीवति। न च द्रव्यपतिः कश्चिद् बिल्ववृक्षस्य छेदकः। क्रियते यत्र विच्छेदः सपुष्पफलिनस्तरोः। अनावृष्टिभयं घोरं तस्मिन् देशे प्रजायते"। अग्निपु०। ४स्कन्दपुराणे १०अ०अस्योत्पत्तिरन्यथोक्ता "लक्ष्म्या शिवाराधनार्थं स्वैकलोचनस्योत्पाटने कृते हृष्टेन शिवेन लक्ष्मीं प्रत्युक्तं यथा "मातः समुद्भवतनये! सा सा किञ्चिल्लघु परम्। अस्ते क्षिप्तः स्तनो वामो जायतां पुनरेव सः। ज्ञाता ते परमा भक्तिः पूर्णस्तेन मनोरथः। अस्य क्षिप्तः स्तनोऽत्रापि मल्लिङ्गोपरि ते शुभे। सोऽस्तु वृक्षः क्षितौ पुण्यो नाम्ना श्रीफल इत्यतः। मूर्त्तिमांस्तव वै भक्तिर्वृक्षः श्रीफलनामकः। स्तुत्कीर्त्तये क्षितावास्यां यावच्चन्द्रदिवाकरौ। स तरुर्मम वै लक्ष्मि! परमः सुप्रियो भवेत्। तत्पत्रैश्चैव मे पूजा भविष्यति न चान्यथा। स्वर्णचम्पकाप्रवालादि पुष्पाण्यन्यानि च ध्रुवम्। श्रीफलच्छदलेशस्य कलां नार्हन्ति कोटिकाम्। यथा मे श्रीफलतरुर्यथा लक्ष्मीर्यथा मम। तथा प्रियतमं लक्ष्मि! त्रिपत्रः श्रीफलच्छदः" तत्रैव ११अ०। "अतः शतक्रतोश्चात्र कलात् खड्गाद्यं तीर्थमुच्यते। अधो भवेत्तथा तीर्थमतश्रीफलमं वसेत्!। अर्द्धपत्रं हरो ज्ञेयः पत्रं वामं विधिः स्मृतम्। अर्द्धं दक्षिणपत्रञ्च त्रिपत्रदलमित्युत। अस्य छायाच्च पत्रस्य लङ्घयेन्न पदा सृजेत्। हरते लङ्घनादायुः पदा स्पर्शात् श्रियं हरेत्"। इत्यादिना तन्माहात्म्यसङ्गा तत्पत्रहरणविधानन्तदि तत्रोक्तं यथा "पक्षान्तद्वादशीषायमध्याह्नभिन्नकालतः। शाखाभङ्गो न कर्त्तव्यो नैवारोहेत्तथा तरुम्। वरमारुह्य चितुवाच शाखाभङ्गन कचित्। खण्डितैश्च शिवः पूज्यः पत्रैरन्यैश्च खण्डितैः। अष्टमासानन्तरं बिल्वपत्रं पवित्रं भवेत्। पूज्या एतेन वै देवाः सूर्य्यलक्ष्मीहरौ विना। बिल्ववृक्षवनं यत्र सा तु वाराणसी पुरी। पद्मं बिल्वद्रुमा यत्र तत्र तिष्ठेत स्वयं हरिः। अग्र बिल्वद्रुमा यत्र तत्र दुर्गावृतो हरः। एको बिल्वतरुर्यत्र तत्र यज्ञ मया सह। बिल्ववृक्षा यत्र दश तत्र यज्ञ मया सह। एतान्युक्तानि तीर्थानि देवाः सर्वे सहस्रशः। यत्र वाप्यां वृक्षस्य कोण ईशाननामके। जायते श्रीफलतरुर्न तत्र विपदः क्वचित्। पूर्वस्यां सुखदः स्याद्वृक्षिणे यमभीतिहा। पश्चिमे च प्रजादायी दक्षो बिल्व उदाहृतः। श्मशाने च नदीतीरे प्रान्तरे वा वनान्तरे। बिल्ववृक्षतलं प्रोक्तं सिद्धपीठस्थलं समम्। न मध्याह्नक्षणे वृक्षं स्थापयेत् श्रीफलाख्यकम्। दैवाद्यदि प्रजायेत तदा शिववदर्च्चयेत्। चैलादिचतुरो मासान् यस्मायै परमात्मने। दत्तं स्याद्बिल्वपत्रैकं लक्षयज्ञफलं नरः। मध्याह्नकाले ये मर्त्या बिल्वं कुर्य्युः प्रदक्षिणम्। तैः सुमेरुर्गिरिवरः कृतश्च प्रदक्षिणम्। न छिन्द्यात् श्रीफलतरुं न दहेत् काष्ठमेव च। विना ब्राह्मणयज्ञार्थं पतितो बिल्वविक्रयी। पक्वबिल्वफलद्वृष्टं यो धत्ते मूर्ध्नि मानवः। यमाधिकारो नास्य स्यात् कृतः पापोपपातकैः। बिल्वपत्रं फलं बीजं भूमौ पतितमीश्वरः। स्वयं गृह्णाति शिरसा वैयर्थ्यभयशङ्कितः। चैलादिचतुरो मासान् शिवे बिल्वतरुं क्षती। यथा स्निग्धो भवेद्वृक्षस्तथा तत्पतितोऽपि च। चैलादिचतुरो मासान् सदा भवति शङ्करः। नवीनबिल्वपत्रार्थी मुक्तिमुक्तिप्रदायकः। कृदिदानगरे यत्र वैद्यनाथो महेश्वरः। तत्राक्षयो बिल्ववृक्षः स्वर्गवृक्ष उदाहृतः। कामरूपे कामतरुः काश्यामुक्तस्वरूपिणः। काञ्चीपुरे पुरः प्रोक्तः श्रीफलोऽक्षयपुण्यदः। तेऽपि तीर्थविशेषाः स्युः स्त्रीर्थञ्चापि सदाऽक्षयाः।" स्कन्दपु० ११अ०। तत्फलैस्तत्पत्रैर्न

र्चा तत्पत्रैर्यः प्रपूजयेत् । तत्काष्ठचन्दनैर्वापि स मे भक्तः स मे प्रियः । तत्काष्ठचन्दनं भाले यो धारयति सन्मुखात् । तत्तनुं शिवदुग्धा सा नमेद्देवी सदान्विता । अतस्तच्चन्दनं देवि ! न धारयति कश्चन । तत्पत्रं तत् प्रसूनं वा कदापि धारयेच्च हि । तन्मूले जह्नेयानि ! प्राणांस्त्यजति यो नरः । रुद्रदेहो भवेत् सत्यं पाप कोटियुतोऽपि सन्" योगिनीतन्त्रे पटले ।

"बिल्वशक्तं तथा देवि ! भगवान् शङ्करः स्वयम् । बिल्वशक्ततले स्थित्वा यदि प्राणांस्त्यजेत् सुधीः । तत्प्रसादाच्छिवमाप्नोति किन्तस्य तीर्थकोटिभिः । यत्र ब्रह्मादयो देवास्तिष्ठन्ति मुक्तिहेतवे । बिल्वशक्ततले स्थानं यदि विष्ठादिपूरितम् । तदेव शाङ्करं क्षेत्रं सर्वतीर्थमयं सदा । सर्वपीठमयं तत्तु सर्वदेवमयं सदा । न त्यजेत् शाङ्करं क्षेत्रं न च गङ्गां त्यजेत् प्रिये !। यमीपे स च चार्वाङ्गि ! बिल्वशक्तो यदि प्रिये !। काशीपुरसमं तत्तु तत्र प्राणान् त्यजेद् यदि । किन्तस्य कोटितीर्थेन काशीवासेन किं प्रिये !। सुरेश्वरसंहितोल्लासे १० पटले । तद्दानविधिर्यथा

"पत्रं वा यदि वा पुष्पं फलं नेष्टमघोऽस्त्रम् । यद्योत्पन्नं तथा देयं बिल्वपत्रमधोमुखम् ।" मातृकातन्त्रे ५५ पटले । "शिव उवाच । शृणु देवि ! प्रवक्ष्यामि रहस्यं त्रिजटाफलम् । पत्रं ब्रह्ममयं देवि ! अद्भुतं वरवर्णिनि !। श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः । विष्णुप्रीतिकरश्चैव तस्य प्रीतिकरः सदा । ब्रह्मविष्णुशिवाः पत्रे फलस्य यक्षिरूपकम् । फलमूले तु वज्रं स्यात् पत्रे ब्रह्मपदं प्रिये !। त्रिजटापत्रकैकेन हरं वा हरिमर्चयेत् । कैवल्यं तस्य तेनैव भक्तिपूजा विशेषतः । पत्रं पुष्पं फलं तोयं नैवेद्यं धूपदीपकम् । दत्त्वा यदुद्धृतं फलं प्राप्तं तस्मात् कोटिगुणं भवेत् । सर्वैरर्चनतो देवि ! त्रिजटात्मसमर्पणम् । कैवल्यदो हरिश्चैव दासेऽहं त्वत्सरूपताम् । त्वयि कैवल्यदं ज्ञानं धर्मकामार्थदं प्रिये !। वज्रहीनमिदं देवि ! प्राप्नुयाद्दाक्षितं फलम् । अवज्रे क्षियते न्यूनं वज्राघातेन पार्वति !। तस्माच्च साधकेन्द्रेण वज्रहीनं प्रदीयते । 'ग्राह्यं गृहीत्वा यो गच्छेत् सर्वसिद्धिमवाप्नुयात् । अर्द्धं तदर्धनं रुद्रेदधः पशुपतिस्तथा । पुरो माहेश्वरी रुद्रेत् पृष्ठे च शूलधारिणी । दक्षपार्श्वे च श्रीनाथो वामपार्श्वे प्रजापतिः । चन्द्रसूर्यौ स्तनौ ह्यस्य महंवादकरौ सदा" । ज्ञानभैरवतन्त्रे ६ पटले । बिल्वशक्तस्य वर्ज्यत्वोपपत्तेऽपि शुष्कशरे तादृशत्वस्यासंभवात् अत्यल्पत्वोपपत्त्या पूजितं सर्वत्र तस्याशुद्धत्वं बोध्यम् । [आ० २५ अ० ।

बिल्वक न० १तीर्थभेदे भा०अनु० २५ अ० । २नागभेदे भा०

बिल्वकादि पु० "बिल्वादिभ्यश्चस्य लुक्" पा०ष तो छप्रत्ययस्य लुगनिमित्ते शब्दगणे स च पा० ग० उक्तो यथा "बिल्व वेणु वेत्र वेतस दन्तु काष्ठ कपोत तस्य कृत्वा (हस्तत्वञ्च) । तस्मात् (नलोपश्च)" वैल्वकीयायां भूमौ भवाः वैल्वकाः तस्य लुक् न कृको निष्टत्तिः ।

बिल्वकीय त्रि० बिल्वाः सन्ति यस्यां नडा० छ कुक्च । बिल्वयुक्तभूमौ ततो बहुत्वे बिल्वका० छमात्रस्य लुक् ।

बिल्वज त्रि०बिल्वात् जायते जन–ड । भास्वरजाते । बिल्वस्य विषयः राजन्या० वुञ् । वैल्वज तद्विषये ।

बिल्वतेजस् पु० नागभेदे भा० आ० ५७ अ० ।

बिल्वपत्र पु०१नागभेदे भा०भी० १०२ । ६त०२भास्वरस्य पक्षे न० "बिल्वपत्रकता पोक्ते दुर्गो सर्वपत्रतिः ।

बिल्वपाण्डर पु० नागभेदे भा०आ० १९० अ० ।

बिल्वपेषिका स्त्री बिल्वस्य पेषः साधनत्वेन अस्त्यस्याः ठन् । (वेलघुँठ) शुष्कबिल्वखण्डे राजनि० ।

बिल्ववन न० ६त० । भास्वरसमुदाये तस्य विषयः राजन्या० वुञ् । वैल्वधनक तद्विषये ।

बिल्वा स्त्री० बिल–भेदने उल्वा०नि० । छिन्नपत्रां राजनि ।

बिल्वोदकेश्वर पु० । शिवमूर्त्तिभेदे तस्याविर्भवकथा हरिवं० १२६ अ० । [अवेक्षीत् बिवेस ।

बिस क्षेपे दि० पर०सक०सेट् । बिसति । ईरित् अबिसत् ।

बिस न० विस–क । मृणाले अमरः । [अमरः ।

बिसकण्ठिका स्त्री बिसमिव कण्ठोऽस्याः कप् । बलाकायाम्

बिसकण्ठिन् पु०बिसमिव कण्ठोऽस्यास्य इनि । बके राजनि०

बिसकुसुम न० बिसस्थितं कुसुमम् श०त० । कमले राजनि० । बिसप्रसून तत्रार्थे अमरः । [खननकर्त्तरि ।

बिसखा त्रि० बिसं मृणालं खनति खन–विट् डा । मृणालखनके

बिसग्रन्थि पु० ६त० । मृणालग्रन्थौ । तस्य जलकालुष्यनिवारकता श्रुयते यथा "सप्त कलुषस्य प्रसाधनानि भवन्ति । तद्यथा कतकगोमेदकबिल्वपन्थिशैवालमूलवल्लाणि मुक्तामणिश्चेति" ।

बिसनाभि स्त्री बिसं नाभिरिवास्याः । पद्मिन्यां त्रिका०

बिसनालिका स्त्री बिसस्य नालिकेव । मृणाले शब्दार्थ० कल्प० । तस्य सच्छिद्रनालत्वात् तथात्वम् ।

बिसल न०विस–कलच् । बिसलये त्रिका० ।

बिसवत् त्रि० बिस+चतुरर्थ्यां मतुप् मस्य वः। सप्तमाद्युक्तादौ स्त्रियां ङीप्।

बिसवर्त्मन् पु०न० बिसाख्ये नेत्ररोगभेदे सुश्रुतः। "शून्यं यद्वर्त्म बहुभिः सूक्ष्मैश्छिद्रैः समन्वितम्। बिसमन्तर्जलं इव बिसवर्त्मेति तन्मतम्"।

बिसिनी स्त्री बिस+पुष्करा० इनि। १पद्मिन्याम् अमरः। २सप्तमाद्युक्ते देशे ३तत्पत्रसदृशे च। [पादौ।

बिसिल त्रि० बिस+चतुरर्थ्यां काश्या० इन। सप्तमाद्युक्तौ।

बीभत्स त्रि०वद-निन्द्यायां स्वार्थे सन् कर्मणि घञ्। १घृणिनि २जुगुप्सिते, ३रसविशेषे च ४तद्वेत्तरि त्रि० मेदि०। ५घृणाद्यौ प्रसिद्धे जुगुप्सास्थायिभावके रसभेदे, पु०अमरः तद्युक्तविषये हरिवंशतमांसादौ त्रि०। "रौद्रवीरभयानकाः। बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः" रसानुद्दिश्य सा०द०लक्षितो यथा "जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः। नीलवर्णो महाकालदैवतोऽयमुदाहृतः। दुर्गन्धमांसरुधिरमेदोमज्जास्थनस्वनं भयम्। तत्रैव क्षिप्तपाताद्यसङ्कीर्णनसमुद्भवः। निर्वेदनाशवमनमोहसङ्क्षोभकादयः। अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः। मोहापस्मारादिरोगा। व्याधिश्च मरणादयः" तन्निरुक्तिः। ७अर्जुने पु० मेदि०।

बीभत्सु पु० बद-निन्द्ने स्वार्थे सन् उ। १अर्जुने। भा० वि० ४४अ० अस्यनिरुक्तिश्च अन्यथोक्ता यथा "न क्रूरां कर्म बीभत्सं युध्यमानः करिष्यति। तेन देवमनुष्येषु बीभत्सुरिति विश्रुतः"। बीभत्सुरिति भवि कल्याणे सुखे चेत्यस्य सनि रूपम्" नीलक०। तस्य पृषो० दीर्घाभावो नलोपश्च। अन्ये तु बीभत्सकर्मरहितत्वात् विरोधिलक्षणया तद्विन्द्नकारित्वाद्वा तथात्वमित्याहुः।

बुक्क त्रि०बुक्क-अच् पृषो०उपधालोपः। अव्यक्तशब्दकारके ततः प्रज्ञा० चतुरर्थ्यां इनि। बुक्किन् अव्यक्तशब्दकारकस्त्रीषादौ त्रि०।

बुक्क कुक्कुरादिशब्दे कथने च वा चु०उभ०सक० सेट्। बुक्कयति ते बुक्कति अबुक्कत् त अबुक्किष्ट अबुक्कीत्। "कथने कुरा०क्वादिशब्दे तु भ्वा०" रमानाथः।

बुक्क न० बुक्क अच्। १हृदयस्थे मांसपिण्डे २अधमांसे ३हृदये च अमरः अस्य स्त्रीत्वमपि स्त्रीत्वे टाप् गौ०ङीष् वा। "बुक्काघातेर्युवतिनिकटे प्रौढ़वान्येव राधा" भट्टिः। ४काशे पु०(बोका)त्रिका०। ५समये च पु०, हेमचन्द्रे भरत स्त्री टाप्। पृषो० बुक्कबुक्के अपि हृदये।

बुक्कन न० बुक्क-भावे ल्युट्। अव्यक्ते कुक्कुरादिशब्दे

बुक्कन् पु० बुक्क-कनिन्। बुक्कशब्दार्थे भरतः।

बुक्कस पुंस्त्री०पुक्कस+पृषोदरादि। वर्णसङ्करे हेमचन्द्र। [सङ्कटः।

बुक्कायमांस न०ष०त०। हृदयस्थे मांसपिण्डाकारे अवयवांशे रायबक्कार पु० बुक्कं अव्यक्तशब्दं करोति कृ-अण्। विरुद्धध्वनौ हारा०

बुट छिंसायां चुरा०उभ० पक्षे भ्वा०पर०सक०सेट्। बोटयति ते। बोटति। अबुबुटत्-त। अबोटीत्। [बुघोड़

बुड त्यागे संवरणे च तु०क्रटा०अक० सेट्। बुडति अबुडीत्

बुड़िल पु०तदा०बुड-इलच्। अवन्तिराजापत्ये राजभेदे ब्रा० उ०५।१०।१। [अबुदत-अबोदीत् अबोदिष्ट। ओदित्त्वा० वेट्।

बुद निशामने (ज्ञानोचने) भ्वा०उ०सक०सेट्। बोदति ते। दरित्

बुद्ध पु०बुध क्त। १भगवतोऽवतारभेदे येन वेदतत्कर्त्रृणामिन्द्रा-कृता। २जागरिते, ३ज्ञातवति च त्रि०। ४पण्डिते पु०मेदि०। बुद्धय विष्णोः चतुर्विंशत्यवतारमध्ये एकविंशोऽवतारो यथोक्तं "ततः कलौ संप्रकृते सम्मोहाय सुरद्विषाम्। बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति" भाग०१स्क०। बुद्धेन प्रोक्तम् अण् तद्देवता अण्। बौद्धप्रोक्तशास्त्रे तदभिज्ञे च त्रि०। तद्दर्शनभेदस्तन्मतादिकं सर्वदर्शनसंग्रहे दर्शितो यथा "अत्र वदन्ति हेरम्बिधीयते यदभ्युपगमे अविनाभावो दुर्बोध इति तदसाधीयः तादात्म्यतदुत्पत्तिभ्यामविनाभावस्य सुनियमात्। तदुक्तम् "कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमो दर्शनान्नादर्शनादिति" अन्वयव्यतिरेकाविनाभावनिश्चायकाविति। ननु पक्षे साध्यसाधनयोर्व्यभिचारो दुरवधारणो भवेत्, अविद्यमाने व्यभिचारशङ्काया अनिवारणात्। ननु तथाविधस्थले तावकेऽपि मते व्यभिचारशङ्का दुर्व्यारहरेति चेत् सैवं योचः विनाधिकारणं। कार्यं सत्त्वमत्तासित्वं वैविधायाः शङ्काया व्याघातावधिकतया निरूपत्वात्। तदेव ह्याशङ्क्यते यद्धि आशङ्क्यमाने व्याघातादयो नावतरेयुः तदुक्तम् "व्याघातावधिराशङ्केति" तस्मात् तदुपपत्तिनिश्चयेन अविनाभावो निश्चीयते तदुत्पत्तिनिश्चयश्च कार्यहेत्वोः प्रत्यक्षानुपलम्भयोरुपयुक्तत्वनियमनः। कार्योत्पत्तेः प्रागसत्त्वात्१कारणोपलम्भे २सत्यनुपलम्भात्३उपलब्धेश्च पश्चात् कारणानुपलम्भात्४अनुपलम्भः इति पञ्चकारणया धूमध्वजयोः कार्यकारणभावो निश्चीयते। तथा तादात्म्यनियमेनाविनाभावो निश्चीयते यदि शिंशपा वृक्षत्वमतिपतेत् स्वात्मानमेव लङ्घयेदिति विपक्षे बाधकप्रमाणेन।

त्व बाधके भूयःसहभावोपलम्भेऽपि व्यभिचारशङ्कायाः को निवारयिता। शिंशपात्ववृक्षत्वयोश्च तादात्म्यनिश्चयो दृष्टोऽयं शिंशपेति सामानाधिकरण्यप्रवृत्तेरुपपद्यते। न ह्यत्यन्ताभेदे तत् सम्भवति पर्यायत्वेन युगपदपि प्रयोगायोगात् नाप्यत्यन्तभेदे समवाययोरिवानुपलम्भात्। तस्मात् कार्यात्मानौ कारणमात्मानमनुमापयत इति सिद्धम्। यदि कश्चित् प्रामाण्यमनुमानस्य नाङ्गीकुर्यात् तं प्रतिब्रूयात् अनुमानं न भवतीत्येतावन्मात्रं प्रमाणं तत्र न किञ्चन साधनमुपन्यस्यते उपन्यस्यते वा। न ह्यसंः एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायात्। नापि चरमः अनुमानं प्रमाणं न भवतीति ब्रुवाणेन त्वया अग्निरुष्णवचनस्योपन्यासे मम माता वन्ध्येतिवद् व्याघातापातात्। किञ्च प्रमाणतदाभासव्यवस्थापनं तत् समानजातीयत्वादिति वदता भवतैव स्वीकृतं स्वभावानुमानम्। परगवा विप्रतिपत्तिस्तु वचनलिङ्गेनेति ब्रुवता कार्यलिङ्गकमनुमानम्। अनुपलब्धा क्वचिदर्थं प्रतिषेधयतानुपलब्धिलिङ्गकमनुमानम्। तथाचोक्तं तथागतैः "प्रमाणान्तरसामान्यस्थितत्वान्यधियां गतेः। प्रमाणान्तरसद्भावः प्रतिषेधाच्च कुत्रचिदिति" पराक्रान्तत्वात् सूरिभिरिति अन्वर्थमुपलभ्यादुपरम्यते। ते च बौद्धास्तुर्विधया भावनया परमपुरुषार्थं कथयन्ति। ते च आध्यात्मिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाभिः प्रसिद्धा बौद्धा यथाक्रमं सर्वशून्यत्व-बाह्यशून्यत्वबाह्यार्थानुमेयत्व बाह्यार्थप्रत्यक्षत्वदानातिष्ठन्ते। यद्यपि भगवान् बुद्ध एक एव बोधविता तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यं यथा मतोऽस्तमर्क इत्युक्ते आरचौरानूधानादयः स्वेष्टानुसारेणाभिसरणपरस्करणपदाचरणादिसमयं बुध्यन्ते। सर्वं क्षणिकं क्षणिकम्, दुःखं दुःखं, स्वलक्षणं स्वलक्षणं, शून्यं शून्यमिति भावमाचष्ट यमुपदिष्टं द्रष्टव्यम्। तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यं यत् सत् तत् क्षणिकं यथा जलधरपटलं सन्तश्चामी भावा इति। न चायमसिद्धो हेतुः अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य नीलादिक्षणानां प्रत्यक्षसिद्धत्वात् व्यापकव्याहत्या व्याप्यव्याहत्तिन्यायेन व्यापकक्रमाक्रमव्याहत्तावक्षणिकात् सत्त्वव्याहत्तेः सिद्धत्वाच्च। तच्चार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति "परस्परविरोधे हि न प्रकारान्तरस्थितिः। नैकत्रापि विरुद्धानामुक्तिन्यायविरोधतः" इति न्यायेन व्याघातस्फोटत्वात्। तौ च क्रमाक्रमौ स्वायिनः सकाशाद् व्यावर्त्तमानौ अर्थक्रियामपि व्यावर्त्तयन्तौ क्षणिकत्वपक्ष एव सत्त्वं व्यवस्थापयत इति सिद्धम्। ननक्षणिकस्यार्थक्रियाकारित्वं किं न स्यादिति चेत् तदयुक्तं विकल्पासहत्वात् तथा हि वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोः किमर्थक्रिययोः स्थायिनः सामर्थ्यमस्ति ? नो वा ? आद्ये तयोरनिराकरणप्रसङ्गः समर्थस्य क्षेपायोगात् यत् यदा यत्करणसमर्थं तत् तदा तत्करोत्येव यथा सामग्री स्वकार्यं समर्थस्यायं भावः इति प्रसङ्गानुमानाच्च। द्वितीयेऽपि कदापि न कुर्यात् सामर्थ्यस्वभावानुवृत्तित्वादर्थक्रियाकारित्वस्य यत् यदा यच्च करोति तत् तदा तत्सामर्थ्यं यथा हि शिलाशकलमङ्कुरे, न चैव वर्त्तमानार्थक्रियाकरणकाले दूरवर्त्तिभ्रमाणे अर्थक्रिये करोतीति तद्विपर्ययाच्च। ननु क्रमवत्सहकारिणः स्थायिनः अतीतानागतयोः क्रमेण क्रमणमुपपद्यते इति चेत् तत्रेदं भवान् पृष्टो व्याचष्टां सहकारिणः किं भावस्योपकुर्वन्ति ? न वा ? न चेत् नापेक्षणीयास्ते किञ्चित्कुर्वतां तेषां तादर्थ्यायोगात्। उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्भिद्यते ? न वा ? भेदपक्षे आगन्तुकश्चैव तस्य कारणत्वं स्यात् न भावस्याक्षणिकस्य, आगन्तुकातिशयान्वयव्यतिरेकानुविधायित्वात् कार्यस्य। तदुक्तम् "वर्षातपाभ्यां किं व्योम्नश्चर्मण्यक्तिनयोः फलम् ?। चर्मोपमस्य सोऽनित्यः सतत्यसेदसत्फल इति"। अथ भावैः सहकारिभिः सहैव कार्यं करोतीति स्वभाव इति चेत् अङ्ग तर्हि सहकारिणो न जन्मात् प्रत्युत पलायमानानपि पाशेन बद्ध्वा कृत्यं कार्यं कुर्यात् स्वभावस्थानपायात्। किञ्च सहकारिजन्योऽतिशयः किमतिशयान्तरमारभते न वा उभयथापि प्रागुक्तदूषणपाषाणवर्षणप्रसङ्गः। अनतिशयान्तरारम्भपक्षे बहुसुखानवस्थादोषोऽपि स्यात् अतिशये जनयितव्ये सहकार्यन्तरापेक्षायां तत्परम्परायाश्च इत्येकानवस्थाऽऽस्थेया, तथाहि सहकारिभिः सन्निधापनादिभिः पदार्थसार्थैराधीयमाने बीजस्यातिशये बीजस्तूपादकमभ्युपेयम् अपरथा तदभावेऽप्यतिशयः प्रादुर्भवेत् बीजस्यातिशयमादधानं सहकारिसापेक्षमेवाधत्ते अन्यथा सर्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत। तस्मादतिशयार्थमपेक्षमाणैः सहकारिभिरहि-

अवान्तरसाध्येयं बीजे, तस्मिंश्चोपकारे पूर्वन्यायेन सहकारिसापेक्षस्य बीजस्य जनकत्वे सहकारिसम्पाद्यबीजमतातिशयवानवस्था प्रथमा व्यवस्थिता। अथोपकारः कार्याधीनमपेक्ष्यमाणोऽपि बीजादिनिरपेक्षं कार्यं जनयति तदपेक्षो वा। प्रथमे बीजादेरहेतुत्वमापद्येत। द्वितीये अपेक्ष्यमाणेन बीजादिना उपकारे अतिशय आधेयः एवं तत्र तत्रापीति बीजादिजन्यातिशयनिष्ठातिशयपरम्परापात इति द्वितीयानवस्था स्थिरा भवेत्। एवमपेक्ष्यमाणेनोपकारेण बीजादौ धर्मिणोपकारान्तरसाध्येवमित्युपकाराधेयबीजातिशयाश्रयातिशयपरम्परापात इति तृतीयानवस्था दुरवस्था स्यात्। अथ भावादभिन्नोऽतिशयः सहकारिभिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावोऽनतिशयात्मा निष्टप्तः अन्यश्चातिशयात्मा कुर्वद्रूपादिपदवेदनीयो जायत इति स्खलितं समापि मनोरथद्रुमेण। तस्मादत्यधिकस्यार्थक्रिया दुर्घटा। नाध्यक्षेण घटते विकल्पासहत्वात्। तथा हि युगपत्सकलकार्यं करणसमर्थः स भावस्तदुत्तरकालमनुवर्त्तते न वा। प्रथमे तत्कालवत् कालान्तरेऽपि सावत्कार्यं करणमापतेत्। द्वितीये स्थायित्वदृष्ट्याश्रयाभिक्षणभक्षितबीजादावङ्कुरादिजननप्रार्थनमनुचरेत्। यत् विरुद्धधर्माध्यस्तं तद्यथा शीतोष्णे। विरुद्धधर्माध्यस्तश्चायमिति जलधरे प्रतिबन्धसिद्धिः। न चायमसिद्धो हेतुः, स्थायिनि कालभेदेन सामर्थ्यासामर्थ्ययोः प्रसक्तप्रतिषेधयोर्विरुद्धत्वात्, तत्रासामर्थ्यसाधको प्रसक्तप्रतिषेधौ प्रागुक्तौ सामर्थ्यसाधकावभिधीयेते यदादा यज्जननासमर्थं तत् तदा तन्न करोति यथा शिलाशकलोऽङ्कुरम्, असमर्थश्चायं वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोरर्थक्रिययोरिति प्रसक्तः यदादा यत् करोति तत् तदा तत्र समर्थं यथा सामग्री स्वकार्येति, करोति चायमतीतानागतकाले तत्कालवर्त्तिन्यावर्थक्रिये भाव इति प्रसक्तप्रतिषेधयोः विपर्ययः। तस्माद् विपक्षे क्रमयौगपद्याभ्यां व्याप्त्यानुपलम्भेनाधिगतव्यतिरेकव्याप्तिकं प्रसक्तप्रतिषेधयोर्बलात् सहेतान्वयव्याप्तिकं सत्त्वं क्षणिकत्वमत्र एव व्यवस्थास्यतीति सिद्धम्। तदुक्तं ज्ञानश्रिया "यत् सत्तत् क्षणिकं यथा जलधरः सन्तश्च भावा अमी सत्तार्थक्रियाविरोधकर्मभिः सिद्धेः सिद्धं न सिद्धं न वा। नाध्यक्षेण विधाऽन्यया परकृतेनापि क्रियादिर्भवेत् द्वेधापि क्षणभङ्गभङ्गुरतिरतः साध्ये च विश्राम्यतीति"। न च क्षणभङ्गाञ्चरमादिपक्षकक्षीकारेण सत्तासामान्ययोगित्वमेव सत्त्वमिति मन्तव्यं सामान्यविशेषसमवायानामसत्त्वप्रसङ्गात्। न च तत्स्वरूपसत्तानिबन्धनः सदुव्यवहारः प्रवोजकगौरवापत्तेः अनुगतत्वाननुगतत्वविकल्पपराहतेश्च, सूर्यप्रभादीधरादिषु विलक्षणेषु क्षणेष्वनुगताकारस्य सत्त्वस्य बहुभूतगणेषु गुणवच्चाप्रतिभासनाच्च। किञ्च सामान्यं सर्वगतं स्वाश्रयसर्वगतं वा प्रथमे सर्ववस्तुसङ्करप्रसङ्गः व्यभिचारापत्तिश्च यतः प्रोक्तं प्रथमपादेन "स्वविषयसर्वगतमिति। किञ्च विद्यमाने घटे वर्त्तमानं सामान्यमन्यत्र जायमानेन संबध्यमानं तस्मादागच्छत् सम्बध्यते अनागच्छत् वा आद्ये द्रव्यत्वापत्तिः द्वितीये सम्बन्धानुपपत्तिः। किञ्च विनष्टे घटे सामान्यमवतिष्ठते, विनश्यति, स्थानान्तरं गच्छति वा प्रथमे निराधारत्वापत्तिः, द्वितीये नित्यत्ववाचोयुक्तायुक्तिः, तृतीये द्रव्यत्वप्रसक्तिः इत्यादि दूषणग्रहणसत्त्वात् सामान्यमप्रामाणिकम। "अन्यत्र वर्त्तमानस्य ततोऽन्यस्थानजन्मनि। तस्मादचलतः स्थानाद् छत्तिरित्यतियुक्तता॥ यत्तावौ वर्त्तते भावस्तेन संबध्यते न तु। तद्देशिनञ्च व्याप्नोति किमप्येतन् महाद्भुतम्। न याति न च तत्रासीदस्ति पश्चान्न चांशवत्। जहाति पूर्वं नाधारमहो व्यसनसन्ततिरिति" अनुक्तप्रत्ययः किमालम्बन इति चेत् सकृ अन्यापोहालम्बन एवेति सन्तोष्टव्यमायुष्मतेति व्यसनप्रसङ्गेन। सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतीर्थकरसम्मतम् अन्यथा तन्निवर्त्तयितृणां तेषां तन्निवृत्त्युपाये प्रवृत्त्यनुपपत्तेः। तस्मात् सर्वं दुःखं दुःखमिति भावनीयम्। ननु किंवदिति पृष्टे दृष्टान्तः कथनीय इति चेन्नैवं सलक्षणानां क्षणानां क्षणिकतया सालक्षण्याभावात् नैतेन सदृशमपरमिति वक्तुमशक्यत्वात्। ततः स्वलक्षणं स्वलक्षणमिति भावनीयम्। एवं शून्यं शून्यमपि भावनीयं स्वप्ने जाग्रत्वे च न मया दृष्टमिदं रजतादीति विशिष्टनिषेधस्योपलम्भात्। यदि दृष्टं स्यात् तदा तन्निषिद्धस्य दर्शनस्खेदन्नाया अधिष्ठानस्य च तस्मिन्नध्यस्तस्य रजतत्वादेस्तत्सम्बन्धस्य च समवायादेः सत्त्वं स्यात् न चैतदिष्टं कस्यचिद् वादिनः। न चार्द्धजरतीयमुच्यते न हि कुक्कुट्या एको भागः प्राज्ञाय अपरो भागः प्रह-

वाद्य कल्प्यन्ते इति कल्प्यते। तस्मादध्यक्षाधिष्ठान-तदुत्पत्तिकल्पदर्शनदृष्टयां मध्ये एकस्यानेकस्य वा अ-वस्तुनि निषेधविषयत्वेन सर्वशून्यत्वं वस्तादापतेदिति।

(साध्यमिकाः) भगवतोपदिष्टे साध्यमिकावतारदुत्तमप्रज्ञा इत्य-भ्युपगम्य भिक्षुपादप्रहारदृष्टान्तेन क्षणभङ्गाद्यभिधान-मुखेन स्थापितत्वात्सूक्ष्मवेदनीयत्वानुगतसर्वसत्त्वभ्रमव्याव-र्त्तनेन सर्वशून्यतायामेव पर्य्यवसानम्। अतस्तत्त्वं सदस-दुभयादुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव। तथा हि यदि घटादेः स्वत्वं स्वभावस्तर्हि कारकव्यापारवैयर्थ्यम्। असत्त्वं स्वभाव इति पक्षे प्राचीन एव दोषः प्रादु-ष्यात्। यथोक्तम् "न सतः कारणापेक्षा व्योमादेरिव युज्यते। कार्यस्यात्मलाभो हेतुः खपुष्पादेरिवासतः" इति विरोधादितरौ पक्षावनुपपन्नौ तदुक्तं भगवता लङ्कावतारे "बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते। अतो निरभिलप्याश्च निःस्वभावाश्च दर्शिताः" इति। "इदं वस्तु यथाभावं यद्बुद्धिर्नावगच्छति। यथा यथार्थाश्चिन्त्यन्ते विशीर्य्यन्ते तथा तथेति" च। न कश्चिदपि पक्षे व्यवतिष्ठत इत्यर्थः। दृष्टान्तव्यवहारश्च न स्वप्नव्यवहार-वत् संवृत्त्या वक्ष्यते। अतएवोक्तम् "परिव्राट्काशक पुनामेकस्यां प्रमदातनौ। कुणपः कामिनी भक्ष्य इति तिस्रो विकल्पना इति।" तदेवं भावनाचतुष्टयवशाच्चि-त्तिवासनानिवृत्तौ निर्बीजं शून्यरूपं येनुत्पद्यत इति वयं कृतार्थाः नास्माकमुपदेश्यं किञ्चिदस्तीति। शिष्यै-स्त्वावद्योगाचारेति श्रयं कस्मादुक्तम्। तत्प्राप्त-स्यार्थस्य प्राप्तये पर्य्यनुयोगो योगः शुक्लकृष्णार्थस्वीकार-व्यवहारः शुक्लकृष्णस्वीकरणादुत्तमाः पर्य्यनुयोगस्वा-कारत्वादधमाश्च अतस्तेषां माध्यमिका इति प्रसिद्धिः।

(योगाचाराः) शुक्लभावनाचतुष्टयं बाह्यार्थस्य शून्यत्वं चाङ्गीकृत्याऽऽन्तरस्य शून्यत्वस्याङ्गीकृतं कथमिति? पर्य्यनुयोगस्य करणात् केषाञ्चिद् योगाचारप्रथा एषा हि तेषां परिभाषा स्वयंवेद्यं तावदङ्गीकार्यम् अन्यथा जगदान्ध्यं प्रसज्येत। तत्कीर्त्तितं धर्म्मकीर्त्तिना "स्वसत्यक्षोपलब्धस्य नार्थदृष्टिः प्रसिध्यतीति।" बाह्यं बाह्यं नोदपद्यत एव विकल्पानुपपत्तेः। अर्थो ज्ञान-स्याद्यो भवादुत्पन्नो भवति अनुत्पन्नो वा, न पूर्वः सत्य-स्यस्य स्थित्यभावात् नापरः खपुष्पस्यापत्त्वात्। क्षण-भङ्गेयाः अतीत एवार्थो ज्ञानग्राह्यः तल्लक्षणत्वादिति तदपि बालभाषितं वर्त्तमानलक्षणविरोधात् इन्द्रिया-देरपि ग्राह्यप्रसङ्गाच्च। किञ्च ग्राह्यः किं परमाणु-रूपोऽर्थः अवयविरूपो वा। न चरमः कृत्स्नैकदेशवि-कल्पादिना तन्निराकरणात्। न प्रथमः अतीन्द्रियत्वात् षट्केन युगपद्योगस्य बाधकत्वाच्च। यथोक्तम् "षट्केन युगपद् योगात् परमाणोः षडंशता। तेषामप्येकदेशत्वे पिण्डः स्यादणुमात्रकः" इति। तस्मात् स्वव्यतिरिक्त-ग्राह्यविरहात्तदाकारिका बुद्धिः स्वयमेव स्वात्मरूपप्रका-शिका प्रकाशवदिति सिद्धम्। तदुक्तम् "नान्योऽनुभाव्यो बुद्धेरिति तस्या नानुभवोऽपरः। ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते इति।" ग्राह्यग्राहकयोरभेदव्यातु-मातव्यः यद्वेद्यते येन वेदनेन तत्ततो न भिद्यते यथा ज्ञानेनात्मा, वेद्यन्ते तैश्च नीलादयः। भेदे हि सत्य-धुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियम-हेतोरभावात् तदुत्पत्तेरनियामकत्वात् यश्चायं ग्राह्य-ग्राहकसंवित्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः अत्यन्तादिरविच्छिन्नप्रवाहो भेद-वासनैव निमित्तम्। यथोक्तम् "सहोपलम्भनियमा-दभेदो नीलतद्धियोः। भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्द्रा-दिबाधने" इति। "अविभागोऽपि बुद्ध्यात्मा विपर्य्यासित-दर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" इति च। न च रसवीर्य्यविपाकादिसमानमायामोदकोपार्जितमो-दकानां स्यादिति वेदितव्यं वस्तुतो वेद्यवेदकाकार-विधुरायाः अपि बुद्धेर्व्यवहारपरिज्ञानाहरोधेन विभिन्न-ग्राह्यग्राहकाकाररूपवत्तया तिमिरादुपहताक्षाणां केशो-न्दुनाड़ीज्ञानाभेदवदनादुपप्लवबाधनासाम्याद् व्यवस्थो-पपत्तेः पर्य्यनुयोगायोगात्। यथोक्तम् "अवेद्यवेदका-काराः यथा भ्रान्तैर्निरीक्ष्यते। विभक्तलक्षणग्राह्यग्राह-काकारविप्लवाः। तथा ज्ञातव्यस्वेयं केशादिज्ञानभेद-वत्। यदा तदा न बुद्धेयाः ग्राह्यग्राहकलक्षणाः" तस्माद् बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति सिद्धम्। ततश्च प्रागुक्तभावनाप्रचयबलाच्चित्तविभ्रमवास-नोच्छेदविगलितविविधविषयाकारोपप्लवविशुद्धविज्ञानोदयो मोक्षोदय इति।

(सौत्रान्तिकाः) ज्ञात्वं तु ज्ञात्वं यथोक्तं बाह्यं वस्तु-जातं नास्तीति तदयुक्तं प्रमाणाभावात्। न च सहोपलम्भनियमः प्रमाणमिति वक्तव्यं वेद्यवेदकयो-रभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्ध-विपक्षव्यावृत्तिकत्वात्। नन्वभेदे सहोपलम्भनियमात्कं

बाधनं न स्यादिति चेन्न ज्ञानस्यानर्थकतया च भेदेन प्रतिभासमानतया एकदेशस्यैककालत्वलक्षणसहत्व-नियमासम्भवाच्च नीलार्थस्य ज्ञानाकारत्वे अहमिति प्रतिभासः स्यात् नत्विदमिति प्रतिपत्तिः प्रत्ययाव्य-तिरेकात्। अथोच्यते ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्वद्भेदेन प्रतिभासत इति न च तत्राहु-स्तुल्ये ख इति यथोक्तम् "परिच्छेदान्तराद् योऽयं भागो बहिरिव स्थितः। ज्ञानस्याभेदिनो भेदप्रतिभासोऽप्यु-पप्लवः" इति। "यदन्तर्ज्ञेयतत्त्वं तद् बहिर्वदवभासत इति च" तदयुक्तं बाह्यार्थाभावे सदुत्पत्तिरहिततया बहिर्व-दित्युपमानोक्तेरयुक्तेः न हि वन्ध्यासुतो वन्ध्यासुतवदव-भासत इति प्रेक्षावानाचक्षीत। भेदप्रतिभासस्य भ्रान्तत्वे ह्यभेदप्रतिभासस्य प्रामाण्यं, तत्प्रामाण्ये च भेदप्रति-भासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गाच्च। अविसंवा-दाद्नीलतादिकमेव संविदाना बाह्यमेवेषादृते जगत्यु-मेक्षन्ते चान्तरमिति व्यवस्थादर्शनाच्च। एवञ्चायमभेद-साधको हेतुर्गोमयपायसीयन्यायवदाभासतां भजेत् अतो बहिर्वदिति वदता बाह्यं बाह्यमेवेति भावनीयमिति अवदीय एव वाचो भवन्तं प्रहरेत्। ननु ज्ञानाभि-न्नैकाकारस्यार्थस्य बाह्यत्वमनुपपन्नमिति चेत् तदनुपपन्नम् इन्द्रियसन्निकृष्टस्य विषयस्योत्पाद्ये ज्ञाने स्वाकार-समर्पकतया समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोप-पत्तेः अतएव पर्यनुयोगपरिहारो समर्थाहिताम्। "भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः। हेतुत्वमेव च व्यक्तेर्ज्ञानाकारार्पणक्षममिति" तथा च यथा मुख्या भोजनमनुमीयते यथा च भाषया देशः यथा वा सम्भ्रमेण क्षोभः तथा ज्ञानाकारेण ज्ञेयमनु-मेयम्। तदुक्तम् "अक्षेण घटयत्येनां न हि मुक्ताऽ-र्थरूपताम्। तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूप-तेति" न हि वित्तिरेवं तदुवेदना युक्ता तस्याः सर्व-त्राविशेषात् तान्तु साहचर्यमाविश्य सहप्रथितं घटवे-दितिवत्। तथा च ग्राह्यार्थसद्भावे प्रयोगः ये य-स्मिन् सत्यपि कादाचित्काः ते सर्वे तदतिरिक्तसापेक्षाः यथा अविवक्षति, व्रजिष्यामीति मयि वचनगमनप्रति-भासा विवक्षुर्जिगमिषुपुरुषान्तरसन्तानसापेक्षाः तथा च विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचिदेव नीलाद्युल्लेखेना इति। तदालयविज्ञानं ग्राह्याकारमाश्रितं विज्ञानं, नीलाद्युल्लेखि च प्रवृत्ति-विज्ञानम्। यथोक्तम् "तत्र आदानलयविज्ञानं यद्-भवेदहमास्पदम्। तत् स्यात् प्रवित्तिविज्ञानं यन्नी-लादिकमुल्लिखेदिति" तस्मादालयविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्वाह्योऽर्थो ग्राह्य एव न वासनापरिपाकप्रत्ययः कादाचित्कत्वात् कदाचि-दुत्पादात् इति वेदितव्यम्। विज्ञानवादिनये हि वास-नानामेकसन्तानवर्त्तिनामालयविज्ञानानां तत्तत्प्रवृत्ति-जननशक्तिः तस्याश्च स्वकार्योत्पादं प्रत्याभिमुख्यं परिपाकः तस्य च प्रत्ययः कारणं स्वसन्तानवर्त्तिपूर्वक्षण: कक्षीक्रियते सन्तानान्तरनिबन्धनत्वानङ्गीकारात्। ततश्च प्रवृत्तिज्ञानजननालयविज्ञानवृत्तिवासनापरिपाकं प्रति सर्वेऽप्यालयविज्ञानवर्त्तिनः क्षणाः समर्था एवेति वक्त-व्यम्। न चैवं कोऽपि न समर्थः स्यादालयविज्ञान-सन्तानवर्त्तित्वाविशेषात्। सर्वे समर्था इति पक्षे कार्यो-त्पत्त्यनुपपत्तिः ततश्च कादाचित्कत्वनिर्वाहाय यद्यत्समर्थ-रूपरसगन्धविषयाः सुखादिविषयाः षडपि प्रत्ययास्तत्तर: प्रत्ययान् प्रतीत्योत्पद्यन्ते इति चतुरेवानिच्छताप्यङ्ग-मतिना स्वानुभवबलाच्छाद्य परिच्छेत्तव्यम्। ते चत्वारः प्रत्ययाः आलम्बनसमनन्तरसहकार्यधिपतिरूपाः तत्र ज्ञानपदवेदनीयस्य चित्तस्य नीलालम्बनप्रत्ययात् नीला-कारता भवति, समनन्तरप्रत्ययात् प्राचीनज्ञानाद् बोध-रूपता, सहकारिप्रत्ययादालोकात्, चक्षुषोऽधिपति-प्रत्ययाद्विषयग्रहणप्रतिनियमः विहितस्य ज्ञानस्य रूपा-दिसाधारणस्यप्राप्तेर्नियामकं चक्षुरधिपतिर्भवितुमर्हति लोके नियामकस्याधिपतित्वोपलम्भात्। एवं चित्तचैत्ता-त्मकानां सुखादीनां चत्वारि कारणानि द्रष्टव्यानि। एवं चित्तचैत्तात्मकस्कन्धः पञ्चविधः रूपविज्ञानवेदना-संज्ञासंस्कारसंज्ञकः। तत्र रूप्यन्ते एभिर्विषया इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः। आल-यविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः। प्रागुक्त-स्कन्धत्रयसम्बन्धजन्यः सुखदुःखादिप्रत्ययप्रवाहो वेदना-स्कन्धः। गौरित्यादिशब्दोल्लेखिसविज्ञानप्रवाहः संज्ञा-स्कन्धः। वेदनास्कन्धनिबन्धना रागद्वेषादयः क्लेशा उप-क्लेशास्च मदमानादयो धर्माधर्मौ च संस्कारस्कन्धः। तदिदं सर्वं दुःखं दुःखस्यायतनं दुःखसाधनञ्चेति भावयित्वा तन्निरोधोपायं तत्त्वज्ञानं समादधेत्। अत एवोक्तं "दुःखसमुदयनिरोधमार्गाश्चत्वारः सुज्ञाभिसमयाः तत्त्वानि"। तत्र दुःखं प्रसिद्धं, समुदयो दुःखकारणं,

तद् द्विविधं प्रत्ययोपनिबन्धनो हेतूपनिबन्धनश्च। तत्र प्रत्ययोपनिबन्धनस्य संग्राहकं सूत्रम् "इदं कार्यं ये अन्ये हेतवः प्रत्ययन्ति" गच्छन्ति तेषामयमानानां हेतूनां भावः प्रत्ययत्वं, कारणसमवायः तन्मात्रस्य फलं, न चेतनस्य कस्यचिदिति सूत्रार्थः। यथा बीजहेतुरङ्कुरो धातूनां पञ्चानां समवायाज्जायते। तत्र पृथिवीधातुरङ्कुरस्य काठिन्यं गन्धञ्च जनयति, अप्धातुः स्नेहं रसञ्च जनयति, तेजोधातुः रूपमौष्ण्यञ्च, वायुधातुः स्पर्शनं चलनञ्च, आकाशधातुरवकाशं शब्दञ्च जनयतीत्यायोगं पृथिव्यादिकम्। हेतूपनिबन्धनस्य च संग्राहकं सूत्रम् "उत्पादाद् वा तथागतानामनुत्पादाद् वा स्थितैवैषां धर्माणां धर्मता धर्मस्थितिता धर्मनियामकता च प्रतीत्य समुत्पादानुलोमतेति"। तथागतानां बुद्धानां भगवतां धर्माणां कार्यकारणरूपाणां वा धर्मता कार्यकारणभावरूपा एषोत्पादादनुत्पादाद् वा स्थिता, यस्मिन् सति यदुत्पद्यते तत् तस्य कारणस्य कार्यमिति धर्मतेत्यस्य विवरणं, धर्मस्य कार्यस्य कारणानतिक्रमेण स्थितिः स्वार्थिकस्त्वनुप्रत्ययः। धर्मस्य कारणस्य कार्यं प्रति नियामकता। नन्वयं कार्यकारणभावश्चेतनमन्तरेण न सम्भवतीति अत उक्तं कारणे सति तत्प्रतीत्य प्राप्य समुत्पादे अनुलोमता अनुसारिता या सैव धर्मता उत्पादादनुत्पादाद् वा धर्माणां स्थिता। न चात्र कश्चिच्चेतनोऽधिष्ठातोपलभ्यत इति सूत्रार्थः। यथा प्रतीत्य समुत्पादस्य हेतूपनिबन्धः बीजादङ्कुरोऽङ्कुरात् काण्डं काण्डात्कालो नालाद्धर्मस्ततः सूकं ततः पुष्पं ततः फलम्। न चात्र बाह्ये वस्तुदाये कारणं बीजादि कार्यमङ्कुरादि चेतायते अहमङ्कुरं निर्वर्त्तयामि अहं बीजेन निर्वर्त्तित इति। एवमध्यात्मिकेष्वपि कारणद्वयमवगन्तव्यम्। पुरःस्थिते प्रमेयाख्ये वस्त्वविकारभियोपरम्यते। तदुभयनिरोधः तदनन्तरं विमलज्ञानोदयो वा मुक्तिः तन्निरोधोपायो मार्गः स च तत्त्वज्ञानं तस्य प्राचीनभावनाबलाद् भवतीति परमं रहस्यम्। सूत्रान्तं पृच्छतां कथितं भवत्सु सूत्रस्यान्तं पृष्टवन्तः सौत्रान्तिका भवन्तीति भगवताभिहिततया सौत्रान्तिकसंज्ञाः सञ्जाताः।

(वैभाषिकाः) केचन बौद्धावाह्येषु रूपादिषु आन्तरेषु सुखादिषु स्कन्धेषु सत्सु अपि तत्तानाख्यासमुत्पादयितुं सर्वं शून्यमिति, प्राथमिकान् विनेयानधीकृत्य भगवान्, द्वितीयांस्तु विज्ञानमात्रप्रहाविष्टान् विज्ञानमेवैकं सदिति, तृतीयानुभयं सत्यमित्याश्रितान् विज्ञेयमनुमेयमिति, सैवं विरुद्धा भाषेति वर्णयन्तो वैभाषिकाख्यया ख्याताः। एषा हि तेषां परिभाषा समनुमतिः। विज्ञेयानुमेयत्वादेः प्रात्यक्षिकस्य कस्यचिदप्यर्थस्याभावेन व्याप्तिसंवेदनस्यानाभावेनानुमानप्रवृत्त्यनुपपत्तिः सकलसौगतानुभवविरोधश्च। ततश्चार्थो द्विविधः ग्राह्योऽध्यवसेयश्च तत्र ग्रहणं निर्विकल्पकरूपं प्रमाणं कल्पनापोढत्वात्, अध्यवसायः सविकल्पकरूपोऽप्रमाणं कल्पनात्मत्वात्। तदुक्तम् "कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्। विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः" इति। "ग्राह्यं वस्तु प्रमाणं हि ग्रहणं यदितोऽन्यथा। न तद्वस्तु न तन्मानं शब्दलिङ्गेन्द्रियादिजमिति च" नन्वेवं सविकल्पकस्याप्रामाण्ये कथं ततः प्रवृत्तस्यार्थप्राप्तिः संवादश्चोपपद्येयातामिति चेन्न तद्रूपं सविप्रभाविषयमपि विकल्पस्यायेन पारम्पर्येणार्थप्रतिलम्भसम्भवेन तदुपपत्तेः। अवसितं सौत्रान्तिकप्रस्तावे प्रपञ्चितमिति नेह प्रतन्यते। न च विनेयाशयानुरोधेनोपदेशभेदः साम्प्रदायिको न भवतीति भणितव्यं यतो भणितं बोधचित्तविवरणे "देशना लोकनाथानां सत्त्वाशयवशानुगाः। भिद्यन्ते बहुधा लोके उपायैर्बहुभिः किल। गम्भीरोत्तानभेदेन कचिच्चोभयलक्षणाः। भिन्ना हि देशनाऽभिन्ना शून्यताऽद्वयलक्षणेति।

द्वादशायतनपूजा श्रेयस्करीति बौद्धनये प्रसिद्धम्। "अर्थानुपार्ज्य वसुधा द्वादशायतनानि वै। परितः पूजनीयानि किमन्यैरिह पूजितैः। घ्राणेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च। मनोबुद्धिरिति प्रोक्तं द्वादशायतनं बुधैरिति"। विवेकविलासे बौद्धमतमित्यनध्यायि। "बौद्धानां सुगतो देवो विश्वञ्च क्षणभङ्गुरम्। आर्यसत्याख्यया तत्त्वचतुष्टयमिदं क्रमात्। दुःखमायतनञ्चैव ततः समुदयो मतः। मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः। दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः। विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च। पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च कानसम्। धर्मायतनमेतानि द्वादशायतनानि तु। रागादीनां गणोऽयं स्यात् समुदेति नृणां हृदि। आत्मात्मीयस्वभावाख्यः स स्यात् समुदयः पुनः। क्षणिकाः

सर्वसंस्कारा इति या वासना स्थिरा । स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते । प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा । चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः । अर्थी ज्ञानान्वितो वैभाषिकैश्च बहुमन्यते । सौत्रान्तिकेन प्रत्यक्षप्राह्योऽर्थो न बहिर्मतः । आकारसहिता बुद्धिर्योगाचारस्य सम्मता । केवलां संविदं स्वस्यां मन्यन्ते मध्यमाः पुनः । रागादिज्ञानसन्तानवासनाच्छेदलक्षणा । चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्त्तिता । क्षत्तिः कमण्डलुर्भैक्ष्यं चीरं पूर्वाह्णभोजनम् । सङ्घो रक्ताम्बरत्वञ्च भिक्षवे बौद्धभिक्षुभिरिति" ।

बुद्धगया स्त्री (बुधगया) प्रसिद्धे कीकटस्थे बुद्धानां गयाभेदे ।

बुद्धदृश्य न० स्तौपिके स्तूपीकृते द्रव्ये तिका० ।

बुद्धधर्म्म पु० ६त० । बुद्धानामहिंसादौ धर्मे ।

बुद्धपुराण न० बुद्धस्याविर्भावादिज्ञापके पुराणभेदे ।

बुद्धान्त पु०बुध-भावे क्त तस्यान्तः परिच्छेदः । जीवस्यावस्थाभेदे जाग्रदवस्थायाम् श्रुत०ब्रा०१४। ७।११।८ ।

बुद्धि स्त्री०बुध-क्तिन् । १ज्ञाने, २सांख्योक्ते सुखदुःखाद्यष्टविधधर्मयुते प्रकृतिपरिणामभेदे "महत्तत्त्वमिति प्रोक्तं बुद्धितत्त्वं तदुच्यते" सां० प्र० भा० धृतवाक्यम् । वेदान्तोक्ते निश्चयात्मकवृत्तियुते ३अन्तःकरणे च । "मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम् । संशयो निश्चयो गर्वः स्मरणं विषया अमी" वेदान्तप० ४धर्मपत्नीभेदे भा०आ०६६अ० । कणा०सूत्रोपस्कारवृत्तौ सांख्यमतसिद्धमहत्तत्त्वरूपबुद्धितत्त्वनिराकरणेन बुद्धेर्ज्ञानपर्य्यायता लक्षणेदानीमुक्ता यथा "द्रव्येषु ज्ञानं व्याख्यातम्" सू० "विषयेण विषयिणं तृतीयाध्यायस्थमुपलक्षयति । "इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः" "आत्मेन्द्रियार्थसन्निकर्षाद् यल्लिङ्गाद्यते तदन्यत्र" इत्येताभ्यां सूत्राभ्यां ज्ञानं व्याख्यातमित्यर्थः" । तत्र "बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्य्यायाः" गौ०सू० समानतन्त्रे बुद्धिलक्षणे साङ्ख्यमतनिरासार्थं पर्य्यायाभिधानम् । साङ्ख्या हि बुद्ध्यादिशब्दानामर्थभेदमाचक्षते तथा हि सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, सा चैकैव पुरुषास्तु परं भिद्यन्ते ते च कूटस्था नित्या अपरिणामिनो नित्यचैतन्यस्वभावाः ते च पङ्गवोऽपरिणामित्वात् प्रकृतिस्त्वन्धा जड़त्वात् यदा विषयभोगेच्छा प्रकृतिपुरुषभेददिदृक्षा च प्रकृतेर्भवति तदा सा पुरुषोपरागवशात् परिणमेत् तस्माच्चाद्यः परिणामो महत्तत्त्वाख्यो बुद्धिरेव महत्तत्त्वं तदुक्तम् "प्रकृतेर्महान्" इति सां०सू० । सा च बुद्धिर्दर्शनवृत्तिभेदा तस्याश्च बहिरिन्द्रियप्रणालिकया विषयाकारो यः परिणतिभेदो घट इति पट इत्याद्याकारस्तज्ज्ञानं वृत्तिरिति चाख्यायते स्वच्छायां बुद्धौ वर्त्तमानेन ज्ञानेन चैतन्यस्य पुरुषस्य भेदाग्रहादहं जानामीति योऽभिमानविशेषः सैवोपलब्धिः । स्वकृचन्दनादिविषयसन्निकर्षादिन्द्रियप्रणालिकयैव सुखदुःखाद्याकारो बुद्धेरेव यः परिणामविशेषः स प्रत्ययः । अतएव ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारधर्माधर्माः सर्वएव बुद्धेः परिणामविशेषाः सूक्ष्ममात्रया प्रकृतावेव वर्त्तमाना अवस्थाभेदादाविर्भवन्ति तिरोभवन्ति च । पुरुषस्तु पुष्करपलाशवच्चिर्लेपः प्रतिबिम्बते परं बुद्ध्यादिति यन्मन्यन्ते । तदनेन पर्य्यायाभिधानसूचितप्रमाणेन निराक्रियते तथा हि बुद्धिशब्दो यदि बुध्यतेऽनयेति करणव्युत्पत्त्याश्रयात् तदा मन एव तत्पर्य्यवस्यति नच्च मनः प्रत्यक्षमुभूबुद्धिस्त्वहं बुध्ये इति प्रत्यक्षवेद्यैव । नचान्तःकरणस्य ज्ञानाद्याधर्माः कर्त्तृधर्मत्वेनैव तेषां सिद्धेः भवति हि अहं ज्ञाने अहं प्रत्येमि अहमुपलभे इत्यहन्त्वसामानाधिकरण्येन प्रतिभासः । अभिमानोऽस्मिति चेत् तात्त्विकत्वे बाधकाभावात् । पुरुषस्यागन्तुकधर्मानाधारत्वं कूटस्थत्वं तदेव बाधकमिति चेन्नागन्तुकधर्माधारत्वेऽपि नित्यत्वसम्भवात् न हि धर्मी धर्मस्त्वेकं तत्त्वं येन धर्मोत्पादविनाशावेव धर्म्युत्पादविनाशौ स्यातां तथा च यएव चेतायते स एव बुध्यते जानात्युपलभ्यते प्रत्येति चेति नानार्थान्तरकल्पना युक्तेति दिक् । तच्च ज्ञानं द्विविधं विद्या चाविद्या च विद्या चतुर्विधा प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा । अविद्याऽपि चतुर्विधा संशयविपर्य्ययस्वप्नज्ञानाध्यवसायलक्षणा । तत्र यल्लैङ्गिकं तदनिन्द्रियजम् अतएवतदित्याह" छप० ६० । "तत्रात्मा मनसाप्रत्यक्षे" कणा०सू० । "आत्माऽत्र परात्मा स्वात्मा वा स्वात्मनि मानसस्य ज्ञा" "आत्माऽत्र परात्मा स्वात्मा वा स्वात्मनि मानसस्य ज्ञा" चित्काहमत्ययस्याहं गौरः कृशो महाबाहुरित्यादि प्रत्ययतिरस्कृतत्वात् स्वात्मनोऽप्रत्यक्षतोक्ता । चकारादाकाशकालदिशां वायोः परमाणूनाञ्च द्रव्याणामुपग्रहः । इन्द्रियजमपि द्विविधं सर्वज्ञीयमसर्वज्ञीयञ्च सर्वज्ञीयं योगधर्मलक्षणया प्रत्यासत्त्या तत्तत्पदार्थसाक्षात्कारं तथा हि परमाणवः प्रत्यक्षप्रसक्ताः प्रमेयत्वादभिधेयत्वात् सत्त्वात् । सामग्र्योविरहात् कथमेषं महत्त्वस्यापि प्रत्यक्षं प्रति कारणत्वात् न च परमाणवो महान्तः रूपवत्त्वाच्चापि चाक्षुषप्रत्यक्षकारणत्वात् न च द्विगादयोऽपरमा

इति चेन्न योगजधर्मसहकारिणा मनसैव तत्सम्भवात् तदुपग्रहाज्जुरादिना वा। अचिन्त्यप्रभावोहि योगजो धर्मो न सहकार्यन्तरमपेक्षते। विवादाध्यासितः पुरुषो न सर्वज्ञः पुरुषत्वादहमिवेत्यादि तु प्राभाकरो न मीमांसाभिज्ञः पुरुषत्वादहमिवेत्यादिर्विपक्षबाधकतर्कशून्यत्वादप्रयोजकम्। अवर्त्तीयच्च प्रत्यक्षं द्विविधं सविकल्पकं निर्विकल्पकञ्च सविकल्पकं ज्ञानं न प्रमाणमिति कीर्त्तिदिङ्नागादयः तथा हि अभिलापसंसर्गयोग्यप्रतिभासं हि तत् नह्यभिलापेन नाम्ना सम्बन्धस्यर्थस्य सम्बन्धो येन घट इति पट इति वा नामान्तरञ्जितः प्रत्ययः स्यात् नच जात्यादि परमार्थसत् येन तद्वैशिष्ट्यं विषयेषु इन्द्रियगोचरः तस्मादिन्द्रियेणालोचनं जन्यते आलोचनमहिम्ना च सविकल्पकमुत्पद्यमानं तत्रार्थे प्रवर्त्तयत् प्रत्यक्षमिति ख्याप्यते इति। तच्चैतदनुपपन्नमभिलापसंसर्गयोग्यप्रतिभासञ्च भवेत् प्रमाणञ्चेन्द्रियार्थसन्निकर्षजन्यं स्यादिति अन्दिग्धव्यतिरेकित्वं नामवैशिष्ट्यञ्च चाक्षुषज्ञाने सम्भवत्येव सुरभि चन्दनमितिवदुपनीतभानसम्भवात्। यद्वा संज्ञावैशिष्ट्यं प्रत्यक्षज्ञाने न भासते संज्ञायाः स्मरणमात्रस्यैव तार्थव्यावर्त्तिका अभावज्ञाने प्रतियोगिस्मरणवत् जात्यादिकञ्च वस्तुभूतं साधितमेवातः सविकल्पकमपीन्द्रियार्थसन्निकर्षजत्वात् प्रत्यक्षम् प्रमाणम्। ननु निर्विकल्पकं न व्यवहारप्रवर्त्तकं न वा व्यवहारविषय इति किन्तत्र प्रमाणमिति चेत् सविकल्पकमेव तद्धि विशिष्टज्ञानम् न च विशेषणज्ञानमन्तरेण तदुत्पद्यते विशिष्टज्ञाने हि विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहस्य कारणत्वावधारणात्" उपस्कारदत्तिः।

"सा च सात्त्विकराजसतामसभेदेन त्रिविधा। तत्र सात्त्विकी यथा "प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये। बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ! सात्त्विकी"। राजसी यथा "यया धर्ममधर्मञ्च कार्य्यञ्चाकार्य्यमेव च। अयथावत् प्रजानाति बुद्धिः सा पार्थ! राजसी"। तामसी यथा "अधर्मं धर्ममिति या मन्यते तमसावृता। सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ! तामसी" गीता० तस्याः पञ्चगुणा यथा। "दृष्टादृष्टविपत्तिश्च व्यवसायः समाधिता। संशयप्रतिपत्तिश्च बुद्धेः पञ्च गुणान् विदुः" महाभारते मोक्षधर्मः "दृष्टादृष्टविपत्तिः दृष्टादृष्टानां वृत्तिविशेषाणां विपत्तिर्नाशः निवृत्तिरूपा वृत्तिरित्यर्थः। व्यवसायः वक्ष्यमाणः। समाधिता चित्तस्यैर्य्यं चित्तवृत्तिनिरोध इत्यर्थः संशयः द्वयस्पृक् ज्ञानम्। प्रतिपत्तिः प्रत्यक्षादिप्रमाणवृत्तिः" टीका। तस्याः सप्त गुणा यथा। "शुश्रूषा श्रवणञ्चैव ग्रहणं धारणन्तथा। ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः" हेमच०। तस्या वृत्तिः पञ्चधा यथा। "प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयः" पात०सू० तल्लक्षणं च तत्तच्छब्दे द्रष्टव्यम्।

बुद्धिवधकरा यथा "शोकः क्रोधश्च लोभश्च कामो मोहः परासुता। ईर्ष्या मानो विचिकित्सा हिंसाऽसूया जुगुप्सता। द्वादशैते बुद्धिनाशहेतवो मानसा मलाः"। कालिकापु० १८अ०। "बुद्धिक्षयकरा एते साधकासारमृत्तिकाः"। बुद्धिवर्द्धिकरा यथा "निम्बाटरूषवल्लाश्च बुद्धिवर्द्धिकरा मताः। बुद्धिक्षयकराच्चित्यं त्यजेद्राजा च भोजने। भोजयेदन्नहं बुद्धिवर्द्धिहेतुं नृपोत्तमः। कालिकापु० ८६ अ०।

बुद्धिकाम पुं स्त्री कुमारानुचरमातृभेदे भा० श० ४७ अ०।

बुद्धिजीविन् पुं बुद्ध्या जीवति जीव-णिनि। बुद्धिरूपोपायेन जीविनि। "भूतानां प्राणिनां श्रेष्ठा प्राणिनां बुद्धिजीविनः" मनुः।

बुद्धिसहाय पु० ७त०। धीसचिवे अमात्यभेदे हारा०।

बुद्धीन्द्रिय न० ६त०। "मनः कर्णौ तथा नेत्रे रसना त्वक् च नासिके। बुद्धीन्द्रियमिति प्रोक्तम्" इत्युक्तेषु इन्द्रियेषु उभयोः ज्ञानकर्मेन्द्रिययोरुपकारकत्वात् मनसो ज्ञानमात्रसहकारित्वविवक्षया बाह्यान्तरज्ञानकरणतया च तथात्वम् "चक्षुः श्रोत्रे स्पर्शनञ्च रसनाघ्राणमेव च। बुद्धीन्द्रियाणि जानीयात्" इत्यत्र बाह्यापेक्षया पञ्चकत्वमुक्तम्।

बुद्बुद न० बुद-क पृषो० दित्वम्। जलस्य लोष्टाकारे विकारभेदे अमरः। "पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत्"। सुश्रुतो० उक्ते २गर्भावस्थाभेदे च।

बुध ज्ञापने भ्वा० प० सक० अनिट्। बोधति अबौत्सीत् शिष्यं गुरुः। बोद्धा बुद्धः।

बुध ज्ञाने भ्वा० उभ० सक० सेट्। बोधति ते। इरित् अबुधत् अबोधीत् अबोधि अबोधिष्ट। ऊदित्वा० वा च पक्षे क। बोधः बुधः।

बुध ज्ञाने दि० आ० सक० अनिट्। बुध्यते अबोधि अबोधिष्ट। बुबुधे। उद्+बुध-जागरणे विषयस्फुरणाभिमुखीभावरूपे संस्कारनिष्ठे व्यापारभेदे उद्बुद्धसंस्काराद्देव स्मृतिर्भवतीति शास्त्रे स्थितम्।

बुध पु० बुध-क। १पण्डिते, बृहस्पतिभार्य्यायां तारायां चन्द्रेण जनिते २ग्रहे तस्य रौहिण्या प्रतिपाद्यत्वात् रौहिणेयत्वम्। ३ग्रहभेदे। तस्योत्पत्तिकथा शिवपरेण तस्य ग्रहत्वप्राप्तिकथा च काशीख० ५५ अ०। "बृहस्पतेः सुतो मायाभैरवर्क्षसमुद्भवः। पुरोहितस्यापि गुरोर्भीतः शङ्करस्य वै। जहार तरसा तारां" इत्युपक्रमे। "दृष्ट्वाङ्गिरसे तारां स्वयमेव पितामहः। अयाचन्तर्भमाजोन्य तारां प्राह बृहस्पतिः। मदीयायां न ते योनौ गर्भो धार्य्यः कथञ्चन। दैत्यिकाख्यमायाद्य सा गर्भं चोत्ससर्ज ह। जातमात्रः स भगवान् देवानामाचिपद्वयुः। ततः संशयमापन्नास्तारामूचुः सुरोत्तमाः। सत्यं ब्रूहि सुतः कस्य सोमस्याथ बृहस्पतेः। पृच्छ्यमाना यदा देवैर्नोह तारातिलज्जया। तदा तां भगवान् क्रुद्धः शशाप सोऽतितेजसा। तस्मिन्नर्थे यदा ब्रह्मा तारां पप्रच्छ संशयम्। प्रोवाच प्राञ्जलिः सा तं सोमस्येति पितामहम्। तदा स मूर्द्ध्न्युपाघ्राय तारागर्भं प्रजापतिः। बुध इत्यकरोन्नाम तस्य बालस्य धीमतः। ततः स सर्वदेवेभ्यस्तेजोरूपबलाधिकः। बुधः सोमं समासाद्य तपसे जातनिश्चयः। जगाम काश्यां नियताहाराधिं विश्वेशपालिताम्। तत्र लिङ्गं प्रतिष्ठाप्य स्वनाम्ना स बुधेश्वरम्। तपश्चचार चात्युग्रमयुतं संयतेन्द्रियः कृति। तस्य तपः प्रभावेन तुष्टेन शिवेनोक्तं यथा "रौहिणेय! महाभाग! सौम्य! सौम्यवपोनिधे!। नवग्रहाणां लोकादुपरि तव लोको भविष्यति। मध्ये सर्वग्रहाणाञ्च सर्वज्ञत्वे वराम्"। बुधग्रहस्य जन्माभगम्यादिकं स्वस्वोदयशब्दे द्रष्टव्यम्।

बुधचक्र न० बुधस्य राज्यान्तरद्वारकाले स्वजन्मस्थ ऋक्षादिस्थानस्थितिभेदेन शुभाशुभसूचके चक्रभेदे "नोगोऽक्षैकमथ भूमिं चतुर्थं रोगः षट् पञ्चमेऽर्थलाभकरं सुखदं सुतेऽस्य। दुःखं पदाब्धि सुखगो युद्धि सप्त राज्यं नाशोऽष्टमे त्रिदश गेहे निधनं बुधस्य" इति समयान्ततम्।

बुधवार पु० ६त०। ह०व० ७स० उक्ते बुधग्रहस्य शुभाशुभसूचके वारे यथा

"नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयम्। अस्तङ्गतमथवनभवजह्यान्यांशयविहङ्गौ वा। विचरन् अवधनिष्ठाप्राजापत्येन्दु ५ विशदैवानि २१। मृद्गृहि क्रिमकरतनयः करोत्यदृष्टिं सरोगभयाम्। रौद्राहीनि मघान्त्यान्युपागते चन्द्रजे प्रजापीडा। अस्तनिपातमुदयरोगानादृष्टिसन्तापैः। फल्गादीनि विचरन् मङ्गल्याख्यु पपीडयन् गवामशुभः। स्वेरसार्पविशक्तिं करोति चोर्वी प्रभूताम्भाम्। आर्यमृगां १२ शौतभुजं १३ मद्रपदान्तरां यमेशं २ च। चन्द्रस्य सुतो विदधन् प्राग्भद्रतां धातुषङ्गवात्। आश्विनवारुण २४मूलान्यु पपद्यन् रेवतीं च चन्द्रजः। पण्यप्रभिन्नौजोविक्रसन्निलजन्तुरगोपघातकरः। पूर्वादृक्षा ११।२०।२६त्रितयादेकमपीन्दोः सुतोऽभिसन्धीयात् शुक्लस्तत्करामयभयप्रदायी चरन् जगतः"। इतःपरं तस्य सन्निवेशाद्यभिहितात्तत्फलञ्च तत्र दर्शितं तच्च गतिपञ्चके २५।१५ पृ० दर्शितम्। अध्यायशेषे च।

"प्रौष्ठपाद्यावणवैशाखेष्विन्दुज सनाक्षेषु। दृष्टो भयाय जगतः शुभफलदः प्रोषितस्तेषु। कार्त्तिकोऽश्वयुजि वा यदि मासे दृश्यते तदुभयः शिशिरांशोः। अस्तचौरहतभुग्गदतोयक्षुद्भयानि च तदा विदधाति। कृष्णानि सौम्येऽस्तमिते पुराणि सान्यूषते सान्युपयान्ति मोक्षम्। अन्ये तु पक्षादुदिते वदन्ति क्षामः पुराणां भवतीति तज्ज्ञाः। हेमक्षान्तिरथ वा शुक्लवर्णः सस्यक्षेम सुभिक्षो वा। स्निग्धमूर्तिरलघुषु स्थिताय व्यत्यये म शुभः कथ्यतेऽधिपुत्रः"। [सुतादयोऽस्य।

बुधतनय पु० ६त०। पुष्करविधि उक्तायग्रहे दृश्यम्। बुध-

बुधतात पु० ६त०। चन्द्रे चन्द्रशब्दे।

बुधरत्न न० बुधप्रियं रत्नं मयू०त०। मरकतमणौ गारुत्मते राजनि०। ग्रहरत्ने २७६२ पृ० दृश्यम्।

बुधवार पु०६त०। बुधपतिकदिवसे दिनपञ्चके २५८२ पृ०दृश्यम्

बुधसानु पु०बुध-सानुक् सुक् च। यमपुरुषे पर्वते च संज्ञिप्रसा०

बुधा स्त्री बोधयति ज्ञापयति रोगिणं सेवनात् बुध-ज्ञापने क। जटामांस्याम् शब्दर०।

बुधादित्य पु० बुधसहित आदित्यः। जन्मकाले एकस्मिन् राशौ बुधादित्ययोर्योगे सति तयोरन्यतरस्मिन् एव भवतीति सम्प्रदायः।

बुधान पु० बुध-आनच् किच्च। १आचार्ये गुरौ २विष्णौ मेदि०। ३कवौ जटा०। ४ब्रह्मणादिनि ५प्रियवादिनि त्रि० अजादिकोषः।

बुधाष्टमी स्त्री० बुधवारयुताष्टमी मयू०त०। चैत्रपौषकृष्णपक्षयोरादौ शुक्लपक्षयोश्च बुधवारयुतायां १शुक्लपक्षाष्टम्यां, २तत्कर्त्तव्ये व्रते च। तस्याः पूजायाश्चेतिः क्षेमा० प्र० भविष्योत्तरे उक्तो यथा

"पुरा कृतयुगस्यादौ इक्ष्वाकुर्नाम राजा बभूव ह। तस्य भक्त

युतो मित्रमन्त्रिभिः परिवारितः। जगाम हिमवत्-पार्श्वं सहादेवाभिशापतः। योऽसौ प्रविशते भूमौ स स्त्री भवति निश्चितम्। स राजा मृगसङ्घेन प्रवि-शत्तदुभावने। एकाकी तुरगोपेतः क्षणात् स्त्रीत्वं जगाम ह। सा वव्राम वने शून्ये पीनोन्नतपयोधरा। का त्वं कस्य सुतः प्राप्ता अनुरोधोऽस्ति कश्चन। तां ददर्श बुधस्तन्वीं रूपौदार्य्यगुणान्विताम्। अष्टम्यां बुध-वारेण तस्यां तुष्टो बुधो ग्रहः, ददौ स्वहाश्रमस्था-मानीयत प्रतोषिताम्। पुत्रस्तत्सादयामास योऽसौ ख्यातः पुरूरवाः। चन्द्रवंशकरो राजा आद्यः सर्वमही-क्षिताम्। ततः प्रभृति पूज्येयमष्टमी बुधसंयुता। सा च सम्पूर्णा आह्या न भिन्ना यथोक्तं तत्रैव "बुधाष्टमी शुभा पूर्णा यथोक्तफलदायिनी" तच्च व्रतमष्टवर्षं कार्य्यं तत्र भक्ष्यभेदादिकं च तत्रैवोक्तं यथा

"अष्टम्यष्टविधानेन विचित्रान्नैः पृथक् पृथक्। प्रथमा मोदकैर्भक्ष्यैः द्वितीया धानकैस्तथा। तृतीया घृतपूरैश्च चतुर्थी वटकैर्नृप!। पञ्चमी शुष्क-शाकैः षष्ठी क्षीरान्नकैः शुभैः। अयोक्तवर्त्तिभिः शुभ्रैः सप्तमी चातिवाहयेत्। अष्टमी फाणितैः पूर्णैः खण्ड-वेष्टैर्युधिष्ठिर!।" तत्र विहितनिषेधकालादि राज-मार्त्तण्डे उक्तं यथा "प्रतङ्के मकरे जाते देवे जायति माधवे। बुधाष्टमीं प्रकुर्वीत वर्जयित्वा तु चैत्रकम्। प्रह्लादे च जगन्नाथे सन्ध्याकाले यथौ तथा। बुधाष्टमीं न कुर्वीत लता छिन्ति पुराकृतमिति"। एतद्व्रतारम्भ-मपि चैत्रादौ न कर्त्तव्यं यथाह स्मृतिः "मीने धनुषि देवेशे सुप्ते ऽप्युद्वहने तथा। बुधाष्टमीं न कुर्वीत पूर्वविद्धामपि क्वचित्" अयुग्मदिने समयायुग्मयुक्तदिने।

बुधित त्रि० भ्वा०बुध-क्त इट्। ज्ञाते अमरः।

बुधिल त्रि० बुध-किलच्। विदुषि उणादि०।

बुध्न पु० बन्ध-नक् बुधादेशः। १मूले अमरः २शिवे भरतः ३अन्तरीक्षे ऋ० ४।१८।७ भाष्यम्। "पृथुबुध्नोदरा-कृतिः" वेदान्तप०। "अयोगूर्त्तिरसस अर्ब्बुधुध्नः" या०मा० श्रुता स्मृतिः। निरुक्ते तु यज्ञा अस्मिन् श्रुता आप इति अन्तरिक्षं बुध्नम्" तत्र निरुक्तिरुक्ता।

बुध्न्य पु० बुध्ने मूले भवः यत्। १मार्कवृक्षे अग्नौ "अहिरसि बुध्न्यः" तान्त्रिक्या०१।४।११ "अहिरसि हन्ता रक्षःप्रभृतीनां बुध्न्यः बुध्ने मूले आदौ आधानकाले प्रथमं जातोऽसि" श्रुत्यन्तरिक्षभवे रुद्रभेदे च। "बुध्ने निषदति बध्न्यः योऽहिः सः अग्निः बुध्न्यः बुध्नमन्तरीक्षं तन्निरुक्ते च तद्भि-वासाद्वा" निरु०। "आनोऽहिर्बुध्न्योरिषे" तद्दृष्टता श्रुतिः।

बुन्द निशामने-भ्वा० उभ० सक० सेट्। बुन्दति ते दरित् अबुदत् अबुन्दीत्। अबुन्दिष्ट। उदित् क्त्वा वेट्। निशामनमालोचनम् प्रविधानमिति यावत्।

बुन्ध निशामने भ्वा० उभ० सक० सेट्। बुन्धति ते दरित् अबुधत्-अबुन्धीत् अबुन्धिष्ट। निशामनमालोचनम्। उदित् क्त्वा वेट्।

बुन्ध बन्धे चु०उभ०सक० सेट्। बुन्धयति ते अबुबुन्धत् त।

बुबुर न० उदके निघण्टौ बर्बुरमित्यत्र पाठान्तरम्।

बुभुक्षा स्त्री० भुज-सन्-भावे अ। भोजनेच्छायां क्षुधायाम्। सा च प्राणधर्मः यथोक्तं या०ति०"बुभुक्षा च पिपासा च प्राणस्य" जन्मिशब्दे दृश्यम्। अत्रेऽजीर्णे च सा न भवति अथ भवति चेत् अनिष्टदा यथोक्तं सुश्रुते "उद्गा-रशुद्धावपि भक्तकाङ्क्षा न जायते क्लेदगुरुता च यस्य" "क्षयं यदा दोषविशेषमाप्तं क्षीणं न तेजः पच-यादपैति। भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दवृद्धिं विषवच्चिकित्सेत्"। क्षुवादि०शोकार्थे अच्। बौभुक्षन्तच्छीले त्रि०

बुभुक्षित त्रि० बुभुक्षा+तारo इतच्। क्षुधायुक्ते "बुभुक्षितः किं हिकरोति भुङ्क्ते" इत्युक्तेः।

बुल मज्जने चु० उभ० अक० सेट्। बोलयति ते अबूबुलत्। बोलयति क्षयः पयसि मज्जतीत्यर्थः।

बुलि स्त्री तद्धा० बुड-इन् किच्च ङीष् वः। भये हेमच०।

बुल्ल त्रि० बुल्ल-अ उल्लादि०। निरर्थके शत०ब्रा० ११।५।४।१४।

बुष(स) न० बुष्यते उत्सृज्यते बुष-उत्सर्गे क पृषो० वा षत्वम्। (आगडा) १तुच्छधान्ये फल्गुरहितधान्ये अमरः। अयं बोपधः २उदके वेदनिघण्टुः ततः हृषा० चतुर्थ्यां स। बुसस तत्सनीपादौ त्रि०। पृषो० दीर्घः। बूसमप्यत्र। [अबोसीत् बुबोस

बुस उत्सर्गे दि०पर०सक०सेट्। बुस्यति। दरित् अबुसत्

बुस्त आदरे अनादरे च चु०उभ०सक०सेट्। बुस्तयति ते अबुबुस्तत् त।

बुस्त न० बुस्त्यते नाद्रियते आद्रियते वा बुस्त-घञ्। १पन-सादिफलस्य त्वाक्ष्ये अंशे (भुधि) २मांसपिण्डभेदे च अमरभरतौ।

बूक न० बुक्क+पृषो० दीर्घः। बुक्कशब्दार्थे रमानाथः।

बृवदुकुध न० पदे निघण्टुः।

ङ्षी स्त्री ब्रुवनोऽस्यां वीट्नि पृषो० ब्रुवो वृ वद-क्विप् गौरा० ङीष्च्च । अक्षीयामासने अमरः ।

बृ(बृ)ह् इत्यो भ्वादि० पर० अक० सेट् व(ब)र्हति अबृ(ब)हीत् । दरिद्र इत्येके तेन अबृ(ब)हदित्यपि । कवि० कल्पद्रुमे बृहधातुमात्रस्य अन्त्यस्यादित्यसूक्तम्" मेदि० "प्रोक्षिते निक्षते क्षिप्ते बृहती वसनान्तरे । छन्दोभित्-क्षुद्रवार्त्ताकीवारिधानीषु वाचि च । कण्टकारीलक्ष-ज्योष" "ब्रह्मतत्त्वतपोवेदे न द्वयोः पुंसि मेधसि" । अश्विनयोर्भिदोर्विप्रे वन्धनं बधबन्धयोः" । बृहन्नक्षति-बृहती ब्रह्मणवद्योः क्षोभ्राद्तियोक्तत्वाद्ङ्ष उभया-दित्वम् ।

बृ(बृ)हक पु० बृ(बृ)ह-क्कु । देवगन्धर्वभेदे भा०आ०१२३अ०

बृ(बृ)हच्चक्षु पु० ६त० । महाचक्षुष्याके राजनि० ।

बृ(बृ)हच्छिल पु० ७त० । फलपूरे बीजपूरे शब्दच० ।

बृ(बृ)हच्छल्क पु० ६त० । चिक्कटसत्यें जटा० ।

बृ(बृ)हच्छ्रवस् त्रि० ६त० । महायशस्के भाग० १।४।१ ।

बृ(बृ)हज्जातक न० कर्म० । वराहमिहिरकृते जातकशास्त्रभेदे ।

बृ(बृ)हज्जाबाल पु० कर्म० । उपनिषद्भेदे उपनिषच्छब्दे दृश्यम् ।

बृ(बृ)हज्जीवन्ती स्त्री कर्म० । महाजीवन्त्याम् राजनि० ।

बृ(बृ)हड्ढक्का स्त्री कर्म० । भेरीभाद्ये जटा० ।

बृ(बृ)हत् त्रि० बृह्-अति शतृवत् कार्य्यम् । १महति स्त्रियां ङीष् । सा च २उत्तरीयभेदे मनाक्षरपादके ४छन्दोभेदे ४क्षुद्रवार्त्ताक्यां ५वारिधान्यां ६वाचि ७कण्टकार्य्यांच स्त्री मेदि० । दक्षिण्य पुं० । "अणुर्बृ(बृ)हन् लघुः स्थूलः" विष्णुस० । आच्छादनपटे कन् । बृहतिका उत्तरीयवस्त्रे अमरः । स्वार्थे क । बृहतीशब्दे च स्त्री ।

बृ(बृ)हतीपति पु० बृ(बृ)हत्या वाचः पतिः । पारस्कर० "तदृबृहत्योः करपत्योस्तौरदेवयोः" वार्त्ति० देवतायामेव हट् तत्रोपत्व नान्यत्र वाक्पतौ देवतेच० ।

बृ(बृ)हत्क त्रि० बृहत्प्रकारः कन् । बृहत्प्रकारे

बृ(बृ)हत्कथा स्त्री वररुचिप्रणीते कथाभेदे ।

बृ(बृ)हत्कन्द पु० ६त० । १पद्मने रत्नमाला । २विष्णुकन्दे राजनि० । [पु० हरिवं० २१अ०

बृ(बृ)हत्कर्मन् त्रि० ६त० । १महाकर्मयुते २बृहत्कर्मपुत्रभेदे

बृ(बृ)हत्काय पु० आजमीढवंशजे नृपभेदे भाग० २१।१७ । ६त० । २महादेहे त्रि० । [गोकर्णभेदे त्रिका० ।

बृ(बृ)हत्कालशाक पु० नित्यक० । महति (कालशाकस्त्रियां)

बृ(बृ)हत्काश पु० नित्यक० । खड्गटे तृणभेदे हारा० ।

बृ(बृ)हत्कीर्त्ति त्रि० ६त० । १महाकीर्त्तियुक्ते २आङ्गिरस-गोत्रपुत्रभेदे पु० भा० व० २१७अ० । १शत्रुरभेदे पु० हरिवं० ५२अ०

बृ(बृ)हत्कुक्षि त्रि० ६त० । वृद्धिके अमरः । [आ० ६अ० ।

बृ(बृ)हत्केतु त्रि० ६त० । १महाध्वजयुते । २राजभेदे पु० भा०

बृ(बृ)हत्क्षत्र पु० आजमीढवंशजे नृपभेदे भाग० ६।२६ ।

बृ(बृ)हत्फाल पु० नित्यक० । छिन्नालतृणे राजनि० ।

बृ(बृ)हत्सिका स्त्री बृहन् निक्षो रसोऽस्याः । पाठायाम् राजनि० ।

बृ(बृ)हत्सत्व पु० ६त० । बंशे शब्दच० ।

बृ(बृ)हत्सत्वच् पु० ६त० । (छातिम) वृक्षभेदे रत्नमा० ।

बृ(बृ)हत्पत्र त्रि० ६त० । १महापत्रयुक्ते वृक्षे २हस्तिकर्णे राजनि० । ३सिंहपर्णिकायां स्त्री राजनि० ।

बृ(बृ)हत्पाटलि पु० नित्यक० । धुस्तूरे त्रिका० । [शब्दच०

बृ(बृ)हत्पाद त्रि० ६त० । १महाचरणयुक्ते वृक्षे २शरभेदे

बृ(बृ)हत्पारेवत न० कर्म० । महापारेवते राजनि० ।

बृ(बृ)हत्पालिन् पु० बृ(बृ)हन्तं पालयति पालि-णिनि । वनजीरके राजनि० ।

बृ(बृ)हत्पीलु पु० नित्यकर्म० । महापीलौ राजनि० ।

बृ(बृ)हत्पुष्पी स्त्री ६त० ङीष् । १घण्टारववृक्षे जटा० । २महापुष्पयुतवृक्षमात्रे त्रि० स्त्रियां टाप् ।

बृ(बृ)हत्फल त्रि० ६त० । १महाफलयुते । २कटुतुम्बर्यां ३माषेम्बुधारुण्यां ४कुष्माण्ड्यां ५महाफलवृक्षे च स्त्री [भेदे । टाप् राजनि० ।

बृ(बृ)हत्संहिता स्त्री वराहमिहिरप्रणीते ज्योतिषग्रन्थ-

बृ(बृ)हत्सामन् न० नित्यक० । साममेदे तस्य साम "त्वा-मिद्धि हवामहे" इत्यस्यर्चि ज्ञेयं तस्य स्तुत्यादानादि-पञ्चतावच्छान्तिः १६।१८ पु० दर्शितम् । [ग्रामभेदे

बृ(बृ)हत्साम ज्येष्ठसाम श्यैतरम्" सामग्रहारण्यो-गाद्यत्तया विधानात्रि० शक्तम् । "बृ(बृ)हत्साम तथा साम्नाम्" गीता० । अस्य साम अल्पमतिपादकमिति सङ्ख्याकारेणोक्तं यमर्षिनाम्नामन्त्रनिरिया "इन्द्रः सुवे" स्वरलेनानेन स्तूयते इति तस्य ऋषेत्रभिसि" ।

बृ(बृ)हत्सेन त्रि० ६त० । १महासेनायुक्ते । २मागधवंशजे मालिनि नृपभेदे पु० भाग० ६।२२।२ ३मागध देशीये नृपभेदे भा० आ० ६७अ० । कर्म० । ४महत्सेनायां स्त्री ।

बृ(बृ)हदश्विन् पु० ६त० । १नासत्यविशेषान्वितयुते तस्य गोत्रा-

प्रत्य. मयो० वञ्। बार्हदन्य तदपत्ये तस्य छात्राः अण्या० अण् यञोपः। बार्हदम तस्य छात्रेषु ब० व० णिन्कौ०। [स्त्रियां स्वाङ्गत्वात् ङीष्।

बृ(बृ)हद्भृङ्ग पुंस्त्री ६त० । १गजे शब्दच० २महाकाये त्रि०।

बृ(बृ)हदम्बालिका स्त्री कुमाराहुषरक्षाभेदे भा०शा०४७अ०

बृ(बृ)हदम्ब पु० बृहन् अम्बो रसोऽस्य। (आमरातक) आमरङ्गे शब्दच०। [रूपभेदे हरिवं०११अ०।

बृ(बृ)हदश्व पु० १ऋषिभेदे भा०व०५२अ०। २आवश्यस्य पुत्रे बृहदारण्यक न०। उपनिषद्भेदे।

बृहद्दिषु पु० आजमीढपुत्रे १रूपभेदे हरिवं०२०अ०। २पूर्व्यवंशे २रूपभेदे च ६२ अ०।

बृ(बृ)हदुक्थ न० कर्म०। १महति उक्थे २अग्निवंशे तपस्पुत्रे ३अग्निभेदे पु० भा० व० २१६ अ०। "बृ(बृ)हदुक्थोह वै वामदेव्यः" शत० ब्रा० ३।२।२।१४। तदुक्थेन साध्ये २यज्ञे अग्निमेधे पु०। [वेदद्वीपे द्वयम्।

बृ(बृ)हदुक्ष पु० १अगस्त्यऋषिकारके २प्रजापतौ च यजु०८।८।

बृ(बृ)हदुक्षरतापनी स्त्री कर्म०। उपनिषद्भेदे।

बृ(बृ)हदेला स्त्री कर्म०। स्थूलैलायां राजनि०।

बृ(बृ)हद्गर्भ पु०शिविन्द्रपुत्रे यो हि ब्राह्मणभोजनार्थं प्रस्थाप्य संस्कृतः पुनरपि जीवितः तत्कथा भा० व० ११७ अ०।

बृ(बृ)हद्गु पु० राजभेदे भा० आ० ६अ०।

बृ(बृ)हद्(गु)गुप्त पु० काकुस्थभेदे हेमच० ४ एषः विन्ध्यपर्वतस्य पश्चात्यभागस्थदेशस्तत्रभे स्थितः (बृहद्गुप्त) इति विकाण्डशेषः। [शब्दच०।

बृ(बृ)हद्गौल अ० नित्यक०। (तरसुज) क्रमणधावनयोः

बृ(बृ)हद्गर्भ पु० कल्पेयुवंशे नृपभेदे हरिवं० १२अ०।

बृ(बृ)हद्बल पु०६त०। १शिलाजे २पक्षिकाशोढ्रे च राजनि०

बृ(बृ)हद्युम्न पु०नृपभेदे भा०व०१२८अ० [महाभारतयुद्धे त्रि०

बृ(बृ)हद्रनुस् पु० आजमीढवंशे नृपभेदे हरिवं० २०अ०।

बृ(बृ)हद्रर्भ पु० आजमीढवंशे नृपभेदे। हरिवं०२०अ०।

बृ(बृ)हद्धर्मपुराण न० उपपुराणभेदे।

बृ(बृ)हद्धन त्रि० बृहत्वमस्य। १महापने २इक्ष्वाकुवंशे नृपभेदे पु० हरिवं०१५अ०।

बृ(बृ)हद्धल न० कर्म०। महाशाकुले शिका०।

बृ(बृ)हद्बलिन् पु०आङ्गिरसे ऋषिभेदे। "ब्रह्मणो यस्य पुत्रः कृत्स्नकोऽहह!। तथाभवत् सुता भार्या प्रजास्वर्थाय च वै हरे। बृहत्कीर्त्तिर्बृहज्ज्योतिर्बृहद्ब्रह्मा बृहन्मनाः। बृहन्मन्यो बृहन्नाथस्तथा राजन्! बृहस्पतिः" भा०व० २३७ अ०। बृहज्ज्योतिरादयस्तत्पुत्रे

बृ(बृ)हद्भट्टारिका स्त्री० कर्म०। दुर्गायां शब्दमाला।

बृहद्(बृ)भय पु० सावर्णिमनोः पुत्रभेदे मार्कण्डेये पु०९३अ०।

बृ(बृ)हद्भानु पु० ६त०। १अग्नौ २क्षत्रकर्कटके च अमरः। ३आङ्गिरसे वह्निभेदे भा०व० २२०। इन्द्रसावर्णिमन्वन्तरे ४हरेरवतारभेदे भाग० ८।१३ अ

बृ(बृ)हद्भण पु०इक्ष्वाकुवंशजे भाविनि नृपभेदे भाग०९।१२।६।

बृ(बृ)हद्भद्र पु० मौर्य्ये १नृपभेदे भाग०१२।१। २आङ्गिरसे वह्नेः पुत्रभेदे भा०३१९ ३मागधराजभेदे अरासन्धसुते हरिव० ३अ०। ४वेदिराजवसोःपुत्रभेदे हरिवं० ११७अ०।

बृ(बृ)हद्भद्रयन्तर न० यामभेदे १आङ्गिरसवंशजे वह्निभेदे भा०व०२१९अ०।

बृ(बृ)हद्भाज पु० इक्ष्वाकुवंशजे भाविनि नृपभेदे भाग० ९।१२

बृ(बृ)हद्भाविन् पु० बृहत् यथा तथा रौति रु-णिनि। क्षुद्रोलुके राजनि०।

बृ(बृ)हद्भ्रप पु० नरकभेदे हरिवं० २०४ अ०।

बृ(बृ)हद्भृत् पु० बृहत् बृहत्साम तदस्यास्ति स्तोत्रतया मतुप् मस्य वः। बृहत्साम स्तोत्रमस्त्यस्य इन्द्रे मनु०७।२२ २सत्राध्ये यज्ञे च ३नदीभेदे स्त्री ङीप् भा०भी०९अ०।

बृ(बृ)हद्भल्क पु० ६त०। पक्षिकाशोढ्रे राजनि०।

बृ(बृ)हद्भात पु०७त०। अग्नीरोहरे धान्यभेदे (देधान) रत्नमा०

बृ(बृ)हद्भारणी स्त्री कर्म०। महेन्द्रभारणीवत् राजनि०।

बृ(बृ)हद्भीज ६त्र०। महाहिंगुवृक्षे आख्यातवृक्षे शब्दच०।

बृ(बृ)हद्भल पु० बृहद्बलेति आख्यात्वेन अस्यास्ति अच्। अर्जुने हेमच० "आदाय प्रययौ वीरः स बृहद्बलसारथिः" भा० वि०६७अ०। "अर्जुन उवाच। प्रतिज्ञा परवीरघ्नी कृतेयं किरिटाग्नि मद्दीपते!। व्याघातो हि महान्नो मे संवृत्तो नृप! दुष्करः। बलवद्भिश्चादियुद्धाग्नि बाहुक्रियवतामिमौ। कर्णयोः प्रतिमुच्याहं कुण्डले ज्वलनप्रभे। पिनद्धकवचः पाणिभ्यां तृतीयां प्रकृतिं गतः। वेणीकृतशिरा राजन्! नाम्ना चैव बृहद्बला" इति तत्र च अज्ञातवासकाले तथाख्यातस्य भा०वि० ११अ० उक्तम्।

बृहद्भारतीय न० उपपुराणभेदे।

बृहद्भारायणोपनिषद् स्त्री०उपनिषद्भेदे। [शब्दे द्वयम्।

बृहद्भीका स्त्री० चतरङ्कशब्दोक्ते क्रीडनभेदे। चतरङ्क०

बृहस्पति पु० बृहत्या वाचः पतिः पारस्क०गुणादिबृहती०पतिशब्दे द्वयम्। आङ्गिरसे १ऋषिभेदे बृहद्बलनयशब्दे द्वयम्। २देवपुरोहिते १ग्रहभेदे च। तस्य गतिभग०

ऽादिकं खगोलशब्दे दर्शितम् । तच्चारश्च गुरुवर्षशब्दे २६२१ पृ० तस्य महत्त्वप्राप्तिक्रिया गुरुशब्दे दृश्या ।

बृहस्पतिचक्र न० बृहस्पतेः सञ्चारकाले नराकारचक्रस्य मङ्गादिषु स्वनक्षत्रस्य पातेन शुभाशुभसूचके चक्रभेदे तच्च ज्यो०त० उक्तं यथा "शीर्षे चत्वारि राज्यं ललाटेऽपि करे दक्षिणे चापि सौख्यं चैकं कण्ठे विभूतिं मदनगरमितं वक्षसि प्रीतिविद्विषि । पादस्थाः षट् च पीडां पुनरपि जघनेवंभूक्षे च मृत्युं नेत्रे त्रीणि प्रदद्युः सुखमथ निजभे वाक्पतेः संक्रमश्चात्" ।

बृहस्पतिपुरोहित पु०ष० त० इन्द्रे २देवमात्रे च यजु० २।११

बृहस्पतिवार पु० ष० त० । जीवाभिधयुक्ते दिने तदाधयनादिकं दिनशब्दे दृश्यम् ।

बृहस्पतिसव पु० यज्ञभेदे "बाजपेयेनेष्ट्वा राजा राजसूयेन यजेत ब्राह्मणो बृहस्पतिसवेन" आश्व० श्रौ० ९ । ९ ।

बृ(बृ)हस्पतिस्तोम पु० यज्ञभेदे ताण्ड्य० २५।१।१ ।

बृ हत्यां भतौ च क्र्या०उभ०पर०सक०सेट् । बृ(बृ)णाति अवारीत् ववार वरि(री)ता विवरी(रि)षति वुबूर्षति बूर्णः ।

बेकनाट पुंवे द्रव्यपञ्चांशः द्विखबोधकः एकं गुणं द्रव्यद्विकाय दत्त्वा द्विगुणं चक्रं देयमिति वनयेन नाटयति व्यवहरति नाटि-अच् वे एकशब्दयोः पृषो० बेकनाटः । कुबेरदिनि च० ८।६६।१० भाष्ये दृश्यम् ।

बे कुरा स्त्री वाचि निघण्टुः ।

बे(बे)ह प्रयत्ने भ्वा० आत्म० सक० सेट् । बे(बे)हते अबे(बे)हिष्ट बे(बे)हे । छदिव् अस्मिन् न दृश्यः ।

बोकड़ी स्त्री वस्त्रान्त्रां राजनि० ।

बोध पु० बुध-भावे घञ् । १ज्ञाने त्रिका० । २जागरे च २देवभेदे मा०भी०६अ० । [चक्रे वैतालिके शब्दमा० ।

बोधक त्रि० बुध-णिच् ण्वुल् । १ज्ञानजनके बोधकरे स्मृ०

बोधकर त्रि० बोधं ज्ञानं जागरकं वा करोति क-ट । १ज्ञानकारके विज्ञाने आनरणकारके २वैतालिके च अमरः

बोधन न० बुध-णिच्-ल्युट् । १विज्ञापने कालवशात् गन्तादेर्व्यूनतायां २तद्दीपने ३जागरणे च । "शयनं बोधनं हरेः" इति पुराणम् । "सायाह्ने बोधनं कुर्यात्" इति स्मृतिः । देवीबोधनकालादिः त्रि०त०प्रदर्शितो यथा विष्णुपुराणम् "कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभे दिवा । नवम्यां बोधयेद्देवीं मघाविभवविस्तरैः" "इदं आश्विने पक्षे नवम्यामार्द्रयोगतः । आरभ्य को।ऽपि यः सायं पूजां करोत्यहरहः । स दशम्यां रावणस्य वधार्थाय रामस्यानुग्रहाय च । अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा" इति मन्त्रविशेषश्च । अकाल इति तु रात्रित्वेन दक्षिणायनस्य तथा च स्मृतिः "तपस्तप्त्वौ गिरिराडतुः । मधुश्च माधवश्च वासन्तिकावृतुः । शुक्रश्च शुचिश्च ग्रैष्मावृतुः । अथैतदुत्तरायणं देवानां दिनं, नभाश्च नभस्यश्च वार्षिकावृतुः इषश्च ऊर्जश्च शारदावृतुः । सहाश्च सहस्यश्च हैमन्तिकावृतुः" । अथैतद्दक्षिणायनं देवानां रात्रिः" इति एवञ्च "रात्रावेव महामाया ब्रह्मणा बोधिता पुरा । तथैव च नराः कुर्युः प्रतिसंवत्सरं नृप !" इति अस्याप्येतद्विषयत्वम् । अतएव लिङ्गपुराणे दिवेत्युक्तम् । एवञ्च कालिकापुराणेऽपि बोधने रात्राविति पदं देवतारात्रिपरम् । ततश्च पूर्वाह्णे नवम्यामार्द्रानक्षत्रयुक्तायां बोधनं पूर्वाह्णेतरकाले आर्द्रांशाभे नवम्यामार्द्रभे दिवेत्यत्र दिवापदात् तत्रापि बोधनम्, अन्यथा दिवापदं व्यर्थं स्यादिति । ज्योतिषार्णवे व्यक्तमुक्तं वराहेण "कन्यादिसीनपर्यन्तं यत्र संप्राप्यते शिवः । तत्र बोधः प्रकर्त्तव्यो देव्या राज्ञा शुभप्रदः" । शिव आर्द्रा । एवञ्चोभयदिने पूर्वाह्णे नवमीलाभे परत्रार्द्रांलाभे परत्र बोधनं युक्तम् पूर्वत्र, युक्तबाधकपूर्वाह्णस्य बाधकमध्यात्मानुरोधात् दिवानक्तव्याप्तौ तु पूर्वाह्ण एव नवम्याम् उभयत्र पूर्वाह्णलाभे तु पूर्वदिन एव युक्तम् । अत्र केवलनवम्यां बोधनविधेर्नक्षत्रस्यापि गुणभूतत्वात् । "माघे वा फाल्गुने वापि शुक्लेतु वै नवमी । सा कौशीति च यत् प्रोक्तं तत् प्रायो वृत्तिदर्शनात्" इति कौशीकाख्यमाद्राकरीतिवत् आर्द्रायोगतः कृत्यस्य प्रायिकत्वेनाभिधानं प्रतीयते । ततश्चार्द्ररहितबोधने अन्यानुपदेशात् तदयुक्तमन्यः प्रथमयुक्तत्वेन प्रयुज्यते । "यच्चूनमतिरिक्तञ्च यच्छिद्रं यदयज्ञियम् । यद्वेध्यमशुद्धञ्च यातयामञ्च यद्भवेत् । तदोङ्कारमयुक्तेन सर्वमाविकलं भवेत्" इति योगियाज्ञवल्क्यवचनात् । अतो बोधनेऽप्येवं नवम्यां बोधनालाभे तु षष्ठ्यां सायं बोधनं यथाह भविष्ये "षष्ठ्यां विल्वतरौ बोधं सायं सन्ध्यासु कारयेत्" । सन्ध्योक्ता वराहसिंहेश्च "अबोधनमयात् सन्ध्या व्यर्थीभूता न तारका यावत्" । षष्ठ्यां बोधने तु प्रागुक्तः "ओं रावणस्य वधार्थाय" इति "अहमश्वाश्विने षष्ठ्यां सायाह्ने बोधयाम्यहम्" इति च पठेत् । अथ बोधनामन्त्रणयोः पृथक्त्वं तत्

प्रकाशकमन्त्रभेदात् अत्र बोधनमन्त्रानुक्तावेव आमन्त्रणमन्त्रो तु "मेरुमन्दरकैलासहिमवच्छिखरे गिरौ" इत्यादौ प्रागुक्तदेवीपुराणे नवमीषष्ठ्योर्बोधनामन्त्रणयोः पृथक्त्वाभिधानाच्च। ततश्च षष्ठ्यासमयकरणेऽपि यतो प्रवेशपूर्वदिने सायंषष्ठीलाभे एकदैवोभयकरणम्। यदा तु पूर्वदिने सायंषष्ठीलाभः न परदिने सायंषष्ठीलाभः तदा पूर्वेद्युर्बोधन परदिने सायमामन्त्रणम्। यदा तूभयदिने सायंषष्ठ्यलाभस्तदा परदिने पूर्वाह्णे षष्ठ्यां बोधनं "बोधयेद् बिल्वशाखायां षष्ठ्यां देवीं फलेषु च। सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत्"।

बोधनी स्त्री बोध्यतेऽनया अत्र वा बुध-णिच्-करणे आधारे वा ल्युट्। १पिप्पल्यां तया हि सुप्तिर्तो बोध्यते। २कार्त्तिकशुक्लैकादश्यां तत्र हि हरेर्बोधनम्। "शयनोबोधनी मध्ये या कृष्णैकादशी भवेत्। सैवोपोष्या प्रयत्नेन नान्या कृष्णा कदाचन" इति तिथ्यादितः। "तावद्गर्जन्ति तीर्थानि वाजिमेधादयो मखाः। मथुरायां प्रिया विष्णोर्यावन्न नायाति बोधनी" हरिभक्तिविलासे ब्रह्मपु०वचनम्।

बोधवासर पु० कृत०। १हरिबोधनदिने कार्त्तिकशुक्लैकादश्याम् २ततुकर्त्तव्यव्रते च। "जन्मप्रभृति यत् पुण्यं नरेणोपार्जितं भुवि। तथा भवति तत् सर्वं न कृत्वा बोधवासरम्" हरिभक्तिविलासे वह्निपु०वचनम्।

बोधान त्रि० बुध-ल्यानच्। १विज्ञे २गीष्पतौ शब्दर०।

बोधि पु० बुध-इन्। १समाधिभेदे २पिप्पलवृक्षे शब्दभेदे मेदि० ४बोधे त्रिका०। ५ज्ञातरि त्रि०। [ज्यत्र पु०

बोधितरु पु० कर्म०। अश्वत्थवृक्षे हेमच०। बोधिद्रुमादयोऽत्र

बोधिसत्त्व न० बोधि बोधयुतं सत्त्वम्। बुद्धभेदे हेमच०।

बौद्ध न० बुद्धेन प्रोक्तमण्। १बुद्धशास्त्रभेदे तच्च शास्त्रं प्रथमं बृहस्पतिना प्रयुक्तं तच्च बुद्धावतारे प्रपञ्चितम्। यथोक्तं मत्स्यपु० २४ अ०।

"आयुषो नहुषः पुत्रो वृद्धशर्मा तथैव च। रजिर्दम्भो विपाप्मा च वीराः पञ्च महारथाः। रजेः पुत्रशतं जज्ञे राजेयमिति विश्रुतम्" इत्युपक्रमे "रजिपुत्रैस्तदा क्षिप्तं बलाद्दिन्द्रस्य वैभवम्। यज्ञभागश्च राज्यञ्च तपोबलगुणान्वितैः। राज्याद् भ्रष्टस्तदा शक्रो रजिपुत्रैर्निपीडितः। प्राह वाचस्पतिं दीनः पीडितोऽस्मि रजेः सुतैः। न यज्ञभागो राज्यं मे निर्जितस्य बृहस्पते!। राज्यलाभाय मे यत्नं विधत्स्व धिषणाधिप!। ततो बृहस्पतिः श्लाघ्यकरोदुबलदर्पितम्। बृहद्बालविधानेन पौष्टिकेन च कर्मणा। गत्वाथ मोहयामास रजिपुत्रान् बृहस्पतिः। जिनधर्मं समास्थाय वेदबाह्यं स वेदवित्। वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः। वेदबाह्यान् परिज्ञाय हेतुवादसमन्वितान्। जघान शक्रो वज्रेण सर्वान् धर्मबहिष्कृतान्"। तदधीते वेत्ति वा पुनः अण्। २तच्छास्त्राध्यायिनि २तद्वेत्तरि च त्रि०। बुद्धशब्दे तन्मतं दर्शितम्।

बोध पु० बुध्यायम् यैष्किोऽण्। बुधात्मजे पुरूरवसि हेम०।

बौधायन पु० बोधस्य गोत्रापत्यम् आङ्गिरसभिन्नम् इञ्। ततो यूनि इञन्तत्वात् फक्। यूनि बोधगोत्रापत्ये ऋषिभेदे तेन च कल्पसूत्रसंपृक्तत्वेन कृता।

बौधि पु०बोधस्य गोत्रापत्यमाङ्गिरसभिन्नम् इञ्। बोधस्यगोत्रापत्ये आङ्गिरसभिन्ने आङ्गिरसे तु यञ्। बौध्य इत्येव

बौध्य पु०बोधस्य गोत्रापत्यमाङ्गिरसः यञ्। आङ्गिरसे बोधगोत्रापत्ये तद्गोता च भा० शा० १७८अ० दर्शिता यथा "बौध्य उवाच। "उपदेशेन वक्तव्यं नानुशास्मीह कञ्चन। लक्षणं तस्य वक्ष्येऽहं तत्स्वयं परिमृश्यताम्। पिङ्गला कुररः सर्पः सारङ्गाश्चेषुकारकः। इषुकारः कुमारी च षडेते गुरवो मम"। भीष्म उवाच "आशा बलवती राजन्नैराश्यं परमं सुखम्। आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला१। सामिषं कुररं दृष्ट्वा बध्यमानं निरामिषैः। आमिषस्य परित्यागात् कुररः२ सुखमेधते। सङ्गारम्भो हि दुःखाय न सुखाय कदाचन। सर्पः३ परकृतं वेश्म प्रविश्य सुखमेधते। सुखं जीवन्ति मुनयो भैक्ष्यवृत्तिं समाश्रिताः। अल्पोद्देशैव भूतानां सारङ्गा४ इव पक्षिणः। इषुकारोऽ५ नरः कश्चिद्विषावेशकृमानसः। समीपेनापि गच्छन्तं राजानं नाबुद्धवान्। बह्वनां कलहो नित्यं द्वयोः सङ्घर्षणं श्रुतम्। एकाकी विचरिष्यामि कुमारीशङ्खको६ यथा"। बोधो देशभेदोऽभिजनोऽस्य अणिञ्वा० अञ्। पित्रादिक्रमेण २तद्देशवासिनि त्रि०।

बध्(व्यध) ताडने दिवा० पर० सक० अनिट् बि(वि)ध्यति अध्या(व्या)दहीत् बि(वि)व्या(ध्वा)ध वध्यादिते सनि बिभ्यत्सति। [अबुध्युषत् त।

बध्न तत्सर्गे विबन्धे च चु०उभ०सक० सेट्। बाधयति-ते

ब्रध्न(व्रण) शब्दे भ्वा०पर०अक०सेट्। (ब्र)व्रणति। अब्रण(व्र)-णीत्-अ(ब्र)व्राणीत्। कविकल्पद्रुमेऽयमन्यस्यादि।

ब्रध्न पु० बध्न-नक् ब्रुवादेशः। १सूर्य्ये २अर्कवृक्षे अमरः। ३शिवे हेमच०। ४दिने ५अश्वे त्रिकाण्ड० ६क्षत्रियभेदे

तस्य गोत्रापत्यम् कुञ्। आभ्रायण तद्गोत्रा-पत्ये पुंस्त्री०। ७भौत्यमनोः पुत्रभेदे मार्कपु० १००अ०। ८रोगभेदे "कण्ठमिछन्द्रियार्थसंसेवनाच्चिरम् यतः। करोति पित्तवच्छोथं दोषो वङ्क्षणसन्धिषु। ज्वर-मूलाङ्गसादाद्यं तं ब्रह्मेति निर्दिशेत्" माधवनि०

ब्रह्मध्न पु० नृपभेदे भा०व० ६८अ०।

ब्रह्मकन्यका स्त्री ६त०। १सरस्वत्यां त्रिका० (वामनघाटी) २ब्राह्म्यां राजनि०। [उ०२६अ०। २ईश्वरार्पितकर्मण्येवि०

ब्रह्मकर्मन् न० ब्रह्मविहित कर्म०। १वेदविहिते कर्मणि भा०

ब्र(ब्र)ह्मकर्मसमाधि पु०ब्रह्मणि कर्मणां समाधिः "ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गन्त-व्यम् ब्रह्मकर्मसमाधिना" गीतोक्ते सर्वकर्मणां कर्त्रादेरङ्ग जातस्य ब्रह्मरूपेण चिन्तने।

ब्र(ब्र)ह्मकुण्ड न० ब्रह्मनिर्मितं कुण्डम् या० त०। सरोवरभेदे तदाविर्भावकथा।

"पाण्डुनाथस्योत्तरस्यां ब्रह्मकुण्डाह्वयं सरः। ब्रह्मणा निर्मितं पूर्वं स्नानाज्ञ स्वर्गवाञ्छिनाम्। आयामेन शत-व्यामं विस्तीर्णेन तदर्द्धकम्। सर्वपापहरं पुण्यं देव-लोकात् समागतम्" तत्र स्नानमन्त्रः। "कमण्डलु वसु-भूतः ब्रह्मकुण्डाऽमृतत्रय!। हर मे सर्वपापानि पुण्यं स्वर्गञ्च साधय। इत्यनेन तु मन्त्रेण स्नानात् तस्मिन् सरोजले। पाण्डुनाथञ्च संपूज्य विष्णुसायुज्यमाप्नुयात्। ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्। ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः" कालिकापु०८१ अ०।

ब्र(ब्र)ह्मकूट पु० पर्वतभेदे ब्रह्मकुण्डशब्दे दृश्यम्।

ब्र(ब्र)ह्मकूर्च न० "अहोरात्रोषितो भूत्वा पौर्णमास्यां विशे-षतः। पञ्चगव्यं पिबेत् प्रातः ब्र(ब्र)ह्मकूर्चमिति स्मृतम्" इत्युक्ते १पञ्चगव्यपानरूपे व्रतभेदे। २कुशोदकसहित पञ्चगव्ये च नारसिंहपु० "पञ्चगव्येन देवेशं यः स्नाप-यति भक्तितः। ब्रह्मकूर्चविधानेन विष्णुलोके महीयते" "ब्र(ब्र)ह्मकूर्चविधानेन कुशोदकयुतेन" देवी० प्र०त०रघु० प्रायश्चित्ताङ्ग ब्र(ब्र)ह्मकूर्चप्रमाणादि हेमाद्रानादि-पद्धतौ २२६१ पृ० अस्माभिर्दर्शितम्।

ब्र(ब्र)ह्मकृत् त्रि०ब्र(ब्र)ह्म तपः करोति क्विप्। १तपःकर्त्तरि २विष्णौ पु०"ब्र(ब्र)ह्मण्यो ब्र(ब्र)ह्मकृत् ब्रह्मा" विष्णुस०

ब्र(ब्र)ह्मकृत त्रि० ३त०। ब्रह्मणा कृते। ततः शुक्रा०अण्यत्ये ढक्। आह्मकृतेय तदपत्ये पुंस्त्री०। [राजनि०।

ब्र(ब्र)ह्मकोशी पु० ब्र(ब्र)ह्मणः कोशोव। अन्नमोदायाम्

ब्र(ब्र)ह्मगर्भा स्त्री ब्र(ब्र)ह्मैव गर्भोऽस्य। आदित्यभक्तायां राजनि०।

ब्र(ब्र)ह्मगार्ग्य पु० ऋषिभेदे हरिवं० १५६ अ०।

ब्र(ब्र)ह्मगिरि पु० कामाख्यानिलयपूर्वस्यां स्थिते गिरिभेदे "ततस्तु नीचकूटाख्यं कामाख्यानिलयं परम्। तत-पूर्वभागे वसति ब्रह्मा ब्रह्मगिरिः पुन" कालिकापु०८१अ०

ब्र(ब्र)ह्मगीता स्त्री ६त०। भा० शानु० २५ अ० दर्शितायां ब्रह्मणा कथितायां अनुशासनरूपगाथायाम्।

"अत्र गाथाः पुरा गीताः कीर्त्तयन्ति पुराविदः। कृष्ण द्विजातीनां धर्मा हि यमपूर्वं सनातनम्। न चान्य दिह कर्त्तव्यं किञ्चिदूर्द्धं यथाविधि। धर्मो योगात्मके ब्रह्म श्रेयो वक्ष्येन शोभनम्। कर्मैव कुर्वतां कर्म शौर्यं ब्राह्मी भविष्यति। प्रमाणं सर्वभूतानां प्रभवश्च भवि-ष्यथ। न शौद्रं कर्म कर्त्तव्यं ब्राह्मणेन विजानता। शौद्रं हि कुर्वतः कर्म धर्मः सम्पद्यते। शौच्च यु-द्धिश्च तेजश्च विभूतिश्च प्रतापिनी। स्वाध्यायं चैव आचारञ्च विपुलं प्रतिपत्स्यथ। श्रुत्वा चाङ्गिरसोयस्य महाभाग्ये प्रतिष्ठिताः। अयमोज्ञा महतानां श्रिया आह्मयाऽनुकलङ्किताः। अक्षया परया युक्ता ब्रह्मलभि-द्रोहलक्षया। दमस्वाध्यायनिरताः सर्वान् कामा-नवाप्स्यथ। सर्वैव मानुषे लोके यच्च देवेषु किञ्चन। सर्वं तु तपसा साध्यं ज्ञानेन नियमेन च। इत्येवं ब्रह्म-गीताख्ये समाख्याता मयाऽनघ"।

ब्र(ब्र)ह्मग्रन्थि पु० यज्ञोपवीतस्य ग्रन्थिभेदे

ब्र(ब्र)ह्मघातक पु० ब्रह्माणं विप्रं हन्ति हन-ण्वुल्। ब्र-ह्महत्याकारके "षड्भिर्भेदो हृषा पापो नित्यं ब्राह्मण-निन्दकः। आदेष्टो वेदविक्रेता यजते ब्रह्मघातकाः" ब्रह्म-यामोक्ते धारिभाषिके २पापभेदयुक्ते त्रि०। ब्रह्म-घातोऽस्यास्यां "अच्चेन ठन्। ह्रादन्यां भङ्गे ब्रह्मघातका-पापयुतायां पूतिकायां "पूतिका ब्रह्मघातिका"ति०त०।

ब्र(ब्र)ह्मघोष पु० ६त०। वेदध्वनौ।

ब्र(ब्र)ह्मघ्न त्रि० ब्रह्माणं ब्राह्मणं हन्ति हन-क। ब्रह्महत्या-कारके "ब्रह्मघ्नमपि चण्डालं कं पतन्तं पुनीमहे" भ-त०। स्त्रियां ङीष्।

ब्र(ब्र)ह्मचक्र न० ब्रह्मनिर्मितं चक्रम्। १कार्यकरत्वात्मके संसाररूपे चक्रे। "सर्वजीवे सर्वसंस्थे बृहन्ते अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे" श्वेताश्वतरोप०। कूर्मजातलोक्ती २दीक्षोपयोगिचक्रभेदे च।

ब्र(ब्र)ह्मचर्य्य न० ब्रह्मणे वेदाध्ययनार्थं चर्य्यम्। द्विजानां वेदाध्ययनार्थव्रतभेदे। "प्रतिवेदं ब्रह्मचर्य्यं" द्वादशाब्दानि षड् वा। अष्टवार्षिकमित्येके" गरुडपु० ६४अ०। तत्प्रकारो मनुनोक्तो यथा

"कृतोपनयनस्यास्य व्रतादेशनमिष्यते। ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वकम्। यद्दु यस्य विहितञ्चर्म यत् सूत्रं या च मेखला। यो दण्डो यच्च वसनन्तत्तदस्य व्रतेष्वपि। मेखलाजिनदण्डांस्तु नियमान् ब्रह्मचारी गुरौ वसन्। सन्नियम्येन्द्रियग्रामं सकलोऽङ्गार्थमात्मनः। नित्यं स्नात्वा शुचिः कुर्य्याद्देवर्षिपितृतर्पणम्। देवतास्यर्चनञ्चैव समिदाधानमेव च। वर्जयेन्मधुमांसञ्च गन्धं माल्यं रसान् स्त्रियः। शुक्तानि यानि सर्वाणि प्राणिनाञ्चैव हिंसनम्। अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्रधारणम्। कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्। द्यूतञ्च जनवादञ्च परिवादन्तथानृतम्। स्त्रीणाञ्च प्रेक्षणालम्भमुपघातञ्चरस्य च। एकः शयीत सर्वत्र न रेतः स्कन्दयेत् क्वचित्। कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः। स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः। स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्। उदुत्यं सुमनसो गोसूक्तनीलशिखण्डिकाजुषाणं। आधरेदपरञ्चाग्निं भैक्षचाचरहरहश्चरेत्। वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु। ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्। गुरोः कुले न भिक्षेत न ज्ञातिकुल बन्धुषु। अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत्। सर्वं वापि चरेद्ग्रामं पूर्वोक्तानामसम्भवे। नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत्। दूरादाहृत्य समिधः संनिदध्याद्दविर्हायसि। सायंप्रातश्च जुहुयात्ताभिरग्निमसन्द्रितः। अकृत्वा भैक्षचरणमसमिध्य च पावकम्। अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्। भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती। भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता। यतस्तदेवैवल्ये पित्र्ये कर्मण्यथर्षिवत्। कामतस्त्वर्थमेतेषां भक्षयेद्व्रतमस्य न लुप्यते। ब्राह्मणस्यैव कर्त्तव्यमेतद्भक्षाशनं मुनिभिः। राजन्यवैश्ययोस्त्वेवं नैतत् कर्म विधीयते"। ततः गुरुवृत्तिरुक्ता सा च गुरुवृत्तिशब्दे २६२५ पृष्ठे दर्शिता। २योगाङ्गयमभेदे च "अहिंसासत्यास्तेय ब्र(ब्र)ह्मचर्य्यापरिग्रहा यमाः" पात०। तत्र ब्र(ब्र)ह्मचर्य्यं व्याख्यातं भाष्यविवरणाभ्यां यथा "ब्र(ब्र)ह्मचर्य्यं गुप्तेन्द्रियस्योपस्थस्य संयमः" भा०। "संयतोपस्थोऽपि हि स्त्रीप्रेक्षणस्पर्शनसङ्कल्पायतनतदङ्गसर्शनसङ्गो न ब्र(ब्र)ह्मचर्य्यवान् तन्निरासायोक्तं गुप्तेन्द्रियस्येति इन्द्रियान्तराण्यपि तत्र लोलुपानि रक्षणीयानि" विव०। तत्र अष्टाङ्गमैथुनशब्दे ५२४ पृ० दर्शितवाक्येन मैथुनस्य स्मरणादष्टाङ्गतया तदुपयोगीन्द्रियाणि संयम्यानीत्यर्थः। तत्फलञ्च तत्रोक्तं यथा "ब्र(ब्र)ह्मचर्य्यप्रतिष्ठायां वीर्य्यलाभः" पात०। "यस्य लाभादप्रतिघान् गुणानुत्कर्षयति सिद्धञ्च विनेयेषु ज्ञानमाधातुं समर्थो भवति" भा०। "वीर्य्यं सामर्थ्यं यस्य लाभादप्रतिघान् गुणानणिमादीन् विनेयेषु सिष्येषु ज्ञानं योगतदङ्गविषयमाधातुं समर्थो भवति" विव०। तथाच अष्टाङ्गमैथुनवर्জनमेव ब्र(ब्र)ह्मचर्य्यं तच्च स्त्रीपुंसयोः साधारणं पुंसः स्त्रीस्मरणादेरष्टाङ्गराहित्यस्येव स्त्रीणां पुंस्मरणादिशून्यत्वस्यापि तथात्वम् "अतएव ब्र(ब्र)ह्मचर्य्यं तदन्यायरोहणं वा" विष्णुसू०। विधवानामपि ब्र(ब्र)ह्मचर्य्यं विहितम् "मृते भर्त्तरि साध्वी स्त्री ब्र(ब्र)ह्मचर्य्यव्यवस्थिता। स्वर्गं गच्छत्यपुत्रापि यथा ते ब्र(ब्र)ह्मचारिणः" मनुव्याख्यायां ब्र(ब्र)ह्मचर्य्ये व्यवस्थिता अमृतपुरुषान्तरमैथुना" कुल्लू० उक्तम्। भावे ष्यञ् ब्रह्मचर्य्यं तत्रार्थे स्त्री।

ब्र(ब्र)ह्मचारिन् पु० ब्र(ब्र)ह्म वेदस्तदध्ययनार्थं चरति व्रतभेदम् चर-णिनि। १उपनयमानन्तरमाद्याश्रममयुते द्विजातौ उपचारात् २तदाश्रमे च। तस्य कर्त्तव्यादिकं मनूक्तं ब्र(ब्र)ह्मचर्य्यशब्दे दर्शितम्।

ब्र(ब्र)ह्मचारिणी स्त्री "वेदेषु चरते यस्मात् तेन सा ब्रह्मचारिणी" देवीपु० ४५अ० निरुक्तियुक्तायां वेदमातृगायत्र्यां चिच्छक्तिरूपायां १दुर्गायां २ब्रह्मचर्य्ययुतायां स्त्रियाञ्च "आसीतामरणात् स्नात्वा नियतं ब्र(ब्र)ह्मचारिणी" मनुः। ३वारुणीवृक्षे राजनि०। ४ब्राह्मीशाके रत्नमाला।

ब्र(ब्र)ह्मज पु० ब्रह्मणो जायते जन-ड। १हिरण्यगर्भे "यो वै ब्र(ब्र)ह्माणं विदधाति पूर्वं यस्मै वेदम् प्रहिणोति" श्रुतेः "सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः" इत्युपक्रमे "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयंब्रह्मा सर्वलोकपितामहः" इति मनूक्तेश्च तस्य तथात्वम्। २ब्रह्मजातमात्रे पञ्चभूतादौ च "यतो वा इमानि भूतानि जायन्ते" इत्युपक्रमे "तत् विजिज्ञासस्व ब्रह्मेति श्रुतौ ब्रह्मतः सर्वभूतोत्पत्तिश्रवणात्।

ब्र(ब्र)ह्मज्ञ त्रि० ब्रह्म जानाति ज्ञा-क। १ब्रह्मवेत्तरि २विष्णौ पु० "ब्रह्मज्ञो ब्राह्मणप्रियः" विष्णुस०। [राजनि०

ब्र(ब्र)ह्मजटा स्त्री ब्रह्मणो जटेव संहतत्वात्। दमनकवृक्षे

ब्र(ब्र)ह्मजा(या)मल न० जामलभेदे तन्त्रे।

ब्र(ब्र)ह्मजिज्ञासा स्त्री इत०। ब्रह्मावगतिफलके विचारे। शारीरकभाष्ये १सूत्रे तत्राधिकार्यादिकं दृश्यम्।

ब्र(ब्र)ह्मजीविन् पु० ब्रह्म वेदस्तद्विहितेन श्रौतकर्मणा जीवति जीव-णिनि। इत्यर्थं परकीयश्रौतादिकर्मकारके

ब्र(ब्र)ह्मज्ञान न० ब्रह्मणो ज्ञानं तेन यत्र आत्माभेदज्ञानम्। ब्रह्मविद्यायां तत्त्व अहं ब्रह्मास्मीत्येवंरूपम् "आत्मानं चेत् विजानीयादयमस्मीति पुरुषः। किमिच्छन् कस्य कामाय किमर्थमनुसंज्वरेत्" श्रुत्या तदभेदज्ञानस्यैव मोक्ष-हेतुत्वमुक्तं "वेदान्तसाङ्ख्यसिद्धान्तब्रह्मज्ञानं वदाम्यहम्। अहंब्रह्म परं ज्योतिः विष्णुरित्येव चिन्तयेत्। ह्रस्वं हृदुव्योस्त्रि वक्षो च ज्योतिरेकं त्रिधा स्थितम्। यथा सर्पिः शरीरस्थं गवां न क्लृप्तेत्वलम्। निर्गतं कर्मसंयुक्तं दृश्ये तासां महाबलम्। तथा विष्णुः शरीरस्थो न करोति हितं त्वयम्। विनाऽऽराधनया देवः सर्वपापहरेश्वरः। आरुरुक्षुयतीनाञ्च कर्मज्ञानसुदाहृतम्। आरूढयोगदृक्षाणां ज्ञानं योगः परं मतम्" गरुड़पु० २४० अ०। न्यायादिमते तज्जारोपज्ञानं वेदान्तिमते प्रमारूपम्। तत्त्वमसि अहंब्रह्मास्मीत्यादिवाक्यजन्यमपि तज्ज्ञानं मननिदिध्यासनादिना पश्चात् प्रत्यक्षतामेति। तज्ज्ञानाभिलाषादिकं विवेकचू० दर्शितं यथा "अव्यक्तादिस्थूलपर्यन्तमेतद्विश्वं मायाविलासमात्रं प्रतीतम्। व्योमप्रख्यं सूक्ष्ममाद्यन्तहीनं ब्रह्माद्वैतं यत्तदेवाहमस्मि। सर्वाधारं सर्वसाक्षिप्रकाशं सर्वाकारं सर्वगं सर्वशून्यम्। नित्यं शुद्धं निश्चलं निर्विकल्पं ब्रह्माद्वैतं यत् तदेवाहमस्मि। यस्मिन्नानाभेदमायाविशेषं प्रत्यग्-रूपं प्रत्ययागम्यमानम्। सत्यज्ञानानन्दमानन्दरूपं ब्रह्माद्वैतं यत् तदेवाहमस्मि। निष्क्रियोऽस्म्यविकारोऽस्मि निष्कलोऽस्मि निराकृतिः। निर्विकल्पोऽस्मि नित्योऽस्मि निरालम्बोऽस्मि निर्भयः। सर्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमद्वयः। केवलाखण्डबोधोऽहमा-नन्दोऽहं निरन्तरम्"।

ब्र(ब्र)ह्मण्यति पु० इत० अनुकम्प० निघृणौ तस्य षट्कात्योक्तेः एकपदत्वम्। १ब्राह्मणजातिस्वामिनि यज्ञ० ताण्ड्य० १।२।८। "हे ब्रह्मण्यते! सन्त्वस्मिन्" भा०

ब्र(ब्र)ह्मण्य पु० ब्रह्मणे हितः। १विष्णौ "ब्रह्मण्यो देवकी पुत्रः" विष्णुस०। २ब्राह्मणहितमात्रे त्रि० ३ब्रह्मदारुवृक्षे पु० अमरः। ४सप्तपर्णवृक्षे ५पलाशवृक्षे राजनि०। ६धनेश्वरे ७ब्रह्मणि तपसि साधौ त्रि० मेदि०।

ब्र(ब्र)ह्मतीर्थ न० इत०। १पुष्करमूले राजनि० २पुष्करतीर्थे च। ३तीर्थभेदे यत्र स्नाने "तत्र वर्षवरः स्नात्वा ब्राह्मण्यं लभते नरः। ब्राह्मण्ये विष्णुभक्तो गच्छेत परमां गतिम्" भा० व० ८३अ०। फलमुक्तम्।

ब्र(ब्र)ह्मत्व न० ब्रह्मणो भावः त्व। १ऋत्विग्विशेषस्य ब्रह्मणो धर्मे २शुक्लतरीयवृक्षभावे च।

ब्र(ब्र)ह्मतुङ्ग पु० कालपर्वतभेदे। "स्निग्धाञ्जनचयाकारं संग्राम: कालपर्वतम्। ब्रह्मतुङ्गं नदीशान्यास्तथा जनपदानपि" भा० द्रो० ८अ०।

ब्र(ब्र)ह्मद पु० ब्रह्म वेदं ददाति। अपनीय वेददातरि आचार्ये "चतुष्पादब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता" मनुः दा-क ब्रह्म तदर्थं पु०।

ब्र(ब्र)ह्मदण्ड पु० ब्रह्मणो दण्डः। १ब्राह्मणदण्डे २अभिशापरूपे दण्डे "ब्रह्मदण्डहता ये च विद्युदग्निहताश्च ये" त्रि० त० षोढ़गीत्राद्यमन्त्रः। ३यमसिद्धसूत्रयष्टिरूपे दण्डे च। "धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं परम्। एकेन ब्रह्मदण्डेन सर्वा नीता मम" रामा० अयो० विश्वामित्रवाक्यम्। ४ब्राह्मणयष्टिवृक्षे शब्दच०। ५विप्रस्य यष्टौ च। ६केतुभेदे बृ०स० ११अ०। केतुशब्दे दृश्यम्।

ब्र(ब्र)ह्मदण्डी स्त्री क्षुद्रो दण्डः ङीप् ब्रह्मोपसनाङ्गं दण्डी। क्षुद्रक्षुपभेदे करटकपत्रफलनायालजगण्डयां राजनि०।

ब्र(ब्र)ह्मदत्त इक्ष्वाकुवंश्ये नृपभेदे इत०। २हिरण्यगर्भेण दत्ते त्रि ७त०। ३विप्राय दत्ते त्रि०। ४शुकदेवस्य कन्यायां कृत्वीसमाख्यायां अणुहस्य पुत्रभेदे पु० ततः कथा हरिवं० ११ अ० दृश्या। [यासु अमरः।

ब्र(ब्र)ह्मदर्भा स्त्री ब्रह्मणो दर्भो यत्र यस्याः। यमानिकायां

ब्र(ब्र)ह्मदाय पु० ब्र(ब्र)ह्म ष(ण) वा वेदाध्ययनसमाप्तौ, विप्राय वा राज्ञा दीयते दा-कर्मणि घञ्। समाहृतविप्राय देये धने "ब्र(ब्र)ह्मदायागतां भूमिं हरयुन्नीह्य दीक्षिताः" दायभागधृतस्मृतिः। [वृक्षभेदे अमरः।

ब्र(ब्र)ह्मदारु पु० ब्रह्मणो विप्रस्य हितः दारुः। अगुरुवृक्षे

ब्र(ब्र)ह्मदेय त्रि० ब्रह्मणे वेदाय विप्राय देयेति देय-क्रिय।

ब्रह्मन् न० बृंह्-मनिन् "बृंहेर्नोऽच्चेति" उणा० नकारस्याकारे ह्रस्वो रत्वम्। १वेदे "तस्मादेतद् ब्रह्म नाम रूपमन्नञ्च जायते श्रुतिः"। "तेन ब्रह्म ह्रदा" भाग० १।१।१। २तपसि, ३सत्ये ४तत्त्वे यथार्थे अमरः। सर्वगुणातीते विष्णुरूपे तुरीये ५चित्स्वरूपे च। ६हिरण्यगर्भे ७विप्रे ८ऋत्विग्विशेषे च पु० अमरः। विष्कम्भादिषु पञ्चविंशे ९योगे मेदि०। उच्चत्वदत्तेन दत्तोष्ठादित्वेन साधितम् मेदिनीकरेण ओष्ठादित्वेन कीर्त्तनात्साधामपि। ब्रह्म च सच्चिदानन्दात्मकम्। तस्य तस्य स्वरूपलक्षणम्। विवरणानुसारिणस्तु "आनन्दो विषयानुभवो नित्यत्वञ्चेति सन्ति धर्मा अपृथक्त्वेऽपि पृथगिवावभासन्ते" इति तत्रोक्तौ मिथ्याभावः सत्यत्वम् अज्ञानभावश्चित्त्वम्। दुःखाभाव आनन्द इत्यादुः। तेषामसाधारणत्वात् ब्रह्मरूपाधिकरणे स्थितत्वात् अभावस्याधिकरणस्वरूपतया ब्रह्मरूपत्वमिति। तस्य तटस्थलक्षणञ्च जगज्जन्मस्थितिप्रलयानां प्रत्येकमुपादानप्रयत्नचिकीर्षाकृतिमत्त्वं तेन नवलक्षणवत्त्वम् "वेदान्तप०। अतएवोक्तं श्रीधरेण "विश्वसर्गविसर्गादिनवलक्षणलक्षितमिति"। तच्च ब्रह्म द्विविधं निर्गुणं सगुणञ्च। सच्चिदानन्दात्मकस्यैव निर्गुणस्यं जगज्जन्मादिकर्तृत्वं च सगुणत्वम्। जायदाद्यवस्थात्रयसाक्षित्वस्य सगुणत्वं अवस्थात्रयातीतस्य चतुरीयसंज्ञा "शिवमद्वैतं चतुर्थं मन्यन्ते" इति श्रुतेस्तथात्वम्। तत्र तस्य तटस्थलक्षणाभिप्रायेण "जन्माद्यस्य यतः" भाग० "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विज्ञासस्व तद् ब्रह्मेति" श्रुतिश्च प्रवृत्ते तस्य स्वरूपलक्षणाभिप्रायेण "निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनम्" इत्याद्याः श्रुतयः प्रवृत्ताः। आत्मबोधे तु तस्य ब्रह्मणोऽखिलवस्त्वपेक्षया श्रेष्ठत्वाद्ब्रह्मत्वमुक्तं यथा "यद्भावाद्भावरो भावो यतस्तद्भावरं सुखम्। यज्ज्ञानाद्भावरं ज्ञानं तद्ब्रह्मेत्यवधारयेत्। यद् दृष्ट्वा नापरं द्रष्टव्यं यद्भूत्वा न पुनर्भवः। यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत्। तिर्य्यगूर्द्ध्वमधः पूर्णं सच्चिदानन्दमद्वयम्। अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत्। अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽद्वयम्। अखण्डानन्दमेकं यत् तद्ब्रह्मेत्यवधारयेत्। दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यत्र तद्भवेत्। तत्त्वज्ञानात् तदब्रह्म सच्चिदानन्दमद्वयम्। सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते। अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्यवत्" । तच्च निर्गुणमपि गुणभेदेन नानारूपं यथोक्तम् "ब्रह्मैकं मूर्त्तिभेदस्तु गुणभेदेन सत्तमम्। तद्ब्रह्म द्विविधं वस्तु सगुणं निर्गुणं शिव!। मायाश्रितो यः सगुणो मायातीतस्तु निर्गुणः। स्वेच्छामयस्य भगवानिच्छया विकरोति च। इच्छाशक्तिश्च प्रकृतिः सर्वशक्तिप्रसूः सदा। केचिदेकं वदन्त्येवं ब्रह्म ज्योतिः सनातनम्। केचिद्वदन्ति द्विविधं ब्रह्मप्रकृतिपूर्वकम्। शृणु ये च वदन्त्येकं प्रकृतिपुरुषयोः परम्। तस्माज्जगति तौ द्वौ च तद्ब्रह्म सर्वकारणम्"। अथवैकं परं ब्रह्म द्विविधं भवतीच्छया। इच्छाशक्तिश्च प्रकृतिः सर्वशक्तिप्रसूः सदा" ब्रह्मवैवर्त्ते जन्मख० ४१ अ०। तस्य नवधा रूपं यथा "योगिनो यं वदन्त्येवं ज्योतीरूपं सनातनम्। ज्योतिरभ्यन्तरे नित्यं रूपं२ भक्ता वदन्ति यम्। वेदा वदन्ति सत्यं३ यं नित्यमाद्यं४ विचक्षणाः। यं वदन्ति सुराः सर्वं परं स्वेच्छामयं प्रभुम्५। सिद्धेन्द्रासुनयः सर्वं सर्वरूपं६ वदन्ति यम्। यमनिर्वचनीयञ्च योगीन्द्रः शङ्करोवदेत्७। स्वयं धाता च प्रवदेत् कारणानाञ्च कारणम्८। शेषो वदेदनन्तं९ यं नवधारूपमीश्वरम्। तर्काणामेव वक्तारं यं षड्विधं रूपमीश्वरम्। वैष्णवानामेकरूपं वेदानामेकमेव च। पुराणानामेकरूपं तस्माद्विविधं स्मृतम्। न्यायोनिर्वर्णनीयंञ्च यन्नतं शङ्करोऽब्रवीत्। नित्यं वैशेषिकास्त्वन्यं वदन्ति च विचक्षणाः। सांख्यो वदति तं देवं ज्योतीरूपं सनातनम्। मीमांसा सर्वरूपञ्च वेदान्तः सर्वकारणम्। पातञ्जलोऽप्यनन्तञ्च वेदाः सत्यस्वरूपकम्। स्वेच्छामयं पुराणञ्च भक्ताश्च नित्यविग्रहम्" इति तत्रैव १२८अ०। अन्यथाऽपि सत्त्वादिगुणभेदेन तस्य चतुर्धारूपं यथा "चतुर्विभागः संसृष्टौ चतुर्धा संस्थितः स्थितौ। प्रलयञ्च करोत्यन्ते चतुर्भेदो जनार्दनः। एकेनांशेन ब्रह्माऽसौ भवत्यव्यक्तमूर्त्तिमान्। सरीचिमिश्राः पतयः प्रजानामन्यभागतः। कालस्तृतीयस्तस्यांशः सर्वभूतानि चापरः। इत्थं चतुर्धा संसृष्टौ यस्तेऽसौ रजोगुणः। एकांशेन स्थितो विष्णुः करोति परिपालनम्। मन्वादिरूपी चान्येन कालरूपी परेण च। सर्वभूतेषु चान्येन संस्थितिं कुरुते स्थितः। सत्त्वं गुणमुपाश्रित्य जगतः पुरुषोत्तमः। आश्रित्य तमसो वृत्तिं सन्तकाले तथा प्रभुः। रुद्ररूपो भगवानेकांशेन भवत्यजः। अन्यूलकादिरूपेण भागेनान्येन वर्त्तते।

२५ भाग ६

कालस्वरूपो भागोऽन्यः सर्वभूतानि चाधरः । विनाशं कुर्वतस्तस्य चतुर्थं स महात्मनः" विष्णुपु० १अंशे २१अ० । वेधास्तु रजोगुणप्रधानोपाधिकः कार्य्यब्रह्मा । अस्यैव भेदत्व व्यक्तावाकाशशब्दे ८५ पृ० दर्शितेषु प्रधानेषु चतुर्थं ऋत्विक्षु मध्ये एकतमः । "त्रयाणामपराधे तु ब्रह्मा परिहरेत् सदा" आचा० भाष्यधृतकारिका । "त्रयाणामध्वर्य्वादिगामृत्विजां वेदत्रयविदां मध्ये ऋत्विगेको ब्रह्मनामको वेदत्रयमन्त्रतद्विहितकर्मविषये यदापराधो न्यूनभावो यदि जायते तस्यापराधस्य परिहारं प्रतीकारं कुर्य्यात्" इति तदर्थः । "यज्ञस्य चैव भिषक् ब्रह्मेति" भाष्यधृतस्मृत्यन्तरम् । अतएवास्य कृताकृतावेक्षणाद्यं वरणमन्यत्रोक्तम् । १०हृश्यतां च ब्रह्मपुरोहितशब्दे ६अंशम् ।

ब्र(ब्र)ह्मनाल न० ब्रह्मणो नालमिव । काष्ठां अग्निकर्णिका मतीयस्ये तीर्थभेदे । "पितामहेश्वरं लिङ्गं ब्रह्मनालोपरि स्थितम् । पूजयित्वा नरो भक्त्या ब्रह्मलोकमवाप्नुयात् । ब्रह्मलोकःसमीपे तु कृतं कर्म शुभाशुभम् । परमक्षयतामेति शुभमेव ततश्चरेत् । अल्पमप्यथ यत् कर्म कृतमत्र शुभाशुभम् । प्रलयेऽपि न तस्यास्ति प्रलयो सुनिसत्तम ! । नाभीतीर्थमिदं प्रोक्तं नाभीभूतं यतः क्षितेः । अपि ब्रह्माण्डगोलस्य नाभिरेषा शुभोदया । सा काष्ठिकर्णिकेयीयं नाभिमाम्नीर्ध्वभूमिका । ब्रह्माण्डगोलकं सर्वं यस्यामेति लये लयम् । ब्रह्मनालं परं तीर्थं त्रिषु लोकेषु विश्रुतम् । तत्पद्मजे नरः स्नातः कोटिजन्मकृतं हरेत् । ब्रह्मनाले पतेद्दुर्गे नाभिपद्मात्कदाचन" काशीख० ६१अ० ।

ब्र(ब्र)ह्मनिर्वाण न० ब्र(ब्र)ह्मणि निर्वाणं निर्वृतिः । ब्र(ब्र)ह्मभावलाभे सकलानर्थनिवृत्तिरूपे परमानन्दे "एषा ब्राह्मी स्थितिः पार्थ ! नैनां प्राप्य विमुह्यति । स्थित्वा स्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति" गीता ।

ब्र(ब्र)ह्मपत्र न० ब्रह्मणः तत्त्वावबोधस्य पत्रम् । पलाशपत्रे । "भोजनं ब्रह्मपत्रेषु सदया लोचनं हृदेः । दर्शनं वैष्णवानाञ्च महापातकनाशनम्" पाद्मोत्तरख० ११८अ० ।

ब्र(ब्र)ह्मपर्णी स्त्री ब्र(ब्र)ह्मेव विस्तीर्णानि मूलाद्यारभ्य स्थितानि पर्णान्यस्या ङीप् । वृश्चिवपर्य्याम् राजनि० ।

ब्र(ब्र)ह्मपवित्र पु० ब्र(ब्र)ह्मेव वेदोक्तकर्मेषु वा पवित्रः । कुशे राजनि० ।

ब्र(ब्र)ह्मपादप पु० ब्र(ब्र)ह्मणः प्रियः दैहिककर्मयोग्यत्वात् विल्व ब्र(ब्र)ह्मचारिधार्य्यदण्डार्थत्वाद्वा ब्रह्मनामकत्वात् वा पादप । पलाशवृक्षे हेमच० "पलाशो वै ब्रह्म" शत०ब्रा० पलाशशब्दे ६अंशम् ।

ब्र(ब्र)ह्मपुत्र पु० ब्र(ब्र)ह्मणः पुत्र इव कविसदृशत्वात् । १विश्वभेदे अमरः । तद्विश्वस्य तत्त्वं भावप्र० उक्तं यथा "वर्णतः कपिलो यः स्यात्तथा भवति सादृशः । ब्रह्मपत्रः स विज्ञेयो आयते सदयाचये" । २सप्तर्षिदेशप्रसिद्धे ३नदभेदे ४क्षेत्रभेदे च । ५सरस्वत्यां नद्यां स्त्रो० । तद्याः पितामहत्वात्तस्य ब्रह्मर्षीयत्वं दृश्यम् । तस्य नदत्वोत्पत्तिकथा "हरिवर्षे महावर्षे ब्रह्मात्मजनीव नामतः । सुनिरासीन्महाभागो ब्रह्मवान् सुतपोधनः । तस्य भार्य्या महाभागा अमोघाख्या महाव्रती । हिरण्यगर्भस्य सुतेस्तृप्तहृन्नाम्नोऽभवत् । तया सार्द्धं स कैलासमध्यादापर्वतेऽवसत् । सौक्षितास्यस्य सरसीरे वै गन्धमादने । एकदा स तपोनिधौ सिद्धपुष्पादिसोश्वरे । जगाम वनमध्यन्तु चित्रवृक्षसमाकुलम् । तस्मिन्नवसरे ब्रह्मा सर्वलोकपितामहः । तत्सालगाम ब्रह्माणि अमोघा ब्रह्मनोः प्रिया । तां दृष्ट्वा देवगर्भाभां युवतीमतिसुन्दरीम् । सोक्षितो मदनेनाशु तदा ऽभूत् हृषितेन्द्रियः । उद्दीरितेन्द्रियो भूत्वा जिघृक्षुस्तां मदाकुलाम् । अथाधावत्तदा ब्रह्मा कम्रुग्रो मदनार्दितः । धावमानं विधातारं दृष्ट्वाऽमोघा अकम्पती । कैवर्षिति सोच्च पर्णशालां व्यलीयत । दृष्ट्वोषाच धातारमोघा कुपिता तदा । पर्णशालान्तरगता द्वारमाहत्य तत्क्षणात् । अकार्य्यं न मया कार्य्यं दुर्निवार्य्यं तु दैवतः । पत्न्या विगर्हितम् । बलात् मनसा कामं देवस्या त्वाच धर्षाण्यहम् । अमोघा कैवसंज्ञो विधातस्तु तदा ब्रह्म ! । रेतस्यस्कन्द च तदैवाम्भसे ब्रह्मनोर्जुनेः । शुक्लं रेतसि धातापि हंसयानं समाश्रितः । लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ । गते वेधसि ब्रह्मनुनिजमाश्रममागतः । आगत्य दृष्ट्वा हंसानां पदन्योभं तथा भुवि । तेजश्च पतितं भूमौ विधातुर्ब्रह्मनोर्वसु । अमोघां परिपप्रच्छ पर्णशालान्तरस्थिताम् । किमेतदद्य शुभगे ! प्रवृत्तं दृश्यते तु यत् । पद्मोभश्चैव हंसश्च कीदृशम् । सा तस्य वचनं श्रुत्वा ब्रह्मनं सुनिसत्तमम् । अमर्षिणैव ब्रह्मवद्दाकुला विकत्थना । हंसयुक्तस्वरूपेण कोऽप्यागत्य वसुर्वच ।

कमण्डलुकरो भोक्तुं रात्रिं सा समुपाचरत् । ततो मया भर्त्सितः स कुटजान्तरधीयत । प्रच्याव्य तेजः स गतो मम शापभयार्दितः । कुरु तस्य प्रतीकारं यदि शक्नोषि शान्तनो ! । न हि तां धर्षणां सोढुं कश्चित् स शक्नोति जीवलोके । स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः । दृष्ट्वा निश्चित्य मनसा तत्र ध्यानपरोऽभवत् । दिव्यज्ञानेन स ज्ञात्वा देवकार्यमुपस्थितम् । तीर्थावतारणार्थाय हिताय जगतां मुनिः । ज्ञात्वोर्दकं विचिन्त्य स्वभार्यामिदमब्रवीत् । इदं तेजो ब्रह्मणस्त्वं पिबाम्भोजे ! ममाज्ञया । हिताय सर्वजगतां देवकार्यार्थसिद्धये । भवत्या निकटे ब्रह्मा स्वयमेव समागतः । स्नानमाप्य स महात्मा आवयोः स समर्थं च । गतो निजाश्रमं तत्त्वं कर्त्तुमर्हसि मद्वचः । तत् श्रुत्वा शान्तनोर्वाक्यममोघातीव लज्जिता । मन्त्रयन्तीव तं प्राह पतिं नत्वा मदाश्रमी । नान्यस्य तेजो धास्यामि न चेत्ते विमनस्कता । अवश्यं यदि कर्त्तव्यं पीत्वा त्वं मयि चोत्सृज । ततस्तस्या वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः । स्वयं पीत्वा च तत्तेजस्तस्या गर्भेऽप्यधेचयत् । संक्रामितैः शान्तनुना तेजोभिर्ब्रह्मणः सुतौ । गर्भं दधारामोघाख्या हिताय जगतां ततः । तस्यां काले तु संप्राप्ते संजातोज्वलवपुद्वयः । तन्मध्ये तनयश्चापि नीलवासाः किरीटधृक् । रत्नमालासमायुक्तो रत्नगौरश्च ब्रह्मवत् । चतुर्भुजः पद्मविद्यावरशक्तिधरस्तथा । शिशुमारशिरस्त्वञ्च तुल्यकायो जलोत्करैः । तं जातञ्च तथाभूतं शान्तनुर्लोकशान्तनुः । चतुर्णां पर्वतानाञ्च मध्यदेशे न्यवेशयत् । कैलासश्चोत्तरे पार्श्वे दक्षिणे गन्धमादनः । जारुधिः पश्चिमे शैलः पूर्वे संवर्त्तकाह्वयः । तेषां मध्ये स्वयं कुण्डं पर्वतानां विधेः सुतः । ज्वलाऽतिवदधे नित्यं शरदीव निशाकरः । तं तोयमध्यगं पुत्रमासाद्य दृष्टिभिः स्वयम् । क्रमतस्तस्य संस्कारानकरोद्वेदसूत्रवित् । अथ काले बहुतिथे व्यतीते ब्रह्मणः सुतः । तोयराशिस्वरूपेण बहुधे पञ्च योजनान् । तस्मिन् देवाः यपुः सर्वे तृतीय इव सागरे । शीतामलजले कृत्वे देव्यश्चाप्सरसां गणैः । तस्मिन्नन्तरे रामो जामदग्न्यः प्रतापवान् । चक्रे मासैर्वधं घोरमात्मनः पितुराज्ञया । तस्य पापस्य मोक्षाय स्वपितुश्चोपदेशतः । स जगाम महाकुण्डं ब्राह्मण्यं ज्ञातुमिच्छया । तत्र स्नात्वा च पीत्वा च मातृहत्यां व्यपानयत् । दीर्घं परशुना कृत्वा तत्र च्छायामपारयत् । ततस्तस्य "ब्रह्मकुण्डात् स्रुतः सोऽथ कासारे लोहितात्मके । कैलासोपत्यकायान्तु न्यपतद् ब्रह्मणः सुतः । तस्मादपि सरस्तीर्त्वा समुत्पाद्य महाबलः । कुठारेण दिशं पूर्वामनयद् ब्रह्मणः सुतम् । ततोऽपरस्मादपि गिरिं शैलमङ्कं विभिद्य च । कामरूपान्तरं पीठमवाहयदसुं हरिः । तस्य नाम विधिश्चक्रे स्वयंलोहितगङ्गकम् । लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽभवत् । स कामरूपमखिलं पीठमाप्लाव्य वारिणा । शोषयन् सर्वतीर्थानि दक्षिणं याति सागरम् । प्रागेव दिव्यसुतां संत्यज्य ब्रह्मणः सुतः । पुनः पतति लौहित्ये गत्वा द्वादशयोजनम् । चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः । स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् । चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः । लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात्" कालिकापु० ८४।८५ अ० "सोने मधौ शुक्लपक्षे अयोकाख्यां तथाष्टमीम् । विवेद्योकलिकाः खाद्यात्लौहित्यवारिणि । पुनर्वसौ दृष्टे लग्ने चैत्रे मासि सिताष्टमीम् । लौहित्ये विरजे स्नायात् सर्वपापैः प्रमुच्यते" नि० त० ।

ब्र(ब्रह्म)ह्मपुर न० ६त० । ब्रह्मण उपासनार्थे हृदयस्थाने "अथ यदिदं ब्रह्मपुरे दहरं पुण्डरीकम्" छा० उ० । दहरशब्दे ३५१० पृ० दृश्यम् । "यः सर्वज्ञः सर्वविदुयस्यैष महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः" मुण्डकोप० । "ब्रह्मणोऽस्य चैतन्यस्वरूपेण नित्याभिव्यक्तत्वाद्ब्रह्मणः पुरं हृदयपुण्डरीकं तस्मिन्" भा० । २विधातृनगर्याञ्च स्त्रियाञ्च वा स्त्रीत्वे तस्यार्थे । इ०सं०१४अ०उक्ते दैशानदिक्स्थे ४देशभेदे पु० (बरमा) देशे ख्यातं क । तत्रार्थे मार्कपु० पूर्वोत्तरकूर्मभागस्थदेशौ ।

ब्र(ब्रह्म)ह्मपुराण न० वेदव्यासप्रणीते अष्टादशपुराणभेदे तत्प्रतिपाद्यविषयाश्च हरिहरादीये ४पा० ६२अ० उक्ता यथा "ब्रह्म पुराणं तत्रादौ सर्वलोकहिताय वै । व्यासेन वेदविदुषा समाख्यातं महात्मना । दशै सर्वपुराणाद्यं धर्मकामार्थमोक्षदम् । नानाख्यानैर्निगदितं दशसाहस्रमुच्यते" तत्पूर्वभागे "देवानामसुराणाञ्च यथोत्पत्तिः प्रकीर्त्तिता । प्रजापतीनाञ्च तथा दक्षादीनां मुनीश्वर ! । ततो लोकेश्वरत्वात्च सूर्यस्य परमात्मनः । वंशानुकीर्त्तनं पुण्यं महापातकनाशनम् । तत्राकारः श्रुतिः परमानन्दरूपिणः । श्रीमतो रामचन्द्रस्य चतुर्व्यूहावतार-

नारिणः । ततश्च सोमवंशस्य कीर्त्तनं यत्र वर्णितम् । कृष्णस्य जगदीशस्य चरितं कलुषापहम् । द्वीपानाञ्चैव सिन्धूनां वर्षाणां चाप्यशेषतः । वर्णनं यत्र पातालं स्वर्गाणाञ्च प्रदृश्यते । नरकाणां समाख्यानं सूर्य्यस्तुति कथानकम् । पार्वत्याश्च तथा जन्म विवाहश्च निगद्यते । दक्षाख्यानं ततः प्रोक्तमेकाक्षत्वेश्वरवर्णनम् । पूर्वभागोऽयमुदितः पुराणस्यास्य सानद ! । तदुत्तरभागे । "अस्योत्तरे विभागे तु पुरुषोत्तमवर्णनम् । विस्तरेण समाख्यातं नीर्थयात्राविधानतः । अत्रैव कृष्णचरितं विस्तरात् सकलीरितम् । वर्णनं सप्त लोकस्य पितृश्राद्धविधिस्तथा । वर्णाश्रमाणां धर्माश्च कीर्त्तिता यत्र विस्तरात् । विष्णुधर्म्मयुगाख्यानं प्रलयस्य च वर्णनम् । योगानाञ्च समाख्यानं साङ्ख्यानां चापि वर्णनम् । ब्रह्मवादसकलैश्च पुराणस्य च शंसनम् । एतद्ब्रह्मपुराणन्तु भागद्वयसमाचितम् । वर्णितं सर्वपापघ्नं सर्वलोकसुखप्रदायकम्" तत्फलश्रुतिः । "श्रुतशौनकसंवादं मुक्तिभुक्तिप्रदायकम् । लिखित्वैतत् पुराणं यो वैशाख्यां हेमसंयुतम् । जलधेनुयुतञ्चापि भक्त्या दद्याद्द्विजातये । पौराणिकाय गुरवे वस्त्रभोज्यविभूषणैः । स याति ब्रह्मणो लोके यावच्चन्द्रार्कतारकम् । यः पठेच्छृणुयाद्वापि ब्रह्मोक्तकमणौ द्विज ! । सोऽपि सर्वपुराणस्य श्रावणं फलं लभेत् । शृणोति यः पुराणन्तु ब्राह्मं सर्वं जितेन्द्रियः । हविष्याशो च नियमात् स लभेद ब्रह्मणः पदम् । किमत्र बहुनोक्तेन यद्यदिच्छति मानवः । तत् सर्वं लभते वत्स ! पुराणस्यास्य कीर्त्तनात्"

ब्र(ब्र)ह्मपुरुष पु॰ ब्रह्मणः पुरुष इव । ब्रह्मप्रापकेषु द्वारपालरूपेषु चक्षुः वाङ्मनःप्राणेषु । चक्षुरादीनि प्रक्रम्य "ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपालाः" छा॰ उ॰ । देवशब्दे २७४५।२७४६ पृ॰ एतद्भाष्यञ्च द्रष्टव्यम् ।

ब्र(ब्र)ह्मपुरोहित पु॰ ब्रह्म बृहस्पतिः पुरोहितो यस्य देवे । तयस्थिंशति देवाः ब्रह्म पुरोहिता इति ब्रह्म वै बृहस्पतिर्ब्रह्मपुरोहिताः" शत॰ ब्रा॰ १२।८।२।२६ ।

ब्र(ब्र)ह्मप्रसूत त्रि॰ इत॰ । १ब्रह्मजाते जगति २ब्राह्मणारब्धे कर्म्मणि न॰ । "यत् क्षत्रियोऽब्राह्मणो भवति न यज्ञं किं च कर्म कुरुतेऽप्रसूतं ब्रह्मणा मित्रेण न हैवास्मै तत् साध्यते तस्माद् क्षत्रियेण कर्म करिष्यमाणेनोपसर्तव्य एव ब्राह्मणः सं हैवास्मै तद्ब्रह्मप्रसूतं कर्म साध्यते" शत॰ ब्रा॰ ४।१।४।६ ।

ब्र(ब्र)ह्मबन्धु पु॰ ब्रह्मा विप्रो बन्धुरुत्पादको यस्य ब्रह्मणो विप्रस्य बन्धुरिव वा । १विप्राचाररहिते निन्द्यकर्म्मकारिणि जात्या विप्रे २विप्रतुल्ये भट्टादौ च । "ब्रह्मबन्धुरिवासि त्वमेनूचम ब्रह्मबन्धुरिव भवति" छा॰ उ॰ । "हे सौम्यानेनूच्यानधीत्य ब्रह्मबन्धुरिव भवतीति ब्राह्मणान् बन्धून् व्यपदिशति न त्वयं ब्राह्मणदत्त." इति भा॰ । विप्रवंश्यापकृष्टब्राह्मणस्यापि दैहिकदण्डनिषेधो यथा "वपनं द्रविणादानं स्थानान्निर्वासनन्तथा । एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः" भाग॰ १स्क॰

ब्र(ब्र)ह्मबिन्दु पु॰ ब्रह्मणि वेदाध्ययनकाले बिन्दुः । वेदाध्ययनकाले मुखनिःसरद्भाजालोक्ये ।

ब्र(ब्र)ह्मबध्या स्त्री वध–भावे क्यप् ६त॰ । ब्रह्महत्यायाम् ।

ब्र(ब्र)ह्मब्रुवाण पु॰ आत्मानं ब्रह्मणं ब्रूते ब्रू–शानच् । विप्रतया आत्मनः कथके । यथा कर्णः आत्मानं विप्रं कथयित्वा परशुरामादस्त्राण्यधीतवान्" भा॰ उद्योग॰ ६१ अ॰ । ब्राह्मणब्रुवि २अपकृष्टब्राह्मणे च । [नैषधटुप्पम॰ ।

ब्र(ब्र)ह्मभद्रा स्त्री ७त॰ । विप्रहितायां लायमाणौषधौ

ब्र(ब्र)ह्मभाग पु॰ ६त॰ । ब्रह्मरूपर्त्विजे हरणीये यज्ञद्रव्यस्य भागभेदे "अथास्यै ब्रह्मभागं पर्य्याहरन्ति । ब्रह्मा वै यज्ञस्य दक्षिणत आस्तेऽभिगोप्ता स एतं भागं प्रतिविदान आस्ते यत् प्राग्मिलं तदस्यै पर्य्याहार्षुस्तत् प्राग्दीक्षयं यमस्य ब्रह्मभागं पर्य्याहरन्ति तेन भागी सम्पद्यत ऊर्द्ध्वसंस्थं स्थितं यज्ञस्य तदभिगोपायति तस्माद्वाऽस्यै ब्रह्मभागं पर्य्याहरन्ति" शत॰ ब्रा॰ १।७।४।१८ ।

ब्र(ब्र)ह्मभूति स्त्री ब्रह्मणो भूतिरस्याः । १सन्ध्यायां शब्दच॰ । २ब्रह्मजातमात्रे त्रि॰ । [राजनि॰ ।

ब्र(ब्र)ह्मभूमिजा स्त्री ब्रह्मभूमितो जायते जन–ड । सिंहल्यां

ब्र(ब्र)ह्मभूय न॰ भू–भावे क्यप् ६त॰ । ब्रह्मभावे शुद्धचैतन्यस्वरूपप्राप्तौ अमरः । [१५।७।१७ संपत्तिव्याख्या ।

ब्र(ब्र)ह्ममण्डूकी स्त्री अध्यण्डाख्ये ओषधीभेदे कात्या॰श्रौ॰

ब्र(ब्र)ह्ममय त्रि॰ ब्रह्मात्मकं ब्रह्मन्+मयट् । ब्रह्मात्मके "दर्शनं तस्य लाभः स्यात् त्वं हि ब्रह्ममयो निधिः" भा॰ शा॰ ४६ अ॰ । स्त्रियां ङीप् । काशी ब्रह्ममयीत्यादि । २ब्रह्मात्मके च भा॰ उ॰ ६१ अ॰ ।

ब्र(ब्र)ह्ममह पु॰ ६त॰ । विप्रानुद्दिश्य उत्सवे । भा॰ शा॰ १६४ अ॰

ब्र(ब्र)ह्ममित्र पु॰ ब्रह्म मित्रमस्य । छंदोभेदे मार्कपु॰ ६२ अ॰ ।

ब्र(ब्र)ह्ममीमांसा स्त्री ६त॰ । ब्रह्मज्ञानार्थं वेदान्तवाक्यविचारात्मके व्यासप्रणीते ग्रन्थभेदे तत्प्रतिपाद्यविषयादि

वैयासिकन्यायमालायामुक्तं यथा "शास्त्रं ब्रह्मविचारास्यमध्यायाः खलु चतुर्विधाः। समन्वयाविरोधौ २ हौ साधनश्च फलं४ तथा। समन्वये स्यल्लिङ्गमस्यत्वे २ऽभ्युपास्यगम्३। ज्ञेयगं४ पदमालक्ष्य चिन्त्यं पादेष्वनुक्रमात्। द्वितीये स्मृतितर्काभ्यामविरोधोऽन्यदुक्तात्२। भूतभोक्तृस्तुतेश्चलिङ्गस्तुतेश्चान्यविरुद्धता। तृतीये विरतिः क्षत्त्वमदार्थपरिशोधनम्२। गुणोपसंहृतिश्चाने बहिरङ्गादिसाधनम्४। चतुर्थे जीवतोमुक्तिः कृत्स्नकर्मक्षयात्२ गतिरुत्तरा१। ब्रह्मप्राप्तिब्रह्मलोकाविति ४पादार्थसंग्रहः। तेन तत्र प्रत्येकं चतुष्टयपादयुताः चत्वारोऽध्यायाः। तत्र शास्त्रं यद्भिः स्वस्वमतानुसारेण व्याख्यातम् तत्र गौडपादाचार्यशङ्कराचार्यादिभिरद्वैतपरतया व्याख्यातं रामानुजादिभिश्च विशिष्टाद्वैतपरतया, वल्लभाचार्यादिभिश्च विशुद्धाद्वैतपरतया माध्वाचार्यादिश्च द्वैतपरतया व्याख्यातं तत्तन्मतञ्च प्रायेण तत्तच्छब्दे द्रष्टव्यम्।

ब्रह्मयज्ञ पु॰ ब्रह्मनिमित्तकस्तदध्ययनतदध्यापनानिमित्तको यज्ञः। वेदाध्ययनाध्यापनादौ अमरः। "अध्यापनं ब्रह्मयज्ञः" मनुः। "स्वाध्यायोब्रह्मयज्ञः" विष्णुसू॰। तेन वेदाध्ययनाध्यापनयोर्ब्रह्मयज्ञता।

ब्रह्मयष्टि स्त्री ब्रह्मणो यष्टिरिवालम्बनत्वात्। (वामन॰ झाटि) द्रुमे शब्दरत्ना॰।

ब्रह्मयुग न॰ ब्रह्मा विप्रत्वदुपलक्षितं युगम्। हिरण्यगर्भस्य विप्रत्वदृष्टिप्रधाने कालभेदे। तच्च हरिवं॰२०८।२०९ अध्याये ततः कृतादिस्वरूपलक्षितं तद्युगं २१०अ॰उक्तम्

ब्रह्मयोग पु॰ब्रह्मणस्तत्साक्षात्कारस्य योगः समाधिः। ब्रह्मसाक्षात्कारसाधने समाधिभेदे हरिवं॰२१० अ॰ "एष ब्रह्मनयो यज्ञो योगः सांख्यस्य तत्त्वतः। विज्ञानञ्च स्वभावश्च क्षेत्रं क्षेत्रज्ञ एव च। एकत्वञ्च पृथक्त्वञ्च समयं विधमं तथा। कालः कालज्ञयश्चैव क्षेत्रो विज्ञानमेव" च विष्णुधर्मादिषु पञ्चविंशे योगे च।

ब्रह्मयोनि पु॰ ब्रह्मणो योनिरुत्पत्तिरत्र। १ब्रह्मगिरौ शब्दर॰। २ब्रह्मप्राप्युपायज्ञाननिष्ठायाञ्च "ब्रह्मणा ब्रह्मयोनिस्थाः" मनुः ३ब्रह्मोत्पत्तौ त्रि॰। ४सरस्वत्यां स्त्री ङीप्। "सरस्वत्यास्तु तीरे यः संत्यजेदात्मसत्तमम्। पृथूदकं समासाद्य सरो ह्येनं न शोषयेत्। तत्रैव ब्रह्म योन्यस्ति ब्रह्मणा यत्र निर्मिता। पृथूदकं समाश्रित्य सर सरस्वत्यास्तटे स्थितः। चतुर्वर्णस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत्। तस्याभिधा यतः सृष्टिर्ब्रह्मणोऽव्यक्तजन्मनः। मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रियास्तथा। जरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन्। चातुर्वर्ण्यं ततो दृष्ट्वा आत्मसस्थान् सुतांस्ततः। एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीति संज्ञितम्। तत्र स्नात्वा सुक्तिकामः पुनर्योनिं न पश्यति" वामनपु॰ १८अ॰ उक्ते तीर्थभेदे स्त्री वा ङीप्।

ब्रह्मरन्ध्र न॰ उत्तमाङ्गस्य रन्ध्रभेदे। "तयोर्द्वमायन्नमृतत्वमेति" श्रुत्या तद्रन्ध्रेण प्राणोत्क्रमणे ब्रह्मलोकप्राप्तेरुक्तत्वात् तथात्वम्।

ब्रह्मराक्षस पु॰ ब्रह्मा विप्रोऽपि कुकर्मभिः राक्षसः। कुकर्मणा विप्रयोनितो राक्षसरूपतां प्राप्ते भूतभेदे "संयोगं पतितैर्गत्वा परस्य योषितं तथा। व्यपकृत्य च विप्रस्वं भवति ब्रह्मराक्षसः" इति मनुः। पतितप्रतिग्रहेऽपि तद्योनिप्राप्तिः भा॰ आनु॰ ११अ॰ दर्शिता। तच्च वाक्यं अधर्मशब्दे १२१ पृ॰ दर्शितं तच्च न हरिवंशवाक्यं किन्तु अनुशासनपर्वीयमिति बोध्यम्। पारिभाषिकब्रह्मराक्षसा यथा "मूर्खः स्त्री कृष्णपक्षश्च वाजी बधिर एव च। गृहीतार्थं न मुञ्चन्ति पञ्चैते ब्रह्मराक्षसाः" व्यवहारप्रदीपः। २शिवानुचरभेदे भाग॰ १०।६२अ॰।

ब्रह्मरात न॰ ब्रह्म तज्ज्ञानं रातं यस्मै। शुकदेवे "ब्रह्मरातो भवं प्रीतो विष्णुरातेन संसदि" भाग॰२।८।२७। २याज्ञवल्क्ये मुनौ ऋग्वेद॰ब्रह्मरातिरिति वा पाठः। तेन हि जनकाय ब्रह्मविद्यादानात् तथात्वम् बृहदारण्यकोपनिषदि तत्कथा द्रष्टव्या।

ब्रह्मरात्र पु॰ रात्रेरयम् अण् ब्रह्मणः ब्रह्मस्वामिके रात्रिशेषभागे मुहूर्ते "उपावृत्ते ब्रह्मरात्रे" भा॰ १०।२१।१६। व्याख्यायां श्रीधरः।

ब्रह्मरीति ब्रह्मणो रीतिः। पित्तभेदे श्लेष्मच॰।

ब्रह्मर्षि पु॰ बृ(ब्र)ह्मा विप्रः चतुर्थस्तुल्यो वा ऋषिः वेदस्य वा ऋषिः ऋत्वा। ब्रह्मतुल्येषु वसिष्ठादिषु १वेदस्रष्टृषु २ऋषिषु श्लेष्मच॰।

ब्रह्मर्षिदेश पु॰। "कुरुक्षेत्रञ्च मत्स्याश्च पाञ्चालाः शूरसेनकाः। एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरम्" मनूक्ते कुरुक्षेत्रादिदेशचतुष्टये। [ब्रह्मावर्तशब्दे द्रष्टव्यम्।

ब्रह्मलक्षण न॰ क्लीबे ब्रह्मणः स्वरूपतटस्थलक्षणे

ब्रह्मलोक पु॰ क्लीबे। १ब्रह्माधिष्ठाने भुवने सत्यलोके "सप्तमस्तु समृतो लोको ध्रुवस्तस्योपरिस्थितः। ध्रुवे

ब्रह्मलोकः समाख्यातो ह्यप्रतीघातसञ्चयः" देवीपु०। "षड्गुणेन तपोलोकात् सत्यलोको विराजते। अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः"। ब्रह्मण लोकः। २तुरीयब्रह्मस्वरूपे च ब्रह्मानन्दशब्दे दृश्यम्।

ब्र(ब्र)ह्मवर्चस न० ब्रह्मणा वेदाध्ययनेन वर्चः अच् समा०। वेदाध्ययनजनिते तेजसि "तपःस्वाध्यायजं यच्च तेजस्तु ब्रह्मवर्चसम्" जटा०। "ब्रह्मवर्चसकामः स्तुवीत" ताण्ड्य० ब्रा०२।५।२"ब्रह्मवर्चसकामस्य कुर्यात् विप्रस्य पञ्चमे" मनुः तदस्यास्ति इनि। ब्रह्मवर्चसिन् तदयुक्ते ति०"ब्रह्मवर्चस्यादो भवति" छा० उ०। "ह्यस्वाध्यायजं तेजः ब्रह्मवर्चसम्" शाङ्करभाष्यम्।

ब्र(ब्र)ह्मवर्चस्विन् पु०६त०। ब्रह्मणश्चोर्चः समासान्तविधेरनित्यत्वात् न अच्समा० ततोऽस्यर्थे विनि। ब्रह्मवर्चसिनि। "ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः" मनुः।

ब्र(ब्र)ह्मवर्त्त पु० ब्रह्मणो वर्त्तो वर्त्तनं यत्र। ब्रह्मावर्त्ते देशे० शब्दर०। [ताच्छे ङेमच०।

ब्र(ब्र)ह्मवर्द्धन न० ब्रह्मा वेधो रूपमिव वर्द्धते वृध-ल्युट्।

ब्र(ब्र)ह्मवाटीय पु० मुनिभेदे हरिवं० १४१।

ब्र(ब्र)ह्मवाद पु० ६त०। १वेदपाठे हारा०। २ब्रह्माधिकारेण तत्त्वनिर्णयार्थे वादे कथाभेदे च।

ब्र(ब्र)ह्मवादिन् पु० ब्रह्म वेदं वदति पठति वद-णिनि। १वेदपाठके। ब्रह्म शुद्धं चैतन्यं सर्वात्मकतया वदति वद-णिनि। २वेदान्तप्रतिपाद्यसर्वात्मकब्रह्मनिर्णयार्थकथाभेदरूपवादयुते। "ब्रह्मवादिनो वदन्ति"छा०उ०। शुद्धचैतन्यं वदति बोधयति। ३ब्रह्मबोधके शास्त्रे जटा०। ४गायत्र्यां स्त्री ङीप्। सा च निर्गुणब्रह्मप्रतिपादिकेति तस्यास्तथात्वम्। "आयाहि वरदे! देवि! त्र्यक्षरे! ब्रह्मवादिनि!" गायत्र्यावाहनमन्त्रः।

ब्र(ब्र)ह्मवालुक न० तीर्थभेदे भा० व० ८२ अ०।

ब्रह्मवास पु० ६त०। ब्रह्मलोके हरिवं० २१२ अ०।

ब्रह्मवाहस् त्रि० ब्रह्मणा मन्त्ररूपवेदेन उह्यते वह-कर्मणि बा० असिच् णिच्च। मन्त्रेण प्राप्यमाणे ऋ०१।१०१।९।

ब्र(ब्र)ह्मविद् ब्रह्मस्वरूपतया वेत्ति आत्मानम् विद-क्विप्। आत्मात्मैक्यवेत्तरि "ब्रह्मविद् ब्रह्म भवति" श्रुतिः। २विष्णौ पु० "ब्रह्मविद् ब्राह्मणो ब्रह्मी" विष्णुस०। वेदं वेदार्थं यथावत् वेत्तीति ब्रह्मविद्" भा० ३वेदार्थवेत्तरि त्रि०। [ऽभेदेन ज्ञाने।

ब्र(ब्र)ह्मविद्या स्त्री ६त०। शुद्धचैतन्यात्मकस्य ब्रह्मण आत्मा-

ब्र(ब्र)ह्मर्षिवर्द्धन पु० ६त०। १तपोवर्द्धके विष्णौ "सत्य ब्रह्मर्षिवर्द्धनः" विष्णुस०। वृध-णिच् भावे ल्युट्। २तपआदीनां विशेषेण वर्द्धने न०।

ब्र(ब्र)ह्मदण्ड पु०। पलाशदण्डे हलायुधः। "ब्रह्म वै पलाशः" शत०ब्रा०१२।८।४।१ तपःसाधने २चतुष्वरदण्डे रत्नमाला।

ब्र(ब्र)ह्मदत्ति स्त्री ६त०। १ब्राह्मणस्य जीवनोपाये "स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः। षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः" भाग०। २ब्रह्माकारान्तःकरणवृत्तौ च। [वेदान्ते च।

ब्र(ब्र)ह्मवेद पु० ६त०। १ब्रह्मज्ञाने २ब्रह्मप्रतिपादके वेदभागे

ब्र(ब्र)ह्मवेदि स्त्री ब्रह्मणो वेदिरिव। "ब्रह्मवेदिः कुरुक्षेत्रं पञ्चरामह्रदान्तरम्" इत्युक्ते देशे हेमच०।

ब्र(ब्र)ह्मवेदिन् त्रि० ब्रह्म वेत्ति आत्माभेदेन विद-णिनि। ब्रह्मात्मैक्याभिज्ञे "ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः। कृतबुद्धिषु कर्त्तारः कर्तृषु ब्रह्मवेदिनः" मनुः।

ब्रह्मवैवर्त्त न०अष्टादशमहापुराणमध्ये अष्टादशसहस्रसंख्यके १महापुराणभेदे तत्प्रतिपाद्यविषयादिकं हरहारदीये ४ पादे १०१अ० उक्तं यथा

"ब्रह्मा उवाच। शृणु वत्स! प्रवक्ष्यामि पुराणं दशमं तव। ब्रह्मवैवर्त्तकं नाम वेदभागानुदर्शकम्। सावर्णिर्यत्र भगवान् साक्षाद्देवर्षयेऽर्थितः। नारदाय पुराणार्थं प्राह सर्वमलौकिकम्। धर्मार्थकाममोक्षाणां सारः प्रीतिर्हरौ हरे। तयोरभेदसिद्ध्यर्थं ब्रह्मवैवर्त्तमुत्तमम्। रथन्तरस्य कल्पस्य वृत्तान्तं यन्मयोदितम्। शतकोटिपुराणं तत् संक्षिप्य प्राह वेदवित्। व्यासश्चतुर्भिः संक्षय ब्रह्मवैवर्त्तसंज्ञितम्। अष्टादशसहस्रन्तत पुराणं परिकीर्त्तितम्। ब्रह्म१प्रकृति२विघ्नेश३कृष्णखण्ड४ समाचितम्। तत्र सूतर्षिसंवादः पुराणोपक्रमो मतः"। तत्र प्रथमे ब्रह्मखण्डे। "सृष्टिप्रकरणं त्वाद्यं ततो नारदवेधसोः। विवादः सुमहान् यत्र द्वयोरासीत् परात्मनः। शिवलोकगतिः पश्चाज्ज्ञानलाभः शिवाज्ञुनेः। शिववाक्येन तत् पश्चात् मरीचेर्नारदस्य। तु सनत्कुमारस्यैव सावर्णिज्ञानार्थं शिवसेविते। आत्मने सुमहापुण्यं त्रैलोक्यास्वर्यकारिणि। एतच्च ब्रह्मखण्डं हि श्रुतं पापविनाशनम्"। द्वितीये प्रकृतिखण्डे "ततः सावर्णिसंवादो नारदस्य समीरितः। कृष्णमाहात्म्यसंयुक्तो नानाख्यानकथोत्तरः। प्रकृतेरंशभूतानां कलानाञ्च शि

वर्णितम्। बाहुल्यं, पूजनाद्यञ्च विस्तरेण यथास्थितम्। एतत् प्रकृतिखण्डं हि श्रुतं भूतिविधायकम्। तृतीये गणेशखण्डे। "गणेशजन्मसंप्रश्नः सपुण्यकसहाग्रतम्। पार्वत्याः कार्त्तिकेयेन सह विघ्नेशसम्भवः। चरितं कार्त्तवीर्यस्य जामदग्नस्य चाद्भुतम्। विवादः शुभशान् पश्चाज्जामदग्न्यगणेशयोः। एतद्विघ्नेशखण्डं हि सर्वविघ्नविनाशनम्" चतुर्थे श्रीकृष्णजन्मखण्डे "श्रीकृष्णजन्मसम्प्रश्नो जन्माख्यानं ततोऽद्भुतम्। गोकुले गमनं पश्चात् पूतनादिवधोऽद्भुतः। बाल्यकौमारजालीला विविधास्तत्र वर्णिताः। रासक्रीडा च गोपीभिः शारदी सुखदाकृता। दृष्ट्वा राधया क्रीड़ा वर्णिता बहुविस्तरा। सङ्क्षेपेण ततश्चान्मथुरागमनं हरेः। कंसादीनां वधे दुष्टे सदसद्विजसंस्कृतिः। काश्यां सान्दीपनेः पश्चादिद्योपादानमद्भुतम्। यज्ञस्य वधः पश्चादुद्धारकागमनं हरेः। नरकादिवधस्तत्र कृष्णेन विहितोऽद्भुतः। कृष्णखण्डमिदं विप्र! नृणां संसारखण्डनम्" तत्फलश्रुतिः "पठतश्च श्रुतं ध्यातं पूजितं स्वाभिवर्णितम्। इत्येतद्ब्रह्मवैवर्त्तं पुराणं चात्यलौकिकम्। व्यासोक्तं चादिसम्भूतं पठनं श्रवणं विमुच्यते। विघ्नान्नानाभयमनात् घोरात् संसारसागरात्। लिखित्वेदञ्च यो दद्यान्माघ्यां धेनुसमान्वितम्। ब्रह्मलोकमवाप्नोति स शक्रोऽज्ञानबन्धनात्। यश्चानुक्रमणीं वापि पठेद् वा शृणुयादपि। सोऽपि कृष्णप्रसादेन लभते वाञ्छितं फलम्"। विवर्त्त उपादानविषमसत्ताकं कार्य्यं स्वार्थे अण् ६त०। २ब्रह्मणोऽत्यन्तसत्ताके कार्य्ये च। [भेदे भा० स० ११अ०।

ब्र(ब्र)ह्मव्रत न० सहस्रवर्षसाध्ये ब्रह्मलोकदर्शनफलके व्रतभेदे।

ब्र(ब्र)ह्मशल्य पु० ब्रह्मेव सूक्ष्मं शल्यं कण्टकाग्रं यस्य। (शावला) वृत्तभेदे रत्नमाला। [गोलायाञ्च।

ब्र(ब्र)ह्मशाला स्त्री १तीर्थभेदे भा० व० ८७अ०। २वेदपाठार्थं

ब्र(ब्र)ह्मशासन न० ६त०। तत्तत्कार्य्येषु ब्रह्मकर्त्तृके १नियोजने। तेन च यथा यज्ञ शासनं कृतं यथा पृथिव्या धारणाय वायोर्वहनाय सूर्य्यादीनां प्रकाशनाय इत्यादि तत्तथैव तैः शासनमनुपाल्यते एवं वर्णाश्रमादिकर्मानुशासनमपि तेनैव अनुशिष्टम् "श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्त्तते। आज्ञाच्छेदी मम द्वेषी नरकं प्रतिपद्यते" भगवदुक्तेः। ब्रह्मणो वेदस्यानुशासने २कर्त्तृत्वोपदेशे च। अधिकरणे ल्युट्। ३ब्रह्मविचारगर्हे शब्दरत्ना०।

ब्र(ब्र)ह्मशिरस् न०अस्त्रभेदे तच्चास्त्रं द्रोणेन स्वसुताय कृपायाग्नेयार्जुनाय चाध्यापितं तदस्त्रप्रयोगसंहारादिकथा भा०द्रो० १२अ०। [अते शब्द० ६।७५।१६

ब्र(ब्र)ह्मसंयित त्रि०१त०। ब्राह्मणा मन्त्रेण संयिते तीक्ष्णी-

ब्र(ब्र)ह्मसंहिता स्त्री वैष्णवाचारसिद्धान्ते अध्यायशतात्मके ग्रन्थभेदे। [निघण्टुः।

ब्र(ब्र)ह्मसती स्त्री ब्रह्मरूपा ब्रह्मणो वा जाता सती। सरस्वत्यां

ब्र(ब्र)ह्मसत्ता स्त्री० ६त०। ब्रह्मरूपजगदधिष्ठातृसत्तायाम्। शुक्तिसत्तया रजतसत्तावत् तत्सत्तयैव जगतःसत्त वेदान्तमतम्।

ब्र(ब्र)ह्मसत्र न० ब्रह्म वेदस्तत्पाठरूपं सत्रम्। ब्रह्मयज्ञशब्दार्थे "नैत्यिके नास्त्यनध्याया ब्रह्मसत्रं हि तत्स्मृतम्" मनुः।

ब्र(ब्र)ह्मसदन न० सीदत्यस्मिन् सद्-आधारे ल्युट्। ६त०। ब्रह्मण ऋत्विग्भेदस्य वारुण्यौदुम्बरादिजाते कुशास्तृते प्रागग्रे १आसने कात्या० श्रौ० २।१।२ सूत्रादौ दर्भपुञ्जे। २हिरण्यगर्भसदने च।

ब्र(ब्र)ह्मसरस् न० दीर्घभेदे तत्कथा भा०व० ८१अ० दृश्या।

ब्र(ब्र)ह्मसर्प पु० ब्रह्मेव दृढत्वं सर्पः। सर्पभेदे त्रिका०।

ब्र(ब्र)ह्मसात् अव्य० ब्रह्माधीनं करोति साति। ब्रह्माधीने कृत्वादिभेदास्य प्रयोगः ब्रह्मसात्-करोति भवति सम्पद्यते वा

ब्र(ब्र)ह्मसामन् न० सामभेदे तच्च साम ताण्ड्यब्रा० ४।३।१ दर्शितं यथा "अथाग्निहोत्रे वाहुनि मध्यन्दिनसवने ब्राह्मणाच्छंसिनः पृष्ठस्तोत्रनिवर्त्तकमेकं साम विधत्ते भा० "अभीवर्त्तो ब्रह्म साम भवति" ताण्ड्यब्रा० "तच्चोदङ्मुखीमुदङ्मुखीत्यृचां योनावुत्पद्यं साम अभीवर्त्ताख्यम् एतत् साम ब्राह्मणाच्छंसी पृष्ठस्तोत्रमनुसंधत्ते, तच्च यज्ञमाणाय कर्त्तुं कर्त्तव्यम्" अथैतत्सामनिर्वचनेन प्रशंसति भा०। "अभीवर्त्तेन वै देवाः स्वर्गं लोकमभ्यवर्त्तन्त यदभीवर्त्तो ब्रह्म साम भवति स्वर्गस्य लोकस्याभिवृत्त्यै" ब्रा०। "अभीवर्त्ताख्येन साम्ना देवाः स्वर्गं लोकमभ्यवर्त्तन्त अगच्छन् अतएवास्याभिवृत्तिसाधनत्वादस्य साम्नोऽभीवर्त्त इति संज्ञा निष्पन्ना। अतएव ब्राह्यायनकं "यदभ्यवर्त्तन्त तदभीवर्त्तस्याभीवर्त्तत्वमिति"। अभिपूर्वाद्वृत वर्त्तने इत्यस्मात् करणे घञ्। उपसर्गस्य घञ्यमनुष्ये बहुलमिति पूर्वपदस्य दीर्घः। एवं सति अग्निहोत्रहवनि अभीवर्त्तो ब्रह्मणः पृष्ठसाम भवतीति यत् तत् स्वर्गस्य लोकस्याभिवृत्यै अभिवर्त्तनायाभिगमनाय सृष्टिणां

भवति" भा० । तच्च सामऋङ्गाने । ६प्र०१४क०दर्शितम् ।

ब्र(ब्र)ह्मसायुज्य न० सह युनक्ति युज-क्विप् तस्य भावः सायुज्यं ६त० । ब्र(ब्र)ह्मभावे ।

ब्र(ब्र)ह्मसार्ष्टिता स्त्री ६त० । ब्रह्मतुल्यगतित्वे मनुः ४।२३२।

ब्र(ब्र)ह्मसावर्णि पु० दशमे मनुभेदे "दशमो ब्रह्मसावर्णि रुपश्लोकश्रुतो महान् । तत्सुता भूरिषेणाद्या हविष्मत-प्रमुखा द्विजाः । हविष्मान् सुकृतः सत्यो जयो मूर्त्ति-रादा द्विजाः । सुवासनविरुद्धाद्या देवाः शम्भुः सुरे-श्वरः । विष्वक्सेनो विषुच्यान्तु शम्भोः सख्यं करिष्यति । जातः स्वांशेन भगवान् गृहे विश्वसृजां प्रभुः" भाग० [वसिष्ठादौ च । ८।१३।१०

ब्र(ब्र)ह्मसम्भव पु० ६त० । १जैनभेदे हेम० २ब्रह्मणो जाते

ब्र(ब्र)ह्मसिद्धान्त ६त० । पैतामहे ज्योतिषसिद्धान्तभेदे "पौ-लिशरोम(सोम)क वासिष्ठसौरपैतामहेषु पञ्चखेतेषु सिद्धा-न्तेषु" बृ०स०१अ० । [दृशद्रूप । २सरीच्यादौ च

ब्र(ब्र)ह्मसुत पु० ६त० । १केतुभेदे बृ०स० ११ अ० केतुशब्दे

ब्र(ब्र)ह्मसुवर्चला स्त्री ओषधिभेदे ततस्थानलक्षणादिकमुक्तं सुश्रुते "देवसुन्दे हृदवरे तथा सिन्धौ सहानदे । दृश्यते च जलान्तेषु मध्ये ब्रह्मसुवर्चला" । "कनकाभा जलान्तेषु सर्वतः परिसर्पति । सच्छोरा पद्मिनीप्रख्या देवी ब्रह्म सुवर्चला" । तत्क्षयिते २जले च "पिबेत् ब्रह्मसुव-र्चलाम्" मनुः ।

ब्र(ब्र)ह्मसू पु० ब्रह्माणं सूतवान् सू-क्विप् । चतुर्व्यूहात्म-कस्य विष्णोर्मूर्त्तिभेदे अनिरुद्धे तस्यावतारभेदे २उषापतौ च अमरः । "अनिरुद्धात्ततो ब्रह्मा तन्नाभिकमलोद्भवः" ब्रह्मपु० । ब्रह्मणि तपसि सुवति प्रेरयति सू-प्रेरणे क्विप् । तपःप्रवर्त्तके १कामे च कामेनैव सर्वतपसु प्रेरणात्तस्य तथात्वम् । तदभिमानिदेवे ४कन्दर्पे च अमरः ।

ब्र(ब्र)ह्मसूत्र न० ब्रह्मणि वेदयज्ञकाले धृतं सूत्रम् । १यज्ञोपवीते त्रिका० । २ब्रह्मप्रतिपादके शारीरकसूत्रे च । "ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितम्" गीता ।

ब्र(ब्र)ह्मसूनु पु० ६त० । इक्ष्वाकुवंशोद्भवे १राजभेदे ब्रह्म दत्ते हेमच० २वसिष्ठादौ च ।

ब्र(ब्र)ह्मस्तेय ६त० । स्वायंमधीयानात् ततोऽनुज्ञामप्राप्य तद्वा व्यवधानेन वेदाध्ययने तरि । "ब्रह्म यज्ञानमुज्ञातमधीयानादवाप्नुयात् । स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते" मनु

ब्र(ब्र)ह्मस्थान न० ६त० । तीर्थभेदे भा० ब० ८१ अ० ।

ब्र(ब्र)ह्मस्व ६त० । ब्रह्मस्वानिके धने । "ब्रह्मस्वं वा गुरुस्व वा देवस्वं वापि यो हरेत् । स जलन्न इति ज्ञेयो महा-पापी च भारत ! । अवटोदे वसेत् सोऽपि यावदिन्द्रा शतं शतम् । ततो भवेत् सुरापीति ततः शूद्रस्ततः शुचिः" । ब्रह्मवै० प्रक्र० ४६अ० ।

ब्र(ब्र)ह्महत्या स्त्री० हन-क्यप् ६त० । विप्रहनने । तस्य म-हापातकत्वमुक्तं मनुना "ब्रह्महत्या सुरापानं स्तेयं गुर्व-ङ्गनागमः । महान्ति पातकान्येव संसर्गश्चापि तैः सह" तदधिष्ठातृस्वरूपमुक्तं ब्रह्मवै० पु० जन्म० ४७ अ० यथा "रक्तवस्त्रपरीधाना वृद्धा स्त्रीवेषधारिणी । सन्ताल-ग्रमाणा सा शुष्ककण्ठौष्ठतालुका । हस्वाग्रमाणदशना महाभीतञ्च कातरम् । धावन्तं परिधावन्ती वलिष्ठाहत-चेतनम् । खड्गहस्ता हतास्त्रं तं दयाहीना च मूर्च्छि-तम् । इन्द्रो दृष्ट्वा च तां घोरां ग्रसन्तं ग्रसं ग्रसं मुहुः । विवेश मानससरो मृणालरुच्छ्रलवतः । तत्र गन्तुं न शक्ता सा ब्रह्मणः शापकारणात्" । हतासुरवधनिमित्तकब्रह्महत्यापनोदनार्थं शक्रेणाश्वमेध-कृते तस्या विभज्य स्थानविशेषे संक्रामणकथा भा० उ० ७० १२अ० यथा "तत्राश्वमेधः सुमहान् महेन्द्रस्य महात्मनः । वृत्ते पावनार्थं वै ब्रह्महत्यापहो नृप ! । विभज्य ब्रह्महत्यां तु वृक्षेषु च नदीषु च । पर्वतेषु पृथिव्याञ्च स्त्रीषु चैव युधिष्ठिरः !" आतिदेशिकब्रह्महत्याः कतिचित् ब्रह्मवै० प्रक्र० २७अ० उक्ता यथा "श्रीकृष्णे च तदर्चायां तन्मन्त्रे प्रकृतौ तथा । शिवे च शिवलिङ्गे वा सूर्ये सूर्यतनौ तथा । गणेशे वा तदर्चायामेवं सर्वत्र सुन्दरि ! । यः करोति भेदबुद्धिं ब्रह्महत्यां लभेत् तु सः । स्वगुरौ स्वेष्टदेवेषु मन्मन्त्रा-तरि मातरि । करोति भेदबुद्धिं यो ब्रह्महत्यां लभेत् तु सः । वैष्णवेष्वन्यभक्तेषु, ब्राह्मणेष्वितरेषु च । करोति स-मतां यो हि ब्रह्महत्यां लभेत् तु सः । हरेः पादो-दकेऽन्यदेवपादोदके तथा । करोति समतां यो हि ब्रह्महत्यां लभेत् तु सः । विष्णौ विष्णु नैवेद्ये चान्य-नैवेद्यके तथा । करोति समतां यो हि ब्रह्महत्यां लभेत् तु सः । सर्वेश्वरेश्वरे कृष्णे सर्वकारणकारणे । सर्वाद्ये सर्वदेवानां शेष्ये सर्वात्मनात्मनि । मायया नैकरूपे वाप्येकत्वेन हि निर्गुणे । करोत्यनेन समतां ब्रह्महत्यां लभेत् तु सः । पितृदेवार्चने पौर्वापर्य-वेदविनिर्मितम् । यः करोति तन्निषेधं ब्रह्महत्यां स विन्दति । ये निन्दन्ति हरेर्नाम तन्मन्त्रोपासकं तथा ।

पवित्राणां पवित्रञ्च ब्रह्महत्यां लभन्ति ते । ये निन्दन्ति विष्णुमायां विष्णुभक्तिप्रदां सतीम् । सर्वशक्तिस्वरूपाञ्च प्रकृतिं सर्वमातरम् । सर्वदेवस्वरूपाञ्च सर्वाद्यां सर्ववन्दिताम् । सर्वकारणरूपाञ्च ब्रह्महत्यां लभन्ति ते । कृष्णजन्माष्टमीं रामनवमीं पुण्यदां पराम् । शिवरात्रिं तथा चैकादशीं वारं रवेस्तथा । पञ्च पर्वाणि पुण्यानि ये न कुर्वन्ति मानवाः । लभन्ते ब्रह्महत्यां ते चाण्डालाधिकपापिनः । अम्बुवाच्यां भूखननं लले शौचादिकञ्च ये । कुर्वन्ति भारते वर्षे ब्रह्महत्यां लभन्ति ते । गुरुञ्च मातरं तातं साध्वीं भार्यां सुतं सुताम् । अनाथां यो न पुष्णाति ब्रह्महत्यां लभेत् तु सः । विवाहो यस्य न भवेत् न पश्यति सुतन्तु यः । हरिभक्तिविहीनो यो ब्रह्महत्यां लभेत् तु सः । हरेरनैवेद्यभोजी नित्यं विष्णुं न पूजयेत् । पुण्यं पार्थिवलिङ्गं वा ब्रह्महत्यां लभेत् तु सः" । आतिदेशिक्यास्तस्या विनाशनं हरिस्मरणगङ्गास्नानादि ।

ब्र(ब्र)ह्महत्यासम न० "अन्धतञ्च समुत्कर्षे राजगामि च पैशुनम् । गुरोरलीकनिर्बन्धः समानि ब्रह्महत्यया" मनूक्ते अनुपातकभेदरूपे मिथ्याभेदकथनादौ ।

ब्र(ब्र)ह्महन् त्रि० ब्र(ब्र)ह्माणं हतवान् हन-क्विप् । १विप्रहत्याकारिणि । "ब्र(ब्र)ह्महा न भवत्यन्यो ब्र(ब्र)ह्महा दृषलीपतिः । यस्तस्यामाहितोगर्भः स तेन ब्रा(ब्रा)ह्मणो हतः" इत्युक्ते २दृषलीतौ च । "च्युतोत्पतनजिह्मासु जीवोत्क्षिप्ताङ्गुलिध्वनिः । गुरोरपि च कर्त्तव्यमन्यथा ब्रह्महा भवेत्" इत्यादिस्मृत्युक्तातिदेशिकब्र(ब्र)ह्महत्यापापयुक्ते च । तत्प्रायश्चित्तं मनुनोक्तं यथा

"ब्रह्महा द्वादश समाः कुटीं कृत्वा वने वसेत् । भैक्षाशी ब्रह्मचरितव्रतार्थं कृत्वा ध्वजशिरोध्वजम्१ । लक्ष्यं शस्त्रभृतां वा स्यादिदुषामिच्छयात्मनः२ । प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः३ । यजेत वाश्वमेधेन४ स्वर्जिताः५ गोसवेन वा६ । अभिजिद्विश्वजिद्भ्यां७ । इष्ट्वा त्रिवृताग्निष्टुताप्तिं८ वा । जपन् वान्यतमं९० वेदं योजनानां शतं व्रजेत्११ । ब्रह्महत्यापनोदाय मितभुङ् नियतेन्द्रियः । सर्वस्वं वेदविदुषे ब्राह्मणायोपपादयेत्१२ । धनं वा जीवनायालं गृहं वा सपरिच्छदम्१३ । हविष्यभुग् वाऽनुसरेत् प्रतिस्रोतः सरस्वतीम्१४ । जपेद्वा नियताहारस्त्रिवृं वेदस्य संहिताम्१५ । कृतवापनो निवसेत् ग्रामान्ते गोव्रजेऽपि वा । आश्रमे वृक्षमूले वा गोब्राह्मणहिते रतः । ब्रह्मणार्थे गवार्थे वा सद्यः प्राणान् परित्यजन्१६ । मुच्यते ब्रह्महत्याया गोघ्ना गोब्राह्मणस्य च । तत्रैवं प्रतियोद्धा वा१७ सर्वस्वमवजित्य वा । विप्रस्य तन्निमित्ते वा प्राणालाभे विमुच्यते" ।

ब्र(ब्र)ह्माङ्गभू पु० ब्रह्मणोऽङ्गात् भवति भू-क्विप् । घोटके हारा० । ब्रह्मात्मभूशब्दे दृश्यम् ।

ब्र(ब्र)ह्माञ्जलि पु० ब्र(ब्र)ह्मण वेदपाठाय अञ्जलिः गुरौ कृतोविनयाञ्जलिः, स्वरविशेषज्ञापनार्थं वा कृतोञ्जलिः संकुचितपाणिः । वेदपाठार्थं गुरुनिकटे कार्य्ये १विनयाञ्जलौ स्वरविशेषार्थज्ञापनाय कृतसङ्कोचे २पाणिद्वये च अमरः ।

ब्र(ब्र)ह्माणी पु० ब्र(ब्र)ह्माणम् आनयति जीवयति अनेन णिच्-अण् पृषो०रत्वम् । ब्रह्मशक्तौ "हंसयुक्ते विमानस्था साक्षसूत्रकमण्डलुः । आयाता ब्रह्मणः शक्तिः ब्रह्माणी साऽभिधीयते" इति देवीमा० । "ब्रह्माणी ब्रह्मजननाद्" देवीपु० । ब्रह्मशब्दात् ङीष् आनङ् चेति त्वपाणिनीयम् । २रेणुकानामगन्धद्रव्ये रत्नमा० । २राजरीतौ राजनि० । ३ब्रह्मणोऽङ्गशरीरादुत्पन्नायां शतरूपायाम् । "ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् । स्त्रीरूपमर्द्धमकरोद्वामं पुरुषरूपवत् । शतरूपा च सा ख्याता सावित्री च निगद्यते । सरस्वत्यथ गायत्री ब्रह्माणीत्युच्यते च सा" मत्स्यपु० २अ० ।

ब्र(ब्र)ह्माण्ड न० ६त० । "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः" इति मनूक्ते ब्रह्मण उत्पादके अण्डाकारे १भुवनकोषे "ब्रह्माण्डभाण्डोदरभास्यत्पिण्डतचण्डमेति" वीरचरितम् ।

ब्रह्माण्डसंस्था स्त्री० सि० दर्शिता यथा

"वासुदेवः परं ब्रह्म तन्मूर्त्तिः पुरुषः परः । अव्यक्तो निर्गुणः शान्तः पञ्चविंशात् परोऽव्ययः । प्रकृत्यन्तर्गतो देवो बहिरन्तश्च सर्वगः । सङ्कर्षणोऽपः सृष्ट्यादौ तासु बीजमवासृजत् । तदण्डमभवद्धैमं सर्वत्र तमसावृतम् । तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातनः । हिरण्यगर्भो भगवानेष ऋन्दसि पठ्यते । आदित्यो ह्यादिभूतत्वात् प्रसूत्या सूर्य उच्यते । परं ज्योतिस्तमःपारे सूर्योऽयं सवितेति च । पर्येति भुवनान्येष भावयन् भूतभावनः" इत्युपक्रमे "गुणकर्मविभागेन सृष्ट्वा प्राग्वदनुक्रमात् । विभागं कल्पयामास यथास्वं वेददर्शनात् । ग्रहनक्षत्रताराणां भूमेर्विश्वस्य वा विभुः । देवा-

सुरमनुष्याणां विज्ञानं च यथाक्रमम्। ब्रह्माण्डमेतत् सुषिरं तत्रेदं भूर्भुवादिकम्। कटाहद्वितयस्यैव सम्पुटं गोलकाकृति(?)। ब्रह्माण्डमध्ये परिधिर्योजनकटाहाभिधीयते। तन्मध्ये भवनं भानामधोऽधः क्रमशस्तथा। मन्दारेऽभ्रभुवस्सूर्यशुक्रेन्दुजेन्द्रवः। परिध्यन्त्यधोऽधस्याः सिद्धविद्याधरा घनाः। उपरिष्टात् स्थितास्तस्य सेन्द्रा देवा महर्षयः। अधस्तादहुराक्षहतुद्विघ्नोऽन्योन्यमाश्रिताः। ततः सप्तान्तरं परिधिः क्रमेणायं महार्णवः। मेरुस्थलेव स्थितो धात्रा देवासुरविभागकृत्। सप्तान्ध्रेऽमध्यात् तु तुल्यभागेषु तोयधेः। द्वीपेषु दिक्षु पूर्वादिनगर्यो देवनिर्मिताः। भूवृत्तपादे पूर्वस्यां यमकोटीति विश्रुता। महाश्ववक्त्रे नगरी स्वर्णप्राकारतोरणा। याम्यायां भारते वर्षे लङ्का तदतन्महापुरी। पश्चिमे केतुमालाख्ये रोमकाख्या प्रकीर्त्तिता। उदक् सिद्धपुरी नाम कुरुवर्षे प्रकीर्त्तिता। तस्यां सिद्धा महात्मानो निवसन्ति गतव्यथाः" सू० सि०।

(१)"एतत् प्रागुक्तं ब्रह्माण्डाधिष्ठितं सुवर्णाण्डं सुषिरमवकाशात्मकं तत्रावकाशे इदं जगत् भूर्भुवादिकं भूर्भुवःस्वर्गोलकमवस्थितं न बहिः। नन्वण्डस्य गोलाकारत्वेनान्तरवकाशात्मकत्वासम्भवतीत्यत आह कटाहद्वितयस्येति। कटाहोर्द्ध्वगोलाकारं यावकाशं तत्र तस्य द्वितयं द्वयं सम्पुटं तस्य। एवकारो न्यूनाधिकव्यवच्छेदकार्थः। सम्पुटमात्रसम्बन्धेन सिद्धं गोलकाकृतिर्गोलाकारः स्यात्। तथाच न क्षतिः" रङ्गना०।

"भूभुवरादिदशदानवमानवाद्या येऽन्याश्च विष्णुजगने चरचक्रकक्षाः। लोकव्यवस्थितिरुपर्युपरि प्रदिष्टा ब्रह्माण्डभाण्डजठरे तदिदं समस्तम्" सि०शि०। इदानीं कथितं ब्रह्माण्डमानं पूर्वं कथितमपि प्रसङ्गादहमपि वदामीति ध्येयं" प्रमिता०। "कोटिघ्नैर्नखनन्दषट्कनखभूभूसङ्गुजङ्घेन्दुभि१८७१२०६६२०००००००ज्योतिः शास्त्रविदो वदन्ति नभसः कक्षाक्षिमां योजनैः। तद्ब्रह्माण्डकटाहसंपुटतटे केचिज्जगुर्वेष्टनं केचित् प्रोचुरदश्यदृश्यकगिरिं पौराणिका. सूरयः। करतलकलितामलकवदमलं सकलं विदन्ति ये गोलम् दिनकरकरनिकरलिङ्गिततनवसो नभसः स परिविरूढितस्तैः। ब्रह्माण्डमेतन्मितमस्तु नो वा कल्पे ब्रजः क्रामति योजनानि। यावन्ति पैरिह तदप्रमाणं प्रोक्तं खकक्षाख्यमिदं मतं नः" । प्रमाणशून्यत्वात् प्रयोजनाभावाच्चाशास्त्रिर्ब्रह्माण्डमानं न कथितमित्यर्थः" प्रमि०।

दानार्थकल्पिते महादानान्तर्गते ब्रह्माण्डात्मकस्वर्णादिघटिते २पदार्थे तत्स्वरूपादि हेमा०दा०ख०मत्स्यपु०उक्तं यथा "अथातः संप्रवक्ष्यामि ब्रह्माण्डं विधिपूर्वकम्। सर्वेषां सर्वभूतानां महापातकनाशनम्। पुराय दिनमध्याह्ने तुलापुरुषदानवत्। कृत्विग्गणब्रह्मप्रसम्भारभूषणाच्छादनादिकम्। लोकेशावाहनं तद्वदधिवासनकं० तथा" तुलापुरुषदानवदिति, कालदेशर्त्विग्ब्राह्मणादिपूजाब्राह्मणवाचनगुरुकृत्विग्वरणसप्तपुर्वकादानकुण्डमण्डपवेदिकासम्भारलोकेशावाहनाधिवासनादि सर्वं मत्स्यपुराणोक्ततुलापुरुषदानविधिना वेदितव्यमित्यर्थः। "कुम्भीदिनप्तपलाद्भूर्नाम्नश्चच्छाच्च धक्षितः। अकलद्वयसंयुक्तं ब्रह्माण्डं काञ्चनं बुधः"। अकलद्वयं, खण्डद्वयम्। तल्लक्षणन्तु ब्रह्माण्डपुराणे "कुम्भच्छाया भवेद्याद्दक् प्रतीच्यां दिशि चन्द्रसाः। उदितः शुक्लपक्षादौ वपुरण्डस्य तादृशमिति" कुम्भच्छाया इति, कुम्भाकारा छाया कुम्भच्छाया। अधोधाहीनकुम्भादिजेत्यवधेयम्। "दिग्गजाष्टकसंयुक्तं ब्रह्मद्वेदाङ्गयमन्वितम्। लोकपालाष्टकोपेतं मध्यस्थितचतुर्मुखम्। शिवाच्युतार्कशिखरसप्तलक्ष्मीसमन्वितम्। वस्वादित्यमरुद्गर्भं महारत्नसमन्वितम्" । अथैतेषां दिग्गजप्रभृतीनां क्रमेण लक्षणान्युच्यन्ते व्यादिमपुराणे "शुभ्राभश्च चतुर्दन्तः श्रीमानैरावतो गजः। पुष्पदन्तो बृहत्काक्षः सदृन्तः पुष्पदन्तवान्। सामान्यगजरूपेण शेषा दिक्करिणः स्मृताः"। तल्लक्षणानि भाषान्तरे "ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः"। वेदाङ्गानि स्मरन्ति पुराणे "शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषास्थिति । छन्दसेति प्रसिद्धानि वेदाङ्गानि प्रचक्षते। मन्त्राणि ब्रह्मणो लोके शास्त्रस्यापि तानि तु। द्विजातिभिः शुभाख्यानि वामे दधसि कुण्डिकाम्"। तानि च पश्चिमदिशि वेदसन्निधौ निवेशनीयानि दिग्विशेषानास्नानात् प्रधानं नीयमानं हि तदङ्गान्यपकर्षतीतिन्यायात्, वक्ष्यते च, "पश्चिमे चतुरोवेदानिति"। लोकपालरूपाण्याह विश्वकर्मा "चतुर्दन्तो गजाह्वो वज्रपाणिः पुरन्दरः। प्राचीपतिः प्रकर्त्तव्यो नानाभरणभूषितः। पिङ्गश्मश्रुसमस्तेक्षाच्छ पीनाङ्गजठरोऽरुणः। क्रोधस्यः साञ्जनस्तस्य वह्निर्दिशः प्रक्लिधारकः। दैवतपीनो यमः कार्यो दण्डहस्तो विजानता। रक्तदृक् पाशधृक् क्रुद्धो निर्ऋतिर्विलताननः। पुरुषाग्र

खड्गहस्तश्च भूतवान् राज्यसंहतः। वरुणः पाशभृत् सौम्यः प्रतीच्यां मकराश्रयः। धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः। दशाश्वरथगः सोमो गदापाणिर्वरप्रदः"। "अथकवाङ्मनः" इत्यागमान्तरम्। "पूर्वोत्तरे त्रिनेत्रस्य वृषभस्यस्थिसम्भवः। कपालपाणिश्चन्द्रार्द्धभूषणः परमेश्वरः"। चतुर्मुखरूपन्तु विष्णुधर्मोत्तरात् "पद्मवत्यासनस्थश्च ब्रह्मा कार्यश्चतुर्मुखः। अक्षमालाकमण्डलुं बिभ्रत् पुस्तकञ्च कमण्डलुम्। वामः कृष्णाजिनं तस्य पार्श्वे हंसस्तथैव च"। शिवलक्षणमुक्तं वायुपुराणे "पञ्चवक्त्रो दशभुजः प्रतिवक्त्रं त्रिलोचनः। कपालशूलखट्वाङ्गी चन्द्रमौलिः सदाशिवः"। विष्णुलक्षणमुक्तं तुलापुरुषदाने। सूर्य्यलक्षणमुक्तं विष्णुधर्मोत्तरे "रविः कार्य्यः शुभश्मश्रुः सिन्दूरारुणसन्निभः। पद्मासनः पद्मकरो भूषितो रथनाधरः"। उमालक्ष्मीसमन्वितमित्यत्र, शिवाच्युतयोः सन्निहिते उमालक्ष्म्यौ विधेयौ। उमालक्षणमुक्तं देवीपुराणे "गौरीं शङ्खेन्दुवर्णाभां सर्वदीक्षानिषेवितां। दक्षपद्मासनासीनां साक्षसूत्रकमण्डलुम्। वरदोद्यतरूपाञ्च सर्वभाल्यफलप्रियाम्"। वरदोद्यतरूपाञ्च, वरदाभयपाणिकामित्यर्थः। लक्ष्मीलक्षणमुक्तं पञ्चरात्रे "पद्मासनस्थां कुर्वीत श्रियं त्रैलोक्यमातरम्। गौरवर्णां सुरूपाञ्च सर्वालङ्कारभूषिताम्। रौक्मपद्मकरद्वयां वरदां दक्षिणेन तु"। वस्वादित्यरूपाणि, नारदीये, "प्रसन्नवदनाः सौम्या वरदाः शक्तिपाणयः। पद्मासनस्था द्विभुजाः कर्त्तव्या वसवः सदा। पद्मासनस्था द्विभुजाः पद्मगर्भसमप्रभाः। करादिस्कन्धपर्य्यन्तनालपङ्कजधारिणः। अधःसंस्थितमेषादिराशयः प्राङ्मुखास्त्विकाः। इन्द्राद्या द्वादशादित्याः स्वस्वोर्ध्वमण्डलमध्यगाः" तथा। वायुतुल्येन रूपेण मरुतो नाम देवताः"। कर्त्तव्या इति शेषः, वस्वादिनामानि, तुलापुरुषोक्तानि वेदितव्यानि। सकारत्नसमन्वितमिति, सकारत्नानि परिभाषायामुक्तानि, अनन्तमिथुनान्वितमिति क्वचित्पाठः। "कणासम्प्रान्वितोऽनन्तः पृथ्वी स्त्रीरूपधारिणीत्यनन्तमिथुनम्। अथ प्रकृतमुच्यते "वितस्तेरङ्गुलयुतं यावदायामविस्तरम्। कौशेयवस्त्रसंवीतं तिलद्रोण्योपरि न्यसेत्। तथाष्टादश धान्यानि सप्तनात्परिकल्पयेत्"। वितस्तेरङ्गुलयुतमिति, द्वादशाङ्गुलमारभ्याङ्गुलशतं यावच्छक्त्यनुसारेण कार्य्यमित्यर्थः। द्रोणमानमष्टादश धान्यानि च परिभाषायां द्रष्टव्यानि। स च तिलद्रोणो वेदिकायां लिखितचक्रोपरि स्थापनीयः। "पूर्वेशानान्तशयनं प्रद्युम्नं पूर्वदक्षिणे। अनन्तर्दक्षिणे देशे संकर्षणमतः परम्। पश्चिमे चतुरोवेदाननिरुद्धमतः परम्। अग्निसुत्तरतो हैमं वासुदेवमतः परम्। सप्तनाड्युपपीठस्थानर्चयेत् काञ्चनान् बुधः। स्थापयेदङ्गसंवीतान् पूर्णकुम्भान् दशैव तु"। पूर्वेशेत्यादि, ब्रह्माण्डात् पूर्वदेशे अनन्तशयनं शेषशायिनं गुण(सत्त्वादि)पीठे स्थापयेत्, तन्मूर्त्तिलक्षणं विष्णुधर्मोत्तरात् "देवदेवश्च कर्त्तव्यः शेषसुप्तश्चतुर्भुजः। एकपादोऽस्य कर्त्तव्यो लक्ष्म्यास्तृतीयकृतः प्रभोः। तथाऽपरस्य कर्त्तव्यः शेषभोगाङ्कसंस्थितः। एकोभुजोऽस्य कर्त्तव्यस्तस्य जानौ प्रसारितः। कर्त्तव्यो नाभिदेशस्थस्तथा तस्यापरः करः। तथैवान्यः करः कार्य्यो देवस्य तु शिरोधरः। सन्तानमञ्जरीधारी तथाचास्य करः परः। नाभिसम्भूतकमले सुखासीनः पितामहः। नालसंस्थौ तु कर्त्तव्यौ पद्मस्थौ मधुकैटभौ। शङ्खचक्रगदादीनि मूर्त्तीनि परितो न्यसेदिति"। प्रद्युम्नलक्षणं पञ्चरात्रादिषु "दक्षिणोर्द्धकरे पद्मं दद्याच्छङ्खमधः करे। चक्रमूर्द्धे ततो वामे गदां दद्यात् तथा द्विज!। बाणेषुधृग्वा प्रद्युम्नो रूपवान् विश्वमोहनः" इति। अत्र यद्यपि प्रकृतेरव्यक्तरूपत्वया विधानमशक्यं तथापि लक्ष्म्यादिशब्दव्यपदेश्यं सकरमस्ति तद्रूपमित्यतस्तदन्यतनरूपमिर्माणमेव न्याय्यम्। तदुक्तं मार्कण्डेयपुराणे "सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी। मातुलङ्गं गदां खेटं पानपात्रञ्च बिभ्रती। नागं योनिञ्च लिङ्गञ्च बिभ्रती नृप! मूर्द्धनीति"। संकर्षणरूपम् विष्णुधर्मोत्तरे "वासुदेवस्य रूपेण कार्य्यः संकर्षणः प्रभुः। स तु शुक्लवपुः कार्य्यो नीलवासा यदूत्तम!। गदास्थाने च मुसलशङ्खस्थाने च लाङ्गलमिति"। वेदमूर्त्तयो मूनघटे वक्ष्यन्ते। अनिरुद्धरूपं नारदीये। "कृष्णं चतुर्भुजं दक्षे शरं खड्गं तदुत्तरे। अन्तःखेटधरं वीरमनिरुद्धं प्रचक्षते"। अग्निलक्षणमुक्तम्। "वासुदेवरूपमपि नारदीये "वासुदेवः शिवः शान्तः पितामश्च चतुर्भुजः। योगमूर्द्धोर्द्धशङ्खश्च कृष्णे शार्ङ्गिवरुक्षकः। धारयेदुत्तरे चक्रं करे वै दक्षिणे गदामिति"। एते च देवताविशेषा, ब्रह्माण्डनिर्माणकृत्प्रस्तुवत्वात् पृथक् स्तुवर्त्तैव घटनीयाः ब्रह्माण्डस्य किल विंशतिपलात्प्रभृति पलसप्तत्यावधिरिह नियतः, पुराणेषु दृश्यते ततोऽवश्यम्

माणकाञ्चने तस्मिन् न्यूनसंख्यत्वादयथावद्विहितत्वमापद्यते। न च दिग्गजाष्टकसंयुक्तं लोकपालोपेतमित्यादिना एक एव तावद्भिरङ्गैरङ्गी निष्पाद्यत इति ब्रह्माण्डपुराणवचनेनैव दिग्गजादिप्रतिमानिर्मितौ न कश्चिद्बाध इति वाच्यं, "ब्राह्मणान् कारयेदिति" पुनः काञ्चनोपदेशानार्थक्यापत्तेः। अस्य यमाद्यपरिभाषानां प्रतिमानामङ्गुष्ठपर्वप्रभृतिवितस्तिपर्य्यन्तं यथाशक्ति परिमाणं कल्पनीयम्। "पूर्णकुम्भान् स्थापयेदित्यत्र समन्तादिति योज्यम्। "दशैव धेनवो देया सहेमाम्बरदोहनाः। पादुकोपानहच्छत्रचामरासनदर्पणैः। भक्ष्यभोज्याढ्यदीपेच्छुफलमाल्यानुलेपनैः। होमाधिवासनान्ते च स्थापितो वेदपुङ्गवैः। इत्यनुच्चारयेन्मन्त्रं त्रिःकृत्वाथ प्रदक्षिणम्" । सहेमाम्बरदोहना इति, हेमशृङ्गाः ताम्रदोहनाः सवस्त्राः पार्श्वतो दक्षिणार्थमुपकल्पनीयाः। तत्राचार्य्याय हे, ऋत्विग्भ्योऽष्टौ संप्रदेया, ज्ञापकादीनां अन्यैव यथाशक्ति दक्षिणेति,। भविष्योत्तरे तु "शय्यं निष्कशतं यार्घ्यमित्यादिना सुवर्णमेव दक्षिणार्थमुपकल्पनीयमित्युक्तं, श्राद्धाधिवासनदिनाद्व्येद्युरग्निकुण्डेषु ऋत्विगुपवेशनादिकर्मशेषसमाप्तौ सुवापुरुषदानवद्विहितायां, पूर्ववदेव स्थापितः शुक्लमाल्याम्बरधरो गृहीतकुशमाञ्जलिर्यजमानो ब्रह्माण्डं त्रिःप्रदक्षिणीकृत्य मन्त्रमुच्चारयेत्। मन्त्रः। "नभोऽस्तु विश्वेश्वर! विश्वधामन्! जगत्सवित्रे भगवन्नमस्ते। सप्ताधिलोकाम्बरभूतलेन गर्भेण सार्द्धं वितराभिरक्षाम्। ये दुःखितास्ते सुखिनो भवन्तु प्रयान्तु पापानि चराचराणाम्। त्वद्दानशक्त्याहृतपातकानां ब्रह्माण्डदोषाः प्रलयं व्रजन्तु। एवं प्रयच्छामरविश्वगर्भं ददाहु द्विजेभ्यो दयधा विभज्य। भागद्वयं तत्र गुरोः प्रकल्प्य समग्रजेऽक्षेमतः क्रमेण"। दानवाक्यं सुवापुरुषवद्वेदितव्यं तत्र दयधा विभज्य गुरोर्भागद्वयं प्रकल्प्य अवशिष्टाष्टभागानामेकैकं भागं त्रिधा विभज्य चतुर्विंशतिसंख्येभ्य ऋत्विगादिभ्यः समं दद्यात्, तदनुत्तरान्येभ्योऽपि ब्राह्मणेभ्यो दद्यात्। "स्वल्पं होमं गुरुरेक एव कुर्यादर्थैकाग्निविधानयुक्त्या। स एव संपूज्यतमोऽल्पवित्तैर्यथोक्तवस्त्राभरणादिकेन"। विंशतिपलादारभ्य पलसहस्रावधिर्द्रव्ये ब्रह्माण्डे सहस्रतद्द्वादित्युत्तममध्यमादित्रैविध्यकल्पनायां कनीयोभागस्यालपत्वमवधेयं, विंशतिपलनिर्मितस्यैवालपत्वमित्येके उक्तविंशतिपलादर्वाक् यथाशक्तिविधाने स्वल्पत्वमवगन्तव्यमिति केचित्। एकाग्निविधानन्तु एकस्मिन्नेव कुण्डे होमकरणम् कुण्डमपि वक्ष्यमाणस्थितं वृत्ताकारञ्च कार्य्यं तदेतत्परिभाषायामुपपादितम्। अथ पुण्याहवाचने कृते देवतावेदीसमीपं गत्वा पूर्ववद्यजमानेन देवतापूजायां विहितायामाचार्य्यो विसर्जनं विदध्यात्। "इत्थं य एतदखिलं पुरुषोऽत्र कृत्वा-दब्रह्माण्डदानमधिगम्य सहद्विमानम्। निर्धूतकल्मषविशुद्धतनुर्नरारेरानन्दकृत् पदमुपैति सहाप्सरोभिः। सन्तारयेत् पितृपितामहपुत्रपौत्रबन्धुप्रियातिथिकुलत-यताष्टकं सः। ब्रह्माण्डदानयजनीकृतपातकौघमानन्देच्च जननीकुलमप्यशेषम्। इति पठति शृणोति वा य एतत् सुरभवनेषु गीयते धार्मिकाग्र्याम्। मतिमपि च ददाति मोदते सोऽमरपतिभवने सहाप्सरोभिः"। "राजोवाच विधिं ब्रह्माण्डदानस्य श्रुत्वा यं मोक्षभाग्भवेत्। कालं देशं द्विजं तीर्थं कर्मैतदवदस्व मे। श्रुतेन येन सर्वस्य फलभागी भवाम्यहम्। कृतूत्सितस्यास्य भावस्य मोक्ष स्यादचिराच्च मे। वशिष्ठ उवाच "एवं श्रुत्वा ततो राजन्! पुरोधास्तस्य तं द्विजः। ब्रह्माण्डं कारयामास सौवर्णं सर्वधातुभिः। पीठं निष्कसहस्रेण पद्मं तत्र प्रकल्पयेत्। तत्र ब्रह्मा तस्य मध्ये पद्मरागैरलङ्कृतः। सावित्र्या चैव गायत्र्या ऋग्भिर्मुनिभिः सह। नारदाद्यैः सुतैः सर्वैरिन्द्राद्यैश्च सुरैस्तथा। सौवर्णविग्रहाः सर्वे ब्रह्मणस्तु पुरःसराः। वाराहरूपो भगवान् लक्ष्म्या सह सनातनः। नीलान्मरकतांश्चैव भूषायास्तस्य कारयेत्। रजतस्य विष्णुस्य देहं रुद्रस्य कारयेत्। गोमेदकैस्तस्य शोभाङ्गारयेदलं बुद्धिमान्। मौक्तिकैश्चापि सोमस्य शोभां वलक्षैर्दिवाकरैः"। सावित्रीगायत्र्यौ तु, ब्रह्मणः पार्श्वभागे स्थापनीयौ। तदाह नारदः "सावित्री दक्षिणे पार्श्वे गायत्री नाम वामतः। विलोकयन्त्यौ ब्रह्माणं सास्रसूत्रकमण्डलुम्"। ऋषयः सप्त गोतमाद्याः तदुक्तमादित्यपुराणे "गौतमस्य भरद्वाजो विश्वामित्रस्य काश्यपः। जमदग्निर्वशिष्ठोऽत्रिः सप्त वैवस्वतेऽन्तरे"। सप्तर्षिलक्षणमाह यमः "सप्तर्षयस्तु जटिलाः कमण्डल्वक्षसूत्रिणः। ध्याननिष्ठा वशिष्ठस्तु कार्य्यो भार्य्यासमन्वितः"। वानप्रस्थाः, नारदाद्यैरिति तेषां विशेषणम्। अनुः "अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुस्तरम्। पतीन् प्रजानामसृजं महर्षीनादितो दश। मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम्। प्रचेतसं वशिष्ठञ्च

भृगुद्वारदमेव च"। तल्लक्षणमाह विश्वकर्मा "जटिलाः मुक्तबुद्धाः शान्ता दशाऽऽधमनिसन्नताः। शुक्लाम्बराः कार्य्या सुनयो द्विभुजाः सदा। तेषु सव्यभुजामूर्ध्वस्थितः क्षीरस्तु नारदः। कर्पूरगौरदेहश्च साक्षसूत्रकमण्डलुः"। इत्यादिरूपाण्यपि प्रागभिहितानि। वाराहरूपं विष्णुधर्मोत्तरे "वाराहरूपः कार्यस्तु शेषोपरिगतः प्रभुः। शेषश्चतुर्भुजः कार्य्यश्चारुरत्नफणान्वितः। कर्त्तव्यौ शोरसुमलौ करयोस्तस्य यादव!। सर्परूपस्य कर्त्तव्यस्तथैव रचिताञ्जलिः। आलीढस्थानसंस्थानस्तत्पृष्ठे भगवान् भवेत्। वामारत्निगता तस्य योषिद्रूपा वसुन्धरा। नमस्कारपरा तस्य कर्त्तव्या द्विभुजा शुभा। यस्मिन् भुजे धरा देवी तत्र शङ्खः करे भवेत्। अन्ये तस्य कराः कार्य्याः पद्मचक्रगदाधराः। पद्मासनस्थां कुर्वीत श्रियं त्रैलोक्यमातरम्। गौरवर्णां सुरूपाञ्च सर्वालङ्कारभूषिताम्। रौक्मपद्मकरव्यग्रां वरदां दक्षिणेन तु"। रुद्ररूपं प्रागभिहितं अष्टलक्षणानि तद्वर्णाश्च नवग्रहदाने वक्ष्यन्ते। सर्ववर्णानि अष्टसमानवर्णानि, रत्नानि भूषणार्थं दापयेदित्यर्थः। सर्वधातुभिः ब्रह्माण्डं कर्त्तव्यमित्युक्तं, तत्र सुवर्णस्य पीठनिर्माणादिविनियोगमभिधायेदानीं धात्वन्तरैः कर्त्तव्यं तदुच्यते "पीठात् सप्तगुणं रौप्यं रौप्यात्ताम्रं तथाविधम्। ताम्रात् सप्तगुणं कार्यं कांस्यमत्र नराधिप!। त्रयुणः परतः सीसं तावल्लोहं च कारयेत्। सप्तद्वीपाः समुद्राश्च सप्तैव कुलपर्वताः। अनया संख्यया ज्ञात्वा निपुणैः शिल्पिभिः कृताः"। तथाविधं सप्तगुणमित्यर्थः सप्तद्वीपा इत्यादि एतेषामेकैकधातुना एकैकं द्वीपं समुद्रं कुलाचलञ्च रचयेदित्यर्थः। "यादसानि च भूतानि राजतान्येव कारयेत्। चारण्यानि च सत्त्वानि सौवर्णानि च कारयेत्। वृक्षान् वनस्पतींश्चात्र फलवल्लोः सवीरुधः"। यादसानि, जलजन्मवानि, पुष्पफलवन्तो वृक्षाः अपुष्पाः फलिनोऽनस्पतयः, वीरुधोगुच्छगुल्मादयः। "सर्वं प्रकल्प्य विधिवत्तीर्थे देयं विचक्षणैः। कुरुक्षेत्रे गयायां च प्रयागेऽमरकण्टके। द्वारवत्यां प्रभासे च गङ्गाद्वारे च पुष्करे। तीर्थश्रेष्ठेषु वै देयं ग्रहणे सोमसूर्ययोः। दिनक्षयेषु सर्वेषु अयने दक्षिणोत्तरे। व्यतीपाते गुरुगुणं विषुवे च विशेषतः। दातव्यमेतद्राजेन्द्र! विचारं नैव कारयेत्। कालाग्निहोत्रिणं विप्रं सुरूपञ्च गुणान्वितम्। सपत्नीकं च संपूज्य भूषयित्वा विभूषणैः। पुरोहितं सुलक्षणं कृत्वान्यांश्च तथर्त्विजः। चतुर्विंशद् गुणोपेतान् सपत्नीकान्निमन्त्रितान्। अक्षतास्वरसुच्छन्नान् सन्विणः सुविभूषितान्। अङ्गुलीयकरत्नानि कर्णवेष्टांश्च दापयेत्। एवंविधांश्च संपूज्य तेषामग्रे स्वयं स्थितः। अष्टाङ्गप्रणिपातेन प्रणम्य च पुनः पुनः। पुरोहिताय पुरतः कृत्वा वै करसंपुटम्। यूयं वै ब्रह्मणा धाता, मैत्रत्वेनानुगृह्यताम्। सौमुख्येनेह भवतामभवेत् पूतोनरः स्वयम्। भवतां प्रीतियोगेन स्वयं प्रीतः पितामहः। ब्रह्माण्डेन तु दत्तेन तेषां प्रीतो जनार्दनः। पितामहाग्निभगवान् शक्रश्च त्रिदशेश्वरः। एते वै तोषमायान्ति अनुध्याता द्विजोत्तमैः। एवं स्तुत्वा ततो राजा ब्राह्मणान् वेदपारगान्। ब्रह्माण्डं गुरवे प्रादात् सविधानं पुनः पुनः। सर्वकामैस्ततस्तप्तो ययौ स्वर्गं नराधिपः। तेनापि गुरुणा तच्च विभक्तं ब्राह्मणैः सह। दत्तस्तैरपि चान्येभ्यो ब्रह्माण्डांशो नराधिप!। ब्रह्माण्डं भूमिदानं च ग्राह्यं नैकेन तद्भवेत्। यद्भुन्तोषमवाप्नोति ब्रह्महत्यां न संशयः। सर्वेषाञ्चैव प्रत्यक्षं दातव्यं तन्नराधिप!। दीयमानञ्च पश्यन्ति तेऽपि पूता भवन्ति हि। दर्शनादेव ते पूता भवेयुर्नात्र संशयः"। पद्मपुराणोक्तस्तद्विधिर्यथा

"शृणु वत्स! प्रवक्ष्यामि ब्रह्माण्डाख्यं पुरातनम्। तच्च द्वादशसाहस्रं भाविकल्पकथायुतम्। प्रक्रियाख्यो१ऽनुषङ्गाख्य२ उपोद्घात३स्तृतीयकः। चतुर्थ उपसंहार४ः पादाश्चत्वार एव हि। पूर्वपादद्वयं पूर्वो भागोऽत्र सप्तसाहस्रकः। तृतीयो मध्यमो भागश्चतुर्थस्तूत्तरो मतः। तत्र पूर्वभागे प्रक्रियापादे "आद्यो ब्रह्मसमुद्देशो नैमिषाख्यानकं ततः। क्षिरण्यगर्भोत्पत्तिश्च लोककल्पनमेव च। एष वै प्रथमः पादो द्वितीयं शृणु मानद"। पूर्वभागे अनुषङ्गपादे "कल्पमन्वन्तराख्यानं लोकज्ञानं ततः परम्। मानससृष्टिकथनं रुद्रसर्गवर्णनम्। अष्टादेवविभूतिश्च ऋषिसर्गस्ततःपरम्। अग्नीनां विषयश्चाथ कालसङ्ख्यावर्णनम्। प्रियव्रताच्चोद्देशः पृथिव्याश्चाभिसारः। वर्णनं भारतस्यास्य ततोऽन्येषां निरूपणम्। जम्बादिसप्तद्वीपाख्या ततोऽधोलोकवर्णनम्। ऊर्ध्वलोकानुकथनं सप्तचारस्ततःपरम्। आदित्यव्यूहकथनं देवसप्तानुकीर्त्तनम्। नीलकण्ठाख्यायाख्यानं सप्तादेवस्य वैभवम्। अमावास्यानुकथनं युगतत्त्वनिरूपणम्। यज्ञप्रवर्त्तनं चाथ युगयोरन्ययोः क्षतिः। युगसन्ध्यालक्षणञ्च ऋषि-

प्रवरवर्णनम्। वेदानां व्यसनाख्यानं स्वायम्भुवनिरूपणम्। शेषमन्वन्तराख्यानं पृथिवीदोहनन्ततः। चाक्षुषेऽप्यतने सर्गो द्वितीयोऽङ्गिः पुरोदले"। मध्यभागे उपोद्घातपादे "व्ययोपोद्घातपादे तु सप्तर्षिपरिकीर्त्तनम्। प्राजापत्यचयस्तस्माद्देवादीनां समुद्भवः। ततो जयाभिव्याहारौ मरुदुत्पत्तिकीर्त्तनम्। काश्यपेयानुकथनम् ऋषिवंशनिरूपणम्। पितृकल्पानुकथनं आङ्गकल्पश्रुतेः परम्। वैवस्वतसमुत्पत्तिः सृष्टिस्तस्य ततः परम्। मनुपुत्राचयस्तातो गान्धर्वस्य निरूपणम्। इक्ष्वाकुवंशकथनं वंशोऽत्रेः सुमहात्मनः। चमावसोराचयस्य रजेश्चरितमद्भुतम्। ययातिचरितञ्चाथ यदुवंशनिरूपणम्। कार्त्तवीर्य्यस्य चरितं जामदग्न्यं ततः परम्। तृष्णिवंश्यानुकथन मगरस्याथ सम्भवः। भार्गवस्यानुचरितं तथाप्यैकवधाश्रयम्। सगरस्याथ चरितं भार्गवस्य कथा पुनः। देवासुराहवकथा कृष्णाविर्भाववर्णनम्। द्रुनस्य च क्षवः पुण्यः शुक्रेण परिकीर्त्तितः। विष्णुमाहात्म्यकथं बलिवंशनिरूपणम्। अविक्षिराजचरितं संप्राप्तेऽथ कलौ युगे। एवमुद्घातपादाख्यं तृतीयो मध्यमे दले"। उत्तरभागे उपसंहारपादे "चतुर्थमुपसंहारं वक्ष्ये खण्डे यथोत्तरे। वैवस्वतान्तराख्यानं विस्तरेण यथातथम्। पूर्वमेव समुद्दिष्टं संक्षेपादिह कथ्यते। भविष्यायां मनूनाञ्च चरितं हि ततः परम्। कल्पप्रलयनिर्देशः कालमानं ततः परम्। लोकास्तदैव यतः कथिता मानसैर्जनैः। वर्णनं नरकाणाञ्च विकर्माचरणैस्ततः। स्वनोसयपुराख्यानं लयः प्राकृतिकस्ततः। शैवस्याथ पुरस्यापि वर्णनञ्च ततः परम्। त्रिविधादुगुणसम्बन्धाल्लयानां कीर्त्तिता गतिः। अनिर्देश्याप्रतर्क्यस्य ब्रह्मणः परमात्मनः। चन्वयव्यतिरेकाभ्यां वर्णनं हि ततः परम्। सूत्रेण उपसंहारः पादो वृत्तः स चोत्तरः। चतुष्पादं पुराणं तै ब्रह्माण्डं समुदाहृतम्। अष्टादशसहस्रौघस्यं सारात् सारतरं द्विज!। ब्रह्माण्डञ्च चतुर्लक्षं पुराणत्वेन पठ्यते। तदेव व्यस्य गदितमष्टादशधा पृथक्। पाराशर्य्येण मुनिना सर्वेषामपि मानद!। वस्तुदृष्ट्याथ तैनैव मुनीनां भावितात्मनाम्। श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे। मुनयो धर्मगोप्तारस्ते दीनानुग्रहकारिणः। मया चेदं पुराणन्तु वधिश्याय पुरोदितम्। तेन शक्तिसुतायोक्तं जातूकर्ण्याय तेन च। व्यासो लब्ध्वा कृतञ्चैतत् प्रसङ्गेनसुखोक्तवत्। प्रमाणीकृत्य लोकेऽस्मिन् प्रावर्त्तयदनुत्तमम्"। तत्फलश्रुतिः "य इदं कीर्त्तयेद्वृत्तः! शृणोति च समाहितः। स विधूयेह पापानि याति लोकमनामयम्। लिखित्वैतत् पुराणन्तु स्वर्णसिंहासनस्थितम्। पाखण्डाच्छादितं यस्तु ब्रह्मणाय प्रयच्छति। स याति ब्रह्मणो लोकं नात्र कार्य्या विचारणा। मरीचे! ऽष्टादशैतानि मया प्रोक्तानि यानि ते। पुराणानि तु सर्वेषाच्छ्रोतव्यानि च विस्तरात्। अष्टादश पुराणानि यः शृणोति नरोत्तमः। कथयेद्वा विधानेन नेह भूयः स जायते। सूक्ष्ममेतत् पुराणानां यन्मयोक्तं तवाधुना। तच्चिन्त्यं श्रीलनीयं हि पुराणफलमिच्छता। न दाम्भिकाय पापाय देवगुर्वनसूयवे। देयं कदापि साधुना द्वेषिणे न शठाय च। शान्ताय रागिचित्ताय शुश्रूषाभिरताय च। निर्मत्सराय शुचये देयं सद्वैष्णवाय च" नारदीयपु० ४पा० १०६अ०।

ब्र(ब्र)ह्मात्मभू पु० ब्रह्मण आत्मनः देहात् भवति भू—क्विप्। ब्रह्मणे शब्दमाना तस्य ब्रह्मदेहजातत्वं दृ० उ० उक्तं यथा "प्राणा वै यशोवीर्य्यं तत् प्राणेषूत्क्रान्तेषु शरीरं श्रयितुमध्रियत तस्य शरीर एव मन आसीत्। सोऽकामयत मेध्यं स इदं स्यादात्मन्वन्नेन स्यामिति। ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम्" भू०। "तदेवं यशोवीर्य्यभूतेषु प्राणेषूत्क्रान्तेषु शरीराच्चिष्क्रान्तेषु तच्छरीरमचेतनमतिशुश्रूषुच्छूनभावञ्जन्तुभिर्भक्ष्यतामेध्यञ्चाभवत्। तस्य प्रजापतेः शरीराद्गतस्यापि तस्मिन्नेव शरीरे मन आसीत्। यथा कस्यचित् प्रिये विषये दूरङ्गतस्यापि मनो भवति तद्वत्। स तस्मिन्नेव शरीरे गतमनाः सन् किमकरोदिति। उच्यते सोऽकामयत कथं मेध्यं मेधार्हं यच्चिरं मे ममेदं शरीरं स्यात्। किञ्चान्वन्नेन स्यामिति प्रविवेश। तस्मात्तच्छरीरं मदियोगात् गतयशोवीर्य्यमश्वदश्वयत् ततश्चाश्वादश्वः समभवत्। ततोऽश्वमाभा प्रजापतिरेव साक्षादश्व स्तूयते। यस्माच्च पुनस्तत् प्रवेशाद्गतयशोवीर्य्यत्वादमेध्यं सन्मेध्यमभूत्तस्मादेवाश्वमेधस्याश्वमेधनाम्नः क्रतोरश्वमेधत्वमश्वमेधनामलाभः" भा० भा०

ब्र(ब्र)ह्मादनी स्त्री ब्रह्मा ब्रह्मवाहनं हंस तस्येवादनं प्राप्तं रूपं यस्याः गौरा० ङीष्। हंसपद्यां राजनि०।

ब्र(ब्र)ह्माभिजाता स्त्री गोदावर्य्यां राजनि०।

ब्र(ब्र)ह्मानन्द पु० ब्रह्मस्वरूपानन्दे तस्य तुल्यादि-

जानानन्देभ्यः श्रेष्ठत्वम् श्रुत० ब्रा० १४।७।१।२१ वा आदौ उक्तं यथा

"एषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यै-वानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति । स यो मनुष्याणां राद्धः समृद्धो भवति । अन्येषामधिपतिः सर्वैर्मानुष्यकैः कामैः सम्पन्नतमः स मनुष्याणां परम आनन्दः । अथ ये शतं मनुष्याणामानन्दाः । स एकः पितॄणां जितलोकानामानन्दः । अथ ये शतं पितॄणां जितलोकानामानन्दाः । स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते । अथ ये शतं कर्म-देवानामानन्दाः । स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतमाजान-देवानामानन्दाः । स एको देवलोक आनन्दो यश्च श्रो-त्रियोऽवृजिनोऽकामहतः । अथ ये शतं लोक आ-नन्दाः । स एको गन्धर्वलोक आनन्दो यश्च श्रोत्रि-योऽवृजिनोऽकामहतः । अथ ये शतं गन्धर्वलोक आ-नन्दाः । स एकः प्रजापतिलोक आनन्दः अथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आ-नन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः एष ब्रह्मलोकः सम्राडिति" मु० । "परमो मोक्षलक्षणो लोकः स्वयं-ज्योतिःस्वभावो लोकयन्त्रस्य सुखवृत्तिविषयः-स्वाभाविकः । परमः स्वरूपानुभवलक्षणो मुख्यो नि-रतिशय आनन्दः पूर्णानन्दः । किं च वस्तुतो नास्ये-वाल्पसुखातिरिक्तं दैषयिकमपि सुखमित्याह एतस्यै-वानन्दस्य मात्रां कलामल्पांशमविद्यया ब्रह्मणो-ऽन्यत्वेन परिकल्पितानि ब्रह्मादिस्तम्बपर्यन्तानि भूता-न्युपजीवन्ति उपभुञ्जते यावदुत्पत्त्यैवानन्दीनि भव-न्तीत्यर्थः । मानुषानन्दमारभ्य ब्रह्मानन्दपर्यन्तसुखतरो-त्तरशतगुणितातिशयशालिनां परब्रह्मानन्दावयवभाजां प्रतिपादनद्वारेणावयविनं निरुत्तमधिगतभेदमनतिशयं ब्रह्मानन्दं दर्शयितुत्तरा श्रुतिः प्रवर्त्तते" भा० ।

ब्र(ब्र)ह्मापेत पु० सूर्यमण्डलस्थराक्षसभेदे "तक्षा च यस्य-दनिश्च कम्बलोऽथ तिलोत्तमा । ब्रह्मापेतोऽथ कृत-जिद्बृतराष्ट्रश्च सप्तमः । माघमासे वसन्त्येते सप्त सैवेय आस्करे" विष्णु० २अंशे १०अ० ।

ब्र(ब्र)ह्मारण्य न० ब्रह्मणोऽरण्यमिव । वेदपाठभूमौ त्रिका०

ब्र(ब्र)ह्मार्पण न० १सर्वकर्मकर्त्रीश्वरायात्मकतया ब्रह्मचिन्तने ब्रह्मणि परमात्मनि ईश्वरे २सर्वकर्मफलानां सन्न्यासे च तत्-

क्रमेपु० ४अ० दक्षो यथा "ब्रह्मणा दीयते देयं ब्रह्मणे संप्रदीयते । ब्रह्मैव दीयते चेति ब्रह्मार्पणमिदं परम् । नाहं कर्त्तास्य सर्वमेतद्ब्रह्मैव कुरुते तथा । एतद् ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः । प्रीयतां भगवानीशः कर्मणा-ऽनेन शाश्वतः । करोति सततं बुद्धा ब्रह्मार्पणमिदं परम् । यद्वा फलानां सन्न्यासं प्रकुर्य्यात् परमेश्वरे । कर्मणामेत-दप्याहुर्ब्रह्मार्पणमनुत्तमम्" ।

ब्र(ब्र)ह्मावर्त्त पु० "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते" मनूक्ते १देशभेदे २तत्रस्थे तीर्थभेदे च भा०व० ८३अ० ।

ब्र(ब्र)ह्मासन न० हृत० । ब्रह्मण ऋत्विग्भेदस्य १आसने ब्रह्मास्तरणादयोऽस्यत्र । ब्रह्मणस्तदुपासनाङ्गमासनम् । २पद्मस्वस्तिकादौ आसने । "ब्रह्मासनं तदाख्यं यद् कृत्वा ब्राह्मणो भवेत् । एकपादमूरौ दत्त्वा तिष्ठेद्दृष्ट्वा-कृतिर्भवेत्" रुद्रया० उक्तो देवपूजाङ्गे २आसनभेदे च ।

ब्र(ब्र)ह्मास्त्र न० हृत० । अस्त्रभेदे भा० आ० १६६ अ० ।

ब्र(ब्र)ह्माहुति न० ब्रह्मैवाहुतिः । वेदाध्ययने "ब्रह्म हुतिर्हुतं पुण्यमनध्यायवषट्कृतम्" मनुः ।

ब्र(ब्र)ह्मिन् पु० ब्रह्मवेदस्तपो वाऽस्यास्य श्रेष्ठतया ब्रह्मा० इनि टिलोपः । वेदतपसोः श्रेष्ठीभूते १परमेश्वरे । तदाराधनार्थमेव तयोरनुष्ठानात् तस्य तच्छ्रेष्ठित्वम् । "ब्रह्मविद् ब्राह्मणो ब्रह्मी" विष्णुस० । ब्रह्म वेदो वेदतयास्यास्य इनि । २वेदतदर्थाभिज्ञे ।

ब्र(ब्र)ह्मिष्ठ त्रि० अतिशयेन ब्रह्मी ब्रह्मन् इष्ठन् टिलोपः । अतिशयेन ब्रह्मज्ञे । "ब्राह्मणा भगवन्तो यो ब्रह्मिष्ठः स एषा (गाः) ददतामृ" भ० । "ब्रह्मिष्ठमाधाय निजेऽधिकारे ब्रह्मिष्ठमेव स्वतनुप्रसूतम्" रघुः । २दुर्गायां स्त्री "ब्रह्मिष्ठा वेदसारत्वात् गायत्री चरणान्मता । वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी" देवीपु० ४५अ० ।

ब्र(ब्र)ह्मी स्त्री ब्रह्मणे हिता मेधाजनकतया अण् टिलोपः भा० न ङीष् । (वामनहाटि) खनामख्याते लतामेदे त्रिका० ।

ब्र(ब्र)ह्मीघृत न० खारस्वतघृतमिति ख्याते औषधविशेषे यथा "यमूलपलाशत्वक्पाथत्र ब्रह्मीं प्रक्षाल्य वारिणा । उदूखले खोदयित्वा रसं वस्त्रेण गालयेत् । रसे घृतचतुर्गुणे तस्मिन् घृतस्य विपाचयेत् । कुटिदा

मालतीकुष्ठं हरितो च हरीतकी। एतेषां पालिकैर्भागैः श्रेष्ठास्तु कार्षिकाः स्मृताः। पिप्पल्योऽथ विड़ङ्गानि सैन्धवं शर्करा वचा। सर्वमेतत् समानीत्य शनैर्मृदग्निना पचेत्। एतत् प्राशितमात्रेण वाग्विशुद्धिः प्रजायते। सप्तरात्रप्रयोगेण किन्नरैः सह गीयते। द्विरात्रप्रयोगेण स्वरो भवति कोकिलः। मासमेकं प्रयोगेण भवेत् श्रुतिधरो नरः। पञ्च गुल्मान् प्रमेहांश्च कासं पञ्चविधं जयेत्। बन्ध्यानाञ्चैव नारीणां नराणामल्परेतसाम्। इतं सारस्वतं नाम बलवर्णबपुःप्रदम्" चिकित्सारत्नसंग्रहः।

ब्र(ब्र)ह्मोद्य ब्रह्मणि तपसि श्येते शी-अच् पृषो०।१कार्त्तिकेये भा०व० २२१ अ०। २विष्णौ च भा०शा०३४०अ०।

ब्र(ब्र)ह्मोज्झ पु० ब्रह्म वेदमुज्झति उज्झ-त्यागे अण् उप० स०। वेदत्यागिनि "ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः। मद्विताद्याद्ययोर्जग्धिः सुरापानसमानि षट्" मनुना तत्त्यागस्यानुपातकत्वसङ्कम्।

ब्र(ब्र)ह्मोड़(डु)म्बर न० तीर्थभेदे भा० व० ८३ अ०।

ब्र(ब्र)ह्मोत्तर त्रि० ब्रह्मा ब्राह्मणः उत्तरोऽधिकारी यस्य। ब्रह्मस्वामिके भूम्यादौ। २ब्रह्मप्रधाने च।

ब्र(ब्र)ह्मोद्य न० वद्-भावे क्यप् ह्रस्व०। ब्रह्मप्रतिपादकवाक्ये कात्या० श्रौ० १२।४।२०। २ब्रह्मकथने च "ब्राह्मणा भगवन्तो हन्ताहमिमं (यज्ञम्) द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चित् ब्रह्मोद्यं जेतेति" छ० उ०।

ब्र(ब्र)ह्मोपनेतृ पु० ब्रह्माणं विप्रमुपनयते तत्रेतदण्डहेतुत्वात् उप-नी-तृच्। पलाशदण्डे "विप्रस्य पालाशो दण्ड" स्मृतिः।

ब्र(ब्र)ह्मोपनिषद् स्त्री उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।

ब्र(ब्र)ह्मौदन पुंन० ब्रह्मार्थमोदनम्। यज्ञे ऋत्विग्भेदार्थे कर्त्रे। "ब्रह्मौदनं पचति चतुर्णां पात्राणामङ्गविप्रकृतानाञ्च" कात्या०श्रौ० २०।१।४। "चतुर्णां पात्राणां चतुर्णामङ्गानां चतुर्णां प्रकृतानां च प्रकृतत्वैकाकृत्वि कोशः। "अन्नेनमाद्यत्विग्भ्यः प्रयच्छति" श्रु०। "एनमोदनम्" कर्कः।

ब्रा(ब्रा)ह्म न०ब्रह्मण इदम्, तेन प्रोक्तम् वा अण् टिलोपः। १अङ्गुष्ठमूले तीर्थे, तेन हि तीर्थेन द्विजाचमनं विहितमिति तस्य तत्सम्बन्धित्वम् "प्रागग्रा ब्रा(ब्रा)ह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्" इति मनुः। "अङ्गुष्ठोत्तरतो रेखा या पाणेर्दक्षिणस्य च। एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै" स्मृतिः। २नारदे पु०जटा०। ब्र(ब्रा)ह्मणोक्ते अष्टादशपुराणान्तर्गते श्रीमद्भागवतपुराणभेदे न०। ३विवाहभेदे ५पारदे च पु०। ४सरस्वत्यां तदधिष्ठातृकायां ७वाचि ८सोमलतायां ९ब्रह्मक्रीयाकै (वामनहाटि) शाकभेदे च स्त्री। "व्याहृत्तावां गुरुकुलात् विप्राणां पूजको भवेत्। न्यूषाणामृचयो ह्येष ब्राह्मो धर्मो विधीयते इति मनूक्ते राज्ञां १०धर्मभेदे पु०। ११मातृभेदे स्त्री ङीप्। "ब्राह्मी नारायणी तद्वेति" कालिकावचनम्। "वृद्धदक्षाः शरीरं यदप्रमेयं प्रमाणतः। वृद्धदिस्तीर्णमित्युक्तं ब्राह्मी देवी ततः स्मृता देवीपु० उक्तनिरुक्तनायां १२देव्याञ्च स्त्री १३ब्रह्मसम्बन्धिनिमात्रे त्रि० स्त्रियां ङीप् "एषा ब्राह्मी स्थितिः पार्थ!" गीता। सरस्वत्या ब्रह्मजातत्वं च ब्रह्माणीशब्दे दर्शितं तत्र दृश्यम्। "ब्राह्मी हिमा सरा तिक्ता लघुर्मेध्या च गीतला। कषाया मधुरा स्वादुपाकायुष्या रसायनी। स्वर्या चक्षुष्प्रदा कुष्ठपाण्डुमेहाम्रकासजित्। विषशोथज्वरहरी तद्वन्नाड्यङ्गकृपण्यपि" भावप्र० ब्राह्मीशाकस्य गुणा उक्ताः। १४वाराहीकन्दे १५छिन्नरोचिकायां स्त्री राजनि०। १६रोहिण्यां स्त्री १७नक्षत्रे न० तयोर्ब्रह्माधिष्ठातृदेवताकत्वात् तथात्वं "रात्रेश्च पश्चिमे भागे मुहूर्त्तो ब्राह्म उच्यते" पितामहोक्ते रात्रिशेषयामास्थिते अरुणोदयकालात् प्रागुदग्दण्डद्वयात्मके१८ काले पु०१९ब्रह्मसम्बन्धिदिने २०तन्नामके च अहन्शब्दे दृश्यम्।

ब्रा(ब्र)ह्मक त्रि० ब्रह्मणा कृतं कुलादि०वुञ्। विप्रेण कृते।

ब्रा(ब्र)ह्मगुप्त पु० आयुधजातिवर्गभेदे त्रिगर्त्तषष्ठशब्दे दृश्यम्

ब्रा(ब्रा)ह्मण पुंस्त्री० ब्रह्म वेदं शुद्धं चैतन्यं वा वेत्त्यधीते वा अण् "ब्रह्मणो जानितिति" पा० न टिलोपः ब्रह्मणो मुखजातत्वात् ब्रह्मणोऽपत्यम् वा अण्। १विप्रे जातिभेदे स्त्रियां जातित्वात् ङीष्। २पृक्कायां स्त्री ङीप्। "ब्रह्म जानाति ब्राह्मणः" इत्युक्ते ३परब्रह्मज्ञे त्रि०। ब्राह्मणत्वे ब्राह्मणाज्जातदेहे तत्सङ्कल्पजातदेहे च ब्राह्मणत्वजातिः स्वीक्रियते यथा गोमयवृश्चिकोभयजातदेहस्य वृश्चिकत्वं तद्वत्। तत्र सङ्कल्पजातदेहे ब्राह्मणत्वं यथा नारदद्रोणादौ। इदानीञ्च ब्राह्मणस्य सत्यसंकल्पत्वाभावान्न तथात्वम्। किञ्च कलौ अधर्मवि
विवाहनिषेधादपि न तथात्वम्।

"ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स्यान्न संशयः। क्षत्रियायां तथैव स्याद्वैश्यायामपि चैव हि" भा०दानधर्म-वाक्यस्यापि संकल्पभेदादेव तथात्वेन युगान्तरविषयत्वम्। तस्य लक्षणं यथा "आत्मा कर्मेण दृष्टेन स्वाध्यायेन श्रुतेन च। एभिर्युक्तो हि यस्तिष्ठेत्स्त्रियं स द्विज उच्यते" वह्निपु०। "न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च यः। सर्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः। व्याघ्रैरिव गणाभीतः सौहित्यान्नरकादिव। कृपणादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः। येन केनचिदाच्छन्नो येन केनचिदाशितः। यत्र क्व चन शायी च तं देवा ब्राह्मणं विदुः। विमुक्तं सर्वसङ्गेभ्यो मुनिमाकाशवत् स्थितम्। अक्षमेकक्षरं शान्तं तं देवा ब्राह्मणं विदुः। जीवितं यस्य धर्मार्थं धर्मो रत्यर्थमेव च। अहोरात्रञ्च पुण्यार्थं तं देवा ब्राह्मणं विदुः। निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्। अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः" भा० मोक्षध०। "विश्वावसुरुवाच। विप्रस्य लक्षणं ब्रूहि तद्भक्तिः का च तत्त्वतः। यतस्तत्रानुग्रहेण वागद्याः ब्राह्मणाः स्मृताः"। कल्किपुराणे च "वेदास्तमीश्वरं प्राहुरध्यक्षं व्यक्तिमत्परम्। ते वेदा ब्राह्मणमुखे नानाधर्मैः प्रकाशिताः। यो धर्मो ब्राह्मणानां हि सा भक्तिर्मम पुष्कला। तयाहं तोषितः श्रीशः संभवामि युगे युगे। अङ्गुल्यन्तु त्रिपदं स्यात् सप्तधानिमितं शनैः। तन्तुत्रयमधोदत्तं यत्तत्स्यात् त्रिदुर्बुधाः। त्रिगुणं तदुपन्यस्तं वेदप्रवरसम्मितम्। शिरोधराभिमध्यात् पृष्ठार्द्धपरिमाणकम्। यजुर्विदां नाभिमितं सामगानामयं विधिः। वामस्कन्धेन विधृतं यत्तत्स्यात् त्रिवृत्प्रदम्। ब्रह्मचन्द्नाद्यैस्तु धारयेत्तिलकं द्विजः। भाले त्रिपुण्ड्रं कर्मोर्द्ध्वं केशपर्यन्तसज्ज्वलम्। पुण्ड्रमङ्गुलिमानन्तु त्रिपुण्ड्रं तत्त्रिधा कृतम्। ब्रह्मविष्णुशिवावासं दर्शनात् पापनाशनम्। ब्राह्मणानां मुखे स्वर्गो वाचि वेदाः करे हरिः। गात्रे तीर्थानि यागाश्च नाड़ीषु प्रकृतिस्त्रिविधा। सावित्री कण्ठकुहरा हृदयं ब्रह्मसङ्गतम्। तेषां स्नानान्तरे धर्मः पृष्टेऽधर्मः प्रकीर्त्तितः। भूदेवा ब्राह्मणा राजन्! पूज्या वन्द्याः सदुक्तिभिः। चातुराश्रम्यकुशला मम धर्मप्रवर्त्तकाः। ब्रह्मणापि ज्ञानदण्डासपोदण्डा मम प्रियाः। तेषां वचः पालयितुमवतारा कृता मया। ब्राह्मणीयं ब्राह्मणानां सर्वपापप्रणाशनम्। कल्किदोषहरं श्रुत्वा सच्यते सर्वतोभयात्" कल्किपु० ४अ०। "कर्मणा ब्रह्मणो जातः करोति ब्रह्मभावनाम्। स्वधर्मनिरतः शुद्धस्तस्माद्ब्राह्मण उच्यते" ब्रह्मवै० गणेशख० ३५अ०।

"जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः। वेदाध्ययनसम्पन्नः षट्सु कर्मस्वस्थितः। शौचाचारपरो नित्यं विघसाशी गुरुप्रियः। नित्यव्रती सत्यरतः स वै ब्राह्मण उच्यते। सत्यं दानमथाद्रोहः आनृशंस्यं क्षमा घृणा। तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः"। तस्य धर्मो यथा "ब्राह्मस्य तु यो धर्मस्तं ते वक्ष्यामि केवलम्। दमस्तेष महाराज! धर्ममाहुः पुरातनम्। स्वाध्यायाभ्यसनञ्चैव तस्य कर्म समाधते। तस्मिन्हि सुमहच्छ्रेयो ब्राह्मणस्य सकर्मणि। अकुर्वाणं विकर्माणि शान्तं प्रज्ञानतर्पितम्। कुर्वीरन्पेत्य सन्तानमथ दद्यादृयजेत च। संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते। परिनिष्ठितकार्यस्तु स्वाध्यायेनैव ब्राह्मणः। कृयादन्यन्न वा कृयान्नैत्रो ब्राह्मण उच्यते" पाद्मे स्वर्गख० २६ अ०। तस्य माहात्म्यादि यथा। "सर्वेषामेव वर्णानां ब्राह्मणः परमो गुरुः। तस्मै दानानि देयानि भक्तिश्रद्धासमन्वितैः। सर्वदेवमयो विप्रः प्रत्यक्षत्रिदिवो भुवि। स तारयति दातारं दुस्तरे विश्वसागरे। हरिरुवाच। सर्ववर्णगुरुर्विप्रस्त्वया प्रोक्तः सुरोत्तम!। तेषां मध्ये च कः श्रेष्ठः कस्मै दानं प्रदीयते। ब्रह्मोवाच। सर्वेऽपि ब्राह्मणाः श्रेष्ठाः पूजनीयाः सदैव हि। अविद्या वा सविद्या वा नात्र कार्या विचारणा। स्तेयादिदोषलिप्ता ये ब्राह्मणा ब्राह्मणोत्तम!। आत्मयज्ञो हविष्यादो ऽपि परेभ्यो न कदाचन। अनाचारा हि ते पूज्या न च शूद्रा जितेन्द्रियाः। अभक्ष्यभक्षका गावः कोलाः सुमतयो न च। माहात्म्यं भूमिदेवानां विशेषादुच्यते मया। तव स्नेहाद्द्विजश्रेष्ठ! निशामय समाहितः। क्षत्रियाणाञ्च वैश्यानां शूद्राणां गुरवो द्विजाः। अन्योऽन्यं गुरवो स्त्रीयाः पूजनीयाश्च भूसुर!। ब्राह्मणं प्रणमेद्यस्तु विष्णुबुद्ध्या नरोत्तमः। आयुः पुत्राश्च कीर्त्तिश्च सम्पत्तिस्तस्य वर्द्धते। न च नीति हिजं यस्तु मूढधीर्मानवो भुवि। सुदर्शनेन तच्छीर्षं हन्तुस्तिष्ठति केशवः"। शूद्रादिदुष्टस्य विप्रस्य प्रणामनिषेधो यथा। "पुंश्चलस्तं पयोदुष्टं देवदुष्टञ्च भूसुर!। न नमेद्ब्राह्मणं प्राज्ञः क्षत्रियैश्वर्यदुर्मदम्। जलस्थं देवयजनस्थं ध्यान-

वञ्चितचेतसम् । देवपूजाञ्च कुर्वन्तं न नमेद् ब्राह्मणं बुधः । बहिष्क्रियां प्रकुर्वन्तं भुञ्जानञ्च द्विजोत्तम ! । तथा सामानि गायन्तं न नमेद् ब्राह्मणं बुधः । ब्राह्मणा यत्र तिष्ठन्ति बहवो द्विजसत्तम । प्रत्येकन्तु नमस्कारः स्तत्र कार्यो न धीमता । कृताभिवादनं विप्रं भक्त्या यो नाभिवादयेत् । स चाण्डालसमो ज्ञेयो नाभिवाद्यः कदापि च । कृतप्रणामं तनय नमेतां पितरौ न च । कृतप्रणामाः सर्वेऽपि नमस्कार्या द्विजैर्द्विजाः । कृतदोषान् द्विजान् गाश्च न द्विषन्ति विचक्षणाः । द्विषन्ति यापि मोहेन तेषां रुष्टः सदा हरिः । याचकान् ब्राह्मणात् यस्तु कोपदृष्ट्या प्रपश्यति । सूचीप्रक्षेपणं तस्य नेत्रयोः कुरुते यमः । विप्रनिर्भर्त्सनं मूढा येन वक्त्रेण कुर्वते । तस्मिन् वक्त्रे यमस्तप्तं लौहपिण्डं ददाति वै । ब्राह्मणा यदुगिरे भुङ्क्ते तदुगिरे केशवः स्वयम् । देवताः सकला एव पितरश्च सुरेश्वरः" । तस्य पादोदकाटिनाद्भाग्यं यथा "विप्रपादोदकं यस्तु कणमात्रं बलेद्बुधः । देहस्थं पातकं तस्य सर्वमेवाशु नश्यति । कोटित्रह्माण्डमध्येषु सन्ति तीर्थानि यानि च । तानि सर्वाणि तीर्थानि वसन्ति द्विजपादयोः । विप्रपादोदकैर्नित्यं सिक्तं स्याद् यस्य मस्तकम् । स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः । सर्वपापानि घोराणि ब्रह्महत्यादिकानि च । सद्य एव विनश्यन्ति विप्रपादाम्बुधारणात् । व्याधयः सर्वे परमक्लेशदायकाः । गच्छन्ति विलयं सद्यो विप्रपादाम्बुभक्षणात् । पितॄणं यानि तोयानि दीयन्ते विप्रपादयोः । तैस्तृप्ताः पितरः स्वर्गे तिष्ठन्त्याचन्द्रतारकम् । प्रक्षाल्य विप्रचरणौ द्वाभ्यामेवार्चयेद्बुधः । तेनार्चितो जगत्स्वामी विष्णुः सर्वसुरोत्तमः । विप्राणां पादनिर्माल्यं यो मर्त्यः शिरसा वहेत् । मत्यं सत्यमहं वच्मि तस्य मुक्तिर्हि शाश्वती" । तस्य प्रदक्षिणफलम् "विप्रं प्रदक्षिणीकृत्य वन्दते या नरोत्तमः । प्रदक्षिणाकृतां तेन सप्तद्वीपा वसुन्धरा" । तस्य पादसेवनफलम् "यो दद्यात् फलताम्बूलं विप्राणां पादसेवने । इह लोके सुखं तस्य परलोके ततोऽधिकम् । पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् । मोक्षार्थी लभते मोक्षं विप्रपादस्य सेवनात् । रोगी रोगात् प्रमुच्येत पापी मुच्येत पातकात् । मुच्येत बन्धनाद्बद्धो विप्राणां पादसेवनात् । वन्ध्यत्वाच्च या नार्यो मृतापत्याच्च या स्त्रियः । बद्धवत्सा जीववत्सा सुविप्रपादसेवनात् पादो क्रियायोगसारे २अ० । तस्य सन्ध्यावन्दनाकरणे दोषो यथा "नोपतिष्ठति यः पूर्वां नोपास्ते यस्तु पश्चिमाम् । स शूद्रवद्बहिः कार्यः सर्वस्माद् द्विजकर्मणः" मनुः । अन्यत्र च "न तस्मिन्ति सुरास्तेषां पितरः पिण्डतर्पणम् । स्वेच्छया च द्विजातेश्च क्रियान्यरहितस्य च" । तस्य सन्ध्यावन्दनफलं यथा "यावज्जीवनपर्यन्तं यस्त्रिसन्ध्यं करोति हि । स च सूर्यसमो विप्रस्तेजसा तपसा सदा । तत्पादपद्मरजसा सद्यः पूता वसुन्धरा । जीवन्मुक्तः स तेजस्वी सन्ध्यापूतो हि यो द्विजः । तीर्थानि च पवित्राणि तस्य संस्पर्शमात्रतः । ततः पापानि यान्त्येव वैनतेयादिवोरगाः" । तस्य निन्द्यकर्माणि यथा "विष्णुभक्तिविहीनश्च त्रिसन्ध्यरहितो द्विजः । एकादशीविहीनश्च विप्रद्वेषी यथोरगः । हरेर्नैवद्यभोगी न धारको हरेः काचकः । शूद्रान्नभोजी विप्रश्च विप्रद्वेषी यथोरगः । शूद्रयाजी च शूद्राणां यो विप्रो ह्यलीपतिः । शूद्रान्नसूपकारी च शूद्रयाजी च यो द्विजः । असिजीवी मसीजीवी विप्रद्वेषी यथोरगः । यो विप्रोऽवीरान्नभोजी क्षत्रस्नातान्नभोजकः । । भगजीवी वार्द्धुषिको विप्रद्वेषी यथोरगः । यः कन्याविक्रयी विप्रो यो हरेर्नामविक्रयी । यो विद्याविक्रयी विप्रो विप्रद्वेषी यथोरगः । ह्यश्वोदये च दिवाभोजी मत्स्यभोजी च यो द्विजः । शिवपूजादिरहितो विप्रद्वेषी यथोरगः" ॥ ब्रह्मवै०प्र०२१ अ० । अन्यत्र च "यदि शूद्रां व्रजेद्विप्रो ह्यलीपतिरेव सः । स भ्रष्टो विप्रजातेश्च चाण्डालात् सोऽधमः स्मृतः । विष्ठासमश्च ततपित्रोर्मूत्रं तस्य च तर्पणम् । तत्पितॄणां सुराणाञ्च पूजने तत् समं भवति ! । कोटिजन्मार्जितं पुण्यं सन्ध्याचोतपसार्जितम् । द्विजस्य ह्यलीभामान्द्यत्येव न संशयः । ब्राह्मणश्च सुरापीतः विष्णुभोजी ह्यलीपतिः । हरिवासरभोजी च कुम्भीपाकं व्रजेद्ध्रुवम् । "करोत्यशुद्धां सन्ध्याञ्च मन्त्रहीनां वा न करोति यः । त्रिसन्ध्यं वर्जयेद् यो वा सन्ध्याहीनश्च स द्विजः" । नारायणक्षेत्रादितीर्थं तस्य प्रतिदोषो यथा "तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे । वाराणस्यां वटस्याध्च गङ्गासागरसङ्गमे । पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले । हरिद्वारे च केदारे सोमे बदरपाचने । सरस्वतीनदीतीरे पुण्ये वृन्दावने वने । गोदावर्यां च कौशिक्यां त्रिवेण्यां च हिमा-

खये। एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः। स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च"। पारिभाषिकमहापातकिब्राह्मणा यथा "सप्तोद्दिक्तसूद्रयाजी ग्रामयाजीति कीर्त्तितः। देवोपजीवजीवी च देवलश्च प्रकीर्त्तितः। सूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः। सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः। एते महापातकिनः कुम्भीपाकं प्रयान्ति ते" ब्रह्मवै०ज०ख०२७अ०। "ब्राह्मणस्य स्वधर्मश्च त्रिसन्ध्यमर्चनं हरेः। तत्पादोदकनैवेद्यभक्षणञ्च सुधाधिकम्। यत्तं विष्ठा जलं मूत्रमनिवेद्य हरेर्नृप। भवन्ति शूकराः सर्वे ब्राह्मणा यदि भुञ्जते। श्वाजीवं भुञ्जते विप्रा एकादश्यां न भुञ्जते। क्षणजन्मदिने चैव शिवरात्रौ सुनिश्चितम्। तथा रामनवम्यान्तु व्रतितः पुण्यवासरे। ब्राह्मणानां स्वधर्मश्च कथितो वेधसा नृप!" ५६ अ०। गृहस्थब्राह्मणनियमा यथा "वेदं वेदौ तथा वेदानधीत्य तु समाहितः। तदर्थमभिजानन्स्नायाद् तः स्नायाद् द्विजोत्तमः। गुरवे तु धनं दत्त्वा स्नायीत तदनुज्ञया। चीर्णव्रतोऽथ शक्तात्मा स्नातकः स्नातुमर्हति। वैणवीम्बारयेद्यष्टिमन्तर्वासमधोत्तरम्। यज्ञोपवीतद्वितयं सोष्णीषञ्च कमण्डलुम्। छत्रञ्चोष्णीषममलं पादुके चाप्युपानहौ। रौक्मे च कुण्डले धार्य्ये छत्तकेशनखः शुचिः। स्वाध्याये नित्ययुक्तः स्याद्वर्हि कौल्यं न धारयेत्। अन्यत्र काञ्चनाद्विप्रो न रक्षां विस्रंसयेत् स्वजम्। शुक्लाम्बरधरो नित्यं सुगन्धः प्रियदर्शनः। न जीर्णमलवद्वासा भवेच्च विभवे सति। न रक्तसूत्रवस्त्राद्यैर्धृतं वासो न कुण्डिकाम्। नोपानहौ स्वजं वाथ पादुके च प्रयोजयेत्। उपवीतमलङ्कारं कुम्भान् कृष्णाजिनानि च। नापसव्यं परीदध्याद्वासो न विकृतं वसेत्। आचरेद्विधिवद्धीमान् सदाचारमात्मनः शुभान्। रूपलक्षणसंयुक्तां योनिदोषविवर्जिताम्। अमातृगोत्रप्रभवामसमानार्षगोत्रजाम्। आचरेदुद्वाह्मणो भार्य्यां शीलशौचसमन्विताम्। ऋतुकालाभिगामी स्याद् यावत् पुत्रोऽभिजायते। वर्जयेत् प्रतिषिद्धानि प्रयत्नेन दिनानि तु। अष्टमी पञ्चदशी द्वादशी च चतुर्दशी। ब्रह्मचारी भवेन्नित्यं तद्वज्जन्मक्षयाहनि। अदूषितायामग्निं जुहुयाज्जातवेदसम्। व्रतानि स्नातको नित्यं पावनानि च पालयेत्। वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः। अकुर्वाणः पतत्याशु नरकानतिभीषणान्। अभ्यसेत् प्रयतो नित्यं वेदं यज्ञान्न हापयेत्। कुर्यात् गृह्याणि कर्माणि सन्ध्योपासनमेव च। सख्यं समाधिकैः कुर्यादुपेयादीश्वरं सदा। देवतान्यपि गच्छेत् तु कुर्याङ्गार्य्याभिषोषणम्। न धर्मं ख्यापयेद्विद्वान् न पापं गूहयेदपि। कुर्वीतात्महितं नित्यं सर्वभूतानुकम्पकः। वयसा कर्मणार्थेन श्रुतेनाभिजनेन च। देशवागबुद्धिसारूप्यमाचरन् विचरेत् सदा। स्मृतिशास्त्रोदितं सम्यक् साधुभिर्यच्च सेवितः। तस्मात्सर्वात्मिकेवेत नेङ्गेतान्यत्र कर्हिचित्। येनास्य पितरो याता येन याताः पितामहाः। तेन यायात् सतां मार्गं तेन गच्छन्न रिष्यति। नित्यं स्वाध्यायशीलः स्यात्नित्यं यज्ञोपवीतवान्। सत्यवादी जितक्रोधो ब्रह्मभूयाय कल्पते। सन्ध्यास्नानरतो नित्यं ब्रह्मयज्ञपरायणः। ऋतुस्नुर्यूर्दुदानो गृहस्थः प्रत्ययान्वितः। वीतरागभयक्रोधो लोभमोहविवर्जितः। सावित्रीजापनिरतः श्रद्धावान् सुच्यते गृही। माता-पित्रोर्हिते युक्तो गोब्राह्मणहिते रतः। दाता यज्वा देवभक्तो ब्रह्मलोके महीयते। त्रिवर्गसेवी सततं देवतानाञ्च पूजनम्। कुर्यादहरहर्नित्यं नमस्येत् प्रयतः सुरान्। विभागशीलः सततं क्षमायुक्तो दयालुकः। गृहस्थस्तपसा युक्तो न गृहेऽपि गृही भवेत्। क्षमा-दया च विज्ञानं सत्यञ्चैव दमः शमः। अध्यात्मनित्यता ज्ञानमेतद्ब्राह्मणलक्षणम्। एतस्माच्च प्रसाद्येत विशेषेण द्विजोत्तमः। यथाशक्ति चरन् कर्म निन्दितानि विवर्जयेत्। विधुय मोहकलिलं लब्धा योगमनुत्तमम्। गृहस्थो मुच्यते ब्रह्मात्र कार्य्या विचारणा। विगर्हितक्रमत्तेषु हिंसाबन्धवधात्मकान्। अन्यमन्युसमुत्थानां दोषाणां वर्जनं क्षमा। बन्धुःखेष्विव कारुण्यं परदुःखेषु सौहृदात्। दया सा सुतयः प्राहुः साक्षाद्धर्मस्य साधनम्। चतुर्दशानां विद्यानां धारणं हि यथार्थतः। विज्ञानमेतच्च विद्याहु येन धर्मो विवर्द्धते। अधीत्य विधिवद्विद्यामर्थञ्चैवोपलभ्य तु। धर्मकार्य्याद्विशिष्टस्तैश्च तद्विज्ञानमिष्यते। सत्येन लोकं जयति सत्यन्तु परमं पदम्। यथाभूत प्रसादन्तु सत्यमाहुर्मनीषिणः। दमः शरीरावनतिः शमः प्रज्ञाप्रसादजः। अध्यात्मशास्त्रं विद्याहुयत्र गत्वा न शोचति। यया स देवो भगवान् विद्यया शिव! वेद्यते। साक्षादेव महादेव! तज्ज्ञानमिति कीर्त्तितम्। तच्चित्तत्परो विद्वान्नित्यमक्रोधनः शुचिः। ब्रह्मायज्ञपरो

विप्रो जायते तदनुत्तमम्। धर्मस्यायतनं यल्लाच्छरीरं परिपालयेत्। न हि देहं विना कश्चित् पुरुषैर्विद्यते परः। नित्यं धर्मार्थिकामेषु युञ्जीत नियतो द्विजः। न धर्मं वर्जितं कामसर्थं वा मनसा स्मरेत्। शीदन्नपि स्वधर्मेण न त्वधर्मं समाचरेत्। धर्मो हि भगवान् देवो गतिः सर्वेषु जन्तुषु। भूतानां प्रियकारी स्याद्ब्रह्म परद्रोहकर्मधीः। न वेददेवतानिन्दां कुर्यान्नैश्च न संवदेत्। यश्चैनं नियतो विप्रो धर्माध्यायं पठेत् शुचिः। अध्यापयेच्छ्रावयेद्वा ब्रह्मलोके महीयते"। कूर्मपु० १४अ०। "सूत उवाच। आनृशंस्यं क्षमा सत्यमहिंसा दमआर्जवम्। ध्यानं प्रसादो माधुर्य्यं मार्दवं चौचमेव च। इज्या दानं तपः सत्यं स्वाध्यायोह्यात्मनिग्रहः। व्रतोपवासौ मौनञ्च स्नानं पैशुन्यवर्जनम्। एभिर्युक्तो द्विजश्रेष्ठा! यः सदा वर्त्तते द्विजः। हुत्वा तु पावकं पूर्वं परं ब्रह्माधिगच्छति। अविद्वो वा सविद्वो वा निरग्निः साग्निकोऽपि वा। यो विप्रक्तपया युक्तः स परं स्वर्गमाप्नुयात्। सर्वेषामुत्तमं श्रेष्ठं विमुक्तिफलदायकम्। ब्राह्मणस्य तपो ब्रह्म तन्मे निगदतः शृणु। सायं प्रातश्च यः सन्ध्यामुपास्ते ऽखिन्नमानसः। जपन् हि पावनीं देवीं गायत्रीं वेदमातरम्। तपसा भावितो देव्या ब्राह्मणः पूतकिल्बिषः। न लीदेत् प्रतिगृह्णन् स ह्यपि पृथ्वीं ससागराम्। ये सन्ध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः। यत्तस्य दुष्कृतं नास्ति पूर्वतः परतोऽपि वा। यश्चादानरतो विद्वान् साङ्गवेदस्य पाठकः। गायत्री ध्यानपूतस्य कलां नार्हति षोड़शीम्। एवं किल्बिषयुक्तस्य विनिर्दहति पातकम्। उभे सन्ध्ये ह्युपासीत ब्रह्मात्मित्यं द्विजोत्तमः"। तस्य देहापवित्रताहेतुः यथा "यथा देहापवित्रत्वं विप्रादीनां यतो भवेत्। देवर्षे! शृणु तत् सर्वं नराणामानुपूर्विकम्। जातके मृतकेऽज्ञाते जलौकाभिः कृते तथा। अपवित्रो द्विजादीनां देहः सन्ध्यादिकर्मसु। अपूतेतनूकृतसर्गे नरो भूत पूरीषयोः। अस्पृश्यस्पर्शने चैव ब्रह्मयज्ञजपादिषु। रक्तपाते नखच्छेदनखण्डादिभिः कृते। विप्राहेरशुचिः कायः प्राह्लादैः कण्टकादिभिः। मुक्तवस्त्रानलोच्छिष्टे ऽपवित्रः क्षतमेथुने। शयने ब्राह्मणादीनां शरीरं क्षुरकर्मणि। ज्वरादिभिश्चनुःश्रवणशिरोरोगैर्युते द्विजन्मनाम्। अशुरप्रयतं पूजादानहोमजपादिषु। घृणोद्गारे वमौ श्राद्धपतितान्नादिभोजने। तथा च रेतस्खलने त्यक्ता, देहापवित्रता। अपवित्रं द्विजातीनां वपुः स्याद्ब्रह्मदर्शने। गर्हितदानग्रहणे पतिते पातकादिभिः। अशौचान्ते शुद्धिः स्याज्जातके मृतके द्विज!। सर्ववर्णास्रमादीनां तनोः सन्ध्यादिकर्मसु" पाद्मोत्तरखण्डे १०६अ०। २मन्त्रेतरवेदभागे न०ब्रह्म०भाष्योपोद्घाते आशङ्कापूर्वकं तल्लक्षणमुक्तं यथा "तत्र ब्राह्मणस्य लक्षणं नास्ति। कुतः? वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वव्याप्तेश्च लक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयितुमशक्यत्वात्। पूर्वोक्तमन्त्रभाग एकः। भागान्तराणि च कानिचित् पूर्वैरुदाहृतं संगृहीतानि "हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः। परक्रिया पुराकल्पो व्यवधारणकल्पनेति"। "तेन ह्राङ्गं क्रियते" इति हेतुः१। "तदृक्षो दक्षिरित्यमिति" निर्वचनम्२। "अमेध्या वै आपः" इति निन्दा३। "वायुर्वै क्षेपिष्ठेति" प्रशंसा४। "तद्व्रविकित्सा जुहवानीह वा हौषाश्मिति" संशयः५। "व्रजमानेन संस्थितौदुम्बरी भवतीति" विधिः६। "आधानेव मन्त्रं पचन्तीति" परक्रियाः७। "पुरा ब्राह्मणा अबिभुः" इति पुराकल्पः८। "यावतोऽज्ञान् परिगृह्णीयात्तावतो याज्ञवल्क्यात्तुष्यात्तावन्तमाप्नोतीति" विशेषावधारणकल्पमाह९। एवमन्यदप्युदाहार्य्यम्। न च हेत्वादीनामन्यतमं ब्राह्मणमिति लक्षणम्। मन्त्रेष्वपि हेत्वादिसद्भावात्। "इन्द्रो वा एषन्ति हीति" हेतुः। "उदा निर्वृक्षहीरिति तस्मादुदकमुच्यत इति" निर्वचनम्। "सोमपत्नं विन्दते अप्रचेताः" इति निन्दा। "अग्निर्मूर्धा दिवः ककुदिति" प्रशंसा। "अधः स्विदासीदुपरि स्विदासीदिति" संशयः। "वसन्ताय कपिञ्जलानालभेत" इति विधिः। "सहस्रमयुतं ददाविति" परक्रियाः। "यज्ञेन यज्ञमयजन्त देवाः" इति पुराकल्पः। इतिकरणवल्लं ब्राह्मणमिति चेत् न "इत्यद्दा इत्ययजथा इत्यपच इति "ब्राह्मणो भायेत" इत्यस्मिन् ब्राह्मणेन गातव्ये मन्त्रेऽतिव्याप्तेः। इत्याहेत्यनेन वाक्येनोपनिबद्धं ब्राह्मणमिति चेत् न "राजा चिदां भगं भक्षीत्याह यो मायातं यातुधानेत्याह यो वा रक्षः। "युक्ष्वा हरीत्याहे अनयोर्मन्त्रयोरतिव्याप्तेः। आख्यायिकाकल्पं ब्राह्मणमिति चेत् न यमयमीसंवादसूक्तादावतिव्याप्तेः। तस्माल्लक्षणमिति प्राप्ते ब्रूमः मन्त्रब्राह्मणयोर्द्वावेव वेदभागाविलक्षणीकारात् मन्त्रलक्षणस्य पूर्वमभिहितत्वादवशिष्टो वेदभागो ब्राह्मणमित्येतल्लक्षणं भविष्यति"।

ब्रा(ब्रा)ह्मणक पु॰कुत्सितार्थे कन्। कुत्सितब्राह्मणे। ब्राह्मणकर्मांण्युक्ता "एवमुक्तो ब्राह्मणः स्यादन्यो ब्राह्मणको भवेत्" भा॰शा॰२७१अ॰उक्तेः। ब्राह्मणेन जातिमात्रेण कायति कै-क। २ब्राह्मणकृत्यरहिते विप्रवंशजे। संज्ञायाम् कन्। आयुधजीविब्राह्मणप्रधाने २देशे सि॰ कौ॰ ततः कोपधत्वात् क्व। ब्राह्मणकीय तत्समबन्धिनि त्रि॰।

ब्रा(ब्रा)ह्मणकाम्या स्त्री ६त॰। १विप्रेच्छायाम् उपचारात् २तद्विषये च "अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः। हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्" भा॰त॰।

ब्रा(ब्रा)ह्मणचक्षुस् न॰ ब्राह्मणस्य सर्वार्थप्रकाशकत्वात् चक्षुरिव। "श्रुतिस्मृती च विप्राणां चक्षुषी देवनिर्मिते। काणस्तत्रैकया हीनो द्वाभ्यामन्धः प्रकीर्त्तितः" हरीतोक्ते सर्वार्थप्रकाशकत्वेन विप्रस्य चक्षुस्तुल्ये वेदस्मृतिरूपे पदार्थे।

ब्रा(ब्रा)ह्मणचाण्डाल पु॰ ब्राह्मणश्चासौ चाण्डाल इव। श्रौतनिषिद्धकर्मकारिणि अपकृष्टब्राह्मणे मनुः ९।८७।

ब्रा(ब्रा)ह्मणजातीय पु॰ ब्राह्मणजाति+स्वार्थे वक्तव्यत्वात् छ प्रकृतिलिङ्गख्यातिक्रमः। ब्राह्मजातियुक्ते

ब्रा(ब्रा)ह्मणजीविका स्त्री ६त॰। याजनाध्यापनप्रतिग्रहरूपायां ब्राह्मणवृत्तौ "ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्मगत्यवस्थिताः। ते सम्यगुपजीवेयुः षट् कर्माणि यथाक्रमम्। अध्यापनमध्ययनं यजनं याजनन्तथा। दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः। प्रशस्तानि कर्मैषां मध्यस्तीणि कर्माणि जीविका। याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" मनुः। ब्राह्मणवृत्तिरत्र स्त्री।

ब्राह्मणत्रा अव्य॰ब्राह्मणाय देयम् त्राच्। विप्राय देयमित्यर्थे

ब्रा(ब्रा)ह्मणप्रिय ६त॰। १विष्णौ "ब्रह्मनो ब्राह्मणप्रियः" विष्णुस॰। २विप्रहिते त्रि॰।

ब्रा(ब्रा)ह्मणब्रुव पु॰ ब्राह्मणं विप्रजातिमात्रतया व्यात्मानं ब्रवीति ब्रू-क बा॰न वच्यादेशः। वेदतत्कर्महीने जातिमात्रोजीविनि विप्रे "गर्भाधानादिमन्त्रैर्यो वेदोपनयनेन च। नाध्यापयति नाधीते स भवेद्ब्राह्मणब्रुवः" व्यासस॰। "जातिमात्रोपजीवी च कामं स्याद् ब्राह्मणब्रुवः। धर्मप्रवक्ता नृपतेर्न तु शूद्रः क्वचन" मनुः। "समसत्र ह्राणे दानं द्विगुणं ब्राह्मणब्रुवे" मनुः।

ब्रा(ब्रा)ह्मणयज्ञ पु॰ब्राह्मणमात्रकर्तृको यज्ञः भा॰त॰। विप्रमात्रकर्त्तव्ये सौत्रामणीयज्ञे "ब्राह्मणयज्ञः सौत्रामण्यृद्धिकामस्य" कात्या॰श्रौ॰ १९।१।१ "ब्राह्मणषड्गं क्षत्रियवैश्ययोर्निवृत्त्यर्थम् ऋद्धिकामस्य ब्राह्मणस्य नेतरयोर्वर्णयोरिति सौत्रामणीति कर्मनामधेयम्" कर्कः। "तस्मादेष ब्राह्मणयज्ञो यत् सौत्रामणी" शत॰ ब्रा॰ १२।९।१।१।

ब्रा(ब्रा)ह्मणयष्टि स्त्री ६त्वा ङीप्। (वाननहाटी) १वृक्षभेदे २विप्रदण्डे च स्वार्थे क। अत्रैव अमरः।

ब्रा(ब्रा)ह्मणलक्षण न॰६त॰। विप्रस्यासाधारणे धर्मभेदे तच्च वसिष्ठेनोक्तं यथा "योगस्तपोदमोदानं सत्यं शौचं दया श्रुतम्। विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम्। सर्वत्र दान्ताः श्रुतपूर्णकर्णा जितेन्द्रियाः प्राणिवधे निवृत्ताः। प्रतिग्रहे सङ्कुचिताग्रहस्ताः स्तुवन्ति ब्राह्मणास्तारयितुं समर्थाः"।

ब्रा(ब्रा)ह्मणशस्त्र न॰ ब्राह्मणस्य शस्त्रमिव तत्कार्य्यकारित्वात्। अभिचारादिमन्त्रोच्चारणात्मके विप्रवाक्ये "वाक् शस्त्रं वै ब्राह्मणस्य तेन घ्नन्तमादृणीत् द्विजः" मनुः। "यस्मादभिचारमन्त्रोच्चारणात्मिका ब्राह्मणस्य वागेव शस्त्रं शस्त्रसाध्यकार्यकारि" कुल्लू॰।

ब्रा(ब्रा)ह्मणसम पु॰ ६त॰। "ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः। जातिमात्रोपजीवी च स भवेद् ब्राह्मणः समः" व्यासोक्ते क्रियारहिते विप्रे

ब्रा(ब्रा)ह्मणाच्छंसिन् पु॰ब्राह्मणे मन्त्रेतरवेदभागे विहितानि शस्त्राणि उपचारात् ब्राह्मणानि तानि शंसति द्वितीयायार्थे पञ्चम्यप्रसंख्यानम् तस्याः "ब्राह्मणाच्छंसिन उपसंख्यानम्" वार्त्ति॰ अलुक्। ब्रह्मरूपस्य ऋत्विजः शस्त्रकारिणि ऋत्विग्भेदे अच्छावाकशब्दे ८५पृ॰दृश्यम्। अत्र कश्चिद्विशेषोऽभिधीयते। षोडर्त्विजां मध्ये प्रधानभूतान् चतुर उक्त्वा कात्या॰श्रौ॰७।१।८९।१०। उक्तं यथा "तत्पुरुषा इतरे यथावेदम्" सू॰। "इतरे द्वादशर्त्विजो तेषामाद्यानां ब्रह्मादीनां चतुर्णां पुरुषाः आदेशकारिणोऽनुचराः सेवकाः यथावेदमिति ये यद्वेदविहितस्य कर्मणः कर्त्तारस्ते तत्पुरुषाः यथावेदमिति ये ब्रह्मपुरुषा न जायन्त इति तान् स्वयमेवाह" कर्कः "ब्राह्मणाच्छंसी तूष्णीं शंसितारो ब्रह्मणः" सू॰। प्रधानपुरुषवरणेन तदंशवर्त्तित्वात्तेऽपि इता एव भवन्ति प्रधानपुरुषे कार्यान्तरासक्तेऽन्यत्र गते वा तदीयं कर्म तत्पुरुषैरेव कर्त्तव्यम् अन्यपुरुषैरिति पुरुषाणामपि पूर्वपूर्वेण करणमन्त्रे नोत्तरेण। तस्य भावः कर्म वा "ब्रह्मण्यच्छः" पा॰ क्व। ब्राह्मणाच्छंसीय तद्भावादौ

ब्रा(ब्रा)ह्मणादि पु॰ भावे कर्मणि वार्थे यञ्प्रत्ययनिष्पन्ने शब्दगणे स च गणः "ब्राह्मण ब्राह्मण माणव (अर्हतोहुल्

च) चोर धूर्त्त आराधय विराधय अपराधय उपराधय एकभाव द्विभाव त्रिभाव अन्यभाव अचेतन संवादिन् संवेगिन् संभाषिन् बहुभाषिन् श्रीघ्रघातिन् विघातिन् समस्य विषमस्य परमस्य सख्यमस्य अनीश्वर कृपण चपल निपुण पिशुन कुतूहल चेतन मिश्र वालिश व्यसन दुःपुरुष कापुरुष राजन् गणपति अधिपति गडुल टायाट विशस्ति विषम विपात निपात (सर्ववेदादिभ्यः स्वार्थे) (चतुर्वेदस्योभयपदवृद्धिश्च) शौटीर° पा०ग०सू०। ब्राह्मणादिराकृतिगणः। तेन औचित्यादि।

ब्रा(ब्रा)ह्मणायण पुंस्त्री० ब्रह्मणापत्यं नडा० फक्। विप्रगोत्रापत्ये शुङ्गवंशजाते विप्रे त्रिका०।

ब्रा(ब्रा)ह्मणिक त्रि० ब्राह्मणस्य मन्त्रेतरवेदभागस्य व्याख्यानो ग्रन्थः ठक्। मन्त्रेतरवेदभागव्याख्याने ग्रन्थे।

ब्रा(ब्रा)ह्मण्य न० ब्राह्मणानां समूहः भावो वा ष्यञ्। १विप्रसमूहे। २ब्राह्मणधर्मे ३विप्रत्वे च। जात्यन्तरगतस्य कारणविशेषाभावे ब्राह्मण्यप्राप्तिर्नास्तीति ब्राह्मण्यस्य दुष्प्रापत्वम् भा० २८ अ० अनङ्गोपाख्याने विस्तरेण उक्तं यथा "तिर्य्यग्योनिगतः सर्वो मानुषत्वं यदि गच्छति। स जायते पुक्कशो वा चाण्डालो वाऽथ संशयम्। पुक्कशः पापयोनिर्यः क्वचिदेव लभ्यते। स तस्यामेव सुचिरं अनङ्ग! परिवर्त्तते। ततो दशगते काले लभते शूद्रतामिति। शूद्रयोनावपि ततो बहुशः परिवर्त्तते। ततस्त्रिंशद्गुणे काले लभते वैश्यतामपि। वैश्यतायां चिरं कालं तत्रैव परिवर्त्तते। ततः षष्टिगुणे काले राजन्यो नाम जायते। ततः षष्टिगुणे काले लभते ब्रह्मबन्धुताम्। ब्रह्मबन्धुश्चिरं कालं तत्रैव परिवर्त्तते। ततस्तु द्विगते काले लभते काण्डपृष्ठताम्। काण्डपृष्ठश्चिरं कालं तत्रैव परिवर्त्तते। ततस्तु त्रिगते काले लभते विप्रतामपि। ताञ्च प्राप्य चिरं कालं तत्रैव परिवर्त्तते। ततश्चतुःगते काले श्रोत्रियो नाम जायते"। एतच्च जात्यभिप्रायं संस्कारादिना तु विशिष्टब्राह्मण्यलाभः यथोक्तमङ्गिरसा "क्षिप्रं कर्म यथाऽनेकैरङ्गैरुत्कीर्त्यते जनैः। ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्वकैः"। २श्लाघनीयत्वे पु० शब्दमाला। तादृशब्राह्मणकर्त्तृत्वादिस्तु कर्मभेदात् यथा "शूद्रां शयनमारोप्य ब्राह्मण्यादेव हीयते" इत्यादि।

ब्रा(ब्रा)ह्मणी स्त्री ब्राह्मणस्य पत्नी ङीष्। १ब्राह्मणस्य पत्न्यां ब्राह्मणस्येयम् अण् ङीप्। २ब्रह्मसम्बन्धिन्यां स्त्रियाम्। २बहुषो च। "मनो मे ब्राह्मणं विद्धि बुद्धिं मे विद्धि ब्राह्मणीम्"। "अरणीं ब्राह्मणीं विद्धि पुरुषञ्चोत्तरारणिम्। तपःश्रुते चाधिमथ्यतो ज्ञानाग्निर्जायते ततः" भा०आश्व०३४अ०।

ब्रा(ब्रा)ह्मीकन्द पु० ब्राह्म्या एव कन्दोऽस्य। १वाराहीकन्दे राजनि०। २ब्रह्मयष्टिकायां विश्वः।

ब्रा(ब्रा)ह्म्य त्रि० ब्रह्मण इदं यञ्। १ब्रह्मसम्बन्धिनि स्त्रियां ङीप्। २विद्यायां २हृद्ये च धरणिः।

ब्रा(ब्रा)ह्ममुहूर्त्त पु० ब्रह्मा देवतास्य यञ् टिलोपः कर्म०। सूर्य्योदयात् प्रागवर्त्तिनि "रात्रेश्च पश्चिमे यामे मुहूर्त्तौ ब्राह्म उच्यते" "रात्रेश्च पश्चिमे यामे मुहूर्त्तौ यत्तृतीयकः। स ब्राह्म इति विख्यातो विहितः संप्रबोधने" या० त० शुमन्तुना उक्तो दण्डद्वयात्मके काले।

ब्रू कथने अदा०उभ०विक०सेट्। ब्रूवीति आह ब्रूते। अब्रवीत् अवोचत। ऊचतुः। अस्यार्द्धधातुके वच्यादेशोऽनित्यः तेन "ब्रूतिः कटङ्कृता"। ब्रह्मणेऽब्रूत इत्यादि सिद्धम्। अनु+पश्चात् कथने अनुवादे। वि+विरुद्धतया कथने विवादे च।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्त्याभिधाने बकारादि शब्दार्थसङ्कलनम्।

भ

भकारः पवर्गीयचतुर्थोवर्णो व्यञ्जनवर्णभेदः। तस्योच्चारणस्थानमौष्ठौ। अस्योच्चारणे आभ्यन्तरप्रयत्नः ओष्ठाभ्यां स्पर्शः जिह्वाग्रस्य स्पर्शः अतस्तस्य स्पर्शवर्णता। बाह्यप्रयत्नश्च संवारनादघोषाः महाप्राणश्च। तस्य ध्येयरूपं यथा "भकारं शृणु चार्वङ्गि! स्वयंपरमकुण्डली। महामोक्षप्रदं वर्णं तरुणादित्यसंप्रभम्। पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा" कामधेनुतन्त्रम्। अस्य अधिष्ठातृदेवताध्यानं यथा "तडित्प्रभां महादेवीं नागकङ्कणशोभिताम्। षड्भुजां वरदां भीमां रक्तपङ्कजलोचनाम्। रक्तवस्त्रपरीधानां रक्तपुष्पोपशोभिताम्। शूल

वर्गप्रदां देवीं साधकाभीष्टसिद्धिदाम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्"। अस्य वाचकशब्दाः यथा "भः क्लिन्ना भ्रमरो भीमो विश्वमूर्त्तिर्निशाभवम्। हिरण्डो भूषणोमलं यन्त्रस्तत्प्रवाचकः। नक्षत्रं भ्रमणा दीप्तिर्द्यौर्भूमिः पयो नभः। नाभिभेदं महाब्राह्मी विश्वमूर्त्तिर्विताण्डवः। प्राणात्मा तापिनी वज्रा विश्वरूपी च चन्द्रिका। भीमसेनः सुधासेनः सुखी मायापुरं हरः"। वर्णाभिधानम्। माहकान्यासेऽस्य नाभौ न्यास्यता काव्यादावस्य प्रयोगे "सुखभयमरणक्लेशदुःखं पवर्गः" इ०टी० उक्तेः क्लेशः फलम्।

भ न० भाति भा-क। १नक्षत्रे अमरः। २गृहे शब्दरत्ना०। ३राशौ ज्यो०त०। ४शुक्राचार्ये पु० मेदि०। तेषां दीप्तिमत्त्वात् तथात्वम्। ५भूधरे एकाक्षरकोषः। ६भ्रान्तौ पु० शब्दरत्ना०। वृ०र०उक्ते ७चादिगुरुके अन्त्यलघुद्वये वर्णद्वये। तस्य काव्यादौ प्रयोगे फलं यशः देवताचन्द्रः यथोक्तं वृ०र० टीकायाम् "भस्वन्द्रो यश उज्ज्वलम्"। [पायौ ऋ० १०।१६३।

भंमस् पु० भसत् कटिदेशः पृषो०। उपचारात् तत्सम्बन्धिनि

भकार पु० भ+स्वरूपे कार। भस्वरूपे वर्णे।

भक्का स्त्री इत०। नक्षत्रकक्षायाम्।

"भवेत् भक्का तिग्मांशोर्भ्रमणं षष्टिताडितम्। सर्वोपरिष्टाद्भ्रमति योजनैस्तैर्भ्रमण्डलम्" सू० सि०। "सूर्यस्य भ्रमणं कक्षापरिधिमानं योजनात्मकम्" "खखार्थैकसुरार्णवाः" ४३१ १२०० इति वक्ष्यमाणं षष्ट्याप्तुणितं सत् नक्षत्राणां कक्षा नक्षत्राधिष्ठितगोलस्य मध्यवृत्तं स्यात्। तैर्नक्षत्रकक्षाभिर्योजनैर्भ्रमण्डलं नक्षत्राधिष्ठितगोलमध्यवृत्तं सर्वोपरिष्टाच्चन्द्रादिसप्तग्रहेभ्य उपरि दूरं भ्रमति भूगोलादभितः परिभ्रमति" रङ्गना०।

भकूट न० इत०। विवाहे दम्पत्योः शुभाशुभसूचके राशिसमूहे तस्य शुभाशुभत्वं च उपयमशब्दे १२५१ पृ०दृश्यम्। "खेटारित्वं नाशयेत् सत् भकूटम्"। "प्राप्ते दुष्टभकूटके परिणयः" मुह० तत्रैव दृश्या। [शब्दार्थकल्पतरुः।

भक्तिका स्त्री फक्किङ्गा+पृषो०। (फक्किङ) ख्याते कीटभेदे

भक्त पुंन० भज-क्त। १अन्ने ओदने अमरः। २भक्तियुक्ते ३तदात्मके ततपरे ४विभक्ते कृतभागे च त्रि०"भक्तो हरः शुध्यति यद्गुणः स्यात्" लीला। अन्नपाकप्रकारस्तद्गुणश्च भावप्र० उक्तो यथा

"हृद्यौतांस्तण्डुलान् स्फीतांस्तोये पञ्चगुणे पचेत्। तद्भक्तं प्रहृतक्लेष्मं विशदं गुणवन्मतम्। भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु। अधौतमहृतं शीतं गुर्वरुच्यं कफप्रदम्"।

भक्तियुक्तलक्षणादिकं तद्भेदश्च शुक्लाफले उक्तं यथा "सङ्कल्पनः कृष्णपदारविन्द्योर्निवेशितं तद्गुणराग्रि यैरिह" "ते भक्ताः इति लक्षणं स च नवधाहासादिनवविधरसास्वादमूलकत्वेन नवविधत्वात्"। रसभेदे भक्तिविशेषाः शुक्लाफले दर्शिताः यथा "तस्य तत् खेलनं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः। व्रीड़िताः प्रेक्ष्य चान्योऽन्यं जातहासा न निर्ययुः" भाग०१०।१२अ०तथाच हासे गोप्यः सम्भोगदृङ्गारे गोप्यादयस्तत्र दर्शिताः। विप्रलम्भशृङ्गारेऽपि गोप्यस्तत्र दर्शिताः। "अन्तर्दृगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः। इत्यादितद्भावनायुक्ता दध्युर्मीलितलोचनाः। दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः। ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः। तमेव परमात्मानं जारबुद्ध्याऽपि सङ्गताः। जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः। अन्यानि रासपञ्चाध्यायीवाक्यानि तत्तोदाहृतानि दृश्यानि। करुणरसेऽर्जुनादयः। वाक्यानि तत्र दृश्यानि। रौद्ररसे हिरण्यकशिपुशिशुपालादयः। भयानकरसे कंसादयः। बीभत्सरसे पुरूरवाःपिङ्गलादयश्च। शान्तरसे नारदादयः। अद्भुतरसे ओदनब्रह्मादयः। वीररसे बलिप्रभृतयः। तत्र दानवीरे बलिः धर्मवीररसे कविप्रभृतयः। युद्धवीरे शिशुपालादयः। एतेषां मूलवाक्यानि तत्र दृश्यानि। अधिकं भक्तिशब्दे दृश्यम् "भक्तानां लक्षणं लक्ष्मि! गूढं श्रुतिपुराणयोः। पुण्यस्वरूपं पापघ्नं परमं भक्तिसंज्ञितम्। सारभूतं गोपनीयं न वक्तव्यं खलेषु च। गुरुभक्तादिष्णुमन्त्रो यस्य कर्णे विशत्यलम्। वेदवेदाङ्गवेदान्तास्तं पावनं वदन्ति हि। पुरुषाणां शतं पूर्वं पूतं तज्जन्ममात्रतः। स्वर्गस्थं नरकस्थं वा मुक्तिमाप्नोति तत्क्षणात्। यैः कैश्चिद् यत्र वा जन्म लब्धं येषु च जन्तुषु च। जीवन्मुक्तास्ते च पूता यान्ति काले हरेः पदम्। भक्तियुक्तो मत्पूजानियुक्तो मद्गुणाश्रितः। मद्गुणश्लाघनीयश्च सच्चिदिष्टश्च सन्ततम्। सगद्गदः सास्रनेत्रः स्वात्मविस्मृत एव च। न वाञ्छति सुखं मुक्तिं सालोक्यादिचतुष्टयम्। ब्रह्मत्वममरत्वं वा तद्वाञ्छा मम सेवने। इन्द्रत्वञ्च मनुत्वञ्च देवत्वञ्च सुदुर्लभम्। स्वर्गराज्यादिभोगांश्च स्वप्ने च न हि वाञ्छति। ब्रह्मादीनि विनश्यन्ति देवा ब्रह्मादयस्तथा।

कल्याणभक्तियुक्तश्च मद्भक्तो न प्रणश्यति । भ्रमन्ति भारते भक्ता लब्ध्वा जन्म सुदुर्लभम् । तेऽपि यान्ति महीं पूत्वा परं तीर्थं ममालयम् ब्रह्मवै० प्र० ५ अ० । "रतिः कृष्ण-कथायाञ्च यस्याश्रु पुलकोद्गमः । मनो निमग्नं यस्यैव स भक्तः कथितो बुधैः । पुत्रदारादिकं सर्वं जानाति स्त्री-हरेरपि । आत्मना मनसा वाचा स भक्तः कथितो बुधैः । दयास्ति सर्वभूतेषु सर्वं कृष्णमयं जगत् । यो जानाति महाज्ञानी स भक्तो वैष्णवोत्तमः" ब्रह्मवै० जन्म० १अ० । त्रिविधभक्तलक्षणं यथा "भक्तानां त्रिविधा-नाञ्च लक्षणं श्रूयतामिति । कृष्णशरणतो भक्तो मत्पर्वं गुणकीर्त्तिषु । मनोनिवेशयेत् त्यक्त्वा संसारसुखकारणम् । दास्यं विना नहीच्छेत्तु सालोक्यादिचतुष्टयम् । नैव निर्वाणमुक्तिञ्च सुधापानमभीप्सितम् । ध्यायते मत्पदा-म्बुञ्च पूजयेद्भक्तिभावतः । त्रीहेतुकाकृष्णस्य देवा मङ्गलपर-हितस्य च । सर्वसिद्धिं न वाञ्छन्ति तेऽणिमादिकमीप्सी-तम् । ब्रह्मत्वममरत्वञ्च सुरत्वं सुखकारणम् । वाञ्छन्ति नित्यनां भक्तिं मदीयामतुलामपि । स्त्रीपुंविभेदो ना-स्त्येव सर्वजीवेषु भिन्नता । तेषां सिद्धेश्वराणाञ्च प्रवराणां व्रजेश्वर ! । क्षुत्पिपासादिकां निद्रां लोभमोहादिकं रिपुम् । त्यक्त्वा दिवानिशं यश्च ध्यायते च दिगम्बरः । स भक्तश्रेष्ठमोनन्द ! श्रूयतां मध्यमादिकम् । नाभक्तः कर्मसु श्रेष्ठो पूर्वप्रोक्तलक्षणः शुचिः । करोति सततञ्चैव पूर्वकर्मनिकृन्तनम् । न करोत्यपरं यस्मात् सद्भक्तिरहि-तस्य सः । सर्वं कृष्णस्य यत्किञ्चिन्नाहं कर्त्ता च कर्मणः । कर्मणा मनसा वाचा सततं चिन्तयेदिति । न्यूनभक्तस्य तन्न्यूनः स च प्राकृतिकः स्मृतः । यमं वा यम-दूतं वा स्वप्नेन च न पश्यति । पुरुषाणां सहस्रञ्च पूर्वं भक्तः समुद्धरेत् । पुंसां शतं मध्यमञ्च तच्छतार्धञ्च प्राकृतः । भक्तश्च त्रिविधस्तात ! कथितस्च तवाग्रतः" इति तत्रैव ८३ अ० । भावे क्त । ५ भजने न० ।

भक्तकंस पुं० भक्तार्थः कंसः । भक्ताहरणार्थे कंसे "भक्ता-व्यास्तद्वर्षेषु" पा० आद्युदात्तत्वम् ।

भक्तकार पु० भक्तं भजनं करोति कृ-ट । धूपे त्रिविधधूपे शब्दच० । [सूपकारे हेमच० ।

भक्तकार त्रि० भक्तं करोति कृ-अण् ६त०स० । पाचके

भक्ततूर्य्य न० भक्ते तद्भोजनकाले वादनीयं तूर्य्यम् मा०न० । भोजनकाले वादनीये वाद्यभेदे त्रिका० ।

भक्तदास पु० भक्तेन भक्तमात्रलाभेन दासः खङ्गीकृतदास-भावः । षष्ठ्युपपदासान्तर्गते दासभेदे । "भक्तदासस्य विज्ञेयः" इति स्मृतिः । दासशब्दे दृश्यम् ।

भक्तपुलाक पु० भक्तस्य पुलाक इव । सिक्थे अन्नमण्डे (माँड़) त्रिका० ।

भक्तमण्ड पु० ६त० । भक्तस्य निष्पावे (माँड़) । हेमच० ।

भक्तवत्सल त्रि० ६त० । १भक्तेषु स्निग्धे २विष्णौ पु० । "माधवो भक्तवत्सलः" विष्णुस० ।

भक्तसिक्थ पु० ६त० । भक्तमण्डे अमरः ।

भक्ति स्त्री भज-क्तिन् । १सेवायाम् आराधनायां, २तदेकताने चित्तवृत्तिभेदे ३विभागे ४गौणप्रीतौ ५उपचारे ६अव-यवे ७भङ्ग्याम् ८व्यङ्ग्यायाम् ९रचनायाञ्च "भवति विरल-भक्तिः" रघुः । भक्तिलक्षणमुक्तं भागवतस्वस्वटीकयो यथा "सा परानुरक्तिरीश्वरे" सू० "अत्र सा परेति लक्ष्यनि-र्देशः । श्रेयं लक्षणम् । परेति गौणीं व्यावर्त्तयति । ईश्वर इति प्रह्लताभिप्रायम् । आराध्यविषयकरागत्वमेव भक्ति-त्वम् । इदञ्च परमेश्वरविषयकान्तःकरणवृत्तिविशेष एव भक्तिशब्दश्रेयं च लौकिकानुरागादौ उपचरम् । यथोक्तं परभक्तिमता प्रह्लादेन । (विष्णु० । अंशे १अ० २० । श्लो० १७) । "या प्रीतिरविवेकानां विषयेष्वनपायिनी । त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु" । अत्र प्रीति-पदेन सुखनियतो राग एव लक्षितः । अन्यथा प्रीतेः सुखरूपाया निर्विषयत्वेन विषयसम्पन्नो न स्यात् तथा सुखज्ञानरूपत्वेऽपि तज्ज्ञानस्य सुखविषयत्वाद्विषयविषय-त्वासम्भवात् । तस्मादनुरक्तिरेव सविषयिणी लक्षिता । न च विषयजन्यप्रीतिरर्थः अनेकजन्मस्या अननुभावनात् । किञ्च "अच्युतास्तु सदा त्वयि" इत्यत्र भक्तेरीश्वरविषय-तासिद्धौ प्रीतिपदेनापि तदेकवाक्यतया सैवोच्यते । पूर्वं प्रतिजन्म भक्तिप्रार्थनमिह तु विषयरागदशायां न तस्या एव सर्वथान्यपरिहार्यत्वप्रार्थनमिति विशेषः । विषयजन्यप्रीतिरपि रागं विना न सम्भवतीति राग-वश्यकत्वम् । तथा च पातञ्जलसूत्रम् । (पा० २ । सू० ७पृ० ७६) "सुखानुशयी रागः" इति । तस्यैव वक्ष्यमाण-लिङ्गेषु व्यापनाल्लाघवाच्च भक्तित्वम् । न तु क्वचित् स्मरणस्य, क्वचिच्च कीर्त्तनादेः अननुगमात् । न च तज्ज्ञानस्य तत्त्वं द्वेषादिमत्स्वपि तदनुसङ्गात् । नाप्या-राध्यत्वेन ज्ञानं सा पूजानमस्काराद्याराधनाक्षणनु-गमात् । अपि च बलाद्वयादु वा नमस्कार्यत्वादिज्ञान-वत्यपि भक्तोऽयमनुरक्तोऽयमिति व्यवहारापत्तेः । अत

रागादिसहितताराध्यत्वज्ञानमिति चेत् अनुराग एवास्तु अतएव गी०।अ०१०। श्लो०९)। "मच्चित्तामद्गतप्राणा बोधयन्तः परस्परम्। कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च। तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते" इत्यादौ तद्गतचित्तप्राणादीनां भजनसक्तं नाराध्यत्वेन ज्ञानवताम्। अतएव च लक्ष्मण्य कमनीयाकृतिदर्शनेनानुरक्तानां गोपतरुणीनामपि भक्तिफलं मुक्तिः स्मर्यते। अनुरक्तिस्तु न लक्षणान्तर्गतः किन्तु भगवन्महिमादिज्ञानादनुपस्कार्ज्यायमानत्वादनुरक्तिरित्युक्तम्। ननु पित्रादिगोचरानुरागस्यापि प्रकृतभक्तित्वं प्रसज्येत जगत एव परमेश्वरात्मकत्वात्। अथ विकारादिविशिष्ट एव तथात्वं वाच्यं तथापि गोपीप्रभृतीनां प्राकट्यावच्छिन्नेश्वरभक्तावव्यापकम्। उच्यते जीवोपाध्यनवच्छिन्नचेतनविषयिणी अनुरक्तिरेव सेति। एवञ्च प्राकट्यावच्छिन्ने परिपूर्णे च भक्तिः संगृहीता भवति" टीका। "ततस्संस्थास्यामृतत्वोपदेशात्" १सू० "तस्मिन्नीश्वरे संस्था भक्तिर्यस्य स तथोक्तः। तस्यामृतत्वं फलमुपदिश्यते (छा०।पृ० १२७) "ब्रह्मसंस्थोऽमृतत्वमेतीति"। तस्माच्चित्फलत्वगौणफलत्वनिबन्धना तज्जिज्ञासा परिकुण्ठिता भवतीति" टी०। "ज्ञानमिति चेन्न द्विषतोऽपि ज्ञानस्य तदवस्थितेः" ४सू० "ननु ब्रह्मसंस्थाशब्देन ब्रह्मज्ञानमेवोच्यते न तु तद्भक्तिः। तथाचामृतत्वफलं तस्यैवेति चेदुच्यते। नैष दोषः। संस्था भक्तिरेव न ज्ञानं द्विषतस्तज्ज्ञानवतोऽपि तत्संस्थत्वव्यवहाराभावात्। राजाद्यनुरक्ताः खल्वमात्यमित्रादयस्तत्संस्था इति व्यपदिश्यन्ते न पुनः प्रतिपक्षभूपालाः। शब्दार्थनिर्णयो हि लोकवदेव वेदेऽपीति। अतएव चिरकालिकोपाख्याने "विस्मृयते न कालेन पत्नीसंस्था व्यतीक्रमः। सोऽब्रवीच्च भयं तप्तो दुःखेनाश्रूणि वर्त्तयन्" । (महाभा० शा० अ० २६७ श्लो० ६५२६) इत्यनेन प्रतिभक्तप्रतिक्रम उक्तः। तस्मात् संस्था भक्तिरिति एवञ्च (ब्रह्मसू०।अ०१।पृ०७)"तद्धिष्ठस्य मोक्षोपदेशादिति"बादरायणीयसूत्रस्थाप्ययमेवार्थोऽध्यवसेयः" टी० "तयोपपत्तेश्च" ५सू०। "तया भक्त्या मुक्तिं प्रति ज्ञानसपक्षीयं यस्माच्चकार उक्तयुक्तिसङ्ग्रहार्थः (गी०।अ०७।श्लो० ११)। "यदा ते निश्चलं चेतो मयि भक्तिसमन्वितम्। तदा त्वं मत्प्रसादेन निर्वाणमपि यास्यसि" इति स्मृतम्। ननु (श्वे०।पृ०।७१) "तमेव विदित्वातिमृत्युमेति-नान्यः पन्था विद्यतेऽयनाय" इत्यत्र वेदनफलं मुक्तिः श्रुता तद्विरोधेन स्मृतीनामन्यार्थत्वं स्यादिति चेन्न अत्रापि तस्यैवोपक्षयात्। तथा हि अतिमृत्युपदं न शक्तौ रूढं किन्तु यस्यां सत्यां मृत्योरतिक्रम इति व्युत्पत्त्या तदपेक्षया यतो भक्तेर्मृत्यतिक्रम इति व्युत्पाद्य भक्तिमेवातिमृत्युपदेनाभिधत्ताम् उपपदविभक्त्यर्थापेक्षया कारकविभक्त्यर्थस्य बलवत्त्वात्। (गी०।अ०१२।पृ०७)। "तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि न चिरात् पार्थ! मय्यावेशितचेतसाम्"। इत्यादिना भक्तितो मृत्योरतिक्रमोक्तेः। मन्त्रश्च भवति (तैत्तिरीयमन्त्रभागे) "त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतादिति"। अत्र यजनं भक्तिः तथैव तत्फलव्याख्यानात् नचास्यां श्रुतौ भक्तेरसन्निधानं मुक्तावपि तुल्यत्वात्। तस्मादनयापि श्रुत्या ज्ञानस्योपक्षय एव प्रतीयत इति। ननु तथापि भक्तेरागरूपत्वे किं कारणमित्यपेक्षायामाह"टी०। "द्वेषप्रतिपक्षभावाच्चशब्दाच्च रागः"सू०। "भक्तिः खलु राग एव भवितुमर्हतीति कुतः द्वेषविरोधित्वात्। लोके हि द्वेष्टायं भक्तोऽयमिति विषयोविरुद्धधर्मवति व्यवह्रियते तत्र द्वेषविरोधी च राग एव प्रसिद्धो न ज्ञानादिः। एवञ्च भगवति विष्णुपालस्य द्वेषानुबन्धमभिधाय विष्णु पु० अ० ४ १५ गद्येन १० "अयं हि भगवान् कीर्त्तितः संस्मृतस्य द्वेषानुबन्धेनापि अखिलसुरासुरदुर्लभं फलं प्रयच्छति किमुत सम्यगभक्तिमताम्" इत्युक्तम्। तथा चात्रिस्मृतौ "विद्वेषादपि गोविन्दं दमघोषात्मजः स्मरन्। शिशुपालो गतः स्वर्गं किं पुनस्तत्परायणः" इति अत्रापि द्वेषविरोधित्वेन भक्तेरभिधानात्। तथा च गीतासु (गी०।अ०१६। श्लो०१८)। "अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः। मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः। तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु। आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय! ततो यान्त्यधमां गतिम्। इति। तद्विरोधिनी च भक्तिरीश्वरविषयैवानुरक्तिरिति युज्यते। किञ्च (तैत्ति०। पृ०१००) "रसं ह्येवायं लब्ध्वानन्दीभवतीतिशब्दाच्च ब्रह्मानन्दाविर्भावसक्तेर्ब्रह्मगोचरस्य रसस्य हेतुतावगम्यते। रसस्य रागः (गी०। अ० २। श्लो० ५९)। "रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते" इत्यादौ प्रसिद्धः। अत

रसो विषयरागः। अत एव च (विष्णुपु० अं० ४। अ० ४ गद्यम्) रामलक्ष्मणादीनां स्वर्लोकारोहण-मुक्त्वा "येऽपि तेषु भगवद्गेष्वनुरागिणः कोशलनगर-जानपदास्तेऽपि तन्मनस्कतत्सलोकतामापुरिति" साक्षा-देव भक्तावनुरागशब्दः प्रयुक्त इति। तस्मादपि न ज्ञानं किन्त्वनुरागरूपैव भक्तिर्निःश्रेयसफलेति। ननु द्वेषविरोधित्वं न रागत्वे निङ्क्ष्म घटादीनत्वेनानैका-न्त्यादिति चेत् उच्यते द्वेषकार्यं हि निवृत्तिस्तद्विरो-धिनी प्रवृत्तिरिति। भवति च भक्तानां भजनीयानु-वर्त्तनादौ प्रवृत्तिस्तद्विरोधिनां तदनुवर्त्तनादौ निवृत्तिः। एवञ्च कार्यसुखेन विरोधमभिप्रेत्य द्वेषप्रतिपक्षेत्युक्तम्। तथा च प्रयोक्तव्यं भक्तिर्भजनीयगोचररागरूपा तदनु-वर्त्तनादिहेतुहितसाधनताधीभिन्नात्मविशेषगुणत्वाद् य-द्वैवं तद्वैवं यथा द्वेषः। रागोत्कर्षेण तदनुवर्त्त-नाद्युत्कर्षस्य दृष्टत्वाच्च। किञ्च यो यस्मिन् भक्तस्तत्र तस्यौदासीन्याभावेऽवगते भक्तिस्तदज्ञानानुवर्त्तनाद्यनुकूल-द्वेषविरोधिगुणरूपा अनुवर्त्तनहेत्वात्मविशेषगुणत्वाद्धित-साधनताधीवदिति हितसाधनताधीत्वबाधसङ्कारेण परिशेषाद्रागत्वसिद्धिः। किञ्चित भक्तिमतामिमित्येतत्-कैतवितिकन्यायो विरोधिन्येव द्रष्टव्यः। (गी०। अ० ९। श्लो० ३२)। "मां हि पार्थ! व्यपाश्रित्य येऽपि स्युः पापयोनयः"। "किं पुनर्ब्राह्मणाः पुण्याः" इत्यादौ च। एवं (गी०। अ० १६। श्लो०१८) "मामात्मपरदेहेष्वित्य-नेन द्वेषस्य संसारहेतुत्वात् तद्विरोधिगुणो जीवोपा-धिपरिहारेण परात्मगोचरो राग एव भक्तिरूपः संसा-रनाशहेतुः। एतदेवोक्तं मामप्राप्यैवेति। चकारात् पुलकाद्यनुरागलिङ्गेनापि रागत्वम्। प्रसिद्धं हि "पुल-काङ्कितेन कथयति मय्यनुरागं कोपोल" इत्यादौ। भक्ते-र्गुणान्तरत्वे तु पृथगनुल्लिङ्गताकल्पने गौरवात्। स च रागः कोषाञ्चिदिष्टसाधनताज्ञानजन्योऽपि यागादिवदि-च्छारूप एव। अस्माकं तु प्रीणाम्यनुरज्यामि नेच्छा-मीत्यादिप्रतीतेरागः पृथगेव द्वेषवत्। इच्छाया अभि-लाषमात्रविषयत्वाद्रागस्य सिद्धासिद्धविषयत्वाच्च। प्रत्युत तस्येच्छात्वादिव्याप्यत्वकल्पनागौरवाच्चेति दिक्। तस्माच्च तल्लक्षणासिद्धिरिति। ननु भक्तिः क्रियात्मिका सा च निःश्रेयसाय न क्षमते (तैत्ति०। आरण्य०। खिलप्रपा० ऋक् २१) "न कर्मणा न प्रजया धनेन त्यागे-नैके अमृतत्वमानशुः" इत्यादिस्मृतिभ्य इत्याशङ्क्य परिहर-त्याह टी०। "न क्रिया लत्यनपेक्षणाज्ज्ञानवत्" ७सू०। सा भक्तिर्न क्रियात्मिका भवितुमर्हति प्रयत्नानुविधानाभा-वात्। यच्च प्रयत्नानुविधायि तच्च क्रियात्मकं यथा ज्ञानम्। तद्धि प्रमाणसम्पत्त्यधीनं न पुरुषेण स्वेच्छया कर्तुमकर्तुमन्यथा कर्तुं शक्यते। तथा भक्तिरपि न हि रागिणां प्रमदापुत्रादिविषयिणी पुंव्यापारेण तथा भवति भक्तिः किन्तु पूर्वसुकृतगौणभक्त्यादिसाधनाधी-नेति टी०। "अतएव फलानन्त्यम्" ८सू०। "यतः सा न क्रियात्मिका अतएव ततफलस्य निःश्रेयसस्यानन्त्य-मुपपद्यते। अन्यथा (छा०। पृ०५२८) "तद्यथेह कर्म-जितो लोकः क्षीयते एवमेवासुत्र पुण्यार्जितो लोकः क्षीयते" इत्यनेनामृतत्वस्यापि क्षयित्वं प्रसज्येतेति टी०। "तदतः प्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत्" ९सू०। "भवति हि भगवद्वाक्यं (गी०। अ० ७। श्लो० १९) "बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते। वासुदेवः सर्वमिति स महात्मा सुदुर्लभः" इति। ज्ञानतः प्रपत्ति-रुक्ता भक्तेर्ज्ञानहेतुत्वे नेदमुपपद्यते इतरप्रपत्तिवदिति। अथा तदनन्तरं (गी०। अ० ७। श्लो०२०)। "कामै-स्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः"। इत्यनेन देवता-न्तरप्रपत्तिनिन्दासुखेनैव प्रपत्तिः स्तूयते। तस्य देवता-भक्तेरेव प्रपत्तिशब्देन कथनं न तज्ज्ञानस्य। तथा एव प्रपत्तेरुभयत्र प्रत्यभिज्ञानात् इति। चकाराज्ज्ञानानन्तर्यश्रवणमपि ज्ञानत्वाभावे निदानम्। यथा (गी०।अ०१५। श्लो०१९)। "यो मामेवमसंमूढो जानाति पुरुषोत्तमम्। स सर्वविद्भजति मां सर्वभावेन भारत!" इति। तथा (गी०। अ०९। श्लो० १३)। "भजन्त्यनन्य-मनसो ज्ञात्वा भूतादिमव्ययम्। इति मत्वा भजन्ते मां बुधा भावसमन्विताः"। इति च। तस्माच्च ज्ञाना-त्मिका। यद्यपि रागत्वेनैव ज्ञानभेदः सिद्धस्तथापि भक्तिशब्दो ब्रह्मज्ञाने गौण इति शङ्कानिरासार्थमेतत्। इदन्तु चिन्त्यते भगवद्गीतावाक्यानि न शब्दविषया वेदवत् प्रमाणम्। किन्तु भारतस्मृतित्वेन तथा च कथं शब्दादिति निर्देशः। अत्रैकेऽनुस्मितशब्दादिति व्याचक्षते। अत्रोच्यते अहरहर्यंकमभगवद्वाक्यत्वमेव वेदत्वं तच्च गीतास्वप्यविशिष्टम्। अतएव भगवद्गीताश्चपनि-षत्स्विति दृश्यते, केवलं त एव श्लोका व्यासेन निबद्धाः तथा च पुराणान्तरम्। "गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः। या स्वयं पद्मनाभस्य मुखपद्मा

र्द्विनिःसृता"। न च गूढार्थानभ्यवगमप्रसङ्गः भारतश्रवणाऽभ्यनुज्ञानेनैव तदुपपत्तेः गणवादिस्तुत्यादिवत्। तद्विज्ञायेति चेन्न लक्षणाऽपरिपूर्त्तेः। तथाचोक्तमाचार्यैः। "तानेव वेदिकान् मन्त्रान् भारतादिनिवेदितान्। स्वाध्यायनियमं हित्वा लोकवृत्त्या प्रयुञ्जते" टी०। १आ०। "एवमल्पतत्वं प्रत्यनन्यथासिद्धायां भक्तौ लक्षितायां ज्ञानयोगभक्तीनामङ्गप्रधानभावविवेकाय द्वितीयाद्विकस्यारम्भः। "सा मुख्येतरापेक्षितत्वात्" १० सू०। आद्विकसमाप्त्युत्तरस्य पुनः स्मारणाय सेति निर्देशः। सा परा भक्तिर्मुख्या प्रधानम् इतरैरात्मज्ञानयोगादिभिः स्वोपकार्यतयापेक्षितत्वादित्यर्थः। छान्दोग्ये (पृ०६।६) "यो भूमा तत्सुखम्" इत्यादुपक्रम्य स्मायते "आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः" इति च "आत्मैवेदं सर्वमिति स य एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवतीति" तत्तदात्मरतिरूपायाः परभक्तेः प्रथमग्रन्थिति दर्शनमप्रियत्वादिध्वनिरासमुखेनाङ्गं भवति। यथा "दण्डी प्रैषमन्वाह प्राञ्जीनायोती दोहयति अभिजानन् जुहोति घनवान् सुखयानित्यादौ दण्डाद्यङ्गं तथा "दर्शनमपि रतेरङ्गं मननविज्ञानयोरुक्तप्रियदर्शनार्थतया न्यायप्राप्तयोरनुवादः। एवमात्मक्रीडादेरतिनैयत्यादर्थप्राप्तोऽनुवाद एव। अन्यथा रत्युद्देशेन दर्शनाद्विधौ दर्शनाद्युद्देशेन वा रत्यादिविधौ वाक्यानि भिद्येरन्। तस्मात् (पूर्वमीमांसायाम्। अ० ३। पा०१। सू० २) "शेषः परार्थत्वादिति" न्यायाद्दर्शनमङ्गमिति। अतएव भगवान् मनुरपि। (महाभार०। शान्ति०।अ०१६४। श्लो० ७१११।७११२)। "यस्त्वात्मा प्राकृतं कर्म नित्यमात्मरतिर्मुनिः। सर्वभूतात्मभूतात्मा स्याच्चेत् परमा गतिः"। इत्यनेनात्मरतेः प्राधान्यमाहेति" टी०। "प्रकरणाच्च" ११ सू०। "प्रकरणं रतेरेव फलवत्त्वात् तस्मात्तत्प्रकरणस्थं दर्शनमङ्गं भवितुमर्हतीति" टी०। "दर्शनफलमिति चेन्न तेन व्यवधानात्" १२ सू०। "अथ दर्शनस्यैव फलं स्वाराज्यलक्षणममृतत्वं तथा च तस्यैव प्रकरणमिति वैपरीत्यमिति चेन्न तेन तच्छब्देन व्यवधानात् (कां०। पृ०५।६।७) य स्वराड् भवतीत्यत्र तच्छब्देन यच्छ्रुताऽऽत्मरतिमानेवोपस्थाप्यते न विप्रकृष्टः पश्यन्निति व्यवहितोपस्थितौ कारणाभावात्। प्रकरणमेव कारणमिति चेन्न अन्योन्याश्रयात्" टी०। "दृष्टत्वाच्च" १३ सू०। "दृष्टं हि लोके सौन्दर्यादिज्ञानस्य तरुण्यादिदृष्टे रतिहेतुत्वं न तु रतेर्ज्ञानहेतुत्वमिति दृष्टोपकारत्वादप्यङ्गत्वमवसीयते। दृष्टं च प्राक्तनिष्करुणत्वाल्पमहिमत्वाप्रियत्वादिज्ञानं मनोमालिन्यकारणं भूतेषु करुणावज्ज्ञानाद्याहतैश्वर्यादिज्ञानं च प्रियतरमाप्य आत्मेति ज्ञानान्मालिन्यनिवृत्तिस्ततः परा भक्तिरिति। अतएव गीयते (गी०।अ०५। श्लो० १७)। "तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः। गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः। इति। तथा आयुर्वेदेऽपि (अष्टाङ्गहृदये। अ० १। श्लो० २१)। धीधैर्यात्मादिविज्ञानं मनोदोषौषधं परम्" टी०। "अतएव तदभावाद्बल्वलीनाम्" १४ सू०। "यतो ज्ञानं दृष्टोपकारक्रमङ्गमत एव दृष्टोपकारं निरस्य मनोमालिन्यादिबाधात् प्रधानभगवद्रतिरागमात्रेण बल्वलीनां मुक्तिः स्मर्यते। (विष्णुपुराणे। अंशे ५। अ० १३। श्लो० १४। १५। "तच्चिन्ताविपुलानन्दक्षीणपुण्यचया सती। तदप्राप्तिमहादुःखविक्षीणाशेषपातका। चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम्। निरुच्छ्वासतया मुक्तिं गतान्यानोपकल्पका" इति। अत्र सुखदुःखनिष्ठेनानुरागोऽनुभूयते न मुक्तिरिति वाक्यार्थः। द्वारत्वाद्दुःखलेनापि कर्मणा फलसिद्धिरिव तासां रागान्मुक्तिरदृष्टद्वारतया ज्ञानमङ्गमेव प्रधानत्वे तु तदभावे फलं न स्यात् चिन्ता च न ब्रह्मात्मैक्यज्ञानं तत्कारणश्रवणमननाद्यसम्भवात्। किन्त्वनुरागनियतानुस्मृतिरेव। नचायमर्थवादः अपूर्वार्थत्वाभावात् सन्निधौ विध्यभावाच्चेति" टी०। "भक्त्या जानातीति चेन्नाभिज्ञप्त्या स्वाध्यायात्" १५ सू०। "इदानीं श्रुतिविरोधेन प्रकरणस्यानङ्गत्वबाधमाशङ्क्य समाधीयते। यथा श्रुतं (गी०। अ० १८। श्लो० ५५। "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्"। इति। तत्र (तैत्तिरीयसं०। अ० १। प्र०५। अनुवाक०८) "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इतिवत् कारकश्रुत्या बलीयस्या भक्तेर्ज्ञानहेतुत्वमवसीयते। यद्यपि दृष्टत्वादित्यनेन दृष्टोपकारे प्रत्यक्षगम्ये न श्रुतेरवकाशः तथापि ब्रह्मविषयिण्या रतेर्ब्रह्मविषयज्ञानोपकार्यत्वं न प्रत्यक्षगम्यम्। किन्तु तरुण्यादे रतौ तथा दर्शनेन ब्रह्मगोचरायामप्यनुमातव्यम्। तथाच लिङ्गत्वे पर्यवसानादिति चेन्न दोषः। तथाहि यदि केवलं जानातीति ब्रूयेन्न त्वेवम्। किन्त्वभिजानातीति। अभिज्ञा पूर्वज्ञातज्ञानमुच्यते। तथा च भक्त्युपकारिपूर्व-

ज्ञानं तत्फलरूपभक्तिप्रवर्त्तकम् । अनन्तरं यावत् तद्दार्ढ्यं भक्त्यैवाभिन्नभिन्नभावेनापेक्ष्यते ब्रीह्यवहननेनावघातवदिति । कार्य्यसाहाय्यार्थमुक्तं ततो ज्ञानदार्ढ्येन भक्तिदार्ढ्ये सति विगत इति । तस्माज्ज्ञेयं स्मृतिः किन्तु न्यायप्राप्तानुवाद इति । एतमेवार्थं स्फुटीकरोति"टी०। "प्रागुक्तं च"१६सू०।"भक्त्या मामित्यस्य पूर्वं ब्रह्मभूयाय कल्पत इत्यभिधाय (गी० । अ० १८ । श्लो० ५४)। "ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्" इत्युक्तम् । तस्य तु ज्ञातब्रह्मणो ज्ञानप्रयोजनाभावादनुक्तमनुवादत्वमिति"टी० "एतेन विकल्पोऽपि प्रत्युक्तः"१७सू०।"एतेन ज्ञानस्याङ्गत्वनिर्णयेन ज्ञानभक्त्योरत्र विकल्पपक्षोऽपि प्रत्युक्तः निराकृत इति मन्तव्यम् । नह्यङ्गाङ्गिनोरेकत्र विकल्पो भवतीति । अपिशब्दात् समुच्चयोऽपीति" टी० । "देवभक्तिरितरस्मिन् साहचर्यात्"१८सू०।"क्वचिदेवं श्रूयते (श्वेताश्व० पृ०११७) "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति । अत्र देवभक्तिरीश्वरेतरस्मिन् देवे मन्तव्या कुतः गुरुभक्तिसाहचर्यात् । साहचर्यं हि नास्तफलायां भक्तौ घटते । इन्द्रादिदेवताश्चाराधिताः शुभवज्ज्ञानफलाय भवन्तीति साहचर्यमपि निर्णायकम् । साहचर्याद्दुलुकशब्दवदुपयुक्तरूपत्वमत्रकमेतत्"११टी०,"योगस्तु भयार्थमपेक्षणात् प्रयाजवत्"१९सू० । "योगः पुनर्ज्ञानार्थं भक्त्यर्थं च भवति । समाहितमनस्कतायां उभाभ्यामपेक्षणात् । ननु (पूर्वमीमांसायाम् । अ०२ । पा० १ । सू० २१) "गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यादिति" न्यायात् प्रधानाङ्गं योगः कथमङ्गाङ्गिभावत्व आह प्रयाजवदिति यथा प्रयाजो वाजपेयाद्यङ्गं तदीयदीक्षणीयादेरप्यङ्गं तद्वत् । तदङ्गताबोधकप्रमाणाविशेषात् । केवलं ज्ञानार्थं योगानुष्ठानप्रसङ्गेन भक्तिमुपकरोतीति । एवं विषयवैराग्यमपि उभयार्थं मन्तव्यम् । ननु योगे पातञ्जलदर्शने २३पृ०) "ईश्वरप्रणिधानादिति" पतञ्जलिस्मरणं दुरपह्नवं तत्र प्रणिधानाभिधेयस्य भगवद्भजनस्य समाधिसिद्ध्यर्थत्वमिति कथं भक्तेः प्राधान्यमित्यत आह"टी० ।"गौण्या तु समाधिसिद्धिः"२०सू०। तत्र प्रणिधानं गौणभक्तिरेव न प्रधानं तया समाधिसिद्धिरिति न स्मृतिविरोधोऽपीति । भवति च वाक्यशेषत्वेन (पा०द०४०,४१पृ०) "तस्य वाचकः प्रणवः" "तज्जपस्तदर्थभावनमिति"टी० । "हेया रागत्वादिति चेन्नोत्तमास्वदत्वात् सङ्गवत्"२१सू०।"योगशास्त्रमप्यात्मानात्मविवेकाद्यर्थं स्वतन्त्रम् । योगशास्त्रोक्तरागत्वादिविशेषाङ्गिरपि मुक्तेच्छया हेयमेव । तथा च सूत्रं (पा० द० ७२पृ०) "हेयाः रागद्वेषाभिनिवेशाः क्लेशाः" इति । एवमुच्यते । नैवं वाच्यम् उत्तमास्वदत्वाद्भक्तेः परमेश्वरविषयत्वादिति यावत् । न हि रागत्वमात्रेण हेयत्वं किन्तु संसारानुबन्धिरागत्वेनैव । यथा सङ्गत्वमात्रेण न त्याज्यता किन्तु असत्सङ्गत्वेन तद्वत् । तथा चेश्वरभक्तिर्हेया रागत्वादित्यत्र संसारानुबन्धित्वं मोक्षानुगुण्यं चोपाधिः । नच सात्त्विकी सा (गी० । अ० १७ । श्लो०४) "यजन्ते सात्त्विका देवान्" इत्यादिना सात्त्विकत्वकीर्त्तनादिति"टी० । "तदेव कर्मज्ञानिभ्योऽस्य आधिक्यशब्दात्" २२सू०"तदेव भजनं मुख्यं तस्मो भक्तेर्वा मुख्यत्वम् । एतत् सर्वमेव निश्चितं यस्मादेवं शब्द्यते (गी० । अ० ६ । श्लो० ४६ । ४७)। "तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः । कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन । योगिनामपि सर्वेषां मद्गतेनान्तरात्मना । श्रद्धावान् भजते यो मां स मे युक्ततमो मतः" इति । अत्र विशेषणानां तपआदीनामाधिक्यनिबन्धनं विशेष्याणामाधिक्यं क्वचादिति मन्तव्यम् । न खलु कस्य सुखादाधिक्यमुपपद्यते । तस्माद्भक्तिः प्रधानमिति । सुख्यर्थेनापि तदुत्पत्तिपरिहार्थं पठति" टी० । "प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः" २३सू० । अत्र कृतश्चोऽपि द्वादशाध्याय उदाहरणम् (गी० । अ० १२ । भक्तियोगशब्दे स च अध्यायो दृश्यः ।

तल्लिङ्गानि च तत्रैवोक्तानि यथा

"तत्परिशुद्धिश्च गत्या लोकवल्लिङ्गेभ्यः" ४२ सू० । "यद्यपि ज्ञानामीत्यादिवद्दृष्टं भजेऽनुरज्ये इत्यैवं ज्ञानादिना प्रत्यक्षगम्यैव भक्तिस्तथापि तस्या दृढतरसंस्कारवैशिष्ट्यलक्षणा परिशुद्धिर्मं प्रत्यक्षतो निर्णीयते ज्ञानप्रामाण्यवत् । तस्मात् तल्लिङ्गेभ्यो लोकवज्ज्ञातलिङ्गेभ्य एव । यथा लोकेऽनुरागातिरेक्यं तत्कथादावश्रुपुलकादिविकारैरनुमीयते तद्वदिति । न केवलं लोकवल्लिङ्गानि भवन्ति अक्षरीणां स्मृतिभ्योऽपि तानि लिङ्गानि बाहुल्येन लक्ष्यन्त इत्याह" टीका । "सम्मानबहुमानप्रीतिविरहेतरविशिष्टेतृसमर्पितस्वान्तितदर्थप्राणस्थानतदीयतासर्वतद्भावाद्यात्मिकाभ्यादीनि

स्मरन्त्येभ्यो वाङ्मल्यात्" ४४ सू०। "यथार्जुनस्य सम्मानः। "प्रत्युत्थानं तु कृष्णस्य सर्वास्त्रेभ्यो धनञ्जयः। न लङ्घयति धर्मात्मा भक्त्या प्रेम्णा च सर्वदा"। बहुमानःयथा द्रुह्यकोः (नृसिंहपु० अ० २५ श्लो० २२) "पक्षपातेन तस्याग्नि रूपे पद्मे च तादृशि। बभार सेवे तद्वर्णे बहुमानमतिं स्तवः"। प्रीतिर्यथा विदुरस्य। (महाभारते। उद्यो० अ० ८८ श्लो० ३११४)। "या प्रीतिः पुण्डरीकाक्ष! तवागमनकारणात्। सा किमाख्यायते तुभ्यमन्तरात्मासि देहिनाम्"। विरहो यथा गोपीनाम् (विष्णु पु०। अंशे ५। अ० १८। श्लो० १७) "कृष्णासक्ततो वक्तुं किं ब्रवीमि न नः क्षमम्। गुरवः किं करिष्यन्ति दग्धानां विरहाग्निना"। इतरविचिकित्सा यथा श्वेतद्वीपनिवासिनाम्। नारददर्शनेऽपि विघ्नबुद्धिः यथोपमन्योः (महाभारते। अनुशा० अ० १४। श्लो० ७०७७)। "अपि कीटपतङ्गो वा भवेयं यदुराजया। न तु भक्त! त्वया दत्तं त्रैलोक्यमपि कामये"। अहिंसाख्याती यथा यमस्य। (नृसिंहपुरा० अ० ८ श्लोक० २१) "नरके पच्यमानस्तु यमेन परिभाषितः। किं त्वया नार्चितोदेवः केशवः खेदनाशनः"। (विष्णुपु०। अंशे ३। अ० ७। श्लो० १०)। "स्मृपुरुषमभिवीक्ष्य पाशहस्तम्। यदति यमः किल तस्य कर्णमूले। परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानाम्" सदर्धप्राणस्थितिर्यथा हनूमतः। तेनैवोक्तम् (वाल्मीकीये उत्तरकाण्डे। स० १०७ श्लो० २१३१)। "यावत् मम कथा लोके विचरिष्यति पावनी। तावत् स्थास्यामि मेदिन्यां तवाज्ञामनुपालयन्"। अथ वा कृतघ्नत्यानामपि नारदादीनां तदेकाराधनार्थं प्राणधारणम्। अतएव श्रुतिः। (नृसिंहतापिनी। खं० ६) "यं सर्वदेवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्चेति"। तदीयतास्वभावस्तु बलेरुपरिचरस्य (महाभारते। शां०। अ० ३२७। श्लो० १२७१८) "आत्मराज्यं धनं चैव कलत्रं वाहनं तथा। यत्किञ्चिदागतवतं सर्वमिति तत् प्रयते सदा" इति। सर्वभूतेषु तद्भावो यथा प्रह्लादस्य प्रसिद्धः। उक्तञ्च तेनैव। (विष्णु पु०। अंशे १। अ० १९। श्लो० ५) "एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी। कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम्"। तृप्तिरप्रातिकूल्यं यथा कृष्णागतेऽपि भगवति भीष्मस्य। तेनैवोक्तम्। (महाभारते भीष्मप०। अ० ६८। श्लो० २६४) "एह्येहि देवेश! जगन्निवास! नमोऽस्तु ते पाण्डवदासिपाशे!। प्रसन्न मां पातय लोकनाथ। रथादुदग्राङ्गुतशौर्य संख्ये"। आदिशब्दादुद्धवाक्रूरादिचेष्टितान्यपि द्रष्टव्यानि। यद्यपि द्वेषविपक्षभावादित्यत्रेदमुक्तं तथापि तत्र रागलिङ्गत्वेनात्र च बहुभक्तिपरिशुद्धिलिङ्गतयेति विशेष इति। ननु स्वामिन्यनुरागिणां तदनुग्रहतारतम्यवत्सु द्वेषेष्वादयो भवन्ति तेऽपि किं लिङ्गानि नेत्याह टीका। "द्वेषादयस्तु नैवम्" ४५ सू०। "तदसम्भावे। यथोक्तं भगवता द्वैपायनेन महाभारते अनुगी०। अ० १४८। पृ० १४६। श्लो० ७६६) "न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे" इति। शिशुपालस्य तु द्वेषात् स्मरणं ततः परा भक्तिस्ततो मुक्तिरित्येव क्रमः इति" टीका।

अत्रेदमवधेयम् शाण्डिल्यसूत्रादौ "भक्तेर्ज्ञानाङ्गत्वं यदुक्तं तदु भक्तेः प्रशंसार्थं तत्त्वज्ञानेनाज्ञाननिवृत्तौ अज्ञानकार्यानुरागविशेषान्तःकरणवृत्तिरूपाया भक्तेः कृतस्मरां सम्भवोऽतो ज्ञानस्यैव भक्तिरङ्गम्। अतएव पात० सू० ईश्वरप्रणिधानात् योगसिद्धिरुक्ता "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" क्रियायोगरूपेश्वरप्रणिधानस्य योगाङ्गत्वमुक्तम् अतएव भक्तिर्ज्ञानाय कल्पते इति सूत्राफलकर्त्तां वोपदेव उदाजहार। इयांस्तु भक्तौ रसास्वादसुखरूपतेति।

तेन च मुक्त्याफलत्वमन्ये भक्तिलक्षणं तद्भेदास्तान्योक्तं यथा "तत्र विष्णुभक्तिर्लक्षणं भेदाश्च। "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्" मू० "यस्मात् कृष्ण एव कैवल्यप्रदः यद्वा तस्मात् उपायविशेषस्याविवक्षितत्वात्। केनापि विहितेन अविहितेन वा उपायेन साध्यसिद्ध्यावधृतसामर्थ्येन, न तूच्चादिना कृष्णे सत्त्वोपाधौ ब्रह्मणि निवेशयेत् स्थिरीकुर्यात् लिङ्निर्देशस्याविवक्षितत्वात् उपायपूर्वं भगवति मनःस्थिरीकरणं भक्तिरिति लक्षणार्थः। न तावदस्यासम्भवः प्रह्लादादौ सुप्रसिद्धत्वात्। न च कर्मत्वयार्थविधिसिद्ध्यर्थयोः भक्त्योरव्याप्तिः तयोरन्तःकरणशुद्धिहेतुत्वेन मनोनिवेशहेतुत्वात्। नाप्युद्धवादावभक्तिभूतेऽतिव्याप्तिः तस्यानुपायत्वेन निरस्तत्वात्। नापि शुद्धायां भक्तौ उपायानिर्देशादुपायेनेति लक्षणेऽनन्वभूतमिति शङ्क्यम्। श्रौताभावेऽप्यानुमानिकस्य सम्भवात्। सा द्वेधा विहिता अविहिता च। तत्र विहिता "देवानां गुणलिङ्गानामानुश्रविककर्मणाम्। सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या।

व्यनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी। जरयत्याशु या कोशं निगीर्णमनलो यथा"। सा द्वेधा मिश्रा शुद्धा च। मिश्रा त्रेधा। कर्ममिश्रा कर्मज्ञानमिश्रा ज्ञानमिश्रा च। कर्ममिश्रापि त्रेधा। तामसी राजसी सात्त्विकी च तामसी च त्रेधा। हिंसायां दम्भाथों मात्सर्य्यार्थां च।"अभिसन्धाय यद्धिंसां दम्भं मात्सर्य्यमेव वा। संरम्भी भिन्नदृग्भावमपि कुर्य्यात् स तामसः। राजसी त्रेधा। विषयार्थां यशोऽर्थां ऐश्वर्य्यार्थां च। "विषयानभिसन्धाय यश ऐश्वर्यमेव वा। अर्चायामर्चयेद् यो मां पृथग्भावः स राजसः। सात्त्विकी त्रेधा कर्मत्वयार्थां विष्णुप्रीत्यर्थां विधिसिद्ध्यर्थां च। "कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्। यजेत यष्टव्यमिति वा पृथग्भावः स सात्त्विकः"। कर्मज्ञानमिश्रा त्रेधा उत्तमा मध्यमाधमा च सत्त्वतारतम्यात्। तत्रोत्तमा "सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः। भूतानि भगवत्यात्मन्येष भागवतोत्तमः। मध्यमा "ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च। प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः"। अधमा "अर्चायामेव हरये पूजां यः श्रद्धयेहते। न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः"। ज्ञानमिश्रा "सद्गुणसुतिमात्रेण मयि सर्वगुहाशये। मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ। लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्। अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे। सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत। दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः। स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः। येनातिव्रज्य त्रिगुणान् मद्भावायोपपद्यते"। अविहिता चतुर्द्धा, कामजा द्वेषजा भयजा स्नेहजा च।"कामाद् द्वेषाद् भयात् स्नेहाद् यथा भक्त्येश्वरे मनः। आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः", भक्तिष्वधिकारिणश्च तत्रोक्ता यथा "गोप्यः कामाद्भयात् कंसो द्वेषाच्चैद्यादयो नृपाः। सम्बन्धाद् वृष्णयः स्नेहात् यूयं भक्त्या वयं विभोः"। सम्बन्धात् स्नेहाद्वृष्णयो यूयं चेत्येकम्। भक्त्या विहितया वयमित्यत्र विभागः। "निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु। तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम्। यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्। न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः। य एतान् मे पथो हित्वा भक्तिज्ञानक्रियात्मकान्। क्षुद्रान् कामान् चलैः प्राणैर्जुषन्तः संसरन्ति ते। स्वेऽधिकारे या निष्ठा सगुणः स प्रकीर्तितः"। एवं सति कर्ममिश्रा नव गृहस्थानाम्। कर्मज्ञानमिश्राभिक्षूणां वनस्थानाम्। ज्ञानमिश्रैका भिक्षूणाम्। शुद्धैका सर्वेषां उत्पन्नेऽनुरागे। उत्पाद्या तु यथा संमिश्रा। अविहिताश्चतस्रो गोप्यादीनाम् एवमष्टादश भेदाः। "यावत्स जायेत परावरेऽस्मिन् विश्वेश्वरे दृष्टरि भक्तियोगः। तावत् स्वधीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत। नैष्कर्म्यमप्यच्युतभाववर्जितम् न शोभते ज्ञानमलं निरञ्जनम्। कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम्"। विष्णुभक्तप्रकर्षवर्णनलक्षणं भेदाय तत्रोक्ता यथा "कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतः स्वभावात्। करोति यद्यत् सकलं परस्मै नारायणायेति समर्पयेत्तत्" इत्युपक्रमे स एकोनविंशतिधा। ब्रह्मविंशद्वर्गः१। त्रिंशद्वर्गः२। षड्विंशतिवर्गः३। पञ्चविंशतिवर्गः४। चतुर्विंशतिवर्गः५। त्रिंशतिवर्गः ६। एकोनविंशतिवर्गः७। अष्टादशवर्गः८। षञ्चदशवर्ग ९। त्रयोदशवर्गः १०। द्वादशवर्गः११। एकादशवर्गः १२। दशवर्गः १३। नववर्गः १४। सप्तवर्गः १५। षड्वर्ग १६। पञ्चवर्गः १७। चतुर्वर्गः१८। त्रिवर्गः १९। एते च यथोत्तरमल्परङ्गवर्गाः। तत्र षडविंशद्वर्गः "तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम्। शाब्दे परे च निष्णातो ब्रह्मण्युपशमाश्रयम्१। तत्र भागवतान् धर्मान् शिक्षेद्गुर्वात्मदैवतः। अमायया नुवृत्त्या च तुष्येदात्मदो हरिः। सर्वतो मनसोऽसङ्गमादौ सङ्गञ्च साधुषु। दया मैत्री प्रश्रयञ्च भूतेष्वद्धा यथोचितम्। शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवम्। ब्रह्मचर्यमहिंसां च समत्वं द्वन्द्वसंज्ञयोः। सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेततामृ। विविक्तं चीरवसनं सन्तोषं येन केनचित्। अद्धा भागवते शास्त्रे निन्दामन्यत्र चापि हि। मनोवाक्कायदण्डञ्च सत्यं शमदमावपि। श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः। जन्मकर्मगुणानाञ्च तदर्थेऽखिलचेष्टितम्। इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम्। दारान् सुतान् गृहान् प्राणान् यत् परस्मै निवेदनम्। एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम्। परिचर्या चोभयत्र महत्सु नृषु साधुषु। परस्परानुकथनं पावनं भगवद्यशः। मिथोरतिर्मिथस्तुष्टिः निवृत्तिर्मिथ आत्मनः। स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं

हरिम्। भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम्। क्वचिद्रुदन्त्यच्युतचिन्तया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः। नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः। इति भागवतान् धर्मान् शिक्षन्भक्त्या धिये चोद्धवया। नारायणपरो मायामञ्जस्तरति दुस्तराम्" भाग०११।३अ०।

त्रिंशद्वर्गः "सत्यं दया तपःशौचन्तितिक्षेक्षा शमोदमः। अहिंसा ब्रह्मचर्य्यञ्च त्यागः स्वाध्याय आर्जवम्। सन्तोषः समदृक्सेवा ग्राम्येहोपरमः शनैः। नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम्। अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः। तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव!। श्रवणं कीर्त्तनं चास्य स्मरणं महतां गतेः। सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम्। नृणामयं परो धर्मः सर्वेषां समुदाहृतः। त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति" भाग०७।११अ०।

षड्विंशतिवर्गः। "हरौ गुरौ मयि भक्त्यानुवृत्त्या विद्वत्तया द्वन्द्वतितिक्षया च। सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या। मत्कर्मभिर्मत्कथया च नित्यं महेवसङ्गादुगुणकीर्त्तनान्मे। निर्वैरसाम्योपशमेन पुत्रा! जिज्ञासया देहगेहात्मबुद्धेः। अध्यात्मयोगेन विविक्तसेवया प्राणेन्द्रियात्माभिजयेन सम्यक्। सच्छ्रद्धया ब्रह्मचर्य्येण शश्वदसंप्रमादेन यमेन वाचाम्। सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन। योगेन दृग्वृत्तमसत्त्वयुक्तो लिङ्गं व्यपोहेत् कुशलोऽहमाख्यन्" भाग०५।५अ०।

सप्तविंशतिवर्गः "स्वधर्माचरणं भक्त्या विधर्माच्च निवर्त्तनम्। दैवलब्धेन सन्तोष आत्मविचरणार्चनम्। श्राद्धधर्मनिष्ठत्वं मोक्षधर्मरतिस्तथा। मितमेध्यादनं शश्वत् विविक्तक्षेमभावनम्। अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः। ब्रह्मचर्य्यं तपः शौचं स्वाध्यायः पुरुषार्चनम्। मौनं सदासनजयः स्थैर्य्यं प्राणजयः शनैः। प्रत्याहारश्चेन्द्रियाणां विषयान्मनसो हृदि। दिष्णानामेकदेशे च मनसः प्राणधारणा। वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः। एतैरन्यैश्च पथि भिर्मनो दुष्टमसत्पथे। भक्त्या युञ्जीत शनकैर्जितप्राणोऽनिन्द्रितः" भाग०३।२८अ०।

अष्टविंशतिवर्गः "मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनम्। परिचर्य्या स्तुतिः प्रह्वगुणकर्मानुकीर्त्तनम्। मत्कथाश्रवणे श्रद्धा मदनुध्यानशुश्रुवः!। सर्वलाभोपहरणं दास्येनात्मनिवेदनम्। मज्जन्मकर्मकथनं मम पर्वानुमोदनम्। गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः। यात्रावलिविधानं च सर्ववार्षिकपर्वसु। वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम्। ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः। उद्यानोपवनाक्रीड़पुरमन्दिरकर्मणि। समार्जनोपलेपाभ्यां सेकमण्डलवर्त्तनैः। गृहशुश्रूषणं मह्यं दासवद्यदमायया। अमानित्वमदम्भित्वं कृतस्यापरिकीर्त्तनम्। अपि दीपावलोकं मे नो पयुञ्ज्यान्निवेदितम्। यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः। तत् तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते। मद्वर्त्म सम्प्रतिष्ठाय मन्दिरं कारयेद्दृढम्। पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान्। पूजादीनां प्रवाहार्थं सदा पर्वण्यथान्वहम्। क्षेत्रापणपुरग्रामान् दत्त्वा मत्सार्ष्टितामियात्। प्रतिष्ठया सार्वभौमं सप्तजन्मभुवत्रयम्। पूजादिना ब्रह्मलोकं त्रिभिर्मत्सायतामियात्" भाग०११।२७अ०।

विंशतिवर्गः "सेवितेनानिमित्तेन स्वधर्मेण महीयसा। क्रियायोगेश्च शस्तेन नातिहिंस्रेण नित्यशः। मद्भिस्पृदर्शनस्पर्शपूजास्तुत्यभिवन्दनैः। भूतेषु मद्भावनया सत्त्वेनासङ्गमेन च। महतां बहुमानेन दीनानाथानुकम्पया। मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च। आध्यात्मिकानुश्रवणान्नामसंकीर्त्तनाच्च मे। आर्जवेनार्य्यसङ्गेन निरहङ्क्रियया तथा। मद्धर्माचरणैरेतैः परिसंशुद्धआशयः। पुरुषस्याञ्जसाभ्येति श्रुतमात्रगुणं हि माम्" भाग०३।२९अ०।

एकोनविंशतिवर्गः "सच्छ्रद्धया भगवद्धर्मचर्यया जिज्ञासयाऽऽध्यात्मिकयोगनिष्ठया। योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया च। अघेन्द्रियारामसगोष्ठ्यशून्यया तत्सम्मतानामपरिग्रहेण। विविक्तरुच्या परितोष आत्मन् विना हरेर्गुणपीयूषपानात्। अहिंसया पारमहंस्यचर्य्यया शान्त्या ससन्दाचरितायधीभुन्। यमैरकामैर्नियमैरनिन्द्या निरीहया द्वन्द्वतितिक्षया च। हरेर्गुणश्रुत्परकर्णपूरगुणाभिधानेन विजृम्भमाणया। भक्त्या ह्यसङ्गः सदसत्यनात्मनि स्याद्विगुणे ब्रह्मणि चाञ्जसा रतिः" भाग०४।२२अ०।

अष्टादशवर्गः "मयि भावेन सत्येन मत्कथाश्रवणेन च। सर्वभूतसमत्वेन निर्वैरेणाप्रसङ्गतः। ब्रह्मचर्य्येण मौ

नेम स्वधर्मेण मद्दीयसा । यदृच्छयोपपन्नेन सन्तुष्टो मितभुक् मुनिः । विविक्तशरणः शान्तो मैत्रः करुण आत्मवान् । सानुबन्धे च देहेऽस्मिन्न कुर्वन्नसदाग्रहम् । ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च । निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः । उपलभ्यात्मनात्मानं भजेद्यो वार्कसात्मदृक् । सङ्गनिर्मुक्त मद्भाममसमति प्रतिपद्यते । अतो वन्धुमसच्चक्षुः सर्वानुस्यूतमद्वयम्" भाग०३ २७अ० ।

पञ्चदशवर्गः "श्रद्धामृतकथायां मे शश्वन्मदनुकीर्त्तनम् । परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम । आदरः परिचर्यायां सर्वाङ्गैरभिवन्दनम् । मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः । मदर्थेष्वङ्गचेष्टा च वचसा मद्गुणेरणम् । मय्यर्पणञ्च मनसः सर्वकामविवर्जनम् । मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च । इष्टं दत्तं हुतं भुक्तं मदर्थं यदुव्रतं तपः । एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदनम् । मयि सञ्जायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते" भाग० ११।१९अ० ।

सप्तदशवर्गः "कुर्य्यात् सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् । मय्यर्पितमनश्चित्तो मद्धर्मात्मनोरतिः । देशान् पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् । देवासुरमनुष्येषु मद्भक्ताचरितानि च । पृथक्सत्त्वेषु मां मद्भं पर्वयात्रामहोत्सवान् । कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः । मामेव सर्वभूतेषु बहिरन्तरपावृतम् । ईक्षेतात्मनि चात्मानं यथाखमसलाशयः । इति सर्वाणि भूतानि मद्भावेन महाद्युते ! । सभाजयन् मन्यमानो ज्ञानं केवलमाश्रितः । ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिङ्गके । अक्रूरे क्रूरके चैव समदृक् पण्डितो मतः । विसृज्य स्वयमन्यां स्वां दृशं व्रीडां च दैहिकीम् । प्रणमेद्दण्डवद्भूमावाश्वचाण्डालगोखरम् । यावत् सर्वेषु भूतेषु मद्भावो नोपजायते । तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः । नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात् । स्पर्द्धासूयातिरस्काराः साहङ्कारा वियन्ति हि" भाग०११।२९अ० ।

अष्टादशवर्गः "गुरुशुश्रूषया भक्त्या सर्वलाभार्पणेन च । सद्भेन साधुभक्तानामीश्वराराधनेन च । सत्त्वया तत्कथायाञ्च कीर्त्तनैर्गुणकर्मणाम् । तत्पादाम्बुरुहध्यानात् तल्लिङ्गेक्षार्हणादिभिः । हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः । इति भूतानि मनसा कामैस्तैः साधु मानयेत् । एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे । वासुदेवे भगवति यया संलभते रतिम् । विषयस्य कर्माणि गुणानतुल्यान् वीर्य्याणि श्रीजातनृभिः कृतानि । यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति रौति नृत्यति । यदाथहस्यक्त इव क्वचिद्रुदत्याक्रन्दते ध्यायति वन्दते जनम् । सद्यः पुनाति सुक्तसमस्तबन्धनस्तद्भावभावानुकृतस्वयाकृतिः । निर्दग्धबीजानुशयो महीयानू भक्तिप्रयोगेण समेत्यधोक्षजम्' भाग०७ ७ ।

एकादशवर्गः "स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुकीर्त्तने । करौ हरेर्मन्दिरमार्जनादिषु श्रुतौ चकाराच्युतसत्कथोदये । मुकुन्दलिङ्गालयदर्शने दृशौ तदुभृत्यगात्रस्पर्शेऽङ्गसङ्गमम् । घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसना तदर्पिता । पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने । कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः" भाग०९।४ ।

दशवर्गः "आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ । तस्य तैर्यत् क्षणो नीत उत्तमश्लोकवार्त्तया । तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत । न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे । श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः । न यत्कर्णपथोपेतो जातु नाम गदाग्रजः । विले बतोरुक्रमविक्रमान् ये न शृण्वतः कर्णपुटे नरस्य । जिह्वासतो दार्दुरिकेव सूत ! न चोपगायत्युरुगायगाथाः । भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् । शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा । बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये । पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ । जीवन् शवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु । श्रीविष्णुपद्यामनुजस्तुलस्याः श्वसन् शवो यस्तु न वेद गन्धम् । तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः । न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः" भाग०२।३अ० ।

नवमवर्गः "श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् । इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा । क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्" भाग०७।५अ० ।

कृतवर्गः "यदनिमित्तनिमित्तेन स्वधर्मेणामलात्मना। तीव्रया मयि भक्त्या च श्रुतसम्भृतया चिरम्। ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा। तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना। प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम्। तिरोभविष्यती शनकैरग्नेर्योनिरिवारणिः" भाग०३।२७अ०।

ऋङ्वर्गः "वाणी गुणानुकथने, श्रवणे कथायां, हस्तौ च कर्मसु, मनस्तव पादयोर्नः। स्मृत्यां, शिरस्तव निवास जगत्प्रणामे, दृष्टिः सतां दर्शनेऽस्तु भगवत्तनूनाम्" भाग० १०।११ अ०।

यजुर्वर्गः "गृणतां गदतां शश्वदर्चतां त्वामिवन्दताम्। नृणां संवदतामन्तर्हृदि भास्यमलात्मनाम्" भाग०१०।८६अ०।

चतुर्वर्गः "तस्मादेकेन मनसा भगवान् सात्वतां पतिः। श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदाः" भाग० ६।२ अ०।

त्रिवर्गः "तस्माद्भारत! सर्वात्मा भगवान् हरिरीश्वरः। श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम्" भाग०२।१अ० "तस्मात् सर्वात्मना राजन्! हरिः सर्वत्र सर्वदा। श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम्" भाग०२।२अ० पुनर्वचनं त्रिवर्गस्यान्तरङ्गतमत्वख्यापनार्थम्"।

"भज इत्येव वै धातुः सेवायां परिकीर्तितः। तस्मात् सेवा बुधैः प्रोक्ता भक्तिः साधनभूयसी" गारुड़े २३१अ०। अथ विशेषलक्षणानि। गौतमीयतन्त्रे "देवतायाञ्च मन्त्रे च तथा मन्त्रप्रदे गुरौ। भक्तिरष्टविधा यस्य तस्य क्लेशः प्रसीदति। तद्भक्तजनवात्सल्यं१ पूजायाञ्चानुमोदनम्२। सुमना अर्चयेन्नित्यं३ तदर्थे दम्भवर्जनम्४। तत्कथाश्रवणेरागस्तदर्थे चाङ्गविक्रिया६। तदनुस्मरणं७ नित्यं यस्तद्भक्त्योपजीवति८। भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते। स मुनिः सत्यवादी च कीर्त्तिमान् स भवेन्नरः"। पाद्मे कार्त्तिकमाहात्म्ये यमधूत्रेयसंवादे। "श्रवणं कीर्त्तनं पूजा सर्वकर्मार्पणं स्मृतिः। अर्चनं वन्दनं दास्यं सख्यमात्मार्पणं हरौ"। तत्रैवोत्तरे शिवपार्वतीसंवादे "आद्यन्तु वैष्णवं प्रोक्तं शङ्खचक्राङ्कनं हरेः। धारणञ्चोर्द्धपुण्ड्राणां तन्नामानां परिग्रहः। अर्चनञ्च जपोध्यानं तन्नामस्मरणं तथा। कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम्। तत्पादोदकसेवा च तन्निवेदितभोजनम्। तदीयानाञ्च संसेवा द्वादशीव्रतनिष्ठता। तुलसीरोपणं विष्णोर्देवदेवस्य शार्ङ्गिणः। भक्तिः षोड़शधा प्रोक्ता भवबन्धविमुक्तये"। किञ्च। "दर्शनं भगवन्मूर्त्तेः स्पर्शनं चेतसेवनम्। आघ्राणं धूपशेषादेर्निर्माल्यस्य च धारणम्। नृत्यं भगवदग्रे च तथा वीणादिवादनम्। श्रवणलीलाद्यभिनयः श्रीभागवतसेवनम्। पद्माक्षमालादिधृतिरेकादश्यादिजागरः। प्रासादरचनाद्यन्यज्ज्ञेयं शास्त्रानुसारतः। लिखिता भगवद्धर्मा भक्तानां लक्षणानि च। तानि ज्ञेयानि सर्वाणि भक्तेर्वै लक्षणानि ह। तेषु ज्ञेयानि गौणानि मुख्यानि च विवेकिभिः। बहिरङ्गान्तरङ्गाणि प्रेमसिद्धौ च तानि यत्। भेदास्तु विविधाभक्तेर्भक्तभावादिभेदतः। मुक्ताफलादिपन्थेभ्यो ज्ञेयास्तल्लिखनैरलम्" "प्रेमभक्तौ च सिद्धायां सर्वेऽर्थाः सेवकाः स्वयम्। भगवांश्चातिवश्यः स्यात्तिख्यतेऽस्याः सुलक्षणम्। अथ प्रेमभक्तिलक्षणम्। नारदपञ्चरात्रे "अनन्यममता विष्णौ ममता प्रेमसङ्गता। भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः। प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यकं परम्। सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम्। चिह्नानि प्रेमसम्पत्तेर्बाह्यान्याभ्यन्तराणि च। अथ प्रेमसम्पत्तिचिह्नानि उक्तानि प्रह्लादस्य बालानुशासने। "निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि" इत्यादि ४६२६ पृ० दर्शितम्।

एकादशे च कविर्योगेश्वरोत्तरे "गृणन्ति शुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके। गीतानि नामानि तदर्थकानि गायन् विलज्जो विचरेदसङ्गः। एवव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः। हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः"। श्रीभगवदुद्धवसंवादे च "कथं विना रोमहर्षं द्रवता चेतसा विना। विनानन्दाश्रुकलया शुध्येद्भक्त्या विनाऽऽशयः। वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च। विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति। यथोक्तभक्तिप्रवरौ तु भगवच्चरणाम्बुजम्। शरणागतभावेन कृष्णभीतिन्मात्रयेत्" हरिभक्तिविलासे ११विलासः। उत्तमभक्तेर्लक्षणं यथा "अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्। आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा"। तथा नारदपञ्चरात्रे। "सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम्। हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते" भाग० २स्क० च।सा उत्तमा भक्तिः षड्विधा यथा "क्लेशघ्नी

शुभदा मोक्षलघुदाक्रत् सुदुर्लभा। सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा" । तत्साक्षाः क्लेशघ्नत्वम् "क्लेशघ्नस्तु पापं तद्बीजमविद्या चेति ते त्रिधा" । शुभदत्वं यथा "शुभानि प्रीणन सर्वजगतामनुरक्तता। सद्गुणा सुखमित्यादीन्याख्यातानि मनीषिभिः" मोक्षलघुताकृद्यथा "मनागेव प्रस्फुरायां हृदये भगवद्रतौ। पुरुषार्थान्तु चत्वारस्तृणायन्ते मनस्वत." । सुदुर्लभा यथा "साधनौघैरनासङ्गैरलभ्या सुचिरादपि। हरिणा चाशुदेयेति द्विधा सा स्यात् सुदुर्लभा। सान्द्रानन्दविशेषात्मा यथा "ब्रह्मानन्दो भवेदेष चेत्परार्द्धगुणीकृतः। नैति भक्तिसुखाम्भोधेः परमाणुतुलामपि" । श्रीकृष्णाकर्षणी यथा "हत्वा हरिं प्रेमभाजं प्रिय-मंसमञ्चितम्। भक्तिर्वशीकरोतीति श्रीकृष्णाकर्षणी च सा" । सा च त्रिधा भक्तिस्त्रिधा यथा "सा भक्तिः साधनं भावः प्रेमा चेति त्रिधोदिता"। साधनभक्तिर्यथा। क्रतिसाध्या भवेत् साध्यभावा सा साधनाभिधा। नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता" । भावभक्तिर्यथा "शुद्धसत्त्वविशेषात्मा प्रेम सूर्यांशुसाम्यभाक्। रुचिभिश्चित्तमाकृण्यक्रदसौ भाव उच्यते" । प्रेमभक्तिर्यथा "सम्यङ्मसृणितस्वान्तो ममतातिशयाङ्कितः। भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्यते" भक्तिरसामृतसिन्धौ पूर्वविभागः।

द्वियोग पु० भक्तिरूपो योगश्चित्तैकाग्र्यतासाधनम् उपायभेदः। भक्तिरूपे योगे भक्तियोगस्य ज्ञानात् श्रैष्ठ्यम् सुखसाध्यत्वात् गीतायाम् उक्तं यथा

"एवं सततयुक्ता ये भक्तास्त्वां पर्य्युपासते। ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः" भू०। "द्वितीयप्रभृतिषडध्यायेषु विभूत्यन्तेषु परमात्मनो ब्रह्मणोऽक्षरस्य विशुद्धसर्वविशेषणस्योपासनमुक्तं सर्वयोगैश्वर्यं सर्वज्ञानशक्तिमत्सच्चोपाधेरीश्वरस्य तव चोपासनम्। तत्र तत्रोक्तं विश्वरूपाध्याये तु समस्तजगदात्मरूपं विश्वरूपं त्वदीयं दर्शितवानसि अतस्तत्कर्मकत्वादिना अहमनयोरुभयोः पक्षयोर्विशिष्टतरबुभुत्सया त्वां पृच्छामीति अर्जुन उवाच। एवमिति। एवं सततयुक्ता नैरन्तर्येण भगवत्कर्मादौ यथोक्तेऽर्थे समाहिताः सन्तः प्रहृष्टा इत्यर्थः ये भक्ताः अनन्यशरणाः सन्तस्त्वां यथादर्शितं विश्वरूपमर्य्युपासते ध्यायन्ति ये चाप्यक्षरमिति ये चापि त्यक्तसर्वैषणाः सन्यस्तसर्वकर्माणो यथाविधैर्वितं ब्रह्माक्षरं निरस्तसर्वोपाधित्वादव्यक्तमक्षरणगोचरं यदि लोके करणगोचरत्वद्व्यक्तमुच्यते अङ्गेधातोस्तत्कर्मकत्वादिदं त्वक्षरं तद्विपरीतं शिष्टैर्लोच्यमानैर्विशेषैर्विशिष्टं तद्वे चापि पर्य्युपासते तेषामुभयेषां मध्ये के योगवित्तमाः के अतिशयेन योगविदित्यर्थः" भा०।

"श्रीभगवानुवाच। मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते। श्रद्धया परयोपेतास्ते मे युक्ततमा मताः" भू०। "ये त्वक्षरोपासकाः सम्यग्दर्शिनो निवृत्तैषणास्ते तावत्तिष्ठन्तु तान् प्रति यदक्तव्यं तदुपरिष्टाद्वक्ष्यामः ये त्वितरे मयीति। मयि विश्वरूपे परमेश्वरे आवेश्य समाधाय मनः, ये भक्ताः सन्तो मां सर्वयोगेश्वराणामधीश्वरं सर्वज्ञं विशुद्धरागादिक्लेशतिरस्कृतिं नित्ययुक्ता व्यतीतानन्तराध्यायान्तोक्तन्यायेन सततयुक्ताः सन्त उपासते श्रद्धया परया प्रकृष्टया उपेताः ये मम मताः अभिप्रेता युक्ततमा इति नैरन्तर्येण हि ते मच्चित्ततयाहोरात्रमतिवाहयन्ति अतो युक्ततमा इति युक्ततमा तान् प्रति युक्ततमा इति वक्तुम्" भा० "ये त्वक्षरमनिर्देश्यमव्यक्तं पर्य्युपासते। सर्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुवम्" । "किमितरे युक्ततमा न भवन्ति न, किन्तु तान् प्रति यदक्तव्यन्तत् शृणु ये त्वक्षरमनिर्देश्यमव्यक्तमव्यक्तत्वादशब्दगोचरमिति न निर्देष्टुं शक्यते अतोऽनिर्देश्यमव्यक्तं न केनापि प्रमाणेन व्यज्यत इत्यव्यक्तं पर्य्युपासते परिश्रमनाद्युपासते उपासनं नाम यथाशास्त्रमुपास्यस्य विषयीकरणेन सामीप्यमुपगम्य तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं यदासनन्तदुपासनमाचक्षते। अक्षरस्य विशेषणमाह सर्वत्रगं व्योमवद्व्यापि अचिन्त्यं चाव्यक्तत्वादचिन्त्यं यद्धि करणगोचरं तन्मनसापि चिन्त्यं तद्विपरीतत्वादचिन्त्यमक्षरं कूटस्थं दृश्यमानगुणमन्तर्दोषं वस्तु कूटरूपं कूटसाक्ष्यमित्यादौ कूटशब्दः प्रसिद्धो लोके तथा चाविद्यामेकसंसारबीजमनन्तदोषं मायाप्रकृत्यादिशब्दवाच्यतया "मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्" "मम माया दुरत्यया" इत्यादौ प्रसिद्धं यत्तत् कूटं तस्मिन् कूटे स्थितं तदध्यक्षतया। अथ वा राशिरिव स्थितं कूटस्थमत एवाचलं यस्मादचलं तस्मात् ध्रुवं नित्यसित्यर्थः" भा०।

"संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः। ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः" भू०। "संनियम्येति। संनियम्य सम्यक् नियम्य संहृत्य इन्द्रियग्रामं इन्द्रियसमुदायं सर्वत्र सर्वस्मिन् काले समबुद्धयः समा तुल्या बुद्धिर्येषामिष्टानिष्टप्राप्तौ ते समबुद्धयः ते समबुद्धयः ते ये एवंविधाः ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः न तेषां वक्तव्यं किञ्चित् मां ते प्राप्नुवन्ति इति ज्ञानित्वादात्मैव मे मतमित्युक्तत्वात् न हि भगवत्साक्षात्कारणां सतां युक्ततमत्वमयुक्ततमत्वं वा वाच्यम्" भा०।

"क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्। अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते" भू०। "किन्तु क्लेशोऽधिकतरो यद्यपि मत्कर्मादिपराणां क्लेशोधिकत्वयापि अधिकतरस्तत्तरात्मनाम्। परमार्थदर्शिनां देहाभिमानपरित्यागनिमित्तः अव्यक्तासक्तचेतसामव्यक्ते आसक्तं चित्तं येषां ते अव्यक्तासक्तचेतसाम् अव्यक्ता हि यस्माद्या गतिरक्षरात्मिका दुःखं देहवद्भिर्देहाभिमानवद्भिरवाप्यते अतः क्लेशोऽधिकतरः" भा०। "ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्परः। अनन्येनैव योगेन मां ध्यायन्त उपासते" भू०। "अक्षरोपासकानां यद्दुर्ज्ञानं तदुपरिष्टाद् वक्ष्यामः ये त्विति। ये तु सर्वाणि कर्माणि मयीश्वरे सन्यस्य मत्परा अहं परो येषां ते मत्पराः सन्तः अनन्येनैव अविद्याज्ञानमत्यादालम्बनं विश्वरूपं देवमात्मानं सत्तां यस्य सोऽनन्यस्तेनानन्येनैव केवलेन योगेन समाधिना मां ध्यायन्तश्चिन्तयन्त उपासते" भा०। "तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात्। भवामि न चिरात् पार्थ! मय्यावेशितचेतसाम्"। "तेषां किमित्याह तेषामिति। तेषां मदुपासनैकपराणाम् अहमीश्वरः समुद्धर्त्ता कुत इत्याह मृत्युसंसारसागरात् मृत्युयुक्तः संसारो मृत्युसंसारः स एव सागरवत् सागरो दुरुत्तरत्वात् तस्मान्मृत्युसंसारसागरादहं तेषां समुद्धर्त्ता भवामि न चिरात् किं तर्हि क्षिप्रमेव हे पार्थ! मय्यावेशितचेतसां मयि विश्वरूपे आवेशितं समाहितं चेतो येषां ते मय्यावेशितचेतस्तेषाम्" भा०।

"मय्येव मन आधत्स्व मयि बुद्धिं निवेशय। निवसिष्यसि मय्येव अत ऊर्द्धं न संशयः। अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्। अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय!। अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव। मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि यैतदप्यशक्तोऽसि कर्त्तुं मद्योगमाश्रितः। सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्। श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते। ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्। अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च निर्ममो निरहङ्कारः समदुःखसुखः क्षमी। सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः। मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः। यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः। हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः। अनपेक्षः शुचिर्दक्ष उदासीनोगतव्यथः। सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः। यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति। शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः। समः शत्रौ च मित्रे च तथा मानापमानयोः। शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः। तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्। अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः। ये तु धर्मामृतमिदं यथोक्तं पर्युपासते। श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः" भू० गीता० १२ अ०।

भक्तिरस पु० भक्तिः ईश्वरविषया रतिरेव रसः। तत्स्थायिभावके रसभेदे "विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः। आद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः। एषः कृष्णरतिस्थायिभावो भक्तिरसो भवेत्" इति भक्तिरसामृतसिन्धुः। तत्फले तद्धेतुकायाञ्च भक्तेरसत्वम् व्यवस्थापितं यथा "भक्तिरसस्यैव हास्यशृङ्गारकरुणरौद्रभयानकबीभत्सशान्ताद्भुतवीररूपेषाननुभवात् व्यासादिभिः वर्णितस्य विष्णोर्विष्णुभक्तानां वा चरित्रस्य नवरसात्मकस्य श्रवणादिना जनितश्चमत्कारो हि भक्तिरसः" तत्फ०। "भक्तिर्विहिताऽविहिता च सैव परां प्रकर्षरेखामापन्ना रसः। यदाहुः। "भावा एवातिसरसाः प्रयान्ति रसतामिमे" इति। भक्तिरसानुभावाश्च भक्तेः यथा हरेः प्रत्यनुभवात् हरेः इत्युच्यते सचानुभवो नवधा हास्यादि भक्तिभेदेन हास्यादय एव हि भगवति प्रयुज्यमानाः "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेदिति" भक्तिलक्षणाक्रान्तत्वात् भक्तिरसपदवीमासादयन्तीति भावः। हास्यादिलक्षणं तु वक्ष्यते। ते चामी नवापि सुखदुःखमोहात्मकैस्त्रिगुणव्यतिकरोद्भवाः तथा हि। प्रथमे त्रयो रजोमूलाः, मध्यास्तु तमोमूलाः, चरमे सत्त्वमूलाः। रतिहासादयो हि रजःप्रभृतीनां विकारा इत्युक्तं एकादशस्कन्धे पञ्चविंशाध्याये। तत्रापि प्रथमेषु त्रिषु

क्रमात् सत्त्वसंभिन्नं तमःसंभिन्नं सत्त्वतमःसंभिन्नं च रजोमूलम्। मध्येषु रजोभिन्नं सत्त्वभिन्नं रजः सत्त्वभिन्नञ्च तमः। चरमेषु तमोभिन्नं रजोभिन्नं रजस्तमोभिन्नं च सत्त्वम् ज्ञेयाभिधानक्रमेण चैष क्रमः"। व्याख्येयपूर्वकं तस्या रसरूपत्वं तत्र व्यवस्थापितं यथा "तस्माद्विभावादिरससामग्रीविरहाच्च भक्तौ रसत्वम् अतएवायमन्यैः "एवं भक्तावपि वाच्यमिति षड्भिः सत्यादिष्टः। अत उत्तरं पठति। व्यासादिभिरिति। वर्णितस्य चरित्रस्य विष्णुभक्ताः गोप्यादयः श्रवणादिनेत्यादिशब्दादर्शनकीर्त्तनस्मरणाभिनयात् चमत्कारः सामाजिकानां हि यस्मादेवंसामग्रीको भक्तिरसस्तस्मादनपह्नवनीय इत्यर्थः। तत्रैषा सामग्री केनाप्युपायेन मनोनिवेशः स्थायी चरित्रश्रवणादय उद्दीपनविभावा विष्णुविष्णुभक्त्यानुभवस्तु अनुभावास्तु स्तम्भादयो वक्ष्यमाणा यथायोग्यं हृष्टादिका व्यभिचारिणश्च। उपायस्तु रतिहासादिः। कविभिर्वर्णितस्येत्यनेन भक्तौ कविप्रबन्धनमस्यमाणेष्वेव रसव्यवहारो नान्यत्रेत्युक्तम्। एवमेवैतत् व्यनुकाव्येषु हि ज्ञानवैराग्यभक्त्यादिषु रत्यादिभावं चमत्कारश्च यद्यपि शृङ्गारादौ क्वचिदस्ति। तथापि तस्य भयानकादावनुपलम्भाच्च तत्र रसव्यवहारः। अतएव च "तानि चेद्भाट्टकाव्ययोः" इत्यादीनि विशेषणानि। अभिनयैरुपदर्श्यमानादपि सन्दर्भैः समर्प्यमाणो रसोऽतिस्खदते अतएवोक्तं "कविवाग्भिनेयञ्च तदुपायो विधेयते। वस्तुवक्त्रमहिम्ना तु प्रथमोऽत्र विधीयते" इति। यत्त्वभिनवगुप्तपादैरुक्तम् "एवं भक्तावपि वाच्यम्" इत्युक्तं तदसत् रसत्वस्य दर्शितत्वात्। सामग्रीसद्भावेऽपि प्रत्याख्यानमरोचकतासामान्यस्य। न च सर्वस्यमानोऽयं रसः सर्वविषयत्वात् रसत्वात्। भट्टतामिति चोद्यं तथा सति सर्वरसोच्छेदापातात्। तथा हि श्रोत्रियजरन्नैयायिकादयो हि भाट्टप्रभाकरान्तःप्रविष्टा अपि चमत्कारादाभावात् क्षीणप्राया एव। एवं प्रधानभक्त्याश्रयिप्रभृतयः शृङ्गाररसास्वादे बालानां गाढरागाणाञ्च शान्तरसचर्वणानभिज्ञत्वम्। अनुभूतश्लोकस्थायीनां च करुणरसास्वादावसरे पाषाणप्रख्यत्वम् तस्मात् सर्वानुभवस्यैव रसचर्वणेति भक्तिरसदर्शनम्"।

भक्तिलव पु० भक्तिं भङ्गीं लाति ला-क। साधुहृये शब्दच०

भक्तिसूत्र न० "अथातो भक्तिजिज्ञासेत्यादिके शाण्डिल्यमुनिप्रणीते सूत्रात्मकग्रन्थे

भक्ष अदने चु०उभ०सक०सेट्। भक्षयति-ते अबभक्षत्-त तस्य ष्वादित्वमपीत्येके भक्षति अभक्षीत्। उभयपदित्वमस्त्यन्ये भक्षते अभक्षिष्ट।

भक्ष पु० भक्ष-भावे कर्मणि वा घञ्। १अशने २भक्ष्ये च। "यष्टा वर्तुः प्रयतभक्षः" स्मृतिः एकस्मा० अन्योदात्तताम्। "गावः सोमस्य प्रयतस्य राज्ञः" सि०कौ० श्रुतिः।

भक्षक त्रि० भक्ष-ण्वुल् भक्षणकारके अमरः।

भक्षिका स्त्री भक्ष अकर्त्तरि गर्ह्ये भावे ण्वुच्। भक्षणाच्छादौ "श्वानिमुभक्षिकामर्हति कर्त्ते दृन्मुभक्षिकां मे धारयति" सि०कौ०।

भक्ष(च्य)कार पु० भ(क्ष)क्ष्यं वा करोति ल-घञ्। भक्ष्यपिष्टकादिविक्रयोपजीविनि आपूपिके भरतः।

भक्षटक पु० भक्ष-बा०अटन् संज्ञायां कन्। गोजुरे राजनि०

भक्षण न० भक्ष-भावे ल्युट्। कठिनद्रव्यस्य गलाधःकरणव्यापारे भक्षणप्रकारः सुश्रुतोक्तः आहारशब्दे ८६७ पृष्ठादौ दृश्यः। [राजनि०।

भक्ष(च्य)पत्रा स्त्री भक्ष्यं पत्रमस्याः। साम्बूलीलतायाम्

भक्षालि पु० भक्षाणामालिर्यत्र। देशभेदे ततो भवार्थे वुञ्। भाक्षालिक तद्देशभवे त्रि०।

भक्षिवस् त्रि० भक्ष-कसु वेदे न द्वित्वम्। भक्षणे ऋग्वे० ६।१६। लोके तु बिभक्षिवस् इत्येव त्रि० स्त्रियां ङीप् बिभक्षुषी।

भक्ष्य त्रि० भक्ष-कर्मणि यत्। १अदनीये "कठिनं विशदमव्यक्षार्य्यं भक्ष्यम्" सङ्घाभाष्योक्ते विविक्तावयवे कठिने २खाद्ये च "भक्ष्येण मिश्रीकरणम्" पा० मिश्रीकरणद्वारा सामर्थ्यम् २त०। गुडधानाः।

भक्ष्यालाबू स्त्री कर्म०। राजालाबूलतायां राजनि०।

भग पु०न० भज+घ। १सूर्य्ये २क्षणिमाद्यष्टविधैश्वर्य्ये ३वीर्य्ये ४यशसि ५स्त्रियां ६स्नाने ७वैराग्ये ८योनौ ९कामाख्यायाम् १०माहात्म्ये ११यत्ने मेदि० १२धर्म्मे १३मोक्षे १४सौभाग्ये १५कान्तौ १६चन्द्रे च। ज्योतिषोक्ते योनिनक्षत्रदैवते १७पूर्वफल्गुनीनक्षत्रे १८शुक्लसप्तम्योर्मध्याह्नादौ च पु०। आद्युदात्तताम्। १९धने २०पदे च न०निघण्टुः। भगशब्दे दृश्यम्। स्त्रीचिह्नञ्च लक्षणभेदादिकं यथा "विस्तीर्णञ्च गभीरञ्च विविधं भगलक्षणम्" "कूर्म्मपृष्ठं गजस्कन्धं पद्मगन्धं सुकोमलम्। अकोलं सुविस्तीर्णं पञ्चैते च भगोत्तमाः। शीतलं निष्कलमत्युष्णं शोणिताक्तं सदर्भं परम्" रतिमञ्जरी।

भगघ्न पु० भगं तन्नेत्रं हन्ति हन-टक् । १महादेवे "नमस्ते त्रिपुरघ्नाय भगघ्नाय नमो नमः" भा०द्रो०२०३अ० तस्य दक्षयज्ञकाले तन्नेत्रहारित्वात् तथात्वम् ।

भगण पु० हृत० । १द्वादशराशीनां समूहे २तद्भोगकाले च । यथोक्तं सू० सि० "पञ्चादुद्वज्जनोऽतिजवान्नक्षत्रैः सततं ग्रहाः । जीयमानास्तु लम्बन्ते तुल्यमेव स्वमार्गगाः । प्रागगतित्वमतस्तेषां भगणैः प्रत्यहं गतिः । परिणाह वशाद्भिन्ना तद्वशाद्भानि भुञ्जते । शीघ्रगस्तान्यथाल्पेन कालेन महतालगः । तेषां तु परिवर्त्तेन पौष्णान्ते भगणः स्मृतः । विकलानां कला षष्ट्या तत् षष्ट्या भाग उच्यते । तच्चिंशता भवेद्राशिर्भगणो द्वादशैव ते" सू०सि० ।

"शीघ्रगतिर्यच्छस्तानि भान्यल्पेन कालेन भुनक्त्यल्पगतिर्यच्छो बहुकालेन भुनक्ति, तुल्यराश्यादिभोगो मन्दशीघ्रगतिग्रहयोस्तुल्यकालेन न भवतीति विशेषार्थः । तेषां राशीनां परिवर्त्तेन भ्रमणेन । तुकाराद् ग्रहादिगतिभोगजनितेन भगणः प्राह्यैरुक्तः । क्रान्तिवृत्ते द्वादशराशीनां सत्त्वात् तद्भोगेन चक्रभोगसमाप्तेर्यत् स्थानमारभ्य चलितो ग्रहः पुनस्तत् स्थानमायाति स चक्रभोगः परिवर्त्तसञ्ज्ञोऽपि द्वादशराशिभोगाद्भगण इत्यर्थः । ननु क्रान्तिवृत्ते सर्वप्रदेशेभ्यः परिवर्त्तसम्भवादत्र कः परिवर्त्तादिभूतः प्रदेश इत्यत आह पौष्णान्त इति । सृष्ट्यादौ ब्रह्मणा क्रान्तिवृत्ते रेवतीयोगतारासङ्गप्रदेशे सर्वग्रहाणां निवेशितत्वात् तदवधितो ग्रहचलनाच्च पौष्णश्च रेवतीयोगतारायाः अन्ते निकटे प्रदेशे तथा च रेवतीयोगतारासन्निधिनस्थानमेवाद्यन्तावधिभूतमिति भावः" रङ्गनाथः । [१६ अ० ।

भगदत्त पु० प्राग्ज्योषपुराधीशे नरकासुरपुत्रभेदे कालिकापु०

भगदा स्त्री स्कन्दानुचरमातृभेदे भा०व०४७अ० । [४३अ०।

भगदेव पु० भगेन दीव्यति दिव-अच् । काम्पिल्ये भा० आश्व०

भगदैवत न० भगो योनिः दैवतं यस्य । पूर्वफल्गुनीनक्षत्रे तस्य योनिदेवताकत्वात् तथात्वम् । ऋक्षशब्दे दृश्यम् । तच्च षड्रसतिजन्मनक्षत्रं यथोक्तं ज्यो०त० "विशाखानक्षत्रतोयानि२४ वैष्णवं२२ भगदैवतम्११। पुष्या पौष्णं२७ यमः२ धर्मो६ जन्मभान्यर्कतः क्रमात्" । [द्वयम् ।

भगनन्दन पु० ३त० । ऐश्वर्येणानन्दयुक्ते विष्णौ भगशब्दे

भगनन्दा स्त्री कुमारानुचरमातृभेदे भा० श० ४७ अ० ।

भगनेत्रघ्न पु० भगनेत्रं हन्ति दक्षयज्ञकाले हन-टक् । महादेवे भा० अनु० १४१अ० । भगनेत्रापहादयोऽप्यत्र

भगन्दर पु०भगं गुह्यसुष्कमध्यस्थानं दारयति दृ-णिच्-खश् मुम् खचि ह्रस्वश्च । स्वनामख्याते रोगभेदे । भावप्र० तन्निदाननिरुक्त्यादिकमुक्तं यथा

"अथ भगन्दरस्य पूर्वरूपसहितं स्वरूपमाह । "कटीकपालयोस्तोददाहकण्डूरुजादयः । भवन्ति पूर्वरूपाणि भविष्यति भगन्दरे । गुदस्य द्व्यङ्गुले क्षेत्रे पार्श्वतः पीडकार्त्तिकृत् । भिन्नो भगन्दरो ज्ञेयः स च पञ्चविधो भवेत्" । आर्त्तिकृत् पीडाकृत् । पञ्चविधः वातिकपैत्तिकश्लैष्मिकसान्निपातिकशल्यजभेदैः । अथ गन्दरशब्दस्य निरुक्तिमाह भोजः "भगन्दरः समन्ताच्च गुदं वस्तिं तथैव च । भगवद्दारयेद्दुष्यात् तस्मादेष भगन्दरः" । भजन्त्यनेनेति भगो मेढ्रनम् । भजन्त्यस्मिन्निति भगं योनिः । अत्र भगशब्देन द्वयमपि कथ्यते । भगवत् योनिवत् । अथ वातिकं शतपोनकसंज्ञं भगन्दरमाह । "कषायरूक्षैरतिकोपितोऽनिलस्त्वपानदेशे पिडकां करोति याम् । उपेक्षणाद्दारुणफेनवाहिनीम् । ततोगमो मूत्रपुरीषरेतसां व्रणैरनेकैः शतपोनकं वदेत्" । दारुणम् अतिदारुणरूक् । व्रणैरनेकैः क्षुद्रमुखैः । शतपोनकं शतपोनकस्रावनी तत्तुल्यम् । अथ पैत्तिकमष्ट्रग्रीवसंज्ञमाह "प्रकोपणैः पित्तमतिप्रकोपितं करोति रक्तां पिडकां गुदे गताम् । तदाशुपाकां क्षिप्रपूतिवाहिनीं भगन्दरं चोष्ट्रशिरोधरं वदेत्" । आशुपाकां क्षिप्रपूतिवाहिनीं शीघ्रपाकासृष्टदुर्गन्धवाहिनीं च । तदा भगन्दरमुष्ट्रशिरोधरं वदेत् । उष्ट्रग्रीवसंज्ञा च पिडकागतेन वक्रतयोष्ट्रग्रीवाकत्वेन । अथ श्लैष्मिकं परिस्रावसंज्ञमाह । "कण्डूयनो घनस्रावी कठिनो मन्दवेदनः । श्वेतावभासः कफजः परिस्रावी भगन्दरः" । कठिनः पिडकावस्थायाम् । परिस्रावी निरन्तरस्रावशीलः । अथ सान्निपातिकं शम्बूकावर्त्तसंज्ञमाह । "बहुवर्णरुजास्रावा पिडका गोस्तनोपमा । शम्बूकावर्त्तगतिकः शम्बूकावर्त्तको मतः" बहुवर्णरुजास्रावा बहुशब्दो वर्णादिभिः प्रत्येकं संबध्यते गतिः स्रावमार्गः । अथ शल्यजमुन्मार्गसंज्ञमाह । "क्षतादुगतिः वायुगता विवर्द्धते क्षुपेक्षणात् व्यूः क्षमयो विदार्य ते । प्रकुर्वते मार्गमनेकधासृखैर्नखैश्चोन्मुन्मार्गभगन्दरं वदेत्" । क्षतात् कण्टकादिना नखेन कण्डूयनादिना वाऽभिघातात् । गतिः स्रावः उन्मार्गभन्दरम् एतस्य तिर्यक्कृतमार्गैः पुरी-

आदिनिमेषादुन्मर्गश्च"। कष्टसाध्यमसाध्यत्वाच्च "घोराः साधयितुं दुःखा सर्व एव भगन्दराः। तेष्वसाध्यश्चितो-दोत्थः क्षतजश्च विशेषतः। वातमूत्रपुरीषाणि वक्त्रञ्च क्षणयत्तया। भगन्दरात् स्रवन्त्यन्तु नाशयन्ति तमातुरम्"।

भगभक्त त्रि० भगे धने भक्तः। धनरते ऋ० १।२४।५।

भगभक्तक पु० भगेन तद्व्यापारोपपादनेन भक्तति भज-ण्वुल्। (कोटना)ख्याते नायकयोर्भेदके।

भगल त्रि० भगं तद्व्यापारं लाति-ला-क। भगव्यापार वाहके ततः ऋरीड्या० चतुरर्थ्यां वुञ्। भागलक तद्विहत्तादौ त्रि०।

भगशास्त्र न० भगव्यापारबोधकं शास्त्रम् शा० त०। कामशास्त्रे

भगवत् पु० भगम् "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गनेत्युक्तम् अस्यास्ति मत्वर्थीय वः॥ऐश्वर्यादियुक्ते परमेश्वरे २वृद्धे ऽमरः तस्य षड्भिन्नत्वात् भगश्चैश्वर्यादियोगाच्च तथात्वम्। अस्य संबोधने भगोः इत्येव अजादौ तस्य विसर्गस्य लोपः। ङ्यां स्त्री ङीप्। "मेद्यते या सुरैः सर्वैस्त्राद्यैव भजते यतः। धातुर्भजेति सेवायां भगवत्येव सा स्मृता" देवीपु० ४५ अ०।

भगवद्गीता स्त्री ३त०। भीष्मपर्वान्तर्गते अष्टादशाध्यायात्मके कर्मयोगज्ञानयोगभक्तियोगप्रतिपादके ग्रन्थे।

भगवद्दृश्य त्रि० भगवानिव दृश्यते दृश-कर्मणि क्यप्। भगवत्तुल्ये। "श्रुतं मे भगवद्दृश्यैरक्षरैरिति शौनकमात्रवित्" छा० उ०। [विष्णौ "भगवद्दृश्य भगवद्दृशः" विष्णुस०।

भगहन् पु० भगनेत्रस्य संहारकाले हन्ति-हन-क्विप्। भगाङ्कुर पु० भगे गुह्यस्थानेऽङ्कुर इव। अर्शोरोगे शब्दार्थक०

भगाधान न० ६त०। १भगाख्यात्याधाने २स्त्रीभाग्ये च हरिवं० १२४ अ०।

भगाल न० भल-कालन् न्यङ्क्वा० कत्वम्। १नरमस्तके २नरकपाले उज्ज्वलः। ततः स्वार्थे कन्। भगालिन् कपालधारके शिवे त्रिका० भगालशब्दे परे ह्रिगौ पूर्वपदप्रकृतिस्वरः पञ्चभगालः। द्विगुत्वे तत्पुरुषे प्रकृतिस्वरत्वेन चलोदात्तता च।

भगिनी स्त्री भगं यशः पित्रादीनां ख्यात्यादेर्नेऽस्त्यस्याः इनि ङीप्। १स्वोदरायाम् स्वसरि अमरः। "भगिनीशुल्कं स्वोदर्यास्वम्" दायभागः। २स्त्रीमात्रे च। तद्युक्तं०३भाग्यान्वितस्त्रीमात्रेऽपि तेन सर्वस्त्रीणां तत्पदेन संबोधनं विहितम्। "वरघ्नी त्वं या स्त्री स्यादसम्बन्धास्त योनितः। तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति च" मनुः।

भगीरथ पु० सूर्यवंशजे नृपभेदे "अम्बरीषस्य तनयो ह्यंशुमान्नाम विश्रुतः। तस्य पुत्रो दिलीपस्तु दिलीपात्तु भगीरथः। येन भागीरथी गङ्गा तपःकृत्वाऽवतारिता" सतत्त्वपु० १२ अ०। [श्वेता० ७०।

भगेश पु० ६त०। ऐश्वर्यादेरीश्वरे "धर्मोऽयं पापहृद्यं भगेशम्"

भगोल पु० भानां नक्षत्राणां गोलाकारः पदार्थः। राशिचक्रे तस्य भ्रमणभेदादिकं सू० सि० उक्तं यथा "सव्यं भ्रमति देवानामपसव्यं सुरद्विषाम्। उपरिष्टाद् भगोलोऽयं व्यक्षे पश्चान्मुखः सदा" सू०सि०। "अयं प्रत्यक्षो भगोलो नक्षत्राधिष्ठितमूर्तगोलो देवानां मेरोरुत्तरापवर्तिनां सव्यम् पूर्वादिक्रमेण मार्गेणेत्यर्थः। भ्रमति भ्रमं परिवर्तं करोतीत्यर्थः। दैत्यानां मेरोर्दक्षिणापवर्तिनामपसव्यं पूर्वादिदिग्व्युत्क्रममार्गेण। पूर्वोत्तरपश्चिमदक्षिणक्रमेणेत्यर्थः। नक्षत्राधिष्ठितगोलो भ्रमति। व्यक्षे निरक्षदेशेषु ज्ञात्यभिप्रायेणैकवचनम्। उपरिष्टान्मस्तकोर्ध्वमध्यभागो भगोलः पश्चान्मुखः पश्चिमदिगभिमुखः सदा नित्यं परिभ्रमति भगोलस्य ध्रुवसध्यस्थत्वेन भ्रमणात् तयोस्तत्र क्षितिजवृत्तस्थत्वाच्च" रङ्ग०। तस्य प्रत्यक्षदर्शनार्थं त्रि० ग्रि० भगोलबन्धप्रकारमाह यथा "इदानीं भगोलबन्धमाह। "याम्योत्तरक्षितिजयत् षट्कं विदध्यादाधारवृत्तयुगलं ध्रुवयष्टिबद्धम्। षष्ठाङ्कमात्रसमखण्डलवत् तृतीयं नाड्याह्वयं च विषुवद्वलयं तदैव" ब्र०। इदानीं क्रान्तिवृत्तमाह। "क्रान्तिवृत्तं विधेयं षट्कार्द्धं भमत्वात् भानुस्थं भार्धं कुभा भानुतः। क्रान्तिपातः प्रतीपं तथा प्रस्फुटाः क्षेपपाताश्च तत्स्थानकान्यङ्कयेत्"। इदानीं क्रान्तिवृत्तस्य निवेशनमाह। "क्रान्तिपाते च पातार्द्धषट्कान्तरे नाड़िकाषष्टिलग्नम् विदध्यादिदम्। पाततः प्राक्तिमे सिद्धभागैरुदग् दक्षिणे तैस्य भागैर्विभागेऽपरे"। इदानीं विमण्डलमाह। "नाड़िकामण्डले क्रान्तिवृत्ते तथा क्षेपवृत्तं न्यसेत्। क्षेपवृत्तं तु राश्यर्द्धितं तत्र च क्षेपपातेषु चिह्नानि कृत्वोक्तवत्। क्रान्तिवृत्तस्य विक्षेपवृत्तस्य च क्षेपपाते समक्षेमे च कृत्वा युतिम्। क्षेपपाताग्रतः पृष्ठतश्च त्रिभे क्षेपभागैः स्फुटैः सौम्ययाम्ये न्यसेत्। शीघ्रकर्षेण भक्तान्त्रिभक्यायुताः स्युः परक्षेपभागा यदाशां स्फुटाः। क्षेपवृत्तानि तस्यां विदध्यात् पृथक् स्वस्वदृक्षे भ्रमन्तीन्दवः पूर्वमग्रः"।

इदानीं क्रान्तिं विक्षेपं चाह। "नाड़िकामण्डलात् तिर्यगग्रायमः क्रान्तिवृत्तावधिः क्रान्तिवृत्ताक्षरः। क्षेपवृत्तावधिस्तिर्यगेवं स्फुटो नाड़िकावृत्तखेटान्तरालेऽयमः"। इदानीं क्रान्तिपातानां विषुवत्क्रान्तिवलययोः सम्पातः क्रान्तिपातः स्यात्। तद्भगणाः सौरोक्ता व्यस्ता अयुतघ्ना कल्पे। अयनचलनं यदुक्तं सङ्गालाद्यैः स एवायम्। तत्पक्षे तद्भगणाः कल्पे गोऽङ्गार्ह-नन्दगोचन्द्राः। तत् संजातं पातं क्षिप्ता खेटेऽयमः साध्यः। क्रान्तिवशाक्षरसुदयासुरदलनग्नायमे ततः क्षेप्यः"। इदानीं विक्षेपपातानाह। "एवं क्रान्तिविमण्डलसंपाताः क्षेपपाताः स्युः। चन्द्रादीनां व्यस्ताः क्षेपानयने तु ते योज्याः। मन्दस्फुटो ह्राक् प्रतिमण्डले हि ग्रहो भ्रमत्यत च तस्य पातः। पातेन युक्ताद्-गणितागतेन मन्दस्फुटात् खेचरतः शरोऽल्पात्। पातेऽथ वा शीघ्रफलं विलोमं कृत्वा स्फुटात् तेन युताच्छरोऽतः। चन्द्रस्य कक्षाबलये हि पातः स्फुटा-दिधोमध्यमपातयुक्तात्"। इदानीं शुक्रयोर्विशेषमाह "ये चात्र पातभगणाः पठितास्तद्भवोस्ते शीघ्रकेन्द्र-भगणैरधिका यतः स्युः। कृत्वा सुखार्थमुदितास्वल-केन्द्रयुतौ पातौ तयोः पठितचक्रभवौ विधेयौ। चलाहिगोऽयः किल केन्द्रविद्धौ सपातयुक्तस्तु योज्यः। अतस्तलात् पातयुताज्जुभवोः सुधीभिराद्यैः शर-सिद्धिरुक्ता। स्फुटो न शीघ्रोच्चयुतो स्फुटौ तयोः पातौ भगोले स्फुट एव पातः"। इदानीं भगोले विशेषमाह। भगस्य गोले कथितायमण्डलं प्रकल्प्य कक्षावलयं यथोदितम्। निबध्य शीघ्रप्रतिवृत्तनल्लिकु विमण्डलं तत्पठितैः शरार्धैः। मध्येऽत्र पातोद्भुवदां भवोः स्वशीघ्रकेन्द्रेण युतस्तु देयः"। इदानीमक्षोरा-नयनमाह। "दृग्क्षितिक्रान्तिलग्नेऽन्तरे सर्वतो नाड़िका-द्यादक्षोरानयनाह्वयम्। तत्र वह्वा घटीनां च षष्ठांश-वेदयस्य विष्कम्भखण्डं द्युजीवा मता। इदानीमन्यदाह। "अथ कल्पग्रहेभाद्या अनुलोमं क्रान्तिपाताद्भात्। एषां मेषादीनां द्युरात्रवृत्तानि वह्नीवात्। नाड़ीवृत्तोभयत-श्चीणि त्रीणि क्रमोत्क्रमात् तानि"। इदानीमक्षोपसं-हारमाह "एष भगोलः कथितः खेचरगोलोऽयमेव विज्ञेयः। कक्षापमण्डले वा स्वपातधारैरधस्य तस्यैव। मन्दादीनां कक्षा वह्नीयादूर्णनाभजालाभाः। वह्वा भगोलमेवं यद्यां यद्यं खगोलनाभिकक्षाः। प्रक्षिप्य भ्रमयेत् तं यच्छाधारं स्थिरौ खट्वगोलौ" वि० शि०।

भग्न त्रि० भनज-क्त। १क्षतावयवभेदे २रोगभेदे हेमच०।

तद्विज्ञानभेदादिकं सुश्रुते उक्तं यथा

"अथातो भग्नानां निदानं व्याख्यास्यामः। पतनपीड़-नप्रहारात्क्षेपणव्यालदष्टगदशनप्रसृतिभिरभिघातविशेषैरने-कविधमस्थ्नां भङ्गमुपदिशन्ति तत्र तु भङ्गजातमनुसार्य्य-मार्यं द्विविधमेवोत्पद्यते सन्धिसक्तं काण्डभग्नञ्च। तत्र सन्धिसक्तमुत्क्षिप्तं विश्लिष्टं विवर्त्तितमवक्षिप्तमतिक्षिप्तं तिर्य्यक्क्षिप्तमिति षड्विधम्। तत्र प्रसारया-कुञ्चनविवर्त्तनाक्षेपणाऽऽवक्षिप्तयोरुजत्वं स्वाभाविकत्वं चेति सामान्यं सन्धिसक्तलक्षणमुक्तम्। विशेषेणोत्क्षिप्ते सन्धावुभयतः शोफो वेदनाप्रादुर्भावो विशेषतश्च नाना-प्रकारा वेदना रात्रौ प्रादुर्भवन्ति। विश्लिष्टेऽल्पशोफो वेदनाधातत्वं सन्धिविक्रिया च। विवर्त्तिते तु सन्धि-पार्श्वापगमनाद्विषमाकृता वेदना च। अवक्षिप्ते सन्धि-विश्लेषस्तीव्ररुजत्वञ्च। अतिक्षिप्ते द्वयोः सन्ध्यस्थ्नोरति-क्रान्तता वेदना च। तिर्य्यक्क्षिप्ते त्वेकास्थिपार्श्वापि-गमनमत्यर्थं वेदना चेति। काण्डभग्नमत ऊर्द्धं वक्ष्यामः। कर्कटकमस्थ्नकर्णं चूर्णितं विश्लिष्टमस्थिच्छल्लितं काण्ड-भग्नं मज्जानुगतमतिपातितं वक्रं छिन्नं पाटितं स्फुटितमिति द्वादशविधम्। त्वगपुद्धालुप्तं सन्धन-विवर्त्तनस्वापक्षिप्तुत्वलघीयसाने यद्वः सक्ताङ्गता विधवेदनाप्रादुर्भावः सर्वास्वस्थ्यात्तु न मर्मजाभ इति सनाम्नैव काण्डभग्नलक्षणमुक्तम्। विशेषतस्तु स्थूलदृढमध्यतोऽस्थिमध्यभग्नं ग्रन्थिरिवोन्नतं कर्कटकम्। चूर्णितमस्थि तत्र तु यद्वस्वाभ्यां नोद्धरणम्। विश्लिष्टं पृथुताङ्गुलमनल्पशोफम्। पार्श्वोरस्थिहीनोन्नतम-स्थिच्छल्लितम्। वेल्लेत प्रकम्पमानं काण्डभग्नलक्षणम्। अस्थ्यवयवोऽस्थिमध्यमनुप्रविश्य मज्जानमनुगच्छतीति मज्जानुगतम्। अस्थि निःशेषतश्छिन्नमतिपतितम्। आभुग्नमविच्छिन्नास्थि वक्रम्। अन्तरधार्श्वावश्लिष्टं छि-न्नम्। पाटितमस्थि बहुविदारितं वेदनावत्। स्थूलपूर्व-विवाभ्यां विपुलं विस्फुटीजातं स्फुटितमिति। तेषु चूर्णितच्छिन्नातिपातितमज्जानुगतानि कक्ष्यप्राप्तानि कथञ्चनोद्धरणानां क्षतक्षीणकृशस्थविराणां सन्ध्युपगतयोः। भवन्ति चात्र "भिन्नं कपालं कटाच्च सन्धिसक्तं तथा च्युतम्। अचलं प्रतिविश्लिष्टं वर्जयेत् तन्त्रिकिल्सकः। अवक्षिप्तं कपालन्तु ललाटे चूर्णितञ्च यत्। भग्नं

स्नानान्तरे शङ्खे पृष्ठे मूर्ध्नि च वर्जयेत्। आदितो यश्च दुच्छिन्नमस्थिसन्धिरथापि वा। सम्यक् संछिन्नमस्थि दुन्यासाद् दुर्निबन्धनात्। सङ्क्षोभादापि यदुगच्छेद्विक्रियां तत् तु वर्जयेत्। मध्यस्य वयसोऽवस्थाश्चिस्रो याः परिकीर्त्तिताः। तत्र स्थिरो भवेज्जन्तुरुपक्रान्तो विजानता। तरुणास्थीनि नम्यन्ते भज्यन्ते नलकानि तु। कपालानि विभिद्यन्ते स्फुटन्ति रुचकानि च"।

भग्नपाद न० ब्यो०त० उक्ते कृत्तिकादिनक्षत्रे यस्य नक्षत्रस्य तृतीयपादस्य आद्यपादस्य वा राशेरन्तरघटकता तादृशे नक्षत्रे। "पुनर्वसूत्तराषाढाकृत्तिकोत्तरफल्गुनी। पूर्वभद्रा विशाखा च षड़ेते पुष्कराः स्मृताः भग्नपादर्क्षसंयोगात्"।

भग्नपृष्ठ त्रि० भग्नं पृष्ठं यस्य। १मुटितपृष्ठके २सम्मुखे च त्रिका०।

भग्नप्रक्रम पु० भग्नः प्रक्रमो यत्र। काव्यगते वाक्यदोषभेदे २७६।६४ पु० दोषशब्दे दृश्यम्। तदुदाहरणं सा०द० "एवमुक्तो मन्त्रिसख्यैरावणः प्रत्यभाषत" अत्र वचधातुना प्रक्रान्तं प्रतिवचनमपि तेनैव वक्तुमुचितं तेन "रावणः प्रत्यवोचतेति" पाठो युक्तः। एवञ्च सति न कथितपदत्वदोषः तस्योद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयत्वात् इह हि वचनप्रतिवचनयोरुद्देश्यप्रतिर्देश्यत्वम्। यथा "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" इत्यत्र। यदि पदान्तरेण स एवार्थः प्रतिपाद्यते तदान्योऽर्थ इव प्रतिभासमानः प्रतीतिं स्खलयति। यथा वा। "ते हिमालयमासाद्य पुनः प्रेक्ष्य च मेदिनीम्। शिवश्चार्क्षै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः"। अत्र "अर्का इति" इदमा प्रक्रान्तस्य तेनैव तत्समानाभ्यामेतदद:शब्दाभ्यां वा परामर्शो युक्तो न तच्छब्देन। यथा वा। उदन्वच्छिन्ना भूः स च पतिरपां योजनशतम्"। अत्र "मिता भूः पत्यापां स च पतिरपामिति" युक्तः पाठः। एवं "यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्त्तितुं वा। निरूत्सुकानामभियोगभाजां समुत्सुकैवाङ्गसुपैति सिद्धिः" अत्र सुखमीप्सितुमित्युचितम्। अत्राद्ययोः प्रकृतिविषयः प्रक्रमभेदः। तृतीये पर्य्यायविषयः चतुर्थे प्रत्ययविषयः"।

भग्नसन्धि पु० भग्नः सन्धिरत्र। रोगभेदे गरुड़पु०१५७अ०

भग्नसन्धिक न० भग्नः सन्धिः सन्धानसमवयवयोजनमत्र कप्। उक्के (चोल) शब्दच०।

भग्नात्मन् पु० ६ब०। चन्द्रे शब्दचन्द्रिका। तस्य क्षयप्रतिपदादिक्रमेण एकैककलाविच्छेदेन भग्नदेहत्वात् तथात्वम्

भग्नाश त्रि० ६त०। १हताशे दृष्टविषयाया इच्छायाः प्रतिघातयुक्ते।

भग्नी स्त्री भगिनी+पृषो०। भगिन्यां द्विरूपकोषः।

भङ्कारी स्त्री भमित्यव्यक्तशब्दं करोति कृ-क्विप् गौरा०ङीष्। भ्रमरालिकायां दंशे त्रिका०।

भङ्ग पु० भनज्-भावादौ घञ्। १तरङ्गे अमरः २पराजये। ३खण्डे ४रोगभेदे मेदि०५कौटिल्ये हेमे०। ६गमने ७जलनिर्गमे च अजयपालः १०रात्रेर्यामे, अमरः। ११शणाख्ये १२शस्ये त्रिष्टतायां (तेउड़ी) १३विजयायाञ्च (भाङ्) स्त्री। १४रोगमात्रे पु०राजनि०।

भङ्गकार पु० अविक्षितो नृपस्य १पुत्रभेदे भा० आ० ६४अ०। २सत्राजितःपुत्रभेदे हरिवं ३८ अ०।

भङ्गवासा स्त्री भङ्गे सति वासः सौरभं यस्याः। हरिद्रायां शब्दरत्ना० तस्याः मेघपुष्पे एव वासनावत्त्वात्तथात्वम्।

भङ्गसार्थ त्रि०भङ्गभ्रष्टः सार्थः मायायुतत्वात् सप्रयोजनः। कुटिले हारा०। [रजसि

भङ्गाकट न० भङ्गाया रजः भङ्गा+रजसि कटच्। भङ्गौषधे।

भङ्गान पुंस्त्री भङ्गेन तरङ्गेण यनिति यन-अच्। (भाङ्गन) मत्स्यभेदे शब्दमा० स्त्रियां जातित्वात् ङीष्।

भङ्गारी स्त्री भमित्यव्यक्तं गिरति गृ-क्विप् गौरा० ङीष्। दंशे त्रिकाण्डे पाठान्तरम्।

भङ्गासन पु० नृपभेदे तत्कथा भा० अनु० १२अ०।

भङ्गि(ङ्गी) स्त्री भनज-इन् नुम्ङु० कुत्वम् वा ङीप्। १विच्छेदे २कौटिल्ये ३विन्यासे ४कल्लोले ५भेदे ६व्याजे च।

भङ्गिमन् पु० भङ्ग+वा० स्वार्थे इमनिच्। भङ्गग्राम्।

भङ्गुर त्रि०भनज-घुरच्। १स्वयं भङ्गनशीले जटा०। २कुटिले ३नदीनां वक्रे च शब्दमा०।४प्रियङ्गौ ५अतिविषायाम् च (क्वातदच्) स्त्री राजनि०।

भङ्ग्य न० भङ्गानां भवनं क्षेत्रं तमर्हति वा यत्। भङ्गभवनयोग्ये क्षेत्रे २भङ्गार्हे त्रि०।

भचक्र न० भानां नक्षत्राणां राशीनां वा चक्रम्। १राशिचक्रे २नक्षत्रचक्रे च "भ्रमावर्तो भचक्रेऽस्मिन् ध्रुवौ नाभौ व्यवस्थितः। आराचक्रे त्विन्दुभौमौ शुक्रजीवशनैश्चराः। राहुः केतुरगस्त्यश्च नक्षत्राण्यथ राशयः। यदा दिनं च रात्रिश्च समे भूगोलकोऽङ्गवा। छाया भवेत्तदा रात्रिः स्याच्च तद्विरहादिनम्। सूर्य्येन्दोरुपरागस्तु गोलकच्छायया भवेत्। अन्योन्ययोस्तयोरेव व्यासयोरेव कार-

त्यात्। यासमोक्षौ तु जायेते तत्रातः पूर्वपश्चिमौ। तत्र पुण्यफलाङ्गागः कृतो राष्ट्रोसु विष्णुना" वह्निपु०। अधिकं भगोजशब्दे दृश्यम्।

भज भागे पृथक्करणे सेवायाञ्च भ्वा० उभ० सक० अनिट्। भजति-ते अभाक्षीत् अभक्तबभाज भेजतुः भेजे। [त

भज पाके दाने च चु०उ०सक०सेट्। भाजयति-ते अबीभजत्

भज दीप्तौ चु०उभ०सक०सेट् इदित्। भञ्जयति-ते अबभञ्जत्-त

भजमान त्रि० भज-शानच्। १न्यायागतद्रव्यादौ २विभाजके ३सेवके च। सात्वतो नृपस्य कोशल्यागर्भजाते ४सुतभेदे पु० हरिवं० १८अ०।

भजि पु०भज-धातुनिर्देशे इन्। १भजधातौ। इन्। सत्वतो नृपस्य २पुत्रभेदे भाग० ९।२४।४श्लो०। हरिवं०२८ अ०। भजिन् इति पाठान्तरम् तत्रार्थे

भजेन्य त्रि० भज-बा०कर्मणि एन्य। भजनीये भाग०५।१७।२०

भजेरथ पु० राजभेदे कथा०।।६०२।

भञ्जनक पु० सुखरोगभेदे "वक्त्रं वक्रं भवेद्यस्य दन्तभङ्गश्च जायते। कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः" माधवकरः।

भञ्जनागिरि पु० ६त०। किंशुलुकाο दीर्घः। पर्वतभेदे

भञ्जरु पु० भनज-बा० उरु। देवकुलोद्भवे वृक्षे त्रिकाο।

भञ्जा स्त्री अन्नपूर्णायाम् रुद्रयामले।

भट भर्तौ कर्मण्युद्यमे भ्वा०पर०सक०सेट् भटति। अभाटीत्-अभटीत्। यो भाटत्वित्वा शकटं नीत्वा चान्यत्र गच्छति। भाटं न दद्यात् दाप्योऽध्वरूढस्यापि भाटकम् दृश्यमनुः।

भट भाषणे भ्वा० पर० सक० सेट्। भटति अभा(भ)टीत्।

भट पु० भट-अच्। १योद्धरि अमरः "तद्भटचाटुरीश्वरौ" नैष०।२क्लेच्छभेदे हेम० ३वीरे ४नीचभेदे ५रात्रिञ्चरे च मेदि० ६इन्द्रवारुणग्राम् (राखालशशा) स्त्री रत्न०।

भटित्र न० भट-इत्र। सूनपक्के मांसादौ (कावाब) अमरः।

भट्ट पु० भट-तन्। स्तुतिपाठवृत्तियुते (भाट) १जातिभेदे "वैश्यायां शूद्रवीर्य्येण पुमानेको बभूव ह। स भट्टो यावदूकश्च सर्वेषां स्तुतिपाठकः" ब्रह्मवै० ब्रह्मख० ७अ० "क्षत्रियाद्विप्रकन्यायां भट्टो जातोऽनुवाचकः"। तेनद्विविधा जातिः। २स्वामित्वे, ३वेदाभिज्ञे ४पण्डिते च। भट्टश्च स्तुतार्थिकः मीमांसकभेदः तन्मतं च १०१ पृ० दर्शितम्। दिग्मात्रं लौगाक्षिभास्करेण दर्शितं यथा "स च यागादिर्यजेत स्वर्गकाम इत्यादि वाक्येन स्वर्गसंहित्य पुरुषं प्रति विधीयते। तथाहि यजेतेत्यत्रास्यंशद्वय यजिधातुः प्रत्ययश्च। प्रत्ययेऽप्यस्यंशद्वयमाख्यातत्वं लिङ्त्वञ्च। तत्राख्यातत्वं दशलकारसाधारणं लिङ्त्वं पुनर्लिङ्मात्रे। उभाभ्यामर्थांशाभ्यां भावनैवोच्यते। भावना नाम भवितुर्भवनानुकूलोव्यापारविशेषः। सा द्विधा—शाब्दी आर्थी चेति। तत्र पुरुषप्रवृत्त्यनुकूलो भावयितव्यांपारविशेषः शाब्दी भावना। सा च लिङंशेनोच्यते लिङ्श्रवणेऽयं मां प्रवर्त्तयति अतःप्रवृत्त्यनुकूलव्यापारवानिति नियमेन प्रतीतेः। यद्यस्माच्छब्दाच्छ्रियत प्रतीयते तत् तस्य वाच्यं गामानयेत्यस्मिन् वाक्ये यथा गोशब्दस्य गोत्वम्। स च व्यापारविशेषो लौकिकवाक्ये पुरुषाभिप्रायविशेषः वैदिकवाक्येषु पुरुषाभावात् लिङादिशब्दनिष्ठ एव। अतएव शाब्दी भावनेति व्यवह्रियते। सा च भावनांशत्रयमपेक्षते—साध्यं साधनमितिकर्त्तव्यताञ्च। किं भावयेत्? केन भावयेत्? कथं भावयेत्?—इति तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेता आर्थी भावना साध्यत्वेनान्वेति, एकप्रत्ययगम्यत्वेन समानाभिधानस्तुतेः सङ्ख्यादीनामेकप्रत्ययगम्यत्वेऽप्ययोग्यत्वाच्च साध्यत्वेनान्वयः। साधनाकाङ्क्षायां लिङादिज्ञानं करणत्वेनान्वेति, तस्य च करणत्वं न भावनोत्पादकत्वेन तत्पूर्वमपि तस्याः शब्दे सत्त्वात् किन्तु भावनाव्यापकत्वेन शब्दभावनाभाव्यनिर्वर्त्तकत्वेन वा। इतिकर्त्तव्यताकाङ्क्षायामर्थवादजाप्यप्राशस्त्यमितिकर्त्तव्यत्वेनान्वेति। प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थी भावना। सा चाख्यातवाच्या, आख्यातसामान्यस्य व्यापारवाचित्वात्। साध्यांशत्रयमपेक्षते साध्यं साधनमितिकर्त्तव्यताञ्च। किं भावयेत्? केन भावयेत्? कथं भावयेत्? इति। तत्र साध्याकाङ्क्षायां स्वर्गादिफलं साध्यत्वेनान्वेति। साधनाकाङ्क्षायां यागादिः करणत्वेनान्वेति, इतिकर्त्तव्यताकाङ्क्षायां प्रयाजाद्यङ्गजातमितिकर्त्तव्यत्वेनान्वेति"।

भट्टाचार्य्य पु० भट्टसुतातभट्टस्य आचार्य्य उदयनाचार्य्यश्च तौ तुल्यतया तन्मतानभिज्ञतया वाऽस्यस्य। सुतातभट्टेन उदयनाचार्य्येण च १तुल्ये २तयोर्मतानभिज्ञे च। द्वन्द्वः। ३तयोः द्वि० व०। "नास्तिकानां निग्रहाय भट्टाचार्य्यौ भविष्यतः"।

भट्टार त्रि० भट्टं स्वामित्वमृच्छति कृ अण। १पूज्ये

त्रिका०। मूर्खे पु०स्वार्थे क। पूज्ये त्रि०नटा०। नाट्योक्तौ रूपे संज्ञायां कन्। देवे तपोधने पु० मेदि० अमरः। "सखे! त्वायुक्तिमिताः प्राणास्तदद्य भट्टारकवारे कथमेतान् दन्तैः खण्डयामि" हितो०।

भट्टि पु० १द्वाविंशतितमनौलकेि सङ्काकाव्यभेदे तच्च जयमङ्गलेन श्रीधरस्वामिकृतो महाब्राह्मणश्च सङ्घर्षव्याकरणञ्च भट्टेः कृतित्वियुक्तं भरतमल्लिकेन भर्तृहरिणा कृतमित्युक्तं तच्चिन्त्यं "काव्यमिदं विहितं मया वलभ्यां श्रीधरसेनन रेन्द्रपालितायाम्" तत्र द्वाविंशसर्गश्लोके उक्तेः न भर्तृहरिकृतत्वम् भर्तृहरेरुज्जयिनीवास्तव्यत्वेन तच्च नृपान्तरराजधानीवास्तव्यत्वोक्तेरनुचितत्वात्। भट्टिनी स्त्री भट्ट स्वामित्वमस्त्यस्या इनि ङीप्। नाट्योक्तौ १व्यक्तताभिषेकायां राज्ञः स्त्रियाम् अमरः। २विप्रभार्य्यायाम् मेदि०।

भट्टोजि पु० सिद्धान्तकौमुदीशब्दकौस्तुभादिप्रणेतृकारके दीक्षितोपनामके वैयाकरणभेदे। [ब्रह्मशब्दे।

भड परिभाषणे भ्वा०आ०सक०सेट् इदित्। भण्डते अभिभण्डते

भड कल्याणभाषणे चु० उ०सक० सेट् इदित्। भण्डयति-ते अभिभण्डत्-त। प्रतारणे च भण्डयति प्रतारको मूल्यं धनदानाङ्गीकारेण, अनिन्द्योपचारे परिहासे च उणा० कू० भडिभण्डोः पृथगनिर्देशात् अयमिदुदित्कोऽपि।

भड पु० भडि-अच्। वर्णसङ्करभेदे "लेटस्त्रीवरकन्यायां जनयामास भडनरान्। मागधं क्षत्रियात्" च भड़ कोलं च कन्दरम्" ब्रह्मवै०ब्रह्मख०२०अ०।

भडिल पु० भड-इलच्। १वीरे २सेवके उज्ज्वलः। २ऋषिभेदे ततः गर्गा० अपत्ये यञ्। भाडिल्य तदपत्ये स्त्रियां आ० फञ्। भाडिल्यायन तदपत्ये नडादित्वे वा फक्। भाडिक्त्यायन तदपत्ये पुंस्त्री०। तस्य वृद्धत्वे वा लुक्।

भण कथने स्वा०पर०द्विक०सेट्। भणति। अभाणीत्-अभणीत्। भडि वा हस्वः। अबीभणत्-त अबभाणत्-त। कथनमिह व्यक्तवाक्यम्।

भणिति स्त्री भण-क्तिन् अड्हादित्वादिट्। कथने। गौडोवीयैकुलप्रशस्तिभणितेः" नैष०। [२सङ्गत्यां रत्नमाला।

भणाकी स्त्री भटि-आकन् ङीष्। १वार्त्ताक्ष्यां, अमरः।

भण्ड(ण्ट)क पु०भटि-उक कक वा। ग्रन्थोनाकडङ्के रत्नमा०

भण्ड पु० भडि-अच्। अश्लीलवाक्यभाषके (भाँड़) "त्रयो वेदस्य कर्त्तारो भण्डधूर्त्तनिशाचराः" सर्व०सं०चार्वाकदर्शनम्

भण्डक पु स्त्री० भण्ड+संज्ञायां कन्। खञ्जनखगे जटा०। स्त्रियां जातित्वात् ङीष्।

भण्डन न० भण्ड-भावाधारादौ ल्युट् १प्रलीकारे (प्रतारणे) २कपटे मेदि०। [वेष्यायां शब्दर०।

भण्डहासिनी स्त्री भण्डेन सह हसति णिनि ङीप्।

भण्डि स्त्री भडि-इन्। १वीणौ धारा०। वा ङीष् ङीवन्तः २शिरीषवृक्षे राजनि०। [शब्दर०

भण्डिका स्त्री भण्ड-स्वार्थे कापि अत इत्त्वम्। भण्डिकायां

भण्डित पु०भण्डि-क्त। १ऋषिभेदे ततः गर्गा० यञ्। भाण्डित्यः तद्गोत्रापत्ये पुंस्त्री अस्त्रा०फञ्। भाण्डिक्त्यायन तद्गोत्रापत्ये पुंस्त्री०। तस्य वृद्धत्वे वा लुक्।

भण्डिर(ल) पु०भण्ड-इलच् पृषो०रस्य वा लः। १शिरीषवृक्षे अमरः। वान्तः वाभण्डतिः। लान्तः शुभे द्रुते त्रि० उणादिको०।

भण्डीतकी स्त्री भण्डो सतीं तनोति तन-क्विप ङीष्। भण्डिकायां भावप्र०।

भण्डीर पु० भण्ड वा०ईर। १वटवृक्षे २तद्वासुनीयशाके ३शिरीषवृक्षे च राजनि०। हरिवं०६५ अ०। तद्वनवर्णनम्

भण्डीरलतिका स्त्री भण्डीर इव वर्त्तते लस-क्वुन् आदेः क कापि अत इत्त्वम्। भण्डिकायां राजनि०।

भण्डीरी स्त्री भडि। वा०ईर गौरा० ङीष्। भण्डिकायाम् अमरः। रस्य लः। तत्रार्थे पु० शब्दच०।

भण्डु पु०भडि-उण्। देशभेदे ततः तद्वास्त्या० चतुरर्थ्यां अण्। भाण्डव तद्देशदेशादौ त्रि०।

भण्ड(ण्डू)क पु० भडि-उक कक वा। (भाङ्गुन) वृक्षभेदे रत्नमाला। दीर्घमध्यः २व्योनाकडङ्के रत्नमाला।

भद्र शुभकथने प्रीतौ च भ्वा०आ० अक० सेट् इदित्। भन्द्रते अभिभद्रिष्ट।

भद्र कल्याणकरणे चु०उ०सक०सेट् इदित्। भन्द्रयति-ते अभद्रत्।

भद्रक्त पु० भद्र-भक्त नलोपः। १क्षुद्रभेदे। २पूजिते त्रि०। उणादि० ३प्रशस्ते उज्ज्वल०।

भद्राक्त न०भद्र कल्याणे आकन् नलोपः। कल्याणे उज्ज्वल०

भद्रक्त न० भद्र-रक्त नि० नलोपः। १मङ्गले उणा०२ उत्तमे हरिवं च मेदि०। ज्योतिषोक्त कवादितः षष्ठमे करणे स्त्री न०। ४मङ्गलदेवे ५शुभे हरिवंशे ७कदम्बे दक्षिणजातिभेदे ८बलदेवे १०रामकरभेदे पु० मेदि०। ११सप्तमेवैले पु० हेमच० १२शुभहीनदण्डे च पु० राजनि०। ज्योतिषोक्ते तु १३द्वितीयासप्तमीद्वादशीतिथिषु च स्त्री। १४साधौ १५श्रेष्ठे च त्रि० मेदि०। १६देवदारुवृक्षे पु०। १७लक्ष्मणभगिन्यां स्त्री "रामं मां भद्रया सह" त्रि० स०।

ऽटमध्यदेशभेदे पु०ह०स० १४अ०कूर्मविभागे दशग्रम्। १६वसु देवपुत्रभेदे पु० भाग०६२।४।२५ श्लो०। २०तुषितदेवगणभेदे भाग० ४।१।८। २१वैश्रवणपत्न्यां स्त्री०भा०१८६अ०। २२सोमस्य दुहितरि उतथ्यपत्न्यां स्त्री भा०अ० १५४अ०। २३रौद्राश्वस्य कन्याभेदे हरिवं० ३६अ०। २४नटभेदे पु० हरिवं० १५० अ०। २५भारतवर्षस्थे नदीभेदे स्त्री मार्कपु० ५६ अ०। विष्टिभद्रायाः सर्वकार्यवर्जनप्रतिप्रसवादिकं मु० चि० पी०धा० दर्शितं यथा "व्ययोगे सुयोगोऽपि चेत् स्यात् तदानीमयोगं निहत्यैषमिष्टं तनोति। परे लग्नगुद्वा कुयोदिनार्धं दिनार्द्धोत्तरं विष्टिपूर्वं च शस्तम्(१)। शुक्ले पूर्वार्द्धेऽष्टमीपञ्चदश्योर्भद्रैकादश्यां चतुर्थ्यां परार्द्धे। कृष्णेऽन्यार्द्धे स्यात् तृतीयादशम्योः पूर्वे भागे सप्तमीशशिन्तिथ्योः(२)। पञ्चद्वादिक्षितार्कराममनुभूयामादिघट्यः शरा विष्टेराद्य असद्गजेन्दुरसरामाद्यश्विबाणाब्धिषु। यामेष्वन्त्यघटीत्रयं शुभकरं पुच्छं तथा वासरे विष्टिस्तिथ्यपराह्णजा शुभकरी रात्रौ तु पूर्वाह्णजा(३)। कृत्यकल्पतरौ मत्स्ये स्वर्गेऽजोऽजाजत्रयेऽग्निगे। स्त्रीधनुर्जूकनक्रे धौ भद्रा तत्रैव तत्फलम्(४)" मू०।

"अथावश्यकशुभलाभे कालान्तरप्रतीक्षाऽयोग्यतायां परिहारमाह विष्टिपूर्वं विष्टिर्भद्रा तत्पूर्वं तदादि व्यतीपातादिकं दिनार्द्धोत्तरं मध्याह्नादनन्तरं शस्तं प्राङ्मध्याह्नं यावत्कालो विष्टिः "विष्टिरङ्गारकस्यैव व्यतीपातश्च वैष्टिभिः। प्रत्यरं जन्मनक्षत्रं मध्याह्नात् परतः शुभम्" इति तेनैवोक्तत्वात्(१)। अथ भद्रा निषिद्धेति पूर्वसक्तं तदधुना प्रस्तावात् तद्विधिकालं शालिनीच्छन्दसाह शुक्ले इति। शुक्लपक्षे अष्टम्यां पूर्णिमायाञ्च पूर्वार्द्धे भद्रा भवति एकादश्यां चतुर्थ्यां चोत्तरार्द्धे भद्रा। अथ कृष्णे कृष्णपक्षे तृतीयायां दशम्यां चान्त्यार्द्धे उत्तरार्द्धे भद्रा स्यात् सप्तम्यां शशिन्तिथौ चतुर्दश्याञ्च पूर्वे भागे पूर्वार्द्धे भद्रा स्यात् पूर्वे इति पूर्वादिभ्यो नवभ्यो वेति स्त्रिनभावपक्षे रूपम्। अष्टम्यादीनां तिथीनां गतभोग्यघटिकायोगार्द्धं भद्राप्रमाणमिति यावत् "तिथेर्गतैष्यैक्यदलं तन्मानं करणं भवेत्" वोपदेवोक्तेः "तिथ्यर्द्धभागं सर्वेषां करणानां प्रकल्पयेत्" इति सूर्यसिद्धान्तोक्तेश्च। उक्तञ्च दीपिकायाम् "तृतीयादशमीशेषे तत्पञ्चम्योस्तु पूर्वतः। कृष्णे विष्टिः सिते तद्वत्तासां परतिथिष्वपि" बृहस्पतिना तु अष्टसूक्तम्। "सिते चतुर्थ्यामन्त्यार्धमष्टम्याद्यार्द्धमेव च। एकादश्यां परार्द्धे तु पूर्वार्द्धं पूर्णशीतगौ। कृष्णे तृतीयान्त्यार्द्धं हि सप्तम्याद्यार्द्धमेव च। दशम्यासुत्तरार्द्धं तु चतुर्दश्यर्द्धमादितः। विष्ट्याख्योऽयं भद्रादोषः कथितोऽत्र समासतः। तदानीं कृतं तत्कर्म कर्त्रा सह विनश्यति" इति। पूर्णशीतगौ पूर्णिमायाम्। रत्नकोशे प्रत्येकं भद्रानामानि "हंसी नन्दिन्यपि च त्रिशिराः सुमुखी करालिकाचैव वैक्रान्तिरौद्रमुखी च चतुर्मुखी विदयः क्रमशः"। चतुर्थ्यादितिथिसम्बन्धि भद्रानामाभिधानं नामसाहश्येन फलतारतम्यसूचनार्थम्। भद्रास्वरूपं रत्नमालायाम् "उदुम्बरोद्भटतरपोड्डिताऽतिकृष्णा दंष्ट्रोग्रा पृथुघनुगण्डदोर्घनासा। कार्यं क्षीङ्कृतवहृवह्नि सम्मुखगिरन्ती विश्वान्तः पतति समन्ततोऽत्र विष्टिरिति"(२)। अथ चतुर्थ्यादितिथिषु भद्रावासमुखपुच्छविभागादिकं शार्दूलविक्रीडितेनाह। पञ्चेति चतुर्थ्यादितिथीनां क्रमशः पञ्चादिप्रहरेषु शराः पञ्च नाड्यः आदिमा विष्टेर्भद्राया आस्यं सुखं यथा चतुर्थ्याः पञ्चमप्रहरे, आदिभूताः पञ्च घट्यो भद्रासुखम् एवमष्टम्या द्वितीयप्रहरे, एकादश्याः सप्तमप्रहरे, पौर्णमास्याश्चतुर्थप्रहरे, तृतीयाया अष्टमप्रहरे, सप्तम्यास्तृतीयप्रहरे, भद्रासुखमित्यर्थः तद् भद्रायासुखमसदशुभमित्यर्थः अथ पुनश्चतुर्थ्यादितिथीनां क्रमेण गजादिप्रहरेषु अन्त्यम् अन्ते भवमन्त्यं दिगादिभ्यो यदिति यत् घटीत्रयं पुच्छं पुच्छसंज्ञं तच्छुभकरं सत्कार्येष्वित्यर्थः। यथा चतुर्थ्यां अष्टमप्रहरस्यान्त्यं घटीत्रयं भद्रापुच्छम् एवमष्टम्याः प्रथमप्रहरस्य, एकादश्याः षष्ठप्रहरस्य, पूर्णिमायास्तृतीयप्रहरस्य, तृतीयायाः सप्तमप्रहरस्य, सप्तम्या द्वितीयप्रहरस्य, दशम्याः पञ्चमप्रहरस्य, चतुर्दश्याश्चतुर्थप्रहरस्यान्त्यं घटीत्रयं भद्रापुच्छमित्यर्थः। यदाह गुरुः "भूतदस्रखराम्भोधिवसुवह्न्यङ्गरूपकाः। यामेष्वेष क्रमादास्यं भवेत् तिथ्यर्द्धविष्टिश्चिति"। व्यवहारसमुच्चये "दशम्यामष्टम्यां प्रथमघटिकापञ्चकपरं हरिद्युः सप्तम्यां दिदश १२घटिकान्ते त्रिघटिकम्। तृतीयाराकायां खयम २०घटिकाभ्यः परभवं शुभं विष्टेः पुच्छं शिवतिथिचतुर्थ्योस्तु विरमे" इति। हरिद्युरेकादशी राका पूर्णिमा। ननु भद्रा देवतेत्यभिधीयते तस्याः पुच्छकथनात्तु पशुत्वसिद्धिर्दृश्यते देवता च कथं पशुर्भवितुमर्हति। सत्यं दैत्येन्द्रैर्देवेषु पराजितेषु रुद्रस्य ज्वालामालाकुलनेत्राद् लोकितदैत्यात् देवी भद्राभवा सुखपुच्छादिसत्त्वे

सतपद्मा दैत्यान् जघान यदुक्तं श्रीपतिना दैत्यैन्द्रैः समरेऽमरेषु विजितेष्वीशः क्रुधा दृष्टवान् स्वङ्घायं किल निर्गता खरमुखी लाङ्गूलिनी च त्रिपात्। विष्टिः सप्तभुजा मृगेन्द्रगलका चामोदरी प्रेतगा दैत्यघ्नी मुदितैः सुरैस्तु करणप्रान्ते नियुक्ता सदेति"। भद्राजन्यमाह वसिष्ठः "वधबन्धविषाग्न्यस्त्रच्छेदनोच्चाटनादि यत्। तुरङ्गमहिषोष्ट्रादि कर्म विष्ट्यान्तु सिद्ध्यति। न कुर्य्यान् मङ्गलं विष्ट्यां जीवितार्थी कदाचन। कुर्वन्नश्यत्यदा क्षिप्रं तत् सर्वं नाशतां व्रजेत्"। तत्राङ्गविभागः फलञ्च कश्यपसंहितायाम् "सुखे पक्ष गले त्वेका वक्त्रस्थैकादश स्मृताः। नाभौ हृदि चतस्रः षट् कटयां तिस्रः पुच्छे तु नाडिकाः। कार्य्यहानिर्मुखे मृत्युर्गले वक्त्रसि निःस्वता। कटयामुत्कण्ठता नाभौ च्युतिः पुच्छे ध्रुवो जयः"। अथञ्च भद्राङ्गविभागो नाडीनां त्रिंशतोन्यूनाधिकत्वे तु त्रैराशिकेन सुखादीनामङ्गानां विभागज्ञानं यथा यदि नाडी त्रिंशता दृष्टसङ्गमङ्गपरिमाणं दृष्टपरिमाणेन किमिति त्रैराशिकम् एवं सति उक्ताङ्गपरिमाणं भद्राभोगमितघटीभिः सङ्गुण्य त्रिंशता भाज्यं लब्धसमोऽङ्गविभागः। तत्र सुखादिकाया रत्नमालायाम् "जलधिखिखधिरत्नः पर्व कीनाशवायुत्रिदशपतिककुप्सु प्रोक्तमास्यं हि विष्टेः। नियतमृषिभिराशासंख्यया क्रमेण स्फुटमिह परिहार्य्यं मङ्गलेच्छेतदेव"। जलं वरुणः कीनाशो यमः शुक्लचतुर्थ्यां उत्तरार्द्धे पश्चिमदिशि भद्रासुखं तच्चाशासंख्यक्रमेण पञ्चमे प्रहरे भवति यथैव भद्रायाः प्रहरचतुष्टयाधिकस्थितभावादन्ते एव घटिकात्रयं पुच्छं ततोऽष्टम्यां द्वितीयप्रहरेऽनेन प्रकारेण आग्नेय्यां दिशि सुखं सुखाच्च प्राक् पुच्छमिति प्रथमप्रहरान्त एव पुच्छघटिका इत्येवं सर्वास्वपि भद्रातिथिष्वनुगन्तव्यं प्रयोजनमपि तत्रैव "मनुवसुमुनितिथियुगदृग्वह्निवसुधासंख्यासु तिथिषु पूर्वेषाः। आयाति विष्टिरेषा पृष्ठे शुभदा पुरस्त्वशुभेति" तदेतदात्ययिककार्य्यासम्भवे सति सुखादिकसंसुखयात्रानिषेधकमवधेयम्। अन्यान्तरे अन्यदप्युक्तम्। "असिते सर्पिणी त्र्येका सिते विष्टिस्तु वृश्चिकी। सर्पिण्यास्तु मुखं त्याज्यं वृश्चिक्याः पुच्छमेव च"। अथ परिहारमाह तथेति विष्टिस्तिथ्यपरार्द्धजा तिथ्युत्तरार्द्धे संभूता वासरे दिवसे यदि स्याद् भद्रा तदा शुभकरी तेनैव प्रकारेण तिथिपूर्वार्द्धजा भद्रा रात्रौ चेत् स्यात् तदा शुभा शुभकरी स्यात। उक्तञ्च "रात्रिभद्रा यदाह्नि स्याद् दिवा भद्रा यदा निशि। न तत्र भद्रादोषः स्यात् सा भद्रा भद्रदायिनी" इति। रात्रिभद्रा तिथ्युत्तरार्द्धोद्भवा दिवाभद्रा तिथिपूर्वार्द्धोद्भवा यस्यामर्थे स्पष्टमाह गुरुः। "निशि पूर्वार्द्धजा विष्टिर्दिवा चापरतः शुभा। क्रमागता तु या विष्टिः सैव हालाहलोपमा" इति। लल्लोऽपि "दिवा परार्द्धजा विष्टिः पूर्वार्द्धोत्था यदा निशि। तदा विष्टिः शुभायेति कथनाशासनभाषितम्"। ब्रह्मसिद्धान्तेऽपि "दिवा परार्द्धजा विष्टिर्विष्टिरेव दिवानिशोः। सा त्याज्या त्वन्यथा विष्टिः सर्वकर्मशुभप्रदा"। नन्वत्र यत् तु नारदकश्यपादिभिरुक्तम्। "करणानि बवादीनि शुभसंज्ञानि षट् क्रमात्। क्रमायाता क्रमायाता विष्टिर्नेष्टा तु सङ्गले"। अत्र क्रमायाता दिवारात्रिक्रमायाता दिवाभद्रा रात्रौ रात्रिभद्रा च दिवेत्यर्थः। एवं सति द्विविधायाऽपि भद्रायादोषवत्त्वोक्तेः पूर्वोक्तपरिहाराभिधानमयुक्तम् उच्यते इदमेव क्रमायातेति वचनं ज्ञापकमुक्तार्थस्य अन्यथा सामान्यतो भद्राद्वये इत्युक्तौ द्विविधभद्राया दोषत्वसिद्धेरनर्थकमिदं स्यात्तस्माच्छुभकार्य्याणां भद्रारूपदुष्टदिनव्यतिरिक्तकालप्रतीक्षाऽयोग्यत्वे तदैव कार्य्यं न दुष्टदिने व्यवधेनोपपत्तौ बाधो न न्याय्य इति न्यायात् वचनस्य निषेध एव तात्पर्य्याच्च। व्यवग्रहकर्त्तव्यस्य तु शुभकर्मणः कालान्तरप्रतीक्षामसहमानस्यैवमादिपरिहारमाश्रित्य दुष्टदिने क्वचिदेव विधिरङ्गीकार्य्यो वेत्यपि परिहार एतत्पर एवेत्यलं पल्लवितेन। अथ भद्रानिवासं तत्फलञ्चानुष्टुभाह (१)। कुर्क इति अजे चन्द्रमसि कुम्भद्वये कुम्भमीनस्थे कर्कसिंहराशिस्थिते सति भद्रा मर्त्य मनुष्यलोके तिष्ठति। व्याख्यातत्वाय मेषवृषमिथुनस्थितेऽलिगे वृश्चिकस्थिते चन्द्रे स्वर्गे भद्रा तिष्ठति। कन्याधनुस्तु वामकरराशिस्थितेऽधः पाताललोके भद्रा तिष्ठति। अथ भद्रा तत्रैव मर्त्य स्वर्गपातालेषु फलं ददातीत्यपवादद्वारा प्रयोजनमुक्तं भवति। उक्तञ्च "मेषोक्षकौर्पमिथुने घटसिंहमीनकर्कटे चापगतौलिसुतासु चन्द्रे। स्वर्मर्त्यनागनगरीः क्रमशः प्रयाति विष्टिः फलान्यपि ददाति हि तत्र दैवे" इति। भूषणवल्लभे "कन्यातुलामकरधन्विषु नागलोके मेषालिवैणिक ऋक्षेषु सुरालये स्यात्। पाठीनसिंहघटकर्कटकेषु मर्त्ये चन्द्रे वदन्ति मुनयश्चविधां हि विष्टिम्" (४) पी० भा०

भद्रशब्दात् परिभाषणे (सुखने) ऽर्थे गम्ये डाच्। क्रियोऽनुप्रयोगः सच्चादा०स०। भद्राकरोति साङ्गत्यं सुखनेन सत्करोतीत्यर्थः शि०कौ०। एवं भद्रशब्देऽपि बोध्यम्।

भद्रकं त्रि०भद्र-स्वार्थे संज्ञायां वा कन्। १मनोहरे त्रिका०। २भद्रमुस्तके न० शब्दमाला। ३देवदारुवृक्षे शब्दर०। "श्रीं नरनारनाथय गुरुर्दिगकेविरसं हि भद्रकमिदम्"। छ०र०उक्ते द्वाविंशत्यक्षरपादके ४छन्दोभेदे।

भद्रकर्ण पु० भद्रः कर्णोऽस्य। गोक्षुरवृक्षे राजनि०।

भद्रकर्ण पु० भद्रस्य कर्णो यत्र। गोकर्णरूपे तीर्थभेदे।

भद्रकर्णेश्वर पु०ष०त०। गोकर्णस्थे शिवलिङ्गभेदे भा०व०८३अ०।

भद्रकार त्रि० भद्रं करोति कृ-अण् उप०स०। १मङ्गलकारके २देवभेदे पु० भा० स० १२ अ०।

भद्रकाय पु०। १नाम्नजित्यां जाते श्रीकृष्णस्य पुत्रभेदे हरिवं० १६२ अ०। हैवं०। २मङ्गलदेहके त्रि०।

भद्रकाली स्त्री १दुर्गायशक्तिभेदे "जयन्ती मङ्गला काली भद्रकाली कपालिनी" दुर्गापूजामन्त्रः। तदाविर्भावकथा च कालिपु० ५०अ० दृश्या। तन्मन्त्रादिकं तन्त्रसारे दृश्यम्। २कुमारानुचरभेदे भा० श० ४७ अ०।

भद्रकाष्ठो स्त्री भद्राय काष्ठायते काष्ठ-अच् गौरा० ङीष्। भद्रमुस्तायाम् राजनि०।

भद्रकाष्ठ न० ह्रस्व०। देवदारुवृक्षे हेमच०। [अमरः।

भद्रकुम्भ पु० भद्रकारकः कुम्भः शा०त०। पूर्णकुम्भे जलपूर्णघटे

भद्रगन्धिका पु० भद्रो गन्धोऽस्त्रस्या साङ्गत्येन ठन्। शुक्लके रत्नमाला।

भद्रगौर पु० देवभेदे स च पूर्वदिग्वर्त्ती सर्क०५८ अ०।

भद्रङ्कर त्रि०भद्रं करोति कृ-खच् मुम्। मङ्गलकारके।

भद्रङ्करण न०भद्रं क्रियतेऽनेन कृ-ल्युट् मुम्। मङ्गलसाधने।

भद्रचारु पु० रुक्मिण्यां जाते वासुदेवस्य पुत्रभेदे हरिवं११८अ०

भद्रचूड़ पु० भद्रा चूड़ा यस्य। (लङ्गाविज) वृक्षभेदे शब्दच०।

भद्रज पु० भद्राय जायते जन-ड। इन्द्रयवे राजनि०।

भद्रतरुणी स्त्री भद्रः तरुणीव। कुञ्जकवृक्षे राजनि०।

भद्रतुङ्ग पु० तीर्थभेदे भा०व० ८२अ०।

भद्रतुरग न० भद्राश्वतुरगा यत्र। जम्बुद्वीपस्य भवर्षमध्ये वर्षभेदे। "माल्यवच्छ्वलधिमध्यवर्त्तियत्तत्तु भद्रतुरग जगुर्बुधाः" सि० शि० जम्बुद्वीपशब्दे भद्राश्वशब्दे च विवरणं दृश्यम्।

भद्रदन्तिका स्त्री कर्म० स्वार्थे कन्। दन्तीवृक्षभेदे।

भद्रदारु पुंन०। कर्म०। देवदारुवृक्षभेदे अमरः।

भद्रद्वीप पु० कुशद्वीपान्तर्गते उपद्वीपभेदे मार्कपु० ५८ अ०।

भद्रनामन् पु०ब०व०। (काटठोकरा) खगभेदे त्रिका०।

भद्रनामिका स्त्री भद्रं मङ्गलं नामयति प्रापयति नम-णिच्-ण्वुल्। लायन्तीलतायां रत्नमा०।

भद्रनिधि पु० दानार्थकल्पिते ताम्रादिघटितघटे तद्दानविधिश्च हेमा० दा० वामनपु० उक्तो यथा

"पुण्यान्तिथिं प्रपद्य तु पौर्णमास्यां तथोपरागे शशिसूर्ययोर्वा। चतुर्युगादिष्वयनद्वये वा प्रबोधने प्रस्वपनेऽथ विष्णोः। कुर्यादधोदुम्बरमेव कुम्भं हिरण्यभारेण यथाशक्त्या। तथाविधानञ्च सुराजतं स्याद्विरण्यभारेण तु पूरयेत् तम्। तदर्द्धतोऽर्द्धेन तदर्द्धतो वा स्वशक्तितः स्वर्णपलैः शतेन। तदर्द्धमर्द्धेन तु वित्तशक्त्या पलत्रयं दुर्लभमप्रकुर्यात्। तत्ताम्रभाण्डे कनकं निधाय सवज्रनीलोत्पलपद्मरागम्। शङ्खस्फटैर्वूर्यसविद्रुमञ्च तद्राजतं पात्रमधोमुखं स्यात्। एवन्तु तं भद्रनिधिं सुविद्वान् कृत्वासने प्रावरणोपयुक्ते। कृशोत्तरे दर्पणचामराढ्ये सपादुकोपानत्कछत्रयुक्तम्। सतूलकौशेयसुखोत्तमयुक्तं संपूजयेन्मन्त्रवरैरथैतैः" "आदौ तु पञ्चामृतकेन विष्णुं संस्नाप्य संसारहरं समर्च्य। तथेश्वरं पावकमेव कृत्वा आमन्त्रयेद्भद्रनिधिं ततस्तम्। श्रीखण्डकर्पूरसकुङ्कुमेन पद्माक्षरं नाम स्त्रियः प्रलिख्य। नमस्तथोङ्कारयुतं च पात्रे तद्राजतेऽभ्येवमथार्चयेत। त्वया समस्तामरसिद्धयक्षविद्याधरेन्द्रोरगकिंनरेन्द्रैः। गन्धर्वविद्याधरदानवेन्द्रैर्युतं धृतं विश्वमिदं नमस्ते। समस्तसंसारकरी त्वमेव विभोः सदानन्दमयी च माया। समस्तकल्याणनिधिः समाधिः। हरिप्रिये! भद्रनिधिर्नमस्ते। एवं पूज्य विधानेन ततो विप्रमथार्चयेत्। किरीटाङ्गदनिष्काग्र्यकुण्डलाङ्गुलिभूषणैः। अलङ्कृत्य हरिं तद्वत् पीताम्बरधरं ततः। पूजयेदच्युतं ध्यात्वा मन्त्रेणानेन भक्तिमान्। भूदेवोऽसीत्यतो नित्यं नित्यानन्दमयो हरे!। हर मे दुष्कृतं कृष्ण! कृपाकर! नमस्तु ते। भूदेव! भगवद्रूप! भवभङ्गकरेश्वर!। भवभूतिकरोजिष्णो! प्रभविष्णुर्नमोऽस्तु ते। एवं पूज्य हृदि ध्यात्वा तं द्विजं विष्णुरूपिणम्। ततो भद्रनिधिं दद्यान्मन्त्रेणानेन मानवः। स्वमोङ्कारयुतेनादौ वपुर्नाम तथात्मनः। यवदर्भतिलैः सार्द्धं सुदकं संपरित्यजेत्। पितृसन्तारणार्थाय नित्यानन्दविवृद्धये। सर्वौघविनाशाय विष्णोः

दानं मया कृतम्। तदनेन सत्येन धातुत्रययुतेन च। सच्चौमाम्बरयुक्तेन सादर्शपादुकेन च। छत्रेण सच्छत्रेण चामरोपानहेन च। सदानन्दविधानेन प्रीयतां विष्णुरीश्वरः। एवमुच्चार्य्य तन्नद्याद्दु द्विजाय हरिरूपिणे। गोप्रेन विधिना दद्याद्वेदसंख्यां न कीर्त्तयेत्। अकीर्त्तिते कोटिगुणायुतं फलं प्रगोपिते कल्पगुणैर्न संशयः। इतीदमन्यस्य न कीर्त्तयेत् सुधीः निधानमध्ये निहितञ्च यद्धनं। एवं कृते स्यान्मनुजः कृतात्मा तपेत्रया स्यान्मरणं कदाचित्। प्रयाति विष्णोः पदमव्ययं तत् शिवात्मकानन्दमयं सनंस्यम्"।

भद्रपदा स्त्री ब०व० भद्रस्य इन्द्रस्येव पदं यासाम्। पूर्वोत्तरभाद्रपदाश्च रायसु०। तत्र जातः अण् उत्तरपदवृद्धिः। भद्रपाद तज्जाते त्रि०।

भद्रपर्णी स्त्री भद्रं पर्णमस्याः अजादि० टाप्। १कटभ्यां वृक्षे शब्दमाला। २प्रसारिण्यां च अमरः। ३गम्भार्य्यां च जटाध०। ङीप्। [पीठभेदे भद्र शब्दे दृश्यम्।

भद्रपीठ पुंन० भद्रार्थं पीठः। न्यूपदेवादीनामभिषेकार्थं

भद्रबलन पु० भद्रं बलनं बलमस्य। बलरामे शब्दमा०।

भद्रव(ब)ला स्त्री भद्राय वलति चलति व(ब)ल—अच्। (गन्धभाद्दाल) १लतायां २गन्धिकायां, ३माधवीलतायाञ्च अमरः। वलायां राजनि०। [न्यासभेदे भा०शा०६६अ०

भद्रभीमा स्त्री कश्यपपत्न्यां दक्षदुहितायां क्रोधायां जाते क-

भद्रमल्लिका स्त्री कर्म०। मल्लिकाभेदे नवमल्लिकायाम् शब्दमाला।

भद्रमुख त्रि०भद्रं सुखं तदुव्यापारोऽस्य कप्। सुवक्तरि "ततो भद्रमुखात्तात्तं स्यास्ये स्याणुरिवाचलः" मार्कपु० १५अ०।

भद्रमुञ्ज पु० कर्म०। शरभेदे भावप्र०।

भद्रमुस्तक पु० कर्म०। नागरमुस्तके। अमरः।

भद्रमुस्ता स्त्री कर्म०। भद्रमुस्तके "भद्रमुस्ता च गुन्द्रा च तथा नागरमुस्तकः। मुस्तं कटु हिमं याहि तिक्तं दीपनपाचनम्। कषायं कफपित्तासतृड्ज्वरारुचिजन्तुहृत्। अनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते। तत्रापि मुनिभिः प्रोक्तं वरं नागरमुस्तकम्" भावप्र०।

भद्रयव पु० भद्रो यव इव। इन्द्रयवे अमरः।

भद्ररथ पु० कच्छेयुवंश्ये हर्य्यङ्गपुत्रस्य पुत्रे हरिवं० २१अ०।

भद्ररेणु इव०। ऐरावते गजे त्रिका०।

भद्ररोहिणी स्त्री भद्रार्थं रोहति रुह—णिनि ङीप्। कटुरोहिण्यां (कटकी) सुश्रुतः तस्याः भद्रदारुकत्वात्। तथात्वम्। "दार्वी त्वक् पिप्पली शुण्ठी लाक्षाशक्रयवैर्हृतम्। संयुक्तं भद्ररोहिण्या पक्वं पेयादिभिश्चितम्"।

भद्रवट पु० ७त०। १आश्रमभेदे भा०व०२२०अ०, २तीर्थभेदे च।

भद्रवत् न० भद्र+मतुप् मस्य वः। देवदारुवृक्षे राजनि०।

भद्रवती स्त्री भद्राणि पर्णानि सन्त्यस्या मतुप् मस्य वः ङीप्। १गाम्भार्य्याम्। नाम्नजितीजातायां भरतकन्यायां स्त्री हरिवं० १६१ अ०।

भद्रवर्मन् पु०भद्रं दधाति धृ—मनिन्। जवमल्लिकायाम् शब्दच०

भद्रवल्लिका स्त्री नित्यक०। संज्ञायां कन् ह्रस्वः अत इत्त्वम् कर्म०। (अनन्तमूल) लतायां रत्नमा०।

भद्रवल्ली स्त्री नित्यक०। (अनन्तमूल) गोपवल्लीभ्यां राजनि०।

भद्रविराज "ओजे तपरौ जरौ गुरुश्चेत् वसौ जगौ भद्रविराड् भवेदनोजे" इ० उक्ते अर्द्धसमे वृत्तभेदे।

भद्रशर्मन् पु०भद्रं शर्म सुखं यस्य। पुत्राद्यानन्दयुते। ततो वाह्वा०अपत्ये इञ् भाद्रशर्मि तदपत्ये पुंस्त्री। [२२७अ०

भद्रशाख पु०भद्राः शाखाः सदृशायाः यस्य। कार्त्तिकेये भा०व०

भद्रश्रय न०भद्राय श्रीयते श्री—कर्मणि अच्। चन्दनवृक्षे रत्नमा०

भद्रश्रवस् पु० धर्मस्य पुत्रभेदे भाग० ५।१८।१।

भद्रश्री पु० भद्रा श्रीर्यस्य। चन्दनवृक्षे अमरः।

भद्रश्रेण्य पु० दिवोदासात् पूर्वं वाराणस्यधीशे नृपभेदे हरिवं० २६ अ०।

भद्रसरस् न० नित्यक०। सुपार्श्वचलस्थे सरोभेदे धान्या० [७अ०। चलशब्दे दृश्यम्।

भद्रसालवन न० ६त०। भद्राश्ववर्षस्थे वनभेदे भा० भी०

भद्रसेन पु० देवक्यां जाते वसुदेवस्य १पुत्रभेदे भाग०६।२४।२५ २कुन्तिन्दपपुत्रभेदे च भाग० ६।२२।

भद्रसोमा स्त्री भद्रः सोम इव द्रवोऽस्याः। १गङ्गायां शब्दमा० २कुरुवर्षस्थे नदीभेदे मार्कपु० ५६अ०। [दृश्यम्।

भद्रा स्त्री भद्राश्ववर्षस्थे १नदीभेदे २विष्टिभद्रादौ भद्रशब्दे

भद्राकरण न०भद्र+डाच् कृ—ल्युट् साच्चदा०स०। सुखदाने हे म०

भद्राङ्ग पु० भद्रमङ्गमस्य। बलरामे हेमच०।

भद्रात्मज पु० खड्गे त्रिका०।

भद्रारक पु० कच्छादशद्वीपान्तर्गते द्वीपभेदे शब्दमाला।

भद्रालपत्रिका स्त्री भद्रं वालति पत्त्यैप्रोति अल—अच् तादृशं पत्रं यस्याः कप् कृत इत्त्वम्। गम्भार्य्याम् (गाम्भार) शब्दमा०।

भद्राली स्त्री भद्रायालति पत्त्यैप्रोति अच् गौरा० ङीष्। १गम्भार्य्याम् (गाम्भार) शब्दमा०। इत०।२मङ्गलक्रियायाञ्च।

भद्रावती स्त्री भद्र-अस्त्यर्थे मतुप् मस्य वः संज्ञायां पूर्वपद-दीर्घः। कट्फलवृक्षे राजनि०।

भद्राश्रय पु० ६त०। चन्दनवृक्षे।

भद्राश्व न०भद्रा अश्वा यत्र। १जम्बुद्वीपस्य नववर्षान्तर्गते वर्ष-भेदे। २तद्वर्षस्थे जनपदे पु०ब०व०। तद्वर्षविवरणञ्च "भाद्राश्व-वतः पूर्वपार्श्वे पूर्वगन्धिका एकषष्टिर्हि योजनसहस्राणि मानतश्च भद्राश्वा नाम जनपदाः भद्रसालवनञ्च तत्र व्यवस्थिताः, कालाभ्रवर्णाः, पुरुषाः श्वेताः, पद्मवर्णिनः, स्त्रियः कृष्णवर्णाः दशवर्षसहस्राणि च तेषामायुस्तत्र च पञ्च कुलपर्वताः तद्यथा शैलवर्णः आकाशस्फटिकोऽरञ्जनः त्रिशृङ्गो नीलश्चेति तन्निर्गता भद्राश्वदन्तःस्थितानां देशानां तान्येव नामानि ते च देशाः एताः नदीः पिबन्ति तद्यथा सीता सुधाकिनी कंसवती कावेरी सुरसा शाखावती हरिद्रनदी अङ्गारवाहिनी हरितोया लोलाम्बुजा मतल्लिका वसुमती कृष्णाश्मा पक्षवङ्गा धनुष्मती मणिवप्रा छन्नच्छाया त्रिसोमिनी कृष्णतोया शुक्लोदा नागवती शिवा शैवालिनी मणितटा क्षीरोदा वरुणावती विष्णुपदी महानदी हिरण्यस्रवन्तिका सरायती वामोदा पताका चेत्येता महानद्यः एताश्च गङ्गासमाः कीर्त्तिताः आजन्मान्तं पापं विनाशयन्ति शतद्रुनद्याश्च कोटिगुणाश्च नद्यौ पिबन्ति ते दशवर्षसह-स्रायुषः कुरुसाम्या इति" वराहपु० गद्यम्। अधिकं जम्बुद्वीपशब्दे १०४५ पृ० दृश्यम्।

भद्रासन न० भद्राय लोकक्षेमायास्यतेऽत्र आस-आधारे ल्युट्। न्यासने अमरः। तल्लक्षणादि ह०स० ४८अ० उक्तं यथा "आदावनड्वुहश्चर्म्म तस्या संकुट्य पुच्छतः। प्रसक्तलक्षणं कृत्वा प्राचीनग्रीवमास्तरेत्। ततो दृषदश्च योधस्य चर्म रोहितमस्यतम्। सिंहस्याथ तृतीयं स्याद्व्याघ्रस्य च ततः परम्। चत्वार्य्येतानि चर्माणि तस्यां वेद्यासुपास्तरेत्। शुभे मुहूर्त्ते संप्राप्ते पुष्ययुक्ते निशाकरे। भद्रासनमेकतमेन कारितं कृष्णरक्ततताम्राणाम्। चीरतन्तुनिर्मितं वा विस्तृतं चर्मणाऽथवा। त्रिविध-स्तस्योच्छ्रायो हस्तः पादाधिकोऽर्द्धयुक्तश्च। माण्डलिका नन्तरजित् समस्तराज्यार्थिनां शुभदः। अन्यथा त्वि-रत्वं तत्रोपविशेत्तस्येश्वरः शुभनाः"।

भद्रिका स्त्री भद्रा+स्वार्थे क। १पक्षयोः द्वितीयासप्तमी-द्वादशीषु तिथिषु। २योगिनीदशान्तर्गतायां पञ्चम्यां दशायाम् "मङ्गला पिङ्गला धान्या भ्रामरी भद्रिका तथा" दशाशब्दे दृश्यम्। "भद्रिका भवति रो नरौ" छ० र० उक्ते नवाक्षरपादके १छन्दोभेदे "मनरलगुरुभिश्च भद्रिका" छ०र० उक्ते ४एकादशाक्षरपादके छन्दोभेदे च।

भद्रेश्वर पु० १शिवलिङ्गभेदे। २कल्पग्रामस्थ शिवलिङ्गभेदे च वामनपु० ४६ अ०।

भद्रैला स्त्री स्थूलैलायाम् राजनि०।

भद्रोदनी स्त्री भद्रमुदनित्यनया उद्+अन-ङी० घञर्थे क गौरा० ङीष्। बलायां राजनि०। [बमान।

भन अर्चने भ्वा०प०सक०सेट् निघण्टुः। भनति अभा(भ)नीत

भन्द अर्चने दीप्तौ च भ्वा० आ० सक० सेट् निघण्टुः। भन्दते अभन्दिष्ट बभदे बभन्दे। कर्मणि भद्यते।

भन्दिल त्रि०भदि-इलच्। १शुभे २कम्पे २दूते ४ संक्षिप्तसा०

भन्दुक पु० वक्रेश्वरसमीपस्थे देशभेदे स्कान्दपु०।

भपञ्जर न० भानां पञ्जरमिव। नक्षत्रचक्रे सि०शि०।

भपति पु० ६त०। १नक्षत्रेशे चन्द्रे हेमच० भनाथादयोऽ-प्यत्र। २राशीश्वरे मङ्गलादौ च।

भमण्डल न० ६त०। राशिचक्रे ह्व०सि०।

भम्भ पु० भसित्यव्यक्तशब्देन भाति भा-क। भस्त्रिकाभेदे देशे भारा०। २तत्तुल्यगतिके धूमे हेमच०।

भम्भराली स्त्री भसित्यव्यक्तशब्दस्य भरमालाति आ+ला-क गौ० ङीष्। (डाँग) भस्त्रिकायाम्। स्वार्थे क अत इत्वम्। भम्भमालिका तत्रैवार्थे त्रिका०।

भम्भासार पु० मगधदेशस्थभेदे हेमच०।

भय न०विभेत्यस्मात् भी-अपादाने अच्। १भयहेतौ। भावेऽच्। २दैन्यात्मके परतः स्वानिष्टसम्भावनारूपे वा चित्तवृत्तिभेदे ३नाटकप्रसिद्धे भयस्थायिभावके रसभेदे च। भयञ्च "रौद्रभक्षाद्या ह्य जनिसं चित्तवैक्लव्यजं भयम्" सा० द० लक्षितम्। भयानकशब्दे दृश्यम्। ४निर्ऋतिपुत्रभेदे पु० भा० आ० ६६अ०। [कु० १५५२ श्लो०।

भयकर त्रि० भयं करोति कृ-अच् ६त०। भयकारके भा०

भयकृत् त्रि०भयं करोति कृ-क्विप्। १भयकारके भयं लुनाति लू-छेदने क्विप्। २परमेश्वरे। "भयकृद् भयनाशनः विष्णुस०।

भयङ्कर पु०भयं करोति कृ-खच् मुम् च। १भयजनके २रस-भेदे ३दुरुद्धुतिरूपे च पुंस्त्री० स्त्रियां ङीष्। भा०व० ३५अ०भद्रा०४विश्वदेवगणभेदे पु० भा० अनु० ६१ अ०। ५कुमारानुचरमातृभेदे स्त्री ङीप् भा० श० ४७ अ०।

भयडिण्डिम पु० भयजनको डिण्डिमः। रणवाद्ये

भयद्रुत त्रि० भयेन द्रुतः ३त०। भयेन पलायिते अमरः।

भयनाशन त्रि० भयं नाशयति नाशि–ल्यु। १भयनिवारके २विष्णौ पु० "भयकृत् भयनाशनः" विष्णुस०।

भयनाशिनी स्त्री भयं रोगभयं नाशयति नश–णिच्–णिनि। नायमाणालतायाम् राजनि०। [त्रनः ख्यापके।

भयब्राह्मण पु० भयेन ब्राह्मणः सम्पद्यते। भीत्या विप्रत्वेना-

भयभ्रष्ट त्रि० ६त०। भयेन पलायिते भटाधरः।

भयव्यूह पु० भये सति व्यूहः। पार्श्वादितो भयभेदेन राज्ञा कर्त्तव्ये व्यूहभेदे भयभेदेन तत्प्रकारः कामं० नी० उक्तो यथा "यायाद्व्यूहेन महता मकरेण पुरोभये। श्येने-नोभयपक्षेण सूच्या वाधीरचक्रया। पश्चाद् भये तु शकटं पार्श्वयोर्वज्रसञ्ज्ञितम्। सर्वतः सर्वतो भद्रं भयव्यूहं प्रकल्पयेत्"।

भयानक पु० विभेत्यस्मात् भी–आनक। १व्याघ्रे २राक्षौ ३रसभेदे च मेदि०। ४भयङ्करे त्रि०। ५भीतेः अपादाने अमरः। तद्रसलक्षणादि सा०द० उक्तं यथा "भयानको भयस्थायिभावः कालाधिदैवतः। स्त्री-नीचप्रकृतिः कृष्णो मतस्तत्त्वविचारदैः। यस्माद् उत्-पद्यते भीतिस्तदालम्बनं मतम्। चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः। अनुभावोऽस्य वैवर्ण्यं गद्गदस्वर-भाषणम्। प्रलयस्वेदरोमाञ्चकम्पदिकृपणादयः। जुगुप्सावेगसंमोहसंत्रासग्लानिदीनताः। शङ्काप-स्मारसंभ्रान्तिमृत्युदा व्यभिचारिणः"।

भयापह त्रि० भयमपहन्ति अप+हन–ड। १भयनाशके २रुद्रे पु० त्रिका० ३विष्णौ पु० "जितमन्युर्भयापहः" विष्णुस०

भयावह त्रि० भयमावहति आ+वह–अच् ६त०। भय-कारके हेमच०।

भय्य न० भी–भावे यत् वेदे नि०। भये पञ्चमी० १०।५।६। लोके तु भेयमित्येव। [त्रि० अमरः।

भर पु० भृ–अप्। १अतिशये। कर्त्तरि अच्। २भरणकर्त्तरि

भरग त्रि० भरमतिशयं गच्छति गम–ड। १अतिशयगन्तरि भरगेति वर्णत्रयद्योत्ये २भर्गशब्दार्थे परब्रह्मणि यथोक्तं ब्राह्म० स० योगियाज्ञवल्क्येन "भेति भासयते यस्मात् रेति रञ्जयति प्रजाः। गेति च गच्छतेऽजस्रं भरगात् भर्ग उच्यते"। तत्र भासि–ड भः रञ्जि उ–रः। गम–ड गः तेषां समाहारः भरगम्। तदर्थत्रय-योगात् भर्ग इत्युच्यते पृषो०।

भरट पु० भृ–अटन्। १ज्ञमाकारे तेन हरति भक्षा०अण् भर-टिक तेन हर्त्तरि त्रि० स्त्रियां षित्त्वात् ङीष् भरटिकी।

भरण न० भृ–भावकरणादौ ल्युट्। १वेतने २पोषणे ३धारणे च। अश्विन्यवधिके द्वितीये ४नक्षत्रे अवद्र० ५घोषक-लतायाञ्च स्त्री ङीप्। नक्षत्रभेदे पु० मेदि०। तस्यायोग-तारादिकम् अश्लेषाशब्दे उक्तम् सा च राशिचक्रस्य४०अं-शोत्तरं १३।२० कलाविकलात्मिका। उदयगणान्तर्गता-ऽधोमुखान्तर्गता च। भरणेन हरति भक्षादि०अण् भर-णिक वेतनेन हारिणि त्रि० स्त्रियां ङीष्।

भरणीभू पु० भरणयां भवति भू–क्विप्। राहुग्रस्ते हेमच० भगदैवतशब्दे दृश्यम्।

भरगड पु० भृ–अण्डन्। १स्वामिनि २रुद्रे च उणादिको०।

भरण्य कण्ड्वा० नामधातुः भुरणेत्यत्र पाठान्तरम् धारणे पोषणे परः सक० सेट् भरण्यति भुरण्यति वा।

भरण्यभुज् त्रि० भरण्यं वेतनं भुङ्क्ते भुज–क्विप्। वेत-निके कर्मकरे अमरः। [दूते (रामदूती) शब्दच०।

भरण्यात्मा स्त्री भरण्या आत्मा आत्मा यस्याः। पर्वपुष्पी-

भ(भु)रण्यु पु० कण्ड्वा० भ(भू)रण्य उनु। १भरण्ये २अग्नौ ४चन्द्रे ५स्वामिनि च मं० च शब्दमाला। ३अग्नौ ४चन्द्रे ५स्वामिनि च मं० च्छिन्नसा०। भुरण्युरिति पाठान्तरम्।

भरत पु० भरं तनोति तन–ड। (जड़भरत) इति ख्याते १मुनिभेदे जड़भरतकथा च १०१५ पृ० दृश्या नाट्यशास्त्रस्य अलङ्कारशास्त्रस्य च २कर्त्तरि मुनिभेदे ३शिवे ४तन्तुवाये ५म्लेच्छे ६कैकयीसुते रामानुजे च। भरतेन प्रोक्तम् भरतं नाट्यशास्त्रमधीयते अण् तस्य लुक्। ७तच्छास्त्राध्येतरि ब०व०।८दुष्मन्तेन शकुन्तलायामुत्पादिते पुत्रभेदे पु०तस्यापत्यानि इञ् तस्य वह्वर्थे लुक्। ९भरतवंशजे रूढे पु०ब०व०। दौष्मन्तिभरतकथा भाग०९।२०।२८दृश्या १०अजमीढभेदेपुत्रभेदे भाग०५।४अ०। ११वह्निपुत्रभेदे "पावनो लौकिको वह्निः प्रथमो ब्रह्मणः सुतः। ब्रह्मौदनाग्निस्तत्पुत्रो भरतो नाम विश्रुतः" मात्स्ये ४८ अ०। रामानुजभरतस्य जन्म यथा "भरतो नाम कैकय्यां जज्ञे सत्यपराक्रमः। साक्षा-द्विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः"। १२मौत्यमनुपुत्रभेदे मार्कपु०१००अ०। १३आयुधजीविसंघभेदे पु० ततः स्वार्थे अण्। भारत तदर्थे ब० व०। १४छत्रिषु ब० व० निघण्टुः।

भरतखण्ड कुमारिकाखण्डे "कुमारिकेति विख्याता नाम्ना प्रकथ्यते। इदं कुमारिकाखण्डं चतुर्वर्णसमन्वितम्। प्रदम्। यथा क्षत्रावनीयञ्च नानाधर्माश्रमादिकलक्षणा।

इदं भरतचरणञ्च मया सम्यक् प्रकल्पितम्" स्कन्दपु०।

भरतद्वादशाह पु० भरतकृते द्वादशाहसाध्ये यज्ञभेदे "सर्वाग्निष्टोमो भरतद्वादशाहः" कात्या० श्रौ० २१।७।१२। "तत्र यत्ते सर्वाग्निष्टोमा भवन्ति प्रायणीयोदनीयवर्जम्। तेन दशरात्रस्य स्थाने दशाग्निष्टोमाः भवन्ति चाद्यन्तयोः प्रायणीयोदनीययोरतिरात्रावेव" संग्रहव्याख्या आश्व० श्रौ० १०।५।८ सूत्रादौ तु अन्यथोक्तं यथा "अथ भरतद्वादशाहः" सू० "अथशब्दोऽहीनकैवल्यनिवृत्तिविच्छेदार्थः। सत्राहीनसाधारणास्त्वारो द्वादशाहा उक्ताः। तत एकोऽहीन उक्तः। उत्तमस्य प्रधारण एवभरतविच्छेदार्थममथशब्दः प्रयुक्तः" नारा०। "इमानेकाहं पृथक् संस्याभिरूपेयुः" सू० "भरतद्वादशाह स्याहःक्रमैः। इममेव प्रकृतैकाहं पृथगभूताभिः संस्याभिर्युक्तं द्वादशत्वात् कुर्युः। विकृतिषु प्रकृतेः संनिहितत्वादिदमुच्यते। उत्तरत्र संख्याविधानादेव संख्यासम्बन्धे सिद्धे पृथक्संख्याभिरितिवचनं वचनादेव स्थाननियमो नातिदेशादिति ज्ञापनार्थम्" नारा०। "अतिरात्रमध्येऽग्निष्टोममध्यात् उक्थ्यानथाग्निष्टोममध्यातिरात्रम्" सू० "द्वादशाहसामान्येन प्राप्तानां संस्थानां विधीयमानो भरतद्वादशाहे व्यत्ययपवादः" नारा०।

भरतपुत्रक पु० भरतस्य नाटयशास्त्रकर्तुः पुत्र इव कायति कै-क। नटे हेम०। [इवार्थभदेवपत्यां ष।

भरतप्रसू स्त्री ६त०। १कैकय्यां शब्दर०। २शकुन्तलायाम्

भरतवर्ष न० ६त०। भारते वर्षे।

भरताग्रज पु० ६त०। दाशरथौ श्रीरामे।

भरद्वाज पु० ज्येष्ठस्य भ्रातुरुतथ्यस्य पत्न्यां ममतायां बृहस्पतिना जनिते मुनिभेदे। तदुत्पत्तिकथा विष्णुपु० ३अं० १६अ०। भाग०६।१८अ०। द्वाजशब्दे ३७६१पृ०तद्विवृत्तिरुक्ता। भा०अनु०६३अ०अन्यथा निर्वचनमुक्तं यथा "भरेऽसुतान् भरेऽग्निष्यान् भरे देवान् भरे द्विजान्। भरे भार्यां भरद्वाजं भरद्वाजोऽस्मि गोभने!"। "प्रजा वै वाजस्ता एष बिभर्त्ति यदुबिभर्त्ति तस्माद्भरद्वाज इति श्रुत्यनुसारेण स्वनामाह "भरे इति अग्निष्यान् अग्निष्वात्तयोर्ग्यानपि राक्षसान् शत्रूंश्च वधेनैव करुण्या पालयामि तथा कृतान् अपुत्रानुदासीनानपि दीनानदीनान् पालयामि भार्यां भार्यति पुत्रभृत्यादेरुपलक्षणम् ईदग्विधोऽन्योऽपि बालं वेगं शत्रूणां बाहुलमं वा भरेत्स्म पृथिवीवत् सर्वं बहोलपदस्य भवतीति तस्मादहमपि तथाकीत्यर्थः। भरे द्वाजमिति च्छेदे तु द्वाभ्यां जातं मङ्गरजमित्यर्थः ननु "माता भस्त्रा पितुः पुत्रो येन जातः स एव सः" इति श्रुतेर्मकोशतुल्या मातेत्यतः सर्वोऽप्येकज एवेति नास्ति कश्चिद् द्वाजः न हि द्वाभ्यां रेतःसेकाभ्यामेको जायत इति सम्भवति सत्यम् आश्वनीयादीनामपि संस्कारवतां सर्वेषां द्विविधं जन्म योनितः संस्कारतश्च तत्र सङ्करोऽन्यस्माज्जातोऽन्येन स्वपुत्र इति बुद्ध्या सस्कृत इति स एव द्वाजः द्विर्जायत इति द्विजोऽन्यः द्वाभ्यां स्त्रीपुरुषाभ्यां जायत इत्यर्थः द्वाजादयो निपात्यन्ते तत एव द्वाजा अपि मन्तीति "यथी वशं नयसि एकजात! त्वमिति" मन्त्रे मन्योः संकल्पस्य एकजेति विशेषेण द्वाजे तु बीजसंस्कार सङ्कारादथ्रं संकल्पयोर्वाङ्मनसयोर्वा पौर्वापर्यविरोधो भवतीति विश्वासघातकादयो द्वाजा इति त्वेयं नद्यं संग्रहः "कौशिके क्रौर्यतपसी राघवे शौर्यभीरुते। खले वाक्चित्तवैमत्ये बीजसंस्कारसङ्करादिति" नीलक०।

२मनोरूपे सचेतने ऋषिभेदे तद्विरुक्तिर्यथा "भरद्वाज ऋषिरिति। मनो वै भरद्वाज ऋषिरन्नं वाजो यो वै मनो बिभर्ति सोऽन्नं वाजं भरति तस्मान्मनो भरद्वाज ऋषिः" शत० ब्रा० ८।१।१।६। अस्यार्थः "भरद्वाज ऋषिः बिभर्तीति भरन् वाजमन्नं यः स भरद्वाजोऽन्नधर्ता मनः मनसि खल्वे अन्नादनेच्छोत्पत्तेः ऋषिः सचेतनो मनोरूपः" यजु० १२।५५ वेददी०।

(भारद्व) ३खगभेदे पुंस्त्री० अमरः। ४शमभेदे भा० भी० ६अ०। भरद्वाज ऋषिश्च गोत्रप्रवर्त्तकः तच्छब्दे २७६६ पृ० दृश्यम्।

भरम त्रि० भृ-बा० असच्। भरणकर्त्तरि। ततः शुभ्रादि० अपत्ये ढक्। भारमेव तदपत्ये पुंस्त्री०।

भरस् पु० भृ-असुन्। भरणे। ऋ०५।१५।४।

भरित त्रि० भरो जातोऽस्य तारका० इतच्। १जातभरणे ऋरित+पृषो०ह्रस्व भः। २ऋरितर्णे इतहति त्रि० स्त्रियां ङीप् तस्य नः। भरिणी तद्वर्णयुक्तायां स्त्रियाम्।

भरित्र न० द्वि०व० भृ-इत्र। आह्वोः निघण्टुः।

भरिमन् पु० भृ-कर्मणि इमनिच्। १कटुत्वे भज्जत्व०। भावे इमनिच्। २भरणे उणादिको० कर्त्तरि इमनिच् ३विष्णौ त्रि० को०।

भरु पु०भृ-उन्। १स्वामिनि भज्जत्व०। २स्वर्णे ३शिवे मेदि०।

भरुक पु० दक्षिणदेशभेदे बृ०स० १४अ०।

भरुज पुंस्त्री० भेतिशब्देन रुजति रुज-क। भृङ्गाले ततः जातित्वेऽपि स्त्रियां वह्वा० वा ङीष्। भरुजा भरुजी। ततः इदार्थे अकुल्या० ठक्। भारुजिक तदर्थे।

भरुटक न० भृ-उट संज्ञायां कन्। भल्लातके हेमच०।

भरे अव्य० भृ-वा० ए। संग्रामे निघण्टुः।

भर्ग पु० भ्रस्ज-घञ् मज्जादेशे कुत्वम्। १शिवे २ज्योतिःपदार्थे ३आदित्यान्तर्गते ऐश्वरे तेजसि, "आदित्यान्तर्गतं वर्चो भर्गाख्यं तन्मुनिभिः। जन्ममृत्युविनाशाय दुःखस्य त्रितयस्य च। ध्यानेन पुरुषैर्यच्च दृष्टव्यं सूर्य्यमण्डले" योगियाज्ञ०। तस्य तेजस ऐश्वरत्वञ्च "यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" इति गीतायामुक्तम्। भावे घञ्। ४भर्जने च। ५पुष्टकेतुवंशजे नृपभेदे हरिवं० २९अ०। ६दैत्यभेदे। तस्य भवः तस्य राजा वा अण्। भार्ग। सहेयभेदे तस्य भवे च स्त्रियां न लुक् भार्गी।

भर्गस् पु० भज-असुन् नुडागमः। तेजसि ऋ० १।१४१।१।

भर्गादि पु० तद्राजार्थं प्रत्ययस्य स्त्रियां लुगनिमित्ते शब्दगणे स च गणः "भर्ग कच्छ केकय कम्बोज गाल्व सुस्थल चरस् कौरव्य"।

भर्गायण पु० प्रवरर्षिभेदे प्रवराध्यायः।

भर्ज्य पु० भ्रस्ज-ण्यत् भर्जादेशे कुत्वम्। शिवे रायमु०।

भर्जन न० भ्रस्ज-भावे ल्युट् भर्जादेशः (भाजा) तण्डुलादेः पाकभेदे शब्दमा०।

भर्णस् त्रि० भृ-असुन् नुगागमः। भरणकारके ऋ० ८।६०।२

भर्त्तृ पु० भृ-तृच्। १स्वामिनि २चधिपतौ अमरः। ३राजनि ४पोषके ५धातरि च त्रि० मेदि० याज्ञका० मध्यमणः। ६विष्णौ पु० "भवनो भावनो भर्त्ता" विष्णुस० तस्य सत्त्वगुणेन पालनात् तथात्वम्।

भर्त्री स्त्री भर्त्तारं हन्ति हन-टक् ङीप्। पतिघातिन्यां पाणिरेखायां "पाणिरेखाघ्नाभिहतास्तेनाभर्तृघ्नाः कामगादिकाः" याज्ञ०। आर्षत्वात् मनुष्यकर्तृकत्वेऽपीह टक्।

भर्त्तारक पु० भर्त्तुरधिपस्य राज्ञः दारकः पुत्रः। भाटयोः १राजकुमारे। २तत्कन्यायां स्त्री। भर्त्तारिका० अमरः।

भर्त्तृस्थान न० तीर्थभेदे भा०व० ८३ अ०।

भर्त्तृहरि पु० भर्त्ता हरिरिव। वाक्यपदीयादि ग्रन्थकर्त्तरि विक्रमादित्यस्य ज्येष्ठे भ्रातरि राजभेदे। [भर्तृ यत् त।

भर्त्स अधिक्षेपे चुरा०उभ०सक०सेट्। भर्त्सयति ते अवस्कारायापकारार्थकवाक्योक्तौ। युच्। भर्त्सनाथत्र स्त्री

भर्त्स्यपतिका स्त्री भर्त्स्यं भर्त्सनीयं पतमस्याः कप् कापि व्रत इत्वम्। भल्लानीलीवृक्षे राजनि०।

भर्भ हिंसायां भ्वा०पर०सक०सेट्। भर्भति अभर्भीत्।

भर्म(न) न० भृ-मन् मनिन् वा। १स्वर्णे अमरः। २भर्तौ ३नाभौ ४धुस्तूरे च हेमच०। नान्तः अदन्तश्च द्विरूपकोषः।

भर्मण्या स्त्री भर्मणि साधु यत्। भर्तौ हेमच०।

भर्मिन् पु० भरतवंश्ये नृपभेदे भाग० ९।२१।२४।

भर्व हिंसायां भ्वा०पर०सक०सेट्। भर्वति अभर्वीत्। भोजने निघण्टुः। [लिट् बभर्व।

भल बधे दाने निरूपणे च भ्वा०आ०सक०सेट्। भलते अबभलत। भल निरूपणे चु०आ०सक०सेट्। भालयते अबीभलत।

भलता स्त्री भाति-भा-क कर्म०। राजबल्लाक्षतायाम् शब्दर०

भलन्दन पु० १दिष्टवंश्ये नृपभेदे भाग०९।२।१६। २काश्यकुलदेशीये नृपभेदे भल्लवैः बहु०ब्व० १७ ब०। [क्लीव।

भलानस् त्रि० भद्रसखे ऋ० ७।१८।७।

भल्ल दाने बधे निरूपणे च भ्वा०प०सक०सेट्। भल्लति अभल्लीत्।

भल्ल पु० भल्ल-अच्। १भल्लूके। २अस्त्रभेदे पुंन०। स्वार्थे क भल्लूके पुंस्त्री०वा गौरा०ङीष् पक्षे टाप्। भल्लकाश्यत। ततः यक्षुआ०निर्वृत्तार्थे अण्। भाल्ल भल्लकते त्रि० यत्र रथ्यां वख्या० ठञ्। भाल्लिक तस्याद्धरदेशादौ त्रि०। ह०स०१४ चक्रे ऐशाख्यां स्थिते २देशभेदे पु०। ३तद्देशभवने च ब०व० स्वार्थे क। भल्लुक तत्रार्थे ततः स्वार्थे क। भल्लकीय तदपत्यादौ त्रि०। भल्लकीय तदर्थे तस्यापत्यं ऋ। भल्लकीय तदपत्यादौ त्रि०।

भल्लपाल पु० भल्लं पालयति पालि-अण् उप०स०। पालके ततः यस्या०अञ्चरध्यांस् ठञ्। भालुपालिक तेन निर्वृत्तादौ।

भल्लपुच्छी स्त्री भल्लस्य पुच्छमिव पुच्छमस्याः ङीप्। [तस्फुला) क्षुपभेदे शब्दच०। (गोरक्षतण्डुली

भल्लवि पु० ऋषिभेदे "तस्यापत्यमिञ्। भाल्लवि तदपत्ये पुंस्त्री०। इञन्तत्वात् तस्यापत्यं ढक्ञ्। भाल्लवेय तदपत्ये पुंस्त्री०। इञन्तत्वात् ढक्ञ्। ऋषिभेदे पु० का०ब०। [का०ब०।

भल्लाक्ष पु० भल्लस्येवाक्षि यस्य बहुव्री०। मद्रदेशे कुंथभेदे

भल्लाट पु० १अरिष्टध्वजराजपुत्रे कल्किपु० २२अ०। २नवमे दनवंश्ये २नृपभेदे हरिवं० २०अ०।

भल्लात पुन्न० भल्लं भल्लाख्यमिवातति अत-अच्। (जेला) वृक्षभेदे स्वार्थे क। तत्रैव पुंस्त्री०ङीष्। भल्लातकस्यापत्ये रत्नमा०। "भल्लातकं लिपु प्रोक्तमल्पबीजं महद्फलं"

ग्निकः। तथैवाग्नीसखो भल्ली वीरवृक्षश्च शोफहृत्। भल्लातकफलं पक्वं स्वादुपाकरसं लघु। कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम्। मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम्। कुष्ठार्शोमेहगुल्मशोफनाहज्वरक्रिमीन्। तन्मज्जा मधुरो दृष्यो दृंहणो वातपित्तहा। हृन्मांसायुष्करं स्वादु पित्तघ्नं केशभग्निकृत्। भल्लातकः कषायोष्णः शुक्रलो मधुरो लघुः। वातश्लेष्मोदरानाहकुष्ठार्शोमेहगुल्मदान्। हन्ति गुल्मज्वरं चित्रवह्निमान्द्यक्रिमिव्रणान्" भावप्र०। गुडभल्लातकशब्दे भल्लातकीगुडपाकविधिर्दृश्यः।

भल्लातकतैल सुश्रुतोक्ते भल्लातकफलच्यवनजाते तैलभेदे "दुरूढत्वात् तु शुक्लानां व्रणकर्म हितं भवेत्। भल्लातकान्वासयेत् तु क्षीरे प्राङ्मूलभावितान्। ततो द्विधा छेदयित्वा लौहे कुम्भे निधापयेत्। कुम्भेऽन्यस्मिन्निखाते तु तं कुम्भमथ योजयेत्। सर्वं सन्धेन सन्धाय गोमयैर्दाहयेत् ततः। यः स्नेहस्रवते तस्माद्दुधाहृयेत तं यत्नैर्भिषक्। पाक्यानूपफलान्दग्धान् कल्कार्थानि कारयेत्। तैलेनानेन संसृष्टं शुक्लमालेपयेद् व्रणम्। भल्लातकविधानेन सारक्षेत्रांस्तु कारयेत्। ये च केचित्फलस्नेहा विधानं तेषु कीर्त्तितम्। दुरूढत्वात्तु व्रणानां पाण्डुकर्म हितं भवेत्। यत्परात्रं स्थितं क्षीरे क्षारगते रोहिणीफलम्। तैलैव पिष्टं सुव्रणं सुवर्णकरणं हितम्"। (द्वौषधभेदे

भल्लातकलौह न० भल्लातकादिपक्के लौहकल्पे "चित्रकं त्रिफला शुण्ठी व्योषिकं भल्लिकाऽम्लता। हस्तिपिप्पल्यपामार्गदग्धोत्पलकुठेरकाः। एषां कल्कप्रमाणात् भागान् जलद्रोणे विपाचयेत्। भल्लातकसहस्रे द्वे क्षिप्त्वा तत्रैव दापयेत्। तेन पादावशेषेण लौहपात्रे पचेद्भिषक्। तत्रार्धं तीक्ष्णलौहस्य दत्तस्य कुडवद्वयम्। क्षारपथ्यं त्रिफलायश्चिसैन्धवं विडलौद्भिदम्। सौवर्चलविडङ्गानि पलिकांशानि कल्पयेत्। कुडवं दृढदारस्य तालमूल्यास्तथैव च। स्फूरणस्य पलान्यष्टौ चूर्णं कृत्वा विनिःक्षिपेत्। क्षिप्ते शीते प्रदातव्यं मधुनः कुडवद्वयम्। प्रातर्भोजनकाले च ततः खादेद् यथाबलम्। अर्शांसि वातश्लीपदं पाण्डुरोगमरोचकम्। क्रिमिगुल्माग्निसादांश्च शूलप्लीहानमेव च। करोति शुक्रोपचयं बलौपचितनाशनम्। रसायनमिदं श्रेष्ठं सर्वरोगहरं परम्"।

भल्लातकविधान सुश्रुतोक्ते भल्लातकफलसेवनप्रकारभेदे "अत ऊर्द्धं भल्लातकविधानमुपदेक्ष्यामः। भल्लातकानि परिपक्वान्युपहृतान्याहृत्यैकमादाय द्विधा त्रिधा चतुर्धा वा छेदयित्वा कषायकल्पेन विपाच्य कषायस्य शुक्तिमात्रां हृताभ्यक्ततालुजिह्वौष्ठः प्रातः प्रातरुपसेवेत ततोऽपराह्णे क्षीरं सर्पिरोदनं इत्याहार एवमेकैकं वर्द्धयेत् तावद्यावत्सप्तेति ततः पञ्च पञ्चाभिवर्द्धयदुयावत् सप्ततिरिति प्राप्य च सप्ततिमपकर्षयेद्भूयः पञ्च पञ्च यावत्पञ्चेति पञ्चभ्यश्चैकैकं यावदेकमिति। एवं भल्लातकसहस्रमुपयुज्य सर्वकुष्ठार्शोभिर्विमुक्तो बलवानरोगः शतायुर्भवति। द्विप्रणीतेन विधानेन भल्लातकमित्युक्तं स्नेहमादाय प्रातः प्रातः शुक्तिमात्रमुपयुञ्जीत जीर्णे पूर्ववदाहारः फलप्रकर्षश्च। भल्लातकमज्ज्यो वा स्नेहमादायापह्रतदोषः प्रतिसंसृष्टभक्तो निवातमागारं प्रविश्य यथाबलं प्रसृतिं प्रसृतं वोपयुञ्जीत। तस्मिन् जीर्णे क्षीरं सर्पिरोदनं इत्याहारः"।

भल्ली स्त्री भल्ल हिंसे अच् गौरा० ङीष्। भल्लातके शब्दरत्ना० तत्फलस्य स्वर्शिनां व्रणकारित्वया हिंसकत्वात्तस्याऽऽख्यात्वम्। स्वार्थे क भल्लिका तत्रार्थे शब्दच०।

भल्लु(ल्ल)क पु०स्त्री भल्ल-उ(ऊ) क। (भालूक) १जन्तुभेदे अमरः स्त्रियां ङीष्। २शरीनामभेदे राजनि०। स च वीरभल्लादिगणे सुश्रुते उक्तः। द्रव्यगणशब्दे दृश्यम्। ३कोशस्थे जलजन्तुभेदे "शङ्खशङ्खनखशुक्तिशम्बूकभल्लूकप्रभृतयः कोशस्थाः" सुश्रुतः।

भव पु० भवत्यस्मात् भू-अपादाने अप्। १महादेवे तस्य तन्नामनिरुक्तिः शत० ब्रा० ६।१।३।१५। "तमब्रवीद्भवोऽस्मीति। तद्यदस्य तन्नामाकारोत्पार्जन्यन्नूपमभवत् पर्जन्यो वै भवः पर्जन्यान्नीदं सर्वं भवति सोऽब्रवीच्छ्रायान् वाऽतोऽस्मि मेघो वै मे नामेति" जलस्य पर्जन्यहेतुकत्वात् तस्य जलमूर्त्तित्वम्। अतएवाष्टमूर्त्तिमध्ये जलरूपेण भवनात्तस्यार्चा। भावे अप्। २जन्मनि ३उत्पत्तौ ४प्राप्तौ ५संसारे मेदि०। कर्त्तरि अच् (चालता) ६फले न० राजनि०।

भवक त्रि० भू-ण्वुल्। १उत्पन्ने २आशीर्वादके संक्षिप्तसा०।

भवकेतु पु० केतुभेदे ह०च० ११अ० केतुशब्दे दृश्यम्।

भवदवसार पु० द्वन्द्व०। दावानले शब्दमा०।

भवत् त्रि० भा-क्वसु। १युष्मदर्थे, सर्वनामता चास्य। भवान् भवत्या पुत्रः भवत्पुत्रः। भू-शतृ। २वर्त्तमानकालार्थे

३भवनकर्त्तरि च। भवन् स्त्रियामुभयत्र ङीप् शतन्तस्य नुम्। ङीवन्तः ४विषाक्तवाक्ये शब्दरत्ना०।

भवदा स्त्री स्कन्दानुचरमातृभेदे भा० श० ४७ अ०।

भवदादि पञ्चमीसप्तमीतरविभक्त्यन्तादपि "इतराभ्योऽपि दृश्यन्ते" पा०तसिलादिप्रत्ययनिमित्ते शब्दगणे तत्र "दक्षिणपूर्वाधरात् भवदादियोग एव" वार्त्ति०। स च गणः "भवान् दीर्घायुः देवानांप्रियः चायुष्मान्"। तेन स भवान् ततो भवान् तत्रभवान् तत्रभवन्तम् इत्यादि एवम् सदीर्घायुः ततो दीर्घायुरित्यादि।

भवदारु पुंन० भवप्रियं दारु। देवदारुवृक्षे राजनि०।

भवदीय त्रि० भवतोऽयम् छस् सित्त्वात् पदत्वे तस्य दः। त्वत्सम्बन्धिनि। [३जन्मनि ४सत्तायाञ्च मेदि०।

भवन न०भू-आधारे ल्युट्। १गृहे अमरः भावे ल्युट्। २भावे

भवनपति पु० ६त०। १गृहस्वामिनि २राज्ञ्यधीशे च भवनानायादयोऽत्र।

भवन्त पु० भू-झच्। काले उज्ज्वल० संक्षिप्तसा०।

भवन्ति पु०भू-झिच् अस्य स्त्रीत्वमपि। वर्त्तमानकाले जन्मादौ स्त्रीत्वे ङीप्। "अस्तिभवन्तीपरः प्रयोक्तव्यः" महाभाष्यम्।

भवभूत न० भवरूपे व्यवितत्वरूपे परमेश्वरे "विश्वरूपं भवभूतमीड्यम्" श्वेता०उ०।

भवभूति पु० ६त०। १महादेवविभूतौ। महावीरचरितोत्तररामचरितमालतीमाधवादिनाटककर्त्तरि २विदर्भदेशे।

भवरुत् पु० भवे जन्मान्ते रोदित्यनेन रुद-करणे क्विप्। प्रेतपटहे त्रिका०।

भवाचल पु० ६त०। मन्दरस्य पूर्ववर्त्तिनि शैलभेदे कैलासे। "शीतार्त्तश्चक्रसङ्गस्य कुलीरोऽथ सुकङ्कवान्। मणिशैलोऽथ वृषवान् महानीलो भवाचलः। सविन्दुर्मन्दरो वेणुस्तामसो निषधस्तथा। देवशैलश्च पूर्वेण मन्दरस्य महाचलाः" मार्कपु०५५अ०। [स्त्री शब्दमा०

भवात्मज पु० ६त०। १कार्त्तिकेये २गणेशे च ३मनसादेव्यां

भवादृक्(ग्)श् त्रि० भवतस्तवेव दर्शनमस्य भवत्+दृश-क्विप् टक् कस क्विप् वा सर्वनामत्वात् आत्। भवत्तुल्ये जने। टकि क्विपि च ङीप् भवादृशी।

भवानी स्त्री भवस्य पत्नी भव+ङीप् आनुक् च। शिवभार्य्यायाम् दुर्गायाम् अमरः। [गुरुत्वात् तथात्वम्।

भवानीगुरु पु० ६त०। हिमाचले तस्य तदुत्पादकत्वेन तद्गुरुत्वात् तथात्वम्।

भवानीपति पु०६त०।महादेवे तत्पदस्य काव्ये प्रयोगे भवान्याः पत्यन्तरप्रतीतिकारित्वाद्विरुद्धार्थद्योतकत्वं काव्यदोषः।

भवान्तकृत् पु० ६त०। १विष्णौ तस्य स्वल्पकाले सर्वभूतानां जन्मविनाशकत्वात् तथात्वम्। "यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते" मनुः। २संसारनाशके त्रिके च।

भवाभीष्ट पु० भवस्य महादेवस्याभीष्टः। १गुग्गुलौ राजनि० ७त०। २भवेऽभीप्सिते त्रि०।

भवायनी स्त्री भवे महादेवशिरसि अयनं स्थानमस्याः गौरा०ङीष्। १गङ्गायाम् शब्दर०२अश्विनतत्परे भैषे त्रि०।

भविक न० भवोभूतिरूपाद्यत्वेनास्त्यस्य ठन्। १कुशले कुशलस्य भूतिहेतुत्वात्तथात्वम्। धर्म्म० अच् २तद्वति त्रि० अमरः। [वृत्तिके जटा०।

भवित त्रि० भवो जातोऽस्य तारा० इतच्। भूते व्यतीतोत्पन्ने।

भवितव्य न० भू-भविष्यति कर्त्तरि च नि० तव्यत्। अवश्यम्भावे भव्ये "भवितव्यं भवत्येव यद्दैवेर्मनसि स्थितम्"।

भवितव्यता स्त्री भवितव्यस्य भावः तल्। १अवश्यम्भावे। २भाग्ये च जटाधरः। [त्रिका०

भविन त्रि० भू-चिन्तायाम् वा० इन्। काव्यस्य वर्त्तरि

भविल पु०भू-भविष्यति इलच्। १भव्ये भविष्यति उज्ज्वल० २जारे पु० त्रिका०।

भविष्णु त्रि० भू-इष्णुच्। भवनशीले अमरः।

भविष्य(त्) पु० भू-"लटः सद्वेति" शतृ-स्यट् च पृषो० वा तत्वोपः। भाविनि १काले २ततृकालवर्त्तिनि पदार्थे त्रि० स्त्रियां ङीप् नुम् च "अव्याच्चेपो भविष्यन्त्याः" रघुः। तत्वोपपक्षे क्लीवता। उत्तरपदस्थः त्रि०। "यङ्लुविछो विनश्यति" पञ्चत० ३अधिकृत्य कृते पुराणभेदे न०। तच्च महापुराणान्तर्गतं पुराणं तत्प्रतिपाद्यविषयादिकं नारदीयपु० ४पा० १००अ० उक्तं यथा

"अथ ते संप्रवक्ष्यामि पुराणं सर्वसिद्धिदम्। भविष्यं भवतः सर्वलोकाभीष्टप्रदायकम्। तत्राहं सर्वदेवानामादिकर्त्ता समुद्यतः। सृष्ट्यर्थं तत्र सञ्जातो मतः स्वादक्षुत पुरा। स मां प्रणम्य पप्रच्छ धर्मं सर्वार्थसाधकम्। अहं तस्मै तदा प्रीतः प्रावोचं धर्मसंहिताम्। पुराणानां यदा व्यासो व्यासशुके महामतिः। तदा तां संहितां सर्वां पञ्चधा व्यभजत्मुनिः। अधो रजस्यहत्तान्तनानाश्चर्यकथाचिताम्"। तत्र प्रथमपर्वणि। "तत्रादिमं स्मृतं पर्व अ ह्मं ब्राह्मेऽत्र पर्वणि। क्रमः। सृष्टिप्रतिसंहारे पुराणप्रक्रमसंक्रमः। व्यादिसर्गचरितः प्रायः सर्वाख्यानसमाश्रितः। सृष्ट्यादिलक्षणो

मेतः शास्त्रसर्वस्वरूपकः । पुत्तलेशकलेशानां लक्षणञ्च ततः परम् । संस्काराणाञ्च सर्वेषां लक्षणञ्चात्र कीर्त्तितम् । पञ्चम्यादितिथीनाञ्च कल्पाः सप्त च कीर्त्तिताः । अष्टम्याद्याः शेषकल्पाः वैष्णवे पर्वणि स्मृताः । शैवे च कामतो भिन्नाः सौरे चान्यकथाचयः । प्रतिसर्गाख्यं पञ्चलक्षणाख्यानसमन्वितम् । पुराणस्योपसंहारसहितं पर्व पञ्चमम् । एषु पञ्चसु पूर्वस्मिन् ब्रह्मणो महिमाधिकः" । द्वितीयतृतीयचतुर्थपञ्चमपर्वसु "धर्मे कामे च मोक्षे तु विष्णोश्चापि शिवस्य च । द्वितीये च तृतीये च सौरो वर्गचतुष्टये । । प्रतिसर्गाख्यं त्वान्त्यं प्रोक्तं सर्वकथाचितम् । एतत् भविष्यं निर्दिष्टं पर्व व्यासेन धीमता । चतुर्दशसहस्रन्तु पुराणं परिकीर्त्तितम् । भविष्यं सर्वदेवानां साम्यं यत्र प्रकीर्त्तितम् । गुणानां तारतम्येन समं ब्रह्मेति हि श्रुतिः" । तत्फलश्रुतिः । "तल्लिखित्वा तु यो दद्यात् पौर्ण्यां विद्वान् विमत्सरः । गुडधेनुयुतं हेमवस्त्रमाल्यविभूषणैः । वाचकं पुस्तकञ्चापि पूजयित्वा विधानतः । गन्धाद्यैर्भोज्यभक्ष्यैश्च क्षत्वा नीराजनादिकम् । यो वै जितेन्द्रियो भूत्वा सोपवासः समाहितः । अथ वा यो नरो भक्त्या कीर्त्तयेच्छृणुयादपि । स शुक्लः पातकैर्घोरैः प्रयाति ब्रह्मणः पदम् । योऽयनुक्रमणीमेतां भविष्यस्य निरूपिताम् । पठेद्वा शृणुयाच्चैतौ सर्वभुक्तिञ्च विन्दतः" । ४(चालता) फलभेदे राजनि० । तान्त ५जले निघण्टुः । भविष्यत्त्वञ्च वर्त्तमानप्रागभावप्रतियोगित्वमिति नैयायिकाः पदार्थस्य अनागतावस्थाभेद इति सांख्यादयः । ४हरिवंशपर्वभेदे न० ।

भविष्यदाक्षेप पु० "सत्यं ब्रवीमि न त्वं मां द्रष्टुवल्लभ ! लप्स्यसे । अन्यचुम्बनसंक्रान्तबाष्पारुणेन चक्षुषा । सोऽयं भविष्यदाक्षेपः प्रागेवातिमनस्विनी । कदाचिदपराधोऽस्य भावीत्येवमरुन्ध यत्" । काव्यादर्शोक्ते अर्थालङ्कारभेदे ।

भवीयस् त्रि० अतिशयेन बहुः बहु+ईयसुन् "बहोर्लोपो भू च बहोः" पा० भूरादेशः वेदे न ईलोपः । बहुतरे ऋ० १।८२।१ लोके तु ईयसुन ईकारलोपः भूय इत्येव ।

भव्य त्रि० भू-कर्त्तरि नि० यत् । १भाविनि "अवश्यभव्ये-ष्वनवद्यमहार्घ्यहेति" नैषधम् । (चालता) २फलभेदे राजनि० "भव्यं स्वादु कषायास्तं हृद्यमाम्लस्य शोधनम् । तदेव पक्वं दोषघ्नं गुरुग्राहि विषापहम्" राजव० ३अस्थिमेदि० ४शुभे ५सत्ये ६योग्ये च न० । ७तद्वति त्रि० । ८कर्मरङ्गे पु० ९गजपिप्पल्यां १०अतस्यां च स्त्री मेदि० । ११रसभेदे शब्दर० ।

भष कुक्कुरशब्दे भ्वा०पर०सक०सेट् । भषति अभषीत्-अभाषीत् ।

भष पुंस्त्री०भष-अच् । १कुक्कुरे शब्दरत्ना० स्त्रियां जातित्वात् ङीष् । २स्वर्णजीर्ण्यां स्त्री रत्नमा० टाप् ।

भषक पु० स्त्री० भष-कन् । कुक्कुरे अमरः । स्त्रियां ङीष् ।

भषण न० भष-भावे ल्युट् । कुक्कुरशब्दे हेमच० ।

भस दीप्तौ अक०भर्त्सने सक०जु०पर०सेट् । बभस्ति । अभासीत् अभसीत् बभास । वैदिकोऽयम् । [बभास ।

भस भर्त्सने प०सक०सेट् निघण्टुः । भसति अभा(भ)सीत् ।

भसद् न० भस-अदि । १जघने उज्ज्वल० । २भास्करे ३मांसे च ४जघने स्त्री मेदि० ५कारण्डवखगे ६श्लेष्मणि पु० उणादिको० ७काले पु० त्रिका० । [पाठ ।

भसन्त पु० भस-वा० झच् । काले त्रिका० तस्य भवन्त इत्येव

भसन्धि पु० ६त० नक्षत्रभेदानां सन्ध्यात्मके कालभेदे यथोक्तम् "सार्पेन्द्रपौष्णप्रथिष्ण्यानामन्त्याः पादाः भसन्धयः । तदग्रभेष्वाद्यपादो गण्डान्तं नाम कीर्त्यते" ज्यो०वि० । "अश्लेषाज्येष्ठारेवतीनक्षत्राणामन्त्याश्चतुर्थ्यश्चरणाः नक्षत्रसन्धयो भवन्ति । तदग्रभेषु तेषामश्लेषाज्येष्ठारेवतीनक्षत्राणाञ्चतुरेषु मघामूलाश्विनीनक्षत्रेष्वित्यर्थः प्रथमचरणो गण्डान्तं नाम प्रसिद्धमुच्यते । यद्यप्यश्लेषाज्येष्ठारेवतीनक्षत्राणामन्तिमं घटिकाद्वयं मघामूलाश्विनीनक्षत्राणामादिमं घटिकाद्वयमिति चतस्रोऽन्तरघटिका गण्डान्तम् । एतदतिरिक्तो नक्षत्रसन्धिः पूर्वनक्षत्रान्तघटिकोत्तरनक्षत्रादिमघटिकेत्यन्तरालघटिकाद्वयं चन्द्रमण्डलसम्बन्धेन घटिकाः सार्द्धद्वयमिति संहिताविरुद्धं तथापि स्वर्योक्तस्य स्वतः प्रामाण्यान्न क्षतिः । अथवैकवाक्यतार्थं पादशब्दः करनेत्रादिवद् द्विसङ्ख्याबाचकः । घटिका दण्डाध्याहारश्च । तथा च द्विसङ्ख्यामिता अन्त्यघटिकासमनक्षत्रसन्धिः" रत्न० । २नक्षत्रयोः सन्धिकाले च तदानयनं सि० शि० दर्शित तच्च तिथिसन्धिशब्दे ११०० पृ० दर्शितम् ।

भसित न० भस-क्त । भस्मनि हेम० । [दैवज्ञे शब्दर० ।

भसूचक पु० भानि नक्षत्राणि सूचयति सूचि-ण्वुल् ।

भस्त्रा स्त्री भस-ष्ट्रन् । १चर्मप्रसेविकायाम् अग्निसन्धुक्षणे चर्मनिर्मिते यन्त्रभेदे । (याँता) अमरः । स्त्रित्वात् ङीष् । अत्रैव शब्दरत्ना० स्वार्थे क टाप् न ह्रस्वम् । भस्त्राकार्य्यत्वेन । ततः तत्करा० चतुरर्थ्यां रू । भस्त्रीय तद्दूरदेशादौ त्रि० ।

भस्माफला स्त्री भस्मेव फलमस्याः ङीप्। (टेपारि) क्षुपभेदे
भस्मक न० भस्म करोति क-ड। (भस्मकीट) बह्वभोजनकारके १रोगभेदे। "कट्वादिरूक्षान्नभुजां नराणां क्षीणे कफे मारुतपित्तवृद्धौ। अतिप्रवृद्धः पवनान्वितोऽग्निर्भुक्तं क्षणाद्भस्म करोति यस्मात्। तस्मादसौ भस्मकसञ्ज्ञकोऽभूदुपेक्षितोऽयं पचते च धातून्"। भस्मकस्य सोपद्रवमरिष्टमाह "तृष्णेदाहमूर्च्छाटीन् कृत्वैवान्यान्निसन्भवान्। पक्वान्नमासु धात्वादीन् स क्षिप्रं नाशयेद्ध्रुवम्" माधव०। भस्मेव इवार्थे कन्। २कनकधौते रूप्ये ३विड्लवणे च मेदि०।
भस्मकूट पु० भस्मरूपे पर्वतभेदे कालिं० ८।६०।
भस्मगन्धा स्त्री भस्मन इव गन्धोऽस्याः। रेणुकाख्यगन्धद्रव्ये भावप्र०। स्वार्थे क वृत्त इत्त्वम्। तत्रैव जटा०
भस्मगन्धिनी स्त्री भस्मन इव गन्धोऽस्त्यस्या वाहुल्येन इनि ङीप्। रेणुकाख्ये गन्धद्रव्ये अमरः।
भस्मगर्भ पु० भस्म गर्भे यस्य। १तिनिशवृक्षे राजनि० २कपिलधिंग्रपायाम् अमरः। ३रेणुकाख्यगन्धद्रव्ये स्त्री जटाधरः टाप्।
भस्मजाबाल पु० उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।
भस्मतूल न० भस्म तूनयति तूज-उत्क्षेपे क। १श्यामकूटे २प्रांशुचर्करणे ३ढिसे च मेदि०।
भस्मन् न०भस-मनिन्। (छाइ) दग्धगोमयादिविकारे अमरः अस्य शिवदेहलेपने कारणं कालिकापु० ४१ अ० उक्तं यथा "महादेवोऽथ तद्भस्म मनोभवशरीरजम्। आदाय सर्वगात्रेषु भूतिलेपं तदाकरोत्। लेपप्रभावाणि भस्मानि कृत्वादाय तदा हरः। सगणोऽन्तर्दधे कार्यं विहाय विधिसन्मतः"। तद्धारणविधिर्यथा "भस्मोपरि चन्दनादिकं न धार्यं तदुक्तं कौले "वैदिकैर्मन्त्रै रहितं चन्दनागुरुकुङ्कुमम्। तिर्यक्पुण्ड्रात्मना धार्यं कान्तिसौख्याभिलाषिभिः। पुण्ड्रोद्धृतचन्दनादौरपि भस्म न संत्यजेत्। दृष्ट्वा भस्मत्यागी सतीशकोधवज्रितः। चन्दनादुपरि प्राज्ञो धारयेद्भस्म वैदिकम्। लौकिकं चन्दनाद्यं तु भस्मोपरि न धारयेत्। भस्मचन्दनादीनां त्यागेनाधो न विद्यते। चन्दनादीन्यतो लौकिकान्येवात्र न संशयः। उपरिष्टाच्चन्दनादेर्धृतेऽल्पे सितभस्मनि। चन्दनादुत्तमभूषाया फलाप्तेः को निवारकः"। त्रिपुण्ड्रधारणं मन्त्ररहितं तूष्णीं न कार्यम्" तदुक्तं विद्येश्वरसंहितायां "जावालोपनिषदादिकैर्मन्त्रैर्धार्यं भस्मत्रिपुण्ड्रकम्। अन्यथा चेष्यजं यावज्जन्मचरकं व्रजेदिति"। शिवधर्मे "येन मन्त्रोक्तमार्गेण न धृतं सुनिपुङ्गव!। तस्य निष्फलं जन्म निःफलं सूकरो यथा"। मन्त्रसारसुधानिधौ" त्रिपुण्ड्रकं सदा कुर्यात् मन्त्रपूतेन भस्मना। मन्त्रेण होनं यः कुर्यात् परभागो भवेच्चरः"। शिवार्चा तद्धारणं न सिध्यति "विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया। महादेवोऽर्चितो येन न च तस्य फलप्रदः" निरुपु०।
भस्मरोहा स्त्री भस्मनि रोहते रुह-क्वच्। दग्धिकायाम् राजनि०।
भस्मवेधक पु०भस्मन इव वेधो वेधनं यस्य कप्। कर्पूरे शब्दर०
भस्मसा अव्य० डासन्तः। चर्वणजन्यशब्दानुकारे यजु०११।८. वेददी०। [सात्। शाकल्येन भस्मरूपताकरणे।
भस्मसात् अव्य० भस्म कात्स्न्र्येन सम्पन्नं करोति भस्मन+
भस्माचल पु० कामरूपस्थे गिरिभेदे कालिकापु० ८१अ०।
भस्मासुर पु० असुरभेदे। इति ख्याते एकासुरे शिववरेण स यस्य शीर्षं करेण स्पृशति स भस्म भवतीति कथा भाग० १०।८८ अ०। [वा० ष्ण। कर्पूरे त्रिका०।
भस्माह्वय पु० भस्म आह्वयते साधुत्वेन स्वर्हते आ+ह्वे-
भा दीप्तौ भ्वा०प०अ०सक०अनिट्। भाति अभाषीत् बभौ। प्रति+वृद्धिप्राप्त्यर्थौ। वि+अति+अभिपूर्वौ भासने-आ०। दीप्तिश्च तैजसपदार्थावयवभेदः प्रकाशश्च। स च ज्ञाने विशदतया प्रकाशः धित्। भावे क्यप्। भा
भा स्त्री भा-क्यप् टाप्। दीप्तौ अमरः। [१।४४।३भा०।
भाकर्जोक पु० भास कर्जोकः। एरण्डः प्रार्जके प्रसिद्धे कर०
भाकुट पु० भया दीप्त्या कुटति कुट-क। (भेटकी) मत्स्यभेदे राजव०। [ज्ञा०६।४ १।६ भा०।
भाकुरि पु०भां कुर्वति कुर्व-कि पृषो०। दीप्तिकारके यत०
भाकूट पु०। १पर्वतभेदे २मत्स्यभेदे च (भेटकी)मेदि०।
भाकोष पु० भानां दीप्तीनां कोष इव। सूर्ये त्रिका०।
भाक्त त्रि० भक्तेः गौण्याद्दत्तेरागतः अण्। १औपचारिके गौण्या वृत्त्या बोधितेऽर्थे। भक्तस्याद्यस्येदम् अण्। २अद्यसम्बन्धिनि त्रि०। भक्तमन्नमस्मै नियतं दीयते वा अण्। ३नियतभक्तदानसम्पादने त्रि०। भक्ताय हितम् अण्। ४भक्तसम्पादनसाधने तण्डुले। [सम्पादने।
भाक्तिक त्रि० भक्तमस्मै नियतं दीयते ठक्। नियतभक्तदानु
भाक्त त्रि० भक्ता शीलमस्य कर्त्रा० अण्। भक्तभक्षणशीले।
भाग पु०भज-भावे घञ्। १भजने कर्मणि घञ्। २अंशे अमरः

दृष्टवस्तुनोऽर्द्धे १एकदेशेऽभाग्ये "त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते" इति ज्योतिषोक्ते राशेः पञ्चत्रिंशांशके च शब्दर०। भगो देवताऽस्य अण्। ६पूर्वफल्गुनीनक्षत्रे तत्समसंख्यायाम् ७एकादशसंख्यायां दक्षभगहारे केनचित् कल्पेन कस्यचित् भजनरूपे अङ्कशास्त्रोक्ते व्यापारभेदे।

भागजातिस्त्री। भागस्य विभजनस्य प्राकारभेदे सा च चतुर्विधा भागजातिः प्रभागजातिः भागानुबन्धो भागापवाहश्च तत्र अंशानां समच्छेदकरणं भागजातिरित्युच्यते। यथा "अन्योऽन्यहराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवम्। मिथोहराभ्यामपवर्त्तिताभ्यां वा हरांशौ सुधियात्र गुण्यौ" लीला०। भागस्य भागः प्रभागो यथा "लवालवघ्नाश्च हराहरघ्नाः भागप्रभागेषु समर्पणं स्यात्"। लीला०। भागस्यानुबन्धो योजनं भागानुबन्धो भागापवाहस्य तद्वियोजनम् यथा "छेदघ्नरूपेषु लवा धनर्णमेकस्य भागा स्वधिकोनकाश्चेत्। स्वांशाधिकोनाः स्वहरं निहन्यात् स्वांशाधिकोनेन न तु तेन भागान्" लीला०

भागधेय न० भाग+स्वार्थे धेय अभिधानात् नपुंसकत्वम्। १भाग्ये। भागेन धीयतेऽसौ धा-कर्मणि यत्। २राजदेये करे पु० अमरः। भागो धीयतेऽस्मै धा-सम्प्रदाने यत्। ३दायादे त्रिषु मेदिनी अजयपालः।

भागलक्षणा स्त्री भागे लक्षणा। शक्यार्थांशभेदपरित्यागेन इतरांशबोधकलक्षणाभेदे जहज्जहत्स्वार्थलक्षणायाम्। जहज्जहल्लक्षणाशब्दे ३०८१ पृ० दृश्यम्।

भागवत त्रि० भगवतः भगवत्या वा इदम् सोऽस्य देवता वा अण्। भगवतः भगवत्या वा १भक्ते, २तयोः सम्बन्धिनि च "भग्नाः क्षत्रेभागवता भवन्ति" भट्टिः। तयोः सम्बन्धिगुणवर्णने ३महापुराणे ४उपपुराणे च न० "यैर्न श्रुतं भागवतं पुराणम्" भाग०। भागवतञ्च महापुराणभेदः उपपुराणभेदो वा उपपुराणशब्दे विस्तरेण दर्शितः। नारदीयपु० महापुराणप्रतिपाद्यविषयोक्तौ ये विषया उक्तास्ते नान्यत्रेति विष्णुभागवतस्यैव महापुराणत्वसिद्धेरुपपुराणशब्दे अन्यमतं द्रष्टव्यम्।

विष्णुभागवतप्रतिपाद्यविषयाश्च नार०पु०४अ०८६श्लोक्ता यथा "मरीचे! शृणु वक्ष्यामि वेदव्यासेन यत् कृतम्। श्रीमद्भागवतं नाम पुराणं ब्रह्मसम्मितम्। तदष्टादशसाहस्रं कीर्त्तितं पापनाशनम्। सरूपादशरूपोऽयं स्कन्धैर्द्वादशभिर्युतः। भगवानेव विप्रेन्द्र! विश्वरूपी समीरितः" तस्य प्रथमस्कन्धे। "तत्र तु प्रथमे स्कन्धे स्तुतीनां समागमः। व्यासस्य चरितं पुण्यं पाण्डवानां तथैव च। परीक्षितस्तथाख्यानमितीदं सप्तदाहृतम्"। द्वितीयस्कन्धे "परीक्षिच्छुकसंवादे स्तुतिद्वयनिरूपणम्। ब्रह्मनारदसंवादेऽवतारचरितान्वितम्। पुराणलक्षणञ्चैव सृष्टिकारणसंयुतः। द्वितीयोऽयं समुदितः स्कन्धो व्यासेन धीमता"। तृतीयस्कन्धे "चरितं विदुरस्याथ मैत्रेयस्य महर्षेः। सृष्टिप्रकरणं यस्माद् ब्रह्मणः परमात्मनः। कापिलं वासुदेवीयमथ तृतीयोऽयमुदाहृतः"। चतुर्थस्कन्धे "सत्याचरितमादौ तु ध्रुवस्य चरितं ततः। पृथोः पुण्यप्रसाख्यानं ततः प्राचीनबर्हिषः। इत्येष तुर्यो गदितो विसर्गे स्कन्ध उत्तमः"। पञ्चमस्कन्धे "प्रियव्रतस्य चरितं तद्वंशानाञ्च पुण्यदम्। ब्रह्माण्डान्तर्गतानाञ्च लोकानां वर्णनन्ततः। नरकस्थितिरित्येष संस्थाने पञ्चमो मतः"। षष्ठस्कन्धे "अजामिलस्य चरितं दक्षसृष्टिनिरूपणम्। वृत्राख्यानं ततः पश्चान्नृणां जन्म पुण्यदम्। षष्ठोऽयमुदितः स्कन्धो व्यासेन परिशोधने" सप्तमस्कन्धे "प्रह्लादचरितं पुण्यं वर्णाश्रमनिरूपणम्। सप्तमो गदितो वत्स! वासनाकर्मकीर्त्तने"। अष्टमस्कन्धे। "गजेन्द्रमोक्षणाख्यानं मन्वन्तरनिरूपणम्। समुद्रमथनञ्चैव बलिबन्धनम्। मतस्यावतारचरितमष्टमोऽयं प्रकीर्त्तितः"। नवमस्कन्धे "सूर्य्यवंशमाख्यानं सोमवंशनिरूपणम्। वंशानुचरिते प्रोक्तो नवमोऽयं महामते!"। दशमस्कन्धे "कृष्णस्य बालचरितं कौमारञ्च व्रजस्थितिः। कैशोरं मथुराख्यानं यौवनं द्वारकास्थितिः। भूभारहरणाद्यात्र निरोधे दशमः स्मृतः"। एकादशस्कन्धे "नारदेन तु संवादो वसुदेवस्य कीर्त्तितः। यदोश्च दत्तात्रेयेण श्रीकृष्णोद्धवस्य च। यादवानां मिथोऽन्तश्च शक्रावेकादशः स्मृतः। द्वादशस्कन्धे "भविष्यत्कलिनिर्देशो मोक्षो राज्ञः परीक्षितः। वेदशाखाप्रणयनं मार्कण्डेयतपः स्मृतम्। सौरो विभूतिरुदिता शाश्वती च ततः परम्। पुराणसंसृष्टिकथनमाश्रये द्वादशो ह्ययम्। इत्येवं कथितं वत्स! श्रीमद्भागवतं तव"। तत्फलश्रुतिः "वक्तुः श्रोतुश्चोपदेष्टुरनुमोदितुरेव च। सहाय्यकर्त्तुर्गदितं भक्तिभुक्तिविमुक्तिदम्। प्रौष्ठपद्यां पूर्णिमायां हेमसिंहसमार्चितम्। देयं भागवतायेदं द्विजाय

प्रीतिपूर्वकम्। संपूज्य वस्त्रहेमादैर्भगवद्भक्तिमिच्छता। योऽप्यनुक्रमणीमेतां श्रावयेच्छृणुयात्तथा। स पुराण श्रवणजं प्राप्नोति फलमुत्तमम्" । विस्तरस्तु भा.म० १२ उपसंहाराध्याये द्रष्टव्यः ।

भगवद्भक्तरूपभागवतलक्षणं यथा भाग०११ स्क० ।

"सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः। भूतानि भगवत्यात्मन्येष भागवतोत्तमः। न यस्य स्वपर इति वित्तेष्वात्मनि वा भिदा। सर्वभूतसमः शान्तः स वै भागवतोत्तमः"। हरियोगेश्वरोत्तरे "गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न काङ्क्षति। विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः"। हरिभक्तिविलासे "शिवे च परमेशाने विष्णौ च परमात्मनि। समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः"। स्कान्दे "येषां भागवतं शास्त्रं सदा तिष्ठति सन्निधौ। पूजयन्ति च ये नित्यं ते स्युर्भागवता नराः। येषां भागवतं शास्त्रं जीवितादधिकं भवेत्। महाभागवताः श्रेष्ठा विष्णुना कथिता नराः"। वैष्णवे "भोजनाच्छादनं सर्वं यथा शक्त्या ददाति यः। विष्णुभक्तस्य सततं स वै भागवतः स्मृतः"। गारुडे "येन सर्वात्मना विष्णुभक्त्या भावो निवेशितः। वैष्णवेषु कृतात्मत्वान्महाभागवतो हि सः"। हरिभक्तिविलासे "तुलसीकानन दृष्ट्वा ये नमस्कुर्वन्ति नराः। तत्काष्ठाङ्कितकण्ठास्ते वै भागवतोत्तमाः। तुलसीगन्धमाघ्राय सन्तोषं कुर्वते तु ये। तन्मूलमृद्धृता यैश्च ते वै भागवतोत्तमाः"। स्कान्दे "सत्कथां कुरुते यस्तु सत्कथाश्च शृणोति च। दृश्यते सत्कथायाश्च स वै भागवतोत्तमः"। हरिभक्तिविलासे "मन्नामश्रवणाच्चित्ते मद्भक्ता मद्भक्तजनलोलुपाः। मन्नामस्मरणाच्चास्ते वै भागवतोत्तमाः। येऽभिनन्दन्ति नामानि हरेः कृष्णेति हर्षिताः। रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः। अन्येषामुदयं दृष्ट्वा येऽभिनन्दन्ति मानवाः। हरिनाम परा ये च ते वै भागवतोत्तमाः"। स्कान्दे "वेदयन्ति सदा विष्णुं यज्ञेशं वरदं हरिम्। देहिनः पुण्यकर्माणः सदा भागवता हि ते"। वैष्णवे "विष्णुक्षेत्रे शुभान्येव करोति स्नेहसंयुतः। प्रतिमासु हरेर्नित्यं पूजयेत् प्रयतात्मवान्। विष्णुभक्तो स विज्ञेयः कर्मणा मनसा गिरा। नारायणपरा नित्यं भूप! भागवतो हि सः" पद्मोत्तरखण्डे "तापादिपञ्चसंस्कारी नवेज्या कर्मकारकः। अर्थपञ्चकविद्विप्र! महाभागवतो हि सः। एकान्तेन सदा विष्णौ यस्माद्वै परायणाः। तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः" भाग० ११ स्कान्दे "ज्ञात्वा ज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः। भजन्त्यनन्यभावेन ते वै भागवता मताः। न कामकर्मबीजानां यस्य चेतसि सम्भवः। वासुदेवैकनिलयः स वै भागवतोत्तमः"। स्कान्दे "यस्य कृच्छ्रगतस्यापि केशवे रमते मनः। न विच्युता च भक्तिर्वै स वै भागवतो नरः। व्यापद्गतस्य यस्येह भक्तिरव्यभिचारिणी। नान्यत्र रमते चित्तं स वै भागवतो नरः"। हरियोगेश्वरे "विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः। प्रणयरसनयार्पिताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः" हरिभक्तिविलासे १० वि० ।

भागवित्ति पु० चूड़नामके ऋषिभेदे "एतस्य हैव चूडो भागवित्तिः" शत० ब्रा० १४।६।३।१८ ततः कुत्सायां यून्यपत्ये वा ठक्। भागवित्तिक तदीये कुत्सिते यून्यपत्ये पक्षे फक्। भागवित्तेय तत्रार्थे

भागवृत्ति स्त्री उषादिवृत्तिभेदे।

भागहार पु० भागस्य हारो हरणम्। लीलावत्युक्ते अङ्कपरिकर्माष्टकमध्ये भागहरणरूपे व्यापारभेदे "भागहारे करणसूत्रं वृत्तम्। भाज्याद्धरः शुध्यति यदृणः स्यादन्त्यात् फलं तत् खलु भागहारे। शुभेन केनाप्यपवर्त्य हारभाज्यौ भजेद्धा सति सम्भवे तु"। अत्र पूर्वोदाहरणे गुणिताङ्कानां स्वगुणच्छेदानां भागहारार्थं न्यासः भाज्यः। १६२०। भाजकः १२। भजनाल्लब्धौ त्रयः १३५। अथवा भाज्यहारौ त्रिभिरपवर्त्तितौ ५४० चतुर्भिर्वा ४०५ स्वस्वहारेण च्छृते फलं तदेव १३५।

भागासिद्धि स्त्री हेत्वाभासभेदे "पक्षतावच्छेदकसामानाधिकरण्येन साध्याभावः। यथा पृथिवी गन्धवती घटत्वादित्यादौ पृथिवीत्वसामानाधिकरण्येन पटादौ घटत्वाद्यभावः। बाधे गदा०। यथा वा पृथिव्यादयश्चत्वारः परमाणवो नित्या गन्धवत्त्वादित्यत्र जलादौ गन्धाभावः।

भागिन् त्रि० भज-घिनुण्। अंशविशिष्टे। स्त्रियां ङीप्।

भागिनेय पुंस्त्री० भगिन्या अपत्यम् ढक्। भगिनीपुत्रे। तत्कन्यायां स्त्री ङीप्।

भागीयस् त्रि० अतिशयेन भागी ईयसुन् इनोलोपः। अतिशयभागयुते हरिवं० १११अ० ध्व०।

भागीरथी स्त्री भागीरथेन आनीता तेन भागीरथी ब्रह्मवै० प्र० ख० उक्ते गङ्गारूपे नदीभेदे।

भाणुरि पु० स्मृतिव्याकरणादिकर्त्तरि मुनिभेदे। "वहि भाणुरिरल्लोपमवाप्योरुपसर्गयोः" सि० कौ०।

भाग्य न० भज-ण्यत् कुत्वम्। १शुभाशुभसूचके कर्मजन्येऽदृष्टे अमरः। भागः प्रयोजनमस्य यत्। २भागार्थे त्रि०। भागमर्हति यत्। ३भागार्हे त्रि०।

भाङ्गीन न० भङ्गायाः विजयायाः भवनं क्षेत्रं खञ्। (भाङः) भङ्गाभवनयोग्ये क्षेत्रे। खञ्। भाङ्गमधत्र। हेमच। [अवभाजत् त।

भाज पृथक्करणे, अदः चु० उभ० सक० सेट्। भाजयति ते

भाजक त्रि० भज-ण्वुल्। भागकारके अङ्कभेदे विभाजके

भाजन न० भज्यतेऽनेन भज-ल्युट्। १पात्रे अमरः। २आधारे ३योग्ये च मेदि०। ४आढकपरिमाणभेदे वैद्यकम्।

भाजिन् त्रि० भज-सेवायां णिनि। सेवके कामन्दकीयः।

भाजित त्रि० भाजि-कर्मणि क्त। १पृथक्कृते। २भक्ते च।

भाजी स्त्री० भाज-कर्मणि घञ् नि० ङीष्। भक्ष्यव्यञ्जनभेदे। अन्यत्र भाजा। त्रि० कौ०।

भाज्य त्रि० भज्यते विभज्यते भज-कर्मणि ण्यत्। विभजनीये "भाज्यो हरः शुभ्यति यद्गुणः स्यादि"ति लीलावती।

भाटक पु०न० भट-घोषणे ण्वुल्। परगृहयानादेरुपभोगार्थं तत्स्वामिने दीयमाने धने। (भाडा) फला०।

"परभूमौ गृहं कृत्वा भाटयित्वा वसेत् तु यः। स तद् गृहीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकम्। स्तोभं विना वसित्वा तु परभूमावनिच्छतः। निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात् कथञ्चन" कात्यायनः। "गृहवाप्यापणादीनि गृहीत्वा भाटकेन यः। स्वामिनोनार्पयेद्यावत्तावद्देयः स भाटकम्। वापी परगता यत्प्रतिष्ठितेति विवक्षितम्। "हस्त्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः। स्वामिनोनार्पयेद्यावत्तावद्देयः स भाटकम्"। इत्यमनुः "यो भाटयित्वा शकटं नीत्वा नान्यत्र गच्छति। भाटं न दद्याद्दाप्योऽसावनुदञ्चापि भाटकम्"। शकटं हयनौकादेरप्युपलक्षणम्। अनुदञ्चावाकृतस्यापि शकटादेः" इति विवादचिन्तामणिः।

भाण पु० सा० द० उक्तलक्षणे दृश्यरूपकान्तर्गते दृश्यकाव्यभेदे तल्लक्षणं यथा

"भाणः स्याद्धूर्त्तचरितो नानावस्थान्तरात्मकः। एकाङ्क एक एवात्र निपुणः पण्डितो विटः। रङ्गे प्रकाशयेत् स्वेनानुभूतमितरेण वा। सम्बोधनोक्तिप्रत्युक्ती कुर्याद्दाकाशभाषितैः। स्रक्चयेद्वीरशृङ्गारौ शौर्यसौभाग्यवर्णनैः। तत्रेतिवृत्तसूचाद्यं वृत्तिः प्रायेण भारती। सुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च"। आकाशभाषितरूपं परवचनमपि स्वयमेवानुवदन्नुत्तरप्रत्युत्तरे कुर्य्यात्। शृङ्गारवीररसौ च सौभाग्यशौर्यवर्णनेन सूचयेत्। प्रायग्रहणात् कौशिक्यपि वृत्तिर्भवति। उदाहरणं लीलामधुकरः" सा० द०।

भाण्ड न० भाण्ड-अच् भण-ड-स्वार्थे अण् वा। पात्रे १तैलाद्याधारे २भाजने (भाँड) "अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाड्कः" नारदः। ३गृहभेदे (भाँड़ार) "ब्रह्माण्डभाण्डोदरेत्यादि" वीरचरितम्। ४वणिजां मूलधने ५अश्वभूषायां मेदि०। ६नदीकूलद्वयमध्ये पात्रे च हेमच०। ७गर्दभाण्डे वृक्षे पु० शब्दच०। भण्डस्य भावः अण्। ८भण्डचरित्रे न० (भाड़ामि) अजयः।

भाण्डपुट पु० नापिते जटाधरः।

भाण्डपुष्प पु० वर्षभेदे त्रिका०।

भाण्डल त्रि० भाण्डं लाति ला-क। भाण्डव्यापृते स्त्रियां गौरा० ङीष्। [वणीपादौ।

भाण्डव त्रि० भण्डोरदूरादि सुवास्वा० अण्। भण्डु-

भाण्डागार कर्म०। (भाँड़ार) गृहभेदे हेमच०। तत्र नियुक्तः ठञ्। भाण्डागारिक तत्र नियुक्ते त्रि०।

भाण्डार न० भाण्डं तदाकारवृक्षति वृ-अण् उप०स०। गृहभेदे (भाँड़ार)।

भाण्डारिन् पु० भाण्डवृक्षति वृ-णिनि। अक्षादिवृक्षगृहेषु कृताधिकारे। "क्षुधितस्तृषितः कामी विद्यार्थी क्षधिकारकः। भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत्" इति व्यवहारप्रदीपः। [(भाँड़ि)

भाण्डि स्त्री भण्डस्येदम्। नापितस्य क्षुराद्याधारपात्रभेदे

भाण्डिवाह पु० भाण्डिं क्षुराद्याधारं (भाडि) वहति वह-अण् उप०स०। नापिते भाण्डि+अस्त्यर्थे लच्। भाण्डिवत् तत्सदृशे शब्दमा०।

भाण्डीर पु० भण्ड-ईरच् पृषो०। १वटवृक्षे २वृन्दावनस्थे ३वटवनभेदे च जटा०। "प्रलम्बो नाम भूत्वाथो वटं भाण्डीरमाश्रितः" हरिवं० ६५अ०।

भाति स्त्री भा-क्तिन्। शोभायाम् राजनि०।

भातु पु० भा-तुन्। १सूर्ये त्रिका०। २दीप्ते त्रि० शब्दरत्नप्र०।

भाद्र पु० भद्राभिर्युक्ता पौर्णमासी भाद्री सा यस्मिन् मासे अण्। चैत्रादितः षष्ठे मासे १मासे अमरः। २तन्मा-

मीयपौर्णमास्यां स्त्री ङीप्। भद्रेव स्वार्थे अण्। श्रपूर्वोत्तरभाद्रपदाख्यनक्षत्रे न०। "भाद्रहये सागरे" ज्योतिषम्। ४भाद्रा पौर्णमास्यायुक्ते पक्षे तथाविधे ५गुरुवर्षे च कार्त्तिकशब्दे दृश्यम्।

भाद्रपदा स्त्री ब०व०। भद्रपदेदं अण् भाद्रमिव पदमास्याम्। अश्विन्यवधिके पञ्चविंशषड्विंशयोर्नक्षत्रयोः। १तद्युक्ता पौर्णमासी अण् ङीप्। २भाद्रमासस्य पौर्णमास्याम् साऽस्य मासे अण्। ३चान्द्रे भाद्रे मासि पु०। तादृशे ४पक्षे ५गुरुवर्षभेदे च कार्त्तिकशब्दे दृश्यम्।

भाद्रमातुर पु० भद्रायाः सत्याः भ्रातुः अपत्यम् अण् भ्रातृकत्। सतीपुत्रे हेमच०।

भान न०भा-भावे ल्युट्। १प्रकाशे २दीप्तौ ३ज्ञाने प्रकाशे च।

भानु पु० भा-नु। १सूर्य्ये २अर्कवृक्षे ३किरणे ४राजनि च अमरः ५प्रभौ धरणिः। ६भूतजैनभेदे हेमच०। उत्तममन्वन्तरे ७देवे ब०व० हरिवं०६अ०। ८धर्मपत्नीभेदे स्त्री हरिवं० ३अ०। १०गन्धर्वभेदे पु० भा०आ०६५अ०। ११यदुवंश्यक्षत्रियभेदे भानुसत्याः पितरि पु० हरिवं० १४६अ०। १२विष्णौ पु० "अस्तांभ्रुङ्गो भानुः" विष्णुस० "तमेव भान्तमनुभाति सर्वम्" श्रुतेस्तस्य तथात्वम्।

भानुफला स्त्री भानुरिव दीप्तिमत् फलं प्रसवो यस्याः। कदल्याम् जटाधरः। तस्याः मोचकस्य सूर्य्यतुल्यवर्णत्वात्तथात्वम्। [१४६ अ०।

भानुमती स्त्री भानोर्यादवस्यभेदस्य कन्यायां हरिवं०

भानुमत् स्त्री भानुः किरणोऽस्त्यस्य मतुप्। १सूर्य्ये शब्दरत्ना० २अर्कवृक्षे च। भानुमतीत्यपि। ३रूपभेदे पु० भा०भी० ५४अ०। अर्जुनातिसृष्टस्य भार्य्यायां जाते कृतवीर्य्यस्य ४दुहितृभेदे स्त्री भा० आ० ६५अ०।

भानुसेन पु० कर्णपुत्रभेदे भा० क० ४८ अ०।

भानेमि पु० भानोः नेमिरिव। १सूर्य्ये २अर्कवृक्षे च त्रिका०।

भान्त पु० भायाः दीप्तेः पञ्चदशाहसध्ये अन्तो यस्य। शुक्लकृष्णपक्षयोः पञ्चदशाहमध्ये क्रान्तेरूपचयापचययुक्ते चन्द्रे "भान्तः पञ्चदशी" यजु० १४।२३ वेददी० धृत०। २नक्षत्रराश्योरन्ते च।

भाम क्रोधे भ्वा०आत्म०अक०सेट्। भामते अभामिष्ट बभामे।

भाम पु०भाम-घञ्। १क्रोधे निघण्टुः। भा-भावे म। २दीप्तौ च। कर्त्तरि म। ३सूर्य्ये मेदि०। ४अर्कवृक्षे च। ५अग्निपत्नौ पु०शब्दरत्ना ६क्रोधनायां स्त्रियां स्त्री मेदि०।

भामनी पु० भामं नयति नी-क्विप्। परमेश्वरे "एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति य एवं वेद" छा०उ०। "एष उ भामनीरेष हि यस्मात् सर्वेषु लोकेष्वादित्यचन्द्राग्न्यादिरूपेभाति दीप्यते। "तस्य भासा सर्वमिदं विभातीति" श्रुतेरतो भामानि नयतीति भामनीः" भा०। [नायां स्त्रियाम् स्त्री ङीप् अमरः।

भामिन् त्रि०भाम-इनि। क्रोधयुक्ते स्त्रियां ङीप्। कोपनायां स्त्री अमरः।

भार पु० भृ-घञ्। १गुरुत्वपरिमाणे २तद्वति द्रव्ये ३विंशतितुलापरिमाणे (अष्टसहस्रतोलकपरिमाणे) च पु०।४वीवधे ५विष्णौ च मेदि०।

भारङ्गी स्त्री भृ-वा० अङ्गच्। पोतशुकपक्ष्यां स्त्रियां ततः काश्या० ढञ्। भारङ्गिक तत्र भवे त्रि०।

भारण्ड पु० उत्तरदेशजे खगभेदे "एकोदराः पृथग्ग्रीवा अन्योऽन्यफलभक्षिणः। असंहता विनश्यन्ति भारण्डा इव पक्षिणः" पञ्चत०।

भारत न० भरतानां भरतवंश्यानधिकृत्य कृतोऽन्यः अण्। भारं वेदादिशास्त्रेभ्योऽपि सारांशं तनोति तन-ड वा। १वेदव्यासप्रणीते लक्षश्लोकात्मके अन्यभेदे। भरतेन क्षिप्तं तस्येदं वा अण्। "हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता। तस्माच्च भारतं वर्षम्" इत्युक्ते जम्बुद्वीपान्तर्गते २वर्षभेदे। भरतस्य गोत्रापत्यञ् अण्। भरतवंश्ये। भरतेन सुनिना प्रोक्तमण्। ४भरतसुनिकृते नाटकादौ न०। तद्धीयते पुनरण्। ५नटे ब०व०६अग्निभेदे च अन्यरूपभारतशब्दस्य निरुक्तिः भा०आ०१अ०दर्शिता यथा "एकतश्चतुरो वेदान् भारतञ्चैतदेकतः। पुरा किल सुरैः सर्वैः समेत्य तुलया धृतम्। चतुर्भ्यः सरहस्येभ्यो वेदेभ्यो ह्यधिकं यदा। तदाप्रभृति लोकेऽस्मिन् महाभारतमुच्यते। महत्त्वे च गुरुत्वे च ध्रियमाणं यतोऽधिकम्। महत्त्वाद्भारतत्वाच्च महाभारतमुच्यते। निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते"।

तच्च वेदव्यासेन कृतं तदादिष्टः तच्छिष्यः वैशम्पायनः जनमेजयं श्रावयामास यथोक्तं भा० आ० १अ०। "जनमेजयेन पृष्टः सन् ब्राह्मणैश्च सहस्रशः शिष्यमासीनं वैशम्पायनमन्तिके। स सदस्यैः सहासीनः श्रावयामास भारतम्। कर्मान्तरेषु यज्ञस्य चोद्यमानः पुनःपुनः। विस्तरं कुरुवंशस्य गान्धार्याः धर्मशीलताम्। क्षत्तुः प्रज्ञां, धृतिं कुन्त्याः सम्यग्द्वैपायनोऽब्रवीत्। वासुदेवस्य माहात्म्यं पाण्डवानाञ्च सत्यताम्। दुर्वृत्तं धार्त्तराष्ट्राणामुक्तवान् भगवान्ऋषिः"।

अत्र नानाविधं नानासंख्यान्वितं च कृतं लोके तु शतसाहस्रसंख्यातं यथोक्तं तत्रैवाध्याये

"चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम्। उपाख्यानैर्विना तावद्भारतं प्रोच्यते बुधैः। ततोऽध्यर्द्धशतं भूयः संक्षेपं कृतवान्ऋषिः। अनुक्रमणिकाध्यायं वृत्तान्तानां सपर्वणाम्। इदं द्वैपायनः पूर्वं पुत्रमध्यापयच्छुकम्। ततोऽन्येभ्योऽनुरूपेभ्यः शिष्येभ्यः प्रददौ विभुः। षष्टिं शतसहस्राणि चकारान्यां स संहिताम्। त्रिंशच्छतसहस्रं च देवलोके प्रतिष्ठितम्। पित्र्ये पञ्चदश प्रोक्तं गन्धर्वेषु चतुर्दश। एकं शतसहस्रन्तु मानुषेषु प्रतिष्ठितम्। नारदोऽश्रावयद्देवानसितो देवलः पितॄन्। गन्धर्वयक्षरक्षांसि श्रावयामास वै शुकः। ख्यातिं तु मानुषे लोके वैशम्पायन उक्तवान्। शिष्यो व्यासस्य धर्मात्मा सर्ववेदविदांवरः। एकं शतसहस्रन्तु मयोक्तं वै निबोध तत्"। तच्चाष्टादशपर्वयुतं तदवान्तरपर्वशतकं तदुपभागस्तत्र वर्णनीयपदार्थानां संग्रहश्च भा० आ० २अ० दर्शितो यथा

"भारतस्येतिहासस्य श्रूयतां पर्वसंग्रहः"। आदिपर्वणि "१पर्वानुक्रमणी पूर्वं द्वितीयः२ पर्वसंग्रहः।३पौष्यं ४पौलोमास्तीक५मादिरं(ं)शावतारणम्६। ततः सम्भव७पर्वोक्तमद्भुतं रोमहर्षणम्। दहो जतुगृहात्तत्र हैडिम्बं९ पर्व चोच्यते। ततो वकवधः१० पर्व पर्व चैत्ररथं११ ततः। ततः स्वयम्वरो१२ देव्याः पाञ्चाल्याः पर्व चोच्यते। क्षात्रधर्मेण निर्जित्य ततो वैवाहिकं१३ कृतम्। विदुरागमनं पर्व राज्यलाभस्तथैव १४ च। अर्जुनस्य वने वासः१५ सुभद्राहरणं१६ ततः। सुभद्राहरणादूर्द्धं ज्ञेयं हरणकारिका १७। ततः खाण्डवदाहाख्यं१८ तत्रैव मयदर्शनम्।(२)सभापर्व ततः१९प्रोक्तं मन्त्रपर्व२० ततः परम्। जरासन्धवधः२१ पर्व पर्व दिग्विजय२२स्तथा। पर्व दिग्विजयादूर्द्धं राजसूयिक२३मुच्यते। ततश्चार्घाभिहरणं२४ शिशुपालवध२५स्ततः। द्यूतपर्व२६ ततः प्रोक्तमनुद्यूत२७मतः परम्। तत(३)आरण्यकं पर्व किर्मीरवधः२८ एव च। अर्जुनस्याभिगमनं२९ पर्व ज्ञेयमतः परम्। ईश्वरार्जुनयोर्युद्धं पर्व कैरात३०संज्ञितम्। इन्द्रलोकाभिगमनं ३१ पर्व ज्ञेयमतः परम्। नलोपाख्यान३२मपि च धर्मिष्ठं करुद्वहम्। तीर्थयात्रा३३ ततः पर्वं कुरुराजस्य धीमतः। जटासुरवधः३४ पर्व यक्षयुद्ध३५मतः परम्। निवातकवचैर्युद्धं ३६ पर्व आजगर३७मतः। मार्कण्डेयसमास्या३८ च पर्वानन्तरमुच्यते। संवादश्च ततः पर्व द्रौपदीसत्यभामयोः३९। घोषयात्रा४० ततः पर्व मृगस्वप्नोद्भव४१मतः। प्रोक्तिर्द्रौणिक४२माख्यानमैन्द्रद्युम्नं (समास्यानगतं) तथैव च। द्रौपदीहरणं४३ पर्व जयद्रथविमोक्षणम्४४। पतिव्रतायाः महात्म्यं सावित्र्यास्तैवमद्भुतम्४५। रामोपाख्यान४६मतश्चैव पर्व ज्ञेयमतः परम्। कुण्डलाहरणं४७ पर्व ततः परमिहोच्यते। आरणेय४८मतः पर्व (४)वैराटमतदनन्तरम्। पाण्डवानां प्रवेशश्च४९ समयस्य च पालनम्। कीचकानां बधः५० पर्व पर्व गोग्रहण५१मतः। अभिमन्योश्च वैराट्या पर्व वैवाहिकं ५२ स्मृतम्। (५)उद्योगपर्व विज्ञेयमत ऊर्द्धं महाद्भुतम्। ततः सञ्जययानाख्यं५३ पर्व ज्ञेयमतः परम्। प्रजागरस्ततः५४ पर्व धृतराष्ट्रस्य चिन्तया। पर्व सनत्सुजातं ५५ वै गुह्यमध्यात्मदर्शनम्। यानसन्धि५६स्ततः पर्व भगवद्यान५७मेवच। मातुलीयमुपाख्यानं चरितं गालवस्य च। सभाप्रवेशः कृष्णस्य विदुरापुत्रशासनम्। ज्ञेयं विवादपर्वा५८त्र कर्णस्यापि महात्मनः। निर्याणञ्च५९ ततः पर्व कुरुपाण्डवसेनयोः। रथातिरथसंख्या६० च पर्वोक्तं तदनन्तरम्। उलूकदूतागमनं ६१ पर्वाभर्त्सविसर्जनम्। अम्बोपाख्यान६२मतश्चैव पर्व ज्ञेयमतः परम्। भीष्माभिषेचनं(६) पर्व ततश्चाद्भुत मुच्यते। जम्बूखण्डविनिर्माणं६३ पर्वोक्तं तदनन्तरम्। भूमिपर्व६४ ततः प्रोक्तं द्वीपविस्तारकीर्त्तनम्। पर्वोक्तं भगवद्गीता६५ पर्व भीष्मवध६६स्ततः। द्रोणाभिषे(७)चनं पर्व संशप्तकवधः६७स्ततः। अभिमन्युबधः६८ पर्व प्रतिज्ञा६९ पर्व चोच्यते। जयद्रथबधः७० पर्व घटोत्कचबध७१स्ततः। ततो द्रोणवधः७२ पर्व विज्ञेयं लोमहर्षणम्। मोक्षो७३ नारायणास्त्रस्य पर्वानन्तरमुच्यते। कर्णपर्व(८) ततो ज्ञेयं शल्यपर्व(९) ततः परम्। ह्रदप्रवेशन७४ पर्व पदायुद्धमतः७५ परम्। सारस्वतं७६ ततः पर्व तीर्थवंशानुकीर्त्तनम्। अत ऊर्द्धं गदायुद्धं पर्व सौप्तिक(१०)मुच्यते। ऐषीकं७७ पर्व चोद्दिष्टमत ऊर्द्धं सुदारुणम्। जलप्रदानिकं७८ पर्व स्त्रीविलाप(११)मतः परम्। श्राद्धपर्व७९ ततो ज्ञेयं कृष्णार्जुनौर्द्धदैहिकम्। चार्वाकस्य बध८० पर्व राक्षसो ब्रह्मरूपिणः। आभिषेचनिकं८१

पर्व धर्मराजस्य धीमतः। प्रतिभागोऽ२ गदाहाणाञ्च पर्वोक्तं तदनन्तरम्। शान्तिपर्व(१२) ततो यत्र राजधर्मानुशासनम्ऽ१। आपद्धर्मश्चऽ४ पर्वोक्तं मोक्षधर्मऽ५स्ततः परम्। शुकप्रश्नाभिगमनं ब्रह्मप्रश्नानुशासनम्। प्रादुर्भावश्च दुर्वासःसंवादश्चैव मायया। ततः पर्व परिज्ञेयमानुशासनिकम्(१३) परम्। स्वर्गारोहणिकञ्चैव ततो भीष्मस्य धीमतः। ततोऽश्वमेधिकं(१४) पर्व सर्वपापप्रणाशनम्। अनुगीताऽ६ ततः पर्व ज्ञेयमध्यात्मवाचकम्। पर्व चाश्रमवासा(१५)ख्यं पुत्रदर्शनमेव च। नारदागमनं८७ पर्व ततः परिमिहोदितम्, मौसलं(१६) पर्व चोद्दिष्टं ततो घोरं सुदारुणम्। महाप्रस्थानिकं(१७) पर्व स्वर्गारोहणिकं(१८) ततः। हरिवंशस्ततः पर्व८८ पुराणं खिलसञ्ज्ञितम्। विष्णुपर्व८९ शिशोश्चर्या विष्णोः कंसवधस्तथा। भविष्यं पर्व९० चाप्युक्तं खिलेष्वेवाद्भुतं महत्। एतत् पर्व शतं पूर्णं व्यासेनोक्तं महात्मना। (महापर्वसहितं किञ्चिदधिकशतपर्वाण्यत्रेति बोध्यम्)। यथावत् सूतपुत्रेण लोमहर्षणिना ततः। उक्तानि नैमिषारण्ये पर्वाण्यष्टादशैव तु। समासो भारतस्यायमत्रोक्तः पर्वसंग्रहः। पौष्यं पौलोममास्तीकमादिरं(वं)शावतारणम्। समयो जतुवेश्माख्यं हिडिम्बबकयोर्वधः। तथा चैत्ररथं देव्याः पाञ्चाल्याश्च स्वयंवरः। क्षात्रधर्मेण निर्जित्य ततो वैवाहिकं स्मृतम्। विदुरागमनञ्चैव राज्यलम्भस्तथैव च। वनवासोऽर्जुनस्यापि सुभद्राहरणं ततः। हरणाहरणञ्चैव दहनं खाण्डवस्य च। मयस्य दर्शनञ्चैव सभापर्वेति कथ्यते। पौष्ये पर्वणि महात्म्यमुक्तमुञ्छोपवर्णितम्। पौलोमे भृगुवंशस्य विस्तारः परिकीर्त्तितः। आस्तीके सर्पनागानां गरुडस्य च सम्भवः। क्षीरोदमथनञ्चैव तन्मोक्षैःसह सत्तथा। यजतः सर्पसत्रेण राज्ञः पारीक्षितस्य च। कथेयमभिनिर्वृत्ता भारतानां महात्मनाम्। विविधाः सम्भवा राज्ञामुक्ताः सम्भवपर्वणि। अन्येषाञ्चैव शूराणामृषेर्द्वैपायनस्य च। वंशावतारणञ्चात्र देवानां परिकीर्त्तितम्। दैत्यानां दानवानाञ्च। यक्षाणाञ्च महौजसाम्। नागानामथ सर्पाणां गन्धर्वाणां पतत्रिणाम्। अन्येषाञ्चैव भूतानां विविधानां समुद्भवः। महर्षेराश्रमपदे कण्वस्य च तपस्विनः। शकुन्तलायां दुष्मन्ताज्जज्ञेऽपि जन्मवान्। यस्य लोकेषु गास्यन्ते प्रथितं भारतं कुलम्। वसूनां पुनरुत्पत्तिर्भागीरथ्यां महात्मनाम्। शान्तनोर्वीर्यसूनि पुनस्तेषाञ्चारोहणं दिवि। तेजोंऽशानाञ्च सम्भवो भीष्मस्यात्र समासः। राज्याच्चिवर्त्तनं तस्य ब्रह्मचर्य्यव्रते स्थितिः। प्रतिज्ञापालनञ्चैव रक्षा चित्राङ्गदस्य च। हते चित्राङ्गदे चैव रक्षा भ्रातुर्यवीयसः। विचित्रवीर्य्यस्य तथा राज्ये सम्प्रतिपादनम्। धर्मस्य ऽषु सम्भूतिरणीमाण्डव्यशापजा। कृष्णद्वैपायनाच्चैव प्रसूतिर्वरदानजा। धृतराष्ट्रस्य पाण्डोश्च पाण्डवानाञ्च सम्भवः। वारणावतयात्रायां मन्त्रो दुर्योधनस्य च। कूटस्य धार्त्तराष्ट्रेण प्रेषणं पाण्डवान् प्रति। हितोपदेशश्च पथि धर्मराजस्य धीमतः। विदुरेण कृतो यत्र हितार्थं म्लेच्छभाषया। विदुरस्य च वाक्येन सुरङ्गोपक्रमक्रिया। निषादाः पञ्चपुत्राया सम्भवा जतुवेश्मनि। पुरोचनस्य चात्रैव दहनं सम्प्रकीर्त्तितम्। पाण्डवानां वने घोरे हिडिम्बायाश्च दर्शनम्। तत्रैव च हिडिम्बस्य वधो भीमान्नरावतात्। घटोत्कचस्य चोत्पत्तिः तत्रैव परिकीर्त्तिता। महर्षेर्दर्शनञ्चैव व्यासस्यामिततेजसः। तदाज्ञयैकचक्रायां ब्राह्मणस्य निवेशने। अज्ञातचर्य्यया वासो यत्र तेषां प्रकीर्त्तितः। वकस्य निधने चैव नामराज्ञश्च विश्रुतः। समयश्चैव कृष्णाया धृष्टद्युम्नस्य चैव हि। ब्राह्मणात् सप्तपञ्चाल्य व्यासवाक्यप्रचोदिताः। द्रौपदीं प्रार्थयन्तस्ते स्वयंवरदिदृक्षया। पाञ्चालानभिनिर्जग्मुर्यत्र कौतूहलान्विताः। अङ्गारपर्व निर्जित्य गङ्गाकूलेऽर्जुनस्तदा। सख्यं लब्ध्वा ततस्तेन तस्मादेव च सुस्रुवे। तापत्यमथ वासिष्ठमौर्वोपाख्यानसत्तमम्। भ्रातृभिः सहितः सर्वैः पाञ्चालानभितो ययौ। पाञ्चालनगरे चापि लक्ष्यं भित्त्वा धनञ्जयः। द्रौपदीं लब्धवानग्र्य मध्ये सर्वमहीक्षिताम्। भीमसेनार्जुनौ यत्र संरब्धान् पृथिवीपतीन्। शल्यकर्णौ च तरसा जितवन्तौ महाहवे। दृष्ट्वा तयोश्च तद्वीर्य्यमप्रमेयममानुषम्। शङ्कमानो पाण्डवांस्तान् रामकृष्णौ महामनौ। जग्मतुस्तैः समागन्तुं यत्रास्ते गन्धवेश्मनि। पञ्चानामेकपत्नीत्वे विस्मयो द्रुपदस्य च। पञ्चेन्द्राद्यानुपाख्यानमत्रैवाद्भुतमुच्यते। द्रौपद्या देवविहितो विवाहश्चापि मानुषः। चक्षुश्च धृतराष्ट्रेण प्रेषणं पाण्डवान् प्रति। विदुरस्य च सम्प्राप्तिर्दर्शनं केशवस्य च। खाण्डवस्थस्य तथा राज्यार्द्धप्रापणम्। नारदस्यागमनं

चैव द्रौपद्याः समयक्रिया। सुन्दोपसुन्दयोस्तद्वदाख्यानं परिकीर्त्तितम्। अनन्तरञ्च द्रौपद्या सहासीनं युधिष्ठिरम्। अनुप्रविश्य विप्रार्षिं फाल्गुनो दृढ़ञ्च चायुधम्। मोचयित्वा दृढ़ं गत्वा विप्रार्षिं कृतनिश्चयः। समयं पालयन् वीरो वनं यत्र जगाम ह। पार्थस्य वनवासे च उलूप्या पथि सङ्गमः। पुण्यतीर्थानुसंयानं बभ्रुवाहनजन्म च। तत्रैव मोचयामास पञ्च सोऽप्सरसः शुभाः। शापाद्ग्राहत्वमापन्ना ब्राह्मणस्य तपस्विनः। प्रभासतीर्थे पार्थेन कृष्णस्य च समागमः। द्वारकायां सुभद्रा च कामयानेन कामिनी। वासुदेवस्यानुमते प्राप्ता चैव किरीटिना। दृढ़ीत्वा हरणं प्राप्ते कृष्णे देवकिनन्दने। अभिमन्योः सुभद्रायां जन्म चोत्तमतेजसः। द्रौपद्यास्तनयानाञ्च सम्भवोऽनुप्रकीर्त्तितः। विहारार्थञ्च गतयोः कृष्णयोर्यमुनामनु। सम्प्राप्तिश्चक्रधनुषोः खाण्डवस्य च दाहनम्। मयस्य मोक्षो ज्वलनाद्भुजङ्गस्य च मोक्षणम्। मन्दपालस्य शार्ङ्गाणां तनयसम्भवः। इत्येतदादिपर्वोक्तं प्रथमं बहुविस्तरम्। अध्यायानां शते द्वे तु संख्याते परमर्षिणा। सप्तविंशतिरध्याया व्यासेनोक्ततेजसा। अष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च। श्लोकासप्ततिरप्येषा मुनिनोक्ता महात्मना (१)।

द्वितीयन्तु सभापर्व बहुदृत्तान्तसञ्चयम्। सभाक्रिया पाण्डवानां किङ्कराणाञ्च दर्शनम्। लोकपालसभाख्यानं नारदाद्वैवदर्शिनः। राजसूयस्य चारम्भो जरासन्धवधस्तथा। गिरिव्रजे निरुद्धानां राज्ञां कृष्णेन मोक्षणम्। तथा दिग्विजयोऽत्रैव पाण्डवानां प्रकीर्त्तितः। राज्ञामागमनञ्चैव सार्हणानां महाक्रतौ। राजसूयेऽर्घ्यसंवादे शिशुपालवधस्तथा: यज्ञे विभूतिं तां दृष्ट्वा दुःखामर्षान्वितस्य च। दुर्योधनस्यावहासो भीमेन च समातले। यत्रास्य मन्युरुद्भूतो येन द्यूतमकारयत्। यत्र धर्मसुतं द्यूते शकुनिः कितवोऽजयत्। यत्र द्यूतार्णवे मग्नां द्रौपदीं नावमर्षणात्। धृतराष्ट्रो महाप्राज्ञः स्नुषां परमदुःखिताम्। तारयामास तां तीर्णां ज्ञात्वा दुर्योधनो नृपः। पुनरेव ततो द्यूते समाह्वयत पाण्डवान्। जित्वा च वनवासाय प्रेषयामास तांस्ततः। एतत् सर्वं सभापर्व समाख्यातं महात्मना। अध्यायाः सप्ततिर्ज्ञेयास्तथा चाष्टौ प्रसंख्यया। श्लोकानां द्वे सहस्रे तु पञ्च श्लोकशतानि च। श्लोकास्त्रैकादश ज्ञेयाः पर्वण्यस्मिन् द्विजोत्तमाः" (२)। (द्वितीयसभापर्व)

"अतःपरं तृतीयन्तु ज्ञेयमारण्यकं महत्। वनवासं प्रयातेषु पाण्डवेषु महात्मसु। पौरानुगमनञ्चैव धर्मपुत्रस्य धीमतः। अन्नौषधीनाञ्च कृते पाण्डवेन महात्मना। द्विजानां भरणार्थञ्च क्रूरमाराधनं रवेः। धौम्योपदेशात्तन्मांशुप्रसादादन्नसम्भवः। हितन्तु ब्रुवतः सत्तुः परित्यागोऽम्बिकासुतात्। त्यक्तस्य पाण्डुपुत्राणां समीपगमनन्तथा। पुनरागमनञ्चैव धृतराष्ट्रस्य शासनात्। कर्णप्रोत्साहनाच्चैव धार्त्तराष्ट्रस्य दुर्मतेः। वनस्थान् पाण्डवान् हन्तुं मन्त्रो दुर्योधनस्य च। तं दुष्टभावं विज्ञाय व्यासस्यागमनं कृतम्। नियोगप्रतिषेधश्च सरस्याख्यानमेव च। मैत्रेयागमनञ्चात्र राज्ञश्चैवानुशासनम्। शापोत्सर्गश्च तेनैव राज्ञो दुर्योधनस्य च। किर्मीरस्य वधश्चात्र भीमसेनेन संयुगे। हृष्णीनामागमश्चात्र पाञ्चालानाञ्च सर्वशः। श्रुत्वा शकुनिना द्यूते निकृत्या निर्जितांश्च तान्। कृष्णानुगमनं हरेश्चैव किरीटिना। परिदेवनञ्च पाञ्चाल्या वासुदेवस्य सन्निधौ। आश्वासनञ्च कृष्णेन दुःखार्त्तायाः प्रकीर्त्तितम्। तथा सौभवधाख्यानमत्रैवोक्तं महर्षिणा। सुभद्रायाः सुतायाः कृष्णेन द्वारकां पुरीम्। गमनं द्रौपदेयानां धृष्टद्युम्नेन चैव हि। प्रवेशः पाण्डवेयानां रम्ये द्वैतवने ततः। धर्मराजस्य चात्रैव संवादः कृष्णया सह। संवादश्च तथा राज्ञा भीमस्यापि प्रकीर्त्तितः। समीपं पाण्डुपुत्राणां व्यासस्यागमनं तथा। प्रतिस्मृत्यास्त्र विद्याया दानं राज्ञो महर्षिणा। गमनं काम्यके चापि व्यासे प्रतिगते ततः। अस्त्रहेतोर्विहरतः पार्थस्यामिततेजसः। महादेवेन युद्धञ्च किरातवपुषा सह। दर्शनं लोकपालानामस्त्रप्राप्तिस्तथैव च। महेन्द्रलोकगमनमस्त्रार्थं च किरीटिनः। यत्र चिन्ता समुत्पन्ना धृतराष्ट्रस्य भूयसी। दर्शनं बृहदश्वस्य महर्षेर्भावितात्मनः। युधिष्ठिरस्य चार्त्तस्य व्यसने परिवेदनम्। नलोपाख्यानमत्रैव धर्मिष्ठं करुणोदयम्। दमयन्त्याः स्थितिर्यत्र नलस्य चरितं यथा। तथाऽतिहृदयप्राप्तिस्तस्मादेव महर्षितः। लोमशस्यागमस्तत्र स्वर्गात् पाण्डुसुतान् प्रति। वनवासगतानाञ्च पाण्डवानां महात्मनाम्। स्वर्गे प्रवृत्तिराख्याता सोमयेनार्जुनस्य वै। सन्देशादर्जुनस्यात्र तीर्थाभिगमनक्रिया। तीर्थानाञ्च फलप्राप्तिः पुण्यत्व-

ख्यापि कीर्त्तितम्। पुलस्त्यतीर्थयात्रा च नारदेन महर्षिणा। तीर्थयात्रा च तत्रैव पाण्डवानां महात्मनाम्। कर्णस्य परिमोक्षोऽत्र कुण्डलाभ्यां पुरन्दरात्। तथा यज्ञविभूतिश्च गयख्यात्र प्रकीर्त्तितः। आगस्त्यमपि चाख्यानं यत्र वातापिभक्षणम्। सोपाकुद्वाभिगमनमपत्यार्थमनेकधा। ऋष्यशृङ्गस्य चरितं कौमारब्रह्मचारिणः। जामदग्न्यस्य रामस्य चरितं भूरितेजसः। कार्त्तवीर्य्यवधो यत्र हैहयानाञ्च वर्ण्यते। प्रभासतीर्थे पाण्डूनां दृष्णिभिश्च समागमः। सौकन्यमपि चाख्यानं च्यवनो यत्र भार्गवः। अश्विनीयत्रे नासत्यौ कृतवान् सोमपीतिनौ। ताभ्याञ्च यत्र स सुनिर्यौवनं प्रतिपादितः। मान्धातुश्चाप्युपाख्यानं राज्ञोऽत्रैव प्रकीर्त्तितम्। जह्नूपाख्यानमत्रैव यत्र पुत्रेण सोमकः। पुत्रार्थमयजद्राजा लेभे पुत्रशतञ्च सः। ततः श्येनकपोतीयमुपाख्यानमनुत्तमम्। इन्द्राग्नी यत्र धर्मस्याभिज्ञासार्थञ्छिबिं नृपम्। अष्टावक्रीयमत्रैव विवादो यत्र बन्दिना। अष्टावक्रस्य विप्रर्षेर्जनकस्याध्वरेऽभवत्। नैयायिकानां सख्येन वरुणस्यात्मजेन च। पराजितो यत्र बन्दी विवादेन महात्मना। विजित्य सागरं प्राप्तं पितरं लब्धवानृषिः। यवक्रीतस्य चाख्यान रैभ्यस्य च महात्मनः। गन्धमादनयात्रा च वासो नारायणाश्रमे। नियुक्तो भीमसेनस्य द्रौपद्या गन्धमादने। व्रजन् पथि महाशाखं ददर्श पवनात्मजम्। कदलीषण्डमध्यस्थं हनूमन्तं महाबलम्। यत्र सौगन्धिकार्थेऽसौ नलिनीं तामधर्षयत्। यत्रास्य युद्धमभवत् सुमहद्राक्षसैः सह। यत्रैश्चैव महावीर्यैर्मणिमत्प्रमुखैस्तथा। जटासुरस्य च वधो राक्षसस्य दुरोदरात्। वृषपर्व्वणो राजर्षेस्ततोऽभिगमनं स्मृतम्। आर्ष्टिषेणाश्रमे चैषां गमनं वास एव च। प्रोत्साहनञ्च पाञ्चाल्या भीमस्यात्र महात्मनः। कैलासारोहणं प्रोक्तं यत्र यक्षैर्बलोत्कटैः। युद्धमासीन्महाघोरं मणिमत्प्रमुखैः सह। समागमश्च पाण्डूनां यत्र वैश्रवणेन च। समागमश्चार्जुनस्य तत्रैव भ्रातृभिः सह। अवाप्य दिव्यान्यस्त्राणि युर्द्धं कृत्वा सव्यसाचिना। निवातकवचैर्युद्धं हिरण्यपुरवासिभिः। निवातकवचैर्घोरैर्दानवैः सुरशत्रुभिः। पौलोमैः कालकेयैश्च यत्र युद्धं किरीटिनः। वधश्चैषां समाख्यातो राज्ञस्तेनैव धीमता। कल्माषवन्दर्शनारम्भो धर्मराजस्य सन्निधौ। पार्थस्य प्रतिषेधश्च नारदेन सुरर्षिणा। अवरोधः पुनश्चैव पाण्डूनां गन्धमादनात्। भीमस्य सकृच्छ्रात् पर्वताभोगवर्त्मनि। भुजगेन्द्रेण बलिना तस्मिन् सुगहने वने। अमोक्षश्चयदुग्रस्य चैनं प्रस्नावणे युधिष्ठिरः। काम्यकागमनञ्चैव पुनस्तेषां महात्मनाम्। तत्रस्थांश्च पुनर्दृष्ट्वा पाण्डवान् पुरुषर्षभान्। वासुदेवागमनमत्रैव परिकीर्त्तितम्। मार्कण्डेयस्य च तथा देवर्षेर्नारदस्य च। मार्कण्डेयसमास्यायामुपाख्यानानि सर्वशः। पृथोर्वैन्यस्य यत्रोक्तमाख्यानं परमर्षिणा। संवादश्च सरस्वत्या तार्क्ष्यैः सुमहात्मनः। मत्स्योपाख्यानमत्रैव प्रोच्यते तदनन्तरम्। मार्कण्डेयसमास्या च पुराणं परिकीर्त्तितम्। ऐन्द्रद्युम्नमुपाख्यानं धौन्धुमारं तथैव च। पतिव्रतायास्याख्यानं तथैवाङ्गिरसं स्मृतम्। द्रौपद्याः कीर्त्तितत्वात्र संवादः सत्यभामया। पुनर्द्वैतवनञ्चैव पाण्डवाः समुपागताः। घोषयात्रा च गन्धर्वैर्यत्र बद्धः सुयोधनः। क्षिप्यमानस्तु मन्त्रिभ्यो मोक्षितोऽसौ किरीटिना। धर्मराजस्य चात्रैव क्रतुराजदर्शनम्। काम्यके काननश्रेष्ठे पुनर्गमनमुच्यते। प्रौक्षिद्रौक्षिकमाख्यानमत्रैव बहुविस्तरम्। दुर्वासोऽभ्युपाख्यानमत्रैव परिकीर्त्तितम्। जयद्रथेनापहारो द्रौपद्यास्त्राश्रमान्तरात्। यत्रैनमन्वयाद्भीमो वायुवेगसमो जवे। चक्रे चैनं पशुयिष्यं यत्र भीमो महाबलः। रामायणमुपाख्यानमत्रैव बहुविस्तरम्। यत्र रामेण विक्रम्य निहतो रावणो युधि। सावित्र्याश्चाप्युपाख्यानमत्रैव परिकीर्त्तितम्। कर्णस्य परिमोक्षोऽत्र कुण्डलाभ्यां पुरन्दरात्। यत्रास्य शक्तिं तपोदादैकवीरवधाय च। आरण्येयमुपाख्यानं यत्र धर्मोऽन्वयात् सुतम्। जग्मुर्लब्धवरा यत्र पाण्डवाः पश्चिमां दिशम्। एतदारण्यकं पर्व तृतीयं परिकीर्त्तितम्। अत्राध्यायशते द्वे तु संख्यया परिकीर्त्तिते। एकोनषष्टिश्चैव तथाध्यायाः प्रकीर्त्तिताः। एकादश सहस्राणि श्लोकानां शट्शतानि च। चतुःप्रतिशतानां श्लोकाः पर्वण्यस्मिन् प्रकीर्त्तिताः॥३। (वनपर्व)

"अतःपरं निबोधेदं वैराटं पर्व विस्तरम्। विराटनगरं गत्वा श्मशाने विपुलां शमीम्। दृष्ट्वा तस्मिन्दधुस्तत्र पाण्डवा ह्यायुधान्युत। यत्र प्रविश्य नगरं छद्मना न्यवसन्त ते। पाञ्चाल्यां प्रार्थयानस्य कामोपहृतचेतसः। दृष्ट्वा तस्मै वधो यत्र कीचकस्य दुरोदरात्। पाण्डवान्वेषणायात्मनो वधो यत्र कीचकस्य दुरोदरात्। पाण्डवान्वेषणायात्मनो

दैन्यं राज्ञो दुर्योधनस्य च। चराः प्रख्यापितास्तत्र निपुणाः सर्वतो दिशम्। न च प्रवृत्तिस्तैर्लब्धा पाण्डवानां महात्मनाम्। गोग्रहस्य विराटस्य त्रिगर्तैः प्रथमं कृतः। यत्रास्य युद्धं सुमहत् तैरासीत्लोमहर्षणम्। ह्रियमाणस्य यत्रासौ भीमसेनेन मोचितः। गोधनस्य विराटस्य मोचितं यत्र पाण्डवैः। अनन्तरस्य कुरुभिस्तस्य गोग्रहणं कृतम्। समस्ता यत्र पार्थेन निर्जिताः कुरवो युधि। प्रत्याहृतं गोधनस्य विक्रमेण किरीटिना। विराटेनोत्तरा दत्ता स्नुषा यत्र किरीटिनः। अभिमन्युं समुद्दिश्य सौभद्रमरिघातिनम्। चतुर्थमेतद्विपुलं वैराटं पर्व वर्णितम्। अत्रापि परिसंख्याता अध्यायाः परमर्षिणा। सप्तषष्टिरथो पूर्णा श्लोकानामपि मे शृणु। श्लोकानां द्वे सहस्रे तु श्लोकाः पञ्चाशदेव तु। उक्तानि वेदविदुषा पर्वण्यस्मिन् महर्षिणा ४। (विराटपर्व)

"उद्योगपर्वः वित्तेयं पञ्चमं शृण्वतः परम्। उपप्लव्ये निविष्टेषु पाण्डवेषु जिगीषया। दुर्योधनोऽर्जुनश्चैव वासुदेवमुपस्थितौ। साहाय्यमस्मिन् समरे भवाद्यौ कर्तुमर्हति। इत्युक्ते वचने कृष्णो यत्रोवाच महामतिः। अयुध्यमानमात्मानं मन्त्रिणं पुरुषर्षभौ। अक्षौहिणीं वा सैन्यस्य कस्य किंवा ददानघ। वव्रे दुर्योधनः सैन्यं मन्दात्मा यत्र दुर्मतिः। अयुध्यमानं सचिवं वव्रे कृष्णं धनञ्जयः। मद्रराजस्तु राजानमायान्तं पाण्डवान् प्रति। उपहारैर्वञ्चयित्वा वर्त्मन्येव सुयोधनः। वरदं तं वरं वव्रे साहाय्यं क्रियतां मम। शल्यस्तथेति प्रतिश्रुत्य जगामोद्दिश्य पाण्डवान्। शान्तिपूर्वाश्रमक्षयस्तत्रेन्द्रविजयं नृपः। पुरोहितप्रेषणञ्च पाण्डवैः कौरवान् प्रति। वैचित्रवीर्यस्य वचः समादाय पुरोधसः। तथेन्द्रविजयश्चापि यानञ्चैव पुरोधसः। सञ्जयं प्रेषयामास ग्रमार्थी पाण्डवान् प्रति। यत्र दूतं महाराजो धृतराष्ट्रः प्रतापवान्। श्रुत्वा च पाण्डवान् यत्र वासुदेवपुरोगमान्। प्रजागरः संप्रजज्ञे धृतराष्ट्रस्य चिन्तया। विदुरो यत्र यानानि विचित्राणि हितानि च। आश्वासयामास राजानं धृतराष्ट्रं मनीषिणम्। तथा सनत्सुजातेन यत्राध्यात्ममनुत्तमम्। मनस्तापान्वितो राजा श्रावितः शोकनाशनः। प्रभाते राजसमितौ सञ्जयो यत्र वा विभोः। देवत्वं वासुदेवस्य प्रोक्तवानर्जुनस्य च। यत्र कृष्णो दयापन्नः सन्धिमिच्छन्महामतिः। स्वयमागाच्छमं कर्तुं नगरं नागसाह्वयम्। प्रत्याख्यानञ्च कृष्णस्य राज्ञा दुर्योधनेन वै। शमार्थं याचमानस्य पक्षयोरुभयोर्हितम्। दम्भोद्भवस्य चाख्यानमत्रैव परिकीर्तितम्। वरान्वेषणमत्रैव मातलेश्च महात्मनः। महर्षेश्चापि चरितं कथितं गालवस्य वै। विदुलायाश्च पुत्रस्य प्रोक्तञ्चात्यनुशासनम्। कर्णदुर्योधनादीनां दुष्टं विज्ञाय मन्त्रितम्। योगेश्वरत्वं कृष्णेन यत्र राज्ञां प्रदर्शितम्। रथमारोप्य कृष्णेन यत्र कर्णोऽनुमन्त्रितः। उपायपूर्वं शौटीर्यात् प्रत्याख्यातश्च तेन सः। आगम्य हास्तिनपुरादुपप्लव्यमरिन्दम!। पाण्डवानां यथादत्तं सर्वमाख्यातवान् हरिः। ते तस्य वचनं श्रुत्वा मन्त्रयित्वा च यद्धितम्। सांग्रामिकं ततः सर्वं सज्यञ्चक्रुः परन्तपाः। ततो युद्धाय नियंता नरेश्वरयदुन्निधः। नगराद्धास्तिनपुरादुबलसंख्यानमेव च। यत्र राज्ञा दूतकस्य प्रेषणं पाण्डवान् प्रति। श्वो भाविनि महायुद्धे दौत्येन कृतवान् प्रभुः। रथातिरथसंख्यानमस्तोपाख्यानमेव च। एतत्सुबहुवृत्तान्तं पञ्चमं पर्व भारते। उद्योगपर्व निर्दिष्टं सन्धिविग्रहमिश्रितम्। अध्यायानां शतं प्रोक्तं षड्योतिर्महर्षिणा। श्लोकानां षट् सहस्राणि तावन्त्येव शतानि च। श्लोकाश्च नवतिः प्रोक्ताश्चत्वारश्च महात्मना। व्यासेनोदारमतिना पर्वण्यस्मिंस्तपोधनाः! (५)। (उद्योगपर्व)

"अतःपरं विचित्रार्थं भीष्मपर्व प्रचक्षते। जम्बुखण्डविनिर्माणं यत्रोक्तं सञ्जयेन ह। यत्र योधिष्ठिरं सैन्यं विषादमगमत् परम्। यत्र युद्धमभूद्घोरं दशाहानि सुदारुणम्। कृष्णार्जुनं यत्र पार्थस्य वासुदेवो महामतिः। मोहजं नाशयामास हेतुभिर्मोक्षदर्शिभिः। समीक्ष्याधोक्षजः क्षिप्रं युधिष्ठिरहितैरतः। रथादाप्लुत्य वेगेन स्वयं कृष्ण उदारधीः। प्रतोदपाणिरायच्छन्नीम हन्तुं व्यपेतभीः। वाक्यप्रतोदाभिहितो यत्र कृष्णेन पाण्डवः। गाण्डीवधन्वा समरे सर्वशस्त्रभृतांवरः। शिखण्डिनं पुरस्कृत्य यत्र पार्थो महाधनुः। विनिघ्नन्निशितैर्बाणैरयाङ्क्षीन्मपातयत्। भरतस्यमतज्ञैस्तु भीष्मो यत्र बभूव ह। षष्ठमेतत् समाख्यातं भारते पर्व विस्तृतम्। अध्यायानां शतं प्रोक्तं तथा पञ्चदशापरे। पञ्च श्लोकसहस्राणि संख्ययाष्टौ शतानि च। श्लोकाश्च चतुरशीतिरस्मिन् पर्वणि को-

र्त्तिताः। व्यासेन वेदविदुषा संख्याता भीष्मपर्वणि (६)। द्रोणपर्व ततश्चित्रं बहुवृत्तान्तमुच्यते। सेनापत्येऽभिषिक्तोऽथ यत्राचार्यः प्रतापवान्। दुर्योधनस्य प्रीत्यर्थं प्रतिज्ञत्ते महास्त्रवित्। यत्रहणं धर्मराजस्य पाण्डुपुत्रस्य धीमतः। यत्र संशप्तकाः पार्थमपनिन्यूरणाजिरात्। भगदत्तो महाराजो यत्र शक्रसमो युधि। सुप्रतीकेन नागेन स हि शान्तः किरीटिना। यत्राभिमन्युं बहवो जघ्नुरेकं महारथाः। जयद्रथसुखा बालं शूरमप्राप्तयौवनम्। हतेऽभिमन्यौ क्रुद्धेन यत्र पार्थेन संयुगे। अक्षौहिणीः सप्त हत्वा हतो राजा जयद्रथः। यत्र भीमो महाबाहुः सात्यकिश्च मयारयः। अन्वेषणार्थं पार्थस्य युधिष्ठिरमुपाद्रवन्। प्रविष्टो भारतीं सेनामप्रधृष्यां सुरैरपि। संशप्तकावशेषञ्च हतं निःशेषमाहवे। अनम्बूषः सुतायुश्च जलसन्धश्च वीर्यवान्। सौमदत्तिर्विराटश्च द्रुपदश्च महारथः। घटोत्कचाटयश्चान्ये निहता द्रोणपर्वणि। अश्वत्थामापि चात्रैव द्रोणे युधि निपातिते। अस्त्रं प्रादुश्चकारोग्रं नारायणमनर्षितः। आग्नेयं कीर्त्यते यत्र रुद्रमाहात्म्यमुत्तमम्। व्यासस्य चाप्यागमनं माहात्म्यं कृष्णपार्थयोः। सप्तमं भारते पर्व महदेतदुदाहृतम्। यत्र ते पृथिवीपालाः प्रायशो निधनं गताः। द्रोणपर्वणि ये शूरा निर्दिष्टाः पुरुषर्षभाः। अत्राध्यायशतं प्रोक्तं तथाध्यायाश्च सप्ततिः। अष्टौ श्लोकसहस्राणि तथा नव शतानि च। श्लोका नव तथैवात्र संख्यातास्तत्त्वदर्शिना। पाराशर्येण मुनिना संचिन्त्य द्रोणपर्वणि (७)।

अतःपरं कर्णपर्वं प्रोच्यते परमाद्भुतम्। सारथ्ये विनियोगश्च महराजस्य धीमतः। आख्यातं यत्र पौराणं त्रिपुरस्य निपातनम्। प्रयाणे पद्मजात्संवादः कर्णशल्ययोः। हंसकाकीयमाख्यानं तत्रैवाक्षेपसंहितम्। वधः पाञ्चाल्यस्य च तथा अश्वत्थाम्ना महात्मना। दण्डसेनस्य च ततो दण्डस्य च वधस्तथा। द्वैरथे यत्र कर्णेन धर्मराजो युधिष्ठिरः। संशयं गमितो युद्धे भिषता सर्वधन्विनाम्। अन्योन्यं प्रति च क्रोधो युधिष्ठिरकिरीटिनोः। यत्रैवानुनयः प्रोक्तो माधवेनार्जुनस्य हि। प्रतिज्ञापूर्वकञ्चापि वधो दुःशासनस्य च। भित्त्वा हृदो रक्तं पीतवान् यत्र संयुगे। द्वैरथे यत्र पार्थेन हतः कर्णो महारथः। अष्टमं पर्व निर्दिष्टमेतद्भारतचिन्तकैः। एकोनसप्ततिः प्रोक्ता अध्याया कर्णपर्वणि। चत्वार्येव सहस्राणि नव श्लोकशतानि च। चत्वारिंशच्च श्लोकाः पर्वणोऽस्मिन् प्रकीर्त्तिताः (८)। (कर्णपर्व)

"अतःपरं विचित्रार्थं शल्यपर्व प्रकीर्त्तितम्। हतप्रवीरे सैन्ये तु नेता सद्वेश्वरोऽभवत्। यत्र कौमारकाख्यानमभिषेचनकर्म च। वृत्तानि रथयुद्धानि कीर्त्यन्ते यत्र भागशः। विनाशः कुरुमुख्यानां शल्यपर्वणि कीर्त्यते। शल्यस्य निधनञ्चात्र धर्मराजान्महात्मनः। शक्रतेजश्च बलोऽत्रैव सहदेवेन संयुगे। सैन्ये च हतभूयिष्ठे किञ्चिच्छिष्टे सुयोधनः। ह्रदं प्रविश्य यत्रासौ संस्तभ्यापो व्यवस्थितः। महत्तिस्तत्र चाख्याता यत्र भीमस्य लुब्धकैः। क्षेपयुक्तैर्वचोभिश्च धर्मराजस्य धीमतः। ह्रदात् समुत्थितो यत्र धार्त्तराष्ट्रोऽल्पमर्षणः। भीमेन सदृशं युद्धं यत्रासौ हतवान् सुहृत्। समवाये च युद्धस्य रामस्यागमनं स्मृतम्। सरस्वत्याश्च तीर्थानां पुण्यतां परिकीर्त्तिता। गदायुद्धञ्च तुमुलमत्रैव परिकीर्त्तितम्। दुर्योधनस्य राज्ञोऽथ यत्र भीमेन संयुगे। ऊरू भग्नौ प्रसह्याजौ गदया भीमवेगया। नवमं पर्व निर्दिष्टमेतद्वृत्तमहर्षिभिः। एकोनषष्टिरध्यायाः पर्वणोऽत्र प्रकीर्त्तिताः। संख्याता बहुवृत्तान्ताः श्लोकसंख्यात्र कथ्यते। तीणि श्लोकसहस्राणि द्वे शते त्रिंशतिस्तथा। मुनिना सम्प्रणीतानि कौरवाणां यशोभृता (९)। (शल्यपर्व)

"अतःपरं प्रवक्ष्यामि सौप्तिकं पर्व दारुणम्। भग्नोरुं यत्र राजानं दुर्योधनममर्षणम्। अपयातेषु पार्थेषु त्वयस्तेऽभ्ययायूरथाः। कृतवर्मा कृपो द्रौणिः सायाह्ने क्षुधितोचितम्। समेत्य दृष्ट्वा भूमौ पतितं रणमूर्द्धनि। प्रतिजज्ञे दृढक्रोधो द्रौणिर्यत्र महारथः। व्यहत्वा सर्वपाञ्चालान् धृष्टद्युम्नपुरोगमान्। पाण्डवांश्च महात्मानात्मज्ञे विमोक्ष्यामि दंशनम्। यत्रैवमुक्त्वा राजानमपक्रम्य त्रयो रथाः। सूर्यास्तमनवेलायामासेदुस्ते महद्वनम्। न्यग्रोधद्यात् महतो यत्राधस्तादुपाविशन्। ततः शाकान् बहून् रात्रौ दृष्ट्वोलूकेन क्षिप्यतान्। द्रौणिः क्रोधसमाविष्टः पितुर्वधमनुस्मरन्। पाञ्चालानां वधं प्रति मनोदधे। गत्वा च शिबिरद्वारि दुर्दर्शन्तत्र राक्षसम्। घोररूपमपश्यत् स दिवमाहत्य तिष्ठितम्। तेन व्याघातमस्त्राणां क्रियमाणमवेक्ष्य च। द्रौणिर्यत्र विरूपाक्षं रुद्रमाराध्य शत्रवः। अक्षय्यान्निशि विश्वस्तान् धृष्टद्युम्नपुरोगमान्। पाञ्चालान् सपरीवारान् द्रौपदेयांश्च सर्वशः। कृतवर्मणा च सहितः कृपेण च

निजघ्निवान्। यत्रासुप्तवन्न ते पार्थाः पञ्च कृष्णवशानुगाः। सात्यकिश्च महेष्वासः शेषाश्च निधनं गताः। पाञ्चालानां प्रसुप्तानां यत्र द्रौणिकृतादुधः। धृष्टद्युम्नस्य क्षत्रेण पाण्डवेषु निवेदितः। द्रौपदी पुत्रशोकार्त्ता पितृभ्रातृबन्धवार्दिता। कृतानशनसंकल्पा यत्र मर्त्तुमुपाविशत्। द्रौपदीवचनाद्यत्र भीमो भीमपराक्रमः। प्रियं तस्याश्चिकीर्षन् वै गदामादाय वीर्य्यवान्। अन्वधावत् हुर्षक्रुद्धो भारतद्वाजं गुरोः सुतम्। भीमसेनभयादुग्रः द्रोणेनाभिप्रचोदितः। अपाण्डवायेति रुषा द्रौणिरस्त्रमवासृजत्। तथैवमित्यब्रवीत् कृष्णः शमयंस्तस्य तद्वचः। यत्रास्त्रमस्त्रेण च तच्छमयामास फाल्गुनः। द्रौणेश्च द्रौपदेयत्वं बोध्य प्रापात्मनस्तदा। द्रौणिर्द्वैपायनादीनां शापाश्चान्योन्यकारिताः। मणिं तथा समादाय द्रौणपुत्रान्मुरारथात्। पाण्डवाः प्रददुर्हृष्टा द्रौपद्यै जितकाशिनः। एतद्दैशमं पर्व सौप्तिकं वसुदाहृतम्। अष्टादशाग्निरध्यायाः पर्वण्युक्ता महात्मना। श्लोकानां कथितान्यत्र शतान्यष्टौ प्रसंख्यया। श्लोकाश्च सप्ततिः प्रोक्ता मुनिना ब्रह्मवादिना। सौप्तिके श्लोकसम्बन्धे पर्वण्युक्तमतेजसा (१०)। (सौप्तिकपर्व)

"अत ऊर्द्धमिदं प्राहुः स्त्रीपर्व करुणोदयम्। पुत्रशोकाभिसन्तप्तः प्रज्ञाचक्षुर्नराधिपः। कृष्णोपनीतां यत्रासायसीं प्रतिमां दृढाम्। भीमसेनद्रोहबुद्धिर्धृतराष्ट्रो बभञ्ज ह। तथा शोकाभितप्तस्य धृतराष्ट्रस्य धीमतः। संसारगहनं बुद्ध्या हेतुभिर्मोहदर्शनैः। विदुरेण च यत्रास्य राज्ञश्चाश्वासनं कृतम्। धृतराष्ट्रस्य चात्मैव कौरवायोधनन्तथा। सान्तःपुरस्य गमनं शोकार्त्तस्य प्रकीर्त्तितम्। विलापो वीरपत्नीनां यत्रातिकरुणः स्मृतः। क्रोधावेशः प्रमोक्षश्च गान्धारीधृतराष्ट्रयोः। यत्र तान् क्षत्रियान् शूरान् संग्रामेष्वनिवर्त्तिनः। पुत्रान् भ्रातॄन् पितॄंश्चैव दृष्ट्वा निहतान् रणे। पुत्रपौत्रवधार्त्तायास्तथात्मैव प्रकीर्त्तिता। गान्धार्याश्चापि कृष्णेन क्रोधोपशमनक्रिया। यत्र राजा महाप्राज्ञः सर्वधर्मभृतांवरः। राज्ञां तानि शरीराणि दाहयामास शास्त्रतः। तोयकर्मणि चारब्धे राज्ञासुहृदादिके। गूढोत्पन्नस्य चाख्यानं कर्णस्य पृथयात्मनः। श्रुतस्यैतद्धि प्रोक्तं व्यासेन परमर्षिणा। एतदेकादशं पर्व लोकवैक्लव्यकारकम्। प्रणीतं सज्जनमनोवैक्लव्यासुप्रवर्त्तकम्। सप्तविंशतिरध्यायाः पर्वण्यस्मिन् प्रकीर्त्तिताः। श्लोकसप्तशती चापि पञ्चसप्ततिसंयुता। संख्यया भारताख्यानसङ्ख्यं व्यासेन धीमता (११) (स्त्रीपर्व)

"अतःपरं शान्तिपर्व द्वादशं वृद्धिवर्द्धनम्। यत्र निर्वेदमापन्नो धर्मराजो युधिष्ठिरः। घातयित्वा पितॄन् भ्रातॄन् पुत्रान् सम्बन्धिमातुलान्। शान्तिपर्वणि धर्माश्च व्याख्याताः भारतर्षिभिः। राजभिर्वेदितव्यास्ते सम्यग्ज्ञानबुभुत्सुभिः। आपद्धर्माश्च तत्रैव कालहेतुप्रदर्शिनः। यान् बुद्ध्वा पुरुषः सम्यक् सर्वज्ञत्वमवाप्नुयात्। मोक्षधर्माश्च कथिता विचित्रा बह्वविस्तराः। द्वादशं पर्व निर्दिष्टमेतत् प्राज्ञजनप्रियम्। अत्र पर्वणि विज्ञेयमध्यायानां शतत्रयम्। त्रिंशच्चैव तथाध्याया नव चैव तपोधनाः। चतुर्दशसहस्राणि तथा सप्त शतानि च। सप्त श्लोकास्तथैवात्र पञ्चविंशतिसंख्यया (१२)। (शान्तिपर्व)

"अत ऊर्द्धञ्च विज्ञेयमनुशासनमुत्तमम्। यत्र प्रकृतिमापन्नः स्तुत्वा धर्मविनिश्चयम्। भीष्माद्भागीरथीपुत्रात् कुरुराजो युधिष्ठिरः। व्यवहारोऽत्र चार्तघ्नेन धर्मार्थीयः प्रकीर्त्तितः। विविधानाञ्च दानानां फलयोगाः प्रकीर्त्तिताः। तथा पात्रविशेषाश्च दानानाञ्च परो विधिः। आचारविधियोगश्च सत्यञ्च परा गतिः। आहाभाष्यं गवाञ्चैव ब्राह्मणानां तथैव च। रहस्यञ्चैव धर्माणां देशकालोपसंहितम्। एतत् सुबहुवृत्तान्तसङ्ख्यातानुशासनम्। भीष्मस्यात्मैव सम्प्राप्तिः स्वर्गस्य परिकीर्त्तिता। एतत्त्रयोदशं पर्व धर्मनिश्चयकारकम्। अध्यायानां शतं ह्यत्र षट्चत्वारिंशदेव तु। श्लोकानान्तु सहस्राणि प्रोक्तान्यष्टौ प्रसंख्यया (१३)। (अनुशासनपर्व)

"ततोऽश्वमेधिकं नाम पर्व प्रोक्तं चतुर्दशम्। तत्संवर्त्तमरुत्तीयं यत्राख्यानमनुत्तमम्। सुवर्णकोषसम्प्राप्तिर्जन्म चोक्तं परीक्षितः। दग्धस्यास्त्राग्निना पूर्वं कृष्णात् संजीवनं पुनः। चर्यायां हयसुत्सृष्टं पाण्डवस्यानुगच्छतः। तत्र तत्र च युद्धानि राजपुत्रैरमर्षणैः। चित्राङ्गदायाः पुत्रेण पुत्रिकायां धनञ्जयः। संग्रामे बभ्रुवाहेन संशयस्थात्र चिन्तितः। अश्वमेधे महायज्ञे नकुलाख्यानमेव च। अनुगीता तथा प्रोक्ता सम्यगभगवता पुनः। कथितः ब्राह्मणो धर्मः कृष्णेनार्जुनसन्निधौ। तथा ब्राह्मणगीता च संवादो गुरुशिष्ययोः। इत्याश्वमेधिकं पर्व प्रोक्तमेतन्महाद्भुतम्। अध्यायानां शतञ्चैव त्रयोऽध्यायास्तु कीर्त्तिताः। त्रीणि श्लोकसहस्राणि तावन्त्येव तानि च। विंशतिश्च तथा

श्लोकाः संख्याताश्चत्त्वदर्शिना" (१४ आश्वमेधिकपर्वे)।

"ततस्त्वाश्रमवासाख्यं पर्व षष्ठमुदाहृतम्। यत्र राज्यं सुतं न्यस्य गान्धार्या सहितो नृपः। धृतराष्ट्राश्रमपदं विदुरश्च जगाम ह। यं दृष्ट्वा प्रस्थितं साध्वी पृथाप्यनुययौ तदा। पुत्रराज्यं परित्यज्य गुरुशुश्रूषणे रता। यत्र राजा हतान् पुत्रान् पौत्रानन्यांश्च पार्थिवान्। लोकान्तरगतान् वीरान-पश्यत् पुनरागतान्। ऋषेः प्रभावात् कृष्णस्य दृष्ट्वा-श्चर्यमनुत्तमम्। त्यक्त्वा शोकं सदारश्च सिद्धिं परमिकां गतः। यत्र धर्मं समाश्रित्य विदुरः सुगतिं गतः। ऋक्षयज्ञश्च महात्मा विद्वान् गावल्गणिर्वशी। दृष्टो नारदं यत्र धर्मराजो युधिष्ठिरः। नारदाच्चैव शुश्राव वृष्णीनां कदनं महत्। एतदाश्रमवासाख्यं पर्वोक्तं सु-महाद्भुतम्। द्विचत्वारिंशदध्यायाः पर्वैतदभिसंख्यया। सहस्रमेकं श्लोकानां पञ्च श्लोकशतानि च। उक्तेव च तथा श्लोकाः संख्याताश्चत्त्वदर्शिना" (१५ आश्रमवासपर्व)

"अतःपरं निबोधेदं मौषलं पर्व दारुणम्। यत्र ते पुरुष-व्याघ्राः शस्त्रस्पर्शमहा युधि। ब्रह्मदण्डविनिर्दिष्टाः समीपे लवणाम्भसः। आपाने पानकलिता दैवेनाभिप्रचोदिताः। एरकाकृपिभिर्वज्रैर्निजघ्नुरितरेतरम्। यत्र सर्वक्षयं कृत्वा तावुभौ रामकेशवौ। नातिचक्रमतुः कालं प्राप्तं सर्व-हरं महत्। यत्रार्जुनो द्वारवतीमेत्य ऋषिविनाकृताम्। दृष्ट्वा विषादमगमत् परावृत्तिं नरर्षभः। स संस्कृत्य नरश्रेष्ठं मातुलं गौरिमात्मनः। दग्ध्वा वृष्णिवीराणामा-पाने वैशसं महत्। शरीरं वासुदेवस्य रामस्य च महा-त्मनः। संस्कारं लम्भयामास वृष्णीनाञ्च प्रधानतः। स दृष्ट्वालमादाय द्वारवत्यास्ततो जनम्। दृष्ट्वापदि कृष्णायां गाण्डीवस्य पराभवम्। सर्वेषाञ्चैव दिव्यानां-स्त्राणामप्रसृजतां। नाशं वृष्णिकुलस्याद्यां प्रभावा-त्यामनित्यताम्। दृष्ट्वा निर्वेदमापन्नो व्यासवाक्यप्रचो-दितः। धर्मराजं समासाद्य यत्रायं समरोचयत्। कृत्स्नेतन्मौषलं पर्व षोडशं परिकीर्त्तितम्। अध्या-यास्तत्र समाख्याताः श्लोकानाञ्च शतत्रयम्। श्लोकानां विंशतिश्चैव संख्यातास्तत्त्वदर्शिना" (१६ मौषलपर्व)।

"भारतस्यानिकं तस्मादूर्द्धं खण्डं कृतम्। यत्र राज्यं परित्यज्य पाण्डवाः पुरुषर्षभाः। द्रौपद्या सहिता देव्या महाप्रस्थानमास्थिताः। यत्र तेऽग्निं ददृशिरे जौहित्यं प्राच्य सागरं। यत्राग्निना चोदितश्च पार्थस्तस्मै महात्मने। ददौ समूह्य तद्दिव्यं गाण्डीवं धनुरुत्तमम्। यत्र भ्रातॄन् निपतितान्द्रौपदीञ्च युधिष्ठिरः। दृष्ट्वा त्यक्त्वा जगामैव सर्वानवलोकयन्। एतत् सप्तदशं पर्व महा-प्रस्थानिकं स्मृतम्। तत्राध्यायास्त्रयः प्रोक्ताः श्लोका-नाञ्च शतत्रयम्। विंशतिश्च तथा श्लोकाः संख्या-तास्तत्त्वदर्शिना"। (१७ महाप्रस्थानिकपर्व)।

"स्वर्गपर्व ततो ज्ञेयं दिव्यं यत्तदमानुषम्। प्राप्य दैवरथं स्वर्गान्नेटवान् यत्र धर्मराट्। आरोढुं सुमहाप्राज्ञ आनृशंस्याच्छुना विभा। तमस्याविः चलं ज्ञात्वा स्थितिं धर्मे महात्मनः। अरूपं यत्र तत्त्यक्त्वा धर्मेणासौ समन्वितः। स्वर्गं प्राप्तः स च तया यातनां विपुलां भृशम्। देवदूतेन नरको यत्र व्याजेन दर्शितः। शुश्राव यत्र धर्मात्मा भ्रातॄणां करुणागिरः। निदेशे वर्त्तमानानां देशे तत्रैव वर्त्तम-ताम्। अनुदर्शितश्च धर्मेण देवराज्ञा स पाण्डवः। आप्लुत्याकाशगङ्गायां देहं त्यक्त्वा स मानुषम्। स्व-धर्मनिर्जितं स्थानं स्वर्गे प्राप्य स धर्मराट्। सुरैश्च पूजितः सर्वैः सेन्द्रैः सुरगणैः सह। कर्म्मस्य नरक-प्राप्तेः प्रमोक्षस्यात्र कीर्त्यते। समागमश्च वीराणां स्वर्गलोके महात्मना। कीर्त्यते यत्र विधिवत् स्वर्ग-संवाद एव च। स्थानि स्थानानि च प्राप्ता यत्र ते पुरुषर्षभाः। एतदष्टादशं पर्व प्रोक्तं व्यासेन धीमता। अध्यायाः पञ्च संख्याताः पर्वण्यस्मिन्महात्मना। श्लोकानां द्वे शते चैव सुसंख्याते तपोधनाः। नव श्लोकास्तथैवान्ये संख्याताः परमर्षिणा। (१८ स्वर्गारोहणिकपर्व)।

अष्टादशैवमेतानि पर्वाण्युक्तान्यशेषतः। खिलेषु हरि-वंशस्य भविष्यच्च प्रकीर्त्तितम्। विष्णुपर्व शिशोश्चर्या विष्णोः कंसवधस्तथा। भविष्यं पर्व चाप्युक्तं खिलेष्वे-वाद्भुतं महत्। इत्य श्लोक सहस्राणि विंशत् श्लोकश-तानि च खिलेषु हरिवंशे च संख्यातानि महर्षिणा"। "भारतं श्रवणायास्मिन् भारतं परिकीर्त्तयेत्। भारतं भवने यस्य तस्य हस्तगतो जयः" भा०आ० १अ०। भर-तस्य अपत्यादि शुभाण्ढक् भारतेय तदपत्यादौ पुंस्त्री०।

भारतवर्ष पुं० जम्बुद्वीपान्तर्गते वर्षभेदे जम्बुद्वीपशब्दे ३०४६ पृ० दृश्यम्।

भारती स्त्री भृ-अतच्। स्वार्थे प्रज्ञाद्यण्। १ वाक्ये तदधि-देवतायां २सरस्वत्यां ३पक्षिभेदे "भारती संस्कृतप्रायो वाग्व्यापारे नराश्रय" इति स्वा०६ प० अकर्त्तारीक

४वृत्तिभेदे च ५सङ्ख्यासिनाशुपाधिभेदे च स्त्री ।

भारद्वाज पु० भरद्वाजस्य गोत्रापत्यम् अण् । गोत्रप्रवर्त्तके १मुनिभेदे २द्रोणाचार्य्ये मेदि० ३खगस्त्यसुतौ शब्दर० ४व्याघ्राटविहगे ५बृहस्पतिपुत्रे च हेमच० द्वयनकार्पासां स्त्री ङीप् । पृषो० । भारद्वाजीत्यप्यत्र । विदा० अञ् ततः अश्वा० फक् । भारद्वायन तद्गोत्रापत्ये पुंस्त्री० । स्त्रियां ङीप् । भारद्वाजी हृत० । भारद्वाजीपुत्र तत्पुत्रे स च यजुर्वेदस्य वंशस्थः ऋषिभेदः शत०ब्रा०१४।६।४।३।

भारभृत् त्रि० भारं बिभर्त्ति भृ-क्विप् । १भारधारके । २विष्णौ पु० "भारभृत् कथितो योगी" विष्णुस० ।

भारमेय त्रि० भारमस्येदम् शुभ्रा० ढक् । भरमसम्बन्धिनि स्त्रियां ङीप् ।

भारय पु०भारो रयो वेगो यस्य ।(भारुद) खगभेदे शब्दच० ।

भारयष्टि स्त्री भारस्य वहनार्थां यष्टिः शाक०त० । भारवहनदण्डे (बाँक) अमरः ।

भारव न० भारं वाति या-क । धनुर्गुणे त्रिका० ।

भारवाह(ह्) त्रि० भारं वहति अण् णिच् वा । भारवाहिनि खल् । भारवाहकोऽप्यत्र । अमरः स्त्रियां ङीप् णिच्प्रत्ययान्तस्य असादावज्ञादौ ङीपि च ऊठ् । भारौहः भारौही ।

भारवि पु० किरातार्जुनीयकाव्यकारके १कविभेदे । "तावद्भा भारवेर्भाति यावन्नाघस्य नोदयः । उदिते च पुनर्व्योम्नि भारवेर्भा रवेरिव" उद्भटः । तत्कृते २काव्ये च "उपमा कालिदासस्य भारवेरर्थगौरवम्" उद्भटः ।

भारवृक्ष पु० भारीभूतो वृक्षः । काष्ठोनामगन्धद्रव्ये शब्दच०

भार(ह)हार त्रि० भारं हरति हृ-अच् अण् वा । भारवाहके तत्वाहृद्यमने अच् । उद्यमने तु अण् इतिभेदः ।

भाराक्रान्त त्रि० ३त० । १भारेणाक्रान्ते "भाराक्रान्ता सभनरसना गुरुः स्मृतिरसवृत्तैः" छन्दोम०उक्ते २सप्तदशाक्षरपादके वर्णवृत्तभेदे स्त्री ।

भारि पु० इभस्यारिः पृषो० । सिंहे हेमच० ।

भारिक त्रि० भारं वहति भार+ठक् । भारवाहके अमरः

भारिट पु० भाषा रेटति रिट-क । ग्रामचटके खगभेदे राजनि० ।

भारिन् त्रि० भारोऽस्यास्त्यत्वेन इनि । भारवाहके एतत्परस्य मालाशब्दस्य ह्रस्वः । मालभारी । "मल्लिकामालभारिण्यः" काव्यादर्श० ।

भारुण्ड पु० उत्तरकुरुवर्षस्थे १खगभेदे तदुपक्रमे "भारुण्डानाम शकुनास्तीक्ष्णतुण्डा भयानकाः । ताक्ष्यैरेतान् दरीषु प्रक्षिपन्ति च" भा०भी० ७अ० । २सामभेदे तत्र भारुण्डेति पाठभेदः । तत्सामद्रष्टरि ऋषिभेदे "भारुण्डसामगीताभिरर्थवद्भिरसोन्नतैः" भा०आ०६७ अ० । तच्च सामार्चिके १।२।२ "इमं स्तोमर्हते" इत्यादिमन्त्रे गेयं साम, मतङ्गत हलादानादिपङ्क्तौ १०१ पृ०दृश्यम् । "आज्यदोहानि सामानि शान्तिकं भारुण्डानि च । एषिमे द्वारपालौ तु पठेताम् साममौ तथा" विधानपा० ।

भारूप न० भारूपमस्य । चिदात्मके १ब्रह्मणि २आत्मनि पु० ।

भार्ग पु० भर्गस्य देशभेदस्य राजा अण् । १भर्गदेशशब्दार्थे तद्राजनि भार्गाः स्त्रियां न लुक् । भार्गी । २प्रतर्दनस्य पुत्रभेदे पु० हरिवं० २९ अ० ।

भार्गभूमि पु० आङ्गिरसे भार्गवपुत्रभेदे हरिवं० ३अ० ।

भार्गव पुंस्त्री० भृगोरपत्यम् तद्गोत्रापत्यं वा अण् । १भृगुवंशे ब्रह्मत्वे तु अत्रिभृग्वित्यादिना अणो लुक् । भृगवः तद्गोत्रापत्येषु । २शुक्राचार्य्ये ३धन्विनि ४गजे च पु० मेदि० । तेन प्रोक्ता तेनाधीता ज्ञाता वा अण् । ५वेदप्रसिद्धे विद्याभेदे ६पार्वत्यां ७लक्ष्म्यां ८दुर्वायां च स्त्री मेदि० ङीप् । प्राच्ये देशभेदे पु० । "ब्रह्मोत्तराः प्रविजया भार्गवाद्येयमल्लकाः" मार्कण्डेयपु० । १०द्रुपदनगरस्थे कुम्भकारभेदे पु० भा०आ०१६०अ० । ११महादेवे पु० भा० द्रो० २०३अ० ।

भार्गवन न० द्वारकास्थे वनभेदे हरिवं० १५७ अ० ।

भार्गवप्रिय पु० ६त० । क्षीरके तस्य शुक्रप्रियत्वात् तथात्वम् । [भर्गगोत्रापत्ये ।

भार्गायण पुंस्त्री०भर्गस्य गोत्रापत्यं वैगर्त्तः फञ् । वैगर्त्ते

भार्गी स्त्री भार्गस्येयमण् । (वामनहाटि)वृक्षभेदे राजनि० ।

भार्य्य पु० भर्गस्य गोत्रापत्यं गर्गा०यञ् । शङ्खगोत्रे नृपभेदे भाग० ६।२१।२४ ।

भार्य्या स्त्री भृ-ण्यत् । १विधिनोढायां स्त्रियाम् २स्त्रीमात्रे ३भरणीयमात्रे त्रि० । भार्य्याशब्दस्य यूपाङ्गवनीयादिवत् अलौकिकसंस्कारसहितस्त्रीबोधकः । तस्याः गुणदोषा यथा "सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रियंवदा । सा भार्य्या या पतिप्राणा सा भार्य्या या पतिव्रता । नित्यस्नाता सुगन्धा च नित्यञ्च प्रियवादिनी । अल्पभुक् स्वल्पभाषी च सततं सद्गुणैर्युता । सततं धर्मशीला सततञ्च पतिप्रिया । सततं प्रियवक्त्री च सततं भर्तृकामिनी । स्निग्धदेवक्रियायुक्ता सर्वसौभाग्यवर्द्धिनी ।

यस्येदृशी भवेद्भार्य्या देवेन्द्रो न च मानुषः"।
"यस्य भार्य्या विरूपाक्षी कामुका कलहप्रिया। उत्तरोत्तरवादा स्यात् सा जरा न जरा जरा। यस्य भार्य्या चितान्यस्य परवेश्माभिकाङ्क्षिणी। कुक्रिया लक्षलक्षा च सा जरा न जरा जरा। यस्य भार्य्या गुणज्ञा च भर्त्तारमनुगामिनी। अल्पाल्पेन तु सन्तुष्टा सा प्रिया न प्रिया प्रिया। दुष्टा भार्य्या गृहे नित्यं भृत्याश्चोत्तरदायकाः। सर्पे च गृहे वासो मृत्युरेव न संशयः। यावत्तु मित्रं जानीयात् युद्धे शूरं वने शुचिम्। भार्य्यां च विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम्"। गारुडे १०८।१०९ अ०। बृहस्पतिरुवाच "यस्य नास्ति सती भार्य्या गृहेषु प्रियवादिनी। अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्। गुणीना सुन्दरी शान्ता सता यस्य गृहोदरात्। अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्। भावानुरक्ता वनिता हृता यस्य च शत्रुणा। अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्। दैवेनापहृता यस्य पतिसाध्वी पतिव्रता। अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्। यस्य माता गृहे नास्ति भार्य्या चाप्रियवादिनी। अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्। प्रियाभूम्यं गृहं यस्य पूर्णं श्रीधनबन्धुभिः। अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्। भार्य्याशून्या वनसमाः सभार्य्याश्च गृहा गृहाः। गृहिणी च गृहं प्रोक्तं न गृहं गृहमुच्यते। अशुचिः स्त्रीविहीनश्च देवे पैत्रे च कर्मणि। यदङ्गं कुरुते कर्म न तस्य फलभाग्भवेत्। दाहकशक्तिहीनश्च यथा मन्दो हुताशनः। प्रभाहीनो यथा सूर्य्यः शोभाहीनो यथा शशी। शक्तिहीनो यथा जीवो यथात्मा च तनुं विना। विनाधारं यथाधेयो यथेशः पशुं विना। न च यज्ञो यथा यज्ञः फलदां दक्षिणां विना। कर्मिणे च फलं दातुं क्षमयोमूलमेव च। विना स्वर्णं स्वर्णकारो यथाऽशक्तः स्वकर्मणि। यथाऽशक्तः कुलालश्च मृत्तिकाञ्च विना द्विजाः!। तथा गृही न शक्तश्च सततं सर्वकर्मणि। भार्य्यामूलाश्च पुत्राश्च भार्य्यामूला गृहाश्रिया। भार्य्यामूलं सुखं शश्वद् गृहस्थानां गृहे सदा। भार्य्यामूलो महादर्षः भार्य्यामूलञ्च मङ्गलम्। भार्य्यामूलश्च संसारो भार्य्यामूलश्च सौरतम्। यथा रथस्य दक्षिणो गृहिणाञ्च तथा गृहम्। सारथिस्तु यथा तेषां गृहस्थानां तथा प्रिया। सर्वरत्नप्रधाना च स्त्रीरत्नं दुष्कुलादपि। सा गृहीता गृहस्थेनेत्याह कमलोद्भवः। यथा जलं विना पद्मं पद्मं शोभां विना यथा। तथैव च गृहं शश्वद् गृहिणां गृहिणीं विना"। ब्रह्मवै०पु० प्र० ख० ५६ अ०। "तोषयेत् सततं भार्य्यां विधिवत् पाणिपीडिताः। तासां तुष्टा तु कल्याणमकल्याणमतोऽन्यथा। सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च। यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्। यया विरूक्ष्यते स्वामी सौभाग्यमदेनया। क्षमतीसङ्गमं कर्तुं सा स्यादेनसा भवान्तरे। इहापि लोकेऽवाच्यत्वमसर्मज्ञापि विन्दति। न च विशेत्कुलं स्वामिकुलं तस्याः प्रशोभते। विरूक्ष्यमाणे पत्यौ यत् सपत्न्या वा प्रवर्त्तते। क्षतीव दुःखं भवति तदकल्याणकृत्तयोः" कालिकापु० २० अ०।

भार्य्याट पु० भार्य्यां तद्दानमटति अट् कर्म० उप० स०। अन्यस्मै स्वभार्य्यादानार्थं गन्तरि त्रिका०।

भार्य्याटिक पु० भार्य्यया व्याटो मतिः प्रयोजनमस्य ठक्। १स्त्रीजिते २हरिणभेदे च मेदि०।

भार्य्याद पु० भार्य्यां भार्य्यमृच्छति ऋ उच्। १गौलभेदे २हरिणभेदे। भार्य्यां परभार्य्यामृच्छति ऋ-उच्। ३अनियोगेन परभार्य्यागामिनि च मेदि०।

भार्य्याहन्त पु० भार्य्यैव प्रियत्वात् हन्तो यस्य। यतकृत्। [जड़भार्य्यके राजनि०।

भार्य्यीढ़ पु० ऊढा भार्य्यां येन व्याढिगा० वा परनिपातः।

भाल न० भा-लच्। १ललाटे भ्रुवोरूर्द्ध्वभागे २तमसि मेदि०।

भालकृत् पु० गोत्रप्रवर्षिभेदे प्रवराध्यायः।

भालचन्द्र पु० भाले चन्द्रोऽस्य। १शिवे २गणेशे ३दुर्गायां स्त्री

भालदर्शन न०भाले दृश्यते कर्मणि ल्युट्। १सिन्दूरे शब्दच० भाले दर्शनं नेत्रमस्य। २कपाललोचने शङ्करदेवे हेमच०।

भालदृश् पु० भाले दृगस्य। त्रिनयने शङ्करदेवे हेमच०।

भालनेत्र पु०भाले नेत्रमस्य। १शिवे। भाललोचनादयोऽप्यत्र। २त्रिनयनायां दुर्गायां स्त्री।

भालाक्ष पु०भालस्थेवाक्षो यस्य भाले अक्षो यस्य वा। १शाकभेदे २करपत्रे ३रक्ते (कराल) ४रोहितमत्स्ये महालक्षण-विशेष ललाटचिह्नयुक्ते ५पुरुषभेदे ६शिवे ७कच्छपे च मेदि०। [उच्चलन०।

भालु पु०भृणाति रोगान् भृ उदसने आलुच् रस्य लः। आदित्ये

भालु(लू)क पुंस्त्री०चु० भल-अवरोधे ण्वुल् ऊक वा। खना-

मख्याते पशुभेदे अमरः पाठान्तरम्। स्त्रियां जातित्वात् ङीष्।

भाल्लवि पु० १सामशाखाभेदे २तदध्येतरि च। "तामेतां भाल्लव्य उपासते" तारण्ड्य ब्रा०२।२।४ "तामेतां परिवर्त्तिनीं विद्युतिम् भाल्लविशाखाध्यायिन उपासते" भा०।

भाल्लू(ल्लु)क पुंस्त्री० भल्लूक+स्वार्थे अण् वा पृषो० ह्रस्वः। जन्तुभेदे भल्लूके स्त्रियां ङीष्।

भाव पु० भावयति चिन्तयति पदार्थान् चु॰भू-अच्। नाट्योक्तौ नानापदार्थचिन्तने १एखिद्यते। भावयति ज्ञापयति हृदयगतम् भू-णिच्-अच्। २हृद्गतावस्थाभेदे मानसविकारे स्थैर्यकव्यादौ व्यभिचारिभावे। ३रत्यादिभावे भेदि० भू-भावे घञ्। साध्यरूपे क्रियारूपे वा ४क्रियारूपे धातोरर्थे। ५रागे ६आशये च ७चेष्टायाम् ८जन्मनि च अमरः ९विभूतौ। कर्त्तरि च। १०आत्मनि ११बुधे १२जन्तौ करणे घञ्। १३गौरविते १४अभिनयभेदे त्रिका०। १५योनौ १६उपदेशे धरणिः। संसारे भवशब्दार्थे च। व्यो० षष्ठे १८बन्धनादितः तत्त्वादि द्वादशभावे तच्छब्दे ३८०२ पृ० तदालयनञ्च दृश्यम्। २०स्त्रीणां यौवनकाले सत्त्वभवाद्यविंशत्यलङ्कारान्तर्गतेऽलङ्कारे प्रथमालङ्कारे। यथा "यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः। अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः। तत्र भावः "निर्विकारात्मके चित्ते भावः प्रथमविक्रिया" इत्यतः प्रभृतिनिर्विकारे मनसि बहुबुद्यमानो विकारो भावः। यथा "स एव सुरभिः कालः स एव मलयानिलः। सेवेयमवला किन्तु मनोऽन्यदिव दृश्यते" सा०द०। भावस्य लक्षणान्तरं यथा "शरीरेन्द्रियवर्गस्य विकाराणां विधायकाः। भावा विभावजनिताश्चित्तवृत्तय ईरिताः पुराणे नाट्यशास्त्रे च द्वयोस्तु रतिभावयोः। समानार्थतया चात्र द्वयमैक्येन लक्ष्यते"। २१पदार्थानां द्वादशविधचेष्टाभेदे तदानयनं फलं च ज्यो०त० उक्तं यथा

"शयनस्योपवेशस्य नेत्रपाणिः प्रकाशनम्। गमनं गमनेच्छा च सभायां वसतिस्तथा। आगमनं भोजनञ्च व्यवलिप्सा च कौतुकम्। निद्रा पदार्थानां भावाश्च द्वादशैते प्रकीर्त्तिताः"। भावानयनक्रमो यथा "यद्भावो विद्यते खेटस्तेन तं परिपूरयेत्। पुनरंशेन संपूर्णं लग्नं तत्र नियोजयेत्। लातदग्धं तथा लग्नमेकीकृत्य सदा बुधैः। रविणा भावलग्नेन शेषं कार्य्यं नियोजयेत्"। अंशेन हतसंख्यया। लब्धं षड्भागं लग्नलवम्। तदुपरि। "विशाखानलतोयानि वैष्णवं भगदैवतं पुष्या पौष्णोडुपः सर्पो लग्नभान्यर्कतः क्रमात्। अजोराशिः। यदा मेषे षड्लवा १एकपूरितषड्संख्याकुः। यदा वृषे षड्लवा २द्विपूरितो षड्संख्याकुः कार्य्यः। लाभायातस्तृतीयकुलक्षष्टत्रिकोणस्थानस्थितपापषड्भागैः निद्रायनभावयोः फलम् "निद्रायाञ्च यदा पापो लाभस्थाने शुभं वदेत्। यदि पापः शुभैर्दृष्टो नाशुभैश्च यदाक्षम। यदि वा शत्रुगेहेऽसौ स्याच्छयने यदि वेक्षितः। तदा नारीसुखं तस्य नाशो भवति निश्चितम्। शुभाशुभैर्यदा दृष्टः शुभषड्वर्गसंयुतः। नारी च लभते तस्य प्रबला च विशेषतः। तृतीयस्थाने स्थितः पापो निद्रायां शयनेऽपि वा। तदा शुभं भवेत्तस्य नात्र कार्य्या विचारणा। तृतीयस्थाने लग्नदृष्टे वा त्रिकोणे वा यदा भवेत्। अपत्यस्य तदा नाशो जायते नात्र संशयः। शुभषड्वो यदा तत्र क्रूरो वा यदि वेक्षितः। तदा प्रबलापत्यस्य नाशो भवति निश्चितम्। कलत्रस्थाने स्थितः पापो निद्रायां शयनेऽपि वा। तदात्मनोऽपरस्याः स्त्रीर्लाभतोऽपरतोऽपि वा। शुभषड्वो यदा तत्र सप्तमस्थानेऽपि संस्थितः। तदा च मरणं तस्य मृत्युस्थाने विशेषतः। पापषड्वैर्यदा दृष्टः शुभो वा शत्रुवीक्षितः। तदा तस्य शिरश्छेदो क्षुरिका परिकीर्त्तितः। एवं क्रमेण बोद्धव्यं षड्भावे बुद्धिना। बलाबलविचारेण जायते च शुभाशुभम्। ज्योतिर्विद्भिः च सर्वेषु परिहारः कृतो मया। शयनादिकभावेषु ज्ञातव्यश्चोपदेशतः। एकादशे वा दशमालये वा धनालये वा यदि वा विलग्ने। पापेन युक्तो न शुभषड्वर्गेऽपि सिद्धिं लभते वदन्ति"। षड्भेदेन दशाभेदे फलं यथा

"मन्दाग्निः पित्तशूली च जायते शयने नरः१। उपवेशे भवेच्छ्लेष्मी श्यामवर्णस्तथा नरः२। नेत्रपाणौ भवेत् क्रूरो लुब्धदोषो भवेन्नरः३। पुण्यवान् धार्मिकश्चैव धनवांश्च प्रकाशने४। गमने च रवेर्जातः कृपणो धनसंयुतः। बहुभाषी क्षमी क्रोधी लुब्धचित्तः सदा भवेत्५। बलाभोक्ता शीघ्रगामी दौर्बाय्युक्तोपवल्लभः। शूरः श्रीमान् सुधीश्चैव गमनेच्छाभवो नरः६। सभायाञ्च रवेर्जातः खलो दाता क्षमी भवेत्। दक्षाकुः पण्डितो धीमान् गुणवान् परिकीर्त्तितः७। आगमने भवेन्मूर्खः क्रूरकर्मा धनवान् अ-

वेत्ट। भोजने भक्तको मांसलुब्धो महाबपुर्बलीट। लत्यलिप्सौ सुन्दरो वाग्मी पण्डितस्टहाधिपः१०। उत्साही च महाभोगी कौतुके च दिवाकरे११। दाता भोक्ता प्रियः पुत्रकलत्राणां न संशयः। लिङ्गे देहे करे चैव गुदे रोगी तथैव च। निद्रायाञ्च भवेद्भानोः क्रोधनो रक्तनेत्रकः"१२। इति रवेः।

"शयने च विधौ क्रोधी दरिद्रो वक्रलम्पटः१। उपवेशे महारोगी धनवांश्च भवेन्नरः२। नेत्रपाणौ नेत्ररोगी शीपदी वक्रभाषकः। क्रूरः खलोऽतिशूरश्च जायते च विधौ तदा३। प्रकाशने निशानाथे धनवांश्च भवेन्नरः। दक्षो बुद्धिमान् दाता च परदारेषु लम्पटः ४। अरोगी वित्तहा चैव क्रूरकर्मा धनान्वितः। शिरोरोगी दन्तशूली जायते गमने विधौ५। नानामतिर्महाक्रोधी सम्पदुक्तो भवेन्नरः। गमनेच्छुविधौ जातो धनहीनो भवेत् तदा६। दाता च धार्मिकश्चैव राजपात्रो भवेत् यदा। सभायाञ्च विधौ नित्यं जायते पुरुषोत्तमः७। नित्यक्रोधी महादुःखी भवेदागमने विधौ८। भोजने च भवेल्लुब्धो भक्तश्च महासुरः९। यो जातो लत्यलिप्सायां गुणवान् धार्मिको भवेत्। बक्रपुत्रो धनी दाता जायते नात्र संशयः१०। कौतुके च भवेद्रोगी नानाविद्यासु तत्परः। उत्साही च महाक्रोधी जायते च सुनिश्चितम्११। निद्रायां दन्तरोगी स्यात् क्लेशपापरुजान्वितः। पुत्रशोकमहादुःखी नित्यं भ्रमति मेदिनीम्"१२। इति चन्द्रस्य।

"शयने च कुजे जातो लक्ष्मीवद्बहिरङ्गकः। अल्पक्रोधी महादक्षः कृपणो जायते नरः१। उपवेशे यदा भौमे जायते च नराधमः। धनवान् क्रूरकर्मा च निष्ठुरो जातिवर्जितः२। नेत्रपाणौ च यो जातोऽक्षिरोगी भवेन्नरः। पुत्रदारधनैर्युक्तो दारिद्र्येणैव दह्यते३। प्रकाशने कुजे जातो धनवान् पण्डितः सुधीः। नारी च म्रियते तस्य प्रथमा च विशेषतः४। गमने च यदा जातः प्रवासी नित्य दुःखितः। शरीरे च भवेद्रोगी कण्ड्वादिकुष्ठदद्रुकः५। प्रवासी गमनेच्छायां गुदरोगी भवेच्च सः। धनहीनः कुकर्मा च जायते क्षितिजस्य च६। सभायाञ्च यदा जातो धार्मिको वक्रलम्पटः। गुणवांश्च महादाता शिरोरोगी भवेद् ध्रुवम्"७। इति भौमस्य। गमने नित्यं दक्षो भवति नान्यथा। कर्णरोगी पित्तशूली जायते च नराधमः८। भोजने भूमिजस्यापि यो जातो मांसलुब्धकः। दृढकायो महाक्रोधी मिथ्योत्साही धनान्वितः९। कुजस्य लत्यलिप्सायां यो जातो धनवान् भवेत्। दाता भोक्ता सदा मानी राजपात्रो भवेच्च सः१०। कौतुके क्षितिजस्यापि जातो भवति पण्डितः। नानाधनेन संयुक्तो वक्रपुत्रो द्विभार्य्यकः११। निद्रायां भूमिपुत्रस्य यो जातो मूर्ख एवः सः। कलहो बान्धवैः सार्द्धं शोकक्लेशरुजान्वितः१२" इति मङ्गलस्य।

"बुधस्य शयने जातो धनवान् क्षुधितः सदा। व्यङ्गच्छेदा भवेद्वापि खञ्जो भवति नान्यथा१। उपवेशे च यो जातः प्रवासी जायते ध्रुवम्। कवितागुणधीयुक्तो गौरवर्णो महाशयः२। नेत्रपाणौ च यो जातः शीपदादिरुजान्वितः। चक्षुरोगी विशेषः स्यात् पुत्रनाशी भवेद्ध्रुवम्३। प्रकाशने भवेज्जातो राजपात्रो धनान्वितः। नानाधनेन संयुक्तो जायते वेदपारगः४। गमने यो नरो जातः प्रवासी नित्यदुःखितः। शरीरे क्षतमाप्नोति नित्यरुग्णो भवेच्च सः५। यो जातो गमनेच्छायां लम्पटो दुष्टचित्तकः। स्त्रीवशो दुष्टभार्य्यश्च स नरो वक्रभाषकः६। सभायाञ्च बुधे जातो मूर्खो भवति पण्डितः। धनवान् धार्मिकश्चैव चिररोगी भवेत्तु सः७। क्रूरः खलो दृढो मूर्खः पापशीलो भवेन्नरः। बुधस्यागमने नित्यं जायते च नराधमः८। भोजने च भवेत् लौल्यं धनहीनो भवेन्नरः। परद्वेषी प्रवासी च शोथगात्रव्यथान्वितः९। यो जातो लत्यलिप्सायां धनवान् पण्डितः कविः। उत्साही च महाक्रुष्टो भुनक्ति सुखमद्भुतम्१०। कौतुके च यदा जातो भवेत् सर्वजनप्रियः। स्त्रीरोगी दृढयुक्तो धनवानल्पसन्धकः११। निद्रायाञ्च यदा जातः सर्वदाल्पैकपात्रताम्। नानारुजैश्च भवाप्नोति रोगशोकजमत्ययम्"१२। इति बुधस्य।

"धनवान् लम्पटः श्यामः स्थूलजङ्घरुजान्वितः। जीवस्य शयने जातो मानवो नात्र संशयः१। उपवेशे गुरौ जातो बक्रभाषी च रोषवान्। पशुघाती महाग्निल्ली शीपदीरोगसंयुतः२। नेत्रपाणौ गुरौ जातः काक्षरोगी धनी भवेत्। क्षतादिश्चरणे नित्यं जायते नात्र संशयः३। गुरोः प्रकाशे धनवान् लिङ्गगुह्यो रुजान्वितः। दक्षो लम्पटः पापी च श्यामवर्णो रुजान्वितः४। सर्पभीतो गुदरुग्णी भवति गमनोन्मुखे। परवित्तेन धनवान् पुमान् भवति

वाक्पतौ५ । गुरोश्च गमनेच्छायां जातो भवति मानवः । शूली धनी प्रवासी च सेवाकर्मणि तत्परः६ । वक्ता दाता च धनवान् राजसेवान्वितो नरः । शूलरोगी भवेल्लग्ने सभायां वाक्पतौ स्थिते७ । धार्मिकस्तीर्थकृन्नानी धनी चागमने गुरोः । परदारेषु संलुब्धो जायते नात्र संशयः । भोजने बहुसौख्याढ्यो मांसलुब्धो महासुरः । कामुकः प्रियवाक्यश्च जायते नात्र संशयः८ । बल्लिपसेः शठो वाग्मी धनवान् सात्त्विकस्तथा । महदैश्वर्यसंयुक्तो जीवस्य च भवेद्वरः१० । कौतुके च गुरोर्जातो धनवान् धार्मिकः सदा । बल्योत्साही महत्सङ्घी भुनक्ति सुखमद्भुतम्११ निद्रायाञ्चैव यो जातश्चक्षुरोगी भवेच्च सः । कृपणो बहुभाषी च दुःखितो भ्रमते महीम्"१२ । इति गुरोः ।

"शुक्रस्य शयने जातो लम्पटो बहुभाषकः । दन्तरोगी महाक्रोधी नीचो भवति नित्यशः१ । उपवेशे तथा जातो बलवान् दाम्भिकः सदा । नित्यप्रवासी रोगी च जायते नीचसंस्थिते२ । नेत्रपाणौ भृगोर्दुःखी रोगशोकसमन्वितः । धनहीनो महारोगी मानवः स्यान्न संशयः३ । भृगोः प्रकाशने जातो विद्याधनसमन्वितः । दाता च धार्मिकश्चैव कीर्त्तिमान् जायते नरः४ । शुक्रस्य गमने जातः पादमूले कलान्वितः । नित्योत्साही महाशिल्पी भवेत्तीर्थगतौ रतः५ । गमनेच्छौ यदा जातो भ्रातृनाशो भवेद्ध्रुवम् । माता च म्रियते तस्य शैशवे व्याधिसंयुतः६ । सभायाञ्च भृगोर्जातो राजपात्रो महाधनी । कुलश्रीलो महादक्षः केवलं शूलरोगवान्७ । भृगोरागमने जातो दुःखितो बहुलम्पटः । दद्रुरोगी पुत्रशोकी जायते च नराधमः । शुक्रस्य भोजने जातो बलवान् दाम्भिकः सदा । महाधनी भवेल्लित्यं वाग्मिज्ञेन विशेषतः८ । यो जातो बल्लिपसायां स वाग्मी जायते ध्रुवम् । पाण्डित्यं कविता चैव वर्द्धते च दिने दिने । यदि चैव भवेच्चोचे मूर्खो भवति निश्चयः । लक्ष्मस्थाने विशेषेण राजपात्रो महाधनी । कामुको बहुकान्तस्य परयोषित्प्रियः सदा । महाकुटो महाबन्धुः कौतुकी च भवेत् सदा । बहुपुत्रकलत्रस्य नानासुखसमन्वितः । नीचे तद्विपरीतः स्यात् दुःखशोकसमन्वितः११ । निद्रायाञ्च भृगोर्जातो भवेद्रोगी च निश्चितम् । नित्यक्लेशी महादुःखी जायते नात्र संशयः । आसवाच्च सुतस्थाने यदि निद्रा भृगोर्भवेत् । तदा सर्वविनाशः स्याद्विष्णुना परिकीर्त्तितम्" १२ । शुक्रस्य ।

"शयने च धनेर्जातो लम्पटो बहुभाषकः । शुक्रस्थाने भवेद्रोगी क्रोधदृष्टिश्च जायते । लग्नात् सप्तमे चैव शयनस्थः शनैश्चरः । तदा नित्यप्रवासी स्याच्चक्षुरुत्थी भवेच्च सः१ । उपवेशे यदा जातः शूलपीडासंयुतः । धनहीनो भवेत् तस्य पीड़ा भवति नित्यशः२ । नेत्रपाणौ यदा जातो मूर्खो भवति पण्डितः । धनवान् धार्मिकश्चैव द्विभार्य्यो बहुभाषकः३ । प्रकाशने च यो जातो राजपात्रो भवेच्च सः । नानागुणेन गुणवान् धार्मिकः पण्डितः शुचिः" "मतान्तरे "जायास्थाने च लग्ने च प्रकाशने यदा शनिः । तदा सर्वविनाशः स्याज्ज्ञातिध्वंसो भवेद् ध्रुवम्४ । गमने च यदा जातः पादमूले कलान्वितः । तीर्थे च गतिमाश्रित्य पुत्रदारैर्विवर्जितः५ । यो जातो गमनेच्छायां शूलपीडासंयुतः । दन्तघाती महाक्रोधी कृपणः परनिन्दकः६ । सभायाञ्च शनौ जातः पुत्रदारधनैर्युतः । सर्वत्र लभते वित्तं नानारत्नसमन्वितम्७ । आगमने यदा जातो महाक्रोधी कलान्वितः । सर्पादिभिश्च संदष्टो भ्रातृनाशी भवेद् ध्रुवमृद । भोजने चैव यो जातो मन्दाग्निश्च महानपि । सर्पोरोगी तथा शूली चक्षूरोगी भवेच्च सः । यो जातो बल्लिपसायां नर्त्तको बहुभाषकः । जीवने दुःखितश्चैव प्रवासी परिदेवकः१० । कौतुके च शनेर्जातो राजपात्रो महाशयः । दाता भोक्ता महादक्षो धार्मिकः पण्डितः शुचिः११ । निद्रायाञ्च शनेर्जातो धनवान् पण्डितः शुचिः । चक्षूरोगी पित्तमूली द्विभार्य्यो बहुपुत्रकः । विशेषतश्च धर्मस्थे कर्मस्थे च कदाचन । यदि दैवाद्भवेच्चिद्रो नाशो भवति निश्चितम् । कर्मनाशो धर्मनाशः क्षुधार्त्तः दुःखितः सदा । नित्यप्रवासी रोगी च कार्य्यनाशः पदे पदे । लग्नमिलगेहे षष्ठे वा सेन्द्रे वा खलगेहे पुनः । तदा सर्वं विधार्य्यञ्च वैपरीत्येन चिन्तनम् । जायायाञ्च सुतस्थाने यदि निद्रा भवेत् पुनः । तदा सर्वं शुभं विद्याद्विष्णुना परिकीर्त्तितम्"१२ । शनेः ।

"शयने च यदा राहोर्जन्म यस्य भवेत् पुनः । तस्य क्लेशो महादुःखं जायते च न संशयः१ । उपवेशे च यो जातः शूलपीडासंयुतः । बहुहानिर्नरेन्द्रस्य पीड़ा भवति नित्यशः२ । नेत्रपाणौ यदा जातश्चक्षुरोगी भवेद् ध्रुवम् । सपत्नजातो महाभीतिर्द्विभार्य्यो बहुभाषकः३ । प्रकाशने च यो जातो धनवान् धा-

र्मिकः पुनः। नित्यप्रवासी चोत्साही सात्त्विको धार्मिकः शुचिः४। गमने चैव यो जातो नानारोगैर्धनक्षयः। दम्भाघाती महाक्रोधी विगुनः परनिन्दकः५। यो जातो गमनेच्छायां बहुपुत्रो महाधनः। पण्डितो गुणवान् दाता जायते च नरोत्तमः६। सभावाच्च यदा जातः कृपणो धनसंयुतः। नानागुणेन गुणवान् धार्मिकः पण्डितः शुचिः७। आगमने च यो जातो लम्पटो बहुभाषकः। सुहृद्बन्धुविनाशः स्यान्नानाक्लेशश्च जायतेऽ। भोजने च महादुष्टो मन्दाग्निश्च कृशान्वितः। कृपणः कटुवाक्यश्च दुःखितो नित्यमेवकः९। यो जातो रुग्विक्षिप्तायां खञ्जो भवति नान्यथा। पुत्रनाशो भवेत् तस्य जायानाशो भवेद् ध्रुवम्१०। कौतुके च यदा जातो गुणैः सर्वैः समन्वितः। नानाधनेन धनवान् राजसेवासु तत्परः। यदि दैवाद् भवेत् रुग्णो खण्डहीनो वा कदाचन। तदा सर्वं वैपरीत्यं जायते च न संशयः११। यो जातो राहुनिद्रायां दुःखितः सर्वतः क्षयी। नानास्थाने गतो वापि धनपुत्रविवर्जितः। जायायाश्च सुतस्थाने यातो निद्रां विधुन्तुदः। तदा सर्वं वैपरीत्यं शतजायासमन्वितः१२। राहोः एवं केतूनाम्।

२२वैशेषिकोक्तेषु द्रव्यगुणकर्मसामान्यविशेषसमवायात्मकेषु षट्सु पदार्थेषु "द्रव्यादयः पञ्च भावा अनेके समवायिनः" भाषा०"तथा हि पदार्थोद्विविधं भावोऽभावश्च। तत्र भावाः षट् सप्तमस्याभावत्वकीर्तनात्" सि०मु०। अभाव एक इति पदार्थाः सप्त। तत्र द्रव्यादिपञ्चकस्य अनेकत्वविशिष्टं भावत्वं लक्षणं समवायस्य भावत्वेऽपि एकत्वात् न तत्र प्रसङ्गः। तत्र च द्रव्यादिषट्कान्यतमत्वम् भावत्वमिति सि०मु०। सत्तासम्बन्धित्वमिति दिनकरप्रकृतयः। सम्बन्धित्वं समवाय सम्बन्धेन तादात्म्येन एकार्थसमवायेन वा बोध्यम्। तेन द्रव्यादित्रिके समवायेन, सत्तायां तादात्म्येन विशेषेषु एकार्थसमवायेन, समवाये स्वात्मकसमवायेन स्वरूपसम्बन्ध विशेषेषु सत्तासम्बन्धसत्त्वाभाप्रसङ्गः"। 'भावो यथा 'तथाऽभावः कार्य्यवत्कारणं सतः'मुक्तना०।

भू-चिन्तायाम् करणे घञ्। २१अन्तःकरणे "भावदुष्टो न शुध्यति" व्या०त०।२४तन्त्रोक्ते पञ्चाचारादित्रये "भावस्तु त्रिविधो देवि! दिव्यवीरपशुक्रमात्। दिव्यवीरो महाभावो अधमः पशुभावकः। वैष्णवः पशुभावेन पूजयेत् परमेश्वरम्। शक्तिमन्त्रे वरारोहे! पशुभावो भयानकः। दिव्ये वीरे महेशानि! जायते सिद्धिरुत्तमा"।

वाक्येन साध्यरूपायाः क्रियायाः भावत्वमुक्तं यथा "तद् यत्रोभे भावप्रधाने भवतः पूर्वापरीभूतं भावमाख्याते नाचष्टे व्रजति पचतीत्यु पक्रमात्प्रत्ययपर्यन्तं, भूते" सत्त्वभूतं सत्त्वनामभिर्व्याप्य षड्भिरित्यादिभिः सत्त्वानामुपदेशो गौरश्वः पुरुषो हस्तीति भवतीति भावस्य,आस्ते शेते व्रजति तिष्ठतीति"। आलङ्कारिकोक्तभावस्य द्विविधता सञ्चारिव्यभिचारिभेदात् तत्तच्छब्दे दृश्यम्। २५सङ्गीतसङ्कृतपदार्थद्योतकहस्तादिचेष्टाभेदे च। "यस्य च क्रियया क्रियान्तरं लक्ष्यते स भावः" इति व्याकरणपरिभाषिते २५पदार्थे च तत्र च सप्तमीव्याकरे स्थितम्। भवतीति भू-कर्त्तरि घञ्। २७उत्पत्तियुते षड्विकारयुते च पदार्थे भवविकारशब्दे दृश्यम्। २८सांख्यमतसिद्धेषु धर्माधर्मादिषु बुद्धिधर्मेषु "संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" सा०का०,"भावैरधिवासितं धर्माधर्मज्ञानाज्ञानवैराग्याविराग्यैश्वर्याणैश्वर्याणि भावास्तदन्विता बुद्धिः तदन्वितश्च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा सुरभिचन्दनसम्पर्कादस्त्रं तदामोदवासितं भवति तस्माद्भावैरेवाधिवासितत्वात् संसरति" तत्त्वकौ०। तेषां करणाश्रितत्वं कार्य्याश्रितत्वञ्च दर्शितं यथा "सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्मादयः। दृष्टाः करणाश्रयिणः कार्य्याश्रयिणश्च कललाद्याः" सा० का० "वैकृतिकानैमित्तिकाः प्राकृतिकाः, स्वाभाविकाः सांसिद्धिकाः भावाः यथा सर्गादावादिविद्वान् भवत्यु कपिञ्जलो महासुनिर्धर्मज्ञानवैराग्यैश्वर्यसम्पन्नः प्रादुर्बभूवेति स्मरन्ति। वैकृतिकाश्च भावाः असांसिद्धिकाः उपायानुष्ठानोत्पन्नाः यथा प्राचेतसप्रभृतीनां महर्षीणाम्। एवमधर्मज्ञानावैराग्यानैश्वर्याण्यपि। कार्य्यं शरीरं तदाश्रयिणस्तस्यावस्थाः कललबुदबुदमांसपेश्यौकरणाङ्गप्रत्यङ्गव्यूहाः गर्भस्थस्य,ततो निर्गतस्य बालस्य बाल्यकौमारयौवनवार्द्धकानीति" त० कौ०। २६तत्तत्पदार्थासाधारण्ये धर्मे च "भावे त्वतलौ" पा०। भावशब्देनासाधारणधर्म उच्यते। स च तद्भिन्नवृत्तित्वे सति सकलगोव्यक्तिवृत्तिधर्मः यथा गोत्वमित्यादौ भावार्थकत्वप्रत्ययेन भवेतरावृत्तित्वे सति सकलगोव्यक्तिवृत्तिधर्मो बोध्यते।

भावक पुं०भाव+स्वार्थे क।१भावशब्दार्थे मनोविकारे हृद्वा०।

भू-भावि-वा ण्वुल्। २सत्तासम्बन्धे २७तृपादके च त्रि०।

भावत त्रि० भू-शतृ भवत् तस्येदम् अण्। भवत्पादमानसम्बन्धिनि स्त्रियां ङीप्।

भावत्क त्रि० युष्मदर्थकात् भवच्छब्दात् इदमर्थे पक्षे ठक्। भवत्सम्बन्धिनि पक्षे छस्। सित्त्वात् पदत्वम्। भवदीय तत्रार्थे त्रि०।

भावन न० भू-णिच्-ल्युट्। (चालना)१फलभेदे २विष्णौ पु०। भावे ल्युट्। ३अधिवासने ४चिन्तायाम् ५ध्याने ६पर्य्यालोचनायां वैद्यकोक्ते ७औषधसंस्कारभेदे। भावि-यच्। "व्यापारो भावना सैवोत्पादना सैव च क्रिया" उक्ते ८भविसुर्भवनानुकूलव्यापारभेदे स्त्री भट्टशब्दे दृश्यम्। अनुभवजन्ये स्मृतिहेतौ ९संस्कारभेदे स्त्री। "संस्कारभेदो वेगोऽत्र स्थितिस्थापकभावने" "स्मृतीन्द्रियोऽसौ विज्ञेयः क्वचित् स्यन्देऽपि कारणम्। भावनाख्यस्तु संस्कारो जीवधृत्तिरतीन्द्रियः। उपेक्षानात्मकत्वस्य निश्चयः कारणं भवेत्। स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते" भाषाप०। "भावनाख्य इति। तस्य संस्कारस्य, उपेक्षात्मकज्ञानात् संस्कारानुत्पत्तेरुपेक्षानात्मकनिश्चय इत्युक्तम्। तेनोपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुतेति भावः। नन्वेवं स्मरणं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वं तेनोपेक्षादिदशायां न स्मरणम् इत्यस्य संस्कारं प्रति ज्ञानत्वेनैव हेतुतास्त्विति चेन्न विनिगमनाविरहेणापि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात्। किञ्च उपेक्षाव्यतिरिक्ते संस्कारकल्पनाया गुरुत्वात् संस्कारं प्रति उपेक्षान्यत्वेन हेतुतायाः सिद्धत्वात्। तत्र प्रमाणं दर्शयति। स्मरणे इति। क्षणौ संस्कारः स्मरणं प्रत्यभिज्ञानञ्च जनयति। अतः संस्कारः कल्प्यते। विना व्यापारं पूर्वानुभवस्य स्मरणादिजननासामर्थ्यं स्वस्वव्यापारान्यतराभावे कारणत्वासम्भवात्। न च प्रत्यभिज्ञां प्रति तत्तत्संस्कारस्य हेतुत्वेन प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम्। अप्रयोजकत्वात्। परे तु अनुद्बुद्धसंस्कारात् प्रत्यभिज्ञानुदयादुद्बुद्धसंस्कारस्य हेतुत्वापेक्षया तत्तत्संस्कारस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्पन्त इत्याहुः" सि०मु०।

भू-चिन्तायां युच्। १०चिन्तायां स्त्री। चिन्ता च मानसवृत्तिभेदः सा च त्रिविधा यथोक्तं विष्णुपु०६अं ७अ०। "त्रिविधा भावना विप्र! विश्वनेतन्निबोधत। ब्रह्मसंज्ञा कर्मसंज्ञा च तथा चैवोभयात्मिका। ब्रह्मभावात्मिका मुक्तेः कर्मभावात्मिका परा। उभयात्मिका तथैवान्या त्रिविधा भावभावना। सनन्दनादयो ब्रह्म भावभावनया युताः। कर्मभावनया चान्ये देवाद्याः स्थावरान्ताः। हिरण्यगर्भादिषु च ब्रह्मकर्मात्मिका द्विधा। बाधाधिकारयुक्तेषु विद्यते भावभावना"। षडङ्गशब्दर्शितं बौद्धमतसिद्धभावनाचतुष्टयञ्च दृश्यम्। चु० भू-णिच्युच्। २नियोजादिना चूर्णद्रव्यस्य मिश्रीकरणे चूर्णद्रव्यस्य नियोजादिना संस्कारभेदो भावना तत्प्रमाणञ्चोक्तं भावप्र० यथा

"द्रवेण यावन्मानेन चूर्णं सर्वं प्लुतं भवेत्। भावनायाः प्रमाणन्तु चूर्णे प्रोक्तं भिषग्वरैः"।

भावबोधक पु०भावस्य रत्नादेर्बोधकः ज्ञातापकः। रत्नादिज्ञापके १अञ्जनभङ्गादिदेहचेष्टाविशेषे २शुक्रशोणितादौ च अमरः

भावयु त्रि० भावमिच्छति क्यच् उनु वेदे नि०। भावेच्छौ। ऋ०१०।८६।१५। [ङीप्।

भाववत् त्रि० भाव+रसा०मतुप् मस्य वः। भावयुते स्त्रियां ङीप्

भावविकार पु० ६त०। यास्कोक्ते उत्पत्तियुतपदार्थस्य जन्मादिषु षट्सु धर्मेषु "षड्भावविकारा भवन्तीति वार्ष्यायणिः, जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति, जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधति, अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणं विपरिणमत इत्यप्रच्यवमानस्य तत्त्वादिकारं, वर्धत इति स्वाङ्गाभ्युच्चयं, सांयौगिकानां वार्थानां, वर्धते विजयेनेति वा वर्धते शरीरेणेति वा, अपक्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमं, विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति"।

भावदत्त पु०भावे दत्तः प्रदत्तः भावो दत्तो जातो यस्माद्वा। सृष्टिकर्त्तरि ब्रह्मणि "अनुष्टुप् च भवेच्छन्दो भावदत्तस्तु दैवतम्" स्मृतिः।

भावाट पु० भावं भावेन वा अटति अट-अण् अच् वा। १भावके २माधौ २कामुके ४भटे ५निवेशे च मेदि०। भावे घञ् ६त०। ६भावप्राप्तौ।

भावानुगा स्त्री भावं पदार्थमाशयं वानुगच्छति गम-ड। १छायायाम् २अभिप्रायानुगन्तरि त्रि० राजनि०।

भावालीना स्त्री भावे पदार्थे आलीना। छायायां राजनि०

भाविक त्रि० भावेन निर्वृत्तम् ठक्। १भावसाध्ये पदार्थे २अर्थालङ्कारभेदे ४०१ पु० दृश्यम्।

भावित त्रि० चु०भू-क्तौ चिन्तायां सिद्धणे वा कर्मणि क्त। १वासिते २प्राप्ते मेदि०। ३शुद्धे ४चिन्तिते ५सिद्धिते वैद्यकोक्तनियोजादिना सिद्धिते ६चूर्णादौ च। वोजण० उक्ते अव्यक्तानेकवर्णसमीकरणेन ७अस्पष्टीकरणे।

भाविद् त्रि० भू–सत्तायां णिच्–क्विन् । लोकान्तरे उज्ज्वल० ।

भाविन् त्रि० भू–णिनि । १भविष्यत्पदार्थे "भाविनि भूतवदुपचारः" न्यायः । स्त्रियां ङीप् । भावो रत्नादिभावः सात्त्विकभावो वाऽस्यास्य एकाचरलदन्तत्वेऽपि वाहुल्यार्थं इनि ङीप् । २बहुभावान्वितायां स्त्रियाम् भरतः श्लोमात्रे राजनि० । ३गन्धर्वकन्याभेदे स्त्री मार्कपु०१२८ तत्र भाविनीति पाठान्तरम् ।

भावुक न० भू–उकञ् । १सङ्गते २तद्वति त्रि० अमरः । ३भावनायुते त्रि० हेमच० । "सज्जरहो रसिका भुवि भावुकाः" इति भाग०१।१।२ ।

भाव्य न० भू–आधारे यत् ।१अवश्यम्भवितव्ये । भू–कर्त्तरि यत् भव्य स्वार्थे अण् । २भव्यशब्दार्थे "भावीत्यवश्यं यत् भाव्यं तत्र ब्रह्मा न बाधकः" कालि०पु०२८अ० ।

भाष वचने भ्वा० आत्म० सक० सेट् । भाषते अभाषिष्ट । ऋदित् अङि न हृस्वः । उपसर्गपूर्वकस्तु तत्तदुपसर्गयोगात्तत्तदर्थयुक्तकथने । परि+भाष्यकारमङ्गीकृते ।

भाषण न० भाष–भावे ल्युट् । कथने अमरः । सा०द० उक्ते निर्वहणाङ्गभेदे "सन्धिर्विरोधो यत्नम्" इत्युपक्रमे "भाषणं पूर्ववाक्यस्य" इत्यादिनोद्दिश्य लक्षितं यथा "दानादानादि भाषणम्" ।

भाषा स्त्री भाष–अ । १वाक्ये २संस्कृतादिवाक्ये च "यद्वादश-भाषावारविलासिनीभुजङ्गः" इति सा०द० । भाषाभेदास्तु प्राकृतशब्दे ४५४६ पृ० दर्शिताः । व्यवहारे ३प्रतिज्ञाहेतुकथनवाक्ये "यदावेदयते राज्ञे तद्भाषेत्यभिधीयते" इति स्मृतिः । पूर्वपक्षशब्दे ४४०६ पृ० दृश्यम् । ४रागिणीभेदे हला० ।

भाषासम न० शब्दालङ्कारभेदे यथोक्तं सा०द० १०परि० । "शब्दैरेकविधैरेव भाषासु विविधासपि । साम्यं यत्र भवेत् सोऽयं भाषासम इतीष्यते" यथा "मञ्जुलमाम्रमञ्जरे कलगम्भीरे विहारसरसीतीरे । विरसापि केलिकीरे किमाह्वि ! धीरे च गच्छसारसगीरे" एष श्लोकः संस्कृतप्राकृतसौरसेनीप्राच्यावन्तीनागरापभ्रंशेष्वेकविध एव" ।

भाषापाद पु०कर्म० । चतुष्पादव्यवहारे प्रतिज्ञाहेतुके वाक्यरूपे प्रथमेऽङ्गे पूर्वपक्षशब्दे ४४०६ पृ० दृश्यम् ।

भाषिक त्रि०भाषया निर्वृत्तः ठञ् । वेदादिपरिभाषानिर्वृत्ते निरु०२।२ । [काल्या०श्रौ०१।१।१८।१०। भाष्ये दृश्यम् ।

भाषिकस्वर पु० कर्म० । मन्त्रेतरवेदभागरूपब्राह्मणे पठितस्वरे

भाषित न०भाष–भावे–क्त । १कथने कर्मणि–क्त । २कथिते त्रि० "भाषितपुंस्कात्" पा० भाषित इव भाषितः पुमान् येन कण्

भाष्य न० "सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो जनाः" इत्युक्तलक्षणे १सूत्रव्याख्यायन्थभेदे "फणिभाषितभाष्यटीकिका" नैष० । २कथनीये त्रि० ।

भाष्यकार पु० भाष्यं करोति कृ–ण्वच् उप०स० । पाणिन्यादिसूत्रभाष्यकारके पतञ्जलिप्रभृतौ भाष्यकारादयश्च सूत्रभेदे विभिन्ना यथा पाणिनिसूत्रस्य पतञ्जलिः" ब्रह्मसूत्रस्य शङ्कररामानुजादयः । योगसूत्रस्य वेदव्यासः, सांख्यसूत्रस्य विज्ञानभिक्षुः, गौतमसूत्रस्य वात्स्यायनः, कणादसूत्रस्य प्रशस्तपादः । मीमांसासूत्रस्य शबरस्वामी इत्यादयः । "व्यूहञ्च भाष्यकारश्च कथाग्रीयधियावुभौ । नैव शब्दाम्बुधेः पारं किमन्ये लङ्घनक्षमाः" दुर्गासिंहः नैव न ऐव गतवन्तावित्यर्थः । क्विप् हृत० भाष्यं हृदयम् ।

भास दीप्तौ भ्वा०व्यात्म०सक०सेट् । भासते अभासिष्ट । चङि षा हृस्वः । अबीभसत् त अबभासत् त । ज्ञानविषयत्वे च "प्रकारोभूय भासते" । [मिदि० इच्छायां धरणिः ।

भास् स्त्री भास–क्विप्–भावे क्विप् ।१प्रभायाम् अमरः २लतायां

भास पु० भास–भावे घञ् । १दीप्तौ विश्वः आधारे घञ् २गोष्ठे । कर्त्तरि अच् । ३कुक्कुरे ४शुक्रे च पृषोदरादित्वात् पक्षिखगे हेमच० "यज्ञार्थमदद्त वसु भासः काकोऽथवा भवेत्" स्मृतिः । ६कविभेदे "अग्नौ हासः कविकुलगुरुः कालिदासो विलासः" प्रसन्नरा० ।

भासद् न०भसदः कटिदेशस्थेदम् अण् । नितम्बे भा०१८।१६२ भाष्यम् । यजु०२५।६ वेददोषे तु भासेते भास–बा०क्विप् । भासद् दान्तः तत्रार्थे इत्युक्तम् ।

भासन्त पु० भास–झच । १सूर्य्ये २चन्द्रे उषा० ३नक्षत्रे हेमच० । ५सुन्दराकारे त्रि० ६भासखगे स्त्री० ङीप् । ७तारायां स्त्री गौरा० उषा० ।

भासस् न० भास–भावे असिच् । दीप्तौ त्रिरूपकोषः ।

भासाकेतु पु० भास–भावे अ । भासा दीप्तिः ६त० । दीप्तिकारके वह्नौ भृ० १०।२०।१ ।

भासापुर न० पुरभेदे दृ०स० १६अ० ।

भासु पु० भास–उण् । सूर्य्ये त्रिका० ।

भासुर त्रि०भास–उरच् । १दीप्तियुक्ते २स्फटिके च त्रिका०३वीरे पु० धरणिः ४कुष्ठौषधे न०जटा० । [(विभाति) राजनि० ।

भासुरपुष्पी स्त्री० भासुराणि पुष्पाण्यस्याः । दुग्धिकायाम्

भास्कर पु० भासं करोति भास+कृ–टच कस्क० । १सूर्य्ये

२अग्नौ मेदि० २वीरे धरणिः। ४अर्कवृक्षे ५सिद्धान्तशिरोमणिग्रन्थकर्तृपण्डिते। ६स्वर्णे न० राजनि०। ७महादेवे पु० भा० अनु० ८अ०। ८भास्करेण कृते पक्कलवणभेदे न० चक्रदत्तः। भास्करलवणशब्दे दृश्यम्।

भास्करद्युति पु० भास्करे द्युतिरस्य। १विष्णौ पु० "चन्द्रांशुभास्करद्युतिः" विष्णुस०। "यदादित्यगतं तेज" इत्युक्तेस्तस्य तथात्वम्। ६त०। २सूर्य्यस्य द्युतौ स्त्री।

भास्करप्रिय पु० ६त०। पद्मरागमणौ (चुनि)।

भास्करलवण न० भास्करनिर्मिते लवणभेदे "पिप्पली पिप्पलीमूलं धन्याकञ्चाजमोदकम्। सैन्धवञ्च विड्ञ्चैव पत्रं तालीशकेसरम्। एषां द्विपञ्चिकान् भागान् पञ्चसौवर्चलस्य च। मरिचाजाजिशुण्ठीनामेकैकस्य पलं पलम्। त्वगेले चार्द्धभागे च खासद्राक्षकुड्यदयम्। दाडिमात् कुड्यञ्चैव द्वे पले चास्लवेतसात्। एतच्चूर्णीकृतं श्लक्ष्णं गन्धाढ्यमसुतोपमम्। लवणं भास्करं नाम भास्करेण विनिर्मितम्। अग्नतस्तु हितायोक्तं वातश्लेष्मामयापहम्। वातगुल्मं निहन्त्येतद्दातशूलानि यानि च। तक्रमस्तुसुरासोधुशुक्तकाञ्जिकयोजितम्। जाङ्गलानान्तु मांसेन रसेषु विविधेषु च। मन्दाग्नेरग्नतः श्रेष्ठो भवेदाशु पावकः। अर्शांसि च कफोदोषकृतान्यभगन्दरान्। कृच्छ्रोगमामदोषांश्च विविधानुदरस्थितान्। प्लीहानमश्मरीञ्चैव श्वासकासोदरक्रिमीन्। विशेषतः शर्करादीन् रोगान्नानाविधांस्तथा। पाण्डुरोगांश्च विविधान् शमयत्यग्निर्यथा" चक्रद०।

भास्करावर्त्त पु० सुश्रुतोक्ते शिरोरोगभेदे "सूर्य्योदयं वा प्रतिमन्दमन्दमभिभवं रुक् सहसैति गाढम्। विवर्द्धते चांशुमता सहैव सूर्य्यास्तकाले विनिवर्त्तते च। शीतेन शान्तिं लभते कदाचिदुष्णेन जन्तुः सुखमाप्नुयाच्च। तं भास्करावर्त्तमुदाहरन्ति सर्वात्मक कष्टतमं विकारम्"। [इसनिभेदे भा० शा० ४७ अ०।

भास्करि पु० भास्करस्यापत्यम्० इञ्। १वैवस्वते मनौ २कर्णे च।

भास्करेष्टा स्त्री ६त०। आदित्यभक्तायां राजनि०।

भास्मन त्रि० भस्मनो विकारः अण् मनन्तत्वात् न टिलोपः। भस्मविकारे।

भास्मायन पु० भस्मनो गोत्रापत्यम् फक्। भस्मन्गोत्रापत्ये ततः स्वार्थे अण् स्त्रियां ङीप् भास्मायन्या तत्रार्थे स्त्री

भास्वत् पु० भास्+अस्त्यर्थे मतुप् मस्य वः। १सूर्य्ये २अर्कवृक्षे २वीरे मेदि० ४दीप्ते त्रि० हेमच०। स्त्रियां ङीप् सा च ८नद्यां व०व० ६जघसि च स्त्री निघण्टुः। ७ज्योतिषनिबन्धभेदे स्त्री यत्र सूर्य्यग्रहणादिनिरूपणमस्ति।

भास्वर त्रि० भास-वरच्। दीप्तियुक्ते २सूर्य्ये ३अग्नौ मेदि० ४दिने ५अर्कवृक्षे च पु०। ६कुष्ठौषधे (कुड़) न० राजनि० ७स्कन्दानुचरभेदे पु० भा० श० ४६ अ०।

भिक्ष सौभे आभाषोक्तौ सक० याचने दिक० क्षेपे अक० भ्वा० आत्म० सेट्। भिक्षते अभिक्षिष्ट विभिक्षे।

भिक्षा स्त्री भिक्ष-अ। १याच्ञायाम् अमरः। २सेवायां ३भृतौ च मेदि०। उपचारात् ४भिक्षिते वस्तुनि। तत्र ब्रह्मचारिभिक्षाप्रकारः ब्रह्मचर्य्यशब्दे ४५६६ पृ० उक्तः। तस्या दानावश्यकत्वम् प्रमाणं च आ० त० मार्कण्डेयोक्तं यथा "भोजनं हन्तकारं वा अन्नं भिक्षामथापि वा। अदत्त्वा नैव भोक्तव्यं यतात्मविभवमात्मनः। आसप्तदानाद्भिक्षा स्यात् अन्नं आसचतुष्टयम्। अन्नाच्चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः"। आसं पलमात्रमिति नव्य वर्द्धमानः"। भिक्षाया दानपात्राणि उक्तानि विष्णुपु० "दद्याच्च भिक्षात्रितयं परिव्राट्ब्रह्मचारिणाम्। स्वेच्छया तु नरो दद्यात् विभवे सत्यवारितम्। इत्येतेऽतिथयः प्रोक्ताः संन्यासा भिक्षुकाश्च ये। चतुरः पूजयन्नेतान् न्यायलब्धात् प्रसच्यते"। चकारः पूर्वोक्तातिथिभोजनेन सप्तत्वार्थः। सन्न्यासिभिक्षादाने तु "मृतिक्लेशे जलं दद्यात् भैक्ष्यं दद्यात् पुनर्जलम्। तद्भैक्ष्यं मेरुणा तुल्यं तज्जलं सागरोपमम्"। विष्णुधर्मोत्तरे "चाण्डालो वाथ पापो वा शत्रुर्वा पितृघातकः। देशकालात्ययगतो भरणीयो मतो मम" विष्णुपु०। "व्याधितस्याकृषीवलस्य कुटुम्बात् प्रच्युतस्य च। अध्वानं वा प्रपन्नस्य भिक्षाचर्य्यं विधीयते"। अत्र भिक्षाद्यदाने भोजननिषेधात् मनुष्ययज्ञस्य नित्यत्वात् अतिथिप्राप्तेरनित्यत्वात् यज्ञसिद्धये ब्रह्मणमात्राय भिक्षादिदानमावश्यकम्। अतएव बौधायनः "अकृतकृच्छ्रान्नेभ्योऽन्नं दद्यात् आमूलफलशाकेभ्यः अथैव मनुष्ययज्ञमाप्नोति"। विष्णुः भिक्षुकाभावे चान्नं गोभ्यो दद्यात् अग्नौ वा क्षिपेत्"।

भिक्षाटन न० भिक्षार्थमटनम्। भिक्षार्थं गमने तस्य सायं प्रातश्च निषेधो यथा "सायं प्रातर्न्दुहारं भिक्षार्थं नावचक्षयेत्" कूर्मपु० १५ अ०।

भिक्षादि पु० "समूहार्थे भिक्षादिभ्योऽञ्" पा० उक्ते अण्प्रत्ययनिमित्ते ब्रह्मसदे ब च गणो यथा "भिक्षा भार्मणो

क्षेत्र करीष अङ्गार चर्मन् सहस्र युयुति पदादि पङ्क्ति अयर्वन् दक्षिणा भत विषय श्रोत्र" पा०ग० ।

भिक्षापात्र न० भिक्षाहरणार्थं पात्रम् शा०त० । १भिक्षाया आहरणार्थे पात्रे भिक्षुशब्दे दृश्यम् । २भिक्षादानसंप्रदाने ब्रह्मचार्यादौ भिक्षाशब्दे दृश्यम् । [२पैशुन्ये हारा०।

भिक्षाशित्व न० भिक्षाशिनो भावः त्व । १भिक्षाशिनोभावे

भिक्षाशिन् त्रि० भिक्षालब्धमश्नाति अश-णिनि । भिक्षालब्धोपजीविनि । "भिक्षाशी विचरेत् ग्रामम्" स्मृतिः ।

भिक्षु त्रि० भिक्ष-उनु । १भिक्षाकारके २चतुर्थाश्रमे पु० ३तद्वति च । तदाश्रमे अधिकारिणश्च आश्रमशब्दे उक्ताः । तद्धर्माः नि० सि० उक्ता यथा

"अथ यतिधर्माः प्रातरुत्थाय ब्रह्मोपस्पृते इति जपित्वा दण्डादीनि स्पृष्ट्वा निधाय मूत्रपुरीषयोर्गृहस्थचतुर्गुणं शौचं कृत्वाचम्य पर्वद्वादशीवर्जं प्रणवेन दन्तधावनं कृत्वा तेनैव सदा बहिःकटिं प्रक्षाल्य जलतर्पणवर्जं स्नात्वा पुनर्जङ्घे प्रक्षाल्य वस्त्रादीनि गृहीत्वा मार्जनान्तं कृत्वा केशयादिनमोन्तनामभिस्तर्पयित्वा ओं भूस्तर्पयामीत्यादि व्यस्तसमस्तव्याहृतिभिर्मृज्जनस्तर्पयामीति तर्पयेत् । "ओं भूः स्वाहेति स्वाहाशब्दान्तैः स्वधाशब्दान्तैश्चैभिरेव पुनस्तर्पयेदिति केचित् । तत आचम्याञ्जलिना प्रणवेन जलमादाय व्याहृतिभिरभिमृत्य गायत्र्या त्रिः क्षिप्त्वा गायत्रीं जपेत् । उदिते सूर्ये प्रणवेन व्याहृतिभिर्घार्घ्यं त्रिर्दत्त्वा मित्रस्य चर्षणीत्याद्यैः पूर्वोक्तसौरीभिरिदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे स्वाहेति चोपस्थाय सर्वभूतेभ्यो नम इति प्रदक्षिणमावर्त्तते ततो नत्वा "आदित्याय विद्महे सहस्रकराय धीमहि । तन्नः सूर्यः प्रचोदयादिति" त्रिर्जपेत् । एवं त्रिकालं विष्णुपूजां ब्रह्म यज्ञञ्च कुर्यात् । अथ भिक्षा । विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने । काले पराह्णभूयिष्ठे नित्यं भिक्षां यतिश्चरेत्" इत्युक्ते काले सहस्रमिति चतसृभिरादित्यमुपस्थाय तेनैक्यं ध्यात्वा आकृष्णेनेति प्रदक्षिणं कृत्वा ये ते पन्थान इति जपित्वा "योऽसौ विष्णुराख्य आदित्ये पुरुषोऽन्तर्हृदि स्थितः । सोऽहं नारायणोऽहमेव इति ध्यात्वा प्रणम्य नमः" । त्रिदण्डं दक्षिणे स्कन्धे ततः सव्याय बाहुना । पात्रं वामकरे धृत्वा शौचवद्दक्षिणेन त्रिरिति बोधायनोक्तादिग्वा त्रीन् पञ्च सप्त वा गृहान् गत्वा भवत्पूर्वं भिक्षां याचित्वा "पूर्णमसि पूर्णं मे भूया"दित्यामन्त्र्याचिरञ्च प्रोक्ष्य ओं भूः स्वधा नम इत्यादिकसमस्त व्याहृतिभिः स्वर्यादिदेवेभ्यो भूतेभ्यश्च भूमौ क्षिप्त्वा भक्षा प्रणवेन षोडश प्राणायामान् कुर्यादिति संक्षेपः । गौतमव्याख्यायां भृगुः । "यतिर्हस्ते जलं दत्त्वा भैक्ष्यं दद्यात् पुनर्जलम् । भैक्ष्यं पर्वतनाम्नं स्यात् तज्जलं सागरोपमम्" । अत्र सर्वत्र मूलं माधवापरार्कमदनरत्नस्मृत्यर्थसारादौ ज्ञेयम् । कल्पः "एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम् । वर्षाभ्योऽन्यत्र वर्षासु मासांस्तु चतुरो वसेत्" । जाबालश्रुतौ "शून्यागारे देवगृहतृणकुटीवल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगिरिकुहरनिर्झरस्थण्डिलेष्वनिकेतनः" इति । मात्स्ये "अष्टौ मासान् विहारः स्याद् यतीनां संयतात्मनाम् । एकत्र चतुरोमासान् वार्षिकान्निवसेत् पुनः । ध्यानसक्तप्रविष्टानां विहारस्तु न विद्यते" । व्यासः "भिक्षाटनं जपः स्नानं ध्यानं शौचं सुरार्चनम् । कर्त्तव्यानि षडेतानि सर्वथा नटपदण्डवत् । मद्यकं गुल्मवल्लञ्च स्त्रीकथां लौल्यमेव च । दिवास्वापञ्च यानञ्च यतीनां पतनानि षट् । व्यासनं पात्रलोभश्च सञ्चयः शिष्यसंग्रहः । दिवास्वापो वृथाजल्पो यतेर्बन्धकराणि षट्" । दक्षः "नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथञ्चन । यतिपात्राणि सर्वेषामुदार्वलाबुमयानि च" । मदनरत्ने यतिः "पित्र्यं कल्पितं पूर्वमन्नं देवादिकारणात् । वर्जयेत् तादृशीं भिक्षां परबाधाकरीं तथा" । हारीतः "न तीर्थयायी नित्यं स्याद्नोपवासपरो यतिः । न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत्" । एतद्देशार्थभिक्षापरम् । यतिः "स्नानं सुरार्चनं ध्यानं प्राणायामो बलिस्तुतिः भिक्षाटनं जपः सन्ध्या त्यागः कर्मफलस्य च" । एते धर्मा मिता० प्रायेणोक्तास्तद्वाक्यञ्चाश्रमशब्दे दृश्यम् । ४वृद्धभेदे जटा० ५श्रावणीच्छुपे राजनि० ६कोकिलाक्षे भावप्र० ७उपनिषद्भेदे च ।

भिक्षुक पु० भिक्ष-उक । भिक्षोपजीविनि । "ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः । अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः" व्यासेन पारिभाषिकादर्शिताः । ततः समूहे खञ्जिकाठञ् । भैक्षुक तत्समुदाये न० । कर्मधा० कर्म०वा परनिपातः । विप्रभिक्षुकः भिक्षुकविप्र इत्यादि । [उप०स० । चीवरे हेमच० ।

भिक्षुसंघाटी स्त्री भिक्षुं संघटते प्राप्नोति सम्+घट-अण् ङीष् । भिक्षुसूत्र न० भिक्षोः तदाश्रमविहितधर्मस्य ज्ञापकं सूत्रम् शा०त० । व्यासकृते ब्रह्मसूत्रे शारीरकसूत्रे ।

भिण्ड पुंस्त्री० भण–ड पृषो०। कराकृतिरक्षवर्षपर्णे वर्त्तुलाकारबीजे क्षुपभेदे। स्त्रीत्वे टाप् राजनि० गौरा० ङीष वा तत्रार्थे [भिण्डीक्षुपे राजनि०।

भिण्डीतक पु० भिण्डी सती तकते तक–क्विप् अच्।

भित्त न० भिद–क्त नि० तस्य न नः। खण्डे अमरः।

भित्ति स्त्री भिद–क्तिन्। घटप्राटेः कुड्ये (देयाल) २प्रभेदे शब्दरत्ना०। ३अवकाशे ४संविभागे विश्वः। स्वार्थे क। तत्रार्थे संज्ञायां कन्। पक्षान्तरे हेमच०।

भित्तिचोर पु० भित्त्या कुड्यादिभेदनेन चोरयति चुर–अच्। (सिंधेल) सन्धिभेदकचोरे।

भित्तिपातन पुंस्त्री०भित्तिं कुड्यं पातयति भेदनेन पाति–ल्यु। महाभूषिकभेदे राजनि० स्त्रियां जातित्वात् ङीष्।

भिद् द्विधाकरणे विशेषकरणे च रुधा०उभ० सक० अनिट्। भिनत्ति भिन्ते इरित् अभिदत् अभैत्सीत् अभित्त। विभेद विभिदे। सिद्धः। भेत्ता।

भिद् अंशकरणे स्वा०पर०सक०सेट् इदित्। भिन्दति अभिन्दीत्

भिदु स्त्री भिद–सम्प० भावे क्विप्। १भेदे २विशेषकरणे च। कर्त्तरि क्विप्। ३भेत्तरि त्रि०।

भिदक न०भिद–कन्। वज्रे १हीरके। २खड्गे उणा०को०

भिदा स्त्री भिद–भावे अङ्। १विदारणे द्वैधीकरणे २विशेषकरणे च।

भिदादि स्त्री अङ्प्रत्ययनिर्दिष्टे शब्दगणे स च गणः पा० ग० उक्तो यथा "भिदा छिदा विदा क्षिपा गुहा अङ्का मेधा गोधा आरा फारा कारा (वस्त्रसञ्चाने) क्षिपा तारा (ज्योतिषि) धारा रे(ले)खा चूड़ा पीड़ा वपा वप्रा व्रजा व्रपा। अत्र छिदा द्वैधीकरण एवान्यत्र क्षिप्तिः। आरा शस्त्रग्रामन्यत्र ऋत्तिः। आरा जलप्रवाहेऽन्यत्र धृतिः। गुहा गिर्योषध्योः अन्यत्र गूढिरिति बोध्यम्"।

भिदि पु० भिद–कि। वज्रे त्रिरूपको०।

भिदिर न० भिद–किरच्। वज्रे त्रिका०।

भिदु न० भिद–कु। वज्रे त्रिका०।

भिदुर न० भिद–कुरच्। १स्वयंभेदनशीले अमरः। २शुक्लद्रव्ये राजनि०। तस्य सौधभेदकाङ्कुरवत्त्वात् तथात्वम्।

भिदेलिम त्रि० भिद–कर्मकर्त्तरि केलिम। स्वयं भिद्यमाने।

भिद्य पु० भिद–कर्त्तरि क्यप् नदे नि०। नदे हेमच०।

भिद्र न० भिद–रक्। वज्रे त्रिका०।

भिन्दिपाल पु० भिदि विदारणे इन् भिन्दिं भेदनं पालयति पालि–अण्। १हस्त्रस्त्रेये नालिकास्त्रे, अमरटीकायां भरतः। हस्तप्रमाणे अस्त्रभेदे औरस्त्राणी। हेमा० प० तस्त्रक्षणमन्यथोक्तं यथा "भिन्दिपालस्य लक्षणं प्रोच्यते तस्य य आयामो यत्प्रमाणं दण्डस्य च यः परिणाहो यत्संस्थानं दैर्घ्यादिप्रमाणं मुष्टिमोक्षौ दृष्टादृष्टाश्च गतयस्तत्सर्वं यथोक्तं वक्ष्यामि वत्स! निबोध। तत्र भिन्दिपालस्य दण्डः फलाचितः सप्तहस्तो ज्येष्ठो भवति द्वादशाङ्गुलहीनो मध्यमो वितस्तिहीनस्तु कनिष्ठो मानतः स्याद्दण्डस्य सप्ताङ्गुलपरिणाहः श्रेष्ठो भवति मध्यमो द्व्यङ्गुलहीनस्त्र्यङ्गुलहीनश्च कनिष्ठो भवति मूले परीणाहो यावान् स च गोपुच्छवत् वेदितव्यो दण्डार्धं पुनः कूटजदृढजं वैणवं भद्रसिंहकं कदम्बकं वा दारुमयं वा कारयेत् तन्मया हि दण्डा दृढाः स्युः कालाकुलोत्पादकारिणः कलमया विवर्द्धयन्ति यत्तस्त्रिंशदङ्गका व्यधनोद्धारकानोद्गमनसहा पूर्वभारपरीक्षमाश्च भवन्ति ते नित्यं दण्डेषु कुशलैः शुभलक्षणा विज्ञेया दण्डस्योपरि पत्रं कर्णिकासंस्थानं प्रयोजयेत् कर्णिका च द्व्यङ्गुलोत्सेधा षड्ङ्गुला च लेख्या स्यात् यथा दण्डपरीणाहं वलित्यां कारयेत् सौवर्णं रजतमयं वा कांस्यं वा ताम्रं वा लौहमयं शार्ङ्गजातमस्थिजं योजयेत् तदालाभे तु वैणवं दृढं वा विदध्यात् भिन्दिपालफलन्तु विंशत्यङ्गुलप्रमाणं भवति निस्त्रिंशसदृशम् पीतं सुनिशितधारसुसमं कुर्वीत अष्टादशाङ्गुलप्रमाणं मध्यं षोड़शाङ्गुलप्रमाणं नीचं निर्दिष्टं तत्र यावत्यः फलपत्रपुष्पाणां योनयो दृश्यन्ते तावत्यो भिन्दिपालफलकाः, कर्तव्या तथा विस्तारे त्र्यङ्गुलमूले वोच्छ्रयसदृक्षबद्धोर्ध्वमष्टाङ्गुलं दण्डसूत्रेणाववेष्टयेत् पूर्वभागे मध्यान्तादिपात्रैरित्युत्तमाधममध्यमानां भवेत् दण्डस्य प्रमाणद्विगुणं फलं तस्य गौरवात् भवति तत्राष्टदशाङ्गुलं भिन्दिपालफलाग्रमृजु कार्य्यं पञ्चभिः पञ्चभिः पलैर्वर्द्धितया यावच्छतपलं श्रेष्ठं पलाग्रेण शतिकः उत्तमः कर्त्तव्यः अशीतिपलोमध्यमः षष्टिपलो नीचः"।

भिन्न त्रि० भिद–क्त। १विदारिते अमरः २भङ्गते ३अन्यार्थे ४प्रस्फुटिते च मेदि०। ५रोगभेदे न०। "शक्तिकुन्तेषुखड्गाग्रविषाग्नेराशयो हतः। यत्किञ्चित् प्रस्रवेत्तद्धि भिन्नमित्यभिधीयते" भावप्र०। आशयः कोष्ठः।

भिन्नक पु० भिन्नं कं यस्य। बौद्धे त्रिका०। तन्मते विश्वस्य क्षणभङ्गुरत्वेन स्थायिसुखराहित्यात्तस्य तथात्वम्।

भिन्नकूट न० कामन्द० उक्ते बलव्यसनभेदे। तत्र च बल-

व्यसनं नानाविधसुक्तं यथा "छन्नद्धं परिच्छिन्नं विमानितममानितम् । श्रमतं व्यथितं श्रान्तं दूराद्यातं नवागतम् । परिक्षीणाम्परिहृतं प्रहृताग्रजवं तथा । आशानिर्वेटभूयिष्ठमल्पतप्राप्तमेव च । कलत्रगर्भं विच्छिन्नमन्तःशल्यं तथैव च । भिन्नगर्भं क्षयक्षतसंभियुक्तं तथैव च । क्रुद्धमौनाविभिन्नञ्च विशिष्टञ्चापि विद्विषा । दूषयुक्तं स्खविच्छिन्नं भिन्नविच्छिन्नमेव च । विच्छिन्नविविधासारं शून्यमूलं तथैव च । श्रस्वामि सङ्कृतञ्चापि भिन्नकूटं तथैव च । दुष्प्रार्थ्यं यद्दमन्यञ्च बलव्यसनमुच्यते" । भिन्नगर्भमपश्यत् ।

भिन्नक्रम पु० भिन्नः क्रमो यत्र । वाक्यगते यत्क्रमराहित्यरूपे भग्नप्रक्रमाख्ये काव्यदोषभेदे । [कर्कटाम् राजनि०

भिन्नगात्रिका स्त्री भिन्नं विदारितं गात्रमवयवो यस्याः ।

भिन्नगुणन न० क्रीला० उक्ते पूरणभेदे "अंशाहृतिच्छेदबधेन भक्ता लब्धं विभिन्ने गुणने फलं स्यात्" उदा० । तत्र दृश्यम् ।

भिन्नपरिकर्मन् न० क्रीला० उक्ते भच्छेदस्य सङ्कलनव्यवकलनादिरूपाङ्गसंस्काराष्टके परिकर्मनृशब्दे दृश्यम् ।

भिन्नभिन्नात्मन् पु० भिन्नप्रकारः प्रकारे द्वित्वम् तादृश आत्मा यस्य । चणके (चोला) शब्दच० ।

भिन्नयोजनी स्त्री भिन्नं युज्यतेऽनया युज-करणे ल्युट ङीप् । पाषाणभेदके वृक्षे राजनि० । [भल्लके सुश्रुतः ।

भिन्नवर्चस्(स्क) त्रि० भिन्नं वर्चो यस्य वा कप् । द्रवीभूतभिन्नविट्का स्त्री० भिन्ना विट् मलं यया । १श्रम्लाम्बु लतायां सुश्रुतः । २अ० । २द्रवीभूतमलके त्रि० । [अमरः ।

भिन्नार्थ त्रि० भिन्नोऽर्थो वाच्यो यस्य कप् । अन्यपदार्थे

भियस् न० भी-वा० असुन् । भये ऋ० १।५२।८ । उदा०

भिरिण्टिका स्त्री श्वेतगुञ्जायाम् राजनि० ।

भिल भेदने वा चु० उ०पक्षे तु०पर०सक०सेट् । भेलयति-ते भिलति अबीभिलत् त अभेलीत् ।

भिल्ल पु० भिल-लक् । म्लेच्छजातिभेदे । (भिल्ल) स च ब्राह्मणकन्यायां नीवराज्जातः । "पुलिन्दभेदभिल्लाश्च" इत्युपक्रमे "एते वै नीवराज्जाताः कन्यायां ब्राह्मणस्य च" पराशरपद्धतिः । [स्त्रियां राजनि० ।

भिल्लगवी स्त्री भिल्लानां गौरिव वच् समा०-ङीष् । गवयजातौ

भिल्लतरु पु० भिल्लप्रियः तदुपजीव्यत्वात् तरुः । लोध्रे राजनि०

भिल्लभूषण न०भिल्लं भूषयति भूषि-ल्यु । गुञ्जावृक्षे राजनि० तत्फलस्य तेषां भूषकत्वात् तस्य तथात्वम् ।

भिल्लोट पु० भिल्लप्रियस्फुटम् पत्रं यस्य । लोध्रवृक्षे सुश्रुतः

भिल्ली स्त्री भिल-लक् गौ० ङीष् । लोध्रे राजनि० ।

भिष रोगप्रतीकारे सौ०पर०सक०सेट् । भेषति अभेषीत् ।

भिषक्प्रिया स्त्री ६त० । गुडूच्याम् राजनि० ।

भिषग्जित न० ३त० । औषधे त्रि० ।

भिषग्भद्रा स्त्री ७त० । भद्रदन्तिकायाम् राजनि० ।

भिषग्माता स्त्री भिषजां मातेव । वासकवृक्षे राजनि० ।

भिषज् चिकित्सायां कण्ड्वा०प०सक० सेट् । भिषज्यति अभिषजी(ज्यौ)त् ।

भिषज् पु०विभेत्यस्मात् रोगः "भियः सुक् च" उणा०अजि कण्ड्वा०भिषज्-क्विप् वा । १चिकित्सके । २विष्णौ पु० । तस्य संसाररोगहारित्वात् "भीषा स्मात् वातः पवते" इत्यादिश्रुत्या सर्वेषां भीतिजनकत्वाद्वा तथात्वम् । ततः अपत्ये गर्गा० यञ् भैषज्य वैद्यपुत्रे स्त्रियां ङीप् यञोः भैषजी । भिषजो भावः ष्यञ् "भेषजाच्च" पा० निर्देशात् गुणः न वृद्धिः । भैषज चिकित्सायाम् न० । ततः स्वार्थे अण् । भैषज्य न० तत्रार्थे ।

भिष्णज् उप० सेवायां कण्ड्वा० प०सक० सेट् । भिष्णज्यति अभिष्णजी(ज्यौ)त् ।

भिस्टा स्त्री भिष्यसामर्थं टीकते टीक-क टाप् । छंदे अमरः । पृषो० । भिस्फटा भिक्षिटा भिक्षिकाश्चात्र पाठान्तराणि ।

भिस्स स्त्री भिद्-क्विप् सो-क पृषो० दस्य सः । छंदे अमरः ।

भी भये जु०पर० सक०सेट् । बिभेति अभैषीत् बिभयाम्बभूव बास चकार बिभाय । भीरुः भीतः । एतद्योगे "भीत्रार्थानां भयहेतुः" पा० भयहेतोरपादानता । व्याघ्रात् भीतः ।

भी भये सक० भरणे सक० क्र्यादिः वा वा० पर० सेट् । भीनाति भिनाति । अभैषीत् ।

भी स्त्री भी-डम्म० क्विप् । भये अमरः ।

भीणी स्त्री कुमारानुचरमातृभेदे भा०श० ४७अ० ।

भीत न०भी-भावे कर्त्तरि वा क्त । १भये २तद्युते त्रि० । ३भल्लभेदे पु० "शिवो वा शक्तिरथ वा भीताख्यः स प्रकीर्त्तितः" तन्त्रसारः

भीति स्त्री भी-क्तिन् । १भये अमरः । २कम्पे च त्रिका० ।

भीम त्रि० बिभेत्यस्मात् भी-अपादाने मक् । १भयहेतौ २भयानकरसे अमरः । ३महादेवे ४भीमसेने ५रुद्रभेदे वेतसे च पु० मेदि० । ६परमेश्वरे पु० तस्य "भीषास्माद्वातः पवते" इत्यादिश्रुतेः सर्वेषां भयहेतुत्वात् तथात्वम् । महादेवस्याष्टमूर्त्तिमध्ये आकाशरूपे ७मूर्त्तिभेदे

टदेवगन्धर्वभेदे भा० आ० ६५ अ०। आङ्गिरसे वह्नि-भेदे भा० व० २१६ अ०। १०दानवभेदे भा० श० २२७ अ०। ११अमावसुवंश्ये नृपभेदे हरिवं० २७ अ०। सात्वतवंशजे १२नृपभेदे हरिवं० ६५ अ०। १३विदर्भाधीशे नृपभेदे दमयन्तीपितरि तत्कथा भा० व०५१ अ०। १४अष्टादशाक्षरमन्त्रभेदे "आदौ मध्ये तथा चान्ते चतुरक्षयुतो मनुः। ज्ञातव्यो भीम इत्येष यः स्यादष्टादशाक्षरः" तन्त्रसा०।

भीमक पु० पार्वत्यारोपजाते गणभेदे हरिवं० १६८ अ०।

भीमजानु पु० यमसभास्थे नृपभेदे भा० स० ८ अ०।

भीमतिथि स्त्री भीमोपासिता तिथिः श्या०त०। भीमैकादश्याम् माघशुक्लैकादश्याम्।

भीमद्वादशी स्त्री भीमोपासिता द्वादशी १माघशुक्लद्वादश्याम् तत्र भीमसेनकृते २व्रतभेदे च हेमा० व्र० पद्मपु०।

भीमनाद पु०ह्व०। १सिंहे शब्दच०। कर्म०। २भयानकशब्दे पु०

भीमपराक्रम त्रि० भीमः पराक्रमोऽस्य। १भयानकपराक्रमे २विष्णौ पु० "भीमो भीमपराक्रम." विष्णुस०।

भीमपुर न० ह्त०। विदर्भराजस्य नगरे कुण्डिनपुरे भीम-नगरादयोऽप्यत्र।

भीमबल त्रि० ह्व०। १भयानकवीर्ये २धृतराष्ट्रपुत्रभेदे पु० भा० आ० १७ अ०। ३वह्निभेदे पु० भा० व० २१६ अ०।

भीमयु स्त्री आत्मनो भीमं हृषमिच्छति क्यच् वेदे नि० उनु। आत्मनो हृषभेच्छौ स्त्रीगव्याम् ऋ० ५।५६।२।

भीमरथ पु० १असुरभेदे गरुड़पु० ८६ अ०। २धृतराष्ट्रपुत्रभेदे भा० आ० ६७ अ०। ३धन्वन्तरिवंश्ये नृपभेदे हरिवं० २६ अ०। ४दशार्हवंश्ये नृपभेदे हरिवं १७ अ०। सत्यभामायां जाते वासुदेवस्य ५पुत्रभेदे हरिवं १६२अ०।

भीमरथी स्त्री "सप्तसप्ततिमे वर्षे सप्तमे मासि सप्तमी। रात्रि भीमरथी नाम नराणामतिदुस्तरा" इत्युक्तायां १रात्रौ। "तामतीत्य नरो योऽसौ दिनानि यानि जीवति। कृत भिक्षानि तुल्यानि सुवर्णशतदक्षिणैः। गतिः प्रदक्षिणं विष्णोर्जल्पनं मन्त्रभाषणम्। ध्यानं निद्रा सुधा चान्नं भीमरथ्याः फलश्रुतिः" वैद्यके। २नदीभेदे भा०व०८८अ०।

भीमरिका स्त्री सत्यभामागर्भजातायां श्रीकृष्णस्य कन्यायां हरिवं० १६२ अ०

भीमल त्रि०भियोमल० सम्बन्धो यतः। भयङ्करे यजु०३०।६।

भीमविक्रम पु० १धृतराष्ट्रपुत्रभेदे भा०अ० ३७ अ०। ह्व०। २भयानकविक्रमे त्रि०।

भीमविक्रान्त पुंस्त्री ह्व०। १सिंहे त्रिका० स्त्रियां जाति-त्वात् ङीष्। ह्व०। २भयानकविक्रमयुते त्रि०।

भीमवेग त्रि० ह्व०। १भयानकवेगयुते २धृतराष्ट्रपुत्रभेदे पु० भा०अ० ५७ अ०। ३दानवभेदे पु०हरिवं २४ अ०।

भीमवेगवत् पु० धृतराष्ट्रपुत्रभेदे भा० आ० १८६ अ०।

भीमशर पु० धृतराष्ट्रपुत्रभेदे भा०आ० ६७ अ०।

भीमशासन पु०भीमं शासनमस्य। १यमे शब्दार्णवः भयानक-शासनकर्त्तरि २नृपादौ च।

भीमसेन पु० युधिष्ठिरात्मजे १मध्यमपाण्डवे २कर्पूरभेदे च शब्दरत्ना०। ३जनमेजयस्य भ्रातृभेदे भा० आ० ३अ०। ४पौरवप्राचीनजनमेजयस्य पुत्रभेदे भा०आ० ६४ अ०।

भीमहास् पु० इन्द्रतरुले (बड़िरसुता) शब्दरत्ना०।

भीमा स्त्री १भीमाख्यायाम् दुर्गायाम् २रोचनाख्यगन्धद्रव्ये शब्दरत्ना० ३कषायां शब्दमाला ४नदीभेदे भा०व०२२१अ०

भीमादेवी स्त्री भीमाख्या देवी। दुर्गामूर्त्तिभेदे "पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले। रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात्। तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्त्तयः। भीमादेवीतिविख्यातं तन्मे नाम भविष्यति" देवीमा०

भीमादि पु० "भीमादयोऽपादाने" पा० अपादाने निपातन-साध्ये शब्दगणे स च गणः पा० ग० उक्तो यथा "भीम भीष्म भयानक वाह चरु प्रस्कन्दन प्रपात सम्भ्रम क्षुभ स्तुक् हृष्टि रक्षः शङ्कु शुक मूर्ख स्खलति"।

भीमैकादशी स्त्री भीमेनोपास्या एकादशी शाक्त० त०। माघशुक्लैकादश्याम्। तत्कर्त्तव्यव्रतादिकं मत्स्यपु० ६५ अ० उक्तम्।

भीरु त्रि०भी-क्रु। १भयशीले अमरः। २शतावर्य्यां स्त्री धरणिः। ३कटक्यां ४शतपादिकायां शब्दर०। ५छायायां ६योषिति ७अजायां स्त्री मेदि०। ८हरिणे पु०शब्दमा०। ९व्याघ्रे राजनि० १०इक्षुभेदे रत्नमा०।

भीरुक पु० भी-क्रुकन्। १हरिणे २व्याघ्रे ३इक्षुभेदे च। "वातपित्तप्रशमनो मधुरो रसपाकयोः। सुशीतो दृंहणो बल्यः पौण्ड्रको भीरुकस्तथा" भावप्र०। ४भययुक्ते त्रि०।

भीरुकच्छ पु० देशभेदे मार्कपु० ५७ अ०। [अमरः

भीरुपत्री स्त्री भीरूणि पत्राणि यस्याः ङीप्। शतमूल्याम्

भीरुस्थान न० ह्त० अस्त्यर्थेति घत्वम्। भीरूणां स्थाने।

भीरुहृदय पु० ह्व०। १मृगे त्रिका० २भयशीलहृदये त्रि०।

भीरू स्त्री भीरु+स्त्रियामूङ्। भयशीलायां नार्य्यां भरतः।

भीलु(क)(लूक) त्रि०भी क्रु। भयशीले। क्रुकन्। तत्र भल्लूके पु०

शब्दरत्ना० पृषो० भीलुक तत्रार्थे भल्लूके शब्दमा०।

भीषक त्रि० भीषयते भी-णिच्-ण्वुल्। भयकारके हेमच०।

भीषण पु० भीषयते भी-णिच्-ल्यु १भयानकरसे २कुन्दुरुके ३हिन्तालेराजनि० ४शङ्खक्यां ५महादेवे शब्दरत्ना० ६कपोते च पु० ७गाढे दृढारुणे च त्रि० मेदि०।

भीषा स्त्री भी-णिच्-क्विप् भावे अङ्। १भयप्रदर्शने "क्षेत्रं वा भीषया हरन्" मनुः। स्वार्थे णिच्। २भये च "भीषास्माद्वातः पवते" श्रुतिः। तृतीयास्थाने वेदे आच्।

भीष्म न० भी-णिच्-सक् अपादाने मक्। १भयानकरसे अमरः। २भयानके त्रि० ३रुद्रे ४राक्षसे पु० हेमच० ५गङ्गागर्भजाते शान्तनुपुत्रभेदे पु० गङ्गाजशब्दे दृश्यम्।

भीष्मक पु० रुक्मिणयाः पितरि नृपभेदे हरिवं० ६१ अ०।

भीष्मकेश्वर पु० काशीस्थे केशवमूर्त्तिभेदे काशी० २२अ०।

भीष्मजननी स्त्री ६त०। गङ्गायाम् राजनि०। गङ्गाजशब्दे २४६१ पृ० दृश्यम्।

भीष्मपञ्चक न० भीष्मेण प्राप्तमुपदिष्टं वा पञ्चकम्। कार्त्तिकशुक्लैकादश्यादिषु ३पञ्चसु तिथिषु तत्कर्त्तव्ये २व्रतभेदे च। तल्लक्षणं यथा "भीष्मेणैतत् पुरा प्राप्तं व्रतं पञ्चदिनात्मकम्। सकाशात् वासुदेवस्य तेनोक्तं भीष्मपञ्चकम्" हेमा० ब्र० नारदपु०। पश्चात् तेन च पाण्डवायोपदिष्टं यथोक्तं तत्रैव "इदं भीष्मेण धर्म्मज्ञ श्रुतत्यागतेन च। तदेवात्र समाख्यातं दुष्करं भीष्मपञ्चकम्"। तत्कालश्च तथोक्तो यथा "कार्त्तिकस्य शुभे पक्षे स्नात्वा संयतवाङ्व्रतः। एकादश्यान्तु गृह्णीयात् व्रतं पञ्चदिनात्मकम्"। तत्रैव तद्विधानं दृश्यम्।

भौष्मरत्न हिमालयोत्तरदेशजातशुक्लवर्णप्रस्तरविशेषे। तस्योत्पत्त्यादि यथा "स्कन्द उवाच। "हिमवत्युत्तरे देशे वीर्य्यं पतितं सुरद्विषस्तस्य। तस्मात्प्रसूतमाना आकरजा भीष्मरत्नानाम्। शुक्लाः शङ्खाजनिभाः श्लोनाकसन्निभाः प्रभावन्तः। प्रभवन्ति ततस्तरुणा वज्रनिभा भीष्मपाषाणाः। हिमाद्रिप्रतिबद्धं शुक्लमपि अद्भया विधत्ते यः। भीष्मनिधिं श्रीवादिषु स सम्पदं सर्वदा लभते। गुणयुक्तस्य तस्यैव धारणान्मुनिपुङ्गव!। विषाणि तानि नश्यन्ति सर्वाण्येव महीतले। विषमा न बाधन्ते ये समरणनिवासिनः समीपेऽपि। द्वीपि दृकगरभल्लूकरक्षिंहव्याघ्रादयो हिंस्राः। तस्योत्कर्षकलिता द्युतिनो भवन्ति भयं न चापि सप्तपरिस्थितम्। भीष्मणियुक्तः सम्यक् संग्राह्याङ्गुलित्रितयः। पित्तपर्णे पित्तघ्नां तन्निर्वृद्धवार्षिको भवति। शाल्यन्युद्भूतान्यपि सर्पाण्डजाखुदृश्चिकविषाणि। सलिलाग्निवैरितस्करभयानि भीमानि नश्यन्ति। सैवलमलाहकाभं परुषं पीतप्रभं प्रभाहीनम्। मलिनद्युति विवर्णं दूरात् परिवर्जयेत् प्राज्ञः। मूल्यं प्रकल्पनमेषां विबुधवरैर्देशकालविज्ञानात्। दूरे भूतानां वृद्ध किञ्चिच्चिकटप्रस्तानाम्" गारुडे ७६अ०। भीष्मशब्दादयोऽप्यत्र।

भीष्मसू स्त्री भीष्मं सूते सू-क्विप्। गङ्गायाम् अमरः।

भीष्माष्टमी स्त्री ६त०। भीष्मस्य देहत्यागदिवसे माघस्य शुक्लाष्टम्याम्। अतस्तस्मिन् दिने सर्ववर्ष्मैस्तस्य तर्पणं कार्य्यम् यथोक्तं त्रि० त० भविष्योत्तरे "शुक्लाष्टम्यान्तु माघस्य दद्याद् भीष्माय यो जलम्। संवत्सरकृतं पापं तत्क्षणादेव नश्यति"। ध्वनलष्टता स्मृतिः "अष्टम्यान्तु सिते पक्षे भीष्माय सतिलोदकम्। अर्घञ्च विधिवद्दद्युः सर्वे वर्णा द्विजातयः"। सर्वे इत्युपादानात् ब्राह्मणस्यापि तस्यधिकारः। द्विजातय इति सम्बोधनम् "ब्राह्मणस्त्वन्यवर्णानां यः करोत्यौर्द्धदैहिकम्। तद्वर्णत्वमसौ याति इह लोके परत्र च" इति मरीचिवचनन्तु भीष्मव्यतिरिक्तपरम्। तथा च स्मृतिः। "ब्राह्मणाद्यास्तु ये वर्णा दद्युर्भीष्माय नो जलम्। संवत्सरकृतं तेषां पुण्यं नश्यति सत्तम!"। अस्यवर्णजलदाननिषेधस्तु प्रकरणादपि भ्रातरादिविषय इति श्रीदत्तः। "आभिरङ्गिरसाप्रोक्त पुत्रपौत्रोचितं क्रियाम्" इत्यार्षसामन्त्रे पुत्रपौत्रोचितामित्यभिधानात् पितृकर्मरीत्या तच्च कर्त्तव्यम्। ब्राह्मणः पितृतर्पणानन्तरं क्षत्रियादिकस्तु तत् पूर्वं तर्पयेत् इति संवत्सरप्रदीपादयः। अत्र बीजं वर्षकृत्यैक्यम्" रघु०।

भुक्त त्रि० भुज-कर्म्मणि क्त। १भक्षिते २कृतभोगे च भुक्तं भोग्यं रक्षेत्यजेत्" नील०ता०। भावे-क्त। ३भक्षणे न०

भुक्तभोग त्रि० भुक्तः कृतो भोगो येन। कृतभोगे "जहात्येनं भुक्तभोगामजोऽन्यः" श्वेता० उ०।

भुक्तसमुज्झित त्रि० पूर्वं भुक्तं पश्चात् समुज्झितं त्यक्तम्। भोजनोत्तरं त्यक्ते अन्नादौ।

भुक्ति स्त्री भुज-क्तिन्। १भोजने २रत्नादिग्रहणार्थं राज्ञादिषु गमने ३भोगे च "आगमो निष्फलस्तात भुक्तिलोकापि यत्र नो" इति स्मृतिः। भुक्तिप्रामाण्यनिर्णयादिकम् आगमशब्दे ६१४ पृ० दृश्यम्।

कश्चिद्विशेषो वीरमित्रोदयपन्थे दर्शितो यथा "नारदः "आगमेन विशुद्धेन भोगो याति प्रमाणताम् । अविशुद्धागमो भोगः प्रमाणत्वञ्चैव गच्छति । आगमस्याविशुद्धत्वं विरोध्याक्रन्दनं भवेत्" । व्यासः "आगमो दीर्घकालश्च विच्छेदापरवोज्झितः । प्रत्यर्थिसन्निधानश्च परिभोगोऽपि षड्विधा" । विच्छेदोऽन्तरायः परत्र आक्रोशस्ताभ्यासुज्झितो रहितः । यद्वाच्छेदो व्यवधानन्तद्विगमवान् विच्छेदो निरन्तर इति यावत् । अपरवो वर्जनविषयोरवः । मदीयं क्षेत्रादि त्वया किमिति भुज्यते इति प्रतिषेधः अपशब्दस्य वर्जनार्थत्वात् तेनोज्झितः । नारदः "सम्भोगं केवलं यस्तु कीर्त्तयेद्वागमं क्वचित् । भोगच्छलापदेशेन विज्ञेयः स तु तस्करः" । विद्यमानेऽपि लिखिते लोकेतुस्वपि हि साक्षिषु । विशेषतः स्थावराणां यत्र भुक्तन्न तत् स्थिरम्" । दानविक्रयादेरुपभोगसापेक्षस्यैव स्वत्वोत्पादकत्वात् कियानू भोगलवोऽवश्यं तत्रापेक्ष्यते इत्याशङ्क्यायासुपपत्तिरुक्ता विज्ञानेश्वराचार्यैः । "दानादेः परस्वत्वापादने परकर्त्तृकस्वीकारापेक्षाऽवश्यम्भावनीया । स्वीकारश्च त्रिविधो मानसो वाचिकः कायिकश्च । ममेदमित्यध्यवसायो मानसः । ममेदमित्याद्यभिलापो वाचिकः । उपादानाभिमर्शनादिरूपेणानेकप्रकारकः कायिकः । तत्र मानसं विना स्वत्वासम्भवात् स त्रावश्यक एव । दानविशेषपुरस्कारेण शब्दप्रयोगविशेषनियमस्तादर्थ्यनादिचेष्टाविशेषनियमाच्च वाचिकक्रायिकावप्यावश्यकावित्यवसीयते । तत्र हिरण्यवस्त्रादौ दातृकर्त्तृकजनत्यागादनन्तरमेव प्रतिग्रहीतृरुपादानादिसम्भवात् त्रिविधोऽपि व्यापारः सम्पद्यते । क्षेत्रादौ तु फलोपभोगं विना कायिकस्वीकारासम्भवादल्पेनाप्युपभोगेनावश्यम्भावितव्यमन्यथा दानविक्रयादेः सम्पूर्णता न भवत्युत्तरकालीनाङ्गीकाराभावात् । तेन तत्सहितादागमान्तरादधिकल आगमो दुर्बलो भवति । एतच्च द्वयोरागमयोः पूर्वापरभावानवगमे तदपगमे तु स्वल्पभोगविकलोऽपि प्राक्तन एवागमो बलवान् । पूर्वेण दानादिना स्वत्वागमे दानाद्युत्तरासम्भवात् । न चैवन्तस्य क्षेत्रादेर्मध्यस्थत्वापत्तिः पूर्वस्वाम्यापगमादुत्तरस्वाम्यानुत्पत्तेरिति वाच्यम् । प्रतिग्रहीतव्यापेक्षणीयस्वत्वस्य सत्त्वात् पूर्वस्वाम्यसत्त्वेऽपि राज्ञैव प्रतिगृहीतादेः कायिकस्वीकारस्थानीयप्रतिपत्तेस्तस्य सम्पादनीयत्वात्"

भुक्तिप्रद पु० भुक्तिं भोगं भोजनं वा प्रददाति स्वल्पावासभक्ष्यत्वात् । शुद्धे राजनि० लघुपाकत्वात्तथात्वम् । [भोगे

भुक्तिसुहित त्रि० सुहितस्य भुक्तिः मयूर०परनि० । तृतृप्र-

भुग्न त्रि० भुज-भोटने क्त । रोगादिना कुटिलीकृते ।

भुज भोटने तु०प०सक०अनिट । भुजति अभौक्षीत् । क्त ओदित् भुग्नः ।

भुज भक्षणे भोगे च आ० पालने पर० सक० रुधा० अनिट । भुङ्क्ते अज्ञम् । अभौक्षीत् । भूमिं भुनक्ति पालयति । "दिवं मरुत्वानिव भोक्ष्यते महीम्" रघुः । भुक्तः । उपसर्गपूर्वस्तु तत्तदुपसर्गद्योत्ययुक्तभोगादौ । भोगश्च सुखदुःखाद्यनुभवः सुखं दुःखं वा भुङ्क्ते सुखादिकमनुभवतीत्यर्थः ।

भुज त्रि० भुज+क । १भोगकर्त्तरि २कुटिलीभूते च ।

भुज पुंस्त्री० भुज्यतेऽनेन भुज-घञर्थे करणे क । १बाहौ २करे मेदि० । लीलावत्यादौ त्रिकोणचतुष्कोणादिक्षेत्रप्रसिद्धे क्षेत्रांशभेदे "तथायते तद्भुजकोटिघातः" इति लीलावती । क्षेत्रशब्दे दृश्यम् ।

भुजकोटर पु० भुजस्य कोटर इव । कक्षदेशे (काँख) हेमच०

भुजग पुंस्त्री०भुज-वक्रगे क भुजः कुटिलीभवन् सन् गच्छति गम-ड । १सर्पे अमरः स्त्रियां ङीष् । २श्लेषानक्षत्रे ज्यो०त० । तस्य तद्देवताकत्वात् तथात्वम् । श्लेषाशब्दे दृश्यम् ।

भुजगदारण पु० भुजगं दारयति दारि-ल्यु । गरुडे त्रिका

भुजगनिसृता स्त्री "भुजगनिसृता नसौरः" छ० र० उक्ते नवाक्षरपादके छन्दोभेदे । [राजनि०

भुजगान्तक पु० ६त० । गरुडे । भुजगनाशनाद्योऽस्यत्व ।

भुजगभोजिन् पु०भुजगं भुङ्क्ते भुज-णिनि । मयूरे राजनि० स्त्रियां ङीप् । [त्रिका० भुजगमक्षकादयोऽस्यत्व ।

भुजगाशन पु० भुजगान् अश्नाति अश-ल्यु । गरुडे

भुजङ्ग पुस्त्री०भुजः सन् गच्छति गम-खच् मुम् डिच्च ।१सर्पे स्त्रियां ङीष् २जारे च पु०अमरः ।३श्लेषानक्षत्रे पु०ज्यो०त०

भुजङ्गघातिनी स्त्री ६त० । भुजङ्गं तद्विषं हन्ति-हन णिनि ङीप् । सर्पौषधीलतायाम् राजनि० ।

भुजङ्गजिह्वा स्त्री ६त० । १सर्पजिह्वायां ६ब० । २तदाकारयुतायां सङ्गासमङ्गायाम् राजनि० ।

भुजङ्गदमनी स्त्री भुजङ्गो दश्यतेऽनया दंश-करणे ल्युट् गौरा०ङीष् । नकुलेष्टायाम् नैघण्टुप्र०

भुजङ्गपर्णिनी भुजङ्गस्फटाकार इव पर्णानि अस्ति यस्याः

ङनि ङीप्। नागदमन्यां नैघण्टुकप्रसिद्धिकायाम्।

भुजङ्गपुष्प पु० भुजङ्ग इव पुष्पमस्य। क्षुद्रभेदे सुश्रुतः।

भुजङ्गप्रयात न० "भुजङ्गप्रयातं भवेद्युग्मनिः" छ०र० उक्ते द्वादशाक्षरपादके छन्दोभेदे।

भुजङ्गभुज् पु० भुजङ्ग भुङ्क्ते भुज-क्विप् ६त०। १गरुडे शब्दर० २मयूरे अमरः।

भुजङ्गभोजिन् पु० भुजङ्गं भङ्क्ते भुज-णिनि ६त०। राजसर्षे हेमच०। २गरुडे ३मयूरे च।

भुजङ्गम पुंक्ली० भुजः कुटिलीभवनं यत्र गच्छति गम-खच् मुम्। १सर्पे अमरः स्त्रियां जातित्वात् ङीष्। २वीरके न० राजनि०। ३अश्वे मानसले पु०। [ताम्बूल्यां राजनि०।

भुजङ्गलता स्त्री भुजङ्ग इव कुटिला तल्लोकख्या वा लता।

भुजङ्गविजृम्भित न० "वक्षीयाम्बुधेर्दोषेतं जलतलयुगलस्खलेभुजङ्गविजृम्भितम्" छ०र० उक्ते सप्तदशाक्षरपादके १छन्दोभेदे। ६त०। २सर्पचेष्टिते च।

भुजङ्गहन् पु० भुजङ्गं हन्ति हन-क्विप्। गरुडे त्रिका०।

भुजङ्गाक्षी स्त्री भुजङ्गस्येवाक्षि पुष्पं यस्याः सच् बहु० ङीष्। राज्ञायाम् अमरः। [ब्रह्म्याम्

भुजङ्गाख्य पु० भुजङ्गतुल्या आख्या यस्य। नागकेसरे।

भुजङ्गेश पु० ६त०। १वासुकौ २शेषे तदवतारे रविकुञ्जरौ ४पतञ्जलिमुनौ च भुजङ्गमेशादयोऽत्र।

भुजङ्गया स्त्री रू०सि०-उक्तायाम् त्रिकोणचक्रस्य भुजजीवायाम् "यद्वं संशोध्य मन्दोच्चात् तथा शीघ्रादियोज्य च। शेषं केन्द्रपदं तच्चाङ्गुलज्या कोटिरेव च" सू०सि०।

"यद्वं राश्यादिकं मन्दोच्चात् प्राग्नीतस्वकीयराश्यादिकमन्दोच्चभोगात् संशोध्योनीकृत्य शीघ्रात् प्रागानीत राश्यादिशीघ्रोच्चात्। चः वक्ष्यते। अनोक्तत्व शेषं राश्यादिकं तथोक्तप्रकारेण केन्द्रं मन्दोच्चाधीनो यद्वो मन्दकेन्द्रम्। शीघ्रोच्चाधीनो यद्वः शीघ्रकेन्द्रं भवतीत्यर्थः। तच्चात् केन्द्रात् यदं राशिलयात्मकं विषमं समं च यदं ज्ञेयम्। तिराश्यन्तर्गतं चेत् प्रथमं विषमं यदम्। ततः षड्राश्यन्तर्गतं चेत् समं केन्द्रं द्वितीयं समं यदम्। ततो नवराश्यन्तर्गतं चेत् षड्कं तृतीयं विषमं यदम्। ततो दशोनं चतुर्थं यदं समलिप्तकम्। तच्चात् यदाङ्गुलज्या त्रिज्या कोटिः कोटिज्या च रङ्ग०। तदानयनं यथा "गताङ्गुलज्या विषमे गम्यात् कोटिः पदे भवेत्। युग्मे तु गम्यादुद्धृताङ्गुलज्या कोटिज्या तु गताङ्गुलभवेत्" सू०सि०। "विषमे यदे गताङ्गुलयहज्या यदाहितो भवेत् राशिवि-भागात्मकं प्रागुक्तानं तच्चादित्यर्थः। भुजज्या स्यात्। गम्याङ्गुलोनं त्रिभं यद्वात् पादान्तावधिकमेष्यम्। तच्चात् कोटिः कोटिज्या स्यात्। युग्मे समे तु यदे यद्यङ्गुलज्या गतात् कोटिज्या स्यात्। तुकारो विशेषद्योतकः। एतच्चादिशब्दोक्त्या द्वयं साधितम्" रङ्ग०।

भुजफल न० "खेनाहते परिधिना भुजकोटिफलेषे भांशैः २६० हृते च भुजकोटिफलाख्ये स्तः" सि०शि० उक्ते भुजानीते फलभेदे

भुजमध्य न० ६त०। भुजान्तरे क्रोडे हेमा०।

भुजशिखर पु० ६त०। स्कन्धे हेम०।

भुजशिरस् न० ६त०। स्कन्धदेशे अमरः।

भुजाग्र पु० ६त०। करे हेमा०।

भुजादण्ड पु० भुजाया दार्ढ्यादण्ड इव। करे हस्ते त्रिका०।

भुजान्तर न० ६त०। भुजयोरन्तरं मध्यम्। क्रोडे अमरः

इत्यष्टसप्तनाड्यधिके प्रहरे गणितागते पदार्थे यथोक्तं सि०शि० "भानोः फलं गणितलब्धयुतस्य राशेर्व्यस्तोदयेन सममागमजौ १८०० विभक्तम्। लब्धा भवेत्स सुखितं द्युनिशा विभक्तं स्वर्णं भवेदकंवदिदं तु भुजान्तराख्यम्"।

भुजि पु० भुज-भावनिङ्निपातने क्विप्। १भुजधातौ भुज-क्विप्। २स्त्री० उच्चाहि० तच्च अर्थभक्तत्वात् तथात्वम्।

भुजिङ्ग पु० देशभेदे आ० भी० ६अ०।

भुजिष्य पु० भुज-किष्यन्। १दासे २रोगे ३खलतन्त्रे ४हस्तखले च। ५दासां ६वेश्यायाञ्च स्त्री मेदि०।

भुज्यु पु० भुज-युच् न अनादेशः। १भोजने भरते। २अग्नौ संक्षिप्त० ४यजे यजु०१८।४२ वेददी०"यज्ञो हि सर्वाण्यि भूतानि पालयतीति" श्रुतेः सर्वलोकपालकत्वात्तस्य तथात्वम्।

भुड भरणे कत्थे च भ्वा० आ० सक० सेट् इदित। भुण्डते अभुण्डिष्ट बुभुण्डे कर्मणि भुण्ड्यते।

भुण्डिक पु० नीलावयवभेदे तच्चावयवम् ततः इञ्। भौण्डिकि तदपत्ये पुंस्त्री०-स्त्रियां ङीष्। भौण्डिकी तच्चीलावयवास्त्रियाम् त्रि० कौ०।

भुण्ड पु०१धीरवे धरतमुनेः पुत्रभेदे भा०आ०१४अ०। २तदुपज्ञे प्राचीनभरताङ्गपुत्रभेदे भा० आ० ६४अ०।

भुरज प्राप्तौ भ्वा०आ०सक०सेट्। भुरजते "भुरजन्त पक्षाः" ऋ० ४।४३।५। अयं धातुः धातुपाठादौ न दृश्यते।

भुरज धारणपोषणयोः कण्ड्वा० अक०आ०सक० सेट्। भुरजयति अभुरजीत्(जीत्) अयं गतौ विघट्टः।

भुरण्यु न० भृ-भृतौ कन्यु । १भरणे यजु० १८।५२ १३।४२ वेददीपे कण्ड्वा०भुरण-उनू इत्युक्तम् । २क्षिप्रे निघण्टुः ३तद्वति त्रि० ।

भुरिज् स्त्री "भृज उच्च" उणा० भृ-इजि किच्च धातोरुकारादेशः । वसुस्वरायाम् उज्ज्वल० । २बाह्वोः द्वि०व० निघण्टुः । [व० १७ अ० ।

भुरुण्ड पु० १प्रवरर्षिभेदे प्रवराध्यायः भारुण्डखगे भा०

भुवे अदने भ्वा०सक०सेट् । भूर्वति अभूर्वीत् "भुर्वतिरक्तिकर्मा" इति यास्कोक्तेः अयं तत्वार्थे धातुर्बोध्यः ।

भुवेणि पु० भुर्व-अनि न दीर्घः । १कर्त्तरि । ऋ० १।५६।१ ।

भुव पु० भवन्तीति भू-क । अग्नौ यजु० १३।५४ । वेददी० २भुवोलोके च "तत्रेदं भूर्भुवादिकम्" स्कं०सि० ।

भुवद्दत् पु० भू-शतृ गणध्यत्यासे दुदा० । भुवन् धारयन् अस्यस्य मतुप् मस्य वः तान्तत्वेऽपि "भुवद्भूमे धारयद्भ्यः पदसंज्ञा वक्तव्या" वार्ति० उक्तेः पदत्वम् । धारकवति आदित्ये ऋ०भ्यो० ४।२।५

भुवन न०भवत्यत्र भू-आधारादौ क्युन् । १जगति २जले ३आकाशे ४चतुर्दशसंख्यायाम् । ५जले च मेदि० । भुवनानि च चतुर्दश यथा "चतुर्दशविधं ह्येतद्भूतसर्गं प्रकीर्त्तितम् । भूर्भुवःस्वर्महश्चैव जनश्च तप एव च । सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः" "अतलं सुतलञ्चैव वितलञ्च गभस्तिमत् । महातलं रसातलं पातालं सप्तमं स्मृतम् । कृष्णभौमं शिलाभौमं पातालं नीलमृत्तिकम् । रक्तपीतसितकृष्णभौमानि च भवन्यपि । पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम् । शुषिरं तानि कथ्यन्ते भुवनानि चतुर्दश" वह्निपु० ।

भुवनकोष पु० भुवनस्य कोष इव । १भूगोले २ज्योतिषग्रन्थभेदे च । पुराणसर्वस्वे विष्णुपु० तद्वर्णनं यथा "अर्कविचन्द्रमसोर्यावन्मयूखैरवभास्यते । मयस्तदूर्ध्वं सरिच्छैला तावती पृथिवी स्मृता । यावत्प्रमाणा पृथिवी विस्तारपरिमण्डला । नभस्तावत्प्रमाणं वै विस्तारपरिमण्डलम् । भूमेर्योजनलक्षे तु सौरं मैत्रेय ! मण्डलम् । लक्षे दिवाकरस्यापि मण्डलं शशिनः स्मृतम् । ऊर्ध्वं शतसहस्रे तु योजनानां निशाकरात् । नक्षत्र मण्डलं कृत्स्नमुपरिष्टात् प्रकाशते । द्विलक्षे चोत्तरे ब्रह्मन् ! बुधो नक्षत्रमण्डलात् । तावत्प्रमाणभागे तु भगवान्काव्यना स्थितः । अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थितः । लक्षद्वयेन भौमस्य स्थितो देव पुरोहितः । सौरिर्द्विलक्षमेतस्योर्द्ध्वं द्विलक्षे समवस्थितः । सप्तर्षिमण्डलं तस्माल्लक्षमेकं द्विजोत्तम ! । ऋषिभ्यस्तु सहस्राणां शतादूर्द्ध्वं व्यवस्थितः । मेधीभूतसमस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः । त्रैलोक्यमेतत् कथितस्तस्येन महात्मने ! । इज्याफलस्य भूरेषा इज्या चात्र प्रतिष्ठिता । ध्रुवादूर्द्ध्वं महर्लोको यत्र ते कल्पवासिनः । एका योजनकोटी तु महर्लोको विधीयते । द्वे कोट्यौ तु जनो लोको यत्र ते ब्रह्मणः सुताः । सनन्दनाद्याः कथिता मैत्रेयामलचेतसः । चतुर्गुणोत्तरे चोर्द्ध्वं जनलोकात्तपः स्मृतः । वैराजा यत्र ते देवाः स्थिता दाहविवर्जिताः । षड्गुणेन तपोलोकात् सत्यलोको विराजते । अपुनर्मारकायत्र ब्रह्मलोको हि स स्मृतः । पादगम्यन्तु यत् किञ्चिदस्त्यस्मिन् पृथिवीमयम् । स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः । भूमिसूर्यान्तरं यत्तु सिद्धादिसुनिसेवितम् । भुवर्लोकस्तु सोऽप्युक्तो द्वितीयोमुनिसत्तम ! । ध्रुवसूर्यान्तरं यत् तु नियुतानि चतुर्दश । स्वर्लोकः सोऽपि कथितो लोकसंस्थानचिन्तकैः । त्रैलोक्यमेतत् कृतकं मैत्रेय ! परिपठ्यते । जनस्तपस्तथा सत्यमिति चाकृतकं त्रयम् । कृताकृतकयोर्मध्ये महर्लोक इति स्मृतिः । स्मृत्यो भवति कल्पान्ते योऽत्यन्तं न विनश्यति । एते सप्तमया लोका मैत्रेय ! कथितास्तव । पातालानि च सप्तैव ब्रह्माण्डस्यैव विस्तरः । एतदण्डकटाहेन तिर्य्यक् चोर्द्ध्वमधस्तथा । कपित्थस्य यथा बीजं सर्वतो वै समावृतम् । दशोत्तरेण पयसा मैत्रेयाण्डञ्च तदृतम् । सर्वोऽम्बुपरिवारोऽसौ वह्निना वेष्टितो बहिः । वह्निश्च वायुना, वायुर्मैत्रेय ! नभसावृतः । भूतादिना नभः सोऽपि महता परिवारितः । दशोत्तराण्यमेषाणि मैत्रेयैतानि सप्त वै । महान्तञ्च समावृत्य प्रधानं समवस्थितम् । अनन्तस्य न तस्यान्तः संख्यानं वापि विद्यते । भाग० ५।१६।१८ अ० विस्तरो दृश्यः ।

भुवनेश्वरी स्त्री ६त० । महाविद्यामध्ये देवीमूर्त्तिभेदे तन्मन्त्रध्यानादिकं तन्त्रसा० दृश्यम् ।

भुवस्ति पु० भुवं तनोति तन क० डि खिच्च सुम् । कटूमेदे यजु० १९।१९ । [श्वक्रो ४चन्द्रे च मेदि० ।

भुवन्यु पु० भू-कन्युच् । १स्वामिनि २सूर्य्ये च उज्ज्वल० ।

भुवपति पु० ६त० । भुवोलोकपतौ यजु०२।२ । भुवभ्वोदयोऽप्यत्र ।

भुवर् अव्य० भू-अरु-किच्च । आकाशात्मके १द्वितीये लोके भुवनकोषशब्दे विष्णुपु०वाक्यं दृश्यम् । २व्याहृतिभेदे च

भुवर्लोक पु० कर्म० । द्वितीये लोके ।

भुवस् अव्य० भू-असुन् किच्च । १आकाशात्मके द्वितीये लोके २व्याहृतिभेदे भुवः स्वाहा ।

भुवस्पति पु० कर्म० । भुवो लोकस्वामिनि अथर्व० १० ५

भुविष्ठ त्रि०भुवि तिष्ठति स्था-क अलुक्स० षत्वम् । भूमिस्थिते भाग० १।५।१७ ।

भुविस् पु० भू-इसिन् किच्च । वह्नौ उज्ज्वल० ।

भुशुण्डी स्त्री पाषाणक्षेपणार्थे चर्ममयवयन्त्ररूपे अस्त्रभेदे "भुशुण्ड्युद्यतबाहवः" भा० आ० २२७ अ० नीलकण्ठः

भू प्राप्तौ चु० आ० सक० सेट् । भावयते अभीभवत ।

भू प्राप्तौ स्वा०उ०सक०सेट् । भवति-ते अभूत् अभविष्ट ।

भू शुद्धौ अक० चिन्तने विस्मरणे च सक० चुरा० उभ० सेट् । भावयति-ते अभीभवत्-त ।

भू सत्तायां भ्वा०पर०अक०सेट् । भवति अभूत् बभूव । "भवते दुरितक्षयं यथोक्तैः क्रतुभिर्भावयते च नागलोकम् । भवति त्रिदशैश्च पूजितो यस्तृणवद्भावयति त्रिषश्च सर्वान्" कविरः

अधि-आधिक्येन भवने ऐश्वर्ये ।

अनु-अनुभवे ज्ञानभेदे सक० अनुभवशब्दे दृश्यम् ।

अन्तर्+तिरोभावे अक० ।

अभि+तिरस्कारे सक० । अभिभवति भवितुम् ।

आविस्+प्रादुस्+प्रथमप्रकाशे ।

उद्-उत्पत्तौ अक० ।

तिरस् अन्तर्धाने स्थितस्य वस्तुनः कारणात्तनाऽवस्थाने अक०

परा+असहने पराभवः ।

परि+तिरस्कारे परिभवति अतिक्रम्य भवने ।

प्रति+तुल्यरूपभवने अक० प्रतिभूः ।

वि+व्याप्तौ विभुः । [जोपदेवः

वि+अति-परस्परभवने आत्म० सक० अभिभवतेऽर्कमिन्दुः ;

सम्+योग्यत्वे अक० । सम्भवति भू-णिच् सम्भावना-रूपज्ञानविषयत्वे सम्भाव्यते ।

भ स्त्री भू-आधारे कर्त्तरि अप् वा यथायथम् क्विप् । १भूमौ अमरः २स्थानमात्रे मेदि० ३यज्ञाग्नौ पु० जटा० ४उत्पद्यमाने त्रि० ५परमेश्वरे पु० "अनिर्विण्णः स्थविष्ठो भूः" विष्णुस० ।

भूक न० भू-कक् । १क्लिन्ने काले मेदि० ।

भूकदम्ब पु० भुवि कदम्ब इव । (कोकसिमा) १अलब्धुपद्मे रत्नमा० २गोरचनुगन्धां स्त्री नैघण्टुप्र० । संज्ञायां कन् । भूकदम्बक । यवान्यां राजनि० । [राजनि०]

भूकन्द पु० भुवः कन्द इव । (थुलकुड़ि) महाम्राबणिकाद्रव्ये

भूकम्प पु० ६त० । लोकानामनिष्टादिसूचके अद्भुतरूपे पृथिव्याः स्वयंचलने । तस्य शुभाशुभसूचकता अद्भुत-सागरे उक्ता यथा "मेघे दक्षिणभे गजः प्रचलति व्यासादिभिः कथ्यते चाषे मीनकुलीरभे च दृषभे सत्यं चलेत् कच्छपः । यूके कुम्भधरे सृगेन्द्रमिथुने कन्यास्थगे पन्नगस्तेषामेकतमो यदि प्रचलति क्षौणी तदा कम्पते । कच्छपे मरणं क्षेय मरणञ्चापि पन्नगे । सर्वत्र सुखदश्चैव पृथिव्यां चलिते गजे । प्रवितनरेश्वर मरणं व्यसनान्याग्नेयमारुतयोः । क्षुद्भयमतिदृष्टि-भिरुपपीडान्ते जनाश्चापि । त्रिचतुर्थपञ्चदिने मासे पक्षे त्रिपक्षके । भवति यदा भूकम्पः प्रधानवृषनाशनं कुरुते" । स च भूमिजोत्पातविशेषः यथा "चर-स्थिरभवं भौमं भूकम्पनपि भूमिजम् । जलाशयानां वैक्लव्यं भौमन्तदपि कीर्तयेत् । भौमं चाप्यं फलं क्षौणं चिरेण परिपच्यते" ज्यो०त० ।

भूकर्बुदारक पु० भूमेर्बो राजनि० ।

भूकल पुंस्त्री० दुर्विनीताश्वे राजनि० ।

भूकश्यप पु० भूमिजातः कश्यप्रपुत्रतार । वसुदेवे त्रिका० कश्यप्रस्य वसुदेवरूपेणावतारकथा च हरिवं० ५६ अ० । "तदस्य कश्यप्रस्यांशस्तेजसा कश्यपोपमः । वसुदेव इति ख्यातो गोषु तिष्ठति भूतले" ।

भूकाक पु० भुवि ख्यातः काकः । १क्षुद्रकाके २कौञ्चे ३नील-कपोते च राजनि० ।

भूकुम्भी स्त्री भुवि कुम्भीव । भूमिपारुष्यौ राजनि० ।

भूकुष्माण्डी स्त्री भुवि कुष्माण्डीव । वदर्याम् राजनि०

भूकेश पु० भुवः पृथिव्याः केश इव । १वटे २शैवले च मेदि० ३राज्ञ्यां स्त्री शब्दरत्ना० ङीष् ।

भूक्षित् पु० भुवं क्षिणोति क्षिद-क्विप् । भूधरे त्रिका० ।

भूखर्जूरी स्त्री भुवि लग्ना खर्जूरी आक०त० । क्षुद्रखर्जूर्याम् राजनि० । भूमिखर्जूर्योरयोऽयत्व ।

भूगर न० १विष्ठे राजनि० २भवभूतिकवौ पु० त्रिका० । [विष्णुस०

भूगर्भ पु० भूर्गर्भोऽस्य । विष्णौ पु० "क्षितिरग्रगर्भो भूगर्भः"

भूगृह न० भूमध्यस्थं गृहम् । १भूमध्यस्थे गृहे धरणी-सदनादयोऽप्यत्र । २तन्त्रोक्ते अन्तर्बहिःस्थे देवताभ्य-र्चविशेषाङ्गके पदार्थे "धरणीसदनात्मयज्ञ" श्रीतत्त्वोद्धार ।

भूगोल पु० भूगोऽव इव । गोलाकारे मण्डले "मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति । विष्वाणः परमां शक्तिं ब्रह्मणो धारयात्मिकाम्" ज्यो०सि० ।

तत्स्थानभेदखलत्वादिकं च सि० शि० उक्तं यथा

"मेरोः पितुः यथाङ्कुक्कविरविजेज्यार्किनक्षत्रकक्षा-
दृक्तैर्द्धो हतः सन् स्वदनिलसलिलव्योमतेजोमयोऽयम् ।
नाल्याधारः स्वशक्त्यैव वियति नियतं तिष्ठतीहास्य पृष्ठे
निष्ठं विश्वं च शश्वत् सदनुजमनुजादित्यदैत्यं समन्तात् ।
सर्वतः पर्वतारामग्रामचैत्यचयैश्चितः । कद-
म्बकुसुमग्रन्थिः केसरप्रसरैरिव । मूर्तौ धर्त्ता चेद्धरि-
त्राक्षतोऽन्यस्तस्याप्यन्योऽस्यैवमानवस्था । अन्त्ये
कल्प्या चेत् स्वशक्तिः किमादौ किं नो भूमेः साऽसतैव
शक्तिः ? । यथोष्णताऽग्नौ जलयोश्च, शीतता विधौ, द्रुतिः
के, कठिनत्वमश्मनि । मरुच्चलो भूरचला स्वभावतो
यतो विचित्रा खलु वस्तुशक्तयः । आकृष्टिशक्तिश्च मही-
तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या । आ-
ख्यते तत् पततीव भाति समे समन्तात् क पतत्वियं खे ।
भपञ्जरस्य भ्रमणाच्चलोकादाधारशून्या धरणिति प्रतीतिः ।
स्वस्थं न दृष्टं च गुरु स्वभातः खेऽधः प्रयातीति
वदन्ति यौक्तिकाः । द्वौ द्वौ रवीन्दू भगणौ च तद्दैका-
न्तरौ साधुदयं प्रयेताम् । यदब्रह्मगुप्तेवमनन्तराद्या-
ब्रुवीत्यसत्यात् प्रति युक्तमुक्तिम् । भूः खेऽधः खलु
यानीति बुद्धिर्बालोक्तिसुधा कथम् । यातायातं तु दृष्टापि
खे यत् क्षिप्तं गुरु क्षितिम् । किं गण्यं तव वैगुण्यं
हैगुण्यं वा तया कथा । भार्केन्दूनां विलोक्याक्षा
भ्रुवन्तस्थपरिभ्रमम् । यदि सभा खगोलोदरसन्निभा
भगवती धरणी तरणिः क्षितेः । उपरिदूरगतोऽपि
परिभ्रमन् किमु नरैरमरैरिव नेक्ष्यते । यदि
निशालनकः खलताक्षः किमु तदन्तरगः सन दृश्यते ।
उदयमं नतु मेरुरयांशुमान् कथमुदेति च दक्षिण
भागके । समो यतः स्यात् परिधेः शतांशः पृथ्वी च
पृथ्वी, नितरां तनीयान् । अरच, तत्पृष्ठगतस्य
क्षणक्षा समेव तस्य प्रतिभात्यतः सा । पुरान्तरं चेदि-
दमुत्तरं स्यात् तदक्षविक्षेपलवैस्तदा किम् । चक्रां-
शकैरित्युपपातयुक्त्या युक्तं निरक्षं परिधेः प्रमाणम् ।
निरक्षदेशात् क्षितिजोऽग्रगे भवेद्यतो गणितेन य-
स्मात् । तदन्तरं षोडशयोजनघ्नं स्याद् भूमानमस्माद् यदु
किं तदुक्तम् । पृष्ठोन्नतिर्यत्पृथुतिर्यदूर्ध्वं दोर्ज्यासजा-
त्यादिकं परिधिना घटतेऽमुना हि । ज्यान्वेन तेन जगु-
रुक्तमहीप्रमाणप्रामाण्यमन्वयबुजा व्यतिरेकवेण । लङ्का
कुमध्ये यमकोटिरस्याः प्राक्, पश्चिमे रोमकपत्तनं च ।
अधस्ततः सिद्धपुरं सुमेरुः सौम्येऽथ याम्ये बडवानलस्य ।
कुक्षत्तपादान्तरितानि तानि स्थानानि षड् गोलविदो
वदन्ति । वसन्ति मेरौ सुरसिद्धसङ्घा सौम्ये च सर्वे नरकाः
सटैत्याः । यो यस्य तिष्ठत्यवनौ तलस्था सात्मानमस्या
उपरिस्थितं च । स मन्यतेऽतः कुचतुर्थसंस्थामिमञ्च ते
तिर्यगिवामनन्ति । अधःशिरस्काः कुटलान्तरस्थाश्छायो-
मनुष्या इव नीरतीरे । स्वनाकुलास्तिर्यगधःस्थिताश्च
तिष्ठन्ति ते तत्र वयं यथात्र । भूमेरर्धं खारनिधौ
वृत्तस्थं जम्बुद्वीपं प्राच्युदाचार्य्यवर्याः । अर्धेऽन्य-
स्मिन् द्वीपषट्कस्य याम्ये खारक्षीराद्यम्बुधीनां नि-
वेशः । लवणजलधिरादौ तुल्यविस्तृश्च तस्मादृतमन्नत-
दृष्टिः श्रीश यस्माद्बभूव । अर्चितचरणपद्मः पद्म-
जन्मादिदेवैर्वसति सकलवासो वासुदेवश्च यस्य । दग्धो
वृतस्तेन सुरश्च तस्मात्तद्यस्य च स्वादुजलस्य चान्यः ।
स्वादूदकान्नर्बुदवानलोऽसौ पातालकोकाः पृथिवीपु-
टानि । अम्बुत्फणामणिमण्युद्युतप्रकाशा एतेषु
वासुरगणाः फणिनो वसन्ति । दिव्यानि दिव्यरमणी
रमणीयदेहैः सिद्धाश्च तत्र च लसत्कनकाम्बरैः ।
भावं ततः शाल्मलमत्र कौशं क्रौञ्चं च गोमेदकपु-
ष्करे च । द्वयोर्द्वयोरन्तरमेकमेकं सप्तद्वयोर्द्वीपवदाह-
रन्ति । लङ्कादेशाद्विमगिरिवृत्तमेकूटोऽथ तस्मात्
तस्माच्चान्यो निषध इति ते सिद्धपूर्व्यन्तदैर्घ्याः । एवं
सिद्धादुदगपि पुराच्छ्वेतशृङ्गीलवर्षाण्यूर्ध्वं जगुरिह
बुधा यत्तरे द्वीपिदेशान् । भारतवर्षमिदं हृदुग-
यात् किंपुरुषवर्षमतो हरिवर्षम् । सिद्धपुराच्च तथा कुरु
तस्मात् विद्धि हिरण्मयरम्यकवर्षे । माल्यवांश्च यस-
कोटिपत्तनाद्रोमकाच्च किल गन्धमादनः । नीलश्वेतनि-
षधावधी च तावन्नारायणमनयोरिलावृतम् । माल्यव-
दब्धिमध्यवर्त्ति यत् तत् तु भद्राश्वगं जगुर्बुधाः ।
गन्धर्वजलराशिमध्यगं केतुमालकमिलावलाविदः ।
निषधनीलसुगन्धमाल्यकैरलमिलावृतमालभौ । अ-
मरलोकिकुधायशमाकुलं रुचिरकाञ्चनचित्रशचीतलम् ।
दृष्ट हि मेरुगिरिः किल मध्यगः कनकरत्नमयश्चि-
दयाश्रयः । दृष्टिगजन्यकृपद्मजकर्णिकेति च पुराण-
विदोऽनुमन्यन्ते । विष्कम्भशैलाः खलु मन्दरोऽन्य

गन्धवैश्चो त्रिपुरः सुपार्श्वः । तेषु क्रमात् सन्ति च केतुवृक्षाः कदम्बजम्बूवटपिप्पलाख्याः । जम्बूफलाम-लगलद्रसतः प्रवृत्ता जम्बूनदी रसयुता स्रवदभूत् सुवर्णम् । जाम्बूनदं हि तदतः सुरसिद्धसङ्घाः प्रमत्त पिबन्त्य-स्ततपानपराङ्मुखांस्तम् । वनं तथा चैत्ररथं विचित्रं तेष्वप्सरोनन्दननन्दनं च । पृथ्वाक्षयं यद्भृति-कृत सुरार्या भ्राजिष्णु वैभ्राजमिति प्रसिद्धम् । सरांस्यघैतेष्वरुणं च मानसं महाह्रदं श्वेतजलं यथा-क्रमम् । सरःसु तासारसपद्मसालसाः सुरा रमन्ते ज-लकेलिलालसाः । सद्वूलकाञ्चनमयं शिखरत्रयं च मेरौ हरारिकपुरारिपुराणि तेषु । तेषामधः शतसहस्रयो-नान्तकामां रत्नोऽम्बुपानिलजयीशपुराणि चाष्टौ । विष्णुपदी विष्णुपदात् पतिता मेरौ स्रवधाऽऽस्रात् । विष्कम्भाचलमस्तकप्रसरःसङ्गता गता वियता । सी-ताख्या भद्राश्वं, मालवनन्दा च भारतं वर्षम् । व-क्षुस्च केतुमालं, भद्राख्या चोत्तरान् कुरून् याता । याऽऽकर्षिताखिलधिता दृष्टा स्पृष्टावगाहिता पीता । चक्रा स्मृता स्तुता वा पुनाति बहुधाधिनः पुरुषान् । यां चलितो दलिताखिलदुरितो गच्छति बलगति तत् पितृसङ्घः । प्राग्तटे विजितान्तकदूतो याति नरे निरयात् सुरलोकम् । ऐन्द्रं कशेरुफलं किल तास्व-पर्णमन्यदुरुभस्त्रिशदतश्च कुमारिकाख्यम् । नागं च सौ-म्यमिह वारुणमन्यखण्डं गान्धर्वसंज्ञमिति भारतवर्ष-मध्ये । वर्षाव्यवस्थितिरिहैव कुमारिकाख्ये शेषेषु चान्यज-नाः निवसन्ति सर्वे । आहेन्द्रशुक्तिमलयर्क्षकपारियात्राः सह्याःसविन्ध्य इह सप्त कुलाचलाख्याः । भूर्लोकाख्यो द-क्षिणे व्यच्छदेशात् तस्मात् सौम्योऽयं भुवः, स्वयं मेरुः । लक्ष्याः पुरयैः खे सहः स्याज्जलोऽलोऽनलयानलैः खे-स्तपः सत्यमन्त्याः । लङ्कापुरेऽर्कस्य यदोदयः स्यात् तदा दिनार्धं यमकोटिपुर्याम् । अधस्तदा सिद्धपुरेऽस्त-कालः स्याद्रोमके रात्रिदलं तदैव । यत्रोदितोऽर्कः किल तत्र पूर्वा, तत्रापरा यत्र गतः प्रसिद्धाम् । तन्मत-स्तुतोऽन्ये च ततोऽखिलास्तासदुत्स्थितो मेरुरिति प्रसिद्धम् । यमोज्जयिन्याः कुचतुर्थभागे प्राच्यां दिशि स्याद्यमकोटिरेव । ततश्च पश्चाच्च भवेदवन्ती लङ्कैव तस्याः ककुभि प्रतीच्याम् । तथैव सर्वत्र यतो हि यत् स्यात् प्राच्यां ततश्च भवेत् प्रतीच्याम् । निरक्षदे-शादितरत्र तस्मात् प्राचीप्रतीच्यौ च विचित्रसंस्थे । निरक्षदेशे क्षितिमण्डलोपगो ध्रुवौ नरः पश्यति दक्षि-णोत्तरौ । तदाश्रितं खे जलयन्त्रवत् तथा भ्रमद्भचक्रं निजमस्तकोपरि । उदग्दिशं याति यथा यथा नर-स्तथा तथा स्याज्ञतसज्ञमण्डलम् । उदग्ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः । योजन-संख्याभांशैर्गुणिता स्वपरिधिहृता भवन्त्यंशाः । भूमौ कक्षायां वार्धांगेभ्यो योजनानि च व्यस्तम् । सौम्यं ध्रुवं मेरुगताः स्वमध्ये याम्यं च दैत्या निजमस्तकोर्वे । भ्रमद्भचक्रं विलोकयन्ति क्षितिजप्रसक्तम् । प्रोक्तो योजनसंख्यया कुपरिधिः षण्णाङ्गनन्दाब्धय४६६७ स्तद्व्यासः कुभुजङ्गषायकभुवः१५८१ विभांशकैनाधिकः१-२४ पृष्ठे क्षेत्रफलं तयोः युगगुणत्रिंशच्छराब्धयो ७८५३० २४ भूमेः कन्दुकजालवत् कुपरिधिव्याजाच्छतैः प्रस्फु-टम् । दुष्टं कन्दुकपृष्ठजालवदिहाभोगे फलं लम्बितं लब्धेनाथ यतांशकोऽपि न भवेद्यस्मात् फलं वास्तवम् । तत् प्रत्यक्षविरुद्धमुद्धतमिदं नैवास्तु वा ह्यस्तु वा हे मौढ्या ! गणका विचारयत लम्बध्यक्षवृत्ता भ्रमम् । यत् परिध्यर्धविष्कम्भं हतं क्षुण्णं किमांशकम् । तेनार्धस्याद्यते गोलः किञ्चिदूनेऽवशिष्यते । गोलक्षेत्रफलात्तु तत् व्याद्रसक्षेत्रफलं यतः । आर्धद्विगुणितात्तस्मात् तावदेवा-पुरे हते । एवं षड्गुणात् क्षेत्रफलात् पृष्ठफलं खलु । आधिकं जायते तेन परिधिघ्नं कृतः कृतम् । दृष्टक्षेत्र-फलं यस्मात् परिधिघ्नं न सूक्ष्मदम् । दुष्टत्वाद्गणि-तस्यास्य दुष्टं भूपृष्ठजं फलम् । गोलस्य परिधिः कक्ष्यो वेदघ्नज्यामितैर्मितः । सखतुरगरेखाभिर्यद्वदाम-लके स्थिताः । दृग्वृत्ते यमकाक्षवद्वत् प्रागुक्तपरिधेर्मि-तान् । अधर्धोऽक्षरेखाभिर्गोले यमान् प्रकल्पयेत् । तत्रैकयमकक्षेत्रफलं खरुद्रैः प्रभाध्यते । सर्वज्यैक्यं भिन्नज्यार्धहीनं भिन्नार्धभाजितम् । एवं यमफलं तत् स्याद्गोलव्यासघ्नं यतः । परिधिव्यासघातो-ऽतो गोलपृष्ठफलं स्मृतम् । दृष्टक्षेत्रे परिधिगुणित व्यासघाद्यं फलं तत् त्रिघ्नं वेदैरुपरि परितः कन्दुकस्येव जालम् । गोलस्यैवं तदपि च फलं पृष्ठजं व्यासनि-घ्नम् षड्भिर्भक्तं भवति नियतं गोलगर्भं घनाख्यम् । पुराणसर्वस्वे विष्णुपु० चतुर्थोक्तं यथा

"जम्बुप्लाक्षौ द्वीपौ शाल्मलिश्चापरो द्विज ! । कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः । एते द्वीपा स-प्तद्वै तु सप्त सप्तभिराहृताः । लवणेक्षुसुरासर्पिर्दधि-

दुग्धजलैः समः। जम्बूद्वीपः समस्तानामेतेषां मध्यमे स्थितः। तस्यापि मेरुर्मैत्रेय! मध्ये कनकपर्वतः। चतुरशीतिसाहस्रो योजनैरस्य चोच्छ्रयः। प्रविष्टः षोड़शाधस्तात् द्वात्रिंशन्मूर्ध्नि विस्तृतः। मूले षोड़शसाहस्रो विस्तारस्तस्य भूभृतः। भूपद्मस्यास्य शैलोऽसौ कर्णिकासंस्थितिः स्थितः। हिमवान् हेमकूटश्च निषधश्चास्य दक्षिणे। नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः। उच्चप्रमाणौ द्वौ मध्यौ दशहीनास्तथा परे। सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते। भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतम्। हरिवर्षं तथैवान्यं मेरोर्दक्षिणतो द्विजः। रम्यकञ्चोत्तरं वर्षं तथैवात्तु हिरण्मयम्। उत्तराः कुरवश्चैव यथा वै भारतं तथा। नवसाहस्रमेकैकमेतेषां द्विजसत्तम!। इलावृतञ्च तन्मध्ये सौवर्णो मेरुरुच्छ्रितः। मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतम्। इलावृतं महाभाग! चत्वार उपपर्वताः। विष्कम्भा रचिता मेरोर्योजनायुतसंछ्रिताः। पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः। विपुलः पश्चिमे भागे सुपार्श्वश्चोत्तरे स्मृतः। कदम्बस्तेषु जम्बूश्च पिप्पलो वट एव च। एकादश शतायामाः पादपा गिरिकेतवः। जम्बूद्वीपस्य सा जम्बूर्नामहेतुर्महामुने!। महागजप्रमाणानि जम्बूफलानि वै। पतन्ति भूमृतः पृष्ठे शीर्यमाणानि सर्वतः। रसेन तेषां प्रख्याता तत्र जम्बूनदीति वै। सरित् प्रवर्त्तते सा च पीयते तन्निवासिभिः। न स्वेदो न च दौर्गन्ध्यं न जरा नेन्द्रियक्लमः। तत्पानसुखसमनसां जनानां तत्र जायते। तीरमृत्तत्र संप्राप्य सूर्यवायुविशोषिता। जाम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणम्। भद्राश्वं पूर्वतो मेरोः केतुमालञ्च पश्चिमे। वर्षं द्वे तु मुनिश्रेष्ठ! तयोर्मध्यमिलावृतम्। वनं चैत्ररथं पूर्वं दक्षिणे गन्धमादने। वैभ्राजं पश्चिमे तद्वदुत्तरे नन्दनं स्मृतम्। अरुणोदं महाभद्रं सलिलोदं समानसम्। सरांस्येतानि चत्वारि देवभोग्यानि सर्वदा। सीतान्तचैत्रसुभद्रास्य कुरवो माल्यवांस्तथा। वैकङ्कमप्रसुखासेरोः पूर्वतः केसराचलाः। त्रिकूटः शिशिरश्चैव पतङ्गो रुचकस्तथा। निषधादयो दक्षिणतस्तस्य केसरपर्वताः। शिखिवासः वैदूर्यः कपिलो गन्धमादनः। जारुधिप्रसुखास्तद्वत् पश्चिमे केसराचलाः। मेरोरनन्तराश्चैषु जठरादिष्ववस्थिताः। अञ्जनोऽथ शतमनो हंसो नागस्तथा परः। कालञ्जराद्याश्च तथा उत्तरे केसराचलाः। चतुर्दशसहस्राणि योजनानां महापुरी। मेरोरुपरि मैत्रेय! ब्रह्मणः प्रथिता पुरी। तस्यां समन्ततश्चाष्टौ दिशासु विदितासु च। इन्द्रादिलोकपालानां प्रख्याताः प्रवराः पुरः। विष्णुपादविनिष्क्रान्ता पूरयित्वेन्दुमण्डलम्। समन्ताद् ब्रह्मणः पूर्यां गङ्गा पतति वै दिशः। सा तत्र पतिता दिक्षु चतुर्द्धा प्रत्यपद्यत। सीता चालकनन्दा च चक्षुर्भद्रा च वै क्रमात्। पूर्वेण शैलात् सीता तु शैलं याप्यन्तरीक्षगा। ततश्च पूर्ववर्षेण भद्राश्वेनैति सार्णवम्। भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून्। अतीत्योत्तरमम्भोधिं समभ्येति महामुने!। चक्षुश्च पश्चिमगिरीनतीत्य सकलांस्ततः। पश्चिमं केतुमालाख्यं वर्षमभ्येति सार्णवम्। तथा चालकानन्दापि दक्षिणेनेत्य भारतम्। प्रयाति सागरं भूत्वा सप्तभेदा महामुने!। श्वेतनीलनिषधायामौ माल्यवद्गन्धमादनौ। तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः। भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा। पद्मानि लोकपद्मस्य मर्य्यादाश्चैव बाह्यतः। जठरो देवकूटश्च मर्य्यादापर्वतावुभौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ। मेरोः पश्चिमदिग्भागे यथा पूर्वौ तथा स्थितौ। त्रिशृङ्गो जारुधिश्चैव उत्तरे वर्षपर्वतौ। पूर्वपश्चायतावेतावर्णवान्तव्यवस्थितौ। इत्येते मुनिवर्य्योक्तामर्य्यादापर्वतास्तव। जठराद्याः स्थिता मेरोर्येषां द्वौ द्वौ चतुर्दिशम्। मेरोश्चतुर्दिशं ये तु प्रोक्ताः केसरपर्वताः। शीतान्ताद्या मुने! तेषामतीव सुमनोरमाः। शैलानामन्तरे द्रोण्यः सिद्धचारणसेविताः। सुरम्याणि तथा तेषु काननानि पुराणि च। लक्ष्मीविष्ण्वग्निसूर्य्यादिदेवानां मुनिसत्तम!। तान्यायतनवर्य्याणि जुष्टानि वरकिन्नरैः। गन्धर्वयक्षरक्षांसि तथा दैतेयदानवाः। क्रीड़न्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम्। औषाहृतेते कथिताः स्वर्गा धर्मिष्ठमालयाश्रुने!। नैतेषु पापकर्माणो यान्ति जन्मशतैरपि। भद्राश्वे भगवान् विष्णुर्हयशिरा द्विज!। वराहः केतुमाले तु भारते कूर्मरूपधृक्। मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते सनातनः। विश्वरूपेण सर्वत्र सर्वः सर्वेश्वरो हरिः। सर्वस्याधारभूतोऽसौ मैत्रेयास्ते ऽखिलात्मकः। यानि किंपुरुषाद्यानि वर्षाण्यष्टौ महामुने!। न तेषु शोको नायासो नोद्वेगः क्षुद्भयादिकम्। सुख्या

प्रजा निरातङ्काः सर्वदुःखविवर्जिताः । दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः । न तेषु वर्षवर्ष्येषु भौमान्यम्भांसि तेषु वै । कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना । सर्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः । नद्यश्च शतशस्तेभ्यः प्रसृता या द्विजोत्तम !" । "पराशर उवाच । उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् । वर्षं तद्भारतं नाम भारती यत्र सन्ततिः । नवयोजनसाहस्रो विस्तारोऽस्य महामुने ! । कर्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम् । महेन्द्रो मलयः सह्यः शक्तिमान्ऋक्षपर्वतः । विन्ध्यश्च पारि(या)त्रश्च सप्तात्र कुलपर्वताः । श्रुतः संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति च । तिर्यक्त्वं नरकत्वञ्च यान्त्यतः पुरुषाशने ! । इतः स्वर्गश्च मोक्षश्च मध्यश्चान्तश्च गम्यते । न खल्वन्यत्र मर्त्यानां कर्म भूमौ विधीयते । भारतस्यास्य वर्षस्य नवभेदान्निबोधत । इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान् । नागद्वीपस्तथा सौम्यो गन्धर्वस्त्वथ वारुणः । अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः । योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् । पूर्वे किराता यस्यापि पश्चिमे यवनाः स्थिताः । ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः । इज्यायुधवणिज्याद्यैर्वर्त्तयन्तो व्यवस्थिताः । वेदस्मृतिसुखाश्चान्याः पारि(या)त्रोद्भवा मुने ! । नर्मदा सुरसाद्याश्च नद्यो विन्ध्यविनिर्गताः । तापीपयोष्णीनिर्विन्ध्या कावेरीप्रमुखा नदी । गोदावरीभीमरथीकृष्णवेण्यादिकास्तथा । सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः । कृतमालाताम्रपर्णीप्रमुखामलयोद्भवाः । त्रिसामा ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः । ऋषिकुल्याकुमारीद्याः ऋक्षपादसमुद्भवाः । शतद्रूचन्द्रभागाद्या हिमवत्पादनिःसृताः । यासां नद्युपनद्यश्च सन्त्यन्यासु सहस्रशः । एतेमे कुरुपञ्चालमध्यदेशादयोजनाः । पूर्वदेशादिकाश्चैव कामरूपनिवासिनः । ओड्राः कलिङ्गामगधा दाक्षिणात्याश्च सर्वशः । तथापरान्ताः सौराष्ट्राः शूद्राभीरास्तथार्बुदाः । मारूकामालकाश्चैव पारि(या)त्रनिवासिनः । सौवीराः सैन्धवाहूणाः शाल्वाः शाकलवासिनः । मद्रारामाम्बष्ठपारसीकादयस्तथा । एषां पिबन्तः सलिलं वसन्ति सरितां सदा । चत्वारि भारते वर्षे युगानि मुने ! । कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् । तपस्तप्यन्ति मुनयोजुह्वते चात्र यज्विनः । दानानि चात्र दीयन्ते परलोकार्थमादरात् । पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते । तत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने ! । यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः । यत्र जन्मसहस्राणां सहस्रैरपि सत्तम ! । कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयम् । गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे । स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात् । कर्मण्यसंकल्पिततत्फलानि संन्यस्य विष्णौ परमात्मरूपे । अवाप्य तां कर्ममहीमनन्ते तस्मिँल्लयं ये त्वमलाः प्रयान्ति । जानीम नैतत्सदृशं विलीने स्वर्गप्रदे कर्मणि देहबन्धम् । प्राप्स्याम धन्याः खलु ते मनुष्या ये भारते नेन्द्रियविप्रहीनाः । नवसंख्यन्तु मैत्रेय ! जम्बूद्वीपमिदं मया । शतयोजनविस्तारं संक्षेपात् कथितं तव । जम्बूद्वीपं समावृत्य शतयोजनविस्तृतः । मैत्रेय ! वृत्ताकारः स्थितः क्षीरोदधिर्बहिः ।" "पराशर उवाच । क्षीरोदेन यथाद्वीपो जम्बुसंज्ञोऽभिवेष्टितः । वेष्टयेच्च तथा सद्यः प्लक्षद्वीपस्तथा स्थितः । जम्बूद्वीपस्य विस्तारः शतसाहस्रसम्मितः । स एव द्विगुणो ब्रह्मन् ! प्लक्षद्वीपोऽप्युदाहृतः । सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै । ज्येष्ठः शान्तभयो नाम शैशिरस्तदनन्तरः । सुखोदयस्तथानन्दः शिवः क्षेमक एव च । ध्रुवस्य सप्तमस्तेषां प्लक्षद्वीपेश्वरा इमे । पूर्वं शान्तभयं वर्षं शिशिरं सुखदं तथा । आनन्दञ्च शिवञ्चैव क्षेमकं ध्रुवमेव च । मध्यादाकारकास्तेषां तथान्ये वर्षपर्वताः । सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम ! । गोमेदश्चैव चन्द्रश्च नारदोदुन्दुभिस्तथा । सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः । वर्षाचलेषु रम्येषु सर्वेष्वेतेषु चानघाः । वसन्ति देवगन्धर्वसहिताः सततं प्रजाः । तेषु पुण्या जनपदाश्चिराच्च म्रियते जनः । नाधयोव्याधयोवापि सर्वकालसुखं हि तत् । तेषां नद्यश्च सप्तैव वर्षाणान्तु समुद्गाः । नामतस्ताः प्रवक्ष्यामि शृताः पापं हरन्ति याः । अनुतप्ता शिखा चैव विपापा तिदिवा क्रमुः । अमृता सुलता चैव सप्तैतास्तत्र निम्नगाः । एते शैलास्तथा नद्यः प्रधानाः कथितास्तव । क्षुद्रनद्यस्तथा शैलास्तत्र सन्ति सहस्रशः । ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते । अपसर्पिणी न तेषां वै नचैवोत्सर्पिणी प्रजा । नात्र चास्ति युगावस्था तेषु स्थानेषु सप्तसु । त्रेतायुगसमः कालः सर्वदैव महामुने ! । प्लक्षद्वीपादिषु ब्रह्मन् ! शाकद्वीपादिकेषु वै । पञ्चवर्षसहस्राणि जना जीवन्त्यना-

मयाः। धर्माः पञ्चसप्तैतेषु वर्णाश्रमविभागजाः।
वर्णांश्च तत्र चत्वारस्तान्निबोध वदामि ते। आर्यकाः
कुररास्चैव विविंशाभाविनश्च ते। विप्रक्षत्रियवैश्याश्चे
शूद्राश्च द्विजसत्तम!। जम्बूद्वीपप्रमाणस्तु तन्मध्ये सुमहा-
नगः। मेरुरुत्तमसंस्थोऽयं मेरुद्वीपे द्विजोत्तम!।
दृश्यते भगवांस्तत्र तैर्देवैरार्यकादिभिः। सोमरूपी
जगत्स्रष्टा सर्वः सर्वेश्वरो हरिः। मेरुद्वीपप्रमाणेन
मेरुद्वीपसमाहृतः। तथैवेक्षुरसोदेन परिवेशानुकारिणा।
इत्येतत्तव मैत्रेय! मेरुद्वीपसदाहृतम्। संक्षे-
पेण मया भूयः शाल्मलं मे निशामय। शाल्मल-
स्येश्वरो वीरो वपुष्मांस्तनुतानू शृणु। तेषान्तु नाम-
संज्ञानि सप्त वर्षाणि तानि वै। श्वेतोऽथ हरितश्चैव
जीमूतो हरितस्तथा। वैद्युतो मानसश्चैव सुप्रभश्च
महासने!। शाल्मलेन समुद्रोऽसौ द्वीपेनेक्षुरसोदकः।
विस्तारद्विगुणेनाथ सर्वतः संवृतः स्थितः। तत्रापि
पर्वताः सप्त विज्ञेयास्तत्त्वयोनयः। रसाभिव्यञ्जकास्ते
तु तथा सप्तैव निम्नगाः। कुमुदश्चोन्नतश्चैव तृतीयश्च
बलाहकः। द्रोणो यत्र महौषध्यः स चतुर्थो महीधरः। कङ्कस्तु पञ्चमः प्रोक्तो महिषः सप्तमस्तथा।
कुमुदान् पर्वतवरः सरित्स्तासां निबोध मे। योनितोया
विपाप्मा च चन्द्रा शुक्ला विमोचनी। निवृत्तिः सप्तमी
तासां कृतास्ताः पापघ्नादिदाः। श्वेतश्च लोहितश्चैव
जीमूतं हरितं तथा। वैद्युतं मानसश्चैव सुप्रभं नाम
सप्तमम्। सप्तैतानि तु वर्षाणि चातुर्वर्ण्ययुतानि वै।
शाल्मलेऽपि च ये वर्षा वसन्त्येते महासने!। कपिला-
श्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक्। ब्राह्मणाः
क्षत्रिया वैश्याः शूद्राश्चैव यजन्ति तम्। भगवन्तं सम-
स्तस्य विष्णुमात्मानमव्ययम्। वायुभूतं मखश्रेष्ठै-
र्योज्विनोऽसङ्गसंस्थितिम्। देवानामत्र सान्निध्यमत्रैव
सुमनोरमे। शाल्मलिश्च महाद्रुमो नाम निवृत्तिकारकः।
एष द्वीपः समुद्रेण सुरोदेन समावृतः। विस्तारः शाल्-
मलस्यैव समेन तु समन्ततः। सुरोदकः परिवृतः कुश-
द्वीपेन सर्वतः। शाल्मलस्य तु विस्तारादुद्विगुणेन समा-
न्ततः। ज्योतिष्मतः कुशद्वीपे सप्त पुत्राः प्रकीर्तिताः।
उद्भिद् वेणुमांश्चैव सुरथो लम्बनो धृतिः। प्रभाकरोऽथ
कपिलस्तन्नाम्ना वर्ष उच्यते। तस्मिन् वसन्ति मनुजाः
सह दैतेयदानवैः। तथैव देवगन्धर्वयक्षकिंपुरुषा-
दिभिः। वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः।
दमिनः शुष्मिणः स्नेहा मन्देहाश्च महासने!। ब्रा-
ह्मणाः क्षत्रियाः वैश्याः शूद्राश्चानुक्रमोदिताः। यथोक्त-
कर्मकर्तृत्वात् स्वाधिकारक्षयाय ते। तत्र यस्तु कुशद्वीपे
ब्रह्मरूपं जनार्दनम्। यजन्तः क्षपयन्त्यघमधिकारफल-
प्रदम्। विद्रुमो हेमशैलश्च द्युतिमान् पुष्पवांस्तथा।
कुशेशयो हरिश्चैव सप्तमो मन्दराचलः। वर्णाश्चत्वारस्तु
सप्तैव तत्र द्वीपे महासने!। नद्योऽपि सप्त तासान्तु
शृणु नामान्यनुक्रमात्। धूतपापा शिवा चैव पवित्रा
सम्मतिस्तथा। विद्युदम्भा मही चैव सर्वपापहरा-
स्त्विमाः। अन्याः सहस्रशश्चान्या क्षुद्रनद्यस्तथाऽपराः।
कुशद्वीपे कुशस्तम्बः संख्या तस्य तु कीर्तिता। तत्प्रमा-
णेन स द्वीपो घृतोदेन समावृतः। घृतोदश्च समुद्रो वै
क्रौञ्चद्वीपेन संवृतः। क्रौञ्चद्वीपो महाभाग! श्रूयतान्मा-
परो महान्। कुशद्वीपस्य विस्तारादुद्विगुणो यस्य वि-
स्तरः। क्रौञ्चद्वीपे द्युतिमतः पुत्राः सप्त महात्मनः। तेषा-
मानि च वर्षाणि तेषामुक्तो महीपतिः। कुशलो मन्दग-
श्चोष्णः पीवरोऽन्धकारकः। मुनिश्च दुन्दुभिश्चैव सप्तैते
तनयास्तदा सुने!। तत्रापि देवगन्धर्वसेविताः सुमनोरमाः।
वर्षाचला महाबुद्धे! तेषां नामानि मे शृणु। क्रौञ्चश्च
वामनश्चैव तृतीयश्चान्धकारकः। चतुर्थो धरणश्चैव
स्वाभिधांश्चयत्नभः। देवाद्रिः पञ्चमश्चैव तथा ऽन्धपुण्ड-
रीकवान्। दुन्दुभिश्च महाशैलो द्विगुणास्ते परस्परम्।
द्वीपद्वीपेषु ये शैला यथा द्वीपानि ते तथा।
वर्षाचलेषु रम्येषु वर्षशैलवरेषु च। निवसन्ति सिरा-
तङ्काः सहदेवगणैः प्रजाः। पुष्कराः पुष्कलाधन्याक्षि-
प्याख्याश्च महासने!। ब्राह्मणाः क्षत्रियावैश्याः शूद्राश्चा-
नुक्रमोदिताः। ते तत्र नद्यो मैत्रेय! या पिबन्ति शृ-
णुष्व ताः। सप्त प्रधानाः परतस्तास्ताः क्षुद्रनिम्नगाः।
सौरी कुशवती चैव सरस्वती रात्रिर्मनोजवा। ख्यातिश्च
पुण्डरीका च सप्तैता वर्षनिम्नगाः। तत्रापि वर्षेभग-
वान् पुष्करादौ जनार्दनः। योगिरूपस्वरूपस्तु दृश्यते
यत्नसन्निधौ। क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन
च। आवृतः सर्वतः क्रौञ्चद्वीपतुल्येन मानतः। दधि-
मण्डोदकश्चापि शाकद्वीपेन संवृतः। क्रौञ्चद्वीपस्य
विस्तारादु द्विगुणेन महासने!। शाकद्वीपेश्वरस्यापि
भव्यस्य सुमहात्मनः। सप्तैव तनयास्तेषां दत्तो वर्षाणि
सप्त च। जलदश्च कुमारश्च सुकुमारो मणीरकः। कुसु-
मोदः सुमोदाकिः सप्तमश्च महाद्रुमः। तत्संज्ञान्यपि-

नान्येव सप्त वर्षाण्यनुक्रमात् । तत्रापि पर्वताः सप्त वर्ष-विच्छेदकारिणः । पूर्वस्तत्रोदयगिरिर्जलाधारस्तथा परः । तथा रैवतकः श्यामस्तथैवास्तगिरिर्द्विज ! । आम्बिकेय-स्तथा रम्यः केशरी पर्वतोत्तमः । शाकस्तत्र महादृक्षः सिद्धगन्धर्वसेवितः । तत्पत्रवातसंसर्गादाह्लादो जायते परः । तत्र पुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः । तत्र-स्थास्तत्र महापुण्याः सर्वपापभयापहाः । सुकुमारी कुमारी च नलिनी रेणुका तथा । इक्षुश्च धेनुका चैव गभस्तौ सप्तमी तथा । अन्यास्त्वयुतशस्तत्र क्षुद्रनद्यो मह-र्षभे ! । महीधरास्तथा चात्र शतशोऽथ सहस्रशः । ताः पिबन्ति सदायुक्ता जलदादिषु ये स्थिताः । वर्षन्ते जनपदाः स्वर्गादभ्येत्य मेदिनीम् । धर्महानिर्न तेष्वस्ति न संहर्षः परस्परम् । मध्यादाव्युत्क्रमो नापि तेषु देशेषु सप्तसु । मागाश्च मागधास्चैव मानसा मन्दगास्तथा । मागा ब्राह्मणभूयिष्ठा मागधा क्षत्रिया-स्तथा । वैश्यास्तु मानसास्तेषां शूद्रास्तेषां तु मन्दगाः । शाकद्वीपे तु तैर्वैश्यैः सूर्यरूपधरो मुने ! । यथोक्तैरिज्यते सम्यक्कर्मभिर्नियतात्मभिः । शाकद्वीपस्तु मैत्रेय ! क्षीरो-देन समन्ततः । शाकद्वीपप्रमाणेन वलयेनेव वेष्टितः । क्षीराब्धिः सर्वतो ब्रह्मन् ! पुष्कराख्येन वेष्टितः । द्वीपेन शाकद्वीपात्तु द्विगुणेन समन्ततः । पुष्कराख्यद्वीपपते-र्महावीतोऽभवत् सुतः । धातकिश्च तयोश्चात्र द्वे वर्षे नाम चिह्निते । महावीतं तथैवान्यत् धातकीषण्ड-मण्डितम् । एकश्चात्र महाभाग ! प्रख्यातो वर्ष-पर्वतः । मानसोत्तरसंज्ञो वै मध्यतो वलयाकृतिः । योजनानां सहस्राणि ऊर्ध्वं पञ्चाशदुच्छ्रितः । तावा-देव च विस्तीर्णः सर्वतः परिमण्डलः । पुष्करद्वीपवलयं मध्ये संविभजन्निव । स्थितोऽसौ मुनिश्रेष्ठ शैलो व्याप्य तदर्धकद्वयम् । वलयाकारमेकैकं तयोर्वर्षं तथा गिरिः । दशवर्षसहस्राणि यत्र जीवन्ति मानवाः । निरामया विशोकाश्च रागद्वेषविवर्जिताः । अधर्मोत्तमौ न तेष्वास्तां न वधप्रवधकौ द्विज ! नेर्ष्यासूयाभय-द्वेषौ द्वेषो लोभादिको न च । महावीतं महावर्षं धातकीसंज्ञमन्ततः । मानसोत्तरशैलश्च देवदैत्यादि सेवितः । कृत्यान्तं न तत्राप्ते द्वीपे पुष्करसंज्ञिते । न तत्र शैलनद्यो वा द्वीपे वर्षद्वयान्विते । तुल्यवेशास्तु मनुजास्तत्रैकरूपिणः । वर्णाश्रमाचारहीनं धर्मा-हरणवर्जितम् । त्रयीवार्तादण्डनीतिशून्यं चारहितञ्च तत् । वर्षद्वयञ्च मैत्रेय ! सौम्यः स्वर्गोऽयमुत्तमः । सर्वत्र सुखदः कालो जरारोगादिवर्जितः । पुष्करे धातकी-षण्डे महावीते च वै मुने ! । न्यग्रोधः पुष्करद्वीपे ब्रह्मणः स्थानमुत्तमम् । तस्मिंस्तिष्ठति ब्रह्मा पूज्य-मानः सुरासुरैः । स्वादूदकेनोदधिना पुष्करः परि-वेष्टितः । समेन पुष्करस्यैव विस्तारान्मण्डलात्तथा । एवं द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः । द्वीपश्चैव समुद्रश्च समानौ द्विगुणौ परौ । पयांसि सर्वदा सर्व-समुद्रेषु समानि वै । जलातिरिक्तता तेषां कदाचिन्नैव जायते । स्वाभीक्ष्णमग्निसंयोगादुद्रेकि सलिलं यथा । तथेन्दुवृद्धौ सलिलमम्भोधौ मुनिसत्तम ! । अनूनाच्चाति-रिक्ताच्च वर्द्धन्त्यापो हसन्ति च । उदयास्तमनेष्विन्दोः पक्षयोः शुक्लकृष्णयोः । दशोत्तराणि पञ्चैव अङ्गुलानां शतानि वै । अपां वृद्धिक्षयौ दृष्टौ सप्तद्वीपां महा-मुने ! । भोजनं पुष्करद्वीपे तत्र स्वयमुपस्थितम् । यत्र संभुञ्जते विप्र ! प्रजाः सर्वाः सदैव हि । स्वादूदकस्य पुरतो दृश्यते लोकसंस्थितिः । द्विगुणा काञ्चनी भूमिः सर्वजन्तुविवर्जिता । लोकालोकस्ततः शैलो योजनायुत-विस्तरः । उच्छ्रायेणापि तावन्ति सहस्राण्यचलो हि सः । ततस्तमः समावृत्य तं शैलं पर्वतः स्थितम् । तमश्चाण्डकटाहेन समन्तात् परिवेष्टितम् । पञ्चाशत्-कोटिविस्तीर्णा सेयमुर्वी महामुने ! । सप्तैवाण्डकटाहेन सप्तद्वीपाब्धिमहीधरा । सेयं धात्री विधात्री च सर्वभूत-गुणाधिका । आधारभूता सर्वेषां मैत्रेय ! जगतामिति ॥

भूगोलस्य स्थिरत्वे युक्तिः खगोलशब्दे उक्ता अधिक-मत्र किञ्चिदुच्यते इंलण्डीयज्योतिर्विदां मते भूगोलस्यैव दक्षिणोत्तरगतिभ्यां सूर्यस्य उत्तरदक्षिणगतित्वं कल्प्यते स्थिरस्य सूर्यस्य उत्तरदक्षिणायनयोरसम्भवादिति । तदेतन्नातमतीवासमञ्जसं भूगोलस्य दक्षिणोत्तरगतिस्वीकारे सूर्यस्यैव क्षत्तिकारोहिण्योरुकटशकव्याधादीनामपि उत्तरदक्षिणयोर्गतिः प्रसज्येत न च तथा दृश्यते तेषाञ्च यथा विक्षेपनामभरसंख्या सौरागमे पठिता तादृशान्तर एव ग्रन्थेऽहं दर्शनं न मनागपि उत्तरदक्षिणा-यनमिति विवेच्य भूगोलस्य स्थिरत्वमनुसन्धातव्यम् ।

भूच्छाया स्त्री भुवश्छाया । सूर्यकिरणासम्पर्कात् जायमाने राहुमहाभिधाने १तमसि २व्यन्धकारे च शब्दमाला ।

भूजन्तु पु० भूरिव जन्तुः । नागे हस्तिनि राजनि० ।

भूजम्बू स्त्री भुवो जम्बूरिव स्वादुत्वात् । १गोधूमे २विकङ्क-

तफले च (वट्टचि) मेदि० भूमिचौना जम्बूः शाक०त० ३क्षुद्रजम्ब्वाम्। भूमिजम्ब्वादयोऽप्यत्र स्त्री

भूत न० भू-क्त। न्याय्ये उचिते पृथिवीजलतेजोवायुगगनरूपेषु गन्धादिविशेषगुणवत्सु २द्रव्येषु, ४सत्ये, यथार्थे वास्तविके 'भूतमप्यनुपत्यस्तं क्षीयते व्यवहारतः" दक्षस्मृतिः। ५तत्त्वानुसन्धाने च "ऋतं निरस्तं भूतेन" स्मृतिः। ६पिशाचादौ पु० ७कुमारे ८योगीन्द्रे ९लक्षणयुक्ते १०प्राणिनि च न०। ११अतीते वृत्ते १२सदृशे १३प्राप्ते १४सत्यार्थे त्रि०। १५कृष्णचतुर्दश्यां स्त्री टाप्। भूतत्वं च आत्मान्यत्वे सति विशेषगुणवत्त्वम् न तु जातिः मूर्त्तत्वेन साङ्कर्य्यात् तथाहि भूतत्वाभाववति मनसि मूर्त्तत्वस्य सत्त्वात् मूर्त्तत्वाभाववति गगने भूतत्वस्य सत्त्वात् उभयोः परस्परभावसामानाधिकरण्यम् पृथिव्यादिषु चतुर्षु च भूतत्वमूर्त्तत्वयोरुभयोः सत्त्वात् परस्परसामानाधिकरण्यमिति साङ्कर्य्यात् जातिव्याघातता।

भूतकला स्त्री ६त०। शा० ति० उक्ते धरादिभूतानामुत्पादके निवृत्त्याद्ये शक्तिभेदे "धरादिपञ्चभूतानां निवृत्त्याद्याः कलाः स्मृताः। निवृत्तिः प्रतिष्ठा स्यात् विद्या शान्तिरनन्तरम्। शान्त्यतीतेति ता ज्ञेया मादेरेकैकशक्तयः" शा० ति० "शक्तिः प्रथमसम्भूता शान्त्यतीतापदोत्तरा शान्त्यतीतापदाच्चक्रे क्रमतः शान्तिपदं क्रमात्। ततो विद्यापदं तस्मात् प्रतिष्ठापदसंग्रहः। निवृत्तिपदसंयुक्तं प्रतिष्ठापदतः परम्। एवमुक्ता शिवेन सृष्टिरीश्वरनोदिता। आनुलोम्यादथैतेषां प्रतिलोम्येन संहृतिः। अस्मात् पञ्चपदोद्दिष्टात् सूक्ष्मान्तरनिष्पत्तेः। कलाभिः पञ्चभिर्व्याप्तं यस्मादिदमिदं जगत्" राघवभट्टकृततत्त्वायत्तीयसंहिता।

भूतकेश पु० भूतानां केश इव। (भूतकेश) नामके १लक्षणभेदे स्त्रीत्वमपि ङीष्। सा च तत्र, २शेफालिकायां च टाप्। ३नीलसिन्धुवारे स्त्री ङीष्।

भूतक्रान्ति स्त्री ६त०। पिशाचावेशे राजनि०।

भूतगन्धा स्त्री० भूतः प्रभूतः गन्धो यस्याः। सुरानामगन्धद्रव्ये जटाध०।

भूतगुण पु० ६त०। आकाशादीनां शब्दस्पर्शादिषु विशेषगुणेषु "शब्दस्पर्शरूपरसगन्धा भूतगुणाः स्मृताः" शा० ति० "भूतगुणा भूतविशेषगुणा इत्यर्थः राघवः"। तत्रैव भूतानामेकैकविशेषगुणा उक्ता यथा आकाशस्य गुणः शब्दो वायोः स्पर्शः तेजसो रूपं जलस्य रसः भूमेर्गन्धः इति नैयायिकादयः। सांख्यादयस्तु अन्यथाङ्गीचक्रुर्यथोक्तमीशानसंहितायाम् "शब्दैकगुण आकाशः शब्दस्पर्शगुणो मरुत्। शब्दस्पर्शरूपगुणैस्त्रिगुणं तेज इष्यते। शब्दस्पर्शरूपरसैरापो ज्ञेयाश्चतुर्गुणाः। शब्दस्पर्शरूपरसगन्धैः पञ्चगुणा मही"।

भूतघ्न पु० भूतं हन्ति हन-टक्। १भूजंपत्रे राजनि० तद्वारण्ये हि बालग्रहभूतादिनिवारणं शास्त्रे प्रसिद्धम्। भूतं प्रकृतं गत्वं हन्ति अधःकरोति। २वशुने २वट्टे च राजनि०। ३भूतनाशके त्रि० हेमच०। ४तद्वत्यां स्त्री राजनि० ङीप्।

भूतचतुर्दशी स्त्री० भूतप्रिया चतुर्दशी तद्धेतुत्वेन तस्यां दीपदानात्। आश्विनकृष्णपक्षचतुर्दश्यां दीपान्विताऽमावास्यापूर्वतिथौ यमचतुर्दश्याम्।

भूतजटा स्त्री भूतस्य पिशाचस्य जटेव। १जटामांस्याम् शब्दमा०। २गन्धमांस्यां राजनि०।

भूतद्राविन् पु० भूतान् पिशाचान् द्रावयत्यपसारयति द्रु-णिच्-घिनि। १रक्तकरवीरवृक्षे २भूताङ्कुशवृक्षे च राजनि०

भूतद्रुम पु० भूतस्य द्रुमः। १ज्ञातकवृक्षे। भूतद्रुमादयोऽप्यत्र। भूतप्रियः द्रुमः शाक०त०। २शाखोटकवृक्षे।

भूतधात्री स्त्री० भूतानि जन्तून् धारयति धा-तृच् ङीप्। पृथिव्याम् त्रिका०।

भूतनाथ पु० ६त०। १शिवे २वटुकभैरवे च। "भैरवो भूतनाथश्च" इति वटुकशब्दे दृश्यम्। भूतेशभूतपत्यादयोऽप्यत्र।

भूतनाशन न० भूतान् नाशयति नश-णिच्-ल्यु। १रुद्राक्षे राजनि० २बन्धके पु० ३मल्लातके च रत्नमा०।

भूतपक्ष पु० भूतप्रियः पक्षः अन्धकारसत्त्वात्। कृष्णपक्षे।

भूतपत्नी स्त्री भूतस्य कृष्णं पत्नं यस्याः ङीप्। कृष्णवर्णयुक्तायाम् राजनि०। [रत्नमा०।

भूतपुष्प पु० भूत इव पुष्पं कृष्णत्वात् यस्य। श्योनाकवृक्षे

भूतपूर्णिमा स्त्री आश्विनपूर्णिमायाम् शब्दर०।

भूतभावन पु० भूतानि पृथिव्यादीनि भावयति जनयति भू-णिच्-ल्यु, भूता सत्ता यथार्था भावना यस्य वा। १विष्णौ, २वटुकभैरवे च "भूतात्मा भूतभावनः" इति। तयोः स्तोत्रे।

भूतमण्डल न० ६त०। शा०ति० उक्ते पृथिव्यादीनां मण्डलभेदे तत्स्वरूपं तत्रोक्तं यथा "वृत्तं दिक्स्वस्रं षड्बिन्दुलाञ्छितं मातरिश्वनः। त्रिकोणं स्वस्तिकोपेतं पञ्चेन्दुसंयुतम्। अम्भोजमम्भसो भूमेश्चतुरस्रं सवज्रकम्। तत्तद्भूमण्डलमानानि षण्णवाब्धि विदुर्बुधाः। वर्षैः

स्वैरङ्कितान्याहुः स्वप्ननाशाहृतान्यपि"। "वर्णैः श्वेतादिभिर्भूतवर्णैरजोभिरङ्कितानीति पदार्थादर्शः। तत्तद्भूताख्या विस्तरेण दर्शिता। मन्त्रमहोदधौ तेषां स्वरूपं स्वरूपं कर्मविशेषे विनियोगश्चोक्तो यथा "अर्द्धचन्द्रनिभं पार्श्वद्वये पद्मद्वयाङ्कितम्। जलस्य मण्डलं प्रोक्तं प्रशस्तं शान्तिकर्मणि। त्रिकोणं स्वस्तिकोपेतं वश्ये वह्नेस्तु मण्डलम्। चतुरस्रं वज्रयुक्तं स्तम्भे भूमेस्तु मण्डलम्। वृत्तं दिक्षु विदिक्षे विन्दु षट्काङ्कितं तु तत्। वायुमण्डलमुच्चाटे मारणे वह्निमण्डलम्"।

भूतमारिन् पु० भूतान् पिशाचान् मारयति अपसारयति मृ-णिच्-णिनि। चिड़ानामगन्धद्रव्ये राजनि०।

भूतयज्ञ पु० भूतानि प्राणिनो वायसादीन् उद्दिश्य यज्ञो बलिः। नित्यं गृहस्थकर्त्तव्यपञ्चयज्ञान्तर्गते बलिवैश्वदेव कर्मणि "भूतेभ्यो बलिहरणं भूतयज्ञः" हारीतस्मृतिः।

भूतयोनि स्त्री ६त०। भूतानामाकाशादीनां कारणे परमेश्वरे कैवल्योप०। [भूमेरधोभागे।

भूतल न० भूरेव तलम्। १पृथिव्याम्। ६त०। २पातालेऽपि

भूतलिका स्त्री भूतलं पातालं मूलत्वेनास्त्यस्याः ठन्। पृक्कायाम् (पिड़िङ्गशाक) राजनि० अङ्गुष्ठरूपमूलत्वात्तस्यास्तथात्वम्।

भूतलिपि स्त्री ६त०। भूतदैवत्ये वर्णभेदे "वाय्वग्निभूजलाकाशाः पञ्चाद्यक्षिपयः क्रमात्। पञ्च ह्रस्वाः पञ्च दीर्घाः विन्दन्ताः सन्धिसम्भवाः। पञ्चयः कादयः पञ्चलसहान्ताः प्रकीर्त्तिताः" या० ति०। कुलाकुलचक्रशब्दे ३१२४पृ० दृश्यम्।

भूतलोत्थाय पु० दानवभेदे हरिवं० २४अ०।

भूतवर्ण पु० ६त०। ध्येये भूतानां श्वेतादिवर्णे यथोक्तं या०ति० "स्वच्छं वियन्मरुत् कृष्णो रक्तोऽग्निर्विग्रहं पयः। पीता भूमिः पञ्चभूतान्येकैकाधारतो विदुः"। "स्वच्छं श्वेतं तत्र केषाञ्चिद्रक्तपिङ्गाद्यानां वर्णकथनस्योपादानार्थं स्वशास्त्रानुरोधेन" राघवः। भूतदैवते ह्रस्वदीर्घसन्धिते वर्गादिवर्णे च। भूतलिपिशब्दे कुलाकुलचक्रशब्दे च दृश्यम्।

भूतवास पु० ७त०। (वयड़ा) विभीतकवृक्षे। भूतावासादयोऽस्य [यसः। अपस्मारारोगे राजनि०

भूतविक्रिया स्त्री भूतानां तदाविशिष्टानामिव विक्रिया

भूतविद्या स्त्री भूतादिनिवारणार्थो विद्या। सुश्रुतोक्तो देवासुरगन्धर्वयक्षरक्षःपितृपिशाचनागग्रहाद्युपसृष्टेषु शान्तिकर्मबलिहरणादि यक्ष्मोपशमनार्थम्" सा च तन्त्रोत्तरतन्त्रे दर्शिता "ब्रह्मविद्या क्षत्रविद्या नक्षत्रविद्या भूतविद्या सर्पविद्या"छा०उ०। [शैक्षालिकायाम् स्वसरः।

भूतवैद्यी स्त्री भूतानामिव वैद्योऽस्याः गौरा० ङीष्। श्वेतभूतब्रह्मन् पु० भूतः पिशाच इव ब्रह्मा। देवले शब्दमाला।

भूतशुद्धि स्त्री० भूतानां देहारम्भकपृथिव्यादीनां शुद्धिर्भावना विशेषात् शोधनम्। तन्त्रादौ प्रसिद्धे देहारम्भकचतुर्विंशतितत्त्वानां भावनाविशेषेण संस्कारेण देवरूपतासम्पादने। भूतशुद्धिप्रकारस्तन्त्रसारे उक्तो यथा गौतमीये "सुषुम्णावर्त्मना सोऽहमिति मन्त्रेण यो जयेत्। स्वस्मारे हृदि स्थाने परमात्मानि देशिकः। धूम्रवर्णं ततो वायुबीजं(यं) षड्विन्दुलाञ्छितम्। पूरये दिड़या वायुं सुधीः षोड़शमात्रया। मात्रया तु चतुःषष्ट्या कुम्भयेच्च सुषुम्णया। द्वात्रिंशन्मात्रया मन्त्री रेचयेत् पिङ्गलाख्यया। पूरयेदनया चैव सञ्चिन्त्य नीलमारुतम्। रक्तवर्णं वह्निबीजं (रं) त्रिकोणं स्वस्तिकान्वितम्। तेन पूरकयोगेन मात्रया षोड़शाख्यया। चतुःषष्ट्या मात्रया च निर्दहेत् कुम्भकेन च। वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम्। ब्रह्महत्याशिरस्कञ्च सुवर्णस्तेयभुजद्वयम्। सुरापानहृदायुक्तं गुरुतल्पकटिद्वयम्। तत्संसर्गिपदद्वन्द्वसङ्गप्रत्यङ्गपातकम्। उपपातकरोमाणं रक्ताक्षमसुविलोचनम्। खड्गचर्मधरं क्रुद्धमेवं कृत्वा विचिन्तयेत्। मूलाधारोत्थितेनैव वह्निना निर्दहेच्च तम्। एवं सन्दह्य परितो द्वात्रिंशन्मात्रया ततः। भक्षणा क्षहितं मन्त्री रेचयेदिड़या पुनः। वामनाड्यां चन्द्रबीजं (ठं) कुन्देन्दुसदृशप्रभम्। भालेन्दुबीजे संयोज्य ततः षोड़शमात्रया। सुषुम्णया चतुःषष्टिमात्रया तोयबीजकम् (वं)। ध्यात्वाऽमृतमयीं दृष्टिं पञ्चाग्नेयीं रुधिरिणीम्। तया देहं विचिन्त्यैवं मनसा पिङ्गलाध्वना। द्वात्रिंशन्मात्रया मन्त्री लंबीजेन दहं नयेत्। स्वस्थाने हंसमन्त्रेण पुनस्तेनैव वर्त्मना। जीवं तत्त्वानि चानीय स्वस्थाने स्थापयेत् ततः। इति कृत्वा भूतशुद्धिं मातृकान्यासमाचरेत्"। ततो हंस इति बीजं हृदयमानीय कुलकुण्डलिनीं धृतिव्यादीनि च यथास्थाने स्थापयेत्। विशेषतस्तु शक्तिविषये। हंस इति जीवादिकं परशिवे संयोज्य सोऽहमिति मन्त्रेण स्थाने नयेत्। तन्त्रान्तरे "सोऽहमेकं

च्छाच्छादनार्थिका । अवेटकस्य भरणं यया सा हीनसंज्ञिका । यथा यथा तु गुणवान् भृतकस्तद्भृतिस्तथा । संयोज्या तु प्रयत्नेन नृपेणात्महिताय वै । अवश्यपोष्यवर्गस्य भरणं भृतकादृते । तथा भृतिस्तु संयोज्या तद्योग्या भृतकाय वै । ये भृत्या हीनभृतिकाः प्रत्यवस्ते स्वयं कृताः । परस्य साधकास्ते तु छिद्रे कोशप्रजाहराः । अन्नाच्छादनमात्रा हि भृतिः सूत्रादिषु स्मृता । तत्पापभागन्यथा स्यात् पोषको मांसभोजिषु । यद्ब्राह्मणेनापहृतं धनं तत् परलोकदम् । शूद्राय दत्तमपि यत्परकार्यैव केवलम् । मन्दो मध्यस्तथा शीघ्रस्त्रिविधो भृत्य उच्यते । समा मध्या च श्रेष्ठा च भृतिस्तेषां क्रमात् स्मृता । भृत्यानां रक्षणार्थं हि दिवायामं वसुं सृजेत् । निशि यामत्रयं नित्यं दिनभृत्येऽर्द्धयामकम् । तेभ्यः कार्यं कारयीत स्मृत्युक्तादैर्विना नृपः । अत्यायप्रं तूत्सवेऽपि क्षिप्त्वा आद्यदिनं सदा । पादहीनां भृतिं स्वार्त्ते दद्यात् त्रैमासिकीं ततः । पञ्चवत्सरभृत्ये तु न्यूनाधिक्यं यथा तथा । षाण्मासिकीं तु दीर्घार्त्ते तदूर्ध्वं न च कल्पयेत् । नैव पञ्चार्द्धमासस्य ज्ञातव्यात्यापि वै भृतिः । संवत्सरोषितस्यापि व्याधेः प्रतिनिधिस्ततः । सुखदुःखिनं स्वार्तं भृत्यर्क्षं कल्पयेद् सदा । सेवां विना नृपः पक्षं दद्याद्दु भृत्याय वत्सरे । चत्वारिंशत् समा नीताः सेवया येन वै नृपे । ततः सेवां विना तस्मै भृत्यर्क्षं कल्पयेत् सदा । यावज्जीवं तु तत्पुत्रेऽप्रमे बाले तदर्क्षकम् । भार्यायां वा सुशीलायां कन्यायां वा स्वसेवके । अष्टमांशं पारितोषं दद्याद्दु भृत्याय वत्सरे । कार्यांशमांशं वा दद्याद्दु कार्यं द्वागधिकं कृतम् । स्वामिकार्यं विनष्टो यत्तत्पुत्रे तद्भृतिं वहेत् । यावद्दु बालोऽन्यथा पुत्रयुद्यात् दृष्ट्वा भृतिं वहेत् । षष्ठांशं वा चतुर्थांशं भृतेर्भृत्यस्य पालयेत् । दद्याद्दु तदर्द्धं भृत्याय द्विस्त्रिवर्षेऽस्थितां तु वा । वाक्पारुष्यप्रभृत्यूनभृत्या स्वामी प्रबलदण्डतः । भृत्यं प्रसादयेन्नित्यं प्रभुत्वं त्वपमानतः । भृतिदानेन सन्तुष्टा मानेन परिवर्द्धिताः । स्वास्थ्यता बहुवाचा ये न त्यजन्त्यधिपं हि ते । अधमा धनमिच्छन्ति धनमानौ तु मध्यमाः । उत्तमा मानमिच्छन्ति मानो हि महतां धनम् । यथायुक्तान् स्वभृत्यांश्च प्रजाः स्वैरक्षयेन्नृपः । ग्रासाम्प्रदानतः कांश्चिद्धनान् फलदानतः । अन्यान् सुचक्षुषा हास्यैस्तथा कोमलया गिरा । सुभोजनैः सुवसनैस्ताम्बूलैश्च धनैरपि । कांश्चित् सुकुशलप्रश्नैरधिकारप्रदानतः । वाहनानां प्रदानेन योग्याभरणदानतः । छत्रातपत्रचमरदीपिकानां प्रदानतः । क्षमया प्रश्रयेणेन मानेनाभिगमेन च । सत्कारेण च दानेन ह्यादरेण समेन च । प्रेमण्यासनीपवासेन स्वार्थासनप्रदानतः । सम्भूयासनदानेन स्तुत्योपकारकीर्त्तनात् । यत्कार्ये विनियुक्ता ये कार्यास्तैरुद्धरेच्च तान् । लोहजैस्ताम्रजैरीतिभवैरब्जतस्तथैः । कौशेयैः रत्नजैर्वापि यथायोग्यैः स्वलाञ्छनैः । प्रविभानाय दूरात् तु वस्त्रैश्च सुकुटैरपि । वाद्यवाहनभेदैश्च भृत्यान् कुर्यात् पृथक् पृथक् । स्वविशिष्टं च यच्चिह्नं न दद्यात् कस्यचिन्नृपः" ।

अथ० तत्र विशेष उक्तो यथा "कालं भृत्यवधिं देयं दत्तं भृत्यस्य लेखयेत् । कति दत्तं हि भृत्येभ्यो वेतनं पारितोषिकम् । तत्प्राप्तिपत्रं गृह्णीयाद्ग्राह्यं वेतनपत्रकम् । सैनिकाः शिक्षिता ये ये तेषु पूर्वां भृतिः स्मृता । व्यूढाख्यासे नियुक्ता ये तेभ्यो भृतिमावहेत्" "स्वकार्यसाधका ये तु स्वभृत्या पोषयेच्च तान् । लोभेना सेवनाङ्गिसाक्षेष्वर्हां भृतिमावहेत् । मृतत्यक्तान् सुधिनः सुभृत्या पालयेन् नृपः । परराष्ट्रे हृते दद्यात् भृतिं सिद्धावधिं तथा । दद्याद्दर्द्धं तस्य पुत्रे स्त्रिये पाहसितां किल । हृतराज्यस्य पुत्रादौ सदुद्यमे पादसम्मिताम् । दद्याद्वा तद्राज्यतस्तु द्वात्रिंशांशं प्रकल्पयेत्"

भृतिभुज् त्रि० भृतं वेतनं भुङ्क्ते भुज-क्विप् । वेतनोपजीविनि कर्मकरे अमरः ।

भृत्य पुंभृ-क्यप् तुक् च । दासे २ भरणीये त्रि० अमरः । भावे क्यप् २ भरणे स्त्री टाप् । "कुमारभृत्याकुशलः" रघुः । निन्द्यानिन्द्यभृत्यपरीक्षा शुक्रनीतिसारे २ अ० एका यथा "भृत्यं परीक्षयेन्नित्यं विश्वासं विश्वसेत् सदा । नैव जातिर्न च कुलं केवलं कल्पयेदपि । कर्मशीलगुणाः पूज्यास्तथा जातिकुले न हि । न जात्या न कुलेनैव श्रेष्ठत्वं प्रतिपद्यते । विवाहे भोजने नित्यं कुलजातिविवेचनम् । सत्यभाक् गुणसम्पन्नस्तत्याभिजनवान् धनी । शुचिश्च सुशीलश्च सुकर्मा च निरालसः । यथा करात्मकार्यं स्वामिकार्यं ततोऽधिकम् । चतुर्गुणेन यत्नेन कार्यवाङ्मानसेन च । भृत्यैव तुष्टो मृदुवाक् कार्यदृष्टः शुचिर्दृढः । परोपकारधर्मे दृष्टो ह्यपकारपराङ्मुखः । स्वाम्यागस्कारिणं पुत्रं पतरं वापि दूषकः ।

भूत्तम न० भुवि उत्तमम् । सुवर्णे हेमच० ।

भूदरीभवा स्त्री० भूदर्यां भूमिबिले भवति भू+यच् । आखु-कन्यायाम् (उन्दरकानि) भावप्र० ।

भूदार पुंस्त्री० भुवं दृणाति खनति सुखाद्यर्थम् दृ-अण् । शूकरे अमरः स्त्रियां जातित्वात् ङीष् ।

भूदेव पु० भुवि देव इव । विप्रे अमरः । भूसुरादयोऽप्यत्र

भूधन पु० भूरेव धनमस्य । नृपे हेमच० ।

भूधर पु० भुवं धरति धृ-अच् । पर्वते अमरः ।

भूध्र पु० भुवं धरति धृ-क । महीध्रे पर्वते हेमच० ।

भूधात्री स्त्री भुवि जन्ना धात्री आमलक्यां शाक० त० । भूम्या-मलक्याम् राजनि० ।

भूनाग पु० भुवि नाग इव । उपरसभेदे राजनि० । [राजनि०

भूनिम्ब पु० भुवि लग्नः निम्बः शाक० त० । (चिरात) क्षुपभेदे

भूनिम्बादि न० चक्रदत्तोक्ते औषधभेदे "भूनिम्बकटुका व्योषसुवर्चलेन्द्रयवानृ समान् । द्वौ चित्रकात् वत्सक-त्वग्भागान् षोडश चूर्णयेत् । गुडूचीताम्बुना पीतं यकृत्प्लीहगुल्मनुत् । कामलाज्वरपाण्डुत्वमेहारु-च्यतिसारनुत् । गुडयोगाद् गुडाम्बु स्याद् गुडपर्ण रसान्वितम्" ।

भूनीप पु० भुवि लग्नो नीपः शाक० त० । भूमिकदम्बे राजनि०

भूप पु० भुवं पाति पा क । भूमिपाले अमरः भूमिपादयोऽप्यत्र ।

भूपति पु० इत० । नृपे भूमिपत्यादयोऽप्यत्र ।

भूपट्ट पु० भुवि पटं भुवं यस्य । १छत्रमात्रे यद्वच० । २मल्लि-कायां स्त्री० ङीप् अमरः ।

भूपरिधि पु० इत० । भूमेः परिधौ तन्मानं सू० सि० उक्तं यथा "योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु । तद्वर्गतो दशगुणात् पदं भूपरिधिर्भवेत्" "लम्बज्याघ्नस्त्रि-जीवाघ्नः स्फुटो भूपरिधिः स्मृतः" । सि० शि० सूक्ष्मतया-न्यथोक्तं यथा "प्रोक्तो योजनसंख्यया कुपरिधिः खघ्नाङ्क-नागाब्धय ४६६७ खड्वाग्नयः कुभुजङ्गयायकभुवः सिद्धां-शकेनाधिकः १५८११/२३ । गुणितेतफलं तथा युग-गुणखनिधनरागाद्रयो ७८५१·२३ भूमेः कन्दुफलावबद्ध कुपरिधिव्याख्याहृतेः प्रस्फुटम् । [रत्नमा०

भूपलाश पु० भुवि पलाशं यस्य । विशल्यकारके क्षुपभेदे

भूपाटलि भुवि ख्याता पाटलिः । भूताखीटके राजनि० ।

भूपाल पु० भुवं पालयति पाल-अण् उप० स० । भूमौ शब्दर० ।

भूपुत्र पु० इत० । १मङ्गले २नरकासुरे च । ३ज्ञानरत्नां स्त्री० शब्दर० गा० ङीप् ।

भूपुर न० भूरिव पुरम् । यन्त्रबहिःस्थे रेखावलित्रयविशेषयुते भूम्याकारे स्थाने ।

भूपेष्ट पु० भूपस्येष्टः । राजादनीवृक्षे (पियासाल) राजनि० तद्दीजस्य चिरच्चि इति ख्यातस्य राजप्रियत्वात्तथात्वम् ।

भूबदरी स्त्री भुवि ख्याता बदरी । क्षुद्रकोल्यां राजनि० ।

भूबल न० नरपतिजयचर्य्योक्ते जयसाधनोपाये बलभेदे "खरोदयेन चक्रेण यत्तुर्यत्र समोऽधिकः । तत्र युद्धे बलं ज्ञेयं भूबलानां जयार्थिनाम् । तेषां नामानि वक्ष्ये-ऽहं ख्यातानि ब्रह्मयामले । चतुरशीतिसंख्याभां यद्-बलेन जयी रणे । उड्डी जालन्धरी पूर्णा कामा कोल्लै कवीरिका । गिलीञ्चा च महामारी क्षेत्रपाली च वंशजा । रुद्रकालानलं प्रोक्तं कालरेखा निरा-मया । जयलक्ष्मीर्महालक्ष्मीर्जया विजयभैरवी । वाला योगेश्वरी चण्डी व्यालाम्बुकक्षत्तरी । शार्दूली सिंहली तन्वी महामाया महेश्वरी । देवकोटी शिवा शक्तिर्दृष्टा माला वराटिका । त्रिखण्डा मातृसरी धर्मा स्मृता दक्षाज्ञयाऽच्चया । दुर्मती प्रवरा गौरी काली नरहरी स्मृता । खेचरी भूचरी गुह्या हादयी विद्या कैथना । त्रैलोक्यविजया काली कराला बडवा परा । रौद्री च गिरिजातङ्को अभेद्या दक्षिणी जिता । यक्षिणा वर्णभूमिश्च कापाली त्वनिलानला । चन्द्रार्कविम्बभूमी च यद्वभूरखिलम्नगा । राहुकालानलो भूमिः खर भूमिर्द्विधा मता । रुद्रत्रिकालिकाश्चैव राहुश्चाष्टविध-स्मृता । चन्द्रः षड्विधः सूर्य्यश्चतुर्धा योगिनी त्रिधा । कालवेला त्रिभेदा च तिथिनक्षत्रवारगा । एतानि भूबलान्यत्र ज्ञात्वा यः प्रविशेत् रणे । खरयत्तस्तु नश्यन्ति मेघा वातहता यथा । समसात्राधिके नाम्नि खरैश्चक्रैश्च भूबलैः । स्थानसैन्याधिके यत्तौ बलविज्ञान संवृते" । एतल्लक्षणानि तत्र दशग्रामे ।

भूभर्त्तृ पु० याजका० । इत० । भूमिपतौ भूमिभर्त्रादयोऽप्यत्र

भूभुज् पु० भुवं भुङ्क्ते भुनक्ति पालयति वा भुज-क्विप् । भूपाले जटा० । [१पर्वते, २भूपाले च मेदि० ।

भूभृत् पु० भुवं बिभर्त्ति धारयति, पालयति वा भृ क्विप् ।

भूमण्डल त्रि० इत० । गोलाकारे भूमिभागे ।

भूमन् पु० महोर्भावः बहु+इमनिच् "बहोर्लोपो भू च बहोः" इति लोपे भ्यादेशः । १बहुत्वे अतिशये चार्थे इमनिच् प्राग्वत् २अतिशयत्वयुक्तत्वयुते च । "यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासि-

तव्यः । भूमानं भगवो विजिज्ञासे" छा० उ० । "यो वै भूमा भवृत् निरतिशयम् यद्धरितिपर्य्यायात्तत् सुखं ततोऽर्वाक् सातिशयत्वादल्पम् । अतस्त्रिष्वेवाल्पे सुखं नास्ति अल्पानां तृष्णाक्लेशत्वात् तृष्णा च दुःखबीजम् । न हि दुःखबीजं ज्वरादि सुखं दृष्टं लोके । तस्मादयुक्तं नाल्पे सुखमस्तीति । अतो भूमैव सुखम् तृष्णादिदुःखबीजत्वाभावाद्भूमः" भाष्यम् तस्मिन् प्रपाठके च यस्मात् यो भूमा तस्मिन्नुपदिष्टं द्रष्टव्यम् ।

भूम्न् त्रि० भू+मयट् । १महत्त्वे २ख्यायां त्रिका० स्त्री ङीप् **भूमि(मी)** स्त्री भवन्त्यस्मिन् भूतानि भू—मि किन्वा ङीप् । १पृथिव्याम् २ख्यातमात्रे मेदि० ३जिह्वायां संज्ञि० उमा० योगशास्त्रोक्ते ४योनिनां चित्तस्थावस्थाभेदे, ५एकसंख्यायाञ्च । पायड्भूसंख्यादिनोऽच् समा०बहु० । द्विभूमः प्रसादः पायड्भूमो देयः । योगोक्तभूमयश्च "तस्य भूमिषु विनियोगः" पा० सू० उक्ताः । "तस्य संयमस्य जितभूमेर्योऽनन्तरा भूमिस्तस्य विनियोगः । नह्यजितावरभूमिरनन्तरभूमिं विजेतुं प्रान्तभूमिषु संयमं लभते तदभावाच्च कुतः तस्य प्रज्ञालोकः, ईश्वरप्रसादाच्छ्रितोत्तरभूमिकस्य च नाधारभूमिषु परचित्तज्ञानादि संयमो युक्तः कस्मात् तदर्थस्यान्वतएवावगतत्वात् भूमेरस्या इयमनन्तरा भूमिः" भा० । सा च भूमिः सप्तप्रकारा यथोक्तं तत्रैव "तस्य सप्तधा प्रान्तभूमिः प्रज्ञा" पात० सू० । "तस्येति प्रत्युदितख्यातेः प्रत्यात्माय: सप्तधेति अशुद्धिरावरणमलापगमाच्चित्तस्य प्रत्ययान्तरानुत्पादे सति सप्तप्रकारैव प्रज्ञा विवेकिनो भवति । तद्यथा परिज्ञातं ज्ञेयं नास्य पुनः परिज्ञेयमस्ति क्षीणा ज्ञेयहेतवो न पुनरेतेषां क्षेतव्यमस्ति साक्षात्कृतं निरोधसमाधिना ज्ञानम् । भावितो विवेकख्यातिरूपो ज्ञानोपाय इत्येषा चतुष्टयी कार्यविमुक्तिः प्रज्ञायाः । चित्तविमुक्तिस्तु त्रयी चरिताधिकारा बुद्धिगुणा गिरिशिखरस्खलिताः इव पाषाणा निरवस्थानाः स्वकारणे प्रलयमभिमुखाः सन्तः तेनास्तं गच्छन्ति । न चैषां विलीनानां पुनरुत्थानोत्पादः प्रयोजनाभावादिति अतस्तासामवस्थायां गुणसम्बन्धातीतस्वरूपमात्रज्योतिरमलः केवली पुरुष इत्येतां सप्तविधां प्रान्तभूमिप्रज्ञामनुपश्यन् पुरुषः कुशल इत्याख्यायते प्रतिप्रसवेऽपि चित्तस्य सत्त्वाः कुशल इत्येव भवति गुणातीतत्वादिति सिद्धा भवति विवेकख्यातिर्हानोपायः इति" भा० । "प्रत्युदितख्यातेः सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च सर्वात्मकत्वं सर्वात्मकत्वं च गुणानां परमार्थः सर्वदृश्यविलयः कैवल्यं स्वरूपप्रतिष्ठा चितिशक्तेरिति एतावान् पुरुषाभ्यासः एतावत्पुरुषार्थतायाः परमपुरुषार्थतायाः पुरुषस्य गुणानामवरं चित्तसत्त्वस्य तदेव मलं तस्यापगमात् चित्तस्य प्रत्ययान्तरानुत्पादे तामसराजसव्युत्थानप्रत्ययानुत्पादे निर्विप्लवविवेकख्यातिनिष्ठायामापन्नस्य सप्तप्रकारैव प्रज्ञा विवेकिनो भवति विषयभेदात् प्रज्ञाभेदः प्रज्ञातोऽन्यो यासां भूमीनामवस्थानां तास्तथोक्ता यतः परं नास्ति संप्रकर्षः प्राप्ता भूमयः यस्याः प्रज्ञायाः विवेकख्यातेः सा तथोक्ता ता एव सप्तप्रकाराः प्रज्ञाः भूमीः उदाहरति । तद् यथेति तत्र पुरुषप्रयत्ननिष्पाद्यासु चतसृषु भूमिषु प्रथमामुदाहरति परिज्ञातं ज्ञेयं यावत् किञ्च प्राधानिकं तत् सर्वं परिणामतापसंस्कारैर्गुणवृत्तिविरोधात् दुःखमेवेति ज्ञेयं तत् परिज्ञातम् । प्रान्तां दर्शयति नास्य पुनः किञ्चिद् परिज्ञातं परिज्ञेयमस्ति । द्वितीयायाह क्षीणा इति । प्रान्ततामाह न पुनरिति । तृतीयामाह साक्षात्कृतं प्रत्यक्षेण निश्चितं यया संप्रज्ञातावस्थायामेव निरोधसमाधिसाध्यं ज्ञानं न पुनरस्यात् परं किञ्चेतव्यमस्तीति शेषः । चतुर्थीमाह भावितो निष्पादितः विवेकख्यातिरूपो ज्ञानोपायो नास्याः परं भावनीयमस्ति इति शेषः । एषा चतुष्टयी कार्यविमुक्तिरिति कार्यान्तरेण विमुक्तिः प्रज्ञाया इत्यर्थः प्रयत्ननिष्पाद्यासु चतसृषु अनिष्पादनीयासु प्रयत्नसाध्यां चित्तविमुक्तिमाह चित्तविमुक्तिस्तु त्रयी । तत्र प्रथमामाह चरिताधिकारा बुद्धिसत्त्वभोगावर्गकार्येत्यर्थः । द्वितीयामाह गुणा इति प्रान्ततामाह न चैषामिति । तृतीयामाह एतस्यामवस्थायामिति तस्यामवस्थायां जीवन्नेव पुरुषः कुशलो मुक्त इत्युच्यते परमहेतुत्वादित्याह एतामिति । अनौपचारिकं मुक्तत्वाह प्रतिप्रसवे प्रधानलयेऽपि चित्तस्य सत्त्वाः कुशल इत्येव भवति गुणातीतत्वादिति" विवरणम् ।

पृथिवीरूपभूमिगुणास्तु भा०शा०उक्ता यथा "भूमेः स्थैर्य्यं गुरुत्वञ्च काठिन्यं प्रसवार्थता । गन्धो गुरुत्वं शक्तिश्च संघातः स्थापना धृतिः" । प्रथमगुरुत्वं पतनविरोधी गुणः द्वितीयगुरुत्वम् पिण्डपुष्टितो न घोनरूक्षत्वम् । शक्तिः धारणादिसामर्थ्यम् संघातः संश्लिष्टावयवत्वम् । स्थापना चतुष्पादेर्धारणानुकूलव्यापारः । धृतिर्धारणा इत्यर्थः ।

भूमिकदम्ब पु० भूमिजातः कदम्बः शा० त० । कदम्बभेदे "त्रिकदम्बाः कटूष्णाश्च तुल्या दोषहरा हिमाः । कषाय

तिक्ताः पित्तघ्ना वीर्य्यहृद्विकरा पराः" राजनि० ।

भूमिकन्दली स्त्री भूलग्ना कन्दली या० त० । कन्दली-भेदे माघः ६।३०। मल्लि० ।

भूमिकम्प पु० ६त० । क्षितिचलने तत्कारणादिकं स फलविशेषं बृ०स० ३२अ० उक्तं यथा

"क्षितिकम्पमाहुरेके हृदलज्जलनिवासिसत्त्वकृतम् । भूभारखिन्नदिग्गजविश्रामसमुद्भवं चान्ये । अनिलोऽनिलेन निहतः क्षितौ पतन् सखनं करोत्येके । केचित्स्वदृष्टकारितमिदमन्ये प्राहुराचार्याः । गिरिभिः पुरा सपक्षैर्वसुधा प्रपतद्भिरुत्पतद्भिश्च । व्याकम्पिता पितामहभाद्यामरसदसि सम्भ्रमं नेतुम् । भगवन्नाम समैतत्क्षया कृतं यदचलेति तच्च तथा । क्रियतेऽचलैश्चलद्भिः शक्राद्रेर्नाश्च खेदश्च । तस्याः सगद्गदगिरं किञ्चित्स्फुरिताधरं विनतमीषत् । सास्रविलोचननमवलोक्य पितामहः प्राह । मन्युं हरेन्द्र ! धात्र्याः क्षिप कुलिशं शैलपक्षभङ्गाय । शक्रः कृतमित्युक्त्वा मा भैरिति वसुमतीमाह । किन्त्वनिलदहनसुरपतिवरुणाः सदसत्फलावबोधार्थम् । प्रागद्रिचलनभङ्गेषु दिननिशोः कथ्यविध्यन्ति । चत्वार्यर्यमणाद्यान्यादित्यं स्वगधिरोऽस्ययुक् चेति । मण्डलमेतद्दाह्यस्य रूपाणि सम्प्रदाहात् । धूमाकुलीकृताशे नभसि नमस्वान् रजः क्षिपन् भौमम् । विरुजन् द्रुमांश्च विचरति रविरपटुकरावभासी च । वायव्ये मकस्मे सस्याम्बुवनौषधोच्चयोऽभिहितः । श्वयथुश्वासोन्मादज्वरकासभवा वणिक्पीडा । रूपायुधवृद्धाः स्त्रीकविगान्धर्वपण्यशिल्पिजनाः । पीड्यन्ते सौराष्ट्रककुरुमगधदशार्णमत्स्याश्च । पुष्याग्नेयविशाखाभरणीपित्र्याजभाग्यसञ्ज्ञानि । वर्णो हौतभुजोऽयं करोति रूपाण्यथैतानि । तारोल्कापातादृतमादीप्तमिवाम्बरं सदिग्दाहम् । विचरन्ति मरुत्सहायः सम्पार्चिः सम्प्रदिवसान्तः । व्याग्नेयेऽम्बुदनादः सलिलाशयसङ्क्षयो नृपतिवैरम् । दहूविचर्चिकाज्वरविसर्पिकाः पाण्डुरोगश्च । दीप्तौजसः प्रचण्डाः पीड्यन्ते चाश्म० काङ्क्षवाह्लीकाः । तद्वणकलिङ्गवङ्गद्रविडाः शबराश्च नैकविधाः । अभिजिच्छ्रवणधनिष्ठाप्राजापत्यैन्द्रवैश्वमैत्राणि । दृश्यधमण्डलमेतद्भवन्ति चास्य स्वरूपाणि । चलिताचलवर्ष्माणो गम्भीरविरावविषमस्कन्धत्वनः । गवलालिकुलाञ्जिनिभा विसृजन्ति पयः पयोवाहाः । ऐन्द्रं श्रुतिकुलजातिख्यातावनिपालगणपविध्वंसि । व्यतिसारगलग्रहवदनरोगशक्रर्दिकोपाय । काम्बियुलम्बरपौरवक्किरातकौराभिसारवल्लभद्राः । व्यर्दुदवास्तुमालवपीडाकरमिष्टदृष्टिकरम् । पौष्णाग्र्याद्रौक्षेयामूलाहिर्बुध्नयरूणदैवानि । मण्डलमेतद्दारुणमस्यापि भवन्ति रूपाणि । नीलोत्पलालिभिन्नाञ्जनत्विषो मधुरराविणो वलाकाः । तडिदुल्लासितदेहा धाराङ्कुशवर्षिणो जलदाः । वारुणमर्णवसरिदाश्रितमतिदृष्टिदं विगतवैरम् । गोनर्दचेदिकुकुरान् किरातवैदेहकान् हन्ति । षड्भिर्मासैः कस्मो द्वाभ्यां पाकञ्च याति निर्घातः । अन्यानथ्यत्यातान् जगुरन्ये मण्डलैरेतैः । भल्लाटकरिश्चन्द्रपुरं रजश्च निर्घातभूकम्पकलुषप्रदाहाः । वातोऽतिचण्डो यच्छणं रवीन्दुहोर्नक्षत्रतारागणवैकृतानि । व्यभ्रे दृष्टिर्वैकृतं वातदृष्टिर्धूमोऽग्नेर्विस्फुलिङ्गार्चिषो वा । वन्यं सत्त्वं ग्राममध्ये विशेद्वा रात्रावैन्द्रं कार्मुकं दृश्यते वा । सन्ध्याविकाराः परिवेषखण्डा नद्यः प्रतीपा दिवि तूर्यनादाः । अन्यच्च यत् स्यात् प्रकृतेः प्रतीपं तन्मण्डलैरेव फलं निगाद्यम् । इन्द्रयैन्द्रो वाय्व्यं वायुश्चान्द्रमेवमन्योऽन्यम् । वारुणहौतभुजावपि नेक्षानक्षत्रजाः कस्माः । ग्रथितनरेश्वरमरणव्यसनान्याग्नेयवायुमण्डलयोः । चुल्लयमरकाक्षुद्भिरुपतापाद्यन्ते जनाश्चापि । वारुणपौरन्दरयोः सुभिक्षशिवदृष्टिहार्दयो लोके । गावोऽतिभूरिपयसो निवृत्तवैराश्च भूपालाः । पञ्चैश्चतुर्भिरनिलस्निग्धैरग्निर्दैवराट् च सम्प्राह्यात् । सद्यः फलति च वरुणो येषु न कालोऽङ्गतेषूक्तः । चलयति पवनः शतद्वयं शतमनलो दशयोजनान्वितम् । सलिलपतिरशीतिसंयुतं कुलिशधरोऽभ्यधिकं च षष्टिकम् । त्रिचतुर्थनभस्यमहिने मासे पक्षे तथा त्रिपक्षे च । यदि भवति भूमिकम्पः प्रधानन्दपनाशनो भवति ।"

भूमिचलनादयोऽत्र । "निर्घाते भूमिचलने" अ० त० ।

भूमिका स्त्री भूमिरिव कायति कै–क । १रचनायां "अन्यरूपेयेदन्यस्य प्रवेशस्तत्र भूमिका" इत्युक्ते नाट्ये-अभिनेयपात्रादिवेशान्तरसूचके श्लोके श्लक्ष्यकथोद्घाते ४कथाया च "नैयायिकादिभिरात्मा प्रथमभूमिकायामयतारितः" इति सांख्यप्रवचनभाष्यम् ।

भूमिकुष्माण्ड पु० भूमिजातः कुष्माण्डः या० त० (भुँइकुमड़ा) ख्याते लताभेदे रत्नमा० ।

भूमिखर्जूरिका स्त्री भुवि जाता खर्जूरिका या० त० । खर्जूरिकाभेदे "भूमिखर्जूरिका साही दुरारोहा महु-

च्छदा । अथ खल्लजला काश्यकर्कटी स्वादुफलका । पिण्डखर्जूरिका तन्वी सा देशे पश्चिमे भवेत् । खर्जूरी गोस्तनाकारा परादृढीपादिहागता । जायते पश्चिमे देशे सा छोहारेति कीर्त्तिता । खर्जूरीत्रितयं शीतं मधुरं रसपाकयोः । स्निग्धं रुचिकरं हृद्यं बलत्रय हरं गुरु । तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम् । कोष्ठमारुतकृद्बल्यं वातघ्नं कफापहम् । ज्वराभिघात-क्षुत्तृष्णाकासश्वासनिवारणम् । मदमूर्च्छांसरक्तपित्त-मद्योद्भूतगदान्हरेत् । मन्थतोऽर्थां गुणैरल्पा स्वल्पखर्जू-रिका स्मृता । खर्जूरीतरुतोयन्तु मदपित्तकरं भवेत् । वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत्" भावप्र० ।

भूमिचम्पक पु० भूमिलग्नः चम्पकः शाक० त०(भूरुक्षंपा) इत्त-केदे मयूरव्यं० ।

भूमिज पु० भूमेर्जायते जन-ड । १मङ्गलग्रहे २नरकासुरे मेदि० ३भूमिकदम्बे ४मनुष्ये च राजनि० । ५भूमिजात-मात्रे त्रि० । ६सीतायां स्त्री ।

भूमिजगुग्गुलु पु० कर्म० । आशापुरजाते गुग्गुलौ राजनि०

भूमिजम्बु स्त्री ७त० । क्षुद्रजम्बूं रत्नमा० वा ङीष् तत्रार्धे राजनि० । स्वार्थे क । तत्रार्धे स्त्री अमरः ।

भूमिजीविन् पु० भूमिं तत्कर्षणं जीवति जीव-णिनि । वैश्ये मेदिनी० ।

भूमिञ्जय पु० विराटनृपस्य पुत्रभेदे भा० वि० ३५ अ० ।

भूमिधर पु० भूमिं धरति धृ-अच् । १क्षुद्रपर्वते उपचारात् २पर्वतमात्रे । [दयोऽप्यत्र ।

भूमिप पु० भूमिं पाति पा-क । नृपे जटा० । भूमिपालादयोऽप्यत्र ।

भूमिपक्ष पु० भूमिः पक्ष इवास्य । वातास्थे क्षारा० ।

भूमिपति पु० ६त० । भूपतौ भूमिनाथादयोऽप्यत्र ।

भूमिपिशाच पु० भूमौ पिशाच इव । तालवृक्षे जटा० ।

भूमिपुत्र पु० ६त० । १मङ्गलग्रहे २नरकासुरे च भूमिपुत्रा-दयोऽप्यत्र । २शानक्यां स्त्री गौरा० ङीष् ।

भूमिप्रविभाग पु० सुश्रुतोक्ते औषधार्थभूमिविभागे

"अथातो भूमिप्रविभागविज्ञानीयमध्यायं व्याख्यास्यामः । श्वभ्रशर्कराश्मविषमवल्मीकश्मशानाऽध्यतनदेवतायतनचिक-तामिरतुपहृतामनूषरामभङ्गुरामदूराश्रिकां स्निग्धां प्ररो-हवतीं बहलां स्थिरां मृदां श्लक्ष्णां गौरीं लोहितां वा भूमिमौषधार्थं परीक्षेत तस्यां जातमपि कृमिविषश्वभ्रा-तपपवनदहननोदसम्भाश्रमागैरतुपहृतमेकरात्रं पुष्टं पु ष्यानक्षत्रमूलमुदीच्यां औषधमादृतेत्यौषधभूमिपरीक्षा-विशेषः शास्त्रान्तः । विशेषतस्तु । तत्राश्मवती स्थिरा गुर्वी श्यामा कृष्णा वा स्थूलदृक्षशर्कराप्राया खगुण-भूयिष्ठा । स्निग्धा शीतलाऽऽस्वादोदका स्निग्धस्वादु-कोमलदृक्षप्राया शुक्लाऽम्बुगुणभूयिष्ठा । नानावर्णा लघु-श्लक्ष्णवती प्रविरलाल्पपाण्डुदृक्षप्ररोहाऽग्निगुणभूयिष्ठा । रूक्षा भस्मराशिवर्णा तनुरूक्षकोटरालरसदृक्षप्रायाऽ-ऽनिलगुणभूयिष्ठा । बहली समाश्वभ्रबल्मीकरसजला सर्वतोऽसारदृक्षा महापर्वतदृक्षप्राया श्यामा चाकाश-गुणभूयिष्ठा । तत्र केचिदाङ्गिराचार्याः प्रावृट्शर्दो-ष्मरङ्गेष्वन्तर्वत्नीषु यथासंख्यं मूलपत्रत्वक्क्षीर-सारफलान्यादृतेति तत्तु न सम्यक् कस्मात् सौम्याग्ने-यत्वाज्जगतः । सौम्यान्यौषधानि सौम्येष्वृतुष्वादृतान्ने-यान्याग्नेयेष्वेवमव्यापन्नगुणानि भवन्ति । सौम्यान्यौष-धानि सौम्येष्वृतुषु गृहीतानि सोमगुणभूयिष्ठायां भूमौ जातान्यतिमधुरस्निग्धशीतानि जायन्ते । एतेन शेषं व्याख्यातम् । तत्र पृथिव्यम्बुगुणभूयिष्ठायां भूमौ जातानि विरेचनदूष्यान्यादृतेतान्याकाशगुरुतगुण-भूयिष्ठायां वमनदूष्याणि । उभयगुणभूयिष्ठायामुभयतो-भागानि । आकाशगुणभूयिष्ठायां संशमनान्येव बल-वत्तराणि भवन्ति । सर्वाण्येव चाभिनवान्यल्पं मधु-घृतगुडपिप्पलीविडङ्गेभ्यः । सर्वाण्येव बल्यौराणि वी-र्य्यवन्ति तेषामसम्यक्त्वावनतिक्रान्तसंवत्सरान्यादृतेति । भवन्ति चात्र । गोपालाजापसा व्याधा ये चान्ये वन-चारिणः । दूताहाराश्च ये तेभ्यो भेषजव्यक्तिरिष्यते । सर्वाण्यवयवाध्येषु पलाशबलवादिषु । व्यवस्थितो न कालोऽस्ति तत्र सर्वं विधीयते । गन्धवर्णरसोपेता षड्विधा भूमिरिष्यते । तत्राद्भूमिस्वभावेन वीर्यतः षड्विधैर्युताः । अव्यक्तः किल तोयस्य रसो निश्चय-निश्चितः । रस एव स चाव्यक्तो भूमेरेव रसाद्भवेत् । सर्वलक्षणसम्पन्ना भूमिः सारवती स्मृता । द्रव्याणि यत्र सत्त्वैव तद्गुणानि विशेषतः । विमर्दनाप्यरास्पृष्ट-मविषक्तं रसादिभिः । नवं द्रव्यं पुराणं वा प्राह्यमेव विनिर्दिशेत् । विडङ्गं पिप्पली शौद्रं सर्पिश्चाप्यनवं हितम् । शेषमन्यत्त्वभिनवं गृह्णीयाद्दोषवर्जितम् । अङ्गानां वयःस्थानां रक्तरोमनखादिकम् । क्षीरमूल-पुरीषाणि क्षीणाहारेषु संहरेत् । श्लोतसङ्गाङ्गकृत्तक-मङ्गविन्यासभेषजम् । मध्यायां दिशि शुचौ भेषजा-गारमिष्यते ।"

भूमिमण्ड पु० भूमिं मण्डयति मण्ड-अच्। (छापरमाछि) लतायेदे रत्नमा०। [ल्यु। माधवीलतायाम् राजनि०।

भूमिमण्डपभूषणा स्त्री भूमिर्मण्डप इव तं भूषयति भूषि-

भूमि(मी)रुह पु० भूम्यां भूमौ वा रोहति रुह-क। वृक्षे महीरुहादयोऽप्यत्र। [त्रिका०।

भूमिलाभ पु० भूमिर्लभ्यतेऽत्र लभ-आधारे घञ्। क्षत्रौ

भूमिलेपन न० भूमिर्लिप्यतेऽनेन लिप-करणे ल्युट् हृत०। गोमये हेमच०।

भूमिवर्द्धन पु० भूमिं वर्द्धयति खदिरेङ्गुदपार्थिवांशोपचयेन वृध-णिच्-ल्यु। यवे क्षते हेमच० क्षितिवर्द्धनादयोऽप्यत्र

भूमिशय पु०भूमौ शेते शी-अच्। १वाजके २भूमौ शयाने त्रि०

भूमिष्ठ पु० भूमौ तिष्ठति स्था-क अम्ब०षत्वम्। भूपृष्ठस्थे।

भूमिसत्त्र न०भूमिदानरूपं सत्त्रं या०त०। भूमिदानरूपे यागभेदात्मके सत्त्रे "इक्षुभिः सञ्छितां भूमिं यवगोधूमशालिनीम्। गोऽश्ववाङ्गनपूर्णां वा बाह्मणेभ्यो दुपार्जिताम्। निधिरत्नौं दृढभूमिं सर्वरत्नपरिच्छदाम्। अक्षयान् लभते लोकान् भूमिसत्त्रं हि तस्य तत्" भा०अनु०६२अ०

भूमिसम्भवा स्त्री भूमिः सम्भवोऽस्याः। १सीतायां जटा०। २मङ्गलग्रहे ३नरकासुरे पु०। ४भूमिजातमात्रे त्रि०।

भूमिसेन पु० दशमनोःपुत्रभेदे मार्क०पु० ९४अ०।

भूमिस्तोम पु० एकाहसाध्ये यज्ञभेदे आश्व० ९५।२।

भूमिसूनु पु० भूमिं सूनयति सूद-क्विन्। १वैन्ये २मनुष्ये ३चौरभेदे मेदि०। ४क्षत्रे ५अन्वे च शब्दरत्ना०।

भूमी स्त्री भू-मि किच्च ङीप्। १कृष्णसारिकायां विषापहननहेतुतया याच ब्रुवते उक्ता "भूमी कुहकवर्णैव गच्छ एकाक्षरः स्मृतः। एकाक्षी द्विक्षिको वापि प्रयोक्तव्यो विषापहः"।

भूमीच्छा स्त्री भूमौ तल्पतले इच्छा। भूमिशयनेच्छायाम्।

भूमीन्द्र पु० भूमौ इन्द्र इव। नृपे शब्दर०।

भूमीसह पु० भूमौ सहते सह-अच्। (भरसर) वृक्षभेदे "भूमीसहस्तु शिशिरः रक्तपित्तप्रसादनः" भावप्र०।

भूम्यनन्तर पु०भूमेरनन्तरः। स्वविषयघनिष्टदेशस्थे नृपाद्यां शब्दे कामन्द० ८५६।

भूम्य त्रि० भूमिमर्हति यत्। धराहें कर्म० ५।३।११०।

भूम्यामलकी स्त्री भूमिरूपा आमलकी शाक०त०। स्वनामख्याते क्षुपे राजनि०। "स्यात् भूम्यामलकी तिक्ता कषाया मधुरा हिमा। पित्तास्रकफकण्डूपाण्डुक्षयप्रणुत्" भावप्र०।

भूम्यामलकी स्त्री भूम्या सह आमलकीव समानाति आ+मन क्वच् गौ० ङीष्। भूम्यामलक्याम् राजनि०।

भूम्याहुत्य न० क्षुपभेदे (भूआतखड़) राजनि०।शब्दरत्ना०

भूयस् अव्य० भुवे भावाय बहुति बह-भावे क्विप्। पुनरर्थे

भूयस् त्रि०अतिशयेन बहुः ईयसुन्। "बहोर्लोपो भूच्च बहोः" ईकोपः भूरादेशश्च। बहुतरे मेदि०स्त्रियां ङीप्।

भूयश्चस् अव्य०भूयस्+चीप्सार्थे यस् चकोपः। बहुश इत्यर्थे

भूयिष्ठ त्रि० अतिशयेन बहुः इष्ठन् भादेशो युक् च। बहुतरे २प्रचुरे च।

भूयुता स्त्री भुवा युक्ता संज्ञा। भूमिसर्जूयाम् राजनि०

भूर् अव्य० भू-क्विप्। अन्तरीक्षलोकादधःस्थे चरणशब्दार्थीयस्थाने लोके भूः स्वाहा इदं भूः मनुषां देवतोद्देशः।

भूरि त्रि० भू-क्रिन्। १विपुले २विशे ३इन्द्रे च मेदि०। ४स्वर्णे न०शब्दरत्ना० बहु-रि भादेशः ५प्रचुरे त्रि०अमरः ६सोमदपुत्रभेदे पु० भा० आ० १८६ अ०। शिवा० अवन्त्यै अप्। और भूरेरपत्ये पुंस्त्री०। [द्रव्ये राजनि०।

भूरिगन्धा स्त्री भूरिः प्रचुरो गन्धो यस्याः। पुरानामगन्धद्रव्ये राजनि०

भूरिगम पु० भूरि भारयुक्तत्वेऽपि बहु गच्छति गम-अच्। गर्दभे राजनि० स्त्रियां जातित्वात् ङीष्।

भूरिज् स्त्री भू-इजि जस रपरः। पृथिव्यां त्रि०कौ०।

भूरिदक्षिण त्रि० भूरिर्दक्षिणा यस्य। १बहुतरदक्षिणादानयुक्ते २विष्णौ पु०"कपीन्द्रो भूरिदक्षिणः"विष्णुस०।

भूरिदुग्धा स्त्री भूरीणि दुग्धानि नियांसा यस्याः। हरिद्रायां राजनि०।

भूरिद्युम्न पु० भूरि द्युम्नं यस्य। नवमनोः पुत्रभेदे सुद्युम्नपुत्रके हरिवं० ७अ०। मार्क०पु०। भूद्युरिश्च इति पाठः प्रथमादिकः तदेवाक्यतया भूरिद्युम्न इत्येव तत्र पाठस्योचित्यात्।

भूरिधामन् पु० नवमनोःपुत्रभेदे हरिवं० ७अ०।

भूरिपत्र पु० भूरीणि पत्राण्यस्य। वत्सरुक्षे राजनि०।

भूरिपलितदा स्त्री भूरि पलितमिव दायति दै-क। पाण्डुरपटलीवृक्षे राजनि०।

भूरिपुष्पा स्त्री भूरीणि पुष्पाण्यस्याः। वनपुष्पायाम् राजनि०

भूरिप्रेमन् पु० भूरिः प्रचुरः प्रेमास्य। शङ्खपाके राजनि०।

भूरिफेना स्त्री भूरीणि फेनान्यस्याः। (चामकला) वृक्षभेदे अमरः।

भूरिबला स्त्री भूरीणि बलानि यस्याः ५त०।१अतिबलायाम्

राजनि०।२प्रचुरवले त्रि०२धृतराष्ट्रपुत्रभेदे पु०भा०श०२७अ०

भूरिमल्ली स्त्री भूरि बहु यथा स्यात् यथा मल्लति मल्ल-लच् गौरा० ङीष्। अम्बष्ठायाम् राजनि०।

भूरिमाय पुंस्त्री० भूरयः माया यस्य। १भृङ्गराजे अमरः स्त्रियां योपधत्वात् टाप्। २प्रभूतमायायुते त्रि०

भूरिमूलिका स्त्री भूरीणि मूलानि यस्याः कप् टापि अत इत्त्वम्। अम्बष्ठायाम् नैघण्टुप्र०।

भूरिशस् अव्य० भूरि-शस्। बहुश इत्यर्थे।

भूरिश्रवस् पु० ह्व०। चन्द्रवंशप्रे १सोमदत्तसुते नृपभेदे। भा० आ० १८७ अ०। २प्रचुरयशस्के त्रि०।

भूरिश्रेष्ठिक पु० भूरयः श्रेष्ठिनो यत्र। (भुरठट) गौड़देशस्थे पुरभेदे "गौड़े राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमोनः पिता" प्रबोधच०।

भूरिहन् त्रि० भूरीन् हन्ति हन-क्विप्। १बहुतरनाशके २बहुतरभेदे पु० भा०शा० २२७ अ०।

भूरुण्डी स्त्री भुवं रुण्डति आच्छादयति रुडि-आदृतौ (माधवदृत्तौ पठितः) अण् उप०स०। (छातिशुँड़ा) वृक्षभेदे अमरः। [शब्दमा०

भूरुह पु० भुवि रोहति रुह-क ७त०। महीरुहे वृक्षे

भूर्ज पु० ऊर्ज-अच् ७त०। खनामख्याते वल्कप्रधाने वृक्षे। "भूर्जत्वचः स्वर्णवतीर्दधानाः" कुमा०। "भूर्जः कटुः कषायोष्णः भूतरघ्नाजरः परः। त्रिदोषशमनः पथ्यः दुष्टकौटिल्यनाशनः" राजनि०। "कर्णरोगपित्तकफमेदोविषहरश्च सः" भावप्र०।

भूर्जकण्टक पुंस्त्री० "म्लात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः" मनूक्ते जातिभेदे स्त्रियां ङीष्।

भूर्जपत्र पु० भुवि-ऊर्ज पत्रं यस्य। खनामख्याते वृक्षे। भूर्जत्वगादयोऽत्र रत्नमा०।

भूर्णि स्त्री भृ-नि त्रि० ऊर्च रपरः। पृथिव्यां सि० कौ०।

भूर्लोक पु० कर्म०। पादसञ्चारयोग्यस्थानरूपे लोके।

भूलग्ना स्त्री भुवि लग्ना ७त०। शङ्खपुष्प्राम् राजनि०।

भूलता स्त्री भुवि लतेव। महीलतायां (केँचो) सरीसृपभेदे हेम०।

भूलिङ्गशकुनि पु० भूलिङ्गः शकुनिः कर्म०। बिलशायिनि पक्षिभेदे "प्रकृतिं यान्ति भूतानि भूलिङ्गशकुनिर्यथा" भा० स० ४१अ०। तद्विवृतिर्यथा

"अथ चैषा न ते बुद्धिः प्रकृतिं याति भारत!। मयैव कथितं पूर्वं भूलिङ्गशकुनिर्यथा। भूलिङ्गशकुनिर्नाम पार्श्वे हिमवतः परे। भीष्म! तस्याः सदा वाचः श्रूयन्तेऽर्थविगर्हिताः। मा साहसमितीदं सा सततं वाशते किल। साहसं चात्मनातीव चरन्ती नावबुध्यते। साहि मांसार्गलं भीष्म! सखात् सिंहस्य खादतः। दन्तान्तरविलग्नं यत्तदादत्तेऽनलचेतना। इच्छतः सा हि सिंहस्य भीष्म! जीवत्यसंशयम्। तद्वत्त्वमप्य धर्मिष्ठ! सदा वाचः प्रभाषसे भा०स०४४अ०। "भूलिङ्गशकुनिर्यथान्यद्वदत्यन्यत् करोति तद्वत्ते शत्रुं कामयन्ते शबलं वदन्तीत्यर्थः भुवं लिङ्गतीति भूलिङ्गो बिलशायी पक्षिविशेषः एषेति पाठे एषा अस्मदीया बुद्धिस्ते त्वदीया त्वद्वत्ते इति योज्यं तदा स्वस्यैव शकुन्युपमत्वम् अर्थविगर्हिताः उक्तिविपरीतक्रियया अर्थैर्विगर्हितो यासां ताः। वाशते शब्दं करोति। मांसार्गलं दंष्ट्रान्तरलग्नस्य मांसस्य बहिर्निर्गतभागमुल्लोलम् इच्छति इति। सा हि पक्षिणी मृत्युमुखे प्रविष्टापि तदुपेक्षया जीवन्ती यथा लोकानुपदिशति मा साहसमिति तथा स्वसुपदेशकारित्वात् मृत्युमुखे पतितोऽपि मृत्युना उपेक्षितो जीवस्त्वमांसोपदिशसि मृत्युमुखे न पतितव्यमिति" नील०।

भूवलय न० भूर्वलयमिव। भूमिपरिधौ। [निघण्टुः

भूशमी स्त्री भूलग्ना शमी शाक०त०। लघुशम्यां नदनपालभूशय पु० भुवि शेते शी-अच् ७त०। १बिलशये नकुलादौ। २विष्णौ च "भूशयो भूषणो भूतिः" विष्णुस०। स हि रामावतारे समुद्रबन्धनाय सागरोपान्तभूमौ शयित इति तस्य तथात्वम्। [नैघण्टुप्र०

भूशर्करा स्त्री भुवि ख्याता शर्करा श०त०। कन्दभेदे

भूशेलु पु० भुवि ख्याता शेलुः श०त०। भूकदम्बारके राजनि०।

भूष भूषणे वा चु०उभ०सक्षे भ्वा० पर० सक० सेट्। भूषयति ते भूषति अबूभूषत्-त अभूषीत्।

भूषण न० भूष्यतेऽनेन भूष-करणे ल्युट्। १अलङ्कारे किरीटादौ। भावे ल्युट्। २भूषायाम्। अलङ्कारभेदाः तत्साधनद्रव्याणि यथा

"किरीटञ्च शिरोरत्नं कुण्डलञ्च ललाटिका। ताटङ्कश्च हारश्च ग्रैवेयकमयोर्मिका। प्रालम्बिका रत्नसूत्रं सूत्रं कोऽर्थमालिका। पार्श्वद्योतो नखद्योतोऽङ्गुलीच्छादक स्तथा। कटिलग्नं माणवको मूर्द्धतारा ललन्तिका। अङ्गदो

बाहुवलयः शिखाभूषणमिङ्किका । प्रगण्डबन्धं तत्पार्श्वं नाभिपूरोऽथ मालिका । सप्तकी ग्रहकुलञ्चैव दण्डपत्रञ्च वर्णकः । जरत्कञ्च नीवी च सुष्टिबद्धं प्रकीर्णकम् । पादाङ्गदं हंसकञ्च नूपुरं क्षुद्रघण्टिका । सुखपट्टसिति प्रोक्ता अलङ्काराः सुशोभनाः । चत्वारिंशदमी प्रोक्ता लोके वेदे च सौख्यदाः । अलङ्काराः प्रदानेन चतुर्वर्गप्रदायकाः । एतेषां पूजनं कृत्वा प्रदद्यादिष्टसिद्धये । तेषां दैवतसञ्चार्य्य पूजयेत्तु विचक्षणः । शिरोगतानि चादद्यात् सौवर्णानि तु सर्वदा । चूड़ारत्नादिकानीह भूषणानि तु भैरव ! । ग्रैवेयकादिहंसान्तं सौवर्णं राजतञ्च वा । निवेदयेत् तु देवेभ्यो नान्यतैजससम्भवम् । रीतिवङ्गादिसंजातं पात्रोपकारणादिकम् । दद्यादायसवर्जन्तु भूषणं न कदाचन । घण्टाचामरकुम्भादिपात्रोपकरणादिकम् । तद्भूषणान्तरे दद्यात् यस्मात्तु तदुपभूषणम् । सर्वं ताम्रमयं दद्याद् यत् किञ्चिद्भूषणादिकम् । सर्वत्र स्वर्णवत्ताम्रमर्घ्यपात्रे ततोऽधिकम् । पूजार्घ्यपात्रं नैवेद्याधारपात्रञ्च पानकम् । ब्रौडुम्बरं सदा विष्णोः प्रीतिदं तोषदं तदा । ताम्रे देवाः प्रमोदन्ते ताम्रे देवाः सदा स्थिताः । सर्वप्रीतिकरं ताम्रं तस्मात्ताम्रं प्रयोजयेत् । स्रोपयोगे नरः कुर्य्यादेवानामपि भैरव ! । ग्रीवोर्द्धदेशे रौप्यन्तु न कदाचिच्च भूषणम् । प्रावारः घानपात्रञ्च गेण्डुकं गटकमेव च । पर्य्यङ्कादि यदन्यच्च सर्वं तदुपभूषणम् । त्रयोमयसृते कांस्यसृते यद्भूषणं भवेत् । स्वर्णरौप्यस्य चाभावे त्वधःकाये नियोजयेत् । एतेषां भूषणादीनां यद्दातुं शक्यते नरैः । तत्तद्दद्यात् समभ्यर्च्य तु सर्वमेव प्रदापयेत् । चतुर्वर्गप्रदं नित्यं भूषणं सर्वसौख्यदम् । तुष्टिपुष्टिप्रीतिकरं यथाशक्तीष्टये सृजेत् । इदं ते भूषणं प्रोक्तं सर्वदेवस्य तुष्टिदम्" कालि०पु०६८अ० । तद्धारणादिनमुच्यते "रेवत्यश्विनिशाद्य हस्तादिष्वपि पञ्चसु । शुक्रशुक्रबुधस्याह्नि वस्त्रालङ्कारधारणम् । अनिष्टेष्वपि निर्दिष्टं वस्त्रालङ्कारधारणम् । उद्वाहे राजसम्माने ब्राह्मणानाञ्च सम्मते । शिरस्त्रं मुकुटं हारः कुण्डलञ्चाङ्गदन्तथा । कङ्कणं बालकञ्चैव मेखलाष्टाविति क्रमात् । प्रधानभूषणान्येषु यथास्वं याति निश्चयः । पद्मरागश्च वज्रञ्च विजयो मौक्तिकन्तथा । मुक्ताप्रवैदूर्य्यनीलञ्च तथा मरकतं क्रमात् । आदित्यादिदशाजानां सर्वसम्पत्तिदायकाः । शुभलग्नेष्वपि घटना सर्वेषामुपयुज्यते । प्रधानभूषणेष्वेवमप्रधाने न निर्णयः । प्रधानभूषणं प्रायः शिरसो ह्यभिधीयते । तस्य प्रधानभूतत्वादित्याह भगुनन्दनः । सुखदा मणयः शुद्धा दुःखदाः दोषशालिनः ।" इति युक्तिकल्पतरुः ।

भूषा स्त्री भूष-भावे अ । मण्डनक्रियायाम् अमरः ।

भूषित त्रि० भूष-क्त । अलङ्कृते ।

भूष्णु त्रि० भू-ष्णु । भवनशीले ।

भूसंस्कार पु०६त० । यज्ञादौ भूमिभागस्य परिसमूहनोपलेपनरेखाकरणपांशूद्धरणजलकरणकाभ्युक्षणरूपेषु पञ्चसु संस्कारेषु तत्प्रकारस्य कात्या० श्रौ० ३।१।२४सूत्रपद्धतौ दर्शितो यथा "तत्र पूर्वमाहवनीयखरे पञ्च भूसंस्काराः कर्त्तव्याः तद्यथा दर्भैः खरं प्राक्संस्थमुदक्संस्थं वा त्रिः परिसमूह्य १गोमयेन त्रिरुपलिप्य २स्फ्येन प्रागायता उदक्संस्था उदगायताः प्राक्संस्था वा तिस्रो रेखाः खरप्रमाणाः कृत्वा ३व्यनामिकाङ्गुष्ठेन ताभ्यो रेखाभ्यः पांशून्नुद्धृत्य ४अग्निस्त्विरभ्युक्षेत्" ५। परिसमूहनं (दर्भाणामपलुम्पनम्) कात्या०श्रौ० ४।१२।१० कर्के ।

भूसुत पु० ६त० । मङ्गलग्रहे भट्टमा० २नरकासुरे च ३सीतायां स्त्री ।

भूस्तृण न० भुवस्तृणम् पृषो०सुट् । भूतृणे क्षुद्रधान्ये अमरः "क्षुद्रधान्यं भूस्तृणं सगन्धं गोजवप्रियम् । भूस्तृणन्तु भवेच्छ्वा माला तृणकमित्यपि । भूस्तृणं कटुकं तिक्तं तीक्ष्णोष्णं रोचनं लघु । विदाहि दीपनं कृमिनेत्रं सुखशोधनम् । अहृद्यं वह्निविट्कृच्च पित्तरक्तप्रदूषणम्" भावप्र० ।

भूस्पृश् पु० भूमिं स्पृशति स्पृश-क्विन् । अनुष्ठुप्छन्दसि ।

भूस्वर्ग पु० भूमिस्थितः स्वर्गः शा० त० । सुमेरुपर्वते जटा० तस्यामरपुरत्वेन स्वर्गत्वात् तथात्वम् । [बभ्रे ।

भृ भरणे क्वा०उभ०सक०अनिट् । भरति-ते अबाभर्षीत् बभार

भृ धारणे पोषणे च जु०उभ०सक०अनिट् । बिभर्त्ति बिभृते अबाभर्षीत् अभृत । बिभरामास-बभार । क्विप् । अथु भरथुः । क्विप् । क्वि-मप् च । भृत्रिमः ।

भृकुंस(ग) पु० भ्रुवा कुंसा(गा) इङ्गितज्ञापनं यस्य निः भ्रुवः वा संप्रसारणम् । स्त्रीवेशधारिणि भटे अमरः ।

भृकुटि(टी) स्त्री भ्रुवः कुटिः भङ्गिः वा संप्रसारणं वृ ङीप् । भ्रुभङ्गे "रचितभृकुटिबन्धं नन्दिना द्वारिरुद्धे" हरविलासः ।

भृगु पु० । भृज्जति किए् भृक् ज्वाला तया सहोत्पन्नः ।

१ब्रह्मणःपुत्रे ऋषिभेदे "भृगित्येव भृगुः पूर्वमङ्गारेभ्योऽङ्गिराऽभवत् । अङ्गारसंश्रयाच्चैव कविरित्यपरोऽभवत् । रुद्र ख्यात्यामभिरुतपद्मो भृगुत्वमात् भृगुः स्मृतः" भा० अनु० ८५ अ० । "भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्वसर्गे पुनः । तथो धाता विधाता च तस्यां जातौ भृगोः सुतौ । आयतिर्नियतिश्चैव मेरुकन्ये महाप्रभो ! । धातुर्विधातुस्ते भार्ये ययोर्जातौ सुतानुभौ । प्राणश्चैव मृकण्डश्च मार्कण्डेयो मृकण्डतः । ततो वेदशिरा जज्ञे प्राणस्य द्युतिमान् सुतः । ततो वेदो मुनिश्रेष्ठा ! विस्तरं भार्गवो गतः" वह्निपु० । २महादेवे ३शुक्रग्रहे मेदि० । ४गरिसानौ ५जमदग्नौ हेम० । ६निरवलम्बने पर्वतादुच्चस्थाने यतः पतेऽवलम्बनं न भवति तस्मिन् अतटस्थाने अमरः । भृगोर्गोत्रापत्यानि अण् बह्वादिषु तस्य लुक् । ८भृगोरपत्येषु ब० व० । ९यस्कापत्ये ऋषिभेदे "भृगुर्वै वारुणिर्वरुणं पितरमुपससाद" तैत्ति० उ० ।

भृगुक पु० कूर्मचक्रस्य दक्षिणपार्श्वस्थे देशभेदे मार्कपु० ५८अ० ।

भृगुकर्ण पु० तीर्थभेदे काशी० ६अ० । [३३अ० ।

भृगुकेशव पु० काशीस्थे भृगुस्थापितकेशवमूर्त्तिभेदे काशी०

भृगुज पु० भृगोर्जायते जन-ड । भार्गवे शुक्राचार्य्ये ।

भृगुतनय पु० ६त० शुक्राचार्य्ये भृगुनन्दनभृगुसुतादयोऽप्यत्र

भृगुतुङ्ग न० तीर्थभेदे भा० आ० २१५ अ० । भा० व० ८४अ० ।

भृगुपति पु० भृगूणां भार्गवबंशस्य पतिः । परशुरामे शब्दमा० तेषां हैहयपतितो हि तेन रक्षा कृता इति तस्य तथात्वम्

भृगुभूमि पु० भार्गवपुत्रभेदे हरिवं० २अ० ।

भृगुवल्ली स्त्री भृगुणाऽधीता वल्ली । "भृगुर्वै वारुणिर्वरुणं पितरमुपससाद" इत्यादिकायां तैत्तिरीयोपनिषदः तृतीयवल्लयाम् ।

भृगूणांपति पु० ६त० अलुक्स० । परशुरामे शब्दर० ।

भृङ्ग पु० भृ-गन् कित् नुट् च । भ्रमरे २कांस्यकृद्विहगे (सिङ्ग) अमरः । ३भृङ्गराजे ४जारे मेदि० ५भृङ्गारे ६भृङ्गरोले च कीटभेदे (भीमरुल) शब्दरत्ना० ।

भृङ्गक पु० भृङ्ग इव कायति कै-क । राजयाग्यनखगे शब्दच०

भृङ्गजा स्त्री भृङ्ग इव जायते जन-ड । १भार्य्यास् । २अगुरुचन्दने न० राजनि० ३अभ्रके ४गुडूच्यां च न० रत्नमा० ।

भृङ्गपर्णी स्त्री भृङ्ग इव कृष्णत्वात् पर्ण यस्याः ङीप् । क्षुद्रमेलायाम् । स्वार्थे क । भृङ्गपर्णिका तत्रार्थे शब्दच०

भृङ्गप्रिया स्त्री ६त० । माधवीलतायां प्रचुरमधुमत्त्वात् तस्यास्तृप्तिप्रियत्वम् राजनि० ।

भृङ्गमूलिका स्त्री भृङ्गस्य भृङ्गराजस्येव मूलमस्याः कप् कापि अत इत्त्वम् । भ्रमरच्छत्राम् राजनि० ।

भृङ्गरज पु० भृङ्गान् रञ्जयति अन्तर्भूतण्यर्थे रनृज-अच् पृषो० नलोपः । भृङ्गराजे (केशुरिया) । भरतः ।

भृङ्गरजस् पु० भृङ्गान् रजयति अन्तर्भूतण्यर्थे रनृज-असुन् नलोपः । भृङ्गराजे अमरटीकायां भरतः ।

भृङ्गराज पु० भृङ्गान् रजयति रनृज-णिच्-अण् नि० ह्रस्व० । (केशुरिया) । १क्षुपभेदे । "भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातनुत् । केश्यस्त्र्यः कृमिश्वासकासशोथामयापहृत् । दन्त्यो रसायनो बल्यः कृष्णनेत्रशिरोर्त्तिजित्" भावप्र० २पक्षिभेदे ह्रस्व० टच् । ३भ्रमरश्रेष्ठे मेदि० ५यज्ञभेदे च धरणिः ।

भृङ्गराजाद्य न० "भृङ्गराजरसप्रस्थे यष्टीमधुपलेन च । तैलस्य कुडवं पक्वं सद्यो दृष्टिं प्रसादयेत् । तत् खादेद् बलीपलितघ्नं मासेनैतन्न संशयः" चक्रदत्तोक्ते तैलभेदे ।

भृङ्गरिट् (टि) पु० भृङ्ग इव रटति अच् इत् वा पृषो० अत इत्त्वम् । शिवपार्श्वचरभेदे । [कीटभेदे त्रिका० ।

भृङ्गरोल पु० भृङ्ग इव रौति रु-अच् । (भीमरुल) ख्याते

भृङ्गवल्लभ पु० ६त० १धाराकदम्बे २भूमिकदम्बे च । भृङ्गवल्लभ्यते लभ-क । ३भूमिजम्बाम् स्त्री राजनि० । [त्रिका०

भृङ्गसोदर पु० भृङ्गस्य सोदर इव । (केशुरिया) केशराजे

भृङ्गानन्दा स्त्री आनन्दयति आ+नन्द+णिच्-अच् ह्रस्व० । यूथिकायाम् (जुई) राजनि० ।

भृङ्गाभीष्ट पु० अभि+इष-क्त ह्रस्व० । आम्रवृक्षे राजनि० ।

भृङ्गार पु० बर्त्तिं जलं भृ-आरक् नि० । १स्वर्णमयजलपात्रभेदे अमरः, २जलपात्रभेदे च (झारी) । भृङ्ग इव भृङ्गच्छति कृ-अच् । ३भृङ्गराजे जटा० । ४खड्गे ५सुवर्णे च न० राजनि० । ६भिक्षुकीनामकीटे स्त्री अमरः गौरादित्वात् ङीष् । स्वार्थे क । भृङ्गारिका तत्रैव । तत्र भृङ्गारपात्ररचनादिकं युक्तिकल्पतरावुक्तं यथा

"राज्ञोऽभिषेकपात्रं यद् भृङ्गार इति तन्मतम् । तदष्टधा तस्य मानं प्रज्ञातिस्तापि चाष्टधा । सौवर्णं राजतं भौमं ताम्रं स्फाटिकमेव च । चान्दनं लौहजं शार्ङ्गमेतदष्टविधं मतम् । भान्वष्टदिङ्नवसप्ताष्टरुद्रैकादशैर्लोकैरुन्मिताः क्रमात् । अष्टावष्टौ समाख्याता व्यासप्रतिनिधाश्रयाः । द्विचतुर्दशवेदाब्धि ४वाण४सप्ताष्टवह्नितः । यथाक्रमं सवृद्धिस्तादित्यादिदृगाभुवाम् । पद्मरागस्तथा वज्रं वैदूर्यं मौक्तिकस्तथा । नीलं मारकतञ्चैव शुक्ता

च सप्त कीर्त्तिताः। भृङ्गारसप्तके न्यास्या न भौमो मणिर्भवेत्। कानकं मृण्मयं वापि सर्वत्रासुपयुज्यते।" "कानकन्तु क्षितीशानां मृण्मयं सार्वभौतिकम्। शङ्ख-पद्मेन्दुकुन्दाभं प्रत्यक्षं विन्यसेत् क्रमात्। चतुर्विधानां भूपानां चान्द्रः (रौद्यः) सर्वत्र शस्यते। श्वेतं रक्तं तथा पीतं कृष्णं चन्दनमुच्यते। एतेषां सलिलैः सेकश्चतुर्णां स्वान्वयीभुजाम्। शङ्खो पद्मश्च नीलश्च तथा कृष्णाप-राजिता। एषां पुष्पाणि वेषेषु चतुर्जातिमहीभुजाम्। क्षीरकं पद्मरागश्च वैदूर्य्यं नीलमेव च। चत्वारो मणयो ध्येयाश्चतुर्णां सेचनाम्भसि। इत्थं निश्चित्य यः कुर्य्याच्छ्रपतिः सेकमात्मनः। स चिरायु-र्भवेद्भोगी इतोऽन्यस्त्वन्यथाचरन्"।

भृङ्गारि स्त्री भृङ्गवद्वर्णमर्च्छति ऋ-इन्। १केरिकापुष्पे २भ्रमरच्छत्रां राजनि०।

भृङ्गाह्वा पु० भृङ्गमाह्वयते स्वर्जते आ+ह्वे-क। १जीरके २भृङ्गराजे च ३अमरच्छत्र्यां स्त्री राजनि०।

भृङ्गि पु० भृ-गिक् नुट् च। शिवपार्श्वचरभेदे। "प्राप्ता गणाधिपत्यं त्वं नाम्ना भृङ्गिरिति स्मृतः" वामनपु०।

भृङ्गिन् पु० भृङ्गस्तद्वर्णः कृष्णत्वादस्यास्ति इनि। १वटवृक्षे राजनि० २शिवानुचरभेदे। तस्य शिवतेजो जातत्वेऽपि कृष्णत्वात् तद्भक्तता यथोक्तं कालिकापु० ४५ अ० यथा "अग्नावुत्सृज्यमानस्य तेजसः प्रथमद्भुतः। अमुद्दय-मतिस्वल्पं निरिमस्थे पपात ह। तयोः कारणयोः सद्यः सम्भूतौ भृङ्गराजौ। एको भृङ्गसमः कृष्णो भिक्षाशननिभोऽपरः। भृङ्गी तस्य तदा ब्रह्मा नाम भृङ्गीति चाकरोत्। महाकृष्णैकरूपस्य महाकालेति लोकभृक्"। वामनपु० तु अन्धकासुरस्यैव शिववरेण भृङ्गि-रूपत्वं गणाधिपत्यञ्च जातमित्युक्तम्।

भृङ्गी स्त्री भृ-गन् किच् नुट् च गौरा ङीष्। अति-विषायाम् राजनि०। [तके राजनि०।

भृङ्गीफल पु० भृङ्गया अतिविषाया इव फलमस्य। आम्रा-

भृङ्गीय पु० हृत०। महादेवे शब्दरत्न०। [तिका०।

भृङ्गिरिटि पु० भृङ्गिरिटि+पृषो०। भृङ्गिणि शिवपार्श्वचरे

भृङ्गेष्टा स्त्री हृत०। १हतकुसायाम् २भार्य्यां ३तकुशायां ४काकजङ्घायाञ्च राजनि०।

भृज भर्जने (भाजा) पाकभेदे भ्वा०आत्म०सक०सेट्। भर्जते अभर्जिष्ट। इदित् निष्ठायां नेट् भृक्तः। [खोला) उज्ज्व०

भृज्जन पु० भ्रस्ज-करणे ल्युट् पस्य भ०। अम्बरीषे (भाजना-

भृणीय क्रोधे भा०आत्म०सक०सेट् निघण्टुः। भृणीयते। अभृणीरिष्ट।

भृणिष्टका स्त्री भिरिष्टिका पृषो०। श्वेतगुञ्जायाम् राजनि०।

भृणिष्ठ स्त्री वीचौ हारा०।

भृत त्रि० भृ-क्त। १पुष्टे वेतनादिना प्रतिपालिते २दासभेदे च। "उत्तमस्त्वायुधीयो यो मध्यमस्तु कृषीवलः। अधमो भारवाही स्यादित्येवं त्रिविधो भृतः स्मृतः। भावे-क्त। ४भरणे न०।

भृतक त्रि० भृतं भरणं वेतनमुपजीवति कन्। वेतनोप-जीविनि अमरः "भृतकाध्यापको यस्तु भृतकाध्यापित-स्तथा" मनुः। भृतकभेदाः शुक्रनीतिसारे ४अ०उक्ता यथा "इह प्रोक्ताः पुरोधाद्या ब्राह्मणाः सर्व एव ते। अभावे क्षत्रिया योज्यास्तदभावे तयोरुजाः। नैव शूद्रास्तु संयोज्या गुणवन्तोऽपि पार्थिवैः। भागच्छाही क्षत्रियस्तु साहसाधिपतिश्च सः। ग्रामणो ब्राह्मणो योज्यः का-यस्थो लेखकस्तथा। शुल्कग्राही तु वैश्यो हि प्रति-प्रतिहारश्च पादजः। सेनाधिपः क्षत्रियस्तु ब्राह्मण-स्तदभावतः। न वैश्यो न च वै शूद्रः कातरश्च कदा-चन॥ सेनापतिः शूर एव योज्यः सर्वासु जातिषु। यस्य यस्मिंश्चतुर्वर्णधर्मोऽयं चैव पावनः। यस्य वर्णस्य यो राजा स वर्णः सुखमेधते॥ नोपकर्त्तं मन्यते स्म न तुष्यति सुसेवने। कथान्तरे न स्मरति शङ्कते प्रश्रय-त्यपि॥ तुष्यत्यनीति मर्माणि तं नृपं भृतकस्त्यजेत्"

भृति स्त्री भृ-क्तिन्। १भरणे २पोषणे च करणे क्तिन्। ३वेतने अमरः ४मूल्ये च मेदि०। भृत्यभेदानां भृति-ज्ञानप्रकारादिकं शुक्रनीतिसारे उक्तं यथा "कालमानं त्रिधा ज्ञेयं चान्द्रं सौरं च सावनम्। अतिदाने सदा सौरं चान्द्रं कौसीदवृत्तिषु। कल्पयेत् सावनं नित्य दिनभृत्येऽवधौ सदा। कार्य्यमाना कालमाना कार्य्यकालमितिस्त्रिधा। भृतिरुक्ता तु तद्विज्ञैः सा देया भाषिता यथा। अयं भारस्त्वया तत्र स्थाप्य-स्त्वैतावतीं भृतिम। दास्यामि कार्य्यमाना सा कीर्तिता तद्विदेशकैः। वत्सरे वत्सरे वापि मासि मासि दिने दिने। एतावतीं भृतं तेऽहं दास्यामीति च कालिकी। एतावता कार्य्यमिदं कालेनापि त्वया कृतम्। भृतिमेता-वतीं दास्ये कार्य्यकालमता च सा। न कुर्य्याद् भृति-लोपं तु तथा भृतिवलस्खलनम्। अवश्यपोष्यभरणा-भृतिर्भक्ष्या प्रकीर्त्तिता। खाद्यपोष्या भृतिः भक्षा च मा-

आच्छादनार्थिका । अवेक्षेत्तस्य भरणं यथा वा क्षीणसंग्रिका । यथा यथा तु पुष्यन्ति भृतवस्तदुभृतिस्तथा । संयोज्या तु प्रयत्नेन स्वमेवात्मोन्नतिप्रिय वै । अवश्यपोष्यवर्गस्य भरणं भृतकादृत्तेत् । तथा भृतिषु संयोज्या तद्योग्या भृतकाय वै । ये भृत्या क्षीणभृतिकाः प्रत्यवस्थे स्वयं कृताः । परस्य साधकाश्चे तु स्त्रिये कोशप्रदा नराः । आच्छादनमात्रा हि भृतिः शूद्रादिषु स्मृता । तत्पोषभागस्यथा स्यात् पोषको नरभोजिषु । यद्यु आच्छादनेनापकृतं धनं तत् परलोकदम् । मूढाय दत्तमपि यत्परकार्यैव केवलम् । मन्दो मध्यस्तथा श्रीमत्त्रिविधो भृत्य उच्यते । यथा मध्या च श्रेष्ठा च भृतिस्तेषां क्रमात् स्मृता । भृत्यानां स्टष्टकर्मार्थं दिवायामं यथेच्छेत् । निशि यामत्रयं नित्यं दिनभृत्यैर्द्वियामकम् । तेभ्यः कार्यं कारयेत्तु शुश्रूषादौर्विना नृपः । आत्मावश्यं तु कुर्वतेऽपि स्थित्वा आत्मदृशं यदा । यादृशीनां भृतिं यस्मै दद्यात् तेषामिकीं ततः । यद्यवश्यरभृत्ये तु न्यूनाधिक्ये यथा तथा । आद्यमासिकीं तु हीनांस्तै तद्भृत्यं न च कल्पयेत् । नैव पञ्चार्द्धमासेभ्य ऊनमप्यधि वै भृतिः । अंशत्रयोनितस्यापि आद्यः प्रतिनिधिस्ततः । शुश्रूषुं शुचिनं स्वार्तं भृत्यं कल्पयेद्दु यदा । सेवां विना नृपः सद्यं दद्याद्दु भृत्याय वत्सरे । चत्वारिंशत् कला नीताः सेवया मेन वै नृपे । ततः सेवां विना तस्मै भृत्यं कल्पयेत् यदा । यावज्जीवं तु तत्पुत्रेऽप्यजे वाऽपे तद्वृत्तिकम् । भार्यायां वा सुधीजायां कन्यायां वा अपत्यके । अष्टमांशं पारितोषं दद्याद्दु भृत्याय वत्सरे । वार्षिकांशं वा दद्याद्दु कार्यं द्रव्यमिकं क्रतम् । आधिकार्यं विनष्टो यस्तत्पुत्रे तद्भृतिं वहेत् । यावद्दु वार्षोऽन्यथा पुत्रशुश्रान् दृष्ट्वा भृतिं वहेत् । अर्धांशं वा चतुर्थांशं भृतेर्भृत्यस्य पालयेत् । दद्याद्दु तदर्धं भृत्याय द्विगिवर्षेऽधिकां तु वा । वाक्पाटवप्रज्ञाज्ञानभृत्या ज्ञानी प्रभवदृष्टतः । भृत्यं प्रशिक्षये स्वत्वं यत्नत्वं त्वप्रज्ञानतः । भृतिदानेन बहुधा ज्ञानेन परिवर्द्धिताः । ज्ञानिनता बहुवाचा ये न त्यजन्त्यधिपं हि ते । अधमाधनमिच्छन्ति धनमानौ तु मध्यमाः । उत्तमा मानमिच्छन्ति मानो हि महतां धनम् । यथाशुश्रान् स्वभृत्यांश्च प्रजाः स्वैरक्षयेन्नृपः । आच्छादनतः कांश्चिद्धनतान् कल्पदानतः । अन्यान् शुश्रूषया कांश्चिद्धया कांश्चिन्मानया गिरा । सुभोजनैः सुवसनैस्ताम्बूलैश्च धनैरपि । कांश्चित् शुक्रयत्नमन्त्रैरधिकारप्रदानतः । वाक्पटानां प्रदानेन योग्याभरणदानतः । ज्ञानातपत्रचमरदीपिकानां प्रदानतः । अथवा प्रश्नपातेन मानेनाभिगमेन च । सत्कारेण च दानेन आदरेण श्रमेण च । प्रेमपूर्वासनीपवासेन स्वार्थासनप्रदानतः । सम्भूयासनदानेन स्वत्वोपकारकीर्त्तनात् । यत्कार्ये विनियुक्ता ये कार्यकुर्वैरक्षयेच्च तान् । लोकलैस्तालवैरीतिभेदैरलतवस्त्रवैः । लोवर्द्धै रत्नजैरपि यथायोग्यैः स्वलाञ्छनैः । प्रविष्टानाय दूरात् तु वस्त्रैश्च शुक्लटैरपि । वाद्यवाहनभेदैश्च भृत्यान् कुर्यात् पृथक् पृथक् । अविधिष्टं च यद्विद्यं न दद्यात् कस्यचिन्नृपः ।

अथ॰तत्र विशेष उक्तो यथा "कार्यं भृत्यवधिं दैवं दत्तं भृत्यस्य लेखयेत् । कति दत्तं हि भृत्येभ्यो वेतनं पारितोषिकम् । तत्प्राप्तिपत्रं स्टष्ट्वीयाद्दद्याद्वेतनपत्रकम् । सैनिकाः स्थिरिता ये ये तेषु पूर्वा भृतिः स्मृता । व्यूढाध्यक्षे नियुक्ता ये तेभ्यश्चां भृतिमावहेत्" "स्वकार्यसाधका ये तु शुभृत्याः पोषयेच्च तान् । लोभेना सेवनाद्भिन्नाश्चेत्यश्चां भृतिमावहेत् । यत्पुत्रकान् शुश्रूषिणः शुभृत्या पालयेन् नृपः । वरराष्ट्रे हते दद्यात् भृतिं निजावधिं तथा । दद्याद्दशं तस्य शुत्रे स्त्रिये पादसितां क्षिप । कृतराज्ञस्य पुत्रादौ बहुशुश्रे पादसितां । दद्याद्दा तद्राज्यतस्तु द्वात्रिंशांशं प्रकल्पयेत्"

भृतिभुज् त्रि॰ भृतिं वेतनं भुङ्क्ते भुज-क्विप् । वेतनोपजीविनि कर्मकरे अमरः ।

भृत्य पु॰ भृ-क्यप् तुक् च । दासे २भरणीये त्रि॰ अमरः । भावे क्यप् २भरणे स्त्री टाप् । "कुमारस्तत्प्रकृत्यैः" रघुः । निन्द्यानिन्द्यत्वपरीक्षा शुक्रनीतिसारे २अ॰ उक्ता यथा "भृत्यं परीक्षयेन्नित्यं विश्वासं विश्वसेत् यदा । नैव जातिर्न च कुलं केवलं कल्पयेदपि । कर्मशीलगुणाः पूज्यास्तथा जातिकुले न हि । न जात्या न कुलेनैव श्रेष्ठत्वं प्रतिपद्यते । विवाहे भोजने नित्यं कुलजातिविवेचनम् । सत्यभाक् गुणसम्पन्नजात्याभिजववान् धनी । शुद्धश्च सुधीश्च सुकर्मा च निरालसः । यथा करोत्यात्मकार्यं स्वामिकार्यं ततोऽधिकम् । चतुर्थेन यत्नेन कायवाङ्मानसेन च । भृत्यैव तुष्टो वदुवाक् कार्यदक्षः शुचिर्दृढः । परोपकरणे दक्षो स्वोपकारपराङ्मुखः । स्वाम्यात्मकारिणं पुत्रं पितरं वापि दूषकः ।

अन्यायमार्गिनि पक्षायतक्रूरः सुबोधकः । नाक्षेप्ता तद्गिरं काञ्चित् तत्क्षूनस्याप्रकाशकः । अदीर्घसूत्रः सुकार्य्ये ह्यसत्कार्य्ये चिरक्रियः । न तद्भार्य्यासुतमित्रच्छिद्रदर्शी कदाचन । तद्वृद्धिक्षतिहीनेषु भार्य्यापुत्रादिबन्धुषु । न श्लाघते स्पर्द्धते न नाभ्यसूयति निन्दति । नेच्छत्यन्याधिकारं हि निस्पृहो मोदते सदा । तद्गुणवत्क्षमाद्यधिकारकक्षतपुरोऽनिशम् । भृतिलक्षाप्तयी दान्तो दयालुः शूर एव हि । तत्कार्य्यश्च रक्षति स्वचक्षो भृतको वरः । विपरीतगुणैर्देहिभर्त्तको निन्द्य उच्यते । ये स्तब्धा हीनभर्त्तारो ये दण्डेन प्रकर्षिताः । अठाश्च कातरा लुब्धाः क्षमत्वं प्रियवादिनः । भक्ता व्यसनिनश्चार्त्ता उत्कोचेष्टाश्च दैविनः । नास्तिका दाम्भिकाश्चैवासत्यवाचोऽभ्यसूयकाः । ये चापमानिता येऽसत्कार्य्यैर्मर्म्मणि भेदिताः । दिष्टोर्मित्रासेवकाश्च पूर्ववैरानुबन्धिनः । चक्षुराः साहसिका धर्म्महीना नैते सुसेवकाः । संक्षेपतस्तु कथितं सदसद्भृत्यलक्षणम् ॥

तत्परिशिष्टे सर्वभृत्यलक्षणमुक्तं यथा

"उत्थाय पश्चिमे यामे स्मरेल्लक्ष्मीं विचिन्त्य च । कृत्वोत्सर्गं तु विण्मूत्रं हि स्नात्वा स्नायादनन्तरम् । प्रातः कृत्यं तु निर्वर्त्य यावत् सार्द्धसुहूर्तकम् । गत्वा स्वकार्य्यशालायां कार्य्याकार्य्यं विचिन्त्य च । विघ्नक्षुद्या विघ्नं तु द्वाःस्थः सम्यग् निरोधयेत् । निर्देशकाय विज्ञाप्य तेनाज्ञप्तः प्रवेशयेत् । दृङ्मतान् सभामध्ये राज्ञे दण्डधरः क्रमात् । निवेद्य तत्मतीः पश्चात् तेषां स्थानानि सूचयेत् । ततो राजगृहं गत्वाऽऽज्ञप्तो मञ्चेच्च सन्निधिम् । नत्वा नृपं यथान्यायं विष्णुरूपमिवापरम् । प्रविश्य सानुरागश्च चित्तज्ञश्च समन्ततः । भर्तुरङ्गिङ्गने दृष्टिं कृत्वाऽन्यत्र विनिःक्षिपेत् । अग्निं दीप्तमिवासीदेद्राजानमुपचिन्तितः । व्याघ्रीविषमिव क्रुद्धं प्रभुं प्राज्ञधनेश्वरम् । यत्नोपचरेच्चित्तं नाकलक्षीति चिन्तयन् । समर्थयंश्च तत्पक्षं साधु भाषत भाषितम् । तच्चियोगेन वा ब्रूयादर्थं सुपरिनिश्चितम् । सुराप्रसङ्गगोष्ठीषु विवादे वादिनां मतम् । विजानन्नपि नो ब्रूयात् भर्तुः चित्तोत्तरं वचः । सदाऽनुव्रतवेषः स्याच्छुपाकृतस्तु प्राज्ञलिः । तद्गुणं कृतनतिः श्रुत्वा वक्षान्तरितसत्सुखः । तदार्त्तां धारयित्वादौ स्वकार्य्याणि निवेदयेत् । नत्वाऽऽसीनासने प्रश्नकृत्पार्श्वे सम्मुखान्तया । उच्चैःप्रश्वसनं कासं छीवनं जृम्भणं तथा । जृम्भणं गात्रभङ्गं वा पर्य्यस्फोटञ्च वर्जयेत् । रात्राद्दिष्टं तु यत् स्थानं तत्र तिष्ठेन्मुदान्वितः । प्रवीणोचितमेधावी वर्जयेदखिलानिताम् । आपद्युन्मार्गगमने कार्य्यकालात्ययेषु च । अदृष्टोऽपि चित्तान्वेषी ब्रूयात् कल्याणभाषितम् । प्रियं तथ्यं च पथ्यञ्च वदेन्नर्म्मार्थकं वचः । समानवार्त्तया चापि तच्चित्तं बोधयेत् सदा । कीर्त्तिमन्यद्यशाश्चं च वदेत्कीर्त्तिकरं तथा । दाता त्वं धार्मिकः शूरोनीतिमानसि भूपते ! । अनीतिस्ते तु मनसि वर्त्तते न कदाचन । ये ये भद्रा अनीत्या तान् तदग्रे कीर्त्तयेत् सदा । नृपेभ्यो ह्यधिकोऽसीति सर्वेभ्योऽपि विशेषयेत् । परार्थं देशकालज्ञो देशे काले च साधयेत् । परार्थनाशनं न स्यात्तथा ब्रूयात् सदैव हि । न कर्षयेत् प्रजाकार्य्यसुपेतञ्च नृपं सदा । अपि स्वाङ्गुदाशीत शुष्कान्न परिगतः क्षुधा । ज्ञात्वेवानर्थसम्पत्तां वृत्तिं नेहेत पण्डितः । यत्कार्य्ये यो नियुक्तः स भूयात्तत्कार्य्यतत्परः । नान्याधिकारमन्विच्छेन्नाभ्यसूयेच्च केनचित् । न न्यूनं क्षत्तयेत् कस्य पूरयेत स्वशक्तितः । परोपकरणं भद्रमस्याभितकरः सदा । करिष्यामीति ते कार्य्यं न कुर्य्यात् कालसम्भवम् । दूरात् कुर्य्यान्न समर्थश्चेत् स्वांगं दीर्घं न रक्षयेत् । गुह्यं कर्म च मन्त्रं च न भर्तुः संप्रकाशयेत् । विद्वेषं च विनाशं च मनसापि न चिन्तयेत् । राजा परमलिलोऽस्ति न कालं विरिचेदिति । स्त्रीभिस्तद्विधिभिः पापैरभूतैर्नीरुजैः । एकार्थचर्य्यं साहित्यं संसर्गञ्च विवर्जयेत् । वेषभाषानुकरणं न कुर्य्यात् भूपतेः । सभ्यश्चोऽपि च मेधावी न च सर्द्धेत तद्गुणैः । रागापरागौ ज्ञानीयाद्भर्तुः कुशलकर्मजात् । इङ्गिताकारचेष्टाभ्यस्तदभिप्रायतां तथा । त्यजेत् विरक्तं नृपतिं रक्तं वृत्तिं तु कारयेत् । विरक्तः कारयेद्भाग्यं विपक्षाभ्युदयं तथा । आशावर्द्धनकं (कामच्छेदम्) कृत्वा फलभागं करोति च । अकोपोऽपि सकोपाभः प्रसन्नोऽपि च निष्फलः । बाल्यञ्च समदं वक्ति वृत्तिच्छेदं करोति च । लक्ष्यते विमुखत्वेव गुणसंकीर्त्तने कृते । दृष्टिं क्षिपत्यधाप्यत्र क्रियमाणे च कर्मणि । विरक्तलक्षणं क्षेत्रतद्भक्तस्य लक्षणं ब्रुवे । वृद्धा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् । कुशलादि यदि पृच्छेत् प्रदापयति चासनम् । विविक्तदर्शनं चास्य रक-

स्नेन न युज्यते । जायेत हृष्टवदनः श्रुत्वा तद्विरमन्तरा । अप्रियाण्यपि चान्यानि तद्युक्तान्यभिमन्यते । उपायनं च गृह्णाति श्लोकं सम्मादयेत्तथा । कथान्तरेषु स्मरति प्रहृष्टवदनस्तथा । इति रक्षस्य वै लक्ष्म कर्त्तव्यं तस्य सेवनम् । तद्दत्तवस्त्रभूषादि चिह्नं संधारयेत् सदा । न्यूनाधिके स्वाधिकारे नित्योद्युक्तो भवेत् सदा । तदर्थां तत्कृतां वार्त्तां शृण्याद्वापि कीर्त्तयेत् । चारदूषकदोषेण दूष्यन्यथा यदृशे नृपः । शृण्यान्मौनमाश्रित्य तथ्यं यत्नेन बोधयेत् । आपद्गतं शुभत्तारं कदापि न परित्यजेत् । एकवारमथादिष्टं सत्यवान् दूष्यादरेण तत् । तदिष्टं चिन्तयेन्नित्यं पाचकस्याक्षसा न किम् । अप्रधानः प्रधानः स्यात्, काले चात्यन्तसेवनात् । प्रधानोऽप्यप्रधानः स्यात् सेवालस्यादिना यतः । नित्यं संसेवनरतो भृत्यो राज्ञः प्रियो भवेत् । स्व स्वाधिकारकार्य्यं यत् शीघ्रं कुर्यात् सुमानी यतः । न कुर्यात् सहसा कार्य्यं नीचं राजापि बोधयेत् । तत् कार्य्यकारकाभावे राज्ञः कार्य्यं सदैव हि । काले यदुचितं कर्त्तुं नीचमप्युत्तमोऽर्हति । यस्मिन् प्रीतो भवेद्राजा तदनिष्टं न चिन्तयेत् । न दर्शयेत् स्वाधिकारगौरवं तु कदाचन । परस्परं नाभ्यसूयुर्न भेदं प्राप्नुयुस्तथा । राज्ञा चाधिकृताः सन्तः स्वस्वाधिकारयुग्मये । अधिकारिगणो राजा सदृक्षो यत्र तिष्ठतः । उभौ, तत्र स्थिरा लक्ष्मीर्विपुला संसुखोभवेत् । अन्याधिकारदक्षं तु न ब्रूयाच्छ्रुतमप्युत । राजा न शृण्युयादन्य सुखतस्तु कदाचन । न बोधयन्ति च हितमहितं चाधिकारिणः । प्रच्छन्नवैरिणस्ते तु दासरूपसपाश्रिताः । हिताहितं न शृणोति राजा मन्त्रिसुखाच्च यः । स दस्यू राजरूपेण प्रजानां धनहारकः । सुपुष्टव्यवहारा ये राजपुत्रैश्च मन्त्रिणः । विरुध्यन्ति च तैः सार्कं ते तु प्रच्छन्नतस्कराः । बाला अपि राजपुत्राः नावमान्यास्तु मन्त्रिभिः । सदा सदुक्तवाक्येषु संबोध्यास्ते प्रयत्नतः । असदाचरितं तेषां क्वचित् राज्ञे न दर्शयेत् । स्त्रीपुत्रमोहो बलवान् तयोर्निन्दा न श्रेयसे । राज्ञोऽवश्यतरं कार्य्यं प्राणसंशयितं च यत् । आज्ञापयाम्यतस्त्वां वै करिष्ये तत्तु निश्चितम् । इति विज्ञाप्य तत् कर्त्तुं प्रयतेत सुशक्तितः । प्राणानपि च संदद्यान्नृकार्य्ये नृपस्य च । भृत्यकुटुम्बपुष्ट्यर्थं नान्यथा तु कदाचन । भृत्या धनहराः सर्वे युक्त्या प्राणहरो नृपः । युद्धादौ तु महाकार्य्ये भृत्यप्राणान् हरेन्नृपः । नान्यथा भृतिरूपेण भृत्यो राजधनं हरेत् । अन्यथा हरतस्तौ तु भवतस्त्व स्वनाशकौ । राजा च युवराजश्च मान्योऽमात्यादिकैः सदा । तन्न्यूनामात्येन च किं तन्न्यूनाधिकृतेन किम् । मन्त्रितुल्यश्च भृतको न्यूनः साहचिको मतः । न क्रीड्येद्राजसमं क्रीडितं तं विशेषयेत् । नावमान्या राजपत्नी कन्या स्त्रापि च मन्त्रिभिः । राज्ञस्सम्बन्धिनः पूज्याः सुहृदश्च यथार्हतः । नृपाङ्गतस्तुरं गच्छेत् त्यक्त्वा कार्य्यशतं महत् । मित्रायापि न वक्तव्यं राजरहस्यं सुमन्त्रितम् । भृत्यं विना राजद्रव्यमदत्तं नाभिलाषयेत् । राजाज्ञया विना नेच्छेत् कार्य्यं माध्यस्थिकृतिम् । न हि हन्यात् द्रव्यलोभात् न कार्य्यं यस्य कस्यचित् । स्वस्त्रीपुत्रधनप्राणैः काले संरक्षयेन्नृपम् । सत्कोचं नैव गृह्णीयात् नान्यथा बोधयेन्नृपम् । अन्यथा दण्डकं भूयं नित्यं प्रबलदण्डकम् । निगडञ्च बाधयेत् सम्यक् एकान्ते राज्यगुप्तये । हितं राज्ञश्चाहितं यल्लोकानां तच्च कारयेत् । नवीनकरयुक्ताद्यैर्लोके बहिजते ततः ।"

"भृत्यः कुर्यात् तु राजाज्ञां शिष्यवत् सश्रियः पतेः । न क्षिपेत् वचनं राज्ञो ह्यनुकूलं प्रियं वदेत् । रहोगतश्च वक्तव्यमप्रियं यद्धितं भवेत् । न नियुक्तो हरेद् वित्तं नोपेक्षेत् तस्य मानकम् । राज्ञश्च न तथाकार्य्यं वेशभाषाविचेष्टितम् । अन्तःपुरचराध्यक्षो वैरभूतैर्निराकृतैः । संसर्गं न व्रजेद् भृत्यो राज्ञो गुह्यञ्च गोपयेत् । दर्शयेत् कौशलं किञ्चिद्राजानं च विशेषयेत् । राज्ञा यच्छ्रावितं गुह्यं न तल्लोके प्रकाशयेत् । आज्ञाप्यमाने वान्यस्मिन् किङ्करोमीति वा वदेत् । वस्त्रं रत्नमलङ्कारं राज्ञा दत्तं च धारयेत् । नानिर्दिष्टो द्वारि विशेन्नायोग्यभुवि राजदृक् । जृम्भां निष्ठीवनङ्कासं कोपं पर्य्यङ्किकाश्रयम् । भ्रकुटीं वातहुङ्कारं तत्समीपे विवर्जयेत् । शुश्रूषाव्यापने युक्त्या परात्मानं नियोजयेत् । धाष्ट्र्यं कौल्यं सपैशून्यं नास्तिक्यं जुगुप्सता तथा । चापल्यञ्च परित्याज्यं नित्यं राजानुजीविना । श्रुतेन विद्याशिल्पैश्च संयोज्यात्मानमात्मना । राजसेवां ततः कुर्याद्भूतये भूतिवर्द्धनः । नमस्कार्य्याः सदा चास्य पुत्रवल्लभमन्त्रिणः । शुचिवेनांश्च विश्वासो राजचित्तप्रियञ्चरेत् । त्यजेद् विरक्तं रक्षार्थं तु वृत्तिमीहेत राजवित् । अगुप्तवास न ब्रूयात् कामं कुर्यात् तथा-

पदि । आसन्नो वाक्यसङ्ग्राही रहस्ये न च शङ्कते । कुशलादि परिप्रश्नं सम्प्रयच्छति चासनम् । तत्कथाश्रवणाद्दृष्टो ह्यप्रियाण्यपि नन्दते । चल्यं दत्तं प्रगृह्णाति करेतु तच्च कथान्तरे । रक्तस्य राज्ञः कर्त्तव्या सेवामन्यस्य वर्जयेत्" अग्निपु० २२१अ० ।

ते च दशधा तेषां प्राधान्याप्राधान्ये च तत्रैव उक्ते यथा "पुरोधाः प्रथमं श्रेष्ठः सर्वेभ्यो राजराष्ट्रभृत् । तदनन्तरात् प्रतिनिधिः प्रधानस्तदनन्तरम् । सचिवस्तु ततः प्रोक्तो मन्त्री तदनु चोच्यते । प्राड्विवाकस्ततः प्रोक्तः पण्डितस्तदनन्तरम् । सुमन्त्रस्तु ततः ख्यातो ह्यमात्यस्तु ततःपरम् । दूतस्ततः क्रमादेते पूर्वश्रेष्ठा यथा गुणाः" ।

तत्करणसङ्ख्यादि स०चि० उक्तं यथा

"क्षिप्रे मैत्रे वितृषितार्केज्यवारे सौम्ये लग्नेऽर्के कुजे वा खलाभे । योनौ मैत्र्यां राशिपोऽपि मैत्र्यां सेवा कार्या स्वामिनः सेवकेन" मु० चि० । "अथ सेवकस्य स्वामिसेवायां मुहूर्त्तं आलिख्याह । क्षिप्रे मैत्रे इति । क्षिप्रे मैत्रे अश्विनीपुष्यहस्तचित्रानुराधामृगरेवतीपुष्यानुराधनक्षत्रेषु, वितृषितार्केज्यवारे बुधशुक्रगुरुवारे तथा सौम्यगृहे लग्नसंस्थे सति अर्के वा अथ वा कुजे भौमे वा खलाभे दशमैकादशस्थे सति सेवकेन भृत्येन स्वामिनो राजादेः सेवा कार्या। राजादिदर्शनं प्रागुक्तं वेतनग्रहणकार्यादौ द्रष्टव्यम् । सेवास्विनृ मुहूर्त्तं कार्या तत्रापि स्वामिसेवकयोर्योनिमैत्र्यां सत्यां च पुनः राशिपोः स्वामिसेवकयोर्यौ जन्मराशी तयोर्यावधिपती तयोरपि मैत्र्यां प्रीतौ सत्यां कार्या उक्तञ्च श्रीपतिना "शुभे विलग्ने दशमायगे च रवौ कुजे वा स्ववशेन योनेः । विद्यायुधाभ्यासरतेन कार्यः समाश्रयः स्वामिनि सेवकेन" । कश्यपोऽपि "दशमैकादशे सूर्ये कुजे वा शुभलग्नके । विद्यायुधाभ्यासयुक्तसेवा, कर्मापि सिद्ध्यति" । राशिमैत्रीसाकित्यं तु "वभ्रूरगं श्वेणमिभेन्द्रसिंहमोलाखुसंज्ञं त्वजवानरञ्च गोव्याघ्रमश्वोत्तरमाहिषञ्च वैरं क्रमेणार्णवभल्लयोश्चेति" वसिष्ठोक्तिमङ्गीकृत्य तुल्यन्यायत्वादत्राप्युक्तं अन्यकृता योनिमैत्री राशिमैत्री च विवाहप्रकरणे अश्विन्यश्वयोरिति "मित्राणि द्वादशेरिति वक्ष्यते" दी० धा० । उपक्रमशब्दे १२५० पृ० दृश्यम् ।

भृत्रिम त्रि० भरणाच्जातः भृ-क्त्रि-सप् च । भरणाच्जाते ।

भृ(भ्र)मि पु० भ्रम-क्त्रि पृषो० वा संप्रसारणम् । (घूर्णा) १वायुभेदे २भ्रमणे च । "किञ्च चक्रभ्रमिकारितागुणः" नैषधम् ।

भृम्यश्व पु० भृमय इवाश्वाः यस्य । ऋषिभेदे तस्य पुत्रः यञ् । भार्म्यश्च तदपत्ये स्त्रियां नि० ६।४ ।

भृश अधःपतने दि०पर०अक०सेट् । भृश्यति इरित् अभृशत् अभर्शीत् बभर्श । चर्दिच्छा वेट् ।

भृश न० भृश-क । १अतिशये २तद्वति त्रि० । ततो भृशादि० च्व्यर्थे भवतौ क्यङ् भृशायते । [शब्दरत्ना० ।

भृशम् अव्य०भान्तमव्ययम् भृश-वा० कप् । १सङ्करार्थे २शोभने

भृशादि पु० च्व्यर्थे भवतौ क्यङ्प्रत्ययनिमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा

"भृश शीघ्र चपल मन्द पण्डित बतूसुक सुमनस् दुर्मनस् अभिमनस् उन्मनस् रहस् रोहत् रेहत् रंहत् रभत् शम्बत् भ्रमत् वेहत् शुचिस् शुचिवर्चस् अन्तर वर्चस् ओजस् सुरजस् अरजस् एते भृशादयः । आकृतिगणोऽयं तेन भृशायते इत्यादि सि० कौ० । एवं घूर्णायते "घूर्णायमानेक्षणम्" घूर्णायमानशब्दे दर्शितम्

भृष्ट् स्त्री दृष्ट+पृषो० । धानाभ्रष्टे शब्दरत्ना० । तत्र दृषदु इत्येव पाठः भृषदित्यपपाठः ।

भृष्ट त्रि० भ्रस्ज-क्त । जलोपसेकं विना वालुकाग्निसंयोगाभ्यां पक्वे हेम० । "सुगन्धिः कर्कशा रूक्षः पित्तलो भृष्टतण्डुलः" राजनि० ।

भृष्टयव पु० कर्म० । धानाशब्दार्थे अमरः ।

भृष्टान्न न० कर्म० । जलोसेकेन भृष्टे तण्डुले (खड़ि)शब्दच०

भृष्टि स्त्री भ्रस्ज-भावे क्तिन् । १भर्जने २स्नुह्यवाटिकायां मेदि० भृ भर्जने भर्त्सने भरणे च क्र्यादि०घा०पर०सक०सेट् । भृणाति अबारीत् बभार बभरतुः ।

भेक पुंस्त्री०भी-कन् कस्य नेत्वम् । (व्याङ) १जन्तुभेदे अमरः स्त्रियां जातित्वात् ङीष् । "तेजःशुक्रबलकरः भ्रमहङ्दाहमेहहृत् । स्वापकृच्छर्दिनाशी भेकस्तु परिकीर्त्तितः" राजनि० । २मेघे मेदि० ३भण्डूकपर्णायां स्त्री ङीप् अमरः

भेकट पु० भेक इव टलति टल-ड । भण्डूकभेदे हिङ्गुपकोषः ।

भेकनि(लि) पु० (भाङ्गन) भण्डूकभेदे राजव० ।

भेकपर्णी स्त्री भेक इव पर्णमस्याः ङीप् । भण्डूकपर्णाम्

भेकभुज् पु० भेकं भुङ्क्ते भुज-क्विप् । सर्पे त्रिका० ।

भेकासन न०रुद्रयामलोक्ते पूजाङ्गे आसनभेदे तल्लक्षणं यथा "भेकनामासनं योगं निजवक्षसि खं सुखम् । निधाय पादयुगलं स्कन्धे बाहौ पदोपरि । ध्यायेदिष्टपदं श्रीमान्

प्रामनस्यः सुखाच्च तत्। यदि मर्यांङ्गसक्तोत्थं गगने खेचरासनम्। महाभेकासनं प्रोक्तं सर्वसिद्धिप्रदायकम्। महाविद्यामहामन्त्रं प्राप्नोति जपतोऽह यः"।

भेकुरि स्त्री अप्सरोरूपे नक्षत्रे "सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम" यजु०। १८।४० "तस्य चन्द्रमसः नक्षत्राणि नाम अप्सरसः कीर्दृश्यः भेकुरयः भां कान्तिं कुर्वन्तीति भेकुरयः पृषोदरादित्वात्साधुः "चन्द्रमाह गन्धर्वो नक्षत्रैरप्सरोभिर्मिथुनेन सहोच्चक्राम भेकुरयो नामेति भेकुरयोह नामैते भां हि नक्षत्राणि कुर्वन्तीति" शत०ब्रा० ६।४।१।६। [स्त्रियां ङीष्।

भेड पुंस्त्री० भी-ड तस्य नेच्चम्। मेषे (भेड़ा) हेमच०

भेड्र पुंस्त्री० भेड+पृषो०। मेषे त्रिका० स्त्रियां ङीष्।

भेद पु० भिद्-घञ्। १पृथक्करणे २अन्यतो विश्लेषे राज्ञामुपायभेदे विपक्षशासनार्थं ३ततपक्षीयामात्यादिभेदने ४न्यायमतोक्ते अन्योऽन्याभावे च यथा घटात् पटस्य भेदः (तादात्म्येनाभावः) उपायभेदभेदप्रकारो यथा "परस्परन्तु ये द्विष्टाः क्रुद्धभीतावमानिताः। तेषां भेदं प्रयुञ्जीत परमं दर्शयेत् भयम्। आत्मीयान् दर्शयेदार्यां येन दोषेण विभ्यति। परास्तेनैव ते भेद्या रक्षो वै ज्ञातिभेदकः। सामन्तकोपो बाह्यासु मन्त्र्यमात्यात्मजादिकः। अन्तःकोपस्तूपशाम्यं कुर्वन् शत्रोश्च तं जयेत्" अग्निपु०२२५ अ०। ५द्वैधे ६विदारणे मेदि०। ७विरेके वैद्यकम्।

भेदक त्रि० भिद्-ण्वुल्। १रेचके २विदारके ३भेदकारके ४विशेषणे च। "स्त्रीदाराद्यैर्यद्विशेषं याद्यैः प्रस्तुतं पदैः। गुणद्रव्यक्रियाशब्दास्तथा सुस्तस्य भेदकाः" अमरः

भेदन त्रि०भेदयति भिद्-णिच्-ल्यु। १विरेचने २विशेषणे च २क्लिङ्गौ न०४स्फूरे ५चक्षुस्तेजसे च पु० राजनि०। भिद्-भावे ल्युट्। ६विदारणे ७द्वैधीकरणे न०।

भेदित त्रि० भिद्-णिच्-क्त। १विदारिते भिन्ने च "आहृयं हृदये, शीर्षे वषट् कौषट् च मध्यमे। स एव भेदितो मन्त्रः सर्वशास्त्रविवर्जितः" तन्त्रसारोक्ते ३मन्त्रभेदे पु०।

भेदिन् त्रि० भिद्-णिनि। १भेदकारके स्त्रियां ङीप्। २चक्षुस्तेजसे पु० राजनि०।

भेदुर न० भिदुर+पृषो०। वज्रे द्विरूपकोषः।

भेद्य त्रि० भिद्-ण्यत्। १शस्त्रादिना विदार्ये २विशेष्ये च। "विश्लेषां भेद्यगामि यत्" अमरः। भेद्यरोगप्रतिषेधश्च सुश्रुते उक्तो यथा

"अथातो भेद्यरोगप्रतिषेधं व्याख्यास्यामः। स्वेदयित्वा विसर्प्यन्तं छिद्रमस्य निरामयम्। पक्वं भित्त्वा तु शस्त्रेण सैन्धवेनावचूर्णयेत्। कासीसमागधीपुष्पनैपाल्यो लायुगेन तु। ततः क्षौद्रं घृतं दत्त्वा सम्यगेवमुपाचरेत्। रोचनाचारतुत्थानि पिप्पल्यः क्षौद्रमेव च। प्रतिसारणमेकैकं भिन्ने च गण इष्यते। महत्यपि च युञ्जीत क्षारामिविधिकोविदः। स्विन्नं भिन्नं विनिर्हृत्य भिषग्व्रणननाभिकाम्। शिलैलानतसिन्धूत्थैः सक्षौद्रैः प्रतिसारयेत्। रसाञ्जनमधुभ्यां वा भिन्नं वा शस्त्रकर्मवित्। प्रतिसार्याञ्जनैर्युञ्जात्पादुष्णैर्दीपशिखोद्भवैः। सम्यक्स्विन्ने क्लमिघ्नौ भिन्ने स्यात् प्रतिसारणम्। त्रिफलाहृत्यकासीसरैन्धवैस्तु रसक्रियाम्। भित्त्वोपनाह्यं कफजं पिप्पलीमधुसैन्धवैः। लेखयेन्नखलायेन समन्तात् प्रोच्छ्रयेदपि। संस्वेद्य पत्तभङ्गैश्च स्वेदयित्वा यथासुखम्। व्यापाकाद्विधिनोक्तेन पक्वं भेद्यानुपाचरेत्। सर्वेष्वेतेषु विहितं विधानं स्नेहपूर्वकम्। सम्यक्ते प्रयतो भूत्वा कुर्वीत व्रणरोपणम्"।

भेर पु० भी-रन्। पटहे संक्षिप्तसा०। उज्ज्वलदत्तेन गौरा० ङीष्। भेरीत्यवसुद्धा भेरी दुन्दुभिरित्युक्तम्।

भेरि(री) स्त्री भी-क्रिन् वसुद्धा० नि० वा ङीष्। १दुन्दुभ्याकायाम्। २पटहे "रवः प्रगल्भाहतभेरिसम्भवः" कुमारः उज्ज्वलदत्तः। "ततः शङ्खाश्च भेर्यश्च" गीता।

भेरीस्वनमहास्वना स्त्री कुमारानुचरमातृभेदे भा०श०४७अ०

भेरुण्ड न० १गर्भधारणे शब्दर० २भयानके त्रि० ३देवताभेदे कालिपु० "महाविद्येश्वरी श्वेता भेरुण्डा कुलसुन्दरी" तन्त्रसद्भावनाम। ४यक्षिणीभेदे स्त्री मेदि०

भेल त्रि० भी-र रस्य लः। १भीरौ २भीरुके ३निर्बुद्धौ ४सन्निभेदे विश्वः। ५चक्षुस्तेजसे शब्दर०। स्वार्थे क। भेलक तत्रैव उडुपे (भेला) शब्दर०।

भेष भये भ्वा०उभ०अक०सेट्। भेषति ते अभेषीत् अभेषिष्ट। ऋदित् चङि न हस्वः। अबिभेषत् त।

भेषज न० भेष-अच् भेषं रोगभयं जयति जि-ड। १औषधे। स्वार्थे अच्। भैषज्य तत्रार्थे भेषजसेवनकालादि भावप्र० उक्तं यथा

"अथ भेषजभक्षणसमयः "भैषज्यमभ्यवहरेत् प्रभाते प्रायशो बुधः। कषायांस्तु विशेषेण तत्र भेदस्तु दर्शितः। ज्ञेयः पञ्चविधः कालो भैषज्यव्यवहरणे नृणाम्। किञ्चित् सूर्योदये जाते तथा दिवसभोजने। सायङ्काले

भोजने च सङ्कुचापि तथा निशि। तत्र प्रथमकालः "प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः। लेखनार्थं च भैषज्यं प्रभातेऽन्नमाहरेत्"। अथ द्वितीयकालः "भैषज्यं विष्णुपाने भोजनाग्रे प्रशस्यते। अरुचौ चित्रभोज्यैश्च मित्रं रुचिरमाहरेत्। समानवाते विष्णुपाने मन्देऽग्नावतिदीपनम्। दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक्। व्यानकोपे तु भैषज्यं भोजनान्ते समाहरेत्। छिक्काश्वेपककर्म्मसु पूर्वमन्ते च भोजनात्"। अथ तृतीयकालः "उदाने कुपिते वाते स्वरभङ्गादिकारिणि। यासग्रासान्तरे देयं भैषज्यं सान्ध्यभोजने। प्राणे प्रदुष्टे सानृध्यस्य भुक्तस्यान्ते प्रदीयते। औषधं प्रायशो धीरैः कालोऽयं स्यात् तृतीयकः"। अथ चतुर्थकालः "सङ्कुसङ्कुश तृट्छर्द्दिछिक्काश्वासगरेषु च। सान्नञ्च भेषजं दद्यादिति कालश्चतुर्थकः"। अथ पञ्चमकालः "ऊर्द्ध्वजत्रुविकारेषु लेखने हृंहणे तथा। पाचने शमने देयमनन्नं भेषजं निशि" इति पञ्चमकालः। निरन्नस्य भेषजस्य गुणमाह "वीर्य्याधिकं भवति भेषजमन्नहीनं छन्नात्तदामयसंशयमाशु चैव। तद्बालवृद्धयुवतीस्मृदुभिश्च पीतम् ग्लानिं परां नयति चाशु बलक्षयञ्च"। सान्नस्य भेषजस्य गुणमाह "शीघ्रं विपाकमुपयाति बलेन हिंसादन्नाहतञ्च च सङ्कुर्वदनाद्विरेति। एतद्धितं स्थविरबालकृशाङ्गनास्यः प्राग्भोजनादुपहितं किल तच्च तद्वत्" तद्वत् यद्भक्षतवत् भेषजमिति शेषः। "औषधशेषे भुक्ते भोजनशेषे यदौषधं पीतम्। न करोति गदोपशमं प्रकोपयत्यन्यरोगांश्च"। पीतमित्युपलक्षणं लीढादिकञ्च। "अनुलोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णासुमनस्कताः। लघुत्वमिन्द्रियोद्गारशुद्धिर्जोर्णौषधाकृतिः। क्लमो दाहोऽङ्गसदनं भ्रममूर्च्छा शिरोरुजः। अरतिर्बलहानिश्च भावश्चौषधाकृतिः"। अथ भेषजभक्षणविधिमाह चरकः "देवान् गुरूंस्तथा विप्रान् पूजयित्वा प्रणम्य च। व्याधिघ्नञ्च समादाय श्रद्धया भेषजं भजेत्। रसायनमिवर्षीणां देवानाममृतं यथा। सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते। ब्रह्मेन्द्राश्विरुद्रेन्द्रमूचन्द्रार्कानिलानलाः। देवाश्च औषधिग्रामा भूमिदेवाश्च पान्तु वः। औषधं क्षेम रजतसङ्काशजनपरिस्थितम्। पिबेदाप्लजनस्थाये प्रसन्नवदनेक्षणः। विश्रान्तस्तूपविश्याथ पीत्वा पात्रमधोमुखम्। निःक्षिप्याचम्य सलिलतास्यूचादुपयोजयेत्।"

२जले ३सुखे च निघण्टुः। ४विष्णौ पु० "विषार्त्तं भेषजं भिषक्" विष्णुस०। तल्लक्षणविहितनक्षत्रादिकं ज्यो० त० उक्तं यथा

"विष्णुधर्मोत्तरे। हरिं गोद्विजचन्द्रार्कसुरान्नीन् प्रतिपूज्य च। प्रहसन् मन्त्रमिमं पुण्यं विद्वान् भेषजमारभेत्। ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः। ऋषयश्चौषधिग्रामा भूतसङ्घाश्च पान्तु ते। रसायनमिवर्षीणां देवानाममृतं यथा। सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते। स्वयंभक्षणे तु ते इत्यत्र मे इति वदेत्। अविशेषेण स्वयंभक्षणेऽपि पठेत्। "द्वयङ्गोदये गुरुबुधेन्दुसितेषु तेषां वारे रवेश्च सुविधौ सुतिथौ सुयोगे। भेषूपपन्नगविशाखधिवेतरेषु जन्मर्क्षविद्धिरहितेष्वगदः शुभाय"। "औषधकरणं चित्रायुगे विधियुगे मित्रयुगे लघुषु वारुणविष्णौ। वस्तिविरेचनवेधाः शुभदितिथिचन्द्रलग्नेषु"। वस्तिर्यमपुटं विरेचनं विरेकः। वेधोऽन्नपादिवेधः। "पौष्णाश्विनीदृविषणशक्रसमेन्द्रपुष्यग्राहस्वादितीन्दुहरिमूलतारामित्रैः, चित्रान्वितैर्भगुबुधेन्दुरवीज्यवारे भैषज्यपानमचिरादपहन्ति रोगान्। रत्नमालायाम् द्यूनशत्रुनिधनव्ययगुद्धौ सद्गुरुहेषु, निरतां बलवत्सु। व्ययुषश्च छित्कारिणि योगे कीर्त्तिता नियतमौषधसेवा। द्यूनादिषु, पापयोर्नेत्रगणशून्येषु। व्ययुष्मानित्यादिषुभयोगे। भीमपराक्रमे, "भैषज्यपाने गुरुसोमशुक्राः शुभं विलग्नं दिवसोरवेश्च। तिथावरिक्ते करणे च शस्ते योगे च लग्ने द्विगरीरसंज्ञे"। तत्रैव "रोहिणी चानुराधा च शस्तमौषधभक्षणे" इति वचनाद्रोहिण्यामपि। "भैषज्यं सत्सु मृदुचरे मूलभे द्वयङ्गलग्ने शुक्रेज्ये विदि च दिवसे चापि तेषां रवेश्च। शुद्धे रिष्फद्यूनसंस्थेऽष्टमे सत्तिथौ नोजनेर्भे" सु० चि०। "लघुमृदुचरे अश्विनीपुष्यग्रहस्तचित्रामृगानुराधारेवतीश्रवणधनिष्ठाशततारकास्वातीपुनर्वसुभेषु मूले च भैषज्यम् औषधं प्रारब्धं भक्षितं वा सत् शुभफलदं भवतीत्यर्थः तदाचाह श्रीपतिः "पौष्णदृवे स्वातितिभदृवे च हस्तत्रये च श्रवणत्रये च। मैत्रे च मूले च मृगे च शस्तं भैषज्यकर्म प्रवदन्ति सन्तः"। ऋषिरोऽपि "हस्तत्रये चाश्विनपौष्णभेषु मित्रेन्दुमूलेषु च सूर्यवारे। भैषज्यमुक्तं शुभवासरेऽपि"। अथ द्वयङ्गलग्ने हिबुकधनरोगशत्रु मिथुनकन्याधनुर्मीनेषु सत्सु शुक्रेज्ये विदि च

शुक्लपञ्चदशीस्थितिषु, द्विजभावलग्नस्थेषु, सतसु च पुनस्तेषां शुक्रेज्यबुधानां रवेश दिवसे वारे षष्ठ्यौ रिक्तामारहिते दिने भैषज्यं सत् । उक्तञ्च दीपिकायाम् "द्वादशोदये गुरुबुधेन्दुस्थितेषु, तेषां वारे रवेश षष्ठ्यौ षष्ठयौ युतौ" । अथ रिपुफद्यूनक्षतिगटछे लग्नात् द्वादशषष्ठाष्टमगटछेषु शुक्रेषु शुभयापरहितेषु सतसु भैषज्यं सत् तत्र वर्षफलग्रन्थादिना सत्यायुर्द्वायोगे औषधसेवनं हितमित्ययं विशेषो ध्येयः । तदुक्तं श्रीपतिना "द्यूनशत्रुनिधनव्ययगुरौ षट्त्रयेषु सितरां बलवत्सु । आयुषश्च हितकारिणि योगे कीर्तिता नियतमौषधसेवा" । कश्यपोऽपि "षट्षष्ठाष्टान्त्यगुरौ च बलिनः शुभखेचराः । आयुर्दाय करे योगे कर्त्तव्या औषधक्रियेति" । अथ जनेर्भं जन्म नक्षत्रे यो भैषज्यं सत् तदुक्तं दीपिकायां "जन्मनक्षत्रगश्चन्द्रः प्रशस्तः सर्वकर्मसु । क्षौरभैषज्यवादाध्वकर्त्तनेषु च वर्जयेत् ।" पौ० धा० ।

भेषजाङ्ग न० ६त० । औषधस्य अवयवे वस्तुनि शब्दच० ।

भैक्ष न० भिक्षैव तत्समूहो वा अण् । १भिक्षायां २भिक्षासमूहे च । भिक्षायां भवः तत्प्रतिपाद्यत्वेनास्त्यस्या वा अण् । २भिक्षाभवे त्रि० स्त्रियां ङीप् । ४तत्प्रतिपादकग्रन्थव्याख्याने च । "भिक्षाशनमनुद्योगात् प्राक् केनाप्य निमन्त्रितम् । अयाचितं तु तद्भैक्षं भोक्तव्यं मनुरब्रवीत्" उद्वाहः । [२/१०८

भैक्षचर्य्या स्त्री चर-भावे क्यप् ६त० । भिक्षाचरणे मनुः

भैक्षजीविका स्त्री ३त० । भिक्षया जीवने त्रि० ।

भैक्षव न० भिक्षूणां समूहः खण्डिकादि० अञ् । भिक्षुसमूहे । [चातुर्वर्ण्या० ष्यञ् । २भिक्षायाम् ।

भैक्ष्य न० भिक्षायां समूहः यञ् । १भिक्षासमूहे । भिक्षैव

भैदिक त्रि० भेदं नित्यमर्हति छेदा० ठञ् । नित्यभेदनार्हे

भैम त्रि० भीमस्य अपत्यादेरिदम् अण् । १भीमसम्बन्धिनि स्त्रियां ङीप् । सा च २नलपत्न्यां दमयन्त्याम् । भीमेनोपासिता अण् ङीप् । ३भाद्रशुक्लैकादश्याम् । एका० त० विष्णुधर्मोत्तरे "श्रवणर्क्षे यथा हरे मासे भाद्रे प्रजायते । एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः । द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते । तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी । तिलस्य दाता भोक्ता च षट्तिलो नावसीदति" । मत्स्यपुराणे "यद्यदृक्षं भवेदस्यां द्वादश्यां द्वादशप्रभ भारत ! । अन्येष्वपि दिनर्क्षेषु न शक्तस्त्वभिभवितुम् । ततः पुण्यामिमां भीमतिथिं प्राप्यप्रणाशिनीम् । उपोषय विधिनानेन मच्छेद्विष्णोः परं पदम् । भीमतिथिं भैमीत्वेन ख्यातामेकादशीम्" रघु० ।

भैमगव पु० गोत्रभेदे "हरितकुत्सपिङ्गलयज्ञदर्भभैमगवानामाङ्गिरसाम्बरीषयौवनाश्वेति" आश्व० श्रौ० १२।१२।२

भैमरथ पु० भीमरथमधिकृत्य कृतो ग्रन्थः । भीमरथाधिकारेण कृते ग्रन्थे

भैमसेन्य पु० भीमसेनस्यापत्यम् कुरुत्वात् अञि प्राप्ते वार्त्ति० अत्र । भीमसेनापत्ये वा० ढञ् । भैमसेनि तत्रार्धे

भैमायन पुंस्त्री० भीमस्यापत्यं युवा इजन्तात् फक् । भीमस्य यून्यपत्ये ।

भैरव पु० भीरोरिदम् अण् । १भये २तद्हति त्रि० अमरः । नाट्यादिप्रसिद्धे १भयानके रसे । ४भयसाधने त्रि० मेदि० स्त्रियां ङीप् । ५शङ्करे ६तद्वतारतद्गणभेदे शब्दर० ७नदभेदे च पु० हेमच० । दक्षिणपत्न्यां स्त्री ङीप् ।

भैरवभेदानामुत्पत्तिर्यथा भविष्यपु० १७ अ० यथा

"दैत्याधिपः सकृत्पत्न्य हरोरसि गदां क्षिपत् । संक्षिप्तस्तु महायोगी सप्तधारः प्रजापतिः । गदापातच्युताद्भूरि चतुर्धाऽस्कन्दयापतत् । पूर्वधारासमुद्भूतो भैरवोऽग्निसमप्रभः । विद्याराजेति विख्यातः पद्ममालाविभूषितः । तथा दक्षिणधारोत्थो भैरवः प्रेतमास्थितः । कालराजेति विख्यातः कृष्णाञ्जनसमप्रभः । नागराजेति विख्यातसक्तमालाविभूषितः । क्षतजाद्रुधिराप्लातो भैरवः शूलभूषितः । सच्चन्द्रराजेति ख्यात इन्द्रायुधसमप्रभः । भूयिष्ठाद्रुधिराप्लातो भैरवः फलभूषितः । ख्यातो लम्बितराजेति शोभाञ्जनसमप्रभः । ततो भूदेवराजेति भैरवः क्षतजादथ । उग्रराजो बभूवाथ क्षतजाद्रुभैरवोऽपरः । एवं हि सप्तरूपोऽसौ कथ्यते भैरवोऽनघे ! । विप्रराजोऽष्टमः प्रोक्तो भैरवाष्टकमुच्यते ।" शारदीयदुर्गापूजायां तस्याष्टौ भैरवा यथोक्तं ब्रह्मवै० प्र० ख० ६१ अ० । "आदौ महाभैरवश्च संहारभैरवस्तथा । असिताङ्गभैरवश्च रुरुभैरवमेव च । ततः कालभैरवश्च क्रोधभैरवमेव च । ताम्रचूडं चन्द्रचूडम् अन्ते च भैरवह्वयम् । एतान् संपूज्य मध्ये च नव शक्तीश्च पूजयेत् ।" कालीपूजादौ पूजनीया भैरवाश्च तन्त्रसारोक्ता यथा "असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः । कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः" । दक्षिणगणाधिपभेदे कालि० पु० ४४ अ० यथा "नन्दी भृङ्गी

महाकालो वेतालो भैरवस्तथा। खड्गं भूत्वा महेशस्य वीतभीतास्तपोधनाः। यैर्मांसमज्जशरीरेण प्रापिरे तपसोबलात्। गणानामाधिपत्यन्तु ते जानन्ति हरं परम्।" शिवांशकरवीरभूपचन्द्रशेखरस्य पार्वत्यंश तारावतीगर्भजाते १०वेतालसोदरे च यथोक्तं कालिपु०४५अ०। "प्रविवेश ततो देवी स्वयं तारावतीतनौ। महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः। कामावसाने तस्यान्तु सद्योजातं सुतद्वयम्। अभवन्नृपशार्दूल! तथा शास्त्रागमाननम्। ततस्तयोर्नाम चक्रे नारदवचनान्नृपः। ज्येष्ठो भैरवनामाभूत् भीरोः पुत्रो भयङ्करः। वेतालसदृशः कृष्णो वेतालोऽभूत्तथाऽपरः"। अपि च "योऽसौ भङ्गी हरसुतो महाकालोऽपि भूतलः। तावेव गौरीशापेन सम्भूय नरयोनिजौ। वेतालभैरवौ जातौ पृथिव्यां नृपवेश्मनि। यथा भङ्गिमहाकालावुत्पन्नौ प्राक् तथा शृणु। योऽसौ महाभैरवाख्यः सकायः प्रारभो हरः। भैरवः पृथगेवायं गणाध्यक्षो हरात्मजः।" देवीभेदेषु शिवरूपभैरवभेदाश्च तोडलतन्त्रे १पटले उक्ता यथा "शिव उवाच। शृणु चार्वङ्गि! शुभगे! कालिकायाश्च भैरवम्। महाकालं दक्षिणाया दक्षभागे प्रपूजयेत्। महाकालेन वै सार्द्धं दक्षिणा रमते सदा। तारायां दक्षिणे भागे अक्षोभ्यं परिपूजयेत्। समुद्रमथने देवि! कालकूटं समुत्थितम्। सर्वे देवाः सदाराश्च महाक्षोभमवाप्नुयुः। क्षोभादिरहितं यस्मात् पीतं हालाहलं विषम्। अतएव महेशानि! अक्षोभ्यः परिकीर्त्तितः। तेन सार्द्धं महामाया तारिणी रमते सदा। महात्रिपुरसुन्दर्यां दक्षिणे पूजयेत् शिवम्। पञ्चवक्त्रं त्रिनेत्रञ्च प्रतिवक्त्रं सुरेश्वरि!। तेन सार्द्धं महादेवी सदा कामकुतूहला। अतएव महेशानि! पञ्चप्रीति प्रकीर्त्तिता। श्रीमद्भुवनसुन्दर्यां दक्षिणे त्र्यम्बकं यजेत्। स्वर्गे मर्त्ये च पाताले या चाद्या भुवनेश्वरी। एतया रमते तेन त्र्यम्बकस्तेन कथ्यते। समक्षिप्त समाख्यातः सर्वतन्त्रे प्रपूजितः। भैरव्या दक्षिणे भागे दक्षिणामूर्त्तिसंज्ञकम्। पूजयेत् परयत्नेन पञ्चवक्त्रं तमेव हि! छिन्नमस्तादक्षिणांशे कबन्धं पूजयेत् शिवम्। कबन्धपूजनाद्देवि! सर्वसिद्धीश्वरो भवेत्। धूमावती महाविद्या विधवा रूपधारिणी। बगलाया दक्षभागे एकवक्त्रं प्रपूजयेत्। महारुद्रेति विख्यातं जगत्संहारकारकम्। मातङ्गीदक्षिणांशे च मतङ्गं पूजयेत् शिवम्। तमेव दक्षिणामूर्त्तिं जगदानन्दकारकम्। कमलाया दक्षिणांशे विष्णुरूपं सदाशिवम्। पूजयेत् परमेशानि! स सिद्धो नात्र संशयः। पूजयेदक्षपूर्णाया दक्षिणांशे च रूपकम्। महामोक्षप्रदं देवं दशवक्त्रं महेश्वरम्। दुर्गाया दक्षिणे देशे नारदं परिपूजयेत्। नकारः सृष्टिकर्त्ता च दकारः पालकः सदा। रेफसंहाररूपत्वान्नारदः परिकीर्त्तितः। अन्यास्तु सर्वविद्यासु ऋषिर्यः परिकीर्त्तितः। स एव तस्या भर्त्ता च दक्षभागे तु पूज्यते"। ११रागभेदे स च महादेवस्वरूपः। धैवतनिषादषड्जगान्धारमध्यमरूपपञ्चस्वरमिलितैर्गेयः। अस्य स्थानं धैवतस्वरः ग्रहतारौ प्रातर्गेयता। मतान्तरे अस्य रागिण्यः पञ्च। भैरवी वैराटी मधुमाधवी सिन्धवी बङ्गाली चेति" कल्लिनाथमते भैरवे गुर्जरी भाषा विलावली कर्णाटी वतंसा वङ्गसेनी चेति षट्। भरतमते मधुमाधवी ललिता वरारी बङ्गाली भैरवी चेति अन्यविधा पञ्च सङ्गी० दा० दृश्या। १२महाविद्यामूर्त्तिभेदे स्त्री ङीप् सा च पञ्चदशविधा तन्त्रसारे उक्ता यथा

१त्रिपुरभैरवी २सम्पत्प्रदा भैरवी ३कौलेशभैरवी ४भयविध्वंसिनी भैरवी ५सकलसिद्धिदा भैरवी ६चैतन्यभैरवी ७कामेश्वरी भैरवी ८षट्कूटा भैरवी ९नित्या भैरवी १०रुद्रभैरवी ११भुवनेश्वरी भैरवी १२सकलेश्वरी भैरवी १३त्रिपुरबालाभैरवी १४नवकूटा बालाभैरवी १५अन्नपूर्णेश्वरीभैरवी च एतासां मन्त्रध्यानादिकं क्रमेण तत्र दृश्यम्। १३तारिण्योग्रशक्तियोगिनीभेदे च "महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च। घोराख्या भ्रामरी चैव महारात्रिश्च सप्तमी। अष्टमी भैरवी प्रोक्ता योगिनीसाः प्रपूजयेत्" तन्त्रसा०। तत्र शिवस्य पत्न्यां "कालीतन्त्रादौ "भैरव्युवाच "कालीपूजा श्रुता नाथ" कालीशब्दे दृश्यम्। १४भैरवरागस्य पत्नीरूपरागिणीभेदे स्त्री "भैरवी कौशिकी चैव भाषा वेलाबली तथा। बङ्गाली चेति रागिण्यो भैरवस्यैव वल्लभाः" संगीतसा०। मतान्तरे १५मालवरागस्य पत्नीभेदे "धानसी मानसी चैव रामकीरी च सिन्धुता। व्याधायरी भैरवी च मालवस्य प्रिया इमाः"। तस्या गानकालः पूर्वाह्णः। "विभाषा ललिता चैव कामोदा पठमञ्जरी। रामकीरी रामकेली वेला मारी च गुर्जरी। देशकारी च सुभगा पञ्चमी च गडातुडी। भैरवी चाष

कौमारी रागिण्यो दश पञ्च च। एताः पूर्वाह्णकाले तु गीयन्ते गायनोत्तमैः" ब्रह्मवैतदा०। १५नागभेदे पु० भा० आ० ५७ अ०।

भैरवीचक्र न० भैरव्याः पूजनार्थं चक्रम्। देवीपूजार्थे कुलाचारवतां चक्राकारसमूहे तद्विधिर्यथा तत्पत्तितन्त्रे "नित्यं नैमित्तिकं काम्यं प्रकुर्य्याच्च दिने दिने। कुलवारे कुलर्क्षे च तिथौ चन्द्रबले तथा। भैरव्याः कल्पितं चक्रं संस्थाप्य पूर्ववत् प्रिये। सुराणां शोधनं कुर्य्यात् यथावत् परमेश्वरि!। प्रकृत्ते भैरवीचक्रे सर्वे वर्णा द्विजोत्तमाः। निष्कृत्ते भैरवीचक्रे सर्वे वर्णाः पृथक् पृथक्"।

भैषज न० भेषजमेव स्वार्थे अण्। १औषधे २लाक्षकखगे जटा० भिषजो गोत्रापत्यं गर्गा० यञ्। भैषज्य तस्य ज्ञातावः कक्षा० अण् यञोपः। २भिषजो गोत्रापत्यज्ञातेषु ब०व०

भैषज्य न० भिषजः कर्म ष्यञ-स्वार्थे वा अञ्। १औषधे भिषजोऽपत्यं गर्गा० यञ्। २भिषजोऽपत्ये पुंस्त्री०।

भैष्णज पु० ब०व० भिष्णजो गोत्रापत्यं गर्गा० यञ् तस्य ज्ञातावः कक्षा० अण् यञोपः। भिष्णगगोत्रापत्यज्ञातेषु।

भैष्णज्य पुंस्त्री० भिष्णजो गोत्रापत्यं गर्गा० यञ्। तद्गोत्रापत्ये

भैष्मकी स्त्री भीष्मकस्य अपत्यम् इञ् ङीप्। भीष्मकजपकन्यायां रुक्मिणीभ्राम् हरिवं० १२० अ०।

भोक्तृ त्रि० भुज-भोजने अथने च तृच्। १भोजनकर्त्तरि २भोगकर्त्तरि च १लाभकर्त्तरि हेमच०। स्त्रियां ङीप्। ४विष्णौ पु० "भ्राजिष्णुर्भोजनं भोक्ता" विष्णुस०।

भोग स्त्री भुज-भावकर्मादौ घञ्। १सुखे २दुःखे ३सुखदुःखाद्यनुभवे ४सुखादीनां भाटके ५भाटकमात्रे च ६सर्पदेहे ७तत्फणायाञ्च अमरः। ८धने ९पालने १०भोजने च मेदि० ११देहे १२सर्पे १३माने च शब्दरत्ना०। १४रम्भादीनां राशिगतिकाले "अतीतानागतो भोगो नाड्यः पञ्चदश स्मृताः" तिथित०। १५भूम्यादीनां फलभुक्तौ भुक्तिशब्दे द्रष्टव्यम्। १६विभवभेदे "कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा। भोगो विभवभेदश्च निष्कृतिस्तत्क्षयश्च" ब्रह्मवै० प्र० ख० २३अ०।

भोगक त्रि० भोग+संज्ञायां कन्। भोगकालीने ततः विदा० अपत्ये घञ्। भौगक तदपत्ये पुंस्त्री०।

भोगगृह न० भोगार्थं गृहम्। वासगृहे हेमच०।

भोगदेह पु० भुज्यते सुखदुःखादिकमत्र भुज-आधारे घञ् कर्म०। पुण्यपापफलभोगार्थे देहे "प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते" गरु० त०। २भोगसाधने देहे च लिङ्गशरीरात्मकः तस्यैव भोगसाधनत्वात् "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" वेदान्तिनः। सांख्यमते पञ्चप्राणस्थले पञ्चभूतमात्रा इति भेदः। स्थूलदेहस्य भोगावच्छेदकत्वात् उपचारात् तथात्वमिति बोध्यम्। तद्विवृतिर्यथा "शृणु देहविवरणं कथयामि यथागमम्। पृथिवी वायुराकाशस्तेजश्चोयमिति स्फुटम्। देहिनां देहबीजञ्च सृष्टुः सृष्टिविधौ परम्। पृथिव्यादिपञ्चभूतैर्यो देहो निर्म्मितो भवेत्। स कृत्रिमो नश्वरश्च भक्ष्यमाञ्च भवेदिह। हस्ताङ्गुष्ठप्रमाणञ्च यो जीवः पुरुषः स्मृतः। बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे। स देहो न भवेद्भक्ष्य ज्वलदग्नौ यमालये। जले न नष्टो देहो वा प्रहारे सुचिरे कृते। न शस्त्रे च न चास्त्रे च न तीक्ष्णकण्टके तथा। तप्तदूर्वे तप्तलोहे तप्तपाषाण एव च। एतत्प्रतिमात्रदेहेऽप्यूर्ध्वपतनेऽपि च। न च दग्धो न भग्नश्च भुङ्क्ते यन्नापमेव सः" ब्रह्मवै०प्र०२६अ०।

भोगपाल पु० भोगं भोगसाधनमस्य पालयति पालि-अण् उप०स०। अश्वरक्षके शब्दमा०।

भोगपिशाचिका स्त्री भोगे पिशाचिकेव। क्षुधायाम् हारा०

भोगप्रस्थ पु० उत्तरस्थदेशभेदे द्व०स० १अ० ङीप्रम्।

भोगभूमि स्त्री भोगार्थैव भूमिः न कर्म्मार्था। भारतवर्षातिरिक्ते वर्षे "तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने!। यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः" विष्णुपु० २अंशे ३अ०।

भोगवती स्त्री भोगः सर्पशरीरं भक्षाऽस्त्यस्याम् मतुप् मस्य वः ङीप्। १पातालगङ्गायाम् "भोगवती च पातालेस्वर्गे मन्दाकिनी तथा" इति पुराणम्। २कुमारानुचरमातृभेदे भा० श० ४७ अ०। ३नदीभेदे भा० व० १२अ०। ४भोगयुक्ते त्रि० स्त्रियां ङीप्।

भोगवर्द्धन पु० देशभेदे मार्क०पु० ५७ अ० ४८ श्लो०।

भोगसद्मन् न० भोगार्थं सद्म। वासगृहे शब्दरत्ना०।

भोगायतन न० इत०। स्थूलदेहे "भोक्तुरधिष्ठानात् भोगायतननिर्माणमन्यथा भूतिमात्रः" सां०सू०।

भोगार्ह न० भोगमर्हति अर्ह-अण् उप०स०। १धान्ये राजनि० भोग्ये २वस्तुमात्रे च त्रि०।

भोगावली स्त्री इत०। १भोगश्रेण्यौ। २स्तुतौ उपचारात् ३स्तुतिपाठके जटा० ४नागपुर्य्यां हेमच०।

भोगावास पु० भोगार्थं आवासः। वासगृहे हारा०।

भोगिक पु० भोगः अन्नभोगः अस्यास्ति कर्मत्वेन ठन्। अक्षरच्छत्रे मेदि०।

भोगिकान्त पु० ६त०। वायौ त्रिका०। सर्पाणामनिलाहारत्वात् तस्य तत्कान्तत्वम्।

भोगिगन्धिका स्त्री भोगिनः सर्पस्येव गन्धो यस्याः कप् अपि अत इत्त्वम्। लघुमल्लिकाख्ये वृक्षे वैद्यकरत्नमा०।

भोगिन् पु० भोगः फणाऽस्त्यस्य इनि। १सर्पे अमरः तद्वैवताके। २अन्नेभोगवत्त्वात्तथात्वम्। ३नागपाशे ४छत्रे मेदि०तस्य प्रशस्तभोगवत्त्वात्तथात्वम्। ५नागपिते विश्वः।६व्याघ्रवृक्षकरे हेमच० ७भोगयुते त्रि० स्त्रियां ङीप् वा च दर्शहिमीभिन्नराजभार्य्यायाम् अमरः भट्टिनीत्यत्र पाठान्तरम्।

भोगिभुज् पु० भोगिनं सर्पं भुङ्क्ते भुज-क्विप्। गरुडे वैद्यकरत्नमा०।

भोगिवल्लभ न० ६त०। चन्दने राजनि०।

भोगीन्द्र(ग्र) पु० भोगी इन्द्र इव ६त० वा। १अनन्तदेवे यज्ञरत्ना० २वासुकौ च।

भोग्य न०भुज-ण्यत् कुत्वम्। १धने २धान्ये च। भोगमर्हति यत्। ३भोगार्हे त्रि०। भोगार्हस्त्रियां ४वेश्यायाञ्च स्त्री राजनि०।५आधिभेदे पु०यथाह नारदः"विक्रयक्षेत्र द्वावत्र प्रतिभूराधिरेव च। अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः। अतत्कालोपनेयश्च यावद्देयोद्धृतस्तथा। स पुनर्द्विविधः प्रोक्तो भोग्यो भोग्यश्चयेव च"।

भोज पु० भुज-अच्। १अनामख्याते देशभेदे स च देशः (भोजपुर) इति ख्यातः। २धारापुरस्थे नृपभेदे भोजप्रबन्ध भोजचरितादौ तद्वृत्तान्तो दृश्यः।

"धन्यः श्रीभोजराजस्त्रिभुवनविजयी" उद्भटः। वसुदेवस्य शान्तिदेवावतारभेदे १पुत्रभेदे पु० हरिवं० ६६अ०। ४कुकुरपुत्रभेदे भा० अनु० ८१ अ०।

भोजक त्रि० भोजयति भुज-णिच्-एवुल्। १भोजनसम्पादके याज्ञ०२। २१६श्लो०भुज-ण्वुल्। २भोजनकर्त्तरि त्रि०

भोजकट पु०भोजः कट इव। भोजाख्ये देशे भा०स०२५अ०। भोजकटे भवः "एङ्प्राचां देशे" पा० वृद्धसंज्ञायाम् "वृद्धाच्छः" पा० छ। भोजकटीय तद्देशभवे त्रि०।

भोजदेव पु० भोजो देव इव। भोजराजे तेन च पातञ्जलवृत्तिप्रभृतिग्रन्थाः कृताः।

भोजन न० भुज-ल्युट्। १कठिनद्रव्यस्य गलविलाधःसंयोजने। करणे ल्युट्। २धने निघण्टुः ३विष्णौ पु०।"भ्राजिष्णु-भोजनं भोक्ता"विष्णुस०। "भोज्यरूपा च प्रकृतिर्यया भोजनमुच्यते"मायाया भोज्यरूपेण परिणामात् विष्णोस्तदधिष्ठानत्वात् तथात्वमिति भाष्यादौ दृश्यम्। भोजनगुणादि भावप्र० उक्तम् आहारशब्दे ८६७४पृ० दृश्यम्। तत्र विशेष आह्निकतत्त्वोक्तोऽभिधीयते "विष्णुपु० "मन्त्राभिमन्त्रितं भक्तं न च पर्युषितं नृप!। अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात् तथा। तद्वदौदरिकेभ्यश्च गुरुपक्वेभ्य एव च। भुञ्जीतोद्धृतसाराणि न कदाचिन्नरेश्वर!। नाश्नेयं पुरुषोऽश्नीयादन्यत्र जगतोऽपते!। मध्वाज्यदधिसर्पिर्भ्यः सक्तुभ्यश्च विवेकवान्। अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं रसम्। लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्तथा। प्रागुक्तं पुरुषोऽश्नन् वै मध्ये च कठिनाशनः। पुनरन्ते द्रवाशी तु बलारोग्ये न सीदति। अनिन्द्यं भक्षयेदित्यं वाग्यतोऽन्नमकुत्सयन्। पञ्च ग्रासान् सहाशीत प्राणाद्य यनाय तत्"। मन्त्राभिमन्त्रितमिति मन्त्रानादेशे गायत्रीति वचनात् गायत्राभिमन्त्रितम्। गारुडे "ग्रासं स्वपञ्च भूयिष्ठम् अत्यन्नञ्च नियर्जयेत्। न चैकरससेवायां प्रसज्येत कदाचन।" "मुनिभिर्द्विरशनं प्रोक्तं विप्राणां सर्व्ववासिनां नित्यम्। अहनि च तथा तमस्विन्यां सार्द्धप्रहरद्वयात्तः" छन्दोगप०।विष्णुः "न तृतीयमथाश्नीयादपद्यपि कदाचन"। भगवद्गीतासु "आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः। रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः। कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः। आहारा राजसस्येष्टा दुःखशोकामयप्रदाः। यातयामं गतरसं पूति पर्य्युषितञ्च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्"। महाभारते "इन्द्रियाणि च संयम्य बकवत् कायमोधनम्। विवेद् यद्यपि गङ्गाम्भस्तस्य साध्यं न यत्नतः"। गङ्गामधिकृत्य मत्स्यपुराणम् "अवगाह्य च पीत्वा च पुनात्यासप्तमं कुलम्"। देवीपुराणम् "ये चैव मृत्तिकां तस्याः सीतांदाकृत्य भुञ्जते। ते सर्वपापनिर्मुक्ताः प्रभवन्ति गतामयाः"। मनुः "आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः। श्रियः प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः"। नियमे त्वेषम्। अनियमे तु नोदङ्मुखः। हारीतः "नोदङ्मुखोऽश्नीयात्"इति "निष्क्रान्तस्य तु प्राङ्मुखेनैव भोजनम्। यथाह देवलः"प्राङ्मुखोऽश्नानि भुञ्जीत शुचिः पीठमधि-

स्थितः। विशुद्धवदनः प्रीतो भुञ्जीत न विदिङ्मुखः" जीवत्मातृकस्य दक्षिणास्यत्वनिषेधमाह आपस्तम्बः "दक्षिणामुखो न भुञ्जीत एवंविधभोजनमनायुष्यं मातृरूपदिशति" केचित्तु "कृष्णस्यानं गयाश्राद्धं तिलैस्तर्पणमेव च। न जीवत्पितृकः कुर्याद्दक्षिणाभिमुखभोजनम्" इत्याचारत्न करतज्जीवत्पितृकस्यापि निषेध इत्याहुः। व्यासः "पक्वार्द्धं भोजनं कुर्यात् प्राङ्मुखो मौनमास्थितः। हस्तौ पादौ तथैवास्यनेषु पञ्चार्द्रता मता।" गोभिलः "भुञ्जानेषु तु विप्रेषु यस्तु पात्रं परित्यजेत्। भोजने विघ्नकर्त्तासौ ब्रह्महापि तथोच्यते"। आपस्तम्बः "दिवा पुनर्न भुञ्जीतान्यत्र फलमूलेभ्यः"। मनुः "नातिप्रगे नातिसायं न सायं प्रातराशितः"। अतिप्रगेऽचिरोदितसूर्ये अतिसायं सूर्यास्तमितिसमय एवं प्रातराशितः दिनभोजनेनातितृप्तः न सायं न रात्रौ भुञ्जीतेत्यर्थः। आपस्तम्बः "यस्तु भोजनशालायां भोक्तुकाम उपस्पृशेत्। व्यासनस्थो न चान्यत्र स विप्र पङ्क्तिदूषकः" भोजनशालायां भोक्तुकामः सन् व्यासनस्थो वान्यत्र स्थितो वा न चोपस्पृशेत्। बौधायनः "उपलिप्ते समे स्थाने शुचौ लब्धासनान्विते। चतुरस्रं त्रिकोणञ्च वर्त्तुलञ्चार्द्धचन्द्रकम्। कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मण्डलम्। अकृत्वा मण्डलं ये तु भुञ्जतेऽधमयोनयः। तेषान्तु यत्तरक्षांसि हरन्त्यन्नानि तद्बलात्"। आपस्तम्बः "भिन्नकांस्ये तु यो विप्रो यदि भुङ्क्ते तु कामतः। उपवासेन चैकेन पञ्चगव्येन शुद्ध्यति"। तथा शूद्रादिभोजनेनापरिष्कृतपात्रेऽपि। हरिमनुः "ताम्रपात्रे न भुञ्जीत भिन्नकांस्ये मलाविले। पलाशपद्मपत्रे वा यद्वा भुक्त्वेन्दवं चरेत्"। नव्यवर्द्धमानधृताग्निपुराणम् "अर्कपत्रे तथा पृष्ठे आयसे ताम्रभाजने। करे कर्पटके चैव भुक्त्वा चान्द्रायणं चरेत्" पृष्ठे कदलीपत्रादिपृष्ठे। पैठीनसिः "ताम्ररजतसुवर्णाश्मशङ्खशुक्तिस्फटिकानां भिन्नमभिन्नम् इति न दोषः"। अत्र पाषाणपात्रं भोजने विहितम् "तैजसानां मणीनाञ्च सर्वेषाञ्चाश्मजस्य च। भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः" इति मनुना पाषाणपात्रस्य शुद्धिविधानाच्च। प्रचेताः "ताम्बूलाभ्यञ्जने चैव कांस्यपात्रे च भोजनम्। मैथुनञ्च ब्रह्मचारी च विधवा च विवर्जयेत्"। अत्रिः "आसने पादमारोप्य यो भुङ्क्ते ब्राह्मणः क्वचित्। सुखेन याज्ञसश्नाति तुल्यं गोमांसभक्षणैः"। सुखेन कृतोत्तोलनं विना गवादिवदित्यर्थः। आश्वमेधिके "आर्द्रपादस्तु भुञ्जीत प्राङ्मुखश्चासने शुचौ। पादाभ्यां धरणीं स्पृष्ट्वा पाणिनैकेन वा पुनः"। बौधायनः "भोजनं हवनं दानमुपहारः परिग्रहः। बहिर्जानु न कार्य्याणि तदाचमनं स्मृतम्"। हारीतः "भोजनाच्च बलिकर्म भोजनानि दैवतौलेन कुर्यात्"। पराशरभाष्ये हरिमतम्; "न विलेख्य च भुञ्जीत द्विजः सव्येन पाणिना। नैकवस्त्रेण च जलं स्पृष्ट्वेवावर्जितं पिबेत्"। मार्कण्डेयपुराणम् "पादप्रसारणं कृत्वा न च वेष्टितमस्तकः"। मनुः "पूजयेदशनं नित्यं चाद्याच्चैव सकृन्मयन्। दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिमेश्वर सर्वदा। अन्नं हेला प्रस्थाटौ प्राञ्जलिः प्रार्थयेत्ततः। अक्षाकं नित्यमस्त्वेतदिति भक्तप्राश वन्दयेत्"। विष्णुपु० "नागः कूर्मश्च ककरो देवदत्तो धनञ्जयः। बलिस्था वायवः पञ्च तेषां भूमौ प्रदीयते। अदत्त्वा वाह्यवायुभ्यः प्राणादिभ्यो न भोजयेत्"। इति शिष्टपतिषेधनाद्यागादिभ्यो बलिदानमिति प्राचीनाचारः। तस्मात् देवेभ्योदत्त्वा भोक्तव्यं तथा च भगवद्गीतायाम् "इष्टान् भोगान् हि वो देवादास्यन्ते यज्ञभाविताः। तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः"। यज्ञैः संवर्द्धिता देवा वो युष्मभ्यं भोगानन्नादीनि वृष्ट्यादिद्वारा दास्यन्ति। अतो देवैर्दत्तान् अन्नादीन् तेभ्योऽदत्त्वा यो भुङ्क्ते स चौर एव। स्मृतिः "निवेद्य प्राशनात् पूर्वं देवपादोदकाक्षतिः। भोजयेत् जठरे यस्तौ स्वेन पाणितलेन तु। तेन पादोदकेनाभोजनं कृत्वा प्राणाहुतिर्नैवेद्येन आद्यौ" आ० त० रघु०।

भोजनगर न० भोजदेवस्य नगरे धारापुरे भा० ब० ११७अ०

भोजपुराटयोऽप्यत्र। [१०।४७अ० भोजनाद्यादयोऽप्यत्र

भोजपति पु० ६त०। १भोजदेशाधिपे २कंसराजे च भाग०

भोजिन् त्रि० भुज-णिनि। भोजनकर्त्तरि स्त्रियां ङीप्।

भोज्य त्रि० भोज-ण्यत् भक्षणार्थत्वाच्च कर्त्तरि। १भक्षणीयद्रव्यमात्रे २भक्ष्यभेदे आचारशब्दे दृश्यम्। आढ्यतुकल्पे पितृणां तृप्त्यर्थं देये २भक्षादौ च।

भोज्यसम्भव पुः भक्ष्यभोज्यत्वात् भस्+भू-घञादाने अप् ६त०। भोज्यजाते देहस्थे रसधातौ शब्दच०।

भोट पु० (भोटान) देशभेदे शब्दरत्ना०।

भोटाङ्ग पु० (भोटान) देशभेदे शब्दर०।

भोलि पु० भा-उलि। वङ्गे त्रिका०।

भौस अव्य०भा-डोसि।१सम्बोधने अमरः २प्रश्नविधाने शब्दर०
भौजीय त्रि० भोजे देशभेदे भवः गहा०छ। भोजदेशभवे।
भौत पु०भूतानि प्राणिनोऽधिकृत्य प्रवृत्तः तानि देवता वा अस्य अण्। १देवले ब्राह्मणे शब्दमा०। बलिकर्मरूपे गृहस्थकर्त्तव्ये पञ्चयज्ञान्तर्गते २महायज्ञभेदे। "होमो दैवो बलिर्भौतो न्ययज्ञोऽतिथिपूजनम्" मनुः। ३रात्रौ स्त्री ङीप् हेमच०। भूतप्रियत्वात्तस्यात्वात्।
भौतिक त्रि० भूतानि पृथिव्यादीनि पिशाचान् वा अधिकृत्य जातानि ठक्। १भूताधिकारेण जाते "व्याहङ्कारिकत्वश्रुतेर्न भौतिकानि" वा० सू०। २उपद्रवे व्याध्यादौ। ३सङ्घायां राजनि०। ४महादेवे पु०विका०।
भौत्य पु० भूतेरपत्यं वा यक्। चतुर्दशमनौ हरिवं ७अ०। "बभूवाङ्गिरसःपुत्रो भूतिर्नाम्नातिकोपनः" इत्युपक्रमे मार्कपु० १०० तदुत्पत्त्यादिकमुक्तम्।
भौम पु० भूमेरपत्यं तस्या इदं वा अण्। १नरकासुरे "त्वयि भौमं गते जेतुम्" माघः। २मङ्गलग्रहे च। ३भूमिभवे त्रि० मेदि०। भौमजलगुणादिकम् अम्बुशब्दे ३३०पृ० दृश्यम्। ४भूमिव्यापके अम्बरे धरणिः। ५रक्तपुनर्नवायां राजनि०
भौमन पु० भूम्नोऽपत्यम् अण् मन्नन्तत्वात् न टिलोपः। विश्वकर्मणि भा० स्या० ३२अ०।
भौमिक त्रि० भूमौ तिष्ठति अधिकरोति वा ठक्। भूम्यधिकारिणि २भूमिस्थिते च मनुः ५।१४२। [अमरः।
भौरिक त्रि० भूरि स्वर्णमधिकरोति ठक्। कनकाध्यक्षे
भौरिकि पुंस्त्री० भूरिकस्यैरपत्यमिञ्। भूरिकैरपत्ये स्त्रियां क्रौड्या० यञ्। भौरिक्या तदपत्ये स्त्रियां विच्त्वात् ङीष् च भौरिकीत्यपि तत्रार्थे। ततः अपत्ये ठिकार० फिञ्। भौरिक्यायणि भौरिकैरपत्ये पुंस्त्री०। भौरिक्या० विषये यं विधत्ते। भौरिकिविध तद्विषये देये
भौरिक्यादि पु० देये विषये विधत्तप्रत्ययनिमित्ते शब्दगणे स च गणः पा०गं० उक्तो यथा "भौरिकि भौलिकि चौपयत चैटयत काण्येय बाणिजक बालिकाभ्य ऐकयत ऐकयत"। [भौरिकिशब्दवत् सर्वम्।
भौलिकि पुंस्त्री० भौरिकि+पा रस्य लः। भौरिकियञ्दार्थे
भौलिङ्ग पुंस्त्री०भूलिङ्गस्य खगभेदस्यापत्यम् अण्। भूलिङ्गखगापत्ये स्त्रियां गौरा०ङीष्। ततः युवापत्ययस्य लुक्।
भौवादिक पु० भ्वादौ गणे पठितः ठक् वातूपूर्वम् ऐच्। भ्वादिगणपठिते धातौ। एवम् अदादिकजौहोत्यादिकदैवादिकादयोऽपि अदाद्यादिगणपठिते धातौ।

भ्यस भये भ्वा० या० अक० सेट्। भ्यसते अभ्यसिष्ट।
भ्यसते अव्य०। उत्तरदिशि निघण्टुः।
भ्रंश पु० भ्रनृश-भावे घञ्। व्यसने अमरः। अतःघाते च
भ्रंशकला अव्य०जया०। हिंसायाम् गणरत्न० टी०। भ्रंशकलाकृत्य हिंसित्वेत्यर्थः।
भ्रु(भ्रु)(भ्रू)कुंश पु० भ्रुवा कुंशा इङ्गितज्ञापनं यस्य। "ऋज्रेन्द्राग्रवज्रेत्यादीनाम्" वार्त्ति० अ पक्षे वा हुस्वः इति रूपत्रयम् स्त्रीवेशधारिणि नटे अमरः।
भ्रु(भ्रु)कुटि पुंस्त्री० भ्रुवः कुटिः कौटिल्यम्। भ्रुकुंशवत् रूपत्रयम्। भ्रुवः कौटिल्ये अमरः।
भ्रु(भ्रु)च्च अदने भ्वा० उ०सक० सेट् वा रस्य लः धातुपाठः। भ्रु(भ्रु)च्चति ते अभ्रु(भ्रु)च्चीत्। बभ्रु(भ्रु)च्च।
भ्रुजस् पु० भ्राजते भ्राज-असुन् पृषो० हुस्वः। १अग्नौ छन्दसि यजु०१५।५। "अग्निर्वै भ्रुजस्छन्दः" शत० ब्रा० ८।५।२।५। २आदित्यरूपे क्षुरे च "क्षुरो असमश्छन्द इत्यथो वा आदित्यः क्षुरो भ्रुजस्छन्दः" तत्रैव।
भ्रुण शब्दे भ्वा०पर०सक०सेट्। भ्रुणति अभ्रुणीत् अभ्रुणीत् बभ्रुण। [अभ्रंशीत् भ्रंश्यते।
भ्रुन्श अधःपतने दिवा०अक०सेट्। भ्रुश्यति इदित् अभ्रुशत्
भ्रुन्श अधःपाते अक० सेट्। भ्रंशति इदित् अभ्रशत्। इदित्। भ्रंशित्वा भ्रष्ट्वा। भ्रष्टः। [भ्रुवो भ्रुङ्गे।
भ्रु(भ्रु)(भ्रू)भङ्ग पु० ६त०। भ्रुकुंशवत् वा अकारहुस्वौ
भ्रम चलने भ्वा०पर०अक०सेट्। भ्रमति कौटिल्ये इरित्। अभ्रमत् अभ्रमीत्। बभ्राम फणा० भ्रेमतुः बभ्रमुः।
भ्रम चलने दिवा०पर०सक०सेट् शमा०। भ्राम्यति अभ्रमीत्।
भ्रम भ्वा०पर०अक०सेट्। भ्रमति अभ्रमीत् फणा० भ्रेमतुः बभ्रमतुः चङि न हुस्वः। ज्वला० भ्रमः भ्रामः।
भ्रम पु० भ्रम-घञ्। १मिथ्याज्ञाने (अन्यथाभूतस्य वस्तुनोऽन्यथारूपेण ज्ञाने) २जलनिर्गमस्थाने ३कुन्दे (कुंद) ४भ्रमणे च मेदि० भ्रमस्य तद्वति तत्प्रकारकज्ञानम्। व्यधिकरणप्रकारावच्छिन्नविषयतायाश्चालिज्ञानम्। यत्प्रकारिका या विषयता तत्प्रकारव्यधिकरणविषयताकज्ञानम्। स्वप्रकारव्यधिकरणविषयताकज्ञानम्। स्वव्यधिकरणप्रकारावच्छिन्नविषयताप्रतियोगिज्ञानम्" (चि०) तदभाववद्विरूपितत्वविशिष्टविषयताप्रतियोगिताकतदभाववति तत्सम्बन्धेन तद्धर्मविशिष्टतद्विरूपितवैशिष्ट्यविषयताश्चालिज्ञानम्। विशेष्यितासम्बन्धेन तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकतदभाववद्वच्छिन्ना या तदुव्यक्तिप्रकारिता त-

ज्ञानविज्ञानम् । (भू०भा०) "मिथ्याज्ञानावरपर्य्यायोऽयं निश्चयः" (गौ०ह०) अतस्मिंस्तद्ग्रहः (भा०प०)। तद्भाववति तत्प्रकारकं ज्ञानम् यथा शुक्तौ इदं रजतम् इति ज्ञानम्। (त०प्र०) भ्रमो द्विविधः। विपर्य्यासः संशयश्च। तत्र तत्त्व दोषा दोषशब्दे ३७६२ पृ० दृश्याः

भ्रमण न० भ्रम-ल्युट्। गतिभेदे पर्य्यटने कर्मण्यशब्दे ६गद्यम्

भ्रमणी स्त्री० भ्रम-करणे ल्युट् ङीप्। १क्रीडार्थपर्य्यटने तत्साधने २क्रीडिकायाञ्च मेदि०। [त्रिका०

भ्रमत्कुटी स्त्री० भ्रमन्ती कुटीव। तप्तादिनिर्म्मिते छत्रे

भ्रमर पुंस्त्री० भ्रम-करन्। १मधुकरे अमरः स्त्रियां जातित्वात् ङीष्। २कास्तके मेदि०।३भ्रमरच्छल्लीलताभेदे स्त्री राजनि० टाप्।

भ्रमरक पु० भ्रमर इव कायति कै-क। ललाटलम्बिते भ्रमरतुल्ये चूर्णकुन्तले अमरः। स्वार्थे क। भृमरक भ्रमरे वालभूषिकायाञ्च मेदि०। (तुरमीन) वेधभ्रमयन्त्रभेदे दशकुमा०। जलभ्रमणे विश्वः।

भ्रमरकीट पु० भ्रमर इव कीटः। (कुमेरपोका) कीटभेदे

भ्रमरच्छल्ली स्त्री० लतामेदे राजनि०। भृङ्गच्छल्लादयोऽप्यत्र "भृङ्गच्छली च कटुका तिक्ता दीपनरोचनी" राजनि०।

भ्रमरपदक न० "भ्रमरपदकमिदमभिहितम्" छादशाक्षरपादके वृ० र० टी० उक्ते छन्दोभेदे।

भ्रमरप्रिय पु० ६त०। धाराकदम्बे रत्नमा०।

भ्रमरमारी स्त्री० भ्रमरं मारयति मारि अण् उप०स०-गौरा० ङीष्। भृङ्गारिलतायाम् राजनि०। भृङ्गाद्यादयोऽप्यत्र "भ्रमरारिश्च तिक्ता स्यात् पित्तश्लेष्मकफापहा। त्रिदोषकुष्ठकण्डूतिशोफव्रणविनाशिनी" राजनि०।

भ्रमरविलसिता स्त्री० "सोगो नौगो भ्रमरविलसिता" छन्दोम० उक्ते एकादशाक्षरपादके छन्दोभेदे अस्य स्त्रीत्वमेके वदन्ति।

भ्रमरातिथि पु० भ्रमरः अतिथिर्यस्य। चम्पके राजनि०।

भ्रमरानन्द पु० भ्रमरान् आनन्दयति आ+नन्द-णिच्-अण् उप०स०।१बकुले २अतिमुक्तके रक्तान्धामे च राजनि०

भ्रमरालक पु० भ्रमर इव अलति पर्य्याप्नोति अल-ण्वुल्। ललाटस्थे चूर्णकुन्तले हेमच०।

भ्रमरी स्त्री० भ्रमर+ङीष्। १षट्पद्यां अस्त्यर्थे अण् गौरा० ङीष्। तदाकारवत्यां २जलयुकायां ३पलदालाञ्च राजनि०

भ्रमरेष्ट पु० ६त०। १ग्रोधाकक्षे २माष्यां ३भूमिजम्बाञ्च स्त्री राजनि०।

भ्रमरोत्सवा स्त्री० भ्रमराणामुत्सवो मोदो यत्र। माधवीलतायाम् राजनि०। [निशानार्थचक्रभ्रमणे आसक्तः। शस्त्र-

भ्रम् अधःपतने दि०पर०सक०सेट्। अभ्रम्यति अभ्राम्यीत् अभ्रमीत्। भ्रदित् क्त्वा वेट्। भ्रमित्वा भ्रष्ट्वा। भ्रष्टः।

भ्रमिमन् पु०भ्रमस्य भावः अतिशये वा इमनिच् ऋतोरः। १भ्रमत्वे २अतिशयभ्रमत्वे च। अतिशये इष्ठन् भ्रमिष्ठ ईयसुन् भ्रमीयस् अतिशयभ्रमत्वे त्रि०ईयसुनि स्त्रियां ङीप्।

भ्रष्ट त्रि० भ्रम-क्त। च्युते गलिते स्वार्थे क। तत्रार्थे स च उपका०।

भ्रस्ज पाके तु० उ०सक० अनिट्। भृज्जति आर्द्धधातुके वा भर्जादेशः स च सेट् अभ्राक्षीत् अभर्जीत्। अभ्रष्ट अभर्जिष्ट। बभर्ज बभ्रज्ज।

भ्राज दीप्तौ भ्वा०आत्म०अक०सेट्। भ्राजते अभ्राजिष्ट कर्त्रा० भ्राजे बभ्राजे। चङि वा ह्रस्वः। द्वित्वे अधु भ्राजयुः।

भ्राज न० वर्षसाध्ये गवामयनसत्रे विषुवन्नामके मध्यमदिने ज्ञेये दिवाकीर्त्ये सामभेदे "दिवाकीर्त्यं सामा भवति" इत्युपक्रमे तस्य दिवाकीर्त्यत्वं समर्थ्य "भ्राजाभ्राजे पवमानसुखे भवतो सुखत एवास्य तान्यां तमोऽपघ्नन्ति" ता०ब्रा०४।६।१४। "यदध्यग्न पवमानसुख इति सामान्यसुखत्व एव दृश्यते ये गायत्रे ते गायत्रीत्तरयोः पवमानयोरिति विशेषावगतेरेवं व्याख्यातं सुखमस्यत्। अनेन भ्राजाभ्राजयोः स्तोत्रोः स्थानियमोऽर्थाद्गम्यो भवति" भा० तत्र साम "परिष्कानो गिरिष्ट" इत्यस्मिन् ज्ञेयम् तत्र ऋचगाने २म०१२।

भ्राजक त्रि० भ्राज-ण्वुल्। १दीप्तियुक्ते २पित्तभेदे न० शब्दरत्ना० पित्तशब्दे ४१२५ पृ० भावप्र० वाक्यं दृश्यम्।

भ्राजिर पु० भौत्यमन्वन्तरे देवभेदे मार्कपु० १००अ०।

भ्राजिष्णु त्रि० भ्राज-ष्णुच्। १दीप्तियुक्ते २विष्णौ पु०। "भ्राजिष्णुर्भोजनं भोक्ता" विष्णुस०।

भ्रातुष्पुत्र पु० ६त० अलुक्स० कर्म्मा०। भ्रातुः पुत्रे।

भ्राट पु० भ्राज-क्विप् पृषो०। एकपितृजाते (भाई) इति ख्याते पदार्थे तस्य सखा शब्दोक्तौ एक०। २भ्रातृभगिन्योः द्वि०व०।

भ्राटक त्रि० भ्रातुरिदम् टञ्। भ्रातृसम्बन्धिनि।

भ्राटज पुंस्त्री० भ्रातृजायते जन-ड ५त०। १भ्रातृपुत्रे २तत्सुकन्यायां स्त्री।

भ्राटजाया स्त्री० ६त०। भ्रातृपत्न्यां क्वौ नियोगेनापि तद्-

गमननिषेधो यथा "भ्रातृजायां कमण्डलुम्" इत्यत्र ६८७१ष्ठ० दृश्यम्। अनियोगेन गमने दोषो यथा "भ्रातृजायापहारी च भ्रातृगामी भवेच्चरः" ब्रह्मवै०म० ५६ अ०। भ्रातृपत्न्यादयोऽत्र।

भ्रातृद्वितीया स्त्री भ्रातृभोजनार्था द्वितीया। कार्त्तिकशुक्लपक्षस्य द्वितीयायाम् यमद्वितीयायां तद्विधिः निर्णयश्च भविष्ये "कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर!। यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः। अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता। अस्यां निशम्यहे विद्वन्! न भोक्तव्यं ततो नरैः। स्वसृहस्तेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम्। दानानि च प्रदेयानि भगिनीभ्योऽपि विधानतः। स्वर्णालङ्कारवस्त्राद्यैः पूजासत्कारभोजनैः। सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः" प्रतिपन्नाः भ्रातृभगिन्य इति हेमाद्रिः। "पितृव्यभगिनीहस्तात् प्रथमायां युधिष्ठिर!। मातुलस्य सुताहस्तात्तृतीयायां तथा नृप!। पितृभ्रातुः स्वसुः कन्ये तृतीयायां तयोः करात्। भोक्तव्यं स्वसृजायाश्च भगिन्या हस्ततः परम्। सर्वासु भगिनीहस्ताद्भोक्तव्यं वनवर्द्धनम्। यस्यां तिथौ यमुनया यमराजदेवः सम्भोजितः प्रतिजगत् स्वसृहस्तेन। तस्यां स्वसुः करतलादिह यो भुनक्ति प्राप्नोति रत्नसुखधान्यमनुत्तमं सः। गौडास्तु "यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत्। अर्घ्यं चात्र प्रदातव्यं यमाय सहजादयैः मन्त्रः "यमोहि सार्त्तिगज! पाशहस्त! यमानुजाखोकधराग्रजेय!। भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते! भ्रातस्त्वानुजातोऽहं भुङ्क्ष्व भक्तमिदं शुभम्। प्रीतये यमराजस्य यमुनाया विशेषतः" ज्येष्ठाऽप्यजातेति वदेदिति आर्त्ताः। इत्यादानमित्यर्थाद्धः। ब्रह्माण्डपुराणेऽपि "या तु भोजयते नारी भ्रातरं युग्मके तिथौ। अर्चयेच्चापि ताम्बूलैर्न सा वैधव्यमाप्नुयात्। भ्रातरायुःक्षयो राजन् न भवेत् तत्र कर्हिचित्"।

भ्रातृवधू स्त्री ६त०। (भादरबौ) कनिष्ठभ्रातृजायायां रूढा०

भ्रातृभगिनी स्त्री द्वि०व०। वा एकशेषः। भ्रात्रासहित भगिन्याम्।

भ्रातृवत् त्रि० भ्राताऽस्त्यस्य वतच्। भ्रातृयुक्ते।

भ्रातृव्य पु० भ्रातुः इदं भ्रातृ+व्यत्। १भ्रातृष्पुत्रे २शत्रौ च हेमच०। "व्यतिपापमानं भ्रातृव्यं क्षपयति य एतया स्तुते" ता०ब्रा०२७।२। [ज्येष्ठभ्रातरि (भासुर) शब्दरत्ना०

भ्रातृश्वशुर पु०भ्राता पतिभ्राता श्वशुर इव पूज्यत्वात्। पतिभ्रातरि (भासुर) शब्दरत्ना०

भ्रात्र न० भ्रातुरिदम् शिवा० अण्। भ्रातृसम्बन्धिनि।

भ्रात्रीय पुंस्त्री० भ्रातुरपत्यम् छ। भ्रातृष्पुत्रे अमरः।

भ्रास्त न० भ्रस-भावे क्त। १भ्रमणे "भ्रमस्थाने भ्रान्तम्" नाट० कर्त्तरि क्त। २मिथ्याज्ञानयुक्ते ३भ्रमयुक्ते च त्रि०। ४धुस्तूरे ५भ्रमरोगे च पु० राजनि०।

भ्रान्ति स्त्री भ्रम-क्तिन्। १भ्रमणे २अयथार्थज्ञाने च। "बाह्यभ्रान्तिस्तु संभ्राम्यं भ्रान्तिः संभ्रमणे समाम्। भ्रान्ताक्षराणि स्खलानि पत्राण्युद्भ्रान्यतः पुरा" ज्यो० त०। भ्रान्तिज्ञानस्य चित्तविक्षेपः योगान्तरायः पात०ख० उक्तः चित्तविक्षेपशब्दे २६४१ पृ० दृश्यम्।

भ्रान्तिमत् त्रि० भ्रान्तिरस्यास्त्यर्थे मतुप् मस्य वः। १भ्रमयुक्ते स्त्रियां ङीप्। २अर्थालङ्कारभेदे पु० अलङ्कारशब्दे दृश्यम्। [२भ्रमनाशके त्रि० स्त्रियां ङीप्।

भ्रान्तिहर पु० भ्रान्तिं हरति हृ-ट। १भ्रान्तिहरे शब्दरत्ना०

भ्राम त्रि० भ्रम-ल्युट्वा० कर्त्तरि घ। भ्रमयुक्ते।

भ्रामक त्रि० भ्रामयति भ्रम-णिच्-ण्वुल्। १भ्रमजनके २भ्रमयुक्ते पुंस्त्री० स्त्रियां ङीप्। ३धूर्त्ते त्रि०। ४अर्थालङ्कारभेदे पु० अलङ्कारशब्दे दृश्यम्। ५व्ययस्थाने (चुम्बकपाथर) मेदि० वस्तु लौहचालकत्वात् तथात्वम्।

भ्रामर न० भ्रमरेण संस्कृतं तस्येदं वा अण्। १मधुनि। २भ्रमरसम्बन्धिनि त्रि० ३व्ययस्थाने पु०मेदि०। "तदाहं भ्रामरं रूपं कृत्वाऽसंख्येयषट्पदम्" इत्युपक्रम्य "भ्रामरीति च मां लोकाः" इति देवीमा० उक्ते ४षण्डीमूर्त्तिभेदे स्त्री। भ्रामरमधुगुडादि किञ्चित् खण्डैः प्रविशेभ्यः पुष्पेभ्योऽलिभिश्चितम्। निर्मलं एलटिकाभं यत्तन्माधु भ्रामरं स्मृतम्। भ्रामरं रक्तपित्तघ्नं मूत्रलाघवकरं गुरु। खाद्वाकमभिष्यन्दि त्रिदोषात् पित्तकं हिमम्" भावप्र० उक्तम्। ५अपस्माररोगे शब्दमाला।

भ्रामरिन् त्रि० भ्रामर 'भ्रमरस्येव घूर्णनमस्त्यस्य इनि। अपस्माररोगयुते "भ्रामरी मयकृन्नाडी च" मतः २।१६१। टीकायां कुल्लू०।

भ्राश भाषे भ्वा०आ०अक०सेट्। भ्राशते भ्राशयते अभ्राशिष्ट। क्षया० भ्रेशे बभ्राशे। ऋदित् अकि न कृञः। द्विष् अतुः भ्राशथुः।

भ्राष्ट्र पु० भ्रस्ज-करणे ष्ट्रन्। १अम्बरीषे (भाजनाखोला) अमरः। भ्राष्ट्रे संस्कृतः अण्। २अम्बरीषसंस्कृते भृष्टतण्डुलादौ त्रि० स्त्रियां ङीप्।

भ्राष्ट्रकि पु० गोत्रर्षिप्रवरभेदे प्रवरा०।

भ्राष्ट्रिवृतिन् पु० गोत्रप्रवरर्षिभेदे हेमा० व्र० प्रवराध्यायः ।

भ्रास दीप्तौ दिवा०आ०अक०सेट् । भ्रास्यते अभ्रासिष्ट ।

भ्रास दीप्तौ भ्वा०आ०अक०सेट् । भ्रासते अभ्रासिष्ट फणा० भेसे बभ्रासे इत् । भ्रासथुः ऋदित् चङि न ह्रस्वः ।

भ्री भये अक० भरणे सक० क्र्या० वा भ्वा० पर० अनिट् । भ्रीणाति भिष्णाति अभ्रैषीत् ।

भ्रुड संवरणे सक० संघाते अक० तु० कु० पर० सेट् । भ्रुण्डति अभ्रुडीत् बुम्भोड ।

भ्रू स्त्री अम-डू । नेत्रयोरूर्ध्वस्थायां रोमराजौ अमरः । तच्छुभाशुभलक्षणं गरु०६६अ०उक्तं यथा "विशाले नेत्रता सुखिनो दरिद्रा विषमभ्रुवः । धनी दीर्घासमक्रूर्भूर्लेन्दून्नतसुभ्रुवः । आद्यो निस्वश्च खड्गस्त्रूर्मध्याश्च विनतभ्रुवः" । भ्रुवो मूलम् जाहच् । भ्रूजाह भ्रूमूले न० ।

भ्रूक्षेप पु० ६त० १भ्रूभङ्गे २सङ्केतज्ञापनाय भ्रुवोक्षिपर्यक्चालने "भ्रूक्षेपमात्रानुमितप्रवेशाम्" कुमारः ।

भ्रूण आशायां विशङ्कायाञ्च चु०आत्म०सक०सेट् । भ्रूणयते अबुभ्रूणत ।

भ्रूण पु० भ्रूण-घञ् । स्त्रीणां १गर्भे २बालके च अमरः ।

भ्रूणघ्न त्रि० भ्रूणं गर्भं हन्ति हन-क । भ्रूणहत्याकारके क्विप् भ्रूणहाप्यत्र । "अपि भ्रूणहनं मासात्" मनुः । तत्प्रायश्चित्तं प्रा० वि० उक्तं यथा

"तत्र पुंस्त्वेन ज्ञाते पुरुषवधप्रायश्चित्तं स्त्रीत्वेन ज्ञाते स्त्रीवधप्रायश्चित्तम् । अविज्ञाते तु पुंवधप्रायश्चित्तमाह मनुः "हत्वा गर्भमविज्ञातमेतदेव व्रतञ्चरेत् । राजन्यवैश्यौ चेच्चज्ञानादात्रेयीं(रजस्वलां)मेव च स्त्रियम्" एतदेवेति । ब्रह्मवधप्रायश्चित्तमित्यर्थः । ब्राह्मणीगर्भवधविषयमिदं तस्यैव प्रकृतत्वात् । क्षत्रियादिगर्भवधे तु यद्यर्थी गर्भस्तदर्धवधप्रायश्चित्तं कार्य्यं यथा याज्ञवल्क्यः "यागस्थक्षत्रविड्घाते चरेद्ब्रह्महणो व्रतम् । गर्भहा च यथावर्णं तथात्रेयीनिसूदनः" व्रतपदोपादानात् ज्ञानत इदम् अज्ञानतस्तदर्द्धं तेन ज्ञानतो ब्राह्मणगर्भवधे द्वादशवार्षिकम् । क्षत्रियगर्भवधे त्रैवार्षिकं वैश्यगर्भवधे सार्द्धवार्षिकं शूद्रगर्भवधे नवमासिकं, धेनुसङ्कलनमप्यूहनीयम्" ।

भ्रूभङ्ग पु० ६त० क्रोधादिज्ञापनार्थं भ्रुवक्षिपर्यक्चालने "भ्रूभङ्गदुष्प्रेक्षसखस्य तस्य" इति कुमारः ।

भ्रेज भासे भ्वा०आत्म०अक०सेट् । भ्रेजते अभ्रेजिष्ट । ऋदित् चङि न ह्रस्वः । अबिभ्रेजत् त ।

भ्रै(भ्रे)ष पतने चलने च अक०भ्वा०उभ० सेट् । भ्रै(भ्रे)षते ते अभ्रै(भ्रे)षीत् अभ्रै(भ्रे)षिष्ट । ऋदित् चङि न ह्रस्वः । अबिभ्रै(भ्रे)षत् त । तत्र पतने आ० भये चलने उभ० अक० इति भेदः ।

भ्रेष पु० भ्रेष-घञ् । उचितस्थानात् पतने अमरः । "कारणभ्रेषे कार्य्यभ्रेषो मा भूदिति" वृ०उ० भा० ।

भ्रौविय त्रि० भ्रुव इदम् "भ्रुवो वुक् च" पा० ढक् वुक् च । भ्रूसम्बन्धिनि च ।

भ्लुञ्च भक्षणे भ्वा०उभ०सक०सेट् । भ्लुञ्चति ते अभ्लुञ्चीत् अभ्लुञ्चिष्ट । दुर्गमते भक्षधातुरयम् ।

भ्लाश दीप्तौ वा दिवा० पक्षे भ्वा० आ० अक० सेट् । भ्लाशयते भ्लाशते अभ्लाशिष्ट फणा० भेसे बभ्लाशे । इत् (अथु) भ्लाशथुः । धोपदेवमते भ्लाशधातुरयम् ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये भकारादिशब्दार्थसङ्कलनम् ।

म

मकारः पवर्गस्य पञ्चमवर्णः । अस्योच्चारणस्थानमोष्ठौ नासिका च जिह्वाग्रेण ओष्ठयोः स्पर्शेनोच्चारणम् आभ्यन्तरः प्रयत्नः अतएवास्य स्पर्शवर्णता अनुनासिकता च । बाह्यप्रयत्नाश्च संवारनादघोषाः अल्पप्राणाश्च । अस्य ध्येयस्वरूपमुक्तं कामधेनुतन्त्रे "मकारं शृणु चार्वङ्गि ! स्वयं परमकुण्डली ! तरुणादित्यसङ्काशं चतुर्वर्गप्रदायकम् । पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा" ।

वर्णाभिधानेऽस्य पर्य्यायाः उक्ता यथा "मः कालो क्लेशिनः कालो महाकालो महान्तकः । वैकुण्ठो वसुधा चन्द्रो रविः पुरुषराजकः । कालभद्रो जया मेधा विष्वक्सेना दीप्तसंज्ञकः । जठरश्च समो मानं नक्षत्रीमौतोग्रवन्धनी । विघ्नं शिवो महावीरः शशिप्रभा जनेश्वरः । प्रमत्तः प्रियश्च रुद्रः सर्वाङ्गो वह्निमण्डलम् । मातङ्गमालिनी विन्दुः श्रवणा भरणो वियत्" । तदधिष्ठातृदेवताध्यानं यथा "कृष्णां दशभुजां भीमां पीतलोहितलोचनाम् ।

क्रणात्मरधरां नित्यां धर्मकामार्थमोक्षदाम् । एवं ध्यात्वा मकारन्तु तन्मन्त्रं दशधा जपेत्" । मातृकान्यासेऽस्य जठरे न्यास्यता । काव्यादौ प्रथमं प्रयोगे दुःखं फलं "सुखमयमरणं क्लेशदुःखं पवर्गः" इ०र०टी०उक्तेः ।

म पु० मा-क । १शिवे २चन्द्रे ३चतुर्मुखे ब्रह्मणि एकाच्० ४यमे ५समये ६विष्णौ ७विष्णौ च मेदि० । छन्दःशास्त्रोक्ते दत्तिगुरुके गणे "भो भूमिस्थिगुरुः श्रियं दिशति यः" इ०र०टी० । तस्य देवता भूमिः काव्यादौ प्रथमप्रयोगे स्त्रीनाशः फलम् । [द्विष्ट समङ्के ।

मक भूषणे गतौ च भ्वा०आ०सक०सेट् इदित् । मङ्कते अमङ्कीत् मङ्कित ।

मक पुंन० म इव कायति कै-क अङ्गेचादि । शिवादिलब्धे ।

मकर पुंस्त्री० मं विषं किरति क-अच् । १जलजन्तुभेदे अमरः स्त्रियां जातित्वात् ङीष् । स च गङ्गावाहनं कामस्य ध्वजश्च । मकराकरत्वात् २मेषादितो दशमे राशौ । तद्राशिश्च उत्तराषाढाशेषपादयवसहितं श्रवणं धनिष्ठार्द्धञ्चेति नवपादात्मकः । तद्राशिस्वरूपादिकं जी० ता० उक्तं यथा "मृगवरः चक्राङ्गरवो यमाशा स्त्री पिङ्गरुक्षः शुभभूमिधीतः । स्वल्पप्रजाबङ्गषमोरराशिरादौ चतुष्पात् विप्रमोदयो विट् । मकि-घञ् पृषो० मकं भूषणं राति ददाति रा-क । ३निधिभेदे निधिशब्दे ४६८ पृ० दृश्यम् । [कारे कर्णभूषणे ।

मकरकुण्डल पु०मकराकृति कुण्डलं कर्णभूषणम् । मकरा०

मकरकेतन पु० मकरः मकरचिह्नितं केतनं ध्वजो यस्य । कन्दर्पे हेमच० मकरकेत्वादयोऽप्यत्र ।

मकरध्वज पु० मकरो ध्वजोऽस्य । कामदेवे अमरः ।

मकरन्द पु० मकरमपि द्यति कामजनकत्वात् दो-अवखण्डने क पृषो०सुम् । १पुष्पमधौ अमरः । २कुन्दवृक्षे च ३किञ्जल्के न० राजनि० ।

मकरन्दवती स्त्री मकरन्द+बाहुल्ये अतुप् मस्य वः ङीप् । १पाटलायाम् शब्दच० २मधुविशिष्टे त्रि० ।

मकरन्दिका स्त्री "रसैः षड्भिर्यौकैर्मनभजजा शुद्धमकरन्दिका" छ० र० टीकोक्ते जगतिंशत्यक्षरपादके छन्दोभेदे । [भेदे भा० भी० ६६ अ० ।

मकरव्यूह पु० मकर इव व्यूहः । मकराकारे सैन्यनिवेशन-

मकरसंक्रान्ति स्त्री ७त० । मकरे राशौ रवेः १संक्रमणे २तदुपलक्षितपुण्यकालोपलक्षिते च दिने ।

मकराकर पु० ६त० । समुद्रे हेमच० । [करञ्जभेदे शब्दच० ।

मकराकार पु० मकरस्येवाकारः फले यस्य । (काँटाकरञ्जचा)

मकराक्ष पु० रावणपक्षस्थे राक्षसभेदे रामा० लङ्का०१७अ० ।

मकराङ्क पु०मकरोङ्को यस्य । १कामदेवे २मत्स्यभेदे अजयपालः

मकरालय पु० ६त० । समुद्रे मकरावासादयोऽप्यत्र ।

मकरासन न० रुद्रयामलोक्ते पूजाङ्गे आसनभेदे "मकरासनमावक्ष्ये वायूनां स्तम्भकारणात् पृष्ठे पादद्वयं बद्ध्वा हस्ताभ्यां पृष्ठबन्धनम्" ।

मकरीग्रस्त पु० मकर्या उपलक्षितः ग्रस्तः । यदा कदाचित् मकरीसम्बन्धे ग्रस्ते मानौ कर्म्मा० अस्य नाद्युदात्तता ।

मकष्टु पु०ऋषिभेदे तस्यापत्यं युवा० ढक् । माकष्टवेय तदपत्ये पुंस्त्री० ।

मकार पु० म+स्वरूपे कार । मस्वरूपे वर्णे । मकारादिर्वर्ण आद्यक्षरेऽस्याः अच् । मद्यमत्स्यमांसमैथुनसंज्ञारूपे मकारादिवर्णयुक्ते तन्त्रोक्ते पदार्थपञ्चके । [रूपकोक्ते ।

मकुट न० मकि-भूषणे उट पृषो० । शिरोभूषणे मुकुटे हि-

मकुति स्त्री मकि-उति पृषो० । मूढग्रामणे त्रिका० ।

मकुर पु० मकि-उरच् पृषो० । १दर्पणे २मुकुलयुक्ते ३कुलालदण्डे ४कलिकायाञ्च हेमच० ।

मकुल पु० मकि-उलच् पृषो० । १मुकुले २मुकुलयुक्ते शब्दरत्ना० ।

मकुष्टक पु०मकि-भूषायां ड-पृषो०मकुं भूषां स्तकति प्रतिफलति स्तक-अच् सुषामा०मत्वम् । वनसुद्गे (सुगानि)राजनि० ।

मकुष्ठ पु० मीयते मा-ड कुत्सितं तिष्ठति स्था-क अस्वष्ठा० षत्वम् कर्म० ।१औषधिभेदे "मकुष्ठो वातलो ग्राही कफपित्तहरो लघुः । वान्तिक्लमघ्नमधुरः पाके कृमिकुष्ठज्वरनाशनः" भावप्र० । २मुद्गगामिनि त्रि० । स्वार्थे क । ३वनमुद्गे

मकूलक पु० मकि-उलच् पृषो० संज्ञायां कन् । १दन्तीवृक्षे अमरः । २मुकुले रमानाथः ।

मक्क गतौ भ्वा०आ०सक०सेट् । मक्कते अमक्किष्ट ममक्के ।

मक्कल पु० सूत्ररोगभेदे "प्रजातायाश्च मायां रूक्षशरीरायाः क्षीणैरविशोधितं रक्तं वायुना सहेषणेनातिसंरुद्धं नाभेरधःपार्श्वयोर्वङ्क्षौ वस्तिशिरसि वा ग्रन्थिं करोति । ततश्च नाभिवस्त्युदरमूलानि भवन्ति सूचीभिरिव निस्तुद्यते भिद्यते दीर्यत इव च पक्वाशयः । समन्तादाध्मानसदरे मूत्रसङ्गश्च भवतीति मक्कलस्य लक्षणम्" सुश्रुतः ।

मक्कूल न० मक्क-जलच् । शिलाजतुनि शब्दर० ।

मक्कोल पु० मक्क-वा० ओल । खटिकायां त्रिका० ।

मच्च रोधे संघाते च भ्वा०पर०अक०सेट् । मच्चति अमच्चीत् ।

मच्चवीर्य्य पु०मच्चं संहतं वीर्यं यस्मात् । ५ब० पियालवृक्षे राजनि० ।

मक्षिका स्त्री मक्ष-सिकन्। कीटभेदे वंभराखीकीटे (मौ-माछि) उज्ज्वल०। पृषो० दीर्घः तत्रार्थे राजनि०।

मक्षिकामल न० ६त०। सिक्थके (मोम) राजनि०।

मक्षिकासन न० ६त०। (मौचाक) सिक्थकाधारे राजनि० पाठान्तरम्। [ब्र-८।२६।६

मक्षु न० मक्ष-उन्। १शीघ्रे निघण्टुः २शीघ्रगतियुते त्रि०

मख सर्पणे भ्वा०पर०सक०सेट्। मखति अमाखीत् अमखीत् ममाख मेखतुः। [मक्षते।

मख सर्पणे भ्वा०पर०सक०सेट् इदित्। मङ्क्षति अमङ्क्षीत्

मख पु० मख-संज्ञायां घ। यज्ञे अमरः।

मखत्राट् पु०मखं विश्वामित्रर्षिमखं त्रायते त्रै-तृच्। श्रीरामे शब्दर०। [त्रि०।

मखद्विष् पु०मखाय हवि द्विष-क्विप्। १राक्षसे २यज्ञद्वेषिणि

मखाग्नि पु० ६त०। यज्ञे संस्कृताग्नौ जटा०। मखानलादयोऽप्यत्र।

मखान्न न० मखे तत्काले भोक्तव्यमन्नं सन्यत्रत्वात् या०त०। (माखना)१जलजाते मूलजे फलभेदे "मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्दिशेत्" भावप्र०। ६त०। २यज्ञान्ने च।

मखाशुघ्नत् पु० ६त०। दक्षयज्ञस्य नाशके महादेवे हेमच०

मग सर्पणे भ्वा०पर०सक०सेट् इदित्। मङ्क्षति अमङ्क्षीत्।

मगध पु० मङ्क्षन्ते अधोगच्छन्तेऽनेन मगि-क पृषो० भगं दोषं पापं वा दधाति धा-क। १देशभेदे २तद्देशस्थे जने ब०व०। स च कीकटेतिसंज्ञः अङ्गदेशस्थश्च। कीकटेषु गया पुण्या नदी पुण्या पुनःपुना" इत्युक्तेः गयादीनामेव पुण्यत्वम्। अन्येषामपुण्यत्वं प्रत्युत पापजनकत्वम् "अङ्गवङ्गकलिङ्गान्धान् गत्वा संस्कारमर्हति" मिता० देवलोक्तेः। "तीर्थयात्रा व्यतिरेकेणैतान् गत्वा तत्रैव चिरस्थित्वा गङ्गागमनं प्रायश्चित्तम्। तदशक्तौ पुनरुपनयनं अतिचिरवासे तु पुनरुपनयनं कृत्वा चान्द्रायणं कर्त्तव्यम्" प्रा० वि०। अतस्तस्य पापजनकत्वात् तथात्वम्। ततः भवार्थे गहा० ञ। मागधीय तत्र भवे त्रि०

मगधा स्त्री मगध उत्पत्तिस्थानत्वेनास्त्यस्या अच्। पिप्पल्यां रत्नमा०। [मागधे च।

मगधेश्वर पु० ६त०। १जरासन्धनृपे हेम०। २तद्देशपतिमात्रे

मगधोद्भवा स्त्री मगधदेशे बाहुल्येनोद्भवति अच्। पिप्पल्याम् राजनि०। तद्देशे तस्याः प्रचुरभवत्वात्तथात्वम्।

मगध्य परिवेष्टने कण्ड्वा० प० सक०सेट्। मगध्यति अमगध्यीत्(धीत्)।

मगन्द पु०मगं पापं ददाति दा क पृषो०सुम् च। क्षयीदिनि निरु० ६।२२।

मगण पु० छन्दःशास्त्रोक्ते सर्वगुरुके वर्णत्रये।

मगल पु० गोत्रप्रवर्त्तकभेदे प्रवरा०।

मग्न त्रि० मस्ज-क्त। (डोबा) जलादौ कृतमज्जने।

मघ कैतवे द्यूतक्रीड़ादौ अक० गतौ निन्दायां आरम्भे च सक०भ्वा०आ०सेट् इदित्। मङ्घते अमङ्घिष्ट। [मङ्क्षदे

मघ भूषणे भ्वा०पर०सक०सेट् इदित्। मङ्घति अमङ्घीत्।

मघ पु० मघि-क्त पृषो०। १द्वीपभेदे मेदि०। (मग)नामके २म्लेच्छदेशभेदे। ३पुंभेदे न० शब्दरत्ना०।

मघवन्(त्) पु० मह-कनिन् नि०हस्य घः "मघवा बहुलम्" पा०वा तृच्। १इन्द्रे अमरः २तन्नामनामके मेघके च। तर्हि मघवान् अतृहि मघवा। एव मघवानौ मघवन्तावित्यादिरूपत्रयम्। भत्वे अझन्तस्य सम्म०। मघोनः तृजन्तस्य न मघवतः इत्यादि स्त्रीपि मघोनी मघवतीत्यादि तद्धिते न सम्म०। माघवनम् इत्यादि भाष्ये तु मघशब्दात् मतुपिरूपं साधयित्वा शब्दान्तरमित्युक्त्वा न तृजित्युक्तम्।

मघा स्त्री मह-घ हस्य घत्वम्। अश्विन्यवधिके दशमे मघात्वे तस्याश्च पञ्चतारात्मकत्वात् बहुत्वमपि "पितरः स्मृतयन्त्यस्मदकाश्च मघासु च" स्मृतिः। "मघां मूलञ्च वर्जयेदिति "मघायां पिण्डदानञ्चेति" स्मृतिस्तु मघदायस्यैकत्वाभिप्रायेण। अस्या योगतारादिकमस्मिन्नेव शब्दे ४६७ पृ० उक्तम्। २औषधभेदे धरणिः।

मघात्रयोदशी स्त्री मघानक्षत्रेण युक्ता त्रयोदशी या०त०। भाद्रशुक्लत्रयोदश्यां तत्रैव मघानक्षत्रसंयोगसम्भवात्। तत्र श्राद्धमावश्यकं यथोक्तं ति० त०

"पौषपञ्चदूर्ध्वं" ज्ञप्तात्रयोदश्यां मघायुक्तायामनिषिद्धं यत्किञ्चिद्द्रव्येण श्राद्धमावश्यकं यच्छादिविधिवाक्ये नक्षत्रविशिष्टतिथेः श्रुतेः। ततश्च केवलत्रयोदशीकेवलमघाश्राद्धार्थवादा अपि क्लृप्तविशिष्टविधिप्राप्तकर्मणो नित्यत्वबोधकाः न तु केवलविध्यन्तरकल्पना गौरवात्। तथाच शङ्खः "पौषपञ्चमतीतायां मघायुक्तां त्रयोदशीम्। प्राप्य श्राद्धं हि कर्त्तव्यं मधुना पायसेन च" अत्रिः "यत्किञ्चित् मधुना मिश्रं प्रयच्छेत्तु त्रयोदशीम्। तदक्षय्यमेव स्यात् वर्षासु च मघासु च"। विष्णुधर्मोत्तरम् "पौषपञ्चमतीतायां तथा ज्ञप्ता त्रयोदशी। एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः"। ज्ञाना-

तपः "पितरः स्मृदयन्त्यश्रमष्टकासु मघासु च। तथाद्यात् सदोदृयुक्तो विद्वत्सु ब्राह्मणेषु च"। अत्राश्रमात्रस्तुतेः मनुवचने यत्किञ्चिदिति स्तुतेश्च यच्छोक्तपायसः फलातिशयार्थः। "गुणविशेषे फलविशेषः स्यात्" इति न्यायात्। व्यक्तं विष्णुधर्मोत्तरे "मघायुक्ता च तत्रापि शस्ता राजंस्त्रयोदशी। तत्राप्ययं भवेच्छ्राद्धं मधुना पायसेन च"। तत्राप्ययुक्कृष्णपक्षे। अत्र यत् श्राद्धं तन्मधुयोगेन पायसयोगेन वाऽत्ययं भवेत्। एवं मनुवचने यत्किञ्चिन्मधुना सिक्थम् इत्यनेन मधुमात्रयुक्तत्वमुक्तम्। अतोऽत्र सुतरां मूढस्याप्यधिकारः। अत्र गजच्छायायोगे फलातिशयः। तथाच कालचिन्तामणौ स्मृतिः "कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः। यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते। करे हस्तानक्षत्रे कन्यादशमांशोपरि सपादत्रयोविंशांशं यावत्। अविभक्तानामप्यत्र पृथक् श्राद्धमावश्यकम्"। यथा श्राद्धचिन्तामणौ स्मृतिः "विभक्ता अविभक्ता वा कुर्युः श्राद्धमदैविकम्। मघासु च तथाश्वत्र नाधिकारः पृथग्विना"। अदैविकं प्रत्याब्दिकैकोद्दिष्टम् अन्यत्र कृष्णपक्षादौ नाधिकारः न नित्याधिकारः। "सपिण्डीकरणान्तानि यानि श्राद्धानि षोड़श। पृथक् नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित्" इत्यत्रापिना सपिण्डितानामपृथग्द्रव्याणां पुंसां सपिण्डीकरणान्तानीति विशेषणात् तदुत्तरं श्राद्धानां पृथक्करणमपि प्रतीयते। मघात्रयोदशीनिमित्तकश्राद्धे पुत्रवता पिण्डा न देयाः। "भौजङ्गीं तिथिमासाद्य यावच्चन्द्रार्कसङ्गमम्। तत्रापि महती पूजा कर्त्तव्या पितृदैवते। श्राद्धे पिण्डप्रदानन्तु ज्येष्ठपुत्रो विवर्जयेत्" इति देवीपुराणात् भोजङ्गीं पञ्चमीं चन्द्रार्कसङ्गमम् अमावास्यां पितृदैवते श्राद्धे मघायाम्। यातातपः "पिण्डनिर्वापरहितं यत्तु श्राद्धं विधीयते। स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते। अक्षय्यदक्षिणा स्वस्ति सौमनस्यं तथास्विति" रघु०।

मघाभू पु० मघासञ्चिकटे क्षत्रे भवति भू-क्विप्। पूर्वफल्गुनीजाते शुक्लपक्षे त्रिका०। भगदैवतशब्दे ४६११पृ० दृश्यम्

मघी पु० मघानक्षत्रसुतपत्तिकालत्वेनास्त्यस्य अच् गौरा० ङीष्। मघानक्षत्रस्थरविभुज्यमानयुक्ते काले सौरमाङ्मासे जायमाने (आउस) धान्यभेदे मेदि०।

मङ्कलक पु० १ऋषिभेदे भा० व० ८१अ०। २यक्षभेदे तत्रैव।

मङ्कि पु० मेकि-इन्। धनेच्छुवणिग्भेदे भा०शा० १७७अ०।

मङ्कु पु० मकि-उन्। सच्चलदुगतिके श्रुत०ब्रा० ५।५।४।११।

मङ्कुर पु० मकि-उरच्। दर्पणे भरतः।

मङ्कुण मङ्क-ल्युट्। जङ्घालाघवे हारा०।

मङ्कु(ङ्कु) अव्य० मखि-उन्। १शैघ्ये २सत्यार्थे च। पृषो० खस्य चत्वमपि।

मङ्ग पु० मगि-घञ्। नौकाग्निरपि हेम०।

मङ्गल पु० मगि-अलच्। १भूमिसुते ग्रहभेदे २प्रशस्ते ३अभीष्टार्थसिद्धौ च। ४तद्वति त्रि० अमरः। स्त्रियां ङीप् "सुमङ्गलीरियं वधूः" सि०कौ०। ५दुर्गायां ६हरिद्रायां ७दूर्वायां ८पवित्रतायाञ्च स्त्री शब्दरत्ना० ९कङ्कुमभेदे स्त्री शब्दच०। १०वृत्तार्हन्नाटभेदे स्त्री हेम० ११योगिनीदशाभेदे "मङ्गला पिङ्गलेति" दशाशब्दे दृश्यम्। अभिप्रेतसिद्धिर्मङ्गलं तद्धेतुत्वात् गोरोचनादेरपि तथात्वम्। मङ्गलद्रव्याणि च मत्स्यसूक्ते ४२प०उक्तानि यथा "लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः। हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः। एतानि सततं पश्येन्नमस्येदर्चयेत्ततः। प्रदक्षिणन्तु कुर्वीत तथाचार्युर्न क्षीयते। दूर्वां दधिं सर्पिरथोदकुम्भं धेनुं सवत्सां वृषभं सुवर्णम्। स्रक्षोभयं स्वस्तिकमक्षतानि लाजा मधु ब्राह्मणकन्यकाश्च। श्वेतानि पुष्पाणि तथा यशीश्च कुशासनं चन्दनमर्कबिम्बम्। अश्वत्थवृक्षञ्च समाश्रयेत ततश्च कुर्यादृद्विजजातिधर्मम्" दधिमित्यार्षम्। १२विष्णौ न०"पवित्रं मङ्गलं परम्" विष्णुस०। कुजशब्दे २०६६पृ० मङ्गलग्रहकथादि दृश्यम्। "प्रशस्तचरणं नित्यमप्रशस्तविवर्जनम्। एतच्च मङ्गलं प्रोक्तमृषिभिर्मन्त्रदर्शिभिः" व्यक्ति० उक्ते १३प्रशस्ताचरणे निन्द्यवर्जने।

मङ्गलचण्डी स्त्री मङ्गले चण्डी दुर्गा। ।देवीभेदे स्वार्थे क। मङ्गलचण्डिकाव्यस्य तत्कथानिरूपणं ब्रह्मवै० प्र० ४१ अ० उक्तं यथा "दुर्गायां वर्त्तते चण्डी कल्याणेषु च मङ्गलम्। मङ्गलेषु च या दक्षा सा च मङ्गलचण्डिका। पूज्यायां वर्त्तते चण्डी मङ्गलेऽपि महीयसः। मङ्गलाभीष्टदेवी या सा वा मङ्गलचण्डिका। मङ्गलो मनुवंशस्य सप्तद्वीपधरापतिः। तस्य पूज्याभीष्टदेवी तेन मङ्गलचण्डिका"। [राजनि०।

मङ्गलच्छाय पु० मङ्गला प्रशस्ता छाया यस्य। वटवृक्षे

मङ्गलपाठक पु० मङ्गलार्थं स्तुतीः पठति पठ-ण्वुल्। स्तुतिपाठके हेमच०। "या इथामङ्गलपाठक!" वेणी०।

मङ्गलागुरु न० नित्यक०। अगुरुभेदे राजनि०।

मङ्गल्य न० मङ्गलाय हितं यत्। १चन्दने २मङ्गलागुरुणि ३स्वर्णे ४सिन्दूरे राजनि०५दन्ति च। ६रुचिरे त्रि०हेम० ७मङ्गलकरे त्रि० मेदि०। "सर्वमङ्गलमङ्गल्ये" इति देवीभा०। ८यज्ञवृक्षे ९विल्वे १०जोरके ११मङ्गलके च पु० मेदि० १२नारिकेले १३कपित्थे १४रीठाकरञ्जे च पु० राजनि०। १५त्रायमाणौषधौ पु० धरणिः।

मङ्गल्यक पु० मङ्गलयतीति मङ्गलः तद्दोषनिवारणार्थं दीयमानत्वेन शास्त्रविधानात्। मङ्गले अमरः। [भावप्र०।

मङ्गलकुसुमा स्त्री मङ्गल्यं कुसुमं यस्याः। शतपुष्पायाम्

मङ्गल्यनामधेया स्त्री ६त०। जीवन्त्यामोषधौ जटा०।

मङ्गल्या स्त्री मङ्गलाय हिता यत्। १मल्लिकागन्धयुक्तागुरुणि अमरः २रोचनायाम् ३श्वेतकुष्माण्डाम् ४शम्यां २शुक्लदूर्वायां मेदि० ६प्रियङ्गौ ७नाममात्रयां हेमच० ८शतपुष्पायाम् ९जीवन्त्याम् १०ऋद्धिनामौषधौ ११हरिद्रायां १२दूर्वायां राजनि० १३दुर्गायाञ्च स्त्री रत्नमा०।

"मङ्गल्याऽगुरुशिंशिरा गन्धाढ्या दोषवाहिका" राजनि०

मङ्गिनी स्त्री मङ्गो नौकाशिरः अस्त्यस्या इनि ङीप्। नौकायां हेमच०। [पत्ये पुंस्त्वो

मङ्गुष पु० नृपभेदे तस्यापत्यं कुर्वा० अण्। माङ्गुष्य तद्-

मच दम्भे याच्ञे च अक०भ्वा०आ०सेट्। मचते अभिचिष्टे मेचे।

मच उच्चताकरणे धारणे पूजायां च सक० दीप्तौ अक० भ्वा० आत्म० सेट् इदित्। मञ्चते अमञ्चिष्ट। मञ्चते।

मचक्रुक न० कुरुक्षेत्रान्तर्गते तीर्थभेदे। कुरुक्षेत्रशब्दे दृश्यम्

मचर्चिका स्त्री चर्च-धात्वर्थनिर्देशे एवुल् मश्च श्मश्नोरिव चर्चिका ध्यानम्। प्रशस्ते अमरः अभ्युत्पन्नोऽयमित्येके "मतल्लिकादयो नियतलिङ्गा न तु विशिष्यप्रतिपन्नाः" त्रि० कौ०"प्रशंसावचनैश्च"पा०अस्य विशेषणत्वेऽपि परनिपातः गोमचर्चिका गोतमल्लिका इत्यादि।

मच्छ पुंस्त्री० माद्यति मद-क्विप् तथा सन् घेते धी-ड। मत्स्ये शब्दर०। स्त्रियां जातित्वात् ङीष्।

मजिर पु० ऋषिभेदे तस्यापत्यं शिवा० अण्। माजिर तदपत्ये पुंस्त्री०।

मज्जकृत् न० मज्जानं करोति कृ-क्विप्। १देहस्थे अस्थिरूपे पदार्थे हेमच० अन्नादिषु भुक्तेषु रसादिपरिपाकेन क्रमेणशोणितमांसत्वमस्थिशुक्राणान्ततत्पत्तेः अस्थ्नः मज्जाकृत्त्वम्।

मज्जन् पु० मस्ज-कनिन्। १अस्थिजाते अस्थिमध्यस्थे स्नेहाकारे पदार्थे २रुधादेः सारांशे च अमरः। फलमज्जगुणाः "यस्य यस्य फलस्येह वीर्यं भवति यादृशम्। तस्य तस्यैव वीर्येण मज्जानमपि निर्दिशेत्" राजवल्लभः "अस्थि यत्स्नाग्निना पक्वं तस्य सारो द्रवो घनः। यः स्नेहवत् पृथग्भूतः स मज्जेत्यभिधीयते"। मज्जस्थानमाह "स्थूलादिषु विशेषेण मज्जा स्वभ्यन्तरे स्थितः" भावप्र०।

मज्जन न० मस्ज-भावे ल्युट्। १स्नाने (डोबा) जटाध०। कर्त्तरि ल्यु। २मज्जायां शब्दर०। अस्थिमध्यमज्जनात्तस्यात्तथात्वम्। ३कुमारानुचरगणभेदे भा०श०४६अ०।

मज्जसमुद्भव न० मज्जः सकाशात्भवति सम्+उद्+भू-अच् ५त०। शुक्रे तस्य मज्जजातत्वम् मज्जशब्दे द्रष्टव्यम्।

मज्जा स्त्री मस्ज-अच् टाप्। १अस्थिसारे २रुधादेः सारांशे च हेम०। "मज्जातको मूलकशिग्रुसिन्धैः प्रियालमज्जासहितैः" सुश्रुतः। [राजनि० २शुक्रधातौ न०

मज्जाज न० मज्जातो जायते जन-ड। १भूमिजे गुग्गुलौ

मज्जारस मज्जायाः रसः परिपाकः। शुक्रे राजनि०। तस्य मज्जासम्भवत्वं मज्जशब्दे उक्तम्।

मज्जासार न० मज्जायां सारोऽस्य। जातीफले राजनि०।

मज्जूषा स्त्री मस्ज-ऊषन्। मञ्जूषायां रायमुकुटः।

मज्मन् न० मस्ज-मनिन् कृषो०। बले निघण्टुः।

मञ्च पु० मचि-उच्छ्राये घञ्। १खट्वायाम् अमरः (मांचा) वंशनिर्मिते २उच्चासने ३उच्चमण्डपभेदे हारा०"मञ्चस्थं रघुनन्दनम्"पुराणम्। स्वार्थे क। तत्रैव "इक्ष्वाकोऽन्वः पतिरेव मञ्चकगतः" इति मा० २य०।

मञ्चकाश्रय पु० ६त०। मत्कुणे (छारपोका) राजनि०।

मञ्चमण्डप पु० मञ्च इव मण्डपः। शयनार्थे उच्चे पटादिकुटीरे (टङ्) हारा०। [शब्दरत्ना०।

मञ्जर न०मनज-अरच्। १तिलकवृक्षे २शुक्लायाञ्च ३वल्लरीञ्च

मञ्जरि(री) स्त्री मञ्जु रञ्जति रञ्ज-इन् यक० परस्वं वा ङीप्। अभिनवोद्गतायां सुकुमारायां पल्लवाङ्कुरस्वरूपायां १वल्ल्यांम् अमरः ङीबन्तस्तु तत्र २शुक्लायां ३तिलकजातायां शब्दरत्ना०। ४तुलस्याम् राजनि० ततः तारका० इतच्। मञ्जरित जातमञ्जरीके त्रि० ङीबन्तः"रुजसा यतोगिति यरभ्रैर्मञ्जरी" छ० र० टी० उक्ते चतुर्दशाक्षरपादके छन्दोभेदे। [राज ना०।

मञ्जरीनम्र पु० मञ्जर्यां तदवस्थायामपि नम्रः। वेतसे।

मञ्जा स्त्री मज्ज-अच्। १छाग्यां त्रिका०।२मञ्जर्यां हेमच०।

मञ्जि(ञ्जी) स्त्री मनज-इन् पा० ङीप्। मञ्जर्यांम् त्रिका०।

मञ्जिका स्त्री मञ्जि-खुल् टाप् अत इत्त्वम्। वेश्यायां हारा०।

मञ्जिफला स्त्री मञ्जिः मञ्जरी फले यस्याः। कदल्याम् त्रिका०

मञ्जिष्ठा स्त्री अतिशयेन मञ्जीमती इष्ठन् मतुपो लोपः। स्वनामख्यातायां लतायाम् अमरः। "मञ्जिष्ठा मधुरा तिक्ता कषाया स्वर्णवर्णका। गुरुरुष्णा विषघ्नी च योषयोन्यच्चिकर्णरुक्। रक्तातीसारकुष्ठास्रविसर्पव्रणमेहनुत्" भावप्र०। मञ्जिष्ठया रक्तम् अण्। माञ्जिष्ठ तत्काथेन रक्ते त्रि०।

मञ्जिष्ठामेह पु० सुश्रुतोक्ते मेहभेदे तल्लक्षणं तत्रोक्तं यथा मेहतीत्यनुषङ्गे "मञ्जिष्ठोदकप्रकाशं मञ्जिष्ठामेही"।

मञ्जिष्ठाराग पु० मञ्जिष्ठेव रागः। "मञ्जिष्ठारागमाक्तस्तं यत्नापैत्यतिशोभते" सा०द० उक्ते पूर्वानुरागभेदे।

मञ्जीर न० मञ्जु-ध्वनौ ईरन्। १नूपुरे अमरः। "मञ्जुमञ्जीरे कलगम्भीरे" इति सा०१०प०। २दधिमन्थनदण्डवन्धस्तम्भे पु० हेमच०।

मञ्जीरक पु० मञ्जीर इव कायति शब्दायते कै-क; नूपुरध्वनितुल्यध्वनियुते ततः शिवा० अण्यत्ये अण्। माञ्जीर तदपत्ये पुंस्त्री०। [मञ्जुल तद्वति त्रि०।

मञ्जु त्रि० मञ्ज-उनु। मनोहरे अमरः। शिवा०लच्।

मञ्जुकेशिन् पु० कर्म० प्राशस्त्ये इनि। १श्रीकृष्णे हेला० २सुन्दरकेशयुते त्रि० स्त्रियां ङीप्। [त्रि०।

मञ्जुगमना स्त्री ह्व०। १हंसां राजनि० २सुन्दरगतियुते

मञ्जुघोष पु०। तन्त्रोक्ते १उपासदेवभेदे तन्त्रसारे ह्यत्रम्। २पूर्वजिनभेदे त्रिका०। कर्म०। ३मनोहरशब्दे पु०।

मञ्जुपाठक पुंस्त्री० मञ्जु पठति पठ-ण्वुल्। १शुकखगे राजनि० स्त्रियां जातित्वात् ङीष्। २मनोहरपाठके त्रि०

मञ्जुप्राण पु० ह्व०। चतुर्मुखे मञ्जूनि जटा० सर्वव्यापित्वेन विश्वात्प्राणस्य महाप्राणत्वात् तस्य तथात्वम्।

मञ्जुभद्र पु० जिनभेदे त्रिका०।

मञ्जुभाषिन् त्रि० मञ्जु भाषते भाष-णिनि। १सुन्दरभाषके स्त्रियां ङीप् वा च "सजसाजगो भवति मञ्जुभाषिणी" छ०र० उक्ते २त्रयोदशाक्षरपादके छन्दोभेदे।

मञ्जुल त्रि० मञ्ज-शिवा० लच् मधि-उलच् वा। १मनोहरे २निकुञ्जे मेदि० ३शबले न० विश्वः। ४जलरङ्कुखगे पुंस्त्री० मेदि० स्त्रियां ङीष्। [३सुन्दरश्रीके त्रि०।

मञ्जुश्री पु० ह्व०। १मञ्जुघोषे २पूर्वजिनभेदे त्रिका०।

मञ्जुहासिनी स्त्री "जतौ सलौ गो भवति मञ्जुहासिनी" छ०र०टी० उक्ते १त्रयोदशाक्षरपादके २छन्दोभेदे। ३सुन्दरहासयुते त्रि०।

मञ्जूषा स्त्री मञ्ज-ऊषन् (पेटरा) १पेटिकायाम् अमरः। २मञ्जिष्ठायाञ्च राजनि० ३पाषाणे उणा० को०।

मट वासे भ्वा०प०सक०सेट्। मटति अमटीत् अमाटीत् मेटतुः

मटची स्त्री मट-वा०अचि ङीप्। १पाषाणशर्करौ "मटचीकृतेषु कुरुषु" कन्दोग्यश्रुतिः। २रक्तवर्णक्षुद्रखगभेदे गोविन्दः।

मटस्फटि पु० दर्पारम्भे जटा०। [अमाठीत् मेठतुः।

मठ वासे अक०सर्दने सक० भ्वा० पर० सेट्। मठति अमठीत्-

मठ आध्याने चुरा०सक०सेट् इदित्। मण्ठयते अममण्ठत्त।

मठ पुंन० अर्त्तिचा० मठत्यत्र मठ-घञर्थे क। १छात्राद्यावासे २देवागारे अमरः। मठप्रतिष्ठातत्त्वे तत्प्रतिष्ठाविधिर्दृश्यः। देवष्टहशब्दे चात्र दृश्यम्। ३गम्भीरार्थे हारा०।

मठर पु० मठ-अरन्। १मुनिभेदे २धौरुष्के त्रि० उज्ज्वल०। राजद०परनिपातः राजमठरः। गर्गा० यञ्। माठर्य तन्मुनेरपत्ये पुंस्त्री०स्त्रियां ङीप् यञोपः। गौरुड्यर्थे कश्यापत्ये विदा० अञ्। माठर तदपत्ये पुंस्त्री०।

मड मोदे चुं०उभ०अक०सेट् इदित्। मण्डयति-ते अममण्डत् त। विभाषे भ्वा० आत्म०। मण्डते।

मड भूषणे चुरा०उभ०पक्षे भ्वा०पर०सक०सेट् इदित्। मण्डयति ते मण्डति अममण्डत्-त असण्डीत्। [अटा०।

मडक पु० मडि-कन् पृषो० नलोपः। धान्यभेदे (मेडुया)

मडर पु० मडि-वा० अरन् पृषो० नलोपः। शिल्पिभेदे कन्याशब्दे परे अस्याद्युदात्तता।

मडार पु० मडि-वा० आरन् पृषो०। भूषके ततः चतुरर्थ्यां प्रगद्या०अञ्। माडार्य्य तेन निर्वृत्तादौ त्रि०।

मड्डु पु० मज्जन्ति अन्ये शब्दा अत्र मस्ज+उनु पृषो०। वाद्यभेदे अमरः स्वार्थे क मड्डुक तत्रार्थे। मड्डुकस्तवादकं शिल्पमस्य वा ठक् पक्षे अण्। माड्डुकिक माड्डुक तदादनशिल्पयुते त्रि०। [मणीत् मेणतुः।

मण अव्यक्तशब्दे भ्वा०प०अक०सेट्। मणति अमाणीत् अ-

मणि(णी) पुंस्त्री० मण-इनि स्त्रीत्वपक्षे वा ङीप्। सत्तादौ रत्ने "मणिरत्नं सरं शीतं कषायं स्वादु लेखनम्। चक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम्" राजवल्लभः। "मणिहारावलिरामणीयकमिति" "न्यपनीलमणीगटहत्विषेति च" नैषधम्। २मण्मयपात्रभेदे अलिञ्जरे (जाला) ३लिङ्गाग्रे ४नागभेदे जटा०५मणिबन्धे हेमच० स्वार्थे क संज्ञायां कन् वा। मणिक अलिञ्जरे न०अमरः।

अजागलस्तने मेदि० योन्यपे शब्दर० [इत्यम्।

मणिकर्ण पु० १कामरूपस्थे २शिवलिङ्गभेदे मणिकूटशब्दे

मणिकर्णिका स्त्री मणिवर्णः मणिमयकर्णभूषणमस्त्यस्यां ठन्। विष्णुतपस्यादर्शनात् विस्मयेन शिवस्य मणिमयकुण्डलपतनस्थाने काशीस्थे १तीर्थभेदे।

तत्कथानिरुक्तिः काशी० २६अ० यथा

विष्णुं प्रति शिववाक्यम् "त्वदीयस्यास्य तपसो महोदयदर्शनात्। यत्प्रयान्दोलितो मौलिरच्युतश्रवणभूषणः। तदान्दोलनतः कर्णात् पपात मणिकर्णिका। मणिभिः खचिता रम्या ततोऽसु मणिकर्णिका। चक्रपुष्करिणीतीर्थं पुराख्यातमिदं शुभम्। त्वया चक्रेण खननाच्चक्रुचक्रगदाधर!। मम कर्णात् पपातेयं यदा च मणिकर्णिका। तदा प्रभृति लोकेऽत्र ख्यातास्तु मणिकर्णिका" मणिकर्णीत्यपि। २मणिमयकर्णभूषणे च।

मणिकर्णीश्वर न० काशीस्थे शिवलिङ्गभेदे काशीख० १००अ०

मणिकर्णेश्वर न० कामरूपस्थे शिवलिङ्गभेदे कालिपु० ८१अ०।

मणिकानन न० मणिकर्णिवानन यत्र। कण्ठे शब्दर०।

मणिकार पु० मणिमयं भूषणं करोति कृ-अण्। (जहरि) १मणिमयभूषणकारके २प्रत्यग्रादिचतुःखण्डात्मकतत्त्वचिन्तामणिनामकग्रन्थकारे गङ्गेशोपाध्याये च। कृ-किण् ६त०। मणिलदादयोऽप्यत्र।

मणिकुट्टिका स्त्री कुमारानुचरमातृभेदे भा०श०४७अ०।

मणिकूट पु०मणिमयः कूटोऽस्य। कामरूपस्थे पर्वतभेदे यथोक्तम् "भद्रकूटस्य चैशान्यां मणिकूटो महागिरिः। मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गकः" कालिकापु० ८१अ०।

मणिकेतु पु० केतुभेदे ह०स० ११अ० केतुशब्दे दृश्यम्।

मणिगणनिकर पु० "वसुहययतिरिह मणिगणनिकरः" ह०र० उक्ते पञ्चदशाक्षरपादके छन्दोभेदे द्विगुणहयलघुरित्यस्यालानुवृत्तिः।

मणिग्रीव पु० कुबेरपुत्रभेदे शब्दर०।

मणिच्छिद्रा स्त्री मणिरिव छिद्रमस्याम्। १भेदानामौषधौ २छद्मनामौषधौ च मेदि०। [११अ०।

मणिजला स्त्री मणिप्रचुरं जलमस्याम्। नदीभेदे भा० च०

मणित न० मण-क्त। रतिकाले स्त्रीणामव्यक्तशब्दभेदे हेम०

मणितारक पुंस्त्री० मणिरिव तारकास्य। तारसङ्घे राजनि० स्त्रियां जातित्वात् ङीष्।

मणिद्वीप पु० मणिमयः मणिप्रचुरो वा द्वीपः। क्षीरसमुद्रमध्यस्थे श्रीविद्यापीठरूपे द्वीपभेदे "सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते मणिद्वीपे नीपोपवनवतीनामणिगृहे" आनन्दल०।

मणिनाग पु० नागभेदे भा० आ० ३५ अ०। [१५८अ०।

मणिपर्वत पु० मणिप्रचुरः पर्वतः श०त०। पर्वतभेदे हरिवं०

मणिपालि त्रि० मणिं पालयति पालि-इनि। मणिपालके तस्य धर्म्ये महिष्या०अण्। मणिपाल तस्य धर्म्ये त्रि०। तस्यापत्यम् रेवत्या०ठक्। माणिपालिक तदपत्ये पुंस्त्री०

मणिपुच्छी स्त्री मणिरिव पुच्छं यस्याः नित्यं ङीष्। मणितुल्यपुच्छयुतायां स्त्रियाम्।

मणिपुष्पक पु० शङ्करदेवस्य शङ्खे गीता १।१६।

मणिपुर न० पौरस्त्ये देशभेदे।

मणिपूर न० सुषुम्णान्तर्गते षट्चक्रमध्ये नाभिस्थे पद्मभेदे "तदूर्ध्वं नाभिदेशे तु मणिपूरं महाप्रभम्। मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः। मणिवद्भासितं तत्पद्मं मणिपूरं तथोच्यते। दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्। शिवेनाधिष्ठितं पद्मं विश्वलोकनकारणम्"

मणिबन्ध पु० मणिर्बध्यतेऽत्र बन्ध-आधारे घञ्। प्रकोष्ठपार्श्वोर्भध्यस्थे १करपर्व्वो तस्य शुभाशुभलक्षणं गरु०पु० ६६अ० उक्तं यथा "मणिबन्धैर्निगूढैश्च सुश्लिष्टैः शुभसन्धिभिः। कृपा हीनैः करच्छेदशबद्दैर्धनवर्जिता" २वैद्यकलक्षणाकारे पर्वतभेदे च। [राजनि०।

मणिबी(वी)ज पु० मणिरिव बी(वी)जमस्य। दाडिमवृक्षे

मणिभद्र पु० यक्षभेदे भा० स० १०अ०।

मणिभूमि स्त्री ६त०। मणीनामाकरे।

मणिमञ्जरी स्त्री "इनाद्यैः स्यात् यभनयजजगाः कीर्त्तिता मणिमञ्जरी" ह० र० टीकोक्ते जनर्द्धित्यक्षरपादके छन्दोभेदे।

मणिमण्डप पु० मणिमयः मणिप्रचुरो वा मण्डपः। १मणिखचिते मण्डपे २देवतापीठस्थानभेदे तन्त्रसारः।

मणिमत् त्रि० मणिरस्त्यस्य मतुप्। १मणियुते त्रि० स्त्रियां ङीप्। २यक्षभेदे पु० भा० स० १०अ०। इत्वाद्वार्थयुक्ते द्वापरयुगीये ३नृपभेदे पु० भा० अ० ६७अ०। ४नागभेदे भा० स० ८अ०। ५राक्षसभेदे भा०व० १६०अ०। ६दैत्यभेदे हरिवं० ३अ०। ७पश्चिमस्थे देशभेदे ह०स० १अ०।

मणिमध्य न० "स्यान्मणिमध्यं चेद्भमसाः" छन्दोम० उक्ते नवाक्षरपादके छन्दोभेदे। [जयदे कामरः।

मणिमन्थ न०मणिरिव मथ्यते मन्थ-कर्मणि घञ्। वैद्यकमणिमाला स्त्री ६त०। "त्वौ त्वौ मणिमाला स्यात्। गुरु-

वक्त्रौ "छन्दो०उक्ते द्वादशाक्षरपादके १छन्दोभेदे । २हारे शतलक्षतभेदे मेदि० । ४लक्ष्म्यां शब्दर० । ५दीप्तौ शब्दमा०

मणिराग न० मणेरिव रागो वर्णोऽस्य । १चिक्कणे रांजनि० हृत० । २मणिवर्णे पु० ।

मणिल त्रि० मणि+सिध्मा० अस्त्यर्थे लच् । मणियुते ।

मणिव पु० मणि-अस्त्यर्थे व । नागभेदे त्रि०कौ० ।

मणिवाल पु० मणिरिव शुक्लत्वात् वालः केशोऽस्य । अश्विदैवत्ये पशुभेदे यजु० २२४।१ ।

मणिवाहन पु० नृपभेदे भा० व्य० ६३अ० ।

मणिशैल पु० मन्दराचलस्य पूर्वस्थे पर्वतभेदे मार्कपु० ५५ ।

मणिसर पु० मणीन् सरति कारयत्वेन गच्छति सृ-अच् हृत० । मणिखचिते हारभेदे ।

मणिस्कन्ध पु० नागभेदे भा० आ० ५७अ० ।

मणीचक न० मणेः ईं शोभां चकते प्रतिहन्ति चक-अच् हृत० । १चन्द्रकान्तमणौ त्रिका० । २मत्स्यरङ्गखगे पुंस्त्री० हारा० स्त्रियां ङीष् ।

मणीवक न० मणीव कायति के-क । पुष्पे हारा० ।

मणीवती स्त्री मणि+अस्त्यर्थे मतुप् नि० मस्य वः मरा० दीर्घः । मणियुक्तनदीभेदे । [क्यामृ राजनि० ।

मण्टपी स्त्री मण्टं याति पा-क गौरा० ङीष् । क्षुद्रोपद

मण्टि पु० गोत्रप्रवर्त्तकभेदे प्रवराध्यायः ।

मण्ड(ठ) पु०मठ-अच् पृषो०वा । (माठ) क्षतान्नभेदे राजनि० "सक्तितां अर्द्धवेदाज्यैर्जलेनापि च साधयेत् । अक्षास्तु वटकं कृत्वा पचेत् सर्पिषि नीरसम् । एलालवङ्गकर्पूरकर्पिचाद्यैरलङ्कृते । मज्जयित्वा सितापाके ततस्तच्च समुद्धरेत् । अयं प्रकारः संसिद्धो मण्ड इत्यभिधीयते" । अस्य गुणाः "मण्डस्तु दृंहणो हृद्यो बल्यः सुमधुरो गुरुः । पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः" भावप्र०मठ इति पठितम् क्षतान्नशब्दे २१८२ पृ० दृश्यम्

मण्ड पुंन० मन-ड तस्य नेत्वम् ।१वर्णज्ञानामग्रसरे (माड) २सारे ३पिच्छे च । ४आमलक्यां ५सुरायाञ्च स्त्री । हृदधिमण्डे (मात्) न० मेदि० । ७एरण्डवृक्षे दयाकभेदे भूषायां च पुंन० हेमच० अर्द्धचादि

भावप्र० तद्विधानं यथा

"तण्डुलानां सुसिद्धानां चतुर्दशगुणे जले । रसः सिक्थैर्विरहितो मण्ड इत्यभिधीयते । गुरुशीतैश्च संयुक्तो दीपनः पाचनश्च सः । अत्यन्तं तस्यकस्मिन्नात्र ज्ञेया मण्डस्य सिक्तता । मेया यूषयवागूनां विलेपी भक्तयोरपि" । तस्य गुणाः "मण्डो व्याधी लघुः शीतो दीपनो धातुसाम्यकृत् । जरन्नरपथ्यो बल्यः पित्तश्लेष्मश्रमापहः" । "क्षुद्बोधनो वस्तिविशोधनश्च प्राणप्रदः शोणितवर्द्धनश्च । ज्वरापहारी कफपित्तहन्ता वायुं जयेदष्टगुणो हि मण्डः । लाजमण्डोऽग्निजननो दाहतृष्णानिवारणः । ज्वरातीसारशमनोऽग्नेषदोषामपाचनः । वाटग्रमण्डोऽग्निजननः शूलानाहविनाशनः । पाचनो दीपनो हृद्यः पित्तश्लेष्मानिलापहः" राजवल्लभः । वाटग्रमण्डो भक्ष्यमण्डः ।

मण्डक पु० भाव० क्त्तो पिष्टकभेदे क्षतान्नशब्दे २१८१ पृ० दृश्यम् भक्षोक्तदामो० क्त्तो मीताक्षभेदे यथा

"जयप्रियः कलापश्च कमलः सुन्दरस्तथा । मक्षलो वल्लभश्चेति मण्डकाः षट् प्रकीर्त्तिताः । जयप्रियो हंसताले लघुसध्ये यदा गुरुः । जनविंशाक्षरैर्युक्तो रसे वीरे स वर्त्तते । लघुर्गुरुर्लघुर्यत्र हंसतालः स उच्यते १। कलापो रङ्गतालेन युक्तो रौद्ररसे हि सः । द्वाविंशत्यक्षरैर्युक्तो लघुरादौ गुरुद्वयम् । लघुरादौ गुरुद्वन्द्वं रङ्गताल इतीरितः २ । लघुद्वन्द्वं गुरुश्चैकोऽनिलोऽत्र सगणात्मकः । पञ्चविंशत्यक्षरैः स्यात् कमलः शान्तहास्ययोः ३। गुरुरेको लघुद्वन्द्वं त्रिपुटे भगणात्मके । अष्टाविंशत्यक्षरैस्तु मङ्गारे सुन्दरे मतः ४ । आदौ गुरुर्लघुर्मध्ये सुतोऽन्ते भक्षुताह्वके । एकत्रिंशत्यक्षरैस्तु वीरे मक्षलमण्डकः ५ । मक्षलितापुत्रके ताले गलसागलगात्मके । चतस्रिंशदक्षरोऽयं वल्लभो रौद्रके रसे ६।"

मण्डन पु० मण्डयति मडि-ल्यु ।१अलङ्कारके २मण्डिमीमांसकभेदे पु०"शिष्यप्रशिष्यैरुपगीयमानमवेहि तं मण्डनमिश्रधाम" । शङ्करदिग्विजयः तेन सह शङ्कराचार्य्यस्य विचारकथा तत्र दृश्या । भावे ल्युट् । ३भूषायामृ न०

मण्डप पुंन० मडि-घञ् मण्डं भूषां पाति रक्षति पा-क मडि-कपन् वा । १जनविश्रामस्थाने०२देवादिगृहे च अमरः । यथा चण्डीमण्डप विष्णुमण्डप इत्यादि । ३मण्डपानकर्त्तरि त्रि० शब्दरत्ना० । ४निम्नाव्यां (भूकश्मिभेदे) स्त्री राजनि० । [ङिति स्त्री त्रिका०ङीप् ।

मण्डयन्त त्रि० मडि-झच् । १अलङ्कारके त्रि०कौ० । २योग्ये

मण्डर त्रि० मडि-अरन् । १भूषणे ततः अस्त्यर्थे अण् । मण्डरिक तत्रार्थे ।२क्षुद्भ्यां स्त्री हारा०ङीप् ।

मण्डल न० मडि-कलच् । १चक्राकारेण वेष्टने अमरः यथा सूर्य्यमण्डलं भूमण्डलम् । उभयतोविंशतियोजनमिते

२देशभेदे १सूर्य्यचन्द्रयोः परिवेषे ४द्वादशनक्षत्रचक्रे ५कोष्ठरोगे च मेदि०. ६गोले अनेकतीर्थको०। ७समूहे हेम० "अर्धमण्डलमण्डलम्" इति वोपदेवः। ८चक्रे त्रिका०। "मण्डलाकारपादाख्यं मण्डलं स्यानमीरितम्" इत्युक्ते ९धन्विनां स्यानभेदे शब्दर०। "मण्डलं सर्वतो वृत्तिः" इत्युक्ते १०सैन्यव्यूहभेदे कामन्द०। कृत्रिमरेखासन्निवेशेन रचिते ११पदार्थे च यथा अष्टमण्डलं सर्वतोभद्रमण्डलमित्यादि। १२बिम्बे त्रि० अमरः स्त्रियां गौरा० ङीष्। सा च १३दूर्वायाम् हारा० १४कुक्कुरे पु०मेदि० १५सर्पभेदे पु० विश्वः १६व्याघ्रनखाख्यगन्धद्रव्ये शब्दच०। ततः स्वार्थे क। बिम्बे कुष्ठभेदे आदर्शे च। कृत्रिममण्डलविधानमुक्तं देवीपु० यथा

"चतुर्हस्तं समारभ्य यावद्धस्तशतं भवेत्। मण्डलं तत्र कर्त्तव्यमत ऊर्ध्वं न कारयेत्। विमलं१ विजयं२ भद्रं३ विमानं४ शुभदं५ शिवम्६। वर्द्धमानञ्च७ देवेशं८ लताञ्च९ कामदायकम्। रुचकं११ स्वस्तिकाख्यञ्च१२ हृदयमिति मण्डलम्। सितादिहरितान्ताश्च रागाः कार्य्याः सुशोभनाः। शालिषष्टिकगोधूमरञ्जनीहरिपत्रजाः। मणिविद्रुमरागाश्च भक्त्या अभिमन्त्रिताः। सितसर्षपधूपाढ्यं रजः कृत्वा तु पातयेत्। अक्षबीजं न्यसेन्मन्त्री सम्भवेति पदं च या। समीलितं शुभं कृत्वागोमयेनोपलेपितम्। चन्दनागुरुकर्पूरचोदधूपाधिवासितम्। भूभागं क्षमितं सिद्धं पूर्वपश्चिमकोत्तरम्। याम्यं स्वस्तिकमत्स्याद्यैः स्वर्णवर्णाब्जपत्रजैः। पद्मपत्राष्टकं मध्ये त्रिगुणं त्रिगुणञ्च वा। द्वाराणि समकृत्वापि कर्णिकाकेसरोज्ज्वलम्। पद्मं तथावशेषाणि स्वस्तिकान्युत्पलानि च। मध्यावसम्बहस्तस्तु रजःपातं समाचरेत्। मध्यमानामिकाङ्गुष्ठैरुपरिष्टाद् यथेप्सया। अधोमुखाङ्गुलिं कृत्वा पातयेत्तु विचक्षणः। समा रेखा तु कर्त्तव्याऽविच्छिन्ना पृष्टिवर्जिता। अङ्गुष्ठपर्वविपुल्या समा कार्य्या विजानता। संसक्तं विषमं स्थूलं विच्छिन्नं क्षतराहतम्। पर्य्यन्तमपितं हस्तमात्रिखेच्च कदाचन। संसक्ते कलहं विद्याद्रजरेखे तु विग्रहम्। अतिस्थाने भवेद्व्याधिर्नित्यं पीड़ा विमिश्रिते। इन्दुभेदभयमाप्नोति यत्पश्चाच्च संशयः। क्षयायार्थहानिः स्यात् विच्छिन्ने मरणं ध्रुवम्। वियोगात्तु भवेत्तस्य दृष्टद्रव्यहृतस्य वा। अविदित्वा लिखेद्यस्तु मण्डलन्तु यथेप्सया। सर्वदोषानवाप्नोति ये दोषाः पूर्वभाषितः"। भोजनमण्डलं यथा "यातुधानाः पिशाचाश्च असुरा राक्षसास्तथा। भुञ्जन्ति केवलमत्रस्य मण्डलस्य विसर्जनात्। आदित्यावसवो रुद्रा ब्रह्मा चैव पितामहः। मण्डलान्युपजीवन्ति तस्मात् कुर्वन्ति मण्डलम्। चतुःकोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु। द्विकोणाकृति वैश्यस्य शूद्रस्य वर्त्तुलं सदा" वह्निपु०। भोजनशब्दे आङ्गिकृत० वाक्यं दृश्यम्। व्यूहभेदलक्षणं कामन्दकीये उक्तं यथा "मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभिः। कथिताः प्रकृतिव्यूहा भेदास्तेषां प्रकीर्त्तिताः। सन्तं व्यूहं मतिमान् काले स्थाने प्रकल्पयेत्। तिर्य्यग्वृत्तिश्च दण्डः स्याद्भोगः स्याद्वृत्तिरेव च। प्रदरो दृढकोऽवक्षेपो वै तद्विपर्ययः। प्रतिष्ठः सुप्रतिष्ठश्च ग्रैनौ विजय० सञ्जयौ। विशालविजयः सूची स्यूणाकर्षश्च भूसुखः। सुखाख्यो वलयश्चैव दण्डभेदाः सुदुर्जयाः। अतिक्रान्तः प्रतिक्रान्तः क्षयाभ्याञ्चैकपक्षतः। अतिक्रान्तश्च पक्षाभ्यां ततोऽन्यस्तु विपर्ययः। स्यूणापक्षो धनुःपक्षो हिस्यूणो दण्ड ऊर्ध्वगः। द्विगुणान्तस्त्वतिक्रान्तपक्षोऽन्योऽस्य विपर्ययः। द्विचतुर्दण्ड इत्येवं श्रेयो वक्षयतः क्रमात्। गोमूत्रिकाऽर्द्धसञ्चारी शकटो मकरस्तथा। भोगभेदाः समाख्याताश्चतुर्धा परिपतन्नकः। दण्डपक्षो युगोरस्यः शकटस्तद्विपर्ययः। मकरो व्यवकीर्णश्च श्येनः कुञ्जररात्रिभिः। मण्डलव्यूहभेदौ च सर्वतो भद्रदुर्जयौ। गजानीको द्वितीयस्तु प्रथमः सर्वतोमुखः। अर्द्धचन्द्रश्च उद्धारो वज्रभेदास्त्वसंहताः। तथा कुक्कुटपक्षौ च काकपादौ च गोधिका। त्रिचतुःपञ्चसैन्यानां श्रेया आकारभेदतः। इति व्यूहाः समाख्याता व्यूहभेदप्रयोक्तृभिः। एते सप्तदश प्रोक्ता दण्डव्यूहास्य षड्विधा। तथा व्यूहद्वयञ्चैव मण्डलस्य प्रयोक्तृभिः। असंहतासु षड्व्यूहा भोगव्यूहास्य षड्विधा। व्यूहा एते प्रयोज्याः स्युर्युद्धकाले उपस्थिते।" भिन्नमण्डरूपे नृत्ये शब्दमाला।

मण्डलनृत्य न० मण्डलाकारेण नृत्यम्। चक्राकारेण परिनृत्ये।

मण्डलपत्रिका स्त्री मण्डलाकारं पत्रमस्याः। रक्तपुनर्नवायाम् राजनि०।

मण्डलपुच्छक पु० कीटभेदे सुश्रुतः कीटशब्दे दृश्यम्।

मण्डलब्राह्मण न० शत०ब्रा०१०अध्याये पठिते "यदेतन्मण्डलं तपतीत्यादिके" ब्राह्मणे मण्डलाध्यायोऽयत।

मण्डलाग्र पु० मण्डलेन इवाग्रमस्य । खड्गभेदे अमरः ।

मण्डलाधिप पु० ६त० । मण्डलेश्वरे नृपभेदे चतुर्योजनपर्य्यन्तो ह्यधिकारो नृपस्य च । यो राजा तच्छतगुणः स एव मण्डलेश्वरः "त्रिद्भवैः ज०ख०८६य०। मण्डलाधीश मण्डलेश्वरादयोऽप्यत्र । [शब्दर० ।

मण्डलाकृत त्रि० मण्डल+च्यङ् कर्त्तरि-क्त । वर्त्तुलाकारे

मण्डलिन् पु० मण्डलं कुण्डलनमस्त्यस्य इनि । १सर्पे २त्रिफले शब्दमाला । ३जाहके (खट्टाश) हेमच० । ४वटवृक्षे त्रिका० ५गोनससर्पे च राजनि० ।

मण्डहारक पु० मण्डं हरति हृ-ण्वुल् । गौरिडके अमरः

मण्डा स्त्री मण्ड:कारणत्वेनास्त्यस्या अच् । सुरायां हारा० मण्ड-अच् टाप् । २आमलक्यां मेदि० ।

मण्डित त्रि० मण्ड-क्त । १भूषिते २गौडभेदे पु० हेमच० ।

मण्डु पु० ऋषिभेदे तस्यापत्यं गर्गा० यञ् । माण्डव्य तदपत्ये ऋषिभेदे ।

मण्डूक पुंस्त्री० मण्डयति वर्णसमयम् मण्ड-ऊक । १भेके अमरः स्त्रियां जातित्वात् ङीष् । २गोपके ३सुनिभेदे च पु०मेदि० ४वन्यभेदे विश्वः । ५गायतेलक्ते त्रि०शब्दर० ।

मण्डूकपर्णी पु० मण्डूक इव पर्णमस्य । १शाकभेदे अमरः २गोधूमके मेदि० ३यष्टिमधुन्यां स्त्री टाप् ङीष् वा । ४ब्राह्मण्यां (वामनहाटि) ५ओषधिभेदे (घुलकुड़ी) रत्नमा० । स्त्री ङीष् मेदि० । इवादित्वमक्षायां स्त्री ङीष् राजनि० । स्वार्थे क । मण्डूकपर्णिका तत्रार्थे "मण्डूकपर्णिका लघ्वी स्वादुपाका सरा हिमा" । "मण्डूकपर्णिका लघ्वी रूक्षा वातविबन्धनुत्" राजवल्लभः ।

मण्डूकमातृ स्त्री मण्डूकस्य मातेव पोषकत्वात् । ब्राह्मण्यां (वामनहाटी) राजनि० । [सरोवरभेदे अमरः ।

मण्डूकसदृश न० मण्डूकप्रचुरं सरः जातौ अच्समा० ।

मण्डूर न० मडि-ऊरच् । लौहमले अमरः ।

मण्डूरवज्र पु० चक्रदत्तोक्ते वज्रकभेदे

"पञ्चकोलं समरिचं देवदारु पलत्रिकम् । पिड्डङ्गसत्त्वयुक्तायाः भागाश्चिपलसम्मिताः । यावन्त्येतानि चूर्णानि मण्डूरं द्विगुणं ततः । पक्त्वा चाष्टगुणे मूत्रे घनीभूते तदुद्धरेत् । ततोऽक्षमात्रान् गुडकात् पिबेत् तक्रेण तक्रभुक् । पाण्डुरोगं जयत्येष मन्दाग्निञ्च अरोचकम् । अर्शांसि ग्रहणीदोषसुरक्तमथापि वा । क्रिमिं श्लीपानसुदरं गररोगञ्च नाशयेत् । मण्डूरवज्रं नाम्नायं दोषानीकविनाशनः ।"

मण्डूरवटक पु० चक्रदत्तोक्ते मण्डूरादिघटिते वटकभेदे

"त्रिफलायाश्च चित्रकं पिड्डङ्गं चव्यचित्रकौ । दार्वीं त्वगमाक्षिकौ धातुर्यन्थिकं देवदारु च । एषां द्विपलिकान् भागांश्चूर्णं कृत्वा पृथक् पृथक् । मण्डूरं द्विगुणं चूर्णं गुडमञ्जनसन्निभम् । मूत्रे चाष्टगुणे पक्त्वा तस्मिंस्तु प्रक्षिपेत् ततः । उदुम्बरसमान् कृत्वा वटकान् यथाग्नितः । उपयुञ्जीत तक्रेण मात्रां लौल्ये च भोजनम् । मण्डूरवटका ह्येते प्राणदाः पाण्डुरोगिणाम् । कुष्ठान्यजयकं शोथमुदरञ्चाकफाभयात् । अर्शांसि कामलां मेहान् प्लीहानं पाण्डुयञ्च ते । पाचयन्त्यष्टगुणितं मूत्रं मण्डूरचूर्णतः ।"

मण्डोदक न० मण्ड इवोदकं यत्र । १आतपशे (आलिपोना) २चित्ररागे ३चित्रवर्णे मेदि० । सुश्रुतोक्ते सुराकल्पान्तर्गतक्वाथभेदे "वैरेचनिकमूलानां क्वाथे माषान् सुभावितान् । सुधौतांस्तत्कषायेण शालीनाञ्चापि तण्डुलान् । अवचुदैकतः पिष्ट्वा शुष्कान् सूर्णितान् । शालितण्डुलचूर्णञ्च तत्कषायोष्णसाधितम् । तस्य पिण्डं भागांस्त्रीन् किण्वभागविमिश्रितान् । मण्डोदकार्थे क्वाथञ्च दद्यात्तत् सर्वमेकतः । निदध्यात् कलसे तान्तु सुरां जातरसां पिबेत् । एष एव सुराकल्पो वमनेष्वपि कीर्त्तितः ।"

मत त्रि० मन-क्त । १सम्मते २अभिप्रेते ३ज्ञाते ४अर्चिते च । भावे क्त । ५सम्मतौ ६अभिप्राये ७ज्ञाने ८अर्चायाञ्च न० । ६समीकृते त्रि० सत्यशब्दे द्रष्टव्यम् । ततः स्वार्थे० चतुरर्थ्यां क । मतक तत्समीपादौ त्रि० । स्वार्थे क । मत शब्दार्थे ।

मतङ्ग पु० माद्यति अनेन मद-अङ्गच् दस्य तः । १मेघे उणादिकोषः । २मुनिभेदे भा० स० ८अ० । ३दानवभेदे हरिवं० २४२ अ० । ४राजर्षिभेदे आ० ७१ अ० । ब्राह्मणायां नापितेन जाते ५चण्डालभेदे च तत्कथा भा० शान्ति० २६ अ० ।

मतङ्गज पुंस्त्री० मतङ्गः मेघ इव जायते जन-ड । १गजे अमरः तस्य मेघाकृतित्वात् तथात्वम् । स्त्रियां ङीष् । स्त्रीणां गजानामूरुणा कुष्ठादिरोगो भवति यथोक्तं कामन्द० "क्षते त्वग्भो ग्रीष्मकृतात् प्रतापाज्जन्तु कुष्ठानि मतङ्गजानाम् । स्वस्यक्रियायामपि कुञ्जरस्यामूरुणा शरीरेऽभिलाज्वलीति । व्यायामयोगेन हि सम्प्रवृद्धः प्रवृद्ध हन्ति हिरदान् प्रतापः । अर्शांसि सन्त्यानि

खलूक्काले विनाम्बुना यान्ति परामवस्थाम् । अन्यत्स-लिलप्रवितप्तकायाः प्रयान्ति षट्पं करिणोऽपिवन्तः ।"

मतङ्गवापी स्त्री तीर्थभेदे भा० अनु० २० अ० ।

मतल्ल पु० पार्श्वस्थे आम्रफलाकृतिवृक्षे अ०१०।१६१।३मा०

मतल्लिका स्त्री मतं मतिमल्लति भक्षयति अल्ल् पृषो० प्रशस्ते अमरः । अत्युत्तल्लोऽयमित्यत्र निपातनिष्ठोऽयम् सि०कौ० ।

मतानुज्ञा स्त्री निग्रहस्थानभेदे गौ०सू० तल्लक्षणसूत्रं यथा "स्वपक्षदोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञा" "यः परेण चोदितं दोषं स्वपक्षेऽभ्युपगम्यानुद्धृत्य वदति भवत्पक्षे समानो दोष इति स स्वपक्षे दोषाभ्युप-गमात् परपक्षे दोषं प्रसञ्जयन् परमतमनुजानातीति मतानुज्ञां नाम निग्रहस्थानमापद्यते" भा० ।

मति स्त्री मन-भावे क्तिन् । १ज्ञाने अमरः । २इच्छायां ३स्तुतौ च । कर्त्तरि क्तिच् । ४आर्य्ये मेदि० ५शाकभेदे अजयपालः । ६मेधाविनि निघण्टुः । ७मतिकरौषधं गरु० १६८अ० उक्तं यथा

"पाठा हे जीरके कृष्णसुरगन्धालमोदकम् । वचाति-कटुकश्चैव लवणं चूर्णमुत्तमम् । ब्राह्मीरसे भावितञ्च सर्पिर्मधुसमन्वितम् । सप्ताहभक्षितं कुर्यान्मदेश्वर्यं मतिं पराम् ।"

मतिदा स्त्री मतिं ददाति दो-क । १ज्योतिष्मतीलतायाम् (गिलड़ी) राजनि० । दा-क । २बुद्धिदातरि त्रि० ।

मतिनीर पु० ऋषभेदे भा० आ० ६४अ० ।

मतिभ्रम पु०मतेर्भ्रमः अयथार्थविषयत्वेन भ्रमणम् । १बुद्धि-भ्रंशे भ्रान्तौ अमरः । भ्रम-भावे क्तिन् । मतिभ्रान्ति-रप्यत्र स्त्री । [मतिभ्रंशादयोऽप्यत्र ।

मतिविभ्रम पु० मतेर्विभ्रमोऽत्र । उन्मादरोगे राजनि० ।

मतिमत् त्रि० १मतिमाधके ऋ०६।७१।५ । २मेधाविनि निघ० ।

मत्क पु० मद-क्विप् स्वार्थे क । १मत्कुणे (ढारपोका) मसेदमू कनू मदादेशः । २मत्कुणवति त्रिषु "नैतन्मतं मत्कुणमिति ब्रुवाणः" भट्टिः ।

मत्कुण पु० मद-क्विप् कुणति कुण-अच् कर्म० । १कीटभेदे (ढारपोका) राजनि० । २निर्दन्तगजे ३शून्यशून्यपुरुषे ४नारिकेले मेदि० ५लक्ष्मणाख्ये हेम० । ६अजातलोम-मगायां स्त्रियां स्त्री शब्दर० ।

मत्कुणारि पु० ६त० । (सिद्धि) भङ्गायां शब्दमाला । तत्-सम्पर्केण हि तस्य नाशः ।

मत्कुणिका स्त्री कुमारानुचरमातृभेदे भा० श० १७अ० ।

मत्त पु० मद-क्त । १दुर्मदे गजे अमरः । २क्षीबे ३मदयुक्ते ४हृष्टे च त्रि० । ५धुस्तूरे ६कोकिले ७मक्षिके पु० राजनि० मत्तं मदोऽस्त्यस्याम् अच् । दर्मदिरायां स्त्री राजनि० । "ज्ञेया मत्ता मदनगयुता" छ० र० उक्ते ६दशाक्षरपादके छन्दोभेदे स्त्री ।

मत्तकाशि(सि)नी स्त्री मत्तेव क्षीबेव काशते कसति गच्छति वा णिनि पृषो० ह्रस्व । उत्तमयोषिति अमरः ।

मत्तकोश पु० मत्तः कोश इव । गले शब्दभा० स्त्रियां जातित्वात् ङीष् ।

मत्तमयूर पु० मत्तो मयूरो यस्मात् । १मेघे "वेदैरन्ध्रैर्मुनौ यसगा मत्तमयूरम्" छ० र० उक्ते त्रयोदशाक्षरपादके २छन्दोभेदे च ।

मत्तवारण पु०कर्म० । १मत्तहस्तिनि । मत्तं वारयति इ-णिच् ल्यु । २प्रासादवरगृहे न० (वारेण्डा) हेमच० ३पूगवृक्षे शब्दभा० ।

मत्ताक्रीड़ा स्त्री "मत्ताक्रीड़ा भौ तौ भौ नलगिति भवति षडुत्तरदशयतियुता" छ० र० उक्ते त्रयोविंशत्यक्षरपादके छन्दोभेदे । (वारेण्डा) प्रासादवरगृहे हेमच० ।

मत्तालम्ब पु० मत्तैरालम्ब्यते आ+लबि-कर्मणि घञ् ।

मत्तेभविक्रीड़ित न०"सभरा नौ यलगाख्ययोदशयतिर्मत्तेभ-विक्रीडितम्" छ० र० टी० उक्ते एकविंशत्यक्षरपादके छन्दोभेदे । इत० । २मत्तगजक्रीड़ायाञ्च ।

मत्य न० मते समीकरणे साधु यत् । क्लिष्टचेतस्य समीकरण-साधने १फलकभेदे (मद्द) "सप्तास्थितेन मत्येन मतीकरोति" तारुण्य०ब्रा०२।६।२ । "यथा लोके सप्ता-स्थितेन सप्तभिरनड्वद्भिः सप्तभिर्लोध्रमागैः शङ्कुभिर्वा अधिष्ठितेन मत्येन मत्यज्ञाम लवणस्य क्लेदस्य समीकरणा-दिसाधनं फलकम् । तेन मतीकरोति समीकरणार्थं कर्षकः प्रव्रजति क्लेदम्" भा० २८अ० आदिसर्गौ हेम० [मन्त्रत ।

मत् गुप्तभाषणे चु० आ० सक० सेट् इदित् । मन्त्रयते अम-

मत्स पुंस्त्री० मद-स । मत्स्ये च्या० ।

मत्सगण्ड पु० मत्सेन गण्डो लेपोऽत्र (माछेरघण्ट) व्य-ञ्जनभेदे शब्दच० ।

मत्सर पु० मद-सरन् । १अन्यगुणदूषणे परसम्पत्त्यसहने २क्रोधे च ३तद्वति ४क्षपणे च त्रि० अमरः । ५कीटभेदे मक्षिकायां स्त्री विश्वः । मत्सरश्च

"निन्दन्ति मां सदा लोका धिगस्तु मम जीवनम् । इत्यात्मनि भवेद्दुःखं धिक्कारः स च मत्सरः" क्रिया-

योगसारोक्तः ।"स्वप्रयोजनप्रतिसन्धानं विना परार्थमितनिवारणेच्छा ।" गौ० ह० उक्तश्च बोध्यः ।

मत्स्य पु० मद-स्यन् । (माछ) १मीने २जलचरभेदे स्त्रियां ङीष् यलोपः मत्स्री । तद्भेदगुणादि भावप्र०उक्तं यथा तत्र मत्स्येषु रोहितस्य "रक्तोदरो रक्तमुखो रक्तात्तो रक्तपत्रतिः । कृष्णपुच्छो भवेच्छेतो रोहितः कथितो बुधैः । रोहितः सर्वमत्स्यानां वरो हृद्योऽर्दितार्त्तिजित् । कषायानुरसः स्वादुर्वातघ्नो नातिपित्तकृत् । ऊर्ध्वजत्रुगतान् रोगान् हन्याद्रोहितषण्डकम् ।" (सिलन्धा) "सिलन्धः श्लेष्मलो बल्यो विपाके मधुरो गुरुः । वातपित्तहरो हृद्य आमवातकरश्च सः ।" (अथ भांगन) "भङ्गुरो मधुरः शीतो हृद्यः श्लेष्मकरो गुरुः । विष्टम्भजनकश्चापि रक्तपित्तहरः स्मृतः "। (मोमाचिका) "मोचिका वातहृद्बल्या हृद्या मधुरा गुरुः । पित्तहृत् कफकृद्रुच्या हृद्या दीप्ताग्नये हिता । (बोदाल)"पाठीनः श्लेष्मलो बल्यो निद्रालुः पित्तनाशनः । दूषयेद्रुधिरं पित्तकुष्ठरोगं करोति च ।" (अथ सौङ्गी) "शृङ्गो तु वातशमनो स्निग्धा श्लेष्मप्रकोपनी । रसे तिक्ता कषाया च लघ्वी रुच्या स्मृता बुधैः ।" (अथ हीलसा) "हल्लसो मधुरः स्निग्धो रोचनो वह्निवर्द्धनः । पित्तहृत्कफकृत्किञ्चिल्लघुर्ष्योऽनिलापहः ।"(अथ सौल)"शष्कुली श्लक्ष्णा हृद्या मधुरा तु वरा स्मृता ।" अथ (गर्गरा) "गर्गरः पित्तलः किञ्चिद्वातजित् कफकोपनः ।" अथ (कवई)"कविका मधुरा स्निग्धा कफघ्नी रुचिकारिणी । किञ्चित्पित्तकरी वातनाशिनी वह्निवर्द्धनी ।" अथ-(वर्मी) "वर्मिमत्स्यो हरेद्वातं पित्तं रुचिकरो लघुः ।" अथ (दण्डारी)"दण्डमत्स्यो रसे तिक्तः पित्तरक्तं कफं हरेत् । वातसाधारणः प्रोक्तः शुक्लो बलवर्द्धनः ।" (अथ खाड़ि) "एरङ्गो मधुरः स्निग्धो विष्टम्भी शीतलो लघुः ।" (अथ पावता) "महाशफरसंज्ञस्तु तिक्तः पित्तकफापहः । शिशिरो मधुरो रुच्यो वातसाधारणः स्मृतः ।" अथ (गरुइ) "गरह्नो मधुरा तिक्ता लवणा वातपित्तहृत् । कफघ्नी रुचिकृल्लघ्वी दीपनी बलवीर्यकृत् ।" अथ (मागुर) "मद्गुरो वातहृद्बल्यो हृद्यः कफकरो लघुः ।" अथ टेङ्गरा "सपादमत्स्यो मेधाकृत् श्लेष्मक्षयकरश्च सः । वातपित्तकरश्चापि रुचिकृत् परमो मतः ।" अथ शफरी (पोठी) "पोठी तिक्ता कटुः स्वादुः शुक्लघ्नी कफवातजित् । स्निग्धास्य कण्ठरीगघ्नी रोचनी च लघुः स्मृतः ।" अथ क्षुद्र-मत्स्याः "क्षुद्रा मत्स्याः खादुरसाः दोषत्रयविनाशनाः । लघुपाका रुचिकरा बलदास्ते हिता मताः ।" अथा-तिक्षुद्रमत्स्याः "अतिसूक्ष्माः पुंस्त्वहरा रुच्याः कासानिलापहाः ।" अथ मत्स्याण्डः "मत्स्यगर्भो भवेद्धृद्यः स्निग्धः पुष्टिकरो लघुः । कफमेहहृदो बल्यो ग्लानिघ्नश्चेति नाधनः ।" अथ (शुकटी) "शुष्कमत्स्याः नवा बल्याः दुर्जराः विड्विबन्धिनः ।" अथ दग्ध-मत्स्याः "दग्धमत्स्यो गुणैः श्रेष्ठः पुष्टिकृद्बलवर्द्धनः ।" अथ कूपजादिमत्स्यगुणाः "कौपमत्स्याः शुक्रमूत्र कृद्धृष्म विवर्द्धनाः । सरोजा मधुराः स्निग्धा बल्या वातविनाशनाः । नादेया दृंहणा मत्स्या गुरवोऽनिलनाशनाः । रक्तपित्तकरा हृद्याः स्निग्धोष्णाः स्वल्पवर्चसः । चौड्राः पित्तकराः स्निग्धा मधुरा लघवो हिमाः । ताड़ागा गुरवो हृद्याः शीतलाः बलमूत्रदाः । ताड़ागावच्चिप्रजाताः बलायुर्मतिडक्कराः ।" चतुर्विधेषु मत्स्यविशेषगुणाः "हेमन्ते कूपजा मत्स्याः शिशिरे सारसा हिताः । वसन्ते ते तु नादेया ग्रीष्मे चौड्रास्तडागजाः । तड़ागजाता वर्षासु ताम्रपर्णा नदीभवाः । नैर्झराः शरदि श्रेष्ठा विशेषोऽयमुदाहृतः ।"

तद्भक्षणनिषेधादिकम्

"यो यस्य मांसमश्नाति स तन्मांसाद उच्यते । मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान् विवर्जयेत्" मनुः ।

"जलस्थलचरा ये च प्राणिनस्तान् हतानपि । न भक्षेन् मानवो ज्ञानी हत्वा तेषां भवेद्वधः हि । हत्वा हत्वा तु मत्स्यादी सर्वेषां यो विशेषतः । मांसादः प्राणिनां सोऽपि तस्मान् मत्स्यं परित्यजेत्" । पाद्मोत्तरखण्डे १०५ अ० । वर्जनीया मत्स्या यथा । "शृणु देवि ! प्रवक्ष्यामि मांसभेदान् निबोध मे । नादेयं तिलकमठं पशुं शल्किनमेव च । गोमीनं चक्रशकुलं वड़ालं राघवं तथा । वामीनं चलकर्णञ्च सचक्रं चेङ्गमेव च । भूमिलक्ष्मानिरुद्धञ्च गाङ्गेयानि विवर्जयेत्" मत्स्यस्य तत्तन्महातन्त्रम् । रविवारे मत्स्यभक्षणे निषेधो यथा "व्याधिषं रक्तशाकञ्च यो भुङ्क्ते च रवेर्दिने । सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते" भविष्यपु० । "माषमाभिषमांसञ्च मसूरं निम्बपत्रकम् । भक्षयेद् यो रवेर्वारे सप्तजन्मान्यपुत्रकः" तिथ्या० । "कार्त्तिके मत्स्यभक्षणनिषेधो यथा "न मत्स्यं भक्षयेन्मांसं न कौर्म

नास्त्येव हि। चण्डालो जायते राजन्! कार्त्तिके मांसभक्षणात्" नारदीयपु०। माघवैशाखयोर्विष्ण व्रह्मचर्य्यविधानात् मत्स्यभक्षणं नितरां निषिद्धमिति तत्त्वतत्त्वम्। "नाभक्ष्यं नैवेद्यार्थे भक्ष्येष्वजामहिषी-क्षीरं वर्जयेत् पञ्चनखमत्स्यवराहमांसानिच" आह्निक० तिथ्यादितत्त्वम्। जन्मतिथौ मत्स्यभक्षणनिषेधो यथा "आमिषं कलहं हिंसां वर्जयेद्धौ विवर्जयेत्"। "भुङ्क्ते यस्तु निरामिषं स हि भवेज्जन्मान्तरे पण्डितः" तिथ्यादितत्त्वम्। शैवस्य मत्स्यभक्षणनिषेधो यथा

"क्व मद्यं क्व शिवे भक्तिः क्व मांसं क्व शिवार्चनम्। मत्स्यमांसरतानां वै दूरे तिष्ठति शङ्करः" काशीख०। विन्ध्यपर्वतस्य पश्चिमे मत्स्यभक्षणनिषेधो यथा

"विन्ध्यस्य पश्चिमे भागे मत्स्यभक्षं पतितो नरः" पुराणम्। कामतो मत्स्यभक्षणप्रायश्चित्तं यथा "मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्रयं वसेत् अज्ञानतस्तदर्द्धम्" प्रा०वि०। मत्स्यभक्षणनिषेधे प्रतिप्रसवो यथा "मत्स्यान् सशल्कान् भक्षयेत् मांसं रौरवमेव च। निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च नान्यथा। शफरं सिंहतुण्डञ्च तथा पाठीनरोहितौ। मत्स्यास्त्वेते समुद्दिष्टा भक्षणाय तपोधनैः। प्रोक्षितं भक्षयेदेषां मांसञ्च द्विजकाम्यया। यथाविधि नियुक्तस्तु प्राणानामपि चात्यये" कौर्मे पु० १६अ०। "पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः। राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्वशः" मनुः। "अनिवेद्य न भोक्तव्यं मत्स्यं मांसञ्च यत्नतः। अज्ञं विद्या पयो भक्ष्यं यद्विष्णोरनिवेदितम्" आ० त०। प्रेतश्राद्धे मत्स्यदानविधिर्यथा

"सपिण्डीकरणं यावत् प्रेतश्राद्धानि षोडश। एकाहेनैव कर्त्तव्यं सामिषेण द्विजातिभिः" आह्निक०।

२विराटदेशे पु० सोऽभिजनोऽस्य तस्य राजा वा अण्। मात्स्य पित्रादिक्रमेण तद्देशवासिनि तस्य लुपे च बह्वृ० अणो लुक्। १तद्देशवासिषु ब० व०। ३मेघादितोद्दाद्शराशौ मीनराशौ। ५भगवतः प्रथमावतारे तत्कथा मत्स्यपु०२अ०। भा० व० ३८७ अ० च। मत्स्यं भगवदवतारभेदमधिकृत्य कृतो ग्रन्थः अण्। मात्स्य महापुराणभेदे तत्प्रतिपाद्यविषयाश्च तत्रैव २९०अ० उक्ता यथा "सूत उवाच। एतद्वः कथितं सर्वं यदुक्तं विष्णुरूपिणा। मात्स्यं पुराणमखिलं धर्मकामार्थसाधनम्। अत्रादौ मनुसंवादो ब्रह्मायज्ञकथानन्तरा। श्राद्धस्य शारीरकं प्रोक्तं चतुर्मुखमुखोद्भवम्। देवासुराणां सृष्टिसर्गकृतोत्पत्तिरेव च। मदनद्वादशी तद्वल्लोकपालाभिपूजनम्। मन्वन्तराणामुद्देशो वैन्यराजाभिवर्णनम्। सूर्य्यादुवैवस्वतोत्पत्तिर्बुधस्यागमनं तथा। पितृवंशानुकथनं श्राद्धकालस्तथैव च। पितृतीर्थप्रवासस्य सोमोत्पत्तिस्तथैव च। कीर्त्तनं सोमवंशस्य ययातिचरितं तथा। कार्त्तवीर्य्यस्य माहात्म्यं ऋष्यवंशानुकीर्त्तनम्। भृगुशापस्तथा विष्णोर्दैत्यशापस्तथैव च। कीर्त्तनं पुरुवंशस्य वंशो यौतागनस्तथा। पुराणकीर्त्तनं तद्वत् क्रियायोगस्तथैव च। व्रतं नक्षत्रसंख्याकं सावित्र्याश्च तथा। कृष्णाष्टमीव्रतं तद्वदोदिष्णी चन्द्रसंज्ञितम्। तड़ागविधिमाहात्म्यं पादपोत्सर्ग एव च। सौभाग्यशयनं तद्वदगस्त्यव्रतमेव च। तथानन्ततृतीया तु रसकल्याणिनी तथा। आर्द्रा नन्दकरी तद्वद् व्रतं सारस्वतं पुनः। उपरागाभिषेकस्य सप्तमीकल्पनं पुनः। भीमाख्या द्वादशी तद्वदनङ्गशयनं तथा। अम्बुशयनं तद्वत्तथैवाङ्गारकव्रतम्। सप्तमीसप्तकं तद्वदशोकद्वादशी तथा। मेरूपदानं दशधा ग्रहशान्तिस्तथैव च। ग्रहस्वरूपकथनं तथा शिवचतुर्दशी। तथा सर्वफलत्यागः सूर्य्यवारव्रतं तथा। संक्रान्तिकल्पनं तद्वद्विभूतिद्वादशीव्रतम्। पतिव्रतानां माहात्म्यं तथा ज्ञानविधिक्रमः। प्रयागस्य तु माहात्म्यं सर्वतीर्थानुकीर्त्तनम्। प्लक्षावतरणं तद्वद्द्वीपलोकानुकीर्त्तनम्। तथान्तरिक्षचारस्य ध्रुवमाहात्म्यमेव च। भवनानि सुरेन्द्राणां त्रिपुरायोधनं तथा। पितृपिण्डदमाहात्म्यं मन्वन्तरविनिर्णयः। वज्राङ्गस्य तु संभूतिः तारकोत्पत्तिरेव च। तारकासुरमाहात्म्यं ब्रह्मदेवानुकीर्त्तनम्। पार्वतीसम्भवस्तद्वत् तथा शिवतपोवनम्। अनङ्गदेहदाहस्तु रतिशोकस्तथैव च। गौरीतपोवनं तद्वद्विघ्ननाशप्रसादनम्। पार्वत ऋषिसंवादस्तथैवोद्वाहमङ्गलम्। कुमारसम्भवस्तद्वत् कुमारविजयस्तथा। तारकस्य वधो घोरो नरसिंहोपवर्णनम्। पद्मोद्भवविसर्गस्तु तथैवान्धकघातनम्। वाराणस्यास्तु माहात्म्यं नर्मदायास्तथैव च। प्रवरानुक्रमस्तद्वत् पितृगाथानुकीर्त्तनम्। तथोभयमुखीदानं दानं कृष्णाजिनस्य च। तथा सावित्र्युपाख्यानं राजधर्मास्तथैव च। श्राद्धनिमित्तकथनं स्वप्नभाङ्गस्तत्कीर्त्तनम्। वामनस्य तु माहात्म्यं तथैवादिवराहकल्प

क्षीरोदमथनं तद्वत् काच्छपं कूटाभिधायनम् । प्रासादलक्षणं तद्वन्मण्डपानान्तु लक्षणम् । पुरुषभेदे स सम्राट्कं भविष्यद्राजवर्णनम् । तुलादानादि बहुशो महादानानुकीर्त्तनम् । कल्पानुकीर्त्तनं तद्वद् यथावत्क्रमयोगतया । एतत्पवित्रमायुष्यमेतत् कीर्त्तिविवर्धनम् । एतत् पवित्रं कल्याणं महापापहरं शुभम् । यस्मात् पुराणादपि पादमेकं पठेत्तु यः सोऽपि विमुक्तपापः । नारायणाख्यं पदमेति नूनमनङ्गवद्विद्यतुल्यानि भुङ्क्ते ।"

तद्दानविधिः मत्स्यपु० "श्रुतीनां यत्र कल्पादौ प्रवृत्त्यर्थं जनार्दनः । मत्स्यरूपी च मनवे नरसिंहोपवर्णनम् । अधिकल्यान्वितं सम्यक्कल्पवृत्तमहव्रतात् ! । तन्मानमिति जानीध्वं सप्तस्यापि चतुर्दश । विष्णवे हेममत्स्येन धेन्वा चैव समन्वितम् । यो दद्यात् पृथिवीं तेन दत्ता भवति चार्चिता" ।

मत्स्यकरण्डिका स्त्री मत्स्यानां करण्डिकेवाधारः । (खालुइ) मत्स्यरक्षणाधारे पात्रभेदे अमरः ।

मत्स्यगन्धा स्त्री मत्स्यस्येव गन्धोऽस्याः ।१व्यासमातरि सत्यवत्याम् भा० आ० ६३अ० । २जलपिप्पल्याञ्च जटा०

मत्स्यवण्ट पु० खनामख्याते व्यञ्जनभेदे शब्दच० ।

मत्स्यजाल न० मत्स्यधारणं जालम् या०त० । मत्स्यधारणार्थे जालभेदे हेमच० ।

मत्स्यजीविन् पु० मत्स्येन तद्धारणविक्रयादिना जीवति जीव-णिनि । निषादे "मत्स्यघातो निषादानाम्" मनुना तस्य तज्जीविकोक्तेस्तस्य तथात्वम् ।

मत्स्यण्डी स्त्री (राब) ख्याते गुडविकारभेदे भावप्र० "इक्षो रसो यः संपक्को घनः किञ्चिदुदूवान्वितः । मदवत् स्यन्दते यस्मान्मत्स्यण्डीति निगद्यते" । अस्या गुणाः "मत्स्यण्डी भेदिनी बल्या लघ्वी पित्तानिलापहा । मधुरा दृंहणी हृद्या रक्तदोषापहा स्मृता" ।

मत्स्यद्वीप पु० मत्स्यप्रधानो द्वीपः या०त० । द्वीपभेदे विष्णुपु०

मत्स्यधानी स्त्री मत्स्या धीयन्तेऽस्यां धा-आधारे ल्युट् ङीप् । मत्स्यरक्षणाधारे (खालुइ) पात्रभेदे अमरः ।

मत्स्यनाशन पुंस्त्री० मत्स्यान् नाशयति ल्यु । १क्षारद्रव्ये हेमच० । स्त्रियां जातित्वात् ङीष् ण्वुल् । मत्स्यनाशकोऽपि तत्रार्थे उभावपि २मीनघातके त्रि० ।

मत्स्यपित्ता स्त्री मत्स्यस्य पित्तमिव रसोऽस्त्रियाः अच् । कटरोहिण्याम् (कटकी) अमरः ।

मत्स्यबन्धक त्रि० मत्स्यान् बध्नाति बन्ध-ण्वुल् । १मीनधारके "न्यायाजीव तस्यैव जातो मत्स्यबन्धकः" स्मृतिः । २कैवर्त्ते सङ्कीर्णजातिभेदे २धीवरे पुंस्त्री० । स्त्रियां जातित्वात् ङीष् । णिनि । मत्स्यबन्धिन् तत्रार्थे मत्स्यधान्यां स्त्री ङीप् हेमा० ।

मत्स्यमुद्रा पूजाङ्गे षष्ठभेदे

"दक्षपाणिपृष्ठदेशे वामपाणितलं न्यसेत् । अङ्गुष्ठौ चालयेत् सम्यक् मुद्रेयं मत्स्यरूपिणी । मत्स्यमुद्रा च कूर्माख्या लेलिहा सप्तधेनिका । महायोनिरिति ख्याता सर्वसिद्धिप्रदायिका" तन्त्रसारः ।

"श्यामादौ खण्डसङ्ज्ञिका । "मत्स्यकूर्मलेलिहाख्या मुद्रा साधारणी मता" तन्त्रोक्तम् ।

मत्स्यरङ्ग पुंस्त्री० मत्स्ये रजति रञ्ज-कर्त्तरि संज्ञायां घञ् । (माछराङ्गा) पक्षिभेदे शब्दर० "त्रिभुवनविदितो ह्या मत्स्यरङ्गे कलङ्कः" चक्रदः । स्त्रियां ङीष् ।

मत्स्यराज पु० ६त० । १रोहितमत्स्ये त्रिका० । २विराटनृपे "नगरं मत्स्यराजस्य" भा० व० ७२ अ० । तस्य मत्स्यदेशाधिपत्वात् तथात्वम् ।

मत्स्यविद्या स्त्री विद-भावे क्य मत्स्यो मत्स्यरसो विद्या यया तुल्यतिक्तत्वात् । कटुक्यां वैद्यकम् ।

मत्स्यविधन न० मत्स्यो विध्यतेऽनेन विध-करणे ल्युट् । १वडिशे अमरः स्त्रीत्वमपि जटा० ङीप् । कर्त्तरि ल्यु । २मद्गुपक्षिणि (पानकौड़ि) स्त्री जटा० ।

मत्स्यसन्तानिक पु० व्यञ्जनभेदे "दग्धोऽङ्गारे सलवणो वेशवारैरुपस्कृतः । सार्द्रकः कटुतैलेन मत्स्यसन्तानिको भवेत्" शब्दच० ।

मत्स्याक्षी स्त्री मत्स्यस्याक्षीवाकारोऽस्याः बहुव्रीहौ ङीष् । १गण्डदूर्वायां राजनि० २सोमवल्लतायाम् ३छिल्लमोचिकायाम् ४नाक्षीशाके रत्नमाला ।

मत्स्याङ्गी स्त्री मत्स्यः तत्सित्तमिवाङ्गं तिक्तत्वात् यस्याः ङीष् । छिल्लमोचिकायाम् त्रिका० ।

मत्स्यादनी स्त्री मत्स्य इवाद्यते आस्वाद्यते अद-कर्मणि ल्युट् । जलपिप्पल्याम् राजनि० ।

मत्स्याशन पुंस्त्री० मत्स्यमश्नाति अश-ल्यु । (माछराङ्गा) खगे त्रिका० स्त्रियां ङीष् ।

मत्स्यासन न० कटूयासनोक्ते आसनभेदे "अथ मत्स्यासनं पृष्ठे हस्तोपरिकराङ्घ्रि । पादयुग्मसमानेन हङ्काङ्घ्रस्य योजनम्" ।

मत्स्योदरी स्त्री मत्स्यगन्धयुक्तउदरमस्याः। १व्यासमातरि मत्स्यगन्धायां २कार्शीस्थे तीर्थभेदे च काशी० ६६ अ० "डमणि तैः कृतानीह सप्त स्वर्गसमानि च। सहस्राणि शयन्त्राणि कवाटविकटानि च। कोटिकोटिभटा-ख्यानि सर्वर्द्धिसहितान्यपि। ततः शैलमहादुर्गं तैः काशी परितः कृतम्। परिखा च कृतानिन्द्रा मत्स्योदर्य्यां जलाविला। मत्स्योदरी द्विधा जाता वह्निरन्तस्था पुनः। तस्य तीर्थं महत् ख्यातं मिलितं गाङ्गवारिणि। यदा संहारमार्गेण गङ्गामाः प्रसरेदिह। तदा मत्स्योदरीतीर्थं लभ्यते पुण्यगौरवात्। कृष्णचन्द्रमसोः पर्व तदा कोटिगुणं शतम्। सर्वपर्वाणि तत्रैव सर्वतीर्थानि तत्र वै। तत्रैव सर्वलिङ्गानि गङ्गा-मत्स्योदरी यतः। मत्स्योदर्य्यांञ्च ये स्नाता यत्र कुत्रापि मानवाः। कृतपिण्डप्रदानास्ते न मातुरुदरेशयाः। अविमुक्तमिदं क्षेत्रं मत्स्याकारत्वमाप्नुयात्। परितः स्वर्धुनीवारिसंहारे परितोहते। मत्स्योदर्य्यां कृत-स्नाना ये नरास्ते नरोत्तमाः। कृत्वापि बहुपापानि नेक्षन्ते यान्तकेः पुरीम्। किं स्नात्वा बहुतीर्थेषु किं तप्त्वा दुष्करं तपः। यदि मत्स्योदरीस्नाताः कुतो गर्भभयं ततः। यत्र यत्र हि लिङ्गानि नदेवर्षि-कृतान्यपि। तत्र मत्स्योदरीं प्राप्य स्नातो मोक्ष-भाजनम्। सन्ति तीर्थान्यनेकानि भूर्भुवःस्वर्गतान्यपि। न समानि परं तानि कोटप्रंशेनापि निश्चितम्। इत्थं तीर्थं कृतं तेन विभो! कैलासवासिना। गणाधिपेन सुमहत् सुमहोदारकर्मणा।"

मथ विलोड़ने भ्वा०पर०सक०सेट्। मथति ममन्थ इदित् ममन्थीत् ज्वला० वा ण। मथः माथः। क्वदित् चङि न ह्रस्वः।

मथ वधे सक०क्लेशे अक०भ्वा०पर०सेट् इदित्। मन्थति ममन्थीत् मन्थ्यते।

मथन न० मथ-ल्युट्। १वधे २क्लेशे ३विलोड़ने च। "क्षीरोद-मथनोद्भूतः" चन्द्रस्तवः। ४गणिकारिकावृक्षे पु० रत्नमा०।

मथित न० मथ-क्त। १निर्जलतक्रे २पीड़िते ३हते च त्रि०।

मथु(थू)रा स्त्री मथ-उ(क)रच्। स्वनामख्यातायां नगर्य्याम्। "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" काशी०ख०। तन्माहात्म्यं विष्णुपु० ६अंशे ८अ०। वराहपु० २७अ०। ततः चतुरर्थ्यां वरणा० अण्। माथुर तत्पुरुषे दूरभवे त्रि०। मथूराप्यत्र स्त्रियां टाप्।

मथुरेश पु० ६त०। श्रीकृष्णे शब्दर०। मथुरानाथादयोऽप्यत्र

मद हर्षे दिवा०पर०सक० सेट् यमा०। माद्यति इदित् अमदत् अमादीत् अमदीत्। ईदित् निष्ठायामनिट् पुषादित्वं तेन अमददित्येवेति पाणिनीयाः। घटा० मदयति जीत् मत्तोऽस्ति। प्र+अनवधाने। [दीत् घटा० मदयति।

मद गर्वे दैन्ये च भ्वा०पर०अक०सेट्। मदति अमादीत्-अम-

मद तर्पणे चु०आ०सक०सेट्। मादयते। अमीमदत।

मद आद्ये स्वप्ने मदे आमोदे स्तुतौ दीप्तौ च यथायथं अक० सक० च भ्वा० आत्म० इदित्। मन्दते अमन्दिष्ट। तत्र स्तुतौ "मन्द्रमानः सुमन्त्रभिः" तारब्रा०१।७।६। "मन्द्रमानः स्तूयमानः मदि-स्तुतौ कर्मणि यकि प्राप्ते व्यत्ययेन शप्" भा०।

मद पु० मद अच्। १हस्तिगण्डादिस्रुतजले दानजले अमरः २गर्वे हर्षे ३रेतसि ४मदमदे मेदि०५मत्ततायाम् हेमच०। ६नदे ७कस्तूरीकरे वस्तुनि च धरणिः।

मदकट पु० मदेन कटति कट-अच् षण्ढे (षांड़) हेमच०।

मदकल त्रि० मदेन कलते कल-अच्। १मत्तहस्तिनि मदो-त्कटे अमरः। २अव्यक्तशब्दकारिणि त्रि० शब्दरत्ना०। मदेन कलो यस्य। ३मदाव्यक्तभाषिणि त्रि० मेदि०।

मदगन्ध पु० मदस्य हस्तिदानस्येव गन्धोऽस्य। १सप्तच्छदवृक्षे २मदिरायां स्त्री टाप्। ३अतस्त्वाच राजनि०।

मदघ्नी स्त्री मदं मदिरामत्ततां हन्ति-हन-ट ङीप्। पूतिकायाम् जटा०।

मदधार पु० मदप्रधाना धारा यत्र। पर्वतभेदे भा०स०२६अ०।

मदन पु० माद्यत्यनेन मद-करणे ल्युट्। १कामदेवे अमरः। २सुरायां हेमच०। ३यवक्षे कोले ४सिक्थके ५धुस्तूरे च पु० मेदि०। (मयना) ६वृक्षभेदे रत्नमाला। ७भ्रमरे जटा० माषे टकलायभेदे हेमच०। ६खदिरवृक्षे शब्दच० १०कङ्कोटकवृक्षे ११बकुलवृक्षे (मयनफल) १२वृक्षभेदे च राजनि०। १३आलिङ्गनभेदे कामशास्त्रम्।

मदनक पु० मदयति मद-णिच्-ल्युट् स्वार्थे क। दमनक-वृक्षे राजनि०। [२रोमाञ्चे त्रिका०।

मदनकण्टक पु० मदननिमित्तः कण्टक इव। १सात्त्विके

मदनकाकुरव पुंस्त्री० मदनेन हेतुना काकुरवोऽस्य। पारावते स्त्रियां जातित्वात् ङीष्।

मदनगृह न० ६त०। १स्त्रीचिह्नभेदे सुरतसङ्कादयोऽप्यत्र। २जन्मावधिके सप्तमस्थाने ज्यो०।

मदनगोपाल पु० मदन इव गोपालः। श्रीकृष्णे।

मदनचतुर्दशी स्त्री मदनपूजार्हा चतुर्दशी शा०त०। चैत्रशुक्लचतुर्दश्याम् तत्र दमनवृक्षे मदनपूजाविहितेति तस्यास्तथात्वम्। ति०त० दशम्याम्।

मदनत्रयोदशी स्त्री मदनपूजार्हा त्रयोदशी। चैत्रशुक्लत्रयोदशयाम् ति०त०दशम्याम्। [भविष्यपु०७अ०

मदनद्वादशी स्त्री मदनपूजार्हा द्वादशी। चैत्रशुक्लद्वादश्याम्

मदनपक्षिन् पु० माद्यति मद-ल्युट् कर्म०। खञ्जनखगे शब्दच०

मदनपाठक पु० मदनोद्दीपनार्थं पठति पठ-ण्वुल्। खरोद्दीपनशब्दकारके कोकिले राजनि०।

मदनमोहन पु० मदनमपि मोहयति सौन्दर्येण मुह-णिच्-ल्यु। श्रीकृष्णे।

मदनललिता स्त्री "वेदाङ्गाऽङ्गैर्मदनललिता मो भो नस नसाः" ह०र० टीकोक्ते षोडशाक्षरपादके छन्दोभेदे।

मदनलेख पु० मदनज्ञापनार्थं लेखः। स्वकीयानुरागज्ञापनार्थं नायकयोः परस्परं प्रति प्रेष्ये लेखे पत्रभेदे। यथा शकुन्तलायाम् "तुच्छ ण खाणे छियअम्" इत्यादि।

मदनबीज न० तन्त्रोक्ते (क्लीम्) इति बीजे

मदनशलाका स्त्री मदनोद्दीपिका शलाका तथाभूत शलाकेव वा। १खरोद्दीपकौषधे २सारसखगे मेदि० ३कोकिले शब्दर०।

मदनसदन न० ६त०। १स्त्रीचिह्नभेदे। ज्योतिषोक्ते लग्नावधिके २सप्तमे स्थाने च।

मदनसारिका स्त्री मदनोद्दीपिका सारिका शा०त०। (सारिका) पक्षिभेदे जटा०। [धान्यभेदे राजनि०।

मदनाग्रक पु० मदनं माद्यकमग्रमस्य कप्। कोद्रवे (कोदो)

मदनाङ्कुश पु० मदनस्याङ्कुश इव। १पुरुषचिह्ने लिङ्गे त्रिका० २मैथुनकाले नखाघाते च।

मदनायुध न० ६त०। स्त्रीचिह्ने शब्दच०। [राजनि०।

मदनायुष पु० मदनस्यायुर्यत्र बहुव्रीहा०। इक्षिकरञ्जभेदे

मदनालय पु० ६त०। २स्त्रीचिह्ने ज्योतिषोक्ते लग्नावधिके सप्तमस्थाने मदनभवनादयोऽप्यत्र।

मदनावस्था स्त्री मदनजातावस्था शा०त०। कामिनां स्मरजन्ये उन्मादादौ दशाभेदे दशाशब्दे दृश्यम्।

मदनी स्त्री माद्यत्यनया मद-ल्युट् ङीप्। १सुरायाम् हारा० २रजनीवृक्षे ३अतिबलायां च राजनि०।

मदनेच्छाफल पु० मदनेच्छां फलति फल-अच् ६त०। बदरवृक्षे राजनि०।

मदनोत्सव पु० मदनप्रियः उत्सवः। १फौलाकोत्सवे शब्दर०। २स्वर्वेश्यायाम् स्त्री शब्दर०।

मदप्रयोग पु० ६त०। गजानां मदोद्गमे त्रिका०। [शब्दच०।

मदभञ्जिनी स्त्री मदं भञ्जति भनज-णिनि। शतमूल्याम्

मदयन्ती स्त्री मद-णिच्-अच् गौरा० ङीष्। वनमल्लिकायाम् (काठमल्लिका) राजनि०। स्वार्थे क हस्वः। मदयन्तिका तत्रैवार्थे शब्दरत्ना०।

मदयित्नु पु० मद-णिच्-इत्नुच्। १कामदेवे २मेघे ३गौरिङ्गके च मेदि०। ४मद्ये न० शब्दर०। ५मादके त्रि० त्रिका०।

मदलेखा स्त्री "भ्रमौ गः स्यात् मदलेखा" ह०र०उक्ते सप्तचरणपादके छन्दोभेदे ६त०। २गजानां दानवारिण्यङ्कौ

मदविच्छित्र पु० ३त०। १मत्तगजे शब्दच०। २मदेन च्छिन्ने त्रि०।

मदशाक पु० मदार्थं शाकमस्य। उपोदक्यां शब्दच०।

मदसार पु० मदं सारयति गमयति सृ णिच्-अण् उप०स०। तृणवृक्षे राजनि०।

मदस्थल पु० ६त०। १सुरापाने शब्दरत्ना०। मदस्थानादयोऽप्यत्र। ज्योतिषोक्ते लग्नावधिके २सप्तमस्थाने च।

मदहस्तिनी स्त्री मदेन हस्तिनीव। महाकरञ्जवृक्षे राजनि०

मदहेतु पु० ६त०। १मत्तताहेतौ २धातक्यां वैद्यकम्।

मदाघ पु० बहुव्रीहिभेदे ततः। उपका० गोत्रप्रत्ययस्य द्वन्द्वे च बहुव्रीहौ च लुक्।

मदाढ्य पु० मदेन मदकारणेन (ताड़ि) रसेनाढ्यः। १तालवृक्षे राजनि०। २रक्तभिण्टयाम् स्त्री शब्दच०। ३मदयुक्ते त्रि०।

मदातङ्क पु० ६त०। मदजन्यरोगभेदे राजनि०।

मदात्यय पु० ६त०। मदनिमित्ते रोगभेदे तस्य निदानादि गरु०पु० १६० अ० उक्तं दृश्यम्। भावप्र० उक्तञ्च यथा "विषस्य ये गुणा दृष्टाः सन्निपातप्रकोपनाः। तएव मद्ये दृश्यन्ते विषे तु बलवत्तराः। तस्मादविधिपीतेन तथा मात्राधिकेन च। युक्तेन चाहितैरन्नैरकाले चेविधेन च। मद्येन खलु जायन्ते मदात्ययसखा गदाः"। अविधिप्रयुक्तं मद्यं विकारान्तरमप्युत्पादयतीत्याह। "निर्भक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यम्। उत्पादयेत् कष्टतमान् विकारानुत्पादयेच्चापि शरीरभेदम्"। एकान्ततो नैरन्तर्येण, विकारान् मदात्ययादीन्। शरीरस्य भेदं नाशम्। मदात्ययादीनां हेत्वन्तरमप्याह "क्रुद्धेन भीतेन पिपासितेन शोकार्दितेन तप्तेन बुभुक्षितेन। व्यायामभाराध्वपरिक्षतेन क्षीणावरोधाभिहतेन वापि। अत्यम्बुरूक्षावततोदरेण वा-

जीर्णभुक्तेन तथाऽवलेन । उष्णाभितप्तेन च सेव्यमानं करोति मद्यं विविधान् विकारान्" । तानेव विकारान् विष्टणोति । "पानात्ययं परमदं पानाजीर्णमथापि वा" । पानविकारान् विष्टणोति । "पानविभ्रमसंज्ञञ्च तेषां वक्ष्यामि लक्षणम् । तत्र मदात्ययस्य सामान्यलक्षणमाह "शरीरदुःखं बलवत्प्रमोहो हृदयव्यथा । अरुचिः प्रततं तृष्णा ज्वरः शीतोष्णलक्षणः । शिरः पार्श्वास्थिसन्धीनां वेदना विद्यते तथा । जायतेऽतिबलात् जृम्भास्फुरणं वेपनं श्रमः । उरोविबन्धः कासश्च श्वासो हिक्काप्रजागरः । शरीरकम्पः कर्णाच्चि सुखरोगास्त्विकक्षयः । छर्दिर्विड्भेदजस्तृष्णो वातपित्तकफात्मकः । भ्रमः प्रलापो रूपाणामसतां चैव दर्शनम् । तृणभस्मलतापर्णपांशुभिश्चावपूरितम् । प्रकर्षेण विचेष्टन्ते भ्रान्तचेताः स मन्यते । व्याकुलानामशस्तानां स्वप्नानां दर्शनानि च । मदात्ययस्य रूपाणि सर्वाण्येतानि लक्षयेत्" । अथ मदात्ययस्य वातिकस्य निदानमाह "स्त्रीशोकक्षयभाराध्वकर्मभिर्योऽतिकर्षितः । रूक्षाल्पप्रमिताशी च यः पिबत्यतिमात्रया । रूक्षं परिणतं मद्यं निशि निर्वां निरूहन्ति च । करोति तस्य तच्छीघ्रं वातप्रायं मदात्ययम्" । तत् मद्यम् । अथ तस्य लक्षणमाह । "हिक्काश्वासशिराकम्पपार्श्वशूलप्रजागरैः । विद्याद्बलप्रलापञ्च वातप्रायं मदात्ययम्" । अथ पैत्तिकस्य निदानमाह "तीक्ष्णोष्णं मद्यमद्यञ्च योऽतिमात्रं निषेवते । अम्लोष्णतीक्ष्णभोजी च क्रोधनोऽग्नितापप्रियः । तस्योपजायते तीव्रः पित्तप्रायो मदात्ययः" । अथ तस्य लक्षणमाह "तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः । विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम्" । अथ श्लैष्मिकस्य मदात्ययस्य निदानमाह "मधुरस्निग्धगुर्वाशी यः पिबत्यतिमात्रया । अव्यायामदिवास्वप्नगव्यासनसुखे रतः । मदात्ययं कफप्रायं स नरो लभते ध्रुवम्" । अथ तस्य लक्षणमाह "छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः । विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम्" । अथ सान्निपातिकस्य मदात्ययस्य निदानं लक्षणञ्चाह "त्रिदोषहेतुभिः सर्वैः सर्वलिङ्गैर्मदात्ययः" । अथ परमदलक्षणमाह "श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च विण्मूत्रभक्तिरथ तन्द्रिररोचकश्च । लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञा स्तृष्णा रुजा शिरसि सन्धिषु चापि भेदः" । तन्द्रिस्तन्द्रा । पानाजीर्णमाह "आध्मानसूयमथ वोद्गरणं विदाहः पाने त्वजीर्णसदृशानि लक्षणानि" । उद्गरणं वान्तिः उद्गारो वा । पीयत इति पानं मद्यम् । पानविभ्रममाह "हृद्रोगात्तोदकफसंज्ञककण्ठधूममूर्च्छावमीज्वरशिरोरुजनप्रदेहाः । द्वेषः सुराक्षविकृतेषु च तेषु तेषु तं पानविभ्रममशेषमुशन्त्यखिलेषु धीराः । कण्ठधूमः निर्गम इव । प्रदेहः कफेन लिप्तास्यता । द्वेषः सुराक्षविकृतेषु सुराविकारेषु अक्षविकारेषु च द्वेषः । असाध्यानां मदात्ययादीनां लक्षणमाह । दीनोत्तरोष्ठमतिशीतमसन्दाहरुक् तैलप्रभाक्षमतिपानकृतं त्यजेच्च । जिह्वोष्ठदन्तमसितं स्रथ वापि नीलमृ पीते च यस्य नयने रुधिरप्रभे च । हिक्काज्वरो वमथुवेपथुपार्श्वशूलाः कासश्रमावपि च पानकृतं त्यजेत्तम्" ।

मदान्नात पु० मदक्षातिक्रमे आन्नातः । गजपृष्ठस्थे ढक्कावाद्ये हारा० ।

मदाम्बर पु० मदो दानमम्बरमिवास्य । मत्तगजे त्रिका० ।

मदार पुंस्त्री० मद-आरन् । १वराहे उज्ज्वल० स्त्रियां ङीष् । २धूर्त्ते ३मत्तगजे विश्वः । ४कासके ५नटभेदे उणादिको० । [त्रिका०।

मदार्म्मद पु० मदजन्यमर्मं ददाति दा-क । फलकमत्स्ये

मदालस त्रि० मदेनालसः । १मदेनालसे २गन्धर्वराजविश्वावसुकन्यायां स्त्री । [शब्दमाला

मदालापिन् पु० मदेनालपति आ+लप-णिनि । कोकिले

मदाह्व पु० मदः मृगमद आह्वा यस्य । मृगमदे कस्तूर्य्यां त्रिका० ।

मदि स्त्री मद्यति क्षुद्यतेऽनेनोष्ठम् मद-इनि पृषो० । (मद) ख्याते क्षुविसाधने क्षुपकयन्त्रभेदे स्वार्थे क । तत्प्रकारं क्षुविशब्दे २१६६ पृ०मदिकादानविधिर्दृश्यः । तल्लक्षणन्तु २११८ पृ० तत्र शब्दे द्रष्टव्यम् ।

मदिन् त्रि० मदयतीति मदि—णिनि । तर्पके यजु० ६।२७।

मदिष्ठतम त्रि० अतिशयेन मदी तमप् इष्ठनौ वा । अतिशयतर्पके यजु० ६।२७ ।

मदिरा स्त्री मद-करणे किरच् । "माध्वीकं पानसं द्राक्षं खार्जूरं तालसैन्धवम् । मैरेयं माक्षिकं टाङ्कं मधूकं नारिकेलजम् । सप्तमद्यविकारोत्थं मद्यानि द्वादशैव तु" इत्युक्ते १मद्यसामान्ये २मत्तखञ्जने शब्दरत्ना० । ३रक्तखदिरे पु० शब्दच० । कालभेदे तद्भेदप्राप्तता यथा

"गौड़ी तु शिशिरे पेया पैष्टी हेमन्तवर्षयोः। शरद्-ग्रीष्मवसन्तेषु माध्वी ग्राह्या न चान्यथा। कादम्बरी शर्करजादिमद्यं सुशीतलं हृद्यकरं मदाढ्यम्। माध्वीसमं स्यात् तृणवृक्षजातं मद्यं सुशीतं गुरु तर्पणञ्च। अन्यथा कुरुते पानं मद्यं सन्तापशोषदम्। यच्चदोषमदात्यय-कारकं मूर्च्छनञ्च तत्" । "पर्य्युषितमल्पमेलनमल्पं वा पिच्छिलं विगन्धं वा। दोषावहमविशेषान् मद्यं हृद्यं विवर्जयेत् सर्वम्। मद्यप्रयोगं कुर्वन्ति शूद्रादिषु महार्त्तिषु। द्विजैस्त्वभिस्तु न प्राह्यं यद्यप्युच्चीवयेन्मृतम्" राजनि०। अधिकं मद्यशब्दे दृश्यम्। ४वसुदेवस्य पत्न्यां हरिवं० २६अ०। ५दुर्गायां १७८ अ०। "सप्तभकारकृतावसितौ च गुरुः कविभिः कथिता मदिरा" छ० र० टी० उक्ते द्वाविंशत्यक्षरपादके छन्दोभेदे स्त्री।

मदिराक्षी पु० १विराटस्य भ्रातरि भा०वि०३१अ०। मदिरा-मत्तस्यञ्जनाक्षीवाक्षियस्य बहुव्री० । खञ्जनतुल्यनेत्रे त्रि० स्त्रियां ङीष्। [गञ्जाख्ये मद्यसन्धानार्थं वृक्षे अमरः

मदिराग्रह न० मदिरासन्धानार्थं वृक्षम् शाक० त०।

मदिराश्व पु० १विराटन्नृपसेनापतिभेदे भा० आश्व० २अ०। छिरण्यहस्तस्य श्वशुरे २प्राचीने नृपभेदे भा०अनु०१४७अ०

मदिरासख पु० इत० टच्समा०। आम्रवृक्षे जटा०। तस्य मदिरातुल्यास्वादत्वात् तथात्वम्। [मदिरायां हेमच०।

मदिष्ठा स्त्री अतिशयेन मदिनी मदयित्री इष्ठन् टिलोपः।

मदेभहि पु० प्रार्थनायाम् निघण्टुः।

मदेव पु० मद-वा० एव। मत्ते ऋ०१०।१०६।६।

मदोत्कट पु० मदेन दानवारिणा उत्कटः उद्भटः। १मत्त-गजे अमरः २मदिरायां स्त्री राजनि०। ३मदोद्भटे त्रि०।

मदोदग्र पु० मदेन हर्षेण दर्पेण वा उदग्रः उच्चः। १मत्ते "मदोदग्राः करुग्रामः" रघुः। २नार्य्यां स्त्री शब्दमा०।

मदोद्धत त्रि० मदेन उद्धतः। मत्ते जटा०।

मदोन्मत्त पु० "मन्त्रो वाक्यं वा विद्या वा सप्ताधिकदशाक्षरः। कटकारपञ्चकादिर्यो मदोन्मत्त उदाहृतः" तन्त्रसारोक्ते १मन्त्रभेदे २मदेनोन्मत्ते त्रि०।

मद्गु पु०मद्ज-उ न्यङ्क्वा०। (पानिकोडि) १पक्षिभेदे अमरः। "मद्गुः स्निग्धो वातनाशो भेदकः श्लेष्मकारकः। रक्त-पित्तविनाशी च शीतलः परिकीर्त्तितः" राजव०। २मदुगुरुमीने नीलकण्ठः।

मद्गु पुंस्त्री०मद-अरच् न्यङ्क्वा०। (सागर)१मत्स्यभेदे। स्वार्थे क। तत्रैव अमरः स्त्रियां ङीष्। तद्गुणाः मत्स्यशब्दे भावप्र०उक्ताः। "निषादो मद्गुरं क्षते" भा० अनु० ४८ अक्षे २सङ्कीर्णजातिभेदे (डुबुरि) पुंस्त्री०। "मद्गून् मीनभेदान् खाति खा-क लस्य रः" नीलकण्ठः। जल-मज्जनेन मीनहारित्वात् तस्य तथात्वम्। "तस्मादेते जले मग्नाः मद्गुरा नाम विश्रुताः। ये हरन्ति सदाऽसं-ख्यान् सत्त्वदोदरचारिणः" हरिवं० ६५अ०।

मद्गुरप्रिया स्त्री मद्गुरस्य प्रियेव। शृङ्गीमत्स्ये हेमच० "मद्गुरस्य प्रिया शृङ्गी" अमरः।

मद्गुरसी स्त्री मद्गोः मद्गुरस्येव रस-आच्चादोऽस्याः गौरा० ङीष्। शृङ्गीमत्स्ये शब्दर०।

मद्य न० माद्यत्यनेन करणे यत्। मदिराशब्दे उक्ते माध्वी-कादिद्वादशविधे मादकद्रव्ये अमरः। मद्यभेदा वर्णभेदेन तत्पाननिषेधादिकं प्रा० वि० उक्तं यथा

"पुलस्त्यः "पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम्। माध्वीकं टाङ्कमाध्वीकं मैरेयं नारिकेलजम्। समानानि विजानीयान्मद्यान्येकादशैव तु। द्वादशन्तु सुरामद्यं सर्व-मामषमं स्मृतम्"। अनेनैकादशानां सुरात्वं निषेधयति मद्यशब्दस्तु मदहेतुद्रव्यद्रव्यमात्रवचनः तस्मादेव वचनान्न तु मद्यमात्रं सुराशब्दार्थः। तथा च शङ्खस्मृतिः "गौड़ीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समाचरेत्। तप्तकृच्छ्रं पराकस्य चान्द्रायणमनुक्रमात्"। तयोर्मा सुरात्वे क्रमेण प्रायश्चित्तं न स्यात्। यथा भविष्ये "सुरा तु पैष्टी सख्योक्ता न तस्माच्चितरे समे"। पैष्टीति तण्डुलविकारमात्रोपलक्षणम्। इतरे गौड़ीमाध्व्यौ अतोऽन्नविकार एव सुराशब्दस्य मुख्यत्वात् त्रिविधा सुरेति गौड़ीमाध्व्योर्गौणसुरात्वज्ञापनार्थम्। तेनैतत्-पानेऽपि महापातकत्वमतिदिशति "यथैवैका तथा सर्वेति" पैष्ट्यां पूर्वप्रसिद्धिं दर्शयति यथा पैष्टी सुरा तथा सर्वा गौड़ी माध्वी च पूर्ववचनोक्ता पैष्टीदृष्टान्तेनात्र दर्शिता न पातव्या द्विजोत्तमैर्ब्राह्मणैरित्यर्थः। सर्ववर्णिकपरत्वे उत्तमपदानर्थक्यात्। न च वस्तुवचनानर्थक्यपरिहारार्थमु-त्तमप्रतिपादिकानर्थक्यं युक्तं वस्तुवचनस्य सजातीयोप-स्थापके चरितार्थत्वात्। अतो ब्राह्मणस्य त्रिविधसुरापानं महापातकं क्षत्रियवैश्ययोस्तु "सुरा वै मलमन्नानामिति" वचनेन पैष्ट्रेवेति स्थितम्। गोविन्दराजविश्वरूपा-देश्वराणामनुमतोऽयमर्थः। अतएव "एष माध्वी च गौड़ी च पैष्टी च त्रिविधा सुरा। द्विजातिभिर्न पातव्या कदाचिदपि कर्हिचिदिति" यमवचनेऽपि द्विजा-

तिपदं ब्राह्मणपरमेव। अतएव द्विविधसुरापाने क्षत्रियादीनां महापातकं दूरे तावदस्तु दोषाभावमेवाह बृहद्याज्ञवल्क्यः "कामादपि हि राजन्यो वैश्यस्यापि कथञ्चन। मद्यमेवासुरां पीत्वा न दोषं प्रतिपद्यते"। तदेवं पैष्टीनिषेधस्त्रैवर्णिकानां गौड़ीमाध्वीनिषेधस्तु ब्राह्मणानामेव। ननु ब्राह्मणराजन्याविति विशेषणात् पुंलिङ्गमत्र विवक्षितम्। अतः कथं ब्राह्मण्याः सुरापानं महापातकम्। उच्यते निषिध्यमानक्रियाया विधेयत्वेन तत्कर्तुरनुपादेयत्वात्तद्विशेषणं लिङ्गमविवक्षितं कृत्रिमभयत्ववत् अतस्तज्जातीयस्त्रीणामपि पाननिषेधः। यथा भविष्ये "तस्माच्च मेयं विप्रेण सुरामद्यं कथञ्चन। ब्राह्मण्यापि न मेया वै सुरा पापभयावहा"। "या ब्राह्मणी सुरापी स्यात् न तां देवाः पतिलोकं नयन्ति" इति श्रुतेः। "पत्युरर्द्धशरीरेण भार्या यस्य सुरां पिबेत्। पतितार्द्धशरीरस्य निष्कृतिर्नोपपद्यते"। न चैवं क्षत्रियवैश्यस्त्रीणामनिषेधः, ब्राह्मणीपदस्य निषिद्धसुरापानकर्तृभार्योपलक्षकत्वात् भार्या यस्य सुरां पिबेदिति सामान्यश्रवणात्। पानञ्च द्रवीभूतस्याभ्यवहारः स च कण्ठदेशादधोनयनं न तु वक्त्रमात्रप्रवेशः। निष्ठीवनाद्यर्थं कपोलधारणे पानशब्दप्रयोगात् यथोक्तं "लिप्तकृद्धि सुरां कश्चित् पिबतीत्यभिधीयते। यावच्च क्रियते वक्त्रे गण्डूषस्य प्रवेशनम्"। तत्र गण्डूषपरिमाणमविवक्षितं गण्डूषार्द्धपानेऽपि लोके पानशब्दप्रयोगात् अतएव मुखप्रवेशनमात्राविवक्षितं किन्तु येन मुखप्रवेशेन कण्ठादधोनयनं भवति अतस्तदेवोपलक्षयति अतएवोष्ठमात्रलेपे न पाननिष्पत्तिः अतस्तत्रोत्तमाक्षरार्थप्रायश्चित्तम्। एतेन केवलौष्ठसंयोगे तत्प्रक्षालनसंस्कारावितिवाचकस्य व्याख्यानमप्यसङ्गतं पानानिष्पत्तेरिति।"

मद्यभेदगुणादिकं भावप्र० उक्तं यथा

"तत्रान्तु शीधुमैरेयमरिष्टा च मदिरा सुरा। कादम्बरी वारुणी च हालापि बलवल्लभा। पेयं यन्मादकं लोकैस्तन्मद्यमभिधीयते। यथारिष्टं सुरा शीधुरासवाद्यनेकधा। मद्यं सर्वं भवेदुष्णं पित्तरक्तहरणाशनम्। भेदनं शीघ्रपाकञ्च रूक्षं कफहरं परम्। अम्लञ्च दीपनं रुच्यं पाचनं चाणुकारि च। तीक्ष्णं सूक्ष्मञ्च विशदं व्यायि च विकाशि च"। अथारिष्टस्य लक्षणं गुणाश्च "पक्वौषधाम्बुसिद्धं यन्मद्यं तत्स्यादरिष्टकम्"। अरिष्टं मद्यमिति लोके। यथा द्राक्षारिष्टम्। दशमूलारिष्टम्। बब्बूलारिष्टमिति। "अरिष्टं सर्वपाकेन सर्वतश्च गुणाधिकम्। अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः"। अथ सुरालक्षणं गुणाश्च "शालिषष्टिकपिष्टादिकृतं मद्यं सुरा स्मृता। सुरागुणैः बलस्त्रीव्यपुष्टिमेदःकफप्रदा। शोथहृत् याति गुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत्"। अथ सुराभेदो वारुणी तस्या लक्षणं गुणाश्च "पुनर्नवाग्निलाघिष्टैर्वारुणी विहिता स्मृता। संक्षिप्तैस्तालखर्जूररसैर्या सापि वारुणी। सुरावद्वारुणी लघ्वी पीनसाध्मानशूलनुत्"। सुरातो भेदार्थं लघ्वीति। अथ शीधुहृदयस्य लक्षणं गुणाश्च "इक्षोः पक्वैः रसैः सिद्धः शीधुः पक्वरसश्च सः। आमैस्तैरेव यः शीधुः स च शीतरसः स्मृतः। शीधुः पक्वरसः श्रेष्ठः सुराग्निबलवर्णकृत्। वातपित्तकरः सद्यः स्नेहनो रोचनो हरेत्। विबन्धमेदःश्लेष्मार्शःशोथोदरकफामयान्। तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः।" अथासवस्य लक्षणं गुणाश्च "यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः। यथा लोहासवादिः। "आसवस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः।" अथ नवपुराणमद्यगुणाः। "मद्यं नवमभिष्यन्दि त्रिदोषजनकं गुरु। अहृद्यं दृंहणान्द्राक्षि दुर्जरं विशदं गुरु। जीर्णन्देव रोचिष्णु क्रमिश्लेष्मानिलापहम्। हृद्यं सुनिषण्णेषु स्रोतोविशोधनम्"। अथ सात्त्विकानां मद्यं पिबतां चेष्टाविशेषाः। "सात्त्विके शीतहास्यादि राजसे साहसादिकम्। तामसे निन्द्यकर्माणि निद्राञ्च मदिरावरे"। आचरेत् कुर्यात् "विधिना मात्रया काले स्निग्धैरन्नैर्यथाबलम्। प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतं यथा। किन्तु मद्यं स्वभावेन यथैवाज्यं तथा स्मृतम्। अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतम्"। अथ मद्यानां मन्त्रनाशनोपायः। "शुक्लैलवालमद्जीरकधान्यकैला यस्यैवयत् सदसि वाचमभिव्यनक्ति। स्वाभाविकं सुखजसुजभति पूतिगन्धं गन्धस्य मद्यजगुणादिभवस्य नूनम्।" औषधार्थमपि विप्रैर्मद्यं न पेयम् मदिराशब्दे राजनि० वाक्यं दर्शितम्।

पुराणादौ ब्राह्मणस्य मद्यनिषेधो यथा

"अदेयञ्चाप्यपेयञ्च तथैवास्पृश्यमेव च। द्विजातीनामनालोच्यं नित्यं मद्यमिति स्थितम्। तस्मात् सर्व-

प्रयत्नेन मद्यं नित्यं विवर्जयेत्। पीत्वा पतति कर्मभ्यस्तस्माद्यो द्विजोत्तमः। भक्षयित्वाप्यभक्ष्याणि पीत्वान्येयान्यपि द्विजः। नाधिकारी भवेत्तावद्यावत्तन्न जहात्यधः। तस्मात् परिहरेन्नित्यमभक्ष्याणि प्रयत्नतः। ऋमेयानि च विप्रो वै पीत्वा तद्याति रौरवम्। कूर्म पु० १६ अ०। "द्विजस्य पूजादौ मद्यदानविध्यनुकल्प निषेधो यथा। "मदिरां पृथतो दद्यात् अन्यत् पानन्तु वामतः। अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः। नारिकेलजलं कांस्ये ताम्रे च विसृजेन्मधु। नापद्यपि द्विजो मद्यं कदाचित् विसृजेदपि। श्रुते, पुष्पासवादुत्कात् व्यञ्जनाद्वा विशेषतः। राजपृतस्तथा मद्यं मंत्रिवः सौम्निकादयः। दद्युर्न रक्षन्ति भूप क्षत्रिया विभवाय च। भूपालानुमते मद्यं ददत् पापमवाप्नुयात्" कालिका पु० ६६ अ०। अथ ब्राह्मणस्य मद्यपाननिषेधकशुक्रवाक्यो यथा "वैशम्पायन उवाच। सुरापानादृचनां प्राप्य विद्वान् संज्ञानार्थं प्राप्य चैवातिघोरम्। हृत्वा कथञ्चापि तथाभिरूपं पीतं तथा सुरया मोहितेन। समन्युरुत्थाय महानुभावस्तदोधना विप्रहितं चिकीर्षुः। काव्यः स्वयं वाक्यमिदं जगाद सुरापानं प्रति वै जातशङ्कः। यो ब्राह्मणोऽद्यप्रभृतीह कश्चित् मोहात् सुरां पास्यति मन्दबुद्धिः। अपेतधर्मो ब्रह्महा चैव स स्यादस्मिंल्लोके गर्हितः स्यात् परे च। मया चेमां विप्रधर्मोत्तरीमां मर्य्यादां वै स्थापितां सर्वलोके। सन्तो विप्राः शुश्रुवांसो गुरूणां देवालोकात्सोपहसन्तु सर्वे" भा० आ० ७६ अ०। "नारिकेलञ्च खार्जूरं पानसञ्च तथैव च। ऐक्षवं मधुकं टाङ्कं तालञ्चैव च साक्षिकम्। द्राक्षान्तु दशमं ज्ञेयं गौड़ं चैकादशं स्मृतम्। पैष्टन्तु द्वादशं प्रोक्तं सर्वेषामधमं स्मृतम्। मध्यमं मधुजं गौड़ं शेषञ्चोत्तममिष्यते। एतत् द्वादशकं मद्यं न पातव्यं द्विजैः क्वचित्। क्षत्रियादिः विवेत् मद्यं पैष्टीमेकान्तु वर्जयेत्। सुरां पीत्वा द्विजो मोहात् कामात् तक्रादिसिञ्चितां। वैयार्घिकं व्रतं कृच्छ्रादीषन्निम्ने तु वार्षिकम्। तक्रादिसिञ्चितां किञ्चित् सुरां पीत्वा ह्यकामतः। कृच्छ्रावृदपाद्यसञ्चार्य्य पुनः संस्कारमर्हति। सुखप्रवेशमावे तु प्रायश्चित्तार्द्धमाचरेत्। अनुपनीतो देवेशि! व्रतं वैयार्घिकं चरेत्। चतुर्थकालाहारी स्याद् ब्रह्मचर्य्यमथापि वा। आपञ्चवर्षं वृद्धं वा ज्ञानादर्द्धं विनिर्दिशेत्। शूद्रस्य च विशेषेण अतिकृच्छ्रद्वयं चरेत्। स्वजातिसाधिते तस्मिन् तदर्द्धं व्रतमाचरेत्। पैष्टीपाने ब्राह्मणस्य मरणान्तिकमुच्यते। माध्वीगौड़ीसुरापाने द्वादशाब्दं विधीयते। इतरेषान्तु पानेन गुरुद्विचान्द्रायणेन तु। राजन्यवैश्ययोश्चापि गौड़ी माध्वी न शस्यते। मोहात् क्षत्रस्य वैश्यस्य पीत्वा कृच्छ्रद्वयं चरेत्। शूद्रोऽपि गौड़ीं पैष्टीञ्च न पिबेद्दीनसंस्कृताम्। कामात् पीत्वा सुरां विप्रो मरणान्तिकमाचरेत्। चरेच्चान्द्रायणं ज्ञानात् क्षत्रियो वैश्य एव च। पैष्टीपाने तु शूद्रस्य प्राजापत्यं विनिर्दिशेत्। ज्ञानादभ्यासयोगे तु चान्द्रायणत्रयं स्मृतम्। नारिकेलं तथा ज्ञानाद्विप्रश्चान्द्रायणेन तु। क्षत्रियश्चैव वैश्यश्च प्राणायामेन शुध्यति। अपक्वं पानसञ्चैव आम्रञ्च बदरं तथा। स्थापयित्वा घटे नित्यं दद्यादामपयः पलम्। त्रैलोक्यविजयाञ्चैव मातुलङ्गं तथैव च। समेऽहनि ततो दद्यात् सम्भानात् सत्त्वमीरितम्। दधि मधु घृतञ्चापि माज्जिष्ठं तिक्तकं तथा। अनुपाने तु देवेशि! द्राक्षमद्यं सुनिश्चितम्। विड्ङ्गं शालयो मूलं समभागेन योजितम्। मधुना सह संस्थाप्य शेषपाकं समाचरेत्। पिप्पलीलवणं दत्त्वा मधुना मद्यमीरितम्। पानसं पक्वखर्जूरमार्द्रं सोमलतारसम्। एकीकृत्याग्निसन्धानात् खार्जूरं मद्यमीरितम्। पक्वतालं दन्तिशाकं कक्कुभञ्च तथैव च। एतैरेव समन्धानात् तालमद्यं प्रकीर्त्तितम्। इक्षुदण्डं मरीचञ्च बदरञ्च तथा दधि। शेषे तु लवणं दत्त्वा इक्षुमद्यं प्रकीर्त्तितम्। नवं मधु तथा बिल्वं पक्वं शर्करया सह। सन्धानाज्जायते मद्यं माध्वीकं शरतो रसम्। शतावरी टङ्कमूलं लक्ष्मणं पद्ममेव च। मधुना सह सन्धानात् टङ्कमाध्वीकमीरितम्। भालूरमूल बदरी शर्करा च तथैव च। एषामेकत्र सन्धानात् मैरेयं मद्यमीरितम्। इन्द्रजिह्वा पक्वधात्री नारिकेलजलन्तथा। कदलीफलसन्धानान्मद्यं तद्वारिकेलजम्। दधि त्रैलोक्यविजया तथैव च करीकणा। गुडेन सह सन्धानात् गौड़मद्यं प्रकीर्त्तितम्। शस्कुलीमर्द्दसिद्धान्नसुरादकसमन्वितम्। यक्षो सन्तापयेत् किञ्चित् स्थापयित्वा दिनद्वयम्। शेषेऽहनि तु संज्ञाते पीतं तत्र निःक्षिपेत्। षड्ङ्गवेरं मरीचञ्च मातुलङ्गं तथैव च। एतैर्धान्येन सन्धानात् पैष्टीमद्यं प्रकीर्त्तितम्" वृहत्पराशरे १६ पटले। "शिष्टसम्मता भवेद्वीरो न वीरो मद्यपानतः। कलौ तु भारते वर्षे लोकां

भारतवासिनः। गटे गटे सुरां पीत्वा वर्णभ्रष्टा भवन्ति हि" उत्पत्तितन्त्र ६४ पटले। "दीव्यवीरमयो भावः कलौ नास्ति कदाचन। केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम्" महानिर्वाणतन्त्रम्। "न दद्याद् ब्राह्मणो मद्यं महादेव्यै कथञ्चन। वामकामो ब्राह्मणो हि मद्य मांसं न भक्षयेत्" तन्त्रम्। भैरवतन्त्रे "नारिकेलोदकं कांस्ये ताम्रे गव्यं तथा मधु। राजन्यवैश्ययोर्देयं न द्विजस्य कदाचन। एवं प्रदानमात्रेण हीनायुर्ब्राह्मणो भवेत्"। कलौ मद्यपानादिनिषेधो यथा याज्ञवल्क्यदीपकलिकायां ब्रह्मपु० "नराश्वमेधौ मद्यञ्च कलौ पञ्च द्विजातिभिः" निषेधविषयं स्मरति यथा "मद्यमद्येयमेयमनिर्याह्यम्"। अनिर्याह्यमस्वीकार्यमिति कल्पतरुः। कालिकापु०। "स्वगात्ररुधिरं दत्त्वा चात्महत्यामवाप्नुयात्। मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते"। श्रुतिः "ताम्रे चेक्षुरसो मद्यं पयसा यवचूर्णकम्। गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं हृतं विना"। अतो मद्यप्रतिनिधिदानमपि न युक्तम्" तिथितत्त्वं रघु०। मद्यतुल्यं यथा "नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु। गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं हृतं विना" कर्मविपाकः।

मद्यकीट पु० मद्यजातः कीटः। सुराजाते कीटभेदे हेम०।

मद्यद्रुम पु० मद्यहेतुर्द्रुमः ष०त०। माडद्रुमे राजनि०।

मद्यप त्रि० मद्यं पिबति पा-क। १मद्यपायिनि २दानवभेदे पु० हरिवं २४० अ०।

मद्यपङ्क पु० मद्यस्य पङ्क इव। सुराकल्के (मेथोया) हेम०।

मद्यपाशन न० मद्यपैरश्यते अद-कर्मणि ल्युट्। मद्यपानरोचके अवदंशे भक्ष्ये (चाटनी) हेम०।

मद्यपीत त्रि० पीतं मद्यं येन बहु० परनि०। सुरापानकर्त्तरि स्त्रियां ङीप्।

मद्यपुष्पा स्त्री मद्यं मदसाधनं पुष्पं यस्याः ब०त०। धातक्यां (धाइफुल) राजनि०। [जाते हेमच०।

मद्यबीज न० हृत०। किण्वादौ (बाखर) मद्यकारणे पदार्थे

मद्यवासिनी स्त्री मद्यस्येव वासो गन्धो विद्यते वाऽस्त्यस्यां नासाः इनि। धातकीवृक्षे (धाइफुल) राजनि०।

मद्यसन्धान न०मद्यस्य मद्योत्पादनार्थं सन्धानम् अभिषवः। मद्योत्पादनव्यापारे हेमच०। [राजनि०

मद्यामोद पु० मद्यस्येव आमोदः गन्धोऽस्य। बञ्जुलवृक्षे

मद्र पु०मद-रक्। "विराटपार्श्वयोर्मध्ये पूर्वदक्षकमेव च। मद्रदेशः समाख्यातः" इत्युक्ते १देशे २हर्षे ३मङ्गले च। हे०सं० १४अ०।

मधु न मन-उ नश्च धः। १मद्ये "गर्ज गर्ज क्षणं मूढ! मधु यावत् पिबाम्यहम्" देवीभा०। २चौद्रे "मधु वाता ऋतायते" इति मधुसूक्तम्। ३पुष्परसे शब्दर०। "मधु द्विरेफः कुसुमैकपात्रे" कुमारः। ४जले च विश्वः ५मधुररसे च। "मधुश्चरन्ति सिन्धवः" इति मधुसूक्तम्। ६मधुरे त्रि० ७विष्णुकर्णमलजाते दैत्यभेदे पु०। "विष्णुकर्णमलोद्भूतावसुरौ मधुकैटभाविति" देवीभा० कृष्णीनस्याभर्त्तरि दैत्यभेदे पु० एवम् ८वसन्तर्तौ १०चैत्रे मासि (मौध) ११दुग्धभेदे च मेदि० १२अशोकवृक्षे हेम० १३यष्टिमधौ पु० शब्दर० १४प्राणिनां शुभाशुभकर्मणि न०विष्णुस०भा०। १५जोवन्त्यां स्त्री अमरः। १६चन्द्रिभेदे १७खगभेदे च पु० विश्वः।

मधुकण्ठ पुंस्त्री० मधुः मधुरः कण्ठोऽस्य। कोकिले त्रिका०। स्त्रियां ङीष्।

मधुकर पुंस्त्री०मधूनि करोति सञ्चिनोति कृ अच्। १भ्रमरे अमरः २तद्योषिति स्त्री ङीष्। ३कामिजने धरणिः। ४भृङ्गराजे च पु०रत्नमा०मधुभृद्दाद्योऽपि भ्रमरे।

मधुकर्कटी स्त्री मधुः मधुरा कर्कटी। १जम्बीरभेदे २मिष्टखर्जूरिकायाञ्च राजनि०। स्वार्थे क ह्रस्वः टाप्। मधुकर्कटिका बीजपूरे। [च मेदि०।

मधुका स्त्री मधिव स्वार्थे कन्। १यष्टिमधौ, २मधुपर्ण्यां३च

मधुकोष पु० मध्वर्थं कृतः कोषः। (मौचाक) मक्षिकाजाते कोषाकारे पदार्थे शब्दच०। [क तत्रैव।

मधुक्षीर पु० मधु मधुरं क्षीरमस्य। खर्जूरवृक्षे। स्वार्थे

मधुखर्जूरी स्त्री मधुर्मधुरा खर्जूरी। अतिमिष्टखर्जूरीभेदे राजनि०।

मधुच्छदा स्त्री मधुर्मधुरः छदोऽस्याः। मधुरच्छदायाम् भावप्र०

मधुज न० मधुनो जायते जन ड। १सिक्थके (मोम) राजनि० मधुदैत्यमेदोजातायां २भूमौ स्त्री शब्दच०।

मधुजम्बीर पु० मधुर्मधुरः जम्बीरः। अतिमिष्टजम्बीरे। (कमलालेबु) राजनि०।

मधुजित् पु० मधुमसुरभेदं जितवान् जि क्विप्। विष्णौ शब्दरत्ना० मधुरतु मधुरिपुप्रभृतयोऽत्र।

मधुतृण न०कर्म०। इक्षौ त्रिका०। पुंस्त्वं राजनि०।

मधुत्रय न० मधूनां मधुराणाम् त्रयम्। मधुघृतसितानां त्रये राजनि०। मधुत्रिकमत्र न०।

मधुदूत पु० मधोर्वसन्तस्य दूत इवाप्रियत्वात्। १आम्रवृक्षे त्रिका० २पाटलायां स्त्री ङीप् भावप्र०।

मधुद्रव पु० मधुरो द्रवोऽस्य। रक्तखदिरे शब्दर०।

मधुद्रुम पु० मध्यं मध्यार्हं द्रुमः। (महुआ) द्रुमभेदे अमरः। तत्पुष्पे च हि पौष्पमधुसम्भवः।

मधुधूलि पु० मधुर्मधुरो धूलिरिव। खण्डे (खांड) गुडविकारादौ हैमच०। [धेनुशब्दे १६०६ पृ० दृश्यम्।

मधुधेनु स्त्री० दानार्थं कल्पितायां मधुप्रस्थितिद्रव्यक्षीरधेन्वौ।

मधुप पु० मधु पिबति पा-क। १भ्रमरे अमरः २मधुप्राविणि त्रि०। "प्रारब्धो मधुपैरहारशबलो" रत्नमुकुटः।

मधुपर्क न० पुच-घञ् मधुनः पर्कौ योगो यत्र। मधुयुते कांस्यपात्रस्थे कांस्यपात्रान्तरेणाहृते "दधि घर्पिर्मधु क्षौद्रं सिता चैतेश्च पञ्चभिः। प्रोच्यते मधुपर्कस्तु" इत्युक्ते दध्यादिद्रव्यपञ्चके।

मधुपर्णी स्त्री मधु इव स्निग्धं पर्णं यस्याः। १गुडूच्याम् अमरः। २गाम्भार्याम् ३नीलीवृक्षे मेदि० ४वराहक्रान्तायाम् ५मधुबीजपूरे च राजनि०। [व्यौस् शब्दमा०।

मधुपालिका स्त्री मधूनि पालयति पाल-ण्वुल्। गाम्भार्याम्

मधुपीलु पु० कर्म०। मधुरपीलौ राजनि०।

मधुपुरी स्त्री मधोर्दैत्यस्य पुरी। मथुरायाम् शब्दरत्ना०।

मधुपुष्प पु० मधुप्रचुरं पुष्पं यस्य १मधुद्रुमे (महुआ) रत्नमा० २गिरीषवृक्षे, ३अशोकवृक्षे ४वकुलवृक्षे च ५दन्तीवृक्षे च ६नागदन्तीवृक्षे च स्त्री टाप् राजनि०।

मधुप्रिय पु० मधु मद्यं प्रियं यस्य। १बकरामे त्रिका० मधु इव प्रियः। २भूम्निलम्बां लटाधरः।

मधुफल पु० मधु मद्यं फलं यस्य। १मधुनारिकेले २मधुखर्जूरिकायां स्त्री राजनि० टाप्।

मधुबहुला स्त्री मधु बहुलं यत्र। माधवीलतायाम् राजनि०

मधुमक्षिका स्त्री मधुरसप्रियिका मक्षिका शा०त० (मौमाछि) वरघायाम् अमरः। [राजनि०।

मधुमज्जन् पु० मधुरः मज्जा सारोऽस्य। आखोटवृक्षे

मधुमत् त्रि० मधुर्मधुररसोऽस्यास्त्यस्य मतुप्। १माधुर्ययुक्ते "मधुमत् पार्थिवं रजः" इति मधुसूक्तम्। २काश्मरीवृक्षे ३नदीभेदे राजनि० ४योगशास्त्रप्रसिद्धे योगिनां चित्तवृत्तिभेदे ५वैदिकप्रसिद्धे "मधु वाता" इत्यादौ ऋक्समूहे तन्नाम्नि ६देवीनायिकाभेदे च स्त्री ङीप्।

मधुमर्कटी स्त्री मधुजाता मर्कटी शा०त०। (खिताखण्ड) मधुजाते खण्डे।

मधुमल्लि(ली) स्त्री मधु-रत् वा ङीप् मधुप्रधाना मल्लिः (ली) मालत्यां शब्दमाला।

मधुमस्तक न० "मधुतैलसमैर्मध्ये वेल्लितः घर्षितश्च यः। मधुमस्तकमित्युक्तम्" शब्दच० उक्ते विल्वभेदे।

मधुमूल न०मधु मधुरं मूलम्। (मौयाडु) आलुभेदे शब्दच०

मधुयष्टि स्त्री मधुरा यष्टिः कायोऽस्य। १दृढी २यष्टिमधौ शब्द० स्त्री वा ङीप्। [मधौ अमरः।

मधुयष्टिका स्त्री मधुः मधुरा यष्टिरिव दृढार्थं कन्। यष्टि-

मधुर पु० मधु माधुर्यं राति रा-क, अथवा र वा। १गुडादिरसे त्रिदशे माधुर्यरसयुक्ते द्रव्यादौ च मेदि० "मधुरवः मधुबोधितमाधवी" माघः। २प्रिये ३क्षीरे च त्रि० मेदि०। ५रक्तखदिरे ६राजाम्रे ७रक्तेक्षौ दन्तीवृक्षे ६द्राक्षायाञ्च, १०जीरके च पु० राजनि० ११पक्वे १२विषे च न० मेदि० १३यवपुष्पायां १४यष्टिमधौ १५मधुकवंटिकायां १६मधूक्षायां १७मेदायां १८वसुरामसर्पयोश्च स्त्री मेदि० १६द्राक्षोक्ष्यां २०शर्करायाञ्च २१दन्तीवृक्षे २२पाण्डुक्षीरे २३मिश्रायाञ्च (मौरी) स्त्री। आदौ क। अत इत्वम्। मिश्रायाम् स्त्री अमरः।

मधुरजम्बीर पु० कर्म०। (कमलानेबु) जम्बीरभेदे राजनि०।

मधुरत्वच पु० मधुरा त्वचा यस्य। भवृक्षे त्रिका०।

मधुरफल पु० मधुरं फलमस्य। राजबदरे राजनि०।

मधुरबल्ली स्त्री कर्म०। मधुबीजपूरे जम्बीरभेदे राजनि०।

मधुरस पु० मधुन इव रसो यस्य। १दृढी भावप्र०। २तालीराजनि०। ३मूर्वायाम् स्त्री अमरः। ४द्राक्षायां ५दुग्धिकायां स्त्री मेदि०। ६गाम्भार्यांञ्च भावप्र०। [राजनि०।

मधुरस्रव स्त्री मधुरं स्रवति स्रु-अच्। पिप्पलवर्णूक्षाम्

मधुराम्लक पु० कर्म०। आम्रातके शब्दच०।

मधु(धू)लग्न पु० मधुर्मधुररसो लग्नो यत्र पृषो० वा दीर्घः। रक्तयोभाञ्जने रत्नमाला।

मधु(धू)लिका स्त्री मधु माधुर्यं याति या-क पृषो० वा दीर्घः संज्ञायां कन् अत इत्वञ्च राजिकायां (राइसर्षा) राजनि०। [अमरः शिनि। मधुलेहीत्यत्र।

मधुलिह् पु० मधु लेढि आस्वादयति लिह क्विप्। अमरे

मधुवन न० मधुदैत्याधिष्ठितं वनम् शा०त०। १मथुरार्द्धलक्षे वनभेदे किष्किन्धास्थे मधुप्रचुरे २वनभेदे च।

मधुवर्ग पु० ६त०। नानाविधमधुरद्रव्ये भावप्र० द्रव्यम्।

मधुवल्ली स्त्री मधुप्रधाना वल्ली। यष्टिमधौ राजनि०। [अमर०

मधुवार पु०मधुनो वारः क्रमः। पुनःपुनःमद्यपानकर्मणि

मधु(बी)बीज पु॰मधु मधुरं बी(बी)जं यस्य। दाडिमे राजनि॰
मधु(बी)बीजपूर पु॰ कर्म॰। मधुरकर्कटिकायाम् राजनि॰।
मधुव्रत पुंस्त्री॰ मधु तत्सञ्चयो व्रतं सततानुशीलनं यस्य। भ्रमरे अमरः स्त्रियां ङीष्।
मधुशर्करा स्त्री मधुजाता शर्करा श॰त॰। (सिताखण्ड) मधुजातशर्करायां राजनि॰।
मधुशाखु पु॰ मधुर्मधुरा शाखाऽस्य (मौक) वृक्षे शब्दच॰।
मधुशिग्रु पु॰ मधुः मधुरः शिग्रुः। रक्तशोभाञ्जने अमरः
मधुशेष पु॰ न॰ मधुनः शेषः उच्छिष्टम्। सिक्थके (मोम)। राजनि॰।
मधुश्रेणी स्त्री मधुनः श्रेणीव। मूर्वायाम् अमरः।
मधुश्वासा स्त्री मधुन इव श्वसित्यस्मात् श्वस-अपादाने घञ्। जीवन्तीवृक्षे राजनि॰। [वृक्षे अमरः।
मधुष्ठील पु॰ मधु यष्ठीले गर्भेऽस्य पृषो॰। (मौक) गुडपुष्प-
मधुसख पु॰ मधोर्वसन्तस्य सखा सदृक्षरः टच्समा॰। कामदेवे मधुसारथ्यादयोऽत्र।
मधुसूदन पु॰ मधुं तन्नामासुरं सूदयति, मधु, जीवानां शुभाशुभकर्म, ज्ञानदानेन सूदयति वा सूद-ल्यु। १श्रीकृष्णे। "भक्तानां कर्मणाञ्चैव सूदनात् मधुसूदनः" तन्नामनिरुक्तेः। मधु माध्वीकं सूदयति भक्षयति। २भ्रमरे जटा॰ पुंस्त्री॰ स्त्रियां ङीष्। मधु इव सूदयते भक्ष्यते ल्युट् ङीप्। ३पालङ्कीशाके स्त्री हेमच॰।
मधुस्रव पु॰ मधूनि मद्यानि स्रवन्त्यस्मात् स्रु-अप्। (मौक) १वृक्षे २मोरटलतायां राजनि॰। ३मधुयष्टिकायां स्त्री जटा॰ ४जीवन्त्यां स्त्री शब्दच॰। ५मूर्वायां स्त्री राजनि॰। [जटाधरः।
मधुस्रवस् पु॰ मधु स्रवति स्रु-असुन्। (मौक) वृक्षे
मधुस्वर पुंस्त्री॰ मधुर्मधुरः स्वरोऽस्य। १कोकिले शब्दर॰ स्त्रियां ङीष्। २मधुरस्वरवति त्रि॰ स्त्रियां टाप्।
मधुहन् पु॰ मधुं तन्नामासुरं कर्मफलं वा ज्ञानद्वारा हन्ति हन् क्विप्। विष्णौ।
मधूक न॰ मह-ऊक हृस्व धः। १यष्टिमधौ अमरः। (मौक)२वृक्षे पु॰राजनि॰। [अमरः। मधूच्छिष्टतमप्यत्र।
मधूच्छिष्ट न॰ मधुन उच्छिष्टमवशिष्टम्। (मौम) सिक्थके
मधूपघ्न पु॰ मधुदैत्यस्योपघ्न आश्रयः। मथुरानगरे जटा॰।
मधूल पु॰ मधु लाति ला-क पृषो॰। जलजनिरिजंलमधूकवृक्षयोः जटा॰। २मधुकर्कोट्याम् ३ज्ञाने ४क्षीतनखे च स्त्री गौरा॰ ङीष् राजनि॰। ज्ञार्थे क अत इत्वम् टाप्। मधूलिका मूर्वायाम् अमरः।
मध्य पुं॰न॰ मध्य-यत् नस्य धः। १देहस्यावयवभेदे। (माजा) "मध्येन वा वेदिविलग्नमध्या" कुमारः। २आदौमध्यत्वयोग्यत्वभिन्ने ३व्यापारभेदे न॰अमरः। ४पूर्वापरयोरन्तराले ५परार्द्धसंख्यातोऽर्वाचीनायां ६षड्ढायां न॰ तत्संख्याते च। "अन्त्यं मध्यं परार्द्धञ्च" ज्योतिषोक्ते महायां ७गतिभेदे स्त्री तद्वति त्र्यत्रे पु॰। ८न्याये १०अन्तर्वर्त्तिनि च त्रि॰ शब्दर॰।।।अक्षरपादके छन्दोभाते ह॰र॰।
मध्यगन्ध पु॰मध्ये फलमध्ये गन्धो यस्य। आम्रवृक्षे शब्दच॰
मध्यतस् अव्य॰ मध्य+तसिल्। प्रथमापञ्चमीसप्तम्यर्थवृत्तेर्मध्यशब्दस्यार्थे।
मध्यदेश पु कर्म॰। 'हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः, मनूक्ते देशभेदे।
मध्यदिन न॰ मध्य दिनस्य एकदेशित्व॰। १मध्याह्ने। अमुकुत्व॰। मध्यन्दिनमप्यत्र। तत्र भवे तत्र पुण्यवति २वृद्धकृत्ये राजनि॰।
मध्यपञ्चमूलक न॰। "बलापुनर्नवैरण्डशूर्पपर्णीद्वयेन तु। एकत्र योजितैरेव स्यान्मध्यं पञ्चमूलकम्" राजनि॰ उक्ते पदार्थपञ्चके।
मध्यपदलोपिन् पु॰ मध्यपदस्य लोपोऽस्यास्ति इनि। व्याकरणप्रसिद्धे शाकपार्थिवादिके मध्यपदलोपयुते समासभेदे।
मध्यम त्रि॰ मध्ये भवः म। १मध्यभवे। २सप्तस्वरमध्ये क्रौञ्चस्वरतुल्ये ३पञ्चमे स्वरे पु॰ अमरः।
मध्यमपाण्डव पु॰ कर्म॰। अर्जुने तस्य पूर्वापरयोर्द्वयोर्द्वयोर्मध्यवर्त्तित्वात् तथात्वम्। [मध्यमे दासे क्रमीवलादौ।
मध्यमभृतक पु॰ कर्म॰। 'मध्यमस्तु क्रमीवल' इत्युक्तौ
मध्यमलोक पु॰ कर्म॰। पृथिव्याम् तस्याः पातालस्वर्गलोकयोर्मध्यवर्त्तित्वात् तथात्वम्। "मध्यमलोकपालः" इति रघुः मध्यलोकोऽप्यत्र।
मध्यमसंग्रह पु॰ कर्म॰। "प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम्। प्रलोभनस्वाद्यपानैर्मध्यमः संग्रहोमतः" व्यासोक्ते मध्यमे स्त्रीसंग्रहरूपे विवादभेदे।
मध्यमसाहस न॰ कर्म॰। "वाक्पारुष्यपशुपामानां दण्डोपकरणस्य च। एतेनैव प्रकारेण मध्यमं साहसं स्मृतम्" इत्युक्ते परकीयवस्त्रादेर्भङ्गच्छेदादिरूपे साहसभेदे "पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः। मध्यमः

पञ्च विज्ञेयः" मनूक्ते पञ्चप्रपाणात्मके २दण्डभेदे पु० ।

मध्यमा स्त्री मध्य+म । १हृदयजस्कायां नाड्यां २तर्जन्यनामयोरन्तःस्थायामङ्गुलौ, ३पद्मादीनां कर्णिकायाम् मेदि० परादिषु मध्ये ४हृदयोत्पन्नशब्दभेदे पशन्ती-शब्दे ४२८१पृ० दृश्यम् ५नायिकाभेदे च ।

मध्यमेश्वर पु० काशीस्थे शिवलिङ्गभेदे । [गणनाभेदे ।

मध्यमाहरण न० बीजगणितप्रसिद्धे अव्यक्तमानज्ञापके

मध्यरात्र पु० मध्यं रात्रेः एकदेशिस० अच्समा० । रात्रान्तत्वात् पुंस्त्वम् । निशीथे अर्द्धरात्रे हेमा० ।

मध्यवर्त्तिन् त्रि० मध्ये वर्त्तते वृत-णिनि । वादिप्रतिवादिनोरन्ययोर्वा पक्षप्रतिपक्षयोर्वाक्यादिविषयविमर्शपूर्वकं १तत्त्वनिर्णायके स्वार्थाविरोधेन परार्थसम्पादके, कार्य्यसम्पादके च २मध्यस्थे ।

मध्यस्थ पु० मध्ये तिष्ठति स्था-क । १मध्यवर्त्तिनि २उदासीने च । 'माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे' इति कुमारः ।

मध्याङ्ग पु० मध्यमङ्गः एक० स० टच्समा० अङ्गादेशः । अङ्गान्तत्वात् पुंस्त्वम् । त्रिधा विभक्तदिनस्य १द्वितीये भागे "प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु । मध्याह्नस्त्रिमुहूर्त्तः स्यात्" दक्षोक्ते पञ्चधा विभक्तदिनस्य २तृतीये भागे च ।

मध्वालु(क) पु० मधुमधुर आलुः । (मौ आलु) मूलभेदे । स्वार्थे क । तत्रैव । [मधुद्रुमजाते मद्ये अमरः ।

मध्वासव पु० मधुना पुष्परसेन कृत आसवः शा०त० । (मौज)

मन पूजायां सक० गर्वे अक० भ्वा० पर० सेट् । मनति अमानीत्-अमनीत् मेनतुः ।

मन गर्वे अक० च० आ० सेट् । मानयते अमीमनत् ।

मन बोधे तना० आ० सक० सेट् । मनुते अमनिष्ट मेने ।

मन बोधे दि० आ० सक० अनिट् । मन्यते । अमंस्त मेने ।

मन ष्टुतौ अदं०चु०उ०सक०सेट् । मनयति ते अममनत् त ।

मन पु० मन-अच् । जटामांसाम् शब्दच० । [त्रिका० ।

मनआप त्रि० मन आप्नोति आप-अण उप०स० । मनोज्ञे

मन(ण)ड पु० नील० ता० उक्ते वर्षकालीने अहयोगभेदे "वक्रःशनिर्यदि शीघ्रखेटात् पश्चात् पुरस्तिष्ठति तुर्यदृष्ट्या । एकर्क्षसप्तर्क्षभुवा दृशा वा पश्यन्नथांशैरधिकोनकस्तेत् । तेजो हरेत् कार्यपरेत्यघाढ्यो स्थितोऽपि वाह्यो मन(ण)डः शुभो न ।

मनःशिला स्त्री मनःशब्दवाच्या शिला । (मनछाल) रक्तवर्णे उपधातुभेदे "मनःशिलाविच्छुरिता निषेदुः" कुमारः । पृष० वा ङीष् पुंस्त्वमपि । "टङ्कैर्मनःशिलसुहैरविदार्य्यमाणे'ति भरतधृतवाक्यम् ।

मनन न० मन-ल्युट् । १अनुमाने २युक्त्या पदार्थनिर्णये च

मनस् न० मन्यतेऽनेन मन-करणे असुन् । सर्वेन्द्रियप्रवर्त्तके अन्तरिन्द्रिये न्यायमतम् वेदान्तमते २सङ्कल्पविकल्पात्मकवृत्तिमदन्तःकरणे । तच्च सुखदुःखाद्याधारः "कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एवे"श्रुतेः । न्यायमते तज्ज्ञानादिसाधनमिति भेदः । ३मनःशिलायाञ्च शब्दच० ।

मनसा स्त्री मनं मननं स्यति सो-क । आस्तीकस्य मुनेर्मातरि वासुकिभगिन्याम् जरत्कारुपत्न्यां नाम्नि जरत्कारौ जटा० ।

मनसादेवी स्त्री मनसा दीव्यति दिवः करणस्य कर्मत्वात् कर्मोपपदत्वेन अण् ङीष् अलुक्स० मनसाशब्दार्थे जटा० ।

मनसिज पु० मनसि जायते जन-ड सप्तम्या वा अलुक् । १कामदेवे अमरः । लुकि । मनोजोऽप्यत्र । एवं चित्तजादयोऽप्यत्र ।

मनसिशय पु० मनसि शेते अच् अलुक्स० । कामदेवे हेमा०

मनस्कार पु० क्र घञ् मनसःकारोव्यापारभेदः । चित्तस्य सुखतत्परत्वे अमरः ।

मनस्ताप पु० मनसस्तापः । १अनुतापे २मनःपीड़ायाञ्च ।

मनस्विन् त्रि० प्रशस्तं मनोऽस्त्यस्य विनि । १प्रशस्तमनस्के स्त्रियां ङीप् । "मनस्विनीनां प्रतिपत्तिरीदृशी" कुमारः २शरभे पु० राजनि० ।

मनाक् अव्य० मन-आकि । १ईषदर्थे अमरः "कुतूहलाक्रान्तमना मनागभूत्" नैषधम् । २मन्दे च मेदि० ।

मनाका स्त्री मन आक । हस्तिन्याम् उणादिको० ।

मनाकृ न० मनाक् करोति कृ-अच् । १सल्लिकागन्धयुक्ते अगुरुभेदे शब्दच० । २ईषत्करे त्रि० ।

मनावी(यी) स्त्री मनोः पत्नी वा ङीष् ऐङ् च । मनोः पत्न्याम् । जटाधरमते ऐङ् । मनायीत्येव तत्रार्थे ।

मनित त्रि० भ्वा० मन-कर्मणि क्त । ज्ञाते ।

मनीक न० मन-ईक । अङ्गने उणादिको० ।

मनीषा स्त्री ईष-अङ् ईषा मनस ईषा शक० । बुद्धौ अमरः ।

मनीषिन् पु० मनीषा अस्त्यस्य इनि । १पण्डिते अमरः २बुद्धियुक्ते त्रि० ।

मनु स्त्री मन उ । १पृथिव्याम् (शिलिङ्गशाक) राजनि० । २मनुपत्न्याञ्च ३प्रजापतिभेदे, धर्मशास्त्रकर्त्तरि स्मार्त्त-

ऋषादौ मुनिभेदे च पु०। मन्त्रस्य ऋषिर्देवता छन्दश्च ज्ञेयानि ज्ञातव्यानि ७त० उक्ता इत्यादयः। [स्त्रियां जातौ ङीष्।

मनुज पु०मनोः स्वायम्भुवात् जायते जन-ड। मनुष्ये अमरः

मनुष्य पु० मनोरपत्यं यत् मनुष्यादेशश्च। मानवे जातिभेदे। स्त्रियां जातौ टाप्। [जुवेरे अमरः।

मनुष्यधर्मन् पु० मनुष्यस्येव धर्मो यस्य बहुव्री० समा०। [मिलायाम् अमरः।

मनोगुप्ता स्त्री मनसा मनःशब्देन तच्छब्दवाच्यत्वात् गुप्ता।

मनोजव त्रि० जु-असुन् मनोजवं वेगवत् समानाधि० यस्मिन्। १पितृतुल्ये अमरः। मनस इव जवो यस्य। २अतिवेगवति त्रि० ३विष्णौ पु०। ४अग्निजिह्वभेदे स्त्री जटा०। "काली कराली च मनोजवा च" भा० ति०। ५दुर्गाशक्तिभेदे। [कामदृङ्निकरदृक्षे राजनि०।

मनोजवृद्धि पु० मनोजस्य कामस्य वृद्धिर्यस्मात् ५ब०।

मनोज्ञ त्रि० मनो जानाति ज्ञापयति बोधनाय प्रवर्त्तयति करोति अन्तर्भूतण्यर्थे ज्ञा-क। १मनोहरे अमरः। २मनःशिलायां रत्नमा०। ३वन्याककोल्यां, ४कटभ्यां, ५जीरके ६मदिरायाञ्च स्त्री राजनि०। ७राजपुत्र्यां जटा० ८सरलकाष्ठे न० रत्नमा०। [तयोऽस्यत्र।

मनोभव पु० मनसि भवति भू-अच्। कामदेवे मनोभूभ्रू-

मनोरथ पु० मनएव रथोऽत्र, मनसो रथइव वा इष्टप्रापकत्वात्। इच्छायाम् अमरः।

मनोरम त्रि० मनोरमयति रम-णिच् अण् उप०स०। १मनोहरे अमरः। २गोरोचनायां स्त्री राजनि०। ३रुचिमत्यां भार्य्यायां स्त्री मार्कण्डु०। [वृक्षे च।

मनोहत त्रि० मनो हृतं यस्य। १प्रतिहृते अमरः २प्रति-

मनोहर त्रि० मनो हरति स्वदर्शनाय हृ-अच्। १रुचिरे २कुन्दवृक्षे पु० शब्दर०। ३जात्यां ४स्वर्णयूथ्यां च स्त्री। ५स्वर्णे न० राजनि०। णिनि। मनोहारिन् मनोहरे त्रि० स्त्रियां ङीप्। [शिलायाम् अमरः।

मनोह्वा स्त्री० मनःशब्देनाह्वयते ह्वे-घञर्थे क। मनःशिलायाम् मेदि०।

मन्ज मज्जने सक० ध्वनौ अक० भ्वा० पर० सेट्। मङ्क्ते अमङ्क्षीत् ममङ्क्तः।

मन्तु पु० मन-उनु तुट् च। १अपराधे २मनुष्ये ३प्रजापतौ च

मन्त्र पु० मत्रि-अच्। १गुप्तभाषणे, २देवादीनां साधनार्थं तन्त्रादुक्ते शब्दधारणार्थशक्तौ ३वेदादीनां साधनार्थं तन्त्रादुक्ते शब्दभेदे, ४वेदविभागभेदे च। वैदिकतान्त्रिकमन्त्रलक्षणादि ऋग्भेदभाष्योक्तं वह्निपु० २६अ० उक्तञ्च द्रष्टव्यम्।

मन्त्रकृत् त्रि० मन्त्रं तत्स्मरणं वा कृतवान् कृ-भूते क्विप्। १मन्त्रणाकारके २वेदमन्त्राणां स्मरणकर्त्तरि ३ऋषिभेदे पु० परिशिष्टखण्डे द्रष्टव्यम्।

मन्त्रजिह्व पु०मन्त्र एव जिह्वा आस्वादनसाधनं यस्य। अग्नौ हेमच०। मन्त्रेण दत्तहविरास्वादकत्वात्तस्य तथात्वम्।

मन्त्रणा स्त्री मन्त्रि-युच्। गुप्तभाषणे ल्युट्। तत्रार्थे न०।

मन्त्रदात् पु० दा-तृच् ह्रस्व०। गुरौ।

मन्त्रिन् पु० मन्त्रयते णिनि। धीसचिवे येन सह रहसि कर्त्तव्यमवधार्यते तस्मिन् अमात्ये अमरः।

मन्थ क्लेशे अक० विलोडने सक० भ्वा० पर० सेट्। मन्थति अमन्थीत्। मथ्यते। [मथ्यते।

मन्थ विलोडे क्या० पर० द्विक० सेट्। मन्थ्नाति अमन्थीत्।

मन्थ पु० मन्थ-करणे घञ्। १मन्थानदण्डे। "सक्तुभिः सर्पिषाभ्यक्तैः शीतवारिपरिप्लुतैः। नात्युष्णो नातिसान्द्रश्च मन्थ इत्यभिधीयते" इत्युक्ते २पेयभेदे, "चूर्णं चतुष्पले शीते क्षुण्णद्रव्यं पलं क्षिपेत्। मृत्पात्रे मन्थयेत् सम्यक् तस्माच्च द्विपलं पिबेत्" भावप्र० उक्ते पेयभेदे च। ३नेत्रमले धरणिः ४किरणे च शब्दच०। भावे घञ्। ५प्रालोडनादौ। [रत्नमा०।

मन्थज न० मन्थात् दधिमन्थनात् जायते जन-ड। नवनीते

मन्थन पु० मथ्यतेऽनेन करणे ल्युट्। १मन्थानदण्डे शब्दर०। भावे ल्युट्। २विलोडनादौ न०।

मन्थर न० मन्थ-अरच्। १कुसुम्भाम्। २कोषे ३फले, बाणे मन्थानदण्डे च पु०५वृक्षे ६वृद्धौ ७मन्दे च त्रि० मेदि० "मदर्थमन्दं शनैश्चालमन्थरः" नैष०। ८जडे शब्दर०। ९नीचे हेम०। १०सूचके विश्वः ११कैकेय्याः दास्यां स्त्री।

मन्थशैल पु० इत०। समुद्रमन्थनाय मन्थनदण्डरूपेण कल्पिते मन्दरपर्वते। [वाहत्वे राजनि०।

मन्थान पु० मन्थ-आनच्। १मन्थनदण्डे अमरः। २आरग्वधवृक्षे पु० शब्दर०।

मन्द त्रि० मदि-अच्। १मूर्खे २जडे ३अभाग्ये ४रोगिणि ५अल्पे ६खलतन्त्रे ७खले च हेम०। ८सदरते ९गतिभेदे १०हस्तिभेदे च पु० मेदि०। ११यमे त्रिका०। १२प्रलये च पु०अजयः। १३ज्योतिषोक्ते रविसंक्रान्तिभेदे १४यह०गतिभेदे च स्त्री।

मन्दग त्रि० मन्दं गच्छति गम ड। १मृदुगामिनि २यानिग्रहे पु० शनि, ज्ञानिपुरुष, हंस, गज, वरस्त्रियः इत्येते स्वभावान्मन्दगतयः। णिनि। मन्दगामिन् तत्रार्थे त्रि० स्त्रियां ङीप्।

मन्दट पु० मन्दं टीकते टीक-अ। पारिभद्रवृक्षे शब्दरत्ना०।

मन्दता स्त्री मन्दस्य भावः तल्। १आलस्ये २जाड्ये च "उच्चैरश्नति मन्दतामरसतामिति" चन्द्रालोकः।

मन्दर पु० मदि-अरन्। सप्तद्वीपमध्याने १पर्वतभेदे २मन्दारवृक्षे मेदि० ३स्वर्गे ४हारभेदे हेम० ५दर्पणे च शब्दर०। ६वञ्चके ७मन्दे च त्रि० मेदि०।

मन्दाकिनी स्त्री मन्दमञ्चति अक-णिनि। १स्वर्गगङ्गायां "स्वर्गे मन्दाकिनी नद्यां" पुराणम्। २संक्रान्तिभेदे च।

मन्दाक्रान्ता स्त्री "मन्दाक्रान्ता जलधिषड्गैर्मौ नतौ तो गुरू चेत्" वृ०र०उक्ते सप्तदशाक्षरपादके छन्दोभेदे।

मन्दाक्ष न० मन्दं मन्दं चक्षुश्चितमक्षि यस्मात् बहुव्री०। १लज्जायाम् अमरः। ६व०। २मन्दं चक्षुश्चितनेत्रे स्त्रियां ङीष्।

मन्दाग्नि पु० मन्दः पचने अल्पशक्तिकः अग्निः अनलः, ष यस्य सः। १देहस्थे अपचनशक्तिकेऽनले २तन्नैतो रोगभेदे च। तल्लिदानादि यथा "मन्दस्त्वल्पोऽथ विषमः समश्चेति चतुर्विधः। कफपित्तानिलाधिक्यात् तत्साम्याच्चाऽष्टरोऽनलः। विषमो वातजान् रोगान् तीक्ष्णः पित्तयुतान्नताम्। करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान्। समो समाग्नेरुचिता आत्मा सम्यग् विपच्यते। अल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः" भावप्र०।

मन्दार पु० मदि-आरक्। १स्वर्गस्थे देववृक्षभेदे २पारिभद्रवृक्षे च अमरः ३इक्षौ ४धूर्त्ते ५तीर्थभेदे ६अर्कवृक्षे च मेदि०।

मन्दिर न० मन्द्यतेऽत्र मदि-किरच्। १गृहे २पुरे च अमरः तस्य द्विलिङ्गत्वमित्येके। ३वसतौ मेदि० ४जानुपश्चाद्भागे च पु० हेमच०। [नीयकटे च (आदुर) मेदि०।

मन्दुरा स्त्री मदि-उरच्। १अश्वशालायाम् अमरः। २अयस्मन्दोदरी स्त्री मयदानवकन्यायां रावणभक्तिष्याम्। [अमरः

मन्दोष्ण न० मन्दमीषदुष्णम्। ईषदुष्णस्पर्शे २तद्वति त्रि०

मन्द्र पु० मदि-रक्। १वाद्यभेदे भेदर०। २मन्त्रीरध्वनौ च। अर्श आद्यच् ३तद्वति त्रि० अमरः।

मन्मथ पु० मनं मत् मन-क्विप् मथति अच् ६त०। १कन्दर्पे २कपित्थवृक्षे च अमरः ३कामक्रियायां मेदि०।

मन्मथालय पु० ६त०। १आम्रवृक्षे राजनि० २स्त्रीयोनिभेदे च।

मन्या स्त्री मेट-मन-क्यप्। ग्रीवायाः पश्चाद्देशस्थायां शिरायाम् अमरः।

मन्यु पु० मन-युच् न अनादेशः। १क्रोधे २दैन्ये ३क्रतौ ४क्लोधे च अमरः ५अहङ्कारे च शब्दर०।

मन्वन्तर न० मनूनामन्तरमवच्छायञ्जडुपलक्षितकालो वा। १स्वायम्भुवादिमनूनामधिकारे २तदुपलक्षिते काले च सत्ययुगमितवर्षाधिका एकसप्ततिचतुर्युगमिता (३११४४०-८०००) वर्षात्मकटयकाल इति पुराणम्।

मन्त्र गतौ भ्वा०पर०सक०सेट्। मन्त्रति अमन्त्रीत्।

मम अव्य०मा-बा०डम। षष्ठ्यर्थद्वयोः अस्मच्छब्दार्थे तेन ममत्वमिति ममतेति च सिध्यति।

ममता स्त्री मम भावः तल्। १दर्पे २अहङ्कारे हेम०। ३ममत्वम्बन्धे च। एवं ममत्वमप्यत्र। "तथापि ममतावर्त्ते" इति "ममत्वं मम राज्यस्य" इति च देवीभा०। [विषये स्त्रि०को०

ममापताल पु० मव आलच् धातोर्वस्य मः अपह्नवागमश्च।

मय गतौ भ्वा०आ०सक०सेट्। मयते अमयिष्ट।

मय पुंस्त्री० मय-अच्। १दक्षे २अन्तरे स्त्रियां टाप् ३दानवभेदे च मेदि०।

मयष्टक पु० मि+अच् मयं प्रक्षेपं स्तकते प्रतिबध्नाति स्तक-अच् पृषो० सत्वम्। वनस्तूपे अमरः। पृषो० मयष्टक तत्रार्थे पु०।

मयु पु० मि-उ। १किन्नरे अमरः २स्वर्गे मेदि०।

मयुष्टक पु० मिनोति मि-उ मयुः स्तक-अच् कर्म० पृषो० सत्वम्। वनस्तूपे पृषो०। मयुष्टकोऽप्यत्र।

मयूख पु० माङ्-ऊख मयादेशः। १रश्मौ २किरणे ३किरणायाम् अमरः ४शोभायां मेदि० ५कीले अजय०।

मयूर पुंस्त्री० मी-ऊरन्। स्वनामख्याते १खगभेदे स्त्रियां ङीष्। २मयूरशिखाहन्ते पु० अमरः। ३वर्षाभूकदम्बे ४अपामार्गे अमरः। ५तत्पक्षाङ्गने (ढँते) न० मेदि०।

मयूरग्रीवक न० मयूरग्रीवेव कन्। तत्रे (ढँते) राजनि०।

मयूरजङ्घ पु० मयूरस्य जङ्घेव मूलमस्य। श्योनाकवृक्षे राजनि०। [राजनि०।

मयूरतुत्थ न० मयूर इव तदर्णं तुत्थम्। तुत्थे (ढँते)

मयूरविदला स्त्री मयूरैर्विदल्यते मयूर इव विशिष्टदलमस्या वा। अम्बष्ठायाम् (आमरुल) वैद्यकम्।

मयूरशिखा स्त्री मयूरस्येव शिखाऽस्याः। अमानख्याते क्षुपभेदे मयूरचूडादयोऽप्यत्र। "नीलकण्ठशिखा कटी पित्तघ्नी ग्राहिसारजित्" भावप्र०।

मयूरिका स्त्री मयूरस्यादाकारो विद्यतेऽस्याः तदस्त्यर्थे ठन्। अम्बष्ठायाम् राजनि० (आमरुल)।

मरक पु० मृ-वुन्। १दैयिकभौतिकोपद्रवजन्ये प्राणिनाम् नाशमरणे (मड़क) २मारिभये हेमच०।

मरकत न० मरकं मारिभर्यं तरत्यनेन तॄ-क। हरिद्वर्णे-मणिभेदे (पाचा) अमरः। तल्लक्षणादि परिभिष्टे दृश्यम्

मरकतपत्री स्त्री मरकतामव हरिद्वर्णं पत्रमस्याः ङीप्। पाच्याम् राजनि०।

मरण न० म्रियतेऽनेन मृ-करणे ल्युट्। वयुसनाभाख्ये १विषे राजनि०। भावे ल्युट्। देहात्मनोर्विच्छेदरूपे, प्राणवायो-रुत्क्रमणरूपे वा २व्यापारभेदे।

मरत पु० मृ-अतच्। मरणे उणा०।

मरन्द पु० मरं मरणं ददाति भ्रमराणां जीवनहेतुत्वात् दो-क पृषो० सुम्। मकरन्दे शब्दर०।

मराकाली स्त्री मरो मरणकालिकं दुःखमिवाकाति याच्य-नेन मराको दुःखितः स इवाचति पर्य्याप्नोति दुःख-दानाय अच-अच् गौरा० ङीष्। दुःखिकायाम् (बिछाति) रत्नमाला।

मराल पु० मृ-आलच्। १राजहंसे अटा०। 'तत्रामरालय-मरालमरालकेशी' नैषधम्। २कच्छपे ३कारण्डवे ४अश्वे ५श्वेते ६दाड़िमीवने च मेदिनिः। ७चिक्कणे त्रि० त्रिका०।

मरि(री)च पु० मृ-इच पु० वा ङीषः। १मरिचनामख्याते वृक्षे अमरः। २कङ्कोलके राजनि०। [राजनि०।

मरि(री)चपत्रक पु० मरिचस्येव पत्रमस्य कप्। मरुवृक्षे

मरीचि पु० मृ-ईचि। सप्तर्षिमध्ये ब्रह्मणो मानसे ज्येष्ठे पुत्रे १ऋषिभेदे २कश्यपे च हेमच०। ३किरणे पुंस्त्री० अमरः।

मरीचिका स्त्री मरीचौ सूर्य्यकिरणे कमिव यत्र भ्रान्तौ। सूर्य्यकिरणे जलभ्रान्तौ, मरुमरीच्याम् अमरः।

मरु पु० मृ-उ। १पर्वते २निर्जलदेशे च अमरः ३शुष्कवृक्षवृक्षे भावप्र० ४देशभेदे च (मारुवार) हेमच०।

मरुज पु० मरुदेशे जायते जन-ड। १नदीनामगन्धद्रव्ये शब्दच०। २निर्जलदेशजाते त्रि०। ३मृगकर्कौ स्त्री जटि०।

मरुत् पु० मृ-उति। १वायौ अमरः २मरुद्वके भावप्र० ३देवे ४पक्षिपर्णे न० मेदि०। ५पृक्कायां स्त्री शब्दर०। स्वार्थे मरुदाद्यच्। मारुतोऽप्यत्र। पृषो० सुमः। मरुतोऽपि देवे च वाचौ ए व्याडिः। [शब्दच०।

मरुत्कर पु० मरुतमपानवायुं करोति क-अच्। राजमाषे

मरुत्त पु० चन्द्रवंश्ये १राजभेदे।

मरुत्तरु पु० मरादिव मरुमि तरु-हार्षे अच्। मरुवके भावप्र०

मरुत्पथ पु० ६त०। आकाशे। मरुदादयोऽप्यत्र।

मरुत्पाल पु०। मरुतो देवान् पालयति पाल-अच्। इन्द्रे

मरुत्वत् पु० मरुत् पालत्वेन हेतुत्वेन वाऽस्त्यस्य न पदत्वम् मस्य वः। १इन्द्रे अमरः। २कनूमति शब्दर०।

मरुत्सख पु० मरुतो वायोः सखा-टच्समा०। १इन्द्रे धरणिः। २यक्षे ३चित्रकवृक्षे च। [शब्दमाला।

मरुदान्दोल न० मरुतमान्दोलयत्यनेन करणे घञ्। व्यजने

मरुदिष्ट पु० मरुतां देवानामिष्टः। गुग्गुलौ राजनि०।

मरुद्भवा स्त्री मरुतो वायोर्भवति वर्द्धते भू-अच् ६त०। ताम्र-मूचीक्षुपे (खिराट) रत्नमा०। [खदिरे रत्नमा०

मरुद्रुम पु० मरोर्निर्जलदेशस्य द्रुमस्तत्रजातत्वात्। विट्-

मरुद्वाह पु० मरुत् वाह इव यस्य। १धूमे त्रिका० २यक्षे शब्दमा० ३चित्रकवृक्षे च। [अमरः।

मरुन्माला स्त्री मरुतो मालेव। (पिड़िङ्गाक) वृक्षायाम्

मरुभू पु० मरुर्भूमिर्यत्र (मारुवार) १देशभेदे त्रिका०। कर्म०। २निर्जलभुवि स्त्री। [भावप्र०।

मरुभूरुह पु०मरुभुवि निर्जलभूमौ रोहति रुह-क। करवीरे

मरुव पु० मरं निर्जलदेशं वाति कारत्वेन वा क। (नाग-दमनी) (मरुया) वृक्षभेदे। स्वार्थे क। तत्र वृक्षभेदे (मरुवा) स्वल्पपत्रतुलस्याम् अमरः। जम्बीरभेदे मरतः पुष्पप्रधाने (मरुयाफुल) वृक्षभेदे रत्नमा० व्याघ्रे राक्षौ भयानके च जटा०।

मरुसम्भवा स्त्री मरौ मरुमति सम्+भू-अच् ७त०। क्षुद्र-दुरालभायाम् राजनि० मरुस्थादयोऽप्यत्र।

मरूद्भवा स्त्री मरौ वर्द्धते वृद्ध+भू-अच् ७त०। १कार्पास्यां २क्षुद्रखदिरे २यवासे च राजनि०।

मर्क गतौ सौ० पर० सक० सेट्। मर्कति अमर्कीत् मर्कं।

मर्कट पुंस्त्री० मर्क-अटन्। १वानरे अमरः। स्त्रियां ङीष् २वर्णनाभे (माकड़सा) ३स्थावरविषभेदे हेमच० (फाड़-गिला) ४पक्षिभेदे च पुंस्त्री० त्रिका० स्त्रियां ङीष्। स्वार्थे क। मर्कटक तत्रैव संज्ञायां कन्। मत्स्यभेदे तैलभेदे च शब्दर०। [भावप्र०।

मर्कटतिन्दुक पु० कर्कटप्रियतिन्दुकः शाक०त०। कपीतनौ

मर्कटपिप्पली स्त्री० मर्कटप्रिया पिप्पली शाक०त०। कपि-नामनि राजनि०।

मर्कटप्रिय पु० ६त०। क्षीरवृक्षे (खिरह) शब्दमा०।

मर्कटवासस् पु० ६त०। (माकड़सालाल)कृमावस्त्रे शब्दर०

मर्कटशीर्ष न०मर्कटस्य वानरस्य शीर्षमिव। क्षिप्रुक्षे रत्नमा०

मर्कटास्य मर्कटस्य वानरस्यास्यमिव रक्तत्वात् । १ताम्रवर्णे हेम० २तद्वति त्रि० ।

मर्कटी स्त्री मर्कटोऽस्त्यस्याः अस्त्यर्थे अच्-गौ० ङीष् । १अपामार्गे २अजमोदायाम् राजनि० ३करञ्जभेदे (माकड़करमचा) अमरः । ४मर्कटीजाले पिङ्गलः ।

मर्कटीजाल न० छन्दोग्रन्थोक्ते मात्रावर्णप्रस्तावे लघुगुरुस्थानविशेषज्ञानाय चक्रभेदे वृ० र० ग्रन्थटीकायां दृश्यम् ।

मर्कर पु० मर्क-अरच् । १भट्टराजे (कँगुरिया) २भाण्डे च २सुरङ्गायां ४वन्ध्यायां स्त्रियाञ्च स्त्री विश्वः ङाप् ।

मर्च अर्चने चु० उभ० सक० सेट् । मर्चयति-ते अममर्चत्-त

मर्ज् पु० मृज-घञ् । १रजके २पीठमर्दे च हेमच० । ३शुद्धौ स्त्री मेदि० ।

मर्त्त पु० मृ-तन् । १मनुष्ये २भूलोके च । तत्र भवः यत् । मर्त्य मनुष्ये । [२चूर्णने च ।

मर्द्दन न० मृद-ल्युट् । १गात्रपादादिसंवाहने अमरः

मर्द्दल पु० मृद-घञ् मर्द्दं लाति ला-क । वाद्यभेदे (माँदल) । अमरः ।

मर्द्दित त्रि० चु० मृद-क्त । १चूर्णिते २अन्विते च भरतः ।

मर्ब गतौ भ्वा० पर० सक० सेट् । मर्बति अममर्बीत् ममर्ब ।

मर्म्मज्ञ पु० मर्म जानाति ज्ञा-क । तत्त्वज्ञे । मर्मविदादयोऽप्यत्र ।

मर्मन् न० मृ-मनिन् । १जीवनस्थाने राजनि० २सन्धिस्थाने ३तात्पर्य्ये च "अपि धर्मागममर्मपारगैरिति नैषधम् । "सन्निपातः शिरास्नायुसन्धिमांसास्थिसम्भवः । मर्म्मणि तेषु तिष्ठन्ति प्राणाः खलु विशेषतः" भावप्र० ।

मर्म्मर पु० मृ-अरन् सुट् च । १वस्त्रपर्णानां शब्दे (मड़मड़) इत्यव्यक्तशब्दे अमरः । २पीतदारुणि ३हरिद्रायाञ्च स्त्री मेदि० गौरा० ङीष् ।

मर्म्मस्पृश् त्रि० मर्म्म प्राणस्थानं स्पृशति स्पृश-क्विन् । अत्यन्तदे मर्मपीड़के अमरः । [दीर्घश्च । मर्मपीड़के ।

मर्म्माविध् त्रि० मर्म्म सन्धिस्थानं विध्यति विध-क्विप् पूर्व

मर्य्या अव्य० म्रियतेऽवधिर्यत्र मृ-यत् । १सीमायाम् स्त्री त्वमपि राय० । कर्त्तरि यत् । २मनुष्ये पु० । "मेषो मर्य्यां वपत्रसे" इति वेदमन्त्रः । "मर्य्यामनुष्या" इति भाष्यम् ।

मर्य्यादा स्त्री मर्य्यायां सीमायां दीयते दा-घञर्थे क मर्य्यादीयते वा परि+आ-दा-अङ् पृषो० पस्य मः । १न्यायव्यवस्थितौ अमरः । २सीमायाम् जटा० ३कूले च हेमच० ।

मर्व पूर्त्तौ भ्वा० पर० सक० सेट् । मर्वति अममर्वीत् ममर्व ।

मल धृतौ भ्वा० आ० अक० सेट् । मलते अमलिष्ट ।

मल पु० मृज्यते शोध्यते मृज-कल-टिलोपः । १पापे २पुरीषे लौहादीनां ३किट्टे अमरः । किट्टं कलङ्को मण्डूरादिर्दृढजातखेदश्लेष्मादिश्च । "वसा शुक्रं मज्जलस्यामूत्रं विट्कर्णविड्नखाः । श्लेष्मास्रं दूषिका स्वेदो द्वादशैते नृणां मलाः" स्मृतिः । ४कर्पूरे शब्दच० ५वातपित्तकफेषु च माधवः । ६दुष्टे ७सम्बन्धे च ।

मलघ्न पु० मलं विण्मलं हन्ति रेचयति हन-क । १शालूकलीकन्दे २नागदमन्यां स्त्री ङीष् राजनि० । ३मलनाशके त्रि० । क्विप् । मलहृत् तत्रार्थे त्रि० ।

मलदूषित त्रि० ३त० । मलिने अमरः ।

मलद्राविन् पु० मलं द्रावयति रेचयति द्रु-णिच्-णिनि । जयपाले राजनि० । तत्फलस्य रेचकत्वात् तथात्वम् ।

मलपू स्त्री मलं मलस्थानं पुनाति पू-क्विप् । काकोदुम्बरिकायाम् अमरः ।

मलभेदिनी स्त्री मलं भेदयति रेचयति भिद्-णिच्-णिनि । कटुकायाम् । (कटकी) राजनि० ।

मलमास पु० मलो दुष्टो मासः । "असावस्माद्दयं यत्र रविसंक्रान्तिवर्जितम् । मलमासः स विज्ञेयः" इत्युक्ते रविसंक्रान्तिशून्ये शुक्लप्रतिपदादिदर्शान्तरूपे चान्द्रे मासे । अधिमासशब्दे १२१८ पृ० दृश्यम् ।

मलय पु० मल-कयन् । दक्षिणस्थे १पर्वतभेदे हेम० । यत्र चन्दनजन्म तत्पर्वतान्तिकस्थे २देशभेदे ३जपवने ४श्रेष्ठार्थे चन्दनजन्म तत्पर्वतान्तिकस्थे २देशभेदे ३जपवने ४श्रेष्ठार्थे च मेदि० । ५नम्रनवने धरणिः । अष्टादशस्य द्वीपेषु ६द्वीपभेदे शब्दमा० ७ऋषभदेवस्य पुत्रभेदे भाग० ५।४ । ८ नै

मलयज पुंन० मलये पर्वते जायते जन-ड । १चन्दने । अमरः २मलयदेशजाते वाच्यौ पु० । ३तद्देशजाते त्रि० ।

मलया स्त्री मलयो देशोऽस्त्यस्याः कारणत्वेन अच् । १हरीतक्याम् (तेलाकुच) मेदि० ।

मलविनाशिनी स्त्री मलं तद्दोषं विनाशयति वि+नश णिच्-णिनि । शङ्खपुष्प्याम् राजनि० ।

मलाकर्षिन् पु० मलमाकर्षति आ+कृष-णिनि । भृङ्गे० । (भेतर) शब्दमा० । [न्याच्च संज्ञायामुपपदे-

मलाका स्त्री मल-आक । १कामिन्यां २दूत्यां ३जनि०

मलारि पु० मलस्य कलङ्कस्य किट्टादेररिः । सर्वज्वारहरे रसौषधे

मलिन त्रि० मल+अस्त्यर्थे इनन् । १मलयुक्ते अमरः । २कृष्णे च मेदि० । ४घोले न० शब्दच० । ५दोषे हेम०

ह्रटङ्गणे न० राजनि० (सोहागा)। इनि। मलीमत्यत्र
मलिनमुख पु० मलिनं मुखं यस्य। १वह्नौ तस्यादौ धूमाय मानत्वेन कृष्णत्वात् २चित्रकवृक्षे च। ३वानरे पुंस्त्री० मेदि०स्त्रियां ङीष् ४क्रूरे ५खले च त्रि०मेदि०६मेघे हेम०।
मलिम्लुच पु० मली वैदिककर्मानर्हत्वेन दुष्टः सन् म्लोचति गच्छति म्लुच-क। १मलमासे २वायौ ३अग्नौ ४चौरे च मेदि०। ५चित्रकवृक्षे। [कासीसे च मेदि०।
मलीमस त्रि०मल-ईमसच्। मलिने अमरः। २लौहे शुक्ल-
मल्ल क्षतौ भ्वा०आ०अक०सेट्। मल्लते अमल्लिष्ट अमल्ल।
मल्ल पु० मल्ल-अच्। १बाहुयुद्धकारके नियोद्धरि २पात्रे ३बलीयसि ४सत्स्वभेदे ५कपोले च मेदि० ६ब्रात्यक्षत्रियात् सर्ववर्णायां जाते जातिभेदे (माल) ७सङ्कीर्णजातिभेदे लेटात् श्रीधरकन्यायां जाते सङ्कीर्णवर्णे (माला)ब्रह्मवै०पु० ६तन्त्रवायां कुन्दकाराज्जाते सङ्कीर्णजातिभेदे च पुंस्त्री० स्त्रियां जातित्वात् ङीष्। ९देशभेदे स्वार्थे क मल्लक तत्रार्थे। संज्ञायां कन्। दन्ते हेम०।
मल्लक पु० मल्लयते श्रियतेऽत्र मल्ल-बुन्। १दीपाधारे पात्रे २नारिकेलफलजाते पात्रे च (माला) अमरः। ५प्रदीपे मधुरेशः ६स्वनासपुष्पे स्त्री अमरः टाप् अत इत्त्वम्।
मल्लज न० मल्ले देशे जायते जन-ड। मरिचे जटा०।
मल्लभू स्त्री मल्लक्रीड़नस्य बाहुयुद्धस्य योग्या भूः स्थानम्। देशभेदे। मल्लभ्यादयोऽप्यत्र।
मल्लयुद्ध ह्रत०। बाहुयुद्धे तत्प्रकारः भा० वि० १२अ०।
मल्लार पु०मल्ल इव वृक्षति वृ-अच्। १रागभेदे २वसन्त रागस्य रागिणीभेदे स्त्री ङीप् सङ्गीतदामो०।
मल्लि(ली) स्त्री मल्ल-इन् वा ङीप्। १मल्लिकायाम् शब्दमा० संज्ञायां कन्। मल्लिका कृष्णवर्णदेहे आलोहितचञ्चुचरणे २हंसभेदे पुंस्त्री० मल्लिकाच्चोऽप्यत्र।
मल्लिकापुष्प पु० मल्लिकाया इव पुष्पमस्य। १कुटजवृक्षे राजनि०। २करवीरवृक्षे च हेमच०। ह्रत०। ३मल्लिकायाः कुसुमे।
मल्लिपत्र न० मल्लिरिव पत्रमस्य। लताके त्रिका०।
मव बन्धे भ्वा०पर०सक०सेट्। मवति अमवीत् अमावीत्।
मव्य बन्धे भ्वा०पर०सक०सेट्। मव्यति अमव्यीत्।
मश ध्वनौ अक० कोपे सक० भ्वा० पर० सेट्। मशति अमशीत्-अमाशीत् मेशतुः।
मशक पु० मश-बुन्। १कीटभेदे (मशा) राजनि०। २चर्मजलपात्रभेदे ३रोगभेदे शब्दर०। तद्रोगलक्षणं यथा

"श्वेदनं स्थिरं चैव यत्तु गात्रे प्रदृश्यते। माषवत् कृष्णसंपन्नं मलिनं मशकं विदुः" गरु० पु० १७५अ०।
मशकिन् पु० मशकोऽस्यास्य इनि। उदुम्बरवृक्षे हेम०।
मशहरी स्त्री मशं मशकं हरति हृ-ट। मशकनिवारणार्थे वस्त्रनिर्मिते पदार्थे चतुष्क्यां जटा०।
मशि(सी) स्त्री मश(स) इन् वा ङीप्। (काली) १पत्रलेखनद्रव्ये त्रिका०। २नीलशेफालिकावृक्षे च शब्दर०।
मष वधे भ्वा०पर०सक०सेट्। मषति अमषीत् अमाषीत्।
मस परिणामे अक० परिमाणे सक० दि०पर०सेट्। मस्यति ह्रस्यित् अमसत् अमसीत् अमासीत्। पुषादिरयं तेन अमसदित्येवेति माधिनीयाः।
मसन न० मस-ल्यु। सोमराजीवृक्षे शब्दर०।
मसरा स्त्री मस-अरच्। मसूरे जटा०।
मसिका स्त्री मसीव इवार्थे कन्। नीलशेफालिकायाम् शब्दर०। [त्रिका०
मसि(सी)जल न०मसिसिक्तं जलम्। (काली) लेखनद्रव्ये
मसिधान न० मसिर्धीयतेऽत्राधारे धा-ल्युट्। मस्याधारे (दोयात) स्त्रीत्वमपि तत्र ङीप्।
मसिपण्य पु० मसिलक्षणलक्षितमक्षरमेव पण्यं विक्रेयं यस्य। लेखनोपजीविनि त्रिका०।
मसिप्रसू स्त्री मस्याः प्रसूरिव। १मस्याधारे। मसिः प्रसूरिव यस्याः। २लेखन्यां टारा०।
मसीना स्त्री मस-ईनन्। अतस्याम् (तिसि) शब्दच०।
मसु(सू)र पुंस्त्री०मस-उरच् ऊरच् वा। १कलायभेदे त्रिका० स्त्रियां गौरा० ङीष्। २वेश्यायां, ३व्रीहिभेदे च स्त्री० टाप् मेदि०।
मसूरविदला स्त्री मसूरस्येव विदलं यस्याः। १कृष्णत्रिवृति (कालतेओटी) अमरः। २शङ्खिन्यां लतायां रत्नमा०।
मसूरिका स्त्री मसूरेव इवार्थे कन्। १वसन्तरोगे २कुष्ठिन्याञ्च शब्दमा० "कटुस्तुलवणक्षारविरुद्धाध्यशनाशनैः। दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः। क्रुद्धप्रहेलणाच्चापि देहे दोषाः समुद्भताः। जनयन्ति शरीरेऽस्मिन् दुष्टरक्ते समुद्भताः। मसूराकृतिसंस्थानाः पिडकाः सूर्मसूरिकाः" भावप्र०।
मसूरी स्त्री मस-उरच् गौरा० ङीष्। १वसन्तरोगे मेदि० २तिक्षति, ३रक्षतिक्षति च राजनि०।
मसृण त्रि० मस-कृण, मसृ+कृण-क पृषो० वा। १स्निग्धे २अकर्कशे च। ३अतस्यां स्त्री मेदि०।

मस्क गतौ भ्वा० पर० अक० सेट् । मस्कति अमस्कीत् ।

मस्कर पु० मस्क-अरच् । १वंशे अमरः । २रम्भ्रयुक्तवंशे च राजनि० । भावे अरच् । ३गतौ ४घ्राणे च ।

मस्करिन् पु० मस्करो घ्राणं गतिर्वाऽस्यास्ति इनि, मा कर्त्तुं कर्म निषेद्धुं शीलमस्य मा+क-इनि "मस्करमस्करिणा-वितिं" निपा० । १परिव्राजके विधानेन स्वकर्मपरित्यागके भिक्षौ अमरः । "धारयन् मस्करिव्रतम्" भट्टिः २चन्द्रे च यद्यप्य० ।

मस्ज शाने तु० पर० अक० अनिट् । मज्जति अमाङ्क्षीत् । ओदित् क्त मग्नः । क्विप् अधु मज्जधुः ।

मस्त(क) न० मज्जति परिमाल्यनेन मस्ज-करणे त ।१उत्तमाङ्गे त्रि० । २शिरसि च स्वार्थे क । ३उत्तमाङ्गे पुंन० । [हेमच० ।

मस्तकशूल पु० ६त० । शिरःस्थितमज्जायाम् अस्थिक्षये

मस्तदारु न० मज्जति परिमाल्यनेन मस्तस्थं कर्म० । देवदारुवृक्षे भावप्र० । [वाम् यौवावावाम् यद्यप्य० ।

मस्तमूलक न० मस्तस्य मूलमिव इवार्थे कन् । शिरोधरा-

मस्तिष्क न० मस्क-क्तिन् मस्तिं पतिष्यतिमेदं तुष्यति तुष्क गतौ अद् पृषो० । मस्तकस्थे स्नेहाकारे पदार्थे (मगज) अमरः । मांसमस्तिष्कपङ्क प्राग्भारे" प्रबोधचन्द्रोदयम् ।

मह पूजायां भ्वा०पर०अक०सेट् । महति अमहीत् मेहतुः ।

मंह दाने भ्वा० आ० अक० सेट् दृदित् । मंहते अमंहिष्ट ।

मह पूजने अद० चु० उभ० सक० सेट् । महयति-ते अमम-हत्-त ।

मह पु० मह-घञर्थे क । १उत्सवे सततानन्दजनकव्यापारे अमरः । २तैलसि. मेदि० । ३यज्ञे पु०४महिषे च पुंस्त्री० हेमच० ।

महत् त्रि० मह-अति । १विपुले २दीर्घे च स्त्रियां ङीप् महती ३राज्ञे न० मेदि० । ४साङ्ख्योक्ते महत्तत्त्वे पु० "प्रकृतेर्महानिति" स्मृतिः । "मनो महान् मतिर्ब्रह्मा" इत्युक्ते ५स्थिरत्वगर्भलिङ्गदेहे या० भा० सर्वनामस्थाने तुमर्हीवौ महान् महान्तौ एकार्थशब्दे परे समासे तस्याने आ । महाधनम् ।

महती स्त्री मह-अत+गौरा० ङीष् । १वीणाभेदे अमरः २नारदवीणायाम् भरतः । "अवेक्षतार्यं महतीं सुदर्शनः" माघः । ३दीर्घायां ४वार्त्ताक्यां ५विपुलायां स्त्रियाञ्च राजनि० । समासे तीस्थाने आ । महत्या घाटः महाघाटः इत्यादि ।

महत्तत्त्व न० कर्म० । सांख्योक्तप्रकृत्यादिचतुर्विंशतितत्त्वमध्ये प्रकृतिकार्य्ये अहङ्कारादिकारणे निश्चयात्मकवृत्तिविशिष्टे तत्त्वभेदे । [भेदे च ।

महर् अव्य० मह-अरु । १ऊर्ध्वस्थे चतुर्थे लोके २व्याहृति-

महर्लोक पु० कर्म० । भूरादिषु ऊर्ध्वस्थे सप्तलोकान्तर्गते चतुर्थे लोके

महर्षि पु० कर्म० । परमर्षिशब्दार्थं वेदव्यासादौ त्रिका० । "ऋषिर्हिंसागतौ धातुर्विद्यात्सत्यतपःस्तुतेः । एष सत्यि-यो यस्माद् ब्राह्मण्यञ्च ततस्त्वृषिः । विश्रुतिसम-काख्यन्तु वृद्धा व्यक्तऋषित्वयम् । ऋषते परमं यस्मात् परमर्षित्वतः स्मृतः । गत्यर्थादृषतेर्धातोर्नाम निर्वृत्ति-कारकम् । यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता । तेनेश्वराः स्वयम्भूता ब्रह्मणो मानसाः सुताः । विवर्द्ध-मानैस्तैर्वृद्धा महान् परिगतः परम् । यस्मादृषिः पर-त्वेन महांस्तस्मान् महर्षयः" मत्स्यपु०१२०अ० तल्लक्षणम् ।

महल्लिक पु० "सुष्कस्फुग्योऽनुषस्यो यः स्त्रीस्वभावो मह-ल्लिकः यद्भावोक्ते क्लीबपुररस्कभेदे (खोजा) ।

महस् न० मह-असुन् । १तेजसि २उत्सवे च मेदि० ३यज्ञे यद्यप्य० । [यद्यप्य० । २स्त्रीलिङ्गे यद्यप्य० ।

महा स्त्री मह-अच् । (गोरचनाख्यायाम्) १गोपवल्लाम्

महाकाकोलिका स्त्री महत्तु कर्कटकस्यस्य मूल्या कृत्रि ङीष् (फल्लिमनसा) तत्सभेदे यद्यप्य० । [३मूत्रके च अमरः

महाकाल पु० कर्म० । १यमे अमरः । २राजमल्लागस्त्यौ

महाकालिक पु० कर्म० । १शिवभक्ते त्रिका० । २रक्तचन्दने ४चाण्डाल्यमल्लके राजनि० ।

महाकच्छ पु० कर्म० । कच्छभेदे (कॉछाकरकचा) राजनि०

महाकर्णिकार पु० कर्म० । कर्णिकारभेदे (दोंदाल) राजनि०

महाकाय पु० ६त० । १शिवानुचरभेदे अस्त्रिदि त्रिका० २कुलिङ्गे पुंस्त्री० स्त्रियां टाप् । ३विष्णुदेवभक्तभेदे त्रि० । कर्म० । ४स्थूलशरीरे पु० ।

महाकार्त्तिकी स्त्री कार्त्तिकीमधिकृत्य "प्रजापत्यं यदाक्षत्रं तद्यैतस्यां नराधिप ! । सा महाकार्त्तिकी ज्ञेया" इ-क्तायां रोहिणीनक्षत्रयुक्तायां कार्त्तिकपौर्णमास्याम् ।

महाकाल पु० कर्म० । १अनवच्छिन्ने काले, २शिवे च "महाकालेन च समम्" कालिकाध्यानम् । (माकाल) ३लताभेदे रत्नमा० । ४भैरवभेदे च "महाकालं यजेद्देव्या दक्षिणे भूम्यवर्णकम्" इति कालीतन्त्रम् ।

महाकाव्य न० कवेः कर्म काव्यं कर्म० । सर्गबन्धरूपे आधु-निकसर्गबन्धे श्रव्यभेदे तल्लक्षणं साहित्यदर्पणे ६प० दृश्यम्

महाकुम्भी स्त्री महतो कुम्भीव (पानात्) कटफले राजनि०।

महाकुल न० कर्म०। "दशपुरुषविख्यातं श्रोत्रियाणां महाकुलम्" इति मनुनोक्ते दशपुरुषावधिवेदाध्यायिवंशे।

महाकुलीन त्रि० महाकुले भवः खच्। महाकुलोद्भवे।

महाकोशफला स्त्री कर्म०। देवदालीलतायाम् राजनि०।

महाकोषातकी स्त्री कर्म०। हस्तिघोषायाम् राजनि०।

महागन्ध न० महान् गन्धोऽस्य। १हरिचन्दने २वोले च राजनि०। ३जलवेतसे वृक्षे पु० शब्दच०। ४नागबलायां ५कवितायां च स्त्री-राजनि०। ६चाषपक्षायां स्त्री हेम०

महागुरु पु० कर्म०। "त्रयः पुरुषस्यातिगुरवो भवन्ति पिता माता चाचार्य्यश्च" स्मृत्युक्ते पुरुषस्य १पित्रादौ "पतिरेकोगुरुः स्त्रीणां" मित्युक्ते दत्तकन्यायाः २भर्त्तरि स्वदत्तकन्यायाः पितरि, मातरि च। "महागुरुनिपाते च कार्य्यं किञ्चिच्चराचरेत्" स्मृतिः।

महागुल्मा स्त्री महान् गुल्मोऽस्याः। शोणवल्ल्याम् राजनि०

महागुहा स्त्री महती गुहेव मूत्रमस्याः। वृश्चिकल्याम् राजनि०। [ङीष्। २दीर्घग्रीवायुक्ते त्रि० स्त्रियां टाप्।

महाग्रीव पुंस्त्री० महान् ग्रीवाऽस्य। १उष्ट्रे राजनि० स्त्रियां

महाघोषा स्त्री घुष्यते कर्मणि घञ् कर्म०। १कर्कटशृङ्ग्याम्। (काकड़शिङ्गे) मेदि०। २कुन्दवृक्षे शब्दच०। महान् घोषोऽस्य व्यक्तो वा। ३विपुलशब्दवति त्रि०। ४वृक्षे न० मेदि०।

महाङ्ग पुंस्त्री० महदङ्गमस्य। १उष्ट्रे स्त्रियां ङीष्। २गोचुरके ३रक्तचित्रके च राजनि०। ४विपुलावयवयुते त्रि०। कर्म०। ५विपुलाङ्गे न०।

महाच्छद पु० महान् छदोऽस्य। देवताड़वृक्षे रत्नमा०।

महाच्छाय पु० महती छाया यस्य। १वटवृक्षे राजनि०। २विपुलच्छायायुक्ते त्रि०। [राजनि०

महाच्छिद्रा स्त्री महत् छिद्रमस्याः। महामेदायाम्

महाजटा स्त्री महती जटा यस्याः। १वटवृक्षजटावृक्षे राजनि०। २विपुलजटायुते त्रि०। कर्म०। ३वृक्षत्वक्, जटायाम् स्त्री।

महाजन पु० कर्म०। वेदशास्त्रेषु श्रद्धावति जने। "महाजनो येन गतः स पन्थाः" भा० व० यक्षप्रश्नः।

महाज(म्बु)म्बू स्त्री कर्म०। राजजम्बाम् रत्नमा०। दीर्घान्तः भावप्र० "राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम्"।

महाजाली स्त्री कर्म०। १पीतवर्णघोषायाम् अमरः। २राजघोषातक्यां राजनि०।

महाज्यैष्ठी स्त्री "ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा। पूर्णिमा रविवारेण महाज्यैष्ठी प्रकीर्त्तिता" उक्तलक्षणायां ज्यैष्ठपौर्णमास्याम्। "महाज्यैष्ठ्यां तु यः पश्येत् पुरुषः पुरुषोत्तमम्" प्रा०त०लक्षणान्तरं दृश्यम्

महाज्योतिष्मती स्त्री कर्म०। (वड़मालकाङ्गनी) लतामेदे राजनि०। [२महति प्रभौ त्रि०।

महाढ्य पु० महत्या उत्सवेनाढ्यः। १कदम्बे राजनि०। कर्म०।

महातरु पु० कर्म०। १क्षुद्रहीवृक्षे हेमच०। २विपुलवृक्षे च।

महातल न० कर्म०। अधःस्थेषु पातालेषु मध्ये पञ्चमे पाताले शब्दमा०। [देख्यां हेमच०।

महातारा स्त्री कर्म०। तन्त्रोक्ते १तारिणीभेदे २जिन-

महातालो स्त्री कर्म०। विपुलतालीभेदे राजतालयाम् राजनि०

महातिक्त पु० कर्म०। १निम्बवृक्षे राजनि०। २अतिशयतिक्तरसयुते त्रि०। ३यवतिक्तायां स्त्री राजनि०। ४पाठायां शब्दमा०। [२अतितीव्रे त्रि०।

महातीक्ष्णा स्त्री कर्म०। १भल्लातवृक्षे (भेला) राजनि०

महातेजस् पु० महत् तेजोऽस्य। १पारदे राजनि०। २अतितेजस्विनि त्रि०। ३कार्त्तिकेये हला०। ४वह्नौ पु० शब्दच०। ५चित्रकवृक्षे च। [महाग्नये।

महात्मन् न० महान् आत्मा स्वभाव आशयो वा यस्य।

महादान न० कर्म०। विनायकादिस्वस्वजपाङ्के ब्रह्मपुरुषादिषोड़शदाने "अथातः संप्रवक्ष्यामि महादानस्य लक्षणम्" इत्युपक्रम्य "आद्यन्तु सर्वदानानां तुलापुरुषसंज्ञकम्" इत्यादिना षोड़शदानान्यभिधाय "विनायकादिग्रहलोकपालवस्वष्टकादित्यमरुद्गणानाम्। ब्रह्माच्युतेशार्कवनस्पतीनां स्वमन्त्रतोहोमचतुष्टयं स्यात्। अन्यानि सूक्तानि तथैव चैषामनुक्रमेणापि यथास्वरूपमित्युक्तं मात्स्ये। विस्तरस्तु मत्कृततुलादानादिपद्धतौ द्रष्टव्यः।

महादारु न० कर्म०। देवदारुवृक्षे अटा०।

महादेव पु० कर्म०। "ब्रह्मादीनां सुराणाञ्च मुनीनां ब्रह्मवादिनाम्। तेषां महत्त्वात् देवोऽयं महादेवः प्रकीर्त्तितः" इत्युक्ते "महती पूजिता विश्वे मूलप्रकृतिरीश्वरी। तस्याः देवः पूजितश्च महादेवस्ततः स्मृतः" इत्युक्ते च शिवे। [महत्त्वम्। २वृक्षवृक्षे च।

महाद्रुम पु० कर्म०। १अश्वत्थवृक्षे शब्दच०। तस्य विष्णुरूपत्वात्

महाधन न० महत् मूल्यरूपं धनमस्य। १बहुमूल्ये अमरः। २सुवर्णे ३सिद्धके च मेदि०। ४मनोज्ञवृक्षे हेमच०

५क्रमौ पु० शब्दरत्नावली। ६अतिशयधनयुते त्रि०।

महाधातु पु० कर्म०। स्वर्णे शब्दच०। [न्याञ्च।

महानदी स्त्री। १ओड्रदेशस्थे नदीभेदे २सप्तद्वगामिन्यां

महानन्द पु० महान् अतिहृत् १आनन्दो यत्र। १मोक्षे कृला०कर्म०। २अतिशयानन्दे पु० "माघमासस्य या शुक्ला नवमी लोकपूजिता। महानन्देति सा प्रोक्तेत्युक्तायां ३माघशुक्लनवम्यां ४सुरायां राजनि० ५नदीभेदे च स्त्री।

महानन्दि पु० कवौ चलान्तकरस्य महापद्मनन्दभेदस्य पितरि।

महानवमी स्त्री कर्म०। आश्विनशुक्लमधिकृत्य "ततोऽतु नवमी यस्मात् सा महानवमी स्मृता" इत्युक्तायाम् आश्विनशुक्लनवम्याम्।

महानस न० महदनं संज्ञायाम् अच्। पाकस्थाने अमरः।

महानाटक न० दृश्यकाव्यनाटकभेदे "एवदेव यदा सर्वैः पताकास्थानकैर्युतम्। अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे"। सा ६ प०। २तन्नामनाटके च।

महानाद पुंस्त्री० महान् नादोऽस्य। १गजे स्त्रियां ङीष्। २गर्जन्मेघे मेदि० ३सिंहे पुंस्त्री० स्त्रियां ङीष् ४कर्णे च हेमच०। ५चक्रे पुंस्त्री० राजनि० स्त्रियां ङीष्। ६कण्ठवाद्ये पु० त्रिका०। कर्म०। ७महति शब्दे च।

महानिद्रा कर्म०। मरणे जटा० तत्र पुनः प्रत्युत्थानाभावात्तथात्वम्।

महानिम्ब पु० कर्म०। (घोडानिम) वृक्षभेदे रत्नमा०।

महानिशा स्त्री "महानिशा तु विज्ञेया मध्यमप्रहरद्वयम्" इत्युक्ते रात्रेर्मध्यमप्रहरद्वये।

महानील पु० कर्म०। १भृङ्गराजे २मणिभेदे "यत्तु वर्णस्य भूयस्त्वात् नीरे शतगुणे स्थितः। नीलतां तनुतात् सर्वं महानीलः स उच्यते" गरुड़पु० ७२६अ०। ३नागभेदे मेदि० ४महाजम्बौ च राजनि० ५तन्नामभेदे न०। ६नीलापराजितायां स्त्री राजनि० गौरा० ङीष्। [शब्दर०।

महानुभाव पु० महानुभाव आशयो यस्य। महाशये

महापञ्चमूलक न० बृहत्पञ्चमूले। "बिल्वोऽग्निमन्थः श्योनाकः काश्मर्यः पाटला तथा। सर्वैस्तु मिलितैरेतैः स्यान्महापञ्चमूलकम्" राजनि०।

महापञ्चविष "शृङ्गी च कालकूटश्च मुस्तको वत्सनाभकः। शङ्खकर्णीति योगोऽयं महापञ्चविषाभिधः" इत्युक्ते पञ्चविधे विषे।

महापत्रा स्त्री महत् पत्रमस्याः। अजाजम्बूवृक्षे रत्नमा०।

महापथ पु० कर्म०। १राजमार्गे हेमच०। २क्षितावुत्तरस्थे २स्वर्गारोहणपथे च।

महापद्म पु० कर्म०। १अष्टनागमध्ये नागभेदे हेमच० २कुबेरस्य निधिभेदे जटा० "अर्बुदमब्जं खर्वनिखर्वमहापद्मकोटि" लीलावत्युक्तायाम् १०युतकोटिसंख्यायां ४तत्संख्यान्विते न० ५तत्पभेदे महानन्दिसुते च ६शुक्लपक्षे रत्नमा०।

महापातक न० "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुस्तत्संसर्गश्च पञ्चमः" इत्युक्तेषु पञ्चसु पातकेषु महापापमध्यत्र।

महापिण्डीतक पु० कर्म०। कृष्णवर्णे विपुलमदनवृक्षे राजनि०

महापीलु पु० कर्म०। मधुपीलौ राजनि० अतिमधुरत्वात्तस्य हि महत्त्वम्।

महापुराण न० न० "सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम्। कर्मणां वासना वार्त्ता मन्वन्तराञ्च क्रमेण च। वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम्। सत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक्। महापुराणं विज्ञेयमेकादशकलक्षणम्" ब्रह्मवै० ज० १३२अ० इत्युक्तलक्षणे व्यासप्रणीते पुराणभेदे।

महापुरुष पु० कर्म०। १श्रेष्ठे नरे २नारायणे च। "वन्दे महापुरुष! ते चरणारविन्दमि"ति भागवतम्।

महापुरुषदत्ता पु० महापुरुषस्य विष्णोः दत्ता इव महत्त्वात् मूलान्यस्य। शतमूल्याम् रत्नमा०।

महापुष्पा स्त्री महत् पुष्पमस्याः, पक्षे मेघया वृहत् वा पुष्पं यस्याः। अपराजितायाम् शब्दच०।

महाप्रलय पु० कर्म०। ब्रह्मणो दिनावसाने जायमानः सर्वभूतक्षयः प्रलयः तस्यैव स्वमानेन शतवर्षावसाने जायमानस्तु महान् प्रलयः १तस्मिन् २तदुपलक्षिते जन्यदृश्यानधिकरणीभूते काले च। ३अन्यभावानधिकरणीभूते काले इत्यन्ये। तत्प्रमाणाभाव इति नव्यनैयायिकाः।

महाप्रसाद पु० "पादोदकञ्च निर्माल्यं नैवेद्यञ्च विशेषतः। महाप्रसाद इत्युक्ता आद्यं विष्णोः प्रयत्नतः" इत्युक्ते १दैवनैवेद्यादौ २विपुलप्रसन्नतायाञ्च।

महाप्राण पुंस्त्री० महान् बहुकालस्थायित्वात् श्रेष्ठः प्राणो यस्य। १द्रोणकाके राजनि० स्त्रियां ङीष् कर्म०। २पौरोरणस्य वाह्यप्रयत्नभेदे स च वर्ग्यद्वितीयचतुर्थैवर्णानां यणश्चानासञ्चारणप्रयत्नः तेषाञ्चारणे हि प्राणवायोर्बाहुल्येन प्रयास इति तेषामपि महाप्राणत्वमुपचारात्।

महाफल पु० महत् फलं यस्याः वृक्षस्य। [पृथिव्याम्

वृक्षे रत्नमा०। २इन्द्रवारुण्यां (राखालशशा) स्त्री जटा०।

महाबल पु० महत् बलं यस्य। १वायौ २दशबले बुद्धे च त्रिका० ३महाबलयुते त्रि०। महत् बलं यस्मात् ५व०। ४सीसके न० हेमच०। ५पीतवाद्यालके स्त्री रत्नमा०।

महाभारत पु० न० "चत्वारश्चैकतो वेदा भारतञ्चैवमेकतः। पुरा किल सुरैः सर्वैः समस्य तुलया धृतम्। चतुर्भ्यः सरहस्येभ्यो वेदेभ्योऽप्यधिकं यदा। तदा प्रभृति लोकेऽस्मिन् महाभारतमुच्यते। महत्त्वात् भारतत्वाच्च महाभारतमुच्यते" इत्युक्तलक्षणे व्यासप्रणीते लक्षश्लोकात्मके ग्रन्थभेदे भारतशब्दे दृश्यम्।

महाभीता स्त्री कर्म०।१लज्जालुलतायाम् शब्दच०स्पर्शमात्रेण हि सङ्कोचेन तस्या अतिभीतत्वम्। २अतिभीते त्रि०।

महाभूत न० कर्म०। सर्वेषां पञ्चात्माकतापाप्तानां स्थूलतापत्तेषु बृहत्सु पृथिव्यप्तेजोवाय्वाकाशेषु १पञ्चसु भूतेषु। "तं वेधा विदधे नूनं महाभूतसमाधिना" रघुः। २परमेश्वरे पु०"तस्यैतस्य महाभूतस्य निःश्वसितमेतत् यदृग्वेदः" इत्यादि श्रुतिः। [मत्स्यपु०।

महाभूतघट पु० षोड़शमहादानान्तर्गते षोड़शे महादाने

महाभृङ्ग पु० कर्म०। १नीलभृङ्गराजे राजनि०। [हेमच०।

महामनस् त्रि० महदुदारं मनस्तदुव्यापारोऽस्य। महाशये।

महामात्र पु० "मन्त्रे कर्मणि भूषायाम् चित्ते माने परिच्छदे मात्रा च महती येषां महामात्रास्तु ते स्मृताः" इत्युक्ते प्रधानामात्ये।

महामाया स्त्री कर्म०। अन्यस्मिन् अन्यधर्मारोपभावो हि माया सर्वजगन्मूलत्वात्तस्या महत्त्वम्। १जगत्कारणभूतायाम् अविद्यायां २तदधिष्ठात्र्यां दुर्गायाञ्च "महामाया हरेश्चैषा यया संमोह्यते जगत्" देवीमा०।

महामाष पु० कर्म०। राजमाषे (बरबटी) शब्दच० माषापेक्षया तस्य हि महत्त्वात्तथात्वम्।

महामूल पु० महत् वीर्य्यकारित्वात् श्रेष्ठं मूलमस्य। राजपलाण्डौ राजनि०।

महामृग पुंस्त्री०महान् मृगः पशुः।१गजे हेमच०शरभे च राजनि०तयोर्हि पशुषु महत्त्वात् तथात्वम्। स्त्रियां ङीष्

महामेद पु० स्त्री द्व०। वैद्यकप्रसिद्धाष्टवर्गोक्ते ओषधिभेदे रत्नमाला। तत्रार्थे स्त्री राजनि०। "महामेदाभिधः कन्दो योरत्नादौ प्रजायते। शुक्लार्द्रकनिभः कन्दो लताजातः सपाण्डुरः। महामेदाभिधो ज्ञेयः" भावप्र०।

महामोह पु० महान् मोहः ज्ञानिद्वेषको वस्तुतोऽनिष्टेऽपि रागः। १संसारतद्विषयकारणरूपेऽज्ञानभेदे "तमोऽविवेको मोहः स्यादन्तःकरणविभ्रमः। महामोहस्तु विज्ञेयो दाम्यभोगसुखैषणा" इत्युक्ते २मैथुनादिसुखभोगेच्छारूपे अन्तःकरणवृत्तिभेदे च। वैषयिकसुखस्य वस्तुतोऽनिष्टत्वात् तथात्वम्। "दशविधो महामोहः" सा० का०। शब्दादिषु पञ्चसु दिव्यादिव्यतया दशविधेषु विषयेषु रञ्जनीयेषु राग आसक्तिः" त० कौ० उक्ते २दशविधविषयरागे च। [१तद्युक्ते पु०।

महाम्ल न० कर्म०। १अत्यम्ले २तिन्तिड़ीफले च जटा०।

महायज्ञ पु० कर्म०। नित्यं गृहस्थकर्त्तव्ये वेदाध्ययनाग्निहोत्रपितृतर्पणभूतबलिकर्मातिथिपूजनरूपेषु पञ्चसु कर्मसु।

महारजत न० कर्म०। १काञ्चने २धुस्तूरे च अमरः। तस्य हि रञ्जकत्वात् महत्त्वम्, कर्म०। १दृढद्रव्ये च।

महारजन न० रजत्यनेन ल्युट् कर्म०। १कुङ्कुमाख्ये अमरः २स्वर्णे च मेदि०।

महारथ पु० "एकादश सहस्राणि योधयेद्यस्तु धन्विनाम्। शस्त्रास्त्रप्रवीणश्च विज्ञेयः स महारथः" इत्युक्ते योधभेदे

महारस पु० द्व०। १खर्जूरे २कपेरुणि ३कोषकारे मेदि० ४दृढो पु०काङ्क्षिके न०जटा०। कर्म० ५पारदे पु० राजनि०। "दरदः पारदं शस्यो वैक्रान्तं कान्तमभ्रकम्। माक्षिकं विमलञ्चेति स्मृतेऽष्टौ महारसाः" राजनि० उक्तेषु ४दरदादिषु पु०।

महाराज(जि)क पु० महान् चासौ राजते यौ० पृषो० इत्वं वा। विंशत्यधिकशतद्वयसंख्याते गणदेवभेदे।

महाराजद्रुम पु० कर्म०। आरग्वधे (सोन्दाल) राजनि०।

महारात्रि स्त्री "ब्रह्मणश्च निपाते च महाकल्पो भवेन्नृप!। प्रकीर्त्तिता महारात्रिः" इत्युक्ते महाकल्पात्मके १महाप्रलये "अर्द्धरात्रात् परं यत्तु मुहूर्त्तद्वयमुच्यते। सा महारात्रिरुद्दिष्टा" तन्त्रोक्ते अर्द्धरात्रोपरि मुहूर्त्तद्वयात्मके २रात्रिकाले।

महाराष्ट्र पु० कर्म०। (महाराष्ट्रा) १देशभेदे। तद्देशः कारणत्वेन अस्त्यस्या अण् मौरा०ङीष्। २जलपिप्पल्याम् ३शाकभेदे च स्त्री राजनि०। [शुभे न०।

महारिष्ट पु० कर्म०। १गिरिजाते निम्बभेदे राजनि०। २अत्य-

महारोग पु० कर्म०। "उन्मादो राजयक्ष्मा च अपस्मारस्तथैव च। मधुमेहश्वाश्मरी च तथोदरभगन्दरौ। इत्येतेऽष्टौ महारोगा महापातकसम्भवाः" इत्युक्तेषु महापातकजन्येषु उन्मादादिषु रोगेषु। (अपस्मारः अपस्मारशब्दे)

महारौरव पु० कर्म०। "महारौरवसंज्ञस्तु ऊर्ध्वोर्ध्वस्थाश्च-संपुटे। धम्यते खदिराङ्गारैः पच्यते कालमक्षयम्" इत्युक्ते नरकभेदे वह्निपु०।

महार्घ त्रि० महानर्घो मूल्यं यस्य। बहुमूल्ये त्रिका०।

महार्णव पु० कर्म०। महासमुद्रे।

महार्द्रक न० कर्म०। वनार्द्रके राजव०।

महालय पु० महान् आत्मनिको लयो यस्य। १परमात्मनि २तीर्थस्थाने ३विहारे ४कन्यास्थरविक्रमासकृष्णपक्षे न०। "तस्यां दद्यात् न चेद्दत्तं पितृणां वै महालये" इति भविष्यपु०। कर्म०। ५हरहदालये।

महालक्ष्मी स्त्री कर्म०। चण्ड्यादितीयचरितदेवतारूपे "सैवै-रिभर्दनीमिह महालक्ष्मीं सरोजास्यताम्" इत्युक्त-लक्षणे अष्टादशभुजान्विते १दुर्गाशक्तिभेदे तन्त्रोक्ते २लक्ष्मीभेदे च।

महालीलसरस्वती स्त्री नारिणीभेदे मन्त्रसा०।

महालोध्र पु० कर्म०। लोध्रभेदे (चाटिया लोध) रत्नमा०।

महावरा पु० वृणोति विस्तृणाति वृ-अच् कर्म०। दूर्वायाम् शब्दर०। [तारभेदे।

महावराह पु० कर्म०। हरहुवराहरूपधारिणि भगवद्व-

महासरोह पु० महान् अवरोहोऽस्य। वटवृक्षे राजनि०।

महावल्ली स्त्री कर्म०। माधवीलतायाम् शब्दच०।

महावाक्य न० कर्म०। परस्परसंबद्धार्थके १वाक्यसमुदायरूपे एकवाक्ये "वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते" मीमांसकाः। वेदान्तोक्ते २ब्रह्मविद्याप्रतिपादके तत्त्व-मस्यादुपनिषद्वाक्ये ३दानादौ क्रमिलापवाक्ये च।

महाविद्या स्त्री कर्म०। "काली तारा महाविद्या षोड़शी भुवनेश्वरी। भैरवी छिन्नमस्ता च विद्या धूमावती तथा। बगला सिद्धविद्या च मातङ्गी कमलात्मिका। एताः दश-महाविद्याः" इत्युक्तासु कालीआदिषु दशसु देवीषु।

महाविष पु० ह्रस्व०। हिंस्रसर्पे जटा०।

महाविषुव न०। रवेर्मेषसंक्रमणे। तत्संक्रमणञ्च स्वरूपतः संक्रमणं प्रभापुञ्जस्य संक्रमणं वा। तत्र प्रभापुञ्जसंक्र-मणमयनांशानुसारेण अष्टमासाधिकषट्षष्टिवृत्तरैरैकै-कांशं परित्यज्य ततः पश्चात्पश्चात्तरादौ स्थाने भवति इदानीं च पश्चादयनं पूर्वायने तु पूर्वपूर्वतरादौ स्थाने भविष्यति। इत्थंतस्त्रञ्चलनियतस्थानत्वात् स्वरूपसंक्रमस्तु स्थिरः सर्वदैकस्थाने जायमानत्वात्। अयनसंक्रान्तिशब्दे दृश्यम्।

महावीचि पु० नास्ति वीचिः सुखं यत्र स वीचिः कर्म०। १सुखरहिते, "यत्र कल्लोलेन नीयते" इत्युक्ते २नरकभेदे च।

महा(वी)वीर पु० कर्म०। १गरुडे २हनुमति ३सिंहे ४यज्ञाग्नौ ५वज्रे ६श्वेतसरङ्के ७सज्जालखगे च मेदि०। ८शेषनिम्बे च ९कोकिले हेम०। १०धनुर्द्धरे ११एकवीरदत्ते राजनि० १२महाशूरे पु० १३क्षीरकाकोलीवृक्षे स्त्री रत्नमा०। १४यज्ञसाधने कृष्णमये पात्रभेदे तन्निर्माणविधिः कात्या०श्रौ०२६।१ सूत्रादौ दृश्यः।

महा(वी)वीर्य्य पु० ह्रस्व०। १वाराहीकन्दे राजनि०। २परमा-त्मनि च शब्दर०। ३अतिबलयुते त्रि०। ४वनकार्पास्यां स्त्री राजनि०। ५संज्ञायां सूर्य्यपत्न्याञ्च स्त्री त्रिका०।

महावृहती स्त्री कर्म०। वार्त्ताक्याम् त्रिका०।

महावृक्ष पु० कर्म०। १क्षुद्रीवृक्षे हला०। २वृहत्तरौ च।

महाव्याधि पु० कर्म०। महारोगे कुष्ठादौ रोगे।

महाव्याहृति स्त्री कर्म०। वैदिके भूर्भुवःस्वरात्मके मन्त्रभेदे

महाव्रण न० कर्म०। (नालिघा) दुष्टव्रणे।

महाव्रत न० कर्म०। १अतिशयव्रते शारदीयदुर्गापूजादौ "महाव्रतं महापुण्यं शङ्करादैरनुष्ठितम्" देवीपु०। २वृहत्प्रवार्षिके प्रायश्चित्तात्मके व्रतभेदे च।

महाशङ्ख पु० कर्म०। तन्त्रे वीराचारप्रसिद्धे नरकपाला-स्थिजाते "नरललाटास्थिखण्डेन रचिता जपमालिका। महाशङ्खमयी माला तारासिद्धालये प्रिया" इत्युक्ते १भाल्यभेदे २वृहच्छङ्खे च। "पौण्ड्रं दध्मौ महाशङ्खम्" गीता। [त्रि०।

महाशठ पु० कर्म०। १राजधत्तूरे राजनि०। २अतिधूर्त्ते

महाशणपुष्पी स्त्री शणस्येव पुष्पमस्य ङीप् कर्म०। वृहच्छणपुष्पग्रामे राजनि०। स्वार्थे क। तत्रैव।

महाशता स्त्री शतं मूलानि सन्त्यस्य अच् कर्म०। वृहच्छतावर्य्याम् राजनि०।

महाशतावरी स्त्री कर्म०। वृहच्छतावर्य्याम् राजनि०।

महाशय त्रि० महान् उदार आशयो यस्य। महाशये अमरः। [राजनि०।

महाशाखा स्त्री महती शाखास्याः। नागबलायाम्

महाशालि पु० कर्म०। स्थूलशालौ हेमच०।

महाशीता स्त्री महती शीता शीतलत्वात्। १शतमूलायाम् शब्दच०। २अतिशीतले त्रि०।

महाशुक्ति स्त्री महती शुक्तिराकारत्वेन प्राशस्त्यात् शुक्तिः।

महाश्वेतौ शुक्लौ राजनि० । [स्त्री ङीष् ।
महाशूद्र पु० कर्म० । १आभीरे (आहीर) जातिभेदे २तत्कन्यां
महाश्मशान न० कर्म० । काश्याम् समूलकर्मसहितसर्वजो-
वानां पुनरुत्पाटनाय नाशाधारत्वात् तस्यात्तथात्वम् ।
महाश्यामा स्त्री कर्म० । १श्यामाभेदतायां रत्नमा० । २शि-
ग्रुपर्णाभेदे राजनि० ।
महाश्रावणिका स्त्री कर्म० । (शुलकुड़ी) क्षुपभेदे राजनि०
महाश्वेता स्त्री कर्म० । १सरस्वत्याम् मेदि० २लक्ष्मणभूमि-
कुष्माण्डे च अमरः ।
महाष्टमी स्त्री कर्म० । "आश्विने शुक्लपक्षस्य भवेद् या तिथि
रष्टमी । महाष्टमीति सा प्रोक्ता" इत्युक्तायामाश्विन-
शुक्लाष्टम्याम् । [राजनि० ।
महासर्ज पु० कर्म० । १असनवृक्षे २धनसवृक्षे च (काटाल)
महास्रह पु० कर्म० १पुष्पप्रधाने कुजवृक्षे राजनि० २माष-
पर्ण्याम् स्त्री २यज्ञानवृक्षे च स्त्री अमरः ४अतिबृहति त्रि०
महासान्तपन न० कर्म० सप्ताहसाध्ये कृच्छ्रभेदे व्रतभेदे ।
महासार पु० महान् सारोऽस्य । दुरुहदिरे राजनि० ।
महासिंह पु० नित्यक० । १शरभे राजनि० २बृहत्सिंहे च
महासुगन्धा स्त्री शोभनो गन्धोऽस्तिन्निंशा वाऽस्याः कर्म० ।
१गन्धनाकुल्याम् राजनि० २अतिसुगन्धयुक्ते त्रि० ।
महासेन पु० महती सेनाऽस्य । १कार्त्तिकेये अमरः । २बृ-
हत्सेनाधिपतौ च ।
महास्कन्धा स्त्री महान् स्कन्धोऽस्याः । जम्बूवृक्षे राजनि०
महाहास पु० कर्म० । अट्टहासे उच्चैर्हासे शब्दर० ।
महाहिगन्धा पु० अहेर्गन्धो हिंसा यस्मात् अहिगन्धो
नकुलः समत्वेनास्त्यस्य अच् कर्म० । गन्धनाकुल्याम्
राजनि० । [२अतिगर्वे त्रि०
महाह्वा स्त्री कर्म० । १कपिकच्छ्वाम् (आलकुशी) शब्दमा०
महि(ही) स्त्री मह-इन् वा ङीप् । १पृथिव्याम् । ङीबन्तस्तु
मालवदेशस्थे २नदीभेदेऽपि ।
महिका स्त्री महते मह-कन् । हिमे अमरः ।
महिमन् पु० महतो भावः इमनिच् डित्त्वेन टिलोपः ।
१महत्त्वे २ईश्वरैश्वर्य्यभेदे हेमच० । [२अर्कवृक्षे च ।
म(मि)हिर पु० मह-(मिह-)वा किरच् । १सूर्य्ये त्रिका० ।
महिला स्त्री मह-इलच् । १योषिति अमरः । २प्रियङ्गुलतायां
३रेणुकागन्धद्रव्ये राजनि० ४मत्तायां स्त्रियाञ्च शब्दर० ।
ङीष च । महेलापि योषिति शब्दर० ।
महिष पुंस्त्री० मह-टिषच् । १खनामख्याते पशुभेदे,
स्त्रियां ङीष् । २महिषासुरे च ३कृताभिषेकायां राज्ञः
स्त्रियां ४सैरिन्ध्र्याम् ५ओषधिभेदे च स्त्री मेदि० ङीष् ।
६व्यभिचारिण्यां स्त्रियां माहिषिकशब्दे दृश्यम् ।
महिषध्वज पु० महिषो ध्वजः चिह्नं वाहनत्वेनास्य ।
१यमे २शिवभेदे च हेमच० महिषवाहनादयोऽस्य ।
महिषमर्दिनी स्त्री महिषं महिषासुरं मृद्नाति मृद्-
णिनि ङीप् ह्रस्वः । दुर्गाभेदे । [क तत्रैव ।
महिषाक्ष पु० महिषस्याक्षीव अक्षि यस्य । गुग्गुलुभेदे । स्वार्थे
महिषासुर पु० रम्भासुरेण महिष्यामुत्पादिते असुरभेदे ।
महिषासुरसम्भव पु० महिषासुरादुत्पन्नोभेदः सम्भवति
सम्+भू-अच् । भूमिजगुग्गुलौ राजनि० । [न्यमे अमरः ;
महीक्षित् पु० महीं क्षयते ईष्टे क्षि-ऐश्वर्ये क्विप् तुक् च ।
महीज न० महा जन्यते जन-ड । १आर्द्रके राजनि० । २म-
ङ्गल्यग्रहे ३नरकासुरे च पु० ४सीतायां स्त्री । [धरोऽस्यत्र ।
महीध्र पु० महीं धारयति धृ-क । पर्वते अमरः । अच् । मही-
महीप्राचीर न० महाः प्राचीरमिवावरकत्वात् । षष्ठ्यु
त्रिका० । [क्विप् । १पर्वते २भूमिपाले च ।
महीभृत् पु० महीं बिभर्त्ति धारयति पालयति वा भृ-
महीयस् त्रि० अतिशयेन महान् महत्+ईयसुन् टिलोपः ।
अतिमहति "महतो महीयान्" श्रुतिः ।
महीयमान त्रि० महीयते मही+कण्ड्वा० यक्-शानच् ।
१पूज्ये २श्रेष्ठे च "महीयमाना भवतातिमात्रम्" भट्टिः ।
महीरुह पु० महां रोहति रुह-क । १वृक्षे अमरः २शाकवृक्षे
राजनि० ।
महीलता स्त्री महा लतेव । (केँचो) किञ्चुल्लके अमरः ।
महेच्छ त्रि० महती इच्छा यस्य । महाशये अमरः ।
महेन्द्र पु० प्रधानः इन्द्रः इन्द्रस्यापि नियन्तृत्वात् । १परमे-
श्वरे २महैश्वर्य्यवति इन्द्रे ३जम्बुद्वीपस्थपर्वतभेदे च मेदि०
महेन्द्रकदली स्त्री महेन्द्रप्रिया तद्दत्ता वा कदली ।
कदलीभेदे राजनि० । [दयोऽस्यत्र राजनि० ।
महेन्द्रपुरी स्त्री ह्रस्व० । अमरावत्याम् । महेन्द्रनगर्यां-
महेन्द्रवारुणी स्त्री महेन्द्रस्य वरुणस्य तयोरियं प्रियत्वात्
अण् देवताद्वन्द्वे उत्तरपदवृद्धिः कर्म० । (बड़माकाल)
लतायां राजनि० । [अमरः ।
महेरणा स्त्री महं गजोत्सवमीरयति रल्यु । गलकोद्धृते
महेश पु० कर्म० । शिवे । महेश्वरोऽप्यत्र "महेश्वरस्त्र्यम्बक
एव नागरः" इति रघुः ।
महेशबन्धु पु० ह्रस्व० । बिल्ववृक्षे शब्दच० ।

महैला स्त्री० कर्म०। स्थूलैलायाम् (बड़इलायची) राजनि०।
महोच्च पु० महान् उच्चो यत्र समा०। इक्षुवृक्षे अमरः।
"महोच्च वा महालं वा श्रोत्रियाय प्रकल्पयेत्" मनुः।
महोटी स्त्री० महान्ति फलावयवत्वेन स्थूलानि उटानि पर्णा-न्यस्याः ङीष्] इक्षुलतायां क्षुपभेदे भावप्र०।
महोत्पल पु० कर्म०। १पद्मे, २सारसपक्षिणि च अमरः।
महोत्सव पु० कर्म०। सन्ततसुखसम्पादकव्यापारे।
महोत्साह त्रि० महान् उत्साहो यस्य। व्यक्तलोद्यमयुक्ते महोद्यमोऽपत्र।
महोदधि पु० कर्म०। समुद्रे।
महोदय पु० महान् उदयो वृद्धिरधिपत्वं वा यत्र। १कान्यकुब्जदेशे। २तद्देशस्थे पुरभेदे न०। ३भोजे पु०भेदः। ४स्वामिनि पु०क्लेमच०। "अभ्यर्कपाते ग्रहणम्" इत्यादि लक्षणात् सूर्य्यचन्द्रोदययोगात् "किञ्चिदूने महोदयः" इत्युक्ते किञ्चिदूने ५योगभेदे पु०। इलागवलायां स्त्री राजनि०।
महोदरी स्त्री० महदुदरं यस्याः। १शतमूल्याम् भावप्र०। २महदुदरयुक्ते त्रि०। [त्रि०।
महोन्नत पु० कर्म०। १तालवृक्षे भावप्र०। २अत्युन्नतियुक्ते
महोरग पु० कर्म०। महतुरगभेदे महोरगाकारोऽस्यस्य अच्। २तगरमूले न० रत्नमा०।
महोल्का स्त्री कर्म०। महदुल्कायाम्।
महौषध न० कर्म०। १शुण्ठ्याम् २वचायां ३वाराहीकन्दे वत्सनाभे ४विषे, ५अभ्याहृत्यके राजनि० ६पिप्पल्याम् शब्दच० ७अतिविषायाम् अमरः दशैर्यवदौषधभावे च।
महौषधि स्त्री कर्म०। १दूर्वायां २वच्चाशुलुञ्जे शब्दच०। "महदेवी तथा व्याघ्री बला चातिबला त्वच। शङ्खपुष्पी तथा सिंही वृश्चिकी च सुवर्चला। महौषध्यष्टकं प्रोक्तम्" इत्युक्ते ३देवादीनां स्वानीयशुक्लभेदे। ङीप्। ४श्वेतकण्टकार्य्यां ५ब्राह्म्यां ६कटुकायाम् ७अतिविषायाञ्च राजनि० दक्षिणमोचिकायाम् त्रिका०
महौषधिगण पु० "पृश्निपर्णी शालपर्णी भृङ्गराजः शतावरी। गुडूची महदेवी च महौषधिगणः स्मृतः" शब्दच०उक्ते पृश्निपर्णादौ औषधिगणे। [अमित मसे।
मा शब्दे अक० जाने सक० जु० आ० अनिट्। मिमीते
मा माने अदा० प० सक० अनिट्। माति अमासीत्।
मा माने दि० डित् आ० अक० अनिट्। मायते अमास्त।
मा अव्य० डिदनुबन्धात् दैवादिकात् आदादिकाद्वा धातोः क्विप्। १मारणे। धातोर्डित्त्वेन शब्दे डिच्चक्षणकार्य्यात् "न माङ्योगे" या० डिदनुबन्धधातुनिमित्तयोगे न अडागमः तद्भिन्नयोगे तु आदेच" मा निषाद। प्रातर्मा त्वमगमः" इति रामायणम्। मा-अ-टाप्। २अक्षुद्रप्राणभेदि०३मातरि च स्त्री। मा-अस्म०भावे क्विप्। ४माने स्त्री शब्दर०।
मांस न० मन-स दीर्घश्च। "मांस भक्षयितामुत्र यस्य मांसमिहास्म्यहम्। एतन्मांसस्य मांसत्वम्" मनूक्ते प्राणिदेहस्थशोणितपरिपाकजे धातुभेदे भावप्रकाशे मांसवर्गे तद्गुणाः उक्ता द्रष्टव्याः। पाकपचनशब्दे परे समासेऽस्यान्त्यलोपः "मांसपचन्या उखायाः" भट्टभाष्यम्।
मांसच्छदा स्त्री मांसं छादयति छद-णिच्-अच् टाप्। मांसरोहिण्यां लतायाम् राजनि०।
मांसज न० मांसाज्जायते जन-ड। देहस्थे मांसजन्ये मेदसि क्लेमच०। अस्रक्करयभेदे दशग्रन्थम्।
मांसदलन पु० मांसं श्लेष्मात्मकं मांसं दलयति दल-णिच्-ल्यु। श्लेष्मघातकवृक्षे शब्दच०। [राजनि०।
मांसद्रविन् पु० मांसं द्रावयति द्रु-णिच्-णिनि। अम्लवेतसे
मांसपेशि स्त्री ६त०। गर्भस्थावयवभेदे। वा ङीप् तत्रैव भावप्र०। [राजनि०।
मांसफला स्त्री मांसमिव कोमलं फलं यस्याः। वार्त्ताक्याम्
मांसमाला स्त्री मद-परिणामे घञ् मांसस्य परिणामो यस्याः ५ब०। मांसपरम्परायाम् राजनि०।
मांसरोहिणी स्त्री मांसं रोपयति रुह-णिच् णिनि वा न पुक्। व्रणसन्धिदूष्यभेदे (चामकषा)। राजनि०।
मांसल त्रि० मांस+अस्त्यर्थे लच्। १बहुमांसयुक्ते अमरः। २स्थूले ३पुष्टे च। [राजनि०।
मांसलफला स्त्री मांसलं पुष्टं फलमस्याः। वार्त्ताक्याम्
मांससार पु० ६त०। मेदसि राजनि०। मांसस्य सारोऽयम्
मांसहासा स्त्री मांसेन हस्यते कर्मणि घञ्। देहस्थकर्मणि शब्दर०। [(कसाइ) अमरः।
मांसिक त्रि० मांसं पण्यमस्य ठक्। मांसविक्रयोपजीविनि।
मांसिनी स्त्री मांसवदाकारत्वप्रहेतुत्वं वाऽस्त्यस्याः इनि। जटामांस्याम् राजनि०।
मांसी स्त्री मांसमस्त्रस्य अच् गौ० ङीष्। १जटामांस्याम् २ककोल्याञ्च मेदि० ३मांसच्छदायां राजनि०।
मांसेष्टा स्त्री मांसमिष्टं यस्याः। बलशुलायां खगभेदे राजनि०
माकन्द पु० माति मा-क्विप् माः परिमितः कन्दोऽस्य।

१आम्रे । २आमलक्यां स्त्री राजनि० ३नगरभेदे च स्त्री मेदि० गौरा० ङीष् । ४पीतचन्दने शब्दच० ।

माकरी स्त्री मकरस्य तत्स्थरविकक्रान्तस्य इयम् अण् । मकरस्थितरविकक्रान्ते तद्रव्यमाघमासस्य शुक्लसप्तम्यां "तस्मै रोगञ्च शोकञ्च माकरी हन्तु सप्तमी" तिथितः ।

माक्ष स्तृ छायां स्वा०पर०सक०सेट् इदित् । माक्ष्टुति अमाक्ष्टीत् ।

माक्षि(क्षी)क न० मक्षिकाभिः सम्भृत्य कृतम् अण् पृषो० वा दीर्घः । १मधुनि अमरः । तत्तुल्यगुणे उपधातुभेदे २स्वर्णमाक्षिके ३रौप्यमाक्षिके च राजनि० । [राजनि०।

माक्षिकज न० माक्षिकाज्जायते जन-ड । सिक्थके (मोम)

माक्षिकफल पु० माक्षिकमिव मधुरं फलमस्य । मधुनारिकेले राजनि० ।

माक्षि(क्षी)कशर्करा स्त्री इतः । मधुजाते खण्डभेदे राजनि०

मागध पु० मगधदेशे भवः अण् । १श्वेतजीरके मेदि० २स्तुतिपाठके अमरः क्षत्रियायां वैश्याजाते ३वर्णसङ्करभेदे (भाट) च । ४यूथिकायां ५पिप्पल्यां स्त्री मेदि० ङीष् । ६कच्छ्वीलतायां ७शर्करायां शब्दच० ८भाषाविशेषे च स्त्री हेमच० । ९मगधदेशजाते त्रि० ।

मागधखारिका स्त्री लीलावत्युक्ते खरिकाभेदे ।

माघ पु० मघानक्षत्रयुक्ता पौर्णमासी अण् ङीष् माघी सा यस्मिन् मासे पुनरण् । चैत्रावधिके १एकादशे चान्द्रे मासे । २तत्पौर्णमास्यां स्त्री ङीष् । ३शिशुपालवधकाव्ये ४तत्कर्त्तरि च पु० । "तावद्भा भारवेर्भाति यावन्माघस्य नोदयः" इत्युद्भटः ।

माघ्य न० माघे भवं यत् । कुन्दपुष्पे अमरः ।

माङ्गल्य न० मङ्गलमेव, मङ्गलाय हितं वा यञ् । १मङ्गले २मङ्गलसाधने च । [लतायाम् राजनि० ।

माङ्गल्याही स्त्री माङ्गल्यमर्हति अर्ह-अच् । त्रायमाणा-

माचिका स्त्री मच-ण्वुल् ।१अम्लशाकायां राजनि० । २मक्षिकायाञ्च लिका० ।

माञ्जिष्ठ न० मञ्जिष्ठया रक्तम् अण् । १रक्तवर्णे २तद्वति त्रि०

माठर पु०मठ-अरन् ठाल्लादेशः ततः स्वार्थे अण्, स्वार्थस्य परिपार्श्वे मठति मठ-अरण् वा । स्वार्थस्य १पारिपार्श्विकेगणभेदे अमरः । २व्याधे मेदि० ३विप्रे हेमच० । ४औखिडके त्रि० कौ० ।

माण(न)क न० मा-अनच् णुट् नुट् वा । स्वनामख्याते कन्दभेदे "हरिद्रा माण(न)कं कचुः" नवपत्रिकोक्तौ ।

माणव पु० मनोरपत्यं अण् अल्पार्थे यत्वम् । १अल्पवयस्के मनुष्ये शब्दच० । स्वार्थे क । तत्रार्थे हारभेदे च हेम० ।

माणवीन त्रि० माणवस्येदम् खञ् । बालकसम्बन्धिनि ।

माणव्य न० माणवानां समूहः यत् । बालकसमूहे ।

माणिक्य न०मणिरिव कायति कै-क स्वार्थे यञ् । (माणिक) १रक्तवर्णे रत्नभेदे, २रत्नगोधिकायां स्त्री हेमच० ।

माणिवन्य(न्थ) न० मणिवन्त्व(न्ध) पर्वते भवः अण् । सैन्धवलवणे अमरः ।

मातङ्ग पुंस्त्री० मतङ्गस्य मुनेरयम् अण् । १गजे अमरः । २किरातजातिभेदे स्त्रियां ङीष् ।३जैनभेदे पु०हेमच० । ४दशमहाविद्याभेदे स्त्री ङीष् ।

मातङ्गमकर पु० मातङ्ग इव मकरो जलजन्तुः । महामत्स्यभेदे राजनि० ।

मातरपितृ स्त्री द्वि० व० माता च पिता च द्वन्द्वे मातृशब्दस्य मातरादेशः । मातापितरौ । पक्षे मातरानङ् । मातापितृ तयोरर्थयोः द्वि० व० ।

मातरिश्वन् पु० मातरि आकाशे श्वयति वर्द्धते श्वि-कनिन् डिच्च अलुक्स० । वायौ अमरः । [इन्द्रसारथौ अमरः ।

मातलि पु० मतं ज्ञातं ला-क मतस्य ज्ञस्यापत्यम् इञ् ।

माता स्त्री मा-अतच् । जनन्याम् । "विश्वेश्वरीं विश्वमातां" इति दुर्गास्तवः । [२तत्पत्न्यां स्त्री गौरा०ङीष् ।

मातामह पु० मातुः पिता मातृ+डामह । १मातुः पितरि

मातुल पु० मातुर्भ्राता मातृ-डुलच् । १मातृभ्रातरि अमरः २तत्तुल्यां वा ङीष् वा आनुक् च । मातुलानी मातुली मातुला च । मद्-णिच्-उलच् पृषो० दस्य तः । १धुस्तूरे ४व्रीहिभेदे ५मदनवृक्षे च मेदि० ६धर्मभेदे हेम० ।

मातुलपुत्रक न० मातुलस्य धुस्तूरस्य पुत्र इव कायति कै-क । १धुस्तूरे अमरः । ह्रस्व० स्वार्थे क । २मातुलसुते ।

मातुलाहि पु० मातुल इवाहिः । मातुलधाने सर्पे अमरः ।

मातुलुङ्ग पु० मातुलं गच्छति गम-खच् डिच्च पृषो० । १बीजपूरे भरतः । २मधुककुटयाम् स्त्री रत्नमा० । स्वार्थे क । ३बीजपूरे अमरः ।

मातृ त्रि० मा-तृच् । १प्रमाणकर्त्तरि २परिमाणकर्त्तरि ३जीवे ४आकाशे च मातरिश्वा । मातारौ मातारः । मा-तृ । "ब्राह्मी माहेश्वरी चण्डी वाराही वैष्णवी तथा । कौमारी चैव चामुण्डा चर्चिकेत्यष्ट मातरः" इत्यमी ५शिवशक्तिभेदे । ६जलनाम्नि ७भूमौ च विश्वभूतौ शब्दर० । ८लक्ष्म्याम् हेमच० १०रेवत्याम् अमरः ११स्त्री

गव्यां मेदि० १२आसुकण्यौम् ११इन्द्रवारुण्याम् (रा-खालशया) १४जटामांस्यां राजनि०। चण्डीप्रसिद्धासु १५देवीशक्तिषु च। "मातः कोपमयाविष्टः" देवीभा०। अतिदेशिकमातरश्च ब्रह्मवै०पु०गण०ख०१५अ०उक्ता यथा "धन्यदात्री गर्भधात्री भक्ष्यधात्री गुरुप्रिया। अभीष्टदेवपत्नी च पितुः पत्नी च कन्यका। स्वगर्भजा या भगिनी पुत्रपत्नी प्रियाप्रसूः। मातुर्मातामहस्यापि पितुर्मातामहस्य च। मातुः पितुश्च भगिनी मातुलानी तथैव च। जनानां वेदविहिता मातरः षोड़श स्मृताः"।

ब्रह्मवै० पु० जन्मख० ५६ अ० अन्यविधा उक्ता यथा "गुरुपत्नी राजपत्नी देवपत्नी तथा वधूः। पितोः स्वसा शिष्यपत्नी भक्ष्यपत्नी च मातुली। पितृपत्नी भ्रातृपत्नी श्वश्रूश्च भगिनीसुता। गर्भधात्रीष्टदेवी च पुंसः षोड़श मातरः"। तत्रैव २५ अ० "गुरोःपत्नी राजपत्नी विप्रपत्नी च या सती। पत्नी च मातृसुतयोर्मित्रपत्नी च तत्प्रसूः। प्रसूः पितोस्तयोर्भ्रातुःपत्नी श्वश्रूः स्वकन्यका। जननी तत्सपत्नी च भगिनी सुरभी तथा। स्वामीष्टसुरपत्नी च धात्री कान्ता प्रदायिका। गर्भधात्री जनान्नी च भयात्रातृश्च कामिनी। एता वेदप्रणीताश्च सर्वेषां मातरः स्मृतः"। अस्य रूपं मातरौ मातरः। दुर्गादौ पूज्यासु गौर्य्यादिषु १६देवीशक्तिभेदेषु "गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः। शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह" शु०त०गरुडपु०।

मातृका स्त्री मातेव कायति कै-क। १उपमातरि २ब्रह्माण्यादिषु चण्डीप्रसिद्धदेवीमूर्त्तिषु ३सर्वशब्दोत्पादकेषु अकारादिकोनपञ्चाशद्वर्णेषु ४मातरि च मेदि०। मातृ+स्वार्थे क। मातृशब्दार्थे।

मातृबन्धु पु० ६त०। "मातुः पितुःस्वसुः पुत्रा मातुर्मातुःस्वसुः सुताः। मातुर्मातुलपुत्राश्च विज्ञेया मातृबन्धवः" इत्युक्तेषु मातुः पितृष्वस्रीयादिषु। मातृबान्धवोऽप्यत्र।

मातृष्वस्र स्त्री ६त०। मातुर्भगिन्याम् अलुक्स० उभयत्र त्वम्। मातुःस्वसाप्यत्र।

मातृष्वस्रेय पु० मातृष्वस्रुरपत्यम् ढक्। १मातुर्भगिनीपुत्रे २तत्कन्यायां स्त्री ङीष्। ढक्। मातृष्वस्रीयोऽप्यत्र।

मातृसिंही स्त्री मातुः प्रमातुः सिंहीव। वासकहत्तें शब्दर० ३परिच्छदे ४बले ५परिमाणे स्त्री अमरः। ६कर्णभूषायाम् ७वित्ते ८वर्णावयवभेदे च स्त्री मेदि०। "कालेन यावता पार्श्वः पर्य्येति जानुमण्डलम्। सा मात्रा कविभिः प्रोक्ता" इत्युक्ते ६त्रुटिवर्णोच्चारणकाले च स्त्री। "एकमात्रो भवेद्ध्रस्वः"। मीयन्तेऽनया विषयाः मा-करणे क्त्रन्। १०इन्द्रियवृत्तौ। "मात्रास्पर्शास्तु कौन्तेय!" गीता।

मात्रापताका स्त्री छन्दोऽन्यभेदे मात्रावृत्तस्यलघुगुरुज्ञानात्तगुणे पताकाकारे चक्रे।

मात्रामर्कटी स्त्री छन्दोऽन्यभेदे मात्रावृत्तस्यलघुगुरुज्ञानात्तगुणे मर्कटीजालचक्रभेदे। [मेरुचक्रे।

मात्रामेरु पु० छन्दोऽन्यभेदे मात्रावृत्तस्यलघुगुरुज्ञानात्तगुणे

मात्रावृत्त न० मात्रया कृतं वृत्तम्। आर्य्यादौ छन्दोभेदे।

मात्सर्य्य न० मत्सरस्य भावः ष्यञ्। परगुणद्वेषे "मात्सर्य्यं तत्प्रार्थ्यं विचार्य्यं धूर्य्याः" भा०द०। [क्षमान्वीत्।

माद्य बधे सक० क्रीडे अक० भ्वा० प० सेट् इदित्। मान्दति

माद्य पु० मद-घञ्। १पथि त्रिका०। २मन्थने शब्दर०।

माथुर त्रि० मथुरायां भवो मथुरायाः आगतो वा अण्। १मथुरानगरीभवे, २तत आगते च।

माद पु० मद-घञ्। १दर्पे २हर्षे च भरतः।

मादक त्रि० मदयति मद-णिच्-ण्वुल्। १मत्तताकारके द्रव्ये। मादयति कर्त्तरि ण्वुल्। २द्राक्षादौ पुंस्त्रीलिङ्गे शब्दमा० स्त्रियां ङीष्।

मादन न० मादयति मद-णिच्-ल्युट्। १स्वनामख्याते शब्दच० २कामदेवे ३मदनवृक्षे च पु०। ४विलयायां राजनि० ५माकन्द्याञ्च स्त्री भाषाप्र०गौरा०ङीष्। ६हर्षकारके त्रि०।

माद(त्त)(श्च)ग् त्रि० समेव दर्शनमस्य दृश्-क्विप् स तुक्च वा। समतुल्यदर्शने मत्सदृशे। [२अतिविषायाञ्च राजनि०।

माद्री स्त्री मद्रे भवा अण्। १पाण्डुराजस्य द्वितीयपत्न्याम्

माधव पु० मायां धवः। १नारायणे। मधु+स्वार्थे अण्। २वसन्ते विश्वः "स माधवेनाभिमतेन सख्या" कुमारः। मधुने पुष्परसाय मद्याय वा हितः अण्। ३चैत्रमासे भाविनि तस्य वसन्तपुष्पवत्त्वम् तद्धितत्वम्। ४मधूकवृक्षे तत्पुष्पेण हि मद्यसम्भवः। ५लक्षणायुक्ते च राजनि०। मधु-बाहुल्येनास्त्यस्याः अण्। ६वासन्तीलतायाम् स्त्री ङीष्।

माधवीलता स्त्री कर्म०। स्वनामख्यातायां लतायाम् अमरः।

माधवेष्टा स्त्री माधवे वैशाखे माधवस्य कृष्णस्य वा इष्टा। वाराहीकन्दे राजनि०। [२माधवप्रिये त्रि०।

माधवोद्भव पु० माधवे वैशाखे उद्भवति फलत्वेन उद्+भू-अच्। (पियाल) राजादन्याम् राजनि०।

माधुर न० मधु-राति अमरेभ्यो ददाति रा-क-स्वार्थे, मधुर-स्वेदं वा अण्। १मल्लिकापुष्पे त्रिका०। २मधुरसम्भवे त्रि०।

माधुरी स्त्री मधुरस्य भावः ष्यञ् माधुर्य्यं तित्त्वात् स्त्रीत्व पक्षे ङीष् यलोपः। १माधुर्य्ये अधुरत्वे, "सद्यस्खलन्माधुरी धारा" इत्युद्भटः। मधुरा+स्वार्थे अण्। २मदिरायाम्

माधुर्य्य न० मधुरस्य भावः ष्यञ्। १मधुरत्वे "चित्तद्रवी भावमयो ह्लादो माधुर्य्यमुच्यते" सा०द० उक्ते २काव्य गुणभेदे च। तद्व्यञ्जकवर्णाश्च तत्रोक्ता यथा "मूर्द्धन्य वर्गान्त्यवर्णेन युक्ताः टठडढान् विना। रणौ लघु च तद्व्यक्तौ वर्णाः कारणतां गताः। अवृत्तिरल्पवृत्तिर्वा मधुरा रचना मता"। तच्च सम्भोगदुःखादावनुगुणं यथोक्तं तत्रैव "सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात्" ३लावण्ये हेम०। "रूपं किमप्यनिर्वाच्यं तनोर्माधुर्य्यमुच्यते" उज्ज्वलमणौ तल्लक्षणमुक्तम्।

माध्यन्दिन न० मध्यान्दनमेव-अण्। मध्यमदिने तत्र पाठः अण्। शुक्लयजुर्वेदीयशाखाभेदे।

माध्वीक स्त्री मधुना मधूकपुष्पेण निर्वृत्तम् ठक। १मधूक-पुष्पजाते मद्ये अमरः। मधु एव अण् स्वार्थे ठक। २द्राक्षाफले "साध्वी माध्वीक! चिन्ता विलुठतीति जयदेवः। [नारिकेले राजनि०।

माध्वीकफल पु० माध्वीकमिव मधुरं फलमस्य। मधु-

माध्वीमधुरा पु० माध्वीकमिव मधुरा पृषो० कर्मधा० मधुरखर्जूरिकायाम् राजनि०।

मान विचारे भ्वा० सक० सेट् स्वार्थे सन् नेट्। मीमांसते अमीमांसिष्ट अचीयां च तत्र न स्वार्थे सन्।

मान अर्च्चे वा चु० उ० पक्षे भ्वा० पर० सक० सेट्। मानयति ते मानति अमीमनत्-त अमानीत्।

मान न० मा-ल्युट्। १परिमाणे कृत्तद्धितप्रसिद्धादौ द्रव्यपरिच्छेदे भावप्र० मानपरिभाषा कर्मशब्दे दृश्या। २प्रमाणे "मानाधीनामेयसिद्धिः" मीमांसकाः। ज्ञानाङ्गे कालक्रियायां तत्तद्विरामोपलक्षिते ३कालव्यापारे च मेदि०। मन-घञ्। आत्मनि उत्कर्षाभिमानात्मिकायां ४चित्तवृत्तौ पु० अमरः। "स्वाभीष्टाश्लेषवियोगादिविरोधी मान उच्यते" इत्युक्ते ५अनुरक्तदम्पत्योः ६व्यवस्थाभेदे पु०। "कृष्ण मयि मानमनिदानम्" जयदेवः। ७सम्माने च।

मानग्रन्थि पु० मानस्य ग्रन्थिर्बन्धनं यस्मात्। अपराधे झारा०

मानरज्जु स्त्री मानाय कालप्रमाणज्ञानाय रज्जुः यस्याः। तास्रनिर्मिते सच्छिद्रे कालज्ञानहेतौ घटीयन्त्रभेदे त्रिका०।

मानव पु० मनोरपत्यम् अण्। १मनुष्ये अमरः। स्त्रियां जातौ ङीष्। सा च २स्वायम्भुवकन्यायाम् भारतम्। ३शासनदेवताभेदे हेमच०। २बाले पु० शब्दर०।

मानस न० मन एव अण्। १मनसि अमरः। कैलासान्तिकस्थे ब्रह्मणा मनसा कृते २सरोवरभेदे च। मनस इदम् अण्। ३चित्तसम्बन्धिनि त्रि०।

मानसव्रत न० मनसा कृतं मानसं कर्म०। "अहिंसासत्यमक्रोधं ब्रह्मचर्य्यमनुव्रता। एतानि मानसानि स्युर्व्रतानि" इत्युक्तेषु अहिंसादिषु। [स्वार्थादयोऽप्यत्र।

मानसौकस् पु० मानसमोको यस्य। हंसे अमरः मान-

मानिनी स्त्री मान-इनि ङीप्। १फलीद्रुमे मेदि० २मानवत्यां स्त्रियां च। ३मानयुते त्रि० ४सिंहे पु० राजनि०।

मानुष पु० मनोरयम् अण् तुक् च। मानवे ततोजातौ स्त्रियां ङीप् मानुषी। मानुषस्येदम् अण्। २मनुष्यसम्बन्धिनि त्रि० स्त्रियां ङीप् सा च ३चिकित्सायाभेदे शब्दर०।

मानुष्य न० मानुषस्य भावः यत्। मनुष्यत्वे।

मानोन्नक न० मनोन्नस्य भावः मनोन्ना० वुञ्। मनोहरत्वे

मान्द्य न० मन्दस्य भावः ष्यञ्। १रोगे हेम० २मन्दतायाञ्च।

मान्धाट पु० मामिन्द्रं धयति धे-ए क्विप्। "मानयं धास्यतीत्यस्मात् मान्धातासौ प्रकीर्त्तितः" इति निरुक्ते युवनाश्वराजपुत्रे नृपभेदे। [२मरुन्मालायां स्त्री शब्दमा०।

मान्य पु० मान-अर्च्चायां कर्मणि यत्। १पूज्ये जटा०।

मामक त्रि० मम-इदम् अकादु+वुञ् ममादेशः। मत्सम्बन्धिनि खञ्। मामकीनोऽप्यत्र।

माया स्त्री मा-यत् वा०नैत्वम्। १छद्मनि कापट्ये अमरः। २इन्द्रजालादौ ३मिथ्याबुद्धिहेतुज्ञानभेदे, ४कृपायां ५दम्भे ६लक्ष्म्यां च मेदि० ७बुद्धमातरि स्त्री अमरः। ८ईश्वरशोपाधौ, अघटनघटनसाधिकायां शक्तौ वेदान्त०। ९पीतास्वरे १०अक्षरभेदे पु० मेदि० [(बाजीकर) शब्दर०।

मायाकृत् पु० मायामिन्द्रजालं करोति कृ-क्विप्। मायाकरे

मायादेवीसुत पु० ६त०। बुद्धे अमरः।

मायावत् त्रि० माया+अस्त्यर्थे मतुप् मस्य वः। १मायाविशिष्टे २कंसराजे पु० शब्दर०। ३कामपत्न्यां स्त्री ङीप् जटा०।

मायाविन् त्रि० माया+अस्त्यर्थे विनि । १मायाकरे स्त्रियां ङीप् २विड़ाले पु० राजनि० । [मायीयत्व ।

मायिक त्रि० मायास्त्यस्य ठन् । मायाकरे जटा० । इनि

माय् पु० मा-यु नाऽनादेशः । देहस्थे पित्ते धातौ अमरः ।

मायूर न० मयूराणां समूहः तस्येदं वा अण् । १मयूरसङ्घे । २मयूरसम्बन्धिनि त्रि० स्त्रियां ङीप् । [यास् राजनि० ।

मायूरी स्त्री मयूरस्येदं प्रियत्वात् अण् ङीप् । अजमोदा-

मार पु० मृ-घञ् । १मरणे । मारयति मृ-णिच्-अच् । २कामदेवे ३विघ्ने मेदि० । ४धुस्तूरे च शब्दच० ।

मारक पु० मृ-णिच्-ण्वुल् मृ-णिच् घञ् स्वार्थे क वा । १मरके मारिभये त्रिका० । (बाज) २पक्षिभेदे च । ३नाशके त्रि० । जन्मलग्नावधिकाष्टमस्थानपतौ ४ग्रहभेदे पु० "भाग्यव्ययाधिपत्येन रन्ध्रेशोमारकः स्मृतः" पराशरः । ५द्वितीयसप्तमाधीशे च मारकस्थानशब्दे दृश्यम् ।

मारकस्थान न० मारणकारणे स्थाने । "अष्टमं चायुषः स्थानमष्टमाद्दशमञ्च यत् । तयोरपि व्ययस्थानं मारकस्थानमुच्यते, इत्युक्ते जन्मलग्नात् सप्तमे द्वितीये च स्थाने । [देवे अमरः ।

मारजित् पु० मारं कामं जितवान् जि-भूते क्विप् । १जिन-

मारण न० मृ-णिच्-भावे ल्युट् । १वधे अमरः । करणे ल्युट् । वैरिवधसाधने तन्त्रोक्ते अभिचारकर्मभेदे च ।

मारि(री) स्त्री मृ-णिच्-इन् । १मारणे । वा ङीप् । "मारीभये राजभये" इति वटुकृत्यवः । ङीवन्तः २दुर्गाशक्तिभेदे मेदि० ।

मारिष पु० रिष-हिंसायाम् क निषेधार्थकमाशब्देन स० । नाटकोक्तौ १आर्य्ये हिंसानिवारकतया तस्य तथात्वम् । २तण्डुलीयशाके च अमरः । ३दक्षमातरि स्त्री मेदि० टाप् ।

मारीच पु० तारकाराक्षसीसुते राक्षसानुचरे १राक्षसविशेषे २कक्कोलके ३याजकब्राह्मणे मेदि० । ४राजगजे पुंस्त्री० जटा० स्त्रियां ङीष् ।

मारुतव्रत न० "प्रविश्य सर्वभूतानि यथा चरति मारुतः । तथाचरैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम्" मनुक्ते राज्ञां धर्मभेदे । [मारुतिरप्यत्र ।

मारुतात्मज पु० ६त० । १हनुमति २भीमे च इज् ।

मारुतापह पु० मारुतं वायुदोषमपहन्ति अप+हन-ड । १वरुणवृक्षे राजनि० । २वायुदोषनाशके त्रि० ।

मार्कण्ड पु० मृकण्डोरपत्यम् अण् पृषो० । १मुनिभेदे तत्पुत्रे २लताभेदे (भुँइखसा) स्त्री भावप्र० स्वार्थे क । तत्रार्थे ।

मार्कण्डेय पु० मृकण्डोरपत्यं शुभ्रा० ढक् पृषो० । १मृकण्डुमुनिपुत्रभेदे तेन प्रोक्तम् अण् । व्यासप्रणीते पक्षि मार्कण्डेयसंवादरूपे २महापुराणभेदे न० । तत्प्रतिपाद्य-विषयाश्च नारदपु० पूर्वभागे ६७अ० उक्ता यथा ।

"यत्राधिकृत्य शकुनीन् सर्वधर्मनिरूपणम् । मार्कण्डेयेन मुनिना जैमिनेः प्राक् समीरितम् । पक्षिणां धर्मसंज्ञानं ततो जन्मनिरूपणम् । पूर्वजन्मकथा चैषां विक्रिया च दिवस्पतेः । तीर्थयात्रा बलख्यातो द्रौपदेयकथानकम् । हरिश्चन्द्रकथा पुण्या युद्धमाजीवकाभिधम् । पितापुत्र-समाख्यानं दत्तात्रेयकथा ततः । हैहयस्याथ चरितं महाख्यानसमाचितम् । मदालसाकथा प्रोक्ता ह्य-लर्कचरिताचिता । सृष्टिसंकीर्त्तनं पुण्यं नवधा परिकीर्त्तितम् । कल्पान्तकालनिर्देशो यच्च सृष्टिनिरू-पणम् । रुद्रादिसृष्टिरप्युक्ता द्वीपवर्षानुकीर्त्तनम् । अननाच्च कथा नाना कीर्त्तिताः पापहारिकाः । तासु दुर्गाकथाख्यानं पुण्यदा चाष्टमेऽन्तरे । ततःप्रभृति प्रण-वोत्पत्तिस्त्रयीतेजःसमुद्भवः । मार्त्तण्डस्य च जन्मा-ख्या तन्माहात्म्यसमाचिता । वैवस्वतान्वयश्चापि यत्स-म्भूश्चरितं ततः । खनित्रस्य ततः प्रोक्ता कथा पुण्या महात्मनः । क्षत्रियस्य चरितं चैव किमिच्छव्रतकीर्त्तनम् । नरिष्यन्तस्य चरितं दक्षकुचरितं ततः । तृणबिन्दोश्चरितं पश्चाद्रामचन्द्रस्य सत्कथा । कुशवंशसमाख्यानं सोमवंशा-नुकीर्त्तनम् । पुरूरवःकथा पुण्या नहुषस्य कथाद्भुता । ययातिचरितं पुण्यं यदुवंशानुकीर्त्तनम् । श्रीकृष्णबाल-चरितं माथुरं चरितं ततः । द्वारकाचरितञ्चाथ कथा सर्वावतारजा । ततः साङ्ख्यसदैशः प्रपञ्चासत्त्व-कीर्त्तनम् । मार्कण्डेयस्य चरितं पुराणश्रवणे फलम्" । यः शृणोति नरो भक्त्या पुराणमिदमादरात् । मार्क-ण्डेयाभिधं वत्स ! स लभेत् परमां गतिम् । यस्तु व्या-कुरुते चैतच्छ्रावं स लभते पदम् । तत्प्रयच्छेल्लिखित्वा यः सौवर्णकरिसंयुतम् । कार्त्तिक्यां द्विजवर्य्याय स लभेद्ब्रह्मणः पदम् । शृणोति श्रावयेद्वापि यश्चानुक्रमणीमि-मामृ । मार्कण्डेयपुराणस्य स लभेद्वाञ्छितं फलम्" ।

मार्क्षव पु० मारयति क्विप् मारि क्षौद्रलोभे क्षूयते क्षु अच् । भृङ्गराजे (केशरिया) अमरः । [अमार्गतः त ।

मार्ग संस्कारे सर्पणे च चुरा० उभ० सक० सेट् । मार्गयति मार्ग अन्वेषणे वा चु० उभ० पक्षे भ्वा० प० सक० सेट् । मार्ग-

अति-ते मार्गति । अममार्गत् त । अमार्गीत् ।

मार्ग पु० मृज-गुङ्वौ-मार्ग-अन्वेषणे वा घञ् ।।पथि अमरः । तल्लेदा यथा "त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तैः कृतः । विंशद्धनुर्भ्यांमार्गः सीमामार्गो दशैव तु । धनूंषि दश विस्तीर्णः श्रीमान् राजपथः स्मृतः । चत्वाजिरधनागानामसम्बाधः सुसञ्चरः । धनूंषि चैव चत्वारिंशाखारथ्यासु निर्म्मिताः । त्रिकरास्रोपरथ्यासु द्विकरास्रोपरथ्यका । जङ्घापथस्ततश्चादस्त्रिपादश्च गृहान्तरम् । त्रितिपादस्त्वर्द्धपादः प्राग्वंशः पादकः स्मृतः । अवकरः परिहारः पादमात्रः समन्ततः । प्राड्विपाके तु प्राड्विवी कर्त्तव्या अन्यथा नहि" देवीपु० ।

मार्गण न० मार्ग-ल्युट् । १अन्वेषणे अमरः। २याचने ३प्रणये च मेदि० । कर्त्तरि ल्यु । ४याचके त्रि० ५शरे पु० अमरः ।

मार्गशिर पु० मृगशिरया युक्ता पौर्णमासी अण् सा यत्र मासे पुनरण् । चान्द्रे १अग्रहायणे मासि २तत्पौर्णमास्यां स्त्री ङीप् भरद्वा० ।

मार्गशीर्ष पु० साधनं मार्गशिरवत् । १अग्रहायणे मासि । अमरः। २तत्पौर्णमास्यां स्त्री ङीप् ।

मार्गित त्रि० मार्ग-क्त । अन्वेषिते ।

मार्ज्ज मार्जने सक० ध्वनौ अक० चुरा० उभ० सेट् । मार्जयति-ते अममार्जत्-त ।

मार्ज्जन न० मृज-ल्युट् । प्रोक्षणादिना निर्मलीकरणे । युच् । तत्रैवार्थे स्त्री । सा च २शरलच्चनौ हेमच० । करणे ल्युट । सम्मार्जन्याम् (झाँटा)। स्त्री ङीप् अमरः ।

मार्ज्जार(ल) पुंस्त्री० मृज-आरन् वा रस्य लः । १विड़ाले अमरः स्त्रियां ङीष् । २रक्तचित्रके पु० राजनि० । ३खट्टासे च हेमच० । ततः संज्ञायां कन् । मयूरे ।

मार्ज्जारगन्धा स्त्री मार्ज्जारस्येव गन्धो यस्याः । शुक्लपर्णीभेदे रत्नमा० । स्वार्थे क अत इत्वम् । तत्रैव ।

मार्ज्जारी स्त्री मृज-आरक् गौरा० ङीष् । १कस्तूर्याम् २खट्टाशलतौ ३मार्जारयोषिति च मेदि० ।

मार्ज्जारीय(लीय) पुंस्त्री० मार्ज्जार+(ल) स्वार्थे क, मृज-आरीयक् रस्य लत्वम् वा । १विड़ाले २मूषे च स्त्रियां टाप् ३कायशोधने पु० मेदि० ।

मार्जित पु० मार्ज-क्त । २शोधिते । दधि-खण्डमधुघृतैर्मरिचादिकृते कर्पूरादियासिते भक्ष्यभेदे स्त्री (रसा) । भरतः

मार्त्तण्ड पु० मृते अण्डे भवः अण् शक० । १सूर्य्ये । तस्य मृताण्डजन्म च "मारितञ्च यतः प्रोक्तमेतदण्डं त्वयोदितं । तस्मान्मुने ! सुतस्तेऽयं मार्त्तण्डाख्यो भविष्यतति" मार्क० पु० । २अर्कवृक्षे अमरः । ३शूकरे पुंस्त्री० मेदि० स्त्रियां ङीष् ।

मार्त्तिक न० मृत्तिकया निर्मितम् अण् । १शरावे (शरा) भरद्वा० ।२मृण्मये त्रि० । [टके अमरः ।

मार्दङ्गिक त्रि० मृदङ्गः तद्वादनं शिल्पमस्य ठक् । मृदङ्ग-

मार्दव न० मृदोर्भावः अण् । १मृदुत्वे २परदुःखासहिष्णुतायाम् ३द्रवीभावे च "अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु" रघुः । ४सङ्कीर्णजातिभेदे पुंस्त्री० जटा० । स्त्रियां ङीष् । [२नाट्योक्तौ श्लेषे हेमच० ।

मार्ष पु० मृष-क ततः स्वार्थे अण् । १तण्डुलीयशाके भरतः

मार्ष्टि स्त्री मृज-क्तिन् । शोधने ।

माल पु० मल-संज्ञायां कर्त्तरि घञ् । "माला भिल्लाः किरातास्च सर्वेऽपि म्लेच्छजातयः" हेमच० म्लेच्छ १म्लेच्छभेदे २विष्णौ पु०भरतः । ३देशभेदे ४क्षेत्रे मेदि० ५कपटे हनने हेमच० ।

मालक न० मल-ण्वुल् । १शस्यप्रक्षे जटा० । २नारिकेलप्रभेदे पु० (माला) । ३निम्बवृक्षे पु० अमरः ।

मालकोश पु०रागभेदे तस्य गानसमयः भरहतौ रात्रिशेषः ।

मालती स्त्री मां लक्ष्मीं शोभां वा लपति वेष्टते लप-अच् ह्रस्वः ङीप् । १जातीलतायां २युवत्यां अमरः । ३काकमाच्यां ४नदीभेदे ५विशल्यायां ज्योत्स्नायां ७निशायाञ्च हेमच० ।

मालतीतीरज पु० मालत्या नदीभेदस्य तीरे जायते जन-ड । टङ्कणे (सोहागा) हेम० मालतीतीरभवाद्योऽप्यत्र

मालतीपत्री स्त्री मालत्यास्तन्नामकजात्याइव पत्रमस्याः । जातीपत्र्याम् (जैयत्री) राजनि० [जातीफले राजनि० ।

मालतीफल न०मालत्यास्तनामकजात्याः फलम् । (जायफल)

मालभारिक त्रि०मालानां भारोऽस्त्रस्य ठन् पूर्वपदहस्वः । मालानां वाहवति । [सङ्गीतदा० ।

मालव पु० १अवन्तिदेशे (मालवोयार देश) २रागभेदे च

मालविका स्त्री मालवे भवा ठक् । त्रिवृति (तेओड़ि) राजनि० ।

मालसी स्त्री मालं मलनं जटादिना दुष्टत्वं स्यति सो-क गौरा०ङीष् । १क्षेत्रपुटिकारके हस्ते शब्दच० । २रागिणीभेदे च सङ्गीतदा० ।

माला स्त्री मल-संज्ञायां कर्त्तरि घञ् । १श्रेण्यां हेमच० ।

जपसंख्यार्थं रुद्राक्षादिबीजसंघातके २माल्यभेदे च ।

मालाकण्ठ पु० मालाकारः कण्ठः कण्ठको यस्य । अपामार्गे राजनि० ।

मालाकन्द पु० मालाकारः कन्दो यस्य । मूलभेदे राजनि० ।

मालाकार पुंस्त्री० मालां करोति कृ-अण् । (माली) १वर्णसङ्करभेदे स्त्रियां ङीष् । २माल्यकारके त्रि० ।

मालाग्रन्थि पु०मालया यन्थिरत्र । मालादूर्वायाम् राजनि० ।

मालाद्रण न० मालाकारं द्रव्यम् । भूस्तृणे अमरः । स्वार्थे क । तत्रैव ।

मालादीपक न० अर्थालङ्कारभेदे अलङ्कारशब्दे दृश्यम् ।

मालादूर्वा स्त्री मालाकारा दूर्वा । (गाठिदूर्वा) दूर्वाभेदे राजनि० । [राजनि०

मालारिष्टा स्त्री मालाभूतमरिष्टं यस्याः ५ ब० । पाच्याम्

मालाली स्त्री मालामलति भूषयति अल-अण् ङीप् । पुष्पायां (पिडिङ्गशाक) राजनि० स्वार्थे क । तत्रैव ।

मालिक पुस्त्री० माला तस्मिन्नर्हं शिल्पमस्य ठन् । १मालाकारे जातिभेदे अमरः २पक्षिभेदे पुंस्त्री० मेदि० स्त्रियां ङीष् । ३रङ्गके शब्दर० । ४माल्यकारके त्रि० ।

मालिका स्त्री मालैव कन् अत इत्वम् । १वनमल्लिकायां २ग्रीवाभूषणरूपे ३नदीभेदे ४पुष्पमाल्ये ५पुत्रग्राम्ये मेदि० ६छुरायां हारा० । ७अतस्याम् शब्दच० "राधाच्छमालिकाम्भोज" इति लक्ष्मीध्यानम् ।

मालिन् पु० माला शिल्पमस्यास्य इनि । १मालाकारे २माल्यवति त्रि० ३मालाकारपत्न्यां ४पञ्चदशाक्षरपादके, "ननमयययुतेयं मालिनी भोगिलोकैः" इ० र० उक्ते ५छन्दोभेदे । ६गोपीभेदे ७चम्पानगर्यां दमनदानिन्यां कण्वाश्रमान्तिकस्थे ८नदीभेदे १०मालतीभेदे च स्त्री मेदि० ङीप् । ११अग्निशिखाख्ये द्रुमाङ्गभायां स्त्री शब्दच० ङीप् ।

मालु स्त्री मल-उण् । १पत्रलतायां (पातलता) २नाड्यां च मेदि०

मालुधान पु० मालुरिव पत्रलतेव धीयतेऽसौ धा-कर्मणि ल्युट् । (मालुयासाप) १वर्षभेदे अमरः । २लतायां स्त्री ङीप् मेदि० । [२कपित्थे च राजनि० ।

मालूर पु० मां लक्ष्मीं परेषां लुनाति लू-रक् । १बिल्वे अमरः

मालेय त्रि० मालायां साधुः ढक् । १मालाकारचलानिपुणे २स्थूलैलायां स्त्री रत्नमा० ।

माल्य न० मालायै हितं यत् । १पुष्पे । स्वार्थे यञ् । २पुष्पमालायाम् । ३मूर्द्धिस्थायां पुष्पमालायाञ्च अमरः ।

माल्यपुष्प पु० मालायै हितं माल्यं पुष्पमस्य । १शणवृक्षे २यष्टिपुष्पवृक्षे स्त्री राजनि० ङीप् । कप् । माल्यपुष्पिका तत्रैवार्थे ।

माल्यवत् त्रि० माल्यमस्त्यस्य मतुप् मस्य वः । १माल्ययुक्ते केतुमालेनाहतवर्षयोः सीमाभूते २पर्वतभेदे शब्दको० रावणमन्त्रिणि राक्षसभेदे च । [धके त्रिका० ।

माल्यविक त्रि० मेति शब्दं निषेधाय करोति ठक् । निषेधकारके

माष पु०मष-संज्ञायां कर्त्तरि घञ् । (माषकलाइ) व्रीहिभेदे "दशार्द्धयुक्तं प्रवदन्ति माषम्" इत्युक्ते "गुञ्जाभिर्दशभिर्माष" इत्युक्ते च २परिमाणभेदे । स्वार्थे क । तत्रार्थे ।

माषकलाय पु० माषाख्यः कलायः । स्वनामख्याते व्रीहौ

माषपर्णी स्त्री माषस्येव पर्णान्यस्याः ङीप् । वनमाषे अमरः

माषभक्तबलि पु० माषमिश्रितं भक्तमेव बलिः पूजोपहार द्रव्यम् । माषमिश्रिते भक्तरूपे पूजोपहारे ।

माषवर्द्धक पु० माषं माषपरिमितं स्वर्णं वर्द्धयति आच्छिनत्ति अपहरति वृध-छेदने ण्वुल् । स्वर्णकारे शब्दमा० ।

माषीण न० माषाणां भवनं क्षेत्रं खञ् । माषव्रीहिभवन योग्ये क्षेत्रे । यत् । माष्यमप्यत्र ।

मास् पु० माति परिच्छिनत्ति स्वगत्या कालम् मा-असुन् । १चन्द्रे २त्रिंशदिनात्मककालरूपे मासे च ।

मास पु० मास एव अण् । १चन्द्रे त्रिंशदहोरात्रात्मके २कालेच । स च सौरसावनचान्द्रनाक्षत्रभेदाच्चतुर्विधः । मासशब्दश्चायम् अण् । २चान्द्रे मासे तु सख्यः । मस्यते परिमीयतेऽनेन मस परिमाणे करणे घञ् । परिमाणपक्षगुञ्जात्मके भरतः । स्वार्थे क । मासक तत्रैवार्थे ।

मासन न०मासं नयति नी-ड । सोमराजीलतायाम् शब्दच० ।

मासप्रमित पु० मासं प्रमाणमारब्धः प्र+मा-क्त । "मासाः परिमाणे" पा० स० । प्रतिपच्चन्द्रे ।

मासर पु०मस-परिणामे घञ् मासं परिणामं राति दो-क । भक्तमण्डे अमरः । [मासावसाने संक्रान्त्यादौ ।

मासान्त पु० मासस्य सौरस्य चान्द्रस्य वाऽन्तः अवयवोऽस्य ।

मासिक त्रि० मासे भवः कालाट्ठञ् । १मासभवे प्रतिमासं देयेन श्राद्धसञ्ज्ञातीयतिथौ, प्रतिमासम् अमावस्यायां च कर्त्तव्ये २श्राद्धे न० "मासि मासि भवं श्राद्धं मासिकं परिकीर्त्तितम्" "पितृणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः" स्मृतिः ।

मास् अव्य० मस णिच्-मा० अप् । निवारणे ।

माह माने भ्वा० उभ० सक० सेट् । आहते ते अमाहीत् अमाहिष्ट । अहित् अहिष्ट न सुखा ।

माहाकुल त्रि० महाकुले भवः अण् । महाकुलोद्भवे । जञ् माहाकुलीनोऽप्यत्र त्रि० ।

माहात्म्यं न० महात्मनो भावः ष्यञ् । महिमनि महत्त्वे ।

माहिष न० महिष्या इदम् अण् । १महिषीदुग्धादौ माहिषस्येदम् अण् । २तच्छृङ्गादौ त्रि० ।

माहिषिक पु० "महिषीत्युच्यते नारी या च स्याद् व्यभिचारिणी । तां दुष्टां कामयति यः स वै माहिषिकः स्मृतः" कालीपु० उक्ते १व्यभिचारिणीपतौ "महिषीत्युच्यते नार्य्या भर्त्रोपार्जितं धनम् । उपजीवति यत्तस्याः स वै माहिषिकः स्मृतः" विष्णुपु० व्याख्यायां श्रीधरधृतवाक्योक्ते व्यभिचारिस्त्रिया २भर्तृोपार्जितद्रव्यो जीविनि च । [पादिते शङ्करजातिभेदे अमरः ।

माहिष्य पु० महिष्यां भवः यञ् । व्रात्येन वैश्यायामुत्पादिते शङ्करजातिभेदे अमरः ।

माहेन्द्र पु० महेन्द्रस्यायम् अण् । ज्योतिषोक्ते महेन्द्रस्वामिनि १दण्डभेदे । २पूर्व्वस्यां दिशि १इन्द्रपत्न्यां २गवि च स्त्री राजनि० ङीप् । [स्त्रीगव्यां स्त्री अमरः ङीप् ।

माहेय पु० मह्या अपत्यम् मही+ढक् । १मङ्गले २नरकासुरे च

माहेश्वर त्रि० महेश्वरादधिगतम् ततः आगत अण् । १महेश्वरतः प्राप्ते सि० कौ० २यवतिक्षायां स्त्री राजनि० ङीप् तस्येदम् अण् "माहेश्वरी वृषारूढा" इत्युक्ते ३माहभेदे ४दुर्गामात्रे स्त्री ङीप् ।

मि क्षेपे स्वा० उभ० सक० अनिट् । मिनोति मिनुते अमासीत् अमास्त । क्विप् स्त्री मप् च मितिमम् ।

अनु+व्याप्तिहेतुके परामर्शजन्यज्ञाने ।

उप+सादृश्यहेतुके ज्ञानभेदे ।

प्र+यथार्थज्ञाने ।

मिक्ष बाधे तुदा० पर० सक० सेट् । मिक्षति अमिक्षीत् ।

मित त्रि० मि भा-वा-क्त । १परिमिते, २अल्पिते ३क्षिप्ते च ।

मितङ्गम पुंस्त्री० मितं परिमितं यथा गच्छति गम-खच् मुम् च । १गजे सि० कौ० स्त्रियां ङीप् । २परिमितगामिनि त्रि० स्त्रियां टाप् ।

मितद्रु पु० मितं द्रवति द्रुवति वा द्रु क्विप् । सङ्घे हेमच० ।

मितम्पच पु० मितं पचति पच-खच् मुम् च । १लपके अमरः । २परिमितपाचके त्रि० ।

मिति स्त्री मा-मि-वा क्तिन् । १ज्ञाने, २माने, ३अवच्छेदे, ४विक्षेपे च । ज्ञानमात्रस्य मितिमात्रमेयविषयकत्वमिति गुरवः ।

मि(न्न)त्त न० मिद्यति स्निह्यति मिद-क्त । १स्नेहान्विते सुहृदि, राज्ञां विषमाचरितस्योपादित्सुत्वे २राजनि तयोर्द्वयोरपि मध्यस्थत्वस्य राज्ञश्चरणरूपैककार्य्यकरत्वात् मित्रत्वम् । मि-त्र । एकतकारः २लुप्तौ पु० अमरः ३सूर्य्यभेदे ।

मित्रयु पु० मित्रं याति या-कु । मित्रवत्सले हेमच० ।

मिथ बधे मेधायाञ्च सक० भ्वा० उभ० सेट् । मेथति-ते अमेथीत् अमेथिष्ट । ऋदित् चङि न लुक् । [अमरः ।

मिथस् अव्य० मिथ-असुन् । १रहसि, २अन्योन्यक्रियायाञ्च

मिथि पु० निमिराजपुत्रे विष्णुपु० ।

मिथिला स्त्री मिथि+अस्त्यर्थे लच् । खनामख्यातायां मिथिराजधान्याम् । [दितत्तृतीये राधौ च ।

मिथुन न० मिथ-उनन् किच्च । १स्त्रीपुंसयोर्युग्मे २मेहा-

मिथ्या अव्य० मिथ-क्यप् । अयथार्थे असत्ये ।

मिथ्यादृष्टि स्त्री मिथ्या-सफलस्यापि अफलत्वेन दृष्टिः । नास्तिकतायां सफलस्यापि वैदिककर्म्मणो निष्फलत्वज्ञाने अमरः । [क्षेपे करणे क्युट् । अपक्षे भरतः ।

मिथ्यानिरसन न० मिथ्या निरस्यतेऽनेन निर्+अस-

मिथ्याभियोग पु० मिथ्याभूतेनासत्येनाभियोगः राज्ञोऽन्तिके भेदनम् अभि-युज-घञ् । यतं मे धारयतीत्यसत्यशङ्का राज्ञोऽन्तिके अभियोगे अमरः ।

मिथ्याभिशंसन न० मिथ्याभूतेनासत्येनाभिशंसनम् अपवादः "त्वया स्वर्णमपहृतम्" इत्यपवादकथने ।

मिथ्याभिशाप पु० मिथ्याभूतेनासत्येनाभिशापोऽपवादः । मिथ्यापवादे । [अतद्वति तद्बुद्धेन ज्ञाने ।

मिथ्यामति स्त्री मिथ्याभूतस्य मतिः मन-क्तिन् । भ्रान्तौ-

मिथ्योत्तर न० कर्म० । व्यवहारे "मिथ्यैतत् नाभिजानामि तदा तत्र न सन्निधिः । अजानत्वादि तत्काले इति मिथ्या चतुर्विधम्" इत्युक्तप्रकारे, उत्तरभेदे, ("मिथ्योत्तरे पूर्ववादे") इति स्मृतिः । [ऋदित् चङि न लुक् ।

मिद बाधे मेधायाञ्च भ्वा० उ०सक०सेट् । मेदति-ते अमेदीत् ।

मिद स्नेहे भ्वा० आ० लुङि प० अक० सेट् । मेदते इदित् अमिदत् आदित् भावादौ क्ते मिन्नं मेदितम् ।

मिद स्नेहे वा चु० उभ०पक्षे भ्वा०अक०सेट् इदित् । मिन्दयति अमिन्दत्-त । पक्षे मिन्दति अमिन्दीत् ।

मिद स्नेहे दि० पर० सक० सेट् । मेद्यति-ते इदित् अमिदत् अमेदीत् । आदित् क्त मेदितं मिन्नम् ।

मिद स्नेहे चु० उभ० सक० सेट् । मेदयति-ते अमीमिदत्-त

मिन्मिल त्रि० सालुनासिकयङ्कारके १रोगभेदे २तद्युते

त्रि० । "आङ्ल्य वायुः सक्को धमनोः शब्दवाहिनीः । नराम् करोत्यक्रियकान् मूकमिन्मिनमदगदान्" अवच नात् ईषदर्थे नञ् । तत्र वायोर्नाङ्ल्ये मूकत्वम् मध्यमत्वे वाक्तुनाधिकशब्दकारकता अल्पत्वे गद्गदकरत्वमिति भेदः ।

मिल श्लेषे तु० उभ० सक० सेट् । मिलति अमेलीत् अमेलिष्ट कुटादिरयमित्येके तेन अमिलीत् ल्युटि मिलनम् ।

मिव सेके भ्वा० पर० सक० सेट् इदित । मिन्वति अमिन्वीत् ।

मिश ध्वनौ अक० कोषे सक० भ्वा० पर० सेट् । मेशति अमेशीत् ।

मिशि(शी) स्त्री मिश-इन् वा ङीष् । १मधुरिकायां (मौरी) २शतपुष्पायां, (सुवफा) भरतः ३जटामांसाञ्च शब्दर० । अस्य पृषो०मिषि मिसी मिसि-मिसी इत्यादयः उक्तार्थेषु । तत्र पाठान्तरम् । [यति-ते अमिमिश्(क्ष)त् त ।

मिश्र (क्ष) योजने रुद० चु० उभ० सक० सेट् । मिश्र(क्ष)

मिश्र त्रि० मिश्र अच् । १संयुते उत्तरपदस्थः २श्रेष्ठार्थे । यथा आर्य्यमिश्राः । ३गजजातिभेदे पु० हेमच० । ४ज्योतिषोक्ते कृत्तिकाविशाखानक्षत्रत्रयरूपे च पु० । संज्ञायां कन् । ५इन्द्रवने जटा० ६औषरक्षवणे राजनि० ।

मिश्रकावण न० मिश्रकनामकं वनं पूर्वदीर्घौ णत्वञ्च । १इन्द्रोद्याने । [काशयाम् राजनि० ।

मिश्रपुष्पा स्त्री मिश्रं पुष्पं यस्याः अजा० टाप् । मेषि-

मिश्रवर्ण न० मिश्रश्चित्रो वर्णो यस्य । १लवणागुरुणि राजनि० २मिश्रितवर्णमात्रे त्रि० । [यात्तोक्यां राजनि०

मिश्रवर्णफला स्त्री मिश्रवर्णं चित्ररूपान्वितं फलं यस्याः ।

मिश्रव्यवहार पु० लीलावत्युक्ते गणनाभेदे ।

मिश्रिता स्त्री "मिश्रिता चैव विज्ञेया मिश्रिनक्षैस्तु संक्रम" इत्युक्ते १कृत्तिकाविशाखानक्षत्रकाले रविसंक्रमणे । २गौरश्रिते न० जटा० ३मिलिते त्रि० ।

मिश्रेया स्त्री मिश्र-अच् मिश्रा ईयते ई गतौ यत् एवा कर्म० शक० । १मधुरिकायां (मौरी) अमरः । २शतपुष्पायाञ्च (सुवफा) राजनि० । [ङ्गा नेट् ।

मिष सेचने भ्वा० पर० सक० सेट् । मेषति अमेषीत् । इदित्

मिष पराभिभवेच्छायाम् तु० पर० सक० नेट् । मिषति अमेषीत् मिमेष ।

मिष न० मिष-क । १क्षणे २स्पर्द्धने पु० मेदि० ।

मिषिका स्त्री० मिषी+स्वार्थे क । जटामांसाम् शब्दरत्ना० ।

मिष्ट त्रि० मिष-क्त । १सिक्ते २स्पर्द्धिते च । ३मधुररसे पु० ४तद्वति त्रि० भावप्र० ।

मिह सेचने भ्वा० पर० सक० अनिट् । मेहति अमिहत् ।

मिहिका स्त्री मिह कु ह्रस्वः । नीहारे शब्दर० ।

मिहिर पु० मिह-किरच् । १सूर्य्ये २अर्कवृक्षे ३सूर्य्ये मेदि० ४मेघे हेमच० ५वायौ, ६चन्द्रे, विक्रमादित्यसभास्थे नवरत्नमध्यस्थे पण्डितभेदे च शब्दर० । तच्चिन्त्यम् । "धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासः । ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नवविक्रमस्य" ज्योतिर्विदाभरणवाक्ये वराहः मिहिर इत्येव तत्र समासे वराहमिहिर इत्येकः "वराहमिहिरात्मजेन पृथुयशसा" तत्पुत्रकृतषट्पञ्चाशिकायास्तुक्तेः द्वित्वे वररुचिना सह दशसंख्यापत्तेश्च ।

मी बधे दि० आ० सक० अनिट् । मीयते अमेष्ट ।

मी बधे क्र्या० उ० सक० सेट् । मीनाति मीनीते अमासीत् अमास्त । ओदित् क्त मीनः ।

मी गत्यां क्षय्याञ्च वा चु० उभ०पक्षे भ्वा०पर० सक० अनिट् । मायवति ते मयति अमीमत् त अमेषीत् ।

मीढ त्रि० मिह-क्त । मूत्रिते ।

मीढष्टम पु० मीढस्+अतिशये तमप् नि० । शिवे ।

मीढुस् पु० मिह-क्तु नि० । शिवे ।

मीन पुंस्त्री० मी-नक् । १मत्स्ये अमरः स्त्रियां ङीष् मेषादितोद्वादशे २राशौ ३भगवदवतारभेदे च पु० ।

मीनकेतन पु० मीनः केतनं यस्य । कन्दर्पे अमरः । मीनध्वजादयोऽप्यत्र । [राजनि० मीनाक्षीत्यादयोऽप्यत्र ।

मीननेत्रा स्त्री मीनस्य नेत्रमिव यन्निरस्याः । गण्डूपदायां

मीनाण्डा स्त्री मीनस्याण्डमिवाकारो रेणुकाऽस्यास्य अच् गौ० ङीष् । शर्करायाम् राजनि० ।

मीम शब्दे अक० गतौ सक० भ्वा० पर० सेट् । मीमति अमीमीत् । कदित् चङि न ह्रस्वः ।

मीमांसक पु० मीमांसां वेत्त्यधीते वा ण्वुल् । १मीमांसाशास्त्रज्ञे २तदध्येतरि च । मान-विचारे स्वार्थे सन् ण्वुल् । ३सिद्धान्तकारके ।

मीमांसा स्त्री मान-विचारे स्वार्थे सन् घ । १विचारपूर्वकतत्त्वनिर्णये २ततत्प्रतिपादकग्रन्थभेदे च स च ग्रन्थः कर्मब्रह्मविषयभेदेन द्विविधस्तत्र कर्मकाण्डविधायकसंशयनिवारकोग्रन्थो जैमिनिप्रणीतः स च पूर्वमीमांसात्वेन प्रसिद्धः ब्रह्मविषयसंशयनिवारकश्चरमः स चेदान्तत्वेन प्रसिद्धः ।

मील निमेषे भ्वा० पर० अक० सेट् । मीलति अमीलीत् । कदित् चङि वा ह्रस्वः ।

मीलन न० मील ल्युट्। १निमेषे २सङ्कोचने च।

मीलित त्रि० मील-क्त। १अप्रफुल्ले २सङ्कुचिते च 'मीलितं यदभिरामतायिके' इति काव्यप्रकाशः।

मीव स्यूतौ भ्वा० पर० अक० सेट्। मीवति अमीमीत्।

मु पु० मोचयति जीवान् एषर्थे सच डु। १महेशे हरिवं० २वन्धने एका०। [पलाण्डौ भरतः।

मुकन्दक पु० मुद् मुदे कन्दो यस्य कप् पृषो० तदो दलोपः। मुकु पु० मुच-कु पृषो० यस्य कः। १मोक्षे हरिवं० २वस्त्रगर्भे च

मुकुट पु० मकि-उट पृषो०। १शिरोभूषणे अमरः। २अङ्गुलीमोटने स्त्री शब्दर० ङीप्।

मुकुन्द पु० मुकं ददाति दा-क पृषो० सुम्। "मुकमव्ययमानन्दं निर्वाणमोक्षवाचकम्। तद्ददाति च यो देवः मुकुन्दस्तेन कीर्तितः" "मुकम् भक्तिरसप्रेमवचनं वेदसम्मतम्। यस्तद् ददाति भक्तेभ्यो मुकुन्दस्तेन कीर्त्तितः" ब्रह्मवै० जन्मख० ११०अ० इति वा निरुक्ते विष्णौ।

मुकुम् अव्य० मकि उमुच् पृषो०। १निर्वाणमोक्षे २भक्तिप्रेमनाम्नि च मुकुन्दशब्दे द्रष्टव्यम्।

मुकुर पु० मकि-उरच् पृषो०। १दर्पणे, २वकुलवृक्षे ३कुलालदण्डे, मेदि० ४भल्लिकावृक्षे, विश्वः ५कोलीवृक्षे, शब्दर०। ६वैरकेऽपि हेमच०।

मुकुल पु० न० मकि-उलच् पृषो०। १ईषद्विकाशितकलिकायाम् अमरः २देहे, ३आत्मनि च धरणिः।

मुकुष्टक पु० मुकुर्गलोत्सर्गं स्रवति स्रु-अच् पृ० षत्वम्। वनसूरणे अमरः पृषो० मुकुष्टक तत्रार्थे।

मुकूलक पु० मकि-अलच् संज्ञायां कन्। वल्लिवृक्षे। रामाश्रमः [च शब्दर०।

मुक्त त्रि० मुच क्त। १त्यक्ते, २प्राप्तमोक्षे मेदि०। ३आनन्दिते

मुक्तरसा स्त्री मुक्तो रसो यस्याः। राज्ञायाम् रत्नमा०।

मुक्तसङ्ग त्रि० मुक्तः सङ्गोविषयासक्तिर्येन। १त्यक्तसर्वविषयासक्ते २परिव्राजके पु०। [हस्तो येन। दानतत्परे।

मुक्तहस्त त्रि० मुक्तः दानाय प्रसारितः न बद्ध इति यावत्

मुक्ता स्त्री मुच-क्त। १राज्ञायाम् रत्नमा० २शुक्तिजे (भवि) रत्नभेदे च।

मुक्तापुष्प पु० मुक्तेव शुभ्रं पुष्पमस्य। कुन्दवृक्षे राजनि०।

मुक्ताप्रसू स्त्री मुक्तां प्रसूते प्र+सू-क्विप् ह्रस्वः। शुक्तौ राजनि०। [मुक्ताहारे हेमच०।

मुक्ताफलत्व न० मुक्तया मुक्ताविशिष्टतया फलत्वेन व्यच्। मुक्ताफल न० मुक्ता फलमिव। १मौक्तिके, २वल्लीफले, (नोयाड़) ३शर्पूरे च मेदि०। ४बोधदेवकृते भक्तिप्रधाने ग्रन्थभेदे च "चतुरेण चतुर्वर्गचिन्तामणिविचर्चया। ऐसाद्रिर्बोधदेवेन मुक्ताफलमचीकरत्" तद्ग्रन्थस्य पद्यम्।

मुक्तालता स्त्री मुक्तया लतेव। मुक्ताहारे हेमच०।

मुक्तावली स्त्री मुक्तया आवली हारभेदः। १मुक्ताहारे अमरः। हेत०। २मुक्ताश्रेष्ठौ भागवतपरिच्छेदग्रन्थटीकायां श्रीधरस्वामिकृतायां च। [पुक्तौ अमरः।

मुक्तास्फोट पु० स्फुट्यते विदीर्य्यते स्फोटः मुक्तायै स्फोटः।

मुक्ति स्त्री मुच-क्तिन्। १मोचने २संसारबन्धनराहित्ये मतभेदेन ३आत्यन्तिकदुःखनिवृत्तौ, ४ब्रह्मस्वरूपावाप्तौ च देहेन्द्रियाभ्यामात्मनो ५बन्धशून्यत्वे च।

मुक्तिमण्डप पु० मुक्तिप्रदो मण्डपः शाक०त०। १काशीस्थे २जगन्नाथक्षेत्रस्थे च मण्डपभेदे तीर्थे। [रत्नमा०।

मुक्तिमुक्त पु० मुक्तिमौक्तं तया मुक्तोरहितः। सिद्धे

मुख न० खन-अच् डित् धातोः पूर्वं सुट् च। "प्रजास्रष्टा यतः खातं तस्मादाहुर्मुखं बुधाः" इत्युक्ते देहावयवभेदे। "ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च। गलो गलादि सकलं समाहारं मुखमुच्यते" इत्युक्ते गलादिसमाहारावयववति २वदने भावप्र०। ३इष्टदेवस्य निष्कासवर्त्मनि, अमरः। ४इष्टमन्त्रपाठेः प्रवेशनिर्गमे, ५आरम्भे, ६उपाये, ७नाटकादौ सन्धिभेदे मेदि० नाटकादिशब्दभेदे, ८आद्ये, १०प्रधाने, ११शस्त्रे, १२वेदे, च शब्दर०। १३कुचवृक्षे पु०(डेको) शब्दच०। [राजनि०

मुखगन्धक पु० मुखस्य गन्धो यस्य सेवनात् कप्। पलाण्डौ

मुखचपला स्त्री आर्य्यावान्तरभेदे मात्राभेदे छ०र०।

मुखज पु० ब्रह्मणो मुखाज्जायते जन-ड। १विप्रे "ब्राह्मणोऽस्य मुखमासीदि'ति श्रुतिः २वदनजातमात्रे त्रि०।

मुखदूषण पु० मुखं दूषयति सेवनात् दुर्गन्धेन दूष-णिच् ल्यु। पलाण्डौ राजनि०।

मुखधौता स्त्री धौतं मुखं यया धाव-क्त जाठ् परनि०। ब्राह्मणयष्टौ (वासनकाटि) शब्दच०।

मुखनिरीक्षक त्रि० मुखमितरस्य निरीक्षते निर्+ईक्ष ण्वुल्। १अलसे शब्दर०। स हि अन्योयदि स्वकार्य्यं कुर्य्यात् तदानीं करोमीत्याशयेन इतरमुखं निरीक्षमाणः स्वकार्य्ये न प्रवर्त्तते। इति तस्य तथात्वम्।

मुखपूरण न० मुखं पूरयति पूर-ल्यु। गण्डूषसलिलजलादौ।

मुखप्रिय न० मुखं प्रीणाति प्री-क-सप०स०। १हरिद्रे भावप्र० २मुखरोचकमात्रे त्रि०।

मुखभूषण न० मुखं भूषयति भूष-ल्यु । १ताम्बूले । २मुखमण्डने च ।

मुखमण्डनक पु० मुखस्य मण्डनमिव प्रवार्थे कन् । १तिलकवृक्षे राजनि० । ६त० । स्वार्थे क । २मुखभूषणे न० । मण्डयति-ल्यु स्वार्थे क ६त० । ३मुखभूषके त्रि० ।

मुखमोद पु० मुखं मोदयति मुद-णिच्-अच् उप०स० । शोभाञ्जने राजनि० ।

मुखर त्रि० मुखं मुखव्यापारं वचनं दाति दत्ते करोतीति यावत् रा-क । १अप्रियवादिनि अमरः । २वाचाले च "मुखरस्तल कथ्यते" इति हितोपदेशः । ३काके पुंस्त्री०स्त्रियां ङीष् । ४यज्ञे पु०राजनि० । [माने

मुखरित त्रि०मुखर इवाचरितः । मुखर+क्विप्-क्त । अव्यक्तशब्दे

मुखरोग पु० सप्ताङ्गस्य मुखस्य रोगः । सप्ताङ्गमुखस्य रोगभेदे तन्निदानादि यथा

"ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च । गलो ३ शादि सकलं सप्ताङ्गं मुखमुच्यते" । अथ मुखरोगाणां बहुत्वात् "ओष्ठप्रकोपयोर्दन्तमूले तु दश षट् तथा । दन्तेष्वष्टौ रसज्ञायां मग्नु रुग्णेषु तालुनि । कण्ठे त्वष्टादश प्रोक्तास्त्वङः अष्टवराः स्मृताः । एवं सप्तामयाः सर्वे समस्तास्मिंता बुधैः" मुखरोगाणां निदानान्याह "अन्नपानमिश्रितक्षीरदधिमाषादिसेवनात् । मुखमध्ये मदान् कृत्वा कुद्धा दोषाः कफोल्बणाः" भावप्र० ।

मुखलाङ्गल पुंस्त्री० मुखं लाङ्गलमिव भूमिविदारकं यस्य । शूकरे जटा० स्त्रियां ङीष् ।

मुखवल्लभ पु० ६त० । १दाडिमवृक्षे शब्दमा० तत्फलस्य मुखप्रियत्वात् तस्य तथात्वम् । २मुखप्रिये त्रि० ।

मुखवाचिका स्त्री मुखं वाचयति अञ्जलीकरोति सेवनात् वच-णिच्-ण्वुल् । अञ्जलावाम् राजनि० ।

मुखवास पु० मुखं वासयति सुरभीकरोति वासि-अच् उप०स० । १मसालादौ राजनि० । २कर्पूरादौ च ।

मुखवासन पु० मुखं वासयति वासि-ल्यु । १मुखसौरभकारके गन्धे । २सहति त्रि० अमरः ।

मुखविष्ठा स्त्री मुखं विष्ठेव दुर्गन्धं यस्याः । तैलपायिकायां हेमच० तस्या मुखस्यैवमाने हि द्रव्यान्तरे दुर्गन्धो भवति ।

मुखव्यादान न० वि+आ+दा-ल्युट् ६त० । मुखप्रसारणे ।

मुखशोधन न० मुखं शोधयति शुध-णिच्-ल्यु । १त्यजे (दारचिनि) राजनि० । २कटुरसे पु० हेमच० । [राजनि० ।

मुखशोधिन् पु० मुखं शोधयति शुध-णिच्-णिनि । लवङ्गवृक्षे

मुखस्राव पु० स्रवति स्रु-अच् ५त० । लालाख्ये मुखमलिनजले राजनि० ।

मुखाग्नि पु० मुखमेवाग्नितुल्यं शापदानेन दाहकत्वात् यस्य । १विप्रे कर्म० बहुव्रीहौ २दाहानन्तरे च मन्त्रभा० ।

मुखास्त्र पु० मुखमेवास्त्रं यस्य । कर्कटे त्रिका० । [च ।

मुख्य त्रि० मुखे भवः यत् । १प्रथमकल्पे अमरः २श्रेष्ठे

मुग्ध त्रि० मुह-क्त । १मूढे । मोहयति स्मनर्भूतार्थे मुहकर्त्तरि क्त । २सुन्दरे विश्वः । ३नायिकाभेदे स्त्री भा०द०१प०

मुच दम्भे याचे भ्वा० आत्म० सक० सेट् । मोचते अमोचिष्ट इदित्त्वम् तत्रार्थे । मुञ्चते ।

मुच त्यागे रुरा० उ० सक० सेट् । मोचयति ते अमूमुचत् त अमोचीत् ।

मुच त्यागे तु० उभा० सक० अनिट् । मुञ्चति-ते मुचादित् अमुचत् अमुक्त । कर्मकर्त्तरि अकर्मकः "मुच्यते सर्वपादेभ्यः" इति पुराणम् ।

मुचकुन्द पु० मुच-क स मुचः कुन्द इव । १स्वनामख्याते पुष्पवृक्षे भावप्र० मान्धातृनृपपुत्रे २नृपभेदे च ।

मुज धावनौ भक्ष० मार्ज्जने सक० वा चुरा० पक्षे भ्वा० पर० सेट् । मार्जयति ते मोजति अमूमुजत् त अमोजीत् । इदित्यत्रार्थे । मुञ्जयति ते मुञ्जति अमुमुञ्जत् त अमुञ्जीत् ।

मुञ्ज पु० मुज-अच् । (मुज) रज्जुसाधने तृणभेदे राजनि० । "मञ्जुलयन्तु मधुरं सुखरं शिशिरं तथा । दाहतृष्णा विषपीनसमलवस्त्यश्चिरोगजित् । दोषत्रयहरं हृद्यं सेवलाख्यमुपयुज्यते" भावप्र० । [हेमच० ।

मुञ्जकेशिन् पु० मुञ्जइव केशः अक्ष्यस्य इनि । विष्णौ

मुञ्जर न० मुज-अरन् । शालूके शब्दमा० । [सुघटते ।

मुट मर्दने भ्वा० पर० सक० सेट् इदित् । मुटति अमुटीत् ।

मुट छोदे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । मोटयति ते मोटति अमूमुटत् त अमोटीत् ।

मुठ छोदने आलेपे च तु० वा० पर० सक० सेट् । मुठति अमुठीत् मुमोठ । [अमुण्डिष्ट ।

मुठ पलायने भ्वा० या० अक० सेट् इदित् । मुण्ठते अमुण्ठिष्ट ।

मुड केशादिच्छेदे मर्दने च भ्वा० पर० सक० सेट् इदित् । मुण्डति अमुण्डीत् । [विण्डित ।

मुड मज्जने भ्वा० आ० अक० सेट् इदित् । मुण्डते अमुण्डिष्ट ।

मुग प्रतिज्ञाने तु० पर० सक० सेट् । मुगति अमोगीत् ।

मुग्ध न० मुह-कर्मणि घञ् । १मस्तके अमर । २बोले १मुखरोगे । यसे च राजनि० ४दैत्यभेदे, ५राजग्रहे पु० मेदि० ।

ईनापिते जटा० ७स्थानुवृक्षे च पु० । दण्डयुक्ते त्रि० । ९महाश्रावणिकायां १०मुण्डीरिकायाञ्च स्त्री टाप् मेदि० २उपनिषद्भेदे "मुण्डमालाकुलत्तिलिरिः" ।

मुण्डक पु० मुण्डयति मुण्ड-णिच्-ण्वुल् ।१नापिते हेमच० । मुण्डचणक पु० मुण्डश्चणकइव । कलाये राजनि० ।

मुण्डन न० मुण्ड-भावे ल्युट् । केशच्छेदे वपने हेमच० ।

मुण्डफल पु० मुण्डं शिरइव फलमस्य । नारिकेले शब्दर० ।

मुण्डशालि पु० मुण्डः शूकशून्यः शालिः । निःशूके शालिभेदे राजनि० ।

मुण्डायस न० मुण्डमयः अच् समा० । लौहभेदे राजनि० ।

मुण्डितिका स्त्री मुण्ड-इत स्वार्थे क अत इत्वम् टाप् । (मुण्डीरी) वृक्षभेदे रत्नमा० ।

मुण्डिन् पु० मुण्डयति मुण्ड-णिच्-णिनि । नापिते अमरः ।

मुण्डीरी स्त्री मुण्ड-ईरच् गौरा० ङीष् । क्षणमध्याते वृक्षभेदे जटाधरः ।

मुदशील पु० ६२५ पृ० दर्शिते नी० ता० उक्ते हृत्यशानयोगे

मुद संभार्ज्जने चु०उ० सक० सेट् । मोदयति ते अमूमुदत त

मुद हर्षे भ्वा० आ०सक० सेट् । मोदते अमोदिष्ट । मुमुदे ।

मुद(दा) स्त्री मुद्-सम्प०भावे क्विप् वा टाप् ।१हर्षे अमरः । २वह्निनामौषधौ राजनि० ।

मुदिर पु० मुद-किरच् । १मेघे अमरः २मेके च संज्ञिप्रसा० २कामुके त्रि० मेदि० । [१जलकाके च हेमच० ।

मुद्ग पु० मुद-गक् नेट् ।१कलायभेदे(मुग) पु०मेदि० २पक्षिभेदे

मुद्गपर्णी स्त्री मुद्गइव पर्णमस्याः ।(मुगाँनी)वनवृक्षे अमरः ।

मुद्गर न० मुद्गं गिरति ग-अच् । १मल्लिकाभेदे २लोष्टभेदने (मुगर) मेदि० । ३पुष्पप्रधानवृक्षभेदे ४कर्मारवृक्षे (कामराङ्गा) च पु० राजनि० । स्वार्थे क । तत्रैव ।

मुद्गल न० मुद्गं गिलति ट-अच् रस्य लः । १रोहिषवृक्षे राजनि० । २गोत्रप्रवर्त्तके मुनिभेदे, इन्द्रपभेदे पु० ।

मुद्गष्ट पु० मुद्गं लक्षति प्रतिबध्नाति लक्ष-ड पृषो० मस्य वः । वनवृक्षे अमरः । अच् मुद्गष्टकोऽप्यत्र ।

मुद्रा स्त्री मुद-रक । १मत्स्यकारिण्याम् (मोहर) त्रिका० २अङ्गुलिस्थे मुद्राङ्कनयुक्ताङ्गुलीयके शब्दर० ३स्वर्णरौप्यादितङ्कायाम् ४अक्षरे । "मुद्राभिः पिल्लिपिर्लिपिः लेखनिसम्भवा । गुण्डिकाघुणसम्भूता लिपयः पञ्चधा मताः" इत्युक्तलिपिमध्ये ५लिपिभेदे वाराहीतन्त्रम् । "लेखन्या लिखितं विप्रैर्मुद्राभिरङ्कितञ्च यत् । शिल्पादिनिर्मितं यच्च पात्रं धार्य्यञ्च सर्व्वदा" मुण्डमालातं० । ६तन्त्रप्रसिद्धे वीराचरभेदे "मुण्डमालाकुला मुद्रा गोधूमकणकादयः । यस्य नाम भवेन्मुद्रा" इत्युक्ते मकारान्तर्गतद्रव्यभेदे ७देवविशेषाराधनायाङ्गन्यासादिविशेषविशेषे तन्त्रसारः "योजनात् सर्व्वदेवानां द्रावणात् पापसंक्षतेः । तस्मात् मुद्रेति सा ख्याता सर्व्वकामार्थसाधनी "मुद्रामन्त्रगुणनिधि"ति तन्त्रम् ८नृत्यभेदे च ,

मुद्रालिपि स्त्री मुद्रया लिपिः । पञ्चधाविभक्तलिपिमध्ये लिपिभेदे (आधार अक्षर)

मुद्रिका स्त्री मुद्रैव स्वार्थे क वा मुद्रा कन् । स्वर्णरौप्यादि निर्म्मिते अङ्गुलिस्थे अङ्गुलीसाधनशोभ्ये पदार्थे ।

मुद्रित त्रि० मुद्रा जातास्य इतच् । १अप्रकाशिते २अङ्किते च

मुधा अव्य० मुह-का पृषो० हस्य धः । मिथ्यार्थशब्दार्थे अमरः

मुनि पु० मन-इन् पृषो० उत्वम् । "दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते" गीतोक्तलक्षणे स्थिरचित्ते वीतरागादौ जने । ते च मन्वत्रिविष्ण्वङ्गिरोदादय । २सप्तसंख्यायाञ्च । ३शुक्रसेनतरौ ४जिने मेदि०।५प्रियालवृक्षे ६पराशरवृक्षे हेमच० ७दमनकवृक्षे राजनि० । "मननान्मुनिरुच्यते" इत्युक्ते ८मननयुक्ते त्रि० । [राजनि० ।

मुनिखर्ज्जूरी स्त्री मुनिप्रिया खर्जूरी । खर्ज्जूरीभेदे

मुनिच्छद पु० मुनिसंख्याताः सप्तसंख्याताः छदाः प्रतिपर्णं यस्य । सप्तच्छदे (छातिम) राजनि० ।

मुनितरु पु० मुनिरत्नस्यानामकलरुः । वकवृक्षे रत्नमा० ।

मुनिद्रुम पु० मुनीनां प्रियो मुनिनामको वा द्रुमः । १श्योनाकवृक्षे रत्नमा० २वकवृक्षे च राजनि० ।

मुनिपुत्रक पु० मुनेः पुत्रः संज्ञायां कन् ।१दमनवृक्षे भावप्र० २खञ्जने च त्रिका० । ३त० । ४कृष्णसुते । [वकपुष्पे ।

मुनिपुष्प न०मुनिकुसुमस्य पुष्पं मौनो मौनसेनवदुत्तरपदलोपः ।

मुनिभेषज न० मुनीनां भेषजमिव । १हरीतक्यां २अगस्त्ये, मुनौ, ३भोजनाभावे च मेदि० । [श्रेष्ठ ।

मुनीन्द्र पु० मुनिः इन्द्र इव ।१बुद्धे अमरः । ७त० । २कृषिमुन्य मत्यां भ्वा० पर० सक० सेट् क्षा वेट् । मुन्यति अमुन्यीत्

मुन्या स्त्री नी०क०ताजकप्रसिद्धे इन्दिक्षाधशब्दार्थे । इन्दिक्षाधशब्दे ६२६पृ० दृश्यम् ।

मुन्यन्न न० मुनिभोज्यमन्नम् । नीवारकन्दादौ ।

मुमुक्ष त्रि० मोक्तुमिच्छुः सुच-सन्-उ । मोक्षेच्छावति । १संसारबन्धनाभावेच्छावति । २यतौ पु० ।

मुमूर्षान पु० मर्त्तुं काम पृषो० दीर्घः । १मेघे २मुमूर्षति त्रि० ।

"दृपदादिभ्य सुमूचानः" इति सुब्याङ्गपाठप्रमन्त्रः ।

मुमूर्षु त्रि० मर्त्तुमिच्छुः मृ-सन्-उ । आसन्नमरणे ।

मुर वेष्टने तु० पर० सक० सेट् । मुरति अमोरीत् ।

मुर पु० मुर-क । १दैत्यभेदे "पार्थेनाथ हिपन् मुरम्" माघः २वेष्टने । ३स्नायाख्याते गन्धद्रव्ये स्त्री अमरः टाप् ।

मुरज पु० मुरात् वेष्टनात् जायते जन-ड । मृदङ्गे वाद्यभेदे अमरः । स इव बन्धः । सुरजबन्धः । चित्रालङ्कारभेदे ।

मुरजफल पु० मुरज इव फलं यस्य । पनसवृक्षे त्रिका० । मृदङ्गफलादयोऽप्यत्र ।

मुरारिपु पु० ६ त० । विष्णौ । मुरारिसुरमथनादयोऽप्यत्र ।

मुरला स्त्री मुरं लाति ला-क । १नर्मदायाम् । "मुरला-माकृतोद्भूतम्" रघुः । २वंशीनाम्नि वाद्ये गौरा०ङीष् ।

मुरलीधर पु० मुरलीं धरति भृ अच् । श्रीकृष्णे मुरलीवादनादयोऽप्यत्र ।

मुर्च्छ मोहे ह्रस्वौ च भ्वा० पर० सक० सेट् । मूर्च्छति अमूर्च्छीत् । आदित् भावे क्त । मूर्तम् मूर्च्छितम् ।

मुर्मुर पु० मुर-क पृषो० द्वित्वम् । १तुषाग्नौ २कन्दर्पे स्त्र्यांचे च मेदि० । [यामनिट् मूर्णः ।

मुर्व बन्धे भ्वा० पर० सक० सेट् । मूर्वति अमूर्वीत् निष्ठा-

मुल रोपणे चु० उभ० सक० सेट् । मोलयति ते अमूमुलत् त ।

मुशटी स्त्री मुश-अटच् गौरा० ङीष् पृषो० । खितकक्षौ हेमच० ।

मुश(स)ली स्त्री मुश मुस वा कलच् पृषो० अस्य यः गौरा० ङीष् । १तालमूल्याम् २गुडगोधिकायाम् राजनि० संज्ञायां कन् । वल्लभ्राम् हला० ।

मुष बधे भ्वा० पर० सक० सेट् । मोषति अमोषीत् ।

मुष क्षेदने दिवा० पर० सक० सेट् । मुष्यति दूरित् असुषत् अमोषीत् पुषादिरयमित्यन्ये ।

मुष लुण्टने क्र्या० पर० द्विक० सेट् । मुष्णाति अमोषीत् ।

मुष(ष)(श)ल पु० मुष-कलच् पृषो० । व्ययोग्ये स्वनामख्याते धान्यादिकण्डनसाधने पदार्थे अमरः । [रायमु० ।

मुषा स्त्री० मुष क-टाप् । धातुद्रावणे पात्रभेदे (मुची)

मुषित त्रि० मुष-क्त । अपहृतद्रव्ये जने अमरः ।

मुष्क पु० मुष-कक् । १पुरुषचिह्नभेदे अण्डकोषे (घण्टा-पाटल) २मोक्षकर्त्तरि ३संक्षिप्ते च मेदि० ४तस्करे, ५मांसले च हेमच० । स्वार्थे क । तत्रैव । [हेमच० ।

मुष्कशून्य पु० ३त० । हृतवृषणरहिते राज्ञामन्तःपुररक्षके (खोजा

मुष्टि पुंस्त्री० मुष-क्तिच् । १बद्धपाणौ अमरः २यवपरिमाणे पु० हेमच० ३कुस्तूलप्रक्षाणे च । क्तिन् । ४मोषणे स्त्री ।

मुष्टिक पु० मुष्टा कायति के-क । १कंसराजमल्लभेदे । मुष्टि मौष्टिं प्रयोजनमस्य कन् । २स्वर्णकारे हेमच० ।

मुष्टिकान्तक पु० ६त० । बलदेवे शब्दर० तस्य मुष्टिकासुर-हननात्तथात्वम् ।

मुष्टियुत न० । ३त० । कपर्दकमुष्टाक्रीडने (पुरमुट्) शब्दमा०

मुष्टिन्धय पु०मुष्टिं धयति धे खच् मुम् च । बालके त्रिका० ।

मुष्टिबन्ध पु०मुष्टेर्बन्धो यत्र । १संयहे अमरः । ६त० २मुष्टि-बन्धने । [आमोषीत् पुषादिरयमित्यन्ये ।

मुस्त खण्डने टि० पर० सक० सेट् । मुस्तति दूरित् असुस्तत् ।

मुस(ष)(श)लिन् मुस(ष)(श)ल+अस्त्यर्थे इनि । बलदेवे अमरः । [वेध्ये अमरः ।

मुस(ष)(श)ल्य त्रि० मुस(ष)(श)लेन वेध्यः यत् । मुषल-

मुसलह पु० नी० ता० वृक्षे नवांगे "मुसलहे पत्र लवाः प्रदिष्टाः" नी० ता० ।

मुस्त संहतौ चु० उभ० सक० सेट् । मुस्तयति ते अमुमुस्तत् त ।

मुस्त पु० मुस्त अच् स्त्रीत्वे टाप् । मुस्तके (मुथा) हारा० तत्रार्थे स्त्री अमरः स्वार्थे क । अत्रैव अस्त्री० अमरः । स्थावरविषभेदे पु० हेमच० । [भेदे अमरः ।

मुस्ताभ न० मुस्तेव भाति भा-क । (नागरमुथा) मुस्तक-

मुह मोहे वैचित्त्ये टि० उभ० अक० सेट् मुह्यति दूरित् अमुहत् दूरित् मोहिता, मोग्धा, मोढा अत्रैव मूढोऽपि ।

मुहिर पु० मुह किरच् । १कामे, २मूर्खे च मेदि० ।

मुहुस् अव्य० मुह-उसिक् । पौनः पुन्ये अमरः ।

मुहूर्त्त स्त्री० मुर्च्छ क्त धातोः पूर्वं सुट् च । १द्वादशलग्नभुक्ते काले, पञ्चदशघटिभक्तस्य दिनस्य पञ्चदशभागे, किञ्चिदू-नाधिकघटिकाद्वयरूपे २काले च ।

मू बन्धे भ्वा० या० सक० सेट् । अवते अमविष्ट सुसुवे ।

मृक पु० मू-कक् । १मनुष्ये त्रिका० २दैत्यभेदे मेदि० ३टीनि हेम० ४जडे हेमच० । [४जडे हेमच० ।

मूढ त्रि० मुह-क्त । १मूर्खे अमरः । २बाले ३तन्द्रिते मेदि०

मूत त्रि० मू+बन्धे क्त । १बद्धे २संयते च अमरः । [मूत्र त

मूत्र स्रावे अट० चु० उभ० अक० सेट् । मूत्रयति ते अमूत्र-

मूत्र न० मूत्र-अच् । प्रस्रावे उपस्थाग्र छिद्रजले अमरः ।

मूत्रकृच्छ्र न० । रोगभेदे "व्यायामतीक्ष्णौषधरूक्षमद्य-प्रसङ्गदत्यम्बुनिषेवणात् । व्यानप्रसक्तस्य च मूत्रवेगान् मूत्रौकसादो विकृतिश्च तस्य" भावप्र० ।

मूत्रदोष प० मूत्रस्य दोषो यस्मात् दुष-घञ् ६त०। प्रमेहरोगे राजनि०।

मूत्रनिरोध पु० मूत्रं निरुणद्धि नि+रुध-अण्। मूत्रप्रतिबन्धकरोगे। [२कर्कोट्याञ्च राजनि०।

मूत्रफला स्त्री० मूत्रमेव फलं यस्याः। १त्रपुष्याम् (शशा)

मूत्राघात पु० मूत्रमाहन्ति आ+हन-अण्। मूत्रहननकारिणि रोगभेदे। "प्रायो मूत्रविघातादौषातकुण्डलिकादयः। जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश" भावप्र०।

मूत्राशय पु० ६त०। नाभेरधोदेशे वस्तिनामकस्थाने भावप्र०।

मूर्ख त्रि० मुह्यति मुह-रन् आदेशः। १मूढे २गायत्रीरहिते ३सार्थगायत्रीरहिते च। "क्रियाहीनस्य मूर्खस्य" इति स्मृतिव्याख्यायां निबन्धकारैस्तथार्थकतया व्याख्यानात्।

मूर्च्छना स्त्री मुर्च्छ-युच्। "स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते। मूर्च्छनामिति तां प्राहुः कवयो ग्रामसम्भवाम्" इत्युक्ते गानाङ्गभेदे "स्फुटीभवद्ग्रामविशेषमूर्च्छनाम्" माघः।

मूर्च्छा स्त्री मुर्च्छ-भावे अङ्। १मोहे अमरः। २अनिद्रायामपि बाह्येन्द्रिय व्यापारशून्यावस्थायां "क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः। वेगाघातादभिघातात् क्षीणसत्त्वस्य वा पुनः। करणायतनेभ्यो बाह्येभ्यान्तरेषु च। निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः" भावप्र०। ३हर्षे च।

मूर्च्छाल त्रि० मूर्च्छा+अस्त्यर्थे लच्। मूर्च्छाविशिष्टे अमरः।

मूर्च्छित त्रि० मूर्च्छा जातास्य तारं० इतच्। १मूर्च्छायुक्ते २हर्षे ३वर्द्धिते च मेदि०

मूर्त्त त्रि० मुर्च्छ-क्त। १मूर्च्छान्विते अमरः। २मूढे ३कठिने च मेदि०। मूर्त्तिरस्त्यस्य अच्। ४मूर्त्तिमति न्यायोक्तेषु अवच्छिन्नपरिमाणवत्सु। क्षितिजलपावकपवनमनःसु च।

मूर्त्ति स्त्री मुर्च्छ-क्तिन्। १देहे २काठिन्ये, अमरः। ३प्रतिमायाञ्च हेम०।

मूर्त्तिमत् पु० मूर्त्तिरस्त्यस्य मतुप्। १देहे। २आकारयुक्ते ३काठिन्यवति च त्रि० स्त्रियां ङीप्। [जातमात्रे त्रि०।

मूर्द्धज पु० मूर्द्धनि जायते जन-ड। १केशे वटा०। २मस्तकजाते।

मूर्द्धन्य त्रि० मूर्द्धनि भवः यत्। १मस्तकजाते। २शिक्षाग्रन्थोक्तेषु ऋकारटवर्गरषवर्णेषु पु०।

मूर्द्धन् पु० मुर्च्छ-कनिन् धृट् च। मस्तके अमरः।

मूर्द्धपुष्प पु० मूर्द्धनि पत्रशिरसि पुष्पं यस्य। शिरीषवृक्षे शब्दमा०

मूर्वा स्त्री मुर्च्छ-अच्। खनामख्याते धनुर्गुणोपयुक्ते लताभेदे गौरा० ङीष्। मूर्वेत्यपत्य भरतः। [अमूर्विष्ट।

मूल प्रतिष्ठायां भ्वा० उभ० अक० सेट्। मूलति ते अमूलीत्

मूल रोपणे चुरा० उभ० सक० सेट्। मूलयति ते अमूमुलत् त।

मूल न० मूल-क। १शिफायाम् (जड़) (शिकड़) अमरः २आद्ये ३निकुञ्जे ४नक्षत्रभेदे ५अग्निजे विश्वः ६वाणिज्याद्युपयोगिनि ७मूलधने, मेदि०। ८निजे त्रिकाण्ड०। ९चरणे १०शूरणे शब्दमा० ११पिप्पलीमूले १२पुष्करमूले राजनि०। १३टीकादिना व्याख्येयग्रन्थे च अश्विन्यवधिके जनविंशे नक्षत्रे अस्त्री० ति०त० शवद्वर० स्त्रीत्वमुक्तम्।

मूलक न०मूल+संज्ञायां कन्। १कन्दभेदे (मूला) वर्ज्जनीयं सदा विप्रैर्मूलकं महिरासमम्" इति ब्रह्मपु०। २विषभेदे पु० हेमच०। [ज्ञने रत्नमा०।

मूलकपर्णी स्त्री मूलकस्येव पर्णान्यस्याः ङीप्। शोभाञ्जने रत्नमा०।

मूलकर्मन् न० मूलेन मन्त्रौषधादिना कर्मवशीकरणादि। औषधादिना वशीकरणकर्मणि।

मूलकृच्छ्र पु० मूलेन कथितकृच्छ्रमूलेन कृच्छ्रः। "मूलकृच्छ्रः स्मृतो मूलैरिति" स्मृत्युक्ते १व्रतभेदे। तदु यस्य। २तद्वति त्रि०।

मूलज न० मूलाज्जायते जन ड। १आर्द्रके राजनि०। २तत्पलाण्डौ पु० हेमच०। ३मूलनक्षत्रजातमात्रे त्रि०।

मूलत्रिकोण न० "सिंहो वृषस्य मेषस्य कन्या धन्वी घटोघटः। "अर्कादीनां त्रिकोणानि मूलानि राशयः क्रमात्" रव्यादीनां क्रमेण सिंहादिषु राशिषु। तद्भागाश्च "रविभौमजीवभार्गवशनैश्चराणां त्रिकोणभागाः स्युः। नखरविदिक्कृतिथिनखरार्कैस्त्रो दिग्भांशकाः स्वस्वात् ज्यो०त०।

मूलद्रव्य न० कर्म०। मूलधने यदवलम्ब्य वाणिज्यादिकं क्रियते तस्मिन् (पुँजि) मूलधनादयोऽप्यत्र।

मूलपर्णी स्त्री मूलमारभ्य पर्णान्यस्याः ङीप्। मयूरशिखायाम् रत्नमा०। [राजनि०।

मूलपुष्कर न० पुष्करस्य मूलं राज० पर०। पुष्करमूले

मूलपोती स्त्री पू-तच् गौ० ङीष् मूलं प्रधाना मेतति। पूतिकायाम् राजनि०।

मूलप्रकृति स्त्री मूलीभूता सर्वाद्या प्रकृतिः। सांख्यमतोक्ते सर्वेषां कारणीभूते साम्यावस्थापन्ने सत्त्वरजस्तमोरूपे त्रिगुणात्मके १प्रधाने "मूलप्रकृतिरविकृतिः" सांख्यकारिका। २दुर्गायाञ्च ब्रह्मवै०पु०४०अ०। [राजनि०।

मूलफलद पु० मूलेऽपि फलं ददाति प्रसूते दा-क। पनसवृक्षे

मूलरस पु० मूले रसो यस्य । मोरटालतायाम् रत्नमाला ।
मूलशाकट न० मूलानां क्षेत्रं मूल+शाकट । मूलभक्षण-योग्ये क्षेत्रे शाखिन । मूलशाकिनोऽप्यत्र पु० । [राजनि०
मूला स्त्री मूलानि बाहुल्येन सन्त्यस्याः अच् । शतमूल्याम्
मूलाधार पु० ६त० । १नाभिलिङ्गयोर्मध्ये तस्य हि शरीर-स्थ सकलनाडीनां मूलस्थानत्वात्तथात्वम् "मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके । मध्ये स्वयम्भूलिङ्गन्तु कोटिसूर्य्यसमप्रभम्" इत्युक्तलक्षणे त्रिकोणाकारे तन्त्रोक्ते २सुषुम्णानाडीस्थे चक्रभेदे च । [कोऽप्यत्र ।
मूलिन् पु० मूलमस्त्यस्य इनि । वृक्षे शब्दच० । ठन् । मूलि-
मूल्य न० मूलाय पटादिकारणतन्त्वाद्यादानाय इदम् यत् । तन्त्वाद्यादानाय दीयमाने १धने अमरः । मूल-ण्यत् । क्रयणयोग्ये त्रि० ।
मूष लुण्ठने भ्वा० पर० सक० सेट् । मूषति अमूषीत् । सुमूष
मूष पुंस्त्री० मूष-क । १मूषिके रत्ना० स्त्रियां ङीष् । २तैजसद्रव्यद्रावणपात्रे (मुचि) अमरः । ३गवाक्षे "एकद्वित्रादि मूषायवृद्धे"ति लीला० ४देवताऽवृद्धे च स्त्री शब्दच०
मूषक पुंस्त्री० मूष-एवुल् स्त्रीत्वे टाप् अत इत्वम् । उन्दुरौ शब्दच० ।
मूषकपर्णी स्त्री मूषककर्णस्तृकर्ण इव पर्णान्यस्याः । (उन्दुर-कानी) आखुकर्ण्याम् मूषिककर्ण्यादयोऽप्यत्र ।
मूषरिफ पु० नीच०ता० उक्ते ग्रहराफाख्ये योगभेदे "यीगो यदा मन्दगतेरधैकमयं गमत्येति तदेषराफः । कार्य्यक्षयो मूषरिके खलोक्ये दौस्थ्ये न चिन्ताजमतेन चिन्त्यम्" ।
मूषिक पुंस्त्री० मूष-इन् । १उन्दुरौ अमरः स्त्रीत्वे टाप् । २सुषिकपर्णायां स्त्री शब्दर० ३सूनायां भरतः । [शब्दर०
मूषिकपर्णी स्त्री मूषिककर्ण इव पर्णान्यस्याः जलजतृणभेदे
मृ स्त्री मृष+इन् गौ०ङीष् । १खर्पराद्रावणपात्रे (मुचौ) २महाऋषिभेदे राजनि० ।
मृ मृतौ तु० सार्वधातुके लुडि च्लौ लिङि च आ० अन्यत्र पर० अक० अनिट् म्रियते । अमृत । ममार मर्त्तासि मृग्रीष्ट ।
मृकण्ड(ण्डु) पु० ऋषिभेदे शब्दच० ।
मृग्र संघाते भ्वा० प० अक० सेट् । मृग्रन्ति अमृग्रीत् ।
मृग अन्वेषणे याचने च अद० चु० आ० सक० सेट् मृगयते अमृगत ।
मृग्र अन्वेषणे दिवा० पर० अक० सेट् । मृग्यति अमृगीत् ।
मृग पु० मृग-क । १पशुभाते, २गजभेदे, ३अश्विन्यधिपतौ पञ्चमे नक्षत्रे पु० । अ०सु०मृग-भावे अच् । ४अन्वेषणे पु० ५याचने च मेदि० ६यज्ञभेदे ७मार्गशीर्षे मासि अजयः अच् । ८मृगभेदे, भरतः ९मकररागौ च पु० ज्यो०त० । १०हरिणे अमरः सर्वतः जातौ स्त्रियां ङीष् ११नरभेदे "मृगे तृषा च चित्रिणी" रतिमञ्जरी ।
मृगगामिनी स्त्री मृग इव गच्छति गम णिनि ङीप् । १विहङ्गायाम् राजनि० । २मृगतुल्यगमनवति त्रि० स्त्रियां ङीप् । [व्याघे शब्दच० ।
मृगजीवन पु० मृगैस्तन्मांसादिविक्रयाभिर्जीवति जीव-ल्यु ।
मृगणा स्त्री मृग युच् टाप् । नष्टद्रव्यस्यान्वेषणे अमरः ।
मृगतृष्णा स्त्री मृगाणां तृष्णेव तृष्णाहेतुत्वात् । सूर्य्यकिरणे जलभ्रान्तौ अमरः । निर्जलदेशस्थं सूर्य्यकिरणं दूरतो वीक्ष्य मृगैर्जलभ्रान्त्या तृष्णार्त्तैः सङ्घ गम्यते न च लभ्यते इति भीष्मे मरुदेशे सिकतादौ पतितरविकिरणेषु जलभ्रान्तिरिति च लोकप्रसिद्धम् । स्वार्थे क । तत्रैव ।
मृगदंशक पुंस्त्री० मृगं दंशति दृश अण्वुल् । कुक्कुरे अमरः स्त्रियां जातित्वात् ङीष् । [स्त्रियां ङीष् ।
मृगधूर्त्तक पुंस्त्री० मृगेषु मध्ये धूर्त्तकः । शृगाले अमरः
मृगनाभि पु० मृगस्य नाभिः जन्महेतुर्यस्य । कस्तूर्य्याम् मृगभेदे अमरः ।
मृगनेत्रा स्त्री मृगो मृगशिरो नक्षत्रं नेता प्रापकः सर्व-रात्रिप्रकाशकत्वात् यस्य अच्समा० । सौरमार्गस्थ किञ्चि-दधिकतयोर्विंशदिनावधिप्रेक्षपर्य्यन्तराशिषु ।
मृगनाभिजा स्त्री मृगस्य नाभिर्जायते जन-ड । कस्तूर्य्याम् क्षेमच० । [क्षेमच० मृगेऽप्यादयोऽप्यत्र २सिंहराशौ च ।
मृगपति पु० ६त० । मृगाणां वनानां पतिः स्वामी । १सिंहे
मृगप्रिय न० ६त० । पवेततृणे राजनि० ।
मृगबधाजीव पु० मृगवधेनाजीवति वा+जीव-अच् । व्याधे अमरः मृगाजीवोऽप्यत्र ।
मृगबन्धनी स्त्री मृगोबध्यतेऽनया बन्ध-करणे ल्युट् ङीप् । मृगबन्धनार्थे जाले अमरः । करणस्य कर्त्तृत्वविवक्षायां णिनि ङीप् । मृगबन्धिनीत्यप्यत्र अमरे पाठान्तरम् ।
मृगभक्ष्या स्त्री मृगैर्भक्ष्यते भक्ष-कर्मणि यत् । अटामांसाम् राजनि० ।
मृगमद पु० मृगस्य मदो गर्वो यस्मात् । कस्तूर्य्याम् अमरः ।
मृगमदवासा स्त्री मृगमदस्येव वासो गौरभमस्याः । कस्तू० रीमल्लिकायां राजनि० ।
मृगया स्त्री मृगं यात्यनया या-क अर्थे क । (स्त्रीकार)

पशुवधफलके व्यापारभेदे आखेटके अमरकोषः ।

मृगयु पु० मृग-अस्यर्थे यु । १जङ्गलि २मृगाले ३व्याधे च मेदि० "मृगयुमिव मृगोऽथ दक्षिणेमां" भट्टिः ।

मृगरसा पु० मृगो मृगमांसं तस्येव रसोऽस्याः । बृहदेवीलतायाम् राजनि० ।

मृगराज पु० मृगाणां पशूनां राजा टच्समा० । १सिंहे शब्दर० । मृगेण राजेन राजते अच् । २चन्द्रे । ३सिंहराशौ च । उपचारात् ४मृगशिरानक्षत्रे च ।

मृगराटिका स्त्री मृगं रटति जीव्यत्वेन रट-अण् गौ० ङीष् स्वार्थे क । जीवन्त्यामोषधौ राजनि० । [राशौ च ।

मृगरिपु पु० ६त० । १सिंहे मृगगतप्रभृतयोऽप्यत्र । २सिंह-

मृगलाञ्छन पु० मृगो लाञ्छनं यस्य । १चन्द्रे शब्दर० । मृगाङ्कादयोऽप्यत्र उपचारात् २मृगशिरानक्षत्रे च ।

मृगवल्लभ न० ६त० । कुन्दरतृणे राजनि० ।

मृगवाहन पु० मृगो वाहनं यस्य । १वायौ "धावन् हरिणपृष्ठस्थः" इति वायुध्यानम् । २ज्ञातिनक्षत्रे च ।

मृगव्य न० मृगान् व्यथतेऽत्र व्यध-ड । मृगयायाम् अमरः ।

मृगशिरस् न० पु० । मृगस्येव शिरोऽस्य । अश्विन्यवधिके पञ्चमे नक्षत्रे मृगशिरायत्र स्त्री टाप् शब्दर० । मृगशीर्षन्, न० रायस० मृगशीर्ष पु० एतावप्यत्र भरतः ।

मृगा स्त्री मृगो मृगमांसतुल्यरसोऽस्यस्य अच । बृहदेवीलतायाम् राजनि० ।

मृगाक्षी स्त्री मृगस्येवाक्षि तत्तुल्यं पुष्पं वा यस्याः अच्समा० ङीष् । १विशालायां २मृगतुल्यनयनवत्यां स्त्रियां च मेदि० । [जायते जन-ड । कलभूयाम् राजनि० ।

मृगाण्डजा स्त्री मृगस्याण्डाकारात् नाभिस्थितमांसपिण्डात्

मृगादन पुंस्त्री० मृगान् अत्ति अद-ल्यु । क्षुद्रव्याघ्रे अमरः । स्त्रियां ङीष् । मृगान्नकोऽप्यत्र ।

मृगादनी स्त्री मृग इवाद्यते अद-कर्मणि ल्युट् । १बृहदेव्याम् २इन्द्रवारुण्याम् (राखालशशा) ३कर्कोटीभेदे च राजनि० । [२सिंहराशौ च ।

मृगाराति पु० ६त० । १कुक्कुरे शब्दमा० । मृगशत्रौ २सिंहे च ।

मृगारि पु० ६त० । १कुक्कुरे २सिंहे ३व्याघ्रे ४रक्तशोभाञ्जने च राजनि० तत्सेवने हि तस्य नाशः । ५सिंहराशौ च ।

मृगाविध पु० मृगं विध्यति व्यध+किप् पूर्वदीर्घः । व्याधे जटाधरः ।

मृगित त्रि० मृग-क्त । १अन्वेषिते अमरः २याचिते च ।

मृगेन्द्र पुंस्त्री० मृगः इन्द्र इव । सिंहे अमरः स्त्रियां ङीष् ।

मृगेन्द्रचटक पु० मृगेन्द्र इव हिंस्रश्चटकः पक्षी । श्येनपक्षिणि जटा० ।

मृगेन्द्राणी स्त्री मृगेन्द्रेण सिंहेनाण्यते भण्यते अण-कर्मणि घञर्थे क गौरा० ङीष् । वासके राजनि० ।

मृगेर्वारु स्त्री मृगप्रिया इर्वारुः कर्कोटी । श्वेतायामिन्द्रवारण्याम् (सादा राखालशशा) राजनि० ।

मृगेष्ट पु० ६त० । सहदेवे राजनि० ।

मृगेक्षण स्त्री मृगस्य ईक्षणमिवेक्षणं पुष्पं वा यस्याः । १मृगशीर्षे राजनि० २मृगतुल्यनेत्रायां स्त्रियां च ।

मृज शोधने भूषणे च वा चु० उभ० पक्षे अदा० सक० वेट् । मार्जयति-ते मार्ष्टि अमीमृजत्-त अममार्जत्-त अमार्क्षीत् आमार्क्षीत् अमृक्षत् धित् मृजा । [धता" भट्टिः

मृजा स्त्री मृज-अङ् । मार्जने अमरः "शिरसा च मृजा-

मृड तोषणे क्रया० ह्व० च पर० सक० सेट् । मृडणाति मृडति अमर्डीत् ममर्ड । [आत्मने च मृडानी ।

मृड पु० मृड-क । १शिवे अमरः २ततृपत्न्याम् स्त्री ङीष्

मृण हिंसे तु० प० सक० सेट् । मृणति अमर्णीत् ।

मृणाल पुं० न० मृण-कालन् । १पद्मादेर्नालस्थे खण्डे अमरः २वीरणमूले न० मेदि० गौरा० ङीष् । मृणालीत्यपि ३विसतन्तौ स्त्री राजनि० ।

मृणालिन् स्त्री मृणालं विद्यतेऽस्य अच् मृणालं पद्मं तत्समूहे तद्युक्तदेशे वा इनि । १पद्मसमूहे २पद्मयुक्तदेशे ३तद्युक्तलतायाञ्च जटा० ।

मृत न० मृ-भावे क्त । १मरणे । २तत्तुल्यदुःखजनके व्याधितके दत्तौ च अमरः । कर्त्तरि क्त । ३गतप्राणे त्रि० ।

मृतक न० मृतेन मरणेन कायति के-क । मरणाशौचे "स्पृतके मृतकेऽथ वा" इति स्मृतिः ।

मृतकल्प त्रि० ईषदसमाप्तो मृतः मृत+कल्पप् । मृतप्राये ।

मृतकान्तक पुंस्त्री० मृतः शवदेहः कान्तोऽभिमतो यस्य कप् । शृगाले हारा० स्त्रियां ङीष् ।

मृतजीव पु० मृतः नष्टः सन् पुनर्जीवति जीव-क्विप् । तिलकवृक्षे राजनि० ।

मृतवत्सा स्त्री मृतोवत्सो यस्याः । मृतापत्यायां स्त्रियां २स्त्रीगव्याञ्च "मृतवत्सा च या नारीति" तन्त्रम् ।

मृतसञ्जीवनी स्त्री मृतान् संजीवयति सम्+जीव-णिच् ल्यु गौरा० ङीष् । १गोरक्षदुग्धावामोषधौ राजनि० तन्त्रोक्ते २विद्याभेदे च । [मरणनिमित्तं क्रतस्नाने अमरः

मृतस्नात त्रि० मृतं मरणं तन्निमित्तं स्नातः स्ना-क्त ।

मृत्तालक न० मृतमालयति भूषयति आल-णिच्-ण्वुल्। आढक्याम् अमरः। मृत् मृत्तिका तालः प्रतिष्ठा यस्य वा कप्। मृत्तालकमयत्व शब्दर०। सौराष्ट्रमृदि राजनि०

मृत्तिका स्त्री मृद्+तिकन् टाप्। १मृदि (माटि) सा जेवत्वेनाऽऽख्यस्य अच् टाप्। २आढक्याम् राजनि०।

मृत्फली स्त्री मृद् फलमस्याः ङीष्। कुष्माण्डौषधौ। (कुड़ा) हारा०।

मृत्यु पु० मृ-त्युक्। १यमे हेम० देहादिभ्यः २प्राणवियोगे विजातीयात्ममनःसंयोगनाशे वा ३मरणे च अमरः। "मृत्योः स मृत्युमाप्नोति" श्रुतिः भयात् मायायां जाते ४पुत्रभेदे पु० भयाज्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम्। निर्ऋतिश्च तथा कन्या मृत्योर्भार्याऽभवन्नृप!। अलक्ष्मीर्नाम तस्यां च मृत्योः पुत्रास्चतुर्दश" मार्क०पु०।

मृत्युञ्जय पु० मृत्युं जयति जि-अच्। १महादेवे अमरः "कतिधा मृत्युकन्यानां ब्रह्मणां कोटिशोलये। काले न क्षीणः शम्भुश्च सत्त्वरूपी च निर्गुणः। मृत्युकन्या जिता शश्वत् शिवेन गुरुणा मम। न मृत्युना जितः शम्भुः कल्पे कल्पे सुतौ सुतम्" ब्रह्मवै०प्र० ५१अ०।

मृत्युनाशक पु० मृत्युं नाशयति नाशि-ण्वुल्। १पारदे राजनि० तस्य हि रसायनक्रियादिना शोधयित्वा सेवने मृत्युनाशकत्वम्। २मृत्युनाशकमात्रे त्रि०।

मृत्युपुष्प पु० मृत्यवे स्वामिमरणाय पुष्पं यस्य। इक्षौ रत्नमा० तस्मिन् पुष्पिते हि ततस्वामिनो नाशः।

मृत्युफला स्त्री मृत्यवे स्वनाशाय फलं यस्याः। कदल्यां सेदि०। फलपाके हि तस्या नाशो लोकसिद्धः। [त्रिका०।

मृत्युबीज पु० मृत्यु स्वइहेतुर्हि एव बीजं कारणमस्य। वंशे

मृत्युसूति स्त्री मृत्यवे सूतिः प्रसवोऽस्याः। कर्कटकयोषिति प्रसवेन हि तस्या नाशः "यथा कर्कटकी गर्भमादत्ते मृत्यवे निजम्" इति पुराणम्।

मृत्(त्स्ना) स्ना स्त्री मृद्+प्रशस्त्यार्थे सक स्ना वा। १प्रशस्तमृत्तिकायाम् अमरः। अर्शआद्यच् स्नान्तः। २आढक्याम् अमरः।

मृद क्षोदे क्रया० प० सक० सेट्। मृद्नाति अमर्दीत् ममर्द।

मृद् (द्दा) स्त्री मृद्यते मृद-कर्मणि क्विप्। मृत्तिकायाम् (माटी) अमरः। हलन्तत्वात् वा टाप्। मृद्दाप्यत्र।

मृद्ङ्ग पु० मृद अङ्गच् किच्च। १वाद्यभेदे अमरः। २कोषातक्याम् स्त्री रत्नमा० गौरा० ङीष्।

मृद्ङ्गफल पु० मृद्ङ्ग इव फलमस्य। पनसवृक्षे शब्दर०।

मृद्ङ्गफलिनी स्त्री मृद्ङ्ग इव फलमस्त्रस्या इति ङीष्। कोषातक्याम् राजनि०। मृद्ङ्गतुल्यफले पनसवृक्षे पु० शब्दर०।

मृदु त्रि० मृद्-कु। १कोमले अमरः। स्त्रियां वा ङीप्। मृद्वी मृदुः। सा च १गटहकन्यायाम्। २चित्राविशाखाऽनुराधामूलरेवतीनक्षत्ररूपे नक्षत्रगणभेदे च त्रि०ज्यो०त०।

मृदुचर्मिन् पु० मृदु कोमलं चर्म त्वगस्त्रस्य ब्रीह्या०इनि। भूर्जवृक्षे राजनि०।

मृदुच्छद पु० छाद्यतेऽनेन छदः त्वक् ६त०। १भूर्जवृक्षे २पर्वतजपीलुवृक्षे जटा० ३कुकुरवृक्षे ४श्वीतालवृक्षे च राजनि०।

मृदुताल स्त्री कर्म०। श्वीतालवृक्षे (तेऊड़ेत) राजनि०।

मृदुत्वच्(च) पु० मृदुः त्वक् त्वचा वा यस्य। भूर्जत्वचवृक्षे अमरः।

मृदुपत्त्र पु० मृदूनि पत्त्राण्यस्य। १नले राजनि०। कर्म०। २कोमलपर्णे न० ६त०। ३तद्वति त्रि०। ४चिल्लीशाके स्त्री राजनि० गौरा० ङीष्। [२मृदुपत्त्रियुक्ते त्रि०।

मृदुपर्वक पु० मृदूनि पर्वाण्यस्य कप्। १वेतसे राजनि०।

मृदुपुष्प पु० मृदूनि पुष्पाण्यस्य। १शिरीषवृक्षे रत्नमा०। ६त०। २मृदुकुसुमयुते त्रि०। कर्म०। ३कोमलपुष्पे न०।

मृदुफल न० मृदूनि फलान्यस्य। १विकङ्कते (वइचि) २नारिकेले च राजनि०। ३कोमलफलयुते त्रि०। [त्रि० अमरः। कर्म०। ४कोमलफले न०।

मृदुल न० मृद्-कुलच्। १जले शब्दच० २कोमलमात्रे

मृदुलोमक पु० ६त०। १शशके हेमच०। २कोमललोमयुक्ते त्रि०। कर्म०। ३कोमललोम्नि न०।

मृदूत्पल न० कर्म०। १नीलोत्पले शब्दर०। २नीलपद्मे च।

मृद्वीका स्त्री मृद्+ईकन्। १द्राक्षायाम् अमरः २कपिलद्राक्षायाञ्च राजनि०।

मृध न० मृध्यतेऽत्र घञर्थे आधारे क। युद्धे अमरः।

मृध आद्रीभावे भ्वा० उभ० सक० सेट् उदित् ङ्या० सेट्। मर्ध्नाति-ते अमर्ध्नीत् अमर्ध्निष्ट ममर्ध्न मर्ध्नुते।

मृग्र स्पर्शने प्रतिघाते च तु० पर० सक० अनिट्। मृग्नाति अस्राग्नीत् अमार्ग्नीत् अस्रष्टुत् ममर्ग्न।

मृष क्षमायाम् कद०चु०उभ०सक० सेट्। मर्षयति ते अमीमृषत् त। [अमर्षिष्ट।

मृष क्षान्तौ कद०भ्वा०उभ० सक० सेट्। मृष्यति ते अमृषीत्

मृष सेचने भ्वा०पर०सक०सेट्। मर्षति अमर्षीत् उदित् ङ्या० सेट्।

मृष क्षमायां चु०उभ०सक०सेट्। मर्षयति ते अमीमृषत त अममर्षत् त। [ऋदित् ङिति क्ङा वेट्।

मृष क्षमायां भ्वा० उभ० सक० सेट्। मर्षति ते अममर्षीत्

मृष क्षमायां चु०पक्षे दिवा०च उभ०सक०सेट्। मृष्यति ते। मर्षयति ते। मर्षितः मर्षित्वा।

मृषा अव्य०सृप-का। मिथ्याशब्दार्थे अमरः।

मृषार्थक न० मृषा अत्यन्तासमभूतोऽर्थो यस्य। "कूर्मलोमतनुत्वाणः गणपङ्क्षधनुर्द्वरः" इत्यादि मिथ्यार्थकवाक्ये।

मृषालक पु० मृषालक इव मृक्षयांमस्यस्य कच्। आत्मश्लघे शब्दर०। [हुदो वक्ष्मिनित्यादिवाक्यम्।

मृषावाद पु० मृषा+वद-घञ्। मिथ्यावाक्ये जटा० यथा

मृषोद्य न० मृषा+वद-भावे क्यप्। १मिथ्याकथने तद्विद्यतेऽस्य अच। २मिथ्यावादिनि त्रि०शब्दमा०। [त्रि०अमरः

मृष्ट न०मृज(ष)-क्त। १मरिचे राजनि०. २धृष्टे ३शोधिते च

मृ वधे क्र्या० पा० प० सक० सेट्। म्रृणाति अमारीत्।

मे प्रतीदाने भ्वा० आत्म० सक० अनिट्। मयते अमास्त।

मेक(ख)ल पु० मि-कलच् खलच् वा नाम्त्वम्। १अद्रिभेदे मे इति कलो यस्य क मध्य। २छागे पुंस्त्री० राजनि० स्त्रियां ङीष्।

मेक(ख)लकन्यका स्त्री मेक(ख)लाद्रेर्जायते जन-ड। नर्मदानद्याम् हेमच०।

मेक(ख)लाद्रिजा स्त्री मेक(ख)लाद्रेर्जायते जन-ड। नर्मदानद्याम् हेमच०।

मेक्षण न० "इध्मजातीसिध्माद्र्यं प्रमाणं मेक्षणं भवेत्। दर्भं वार्क्षं च पृथ्वग्रमवदानक्रियाक्षमम्" ऋन्दोगप०भक्ते यज्ञपात्रभेदे। इध्मप्रमाणं प्राग्दृश्यम्।

मेखला स्त्री मि-खलच्। "मेखला त्वष्टयष्टिका" उक्ते स्त्रीकट्याभूषणभेदे अमरः। उपनयनकाले ब्रह्मचारिधार्ये सोञ्जादौ २कटीसूत्रे "मौञ्जी त्रिवृत समा श्लक्ष्णा कार्या विप्रस्य मेखला। क्षत्रियस्य च मौर्वी वैश्यस्य शणतन्तुजा" मनुः। ३खड्गादिमुष्ट्याधारणार्थे ४उपर्यधोभागेन बन्धे पुरैलनितम्बे मेदि० ६नर्मदायां शब्दर० ७दृष्टिप्रणद्धाम् राजनि०। होमकुण्डोपरिस्थे सप्तकुशे ८वेष्टनभेदे च।

मेघ पु० मिह-घञ् कुत्वम्। धूमज्योतिःपवनसलिलसंघातजन्ये १जलधरे २सुस्तके च अमरः। ३राक्षसभेदे शब्दच० [स्त्रियां ङीष्। ४रागभेदे च सं०गी०।

मेघजीवन पुंस्त्री० मेघो जीवनं यस्य। चातकखगे राजनि०

मेघज्योतिस् न०मेघजन्यं ज्योतिः ष०त०। वज्राग्नौ अमरः

मेघनाद पु० मेघस्येव नादोऽस्य। १यज्ञे २रावणस्य पुत्रे इन्द्रजिति। ३त०। ४मेघगर्जे च मेदि०।

मेघनादानुलासक पुंस्त्री० मेघस्य नादेनानुलसति अनु+लस ण्वुल्। मयूरे राजनि० स्त्रियां ङीष्। णिनि। मेघनादानुलासिन् मयूरे अमरः।

मेघनामन् पु० मेघस्य नामेव नाम यस्य। मेघवाचकशब्दवाच्ये मुस्तके अमरः।

मेघपुष्पक न० मेघस्य पुष्पमिव। जले अमरः।

मेघयोनि स्त्री० ब०त०। धूमे शब्दरत्ना०।

मेघवर्षा स्त्री मेघस्येव वर्षोऽस्याः। नीलीवृक्षे शब्दच०।

मेघवर्त्मन् न०ब०त०। आकाशे त्रिका०। मेघवीथ्यादयोऽप्यत्र।

मेघवह्नि पु० मेघजन्यो वह्निस्तद्घर्षणजातोग्निः। वज्राग्नौ हेमच०। एवं मेघानलादयोऽप्यत्र।

मेघवाहन पु० मेघो वाहनमिव यस्य, मेघान् वाहयति चालयति वह-णिच् ल्यु वा। इन्द्रे अमरः।

मेघसार पु० मेघस्य कर्पूरस्य सारः। चीनकर्पूरे राजनि०।

मेघस्तनितोद्भव पु० मेघस्तनिताद्भवति उद्+भू-अच्। शिलारुढकवृक्षे राजनि०।

मेघागम पु० मेघानामागमो यत्र। वर्षाकाले वर्षर्तौ शब्दर०.

मेघानन्दिन् पु० मेघेन तद्ध्वनिना आनन्दति आ+नन्द-णिनि। मयूरे अच् मेघानन्दा। बलाकायां राजनि०।

मेघान्त पु० मेघानामन्तो यत्र। शरत्काले राजनि० मेघान्त्यवादयोऽप्यत्र। [त्रिका०।

मेघास्थि न० मेघानामस्थीव संहतकठिनत्वात्। करकायाम्

मेचक न० मच-वुन् पृषो०। १अन्धकारे २श्यामोऽञ्जने च मेदि० ३नीलाञ्जने राजनि०। ४मयूरचन्द्रके ५कृष्णवर्णे मेदि०। ६धूमे ७मेघे दशोभाञ्जने शब्दर० ८कृष्णवर्णयुते त्रि० अमरः।

मेट (ड) उन्माद्दे भ्वा० पर० सक० सेट् ऋदित् चङि न ह्रस्वः। मेट(ड)ति अमेटी(डी)त्।

मेटुला स्त्री मेट-उलच्। आमलक्याम् शब्दच०।

मेढ्र पुंस्त्री० मिह-ष्ट्रन्। १मेषे स्त्रियां ङीष् २पुंशोऽवयवरक्षाचिह्ने च पु० अमरः। [शाङ्गरशिङ्गा) रत्नमा०।

मेढ्रशृङ्गी स्त्री मेढ्रस्येव शृङ्गं यस्याः ङीष्। मेषशृङ्ग्राम्

मेध मेधायाञ्च सक० सङ्गे अक० भ्वा० उभ० सेट्।

मेधति ते अमेधीत् अमेधिष्ट। ऋदित् चङि न ह्रस्वः।

मेधि(धी) पु० मेध (घ)-इन्। धान्यमर्हनार्थं पशुबन्धनकाष्ठे (मेड़काठ) हेमच०।

मेधिका स्त्री मेध-ण्वुल् । (मेथि) शाकभेदे राजनि० । णिनि मेधिनी । अत्रैव स्त्री ङीष् । अच् गौरा०ङीष् । मेथी अत्रैवार्थे राजनि० ।

मेद बधे मेदायाञ्च भ्वा० उभ० सेट् । मेदति ते अमेदीत् अमेदिष्ट । अदित् चङि न हृस्वः ।

मेदःसारा स्त्री मेदसः इव सारोऽस्याः । अष्टवर्गप्रसिद्धौषधि भेदे मेदायां राजनि० ।

मेदक पु० मेद-ण्वुल् । जगले (मेकोया) अमरः ।

मेदज पु० मेदात् महिषासुरमेदसो जायते जन-ड । भूमिज गुग्गुलौ राजनि० । मेदोजातमात्रे त्रि० ।

मेदस् न० मेद-असुन् । मांसजन्ये धातुभेदे (वसा) अच् । मेद अत्रैव पु० । [मांसे हेमच० ।

मेदस्कृत् न० मेदः करोति स्वपरिपाकेन जनयति कृ-क्विप् ।

मेदा स्त्री मेदः कारणत्वेनास्त्यस्याः अच् । अष्टवर्गप्रसिद्धौषधिभेदे भावप्र० ।

मेदिनी स्त्री मेदः मधुकैटभमेदोऽस्त्यस्याः कारणत्वेन इनि । १वसुन्धरायाम् "मधुकैटभयोरासीन्मेदसैव परिप्लुता । तेनेयं मेदिनी देवी प्रोच्यते" इति पुराणम् । २मेदायाञ्च ।

मेदुर त्रि० मिद-उरच् । १अतिशयस्निग्धे । "मेघैर्मेदुरमम्बरम्" जयदेवः । २काकोल्यां स्त्री राजनि० ङीप् ।

मेदोज न० मेदसो वसातो जायते जन-ड । देहस्थे मज्जहेतौ अस्थिनामके धातौ । [धिभेदे राजनि०

मेदोद्भवा स्त्री मेदादुद्भवति उद्+भू-अच् । अष्टवर्गप्रसिद्धौषधिभेदे भावप्र० ।

मेध मेधवत् वर्त्तम् । मेधति ते अमेधीत् अमेधिष्ट ।

मेधस् पु० मेध-असुन् । स्वायम्भुवस्य मनोः पुत्रभेदे ।

मेधा स्त्री मेध-अङ् । १धारणावत्यां बुद्धौ यया बुद्ध्या ज्ञातस्य न विस्मरणं तत्र । मज्जदःसुयज्ञात् बहु० असिच्समा० । अमेधाः दुर्मेधाः सुमेधाः इत्यादि । आधारे घञ् । २त्यागे पु० । [वति त्रि० मेदि० स्त्रियां ङीप् ।

मेधाविन् पु० मेधा+अस्त्यर्थे विनि । १शुक्रखगे । २मेधायुक्ते त्रि० मेधा+अस्त्यर्थे इरच् । मेधावति त्रिका० ।

मेधिष्ठ त्रि० अतिशयेन मेधावान् इष्टन् मतोर्लुक् । अतिशयमेधावति जने । द्वयसुन् मेधीयस् तत्रार्थे स्त्रियां ङीप् ।

मेध्य त्रि० मेध-यत् । १पवित्रे अमरः २शुचौ च मेदि० मेधाय यज्ञाय हितं यत् । २अग्नौ ४खादिरे ५यज्ञे च पु० मेदि० । ६केतक्यां ७शङ्खपुष्प्यां ८रक्तवचायाम् ९रोचनायां, १०मद्यास्, ११मण्डूक्यां १२ज्योतिष्मतीलताया-यास् स्त्री राजनि० ।

मेनका स्त्री मि-मक । १स्वर्वेश्याभेदे शब्दर० । मेनैव स्वार्थे क । २हिमालयपत्न्याम् । [ख्यत ।

मेनकात्मजा स्त्री ६त० । हैमवत्यां दुर्गायाम् मेनाक्षतादयो-

मेना स्त्री मि-न । हिमालयपत्न्याम् पितृणां मानस्यां कन्यायाम् । "मेनां सुनीनामपि मानमीयाम्" कुमा० ।

मेनाद पुंस्त्री० मे इति नादो यस्य । १विड्वाले २खले ३मयूरे च मेदि० स्त्रियां ङीष् ।

मेन्धी स्त्री मा अच्छो ध्यते यया इन्ध-घञ् गौरा०ङीष् । (मेहदी) वृक्षे तत्पत्रमर्दने हि अच्छोतुल्यरक्तकरणता ।

मेष गतौ भ्वा० आ० सक० सेट् । मेषते अमेषिष्ट । अदित् चङि न हृस्वः । [ना मेषायसञ्जिः" ।

मेय त्रि० मा-मि-वा यत् । १परिच्छेद्ये २ज्ञेये च "मानाधीन-

मेरु पु० मि-रु । सर्ववर्षस्य उत्तरस्थे १पर्वतभेदे अपमालोपरिस्थे २फलबीजादिके ३करञ्जपलाशायाम्ञ्च [स्वर्णभेदे च

मेरुक पु० मेरुरिव पीतवर्णत्वात् इवार्थे कन् । यष्टिमधुनि (मुलै) शब्दच० ।

मेरुसावर्ण पु० । अष्टमेऽन्तर मनुषु एकादशे मनौ ।

मेलक त्रि० मेलयति मिल-णिच-ण्वुल् । १विवाहे योढकभेदे मिल-भावे घञ् स्वार्थे क । २सङ्गे अमरः ।

मेला स्त्री मिल-णिच-अच् टाप् । १नीलीवृक्षे राजनि० । २सख्याम् ३सङ्गमे ४मेलने च मेदि० । [लटा० ।

मेलाम्बु पु० मेलाया मद्या अम्बुरिव । मद्याधारे (दोयात)

मेलापकाख्या स्त्री नी० ता० ङके अष्टदृष्टिभेदे अष्टदृष्टि-शब्दे २७५१ पृ० दृश्यम् । [चङि न हृस्वः ।

मेष मेषणे भ्वा० आ० सक० सेट् । मेषते अमेषिष्ट । अदित्

मेष पुंस्त्री० मिष-अच् । (भेड) १पशुभेदे अमरः स्त्रियां ङीष् । २चक्रमर्दवृक्षे मेदि० । ज्योतिश्चक्रस्य द्वादशांशे अश्विनीभरण्यादिनक्षत्रादिचतुष्टयात्मके ३राशिभेदे ।

मेषकम्बल पु० मेषेण तल्लोम्ना निर्मितः कम्बलः । मेष-लोमजाते वस्त्राकारे पदार्थे अमरः ।

मेषलोचन पु० मेषस्य लोचनमिव पुष्पमस्य । १धत्तूरवृक्षे भावप्र० । २मेषतुल्यनेत्रे त्रि० मेषनेत्रादयोऽस्य ।

मेषवल्ली स्त्री मेषस्य भल्लाकारफलयुता वल्ली शाकत्व० (गो-क्षुरशिम्बा) लताभेदे भावप्र० ।

मेषविषाणी स्त्री मेषस्य विषाणं भल्लमिव फलं यस्याः गौरा०ङीष् (गोक्षुरशिम्बा) लताभेदे रत्नमा० । स्वार्थे क अत इत्त्वम् । मेषविषाणिका तत्रैवार्थे ।

मेषशृङ्ग पु० मेषस्य भल्लाकारेऽस्त्रस्य अच् । १धत्तूरवृक्ष

भेदे हेमच०। २अजशृङ्ग्यां (गाडरशिङी) स्त्री गौरा० ङीष् रत्नमा०। [शब्दच०।

मेषा स्त्री मिष-कर्मणि घञ्। सूक्ष्मैलायाम् (गुजराटी)

मेषाक्षिकुसुम पु० मेषाक्षीव कुसुमं यस्य। चक्रमर्दे रत्नमा० मेषपुष्पादयोऽप्यत्र।

मेषाण्ड पु० मेषस्याण्ड एवाण्डोऽस्य। इन्द्रे तस्य हि दक्षयज्ञेऽण्डनाशे मेषाण्डेन तत्करणमिति पुराणप्रसिद्धम्।

मेषालु पु० मेषाणामालुरिव प्रियः। सर्वरीवृक्षे शब्दच०।

मेषी स्त्री मिष-अच् गौ० ङीष्। १जटामांस्यां २तिनिशवृक्षे च राजनि०। जातौ ङीष्। ३मेषजातिस्त्रियाम्।

मेसूरण न० जन्मावधिदशमस्थाने ज्यो० त०।

मेह पु मिह्-घञ्। १प्रस्रावे हेमच० २प्रमेहरोगभेदे च अमरः। प्रमेहशब्दे दृश्यम्। अच्। ३मेघे शब्दच०।

मेहघ्नी स्त्री मेहं हन्ति हन-टक् ङीप्। हरिद्रायाम् रत्नमा० आर्द्रतन्मूलरससेवनाद्धि मेहनाश इति वैद्यकप्रसिद्धिः।

मेहन न० मिह्यतेऽनेन मिह-करणे ल्युट्। १शिश्ने अमरः। कर्मणि ल्युट्। २मूत्रे मेदि० भावे ल्युट्। ३मूत्रोत्सर्गे।

मैत्र(त्रि) न० मित्रो देवतास्य अण् मैत्रं पायुरस्येदं पुनरण्। १विष्ठोत्सर्गे "मैत्रं कर्म समाचरेत्" इति स्मृतिः। मित्रो देवताऽस्य, मित्रत आगतं तस्येदं वा अण्। २अनुराधानक्षत्रे न०। तस्य हि मित्रो देवता। ३मित्रतः प्राप्ते "मैत्रमौद्वाहिकञ्चैव" स्मृतिः। ४सुहृत्सम्बन्धिनि च त्रि०। मित्रमेव स्वार्थे प्रज्ञाद्यण्। ५मित्रे ६ब्राह्मणे च पु० त्रिका०।

मैत्रावरुण पु० मित्रस्य वरुणस्य देवताद्वन्द्वे आनङ् मित्रावरुणयोरपत्यम् अण्। अगस्त्ये। इञ्। मैत्रावरुणिरप्यत्र कल्पभेदे हि तस्य तयोः पुत्रत्वं पुराणप्रसिद्धम्।

मैत्री न०मित्रस्य भावः अण् वा यञ् पक्षे ङीप् यलोपः। सौहार्दे मैत्रप्रभृत्यत्र न०। [त्रिका०।

मैत्रेय पु० मित्रायाः अपत्यमयम् ढक्। १मुनिभेदे २बुद्धदेवे

मैथिली स्त्री मिथिलायां भवा अण् ङीप्। १सीतायाम्। मिथिलाया राजा अण्। २मिथिलादेशाधिपे पु०।

मैथुन न० मिथुनेन स्त्रीपुंसाभ्यां निर्वृत्तम् अण्। १अन्याधानादौ, कर्मणि "या प्रवृत्ता द्विजातीनां दारकर्मणि मैथुने" इति स्मृतिः। अन्याधाने हि स्त्रीपुंसौकस्यैवाधिकार इति तस्य तदसाध्यत्वम्। २स्त्रीपुंसयोरुपरमे [जटा०। प्रास्यधर्मे च अमरः।

मैनाक पु० मेनकायां भवः अण्। हिमालयसुते पर्वतभेदे

मैरेय न० सिरायां देशभेदे ओषधिभेदे वा भवं ढक्। सिरा देशजाते १आसवे "मैरेयं धातकीपुष्पगुडधानाद्यसम्भवम्" माधवोक्ते २मद्यभेदे च न०।

मोक्ष मोक्षे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। मोक्षयति ते मोक्षति अमुमोक्षत् त अमोक्षीत्।

मोक्ष पु० मोक्ष-घञ्। १अपवर्गे २मोचने "नीविमोक्षादि मोक्षः" सा०द०। ३पाटलिवृक्षे मेदि० ४मरणे हेमच०।

मोघ त्रि० मुह-घ अच् वा कुत्वम्। १निरर्थके अमरः २क्षीणे ३पाटलावृक्षे मेदि० ४विड्डङ्गे च स्त्री हेम० ५प्राचीरे पु० शब्दमा०। [राजनि०।

मोघपुष्पा स्त्री मोघं पुष्पमार्त्तवं यस्याः। वन्ध्यायां स्त्रियाम्

मोच न० मुच-अच्। १कदलीफले २शोभाञ्जने पु० अमरः। ३कदल्यां ४शाल्मलिवृक्षे ५नीलीवृक्षे, च स्त्री मेदि० टाप्।

मोचक पु० मुच-ण्वुल्। १मोक्षे २कदल्यां ३शोभाञ्जने च ४वैराग्यवति त्रि० हेमच० ५मुष्ककवृक्षे राजनि०।

मोचन न० मुच-णिच्-ल्युट् वा भावे ल्युट्। १मुक्तौ २मोचने दम्भे ४त्राणे च। मुच्यते रोगात् अनया मुच-करणे ल्युट्। ५कण्टकार्य्यां स्त्री जटा० ङीप्। [राजनि०।

मोचरस पु० इत०। शाल्मलिनिर्यासे खनामख्याते पदार्थे

मोचाट पु० मुच-णिच्-अच् मोचाय रोगमोचनाय अटति अट-अच्। १क्षणजीरके २रम्भास्थि, ३मलयोद्भवे च मेदि०

मोटक न० मुट-ण्वुल्। श्राद्धे पिण्डदानार्थं १सुवर्णकुशपत्रद्वये २राशिणीभेदे स्त्री रूढा० ङीप्।

मोटा स्त्री मुट-अच्। बलायाम् राजनि०।

मोट्टायित न० "कान्तस्मरणवाक्यादौ रूढि तद्भावभावतः। प्राकृतमभिलाषस्य मोट्टायितमुदीर्यते" रसमञ्जर्यामुक्ते स्त्रीणामभिलाषभेदे।

मोद पु० मुद-घञ्। हर्षे शब्दर०।

मोदक पु० मोदयति मुद-णिच्-ण्वुल्। १खाद्यभेदे (मोया) अमरः। मुद्गायां चेलियाख्याते २वर्णसङ्करजातिभेदे (मयरा) स्मृतिः। [राजनि०।

मोदमोदिनी स्त्री मोद इव मोदयति मुद-णिनि। जम्बूम्

मोदयन्ती स्त्री मुद-णिच्-शतृ ङीप्। वनमल्लिकायाम् (काठमल्लिका) शब्दर०। [राजनि०।

मोदा स्त्री मोदयति अजान् मुद-णिच्-अच्। अजमोदायाम्

मोदाख्या स्त्री मोदः अजमोदस्येवाख्या। १अजमोदायाम् २हर्षयुक्ते त्रि० राजनि०।

मोदिनी स्त्री मोदयति मुद णिच्-णिनि । १अजमोदायाम् २मल्लिकायाम् ३यूथिकायां ४कस्तूर्य्यां ५मदिरायाञ्च राजनि० ।

मोरट न० मर--अटन् । १इक्षुमूले, २अङ्कोटपुष्पे ३अम्रातोषितक्षीरे च मेदि० । ४मूर्वालतायां स्त्री अमरः । ५क्षीरमोरटायां पु० राजनि० ।

मोषक पु० मुष्णाति मुष-ण्वुल् । तस्करे चौरे अमरः ।

मोषण न० मुष-ल्युट् । १लुण्ठने २छेदने, ३वधे च ।

मोह पु० मुह-घञ् । १मूर्च्छायाम् भ्रान्तिसाधने २अज्ञाने मेदि० ३वेदान्तोक्ते अविद्याहृत्तिभेदे ४दुःखे शब्दर० ४रेहादिष्वात्माभिमाने च ।

मोहन पु० मोहयति मुह-णिच्-ल्यु । १धुस्तूरे राजनि० २कन्दर्पस्य ३शरभेदे च त्रिका० । ४मोहकारके त्रि० स्त्रियां टाप् । सा च ५त्रिपुरमालीपुष्पे रत्नमा० । ६मरुन्नायां शब्दमा० । ७उपोदक्यां स्त्री राजनि० । ८वटपत्र्यां भावप्र० उभयत्र गौरा० ङीष् ।

मोहरात्रि स्त्री ब्रह्मणो निजपरिमाणेन पञ्चाशदब्दे गते प्रलयभेदे "कालरात्रिर्महारात्रिर्मोहरात्रिश्च" चण्डी

मोहिनी स्त्री मुह-णिनि । १अप्सरोभेदे यस्याः शापात् ब्रह्मणोऽपूज्यत्वं तत्कथा ब्रह्मवै० ज० ख० ३३अ० । अमृतमन्थनकाले दैत्यानां मोहनाय स्त्रीरूपिणि भगवदवतारभेदे च ।

मौक्तिक न० मुक्तैव स्वार्थे ठक् । मुक्तायाम् अमरः ।

मौक्तिकप्रसवा स्त्री मौक्तिकं प्रसूते प्र+सू-अच् । मुक्ताोस्फोटे शुक्तौ राजनि० ।

मौक्तिकशुक्ति स्त्री ६त० । मुक्ताोस्फोटे शुक्तौ राजनि० ।

मौञ्जी स्त्री मुञ्जस्येयम् अण् । कटिसूत्रे त्रिवृत्तमुञ्जलतायां मेखलायाम् मनुः । [राजनि०]

मौञ्जीपत्री स्त्री मौञ्जाइव पत्रमस्याः । वल्वजजायाम्

मौञ्जीबन्ध पु० मौञ्जा मेखलाया बन्धोयत्र । १उपनयनसंस्कारे "मौञ्जीबन्धः शुभः प्राक्तश्चैत्रे मौनगते रवाविति ज्यो० । ल्युट् मौञ्जीबन्धन तत्रार्थे न० । "द्वितीयं मौञ्जीबन्धनम्" मनुः । ६त० । २तद्बन्धने च ।

मौढ्य न० मूढस्य भावः ष्यञ् । १मोहे हेम० २बाल्ये च ।

मौद्गल्य पु० मुद्गलस्य मुनेर्गोत्रापत्यं गर्गा० यञ् । मुद्गल गोत्रापत्ये मुनिभेदे । [त्रेते अमरः ।

मौद्गीन न० मुद्गानां भवनं क्षेत्रं खञ् । मुद्गभवनयोग्ये

मौन न० मुनेर्भावः । वाग्व्यापाररहित्ये "उच्चारे मैथुने चैव प्रस्रावे दन्तधावने । स्नाने भोजनकाले च षट्सु मौनं समाचरेत्" इति स्मृतिः ।

मौनिन् त्रि० मौनमस्त्यस्य इनि । १वाग्व्यापाररहिते । २मुनौ पु० जटा० । [राजनि०]

मौनेय पु० मुनेः कश्यपपत्नीभेदस्यापत्यम् ढक् । गन्धर्वभेदे

मौरजिक त्रि० मुरजस्तदुपादनं शिल्पमस्य ठक् । मुरदुपादनशीले अमरः ।

मौर्ख्य न० मूर्खस्य भावः ष्यञ् । १जाड्ये हेमच० २मूर्खतायाञ्च

मौर्वी स्त्री मूर्वा लता तन्तुना निर्वृत्ता अण् । १धनुर्गुणे अमरः । २अजशृङ्ग्याञ्च रत्नमा० ।

मौल त्रि० मूलं वेत्ति मूलादागतो वाऽण् । भूम्यादेरागमात्रिमूलज्ञे, "यं परम्परया मौलाः सामन्ताः स्वामिनं विदुः" रिति स्मृतिः २मूलादागते च ।

मौलि पुंस्त्री० मूलस्यादूरभवः इञ् । १चूडायां २किरीटे ३संयतकेशेषु अमरः ४मस्तके हेमच० । ५अशोकवृक्षे पु० । ६भूमौ स्त्री मेदि० वा ङीष् ।

मौषल न० मुषलस्येदम् तत्सदृशं वाऽण् । १मुषलसम्बन्धिनि २मुषलतुल्यनिर्यूहे "गङ्गायां मौषलं स्नानं महापातकनाशनम्" इति पुराणम् । मुषलमधिकृत्य कृतो ग्रन्थः अण् । महाभारतान्तर्गते "मुषल कुलनाशनम्" इत्यादिप्रतिपाद्ये षोडशे ३पर्वणि ।

मौहूर्त्त पु० मुहूर्त्तं तत्प्रतिपादकं शास्त्रं वेत्त्यधीते वाऽण् । ज्योतिःशास्त्रज्ञे । ठक् । मौहूर्त्तिक तत्रैव अमरः ।

म्ना अभ्यासे भ्वा०पर०सक० सेट् । मनति अम्नासीत् अम्नौ ।

म्रक्ष संयोजने म्लेच्छने च चु० उभ० सक०सेट् । मक्षयति ते अमम्रक्षत् त । [अमक्षीत् ।

म्रक्ष संघाते अक० संयोजने सक० भ्वा० पर०सेट् । म्रक्षति अम्रक्षीत् ।

म्रक्षण न०म्रक्ष-भावे ल्युट् । १संयोजने २राशीकरणे, ३तैलादौ हेमच० ।

म्रद वादे भ्वा० आ० सक० सेट् । म्रदते अम्रदिष्ट । मर्दा० म्रदयति । घित् अङ् म्रदा । [मृदुत्वे ।

म्रदिमन् पु० मृदोर्भावः मृदु+इमनिच् डित् मृतोरः ।

म्रदिष्ठ त्रि० अतिशयेन मृदुः इष्ठन् डित् मृतोरः । अतिमृदुत्वयति । ईयसुन् । म्रदीयस् तत्रार्थे त्रि० स्त्रियां ङीष् ।

म्रुच गतौ भ्वा० पर० सक० सेट् । म्रोचति इरित् अम्रुचत् अम्रुचीत् अम्रोचीत् मुम्रोच । इदित् ह्वा० सेट् ।

म्रुन्च गतौ सर्व० म्रुचवत् । म्रुञ्चति अम्रुन्चत् अम्रुञ्चीत्

म्लेट(ड) उन्मादे भ्वा० पर० सक० सेट्। अम्लेटी(डी)त्। क्वादित्वात् चङि न ह्रस्वः।

म्लेच्च् चु० भक्षवत् सर्वम्। म्लेचयति ते। अमम्लेचत् त।

म्लेान क्लि० म्लै कान्तिक्षये-क्त तस्य नः। १मलिने २म्लानियुक्ते च।

म्लानि स्त्री म्लै-क्तिन्। कान्तिक्षये। [श्म्लाने च क्लि०मेदि०

म्लिष्ट न० म्लेच्छ-क्त नि०। १अविस्पष्टवाक्ये २तदाक्ययुक्ते

म्लुच् गतौ भ्वा०पर०सक०सेट्। म्लोचति। क्वादित्वात् चङि अम्लुचत् अम्लोचीत्। उदित् क्त्वा वेट्।

म्लुच् गतौ म्लुचवत् सर्वम्। म्लुचति अम्लुचत् अम्लुचीत्

म्लेच्छ अपशब्दे वा चु० उभ० पक्षे भ्वा० पर० अक० सेट्। म्लेच्छयति ते म्लेच्छति अमम्लेच्छत् त अम्लेच्छीत्

म्लेच्छ पु० म्लेच्छ-घञ्। १अपशब्दे "म्लेच्छो हि वा नाम यदपशब्दः" इति स्मृतिः। कर्त्तरि अच्। २पामरजातौ, ३नीचजातौ च पुंस्त्री० स्त्रियां ङीष् "गोमांसखादको यस्तु विरुद्धं बहु भाषते। सर्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते" बौधायनः। ४पापरते त्रि० मेदि०। ५किङ्किरे न० राजनि०।

म्लेच्छकन्द पु० म्लेच्छप्रियः कन्दः श०त०। लशुने राजनि०

म्लेच्छजाति स्त्री म्लेच्छाभिधा जातिः। गोमांसादिभक्षके किरातादिजातिभेदे अमरः।

म्लेच्छदेश पु० म्लेच्छाधारो देशः। चातुर्वर्ण्याचाररहिते देशे अमरः। "चातुर्वर्ण्यव्यवस्थानं यत्किञ्चित् देशे न विद्यते। म्लेच्छदेशः स विज्ञेय आर्यावर्त्तस्ततःपरम्"।

म्लेच्छभोजन न० म्लेच्छैर्भुज्यते भुज-कर्मणि ल्युट्। १यावके यवभेदे शब्दर०। २गोधूमे पु० त्रिका०।

म्लेच्छमण्डल न० ६त०। म्लेच्छदेशे शब्दर०।

म्लेच्छमुख न०म्लेच्छानां मुखमिव रक्तत्वात्। ताम्रे अमरः। म्लेच्छास्यवत् हारा०।

म्लेच्छित न० म्लेच्छ-क्त। अपशब्दे असंस्कृतशब्दे हारा०।

म्लेट(ड) उन्मादे भ्वा० पर० सक० सेट्। म्लेटी(डी)त्। अम्लेटीत्। क्वादित्वात् चङि न ह्रस्वः।

म्लेव सेवने भ्वा० या० सक० सेट्। म्लेवते अम्लेविष्ट। क्वादित्वात् चङि न ह्रस्वः। [अम्लो म्लानः म्लानिः।

म्लै कान्तिक्षये भ्वा० पर० सक० अनिट्। म्लायति म्लासीत्

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये मकारादिशब्दार्थसङ्कलनम्।

य

यकारः व्यञ्जनवर्णभेदः स्पर्शवर्णोष्मवर्णयोर्मध्यस्थत्वात् अन्तःस्थवर्णभेदः तस्योच्चारणस्थानं तालु जिह्वायेन तालुन ईषत्स्पर्शेनोच्चारणादीषत्स्पर्शे आभ्यन्तरप्रयत्नः "अचोऽस्पृष्टायणस्त्रीषत्" शिक्षोक्तः। बाह्यप्रयत्नाः संवारनादघोषा अल्पप्राणश्च। वर्णाभिधानेऽस्य वाचकशब्दाः यथा "यो वायौ वसुधा वायुर्विश्वतिः पुरुषोत्तमः। युगान्तःश्वसनः शीघ्रोधूमार्च्चिः प्राणिसेवकः। यङ्का भ्रमो जटी लोला वायुवेगी यशस्करी। सङ्कर्षणः क्षपा बालो हृदयं कपिला प्रभा। आग्नेयोव्यापकस्यानी मोहोयाता प्रभा सुखम्। चण्डः सर्वेश्वरी धूम्रा चासुण्डा सुखेश्वरी। त्वमात्मा मलयोमाता क्षेमिनी भृङ्गिनायकः। ङे नमः शोषकोमीनोधनिस्तानङ्कवेदिनी। शिष्टः सोमः षड्ङ्किनामा पापहा प्राणसंज्ञकः"।

अस्याधिष्ठातृदेवताध्यानं यथा "धूम्रवर्णं महारौद्रीं षड्भुजां रक्तलोचनाम्। रक्ताम्बरपरीधानां नानालङ्कारभूषिताम्। महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिनीम्। एवं ध्यात्वा यकारन्तु तन्मन्त्रं दशधा जपेत्"। अस्य ध्येयस्वरूपं यथा "यकारं शृणु चार्वङ्गि! चतुष्कोणमयं सदा। पुन्नागधूमसङ्काशं स्वयं परमकुण्डलीम्। यजुष्प्राणमयं वर्णं यजुर्वेदमयं सदा। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं तथा। प्रणमामि सदा वर्णं मूर्त्तिमन्मोक्षसव्ययम्" कामधेनुतन्त्रम्। मातृकन्यासे अस्य हृदयन्यासता। काव्यादौ अस्य प्रथमप्रयोगे लक्ष्मीलाभः फलम् "यो लक्ष्मीं रस्तु दाक्ष्म्" इत्र०टीका

य पु० या-ड। १वायौ २यशसि ३योगे, ४मतौ च ५यावति त्रि० शब्दरत्ना०। यम-ड। ६संयमे। ७ब्रह्मादिभुवनेशगुरुके जलदैवते लक्ष्मीपतिके यमजे च।

यकार पु० य+स्वरूपे कार। यस्वरूपे वर्णे।

यकृत् न० यं संयमं करोति क-क्विप् तुक् च। १कुक्षौ दक्षिणभागस्थे मांसपिण्डे अमरः। २तद्रोगकारके रोगभेदे च "अधो दक्षिणतश्चापि हृदयात् यकृतः स्थितिः। तत्र रक्तकफपित्तस्य स्थानं शोणितजं मतम्" भावप्र०। तद्रोगनिदानादि तत्रोक्तं यथा "प्लीहाभयस्य हेत्वादि समस्तं यकृदामये। किन्तु स्थितिस्तयोर्ज्ञेया वामदक्षिणपार्श्वयोः"। अस्य शमादौ भक्षे च यकृच्छत्रेशः।

यक्षदार्व्यिका स्त्री यक्षतरुवाक्या स्वरूपं यस्याः कप्। तैलपायिकायाम् (तेलापोका) शब्दच०। [इक्षे शब्दच०।

यक्षद्वैरिन् पु०यक्षतो रोगभेदस्य वैरी हन्तृत्वात्। रोहितक-

यक्ष पूजायां चु० आ० सक० सेट्। यक्षयते अयययक्षत।

यक्ष पु० यक्ष्यते यक्ष-कर्मणि घञ्। १देवयोनिभेदे २तदीश्वरे कुबेरे सेदि०इ०इन्द्रशब्दे दारक्षतः। भावे घञ् ४पूजने च।

यक्षकर्दम पु०यक्षप्रियः कर्दम इव। "कुङ्कुमागुरुकस्तूरीकर्पूरं चन्दनं तथा। अष्टाङ्गगन्धमित्युक्तं नामतो यक्षकर्दमं" इत्युक्ते समभागेन मिश्रिते कुङ्कुमादौ धन्वन्तरिः। कुङ्कुमस्थाने कक्कोलस्तूक्तम् [यक्षदृक्षादयोऽप्यत्र।

यक्षतरु पु० यक्षाणां वासयोग्यस्तरुः। वटवृक्षे राजनि०

यक्षधूप पु०यक्षे पूजने योग्यो धूपः।(धुना) सर्ज्जरसे अमरः

यक्षराज पु० यक्षाणां राजा टच् समा०। कुबेरे। यक्षेषु राजते राज-क्विप्। यक्षराड्यत्र पु०।

यक्षरात्रि स्त्रि० यक्षप्रिया रात्रिः श०त०। कार्त्तिकपूर्णिमारात्रौ त्रिका०। [शब्दमा०।

यक्षामलक न० यक्षाणामामलकमिव। प्रियङ्वक्ष्यूरफले

यक्षावास पु० इत०। यक्षाणामावासः। वटवृक्षे राजनि०।

यक्षाड्म्बुरक न० यक्षाणामुडुम्बरमिव इवार्थे कन्। अश्वत्थफले त्रिका०। [शब्दमा०।

यक्ष्मघ्नी स्त्री० यक्ष्माणं हन्ति हन-टक् ङीप्। द्राक्षायाम्

यक्ष्मन् पु०यक्ष-मनिन्। रोगभेदे अमरः। तन्निदानादि यथा "वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात्। त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात्"। वेगोत्थं वातमूत्रपुरीषाणां। "वातमूत्रपुरीषाणि निगृह्णाति यदा नरः" इति चरकवचनात्। क्षयात् क्षीयतेऽनेनेति क्षयः तेनातिव्यवायानशनेष्वादयो धातुक्षयहेतवः क्षय शब्देनोच्यन्ते। साहसात् बलवता समं मल्लयुद्धादितः। विषमाशनात् "यच्च स्तोकमकाले या तद्भुक्तं विषमाशनम्" तस्मात्। त्रिदोषः सान्निपातिकः। हेतुचतुष्टयात् अन्येपि हेतवः हेतुचतुष्टय एवान्तर्भवन्ति। यक्ष्मयक्ष्माः पर्य्यायाः राजयक्ष्मक्षयशोषाः। यक्ष्मादीनां शब्दानां निरुक्तिमाह "वैद्यो व्याधिमतां यस्मात् व्याधेर्यत्नेन यक्ष्यते। स यक्ष्मा प्रोच्यते लोके शब्द शास्त्रविशारदैः"। यक्ष्यते पूज्यते। "राजचन्द्रमसो यस्मादभूदेष किलामयः। तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः। क्रियाक्षयकरत्वात्तु क्षय इत्युच्यते बुधैः। संशोषणाद्रसादीनां शोष इत्यभिधीयते"। संग्राहिभाह "कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु। व्यतिव्यवायिनो वापि क्षीणे रेतस्यनन्तराः। क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः"। कफप्रधानैर्दोषैः रसवर्त्मसु रुद्धेषु अनन्तराः सर्वे धातवः क्षीयन्ते ततो मानवः शुष्यति। कारणभूतस्य रसस्य क्षये कार्य्याणां रक्तादीनामनुक्रमेण क्षीयमाणत्वात् भावप्र०।

यज देवपूजने, दाने, सङ्गतौ च भ्वा० उभ० यजादि० अनिट्। यजति ते अयाक्षीत् अयष्ट इयाज ईजतुः।

यजति पु० यज-अतिच्। यागभेदे। "यजतिषु ये यजामहे नानुयाजेषु" श्रुतिः। तल्लक्षणञ्च कात्या० श्रौ० १।२।६ "तिष्ठद्धोमा वषट्कारप्रदाना याज्यापुरोऽनुवाक्यावन्तो यजतयः" सू०। "उच्यन्त इति शेषः। तिष्ठता होमो येषु ते तिष्ठद्धोमाः वषट्कारेण प्रदानं येषु ते वषट्कारप्रदानाः तथा याज्यावन्तः पुरोऽनुवाक्यावन्तश्च ये ते यजतयः उच्यन्ते" कर्कः।

यजत्र न० यज-अत्र। १अग्निहोत्रे उणादि० २तद्वति त्रि०।

यजन न० यज-ल्युट् होत्रादिना पशुचोराज्यादिभिः मन्त्रपूर्वकं यद्धौ प्रक्षेपरूपे यागे।

यजनञ्च आ० वि० देवलोक्तं यथा "पशुचीराज्यपुरोडाशसोमौषधिचरुप्रभृतिर्हविर्भिः खदिरपलाशाश्वत्थन्यग्रोधोडुम्बरप्रभृतिभिः समिद्भिः स्रुक्स्रुवोदूखलमूसलकुठारखनित्रयूपदारुदर्भचर्मग्रावपवित्रभाजनादिभिर्द्रव्योपकरणैरुदुगात्रहोत्राध्वर्युब्रह्मादिभिः ऋत्विग्भिः काम्यनैमित्तिकानां पक्षादिपूर्वकाणां यथोक्तदक्षिणानां समापनं यजनम्"। ल्युट्। उत्तरपदस्थः समभिव्याहृतदेवादेर्देवरि त्रि०आधारे ल्युट्। १यागाधिकरणे न०। यथा देवयजनम्। [कर्मफलयुते। २महादेवमूर्त्तिभेदे च।

यजमान पु० यज-शानच्। होत्रादेर्नियोक्तरि प्रधानयजि पु० यज-इन्। १यष्टरि उणा०। २यागे १यजधातौ च।

यजुर्वेद पु० यजुषां ऋक्सामभिन्नानां मन्त्राणां प्रतिपादको वेदः। वेदभेदे स च शुक्लकृष्णभेदेन द्विधा तद्विवरणं चरणव्यूहे भाग० १२।६अध्याये च दृश्यम्।

यजुस् न० यज-उसि। ऋक्सामभिन्ने पदच्छेदरहिते मन्त्रभेदे अमरः। तल्लक्षणम् "इत्तगीतिवर्जितत्वेन ग्रन्थिष्टपठिता मन्त्रा यजूंषि" सा० भा० उक्तम्।

यज्ञ पु० यज-भावे न। यागे अमरः। स त्रिविधः स्वफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते। यष्टव्यमेवेति मनः समाधाय स सात्त्विकः१। अभिसन्धाय तु फलं दम्भार्थ-

अपि चैव यत् । इज्यते भरतश्रेष्ठ ! तं यज्ञं विद्धि राजसम् ३। विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते" गीता १७अ०। ष च नानाविधः । "द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे । स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः" गीता ४अ०। पञ्चसूनाकृतस्यकर्त्तव्या यज्ञा यथा "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्" गारुडे ११५अ०। २विष्णौ च

यज्ञपति पु० इत०। विष्णौ "यज्ञो यज्ञपतिर्यज्वा" विष्णुस०।

यज्ञपशु पु० इज्यते हविर्दीयतेऽत्र यागार्थकयजेर्भावे आधारे वा न यज्ञः यज्ञार्थः पशुः। १अश्वे २छागादौ च।

यज्ञपात्र न० इत०। यागसाधने पात्रे तद्भेदस्वरूपादि कात्या० श्रौ०उक्तं पात्रशब्दे ४१०० पृ० दर्शितम्।

यज्ञपुरुष पु० यज्ञरूपः पुरुषः। वराहरूपे विष्णौ हेमच०। क्रतुपुरुषशब्दे २२८४पृ० दृश्यम्। [राजनि०।

यज्ञभूषण पु० यज्ञस्य भूषयति भूष-णिच्-ल्यु। श्वेतदर्भे

यज्ञयोग्य पु० यज्ञे योग्यः। १चक्रुम्बरवृक्षे राजनि०। तत्समिदादिभिर्हि यज्ञः साध्यते।२यागार्हे त्रिप्रादौ च।

यज्ञवल्ली स्त्री० यज्ञार्था वल्ली। सोमवल्ल्याम् राजनि०।

यज्ञवराह पु० यज्ञरूपो वराहः। श्वादिवराहे भगवदवतारभेदे। क्रतुपुरुषशब्दे २२८४पृ० दृश्यम्। वराहदेहस्य शिवेन विदारणेन यज्ञभेदरूपत्वं सम्पादितं यथोक्तं कालिकापु० ३० अ० "विदारिते वराहस्य काये मर्मणि यत्तत्क्षणात्। ब्रह्मविष्णुशिवा देवाः सर्वैश्च प्रमथैः सह। निर्ग्युर्जलात् समुद्धृत्य तत् शरीरं नभः प्रति। तद्भेदुः शरीरन्तु विष्णोश्चक्रेण खण्डशः। तस्माद्गन्धिनो यज्ञाजातास्ते वै पृथक् पृथक्। यस्माद् यस्माच्च ये यज्ञास्तत् पृच्छन्तु महर्षयः। भ्रूनासासन्धिना जातो ज्योतिष्टोमो महाध्वरः। हनुश्रवणसन्ध्योस्तु वह्निष्टोमो व्यजायत। चक्षुर्भ्रुवोः सन्धिना तु व्रात्यस्तोमो व्यजायत। आयुः सोमर्भवस्तोमस्तस्य सोमोऽथ सन्धिना। इडस्तोम इडहृत्स्तोमो जिह्वामूलाद्व्यजायत। अतिरात्रं सर्वेराजमधोजिह्वात्तरादभूत्। अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्। स्नानं तर्पणपर्य्यन्तं नित्यमत्रास्य सर्वशः। क्रतुसन्धेः समुद्भूता, जिह्वातो विधयस्तथा। वाजिमेधो महामेधो नरमेधस्तथैव च। माच्छिद्यिाकरा येऽन्ये ते जाताः षोडशसन्धितः। राजसूयोऽथ कारीरी वाजपेयस्तथैवच। पृष्ठसन्धौ समुद्भूता महायज्ञास्तथैव च। प्रतिष्ठोत्सर्गयज्ञाश्च दानयज्ञादयस्तथा। हृत्सन्धितः समुद्भूता सावित्रो यज्ञ एव च। सर्वेषां साधका यज्ञाः प्रायश्चित्तकराश्च ये। ते मेढ्रसन्धितो जाता यज्ञास्तस्य महात्मनः। रत्नःसत्रं सर्पसत्रं सर्वश्चैवाभिचारिकम्। गोमेधो हयजापश्च खुरेभ्यो ह्यभवन्मिमे। गायेष्टिः परमेष्टिश्च गाणपत्यौगसम्भवः। लाङ्गूलसन्धौ संजाता अग्निष्टाम स्तथैवच। नैमित्तिकाश्च मे यज्ञाः संक्रान्त्यादौ प्रकीर्त्तिताः। लाङ्गूलसन्धौ ते जातास्तथा द्वादशवार्षिकम्। तीर्थप्रयोगसामोधः यजुः सङ्कर्षणस्तथा। आर्कमाधर्वणश्चैव नाभिसन्धेः समुद्गताः। सत्रोत्कर्षः क्षेत्रयज्ञः पञ्चमार्गोऽतियोजनः। छिद्रसंस्थानहैरम्बयज्ञा जाताश्च जानुनि। एवमष्टाधिकं जातं शतञ्च द्विजसत्तमाः!। यज्ञानां सततं लोकायैर्भाव्यन्तेऽधुनापि च। चुबुकस्य पोतात् संजाता नासिकायाः स्रुवोऽभवत्। अन्ये स्रुक्स्रुवभेदा ये ते जाताः पोतनासयोः। पोताभागेन तस्याभूत प्राग्वंशो मुनिसत्तमाः!। इडापूर्त्ते यजुर्धर्मा जाताः श्रवणरन्ध्रतः। दंष्ट्राभ्योऽभवन् यूपाः कुशा रोमाणि चाभवन्। इडुगाता च तथाध्वर्युर्होता समिध एव च। अग्रदक्षिणयाभाङ्गे पश्चात्पादेषु सङ्गताः। पुरोडाशाः सचरवो जाता मस्तिष्कसञ्चयात्। कर्णनेत्रयुगाच्छ्राता यज्ञकेतुस्तथा खुरात्। मध्यभागोऽभवद्वेदी मेढ्रात् कुण्डमजायत। रेतोधारास्तथैवाज्यं स्वरमन्त्राः समुद्गताः। यज्ञायुधः पृष्ठभागात् हृत्पद्मात् यज्ञ एव च। तद्गात्रा यज्ञपुरुषो सङ्गाः कर्त्तात् समुद्गताः। एवं यावन्ति यज्ञानां भाण्डानि च ऋचोऽपि च। तानि यज्ञवराहस्य शरीरादेव चाभवन्। एवं यज्ञवराहस्य शरीरं यज्ञसम्भवात्। यज्ञरूपेण सकलमाप्यायितमिदं जगत्।"

यज्ञवाट पु० इत०। यज्ञस्थाने हेमच०।

यज्ञवृक्ष पु० यज्ञार्थः वृक्षः। वटवृक्षे राजनि०। [राजनि०।

यज्ञश्रेष्ठा स्त्री यज्ञेषु तत्साधनेषु श्रेष्ठा। सोमवल्ल्याम्

यज्ञसार पु० यज्ञेषु यज्ञसाधनेषु सारः श्रेष्ठः। यज्ञोडुम्बरवृक्षे राजनि०।

यज्ञसूत्र न० यज्ञार्थं योग्यं संस्कृतं वा सूत्रं शाक०त०। यज्ञोपवीते जटा०। तत्स्वरूपादि यथा

"कार्पासं तिहतं सूत्रं सुधवानिर्मितं मनैः। तत्त्रितय-

मधोष्टसं यज्ञसूत्रं विदुर्बुधाः । त्रिगुणं तदुपन्यिगुक्तं वेदप्रवरसन्नितम् । शिरोधराङ्गाभिमध्यात् सुत्रार्द्धं परिमाणकम् । यजुर्विदां नाभिमितं सामगानामयं विधिः । वामस्कन्धेन विधृतं यज्ञसूत्रं वलप्रदम्" कालिकापु० ४अ० । "उपवीतमाह गोभिलः "यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा अपि वा कुशरज्ज्वमेव" । यज्ञोपवीतं विशिष्टविन्यासधारणकर्मतया कुरुते । किं तत्सूत्रं विशेषयति कन्दोगपरिशिष्टम् "जर्द्धन्तु त्रिवृतं कार्य्यं तन्तुत्रयमधोवृतम् । त्रिवृतञ्चोपवीतं स्यात्सूत्रञ्चैको यन्थिरिष्यते" । वामावर्त्तवलितं तन्तुत्रयं त्रिगुणं कृत्वा दक्षिणावर्तवलितं कार्य्यम् एवं त्रिवृतं त्रिवृतम् उपवीतं स्यात् एकोयन्थिरिति कालात्यनिषेधार्थम् । तथा च बौधायनः "कौशं सूत्रं त्रिवृत्तं यज्ञोपवीतमालाभेः" । कौशं कुशिकाघोद्भवं षट्सूत्रादिमयमित्यर्थः । कौशं कार्पासोद्भवम् । तथाच मनुः "कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत् । शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्" । त्रिशिवृतमित्युक्तत्वात् मनुवचनेऽपि त्रिवृन्मात्रं त्रिरावृत्तत्वेन विशेष्यम् । यत्तु पैठीनसिवचनम् "कार्पासमुपवीतं षट्तन्तु त्रिवृतं ब्राह्मणस्य । क्षौमं राजन्यस्य आविकं वैश्यस्य" । तत्प्रवरतन्त्वलाभे षट्तन्तु विधायकम् । नवतन्तुत्वं व्यक्तमाह देवलः "यज्ञोपवीतं कुर्वीत सूत्राणि नवतन्तुभिः । एकेन ग्रन्थिना तन्तुर्द्विगुणस्त्रिगुणोऽथवा" । एकेन ग्रन्थिना युक्त इति शेषः । द्विगुणस्त्रिगुणोऽथ वेति तन्तुवलेन द्विवृतो त्रिवृतो वा कर्त्तव्यः । त्रिवृत्वं त्रिवृत्त्वासम्भवे । मौञ्जिबन्धे वा यज्ञो विकल्पार्थः । अथिवज्ञा वस्त्रकुशरज्ज्वोः सूत्रानुकल्पत्वप्रदर्शनार्थः । एवकारोऽत्रिवृत्त्वव्यवच्छेदार्थः । द्वितीयो वाशब्दोऽनुक्तमौञ्जबालादिसमुच्चयार्थः । तथा च निगमपरिशिष्टम् "वासवा यज्ञोपवीतानि कुरुते तदभावे त्रिवृता सूत्रेण कुशमुञ्जबालप्रतिसर रज्जुभिर्वा । यतोऽत्र गोबालः यथाह देवलः "कार्पास क्षौमगोबाल कररज्जुतृणोद्भवम् । सदा सम्भवतो धार्य्यं सुपवीतं द्विजातिभिः" । तदभाव इतिकरणाद्वस्त्राभावे कुशरज्जुभिरिति बोद्धव्यम्" । आ०वि० ।

यज्ञाङ्ग पु० यज्ञस्याङ्गं साधनत्वेनास्यस्य अच् । १यज्ञोडुम्बरे अमरः । २खदिरे राजनि० । ३स्रुक्स्रुवयष्टिकायाञ्च यद्वच० तै हि सर्रुवेणाज्यादिना यज्ञं सम्पादयन्ति । ४सोमयज्ञायां स्त्री राजनि० टाप् । ५यागाङ्गमात्रे न० । ६तत्० ।

यज्ञात्त पु० ६त० । १अवभृथे यज्ञसमाप्तौ स्नानादिक्रियाभेदे २यज्ञशेषे च हेम० ।

यज्ञायज्ञीय न०यज्ञायज्ञा इत्यनेन शब्देन युक्तायामृचि गेयम् क० । १अग्निष्टोमे गेये सामभेदे ताण्ड्य० ब्रा० ४।१।२० ज्योतिष्टोमे गेये २सामभेदे च सा०सं०भा०उपोद्घाते ।

यज्ञिक पु० यज्ञः यज्ञाङ्गं साध्यत्वेनास्त्यस्य ठन् । पलाशे जटा० । तत्सम्बन्धिदार्व्यादिभिर्हि यज्ञोनिष्पाद्यते ।

यज्ञिय त्रि० यज्ञाय हितः घ । १यज्ञकर्म्मयोग्ये अमरः । २द्वापरयुगे पु० त्रिका० ।

यज्ञियदेश पु० कर्म० । यज्ञकर्म्मयोग्यदेशे "कृष्णसारस्तु चरति मृगो यत्र स्वभावतः । स ज्ञेयो यज्ञियोदेशः" मनूक्ते देशे । [राजनि० २यागसम्बन्धिनि त्रि० ।

यज्ञीय पु० यज्ञाय हितः तस्येदं वा क । १यज्ञोडुम्बरे

यज्ञीयब्रह्मपादप पु० कर्म० । विकङ्कतवृक्षे (वर्द्द च) राजनि० । "वैकङ्कतौ स्रुवमादत्ते" इति श्रुतौ तदीयस्रुवविधानात् तस्य तथात्वम् ।

यज्ञेश्वर पु०यज्ञस्य प्रवर्त्तयिता ईश्वरः । विष्णौ । [यज्ञके त्रि०

यज्ञेष्ट न० ७त० । १दीर्घरोहितवृक्षे राजनि० । ६च० २६०

यज्ञोडुम्बर पु० यज्ञार्थं उडुम्बरः । स्वनामख्याते वृक्षे शब्दर०

यज्ञोपवीत न० यज्ञेन संस्कृतमुपवीतम् । यज्ञसूत्रे उपनयनसंस्कारेण पवित्रीकृते त्रिवृति उद्धृते कामस्कन्धात् दक्षिणकुक्षितो लम्बमानतया धृते सूत्रभेदे । यज्ञसूत्रशब्दे दृश्यम् । [२विष्णौ च यज्ञपतिशब्दे दृश्यम् ।

यज्वन् पु० यज-भूते क्वनिप् । विधानेन १कृतयागे अमरः ।

यत ताडने उपस्करे च चु० स० सेट् । यातयति । अयीयतत् त । निर्+परीवर्त्ते प्रतीरूपबोधने च ।

यत यत्ने भ्वा० आत्म० अक० सेट् । यतते अयतिष्ट ईदित् निष्ठायामनिट् यत्तः ।

यतम त्रि० एषां मध्ये यः यद्+डतमच् । एषां मध्ये यदर्थे । [यरत्मर्थे ।

यतर त्रि० । अनयोर्मध्ये यः यद्+डतरच् । अनयोर्मध्ये

यतस् अव्य० यद्+तसिल् । यस्मादित्यर्थे ।

यति पु०यतते मोक्षाय यत-इन् । १परिव्राजके संन्यासिनि अमरः । यम्यते जिह्वा यत्र यम-क्तिन् । २छन्दोग्रन्थविख्याते जिह्वाया २विश्रामस्थाने उच्चारणकालविच्छेदे स्त्री । स च "क्वचित् छन्दस्यास्ते यतिरभिहिता पूर्वकृतिभिः पदान्ते वा श्लोकं व्रजति पदमध्ये त्यजति च" इत्यादुक्तादनुष्टिडन्तपदान्ते एव छन्दोग्रन्थानुसारेण जिह्वाया

विश्रामरूपोच्चारणाभावरूपा। २विधवायां ४राजे ५पत्नौ च शब्दच० ६पाठविच्छेदे मेदि०। ७निकारे ८विष्णौ हेमच०। ९वाद्याङ्गप्रबन्धभेदे सङ्गीतदा०। यद्+परिमाणे-डति। १०यत्परिमाणे त्रि० ब०व०।

यतिचान्द्रायण न० यतिनेव कर्त्तव्यं चान्द्रायणं व्रतभेदः। "अष्टावष्टौ समश्नीयात् पिण्डान् मध्यदिने गते। नियताक्षा हविष्याशी यतिचान्द्रायणं चरन्" मनूक्ते व्रतभेदे।

यतिन् पु० यम-भावे क्त यतं यमनं यतमनेन इनि। १संन्यासिनि परिव्राजके अमरः। २विधवायां स्त्री ङीप् षष्ठ्यरत्ना०। [शब्दर०।

यत(तू)का स्त्री यत-उक जक वा। लिनपत्रिकाद्वये

यत्न पु०यत-भावे नङ्। १आयासे २उद्योगे वैशेषिकोक्ते प्रवृत्तिनिवृत्तिजीवनयोनिरूपत्वविध्यापन्ने ३गुणभेदे च। स च आत्मगुणः इति नैयायिकादयः चित्तगुण इति सांख्यवेदान्तिकाः।

यत्र अव्य० यद्+त्रल्। यस्मिन्नर्थे।

यत्र सङ्कोचने वा चु०उभ०पक्षे भ्वा०पर०सक० सेट् इदित्। यन्त्रयति ते यन्त्रांत अययन्त्रत् त अयन्त्रीत्।

यथा अव्य०यद्+प्रकारे थाल्। १येन प्रकारेणेत्यर्थे २सादृश्ये ३योग्यतायाम्४आनुरूप्ये ५पदार्थानतिवृत्तौ च वि०कौ०।

यथाकाम अव्य० काममनतिक्रम्य अव्ययी०। १स्वाच्छन्द्ये २यथेष्टतायाञ्च। [स्वेच्छाचारिणि जने स्त्रियां ङीप्।

यथाकामिन् त्रि० यथाकामं स्वाच्छन्द्यमस्त्यस्य इनि।

यथाक्रम अव्य० क्रमस्य आनुरूप्यं तस्यानतिक्रमो वा अव्ययी०। १क्रमानुरूप्ये २क्रमानतिक्रमे च।

यथाजात त्रि० जातं समयविशेषमनतिक्रम्य यथाजातं तदस्यास्ति अच्। १मूर्खे अमरः। २नीचे जटा०।

यथातथ अव्य० तथानतिक्रम्य अनतिवृत्तौ अव्ययी०। याथार्थ्ये यस्य वस्तुनो यद्रूपं भवितुमुचितं तथारूपभावे स्वरा० यथायथमयत्रार्थे।

यथार्थ अव्य० अर्थमनतिक्रम्य अव्ययी०। १सत्यतायाम् अर्थस्याव्यभिचारे सत्यस्वरूपे। अर्थे आद्यच्। २सत्ये त्रि०।

यथार्ह अव्य० अर्हं योग्यतामनतिक्रम्य अव्ययी०। १यथायोग्यत्वे ततः अर्थ आद्यच्। २सत्यभूते पदार्थे त्रि०।

यथार्हवर्ण पु० यथार्हं यथायोग्यं वर्णयति वर्ण-अण्। चरे अमरः। [२यथाशास्त्रानुसारे।

यथाशक्ति अव्य० शक्तेरानुरूप्यम् अव्ययी०। १शक्तेरानुरूप्ये

यथाशास्त्र अव्य० शास्त्रस्यानुरूप्यम् अनतिक्रमो वा अव्ययी०। १शास्त्रानुसारे २शास्त्रानतिक्रमे च।

यथास्थित अव्य०यथा येन रूपेण स्थातुं योग्यं तथास्थितम् योग्यतायाम् अव्ययी०।१सत्यतायाम् हेमच०अर्थ आद्यच्। २सत्ये त्रि०। [आद्यच्। २यथार्थे त्रि०अमरः।

यथास्व अव्य० स्वस्यानतिक्रमः अव्ययी०।१याथार्थ्ये। अर्थ

यथेप्सित अव्य० ईप्सितस्यानतिक्रमः अव्ययी०। १स्वाच्छन्द्ये अमरः। अर्थ आद्यच्। २यथाभीष्टे त्रि० यथेप्समव्यय।

यथोचित अव्य० उचितस्यानतिक्रमः अव्ययी०। १औचित्ये अमरः। अर्थ आद्यच्। २उचिते त्रि०।

यद् त्रि०यज्-अदि डिच्च। (ये)१इत्येवं बुद्धिविशेषविषये। अस्य एकार्थे सर्वनामता। अयञ्च शब्दः तच्छब्दार्थनित्यापेक्षो उत्तरवाक्यस्थस्तु न तदपेक्षी इति काव्यप्र०, यत्तच्छब्दयोरन्वये च न समानविभक्तेस्तत्तत्तात्पर्याकरे स्थितम्। २यद्यादित्यर्थे अव्य०। ३गर्हायाम् ४अवधृतौ च मेदि०।

यदा अव्य० यद्+काले दाच्। यस्मिन् काले इत्यर्थे।

यदि अव्य० यद्+णिच्-इन् णिलोपः। १पक्षान्तरे अमरः। २सम्भावनायाम् ३गर्हायां ४विकल्पे च मेदि०।

यदु पु० ययातिनृपतेः [ज्येष्ठपुत्रे वसु वंशे श्रीकृष्णावतारः। तस्य गोत्रापत्यमण् बहुषु तस्य लुक्। २यदुवंश्ये ३दर्शार्हेऽपि च ब०व० हेमच०। [यदुपत्यादयोऽस्यत्र।

यदुनाथ पु० यदूनां नाथो रक्षकत्वात्। श्रीकृष्णे हेमच०।

यदृच्छा स्त्री यद्+कच्छ-अ-टाप्। १स्वातन्त्र्ये, २स्वैरतायाम् अमरः। "यदृच्छालाभसन्तुष्टः" इति गीता।

यदृच्छाशब्द पु० जात्यादिवाचके जात्यादिसंज्ञाशब्दे "अस्मादयतः कश्चिदर्थं जातिक्रियागुणैः। यदृच्छाशब्दवत् पुंसःसञ्ज्ञायै जन्म केवलम्" माधवः।

यद्यपि अव्य० यदि च ह च वा च इ०। यद्यर्थे पक्षान्तरद्योतने "यद्यपात्रतरसम्भारस्तर्हि पशुनैव" इति "यद्यपाऽभयं चिक्षीर्षेदिति" च गोभिलः।

यद्वा अव्य० यश्च वा च इ०। १पक्षान्तरे "यद्वाभ्युदययोन्यता" भर्तृहरिः २नुज्ञौ संज्ञिप्रभा०। [३संयमयुक्ते त्रि०हेमच०

यन्तृ पु० यम-तृच्। १सारथौ २हस्तिपके च अमरः।

यन्त्र न० यत्रि-अच्। १संयमने तन्त्रोक्ते देवाद्यधिष्ठाने २चक्रभेदे ३औषधपाकार्थपात्रभेदे, ज्योतिश्चक्राद्यवेक्षणसाधने ४पदार्थभेदे, ५सूतधारादेर्दारुवेधकादौ (तुरविन्) (भमर) पदार्थे। ६अन्यादेः क्षेपणसाधने पदार्थे अस्त्रिलन्तम् (कामान धनुक)।

औषधपाकपात्रं च नानाविधं भावप्र० दर्शितं यथा

वालुकायन्त्रम् "भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके। कूपिकाकण्ठपर्य्यन्तं वालुकाभिश्च पूरिते। भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते। वालुकायन्त्रमेतद्धि यन्त्रतन्त्रवुधैः स्मृतम्"।

दोलायन्त्रम् "निधद्धौषधं सूतं भूर्ज्जे तच्चिगुणान्तरे। रसपोटलिकां काष्ठे दृढं बद्ध्वा गुणेन हि। सम्यानपूर्णं कुम्भान्तः स्थापनस्थितम्। अधस्ताज्ज्वालयेदग्निं तत्तदुक्तक्रमेण हि। दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि"। सम्यानं काञ्जिकादि।

विद्याधरयन्त्रम् "खाब्धुस्थालीमुखे बद्धे वस्त्रे स्वेद्यं निधाय च। पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं परम्। अधःस्थाल्यां रसं क्षिप्त्वा संनिदध्यान्मुखोपरि। स्थालीबूर्ज्जमुखौ सम्यक् निरुध्य वहुसूत्रया। ऊर्द्धस्थाल्यां जलं क्षिप्त्वा चुल्ल्यामारोप्य यत्नतः। अधस्तात् ज्वालयेदग्निं यावत् प्रहरपञ्चकम्। स्वाङ्गशीतं ततो यन्त्रात् गृह्णीयादुत्तमं रसम्। विद्याधराभिधं यन्त्रमेतत्तज्ज्ञैरुदाहृतम्"।

भूधरयन्त्रम् "वालुकासु समस्ताङ्गं गर्त्ते भूधाः रसान्विताः। दीप्तोपलैः संगुणवादुयन्त्रं भूधरनामकम्"।

ऊर्ध्वरयन्त्रम् "यन्त्रं ऊर्ध्वसंज्ञं स्याच्चत्स्याल्लोर्ध्वस्थिते सुखे" कालज्ञानार्थे सू० सि० उक्ते द्रव्यार्थभेदे यथोक्तं "कालसंसाधनार्थाय तथा यन्त्राणि साधयेत्। एकाकी योजयेदेकं यन्त्रं सिद्धिकारिणि। शङ्कुयष्टिधनुश्चक्रैश्छायायन्त्रैरनेकधा। गुरूपदेशाद्विज्ञेयं कालज्ञानमतन्द्रितैः" सू०। "शङ्कुयष्टिधनुश्चक्रैः प्रसिद्धैश्छायायन्त्रैश्छायासाधकयन्त्रैरनेकधा नानाविधगणितप्रकारैर्गुरूपदेशात् स्वाध्यापकस्य निर्व्याजकथनादतन्द्रितैरभ्रमैः पुरुषैः कालज्ञानं दिनगताद्विज्ञानं विज्ञेयं सूक्ष्मत्वेनावगम्यम्। एतत् सर्वं सिद्धान्तशिरोमणौ भास्कराचार्यैः सप्रपञ्चीकृतम्

शङ्कुयन्त्रम् "समतलसमचक्रपरिधिर्ब्रह्मसिद्धे दन्तिदन्तजः शङ्कुः। तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम्"।

यष्टियन्त्रम् "त्रिज्याविष्कम्भार्धं दृत्तं कृत्वा दिगङ्कितं तत्र। दृक्सूत्र्यां प्राक्पश्चात् द्विज्याहतं च तन्मध्ये। तत्परिधौ षष्ठ्यङ्गं यष्टिर्नेष्टद्युतिस्ततः कोन्द्रे। त्रिज्याकृत्या निधेया यष्ट्याद्यान्तरं यावत्। यावत्या कौव्यां यद्वृद्धितोयवृत्ते धनुर्भवेत् तत्र। दिनगतशेषा नाड्यः प्राक् पश्चात् क्रमेणैवम्"।

चक्रयन्त्रम् "चक्रं चक्रांशाङ्कं परिधौ श्लथवृङ्खलादिकाधारम्। धात्री साधारात् कलया मार्केऽस्त खार्धं च। तन्मध्ये सूक्ष्माक्षं चित्वाकीलेऽसुखनेमिकं धार्यम्। भूमेरुन्नतभागास्तत्साच्छायया भुक्ताः। तत्खार्धोनास्तु गता उन्नतवशसङ्गुणं द्युदलम्। द्युदलोन्नतांशभक्तं नाड्यः स्यूनाः परैः प्रोक्ताः"।

धनुर्यन्त्रम् "दलीकृतं चक्रमुशन्ति चापम्" इति।

अथ ग्रन्थविस्तरभयादेतेषां निरूपणविस्तरो गणितादिविचारश्चोपेक्षित इति मन्तव्यम्। अथ घटीयन्त्रादिभिश्चसत्कारियन्त्रैर्वा सर्वैरुक्तैर्यं कालं सूक्ष्मं साधयेदिति कालसाधनमुपसंहरति" रङ्ग०। "तोययन्त्रकपालाद्यैर्मयूरनरवानरैः। सूक्ष्मरेणुगर्भैश्च सम्यक् कालं प्रसाधयेत्" सू०। "तोययन्त्रं च तत् कपालं च कपालाख्यं जलयन्त्रं वज्रलवणं तदाद्यं प्रथमं येषां तैर्यन्त्रैर्घटीयन्त्रप्रभृतिभिः सापेक्षघटीयन्त्रैर्मयूरनरवानरैः। मयूराख्यं स्वयंवहयन्त्रं निरपेक्षं नरयन्त्रं शङ्कुाख्यं छायायन्त्रं पूर्वोद्दिष्टं वानरयन्त्रं स्वयंवहं निरपेक्षमेतैः सूक्ष्मरेणुगर्भैः सूक्ष्मसहिता रेणवो धूलयो गर्भे मध्ये येषां तैः सूक्ष्मप्रोताः षष्टिसङ्ख्याका सूक्ष्मवृष्टिका मयूरोदरस्था सुखाद्यु घटिकान्तरेण खत एव निःसरन्तीति लोकप्रसिद्ध्या तादृशैर्यन्त्रैरित्यर्थः। यद्वा सूक्ष्माकारेणरेखाः सिकतांशा गर्भे उदरे यस्यैतादृशं यन्त्रं वालुकायन्त्रं प्रसिद्धम्। तेन सहितैर्मयूरादियन्त्रैर्मयूराद्युक्तयन्त्रैर्वालुकायन्त्रेण चेति सिद्धोऽर्थः। चकारस्तोययन्त्रकपालाद्यैरित्यनेन समुच्चयार्थकः। कालं दिनगतादिरूपं सम्यक् सूक्ष्मं प्रसाधयेत्। प्रकर्षेण सूक्ष्मत्वेनातिसूक्ष्मत्वेनेत्यर्थः। जानीयादित्यर्थः। ननु मयूरादिस्वयंवहयन्त्राणि कथं साध्यानीत्यतस्तत्साधनप्रकारा बहवो दुर्गभाश्च सन्तीत्याह रङ्ग०।

"पारदाराम्बुसूत्राणि शुल्बतैलजलानि च। बीजानि पांसवस्तेषु प्रयोगास्तेऽपि दुर्लभाः" सू०। "तेषु मयूरादियन्त्रेषु स्वयंवहार्थमेते प्रयोगाः प्रकर्षेण योज्याः। प्रकर्षस्तु यावद्भ्रमतसिद्धेः। ते के इत्यत आह। पारदाराम्बुसूत्राणीति। पारदयुक्ता आराः। तथाच सिद्धान्तशिरोमणौ "लघुकाष्ठजसमचक्रे समसुषिरारा समान्तरा नेम्याम्। छिद्रिद्रुका योज्याः सुषिरस्यार्धे पृथक् ताश्च। रसपूर्णे तच्चक्रं स्वाधाराच्छ्यितं स्वयं भ्रमति"। अम्बु जलस्य प्रयोगः। सूत्राणि सूत्रसाधनप्रयोगः।

शुल्बं शिल्पनैपुण्यम् । तैलजलानि तैलयुक्तजलस्य प्रयोगः । चकारात् तयोः पृथक् प्रयोगोऽपि । तथाच सिद्धान्तशिरोमणौ "उत्कीर्यनेमिमध्ये वा परितो यदनेन संलग्नम् । तदुपरि तालदलाद्यं कृत्वा सुषिरे रसं क्षिपेत् तावत् । यावद्रसैकपार्श्वं क्षिप्तजलं नान्यतो याति । पिहितच्छिद्रं तदतश्चक्रं भ्रमति स्वयं जलाकृष्टम् । ताम्रादिमलस्याङ्गुशरूपनलस्याम्बुपूर्णस्य । एकं कृण्डजलान्तर्द्वितीयमग्र्यं त्वधोमुखं च बहिः । युगपन्मुक्तं चेत् कं नलेन कृण्डाद्बहिः पतति । नेम्यां बद्धा घटिकाशक्तं जलयन्त्रवत् तथा धार्यम् । नलकप्रच्युतसलिलं पतितं यथा तद्घटीमध्ये भ्रमति । ततस्तत् सततं पूर्णघटीभिः समाकृष्टम् । चक्रच्युतं स्वयमुदकं कृण्डे याति प्रणालिकया" । इति । बीजानि केवलं तद्भवीज प्रयोगः । पांसवो धूलिप्रयोगास्तैर्युक्ताः प्रयोगाः । अपिशब्दात् प्रयोगेषु सुगमतरा इत्यर्थः । दुर्लभाः असाधारणत्वेन मनुष्यैः कर्तुमशक्या इत्यर्थः । अन्यथा प्रतिगृहं स्वयंवहानां प्राचुर्यापत्तेः । इयं स्वयंवहविद्या समुद्रान्तर्निवासिजनैः फिरङ्गाख्यैः सम्यग्व्यक्तेति । कुहकविद्यात्वादत्र विस्तारानुद्योग इति संक्षेपः" रङ्ग० ।

अथ कपालाख्यं जलयन्त्रम्

"ताम्रपात्रमधश्छिद्रं न्यस्तं कुण्डेऽमलाम्भसि । षष्टिर्मज्जत्यहोरात्रे स्फुटं यन्त्रं कपालकम्" भू० "यत् ताम्रघटितं पात्रमधश्छिद्रमधोभागे छिद्रं यस्य तत् । अमलाम्भसि निर्मलं जलं विद्यते यस्मिन् तादृशे कृण्डे दृढङ्गाख्ये न्यस्तं धारितं सदहोरात्रे नाक्षत्राहोरात्रे षष्टिः षष्टिवारमेव न न्यूनाधिकं मज्जति । अधश्छिद्रमार्गेण जलागमनेन जलपूर्णतया निमग्नं भवति । तत् कपालकं घटखण्डानां कपालपदवाच्यत्वात् घटाधस्तनाधोकारं यन्त्रं घटीयन्त्रं स्फुटं सूक्ष्मम् तद्घटनं तु "शुल्बस्य दिग्भिर्विहितं पलैर्यत् षड्भुजोच्चं द्विगुणायताश्रम् । तदम्भसा षष्टिपलैः प्रपूर्यं पात्रं घटार्धप्रतिमं घटी स्यात् । सत्र्यंशमाषत्रयनिर्मिता या हेम्नः शलाका चतुरङ्गुला स्यात् । विद्धं तया प्राक्तनमत्र पात्रं प्रपूर्यते नाडिकयाम्बुभिस्तत्" भू० । इति व्यक्तम् । भगवता तु सूक्ष्मसूक्तम् । अथ शङ्कुयन्त्रं दिवैव कालज्ञानार्थं नान्यदेत्याह रङ्ग० । "नरयन्त्रं तथा साधु दिवा च विमले रवौ । छायासंसाधनैः प्रोक्तं कालसाधनमुत्तमम्" भू० ।

देवताभेदे पूजाधारयन्त्राणि धारणयन्त्राणि च तन्त्रसारोक्तानि दृश्यानि । तल्लेखनद्रव्याणि तत्रोक्तानि यथा "काश्मीररोचनालाक्षामृगेभमदचन्दनैः । विलिखेद्भूर्जपत्रे वा सम्यगालिखेत् । अथ वा ताम्रपत्रे वा गुटिकीकृत्य धारयेत् । यावज्जीवं सुवर्णे स्यात् रौप्ये विंशतिवार्षिकम् । भूर्जे द्वादशवर्षाणि तदर्धं ताम्रपट्टके" । द्रव्यभेदस्यैव तत्र तस्याधार्यतोक्ता यथा "भूमिस्पृष्टं शवस्पृष्टं यन्त्रं निर्माल्यसङ्गतम् । विदीर्णं लङ्घितं मन्त्रो यन्त्रं नैव च धारयेत्" ।

यन्त्रक न० यन्त्रमिव इवार्थे कन् (क्त) दारुभ्रामकयन्त्रभेदे

यन्त्रगृह न० ६त० । तैलिकयन्त्राख्ये (घानिघर) हेमच० ।

यन्त्रगोल पु० यन्त्रमिव ज्योतिश्चक्राकृतिगोलयन्त्रमिव गोलःवर्त्तुलः । कलायभेदे (मटर) शब्दच० ।

यन्त्रण न० यत्रि-ल्युट् । १नियमने २रज्जौ ३बन्धने च मेदि० युच् । ४पीडायाम् स्त्री टाप् ।

यन्त्रपेषणी स्त्री यन्त्रेणैव पिष्यतेऽनया पिष-करणे ल्युट् ङीप् । (याँता) पेषणयन्त्रे जटा० ।

यभ मैथुने भ्वा०पर०सक० अनिट् । यभति अयाभीत् ।

यम उपरतौ भ्वा० पर० सक० अनिट् यच्छति अयंसीत् उदित् क्त्वा वेट् । यन्त्वा यत्वा यत्तः ।
आ+दीर्घीकरणे आत्म० । उप+विवाहे आत्म० ।

यम परिवेषणे चु० उ० सक० सेट् वा घटा० । यमयति यामयति अयीयमत् त अययामत् त ।

यम पु० यम-घञ् । "अहिंसा सत्यवचनं ब्रह्मचर्य्यमकल्कता । अस्तेयमिति पञ्चैते यमाख्यानि व्रतानि च" इत्युक्ते १अहिंसादौ तच्च देहमात्रसाध्यम् आवश्यकनवश्यकार्य्ये नित्यं कार्य्यमिति अमरः इन्द्रियादीनां २संयमने च । यमयति अच् । प्राणिनां शुभाशुभकर्मानुसारेण दण्डविधायके ईश्वरनियुक्ते दक्षिणस्थे ३देवभेदे पु० अमरः । तत्स्वामिकत्वात् ४काके च । स्वामित्वेन यमसम्बन्धिनि पुंस्त्री ङीप् एकगर्भजायमाने यमजे त्रि० मेदि० । ७द्वित्वसंख्यायां द्वयमदेवताके भरण्योनक्षत्रे ज्यो० ।
दिक्पालयमभेदाः चतुर्दश भविष्यपु० उक्ता यथा "यमाय धर्मराजाय मृत्यवे चान्तकाय च । वैवस्वताय कालाय सर्वभूतक्षयाय च । औदुम्बराय दध्नाय नीलाय परमेष्ठिने । वृकोदराय चित्राय चित्रगुप्ताय वै नमः" ।
योगाङ्गयमास्तु पात० स्मृ० भा० उक्ता यथा

"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि" सू०। "यथाक्रमं एतेषाम् अनुष्ठानं स्वरूपञ्च वक्ष्यामः भा०। तत्र "अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा-यमाः" सू०। "तत्राहिंसा सर्व्वथा सर्व्वदा सर्व्वभूतानामनभिद्रोहः। उत्तरे च यमनियमाश्चन्मूलास्तत्सिद्धिपरतया तत्प्रतिपादनाय प्रतिपाद्यन्ते तदवदातकरणायैवोपादीयन्ते। तथाचोक्तं "स खल्वयं ब्राह्मणो यथा यथा व्रतानि बह्वनि समादित्सते तथा तथा प्रसादक्लमेभ्यो हिंसानिदानेभ्यो निवर्त्तमानस्तामेवावदातरूपामहिंसां करोति"। सत्यं यथार्थे वाङ्मनसे यथादृष्टं यथानुमितं यथाश्रुतं तथा वाङ्मनसेति स्वबोधसंक्रान्तये वाग्युक्ता सा यदि न वञ्चिता भ्रान्ता वा प्रतिपत्तिबन्ध्या वा भवेत् इत्येषा सर्व्वभूतोपकारार्थं प्रवृत्ता न भूतोपघाताय यदि चैवमप्यभिधीयमाना भूतोपघातपरैव स्यान्न सत्यं भवेत् पापमेव भवेत् तेन पुण्याभासेन पुण्यप्रतिरूपकेन कष्टं तमः प्राप्नुयात् तस्मात् परीक्ष्य सर्व्वभूतहितं सत्यं ब्रूयात्। स्तेयमशास्त्रपूर्व्वकं द्रव्याणां परतः स्वीकरणं तत्प्रतिषेधः पुनरस्मृत्याक्षेपमात्रेणेयमिति। ब्रह्मचर्य्यं गुप्तेन्द्रियस्योपस्थस्य संयमः। विषयाणामर्জनरक्षणक्षयसङ्गहिंसादोषदर्शनाद्स्वीकरणमपरिग्रह इत्येते यमाः" भा०।

ग.रुड़े तु तस्य दशविधत्वमुक्तं यथा "ब्रह्मचर्य्यं दयाक्षान्तिर्ध्यानं सत्यमकल्कता। अहिंसाऽस्तेयमाधुर्य्यं दमश्चेते यमाः स्मृताः" १०५ अ०।

यमक न० शब्दालङ्कारभेदे अलङ्कारशब्दे २८९ पृ० दृश्यम्।

यमकोटि पुंस्त्री० भूगोलस्य चतुर्थपादान्तरिते लङ्कातः पूर्व्वस्यां स्थितायां देवनिर्मितायां पुर्य्याम् "लङ्का कुमध्ये यमकोटिरस्याः प्राचीति सिद्धान्तशिरोमणिः।

यमघण्ट पु० योगविशेषे। "हे मघापूर्व्वफल्गुन्यौ पुष्याश्लेषार्कचन्द्रयोः। ज्येष्ठानुराधा भरणी चाश्विनी कुजवासरे। हस्ताद्रां चन्द्रजे मूला पूर्व्वाषाढा च रेवती। जीवे ह्युत्तरभाद्रश्च शुक्राहे स्वातिरोहिणी। शनिवारे शतभिषा श्रवणा यमघण्टकः" सारसंग्रहः।

यमदग्नि पु० जमदग्नौ मुनिभेदे।

यमज त्रि० द्वि० व०। यमौ एकदा एकत्र गर्भे बहवो वा जायेते जन-ड। एकदा एकगर्भजातयोः मेदि०।

यमदशन पु० ब०व०। यमस्य दशना इव चर्व्वणसाधनत्वेन छिन्नकत्वात्। "कार्त्तिकस्य दिनान्यष्टौ चाष्टाषाढाश्रवणस्य च। यमस्य दशना एते लङ्घाहारी स जीवति वैद्यकोक्ते सौरदिनभेदेऽष्टके। यमदन्त शब्दोऽप्युक्ते अर्थे।

यमदूतिका स्त्री यमस्य दूतीव दूषार्थे कन्। १तिन्तिड़ीवृक्षे अमरः। यमस्य दूत इव कायति कै-क। यमदूतक २काके पुंस्त्री० शब्दरत्ना० स्त्रियां ङीष्।

यमद्रुम पु० यमस्य द्रुमः इव। यमदारुस्यद्रुमतुल्ये शाल्मलिवृक्षे तत्तुल्यलौहमयकीलाकीर्णवृक्षेण हि नारकिपीडनात्तस्य यमद्रुमत्वम्।

यमद्वितीया स्त्री ह्रत०। कार्त्तिकशुक्लद्वितीयायाम् "तथा यमद्वितीयायां यात्रायां मरणम्" ति०त०।

यमधार पु० यमसंख्याका धारास्य। उभयपार्श्वे धारायुक्ते अस्त्रे (किरीच)। [यति ल्यु। २यमे पु० मेदि०।

यमन न० यम-ल्युट्। १बन्धने २उपरमे च मेदि०। यम-

यमप्रिय पु० ह्रत०। वटवृक्षे शब्दर०।

यमराज पु० यमानां चतुर्दशानां राजा यमनियामको राजा वा टच्समा०। प्रेतानां राजनि धर्मराजे हेमच०। यमेषु राजते राच-क्विप्। यमराडप्यत्र अमरः।

यमल न० यमं योगं लाति ला-क। १युग्मे अमरः द्वन्द्वनस्थे २वृक्षभेदे च। "तच्च लक्षणःपदा बभञ्च" हरिवं०।

यमलपत्र पु० यमलानि युग्मानि पत्राण्यि यस्य। १अश्वत्थवृक्षे २कोविदारवृक्षे राजनि०।

यमवाहन पु० यमं वाहयति स्थानात् स्थानान्तरं नयति वह-स्वार्थे णिच्-ल्यु। महिषे हेमच०।

यमानी स्त्री यच्छति अग्निमान्द्यमनया यम-करणे ल्युट् पृषो० आत्वम्। १अजमोदायाम् शब्दमा० स्वार्थे क। यमानिका तत्रैव स्त्री।

यमुना स्त्री यम-उनन्। १कालिन्द्यां नद्यां २यमभगिन्याम् सूर्य्यसुतायाम् अमरः। ३दुर्गायाञ्च देवीपु०।

यमुनाभ्रात पु० ह्रत०। यमे अमरः।

ययाति पु० यस्य वायोरिव यातिः सर्व्वत्र रथमतिरस्य। नड़ [मेदि०। पालजे राजभेदे।

ययु पु० या-कु हित्वञ्च। १अश्वमेधीयेऽश्वे २अश्वमात्रे च

यव पु० यु-अच्। १स्वनामख्याते शूकधान्यभेदे अमरः। "यवस्ते सर्व्वशस्यानां जायते पत्रशातनम्। मोदमानाश्च तिष्ठन्ति यवाः कक्षिशयालिनः" इति मीमांसा। अङ्कुरिते यवाकारे २रेखाभेदे साहङ्कम् तत्फलसूत्रं तत्रैव "तर्জनीमूलसंपृक्तौ यवौ सुतार्थदौ क्रमात्। मध्यमायां यदि यवौ दृश्यते यवस्त्वेवाङ्गुष्ठेऽपूर्व्वधनप्रदः। मध्यमायां यदि यवौ दृश्यते च सुशोभनौ। तदान्यस्मिंस्तं दृश्यं प्राग्रोत्तङ्कके

यवे। यस्यापि चक्रमङ्कुशे यवपूर्णञ्च दृश्यते। तदा पितामहादीनामर्जितं लभते धनम्" इति सामुद्रिकम्। २षट्वर्षात्मके परिमाणभेदे शब्दच०। [क्षेत्रे अमरः।

यवक्य न० यवानां भवनं क्षेत्रं यत् कुक् च। यवभवने

यवक्षार पु० यवजातः क्षारः। यवजातक्षारे यवक्षभेदे शब्दर०

यवज पु० यवात् जायते जन-ड। १यवक्षारे रत्नमा० २यवान्नान्ने च राजनि०। [राजनि०।

यवतिक्ता स्त्री यवाकारं तिक्तं फलं यस्याः। यष्टिन्याम्

यवन पु० यु-यु। १देशभेदे सोऽभिजनोऽस्य तस्य राजा वा अण् बहुषु तस्य लुक्। २तद्देशस्थेषु जनेषु २तच्छ्मश्रुषु ब०व०। ४वेगे ५व्यधिवेगयुतास्त्रे मेदि० ६गोधूमे ७गर्जरतृणे ८तुरष्कजातौ राजनि० ययातिशापस्य तत्पुत्रस्य तुर्वसोर्वंशजे जातिभेदे च पुंस्त्री० स्त्रियां ङीष्। १०वेगवति त्रि०।

यवनद्विष्ट पु० यवनैर्द्विष्टः द्विष-क्त। द्रुगुग्गुलौ राजनि०

यवनप्रिय न० ६त०। मरिचे हेमच०।

यवनाचार्य्य पु० ताजकादिज्योतिःशास्त्रकारके पण्डितभेदे

यवनानी स्त्री यवनानां लिपिः ङीप् आनुक् च। यवनानां लिपिभाषासु त्रि० को०।

यवनारि स्त्री यवनस्यारिः। श्रीजगणे त्रिका०।

यवनाल पु० यवस्येव नाडा (नाडा) यस्य। (शैधान) धान्यभेदे हेमच०। [यवक्षारे हेमच०।

यवनालज पु० यवस्य नालात् कायत्वात् जायते जन-ड।

यवनिका स्त्री युवन्त्यस्यां यु-ल्युट् ङीप् स्वार्थे क अत इत्त्वम्। (कानात) जवनिकायाम् अमरः।

यवनी स्त्री यु-ल्युट् ङीप्। १यवनीनामकोषधौ मेदि० ङीष्। २यवनभाष्यांवाच्च। "यवनीलवणप्रख्यानाम" रघुः।

यवनेष्ट न० ६त०। १वीरुधे हेमच०। २मरिचे ३लशुने ४लशुने ५राजपलाण्डौ ६मिश्रे च पु०। खर्जूर्यां स्त्री राजनि० टाप्।

यवफल पु० यव इव फलमस्य। १बंशे अमरः २कुटजे यस्य फलमिन्द्रयवः। ३अटासंज्ञायाञ्च मेदि० ४अल्पवृक्षे शब्दर०।

यवमध्य न० यव इव मध्यं यस्य। चान्द्रायणभेदे प्रथमद्वितीयादिपञ्चदशदिनमेकैकग्रासवृद्ध्या, तदुत्तरं च आपञ्चदशदिनं क्रमेणैकैकग्रासहान्या माससाध्ये व्रते तस्य मध्यदिवसानां हि बहुग्रासत्वेन यवमध्यतुल्यत्वम्।

यवयास पु० यवेन यवक्षेत्रे संज्ञायां कर्त्तरि घञ्। यवक्षारे शब्दच०।

यवयूक पु० यवानां यूकः कारणत्वेनास्त्यस्यः अच्। यवक्षारे त्रिका० यवयूकजादयोऽप्यत्र राजनि०।

यवस न० यु-असच्। १घासे २तृणे च अमरः।

यवागू स्त्री यूयते मिश्र्यते यु-आगू। षड्गुणजलपक्वे द्रवभेदे (वाउ) अमरः। "मरुद्यवतुर्दशगुणे यवागूः षड्गुणेऽम्भसि" वैद्यकपरिभाषा।

यवाग्रज पु० यवक्षाग्रात् यूकात् जायते जन-ड। १यवक्षारे अमरः। २यवान्नाच्च राजनि०।

यवानी स्त्री दुष्टो यवः ङीप् आनुक् च। (जोयानि)पदार्थे राजनि०। "यवानी पाचनी रुच्या दीप्तोष्णा कटुका लघुः। दीपनी च तथा तिक्ता पित्तला शुक्रशूलहृत्। वातश्लेष्मोदरानाहगुल्मप्लीहकृमिप्रणुत्" भावप्र०।

यवापत्य न० यवक्षापत्यमिव तज्जातत्वात्। यवक्षारे राजनि०

यवाम्लज न० यवजातादम्लाज्जायते जन-ड। सौवीरके काञ्जिकभेदे राजनि०।

यवास पु० यु-आस। १दुरालभायाम् अमरः। २खदिरभेदे च शब्दमा० ३सुरङ्गासिनी तृणे स्त्री राजनि० टाप्। स्वार्थे क। यवासक तत्रैव। [तरुणे।

यविष्ठ त्रि० अतिशयेन युवा युवन्-इष्ठन् यवादेशः। अति-

यवीयस् त्रि० अतिशयेन युवा युवन्+ईयसुन् यवादेशः। १अतितरुणे २कनिष्ठे च "अंशबंधं यवीयांसः" स्मृतिः। स्त्रियां ङीप्।

यवोत्थ न० यवादुत्थितति यद्+स्था-क। सौवीरके राजनि०।

यश्य न० यवानां भवनं क्षेत्रं यत्। यवभवनयोग्ये क्षेत्रे अमरः। युतचन्द्राकांवत्र यत्। १चान्द्रे मासे पु०। "यश्यद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः" प्रा०त०।

यशःपटह पु० यशःख्यापकः पटहः मा० त०। ढक्कायाम् वाद्यभेदे अमरः। [शेषादयोऽप्यत्र।

यशःशेष त्रि० यश एव शेषोऽस्य। मृते हेमच०। कीर्त्ति-

यशद न० येन वायुना शीयते शद-अच्। (दस्ता) ख्याते धातुभेदे "यशदं रङ्गशदृशं रीतिरेतस्य तन्मतम्। यशदं लघुरं तिक्तं शीतलं कफपित्तहृत्। चक्षुष्यं परमं सेव्यं पाण्डुं श्वासञ्च नाशयेत्" भावप्र०।

यशस् न० अश-असुन् धातोः गुट् च। शौर्य्यादिभूते ख्यातिपरपर्य्याये पदार्थे अमरः।

यशस्या स्त्री यशसे हिता यशस्+यत्। १जीवन्त्यां २क्षुद्रिनामौषधौ च राजनि०। ३यशःसाधने त्रि०। "धन्यं यशस्यमायुष्यम्"।

यशस्वत् त्रि० यशस्+अस्त्यर्थे मतुप् मस्य वः । यशोविशिष्टे

यशस्विन् त्रि० यशस्+अस्त्यर्थे विनि । १यशोयुते स्त्रियां ङीप् । सा च २ज्योतिष्मतीलतायां ३यष्टितिक्तायां राजनि० ४धनकापीसाच्च शब्दर० ।

यशोद पु० यशो ददाति दा–क । १पारदे राजनि० २यशोदातरि त्रि० ।३नन्दगोपपत्न्यां स्त्री । "नन्दगोपगृहे जाता यशोदागर्भसम्भवा" देवीमा० ।

यष्टृ पु० यज–तृच् । यागशीले ।

यष्टि पु० यज–क्तिन् नि० न सम्प्रसारणम् । १भ्रजादिदण्डे २भुजाद्यवलम्बने दण्डे च मेदि० क्तिच् । ३तन्त्रौ शब्दमा० । ४हारलतायां ५भार्य्यां ६मधूकायां (यष्टिमधु) स्त्री वा ङीप् । ७शस्त्रभेदे च मेदि० ।

यष्टिमधु न०यष्टौ मधु यस्य । स्वनामख्याते लतामेदे हला० । कप् तत्रार्थे स्त्री अमरः ।

यष्टीक न०यष्ट्या कायति कै–क । यष्टीमधौ लतामेदे भावप्र०

यष्टीपुष्प पु० यष्टीव पुष्पमस्य । पुत्रजीवद्वृक्षे भावप्र० ।

यष्टीमधु पु० यष्ट्यां मधु यस्य । (यष्टिमधु) स्वनामख्याते लतामेदे राजनि० ।

यस यत्ने दिवा० पक्षे भ्वा० वा श्यन् पर०अक०सेट् । यस्यति यसति संयस्यति संयसति अनुयस्यति । इरित् अयसत् अयासीत् अयसीत् । अयं पुषादिरित्यन्ये उदित् क्त्वा वेट् । यसित्वा यस्त्वा यस्तः ।

यस्क पु० यस–क नेत्त्वम् । मुनिभेदे तस्य गोत्रापत्यं शिवा० अण् । यास्क तदपत्ये पुंस्त्री० निरुक्तकारके मुनिभेदे पु० । बह्वृच अणो लुक् । यस्काः ।

या गतौ अदा० पर० सक० अनिट् । याति अयासीत् ययौ

याग पु०यज–घञ् । अन्तकरणके वह्न्याद्यधिकरणे देवोद्देशेन हविस्त्यागरूपे यज्ञे अमरः । तद्भेदाः कात्यायनादि-श्रौतसूत्रादौ दृश्याः ।

याच याचने भ्वा०उभ०द्विक०सेट् । याचति ते अयाचीत् अयाचिष्ट । उदित् चङि न दुस्तः । द्वित् अथु याचथुः । द्वित् याचित्वम् । गौणेऽस्य कर्मणि लकारादयः ।

याचक त्रि० याच–ण्वुल् । याच्ञाकारके अमरः ।

याचन न० याच–ल्युट् । याच्ञायाम् । युच् । याचना तत्रार्थे स्त्री ।

याचनक त्रि० याच–ल्यु स्वार्थे क । याचके अमरः ।

याचित न० याच–भावे क्त । आचनद्वयो अमरः । २याच्ञायाञ्च । कर्मणि क्त । ३प्रार्थिते त्रि० ।

याचितक न० याचितेनाधिगतम् कन् । याच्ञया धनस्वामिनो गृहीते (चाओया) द्रव्ये अमरः ।

याच्ञा स्त्री याच–नङ् । प्रार्थनायाम् अमरः ।

याजक पु० याजयति यज–णिच्–ण्वुल् । धनादिलाभाय परार्थं यज्ञकर्तरि ऋत्विगादौ ।

याजन न० यज–णिच्–ल्युट् । दक्षिणार्थमन्यस्य यागसम्पादने "यजनं याजनं तथा" मनुः ।

याज्ञवल्क्य पु० १धर्मशास्त्रकर्त्तरि तत्संहिता चाचारव्यवहारप्रायश्चित्तात्मकाध्यायत्रयान्विता ।२शुक्लयजुःप्रवर्त्तके मुनिभेदे तत्कथा भाग० १२ स्क० ।

याज्ञसेनी स्त्री यज्ञसेनस्य द्रुपदराजस्यापत्यं स्त्री अत इञ् ङीप् । द्रौपद्यां पाण्डवभार्य्यायाम् हेमच० ।

याज्ञिक पु० यज्ञाय हितः यज्ञः प्रयोजनमस्य वा ठक् । १दर्भभेदे शब्दर० ।२याजके ऋत्विगादौ ३खदिरे ४पलाशे ५अश्वत्थे राजनि० । ६यजमाने च ।

याज्य न० इज्यतेऽत्र यज–वा ण्यत् । १यागस्थाने २देवप्रतिमायाञ्च "याज्यं क्षेत्रमलङ्कारम्" इति स्मृतिव्याख्यायां दायभागे "याज्यं यागस्थानं देवताप्रतिमा वेत्युक्तम् । ३याजनीये त्रि० । करणे ण्यत् । ४ऋग्विशेषे स्त्री । तदुच्चारणविशेषः आश्व०श्रौ० १।४५ सू० उक्तः ।

यातना स्त्री चु० यत–युच् । तीव्रवेदनायाम् अमरः ।

यातयाम त्रि० यातो गतो याम उचितसमयो यस्य । १जीर्णे २परिभुक्ते च अमरः ।३पर्युषिते "यातयामं गतरसम्" इति गीता । ४उच्छिष्टे मेदि० । ५पुनःपुनःप्रयुज्यमाने च "संवत्सरसाध्ये गवामयने प्रत्यहं द्वादशानां द्वादशानामहां पुनः पुनः प्रयोगात् तस्य तथात्वम् ता० ब्रा० ४।३।१ भाष्ये दृश्यम् । [१अतौ २गन्तव्ये त्रि० ।

यातव्य पु० यायतेऽसौ या–तव्य । अपायाय युद्धार्थमभिगम्ये

यातायात न० यातञ्चायातञ्च या–भावे क्त । आ+या–भावे क्त समाहार द्व० । गमनागमनयोः ।

यातु न० या–तु । १राक्षसे अमरः । २गन्तरि त्रि० उणा० ३काले पु० ४अध्वगे त्रि० सि० कौ० ५वायौ धरणिप्रभा० यत–णिच्–उण् । ६यातयितरि प्रवर्त्तयितरि च "यातुर्यथेति" ताण्ड्य ब्रा० "यातयीतयिता प्रवर्त्तयितेति" भा० । [राजनि० ।

यातुन्न पु० यातं राक्षसं गच्छेन हन्ति हन–टक् । १गुग्गुलौ

यातुधान पुंस्त्री० यातु इति धीयतेऽभिधीयते धा–ल्युट् । राक्षसे अमरः स्त्रियां जातौ ङीष् ।

यातृ स्त्री या-तृच्। १देवरपत्न्याम् (या) अमरः। यातरौ यातरः। तृन्। २गन्तरि त्रि०। यातारौ यातारः।

यात्रा स्त्री या-ष्ट्रन्। १जिगीषया राज्ञां गमने अमरः २गमनमात्रे ३देवोद्देशेनोत्सवभेदे रथयात्रादौ ४यापने च मेदि०। ५उपाये विश्वः यात्रादिनादिकं शु०चि० यात्राप्रकरणे दर्शयिष्यते। [स्थिते नक्षत्रादौ च।

यात्रिक त्रि० यात्रायै हितम्। १उत्सवे २उपाये ३गमन-

याथातथ्य न० तथा तद्भूयौचित्यम् अध्ययी० तस्य भावः ष्यञ्। यद्वस्तु यथा भवितुं युक्तं तस्य तथाभावे।

याथार्थ्य न०यथार्थस्य भावः। सत्यत्वे वास्तविकत्वे। [अमरः

यादःपति पु० यादसां जलजन्तूनां पतिः। १वरुणे २समुद्रे

यादव पु० यदोर्गोत्रापत्यमण्। १यदुवंशे स्त्रियां ङीप्। २तत्प्रधाने श्रीकृष्णे पु० शब्दर०। यदूनामिदमृअण् ३गोमहिष्यादिके धने न०अम०। ४दुर्गायां स्त्री त्रिका०ङीप्

यादस् न० या-असुन् दुक् च। जलजन्तुमात्रे अमरः।

यादसांनाथ पु० ६त० अलुक्समा०। १वरुणे हेमा० २समुद्रे च अमरः। यादसांपत्यादयोऽप्यत्र।

यादृच्(श)(ष्) त्रि० यस्येव दर्शनमस्य यदु+दृश-क्विप् (ट) क्विप् वा। यत्सदृशे यथाविधे। टाल्लुप्तौ स्त्रियां ङीप्।

यादृच्छिक त्रि० यदृच्छया आगतः ठक्। यथेच्छया प्राप्ते।

यान न० या-भावे ल्युट्। १गमने उपचितशक्तेः राज्ञः भूमि-राष्ट्रादिरक्षां कृत्वा रिपोराक्रन्दनाय २गमने च अमरः। करणे ल्युट्। ३गमनसाधने रथादौ अमरः।

यापन न० या-णिच्-ल्युट्। १कालादेः क्षेपणे हेमच०। २निरसने च मेदि०।

याप्य त्रि० या-णिच्-ण्यत्। १निन्द्ये २अधमे अमरः। ३क्षेपणीये मेदि०। निःशेषप्रतिकार्ये उपशमनीये ४रोगभेदे च भावप्र० तत्र तल्लक्षणादिकमुक्तं यथा "यापनीयन्तु तं विद्यात् क्रियां धारयते हि यः। क्रियायान्तु निहन्त्यार्त्तं सद्यो यश्च विनश्यति। प्राप्ता क्रिया धारयति सुखिनं याप्यमातुरम्। अपतिष्ठत्र दिग्गारं लब्धो यत्नेन योजितः। साध्या याप्यत्व-मायान्ति याप्यासाध्यतां तथा। घ्नन्ति प्राणानसा-ध्यास्तु नराणामक्रियावताम्"।

याप्ययान पु० याप्यं क्षेप्यं कृतक्षितं वा यदशून्यत्वात् इतर-वाहत्वाद्वा यानम्। (मड़ियाला) शिविकायाम् अमरः।

याम पु० यम घञ्। १समये मेदि० २प्रहरे च अमरः। "यामो यातस्तथापि नायातः" इति या० द०।

यामघोष पुंस्त्री०यामे घोषोऽस्य। १कुक्कुटे शब्दच० स्त्रियां ङीष्। २घटिकायन्त्रभेदे स्त्री त्रिका०।

यामल न० यमल+स्वार्थेऽण्। १युगले हेमच०। २तन्त्र-शास्त्रभेदे च। "सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्य-प्रदीपनम्। क्रमश्चैव वर्णभेदो जातिभेदस्तथैव च। युगधर्मश्च संख्यातो यामलस्याष्टलक्षणम्"। तच्च षड्विधम् "आदियामलं१ ब्रह्मयामलं२ विष्णुयामलं३ रुद्रयामलं४ गणेशयामलम्५ आदित्ययामलम्६ च इति वाराहीतन्त्रम्। अस्य वर्ण्यादित्वमपि तत्रार्थे।

यामवती स्त्री यामाः प्रहरः नित्यसंख्यायुताः सन्त्यस्यां भूमि मतुप् मस्य वः ङीप्। १रात्रौ राजनि० २हरिद्रायाञ्च

यामात पु०जायां याति तृच् पृषो०। जामातृशब्दार्थे शब्दर०

यामि स्त्री यम-इन्। १कुलस्त्रियां २भगिन्यां अन्तःस्व-यादौ रभसः। "या(जा)सवोयानि गेहानीति" मनुः। ३रात्रौ शब्दर०। ४यमपत्नीभेदे वह्निपु० "अरुन्धती वसु-र्यामिर्लम्बा भानुर्मरुत्वती। सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च नामतः। धर्मपत्न्यो दश त्वेताब्रह्मपत्न्यानि मे शृणु"।

यामित्र न० ज्योतिषोक्ते लग्नराशिभ्यां सप्तमे स्थाने।

यामित्रवेधः पु०यामित्रे सप्तमस्थाने वेधः पापसङ्गमः। विवाहादौ वर्ज्ये "यामात् सप्तमगः शशी" इत्युक्ते योगभेदे उपयमशब्दे १२६७ पृ० दर्शयिष्यते।

यामिनी स्त्री यामाः नित्यसंख्याताः सन्त्यस्य वाहुल्ये इनि। १रात्रौ २हरिद्रायाञ्च अमरः। [रजनीशब्दादयोऽप्यत्र।

यामिनीपति पु० ६त०। १चन्द्रे शब्दर० २कर्पूरे च।

यामी स्त्री यमस्येयम् यमो देवताऽस्या वा तस्येदं वा अण् ङीप् १दक्षिणस्यां दिशि २यमसम्बन्धिन्यां यातनायां ३भ-रणीतारायां च। यामि+वा ङीप्। ४यामिनशब्दार्थे च।

यामुनेष्टक न० यमुनायां भवं यामुनं तदिवेष्टकम्। बीरकै जटा० तस्य लक्षणत्वात् यामुनजलतुल्यत्वात्तथात्वम्।

याम्य पु० यामी दिक् निवासोऽस्य यत्। १अगस्त्ये २चन्द्रम-हृक्षे च मेदि०। यमोदेवताऽस्य तस्येदं वा यत्। २यम-सम्बन्धिनि त्रि० ३भरणीनक्षत्रे च ज्यो० ५दक्षिण-देशस्थे त्रि०।

याम्यायन न० याम्यायां अयनं सूर्य्यस्य गतिः। सूर्य्यस्य दक्षिणायने तदाधारेषु देवेः ऋगसंक्रान्तितः परेषु षट्सु मासेषु च। [राजनि०।

याम्योद्भूत पु० याम्ये दक्षिणदेशे उद्भूतः। श्रीताम्रवृक्षे

यायजूक पु० यज-यङ्-ऊक। पुनःपुनःयागशीले अमरः।

यायावर पु० देशाद्देशान्तरं याति या-यङ्वरच्। १ऋग्मेधोयाश्वे जटा० तस्य नामादेशगमनत्वात्तथात्वम् २जरत्कारुसुनौ च त्रिका०। ३ऊर्ध्वयज्ञगमनशीले त्रि०।

याव पु० यु-अप् स्वार्थे अण्। १अङ्कुरे अमरः स्वार्थे क। यावक तत्र। याव इव कनू (कुलतीकलाई) २क्षुद्रधान्यभेदे अमरः।

यावत् त्रि० यद् परिमाणमस्य मतुप्। १यत्परिमाणे स्त्रियां ङीप्। या-वति। २साकल्ये ३अवधौ ४व्याप्तौ ५माने ६अवधारणे च अव्य०अमरः। एतच्छब्दयोगे द्वितीया।

यावत्तावत् अव्य० यावच्च तावच्च द्व०। बीजगणितप्रसिद्धे अव्यक्तमानानयनाय कल्पिते प्रथमे राशौ।

यावतिथ त्रि० यावतां पूरणः यावत्+डट् इथुक् च। यावत् परिमाणपूरणे।

यावन पु० यु-णिच्-ल्यु। सिन्धुाख्यगन्धद्रव्ये अमरः।

यावनाल पु० यवनाल एव स्वार्थे अण्। धान्यभेदे (जनार) राजनि०।

यावनालशर पु० यवनाल इव शरः। शरभेदे राजनि०।

यावनाली स्त्री यवनालस्य विकारः अण् ङीप्। यवनालभवायां शर्करायाम् राजनि०।

यावशूक पु० यवशूकस्य विकारः अण्। यवक्षारे रत्नमा०।

याष्टीक पु० यष्टिः प्रहरणमस्य ठक्। यष्ट्या योद्धरि अमरः। [भावे यञ्। २प्रयासे।

यास पु० यस-कर्त्तरि संज्ञायां घञ्। १दुराग्रहभायाञ् अमरः

यु मिश्रणे अमिश्रणे च अदा०पर०सक०सेट्। यौति अयावीत्।

यु बन्धे क्रया०उभ०सक०अनिट्। युनाति युनीते अयौषीत् अयविष्ट।

यु ईन्द्धने चु० आत्म० सक० सेट्। यावयते अयीयवत्।

युक्त त्रि० युज-क्त। १मिलिते भेदि०। २अभ्यासवशाद् सदा सर्वविषयकज्ञानयुते योगिनि पु० भाग०। ३उचिते ४न्यायागतद्रव्यादौ च न० अमरः ५(एलाची) वृक्षभेदे स्त्री रत्नमा०। [स्त्री) अमरः।

युक्तरसा स्त्री युक्तो रसो यस्याः। राज्ञायां (काटा आम)

युक्ति स्त्री युज-क्तिन्। १न्याये भेदि०। २व्यवहारे ३अनुमाने ४तत्साधकविचक्षणज्ञानादौ स्वपक्षसाधकविपक्षबाधकप्रमाणतर्कन्याये तर्कौ० व्यवहारे कानि चित् वैद्यशास्त्रिकुलानि वारदेनोक्तानि यथा "उलूकाक्षस्तोऽग्निदो सेवः शस्त्रपाणिश्च घातकः। केशतोयिष्टहीतश्च युग्मपत् धारदारिकः। कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः। तथा कुठारहस्तश्च वनच्छेत्ता प्रकीर्त्तितः। प्रलम्बचिह्नैर्विज्ञेयो दण्डपाशधनुर्धरः। अस्वाभिप्रत्ययाक्षेते पाक्ष्ये तु परीक्षणम्"। "युक्तिरर्थावधारणम्" सा०द० उक्ते ६नाटकाङ्गविशेषे च। तत्र न्याये "श्रुत्योर्विरोधे न्यायस्तु बलवानर्थनिर्णये। युक्तिहीनविचारे तु धर्महानिः प्रजायते" मीमांसकाः।

युग वर्जने भ्वा०पर०सक०सेट् इदित्। युग्वति अयुगीत्।

युग न० युजि-घञ् पृषो० नलोपः। १युग्मे द्वित्वसंख्यान्विते सत्त्वेनाद्यापरकलिरूपे २कालविशेषे ३तन्नामौषधे ४हस्तचतुष्कपरिमाणे ५रथहलादेरङ्गभेदे पु० (जोयाल) मेदि०। [काष्ठमयङ्गभेदे अमरः।

युगकीलक पु० ष० त०। रथाद्यङ्गयुगधारणार्थं कीलकाकारे

युगन्धर पु० युगं रथस्य युगकाष्ठं धरति धृ-अच्। रथस्य युगकाष्ठसङ्गने कुवराख्ये १काष्ठभेदे अमरः। २पर्वतभेदे च मेदिनी०। [अमरः।

युगपद् अव्य० युगमिव पद्यते पद-क्विप्। एककाले इत्यर्थे

युगपत्र पु०युगमिव संहतं पत्रमस्य। कोविदारवृक्षे हेमच० वा कप्। तत्रैव। शिंशपावृक्षे स्त्री त्रिका० टाप् अत इत्वम्।

युगपार्श्वग पु० युगपार्श्वं गच्छति गम-ड। अश्व सार्थे ना-कुलपार्श्वं वहे वृषे अमरः। [स्थिते अमरः।

युगल न० युगं द्वित्वं लाति ला-क। युग्मे द्वित्वसंख्या-

युगलाख्य पु० युगलेन वराटकेन व्यञ्जनवर्णद्वयेनाख्यायते आ+ख्या-क। १वर्वरवृक्षे राजनि०। २युग्मनामके त्रि०।

युगान्त पु० युगानां सत्यादीनामन्तस्तदुपलक्षितो वा कालः। १प्रलये २तत्कालेच वृद्धा०।

युग्म न० युज-मक् पृषो० नस्य गः। १द्वित्वसंख्यान्विते (जोड़ा) युगले। "युग्माग्निकृतभूतानि षण्मुन्योर्वसुरन्ध्रयोः। रुद्रेण द्वादशी युक्ता चतुर्दश्याश्च पूर्णिमा। प्रतिपदाद्यमावस्या तिथ्योर्युग्मं महाफलम्" इत्युक्ते २तिथिविशेषयोगे ३समरराशिषु च ४मिथुनराशौ च उज्जो०

युग्मपत्र पु० युग्मानि पत्राण्यस्य। १रक्तकाञ्चनवृक्षे रत्नमा० युग्मपर्णादयोऽप्यत्र। संज्ञायां कन्। २शिंशपावृक्षे स्त्री मल्लर०टाप् अत इत्वम्। [२वल्लिकालौ च राजनि०।

युग्मफला स्त्री युग्मानि फलानि यस्याः। १इन्द्रवारुणवृक्षे

युग्य न० युगमर्हति युग+यत्। १वाहने याने। युगं वहति यत्। २युगवाहकेऽश्वादौ त्रि० अमरः।

युच्छ् प्रमादे भ्वा० पर० सक० सेट् । युच्छति अयुच्छीत् ।

युज् युतौ रु० उ० सक० अनिट् । युनक्ति युङ्क्ते इरित् अयुजत् अयौक्षीत् अयुक्त युयोज युयुजे । अजन्तोपसर्गात् उदश्च परस्मात् आत्म० ।

अनु+प्रश्ने सक० आ० । अनुयुङ्क्ते अनुयोगः ।

अभि+व्यवहारेणाक्रन्दने (नालिशकरा) सक० आत्म० अभियुङ्क्ते अभियोगः ।

उद्+आयोजने सक० उद्यमे अक० उद्युङ्क्ते उद्योगः ।

उप+भोजने सक० सम्बन्धभेदे अक० आत्म० उपयुङ्क्ते उपयोगः ।

नि+प्रेरणे सक०आत्म०नियुङ्क्ते । नियोगः । [पर्य्यनुयोगः ।

परि+अनु+दूषणाय प्रश्ने आत्म० सक० । पर्य्यनुयुङ्क्ते

प्र+उच्चारणे व्यवहारभेदे च सक० आत्म० प्रयुङ्क्ते प्रयोगः

प्रति+प्रतिरूपे योगे सक० आ० प्रतियुङ्क्ते प्रतियोगः ।

सम्+संयोगे सक० प० संयुनक्ति संयोगः ।

युज निन्दायां चु० आ० सक० सेट् । योजयते अयूयुजत ।

युज समाधौ दि० आत्म० अनिट् । युज्यते । युयुजे ।

सुज बन्धने युतौ च वा चु० उभ० पक्षे भ्वा० पर०सक०सेट् । योजयति ते योजति । अयूयुजत् त । अयोजीत् ।

युज् त्रि० दि०युज क्विप् । १समाधिमति । युक् युजौ । रु० युज क्विप् । २संयोगवति त्रि०युङ् युञ्जौ युञ्जः इति भेदः चु० युज-निन्दे भावे क्विप् । ३निन्दायाम् अव्य० ।

युज्ञान पु० युज–ज्ञानच् । १योगविशेषवति भावनासहकारेण सर्वपदार्थज्ञातरि भाषा० । २रथसारथौ ३विप्रे च मेदि० ।

युत दीप्तौ भ्वा०आ०अक०सेट् । योतते । अयोतिष्ट । क्वादित् चङि न ह्रस्वः । [४हस्तचतुष्टयमाने न०मेदि० ।

युत त्रि० यु–क्त । १संयुक्ते २मिलिते ३अमिलिते च ।

युतक न० यु–क्त युत-क वा ततः स्वार्थे क । १संशये २युगे ३स्त्रीवसनाञ्चले ४चरणाग्रे ५यौतुके धने मेदि० । ६मैत्रीकरणे शब्दर० । ७संश्रवे ८म्लेच्छभाषायां च नानार्थमा० । ९स्त्रीवस्त्रभेदे हेम० । १०संयुक्ते त्रि० ।

युतवेध पु० विवाहादौ वर्ज्ये चन्द्रेण सह पापग्रहयोगे उपयमशब्दे १२६७पृ० लग्नवाक्ये दृश्यम् ।

युद्ध न० युध–भावादौ क्त । १परस्पराभिघातार्थं शस्त्रादिक्षेपणव्यापारे योधने २तदाधारे संग्रामे अमरः । ज्योतिषोक्ते अङ्गानां मतिभेदकृते योधनरूपे १परस्परमिलनविशेषे च । अहयुद्धशब्दे २७६६ पृ० दृश्यम् ।

युध युद्धे दिवा० आ० सक० अनिट् । युध्यते अयुद्ध युयुधे ।

युध्(धा) स्त्री युध–सम्प० क्विप् वा टाप् । १युद्धे योधने २संग्रामे च अमरः । [३५अ० ।

युधाजित् पु० क्रोष्टुनृपपुत्रे माद्रीगर्भजाते नृपभेदे हरिवं०

युधान पु० युध–उणा०कान । १क्षत्रिये उणादिको० ।

युधिष्ठिर पु० युधि युद्धे स्थिरः "गविषुधिभ्यां स्थिरः" पा० षत्वम् । पाण्डवज्येष्ठे । [अयोधीत् ।

युप विमोहे दिवा०पर०अक० सेट् । युप्यति इरित् अयुपत्

युयुधान पु० युध–कानच् हित्वम् । १इन्द्रे सात्यकिनामनि यादवे क्षत्रियभेदे त्रिका० । २क्षत्रियमात्रे च संक्षिप्तसा० ।

युवखलति स्त्री युवतिरेव खलतिः पुंवत् । (टाक्) रोगवत्याम् युवत्याम् । [शब्दर० ।

युवगण्ड पु० ह्रस्व० । यूनो गण्डस्थव्रणभेदे । (वयस्फोड़ा)

युव(ति)ती स्त्री युवन्+ति ङीप् वा । १यौवनवत्यां स्त्रियाम् शब्दर० । युवन्–ङीप् । यूनीत्यपत्ये । २स्त्रीमात्रे भागुरिः ३हरिद्रायां शब्दच० ।

युवतीष्टा स्त्री युवतीनामिष्टा । स्वर्णयूथिकायाम् राजनि० ।

युवन् त्रि० यु–कनिन् । १श्रेष्ठे २निसर्गबलवति मेदि० । "आशोऽशाङ्कवेट् बालस्तरुणस्तत उच्यते" इत्युक्तवयस्के ३तरुणे च । "जीवति तु वंश्ये युवा" पा० खतैरुक्तौ पौत्रादेरपत्ये ४चतुर्थादौ बालादिस्वरेषु ५स्वरभेदे ।

युवनाश्व पु० सूर्य्यवंश्ये मान्धातृपितरि नृपभेदे ।

युवराज पु० युवैव राजा टच्समा० । राजयोग्यक्रियत्कार्य्यकरे १राजपुत्रे अमरः । २वृद्धभेदे त्रिका० । [युष्मट्

युष भजने सौ०पर०सक०सेट् । योषयति अयोषीत् । योषा

युष्मद् त्रि० सौ० युष-मदिक् । संबोध्यचेतने भवच्छब्दार्थे । उक्तार्थेऽस्य सर्वनामता त्रिषु लिङ्गेषु समरूपता च ।

यूक पुंस्त्री० यू–किप् क । मत्कुणे (उकुण) स्त्रीत्वे टाप् ।

यूति स्त्री यु-क्तिन् नि० दीर्घः । मिश्रीकरणे ।

यूथ न० यु–थक् पृषो० दीर्घः । सजातीयसमुदाये अमरः ।

यूथनाथ पु० ह्रस्व० । वन्यगजादीनां प्रधाने अमरः । यूथपादयोऽप्यत्र ।

यूथिका स्त्री यु–थक् पृषो० दीर्घः स्वार्थे क अत इत्त्वम् टाप् । १अम्लानके मेदि० २पाठायां राजनि० । ३यूथ्याञ्च (युद्) अमरः । [अमरः ।

यूथी स्त्री यु-थक् पृषो० दीर्घः ङीप् । (युद्) पुष्पप्रधाने वृक्षे

यूप पुंन० यु-पक् पृषो० दीर्घः । १यज्ञीयपशुबन्धनकाष्ठभेदे तल्लक्षणं यज्ञपार्श्वे दृश्यम् । यागसमाप्तिचिह्नार्थे २स्तम्भे च अमरः ३जवसम्भे पु० उणादिको० ।

यूपकटक पु० ६त०। यज्ञसमाप्तिसूचककाष्ठस्य शिरःस्थे वलयाकारे काष्ठमये पदार्थे चषाले अमरः।

यूपद्रु पु० यूपाय द्रुः प्रकृतिविकृतिभावात् ४त०। खदिरवृक्षे यूपद्रुसादयोऽप्यत्र त्रिका०।

यूष वधे भ्वा० पर० सक० सेट्। यूषति अयूषीत् युयूष।

यूष पुं न० यूष-क। १मुद्गादिक्वाथे अमरः।

"अष्टादशगुणे नीरे भ्रमीघान्यशृतोरसः। विरलार्द्रे भवेत् किञ्चित् पेयातो यूष उच्यते। उक्ताः स एव निर्यूहो रुचिकृच्च विशेषतः"। यूषस्य प्रकारान्तरमाह कल्पकद्रव्यपलं गुरुटीं पिप्पलीश्चार्द्धकार्षिकीं। वारिप्रस्थेन विपचेत्तद्भवो यूष उच्यते"।

"यूषो वल्यो लघुः पाके रुच्यः कण्ठ्यः कफापहः"। अथ मुद्गयूषविधिः "मुद्गानां द्विपलं तोये शृतमर्द्धावशेषितं। पादस्थं मर्दितं पूतं दाडिमस्य पलेन तत्। युक्तं सैन्धवविश्वाभ्यां धान्यकैः पादकांशिकैः। कणाजीरकयोश्चूर्णांच्छाणैकेनावचूर्णितम्। संस्कृतो मुद्गयूषोऽयं पित्तश्लेष्महरो मतः"। अथ तस्य गुणाः "मुद्गानामुत्तमो यूषो दीपनः शीतलो लघुः। व्रणोर्ध्वजत्रुरुग्दाहकफपित्तज्वरास्रहृत्"। अथ मुद्गामलकयूषगुणाः "मुद्गामलकयूषस्तु भेदी पित्तानिलापहः। तद्दाहशमनः शीतो मूर्च्छाश्रमभयापहः" भावप्र०। २ब्रह्मदारुवृक्षे पु० शब्दर०। [चण्डि न ह्रस्वः।

येष यत्ने भ्वा० आ० अक० सेट्। येषते अयेषिष्ट। कदित्।

योक्त्र न० युज्यतेऽनेन यज-ष्ट्रन्। देशादण्डादौ युगबन्धनार्थे दामनि (योत) अमरः।

योग पु० युज-भावादौ घञ्। संयोगे १मेलने २उपाये ३धर्मादिधारणे ४ध्याने ५युक्तौ च अमरः। "योगश्चित्तवृत्तिनिरोधः" इति पातञ्जलोक्ते ६सर्वविषयेभ्योऽन्तःकरणवृत्तेर्निरोधे "संयोगं योगमित्याहुर्जीवात्मपरमात्मनोः" इत्युक्ते ७जीवात्मपरमात्मनोरैक्ये। दत्रलभ्यार्थलाभचिन्तायाम् ९देहस्थैर्ये १०शब्दादीनां प्रयोगे ११भेषजे १२विश्वासघातके १३द्रव्ये कार्मणे च मेदि०। १४समुदायशब्दस्यावयवार्थसम्बन्धे "योगबलं समाख्या" इति मीमांसकाः। "योगः कर्मसु कौशलम्" इत्युक्ते १५यथास्थितवस्तुनोऽन्यथाकरणप्रतिपादने यथा संसारबन्धहेतोरपि कर्मणोऽबन्धमोचहेतुत्वम्। १६ज्योतिषोक्तेषु रविचन्द्रयोगाधीनेषु विष्कुम्भादिषु सप्तविंशतौ पदार्थेषु। तिथिवारनक्षत्राणाम् अन्यतरान्यतमानां १७सम्बन्धविशेषेषु सिद्धियोगः अमृतयोगः अर्द्धोदययोग इत्यादि। १८छन्दसि च "योगाधमनविक्रीतमिति" स्मृतिः। १९नैयायिके २०धने हेमच० २१चारे २४सूत्रे त्रिका०। चित्तवृत्तिनिरोधरूपयोगस्य द्विविधः। राजयोगो लयोगश्च। तत्र राजयोगः पतञ्जलिनोक्तः। लयोगस्तु तन्त्रशास्त्रोक्तः। तस्य प्रकारान्तरेण वैविध्यम् भाग० ११।२० अ० उक्तं यथा "श्रीभगवानुवाच "योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया। ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्। निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु। तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम्। यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्। न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः। तावत् कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते। स्वधर्मस्थो यजन् यज्ञैरनाशीःकाम उद्धव!। न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत्। अस्मिल्लोके वर्त्तमानः स्वधर्मस्थोऽनघः शुचिः। ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया"। २३ज्योतिषोक्ते लग्नाद्दिग्दृष्टविशेषे अरिष्टभेदयोगे यथा राजयोगः नाभसयोग इत्यादि। यात्रायां यात्रालग्नात् केन्द्रत्रिकोणस्थिते बुधजीवशुक्राणामेकस्मिन् यथोक्तं ह० चि० "एकोऽपि ज्यसितेषु पञ्चसु तपःकेन्द्रेषु योगस्तथा द्वौ चेत्तेष्वधियोग एव सकलां योगाधियोगः स्मृतः"। योगे क्षेममथाधियोगगमने "क्षेमं रिपूणां वधः"

योगक्षेम न० योगश्च क्षेमश्च समाहारः द्व०। अलब्धलाभचिन्तायां रक्षिते लब्धपरिरक्षणे "योगक्षेमं वहाम्यहम्"

योगज न० योगात् जायते जन-ड। १अणुरत्वचन्दने भावप्र०। २योगजातमात्रे त्रि०। ३न्यायोक्ते प्रत्यक्षसाधने अलौकिकसन्निकर्षभेदे पु०।

योगदान न० योगेन क्लेन उपधिना वा दानम्। "योगदानप्रतिग्रहम्" इति स्मृत्युक्ते सोपधिके दाने।

योगनिद्रा स्त्री योगरूपा निद्रा। प्रलये परमेश्वरस्य सर्वजीवसंहारेच्छया योगरूपे व्यापारे "योगनिद्रासमेयुषः" देवीमा० २तदधिष्ठात्र्यां दुर्गायाञ्च।

योगपट्ट न० योगाभ्यासार्थं पट्टम्। योगिधार्य्ये पट्टखण्डभेदे योगपट्टकमप्यत्र। "त्रिविधं योगपट्टकमाहुर्व्याघ्राजिनोद्भवम्। द्वितीयं नगचर्माढ्यं तृतीयं तन्तुनिर्मितम्। चतुर्मात्रविस्तारं दैर्घ्येण यत्तदुच्यते" सिद्धान्तशेखरः। चतुर्मात्रं चतुरङ्गुलमात्रम् वीरमि०।

योगपीठ पुं न० योगयोग्यं पीठमासनम्। देवादीमासनभेदे

योगमाया स्त्री योग एव माया। भगवतो जगत्सर्जनार्थायां शक्तौ "योगमायामुपाश्रितः" इति भाग० १० स्क० रासारम्भे तदधिष्ठात्र्यां २दुर्गायाञ्च।

योगरङ्ग पु० योगेन रङ्गोऽत्र। (नारङ्ग) जम्बीरभेदे राजनि०

योगरूढ़ पु० योगोऽवयवशक्तिः रूढ़िः समुदायशक्तिः एते स्तोऽस्य अच्। अवयवशक्त्या समुदायशक्त्या च अर्थबोधके पङ्कजशब्दादौ। तत्र हि उभयशक्त्या पङ्कजन्मकर्तृत्वरूपावयवार्थविशिष्टपद्मत्वविशिष्टस्य बोधः। उभयार्थबोधनाच्च पङ्कजाते कुमुदादौ स्थलजाते पद्मे च न तत्पदप्रयोगप्रसङ्गः।

योगरूढ़ि स्त्री योगेन सहिता रूढ़िः। शब्दस्य वृत्तिभेदे यया पङ्कजनिकर्तृत्वविशिष्टपद्मस्य बोधः। [च हेमच०।

योगवाहिन् पु० योगेन वहति वह-णिनि। १पारदे २क्षारभेदे

योगाचार पु० बौद्धभेदे तन्मतञ्च बुद्धशब्दे ४५८१ पृ० दृश्यम्

योगाधमन न० योगेन छलेनोपधिना धाऽऽधमनम्। सोपधिके छलहेतुके च बन्धकदाने। "योगाधमनविक्रीतम्" इति स्मृतिः।

योगारूढ़ पु० योगमारूढ़ः आ+रुह-क्त। "यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते। सर्वसंकल्पसन्न्यासी योगारूढ़स्तदोच्यते" इत्युक्ते योगिभेदे "योगारूढ़स्य तस्यैव शमः कारणमुच्यते" इति गीता।

योगासन न० योगार्थमासनम्। १योगशास्त्रोक्ते स्वस्तिकादौ आसनभेदे हेमच०। "अथ योगासनं वक्ष्ये यत् कृत्वा योगिवल्लभेत्। जानोः पादतलद्वन्द्वं स्काङ्के बद्ध्वा करद्वयम्" इति रुद्रजा० उक्ते २आसनभेदे च।

योगिन् त्रि० युज-घिनुण्। "आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुनः। सुखं वा यदि वा दुःखं स योगी परमो मतः" गीतादुक्तयोगयुक्ते २संयोगवति च त्रि० स्त्रियां ङीप्। सा च तत्र १दुर्गायां ४तच्चशक्तिभेदेषु अच्योभ्यादिषु चतुःषष्टिप्रकारेषु देवताप्रतिमाशब्दे १६६५ पृ० दृश्यम्। "प्रतिपच्चषमी पूर्वे रामरुद्रौ च पावके। शरस्त्रयोदशी वास्ये वेदमासौ च नैर्ऋते। अष्टौ चतुर्दशी पश्चात् वायव्यां मुनिपूर्णिमे। द्वितीया दशमी यत्ने ऐशान्यां चाष्टमी कुहूः" इत्युक्तेषु पूर्वादिदिग्भेदाद् ५तिथिभेदेषु तत्फलं वामे शुभकरी प्रोक्ता पृष्ठे सर्वार्थसाधिनी" ज्यो० त०। आवश्यकत्वे यामार्द्धभेदे तस्याः शुभत्वं समयामृते उक्तं यथा "यस्यां दिग्यामुदयं याति ततो यामार्द्धभुक्तिका। अमली तेन मार्गेण भवेत्तत्कालयोगिनी। तेन "प्राचीधनेश्वरस्तासनकौणपेयवायव्यवारुणयमाधिपशङ्करेषु। एषु क्रमाच्चिवसति प्रतिपच्चषष्ठ्योः पृष्ठे स्थिता शुभकरी गिरिराजपुत्री"। ६मङ्गलाधिष्ठितादिदशाभेदे च दशाशब्दे १४८४ पृ० दृश्यम्। [२दुर्गायां स्त्री ङीप्।

योगीश्वर पु० ६त०। १याज्ञवल्क्यमुनौ २योगिनां श्रेष्ठे च।

योगेश्वर पु० ६त०। १श्रीकृष्णे "योगेश्वर! ततो मे त्वं दर्शयात्मानमव्ययम्" गीता। २दुर्गायां च २वन्ध्याकर्कोट्यां स्त्री भाषाप्र० ङीप्।

योगेष्ट न० योगाय योजनार्थमिष्टम्। सीसके अमरः।

योग्य त्रि० योगमर्हति यत् युज-ण्यत् वा। १योगार्हे २उचिते ३निपुणे ४शक्ते च। ५पुष्यनक्षत्रे पु० मेदि०। ६वह्निनामौषधे न० अमरः।

योग्यता स्त्री योग्यस्य भावः तल्। १सामर्थ्ये २शाब्दबोधसाधने "पदार्थे तत्र तद्वता योग्यता परिकीर्त्तिता" भाषा० उक्ते ३ततपदार्थे तत्पदार्थवत्तारूपे ४परस्परान्वये बाधाभावरूपे वार्थे च।

योग्या स्त्री योगमर्हति यत् युज-ण्यत् वा कुत्वम्। १अभ्यासे स्वर्थस्त्रियाञ्च मेदि० २शास्त्राभ्यासे हेमच०।

योग्यानुपलब्धि स्त्री योग्यस्य प्रत्यक्षादिना उपलब्धुमर्हस्यानुपलब्धिरज्ञानम्। न्यायादुक्ते अभावप्रमाणके साधनभेदे। तथाहि घटादिसत्त्वे तत्र घटाभावो नानुपलभ्यते तस्य प्रतियोगिनो घटादेः सत्त्वेन तत्प्रत्यक्षकारणसामग्र्यसत्त्वेन तत्प्रत्यक्षाभावात् किन्तु घटाद्याभावो गृह्यते पिशाचाद्यभावस्य तु न प्रत्यक्षता तत्प्रतियोगिपिशाचादेर्दर्शनायोग्यत्वात्। वेदान्तिमते इयं प्रमाणान्तरम् वेदान्तप० ६प०।

योजन न० युज-भावादौ ल्युट्। १संयोगे णिच-ल्युट्। २संयोगकरणे। ३चतुर्षु क्रोशेषु। "स्याद् योजनं क्रोशचतुष्टयेन" "प्रथमसगमदङ्गा योजने योजनेशः" इति च लीला०। ४परमात्मनि च मेदि०। ५अङ्गुलौ निघ०। युज-णिच-युच्। यस्यार्थस्य यत्रान्वयः तद्वाचकशब्दस्य तद्वाचकशब्देन ६आसक्तिसम्पादने स्त्री।

योजनगन्धा स्त्री योजनं व्याप्य गन्धो यस्याः। १कस्तूर्याम् २सीतायां ३व्यासमातरि सत्यवत्याञ्च मेदि०। स्वार्थे कप् अत इत्त्वम् तत्रैवार्थे। [त्वात्। अङ्गिष्ठायाम् रत्नमा०।

योजनपर्णी स्त्री योजनं व्याप्य पर्णान्यस्याः विस्तीर्णपर्ण-

योजनवल्ली स्त्री योजनं व्याप्य वल्लीव । अञ्जिछायाम् अमरः स्वार्थे क ह्रस्वः टाप् । तत्रैव राजनि० ।

योटक त्रि० युट-ण्वुल् । १मेलके विवाहमेलकञ्च उपयमशब्दे १२४८ पृ० दृश्यः ।

योत्र न० यु-ष्ट्रन् । योक्त्रे (योत) अमरः ।

योद्धृ पु० युध-तृच् । युद्धकर्त्तरि अमरः । [२युद्धे ।

योध पु० युध-अच् । १युद्धकारके अमरः । भावे घञ् ।

योधन न० युध-भावे ल्युट् । १युद्धे । करणे ल्युट् । २अस्त्राद्यायुधे । कर्त्तरि ल्यु । ३युद्धकर्त्तरि पु० ।

योधनसंराव पु० योधनस्य युद्धाय संरावः आह्वानम् ६तत्० । योधानां युद्धार्थं परस्पराह्वाने अमरः ।

योनल पु० यवस्य नल इव काण्डोऽस्य पृषो० षत्वम् । (देधान) शस्यभेदे हेमच० ।

योनि पुंस्त्री० यु-नि । १सगयादीनामुत्पत्तिस्थाने आकरे मेदि० । २कारणे ३जले हेम० । ४स्त्रीणामसाधारणचिह्ने अमरः । ५तद्देवताके पूर्वफल्गुनीनक्षत्रे ज्यो० । स्त्रीत्वे वा ङीप् । ६उत्पत्तिस्थानमात्रे त्रिका० ।

योनिज न० योनिस्थानात् जायते जन-ड । देहभेदे १जरायुजे २अण्डजे च देहे ।

योनिमुद्रा स्त्री योन्याकारा मुद्रा । तन्त्रोक्ते देवताविशेषपूजाङ्गे प्रदर्शनीये अङ्गुलीसन्निवेशविशेषे तल्लक्षणन्तु "मिथः कनिष्ठिके बद्ध्वा तर्जनीभ्यामनामिके । अनामिकोर्ध्वसंश्लिष्टे दीर्घमध्यमयोरधः । अङ्गुष्ठाग्रद्वयं न्यस्य योनिमुद्रेयमीरिता" तन्त्रसा० । २मूलबन्धरूपे योनेर्बन्धभेदे तल्लक्षणञ्च पदार्थादर्शे "पार्ष्णिभागेन सुसंपीड्य योनिमार्गं तथा गुदम् । अपानमूर्ध्वमाकृष्य मूलबन्धो निगद्यते । गुदमेढ्रान्तरं योनिस्तामाकुञ्च्य प्रबन्धयेत् । युवा भवति वृद्धोऽपि सततं मूलबन्धनात्" । (योनिस्थानमुद्रणात् योनिमुद्रात्वमस्याः) "सेयं मयोक्ता खलु योनिमुद्रा बन्धस्य देवैरपि दुर्लभोऽस्य । अनेन बन्धेन न बाध्यते यत्तस्यैव तत्साधकपुङ्गवस्य" ।

योनिरोग पु० ६त० । षोडशविधे भगरोगभेदे

"उदावर्त्ता तथा वन्ध्या२विप्लुता३च परिप्लुता४ । वातला५ योनिजो रोगो वातदोषेण पञ्चधा । पञ्चधा पित्तदोषेण तत्रादौ लोहितार्त्तरा१ । प्रस्रंसिनी२ वामनी३च सुतन्त्री४ पित्तला५ तथा । चत्वारन्ता१ कर्णिनी२ च चरणा३नन्दपूर्विका४ । अतिपूर्वाप्यसृक्ष्या श्लेष्मला५ च कफादिमाः । षण्ढी१ शण्ढी२ च विज्ञेया३ सूचीवक्त्रा४ तिदोषिणी५ । पञ्चैता योनयः प्रोक्ताः सर्वदोषप्रकोपतः" । अथ तासां लक्षणान्याह "सक्तेनिलसुदावर्त्ता रजः कृच्छ्रेण मुञ्चति । वन्ध्या२ निरार्त्तवा श्लेया विप्लुता३ नित्यवेदना । परिप्लुतायां४ भवति व्याध्यधर्मे त्वरा भृशम् । वातला५ कर्कशाक्ष्याभूलनिस्तोदपीड़िता । चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः" । अनिलवेदनास्तोदादयः वातलायां त्वति वातवेदना बोद्धव्या वातलेत्यन्वयात् । "सदाहं क्षरते रक्तं यस्याः सा लोहितार्त्तरा१ । प्रस्रंसिनी२ संक्षते च क्षोभिता दुष्प्रजायिनी" । "क्षोभिता विमर्दिता क्षंसते स्खलनाच्च्यवते दुष्प्रजायिनी दुष्प्रजननशीला । सतत सन्निरोद्धव्यं वामनी३ रजसा युतम् । स्थितं हि पातयेद्गर्भं पुत्रघ्नी४ रक्तसंस्रवात्" । पुत्रशब्दोऽत्रापत्योपलक्षकः । "अत्यर्थं पित्तला५ योनिर्दाहपाकज्वरान्विता । चतसृष्वपि चाद्यासु पित्तलिङ्गोक्तयो भवेत्" । अत्यानन्द्या१ न सन्तोषं व्याध्यधर्मेण विन्दति । कर्णिन्यां२ कर्णिका योनौ श्लेष्मासृग्भ्यां प्रजायते" । कर्णिका मांसस्य कर्णिकाकारोत्पन्निः । "मैथुने चरणा३ पूर्वं पुरुषादतिरिच्यते । अतिरिच्यते रजोमुक्तौत्यर्थः । बड्डशश्चातिचरणा४ तयोर्वीर्यं न तिष्ठति" । बड्डशः वारंवारमतिरिच्यते तयोः चरणातिचरणयोः । "श्लेष्मला५ पिच्छला योनिः कण्डूयुक्तातिशीतला । चतसृष्वपि चाद्यासु श्लेष्मलिङ्गोक्तयो भवेत् । अनार्त्तवाऽल्पनी षण्ढी१ खरस्पर्शा च मैथुने" । अल्पनी ईषत्पत्नी यस्याः सा अल्प शब्दा षण्ढी । महामेढ्रगृहीताया बालाया अखिन्नी२ भवेत् । महामेढ्रः पुरुषस्तेन गृहीतायाः बालायाः मूच्छ्यायोनिश्छिद्रायाः । अखिन्नी२ अखण्डवल्लम्बमाना योनिर्भवति" । विदृतां सूचीवक्त्राह्याह "विदृता३ च महायोनिः सूचीवक्त्रेति४ संज्ञिता । त्रिदोषजामाह सर्वलिङ्गसमुत्थान सर्वदोषप्रकोपजम् । चतसृष्वपि चाद्यासु सर्वलिङ्गनिदर्शनम्" । अथासाध्यां योनिमाह । "पञ्चासाध्या भवन्त्येह योनयः सर्वदोषजाः । पञ्च षण्ढीप्रभृतयः' अथ योनिकन्दस्य निदानमाह । "दिवास्वप्नादतिक्रोधात् व्यायामादतिमैथुनात् । नखदन्ताद्यैर्घाताद्याः कुपिता यत्र" । यत्रास्वनिदानकुपिता घातादयः । रूपमाह "पूयशोणितसङ्काशं क्लेदबहुलमतिसञ्चिभम् । लम्बयन्ति यदा योनौ नाम्ना कन्दः स योनिजः" । सकुचाकृतिसन्निभं सकुचफलाकारं गुप्तकमत्र विशेषं बोध्यम्" । वातजादिभेदेन रूपमाह । "कृष्णं विवर्णं स्फुटितं कार्त्तिकं तं विनिर्दिशेत् । दाहरागरुजा-

ज्वरयुतं विद्यात्पित्तात्मकं तु तत्। तिलपुष्पप्रतीकाश करङ्गसन्तं कफात्मकम्। सर्वलिङ्गसमायुक्तं सन्निपातात्मकं वदेत्"।

योषा स्त्री युष-अच् टाप्। स्त्रियाम् नार्य्याम् अमरः।

योषित् स्त्री युष-इति। नार्य्याम् अमरः। फलत्वाद्वा टाप्।

योषितापत्य शब्दर०। [प्रियमात्रे त्रि०।

योषित्प्रिया स्त्री ६त०। १हरिद्रायां भावप्र०। २नारी-

यौक्तिक त्रि० युक्तित आगतः ठक्। १युक्तिसिद्धे २योग्ये च। युक्तौ अधिकृतः ठक्। ३नर्मसचिवे पु० शब्दर०।

यौगिक त्रि० योगात् प्रकृतिप्रत्ययार्थसम्बन्धात् आगतः ठक्। प्रकृतिप्रत्ययलभ्यार्थवाचके शब्दे यथा पाचकादिशब्दः पाककर्त्रर्थवाचकः। योगाय प्रभवति ठक्। २योगसाध्ये

यौट संवन्धे भ्वा० पर० सक० सेट्। यौट्टति अयौटीत्। छदित् चडि न छुस्वः।

यौड़ यौटवत् सर्वम्। यौड़ति अयौड़ीत् छदित्।

यौतक न० युते विवाहकालेऽधिगतम् वुण्। विवाहकाले लब्धे धने हला०। इति दायभागानुसारिणः। वीरमि० तु "यु मिश्रणे इति धात्वनुसारात् विवाहकाले एकासनोपविष्टयोर्वधूवरयोर्यद् वस्त्वलिदीयते तत्युतयोरिदं यौतकमिति व्युत्पत्त्या यौतकमित्युच्यते" इत्युक्तम् अत एव निबन्धनो युतयोर्यौतकमित्युक्तम्। अन्ये तु विवाहे स्त्रीपुंसावेकशरीरतया मिश्रितौ भवत इति "अस्थिभिरस्थीनि मांसैर्मांसानि" इत्यादिन्यया तयोक्तेः विवाहेन युतयोरिदम्" इत्याहुः। वस्तुतः विवाहकालोत्तरमेकासनोपविष्टयोरेव दत्तं धनं यौतकं लोकप्रसिद्धं वीरमि० उक्तं साधीयः। "मातुश्च यौतकं यत् स्यात् कुमारी भाग एव सः" मनुः।

यौतव न० युवन्-त्व योतुः तस्य भावः अण्। १परिमाणे अमरः।

यौतुक न० योतुर्योगकालस्तत्र लब्धं कण्। विवाहकाले लब्धे धने यौतकशब्दे दृश्यम्।

यौधाजय न० अर्हणाने १प० दर्शिते सामभेदे "रौरवयौधाजये वार्हते भवतः" श्रुतिः।

यौधेय पु० योध एव स्वार्थे ढक्। १योद्धरि। २उत्तरस्थदेशभेदे पु० ह० स० १४ अ०। युधायाः अपत्यम् "इञ्चः" पा० ढक्। २युधाया अपत्ये। ततःस्वार्थे अञ् शार्ङ्गर० स्त्रियां ङीन्। यौधेयी।

यौन त्रि० योनितः योनिसम्बन्धात् आगतम् अण्। १योनितः प्राप्ते। योनेरयमण्। २वैवाहिकसम्बन्धे पु०। प्रा० वि० बौधायनः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनात् सद्यो हि मयनाशनात्"। शुमन्तुः "यस्यैतैर्यौनसौख्यसौवाटीनां सम्बन्धानामन्यतमेन सह सम्बन्धक्रियात् तस्यायमेतदेव प्रायश्चित्तं विदध्यादिति"।

यौवत न० युवतीनां समूहः अण्। युवतिसमुदाये अमरः।

यौवन न० यूनो भावः अण्। १तारुण्ये "आ षोडशाद्भवेद् बालस्तरुणस्तत उच्यते। ऊर्द्धं स्यात् सप्ततेर्वृद्धः" इत्युक्ते २वयस्यामेदे। [क्रीडा)व्रणभेदे शब्दमा०

यौवनकण्टक पु न० यौवनस्य कण्टक इव चिह्नम्। (वयस्

यौवनदशा स्त्री कर्म०। तारुण्ये अवस्थाभेदे।

यौवनलक्षण न० ६त०। १स्तने २लावण्ये च मेदि०।

यौष्माक त्रि० युष्माकमिदम् युष्मद्+अण् युष्माकादेशः। युष्मत्सम्बन्धिनि। खञ्। यौष्मकीनोऽप्यत्र त्रि०।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य सङ्कलिते वाचस्पत्ये यकारादि-शब्दार्थसङ्कलनम्।

र

रकारः व्यञ्जनवर्णभेदः सर्ववर्णोष्मवर्णयोर्मध्यस्थत्वात् अन्तःस्थवर्णः। अग्रोच्चारणस्थानं मूर्द्धा। जिह्वाग्रेण मूर्द्धस्थानस्पृक्सर्शेनोच्चारणादस्य आभ्यन्तरप्रयत्न ईषत्स्पृष्टम्। बाह्यप्रयत्नाश्च संवारनादघोषा अल्पप्राणश्च। वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा

"रो रक्तः क्रोधिनी रेफः पावकस्तैजसो मतः। प्रकाशी दर्शनो दीप्तो रततृष्णा परं बली। भुजङ्गेशो मतिः सूर्य्यो धातुरक्तप्रकाशकः। व्यापको रेवती दानं दक्षांसो वह्निमण्डलम्। उग्रवेगाश्चूलदण्डो वेदवर्णोपलाम्बरा। प्रकृतिः सुगणो ब्रह्मशब्दश्च नायको घनः। श्रीकण्ठ ऊष्मा हृदयं सुखी त्रिपुरसुन्दरी। सविन्दुर्योनिजो ज्वाला श्रीशैलो विश्वनोऽग्नी"। अस्य ध्येयरूपं यथा "रेफञ्च चञ्चलापाङ्गि! कुण्डलीहयसंयुतम्। रक्तविद्युल्लताकारं पञ्चदेवात्मकं सदा। पञ्चप्राणमयं वर्णं

त्रिविध्वङ्कितं यदा" कामधेनुतं०। "अस्याधिष्ठात्रदेवतारूपं यथा "बलच्छिन्नां मदारौद्रीं रक्तास्यां रक्तलोचनाम्। रक्तवर्णाष्टभुजां रक्तपुष्पोपशोभिताम्। रक्तमाल्याम्बरधरां रक्तालङ्कारभूषिताम्। मदालोलमदां नित्यामष्टसिद्धिप्रदायिनीम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्"। मातृकान्यासेऽस्य दक्षांसे न्यासता। काम्यादौ प्रयोगे "रक्तु दाहे" दृ० र० ड्वोऽन्तेः दाहः कर्त्तव्यः।

रक्त पु० रा-क। १वर्णे २रूपे मेदि०। २रागयुक्ते च चन्द्रर०। ३छन्दःशास्त्रप्रसिद्धे वृत्तभेदे आद्यन्तगुरुयुते रगणे काम्यादौ तस्य प्रथमप्रयोगे सरूपं फलञ्च अस्य देवताऽग्निः।

रंक्ष् भक्षे भ्वा० पु० सक० अक० सेट्। रंक्षयति ते अरंक्षत् त।

रंक्षस् न० रंक्ष-असुन्। वेगे अमरः। [अरीरकत् त

रक्ष् क्षये प्राप्तौ च चु० उभ० सक० सेट्। राक्षयति-ते अ न० रक्ष-करणे क्त। १क्षुद्रे २रक्षाकर्त्तरि त्रि० ३क्षिप्रे ४क्षिप्रकुशे ५पक्षके राजनि०। ७मरीचिवृक्षे रक्तपाकजन्ये क्षारक्षेत्रौ रुधिराख्ये धातुभेदे अमरः। ८क्षुद्रजन्तौ ९क्षिप्रकारिणि १०रोहितवर्णे च पु० ११तिनिदति त्रि० अमरः। १२परागे कर्त्तरि त्रि। १३क्षतरक्षे मेदि० १४क्षीरक्षरति च वरुधिः। कर्मणि क्त। १५लोध्रादिभिरक्षिते त्रि०। करणे क्त। १६सक्तिक्षायां १७लाक्षायां १८गुडायाञ्च स्त्री राजनि०टाप्। भावे क्त। २०रागे न०। धातुभेदरक्तस्वरूपादिकं भावप्र० उक्तं यथा "यदा रक्तो बलाद्दुष्यति तत्र रक्तप्रदूषितः। रागं पाकं च वर्णाश्च स भवेद्दूषणात्मकः। रक्तं सर्वशरीरस्थं जीवस्याधारसम्भवम्। स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत्"। जीवस्याधारसम्भवमिति, यत आह। "जीवो वसति सर्वस्मिन्देहे तत्र विशेषतः। वीर्ये रक्ते मले यस्मिन् जीवे याति क्षयं क्षणादिति"। वीर्ये रक्ते मले च शरीरारम्भके जातभोजनपरिमाणमिते सुस्थे जीवो वसति न तु दुष्टे मृदुके रक्तस्रावक्षोपदेशस्य वैयर्थ्यप्रसङ्गात्। पित्तवद्भवेत् अम्लवद्भवेदित्यर्थः। अथ रक्तस्य स्थानमाह "यकृत् प्लीहा च रक्तस्य मुख्यस्थानत्रयोः स्थितम्। अन्यत्र संस्थितवतां रक्तानां पोषकं भवेत्"। अस्मत्करम्भे ५५९ पृ० दृश्यम्।

रक्तक पु० रक्तं रुधिरमिव कायति कै-क स्वार्थे कन् वा। १रक्तचन्दनवृक्षे रक्तजूवृक्षे मेदि०। २रक्तशोभाञ्जने ३रक्तकैरवे च राजनि०। ४रुधिरे ५रक्तवस्त्रे च न०। ७अनुरागिणि मेदि० ८विशोदिनि च त्रि०।

रक्तकन्द पु० रक्तवर्णः कन्दोऽस्य। १विष्णुक्रान्तायां २रक्तालौ ३रक्तपलाण्डौ च राजनि०।

रक्तकमल न० रक्तं कमलमिव। रक्तवर्णोत्पले राजनि०। मृगो०। रक्तकम्बलसमञ्च न०। [ज्ञार्थे क तत्रार्थे।

रक्तकरवीर पु० कर्म०। रक्तवर्णपुष्पककरवीरवृक्षे राजनि०

रक्तकाञ्चन पु० कर्म०। रक्तवर्णपुष्पककाञ्चनवृक्षे शब्दच०।

रक्तकाण्डा स्त्री रक्तः काण्डोऽस्याः। रक्तपुनर्नवायाम् राजनि०। [कैरवरक्तशोकजटे अथत्न न० जटा०।

रक्तकुरुट न० कर्म०। १रक्तवर्णपुष्पककैरवे जटा०। २रक्तरक्तकुसुम पु० रक्तानि कुसुमान्यस्य। पारिभद्रे (पालदाहार) राजनि०। [२पुन्नागवृक्षे च रत्नमा०।

रक्तकेसर पु० रक्ताः केसरा यस्य। १पारिभद्रे राजनि०।

रक्तखदिर पु० क्षारतो रक्तवर्णः खदिरः। रक्तवर्णक्षारके खदिरवृक्षे राजनि०।

रक्तगन्धक न० रक्तेन गन्धकमिव। पीते (अम्लरस) राजनि०

रक्तघ्न पु० रक्तं हन्ति हन-टक्। २रोहितकवृक्षे अदा०। २दूर्वायां स्त्री शब्दच०।

रक्तचन्दन न० कर्म०। खनामख्याते चन्दनभेदे अमरः। "रक्तं (चन्दनम्) पीतं गुरु स्वादु हृद्दिसृष्णाक्षयापहम्" भावप्र० तस्य। पित्तनेत्रक्षितं हृद्यं ज्वरत्रयविषापहम्" भावप्र०।

रक्तचित्रक न० कर्म०। (खालचिता) क्षुपभेदे राजनि०।

रक्तचूर्ण न० कर्म०। १सिन्दूरे क्षारा० २रक्तवर्णचूर्णसामे च

रक्तझिण्टी स्त्री कर्म०। (नाटझाटि) पुष्पप्रधानकण्टकभेदे अमरः।

रक्ततुण्ड पु० रक्तं तुण्डमस्य। १शुक्लपक्षिणि राजनि०। २रक्तमुखके त्रि० कप्। रक्ततुण्डक भूनागे राजनि०।

रक्ततृणा स्त्री रक्तं तृणं यस्याः। गोभूमिकायाम् राजनि०

रक्तत्रिवृत् (ता) स्त्री कर्म०।(नालतेओजि) द्रुमभेदे राजनि०

रक्तदन्तिका स्त्री रक्ता दन्ता अस्याः कप् अत इत्वम्। दाडिमीख्ये दुर्गाशक्तिभेदे "मद्यमन्त्यास्य तान्वयान् वैप्रचित्तान् महासुरान्। रक्ता दन्ता भविष्यन्तीति" तदाख्ये" ततो मां देवताः सर्वे मत्संत्रोकेषु च मानवाः। स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकामु" देवीभा०। इति तन्त्रोक्तनिरुक्तिः। [राजनि०।

रक्तदला स्त्री रक्तानि दलान्यस्याः। नाडिकायाम् (नालते)

रक्तदृश् पु० रक्ता दृक् नेत्रमस्य। कपोते। रक्तनेत्रादयोऽप्यत्र

रक्तधातु पु० कर्म० । गैरिके त्रिका० । २ताम्रे च राजनि० ३देहस्थे रुधिररूपे रसधातुजाते मांसधातुहेतौ ४धातुभेदे च अस्मत्करचन्द्रे ५५६ पृ० दृश्यम् ।

रक्तनाल पु० रक्तो नालोऽस्य । जीवशाके राजनि० ।

रक्तप पुंस्त्री० रक्तं पिबति पा-क । १राक्षसे मेदि० । स्त्रियां ङीष् । २रक्तपानकर्त्तरि त्रि० ३जलौकायां ४डाकिन्याञ्च स्त्री मेदि० टाप् ।

रक्तपत्रिका स्त्री रक्तानि पत्राण्यस्याः कप् अत इत्वम् । १नागदन्त्यां २रक्तपुनर्नवायाञ्च राजनि० ।

रक्तपल्लव पु० ह्रस्व० । १अशोकवृक्षे राजनि० । कर्म० । २रक्तवर्णपल्लवे अमरः । [राजनि०।

रक्तपाकी स्त्री रक्तः पाकः फलं यस्याः ङीप् । इक्ष्वाम्

रक्तपाद पु० इत० । १शुक्लपक्षिणि हेमच० । २लज्जालौ लतायां ३हंसपद्याञ्च स्त्री राजनि० ङीप् षट्त्वाभावश्च ।

रक्तपायिनी स्त्री रक्तं पातुं शीलमस्याः पा+णिनि ङीप् । जलौकायाम् (जोंक) राजनि० ।

रक्तपारद न० कर्म० । हिङ्गुले हारा० । तत्सार्द्धे पु० जटा० ।

रक्तपित्त न० रोगभेदे । तल्लक्षणादिकं भावप्र० उक्तं यथा "धर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः । तीक्ष्णोष्णक्षारलवणैः कटुभिरेव च । पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितम्" । तीक्ष्णं मरिचादि । उष्णमग्नितापादि । क्षारोयवक्षारादिः । विदग्धं स्वगुणैः स्वकारणैः गुणैस्तीक्ष्णादिभिः । गुणैरिति बहुत्वेन तीक्ष्णस्यैवलवणकटूष्णधर्म्मादयो ग्रहणे विदहति दूषयति । अथ रक्तपित्तस्य सामान्यं लक्षणमाह "ततः प्रवर्त्तते रक्तमूर्द्ध्वाधो द्विधापि वा" । अत्र रक्तपित्तमुपलक्षणम् । 'तेन संसृष्टं पित्तञ्च । अतएव रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व इति सुश्रुतः । रक्तञ्च तत् पित्तं चेति रक्तपित्तं राजप्राप्तं पित्तं रक्तमित्युच्यते रक्तं पित्तं कर्म्मधारय इति चरकः । उभयमपि न दोषः कारणत्वयात् । कारणत्वमाह "संयोगात् दूषणात् तन्तु सामान्यात् गन्धवर्णयोः । रक्तञ्च पित्तमाख्यातं रक्तपित्तं मणीषिभिः" । सामानाह "अर्द्धं नासानिकर्णाक्षैर्भेदयोनिगुदैरधः । कुपितं रोमकूपैश्च समस्तैस्तत् प्रवर्त्तते" । कुपितं पित्तम् । पूर्वरूपमाह "तदग्रं शीतकासित्वं कण्ठधूमायनं वमिः । लोहगन्धित्व निष्ठीवो भवत्यस्मिन् भविष्यति" । "विशिष्टरूपमाह "शान्तं सपाण्डु सदनं पिच्छिलं च कफान्वितम्" । वातिकमाह "श्यावारुणं सफेनञ्च तनु रूक्षञ्च वातिकम्" । पैत्तिकमाह "रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभम् । मेचकाङ्गारधूमाभमञ्जनाभञ्च पैत्तिकम्" । मेचकम् चिक्कणं कृष्णवर्णम् । अञ्जनं स्रोतोञ्जनं तदाभम् । संसर्गविशेषेण मार्गभेदमाह "संसृष्टं लिङ्गसंसर्गादुत्तरोत्तरं सान्निपातिकम् । ऊर्द्ध्वगं कफसंसृष्टमधोगं मारुतानुगम् । द्विमार्गं कफवातास्यासृभास्यां तत् प्रवर्त्तते" । उपद्रवानाह "दौर्बल्यं श्वासकासज्वरवमथुमदाः पार्श्वशूलादाहमूर्च्छा मुक्ते घोरोविदाहस्त्वतिरपि सदा हृद्व्यथल्या च पीड़ा । तृष्णा कोष्ठस्य भेदः शिरसि च तपनं पूयनिष्ठीवनञ्च द्वेषो भक्तेऽविपाको विकृतिरपि भवेदुक्तलिङ्गोपसर्गाः" । विकृतिः मांसप्रक्षालनाभत्वादिः । साध्यादिकमाह "एकदोषानुगं साध्यं द्विदोषात् याप्यमुच्यते । त्रिदोषमसाध्यं स्यान्नव्याम्बरतिवेगवत् । ऊर्द्ध साध्यमधो याप्यमसाध्यं मुखदूषणम् । व्याधिभिः क्षीणदेहस्य हृत्प्लावनञ्चतस्तु यत्" । अथ साध्यमाह "एकमार्गं बलवतो नातिवेगं नवोत्थितम् । रक्तपित्तं सुखे काले साध्यं शारिरपट्टवम्" । सुखे काले हिमशिशिरयोः । असाध्यमाह "मांसप्रक्षालनाभं कुथितमिव च यत्कर्दमाम्भोनिभं वा भेदःपूयाभकल्पं बलदिव यदि वा पक्वजम्बूफलाभम् । यत् लवणं यच्च नीलं भ्रमरपि कृष्णं यत्र चोक्ता विकारास्तदसृक्पित्तं सुरपतिधनुषा यच्च तुल्यं विभाति" । उक्ता विकारा दौर्बल्यादयः । सुरपतिधनुषा तुल्यं नानावर्णम् । "येन चोपद्रुतो रक्तं रक्तपित्तेन मानवः । पश्चेदुभयं वियच्चापि तदसाध्यमसंशयम्" । येन रक्तपित्तेनोपद्रुतः मनुष्यः हरितं घटप्रटादिकं रक्तं पश्यति च नश्यति वियच्चापि अदृश्यमपीत्यर्थः । अथारिष्टमाह । "लोहितं कर्दमेवस्तु बहुशो लोहितेक्षणः । लोहितोद्गारदर्शी च म्रियते रक्तपैत्तिकः" । लोहितोद्गारदर्शी व्याधिमहिम्नोद्गारमपि लोहितं पश्यतीत्यर्थः" ।

रक्तपुष्प न० कर्म० । १रक्ते कुसुमे रक्तं पुष्पमस्य । २करवीरे जटा० ३रोहितकवृक्षे ४रक्तवासकवृक्षे ५दाड़िमवृक्षे ६रक्तबकवृक्षे रत्नमा० ७बन्धूकवृक्षे ८पुन्नागवृक्षे च राजनि० ९बालबलीवृक्षे स्त्री जटा० टाप् । रक्तपुष्पक पलाशवृक्षे रोहितकवृक्षे च जटा० । पर्वते शालवलिवृक्षे च राजनि०

रक्तपुष्पिका स्त्री रक्तानि पुष्पाणि यस्याः कप् अत इत्वम् । १लज्जालुलतायाम् शब्दच० २रक्तपुन-

नवावासु २भूमिपाटलौ च राजनिघण्टुः ।

रक्तपुष्पी स्त्री रक्तानि पुष्पाण्यस्याः ङीप् । १पाटलिवृक्षे (पारुल) २जवायाम् ३चाकुन्दीलतायाम् ४मामदशन्याम् ५कटफलीवृक्षे ६चक्रकायाञ्च राजनि० ।

रक्तपूरक न० रक्तं रुधिरं पूरयति सेवनात् पूर-ण्वुल् । हृद्रन्ध्रे राजनि० । [स्थाने च राजनि० ।

रक्तप्रसव पु० रक्तवर्णः प्रसवः पुष्पमस्य । १करवीरे २रक्ता

रक्तफल पु० रक्तानि फलान्यस्य । १वटवृक्षे जटा० । २बिम्बिकायां (तेलाकुचा) स्त्री अमरः टाप् ।

रक्तबालुक न० कर्म० । सिन्दूरे शब्दार्० रक्तबालुकाप्रभ स्त्री

रक्तमञ्जर पु० रक्तवर्णा मञ्जरी अवयवो यस्य अच् । निचुलवृक्षे त्रिका० । [राजनि० ।

रक्तमूला स्त्री रक्तं, मूलालुलतायाम् । कप् । देवदर्भभेदे पु०

रक्तमेह पु० कर्म० । प्रमेहरोगभेदे "किञ्चिदुष्णं सलवणं रक्ताभं रक्तमेहतः" भावप्र० ।

रक्तमोक्षण न० रक्तं । रुधिरस्रावणे ।

"वेदनोपशमार्थाय तथाऽपाकशमाय च । अचिरोत्पतिते शोथे शोणितस्रावणञ्चरेत्" । चरेत् कुर्य्यात् । "एकतस्तु क्रियाः सर्वा रक्तमोक्षणमेकतः । रक्तं हि वेदनासूत्रं तन्नेक्षन्ति न चापि कृक् । विवर्णं कठिने श्यावे व्रणे चात्यन्तवेदने । कृच्छ्रेषु विशेषेण जलौकोभिः पटैरपि" । शोणितस्रावणञ्चरेदित्यनेनान्वयः" भावप्र० ।

रक्तयष्टि स्त्री रक्तवर्णा यष्टिरस्याः । मञ्जिष्ठायाम् जटा० । कप् । रक्तयष्टिका तत्रैव ।

रक्तरेणु पु० रक्ता रेणवोऽस्य । १पद्माख्यकलिकायाम् २सिन्दूरे च मेदि० ३पुन्नागे राजनि० ।

रक्तलशुन न० कर्म० । (लालरशुन) मूलभेदे राजनि० ।

रक्तला स्त्री रक्तं रुधिरं हेतुत्वेनास्त्यस्याः अच् तत् खाति सेवनात् ला-क वा । कामलरोगाम् राजनि ।

रक्तवटी स्त्री रक्तवर्णा वटीव । मञ्जरिकायाम् त्रिका० ।

रक्तवर्ग पु० रक्तानां वर्गः समुदायः । दाड़िमकिंशुकलाक्षाबन्धूककुरिण्टद्रुद्रवन्तीवृक्षपुष्पमञ्जिष्ठालक्तकरूपे समूहे राजनि० । [कर्म० । २रोहितरूपे पु० ३तद्वति त्रि० ।

रक्तवर्ण पु० रक्तो वर्णोऽस्य । १इन्द्रगोपकीटभेदे राजनि० ।

रक्तवर्द्धन पु० रक्तं रुधिरं वर्द्धयति भोजनात् वृधणिच्-ल्यु । वार्त्ताकौ शब्दच० । [याम् राजनि० ।

रक्तवर्षाभू पु० वर्षास्वां भवति भू-किप् कर्म० । रक्तपुनर्नवा-

रक्त(क्ती)बीज पु० रक्तवर्णानि बी(क्ती)जान्यस्य । १दाड़िमे राजनि० रक्तं रुधिरमेव बी(क्ती)जमुत्पत्तिः कारणं यस्य । "रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः । समुत्पतति मेदिन्यान्तत्प्रमाणश्चदासुरः" देवीमा० उक्ते असुरभेदे [मन्त्रच०

रक्तवन्ता स्त्री रक्तं वन्तं यस्याः । शेफालिकायाम्

रक्तवृष्टि स्त्री ६त० । दैवजलोपद्रवभेदे रुधिरवर्षणे "कल्पचिन्तामणौ "रक्ते यज्ञोद्योगो सांसास्थिवसादिभिर्मरकः । धान्यहिरण्यलवणकृष्णलक्षुमादौ वर्षिते भयं विद्यात्" ज्यो० त० । [शब्दे १८७६ पृ०द्रष्टव्यम् ।

रक्तशालि पु० कर्म० । (लालधान) धान्यभेदे भावप्र० । धान्यशब्दे १८७६ पृ० द्रष्टव्यम् ।

रक्तशिग्रु पु० कर्म० । (लालसजना) वृक्षभेदे राजनि० ।

रक्तशौर्षक पु० रक्तं शौर्षकमस्य कप् । १खरपुष्पे रत्नमा० । २रक्तवर्णकुसुमके त्रि० ।

रक्तशृङ्गिका न० रक्तं शृङ्गमिवास्त्यस्य ठन् । विषभेदे राजनि०

रक्तसन्ध्यक न० रक्ता सन्ध्येव कन् । रक्तवर्णे कङ्कारे अमरः

रक्तसरोरुह न० कर्म० । रक्तपद्मे अमरः ।

रक्तसर्षप पु० कर्म० । (राङ्गसरिषा) राजिकायाम् राजनि० ।

रक्तसह्या स्त्री रक्तं सहते सह-अच् । रक्तक्षमे राजनि०

रक्तसार न० रक्तः सारोऽस्य । १रक्तचन्दने २रक्तक्षमेतसे पु० राजनि० ।

रक्तसौगन्धिक न० कर्म० । (लालसुदि) रक्तवर्णकुसुमे जटा०

रक्ताकार पु० रक्तवर्ण आकारो मूर्त्तिर्यस्य । १प्रवाले राजनि० २रक्तमूर्त्तिके त्रि० ।

रक्ताक्ष पु० रक्ते अक्षिणी यस्य बहुव्री० । १कारण्डवे २मक्षिके ३चक्रोरे राजनि० ४रक्तनेत्रवति क्रूरे जने च त्रि० ५सारसे च मेदि० । स्त्रियां जातौ वर्णत्वात् ङीप् ।

रक्ताङ्ग न० रक्तमङ्गं यस्य यस्माद्वा । १कुङ्कुमे २मङ्गल्यवृक्षे ३कम्पिल्ले (कमेरकरमचा) च पु० ४प्रवाले पुंन० मेदि० । ५जीवन्त्याम् ६मञ्जिष्ठायाञ्च स्त्री भावप्र० ङीप् ।

रक्ताति(ती)सार पु० रक्तमिश्रितोऽतिसार(ती)सारः । प्रसिद्धे रोगभेदे । "पित्तकृत यदात्यर्थं द्रव्यमत्यति पैत्तिके । तद्दोषाच्छ्रावते शीघ्रं रक्तातीसार उच्यते" भावप्र० । अति(ती)सारशब्दे १०६ पृ० द्रष्टव्यम् ।

रक्ताधार पु० ६त० । देहावरके चर्मणि राजनि० ।

रक्तापच्छ न० रक्तं रुधिरमपच्छन्ति अप+छद-क । गन्धरसे बोले राजनि० ।

रक्तापामार्ग पु० कर्म० । (लाल आपाङ) क्षुपभेदे राजनि०

रक्तास्त्र पु० नित्यक० । कोषास्त्रे राजनि० ।

रक्ताम्लान पु० कर्म०। रक्तमङ्गाश्रहालतायाम् राजनि०।

रक्तार्बुद पु० रोगविशेषे। तल्लक्षणं भावप्र० उक्तं यथा "दोषप्रदुष्टा रुधिरं सिराश्च संदूष्य संपीड्य बलस्य मांसम्। मांसावसन्नह्यति मांसपिण्डं मांसाङ्कुरैराचितमाशुवृद्धिम्। स्वल्पत्वजस्रं रुधिरं प्रदुष्टमसाध्यमेतद्रुधिरात्मकन्तु। रक्तत्रयोपद्रवपीड़ितत्वात् पाण्डुर्भवेदर्बुदपीड़ितश्च"। दोषोऽत्र पित्तं, रुधिरं सिराश्च दूषयित्वा संपीड्य संदूषणात्र मांसासृजोः सर्वेष्वर्बुदेषु दुष्टत्वं, रक्तजे तु विशेषतो रक्तदुष्टिः एवं मांसार्बुदे विशेषतो मांसदुष्टिर्बोद्धव्या। ततो मांसपिण्डमसन्नह्यति उद्गतं करोति। अपाकं ईषत्पाकं यथा स्यादेवमिति क्रियाविशेषणम्। ईषत्पाकश्चैकदेशपाकेन। रक्तत्रयोपद्रवपीड़ितत्वात् रक्तत्रयोपद्रवाः सञ्जातेनोक्ताः। तैः पीड़ितत्वात् अर्बुदपीड़ितः"। अतत्तपीयकर्मविपाके "रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः" इत्युक्तम्।

रक्तार्शस् न० अर्शरोगभेदे। तल्लक्षणं भावप्र० उक्तं यथा "रक्तोल्बणा गुदे कीलाः पित्तासृक्प्रतिसमन्विताः। षट्प्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः। तेऽत्यर्थं दुष्टरुधिरा गाढविड्भिः प्रपीड़िताः। स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः। भेकाभः पीड्यते दुःखैः शोणिनश्चरमम्बुवैः। हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः। विट् श्यावं कठिनं रूक्षमधोवायुर्न वर्त्तते। तत्तु चारुणवर्णञ्च फेनिलञ्चासृगर्शसम्। कण्डूरुगुदशूलञ्च दौर्बल्यं यदि वाऽधिकम्। तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम्। शिथिलं श्वेतपीतञ्च विट् स्निग्धं गुरु शीतलम्। यद्यर्शसां घनञ्चासृक् तत्तु स्वल्पं पाण्डु पिच्छिलम्। गुदं सर्पिच्छं स्रवितं गुरु स्निग्धञ्च कारणम्। श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां दुःखैः। गुदे कीला अर्शांसि पित्तासृक्प्रतिसदृशाः। दुःखैः रोगैः त्वक्पाकश्यावगीतप्रार्थनादिभिः। कलुषेन्द्रियः व्याकुलसर्वेन्द्रियः। रक्तजस्यापि वातोल्बणस्य लक्षणमाह। तत्र रक्तार्शसि अनुबन्धः रूक्षणत्वम्। रूक्षणं रूक्षयतीति रूक्षं रूक्षं द्रव्यम्। पित्तोल्बणस्य लक्षणम् "रक्तोल्बणा गुदे कीलाः पित्तासृक्प्रतिसमन्विताः" इत्यादिनैवोक्तम् रक्तपित्तयोः समानलिङ्गत्वात्। कफोल्बणस्य लक्षणमाह। सर्पिच्छं पिच्छिलार्द्रं स्रवितमार्द्रं चर्मावगुण्ठितमिव"।

रक्तालु पु० कर्म०। (शकरकन्द) आलुभेदे राजनि०।

रक्तिका स्त्री रक्तैव कन् अत इत्वम्। १गुञ्जायां २रक्तिकायां राजनि० ३परिमाणभेदे रक्तिकापरिमाणे च।

रक्तेक्षु पु० कर्म०। (काजला) इक्षुभेदे राजनि०।

रक्तैरण्ड पु० कर्म०। (लालभेरण्डा) इक्षभेदे राजनि०।

रक्तोत्पल न० कर्म०। कोकनदे लोहितवर्णे पद्मे अमरः। रक्तोत्पलमिव पुष्पमस्त्यस्य अच्। २शालूकविशेषे (शिलुक) पु० राजनि०। रक्तमुत्पलमिव। ३रैरिके न०हारा०

रक्तोत्पलाभ पु० रक्तोत्पलस्य कोकनदस्येवाभा यस्य। १रक्तरूपे जटा० २तद्वति त्रि०।

रक्ष पालने भ्वा०पर०सक०सेट्। रक्षति अरक्षीत् ररक्ष। जीव् रक्षितो वर्त्तते। [समूहे अमरः।

रक्षःसभ न० रक्षसां राक्षसानां सभा स्त्रीत्वम्। राक्षसरक्षक त्रि०रक्ष-ण्वुल्। रक्षाकर्त्तरि स्त्रियां टाप् अत इत्वम्

रक्षणि(णी) स्त्री रक्ष-अनि वा ङीप्। आयसायाञ्चतायाम् राजनि०। [अमरः।

रक्षस् न० रक्ष्यते हविरस्मात् रक्ष-असादानेऽसुन्। राक्षसे

रक्षा स्त्री रक्ष-भावे अ टाप्। १रक्षणे २तदर्थे रक्षासूत्रे च "रक्षे! मा चल मा चल" रक्षाबन्धमन्त्रः। रक्षति रक्ष अच् टाप्। ३जतुनि मेदि०। ४भस्मनि च स्त्री शब्दर०। ५रक्षके त्रि०।

रक्षापत्र पु० रक्षार्थं पत्रमस्य। भूर्जपत्रवृक्षे राजनि०।

रक्षित त्रि० रक्ष्यतेऽत्र रक्ष-क्त। १भाण्डे। २वैद्यभेदे पु०।

रक्षिवर्ग पु० रक्षिणां वर्गः। रक्षकसैन्यादिगणे (नफरिगण)

रक्षोघ्न न० रक्षो हन्ति हन-टक्। १आञ्जिके हेमच०। २हिङ्गुनि राजनि०। तद्गन्धस्य घ्राणसहत्वात्तस्य रक्षसामपसरणम्। ३भल्लातकवृक्षे पु० त्रिका०। ४श्वेतसर्षपे पु० रत्नमा०। ऋग्वेदप्रसिद्धे "त्रायध्वमित्यादिके मन्त्रे ४।४।१०। ५रक्तभेदे न०। ६वचायां स्त्री। ७राक्षसघातकमात्रे त्रि० ङीप्।

रक्षोहन् पु० रक्षो हन्ति हन+क्विप्। १गुग्गुलौ राजनि० तद्गन्धस्य घ्राणाद्धि रक्षसामपसरणम्। २श्वेतसर्षपे पु०। ३राक्षसहन्तरि त्रि०। "रक्षहणं वनगहनम्" यजु०५,२१

रक्ष्ण पु० रक्ष-नङ्। त्राणे अमरः। [रक्ष्यते।

रख सर्पणे भ्वा० पर० सक० सेट् इदित्। रखति अरखीत् रख सर्पणे भ्वा० पर० सक० सेट्। रखति अरखीत् अराखीत्। [जटा० रगवति।

रग शङ्कायाम् भ्वा० प० सक० सेट्। रगति एदित् अरगीत् रग गतौ भ्वा० परं० सक० सेट् इदित्। रङ्क्षति अरङ्क्षीत्।

रग क्षरे क्षाप्तौ च चु० उभ० सक० सेट्। रागयति अरीरगत् त। [अररङ्गत् त।

रघ दीप्तौ भ्वा० आ० सक० सेट् इदित्। रङ्घयते रघ गतौ भ्वा० आ० सक० सेट् इदित्। रङ्घते अरङ्घिष्ट।

रघु पु० लघ-उ लस्य रत्वम्। सूर्य्यवंश्ये दिलीपपुत्रभेदे रघोरपत्यमण् वञ्छ लुक्। रघुवंश्येषु अजप्रभृतिषु २क्षत्रियेषु ब०व०। तान् अधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां तस्य लुक्। कालिदासग्रथीते जनविंशतिसर्गात्मके महाकाव्यभेदे पु०।

रघुनन्दन पु० रघून् नन्दयति नन्द-णिच् ल्यु। दशरथस्य ज्येष्ठपुत्रे १श्रीरामे त्रिका० २भरतादौ च।

रघुनाथ पु० रघूणां नाथः रक्षकत्वात् श्रेष्ठत्वाद्वा। श्रीरामे शब्दर०। रघुपत्यादयोऽप्यत्र।

रघुवंश पु० ६त०। रघुकुले। तमधिकृत्य कृतो ग्रन्थः आख्यायिकायां तस्य लुक्। कालिदासग्रथीते जनविंशतिसर्गात्मके महाकाव्यभेदे पु०। [पुत्रे श्रीरामे।

रघुवंशतिलक पु० रघुवंशे तिलक इव। दशरथनृपस्य ज्येष्ठ-

रघुवर पु० रघुषु वरः श्रेष्ठः। श्रीरामे।

रघूद्वह पु० रघुषु उद्वहः रक्षादिभारधारकः उद+वह-अच्। दशरथनृपस्य ज्येष्ठपुत्रे श्रीरामे शब्दर०।

रङ्क त्रि० रकि-अच्। १क्षुद्रे २मन्दे च मेदि०। [राजनि०

रङ्कु पु० रकि-उ। १हरिणविशेषे अमरः। २अवलग्नदण्डे लगे

रङ्ग पुं०न०रगि-अच्। १धातुभेदे (राङ) राजनि०। रनज-भावे घञ्। २रागे। आधारे घञ्। ३रणभूमौ ५नाट्यस्थाने च अमरः। करणे घञ्। ४नृत्ये मेदि०। ६टङ्कणे (सोहागा) ७खादिरसारे च राजनि०। रङ्गधातोः शो "धनप्रकारो भावप्र० उक्तो यथा "र(व)ङ्गनागौ प्रतप्तौ च गलितौ तौ निषेचयेत्। त्रिधा त्रिधा त्रिशुद्धिः स्याद्रविदुग्धेऽथि च त्रिधा"। तैलतक्रकाञ्जिकगोमूत्रकुलत्थकाथेषु प्रत्येकं त्रिधा त्रिधा। अथ रङ्गस्य मारणविधिः। "मृत्पात्रे द्रावितं र(व)ङ्गं चिञ्चास्वत्वचोरसः। क्षिप्त्वा र(व)ङ्गचतुर्थांशमवोदर्व्यां प्रचालयेत्"। चिञ्चा(अमिली) रसचूर्णम्। कवोदर्वी (करकुची)। "ततोऽदियामभार्त्तेषु र(व)ङ्गं भस्म प्रजायते। अथ भस्मसमं तालं क्षिप्त्वाम्लेन विवर्द्धयेत्। ततो गजपुटे पक्त्वा पुनरम्लेन मर्दयेत्। तालेन दशमांशेन यामभेकं ततः पुटेत्। एवं दशपुटैः यक्तं र(व)ङ्गं भवति मारितम्। एवं मारितस्य र(व)ङ्गस्य गुणाः। "रङ्गं लघु सरं रूक्षं कृमिमेहकफक्लमान्। निहन्ति पाण्डुं सन्ताप नेत्रमीषत्तु पित्तलम्। सिंहोगजोघन्तु यथा निहन्ति तथैव र(व)ङ्गोऽखिल हेमवर्गम्। देहस्य सौख्यं प्रबलेन्द्रियत्वं नरस्य पुष्टिं विदधाति नूनम्"। तस्यागुणस्य दोषमाह "रङ्गोविधत्ते खलुमुद्विहीनस्तथा क्षपक्वस्य किलाशगुल्मौ। कुष्ठानिस्थूलं खिल वातशोथं पाण्डुं प्रमेहञ्च भगन्दरञ्च। विषोपमं रक्तविकारछर्दिं श्वासञ्च कण्ठ्याञ्च कफज्वरञ्च। मेहाश्मरीविद्रधिसुप्तयोगान्नागाप कुर्य्यात् कथितान् विकारान्" तद्दोषा यथा। "श्वेतं मृदु लघु स्वच्छं स्निग्धसुपक्वसञ्चं स्निग्धम्। क्षतपक्षकरं कान्तं तप्तश्वेतसुदाहृतम्। क्षुरकं मिश्रकञ्चापि द्विविधं र(व)ङ्गमुच्यते। उत्तमं क्षुरकं तत्र मिश्रकं त्वहितं मतम्"। राजनि०।

रङ्गज न० रङ्गात् रङ्गधातोर्जायते जन-ड। सिन्दूरे रक्तमा

रङ्गजीवक पु० रङ्गेण रञ्जनेन जीवति जीव-ण्वुल्। (रङ्गरेज) १शिल्पिभेदे चित्रकरे शब्दर०। २नाट्यजीविनि च

रङ्गद पु० रङ्गं रञ्जनं रागं ददाति दा-क। १टङ्कणे २खदिरसारे च ३स्फटिके स्त्री राजनि०।

रङ्गदायक पु० रङ्गं ददाति दा-ण्वुल्। १कङ्कुष्ठे (काङ्गनी) २धान्यभेदे राजनि०।

रङ्गपत्री स्त्री रङ्गाय पत्रमस्याः ङीप्। नीलीवृक्षे राजनि० तत्पत्त्ररसादिना हि नीलरागसम्भवः। [वृक्षे राजनि०।

रङ्गपुष्पी स्त्री रङ्गं पुष्पयति पुष्प अण् गौरा०ङीष्। नीलीवृक्षे

रङ्गभूमि स्त्री रज्यतेऽत्र रनज-आधारे घञ् कर्म०। १नाट्यभूमौ शब्दर०। "रङ्गभूमिं समासाद्य" इति भा० ६प० २मल्लभूमौ च।

रङ्गमाल स्त्री रङ्गस्य रागस्य मातेवोत्पादिका। १लाक्षायाम् २कुट्टिन्याञ्च मेदि०। या हि नायकभावौचित्यहरणादिद्वारा रागं वर्द्धयति।

रङ्गलासिनी स्त्री रङ्गं रागं लासयत्युल्लासयति दृनट्रसेन लस-णिच-णिनि। वेश्यालिकायाम् शब्दच०।

रङ्ग(बी)बीज न० रङ्गं बी(बी)जमुत्पत्तिसाधनं यस्य। रजते शब्दर०। कृत्रिमस्वर्णस्य पारदयोगात् रङ्गजम् रजतशब्दे दृश्यम्।

रङ्गशाला स्त्री ६त०। (नाचघर) नाट्यगृहे शब्दर०।

रङ्गाजीव पु० रङ्गं रञ्जनं नाट्यस्थानं वा आजीवति आ+जीव-अण्। (रङ्गरेज) १शिल्पिभेदे चित्रकरे अमरः। २नटे च हेमच०।

रङ्गारि पु० रङ्गस्यारिरिव जारकत्वात् । करवीरे रत्नमा० । तद्वृक्षसंबन्धात्तस्य रङ्गस्य जीर्णता वैद्यकप्रसिद्धा ।

रङ्गावतारक पु० रङ्गे नाटकस्थानेऽवतरति वेशान्तरपरिग्रहेण अव+तॄ–ण्वुल् । १नटे शैलूषे जटा० णिनि । उक्तार्थे हेमच० । तत्प्रभोजननिषेधो मनूक्तो यथा "क्रमारस्य निषादस्य रङ्गावतारकस्य च । सूपकर्तुर्नृशंसस्य गन्धविक्रयिणस्तथा । त एतेऽन्ये समोच्छ्राया: क्रमश: परिकीर्त्तिता: । तेषान्नमस्थिरोमाणि वदन्त्यन्नं मनीषिण: । भुक्त्वातोऽन्यतमस्यान्नमत्ता जपणं त्यहम् । भत्ता भुक्त्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च" ।

रङ्गिणी स्त्री रङ्गमिव शुक्लानि मूलानि सन्त्यस्या: इनि । १शतमूल्याम् जटा० । २वेश्यायां शब्दच० । ३रङ्गयुक्ते त्रि० ।

रङ्गम् न० रञ्ज–असुन् । वेगे अमरे पाठान्तरम् । [त ।

रच रचनायां भ्वा० उभ० सक० सेट् । रचयति ते, अररचत्

रचना स्त्री रच–युच् । रचने १पुष्पपत्रादेर्विन्यासे अमर: । भावे ल्युट् । तत्रैवार्थे न० ।

रज न० रञ्ज–क । १स्त्रीकुसुमे शब्दर० । २परागे ३रेणौ ४गुणभेदे च पु० जाती शब्दच० ।

रजक पुंस्त्री० रजति रञ्ज–ण्वुल् नलोप: । यक्ष्मादे: रोगकारके जातिभेदे (धोबा) अमर: । स च तीवरकन्यायां धीवराज्जात: ब्रह्मवै० । स्त्रियां ङीष् । सा च कुलनाशिका "रजकी नापिताङ्गना" तन्त्रम् ।

रजत रञ्ज–अतच् नलोप: । १रूप्ये अमर: । २गजे ३दन्ते ४रुधिरे ५हारे ६धैर्ये ७खर्णे ८धवले च हेमच० । ९एतद्गुणवति त्रि० ।

रूप्यधातोरुत्पत्त्यादि भावप्र० उक्तं यथा "त्रिपुरस्य वधार्थाय निर्द्दिग्धैर्विलोचनै: । निरीक्षयामास शिव: क्रोधेन परिपूरित: । अग्निकृत्तकालमपतत्तस्यैकस्माद्विलोचनात् । ततोरुद्र: समभवद्वैश्वानर इव ज्वलन् । द्वितीयादपतत्तेजोऽश्रुबिन्दुस्तु वामकात् । तस्माद्रजतमुत्पन्नमुत्तमर्णस्य योजयेत् । क्रमेणैव भवेत्तस्मिन् वङ्गादिरसयोगत: । रूप्यन्तु रजतं तारशुक्लकान्ति सितप्रभम् । गुरु स्निग्धं मृदु श्वेतं दाहे क्लेदे घनं क्षमम् । वर्णाढ्यं चन्द्रवत् स्वच्छं रूप्यं नवगुणं शुभम् । कठिनं क्लमिलं रूक्षं रक्तं पीतदलं लघु । दाहच्छेदघनेष्टं रूप्यं दुष्टं प्रकीर्त्तितम् । तारं शरीरस्य करोति तापं शुक्लं वर्णं मक्षति शुक्रनाशम् । वीर्य्यं बलं हन्ति तनोश्च पुष्टिं मङ्गल्यदानं शोधयति क्षणेन" ।

स्थानान्तरे तत्रैव

तस्य शोधनविधि: "पक्वजीरतपत्राणि तारस्योर्ध्वं प्रतापयेत् । निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके । गोमूत्रे च कुलत्थानां कषायेच त्रिधा त्रिधा । एवं रजतपत्राणां विशुद्धि: सम्प्रजायते" । अथास्य रूप्यस्य दोषमाह "रूप्यं क्षयकुष्ठं प्रकरोति तापं विनाशकं वीर्य्यबलक्षयस्य । देहस्य पुष्टिं हरते तनोति रोगांस्तत: शोधनमस्य कुर्य्यात्" । अथ रूप्यमारणविधि: "भागैकं तालकं ग्राह्यं याममर्द्दनेन केनचित् । तेन भागत्रयं तारपत्राणि परिलेपयेत् । शुष्कं मृत्वा पुटे रुद्ध्वा पुटेत् खिंशद्गुणोपलै: । खङ्गेनोत्थं पुनस्तालं दत्त्वा रुद्ध्वा पुटे पचेत् । एवं चतुर्दशपुटैस्तारस्यास्य प्रजायते" । अथान्य प्रकार: "स्नुहीक्षीरेण संपिष्टं तालकं तेन लेपयेत् । तालकस्य प्रकारेण तारपत्रस्य बुद्धिमान् । पुटेच्चतुर्दशपुटैस्तारमस्य प्रजायते" । एवं मारितस्य रूप्यस्य गुण: "रौप्यं शीतं कषायञ्च स्वादु पाकरसं सरम् । वयस: स्थापनं स्निग्धं लेखनं वातपित्तजित् । प्रमेहादिकरोगांश्च नाशयत्यचिराद् ध्रुवम् ।

रजताचल पु० रजतकल्पितोऽचल: । दानार्थं कल्पिते रजतमये पर्वते मत्स्यपु० ७७अ० तद्विधिर्दशब्द: । रजतमिव शुभ्रोऽचल: । २कैलासपर्वते रजतगिर्यादयोऽप्यत्र पु०

रजन न० रञ्ज–ल्युट् । १रागे सि०कौ० । २कुसुम्भे ३हरिद्रायां ४रात्रौ च स्त्री उज्ज्वल: गौरा० ङीष् ।

रजनि(नी) स्त्री रज्यतेऽत्र रञ्ज-कनि वा ङीष् । १रात्रौ २हरिद्रायां ३लताकायाञ्च अमर: ।

रजनीकर पु०रजनीं करोति कृ–ट रजन्यां कर: किरणोऽस्य वा । १चन्द्रे शब्दर० २कर्पूरे च । [पुष्पप्रधाने वृक्षे ।

रजनीगन्धा स्त्री रजन्यां गन्धो यस्या: । खनामख्याते

रजनीचर पुंस्त्री०रजन्यां चरति चर–ट । १राक्षसे शब्दर० स्त्रियां ङीष् । २चौरे ३यामिकभेदे च ।

रजनीजल न० रजन्या जलमिव । नीहारे हारा० ।

रजनीपुष्प पु० रजन्या हरिद्राया इव पुष्पमस्य । (पूतिकरमचा) करञ्जभेदे राजनि० ।

रजनीमुख न० ३त० । प्रदोषे रूढ्यर्थलाभात् चतुर्दण्डात्मके सन्ध्यात्मके वा काले अमर: । प्रदोषशब्दे दृश्यम् ।

रजनीहासा स्त्री रजन्यां हास: विकाशो यस्या: । मेघालिकायाम् शब्दर० ।

रजस् न०रञ्ज असुन् नलोपः ।१कुङ्कुमे अमरः । २पुष्परेणौ ३परागे ४धूनौ मेदि० साङ्ख्योक्ते चलनादियुते ५प्रकृति गुणभेदे च "सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च" रजः" सा० का० । "सत्त्वतमसी स्वयमक्रियतया स्वस्वकार्य्यप्रवृत्तिं प्रत्यवसीदन्ती रजसोपष्टभ्येते अवसादात् प्रचुराव्य स्वकार्य्ये ते उत्साहं प्रयत्नं कार्य्यते तदिदमुक्तमुपष्टम्भकं रज इति । कञ्चादित्वात् उक्तं चलमिति । तदनेन रजसः प्रवृत्त्यर्थत्वं दर्शितम्" त० कौ० । ६पृथिव्यां स्त्री ङीप् निघण्टुः ।

रजस्वल त्रि० रजोऽस्त्यस्य वलच् । १रजोयुक्ते २अहिफेने पुंस्त्री० मेदि० स्त्रियां ङीष् । आर्त्तवमत्यां स्त्रियां स्त्री टाप् अमरः ।

रजोरस न० रजस इव रसोऽनुभवोऽस्य । अन्धकारे त्रि० ।

रजोवल न०रज इव वलति । वल—अच् । अन्धकारे त्रिका०

रज्जु स्त्री रुज-उ नि० १बन्धनसाधने दामनि अमरः (दड्डि) २वेगवायौ मेदि० ।

रञ्जक न० रञ्जयति रञ्ज—णिच्—ण्वुल् । १क्ष्विल्ले राजनि० २प्रीतिकारके त्रि० । ३काम्पिल्लवृक्षे पु० (कबइकरमचा) राजनि० ।

रञ्जन न० रज्यतेऽनेन रञ्ज—करणे ल्युट् । १रक्तचन्दने २क्ष्विल्ले ३खञ्जतृणे राजनि० ४मञ्जिष्ठायां ५नील्यां ६गुणखरोचनिकायां (कसलागुड़ि) स्त्री मेदि० ङीप् । ७श्वेतकाञ्चिकायां शब्दच० । ८हरिद्रायां ८पर्पटवृक्षे स्त्री राजनि० ङीप् । भावे ल्युट् । ९रागे । णिच् कर्त्तरि ल्यु । १०रागजनके त्रि० संज्ञायां कन् ।११कटफले पु० राजनि०

रट भाषणे भ्वा० पर० सक० सेट् । रटति अरार्टीत् अरटीत् रेटतुः "साधे साधि रटन्त्याप्यः" भट्ट० त० ।

रटन्ती स्त्री रट—वा०भाव ङीप् ।"साधे साध्वसिते पक्षे रटन्त्याख्या चतुर्दशी । तस्यां प्रदोषसमये पूजयेत् खड्गमालिनीम्" इत्युक्तायां साधनाख्यचतुर्दश्याम् । [रेटतुः ।

रठ भाषणे भ्वा० पर० सक० सेट् । रठति अरार्ठीत् अरठीत् रेठतुः । घटादि० । रठयति । [रेठतुः ।

रण रवे भ्वा० पर० अक० सेट् । रणति अराणीत् अरणीत्

रण पुंन० अर्त्तौ० रण-"वशिरण्योः" वार्त्ति० अप् । १युद्धे अमरः । भावे अप् । २शब्दे १कणे पु० मेदि० ४गतौ च पु० शब्दर० ।

रणरणक पु० रणः शब्दस्तत्प्रकारः प्रकारे द्वित्वम् ततः संज्ञायां कन् । १उद्वेगे २हर्षेच० ३व्यतिशये च ।

रणसङ्कुल न० रणमेव सङ्कुलम् । तुमुलयुद्धे अमरः ।

रण्ड पु० रम—ड तस्य नेत्त्वम् । १धूर्त्ते २विफले अङ्गांकुचिशिष्टतया इक्षिञ्जावयवे त्रि०संज्ञिप्रसारः । ४मूषिकपर्ण्यां स्त्री अमरः । ५विधवायाञ्च स्त्री । स्वार्थे क । अफलश्चादौ शब्दच० ।

रण्डाश्रमिन् पु० रण्डः विफलः प्रजाहीनत्वात् आश्रमः अस्त्यस्य इनि । "चत्वारिंशद्वत्सराणां वाष्टानाञ्च परे यदि । स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मतः" इत्युद्वाहतत्त्वे स्त्रीवियुक्ते पुरुषे ।

रत न० रम-भावे क्त । १रमणे स्त्रीपुंसयोः सङ्गमे मैथुने अमरः ।२सुरौ च मेदि० । कर्त्तरि क्त । ३अनुरक्ते त्रि० ।

रतक्रिया स्त्री रतये रतिहेतवे या क्रिया व्यापारः । स्त्रीपुंसयोः सङ्गमसाध्ये मैथुने ।

रतगुरु पु० ७त० । पत्यौ त्रिका० । [कामदेवपत्न्यां च मेदि० ।

रति स्त्री रम-क्तिन् । १रागे २सुरौ ३रमणे ४तदधिष्ठातृदेव्यां

रतिपति पु० ६त० । कन्दर्पे अमरः । रतिकान्तादयोऽत्र ।

रतिप्रिय पु०६त० । १कामदेवे शब्दर० । ६ब० ।२रमणप्रिये त्रि०

रतिबन्ध पु० रतौ बन्धः । रतिसङ्गमार्थं उक्ते षोड़शप्रकारे रमणबन्धभेदे "न भवन्ति यदा नार्य्यस्तुष्टा वाद्यरतेन ताः । नानाविधैस्तदा बन्धै रत्नन्या कामिभिः स्त्रियः । पद्मासनो १ नागपाशो२ लतावेष्टो३ऽर्द्धसंपुटम ४ । कुलिशं५ सुन्दर६श्चैव तथा केशर७ एव च । छेदोद८ नरसिंहोऽपि विपरीत१०श्चतुष्पदः । ११शुम्भो वै पेलुक१२श्चैवष्टत्कण्ठ१३स्तु ततः परम् । सिंहासनो१४ रतिनागो१५ विद्याधर१६स्तु षोड़शः" "रतिमञ्जरी । तत्तल्लक्षणं तत्र द्रष्टव्यम् । [चिह्ने च जटा० ।

रतिमन्दिर न० ६त० । १रतिगृहे २स्त्रीणामवाधारणे

रतिरमण पु० रतिं रमयति रम—णिच्—ल्यु । कामदेवे ।

रतिलक्ष न० रतेर्लक्षं पदम् । मैथुने हारा० ।

रतिसत्वरा स्त्री रतिं सत्वरयति सत्वरा+करोत्यर्थे णिच् अण् । (पिड़िङ्ग) शाके शब्दच० ।

रत्न न० रमतेऽत्र रम—न तान्तादेशः । १माणिक्यादिप्रसिद्धे अमरः । २स्वस्वजातिषु श्रेष्ठे मेदि० ३माणिक्ये ४कपूरे च राजनि० । तल्लक्षादिकं वृ०स०८०अ० उक्तं यथा "रत्नेन शुभेन शुभं भवति नृपाणामनिष्टमशुभेन । यत्नादतः परीक्ष्यं दैवं रत्नाश्रितं तज्ज्ञैः । द्विपहयवनितादीनां स्वगुणविशेषेण रत्नशब्दोऽस्ति । इह तु

पुष्परत्नानामधिकारो वज्रपूर्वाणाम् । रत्नानि बलाहैस्त्याद् दधीचितोऽन्ये वदन्ति जातानि । केचिदुभुवः स्वभावाद् वैचित्र्यं प्राक्तरूपलानाम् । वज्रेन्द्रनीलमरकतकर्केतनपद्मरागरुधिराख्याः । वैदूर्यपुलकविमलकरराजमणिस्फटिकशशिकान्ताः । सौगन्धिकगोमेदकशङ्खमकानीलपुष्परागाख्याः । ब्रह्ममणिज्योतीरसशस्यकशक्रा प्रवालानि" । [शब्दर० ।

रत्नकन्दल पु० रत्नेषु कन्दल इव रक्तत्वात् । प्रवाले

रत्नकूट पु० रत्नमयः कूटः शृङ्गमस्य । पर्वतभेदे शब्दर० ।

रत्नगर्भ पु० रत्नयुक्तं गर्भं मध्यं यस्य या० त० । १वसुदेवे राजनि० २कुबेरे च त्रिका० । ३पृथिव्यां स्त्री हेमच० ४वसुपुत्रायां नार्य्यां च स्त्री ।

रत्नद्वीप पुंन० । रत्नमयो द्वीपः । तन्त्रोक्ते सुधासमुद्रमध्यस्थिततया ध्येये रत्नमयेऽन्तरीपे ।

रत्नधेनु स्त्री रत्नकल्पिता धेनुः । महादानार्थं कल्पितायां रत्ननिर्मितायां धेन्वाम् । मत्स्यपु० २८७अ० दृश्यम् ।

रत्नपारायण न० रत्नानां पारायणं साकल्येन स्थानम् । सर्वरत्नाधारे "रत्नपारायणं नाम्ना लङ्का" भट्टिः ।

रत्नमुख्य न० रत्नेषु मुख्यम् । हीरके अमरः ।

रत्नवती स्त्री रत्नानि सन्त्यस्याः मतुप् मस्य वः । १पृथिव्याम् शब्दर० । २रत्नयुक्ते त्रि० ।

रत्नसानु पु० रत्नानि सानायस्य । सुमेरुपर्वते अमरः ।

रत्नसू स्त्री रत्नानि सूते सू-क्विप् । पृथिव्याम् हेमच० ।

रत्नाकर पु० ६त० । १समुद्रे अमरः । रत्नोत्पत्तिस्थाने २मणिबन्धौ च ।

रत्नाचल पु० रत्ननिर्मितः अचलः । दानार्थं कल्पिते रत्ननिर्मिते पर्वते भान्त्यर्थैकशब्दे १८८१पृ०दृश्यम् । [भूषणभेदे ।

रत्नाभरण न० रत्नघटितमाभरणम् शाक०त० । (जड़ाओ)

रत्नावली स्त्री ६त० । १रत्नसमूहे तद्घटितहारे २वत्सराजपत्नीभेदे च रत्नावलीमधिकृत्य कृतः ग्रन्थोऽप्याख्यायिकायां तस्य लक् । श्रीहर्षकृते चतुरङ्कात्मके ४नाटिकाभेदे । [स्त्रीत्वे वा ङीप् ।

रत्नि पुंस्त्री० रद-क्तिच् । बद्धमुष्टिहस्तपरिमाणे अमरः ।

रथ पु० रथ्यतेऽनेन अत्र वा रथ-कथन् । १स्वनामख्याते यानभेदे अमरः । २देहे च "आत्मानं रथिनं विद्धि शरीरं रथमेव च" इति गीता । अत्र रूपकमित्यन्ये ३पाशे ४श्वेतसर्षपे विश्वः ५तिनिशवृक्षे राजनि० । ज्ञानरूपरथभेदादिकं हेमच० उक्तं यथा

"युद्धार्थे चक्रवद्याने शताङ्गः स्यन्दनो रथः । संक्रोड़ार्थः पुष्परथो देवार्थस्तु, मरुद्रथः । योग्यो रथो वैनयिकोऽध्वरथः परिणातिकः । कर्णीरथः प्रवहणं डयनं रथगर्भकः । अनस्तु शकटोऽथ स्याद्गन्त्री कम्बलि वाह्यकम् । अथ काम्बलवास्त्राद्यैश्छन्नैः परिवृते रथे । स पाण्डुकम्बली यः स्यात् संवीतः पाण्डुकम्बलैः । स तु दैपो वैयाघ्रस्तु दृतो यो दीपिचर्मणा । ज्योतिर्विदाभरणे तत्करणञ्चोक्तं यथा "लोहमैत्वलघुस्निग्धकृष्णेषु स्यन्दनाखिलविधानमथाङ्गः । सैन्यवहेषु बलाम्बुतपःस्थैः साधुरायिमति साधुभिरङ्गे । रथचक्रभागमाह "षण्णवतिकरकर्णयुगाद्यैर्यद्भवलयं वलयस्य । सप्तभागनिहितभ्रमणमपादादिमध्यमनसो नवभागम् । अग्रमे भवति सङ्कलिरजः कूबरोऽनि जयोऽथ रथाङ्गे । सन्धिभेऽर्धकृतिरन्तरसन्धौ नीतिरिष्टमनसो ननु गर्भे । अथ रथलक्षणमुक्तं "पुष्ये पुनर्वसुज्येष्ठानुराधारेवतीदये । अश्विन्यादित्रिभे हस्तत्रितये रोहिणीस्थगे । सार्के सौम्यदिने सौम्यविलग्ने रथकर्म सत्" । [अमरः

रथकड्या स्त्री रथानां समूहः रथ+कञ्च् । रथसमूहे

रथक(का)र पु० रथं करोति कृ-अच्-अण् वा । १रथनिर्माणकारके (सूत्रधार) २वर्णसङ्करभेदे करणात् मार्हिण्याच्जाते पुंस्त्री० । [अमरः ।

रथकुटुम्बिन् पु० रथस्य कुटुम्बीव चालकत्वात् । सारथौ

रथगर्भक पु० रथस्य गर्भमिव इवार्थे कन् । १कर्णीरथे २स्कन्धवाह्ययाने (पालकी) हेमच० ।

रथगुप्ति स्त्री रथस्य गुप्तिः शस्त्रवारणार्थं रक्षा उपचारात् तत्स्थानम् । रथस्य शस्त्रवारणार्थे गुप्तस्थाने अमरः ।

रथचरण पु० रथस्य चरण इव गतिहेतुत्वात् । १रथचक्रे तन्नामनामके २चक्रवाकविहगे पुंस्त्री० शब्दर० स्त्रियां ङीष् । रथपादादयोऽत्र । [हंसे अमरः ।

रथद्रु पु० रथनिर्माणाय द्रुः रथनामको वा द्रुः । तिनिशवृक्षे

रथन्तर त्रि० रथेन तरति तॄ-खच् सुम् च । १रथेनतरि । "अश्विना यूयं" इत्यस्यार्चि गीते २सामभेदे न० । "स्वरादिविशेषानुपूर्वीभावस्वरूपे कृष्णचरस्यातिरिक्तं यत् गानम् तद्रथन्तरम्" सायणभाष्यम् । "बार्हतेऽह्नि स्तुवन् साम ज्येष्ठसाम रथन्तरम्" इत्युपक्रमे "पञ्चिमे द्वारपालौ तु पठेतां सामसामनी" इति पा० ।

रथयात्रा स्त्री रथेन यात्रा । आषाढ़शुक्लद्वितीयायां जग-

आधस्य रथेन २आत्मायां २तत्र कर्त्तव्ये उत्सवभेदे च ।

रथाङ्ग न० अङ्ग्यते गम्यतेऽनेन अनि करणे घञ् ह्रस्व० । १चक्रे । रथाङ्गशब्दः वाचकत्वेनाख्यस्य अच् । २चक्रवाके पुंस्त्री० अमरः स्त्रियां ङीष् ।

रथाङ्गपाणि पु० रथाङ्गं चक्रं सुदर्शनं पाणौ यस्य । चक्रधरे विष्णौ हेमा० । [ष्ठे यङ्लुगन्तः ।

रथाम्र पु० रथ इवाभ्रियतेऽसौ आ+भृ-मूलवि० क । वेतस-

रथाम्रपुष्प पु० अम्रमिव पुष्पमस्य रथनामकोऽम्रपुष्पः कर्म० । वेतसवृक्षे भरतः । [२रथेन युद्धकारके च हेमच० ।

रथारोहिन् पु० रथमारोहति आ+रुह णिनि । १रथिनि

रथिक पु० रथो युद्धसाधनत्वेनाख्यस्य ठन् । १रथिनि २तिनिशवृक्षे च राजनि० । रथिर । रथिर । रथिन । रथिन् । रथिन् एतेऽत्र । [उपावियत्" गीता ।

रथोपस्थ न० रथस्य उपस्थ इव । रथमध्ये । "रथोपस्थ

रथ्य पुंस्त्री० रथं वहति यत् । १रथवाहके घोटके अमरः स्त्रियां ङीष् । रथस्येदं यत् । २रथसम्बन्धिनि चक्रादौ त्रि० हेमच० । डाक्षायणः "वध्र्यं आद्वायोरिति धर्मण्यं प्रतिमद्भ्यो यात्" "रथ्यं रथसम्बन्धि धर्मण्यं चोदक्षिरणप्रादिनिर्मितम्" तास्यु-ब्रा० १।७।२भा० । रथस्य तद्गमनस्य योग्या गतिः । ३प्रशस्तपथे अभ्यन्तरमार्गे स्त्री अमरः । रथानां समूहः यत् । ४रथसमूहे च स्त्री अमरः । ५आवर्त्तन्यां स्त्री मेदि० । ६मार्गमात्रे ७वत्सरे च स्त्री हेमच० । [रेदतुः ।

रद उत्खाते भ्वा० प० सक० सेट् । रदति अरादीत् अरदीत् ।

रद पु० रदति उत्खनति रद-अच् । १दन्ते । भावे घा० अप् । २उत्खनने मेदि० ।

रदच्छद पु० द्वि० व० । रदान् आदृणाति छद-णिच्-घ ह्रस्वः । ओष्ठयोः कारा० । रदनादिच्छादयोऽस्यत्र ।

रदन पु० रद-करणे ल्यु । १दन्ते अमरः । भावे ल्युट् । २विदारणे । [स्वत् अदित् वेट् रधिता रद्धा ।

रध हिंसने पाके च दि० पर० सक० । रध्यति अरदित् अर-

रनज रागे (वर्णान्तराधाने) सक० आसक्तौ अक० भ्वा० उभ० अनिट् । रजति ते अराङ्क्षीत् अरङ्क्त । घटा० रञ्जयति लक्षरञ्जने तु रजयति ।

रनज रागे आसक्तौ दिवा० उभ० सक० अनिट् । रज्यति रज्यते अराङ्क्षीत् अरङ्क्त । घटा० रञ्जयति रजयति ।

रन्तिदेव पु० रम-संज्ञायां तिक् कर्म० । १विष्णौ मेदि० । २चन्द्रवंश्ये नृपभेदे इक्ष्वाकुरे च पुंस्त्री० यङ्लुगन्त० स्त्रियां ङीष् ।

रन्तु पु० रम-आधारे तुन् । १वर्त्मनि २नद्याञ्च मेदि० ।

रन्धन न० रध-पाके ल्युट् नुमागमः । "पाके सुरहर ! रन्धनसमये" इत्युज्ज्वटः । "रन्धनाय स्यात्" त्रि० कौ० ।

रन्ध्र न० रम-क्विप् ष्ट-भू व० क कर्म० । १छिद्रे २दूषणे मेदि० ज्योतिषोक्ते १लग्नतोऽष्टमस्थाने च । [ष्ठे राजनि० ।

रन्ध्रकण्ट पु० रन्ध्रे रन्ध्रे कण्टः कण्टकोऽस्य । जालबद्धुरक-

रन्ध्रबभ्रु पु० रन्ध्रे गर्त्ते बभ्रुरिव । उन्दुरौ त्रिका० ।

रन्ध्रवंश पु० रन्ध्रबहुलो वंशः शाक० त० । (नलताँश) वंशभेदे । "वंशो त्वन्ध्रौ कषायौ च किञ्चित्तिक्तौ च शीतलौ । मूत्रकृच्छ्रप्रमेहार्शःपित्तदाहास्रनाशनौ । विशेषात् रन्ध्रवंशस्तु दीपनोऽजीर्णनाशकः । रुचिकृत् पाचनो रूक्षः शूलघ्नो गुल्मनाशनः" राजनि० । [ररास रेषतुः ।

रप व्यक्तवाक्ये भ्वा० प० सक० सेट् । रपति अरापीत् अरपीत्

रफ गतौ हिंसे च भ्वा० प० सक० सेट् । रफति । अरफीत् अराफीत् । इदितोऽयम् । रम्फति अरम्फीत् रम्फितेति ।

रब गतौ सक० प० शब्दे अक० आ० भ्वा० सेट् इदित् । रम्बति ते अरम्बीत् अरम्बिष्ट ।

रभ औत्सुक्ये भ्वा० आ० अक० अनिट् । रभते अरब्ध रेभे आ+आरम्भे सक० । अनिट्त्रजादौ आर्द्धधातुके सुम् । आरम्भः आरम्भणम् । लिटि तु आरेभे ।

रभ शब्दे भ्वा० आ० अक० सेट् इदित् । रम्भते अरम्भिष्ट ।

रभस पु० रभ-असच् । १वेगे २हर्षे मेदि० इकोतुक्सौ ४पौर्वापर्य्याविचारे च अमरः । कर्त्र घाद्यच् । ५वेगादियुक्ते त्रि० ६कोपकारकभेदे पु० । ७अहति त्रि० निघ० ।

रम क्रीडायां भ्वा० प० अक० अनिट् । रमते विरमति उपरमति अरंस्त उपारंसीत् । ह्वा सेट् । णिचि रमयति । ज्वला० ण रमः रामः ।

रम पु० रम-अच् । १कान्ते २अशोकवृक्षे ३कामदेवे च मेदि०

रमठ न० रम-अटन् । छिक्कुनि स्वार्थे अण् । अतैव न० अमरः

रमठध्वनि पुं० रमठ इतिशब्देन ध्वन्यते ध्वन-इन् । छिक्कुनि शब्दच० ।

रमण पु० रमयति-रम-णिच् ल्यु । १कामदेवे २पत्यौ । "रमण ! त्वामनुयामि यद्यपि" कुमा० । ३गर्दभे पुंस्त्री० हेमच० स्त्रियां ङीष् । ४हरणे शब्दच० ५प्लक्षद्वीपे (निम्ब)राजनि० । जम्बुद्वीपान्तर्गते ६रम्यकनाम्नि वर्षे च । रम-भावे ल्युट् । ७सुरते न० । करणे ल्युट् । टोलमूले न० मेदि० । ९जघने न० हेमच० । रमयति-जनया ल्युट् ङीष् । १०नार्याम् स्त्री ११उत्तमनार्याम्

मेदि० । १२वाद्याख्यवृक्षे च स्त्री शब्दचन्द्रिकाकोषः ।

रमणीय त्रि० रम्यतेऽत्र रम-आधारे-अनीयर् । सुन्दरे । ततो भावे गुण् । रामणीयक तद्भावे न० ।

रमति पु० रम-अतिच् । १नायके २स्वर्गे मेदि० । ३कामे शब्दर० ४काले ५कामदेवे सि० कौ० ।

रमल न० ज्यौतिःशास्त्रभेदे यत्र प्राश्नकालेपणेन लग्ननिर्णय-द्वारा प्रश्नादिफलप्रतिपादनम् ।

रमा स्त्री रमयति रम-अच् । १लक्ष्म्याम् मेदि० २कलकि-भार्यायां कलकिपु० । ३शोभायां राजनि० ।

रमापति पु० ६त० । नारायणे रमानाथतत्कान्तादयोऽप्यत्र

रमाप्रिय न० ६त० । १पद्मे शब्दच० । २विष्णौ पु० ।

रम्भ पु० रभि-अच् नुम् । १रेणौ २असुरभेदे च मेदि० । स च महिषासुरजनकः कालिकापु० । ४कदल्याम् ५अप्सरोभेदे स्त्री मेदि० ६वेश्यायां धरणिः । ७गवां ध्वनौ हेमच० । ८गौर्यां च स्त्री शब्दर० । ९उत्तरस्यां दिशि निघण्टुः ।

रम्भातृतीया स्त्री रम्भा गौरी ६त० । १मार्गशीर्षशुक्लतृतीयायाम् उपचारात् तत्र कर्त्तव्ये गौरीपूजाङ्गके २व्रतभेदे च ।

रम्य त्रि० रम्यतेऽत्र यत् । १सुन्दरे मेदि० २बलकरे जटा० ३चम्पके पु० मेदि० ४वकवृक्षे पु० शब्दच० । ५पटोलमूले न० मेदि० । संज्ञायां कन् । ६प्रधानधातौ शुक्ले न० जटा० । जम्बुद्वीपस्थेषु नवसु वर्षेषु मध्ये "दक्षिणेन सुमेरोस्तु श्वेतस्य चोत्तरेण च वाद्यं रम्यकं नाम" इत्युक्ते ७वर्षभेदे ।

रम्यपुष्प पु० रम्याणि पुष्पाण्यस्य । शालमलीवृक्षे राजनि० ।

रम्भा स्त्री रम्यतेऽत्र यत् । १स्थलपद्मिन्याम् राजनि० । २रावो च मेदि० । [अरविध्वम् ।

रय गतौ भ्वा० आ० सक० सेट् । रयते अरयिष्ट । अरयिढम्

रय पु० रय-अच् । १वेगे अमरः । २प्रवाहे च ।

रयि न० रय-इन् । १जले २धने च निघण्टुः । [५।२१

ररट न० ललाट+पृषो० । ललाटे "विष्णोररटमसि" यजु०

रलक पु० रम-क्विप् मलोपे लुक् ला-क कर्म० । १स्टगभेदे शुक्रटः । २कम्बले अमरः ३नेत्रलोम्नि च भूभूतिः ।

रव गतौ भ्वा० आ० सक० सेट् इदित् । रवते अरविष्ट ।

रव पु० रु-भ्वनौ अप् । शब्दे अमरः ।

रवण पुंस्त्री० रु-युच् । १कोकिले सि० कौ० २वृक्षे च हेमच० स्त्रियां ङीष् । ३कांस्ये न० हेमच० । ४शब्दकारके ५तीक्ष्णे ६चञ्चले ७अशुद्धे च त्रि० शब्दर० ।

रवि पु० अव-इन् रुट्च् । १सूर्य्ये शब्दर० । २अर्कवृक्षे च "अचिरात्तु प्रकाशेन अवनात् स रविः स्मृतः" मत्स्यपु० तन्नामनिरुक्तिः । ३द्वादशसंख्यायाम् ।

रविज पु० रवेर्जायते जन-ड । १शनौ २सावर्णिमनौ ३वैवस्वते मनौ ४सुग्रीवे वानरे ५यमे च ६यमुनायां स्त्री रवितनयादयोऽप्यत्र । [च शब्दच० ।

रविनाथ न० रविर्नाथः प्रकाशकत्वात् यस्य । १पद्मे २वन्धूके

रविनेत्र पु० रविर्नेत्रं यस्य । विष्णौ रविलोचनादयोऽप्यत्र । "चक्षुः सूर्य्यो अजायत" पुरुषसू० उक्तेस्तस्य तथात्वम् ।

रविप्रिय न० ६त० । १रक्तकमले २ताम्रे च ३करवीरे पु० राजनि० ४आदित्यपर्णे ५जलचरे पु० शब्दच० ।

रविरत्न न० रवेः प्रियं रत्नम् श० त० । माणिक्ये राजनि० ।

रविलौह न० रवेः प्रियं लौहं धातुः । ताम्रे राजनि० ।

रश खने सौ० पर० अक० सेट् । रशति अरशीत् अरशीत्

रशना स्त्री अश-युच् रशादेशः । १काञ्च्याम् २जिह्वायाञ्च शब्दर० । ३दामनि च "इमामगृभ्नन् रशनामृतस्य" श्रुतिः तत्रार्थे दन्त्यमध्य एवेत्यन्ये ।

रश्मि पु० अश-मि धातोरुट् रश-मि वा । १किरणे २अश्वादिदामनि ३पद्मे न० मेदि० ।

रवेः रश्मिभेदादिकार्य्यं मत्स्यपु० १०२ अ० उक्तं यथा "तेजोऽभि. सर्वलोकेभ्यो ह्यादत्ते रश्मिभिर्जलम् । समुद्वाहवायुसंयोगाद् वहन्त्यापो गभस्तयः । ततस्तु पयसां काले परिवर्त्तन् दिवाकरः । नियच्छत्यपो मेघेभ्यः शुक्लाशुक्लैस्तु रश्मिभिः" ।

कूर्मपु० ४अ० विस्तरेणोक्तं यथा

"एवमेष महादेवो देवदेवः पितामहः । करोति नियतं कालं कालात्मा ह्यीश्वरी तनुः । तस्य ये रश्मयो विप्राः सर्वलोकप्रदीपकाः । तेषां श्रेष्ठाः पुनः सप्तरश्मयो ह्यहयोनयः । सुषुम्णोहरिकेशश्च विश्वकर्मा तथैव च । विश्वव्यचाः पुनश्चान्यः सम्पद्वसुरतः परः । अर्वाग्वसुरिति ख्यातः खराड्न्यः प्रकीर्त्तितः । सुषुम्णः सूर्य्यरश्मिस्तु पुष्णाति शिशिरद्युतिम् । तिर्य्यग्गूर्द्ध्वप्रचारोऽसौ सुषुम्णः परिगीयते । हरिकेशस्तु यः प्रोक्तो रश्मिर्नक्षत्रपोषकः । विश्वकर्मा तथा रश्मिर्बुधं पुष्णाति सर्वदा । विश्वव्यचास्तु यो रश्मिः शुक्रं पुष्णाति नित्यदा । सम्पद्वसुरिति ख्यातं स पुष्णाति च लोहितम् । बृहस्पतिं प्रपुष्णाति रश्मिरर्वाग्वसुः प्रभोः । शनैश्चरं प्रपुष्णाति सप्तमश्च खराट् तथा । एवं सूर्य्यप्रभावेन सर्वा नक्षत्रतारकाः । वर्द्धन्ते वर्द्धिताः

नित्यं नित्यमाप्याययन्ति च। दिव्यानां पार्थिवानाञ्च नैयानाञ्चैव सर्वशः। आदानाच्चित्यमादित्यस्तेजसा तमसां प्रभुः। आदत्ते स तु नाड़ीनां सहस्रेष्य समन्ततः। नाटेयांश्चैव सानुष्ठान् कूप्यांश्चैव सहस्रकम्। स्थावरान् जङ्गमांश्चैव यच्च किञ्चादिकं पयः। तस्य रश्मिसहस्रन्तु शीतवर्षोष्णनिःस्वनम्। तासां चतुःशतं नाड्यो वर्षन्ते चित्रमूर्त्तयः। छन्दनाश्चैव वाह्याश्च कीर्तनाभ्रकणास्तथा। कल्पता नामतः सर्वा रश्मयो दृष्टिसर्जनाः। हिमोद्धाश्च नामतो रश्मयश्चित्रशतं पुनः। वप्रो नेष्यश्च पैप्यश्च हृदादिन्यो हिमसर्जनाः। चन्द्रमा नामतः सर्वाः पीताभाः स्वर्णभस्तयः। शुक्राश्च ककुभश्चैव गावो विश्वभृतस्तथा। शुक्राख्या नामतः सर्वास्त्रिविधा वर्षसर्जनाः। स्वयं बिभर्त्ति ताभिः स मनुष्यपितृदेवताः। मनुष्यानौषधेनेह स्वधया च पितॄनपि। अन्नेन सुरान् सर्वान् त्रिधा वीर्यमयत्यसौ। वसन्ते शीघ्रगे चैव गतैः सन्धत्ते त्रिभिः। शरद्यपि च सर्वांस्तु चतुर्भिः स प्रवर्षति। हेमन्ते शिशिरे चैव हिमसृत्सृजति त्रिभिः। वरुणो माघमासे तु सूर्यः पूषा तु फाल्गुने। चैत्रे मासि भवेदीशो धाता वैशाखतापनः। ज्यैष्ठमासे भवेदिन्द्रः आषाढ़े सविताऽरविः। विवस्वान् श्रावणे मासि प्रौष्ठपद्यां भगः स्मृतः। पर्जन्योऽश्वयुजि त्वष्टा कार्त्तिके मासि भास्करः। मार्गशीर्षे भवेन्मित्रः पौषे विष्णुः सनातनः। पञ्चरश्मिसहस्राणि वरुणस्यार्ककर्मणि। षड्भिः सहस्रैः पूषा तु देवेशः सप्तभिस्तथा। धाता दशभिः सहस्रैस्तु नवभिस्तु शतक्रतुः। विवस्वान् दशभिः याति पात्येकादशभिर्भगः। सप्तभिः क्षपते मित्रस्त्वष्टा चैवाष्टभिस्तपेत्। अर्य्यमा दशभिः याति पर्जन्यो नवभिस्तपेत्। षड्भीरश्मिसहस्रैस्तु विष्णुस्तपति विश्वकृत्। वसन्ते कपिलः सूर्यो ग्रीष्मे काञ्चनसंप्रभः। श्वेतो वर्षासु वर्णेन शरदि शरदः प्रभुः। हैमन्ते ताम्रवर्णः स्यात् शिशिरे लोहितो रविः। ओषधीषु बलं धत्ते स्वधामपि पितृष्वथ। सूर्योऽमरत्वममृतत्वं त्रिषु नियच्छति। अन्ये चाष्टौ ग्रहाः ज्ञेयाः सूर्येणाधिष्ठिता द्विजाः!। चन्द्रमाः सोमपुत्रश्च शुक्रश्चैव बृहस्पतिः। भौमो भानुसुतो राहुः केतुश्चापि चाष्टमः। सर्वे ध्रुवे निबद्धा ये यन्त्रास्ते वातरश्मिभिः। भ्रामयन्ति यथायोगं भगणन्यञ्चुदिवाकरम्"।

रस शब्दे भ्वा० प० अक० सेट्। रसति अरासीत् अरसीत्। रराष रेसतुः।

रस आस्वादे अ० चु० उ० सक० सेट्। रसयति ते अररसत त

रस पु० रस्यते रस–अच्। आस्वाद्ये रसनेन्द्रियग्राह्ये १मधुर्य्यादिगुणभेदे २देहस्थे भुक्तास्वादेः प्रथमपरिणामे ३सारे च "ओषधीनां रसः" इति ताण्ड्यब्रा०। "रसः सारः" भा०। ४धातुभेदे पारदे ५माधुर्य्यादरसवति गुड़ादौ त्रि० ६पुष्पस्य मधुनि ७अलङ्कारोक्ते विभावानुभावसञ्चारिभावव्यङ्ग्ये रत्यादिस्थायिभावके शृङ्गारादौ। दर्विमे ९वीर्य्ये १०रागे ११द्रवे अमरः १२जले च १३गन्धरसे पुं० मेदि० १४अम्ले च निघण्टुः।

पारदशब्दे ४१११ पृष्ठादौ रसयोगनादि द्रष्टव्यम्।

देहस्थधातुहेतुरसस्वरूपादि भावप्र० उक्तं यथा

"यत्पाको रसधातुर्यस्ततोऽभवदपां रसः। सद्रवं सकलं देहं रसतीति रसः स्मृतः।" अथ रसस्य स्वरूपमाह "सम्यक् पक्वस्य भुक्तस्य सारो निर्गदितो रसः। स तु स्निग्धः स्थितः शीतः स्वादुः स्निग्धश्लथो भवेत्। सारो यथा गुड़मधूकपुष्पबकुलत्वग्बदरीमूलादिभवः सारो मदिरा। अथ रसस्य स्थानमाह "सर्वदेहचरस्यापि रसस्य हृदयं स्थलम्। समानमरुता पूर्वं यदयं हृदये धृतः।" अथ रसस्य कर्माण्याह "आरुह्य धमनीर्गत्वा धातून् सर्वानयं रसः। पुष्णाति तदनुरूपेण स्वीयैर्व्याप्नोति च तनुं गुणैः।" गुणैः शीतस्निग्धपोषकत्वगुणैः शीतस्निग्धपोषकत्वैः "मन्दवह्निर्विदग्धस्य कटुर्वाल्पो भवेद्रसः। स कुर्य्यादुबद्धलान् रोगान् विषूचिकां करोत्यपि।" अलङ्कारशब्दे द्रष्टव्यम्।

अलङ्कारशास्त्रोक्तो रसो नवविधः। "शृङ्गारहास्यकरुण रौद्रवीरभयानकाः। बीभत्सोऽद्भुत इत्यष्टौ रसा ज्ञानसत्तया मतः।" सा० द० तल्लक्षणं तत्रैव यथा "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा। रसतामेति रत्यादिः स्थायी भावः सचेतसाम्"। "विभावादयो वक्ष्यन्ते। सात्त्विकास्तानुभावरूपत्वात् न पृथगुक्ताः। व्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतः व्यक्तीकृत एव रसो न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते। तदुक्तं लोचनकारैः "रसाः प्रतीयन्त इति लोदनं पचतीतिवद्व्यवहार इति"। अत्र च रत्यादिपदोपादानादेव प्राप्ते स्थायित्वे पुनः स्थायिपदोपादानं रत्यादीनामपि रसान्तरेऽस्थायित्वप्रतिपादनार्थम्। ततश्च हासशोकोद्वेग

ङ्गारवीरादौ व्यभिचारित्व एव । तदुक्तम् "रसावस्थः परं भावः स्थायितां प्रतिपद्यते" इति । अस्य स्वरूपकथनपूर्वं आस्वादप्रकारः कथ्यते । "सत्त्वोद्रेकादखण्ड-स्वप्रकाशानन्दचिन्मयः । वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वाद-सहोदरः । लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः । स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः । रजस्तमोभ्या-मसृष्टं मनः सत्त्वमिहोच्यते" इत्युक्तप्रकारो ब्राह्मस्पर्शविसुखतापादकः कथनान्तरो धर्मः सत्त्वं तस्यो-द्रेकः रजस्तमसो अभिभूयाविर्भावः । अथ च हेतुस्तथा-विधालौकिकक्काव्यार्थपरिशीलनम् । अखण्डं इत्येक एवायं विभावादिरत्यादिप्रकाशसुखचमत्कारात्मकः । अत्र हेतुं वक्ष्यामः । स्वप्रकाशत्वादपि वक्ष्यमाणरीत्या । चिन्मय इति स्वरूपार्थे मयट् । चमत्कारश्चित्तविस्तार-रूपो विस्मयापरपर्यायः । तत्प्राचुर्यात्तात्कालिकभावकत्वप्रतिपा-दकहृदयसंवादौचित्यरचितकविपरिकल्पितसत्त्वशब्दाभिधेयत्वेन सत्त्वं । तदाह धर्मदत्तः स्वग्रन्थे

"रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते । तच्चमत्कार-सारत्वे सर्वत्राप्यद्भुतो रसः । तदाहुरद्भुतमेवाह कृती नारायणो रसमिति" । "कैश्चिदिति प्राक्तनपुण्यवद्भिः सङ्गतं "पुण्यवन्तः प्रमिण्वन्ति योगिवद्रसमन्तरभिति" यद्यपि "स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः" इत्युक्तदिशा रसस्यास्वादानतिरिक्तत्वमुक्तं तथापि "रसः स्वाद्यते" इति कार्मणिकं भेदमररीकृत्य कर्मकर्तरि वा प्रयोगः । तदुक्तम् "रसमानतामात्रसारत्वात् प्रकाश-शरीरादनन्य एव हि रसः" इति । एवमन्यत्रापीवं-विधस्थलेषूपचारेण प्रयोगा ज्ञेयाः । नन्वेतावता रस-स्यास्वाद्यत्वमुक्तं भवतीति व्यञ्जनायाश्च ज्ञानविशेष-त्वाद् द्वयोरैक्यमापतेत् ततश्च "स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः । यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्" इत्युक्तदिशा घटप्रदीपवद् व्यङ्ग्यव्यञ्जकोः पार्थक्यमेवेति कथं रसस्य व्यङ्ग्यतेति चेत् सत्यमुक्तम् अत एवाहुः "विलक्षण एवायं क्रतिज्ञप्तिभेदेभ्यः स्वादनाख्यः कश्चिद्व्यापारः । अत एव हि रसनास्वादनचमत्करणादयो विलक्षणा एव व्यपदेशा इति अभिधादिविलक्षणव्यापारतायाः प्रसाधन-युक्तिभिरस्माभी रसादीनां व्यङ्ग्यत्वमुक्तं भवतीति । नन्व तर्हि करुणादीनां रसानां दुःखमयत्वाद्रसत्वं न स्यादि-त्युच्यते" "करुणादावपि रसे जायते यत् परं सुखम् । तच्चेतस्यनुभवः प्रमाणं तत्र केवलम्" । आदिशब्दाद् भीभत्सभयानकादयः । तथाप्यसङ्कुदयानां सुखसङ्घाय पश्चान्तरमुच्यते । "किन्तु तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः" । न हि कश्चित् सचेता आत्मनो दुःखाय प्रवर्त्तते कदाचिदपि च कस्यापि तथा-निवेशप्रवृत्तिदर्शनात् । अनुपपत्तिकरणाच्च । "तथा रामायणादीनां भविता दुःखहेतुता" । "कश्चरस्य दुःखहेतुत्वात् करुणरसप्रधानरामायणादिप्रबन्धानामपि दुःखहेतुत्वप्रसङ्गः स्यात् । नन्व कथं दुःखकारणेभ्यः सुखोत्पत्तिरित्याह "हेतुत्वं शोकहर्षादेर्गतेष्वो शोक-संभवात् । शोकहर्षादयो लोके यान्तां नाम लौ-किकाः । अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात् । सुखं संजायते तेभ्यः सर्वेभ्योऽपीति या श्रुतिः" । ये खलु रामायणादयो लोके दुःखकारणानि इत्यु-च्यन्ते त एव हि काव्यनाट्यप्रबन्धगर्भिता अलौकिकविभा-वनव्यापारवत्ता कारणशब्दवाच्यत्वं विहायालौकिक-विभावशब्दवाच्यत्वं भजन्ते । तेभ्यश्च श्रुते इत्यनन्ता-दिभ्य एव सुखमेव जायते । अतश्च लौकिकशोकहर्षा-दिकारणेभ्यो लौकिकशोकहर्षादयो जायन्त इति लोक एव प्रतिनियमः । काव्ये पुनः सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते इति नियमाभ्युपगमे कश्चिद्-दोषः । कथं तर्हि रुक्मिणीहरणादिचरितस्य काव्यनाट्य-योरपि दर्शनश्रवणाभ्यामनुपातादयो जायन्त इत्युच्यते । "अनुपातादयस्तद्वदुत्तत्वाच्चेतसो मताः" । तर्हि कथं काव्यतः सर्वेषामेवौत्सुक्यादयो रसाभिव्यक्तिर्न जायत इत्याह "न जायते तदास्वादो विना रत्यादिवासनाम्" । वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः । तत्र यदि काव्या न स्यात्कोमियजरन्तीसांसकादीनामपि सा स्यात् । यदि द्वितीया न स्याद् यद्रागिणामपि कोमा-सिकुसुंदुबोधो न दृश्यते तत्र स्यात् । उक्तञ्च धर्मदत्तेन "सवासनानां सभ्यानां रसस्यास्वादनं भवेत् । निर्वा-सनास्तु रङ्गान्तःकाष्ठकुड्याश्मसन्निभाः" इति । नन्व कथं रामादिरत्यादुद्बोधकारणैः सीतादिभिः सामाजिक-रत्यादुद्बोध इत्युच्यते "व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः । तत्प्रभावेण यस्यासन् प्राग्वोधिप्लव-नादयः । प्रमाता तद्भेदेन स्वात्मानं प्रतिपद्यते" । "नन्व कथं मनुष्यमात्रस्य सकलसहृदयानादावुत्साहोद्बोध इत्यु-च्यते "सत्त्वोद्रेकादिसकलबोधः साधारण्यात्तिमात्रतः ।

नयाम्पि वस्तुदादिलक्षणादौ न दृश्यते। रत्यादेरपि साधारण्येन प्रतीयत्व इत्याह साधारण्येन रत्यादिरपि तद्वत् प्रतीयते। रत्यादेरपि स्वात्मगतत्वेन प्रतीतौ सभ्यानां मौढ्यादिदोषः परगतत्वेन चारस्वतापात्. विभावादेरपि प्रथमतः साधारण्येन प्रतीयन्ते इत्याह "परस्य न परस्येति ममेति न ममेति च। सहृदयादे विभावादेः परिच्छेदो न विद्यते"। ननु तथापि कथमेषामलौकिकत्वमेतेषां विभावादीनामित्युच्यते "विभावनादिव्यापारसलौकिकमुपेयुषाम्। अलौकिकत्वमेतेषां प्रमुखं नाट्य दूषणम्"। आदिशब्दादनुभावव्यभिचारयोः। तत्र विभावनं रत्यादेर्विशेषेणास्वादाङ्कुरयोग्यतानयनम्। अनुभावनमेवम्भूतस्य रत्यादेः सामान्यरूपतया भावनम्। व्यभिचारं तथाभूतस्यैव तस्य लक्ष्यरूपतया चारणम्। विभावादीनां व्यापारस्य कारणकार्यसहकारित्वे सत्यपि रसोद्बोधे कारणत्वमित्युच्यते "कारणं कार्यसहकारिरूपा अपि हि लोकतः। रसोद्बोधे विभावाद्याः कारणान्येव ते मताः"। ननु तर्हि कथं रसाद्यादे तेषामेव प्रतिभास इत्युच्यते "प्रतीयमानः प्रथमं विभावैः केनचिद्यते। ततः संवलितः सर्वो विभावादिः सचेतसाम्। प्रधानकरणव्यापारत्वात्तस्य भावोरसो भवेत्"। यथा खण्डखण्डरिचादीनां पश्चे खण्डादपूर्व एव कश्चिद्रागादिः प्रधानकरणे संजायते विभावादिसम्बन्धादिरपि तथेत्यर्थः। ननु यदि विभावानुभावव्यभिचारिभिर्मिलितैरेव रसस्य अयं रसश्च द्वयोर्वा वस्तुनोरपि स्यादित्युच्यते "वस्तुन्यथवेदृविभावादेर्द्वयोरक्ष्यो वा भवेत्। अटिल्यत्वसमारोपे तदा दोषो न विद्यते"। अन्यथा समारोपस्य प्रकरणादिवशात्। यथा "लोचनं सरदिन्दुकान्ति वदनं बाहू नवपल्लवौ। विम्बोष्ठतनुतनुतरः पार्श्वं प्रच्छदे एव। मध्यः पाणिमितो मितश्च जघनं शादाद्रुरम्भाकृती। स्तम्भौ निर्दयवेधसा नवमयः कृत्वा मनस्विस्त्रियाः"। "अस्य मालविकाभिमित्रतोऽन्यस्मिन्नासक्तस्य मालविकाविषयमालम्बनविभावमात्रवर्णने वस्तुन्यालोचनसमुद्बोधनाभावात्तस्य नयनविस्फारादीनामोचित्यादेवाभावः। एवमन्यत्रापीत्येतत्। "अनुभावैर्भवेत्तस्य रसः" इति वदतः प्रत्याह "वाचिकाङ्गिकसात्त्विकत्वात् स्वान्तराधतया तथा। अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत्"। सीताहिदर्शनादिजो रामादिरत्यादेरनुद्बोधो हि यदि मितो लौकिको, नाट्यप्रयोक्तृदर्शनादिः स्वान्तराधत्व। अतः कथं रसरूपतामियात्। रसस्तन्मीलितत्वविलक्षणधर्मकत्वात्। अनुकार्यगतत्वञ्च निरस्यति "शिक्षाभ्यासादिमान् य रामादेः रूढ्यपत्। दर्शयन् सर्वथो नैव रसस्यास्पदो भवेत्"। किञ्च काव्यार्थभावने नाटकमपि सभ्यसहृदयम्। यदि पुनर्नटोऽपि काव्यार्थभावनया रामादिरूपतामात्मनो दधेत् तदा सोऽपि सभ्यमध्य एव गण्यते"।

कृष्णगतमधुरादिरसकारणादिकं दृष्टान्तयति यथा "अथातो रसविशेषविज्ञानीयमध्यायं व्याख्यास्यामः। आकाशपवनदहनतोयभूमिषु यथाक्रमेणोत्तरगुणाः शब्दस्पर्शरूपरसगन्धाः। शब्दादयो रसः परस्परसंसर्गात् परस्परानुप्रवेशाच्च सर्वेषु सर्वेषां सान्निध्यमस्त्युत्कर्षापकर्षयोगेषु व्यपदेशाः। तत्र श्रोत्राश्रयः शब्दः शब्दवान् आकाशगुणः। त्वगाश्रयः स्पर्शः स्पर्शवान् वायुगुणः। चक्षुराश्रयो रूपं रूपवत् तेजोगुणः। रसनाश्रयो रसो रसवान् आपो गुणः। घ्राणाश्रयो गन्धो गन्धवान् पृथिवीगुणः। तत्र शब्दो द्विविधः आहार्योऽनाहार्यश्च। तत्राहार्यो वीणादिजः। अनाहार्यो वैद्युतः। स्पर्शस्त्रिविधः शीतोष्णानुष्णाशीतश्च। तत्राग्निसंयोगाद्युष्णः। हिमसंयोगात् शीतः। सोमसंयोगादनुष्णाशीतः। रूपं त्रिविधं शुक्लं नीलं पीतं लोहितं हरितं कपिलं कर्बुरं चेति। तत्र शुक्लं फेनशङ्खकुन्दशशिकरजतादिषु। नीलं शिरीषकुसुमप्रावृट्कालीनवनराजिजीमूतादिषु। पीतं हरितालहरिद्रादिषु। लोहितं शशरुधिरप्रवालादिषु। हरितं शुकपक्षशाद्वलादिषु। कपिलं गोमयादिषु। कर्बुरं शबलवर्णेषु। रसाः षड्विधाः मधुराम्ललवणतिक्तकटुकषायाः। तत्र मधुरो रसः पृथिव्यप्तेजोवायुगुणोत्कर्षात्। अम्लः पृथिव्यग्नितेजोगुणोत्कर्षात्। लवणः पृथिव्यग्नितेजोगुणोत्कर्षात्। तिक्तः पृथिव्याकाशवायुगुणोत्कर्षात्। कटुरग्निवायुगुणोत्कर्षात्। कषायः पृथिव्याकाशवायुगुणोत्कर्षात्। तत्र मधुरो रसः श्लेष्मणो वृद्धिकरः। अम्लो रसः क्लेदनः। लवणो रसः स्वेदनः। तिक्तो रसः क्लेदमेदोवसालसीकारुधिरपूयविण्मूत्रस्वेदनाशनः। कटुरसो वातश्लेष्महरः। कषायो रसो मेदोरुधिरविण्मूत्रस्वेदस्तम्भनः। तत्र वायुराकाशवायुबाहुल्यात्। पित्तमाग्नेयं द्रवोष्णं तैक्ष्ण्यात्। सौम्यं दृष्टिः। स एव रसः शुक्लोमिमधुरगन्धवर्णो"।

रसकर्पूर म० रसेन कर्पूरमिव। (रसकपुर) कर्पूरसंज्ञे रसौषधिभेदे। तस्योत्पत्तिगुणा भावप्र० उक्ताः कर्पूररसशब्दे १७४१पृ० दृश्याः। [दृश्याः।

रसकेसर म०रसेन केसरमिव नामतोऽस्तित्वात्। कर्पूरे

रसगन्ध पुं० रसे गन्धोऽस्य। १बोले नागरङ्गे शिखा०। कपू

तत्रार्थे मत्वर्थ० २गन्धके च राजनि०।

रसगर्भ म० रसो गर्भे यस्य। विल्वधातुवृक्षे १रसाञ्जने अमरः। २हिङ्गुले च राजनि०। [राजनि०।

रसज्ञ पु० रसं पारदं वेत्ति ज्ञा-क। टङ्गणे (बोरागा)

रसज म० रसात् भुक्तान्नसारात् प्रथमधातोर्जायते जन-ड।

१रुधिरे यत्नच० अस्रकरणशब्दे दृश्यम्। रसात् रसु, प्रभृतेः क्वाच् जायते जन-ड। २शुक्रे पु० राजनि०।

३मद्यकोटे च पु० हेमच०। ४रसभवादयोऽन्ये।

रसज्ञा स्त्री रसं जानाति अनया ज्ञा-करणे यज्ञ्ञ् क।

१जिह्वायाम्, रसज्ञानसाधने जिह्वास्थानस्थेन्द्रिये अमरः
घा-क । रसज्ञातरि त्रि०।

रसज्ञ पु० रसेषु ज्ञेयेषु ज्ञः ज्ञेयः। १मधुररसे हेमच०
२शृङ्गाररसे च। [हेमच०।

रसतेजस् न० रसस्य भुक्तान्नसारस्य तेजः सारः। रुधिरे

रसदालिका स्त्री रसार्थं दल्यते दल-कर्मणि ण्वुल् गौरा०
ङीष् स्वार्थे क ह्रस्वः। पुष्पेक्षौ (पुडि आख)
राजनि०।

रसधातु पु० रसाख्यो द्रवरूपो वा धातुः। पारदे राजनि०

रसधेनु स्त्री दानार्थं कल्पितायाम् इक्षुरसनिर्मितायां धेनौ
धेनुशब्दे २६०६ पृ० दृश्यम्।

रसन न०रस-ल्युट्। १स्वादे २ध्वनौ च करणे ल्युट्। जिह्वायां
च मेदि०। "पित्तेन दूने रसने वितिक्तः नैषधम्।

रसना स्त्री रसतेऽनया रस-करणे ल्युट् अजा० टाप्।
१जिह्वायाम् अमरः। २राज्ञायां मेदि०। ३काञ्च्यां
हेमच०। ४रज्जौ च। [जिह्वायाम् हेमच०।

रसनेत्रिका स्त्री रसो नेत्रमिव अस्त्यस्याः ठन्। मनः-

रसपाकज पु० रसपाकेन जायते जन-ड। १गुडे राजनि०
२रुधिरधातौ च अमृतरसशब्दे दृश्यम्।

रसफल पु० रसो जलं फले यस्याः। नारिकेलवृक्षे शब्दर०।

रसमाणिक्य न० रसेन पारदेन माणिक्यमिव तत् पाकज-
त्वात्। स्वनामख्याते पदार्थे।

रसराज पु० रसेषु रसो वा राजेव श्रेष्ठत्वात् रसः द्रव द्रव
राजते वा। १पारदे रसनाथादयोऽस्यत्र। २रसाञ्जने च
राजनि०। [अस्य वः ङीप्। पाकस्थाने अमरः।

रसवती स्त्री रस आस्वाद्यद्रव्यमस्त्यादि अस्त्यर्थाम् मतुप्

रसशोधन न० रस पारदं द्रवीभूतं द्रव्यं स्वर्णादि वा शोध-
यति शुध-णिच्-ल्यु। १टङ्कणे (सोहागा) हेमच०
हैत०। २पारदशोधने च।

रसस्थान न० रसस्य पारदस्य स्थानम्। क्रिङ्कुले शब्दच०।

रससिन्दूर न० रसजातं सिन्दूरम्। पारदजाते सिन्दूरभेदे
तत्पाकविधिः भावप्र० उक्तो यथा
"शुद्धसूतस्य षट्भागान् भिनत्त्यागस्तुतुत्थम्। शुद्ध-
गन्धस्य भागैकं तावत् क्षिपेत्तन्मर्दकम्। अथ वा पारदा-
र्द्धं शुद्धगन्धकमेव हि। तयोः कज्जलिकां कृत्वाहिन-
स्यार्द्धं शुद्धगन्धकमेव हि। तयोः कज्जलिकां कृत्वाहिन-
मेकं विमर्दयेत्। मृत्तिकां वासया सार्द्धं कृत्वेदति-
यत्नतः। तथा वारत्रयं सम्यक् काचकूप्यां प्रलेपयेत्।
मृत्तिकां शोषयित्वा तु कूप्यां कज्जलिकां क्षिपेत्।
तां कूपीं वालुकायन्त्रे स्थापयित्वा रसं पचेत्। अग्निं
निरन्तरं दद्याद् यावद्दिनचतुष्टयम्। शङ्खोदादूर्ध्वं
संलग्नं सिन्दूररसदृशं रसम्"।

रसा स्त्री पाकजः रसो माधुर्यादिरूपोऽस्त्यस्याः अच्।
पृथिव्याम् अमरः। [रसाञ्जने राजनि०।

रसाग्रज न० रसस्य पित्तधातुद्रवस्याग्रात् जायते जन-ड।

रसाञ्जन न० रसजातं पित्तधातुजमञ्जनम्। स्वनामख्याते
"रीत्यान्तु ध्मायमानायां तत्किट्टन्तु रसाञ्जनम्। तदभावे
तु कर्त्तव्यं दर्वीकाभस्मसम्भवम्" इत्युक्ते १पदार्थे राजनि०
तद्विधिश्च भावप्र० उक्तो यथा
"दार्वीकाभस्मकं क्षीरं वाद्यं पञ्चगुणं जलम्। तद्वा
रसाञ्जनाख्यं तच्चेलयोः परमं हितम्। रसाञ्जनं कटु
क्षारविषनेत्रविकारहृत्। अक्ष्ण्यं रसायनं तिक्तं छेदनं
व्रणदोषहृत्"।

रसाढ्य पु० रसेन मधुररसेनाढ्यः। १आम्रातके राजनि०।
२रसवति त्रि०। [भागे अमरः।

रसातल न० रसायास्तलम्। पातालभेदे सप्तमे भूमेरधो-

रसाधिक पु० रसाय द्रवाय स्वर्णादिद्रावणाय अधिकः
आदीयमानत्वात्। १टङ्कणे रसेनाधिका। २काको-
दुम्बरिकायां स्त्री राजनि०। ३रसेनाधिके त्रि०। [रसे

रसान्तर न० अन्यो रसः मयूर० नि०। प्रकृतरसादन्यस्मिन्

रसाभास पु० रस इव आभासते आ+भास-अच्। "अनौ-
चित्यप्रवृत्तत्वे आभासौ रसभावयोः" सा० द० उक्ते
पश्वादिपरनायकादिगतशृङ्गारादौ रसे।
"अनौचित्यञ्चात्र रसानां भरतादिप्रणीतलक्षणानां साम-
ग्रीरहितत्वे सत्येकदेशयोगित्वोपलक्षणपरं बोध्यं तच्च
बालव्युत्पत्तये एकदेशतो दर्श्यते। "उपनायकसंस्थायां
मुनिगुरुपत्नीगतायाञ्च। बहुनायकविषयायां रतौ
तथाऽनुभयनिष्ठायाम्। प्रतिनायकनिष्ठत्वे तदुपदेशप्र-
वर्त्तित्वे गादिगते। शृङ्गारेऽनौचित्यं रौद्रे गुर्वादिगत-
कोपे शान्ते च स्त्रीनिष्ठे गुर्वाद्यालम्बने हास्ये।
ब्रह्मवधाद्युत्साहेऽधमपात्रगते तथा वीरे। उत्तमपात्र
गतत्वे भयानके त्रेयमेवमन्यत्र"। [(चुकपालङ्क)

रसाल न०रसेनाढ्यम्। १इक्षुक्षेत्रे राजनि०। २चूते च भावप्र०

रसायन न० रसस्यायनमिव। १तक्रे हेमच० २कटुतैले
राजनि० ३विषभेदे वैद्यकप्रसिद्धे ४औषधभेदे च ५गरुडे
६विष्णौ च पु० मेदि०। ७तन्त्रे। ८रसस्थाने च।
औषधभेदलक्षणादि भावप्र० उक्तं यथा

"यच्चराव्याधिविध्वंसि वयसस्तम्भजन्मदा। चाक्षुष्यं दृंहणं दृष्यं मेध्यं तद्रसायनम्"। रसायनस्य फलमाह "दीर्घमायुः स्मृतीमेधामारोग्यं तरुणं वयः। देहेन्द्रियबलं वाग्मि नरो विन्देद्रसायनात्"। तद्विधिमाह "पूर्वं वयसि मध्ये वा वयसश्च रसायनम्। प्रयुञ्जीत भिषक् प्राप्तः स्निग्धशुद्धतनोः सदा। नाविशुद्धशरीरस्य युक्तो रसायनो विधिः। न भाति वाससि स्निग्धे रक्तयोग इवाङ्गिनः"। "गोक्षीरं पयः शीतं सवसेकैकशो हितः। स्निग्धः सप्तसप्तमं वा प्राक् पीतं स्यात्त्रयोदशः। मण्डूकपर्णीस्वरसः प्रभाते प्रयोज्य यष्टीमधुकस्य चूर्णम्। रसो गुडूच्यास्तु समूलपुष्पः कल्कः प्रयोज्यः खलु शङ्खपुष्प्याः। आयुःप्रदान्यामयनाशनानि सर्वाणि सर्वर्तुनानि। मेध्यानि चैतानि रसायनानि मेध्या विशेषेण च शङ्खपुष्पी"। मण्डूकपर्णी ब्राह्मी। (वरणी) इति लोके, तदभावे अश्मन्तकापि ग्राह्या तस्या अपि रसायनत्वात्। "आत्रिभ्यश्च त्रयाणीर्ष्यां पिप्पल्या अयुजेन च। त्रिफला क्षितया वापि युक्ता सिद्धं रसायनम्। घृतं मधु शर्करा गुडूची कषायमधुगुडैः क्रमात्। वर्षादिष्वभया प्राह्या रसायनगुणैषिणा। पुनर्नवस्यार्द्धपलं नवस्य पिष्टं पिबेद्यः पयसार्द्धमासम्। मासत्रयं तच्चिगुणं वयसा वा जीर्णोऽपि भूयः स पुनर्नवः स्यात्। ये मासमेकं खरसं पिबन्ति दिने दिने भृङ्गरजः सपत्यम्। क्षीराशिनस्ते बलवीर्य्ययुक्ताः सवासतं जीवनमाप्नुवन्ति। शतावरी सुस्थितिका गुडूची सहस्रिकर्षा सह तालमूली। एतानि कृत्वा समभागयुक्तान्याक्षेन किं वा मधुनाऽवलिह्यात्। जराकृजाकृत्युविमुक्तदेहो भवेच्चरो वीर्य्यबलादियुक्तः। विभाति देवप्रतिमः स नित्यं प्रभामयो भूरिविशुद्धबुद्धिः। पीतास्वगन्धा पयसार्द्धसाक्षं घृतेन तैलेन गुडेन वाऽथ। वीर्य्यस्य पुष्टिं वपुषो विधत्ते बालस्य सङ्गस्य यथाऽनुवृष्टिः। त्रयःपलं गुग्गुलुरत्र योज्यः पलत्रयं त्र्योषपलानि पञ्च। पलानि चाष्टौ त्रिफलारजश्च कर्षं लिहन् यात्यमरत्वमेव। न केवलं दीर्घमिहा युरश्नुते रसायनं योऽविधिवं निषेवते। मतिं च देवर्षि निषेवितां शुभां प्रपद्यते ब्रह्म तथैव चाव्ययम्"।

रसायनफला स्त्री रसायनमौषधविशेष इव फलं व्याधिघातकत्वात् यस्याः। वृद्धदारुकायाम् त्रिका०।

रसायनश्रेष्ठ पु० रसायनेषु औषधभेदेषु श्रेष्ठः। पारदे राजनि०।

रसायनी स्त्री रसायनं रसस्यानवस्थया अत्र गौ०ङीष्। १गुडूच्याम् २काकमाच्यां ३मत्स्याक्षदारे ४गोरक्षदुग्धायाम् ५मांसरुद्दावास्तु राजनि०।

रसाल न० रसमाददाति आ+दा-क दुगभ०। १बिल्वफले २गन्धरसे मेदि०। ३श्रियङ्गिरिणाम् (पेजसेरे) वसपाकविधिः कृतान्नशब्दे २१८४ पृ० आगम० उक्तो दृश्यः। ४रसनायां ५दूर्वायां ६विदार्यां ७द्राक्षायास्तु स्त्री मेदि०। ८आम्रे "रसालः साकः सप्तपत्रच्छदना" भैषधम्। ९दक्षौ अमरः। १०धनिनि गन्धर०। ११गोधूमे १२पुण्ड्रेक्षौ च पु० राजनि०।

रसालिहा स्त्री रसं भूमिं लेढि रस्यति लिह-क (बाहुलिया) तुगभेदे शब्दच०। [आख] दृश्यभेदे राजनि०।

रसाली स्त्री रसमाददाति आ+दा-क गौरा०ङीष्। (पुष्टि-

रसास्वासा स्त्री रसां भूमिमास्वासयति दत्तैः आ+स्वस-णिच् अण्। पलाशीलतायाम् राजनि०।

रसास्वादिन् पु० रसं पुष्परसमास्वदते आ+स्वद-णिनि। १भ्रमरे शब्दमा०। २मधुरद्रव्यकारादिरसास्वादके त्रि० स्त्रियां ङीष्।

रसिक पुंस्त्री० रसं वेत्ति अनुभवति ठन्। १शारदपण्डिते राजनि० २अश्वे ३गजे शारदतः। स्त्रियां जातित्वात् ङीष्। ४रसज्ञे त्रि०। रसोऽस्यास्ति ठन् ५रसवति च त्रि० मेदि०। ६रसनायाम् ७क्षुरसे च स्त्री मेदि० ८काश्म्र्यां हरेणवां स्त्री विश्वः।

रसित न० चुरस-भावे क्त। १मेघादिशब्दे २विहगादिशब्दे च अमरः। कर्त्तरि क्त। ३शब्दवति कर्मणि-क्त ४आस्वादिते च त्रि०। [तत्रैव स्वार्थे क। तत्रार्थे।

रसुन पु० रस-उनन्। लशुने शब्दच०। ओनन् रसोन

रसेन्द्र पु० रस इन्द्र इव। पारदे राजनि०।

रसेश्वर पु० रसः पारद ईश्वर इव तद्धेश्वरसजातत्वात्। १ईश्वरतुल्ये रसे। तत्त्वज्ञानार्थं देहस्थैर्यसम्पादनद्वारा मुक्तिहेतुत्वस्य माहेश्वरभेदाः प्रतिपेदिरे तन्मतञ्च सर्वदर्शनसंग्रहे प्रदर्शितं यथा

"अपरे माहेश्वराः परमेश्वरतादात्म्यवादिनोऽपि पिण्डस्थैर्यं सर्वाभिलषितं जीवन्मुक्तिः सेत्स्यतीत्याशाय पिण्डस्थैर्योपायं पारदादिपदवेदनीयं रसमेव सङ्गिरन्ते रसस्य पारदस्य संसारपरपारप्रापणहेतुत्वेन तदुक्तम्

इतःपरः अन्यः पारदग्रन्थे ४११२ पृष्ठे प्रदर्शितः ।

"प्रकारान्तरेणापि जीवन्मुक्तौ नेयं वाग्वादयुक्तिर्युक्तिमतीति चेन्न षट्त्रिंशे दर्शनेषु देहपातान्तरं मुक्तेरुक्ततया तत्र विश्वासानुपपत्त्या निर्विचिकित्सप्रवृत्तेरनुपपत्तेः । तदप्युक्तं तत्रैव "षड्दर्शनेऽपि मुक्तिस्तु दर्शिता विष्णुपादने । करामलकवत्सापि प्रत्यक्षा लोपलभ्यते । तस्मात्स रसयेत्पिण्डं रसेनैव रसायनैरिति" । गोविन्दभगवत्पादाचार्यैरपि "इति धनशरीरभोगात्मत्वाऽनित्यानि यदेव यतनीयम् । मुक्तौ वा न ज्ञानात् तज्ज्ञाध्यासात् स च स्थिरे देहे"त्युक्तम् । तत्र सिद्धस्वरतया इष्टप्रमाणस्य देहस्य कथं नित्यत्वमवधीयते इति चेन्नैवं मन्त्राः, भाट्टौपयिकस्य शरीरस्यानित्यत्वेऽपि रसाश्वकपदादिनिष्पन्नकरगौरीस्पृष्टिजातस्य नित्यत्वोपपत्तेः तथाच रसहृदये "ये चात्मलाभशरीरा करगौरीस्पृष्टिजालरं प्राप्ताः । वज्रप्राये रसविद्या मन्त्रगणः किङ्करो येषामिति" । तस्माज्जीवन्मुक्तिं सजीकृत्यानेन बोधिना प्रथमं दिव्यतनुर्विधेया । करगौरीस्पृष्टिसंयोगजनितत्वञ्च रसस्य करजत्वेनाभ्रकस्य गौरीसम्भवत्वेन तस्याभ्रकत्वसिद्धम् "अभ्रकल्पं वीजन्तु अभ्रकं वीजन्तु पारदः । अनयोर्भेदं देवि ! मृत्युदारिद्र्यनाशनमिति" । अत्यल्पसिद्धत्वाच्च देवदैत्यसुसिद्धमानवादिषु बहवो रसमाश्रित्य दिव्यं देहमाश्रित्य जीवन्मुक्तिमाश्रिताः श्रूयन्ते रसेश्वरसिद्धान्ते "देवाः केचिन्महेशाद्या दैत्याः काव्यपुरःसराः । मुनयो वाल्मिक्याद्या नृपाः सोमेश्वरादयः । गोविन्दभगवत्पादाचार्यो गोविन्दनामकः । नर्वटिः कपिलो व्याडिः कापालिः कन्दलायनः । एतेऽन्ये बहवः सिद्धा जीवन्मुक्ताश्चरन्ति हि । तत्तं रसमयीमाद्य तदात्मक कथाश्चयाः" इति । अयमेवाद्यार्थः परमेश्वरेण परमेश्वरीं प्रति प्रपञ्चितः' ।

इतःपरो अन्यः पारदग्रन्थे ४११२ पृ० दर्शितः ।

तत्प्रपञ्चस्तु गोविन्दभगवत्पादाचार्यसर्वज्ञरामेश्वरभट्टारकप्रभृतिभिः प्राचीनैराचार्यैर्निरूपित इति ग्रन्थभूयस्त्वभयादुद्दाल्यते । न च रसशास्त्रं धातुवादार्थमेवेति मन्तव्यं देहवन्मद्वारा मुक्तेरेव परमप्रयोजनत्वात् तदुक्तं रसार्णवे "लोहत्वमस्त्वया देव ! यदुक्तं परमोत्थितः ! । तं देहत्वमाचक्ष्व येन स्यात् खेचरी गतिः ! यथा लोहे तथा देहे कर्त्तव्यः कृतकः सदा । समानं कुरुते देवि ! मृत्युं देहलोहयोः । पूर्वं लोहे परीक्षेत पश्चाद्देहे प्रयोजयेत्"इति । नन्तु सच्चिदानन्दात्मकपरतत्त्वस्फुरणादेव मुक्तिसिद्धौ किमनेन दिव्यदेहसम्पादनप्रयासेनेति चेन्नैतदेवार्त्तं वार्त्तशरीरालाभे तद्वार्त्ताया अयोगात् । तदुक्तं रसहृदये "गलितानल्पविकल्पः सर्वाध्वविवर्जितश्चिदानन्दः । स्फुरितोऽयस्फुरितनोः करोति किं जन्तुर्जरेति । यं जरया जर्जरितं कासश्वासादिदुःखविषदग्धम् । योग्यं तं न समाधौ प्रतिकुरुते कीदृग्विषयप्रसरम् । वातः षोडशवर्षो विषयरसाद्यस्तत्परतः । यातविवेको दृष्टो मर्त्यः कथमाप्नुयान्मुक्तिमिति" । नन्तु जीवत्वं नाम संसारित्वं तद्विपरीतत्वं मुक्तत्वं तथाच परस्परविरुद्धयोः कथमेकावतनत्वमुपपन्नं स्यादिति चेन्नैतदुपपन्नं विकल्पानुपपत्तेः मुक्तिलाभे सर्वतोऽधिकरसमता सा किं ज्ञेयपदे निविशते न वा चरमे यद्यविशेषाकल्पा स्यात् प्रथमे न जीवन्मुक्तौ वर्त्तमीयमजीवतो ज्ञातत्वानुपपत्तेः । तदुक्तं रसेश्वरसिद्धान्ते "रसाङ्गमेयमार्गोक्ते जीवन्मोक्षोऽस्त्यधोमनाः । प्रमाणान्तरवादेषु युक्तिभेदावलम्बिषु । ज्ञानज्ञेयमिदं विद्धि सर्वतन्त्रेषु सम्मतम् । नाजीवन् ज्ञास्यति ज्ञेयं यदतोऽस्त्येव जीवनम्" इति । न चेदमदृष्टचरमिति मन्तव्यं विष्णुत्वाभिमतानुसारिभिः नृपत्वास्यशरीरस्य नित्यत्वोपपादनात् । तदुक्तम् साकारसिद्धौ "सच्चिच्चित्यनिजाचिन्त्यपूर्णानन्दैकविग्रहम् । नृपञ्चास्यमहं वन्दे श्रीविष्णुत्वाभिसम्मतम्" इति । नन्वेतत् सावयवं रूपवदवभासमानं नटकण्ठीरवाङ्कं सदिति न शङ्कनीयं इत्यादिभाष्योपपुराणं सनकादिप्रत्यक्षेण "सहस्रशीर्षा पुरुषः" इत्यादिश्रुत्या "तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम्" इत्यादिपुराणलक्षणेन प्रमाणत्रयेण सिद्धं नृपञ्चाननाङ्कं कथमसत् स्यादिति । सदादीनि विशेषणानि गर्भश्रीकान्तमिश्रैः विष्णुत्वाभिचरणपरिणतान्तःकरणैः प्रतिपादितानि । तस्मादस्मदिष्टदेहनित्यत्वमत्यन्ताऽदृष्टं न भवतीति पुरुषार्थकामुकैः पुरुषैरेष्टव्यम् । अत एवोक्तम् "आयतनं विद्यानां मूलं धर्मार्थकाममोक्षाणाम् । श्रेयः परं किमन्यच्छरीरमजरामरं विहायैकमिति" । अजरामरीकरणसमर्थश्च रसेन्द्र एव तदाह "एकोऽसौ रसराजः शरीरमजरामरं कुरुते" इति । किं वर्ण्यते रसस्य माहात्म्यं यस्य दर्शनस्पर्शनादिनापि महत् फलं भवति । तदुक्तं रसार्णवे"दर्शनात् स्पर्शनात्तस्य भक्षणात् स्मरणादपि । पूजना-

दृश्यते षड्विधं फलम्। केदाराद्दीनि लिङ्गानि पृथिव्यां यानि कानिचित्। तानि दृष्ट्वा तु यत् पुण्यं तत् पुण्यं रसदर्शनादित्यादिना"। अन्यत्रापि "काशग्रादिसर्वलिङ्गेभ्यो रसलिङ्गार्चनं शिवम्। प्राप्यते येन तल्लिङ्गं भोगारोग्याद्भुतालरम्" इति। रसनिन्द्यायाः प्रत्यवायोऽपि दर्शितः "प्रमादाद्रसनिन्द्यायाः श्रुतावेनं स्मरेत् सुधीः। द्राक् त्यजेन्निन्द्यं नित्यं निन्द्या पूरितमाशुभम्" इति। तस्मादनुक्तया रीत्या दिव्यं देहं सम्प्राप्य योगाभ्यासवशात् परतत्त्वे दृष्टे पुरुषार्थप्राप्तिर्भवति। तदा "भ्रूयुगमध्यगतं यत् शिखिविद्युत्सूर्यवच्छशाङ्कि। केषाञ्चित् पुण्यदृशामुन्मीलति चिन्मयं ज्योतिः। परमानन्दैकरसं परमं ज्योतिःस्वभावमविकल्पम्। विगलितसकलक्लेशं ज्ञेयं शान्तं स्वसंवेद्यम्। तच्चित्तमाधाय मनः स्फुरदखिलं चिन्मयं जगत् पश्यन्। चतुरङ्गकर्मबन्धो ब्रह्मत्वमिहैव चाप्नोतीति"। श्रुतिश्च "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवतीति"। तदित्थं भवे नान्योदुःखभरतरणोपायो रस इवेति सिद्धम्। तथाच रसस्य परब्रह्मणा साम्यमिति प्रतिपादकः श्लोकः "यः स्यात् प्रावरणाविमोचनधियां साध्यः प्रक्रत्या पुनः सम्भ्रमो वहते न दीव्यति परं वैश्वानरे जाग्रति। जातो यद्यपरं न वेदयति च स्वभात् स्वयं द्योतते यो ब्रह्मैव स दैन्यसंस्कृतिभयात् पायादसौ पारदः" इति।

रसोत्तम पु० रस उत्तमो यस्य। सूते राजनि०।

रसोद्भव न० रसः पारद उद्भवस्थानात् उद्+भू-अच् उद्भवो यस्य। १हिङ्गुले राजनि०। ५त०। २रसजाते त्रि०।

रसोपल न० रसः पारद इव उपलीयते शुभत्वात् उप+ली-ड। मौक्तिके त्रिका०।

रस्न न० रस न। द्रव्ये उज्ज्वलट०।

रस्य न० रसादुभुक्तान्नपरिणामादागतः यत्। १रुधिरे शब्दच० रस्यते आस्वाद्यते रस-यत्। २आस्वाद्ये त्रि०। रस्याः, "स्निग्धाः स्थिरा हृद्याः" गीता। ३पाठायां ४राज्ञायाञ्च स्त्री राजनि०।

रह गतौ भ्वा० पर० सक० सेट् इदित्। रंहति अरंहीत् "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः" शारीरकसूत्रम्

रह त्यागे भ्वा० प० सक० सेट्। रहति अरहीत्।

रह त्यागे अद० चु० उभ० सक० सेट्। रहयति ते अररहत्-त

रहस् न० रह-असुन्। १निर्जने अमरः। २गोप्ये ३याथार्थ्ये ४रमणे च मेदि०। ५निर्जने अव्य०अमरः। रमन्तेऽस्मिन् रस-असुन् मस्य रः। ६विश्वासयोग्यदेशे उज्ज्वलद०।

रहस्य त्रि० रहसि भवः यत्। १गोप्ये "रहस्यमाख्याः स महदिति" नैषधम्। २निर्जनभवे च ३पाठायां ४राज्ञायाञ्च स्त्री राजनि० टाप् ५नदीभेदे स्त्री मेदि०।

रहित त्रि० रह-क्ते कर्मणि क्त। वर्जिते।

रा दाने ग्रहणे च अदा०पर०सक०अनिट्। राति अरासीत्।

रा स्त्री रा-क्विप् भावे क्विप्। १विश्वमे २दाने एकाक्षरकोषः। कर्मणि क्विप्। ३काञ्चने शब्दर०।

राका स्त्री रा-क तस्य नेत्वम्। १प्रतिपदादियुक्तायां पूर्णमासां सम्पूर्णेन्दुतिथौ २नदीभेदे ३नवजातरजस्कायां नार्यां ४कच्छुरोगे च मेदि०। ५व्याङ्गिरसः कन्याभेदे कुहूशब्दे २१६२ पृ० दृश्यम्।

राक्षस पु० रक्ष एव स्वार्थे अण्। "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" इति भाष्योक्तेः पुंस्त्वम्। स्वनामख्याते निकषात्मजे १जातिभेदे अमरः जातौ ङीष्। २राक्षसजातिस्त्रियाम् स्त्री। रक्षस इदम् अण्। ३राक्षससम्बन्धिनि त्रि० स्त्रियां ङीष्। "राक्षसी रात्रिरन्यत्र" तिथितत्त्व०। ४दंष्ट्रायां ५मरिचे च ६चण्डिकायां ७घौरनामगन्धद्रव्ये च स्त्री मेदि० ङीप्।

राक्षसेन्द्र पु०राक्षस इन्द्र इव श्रेष्ठत्वात्। विश्रवसः ऋषेः पुत्रे निकषात्मजे रावणे त्रिका०।

राक्षा स्त्री लक्ष्यतेऽनया रक्ष-कर्मणि-घञ् पृषो० दस्य रक्ष। लाक्षायाम् अमरः।

राख शोषणे भूषणे निवारणे च सक० सामर्थ्ये अक० भ्वा० पर० सेट्। राखति अराखीत्। क्वादित्वे चङि न ह्रस्वः।

राग पु० रञ्ज-भावे घञ् नि० नलोपकुत्वे। १रञ्जने २शुक्लादिवर्णे ३प्रीतौ ४अनुरागे ५नदे ६हमालवादिनामभिः प्रसिद्धे निषादादिस्वरयोनिके स्वरभेदे मेदि० ७चन्द्रे दक्षयज्ञे च शब्दर०। करणे घञ्। ८लोहितवर्णे १०तदुविशिष्टलाक्षादौ च "तेन रक्तं रागात्" पा० अनुरागलक्षणम् उज्ज्वलमणिनोक्तं यथा "सुखमयधिकं चित्ते सुखत्वेनैव रज्यते। यतस्तु प्रणयोत्कर्षात् स राग इति कथ्यते"। स्वरभेदनिरूक्तिर्यथा "त्रैलोक्यं खेतांहि रज्यन्ते जगच्चित्रतयवर्त्तिनाम्। ते रागा इति कथ्यन्ते सुनिभिर्भरतादिभिः" तेषां भेदाः संगीतदा० मतभेदेन नाना तत्र प्रसिद्धा षड् भेदा यथा

"आदौ मालवरागेन्द्रस्ततो भञ्जारसंज्ञितः । श्रीरागश्च ततः पश्चात् वसन्तस्तदनन्तरम् । हिन्दोलश्चाथ कर्णाट एते रागाः षड़ेव तु" षड्रागीतदा० । भरतमते तु "भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा । श्रीरागो मेघरागश्च रागाः षड्डिति कीर्त्तिताः" ।

रागचूर्ण पु० रागस्य रक्तस्य चूर्णं इव । १काम्ये । रागाय चूर्ण्यते ऽसौ चूर्ण-घञ् । २खदिरे च मेदि० । ३लाक्षायां राजनि० ४रागयुक्तचूर्णे पु० (फाग) शब्दच० ।

रागदालि पु० दल्यतेऽसौ दल-णिच्-इन् पृषो० इत्वम् । रागेण रक्ततया युक्तो दालिर्वा । भल्लूरे राजनि० ।

रागपुष्प पु० रागयुक्तं रक्तवर्णं पुष्पमस्य । १बन्धूके २रक्ताख्याने च ३अवार्यां स्त्री राजनि० ङीप् ।

रागप्रसव पु० रागयुक्तो रक्तवर्णः प्रसवोऽस्य । १बन्धूके २रक्ताख्याने च राजनि० ।

रागयुज् पु० रागेण रक्तवर्णेन युज्यते युज-कर्मणि क्विप् । १माणिक्ये राजनि० २रक्तवर्णयुक्ते त्रि० ।

रागसूत्र न० रागयुक्तं सूत्रम् । षट्सूत्रे २तन्त्रास्त्रे च मेदि० । [राजनि० इत० । रागाढ्यमस्त्री ।

रागाङ्गी स्त्री रागयुक्तमङ्गं यस्याः ङीप् । मञ्जिष्ठायाम्

रागिणी स्त्री रागोऽस्त्यस्या इनि । १नीलाङ्के अरभेदे रागपत्न्यां सङ्गीतदा० । २विदग्धनार्यां जटा० । ३सेनजाकन्यायां रागवति ४अनुरक्ते ५आसक्ते त्रि० विन्ध्यः रञ्ज-णिच्-युच् । ६रतियुक्ते च त्रि० । ६दृष्यधान्यभेदे मेदि० । एकैकरागे षट् रागिण्य इति षट्सु रागेषु रागिणीभेदाश्च षट्त्रिंशत् यथा

"षट् त्रिंशद्रागिणीभेदाः प्रायशः कथिता मया । धानश्री१ मालश्री२ चैव रामकीरी३ च शिवकुड़ा ४ । आशावरी५ भैरवी६ च मालवश्र्य (१) प्रिया इमाः । वेलावली१ पटमञ्जरी२ च ललितास्य (२) प्रिया इमाः । देशाख१ पटदीपकी२ च खानडा३ माधवी४ तथा । कोडा५ केदारिका६ चापि मल्लार(३)दयिता इमाः । गान्धारी१ सुभगा२ चैव गौरी३ गौरारिका४ तथा । वेलोवारी५ च वैरागी६ श्रीरागस्य (१) प्रिया इमाः । तुडी१ च पङ्कमी२ चैव ललिता३ पठमञ्जरी४ । गुर्जरी५ च विभाषा६ च वसन्तस्य (४) प्रिया इमाः । मायूरी१ देशाख२ चैव देशकारी३ च पाहिड़ी४ । वराड़ी५ गौरड़ाटी६ च हिल्लोलस्य(५) प्रिया इमाः । नाटिका भैरड़ाटी६ च मल्लार४ तथा । काम्बोद५ चाथ कल्याणी६ कर्णाटस्य (६) प्रिया इमाः" ।

सङ्गीतदा० । तन्मतान्यङ्गभेदाः तत्पुत्रादयश्च तत्रैव दृश्याः ।

राघ भ्वा० आ० अक० सेट् । राघते अराघिष्ट । क्वचित् चङि न हस्वः ।

राघव पु० रघोर्गोत्रापत्यम् अण् । १रघोर्वंश्ये २तत्प्रधाने श्रीरामे च ३महाभक्तभेदे ४वणिग्भेदे च मेदि० ।

राङ्कव न० रङ्कोरयं विकारो वा तन्तोमजातत्वात् अण् । मृगविशेषलोमजाते वस्त्रभेदे अमरः ।

राज दीप्तौ भ्वा० उभ० अक० सेट् । राजति ते-अराजीत् अराजिष्ट कृपादि० रेजतुः रराजतुः । क्वचित् चङि न हस्वः ।

राजक न० राज्ञां समूहः कन् । १अपवसुदाये अमरः । राजैव क । २रम्भे पु० । राज-क्विप् । ३दीप्तिमति त्रि० । [भेदे जटा० ।

राजकदम्ब पु० कदम्बानां राजा राजद० परनि० । कदम्ब-

राजकल्प पु० ईषदसौ राजा राजन्+कल्पप् । राज-तुल्ये । [आम् राजनि० ।

राजकर्कटी स्त्री राजते राज-अच् कर्म० । चीनाकर्क-

राजकशेरु पु० कशेरूणामयं राजा राजद० । मधुस्रवायाम् राजनि० । [वाँदो ।

राजकीय त्रि० राज्ञ इदम् छ ह्रस्वश्च । राजसम्बन्धिनि-

राजकुमार पु० राज्ञः कुमारः । अमात्यवत्सरे युवराज-आख्यानाच्छद्रे राजपुत्रे । [आम् जटा० ।

राजकुष्माण्ड पु० राज्ञः कुष्माण्ड इव । त्रिवत्वात् । बार्त्ता-

राजकोषातकी स्त्री राजप्रिया कोषातकी । (घिवाभिङ्गा) लतामेदे अमरविनोदः ।

राजक्षयक पु० क्षयरूपेण कुत्सितो राजते राज-अच् कर्म० स्वार्थे क । राजयक्ष्मणि (राएसणा) राजनि० ।

राजखर्जूरी स्त्री राजप्रिया खर्जूरी । खर्जूरीभेदे (घिवाभि-खेजुर) राजनि० । [२माकभेदे राजनि० ।

राजगिरि पु० राज्ञामयं गिरिः । १जरासन्धस्य पर्वतभेदे

राजन् त्रि० राजानं वृणोति वृञ-क त्रि० । १राजवृक्षभेदे, २तोक्मे च जटा० "रराज नीरजसमा च राजनः" नैष०,

राजजम्बू स्त्री राज्ञः जम्बूरिव । १घिवाभिखर्जूरे मेदि० राजते अच् कर्म० । २महाजम्बाम् राजनि० ।

राजज(य)क्ष्मन् पु० राज्ञः सम्बन्धि यक्ष्मकारको ज(य)क्ष्मा । रोगभेदे यक्ष्मशब्दे दृश्यम् "राज(य)क्ष्मेव रोगाणाम्" आर्षः । [वृद्धौ २आरम्भे च राजनि० ।

राजतरु पु० तरूणां राजा राजद० परनि० । १कर्णिकार-

राजताल पु० राज्ञस्ताल इव प्रियः । १धुस्तूरवृक्षे अमरः । स्त्रीत्वमपि तत्र ङीप् । "राजतालीवनच्छनिः" रघुः ।

राजदन्त पु० दन्तानां राजा परनि० । अग्रे पङ्क्तिस्थे मध्यवर्त्तिदन्तद्वये हेमच० । [तुल्ये राजवल्लभे ।

राजदेशीय पु० देशदेशो राजा राजन्+देशीयर् । राज-

राजधुस्तूरक पु० धुस्तूराणां राजा राज० परः स्वार्थे क । वृक्षविशेषे राजधुस्तूरकोऽप्यत्र पु० राजनि० ।

राजधर्म्म पु० क्षत्त्रो धर्म्मः । राज्ञामवश्यकर्त्तव्ये प्रजापालनादौ कर्म्मणि । तमधिकृत्य कृतो ग्रन्थः अण् । भारतस्यान्तिमपर्व्वान्तर्गते व्यासप्रणीते ग्रन्थभेदे । राजधर्म्माश्च मत्त मानवे ७ अ० च उक्ता द्रष्टव्याः ।

राजधानी स्त्री राजा धीयतेऽस्यां धा-आधारे ल्युट् ङीप् । राजावासे नगरनगर्याम् अमरः । [धान्ये राजनि० ।

राजधान्य न० धान्येषु राजा राज०पर० । (श्यामा) श्यामाक-

राजन् पु० राज-कनिन् रञ्जयति रनज-कनिन् नि० वा । १नृपे, "राजा प्रकृतिरञ्जनात्" रघुः । २चन्द्रे, ३प्रभौ, ४क्षत्रिये, ५यज्ञे ६इन्द्रे, च मेदि० । उत्तरपदः पूर्व्वपदस्थ समभिव्याहृतपदार्थश्रेष्ठवाचकः । यथा राजमाषः खदिरराज इत्यादि । ७शुभ्रधुस्तूरे च । "पिता न रक्षितात्तस्य प्रजास्तेनाहुरक्षिताः । अनुरागात्ततस्तस्य नाम राजेत्यभाषत" विष्णुपु० ।

राजनीति स्त्री राज्ञां नीतिः । १राजोचिते सामाद्युपाये, २उपचारात् तत्प्रतिपादके-शास्त्रे च । सा च कामन्दकीयनीतिशास्त्रादौ द्रष्टव्या ।

राजन्य पु० राज्ञोऽयम् यत्, जातौ नलोपः । राज-अन्य वा । १क्षत्रिये अमरः । २राजपुत्रे ३अग्नौ, उणादिको० ५क्षौरिकावृक्षे वाजटा० । [समूहे अमरः ।

राजन्यक न० राजन्यानां क्षत्रियाणां समूहः कन् । क्षत्रिय-

राजन्वत् त्रि० प्रशस्तो राजाऽस्यास्ति प्राशस्त्ये मतुप् मस्य वः न नलोपः । सुन्दरराजयुते देशे अमरः अन्यत्र राजवद् इत्येव । [२मधुरपटोल्यां राजनि० ।

राजपटोल पु० राजप्रियः पटोलः । १पटोले रत्नमा० ।

राजपट्ट पु० राज्ञः पट्ट इव । मणिभेदे त्रिका० ।

राजपथ पु० पथां राजा राजगमनयोग्यो वा पन्थाः अच्-समा० । 'धनूंषि इव विस्तारे श्रीमान् राजपथः स्मृतः । न्यायाजिरधनागानामध्वबाधः सुखञ्चरः" इत्युक्ते राजमार्गे देवीपु० । [वर्णपलाण्डौ राजनि० ।

राजपलाण्डु पु० पलाण्डूनां राजा श्रेष्ठत्वात् राजद० रक्त-

राजपीलु पु० राजप्रियः पीलुः । महापीलुवृक्षे राजनि० ।

राजपुत्र पु० राज्ञश्चन्द्रस्य, अपत्ये वा पुत्रः । १बुधपत्ते अमरः २अश्वघुमारे ३वर्णसङ्करभेदे (रजपुत) "वैश्यादम्बष्ठकन्यायां राजपुत्रस्य सम्भवः" स्मृतिः परावरः । ४महाराजपूतवृक्षे राजनि० ।

राजपुत्री स्त्री राज्ञश्चन्द्रस्य पुत्रीव । १कटुतुम्ब्याम् २रेणुकायां ३हरीतक्यां, ४जातौ ५क्षुद्रक्षुन्द्र्यां च । ६मालत्याञ्च राजनि० । इत० । ६नृपकन्यायाम् । ङीप्-अन्तोऽप्ययम् । ७शरारिटिखगे जटा० ।

राजपुष्प पु० राजा चन्द्र इव शुभ्रत्वात् पुष्पमस्य । नागकेसरवृक्षे अमरः । २कदम्बवृक्षे स्त्री राजनि० ङीप् ।

राजफणिज्झक पु० राज-अच् कर्म्म० । नागरङ्गवृक्षे अमरः ।

राजफल न० राजप्रियं फलमस्य । १पटोले त्रिका० । २राजप्रियं फलमस्याः । २जम्ब्वाम् स्त्री राजनि० टाप् ।

राजबदर न० राज्ञो बदरमिव प्रियत्वात् । १रक्तामलके २बदरे च मेदि० बदराणां राजा राजद० प० । ३बदरकोलौ पु० राजनि० । [भादाल) लतामेदे अमरः ।

राजबला स्त्री राज-अच् राजं बलं यस्याः ५ब० । (गन्ध-

राजभद्रक पु० राज्ञो भद्रं यस्मात् कप् । १कुडे (कुड़) २भिल्वे च राजनि० ३पारिभद्रवृक्षे धातुपा० ।

राजभूय न० राज्ञो भावः राजन्+भू-क्यप् । राज्ञोऽधार्य-रूपधर्म्मे राजत्वे ।

राजभोग्य न० राज्ञा भोक्तुं योग्यम् भुज-ण्यत् कुत्वम् । १जातीकोषे २प्रियालवृक्षे पु० अमरः । ३नृपतेर्भोग्यवस्तु-मात्रे त्रि० ।

राजमार्ग पु० राजयोग्यः मार्गः । १राजपथे राजनि० ।

राजमाष पु० माषेषु कलायेषु राजा श्रेष्ठत्वात् राजद० प० । १माषभेदे हेमच० । (बरबटी) २व्रीहिभेदे राजनि० ।

राजमुद्ग पु० मुद्गेषु राजा राज० प० नि० । (मुगानि) मुद्गभेदे ।

राजरङ्ग न० राजयोग्यं रङ्गम् । रजते अमरः ।

राजराज पु० राज्ञामपि राजा प्रभूतधनत्वात् टच् समा० । १कुबेरे, अमरः । २सार्व्वभौमभूपे, ३चन्द्रे च मेदि० ।

राजर्षि पु० राजा ऋषिरिव श्रेष्ठत्वात् संयतत्वाच्च । १राजश्रेष्ठे, २यतात्मनि नृपे च । [भेदे पुंस्त्री० ।

राजवंश्य त्रि० राजवंशे भवः यत् । १राजवंशोद्भवे २जातिः

राजवर्त्मन् न० राजयोग्यं वर्त्म । १राजपथे हेमच० । इत० । राज्ञः २कर्त्तव्यकर्म्मणि च ।

राजवल्लभ पु० इत० । १प्रियाले २राजबदरे ३राजाई-

राजनि० द्रव्यगुणप्रतिपादके तन्त्रभेदविहृतन्त्रते ४अन्यभेदे च। ५राज्ञः प्रिये त्रि०। [(उक्षा) वृक्षभेदे रत्नमा०।

राजवल्ली स्त्री राजते राज-अच् राजा वल्ली कर्म०।

राजवत् त्रि० राजा राजभावं विद्यतेऽस्य मतुप् मस्य वः। राजभावविति देशे अमरः।

राजवीजिन् त्रि० राजा वीजी कारणं यस्य। राजवंश्ये।

राजवृक्ष पु० वृक्षाणां राजा राजद० परनि०। १खादिरवृक्षे (खोन्दाल) अमरः। राजप्रियो वृक्षवृक्षफलवीजजातलड्डुकस्य राजप्रियत्वात्। २प्रियाले मेदि०। ३लड्डुकायिवृक्षे (लड्डुकिवृक्ष) शब्दच०। [शब्दमा०।

राजशण पु० राज-अच् राजः शणः कर्म०। पट्टे (पाट)

राजशाक पु० शाकानां राजा राजः परनि०। वास्तूकशाके राजनि०। [क्षुपे त्रिका०।

राजशृङ्ग न० राज्ञां शृङ्गमिव ऊर्ध्वस्थितत्वात्। राजचिह्न-

राजस त्रि० रजसा निर्मितः अण्। रजोगुणात् जाते १कर्मेन्द्रियादौ "येनाक्षिप्तं कर्मणा लोके ख्यातिमाप्नोति पुष्कलाम्। न च शोचत्यसम्पत्तौ तद्विद्धेयन्तु राजसम्" इत्युक्ते ख्यातौ क्रियमाणे २कर्मणि च। रजःप्रधानत्वात् तस्य अण्। ३रजःप्रधाने। सर्वेषां वस्तूनां त्रिगुणात्मकत्वेऽपि "भूयस्त्वात्तद्व्यपदेशः" इत्युक्तेः क्वचित् तत्प्रधानत्वेन व्यपदेशः। ४दूर्वायां स्त्री ङीप् शब्दमा०।

राजसभ न० राज्ञां नृपाणां सभा। नृपसभाजे अमरः।

राजसर्षप पु० सर्षपाणां राजा श्रेष्ठत्वात् राजद०। (राज-सर्षा) १सर्षपभेदे हेमच०। "तेऽसौ सिद्धार्त तार्क्षिसो राजसर्षप उच्यते" उक्ते २परिमाणभेदे च विश्वः।

राजसारस पुंस्त्री० राज्ञः सारस इव। मयूरे शब्दमा० स्त्रियां ङीप्।

राजसूय पु० राज्ञा क्रियते कृ-कर्मणि क्यप्। राजभावकर्तृके यज्ञभेदे शब्दच०। "राजा राजसूयेन यजेत" श्रुतिः।

राजस्व न० राज्ञे देयं स्वं कररूपं धनम्। १राजदेये करे हेत०। २राजधने च। [दुर्दुधूस्तूरे राजनि०।

राजस्वर्ण पु० स्वर्णानां धुस्तूराणां राजा०राजद० परनि०।

राजहंस पुंस्त्री० हंसानां राजा श्रेष्ठत्वात्राजद०पर०। रक्त-वर्णचञ्चुचरणयुक्ते श्वेतपक्षके हंसभेदे अमरः।२कलहंसे च मेदि०। उभयार्थे स्त्रियां ङीष्। राजा हंस इव सारसत्वात्। ३नृपश्रेष्ठे। [नगरपुष्पे राजनि०।

राजहर्षण न० राज्ञः नृपात् हर्षमेति हृष-णिच्-ल्यु।

राजातन पु० राज्ञार्थमातनोति फलवीजम् आ+तन-अच्।

(चीरक्षीति) ख्यातवीजफेनफलके पियाले शब्दमा०।

राजादन पु० राज्ञा खण्डते तत्फलवीजजातलड्डुकः खद्-कर्मणि ल्युट्। १पियालवृक्षे अमरः। यस्य फलवीजं (चिरञ्जि) तेन हि लड्डुकं कृत्वा राज्ञा भुज्यते। २चीरिकायां (चोरट) ३किंशुके च मेदि०। ४शीरिण्यां स्त्री ङीप् भरतः। [राजनि०।६त०। २नृपखण्डनिकारके च

राजान्न न० अन्नानां राजा राजद०। १अन्नदेशजधान्यभेदे

राजाम्र पु० आम्राणां राजा श्रेष्ठत्वात् राजद०। १आम्रभेदे "राजाम्रं तुवरं स्वादु विशदं शीतलं गुरु। ग्राहि रूक्षं विबन्धाध्मातलुत् कफपित्तनुत्" भावप्र०। [राजनि०।

राजाम्ल पु० अम्लानां राजा श्रेष्ठत्वात् राजद०। अम्लवेतसे

राजार्क पु० अर्काणां राजा श्रेष्ठत्वात् राजद०। श्वेतार्क-वृक्षे (सादा आकन्द) राजनि०

राजार्ह न० राजानमर्हति अर्ह-अण्। १अगुरुचन्दने २राज-योग्ये त्रि० राजनि० ३जम्ब्यां स्त्री मेदि०। [मदनवि०।

राजालाबू स्त्री राजते राजा अलाबूः कर्म०। सिद्धालाबुवाम्

राजावर्त्त पु० राजानमावर्त्तयति अनुकूलयति आ-वृत-णिच्-अण्। १उपरत्नभेदे राजनि०। २विराटदेशीय-हीरके हेमच०।

राजाहि पु० नित्यक०। हिंसुखसर्पे शब्दर०।

राजि(जी) स्त्री राज-इन् वा ङीप्। १श्रेण्याम् षड्क्तौ २रेखायां च मेदि०। स्वार्थे क। रेखायाम्। राजते राज-एषुन्। राजिका राजसर्षपे स्त्री मेदि०।

राजिकाफल पु० राजिकाया इव फलमस्य। श्वेतसर्षपे राजनि०।

राजि(जी)फला स्त्री राजिभूतानि श्रेणिभूतानि फलानि यस्याः। १चीनाकर्कटयाम् राजनि० २पटोले पु०राजनि०

राजिल पुंस्त्री० राज-इलच्। क्षुद्रक्षुपवर्षे (ढोड़ासाप) अमरः स्त्रियां ङीष्।

राजीव न० राजी दलराजी अस्त्यस्य व। १पद्मे अमरः। "राजीवराजीवयकोकेति" माघः। २हरिणभेदे ३मत्स्य-भेदे च पुंस्त्री० मेदि० "राजीवविष्टरश्रीकांस" महः। ४गजे त्रिका० ५सारसपक्षिणि च पुंस्त्री० अमरः सर्वत्र जातौ स्त्रियां ङीष्।

राजेन्द्र पु० राजा इन्द्र इव श्रेष्ठत्वात्। "चतुर्योजनपर्य्यन्त-मधिकारी नृपो भवेत्। यो राजा तच्छतगुणः स एव मण्डलेश्वरः। तस्माच्छतगुणो राजा राजेन्द्रः" इत्युक्ता-धिकारवति भूपतिभेदे मत्स्यवै० ज०खः ८६अ०।

राज्ञी स्त्री राज्ञः पत्नी ङीप् स्वयं वा राजते राज-कनिन् ङीप् वा। (रानी) १राजपत्न्याम् २स्वयं राजकर्मकर्त्र्याञ्च ३सूर्य्यपत्न्यां मेदि० ४कांस्ये हेमच०।

राज्य न० राज्ञो भावः कर्म्म वा राजन्+यत् नलोपः। १राजकर्म्मणि २राजभावे च ३जनपदे शब्दर०। "लक्षाधिपत्यं राज्यं स्यात् साम्राज्यं दशलक्षके। शतलक्षे महेशानि! महासाम्राज्यमुच्यते" वरदातन्त्रोक्ते ४लक्षसंख्याधिपत्ये च। [प्रजापालनादौ।

राज्यधुरा स्त्री ६त० अच्समा०। राज्यभारे राजकर्त्तव्य

राज्याङ्ग न० ६त०। स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलप्रकृतिरूपेषु अष्टसु राज्यस्योपायेषु। "परस्वैवोपकारीदं स्वाम्यङ्गं राज्यमुच्यते। अमात्यराष्ट्रे दुर्गाणि कोषो दण्डस्य पञ्चमः। मताः प्रकृतयस्तद्वत् विजिगीषोरुदाहृताः। एताः पञ्च तथा मित्रं सप्तमं पृथिवीपतिः। सप्तप्रकृतिकं राज्यमित्याचष्टे बृहस्पतिः। पौरश्रेणी तदङ्गं च ब्रुवते शब्दवेदिनः" शब्दर०।

राट्टि पु०रट-इण्। (गराल) १विहगे अमरः। २युद्धे स्त्री हेमच० वा ङीप्। पृषो० टस्य डत्वम्। राडिरप्युक्तार्थे

राढ पु० रह-घञ् पृषो० ढत्वम्। देशभेदे (राढ़) स्वार्थे क तत्रैव।

राढा स्त्री रह-घञ् पृषो०ढत्वम्। पुरीभेदे "गौडं राष्ट्रमलुब्धं निरुपमा तत्रापि राढा पुरीति" प्रबोधचन्द्रोदयः।

राढ़ीय त्रि० राढो निवासोऽस्य "ढक्राक्छः" पा०छ। राढदेशोद्भवे।

रात्रि(त्री) स्त्री रा-त्रिप् वा ङीप्। १रजन्यां नद्यां स्वस्वैधाप्रेक्षया सूर्य्यमण्डलस्य अदर्शनयोग्ये काले २हरिद्रायाञ्च अमरः। "मासेन च मनुष्याणां पितृणां तदहर्निशम्। कृष्णपक्षे दिनं प्रोक्तं शुक्ले रात्रिः प्रकीर्त्तिताः" उक्ते पितृणां शुक्लपक्षरूपे काले "उत्तरायणे दिनं प्रोक्तं रात्रिः स्यात् दक्षिणायने" इत्युक्ते देवानां दक्षिणायनरूपे ४काले च।

रात्रिकर पु० रात्रिं करोति कृ-अच् रात्रौ करः किरणोऽस्य वा। १चन्द्रे हेमच० २कर्पूरे च।

रात्रि(त्र्य)चर पुंस्त्री० रात्रौ चरति चर-ट खच् मुम् वा। राक्षसे अमरः। १खज्जातिस्त्रियां स्त्री ङीष्। २निशाचारिणि त्रि० टान्तस्य स्त्रियां ङीप्।

रात्रिजागर पुंस्त्री० रात्रौ जागर्त्ति अच्। १कुक्कुरे हेमच० स्त्रियां ङीष २निशाजागरणकर्त्तरि त्रि०। ७त०। ३रात्रौ जागरणे पु०। [कीटभेदे राजनि०।

रात्रिजागरद पु० रात्रौ जागरं ददाति दा-क। मशके

रात्रिपुष्प न० रात्रौ पुष्पमस्ति पुष्प-अच् ७त०। एरण्डे राजनि०। [क्षारा०। २कर्पूरे च।

रात्रिमणि पु० रात्रौ मणिरिव दीप्तिमत्त्वात्। १चन्द्रे

रात्रिवासस् न०रात्रेर्वासः इवाच्छादकम्। १अन्धकारे शब्दमा० रात्रौ परिधेयं वासः शाक०। २रात्रौ परिधेये वस्त्रे च।

रात्रिविगम पु० ६त०। १रजन्यवसाने तदुपलक्षिते २प्रभातकाले च शब्दमाला।

रात्रिविश्लेषगामिन् पु० रात्रौ विश्लेषं विच्छेदं गच्छति गम-णिनि। चक्रवाके राजनि० ततः स्त्रियां स्त्री ङीप्। [अण्। कुक्कुटे शब्दच०स्त्रियां ङीष्।

रात्रिवेद पुंस्त्री०रात्रिं रात्रिशेषं वेदयति रवेरुदयं विद-णिच्

रात्रिसत्त्र न० रात्रिषु त्रयोदशादिदिनेषु विहितं सत्त्रम्। त्रयोदशाहादिषु विहिते यागभेदे तत्र चार्थवादिकं फलं प्रतिष्ठादिकम् न विश्वजिन्न्यायात् स्वर्गफलमिति जै०४।३। १७।१८ सूत्रे समर्थितम्। "यद्यपि रात्रिशब्देन अथैव ज्योतिरथैव गौरित्यादिवाक्येन विहितानि सोत्थानि कर्माण्युच्यन्ते द्वादशाहादूर्ध्वभाविनस्त्रयोदशरात्रत्वतदहरादयश्च सत्त्रविशेषाः रात्रिसत्त्रपदवाच्यास्त्रयोदशसंख्यका रात्रयो यस्मिन् सत्त्रविशेषे स त्रयोदशरात्र इति व्युत्पत्तेः तथापि बहुवचनान्तरात्रिशब्देन रात्रिसत्त्रमुच्यते "एता विंशतिं रात्रीः इति श्रवणात्" त० बो०। "फलमात्रेयो निर्देशादस्तुतौ ह्यनुमानं स्यात्" जै० सू०। निर्देशादर्थवादेन फलस्य निर्देशात् फलमर्थवादोक्तमनुमेय आह अस्तुतौ यत्रार्थवादादिषु फलश्रुतिस्तत्रानुमानं स्वर्गफलकल्पनम्" शा० "निर्देशात्तु प्रतिष्ठैव फलत्वेन विवक्ष्यते" तथा च प्रतिष्ठाकाम आयुषा यजेत प्रतिष्ठाकामो ज्योतिषा यजेत" इत्यादिस्तुतिपदघटिता एव विधयः कल्पान्ते लाघवात् न तु स्वर्गकामादिपदघटिताः तत्त्ववो०। रात्रिसत्त्रन्यायोऽपि चार्थवादिकफलान्वयार्थः।

रात्रिहास पु०रात्रेर्हास इव शुभ्रत्वात्। श्वेतोत्पले शब्दच०

रात्र्यन्ध त्रि० रात्रावन्धः दृष्टिक्षययुक्तः। १निशादृष्टिशून्ये लाक्षादौ। २रात्रौ रोगकृतदृष्टिशून्ये (रतकाणा) च।

राद्ध त्रि०राध-कर्त्तरि कर्म्मणि वा क्त। १सिद्धे २पक्के च हेमच०

राद्धान्त पु० राद्धः सिद्धः अन्तो निर्णयो यस्मात् ब०। संशयविषये वादिदर्शितपक्षनिराकरणपूर्वकयथार्थपक्षप्रतिपादके २वाक्ये अमरः।

राध सिद्धौ अक० निष्पादने पाके च सक० स्वादि० दिवा० च पर० अनिट्। राध्नोति राध्यति अराद्सीत् अराद्धेधतुः रराधतुः। शुभाशुभालोचने च। तद्योगे शुभाशुभस्वामिनः सम्प्रदानता। "गर्गो राध्यति रामाय" बोपदेवः। अप+दोषकरणे "यन्मल्लमपराध्यति"भ घः।

राध पु० राधा विशाखा तत्समीपस्था अनुराधा च तद्युक्ता पौर्णमासी अण् ङीप् राधी सा यत्र मासे पुनरण्। १चान्द्रे वैशाखे मासि। ताण्डये २पञ्चे ३गुरुवर्षे च कार्त्तिकशब्दे दृश्यम्। ४तत्पूर्णिमायां स्त्री ङीप्।

राधन न० राध-ल्युट्। १साधने २प्राप्तौ मेदि०। ३तोषे च हेम०। राध-णिच्-युच्। पूजने स्त्री टाप्।

राधस् न० राध-असुन्। अन्ने निघण्टुः।

राधा स्त्री राध-अच्। १विशाखानक्षत्रे विरंचया रमणीदेहत्वेनाविर्भूते गोलोकस्थे परमेश्वराङ्गोद्भवरूपे २शक्तिभेदे तत्रैव श्रीदामशापात् वृन्दावने जातायां वृषभानुसुतायां ३अयानगोपिकायाम् ४कर्णस्य पालयित्र्यां मातरि च। ५वैशाखपौर्णमास्यां स्त्री ङीप्। [दृश्योऽप्यत्र

राधाकान्त पु० राधायाः कान्तः। श्रीकृष्णे राधावल्लभा-

राधातनय पु० राधायास्तनयः। कर्णे स हि कन्यावस्थायां सूर्य्यात् कुन्तीगर्भजातस्तया च त्यक्तः राधया स्वतपत्या पालित इति भारतप्रसिद्धम्। [पालितत्वात् ढक्। कर्णे

राधेय पु० राधाया अपत्यम् युवत्वेन परिपक्वत्वेन तद्-

राम पु० रम-कर्त्तरि घञ् ण वा। १परशुरामे २दशरथज्येष्ठपुत्रे श्रीरामे ३बलरामे च "भार्गवो राघवो गोपस्त्रयो रामाः प्रकीर्त्तिता" वह्निपु०। रामशब्दनिरुक्तिः "राशब्दो विश्ववचनो मशापीश्वरवाचकः। "विश्वानाधीश्वरो यो हि तेन रामः प्रकीर्त्तितः" ब्रह्मवै० ब्र०खं० ११०अ०। ४मनोहरे ५क्षिते ६अक्षिते ब्रह्मवै० ब्र०खं० ११०अ०। ७वास्तूक्शाके ८कुष्ठे (कुड़) न० मेदि० ९तमालपत्रे न० राजनि०।

रामकर्पूरक पु० रामं मनोहरं कर्पूरमिव कनू। सौगन्धिके स्वनामख्याते तृणभेदे शब्दर०।

रामगिरि पु० रामाश्रितः गिरिः। चित्रकूटपर्वते स हि रामेण वनवासगमनकाले प्रथममाश्रितः।

रामचन्द्र पु० रामश्चन्द्र इवाह्लादकत्वात्। दशरथज्येष्ठपुत्रे श्रीरामे शब्दर०। [मदनवृक्षे (मयनागाछ) भावप्र०।

रामच्छदनक पु०रामप्रियराम छदयति छद-णिच-ल्यु ल्। मदनवृक्षे (मयनागाछ) भावप्र०।

रामजननी स्त्री ६त०। १वसुदेवपत्न्यां रोहिण्यां २जमदग्निपत्न्यां रेणुकायां ३दशरथपत्न्यां कौशल्यायाञ्च।

रामठ न०रमठ+स्वार्थे अण्। १हिङ्गुनि अमरः। तत्तुल्यगन्धके २अङ्कोटकवृक्षे रत्नमा०। नाडीहिङ्गुनि स्त्री राजनि०

रामण न० रमयति रम-णिच् ल्यु पृषो० दीर्घः। निम्बे २तिन्दुके च (तेँद) राजनि०।

रामणीयक न० रमणीयस्य भावः रमणीयमेव वा स्वार्थे-धत्वात् ठञ्। १रमणीयत्वे "मणिकाञ्चनसंसर्गो रामणीयकमुच्यते" नैष० २रमणीये च।

रामतरुणी स्त्री रामा अभिरामा तरुणीव। (सेओती) १पुष्पवृक्षे राजनि० ६त०। २सीतायां ३रेवत्याञ्च।

रामदूत पु० रामस्य दूतः वार्त्ताहरः। हनूमति स हि रामवार्त्तां लङ्कातः सीतायाः आजहार।

रामदूती स्त्री रामा अभिरामा दूतीव गन्धद्वारा प्रचारात्। तुलसीभेदे (रामतुलसी) शब्दच०।

रामनवमी स्त्री रामस्य जन्माधारो नवमी। चैत्रशुक्लनवम्याम्। "चैत्रे मासि नवम्यान्तु जातो रामः स्वयं हरिः" अगस्त्यसंहिता। "प्राप्ते श्रीरामनवमीदिने सर्व्वो विमूढधीः। उपोषणं न कुरुते कुम्भीपाकेषु पच्यते" ति० त०।

रामपूग पु० रामः अभिरामः पूगः। गुवाकभेदे त्रिका०।

रामबाण पु० रसभेदे भावप्र०।

"पारदास्तनवङ्गाभ्रं भागयुग्मपरिचेन मिश्रितम्। तत्र जातिफलमर्द्धभागिकं तिन्तिलीफलरसेन मर्द्दितम्। वह्निमान्द्यदशवक्त्रनाशनो रामबाण इति विश्रुतो रसः। संग्रहग्रहणिकुष्ठकर्णकामलातखरदूषणं जयेत्। दीपते च खलु तानुमानतः सद्य एव जठराग्निदीपनः। रोचकः कफकुलान्तकारकः श्वासकासवमिजन्तुनाशनः" भावप्र०।

रामभद्र पु० राम एव भद्रः मङ्गलदायकत्वात्। श्रीरामे "रामेति रामचन्द्रेति रामभद्रेति वा स्मरन्निति" पद्मपु०।

रामलवण न० कर्म०। शाम्भरिलवणे रत्नमा०।

रामवल्लभ न० रामस्य वल्लभं प्रियम्। १भूर्जपत्रे राजनि० तद्धि रामेण वनवासाश्रमे प्रियतया धृतम्। २तत्प्रिये त्रि०। [बाणहेतुत्वात् मनोहरः।

रामशर पु० कर्म०। शरवृक्षभेदे राजनि० स हि कार्त्तिकेयद्वारा

रामसख पु० ६त० टच्। सुग्रीवे वानरराजे शब्दच०।

रामा स्त्री रमतेऽनया रम-करणे घञ्। १गीतादिकलाभिज्ञायां नार्य्यां २नारीमात्रे भावप्र० ३नद्याम् ४हिङ्गुनि मेदि० ५हिङ्गुवृक्षे पु० ६श्वेतकण्टकार्य्यां ७वटवृक्षकन्यायां ८अशोके

दमोरोचनायां १०बालायां ११गैरिके च स्त्री शब्द०।

रामायण न० रामस्यायनं चरितमधिकृत्य कृतो ग्रन्थोऽण्।
रामचरितप्रतिपादके वाल्मीकिकृते महाकाव्यभेदे तच्च
सप्तकाण्डात्मकम् ब्रह्मलोके कोटिश्लोकात्मकं मनुष्यलोके
च चतुर्विंशतिसाहस्रं षड्यतषडंशुतम्।
तत्प्रतिपाद्यविषयाश्च महा०पु० १४८ अ० उक्ता यथा
"मनोरिक्ष्वाकुवंश्योऽभूद् वंशे राजा रघुः स्मृतः।
रघोरजस्ततो जातो राजा दशरथो बली। तस्य
सुताश्चत्वारो महाबलपराक्रमाः। कौशल्यायां
जज्ञे रामो भरतः कैकयीसुतः। सुतौ लक्ष्मणशत्रुघ्नौ
सुमित्रायां बभूवतुः। रामो भक्तः पितुर्मातुर्विश्वामित्रा-
दवाप्तवान्। अस्त्रग्रामं ततो वह्नीं ताडकां प्रजघान
ह। विश्वामित्रस्य यज्ञे तु सुबाहुं न्यबधीद्बली। जन-
कस्य क्रतुं गत्वा धनुर्भेऽथ जानकीम्। उर्म्मिलां
लक्ष्मणो वीरो भरतो माण्डवीं सुताम्। शत्रुघ्नो वै
कीर्त्तिमतीं कुशध्वजसुते च ते। पित्रादिभिरयोध्यायां
गत्वा रामादयः स्थिताः। युधाजित् मातुलश्च यदुभ-
रतौ गतौ। मातुलोर्द्धपथ्यैश्च राज्यं दातुं समुद्यत-
स्य। रामाय ज्येष्ठपुत्राय कैकेय्या प्रार्थितं तदा।
चतुर्दश समावासो वने रामस्य वाञ्छितः। रामः पित्र-
र्हितार्थन्तु लक्ष्मणेन च सीतया। राज्यं च तृणवत्
त्यक्त्वा पद्भ्यामेवपुरं गतः। दृष्ट्वा त्यक्त्वा प्रयागञ्च चित्र-
कूटं गिरिं गतः। रामस्य तु वियोगेन राजा स्वर्गं स-
माश्रितः। संस्कृत्य भरतस्तस्मात् रामं भ्रातृगणान्वितः।
अयोध्यान्तु समागत्य राज्यं कृत्वा महामते!। न नैच्छत्
पादुके दत्त्वा राज्याय भरताय तु। विसर्ज्जितोऽथ
भरतो रामराज्यसमाश्रयत्। नन्दिग्रामे स्थितो भक्तो
ह्ययोध्यां नाविशद् बली। रामोऽपि चित्रकूटाच्च अत्रे-
राश्रममाययौ। नत्वा मुनीन्द्रं वामाक्ष्यं दण्डकारण्य-
मागतः। तत्र शूर्पनखा नाम राक्षसी सहसागता।
निरस्य कर्णौ नासे च रामेणाथ पराहिता। तत्प्रेरितः
खरस्तस्माद्दूषणस्त्रिशिरास्तथा। चतुर्दशसहस्रेण रक्ष-
सान्तु बलेन च। रामोऽपि प्रेषयामास बाणैर्यमपुरञ्च
तान्। राक्षस्या प्रेरितोऽभ्यागात् रावणो हरणाय हि।
मृगरूपं स मारीचं कृत्वाथेत्य विदग्धकृत्।
सीतया प्रेरितो रामो मारीचं प्रजघान ह। म्रिय-
माण. स च प्राह हा सीते! लक्ष्मणेति च। सीतोक्तो
लक्ष्मणोऽभाद्रामस्याशु ददर्श तम्। ततश्च राक्षसी
माया नूनं सीता हृतेति सा। रावणोऽन्तरमासाद्य कक्षी-
कृत्यादाय जानकीम्। जटायुषं विनिर्जित्य ययौ लङ्कां
ततो बली। अशोकवनिकायां रक्षितां तामधारयत्।
आगत्य रामः शून्याञ्च पर्णशालां ददर्श ह। शोकं
कृत्वाथ जानक्या मार्गणं कृतवान् मुहुः। जटायुषञ्च
संस्कृत्य तदुक्तो दक्षिणां दिशम्। गत्वा सख्यं ततस्तस्य
सुग्रीवेण च राघवः। सप्ततालान् विनिर्भिद्य किष्कि-
न्ध्यायां हरीश्वरम्। सुग्रीवं कृतवान् राम स्वयमूरुके
स्वयं स्थितः। सुग्रीवः प्रेषयामास वानरान् पर्वतोप-
मान्। सीतायाः मार्गणं कर्तुं पूर्वादौ सुमहाबलान्।
प्रतीचीमुत्तरां प्राचीं दिशं गत्वा समागताः। दक्षिणान्तु
दिशं ते च मार्गयन्तोऽथ जानकीम्। वनानि पर्वतान्
द्वीपान् नदीनां पुलिनानि च। जानकीं ते ह्यपश्यन्तो
मरणे कृतनिश्चयाः। सम्पातिवचनात् ज्ञात्वा हनूमान्
कपिकुञ्जरः। शतयोजनविस्तीर्णं प्लुत्वे मकरालयम्
अपश्यल्लङ्कानगरीं तत्र अशोकवनिकास्थिताम्। भर्त्सितां
राक्षसीभिश्च रावणेन च रक्षसा। भव भार्य्येति वदता
चिन्तयन्तीञ्च राघवम्। अङ्गुलीयं कपिर्दत्त्वा सीतां
कौशल्यनन्दनीम्। रामस्य तस्य दूतोऽहं शोकं मा कुरु
वैदेहि!। अभिज्ञानञ्च मे देहि येन रामः करिष्यति।
तत् श्रुत्वा प्रददौ सीता वेणीरत्नं हनूमते। यथा रामो
लभेत् शीघ्रं तथा वाच्यं त्वया गते। तथेत्युक्त्वा स
हनुमान् वनं दिव्यं बभञ्ज तत्। हत्वाञ्च राक्षसांश्चा-
न्यान् बन्धनं स्वयमागतः। खड्गैरिन्द्रजितो बाणैर्बद्धो
रावणमन्त्रीतु। रामदूतोऽस्मि हनुमान् देहि रामाय
मैथिलीम्। एतत् श्रुत्वा प्रकुपितो दीपयामास पुच्छकम्।
कपिर्ज्वलितलाङ्गूलो लङ्कां देहे महाबलः। दग्ध्वा
लङ्कां समायातो रामपार्श्वं स वानरः। जग्ध्वा फलं
मधुवने दृष्ट्वा सीतेत्यवेदयत्। मणिरत्नञ्च रामाय रामो
लङ्कां ययौ पुरीम्। सुग्रीवः सहसानङ्गदाद्यैः
सलक्ष्मणः। विभीषणोऽपि संप्राप्तः शरणं राघवं प्रति।
लङ्कैश्वर्य्येऽभ्यषिञ्चद्रामस्तं रावणाहृजम्। रामो नलेन
सेतुञ्च कृत्वाब्धौ चोच्छ्रायतम्। सुवेलावस्थितश्चैव पुरीं
लङ्कां ददर्श ह। अथ ते वानरा वीरा नीलाङ्गदनला-
दयः। धूम्राक्षव्यालधूम्रेन्द्राजाम्बवत्प्रमुखाश्चदा।
द्विविदसुषेणाद्या पुरीं लङ्कां बभञ्जिरे। राक्षसांश्च मुख्या-
कायान् काकाक्षनक्षयोपमान्। रामः सलक्ष्मणो हत्वा
सकपिः सर्वराक्षसान्। विद्युज्जिह्वञ्च धूम्राक्षं देवा-

लक्षनरान्वितौ । महोदरमहापार्श्वपतिकायं महाबलम् । कुम्भं निकुम्भं मत्तञ्च मकराक्षं खरस्वनम् । महत्तं गोरथाक्षञ्च कुम्भकर्णं महाबलम् । रावणं ब्रह्मणश्चित्त्वा कक्षे दे राघवौ बली । निक्षिप्य वाङ्मध्यगोऽपि रावणन्तु व्यपानयत् । सीतां गृहां गृहीत्वाथ विमाने पुष्पके स्थितः । सवानरः सभाजातो ह्ययोध्यां प्रवरां पुरीम् । तत्र राज्यं चकाराथ पुत्रवत् पालयन् प्रजाः । दशाश्वमेधानाहृत्य गवामियुतमेव च । पिण्डानां विधिवत् कृत्वा दत्त्वा दानानि राघवः । पुत्रौ कुशलवौ स्थाप्य तौ च राज्येऽभ्यषेचयत् । एकादशसहस्राणि रामो राज्यमकारयत् । शत्रुघ्नो लवणं हत्वा शैलूषं भरतः स्थितः । अगस्त्यादिमुनीनाञ्च सत्कृत्यञ्च रक्षणम् । स्वर्गं गतो जनैः सार्द्धं सयोध्यस्थैः कृतान्वयः" । अन्यदपि व्यासप्रणीते पद्मपु० अध्यात्मरामायणं वाल्मीकिकृतमद्भुतरामायणं चास्ति ।

रामालिङ्गनकाम पु० रामायाम् स्त्रीआमालिङ्गनस्य कामोऽत्र । रूपकस्थाने राजनि० ।

रामोपाख्यान न० ६त० । १रामस्योपाख्याने । तदधिकृत्य कृतो ग्रन्थः अण् । २भारतवनपर्वान्तर्गते तदुपाख्यानप्रतिपादके ऽवान्तरपर्वणि च । [बंधभवे दृश्यभेदे ।

राम्भ पु० रम्भो वेणुरस्य विकारोऽण् । व्रतभेदे धार्य्ये ।

राल पु० रा–अलच् । सालवृक्षनिर्य्यासे (धुना) भावप्र० । "राजो हिमो गुरुस्निग्धः कषायो वातकोपहृत् । दोषास्रस्वेदवीसर्पव्रणविषादिकाः । दग्धभग्नाग्निदग्धांश्च शूलातीसारनाशनः" भावप्र० ।

रालकाश्य पु० राल: काश्यो यस्य । सालवृक्षे राजनि० ।

राव पु० रु–घञ् । शब्दे हारा० ।

रावण पु० रवणस्यापत्यम् शिवा० अण् रावयति शब्दयति रु णिच्–ल्यु वा । लङ्काधिपतौ विश्रवसः पुत्रे राक्षसे ।

रावणगङ्गा स्त्री रावणनिर्म्मिता गङ्गा नदी । सिंहलदेशस्थे नदीभेदे गरुड़पु० ७ अ० ।

रावणारि पु०६त० । श्रीरामे जटा० रावणान्तकादयोऽत्र ।

रावणि पु० रावणस्यापत्यम् इञ् । मेघनादाख्ये रावणपुत्रे हेमच० । [चक्रि न तुल्यः ।

राश्च शब्दे भ्वा० आ० अक० सेट् । राशते अराशिष्ट अरिदित् ।

राशि पु० अश्नुते व्याप्नोति अश–इन् धातोरुडागमश्च । धान्यादीनां पुञ्जे अमरः । ज्योतिश्चक्रस्य द्वादशांशे २मेषादौ, "दशभे राशिप्रविष्टे" इति जीवातौ प्रसिद्धे १व्यक्ताव्यक्तगणभेदे यथा त्रैराशिकपञ्चराशिकादिशब्दे ।

राशिचक्र न० राशिघटितं चक्रं इत्तम् । मेषादिद्वादशराशियुक्ते गोलाकारे वायुपथेन पूर्व्वतः पश्चात् भ्रमिष्यं वंभ्रम्यमाणे ज्योतिर्मये "सप्तविंशतिभिर्ज्योतिश्चक्रं क्षिप्तमिवायुगम्" इत्युक्ते ज्योतिश्चक्रे खगोलशब्दे दृश्यम् मत्स्यपुराणोक्तराशिचक्रे तच्च चक्रशब्दे २८०पृष्ठे दृश्यम् ।

राशिभोग पु० राशीनां भक्तभक्ता भक्तैर्भोगः भुज–घञ् कृत्वम् । रव्यादीनां भक्तभक्तभुक्तारेषु राशिषु गतिभेदे । खगोलशब्दे दृश्यम् ।

राशी(शि)कृत पु० अराशिः राशिः कृतः राशि+अभूततद्भावे च्वि तदर्थे कृभ्वा० वा । (ढेरी) पुञ्जीकृते एकत्रीकृते ।

राष्ट्र न० राज–ष्ट्रन् । अमरदे "भोक्तुं राष्ट्रमनक्षत्रवश्यं" इति प्रयोधचन्द्रोदयः । २देशभेदे अमरः ।

राष्ट्रिका स्त्री राज–ष्ट्रन् पित्त्वात् ङीष् स्वार्थे क । कण्डुकारिकायाम् अमरः ।

राष्ट्रिय पु० राष्ट्रे भवः घ । नाट्यौक्तौ १राजभृत्ये । ञ राष्ट्रीव तत्रार्थे । तद्भावेपि २राष्ट्रभवे त्रि० ।

रास शब्दे भ्वा० आ० अक० सेट् । रासते अरासिष्ट अरिदित् वक्ति न तुल्यः । रासभः । अयं तालव्यान्त इत्यन्ये ।

रास पु० रस–घञ् रास–घञ् वा । १शब्दे, २ध्वनौ भक्तभक्तावन्वयवत् द्वयोर्हस्तयोर्मध्यस्थित्या ३क्रीड़ाभेदे, ४क्रीड़ाफले च मेदि० ।

रासक न० दृश्यकाव्यभेदे "नाट्ये रासकमेकाङ्कं बहुताललयस्थिति । उदात्तनायकं तद्वत् पीठमर्द्दोपनायकम् । कक्षोऽङ्गत्र षड्डकारो नारी वासकसज्जिका । सुखनिवर्हणे सन्धी लास्याङ्गानि दशापि च । केचित् प्रतिमुखं सन्धिमिह नेच्छन्ति केवलम्" सा० द० ।

रासभ पुंस्त्री० रास–अभच् । गर्दभे अमरः स्त्रियां ङीष् ।

रासभवन्दिनी स्त्री रासभस्य वन्दिनीव । मल्लिकायाम् शब्दच० ।

रासमण्डल न० रासार्थं भक्तभक्तावन्वयवत् द्वयोर्हस्तयोर्मध्यस्थित्या क्रीड़ाभेदार्थं भक्तभक्ताकारेण भ्रमणं यत्र । १गोलोकस्थे रासक्रीड़ाधारस्थाने । तत्तत् मण्डलप्रमाणञ्च ब्रह्मवै० जन्मख० ८४ अ० । श्रीकृष्णस्य तद्रासाङ्के २मण्डलभेदे च ।

रासयात्रा स्त्री ६त० । कार्त्तिकपौर्णमास्यां भगवद्रासभेदे ब्रह्मवै० प्र० २५ अ० । भगवद्रासस्य भा० १०स्क० २८अ० आदौ दृश्यः ।

रासेवास पु० ६त० अलुक् स० । १गोष्ठ्यां, २रासे, ३हल्लारे ४रसविशेषे, ५रसावासे, ६प्रणीलागरे च मेदि० । ७उत्सवे शब्दच० ८परिहासे भटा० ।

रासेश्वरी स्त्री ६त० । राधिकायाम् ।

रास्ना स्त्री रस-क्यन् । १खनामख्यातायां लतायाम् (काँटा आमरुल) । तत्पर्य्यायगुणा भावप्र० उक्ता यथा "रास्ना युक्तरसा रम्या सुवहा रसना रसा । एलापर्णी च सुरसा सुस्निग्धा श्रेयसी तथा । रास्नाऽऽमपाचनी तिक्ता गुरूष्णा कफवातजित् । शोथश्वासप्लीहवातशूलोदरापहा । कासज्वरविषार्शोतिवातिकामयसिध्मजित्" भावप्र० । २नाकुल्यां भावप्र० तत्पर्य्यायगुणा उक्ता यथा "नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली । नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी । नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् । श्लीपिलूतालसिकाखुविषज्वरक्लमिव्रणान्" ।

राहु पु० रह-उण् । १त्यागे, २त्यक्तरि, ज्योतिश्चक्रस्थे खूर्य्यकिरणसम्पर्काभावेन जायमानपृथिवीच्छायारूपे ३तत्संज्ञे तदधिष्ठातरि ४ग्रहभेदे, ५सिंहिकासुते दानवे च । तमःशब्दे दृश्यम् ।

राहुच्छत्र न० राहोर्यच्छत्रमिव । आर्द्रके राजनि० ।

राहुदर्शन न० राहोर्दर्शनं यत्र । चन्द्रसूर्य्ययोरुपरागरूपे १ग्रहणे "स्नानं दानं तपः आत्ममन्त्रं राहुदर्शने" इति ति०त० । तेन उपरोक्ते एव चन्द्रे सूर्य्ये च तस्य दृश्यता नान्यदा तस्य छायारूपत्वात् ।

राहुमूर्द्धभिद् पु० राहोः सिंहिकासुतस्य मूर्द्धानं भिनत्ति भिद-क्विप् । विष्णौ । अस्तपायकाले देवरूपो देवरूपेण स्थित्वाऽमृतं पिबन्तं दृष्ट्वा विष्णुचक्रस्य शिरश्छेदेति भाग० ८।९ अ० ।

राहुरत्न न० राहोः प्रियं रत्नम् । गोमेदमणौ राजनि० ।

राहुस्पर्श पु० राहोः स्पर्शः स्वाधिष्ठितभूच्छायाद्वारा यत्र । चन्द्रसूर्य्ययोः उपरागरूपे ग्रहणे हलायुधः ।

राहूच्छिष्ट पु० ६त० । लशुने त्रिका० ।

राहूत्सृष्ट पु० ६त० । लशुने हारा० ।

रि गतौ हु० पर० सक० अनिट् । रियति अरैषीत् रिरिषाय ।

रिक्त न० रिच-क्त । १शून्ये २वने मेदि० । ३निरर्थके च त्रि० शब्दर० । स्वार्थे क । तत्रैव त्रि० ।

रिक्तभाण्ड न० रिक्तं भाण्डम् । तैलादिशून्ये भाण्डे ।

रिक्तहस्त त्रि० रिक्तो धनादिशून्यो हस्तो यस्य । १निर्धने, भूरिदानादिना २व्ययितधने च । [तिथिषु ज्यो०त०

रिक्ता स्त्री रिच-क्त । उभयपक्षयोश्चतुर्थीनवमीचतुर्दशी-

रिक्थ न० रिच-थक् । १धने अमरः । २मिताक्षरादयुक्ते अप्रतिबन्धे दाये च "स्वामी रिक्थक्रयसंविभागेत्यादि" गौतमस्मृतिः ।

रिक्थग्राहिन् त्रि० रिक्थं दायं गृह्णाति । ग्रह-णिनि । दायहारिणि पुत्रादौ । अण् । रिक्थ्यग्राह्योऽप्यत्र ।

रिक्थिन् त्रि० रिक्थं स्वाम्यत्वेनास्त्यस्य इनि । दायहारिणि दायादे "उभयोरप्यसौ रिक्थी" इति मनुः ।

रिख खर्ये भ्वा० पर० सक० सेट् इदित् । रिङ्खति अरिङ्खीत् । अनिदित्यस्यमित्येके रेखति अरेखीत् ।

रिग गतौ भ्वा०पर०सक०सेट् इदित् । रिङ्गति अरिङ्गीत् ।

रिङ्गण न०रिगि-ल्युट् । स्खलने । रिखि ल्युट् । रिङ्खणमप्यत्र

रिच वस्यर्के वियोगे च वा चु०उभ० पक्षे भ्वा०पर०सक०सेट् । रेचयति ते रेचति । अरीरिचत् त अरेचीत् ।

रिच विरेके (अतिशय पुरीषोत्सर्गे) रुधा०उभ०सक०अनिट् । रिणक्ति रिङ्क्ते रिरेच अरिचत् अरैक्षीत् अरिक्त । अति+अतिरिक्त स्थिते आधिक्येन स्थितौ सक० । अतिरेक वि+अति भेदे तदवस्थे तदवस्थरूपे पदार्थे च अतिरेकः ।

रिज भर्जने भ्वा० आ०सक० सेट् । रेजते अरेजिष्ट ।

रिपु पु० रप-उनु-पुगो० । १शत्रौ अमरः । २चोरनामगन्धद्रव्ये राजनि० । ज्योतिषोक्ते जन्मनामेषया ३षष्ठस्थाने च । देहिक्येषु षट्सु ४कामक्रोधादिषु । "कामः क्रोधश्च लोभश्च मात्सर्य्यं मदमोहकौ । देहिक्या रिपवस्त्वेते पुरा-

रिपुघातिनी स्त्री रिपुं हन्ति हन-णिनि । (तुँचुर) लताभेदे शब्दच० । २शत्रुघातके त्रि० । [२शत्रुभेदे पु०]

रिपुञ्जय त्रि० रिपुञ्जयति जि-खच् मुम् । १शत्रुजयिनि,

रिम्फ बधे तु० प० सक० सेट् । रिम्फति अरिम्फीत् रिम्फते

रिप्फ पु०रिम्फ-अच् पृषो० । जन्मनामेषया द्वादशे स्थाने ज्यो०

रिफ कत्थने भौ० पर० सक० सेट् । रेफति अरेफीत् ।

रिफ हिंसायां निन्दायां बोधने च सक० श्लाघायाम् अक० तु० पर० सेट् । रिफति अरेफीत् ।

रिब गत्यां भ्वा०पर०सक०सेट् इदित् । रिम्बति अरिम्बीत् ।

रिभ शब्दे भ्वा० पर० सक० सेट् । रेभति अरेभीत् ।

रिख गतौ भ्वा०पर०सक०सेट् इदित् । रिख्खति अरिख्खीत् ।

रिश्य हिंसायां तु०पर०सक०अनिट् । रिश्यति अरिक्षत् ।

रिश्य(श्य) स्त्री रिश्य(श्य)तेऽनेन रिश्य(श्य)-क्यप् । मृगभेदे त्रिका० स्त्रियां बोपधत्वात् टाप् । उपश्यशब्दार्थे शब्दर० ।

रिष वधे भ्वा०पर०सक०सेट्। रेषति अरेषीत्। रिरेष।

रिष्ट न० रिश-क्त। १भङ्गे २अशुभे ३पापे च अमरः। भावे क्त। ४नाशे, ५अशुभादिमति त्रि०। उपचारात्। ६खड्गे, ७रक्तशिग्रौ च पु० मेदि०। स्वार्थे क। तेषु।

रिष्टि स्त्री० रिष-रिश-वा क्तिन्। १अशुभे, २शस्त्रभेदे खड्गे पु०मेदि०। क्तिच्। ३रम्भे पु०। सा च द्व०जा०दृश्याः

रिह वधे भ्वा० पर० सक० सेट्। रेहति अरेहीत्।

री गतौ दि० आ० अक० अनिट्। रीयते अरेष्ट ओदित् निष्ठातस्य नः। रीणः। [णाति अरैषीत्।

री गतौ वधे च सक० रवे अक० क्या० पा० अनिट्। रि-

रीठा स्त्री री-टक् ठस्य नेत्त्वम्। रीठाकरञ्जे "रीठाकरञ्ज-स्तिक्तोष्णः कटुगन्धश्च वातहृत्। कण्डूतिकुष्ठविष-हृत् कफविस्फोटनाशनः" राजनि०।

रीठाकरञ्ज पु० कर्म०। खनामख्याते वृक्षे राजनि०।

रीठा स्त्री रिह-क्त नि० दृढभावः। अवष्टब्धायाम् अमरः।

रीण त्रि० री-क्त। क्षरिते स्रुते अमरः।

रीति स्त्री री क्तिच्। १पित्तले। क्तिन्। २प्रस्रावे, ३क्षरणे अमरः ४चौरकिट्टे, मेदि०। ५दग्धक्षणादिमले रमा०। ६स्त्री-भावे, ७गतौ, ८स्वभावे, ९मेघच०। अलङ्कारोक्ते ९गौ-ड्यादिरचनाभेदे च "गौडीपाञ्चालवैदर्भ्यो रीतयः परि-कीर्त्तिताः" सा० द०। [तत्रार्थे स्त्री शब्दर०

रीतिक न०रीत्या पित्तेन कायति कै-क। पुष्पाञ्जने राजनि०

रीतिपुष्प न० रीतेः पुष्पमिव। कुसुमाञ्जने अमरः।

रीव गतौ, संस्रवणे च भ्वा०उभ० सक० सेट्। रीवति ते अरीवीत् अरीविष्ट। क्वादित्वात् ङित्त्वं न हृस्वः।

रु शब्दे अदा०प०प०अक०वेट्। रौति-रवीति अरावीत्-अरौ-षीत्। लिटि नित्यमेट्। रुरविथ। [रुरुविथे।

रु वधे गतौ च भ्वा० आ० सक० अनिट्। रवते अरोष्ट।

रुक्प्रतिक्रिया स्त्री रुजः प्रतिक्रिया प्रतिकारः प्रति+ कृ-भावे श हृत०। चिकित्सायाम् अमरः।

रुक्म न० रुच्-मन् नि० कुत्वम्। १काञ्चने, २धत्तूरे, अमरः ३चोके, मेदि० ४नागकेसरे च राजनि०।

रुक्माकारक पु० रुक्मं तच्चिन्तभूषणं करोति कृ-ण्वुल्। स्वर्णकारे अमरः।

रुक्मिन् त्रि० रुक्मं विद्यतेऽस्य इनि। १स्वर्णयुक्ते २भीष्मक-राजश्वशुरे पु० राजभेदे भाग०१०।५२। ३रुक्मि-राजकन्यायां श्रीकृष्णपत्न्यां स्त्री ङीप्।

रुक्ष त्रि०रुह-क्स। १अचिक्कणे २निःस्नेहे ३कठोरे च अमरः

रुग्ण त्रि०रुज-क्त। १रोगान्विते राजनि० २भग्ने च अमरः

रुच प्रीतौ प्रकाशे च भ्वा० आ० अक० सेट्। रोचते लुङि उ० अरुचत् अरोचिष्ट। एतद्योगे प्रीयमाणस्य सम्प्र-दानता "नारदाय रोचते कलहः" सि०कौ०।

रुचक न० रुच-कुन्। १सर्जिकाक्षारे, माङ्गल्ये २दूर्व्ये, ३अश्वभूषणे, ४माल्ये ५सौवर्चले, ६वृत्तकटे त्रि० मेदि० ७आस्वाद्यरसे, शब्दच० ८रोचनायाम्, ९विड्डङ्गे न० हेमच० १०लवणे न० हारा०। ११बीजपूरे, १२दन्ते, १३निष्के पु० १४कपोते च पुंस्त्री०मेदि० स्त्रियां ङीष्। १५स्वर्णपात्रभेदे च।

रुच(चा) स्त्री रुच सम्प० क्विप् वा टाप्। १दीप्तौ, २शो-भायां, ३प्रकाशे, ४शारिकाखगवाचि च शब्दर०।

रुचि(ची) स्त्री रुच-कि वा ङीप्। १अनुरागे २आसङ्गे ३स्पृहायाम् ४अभिलाषे ५किरणे अमर०। ६शोभायां मेदि० ७बुभुक्षायां हेमच०। ८गोरोचनायां च राजनि०। ९प्रजापतिभेदे पु०मार्क०पु०। १०आग्निध्रभेदे कामशास्त्रम्।

रुचिर त्रि० रुचिं राति ददाति रा-क। १मनोहरे सुन्दरे १मधुरे च अमरः। २भूतके ३कुङ्कुमे ४लवङ्गे च न० ५गोरोचनायां स्त्री राजनि०।

रुचिराञ्जन पु० अञ्जयतेऽनेन अञ्ज-करणे ल्युट् रुचिरः शोभायुक्तोऽञ्जनः। शोभाञ्जने (शजिना) राजनि०।

रुच्य त्रि०रुचये हितः यत्। १सुन्दरे २रुचिकरे च अमरः। २सौवर्चले न० राजनि०। ३पत्यौ पु०हेमच०। ४कनकवृक्षे ५शालिधान्ये च पु० राजनि०।

रुच्यकन्द पु० रुच्यः रुचिकरः कन्दो मूलमस्य। शूरणे (ओल) राजनि०। [निष्ठातस्य नः। रुग्णः।

रुज भञ्जने तु०प०सक०अनिट्। रुजति अरौक्षीत् ओदित्

रुज हिंसायां चु० उभ०सक०सेट्। रोजयति ते अरूरुजत् त रोगकर्त्तृकस्यास्य योगे कर्मणि षष्ठी। रुजयति चौरस्य रोगः

रुज(जा) स्त्री रुज-सम्प० क्विप् वा टाप् रुज-अङ् वा। १रोगे २भङ्गे मेदि० रुज-क। ३सेव्यां हेमच०। ४कुष्ठे च (कुड़) राजनि०। एतद्योगे कर्मण्यष्ठी न समासः।

रुजाकर न० रुजां रोगं करोति कृ-अच्। १कर्मरङ्गफले (कामराङ्गा) शब्दच० २रोगकारके त्रि०। ३व्याधौ पु० हेमच०।

रुट चौर्य्ये भ्वा० पर०सक०सेट् इदित्। रुण्टति अरुण्टीत्।

रुट रोषे सक० दीप्तौ अक० चु० उभ० सेट्। रोटयति ते अरूरुटत् त।

रुट दीप्तौ अक० प्रतिघाते सक० च भ्वा० आ० सेट्। रोटते लुरिट लुडि अभ० अरुटत् अरोटिष्ट रुरुटे।

रुठ उपघाते भ्वा० पर० सक० सेट्। रोठति अरोठीत्।

रुठ प्रतीघाते भ्वा० आ० सक० सेट्। रोठते लुरिट् लुडि अभ० अरुठत् अरोठिष्ट रुरुठे।

रुठ गतौ चौर्य्ये अक० मन्दीभावे खञ्जीभावे च अक० भ्वा० पर० सेट् इदित्। रुण्ठति अरुण्ठीत्। [कवन्धे जटा०।

रुण्ड पु० रुटि-अच् पृषो० ठस्य डः। १मूर्द्धशून्यदेहे रुत न० रु-क्त। एवे पशुपक्षिप्रभृतीनां शब्दे अमरः।

रुद् रोदने अश्रुविमोचने अदा० पर० अक० सेट् वेदा० सार्व० धातुके कृत्यादौ लुट् रोदिति इरित् अरुदत् अरोदीत्।

रुदादि पु० सार्वधातुके कृत्यादौ लुड् निमित्ते शब्दगणे च गणः "रोदितिः स्वपितिश्वैव श्वसितिः प्राणितिस्तथा। अजितिश्चैव विज्ञेयो रुदादिः पञ्चको गणः"।

रुदन्ति(न्ती)का स्त्री रुद-झश् गौरा० ङीष्। संज्ञायां कन् वा। क्षुद्रक्षुपभेदे राजनि० "यथापत्रसमं पत्रं क्षुपस्यैव तथाकृतिः। शैशिरे जलबिन्दूनां स्रवन्तीति रुदन्तिका। रुदन्ती वह्निरुदृष्या त्रिशूली च रसायना" राजव०।

रुदित न० रुद-भावे क्त। १क्रन्दने अमरः। कर्त्तरि क्त। २क्षुतरोदने त्रि०। [रोधे च।

रुद्ध त्रि० रुध-क्त। आवरणादिना वेष्टिते अमरः २क्षुतगतिः

रुद्र पु० रोदिति रुद्-रक्। १शिवमूर्त्तिभेदे "घोऽरोदीत् यद्-रोदीत् तत् रुद्रस्य रुद्रत्वम्" श्रुतौ २वह्नौ च। "अजैकपादहिर्बुध्नो विरूपाक्षः सुरेश्वरः। जयन्तो बहुरूपश्च त्र्यम्बकोऽपराजितः। वैश्वतश्च सावित्रो हरो रुद्रा इति स्मृताः" १रुद्रभेदेषु एकादशसु शिवमूर्त्तिभेदेषु व० व० अजु० १६अ० उक्तेषु "नमस्ते! रुद्र मन्यवे" इत्यादिषु ४रुद्रगणेषु च। ५एकादशसंख्यायाम् ६आदौनिक्षत्रे च।

रुद्रचण्डी स्त्री रुद्रयामलोक्ते देवीमाहात्म्यप्रतिपादकग्रन्थे

रुद्रज पु० रुद्रात् जायते जन-ड। १शिवबीर्य्यजाते पारदे राजनि० २कार्त्तिकेयादौ च।

रुद्रजटा स्त्री रुद्रस्य जटेव पिङ्गत्वात् जटित्वाच्च। १स्वनामख्याते लताभेदे राजनि० "कटूरुद्रजटा श्वासकास कृच्छ्रोदरनाशिनी। भूतघ्नीनाशिनी च" रुद्रजटाशब्द।

रुद्रपत्नी स्त्री ६त०। १दुर्गायाम् २सतीशाम्भ (शंभिना) रत्नमा०।

रुद्रप्रिया स्त्री ६त०। १हरीतक्याम् २दुर्गायाञ्च शब्दर०।

रुद्रविंशति स्त्री रुद्रसङ्ख्यिका विंशतिः। प्रभवादिषु षष्टिसंवत्सरेषु अन्तिमेषु विंशतिवर्षेषु। प्रभवादिशब्दे ४४७१ पृ० दृश्यम्।

रुद्रसावर्णि पु० चतुर्दशस्य मनुषु द्वादशे मनौ भाक० पु०।

रुद्राक्षोड़ न० रुद्रस्याक्षीडा यत्र। श्मशाने त्रिका०।

रुद्राक्ष पु० रुद्रस्याक्षि कारणत्वेनास्यास्य तथा। स्वनामख्याते वृक्षे तन्माहात्म्यादि नि०शि० उक्तं यथा

कौर्म्मे "विना भक्त्यापि पुरुषैर्न विना रुद्राक्षधारया। मुक्तिलोऽपि महादेवो न स्यात्तस्य फलप्रदः। तस्मान्मृदापि कर्त्तव्यं ललाटे वै त्रिपुण्ड्रकम्" रुद्राक्षविशेषाः शिवरहस्ये "एकवक्त्रः, शिवः साक्षाद् ब्रह्महत्यां व्यपोहति। अभक्ष्यत्वं प्रतिस्रोतो वह्निमान्द्यं करोति च। द्विवक्त्रो२ हरगौरी स्यादुगोवधाद्यघनाशनम्। त्रिवक्त्रो३ ह्यग्निजन्माथ पापराशिं प्रणाशयेत्। चतुर्वक्त्रः४ स्वयं ब्रह्मा मरहत्यां व्यपोहति। पञ्चवक्त्रः५ तु साक्षान्निरगस्याभक्ष्यपापघृत्। षड्वक्त्रः६स्तु गुहो ज्ञेयो ब्रह्मभ्रूणहत्यादि नाशयेत्। सप्तवक्त्रः७ स्वयं सप्त धातवः स्युः सप्तमातरः। क्षेयादिपापहृत्। विनायकोऽष्टवक्त्रः८ स्यात् सर्वान्नतविघ्ननाशनम्। भैरवो नववक्त्रस्तु शिवस्यायुष्यकारकः। दशवक्त्रः१० स्मृतो विष्णुर्भूतप्रेतभयापहः। एकादशमुखो ११रुद्रो नानायज्ञफलप्रदः। द्वादशास्य१२ स्तथादित्यः सर्वरोगनिबर्हणः। त्रयोदशमुखः१३ कामः सर्वकामफलप्रदः। चतुर्दशास्यः१४ श्रीकण्ठो बंधोद्धारकरः परः" इति। तथा "विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः। स याति परमां घोरां यावदिन्द्राश्चतुर्दश। पञ्चास्यं पञ्चगव्यं स्नानकाले प्रयोजयेत्। रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पञ्चाक्षरं तथा। त्रियम्बकादिमन्त्रं च तथा तत्र प्रयोजयेत्" तथा "अष्टोत्तरशतं धार्य्यं चतुःपञ्चाशदेव वा। सप्तविंशतिसाङ्ख्या वा ततो हीनाधमा स्मृता"। प्रजापतिः "नक्षत्राणि पञ्चविंशत्सङ्ख्यानि तिथयो जपेत्। पुत्रार्थी पञ्चविंशत्या धनार्थी तिथिसङ्ख्यया। दशसङ्ख्यया दशप्राभिचारके। सप्तविंशतिरुद्राक्षमालया स्वया। यत् करोति नरः पुण्यं सर्वं कोटिगुणं भवेत्। यो ददाति द्विजेन्द्रस्य रुद्राक्षं भुवि मन्त्रकम्। तस्य प्रीतो भवेद्रुद्रः सपद्म च प्रयच्छति"। पद्मार्थोदर्थं वोपदेवः "रुद्राक्षान् कण्ठदेशे दशनख१०परिमितान् मस्तके त्रिंशतो द्वे ४० षट् षट् कर्णप्रदेशे करयुगलधृता द्वादशद्वादशैव। बाह्वोरिन्दो१६कलाभिर्नयनयुगधृतयुग्मं च वक्षस्यथाधिकं यः कलयति शतकं शः स्वयं नीलकण्ठः"।

रुद्राणी स्त्री रुद्रस्य पत्नी रुद्र+ङीप् आनुक् च। शिवपत्न्याम् दुर्गायाम् अमरः।

रुद्रारि पु० रुद्रः अरिर्यस्य। कामदेवे। [च।

रुद्रावास पु० ६त०। १कैलासे २काशीग्राम् काशीख०१३अ०शाने रुध कामे दि०आ०सक०अनिट् प्रायेणात्मनेपदी। अरुन्धत अरुन्धत। [अरुधत् अरौत्सीत्

रुध आवरणे रु० उभ०हि० अनिट्। रुणद्धि रुन्धे इरित् रुधिर न० रुध-किरच्। शरीरस्थे रसपाकजन्ये १धातुभेदे २रक्तद्रुमे अमरः। ३मङ्गलयुक्ते ४रक्तवर्णे च पु० मेदि० ५तद्वर्णवति त्रि०। ६सप्तभेदे न०। तदुद्भवादि यथा "क्षतभृग्भूपसादाय दानवस्य यवेप्सितम्। नर्मदायां निचिक्षेप लिखित्वौनादि भूतले। तत्रेन्द्रगोपकलितं शुकरक्तवर्णं संस्थानतः प्रकरपीलुसमानमात्रम्। नानाप्रकारविहितं रुधिराख्यरत्नसङ्घात्य तस्य खलु सर्वसमानमेव। मध्येन्द्रगोपरमणीव विशुद्धवर्णं तन्नेन्द्रनीलसदृशं पटलं तले स्यात्। सैन्धवंभल्यजननं कथितं तदेव पक्वन्तु तत् त्रिलवणं भवेत् सुरवल्लभवर्चसम्" गरु०पु०७८अ०।

रुप आकुलीकरणे दि०पर०सक० सेट्। रुप्यति इरित् अरुपत् अरोपीत्।

रुमण्वत् पु० रुमण्+अस्त्यर्थे मतुप् मस्य वः आधिन्दीवादिनाद्यादिना नि०। रुमण्याकरे पर्वतभेदे त्रि०कौ०।

रुमा स्त्री रु-मक्। १सुग्रीववानरभार्य्यायाम् २रुमण्वत्याख्ये देशभेदे च मेदि०।

रुरु पु० रु-कु। मृगभेदे अमरः।

रुरु पु० रु-कु। १परब्रह्मणि रत्नमा० स्वार्थे क। रुरुकेरवे पु० राजनि० रु-उकक्। कुरुकोऽप्यत्र।

रुष हिंसायां तु०पर०सक०अनिट्। रुष्यति अरुषत्।

रुष वधे भ्वा०पर०सक०सेट्। रोषति अरोषीत्।

रुष क्रोधे दि०पर०सक०सेट्। रुष्यति इरित् अरुषत् अरोषीत्

रुष क्रोधे चु०उभ०सक०सेट्। रोषयति ते अरूरुषत् त।

रुष(षा) स्त्री रुष-सम्प् क्विप् वा टाप्। क्रोधे हेमच०।

रुषित त्रि० रुष-क्त वा इट्। क्रोधयुक्ते इडभावपक्षे रुष्टोऽप्यत्र। [रोहः रुरुहः।

रुह उद्भवे भ्वा०पर०सक०अनिट्। रोहति अरुहत्। ज्वला०

रुह त्रि० रुह-क। १जाते २दूर्वायां स्त्री अमरः उत्तरपदस्थः तत्प्रादुर्भूते त्रि० यथा भूरुहः वारिरुहम्।

रुक्ष पारुष्ये कठोरतायाम् निःस्नेहे च अद० चु०उभ०सक० सेट्। रूक्षयति ते अरूरुक्षत् त।

रूक्ष त्रि० रुक्ष-अच्। १खचिक्कणे २स्नेहशून्ये च ३दृक्षे पु० हेमच०, ४दन्तीवृक्षे स्त्री राजनि०।

रूक्षगन्ध पु० रूक्षो गन्धो यस्य। गुग्गुलौ राजनि०।

रूक्षदर्भ पु० नित्यकर्म०। स्थिरदर्भे कुशभेदे राजनि०।

रूक्षपत्र पु० रूक्षं पत्रमस्य। शाखोटवृक्षे राजनि०।

रूक्षप्रिय पु० रूक्षं प्रीणाति प्री-क। ऋषभौषधे राजनि०।

रूढ़ त्रि० रुह-क्त। १जाते, २प्रसिद्धे च मेदि०। रूढिरस्यास्ति अच्। प्रकृतिप्रत्ययार्थसमुदायशक्त्यार्थबोधके १शब्दे। यथा घटः गौरित्यादि। शब्दश्च प्र०

रूढ़ि स्त्री रुह-क्तिन्। १जन्मनि, २प्रसिद्धौ, प्रकृतिप्रत्ययार्थसमुदायेन शब्देन समुदायशक्त्यार्थस्य १बोधने ४शब्दशक्तिभेदे च "शब्दात्मिका सती रूढिर्भवेद्योगापहारिणी। कल्पनीया तु लभते नात्मानं योगबाधनः" कुमारभट्टः। लक्षात्मिका कृता शक्तिर्योगबाधिका, कल्पनीया तु योगबाध्या" इत्यर्थः।

रूप रूपान्वितकरणे चुरा० उभ० सक० सेट्। रूपयति ते अरूरूपत् त। नि+प्रसाधोपन्यासेन स्वरूपादिकथने।

रूप न० रूप-क भावे अच् वा। १स्वभावे, २सौन्दर्य्ये, ३यशौ, ४नाम्नि, ५शब्दे, ६अन्धाहृत्तौ, ७दृश्यकाव्ये नाटकादौ दशरूपके ८आकारे च मेदि०। शब्दधातूनां विभक्तियोगेन १०निष्पन्नशब्दे, ११शुक्लादिवर्णे च १२तद्वति त्रि०। उकारपदस्थः सदृशार्थे त्रि० यथा पितृरूपस्तनयः मातृरूपा कन्या। १३एकसंख्यान्विते न० "रूपं भजेत् स्यात् परिपूर्त्तिकालः" लीलावती। "एकाव्यक्तं शोधयेदन्यपक्षात् रूपाण्यन्यस्येतरस्मात्र पक्षादिति" बीजगणितोक्ते १४अव्यक्तराशिसहचरितव्यक्तसंख्यान्विते च। आकारवर्णरूपस्य षोडश भेदाः तत्र परिमाणजन्यता रूपाकारस्य ह्रस्वदीर्घचतुरस्रवृत्तेति पञ्च भेदाः। वर्णस्य शुक्लकृष्णनीलारुणरक्तपीतेति षट् भेदाः स्पर्शजन्यता आकारभेदा कठिनचिक्कणश्लक्ष्णखरमृदुदारुणेति षट् भेदाः इति षोडशविधा भा० शा० उक्ताः। वैशेषिकमते "चक्षुर्ग्राह्यं तद्रूपं द्रव्यादेरुपलब्धिकम्। चक्षुषः सहकारि स्यात् शुक्लादिकमनेकधा" भाषा०। तच्च भूतभूतभेदेन द्विविधम् "भूतरूपं नयनस्य गोचरः" भाषोक्तेः भूतरूपस्यैव प्रत्यक्षविषयता न परमाणुगतस्य भूतस्य। तच्च पृथिव्यप्तेजसां गुणः "रूपद्रव्यत्वप्रत्यक्षयोगि स्यात् प्रथमं त्रिकम्" भाषा०उक्तेः। सौन्दर्य्यरूपलक्षणमुज्ज्वलमणिनोक्तं यथा "अङ्गान्यभूषितान्येव केनचित् भूषणा-

दिना येन भूषितयङ्गानि तद्रूपमिति कथ्यते" ।

रूपक न० रूपयत्यत्र रूप-ण्वुल् । १अभिनयप्रदर्शके दृश्यकाव्यभेदे, "रूपारोपात्तु रूपकम् तद्दृश्यं काव्यं नटैरार्यादिरूपारोपात् रूपकमित्युच्यते" सा०द० । तस्य दशविधम् "नाटकमथप्रकरणं भाणव्यायोगसमवकारडिमाः । ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश" सा०द० । दशरूपकमन्थेऽस्य विवृतिः । रूपमस्यास्त कन् । २भूते त्रि० मेदि० रूप+स्वार्थे क । ३शुक्लादिवर्णे, ४आकारे च ५अर्थालङ्कारभेदे, सा०द० अलङ्कारशब्दे ४०१ पृ० दृश्यम् । ६शुक्लाम्लवेतसपरिमाणे "षड्वाली प्रोच्यते शुक्ला तास्तिस्रो रूपकं भवेत्" युक्तिक० ।

रूपतन्मात्र न० सांख्यमतादिसिद्धे तेजःपदार्थारम्भके सूक्ष्मभूतभेदे तन्मात्रशब्दे १२२६ पृ० दृश्यः ।

रूपधारिन् त्रि० रूपं धारयति धारि णिनि । १रूपवति, २सौन्दर्य्यान्विते, ३वेषान्तरग्राहिणि नटे च ।

रूपवत् त्रि० रूप+मतुप् मस्य वः । १शुभ्रादिरूपविशिष्टे, २सौन्दर्य्ययुक्ते ३आकारविशिष्टे च ।

रूपाजीवा स्त्री रूपं सौन्दर्य्यमाजीवो जीविका यस्याः । वेश्यायाम् अमरः ।

रूपिका स्त्री रूपमस्त्यस्य ठन् । श्वेतार्कवृक्षे रत्नमा० ।

रूप्य न० रूपाय आदृश्यते रूपादि यत् । अलङ्कारादिनिर्माणाय आदृश्यमाने १स्वर्णे २रजते च अमरः । स्वार्थे यत् । ३रजतमाने रजतशब्दे ४७८६ पृ० दृश्यम् । ४सुन्दरे त्रि० मेदि० ।

रूप्याध्यक्ष पु० रूप्येषु अध्यक्षः । कोषाध्यक्षे अमरः ।

रूष धूल्यादिना मिश्रीकरणे अदं० चु० उभ० अक० सेट् । रूषयति ते अरूरूषत् त । [कारके त्रि० ।

रूषक पु० रूष-ण्वुल् । १घासके दृक्षे जटा० । २मिश्रीकृते त्रि० रूष-क्त । १धूल्यादिभिर्मिश्रिते, २अधिकृष्णीकृते च अमरः ।

रे अव्य० रा-के । नीचादेः सम्बोधने हेमच० ।

रेक शङ्कायां भ्वा० आ० स० सेट् । रेकते अरेकिष्ट । अदित् चङि न हृस्वः ।

रेक पु० रिच-घञ् । १विरेचने । रेक-अच् । २शङ्कायां, ३नीचे मेदि० ४भेके पुंस्त्री० जटा० । स्त्रियां ङीष् । रेक-भावे अ । ५सन्देहे स्त्री हेमच० टाप् ।

रेकणम् न० रिच-अनट् णित्त्वे तेन कृत्वं लुट् । स्वर्णे त्रि० को० ।

रेखा स्त्री लिख-अच् लस्य रः । १अङ्के, २लेखे, ३ज्ञानभेदे, बिन्दुपङ्क्तौ दण्डाकारे ४चिह्नभेदे (दाढि) (कषा) विश्वः । ५भूमेरुन्नतयोर्मध्यस्थसूत्रगस्थलभेदे च ।

रेखागणित न० रेखायाः गणितं प्रमाणमस्त्रूपादि यत्र । जगन्नाथपण्डितकृते गणितसम्बन्धभेदे क्षेत्रग्रन्थे तत्परिभाषादिकं २१८६ पृ० उक्तम् ।

रेखापुर न० भुवो मध्यसूत्रस्थः पुरम् । "राक्षसालयदेवौकः शैलयोर्मध्यसूत्रगाः । रोहितकमवन्ती च तथा सन्निहितं सरः" सू०सि० उक्ते पुरे । "राक्षसालयं लङ्का देवानां स्वर्गरूपः पर्वतो मेरुरनयोर्मध्ये यज्जसूत्रं तत्र स्थिता देशा रेखाख्याः लङ्कादक्षिणसूत्रस्थास्यवन्तपमुज्जयिनी मलयाभोगेश्वरत्वादिति नोक्ताः । ज्ञानार्थमुदाहरति । रोहीतकमिति । यथा रोहीतकं नगरमवन्त्युज्जयिनीसन्निहितं सरः कुरुक्षेत्रम् । अकारलङ्कोज्जयिनीतथान्यानि परस्परं सन्निहिततया स्थितानि" रङ्ग० ।

रेचक न० रेचयति रिच-णिच्-ण्वुल् । १कफादुष्टे राजनि० २यवक्षारे, पु० त्रिका० । ३क्षयपाके, ४तिलकवृक्षे पु० राजनि० । ५पुरीषनिःसारके त्रि० । क्रीड़ार्थजलनिःसारयन्त्रे न० (पिचकिरी) राजनि० । ६कोष्ठस्थ वायोर्निःसारके व्यापारभेदे कुम्भकशब्दे २११४ पृ० दृश्यम् ।

रेचन न० रिच-ल्युट् । १मलभेदनेन तन्निःसारणे । २कोष्ठात् वायोर्नासिकया निःसारणे च ।

रेचनक पु० रिच्यतेऽनेन ल्युट् संज्ञायां कन् । १काम्पिल्लवृक्षे । कलभावे वा ङीप् । रेचनी तत्रार्थे अमरः । २दन्तीवृक्षे ३कालाङ्गन्यां राजनि० । ४श्वेतनिशिथतायाम् स्त्री मेदि० टाप् । ५काम्पिल्लवृक्षे स्त्री शब्दर० ।

रेची स्त्री रेचयति अच् गौ० ङीष् । १काम्पिल्लवृक्षे २अङ्गोठे च राजनि० । [दित् चङि न ह्रस्वः ।

रेज दीप्तौ भ्वा० आत्म० अक० सेट् । रेजते अरेजिष्ट । अरेजते स्त्री रज+अते । उत्तरस्यां दिशि निघण्टुः ।

रेट याचने वाचि च हिं० भ्वा० उभ० सेट् । रेटति ते अरेटीत् अरेटिष्ट । अदित् चङि न ह्रस्वः ।

रेणु पुंस्त्री०री-ङ । १परागे २धूल्यां च अमरः । ३रेणुकायां स्त्री ४पर्पटे पु० । ५पांशौ च राजनि० ।

रेणुका स्त्री रेणुना कायति कै-क । मरिचाख्यायां १गन्धद्रव्ये अमरः "रेणुका कटुका पाके तिक्तातृष्णा क्षयप्रणुत् । कटुः । पित्तला दीपनी मेध्या पाचनी गर्भपातिनी । वातश्लेष्मविषश्वित्रकण्डूकुष्ठविनाशनी" भावप्र० । २जमदग्निपत्न्यां ३परशुरामस्य मातरि च ।

रेणुकासुत पु० ६त० । परशुरामे रेणुकात्मजादयोऽप्यत्र ।
रेणुरूषित स्त्री रेणुभिः रूषितः । १गर्दभे त्रिका० स्त्रियां ङीष् । २धूसिधूसरे त्रि० ।
रेणुसार पु० रेणुरिव सारोऽस्य । १कर्पूरे त्रिका० । कप् । तत्सदृशे त्रि० । [भावप्र० ।
रेतजा स्त्री रेत इव जायते जन-ड गुणो० । वालुकायां
रेतस् न० री-असुन् तुट् च । पुंसो रक्तादिपरिपाकजन्ये देहस्थे मज्जहेतुके धरमधातौ १शुक्रे शिववीर्य्ये २पारदे च मेदि० । [मेदि० ।
रेत्र न०री-त्र । १रेतसि २पीयूषे ३पटवासे ४स्वलके च
रेप शब्दे अक० गतौ सक० भ्वा० आत्म० सेट् । रेपते अरेपिष्ट अदित् चङि न हुस्वः ।
रेप त्रि० रेप-अच । १निन्दिते २क्रूरे ३लम्पटे च मेदि० ।
रेफ पु० र+इफ । १रकारात्मके वर्णे । रिफ-अच् । २कुत्सिते त्रि० अमरः । [४लम्पटे च शब्दर० ।
रेफस् त्रि० रेप-असुन् पस्य फः । १क्रूरे २अधमे, ३दुष्टे
रेब(व) गतौ सक० शब्दे अक० भ्वा० आ० सेट् । रेब(व)ते अरेबि(वि)ष्ट । अदित् चङि न हुस्वः ।
रेभ शब्दे भ्वा०आत्म०अक०सेट् । रेभते अरेभिष्ट । अदित् चङि न हुस्वः । [२वलरामश्वशुरे राजभेदे हरिवं० ।
रेवत पु० रेव-अतच् । १जम्बीरे जटा० २आरग्वधे शब्दचि०
रेवती स्त्री रेवतस्यापत्यमण् रेवत्यादीति निर्देशात् न ह्रस्वः । १रेवतराजकन्यायां बलदेवपत्न्याम् । रेव-अतच् गौ० ङीष् । अश्विन्यधिपतिसप्तविंशतिसंख्याते २नक्षत्रे, ३तत्संख्यायां, ४मातृकाभेदे मेदि० । ५स्त्रीगव्याम् अजयपा० ६नदीभेदे, ७दुर्गायाञ्च देवीपु० । ८रेवतीपदघटितायाम् ऋचि च "एतस्यैव रेवतीषु यारवन्तीयम्" श्रुतिः । [४६२१पृ० दृश्यम् । ९यज्ञसमनुपत्न्याम् ।
रेवतीभव पु० ७त० । शनैश्चरे हेमच० । भगदैवतशब्दे
रेवतीरमण पु० रेवतीं रमयति रम-णिच-ल्यु । बलरामे । ६त० । रेवतीशब्दोऽप्यत्र । [शब्दे दृश्यम् ।
रेवत्यादि पु० अपत्यार्थे ठक्प्रत्ययनिमित्ते शब्दगणे । पा०ग०
रेवन्त पु०रेव-झच् ।१गुह्यकाधिपतौ २सूर्य्यपुत्रभेदे च षष्ठिपु० ।
रेवा स्त्री रेव-अच् ।१नर्मदाख्यनद्याम् अमरः । २कामपत्न्यां ३नीलीवृक्षे च मेदि० ४दुर्गायां देवीपु० ।
रेष हेषायां (घोटकशब्दे) भ्वा० आत्म० अक० सेट् । रेषते अरेषिष्ट । अदित् चङि न हुस्वः ।
रै शब्दे भ्वा० पर० अक० अनिट् । रायति अरासीत् ।
रै पु० रा-डै । १धने २स्वर्णे अमरः । ३शब्दे शब्दर० अस्य ह्रस्वादौ तुपि व्याप्त्वम् राभ्यामित्यादि । [पात्रादौ० ।
रैत्य त्रि० रीतेः पित्तस्य विकारः रीति+ष्यञ् । पित्तजन्यरोगे
रैवत पु० रेवत्या नद्या अदूरो देशः अञ् । द्वारिकासमीपस्थे १पर्वतभेदे २स्वर्णालुवृक्षे, ३शिवे मेदि० । ४दैत्यभेदे भरणिः । रेवत्यां भवः अण् । ५चतुर्दशस्वपि मनुषु पञ्चमे मनुभेदे । ६शनैश्चरे च । [रिवतश्चन्द्रे न० राजनि० ।
रैवतक पु० रैवतएव स्वार्थे क । १रैवतपर्वते हेमच० २पारोक न० रु-कनु तस्य नेत्वम् । १छिद्रे अमरः "तन्त्रे रोकं च शोकञ्चेति" तिग० । २नौकायाम् ३चले त्रि० मेदि० रुच-घञ् नि० कुत्वम् । क्रयकाले मूल्यदानेन क्रयात्मके ४क्रयभेदे ५दीप्तौ च पु० मेदि० ।
रोग पु० रुज-घञ् । १धातुवैषम्यजाते व्याधौ राजनि० २कुत्सौषधे च (कुड़) मेदि० । [च ३रोगनाशके त्रि० ।
रोगघ्न न० रोगं हन्ति हन-टक् । १औषधे, २वैद्यकशास्त्रे
रोगराज पु० ६त० टच् समा० । राजयक्ष्मव्याधौ राजनि० ।
रोगलक्षण न०रोगो लक्ष्यतेऽनेन लक्ष-करणे ल्युट् । रोगानुमापके धातुवैषम्यहेतुके चिह्नभेदे निदाने राजनि० "रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता । रोगा दुःखस्य दातारो ज्वरप्रभृतयो हि ते । ते च स्वाभाविकाःकेचित्केचिदागन्तवः स्मृताः । मानसाः केचिदाख्याताः कथिताः केऽपि कायिकाः" । तत्र स्वाभाविकाः शरीरस्वभावादेव जाताः क्षुत्पिपासाश्रमस्वप्नाद्यतिरात्यल्पप्रभृतयः अथ वा स्वस्वभावादुत्पन्नजाता स्वाभाविकाः सहजा इति यावत् । ते च जन्मान्धत्वादयः । आगन्तवोऽभिघातादिजनिताः । अथ वा जन्मोत्तरभाविनः कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यशोकविषादेर्ष्यासूयामात्सर्य्यप्रभृतयः । अथ वा जन्मादिप्रकार मूर्च्छाभ्रमश्रमक्लमसंन्यासप्रभृतयः । कायिकाः पाण्डुरोगप्रभृतयः "कर्म्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे । कर्म्मदोषोद्भवास्त्वन्ये व्याधयस्त्रिविधाः स्मृताः" । तत्र कर्म्मजा व्याधयः यत्प्राक्तनन्दुष्कर्म्म प्रबलक्लेशलंभोगनाश्यम् प्रायश्चित्तनाश्यं वा ततो जाताः नतु दुष्टवातादिदोषेण जनिताश्चया । "यथाशास्त्रन्तु निर्णीतो यथाव्याधि चिकित्सितः । न शमं याति यो व्याधिः स ज्ञेयः कर्म्मजो बुधैः" । दोषजाः । मिथ्याहारविहारप्रकुपितवातपित्तकफजाः । नतु मिथ्याहारविहारित्वाभावेऽपि प्राक्तनसुकृतेन नैरुज्यं दृश्यते

एव । ततो दोषजेष्वपि पाक्षनं दुष्कर्मैव कारणम् तत् कथं दोषजा इत्युच्यते । दोषजेष्वपि वस्तुतः आदि कारणं दुष्कर्म वर्त्तत एव किन्तु तत्र मिथ्याहारविहार दूषिता दोषा हेतवो यस्यन्त इति दोषजा इत्युच्यन्ते इति समाधिः । कर्मदोषोद्भवाः "स्वल्पदोषा गरीयांसो-ऽधर्मांसे कर्मदोषजाः" । अत्र कारणं दुष्कर्म प्रबलं यतो दोषाल्पत्वेऽपि व्याधेर्गरीयस्त्वलक्षणकर्मबाहुल्यादेव क्षीणं भवति । दोषाः स्वल्पा अपि निदानत्वेनोक्ता इत्यन्त एवेति दोषाणां कारणता बध्यन्त इति । "कर्मबाहुल्यात् कर्मजता दोषजाः स्वस्वभेषजैः । कर्मदोषोद्भवा यान्ति कर्मदोषक्षये क्षयम्" । दोषजाः स्वस्वभेषजैरिति दोष-जेष्वादिकारणं दुष्कर्म तद्भेषजार्थं द्रव्यक्षयादिजनित दुःखभोगेन कटुतिक्तकषायाद्यरुद्यभक्षणादिजनित-दुःखभोगेन च क्षयं यान्ति । शेषा दुष्टा हेतवो दोषास्ते स्वस्वभेषजैः क्षयं यान्तीत्यर्थः । "साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः स्मृताः । सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते" । याप्यलक्षणमाह "यापनीयन्तु तत्तायां यदो यत्र विनश्यति । प्राप्तः क्रिया धारयति क्षिपन्तं याप्यमातुरम् । प्रयतिष्यदियागारं तन्नो यत्नेन योजितः । साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतामपि । म्लेच्छा प्राणानसाध्यास्तु नराणा-मक्रियावताम्" । अक्रियावतां चिकित्सारहितानाम् । अधोपदृष्टञ्च बध्यम् । "रोगास्तदुद्भवश्च प्रकोपादुप-जायते । योऽस्यो विकारः स बुधैरुपदृष्ट उदाहृतः" ।

रोगशिला स्त्री रोगाय तन्निवृत्तये शिला । मनःशिलायाम् राजनि० । [क्विप् रोगहन् । रोगहन्तरि-वैद्यादौ त्रि० ।

रोगह न० रोगं हन्ति हन-ड । १औषधे शब्दच० । हन-

रोगहर त्रि० रोगं हरति हृ-अच् । व्याधिनाशके द्रव्यादौ तच्च सुश्रुतादौ द्रष्टव्यम् ।

रोगहारिन् पु० रोगं हरति हृ-णिनि । १चिकित्सके वैद्ये अमरः । २रोगनाशके त्रि० ।

रोगितक पु० रोगिप्रियत्वतः प्राक० । अयोकवृक्षे राजनि० ।

रोगिन् त्रि० रोग+अस्त्यर्थे इनि रुज-घिनुण् वा । व्याधियुक्ते राजनि० स्त्रियां ङीप् ।

रोचक त्रि० १रुचिकारके । २क्षुधायां हेमच० । ३कदल्यां शब्दर० । ४राजपत्नीवृक्षे ५अवदंशे (चाटनि) च राजनि० ६द्रव्यविशेषभेदे विश्वः ।

रोचन पु० रुच-ल्यु रोचयति वा ल्यु । १कूटशाल्मलिवृक्षे २श्वेतसर्षपभाक्षते, ३पत्राख्यौ ४दाड़िमे च राजनि० ५कङ्के, ६अङ्कोठे, ७आरग्वधे च मेदि० । ८वस्त्रमायां नार्य्यां ङीष् । ९रक्तकङ्कारे स्त्री मेदि० टाप् । ११रुचिकारके त्रि० ।

रोचनक पु० रोचनाय रुचिजननाय कायति कै-क । अ-क्षीरे राजनि० । [क्षीरभेदे २चित्रभेद्यां स्त्री राजनि०

रोचनफल पु० रोचनं रुचिकरं फलमस्य । १बीजपूरके ज-

रोचनी स्त्री रोचयतीति कर्त्तरि ल्युट् गौरा० ङीष् । १मनःशिलायाम् हेमच० २गोरोचनायां ३आमलक्याम्, राजनि० ४श्वेतत्रिवृति, ५गन्धद्रव्यभेदे च (गुडारोचना) अमरः । [२रुचियुक्ते त्रि० ।

रोचमान पु० रुच-शानच् । १अग्नीषोमाख्यरोभावर्त्ते त्रिका० ।

रोचिष्णु त्रि० रुच-इष्णुच् । १दीप्तियोगे २रुचियोगे च ।

रोचिस् न० रुच-इसुन् । प्रभायाम् अमरः ।

रोची स्त्री रोचयति रुच-णिच्-अच् गौरा० ङीष् । क्षिप्त-मोचिकायाम् शब्दर० ।

रोटिका स्त्री रुट-ण्वुल् । गोधूमादिचूर्णनिर्म्मिते पिष्टकभेदे (रुटी) भावप्र० लताशब्दे २१८१ पृ० दृश्यम् ।

रोड अनादरे भ्वा०पर०सक०सेट् । रोडति अरोडीत् रुरोड चड्डि न रुरुडः ।

रोदन न० रुद-ल्युट् । १क्रन्दने २अश्रुणि मेदि० करणे ल्युट् ङीप् । ३हरालभायाम् अमरः । संज्ञायां कन् अत इत्वम् । रोदनिका ४यवासाख्यायाम् अमरः ।

रोदस् न० रुद-असुन् । १स्वर्गे २भूमौ च अमरः । गौरा० ङीष् रोदसीत्यपि । २द्यावाभूम्योः स्त्री द्वि०व० अमरः । ३पृथिव्यां निघण्टुः । [अरतः ।

रोध पु० रुध-घञ् । १रोधने २आवरणे च ३नदीतीरे

रोधन त्रि० रुणद्धि रुध-ल्यु । १रोधकर्त्तरि । भावे ल्युट् । २प्रतिबन्धे न० ।

रोधस् न० रुध-असुन् । नद्यादिकूले अमरः ।

रोधवक्रा स्त्री रोधेन तीरेण वक्रा । नद्यां निघण्टुः । रोधोवक्राऽप्यत्र त्रिका० ।

रोध्र न० रुध-रन् । १पापे २अपराधे ३लोध्रवृक्षे पु० मेदि० ।

रोध्रपुष्प पु० रोध्रस्य लोध्रस्येव पुष्पमस्य । अमूलकवृक्षे (मोक) राजनि० । [धातकीवृक्षे (धाइफुल) राजनि० ।

रोध्रपुष्पिणी स्त्री रोध्र इव पुष्पमस्ति पुष्प विकारे इनि ।

रोप पु० रुह-णिच्-हस्य पः कर्मणि अच् । १वापे अमरः भावे अच् । २रोपणे धान्यादेर्जननाय ३अङ्कुरारोपणे च मेदि० ४क्षिप्ते न० हेमच० ।

रोपण न० रुह-णिच्-ल्युट्। १जनने २अञ्जन-भेदे रुप-ल्युट्। ३विलोडने ४अन्यथाभूतस्य वस्तुनोऽन्यथा स्थाने। अञ्जनभेदप्रकारादि भावप्र० उक्तं यथा "शिलायां रक्तकं पिष्ट्वा गव्यमूत्रं संशोध्य वारिणा। दृष्ट्वा यास्तत्क्षणं सर्वं त्यजेत्सूर्यमधोगतम्। शुष्कस्य तत्क्षणं सर्वं पर्पटीसदृशं भवेत्। विधूत्थं भावयेत् सम्यक् त्रिभिर्वारैः। कर्पूरस्य रवं तत्र दत्त्वांशेन विनिक्षिपेत्। अञ्जयेत्तेन नेत्राभ्यां सद्यश्चक्षुर्विशुद्धिदः"। रोपणीवर्त्ति स्त्री नेत्राञ्जनवटीभेदे भावप्र०तत्प्रकार उक्तो यथा "अशीतिस्त्रिंशपुष्पाणि मरिचः पिप्पलिस्तथा। जातीपुष्पाणि पञ्चाग्न्यरिचाणि च षोडश। कृष्णं पिष्ट्वाम्बुना वर्त्तिः कृता कुसुमिकाभिधा। तिमिरार्जुनशुक्लार्त्या नाशिनी मांसदर्शिनुत्। एतस्या अञ्जने प्रोक्ता मात्रा षट् रेणुका"। (कुसुमिका वटी)।

रोपित त्रि० रुह-णिच्-क्त य: क्त। १वृक्षादेर्जननाय लतादङ्कुरारोपणे अन्यद्वृक्षेण निर्दिष्टे यथा खदिरं चन्द्र इत्यादौ वृक्षस्य चन्द्रवृक्षेण निर्देशः। रोमक न० रोमेव निर्दिष्टं कायति कै-क। (रूम) १नगरे रु०वि०। २पांशुलवणे ३क्षयरोगान्तरे च राजनि०।

रोमकन्द पु० रोमभ्यो यूक्ष्मः कन्दो मूलमस्य। विरूढायां राजनि०।

रोमकपत्तन न० कर्म०। (रूम) नगरभेदे रु०वि०।

रोमकूप पु० रोमणां कूप इव। रोमाधारे बिवरे "न रोमकूपेषु निमज्जतीति" नैषधम्।

रोमकेसर न० रोमभिः केसरः सिंहसटेव। चामरे त्रिका०

रोमगुच्छ न० रोमभिर्गुच्छं स्तवकमिव। रोमसमुदायात्मके चामरे आर्द्धं क। अत्रैवार्धे हेमच०।

रोमन् न० रु-मनिन्। रोहणजाते अङ्कुराकारे रोमसदृशे पदार्थे (रोंया) अमरः।

रोमन्थ पु० रोमं मथ्नाति मन्थ-अण् पृषो० मलोपः। भुक्तस्य चावाद्यैः पशुभिरुद्गीर्य चर्वणे। रोमन्थमन्थस्यति क्याङ्। रोमन्थायते।

रोमभूमि स्त्री ६त०। चर्मणि राजनि०।

रोमलता स्त्री रोमाणि लतेव। रोमराजौ हेमच०।

रोमविकार पु० ६त०। रोमोद्गमे रोमाञ्चे हला०।

रोमश त्रि० रोमाणि सन्त्यस्य अ। १प्रचुररोमयुक्ते २मेषे पुंस्त्री० हेमच० स्त्रियां ङीष्। ३पिङ्गलायां ४शूकरे पुंस्त्री स्त्रियां ङीष्। ५कृष्णत्रायां पु०(पाला) राजनि०।

रोमहर्ष पु० रोमणः हर्ष इव तदुत्थसुखकत्वात्। रोमाञ्चे कर्मौतृणजन्यादिभिः रोमकूपे जायमाने कण्टकाकारे पदार्थे धारा०। ल्युट्। रोमहर्षणमस्यास्त्र अमरः।

रोमहर्षण पु० रोमाणि हर्षयति हृष-णिच्-ल्यु। १विभीतकवृक्षे मेदि० २लोमहर्षणे मुनिभेदे च। [अमरः।

रोमाञ्च पु० रोमणामञ्चा उद्गमः अञ्च-अच्। रोमहर्षे

रोमाञ्चित त्रि० रोमाञ्चः जातोऽस्य तारं०इतच्। जातपुलके त्रिका०। [वस्त्रायाञ्च शब्दमा०।

रोमाली स्त्री ६त०। १रोमावली तदुत्पत्तिस्थाने नाभ्यादावूर्ध्वं २नाभेरूर्ध्वं स्थरोमपङ्क्तौ तदुपलक्षिते इतःकृष्णायस्त्रायाञ्च हेमच०।

रोमालु पु० रोमयुक्तं आलुः आक०। १पिण्डालौ राजनि० रोम+आलुच्। २रोमयति त्रि०। [वृक्षे राजनि०।

रोमालुविटपिन् स्त्री रोमालुः रोमयुक्तः विटपी। कृष्णोदुम्बरे राजनि०।

रोमावलि(ली) स्त्री ६त०। १रोमश्रेणौ २नाभेरूर्ध्वस्थरोमपङ्क्तौ तदुपलक्षिते इतःकृष्णायस्त्रायाञ्च हेमच०।

रोमोद्गम पु० रोमणामुद्गमः उद्-गम-अच्। रोमहर्षे हला०। रोमोद्भेदादयोऽत्र।

रोरवा स्त्री रुद्-यङ्-भावे अ टाप्। अतिशयरोदने।

रोल पु० रु-लच्। पानीयामलके शब्दच०।

रोलम्ब पुंस्त्री रौति रु-विच् रौः अम् अम्बते गच्छति अम्ब-अच् कर्म०, रोट अम्बच् उस्य ओ वा। भ्रमरे त्रिका० स्त्रियां ङीष्।

रोष पु० रुष-घञ्। क्रोधे अमरः।

रोषण पु०रुष-युच्। १पारदे, २भिल्लप्रकारे, मेदि०। ३अपरभूमौ ४क्रोधशीले त्रि० हेमच०।

रोह पु० रुह-अच्। १अङ्कुरे हेमच० २रोहणकर्त्तरि त्रि०।

रोहण पु० रुह्यतेऽसौ रुह-ल्युट्। १पर्वतभेदे जटा०। भावे ल्युट्। २प्रादुर्भावे न०। करणे ल्युट्। ३वृक्षे राजनि०

रोहन्त पु० रुह-झच्। १वृक्षभेदे, २वृक्षमात्रे च। ३लतामेदे, ४लतायाञ्च स्त्री ऊधादि० गौरा० ङीष्।

रोहि पु० रुह-इन्। १बीजे, २वृक्षे च ऊधादि०। २धान्ये त्रि० शि० की०।

रोहिण न० रुह-इनन्। पञ्चदशधा विभक्तेषु नक्षत्रेषु भागे "कृत्यादारोहिणं बुधः" इति स्मृतिः। रोहिणो देवताऽस्य अण्। रौहिणमस्यत्र। २वटवृक्षे, ३रोहितकवृक्षे ४भूमृणे च पु० राजनि०।

रोहिणी स्त्री रुह-इनन् गौरा०ङीष्। १स्त्रीभेदयाम् अमरः अश्विन्यादिके चतुर्थे २नक्षत्रे ज्यो० ३वसुदेवपत्न्यां बलभद्रमातरि, ४विद्युति, ५कटुतुम्ब्यां, ६रोमवृक्षे

च मेदि०। रोहित+स्त्रियां ङीष् तस्य नत्वे चत्वम्। ७रक्तवर्णवत्यां स्त्रियाम्। सा च दक्षरितक्याम्, ६काश्यपीम्, १०अश्विन्यां च राजनि०। ११धरभिकन्यायां कालिकापु० "अष्टवर्षा भवेत् गौरी नववर्षा च रोहिणी" ऋतुकालायां नववर्षायां १२कन्यायां १३गलरोगभेदे भावप्र० "रोहिणीनामकगलरोगाणां नामानि संख्यामाह "रोहिणी पञ्चधा प्रोक्ता कण्ठशालूक एव च। अधिजिह्वश्च वलयोऽलासनामैकहन्द्रुकः। ततो हन्द्रः गतघ्नी च गिलायुः कण्ठविद्रधिः। गलौघः प्रस्तरश्चैव मांसतालजकौ च। विदार्ही कण्ठदेशे तु रोगा ह्येतावितिं स्मृताः"। तत्र पञ्चानामपि रोहिणीनां सामान्यसंप्राप्तिमाह "गलेऽनिलः पित्तकफौ च मूर्च्छितौ प्रदूषयं मांसञ्च तथैव शोणितम्। गलोपसंरोधकरैस्तथाङ्कुरैर्निहन्त्यसृग् व्याधिरियं हि रोहिणी"। अनिलः मूर्च्छितः पञ्चधः कफपित्तौ च मूर्च्छितौ पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः न तु त्रयोऽपि मूर्च्छिताः" पृथग्दोषजाया अविवक्षितत्वात्। तत्रा वातजायालक्षणमाह "जिह्वास्तम्भात्प्रदुष्टश्वेदनासु मांसाङ्कुराः कण्ठविरोधनाः स्युः। सा रोहिणी वातकृता प्रदिष्टा वातात्कोपदूषणाद्युक्ता"। जिह्वास्तम्भात् जिह्वायाः सर्वतः। "वातात्कोपदूषणाद्युक्ता स्तम्भादिभिरतिशयेन युक्ता। पित्तजामाह "क्षिप्रोद्गमा क्षिप्रविदाहपाका तीव्रज्वरा पित्तनिमित्तजाता"। श्लेष्मजामाह "स्रोतोनिरोधिन्यपि मन्दपाका गुर्वी स्थिरा सा कफसम्भवा तु। स्रोतोऽन्तरस्रोतः। सन्निपातजामाह "गम्भीरपाकिन्यनिवार्य्यनीयां त्रिदोषलिङ्गा त्रिभया भवेत् सा"। रक्तजामाह "स्फोटैश्चिता पित्तसमानलिङ्गा साध्या प्रदिष्टा रुधिरात्मिका तु"। रक्तजेतरावंशकारकत्वावधिमाह "यद्यस्त्रिदोषजा स्यात्तत्र हात् कफसमुद्भवा। पञ्चाहात् पित्तसम्भूता सप्ताहात् पवनोत्थिता"। [नाधाद्योऽप्यत्र। रोहिणीपति पु० ६त०। १चन्द्रे, २नक्षत्रदेवे च रोहिणी-रोहिणीव्रत न० रोहिणीयुक्ताष्टम्यां व्रतम्। रोहिण्यु-पवर्णितायां भाद्रजन्माष्टम्यां कर्त्तव्ये उपवासरूपे व्रते। कृष्णाष्टमीशब्दे २२२०पृ०दृश्यम्। [२४२२ पृ०दृश्यम्। रोहिणीशकट न० ६त०। ज्योतिषे तारामेदे खगोलशब्दे रोहित् पु० रुह-इति। १रक्ते मेदि० २वर्णभेदे च ३मत्स्य भेदे पु० उज्ज्वल०। ४लताभेदे ५मृगभेदात् स्त्री ङीष् मेदि०। रोहित न० रुह-इतच्। १रुधिरे २कुङ्कुमे ३लाक्षायां हन्द्रुवायां मेदि०। ४रोहितकवृक्षे पु० जनपदख्याते ५मत्स्यभेदे पुंस्त्री० स्त्रियां ङीष् मेदि०। "रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपत्रितः। लघुपक्षो भवेन्मेधो रोहितः कथितो बुधैः। रोहितः सर्वमत्स्यानां वरो दुर्जरोऽहितः। तार्क्षिजित्। कषायानुरसः स्वादुर्वातघ्नो नातिपित्तलः। अर्शःक्षयगतान् रोगान् हन्याद्रोहितसेवनम्" भावप्र०। ६रक्तवर्णे पु० ७तद्वति त्रि० अमरः। स्त्रियां ङीष् तस्य नत्वे चत्वम्। ८अग्निवाहने मृगभेदे निघण्टुः। स्वार्थे क। रोहितक तत्रार्थे ९वृक्षभेदे अमरः।

रोहिताश्व पु० रोहितो मृगभेद अश्व इव गतिसाधनम् यस्य। वह्नौ निघण्टुक्तिर्हि स्या।

रोहितेय पु० रोहित एव स्वार्थे ढ। रोहितकवृक्षे रक्तको-

रोहिन् पु० रोहति पुनःपुनश्छिन्नोऽपि प्रादुर्भवति रुह-णिनि। १रोहितकवृक्षे २वटवृक्षे ३अश्वत्थवृक्षे च। मेदि०। ४रोहणवति त्रि० स्त्रियां ङीष्।

रोहिष पु० रुह-इषन्। स्वनामख्याते कण्टके मेदि०।

रौक्ष्य न० रूक्षस्य भावः ष्यञ्। १पारुष्ये २अचिक्कणतायाम्।

रौचनिक त्रि० रोचनया रक्तः अण्। रोचनया रक्ते।

रौच्य पु०। त्रयोदशे मनुभेदे मनुशब्दे ६ उ०।

रौट(ड) अनादरे भ्वा० पर० सक० सेट्। रोट(ड)ति अरौ(डी)टीत्। अदित् चक्रे न तुदः।

रौद्र न० रुद्रो देवतास्य अण्। १स्वर्णतामे, २उग्यरसे च। ३तद्वति मेदि० ४भीषणे च त्रि० ५रसभेदे अमरः। "रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदेवतः। आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम्। तच्छिरश्चारपतनविक्षतच्छेदादारणैश्चैव। संग्रामस्तम्भमोहैरप्युद्दीप्तिर्भवेत् प्रौढा। भ्रूविभङ्गोष्ठनिर्दंशबाहुस्फोटनतर्जनाः। आत्मावदानकथनमायुधोद्यमणानि च। अनुभावास्तत्राक्षेपक्रूरस्पन्दर्शनादयः। व्यभिचारिणस्तत्रौग्र्यमात्मसंभावनमदः। मोहामर्षादयस्तत्र भावाः स्युर्व्यभिचारिणः" सा० द०।

६५दुर्गायां ७रुद्रजटाहृक्षे च स्त्री ङीष् मेदि०।

रौप्य न० रूप्यमेव अण्। रजते राजनि०।

रौम न० रुमायां खनिखनिभेदे भवः अण्। आम्बरिखनिजे। स्वार्थे क। तत्रैवार्थे अमरः।

रौरव पु० रोरूयतेऽत्र रु-यङ्-क्विप् तेन प्राप्यः तत्रार्थं वा अण्। १नरकभेदे अमरः। २चक्षुषि, ३धूर्त्ते, ४घोरे च त्रि० मेदि०। ५पाशभेदे न०। तस्य पाश जलजन्तौ

१प्र० दर्शितम्। "रौरवर्योधालये चार्हते तत्वे भवतः" ना०मा०। रौरवनरकस्वरूपादिकन्तु मार्कपु० १०अ० "रौरवे क्रूटसाक्षी तु याति यत्राहतो मरः। तस्य स्वरूपं गदतो रौरवस्य निबोधत। योजनानां सहस्रे द्वे रौरवो हि प्रमाणतः। आतुसात्प्रमाणेन ततः शुभ्रः शतुत्तरः। तत्ताङ्गारचयोपेतं क्षतस्य धरणीतलम्। आज्यस्यमानलीभेन तापिताङ्गारभूमिगम्। तस्मध्ये पापकर्माणं विसृजन्ति यमानुगाः। स दह्यमानलीभेन वह्निना तत्र धावति। यदे यदे च पादोऽस्य शीर्यते जीर्यते पुनः। अहोरात्रेणोद्धरणं पादस्यास्य च गच्छति। एवं सहस्रं विज्ञेयं योजनानां विपच्यते"।

रौहिण पु० रुह-इनन् स्वार्थे अण्। १चन्द्रसहचे तिका०। २रोहिणशब्दार्थे च।

रौहिणेय पु० रोहिण्यां भवः ढक्। १बुधग्रहे, २बलरामे, च अमरः। २मरकतमणौ न० राजनि० ४गोवत्से पुंस्त्री मेदि० ५अनैश्वरे पु० भगवैवतपुराणे ४६२१ पृ०दृश्यम्।

रौहिष न० रुह-इनन् स्वार्थेऽण्। १कत्तृणे मेदि० २लग्नभेदे पुंस्त्री०अमरः। ३रोहितमत्स्ये च अजयपा०। ४दूर्वायां, ५रोहितमत्स्याच स्त्री ङीष्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य सङ्कलिते वाचस्पत्ये रकारादि-शब्दार्थसङ्कलनम्।

ल

लकारो व्यञ्जनवर्णभेदः। तस्योच्चारणस्थानं दन्तमूलम्। स्पर्शोष्मवर्ण्ययोर्मध्यस्थत्वाद्यत्नान्तस्थवर्णः। अस्योच्चारणे आभ्यन्तरप्रयत्नः जिह्वाग्रेण दन्तमूलस्य ईषत्स्पर्शेनाग्र ईषत्स्पृष्टता। बाह्यप्रयत्नाश्च संवारनादघोषाः अल्पप्राणत्व। मातृकान्यासेऽस्य ककुदि न्यस्तता। काव्यादौ प्रथमप्रयोगे व्यसनं फलम्। "व्यसनमथ लवौ"ह्०र०टी। तस्य स्वरूपं यथा "लकारं चञ्चलापाङ्गि! कृष्णछोलयसंयुतम्। पीतविद्युल्लताकारं सर्वरत्नप्रदायकम्। पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा। आत्मादिसहितं वर्णं कुदि-भावद पार्वति"कामधेनुतन्त्रम्। तत्पर्य्यायो वर्णाभिधाने उक्ता यथा "लक्ष्मीः पूतना पृथ्वी माधवी शक्रवाचकः। ब्रह्मानुजः पिनाकीशो व्यापको मांसशङ्करः। परायणा ककुद्वच्चः खड्गी नादोऽमृतं दिवि। लवणं वारुणी-पीतशिखा वाणी क्रियाऽजिता। ध्वाङ्क्षिणी वेगिनी-नादः प्रद्युम्नः शोषणो हरिः। विघातन्द्रायणो चेतो मेरुर्गिरि कलोरवः"। तस्याधिष्ठातृध्येयरूपं यथा "चतुर्भुजां पीतवस्त्रां रक्तपङ्कजलोचनाम्। सर्वदा वरदां भीमां सर्वालङ्कारभूषिताम्। योगीन्द्रसेवितां नित्यं योगिनीं योगरूपिणीम्। चतुर्वर्गप्रदां देवीं नाग-हारोपशोभिताम्। एवं ध्यात्वा लकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम्।

ल पु० ला-क। १इन्द्रे मेदि० तन्त्रोक्ते भूमिदेवताके २मन्त्र-भेदे न० २एकलक्षके वर्णे। लड़ादिदशसु लकारादि तिङ्प्रत्ययेषु "लः कर्मणि च भावे चाकर्मकेभ्यः" पा०।

लक आस्वादे प्राप्तौ च चु० उभ०सक० सेट्। लाकयति ते अलीलकत् त।

लकच पु० लक-बा०अचन्। क्षिप्रवृक्षे (भाँदार) शब्दर०।

लकुच पु० लक-उचन्। (भाँदार) वृक्षभेदे अमरः।

"लकुचः चुक्रूपनसो लिकुचो डक्करिक्षपि। आमं ल-कुचफलञ्च गुरु विष्टम्भकृत्तथा। मधुरञ्च तथाम्लञ्च दोष-त्रितयरक्तकृत्। शुक्राग्निनाशनञ्चापि नेत्रयोरहितं स्मृतम्। पक्वं तत्तु मधुरमम्लं वातपित्तहरम्। कफवह्निकरं हृद्यं हृद्यं विष्टम्भकञ्च तत्" भावप्र०।

"लकुचं गुरु विष्टम्भि स्वादम्लं रक्तपित्तकृत्। श्लेष्म-कारि समीरघ्नमुष्णं शुक्राग्निनाशनम्" वैद्यक०।

लकुक पु० लक-कु नि० संज्ञायां कन्। १अलक्तके (आलता) शब्दर०। २जीर्णवस्त्रखण्डे (नेकड़ा) अमरः। [शब्दच०

लकुकर्मन् पु० लकुं करोति कृ-मनिन्। रक्तवर्णलोध्रे

लकुटिका स्त्री गोधायां निघण्टुः। [लिखत् त।

लक्ष दर्शने अङ्कने च चु०उभ०सक०सेट्। लक्षयति ते अल-

लक्ष न० लक्ष-अच्। १पदे २चिह्ने ३ध्याने ४शरव्ये च। ५दशायुतसंख्यायां स्त्री०म० मेदि०।

लक्षक त्रि० लक्षयति लक्षणयार्थम् लक्ष-ण्वुल्। लक्षण-यार्थबोधके शब्दे। तल्लक्षणं य० प्र० उक्तं यथा "यादृशार्थस्य सम्बन्धवति शब्दान्तु यत्नवेत्। तत्र तत्त-च्छब्दं नाम तच्छास्त्रविधुरं यदि"। "यादृशार्थसम्बन्धवति यत्नात् शब्दे तितं तदेव तादृशार्थं लक्षकं यदि तादृशार्थं

शक्तिशून्यं भवेत्। सैन्धवादयश्च शब्दास्तुरगादिसम्बन्धिनि लवणादाविव तुरगादावपि शक्ता एव। गङ्गादयस्तु तीराद्यवच्छेदिताः तत्सम्बन्धितीरादिशक्तत्वेन गृहीता एव तीराद्यन्वयं बोधयन्तीति तत्र लक्षका एव शक्तत्वे पूर्वपूर्वप्रयुक्तत्वापत्तेः तस्य तदव्याप्यत्वात् कथञ्चित्तीरादिसम्बन्धित्वेन गृहीतादपि गङ्गादिपदात्तीरादेरन्वयबोधेन तीराद्यशक्तत्वे सति तत्सम्बन्धितामात्रन्तु न लक्षणा गङ्गायां गङ्गायां घोष इत्यादावपि गङ्गागङ्गेतिभागस्य निरुक्तलक्षणायाः सत्त्वेन वैयर्थ्याभावप्रसङ्गाच्च। एतेन तीराद्यशक्तत्वे सति तीरादिपरत्वं तीरादिसम्बन्धानुभावकत्वं वा तल्लक्षकत्वमित्यपि प्रत्युक्तम् अप्रसिद्धस्यापि लक्षकत्वापाताच्च नचेष्टापत्तिः शक्तिलक्षणान्यतरवृत्तिमत्त्वे तस्य साधुतापत्तेः पदसाधुतायां वृत्तिमत्त्वस्यैव तन्त्रत्वात्। किञ्चानुभावकत्वं तदा घोषादिपदसाकाङ्क्षस्य गङ्गादिपदस्य तीरलक्षकता न स्यात् तेन तीरसम्बन्धिनो नीरस्यानुभवानर्ज्जनात् स्वरूपयोग्यत्वन्तु गङ्गायामिति वाक्यस्य दुर्वारं तस्याधाधेयताधर्मिकनीरानुभवं प्रति नीरार्थकनामोत्तर सप्तमीत्वेन तथात्वात् नीराधेयत्वस्य च तीरसम्बन्धित्वानपायात्।" अधिकं लक्षणशब्दे दृश्यम्।

लक्षण न० लक्ष्यतेऽनेन लक्ष-करणे ल्युट्। १इतरभेदानुमापके चिह्ने "लक्षयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वतः। लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः"। यथा पृथिव्या गन्धो लक्षणं स हि पृथिवीं परस्मात् भिन्नतया अनुमापयति। तच्च द्विविधम् "स्वरूपं तटस्थं द्विधा लक्षणं स्यात् स्वरूपं प्रविष्टं स्वरूपादिभिन्नम्" इत्युक्तेः स्वरूपलक्षणं तटस्थलक्षणं च यथा आकाशो विभुः सच्चिदानन्दो ब्रह्मेति स्वरूपलक्षणम्। काकवत् कृष्णं जगज्जन्मादिकर्तृ ब्रह्मेति तटस्थलक्षणम्। २स्वरूपे यथा घटलक्षणं वस्तु। ३नाम्नि व्यवहारोपयोगिनि ४चिह्ने च मेदि०। कर्त्तरि ल्युट्। ५स्वरूपप्रतिपादके "नोदनालक्षणार्थो धर्मः" इति जैमिनिसूत्रम् नोदना विधिवाक्यमेव लक्षणं स्वरूपज्ञापिका यस्य तादृशोऽर्थः धर्मः इति तदर्थः। ६शब्दसाधुतापतिपादके व्याकरणादिशास्त्रे च न० "लक्षणं स्वलक्षिज्ञानाम्" अमरः। कर्मणि ल्युट्। ७प्रतिपादे यथा "इत्थं द्वादशलक्षणीति" माधवीयन्यायमाला द्वादशानां लक्षणानां प्रतिपाद्यविषयाणां समाहारः इति तदर्थः। लक्ष युच्। शब्दनिष्ठे वाच्यार्थसंबन्धार्थबोधकताख्ये "मुख्यार्थबाधे तद्योगे ययान्योऽर्थः प्रतीयते। रूढेः प्रयोजनाद्वापि लक्षणा शक्तिरर्पिते"त्युक्ते वृत्तिभेदे स्त्री। यथा गङ्गायां घोषः प्रतिवसतीत्यादौ गङ्गाशब्दस्य जलप्रवाहरूपे स्वार्थेऽन्वयासम्भवात् तत्सम्बन्धतीरादिबोधकता। वृत्तिलक्षणे रामानुजौ पु० १०सारसपक्षिणि पुंस्त्री०तत् स्त्रियां राजनि०ङीष्। लक्षणाभेदादिकं शब्दशक्तिप्रकाशिकायामुक्तं यथा "जहत्स्वार्थाजहत्स्वार्थानिरूढाधुनिकादिकाः। लक्षणा विविधास्ताभिर्लक्षकं स्यादनेकधा"। काचिल्लक्षणा शक्याद्वृत्तिरूपेण बोधकतया जहत्स्वार्थेत्युच्यते यथा तीरत्वादिना गङ्गादिपदस्य। काचिच्छक्यलक्ष्योभयवृत्तिना शक्यवृत्तिनैव वा रूपेणानुभावकत्वादजहत्स्वार्था यथा द्रव्यत्वादिना नीलघटत्वादिना च घटपदस्य। काचिल्लक्ष्यतावच्छेदकीभूततत्तद्रूपेण पूर्वपूर्वप्रत्ययकत्वात् निरूढा यथा आरुण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरुणादिपदस्य। काचिच्च पूर्वपूर्वं तादृशरूपेणाप्रत्ययकत्वादाधुनिकी यथा घटत्वादिना घटादिपदस्य। शक्यसदृशत्वप्रकारेण बोधकतया गौण्यपि गृह्यते यथा अग्निर्माणवक इत्यादावग्निसदृशत्वादिना माणवकादिपदस्य। तदेवं विवक्षितलक्षणावत्त्वाल्लक्षकं नामापि जहत्स्वार्थादिभेदादनेकविधमित्यर्थः। स्यादेतत् यदि तीरादिलक्षकतया गङ्गादिपदस्य ज्ञानं तीरानुभवे भवेत्तर्हि तेनैव क्रमेण लक्षकान्तरं विभागः नत्वेतदस्ति तीराद्यन्वयबोधं प्रति तीरादिशक्तत्वेनैव पदज्ञानस्य लाघवेन हेतुतया लक्षकाणामननुभावकत्वात् गुरूणामग्नौ शैत्यं सृजेदित्यादौ शक्येन दहनादिनैव गङ्गायां घोष इत्यादौ लक्षितेन तीरादिना शाब्दबोधसंसर्गकस्यैव सप्तम्यर्थाधेयत्वादेरन्वयबोधप्रविष्टत्वादिति चेन्न प्रकृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य धर्म्यन्तरेऽन्वयबुद्धेर्व्युत्पन्नतया तीराद्यविशेषितस्य कुलधार्थेयत्वादेर्घोषादावन्वयबोधायोगात्। न च शक्तस्यैव पदस्य स्वसाकाङ्क्षपदान्तरोपस्थाप्यार्थान्वितस्वार्थधर्मिकान्वयबोधं प्रति हेतुत्वादन्वयबुद्धौ लक्ष्यार्थस्याप्रवेशः, कुन्ताः प्रविशन्तीत्यादौ लक्ष्यस्य कुन्तधरादेरन्वयविशेष्यत्वानुपपत्तेः कुन्तधरैः पथुरित्यादौ शक्यलक्ष्यार्थयोरन्वयबोधस्याप्यानुभविकत्वाच्च। तस्माच्छक्तेरिव भक्तेरपि ज्ञानमनुभावकं भवत्येव कार्यतावच्छेदकस्य बहूपोचाच्च न व्यभिचारः"। सा च बहुधा विस्तरस्तु साऽ२५०दृश्यः।

लक्षित त्रि०लक्ष-क्तेन क्त। १लक्षणया बोधितेऽर्थे, २ज्ञाते, ३अनुमिते च कर्त्तरि क्त। ४लक्षणाश्रये लक्षकशब्दे च।

लक्षितलक्षणा स्त्री लक्षणाभेदे यथा द्विरेफपदेन वक्तव्योक्तिलक्षणयोपस्थापिताङ्के फदयुक्तभ्रमरपदादभिधयैव भङ्गोपस्थितिः। अत्र न रूढ़िरस्ति प्रकृते तु रूढ़िप्रयोजनाभावात्तस्येयार्थत्वं दृश्यमेव लक्षितलक्षणेति वाच्यम्। यत्र लक्षिताच्छब्दादर्थाभिधानं तत्रैव लक्षितलक्षणायाः परिभाषितत्वात्" सा० द० टी०।

लक्ष्मन् न० लक्ष-मनिन्। १चिह्ने २प्रधाने च अमरः। स्वार्थे अण् पृषो० न वृद्धिः। ३शारङ्गपक्षिणि पुंस्त्री० हेमच० ४रघुपत्न्याः सुमित्रायाः ५अश्वेषाजाते च पु०। ६श्वेतकण्टकार्य्यां हेमच० स्त्री टाप् ७शारङ्गपक्षिस्त्रियाम् ८औषधभेदे च स्त्री भेदि० टाप्।

लक्ष्मी स्त्री लक्ष्यते-सट च। १विष्णोःपत्न्याम् अमरः। २शोभायां, ३कान्तौ, ४सम्पत्तौ, ५कट्वङ्गौषधे, ६वृद्धिनामौषधे, ७फल्गिनीवृक्षे च मेदि०। ८स्वर्णयूथिकायाम् ९हरिद्रायां, १०गव्यां, ११छत्रायां १२द्रव्ये च राजनि० १३पीड़ायां १४वारयोषिति च शब्दच०।

तल्लक्ष्मीपूजाकालादि स्कन्दपु० उक्तं यथा

"पौषे चैत्रे तथा भाद्रे पूजयेयुः स्त्रियः श्रियम्। सिंहे धनुषि मीने च स्थिते सप्तरङ्गमे। प्रत्यब्दं पूजयेल्लक्ष्मीं शुक्लपक्षे गुरोर्दिने। नापराह्णे न रात्रौ च नाशिते न च रुग्णे। द्वादश्यां चैव नन्दायां रिक्तायाञ्च निरंशके। त्रयोदश्यां तथाष्टम्यां कमलां नैव पूजयेत्। न पूजयेत् यनौ भौमे न बुधे नैव भार्गवे। पूजयेत्तु गुरोर्वारे चाप्राप्ते रविसोमयोः। गुरुवारे हि पूर्णा च यत्नेन यदि लभ्यते। तत्र पूज्या तु कमला धनपुत्रविवर्द्धिनी। न कुर्य्यात् प्रथमे मासि नैव कुर्य्याद्विसर्जनम्। न घण्टां वादयेत्तत्र नैव भिण्टीं प्रदापयेत्। पौषे च दशमी शस्ता चैत्रजे पञ्चमी तथा। नभस्ये पूर्णिमा ज्ञेया गुरुवारे विशेषतः। आढकं धान्यसंपूर्णं नानाभरणभूषितम्। सुगन्धिशुक्लपुष्पेण शुक्लपक्षे विशेषतः। पौषे तु पिष्टकं दद्यात् परमान्नञ्च चैत्रजे। पिष्टकं परमान्नञ्च नभस्ये तु विशेषतः। गुरुवारसमायुक्ता नभस्ये पूर्णिमा शुभा। कमलां पूजयेत्तत्र पुनर्जन्म न विद्यते। एतेन कमलेनैव कमलां तत्र पूजयेद् यदि। इह लोके सुखं प्राप्य परत्र लभते पदं"। लक्ष्मीचरित्रे तु "न कृष्णपक्षे रिक्तायां दशमी द्वादशीषु च। श्रवणादिचतुर्ऋक्षे लक्ष्मीपूजां न कारयेत्"। दशमीनिषेधः पौषातिरिक्तपरः प्राग्युक्तैकवाक्यत्वात्। दीपान्वितामावस्यायां तत्पूजादिकं दीपान्वितशब्दे ३६०७पृ० दृश्यम्। कोजागरलक्ष्मीपूजा कोजागरशब्दे २२६२ पृ० दृश्या। भाद्रशुक्लपञ्चम्यां श्रीपूजनं "पञ्चम्यां श्रीरपि श्रियम्" इति० त० विहितम्। "पञ्चम्यां श्रियं पूजयेत्" कल्पसूतिरपि तत्परा। गरु०पु० ११४ अ० लक्ष्म्यास्त्यागकारणतोक्ता यथा

"कुचेलिनं दन्तमलोपधारिणं बह्वाशिनं निष्ठुरवाक्यभाषिणम्। सूर्य्योदये चास्तमये च शायिनं विमुञ्चति श्रीरपि चक्रपाणिनम्। नित्यं क्षेदस्तृणानां धरणिविलिखनं पादयोरलसमार्द्रदन्तानामल्पशौचं वसनमलिनता रूक्षता मूर्द्धजानाम्। हे सत्त्वे चापि निद्रा विवसनशयनं यासहावातिरेकः स्वाङ्गे पीठे च वाद्यं निधनमुपनयेत् केशवस्यापि लक्ष्मीः। तस्या भाजनहेतुता तत्रोक्ता यथा "शिरः सुधौतं चरणौ सुमार्जितौ वराङ्गनासेवनमल्पभोजनम्। अनन्यचायित्वनपर्वमैथुनं चिरप्रनष्टां श्रियमानयन्ति षट्। यस्य कस्य तु पुष्पस्य पाण्डुरस्य विशेषतः। शिरसा धार्य्यमाणस्य अलक्ष्मीः प्रतिहन्यते। दीपस्य पश्चिमाच्छाया च्छाया शय्यासनस्य च। रजकस्य तु यत्तीर्थमलक्ष्मीस्तत्र तिष्ठति"।

लक्ष्मीकान्त पु० ६त०। १विष्णौ, २राजनि च लक्ष्मीपत्यादयोऽत्र। "विहाय लक्ष्मीपतिलक्ष्मकासुंकम्" किरा०। लक्ष्मीपतिस्तु लक्षके पुंगदृक्षे च विश्वः।

लक्ष्मीजनार्द्दन न० शालग्रामभेदे। तस्य लक्षणं यथा "एकद्वारे चतुश्चक्रं नवीननीरदोपमम्। लक्ष्मीजनार्द्दनं ज्ञेयं रहितं वनमालया" ब्रह्मवै० प्र०।

लक्ष्मीनारायण पु० शालग्रामभेदे तस्य लक्षणं यथा "एकद्वारे चतुश्चक्रं वनमालाविभूषितम्। नवीननीरदाकारं लक्ष्मीनारायणाभिधम्" ब्रह्मवै० प्र०।

लक्ष्मीनृसिंह न० शालग्रामभेदे तस्य लक्षणं यथा "द्विचक्रं विस्तृतास्यञ्च वनमालासमन्वितम्। लक्ष्मीनृसिंहं विज्ञेयं रुद्रिणाञ्च सुखप्रदम्" ब्रह्मवै० प्र०।

लक्ष्मीपुत्र पु० ६त०। १कामदेवे, २बुधे मेदि० ३कुबेरे च शब्दच०। ४गन्धर्वभेदे।

लक्ष्मीफल पु० लक्ष्म्याः फलमस्य। श्रीफले बिल्ववृक्षे राजनि०

लक्ष्मीवत् पु० लक्ष्मीः शोभाऽस्यास्य मतुप् मस्य वः। १पतङ्गे

यष्टव० । २स्त्रीयुक्ते त्रि० अमरः स्त्रियां ङीप् । ३श्वेतरोहितकवृक्षे पु० राजनि० ।

लक्ष्मीसहज पु० लक्ष्म्या सह क्षीराब्धौ जायते जन-ड । १चन्द्रे, मद्यच० २लक्ष्मैः अर्थिभिः सहपूर्वे च ।

लक्ष्य न० लक्षण्यम् । १वेधार्थलक्ष्यीक्रियमाणे शरव्ये अमरः । २लक्षणाबोध्येऽर्थे, ३दृश्ये, ४ज्ञेये, ५अनुभवे च त्रि० ।

लक्ष्यासन न० कर्म० शरे आसनभेदे । "अथ लक्ष्यासनं वक्ष्ये शिक्षायेऽस्त्रिणां नृणाम् । गुल्फदेशे कृतयुग्मं तलाभ्यामवलम्बयेत् भुवि" ।

लक्ष्ण गतौ भ्वा० पर०सक० सेट् । लक्षति । अलक्षीत्-अलाक्षीत् । इदितोयम् लक्ष्णति अलक्ष्णीत् ।

लग खञ्जीभावे सक०गतौ सक०भ्वा०प०सेट । लङ्गति अलङ्गीत लग सङ्गे भ्वा० पर० सक० सेट् । लगति इदित् अलगीत् चटा० लगयति । "लोकेव तस्या लगति स्म यस्मात्" नैष० ।

लग खादे म्लौ च सक०चु०उभ०सेट् । लागयति ते अलीलगत् त ।

लगित त्रि० लग-क्त । संसक्ते ।

लगुड(ल)(र) पु० लग-उडच् लड वा रश्च वा । दण्डाकारे काष्ठनिर्मिते यष्टयें (लाठी) अमरः ।

लग्न न० लस्ज-क्त तस्य नः । १मेषादिराशीनामुदये अमरः । २लज्जिते त्रि० । लग-क्त पृषो० । ३संसक्ते त्रि० । ४स्तुतिपाठके पु० त्रिका० । लग्न दृब्ध दृब्धार्थे क्त्वा । ५प्रतिभुवि । (जामिन) "खादको वित्तहीनः स्यात् लग्नको वित्तवान् यदि" इति स्मृतिः । मेषादिराश्युदयरूपलग्नपदार्थस्य ज्योषमेदे कालमानं खगोलशब्दे २४५२। ५६५०दर्शितम् । दृष्टकाले लग्नसाधनञ्च १८०२ पृ०दृश्यम् ।

लग्निका स्त्री लग्नेव कन् पृषो० । अष्टवर्जकन्यायां स्त्रियाम् अमरटीका ।

लघ अभोजने सौमार्जिकमेगतौ च भ्वा०आ०सक०सेट् इदित् । लङ्घते अलङ्घिष्ट । "कङ्घोलिनीवल्लभसुल्लङ्घे" महाना० ।

लघ योके भ्वा० पर० सक०सेट् इदित् । लङ्घति अलङ्घीत् ।

लघ प्रकाशे चु०उभ०स०सेट् इदित् । लङ्घयति ते अलङ्घयत् त

लघ आच्छादने चु०उभ०सक०सेट् । लाघयति-ते अलीलघत्-त

लघट्(ट्टि) पु०लघि-घोञे "लङ्घेर्नलोपश्च" उणा०अटिः टकार उच्चारणार्थः उज्ज्वल० धारावर्षे तु न तथा । वायौ ।

लघिमन् पु० लघोर्भावः इमनिच् डिच्च । १लघुत्वे लाघवे, येनोर्द्ध्वगतिर्लभ्यते । २ऐश्वर्यभेदे च ।

लघिष्ठ त्रि० अतिशयेन लघुः इष्ठन् डिच्च । अतिशयलघुत्वयुक्ते । ईयसुन् । लघीयानप्यत्र स्त्रियां ङीप् ।

लघु न० लघि-कु नि०नलोपः । १शीघ्रे अमरः । २क्षिप्रायुक्तमेदि० । ३वीरणमूले राजनि० । ४पृक्कानामौषधौ स्त्री मेदि० । ५तिन्तिडीसारे, ६लघुत्वगुणान्विते, ७तुच्छे, ८अनौद्धरे च त्रि० मेदि० । व्याकरणोक्ते हृस्वसंज्ञके ९अकारादौ वर्णे, ज्योतिषोक्तेषु "पुष्याश्विहस्ता लघुः" इत्युक्तेषु १०पुष्यादिनक्षत्रेषु च पु० । ११लघुतायुक्तायां स्त्रियां स्त्री वा ङीप् । तनूकृतो यिच् लघयति ।

लघुकाय पुंस्त्री० लघुः कायो यस्य । १छागे त्रिका० स्त्रियां वोपधत्वात् टाप् । कर्म० । २क्षुद्रशरीरे पुंन० ।

लघुकाश्मर्य्य पु० नित्यकर्म० । कटफले वृक्षे राजनि० ।

लघुचिर्भिटा स्त्री नि०कर्म० । क्षुद्रचीनी कर्कटीभेदे राजनि० ।

लघुदन्ती स्त्री कर्म० । क्षुद्रदन्तीवृक्षे ।

"दन्तीद्वयं वरं पाके रसे च कटुदीपनम् । गुदाङ्कुरास्रशूलाध्मकफकृच्छ्रविरेचनम् । तीक्ष्णोष्णं कृमिनिघ्नञ्च स्निग्धं कफयकृदादरक्लिनुत्" "क्षुद्रदन्तीफलन्तु स्वाद्वम्लं रक्तपाकयोः । शीतलं स्रंसविष्टम्भं मलयोः कफापहम्" भावप्र० ।

लघुद्राक्षा स्त्री कर्म० । काकजङ्घाख्यामाम् राजनि० ।

लघुनामन् पु० लघुवर्णयुक्तं नाम यस्य बहुव्रीहौ यद्वच० । गुरुशब्दे यद्वच० ।

लघुपत्रक पु० लघूनि क्षुद्राणि पत्राण्यस्य कप् । (शुद्धारोजना) वृक्षभेदे यद्वच० । कप् भावे ङीप् । लघुपत्री स्त्री २वृक्षत्यद्वृक्षे राजनि० ।

लघुपुष्प पु०लघु पुष्पं यस्य । भूमिकदम्बे राजनि० । [ङीप् ।

लघुबदर पु० कर्म० । क्षुद्रकोलौ । २भूबदर्य्यांम् स्त्री राजनि०

लघुब्राह्मी स्त्री कर्म० । क्षुद्रब्राह्मीक्षुपाम् राजनि० ।

लघुमन्य पु० । अग्निमन्थः मन्थः पूर्वपदलोपः कर्म० । क्षुद्राग्निमन्थे राजनि० ।

लघुलय न० लघु शीघ्रं लीयते ली-अच् । वीरणमूले अमरः

लघुसदाफला स्त्री सदा फलं यस्याः कर्म० । क्षुद्रोडुम्बरे (छोट डुमुर) कायाम् राजनि० ।

लघूहेमदुग्धा स्त्री कर्म० । क्षुद्रोडुम्बरे (छोट डुमुर) राजनि०

लघूदुम्बरिका स्त्री कर्म० । क्षुद्रोडुम्बरभेदे राजनि० ।

लङ्का स्त्री लक-अच् लस्य ङ च । स्वनामख्यातायां पुर्य्याम् सा च भूगोलस्य याम्ये भूवृत्तपादविवरे वसुद्रभाध्यस्थिता" सि० शि० । २खादिरीवृक्षे ३वेश्यायां ४ब्राह्मणीभेदे च विश्वः ।

लङ्घाधिप पु० ६त० । १रावणे लङ्घानाथाद्योऽप्यत्र । २कुबेरे च । [पृक्कायां (पिड़िङ) शाकभेदे शब्दच० ।

लङ्घा(ञि)पिका स्त्री लङ्घामश्नते आप्नोति वा ण्वुल् । लङ्घास्थायिन् पु०लङ्घायां तिष्ठति स्था णिनि । (लङ्घाशिज) पक्वभेदे शब्दच० । २लङ्घावासिनि त्रि० ।

लङ्घोपिका स्त्री लङ्घायामुप्यते वप-ण्वुल् पृषो० । पृक्कायाम् । (पिड़िङशाक) शब्दर० ।

लङ्घन न० लङ्घि-ल्युट् । १अभोजने, २अतिक्रम्य गमने, ३क्षमणे, ४क्षपणे च मेदि० । ५कर्षणे च भावप्र० लङ्घनस्य लक्षणस्वरूपगुणादिकमुक्तं यथा "ज्वरी लङ्घनं कुर्य्यादित्याह चरको वागभटश्च "आमाशयस्थो हृत्वाग्निं यामो मार्गान् पिधापयन् । विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत्" । तथा "ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम् । ज्वरान्ते भेषजं दद्याज्ज्वरमुक्ते विरेचनम् । त्रिविधं त्रिविधे दोषे तत्त्रयमीक्ष्य प्रयोजयेत् । दोषोऽपि लङ्घनं पथ्यं मध्ये लङ्घनपाचनम् । प्रभूते शोधनं तस्य मूलादुन्मूलयेन्मलान्" । चक्रदत्तश्च "तत्रणं तु ज्वरं पूर्वं लङ्घनेन त्रयं नयेत् । आमदोषमविज्ञाय लङ्घयेत्तं यथाविधि । मातः पचति सप्ताहात् पित्तन्तु दशभिर्दिनैः । श्लेष्मा द्वादशभिर्घस्रैः पच्यते वदतांवर ! । लङ्घनं लङ्घनीयन्तु कुर्य्याद्दोषानुरूपतः । त्रिरात्रमेकरात्रं वाऽहोरात्रमथ वा ज्वरे । निर्वातसेवनात् स्वेदाल्लङ्घनाद्रुग्णशारिणः । प्रायादामज्वरे क्षीणे पश्चाद्दोषमाचरेत्" । अत्रैवोक्तम् "ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम् । ज्वरान्ते भेषजं दद्याज्ज्वरमुक्ते विरेचनम् । दोषप्रेरणपाकार्थमग्नेः सन्धुक्षणाय च । लङ्घितस्याथ दोषघ्नेषु यवागूपानमाचरेत् । शालिषष्टिकमुद्गानां यूषं वा भक्षमाचरेत् । पञ्चकोलेन संसिद्धां यवागूं मध्यलङ्घने । अत्यर्थं लङ्घितं दृष्ट्वा तस्य शमनार्थं हितम् । द्राक्षादाडिमखर्जूरपियालैः सपरूषकैः । तर्पणार्हस्य कर्त्तव्यमन्नपानं ज्वरशान्तये" । अत्र लङ्घनशब्देनानशनमुच्यते । यत आह सुश्रुतः "आनद्धस्निग्धितैर्दोषैर्यावन्तं कालमातुरः । नाश्नीयात्तावतः कुर्य्यात्ततः संसर्गमाचरेत् । आनद्धस्निग्धितैर्दोषैः क्षपणञ्च । संसर्गम् औषधाद्यादिप्रसङ्गम्" । यत आह चरकः "चतुःप्रकाराः संशुद्धिः पिपासा काङ्क्षितापनौ । पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् । चतुःप्रकारा संशुद्धिर्वमनञ्च विरेचनम्" । निरूहबस्तिशिरोविरेचनानि नत्वनुवासनं तस्य दृंहणत्वात् । अत्र लङ्घनं कर्षणमित्यर्थः । सुश्रुतः "शरीरलाघवकरं यदुद्रव्यं कर्म वा पुनः । तं लङ्घनमिति ज्ञेयं दृंहणं तु पृथग्विधम्" । लङ्घनात्कर्षणादन्यत् शरीरपोषकमित्यर्थः" ।

लङ्घ चिह्नकरणे भ्वा० पर० सक० सेट् । लङ्घति अलङ्घीत् ।

लज व्रीड़ायाम् भ्वा० आ० अक० सेट् । लजते अलज्जिष्ट ।

लज निरस्कारे भ्वा०पर०सक०सेट् इदित् । लज्जति अलज्जीत्

लज अलङ्कारे चुरा० उ० सक० सेट् । लाजयति-ते अलीलजत् त ।

लज भाषणे हिंसायां दाने च सक०शक्यर्थे वासे च अक० चुरा० उभ० सेट् इदित् । लज्जयति-ते अललज्जत् त ।

लज भाषने अद०भ्वा०उभ०सक०सेट् । लजयति-ते अललजत्-त

लजकारिका स्त्री लजं लज्जां करोति कृ-ण्वुल् अत इत्त्वम् । लज्जालुलतायाम् हेमच० ।

लज्जा स्त्री लस्ज-भावे अ । अकृत्यप्रवृत्तौ परदर्शने दुष्टत्वधिया ततो निवृत्तिसाधने चित्तवृत्तिभेदे अमरः ।

लज्जालु स्त्री लस्ज-आलुच् । १लतामेदे शब्दच० । २लज्जावति त्रि० ।

"लज्जालुः स्यात् शमीपत्रा सप्तपत्राह्वयकारिका । रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि । लज्जालुः शीतला तिक्ता कषाया कफपित्तजित् । रक्तपित्तप्रतीकारं योनिरोगं विनाशयेत्" भावप्र० । [विवरिष्टे ।

लज्जाशील त्रि० लज्जां शीलयति शील-अण् । लज्जालु ।

लज्जिरी स्त्री लज्जा+अस्त्यर्थे इरच् गौरा०ङीष् । लज्जालुलतामेदे राजनि० । [त ।

लञ्ज भाषने अद०चु०उभ०अक०सेट् । लञ्जयति ते अललञ्जत्

लञ्छ पु० लञ्छ-अच् । १पदे २कच्छौ च हेमच० ।३पुच्छे जटासंज्ञायां कनू अत इत्त्वम् । लञ्छिका वेश्यायाम् हेमच० ।

लट बालभावे अक० उक्तौ द्वि० भ्वा० पर० सेट् । लटति । अलाटीत् अलटीत् । [विश्वः ।

लट पु० लट-घञ् अजर्थे क । १प्रमादवचने २दोषे च

लटक पु० लट-ण्वुल् । दुर्जने उणादिकोषः ।

लटपर्ण न०लटं दुष्टं पर्णमस्य । स्वर्णे (दारचिनि) राजनि०

लटा स्त्री लट-अ । (लाटाकरमत्स्य) १करञ्जभेदे, २वाद्यभेदे, ३श्यामचटके, भेदि० ४क्षुद्रमत्स्ये हेमच० । ५भरतः । ६व्याधे स्त्रियां पुंस्त्री० ७रागभेदे पु० उषा० ।

लड विलासे भ्वा० पर० अक० सेट् । लडति अलाडीत् लड उत्क्षेपणे सक० जिह्वाचालने अक० भ्वा० पर० सेट् । लडति अलाडीत्-अलडीत् घटा० । लडयति ।

लड अत्यन्तपालने चु०उभ०सक०सेट् । लाडयति-ते अलीलडत् त ।

लड आप्तौ चु०उभ०सक०सेट् । लाडयति-ते अलीलडत् त ।

लड भाषणे दिक० वा चु० उभ०पक्षे भ्वा० पर० सेट् इदित् । लण्डयति-ते लण्डति । अललण्डत्-त अलण्डीत् ।

लड उत्क्षेपणे वा चुरा० उभ०पक्षे भ्वा०पर०सक०सेट इदित् । लण्डयति-ते लण्डति । अललण्डत्-त अलण्डीत् ।

लड क्षेपणे अद०चु०उभ०सक० सेट् । लडयति ते अललडत् त

लड्डुक पु० लड-डु तस्य नेत्त्वम् स्वार्थे क । तैलादिपक्वे गोधूमादिचूर्णनिर्मिते (लाडु) मिष्टान्नभेदे "पृथुलडडु कलनीति" नैषधम् स्त्रीत्वमप्यस्य ।

लण्डु पु० लडि-रन् । (लण्डन) इति ख्याते क्षेपभेदे ।

लत आघाते सौ०पर०सक०सेट् । लतति अलातीत् अलतीत् ।

लता स्त्री लत अच् । शाखारहिते गुडूच्यादौ अमरः । २शाखायां ३प्रियङ्गौ ४पृक्कायाम् ५अम्बष्ठपर्ण्यां च अमरः । ६ज्योतिष्मत्यां ७लताकस्तूरिकायां ८नाधवीलतायां ९दूर्वायाञ्च मेदि० । १०वैद्यकिलतायां ११सारिवौषधौ च राजनि० ।

लताकरञ्ज पु० लतारूपः करञ्जः । करञ्जभेदे राजनि० ।

लताकस्तूरिका स्त्री लतायां कस्तूरीव गन्धत्वात् इवार्थे कन् । कस्तूरीगन्धयुक्तपत्रयुतायां लतायाम् राजवल्ल० । "लताकस्तूरिका तिक्ता कटुका शीताक्षरोगहृत्" ।

लताजिह्व पुंस्त्री०लतेव जिह्वा यस्य । सर्पे शब्दमा० स्त्रियां ङीष् ।

लतातरु पु० लतेव दीर्घस्तरुः । १ताडवृक्षे २नागरङ्गवृक्षे च शब्दच० । ३शालवृक्षे राजवल्ल० । लताद्रुमादयोऽप्यत्र ।

लतापनस पु० लतायां पनसमिव स्थूलं फलमस्य । (तरसुज) लताभेदे त्रिका० । [शब्दच० ।

लतापृक्का स्त्री लतेव विस्तीर्णा पृक्का । (पिडिङ्ग) शाकभेदे

लताफल न० लतायां फलमस्य । पटोले ।

लतामरुत् स्त्री लतायां मरुत् वायुर्यस्याः । पृक्कायां शब्दच० तल्लतासेवने हि वायुरुद्भिरिति वैद्यकप्रसिद्धम् ।

लतायष्टि स्त्री लतापि यष्टिरिव । मञ्जिष्ठायाम् शब्दमा० ।

लतायावक न० लतायाः यावकमिव । प्रवाले हारा० ।

लतार्क पु० लतयार्क इव । हरितालगुडौ अमरः ।

लतावेष्ट पु० "बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा स्त्रियं रमेत् । लघुचिङ्गताडनं योनौ लतावेष्टसञ्ज्ञितः" रसम० उक्ते आलिङ्गनभेदे । [वेष्टितक तथा" शब्दमा० ।

लतावेष्टितक न० आलिङ्गनभेदे । "उद्घट्टपीडितं लतावेष्टितकं तथा" शब्दमा० ।

लप कथने भ्वा०पर० सक० सेट् । लपति । अलापीत्-अलपीत् । क्वादित्वात् सिज्लुक् न छलः ।

लपन न० लप्यते उच्यतेऽनेन लप-करणे ल्युट् । १कथने अमरः । भावे ल्युट् । २कथने च । [न० अमरः ।

लपित त्रि० लप-कर्मणि क्त । १कथिते । भावे क्त । २कथने

लपिका स्त्री खाद्यभेदे लतावच्छब्दे २।८। पृ० दृश्यम् ।

लभ आलम्बने सक० शब्दे अक० भ्वा० आत्म० सेट् इदित् । लम्भते अलम्भिष्ट ।

लब्ध त्रि० लभ-कर्मणि क्त । १प्राप्ते अमरः । २नायिकाभेदे स्त्री लटा० । भावे क्त । प्राप्तौ १लाभे न० । "प्राप्तश्चाधिकं लब्धम्" गौत० स्मृतिः ।

लब्धवर्ण पु० लब्धो वर्णो वर्णनं प्रशंसा ज्ञानवत्त्वेन येन । पण्डिते अमरः ।

लभ शब्दे अक० भ्वा० आत्म० सेट् इदित् । लम्भते अलम्भिष्ट ।

लभ प्राप्तौ सक० भ्वा० आत्म० अनिट् । लभते । अलब्ध । ङित् लब्धिमः । णित् लम्भा । अविद्यजादायार्हधातुके नुम् । आलम्भः उपालम्भः । अनुपसर्गात् घञि न नुम् । खशि च सर्वथा दुर्लभः ।

आ+अर्थे बधे च उप+ज्ञानभेदे उप+आ+तिरस्कारे ।

लभस न० लभ-असच् नि०नुम् । वाजिबन्धने उज्ज्वल० ।

लभ्य त्रि०लभ-कर्मणि यत् । १प्राप्तव्ये मेदि० २न्याय्ये अमरः

लमक पु० रम-बुन् रस्य लः । १भिक्षे जारे त्रि०को ।

लम्पट पु० रस-अटन् पुक् च रस्य लः । परस्त्रीषु १लोलुपे, मेदि० । २आसक्ते च ।

लम्ब पु० लबि-अच् । १नर्त्तके २काले ३अङ्के च अमरः । ४उत्कोचे हेमच० अङ्कशास्त्रोक्ते त्रिभुजादिक्षेत्रे भुजकर्णयोर्मध्यस्थे लम्बमाने ५सूत्रे च "लम्बाधाभुजलम्बोत्तरमूलं प्रजायते लम्बः । लम्बगुणं भूम्यर्धं लब्धं लम्बभुजे फलं भवति" लीला० । ७दीर्घे दलम्बमाने च त्रि० ।

लम्बकर्ण पु० लम्बः कर्णो यस्य । १छागे मेदि० २अकोटे हृद्दे पु० २हस्तिनि ४राक्षसे च पुंस्त्री०शब्दच० ५ग्रन्थभेदे त्रिषु राजनि० । ६लम्बमोष्ठयुते त्रि० । कर्म० । ७लम्बमाने मोष्ठे पु० । सर्वत्र स्त्रियां जातित्वात् ङीष् ।

लम्बकेश त्रि० लम्बा दीर्घाः केशो यस्य । दीर्घाग्रयुक्ते केशसमूहे

विष्टरे। "ऊर्ध्वकेशो भवेत् ब्रह्मा लम्बकेशस्तु विष्टरः। दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः" सं० त०। "केशोऽत्रायम्" रघु०। २दीर्घकेशयुक्ते त्रि०। कर्म०। ३दीर्घे केशे च पु०।

लम्बदन्ता स्त्री लम्बोदीर्घः दन्त इव बीजकराटको यस्य। १सिंहलद्वीपभवपिप्पल्याम् राजनि०। २दीर्घदन्तयुक्ते त्रि० कर्म०। ३दीर्घे दन्ते पु०।

लम्बन न० लबि-ल्यु। नाभिदेशपर्य्यन्तं १लम्बमाने माल्यादौ अमरः। भावे ल्युट्। २आश्रयणे न०।

लम्बबीजा स्त्री लम्बं दीर्घं बीजं यस्याः। सिंहलदेशजातपिप्पल्याम् राजनि०।

लम्बा स्त्री लम्बते लबि-अच्। १तिक्तलम्बायां (तितलाउ) २लक्ष्म्यां ३गौर्य्यांच मेदि० ४दक्षकन्याभेदे ५हिमालयकन्याभेदे च हरिवं०।

लम्बोदर पु० लम्बं दीर्घमुदरं यस्य। १गणेशे अमरः। २तारानाम्न्यां देव्यां स्त्री तन्त्रम् ङीष्। ३दीर्घोदराढ्ये त्रि०।

लम्बो(म्बौ)ष्ठ पुं स्त्री० लम्बौ ओष्ठौ यस्य। वृद्धे त्रिका० स्त्रियां ङीष्। [अलयिढ्वम् अलयिध्वम्।

लय गतौ भ्वा० आत्म० सक० सेट्। लयते अलयिष्ट।

लय पु० ली-अच्। १संश्लेषे २विनाशे ३नृत्यगीतवाद्यानामेकतानतारूपे साम्ये च मेदि०। लीयतेऽत्र। सर्वभूतसंहरे ४प्रलयकाले शब्दर० ५ईश्वरे च। षड्लयभेदाश्च "द्विपदी स्यादुवलतिका भङ्गिका छित्रखण्डिका। वामभ्रुवक्त्रताभिख्या खण्डधारा फडक्कका। जम्भाद्रिकाकलतिका खण्डकः खरिकस्तथा। कथितस्तुरगोऽर्द्धचतुरश्रोऽथ नर्त्तकः। त्र्यस्रः प्रत्युन्दालनावलष्टमन्दघटौत्यपि। कादम्बसर्चरी षट्का मिश्रोऽर्द्धवलिता ततः। अतिचित्रः समश्चैव वलितोऽर्द्धदलक्षया। आविद्धस्तु टङ्कवक्त्रतश्चित्रविचित्रकौ। आन्त्री विलम्बितधारा च सङ्कुलोऽथ विलोलकः। रमणीयस्तथैव करकण्टकसंज्ञकः। चत्वारिंशदिमे प्रोक्ता लया लयविशारदैः। लयेन यस्मो भगवान् लये लीनो जनार्दनः" सङ्गीतदा०।

लर्व गतौ भ्वा० पर० सक० सेट्। लर्वति अलर्वीत्।

लल इच्छायां चु०उभ०सक०सेट्। लालयति-ते अलीललत् त।

लल इच्छायां अद० चु०उभ०सक०सेट्। ललयति ते अललत् त।

ललज्जिह्व पु० ललन्ती आस्वाद्यास्वादनाय चलन्ती जिह्वा यस्य ङस्य लः। १शुक्रे, २वह्नौ, ३क्षिप्तचित्ते त्रि० मेदि० स्त्रियां जातित्वात् ङीष्। ४चलद्रसनायुक्ते त्रि०। स्त्रियां टाप्।

ललन न० लड-ल्युट्, ङस्य लः। १चालने। २केलौ हेमच० ३बाले ४बालद्वये ५प्रियालद्वये च पु० राजनि०। चु० लल-ल्यु। ६जिह्वायां ७नार्य्यांच स्त्री मेदि०।

ललनाप्रिय पु० कर्म०। १कदम्बे। २छुहीवेरे न० राजनि०। ३जिह्वाप्रिये, ५रमणीवल्लभे च त्रि०।

ललन्तिका स्त्री लड-झच् स्वार्थे क अत इत्वम् ङस्य लः। नाभिदेशपर्य्यन्तं लम्बमाने १माल्यादौ अमरः। २गोधायां शब्दच०।

ललाट न० लड-अच् ङस्य लः ललमटति अट-अण्। अलकाधःस्थेऽङ्गभेदे (कपाल) अमरः।

ललाटन्तप पु० ललाटं तापयति तप-णिच् खच्-हुस्वः। १सूर्य्ये सि०कौ०। २ललाटतापके त्रि० "लिपिर्ललाटन्तपनिष्टराक्षरा" नैषधम्।

ललाटपट्ट पु० ललाटं पट्टमिव विस्तीर्णत्वात्। प्रशस्तललाटे ललाटफलकादयोऽप्यत्र।

ललाटिका स्त्री ललाटे आबध्यते ठन्। १ललाटभूषणे (टीका) अमरः २ललाटस्थे चिह्ने च।

ललाम न०लल-अच् तममति अम-अण्। १प्रधाने, २ध्वजे ३पुच्छे ४बालधौ ५चिह्ने ६भूषायां ७रत्ने ८तिलके ९घोटके १०प्रभावे च मेदि०। नान्तत्वमप्यस्य रुद्रः।

ललामक न० ललामं तिलकमिव स्वार्थे कन्। ललाटपर्य्यन्तं सम्मुखन्यस्ते माल्यभेदे अमरः।

ललित न० लल-क्त। १शृङ्गारानुगुणे चेष्टाभेदे "सुकुमारतयाऽङ्गानां विन्यासो ललितं भवेत्" सा०द०। २सुन्दरे, ३ईषत्स्मिते च त्रि० अमरः ४स्वरभेदे पु० स्त्री० लड-क्त ङस्य लः। ५चालने न० ६कस्तूर्य्यां ७नार्य्यां च स्त्री राजनि०। ८नदीभेदे सा च नदी कालिकापु० ८१ अ० उक्ता। ९दुर्गायाम् "या दुर्गा सैव ललिता" पद्मपु० पाता०। १०राधासखीभेदे च।

ललितासप्तमी स्त्री ललितायुक्ता सप्तमी। ललितापूजाङ्गे १भाद्रशुक्लसप्तम्याम्, तद्दिनकर्त्तव्ये २व्रतभेदे च।

लव पु० लू-अप्। १छेदे २विनाशे ३छेदने श्रीरामपुत्रे मेदि० ५कालपरिमाणभेदे काष्ठाद्वये हेमच० ६गोलाङ्गूललोम्नि, ७बाले केशे च दजासीफले न० शब्दच०। ८लवङ्गे १०लामज्जके ११ऐषदर्थे राजनि०। १२लावखण्डे पुं स्त्री० राजनि०।

लवङ्ग न० लू-अङ्गच्। सुगन्धिद्रव्ये अमरः। "लवङ्गं कटुकं तिक्तं लघु नेत्रहितं स्मृतम्। दीपनं पाचनं हृद्यं कफपित्तास्रनाशनम्। तच्चूर्णं छर्दिं तथा श्वासमूत्रकृच्छ्राणि विनाशयेत्। कासं श्वासं च हिक्कां च जयं क्षिपति तद्भुवम्" भावप०। आर्द्रं क तत्रैव यद्गुर०। लवङ्गकलिका स्त्री लवङ्गं कलिकेव। लवङ्गे राजनि०।

लवण पु० लू-ल्युट् पृषो० णत्वम्। १रसभेदे "लवणः शोधनो हृद्यः पाचनः कफपित्तहृत्। पुंस्त्वशीतकरः-कार्यवैशिष्ट्यबहुताकरः। वह्नीषाङ्गुलसङ्घः कफोल-गलदाहजित्। शोऽनियुक्तोऽधिपाकाक्षपित्तशोटक्षतादि-कृत्। बलीपलितखालित्य कृच्छ्रवीसर्पतृट्प्रदः" भावप०। यत्प्रधाने २सैन्धवक्षौद्यर्चलविडादिरूपे पदार्थे च ज०। तदुपक्षिप्याने ३क्षिप्तव्यंजने ४व्यञ्जने ५मधुरद्रव्यभेदे च पु०। ६लवणरसयुक्ते मेदि० ७लावण्ययुक्ते च त्रि० ८नदीभेदे ९दीप्तौ च स्त्री मेदि०।

लवणकिंशुका स्त्री लवणरसान्वितं किंशुकं पलाशं यस्याः। महाज्योतिष्मत्याम् राजनि०। [राजनि० लवणक्षार पु० लवणमयः क्षारः। लवणरसयुक्ते क्षारे लवणाक्तलि स्त्री ६त०। शाल्मलिवृक्षोत्पत्तिस्थाने क्षेत्रच०। लवणधेनु स्त्री दानार्थं कल्पितायां लवणनिर्मितायां धेनौ वराहपु०। [धान्यशैलमयद्वे १८८१पृ० उदाहृतम्।

लवणाम्बल पु० दानार्थं कल्पिते लवणाक्तारे लवणयूपे। लवणाब्धि पु० लवणमयोऽब्धिः। लवणपयुरसमुद्रे। लवणाकरादयोऽत्र। [(करभवणवत्) राजनि०।

लवणाम्बिज न० लवणाम्बेर्जायते जन-ड। क्षारमृत्तिकायां लवणोत्तम न० लवणेषु उत्तमम्। सैन्धवलवणे रत्नमा०। लवणोद पु० लवणमयसमुद्रः यस्य उदादेशः। लवणसमुद्रे अमरः।

लवन न०-लू-भावे कर्मणि च ल्युट्। १छेदने अमरः (छोना आना) २दत्ते स्त्री यद्गुण-ङीप्। [दत्ते राजनि०। लवली स्त्री० लवं छेदं लाति-ला क पृषो० ङीष्। (नोयाड़) लविल न० लूयतेऽनेन लू-इलच्। १दात्रे अमरः।

लश(ष)(स) श्लिष्यशोषे चु०उभ०सक०सेट्। लाश(ष)(स)यति ते अलीलश(ष)(स)त् त।

लशुन(न) न० लश-उनन् अनङ् वा धातोरादेर्लश्च। (रसुन) १रसोने भावप०।

तस्योत्पत्तिगुणादि भावप्र० उक्तं यथा "लशुनन्तु रसोनः स्यादुग्रगन्धो महौषधम्। अरिष्टो म्लेच्छकन्दः स्यात् पवनेष्टो रसोनक। यदाम्लतं दैवतेयो जहार सुरसत्तमः। तदा ततोऽपतद्बिन्दु स रसो नोऽपतद् भुवि। पञ्चभिस्तु रसैर्युक्तो रसेनाक्षेन वर्जितः। तच्चाश्वत्थोम्बुजो दृष्ट्वा दृष्ट्वाणां युथनेदिभिः। कटु-स्तापि मूलेषु तिक्तः पत्रेषु संस्थितः। नाले लवाय कथितो नालाग्रे लवणः स्मृतः। बीजे तु मधुरः प्रोक्तो रस कटुगुणवेदिभिः। रसोनो दंष्ट्रको ह्यग्निः क्षीणोष्णः पाचनः सरः। दृष्टे पाके च कटुकस्त्रीष्णो मधुरको मतः। अम्लपाकात्मजत्व कफस्रो गुदपित्तास्रदाहदः। बलवर्णकरो मेधाहितो नेत्र्यो रसायनः। कृष्ठोग-जीर्णज्वरकृमिगुल्म विबन्धगुल्मवातविकारनाशनोक्तानु। इ-दानीमृतावनुवादेनाजन्तुसमीरणवातव्याधिकफकांश्च हन्ति। यदा भांसं तदाम्लत्व हितं लशुनसेविनाम्"। दीर्घमध्यः यद्गुर०।

लष कान्तौ दिवा० भ्वा०च अक०सक०सेट्। अलषित् लषति ते अलषीत् अलाषीत् अलषिष्ट अलाषि शेषे।

लष क्षेपे क्रीडायां दीप्तौ च अक०भ्वा०पर०सेट्। अलषित् अलाषीत् अलषीत्।

लसा स्त्री लसति लष-अच्। कृमिरोगभेदे क्षारा०।

लसिका स्त्री लस अच् टाप् अत इत्त्वम्। लालायां अमरः।

लसज प्रेङ्खायां भ्वा०आ०अक०सेट्। अलसते अलसिष्ट। ईदित् निद्रायामनिट् खोदित् निद्रायाञ्च मः। अलस।

लस्त वि० लस-क्त वि० इडभावः। १श्लिष्टे, श्लेषिते, २श्लिष्टयुक्ते च। संज्ञायां अनु। धनुर्मध्यभागे पु०अमरः।

लङ्घि(री) स्त्री लेष-इन्द्रे लेष क्षिप्यते अर्जुनमनया धनु-अर्जनि ङीष् वा ङीष्। मङ्गातरङ्गे लेषच०।

ला आदाने अदा० पर० सक० अनिट्। लाति अलासीत्।

लाक्षणिक त्रि०लक्षणया बोधयति ठक्। १लक्षणया अर्थबोधके शब्दे। अस्यार्थे ठञ् आर्हे अण्। २लक्षणयुक्ते च।

लाक्षण्य त्रि० लक्षणं वेत्ति अण्। १शुभाशुभलक्षणज्ञे। अस्यार्थे वा० अञ्। २लक्षणयुक्ते।

लाजा स्त्री लज्जतेऽनया-लज-अच् पृषो०डस्य लः। (खा)खाते पदार्थे अमरः। २रञ्जनद्रव्ये।

लाजातङ्क पु० लाजायोनिसङ्कः। (खा) दुग्धसाधने द्रव्ये यद्गुण०। लाजाहङ्कारोऽत्र।

लाजादितैल न०लाजादिभिः पक्वं तैलम् या०त०। तैलकल्पे तैलभेदे तच्च द्विविधं लघ्वं बृहच्च तिभेदात् तत्र लघ्वं यथा "लाजा हरिद्रा कश्मिलालक्तकैलं विषाधितम्।

सहसूपेनारनालेन दाडयीतज्वरातुरम्" । इदम् यथा "क्षाराम्लाढके प्रस्थं तैलस्य विपचेत् भिषक् । मस्ताढकसमायुक्तं पिबेत् चात्र समाक्षमेत् । शतपुष्पां हरिद्रां मूर्वां कुष्ठं हरेणुकाम् । कटुकां मधुकां रास्नामश्वगन्धाञ्च दार्व्व च । मुस्तकं चन्दनं चैव पृथगक्षसमानकैः । द्रव्यैरेतैश्च संक्षिप्तमभ्यङ्गात् मारुतापहम् । विषमाख्यान् ज्वरान् सर्वानाशु हन्यात् न संशयः । क्षारं क्षारं प्रतिख्यातं लाङ्गू दौर्गन्ध्यगौरवम् । त्रिदशपुष्पं मूलं गात्राणां स्फुटनं तथा । पापालक्ष्मीप्रशमनं सर्वपङ्कनिवारणम् । अस्थिभ्यां निर्मितं सम्यक् तैलं क्षाराद्यिकं महत्" सुश्रुतोक्तः । [राजनि०

लाक्षाप्रसाद पु० लाक्षायां प्रसादो यस्य । षष्टिकशालीभेदे

लाक्षाप्रसाधन न० प्रसाध्यते भूष्यतेऽनेन ल्युट् लाक्षा रक्तस्य एव प्रसाधनमस्य । १रक्तलोध्रे अमरः ।

लाक्षारस पु० लाक्षानिःस्रुतो रसः इव । अलक्तकरसे ।

लाङ्गु गतौ भूषणे दाने वारणे च भ्वा० सामर्थ्ये अक० भ्वा० पर० सेट् । लाङ्गति अलाङ्गीत् क्वचित् चङि न ह्रस्वः ।

लाघ सामर्थ्ये भ्वा० आ० अक० सेट् । लाघते अलाघिष्ट । क्वचित् चङि न ह्रस्वः ।

लाघव न० लघोर्भावः अण् । १लघुत्वे आरोग्ये च रा०नि० ।

लाङ्गल न० लगि-कलच् पृषो० इत्वम् । स्वनामख्याते १भूमिकर्षणे पदार्थे अमरः । २लिङ्गे त्रिका० ३पुष्पभेदे ४तालवृक्षे ५वटवृक्षेऽपि च मेदि० । [(हल) अमरः ।

लाङ्गलदण्ड पु० ६त० । लाङ्गलमध्यस्थे काष्ठमये दण्डे

लाङ्गलपद्धति स्त्री लाङ्गलखाता पद्धतिः रेखा । सीतायाम् लाङ्गलखातरेखस्यभूमिरेखायाम् अमरः ।

लाङ्गलिकी स्त्री लाङ्गलिप्राकारेऽस्त्यर्था० ठन् ङीप् । (हिजड़ा) १हिजडे अमरः । तत्र भव० अण् । २क्लीबभेदे पु० हेमच० ।

लाङ्गलिन् पु० लाङ्गलं प्रहरणत्वेनास्त्यस्य इनि । १बलदेवे मेदि० । लाङ्गलदण्ड इव दीर्घः आकारोऽस्त्यस्य इनि । २नारिकेलवृक्षे अमरः ।

लाङ्गली स्त्री लाङ्गलाकारः पुष्पमस्त्यस्याः अच् गौरा० ङीष् (कौंचड़ा) शाकभेदे अमरः ।

लाङ्गूल न० लगि-ऊलच् पृषो० पशूनां पाश्चाद्भागिनि रोमयुक्ते चारुसुन्दरी २शैवके मेदि० ३कुत्सिते त्रि०कौ० ।

लाङ्गूलिका स्त्री लाङ्गूलाकारोऽस्त्यस्याः ठन् । पृश्निपर्ण्याम् राजनि० [तदाकारपुष्पयुते २क्षवभौषधे च राजनि० ।

लाङ्गूलिन् पु० न लाङ्गूलमस्त्यस्य इनि । १वानरे शब्दर० ।

लाङ्क्ष भक्षणे भ्वा०पर०अक०सेट् इदित् । लाङ्क्षति अलाङ्क्षीत् । [दयवयम् । लाङ्क्षति अलाङ्क्षीत् ।

लाज भर्त्सने भ्वा०पर०सक०सेट् । लाजति अलाजीत् । इदित् ।

लाज न० लाज-अच् । १धानीरे २आर्द्रनक्षत्रे पु० मेदि० । ३भृष्टधान्ये (खइ) पु०ब०व०अमर० । स्त्रीत्वमप्यत्र मेदि० ।

लाञ्छन न० लाञ्छ्यते लाञ्छि-कर्मणि ल्युट् । १चिह्ने २नामनि च मेदि० भावे ल्युट् । ३कलङ्के ।

लाट पु० लट-अंशायां घञ् । १देशभेदे २वस्त्रे अमरः ३जीर्णोद्धारे शब्दर० । ४विटमधुकृषे च रा०नि० ।

लाटानुप्रास पु० अलङ्कारोक्ते शब्दालङ्कारभेदे अनुप्रासशब्दे १७६६ पृ० अलङ्कारशब्दे च १८६ पृ० दृश्यम् ।

लाड चेष्टे अदा०चु०उभ०सक०सेट् । लाडयति ते ।

लाभ पु० लभ्यते लभ-कर्मणि घञ् । १भूलाभादिलाभेऽधिके लभ्यमाने धने अमरः । भावे घञ् । २प्राप्तौ ।

लामज्जक न० लायते ला-किप् लाः आदीयमानः मज्जा सारो यस्य कप् । वीरणमूले अमरः ।

लालन न० लड-ल्युट् । स्नेहपूर्वकपालने ।

लालसा स्त्री लस-सृ टापां यङ् लुक् भावे अ । १अतिइच्छायाम् अमरः । २गर्भिणीदोहदे हेमच० ३याच्ञायां औत्सुक्ये च मेदि० । कर्त्तरि अच् ।५लोले त्रि० हेमच०

लाला स्त्री पु० लस-णिच् अच्-टाप् । मुखजजलद्रवे अमरः

लालाटिक त्रि० ललाटं प्रयोजनमस्य ठञ्ञति ठञ् । १प्रभुभाग्यापजीविनि कार्य्यासमर्थे अमरः । ललाटात् ललाटस्यभाग्यात् आगतः तत्रेदं वा ठञ् । २भाग्याधीने त्रि० "प्राग्निस्तु लालाटिकी" इत्युज्ज्वटः । ३ललाटसम्बन्धिनि त्रि० ।

लालाविष पु० लालायां विषमस्य । १लूतादौ कीटे हेमच० कीटशब्दे २०५६ पृ०दृश्यम् । [हेमच० ।

लालास्राव लालां स्रावयति स्रु-णिच्-अण् । लूताकीटे

लालित्य न० ललितस्य भावः ष्यञ् । १सौन्दर्य्ये २मनोहरत्वे "नैषधे पदलालित्यम्" इत्युज्ज्वटः ।

लाव छेदे भ्वा० लू-कर्त्तरि संज्ञायां घञ् । १पक्षिभेदे अमरः । स्त्रियां ङीष् । आर्षं क । तत्रैव भावे घञ् । २छेदने ।

लावण न० लवणे संस्कृतमस्त्र अण् । लवणसंस्कृते औषधादौ

लावणिक न० लवणे संस्कृतमस्त्र ठण् । १लवणे संस्कृतौषधादौ हेमच० । लवणं पण्यमस्त्र ठण् । २लवणविक्रयोपजीविनि वणिग्भेदे च ।

लावण्य न० लवणस्य भावः ष्यञ्। लवणत्वे "मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते" उज्ज्वलमाद्युक्ते देहसौन्दर्य्यभेदे च।

लासिका स्त्री लस-ण्वुल्। नर्त्तक्याम् अमरः। पृषो० लासकीत्यपि तत्रैव।

लास्य न० लस-ण्यत्। १नृत्ये अमरः। २वाद्यनृत्यगीतित्रिके भेदि०। "स्त्रीनृत्यं लास्यमुच्यते" इत्युक्ते ३स्त्रीनृत्ये च। स्वार्थे क। तत्रैव।

लिकुच पु० लकुच-पृषो० इत्त्वम्। (माँदार) वृक्षे अमरः।

लिक्षा(क्षा) स्त्री लिख-गतौ क्स षड्क्षत्वानि पृषो० वा कच। १यूकाण्डे शब्दर०। "आलान्तरगते भानौ यत्राणु दृश्यते रजः। तैस्तुर्भिर्भवेल्लिक्षा" २इत्युक्ते परिमाणभेदे च।

लिख लेखने तुदा०पर०सक०सेट्। लिखति अलेखीत्। कुटादित्वान्ङित्त्वम् तेन लिखनमिति सिद्धम्।

लिख गतौ भ्वा०पर०सक०सेट् इदित्। लिङ्क्ते अलिङ्क्षीत्

लिखन न० कृ० लिख-भावादौ ल्युट्। १लेखने २लिपौ च

लिखित न० लिख-भावे क्त। १लेखने। आधारे क्त। २लिपौ अमरः। विषादे अर्थसाधके शपथे च "प्रमाणं लिखितं भक्तिः" स्मृतिः। लेख्यशब्दे दृश्यम्। ४स्मृतिकारके शङ्खमुनिभ्रातरि मुनिभेदे पु०।

लिग गतौ भ्वा०पर०सक०सेट् इदित्। लिङ्गति अलिङ्गीत्।

लिग चिह्नीकरणे चुरा०उभ०सक०सेट् इदित्। लिङ्गयति ते अलिलिङ्गत् त।

लिङ्ग पु० लिगि-क्त्। १चिह्ने २पुंसोऽसाधारणचिह्ने उपस्थेन्द्रिये अमरः। ३अनुमानसाधने हेतौ ४सांख्योक्ते प्रधाने तस्यात्मविवेकहेतुत्वात् तथात्वम् ५शिवमूर्त्तिभेदे मेदि० ६व्याप्ये ७व्यक्ते शब्दनिष्ठे पदसाधुतानियोजके दर्शभेदे विका० ८अर्थप्रकाशनसामर्थ्ये च। "क्षमता च लिङ्गमिति" मीमांसकाः।

शब्दधर्मलिङ्गं चाचार्यैः शब्दार्थरत्ने निरूपितं यथा "लिङ्गत्वञ्च प्राकृतगुणगतावस्थात्मको धर्म एव तद्विशेषस्य पुंनपुंसकत्वादिः। तथा हि सर्वेषां त्रिगुणप्रकृतिकार्य्यतया शब्दानामपि तथात्वेन गुणगतविशेषाच्छब्देषु लिङ्गविशेष इति कल्प्यते स च विशेषः शास्त्रे इत्यभ्यधायि। "विकृतसत्त्वादीनां तुल्यरूपेणावस्थानात् नपुंसकत्वं सत्त्वाधिक्ये पुंस्त्वम् अल्पत्वे (रज आधिक्ये) स्त्रीत्वमिति"। एवञ्च लिङ्गस्य शब्दधर्मत्वेऽपि शब्देन सहार्थाभेदारोपात् असति बाधके अर्थेऽपि साक्षात् तत्प्रतीतत्वेन वा सर्वत्र तस्य विशेषणत्वम् शब्दबोधे शब्दभानस्येष्टत्वाच्च शब्दस्य नामार्थतावत् तद्गतलिङ्गस्यापि नामार्थतौचित्यात् "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते" इति हर्य्युक्तेः "शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा। नो चेत् श्रोत्रादिभिः सिद्धोऽप्यसावर्थेऽवभासते" इत्युक्तेश्च शब्दानां नामार्थतावगतेः। तथा प्रातिपदिकार्थाभेदविवक्षायां तु श्रोत्रादिभिरेव सिद्धः ज्ञातः सन् अर्थे प्रकारतया भासते इति तदर्थः। युक्तञ्चैतत् पुंलिङ्गः शब्द इति व्यवहारात् "स्वमोर्नपुंसकादिति" पा०सूत्रे शब्दस्यैव नपुंसकत्वव्यपदेशात् दारानित्यादौ पुंस्त्वान्वयबाधाच्च लिङ्गस्य शब्दधर्मत्वमन्यथैतेषु लिङ्गाद्यन्वयापत्त्या व्यवहारस्तत्र निर्देशासङ्गत्यापत्तेश्च। तथा अर्थभेदाच्छब्दभेदवत् लिङ्गभेदादपि शब्दभेद इति कल्प्यते प्रागुक्तधर्मविशेषरूपभेदकसङ्गावात्। उक्तञ्च भाष्ये "एकार्थे शब्दानान्त्वाद्दृष्टं लिङ्गान्यत्वमिति"। एवञ्च तटादिशब्दानामनेकलिङ्गत्वव्यवहारः समानानुपूर्वीकत्वेनैव वस्तुतस्तेषां भिन्नानामेव भिन्नलिङ्गत्वमिति दिक्"।

अर्थप्रकाशनसामर्थ्यरूपलिङ्गन्तु द्वितीयादिश्रवणे तत्तन्मन्त्रप्रकाश्यार्थे विनियोगसाधकं यथा "बर्हिर्देवसदनं दानीति" अत्र दानीति पदस्य दा लवने इत्यस्माल्लोडिङ्गस्य च्छेदनप्रकाशनसामर्थ्यात् बर्हिरित्यस्य वास्तुतदर्भप्रकाशनसामर्थ्यात् दर्भच्छेदने सस्तदायमन्त्रस्य विनियोगोऽवगम्यते" तत्त्वबोध०। प्रत्यक्षद्वितीयाश्रवणे तु लैङ्गिकविनियोगस्यज्यते "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" जै० सू०। यथा "ऐन्द्रा गार्हपत्यमुपतिष्ठते" श्रुतिः ऐन्द्री च ऋक् "कदाचन स्तरीरसि नेन्द्र ! दाशुषे" अस्य मन्त्रस्य इन्द्रप्रकाशनसामर्थ्यम् तदेतत् निरूपितं तत्त्वबोधव्याख्याम् "तथा हि गार्हपत्यमिति द्वितीयारूपप्रत्यक्षश्रुत्या गार्हपत्याग्निगतं क्रियाजन्यप्रीतिफलाश्रयत्वरूपं कर्मत्वं साक्षादुबोधितं तथा च तस्य देवतात्वं श्रुतिप्राप्तं क्रियाजन्यप्रीतिभागित्वेनोद्देश्यस्यैव देवतात्वादिति गार्हपत्याग्नेरुपस्थानस्य प्रेषितावगम्यते ऐन्द्र्येति तृतीयाश्रुतेः करणत्वबोधनादुपस्थानप्रेषत्वमवगम्यते मन्त्रलिङ्गेनेन्द्रस्यापि प्रेषत्वमित्युभयोरुपस्थानं देवतात्वञ्चावगम्यते तथा च विरोधः न ह्यन्यप्रकाश्यकत्वेऽन्योपस्थ

विक्षितमिति तदपरीहाराय मन्त्रस्येन्द्रपदे विधिवाक्यस्यागार्हपत्यपदे वा एकस्य लक्षणावश्यकी। तत्र गार्हपत्य पदस्य इन्द्रे न लक्षणा गार्हपत्यदेवतात्वस्य लिङ्गानिरपेक्षस्मृतिप्राप्तत्वात् इन्द्रदेवतात्वन्तु लिङ्गेन विलम्बबोध्यम्। तथा हि इन्द्रप्रकाशनसामर्थ्यान्यथानुपपत्त्या इन्द्रसुपतिष्ठते इति कल्प्यते इति इन्द्रस्य देवतात्वं विलम्बगम्यमिति शीघ्रबोधकत्वेन स्मृतिरेव बलवतीति लिङ्गं दुर्बलम्। अतएव न समुच्चयः न वा इन्द्रस्यैवेति नियमः लिङ्गस्य दुर्बलत्वेन इन्द्रोपस्थानस्यान्याप्राप्तत्वात्। एवञ्च स्मृतितोऽग्ने रुपस्थाने सिद्धे कथमित्याकाङ्क्षायामैन्द्रमिति। ततश्च मन्त्रस्येन्द्रप्रकाशकत्वात् तेनाग्नेरुपस्थानानुपपत्तेः न ह्यन्योपस्थापकमन्त्रेणान्यस्योपस्थानं युक्तमित्यनुपपत्त्या मन्त्रस्येन्द्रपदस्य इदि परमैश्वर्ये इति धात्वनुसारादैश्वर्यगुणयोगादग्नौ लक्षणा" "यावदेव हि मन्त्रार्थो मन्त्रेण प्रतिपाद्यते। मन्त्रार्थं मन्त्रतो बुद्ध्वा पश्चाच्छक्तिर्निरूप्यते। मन्त्राकाङ्क्षावशेऽग्नेरिन्द्रपदमन्त्रस्मृतिकल्पना। स्मृत्या प्रत्यक्षया पूर्वं गार्हपत्यार्थता गते। लिङ्गस्य हि प्रमाणत्वं मन्त्राकाङ्क्षानिबन्धनम्। तास्य स्मृतिर्विरुध्यन्ती श्रुतिरोधेन नश्यति। विरोधे च स्मृतिर्लिङ्गं बलीयस्त्वेन बाधते"। लियं स्वयं गच्छति धृतो। १०सांख्योक्ते महत्तत्त्वे देहशब्दे २७५४ पृ० दृश्यम्। ११सप्तदशावयवे लिङ्गदेहे।

"सप्तदशैकं लिङ्गम्" सा० सू० "सूक्ष्मशरीरमाधाराधेयभावेन द्विविधं भवति तत्र सप्तदश मिलित्वा लिङ्गशरीरं तच्च सर्गादौ समष्टिरूपमेकमेव भवतीत्यर्थः। एकादशेन्द्रियाणि पञ्च तन्मात्राणि बुद्धिश्चेति सप्तदश। अहङ्कारस्य बुद्धावेवान्तर्भावः। चतुर्थकल्पवक्ष्यमाणप्रमाणादेतान्येव सप्तदशलिङ्गं मन्तव्यम्। न तु सप्तदश एकं चेत्यष्टादशतया व्याख्येयम् उत्तरसूत्रेण व्यक्तिभेदस्योपाद्यतयात्र लिङ्गैक्ये एकशब्दस्य तात्पर्यावधारणाच्च। "कर्मात्मा पुरुषो योऽसौ बन्धमोक्षैः स युज्यते। ससप्तदश कोनापि राशिना युज्यते च सः" इति मोक्षधर्मादौ लिङ्गशरीरस्य सप्तदशत्वमिदञ्च सप्तदशावयवा अत्र सन्तीति सप्तदशको राशिरित्यर्थः। राशिशब्देन स्थूलदेहस्यावयवित्वं निराकृतम् अवयविरूपेण द्रव्यान्तरकल्पनायां गौरवात्। स्थूलदेहस्य चावयवित्वमेकतादिप्रत्यक्षानुरोधेन कल्प्यत इति। अत्र च लिङ्गदेहे बुद्धिरेव प्रधानेत्यावयेन लिङ्गदेहस्य भोगः प्रायुक्तः। प्राणवत्त्वान्तःकरणस्यैव वृत्तिभेदः। अतो लिङ्गदेहे प्राणपञ्चकस्यान्तर्भाव इत्यस्य सप्तदशावयवकस्य शरीरस्य स्वयं वक्ष्यति "लिङ्गशरीरनिमित्तक इति सनन्दनाचार्यः" इति सूत्रेण। अतो भोगायतनत्वमेव सूक्ष्मं शरीरलक्षणम्। तदाश्रयतया तत्त्वस्य शरीरत्वमिति पश्चादुत्पत्तीभविष्यति। चेष्टेन्द्रियार्थाश्रयः शरीरमिति तु न्यायेऽपि तस्यैव लक्षणं कृतमिति" भा०। "तदधिष्ठानाश्रये देहे तद्वादात् तद्वादः" सा० सू०। "तस्य लिङ्गस्य तदधिष्ठानमाश्रयो वक्ष्यमाणभूतपञ्चकं तस्याश्रये षाट्कौशिकदेहे तद्वादो देहवादस्तद्वादात् तस्याधिष्ठानशब्दोक्तस्य देहस्य वादादित्यर्थः लिङ्गसम्बन्धादधिष्ठानस्य देहत्वमधिष्ठानाश्रयत्वाच्च स्थूलस्य देहत्वमिति पर्य्यवसितोऽर्थः"। अधिष्ठानशरीरं च सूक्ष्मं पञ्चभूतात्मकं वक्ष्यते तथा च शरीरत्रयं सिद्धम्" "वासना भूतसूक्ष्मं च कर्मविद्धे तथैव च। दशेन्द्रियं मनोबुद्धिरेतल्लिङ्गं विदुर्बुधाः" इति वाशिष्ठादिवाक्येभ्यः। अत्र लिङ्गशरीरप्रतिपादनेनैव पुर्यष्टकमपि व्याख्येयमित्याशयेन बुद्धिधर्माणामपि वासनाकर्मविद्यानां पृथगुपन्यासः। भूतसूक्ष्मं चात्र तन्मात्रा, दशेन्द्रियाणि च ज्ञानकर्मेन्द्रियभेदेन द्वादशेत्याशयः। यत्तु मायावादिनो लिङ्गशरीरे तन्मात्रस्थाने प्राणादिपञ्चकं प्रक्षिपन्ति पुर्यष्टकं चान्यथा कल्पयन्ति तदप्रामाणिकमिति" भा०। वेदान्तिनये "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" इत्युक्तं सप्तदशावयवं लिङ्गशरीरमिति भेदः।

लिङ्गक पु० लिङ्गेन कायति कै-क। कपिञ्जले शब्दच०।

लिङ्गपुराण पु० व्यासप्रणीते महापुराणभेदे लिङ्गपुराणप्रतिपाद्यविषया यथा "ब्रह्मोवाच "शृणु पुत्र! प्रवक्ष्यामि पुराणं लिङ्गसंज्ञितम्। पठतां शृण्वतान्चैव भुक्तिमुक्तिप्रदायकम्। यच्च लिङ्गाभिधे तिष्ठन् वह्निर्लिङ्गे हरोऽभ्यधात्। महद्धर्मादिसिद्ध्यर्थमग्निकल्पकथाश्रयम्। तदेव व्यासदेवेन भागद्वयसमाचितम्। पुराणं लिङ्गसंज्ञितं वक्ष्याख्यालविचित्रितम्। तदेकादशसाहस्रं हरमाहात्म्यसूचकम्। परं सर्वपुराणानां सारभूतं जगत्त्रये। पुराणोपक्रमे ब्रह्मः सृष्टिसंक्षेपतः पुरा"। तत्र पूर्वभागे "योगाख्यानं ततः प्रोक्तं कल्पाख्यानं ततः परम्। लिङ्गोद्भवस्तदर्च्चा च कीर्त्तिता हि ततःपरम्। सनत्कुमारशैलादिसंवादश्चाथ पावनः। ततो दधीचिचरितं युगधर्मनिरूपणम्। ततो भुवनकोशाख्या

सूर्यसोमाग्नयस्ततः । ततश्च विकरात् वर्मेश्वरपुराख्यानकं तथा । लिङ्गप्रतिष्ठा च ततः पशुपाशविमोचनम् । शिवव्रतानि च तथा सदाचारनिरूपणम् । प्रायश्चित्ताभिधानानि काशीश्रीशैलवर्णनम् । अन्धकाख्यानकं पश्चादाराधनचरितं पुनः । ऋषिद्विजचरितं पश्चाज्जलन्धरवधस्ततः । वैरं यक्षकुलानाय दत्तयज्ञविनाशनम् । कामस्य दहनं पश्चात् गिरिजायाः करग्रहः । ततो विनायकोत्पत्तिं स्कन्दाख्यानं शिवस्य च । उपमन्युकथा चापि पूर्वभाग इतीरितः" । उत्तरभागे "विष्णुमाहात्म्यकथनमस्वरीषकथा ततः । सनत्कुमारनन्दीशसंवादश्च पुनर्हने ! । शिवमाहात्म्यसंयुक्तज्ञानयोगादिकं ततः । सूर्यपूजाविधिश्चैव शिवपूजा च सुव्रता । दानानि बहुधोक्तानि श्राद्धप्रकरणन्ततः । प्रतिष्ठा तत्र कथिता ततोऽघोरस्य कौर्त्तनम् । ब्रह्मेश्वरी मन्त्रविद्या गायत्रीमहिमा ततः । मन्त्रभेदश्च माहात्म्यं पुराणश्रवणस्य च । एतत्सोपरिभागस्तु लैङ्गस्य कथितो मया । व्यासेन हि निबद्धं बहुमाहात्म्यसूचिनः । लिखित्वैतत् पुराणन्तु तिलधेनुसमन्वितम् । फाल्गुन्यां पूर्णिमायां यो दद्यादुक्त्वा द्विजातये । यः पठेच्छृणुयाद्वापि लैङ्गं पापापहं नरः । स भुक्तभोगो लोकेऽस्मिन्ते शिवपुरं व्रजेत् । लिङ्गानुक्रमणीमेतां पठेद्यः शृणुयात्तथा । तावुभौ शिवसक्तौ तु लोकहितपरायणौ । जायेतां गिरिजाभर्तुः प्रसादान्नात्र संशयः" वायु०पु०१०२अ० ।

लिङ्गवर्द्धिनी स्त्री लिङ्गं पुरुषचिह्नभेदं वर्द्धयति वृध-णिच्-णिनि । अपामार्गे शब्दच० ।

लिङ्गवृत्ति पु० लिङ्गं संन्यासादिवेषधारणमेव वृत्तिः जीविका यस्य । जीविकार्थंसंन्यासचिह्नादिधारिणि कपटपरिव्राजके अमरः ।

लिङ्गिन् त्रि० लिङ्गमस्त्यस्य इनि । १चिह्नवति, २जीविकार्थंसंन्यासादिचिह्नवति, ३प्रशस्तलिङ्गवति गजे च पु० जटा० । ४लिङ्गशास्त्रज्ञे साध्ये ५पक्षे च । "तल्लिङ्गलिङ्गिज्ञानपूर्वम्" सां० का० व्याख्याने लिङ्गिशब्दश्चावर्त्तनीयं तेन लिङ्गमस्यास्तीति मत्वर्थमतान्तानमपि दर्शितम्" त० कौ० । [गुरिया] लताभेदे राजनि० ।

लिङ्गिनी स्त्री लिङ्गमिवाकारोऽस्त्र्याः इनि ङीप् । (घंघ-

लिङ्गोपहित पु० लिङ्गेन हेतुना उपहितः विशिष्टः । साध्यानुमानाङ्गहेतुयुक्ते पक्षे । आचार्यमते लिङ्गोपहित एव पक्षे हेतुरूपस्य साध्यस्य भानम् । तथा हि वह्निव्याप्यो हि धूमो वह्निलिङ्गं लभते पक्षे वह्नेर्भानम् वह्निव्याप्यधूमवान् पर्वत इति परामर्शोत्तरं जायमानानुमाने ज्ञानलक्षणया साध्यवद्भानस्यावश्यकत्वात् । तथा च वह्निव्याप्यधूमवान् पर्वतो वह्निमान् इत्येव तत्रानुमानप्रकारः । [अलिखत् अलिखत अलिख्र ।

लिख लेखने, तुदा० उभ० सक० अनिट् । लिखति ते अलिखत् । **लिखि(खी)** स्त्री लिख-इक् पृषो० पस्य बः वा ङीप् । लिपिशब्दार्थे अमरः । लिखिकरादयोऽपि लिपिकरादयः ।

लिख्य क्लेशे अल्पीभावे च दि० अक० आत्म०अनिट् । लिख्यते अलिख्यत ।

लिघ गतौ तु० पर० सक० अनिट् । लिघति अलिघत् ।

लिछ आस्वादने अदा० उभ० सक० अनिट् । लेढि लीढे । अलिछत् त । [ओदित् निष्ठानस्य नः । लीनः ।

ली श्लेषे दिवा० आ० अक० अनिट् । लीयते अलेष्ट ।

ली श्लेषे क्रया०पा० पर० अक० अनिट् । लिनाति अलैषीत् ।

ली द्रावणे वा चुरा० उभ० सक० सेट् पक्षे स्वा० पर० अनिट् । लीनयसि ते लाय(प)यति ते द्रुतम् लयति । अस्त्रेहद्रावणे लौहं विलायतीत्येव । प्रलयने अभिभवे पूजायाञ्च सक०आत्म० । तत्र नित्यमात्मे पुक् । जटाभिलीपयते पूजामधिगच्छतीत्यर्थः । व्योमो वर्त्तिकान्तुलापयते अभिभवतीत्यर्थः । वालस्तुलापयते वञ्चयतीत्यर्थः । अलीलपत् त अलील(प)यत् त । अलैषीत् । अलासीत् ।

लीढ त्रि० लिह-आस्वादे क्त । १आस्वादिते, २भक्षिते च ।

लीला स्त्री ली-किप् लियं लाति ला-क । १केलौ, २विलासे ३हङ्कारादिजातचेष्टायाम् मेदि० । "अमाप्तबलमप्यमा-

गमनायिकायाः, सख्याःपुरोऽत्र निजचित्तविनोदबुद्ध्या, आलापवेशगतिहास्यविलोकनाद्यैः प्राणेश्वरानुकृतिमाकलयन्ति लीलाम् उज्ज्वलमण्युक्ते ४प्रियानुकरणे च। लीलावती स्त्री लीला+अस्त्यर्थे मतुप् मस्य वः। १विलासवत्यां स्त्रियां, भास्कराचार्यस्य २पुत्र्यां, तत्कृते २अङ्कग्रन्थभेदे भास्कराचार्यस्य ४भार्यायां तन्नामके न्यायशास्त्रप्रसिद्धे "नाथः स्रजतीत्यादिके" न्यायमतसिद्धपदार्थप्रतिपादके ५ग्रन्थभेदे, पुराणप्रसिद्धे ६वेश्याभेदे च ति० त० मतुप्पु०। [२देववने च त्रिका०।

लीलोद्यान न० लीलार्थमुद्यानम्। १क्रीडनार्थे आरामे,

लुक्कायित त्रि० लुच्यते लुनृच-अपनयने क्विप् लुक् कायो यस्य तादृश इवाचरति लुक्काय+क्विप्-क्त। अन्तर्हितदेहे

लुज कथने अदृधातोरर्थे च चुरा० उभ०सक० सेट् इदित्। लुञ्जयति ते अलुलुञ्जत् त।

लुञ्चित त्रि० लुनृच-णिच्-क्त। अपसारिते दूरीकृते।

लुट दीप्तौ चक० प्रतिघाते सक० भ्वा० आत्म० सेट्। लोटते लदित् लुङि उभ० अलुटत् अलोटिष्ट।

लुट् क्षरणे भ्वा०पर०सक०सेट् इदित्। लुण्टति अलुण्टीत्।

लुट दीप्तौ चु०उभ०सक०सेट्। लोटयति ते अलूलुटत् त।

लुट विलोड़ने, क्षरणे च दिवा० सक० पर०सेट्। लुट्यति अलुटत्। ऋदित् चङि वा ह्रस्वः।

लुट विलोड़ने सम्बन्धे च दिवा० सक०पर०सेट्। लुट्यति अलोटीत्। अत्रार्थे भ्वादिरपि। लोटति।

लुट गतौ चौर्य्ये च सक० खञ्जीभावे आलस्ये च अक० भ्वा० पर० सेट् इदित्। लुण्टति अलुण्टीत्।

लुठ प्रतिघाते भ्वा० आ० लुङि उभ० सक० सेट्। लोठते। अलुठत् अलोठिष्ट। ऋदित् चङि न ह्रस्वः।

लुठ उपघाते भ्वा० पर० सक० सेट्। लोठति अलोठीत्।

लुठ लोठे तु० कु० प० अक० सेट्। लुठति अलुठीत्।

लुठ चौर्य्ये चु० उभ०सक०सेट। लोठयति ते अलूलुठत् त।

लुठन न० कु० लुठ-ल्युट्। अश्वादेर्भूम्यादौ भ्रमापनयनार्थं पुनः पुनरङ्गचालने (लोटा) त्रिका०।

लुठित त्रि० लुठ-क्त। भूमौ कृतभूरिदेहपरावर्त्तने।

लुड मन्थने भ्वा०पर०सक०सेट्। लोडति अलोडीत्।

लुड संहतौ सक० क्षेपे अक० तु० कु० पर० सेट्। लुडति अलुडीत्। लुडनम्।

लुण्ट अवघ्राय चौर्य्ये च वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। लुण्टयति ते लुण्टति अलुलुण्टत् त अलुण्टीत्। कर्मणि लुण्ट्यते।

लुण्टक पु० लुण्ट-ण्वुल्। (नटिया) शाकभेदे शब्दच०।

लुण्टाक त्रि० लुटि-घाकन्। चौरे स्त्रियां ङीष्।

लुण्ठक त्रि० लुठि-ण्वुल्। चौरे।

लुण्ड चौर्य्ये चु० उ०सक०सेट्। लुण्डयति ते अलुलुण्डत् त

लुथ बधे सक० क्लेशे अक० भ्वा० पर० सेट् इदित्। लुन्थति अलुन्थीत्।

लुनृच अपनयने भ्वा०पर०सक०सेट्। लुञ्चति अलुञ्चीत्।

लुप छेदने विनाशने च तु०सुचा०उभ०सक० अनिट्। लुम्पति ते अलुपत् अलुप्त। ऋदित् चङि वा ह्रस्वः। अलूलुपत् त अलुलोपत् त। [अलोपीत् नित्यलङ् इत्येके।

लुप आकुलीभावे दिवा० पर० अक० सेट्। लुप्यति अलुपत्

लुप्त न० लुप-क्त। १अपह्नुतधने। २क्षिप्ते ३नष्टे त्रि०।

लुभ ग्रहणे वा चु० उभ० पक्षे भ्वा० पर० सक०सेट् इदित्। लुम्भयति ते लुम्भति। अलुलुम्भत् त अलुम्भीत्।

लुभ्ध पु० लुभ-क्त। १व्याधे। २लम्पटे शब्दर० ३लोलुपे च मेदि०। स्वार्थे क। तत्रैव। लुभ्ध इव कायति कै-क। लुब्धक व्याधाकारतारामेदे खगोलशब्दे २४२२पृ०दृश्यम्।

लुभ विमोहने तु० पर० अक० सेट्। लुभति अलोभीत्।

लुभ आकाङ्क्षायां दि० पर० सक० सेट्। लुभ्यति। इदित् अलुभत्-अलोभीत्।

लुल विमर्दने भौ० पर० सक० सेट्। लोलति। अलोलीत्।

लुलाप पुंस्त्री० लुल घञर्थे क तमाप्नोति अण्। नडिहे अमरः स्त्रियां ङीष्। [लुलितपतच्चित्रमालम्" भट्टिः।

लुलित त्रि० लुल क्त। १आन्दोलिते, २चालिते च "अथ

लुष चौर्य्ये भ्वा० पर० सक० सेट्। लोषति अलोषीत्।

लुष हिंसायां भौ० पर० सक० सेट्। लोषति अलोषीत्।

लुह आकाङ्क्षायां भ्वा० पर० सक० अनिट्। लोहति अलुक्षत्। [लोषीत्।

लू छेदने क्रया०पा० उभ० सक० सेट्। लुनाति लुनीते अलूता स्त्री लू+तक्। कीटभेदे (माकड़सा) अमरः। स्वार्थे क अत इत्वम्। तत्रैव। २पिप्पलिकायां ३रोगभेदे (मर्म्मव्रणे) मेदि०।

लून त्रि० लू-क्त निष्कासने नः। छिन्ने अमरः।

लूम न० लू-मक्। लाङ्गूले अमरः। [लुषत्।

लूष बधे क्षेपे च चु० उभ० सक० सेट्। लूषयति ते अलूलेख पु० लिख्यते पूजार्थं चित्रादिपटेऽसौ लिख-कर्मणि घञ्। १देवे अमरः। भ बे घञ्। २लेखने। कर्मणि घञ्।

३लेख्ये त्रि० भेदे० । आधारे घञ् । ४लेखनाधारे पत्रे "निर्द्धारितेऽर्थे लेखेन" इति माघः ।

लेखक पु० लिख-ण्वुल् । लिपिकरे अमरः । लेखकलक्षणादि मत्स्यपु० १८६ अ० उक्तं यथा

"सर्वदेशाक्षराभिज्ञः सर्वशास्त्रविशारदः । लेखकः कथितो राज्ञः सर्वाधिकरणेषु वै । श्रीर्योमेतानु लक्षण्यानु समग्रैर्यिगतानु समानु । अक्षरानु वै लिखेद्यस्तु लेखकः स वरः स्मृतः । उपायवाक्यकुशलः सर्वशास्त्रविशारदः । वक्तुर्थवक्ता वाक्येन लेखकः स्याद्गुणोत्तम ! । वाक्याभिप्रायतत्त्वज्ञो देशकालविभागवित् । अनाकाङ्क्षी नृपे भक्तो लेखकः स्याद्गुणान्वितः" । "सकलुक्तगृहीतार्थो लघुहस्तो जिताक्षरः । सर्वशास्त्रसमालोकी प्रलष्टो नाम लेखकः" चाणक्यः राजलेखकलक्षणं तु पत्रकौमुद्यामुक्तं यथा "ब्राह्मणो मन्त्रणाभिज्ञो राजनीतिविशारदः । नानालिपिज्ञो मेधावी नानाभाषासमन्वितः । मन्त्रणाचतुरो धीमान् नीतिशास्त्रार्थकोविदः । सन्धिविग्रहभेदज्ञो राजकार्य्ये विचक्षणः । सदा राज्ञो हितान्वेषी राजचित्तविधिस्थितः । कार्य्याकार्य्यविचारज्ञः सत्यवादी जितेन्द्रियः । सुरूपवादी शुद्धात्मा धर्मज्ञो राजधर्मवित् । एवमादिगुणैर्युक्तः स एव नृपलेखकः । नृपानुवर्त्ती सततं नृपविश्वासरक्षकः । नृपतेर्हितकान्वेषी स एव राजलेखकः" । "लेखकानपि कायस्थान् लेख्यकर्म्मे विचक्षणान्" पराशरेणोक्तं कायस्थस्य लेखकत्वं विवादान्तर्गतविषयलेखने एव न पुस्तकादौ अब्राह्मणलिखितपुस्तकस्य पाठभिन्नेधात् ।

लेखन न० लिख-ल्युट् । १पत्रादौ वर्णादिविन्यासे, २कर्दने च । आधारे ल्युट् । ३भूर्जपत्रे मेदि० । लिख्यतेऽनया ल्युट् । ४काशे राजनि० ५लेखनसाधने (कलम) स्त्री ङीप् । "मसाधारं लेखनीञ्च" इति तिथितः । ६रोगोत्सारणार्थशस्त्रभेदे स्त्री ७अञ्जनाङ्गे व्यापारभेदे ८चूर्णभेदे च न० । ९लेखनसाधनवर्त्तिभेदे स्त्री भावप्र० तत्र लक्षणक्रियां तत्साधनलेखनीप्रमाणञ्चोक्तं यथा

"लेखनं चारतिक्षात्तरसैरञ्जनमुच्यते । नेत्रवर्त्मशिराजालस्रोतोदुष्टाटकस्थितम् । सुखलालाक्षिभिर्दोषमुत्क्लेश्य स्रावयेच्च तत्" । तद्वर्त्तिमानं तत्रैव "एरण्डमात्रारत्निस्तु लेखनी स्यात् प्रमाणतः । चूर्णं तु लेखनं वैद्यैर्द्विगलाकं प्रदीयते" । तस्य गलाकास्वरूपादि तत्रैव "सुखे सुकुसुमाकारा कलायपरिमण्डला । अष्टाङ्गुला गलाका स्यादृजुजा धातुजाऽथ वा" कलायपरिमण्डला त्र्यस्रे कलायवद्वर्त्तुला । "ताम्रलोहाश्मसंजाता गलाका लेखने मता" । चन्द्रोदयाख्या लेखनी वर्त्तिश्च तत्रोक्ता यथा "शङ्खनाभिविभीतस्य मज्जा पथ्या मनःशिला । पिप्पली मरिचं कुष्ठं वचा चेति समांशकम् । छागचीरेण संपिष्य वर्त्तिं कुर्य्यात् यवोन्मिताम् । एरण्डमात्रां संपिष्य जलैः कुर्य्याद्यथाञ्जनम् । तिमिरं मांसदृष्टिञ्च काचं पटलमर्बुदम् । रात्र्यन्धं वार्षिकं शुक्लं वर्त्तिश्चन्द्रोदया हरेत्" । रसक्रिया लेखनी तत्रैवोक्ता यथा "तुत्थमाक्षिकसिन्धूत्थासिताश्मञ्जनःशिला । गैरिकं सिन्धुफेनञ्च मरिचं चेति चूर्णयेत् । संयोज्य मधुना कुर्यादञ्जनार्थं रसक्रियाम् । वर्त्मरोगार्शतिमिरकाचशुक्लहरीं पराम्" । चूर्णलेखनञ्च तत्रोक्तं यथा "दत्त्वाऽश्वत्वक्शिलाकाचशङ्खचन्दनसैन्धवैः । अञ्जनं हरते नित्यं सर्वानक्षिगदान् बलात्" दत्तः कुक्कुटः" । अक्षरलेखनीप्रमाणादि योगिनीतन्त्रोक्तं यथा "वंशसत्त्वा लिखेद्यस्तु तस्य हानिर्भवेद्ध्रुवम् । ताम्रसत्त्वा तु विभवो भवेच्च तत्क्षयो भवेत् । महालक्ष्मीर्भवेन्नित्यं सुवर्णस्य गलाकया । दृढत्वलक्ष्म सत्त्वा वै नातिदृष्टिः प्रजायते । तथा अग्निमयैर्देवि ! पुत्रपौत्रघनागमः । रौप्येण विपुला लक्ष्मीः कांस्येन मरणं भवेत् । अष्टाङ्गुलप्रमाणेन दशाङ्गुलेन चाथ वा । चतुरङ्गुलसत्त्वा वा यो लिखेत् पुस्तकं शुभे ! । तत्तदक्षरसंख्याते खल्वायुर्याति वै दिने ।"

लेखनिक पु० लेखनं शिल्पमस्य ठन् । लिपिकरे मेदि० ।

लेखर्षभ पु० लेखे ऋषभ इव श्रेष्ठत्वात् । इन्द्रे अमरः ।

लेखहार पु० लेखं हरति हृ-अण् । १पत्रवाहके । ण्वुल् । लेखहारकोऽप्यत्र ।

लेखा स्त्री लिख-अ टाप् । १रेखायां, २षड्क्रौ च । आधारे घञ्यां घञ् टाप् । ३लिपौ मेदि० ।

लेख्य त्रि० लिख-ण्यत् । १लेखनीये । २व्यवहारे खल्वाट्यादेके पत्रभेदे न० । तल्लक्षणादि वीरमि० उक्तं यथा "अथ लेख्यं निरूप्यते । तत्र दृढस्मृतिः "साक्षिणामेव निर्देशः संख्यालक्षणनिश्चयः । लिखितस्याधुना वक्ष्मि विधानमनुपूर्वशः । यावत्साक्षिकेऽपि समये भ्रान्तिः सञ्जायते नृणाम् । धात्वाक्षराणि दृष्टानि पत्राद्दृढान्यतः पुरा । राजलेख्यं स्थानलग्नं स्वहस्तलिखितन्तथा । लेख्यन्तु त्रिविधमुक्तं भिन्न-

दृष्ट्वा पुनः। भागदानक्रयाधानसंविद्दास ऋणादिभिः। सप्तधा लौकिकं लेख्यन्त्विविधं राजशासनम्"। मरीचिरपि "स्थावरे विक्रयाधाने विभागे दान एव च। लिखितेनाप्नुयात् सिद्धिमविसंवादमेव च" विभागो दायभागः आधानमाधीकरणम् संविद्व्यवहारः आदिशब्देन विष्णुप्रादिपरिग्रहणम्। भागपत्रादीनां लक्षणमाह बृहस्पतिः "भ्रातरः संविभक्ता ये स्वरुच्या तु परस्परम्। विभागपत्रं कुर्वन्ति भागलेख्यन्तदुच्यते। भूमिन्दत्त्वा तु यत्पत्रं क्रयाच्चन्द्रार्ककालिकम्। अनाच्छेद्यमनाहार्य्यन्दानलेख्यन्तु तद्विदुः। गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याद्वरान्वितम्। पत्रं कारयते यत्तु क्रयलेख्यन्तदुच्यते। जङ्गमं स्थावरञ्चैव दत्त्वा लेख्यङ्करोति यः। गोप्यभोग्यक्रियायुक्तमाधिलेख्यन्तदुच्यते। ग्रामे देशे च यत्कुर्यात् सत्यलेख्यमपरस्परम्। राजाविरोधिधर्म्मार्थं संविद्पत्रं वदन्ति तत्। वस्त्रक्षहीनः कान्तारे लिखितं कुरुते तु यः। कर्म्माणि ते करिष्यामि दासपत्रन्तदुच्यते। धनं दृष्ट्वा गृहीत्वा तु स्वयं कुर्याच्च कारयेत्। उद्धारपत्रन्तत्प्रोक्तमृणलेख्यं मनीषिभिरिति"। विष्णुद्विपत्रमुक्तं कात्यायनेन "अभिशामे समुत्तीर्णे प्रायश्चित्ते कृते बुधैः। विष्णुद्विपत्रकन्देयन्तेभ्यः साक्षिसमन्वितम्"। सन्धिपत्रमप्याह स एव "उत्तमेषु समस्तेषु अभिशामे समागते। दृष्टानुवादलेख्यं यत् तज्ज्ञेयं सन्धिपत्रकम्"। अन्वाधिपत्रमाह प्रजापतिः "धनी धनेन तेनैव परमाधिं नयेद्यदि। कृत्वा तदाधिलिखितं पूर्ववाऽस्य समर्पयेत्"। पूर्वमाधिपत्रम्। सीमापत्रमप्याह कात्यायनः "सीमाविवादे निर्णीते सीमापत्रं विधीयते" इति। ऋणशोधने कृते ऋणपत्रनाशादौ सति प्राप्तिपत्रमुत्तमर्णेनाधमर्णाय देयमित्याह याज्ञवल्क्यः "दत्त्वर्णमाप्तलेख्यं शुद्ध्यै वान्यत्तु कारयेत्"। अत्र लौकिकं सप्तविधं लेख्यं स्वकृतान्यकृतभेदेन द्विविधत्वादेनोक्तम् "लेख्यन्तु द्विविधं प्रोक्तं स्वहस्तान्यकृतन्तथा"। स्वकृते साक्षिनियमोऽन्यकृते तन्नियम इत्याहोत्तरार्द्धेन स एव "असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्त्रयोरिति"। असाक्षिमदपीत्यर्थः। याज्ञवल्क्यः "विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितञ्च यत्। तत्प्रमाणं स्मृतं सद्भिः कूटलेख्यमतोऽन्यथा"। इत्यपिशब्दः प्रागुक्तबलोपधिकृतत्वपर्य्युदासः सर्वलेख्यविषयो न स्वकृतमात्रविषयः। तथा च मनुः "बलाद्गुप्तं बलाद्दत्तं बलाद्यच्चापि लेखितम्। सर्वान् तु बलकृतानधर्मकृतान्मनुरब्रवीत्"। नारदोऽपि "सत्ताभियुक्तस्त्रीबालबलात्कारकृतञ्च यत्। तदप्रमाणं लिखितं भयोपधिकृतन्तथेति"। व्यवहारे विशेषान्तरमाह योगीश्वरः "यः कश्चिदर्थो निष्पातः स्वरुच्या तु परस्परम्। लेख्यन्तु साक्षिमत्कार्यं तन्निबन्धनिकपूर्वकम्। समासासतद्वर्णनामजातिस्वगोत्रकैः। सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम्"। धनिकनामपूर्वकमित्यनेनोत्तमर्णनामोपरि लेख्यमधमर्णनाम तदध इत्यर्थः। एतदधमर्णपत्रादिविषयमन्यत्राऽसम्भवात्। समासासादि यथा सम्भवमन्यत्रापि सब्रह्मचारिकम्बह्वृचादिशाखाप्रयुक्तगुप्तनाम बह्वृचः कठ इत्यादि। वशिष्ठोऽपि "कालं निवेश्य राजानं स्थानं निवसनन्तथा। दायकं ग्राहकञ्चैव पितृनाम्ना च संयुतम्। जातिर्गोत्रञ्च शाखाञ्च द्रव्यमाधिं ससङ्गकम्। वृद्धिं ग्राहकहस्तञ्च विदितार्थौ च साक्षिणौ"। स्थानं जनपदः। निवसनं पुरग्रामादिकं ग्राहकोऽधमर्णः। तन्निवेशनप्रकारमाह योगीश्वरः "समाप्तेऽर्धे ऋणी नाम स्वहस्तेन निवेशयेत्। मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितमिति"। साक्षिणाविवचनेन द्वयोरभ्युपगमात् अवरत्वनियमो नास्तीत्युक्तमेकस्तु न भवत्येवेति। अत्र साक्षिलेखकाभ्यां स्वहस्तचिह्नं कार्यमित्याह स एव "साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम्। अत्राहममुकः साक्षी लिखेयुरिति ते समाः। उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना। लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत्"। समा इत्यनेन गुणसाम्यं सङ्ख्यासाम्यञ्च वैषम्यनिवृत्तये विवक्षितम्। असमा इत्यकारप्रश्लेषस्तु वैषम्यस्य सामान्यत एव साक्षिषु प्राप्तेर्नोपादेयः। ऋणिसाक्षिणोः सर्वथा लिप्यनभिज्ञत्वे नारद आह "अलिखिन्न ऋणी यः स्याद् ऋणं स तु लेखयेत्। साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः" इति।

लिखितं राजशासनमित्युक्तम् तद्वैविध्यं विवृणक्ति बृहस्पतिः "दत्त्वा भूम्यादिकं राजा ताम्रपट्टे पटेऽथ वा। शासनं कारयेद्धर्म्मं स्थानवंशादिसंयुतम्। मातापित्रोरात्मनश्च पुण्यायायुष्कमूलवे। दत्तमेतायुष्कायाद्य दानं सब्रह्मचारिणे। चन्द्रार्कसमकालीनं पुत्रपौत्रान्वयानुगम्। अनाच्छेद्यमनाहार्य्यं सर्वभागविवर्जितम्। दातुः पालयितुः स्वर्ग्यं हर्तुर्नरकमेव च। षष्टिं

वर्षसहस्राणि दानाच्छेदफलं लिखेत्। ज्ञातं भवेति लिखितं सन्धिविग्रहलेखकैः। सप्तदं वर्षमासादिधनाध्यक्षाक्षरान्वितम्। एवंविधं राजज्ञप्तं शासनं सप्तदाहृतम्। देयादिकं यस्य राजा लिखितेन प्रयच्छति। सेवाशौर्यादिना तुष्टः प्रसादलिखितश्चतथा। पूर्वोत्तरक्रियावादनिर्णयान्ते यदा नृपः। प्रदद्याज्जयिने लेख्यं जयपत्रं स तदुच्यते"। सत्रह्मचारिणे अमुकशाखाध्यायिने। सर्वभागविवर्जितम् सकलराजपुरुषादिदेयैरपरिहृतम्। योगीश्वरः शासनपत्रमाह "भूमिं दत्त्वा निबन्धं वा कृत्वा लेख्यन्तु कारयेत्। आगामिभद्रनृपतिपरिज्ञानाय प्रार्थिवः। पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिह्नितम्। अभिलेख्यात्मनोऽवंश्यानात्मानञ्च महीपतिः। प्रतिग्रहपरीमाणं दानच्छेदोपवर्णनम्। स्वहस्तकालसम्पन्नं शासनं कारयेत् स्थिरमिति"। इयन्ति पर्णकमुष्टिभारादावित्यनि पर्णकमुष्टादीन्यस्मै देयानीति राज्ञो नियतदाब्राह्मणनिबन्धं कारयेत् सन्धिविग्रहाद्यधिकारिद्वारेत्यर्थात्। तथा च व्यासः "राज्ञा तु स्वयमुद्दिष्टः सन्धिविग्रहलेखकः। ताम्रपट्टे पटे वापि प्रतिलेखेद्राजशासनमिति"। प्रतिगृह्यत इति प्रतिग्रहो भूम्यादिस्तत्परीमाणं प्रतिग्रहपरीमाणं उपवर्णञ्च दीर्घो ब्राह्मणकः। दीयत इति दानम् भूम्यादि तस्य च्छेदः क्षेत्रादेर्मर्यादा तदुपवर्णनं तद्विदेयम्। आत्मवंश्यादीनभिलिख्येत्यन्वयः। इदञ्च साधुशब्देरेव लेखनीयं न लौकिकवत्तदनियमः। तथा च संग्रहकारः "राजा स्वहस्तचिह्नेन राज्ञादेयेन संयुतम्। युक्तं राजाभिधानेन मण्डितं राजमुद्रया। सन्धिविग्रहशब्दोक्तिश्चस्मूर्व्यवयवाक्षरम्। शासनं राजदत्तं स्यात् सन्धिविग्रहलेखकैः"। अन्तिमप्रादोत्तरं लिखितमिति शेषः। तस्मिन्नेव लौकिके देशभाषादिप्रतिषेधो नेत्राह नारदः "देशाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणम्। तत्प्रमाणं कृतं लेख्यमविलुप्तक्रियाक्षरमिति"। शासने राज्ञा स्वहस्तेनैव स्वयमुक्तं लेख्यमित्याह व्यासः "सन्धिविग्रं प्रमाणञ्च स्वहस्तेन लिखेत्स्वयम्। मतञ्चैवमुक्तपुत्रस्य अमुकस्य महीपतेः"। सन्धिविग्रं प्रमाणञ्चेत्यस्य पूर्ववाक्ये प्रतिलेखेदित्यत्रान्वयः तयोराजस्वहस्तलिखनानियमात्। इदञ्च राज्ञा प्रतिग्रहीते स्वमर्पणीयत्वात्तु विष्णुः "पटे वा ताम्रपट्टे वा लिखितं स्वमुद्राङ्कमागामि नृपतिपरिज्ञानार्थं इत्यादिति"। अतएव दत्तापहार-दोषप्रतिपादनमपि आविष्टपप्रत्ययनार्थं तत्रावश्यकमित्याह व्यासः "सष्टिवर्षसहस्राणि दानच्छेदफलन्तथा। आगामिनृपसासत्वबोधनायाभिलेखयेत्" इति। सष्टिवर्षसहस्राणीत्यादि पुराणवचनप्रसिद्धन्दानाच्छेदयोः दानापहारयोः स्वर्गादिनरकादिफलं लेखयेद्राजेत्यर्थः।"

लेख्यपत्र पु० लिख्यतेऽत्र यत् लेख्यं पत्रं यस्य। १ताम्रपट्टे भरतः। कर्म०। २लेख्ये पत्रे न० [लिपते अलेखिष्ट।

लेप गमने भ्वा० आत्म० सक० सेट् कदित् चङि न ह्रस्वः।

लेप पु० लिप लेप-वा घञ्। १भोजने, २लेपने च मेदि०। कर्मणि घञ्। ३सुधायाम् (कलिचुन) विश्वः। ४पिण्डदत्तपिण्डभेदे "लेपभाजश्चतुर्थाद्याः पितराद्याः पिण्डभागिनः" स्मृतिः। [प्रलम्बघ्ने पु० अमरः।

लेपक त्रि० लिम्पति लिप-ण्वुल्। १लेपनकरे २ज्ञ तिभेदे

लेपन न०लिप-ल्युट्। (लेपा) इति ख्याते १व्यापारे। कर्मणि ल्युट्। २तुरङ्गनासागलग्नचर्मद्वये राजनि०।

लेय पु० सिंहराशौ ज्यो० त०।

लेलिहा स्त्री सर्वदेवजीवन्यासाङ्के सप्तभेदे तल्लक्षणं यथा "तर्जनीमध्यमाऽनामाः समं कृत्वांदधोमुखीः। अनायासायं लिखेत् सप्तावृत्तीं कृत्वा कनिष्ठिकाम्। लेलिहा नाम सप्तैषा जीवन्यासे प्रकीर्त्तिता" तन्त्रसा०।

लेलिहान पु० लिह यङ् लुक् ताच्छील्ये चानश्। १शिवे शब्दर० २सर्पे पुंस्त्री० हेमच०। ३पुनःपुनर्लेहनकरे त्रि० तारादेवतापूजाङ्गे अङ्गुल्यादिमन्त्रविन्यासविशेषरूपे ४मुद्राभेदे स्त्री। तल्लक्षणं यथा "वक्त्रं विस्तारितं कृत्वाधो जिह्वां च चालयेत्। पार्श्वस्थं मुष्टियुगलं लेलिहानेति कीर्त्तिता" तन्त्रसा०। [२अल्पत्वे च।

लेश पु० लिश-अल्पीभावे घञ्। १अल्पे २लवे अमरः।

लेष्टु पु० लिष-क्तन्। लोष्टे अमरः। [लोष्टुरेदनोऽत्र।

लेष्टुघ्न पु०लोष्टुं हन्ति हन-क्। लेष्टुभेदके शब्दरत्न०ख्यु

लेह पु० लिह-घञ्। १आहारे २आस्वादे लिह्यते रसोऽनेन दानव्यापारभेदे (चाटा) च हेमच०। भावे ल्युट्। लेहनमत्र न०।

लेहिन पु० लिह-इनन्। टङ्कणे (सोहागा) हेमच०।

लेह्य त्रि० लिह-ण्यत्। जिह्वया १आस्वाद्ये। २अश्नते न० शब्दर०।

लैङ्ग न०लिङ्गमधिकृत्य कृतो ग्रन्थः अण्। अष्टादशसु महापुराणेषु एकादशे १महापुराणे। लिङ्गं तदाकारः

अस्याश्चाः फलेषु अण् ङीप्। २लिङ्गिनीवृक्षे स्त्री राजनि०तस्येदमण्। २लिङ्गलक्षणे त्रि०स्त्रियां ङीप्।

लैङ्गिक त्रि० लिङ्गेनानुमापकचिह्नादिना आपादितस्तत आगतो वा ठक्। लिङ्गादिभिः १कल्पिते २अनुमिते साध्ये लिङ्गोपहितलैङ्गिकभानमित्याचार्याः। अर्थप्रकाशसामर्थ्यलिङ्गेन कल्पिते ३मन्त्रादीनां तत्तत्कर्मादि विनियोगे च।

लोका दीप्तौ चु०उभ०सक०सेट्। लोकयति ते अलूलुकत् त।

लोक दर्शने भ्वा०आ०सक०सेट्। लोकते अलोकिष्ट लुलोके। ऋदित् चङि न ह्रस्वः। अलुलोकत् त।

लोक पु० लोक्यतेऽसौ लोक-घञ्। १भुवने भुवनशब्दे दृश्यम्। २जने च अमरः। भावे घञ्। ३दर्शने।

लोककान्ता स्त्री ६त०। १ह्रस्वभौषधे राजनि० २लोकस्वामिनि ३लोकप्रिये च त्रि०। [अमरः।

लोकजित् पु० लोकं लोकाचारं जितवान् जि-क्विप्। बुद्धे

लोकपाल पु० लोकान् पालयति पा-णिच्-अण्। १लोकपालके नृपे, २इन्द्रादिदिक्पाले, ३विनायकादिषु पञ्चसु। ४लोकरक्षकमात्रे त्रि०। लोकनाथादयोऽप्यत्र।

लोकबान्धव पु० लोकानां बान्धवः सर्वकर्मप्रवर्त्तकत्वात्। सूर्य्ये जटा०। [लोकबहिर्भूते।

लोकबाह्य त्रि० बहिश्चरति बहिस्+यञ् टिलोपश्च ६त०।

लोकमातृ स्त्री लोकानां मातेव रक्षित्री। १लक्ष्म्याम् अमरः ६त०। लोकानां भ्रातरि त्रि०।

लोकलोचन पु०लोकैर्लोक्यतेऽनेन लुच ल्युट्। सूर्य्ये मन्द्र० लोकस्य लोचनमिव। सूर्य्ये न०। लोकनेत्रादयोऽप्यत्र न०

लोकायत न० लोकेषु आयतम् विस्तीर्णम् अनायाससाध्यत्वात्। चार्वाकमतसिद्धधर्म्मे मन्द्र०।

लोकायतिक पु०लोकायतं तन्मतम् अधीत्य ठक्। चार्वाके।

लोकालोक पु० लोक्यतेऽसौ लोकः न लोक्यतेऽसौ कर्म०। जनाश्रयख्याते सूर्य्यकिरणसम्पर्कशैलभेदे पर्व्वते। तस्य च पार्श्वचोरतपानातपसम्बन्धात्तथात्वम्।

लोकेश पु० ६त०। १ब्रह्मणि अमरः। २नृपतौ ३शारदे च राजनि०बुधभेदे त्रिका०। [न ह्रस्वः। अलुलोचत् त।

लोच दीप्तौ चु०उभ०अक०सेट्। लोचयति ते ऋदित् चङि

लोच दर्शने भ्वा० आत्म० सक० सेट्। लोचते अलोचिष्ट। ऋदित् चङि न ह्रस्वः।

लोचक न० लोच-ण्वुल्। १नांसपिण्डे, २अञ्जितारक्षे रक्तञ्जने ३स्त्रीणां लोचाटाभरणे, पुंस्त्यवस्त्रे, ६कर्णपूरे, ७कदल्यां, दक्षूर्णायां ८निर्गुण्डौ भ्रूस्तथवर्त्तनि मेदि० ११सर्षपवृक्षे शब्दर०।

लोचन न०लोच्यतेऽनेन लोच-करणे ल्युट्। १नेत्रे अमरः। भावे ल्युट्। २दर्शनक्रियायाम्। युच्। ३दर्शने ४आलोचने च स्त्री टाप् अमरः। ५नक्षत्राधिकीटे स्त्री राजनि० ङीप्।

लोचनहिता स्त्री ६त०। तत्याञ्जने तुँते) राजनि०।

लोचमस्तक पु० लोच्यते लोचं मस्तकं यस्य। मयूरशिखायाम् अमरः।

लोट(ड) उन्मादे भ्वा० पर० सक० सेट्। लोट(ड)ति। अलोटी(डी)त्। ऋदित् चङि न ह्रस्वः।

लोणा स्त्री लवणमस्त्यस्याः भक्षणसमये अपेक्ष्यत्वेन अच्। १क्षुद्रा क्षुद्रायाम् राजनि०। लोणाच्छाप्यत स्त्री राजनि०

लोणार न० लवणमस्त्यति कारणत्वेन वृ-अण् उप०स०। पृषो० लवणजे क्षारभेदे राजनि०।

लोत न० लू-तन्। १चोरितधने, लोप्तृ (वलाच्च) लटाधरः शब्दरत्ने त्रि० कौ०। ४नेत्राक्ष्णि त्रिका० ५लवणे च

लोत्र न० लू-ष्ट्रन्। १चञ्चुर्जले, २चोरितधने च संक्षिप्तसा०।

लोध पु० रुध-घञ् रस्य लः। खनामख्याते वृक्षे रत्नमा०।

लोध्र पु० रुध-रक् रस्य लः। (लोध) ख्याते वृक्षे अमरः।

"लोध्रो याष्टी लघुः शीतस्तुरः कफपित्तहृत्। कषायो रक्तपित्तास्रव्रणवातातीसारशोथहृत्" भावप्र०।

लोप पु० लुप-भावे घञ्। १विनाशे २छेदने, ३आकुलीभावे, ४आकारश्लोपे अदर्शनरूपे नाशे च। लोपयति स्त्रीत्वं रूपगर्वम् अच्। २अगस्त्यमुनिपत्न्यां स्त्री जटा०।

लोपामुद्रा स्त्री लुप्तं राति रा-क कर्म०। अगस्त्यमुनिपत्न्याम् अमरः।

लोप्तृ न०लुप-तृच्। लोपधने स्त्रीत्वमपीच्छन्ति तत्पक्षे ङीप्।

लोभ पु० लुभ-आकाङ्क्षायां भावे घञ्। परद्रव्येषु अतितृष्णायाम् अभिलाषे परवित्तादिकं दृष्ट्वा नेत्रं यो हृदि जायते। अभिलाषो द्विजश्रेष्ठ! स लोभः परिकीर्त्तितः" पद्मपु०।

लोभिन् त्रि०लुभ-णिनि। परद्रव्येषु अतितृष्णायति जटा०।

लोभ्य पु० लुभ-कर्म्मणि यत्। १शङ्खे हेमच०। २लोभनीयपदार्थे त्रि०। [अमरः। तत्प्रधाने २लाङ्गूले न० जटा०।

लोम न० लू-मन्। देहजाते रोमाकारे १रोमाख्ये द्रव्ये

लोमकर्ण पुंस्त्री लोमवत्कर्णः कर्णौ यस्य बाक०। शशके

हेमच० तत्कर्षस्य लोमशत्वात्तथात्वम् स्त्रियां ङीष् । लोमकूप पु० लोम्नां कूप इव । रोमाधारे १छिद्राकारे भेदे लोमघ्न न० लोमानि हन्ति हन-टक् । (टाक) रोमभेदे । लोमन् पु० लू-मनिन् । देहस्थे केशतुल्ये (रो-वा) पदार्थे अमरः । [रूपभेदे हारा० लोमपाद् पु० लोमयुक्तौ पादावस्य या० न० । कश्यपवंश्ये लोमश पु० लोमानि मस्तकत्वेन सन्त्यस्य श । १मुनिभेदे २मेषे ३लोमयुक्ते त्रि० मेदि० ४कांकजङ्घायां ५जटामांस्यां, ६वचायाम् ७शुकशिम्बयाम् ८नखहीमेदायां ९काशीसे १०याकिनीभेदे च स्त्री मेदि० ११शत्यपुष्पयाम् १२अतिबलायां च स्त्री विश्वः । १३गन्धमांस्यां स्त्री राजनि० । [राजनि० लोमशकाण्डा स्त्री लोमश इव काण्डोऽस्याः । कर्कट्याम् लोमशपर्णिका स्त्री लोमशानीव पर्णानि यस्याः कप् अत इत्त्वम् । माषपर्ण्याम् शब्दच० । [राजनि० लोमशपुष्पक पु० लोमशमिव पुष्पमस्य कप् । गिरीषवृक्षे लोमशातन न० लोमानि शातयति भट-णिच् तान्तादेयः ल्यु । लोमशातने औषधभेदे गरु० पु० १८५ अ० तदौषधलक्षणं यथा "हरितालयवक्षारं कट्फलोद्भवभस्मना । एतद्द्रव्यैश्च कोद्दर्यं लोमशातनमुत्तमम् । क्षारं हरितालजं तच्छुल्वाच्च भवति च । क्षारद्वयसमायुक्तं लोमशातनमुत्तमम् । सुधा च हरितालञ्च यवक्षारश्च मनःशिला । सैन्धवेन सहैकत्र लिंगमूलेन लेपयेत् । तत्क्षणेनैव लोमशातनमुत्तमम्" । लोमहर्षण न० लोम्नां हर्षणं हर्षजनकव्यापार इव ल्युट् इति तावत् । १रोमाञ्चे । लोमानि हर्षयति उत्तमश्लोकश्रवणया हृष-णिच्-ल्यु । व्यासशिष्ये सूतवंश्ये स्वनामख्याते २पौराणिके पु० "प्रख्यातो व्यासशिष्योऽभून् सूतो वै लोमहर्षणः । पुरा द्वादशसंहितां तस्मै ददौ व्यासो महामुनिः" विष्णुपु० । लोमहृत् पु० लोमानि हरति हृ-क्विप् तुक् च । १हरितालेहेमच० । लोमशातनशब्दे तस्य तथात्वं द्रव्यम् । लोल त्रि० लोड-अच् डस्य लः । १चञ्चले २चञ्चले च अमरः च ३जिह्वायां ४चक्षुष्यद्रव्ये च स्त्री मेदि० । लोलार्क पु० काशीस्थे अर्कमूर्त्तिभेदे काशीख० ४६ अ० । लोलिका स्त्री लोडयति सेचने टलान् लोड-एवुल् डस्य लः । १चञ्चुर्याम् (चुकोपालङ्क) जटा० । लोलित त्रि० लुल-विभर्दे णिच् क्त । चालिते ।

लोलुप(भ) त्रि० लुभ-यङ् अच् पृषो० कस्य भा पः । अतिलोभयुक्ते अमरः । [अलोलुप । लोष्ट संघातौ राधीकरणे भ्वा० आ० सक० सेट् । लोष्टते लोष्ट पुंन० लोष्ट-अच् । १मृत्पिण्डे (ढेला) अमरः । २लोष्टमात्रे राजनि० । लोष्टघ्न पु० लोष्टं हन्ति मर्दयति हन-क । लोष्टभेदने सुश्रुतादौ भरतः । [भेदनसाधके सुश्रुतादौ भरतः । लोष्टभेदन पु० लोष्टं भिनत्ति विमर्दयति भिद्-ल्यु । लोष्टलोष्ट्र पु० लोष्ट-रन् । लोष्टे हेमच० । लोह्र पुंन० लु पिच् लोलं जहाति हा-क । १धातुभेदे अमरः । २धातुमात्रे मेदि० ३रुधिरे राजनि० ४कुङ्कुमचन्दने न० अमरः । धातुभेदलक्षणादि भावप्र० उक्तं यथा "अथ लोहशोत्पत्तिनामलक्षणगुणाः "पुरा लोभिदैत्यानां निहतानां सुरैर्युधि । तत्मज्ञानि शरीरेभ्यो लोहानि विविधानि च । लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी । शुक्रताडस्तोयकृष्णकालेय कारिता । अयसदोषः सङ्गन्धो दोषाः सप्तायसस्य तु । लोहं तिक्तरसं शीतं मधुरं लवणं गुरु । रूक्षं वयस्यं चक्षुष्यं छेदनं वातलं जयेत् । कफं पित्तं मलं शूलं शोथार्शःप्लीहपाण्डुताः । मेदोमेहकृमीन् कुष्ठं तत्सदृक्षं तद्वदेव हि । पाण्डुरुग्भस्मकृत्यूदं भक्षेद्वा कृष्णलोहभस्मनो कुरुतेऽग्निवृद्धिं । नानारूपजाद्यापि तथा प्रकृतिं करोति कृष्णायसमयुद्धलोहम् । जीर्णहारि मदःकारि चायसं चेदगुद्धिमदसंस्कृतं ध्रुवम् । पाटवं न तनुते शरीरके टाक्षणां हृदि रुजाञ्च यच्छति । कृष्णायसं तिलतैलञ्च माषाञ्च राजिकां तथा । मद्यमम्लरसञ्चापि त्यजेल्लोहस्य सेवकः" । तत्र सारलोहस्य लक्षणं गुणाश्च "क्षमाभिच्छखराकाराग्रलङ्घ्यस्निग्धेन लेपयेत् । लोहे स्युर्यत्र रूक्षाणि तत्सारमभिधीयते । लोहसारो ह्ययं रूक्षादुष्णवीर्यतिसारकृत् । अर्शःसर्वाङ्गजं वातं गुल्मञ्च परिणामजम् । छर्दिञ्च पीनसं पित्तं श्वासं कासं व्यपोहति" । अथ कान्तलोहस्य लक्षणं गुणाश्च । "यत् पात्रेण प्रसरति जले तैलबिन्दुः प्रतप्ते स्निग्धं गन्धं त्यजति च निजं तिक्ततां निश्चलत्वम् । तप्तं दुग्धं भवति शिखराकारकं नैति भूमिं कृष्णाङ्गः स्यात् सजलचषकः कान्तलोहं तदुक्तम् । गुल्मोदरार्शःशूलाममामवातं भगन्दरम् । कामलाशोथकुष्ठानि ह्ययं कान्तमयो हरेत् । लोहान-

मन्दपित्तस्य यक्ष्मापि शिरोरुजम्। सर्वान् रोगान् विजयते कान्तलोहं न संशयः। बलं वीर्यं वपुःपुष्टिं कुरुतेऽग्निं विवर्द्धयेत्"। अथ किट्टस्य "भ्रायमानस्य लोहस्य मलं मण्डूरमुच्यते। लोहसिंहानिका किट्टं सिंहानञ्च निगद्यते। यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्"। अथ लोहस्य दोषशान्तये शोधनमभिधीयते "पत्तनीक्षतपत्राणि लोहस्याग्नौ प्रतापयेत्। निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके। गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा। एवं लोहस्य पत्राणां विशुद्धिः संप्रजायते"। अथ लोहस्य मारणविधिः "शुद्धलोहभवं चूर्णं पातालगरुडीरसैः। मर्दयित्वा पुटेद्भूयो दद्यादेवं पुटद्वयम्। पुटत्रयं कुमार्याश्च कुठारच्छिन्नकारसैः। पुटषट्कं ततो दद्यादेवं तीक्ष्णा मृतिर्भवेत्"। अन्यच्च। "त्रिभेदुद्वादशांशेन दरदं तीक्ष्णचूर्णतः। मर्दयेत् कन्यकाद्राक्षैर्यामयुग्मं ततः पुटेत्। एवं सप्तपुटैर्मृत्युं लोहचूर्णमवाप्नुयात्। सत्याऽनुभूतो योगीन्द्रैः क्रमोऽयो लोहमारणे। कथ्यते रामराजेन कौतूहलधियाऽधुना। घृतकाद्विगुणं गन्धं दत्त्वा कृत्वाश्च कज्जलीम्। द्वयोः समं लोहचूर्णं मर्दयेत् कन्यकाद्रवैः। यामयुग्मं ततः पिण्डं कृत्वा ताम्रस्य पात्रके। घर्मे धृत्वा कुक्कुटस्य पक्षैराच्छादयेद्बुधः। यामद्वयाच्चवेद्गुण्यं धान्यराशौ न्यसेत्ततः। दत्त्वोपरि घटञ्चैव त्रिदिनान्ते समुद्धरेत्। पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत्। दाडिमस्य दलं पिष्ट्वा तत्तुल्यं वारिणा। तद्रसेनायसचूर्णं सप्तधा यत्नभावयेदपि। यामे शोधयेत्तच्च पुटेदेवं पुनः पुनः। एकविंशतिवारैस्तन्म्रियते नात्र संशयः। एवं सर्वाणि लोहानि खर्पादीन्यपि मारयेत्"। एवं मारितलोहस्य गुणाः "लोहं तिक्तं सरं शीतं कषायं मधुरं गुरु। रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्। कफं पित्तं गरं शूलं शोफार्शःप्लीहपाण्डुताः। मेदोमेहक्रमीन् कुष्ठं तत्किट्टं तद्वदेव हि। गुञ्जामेकां समारभ्य यावत् स्युर्नव रत्तिकाः। तावल्लोहं समश्नीयाद्यथादोषानलं परः। कुमाण्डं तिलतैलञ्च माषान्नं रात्रिजागरान्। मद्यमम्लरसञ्चैव वर्जयेल्लोहसेवकः" भावप्र०। "यदा तु आयसे पात्रे पक्वमश्नाति वै द्विजः। स पापिष्ठोऽपि भुङ्क्ते ऽन्नं रौरवे परिपच्यते" मत्स्यपु०। "अयःपात्रे पयःपानं गव्यं सिद्धान्नमेव च। भक्षादिकं मधु गुडं नारिकेलोदकं तथा। फलं मूलञ्च यत् किञ्चिदभक्ष्यं मनुरब्रवीत्" ब्रह्मवै०।

लोहकण्टक पु० लोहमिव कठिनः कण्टको यस्य। १मदनवृक्षे शब्दच०। २लोहमयकण्टके च।

लोहकार पु०लोहं तन्मयं शस्त्रादि करोति कृ-अण्। कर्मकारे। एवुल्। लोहकारकोऽप्यत्र। "गोपालात् तन्तुवाय्यां वै कर्मकारोऽभवत् सुतः" पराशरोक्ते जातिभेदे पुंस्त्री०।

लोहकिट्ट न० ६त०। लौहमले। (लोहार गु)। राजनि०

लोहचूर्ण न० ६त०। (लोहाचुर) ख्याते १पदार्थे २लोहमले राजनि०।

लोहज न० लोहात् लोहाभ्यां वा जायते जन-ड। १लोहकरे राजनि० २धातुद्वयजे कांस्ये च हेमच०।

लोहद्राविन् पु० लोहानि धातुद्रव्याणि द्रावयति द्रु-णिच्-णिनि। १टङ्कणे (सोहागा) राजनि०। २धातुद्रावके त्रि०। [अमरः स्त्रियां ङीष्।

लोहपृष्ठ पुंस्त्री० लोहमिव कठिनं पृष्ठमस्य ब। कङ्कपक्षिणि

लोहमारक पु० लोहं मारयति मारयति मृ-णिच्-ण्वुल्। शालिषष्टिकधान्ये त्रिका०। [२लोहघातके त्रि०।

लोहल पु० लोहमिव लाति ला-क। १अव्यक्तशब्दे अमरः

लोहवर न० लोहेषु सर्वधातुषु मध्ये वरम्। स्वर्णे मेदि०।

लोहश्लेषण न० लोहानि स्वर्णादीनि श्लेषयति योजयति श्लिष-णिच्-ल्यु। टङ्कणे (सोहागा) हेमच०।

लोहसङ्कर न०लोहानां धातुद्रव्याणां सङ्करो यत्र। मिश्रितधातौ १रीत्यादौ २वर्त्तलोहे च राजनि०।

लोहाभिसा(हा)र पु० लोहं तन्मयशस्त्रम् अभिसृ(हृ)-यतेऽत्र अभि+सृ-(हृ)-घञ् आधारे अच्। राज्ञां युद्धयात्रादौ शस्त्रनीराजनाविधौ अमरः।

लोहार्गल पु० १तीर्थभेदे वराहपु०। २लोहकीले च।

लोहित न० रुह-इतच् रस्य लः। १क्षतजे २रक्तचन्दने ३रक्तगोशीर्षकभेदे मेदि०।४पद्मके ५हरिचन्दने शब्दच०। ६कुङ्कुमकुङ्कुमे ७रुधिरे च राजनि० ८युद्धे हेमच०। ९नदभेदे १०मर्दने ११रक्तवर्णे च पु०मेदि०। १२रक्ततायुते त्रि०। १३मृगभेदे १४रोहितमत्स्ये १५वर्णे १६देवभेदे भरतः। १७मरुरे शब्दच० १८रक्तालौ १९रक्तशालौ राजनि०।२०वनभेदे २१सरोवरभेदे ब्रह्मपुत्रशब्दे दृश्यम्। सर्वत्र लातौ स्त्रियां ङीष्। वर्णे तु स्त्रीत्वे ङीप् तस्य नः। लोहिनी रोहितवर्णयुतस्त्रियाम्। रुह-इतनृ रस्य लः। रोहणकर्त्तरि स्त्रियां टाप्।

लोहितक न० लोहितमिव कायति के-क। १पित्तले राजनि०। लोहित+स्वार्थे कन्। २पद्मरागमणौ पु० हेमच०। ३मङ्गलग्रहे पु० शब्दमा०।

लोहितचन्दन न०कर्म०। १कुङ्कुमे अमरः २रक्तचन्दने च।

लोहितपुष्पक पु० लोहितानि रक्तानि पुष्पाण्यस्य कप्। दाड़िमवृक्षे भावप्र०। २रक्तवर्णपुष्पयुते त्रि०।

लोहितमृत्तिका स्त्री कर्म०। १गैरिके (गेरिमाटी) रत्नमा० २रक्तमृदि च।

लोहिता स्त्री रुह-रतच् रत्व हः। १वराहक्रान्तायां शब्दच० २रक्तानन्तायां राजनि०। ३रक्तवर्णायां स्त्रियाम्।

लोहिताक्ष पु०लोहिते अक्षिणी यस्य अच् समा०। १विष्णौ शब्दच० २कोकिले च पुंस्त्री० शब्दच०। ३रक्तनेत्रयुते त्रि० स्त्रियां ङीष्। [स्निग्धवृक्षे च राजनि०।

लोहिताङ्ग पु०लोहितमङ्गमस्य। १मङ्गलग्रहे अमरः २का-

लोहितानन पुंस्त्री० लोहितमाननमस्य। १नकुले राजनि० स्त्रियां ङीष्। २रक्तमुखे त्रि० स्त्रियां टाप्। [त्रिका०।

लोहितायस् न० लोहितं वर्णमेति इण्-असुन्। ताम्रे

लोहितायस न० लोहितमयः अच् वा। १ताम्रे २रक्तवर्णायोजातिभेदे च।

लोहोत्तम न० लोहेषु धातुषूत्तमम्। स्वर्णे हेमच०।

लौकायतिक न० लोकायतं चार्वाकशास्त्रं वेत्त्यधीते वा ठक्। चार्वाकमताभिज्ञे।

लौकिक त्रि० लोके विदितः प्रसिद्धो विदितो वा ठण्। १लोकविदिते २लोकप्रसिद्धे। ३लोकस्थिते च।

लौकिकाग्नि पु० कर्म०। विधानेन संस्कारशून्ये वह्नौ।

लौड उन्मादे भ्वा० पर० सक० सेट्। लौडति अलौडीत्। क्षदित् चक्षि न तुल्यः। [१धातुमात्रे च।

लौह पु०लोहमेव स्वार्थे अण्। (लोहा) १धातुभेदे भरतः।

लौहज न० लोहात् लोहाभ्यां जायते वा जन-ड। १मण्डूरे रत्ना०। धातुदलजे कांस्यपित्तलादौ च।

लौहभाण्ड पु० लोहस्य विकारः अण् कर्म०। (हामान-दिस्ता) २लोहमये पात्रभेदे शब्दच०। ३लोहमयपात्रजाते न०।

लौहमल न० लोहस्येदमच् कर्म०। लोहकिट्टे राजनि०।

लौहित्य न०लोहितस्य भावः ष्यञ् स्वार्थे ष्यञ् वा। १रक्तवर्णे २रक्तत्वे "लोहितात् वरञौ जातौ लौहित्यस्तु ततो ऽभवत्" उक्ते ३ब्रह्मपुत्रनदभेदे। "तीर्णो लौहित्यरघुः।

ल्यी स्नेहे क्र्या० पर० सक० अनिट्। ल्यिनाति अल्यीत्। [लीत्।

ल्यी गतौ क्र्या० पर० सक० अनिट्। ल्यिनाति अल्यीत्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये लकारादिशब्दार्थः सङ्कलनम्।

व

वकारः व्यञ्जनवर्णभेदः। स च वर्णोच्चारणयोरुत्पत्तिस्थानभेदः अस्योच्चारणस्थानं दन्तोष्ठौ "दन्तौष्ठ्यो वः स्मृतो बुधैः" शिक्षोक्तेः। अस्योच्चारणे जिह्वाग्रेण दन्तौष्ठयोरीषत्स्पर्शात् ईषत्स्पृष्टता आभ्यन्तरप्रयत्नः। बाह्यप्रयत्नास्तु विवारनादघोषा अल्पप्राणश्च। अस्य दन्त्योष्ठ्यत्वात् दन्त्यत्वं कचित्च ओष्ठ्यत्वमाश्रित्य कार्य्यभेदस्तेन संवृवर्तीत्यादौ ओष्ठ्यत्वमाश्रित्य ऊः अपरः। दन्त्यत्वमाश्रित्य च अनुस्वारस्थाने अनुनासिको वा पक्षे अनुस्वारस्थितिः। अस्य नाटकाद्यारम्भे पूजनत्वे व्यवहृता। काव्यादौ प्रयोगे "व्यञ्जनमथ स्वरौ" इत्यु० टी० उक्तेः व्यञ्जनं फलम्। वर्णाभिधाने अस्य वाचकयन्त्रा उक्ता यथा "ओ वायो वाग्भो वह्नयो मेदसंज्ञकः। खड्गीशो ज्वालिनी वह्नौ कवयो वारिवाचकः। उत्कारी शालिनी शान्ता वातः स्त्रिक्कः स्रायुरः शुचिः। इन्द्रधारा च वामांसः करमूलं च नर्त्तकः। जगद्धात्री सारिणी च देवोऽग्निर्भोऽनिरुद्धकः। गिरिराजो निष्टप्तात्मा व्यङ्क्षा निन्द्यो करः" अस्य ध्येयस्वरूपं यथा "वकारं चन्द्रसंकाशं ! पञ्चप्राणमयं वर्णं त्रिमात्रिसहितं सदा। मोक्षमव्ययम्। पञ्चप्राणमयं वर्णं त्रिमात्रिसहितं सदा। त्रिबिन्दुसहितं वर्णमात्मादितत्त्वसंयुतम्। पञ्चदेवमयं वर्णं पीतविद्युल्लतोपमम्। चतुर्वर्गप्रदं वर्णं सर्वसिद्धिप्रदायकम्" कामधेनुतन्त्रे "अस्याधिष्ठातृध्येयरूपं यथा "कुन्देपुष्पप्रभां देवीं द्विभुजां पद्मजेक्षणाम्। शुक्लमाल्याम्बरधरां रत्नहारोज्ज्वलां पराम्। वाग्बीजाभीष्टदां विद्यां

विद्विद्वां विद्वत्सेवितम्। एवं ध्यात्वा वकारं तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम्।

व पु॰ वा—ड। १वायौ २वरुणे ३सान्त्वने ४मन्त्रणे मेदि॰ ५राज्ञौ ६कल्याणे ७वसतौ ८वसतौ ९वसुद्वे च मद्रे च॰ १०व्याघ्रे ११वसने १२शालूके १३वन्दने च एकाक्षरकोष॰। १४षाढत्वे व्यध॰ मेदि॰ "गात्रवं व यशः पयः" रघुः। १५वरुणे न॰मेदि॰। १६वरुणबीजे मालतीमाधवम्।

वंश पु॰ वमति उद्गिरति वम-श तस्य नेत्वम्। १पुत्रपौत्राद्युपत्यवर्गे २तृणजातिभेदे (बाँश) अमरः।

"वंशः सरो हिमः स्वादुः कषायो वह्निशोधनः। श्लेष्मनः कफपित्तघ्नः कुष्ठक्षतव्रणापहः। तत्करीरः कटुः पाकरसे रूक्षो गुरुः सरः। कषायः कफकृत् स्वादुर्विदाही वातपित्तलः। तत्यवासु सरा रूक्षाः कषायाः कटुपाकिनः। वातपित्तकरा उष्णा वह्निमूलाः कफापहाः" भावप्र॰। ३पृश्नपर्ण्यां ४वर्णे च मेदि॰ ५रूक्षो ६सालवृक्षे च राजनि॰। ७व्याधभेदे पुंस्त्री॰ धरणिः स्त्रीत्वे गौरा॰ ङीष्। "वंशीरवेण वनिते" इति छन्दोवनचन्द्रः। तद्विवृतिर्यथा

"तालेन राजते गीतं तालो वादित्रसम्भवः। तच्चतुर्विधमुच्यते। ततं शुषिरमानद्धं घनमित्यं चतुर्विधम्। ततं तन्त्रीगतं वाद्यं वंशाद्यं शुषिरं तथा। चर्मावनद्धमानद्धं घनं तालादिकं मतम्"। तत्र शुषिरं यथा "वंशोऽथ पारी मधुरी तित्तिरी शङ्खवाद्यला। तोड़ही सुरली वुक्का मुर्च्छिका खरनाभयः। मुर्च्छं कापालिकं वंशधर्मवंशस्तथा परः। एते शुषिरभेदास्तु कथिताः पूर्वसूरिभिः। वर्त्तुलः सरलश्चैव पर्वदोषविवर्जितः। वैष्णवः खादिरो वापि रक्तचन्दनजोऽथ वा। श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽपि वा। राजतस्ताम्रजो वापि सौकुजः स्फाटिकोऽथ वा। कनिष्ठाङ्गुलिमात्रेण गर्भरन्ध्रेण शोभितः। शिल्पविद्याप्रवीणेन वंशः कार्यो मनोहरः। वंशेनैव मतःप्रीतिः मतङ्गमुनिनोदितम्। ततोऽत्येऽपि तदाकारा वंशा यत्र प्रकीर्त्तिताः। तत्र त्यक्त्वा शिरोदेशादधोदिमितमङ्गुलम्। फुत्कारन्ध्रं कुर्वीत मितमङ्गुलिपर्वणा। पञ्चाङ्गुलानि संत्यज्य तारन्ध्रादि कारयेत्। कृत्वैतत्रान्ध्रादि सप्तसंख्यादि कौशलात्। बदरीबीजतुल्यानि संत्यज्याङ्गुलमङ्गुलम्। मान्त्रयोर्वंशनं कार्यं खरादीनांदहेतवे। शिक्थकेन कला देया तेन सुस्वरता भवेत्। पञ्चाङ्गुलोऽयं वंशः स्यादेकैकाङ्गुलिवर्द्धितः। षड्ङ्गुलानि नाम्ना स्यात् यावदष्टादशाङ्गुलम्। फुत्कारतारन्ध्रयुक्तं यावदङ्गुलिमन्तरम्। तदेव नाम वंशस्य वांशिकैः परिकीर्त्यते। एकाङ्गुलोद्वयङ्गुलत्र्यङ्गुलचतुरङ्गुलः। अतितारतरत्वेन वांशिकैः समुपेक्षितः। त्रयोदशाङ्गुलो वंशोऽपरः पञ्चदशाङ्गुलः। निन्दितो वंशतत्त्वज्ञैस्तथा सप्तदशाङ्गुलः। महानन्दस्तथानन्दो विजयोऽथ जयस्तथा। चत्वार उत्तमा वंशा मतङ्गमुनिसम्मताः। दशाङ्गुलो महानन्दोनन्द एकादशाङ्गुलः। द्वादशाङ्गुलमानस्तु विजयः परिकीर्त्तितः। चतुर्दशाङ्गुलमितो जय इत्यभिधीयते। मध्या रुद्रो रविर्विष्णुः क्रमादत्र व्यवस्थिताः। नैर्विद्यं गौढ़ताप्यापि तुम्बरत्वञ्च शीघ्रता। माधुर्यमिति पञ्चामी फुत्कारेषु गुणाः स्मृताः। गीतकारवकुलः स्रस्तो विस्वरः स्फुटितो लघुः। असधुरश्च विज्ञेयाः षड्दोषाः फुत्कारे क्रमात्। इमा प्रयोगवाकुल्यमत्वता गीतवादने। एभिर्दोषैर्युतोऽतीव निन्दितो वांशिको मतः। स्थानकादिनयाभिज्ञोगमकाढ्यः स्फुटाक्षरः। शीघ्रहस्तः कलाभिज्ञो वांशिको दक्ष उच्यते। प्रसक्तिर्वङ्गसङ्गित्व मुक्तिश्चेत्यङ्गुले गुणाः। तुल्यानत्वं सुस्वरत्वमङ्गुलीसारचक्रिया। समलगमसत्तानं रागरागाङ्गवेदिता। क्रियाभाषाविभाषासु दक्षता गीतवादने। स्वस्थाने चापि दुःस्थाने नादनिर्माणकौशलम्। गात्रयां स्थानदाढत्वं तद्दोषाच्छादनं तथा। वांशिकस्य गुणा एते मया संक्षिप्य दर्शिताः" सङ्गीतदा॰।

वंशक पु॰ वंश इव कायति कै—क। (सोमशाडा) १इक्षुभेदे रत्नमा॰ २मत्स्यभेदे (राजत) शब्दमा॰। ३अगुरुचन्दने न॰ हारा॰। [वंशरोचनायाम् राजनि॰।

वंशकर्पूररोचना स्त्री कर्पूरमिव रोचते रुच—ल्यु ६त॰। वंशकीरी स्त्री वंशस्य कीरमिवास्यस्या अच् गौरा॰ ङीष्। वंशरोचनायाम् राजनि॰।

वंशज पु॰ वंशात् जायते जन—ड। १वंशदलजाते यवाकारे वेणुयवे राजनि॰ २सदृक्कुलजाते त्रि॰। ३वंशरोचनायां स्त्री टाप् शब्दर॰। [राजनि॰।

वंशतण्डुल पु॰ ६त॰। वेणुजाते तण्डुलाकारे वेणुयवे

वंशधर त्रि॰ वंशं धरति। कुलाविच्छेदकारके सन्ताने। धृ—अच् ल्युट्। वंशवर्द्धनोऽप्यत्र।

वंशनेत्र न॰ वंशस्येव नेत्रमस्य। इक्षुमूले राजनि॰।

वंशपत्र पु० वंशस्य पत्रमिव पत्रमस्य । १नलनामके तृणे राजनि० । हृत० । २वंशदले न० । कप् ततश्च । २नाड़ीछिद्रौ स्त्री राजनि० गौरा० ङीष् ।

वंशपत्रपतित न० सप्तदशाक्षरपादके छन्दोभेदे । "दिङ्-सनि वंशपत्रपतितं भरनभननगैः" छन्दो० ।

वंशपीत पु० वंशस्तृपत्रमिव पीतः । कणगुग्गुलौ राजनि० ।

वंशपुष्पा स्त्री वंशस्य पुष्पमिव पुष्पमस्याः । सहदेवीलतायाम् राजनि० ।

वंशपूरक न० वंशस्येव पूरकं यस्य । इक्षुमूले राजनि० ।

वंशरो(लो)चना स्त्री वंशेषु रोचते रुच-ल्यु वा रस्य लः । वंशपर्वस्थिते श्वेतवर्णे कर्पूराकारे द्रव्ये । (वंशलोचन) । "वंशजा क्षुण्णा हृद्या वल्या स्वादी च शीतला । तृष्णाकासज्वरश्वासक्षयपित्तास्रकामलाः । हरेत् कुष्ठं व्रणं पाण्डुं कषायवातकृच्छ्रजित्" भावप्र० ।

वंशशर्करा स्त्री वंशस्य शर्करेव । (वंशलोचन) पदार्थे राजनि० । [हेमच० ।

वंशशलाका स्त्री० वंशस्य शलाकेव कठिनत्वात् । वीरणमूले

वंशस्तनित न० । द्वादशाक्षरपादके वंशस्थविलाप्रपर्य्याये छन्दोभेदे शम्भुः । [वंशस्थविलं जतौ जरौ" छन्दो०

वंशस्थविल न० । द्वादशाक्षरपादके छन्दोभेदे । "वदन्ति

वंशाग्र न० वंशस्य अग्रं मूलम् । वंशाङ्कुरे (कोँड़) राजनि०

वंशाङ्कुर पु० हृत० । (कोँड़) इति ख्याते पदार्थे राजनि०

वंशिक न० वंशोऽस्त्रास्य ठन् वंश इव वा कन् । १अगुरुचन्दने अमरः २वंश्यां स्त्री शब्दच० टाप् ।

वंशीधर पु० वंशीं वंशजवाद्यभेदं धरति धृ-अच् । श्रीकृष्णे

वंश्य त्रि० वंशे सत्कुले जातः यत् । सत्कुलजाते ।

वक कौटिल्ये अक० गतौ सक० भ्वा० आ० सेट् इदित् । वङ्कते अवक्रङ्क्ष्ट ।

वक पुंस्त्री० वक्रि-अच् पृषो० नलोपः । स्वनामख्याते विहगे अमरः स्त्रियां ङीष् । २स्वनामख्याते पुष्पवृक्षे "अगस्तिकुसुमं शीतं चातुर्थकनिवारकम् । नक्ताह्व्यनाशनं तिक्तं कषायं कटुपाकि च । पीनसश्लेष्मपित्तघ्नं वातघ्नं कृमिनाशनम्" भावप्र० । ३औषधादिपाचनयन्त्रभेदे "जलकच्छपपातालदोलाभूधरबालुकाः । वकाद्या यन्त्रभेदाः स्युर्वज्राद्याश्च मूषिकाः" शब्दच० । अस्य लक्षणं यथा "दीर्घकण्ठकाचकुप्या गिलयेत् खल्वभाण्डकम् । तिर्यक् कृत्वा पचेत् चुल्ल्यां वकयन्त्रमिति स्मृतम् ।" वैद्यकम् । ४कुबेरे ५राक्षसभेदे मेदि० वो भीमेन हतः भा० व० १४ अ० । श्रीकृष्णेन हते दैत्यभेदे च भाग० १०।११ क० ।

वकजित् पु० वकं जितवान् जि-क्विप् हृत० । १श्रीकृष्णे २भीमसेने च यकाल्लकादयोऽत्र ।

वकधूप पु० वक इव शुभ्रो धूपः । हृकधूपे अमरः ।

वकपञ्चक न० । कार्त्तिकशुक्लपञ्चम्यैकादश्यादितिथिपञ्चके । तत्र मत्स्यादवकैरपि मत्स्यत्यागेन व्रताचरणात् तथात्वम्

वकपुष्प पु० वक इव कुटिलं पुष्पमस्य । स्वनामख्याते पुष्पवृक्षे शब्दच० ।

वकवृत्ति पु० वकस्येव स्वार्थपरा वृत्तिरिच्छा यस्य । "कर्मांगुदृष्टिर्नैतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः" इत्युक्तलक्षणे परञ्चके जने ।

वकव्रतधर पु० वक इव व्रतं धारयति धृ-अच् । "अधीदृष्टिर्नैतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च वकव्रतधरो द्विजः" इत्युक्ते स्वार्थसाधनतत्परे वञ्चके विप्रादौ । [व्रतधर ।

वकव्रतिन्(क) पु० वकव्रत+अस्त्यर्थे इनि ठन् वा । वक-

वकुल पु० वक्रि-कुलच् नलोपः । १स्वनामख्याते पुष्पवृक्षे अमरः । २कटुकायां स्त्री राजनि० टाप् । काकोल्यां ङीष् पृषो० । वञ्जुकोऽपि वकुले पु० ।

"वकुलो मधुगन्धश्च सिंहकेसरकस्तथा । वकुलस्तुवरोऽतृष्णः कटुः पाके रसे गुरुः । कफपित्तविषश्वित्रि कृमिदन्तगदापहः" भावप्र० । अस्य ओष्ठ्रादित्वमिच्छन्त्यन्ये ।

वक्क गतौ भ्वा० आत्म० सक० सेट् । वक्कते अवक्किष्ट ।

वक्तव्य त्रि० वच-तव्य । १कृत्सिते २हीने ३दुष्टे च मेदि० "दिवा वक्तव्यता पाले" स्मृतिः । ४कथनीये च । भावे क्त । ५कथने ६दूषणे च न० ।

वक्तृ त्रि० उचितं वक्ति वक्ष्यति वच-तृच् । १उचितवक्तरि अमरः स्त्रियां ङीप् । २पण्डिते पु० मेदि० ।

वक्त्र न० वक्त्रेऽनेन वच-करणे ष्ट्रन् । १मुखे अमरः । २तगरमूले शब्दर० । ३वसनभेदे मेदि० । वक्त्रं "नाद्या" "नाद्यौ स्रोतामध्येऽनुष्टुभि ख्यातम्" छ० र० ४छन्दोभेदे च ।

वक्त्रभेदिन् पु० वक्त्रं भिनत्ति भिद-णिनि । १तिक्तरसे हेमच० । २सुखविदारके त्रि० स्त्रियां ङीप् ।

वक्त्रवास पु० वक्त्रं वासयति सुरभीकरोति वस-णिच्-अण् उप० स० । १नागरङ्गे हेमच० । हृत० २सुखगन्धे पु० ।

वक्त्रशोधिन् पु० वक्त्रं शोधयति शुध-णिच्-णिनि । १क्षीरे २सुखशोधके ३ताम्बूलादौ त्रि० स्त्रियां ङीप् ।

वक्त्रासव पु० वक्त्रस्यासव इव। अधररसे त्रिका०।
वक्र न० वक्रि-रन् पृषो० नलोपः। १नदीवङ्के अमरः २शनैश्चरे पु०मेदि० ३मङ्गलग्रहे पु०हेम० ४वङ्के ५त्रिपुरासुरे पु० धरणिः ६पर्वते कुटिलगतौ च स्त्री। दतद्धति त्रि०। पक्षाणां वक्रगतिकारणं खगगतिशब्दे उक्तम्। सामान्यतः ज्यो० त० उक्तं यथा "वक्राः स्युः पञ्च षष्ठेऽर्के अतिवक्रा नगाष्टगे। नवमे दशमे चैव जायते वक्रजा गतिः। द्वादशैकादशे सूर्य्ये भजन्ते शीघ्रतां पुनः। रविस्थित्यंशकैर्नित्यं शावधेः संख्यात कल्पते। न तु राश्यन्तरस्पर्शात् पञ्चमादिनिरूपणम्। राशुकेतु सदा वक्रौ"।
वक्रकण्ट पु० वक्रः कुटिलः कण्टः कण्टकोऽस्य। बदरवृक्षे राजनि०। ततः संज्ञायां कन्। खदिरवृक्षे राजनि०।
वक्रखड्ग पु० कर्म०। करवाले राजनि०।
वक्रग्रीव पुंस्त्री० वक्रा ग्रीवा यस्य। १वृद्धे त्रिका० स्त्रियां ङीष्। २कुटिलग्रीवायुते त्रि० स्त्रियां टाप्।
वक्रपुच्छ पुंस्त्री० वक्रं पुच्छं यस्य। १कङ्कुरे त्रिका० स्त्रियां ङीष्। वक्रलाङ्गूलादयोऽप्यत्र।
वक्रपुष्प न० वक्राणि पुष्पाण्यस्य। १वकवृक्षे शब्दर० २पलाशवृक्षे च राजनि०। [वृक्षे राजनि०।
वक्रशल्या स्त्री वक्रं शल्यमिव पत्त्रादि यस्याः। कुटुम्बिनीवक्राङ्ग पुंस्त्री० वक्राण्यङ्गान्यस्य। १हंसे स्त्रियां ङीष्। २कुटिलावयवयुते त्रि० स्त्रियां वा ङीष्। कर्म० ३कुटिले ३हे न०।
वक्रिमन् पु०वक्रस्य भावः इमनिच्। कौटिल्ये "वक्रितवक्रिम प्रेक्षितम्" मालतीमाधवम्। पृषो०। वदन्त्योऽप्यत्र।
वक्रोक्ति स्त्री कर्म०। १कुटिलोक्तौ "अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद्यदि। अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा" सा० द० उक्ते २अर्थालङ्कारभेदे ३काकुवचने च।
वक्ष रोषे भ्वा० पर० सक० सेट्। वक्षति अवक्षीत्।
वक्षस् न० वक्ष-असुन् सुट् च। १वृक्षे २उरसि च अमरः।
वक्षः(च)स्थल न० वक्षःस्थलमिव वा विसर्गलोपः। प्रशस्त-[सा०द०।
वक्षसि।
वक्षोज पु०वक्षसि जायते जन-ड। १स्तने "वक्षोजयोर्मन्दता"
वक्षोरुह पु० वक्षसि रोहति रुह-क। स्तने त्रिका०।
वख गतौ भ्वा० पर० सक० सेट् इदित्। वङ्खति अवङ्खीत् अनिदित्त्वम्, वखति अवखीत् अवाखीत्।
वग खङ्गे भ्वा०पर०अक०सेट् इदित्। वङ्गति अवङ्गीत्।
वगाह पु० अव+गाह-घञ् अवातो लोपः। अवगाहने।
वङ्ग गतौ निन्दायाम् आरम्भे च सक०अवे अक०भ्वा०आत्म० सेट् इदित्। वङ्गते अवङ्गिष्ट।
वङ्ग पु० वङ्ग-घञ्। १नदीवङ्के भरतः। २पल्ययने (प्रालान) स्त्री त्रिका० टाप्।
वङ्गि स्त्री वङ्ग-रि। १पार्श्वास्थि हेमच०। २वाद्यभेदे पुंन० उणादिको०। ३वटवृक्षे पुंन० सिंकौ०।
वङ्ग न० वङ्ग-अच्। धातुभेदे (राङ्) रङ्गशब्दे दृश्यम्। "रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं प्रिये!। वङ्गदेश इति प्रोक्तः" उक्ते देशभेदे पु०ब०व०। २चन्द्रवंश्ये नृपभेदे पु० गरु०१अ०। ३वार्त्ताकौ ४कार्पासे च पु० मेदि०।
वङ्गज न०वङ्गान् धातोः जायते जन-ड। १सिन्दूरे रत्नमा० २वङ्गदेशजाते त्रि०।
वङ्गन पु० वङ्ग-ल्यु। वार्त्ताकौ शब्दर०।
वङ्गशुल्वज न० वङ्गशुल्वाभ्यां रङ्गताम्राभ्यां जायते जन-ड। रङ्गताम्रमिश्रितजाते कांस्ये धातौ हेमच०।
वङ्गसेन पु० वङ्गमिव शुभ्रा सेना पुष्पमस्य। वकवृक्षे त्रिका०
वङ्गादि पु० ६त०। हरितालं हेमच० तस्य वङ्गधातुजारणात्थात्वम्।
वङ्गण पु० वच-ल्युट् पृषो०नुम्। अरुस्तुन्दे (कुचकी) अमरः
वच सन्देशे सक०कथने द्विक० चुरा०उभ० सेट्। वाचयति ते
वच कथने अदा० द्विक० पर० अनिट्। वक्ति। "न हि वचिरल्लिपरः प्रयुज्यते" अभियुक्तोक्तेरप्याह अन्ति" अवोचत् त। उवाच ऊचतुः वक्ता उक्तः।
अनु+उक्तस्य पुनःकथने अनुवादे।
निर्+अवधार्थकथने निरुक्तिः निर्वचनम्।
प्र+प्रकर्षेण कथने वाख्यानार्थउक्तस्य कथने प्रवचनम्।
वचन न० वच-ल्युट्। १कथने २वाक्ये अमरः ३शब्दरत्नम् शब्दच० कर्त्तरि ल्यु। व्याकरणोक्ते संख्यार्थके सुप्तिङन्तरूपे ग्रन्थे च। "सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्"। [णिनि। वचने स्थिते वशीभूते अमरः।
वचनग्राहिन् त्रि०वचनं गृह्णाति तदनुसारेणाचरति ग्रह-णिनि।
वचनीय त्रि० वच-अनीयर्। १कथनीये २निन्दनीये लोकापवादे न० "वचनीयमिदं व्यवस्थितम्" कुमारः।
वचनेस्थित त्रि० वचने वाक्ये तदुपदिष्टाचारे तिष्ठति स्था-क अलुक्स०। वाक्यप्रतिपालके वशीभूते अमरः। [मेदि०
वचर पुंस्त्री०वच-अरन्। १कङ्कुटे स्त्रियां ङीष्। २शठे त्रि०

वचस् न० वच–असुन्। वाक्ये वाक्पटुत्वे अमरकोषः।

वचसांपति पु० ६त० अलुक्स०। बृहस्पतौ दीपिका।

वचस्कर त्रि० वचः करोति कृ–अच् कस्कादि०। वाग्मतिपालके वाग्ये।

वचा स्त्री वच–अच्। (वच) इति ख्याते द्रव्ये।

"वचोषणम्बा कटुका तिक्तोष्णा दीपनीयकृत्। विबन्धाध्मानशूलघ्नी शब्दनत्वविशोधनी। अपस्मारकफोन्मादभूतजन्वनिलान् हरेत्"। (खुरासानी वचा)। "पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा। हैमवत्युदिता तद्वत् गुणं हन्ति विशेषतः।" सुगन्धा (महाभरी) वचा। यस्या लोके (कुलीवच इति) नामान्तरम्। "सुगन्धाषणगन्धा च विशेषात् कफकासनुत्। सुस्वरत्वकरी रुच्या कृत्कण्ठसुखशोधिनी"। अपरा सुगन्धा स्थूलपर्णीपर्यया लोके महाभरा इति नाम। "स्थूलग्रन्थिः सुगन्धाख्या ततो हीनगुणा स्मृता"। (चोपचीनीति) लोके प्रसिद्धा। तस्या गुणाः "द्वीपान्तरवचा कट्वी तिक्तोष्णा वह्निदीपिनी। विबन्धाध्मानशूलघ्नी शब्दनत्वविशोधनी। वातव्याधीनपस्मारसन्मादतनुवेदनाम्। व्यपोहति विशेषेण क्षिप्रकारिमयनाशिनी" भावप्र०।

वज गतौ भ्वा० पर० सक०सेट्। वजति। अवाजीत्–अवजीत् अवजतुः। [ते अवोवलत् त।

वज गरसंस्कारे गतौ च चुरा० उभ० सक०सेट्। वाजयति

वज्र पुंन० वज–रन्। १हीरके २इन्द्रास्त्रभेदे च। तच्च दधीचिसुन्यस्थितो जातम् भाग०६।१०अ०उक्तम् २बालके २धात्याम् न०मेदि० ४काञ्जिके जटा० ५वज्रपुष्पे शब्दर०। ६लोहभेदे ७अभ्रभेदे न०भावप्र०ज्योतिषोक्ते विष्कुम्भादिषु सप्तविंशतौ योगेषु मध्ये पञ्चदशे योगभेदे च न०। ८कोकिलाक्षवृक्षे १०श्वेतकुशे पु०राजनि०। ११श्रीकृष्णस्य प्रपौत्रे यदुवंश्ये नृपभेदे च पु० भाग०। १२सेण्डङ्कवृक्षे भावप्र०। हीरकवज्रलक्षणादि सू०म० ८०अ० उक्तं यथा "रत्नानि बलाद्दैत्यादुदधीचितोऽन्ये वदन्ति जातानि। केचिद्भुवः स्वभावाद् वैचित्र्यं प्राहुरुपलानाम्। इत्युपक्रमे।"

"वेरुवातटे विशुद्धं गिरीषकुसुमोपमं च कौशलकम्। सौराष्ट्रकमाहात्म्यं लघ्वी सौवीरकं वज्रम्। ईषत्ताम्रं स्निग्धवर्णं शतकुम्भं वज्रपुष्पसङ्काशम्। पाण्डुरं च कचिद्भागे पौष्करेषु समुद्भवम्। ऐन्द्रं मदस्निग्धं शुक्लं याम्यं सर्षपकुसुमसन्निभं च। कदलीकाण्डनिकाशं वैष्णवमिति सर्वसंस्थानम्। वाराहमवलागुच्छाभं भवेत् कर्णिकारपुष्पनिभम्। शृङ्गाटकसंस्थानं व्याघ्रास्त्रनिभं च हौतभुजम्। वायव्यं च यवोपमयवोकुसुमप्रभं सप्तविधम्। स्रोतःस्वनिः प्रकीर्णकस्निग्धाकरसमुद्भिविधः। रक्तं पीतं च शुभं राजन्यानां सितं द्विजातीनाम्। शैरीषं वैश्यजानां शूद्राणां श्यामतोऽसितनिभम्। सितसर्षपाभ्रक तण्डुलो भवेत्तण्डुलेषु विज्ञेया। द्वे लक्षे मूल्यं द्विद्व्यूनिते चैतत्। पादत्र्यंशार्धोनं त्रिभागपञ्चांशषोडशांशाश्च। भागश्च पञ्चविंशः यतिकः साहस्रिकश्चेति। सर्वद्रव्याभेद्यं वज्रमाशु तरति रश्मिवत् स्निग्धम्। सङ्घिदनलशक्रचापोपमं च वज्रं हितायोक्तम्। काकपदमक्षिकाकेशधातुयुक्तानि शर्कराविद्धम्। द्विगुणाभ्रि स्निग्धकलुषलक्षविशीर्णानि न शुभानि। यानि च बुद्बुदकुलिताग्रचिपिटषाण्डुफलप्रदीर्घाणि। सर्वेषां चैतेषां मूल्याङ्गागोऽष्टमो हानिः। वज्रं न किञ्चिदपि धारयितव्यमेके शुक्लार्थिनोभिरबलाक्षिरुशन्ति तज्ज्ञाः। शृङ्गाटकत्रिपुटधान्यकवर्त्स्यितं यच्छ्रोणीनिभं च शुभदं तनयार्थिनीनाम्। व्रजनविभवजीवितक्षयं जनयति वज्रमनिष्टलक्षणम्। अशनिविषभयारिनाशनं शुभसुखभोगकरं च भूभृताम्। क्षीरकोतपत्र्यादि गारुडे ६८अ० उक्तं यथा "तस्या(वलक्षा)स्थिलेशो निपपात येषु भुवः प्रदेशेषु कथञ्चिदेव। वज्राणि वज्रायुधनिर्जिगीषोर्भवन्ति नानाकृतिमन्ति तेषु। हैमसातङ्कसौराष्ट्राः पौण्ड्रकालिङ्गकोशलाः। वेरुवातटाः ससौवीरा वज्रस्याष्टाविधाकराः। ज्ञातास्त्रिभिर्गैलजाश्च शशिभा वेरुवातटीयाः स्मृताः सौवीरे सुषिताङ्गमेघसदृशाश्चामाश्च सौराष्ट्रजाः। कालिङ्गाः कनकावदातरुचिराः पीतप्रभाः कोशले श्यामाः पुण्ड्रभवा अतङ्कविषये नात्यन्तपीतप्रभाः। अत्यर्थं लघुवर्णतश्च गुणवत् पार्श्वेषु सम्यक् समं रेखाबिन्दुकलङ्ककाकपदकव्यासादिभिर्वर्जितम्। लोकेऽस्मिन् परमाणुमात्रमपि यत् वज्रं क्वचिद्दृश्यते तस्मिन् देव! समाश्रयो ध्रुवितथस्तीक्ष्णाग्रधारं यदि। वज्रेषु वर्णयुक्ता देवानामपि परिग्रहः प्रोक्तः। वर्णेभ्यश्च विभागः कार्यो वर्णाश्चयादेव!। पीतपिङ्गप्रभामाताम्राः स्वभावतो रुचिराः। वरुणयमकुबेरवह्निपतिमरुतां शुक्लकायाः। विप्रक्षत्रियवैश्यशूद्रजातीनां क्रमेण वज्राणि। तेषां लक्षणमुक्तं तत्तद्वर्णेषु तत्तदेव शुभम्। वज्रं यस्य करस्थं स्यात् तस्य जयः सर्वतो भवेत्। वज्रं यस्य करस्थं स्यात् तस्य जयः सर्वतो भवेत्। वज्रं यस्य करस्थं स्यात् तस्य जयः सर्वतो भवेत्।

शङ्खकुन्दस्फटिकावदातः स्यात् क्षत्रियस्य शशबन्धु विलोचनाभः। वैश्यस्य कान्तकङ्कोदनसन्निकाशः शूद्रस्य धौतकरवालसमानदीप्तिः। द्वौ वज्रवर्णौ पृथिवीपतीनां सद्भिः प्रतिष्ठौ न तु सार्वजन्यौ। यः स्याज्जवा विद्रुमभङ्गशोणो यो वा हरिद्वारससन्निकाशः। दैवत्वात् सर्ववर्णानां गुणवत् सार्ववर्णिकम्। कामतो धारयेद्राजा नत्वन्योऽन्यत् कथञ्चन। अधरोत्तरहत्या हि याहक् स्याद्वर्णसङ्करः। ततः कष्टतरो वज्रो वर्णानां सङ्करो मतः। न च मार्गविभागमात्रहत्या विदुषा वज्रपरित्यङ्गो विधेयः। गुणवद्गुणसम्पदां विभूतिर्विपरीतो व्यसनोदयस्य हेतुः। एकमपि यस्य गृहं विद्युन्निभमवलोक्यते विशीर्णं वा। गुणवदपि तन्नाधार्यं वज्रं श्रेयोऽर्थिभिर्भवने। स्फुटिताग्निविशीर्णदुष्करैश्च कलभैः शुभतैश्चमेतदभ्यम्। न हि वज्रभृतोऽपि वज्रमायुश्चियमन्याश्चयत्नाहसां न कुर्यात्। यश्चैकदेशः क्षतजावभासो यद्वा भवेल्लोहितवर्णचित्रम्। न तत्र कुर्याद्धृदयाणमायुः स्वच्छन्दमृत्योरपि जीवितान्तम्। कोटयः पार्श्वानि धारायाः षट्कृतो द्वादशेति च। उच्चुङ्गमतीक्ष्णाग्रा वज्रस्याकरजा गुणाः। षट्कोटिगुणमध्यं स्फुटतीक्ष्णधारं वर्णान्वितं लघु सुपार्श्वमेतद्दोषम्। इन्द्रायुधांशुविस्फुरितच्छुरितान्तरीक्षमेवंविधं भुवि भवेत् सुलभं न वज्रम्। तीक्ष्णाग्रं विमलमपैति सर्वदोषं धत्ते यः प्रयततनुः सदैव वज्रम्। दृष्टिस्तं प्रतिदिनमेति यावदायुः श्रीरभ्रमत्सुतधनधान्यगो, भ्रमूनाम्। व्यालवह्निविषव्याधतस्करास्त्रभयानि च। दूराच्चास्य निवर्त्तन्ते कर्माण्यार्थवधानि च। यदि वज्रमेतत् सर्वदोषं विश्रयात्तच्छुल्विधिं गुरुत्वे। मणिशास्त्रविदो वदन्ति तस्य द्विगुणं रूपकलत्रमयत्रबल्यम्। त्रिभागहीनार्द्धवदर्द्धभेषं त्रयोदश त्रिंशदतोऽर्द्धभागाः। अधोतिभागोऽथ शतांशभागः षड्भागभागोत्तमसान्नवेशः। यत्तच्छुलैर्हादशभिः कृतस्य वज्रस्य मूल्यं प्रथमं प्रदिष्टम्। द्वाभ्यां क्रमाद्वानिसुपागतस्य त्रैकाक्षयानस्य विनिश्चयोऽयम्। न चापि तच्छुलैरेव वज्राणां धारणक्रमः। अष्टाभिः सर्वगुणैरेतच्छुलं परिकल्पयेत्। यत्तु सर्वगुणैर्युक्तं वज्रं तरति वारिणि। रत्नवर्णमलक्षोऽपि तस्य धारणमिष्यते। अनेनापि हि दोषेण लक्षालक्षेण दूषितम्। मूल्यात् दशमं भागं वज्रं क्षपति मानवः। प्रकटानेकदोषस्य वज्रस्य मूल्यतोऽपि वा। मूल्याच्चतुर्थभागो वज्रस्य न विधीयते। सूक्ष्मदोषसमुद्भारे वज्रं यद्यपि दृश्यते। रत्नानां परिकर्मार्थं मूल्यं तस्य भवेच्छुभम्। प्रथमं गुणसम्पदाभ्युपेतं प्रतिबद्धं समुपैति तच्च दोषम्। अनुमानरत्नेन तस्य राज्ञो गुणहीनोऽपि मणिर्न भूषणाय। नार्या वज्रमधार्यं गुणवदपि सुतप्रसूतिमिच्छन्त्या। अन्यत्र दीर्घचिपिटक्षुद्रादुगुणैर्विमुक्ताच्च। व्ययसा पुष्परागेण तथा गोमेदकेन च। वैदूर्यस्फटिकाभ्यां च वैद्यैरपि गुणगविधैः। प्रतिरूपाणि कुर्वन्ति वज्रस्य कुशलाजनाः। परीक्षा तेषु कर्त्तव्या विद्वद्भिः सुपरीक्षकैः। तुलारोहेक्षणालाभिस्तेषां कार्यं परीक्षणम्। पृथिव्यां यानि रत्नानि ये चान्ये लोहधातवः। सर्वाणि विलिखेद्वज्रं तच्च तैर्न विलिख्यते। गुरुता सर्वरत्नानां गौरवाधारकारणम्। वज्रे तान्यैरीत्येन सूरयः परिचक्षते। जातिभिरजातिं विलिखन्ति वज्रकुरुविन्दाः। वज्रैर्वज्रं विलिखति नान्येन लिख्यते वज्रम्। वज्राद्धि सूक्ष्मसुषिरो यास्य काश्चन जातयः। न तेषां प्रतिबद्धानां भा भवत्युद्गमिनी। तिर्यक्क्षतत्वात् केषाञ्चित् क्वचिच्चादि दृश्यते। तिर्यग्लिख्यमानानां सा पार्श्वेऽपि दृश्यते। यद्यपि विशीर्णकोटिः सविन्दुरेखान्वितो विवर्णो वा। तदपि धनधान्यपुत्रान् करोति खेन्द्रायुधो वज्रः। सौदामिनीविस्फुरिताभिरामं राजा यथोक्तं कुरुते दधानः। पराक्रमाक्रान्तपरप्रतापः समस्तसामन्तभुवं भुनक्ति"। इविद्युदग्नौ तच्चिवारयेच्चेत्तथा "प्रचण्डपवनाघाते मेघेषु स्तनितेषु यः। निःपतेत्तत्सिनीयोऽपि प्राङ्मुखो वाप्युदङ्मुखः। तस्य मा भूद्भयं घोरं विद्युतोयोऽवसीदति आ०त० धृतवज्रपुराणम्। "मुनेः कल्याणमित्रस्य जैमिनेश्चापिकीर्त्तनात्। विद्युद्विभवं नास्ति पठिते च स्फोटरे"। "लिखिते च स्फोटरे" इति वा पाठः। जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च। पुलस्त्यः पुलहश्चैव पञ्चैते वज्रधारकाः" पुराणम्।

तत्पर्य्यायादि भावप्र० उक्तं यथा

"हीरकः पुंसि वज्रोऽस्त्री शक्रो मघवरत्न च। स तु श्वेतः क्षतो विप्रो लोहितः क्षत्रियः स्मृतः। पीतो वैश्योऽसितः शूद्रश्चतुर्वर्णात्मकश्च सः। रत्नाजने मतो विप्रः सर्वविद्विप्रदायकः। क्षत्रियो व्याधिविध्वंसी जराद्यत्पुरः स्मृतः। वैश्यो धनप्रदः प्रोक्त

लता देहस्य दार्ढ्यकृत्। गुडो नाशयति व्याधीन् वयः स्तम्भं करोति च। पुंस्त्वोनपुंसकानीकृत लक्षणीयानि लक्षणैः। षड्वक्त्राः फलसंपूर्णास्तेजोयुक्ता दृढत्वराः। पुरुषास्ते समाख्याता रेखाबिन्दुविवर्जिताः। रेखाबिन्दु समायुक्ताः षड्वास्ते स्त्रियः स्मृताः।" षड्वाः षट्कोणाः। "त्रिकोणाश्च नदीवास्ते क्लिवेयास्तु नपुंसकाः। तेषु स्युः पुरुषाः श्रेष्ठा रसबन्धनकारिणः। स्त्रियः कुर्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदाः। नपुंसकास्त्वशीर्याः स्युरकामाः सत्त्ववर्जिताः। स्त्रियः स्त्रीभ्यः प्रदातव्याः क्लीवं क्लीवे प्रयोजयेत्। मर्त्येभ्यः सर्वदा देयाः पुरुषाः वीर्यवर्द्धनाः। कल्पद्रुं कुरुते वज्रं कृष्णं पार्श्वव्यवस्थया। पाण्डुताम्रस्फुरत्त्वञ्च तस्मात् संशोध्य मारयेत्।" तच्छोधनविधिर्यथा

"कदलीकन्दरक्ताक्ते दोलायन्त्रे विपाचयेत्। व्याघ्रीकन्दगतं वज्रं त्रिदिनं नदिशुद्धयति"। व्याघ्री कण्टकारिका। अस्य शोधनविधिः। "सप्तच्छिन्नामि सुते वज्रं व्याघ्रीकन्दोदरे क्षिपेत्। माहिषीविषया सिद्धा कारीषाग्नौ विपाचयेत्। क्षियावायां चतुर्यामं यामिन्यन्ते ऽस्फूलके। सेचयेत्माक्षवेदेयं सप्तवारेण शुद्धयति।" अथ वज्रस्य मारणविधिः "छिन्नुहैम्बपयुक्ते क्षिपेत्कोष्ठे कदलीरजे। तप्तं तप्तं पुनर्वज्रमवेन्नञ्च त्रिसप्तधा"। अन्योऽस्य मारणप्रकारः "मेषशृङ्गभुजङ्गाक्षिकुर्मपृष्ठास्थिवेतसम्। शतदलं समस्तिद्वा वज्रीलीरेण मेलकम्। कृत्वा तन्मध्यगे वज्रं म्रियते घृतमेवहि।" शोधितस्य वज्रस्य गुणाः "आयुःवृष्टिं बलं वीर्यं वर्णं सौख्यं करोति च। सेवितं सर्वरोगघ्नं मृतं वज्रं न संशय।" वज्रभेदा तद्गुणाश्च भावप्र० उक्ता यथा

"पुरा वधाय हतस्य वज्रिणा वज्रसङ्गतम्। विस्फुलिङ्गास्तदस्रस्य गगने परिसर्पिताः। ते निपेतुर्वनध्वानाच्छिखरेषु महीभृताम्। तेषां यत् समतत्वञ्च तत्तद्गिरिषु खाभ्रकम्। तद्वज्रं वज्रजातत्वाद्भ्रमत्यम्बरबोद्भवात्। गगनात् सर्वजिच्च यस्माद्गगनञ्च ततो मतम्। विप्रक्षत्रियविट् शूद्रभेदात्तत् स्याच्चतुर्विधम्। क्रमेणैषां सितं रक्तं पीतं कृष्णञ्च वर्णतः। प्रशस्यते सितस्तारं रक्तं तत्तु रसायने। पीतं हेमनि, कृष्णन्तु गदेषु द्रुतयेऽपि च। पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्विधम्। सुवज्रयन्त्रो विनिःक्षिप्तं पिनाकन्दृढमञ्चति। अज्ञानाद्भक्षणं तस्य महाकुष्ठप्रदायकम् दर्दुरं त्वग्निनिःक्षिप्तं कुरुते दर्दुरध्वनिम्। मोचकात् बहुमूल्यं च स्यान्मृत्युप्रदायकः। नागन्तु नागवद्भीतं फुत्कारं परिमुञ्चति। तद्भक्षितमवश्यन्तु विठपाति भगन्दरम्। वज्रन्तु वज्रवत्तिष्ठेत्तच्चाग्नौ विज्ञातं व्रजेत्। सर्वेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत्। अभ्रं तत्तरधैर्योत्थं बह्वपत्यं गुणाधिकम्। दक्षिणाद्रिभवं स्वल्पसत्त्वमल्पगुणप्रदम्। अभ्रं कषायं मधुरं सुशीतमायुष्करं धातुविवर्द्धनञ्च। हन्यात् त्रिदोषं क्षयमेककुष्ठक्लीहोदरपन्थिविषक्रमीश्च। रोगान् हन्ति वृद्धयति वपुर्वीर्यवृद्धिं विधत्ते नारुण्याद्य रमयति यतं योषितां नित्यमेव। दीर्घायुष्कान् जनयति सुतान् विक्रमैः सिंहतुल्यान् मृत्योर्भीतिं हरति सततं सेव्यमानं मृताभ्रम्।"

वज्रकण्टक पु० वज्रमिव कठिनं कण्टकमस्य। १क्षुद्रोषधे जटा०। २कोकिलाक्षे राजनि०। [राजनि०

वज्रचर्मन् वज्रमिव कठिनं चर्म यस्य। नकुले खड्गनि०

वज्रतुण्ड पु० वज्राकारं तुण्डमस्य। १नखभेदे २गरुडे त्रिका० ३मत्स्यभेदे ४वटभेदे च राजनि०।

वज्रदन्त पु० वज्रमिव कठिनो दन्तोऽस्य। १शूकरे २मूषके च शब्दमा० वज्रदशनादयोऽप्यत्र।

वज्रद्रु पु० वज्राकारो द्रुः। क्षुद्रौषधे अमरः। वज्रद्रुमादयोऽप्यत्र। [वज्रभूदादयोऽप्यत्र।

वज्रधर पु० वज्रं धरति धृ-अच्। १इन्द्रे हला० २पेचके च

वज्रनिर्घोष पु० ६त०। वज्रसन्निभशब्दोऽस्य कर्म० वज्रनिर्घोषोऽप्यत्र। [वज्रकूटादयोऽप्यत्र।

वज्रपाणि पु० वज्रं पाणौ यस्य। १इन्द्रे २पेचके च त्रिका०

वज्रपुट न० वज्रमिव कठिनं पुटमस्य। औषधपाचनपात्रभेदे

वज्रपुष्प न० वज्रमिव पुष्पम्। तिलपुष्पे अमरः।

वज्रपुष्पा स्त्री वज्रमिव पुष्पं यस्याः। शतपुष्पायाम् राजनि०

वज्रमय त्रि० वज्रात्मकम् मयट्। अतिकठिने स्त्रियां ङीप्।

वज्रमूली स्त्री वज्रमिव कठिनं मूलमस्याः ङीप्। शालपर्णीम् राजनि०। [सप्तारलतायाम् हारा०।

वज्रवल्ली स्त्री वज्रमिव कठिना वल्ली। (छाड़जेङ्गा) अस्थिसंहारलतायाम् राजनि०।

वज्रबीजक पु० वज्रमिव कठिनं बीजमस्य कप्। कृताकरञ्जे राजनि०। [राजनि०।

वज्रवृक्ष पु० वज्रमिव कठिनो वृक्षः। वेतसवृक्षे (सेंयोड़ा)

वज्रा स्त्री वज्र-टाप्। १गुडूच्याम् २क्षुद्रौषधे ३दुर्गायां देवीपु० ४क्षुद्रौषधे ङीप्रन्तोऽपि मेदि०।

वज्राकृति पु० वज्रस्येवाकृतिरस्य । जिह्वामूलीयस्थवर्णभेदे ।

वज्राङ्गी स्त्री वज्रमिवाङ्गं यस्याः । गवेधुकाधान्यभेदे (गड़-गड़े) शब्दच० २लताभेदे (झाड़जोड़ा) भावप्र० ।

वज्रास्थिशृङ्खला स्त्री वज्रमिवास्थि शृङ्खला बन्धनं यस्याः । कोकिलाक्षवृक्षे राजनि० । [२वृद्धे मेदि० ।

वज्रिन् पु० वज्रमस्त्यस्य इनि । १इन्द्रे अमरः २मेघके च ।

वञ्चक पुंस्त्री०वञ्च-णिच्-ण्वुल् । १शठगोले अमरः स्त्रियां ङीष् २शठवञ्चौ च । ३खले ४प्रतारके च त्रि० मेदि० ।

वञ्चन न० वञ्च-ल्युट । प्रतारणे अन्यथास्थितस्य वस्तुनोऽन्यथारूपेण कथनादिनाऽन्यमोहोत्पादने । युच् । वञ्चनाप्यत्र स्त्री ।

वञ्चुक त्रि० वञ्च-उकञ् । वञ्चनाशीले शब्दर० ।

वञ्जुल पु० वञ्च-उलच् पृषो० चस्य जः । १तिनिशवृक्षे २अशोकवृक्षे अमरः । ३श्वेतवृक्षे मेदि० ४स्थलपद्मवृक्षे शब्दच० । ५पक्षिभेदे च फला० । ६वञ्जुलपक्षायां गवि स्त्री हेमच० । ७वञ्चके त्रि० वञ्जुलप्रियः ।

वञ्जुलद्रुम पु० वञ्जुलाख्यः द्रुमः । अशोकवृक्षे राजनि० ।

वञ्जुलप्रिय पु०वञ्जुलं वञ्चकं प्रीणाति प्री-क । वेतसे रत्नमा०

वट वेष्टने भागे च अदं०चुरा०उभ०सक०सेट् । वटयति ते । [अववटत् । अववटतां त ।

वट वेष्टने भ्वा० पर० सक०सेट् । वटति । अवटीत् अवाटीत्

वट विभाजने वा चुरा०उभ०पक्षे भ्वा०पर०सक०सेट् इदित् । वण्टयति ते वण्टति । अववण्टत् त अवण्टीत् ।

वट कथने भ्वा० पर० द्विक० सेट् घटा० । वटयति अवाटीत् अवटीत् । ववटतुः ।

वट क्षेपे सौ०पर०सक०सेट् इदित् । वण्टति अवण्टीत् ।

वट पु० वट-अच् । १स्वनामख्याते वृक्षे अमरः २ग्रन्थनिर्मिततन्त्रौ च त्रि० । (वँटे) मेदि० ।

वटवृक्षस्य रूढ़ रूपत्वमस्त्यशब्दे ५१७ पृ० उक्तम् ।

"वटः शीतो गुरुर्ग्राही कफपित्तव्रणापहः । वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषजित्" भावप्र० । २साध्ये हेमच० । ४कपर्दे ५गोले ६भक्ष्यभेदे (वड़ा) मेदि० ।

वटक पु० वट-कन् । पिष्टकभेदे (वड़ा) भावप्र० क्षुताद्यशब्दे २१८२ पृ० दृश्यम् ।

वटपत्र पु० वटस्येव पत्रमस्य । १सितार्जकवृक्षे राजनि० । २पाषाणभेदीलतायां स्त्री ङीष् भावप्र० । "वटपत्री कषायोष्णा योनिरक्तगदापहा" इतिपुरमालीवृक्षे रत्नमा० टाप् । [त्रि० शब्दर० ।

वटर पुंस्त्री० १कुक्कुटे स्त्रियां ङीष् । २शठे ३चञ्चले ४चौरे

वटी स्त्री वट-अच् गौरा०ङीष् । १रज्जौ अमरः गोलाकारे (बड़ी) पदार्थे भावप्र० स्वार्थे क हृस्वः । वटिकायत्र "वटिका अथ कथ्यन्ते तन्नाम गुटिका वटी । मोदको वटिका पिण्डी गुड़ो वर्त्ति स्त्रयोच्यते । लेहवत् साध्यते वह्नौ गुड़ो वा शर्कराथ वा । गुग्गुलुर्वा त्रिभेदत्व चूर्णं तत्रिर्भिता वटी ।" तत्र वह्निसिद्धे गुड़ादौ । "कुर्यादवह्निसिद्धेन कांचिद्गुग्गुलुना वटी" । द्रवेण मधुना वापि गुटिकां कारयेद्बुधः । सिता चतुर्गुणा देया वटीषु द्विगुणो गुड़ः । चूर्णं चूर्णसमः कार्य्यो गुग्गुलुर्मधु तत्समम् ।" तत्समम् चूर्णसमम् "द्रवं तु द्विगुणं देयं मोदकेषु भिषग्वरैः" । द्रवं द्रवरूपद्रव्यम् । "कर्षप्रमाणं तन्मात्रा बलं दृष्ट्वा प्रयुज्यते" । बलमिति कालादेरप्युपलक्षणम् । नदीवटाख्ये २वृक्षभेदे राजनि० ।

वटु पु० वट-उ । १माणवके २ब्रह्मचारिणि च हेमच० ।

वटुक पु० वट-उक । १बालके शब्दर० २भैरवभेदे च तन्त्रम्

वठ असहायकरणे भ्वा० आत्म० सक० सेट् इदित् । वण्ठते अवण्ठिष्ट । [ववठतुः ।

वठ शक्तौ भ्वा०पर०अक०सेट् । वठति । अवाठीत् अवठीत्

वठर पु० वठ-अरन् । १मूर्खे उणादि० २अम्बष्ठे हेमच० ३शठे ४मन्दे च त्रिका० ।

वड विभजने चुरा० उभ० सक० सेट् इदित् । वण्डयति ते अववण्डत् त । [अवण्डिष्ट ।

वड वेष्टने विभागे च भ्वा० आ० सक० सेट् इदित् । वण्डते

वड आरोहणे सौ० पर० सक० सेट् । वडति अवाडीत् अवडीत् । ववडतुः ।

वडभि(भी) स्त्री वह्यते आरुह्यतेऽत्र वड-अभि वा ङीप् । १शठचूडायाम् (चुड़नि) अमरः २प्रासादाग्रस्थगृहे च (चिलेघर) रत्नमा० ।

वडा स्त्री वड-अच् । स्वनामख्याते पिष्टकभेदे शब्दच० ।

वडिश न० वड-इनृ वडिं श्यति शो-क । मत्स्यधारणार्थे वक्रलौहकण्टकयुक्ते पदार्थे अमरः । "वडिशेन झषो-रिवाक्षान्" इन्द्रावज्रचम्पूः ।

वड्र त्रि० वल-रक् लस्य डः । वृणति (वड़) अमरः ।

वण शब्दे भ्वा० पर० सक० सेट् । वणति अवाणीत् अवणीत् । वृदित् चङि वा हृस्वः ।

वण्ट विभाजने अदं० चुरा० उभ० सक० सेट् । वण्टयति

ते अवण्टत् त । [२अक्षतोद्घाते च । (डेकरो) शब्दमा०
वण्ट पु० वण्ट-अच् । १भागे २दात्रादेः धारणस्थाने(बाँठ)
वण्टक पु० वण्ट-घञ् स्वार्थे क । १भागे अमरः
ण्वुल् । २विभाजके त्रि० । [२अक्षतोद्घाते च मेदि०।
वण्ठ त्रि० वण्-ठ तस्य नेत्वम् । १खर्वे (बेँटे) ।२क्लीबायुधे
वण्ठर पु० वठि-अरन् । १स्थगिकारब्क्षौ २क्षुद्रकुरलाङ्कुले
३करीरकोषे ४तालस्य पल्लवे ५पयोधरे च मेदि० । अय
मौणादिरपि तत्रार्थे ।
वण्ड त्रि०वडि-अच् ।१अक्षतोद्घाते २हस्ताद्यङ्गविकले (बेँडे)
३अनाहतमेढ्रे हेमच० ४पांशुलायां स्त्रियां स्त्री मेदि० ।
वण्डाल पु० वडि-आलच् । १म्लेच्छयुद्धे २नौकायां खनित्रे
च मेदि० । [आर्षे अव्य०राजवत् भूद्वत् इत्यादि ।
वत् अव्य० वा-डति । सादृश्ये अमरः वतिप्रत्ययान्तोऽव्य-
वत अव्य० वन-क्त । १खेदे २अनुकम्पायाम् ३हर्षे ४वि-
स्मये ५आमन्त्रणे च अमरः ।
वतंस पु० अव+तनुस-घञ् अवाल्लोपः । १कर्णभूषणभेदे
२शेखरे ३शिरोभूषणे मेदि० ४भूषणमात्रे च ।
वतण्ड पु० अव+तडि-अच् अवाल्लोपः । मुनिभेदे उणादि० ।
वतोका स्त्री अवगतं तोकं यस्याः प्रा०ब०अवाल्लोपः । अपत्य-
हीनायां स्त्रियाम् अमरः ।
वत्स न० वस-स । १वक्षःस्थले अमरः । २गवादिशिशौ द्वि-
ब० । ३वत्सरे पु० अमरः । ४चन्द्रवंशे राजभेदे च पु० ।
वत्सक न० वत्स इव इदार्थे कन् । १पुष्पकासीसे राजनि०
२कुटजे अमरः । ३इन्द्रयवे च राजनि० ।
वत्सकबीज न०वत्सकस्य कुटजस्य बीजम् । इन्द्रयवे राजनि०
वत्सतर पुंस्त्री० क्षुद्रः वत्सः अल्पत्वे तरप् । १क्षुद्रवत्से
अप्राप्तदमनकाले गवादौ अमरः स्त्रियां ङीप् । वत्सतरी
वत्सनाभ पु० वत्सान् पशुशिशून् नभ्यति हिनस्ति नभ-
अण् वत्सस्य नाभिराकारोऽस्यस्य अच् वा । स्थावरे
विषभेदे अमरः । तल्लक्षणादि भावप्र० उक्तं यथा
"विस्फुवारसदृक्पत्रोवत्सनाभ्याकृतिस्तथा । यत्
पार्श्वेन तरोर्दृष्टिर्वत्सनाभः स भाषितः । तस्य सामान्य
गुणा यथा । "विषं प्राक्तरं प्रोक्तं व्यवायि च विकाशि
च । आग्नेयं वातकफहृद्योगवाहि मदावहम्" ।
व्यवायि सकलकायव्यापनपूर्वकपाकगमनशीलम् । वि-
काशि ओजसः शोषणपूर्वकं सन्धिबन्धविश्लिष्टीकरणशी-
लम् । आग्नेयम् अधिकाग्न्यंशं योगवाहि संसर्ग-
गुणत्वाद्गुरुम् मदावहं तमोगुणाधिक्येन बुद्धिविध्वंस-
करम् । "तदेव युक्तियुक्तं तु प्राणदायि रसायनम् ।
योगवाहि विदोषघ्नं दृष्टिघ्नं वीर्यवर्द्धनम् । ये दुर्गुणा
विषेऽनुक्ते ते शुद्धीनां विशोधनात् । तस्माद्विषं प्रयो-
गेषु शोधयित्वा प्रयोजयेत्" भावप्र० ।
वत्सपत्तन न० वत्सस्य वत्सराजस्य पत्तनम् । उत्तरदेश-
स्थायां कौशाम्ब्यां नगर्याम् हेमच० ।
वत्सपाल पु० वत्सान् पालयति पाल-अण् । १श्रीकृष्णे
२बलदेवे च । [इयम् ।
वत्सर पु० वस-सरन् । द्वादशमासात्मके काले अब्दशब्दे
वत्सराज पु०चन्द्रवंश्ये नृपभेदे । "वत्सराजचरितम्" रत्ना०
वत्सरान्तक पु० वत्सरस्यान्तं करोति अन्त+णिच्-ण्वुल् ।
फाल्गुनमासे राजनि० वत्सरस्य चैत्रादिकत्वात् फाल्गु-
नस्य तदन्तकालत्वात्तथात्वम् ।
वत्सल त्रि० वत्सं लाति ला-क । १स्नेहयुक्ते २वात्सल्ये
रसे पु० ३तद्वति त्रि० ४विष्णौ पु० विष्णुस० ।
वत्साक्षी स्त्री वत्सस्याक्षीवाक्षि अस्य षच्समा० । गो-
क्षुरवायाम् (गोमक्ष) लटा० ।
वत्सादनी स्त्री वत्सैरद्यते प्रियत्वेन अद-ल्युट् ङीप् ।
१गुडूच्याम् अमरः । वत्सः अदनमस्य । २शुक्रे पुंस्त्री०
राजनि० स्त्रियां ङीष् । [अवन्दिष्ट ।
वद लुटौ अभिवादने सक० भ्वा० आ० सेट् इदित् । वन्दते
अवादीत् अवदिष्ट । ज्ञानयत्नादावात्मनेपदीत्यन्ये ।
वद वाचि भ्वा० पर० सक० सेट् यजा० । वदति अवादीत्
उवाद ऊदतुः ऊदिथ । उदितः ।
भाषने उपसान्त्वने आत्म० शास्त्रे वादते भासमानो
वदतीत्यर्थः मत्यानुपवदते सान्त्वयतीत्यर्थः । ज्ञानाद्युपार्थौ
च आत्म० । तत्र ज्ञाने शास्त्रे वदते । यत्ने खेले वदते ।
विषतो खेले विवदन्ते । उपच्छन्दने उपवदते प्रार्थयते
इत्यर्थः सि०कौ० । अत्रवाचां सम्भूयोच्चारणे आत्म०
प्रवदन्ते विप्राः । अति+मर्यादातिक्रमेणोक्तौ प०
अतिवदति । अनु+उक्तस्य पर्यायान्तरेण कथने अनुवादः
सकर्मकात् अकृतवाचामनुवादे तु आत्म० अनुवदते कठः-
प्रलापस्य सि०कौ० अव्यक्तवाचि तु प० अनुवदति वीणा
सकर्मकात्तु पर० उक्तमनुवदति । विरुद्धोक्तौ अकृतायां
वाचि वा आत्म० विप्रवदन्ते नित्यं वैद्याः । [विशेषविधिः
अप+निन्दायाम् । अपवादः । विशेषविधाने च अपवादः
परि+निन्दायां मिथ्यादूषणे च पर० । परिवदति परिवादः ।

प्रति+विरुद्धतयोक्तौ पर० प्रतिवदति प्रतिवादः प्रतिवादी प्रत्युत्तरोक्तौ च ।

वि+विरुद्धोक्तौ पक्षप्रतिपक्षग्रहणेनोक्तौ आत्म० विवदन्ते पण्डिताः वादिप्रतिवादिनश्च ।

वद् वाचि सन्देशे च सक० चुरा० उभ० सेट् । वादयति ते अवीवदत् । अभि+प्रयोगे ।

वद त्रि० वदति वद–अच् । वक्तरि अमरः ।

वदन न० उद्यतेऽनेन वद–करणे ल्युट् । १मुखे अमरः । २वचनेन्द्रिये भावे ल्युट् । ३कथने न० । [अमरः ।

वदा(दा)न्य पु० वद–अन्य पृषो० वा दीर्घः । भूरिदानशीले

वदाम न० वद–आमन् । (बादाम) बाताडे फलभेदे भावप्र० । "बादामो वातवैरी स्यात्तेलोपमफलस्तथा । बादामः उष्णः स्निग्धो वातघ्नः एकफलुरुः । बादामस्त्वल्पो मधुरो दृष्यः पित्तानिलापहः । स्निग्धोष्णः कफहृत् मेधो रक्तपित्तविकारिण्याम्" भावप्र० ।

वदाल पुं स्त्री० वद–आल । पाठोनमतृच् (बोयाल) त्रिका० स्त्रियां ङीष् । स्वार्थे क तत्रार्थे । [अमरः ।

वदावद पु० अत्यन्तं वदति वद–अच् नि० । बहुवक्तरि

वधू स्त्री उह्यते पितृगेहात् पतिगृहं वह–ऊ धुकच् । १भार्यायाम् २नवोढायां ३पुत्रजायायाम् अमरः । ४अठराञ्च मेदि० । अस्य ओकारादित्वमित्यन्ये

वधूजन पु० कर्म० । नारीजने त्रिका० ।

वधूटी स्त्री अल्पा वधूः टी० । अल्पवयस्कायाम् नार्य्यां "गोपवधूटी दुकूलेति" भाषापरि० । [नीत् अवनीत् अवनतः ।

वन सेवने सक० शब्दे अक० भ्वा० पर० सेट् । वनति अवानीत् अवनीत् । व्यचा० वनः वानः । घटा० वनयति । [निष्ट ।

वन याचने त्रिक० तना० आ० सेट् क्वा वेट् । वनुते अवनिष्ट अवनीत् अवानीत् ।

वन उपकारे उपतापे च सक० शब्दे अक० वा चु० उभ० पक्षे भ्वा० पर० सेट् । वानयति ते वनति । अवीवनत् त । अवनीत् अवानीत् ।

वन न० स्त्री वन–अच् । १वृक्षसमुदायात्मके अरण्ये अमरः स्त्रीत्वे ङीष् । "सुवनो सम्भवदृतुपिकापि का" नैष० । २जले ३निवासे ४आलये च मेदि० । ५प्रस्तरणे हेमच० ।

वनकदली स्त्री ७त० । काष्ठकदल्याम् राजनि० ।

वनकन्द पु० वनजातः कन्दः । अरण्यजाते सूरणे राजनि०

वनकार्पासी स्त्री वनोद्भवा कार्पासी । (वनकापास) क्षुपभेदे रत्नमा० ।

वनकोलि पु० वनोद्भवः कोलिः । (वनकुल) वृक्षे ।

वनचन्दन न० वनजातं चन्दनम् शा० क० । १रक्तचन्दने २देवदारुणि च विश्वः ।

वनचन्द्रिका स्त्री वने चन्द्रिकेव । मल्लिकायाम् राजनि०

वनचम्पक पु० ७त० । (वनचाँपा) चम्पकभेदे राजनि० ।

वनच्छाग पु० वने जातश्छागः । (वनछागल) १छागभेदे राजनि० । वने छाग इव । २शूकरे पुंस्त्री० शब्दमा० स्त्रियां ङीष् ।

वनज न० वने जलेऽरण्ये वा जायते जन–ड । १पद्मे २मुस्तकभेदे ३वनसूरणे पु० राजनि० ४गजे विश्वः । ५अश्वगन्धायां ६गन्धपत्त्रायां ७वनकार्पासां ८वनोपोदक्यां ९मिश्रेयायां १०ऐन्द्रे स्त्री राजनि० ११मुद्गपर्ण्यां च स्त्री मेदि० । १२वनजातमात्रे त्रि० ।

वनतिक्त पु० वनेषु वनजातेषु मध्ये तिक्तः । १कुरीतक्याम् शब्दमा० । २पाठायां (आकनादि) च स्त्री रत्नमा० । स्वार्थे क तत्रैव अमरः ।

वनदीप पु० वनस्य दीप इव । वनचम्पके राजनि० ।

वनपल्लव पु० वनमिव निबिड़ पल्लवोऽस्य । शोभाञ्जने जटा० ।

वनपुष्पा स्त्री वनमिव संहतं पुष्पं यस्याः । शतपुष्पायाम् राजनि० । [पूरकः । वनबीजपूरके राजनि० ।

वनपूरक पु० पूरकः बीजपूरकः पूर्वपदलोपः वनोद्भवः

वनप्रिय पुं स्त्री० वनं वनस्थं प्रीणाति प्री–क । १कोकिले स्त्री मेदि० स्त्रियां योषधत्वात् टाप् २अरण्यप्रियमात्रे त्रि० । ३तक्के न० राजनि० ।

वनभुज पु० वनं भुङ्क्ते भुज–क्विप् । १ऋषभे २तद्गामौषधे शब्दच० । [अमरः ।

वनमल्लिका स्त्री वनोद्भवा मल्लिका । दंशे कीटभेदे (डाँश)

वनमल्ली स्त्री वनोद्भवा मल्ली । अरण्यमल्लिकायाम् शब्दर० ।

वनमाला स्त्री "आजानुलम्बिनी माला सर्वर्तुकुसुमोज्ज्वला । मध्ये स्थूलकदम्बाद्या वनमालेति कीर्त्तिता" इत्युक्तायां मालायाम् ।

वनमालिन् पु० वनमालाऽस्त्यस्य इनि । १श्रीकृष्णे अमरः २वाराहीलतायाम् स्त्री मेदि० ङीष् ३द्वारकापुर्यां स्त्री त्रिका० । [४मुद्गपर्ण्यां स्त्री राजनि० गौरा० ङीष् ।

वनमुद्ग पु० वनोद्भवः मुद्गः । १मुद्गभेदे (सुगानि) अमरः ।

वनमूर्द्धजा स्त्री वनस्य मूर्द्धजं शृङ्गमिवास्त्यस्याः अच् । (काकड़ाशिङ्गी) कर्कटशृङ्गाम् राजनि० ।

वनमोचा स्त्री वनोद्भवा मोचा । काष्ठकदल्याम् राजनि०

वनलक्ष्मी स्त्री वनस्य लक्ष्मीरिव तदधिष्ठानत्वात्। कदल्याम् राजनि०। [राजनि०।

वनवर्वर पु० वनोद्भवः वर्वरः। कृष्णार्जके। (वनवाइ) इति

वनवासिन् पु० वनं वासयति स्वरीकरोति वासि-णिनि। १शुष्ककक्षत्वे २वाराहीकन्दे ३शालमलीकन्दे ४नीलझण्टिकन्दे ५क्षुद्रमुस्तामौषधे च राजनि०। वने वसति वस-णिनि। ६वनवासकर्त्तरि त्रि० स्त्रियां ङीप्।

वनबीज पु० बीजो बीजपूरकः उत्तरपदलोपः ७त०। वनबीजपूरे राजनि०। [राजनि०।

वनवृन्ताकी स्त्री वनस्य वृन्ताकी वार्त्ताकी। वृहत्याम्

वनव्रीहि पु० वनस्य व्रीहिः। नीवारे (उड़िधान) हेमच०।

वनशूकरी स्त्री वनस्य शूकरीव रोमशत्वात्। १कपिकच्छ्वाम् राजनि०। ७त०। २वनवराहे पु०२वनशूकरयोषिति स्त्री।

वनशृङ्गाट पु० वनस्य शृङ्गाट इव कण्टकाद्यतत्वात्। गोक्षुरे अमरः। स्वार्थे क। तत्रैवार्थे। [शब्दच०।

वनशोभन न० वनं जलं शोभयति शुभ-णिच् ल्यु। पद्मे

वनसङ्कट पु० सम्+कट-अच् ६त०। मरुरे शब्दच०।

वनसरोजिनी स्त्री वनस्य सरोजिनी पद्मिनीव शोभाकरत्वात्। वनकार्पास्याम् शब्दर०।

वनस्पति पु० वनस्य पतिः नि० षट्। पुष्पं विना जायमानफले १अश्वत्थादौ वृक्षे अमरः। २वृक्षमात्रे मेदि०।

वनहास पु० वनस्य हास इव प्रकाशकत्वात्। कासतृणे राजनि०।

वनाखु पु० वने आखुरिव। मूषके त्रिका०।

वनाखुक पु० अव+नख-उकञ् अवाक्षोपः। मुद्गे त्रिका०।

वनाट पु० वनमटति अट-उन्। १वर्बरायां नीलझिण्टिकायाञ्च शब्दच०। २अपानदेशे उज्ज्व०।

वनामल पु० वनस्यामल आमलक इव। करमर्दे शब्दमा०।

वनाम्र पु० वनस्य आम्र इव। कोशाम्बे राजनि०।

वनायु पु० वन-आयुच्। प्रथमघोटकोद्भवदेशभेदे (आरब) राजनि०। [(आरवि) शब्दर०।

वनायुज पु० वनायुदेशे जायते जन-ड। प्रथमघोटके

वनारिष्टा स्त्री वनस्य न रिष्टं यस्याः। वनहरिद्रायाम् राजनि०। [गुडूचीलतायाम् हारा०।

वनालिका स्त्री वनमलति भूषयति अल-एवुल्। कृष्णिवनि पु० वन-इनि। १अन्नौ त्रि०कौ० २रागौ उज्ज्वल०। ३याचने पु० ४याचके त्रि०। [रक्तायां स्त्रियाञ्च मेदि०।

वनिता स्त्री वन-याचने कर्मणि क्त०इत्। १योषिति २अनुवनिन् पु०वनमस्त्यस्य इनि। वानप्रस्थाश्रमयुक्ते

वनिष्णु त्रि० वन-इष्णुच्। याचके।

वनीपक वनीयक+पृषो० यस्य पः। याचके उज्ज्वल०।

"जपन्नेव नवनीपकोपसेवितपर्वतः श्लेषात्" पमध्यता च

वनीयक स्त्री वन-इनि आत्मनो वनिं याचनमिच्छति क्यच् ण्वुल्। याचके अमरः पृषो० यलोपः। वनीकोऽप्यत्र सारसुन्दरी।

वनेक्षुद्रा स्त्री ७त० अलुक्स०। करञ्जे रत्नमा०।

वनेचर त्रि० वने चरति चर-ट अलुक्स०। आरण्यचारिणि व्याधादौ स्त्रियां ङीप्।

वनेसर्ज पु० सृजति-सृज-अच् ७त० अलुक्स०। असनवृक्षे रत्नमा०। [कार्पास्याम् रत्नमा० २वनजाते त्रि०।

वनोद्भवा स्त्री वन एव उद्भवति उद्+भू-अच् ७त०। १वनवनौकस् पु० वनमेव ओकः स्थानं यस्य। १वानरे अमरः। २वनवासिनि त्रि०।

वन्च प्रतारणे भ्वा०पर०सक०सेट् क्वा वेट्। वञ्चति अवञ्चीत्

वन्दन न० वदि-ल्युट्। १स्तवने २प्रणामे च। युच्। वन्दनाध्यक्ष स्त्री। १वदने न० शब्दच०।

वन्दनीय त्रि० वदि-अनीयर्। १नमनीये २स्तवनीये च १पीतभृङ्गराजे पु०राजनि०।४गोरोचनायां स्त्री त्रिका०।

वन्दा स्त्री वदि-कर्मणि घञ्। (परगाछा) लतामेदे अमरः २भिक्षुक्यां २लतामेदे च मेदि०।

वन्दाका स्त्री वदि-आकन्। वन्दायाम् वृद्धच०। गौरा० ङीप् तत्रार्थे स्त्री शब्दर०। तत्रार्थे पु० भावप्र० "वन्दाकः स्यात्त्रिदोषघ्नः कषायो मधुरो रसे। मलकृच्छ्रः कफवातासरचोन्मणविषापहः"।

वन्दारु त्रि० वदि-आरु। वन्दनशीले शब्दर०।

वन्दि(न्दी) स्त्री वदि-इन् वा ङीप्। १कारावन्धनमनुष्यादौ (कएदी) शब्दर० २वन्दने २स्तुतौ च। ३सोपानके उणा०।

वन्दिग्राह पु० वन्दिभिः-गृह्णाति ग्रह-अ। बलात्कारेण घातके (डाकाइत) भिता०। "वन्दिग्राहांस्तथा वाणिजकुक्षराणां च हारिणः" मनुः।

वन्दिपाठ पु० इत०। स्तुतिव्यग्रे त्रिका०।

वन्दिन् पु० वन्दते स्तौति वदि-णिनि। राजादेः १स्तुतिपाठके अमरः। [भावप्र० २वन्दायां शब्दच०।

वन्द्य त्रि० वदि यत्। १वन्दनीये। २गोरोचनायाम् स्त्री

वन्द्र न० वन्द्-रन्। कल्याणे त्रि०कौ०।२पूजके त्रि०अजादि०

वन्य न० वने भवः यत्। १लवणे (दारचिनि) राजनि०।

२वनस्थूरणे २वाराहीकन्दे ४देवनले पु०राजनि०। ५वन-जातमात्रे त्रि०। ६सुहृत्पर्य्यां ७गोपालकर्कट्यां ८यु-ङ्खायां ९मिश्रेयायां १०भद्रमुस्तायां ११गन्धपत्रायां स्त्री राजनि०। वनानामरण्यानां जलानां वा समूहः यत्। १२जलसमूहे १३वनसमूहे च स्त्री मेदि०।

वेप बीजवपने तन्तुवयने सुखडने च सक० स्वा० उभ० अनिट् यजा०। वपति ते अवाप्सीत् अवप्त अवाप जपतुः। क्विप् उप्तिमः। पित्रादिपिण्डदाने "पिण्डनिर्वपनं चरेत्" स्मृतिः।

वपन न० वप-ल्युट्। १केशसुण्डने २बीजाधाने ३तन्त्वा-धाने च मेदि०। "प्रयामे भास्करक्षेत्रे पितृमातृ-वियोगतः। आधाने सोमपाने च वपनं पञ्चसु स्मृतम्" प्रा० त०।

वपनी स्त्री वप्यतेऽनया अत्र वा वप-ल्युट् ङीप्। १मापि-तास्त्रे २तन्तुशालायां (तान्तघर) हेमच० ३तन्तुवयन-यन्त्रभेदे (माकु) च।

वपा स्त्री वप-अच्। १मेदसि (चरबि) "वपाया हविषः" इति श्रुतिः। २श्रिक्वे च अमरः।

वपुन पु० वप-उनच्। देवतायां शब्दर०।

वपुषा स्त्री वप-वा उषन्। हवुषायाम् भावप्र०।

वपुष्टमा स्त्री अतिशयेन वपुः प्रशस्ताकृतिः तमप् डत्वम्। १पद्मचारिण्याम् लतायाम् जटा०। २काशीपतिकन्यायां ३जनमेजयपत्न्यां च।

वपुस् न० उप्यन्ते देहान्तरभोगसाधनबीजीभूतानि कर्माण्यत्र वप-उसि। १शरीरे अमरः। २प्रशस्ताकारे च मेदि०।

वप्त पु० वप-तृच्। १जनके २क्षौरकारे च मेदि० ३बीजादि-वापके त्रि०।

वप्र पुंन० उप्यतेऽत्र रन्। १दुर्गनगरादौ परिखाया उद्धृत-मृत्तिकास्तूपे अमरः। २क्षेत्रे ३रेखौ ४तटे मेदि०। ५सीसके न० हेमच०। ६जनके ७प्राचीरे पु० विश्वः। ८प्रजापतौ च पु० संक्षिप्तसा०। ९मस्तिष्कायां स्त्री राजनि०। [१०सस्ये च संक्षिप्तसा०।

वप्रि पु० वप-रि १क्षेत्रे केदारे त्रि० कौ०। २दुर्गतौ

वम्म गतौ भ्वा० पर० सक० सेट्। वम्मति अवम्मीत्।

वम्म उद्गारे भ्वा०पर० सक० सेट्। वमति अवमीत्। क्विप् वमथुः। ज्वला० वमः वामः। वमयति वामयति उप-ह्वस्य निलं क्षुखः। कण्ड्वा० वेमतुः वक्मतुः। उदित् वमित्वा वान्त्वा वान्तः।

वमथु पु० वम-अथुच्। वमने उद्गिरणे अमरकोषः।

वमन न० वम ल्युट्। १मर्दने २छर्दने मेदि० ३आङ्क्तौ त्रिः ४निःसारणे च "स्वर्गाभिध्यन्त्ववमनम्" कुमारः। ५ऊ पु०। ६जलौकायां स्त्री राजनि० गौरा० ङीष्।

वमि स्त्री वम-इन्। १छर्दौ छर्दिशब्दे २६८० पृ० कथितम्। २अग्नौ पु० मेदि० ३धूर्त्ते त्रि० शब्दर०।

वमित पु० वम-णिच्-क्त। क्षतोद्गारे। [वि(ह्वे)त्रम्।

वय गतौ भ्वा० आ० सक० सेट्। वयते अवयिष्ट। अव-

वयस् न० अज-असुन् वीभावः। १विहगे २बाल्याद्यवस्था-यां अमरः "वसोऽतिपातोऽहतवातेति" नैष०। ३यौवने च त्रिकः।

वयं(यः)स्थ पुंस्त्री० वयसि यौवने तिष्ठति स्था-क खपरे शरि वा विसर्गलोपः। १तरुणे २विभीतक्यां स्त्री अमरः। "वयस्था नागरा रक्ष्यात्" वैद्यकम्। ३आमलक्यां ४हरी-तक्यां ५सोमवल्क्यां स्त्री अमरः। ६गुडूच्यां ७सूक्ष्मैलायां टकाकोल्याम् ८आलौ स्त्री मेदि०। १०शालमलौ स्त्री हेमच०। ११क्षीरकाकोल्याम् भावप्र० १२अत्यल्पपर्व्वणि मत्स्याख्यां १३युवतौ च स्त्री राजनि०।

वयस्य पु० वयसा तुल्यः यत्। १समानवयस्के अमरः। २सख्यं स्त्री अमरः।

वयुन न० वय-उनन्। १ज्ञाने भाग० १०।८० श्रीधरः। २देवागारे त्रिका०। देवागारे पु० उणादि०।

वयोधस् पु० वयो यौवनं धत्ते धा-असुन्। तरुणे उणा०।

वयोरङ्ग न० वयसा रङ्गमिव। सीसके राजनि०।

वर ईप्से अद० चु०उभ०सक०सेट्। वरयति ते अवरत् त।

वर न०त्रियते इ-कर्मणि अप्, वरि-अच् वा। १कुङ्कुमे २मना-गभीष्टे अमरः "वरं प्राणान् परित्यज्य" इति तन्त्रम्। भावे अप् अच् वा। ३इच्छायाम् ४याचने ५आवरणे ६वेष्टने च। इ-कर्मणि अप्। ७अभीष्टे ८श्रेष्ठे च त्रि० अमरः। ९जारे १०जामातरि शब्दर० ११गुग्गुलौ शब्दच० १२पत्यौ च पु० हेमच०। "तपोभिरिप्यते यस्तु देवैस्त्व वरोमतः" इत्युक्ते १३दार्ढ्ये।

वरक पु० इ-वुन्। १वनसुद्गे हेमच० २पर्पटे ३तत्स्थ-धान्यभेदे (चीना) च राजनि०। ४पोताच्छादनवस्त्रे न० हारा०।

वरचन्दन न० कर्म०। १कालीये २देवदारुणि च मेदि०।

वरट न० इ-अटन्। १कुन्दपुष्पे शब्दर०। २कीटभेदे (बोलता) ३हंसे पुंस्त्री०मेदि०। स्त्रियाम् अजादि० टाप् अमरः।

ङीष् मेदि० । ४कुलभ्रमीजे भावप्र० । सा च ५गन्धोल्यां मेदि० ।

वरण न० वृ-ल्युट् । कन्यादिदानाय जामात्रादेरभ्यर्थनानुकूले १व्यापारभेदे २वेष्टने मेदि० । ऋत्विगादेः क्रियायां नियोगाय ३पूजनादौ ५वृद्धे पुंस्त्री० धारा० । ६प्राकारे ७वरणवृक्षे च । (बाँको) ख्याते ८पदार्थे च ९काशीस्थे नदीभेदे स्त्री शब्दर० । वरणशब्दे दृश्यम् ।

वरण्ड पु० वृ-अण्डच् (वयसक्रोड़ा) १सुकुरोलभेदे मात्रङ्युद्धार्थे २मध्यवेदौ च मेदि० ।

वरण्डक पुंन० वृ-अण्डच् संज्ञायां क । १वरण्डशब्दार्थे २वर्तके मेदि० । ३भित्तौ हेमच० । ४विशाले ५कृपणे ६भीते च त्रि० शब्दर० ।

वरण्डालु पु० वरण्ड इवालुः । वरण्डवृक्षे त्रिका० ।

वरतिक्त पु० वरः श्रेष्ठस्तिक्तो रसो यस्य । कुटजवृक्षे राजनि० । २पाठायाम् (आकनादि) स्त्री राजनि० स्वार्थे क तत्रैव ।

वरत्रा स्त्री वृ-अत्रच् । वृक्षिकबध्यरज्जौ अमरः ।

वरत्वच पु० वरा त्वचा यस्य । १निम्बवृक्षे रत्नमा० । २श्रेष्ठत्वगायुते त्रि० ।

वरद त्रि० वरं ददाति दा-क । १अभीष्टदातरि अमरः । २प्रसन्ने च मेदि० ३तन्त्रिक्तचक्रे दक्षादिविद्याभेदे सुदाभेदे न० "अभयं वरदश्चैव" व्याख्यानम् । ४कन्यायाम् स्त्री मेदि० । ५अश्वगन्धायाम् स्त्री भावप्र० ६आदित्यभक्तायां स्त्री राजनि० ७दुर्गायाञ्च स्त्री ।

वरदाचतुर्थी स्त्री माघशुक्लचतुर्थ्याम् । तामधिकृत्य "चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता" तिथितत्त्व भविष्यपु० ।

वरदातृ पु० दा-तृच् हृत० । भूमीशवृक्षे राजनि० ।

वरपर्ण पु० वराणि पर्णान्यस्य । क्षीरकाकोलीवृक्षे रत्नमा० ।

वरप्रदा स्त्री वरं प्रददाति दा-क । लोपामुद्रायां हेमच० । २वरप्रदातरि त्रि० ।

वरफल पु० वरं फलमस्य । १नारिकेले वृक्षे शब्दच० । कर्म० । २श्रेष्ठे फले न० । [वृक्षे शब्दच० ।

वरमुखी स्त्री वरं मुखं यस्याः ङीष् । रेणुकानामगन्ध-

वरम् अव्य० वृ-असुन् । श्रेष्ठमीष्टे मेदि० ।

वरम्वरा स्त्री वरं वृणोति वृ-खच् मुम् । (चाकुड़िया) १चेक्रपर्ण्याम् शब्दच० । २पतिम्वरायां कन्यायाञ्च ।

वरयुचि त्रि वरा रुचिर्यस्य । १श्रेष्ठप्रीतियुते । २पाणिनिकात्यायनवार्त्तिककारे कात्यायनसूनौ स्त्रिका० । ३विक्रमादित्यसभास्थे पण्डितभेदे पु । नवरत्नशब्दे १६६२पृ०दृश्यम् ।

वरल पु० वृ-अलच् । १वरटे त्रिका० २कीटभेदे शब्दमा० स्त्रियां गौरा० ङीष् वरटायां स्त्री जटा० अजा० टाप् ।

वरलक्ष्म पु० वरः उत्कर्षः पुष्पेषु लक्ष्म यस्य बहुव्री० । १चम्पके त्रिका० २प्राप्तवरे त्रि० ।

वरवर्णिनी स्त्री वरः श्रेष्ठो वर्णः प्रशंसाऽस्त्यस्याः इनि । उत्तमस्त्रियाम् अमरः । २लाक्षायां ३हरिद्रायां ४रोचनायां ५कलिन्द्यां ६सारिवायां स्त्रियां मेदि० । ७गौर्याञ्च दक्षकन्यायां ८पार्वत्यां च शब्दर० ।

वरवाल्लीक न० कर्म० । कुङ्कुमे अमरः ।

वरा स्त्री वृ-अच् । हरितक्यामलकीवयस्यारूपे फलविशेषे मेदि० । २रेणुकानामगन्धद्रव्ये शब्दच० । ३शुक्लायाम् ४मेदायां ५ब्राह्म्याम् ६विदङ्गे ७पाठायाम् ८हरिद्रायाञ्च राजनि० ।

वराक पु० वृ-आकन् । १शिवे मेदि० । २युद्धे न० हेमच० । ३अवरे त्रि० शब्दर० । ४शोचनीये च त्रि० मेदि० स्त्रियां ङीष् ।

वराङ्ग न० कर्म० । १मस्तके । व्रियते आश्रियते गुप्यते वृ-अप् । २गुह्ये अमरः । ३योनौ ४गुदत्वचि च त्रिका० । ५गजे पुंस्त्री० त्रिका० स्त्रियां ङीष् ६विष्णौ विष्णुस० । ७कामदेवे च पु० । उत्तमावयवयुक्ते त्रि० । हरिद्रायाम् स्त्री राजनि० । गौरा० ङीष् । संज्ञायां कन् । गुदत्वचि (दारचिनि) न० अमरः ।

वराङ्गिन् पु० वराङ्गमस्त्यस्या इनि । १अश्वत्थवृक्षे रत्नमा० । २श्रेष्ठाङ्गयुते त्रि० स्त्रियां ङीप् ।

वराट पु० वृ-मलमटति अट-अच् । १कपर्दे राजनि० । २रज्जौ च पु० रत्नको० । स्वार्थे क । तत्रार्थे "वराटकानां दशकद्वयं यत्" लीला० अट-एबुल् । वराटक यज्ञवीजाधारे कोषे पु० अमरः । [शब्दमा० ।

वराटकरजस् पु० वराटकस्येव रजोऽस्य । नागकेशरे वृक्षे

वराण पु० वृ-आनच् । १इन्द्रे त्रिका० । २वरुणवृक्षे शब्दर० ।

वरादन न० वरैर्न्नं पेरद्यते अद-ल्युट् । राजादने (पियाशाल) शब्दच० ।

वरास्त्र पु० वरः श्रेष्ठ इव । करमर्दे रत्नमा० ।

वरारोह पु० वर आरोहो मध्यं यस्य । १हरिणि त्रिका० २प्रशस्तनितम्बवत्यां स्त्रियां स्त्री अमरः ।

वरालिका स्त्री वरानामालिर्यस्यां कप् । दुर्नायां त्रिका० ।

वरावि पु० वरमावरणमश्नुते अश्न-इन् । स्थूलवृक्षे अमरः ।

वरासन न० वराय वरणीयायास्यते क्षिप्यते अस्य-ल्युट्। १जवापुष्पे शब्दमा०। कर्म०। २उत्तमे आसने न०। वरं पतिमस्यति अस-ल्यु। ३शिवे जारे पु०। वरान् श्रेष्ठानपि अस्यति दूरीकरोति ल्यु। ४द्वारपाले च पु० विश्वः। [२खड्गधरे च धरणिः।

वरासि पु० वराय वरणीयायास्यते अस-इन्। १स्थूलवस्त्रे

वराह पुंस्त्री० वराय अभीष्टाय सुखादिलाभाय आहन्ति खनति भूमिम् आ+हन-ड। १शूकरे अमरः स्त्रियां ङीष्। २यज्ञवराहाख्ये भगवतोऽवतारभेदे पु० ३पर्वतभेदे ४सुस्तके ५मानभेदे मेदि०। ६त्रिशुमारे ७वाराहीकन्दे पु० राजनि० ८अष्टादशद्वीपमध्ये द्वीपभेदे च।

"गन्धर्वो वरुणः सौम्यो वराहः कद्रु एव च। कुसुदश्च कसेरुश्च नामो भद्रारकस्तथा। चन्द्रेन्द्र मलयाः शङ्ख यवाङ्गक भस्तिमान्। ताम्राङ्गश्च कुमारी च तत्र द्वीपा दशाष्टभिः" शब्दमा०।

वराहकन्द पु० वराहप्रियः कन्दः मा०त०। खनामख्याते वृक्षभेदे राजनि०। [शब्दर०।

वराहकान्ता स्त्री वराहाणां कान्ताऽभीष्टा। वराहकन्दे

वराहक्रान्ता स्त्री वराहेण क्रान्तेव। १वृक्षाङ्गुलतायाम् शब्दच०। २वाराह्यां (वाराहकन्दे) सुभूतिः।

वराहिका स्त्री वराहो भक्षकत्वेनास्त्यस्याः ठन्। कपिकच्छूम् राजनि०।

वाराही स्त्री वराहो भक्षकत्वेनास्त्यस्या अण् गौरा० ङीष्। १भद्रमुस्तायाम् २वराहकन्दे च राजनि०।

वरिवस् न० वृ+वसुन् कुट् च। १पूजने २धने च निघण्टुः।

वरिवसि(स्य)त नि० वरिवः पूजनं करोति क्यच्-क्त वा वलोपः। पूजिते अमरः। [२शुश्रूषायाम् अमरः।

वरिवस्या स्त्री वरिवस्+क्रत्यर्थे क्यच्-भावे अ। १पूजने

वरिष्ठ नि० अतिशयेन उरुः वृद्धन् वरादेशः। १उरुतमे २तित्तिरिविशेषे पुंस्त्री० स्त्रियां ङीष् ३नागरङ्गवृक्षे पु०राजनि०। ४ताम्रे न० अमरः। ५मरिचे न० मेदि० ६वृत्ते अजयः। ७आदित्यभक्तायां स्त्री राजनि०।

वरी स्त्री वरी शतावरी पूर्वपदलोपः। १शतावर्याम् अमरः २स्वर्यपत्न्याञ्च त्रिका०।

वरीयस् नि० अतिशयेन उरुः श्रेष्ठः ईयसुन् वरादेशः। १उरुतमे विष्कम्भादिषु मध्ये २अष्टादशे योगभेदे पु० स्त्री०त०। [३धने अमरः।

वरी(ली)वर्द्ध पु० वृध-वर्द्ध-नुक् अच् पृषो० रस्य वा लः।

वरुट पुंस्त्री० म्लेच्छजातिविशेषे स्त्रियां ङीष्। "पुलिन्द्रा नाहला निष्ठाः शबरा वरुटा भटाः। मालाः भिल्लाः किरातास्च सर्वेऽपि म्लेच्छजातयः" हेमच०।

वरुड पु० वृ-उडन्। अन्त्यजजातिभेदे स्त्रियां ङीष्। "रजकश्चर्मकारश्च नटोवरुड एव च" मनुः।

वरुण पु० वृ-उनन्। पश्चिमाशाधिपतौ १जलेशे खनामख्याते देवभेदे अमरः। २जले मेदि०३सूर्ये च विश्वः। ४द्वीपभेदे वराहशब्दे दृश्यम्। ६वाशीख्ये नदीभेदे स्त्री। काशीस्थनदीभेदस्तोत्रपद्धत्यादिकं वामनपु० १३अ० उक्तं यथा "प्रयागे वसते नित्यं योगयायी च विश्रुतः। वरणाद्वरिणात्तस्य विनियोता सरिद्वरा। विश्रुता वर(र)णेत्येवं सर्वपापहरा शुभा। सङ्गात् पादात् द्वितीया च असिरित्येव विश्रुता। ते उभे च सरित्श्रेष्ठे लोकपूज्ये बभूवतुः। तयोर्मध्ये तु यो देशस्तत्क्षेत्रं योगयायिनः। त्रैलोक्यप्रभवं तीर्थं सर्वपापप्रमोचनम्। न तादृशोऽस्ति गगने न भूम्यां न रसातले। तत्रास्ति नगरी पुण्या ख्याता वाराणसी शुभा"।

७खनामख्यातवृक्षभेदे पु०अमरः "वरुणः पित्तलो भेदी श्लेष्मवातहरो गुरुः। निहन्ति गुल्मवातास्र क्रिमीन्योष्णोऽग्निदीपनः। कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः" भावप्र०।

वरुणात्मजा स्त्री वरुणस्य जलस्वामित्वेन तत्सम्बन्धात्। जलभवे मद्ये अमरः। [पत्न्याम् अटा०।

वरुणानी स्त्री वरुणस्य पत्नी ङीष् आनुक् च। वरुण-

वरुत्र न० वृ-उत्र। उत्तरीयवस्त्रे सि० कौ०

वरुथ न० वृ-उथन्। तनुत्राणे हेमच० २वर्मणि मेदि०। ३स्वगुप्तिस्थाने परप्रहाररक्षार्थमाहते स्थाने पु०अमरः।

वरूथिनी स्त्री वरूथोऽस्त्यस्याः इनि। सेनायाम् अमरः।

वरेण्य न० वृ-एन्य। १कुङ्कुमे राजनि० २प्रधाने ३प्रार्थनीये च त्रि० अमरः। [वारेन्द्र विप्रभेदे।

वरेन्द्री स्त्री गौड़देशे त्रिका०। वाभिजनोऽस्य अण्।

वरोट न० वराण्युटानि दलान्यस्य। अरुवकपुष्पे अमरः।

वरोल पुंस्त्री०वृ-ओल। वरटे कीटभेदे त्रिका०। स्त्रियां ङीष्

वर्कर पु० वृक-अरन्। १तरुणपशौ अमरः २मेषशावके भरतः। ३छागलाले पुंस्त्री०स्त्रियां ङीष् ४परिहासे मेदि०

वर्ग पु० वृज-घञ्। १सजातीयसमूहे अमरः। यथा मनुष्यवर्गः पशुवर्गः। समानधर्मभिः प्राज्ञप्राणिभिः कृते २संज्ञे च यथा कवर्गः चवर्गः। अत्र वर्णसमूहादिना

विजातीयत्वेऽपि स्थानसाम्यमस्ति । ३अन्यपरिच्छेदे यथा स्वर्गवर्गः पातालवर्गः । ४अङ्कशास्त्रोक्ते समानाङ्कद्वयस्य परस्परगुणने यथा द्विकस्य चत्वारि, त्रिकस्य नव, चतुष्कस्य षोड़श इत्यादि । "स्याद्योऽन्यवर्गः" "वर्गं मूलं पदं कृतिम्" इति च लीला० । वृज-घञ् ।५त्यागे । अन्यपरिच्छेदाश्च बहुविधाः यथा "सर्गोवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः । उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम् । स्थानं प्रकरणं पर्वाह्निकञ्च व्यवसन्वयः" त्रिका० ।

वर्गप्रकृति बीजगणितोक्ते गणनाप्रकारभेदे तत्र दृश्यम् ।

वर्गमूल न० वर्गस्य समद्विघाताात्मकखण्डतेः मूलम् । अङ्कशास्त्रप्रसिद्धं समाङ्कद्वयेन कृताङ्कसङ्ख्यायाः यन्मूलं घातसाधनं तत्र । यथा षोड़शानां चत्वारि नवानां त्रयः चतुर्णां द्वौ इत्यादि ।

वर्गोत्तम पु० वर्गेषु षट्सु क्षेत्रादिषु उत्तमः नवांशः । "चराणां प्रथमे चांशे स्थिराणां पञ्चमे तथा । द्व्यात्मकानाञ्च नवमे वर्गोत्तम इति स्मृतः" इति ज्योतिषोक्ते त्रिंशांशकात्मकराशेर्नवांशभेदे ।

वर्च दीप्तौ भ्वा० आत्म० अक० सेट् । वर्चते अवर्चिष्ट ।

वर्चस् न० वर्च-असुन् । १रूपे २शुक्रे ३तेजसि ४विष्ठायाञ्च मेदि० ।५चन्द्रपुत्रे पु० "रोहिण्यामभवद्बुधो वर्चसो येन चन्द्रमा" वह्निपु० । स्वार्थे क । विष्ठायाम् अमरः ।

वर्चस्विन् त्रि० वर्चस्+अस्त्यर्थे विनि । तेजस्विनि स्त्रियां ङीप् ।

वर्जन न० वृज-ल्युट् । १त्यागे २हिंसायां च ३सारणे मेदि०

वर्ष स्तुतौ विस्तारे शुक्लादिवर्णकरणे उद्योगे दीपने च अदु० चु० उभ० सक० सेट । वर्णयति ते अववर्णत् त ।

वर्ष वर्णने चु० उभ० सक० सेट् । वर्णयति ते अववर्णत् त ।

वर्ण न० वर्ण-अच् ।१कुङ्कुमे न० २स्वर्णे ३व्रते ४शुक्लादिरूपे ५अकारादावक्षरे ६भेदे ७गीतक्रमे ८चित्रे ९तालभेदे १०अङ्गरागे पु० हेमच० । ११गजचित्रकम्बले पु० अमरः १२यशसि १३गुणे १४स्तुतौ पु०मेदि० । भेदे रूपे अक्षरे पु० न० मेदि० । १५ब्राह्मणादिजातौ पु० अमरः । "चातुर्वर्ण्यं मया सृष्टम्" गीता ।

तत्र विप्रादिवर्णानां सृष्टिः तद्धर्माश्च मनुना उक्ता यथा "लोकानान्तु विवृद्ध्यर्थं मुखबाहूरुपादतः । ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्त्तयत्" । "मुखबाहूरुपज्जानां सृष्टिं कर्माण्यकल्पयत् । अध्यापनमध्ययनं यजनं याजनन्तथा" "ब्राह्मणोऽस्य मुखमासीद्बाहूराजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत" यजु० ३१।११ तेषां ब्राह्मणस्य श्रैष्ठ्ये कारणं मनुनोक्तं यथा "ऊर्द्धनाभेर्मेध्यतरः पुरुषः परिकीर्त्तितः । तस्मान्मेध्यतमं त्वस्य मुखमुक्तं स्वयम्भुवा । उत्तमाङ्गोद्भवात् ज्यैष्ठ्याद् ब्रह्मणश्चैव धारणात् । सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः" वर्णधर्माश्च जातिधर्मशब्दे २१०५पृ० दृश्याः ।

तत्र अक्षररूपवर्णोत्पत्तिक्रमः तद्भेदाश्च शब्दार्थरत्नाभिरुक्ता यथा

"अथ वर्णोत्पत्तिप्रकारस्तावदभिधीयते । चेतनेन ज्ञातार्थविवक्षया तदुबोधकशब्दनिष्पादनाय प्रेरितमन्तःकरणं मूलाधारस्थितमनलं चालयति तच्चालितस्यानलः तत्स्थलस्थानिलचालनाय प्रभवति तच्चालितेन चानिलेन तत्रैव सूक्ष्मरूपेणोत्पादितः शब्दः परा वागित्यभिधीयते । ततोनाभिदेशपर्य्यन्तं चलितेन तेन तद्देशसंयोगादुत्पादितः शब्दः पश्यन्तीति व्यवह्रियते एतद्धृदयस्य सूक्ष्मसूक्ष्मतरतया ईश्वरयोगिमात्रगम्यता नाऽस्मदीयस्मृतिगोचरता । ततस्तेनैव हृदयदेशं परिसरता हृदयसंयोगेन निष्पादितः शब्दो मध्यमेत्युच्यते सा च स्वकर्णपिधानेन ध्वन्यात्मकतया सूक्ष्मरूपेण कदाचिदस्माकमपि समधिगम्या । ततो मुखपर्य्यन्तमागच्छता तेन कण्ठदेशं प्राप्य आहत्य मूर्द्धानं तत्प्रतिघातेन परावृत्य च मुखविवरे कण्ठादिषु तत्तदुत्स्थानेषु स्वाभिघातेनोत्पादितः शब्दो वैखरीत्युच्यते । तदुक्तं शिक्षायाम् "आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । सोदीर्णो मूर्द्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णान् जनयते तेषां विभागः पञ्चधा मतः । स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः" इति । संस्कारस्वरूपेण स्वगतानर्थान् बुद्ध्या बुद्धिस्थान् समेत्य विवयीकृत्यर्थः । तथा । "प्राणापानान्तरे देवी वाग्वै नित्यं हि तिष्ठति । स्थानेषु विकृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धिनी । केवलं बुद्ध्युपादानाक्रमरूपानुपातिनी । प्राणवृत्तिमनुक्रम्य मध्यमा वाक् प्रवर्त्तते । अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा । सूक्ष्मज्योतिरेवातः परा वागनपायिनी" इति भारतेऽप्युक्तम् । अत्र प्राणापानान्तरे इत्यधिकरणनिर्देशात्

शब्दाकाशस्थायिता नित्यमित्यभिधानात् यावत्प्रलय-पर्यन्तस्थायिता प्राणापानादेरपि तथैव नित्यत्वाभ्युपगमात्। न तु क्षणिकता मध्ये उत्पत्तिविनाशकल्पने गौरवात् शब्दार्थयोर्नित्यत्वस्वीकारादनित्येन शब्देन नित्यार्थसम्बन्धस्वीकारेऽयुक्तत्वापत्तेश्च। नित्यत्वेऽपि तेषां व्यञ्जकचञ्चलाघाभावाभ्यां प्रत्ययापत्ययावित्यस्य विस्तरः। स्थानेषु कण्ठतालुवादिष्टस्थानेषु वायौ मूलाधारस्थे विवक्षाप्रेरितमनोनियुक्ताग्निर्घातोभाहन्ति इत्यर्थः। ऋतवर्णपरिग्रहो वर्णभावापन्न, तत्र स्थानेष्विति व्यवच्छेदेनान्वितम्। प्राणवृत्तिनिबन्धनीत्यनेन प्राणवृत्तेर्वायोरुत्पत्तेरुपर्यन्तगमनमभिप्रेतं, केवलमित्यनेन कण्ठतालुवादिस्थानानपेक्षाभिप्रेता। बुद्ध्युपादानेत्यनेन हृदयस्थानगमनसूत्रं बुद्धेर्हृदयस्थत्वात्। मरुदित्यनेन हृदयस्थानगमनानपेक्षाभिप्रेता। अविभागेत्यनेन मध्यमाया विभागरूपविशेषस्य वर्णविधानेनाप्रवेशात् पश्यन्त्यास्तु तदुद्भवः। अनपायिनी स्वस्थानादचलिता प्राणापानान्तरे मूलाधारस्थितेति यावत्। अतो यथाप्रदर्शितं परादीनां विभागं प्रतिपादयतीदं महाभारतीयमन्त्रं विस्तरेण। "अभिघातस्थानानि चाष्टविधानि सामान्यतो वेदितव्यानि "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु चेति" शिक्षा ब्रह्मोक्तेः। वर्णाश्च मतभेदेन त्रिषष्टिश्चतुःषष्टिर्वा शिक्षाभिहिता वेदितव्याः। यथा "चतुःषष्टिस्त्रिषष्टिर्वा वर्णाः शम्भुमते मताः। स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः। यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च +कुँपौ चापि परान्वितौ। दुःस्पृष्टस्तेति विज्ञेयो लृकारः प्लुत एव चेति"। अस्यार्थः अ इ उ ऋ ऌ इत्येवं ह्रस्वदीर्घप्लुताः कालभेदा द्वादश भेदाः लृकारस्यैको भेदोऽस्य दीर्घाभावात् प्लुतस्यूत्तरं प्रतिपादितः। एवं चतुर्णां ह्रस्वाभावात् दीर्घप्लुतभेदेनाष्टौ भेदाः इत्येकविंशतिः स्वराः। स्पर्शाः कादयो मावसानाः पञ्चविंशतिः। यादयो ह्यन्ता अष्टौ। यमाः वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये अष्टौ। पूर्वसदृशाः प्रातिशाख्ये प्रसिद्धाश्चत्वारो वर्णाः। यथा यञ्ञिकँङ्क्ती, चञ्चँञ्चतः। अगँन्निः। घतिघँङ्क्षीत्यादौ। अनुस्वारादयश्चत्वारः स्मृताः। +कुँपौ परान्वितावित्युक्तेः कखयोः परयोरेकविधः अपि परान्वितावित्युक्तेः कखयोः परयोरन्यविधः कण्ठ्योष्ठ्यत्वभेदादिति ज्ञापनाय। दुःस्पृष्टः ईषत्स्पृष्टः लृकारः। "ऋचोऽस्पृष्टा यणस्त्रीषन्नेमस्पृष्टाः शलस्तथा" इत्यनेन प्रतिपादितस्य यणादिधेयवरो धर्मस्य ईषत्स्पृष्टस्य लृकारे कथनात् लृकारस्य स्वरत्वयण्त्वोभयधर्मसमावेशात् द्विविधता इति त्रिषष्टिर्भेदाः। लृकारस्य प्लुतत्वे चतुःषष्टिर्भेदाः। एवं वर्णानां सामान्यतो भेदे बोधिते एतेषामुत्पत्तिस्थानानि बाह्याभ्यन्तरप्रयत्नभेदाश्च प्रदर्श्यन्ते। तत्र स्थानानि "हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यन्तं विजानीयात् कण्ठ्यमाहुरसंयुतम्। कण्ठ्यावहाविचुयशाकारलृवर्णा ओष्ठ्यावुपू। मुर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः। जिह्वामूले तु कुः प्रोक्तः दन्त्यौष्ठ्यो वः स्मृतो बुधैः। ए ऐ तु कण्ठ्यतालव्यावोऔ कण्ठ्योष्ठ्यजौ स्मृतौ। अर्द्धमात्रा तु कण्ठ्या स्याद्देकारैकारयोर्भवेत्। ओकारौकारयोस्तद्वदिति"। "अनुस्वार्यमानासु नासिका स्थानमुच्यते। अयोगवाहा विज्ञेया आश्रयस्थानभागिन इति शिक्षालङ्कारानि वेदितव्यानि। यद्यपि सर्वेषां वर्णानामुच्चारणे कण्ठव्यापार आवश्यकस्तथापि चकारादुच्चारणे तालव्यादिव्यापारोऽप्यपेक्षित इति तन्मात्रामात्रकृतत्वेन वर्णानां वैलक्षण्यम्। "जिह्वामूले तु कुः प्रोक्तः" इति पाणिनिशिक्षाभिधानात् कवर्गस्य कण्ठ्यत्वव्यवहारस्तु कण्ठशब्दस्य कण्ठमूलयरतया भाक्त एव तवर्गस्य दन्तमूलीयत्वेन दन्त्यत्ववत् अन्यथा भग्नदन्तस्य तदनुच्चारापत्तेः। जिह्वामूलीयस्य आश्रयस्थानभागित्वेन तदाश्रयस्य कोरपि जिह्वामूलस्थानत्वौचित्यात्। दन्त्योष्ठ्यौ इत्यादावुभयोरेव प्रत्येकं वकारस्थानत्वं न तु समुदितयोः तथा सति दन्तोष्ठ्य इत्येव परिगृह्येत। अतस्तस्य दन्त्यौष्ठ्योभयकार्यनिमित्तता एवमग्रेऽपि दृष्टव्यम्। यमानां प्रातिशाख्यप्रसिद्धानां ङकादिचतुष्टयानां पूर्वादिनां यमसंज्ञाबोधितानाञ्च नासिकापि स्थानमधिकृत्योपदिश्यते। तत्र च यमेत्युपलक्षणम्। "यमोऽनुनासिका नञौ" इत्युक्त्या हकाररेफभिन्नानामशानां नासिका स्थानत्वाभिधानात् नासामनुगतः स्थानत्वेनेत्यनुनासिकशब्दव्युत्पत्त्या नासिकास्थानत्वमाप्नोति। तत्र चेहाधिति पुनः हकाररेफयोः पर्युदासः। "सुखनासिकावचनोऽनुनासिकः" इति पा० सूत्रे सुखपदस्य कण्ठादितत्तत्स्थानपरतया

बाह्यौ प्रयत्नौ विवृतसंवृताभ्यां भिन्नावेव तयोः समीपदूरावस्थानात्कृत्वादिति विवेक्तव्यम्। ते च आभ्यन्तराः प्रयत्नाः केषां वर्णानाङ्के इत्येतत्तावदधीयते। कादिमावसानानां स्पृष्टता अतएव तेषां सम्यक्स्पर्शनत्वेन स्पर्शपदवाच्यता। यणः ईषत् स्पृष्टता। तेषाञ्च स्पृष्टविवृतयोर्मध्यस्थितत्वेन लौकिकव्यवहारेष्वपि शषादीनां वर्ग्याणाञ्च मध्यस्थितत्वेन चान्तःस्थवर्णत्वम्। अन्तःस्थाभिश्च संयुतनियुक्तेरन्तःस्थाशब्दः आदृतः। शषसहानां अघोषत्वञ्च विवृतता। शसहानाञ्च ऊष्मशब्दाभिधेयवायुप्रधानत्वात् ऊष्मशब्दवाच्यता। अघोषत्वञ्च स्वयं राजमानत्वात् उदात्तादिस्वरवत्त्वाच्च स्वराभिधेयता। "अचः स्वयं विराजन्ते" इत्युक्तेः "उदात्तश्चानुदात्तश्च स्वरितश्च स्वराः स्मृताः। ह्रस्वो दीर्घः प्लुतश्चेति कालतो नियमा अपि" त्युक्तेश्च। तत्र ह्रस्वस्य संवृतता। "संवृतं त्वेकमात्रं स्यात् विवृतन्तु द्विमात्रकम्" इत्युक्तेः ह्रस्वस्यैकमात्रतया प्रयोगे संवृतता प्रक्रियायान्तु विवृततैव। तत्र मूलं "अचो स्पृष्टा यणस्त्वीषत् नेमस्पृष्टाः शसस्तथा। शेषाः स्पृष्टा हलः प्रोक्ता" इति शिक्षावाक्यमेव बोध्यम्। अतोऽत्र स्पर्शभावरूपविवृतत्ववन्तः यणः यवरणस्त्वीषत् स्पृष्टा इत्यर्थः नेमदलर्द्धवाची। शलः शषसहा नेमस्पृष्टा अर्द्धस्पृष्टा अर्थादर्द्धविवृताः। "स्वराश्चाष्टमाश्चैव विवृतं करणं स्मृतम्" इत्येकवाक्यत्वात्। एते च स्थानप्रयत्नाः सवर्णसंज्ञायामुपयुक्ताः बाह्यप्रयत्नास्तु आन्तरतम्यपरीक्षायामेवोपयोगिन इति "तुल्यास्यप्रयत्नं सवर्णमिति" पा०सूत्रभाष्यादौ स्पष्टम्। तेन तकारस्थाने विवारश्वासघोषाल्पप्राणरूपबाह्यप्रयत्नसाम्येन चकारटकारादेशः "स्थानेऽन्तरतमः" इति पा०सूत्रभाष्ययोः स्पष्टम्। बहुसमानधर्मत्वमेवान्तरतम्ये हेतुरिति बोध्यम्। "बाह्याःप्रयत्नाश्चाष्टविधाः काकलकाधःस्थलगलबिलसङ्कोचविकाशश्वासोत्पत्तिध्वनिविशेषघोषाल्पघोषप्राणाल्पत्वमहाप्राणत्वरूपकार्यकरा यथाक्रमं विवारसंवारश्वासनादघोषाल्पघोषाल्पप्राणमहाप्राणनामानो भवन्ति। प्रयत्नप्रेरितो वायुर्वर्णानभिव्यञ्जन् यत्तद्विशेषेण गलबिलविकाशादीनपि सम्पादयति अतो गलबिलविकाशादिकरत्वादास्यवच्छिद्रदेशकार्यकरत्वात् चैते बाह्या इति। ते च "खयां यमाः खयः +कँपौ विसर्गः शर एव च। एते श्वासा नुप्रदाना अघोषाश्च विवृत्यते। कण्ठमन्ये तु घोषाः स्युः संवारा नादभागिनः। अयुग्मा वर्गयमगाश्चयश्चा-

यमानासभयस्थानत्वम्। अयोगवाहा विसर्गो जिह्वामूलीयोपध्मानीययोरपि विसर्गविशेषरूपत्वेनाभ्यन्तरस्थानभागित्वम्। आभ्यन्तरस्थानभागित्वञ्च यमाश्रित्यैते उच्चार्यन्ते तत्स्थानभागित्वमतः विसर्गश्च कखयोः परयोर्जिह्वामूलीयोच्चार्यमाणयोराभ्यन्तरेण तत्स्थानभागित्वात् जिह्वामूलीयरूपान्वितनामता सङ्गच्छेया। पफयोः परयोरोष्ठोच्चार्यमाणयोराभ्यन्तरेणोपध्मानीयता। उच्च पश्च आध्मायेते अनेन स्थानेनेति व्युत्पत्तेः उपध्मानशब्द ओष्ठवचनः। तत्स्थानयोग्यत्वादन्वितनामता चावधेया। अतएव "कौभुद्यां जिह्वामूलीयस्य जिह्वामूलसुपध्मानीयस्योष्ठाविति" उक्तम्। यद्यपि सर्वेषां वर्णानामाकाशस्थानत्वं करणत्वञ्च कण्ठादीनां तदुत्पत्तौ युक्तं तथापि तेषां स्थानत्वव्यवहारो वर्णाभिव्यञ्जकतालवादौ वर्णजनकवायुसंयोगाधारे वर्णाधारत्वारोपेण भाक्त एव। तत्तत्स्थानेषु जिह्वाद्यादिसम्बन्धेन वर्णोत्पत्त्या जिह्वाद्यादिस्थिते तत्सम्बन्धजनकप्रयत्नविशेषे आभ्यन्तरप्रयत्नवाच्ये स्पृष्टतादावेव करणत्वव्यवहारः सङ्गच्छितः। वर्णाभिव्यक्त्यनन्तरभाविनस्तु आन्तरतम्यपरीक्षोपयुक्ताः कण्ठविवरविकाशादेराभ्यवच्छिद्यैवच्छिन्नकार्यस्य जनका बाह्या यत्ना गुणशब्देनोच्यन्ते इत्यादिकं शेखरादौ स्पष्टम्। आभ्यन्तरप्रयत्नास्तु वर्णोत्पत्तेः प्राग्भाविनो बाह्यास्तु तदुत्पत्तेः पश्चाद्भाविन इति विवेकः। तथाहि नाभिदेशात् प्रयत्नप्रेरितः प्राणवायुरूर्द्धमागच्छन् उरःप्रभृतीनि स्थानान्याहन्ति ध्वन्यादयति च ततो वर्णान् तदभिव्यञ्जकध्वनींश्च तत्र वर्णोत्पत्तेः प्राक् जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं तालादिकं यदा सम्यक् स्पृशन्ति तदा स्पृष्टता प्रयत्नो यदा ईषत् स्पृशन्ति तथा ईषत्स्पृष्टता समीपावस्थाने संवृतता दूरावस्थाने विवृतता कृत्वेत्याभ्यन्तरप्रयत्नभेदात् वर्णानां भेदाः। अतएव इवर्गयशानां तालव्यत्वाविशेषेऽपि यवर्गोच्चारणे कर्तव्ये तालुस्थानेन सह जिह्वाग्रादीनां सम्यक् स्पर्शः, यकारोच्चारणे तु ईषत् स्पर्शः अकारेकारोच्चारणे दूरसमीपावस्थानमिति। एतेषां चाभ्यन्तरत्वं ओष्ठप्रभृतिकाकलोत्पत्तिककाकलस्थानपर्यन्तरूपाध्यात्मान्तर्गततत्तत्स्थानेषु जिह्वाग्रादीनां स्पर्शादिचतुष्टयरूपाभ्यन्तरकार्यकारित्वात् वर्णोत्पत्त्यव्यवहितप्राग्भावित्वाच्च बोध्यम्। विवारसंवारौ तु गलबिलस्य विकाशाविकाशसङ्कौ

ध्यावयः सूक्ताः" इति सिद्धान्तकौमुद्युक्तदिशावयेयाः। अयं खाजे जाता ये अमाः पूर्वोक्ताः प्रातिपाख्ये प्रसिद्धाः। अयः, अरः अमसञ्ज्ञाः। एते खाजातुप्रदाना खाजोक्ताः कम्बुं विवृण्वते च। अन्ये एतद्भिन्नाः सर्वे वर्णा बोधसंचारनादवाह्यप्रयत्नवन्तः। वर्गीयप्रथमतृतीय-अनुनासिकाः प्रथमतृतीयवर्णसंज्ञातश्च पूर्वोक्ताः अघोष एते अल्पप्राणास्तद्भिन्नाः सर्वे महाप्राणा इति विवेकः।" "तथा उदात्तानुदात्तस्वरितकृप्तिविधाः स्वरा ह्रस्वदीर्घप्लुतकालभेदाच्च स्वराश्च विश्लेषाधाने केनचो देहितव्याः। तथा हि "विसर्गः पञ्चधा मतः" मुनुपक्रम्य "अघोषः कालतः स्थानात् प्रयत्नात्तुप्रदानतः" इति स्वरकालस्थानप्रदत्नात्तुप्रदानाभिधेयवाह्यप्रयत्नात् वर्णविशेषाणां प्रभु द्वारान्यतो निर्दिश्य विसर्गकता उदात्तोदात्तस्वरितेत्यादिना अन्येव स्वरकालयोर्विभाजकधर्माऽभिहिता। तत्र वाल्मादिषु स्थानेषूर्ध्वभागे विसर्गोऽनुदात्तः नीचैरुच्चार्यमाणोऽनुदात्तः प्रथमवर्ण उदात्ततयोच्चार्यमाणः उदात्तः स्वरितः इति "पञ्चोदात्तः नीचैरनुदात्तः समाहारः स्वरितः तस्य आदित उदात्तमर्धं हस्वमिति" पाणिनि-सूत्रभाष्येभ्यः। तद्वेवं परस्परविभाजकस्थानबाह्याभ्यन्तरप्रयत्नस्वरकालभेदविशेषात् वर्णानां परस्परविशेषरूपता। अर्थं हि वर्णैः पुरुषस्यैव चित्तविशेषं विशेषतोभाजो भवन्तीति।"

विशेषोदयोलिनि नक्षत्रविशेषभेदे १६वर्णभूटे ऊधयल-धत्वे वर्णभूटोऽपौ १२४८ पृ० ऊधयत्।

वर्णक न०वर्णयति वर्ण-ण्वुल्। १कुङ्कुमादिके रञ्जनभा०।२अङ्गरागयोग्ये अगरुः कुङ्कुमे वा चन्दनादौ कुङ्कुमे च। पृषिषुलादौ पुंस्त्वेऽपि अमरः। ३अक्षरे अक्षरः। एकस्यैव खलादेः पञ्चाक्षरपञ्चाक्षरादिरूपे ५अन्यभेदे न० "त्रिपञ्चाक्षरे स्त्रीत्वबहुत्वे" त्रिका०। ८चारणे पु०भेदि०।

वर्णकूपिका स्त्री वर्णानामक्षराणां लेखनाय क्षुद्रः कूपः कूपो लेख लत्। अक्षाधारे त्रिका०।

वर्णचारक पु० वर्णं शुक्लादिरूपं चारयति चर-णिच्-ण्वुल्। चित्रकरे शब्दमा०।

वर्णज्येष्ठ पु० वर्णेषु ज्येष्ठः प्रशस्यत्वात्। १प्रशस्ये त्रिप्र०। स्वजातीयेषु २श्रेष्ठवर्णकूटस्थे त्रि०। "वर्ण-ज्येष्ठा च या नारी" स्मृतिः।

वर्णतूलि(ली) स्त्री वर्णानां लेखनसाधनं तूलिः। लेख-न्यासु शब्दर०आर्थं क। अत्रैव [जटा०।२वर्णभेदे त्रि०

वर्णद न० वर्णं ददाति दा-क। १शास्त्रीयके गन्धद्रव्ये।

वर्णदात्री स्त्री वर्णं रूपं ददाति दा-तृच् ङीप्। १हरिद्रायाम् राजनि० २वर्णदातरि त्रि०।

वर्णदूत पु० वर्णो एव दूतो यत्र। शिखी त्रिका०।

वर्णधर्म पुंन० ६त०। विप्रादीनामसाधारणे धर्मे यथा विप्रस्य याजनाध्यापनप्रतिग्रहादिः। क्षत्रियस्य प्रजा-पालनादिः पु० जातिधर्मशब्दे दृश्यम्।

वर्णमाट स्त्री ६त०। वर्णानां मातेव। लेखन्यां हारा०।

वर्णमाटका स्त्री वरुणस्यां शब्दच०।

वर्णमाला स्त्री ६त०। १जातिमात्रायां २अक्षरपङ्क्तौ ३अन्त्यांगकर्णेषु वस्त्रादुवर्णोल्लेखमालाभेदे। अक्षमाला शब्दे ४१पृ० दृश्यम्।

वर्णरेखा स्त्री वर्णानां विलेखनाय लेख-करणे भव् रेख-यः। कठिन्यां (खड़ि) त्रिका०।

वर्णवती स्त्री वर्ण+मतुप् मस्य व। १हरिद्रायां जटा०। २वर्णविशिष्टे त्रि०स्त्रियां ङीप्।

वर्णविलोडक पु० १लोकचौरे २सन्धिचौरे मेदि०

वर्णसङ्कर पु० सम्+कृ-अप् वर्णतः सङ्करः। विप्रादिभ्यो वर्णेभ्योऽनुलोमजाते प्रतिलोमजाते मूर्धावसिक्तादौ मागधादौ च जातिभेदे "जायते वर्णसङ्करः" गीता। जातिशब्दे २०६१ पृष्ठे भेदादिकं दृश्यम्।

वर्णसि पु० वर्ण-असिच्। अन्ने उणादि०।

वर्णा स्त्री प्रशस्तवर्णोऽस्त्यस्याः अर्शआद्यच्। खाढ-क्याम् शब्दच०। [लेखन्यासु शब्दच०।

वर्णाङ्का स्त्री वर्णा अक्षराणि अङ्कान्तेऽनया अङ्कि-अच्। वर्णात्मन् पु० वर्णः आत्मा स्वरूपं यस्य। छन्दोऽक्षरादि-लक्षणे अकाराद्यक्षरे शब्दभेदे जटा०।

वर्णार्ह पु० वर्णं स्तुतिमर्हति अर्ह-अच्। स्तुत्ये राजनि०।

वर्णिका स्त्री वर्णा अक्षराणि लेखनत्वेन सन्त्यस्याः ठन्। १लेखन्याम् २कठिन्यां हारा० ३मस्यां त्रिका०।

वर्णित त्रि० वर्ण-क्त। १स्तुते अमरः २कृतवर्णनेऽन्तरभावादिते च।

वर्णिन् पु० वर्णोऽस्त्यस्य इनि। १चित्रकरे २लेखके ३शङ्खचारिणि मेदि०। "अथाङ्ग वर्णी विहितो महेश्वरः" कुमारः। ४विप्रादिजातौ च "वर्णिनां हि वधो यत्र" स्मृतिः। [हरिद्रायाम् अमरः।

वर्णिनी स्त्री वर्णः अक्षरमस्याः प्रशस्त्ये इनि ङीप्।

वर्त्तु पु० वर्त्त-उनु । १नदभेदे २आदित्ये संक्षिप्त० ।

वर्त्तक पु० वृत-एवुल् । (भाइर) १पक्षिभेदे वर्त्तकाण्डत्व ।
२अश्वस्य क्षुरे च अमरः । ३वर्त्तलोहे न० हेमच० ।

वर्त्तन न० वृत-ल्युट् । १वृत्तौ २स्थितौ अमरः । णिच्-भावे ल्युट् । २स्थापने णिच करणे ल्युट् । ३जीवनोपाये स्त्री ङीप् । ४तक्रपीठे न० मेदि० । ल्यु । ५वृत्तिमति वर्त्तिष्णौ च त्रि० अमरः । ७वामने त्रि० मेदि० । ८साधारणवर्तुले न० शब्दर० ।

वर्त्तनी स्त्री वर्त्यते पादादिक वृत-णिच आधारे ल्युट् । १पथि २लेखने शब्दर० । पृषो० हस्वः पूर्वदेशे त्रिका० ।

वर्त्तमान पु० वृत-शानच् । कालभेदे शब्दप्रयोगाधारे आरब्धापरिसमाप्ते १काले २तत्कालवृत्तौ त्रि० ।

वर्त्तमानकालश्च चतुर्विधः । यथा "प्रवृत्तोपरतश्चैव वृत्तावित्तश्च एव च । नित्यः प्रवृत्तः३ सामीप्यो४ वर्त्तमानश्चतुर्विधः । क्रमेणोदाहरणानि । मांसं न खादति आदौ प्रवृत्तं मांसभोजनं निवर्त्तयतीत्यर्थः । इह कुमाराः क्रीड़न्ति २तदानीन्तनक्रीड़नाभावेऽपि पूर्वक्रीड़नानां बहुत्वे वर्त्तमानत्वात् । पर्वतास्तिष्ठन्ति ३नित्यप्रवृत्तत्वात् । किञ्च पर्वतानां स्थितत्वेन वर्त्तमानत्वेऽपि भूतभविष्यत्कालाभ्यां सम्बन्धविवक्षया पर्वतास्तस्थुः स्थास्यन्ति इत्यपि स्यात् । सामीप्यो४ द्विविधः । भूत सामीप्यो भविष्यत्सामीप्यश्च यथा कदा आगतोऽसि इतिप्रश्ने अध्वखेदादिर्वर्त्तमानत्वात् एषोऽहमागच्छामि इति आगतोऽपि वदति । भविष्यत्सामीप्यो यथा । कदा गमिष्यसि इति प्रश्ने एषोऽहं गच्छामि इति गमने क्रियमाणोद्यमोऽपि वदति" दुर्गादास० ।

वर्त्तरुक पु० १नदीभेदे २काकजीभेदे ३जलावर्त्ते मेदि० । ४द्वारपाले त्रिका० । [आवर्त्तनयोग्ये लौहभेदे ।

वर्त्तलोह न० वर्त्यते वृत-णिच-कर्मणि अच् कर्म० ।

वर्त्ति (र्त्ती) स्त्री वृत-इन् वा ङीप् । १लेखे २नयनाञ्जने ३गात्रानुलेपने ४दीपदशायां ५भिषजां निर्मेयौषधभेदे (वाति) "कतकस्य फलं शङ्खः सैन्धवं त्रपुषं वचा । फेणो दन्ताञ्जनं चौद्रं विड्गानि मनःशिला । एषां वर्त्तिर्हरेन्निशं तिमिरं पटलं तथा" गरुड़पु०१९८अ० । ६दीपे च मेदि० ।

वर्त्तिका पुंस्त्री वृत-तिकन् । (बटेर) १विहगभेदे राजनि० स्त्रियां ङीष् । वर्त्मनि वर्त्तते वृत-अच् वर्त्तः तत्र साधुः स्थितो वा ठन् । (भाइर) २खले अमरः ।
३अञ्जनशलाकायां स्त्री० राजनि० ४दीपदशायां स्त्री सा च पञ्चविधा यथा "पद्मसूत्रभवा दर्भगर्भसूत्रभवाऽथ वा । शाणजा वादरी वापि कनकोत्थोद्भवाथ वा । वर्त्तिका-दीपकर्मेषु सदा पञ्चविधा स्मृता" कालिकापु०६८अ० ।

वर्त्तिन् त्रि० वृत-णिनि । वर्त्तनशीले ।

वर्त्तिष्णु त्रि० वृत-ष्णुच् । वर्त्तनशीले ।

वर्त्तिष्यमाण पु० वृत-शानच् स्युट् सट्वेति स्युट् । भविष्यत्काले । २तद्वृत्तौ त्रि० ।

वर्त्तुल त्रि० वृत-उलच् । १गोलाकारे पदार्थे अमरः । २मुष्कफले न० राजनि० । ३कषायभेदे पु० शब्दमा० । ४तर्कुपीठद्रुमे स्त्री शार० ५गजपिप्पल्यां स्त्री राजनि० ङीप् ।

वर्त्मन् न० वृत-मनिन् । १पथि अमरः २आधारे "आनोर्वर्त्मनः" रघुः ३नेत्रपक्ष्मणि च मेदि० । अक्षिशब्दे ४५१पृ० दृश्यम् । वर्त्मलक्षणं तद्गतरोगभेदाश्च सुश्रुते उक्ता यथा

"ह्याकुलं सर्वतः सार्द्धं भिन्नमञ्जनबुद्बुदम् । वृत्तं गोलनाकारं सर्वभूतगुणोद्भवम् । यत्तं भुग्नोन्नतो रक्तं वातात्कृष्णं स्थितं जलात् । श्लेष्मादश्वेतमांसाभं जायते नेत्रबुद्बुदे । दृष्टिस्थाने तथा वर्त्मे अधोमूर्ध्वं विशारदः । नेत्रायामत्रिभागन्तु लम्बमस्योन्नतं भवेत् । लक्षणात् सप्तमिच्छन्ति दृष्टिं दृष्टिविशारदाः । सप्त-जानि च सन्धींश्च षट्शाखाश्च लोचने । यथाक्रमं विजानीयात् पञ्चसप्त च षड्डश च । पञ्चसप्तसन्धिलक्षण-दृष्टीनां सप्तशाखानि तु । अनुपूर्वन्तु ते मध्यात्सप्तसारी-ऽन्त्या यथोत्तरम् । पञ्चसन्धिगतः कफिवर्त्मं शुक्लगतो-ऽपरः । शुक्लसन्धिगतस्त्वन्यः लग्नदृष्टिगतोऽपरः । मतः कनीनकगतः सप्तसन्धिगतः स्मृतः । ते वर्त्मपटलैः विद्यात्सप्तार्थ्यानि चाक्षिणि । आवृत्ते तिमिरं नेषु व्याधिः परमदारुणः ।"

"पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः । शिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः । विवर्द्धयन्ति मांसं रक्तञ्च तदा वर्त्मव्यपाश्रयान् । विकारान्नामतस्तान्निबोधत । अञ्जनाख्यं बहलं वर्त्म यस्यापि व्याधिर्वर्त्मान्त्यसन्धौ-न्याशु नामतस्तान्निबोधत । अञ्जनाख्यं बहलं वर्त्म यस्यापि व्याधिर्वर्त्मान्त्यसन्धौ-पोथकी वर्त्मशर्करा । तथार्शोवर्त्म शुष्कार्शसन्धौ-अञ्जनाभिका । बहलं वर्त्म यस्यापि व्याधिर्वर्त्मान्त्य-पक्ष्मकः । क्लिष्टकर्दमवर्त्माख्यौ प्रायववर्त्म तथैव च । श्लक्ष्णमपरिक्लिष्टं वर्त्म वातश्लक्ष्णतन्तु यत् । अर्जुनं तिमि-रमपि शोणितार्थञ्च यत्कृतम् । लगणो विलगाख्य

पक्ष्मकोपस्तथैव च । एकविंशतिरित्येते विकारा वर्त्म-संश्रयाः । नामभिस्ते समुद्दिष्टा लक्षणैस्तान् प्रचक्ष्महे । पिडकाभ्यन्तरसुखी बाह्याधोवर्त्मसंश्रया । विस्फोटोत्सङ्गिनी१ नाम तदूर्ध्वपिडकान्विता । कुम्भीकयीज-प्रतिमाः पिडकाः पक्ष्मवर्त्मनोः । आध्मायन्ते तु भिन्ना याः कुम्भीकपिडकास्तु ताः । कण्डूच्छायान्विता शुर्य्यो रक्तसर्षपसन्निभाः । पिडकास्तु रुजावत्यः पोथक्या२ इति संज्ञिताः । पिडकाभिः समुत्पन्नाभिर्घनाभिरभिसंहता । पिडका या खरा स्थूला सा स्यैया वर्त्मशर्करा३ । सूक्ष्माः खराश्च वर्त्मस्थाः पिडकाः पिटिकीर्त्यते । दीर्घो-ऽङ्कुरः खरः सक्थो दारुणो वर्त्मसंश्रयः । व्याधिरेष समाख्यातः शुष्कार्श इति संज्ञितः । दाहरुजोपवती स्रवा पिडका वर्त्मसंश्रया । मृद्वी मन्दरुजा सूक्ष्मा स्यैया सोऽक्षननामिका४ । वर्त्मोपचीयते यस्य पिडकाभिः समन्ततः । सवर्णाभिः समाभिश्च विद्याद्बहलवर्त्म तत् । कण्डूमतालसोत्तोदेन वर्त्मशोफेन यो नरः । न समं क्षोदयेदक्षि भवेदुन्मेषः स वर्त्मनः । बहलत्वभेदनं तास्य बहलं समभेव च । अकस्माच्च भवेदुक्तं क्लिष्टवर्त्म१० तदा दिशेत् । क्लिष्ट पुनः पित्तयुक्तं विद्धेच्छोणितं यदा । तदा क्लिष्टत्वमापन्नमुच्यते वर्त्मकर्दमम्११। यद्वर्त्म बाह्य नोऽन्तश्च श्यावं स्यूनं सवेदनम् । दाहकण्डूपरिक्लेदि श्याव-वर्त्मेति१२ तन्मतम् । चरजं बाह्यतः स्यूनमन्तःकिञ्चि त्सवर्त्मापि । कण्डूनिस्तोदभूयिष्ठं क्लिन्नवर्त्म१३ तदुच्यते । यस्य धौतानि धौतानि शुष्यन्त्यन्तः पुनः पुनः । वर्त्मो-पर्यपरिपक्वानि विद्याद्क्लिन्नवर्त्म१४तत् । विसृत्तसन्धि निश्चेष्टं वर्त्म यस्य निमील्यते । एतद्वातहतं१५ विद्याद् सरुजं यदि वाऽरुजम् । वर्त्मान्तरस्थं विषमं ग्रन्थिभूत मवेदनम् । विन्द्येत्तमर्बुदं १६ पुंसां सरक्तमवलम्बितम् । निमेषणीः शिरा वायुः प्रविशो वर्त्मसंश्रयाः । पालये दतिवत्तानि निमेष १७ स मतो मतः । क्लिन्नाक्लिन्ना विवर्द्धन्ते वर्त्मस्था मृदवोऽङ्कुराः । दाहकण्डूरुजो-पेतास्तेऽर्शांसीव शोणितसम्भवाः१८ । अपाकः कठिनः स्थूलो ग्रन्थिवर्त्मभवोऽरुजः । सकण्डूः पिच्छिलः श्लेष्मप्रभवो लक्षणं१९स्तु सः । स्थूलं यद्वर्त्म बहुभिः सूक्ष्मैश्छिद्रैः समन्वितम् । विषमन्तर्जलं इव विसर्पतीति २०तन्मतम् । पक्ष्माश्रयत्वता होषां स्वरादीनां स्वरादि च । निर्वे र्त्मयन्ति पक्ष्माणि तैर्जुष्टानि दूयते । उत्पाटितैः पुनः क्षान्तं पक्ष्मभिश्चोपजायते । वातातपाललहेतौ

पक्ष्मकोपः २१ स उच्यते ।" तच्चिकित्सा तत्र दृश्या ।

वर्त्मनि स्त्री हृत-अनि सुट् च । पथि उणा० ।

वर्द्ध छेदने पूरणे च भ्वा० उभ० सक० सेट् । वर्द्धयति-ते अववर्द्धत त । (भावे अच् । २पूरणे २छेदे च ।

वर्द्ध पु० हृध-अच । १आङ्क्रामे (वामनहाटि) जटा० वर्द्ध-वर्द्धक पु० हृध-ण्वुल् । १आङ्क्रामके (वामनहाटी) अमरः हृध-वा वर्द्ध-ण्वुल् ।२पूरके १छेदके ४वृद्धिकारके च त्रि० ।

वर्द्धकि पु० वर्द्ध-छेदने अच् कप-डि कर्म० । त्वष्टरि (कुमार) अमरः । (जातिभेदे शब्दर० ।

वर्द्धकिन् पु० वर्द्धकः वर्द्धोऽस्यास्त इनि । त्वष्टरि (कुमार)

वर्द्धन न० हृध-वर्द्ध-भावे ल्युट् । १छेदने २पूरणे च मेदि० । हृध णिच्-ल्यु । ३वृद्धिकारके त्रि० । "करोमि क्षितिवर्द्ध-नम्" भट्टिः । हृध-ल्यु । ४वृद्धियुक्ते त्रि० ।

वर्द्धनी स्त्री वर्द्धतेऽनया हृध-णिच्-ल्युट् ङीप् । १संमार्जनी-न्याम् २खड्गे मेदि० । ३वर्द्धनानपात्रभेदे च (बटना) जटा० ।

वर्द्धमान पु० हृध-शानच् । १परशुवृक्षे अमरः । २वृद्धि शीले त्रि० । ३शरावे स्तृपात्रभेदे ४त्रिष्णौ ५पशुभेदे च मेदि० । ६क्षितिभेदे हेमच० । ७धनिनां गृहभेदे हला० । वृद्धेयभेदे ह० व० १४अ० कूर्मविभागशब्दे दृश्यम् । ८नगरभेदे च । ९वृद्धियुक्ते त्रि० ।

वर्द्धापन न० वर्द्ध छेदं करोति वर्द्ध+णिच्-आप् च ततो भावे ल्युट् । नाडीच्छेदनकर्मणि संस्कारभेदे त्रि०त० रघु० ।

वर्द्धित न० वर्द्ध-क्त । १छेदिते २पूरिते ३प्रसृते च ।

वर्द्धिष्णु त्रि० हृध-ष्णुच् । वृद्धिशीले । भरतः ङीप् ।

वर्ध्र न० हृध-ष्ट्रन् । १चर्मणि उणादिको० । २चर्मरज्जौ स्त्री

वर्यस् न० वृ-असुन् पुक् । रूपे निघण्टुः ।

वर्ष गतौ वर्षे च भ्वा० पर० सक० सेट् । वर्षति अववर्षीत् ।

वर्ष्मकरटक पु० वर्ष्म इव करटकोऽस्य । वर्षटे राजनि० ।

वर्ष्मकषा स्त्री वर्ष्म-कषति अच् । (चामकसा) सम्मृजायाम् शब्दर० ।

वर्ष्मन् न० वृ-मनिन् । १कवचे सन्नाहे अमरः । २क्षत्रि-योपाधौ पु० । "वर्ष्मान्तं क्षत्रियस्य तु" शातातप

वर्ष्महर पु० वर्ष्म हरति हृ-अच् । सन्नाहधारणयोग्ये अवस्थाभेदे तरुणे । "वर्ष्महरः कुमारः" रघुः ।

वर्ष्मिन् पु० वृ-वा० मिनि । (यानि) मनुष्यभेदे राजनि० ।

वर्ष्मित त्रि० वर्ष्म करोति णिच्-क्त । १लक्षणयुक्ते २बद्धकवचे च

वर्ष्य त्रि० वृ-यत् । प्रधाने श्रेष्ठे च अमरः । २वर्षाभवे

२वनिम्बरायां कन्यायां चमरः । ४कन्याकाले च स्त्री ।

वर्वरा स्त्री वरिति वध्नति शब्दायते वर्व-क्वच । (मस्यभेदे) मल्लिकाभेदे अमरः । अयमौषधादिरित्येके ।

वर्वर न० व-अरच् वुट्च् । १छिक्कुके २पीतचन्दने ३नखरमे च राजनि० । ४प्रामरे ४क्रूरे च त्रि० । "गल्लमिच्छन्ति वर्वरा" इत्युक्तेः । ६केशभेदे (बाबरी) ७देशभेदे कृष्णाजिने (कालबाघर) हरे च पु०राजनि० । ८मल्लिकाभेदे पुंस्त्री०शब्दर०(बाबुई) १०हरे स्त्री टाप् ङीप् वा "वर्वरी बरवी तुल्ली खरदग्धाङ्गशिखिका। पर्णासवल्ल कृष्णे स्त्र कठिञ्जरकठेरको। कालसारः कराल्य मलूकः कृष्णमल्लिका। तस्य शुक्लेऽर्जकः प्रोक्तो बर्बरीयस्ततोऽपरः। बर्बरीतितयं क्लेदं श्लेष्मलं कटु विद्राहि च। तीक्ष्णं रुचिकरं क्षुद्यं दीपनं लघुपाकि च। पित्तलं कफवातास्रदद्रुकृमिविषापहम्" भावप्र० संज्ञायां कन् । वर्वरिका चन्दनभेदे पुष्पभेदे स्त्री मेदि० ।

वर्वरीक पु० व-ईकन् पृषो० नि० । १आम्रातकवृक्षे २कुटिलकेशे च त्रिका० । ३यजुर्वेदशाखायां (बाबुईतुलसी) शब्दच० ४क्षुद्राङ्गाले केशच० ।

वर्वा स्त्री व-व तस्य नेत्वम् । (बाबुई) तुलसीभेदे शब्दच्० ।

वर्वर पु० व-अरच् वुट्च् । (बाघला) तुलसीभेदे राजनि० । ओषध्यादिरित्येके ।

वर्ष पु० वृष-भावे घञ् कर्तरि अच् वा । १वृष्टौ २जम्बुद्वीपांशभेदे पुंन० अमरः ।

"लक्षादेषामिलगिरिरुदग्भेमवतोऽपि तस्मात् तस्माच्चान्यो निषध इति ते सिन्धुपर्यन्तदेर्घ्याः । एवं सिद्धादुदगपि पुराच्छृङ्गवच्छृङ्गिणोक्ता वर्षाण्येषां जयुरिह बुधा अन्तरे द्रोण्यिदेशात् । भारतवर्षमिदं ह्युदगस्मात् किम्पुरुषवर्षमतो हरिवर्षम् । सिद्धपुराच्च तथा कुरु तस्माद्विद्धि हिरण्मयरम्यकवर्षे । माल्यवांश्च यमकोटिपत्तनाद्रोमकाच्च खिल मन्मथमादनः । नीलगैलनिषधावधी च तावन्तरालमनयोरिलावृतम् । माल्यवच्छलधिमध्यवर्ति यत् तत् तु भद्राश्वतरं जगुर्बुधाः । गन्धगैलजलराशिमध्यगं केतुमालकखिलाकलाविदः । निषधनीलसुगन्धसुमाल्यकैरचलखिलावृतमावृतमावभौ । अमरकौलिकुलायसधाकुल कृषिरक्षाकुलचित्तमहौसलकृं सिं०शि०।"अत्र भूगोलस्यार्धमुत्तरं जम्बूद्वीपम् । तस्य चाराख्येव खल्विलावृतदेशः । तत्र जम्बू रौमकं सिद्धपुरं यमकोटिरिति पुरचतुष्टयं भूपरिधिचतुर्थांशान्तरे खिल कथितम् । तेभ्यः पुरेभ्यो यस्यां दिशि मेरुः प्रोक्तरा । अतो लङ्कायां उत्तरतो हिमवान् नाम गिरिः पूर्वापरसिन्धुपर्यन्तदेर्घ्योऽस्ति । तस्योत्तरे हेमकूटः । प्रोऽपि प्रागुक्तपर्यन्तदेर्घ्यः । तथा तदुत्तरे निषधः । तेषामन्तरे द्रोण्यिदेशा वर्षसंज्ञाः । तत्रादौ भारतवर्षम् । तदुत्तरं किम्पुरुषवर्षम् । ततो हरिवर्षमिति । एवं सिद्धपुरादुत्तरतः श्वेतवान् नाम गिरिः । ततः श्वेतगिरिः । ततो नीलगिरिरिति । तेऽपि सिन्धुपर्यन्तदेर्घ्याः । तेषामन्तरे च वर्षाण्यि । तत्रादौ कुरुवर्षम् । तदुत्तरे हिरण्मयम् । ततो रम्यकमिति । एष यमकोटिपत्तनतो माल्यवान् नाम गिरिः । स तु निषधनीलपर्यन्तदेर्घ्यः । तस्य त्रयोदशे मध्ये भद्राश्वं वर्षम् । एवं रोमकादुत्तरतो गन्धमादनः । तस्य त्रयोदशे मध्ये केतुमालवर्षम् । एवं निषधनीलमाल्यवदन्तरालादुभयोरारभ्य खिलावृतं नाम नवमं वर्षम् । या स्वर्गभूमिः । यतस्तत् देवक्रीडास्पदत्वात्" । १२दादशसाहस्रके काले ४जम्बुद्वीपे च पु०मेदि० । कर्षादि ऋच् । ५मेघे पु० हेमच० ६प्रभवादिषु षष्टितमसंवत्सरेषु पु० ।

वर्षकरी स्त्री वर्षं तद्वर्षणं करोति कृञ् अच् ङीष् । झिल्लिकायां हेमच० । [१वर्षाचक्रे ।

वर्षकेतु पु०वर्षस्य वृष्टेः केतुरिव । १इन्द्रपुनर्नवायां राजनि० **वर्षकोष** पु० वर्षस्य कोष इव । १दैवज्ञे शब्दर० । २मासे हेमच० । [४वर्षचक्रे संज्ञिप्रभा० ।

वर्षणि स्त्री वृष-अनि । १क्षतौ २वर्त्तने उणा० । ३क्षतौ

वर्षपर्वत पु० वर्षाणां चिह्नभूतः सीमाभूतो वा पर्वतः । "हिमवान् हेमकूटश्च निषधो मेरुरेव च । चैत्रः शृङ्गी च शृङ्गी च सप्तैते वर्षपर्वताः" इत्युक्तेषु पर्वतेषु ज्ञाता० । द्वीपभेदेऽप्येषु वर्षपर्वता कुलपर्वतशब्दे २।१२ पृ० दर्शिताः । त्रि०शि० उक्ता जम्बूद्वीपपर्वता वर्षशब्दे दर्शिताः । तत्र नामसाम्ये भेदः स्वल्पभेदात् ।

वर्षपाकिन् पु० वर्षस्य पाकोऽस्त्यस्य इनि । आम्रातकवृक्षे हेमच० तस्य हि सुकुलोद्भवात् प्रायेण वल्लरानन्तरफलपाकः । [राजनि०।

वर्षपुष्पा स्त्री वर्षकाले पुष्पमस्याः । सह्यदेवीलतायाम्

वर्षप्रिय पुंस्त्री० वर्षः प्रियोऽस्य । आम्रातकवृक्षे त्रिका० स्त्रियां योपधत्वात् टाप् ।

वर्षवर पु० वर्षं वरोवर्षं वृणोति स्वावृणोति वृ-अच् । "ये स्वल्पवर्षाः प्रथमसाक्षीयाः स्त्रीकुलाधिपाः । ज्ञात्या न दृष्टाः काव्येषु ते वै वर्षवराः स्मृताः" इत्युक्तलक्षणे

राज्ञामन्तःपुररक्षके षण्ढे (खोजा) अमरः। "नष्ट वर्षवरैरिति" रत्नावली।

वर्षवृद्धि पु० वर्षस्य वृद्धिरधिकता यस्मिन्। १जन्मतिथौ २तद्दिनकर्त्तव्ये पूजादौ च। "युगाद्या वर्षवृद्धिश्च अग्नयो पार्वतीप्रिया। रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता" ति०त०। "तत्कृत्यं च मलमासे न कर्त्तव्यं चान्द्रमासीयत्वेन सावकाशत्वात् न च सौरमासीयं तथात्वे तत्तिथेः कदाचिदप्राप्तौ तद्वर्षं तत्कृत्यलोपापत्तेः न चेष्टापत्तिः "प्रतिसंवत्सरं चैव कर्त्तव्यश्च महोत्सवः" ब्रह्मपु० प्रतिसंवत्सरं तद्विधानात् ति० त० रघु०। अधिकं जन्मतिथिशब्दे दृश्यम्।

वर्षा स्त्री ब०व०। वर्षन्ति मेघा यत्र। आषाढभाद्रात्मके मासद्वये ऋतौ "नभश्च नभस्यश्च वार्षिकावृतू" यजु०श्रुतिः "वर्षासु च मघासु च" मनुः।

वर्षाङ्गी स्त्री वर्षासु अङ्गमस्याः। पुनर्नवायाम् शब्दर०।

वर्षापगम पु० वर्षाणामपगमो यत्र। १शरत्काले हेत०। २वर्षासमाप्तौ।

वर्षाभव पु०वर्षासु भवति भू-अच्। रक्तपुनर्नवायाम् राजनि०

वर्षाभू पु० वर्षासु भवति भू-क्विप्। १भेके अमरः २इन्द्रगोपे राजनि० ३सह्यीलतायाम् मेदि० ४पुनर्नवायां ५भेक्यान्तु स्त्री मेदि० अमरे भेक्याम् मौरा० ङीष् वर्षाभ्वोत्यपि ६वर्षाभवमात्रे त्रि०। [ङीष्।

वर्षामद पुंस्त्री० वर्षासु माद्यति मद-अच्। मयूरे स्त्रियां

वर्षिष्ठ त्रि० अतिशयेन वृद्धः वृद्धन् वर्षादेशः। अतिशयवृद्धे

वर्षीयस् त्रि० अतिशयेन वृद्धः वृद्ध+इयसुन् वर्षादेशः। अतिवृद्धे अमरः स्त्रियां ङीष्।

वर्षुक त्रि० वृष-उकञ्। वर्षणशीले। [अमरः।

वर्षोपल पु० वर्षस्य वृष्टेरुपलः प्रस्तर इव। करकेषु (शिल)

वर्ष्मन् न० वृष-मनिन्। १देहे २पराग्रे च अमरः। ३अतिवृद्धरे त्रि०। [अवर्हेत् त।

वर्ह बधे सक० दीप्तौ अक० चु० उभ० सेट्। वर्हयति-ते

वर्ह उत्कर्षे भ्वा० क्या० सक० सेट्। वर्हते अवर्हिष्ट।

वर्ह न० वर्ह-अच्। मयूरपिच्छे अमरः अस्य पुंस्त्वमपि "कं क्वरदेव वर्हः" विक्रमो०प्रयोगात्। २अन्त्यपर्वणि वृक्षे भरतः। ३पत्रे शब्दर०।

वर्हिं(र्हिः)कुसुम न० वर्हिःवर्हिरिव कुसुममस्य वृक्षो० वा बलोपः। अन्त्यपर्वणि शब्दमा०।

वर्हिःपुष्प न० वर्हिः वर्हिरिव पुष्पमस्य। अन्त्यपर्वणि भरतः

वर्हिःशुष्मन् पु० वर्हिं कुशः शुष्म बलमस्य। १वह्नौ अमरः कुशेन हि वह्निरूह्यते।

वर्हिं(र्हिः)ष्ठ न० वर्हिरिव तिष्ठति स्था-क वा विसर्गलोपः षत्वम्। छोवेरे अमरः। [दृनि। वर्हीत्यपत्र।

वर्हिण पुंस्त्री० वर्हमस्त्यस्य इनच्। १मयूरे अमरः स्त्रियां ङीष्

वर्हिर्ज्योतिस् पु० वर्हिषा कुशेन ज्योतिरस्य। वह्नौ हेम०

वर्हिर्मुख पु० वर्हिर्वह्निर्मुखं यस्य। देवे अमरः। तद्द्वारैव हि देवा हविरश्नन्ति।

वर्हिषद् पु० ब०व० वर्हिषि विप्रपाणिस्थेऽग्नौ सीदन्ति वर्हिस् सद-क्विप् षत्वम्। पितृगणभेदे "अग्निष्वात्ता वर्हिषद आज्यपास्तथा" मनुः। [वह्नौ।

वर्हिष्केश पु० वर्ह-दीप्तौ इसुन् वर्हिः दीप्तिमान् केशो यस्य

वर्हिस् स्त्री वृह-इसुन् नि० नलोपश्च। १वह्नौ मेदि० "वर्हिषि रजतं न देयम्" स्मृतिः। २अन्त्यपर्वणि शब्दरत्ने च (चित्ते) अमरः। ३कुशे पु०न० "वर्हिर्देवसदनम्" श्रुतिः वर्ह-दीप्तौ इसुन्। ४दीप्तियुक्ते त्रि०। [वा घटा०।

वल संवरणे भ्वा०आत्म०सक०सेट्। वलते अवलिष्ट। ववलतुः

वल न०वल्यतेऽनेन वल-क। सैन्ये राजनि० बलशब्दार्थे च।

वलज पु० वल-क्विप् अच-अच् कर्म०। १धवले वर्णे २तद्वति त्रि० अमरः।

वलन न० वल-भावे ल्युट्। १संवरणे सि०शि० उक्ते दक्षमौर्दिसंस्कारभेदे २कटस्वयाम्योत्तरयोरन्तर तत्स्वरूपादिकं तल्लक्षणं प्रदर्श्यते

"बलाजाद्योर्हि संपाते विषुवत्क्रान्तिदक्षयोः। स्यातां याम्योत्तरे भिन्ने परक्रान्त्यन्तरे च ते। आयनं बलनं तत्र जिनांशज्यासमं ततः। एकैवायनसंधौ तु तयोः स्याद्दिग्विलोत्तरा। एकैव तद्वशात् प्राची तत्र नो बलनं ततः। तदन्तरेऽनुपातेन खेटकोटिक्रमज्यका। जिनज्यायां द्युजीवाप्तायनदिग्बलनं भवेत्। एवमेव हि संपाते विषुवत्प्रसक्षयोः। उन्मण्डलं भवेत् तत्र विषुवद्दिग्विलोत्तरा। क्षितिजं समदक्षस्य पलज्या च तद्बलम्। क्षितिजेऽक्षज्यया लब्धमक्षजं बलनं ततः। तयोरेकैव याम्योदक्संस्थे मध्ये बलनं ततः। मतक्रमज्यया साध्यमन्तरे त्वनुपातितः। नतं खाङ्काहतं भक्तं द्युदक्षेनाग्रभागकैः। क्रमज्याचज्यया लुप्ता द्युज्याभक्तात्तजं भवेत्। प्राक् सौम्यं पश्चिमे याम्यं तच्चापैक्यान्तरात् स्फुटम्। एवमेव च संपातो यः क्रान्तिसमदक्षयोः। परमं तत्र तत्कालबलनैक्यान्तरं स्फुटम्।

अयतः पृष्ठतस्थत्वात् क्रान्तिवृत्ते त्रिभेऽन्तरे । तयो र्याम्योत्तरैकत्वात् तत्र नो वलनं स्फुटम् । न स्पष्टवलनाभावस्तत्र स्थादुत्क्रमजया । क्रमज्यया ततः कार्यं दाक्षार्धं कथ्यते पुनः । सूर्यतः क्रान्तिवृत्तायां ध्रुवे योगो भवेद्यतः । विषुवत्प्रागपक्रमाच्या ध्रुवे याम्या तयोत्तरा । सूर्यतः क्षेपवृत्तायां ध्रुवाक्षिनवमान्तरे । योगः कदम्बसंज्ञोऽयं क्षेपो वलनबोधकृत् । तत्प्रापमण्डलप्राच्या याम्या सौम्या च दिक् सदा । कदम्बभमवृत्तं च बध्नीयात् परितो ध्रुवात् । गोले तु जिनलग्नांशैस्तत्र ज्या क्रान्तिश्चिञ्जिनी । सूर्यतः समवृत्तात्तु याम्योदक्कुजसंगमे । तत्रित्यभगतवृत्तायां योगः स समसंज्ञकः । समध्रुवकदम्बानामुपरि द्युचरज्ञयेत् । कृतायि वृत्तकृपायि वलनानि तदन्तरे । अयनं वलनं मध्ये स्थात् समध्रुवकृतयोः । कदम्बध्रुवकृतान्तरायनं च विभे यतः । कदम्बसमकृतान्तः स्फुटं सर्वदिशां च तत् । अथ वा परितः खेटात् खाक्षभागान्तरे न्यसेत् । त्रिज्याकृतं ततस्तत्र विषुवत्समवृत्तयोः । मध्येऽयवलनं विद्याद्विषुवत्क्रान्तिवृत्तयोः । अन्तरं चायनं क्रान्तिसमवृत्तान्तरे स्फुटम् । तत्रापमण्डलं प्राची तस्या याम्योत्तरः शरः । वलनानयने क्षेपः क्षिप्तो यैस्ते क्रमुद्गयः । मकरादिस्थ कदम्बस्य स्थातां याम्योत्तरे समम् । आयनं वलनं तस्मान्नायनादौ प्रजायते । ततो भ्रमति गोले च मकरादिर्यथा यथा । तथा तथा भमण्डले कदम्बो निजमण्डले । कुम्भादावथ मीनादौ याम्योदग्वलनं यास्यते । जायते वलनं तत्र सौम्यसूत्रकदम्बयोः । अन्तरं शिञ्जिनीरूपं कदम्बभसमण्डले । अयनाद्यतकालांशक्रमक्रान्तिज्यका हि सा । उत्क्रमज्या यतो बाणः शिञ्जिनी तु क्रमज्यका । अतिभाकृतं क्रमक्रान्तिज्यातो वलनमायनम् । यैरुक्तमुत्क्रमक्रान्त्या भान्त्या तैर्नोचितं हि तत् । युक्तानयैव विक्षेपमण्डलं च क्रमज्यया । परोक्तेरन्यथा ब्रूयादुदयः परान् न प्रदूषयेत् । तस्यैव दूषणं तद्धि न दोषोऽतोऽन्यदूषणे । उत्क्रमज्यानिराणोऽयमन्यथा वाथ कथ्यते । जिनांशैर्जिनवृत्ताख्यं कदम्बात् परितो न्यसेत् । क्रान्तियाम्योत्तरं वृत्तं कदम्बद्वयकीलयोः । प्रोतं कृत्वा कृतं न्यस्तं दन्वान्ते स्थाद् ध्रुवोपरि । दन्वान्तात्तावतैवांशैरेव चलति ध्रुवात् । जिनवृत्ते तदंशानां तत्र ज्या क्रान्तिशिञ्जिनी । आयनं चैव वलनं ज्यायै जायते यतोऽत ।

यतश्चध्रुवान्तरे यस्माद्दृज्या चापांशकाः सदा । त्रिज्याकृते यतो देयं तस्मात् परिभाष्यते । ध्रुवमण्डलांशकैर्दृग्वस्तस्मात् परितो न्यसेत् । समकीलकयोः प्रोतं तथा याम्योत्तरं वलम् । तत्तत्खेटोपरि स्थितं यैरंशैः खार्धतो नतम् । समवृत्तेऽवृत्ते च तैरेव स्थानतं ध्रुवात् । समवृत्तनतांशज्यात्रिज्यापरिणताच्छरम् । दृग्ज्यायै वलनं प्राग्वत् त्रिज्यायै परिभाष्यते । उपपत्त्यानया सम्यक् समवृत्तनतांशजम् । वलनं स्यात् तथा यच्च स्याद्दोरालवनादपि । अयनान्तलयोर्योगः समदिङ्मेऽन्यथान्तरम् । तच्चिह्नाभावसंविज्ञेयपदभक्तांशसंज्ञिनी । नतादृदोर्ज्यया हृष्ट्वा वलनं वलजं स्फुटम् । नतं खाक्षाहृतं भक्तं दृष्टेनाग्रभागवैः । क्रमज्यात्तज्यया हृष्ट्वा स्थूलं वा दृज्यया हृता । दृज्याहृतापदृक्क्षेपे न्यसेद्दा रविमण्डलम् । बिम्बाग्रे वलनं तद् यदन्तरं वृत्तयोस्तयोः । बिम्बान्तबिम्बमध्योत्थक्रान्तिसौम्यांशदृक्तरम् । अर्कदोर्भोग्यखण्डघ्नं बिम्बार्धं तत्पदक्षृते । जिनज्याघ्नं त्रिभज्याघ्नमेव स्यादन्तरं हि तत् । बिम्बार्धघ्नृत त्रिभज्याघ्नमेव त्रिज्या नतं भवेत् । गुणकारकबिम्बार्धत्रिज्यानाशे हृते सति । भोग्यखण्डं जिनांशज्यायुणं तच्चाग्निभाजितम् । अतिभाकारं क्रमक्रान्तेर्हृतं लब्धं जायतेऽथ वा । क्रमक्रान्तेरिदं वीक्ष्य क्रान्तिं लज्जत बालिशाः ! । नामितं कलयद्बिम्बं तिर्यक् क्रान्तिस्तु सा समा । अत्र दृज्यानुपातो यश्चिर्यक्करत्वाय सः" मू० "अथ वलनेषु दृक्कर्मणि चोक्तक्रमज्यानिराकरणाय मूलसूत्रेऽपि बहुक्तं तथापि विशिष्टोच्यते । विषुवद्वृत्तं समवृत्तं प्रकल्प्य दक्षिणोत्तरवृत्तस्थे यदे आयनवलनक्षेपोपपत्तिप्रतीत्यर्थं पृथग् दर्शयेत् । अयमण्डलप्राच्यपरायां एकः कदम्बयाम्या अन्यः सौम्या दिक् । एवं विषुवद्वृत्तसमाच्यपरायां ध्रुवौ । यदा मकरादिर्याम्योत्तरवृत्ते तदैव कदम्बोऽपि । अतो विषुवत्क्रान्तिवृत्तयोरेकैव याम्योदक् । तया दृक्क्षेपोत्तरवृत्तस्य कुम्भादेश्च मध्ये खाक्षोरालवृत्ते पञ्चगुणाहतचन्द्रा १९१५ असवो वर्त्तन्ते । ते पञ्चहृताः कालांशाः स्युः ३८।१५ । अथ कुम्भादिर्यावद्दृक्क्षेपोत्तरवृत्तं नीयते तावत् कदम्बो निजमण्डले चक्रांशाङ्किते तावच्छिरेव कालांशै ३८ । १५ दक्षिणोत्तरवृत्तसंपातादुत्तरगगनस्थो भवति । कदम्बयाम्योत्तरवृत्तयोरन्तरं वलनम् । अत्र च तेषामंशानां कदम्बवृत्ते ज्या । अतः क्रमज्या ।

तत्क्रमज्या तु बाणरूपा भवति। कदम्बवृत्ते या ज्या सा क्रान्तिज्या। अतस्तेषामंशानां क्रमक्रान्तिज्या वलनम्। अथ वैकराशेः क्रमक्रान्तिज्या त्रिज्यागुणा द्युज्याहृता तथापि सैव भवति। अथ चान्यप्रकारेणोत्क्रमज्यानिराकरणं द्युज्यानुपातश्च प्रतिपाद्यते। क्रान्तिवृत्तेऽर्कस्थानेऽर्कबिम्बं सूचिकाकारं विन्यस्य बिम्बपरिधौ यत्र खाहोरात्रवृत्तं लग्नं यत्र च क्रान्तिवृत्तं तयोरन्तरं यद्दक्षिणोत्तरं तत् तत्र बिम्बे प्राच्यपरयोर्वलनम्। तच्चार्ककान्तेर्बिम्बार्धकलायुतस्यार्कस्य क्रान्त्यन्तरम्। अतस्तत्स्थानयनम्। रविदोर्ज्यायां क्रियमाणायां यद्भोग्यखण्डं तेन मानार्धकला गुण्याः शरद्विघ्नै २२५ र्भाज्याः। फलं दोर्ज्ययोरन्तरं स्यात्। तत्र तावत् स्फुटभोग्यखण्डज्ञानायानुपातः। यदि त्रिज्यातुल्यायां कोटौ प्रथमं ज्यार्धं शरद्विघ्नं भोग्यखण्डं तदाभिमतायामस्यां किमिति फलं स्फुटं भोग्यखण्डम्। तेन गुणितं बिम्बार्धं शरद्विघ्नैर्भाज्यम्। एवं स्थिते शरद्विघ्नमितयोर्गुणहरयोर्नाशे कृते बिम्बार्धस्य कोटिज्या गुणस्त्रिज्या हरः। फलं दोर्ज्ययोरन्तरम्। ततः क्रान्त्यर्धमनुपातः। यदि त्रिज्यया जिनज्या लभ्यते तदानेन दोर्ज्यान्तरेण किमिति। फलं क्रान्त्यन्तरम्। तद्बिम्बव्यासार्धवृत्ते वलनम्। अथान्योऽनुपातः। यदि बिम्बव्यासार्धवृत्ते एतावद्वलनं तदा त्रिज्याव्यासार्धवृत्ते किमिति। अत्र त्रिज्यातुल्ययोर्गुणहरयोस्तथा बिम्बार्धमितयोश्च तुल्यत्वान्नाशे कृते कोटिज्याया जिनांशज्या गुणस्त्रिज्या हरः। फलं कोटिक्रमक्रान्तिज्या। तत् त्रिज्यावृत्ते वलनम्। एवं विषुवद्वृत्तस्थित एव ग्रहे। यतो भूमध्यात् खस्वस्तिकस्थबिम्बमध्यं प्रति यत् सूत्रं नीयते तत् त्रिज्यासूत्रं दण्डवत्। तदुपरिस्थं बिम्बं छत्रवत् समत्वात् सममेव। यत् तत्परितस्त्रिज्यावृत्तं यत्र च वलनज्या दृश्या तदपि भूसममेव स्थितम्। अतस्तत्र यथागतमेव वलनम्। यदा किल मेषान्ते ग्रहस्तदा तत्क्रान्त्या खस्वस्तिकादुत्तरे नतं बिम्बं स्यात्। त्रिज्यासूत्रं तदा कर्णरूपम्। बिम्बमध्याच्च लम्बसूत्रं ध्रुवच्छन्नं द्युज्या। सा तत्र कोटिः। क्रान्तिज्या भुजः। यथा किञ्चित् कर्णस्थित्या धृते दण्डे छत्रमपि तत्सार्धिन्यां दिशि कर्णरूपं भवति। तत्र वलनज्ययापि तत्सार्धिन्यां दिशि कर्णरूपं भवितव्यम्। यत् पूर्वमानीतं क्रान्त्यन्तरं कर्णरूपिण्या भवितव्यम्। तच्च खस्वसूत्रप्रतिसार्धि तत् कोटिरूपं जातम्। तच्च कर्णकरणायानुपातः। यदि द्युज्याकोट्या त्रिज्या कर्णस्तदाऽनया किमिति। पूर्वं कोटिज्यायां जिनज्या गुणस्त्रिज्या हरः। इदानीं त्रिज्या गुणो द्युज्या हरः। अत्रापि त्रिज्यातुल्ययोर्गुणहरयोर्नाशे कृते कोटिज्या जिनज्यागुणा द्युज्यया भक्ता वलनं स्यादित्युपपन्नम्। युक्तप्रायमेव त्रिज्येयमवजं च क्रमज्ययेति। यथायनवलज्ञानार्थं ध्रुवात् परितो जिनभागैः कदम्बभ्रमवृत्तं निबद्धं तथा याम्योत्तरक्षितिजयोर्यः संपातः स समसंज्ञकः। तस्मादयनांशैः परितोऽयनवलनज्ञानार्थं वृत्तं बध्नीयात्। तत् किलायनवलयसंज्ञम्। तदपि भांधैरङ्कम्। तत्रायनवलनोपपत्तिर्दर्शनीया। तद्यथा मध्याङ्केऽर्कात् समच्छिन्नं प्रति नीयमानं वृत्ताकारं सूत्रं ध्रुवच्छिन्नलग्नं याति। अतस्तत्र विषुवत्समवृत्तयोरेकैव याम्योत्तरा वलनाभाव इत्यर्थः। अथ यदि दिनार्धान्तं सूर्यं कृत्वा समच्छिन्नात् सूर्यं प्रति नीयमानं सूत्रं यत्र समसूत्रे लगति तत्खस्वस्तिकयोर्मध्ये यावन्तोऽंशास्तावन्त एवायनवृत्ते समसूत्रध्रुवयोर्मध्ये भवन्ति। यतस्तत्समवृत्तानुकारं वक्रम्। तेषां भागानामयनवलये यावती क्रमज्या तावदेव समसूत्रध्रुवयोरन्तरम्। अथ क्षितिजस्थेऽर्के क्षितिजमेव समसूत्रम्। तस्मादयनवृत्ते च नवतिर्नतांशाः। तेषां ज्याऽयनवलेऽयज्यातुल्या स्यात्। अतः समसूत्रलगनैर्नतांशैर्वलनं साधयितुं युज्यते। ते तु महायासेन ज्ञायन्ते। न तु सुखेन। अतस्तज्ज्ञानार्थं स्थूलोऽनुपातः सुखार्थं कृतः। यदि दिनार्धतुल्येन खाहोरात्रवलनेन नवतिः समसूत्रलगनतांशा लभ्यन्ते तदेष्टेन किमिति। लब्धनतांशानां या क्रमज्या सायज्यावृत्ते परिणास्यते। यदि त्रिज्यावृत्ते एतावती ज्या तदायनजावृत्ते कियतीति। लब्धं किल वलनजया स्यात्। परं सा द्युजायां, न त्रिजायाम्। यतः समसूत्रध्रुवयोरन्तरं तत्। अत्रध्रुवयोर्मध्ये द्युजायाचापांशा एव वर्तन्ते। यदि द्युजावृत्ते एतावती तदा त्रिजावृत्ते कियतीति। एवं सति पूर्वत्रैराशिके त्रिजया हरः। इदानीं गुणः। तुल्यत्वात् तयोर्नाशे कृते नतांशजायां अयनजया गुणो द्युजया हरः। फलं स्थूला वलनजया स्यात्। अथ सूक्ष्मायुच्यते। अत्रक्षकालोऽर्कस्य शङ्कुः शङ्कुतलमया च साध्या। अयंशङ्कुतलयोः समदिशोरैक्यमन्यथान्तरं स किल ज्ञाप्यः पूर्वं प्रतिपादित एव।

यच्चमभट्टत्तयोरन्तरं जात्यारूपं दक्षिणोत्तरं बाहुतुल्यं स्यात्। यथा विषुवदुदक्तादुत्तरतो दक्षिणतो वा क्रान्तिजत्रान्तरे द्युजत्राभट्टत्तं तथा समभट्टत्तादपि बाहुवशादुत्तरतो दक्षिणतो वा बाहुतुल्येऽन्तरे उपभट्टत्तं कल्प्यम्। तदपि भांशैरङ्कम्। बाहुवर्गोनत्रिज्यावर्गस्य पदं नक्षत्रभट्टत्ते द्युजत्रावद्व्यासार्धम्। अथ द्युजत्राभट्टत्तोपभट्टत्तयोर्यौ प्राक्पश्चात्संपातौ तयोर्जीवावद्वत्तं क्षेत्रं निबध्यते तस्यार्धमुपभट्टत्ते नतांशानां भुजजत्रा। अथ तदानयनम्। नतक्षत्रं वा भुजजीवा वा द्युजत्राभट्टत्ते परिणाम्यते। यदि त्रिज्याभट्टत्ते एतावती तदा द्युजत्राभट्टत्ते कियतीति। लब्धमुपभट्टत्तनतांशजत्रा भवति। ततो यद्युपभट्टत्तव्यासार्धे एतावती तदाक्षजत्राव्यासार्धे कियतीति। लब्धो द्युजत्रार्धे एतावती वलनजत्रा तदा त्रिजत्रार्धे कियतीति। अत्र प्रथमेऽनुपाते त्रिज्या हरो द्युजत्रा गुणः। तृतीयेऽनुपाते त्रिज्या गुणो द्युजत्रा हरोऽतस्तुल्यत्वात् तयोर्नाशे कृते नतक्षत्रं भुजजत्राज्जीवया गुणितोपभट्टत्तव्यासार्धेन भक्ता वा लब्धा वलनजत्रा स्यात्। अत उक्तमन्यदतस्तयोर्योग इत्यादि। अथ दृष्टान्तः। यत्र किल दृषभान्तक्रान्तितुल्योऽक्षः २०। १८ तत्र दृषभान्तस्थोऽर्कः दिनार्धे खस्वस्तिके भवति। तदा क्रान्तिभट्टत्तं दङ्मण्डलाकारं स्यात्। क्षितिजस्थोऽर्कः राशिषट्कं सिंहान्तः। स च तदा क्षितिजे वर्त्तते। तत्र प्राक्परयोरन्तरं क्षितिजे प्रत्यक्षं वलनं दृश्यते। सा च सिद्धान्तछाया। तत् कथं क्षितिजार्कोत्क्रमक्रान्तिर्वलनम्। अतोऽसत्। अक्षदानयनं विना नेदमयाक्षं वलनमत्यद्भुतं इत्यर्थः। अथान्यो महान् दृष्टान्तः। यत्र देशे षट्षष्टिभागाः ६६ अक्षः। तत्र मेषादौ क्षितिजस्थे सर्वेऽपि राशयः समकालमेव क्षितिजस्था भवन्ति। तदा क्रान्तिभट्टत्तमेव क्षितिजं भवतीत्यर्थः। तत्र मेषादौ वृषभादौ मिथुनादौ वा स्थिते रवौ परमं त्रिज्यातुल्यमेव स्फुटं वलनं स्यात्। यतः क्रान्तिभट्टत्तप्राच्युत्तरा जाता। तथा विक्षेपाभावे सति तदा रवेर्दक्षिणस्यां दिशि स्थितेः। चक्रस्योत्तरस्यामित्यर्थः। एतदुक्तं भवति। तत्र देशे तस्मिन् काले तस्य त्रिज्यातुल्यस्य वलनस्याक्षव्यत्ययानुपपत्त्याक्षदीयमेव वलनानयनं समीचीनम्। तत्र देशेऽक्षजत्रा ३।४०। मेषादिगे रवौ द्युजत्रा २४।६। चरजत्रासवः ०। क्षितिजस्थेऽर्के नतघटिकाः १५। आयनवलनचापांशाः २४। चक्षुर्वलनचापांशाः ६६। स्फुटवलनस्य चापांशाः ६०। वृषादिगे रवौ द्युजत्रा २२।६। चरजत्रासवः १६७०। नतघटिकाः १९। २८। आयनवलनचापांशाः २१। ४। चक्षुर्जस्य ६८। ५६। स्फुटवलनस्य चापांशाः ६०। मिथुनादिगे द्युजत्रा १२।८। चरासवः २४६५। नतघटिकाः २४। ३७। आयनवलनांशाः २१। १२। चक्षुर्जस्य ७७। २८। स्फुटस्य ६०। इयं सर्वत्र।"

वल्लभि(भी) स्त्री वल्ल्यते आच्छाद्यते वल-अभि वा ङीप्। वडभीशब्दार्थे गोपालसाम् अमरटी०।

वलय पुंन० वल-अयन्। १ हस्तपाद्कटकादौ अमरः। उत्तरपदस्थः तदाकारवेष्टने यथा भूवलयम्। २वेष्टनभूमौ ४गोले च। ५गलरोगभेदे माधवः "वलासृग्यायतस्तन्तुतत्र शोथं करोत्यपक्वमतिं निवार्य्य। तं सर्व्वथैवाप्रतिकार्य्यवीर्य्यं विवर्जनीयं वलयं वदन्ति"। ६वेलायां ७कङ्कणे जटा०। [अमरः।

वलयित त्रि० वलयमिव आचरितम् वलय+क्विप्-क्त। वेष्टिते

वला स्त्री वल-अच्। (वेड्डाडा) ओषधिभेदे रायमुकुटः। २बलाशब्दार्थे च। [अजा० टाप्।

वलाक पुंस्त्री० वल-आकन्। वकपक्षिणि अमरः स्त्रियां

वलाहक पु०वारि वहति वह-ण्वुल्०। १मेघे २शुक्लके च अमरः। ३पर्वते दैत्यभेदे ५नागभेदे मेदि० श्रीकृष्णस्य श्वयभेदे "स्कन्दस्तु यदानन्दः सारसिंहश्च दारुकः। तुरङ्गाः शैव्यसुग्रीवमेघपुष्पबलाहकाः" विष्णु०।

वलि पु० वल-इन्। उपहारद्रव्ये ओष्ट्रादित्वमित्यन्ये।

वलिर त्रि० वल-बाहुलकात् क वलसंवरणसमर्थत्वात् इरन्। केकरे अमरः।

वलिश न० वलिना उपहारद्रव्येण श्यति मतुलोपात् शो-क। वडिशशब्दार्थे। [पटले जटा०।

वलीक न० वल्यते संव्रियतेऽनेन ईकन्। वनीकशब्दार्थे

वलूक न० वल-वा ऊक। १अक्षुरे २पक्षिभेदे मि०को०।

वल्क भाषणे चु०उभ०सक०सेट्। वल्कयति ते अववल्कत् त।

वल्क न० वल-संवरणे क वल्क नेत्वम्। १वृक्षादीनां त्वचि वल्कले २मत्स्यानां त्वचि शल्के (आँइस) मेदि०। ३क्षत्रे च विश्वः। ४पक्षिकालोभे पु० राजनि०।

वल्कतरु पु० वल्कप्रधान तरुः श०त०। शुक्लवृक्षे राजनि०।

वल्कद्रुम पु० वल्कप्रधानो द्रुमः। भूर्जपत्रवृक्षे राजनि०।

वल्कल न० वल्क-कलच् कस्य नेत्वम्। १त्वचे (दारचिनि) वृक्षे राजनि० २त्वचि (छाल) पुंन० अमरः। ३शिवा-वल्कायां स्त्री राजनि०।

वल्कलोध्र पु० वल्कलवान् लोध्रः। पट्टिकालोध्रे राजनि०।

वल्ग गतौ भ्वा० पर० सक० सेट्। वल्गति अवल्गीत्। [हेमच०

वल्गा स्त्री वल्ग-अच्+। (लगाम) अश्वमुखस्थे रज्जुभेदे

वल्गित न० वल्ग-भावे क्त। १अश्वस्य गतिभेदे प्लुतगतौ अमरः। २गमने २वल्गुभाषणे च।

वल्गु पु० वल्ग—संवरणे उ-गुक् च। १छागे २मनोहरे त्रि० मेदि०। संज्ञायां कन्। वल्गुक चन्द्रने वने पद्मे च न०। चारुणि सुन्दरे च त्रि० अजयः। अस्यौ-णादिकत्वमित्यन्ये।

वल्गुपत्र पु० वल्गूनि पत्राणि यस्य। वनमुद्गे शब्दर०।

वल्गुला स्त्री वल्ग-उल। १वागुच्यां सोमराज्यां २खगभेदे राजनि०संज्ञायां कन्। वल्गुलिका सैलपाचिकायां हेमच०

वल्लभ भजने स्वा० आत्म० सक० सेट्। वल्लभते अवल्लभिष्ट।

वल्मिकि पु० वल्-इकि सुट् च। कीटविशेषकृते मृत्तिका-स्तूपे (उयेर डिपि) शब्दर०। वल्-इक सुट् च। वल्मिक तत्रार्थे भरतः।

वल्मीक पुंन०वल्-ईक सुट् च। क्षुद्रकीटकृतमृत्तिकास्तूपे अमरः तत्प्रदा औषधनिषेधो विष्णुपु० उक्तो यथा "वल्मीकलाङ्गलिकोत्खाता मृदमन्तर्जलां तथा। औषाव-शिष्टां गेहाच्च नादद्यात् लेपसम्भवाम्"। देवप्रतिमायाः श्लिष्टिदोषशान्तये तन्मृदा प्रतिमाक्षालनं विहितं यथा "वल्मीकमृत्तिकाभिश्च गोमयेन समन्वितः। क्षालयेत् श्लिष्टिसंसर्गदोषाणामुपशान्तये" देवप्र० व०। तेन देवमूर्त्तीनां स्नापनमपि देवप्र० त० विहितं यथा "स्नापयेत् प्रथमं देवं गोयैः पञ्चविधैरपि। पञ्चामृतैः पञ्चगव्यैः पञ्चपल्लवकैरपि। मृत्तिका करिदन्तस्य पर्वताश्वखुरस्य च। कुशवल्मीकसम्भूता मृत्पञ्चक-मुदीरितम्" देवप्र० त०। तत्राधिभूते प्राचेतसे मुनौ ख्याते रामायणकर्त्तरि २मुनिभेदे ३रोगभेदे च विश्वः। तद्रोगनिदानादि भावप्र० उक्तं यथा "पीवांसकल्काकरणाद्देहे सन्धौ मले वा त्रिभिरेव दोषैः। ग्रन्थिः स वल्मीकवदक्रियायां जातः क्रमे-णैव गतप्रवृद्धिः। खरैरनेकैस्त्वतिदारुणैश्च विसर्पवत् सर्पति चोन्नतायैः। वल्मीकमाक्रम्भिनत्ति विकारम् निष्प्रत्यनीकं चिरजं विशेषात्"। वल्मीकवदित्यनेन प्र-चुरशिखरत्वमुन्नतमत्यमाढमूलत्वञ्च उच्यते निष्प्रत्यनीक-मुपचारायोग्यम्"। ततः भवार्थे दञ्। वाल्मीकि वल्मीकभवे प्राचेतसे मुनौ शब्दरत्न०।

वल्मीकशीर्ष न०वल्मीकस्य शीर्षमिव। क्षोतोऽञ्जने राजनि०

वल्मीकूट न० वल्मीकं कूटमिव पृषो०। वल्मीके हेमच०

वल्य्(ल्यू)ल छेदने पवित्रतायाञ्च चुरा० उभ० सक० सेट्। वल्यु(ल्यू)लयति ते अवल्यु(ल्यू)लत त।

वल्ल संवरणे भ्वा० आत्म० सक० सेट्। वल्लते अवल्लिष्ट।

वल्ल पु० वल्ल-घञ्। १गुञ्जाद्वयपरिमाणे "वल्ल स्त्रगुञ्जे" लीला० २गुञ्जाद्वये वैद्यकम्।३सार्द्धगुञ्जामाने "गोधूमद्वितयोन्मिता तु कथिता गुञ्जा तया सार्द्धया वल्लः" राजनि०।

वल्लकी स्त्री वल्ल-कन् गौरा० ङीष्। १वीणायाम् अमरः। २वल्लकीवृक्षे च राजनि०।

वल्लभ पु० वल्ल-अभच्। १दयिते २अभ्यर्हे अमरः। ३उत्त-मार्श्वे च मेदि०। ४दयितायां स्त्री हेमच०।

वल्लभपाल पु० वल्लभं पालयति पाल-अण्। अश्वपाले

वल्लर न० वल्ल-अरन्। १क्षणागुरुणि मेदि० २गरुडे ३कुञ्जे च राजनि०। ४भङ्ग्यां शब्दर०।

वल्लरि(री) स्त्री वल्ल—अरि वा ङीष्। १भङ्ग्यामृ अमरः। २लेखिकायां ३चिल्लमूले च राजनि०।

वल्लव पुंस्त्री० वल्लु-घञ् तं वाति वा-क। १गोपे अमरः स्त्रियां ङीष्। २पाचके अमरः ३भीमसेने मेदि०।

वल्लि(ल्ली) स्त्री वल्ल-इन् वा ङीष्। १लतायामृ अमरः। २पृथिव्याञ्च शब्दच० दीर्घान्तस्तु ३अजमोदायां मेदि० ४कैवर्त्तिकायामृ ५चञ्चे च राजनि०।

वल्लीज न० वल्लयां जायते जन-ड। मरिचे राजनि०।

वल्लीदूर्वा स्त्री वल्लीरूपा दूर्वा। माङ्गल्यदूर्वायामृ राजनि०।

वल्लीबदरी स्त्री वल्लीरूपा बदरी। भूमिबदर्याम् राजनि०।

वल्लीमुद्ग पु० वल्लीप्रधानः मुद्गः। वनमुद्गे (सुगानि) राजनि०

वल्लीवृक्ष न० वल्लीव दीर्घो वृक्षः। लाङ्गले राजनि०।

वल्लुर न० वल्ल-उरन्। १कुञ्जे २भङ्ग्यां ३क्षेत्रे ४निर्जल-स्थाने ५शाद्वले हेमच०। ६जलहस्ते च मेदि० वल्ल-अरन्। वल्लर तत्रार्थे न० शब्दर०।

वल्लूर त्रि० वल्लु-ऊरन्। आतपादिना १शुष्कमांसे अमरः २शूकरमांसे मेदि० ३वनक्षेत्रे ४वाहने ५खरभूमौ च हेमच०।

वल्लूरा स्त्री वल्लु-यत्। धातीवृक्षे राजनि०।

वष्कज पु० वष्कते ऊर्ध्वं वेष्टयति वष्क-क्विप् ताडयः कनू वजति गच्छति वज-अच् । १छलभे तृणभेदे अमरः । (वाघुई) २वृक्षभेदे स्त्री राजनि० ।

वल्ह दीप्तौ चु० उभ०अक०सेट् । वल्हयति अववल्हयत् त वल्ह उत्क्लेदे भ्वा० चा० सक० सेट् । वल्हते अववल्हिष्ट ।

वस पु० वा-ड प्रकारे हित्वम् । ज्योतिषोक्ते तिथ्यर्धात्मके प्रथमे करणे । अस्य बौलवादित्वमित्यन्ये ।

वस आच्छादने अदा०पर०सक०सेट् । वष्टि उटः उषन्ति । अवट् अवाषीत् उवाष उषतुः ।

वस न० वस-भावे अप्, कर्त्तरि अच् वा । १आवरणे २प्रभुत्वे च आदन्ते त्रि० मेदिनी ।

वसंवद त्रि० वसं वसकरं मधुरं, वसोऽस्मिति वा वदति वद-खच् मुम् च । १प्रियवाक्यवादिनि २मधुरवादिनि (तवाहं वसः) इति रत्नादिनि च ।

वसक्रिया स्त्री वसस्य क्रिया करणं कृ-भावे श । वसीकरणे ।

वसग त्रि० वसं गच्छति गम-ड । वशीभूते ।

वसवर्त्तिन् त्रि० वसे वर्त्तते वृत-णिनि । वशीभूते ।

वसा स्त्री वस-अच् । १वन्ध्यायां २योषायां ३हृतायां ४कपूरिण्यां स्त्रीगव्याच्च मेदि० । अनेन जातेः समासे वरनि० ङीषपि । [चन्द्रने स्त्री ।

वसिक त्रि० वसोऽस्यास्य ठन् । १भृत्ये अमरः २अणुरजसि च ।

वसित्व न० वसिनो भावः त्व । १स्वातन्त्र्ये २ईश्वरस्य ऐश्वर्यभेदे च । तल् । वसिताशब्द स्त्री । [स्वातन्त्र्ये च ।

वसिन् त्रि० वसोऽस्यास्य इनि । १जितेन्द्रिये २स्वाधीने

वसिर न० वस-ईरन् । १वासुदृश्यवस्तुनि अमरः । २मज्जिन्यां २घृते च पु० राजनि० ।

वसिष्ठ अतिशयेन वसी इतन् इनेर्लुक् । अतिशयजितेन्द्रियतायुक्ते ऋषिभेदे ।

वसीकरण न० अवश्यः वशः क्रियतेऽनेन वश-च्वि-कृ-ल्युट् । तच्चाद्युक्ते वशताजनके मणिमन्त्रादौ ।

वसीर पु० वस-ईरन् । नलमिश्रस्यास्य जटा० ।

वसु न० वस-उ । १धने अमरः । २आयुधे त्रि० अमरः

वसु वसे भ्वा० पर० सक० सेट् । वसति अवसीत् अवासीत् उवसतुः ।

वसट् अव्य० वह-डसटि । देवोद्देशकहविस्त्यागे अमरः ।

वसट्कार पु० वसट्+कृ-घञ् । १देवोद्देशकत्यागरूपे यज्ञे २वषडिति करणे यजतिशब्दे कात्या०श्रौते दृश्यम् ।

वसट्कृत त्रि० वसट् इति कृतम् कृ-क्त । हुते अमरः ।

वस्क गतौ भ्वा० आत्म० सक० सेट् । वस्कते अवस्किष्ट ।

वस्कय पु० वस्क-अयन् । एकवर्षायने वत्से अमरः ।

वस्कयणी स्त्री वस्कयमेकवर्षावत्सं नयति स्थानान्तरं नी-ड गौरा० ङीष् यत्वम् । चिरप्रसूतायां गवि अमरः । आत्वा समासेऽस्य परनि० गोवस्कयणी ।

वस्कयिणी स्त्री वस्कय एकवर्षायनो वत्सोऽस्त्यस्या इनि । चिरप्रसूतायां गवि अमरः वस्कयणीति वा पाठः ।

"वस्कयिण्यास्त्विदोषङ्गं तर्षणं वलतूदयः" भावप्र० ।

वस छेदे क्षेदने वधे च सक० पु० उभ० सेट् । वासयति ते अवीवसत् त । अधि+गन्धादिनार्थस्कारे सक० ।

वस्त छर्दे दिवा०पर०सक०सेट् । वस्यति इरित् अवस्त अवास्तीत् उदित् त्वा सेट् ।

वस निवासे स्वा०पर०सक०अनिट् यजा० । वसति अवात्सीत् उवास ऊषतुः उषित्वा । अधि+अनु+उप-आ+वा वसतेराधारस्य कर्मता अधिवसति वैकुण्ठं हरिः मि०को० अनुवसति उपवसति आवसति । उप+ व्यवोजने तत्रा धारस्य कर्मता "एकादश्यामुपवसेत्" इत्यादि ।

वस आच्छादने अदा० आ० सक० सेट् । वस्ते अवसिष्ट ।

वस वासने सुरभीकरणे अद०चु०उभ०अक०सेट् । वासयति ते अववसत् त ।

वसति(ती) स्त्री वस-अति वा ङीष् । १काशे २यामिन्याम् "वसतीवरिता" रघुः । ३निवेशने मेदि० ४स्थाने च ५शिविरे त्रि० कौ० ।

वसतिवरी स्त्री ब०व० लोमवृद्धनामसु ग्रन्थे । "अग्नीषोमीयस्य पशोराजैनान्ते वसतीवरीयर्चं शन्नोमानामानमभिमन्त्रयते" आश्वा० श्रौ० दा० । "लोमार्थो आपो वसतीवरीशब्देनोच्यन्ते" कर्क० । अथ लोमाभिमन्त्रणमुक्तानां वसतीवरीसंज्ञानामर्चां यदृच्छमभिधीयते, वेददी० यजु० ६।२१ ।

वसन न० वस-आच्छादने कर्मणि ल्युट् । १वस्त्रे अमरः । भावे ल्युट् । २आच्छादने मेदि० वस-वासे आधारे ल्युट् । ३निवासे ४क्षीकटीभूमौ च वरदः ।

वसन्त पु० वस-झ । मधुमाधवात्मके ऋतुभेदे "मधुश्च माधवश्च वासन्तिकावृतू" यजु श्रुतिः । २अतिसारे शब्दर० ३नाट्ये विदूषकोपाधौ । ४रागभेदे च ।

"आन्दोलिता च देशाक्षी लोला प्रथमनञ्जरी। मन्दारी चेति रागिण्यो वसन्तस्य सदानुगाः" इत्युक्ता वस्य रागिण्यः भट् इत्यन्ते रागिणीशब्दे दृश्याः ।

अस्य गानकालः । "श्रीपञ्चमी सखारभ्य यावत् स्याच्छयनं हरेः । तावद्वसन्तरागस्य गानमुक्तं मनीषीभिः" सङ्गीतदा० । ४तालावयवे । "जयमङ्गलगन्धर्वमकरन्दतिलङ्कषाः । रतितालो वसन्तश्च जगझम्पाऽथ मालविः" वसन्ततालेऽत्र कर्त्तव्यो नगणो रगणस्तथा" सङ्गीतदा० ।

वसन्तक पु० वसन्ते कायति कै-क । द्योनाकवृक्षे शब्दमा०

वसन्तकुसुम पु० वसन्ते कुसुमं यस्य । सेलुवृक्षे शब्दमा० ।

वसन्तकुसुमाकर पु० प्रमेहरोगनाशके औषधभेदे ।

"प्रवालरसमौक्तिकाम्बरनिदं चतुर्भागभाक् पृथक् पृथगथ घृते रजतहेमतो द्वयं धके । अयोभुजगरङ्गकं त्रिकटकं त्रिवत्सोद्भिदं शुभेऽह्नि विभावयेत् त्रिगुणितं धिया समयः । कुवेर्द्वनिशेषुजैः कलतलाजतीपुष्पजैः पयःकदलिकन्दजैर्मलयजैश्च नाभ्युद्भवैः । वसन्तकुसुमाकरोरुपतिर्दिवल्लोऽधितः वसन्तनदकुञ्जगेषु खिल निजानुपानैरयम्" इत्ययोगतरङ्गिणी । [राजनि० ।

वसन्तजा स्त्री वसन्ते जायते जन-ड । माधवीलतायाम् ।

वसन्ततिलक न० स्त्रियं वसन्ततिलकं तभजा जगौ गः" छन्दो० उक्तौ चतुर्दशाक्षरपादके छन्दोभेदे

वसन्तदूत पु० वसन्तस्य दूत इव । १कोकिले २आम्रवृक्षे ३पञ्चमरागे च त्रिका० । ४माधवीलतायाम् ५पाठलीवृक्षे स्त्री मेदि० गौ० ङीष् । दृग्विषकारिकायां ऽपिलात्वे स्त्री ङीष् राजनि० ।

वसन्तद्रु पु० वसन्तस्य द्रुः । आम्रवृक्षे शब्दर० तत्काले तस्य आयकालसम्बन्धात् तथात्वम् वसन्तश्चादयोऽर्थाः ।

वसन्तसख पु० वसन्तस्य सखा अनुगमा० । कामदेवे त्रिका० ।

वसा स्त्री वस-अच् । १मांसजाते धातुभेदे मेदसि अमरः । अस्थ्नस्तरवृक्षे ५५८पृ०दृश्यम् । २मांसरोहिण्यां लतायाञ्च राजनि० । [त्रिका० ।

वसाज्य पुंस्त्री० वसाभिः आज्यः । मधुरमेदुरे त्रिगुणारे [धरणिः ।

वसि पु० वस-इन् । वस्त्रे उणा० ।

वसिर न० वस-इरन् । १घासदूलवृक्षे २गजमिथुनयोश्च

वसिष्ठ पु० अतिशयेन+पृषो० । ब्रह्मणः मानसपुत्रेषु सप्तर्षिषु तन्निभेदे भा० वनु० अनुशासनपर्व्वणि तन्निरुक्तिर्यथा "वसिष्ठोऽस्मि वसिष्ठोऽस्मि वसुश्रेष्ठेष्वपि । वरिष्ठत्वाच्च वासाच्च वसिष्ठ इति विद्धि माम्" ।

वसु न० वस-उ । १धने २रत्ने अमरः ३ब्रह्मप्रीतौ ४ख्यातौ मेदि० । ५जले पुंस्त्री० । ७यज्ञे पुंस्त्री० । ८यज्ञे देवभेदे पुंस्त्री० १०दक्षपुत्र्यां ११गन्धर्वदेवताभेदे च पु०अमरः । १२अष्टसङ्ख्यायाञ्च १३मधुरे १४शुक्ले च त्रि० हेमच० । १५दीप्तौ १६ब्रह्मप्रीतौ च स्त्री शब्दच० । १७वसुदेवताके धनिष्ठानक्षत्रे पु० स्त्री०त० । १८चेदिराजाख्ये देवभेदे

वसुक पु० वसुना सूर्य्यनाम्ना कायति कै-क । १चर्कटवृक्षे अमरः । २वकवृक्षे च मेदि० ।

वसुकोट पु० वसुनि धने कोट इव । याचके त्रिका० ।

वसुच्छिद्रा स्त्री वसुसङ्ख्यातानि पुष्पे छिद्राण्यस्याः । मल्लिकायाम् रत्नमा० । [देवे क्षत्रियभेदे अमरः ।

वसुदेव पु० वसुना दीव्यति दिव-अच् । श्रीकृष्णजनके यादवे

वसुदेवभू पुं० वसुदेवात् भवति भू-क्विप् । श्रीकृष्णे वसुदेवसुतादयोऽत्रैव । [दधाति धा-क वा । पृथिव्याम् अमरः

वसुधा स्त्री वसूनि धीयन्तेऽस्यां धा-बाहुलकात् आधारे क, वसूनि

वसुधारा स्त्री वसोश्चेदिराजस्य प्रियार्थं धारा इतादिस्वरूपतिः । माङ्गल्येषु चेदिराजवरदेन दीयमानायां घृतादिधारायाम् ।

"कुलवर्म्मा वसोर्धारां वप्र वारान् हतेन तु । कारयेत् यस्तु वारान् वा नातिनीचां न चोच्छ्रिताम् । आयुष्मान् निति शान्त्यर्थं जत्वा तत्र समाहितः । अद्भ्यः पिवेत्यवदत्त आदानसुपक्रमेत्" कल्पोगप० ।

२लिनशक्तिभेदे हेमच० । ३कुबेरपुर्य्यां शब्दमा० ।

वसुन्धरा स्त्री वसूनि धारयति धृ-खच् मुम् ह्रस्वश्च । पृथिव्याम् अमरः ।

वसुप्राण पु० वसुर्दीप्तः प्राण इव वस्तु । अग्नौ शब्दर० ।

वसुमती स्त्री वसूनि सन्त्यस्यां मतुप् । पृथिव्याम् अमरः ।

वसुरोचिस् पुं०वसुने धनाय रोचते रुच-क्विप् नुम् च । यज्ञे सि०कौ०

वसुल पु० वसु दीप्तं लाति ला-क । देवे त्रिका० ।

वसुहट्ट पु० वसूनां दीप्तीनां हट्ट इव । वकवृक्षे जटा० ।

वस्त अदने नतौ च सक० याचने दि० चु० उभ० सेट् । वस्तति ते अवस्तत् त । [अमरः स्त्रियां ङीष् ।

वस्त पुंस्त्री० वस्यते वध्यते वस्त्रार्थं वस्त्र-कर्मणि घञ् । छागे

वस्तक न० वस्त्र इव कायति कै-क । क्षत्रियवस्त्रयोः हेमच० ।

वस्तकर्ण पु० वस्तस्य कर्ण इव पताकारोऽस्यस्य अच् । शालवृक्षे राजनि० ।

वस्तगन्धा स्त्री वस्तस्येव गन्धोऽस्याः । अजगन्धायाम् राजनि० । [राजनि० ।

वस्तमीढा स्त्री वस्तस्येव मीढो यस्याः । अजमोदायाम्

वस्ति पु० वस्ते आदत्तेऽति मूत्रम् वस्-तिच्। नाभेरधोभागे मूत्राधारे स्थाने २वासे च २४खनदशायां पुंस्त्री ब०व० अमरः (पिचकारी) औषधदानार्थे द्रव्यभेदे पु० तद्विधिः भावप्र०

"वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परम्। यः स्नेहो दीयते गुदः स्नादनुवासनेनामकः। कषाय क्षीरतैलैर्यो निरूहः स निगद्यते। वस्तिभिर्दीयते यस्मात्तस्मादस्तिरिति स्मृतः।" वस्तिभिः मृगादीनां मूत्राशयैः "तस्मानुवासनाख्यो हि वस्तिर्यैः सोऽत्र कथ्यते। अनुवासनभेदस्य मात्रावस्तिरुदीरितः। पलद्वयस्य मात्रा तद्वादपि वा भवेत्। अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिली। नानुवास्यस्तु कृशो स्यान्नेही स्थूलस्तथोदरी। नास्याध्या नानुवास्याश्च जीर्णोन्मादहृदुर्दिताः। शोथमूर्छाकृच्छिभयश्रमकासक्षयातुराः। नेत्रं कार्यं सुवर्णादिधातुभिर्दन्तवेणुभिः। नलैर्दलैर्विषाणाद्यैर्मणिभिर्वा विधीयते।" नेत्रं नाड़ी तथा चोक्तं विश्वप्रकाशे "नेत्रं वल्यगुदे वस्त्रे तरुमूले विलोचने। नेत्रवल्ले च नाड्याञ्च नेत्रो नेतरि भेद्यवदिति"। "एकवर्षात्तु षड्वर्षाद् यावन्मानं षडङ्गुलम्। ततो द्वादशकं यावन्मानं स्यादष्टसम्मितम्। ततः परं द्वादशभिरङ्गुलैर्नेत्रदीर्घता। सुखच्छिद्रं कलायाभं छिद्रं कोलास्थिसन्निभम्। यवमध्यं भवेच्चेत्रं वृत्तं गोपुच्छसन्निभम्। गोपुच्छसन्निभं मूले तस्मात् क्रमात् क्रमात् क्रमात्"। सुखच्छिद्रादिप्रमाणं नेत्रं क्रमेण षड्वर्षा यद्वा दशवर्षा यदा तदूर्द्धं वर्षाश्च ज्ञेयाः। "बालराङ्गुष्ठमानेन मूले स्थूलं विधीयते। कनिष्ठिकामरीणाङ्गमध्ये च गुटिकाङ्गुलम्।" परिणाहोऽस्य स्थौल्यम् "तन्मूले कर्णिके द्वे च कार्ये भागात्तुर्यकात्।" कर्णिका शरादिकर्णवत् "योजयेत्तत्र वस्तिञ्च बन्धदयविधानतः। मृगाजशूकरगवां महिष्याश्चापि वा भवेत्।" वस्तिरिति शेषः। "मूत्रकोषस्य वस्तिस्तु तदाभे तु चर्मणः। कषायरक्तः स मृदु वस्तिः स्निग्धो दृढोद्धितः। नवबल्लेस्तु नेत्रं स्यात् सुखमष्टाङ्गुलोन्मितम्। सुच्छिद्रं स्थूलपक्वनालिका परिणाहि च। शरीरोपचयं वर्णं बलसारोग्यमायुषः। कुरुते परिशुद्धिञ्च वस्तिः सम्यगुपाचितः। दिवा शीते वसन्ते च स्नेहवस्तिः प्रदीयते। ग्रीष्मवर्षाशरत्काले रात्रौ स्यादनुवासनम्। न चातिस्निग्धभुक्तस्य भोजयित्वानुवासयेत्। मद्यं मूर्च्छां च जनयेद्विधा स्नेहः प्रयोजितः। "द्विधा भोजने वस्तौ च। "रूक्षं भुक्तवतोऽल्पं वर्षं वर्षञ्च कारयेत्। युक्तस्नेहस्तते नन्तु भोजयित्वानुवासयेत्"। युक्तस्नेहं यथोक्तस्नेहं भोक्तं भोजयित्वेत्यर्थः। "हीनमात्रावभौ वस्ती जातिजार्यंकरौ स्मृतौ। अतिमात्रौ तथानाहरुक्मातोद्वारकारकौ" उभौ वस्ती अनुवासननिरूहाख्यौ। "उत्तमा मात्रमेहः मध्यमा स्यात्मस्नेहस्तिभिः। प्रकाशार्द्धेन हीना स्यादेकमात्रानुवासने। यतोऽनुवास्यमाश्रित्य देयं स्नेहे च चूर्णकम्। तन्मात्रोत्तममध्यान्या षट्चतुर्दशमात्रकैः। विरेचनात्मरावे गते ज्ञातवत्याव च। भुक्ताद्यायानुवासाय वस्तिर्देयोऽनुवासनः। अथानुवास्यं स्नेहक्तमुष्णाम्बु चेदितं मनैः। भोजयित्वा यथाशास्त्रं कृतस्नेहमथ ततः। पक्वाशयानिलविण्मूत्रं योजयेत्स्नेहवस्तिना" उष्णाम्बुस्नेहितम् उष्णाम्बुना स्नापितम्। "वामस्य वामपार्श्वेन वामजङ्घाप्रसारिणः। कुञ्चितापरजङ्घस्य नेत्रं स्निग्धे गुदे न्यसेत्। वृद्धं वस्तिसुखं स्नेहं वामहस्तेन धारयेत्। पीड़येद्वस्तिमेनैव मध्यमेन धीरधीः। जृम्भाकासक्षयादींश्च वस्तिकाले न कारयेत्। तिर्यन्नाभेर्मितः कालः प्रोक्तो वस्तेस्तु पीड़ने। तत्प्रणिहिते स्नेहे उत्तानो वागयतो भवेत्। अङ्गानुष्णः करावर्त्तं कुर्यात्क्षोटिकया पुनः। एषा माता भवेदेका सर्वत्रैवेह निश्चयः। निमिषोन्मेषणं पुंसामकृत्वा क्षोटिकां वा। गुर्वक्षरोच्चारणं वा स्यान्मात्रेयं स्मृता बुधैः। प्रसारितैः सर्वगात्रैर्यथावीर्यं प्रसर्पति" यथावीर्यं स्नेहादि। "ताड़येत्तत्रयोरेनन्नीस्त्रीन्वारान् मनैः मनैः। स्फिजोश्चैव तथा श्रोणीं मध्यात्त्वेवोत्क्षिपेत्ततः। स्फिजोश्चैनं स्वपाणिभ्यां पूर्ववत्ताड़येद्बुधः। मध्यात्तु यदत्यर्थं तत्तस्य त्रीन् वाराञ्चुत्क्षिपेत्ततः। ज्ञाते विधाने तु तत कुर्यात्क्षिप्रं यथासुखम्। सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु। उपद्रवं विना शीघ्रं स सम्यगनुवासितः। जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः। भोजयेत्काञ्जं दीप्ताग्निस्तु नरो यदि। अनुवासिताय, दातव्यमितरेऽङ्गि सुखोदकम्। धान्यशुण्ठीकषायं वा स्नेहव्यापत्तिनाशनम्"। सुखोदकसुण्ठोदकं व्यापत्सिद्धौ धिः। "अनेन विधिना बद्ध्वा सप्त चाष्टौ नवापि वा। विधेया वस्तयस्तेषामन्ते चैव निरूहणम्। दत्तस्तु प्रथमो वस्ति स्नेहयेद्वस्तिवद्धयौ। बलवर्णकरौ द्वितीयस्तु मू

र्जस्यमनिलं जयेत् । वर्णं वर्णंच स जयेत्तृतीयस्तु प्रयोजितः । चतुर्थपञ्चमौ दत्तौ श्लेष्मेतां रसाश्रजौ । षष्ठो मांसं श्लेष्मति सप्तमो मेद एव च । अष्टमो नवमश्चापि मज्जानञ्च यथाक्रमम् । यथाक्रममिति वचनादष्टमोऽस्थि श्लेष्मयेत् । "एवं शुक्रगतान् दोषान् द्विगुणः साधु साधयेत् ।" अष्टादशदिवसावधिरवस्तिफलम् "अष्टादशाष्टादशकाह्निाहु यो ना विषेवते । स कुञ्जरबलोऽश्वस्य जवतुल्योऽमरप्रभः । रूक्षाय बद्धवाताय श्लेष्मवस्तिं दिने दिने । दद्याद्वैद्यस्तथान्येषामग्न्याबाधभयात् त्रयहात् । श्लेष्मोल्लसातो रूक्षाणां दीर्घकालमनत्ययः ।" अनत्ययः अबाधः । "तथा निरूहः स्निग्धानामल्पमात्रः प्रशस्यते । अथ वा यस्य तत्कालं श्लेष्मो नियति केवलः । तस्याप्यल्पतरो देयो न हि स्निग्धेऽवतिष्ठते ।" अवतिष्ठते दत्तः श्लेष्म इति शेषः "अशुद्धस्य मलोन्निष्ठः श्लेष्मो नैति यदा पुनः । तदाऽरुसदनाध्माने शूलं श्वासश्च जायते । पक्वाशये गुरुत्वञ्च तत्र दद्यान्निरूहणम् । तीक्ष्णं तीक्ष्णौषधैर्युक्तं फलवर्त्तिमथापि वा । यथानुलोमनो वायुर्मलः श्लेष्मश्च जायते । तथा विरेचनं दद्यात्तीक्ष्णं नस्यञ्च शस्यते । यस्य नोपद्रवं कुर्य्यात् श्लेष्मवर्त्तिरनिःसृता । सर्वोऽल्पो व्याहतो रौक्ष्यादुपेक्ष्यः स विजानता । अनायातस्त्वहोरात्रे श्लेष्मं संशोधनैर्हरेत् । श्लेष्मवस्त्यनायाते नान्यः श्लेष्मो विधीयते । गुडूच्यरण्डपूतीकभार्गीदंषकरौहिषम् । अतस्तरीं बहुचरं काकनासां प्रलोन्मिताम् । यवमाषातसीकोलकुलत्थान् प्रसृतोन्मितान् । चतुर्द्रोणेऽम्भसः पक्वा द्रोण्यर्धेन तेन च । पचेत्सैलादकं सर्वैर्जीवनीयैः प्रलोन्मितैः । अनुवासनमेतद्धि सर्ववातविकारनुत् ।" पूतीकः करञ्जः रौहिषं रोहितसुगन्धत्वयविशेषः । काकनासा (काकाठोठी) प्रसृतम् पलत्रयम् । "ओढा यत्र व्यापदस्तु जायते वस्तिकर्मणः । दूषितान् वस्तुदायेन तांश्चिकित्सात्तु वस्तुतः । वस्तुदायेन वस्तुचिन्तनेत्यादिसामर्थ्यात् । "मात्राहारविहाराश्च परिहाराश्च तद्वतः श्लेष्मपानवमाः कार्या नात्र कार्य्या विचारणा ।"

वस्तिकर्मन् पुं० वस्तिकर्मणा तच्छोधनव्यापारेणाङ्गः । अरिष्टसञ्ज्ञे शब्दज० ।

वस्तिमल न० मूत० । मूत्रे हेमचः ।

वस्तु न० वस-तुन् । १ द्रव्ये २पदार्थे तिका० १वस्त्वर्थे च

वस्तुक न० वस्तु+स्वार्थे कन् । १वास्तुके शाकभेदे २श्वेतचिल्लीशाके च स्त्री राजनि० ।

वस्त्य न० वस्तौ साधु यत् । वस्तौ वसरः ।

वस्त्र न० वस-ष्ट्रन् । परिधानाद्युपयुक्ते कार्पासादौ वसने ।

वस्त्रधारणगुणाः यथा "स्नातस्यानन्तरं सम्यग्वस्त्रेण तनुमार्जनम् । कान्तिप्रदं शरीरस्य कण्डूयादोषनाशनम् । कौषेयं चित्रवस्त्रञ्च रक्तवस्त्रं तथैव च । वातश्लेष्महरं तत्तु शीतकाले विधारयेत् ।" कौषेयं पट्टाम्बरं तसरवस्त्रञ्च । "मेध्यं सुशीतं पित्तघ्नं काषायं वस्त्रमुच्यते । तद्वारयेदुष्णकाले तच्चापि लघु शस्यते ।" काषायं (कोकटी) इति लोके । कषायरागरक्तं वा । "शुक्लन्तु शुभदं वस्त्रं शीतातपनिवारणम् । नचोष्णं नच वा शीतं तत्तु वर्षासु धारयेत् । यशस्यं काम्यमायुष्यं श्रीमदानन्दवर्द्धनम् । स्वच्यं वशीकरं रूच्यं नवं निर्मलमम्बरम् ।" काम्यं कामोद्दीपकम् । "कदापि न जनैः सङ्गिधार्य्यं मलिनमम्बरम् । तत्तु कण्डूकृमिकरं ग्लान्यलक्ष्मीकरं परम् ।" अलक्ष्मीरशोभा दारिद्र्यं वा ।" भावप्र०

अस्य परिधानविधिर्यथा स्मृतिः "विकच्छोऽनुत्तरीयश्च नग्नश्चावश्च एव च । श्रौतं स्मार्त्तं तथा कर्म न कुर्य्यादेवमित्यपि । विकच्छः परीधानाद् गलितकच्छः । तथा च "परीधानात्तवहिः कच्छा निबद्धा ह्यासुरी भवेत्" स्मृतिः "वामे पृष्ठे तथा नाभौ कच्छत्रयमुदाहृतम् । एभिः कच्छैः परीधत्ते यो विप्रः स शुचिः स्मृतः" । बौधायनः "नाभौ धृतञ्च यद्वस्त्रमाच्छादयति जानुनी । अन्तरीयं प्रशस्तं तद्विच्छिन्नमुभयोस्तयोः ।" प्रचेताः "दद्या नाभौ प्रयोजयेत्" स्मृतिः "न स्यात् कर्मणि कञ्चुकीति" । उत्तरीयधारणं चोपवीतवत् "यथा यज्ञोपवीतञ्च धार्य्यते च द्विजोत्तमैः । तथा सञ्धार्य्यते यत्नादुत्तरा-च्छादनं शुभम्" स्मृतेः । अत्र यथा द्विजोत्तमैः सव्यापसव्यत्वादिना उपवीतं धार्य्यते तथा उत्तराच्छादनमपि द्विजोत्तमैरिति प्रदर्शनमात्रम् प्रागुक्तभगुवचनेन सर्वेषां द्विवस्त्रतायाप्रतीतेः" पारस्करः "एकवासो भवति तस्य उत्तरार्द्धेन प्रच्छादयतीति" स्मा० त०रघु० । "वस्त्रपरीधाननक्षत्रादि "नक्षत्रानुराधवसुतिष्यविशाखहस्तचित्रोत्तराग्निपवनादितिरेवतीषु । जन्मर्क्षजीवबुधशुक्रदिनोत्सवादौ धार्य्यं नवं वसनमीश्वरदेवतुष्ट्यै ।" ज्यो० त० । "स्त्र्यं चाल्पधनं,

क्षयः अधिदिने, क्षेयः यदा भूमिक्षे, वस्त्राणां वक्रता बुधे, गुरुगुरौ विद्यागमः शब्दः। नानाभोगयुतप्रमोद अयनं विद्याकृषा भार्गवे, भौरौ क्षुः खलु रोगशोककलहा वस्त्रे धृते नूतने" कर्मलोचनम्। अस्य चारसंयोग निषिद्धदिनानि यथा। "मन्दमङ्गलषष्ठीषु द्वादश्यां श्राद्धवासरे। वस्त्राणां चारसंयोगात्दग्धत्यासप्तमं कुलम्।" श्रा०त०।

परकीयवस्त्रधारणनिषेधो यथा "आत्मनं वस्त्रं यथा न्यायात्तं कमण्डलुः। आत्मनः शुचिरेतानि न परेषां कदाचन"। ईषद्धौतादिवस्त्रस्य पश्चिमाद्यप्रसारितवस्त्रस्य च अधौतत्वं यथा "ईषद्धौतं क्षिया धौतं यद्धौतं रजकस्य तु। अधौतं तदिजानीहशादिक्षपरिक्षये।" कर्मलोचनम्। सत्यतपाः "प्रमाणसूत्रं वा धौतं वस्त्रं प्रसारयेत्। पश्चिमाग्रं दक्षिणाग्रं पुनः प्रक्षालनात् शुचि" अत्राग्रं दशा इत्यर्थवत्। अत्रेताः "स्वयं धौतेन कर्त्तव्या क्रिया धर्म्या विपश्चिता। न च रजकधौतेन नाधौतेन भवेत् क्वचित्। पुत्रस्त्रिवर्गलोभेन स्वजातिबान्धवेन च। दासवर्गेण यद्धौतं तत् पवित्रमिति स्थितिः"। स्नानोत्तरं उष्णीषवस्त्रस्य धार्य्यत्वं यथा उष्णीषधारणं शिरोरुजापनयनाय। तेन स्नानानन्तरं धार्य्यम्। तथा च महाभारतम् "क्षौमोत्तराधिवासेन जलेन च सुगन्धिना। राजहंसनिभं प्राप्य उष्णीषं शिथिलार्पितम्। जलक्लेदनिमित्तं वै वेष्टयामास मूर्द्धनि"। शिथिलार्पितम् अग्रादक्षम्। निषिद्धवस्त्राणि यथा भारते "नक्षतेन न दग्धेन धारकेण विशेषतः। कृमिकोत्कीर्णजीर्णेन कर्म कुर्य्यादहिंसकः।" नारसिंहे न रक्तवस्त्रं वासो न नीलञ्च प्रशस्यते। अत्यन्तञ्च दशाहीनं वर्जयेत्तत्तरं बुधः। वस्त्रयम् .चत्कटरक्तविशेषम्। आचाररत्ने स्मृतौ "दशाहीनेन वस्त्रेण कुर्यात् कर्मोत्सवादृते"। विष्णुधर्मोत्तरे "वस्त्रं जात्यधृतं धार्य्यं न रक्तं मलिनं तथा। जीर्णं वाऽपदशञ्चैव श्वेतं धार्य्यं प्रयत्नतः। उत्तानहं नाम्बुधृतं वस्त्रञ्चैव धारयेत्। न जीर्णमलवद्वासा भवेच्च क्रियते यति।" योगियाज्ञवल्क्यः "क्षौमेवं वाससी धौते अक्लिन्ने परिधाय च। प्रक्षाल्योरु स्पृशंश्चैव क्षालयेत्तत्तः। अभावे धौतवस्त्राणां प्राक्शौचाविकानि च। कृतपौ सोमपट्टं वा द्विवोढ्वा देव वा भवेत्। अधौतेन च वस्त्रेण लिङ्गनैर्ऋतिकीं क्रियाम्। धृतेन वस्त्रं न शाम्यति दग्धं भवति निष्फलम्"। कृतपो नेपालकम्बलः। तत्रापवादः "राङ्कवे पट्टसूत्रे च सूचीविद्धं न दुष्यति" विधानपा० "जीवोरक्तं न दुष्यति" इति क्षिता०पाठः। तर्पणात् पूर्वं स्नानवस्त्रं निष्पीडने निषेधो यथा "निष्पीडयति यः पूर्वं स्नानवस्त्रन्तु तर्पणात्। निराशास्तस्य गच्छन्ति देवाः पितृगणैः सह"। लाट्यायनिः "स्नानं कृत्वाऽर्द्धवासाश्च विष्मूत्रं कुरुते यदि। प्राणायामत्रयं कृत्वा पुनः स्नानेन शुध्यति। नार्द्रमेकञ्च वसनं परिदध्यात् कथञ्चन"। हारीतः "आर्द्रञ्च मलवातातप्तमपि शुद्धयति"। संक्रान्त्यादौ वस्त्रनिष्पीडननिषेधो यथा षट्त्रिंशन्मतनिगमौ "संक्रान्त्यां पञ्चदश्याञ्च द्वादश्यां श्राद्धवासरे। वस्त्रं न पीडयेत्तत्र नच चारेण योजयेत्" ति०त०

वस्त्रकुट्टिम न० वस्त्रनिर्मितं कुट्टिमं यत्र। १वस्त्रगृहे (तासु) २वस्त्रे त्रिका०। [निर्मिते गृहे त्रिका०।

वस्त्रगृह न० वस्त्रनिर्मितं गृहम् शाक०। (तासु) वस्त्रवस्त्रग्रन्थि पु० हृत० नीव्याम् त्रिका०।

वस्त्रपुत्रिका स्त्री वस्त्रनिर्मिता पुत्रिका। वस्त्रनिर्मितपुत्रिकायाम् शब्दमा०। [२साकरवस्त्रगृहे च राजनि०।

वस्त्रभूषा स्त्री वस्त्रस्य भूषणं यस्याः ब०व०। १आङ्गुलायाम् वस्त्रयोनि स्त्री हृत०। स्वकृतवस्त्रनिरोधादौ अमरः।

वस्त्रवृक्ष पु० वस्त्रं रक्षयति रक्षण-णिच्-क्षु। कल्पवृक्षे राजनि०।

वस्त्र न० वस्त्र-अच्। १वेसने २मूल्ये ३वस्त्रे ४दूष्ये च विश्वः ५धने ६स्तुत्यौ च अमरटीकायां रमानाथः। मूल्ये पु० अमरः।

वस्त्रका स्त्री वस्त्रमिव स्वार्थे-क। छायौ अमरः।

वस्त्रौकसादा स्त्री वस्त्रनाशौकस्य नाशो यत्र। १वस्त्रनाशकौकस्ये २वन्दनदा ३कुनेरपुर्यां ४वस्त्रेरनद्याञ्च मेदि०।

वह दीप्तौ चु० उभ० सक० सेट् इदित्। वंहयति ते अवंहिष्ट।

वह्न प्रापणे भ्वा० उभ० सक० सेट् अनिट्। वहति ते अवाक्षीत् अवोढ् उवाह ऊहे ऊढः। अस्य प्रधानकर्मण्येव लकारादयः।

वह्न पु० वह्यतेऽनेन वह-क्यच्। १वस्त्रस्थरेणे अमरः। वह-भूवृक्षि क्यच्। २घोटनेऽवाक्षौ मेदि। वस्त्रस्य ५नद्यां स्त्री हेमच०।

वस्त्रल पु० वह-अतच्। १छत्रे २पालके च अजादिकोषः

वहति पु० वह-अति । १वायौ उणा० । २गवि ३सचिवे च मेदि० । [३गमने च ।

वहन न० वह-भावे ल्युट् । १पुरभेदे त्रिका० २प्रापणे ।

वहन्त पु० वह-झ । वायौ सि०कौ० २वाले उणा० ।

वहल पु० वह-अलच् । १पोते हारा० २दृढे त्रि० हेम० ।

वहलगन्ध न० वहलो दृढो गन्धो यस्य । शम्बरचन्दने राजनि० ।

वहलचक्षुस् पु०वहलानि चक्षुषीव पुष्पाण्यस्य । मेषशृङ्ग्यां (गाड़रशिङ्गी) रत्नमा० । [राजनि० ।

वहलत्वच पु० वहला दृढा त्वचा यस्य । श्वेतलोध्रे

वहला स्त्री वहलानि पुष्पादीनि सन्त्यस्य अर्श आद्यच् । १शतपुष्पायां राजनि० । २स्थूलैलायां भावप्र० ।

वहित्र न० वह-इत्र । १पोते जलयाने त्रिका० । स्वार्थे क । अत्रैवार्थे ।

वहिरङ्ग न० वहिः प्रकृतेर्बाह्यमङ्गं यस्य । व्याकरणोक्ते प्रत्ययादिनिमित्तके प्रकृत्यवयवादिकार्य्ये । "असिद्धं वहिरङ्गमन्तरङ्गे" व्या० परिभाषा ।

वहिरिन्द्रिय न० वहिर्देहादुद्बाह्यस्य पदार्थस्य ग्राहकमिन्द्रियम् । शब्दादिबाह्यविषयग्राहकेषु श्रोत्रादिषु ।

वहिर्द्वार न० वहिःस्थं द्वारम् । तोरणे अमरः ।

वहिर्मुख त्रि० वहिः बाह्यविषये मुखं प्रवणता यस्य । बाह्यविषयासक्तमनस्के विषयासक्ते १जने २विमुखे च ।

वहिस् अव्य० वह-इसुन् । बाह्ये अमरः ।

वहेड़क पु०वह-अच् वहः एडक इव वहत् काण्डो यस्य । विभीतकवृक्षे (वहेड़ा) राजनि० ।

वह्नि पु० वह-नि । १अग्नौ २चित्रकवृक्षे अमरः ३भल्लातके ४निम्बूके राजनि० । तन्त्रोक्ते ५प्रकारे च ।

"वर्गाद्यं वह्निसंस्थम्" इति श्यामास्तोत्रम् ।

वह्निभेदादिकं यथा

"जम्भको दीपकश्चैव विभ्रमश्चक्रमश्चोभकाः । आवश्याहवनीयौ दक्षिणाग्निस्तथैव च । अन्वाहार्य्यो गार्हपत्य इत्येते दश वह्नयः" । अन्यैरन्यथोक्तानि यथा "भ्राजको रञ्जकश्चैव लोदकः सूचकस्तथा । धारको सन्धकश्चैव द्रावकाख्यश्च सप्तमः । व्यापकः पावकश्चैव श्लेष्मको दशमः स्मृतः" । शरीरस्थवह्नेः नामानि यथा "वह्नयो दोषदुष्येषु संज्ञीना दश देहिनः" । दोषदुष्यांश्च यथा "वातपित्तकफा दोषाः दुष्याः स्युः सप्तधातवः" भा० ति० । "सप्ताग्नयो यथा "गार्हपत्यो दक्षिणाग्निस्तथैवाहवनीयकः । एतेऽग्नयस्त्रयो मुख्याः शेषास्तूपसदस्त्रयः" वह्नि०पु० । तत्र निषिद्धकर्माणि यथा "नाशुद्धोऽग्निं परिचरेत् न देवान् कीर्त्तयेदधीन् । न चाग्निं लङ्घयेद्धीमान् नोपदध्याद्धः क्वचित् । न चैनं पादतः कुर्य्यात् सुखेन न धमेद्मुधः । अग्नौ न निःक्षिपेदग्निं नाङ्गैः प्रशमयेत्तथा । न वह्निं मुखनिश्वासैर्ज्वालयेन्नाशुचिर्बुधः । स्वमग्निं नैव हस्तेन स्पृशेन्नाप्सु चिरं वसेत् । नापत्तिमेन्नोपधमेत् न स्पर्शेन्न च पाणिना । सुखेनाग्निं वसन्नीतं सुखादग्निरजायत" कूर्मपु० १५अ० । अग्निवैकल्यं तस्य शान्तिश्च यथा "अनग्निर्दीयते यत्र राष्ट्रे यस्य निरिन्धनः । न दीयते चेन्धनवान् स राष्ट्रः पीड्यते नृपैः । प्रज्वलेदपि वा मासं वा तथार्द्धमपि किञ्चन । प्रासाद तोरणद्वारं नृपवेश्म सुरालयम् । एतानि यत्र दह्यन्ते तत्र राजभयं भवेत् । विद्युता वा प्रदह्यन्ते तत्रापि नृपतेर्भयम् । धूमस्थानग्निजो यत्र तत्र विद्यान्महद्भयम् । विनाग्निं विस्फुलिङ्गाश्च दृश्यन्ते यत्र कुत्रचित् । त्रिरात्रोपोषितस्त्वात्र पुरोधाः समाहितः । सर्पिर्घृतः क्षीरवृक्षाणां समिधैस्तु हुतेन च । दद्यात् सुवर्णञ्च तथा द्विजेभ्यो गाश्चैव वस्त्राणि तथा भुवञ्च । एवं कृते पापमुपैति नाशं यदग्निवैकल्यभवं द्विजेन्द्र" ! वह्निपु० १०५अ० । हुतदेवताके कृत्तिकानक्षत्रे. ज्योतिषम् ।

वह्निकरी स्त्री वह्निं देहस्थवह्निं करोति वर्द्धयति कृ-ट ङीष् । १धातकीवृक्षे (धाइफुल) शब्द० । २वह्नेर्दीपके त्रि० । [दाहागुरुणि राजनि० ।

वह्निकाष्ठ न० वह्नेर्दाह्यदाहायानुकूलं काष्ठम् ष० त० ।

वह्निगन्ध पु० वह्नौ दाहकाले गन्धो यस्य । यज्ञधूपे शब्दच० ।

वह्निगर्भ पु० वह्निर्गर्भे यस्य । १वंशे २शमीवृक्षे स्त्री शब्दर० ।

वह्निज्वाला स्त्री वह्नेर्ज्वालेव पीडाकारकत्वात् । १धातकीवृक्षे राजनि० हृत० । २वह्निशिखायाम् ।

वह्निदीपक पु० वह्निं देहस्थवह्निं सेवनाद्दीपयति दीप-णिच्-ण्वुल् यद्वह्निरिव दीप्यति दीप-ण्वुल् वा । १कुसुम्भे शब्दर० । २अग्निदीपके त्रि० । ३अजमोदायाम् स्त्री राजनि० । [ङीष् । जटामांस्याम् रत्नमा० ।

वह्निनी स्त्री वह्निं तत्कान्तिं नयति नी-ड गौरा० ।

वह्निपुष्पी स्त्री वह्निरिव तापकं पुष्पं यस्याः ङीप् । धातकीवृक्षे राजनि० ।

वह्निभोज्य न० हृत० । घृते शब्दच० ।

४८ भाग ८

वह्निमन्थ पु० वह्नये वह्निजननाय मन्थतेऽसौ मन्थ-कर्मणि घञ्। १गणिकारीवृक्षे जटा०। ६त०। २वह्नेर्मन्थने राजनि०। (तत्रैव न०।

वह्निमित्र पु० वह्निर्मित्रं यस्य। १वायौ शब्दच० ६त०।

वह्निरेतस् पु० वह्नौ निक्षिप्तं रेतो येन। १शिवे वह्नौ हि निक्षिप्तात् शिवबीर्य्यात् गङ्गादिसङ्गमेन-कार्त्तिकेयोत्पत्तिः पुराणप्रसिद्धम्। ६त०।२वह्नौ च। [राजनि०।

वह्निलोहक न० वह्नेः प्रियं लोहं घातुः स्वार्थे क। कांस्ये

वह्निवधू स्त्री ६त०।१अग्निभार्य्यायां स्वाहायाम् २स्वाहालाके मन्त्रे च। वह्निजायादशोऽत्र।

वह्निवर्ण न०वह्नेरिव वर्णोऽस्य। रक्तोत्पले शब्दच०। [त्रिका०

वह्निवल्लभ पु० वह्नेर्वल्लभ इवोपकरत्वात्। सर्जरसे (धुना)

वह्निबीज न० वह्नेर्हेरम्बवह्नेर्बीजमिव उपकरत्वात्। १जीरके ६त०। वह्निदेवताके मन्त्रोक्ते २रकारे च। ३निष्पुके राजनि० ४ हेमच०।

वह्निशिख न० वह्नेरिव रक्तत्वात् शिखाऽस्य। १कुङ्कुमे अमरः। २क्षत्रियायां ३क्षत्रियकारीवृक्षे ४धातकीवृक्षे स्त्री राजनि० ६त०। ५अग्निशिखायां स्त्री। [राजनि०।

वह्निसख पु० ६त०। १वायौ। देहस्थवह्नेरुद्दीपके २जीरके

वह्नि न० वह-यत्। १शकटे २वाहनमात्रे च हेमच०। ३शिबिपत्न्यां स्त्री भरतः।

वा ऽवाप्तौ अव० गतौ सेवने च भ्वा० पु० उभ० सेट्। वापयति ते अवीवपत त। [वाति अवावीत्।

वा गमने क्विप्ते (क्षेपणे) प्र अदा० पर० सक० अनिट्।

वा अव्य० वा-का। १विकल्पे २सादृश्ये ३अवधारणे ४समुच्चये अमरः। एतेषु यथारुते उदाहृतं यथा (विकल्पे) अथैवं श्रोत्रियमिवं यजेत। (उपमाने) सिन्धौ वार्धो मणडूकं गोर्वा रसः" इत्यत्र (अवधारणे) "सा वा मन्त्रोक्तदीया वा मूर्त्तिर्जलमयी मनं न तृतीयेत्यर्थः। (समुच्चये) वायुर्वा दहनो वा। ५वितर्के ६पादपूरणे च मेदि० [जटा०

वांशिक पु० वंशी तदादत्ते शिल्पमस्य ठक्। वंशीवादनशीले

वांशी स्त्री वंशे भवः अण् ङीष्। वंशरोचनायाम् राजनि०

वाक पु० वच-घञ्। १वचने "नमोवाकं प्रयाक्षरे" उत्तररामचरितम्। पुंसो० बालत्वम्। अन्यभेदे "वाकोवाक्येतिहासेत्यादि" छान्दोग्यम्। "वाकोवाक्यम् उक्तिप्रत्युक्तिरूपम्" भा०। वकस्येदम् तेषां समूहो वा अण्। २वकसम्बन्धिनि त्रि०। ३वकसंघे न० अमरः।

वाकुची स्त्री वाति क्विप् वाः कुच-सङ्कोचे क गौरा०ङीषे कर्म०। (वाकुच) १ओषधिभेदे २शोभराज्यां राजनि०।

वाक्कीर पु० वाचा कौलकवाचा कीर इव श्लिष्टत्वात्। व्याधके शब्दर०।

वाक्कुल न० गौत० छलोक्ते छलभेदे "अविशेषाभिहितेऽर्थे वक्तृभिप्रायादर्थान्तरकल्पनम् वाक्कुलम्" गौ० सू०। यथा एकार्थवाच्यवोधवत्तात्पर्य्यकशब्दस्य यत्रान्यार्थान्तरबोधतात्पर्य्यकत्वकल्पना वाक्कुलम्" वृत्तिः। यथा वेयालादागतोऽयं नवकम्बलवत्त्वात् इत्युक्ते कुतोऽस्य नवसंख्यकाः कम्बला इत्युक्तिः।

वाक्पति पु० ६त०। १बृहस्पतौ अमरः २पुण्यनक्षत्रे च वाचः पतिरिव। ३निर्दोषोक्ततत्त्ववचनयुक्ते रावणकुटः।

वाक्पथ पु० वाचः पन्थाः विषयः अच्समा०। वाक्यविषये

वाक्पारुष्य न० वाचा कृतं पारुष्यम्। १वाक्यकृते पारुष्ये तद्विषये २विवादभेदे च। तद्विवृतिः वीरमि०उक्ता यथा "तस्य च स्वरूपमाह नारदः "देशजातिकुलादीनामाक्रोशं व्यङ्गसंयुतम्। यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते" इति। आक्रोशः आक्षेपः भर्त्सनमिति यावत् कुत्सितप्रियाः गौड़ा इति देशाक्रोशः। अत्यन्तलोलुपा आह्मणा इति जात्याक्रोशः। "क्रूरचरिता वैश्यालिका इति कुलाक्षेपः। व्यङ्गं निष्ठुराक्रमणयुक्तं यद्वाक्यं तद्भयजननार्थं वाक्यं तद्वाक्पारुष्यमित्यर्थः। तस्य त्रैविध्यमाह स एव "निष्ठुराक्षीलसौम्यत्वादपि तत् त्रिविधं स्मृतम्। गौरवाद्यत्क्रमात्तस्य दण्डोऽपि स्यात् क्रमाद्गुरुरिति" निष्ठुरादीनां स्वरूपमाह स एव "साक्षेपन्निष्ठुरं श्रेयसश्लीलं व्यङ्गसंयुतम्। पतनीयैरुपाक्रोशैस्त्रीव्रमाक्रुष्टमेनोधिषः" इति। धिङ्मूर्ख! जाल्म! इत्यादि साक्षेपमाक्षेपं निष्ठुरम्। व्यङ्गसंयुतं अयद्यत्प्रागिन्द्रादिगणसंयुतम् व्यङ्गीलम्। पतनीयैः सुरापानादिमिरुपाक्रोशैस्त्रीव्रं वाक्पारुष्यमित्यर्थः। कात्यायनोऽपि "यत्तत्सत्यं क्षितेरङ्कैः परमाक्षिपति क्वचित्। अभूतैर्वाथ भूतैर्वा निष्ठुरा वाक् स्मृता तु सा। व्यङ्गभावकरत्वेन वाचा क्रोधात्तु कथ्यते यदा। कुलदेशकुलानान्तु अक्षीणा सा बुधैः स्मृता। महापातकयोक्ती च रामद्वेषकरी च या। जातिध्वंशकरी वाथ तीव्रा सा प्रथिता तु वाग्मिभिः।" कल्पतरौ व्यङ्गावमूरण्यमिति पठित्वा निष्ठुराक्षुद्रकाथनेन तिरस्करण्यमिति व्याख्यातम्। व्यङ्गभावकरण्यमिति तु माधवादिसंमतः पाठः। प्रथममध्यमोत्तमभेदेन त्रैविध्यमाह बृहस्पतिः "देव

ग्रामकुलादीनां क्षेपः पामेन योजनम् । द्रव्यं विना तु प्रथमं वाक्पारुष्यं तदुच्यते । भगिनीमातृसम्बन्धसूपपातकशंसनम् । पारुष्यं मध्यमं प्रोक्तं वाचिकं शास्त्रवेदिभिः । अभक्ष्याभेयकथनं महापातकदूषणम् । पारुष्यमुत्तमं प्रोक्तं तीव्रं समभिघट्टनमिति ।" द्रव्यं विनेत्यत्र द्रव्यशब्दोऽभिधेयपरः । तेनोच्यमानार्थव्यतिरेकेणैव विधमभिधानं वाक्पारुष्यमित्यर्थः इति कल्पतरौ । द्रव्यं विना द्रव्यवैशिष्ट्यं विनेति मदनरत्ने । अभिघट्टनं उत्पाटनम् । निष्ठुराक्रोशे दण्डमाह याज्ञवल्क्यः "सत्यासत्याभ्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम् । क्षेपं करोति चेद्दण्ड्यः पणानर्द्धत्रयोदशेति । अन्यथास्तोत्रविनिन्दास्तुतिः । न्यूनाङ्गाः कराद्यरहिताः । न्यूनेन्द्रियाः नेत्रादिरहिताः । रोगिणः कुष्ठाद्यः अर्द्धत्रयोदशान् अर्द्धाधिकद्वादशपणानित्यर्थः । एतत् समवर्णविषयम् । अतएव बृहस्पतिः "समजातिगुणानान्तु वाक्पारुष्ये परस्परम् । विनयो विहितः शास्त्रे पणा अर्द्धत्रयोदशाः" इति । "विष्णुरपि "समवर्णाक्रोशे द्वादश पणान्दण्ड्य" इति । परस्परामतिक्षेपः । मनुनारदावपि "समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे । वादेष्ववचनीयेषु तदेव द्विगुणं भवेदिति" । शङ्खलिखितावपि "समवर्णव्यतिक्रमे द्वादशपणा यथारूपविशिष्टक्षेपेषु विशिष्टस्य चतुर्विंशतिरविशिष्टस्यातिक्रमे च विशिष्टस्य ततोऽर्द्धमिति । अत्र द्वादशार्द्धद्वादशयोरुत्कृष्टापकृष्टत्वेन व्यवस्था । कात्यायनोऽपि" "यो गुणान् कीर्त्तयेत् क्रोधाद्विगुणे वा गुणव्रताम् । अन्यत्र संज्ञानियोजी च वाग्दुष्टं तत्तरं विदुरिति" "नारदोऽपि "दुष्टस्यैव तु यो दोषान् कीर्त्तयेत् क्रोधकारणात् । अन्यायदेशवादी च वाग्दुष्टं तत्तरं विदुरिति" "अत्र क्रोधकारणादित्यनेन दुष्टपरित्यागार्थं दोषकीर्त्तने न दोष इति सूचितम् । अतएवोक्तं कात्यायनेन "यत्र ह्यात्मविकारार्थं पतितस्तेन कीर्त्तितः । वचनात्तत्र न ह्यात्तु दोषो यत्र विभावयेदिति" "वचनात् दोषकीर्त्तनात् । यत्राभियोगादौ पातित्यादिकं साधयेत्तत्रापि वचनाद्दोषो न स्यादिति यत्र विभावयेदित्यस्यार्थं शङ्खः स्मृतिचन्द्रिकायाम् । अत्रापि दण्डपारुष्यन्यायेन युगपत्प्रवृत्तयोर्दण्डत्वल्पत्वं अयुगपत्प्रवृत्तयोः पूर्वप्रवृत्तस्य दण्डाधिक्यमिति द्रष्टव्यम् । जातिगुणकृते विशेषे दण्डवैषम्याच्च बृहस्पतिः "समानयोः समो दण्डोन्यूनस्य द्विगुणोदमः । "उत्तमस्याधिकः प्रोक्तो वाक्पारुष्ये परस्परमिति" । हीनस्योत्तमाक्षेपे द्विगुणः उत्तमस्य हीनाक्षेपेऽर्द्धपरिमितोदण्ड इत्यर्थः । याज्ञवल्क्योऽपि "अङ्गोऽधमेषु द्विगुणः परस्त्रीभूत्तमेषु च । दण्डप्रणयनं कार्यं वर्णजात्युत्तराधरैरिति" "अर्द्धः सार्द्धद्वादशपणात्मक इत्यर्थः पूर्ववाक्ये "पञ्चविंशतिको दम" इति पञ्चविंशतेः पक्षतत्वात् । वर्णा ब्राह्मणादयः । जातयो मूर्द्धावसिक्तादयः । ते च ते उत्तराधराश्च वर्णजात्युत्तराधरास्तैरन्योन्याक्षेपे क्रियमाणे दण्डस्य प्रणयनमूहनीयं ज्ञातव्यम् । उत्तराधरभावमालोच्य दण्डः कल्पनीय इत्यर्थः । तमेव कल्पनीयं दण्डं प्रदर्शयति मनुः "शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति । वैश्योऽध्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति । विप्रः पञ्चाशतं दण्ड्यः क्षत्रियस्याभिशंसने । वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दम इति ।" बृहस्पतिरपि क्षिपन् विप्रादिकं दद्यात् पञ्चाशत्पणिकं दममिति" । शङ्खलिखितावपि "आक्रोशे ब्राह्मणस्य क्षत्रियः पञ्चशतं दण्ड्यः, शतार्द्धं वैश्यस्य पञ्चविंशतिं शूद्रस्येति" । बृहस्पतिरपि । "विप्रः शतार्द्धं दण्ड्यस्तु क्षत्रियस्याभिशंसने । विपरीतार्द्धं पञ्चाशच्छूद्रार्द्धत्रयोदश । शूद्रोऽशक्तो विनयोऽनयराधिनः । गुणहीनस्य पारुष्ये ब्राह्मणो नापराध्नुयात् । वैश्यस्तु क्षत्रियाक्रोशे दण्डनीयः शतम्भवेत् । तदर्द्धं क्षत्रियो वैश्यं क्षिपन् विनयमर्हति । शूद्राक्रोशे क्षत्रियस्य पञ्चविंशतिको दमः । वैश्यस्य चैतद्द्विगुणः शास्त्रविद्भिरुदाहृतः । वैश्यमाक्षारयन् शूद्रादाद्यः स्यात् प्रथमं दमम् । क्षत्रियं मध्यमश्चैव विप्रस्तत्तमसाहसमिति ।" जिह्वाच्छेदनरूपोऽत्रोत्तमसाहसो द्रष्टव्यः । तथा च स एव "धर्मोपदेशकर्त्ता च वेदादाहरणान्वितः । आक्रोशकस्तु विप्राणां जिह्वाच्छेदेन दण्ड्यते" इति । शूद्र इत्यनुषङ्गः । आपस्तम्बोऽपि "जिह्वाछेदनं शूद्रस्यार्य धार्मिकमाक्रोशतः" इति । गौतमोऽपि "शूद्रो द्विजातीनभिशस्यायाभिहत्य च वाग्दण्डपारुष्याभ्यामङ्गमोच्यो येनोपहन्यादिति" । अभिशस्याय बुद्धिपूर्वं वाचातिक्रम्य अभिहत्य उग्रेण दण्डेन ताडयित्वा अङ्गमोच्यो येनाङ्गेनाभिहन्यते तेन वियोजनीय इत्यर्थः । गुर्वादाक्रोशे त्वाहुः शङ्खलिखितौ "तथाऽभिशस्तानां विप्राणां गुरूंश्च निगृह्याशक्तस्य शस्त्रेण ताडनं वा गोधयाशुद्धेर्धनं

खरारोहणं दर्पहरणं वा दण्डो वेति । दण्डः कार्षापणशतरूपः । अतएव विष्णुः "गुरूनाक्रोशयन् कार्षापणशतमिति" । पुत्रादिभिर्मातृादीनामाक्रोशे दण्डमाह मनुः "मातरं पितरं जायां भ्रातरं श्वशुरं गुरुम् । आक्रोशयन् शतन्दाप्यः पन्थानञ्चाददद्गुरोरिति" । भ्रातरं ज्येष्ठभ्रातरम् । एतच्च साधुराधेषु मातृादिषु निरपराधायां जायायामिति मिताक्षरायामभाणि । अथ वाग्दण्डाधिक्षेपे दण्डमाह इहस्पतिः "क्षिपन् श्वश्रूादिकं दद्यात् पञ्चाशत्पणिकं दममिति ।" वाङ्मादिच्छेदन निष्ठुरभाषाभिभाषणे दण्डमाह याज्ञवल्क्यः "ब्राह्मणीवानेत्रसक्थिविनाशे वाचिके दमः । अत्यन्तदुर्वाचिकः पादनासाकर्णकरादिष्विति ।" वाङ्मादिविनाशे वाचिके करिष्यामीति वाचा प्रतिपादितं शतः शतपरिमितो दण्डः । पादादिभङ्गं करिष्यामीत्याक्षेपे पञ्चाशत्परिमितो दण्ड इत्यर्थः । एवंवादिनोऽशक्तस्य दशपणा दण्डनीया इत्याह स एव "अशक्तस्तु वदन्नेवं दण्डनीयः पणान्दशेति ।" यः पुनः शक्तोऽशक्तस्य वाङ्मादिभङ्गाक्षेपं करोति न केवलं स दण्ड्यः किन्तु अशक्तक्षेमार्थं प्रतिभुवमपि दापनीय इत्याह स एव "तथा शक्तः प्रतिभुवन्दाप्यः क्षेमाय तस्य त्विति" । अक्षीभ्रूभाषणे दण्डमाह स एव "अभिगन्ताम्बि भगिनीं मातरं वा तवेति च । अपनन्दापयेद्राजा पञ्चविंशतिकं दममिति ।" तीव्राक्रोशे दण्डमाह स एव "पतनीय कृते क्षेपे दण्डस्तत्समसाहसम् । उपपातकयुक्ते तु दाप्यः प्रथमसाहसमिति ।" पतनीयैः पातित्यहेतुभिर्ब्रह्महत्यादिभिः । उपपातकानि गोवधादीनि । मनुरपि "ब्राह्मणक्षत्रियाभ्यान्तु दण्डः कार्यो विजानता । ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः । विट्शूद्रयोस्त्वेवमेव स्वजातिं प्रति तत्त्वतः । क्षेदवर्जं प्रणयनं दण्डस्येति विनिश्चयः । पापोपपातवक्तारो महापातकसंसकाः । याद्यमध्योत्तमान्दण्डान्दाप्यस्तेते यथाक्रममिति ।" विष्णुरपि "परस्परपतनीये क्षेपे कृते तूत्तमसाहसं उपपातकयुक्तन्तु मध्यमम् त्रैविद्यवृद्धानांक्षेपे जातिपूगानाञ्च ग्रामदेशयोः प्रथमसिति" । देशाद्याक्रोशे दण्डमाह इहस्पतिः "देशादिकं क्षिपन्दाप्यः पणानर्द्धत्रयोदश । पापेन योजयन् दर्पाद्दाप्यः प्रथमसाहसम् । एष दण्डः समाख्यातः पुरुषापेक्षया मया । स्वल्पबाधिकत्वेन कल्पनीयो मनीषिभिरिति ।" याज्ञवल्क्योऽपि "मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोरिति ।" राज्ञ आक्रोशे दण्डमाह नारदः "अवक्रुश्य च राजानं वर्त्मनि स्वे व्यवस्थितम् । जिह्वाच्छेदाङ्गवेच्छ्रद्धिः सर्वस्वहरणेन वेति ।" याज्ञवल्क्योऽपि "राज्ञोऽनिष्टप्रवक्तारन्तस्यैवाक्रोशकन्तथा । तन्नासिकोष्ठौ च भेत्तारच्छित्त्वा जिह्वाम्प्रवासयेदिति ।" अल्पदोषाभिधानेऽपि वाक्पारुष्यदण्डोऽस्त्येव तथा च नारदः "पतितं पतितेत्युक्त्वा तथा चौरेति वा पुनः । वचनाल्पदोषः स्यान्मिथ्यादिर्दोषतां व्रजेदिति ।" मनुनारदावपि "काणं वाप्यथ वा खञ्जमन्यं वापि तथाविधम् । तथ्येनापि ब्रुवन्दाप्यो दण्डञ्चाषंपणावरमिति ।" विष्णुरपि "काणखञ्जादीनान्तथ्यवाच्यपि कार्षापणद्वयमिति ।" एतच्च दुर्वृत्तविषयमिति साधवीये विद्यारण्यश्रीपादैरभ्यधायि । मिथ्यावदनशीलानां दण्डमाह कात्यायनः "अनृताख्यानशीलानाञ्जिह्वाच्छेदो विशोधनमिति ।" हारीतोऽपि "मिथ्याभाषिणां मेलकानाञ्च राजा जिह्वाञ्छिन्द्याद्दण्डयेद्वेति" मेलको भक्तकः । कस्यचिदाक्रोशप्रकृतोऽर्द्धदण्डमाहोशनाः "मोहात्प्रमादात्सङ्घर्षात् प्रीत्या वोक्तं मयेति यः । नाहमेवं पुनर्वक्ष्ये दण्डार्द्धन्तस्य कल्पयेदिति ।"

वाक्य न० वच–ण्यत् चस्य कः । "वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" इत्युक्ते १पदसंघे सा०द० । २स्वार्थबोधसमाप्ते पदसमुदाये वैयाकरणाः । [अवाङ्क्षीत् ।

वाक्ष स्तृचायां भ्वा० पर० सक० सेट् इदित् । वाक्षति

वागीश पु० वाचामीशः । १इहस्पतौ "वागीशाद्याः सुमनसः" इति न्यायमालायां । २सरस्वत्यां स्त्री "वागीशा हृदये यस्य" इति भाग०टीकोपक्रमे श्रीधरः । ३पुंस्यर्चे च

वागीश्वर पु० ६त० । १इहस्पतौ २गुरौ च ३ततृपत्न्यां स्त्री ङीष् "वागीश्वरीमतुल्लातां फुल्लेन्दीवरलोचनाम् । वागीश्वरेण संयुक्ताम्" इति तन्त्रम् । ४सरस्वत्यां स्त्री ङीप् ५मञ्जुघोषे पु० त्रिका० । सोमराजाम्र अमरः ।

वागुजी स्त्री वाचा गुज्यते ध्वन्यते गुज–क गौरा० ङीष् ।

वागुरा स्त्री वा–ह्वसने उरच् गन् च । मृगयार्थं मृगबन्धनपाशादौ अमरः । [यस्य । व्याधे ।

वागुराबृत्ति पु० वागुरा मृगबन्धनपाशादिरेव वृत्तिर्जीविका

वागुरिक पु० वागुरा प्रहरणं यस्य वागुरयाचरति वा ठक् । व्याधे अमरः ।

वाग्गुद पुंस्त्री० पक्षिभेदे त्रिका० गुडहरणे तज्जातिग्राह्मि-

भेतुनोक्ता "गोधा गां वाग्गुदो गुडम्" ऋत्वेति शेषः

वाग्गुलि पु० राज्ञां ताम्बूलदातरि रत्नमाला।

वाग्डम्बर पु० ६त०। १वाक्यस्तोमे २वक्तृत्ववाक्ये च।

वाग्दण्ड पु० वाचो वागिन्द्रियस्य दण्डः संयमनम्। १मित-२भाषणे २वाक्यसंयमे च।

वाग्दत्ता स्त्री वाचा दत्ता। विधिना वाक्यमात्रेण दातुं कृतसङ्कल्पायां कन्यायाम् "वाचा दत्ता मनोदत्तेति यहा०त०

वाग्दरिद्र त्रि० ६त०। मितभाषिणि शब्दमा०।

वाग्दान न० ३त०। कन्याया वाङ्मात्रेण दाने "ततो वाग्दानपर्य्यन्तं यावदेकाहमेव च" शु०त०।

वाग्दुष्ट त्रि० वाचा दुर्वचनेन दुष्टः। गुडेऽपि वस्तुन्य-गुडरूपतया कथनेन दूषिते। "वाग्दुष्टं भावदुष्टं च वर्जयेदिति" स्मृतिः।

वाग्देवता स्त्री वाचां देवता। सरस्वत्यां "वाग्देवता चरितचित्रितचित्तसद्मा" जयदेवः। वाग्देव्यादयोऽप्यत्र।

वाग्मिन् त्रि० वाच्+अस्त्यर्थे ग्मिनि चस्य कः तस्य लोपः। १प्रशस्तवाक्यवक्तरि अमरः। २हरिवंशतौ पु० मेदि०। ३विष्णौ पु० विष्णुस०। [२निर्वेदे ३कल्पे अजयः।

वाग्य त्रि० वाचं यच्छति यम-ड। १वाग्दरिद्रे शब्दमा०

वाग्यत त्रि० वाक् वागिन्द्रियव्यापारोयता येन। मौन-धारिणि मुनौ अमरः "वाग्यतस्त्रिषवनं चरेत्" स्मृतिः।

वाग्यम त्रि० वाचं तद्व्यापारं यच्छति यम-अच्। मुनौ अमरः।

वाङ्मती स्त्री "हिमाद्रेस्तुङ्गशिखरात् प्रोद्भूता वाङ्मती नदी" इत्युक्ते नदीभेदे। सा च मिथिलादेशसन्नि-कृष्टतया वहति।

वाङ्मय त्रि० वाक्स्वरूपम् मयट् चस्य कः तस्य ङः। १वाक्य-स्वरूपे शास्त्रे। २वाक्यजनिते पापभेदे च। "पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्वशः। असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतु-र्विधम्" मनुः। तथा "परुषवचनमपवादः पैशुन्यमनृतं वृथालापो निष्ठुरवचनम् वाङ्मयानि षट्। परेषां देश-जातिकुलविद्याशिल्परूपवृत्ताचारपरिच्छदशरीरकर्मजी-विनां प्रत्यक्षदोषवचनं परुषम्। "यच्चान्यत् क्रोधस-न्तापत्रासजननं वचः। परुषं तच्च विज्ञेयं यच्चान्यत् तथाविधम्। चक्षुष्मानिति लुप्ताक्षं जात्यन्धं ब्राह्म-णेति च। प्रशंसानिन्दनं द्वेषात् परुषाच्च विशिष्यते"। तेषामेव परुषवचनानामपरोक्षमुदाहरणम् अपवादः। गुरुदेवपतिबन्धुभ्रातृमित्रसवर्णे अर्थौषधार्थं दोषो-द्घाटनं पैशुन्यम्। अनृतं द्विविधं असत्यसंवाद-श्चेति "देशराष्ट्रप्रसङ्गाच्च परार्थपरिजल्पनात्। नर्महास-प्रसङ्गाच्च भाषणं व्यर्थभाषणम्। गुह्याङ्गानेष्टसंज्ञानां भाषणं निष्ठुरं विदुः। यदन्यदपि वचो नीचस्त्रीपुंसो-र्मिथुनाश्रयम्। इत्येवं षड्विकल्पस्य दुष्टवाक्यस्य भाष-णात्। इह चामुत्र च क्रूरसनर्थं प्रतिपद्यते"। प्रशं-सयानिन्दनं प्रशंसानिन्दनम्। अत्र चतुर्विधमद्विधयो-रविरोधः। असत्यत्वासत्यत्वभेदानादरेण पारुष्यापा-वादयोरैक्यात् निष्ठुरस्य परुषान्तर्भावाच्च। अयञ्च व्यर्थप्रलापव्यर्थभाषणयोः पर्य्यायत्वान्नार्थान्तरम्" तिं०त०।

वाङ्मुख न०६त० उपन्यासे प्रथमवाक्योपक्रमे अमरः।

वाचंयम त्रि० वाचां यच्छति वाचा+यम-ख सुम् हस्वश्च। १मितभाषिणि। २मौनावलम्बिनि मुनौ पु० अमरः।

वाच पुंस्त्री० वच-क्विप्-अच्। (वाचा) इति ख्याते मनुष्य-भेदे राजवल्लभः स्त्रियां ङीष्।

वाचक त्रि० वक्ति अभिधाशक्त्या बोधयति वच-ण्वुल्। "साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः" इत्युक्ते १शब्दभेदे २कथके त्रि०। वाचयति वच-णिच्-ण्वुल्। ३पुराणादिपाठके पु० "वाचकः पूजितो येनेति" पुरा० "ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात्। श्रुत्वान्य-वर्णजाद्राजन् ! वाचकाक्षरकं व्रजेत्"। तथा "देवाग्नौ-मध्यतः कृत्वा ब्राह्मणानां विशेषतः। ग्रन्थिञ्च शिथिलं कुर्य्याद्वाचकः कृच्छ्रनन्दन !। पुनर्बध्नीत तत्सूत्रं न सूत्रं धारयेत् क्वचित्। हिरण्यं रजतं गाञ्च तथा कांस्योपदो-हनाः। दत्त्वा तु वाचकायेह श्रुतस्याप्नोति तत् फलम्"। कांस्योपदोहनाः कांस्यक्रोडाः "वाचकः पूजितो येन प्रसन्नास्तस्य देवताः"। तथा "ज्ञात्वा पर्वसमाप्तिञ्च पूजये-द्वाचकं बुधः। आत्मानमपि विक्रीय य इच्छेत् सुफलं क्रतुम्"। तथा "विस्पष्टमद्भुतं शान्तं सुश्राव्याक्षरपदं तथा। कलस्वरसमायुक्तं रसभावसमन्वितम्। बुध्यमानः सदात्यर्थं अन्यार्थं कृतलक्षणो नृप !। ब्राह्मणादिषु सर्वेषु अन्यार्थं चार्थवेत्तृषु !। य एवं वाचयेद् ब्रह्मन् स विप्रो व्यास उच्यते"। तथा "सप्तस्वरसमायुक्तं काले-काले विशाम्पते !। प्रदर्शयन् रसान् सर्वान् वाचयेद् वाचको नृप" तिं०त०।

वाचकलक्षणादि हेमा० हा० नन्दिपु० उक्तं यथा

"वाचको ब्राह्मणः प्राज्ञः श्रुतशास्त्रो महामनाः। अभ्यस्ताक्षरविन्यासो ह्यक्षशास्त्रविशारदः। शब्दार्थविच्च

प्रगल्भश्च विनीतो मेधया पुनः। गीतिज्ञो वाक्यसुश्राव्यः स्वरेणाखिलभाषकः" इत्युपक्रमे एवंविधानतो वाच्यं वाचकेन विपश्चिता। तपःप्रभावात्मकं सर्वं स्वर्गादिफलसाधकम्। अनैर्विबोध्य वै वाच्यमध्यात्मादि च यद्भवेत्। क्रुद्धोक्तियुद्धसंक्षोभं धारावत्तेन (वेगेन) वाचयेत्। सरागं ललितैर्वाक्यैर्वाचयेत् हृद्यसङ्गमे। नानावृत्तानुरूपेण लालित्येन च वाचयेत्। सर्गाध्याये समाप्ते च कथायन्तं न एव वा। प्रश्नशब्दसंयोगे कुर्यादिति विरामकम्। समाप्तौ वाचको भीष्म! ब्रूयादेवं विचक्षणः। अवधार्य्य जगच्छान्तिमन्ते शान्त्युदकं वजेत्। शृणुतं शृणुतं ब्रूयादस्तु व्याख्यातमित्यदः। लोकः प्रवर्त्ततां धर्मे राजा चास्तु सदा जयी। धर्मवान् धनसम्पन्नो गुरुवाक्ये निरामयः। इति प्रोच्य यथाऽऽवासं गन्तव्यं च विभावतः।

वाचन न॰ वच-णिच-स्वार्थे वा णिच-ल्युट्। १पठने २कथने च युच्। पठने स्त्री। [पाघाटी।

वाचनिक त्रि॰ वचनेन निर्वृत्तम् ठक्। वाक्यनिष्पादिते

वाचस्पति पु॰ वृत॰अलुक्स॰। १बृहस्पतौ। २पुष्यनक्षत्रे च

वाच्(चा) स्त्री उच्यतेऽर्थो अनया वा वच-क्विप् नि॰ वा टाप्। १वाक्ये अमरः २वागिन्द्रिये च।

वाचाट त्रि॰ वाक्+कुत्सायां वाङ्मात्येऽस्यर्थे व्याटच् मत्वात् न कः। कुत्सितबहुभाषिणि अमरः। व्यालच्। वाचालोऽप्यत्र।

वाचिक त्रि॰ वाचा कृतम् वाच्+ठक् मत्वात् न कः। वाक्यनिष्पादिते पाघादौ वाङ्मयशब्दे दृश्यम्। २वाक्यारम्भभेदे। "आलापश्च विलापश्च संलापश्च प्रलापकः। अनुलापोऽपलापश्च सन्देशश्चातिदेशिकः। अपदेशोपदेशौ च निर्देशो व्यपदेशकः। कीर्त्तिता वचनारम्भा द्वादशामी मनीषिभिः" उज्ज्वलमणिः। [नैर्मल्ये च।

वाचोयुक्ति स्त्री ६त॰ अलुक्स॰। १वाचादक्षितयुक्तौ २वाक्यरचनायाम्

वाच्य न॰ वच-भावे यत् न कः। १दूषणे २प्रतिपादने धरणिः। ३कथने च। कर्मणि यत्। ४दूष्ये ५प्रतिपाद्ये अभिधया बोध्यार्थे च मा॰ ट॰।

"अचाल्यत्वबहुत्वाभ्यां प्रयोगाणां विशिष्यते। वाच्यवाचकभावोऽयमक्षपादादिशब्दवत्। विभीतकेऽप्यक्षशब्दो यद्यप्यक्ष्णैः प्रयुज्यते। तथापि वाचकस्यास्य ज्ञायते शकटाक्षवत्" भ॰त॰भट्टमा॰। [भावे-ष्यञ्। वाच्छा।

वाच्छ कामे भ्वा॰पर॰क॰सेट इदित्। वाच्छति अवाच्छीत्।

वाज न॰ वज-घञ्। १अन्ने २वृते ३जले ४यज्ञे च मेदि॰। ५शरपक्षे अमरः ६वेगे पु॰ ७निरूपणे ८पक्षे पु॰ मेदि॰ ९क्षुरौ पु॰विश्वः। [कात्या॰श्रौ॰तद्प्रकारादि दृश्यम्।

वाजपेय पुंन॰ वाजस्यान्नं वृतं वा पेयमत्र। यागभेदे

वाजपेयिन् पु॰ वाजपेय+अस्त्यर्थे इनि। १वाजपेययागकर्त्तरि उपचारात् २तद्वंशप्रे च।

वाजसन पु॰ वाजमन्नं सनोति ददाति सन-अच्। १विष्णौ विष्णुस॰। २शिवे भा॰ आनु॰ १७अ॰।

वाजसनि पु॰ राजस्य अन्नस्य सनिर्दानं येन। सूर्य्ये "आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इत्यादिक्रमेण तस्य वृष्टिद्वारा अन्नदातृत्वात् तथात्वम्।

वाजसनेय पु॰ वाजसनेः सूर्य्यस्य अपत्यं ढक्। याज्ञवल्क्ये "आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते" बृहदारण्यश्रुतिः। अस्यार्थः। आदित्यादधीतान्यादित्यानि शुक्लानि शुद्धानि। इयमत्र आख्यायिका। व्यासशिष्यो वैशम्पायनो याज्ञवल्क्यादिभ्यः स्वशिष्येभ्यो यजुर्वेदमध्यापयत्। तत्र दैवात् केनापि हेतुना क्रुद्धो वैशम्पायनो याज्ञवल्क्यं प्रत्युवाच मदधीतं त्यजेति। स योगसामर्थ्यात् सूतां विद्यां विधायोद्वमत्। तानि यजूंषि गृह्णीतेति गुरुणा अन्ये वैशम्पायनशिष्यास्तित्तिरयो भूत्वा यजूंष्यभक्षन्। तानि यजूंषि बुद्धिमाद्यिभ्यात् कृष्णानि जातानि। ततो दुःखितो याज्ञवल्क्यः सूर्य्याराध्यान्यानि शुक्लानि यजूंषि प्राप्तवान्। तानि च जावालगौपेयकाण्वमाध्यन्दिनादिभ्यः यच्छन्दर्शशिष्येभ्यः पाठितवान्" वेददी॰। "एवंस्तुतः स भगवान् वाजिरूपधरो रविः। यजूंष्ययातयामानि मुनवेऽदात् प्रसादतः। यजुर्भिरकरोच्छाखा दशपञ्चशतैर्विभुः। जगृहुर्वाजसन्यख्याः। काण्वमाध्यन्दिनादयः भाग॰ १२।६।६७ श्लो॰

वाजसनेयिन् पु॰ ब॰व॰। वाजसनेयेन प्रोक्तमधीयते इनि। यजुर्वेदशाखाभेदाध्यायिषु विप्रादिषु। २तदुक्तरीत्या कर्म्मकर्त्तृषु शूद्रेषु च "शूद्रा वाजसनेयिनः" म॰मा॰त॰।

वाजिदन्त पु॰वाजिनां दन्त इव पुष्पमस्य। १वासके रत्नमा॰ कप्। वाजिदन्तक तत्रैव।

वाजिन् पु॰ वाजः वेगः पक्षो वा अस्त्यस्य इनि। १घोटके २बाणे ३वासके च शब्दर॰। ४वेगवति त्रि॰ स्त्रियां ङीप्। सा च ५अश्वगन्धायाञ्च ६घोटिकायाम् स्त्री

·राजनि० । ७देवभेदे पु० । वाजिनशब्दे ६४३५ ।

वाजिन पु० वाजिभ्यो देवेभ्यः अण् । अग्निहोत्रनिःसृतजले "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इति श्रुतिः ।

वाजिपृष्ठ पु० वाजिन इव पृष्ठमस्य । अस्थानदग्धे शब्दच० ।

वाजिभक्ष पु० भक्ष्यते भक्ष-कर्मणि घञ् हृत० । चणके राजनि० । [मुद्गे राजनि० ।

वाजिभोजन पु० वाजिभिर्भुज्यते भुज-कर्मणि ल्युट् ।

वाजीकरण न० अवाजी वाजीव क्रियतेऽनेन वाजिन्+च्वि कृ-ल्युट् । "यद्द्रव्यं पुरुषं कुर्य्यात् वाजिवत् सुरतक्षमम् । तद्वाजीकरणं ख्यातम्" इत्युक्ते वीर्य्यवर्द्धिकरणे औषधभेदे । सुश्रुते ६४३५ ।

वाञ्छा स्त्री वाञ्छि-अ । इच्छायाम् इष्टसाधनताधीजन्ये ऽभीष्टविषये चित्तवृत्तिभेदे अमरः ।

वाट पु० वट-घञ् । १पथि २वृतिस्थाने च मेदि०गौरा०ङीष् ४वासुभूमौ ५कुटयां स्त्री मेदि० । ६वाटप्राकारे शब्दर० ।

वाटिका स्त्री वट-ण्वुल् । १वासुभूमौ (बेड़ियाला) २क्षुपे २क्षिकुपत्रायाञ्च शब्दच० । [क्षुपभेदे रत्नमा० ।

वाटया स्त्री वाट्यै हिता तत्र साधुर्वा यत् । (बेड़ियाला)

वाटयाल पु० वाटीमलति भूषयति मल-अण् । (बेड़ियाला) क्षुपभेदे शब्दर० गौरा० ङीष् तत्रैव स्त्री । ण्वुल् । वाट्यालक तत्रैवार्थे पु० शब्दर० । [अवाङ्मिष्ट ।

वाड् आप्तावे भ्वा० या० अक०सेट् चक्षिं न क्षुवः । वाडते

वाढ न० वह-क्त नि० । १अतिशये २तद्युक्ते त्रि० अमरः । पृषो० साधु । वाढम् ३प्रतिज्ञायां ४स्वीकारे च अव्य० अमरः ।

वाण पु० वण-घञ् । १शरे अमरः २गदां क्षणे ३दैत्यभेदे ४केवले मेदि० ५वल्लौ त्रिका० हेमाद्रिधृतवायवे विष्णुः ७भद्रक्षुद्धे राजनि० कादम्बरीग्रन्थकारके ८कविभेदे च "पञ्चबाणस्तु वाणः" इति प्रसन्नराघवम् ।९नीलझिण्टयां पुंस्त्री० अमरः । अस्योष्ट्रादित्वमित्यन्ये । [शब्दर० ।

वाणपुर न० हृत० । शोणितपुरे (कोड़री) पुराख्ये पुरभेदे

वाणवार पु० वाणं परसैन्यशरं वारयति चु० बृ-अण् । योधादेश्चोलाकारे वस्त्रादौ कवचे शब्दच० ।

वाणहन् पु० वाणं तन्नामासुरं हतवान् हन-ताडने भूते क्विप् । श्रीकृष्णे वाणजिदादयोऽप्यत्र ।

वाणि स्त्री वण-इण् वा ङीष् । १वयने अमरः २वयनदण्डे वेमनि हेमच० । ३वाक्ये हृतहेवतायाञ्च अमरः ङीप् ।

वाणिनी स्त्री वण-णिनि ङीप् । १नर्त्तक्यां २छेके शब्दरत्नावल्याम् हेमच० । वाण+अस्त्यर्थे इनि । ४शरयुते त्रि० ।

वात गतौ सेवायां सुखीकरणे च सक० अद० चु०उभ०सेट् ।

वातयति ते अववातत् त ।

वात पु०वा-क्त । सप्तमात्मविशेषगुणयुक्ते भूतभेदे १पवने अमरः । अनिलशब्दे १६४१ पृ० दृश्यम् । २देहस्थे धातुभेदे च । ३गन्धरि त्रि० । जारे ५पृष्टनायके च "प्रभातवाता इतीति" भट्टिः । ६वातजन्ये रोगभेदे भावप्र० यथा "कषायकटुतिक्तकप्रमितरूक्षलघ्वल्पतः पुरःपवनजागरप्रतरणाभिघातश्रमैः । क्षिपादनशनात् तथा निष्पुवनाच्च धातुक्षयात् मरुदादिरत्यधारणात् मदनशोकचिन्ताभयैः । अतिस्रुतजलोच्चयात् गदजलातिनाशं च वयादतीव वसनात् व्यायामतिविरेचनादामतः । पयोदसमये दिनक्षपदयोस्तृतीयांशयोर्जरामतिगतेऽग्निते शिशिरसंज्ञकालेऽपि च । देहे स्रोतांसि रिक्तानि पूरयित्वाऽनिलो बली । करोति विविधान् रोगान् सर्वाङ्गैकाङ्गसंश्रयान्" । प्रमितत्वात् वैपरीत्ये प्रायसर्वत्रैव अपरिमितनित्यर्थः । प्रकर्षेण मितमल्पं वा सूच्यत्र क्षुद् अतिपुराणं शाल्यादि । अतिस्निग्धानि मद्यान्यपि वातलानि यत आह शुश्रुतसंहितायाम् "जीवारक्षिपुटः खतीनचणकः श्यामाकशुङ्गाढकीनिष्पावाश्च मकुष्टकश्च वरठामकुलकः कोद्रवः" । एते वातकरा इति शेषः । जीवारः प्रसाधिका (चीना) इति लोके । त्रिपुटः (खसारी) । खतीनः कलायः । निष्पावो राजमाषः । (बरबटी) इति लोके । मकुष्टकः (माठा) इति लोके । वरठा वरटिका (बरै) इति लोके । मकुलकः (मखरी) इति लोके । पुरःपवनः प्राग्वातः, आमसः आमेन आमाशयेन सह वर्त्तमानत्वात् । यत उक्तम् वायोर्जरा लङ्घनात् कोपो मार्गस्यावरणेन चेति" । पयोदसमये वर्षासु । जरामतिगतेऽग्नित्रे भुक्तेऽजीर्णताङ्गते । देहे स्रोतांसीत्यादिना संप्राप्तिरुक्ता । कषायादिभिर्हेतुभिर्वर्षादौ समये हेतुमते बली अनिलः प्रवृद्धो वायुः करोति विविधान् रोगान् । ते रोगाः कथ्यन्ते "शिरोग्रहोऽलसकेशत्वं जृम्भात्यर्थं हनुग्रहः । जिह्वास्तम्भो मरुद्गद्गत्वं मिन्मिनत्वञ्च मूकता । वाक्सङ्गता प्रलापश्च दशनाजनभिज्ञता । बाधिर्य्यं "कर्णनादश्च सर्वाङ्गत्व तथार्दितम् । मन्यास्तम्भोऽक्षिणो वाङ्गशोषोपवाङ्गकः । पक्षिता चैव विश्वाची जर्ङ्घावात उदीरितः ।

आध्मानञ्च प्रत्याध्मानं बाताष्ठीला प्रत्यष्ठीला। "तूणी च प्रतितूणी च वङ्क्षवेषणमेव च। आटोपः पार्श्वशूलञ्च त्रिकशूलं तथैव च। सुप्तस्य मूत्रं मूत्रनिग्रहो मलग्राहता। पुरीषस्याप्रवृत्तिश्च श्रोणी च ततः परम्। कलापखञ्जता चापि खञ्जता पङ्गुता तथा। क्रोष्टुशीर्षक खल्ली च वातकण्टक एव च। पादहर्षो पाददाह आक्षेपो दण्डकाभिधः। वातपित्तकृताक्षेपस्तथा दण्डो पतानकः। अभिघातकृताक्षेप आयामो द्विविधः स्मृतः। आन्तरश्च तथा बाह्यो धनुर्वातश्च कुब्जकः। अपतन्त्रोपतानश्च पक्षाघातोऽखिलाङ्गकः। कम्पस्तम्भो व्यथातोदो भेदश्च स्फुरणं तथा। रौक्ष्यं कार्श्यञ्च कार्ष्ण्यञ्च शैत्यं लोम्नाञ्च हर्षणम्। अङ्गमर्दोऽङ्गविभ्रंशः शिरासङ्कोच एव च। अङ्गशैथिल्यञ्च भीरुत्वं मोहश्चञ्चलचित्तता। निद्रानाशः खेदनाशो बलहानिस्तथैव च। शुक्रक्षयो रजोनाशो गर्भनाशः परिश्रमः। एत एवाशीतिसंख्यारोगा योगेन कुपिताः। वातव्याधीतिनामानो मुनिभिः परिकीर्त्तिताः"। एत एव शिरोग्रहादय एव। योगेन वातेन वाताद्व्याधिर्वातव्याधिरिति निरुक्त्या तदा वातज्वरादिष्वपि प्रसङ्ग आदत आह कुपितः प्रसिद्धितः शिरोग्रहादयोऽशीतिरेव वातव्याधिसंज्ञाः प्रसिद्धा न तु वातज्वरादयः"। तच्च पादिकं तत्र दृश्यम्।

वातक पु० वात इव चञ्चलः इवार्थे कन्। १अञ्जनपर्णाम् स्वार्थे क। २जारे च।

वातकर्मन् न० वातानां कर्म। अपानेन मरुत्त्यागे पदने।

वातकिन् त्रि० वातोऽस्यास्य इनि कुक् च। वातरोगयुक्ते अमरः स्त्रियां ङीप्।

वातकेतु पु० वातस्य केतुरिव। धूलौ रजसि त्रिका०।

वातगुल्म पु० वातेन गुल्म इव। १वातजे त्रिका०। २वात निमित्ते गुल्मरोगभेदे गुल्मशब्दे २६१६ पृ० दृश्यम्।

वातघ्नी स्त्री वातं रोगभेदं हन्ति-हन-टक् ङीप्। १माषपर्ण्याम् (मालपानि) २अश्वगन्धायां ३शिग्रुवृक्षे च राजनि०।

वातचक्र न० ष०स० २७अ०उक्ते पूर्वादिवातानां कालभेदेन शुभाशुभसूचके लक्षणभेदे

"पूर्वः पूर्वसमुद्वीचिशिखरप्रस्खालनाधूर्णितयन्द्रार्कांशुजटाभिघातकलितो वायुर्वेदाकाशगतः। नैकान्तस्थितनीलमेचपटलां धारयसंवर्धितां वाचन्तोत्कटसस्यमण्डिततलां विद्यात्तदा मेदिनीम्। यदाग्नेयो वायुर्मलयशिखरास्खालनपटुः प्लवत्यग्निनयोगे भगवति पतङ्गे प्रवसति। तदा नित्योद्दीप्ता ज्वलनशिखरालिङ्गिततला खगालोघ्नो ज्वालैर्वमति वसुधा भस्मनिकरम्। तालीपलवताविताननतरुभिः शाखाभङ्गाचर्तयन् योगेऽस्मिन् प्लवति घनवृन्दपरुषो वायुर्यदा दक्षिणः। सर्वोद्योगसमुद्यताश्च गजवत्ताद्वाङ्गणैर्घट्टिताः क्षोणीशा इव सन्द्वारिकणिकान्मुञ्चन्ति मेघास्तदा। कृष्णैलालवलीलवङ्गनिचयान् व्याधूर्णयन् सागरे भानोरस्तमये प्लवत्यविरतो वायुर्यदा नैर्ऋतः। क्षुत्तृष्णान्नतमानुषास्थिशकलप्रस्तारभारच्छदा मत्ता प्रेतवधूरिवोग्रचपला भूमिस्तदा लक्ष्यते। यदा रेणूत्पातैः प्रविकटसटाटोपचपलः प्रवातः पश्चार्धे दिनकरकरापातसमये। तदा सस्योपेता प्रवरन्टवराबद्धसमरा धरा स्याने स्यानेऽघविरतवसामांसरुधिरा। आषाढीपर्वकाले यदि किरणतेरस्तकालोपपत्तौ वायव्यो बद्धवेगः प्लवति घनरिपुः पन्नगादानुकारी। जानीयाद्वारिधाराप्रमुदितमुदितां सत्तमण्डूककण्ठां सस्योल्लासैकचिह्नां सुकृतवसुमतीं भाग्यभेनामिषोर्वीम्। मेरुप्रस्तम्बरीचिप्रगुणतले भीमावसाने रवौ वात्यामोदिकदम्बगन्धसुरभिर्वायुर्यदा दोत्तरः। विद्युद्भ्रान्तिसमस्तकान्तिकलनामत्तास्तदा तोयदा उन्मत्ता इव नर्दन्तश्चन्द्रकिरणां गां पूरयन्त्यम्बुभिः। ऐशानो यदि शीतलोऽमरगणैः सेव्यमानो भवेत् पुन्नागागुरुपारिजातसुरभिर्वायुः प्रवण्डध्वनिः। आपूर्णोदकजीवना वसुमती सम्पन्नसस्याकुला धर्मिष्ठाः प्रणतारयो नृपतयो रञ्जन्ति वर्णांस्तदा"।

वाततूल न० वातेन उड्डीयमानं तूलम्। (बुढिरुतां) आकाशे उड्डीयमाने सूक्ष्मे क्षारा०। [२धूलौ।

वातध्वज पु० वातो ध्वज इव यस्य १मेघे शब्दमा०। ६त०। **वातपोथ** पु० वातं रोगभेदं पुथ्यति क्षिपति पुथ-अण्। पलाशवृक्षे अमरः। [सृगे (बाघोटा) अमरः।

वातप्रमी पुंस्त्री० वातं प्रमिणोति प्र+मा-ई किप्च। १शीघ्रगे

वातमज पुंस्त्री० वातमनुलक्ष्य अजति अज-अच् अभावः। सृगभेदे जटा० स्त्रियां ङीष्। [जटा० स्त्रियां ङीष्।

वातमृग पुंस्त्री० वातानुगो मृगः शाक०। शीघ्रगे मृगभेदे

वातरक्त न० वातजं दुष्टं रक्तम् रुधिरं यत्र। रोगभेदे

"लवणाम्लकटूष्णातिस्निग्धोष्माजीर्णभोजनैः। क्लिन्नशुष्कानूपमांसपिण्याकमूलकैः। कुलत्थमाषनि-

आवणकादिपद्मेक्षुभिः । दध्यारनालसौवीरशुक्ततक्र-सुरासवैः । विरुद्धाध्यशनक्षौद्रदिवास्वप्नातिजागरैः । प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम् । स्थूलानां सुखिनां चापि प्रकुप्येद्वातशोणितम् । रूक्षस्याशोष्टैर्गच्छतश्चाध्वनश्च विदाह्यन्नं संविदाहाशनस्य" । क्षारो यवक्षारादिः । अजीर्णभोजनैः अजीर्णाय भोजनैः अतिमात्रभोजनैरित्यर्थः । क्लिन्नादीनि मांसस्य विशेषणानि । क्लिन्नं शिथिलम् । शुष्कमातपे शोषितम् । अम्बुजं मत्स्यादिमांसम् । आनूपं गौड़ादिपूर्वदेशजं मांसम् । पिण्याकं तिलखलिः । मूलकं प्रसिद्धमेव । निष्पावः (बोड़ा) शाकम् । शाकं पत्रशाकम् । आदिशब्देन कन्दाकादीनि फलशाकानि गृह्यन्ते । पलल-शिथिलत्वादिदोषरहितमपि मांसं वातशोणितं प्रकोपयेत् । शिथिलादि तु मांसं विशेषतो वातशोणितं प्रकोपयेत् । क्षारमाल सन्धानभेदः । शुक्तं सन्धान-भेदः । सौवीरं सन्धानभेदः । तक्रं चतुर्थांशजल-युक्तं वस्त्रपूतं दधि । सुरा सन्धानभेदः । आसवः सन्धानभेदः । विरुद्धं क्षीरमत्स्यादि । अध्यशनम् । "अजीर्णे भुज्यते यस्तु तदध्यशनमुच्यते" । अतिजागरो-निशि । प्रायशः बाहुल्येन । सुकुमाराणाम् अल्पतर-व्यायव्यापाराणाम् । अथ वा । मिथ्याहारविहारि-णाम् अयथाहारविहाराभ्यां स्थूलानां सुखि-नाम् रक्तसङ्गात् रूक्षस्याशोष्टैर्गच्छतः यतो वायुर्विव-र्धते रुधिरस्रावो नश्यति । रूक्षादय उपलक्षणानि । पङ्गोरप्यतिचलतः । अध्वनः विदाह्यन्नम् । विदाहि निष्पावकुलत्थसर्षपाकादि । संविदाहाशनस्य । संविदाहेऽन्नं यस्य भुक्ते विदग्धे तदुपरि भुञ्जा-नस्येत्यर्थः । अध्यशनसङ्ख्याप्येतदन्नं विदह्याजीर्ण-भोजनस्य विशेषतो हेतुत्वार्थम् । ततश्च वातशो-णितं प्रकुप्येदित्यनेनान्वयः । एतेषां कारणानां मध्ये केनचिद्वायुः केनचिदुभयमपि प्रकुप्येत् । संप्राप्ति-माह "कृत्स्नं रक्तं विदहत्यासु तच्च दुष्टं सत्तं पाद-योर्याति तु । तत् संसृष्टं वायुना दूषितेन तत् प्रा-बल्याद्दुच्यते वातरक्तम्" । पूर्वोक्तैर्हेतुभिः कृत्स्नं स-कलं रक्तं विदहति अत्र दहधातुरविवक्षितकर्मकः । तेन विदहति विदग्धं भवतीत्यर्थः । तच्च दुष्टरक्तम् । सत्तम् अधोगतम् पादयोर्याति संसृष्टं भवति । तद्दु-ष्टरं दूषितेन स्वहेतुना संयुक्तं मिश्रितं वातरक्तम् उच्यते । तत्र चैतस्य संप्राप्तिरुक्ता सुश्रुतेन "शीघ्रं रक्तं दुष्टिमायाति तच्च वायोर्मार्गं संरुणद्ध्यारु वातः । क्रुद्धोऽत्यर्थं मार्गरोधात् स वायुरत्यृद्धिं दूषयेद्रक्त-माशु" । अत्र प्रथमं रक्तस्य दुष्टिरतो रक्तवातमिति व्यपदेष्टुमुचितं भवत्यत आह तत्प्रभावाच्चादिति । तस्य वातस्य दोषत्वेन प्राधान्याद्वातरक्तमिति व्यप-दिश्यते । पूर्वरूपमाह "स्वेदोऽत्यर्थं न वा कार्ष्ण्यं सुप्तांगत्वं क्षतेऽतिरुक् । सन्धिशैथिल्यमालस्यं सदनं पिडकोद्गमः । जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु । निस्तोदस्फुरणं भेदो गुरुत्वं सुप्तिरेव च । कण्डूः सन्धिषु रुग्दाहो भूत्वा नश्यति चासकृत् । वैवर्ण्यं मण्डलोत्पत्तिर्वातासृक्पूर्वलक्षणम्" । अथाधि-क्षतवातस्य रक्तस्य लक्षणमाह "वातेऽधिकेऽधिकं तत्र शूलस्फुरणतोदनम् । शोफस्य रौक्ष्यं श्यावत्वं म्लो-नताङ्गिष्वतीव च । श्यामस्फुलिङ्गसन्नीनां सङ्कोचोऽङ्ग-मर्दोऽतिरुक् । शीतद्वेषानुपशयौ स्तम्भनेषूपशय" । तत्र पादयोः मूलादिसमधिकम् यत आह सुश्रुतः "स्पर्शोष्मिणौ तोदभेदप्रमोहौ स्यातोमेतौ वातरक्तेन बाधाविति" । अत्र सुप्तिः स्पर्शोनता । अधिकरक्तं वात-रक्तमाह "रक्ते शोफोऽतिरुक् तोदस्तीव्रविसर्पिभि-र्जायते । स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसम-न्वितः" । अधिकपित्तं तदाह "पित्ते विदाहः शोफोरुः स्वेदो मूर्च्छामदक्लमाः । स्पर्शासहत्वं रुग्दाहः शोषपाकौ ज्वरोष्णता" । विदाहश्च बाहुल्येन पादयोरेव बोद्धव्यः यत आह सुश्रुतः "पित्तासृग्भ्यामधःकायो भवेतामत्यर्थमुष्णो रक्त-शोथौ मृदू च" । बाधाविति शेषः । अधिककफं त-माह "कफाधिक्ये तु गुरुता सुप्तिः स्निग्धत्वशीतता" । गुरुतादयः पादयोरेव यत आह सुश्रुतः कण्डू-मन्तौ स्वेदशीतौ सशोथौ पीवरत्वचौ स्निग्धरुजौ तु रक्तौ" । अप्रतिक्रियमाणवातरक्तस्य उपद्रवानाह "अस्यप्रारोचकश्वासमांसकोथगिरोग्रहाः । मूर्च्छा च मन्दरुग् दाहज्वरशोफप्रकोपकाः । छिन्नाभगुल्म-वीसर्पपाकतोदस्रवक्लमाः । अङ्गुलीवक्रतास्फोटदाह-लर्मभ्रदार्बुदाः" मांसकोथो मांसगलनम् । अरोचकादि-कमाह "एतैरुपद्रवैर्वैक्ल्यं शोफेनैकेन वापि यत् । अक्षतस्योपद्रवं याप्यं साध्यं स्यात्तिरुपद्रवम् । एक-दोषानुगं साध्यं नवं याप्यं द्विदोषजम् । त्रिदोषज-मसाध्यं स्यात्सर्वं च क्षुद्रोपद्रवम्" ।

वातरक्तघ्न पु० वातरक्तं रोगभेदं हन्ति हन-टक्। कुक्कुर-वृक्षे (कुकरसोंङा) शब्दच०। [शब्दच०।

वातरक्तारि पु० ६त०। (गुडूच) ख्यातायां लतायाम्

वातरङ्ग पु० वातस्येव सततं रङ्गवलनमस्य। चलदले अश्वत्थवृक्षे अमरः।

वातरायण पु०वा-क्विप् ततस्तरप् वातरमयनं यस्य यत्वम्। १उन्मत्ते २प्रयोजनशून्ये पुरुषे ३काकोले ४करपात्रे ५क्षुद्रे ६परसंक्रमे मेदि०। ७चरलहुमे च शब्दर०।

वातरूष पु० वातेन रूषयते रूष-घञ्। १वाहुले २उत्कोचे ३चन्द्रचामे च मेदि०।

वातर्द्धि पु० वातस्य वर्द्धियंतः। १काष्ठलोहनिर्मितमात्रे त्रिका० ६त०। २वायुवृद्धौ स्त्री।

वातल पु० वातं रोगभेदं लाति ला-क। १भक्षके शब्दच०। २वायुकारके द्रव्ये त्रि०।

वातव्याधि पु० वातेन देहस्थधातुभेदेन जनितो व्याधिः शाक०। वातरोगे वातशब्दे दृश्यम्।

वातशीर्ष न० वातस्य शीर्षमिव। वस्तौ राजनि०।

वाताट: पु० वात इवाटति भट-अच्। १सूर्य्यांशे त्रिका० २वातसृगे शब्दर०।

वातारुड पु० शुक्रयोगविशेषे तस्य लक्षणं यथा "दृष्ट्वा दूरवेदायुः श्लेष्मणा यस्य संहतः। तस्य शुष्कश्चलत्येको रोगो वातारुडसंज्ञकः" माधवकरः।

वाताद पु० वाताय वातनिवृत्तयेऽद्यतेऽत्तौ वद-घञ्। (वादाम) फलप्रधानवृक्षे भावप्र०।

वातापि पु०अगस्त्यनाशिते इल्वभ्रातरि असुरभेदे। "वातापिर्भक्षितो येनवातापिन्न कदाचनः। अमुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु" इति भोजनान्ते पाठमन्त्रः।

वातापिसूदन पु० वातापिं सूदयति छिनत्ति सूद-ल्यु। अगस्त्ये मुनौ त्रिका०भा०व०१६८०अ० तत्कथा दृश्या।

वातामोदा स्त्री वातेनामोदो यस्याः। कस्तूर्य्याम् शब्दमा०

वातायन न० वातस्यायनं गतिर्यत्र। १गवाक्षे अमरः। वातस्येव शीघ्रमयनं गतिरस्य। २अश्वे पुंस्त्री० त्रिका० स्त्रियां ङीष्।

वातायु पु० वातमयते क्षय-उण्। फरिश्ते अमरः

वातारि पु० वातस्य रोगभेदस्यारिः। १एरण्डवृक्षे २यवभूम्यां ३शेफालिकायां ४यवान्यां ५भार्ग्यां ६क्षुद्रायां ७विड्डे ८सूरणे ९भल्लातके १०जलकाक्यां ११पुनर्नवालोहवृक्षे च राजनि०।

वातारुड पु० वात इव शीघ्रगोऽश्वः। आजानेये उत्तमे हये त्रिका०।

वाति पु० वा-क्तिच्। १वायौ २सूर्य्ये ३चन्द्रे च रभसः।

वातिक पु० वाताद्यागतः ठक्। देहस्थधातुजन्ये रोगभेदे राजनि०।

वातिग पु० वातिं वायुं गच्छति गम-ड। १वात्तोकौ २धावनवाहादिनि त्रि०मेदि०। गम-क। वातिगमोऽध्वनि शब्दर०

वातिङ्गण पु० वातिं देहस्थवातं सेवनात् गच्छयति गच्छ-खच् मुम् च। वात्तोकौ त्रिका०।

वातीय न० वाताय वातनिवृत्तये हितः छ। आह्निके शब्दच०

वातुल पु० वातानां समूहः उलच्। वातसमूहे भरतः।

वातुलि पुंस्त्री० वा-उलि वुट् च। (वाडुड़) ख्याते खगे हारा०।

वातूल त्रि० वात+अस्यर्थे अलच्। १वातरोगयुक्ते उन्मत्ते अमरः। समूहार्थे अलच्। २वातसमूहे न० भरतः।

वातोना स्त्री वातमूनयति क्षन-अण्। १गोजिह्वाक्षुपे राजनि० वातेनोनः। २वायुहीने त्रि०।

वात्या स्त्री वातानां समूहः यत् १वातसमूहे अमरः "विततत्य वात्यामयचक्रचंक्रमान्" नैष०।

वात्सक न० वत्सानां समूहः वुञ्। वत्ससंघे अमरः।

वात्सल्य न० वत्सलस्य भावः ष्यञ्। पुत्रादिस्नेहानुगुणे रसभेदे उज्ज्वलमणिः "यशोदा वत्सले स्मृता"।

वात्स्य पु० वत्सस्यापत्यं यञ्। गोत्रप्रवर्त्तके मुनिभेदे।

वात्स्यायन पु० वत्सस्य गोत्रापत्यं युवा वत्स+यञ् ततो यूनि फक्। १यूनि वत्सगोत्रापत्ये। २न्यायसूत्रभाष्यप्रकारके पक्षिलाख्ये मुनौ पुं त्रिका०।

वाद पुं स्त्री वद-घञ्। १तत्त्वबुभुत्सया कथने "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः" इति २गौतमोक्ते विचारात्मके वाक्यभेदे। "वादः प्रवदतामहम्" गीता।

वादन न० वद-णिच्-कर्मणि ल्युट्। १वदङ्गादिताडने भावे ल्युट्। वदङ्गादिताडनरूपे २व्यापारे।

वादर न० वदरायाः कार्पास्याः विकारः अण्। कार्पासवस्त्रनिर्मिते वस्त्रादौ। वदरशब्दस्य ओष्ठ्यादित्वसिद्ध्यर्थे।

वादरङ्ग पु० वादरं वदरावस्त्रन्यिपत्रादिसादृश्यं गच्छति गम खच् डिच्च। अश्वत्थवृक्षे त्रिका०।

वादरत त्रि० वादे विवादे रतः रञ-क। अनुदिनविवादशीले।

वादरा स्त्री वातं वायुं राति ददाति रा–क पृषो॰ तस्य दः [काशीस्थाम् शब्दर॰।

वा(बा)दरायण पु॰ व(बा)दरीप्रधानं स्थानं वाबदरं तदयनं स्थान यस्य। नित्यं व(ब)दरिकाश्रमवासिनि ऽवेदव्यासे। स्वार्थे इञ्। वा(बा)दरायणिरप्यत्र शब्दच॰। अपत्ये इञ्। वा(बा)दरि व्यासपुत्रे शुकदेवे। [मधुवल्लौ शब्दच।

वादल न॰ वातं स्वाति स्यद्यति वा–क पृषो॰ तस्य दः।

वादाम न॰ वातमर्मति छिनत्ति अम–अण् पृषो॰ तस्य मः। स्वनाम्नाख्याते फलभेदे भावप्र॰।

वादि त्रि॰ वद–इन्। विदुषि उणादिकोषः। [शब्दर॰।

वादिर न॰ वद–णिच्–किरच्। व(ब)दरीसदृशफलके वृक्षे

वादित्र न॰ वद–णिच्–इत्र। स्यूतङ्गादिवाद्ये अमरः।

वादिन् त्रि॰ वदति वद–णिनि। १वक्तरि २अर्थिनि ३वादकथाकर्त्तरि विचारस्थले ४प्रथमपक्षप्रतिपादके च।

वाद्य न॰ वद–णिच्–यत्। वादनीये स्यूतङ्गादौ अमरः। वंशशब्दे ततादिभेद उक्तस्तत्र

तत यथा "अलाबनी ब्रह्मवीणा किन्नरी लघु किन्नरी। विपञ्ची वल्लकी ज्येष्ठा चित्रा ज्येष्ठवती त्रया। हस्तिका कुब्जिका कूर्म्मी शारङ्गी परिवादिनी। त्रिशवी शतचन्द्री च नकुलोष्ठी च ढंशवी। औडुम्बरी पिनाकी च निबन्धः शुष्कलस्तथा। गदावारणहस्तश्च रुद्रोऽथ शरभस्तथा। कपिलाषो मधुस्यन्दो घोषेत्यादि ततं भवेत्"। अलाबनी यथा "कनिष्ठिकापरिध्यर्द्धं मध्यच्छिद्रेण संयुतः। दण्डयष्टिमितो दण्डः खादिरो वैणवोऽथ वा। अधःकरभवानूर्द्धं त्रयाणामभिशोभितः। नवाङ्गुलादधश्छिद्रोपरिचन्द्रार्द्धसन्निभम्। निवेशयेत् तुम्बिकां भद्रालाबुखण्डं निवेशयेत्। द्वादशाङ्गुलविस्तारं दृढपक्वं मनोहरम्। तुम्बिकावेधमध्येन दण्डच्छिद्रे तु निर्मिताम्। अलाबुमध्यगां छित्वा खल्पान्तु काष्ठिकाम्। तथा संवेष्टयेत् तन्मध्ये काष्ठिकां भ्रामयेत्ततः। यथा स्रास्रिश्चलालाबुर्बन्धस्य करभोपरि। पञ्चाङ्गुलिषु संत्यज्यालाबुं खल्पञ्च बन्धयेत्। वेणान्निर्मिता षट्त्रयी खलतोथ वा। समा सूक्ष्मा दृढा तत्र तन्त्रो देया विचक्षणैः। एतल्लक्षणसंयोगिन्यलाबनी प्रकीर्त्तिता। विन्दुना न समेतं तत्त्वं निश्चित्य वक्षसि। मध्यमानामिकाभ्यान्तु वाद्या दक्षिणपाणिना। तारे मन्द्रे च घोषे च त्रिस्थाने विन्दुरिष्यते। तुम्बीमूलं समुत्पत्य वामाङ्गुष्ठेन धारयेत्। ततस्ताभिस्तु सर्वाभिः स्वरव्यक्तिर्विधीयते। त्रिस्वरो दक्षिणः पार्श्ववर्त्तिस्तत्र चतुःस्वरः। अलाबन्यां स्थिता ज्ञेयाः सप्त षड्जादयः स्वराः। रागव्यक्तिर्यथा रागे भवेत् षड्जादिभेदतः। अंशन्यास विभेदाच्च तथात्रापि विधीयते। इयमलाबनी प्रोक्ता मनः श्रवणरञ्जनी। प्रत्यक्षा सारदा देवी वीणारूपेण संस्थिता"। शुषिरं वंशशब्दे उक्तम्। आनद्ध यथा

"आनद्धे मर्दलः श्रेयानुत्तमं भरतादिभिः। मुरजपटहढक्कास्विक्कोदर्परवाद्यं पणवघनसरुझालावजाह्वात्रवल्यः। करटकमठभेरी स्यात् कुडक्का डुडुक्का झनसघुरलिझल्लीदुक्कलीदौण्डिशानाः। डमरुटमुकिमड्डुः कुण्डलीस्तुम्बनामा रणमभिघटवाद्यं दुन्दुभी च रजश्च। क्वचिदपि डुढुक्की स्यात् दर्दुरं चाप्युपाङ्गं प्रकटितमनुजन्यं वाद्यमित्थं जगत्याम्। त्रिपुरमथनकर्त्तुस्ताण्डवे तत् प्रयाणे ततमथ शुषिरञ्चानद्धमित्थं घनञ्च। मर्दलः खादिरः श्रेष्ठो हीनः स्यादन्यदारुजः। रक्तचन्दनजो वाद्यो गभीरध्वनि रुच्यकैः। सार्द्धहस्तप्रमाणन्तु दैर्घ्यमस्य विधीयते। त्रयोदशाङ्गुलं वाममथ वा द्वादशाङ्गुलम्। दक्षिणञ्च भवेद्वीनमेकेनाङ्गुलेन वा। करणानद्धवदनो मध्ये चैव पृथुर्भवेत्। षण्मासीयो भवेत् यस्तत्तुर्यं करणं मतम्। मृत्तिकानिर्मितस्यैव मृदङ्गः परिकीर्त्तितः। पातयेत् खरलिं वाद्ये वादनार्थञ्च मर्दले। विभूतिर्भैरिकं भक्तं कैन्दुकेन च संभवम्। यद्वा चिपीटकं देयं जीवनीसत्त्वसंश्रितम्। सर्वमेकत्र पिष्ट्वातु लेपः खरलिरुच्यते। वामास्ये पूरिकां दत्त्वा लेपं दद्याच्च दक्षिणे। एवं मर्दलकः प्रोक्तः सर्ववाद्योत्तमो मतः। अस्य संयोगमासाद्य सर्वं वाद्यञ्च शोभते। एतदङ्गे बीजकाष्ठे दलमङ्गाङ्गुलं विदुः"। मर्दलः त्रयोदशाङ्गुलवामसुखो द्वादशाङ्गुलदक्षिणसुखः। मुरजस्त्वष्टादशाङ्गुलवामसुखः सप्तदशाङ्गुलदक्षिणसुखः मर्दलसुरजयोरयं भेदः। घनं यथा। "अनुरक्तं विरक्तञ्च द्विविधं घनवाद्यकम्। गीतानुगमनुरक्तं विरक्तं ताडसंश्रयम्। करतालः कांस्यतालो जयघण्टोथ शुक्तिका। कम्बिका भञ्जञ्च वाद्यञ्च पटहतोयं च घर्घरम्। झञ्झातालश्च मञ्जीरकर्त्तर्युङ्कर इत्यपि। द्वादशैते मुनीन्द्रेण कथिता घनसंज्ञकाः। त्रयोदशाङ्गुलव्यासौ शुक्तिकांस्यविनिर्मितौ। मध्यसुषो स्थानाकारो तन्मध्ये रज्जुगुम्फितौ।

पद्मिनीपत्रसदृशौ कराभ्यां रज्जुयन्त्रितौ। करताडावुभौ वाद्यौ पाटैर्झनटकैरिति। यद्वा त्वयोदशयवव्यासं वक्त्रयवोन्नितम्। यवपञ्चकगम्भीरं मध्ये च यवसप्तकम्। निम्नतं वर्त्तुलं निम्नं यवत्रयमितं ततः। पृष्ठतो मध्यदेशे च शिवलिङ्गसमाकृति। अत्यन्तपेशीनिर्दग्धगुडकांस्यविनिर्मितम्। संरक्ताङ्गुलि सस्निग्धसुदीर्घमधुरध्वनिम्। घनानुसारि संरक्तं दृढं शुष्कं मनोहरम्। काश्मीरादिसमुद्भूतं तालाढ्यमनीषिणः। सुनादं दक्षिणं तालं ततो हीनञ्च वामकम्। कुर्वीत तद्द्वयं कार्य्यं तर्ज्जन्यङ्गुष्ठयोर्गतम्। वामहस्तस्थतालस्य मध्यं सन्निनादितम्। तिर्य्यग्दक्षिणतालस्य परिध्यंशेन ताडयेत्। तालादौ वादयेच्चैव सुतदीर्घलघुद्रुतैः"। अन्येषां लक्षणं विस्तरभयान्नोक्तम्। "हंसिन्याः सत्यभामायाः कालिन्दीमित्रविन्द्योः। जाम्बवत्या नाग्नजित्या लक्ष्मणाभद्र्योरपि। कृष्णस्याष्टमहिषीणां पुरोद्वाहमहोत्सवे। तत् सुस्थिरमानद्धं घनञ्च युगपज्जनाः। अवादयन्नसंख्यातमिति पौराणिकी श्रुतिः। तत् वाद्यन्तु देवानां गन्धर्वाणाञ्च शौषिरम्। वानद्धं राक्षसानान्तु किन्नराणां घनं विदुः" सङ्गीतदा०

वाद्यभाण्ड न० कर्म०। वादनीयपात्रे।

वा(बा)ध विघाते भ्वा०आत्म०सक०सेट्। वा(बा)धते अवा(बा)धिष्ट। चक्रे न वाधः।

व(बा)ध पु० वा(बा)ध-घञ्। १प्रतिरोधे २प्रतिबन्धे न्यायोक्ते स्वाभावबन्धेन ज्ञाने ३हेत्वाभासभेदे। भावे घञ्। वा(बा)धाय्य ३पीड़ायाञ्च स्त्री अमरः ङ्युट्। वा(बा)धनमप्यत्रार्थे न० भरतः च०।

वाधूक्य न० वध्वां साधु यत् कुक् च। विवाहे त्रिका०।

वार्क्षीणस पु० वार्क्षीनस+पृषो०। वार्क्षीनसे खड्गिनि च।

वान न० वन-घञ्। १शुष्कफले अमरः। २शुष्के त्रि०मेदि०। वनस्येदं तत् समूहो वा अण्। ३वनसम्बन्धिनि त्रि०। ४ततृसंघे न०। वे-भावकर्त्तरि ल्युट्। ५सीवनकर्म्मणि हेमच०। वा-भावादौ ल्युट्। ७गतौ मेदि०। दनुसुतवातोर्मौ दनुरङ्गायां १०वीरभे हेमच० ११योधीरजे १२तक्षीरे राजनि०। १३वर्त्तिकायाञ्च स्त्री अटा०।

वानप्रस्थ पु० वाने वनसमूहे प्रतिष्ठति स्था-क। १मधूकवृक्षे २यत्याश्रमभेदे। वनप्रस्थ इव आर्षे अण्। "गृहस्थस्तु यदा पश्येत् वलीपलितमात्मनः। पुत्रेषु दारान्निक्षिप्य वनं गच्छेत् सहैव वा" इत्युक्ते ३याश्रमभेदे मेदि०। स च द्विविधः पचमानः अपचमानश्च। तत्र पचमानः श्रुतकृक्षः। अपचमानस्तु दन्तोलूखलिकः।

तस्य धर्मो यथा "भूस्था मूलफलाशित्वं स्वाध्यायस्तप एव च। संविभागो यथान्यायं धर्मोऽयं वनवासिनः। तपस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च। स्वाध्याये चैव निरतो वनस्थस्तापसो मतः। तपसा कर्षितोत्यर्थं यस्तु ध्यानपरो भवेत्। सचाप्रतीक्ष्य एवं विज्ञेयो वानप्रस्थाश्रमे स्थितः" गारुड़े ४६अ० याज्ञवल्क्य उवाच "वानप्रस्थाश्रमं वक्ष्ये तत् शृणुध्वं महर्षयः। पुत्रेषु भार्यां निःक्षिप्य वनं गच्छेत् सहैव वा। वानप्रस्थो ब्रह्मचारी साग्निः सोपासनः क्षमी। अकालकृष्टेनाग्नींश्च पितृदेवातिथीन्यजेत्। भक्ष्यांस्तु तर्पयेत् श्मश्रुजटालोमभृदात्मवान्। दान्तः स्निग्धवचनायी निवृत्तश्च प्रतिग्रहात्। स्वाध्यायवान् ध्याननीलः सर्वभूतहिते रतः। श्रद्धो मासस्य पर्वणां वा कुर्याद्वाद्धपरिग्रहम्। हुत्वा त्वजेदाश्वयुजे नवेष्टं कालं अतादिना। पक्वे मासे तु वाप्योदान्तोलूखलिको भवेत्। चान्द्रायणी स्वमेवैकं कर्म कुर्यात् फलादिना। ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः। आर्द्रवासास्तु हेमन्ते योगाभ्यासाद्दिनं नयेत्। १०२ अ०। "जटित्वमग्निहोत्रित्वं भूशय्याऽजिनधारणम्। वने वासः पयोमूलनीवारफलभक्षिता। प्रतिग्रहाद्विनिवृत्तिश्च त्रिरह्नश्च व्रतधारिता। देवतातिथिपूजा च धर्मोऽयं वनवासिनः। २१५ अ०। "एवं गृहाश्रमे स्थित्वा द्वितीयभागमायुषः। वानप्रस्थाश्रमं गच्छेत् सदारः साग्निरेव च। निःक्षिप्य भार्यां पुत्रेषु गच्छेद्वनमथापि। दृष्ट्वाऽपत्यस्य चापत्यं जर्जरीकृतविग्रहः। शुक्लपक्षस्य पूर्वाह्णे प्रयत्ने चोत्तरायणे। गत्वाप्यरण्यं नियमांस्तपः कुर्यात् समाहितः। फलमूलानि यानि नित्यमाहारमाहरेत्। यदाहारो भवेत्तेन पूजयेत् पितृदेवताः। पूजयेदतिथिं नित्यं दत्वा चाभ्यर्चयेत् सुरान्। आमादानीय वाप्योदाद्यौ प्राशान्। समाहितः। जटाश्च विभृयान्नित्यं नखरोमाणि नो त्यजेत्। स्वाध्यायं सर्वदा कुर्यात् नियच्छेद्वाचमन्ततः। अग्निहोत्रन्तु जुहुयात् पञ्च यज्ञान् समाचरेत्। शुल्यैर्विविधैर्मेध्यैः शाकमूलफलेन वा। चीरवासा भवेन्नित्यं स्नायात् त्रिषवणं शुचिः। सर्व-

भूतानुकम्पी स्यात् प्रतिग्रहविवर्जितः । दर्शेन पौर्ण-मासेन यजेत नियतं द्विजः ! । पक्षेष्टया श्रावणे चैव चातुर्मास्यानि चाहरेत् । उत्तरायणञ्च क्रमशो दत्तस्या-यनमेव च । वासन्तशारदैर्मध्यैर्नव्यैः क्रतुमा-हरेत् । पुरोडाशं चरुं चैव विधिवच्चरुवेत् पृथक् । देवताभ्यश्च तद्धुत्वा वन्यं मेध्यतरं हविः । शेषं स-हुपभुञ्जीत लवणञ्च स्वयंकृतम् । वर्जयेन्मधुमांसादि भौमानि कवकानि च । भूस्तृणं शिग्रुकञ्चैव श्लेष्मा-तकफलानि च । न फालकृष्टमश्नीयात् क्षुत्तृष्टमपि कैनचित् । न ग्रामजातान्यार्त्तो वा पुष्पाणि च फलानि च । श्रावणे चैव विधिना वह्निं परिचरेत् सदा । न द्रुह्येत् सर्वभूतानि निर्द्वन्द्वो निर्ममो भवेत् । न नक्तं किञ्चिदश्नीयात् रात्रौ ध्यानपरो भवेत् । जितेन्द्रियो जितक्रोधस्तत्त्वज्ञानविचिन्तकः । ब्रह्म-चारी भवेन्नित्यं न पत्नीमपि संस्पृशेत् । यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत् । तद्व्रतं तस्य लुप्येत प्रायश्चित्ती भवेत् द्विजः । तत्र यो जायते गर्भो न संस्पृश्यो द्विजातिभिः । न हि वेदाधिकारोऽस्य तत्त्व-मप्येवमेव हि । अधः शयीत सततं सावित्रीजप-तत्परः । शरण्यः सर्वभूतानां संविभागपरो भवेत् । परीवादं मृषावादं निद्रालस्यं च वर्जयेत् । एकाग्नि-रनिकेतः स्यात् प्रोक्षितां भूमिमाश्रयेत् । मृगैः सह चरेद्व्रजं तैः सङ्गैश्च संवसेत् । शिलायां शर्करायां वा शयीत तृणसंहितः । सद्यःप्रक्षालको वा स्यात् मास सञ्चयिकोऽपि वा । षण्मासनिचयो वा स्यात् समानिचय एव वा । नक्तञ्चाह्नं समश्नीयात् दिवा वा-हृत्य शक्तितः । चतुर्थकालिको वा स्यात् स्याद् वा षष्ठकालिकः । चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्तयेत् । पक्षे पक्षे समश्नीयात् यवागूक्वथितां तथा । पुष्पमूलफलैर्वापि केवलैर्वर्तयेत् सदा । स्वाभाविकैः स्वयंशीर्णैर्वैखानसमते स्थितः । मुनौ वा परि-वर्त्तेत तिष्ठेद् वा प्रपदैर्दिनम् । स्थानासनाभ्यां विहरेत् न क्वचिद्वैर्यमुत्सृजेत् । ग्रीष्मे पञ्चतपाश्च स्याद् वर्षास्वभ्रावकाशिकः । आर्द्रवासास्तु हेमन्ते क्रमशो वर्त्तयंस्तपः । उपस्पृश्य त्रिषवणं पितॄन् देवांश्च तर्प-येत् । एकपादेन तिष्ठेत शरीरीवां पिबेत् सदा । प-क्षान्निर्मुसपो वा स्यादूञ्छपः सोञ्छपोऽथ वा । पयः पिबेत् शुक्लपक्षे कृष्णपक्षे तु गोमयम् । शीर्णपर्णाशनो वा स्यात् कृच्छ्रैर्वा वर्त्तयेत् सदा । योगाभ्यासरतो वा स्यादुद्वाध्यायी भवेत् सदा । अथर्वशिरसामेतो वेदान्ता-भ्यासतत्परः । यमान् सेवेत सततं नियमांश्चाप्य तन्द्रितः । कृष्णाजिती सोपवीतः शुक्लयज्ञोपवीतवान् । अथ वाग्नीन् समारोप्य स्वात्मनि ध्यानतत्परः । अन-ग्निरनिकेतः स्याद् निर्मोक्षपरो भवेत् । तापसेष्वेष विप्रेषु यात्रिकं नैष्ठमाचरेत् । गृहमेधिषु चान्येषु द्विजेषु वनवासिषु । ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वनेवसन् । प्रतिगृह्य पुटेनैव पाणिना शकलेन वा । विधिवांश्चोपनिषदं स्वात्मसंसिद्धये जपेत् । विद्याविः शेषान् सावित्रीं ब्रह्माध्यायं तथैव च । महाप्रस्था-निकञ्चास्थौ कुर्यादनशनन्तथा । अग्निप्रवेशमन्यद्वा ब्रह्म पर्णविधौ स्थितः । ये तु सम्यगिममाश्रमं शिव-माश्रयन्त्यशुभपुञ्जनाशनम् । ते विशन्ति पदमैश्वरं परं यान्ति चैव जगतोऽस्य संस्थितिम्" कूर्मपु० २६ अ०

वानर पुंस्त्री० वानं वनसम्बन्धिफलादिकं राति रा-क । वनामख्याते पशुभेदे अमरः स्त्रियां ङीष् ।

वानरप्रिय पु० ६त० । क्षीरिवृक्षे रत्नमा० ।

वानराघात पु० वानराणामाघातो यत्र । क्षोभ्रवृक्षे शब्दच०

वानरी स्त्री वानरस्य प्रियम् भञ्जत्वात् अण् ङीष् । १शूक-शिम्बीवृक्षे शब्दर० । वानर+स्त्रियां ङीष् । २वानर-योषिति । [२वानराधीशे वानरनाथादयोऽप्यत्र ।

वानरेन्द्र पु० वानर इन्द्र इव । १सुग्रीवे शब्दर० ६त० ।

वानल पु० वानं वनभावं निषिद्धतां लाति ला-क । (वाबइ) तृणभेदे शब्दच० ।

वानस्पत्य पु० वनस्पतेरयम् प्रतिरूपः पुष्पाज्जातफलत्वात् । पुष्पजातफलके आम्रादौ वृक्षे अमरः ।

वानायु पु० वनायु+पृषो० । देशभेदे (आरब) शब्दर० ।

वानायुज पुंस्त्री० वानायुदेशे जायते जन-ड । घोटकभेदे च (आरबी) अमरः स्त्रियां ङीष् । [अमरः ।

वानीर पु० वन-ईरन् स्वार्थेऽण् । १वेतसे २वञ्जुलवृक्षे

वानीरक पु० वानीर इव इवार्थे कन् । वञ्जुलवृक्षे राजनि०

वानेय न० वने जले भवः ढक् । कैवर्त्तीमुस्तके अमरः ।

वान्त त्रि०वम-क्त । उद्गीर्णे "वान्ताशीत्युच्यते बुधैः" छन्दोटी ।

वान्तिकृत् पु० वान्तिं वमनरोगं करोति कृ-क्विप् । (मयना) ख्याते वृक्षे शब्दच० । [राजनि०

वान्तिदा स्त्री वान्तिं छर्दिं ददाति दा-क । कटुकीवृक्षे

वाप पु० वप-घञ् । १तन्त्वादेर्वीजादेश्च २वपने १वृषणे च ।

वापदण्ड पु० उप्यतेऽनेन वप–करणे घञ् कर्म० । वेमनि तन्तुवपनदण्डे अमरः । [२धान्यभेदे न० राजनि० ।

वापित त्रि० वप–णिच् क्त । १बीजाङ्कुरे २मुण्डिते मेदि० ।

वापि(पी) स्त्री वप–इञ् वा ङीप् । "दीर्घात् दशगुणा वापी" इत्युक्तलक्षण १जलाशयभेदे जलाशयशब्दे दृश्यम् २जलाशयमात्रे च "वापीं स्नातुमितो गतासि" इति काव्यप्र० । "यो वापीमथ वा कूपं देशे वारिविवर्जिते । खानयेत् स दिवं याति विन्दो विन्दो गतं यमाः" कल्पतरौ वायुपु० तज्जलगुणाः "वाप्यं गुरु कटुक्षारं पित्तलं कफवातजित्" राजवल्लभः । "वापीकूपतडागं वा प्रासादं वा निकेतनम् । न कुर्याद्दुद्धिकामस्तु अनलानिलनैर्ऋते । आग्नेय्यां मनसस्तापो नैर्ऋते क्रूरकर्मकृत् । वायव्यां बन्धवित्तञ्च पीयमाने जले प्रिये ! । स्थानस्य पापके भागे वापीकूपतडागकम् । अग्निदाहं सदा कुर्यात् समानुषचतुष्पदाम् । नैर्ऋते पीयमानन्तु आत्मना दुःखितो भवेत् । कन्यापि तज्जलं पीत्वा पतिं हन्ति न संशयः" देवीपु० ।

वापीह पुंस्त्री० वापीं तत्स्थजलं जहाति हा–क । घातके विहगे त्रिका० स्त्रियां ङीष् ।

वाप्य न० वाप्यां भवः यत् । १कुष्ठौषधे अमरः । २वापीभवे वप–गत्वत् । ३वपनीये च त्रि० ।

वाम न० वा–मन् । १धने मेदि० २वाम्भूके जटा० । ३मनोहरे ४प्रतिकूले ५सव्यभागस्थे त्रि० मेदि० । ६अधमे त्रि० हि० को० ७सव्यदेहे न० । ८कामदेवे ९वसुदेवे तन्त्रोक्ते वेदाचारविरुद्धे १०मद्यादिपानरूपाचारे च पु० कुलाचारशब्दे २१३४पृ० दृश्यम् ।११स्त्रीभाषे स्त्री अमरः १२दुर्गायां स्त्री । "वामं विरुद्धरूपन्तु विपरीतन्तु गीयते । वामेन सुखदा देवी वामा तेन मता बुधैः" देवीपु० ४५अ० । "वामान्तु वामदाक्षिण्यभावाभ्यामपि पूजयेत् । प्रसन्नानभैरवीं देवीसप्ततारां तथैव च । उच्छिष्टभैरवीं चण्डीं तारां त्रिपुरभैरवीम् । एतास्तु वामभावेन यजेत् त्रिपुरभैरवीम् । सर्वत्र पितृदेवादौ यक्षाद्भवति दक्षिणः । देवी च दक्षिणा यस्मात्तस्मात् दाक्षिण्यमुच्यते । या पुनः पूज्यमाना तु देवादीनां तु पूर्वतः । यत्तद्भागं व्रजं धत्ते सा वामा तु प्रकीर्त्तिता" कालिकापु० ७७अ० ।

वामदेव पु० कर्म० । महादेवमूर्त्तिभेदे अमरः ।

वामन त्रि० वम–णिच्–ल्युट्–ल्यु वा । १दक्षिणदिग्वर्त्तिनि अमरः । २ह्रस्वे ३वलिबन्धनार्थं प्रादुर्भूते हरेरवतारभेदे मेदि० तत्कथा हरिव० २६१ अ० दृश्या । पाणिनिसूत्रवृत्त्य कारिके हस्तिकारके ५पण्डितभेदे च । ६ह्रस्वे त्रि० अमरः स्त्रियां ङीप् । "वामनी मूर्त्तिमाहरेत्" ।

वामलूर पु० वामं लुनाति लू–रक् । वल्मीके अमरः ।

वामलोचना स्त्री वामे सुन्दरे लोचने यस्याः । स्त्रीभेदे अमरः ।

वामवेध पु० वामः प्रतिकूलो वेधः । ज्योतिषोक्ते गोचरस्थग्रहाणां स्वस्वराश्यवधिकस्थानविशेषस्थग्रहभेदजन्ये योगभेदे "वामवेधविधिना स्वगोचरा ज्ञेयकी" इति ज्योतिषम् गोचरशब्दे २६८१ पृ० दृश्यम् ।

वामाचार पु० वामः वेदादिविरुद्धः आचारः । तन्त्रोक्ते मद्यमांसादिसेवनरूपे आचारभेदे । कुलाचारशब्दे दृश्यम्

वामापीड़न पु० वामं यथा तथा आपीड्यते भूषयतेऽनेन आ+पीड–ल्युट् । पीलुवृक्षे शब्दच० ।

वामावर्त्त त्रि० वामेनावर्त्तते आ–वृत–अच् । १वाममार्गेणावर्त्तमाने पदार्थे । भावे घञ् । २वाममार्गेणावर्त्तने पु० ।

वामिल त्रि० वाम+अस्यर्थे स्वार्थे वा इलच् । १दाक्षिणात्ये २वामे च मेदि० ।

वामी स्त्री वाम–गौरा० ङीष् । १अश्वग्राम "अथोष्ट्रवामीश्वतवाहितार्थाः" रघुः । २मद्यगाल्यां ३रासभ्यां ४करभ्याञ्च मेदि० । [कुटुतायां नाट्यांम् ।

वामोरू स्त्री वामौ सुन्दरौ ऊरू यस्याः ऊङ् । प्रियतायाम् ।

वाय पु० वे–घञ् । वयने (बोना) । [वापदण्डे हिरूपकोषः ।

वायदण्ड पु० वायतेऽनेन वे–करणे घञ् कर्म० । वेमनि

वायवी स्त्री वायोरियं यत्र स्त्रियां ङीप् यलोपः । १वायुसम्बन्धिन्यां स्त्रियां २तन्त्रोक्तो ३उत्तरपश्चिमायां दिशि च जटा० ।

वायव्य त्रि० वायुर्देवताऽस्य वायु+यत् । १वायुदेवताके पदार्थादौ "वायव्यं श्वेतमालभेत" श्रुतिः । २वायुसम्बन्धिनि च

वायस त्रि० वय एव स्वार्थे अण् । १काके वायं वपनं स्तुतिं वा–क । २अगुरुवृक्षे ३श्रीवासे च मेदि० ।

वायसविद्यिक त्रि० वायसविद्यां वेत्ति ठक् । काकचेष्टाभेदेन शुभाशुभाभिज्ञे ।

वायसादनी स्त्री वायसैः काकैरद्यते अद–ल्युट् ङीप् । १काकतुण्ड्यां २महाज्योतिष्मत्यां च राजनि० ।

वायसारति पु० इत० । पेचके अमरः ।

वायसी स्त्री वायसस्येवमक् प्रियत्वात् । १काकोदुम्बरिका-

याम् २कालनाच्यां च मेदि० ३महाज्योतिष्मत्या ४काकमाचायां ५काकतुण्ड्यां च राजनि०।

वायसेष्टु पु० वायसानामिष्टुरिव प्रियः। काशतृणे राजनि०

वायसोली स्त्री वायसमोड्डते ओड-उत्क्षेपे अच् ङीष् वयसः ओलः० मोरा० ङीष्। काकमाचायाम् शब्दर०। स्वार्थे क तत्रैव।

वायु पु० वा-उण्। १स्पर्शगुणके वह्निभूतमध्ये भूतभेदे उत्तरपश्चिमविदिग्दिगधिपतौ २देवभेदे ३देहस्थधातुभेदे च अनिलशब्दे १६३ पृ० दृश्यम्।

वायुगुल्म पु० वायुना गुल्म इव। अन्नसंक्लमे त्रिका०

वायुटाङ्ग पु० वायुना दीर्घतैऽङौ टु-उण्। मेघे त्रिका०।

वायुपुत्र पु० ६त०। १हनुमति २भीमे च वायुसुतशब्दे योऽप्यत्र

वायुफल्ल न० वायुना फल्लति प्रतिफल्लति फल्ल-अच्। १इन्द्रयवे २करकायां च मेदि०।

वायुभक्ष पुंस्त्री० वायुं भक्षति भक्ष-अण्। १सर्पे राजनि०। स्त्रियां ङीष्। २। वायुभक्षणोऽप्यत्र। वायुर्भक्षोऽस्य। वायुभक्ष्य तत्रार्थे पुंस्त्री० स्त्रियां टाप्। [शब्दर०।

वायुवर्त्मन् न०। वायोर्वर्त्म संचारमार्गो यत्र। आकाशे

वायुवाह पु० वायुना उह्यते वह-घञ्। धूमे हेमच०।

वायुवाहिनी स्त्री वायुं देहस्थवायुं वाहयति संचारयति वह-णिच्-णिनि। वायुसंचारिण्यां देहस्थसिरायाम्-कायशब्दे १६१६ पृ० दृश्यम्। [भरतः।

वायुसख पु० वायोः सखा सहचरः अलुक्स०। अग्नौ

वायुसखि पु० वायुः सखा यस्य। अग्नौ अमरः।

वायुवाह्य न० ६त०। वायुसंचारस्थाने आकाशे धनञ्जयः।

वार् न० पृ० ह-क्विप्। अप्सु अमरः।

वार पु० ह-घञ्। १संख्ये २अवसरे अमरः। खरोदयकाले (पाला) "वारोऽस्त्रराजसुतः" ज्यो० ३प०। ४द्वारे-५शिवे ६त्रिंशद्दण्डे ७अहोरात्रे मेदि०। वार्+संघे अण्। दशसंघे न० स्त्र्यादिषष्ठ्यधिष्ठिते ६दिने पु० यथा रविवारः रविस्वामिकं दिनम्। तदालयनत्व स्त्री० शि०

"मन्दादधः क्रमेण स्युश्चतुर्थां दिवसाधिपाः। वर्षाधिपतयस्तद्वत् त्रयोवाच प्रकीर्त्तिताः। अर्ध्वक्रमेण शशिनो मासानामधिपाः स्मृताः। होरेशाः सूर्यतनयादधोऽधःक्रमतस्तथा।" सू० "अनेः सकाशादधःक्रमेण चतुर्थषष्ठाता यहा दिनाधिपतयो वारेश्वरा भवन्ति। यथा शनिरविचन्द्रभौमबुधगुरुशुक्रा इति। वर्षस्य षड्भिर्दिनसमत्रयहिनाब्दस्य स्वामिनस्तदन्यादधः क्रमेण तृतीयषष्ठ्यङ्का यहा उक्ताः। यः षष्ठ्यर्थे। तत्क्रमश्च यथा शनिभौमशुक्रचन्द्रगुरुसूर्यबुधा इति। चन्द्रात् सकाशादूर्ध्वकक्षाक्रमेण यहा मासानां त्रिंशद्दिनात्मकानां स्वामिनः कथिताः। तत्क्रमश्च चन्द्रबुधशुक्ररविभौमगुरुशनय इति। अनेः सकाशादधोधः क्रमतः अधःक्रमेण होरेशाः "होरेति लग्नं भगणस्य चार्धम्" इत्युक्तलग्नार्द्धभागात्मकहोराणां दिने हादश रात्रौ हादशेत्यहोरात्रे चतुर्विंशतिहोराधामित्यर्थः। होरा चार्धदिनाडिका। इति षष्टिघटिकात्मकेऽहोरात्रे चतुर्विंशतिहोराधामिन्ये स्वामिनस्तथा मासेश्वरवदव्यवहिताः कथिताः। यथा तत्क्रमः शनिगुरुभौमरविशुक्रबुधचन्द्रा इति। अत्र शनेः सर्वोर्द्धस्थत्वाच्चन्द्रस्य सर्वाधः स्थत्वात् तस्यासध ऊर्ध्वक्रमः क्रमेणोक्तः अन्यथाहस्वाधिपत्वाभ्युपगमे विनिगमनाविरहापत्तेः। न हु शनेरावर्षाधिपत्वेन वृष्ट्यादौ दिनवर्षहोराधां स्वामित्वं न वा चन्द्रस्याद्यावर्षाधिपत्वेन वृष्ट्यादौ मासेशत्वं पूर्वखण्डोक्तानीतनदीशैर्विरोधापत्तेः। अतोपपत्तिः। होराद्यङ्गानां क्रान्तिहक्षेऽधःक्रमेण मेषादीनां सम्बन्धादूर्ध्वक्रमेणाधः क्रमेण होरेशत्वं युक्तम्। एवमहोरात्रे चतुर्विंशतिहोराः। सप्ततारास्त्रयो होरेशा गताः चतुर्थो होरेशो द्वितीयदिनारम्भे स एव प्रथमहोरेशत्वाद् द्वितीयदिने होरेशः। एवमुत्तरत्रापि। एवमेतद्वारक्रमेण श्रावनवर्षे त्रयो वारा अधिका इति पूर्ववर्षादधिमवर्षे मासाधःक्रमेण तृतीय उत्तरोत्तरम्। एवं श्रावनमासे द्वौ वारौ वारक्रमेण मासेश्वरस्याधिकाविति कक्षोर्ध्वक्रमे वारक्रमेणैकान्तरितत्वात् कक्षोर्ध्वक्रमेण मासेश्वर उत्तरोत्तरमित्युपपन्नं मन्दादित्यादि श्लोकद्वयम्" रङ्गनाथः।

वारप्रवृत्तिश्च देशभेदात् भिन्नकालीना यथोक्त सि०शि० "सूर्योदयादूर्ध्वमधश्च तासिः प्राच्यां प्रतीच्यां दिशि तत्प्रवृत्तिः। अर्ध्वं तथाऽधश्च कलाभिरार्भीरवावुदग्दक्षिणगोलमार्गे" भू०। "प्राच्यां सार्धघटीभिर्दिनवारप्रवृत्तिरर्कोदयादूर्ध्वम् भवति प्रतीच्यां तु तस्मादधः। यतो लङ्कोदये वारादि अतएव च वाराद्युत्तरगोलस्थे चरोर्ध्वघटिकाभिरूर्ध्वम् यतस्तदा उन्मण्डलं क्षितिजादूर्ध्वम्। दक्षिणे स्वधः अतस्तत्रोदयादधः वारप्रवृत्तिः मनिता०, "जयति तमोभूतेऽस्मिन् सृष्ट्यादौ भास्करादिभिः

स्फुटः। यस्माद्दिनप्रवृत्तिर्दिनवारोऽर्कोदयात् तस्मात्"। श्रीपतिरपि "स्फुटे सुखे ध्रुवाल्पमयेऽपि विम्बे ग्रहेषु स्फुटेष्विनपूर्वकेषु। दिनप्रवृत्तिस्तदधीश्वरस्य वारस्य तस्मादुदयप्रवृत्तिः। लङ्कोदयाभ्यसूत्रात् प्रथममपरतः पूर्वदेशे च पश्चात् सध्वोत्याभिर्घटीभिः सवितुरुदयतो वासरे वा प्रवृत्तिः। ज्ञेया सूर्योदयात् प्राक् चरगणकृत-भवैश्वासुभिर्व्यत्यगोले पश्चात् तैः सौम्यगोले युतिवियुति-वशाच्छोभयोः स्फुटकालः"। अन्योऽप्याह "केचिद्वारं सवितुरुदयात् प्राहुरन्ये दिनार्धात् भानोरर्धास्तमय समयादूचिरे केचिदेवम्। वारस्यादिं यवनन्दपतिर्दिङ्मुहूर्ते निशाया ब्राह्मोचार्यः कथयति पुनश्चार्द्धरात्रे खतन्त्रे"। एवं मतभेदे व्यवस्था मलमा० उक्ता यथा "हो तिथ्यल्पावेकवारे यत्र स स्यात् दिनत्रयः" कूर्मपु० "एकस्मिन् सावने स्पृष्टे तिथीनां त्रितयं यदा। तदा दिनत्रयः प्रोक्तस्तत्र साङ्गिकं फलम्" वसिष्ठः। कौर्मपुराणवासिष्ठवचनैकवाक्यतया सावनदिनवत् वारप्र-वृत्तिः सूर्योदयावधिरेव सूर्यसि० 'सूतकानां परिच्छेदो दिनमासाब्दवाक्षया। मध्यमग्रहभुक्तिश्च सावनेन प्रकी-र्त्तिता"। अत्र दिनाधिपस्य रव्यादेर्भोग्यं दिनं वार-रूपं सावनगणनयोक्तम् यत्तु "रेखापूर्वापरयोः इत्या-दिना ज्यौतिषे वारप्रवृत्तिरुक्ता तत् ज्योतिषशास्त्रो काङ्गहोरात्रज्ञानार्थम्"। वाराणां क्रूरत्वविशेषविधा-नार्थं संज्ञाभेदा यथा "चरः सौम्यो गुरुः स्निग्धो मृदुः शुक्रो रविर्ध्रुवः। शनिश्च दारुणो क्षेयो भौम उग्रः शशी समः। चरस्थिरैः प्रयत्नेन प्रवेश्यं मृदुभिर्ध्रुवैः। दारुणैश्चैव योक्तव्यं क्षत्रियैर्युद्धकाङ्क्षिभिः"। इति सामान्यतोऽभिधाय "नृपाभिषेकोऽग्निकार्य्यं च सूर्यवारे प्रशस्यते। सोमे तु शेषयानं च कृषिं चैव गृहादिकम्। सैनापत्यं गौर्य्यगुडं शस्त्राभ्यासः कुजे तथा। सिद्धिकार्य्यं च मन्त्रश्च यात्रा चैव बुधे तथा। पठनं देवपूजा च वस्त्राद्याभरणं गुरौ। कन्यादानं गजारोहः शुक्रे स्यात् समयः स्त्रिया। स्याद्य गृहप्रवेशश्च गमनञ्च शनौ शुभः" गरुडपु० १व्य०

वारक त्रि० वारयति वृ-णिच्-ण्वुल्। १प्रवृत्तिनिरोधके। २अश्वभेदे ३अश्वगतिविशेषे च पु० मेदि०। ४कट-स्थाने ५हुडिवेरे न० हेमच०।

वारकिन् पु० वारकः अस्त्यस्य इनि। १चित्रार्के २पर्या-लोचनि (वाछड़) ३खड्गे ४अलौ क मेदि०।

वारकीर पु० वारे कीर इव। १श्यालके त्रिका० वार-व्याहके २खाड़वे ४यूकायां ५वेधिवेधिन्यां ६नीराजितहये च मेदि०।

वारङ्ग पु० च० वृ-अङ्गच्। खड्गादिमुष्टौ (मुठ) त्रि०को०।

वारट न०चु० वृ-अटच्। १क्षेत्रे त्रिका० २क्षेत्रसमूहे शब्दर० २हस्तां स्त्रा हेमच० टाप्।

वारण न०चु०-वृ-ल्युट्। प्रवृत्तिप्रतिरोधे १निषेधे मेदि० २हस्त्यादिवारणे च जटा०। ३गजे पुंस्त्री० अमरः स्त्रियां ङीष्। ४वाणवारे कवचे पुंन० शब्दच०।

वारणपुषा स्त्री वारणं पुष्णाति पुष-क पृषो० पस्य बः। कदल्याम् अमरः।

वारणवल्लभा स्त्री वृत०। कदल्याम् त्रिका०।

वारमुख्या स्त्री वारे वेश्याहन्दे मुख्या। बहुजनसम्-मतायां वेश्यायाम् अमरः।

वारंवारम् अव्य० वृ-णमुल् द्वित्वम्। पौनःपुन्ये।

वारयिट पु० चु० वृ-इटच्। १पत्यौ हला०। २वारण-कर्त्तरि त्रि०।

वारयोषा स्त्री वारस्य जनसमूहस्य योषा साधारणत्वात्। वेश्यायाम्। वृत०। वारवध्वादयोऽप्यत्र हेमच०।

वारलोक पु० वार्जलम् अलोकं यत्र। (वाउड़ जलसो) जुपे शब्दर०। [कवचे अमरः।

वारवाण पुंन० वार्यते वृ-घञ् वारो वार्यो वाणो यस्य।

वारवाणि स्त्री वारं समूहं वष्टे वण-इण् वा ङीप्। वेश्यायाम् त्रिका०। [२कदल्यां शब्दर०।

वारवृषा स्त्री वारं जलसंघं वर्षत्यत्र वृष-क। १धान्ये

वारवेला स्त्री वृत०। सूर्य्यादिदिनविशेषे वर्ज्यकालभेदे "कृत४मुनि७यम२शर५मङ्गल८रामश१र्तु६ भास्करादि-यामार्द्धं। ग्रसति हि वारवेला न शुभा शुभकार्य्येषु. याव"ज्ज्यो०त०। [कि यलुक् समा०। यशस्के शब्दर०।

वारांनिधि स्त्री वारां जलराशीनां निधिराधारः नि+धा-

वाराणसी स्त्री वरणा च असी च सोमात्मेनास्यस्या अण् पृषो०काशीपुर्यां हेम०। पृषो०वराणस्यत्र। वरणाशब्दे ४८४६पृ० दृश्यम्। [राजनि०।२वराहसम्बन्धिनि त्रि०।

वाराह पु० वराहस्येदं प्रियत्वात् अण्। १मङ्गलप्रियेऽजके

वाराहकर्णी स्त्री वराहस्यायं वाराह एव कर्णः पत्र-मस्याः ङीप्। अश्वगन्धायाम् राजनि०।

वाराहपत्री स्त्री वाराहस्तत्कर्ण इव पत्रमस्याः ङीप्। अश्वगन्धायाम् राजनि०।

वाराहाङ्गी स्त्री वाराहमिवाङ्गमस्याः ङीप्। दन्तीवृक्षे भावप्र०।

वाराही स्त्री वराहस्येयमण् ङीप्। अष्टमातृकामध्ये १वराहशक्तौ "यज्ञवराहमतुलं रूपं या बिभ्रता हरेः। शक्तिः साध्यायतो तत्र वाराहीं बिभ्रती तनुम्" देवीमा० "वाराही नारसिंही च" अग्निपु०। २योगिनीभेदे हृदयहन्दिकेश्वरपु०। ३वराहक्रान्तायाम् अमरः ४वराहयोषिति च ५अग्निभाखण्डे राजनि०।

वाराहीकन्द पु०(शूकरादन) ख्याते कन्दभेदे "वाराहीकन्द एवान्यैस्तर्म्मकार लुको मतः। अनूपे स भवेद्वेणे वराहइव लोमवान्" भावप्र०।

वारि न० वृ-इण्। १जले अमरः २क्षीरेरे च हेमच०। वार्य्यतेऽनया वृ-णिच्-इन् वा ङीप्। ३गजबन्धन्याम् अमरः। "व्यर्गलाभङ्ग इव प्रवृत्तः" रघुः। ४वाचि ५स्वरस्त्यामृ च स्त्री ङीवन्तः वृक्षस्यां "रणिः ७वन्दी च मेदि०।

वारिकण्टक पुंन० वारिणः कण्टक इव। शृङ्गाटके जटा०

वारिकर्णी स्त्री वारिणि कर्ण इव पत्रमस्याः ङीप्। १कुम्भ्राम् (पाना) शब्दर० स्वार्थे क। तत्रैव।

वारिकर्पूर पुंस्त्री० वारिणि कर्पूर इव। दृढिभमत्स्ये त्रिका० स्त्रियां ङीष्।

वारिकुब्ज पु० वारिणि कुब्ज इव वक्राकृतित्वात्। शृङ्गाटके शब्दर०। स्वार्थे क। तत्रैव त्रिका०।

वारिक्रामि पु०वृत०। जलौकायां त्रिका०। [कायाम् त्रिका०।

वारिचत्वर पु० वार्य्येव चत्वररूपमस्याधारत्वात्। कुम्भ्राम्

वारिचर पुंस्त्री० वारिणु चरति चर-अच्। १मत्स्ये २जलचरजन्तुमात्रे त्रि० स्त्रियां ङीष्। [शैवाले त्रिका०

वारिचामर न० वारिणश्चामरमिव शोभाहेतुपुष्पाकृतित्वात्।

वारिज न० वारिणि जायते जन-ड। १पद्मे २लवङ्गे ३गौरसुवर्णे ४नवणभेदे च राजनि०। ५शङ्खे हेमच० वृक्षभूके पु० शब्दच०। ७जलजातमात्रे त्रि०।

वारितस्कर पु०वारिणः तस्कर इवापहारकत्वात्। १सूर्य्ये २मेघे शब्दमा०। ३मुस्तके च।

वारित्रा स्त्री वारिणस्त्रायते त्रै-क। छत्रे त्रिका०।

वारिद न० वारि ददाति दा-क। १मेघे २मुस्तके च अमरः। ३जलदातरि त्रि० ४वाडवायां स्त्री शब्दच०।

वारिधि पु० वारीणि धीयन्तेऽस्मिन् धा-आधारे कि। १समुद्रे शब्दर० वारिनिष्कादयोऽप्यत्र जलाधारे २घटादौ च

वारिपर्णी स्त्री वारिणि पर्णान्यस्याः ङीप्। कुम्भिकायाम् (पाना) अमरः।

वारिपालिका स्त्री वारीणि पालयति आस्तरणेन पाल-ण्वुल्। कुम्भिकायाम् (पाना) शब्दमा०।

वारिपृश्नी स्त्री वारिणि पृश्निः पर्णमस्याः ङीप्। कुम्भिकायाम् (पाना) शब्दमा०। [त्रिका०।

वारिबदरा स्त्री वारिसमीपभवा बदरेव। प्राचीनामलके

वारिबालक न० वारिणो बालक इव। हीबेरे शारा०।

वारिभव न० वारिणो नेलजलाय वारिणि वा भवति प्रभवति वा भू-अच्। १स्रोतोऽञ्जने राजनि०। २जलभवमात्रे त्रि०

वारिमसि पु० वारि जलं मसरिव नीलतोयादकं यस्य। १मेघे त्रिका० २मुस्तके च। [(पाना) त्रिका०।

वारिमूली स्त्री वारिणि मूलमस्याः ङीप्। कुम्भ्राम्

वारिरथ पु०वारिणि रथ इव गमनसाधनत्वात्। भेलके त्रिका०

वारिराशि पु० वारीणां राशियोऽत्र। १समुद्रे त्रिका०। ६त०। २जलसमूहे च। [२जलजातमात्रे त्रि०।

वारिरुह न० वारिणि रोहति रुह-क। १पद्मे राजनि०

वारिवदन न० वारियुक्तं वदनं यस्मात्। प्राचीनामलके तत्सेवने हि मुखं वारिनिस्रावः।

वारिवर न० वारि वृणोति वृ-अच्। वरमुस्तके जटा०।

वारिवल्लभा स्त्री वारि वल्लभमस्याः जनकत्वात्। विद्युति राजनि०। [च अमरः। एव। वारिवाडवत्र भवे वार्वृहः।

वारिवाह पु० वारीणि वहति वह-अण्। १मेघे २मुस्तके

वारिश पु०वारिणि समुद्रजले शेते शी-ड। विष्णौ त्रिका०।

वारीश पु० ६त०। १समुद्रे २वरुणे च। वारिनाथादयोऽप्यत्र।

वारु पु० वारयति रिपून् वारि-उण्। विजयकुञ्जरे शारा०।

वारुण न० वरुणस्येदमण्। १जले २वरुणसम्बन्धिनि त्रि० स देवतास्य अण्। ३वरुणदेवताके त्रि०। ४शततारके न०।

वारुणि पु० वरुणस्यापत्यमिञ्। अगस्त्यमुनौ त्रिका०।

वारुणी स्त्री वरुणो देवतास्य वरुणस्येदं वा अण् ङीप्। १पश्चिमदिशि २मदिरायाम हेमच०। ३शतभिषानारायां। ४गण्डदूर्वायाम् ५दूर्वायां मेदि०। ६इन्द्रवारुणयोः राजनि० ७वरुणस्त्रियां दशतारा-घानक्षत्रयुक्तचैत्रकृष्णत्रयोदश्यां च स्कन्दपुराणे। "वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी। गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा" वारुणं शतभिषा। "शनिवारसमायुक्ता सा महावारुणी स्मृता। गङ्गायां यदि लभ्येत कोटि

सूर्य्यग्रहैः समा। शुभयोगसमायुक्ता शनौ शतभिषा यदि। महामहेति विख्याता त्रिकोटिकुलमुद्धरेत्" "अत्र संज्ञाविधेः सार्थकत्वाय निमित्तत्वेन मासपक्षतिथ्यृक्षेखानन्तरं महावारुणीमहामहावारुणाख्ययुक्षेखनीये चाद्ये पार्व्वणादिसंज्ञाक्षेखवत् पौर्णमास्यमावास्ययोः पक्षाक्षेखवच्च तिं०त०। अत्र च रूढितत्वात् सावनदिनमेव ग्राह्यम् "सूतकानां परिच्छेदो दिनमासाब्दसंख्या। मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तितः" सूर्य्यसि० उक्तेः। कोर्मेपाद्मयोः "द्वौ तिथ्यन्तावेकवारे यत्र स्यात् स दिनत्रयः"। वशिष्ठः "एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा। तदा दिनत्रयः प्रोक्तस्तत्र साहस्रिकं फलम्" इत्येतयोर्वचनयोरेकवाक्यतयापि तथावगम्यते। रेखापूर्व्वपरयोरित्यादिकन्तु ज्योतिःशास्त्रोक्तं कालहोरादिज्ञानार्थमिति। अत्र "संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्रसूर्य्ययोः। पुण्ये स्नात्वा च गङ्गायां कुलकोटीः समुद्धरेत्"। इति ब्रह्मवैवर्त्तपुराणात् ग्रहणमात्रे त्रिकोटिकुलोद्धरणविधानात् ततोऽधिकेषु वारुण्यादिषूत्तरोत्तरगुरुषु महामहावारुण्यादिषु यत् त्रिकोटिकुलोद्धरणमुक्तं तदुद्धरणगततारतम्येनाविरुद्धम् "यं यं क्रतुमधीते च तस्य तत्फलमाप्नुयात् फलम्" याज्ञवल्क्योक्ताध्ययनात् यथा तत्तदुपासकस्तत्तेऽधिकफलम् अतएव शिष्टानामादरोऽपि तथेति। नचात्र "स्नानं कुर्व्वन्ति यानार्थं सन्ध्रे शतभिषां गते। सप्तजन्म भवेयुस्ता दुर्भगा विधवाध्रुवम्"। "त्रयोदश्यां तृतीयायां दशम्याञ्च विशेषतः। शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथञ्चन" इति प्रचेतोजाबालिवचनाभ्यां स्त्रीणां शूद्रादीनाञ्च स्नाननिषेध इति वाच्यम् "भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः। तच्चिद्धं दशम्यादौ नित्यनैमित्तिके न तु" इति हेमाद्रिधृतवचनेन रागप्राप्तस्नान एव निषेधात् नक्षत्रेऽपि तथाकल्पनात्। अत्र त्रयोदश्यां पूर्णायां पूर्वाह्णेतरकाले नक्षत्रादिसत्त्वे परदिने पूर्वाह्णे तिथिनक्षत्रलाभेऽपि पूर्वदिन एव स्नानम्। तथा च कालमाधवीये नारदीयम् "यादित्योदयवेलाया आरभ्य घटिनाडिकाः। तिथिस्तु सा हि शुद्धा स्यात् सार्व्वतिथ्यो ह्ययं विधिः" अत्र पूर्वतिथेः शुद्धत्वाभिधानात् तत्परतिथेरशुद्धत्वाभिधानं प्रतीयते। रात्रावपि वारुण्यादिषु गङ्गायां स्नानम्। "दिवा रात्रौ च सन्ध्यायां गङ्गायाञ्च प्रसङ्गतः। स्नात्वाऽश्वमेधजं पुण्यं लभेदघ्नुततज्जलैः"। लघुहारीतस्मृतौ देवलः "महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम्। तत्र स्नानं न कर्त्तव्यं काम्यनैमित्तिकादृते"। अत्र महानिशायामपि काम्यनैमित्तिकं स्नानं प्रतीयते"। तिं०त०रघु०

वारेन्द्री स्त्री० देशभेदे (वारेन्द्रभूमि) (राजसाही) वङ्गदेश प्रदेशभेदे।

वार्च त्रि० वारि चरति चर-ड। जलचरे हंसादौ।

वार्णिक पु०वर्णस्यलेखनं शिल्पमस्य ठञ्। लेखके शब्दच०

वार्त्त न० वृत्ति+अण्। १आरोग्ये २व्यवसाये ३निरामये ४वृत्तिशीले च त्रि०अमरः। ५दुर्गायां "पश्वादिपालनाद्देवी वृत्तिकर्म्मान्तकारणात्। वर्त्तनाद्वारणाद्वापि वार्त्ता सैव प्रगीयते" देवीपु०। ६वृत्तौ वृत्तिकर्म्मणि ७जनश्रुतौ अमरः। ८वृत्तान्ते ९व्यतिक्रमणे मेदि। १० कालकर्त्तृके भूतनाशने च स्त्री "अस्मिन् महामोहमये कटाहे सूर्य्याग्निना रात्रिदिनेन्धनेन। मासर्त्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्त्ता" इति भा०व० यक्षप्रश्नः।

वार्त्ताक पु० वार्त्तं आरोग्यमाकयति गमयति अक-णिच्-अण्। वार्त्ताकी त्रिका०। भावप्र० स्त्रीत्वमस्योक्तं ङीप्

वार्त्ताकु स्त्री वार्त्तं आरोग्यमाकयति गमयति अक-णिच्-उण्। वृन्ताके (बेगुन) शब्दच०। "अस्रप्रदा१ मारुतलाधिनी२ च शुक्रप्रदा३ शोणितवर्द्धिनी४ च। वृन्ताकः कासारुचिनाशिनी च ५।६।७। वार्त्ताकुरेषा गुणसप्तयुक्ता। सा बाला कफवातघ्नी पक्का सक्षारपित्तला। सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी। अक्षारपक्का वार्त्ताकुः किञ्चित् पित्तकरी मता। कफमेदोऽनिलघ्नश्च सरा लघुतरा परा" राजव०। "वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम्। ज्वरवातव्रणश्लेष्मदीपनं शुक्रलं लघु। तद्बालं कफपित्तघ्नं वृद्धं पित्तकरं गुरु। वृन्ताकं पित्तलं किञ्चिदङ्गारोपरिपाचितम्। कफमेदोऽनिलाम्लघ्नमत्यन्तं लघु दीपनम्। तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम्। अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत्। तद्गुणैस्तु विशेषेण हितं क्षीणस्य पूर्वतः" भावप्र०। तत्रार्थे ङ० त्रिका०।

वार्त्तायन पु० वार्त्तायाः अयनं येन। वृत्तिहेतौ चरे हेमच०

वार्त्तावह पु० वार्त्तामावहति वा+वह-अण्। १क्षत्रिय वाणिज्याजीविनि वणिग्भेदे अमरः २वृत्तान्तवाहके त्रि०

वार्त्तिक न० वृत्तिरूपेण कृतो ग्रन्थः ठक्। "उक्तानुक्त-

दुरुक्तार्थव्यक्तकारि तु वार्त्तिकम्" इत्युक्ते स्तवानुक्ता-व्यर्थविष्कारके १ग्रन्थभेदे हेमच०। वार्त्तायां तत्करणे नियुक्तः ठक्। २चरे त्रि०। वृत्तिः क्षत्त्रादिः प्रयो-जनमस्य ठञ। ३वैश्ये ४वर्त्तिकाखगे पुंस्त्री० स्त्रियां ङीष्। राजनि० ५वार्त्ताकौ शब्दर०। ६खगभेदे (बटेर) स्त्री हारा०।

वार्दर न० वारे जलाय दीर्य्यते दृ-अप्। १दर्दुरगावर्त्त शङ्खे २काकचिञ्चायाम् ३कृष्णत्रावोज ४भारत्यां मेदि० ५कमिजे कृम्यात्रबीजे च। वारेव दरम्। ७जले च विश्वः।

वार्दल न० वार्दल्यतेऽत्र दल-आधारे क। १दुर्दिने २मस्या-धारे पु० मेदि०।

वार्द्धक न० वृद्धानां समूहः तस्य भावः कर्म वा वुञ्। १वृद्धस-मूहे वृद्धस्य २भावे ३कर्मणि च मेदि०।

वार्द्धत्य न० वृद्धस्य भावः कर्म वा ष्यञ् वृद्ध च। वृद्धत्वे अमरः। [त्रिका०।

वार्द्धि पु० वारि जलानि धीयन्तेऽत्र धा-कि अत०। समुद्रे

वार्द्धिभव न० वार्द्धौ समुद्रे भवति भू-अच्। १समुद्रलवणे राजनि०। २समुद्रभवमात्रे त्रि०।

वार्द्धुषि पु० वृद्धया जीवति वृध वृद्धेर्धुषिभावः। वृद्धाजीवे अमरः। स्वार्थे क तत्रैव। "शस्यार्धं धान्यमादाय महार्घं यः प्रयच्छति। स वै वार्द्धुषिको नाम कुव्यकव्यवहि-ष्कृतः" स्मृतिः। वृद्धिश्च वृद्धिशब्दे वक्ष्यते तत्रोक्तनियमा-तिक्रमेण अनापदि स्वसम्बन्धद्वारा वा स्वाच्छन्द्येन यो व्यवहरति तस्यैव प्रायश्चित्तम् आपदि तु स्वयं करणे नियमातिक्रमे च न दोषः" प्रा० वि०।

वार्द्धुषिन् त्रि० वृद्धि+अस्त्यर्थे इनि प्रकृतेः नि० वार्धुषि भावः। वृद्धाजीविनि भा० स्त्री० ४८२६ श्लो०।

वार्द्धुष्य न० वार्द्धुषेर्भावः ष्यञ्। धान्यादेर्वृद्धिनोपाये (बाढ़ि देया) त्रिका०।

वार्द्धीनस पुंस्त्री० वारि जलानि धयति धा-किप् वार्द्धीः नासा नासिका यस्य नसादेशः। १गजयूथे त्रिका० स्त्रियां ङीष्। "त्रिशृङं त्रिन्द्रियशीर्षं श्वेतं वृद्धसजा-पतिम्। वार्द्धीनसः प्राच्यतेऽसौ हव्ये कव्ये च सत्कृतः" इत्युक्ते २ऋषिभेदे "वार्द्धीनसस्य वांसेन तस्मिन्दोहयवार्द्धिकी" स्मृतेः। ३पक्षिभेदे च "रक्तपादो रक्तगिरा रक्तचञ्चुर्विहङ्गमः। कण्ठो वर्णेन च तथा पक्षी वार्द्धीनसो मतः" सा-र्क०पु०अयं आत्मज्ञम्। वह्निदानाङ्गं कल्किकापु० ६६अ० उक्तो यथा "नीलग्रीवो रक्तचीर्षः कृष्णपादः सितच्छदः। वार्द्धीनसः स्यात् पक्षीयो मम विष्णोरतिप्रियः"। पृषो० वार्भीणसोऽत्र।

वार्भट पुंस्त्री०वारि भट इव कुम्भीरे त्रिका० स्त्रियां ङीष्।

वार्मण न० वर्मणां समूहः अण् न टिलोपः। कवचसमूहे अमरः। [समूहे शब्दर०।

वार्मिण न० वर्मिणां समूहः अण् न टिलोपः। कवच-

वार्मुच् पु० वारि जलानि सुञ्चति उच-किप्। १मेघे शब्दर० २मुस्तके च।

वार्शिला स्त्री वाजीता शिला शाक०। करकायां शब्दच०।

वार्षक न० पृथिवीभागभेदे। "दशधा विभजन् क्षेत्रमकरात् पृथिवीसिनाम्। इक्ष्वाकुरस्थे वृद्धायादो मध्यदेशमवाप्तवान्। कोणे वार्षकं क्षेत्रं रणवृष्टिर्बभूव ह" अग्निपु०।

वार्षिक त्रि० वर्षे वर्षासु वा भवः ठञ्। १वत्सरभवे २वर्षा-कालभवे च। ३वार्यमाणलतायां न० मेदि० तत्रार्थे स्त्री राजनि० स्त्रीत्वे ङीष्। ४वर्षे वर्षं कर्त्तव्यायां पूजायां स्त्री ङीष्। "शरत्काले महापूजा क्रियते या च वा-र्षिकी" देवीमा०। [अमरः।

वार्हत न० बृहत्याः फलम् अण् तस्य न लुप्। बृहतीफले

वार्हद्रथ(थि) पु० बृहद्रथस्यापत्यमण् इञ् वा। बृहद्रथ-राजपुत्रे जरासन्धे नष्टे त्रिका० अवन्तः शब्दर०।

वार्हस्पत्य न० बृहस्पतिना प्रोक्तमधीते पत्यन्तत्वात् यक्। १चार्वाके रत्नमा०। तेन प्रोक्तं तत्रैदं वा यक्। २नीतिशास्त्रे ३बौद्धागमे च। ४बृहस्पतिसम्बन्धिनि त्रि०। ५वर्षभेदे गुरुवर्षशब्दे २६१६पृ०दृश्यम्। स देवताऽस्य यक्। ६तद्देवताके त्रि० ७पुष्यनक्षत्रे न० यैषिकोऽण्। वार्हस्पत्य तत्सम्बन्धिनि त्रि० स्त्रियां ङीष्।

वालव पु० वल-घञ् वालश्लथनं याति गच्छति वा-क। तिथ्यर्द्धात्मके द्वितीये करणे ज्यो०त०। [लकल अत्यल्प न०

वाल्क न० वल्केन निर्वृत्तमण्। वल्कजातेवस्त्रे। वा-

वाल्मिकि पु० वल्मीके भवः इञ् मुनौ०। रामायण-ग्रन्थकर्त्तरि मुनिभेदे द्विरूपकोष।

वाल्मीक(कि) पु० वल्मीके भवः कण् इञ् वा। भार्गवे प्राचेतसे मुनिभेदे जटा०। [अमरः।

वावदूक त्रि० वद-यङ् लुक्-ऊकञ्। बहुवदनशीले वक्तरि

वावय पु० वय-यङ्लुक्-अच्। (वावई) तुलसीभेदे शब्दच०

वाहत संभक्तौ हिं० आत्म० सक० सेट् ज्ञा वेट्। वाहत्यते क्षयावर्त्तिष्ट। "ततो वाहत्यमाना सा" भट्टिः।

वाहत्त त्रि० वाहत-क्त। कृतवरणे।

वाश् तिरश्चां शब्दे अक० व्याह्वाने सक० दि० आत्म० सेट् ऋदित् चङि न ह्रस्वः। वाश्यते अवाशिष्ट। "उद्वाश्यमानः पितरम्" भट्टिः।

वाशा स्त्री वां कासयति श्यति शो-क। वासके शब्दर० स्वार्थे क ह्रस्वे अत इत्त्वम्। वाशिका तत्रार्थे शब्दच०।

वाशित न० वाश-भावे क्त। १तिरश्चां शब्दे अमरः २आह्वाने च।

वाशिता स्त्री वाश-क्त। १करिण्याम् २स्त्रीमात्रे च अमरः

वा(शि)शिष्ठ न० वशि(शि)ष्ठस्येदम् अण् तेन प्रोक्तं वा अण्। वशिष्ठप्रणीते १उपपुराणभेदे २योगशास्त्रभेदे च। ३वशि(शि)ष्ठसम्बन्धिनि त्रि०। ४गोमत्यां नद्यां स्त्री ङीप्च० ङीप्। [मेदि०।

वाश्र न० वाश-रक्। १गृहे २चक्षुष्यद्रव्ये च। २दिवसे पु०

वाष्प(स्प) पु० वा-पष्प(ष्प)क् च। १कण्ठ्ये २नेत्रे मेदि० ३चक्षुर्जले च अमरः। संज्ञायां कन्। ४मारिषशाके (नटिया) पुंस्त्री०शब्दर० वा गौ०ङीष्। वाष्पी+(स्त्री)-स्वार्थे क। वाष्पि(स्पि)काप्यत्र अमरः।

"मारिषो वाष्पको मार्षः श्वेतो रक्तश्च स स्मृतः। मारिषो मधुरः शीतो विष्मो पित्तकृद् गुरुः। वातश्लेष्मकरो रक्तपित्तनुद् विषमाग्निजित्। रक्तमर्शो गुरुर्नातिवृत्तारो मधुरः सरः। श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः" भावप्र०। [अवघावत् त।

वास सुरभीकरणे अद० चु० उभ० सक० सेट्। वासयति ते

वास पु० वस-निवासे आच्छादने वा आधारकर्मादौ घञ्। १गृहे २वस्त्रे ३अवस्थाने हेमच०। वास-कच्। ४वासके शब्दर०। तत्रार्थे स्त्रीत्वेऽपि तत्र टाप्। ५सुगन्धे च। स्थानभेदेऽवस्थाननिषेधो यथा

"तस्मात् सङ्कीर्णगृहेषु वासो मम न रोचते। पुंसो ये नाभिनन्दन्ति वृत्तेनाभिजनेन च। न तेषु च वसेत् प्राज्ञः श्रेयोऽर्थी यशसि स्पृहेषु। ये त्वेवमभिजानन्ति वृत्तेनाभिजनेन च। तेषु साधुषु वस्तव्यं सवासः श्रेयसे मतः" मात्स्ये २८अ०। "धार्मिकैरावृते ग्रामे न व्याधिबहुले भयम्। न शूद्रराज्ये निवसेत् न पाषण्डजनैर्वृते। स्त्रियवद्विन्ध्ययोर्मध्यं पूर्वपश्चिमयोः शुभम्। मुक्त्वा समुद्रयोर्देशं नान्यत्र निवसेत् द्विजः। अर्द्धक्रोशादृदीकूलं वर्जयित्वा द्विजोत्तमः। नान्यत्र निवसेत् पुण्यं नान्यजप्यासन्निधौ। न संवसेच्च पतितैर्न चण्डालैर्न पुक्कसैः। न मूर्खैर्नावलिप्तैश्च नान्यैर्नान्त्यावसायिभिः" कूर्मपु० १५अ०। "धनिनः श्रोत्रियो राजा नदी वैद्यश्च पञ्चमः। पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत्" चाणक्यः

वासक पु० वास-खुल्। स्वनामख्याते वृक्षे "येन तेन प्रकारेण वासकः कासनाशकः" इति वैद्यकम्

"वासकः कासहृत् स्वर्यः कफपित्तास्रनाशनः। तिक्तस्तुवरको हृद्यो लघुः शीतस्तृड्विषहृत। श्वासकासज्वरच्छर्दिमोहकुष्ठक्षयापहः" भावप्र०। २गानाङ्गविशेषे यथा "मनोहरोऽथ कन्दर्पश्चारुनन्दन एव च। चत्वारो वासकाः प्रोक्ताः शङ्करेण स्वयं पुरा"। केषाञ्चिन्मते नामान्तरम्। "विनोदो वरदश्चैव नन्दः कुसुद एव च। चत्वारो वासकाः प्रोक्ता गीतवाद्यविशारदैः" सङ्गीतदा०।

वासकसज्जा स्त्री "कुरुते मण्डनं यात्र सज्जिते वासवेश्मनि। सा तु वासकसज्जा स्यात्" इत्युक्तलक्षणे नायिकाभेदे वासकसज्जाप्यत्र सा० द०।

वासकर्णी स्त्री वासं देववासं कर्णयत्यत्र कर्ण-आधारे कृष् गौरा० ङीष्। यज्ञशालायाम् शब्दर०।

वासगृह न० वासयोग्यं गृहम् शाक०। मध्यगृहे अमरः।

वासत पुंस्त्री० वास-अतच्। गर्दभे शब्दर०। स्त्रियां ङीष्।

वासतेयी स्त्री वसतये हिता ढक्। १रात्रौ त्रि०। २वसतियोग्ये त्रि० "वनेषु वासतेयेषु" भट्टिः। स्त्रियां ङीप्।

वासन न० वास-ल्युट्। १सुरभीकरणे २धूपने ३वारिधान्याम् ४वस्त्रे मेदि० ५वासस्थाने शब्दर० ६ज्ञाने च धरणिः वस-णिच्-ल्युट्। ७निक्षेपाधारे निक्षेपार्थं मुद्राङ्किते पात्रे च। "वासनस्यमनाख्याय समुद्रं यश्चिधीयते" नारदः। "वासनं निक्षेपाधारभूतं सम्पुटादिकं समुद्रमन्यप्रादियुक्तम्" व्य०त० रघु०। वस-णिच् भावे ल्युट्। ८क्षेपणे च।

वासना स्त्री वास-युच्। १प्रत्याशायां २ज्ञाने मेदि० ३संस्कृतिहेतौ संस्कारे जटा०। ४सुरभीकरणे च। मिथ्याज्ञानजन्ये ५संस्कारभेदे दोषशब्दार्थे। ६व्याख्यविज्ञानात्मैकसन्तानवर्त्तिनां तत्तत्प्रवृत्तिविज्ञानजननशक्तौ बौद्धाः। ७गणितशास्त्रप्रसिद्धे अपहस्तीकरणादुपयोगिनि संस्कारभेदे च।

वासन्त पुंस्त्री० वसन्तस्येदम् वसन्ते भवः वा अण्। वसन्तभिये १हृद्ये मेदि० २कोकिले राजनि० स्त्रियां ङीष्। वसन्तभवे ३मलयवायौ ४वृक्षे त्रिका०। ५कृष्णसुक्षे हेमच०। ६चन्दनवृक्षे च शब्दर०। वसन्तकालभवे त्रि०।

स्त्रियां ङीप् सा च ट्यूष्यां हेमाधवीक्षतायां धरणिः। १०पाटलायां विश्वः ११नवमल्लिकायां भावप्र०। "वासन्ती शीतला लघ्वी तिक्ता दोषत्रयापहा" भावप्र०। १०वसन्तकाले कर्त्तव्यदुर्गापूजायाम्। भविष्यपु० "मीनराशिस्थिते सूर्ये शुक्लपक्षे नराधिप!। सप्तमीं दशमीं यावत् पूजयेदम्बिकां सदा" भविष्योत्तरे "चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये। पूजयेद्विधिवद् दुर्गां दशम्यान्तु विसर्जयेत्" कालकौमुद्यां जाबालिः "चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये। पूजयेद्विविधैर्द्रव्यैर्वस्त्रकुङ्कुमकैस्तथा। नानाविधैश्च बलिभिर्मेषादैर्दोषवर्जितैः। विचित्राभरणैः पार्थ! पट्टवस्त्रादिभिस्तथा। एवं यः कुरुते पूजां वर्षे वर्षे विधानतः। ईप्सितान् लभते कामान् पुत्रपौत्रादिकान्नृप!" इति। अत्र निरूपदमासशब्दसङ्केतात् भविष्यपुराणवचने मीनराशिस्थिते इति मीनस्थरव्यारब्धचान्द्रमासीयतिथिपरम्। सौरव्यारब्धत्वे कदाचित् सप्तम्यादितिथित्रयालाभात् तद्वर्षे तत्पूजालोपः स्यात्। न चेष्टापत्तिः भविष्यपुराणे सदापदोपादानात् जाबालिवचने वर्षे वर्षे इत्युपादानाच्च नित्यत्वम्। एतद्विवृतं कालविवेके। एवं जाबालिशेषवचनपरार्द्धे पुत्रादिरूपफलश्रवणात् काम्यत्वञ्च। ततश्च काम्यतया पूजने कृते प्रसन्नाम्बिकात्यधिकृत्य। "सिताष्टम्यान्तु चैत्रस्य पुष्पैस्तत्कालसम्भवैः। अशोकैरपि यः कुर्यात् मन्त्रेणानेन पूजनम्। न तस्य जायते शोको रोगो वापथ दुर्गतिः" इति कालिकापुराणवचनात् केवलाष्टमीकल्प एवः। चैत्रमासमधिकृत्य "नवम्यां पूजयेद्देवीं महिषासुरमर्दिनीम्। कुङ्कुमागुरुकर्पूरधूपपात्रध्वजार्पणैः। दमनैर्बकुलैश्च विजयाख्यपदं लभेत्" इत्यनेन केवलनवमीकल्प उक्तः। व्यवस्था तु वासरादीयपूजाप्रकरणोक्ता ग्राह्या। विशेषस्तत्र बोधनप्रक्रिया नास्ति बोधितायां बोधनाभावात् इति प्रागुक्तम्। होमादिकन्तु पूर्ववत्रेयमिति दिक् दुर्गोत्सवविवेकः। तत्कालपूजत्वात् दुर्गापि वासन्तीत्युच्यते।

वासयोग पु० वासेन गन्धेन योगो यत्र (आखिर) चूर्णभेदे अमरः। [पु०मेदि०।

वासर पुं न०। वस-अरच्। १दिवसे अमरः। २नागभेदे

वासव पु० वसूनां देवानामिदं वसूनि सन्त्यस्य अण् वा। १इन्द्रे वसोरपत्यं स्त्री अण् ङीप्। २व्यासमातरि मत्स्यगन्धायाम् स्त्री हेमच०। ३धनिष्ठानक्षत्रे न० ज्यो०

वासवदत्ता स्त्री वासवदत्तामधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां तस्य लुक्। १वासवदत्ताचरिताख्यायिकाग्रन्थभेदे २त०। २इन्द्रदत्ते त्रि०। [भेदे राजनि०।

वासस् न०वस-आच्छादने असि णिच्च। १वस्त्रे अमरः २पत्र-

वासाखण्ड न० चक्रदत्तोक्ते औषधभेदे "तुलामादाय वासायाः पचेदष्टगुणे जले। तेन पादावशेषेण पाचयेदाढकं भिषक्। चूर्णानामभयानाञ्च खण्डाच्छुद्धं तथा घृतम्। द्वे पले पिप्पलीचूर्णात् सिद्धगीते च माक्षिकात्। कुडवं पलमात्रन्तु चातुर्जातं सुचूर्णितम्। क्षिप्त्वा विलोड़ितं खादेदूर्द्धपित्ती क्षतक्षयी। कासश्वासपरीतश्च यक्ष्मणा च प्रपीड़ितः"

वासाखण्डकुष्माण्डक न० चक्रदत्तोक्ते औषधभेदे "पञ्चाशच्च पलं स्निग्धं कुष्माण्डात् प्रस्थमानतः। साध्यं पलशतं खण्डं वासाकाथाढके पचेत्। संस्वादयेत्तं गुडभागं त्रिसुगन्धैश्च कार्षिकैः। ऐलेयत्रिसुधन्याकमरिचैश्च पलांशिकैः। पिप्पलीकुडवञ्चैव मधुमात्रां प्रदापयेत्। कासं श्वासं क्षयं हिक्कां रक्तपित्तं हलीसकम्। हृद्रोगमग्निपित्तञ्च पीनसञ्च व्यपोहति"

वासागार न० वासयोग्यमगारम् शाक०। वासयोग्ये गृहे गृहमध्ये त्रिका०।

वासाघृत न० चक्रदोक्ते घृतभेदे "वासां सशाखां सपलाशमूलां कृत्वा कषायं कुडवप्रमाणम्। प्रदाय कल्कं विपचेद् घृतं तत् क्षौद्रयुक्तञ्चैव निहन्ति रक्तम्"।

वासाद्यघृत न० चक्रदत्तोक्ते घृतभेदे वासां गुडूचीं त्रिफलां त्रायमाणां यवासकम्। पक्त्वा तेन कषायेण पयसा द्विगुणेन च। पिप्पलीमूलयष्ट्याह्वा चन्दनोत्पलनागरैः। कल्कीकृतैश्च विपचेत् घृतं जीर्णज्वरापहम्"। [घृतादि०।

वासि(सी) स्त्री वस-इञ् वा ङीप्। १कुठारभेदे (बाइस)

वासित त्रि० वास-क्त। १सुरभीकृते अमरः। वास-क्त पृषो०। २कृते न०मेदि०। ३ज्ञानमात्रे हेमच०। ४खगशब्दे विश्वः। ५करिण्यां हस्तिनीमात्रे स्त्री अमरे पाठान्तरम् वा गौरा० ङीष्। ७ख्याते दवल्लवेष्टिते च त्रिकाण्डशेषः।

वासिनी स्त्री वासोऽस्त्यस्याः इनि। शुक्लभिण्टायाम् शब्दच०। [नक्षत्रे च अणादिको०।

वासु पु० वस-उण्। १विष्णौ त्रिका०। २विश्वरूपे ३पुनर्वसु-

वासुकि पु० वसुना शिरस्यत्रेन कायति कै–क षत्व दज । १सर्पराजे "भगिनी वासुकेस्तथा" मनसाऽस्त्रीत्वम् ।

वासुदेव पु० वसुदेवस्यापत्यम् अण् । १विष्णौ अमरः ।

अस्यार्थे नद्ध अभिरुक्तिः विष्णु पु० दर्शिता यथा "सर्वेत्रासो समस्तं च वसत्यत्रेति वै यतः । ततः स वासुदेवेति विद्वद्भिः परिपठ्यते" । विष्णु न० भाष्ये तु द्विधा यौगिक्योः वासुदेवशब्दयोर्द्विधा व्युत्पत्तिर्दर्शिता तत्र प्रथम वसुदेवापत्यरूपार्थिका द्वितीया यथा "वसति वासयन्ति या वासुः द्योत्यति क्रीड़ति जिगीषते व्यवहरति द्योतते स्तूयते सुसन्नुभिर्वा गच्छतीति वा देवः । वासुश्चासौ देवश्च वासुदेवः । "छादयामि जगद्विश्वं भूत्वा (आदित्य) सूर्य इवांशुभिः । सर्वभूताधिवासश्च वासुदेवस्ततः स्मृतः" "वसनात् सर्वभूतानां वासुत्वाद् देवयोनितः । वासुदेवस्ततो ज्ञेयो योगिभिस्तत्त्वदर्शिभिः" भा० उ० । स च चतुर्व्यूहस्य नारायणाख्यस्य परमात्मनः अंशभेदः इति वैष्णवसम्मतम् ।

"एकांशेन जगत् कृत्स्नं व्याप्य नारायणः स्थितः । चतुर्द्धाव्यूहितो व्यापी सगुणो निर्गुणोऽपि वा । एकाभगवतोमूर्त्तिस्तिनरूपा शिवाऽमला । वासुदेवाभिधाना सा गुणातीता सुनिष्कला । द्वितीया कालवेत्तान्या तामसी शेषसंज्ञिता (सङ्कर्षणाख्य) । निरूपिनि सकलांश्चाने वैष्णवी परमा तनुः । सत्त्वाद्विक्ता तृतीयाऽन्या प्रद्युम्नेति च संज्ञिता । जगत व्यापयते सर्वं सा विष्णुप्रकृतिर्ध्रुवा । चतुर्थी वासुदेवस्य मूर्त्तिर्ब्रह्मो समंज्ञिता । राजसी चानिरुद्धाख्या प्राद्युम्नी सृष्टिकारिका । यः स्वपित्यखिलं सृष्ट्वा प्रद्युम्नेन सहप्रभुः । नारायणाख्यो ब्रह्मासौ प्रजासर्गकरो हि सः । या सा नारायणतनुः प्रद्युम्नाख्या सुनीश्वराः ! । तया संमोहयेद्विश्वं सदेवासुरमानुषम् । सैव सर्वजगत् सृष्टे पालनैः परिकीर्त्तिता । वासुदेवो ह्यनन्तात्मा केवलो निर्गुणो हरिः । प्रधानं पुरुषः कालस्तद्वद् व्यक्तमनुत्तमम् । वासुदेवात्मकं नित्यमेतत् चित्तानसञ्यते" कूर्मपु० ४८ अ० ।

वासुदेवप्रियङ्करी स्त्री ६त० । १जातावर्ययि, राजनि०

वासुरा स्त्री वस–उरण् । १स्त्रीमात्रे २करिण्यां ३रात्रौ ४भूम्नौ च हेमच० ।

वास्तु स्त्री वस–तुन् । वास्तुकायाम् स्त्रियाम् अमरः ।

वास्तव न० वस्तुन इदम् अण् । तत्त्वभूते पदार्थे । [पदार्थे ।

वास्तविक त्रि० वस्तुतो निर्वृत्तम् ठक् । स्वतःसिद्धे तत्त्वभूते

वास्तव्य त्रि० वसति वस–तव्य नि० । वासकर्त्तरि, २वासयोग्ये स्थाने, ३वसतौ च न० ।

वास्तु पु० न० वस–तुन् । वासयोग्यभूमौ अमरः । गृहगल्के २६१२ पृ० दृश्यम् । स्वार्थे क । स्वनामख्याते शाके राजनि० । तत्रार्थे न० भावप्र० ।

वास्तूक न० वास्तु स्वार्थे क पृषो० दीर्घः । (वेथुय) १शाके भावप्र० २चिल्लीशाके स्त्री गौरा० ङीष् राजनि० ।

"वास्तूकं वास्तुकं च स्यात् क्षारपत्रञ्च शाकराट् । तदेव तु वृहत् पत्रं रक्तं स्याद् गौड़वास्तुकम् । प्रायशो वस्तुमध्ये स्यात् यास्तु शाकमतः स्मृतम् । वास्तूकद्वितयं स्वादु क्षारं पाके कटूदितम् । दीपनं पाचनं रुच्यं लघु शुक्रबलप्रदम् । सरं श्लेष्मपित्तास्रकृमिदोषव्रणापहम्" भावप्र० । [स्त्रियां २वासयोग्ये च ।

वास्तोष्पति पु० वास्तु क्षेत्रं पाति पा–कि । १इन्द्रे, अमरः २वास्तुभूमिपतौ च । [स्त्रियां अमरः ।

वास्त्र पु० वस्त्रेणाहतो रथः अण् । वस्त्रेण वस्त्रगाहते

वास्त्रेय पु० वास्त्राय हितं ढक् । नागकेसरे रत्नमा० ।

वाह यत्ने भ्वा० या० अक० सेट् वहति चकि न वुधः । वाहते अवाहिष्ट ।

वाह पुंस्त्री० उह्यतेऽनेन असौ वा वह–घञ् । १अक्षे "वाहो भारचतुष्टयम्" इत्युक्ते २परिमाणभेदे च अमरः । ३भुजे ४वायौ पु० ५दक्षे च पुंस्त्री० शब्दर० स्त्रियां जातित्वे ङीष् । अमरः वाहरिपादयोऽप्यत्र ।

वाहद्विषत् पु० वाहाय द्वेष्टि द्विष–क्विप् ६त० । महिषे

वाहन न० वाहयति वह–णिच–ल्यु । रथादौ याने ।

देवभेदे वाहनभेदो यथा "विष्णुब्रह्मशिवैर्देवैर्ध्रियते या जगन्मयी । स्थितप्रेतो महादेवो ब्रह्मा चोत्थितपङ्कजः । हरिर्हरिस्तु विप्रेन्द्रो वाहनानि महौजसः । समूत्था वाहनत्वन्तु तेषां यस्मान्न युज्यते । तस्मान्मूर्त्यन्तरं कृत्वा वाहनत्वं गतास्त्वयः । यस्मिन् यस्मिन् महाभावा पीड़ाभिः सृजयं शिवा । तेन तेनैव रूपेण आयनान्यभवन् त्रयः" कालिकापु० ५७अ० । देवदानवानां वाहनानि यथा । पुलस्त्य उवा च "वृत्तान्तं कथयिष्यामि सर्वेषामपि नारद ! । वाहनानि समासेन एकैकस्यानुपूर्वशः । वृहद्वक्षस्तलोत्पन्नं महाकायं महाबलम् । श्वेतवर्णं महावीर्यं देवराजस्य वाहनम् । रौद्रौजःसम्भवं भीमं कृष्णवर्णं मनोजवम् । पौरुषकं नाम महिषं

धर्मराजस्य नारद !। रुद्रमानसमम्भूतं श्यामं जलधि-सन्निभम्। शिशुमारं दिव्यगतिं वाहनं वरुणस्य च। रौद्रं शकटचक्राभ्यां प्रेतोष्ट्रनरोत्तमम्। चम्बिका-वाहसम्भूतं वाहनं धनदस्य तु। एकादशानां रुद्राणां वाहनानि वदाम्यहम्। गन्धर्वाश्च महावीर्या भुजगेन्द्राः सुदारुणाः। श्वेतानि सोरभेयाणि हयाश्युग्रजवानि च। रथं चन्द्रमसश्चार्कसङ्कल्पं वाहनम्। हयोढ़ रथवाहाश्च आदित्या मुनिसत्तम !। कुञ्जरस्याश्च वसवो यक्षाश्च नरवाहनाः। किन्नराभुजगारूढा हयारूढो तथाश्विनौ। धारङ्गाधिष्ठिता ब्रह्मन् ! मरुतो घोर-दर्शनाः। शुकारूढाश्च कवयो गन्धर्वाश्च पदातिनः। वाहनान्येवं स्वानि स्वान्यमरोत्तमाः। सङ्गम्य निर्ययुर्हृष्टा युद्धाय सुमहौजसः" वामनपु० ९ अ०।

निघण्टौ देवभेदे वाहननामभेदा उक्तास्तत्र दृश्याः।

वाहन पु० वाहं गतिं यति सो-क। १यज्ञगरे अमरः। २सन्निधाने (सवनि) शाके ३परिमाणे च मेदि०।

वाहिक पु०वह-णिच्-ण्वुल्। १ऊढ्रयां २गोवाहे (बलदे) ३शकटादौ धरणिः। ४भारवाहके त्रि० "गौर्वाहिकः" पा० ६०। [पृथो०। गजकक्ष्याख्यायोभागे अमरः।

वाहिन्य न० वहतीति णिनि वाही-तस्मिन् तिष्ठति स्या-क

वाहिनी स्त्री वाहोऽस्त्यस्याः इनि ङीप्। १सेनायां, २दशसङ्ख्यादिसंख्याभेदान्विते सैन्यभेदे अनीकिनीशब्दे १६९पृ०दृश्यम्। वहति वह-णिनि। २नद्याम् अमरः। "वाहिन्यः पार्श्वसेना न जहति भवतः" काव्यप्रकाशः।

वाहिनीपति पु० ६त०। १सेनापतौ अमरः। २सप्तदे च शब्दच०।

वाहीक पु० वह ईकण्। १जर्त्तिके जातिभेदे (जाट)। २देशभेदे च हेमच०।

"वाहीकदेशं महांश्च कृत्स्नयत्न वाक्यमब्रवीत्। पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तराश्रिताः। तान् धर्मबाह्यानधीत् वाहीकान् परिवर्जयेत्। शाकलं नाम नगरमापगा नाम निम्नगा। जर्त्तिका नाम वा-हीकास्तेषां दुष्टं सुनिन्दितम्" भा० कर्ण० २०० अ०।

वाह्य न० वाह्यं वाहनमर्हति यत्, वह-ण्यत्। १अश्वादौ याने हेमच०। वहिर्भवः यत्र टिलोपः। २बहिर्भवे त्रि०। ३एतत्परत्वे ओङ्यादित्वमित्यन्ये।

वाह्येन्द्रिय न० वाह्यपदार्थानां शब्दादीनां ग्रहणयोग्य-मिन्द्रियम् शाक०। शब्दादिग्राहके श्रोत्रादौ इन्द्रिये।

वाह्लि(ह्ली)क पु०। वह-त्रिण् स्वार्थे क। १देशभेदे भरतः। तद्देशजाते-वृद्धु मे, २हिङ्गुनि न० मेदि०।

वि अव्य० वा-कि। १निर्वाणे, २विशेषे, ३निश्चये, ४असहने, ५निग्रहे, ६क्षेपे, ७व्याप्तौ, ८ईषदर्थे, ९परिभवे, १०अवलम्बने, ११ज्ञाने मेदि० १२विशेषेण गतौ, १३ज्ञा-नार्थे, १४पालने च शब्दच०। १५विहगे पु० अमरः। गणरत्ने अस्यार्थभेदानुक्त्वा क्रमेणोदाहृतं यथा "विनानावियोगातिशयभृशार्थेष्वाङ्मर्यादाधैशुन्याक्षरणभू-षेषदर्थानिमुख्यानवस्थाऽऽसुख्यस्वैर्य्यदर्शनेषु"। विचित्तं१ वियुक्तः२ विकीर्णः३ विततः नदी४ विमनस्कः५। विमुः६ विवदति७ विगायति८ विक्षतः९ विभूषितः१० विलोपितः११ विसृष्टः१२ विभ्रान्तः१३ विद्रुतः१४ विश्रान्तः विलोकयति१५"। [यतिशङ्खाप्यूर्ध्वते तस्मिन्।

विंश त्रि०विंशतेः पूरणः विंशति+ड तिलोपः। येन वि-

विंशक न०विंशतेरवयवः कन् तिलोपः। विंशतिसंख्यायाम्। विंशतिरधिका दीयतेऽस्मै दा संप्र० ते आयौ लाभे इष्टिवां-कन्। प्रतिशतं विंशत्यधिकलाभादौ "शतस्य विंशकं शतम्" इति याज्ञ०।

विंशति स्त्री द्वे दशती नि०। १द्विदशकसंख्यायां, तत्सङ्ख्याते च नित्यैकव०। सङ्ख्याविशेषार्थं तु द्वि०व०व०। द्वे विंशती त्रिस्रो विंशतयः इति।

विंशतिक त्रि० विंशतिमर्हति कन्। विंशतिसंख्यायोग्ये।

विंशतितम त्रि० विंशतेः पूरणः तमप्। विंशशब्दार्थे स्त्रियां ङीप्। [संख्यायाम्।

विंशिन् पु० विंशति+संख्यायां डिनि तिलोपः। विंशति-

विक न० विरुद्धं विगतं वा कं जलं सुखं वा यत्र। सद्यःप्रसू-तायां गोःक्षीरे पेयूषे शब्दच०। २विगतसुखे ३विगतजले च त्रि०। [टिफलं पक्वं मधुरं सर्वदोषहृत्" भावप्र०।

विकङ्कट पु०वि+कक्ति-अटन्। गोक्षुरे शब्दमाला। "विकङ्क-

विकङ्कत पु० वि+कक्ति अतच्। (वंदचो) १वृक्षे अमरः २अतिबलायां स्त्री राजनि०।

विकच पु० विगतः कचो यस्य। १लूपणे नापितसंज्ञायाम्। विशिष्टः कचो यत्र। २भृङ्गे केतौ मेदि०। वि+कच-अच्। ३विकसिते अमरः। ४व०। ५केशशून्ये त्रि०मेदि०। ६महाश्रावणिकायाम् स्त्री राजनि०।

विकट पु० वि+कट-अच्। १विस्फोटके शब्दरत्ना०। २शाक-यवक्षारे च राजनि०। वि+कटच्। ३विशाले त्रि०मेदि०। ४विकृते त्रि० विश्वा० ५सुन्दरे त्रि० विश्वः ६दन्तुरे त्रि०

धरणिकोषः ७मायादेव्यां स्त्री विकाण्डश्लेषः ।

विकण्टक पु०विगतः कण्टकोऽस्य । १यवासे जटा० । २शत्रुहीने त्रि० । [कर्त्तरि युच् तत्कर्त्तरि त्रि०]

विकत्थन न० वि+कत्थ-ल्युट् । आत्मश्लाघायाम् हेमच० ।

विकर्त्तन पु० वि+कृत ल्यु । १सूर्य्ये २चर्कटवृक्षे च अमरः ।

विकर पु०वि+कृ-अच् । १रोगे शब्दच० । २सारस्वतदेशे हेमच०

विकर्म्मस्थ पु० त्रि० विकर्मेण निन्दिताचारे तिष्ठति स्था-क । कुत्सिताचाररते विष्णुपु० ।

विकर्ष पु० वि+कृष-कर्मणि घञ् । शरे बाणे त्रिका० ।

विकल त्रि० विरुद्धा कला यस्य । १विच्छिन्ने, २स्वभावहीने त्रिका० । ३कलाहीने च । ४क्षुद्रसत्यां स्त्रियां स्त्री रत्नमा० वा ङीष । विभक्ता कला यया प्रा०ब०व० । ५कलाषष्टिभागे स्त्री "विकलानां कला षष्ट्या" ज्यो०त० । [धिकाङ्क्षे कमरः ।

विकलाङ्ग त्रि० स्वभावहीनमङ्गमस्य । स्वभावतो न्यूनाङ्गे

विकल्प पु० विभिन्नः कल्पः । १ज्ञानभेदे २कल्पने मेदि० ३विविधकल्पने ४संसर्गारोपणे, ५पक्षतः प्राप्तौ च ।

विकल्पश्च द्विविधः व्यवस्थितः ऐच्छिकश्च । सोऽप्याकाङ्क्षाविरहे युक्तः तथा च भविष्ये "श्रुतिवाक्ये विकल्पस्तु आकाङ्क्षापूरणे सति" । इच्छाविकल्पेऽनेकदोषः यथा "प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पना । प्रत्युच्चोवनहानिभ्यां प्रत्येकमनेकदोषता" । व्रीहिभिर्यजेत यवैर्यजेत" इति श्रूयते । तत्र व्रीहिप्रयोगे प्रतीतयवप्रामाण्यपरित्यागः । अप्रतीतयवाप्रामाण्यपरिकल्पनम् । इदन्तु पूर्वस्मात् पृथक् वाक्यम् अन्यथा यवस्तुत्येऽपि यागसिद्धिः स्यात् । अतएव विकल्पे न उभयम् शास्त्रार्थ इत्युक्तम् । प्रयोगान्तरे यवे उपादीयमाने परित्यक्तयवप्रामाण्योच्चोवनं स्वीकृतयवाप्रामाण्यहानिरिति चत्वारो दोषाः । एवं व्रीहावपि चत्वारः इत्यष्टौ दोषा इच्छाविकल्पे । तथा चोक्तम् । "एवमेवाष्टदोषाच्च यद्व व्रीहियववाक्ययोः । विकल्प आश्रितस्तत्र गतिरन्या न विद्यते" इति । विविधं कल्पयते इति विकल्पः । तस्मादष्टदोषभिया उपोषत्र इत्यत्र न इच्छाविकल्पः किन्तु व्यवस्थितविकल्पः" एता० त० रघु० । पातञ्जलोक्तेः हृच्चित्तवृत्तिभेदे यथा "शब्दज्ञानानुपातीवस्तुशून्यो विकल्पः" सू० । "न च प्रमाणोपारोहौ न विपर्ययोपारोहौ, वस्तुशून्यत्वेऽपि शब्दज्ञानमाहात्म्य निबन्धनो व्यवहारो दृश्यते । तद् यथा चैतन्यं पुरुषस्य स्वरूपमिति यदा चितिरेव पुरुषः तदा किमत्र केन व्यपदिश्यते भवति च व्यपदेशे वृत्तिः यथा चैत्रस्य गौरिति । तथा प्रतिषिद्धवस्तुधर्मा निष्क्रियः पुरुषः । तिष्ठति वायुः स्थास्यति स्थित इति गतिनिवृत्तौ धात्वर्थमात्रं गम्यते । तथानुत्पत्तिधर्मा पुरुष इति उत्पत्तिधर्मस्याभावमात्रमवगम्यते न पुरुषान्वयी धर्मः तस्माद्विकल्पितः स धर्मस्तेन चास्ति व्यवहार इति । भा० "ननु शब्दज्ञानानुपाती चेदागमप्रमाणान्तर्गतो विकल्पः प्रसज्येत निर्वस्तुकत्वे वा विपर्ययः स्यादित्यत" आह । स नेति । न प्रमाणविपर्ययान्तर्गतः कस्मात् यतो वस्तुशून्यत्वेपीति प्रमाणान्तर्गतिं निषेधयति । शब्दज्ञानमाहात्म्यनिबन्धन इति विपर्ययान्तर्गतिम्" । तदुक्तं भवति क्वचिदभेदे भेदमारोपयति क्वचित् पुनर्भिन्नानामभेदं ततो भेदस्याभेदस्य च वस्तुतोऽभावात् तदाभासो विकल्पो न प्रमाणं नापि विपर्ययो व्यवहाराविसंवादादिति । शास्त्रप्रसिद्धमुदाहरणमाह तद् यथेति । किं विशेष्यं केन व्यपदिश्यते विशेष्यते, वाभेदे विशेष्यविशेषणभावो न हि मया गौर्विशेष्यते । किन्तु भिन्नेन चैत्रेण तद्दिमाह । भवति च व्यपदेशे वृत्तिः । व्यापदेश्यव्यापदेशकयोर्भावो व्यपदेशे विशेषणविशेष्यभाव इति यावत् तस्मिन् वृत्तिर्बोध्यस्य, यथा चैत्रस्य गौरिति । शास्त्रीयमेवोदाहरणान्तरं सूचयति तथेति प्रतिषिद्धवस्तुनः पृथिव्यादेः धर्मः परिस्पन्दो यस्य स तथोक्तः कोऽसौ निष्क्रियः पुरुषः । न खलु लौकिके दृष्टान्तेऽभावो नाम कश्चिदस्ति वस्तुधर्मो येन पुरुषो विशेष्येतेत्यर्थः । क्वचित् पाठं प्रतिषिद्धवस्तुधर्मा इति तस्यार्थः प्रतिषेधव्याप्या प्रतिषिद्धाभावो न वस्तुधर्माणां तद्व्याप्यता भावाभावयोरसम्बन्धाद्य च तथा प्रतीतिरिति । लौकिकमुदाहरणमाह तिष्ठति वायुरिति । पचति भिनत्तीत्यत्र पूर्वापरीभूतया पाकादिक्रियया स्थानक्रियया वायुवृत्त्या वायुस्य व्यपदेश इति गतिनिवृत्तौ धात्वर्थमात्रं गम्यते । गतिनिवृत्तिरेव तावत् कल्पिता तस्या अभावरूपत्वम् । तथापि पूर्वापरीभाव इत्यत्रो कल्पनाक्षरस्मरेत्यर्थः । अभावः कल्पितो भाव इव चानुभूत इव च सर्वपुरुषेषु गम्यते न पुरुषाद् व्यतिरिक्तो धर्मः कश्चिदित्युदाहरणान्तरमाह । तथानुत्पत्तिधर्मेति । प्रमाणविपर्ययाभ्यामन्या न विकल्पवृत्तिरितिवादिनो वचनः प्रतिषेधिरे तत्प्रतिबोधनायोदाहरणप्रपञ्च" विव० ।

ज्ञाने प्रकारतारूपविषयतामेदे यथा सविकल्पकं स्वप्रकारताक ज्ञानम् । निर्विकल्पकं निष्प्रकारताकं ज्ञानमित्यादि दर्शनग्रन्थे तस्य क्वचित् सत्त्वं क्वचिदसत्त्वम् । यथा माध्यन्दिनाध्वर्योर्धर्मैक्यात्" गौ० स्मृ० इत्तौ दृश्यम् ।

विकल्पसम पु० गौ० उक्ते जात्युत्तरभेदे । स च कस्यचित् धर्मस्य कुत्रचिद्व्यभिचारदर्शनेन धर्मत्वाविशेषात् प्रकृतहेतोः प्रकृतसाध्यं प्रति व्यभिचारापादनरूपः यथा शब्दोऽनित्यः कृतकत्वादित्यत्र कृतकत्वस्य गुरुत्वव्यभिचारदर्शनात् गुरुत्वस्यानित्यत्वव्यभिचारदर्शनात् अनित्यत्वस्य कृतकत्वव्यभिचारदर्शनात् धर्मत्वाविशेषात् कृतकत्वमप्यनित्यत्वं व्यभिचरेदिति" वृत्तिः । वा०भाष्ये तु "साधनधर्मयुक्ते दृष्टान्ते धर्मान्तरविकल्पात् साध्यधर्मविकल्पं प्रसजतो विकल्पसमः । यथा क्रियाहेतुगुणयुक्तं किञ्चिद् गुरु यथा लोष्टः किञ्चिद् लघु यथा वायुः। एवं क्रियाहेतुगुणयुक्तं किञ्चित् क्रियावत् स्यात् यथा लोष्टः। किञ्चिदक्रियं यथात्मा । विशेषो वा वाच्यः" इत्युक्तम् ।

विकल्प्य(ल्प)क् त्रि० वि+कृप(ल्प)-ण्यत् ।।प्रकाशयोग्ये अमर. २।८पुनर्नवायाञ्च राजनि० ।

विकषा(सा) स्त्री विशेषेण कष्यतेऽसौ कष(सः) घञर्थे क । १अश्मिकष्यायाम् अमरः । २अक्षरोल्लिखितायां राजनि० ।

विकाशि(शिन्)त त्रि० वि+काश(श)-क्त । प्रकाशयुक्ते ।

विकार पु० वि+कृ घञ् । प्रकृतेरन्यरूपे परिणामे ।

"विकारस्य घटात्मकं द्रव्यं मृदा सार्द्धं वा तदात्मनोऽन्यत्वे पूर्वो व्यूहो निवर्त्तते व्यूहान्तरं चोपजायते । तं विकारमाचक्षते" वा० भा० २।१।४६ सूत्रे उक्तः । स्वरूपत्यागेन रूपान्तरापत्तिरूपः । स्वरूपस्य विनाशे द्रव्यान्तरारम्भकत्वरूपः यथा दुग्धादेर्दध्यारम्भकत्वम् बीजादेर्वाङ्कुरारम्भकत्वरूपो वा" गौ०स्मृ०वृत्तौ दृश्यम् । स्वरूपनाशोऽपि विकारो भावविकारशब्दे दृश्यः । काष्ठादेरवयवनाशेन तद्भेदापादनात् तस्यापि काष्ठविकार एव कर्म्मशब्दे विकार्य्यनिरूपणे दृश्यम् ।

विकार्य्य त्रि० वि+कृ-ण्यत् । १विकारजन्ये द्रव्ये व्याकरणोक्ते कर्म्मभेदे कर्मशब्दे १७११ पृ० दृश्यम् ।

विकाल पु० विरुद्धः देवपित्र्यादिकर्मानर्हः कालः । १रात्रौ नामरत्नमालायाम् २दिवसान्त्यकाले त्रिका० ।

विकालिका स्त्री विज्ञातः कालोऽनया कप् अत-इत्वम् । कालज्ञापके घटीयन्त्रभेदे (तौवी) ताञ्च्यां त्रिका० ।

विकाश्य न० विरुद्धः काशः । १दर्शने २विशिष्टे काशे प्रकाशे च अमरः । [अमरः ।

विकाशिन् त्रि० वि+काश-णिनि । प्रकाशशीले विकसरे

विकिर पुंस्त्री० वि+कृ-क । १पक्षिणि अमरः स्त्रियां ङीष् । २दग्धे त्रिका० । विकीर्य्यते घञर्थे क । २विघ्नोपशान्तये वृत्तिग्रन्थे तर्पणादौ "ब्राह्मचन्दनसिद्धार्थभक्तदूर्वाकुशाक्षताः । विकिरा इति सन्दिष्टा सर्वविघ्नौघनाशनाः" तन्त्रसा० । ४अग्निदग्धादीनां पित्तनिर्वपणे "अस्थसंचयनं प्रेतानां योनिनां कुलयोषिताम् । उच्छिष्टं भागधेयं स्यात् दर्भेषु विकिरश्च यः" आ० त० ।

"पित्र्यन्निर्वापरहितं यत्तु श्राद्धं विधीयते । क्षुधावाचनकोपेतं विकिरस्तु न लुप्यते" श्रा०त० ।

विकिरण न० वि+कृ-ल्युट् नि० इत् रपरत्वम् । १क्षेपणे २हिंसने, ३क्षाने च । ४अर्कदग्धे पु०अमरः । ६त०,५किरणशून्ये त्रि० ।

विकीर्ण त्रि० वि+कृ-क्त । विक्षिप्ते ।

विकुर्वाण त्रि० वि+कृ शानच् । कुर्वद्रूपेणा आतरौद्रध्यानादौ अमरः । २विकृतिप्राप्ते च । [११ व० ।

विकुक्षि पु० सूर्य्यवंश्ये इक्ष्वाकुराजपुत्रे रघुमेदे हरिवं० ।

विकुक्ष पु० वि+कुष-रक् । चन्द्रे उणादिकोषः ।

विकूणिका स्त्री वि+कूण-रक्ष स्वार्थे क अत इत्वम् । नासायां हेमच० ।

विक्लत त्रि० वि+क्लम-क्त । १क्लीभूते २सङ्कुचीकृते, ३रोगयुक्ते ४विकारयुते ।

"क्लोमानेष्वादिभिर्यत्र नोच्यते स्वं विक्लितम् । व्यक्तं चेष्टयैवेदं विक्लतं तद्विदुर्बुधाः" उज्ज्वलदत्तयुक्ते ५भावभेदे न० प्रभवादिषु ६ष्टिसंवत्सरे पु० प्रभवादिशब्दे ४४७४पृ० तदानयनं दृश्यम् । "सर्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्च जायते । शिरोवक्षोऽक्षिरोगाश्च मासि विक्लते नराः" ज्यो०त० गुरुवर्षशब्दे २६११ पृ० दृश्यम् । [क्लिच्नित्यं ङीप् । २रोगे, ३क्लिन्ने हेमच० ।

विक्लाति स्त्री वि+क्लम-क्तिन् वा । १विकारशब्दार्थे अमरः ।

विकेशी स्त्री विगतः केशो यस्याः ङीष् ।।केशभूषणाद्यां स्त्रियां २पञ्चपर्णी च धरणिः । ३अकौलीकृपस्य शिवस्य पत्न्याम् "सूर्य्यो जलं मही वह्निर्वायुराकाशमेव च । दीक्षातो ब्राह्मणः क्षोभः इत्येताश्चनवः क्रमात् । सुवर्चला तथैवोषा विकेशी चापरा शिवा । स्वाहा दिगम्बरा दीक्षा रोहिणी च यथाक्रमम् । सूर्य्यादीनामिमाः पत्न्यो इदार्द्यैर्नामभिः स्मृताः" मार्क० पु० ।

विक्रोक पु० इक्षाकुरपुत्रभेदे अलर्किन० २१अध्याये दृश्यम्।

विक्रु पु० विक्रणति वि+क्रण-ड। करिणाबके विकाण०।

विक्रम पु० विशेषेण क्रामति वि+क्रम-अच्। १विविक्रमे. २विष्णौ "मेधावी विक्रमः क्रमः" विष्णुस०। ३विक्रमादित्यनृपे "रत्नानि वै वररुचिर्नवै विक्रमस्य" ज्योतिर्विदाभरणम्। भावे घञ्। ४क्रमणे वेदिः। करणे घञ्। ५चरणे, त्रिविक्रमः। ६पौरुषाभिमाने, ७सामर्थ्ये च राजनि०। भविष्यधर्मपर्व्वणि "जयार्थं मधुगन्धस्य महार्हं विक्रमे प्रिये!" इत्यृक्षलक्षणे दशवारभेदे मेदि०। प्रभवादिषष्टे ४४७४ शृ० दृश्यम्।

विक्रमादित्य पु० विक्रमेणादित्य इव। स्वनामख्याते नृपभेदे विक्रमाकोंऽत्यत्र "नो युद्धः श्रुत एव वा क्षितितले श्रीविक्रमार्कोपमः" मिता०।

विक्रमिन् पु० वि+क्रम-णिनि। १सिंहे, राजनि० २विष्णौ विष्णुशु०। ३विक्रमयुक्ते त्रि० स्त्रियां ङीप्।

विक्रय पु० वि+क्री-अच्। मूल्यग्रहणेन परस्वस्वापादके व्यापारे अमरः।

विक्रये विहितविहितनक्षत्राणि यथा "यमाग्निशक्रवह्निजलाग्नेयपूर्वा नेष्टाः क्रये विक्रयणे प्रशस्ताः। पौष्णाश्विचित्रार्यमतविन्द्ववाताः क्रये हिता विक्रयणे निषिद्धाः"। ज्योतिःसारः। क्रयविक्रयनिर्णयो यथा "मूल्यं दास्यामीति नियमं कृत्वा गृहणादपि क्रयसिद्धिः। तथाच विवादचिन्तामणौ कात्यायनः "पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत्। ऋतुत्रयस्योपरितः तस्य दृष्टिमाप्नुयात्"। अतएव बृहस्पतिः "गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम्। पत्रं कारयते यत्तु क्रयजेयं तदुच्यते"। क्रयविक्रये समयविशेषाभ्यन्तरे पश्चात्तापादसिद्धिः। यथाह मनुः "क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत्। सोऽन्तर्दशाहे तद्द्रव्यं दद्याच्चैवाददीत वा"। एतद्याज्ञवल्क्योक्तेरपरम्। यथा याज्ञवल्क्य "दशैकपञ्चसप्ताहमासत्रिद्व्यहार्द्धस्वामिकम्। बीजान्योवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणे। अत्र बृहस्पतिः "अतोऽन्यं पण्यदोषन्तु यदि संजायते क्वचित्। विक्रेतुः प्रतिदेयन्तत् क्रेता मूल्यमवाप्नुयात्"। अतस्तद्दृष्टपरीक्षणकालात्। कात्यायनः "क्वचित्तावन्तु यत् क्रीतं दृष्टं पश्चादिभावितम्। क्रेत्रा तत् स्वामिने देयं पण्यं कालेऽन्यथा न तु"। एषोऽपि प्रागुक्तपरीक्षाकालाभ्यन्तरे। परीक्षिते तु दृष्टस्मृतिः "परीक्षेत स्वयं पण्यं ह्यन्येभ्यश्च प्रदर्शयेत्। परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेत्"। अत्र विशेषमाह नारदः "क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्वचित्। विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाहनि क्रेतृचेतसम्। द्वितीयेऽह्नि ददत् क्रेता मूल्यान्त्रिंशांशमाहरेत्। द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तत्"। आहरेत् दद्यात् विक्रेत्रे इति शेषः। द्विगुणं त्रिंशान्यस्य। याज्ञवल्क्यः "राजदैवोपघातेन पण्ये दोषसमागते। क्षतिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः"। नारदः "उपहन्येत वा पण्यं दह्येतापह्रियेत वा। विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः। दीयमानं न गृह्णाति क्रीतं पण्यन्तु यः क्रयी। स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः" प्राय० त०। "न्यासं कृत्वा परत्राधिं कृत्वा वाधिं करोति च। विक्रयं वा क्रियातस्य पश्चिमा बलवत्तरा"। न्यासं कृत्वा आधिं करोति आधिं कृत्वा वा विक्रयं करोति। विक्रयपदं सत्त्वभ्रंशकत्वात् दानं लक्षयति तत्र धरा क्रिया सिद्धेत्यर्थः। एवञ्च विक्रेतृदात्रोर्मरणादिना आध्यनुद्धारे विक्रयदाने तत्कर्तृतुल्यस्वत्वजननात् तत्र तत्क्रेतृप्रतिपत्तौ तृभ्यामाध्युद्धारः कार्य्यः इति। न च "स्थावरस्य समस्तस्य गोत्रसाधारणस्य च। नैकः कुर्य्यात् क्रयं दानं परस्परमतं विना। विभक्ता अविभक्ता वा अपिण्डाः स्थावरे समाः। एको ह्यनीशः सर्वत्र दानाधमविक्रये" इति व्यासवचनाभ्यामेकस्य दानवत्स्वविक्रयेऽनधिकारः इति वाच्यं यथेष्टविनियोगार्हस्वरूपस्य स्वस्य दृष्यान्तर दृष्टाद्याप्यविशेषात् वचनञ्च स्वामित्वेन दुर्वृत्तपुरुषाचरविक्रयादिना कुटुम्बविरोधादधर्मोत्पत्तिनिवर्त्तनार्थनिषेधकं न तु विक्रयाद्यनिष्पत्त्यर्थमिति" दायभागः। एवञ्च "स्थावरे विक्रयो नास्ति कुर्य्याद्याधिमनुज्ञया" इति स्थावरस्य जीवत्स्वविक्रयप्रतिषेधात् एवं "भूमिं यः प्रतिगृह्णातीत्यादिवचने दानप्रशंसाऽनाश्च विक्रयेऽपि कर्त्तव्ये सङ्किरणसुदकं दत्त्वा दानरूपेण स्थावरविक्रय इति" विज्ञानेश्वरः। वस्तुतस्तु स्थावरविक्रयनिषेधः अविभक्तस्थावरविषयः। तत्रापि यदि विक्रयं विना व्यवस्थितिर्न भवति तदा विक्रयः कर्त्तव्यः। पूर्वपुरुषार्जितनष्टोद्धारे विशेषयति मिताक्षरायाम् "स्थावरं हिपदञ्चैव यद्यपि स्वयमर्जितम्। अलभ्य सुतान् स्वयंन्न दानं न च विक्रयः" इ-

स्यादि। अन्यापवादश्चाह "एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थे धर्मार्थं च विशेषतः" ह्यायत्त्वे रघु०। द्रव्यविशेषविक्रयनिषेधो यथा स्मृतिः "विक्रीणन् मद्यमांसानि ब्राह्मणस्य च भक्षयन्। कृत्वा तस्यागमनं मूढः पतति तत्क्षणात्। ऋषिमाचीरपानेन ब्राह्मणीगमनेन च। वेदाक्षरविचारेण शूद्रस्यायुर्दशानयां व्रजेत्" कालिकापु०। "विक्रयं सर्ववस्तूनां कृत्वेह शूद्रो न दोषभाक्। मधु चर्म सुरां लाक्षां त्यक्त्वा मांसञ्च पञ्चमम्" मनुः। "मद्यः पतति लोहेन लाक्षया लवणेन च। तिलैश्च शूद्रो भवति ब्राह्मणः क्षीरविक्रयात्। अयशो भेषजस्यार्थे यशश्चेतोऽन्नयैव च। यद्यवश्यन्तु विक्रेयास्तिला धान्येन तत्समाः" आङ्गि० त०। "नवां विक्रयकारी च गवां गोघ्नं कृमिर्भवेत्" इति ब्रह्मवचनम्। "गोघ्नोऽयाज्यसंयाज्यपारदार्यात्मविक्रयाः। तड़ागारामदारागिनपत्यस्य च विक्रयः। भृताध्ययनादानमपण्यानाञ्च विक्रयः" मनुः।

विक्रयानुशय पु० विक्रयस्यानुशयः पश्चात्तापः। विक्रीतपदार्थस्य परावृत्तिफलके ऽनुशये तद्विषिके ऽविवादभेदे

विक्रविक पु० विक्रयः अत्यस्य ठन्। विक्रेतरि अमरः।

विक्रयिन् त्रि० वि+क्री-णिच्छीलेर्थे इनि। विक्रयशीले शब्दच० स्त्रियां ङीप्। [भावे क्त। २विक्रमे।

विक्रान्त पु०वि+क्रम-क्त। १सिंहे राजनि० २शूरे च अमरः।

विक्रिया स्त्री वि+कृ-भावे ग। १विकारे अन्यथास्थितस्य वस्तुनोऽन्यथा परिणामे।

विक्रीयासम्प्रदान न० विक्रीय न सम्प्रदानं क्रेतरि यत्र। अष्टादशविवादान्तर्गते विवादविशेषे तत्स्वरूपादिकं वीरमि० उक्तं यथा

"अथ विक्रीयासम्प्रदानाख्यस्याष्टादशपदस्य। तत्स्वरूपमाह नारदः "विक्रीय पण्यं मूल्येन क्रेतुर्यच्च प्रदीयते। विक्रीयासम्प्रदानं तद्विवादपदमुच्यते इति" तत्र विक्रेयद्रव्यस्य वैविध्यद्वैविध्यत्वे क्रमेणाह स एव "लोकेऽस्मिन् द्विविधं पण्यं जङ्गमं स्थावरं तथा। षड्विधस्यास्य च बुधैर्दानादानविधिः स्मृतः। गणितन्तुलितं मेयं क्रियया रूपतः स्त्रियेति"। दानं विक्रयः स्वादानं क्रयः। गणयित्वा यस्य क्रयः तद्गणितम्। गणितं संख्येयं क्रमुकफलादिकम् एवं तुलितादिकं तुलितमन्नाद्युतं क्षेमचन्दनादिकम्। मेयं द्रोणादिकम् क्रियया वाहनदोहनादिरूपया युक्तमिति शेषः। रूपतः रूपेण युक्तं वस्तु पण्याङ्गनादि। स्त्रिया दीप्त्या युक्तं पद्मरागादिकम्। यदा विक्रेता मूल्यं गृहीत्वा याचमानाय क्रेत्रे विक्रीतं वस्तु न ददाति तदा यत्कर्त्तव्यं तदाह स एव "विक्रीय पण्यं मूल्येन क्रेतुर्यो न प्रयच्छति। स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियं फलमिति" यो गृहीतमूल्योविक्रेता अजानानुशयाय क्रेत्रे प्रार्थयमानाय नार्पयति तच्च पण्यं यदि स्थावरात्मकं तदा क्षयेण सहितमसौ दाप्यः। यदा तु जङ्गमात्मकं तदा क्रियाफलेन सहितमित्यर्थः। विक्रयानन्तरं जात उपभोगोऽत्र क्षयः क्रियाफलं दोहनादिक्रियाफलं क्षीरादिकम्। गृहीतञ्च क्रयकालापेक्षया अर्पणकाले मूल्याधिक्ये वेदितव्यम्। मूल्यह्रासे त्वन्यशब्दाभिधानात्। तथा च स एव "अर्घश्चेदपचीयेत क्रेतुर्दद्यात्ततोऽधिकम्। अर्घश्चेदुपचीयेत विक्रीणीतेति संदेयमपण्यमावहेदिति"। अत्रैव् चेदपचीयेतेति कल्पतरौ पाठः। अत्रैव् विक्रीतस्य क्रेत्रे समर्पणात् पूर्वं अपचीयेत हीनमूल्यं भवेत्तोदयमपण्यमावहेत्। विक्रयकाले यावन्मूल्यं गृहीतं तावता मूल्येनार्पणक्षणे मूल्यह्रासवशाद्यदुपचयसहितं लभ्यते तावद्दाप्यमित्यर्थः। यदा तु मूल्यसाम्यं तदा पण्योपचयरूपस्यासम्भवात् "निक्षेपं हृद्विशेषञ्च क्रयं विक्रयमेव च। याच्यमानमदत्त्वैवं ह्यतं पञ्चकं स्मृतमिति" वचनोक्त द्विगुणसहितमपण्यं दाप्यः। अतएव याज्ञवल्क्यः "गृहीत्वा मूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति। सोदयं तस्य दाप्योऽसौ दिगुणाभं वा दिगागते" इति। गृहीतमूल्यमपण्यं विक्रेता यदि प्राप्तुमशक्यमावाय स्वदेशवणिजे क्रेत्रे न समर्पयति तच्च पण्यं यदि क्रयकाले बहुमूल्यं कस्मात्कालान्तरे अल्पमूल्येनैव लभ्यते तदा सोदयं द्विगुणा सहितं विक्रेता क्रेत्रे दापनीयः। यदा मूल्यह्रासतः पण्यस्योदयो नास्ति किन्तु क्रयकालेयावता मूल्येन लभ्यं यावत्पण्यमिति प्रतिपन्नं तावदेव तदा तत्पण्यमादाय तन्निजं देये विक्रीतस्य यो लाभस्तेनोदयेन सहितं दापनीयः वचनत्रयस्यार्थः। चतुर्थस्य तु यो देशान्तरात् क्रयणार्थमागत्य क्रीणाति तस्मै देशान्तरे तत्पण्यं विक्रये यो लाभस्तेन सहितं तत्पण्यं दापनीय इत्यर्थः। देशान्तरलाभसहितपण्यदानञ्च केवलमादेयस्य एव किन्तु मूल्यस्य द्विगुणे क्षयेऽपीत्याह नारदः "स्थायिनामेष नियमोदिगुणाभं दिगुविचारिणामिति"।

स्थायिनां विक्रेतृदेशस्थायिनाम् एष नियमः स्थावरस्य चेत्र दाप्य इत्यादिवचनोक्तो नियम इत्यर्थः। विष्णुर्विक्रेतुर्दण्डप्रकारमाह "अदत्तमूल्यं यः पण्यं कर्तुमेव दद्यात्तस्य मोचयं दाप्यो राज्ञा च पञ्चशतं दण्ड्यः" इति। एतच्चानुशयरहिततृविक्रेतृविषयमिति मदनरत्ने। यत्तु विक्रीयानुशयवशाद्दापयति यश्च क्रीत्वाऽनुशयवशाच्च गृह्णाति तौ प्रत्याह कात्यायनः "क्रीत्वा प्राप्तान्न गृह्णीयाद्यो न दद्याद्दुर्धनम्। स मूल्याद्दशभागन्तु दत्त्वा स्वद्रव्यमाप्नुयात्"। अप्राप्तेऽपि क्रियाकाले कृते नैव प्रदापयेत्। एष धर्मो दशाहात्तु परतोऽनुशयो नास्तीति"। अदूषितं जलादिनेति शेषः। दोहवाह्याद्यपेक्षस्य दोहनवाहनादिरूपः कालोऽल्पक्रियाकालस्तस्मिन्नप्राप्ते सति अल्पक्षेऽदाने वा कृते सति न दशमभागं प्रदापयेत् किन्तु तमदत्त्वैव स्वीयं द्रव्यं प्राप्नुयादिति। एष धर्मो दशाहात्प्राग्वेदितव्यः तत ऊर्द्धमनुशयो न कर्त्तव्यः। विक्रीयासम्प्रयच्छतो यद्विक्रीतं पण्यं विक्रेतुः पार्श्वे स्थितं तस्य यदि नाशः स्यात्तदा विक्रेतुरेव हानिरित्याह याज्ञवल्क्यः "राजदैवोपघातेन पण्ये दोषमुपागते। हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः" इति। अत्र याचितस्येति विशेषणोपादानात् याचनाभावे न विक्रेतुर्हानिरित्यर्थादुक्तं भवति। नारदोऽपि "क्षयङ्गच्छेत वा पण्यं नश्येन्नापच्छियेत वा। विक्रेतुरेव सोऽनर्थो विक्रीयासम्प्रयच्छतः" इति। यथा याचितस्याप्रयच्छतो विक्रेतुर्हानिस्तथा दीयमानं पण्यमगृह्णतः क्रेतुरपीत्याह स एव "दीयमानञ्च गृह्णाति क्रीतमप्यपणञ्च यः क्रयी। स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः" इति। अप्रयच्छतः विक्रेतुर्यो दोषः स एवास्य भवेदित्यन्वयः। क्रेतृदोषाभिधानस्य फलं पण्यस्य मूल्यं क्रेतरि विक्रेता न प्रत्यर्पणीयमिति। दीयमानञ्च गृह्णातीति वदता दीयमानस्यहरणे न मूल्यहानिरिति दर्शितम्। क्रयानन्तरं क्रेता न याचितं विक्रेता च न समर्पितं जानन्नौरादावुपदूषितञ्च द्वयोः समा हानिः। क्रेतृविक्रेत्रोरुभयोरपि याचनानर्पणशैथिल्येन अपराधत्वादित्युक्तं केवलभट्टैः स्मृतिचन्द्रिकायाम्। याज्ञवल्क्योऽपि "हानिश्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेदिति" क्रेतृदोषं दोषमानस्यायहणम्। यत्तु पुनर्जातानुशयः क्रेता विक्रीता दीयमानञ्च गृह्णाति तन्नाघाह नारदः "दीयमानञ्च गृह्णाति क्रीत्वा पण्यं च यः क्रयी। विक्रीणानस्तदन्यस्य विक्रेता नापराध्नुयादिति"। क्रयी जातानुशय इति शेषः। याज्ञवल्क्योऽपि "विक्रीतमपि विक्रेयं पूर्वक्रेतर्यगृह्णतीति"। यत्त्वदृष्टं पण्यं दर्शयित्वा सदोषं विक्रीणीते यश्चान्यच्छुद्धं विक्रीतं तत्क्रेत्रनुशयाभाव एवान्यस्य विक्रीणीते तयोः समानोदण्ड इत्याह नारदः "निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति। स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव तु। तथान्यच्छुद्धं विक्रीय योऽन्यच्च तत्प्रयच्छति। द्रव्यन्तद्द्विगुणं दाप्यो विनयं तावदेव त्विति"। याज्ञवल्क्योऽपि "अन्यच्छुद्धे च विक्रीते दुष्टं वाऽदुष्टवादिति। विक्रीणीते दशगुणं मूल्यात्तु द्विगुणो भवेदिति" बुद्धिपूर्वविषयमेतत्। "ज्ञात्वा सदोषं यः पण्यं विक्रीणीते विचक्षणः। तदेव द्विगुणं दाप्यस्तत्क्षणं विनयं लभेति" हारीतस्मृतेरुक्तत्वात्। अबुद्धिपूर्वके विक्रये तु क्रयपरावर्त्तनमेव। अन्यत्रापि विषयविशेषे परावर्त्तनमाह हारीतस्मृतिः "अज्ञानाज्ञेन विक्रीतं क्रीतमूल्यं भयेन वा। अस्वतन्त्रेण मूढेन त्याज्यन्तस्य पुनर्भवेदिति"। एतत्सर्वं दत्तमूल्ये पण्ये द्रष्टव्यम्। अतएव नारदः। "दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्त्तितः" इति। यत्र पुनर्मूल्यं न दत्तं तत्रापि यमाह "अदत्तेऽन्यत्र समयाच्च विक्रेतुरविक्रयः" इति। अदत्तमूल्ये तु पण्ये वाङ्मात्रेण क्रये कृते न परावर्त्तनीयमित्येवमादिविषयाभावे सति प्रदत्तो निहतो न कश्चिद्दोष इत्यर्थः। यत्र पुनर्वाङ्मात्रक्रयपरिहारार्थं विक्रेतुर्हस्ते क्रेता किञ्चिद्दद्रव्यं दत्तं तत्र क्रेतृदोषवशेन क्रयासिद्धौ त्याह व्यासः "सत्यङ्कारं च यो दत्त्वा यथाकालं न दृश्यते। पण्यं भवेच्चिरोन्नीयमानमदूषितः" इति। निरुप्तं भवेत् सत्यङ्कृतं भवेदित्यर्थः। अत्र पणद्रव्यस्योत्सर्गः सत्यङ्कारद्रव्योत्सर्गोऽभिमतः। अन्यथा वाङ्मात्रक्रयकर्तृत्वस्यैव विक्रेतुः सत्यङ्कारद्रव्यग्राहकत्वलक्षणस्यैव विक्रयबाधापराधनिमित्तस्य सत्यङ्कारद्रव्यस्य द्वैगुण्येन प्रतिदानं न स्यात्। अत्रापि विक्रीतसविक्रेयमित्यनुसन्धेयम्। अस्मिन्नेव विषये विक्रेतृदोषवशेन क्रयासिद्धौ त्याह याज्ञवल्क्यः "सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेदिति" सत्यङ्कारः सत्यापनं कृतस्य क्रयस्य सत्यताकरणमिति यावत्। "क्लीबे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियाम्" इत्यमरः

कोषाभिधानात् । यत्तच्छब्दाभ्यां तदर्थितं यत्कृत्वा-क्तं वयं हस्यं कर्तुं यद्विकेतृक्रीते क्रीतमित्यर्थः" ।

विक्षेय त्रि॰ वि+क्षी-यत् । विक्षयार्थे पदार्थे । [२व्याकुलत्वे

विक्लव त्रि॰ वि+क्लु-क्वच् । १व्याकुलभूते अमरः । भावे अप्

विक्लित्ति स्त्री वि+क्लिद-क्तिन् । जलतेजःसंयोगव्यापार-व्यवयवैक्ल्ये पूर्वावयवकसंयोगनाशानन्तरावयविद्रव्यसंयोगापत्तौ ।

विक्लिन्न त्रि॰ वि+क्लिद-क्त । १आर्द्रे २शीर्णे ३क्लीबे च मेदि॰ । ४विक्लेदयुक्ते । [शब्दे च वैद्यकम् ।

विक्लाव पु॰ वि+क्लु घञ् । १शब्दे अमरः । २कासादिरोगजन-

विक्षिप्त त्रि॰ वि+क्षिप-क्त । १विशेषेण क्षिप्ते २योगशास्त्रोक्ते चित्तस्य भूमिभेदे स॰ । यथोक्तं पातञ्जलभाष्यविवरणयोः "क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः । तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्त्तते" भा॰ । "क्षिप्तं यदैव रजसा तेषु तेषु विषयेषु क्षिप्यमाणम् अत्यन्तमस्थिरं, कुठन्तु तमःसमुद्रेकान्निद्रादृत्तिमत् । विक्षिप्तं क्षिप्तादिभ्यः विक्षिप्तं विशेषोऽत्र स्थैर्यवत्त्वस्य कादाचित्कः स्थैर्यं सा सा चास्थैर्यवत्ता सांसिद्धिकी वा यच्छ्रमाणव्याधिस्त्यानाद्यन्तरायजनिता वा" विव॰ ।

विक्षीर पु॰वि+क्षिर घञ् । १अर्कवृक्षे राजनि॰ २विगतक्षीरे त्रि॰ ।

विक्षेप पु॰वि+क्षिप-घञ् । १त्यागे २प्रेरणे ३दूरीकरणे च । "चित्तस्य विक्षेपा नवविधाः पात॰ सूत्रभाष्ययोर्दर्शिताः तत्र च चित्तविक्षेपशब्दे २६४१पृ॰ अन्तरायशब्दे च दृश्याः । वेदान्तमते चित्तविक्षेपाः २०० पृ॰ उक्ताः । विमर्शस्थले यत् पक्षस्यानं तस्य क्रान्तिवत्त्वाद् यत् तिर्यगन्तरं स विक्षेपः" सि॰शि॰ पक्षे ४धरे च । "भूषणानामर्थरचना तथा विचित्रवैचित्र्यम् । रूपकाख्यानमीदृक्ष विक्षेपो दयितालिके" सा॰ द॰ पक्षे स्त्रीणां ५सप्तत्यलङ्कारभेदे । ६कथाविच्छेदरूपे निग्रहस्थानभेदे "कार्य्यव्यासङ्गात् कथाविच्छेदो विक्षेपः" गौ॰सू॰ "यत्र कर्त्तव्यं व्यासङ्गस्य कथां व्यवच्छिनत्ति । इदं मे करणीयं विद्यते तच्चिरवर्त्तिते कथयिष्यामि इति विक्षेपो नाम निग्रहस्थानम् । एकनिग्रहावस्थानायां कथायां स्वयमेव कथान्तरं प्रतिपद्यते इति" वा॰भा॰ । "अप्रस्तावत्कालान्तरकल्पनारोपितं कार्य्यव्यासङ्गमङ्गीकृत्य कथाविच्छेदकथा" इक्तिः ।

विक्षेपशक्ति स्त्री विक्षेपस्य अजिका शक्तिः । वेदान्तोक्ते अविद्याशक्तिभेदे ।

"विक्षेपशक्तिस्तु यथा रज्वज्ञानं स्वाश्रयरज्वौ स्वभङ्ग्या सर्पादिकल्पनावयति इयमज्ञानमपि स्वाश्रितान्यपि स्वभङ्ग्या आकाशादिप्रपञ्चकल्पनावयति तादृशं सामर्थ्यम् । तदुक्तम् "विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजेदिति" । वेदान्तसा॰ ।

विख त्रि॰ विगता नासिका यस्य खादेशः । गतनासिके । अमरः । खादेशः । विखोऽथस्य त्रिका॰ ।

विखुर पुंस्त्री॰ १राक्षसे त्रिका॰ स्त्रियां ङीष् । २चौरे संक्षिप्त॰

विख्यात विशेषेण ख्यातः प्रसिद्धः वि+ख्या-क्त । प्रसिद्धे

विगणन न॰ विशेषेण गणनम् गण-ल्युट् । अप्रयोजनार्थं सङ्ख्यागणने ।

विगत त्रि॰वि+गम-क्त । १प्रमादरहिते अमरः । २विशेषगते बहु॰ ३अपगते च हेमच॰ । ४मृत॰ । ५खगगतौ न॰ । "विगतं विगतम्"भट्टिः । [स्त्रीयां स्त्रियाम् चन्द्रत्रा॰ ।

विगतार्त्तवा स्त्री विगतमार्त्तवं रजो यस्याः । गतरज-

विगन्धक पु॰ विरुद्धः गन्धोऽस्य कप् । १हड्डीवृक्षे राजनि॰ २कुष्ठायां स्त्री॰ टाप् अत इत्त्वम् ।

विगम पु॰ वि+गम-घञ् । १नाशे, २अपाये च ।

विगर्हण न॰ वि+गर्ह-ल्युट् । निन्दने ।

विगर्हित त्रि॰ वि+गर्ह-क्त । १निन्दिते २निषिद्धे च । भावे-क्त । ३निन्दायाम् न॰ ।

विगाढ़ त्रि॰ वि+गाह-क्त । १स्नाते, २अवगाहने च ।

विगान न॰ वि+गै-ल्युट् । निन्दायाम् हेमच॰ ।

विगीत त्रि॰ वि+गै-क्त । निन्दिते ।

विगीति स्त्री वि+गै-क्तिन् । निन्दायाम् ।

विगुण त्रि॰ विरुद्धो गुणोऽस्य । गुणरहिते ।

विगूढ़ त्रि॰ वि+गुह क्त । १गर्हिते, २गुप्ते च मेदि॰ ।

विग्रहीत त्रि॰ वि+ग्रह-क्त । १गर्हीते, व्याकरणोक्ते विग्रहवाक्यस्थे २पदे च ।

विग्र त्रि॰ विगता नासिकाऽस्य ग्रादेशः । विगतनासिके अमरः

विग्रह पु॰ वि+ग्रह-घञ् । १देहे, २विस्तारे, ३युद्धे पुं॰न॰ अमरः । ४समासादिदर्शितसमानानार्थकवाक्यभेदे, ५विशेषज्ञाने च "अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः" हरि॰ ।

विघटिका स्त्री विभक्ता घटिका यया प्रा॰ब॰। घटिकाषष्टिभागे पलात्मके काले राजनि॰। वि+घट-ण्वुल्।२विघोलते त्रि॰

विघटित त्रि॰वि+घट-क्त। १वियोजिते २विश्लेषेण रचिते च
विघट्टित त्रि॰ वि+घट्ट-क्त। १चालिते २वियोजिते च।
विघस पु॰वि+घस-घञ्। भोजनशेषे मेदि॰ २आहारे च शब्दच॰। ३सिक्थके न॰ राजनि॰। ४दैवपैत्रकर्मशेषे
विघसाशिन् त्रि॰ विघसं देवतादिदत्तावशेषमश्नाति अश-णिनि। दैवपैत्रकार्यानन्तरं तदवशिष्टभोजिनि।
विघात पु॰ वि+हन-क्त। १व्याघाते २आघाते च।
विघातिन् त्रि॰ वि+हन-णिनि। १निवारके २नाशके, ३नाशप्रतियोगिनि च "नित्यश्चायं वलुनिमिचो विघाती" इति व्याकरणका॰। ख्वुल्। विघातकोऽप्यत्र।
विघ्न पु॰ वि+हन-क। १व्याघातके अन्तराये अमरः। २कर्म्मणि पाकफलायां शब्दच॰। [गणेशे शब्दर॰।
विघ्ननायक पु॰ विघ्नानामुत्सर्ज्जनोत्पत्त्योः नायकः। विघ्नेशे
विघ्नकारिन् त्रि॰ विघ्नं करोति कृ-णिनि। १घोरदर्शने २विघातके च मेदि॰। स्त्रियां ङीप्। [ण्यत्र।
विघ्ननाशक पु॰ष॰त॰। गणेशे शब्दच॰ ल्यु। विघ्ननाशनादयो-
विघ्नराज पु॰ विघ्ने राजते राज-क्विप्। गणेशे अमरः। ष॰त॰। विघ्नेशादयोऽप्यत्र।
विघ्नहारिन् पु॰विघ्नं हरति हृ-णिनि। गणेशे त्रिका॰।
विघ्नित त्रि॰ विघ्नो जातोऽस्य इतच्। जातविघ्ने।
विघ्नेशानकान्ता स्त्री ष॰त॰। श्वेतदूर्व्वायाम् राजनि॰।
विच पृथक्करणे रु॰ जु॰ वा उ॰ अक॰ अनिट्। विनक्ति विवेक्ति विङक्ते विविक्ते। इरित् अविचत् अवैचीत्।
विचकिल पु॰ विच+क किल-क कर्म्म॰। १मदनवृक्षे। २मल्लीभेदे मेदि॰। [२नागदन्त्यां स्त्री राजनि॰ टाप्।
विचक्षण पु॰ वि+चक्ष-ल्यु न ख्यादेशः। १पण्डिते अमरः
विचक्षुस् त्रि॰ वि+चक्ष-उसि न ख्यादेशः। १विगतनेत्रे त्रिका॰। विगतं चक्षुर्यस्य। २नेत्रशून्ये त्रि॰। [चयने च।
विचयन न॰वि+चि-ल्युट्। १अन्वेषणे शब्दच॰। २पुष्पादि-
विचर्चिका स्त्री वि+चर्च-ण्वुल्। पामनि रोगभेदे अमरः। सा च क्षुद्रकुष्ठविशेषः। "एकं कुष्ठं कृतं पूर्वं गजचर्म ततः कृतम्। ततश्चर्मदलं प्रोक्तं ततश्चापि विचर्चिका। विपादिकाभिधा सैव पामा कच्छस्ततः परा। ततो दद्रुश्च विष्फोटः किटिभञ्च ततः परम्। ततश्चालसकं प्रोक्तं ज्ञातव्यञ्च ततः परम्। क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैः। एकस्फोटः पिड़का श्यावा वह्वल्पावा विचर्चिका" पिड़का क्षुद्रपिड़का। "दाह्यते त्वक् खरा रूक्षा जान्वोर्व्वा विचर्चिका। पादे विपादिका ज्ञेया-स्थान-भेदाद्विचर्चिका"। "केचिद्विचर्चिकातो विपादिकां भिन्नामाहुः" भावप्र॰। कुष्ठशब्दे ३११५४पृ॰ दृश्यम्।
विचार पु॰ वि+चर-घञ्। १तत्त्वनिर्णये सन्दिग्धे वस्तुनि प्रमाणेन तत्त्वपरीक्षायां २तदनुगुणे वाक्यसोमे च। "विपरीतोद्भावकपरविजिगीषया न्यायप्रयोग इति" केचित् प्राहुः। यथा पदार्थानुमानस्थले पर्वतो वह्निमान् धूमवत्त्वादित्यादि। अत्र च पर्वते वह्नौ साधनीये प्रतिवादिना च पर्वतो न वह्निमानित्यादि विपरीतवाक्ये प्रयुक्ते मध्यस्थस्य संशयो जन्यते। तच्छित्त्यर्थं वादिना पर्वतो वह्निमानित्यादिप्रतिज्ञादिघटितवाक्यप्रयोगरूपः विचारः क्रियते इति। ४विगतश्चारो यस्मात् प्रा॰ब॰। चार शून्ये च "विचारदृकचारदृगप्यवर्त्तत"।
विचारण न॰ वि+चर-णिच्-ल्युट्। १विचारे शब्दर॰। युच्। तत्रैव स्त्री अमरः। २लोमांसाधारे हेमच॰
विचारित त्रि॰ विचारो जातोऽस्य इतच्। कृतविचारे।
विचाल त्रि॰ वि+चल-कर्त्तरि ण। १अन्यत्रे २अन्तराले-हेमच॰। वि+चल-णिच् भावे अच्। २अन्यथा स्थितस्य वस्तुनो विशेषरूपतापादने "अधिकरणविचाले च" पा॰ "द्रव्यस्य संख्यान्तरापादने संख्याया वा स्यात्। एकं राशिं पञ्चधा कुरु" सि॰कौ॰। [स्त्रीप्।
विचि(ची) पुंस्त्री विच-इक्। तरङ्गे भरतः। स्त्रीत्वपक्षे वा
विचिकित्सा स्त्री वि+कित-स्वार्थे सन् अ। सन्देहे अमरः।
विचित्र न॰ विशेषेण चित्रमस्। १कबुरवर्णे। २तद्वति त्रि॰ शब्दच॰ ३आश्चर्य्ये त्रि॰। ४सप्तमेवीरौ स्त्री राजनि॰। ५अर्थालङ्कारभेदे न॰ अलङ्कारशब्दे ३०२ पृ॰ दृश्यम्। संज्ञायां कन्। भुर्जपत्रवृक्षे पु॰ राजनि॰।
विचित्रवीर्य्य पु॰ शान्तनुनृपात्मजे नृपभेदे भा॰आ॰१०६अ॰
विचित्राङ्ग पुंस्त्री॰ विचित्रमङ्गं यस्य। (चित्रं) १व्याघ्रभेदे शब्दच॰ २मयूरे पुंस्त्री॰ शब्दर॰ उभयत्र स्त्रियां ङीष्। ३आश्चर्य्यदेहे त्रि॰।
विचेतस् त्रि॰ विरुद्धं दुष्टं विशिष्टं वा चेतो यस्य। १दुष्टचित्ते २विशिष्टचित्ते च। ३दुर्म्मनस्के हेमच॰।
विचेष्टित त्रि॰ विगतं चेष्टितमस्य। १चेष्टाशून्ये, वि+चेष्टभावे क्त। २विशेषेण चेष्टायाम् न॰।
विच्छ दीप्तौ चु॰उभ॰सक॰सेट्। विच्छयति ते अविविच्छत् त
विच्छ गतौ तु॰ पर॰ स्वार्थे आय, आयपक्षे उ॰सक॰ सेट्। विच्छायति विच्छायते विच्छति। अविच्छायीत् अविच्छीत्।

विच्छन्दक पु० विशिष्टः छन्दो यत्र कप्। ईश्वरटहे अमरः "उपर्य्युपरि यद्गेहं तद्विच्छन्दकसंज्ञितम्"।

विच्छाय न० बीनां पक्षिणां छाया नपुंसकत्वम्। पक्षि समूहच्छायायाम् अमरः। विगता छाया यस्य। २छाया-रहिते त्रि० मेदि०। ३विशिष्टकान्तियुते मणौ भरतः।

विच्छित्ति स्त्री वि+छिद्-क्तिन्। १अङ्गरागे २हारभेदे ३विच्छेदे मेदि०। ४छेदे ५विनाशे ६स्त्रीणां चेटाभेदे च। "लोकाप्याकल्परचना विच्छित्तिः कान्तिपोषकृत्" सा०द०

विच्छिन्न त्रि० वि+छिद्-क्त। १विभक्ते २समालब्धे च मेदि० ३कुटिले हेमच०। भावे-क्त। ४छेदने न०।

विच्छेद पु० वि+छिद्-भावे घञ्। १वियोगे २सन्ततिरा हित्ये ३विभागे च।

विज पृथक्करणे जु० उभ० सक० अनिट्। वेवेक्ति वेविक्ते इरित् अविजत् अवैक्षीत् अविक्त।

विज भये कम्प च रु० पर०अक०सेट्। विनक्ति अविजीत्। ईदित् ओदित्व क्त-विग्नः। [ईदित् ओदित्व क्त-विग्नः।

विज भये कम्पे च तु०आ०अ०अनिट्। विजते अविजिष्ट।

विजन त्रि० विगतो जनो यस्मात् प्रा०व०। निर्जने अमरः।

विजनन न० वि+जन-ल्युट्। १गर्भमोचने प्रसवे हेमच० २चङ्क्रमे शब्दच०।

वेजपिल न० विज-क पिल-क कर्म०। पङ्के हलायुधः।

विजन्मन् त्रि० विरुद्धं जन्म यस्य। जारजे।

विजय पु० वि+जि-कर्त्तरि अच्। १अर्जुने मेदि०। "अभिप्रयामि समरे यदहं युद्धदुर्मदान्। नाजित्वा विनिवर्त्तोस्मि तेन मां विजयं विदुः" भा० वि० ४४अ०। २विमाने हेमच० ३यमे च। ४विष्णोरनुचरभेदे। जय-शब्दे ३०५० पृ० दृश्यम्। तच्छब्दशब्दे दर्शिते ५म्लेच्छभे ६कल्किपुत्रभेदे कल्किपु० १३अ०। भावे अच्। ज ८परिभवपूर्वकग्रहणे च।

विजयकुञ्जर पु०विजयाय कुञ्जरः। राजवाहनगजे त्रिका०।

विजया स्त्री १आश्विनशुक्लपक्षीयदशम्याम् २उमायाः सखीभेदे वामनपु० ४अ० "कथयतु विजया" इति सुदाराच्चसम्। ३दुर्गायां हेमच० "विजित्य पद्मनाभान दैत्यराज महाबलम्। विजया तेन सा देवी लोके चैवापराजिता" देवीपु०४५अ०। ४जयन्त्यां ५शेफालिकायां ६मञ्जिष्ठायां ७शमीभेदे, ८अग्निमन्थे राजनि०। ९भङ्गायाम् (सिद्धि) हेमच० तत्पर्य्यायगुणादि भावप्र० उक्तं यथा "भङ्गा गञ्जा जयानन्दा मादिनी विजया जया। भङ्गा कफहरी तिक्ता वाह्निणी पाचनी लघुः। तीक्ष्णोष्णा पित्तला मोहमदवाग्वह्निवर्द्धिनी" भावप्र०। अष्टद्वादशीमध्ये "यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत्। तदा सा तु महापुण्या द्वादशी विजया स्मृता" इत्युक्ते १०द्वादशीभेदे "शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो यदा भवेत्। सप्तमी विजया नाम" इत्युक्ते सप्तमीभेदे च। ११यमभार्य्यायां १२हरितक्यां जटा०। १३वचायां रत्नमा०। १४अस्त्रविद्याभेदे "विद्यामधैनं विजयां जयाञ्च भट्टिः।

विजल्प पु० "व्यक्तयाऽस्पष्टया गूढमानमुद्रान्तरालया। अव-हित्थि कटाक्षोक्तिर्विजल्पो विदुषां मतः" उज्ज्वलभ-ण्युक्ते वाक्यभेदे।

विजात त्रि० विरुद्धं जातः। १जारजाते विशेषेण जाता। २जातासत्यायां स्त्रियां स्त्री हेमच०। ।धर्म्मविनिन्दिनि।

विजातीय त्रि० विभिन्नां जातिं धर्म्मकर्म्मेति छ। विभिन्न-

विजिगीषा स्त्री विजेतुमिच्छा वि+जि-सन् भावे अ। १स्तोदरपूरणेच्छया निन्दनीयकर्म्मादौ प्रवृत्तौ २तच्चिन्ता-ऽगणने रमा० ३विजयेच्छायाञ्च। ष। विजिगीषु जयेच्छावति त्रि० शब्दच०।

विजिगीषाविवर्जित त्रि ६त०। औदरिके अमरः।

विजिन(ल) न० विज-इनच् इलच् किच्च। सरसव्यञ्जने "शाकरूपरसासक्ते व्यञ्जने तु भवेत् त्वयम्। तैलणाक-सुसंस्कारे प्रशस्तसुपसंस्कृतम्। विजिनं नालसीकञ्च विजिलं विञ्जिलञ्च तत्" शब्दर०।

विजुल पु० विज-उलच् किच्च। शालमलीवृक्षे राजनि०।

विजृम्भण न० वि जृभि-ल्युट्। १विकाशे २सुखविकाशहेतु-भूते वायुव्यापारभेदे (हाइतोला)। ष विजृम्भाव स्त्री।

विजृम्भित त्रि० वि+जृभि-क्त। १विकशिते मेदि० २जृम्भा-युक्ते भावे क्त। ३प्रकाशे ४चेष्टायां ५जृम्भायां च मेदि०।

विज्जन न० विद्-वेधनं जनयति जन-अच्। बाणे त्रिका०।

विज्जल न० व्यध-ताड़े क्विप् विद्धा जडयति जडि-क अ डस्य जः। १बाणे त्रिका०। २विजिले हेमच०।

विज्जुल न० विज-उलच् जुट्। त्वचे (दारचिनि) राजनि०

विज्जुलिका स्त्री विज्जुल+संज्ञायां कन् कापि अत इत्वम्। जतुकायां राजनि०। [शिडते पु० राजनि०।

विज्ञ त्रि०विशेषेण जानाति वि+ज्ञा-क। १प्रवीणे अमर। २प-

विज्ञात त्रि० वि+ज्ञा-क्त। १ख्याते अमरः। २ज्ञाते च।

विज्ञान न० वि+ज्ञा-ल्युट्। १ज्ञाने २कर्म्मणि मेदि० ३शि-

ख्यातिज्ञाने अमरः । ४वेदान्तोक्ते अविद्याद्वित्रिभेदे च । ५बौद्धमतसिद्धे आलयरूपे ज्ञाने च । "चतुर्दशानां विद्यानां धारणं हि यथार्थतः । विज्ञानमितरत् विद्यात् येन धर्मो विवर्द्धते" कूर्मपु० १३अ० उक्ते १चतुर्दशविद्याज्ञाने च ।

विज्ञानमयकोष पु० विज्ञानात्मकः कोष इवावरकत्वात् । ज्ञानेन्द्रियसहिते बुद्धिपदार्थे ।

विज्ञानस्कन्ध पु० बौद्धमतसिद्धेषु रूपविज्ञानवेदनासंज्ञासंस्कारस्कन्धेषु स्कन्धेषु आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहे ।

विज्ञानिक त्रि० विज्ञानमस्त्यस्य ठन् । विज्ञानयुक्ते भरतः ।

विज्ञौली स्त्री विज-ऊल-पृषो० । षड्ङ्कौ त्रिका० ।

विट आक्रोशे सक० सने अक० भ्वा० पर० सेट् । वेटति अवेटीत् ।

विट पु० विट क । १घिक्कृते जारे अमरः । २शृङ्गाररसनायककालचरे "सख्मे गृहीतसम्भृत विटस्तु धूर्तः फलैक देशज्ञः । वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम्" सा०द० । ३भूत्तें, "विट ! विटपमसुं दद्स तस्मै" माघः ४पर्वतभेदे ५लवणभेदे ६खदिरभेदे ७मूत्रिकेच मेदि० । ८नारङ्गवृक्षे शब्दमाला ।

विटङ्क न० वि+टकि-अच् । कपोतपालिकायां प्रासादाद्यग्रे काष्ठनिर्मिते कपोतावासस्थाने । (पायराखोप) अमरः ।

विटप पुंन० । विटं विस्तारं वा पाति पिबति वा पा-क । १शाखायां, २पल्लवविस्तारे अमरः । ३स्तम्बे ४पल्लवे च शब्दर० ५विटपालके वृक्षपायिनि च मेदि० "पिबति च पाति च यस्मात् रक्षत्वाद्वा विट ! विटपमसुन्दद्स तस्मै" माघः । ७व्याटिलपत्रे पु० राजनि० । दक्षिणदक्षिणान्तरस्थाने हेमच० ९विटाधिपे मेदि० । [वृक्षे राजनि० ।

विटपिन् पु० विटप+अस्त्यर्थे इनि । १वृक्षे अमरः । २वटवृक्षे राजनि० ।

विटप्रिय पु० वृ० । सुन्दरवृक्षे राजनि० ।

विटमाक्षिक पु० विटप्रियः माक्षिकः । धातुभेदे हेमच० ।

विटि(टी) स्त्री विट-कि वा ङीष् । पीतचन्दने शब्दमाला ।

विट्खदिर पु० विडिव दुर्गन्धः खदिरः । (गुयेरावला) वृक्षे अमरः । [अमरः स्त्रियां ङीष् ।

विट्चर पुंस्त्री विषि-विष्ठायां चरति चर-अच् । ग्राम्यशूकरे

विट्पति पु० विश्यते विश-क्विप् विशः कन्यायाः पतिः । जामातरि जटाधरः । [पक्षिभेदे जटा० ।

विट्सारिका स्त्री विडिव दुर्गन्धः सारिका । (गुयेसालिक)

विड आक्रोशे भ्वा० पर० सक० सेट् । वेडति अवेडीत् ।

विड न० विड-क । लवणभेदे अमरः ।

"विडं सञ्चारमूर्ध्वाधःकफवातानुलोमनम्" ऊर्ध्व कफमधोवातं सञ्चारयतीत्यर्थः । "दीपनं लघु तीक्ष्णोष्णं रूक्षं रुच्यं व्यवायि च । विबन्धानाहविष्मूत्रकृमिगौरवशूलनुत्" भावप्र० ।

विडङ्ग पु०न०विड-अङ्गच् । १खनामख्याते औषधभेदे अमरः । "विडङ्गं कटु तीक्ष्णोष्णं रूक्षं वह्निकरं लघु । शूलाध्मानोदरश्लेष्मकृमिवातविबन्धनुत्" भावप्र० । २अभिधे त्रि० मेदि० ।

विडम्बन न०वि-डिव+ल्युट् । १तिरस्करणे २अनुकरणे च । युच् । विडम्बनाप्यत्र स्त्री । "दृश्यन्ते तेऽन्यम् पुरतो विडम्बनेति" कुमारः ।

विडाल पुंस्त्री विड-कालनृ । खनामख्याते १पशुभेदे अमरः स्त्रियां ङीष् । २नेत्ररिपुरोगे मेदि० ३नयनौषधभेदे च भावप्र० ४विद्यायां स्त्री राजनि० ङीष् । संज्ञायां कन् । हरितालेन० । स्वार्थे क । विडाले पशौ पु० स्त्री० । संज्ञायां कन् । नेत्रौषधभेदे तद्विधिः भावप्र० उक्तो यथा "विड़ालको वह्निलेपो नेत्रे पक्ष्मविवर्जिते । तस्य मात्रा परिज्ञेया सुखालेपविधानवत्" । सुखालेपस्तु "अङ्गुलस्य चतुर्थांशो सुखालेपः कनिष्ठकः । मध्यमस्तु त्रिभागः स्यादुत्तमोऽङ्गुलको भवेत्" । स्थितिकालोऽपि तस्योक्तो यावत् कलको न शुष्यति । तेनापि शुष्कहीनः स्यात्तथा दूषयति त्वचम्" । स च "यष्टीगैरिकसिन्धूत्थदार्वीताम्रैः समांशकैः । जलपिष्टैर्वह्निलेपः सर्वनेत्रामयापहः" । ताम्र्यं रसाञ्जनम् । "रसाञ्जनेन वा लेपः पथ्याविल्वदलैरपि । वचाहरिद्राविश्वैर्वा तथा नागरगैरिकैः" ।

विड़ालपदक न० कर्षपरिमाणे भावप्र० कर्षशब्दे १७७४ पृ० दृश्यम् । [शब्दे २४१४ पृ० दृश्यम् ।

विडीन न०वि+डी-क्त । पक्षिणां गतिभेदे जटा० खगगतिशब्दे २४१४ पृ० दृश्यम् ।

विडुल पु० विड-कुलच् । वेतसवृक्षे हेमच० ।

वि(डो)डौजस् पु० विष-क्विप् विट् व्यापकमोजो यस्य पृषो० वा औत् । इन्द्रे अमरः ।

विड्गन्ध न० विष्ठा इव गन्धोऽस्य । विड्लवणे रत्नमाला ।

विड्लवण न० विडिव दुर्गन्धं लवणम् । खनामख्याते लवणभेदे रत्नमाला ।

विड्वराह पुंस्त्री० विट्प्रियो वराहः मध्य० । १ग्राम्यशूकरे जटा० स्त्रियां ङीष् । "लक्ष्मणं विड्वराहश्च" इति स्मृतेः ।

वितंस पु० वि+तनृञ्-कच्। यष्टिपाशबन्धनसाधने रज्जुप्रभृतौ भरतः।

वितण्डा स्त्री वि+तडि-भावे क। स्वपक्षाव्यवस्थापनेन परपक्षमात्रनिराकरणे यथाभेदे अमरः। २कपोलाके ललाटे ४करव्यां मेदि० ५दृष्यां हारा०।

वितण्डाकथालक्षणं गो० सू० यथा "स प्रतिपक्षस्थापनाहीनो वितण्डा" सू० "स जल्पो वितण्डा भवति किंविशेषयुक्तः। प्रतिपक्षस्थापनया हीनः। यौ तौ वादिप्रतिवादिनौ समानाधिकरणौ विरुद्धौ धर्मौ पक्षप्रतिपक्षाश्रयिणौ तयोरेकतरं वैतण्डिको न स्थापयतीति परपक्षप्रतिषेधेनैव प्रवर्त्तत इति। अस्तु तर्हि प्रतिपक्षहीनो वितण्डा यद्वै खलु तत्परप्रतिषेधलक्षणं वाक्यं स वैतण्डिकस्य पक्षः स हीनो साध्यं कञ्चिदर्थं प्रतिज्ञाय स्थापयतीति तस्मात् यथान्यायमेवास्तु" वा०भा०। इत्थं तु सूत्रमन्यथा व्याख्यातं यथा "क्रमप्राप्तां वितण्डां लक्षयति स इति। यद्यपि तल्लक्षणेन जल्पो न परामृष्टुं शक्यते जल्पस्य स्थापनाहेयवतः प्रतिपक्षस्थापनाहीनलक्षणविरुद्धत्वात् तथापि स्थापनाहेयवत्त्वं विहाय जल्पैकदेशः परामृश्यते प्रतिपक्षो द्वितीयपक्षः तथाच प्रतिपक्षस्थापनाहीना विजिगीषुकथा वितण्डेति। न च स्वस्य स्थापनीयाभावात् कथमियं कथा प्रवर्त्तनामिति वाच्यम् परपक्षखण्डनेन जयस्यैवोद्देश्यत्वात्। परे तु परपक्षखण्डनेनैव स्वपक्षसाधनादेव विजिगीषुसाधनाभावेऽपि न प्रवृत्त्यनुपपत्तिरिति वदन्ति"।

वितथ त्रि० वि+तन-कथन्। मिथ्याभूते पदार्थे अमरः। स्वार्थे यत्। वितथ्य तत्रैव। [उपादिको०

वितनु स्त्री वि+तन-कु दीर्घश्च। पक्षावटीशब्देनदीभेदे

वितरण न० वि+तॄ-ल्युट्। दाने अमरः।

वितर्क पु० वि+तर्क-भावे घञ्। १सन्देहे २ऊहे च मेदि०। ३भ्रमसञ्चके शब्दर०। ४अर्थालङ्कारभेदे अलङ्कारशब्दे ३०२ पृ० दृश्यम्।

वितर्दि स्त्री वि+हृद-इन् वा ङीप्। वेदिकायाम् अमरः। पृषो० वितर्द्विरप्यत्र स्त्री भरतः वा ङीप्।

वितल न० विशेषेण तलम्। पातालभेदे शब्दर०। पातालशब्दे ४२६६ पृ० दृश्यम्। २तलशून्ये त्रि०।

वितस्ति पुंस्त्री० वि+तस-क्तिच्। द्वादशाङ्गुलपरिमाणे विकृते सकनिष्ठाङ्गुष्ठप्रदेशपरिमाणे अमरः।

वितान न० वि+तन-कर्मभावादौ घञ्। १छत्तिभेदे मेदि० २अवसरे विश्वः। ३वस्त्रे ४विस्तारे अमर। ५चन्द्रातपे पुंन० ६यज्ञे ७मन्त्रे च त्रि०अमरः। ८मूल्ये त्रि० धरणिः। स्वार्थे क। चन्द्रातपे। संज्ञायां कन्। माहिष्मत्यां राजनि०। ६श्रौताग्नीयाद्याग्नीनां विस्तारे। वितानेन निर्वृत्तः ठक्। वैतानिक वितानसाध्ये अग्न्याधेयप्रभृतौ त्रि०"अग्न्याधेयप्रभृतीन्याहुः वैतानिकानि" आश्व० श्रौ० २सू०। "वितानेषु भवानि वैतानिकानि वितानसाध्यानीत्यर्थः। वितानशब्दोऽत्र सूत्रे भावसाधनोऽग्नीनां विस्तारवचनः" नारा०। वितायन्तेऽग्नयोऽस्मिन् वि+तन० आधारे घञ्। १०अग्निहोत्रादिकर्मणि। "अथैतस्य समाम्नायस्य वितानेयोगापत्तिं व्याख्यास्यामः" आ० श्रौ० १सू०। "विततानग्नयो यस्मिन्निति श्रौतकर्मजातमग्निहोत्रादि वितानशब्देनोच्यते" नारा०। तत्र साधु ठक्। वैतानिक अग्निहोत्रादिकर्मसाधने अग्नौ पु०। "वैतानिकेऽग्नौ कुर्यीत" मनुः।

वितानमूलक न० वितानाय मूलमस्य कप्। उशीरे राजनि०।

वितुन्न न० वि+तुद क्त। १सुनिषण्णके अमरः संज्ञायां कन्। २धान्यके २तत्रे च न० अमरः। ४भूम्यामलक्यां स्त्री राजनि०। संज्ञायां कन्। ५तामलक्यां पु० अमरः।

वित्त लाभे अदा० चु० उभ० सक० सेट्। वित्तयति ते अवित्तत् त वित्तापयतीत्यपि।

वित्त न० वित्त्यते लाभ्यते वित्त-घञ्। १धने अमरः। विदन्ति वा दृश्यन्ते जनैः। २ख्याते, ३विचारिते ४ज्ञाते ५लब्धे च त्रि०।

वित्ति स्त्री विद-क्तिन्। १ज्ञाने २लाभे ३विचारे च मेदि०।

वित्तेश पु० ६त०। कुबेरे।

वित्सन पु० विद-लाभे क्विप् तां सनोति सन-दाने अच् उपपदसमासः। [अवेविद्।

विद्य याचने भ्वा० आ० द्विक० सेट् अदित् न लुङः। वेद्यते

विद्युर पु० विद्य-उरच् किच्च। १चौरे २राक्षसे च उणा०।

विद्या स्त्री विद-यत्। गोत्रिक्षायाम् शब्दच०।

विद ज्ञानेचतुर्भ्यो ज्ञाने, वादे च सक० वामे अक० चु० उभ० सेट्। वेदयति ते अवीविदत् त।

विद लाभे त० उभ० सक० अनिट् मुचादि। विन्दति ते। छन्दसि अविदत्। अवित्त। विवेद विविदे। वित्तं वित्तम्।

विद ज्ञाने दिवा० भ्वा० अक० अनिट्। विन्ने अवित्त।

विद भावे दिवा० आ० अक० अनिट्। विद्यते अवित्त।

विद ज्ञाने अदा० पर० सक० सेट् । वेत्ति-वेद । अवेदीत् ।
विद पु० विद-क्विप् । १पण्डिते अमरः २बुधग्रहे च ज्यो० ।
विद पु० विद-क । १पण्डिते अमरः २बुधग्रहे च ज्यो० ।
विदंश पु० विदश्यतेऽनेन वि+दंश करणे घञ् । अवदंशे (चाटनि) राजनि० ।
विदग्ध त्रि०वि+दह-क्त । १नागरे त्रिका० २निपुणे राजनि० ३पण्डिते च शब्दच० । ४नायिकाभेदे स्त्री रसमञ्जरी । परकीयशब्दे ४२३२ पृ० दृश्यम् । ५विशेषेण दग्धे त्रि० ।
विदग्य पु० विद कथच् । १योगिनि, २क्षत्रिये च मेदि० ।
विदर न०वि+दृ-अच् । (स्फोटनेना) दृते शब्दर० भावे अप् २विदलीकरणे पु० शब्दर० । प्रा०व० । ३विगतभये त्रि० ।
विदर्भ पुंस्त्री० विगताः दर्भाः कुशायतः । देशभेदे कुण्डिननगरे (वऱ्हाडप्रांत) ।
विदल त्रि० विशेषेण दल्यते दल-घञर्थे क । १द्विधाभूते २दाडिमकलञ्जे ३वंशादिपात्रे ४क्षणदेरवयवे च न० । ५कञ्जायादौ न० अमरभरतौ ६रक्तकाञ्चने ७पिण्डके न० शब्दच० । दलिहृति (तेलोडि) स्त्री राजनि० । प्रा०व० । ९दलशून्ये त्रि० ।
विदा स्त्री विद-अङ् । १ज्ञाने २बुद्धौ च मेदि० ।
विदादि पु०अपत्यादौ "विदादिभ्योऽञ्" पा०अञ्प्रत्ययनिमित्ते शब्दगणे स च गणः पा० गणसूत्रे दृश्यः ।
विदार पु० वि+दृ-णिच् भावादौ अच् । १विदारणे २जलोच्छ्वासे च मेदि० २वृद्धे त्रिका० । ३विधाकरणे ।
विदारक पु०वि+दृ-णिच-ण्वुल् । १जलमध्यस्थतरुमूलादौ अमरः । २विदारणकर्त्तरि त्रि० शुष्कनदादेर्जलधारणयोग्ये गर्त्ते न० सर्वधरः । ३जलवल्मीके शब्दर० ।
विदारण न०वि+दृ णिच्-भावादौ ल्युट् । १भेदने २विड़म्बे च मेदि० । ३मारणे शब्दर० । ४युद्धे पुंस्त्री० मेदि० । ५कर्णिकारवृक्षे पु० शब्दच० ।
विदारिगो स्त्री वि+दृ-णिच् ङीष् । आलुपर्ण्याम् राजनि० ।
विदारी स्त्री वि+दारि+कर्मणि अच् गौ० ङीष् । १आलुपर्ण्याम् । (आलुपान) मेदि० २भूमिकुष्माण्डे च अमरः "पित्तहारी वातपित्तप्नो वल्या बृष्या रसायनी" राजव० । ३कण्डूरोगभेदे भावप्र० "सदाहतोदं त्वयथुं सुताम्रं सञ्जायते पूतिविगीर्णमांसम्। पित्तेन विद्यात् वदने विदारीं पार्श्वे विशेषात् वा तु येन शेते" यत्र पुरुषो येन पार्श्वेन विशेषात् च कण्डूयेन शेते तच्छ्रितं पार्श्वे सा विदारी भवतीत्यर्थः" ।
विदारीगन्धा स्त्री विदार्याः भूमिकुष्माण्डस्येव गन्धो यस्याः शालपर्ण्याम् (शालपान) अमरः ।
विदारु पु० वि+दृ-उन् । १क्रकचपक्षिणि २क्रकलासे हेमच० ।
विदाहिन् न० वि+दह-णिनि । दाहजनकद्रव्ये ।
विदित त्रि० विद-क्त । १ज्ञाते अमरः २प्राप्तिते च मेदि० ३कवौ पु० जटा० । भावे-क्त । ४विख्याते ४उपगमे शब्दच० ५प्राप्ते च । तदस्यास्ति अच् । ६ज्ञातरि त्रि० । "विदितः समायया विति" किरा० ।
विदिश् स्त्री विगता दिशौ । दिशोमध्ये अग्निनिर्ऋतिवायवीशानकोणचतुष्टये अमरः ।
विदु पु० विद-कु । वस्तिकुक्षिमध्यभागे अमरः ।
विदुर त्रि० विद-कुरच् । १नागरे २धीरे ३कौरवाणां मन्त्रिणि दासीगर्भजाते धर्मावतारभेदे च मेदि० भा०आ० १०६अ० ४ज्ञातरि च अमरः ।
विदुल पु० विद-कुलच् । १वेतसे २जलवेतसे मेदि० ३गन्धरसे च रत्नमा० । ४क्षत्रियभेदे भा० ७० १३२ अ० ।
विदूर न० विशिष्टं दूरम् । १अतिदूरे २तत्स्थे पदार्थे त्रि० । "विदूरे केयूरे कुरु" इति सा०द० ३परि० । ३वैदूर्यमणिसमवर्णाने पु० "विदूरभूनिर्नमेघशब्दात्" कुमारः ।
विदूरज न० विदूरे देशभेदे जायते जन-ड । वैदूर्यभेदौ ।
विदूरथ पु० [illegible] पुत्रभेदे २पौरवे नृपभेदे विष्णुपु० ४अ०
विदूराद्रि पु० विदूरे शैलेऽद्रिः पर्वतः । पर्वतभेदे । यत्र वैदूर्यमणि उत्पद्यते ।
विदूषक पु० विदूषयति वि+दूष-णिच-ण्वुल् । १भट्टारकसञ्ज्ञायभेदे २परनिन्दके त्रि० मेदि० ।
"भट्टारकस्य सञ्ज्ञाया विटचेटविदूषकाद्याः स्युः । भक्षा नर्मसु निपुणाः क्षपितवधूमानभञ्जनाः शूद्राः । कुसुमरसलाद्यभिधाः कर्मसुवेंगभाषाद्यैः । हास्यकराः, कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः" सा० द० ३प० ।
विदेश पु० विभिन्नो देशः । देशान्तरे "को विदेशः सविद्यानाम्" चाणक्यः ।
विदेह पु० विगतो देहः देहसम्बन्धो यस्य । १जनकाख्ये नृपे "क्रमभाग्ये ततो यज्ञे वशिष्ठस्यागमद्विधः । तं दृष्ट्वा कृपितः प्राह प्रत्याख्यातोऽसि प्रार्थिव! । यस्मात् तस्मात् त्वयेयं त्वां विदेहस्त्व भविष्यसि" वह्निपु० । तदीये २जनपदे च स च देशः मिथिलादेश इति ख्यातः । ३रूपविभागे ह०स०१४अ० । कूर्मविभागशब्दे दृश्यम् । ४तद्देशे स्त्रियां ङीप् न०व०स० ५कैवल्यमुक्तियुते ६देहसम्बन्धशून्ये

च वि० ४मिथिलायां स्त्री हेमच० । ५देहशून्ये देवे पात० सूत्रभाष्यादौ देवस्य विदेहत्वं समर्थितं यथा "भवप्रत्ययो विदेहप्रकृतिलयानाम्" सू० ।

"स खल्वयं द्विविध उपायप्रत्ययो भवप्रत्ययश्च तत्रोपाय प्रत्ययो योगिनां भवति" भवप्रत्ययो विदेहप्रकृतिलयानाम्" विदेहानां देवानां भवप्रत्ययः ते हि स्वसंस्कारमात्रोपयो(भो)गेन चित्तेन कैवल्यपदमनुभवन्तः स्वसंस्कारविपाकं तथाजातीयकमतिवाहयन्ति" भाष्यम् । "भवन्ति जायन्तेऽस्यां जन्तव इति भवोऽविद्या स खल्वयं भवः प्रत्ययः कारणं यस्य निरोधसमाधेः स भवप्रत्ययः । तत्र तयोर्मध्ये उपायप्रत्ययो योगिनां मोक्षमाणानां भवति विशेषविधानेन शेषस्य सुसूक्ष्मत्वं निषेधति । केषां तर्हि भवप्रत्ययः । इत्यत्र श्लोकेनोत्तरम् । विदेहाश्च प्रकृतिलयाश्च तेषामित्यर्थः । तदु व्याचष्टे विदेहानां देवानां भवप्रत्ययः भूतेन्द्रियाणामन्यतममात्मत्वेन प्रतिपन्नानासुपासनया तद्वासनावासितान्तःकरणाः पिण्डपातानन्तरमिन्द्रियेषु भूतेषु वा लीनाः संस्कारमात्रावशेषतया षाट्कौशिकशरीररहिताः विदेहाः ते हि संस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तः प्राप्नुवन्तः विदेहाः । व्यष्टित्वकत्वञ्च कैवल्येन सारूप्यम् । स्वाधिकारसंस्कारशेषता च वैरूप्यम् । संस्कारमात्रोपभोगेनेति क्वचित् पाठः तस्यार्थः संस्कारमात्रमेवोपभोगो यस्य न तु चित्तवृत्तिरित्यर्थः । प्राप्ताधयः संस्कारविपाकं तथाजातीयकमतिवाहयन्ति व्यतिक्रामन्ति पुनरपि संस्कारे विशन्ति तथा च वायु प्रोक्तं "दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः । भौतिकास्तु शतं पूर्णम्" विवरणम् । तेषां देवानां मध्ये यस्य विवेकसाक्षात्कारस्तस्य कैवल्यप्राप्तिः "योगो देवानां प्रत्यबुध्यत स विमुच्यते" इति श्रुतेः । मीमांसासिद्धे देहशून्ये ५व्यचेतने मन्त्रात्मके देवे च । व्यवहारशब्दे ४५१ पृ० दृश्यम् ।

विदेहकैवल्य न० कर्म० । "न तस्य प्राणा उत्क्रामन्ति इहैव समवलीयन्ते" श्रुतौ जीवन्मुक्तस्य देहपातानन्तरं निर्वाणमोक्षे ।

विदेहकैवल्यनिष्पत्तिप्रकारादि भा० सू० भाष्ययोरुक्तं यथा "भोगेन त्वितरे क्षपयित्वा सम्पद्यते" सू० । अनारब्धकार्ययोः पुण्यपापयोर्विद्यासामर्थ्यात् क्षय उक्तः इतरे त्वारब्धकार्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्म सम्पद्यते "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति। "ब्रह्मैव सन् ब्रह्माप्येति" इति चैवमादिश्रुतिभ्यः । ननु सत्यपि सम्यग्दर्शने यथा प्राग्देहपातात् भेददर्शनं द्विचन्द्रदर्शनन्यायेनानुवर्त्तमेवं पश्चादप्यनुवर्त्तेत न, निमित्ताभावात् उपभोगशेषत्वपक्षे हि तत्रानुवृत्तिनिमित्तं न च तादृशमस्ति किञ्चित् कारणम् । नन्वपरः कर्माशयोऽभिनवमुपभोगभारप्यते न, तस्य दग्धबीजत्वात् । मिथ्याज्ञानावष्टम्भं हि कर्मान्तरं देहपाते उपभोगान्तरमारभते तच्च मिथ्याज्ञानं सम्यग्दर्शनेन दग्धमिति साध्वेतत् आरब्धकार्यत्वे विदुषः कैवल्यम् भा० । तत्रैव ४पादे च सू०भाष्ययोरुक्तं यथा "सम्पद्याविर्भावः स्वेनशब्दात्" सू० "एवमेवैष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" श्रुतिर्विषयवाक्यं तत्र पूर्वपक्षं दर्शयित्वा सिद्धान्तितं भाष्यकृता यथा "केवलेनैवात्मनाविर्भवति न धर्मान्तरेणेति कुतः ? स्वेन रूपेणाभिनिष्पद्यते इति स्वशब्दात्" भा०, "मुक्तः प्रतिज्ञानात्" सू० । "योऽतोभिनिष्पद्यते इत्युक्तः स पूर्वबन्धविनिर्मुक्तः शुद्धेनैवात्मनाविर्भवति" कुतः ? प्रतिज्ञानात् । "एतं त्वेव ते भूयोऽनुव्याख्यास्यामः" इति प्रतिज्ञातम् "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति चोपन्यस्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः" इति (श्रुतेः) भा० । "अविभागेन दृष्टत्वात्" सू० । "अविभक्त एव परेणात्मना युक्तोऽभिनिष्पद्यते कुतः ? दृष्टत्वात्" "यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति" एवं मुनेर्विजानतः आत्मा भवति गौतम !" इत्येवमादीनि सूक्तस्वरूपनिरूपणपराणि वाक्यान्यविभागमेव दर्शयन्ति नदीसमुद्रादिनिदर्शनानि च" भा० । विवेकचू० स्पष्टमुक्तं यथा "पाषाणदग्धवर्णधान्यकटाम्बरादा दग्धा भवन्ति हि स्वैव यथा तथैव । देहेन्द्रियाद्यमनआदिसमस्त दृश्यम् ज्ञानाग्निदग्धसुप्यानि परात्मभावम् । विलक्षणं यथा ध्वान्तं लीयते भानुतेजसि । तथैव सकलं दृश्यं प्रत्यात्मनि विलीयते । घटे नष्टे यथा व्योम व्योमैव भवति स्फुटम् । तद्वदेवोपाधिविलये ब्रह्मैव ब्रह्मवत् स्वयम् । क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले । संयुक्तमेकतां याति तथात्मन्यात्मविन्मुनिः । एवं विदेहकैवल्यं सन्मात्रत्वमखण्डितम् । ब्रह्मभावं प्रपद्यैव यतिर्नावर्त्तते पुनः । सदात्मकत्वविज्ञानदग्धाऽविद्यादिबन्धनः । असुप्त्र ब्रह्मभूतत्वात् ब्रह्मणः कुत उद्भवः" ।

"विसृजस्य विसृज्यते" न तस्य प्राणाश्चुत्क्रामन्ति इहैव समवलीयन्ते" इत्यादौ श्रुतयश्चात्र प्रमाणम्।

विद्ध त्रि॰ व्यध-क्त। १छिद्रिते अमरः। २क्षिप्ते ३खड्गे ४बाधिते मेदि॰ ५ताडिते च।

विद्धकर्ण पु॰ विद्धः कर्ण इव पत्रमस्य। पाठायाम् (आकनादि) हिरूपकोषः। स्त्रीत्वमपि तत्रैव अमरः। ङीप्। स्वार्थे क। तत्रार्थे स्त्री शब्दर॰। [पदार्थे त्रि॰।

विद्यमान पु॰ विद्-शानच्। १वर्त्तमानकाले, २तद्वृत्तौ

विद्या स्त्री विद्-क्यप्। १ज्ञाने। २तत्त्वसाक्षात्कारे "विद्यया मृतमश्नुते" इति श्रुतिः। ३दुर्गायां शब्दच॰ ४गणिकारिकाहृच्चे शब्दच॰। तन्त्रोक्ते ५देवीमन्त्रे च। "शतलक्षप्रजप्तापि तस्य विद्या न सिध्यतीति" श्यामारहस्यः।

६विद्याहेतौ शास्त्रे "अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः। धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश। आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः। अर्थशास्त्रं चतुर्थञ्च विद्या ह्यष्टादशैव ताः" प्रा॰ त॰ विष्णुपु॰। विद्याभेदे देवताभेदाः हेमा॰ ब्र॰ विष्णुधर्मोत्तरे उक्ता यथा "ऋग्वेदस्तु स्मृतो ब्रह्मा यजुर्वेदस्तु वासवः। सामवेदं तथा विष्णुः शम्भुश्चाथर्वणो भवेत्। त्रिधा-प्रजापतिर्ज्ञेया कल्पो ब्रह्मा प्रकीर्त्तितः। सरस्वती व्याकरणं निरुक्तं वरुणः प्रभुः। छन्दो विष्णुश्चथैवाग्निर्ज्योतिषं भगवान् रविः। मीमांसा भगवान् सोमो न्यायमार्गः सकीरणः। धर्मश्च धर्मशास्त्राणि पुराणञ्च तथा मनुः। इतिहासं प्रजाध्यक्षो धनुर्वेदः शतक्रतुः। आयुर्वेदस्तथा साक्षाद्देवो धन्वन्तरिः प्रभुः। कलावेदो महीदेवी नृत्यशास्त्रं महेश्वरः। सङ्कर्षणः पञ्चरात्रं रुद्रः पाशुपतं तथा। पातञ्जलमनन्तश्च सांख्यञ्च कपिलो मुनिः। अर्थशास्त्राणि सर्वाणि धनाध्यक्षः प्रकीर्त्तितः। कलाशास्त्राणि सर्वाणि कामदेवो जगद्गुरुः। अन्यानि यानि शास्त्राणि यत्कर्माणि प्रचक्षते। स एव देवता तस्य शास्त्रं कर्म च दैववत्" । श्रुतौ त विद्याभेदः द्विविधः पराऽपराभेदात् उक्तः। यया ब्रह्मावगमः सा परा "ययाऽक्षरमधिगम्यते सा परेतिश्रुतेः"। ऋग्वेदादिलक्षणा अपरा सा च अध्ययनाध्यापनरूपा।

विद्याचन(ण) त्रि॰ विद्यया ख्यातः। विद्या+चन(ण) विद्यया विख्याते। [ख्याते।

विद्याचक्षु पु॰ विद्यया विख्यातः विद्या+चक्षु। विद्यया

विद्याद्दल पु॰विद्यायै ज्ञानाय दल्यतेऽसौ। भूर्जवृक्षे शब्दच॰

विद्यादान न॰ ६त॰। १अध्यापने २पुस्तकादिदाने च।

"विद्यादानञ्च अध्यापनेन व्याख्यया विलिख्यार्पणेन च भवतीति ज्यो॰त॰रघु॰। तत्राध्यापनविधिः श्रुतौ यथा "योऽधीत्यार्टिभ्यो विद्यां न प्रयच्छेत् स काको वान्यक्षिनू स्यात् श्रेयसो द्वारमपाहणुयात् अनध्यापने दोषश्रवणात् तस्यावश्यकत्वं गम्यते। "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" इत्यादिश्रुतौ च अध्यापनाविधिलाभः। व्याख्यानादिविधिलाभस्तु "अज्ञानतिमिरोऽपेतान् छन्दोज्ञपटलान्वितान्। निरामयान् यः कुरुते शास्त्राञ्जनशलाकया। इह कीर्त्तिं राजपूजां लभते सद्गतिं च सः" ज्यो॰त॰। तद्धेतुपुस्तकादिदानस्यापि वक्ष्यमाणप्रमाणात् तत्र ज्ञानरूपविद्यादानप्रकारः हेमा॰दा॰वह्निपु॰उक्तो यथा "वाजपेयसहस्रस्य सम्यगिष्टस्य यत् फलम्। तत्फलं समवाप्नोति विद्यादानाच्च संशयः। तस्माद्देवाग्रये नित्यं धर्मशास्त्रस्य वा श्रुतेः। पठनं कारयेत् राजन्! यदीच्छेत् धर्ममात्मनः। गोभूहिरण्यवासांसि शयनान्यासनानि च। प्रत्यहं तेन दत्तानि भवन्ति नृपसत्तम!। धर्माधर्मौ न जानाति लोकोऽयं विद्यया विना। तस्मात् सदैव धर्मात्मन्! विद्यादानरतो भवेत्। वेदशास्त्रहस्तो यदि नैव नृपोत्तम!। ततोऽज्ञानतमोऽन्धस्य कावस्था जगतो भवेत्। ब्रह्मादयः सुराः सर्वे ऋषयो दग्धकिल्बिषाः। मनुमुखाः पितरश्चैव विद्यादाने प्रतिष्ठिताः। चतुर्युगानां राजेन्द्र! एकसप्ततिसंख्यया। वेदशास्त्रप्रदः स्वर्गे पूज्यते सुरसत्तमैः। इत्युपक्रमे "दानं विशेषफलदं जगतीह नान्यद् विद्यां विहाय वदनाज्जलतार्धवासाम्। गोभूहिरण्यगजवाजिरथादि सर्वं तां यच्छतां किमिति भूप! भवेन्न दत्तम्"। तत्रैव नन्दिपु॰ "अध्यापयेच्छुभान् शिष्यानभिजातान् सुमेधसः। एवं विद्याप्रदानं हि सर्वदानोत्तमोत्तमम्। सर्वदा सर्ववर्णानामयं च ध्रुव उत्तमः। अनेन विधिना दत्त्वा विद्यां पुरुषपरो नरः"।

स्वयंविद्यादानासामर्थ्ये आ॰ त॰ भविष्यत्पु॰ उक्तं यथा "अध्यापकस्य यो वृत्तिं दत्त्वाऽध्यापयति द्विजान्। किं न दत्तं भवेत्तेन धर्मकामार्थमिच्छता"। तद्धेतुभूतपुस्तकादिदानमपि विद्यादानं हेमा॰ दा॰ उक्तं यथा नन्दिपु॰ "विद्या च मुख्या दानानां गुरुतोऽस्य विधिं बुधः। श्रुत्वा विद्याञ्च विधिवत् गुरुया भावितात्मना। सत्पात्रेभ्यश्च तां दद्यात् विशेषात् गुणशालिषु। उप-

योग्यञ्च यद् यस्य तत्तस्य प्रतिपादयेत्"। ततः पुस्तकलेखनप्रकारस्तद्दानविधिश्च विस्तरेणोक्तस्तत्र द्रष्टव्यः। विद्योपयोगिद्रव्यादिदानेऽपि विद्यादानं भवति यथोक्तं हेमाद्रौ देवीपु० "आत्मवित्तानुसारेण विद्यादानं करोति यः। यत्साध्यं फलमाप्नोति व्याघ्रस्तत्र न संशयः। स्त्री तथानेन विधिना विद्यादानफलं लभेत्। भर्त्ता चैवानुज्ञाता विधवा च तदर्हयेत्"। विधानमाह "विद्यार्थिने सदा दद्याद् वस्त्राभ्यङ्गञ्च भोजनम्। खटिका सुदकं दीपं यस्मात्तैलं विना न सः। लेखनीघटितं तीक्ष्णं मसीपात्रन्तु लेखनीम्। दत्त्वा तु लभते वत्स! विद्यादानमनुत्तमम्। पुस्तकस्तरणं दत्त्वा सुप्रमाणं सुशोभनम्। विद्यादानमवाप्नोति रूपवत्वञ्च बुद्धिमान्। यत्फलं त्वासनस्यैव दण्डासनमथापि वा। विद्यावाचनशीलाय दत्तं भवति राज्यदम्। अञ्जनं नेत्रपादानां दत्तं विद्यापरायणे। भूमिमर्द्धञ्च जैत्रञ्च स्वर्गराज्यफलप्रदम्। यस्य भूम्यां स्थितो नित्यं विद्यादानं प्रवर्त्तयेत्। तस्यापि भवति स्वर्गस्तत्प्रभावान्न संशयः"। "येऽपि पत्रं मसीपात्रं लेखनीं सम्पुटादिकम्। दद्युः शास्त्राभियुक्ताय तेऽपि विद्याप्रदायिनाम्। यान्ति लोकान् शुभान् मर्त्याः पुण्यभाजो नराधिप!"। नान्दिपु० "विद्यादानमवाप्नोति प्रदानात् पुस्तकस्य च। शिल्पानि शिक्षयेद् यस्तु पौण्डरीकफलं लभेत्। शिल्पभाण्डप्रदानेऽपि तद्विद्यादानजं फलम्। अर्हितेषु प्रदत्तस्य तथा कृत्वा निवारणम्। विद्यादानफलं प्रोक्तं नात्र कार्य्या विचारणा। पापदत्तस्य च तथा दत्त्वा चैव परां गतिम्। विद्यादानफलं प्राप्य स्वर्गलोके महीयते। येन जीवति भाण्डेन तत्रैव तद्भाण्डदायकः। सर्वकामसमृद्धस्य यस्य फलमश्नुते" विष्णुधर्मो०। तत्रैव स्कन्दपु० विद्यादानोपक्रमे "पुस्तकस्तरणं दत्त्वा सदृशं तत्प्रमाणतः। तदासनं वितानं वा शिवलोके महीयते। यः शोणसदृशं निम्नखातं मूलक्षणम्। दद्यात् सम्पुटकं कृत्वा चर्मणा वापि निर्मितम्। शिवज्ञानाभियुक्ताय तदध्ययनहेतुना। सुकृष्णं फलकं वापि विद्यादानफलं लभेत्। यः सौवर्णं सुसम्पूर्णं सर्वरत्नोपशोभितम्। सन्निधानं समङ्गुष्ठं विद्याकोशसमाश्रयम्। कारयेद्वापि रौप्येण ताम्रेण चतुरस्रकम्। कांस्यारकूटं लोहं वा दारुवंशादिनिर्मितम्। सुकषायातिरिक्तेन चर्मणाभिनवेन च। अन्तर्बहिश्च मठयेत् विद्यादाने नवं गृहम्। सुदृढं कटकोपेतं दृढस्तम्भनिवेशनम्। कुर्य्यात्तालकसंयुक्तं विद्यावर्त्तिकरण्डकम्। एवं वित्तानुसारेण कारयित्वा गृहं नृपः। विद्यासिंहासनं तत्र संपूज्य विधिवद्बुधः। तस्मिन् पुस्तकशब्देन विद्याकोशगृहं न्यसेत्। एवं यः शिवविद्यायाः कुर्य्यादायतनं शुभम्। स सकलः पातकैः सर्वैर्विद्यादानफलं लभेत्। विद्यामण्डलकं कृत्वा विद्याव्याख्यानमण्डपे। तत्राभ्यर्च्च्य शिवां विद्यां तद्व्याख्यां शृणुयात्ततः। सोऽपि याति शिवस्थानं कार्यकालसमन्वितम्। अनेन विधिना ज्ञानं यः शृणोति प्रवक्ष्यतः। स साम्राज्यश्रियं सौख्यं देहान्ते मुक्तिमाप्नुयात्"। तत्रैव देवीपु० "तस्मात् सर्वप्रयत्नेन विद्या देया सदा नरैः। इहैव कीर्त्तिमाप्नोति मृतो याति परां गतिम्। यस्तु देव्या गृहे नित्यं विद्यादानं प्रवर्त्तयेत्। स भवेत् सर्वलोकानां पूज्यः पूज्यपदं व्रजेत्"। वराहपु० "लेखापयित्वा तच्छास्त्रं देयं गुणवते सदा। तपस्विने, धर्मरते प्रतिपालनतत्परे। वस्त्रयुग्मेन संवीतं पुस्तकं प्रतिपादयेत्। वाचकं पूजयेच्चापि वस्त्रालङ्कारभूषणैः। अनेनैव विधानेन विद्यादानफलं लभेत्"।

विद्याधन न० विद्यया लब्धं धनम्। विद्यया लब्धे "उपन्यस्ते तु यल्लब्धं विद्यया प्रणपूर्वकम्। विद्याधनन्तु तद्विद्यात्" इति, "शिष्यादार्त्विज्यतः प्राप्तं सन्दिग्धप्रश्ननिर्णयात्। अज्ञानसंशयोच्छेदाल्लब्धं प्राध्ययनात्तु यत्। विद्याधनन्तु तत् प्राहुः" इति "शिल्पिष्वपि हि धर्मोऽयम्" इत्युपक्रम्य "परं निरस्य वादेन विद्यया द्यूतपूर्वकम्"। विद्याधनं तु तद्विद्यादित्युक्ते च धने।

विद्याधनविभागे विशेषः "विद्याधनं तु यद् यस्य तत्तस्यैव धनं भवेत्। कुटुम्बं बिभृयाद् भ्रातुर्यौ विद्यामधिगच्छतः। भागो यवीयसां तत्र यदि विद्यानुपालिनः" दायभा०। दायतत्त्वे तु "भागं विद्याधनात्तस्मात् स लभेतेत्यृतौ सनृ" इति पाठः। दायभा० नारदवाक्ये "देयं वैद्येन तद्धनम्" पाठः। "परभक्तोपयोगेन विद्या प्राप्ताऽन्यतस्तु या। तया लब्धं धनं यत्तु विद्यालब्धं तदुच्यते" दाय०त० कात्यायनः। "अन्यतः पितृमातृकुलव्यतिरिक्तात्" रघु०। "नाविद्यानां तु वैद्येन देयं विद्याधनात् क्वचित्। समविद्याधिकानां तु देयं वैद्येन तद्धनम्" "कुले ऽवनीतविद्यानां भ्रातॄणां

विद्वलोऽपि वा। यौर्यवाप्तं तु यदिदं तद्विमाख्यं कृष्णजिनः" दायतः।

विद्याधर पु० विद्यां मन्त्रादिकं धरति धृ-अच्। १देवयोनिभेदे अमरः। २विद्याधारके त्रि०।

विद्यारम्भ पु० ६त०। पञ्चमवर्षे शिशोः अक्षरे विद्यारम्भे तत्काखादि० ज्यो० त० उक्तं यथा

"संप्राप्ते पञ्चमे वर्षे अग्रतश्च जनार्दने। यदौ प्रतिपदश्चैव वर्ज्यं वित्वा तथाष्टमीम्। रिक्तां पञ्चदशीं चैव यौरिभौमदिनं तथा। एवं शुभदिने काले विद्यारम्भं तु कारयेत्। पूजयित्वा हरिं लक्ष्मीं देवीमपि सरस्वतीम्। अविद्यास्तिमिरान्धस्य ज्ञानं विद्या विशेषतः" विष्णुध०। "अष्टचरशिरमुनाधीशतत्वदौष्ण्यशिषु च हरिबोधे शुक्लजीवार्कवारे। उदितवति च लग्ने केन्द्रकोणेषु सौम्यैरपठनदिनवर्गं पाठयेत् पञ्चमेऽब्दे" दीपिका। "विद्यारम्भे गुरुः श्रेष्ठो मध्यमो भृगुभास्करौ। मरणं शनिभौमाभ्यामविद्या बुधसोमयोः" मदनपा०। "विद्यारम्भः शुभग्रहयुक्तसौम्यदिनादौ वर्षं वाप्युत्तिरनपि करोत्यंशुयानू मध्यगोऽत्र। नोक्षारांशौ सवति अडता पञ्चता मूर्तिपुत्रे जायाक्षत्रावपि च सुतः सौम्यैस्तत्थेवमाद्याः" रत्नमाला। "रोद्रं सौम्यं तत्रयं केन्द्रकोणेन्दुयुक्तः। पूर्वैकेन्द्रूक्षुद्रो च विद्यारम्भः प्रशस्तः"। "प्राक्तनो गुरुरायोनो वक्ष्यामिसर्वं शिशुम्। अध्यापयेत्र प्रवरं हिताप्तोभिः समन्वितम्। उडुपतिः। तद्विधिः ज्ञानतत्त्वे दृश्यः। अविद्या बुधसोमयोरिति बहुविद्याविषयम् बुधोक्तं दोषिकायाम् "अहिनिशुतत्तमाचैज्ञातिचित्तम्भिपैमधुपरिवेषमूलाद्यो-त्तुलाज्ञानस्थेषु। शिवनिधिबुधाद्दे विष्णुबोधे त्रिपौषे शुक्लपञ्चमितिथौ कायस्थिताप्रदानम्" तत्राक्षरपक्षे विद्यारम्भो च सम्यक्षुद्धिरावश्यकीत्याह पी० धा० कर्त्रिंशः "शुभाः पापाश्च रन्ध्रस्थाः सर्वे नेष्टाः सदा बुधाः। ज्ञात्वाप्यज्ञानकर्मस्था पापाः सर्वं शुभावहाः। शुभाः केन्द्रत्रिकोणस्थाः सकलाकलनाः शुभाः। सर्वे कार्ये शुभाः शुद्धपक्षके त्रिशोः"। अक्षरपक्षं विद्योपक्रमपरम्" उभयमपि उत्तरायणस्थैव ग्राह्यता। "षष्ठगमने भास्करे पञ्चमेऽब्दे" वसिष्ठोक्तेः।

विद्युत् स्त्री विद्योतते वि+द्युत-क्विप्। १तडिति अमरः २सम्यादाच्च विनतायाम् यस्य प्रा०व०। विद्युन्मे त्रि०मेदि०। विद्युतश्च षड्विधाः "अरिष्टनेमिपञ्चोक्तमपक्षाभोद्र घो-रूप। यज्ञपुरुषश्च विद्युत्प्रभा विद्युतः स्मृताः"। तत्र "वातायं वपिवा विद्युदातपाय हि लोहिता। पीताः सर्पोव विज्ञेया दुर्भिक्षावाहिताः भवेत्" ज्यो०। आन्तरिक्षोपदूषविद्युत्कारणञ्च श्रीपतिनोक्तं यथा "निर्मोलोल्काघनसुरधनुर्विद्युतश्च कुवातोः संहत्यान्ते खननरपरीवेषपूर्वोक्तयान्ये" "सुजलजलधिमध्ये वाडवोऽग्निः स्थितोऽन्तात् हविषभरनिषन्नात् विद्युतस्तस्कृ, शिक्षाः"। तदन्निपातरूपवज्राग्निपातसम्भवकारणं अक्षसादैद्युतं तेजः पार्थिवं पक्वमिश्रितम्। वात्यावद् भ्रमदाघाते प्रतिकूलानुकूलयोः। वाय्वोस्तत् पतति प्रायो सूक्ष्मरूपाण्यवर्षके। यतः प्राहुर्हि नैवेते पांसवः प्रवरन्ति हि। तत् त्रेधा पार्थिवं चाम्बं तैजसं तत्प्रभेदात्। ततो निर्झरदाहैश्च भूमिस्थैरनुभूयते"।

विद्युत्प्रिय न० ६त०। विद्युद्दाहयुक्ते कांस्ये धातौ हेमच०।

विद्युन्माला स्त्री अष्टाक्षरपादके छन्दोभेदे। "नो नो गा गो विद्युन्माला" छन्दोम०। [प्रसिद्धे रत्नमालाभेदे च।

विद्युन्मालिन् पु० राक्षसभेदे भाग०१।७ अ०। १राक्षसभेदे।

विद्रु न० व्यध-रक् दान्तादेशः। छिद्रे मन्त्रच०।

विद्रधि पु० वेत्त्यनेन विद्रु कृदव हुलक्षि व्यध-कि पृषो० रोगभेदे। तस्यनिदानादि भावप्र० उक्तं यथा

"तत्र विद्रधेः वक्ष्यामिपूर्वं आमाम्बं तस्यलक्षणाह। "अपक्वलक्षणैर्दोषैः प्रदुष्टास्त्वक्षसाश्रिताः। दोषाः शोणं सनैर्दाहमयन्त्यच्छिता भृशम्। महामूलं कृशावन्तं वृत्तं वाप्यथ वावतम्। स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः" अस्त्रिक्षमाश्रिता दोषा इति पक्वलक्षणयोगाद् विद्रधेर्भेदलक्षणम्। यतो व्रणशोथे दोषा आमक्षिक्षमाश्रवनियमो नास्ति इति व्रणशोथात् दाहः अधु। आयतस्तीक्ष्णः। षड्विधत्वं विद्रधीति। "व्रणा दोषैः समस्तैश्च क्षतेनाप्यक्षजा तथा। यस्मात् तस्मात्तमेव लक्षणं वक्ष्यते" अथ विशिष्टानि लक्षणानि। तत्र वातिकस्य लक्षणमाह "अल्पोऽरुजो वा विषमो श्यावस्तम्भरुजान्वितः। चिरोत्थानप्रपाकश्च विदधीनसम्भवः" विषमो श्यावः अरुजमस्या अयं मतः। चिरोत्थानप्रपाकः चिराद्विलम्बादुत्थानमङ्कुरितः प्रपाकश्च यस्य स। अथ पैत्तिकमाह "पक्वोदुम्बरसङ्काशः स्रावो वा ज्वरदाहवान्। चिरोत्थानप्रपाकश्च विद्रधिः पित्तसम्भवः"। अथ श्लैष्मिकमाह। "गुरुवः पाण्डुः शीतः स्निग्धोऽल्पवेदनः। चिरोत्थान-

प्रकाश्च विद्रधिः कफसम्भवः। तनुपीतासितास्रावैर्नानास्रावाः क्रमशोमताः"। अथ सान्निपातिकमाह। "नानावर्णरुजास्रावो घाटालो विषमो महान्। विषमं पच्यते वापि विद्रधिः सान्निपातिकः"। नाना अनेकविधाः वर्णाः कृष्णरक्तपाण्डुरूपाः। रुजा तोददाहकण्डादिरूपाः स्रावाः तनुपीतसिताः यस्य सः। घाटालः घाटाकोटिः साऽस्यास्तीति घाटालः अत्यच्छ्रावाप इत्यर्थः। विषमः निम्नोन्नतः। विषमं पच्यते चिराच्चिरगम्भीरोत्तानोद्भानुर्ध्वभेदेन विषमं यथा स्यात्तथा पच्यते। अथाभिघातजस्यागन्तोः विद्रधेः सम्प्राप्तिपूर्वकं लक्षणमाह। "तैस्तैर्भावैरभिहते क्षते वाऽपथ्यकारिणाम्। क्षतोष्मा वायुविक्षतः सरक्तं पित्तमीरयेत्। ज्वरस्तृषा च दाहश्च जायते तस्य देहिनः। आगन्तुर्विद्रधिर्ह्येभिः पित्तविद्रधिलक्षणैः"। तैस्तैर्भावैः काष्ठलोष्टपाषाणादिभिः अभिहते यदा रक्तस्रावो भवति। तथाभिहते क्षते क्षते वा अथ वा खड्गशूकादिभिः क्षते यथारक्तस्रावो भवति तथा क्षते क्षते क्षतोष्मा। अत्र क्षतशब्देन क्षतमात्रं उच्यते तेनाभिहतक्षतयोरुभयोरप्यूष्मा वायुना विक्षतः अभिघातात् क्षते रक्तक्षयात् कुपितेन वायुना प्रक्षतः। देहिनः कोपयेत्। अथ रक्तजमाह "कृष्णस्फोटाहतः श्यावस्तीव्रदाहरुजाज्वरः। पित्तविद्रधिलिङ्गेषु रक्तविद्रधिरुच्यते" अधिष्ठानविशेषेण लिङ्गविशेषं बोधयितुमाह्य० नरान् विद्रधीनाह "आभ्यन्तरानन्तर्मूर्ध्नि विद्रधीन् परिचक्षते। गुर्वसात्म्यविरुद्धान्नशुष्कशाकान्नभोजनाः। अतिव्यवायाभिघाताद्व्युषितादिभिः। पृथक् समूय वा दोषाः कुपिता गुल्मरूपिणम्। वङ्क्षणोक्तवत्समुत्थानमन्तः कुर्वन्ति विद्रधिम्। गुदे वस्तिमुखे नाभ्यां क्लोमि वङ्क्षणयोस्तथा। क्षतयोः प्लीह्नि यकृति हृदि वा क्लोम्नि चाप्यथ। एषां लिङ्गानि जानीयाद्वातादिविद्रधिलक्षणैः" समूय वा मिलित्वा वा। समस्तैः समस्तलक्षणैः। स्थानविशेषेण रूपविशेषमाह "गुदे वातनिरोधस्तु वस्तौ कृच्छ्रालमूत्रता। नाभ्यां हिक्का भृशार्त्तिश्च कुक्षौ मारुतकोपनम्। कटिपृष्ठग्रहस्तीव्रो वङ्क्षणोत्थे तु विद्रधौ। क्षतयोः पार्श्वसङ्कोचः प्लीह्नि [illegible] रोधनम्। सर्वाङ्गग्रहस्तीव्रो हृदि क्लमश्च जायते। श्वासो यकृति हिक्का च क्लोम्नि मेघीयते पयः" स्थानसामान्यमाह "नाभेरुपरिजाः पक्वा यान्त्यूर्ध्वमिति स्रावसामान्यमाह "नाभेरुपरिजाः पक्वा यान्त्यूर्ध्वमिति स्रवः" कक्षादिजाताः यान्ति स्रवन्ति ऊर्ध्वमुखाः, इतरे वङ्क्षणादिजाः अधः गुदात्। नाभिजत्वभ्यां मार्गाभ्याम्। तथा च हारीतः ऊर्ध्वं प्रभिन्नेषु सुदारुणां प्रवर्त्ततेऽस्रमुसहितो हि पूयः। अधः प्रभिन्नेषु तु पायुमार्गाद् द्वाभ्यां प्रवृत्तिस्त्विह नाभिजेषु" अथ साध्यत्वादिक्रमाह "अधःक्षतेषु जीवेत्तु क्षतेषूर्ध्वं न जीवति। हृन्नाभिवस्तिवर्जेषु तेषु भिन्नेषु वाग्यतः। जीवेत्कदाचित् पुरुषो नेतरेषु कदाचन"। हृन्नाभिवस्तिवर्जेषु प्लीहक्लोमादिजाः तेषु तथाभिन्नेषु न जीवेत् हृदादीनां मर्मत्वात्। अतएव भोजः "असाध्यो मर्मजो ज्ञेयः पक्वोऽपक्वश्च विद्रधिः। सन्निपातोत्थितोऽप्येवं पक्व एव हि वस्तिजः। त्वग्जो नाभेरधोजश्च साध्यो यश्च समोद्भवः। अपक्वश्चैव पक्वश्च साध्यो नोपरि नाभितः। आध्मानं बद्धनिष्यन्दं हृद्विड्विक्काटोपान्वितम्। रुजाश्वासप्रसक्तायुक्तं विद्रधिनाशयेन्नरम्" अथ वाह्यविद्रधीनां साध्यासाध्यत्वमाह "साध्या विद्रधयः पञ्च विवर्ज्याः सान्निपातिकः। आमपक्वविदग्धत्वं तेषां ज्ञेयञ्च शोथवत्" शोथवत् वक्ष्यमाणव्रणशोथवत्"।

विद्रधिनाशन पु० विद्रधिं नाशयति नश-णिच्-ल्यु। शोभाञ्जने त्रिका०। [रुजरणे च शब्दमा०।

विद्रु(द्रा)व पु० विद्रु-अप् घञ् वा। १पलायने अमरः

विद्रुत त्रि० वि+द्रु-क्त। १प्राप्तद्रवे २पलायिते च अमरः।

विद्रुम पु० विशिष्टो द्रुमः। १प्रवालरत्नहेतुवृक्षे मेदि०।

विद्रुमलता स्त्री विद्रुमस्य लतेव। नलीनामगन्धद्रव्ये मेदि० स्वार्थे क अत इत्त्वम्। विद्रुमलतिका तत्रैव। [द्रुबे विद्रुधि

विद्वत्कल्प त्रि० ईषदसमाप्तो विद्वान् विद्वस्+कल्पप्। ईषद्विद्वत्तम पु० अतिशयेन विद्वान् विद्वस्+तमप्। अतिपण्डिते तरप्। विद्वत्तरोऽत्र। [विद्वत्कल्पे

विद्वद्भोग्य त्रि० ईषदसमाप्तो विद्वान् विद्वस्+ईयसुन्। **विद्वस्** त्रि० विद्-क्वसु। १प्राज्ञे स्त्रियां ङीप् सम्भ० "विदुषी मूर्ध्नि सा बिभर्त्ति यानू" नैष०। २पण्डिते पु० ३आत्मज्ञानयुक्ते। [क। विद्विषोऽत्र।

विद्विष् पु० विशेषेण द्वेष्टि वि+द्विष-क्विप्। शत्रौ अमरः।

विद्विष पु० वि+द्विष-घञ्। वैरिभावे शत्रुतायाम् अमरः।

विद्वेषण न० वि+द्विष-णिच्-ल्युट्। तन्त्रोक्ते अभिचारकर्मभेदे येन शत्रूणां परस्परविद्वेषो भवति तत्किनू व्यापारे। वि+द्विष-ल्युट्। २विद्वेषे। [विधति। अवेधीत्

विध विधाने छिद्रकरणे छेदने च तु० पर० सक० सेट्। पुंस्त्री विध क अच् वा। १विधाने २राजभक्ष्यान्ने ३प्रकारे

३वेधे पुंक्लीबौ रभसः ६वेतने मेदि० ७कर्मणि च क्लीबे हेमच०। तत्रार्थे वेधने च स्त्री त्रिका०।

विधवा स्त्री विगतो धवो यस्याः। मृतपतिकायां स्त्रियाम् अमरः।

विधवाधर्मांश्च शु०त० उक्ता यथा विष्णुः स० "मृते भर्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा"। ब्रह्मचर्य्यं मैथुनवर्जनं ताम्बूलादिवर्जनञ्च यथाह प्रचेताः "ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम्। यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्"। केशभञ्जनमायुर्वेदोक्तम् रघु०। काशीख० विस्तरेण ४अ० उक्ता यथा

"अनुयाति न भर्त्तारं यदि दैवात् कदाचन। तथापि शीलं संरक्ष्यं शीलभङ्गात् पतत्यधः। तद्वैगुण्यादपि स्वर्गात् पतिः पतति नान्यथा। तस्याः पिता च माता च भ्रातृवर्गस्तथैव च। पत्यौ मृते च या योषिद्वैधव्यं पालयेत् क्वचित्। सा पुनः प्राप्य भर्त्तारं स्वर्गभोगान् समश्नुते। विधवाकबरीबन्धो भर्तृबन्धाय जायते। शिरसो वपनं तस्मात् कार्य्यं विधवया सदा। एकाहारः सदा कार्य्यो न द्वितीयः कदाचन। त्रिरात्रं पञ्चरात्रं वा पक्षव्रतमथापि वा। मासोपवासं कुर्य्याद्वा चान्द्रायणमथापि वा। कृच्छ्रं पराकं वा कुर्य्यात् तप्तकृच्छ्रमथापि वा। यवान्नैर्वा फलाहारैः शाकाहारैः पयोव्रतैः। प्राणयात्रां प्रकुर्वीत यावत् प्राणः स्वयं व्रजेत्। पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम्। तस्माद्भूशयनं कार्य्यं पतिसौख्यसमीहया। नैवाङ्गोद्वर्त्तनं कार्य्यं स्त्रिया विधवया क्वचित्। गन्धद्रव्यस्य सम्भोगोनैव कार्य्यस्तया पुनः। प्रत्यहं तर्पणं कार्य्यं भर्तुः कुशतिलोदकैः। तृप्तिस्तृप्तिस्तृप्तिश्चापि नामगोत्रादिपूर्वकम्। विष्णोस्तु पूजनं कार्य्यं पतिबुद्ध्या न चान्यथा। पतिमेव सदा ध्यायेद्विष्णुरूपधरं वरम्। यद् यदिष्टतमं लोके यच्च पत्युः समीहितम्। तत्तद्गुणवते देयं पतिप्रीणनकाम्यया। वैशाखे कार्त्तिके माघे विशेषनियमांश्चरेत्। स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः। वैशाखे जलकुम्भांश्च कार्त्तिके हृतदीपकाः। माघे तिलैश्च नोत्सर्गः स्वर्गलोके महीयते। प्रपा कार्य्या च वैशाखे देवे देया गलन्तिका। व्यजनद्रव्यजं चापि सूक्ष्मवासांसि चन्दनम्। सकर्पूरन्तु ताम्बूलं पुष्पदानं तथैव च। जलपात्रासनेकानि तथा पुष्पगृहाणि च। यानानि च विचित्राणि द्वाचारम्भाफलानि च। देयानि द्विजमुख्येभ्यः पतिर्मे प्रीयतामिति। जर्जे यवागूमश्नीयादेकान्नमथ वा पुनः। हृन्नाकं शूरणञ्चैव शुक्तशिग्वीञ्च वर्जयेत्। कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु। कार्त्तिके वर्जयेत् कांस्यं कार्त्तिके चापि सन्मितम्। कार्त्तिके मौननियमे घण्टां चारुं प्रदापयेत्। पत्रभोजी कांस्यपात्रं घृतं पूर्णं प्रपच्छति। भूमिशय्याव्रते देया शय्या श्लक्ष्णा सदूलिका। फलत्यागे फलं देयं रसत्यागे च तद्रसः। धान्यत्यागे च तद्धान्यमथ वा शालयः स्मृताः। धेनुं दद्यात् प्रयत्नेन सालङ्कारां सकाञ्चनाम्। एकतः सर्वदानानि दीपदानं तथैकतः। कार्त्तिके दीपदानस्य कलां नार्हन्ति षोडशीम्। किञ्चिदभ्युदिते सूर्य्ये माघस्नानं समाचरेत्। यथाशक्त्या च नियमान्माघे स्नानं समाचरेत्। पक्वान्नैर्भोजयेद्विप्रान् यतीनपि तपस्विनः। लड्डुकैः फाणितैश्चापि वटकैरण्डरिकादिभिः। घृतपक्वैः समरिचैः शुचिकर्पूरवासितैः। गर्भे शर्करया पूर्णैर्नैवान्नैः सुगन्धिभिः। शुष्केन्धनानां भारांश्च दद्याच्छीतापहृत्तये। कञ्चुकं तूलगर्भञ्च तूलिकां रूपवीतिकाम्। मञ्जिष्ठारूपवासांसि तथा तूलवतीं पटीम्। जर्णांमयानि वासांसि यतिभ्योऽपि प्रदापयेत्। जातीफललवङ्गैश्च ताम्बूलानि वहन्यपि। कम्बलानि च चित्राणि निर्वातानि गृहाणि च। मृदुलाः पादरक्षाश्च सुगन्ध्युद्वर्त्तनानि च। घृतकम्बलपूजाभिर्मङ्गलस्नानपूरःसरम्। संस्थाप्य शाम्भवं लिङ्गं पूजयेद् दृढभक्तितः। कृष्णागुरुप्रभृतिभिर्गन्धागारे प्रधूपनैः। तूलवर्त्तिप्रदीपैश्च नैवेद्यैर्विविधैस्तथा। भर्तृस्वरूपो भगवान् प्रीयतामिति घोच्चरेत्। एवंविधैश्च विधवा विविधैर्नियमैर्व्रतैः। वैशाखान् कार्त्तिकान् माघानेवमेवातिवाहयेत्। नाधिरोहेदनड्वाहं प्राणैः कण्ठगतैरपि। कञ्चुकं न परीदध्याद्वासो न विकृतं वसेत्। कचृह्णात् सुतान् किञ्चिन्न कुर्य्याद् भर्तृतत्परा। एवं चर्य्यापरा नित्यं विधवापि शुभा मता। इति धर्मसमायुक्ता विधवापि पतिव्रता। पतिलोकानवाप्नोति न भवेत् कापि दुःखिता"। ब्रह्मवै० ज० ख० ८१अ० कस्यचिद्विशेष उक्तो यथा

"ब्राह्मणी पतिहीना या भवेच्चिद्रूपकामणी सदा। एकभक्ता दिनान्ते सा हविष्यान्नरता सदा। न धत्ते दिव्यवस्त्रञ्च गन्धद्रव्यं सुतैलकम्। खजञ्च चन्दनं चैव गुडं सिन्दूरभूषणम्। लक्ष्मी मलिनवस्त्रा स्यात् नित्यं नारा-

वर्णं चरेत्" । "पुत्रस्तल्पञ्च पुरुषं यदा पश्यति धर्मतः । निष्ठां न च भुङ्क्ते सा न कुर्यादिभजे व्रजम् । एकादश्यां न भोक्तव्यं कृष्णजन्माष्टमीदिने । श्रीरामस्य नवम्याञ्च शिवरात्रौ पवित्रया । अघोरायाञ्च मैत्रायां चन्द्रसूर्य्योपरागयोः । अदृष्टं परित्यज्य भुञ्जते परमेव च । ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् । मद्यादिसमं च गोमांससुरातुल्यं श्रुतौ स्मृतम् । रक्तगाजं मसूरञ्च जम्बीरं पर्णमेव च । अलाबूवर्त्ताकाकारा वर्जनीया यतेरपि । पर्य्यङ्कशायिनी नारी विधवा यातयेत् पतिम् । यामस्यारोहणं कृत्वा विधवा नरकं व्रजेत् । न कुर्य्यात् केशसंस्कारं नखसंस्कारमेव च । केशानञ्जो जटारूपा न क्षौरं तीर्थकं विना । तैलाभ्यङ्गं न कुर्वीत न हि पश्यति दर्पणम् । सुखञ्च परुषां च यावां स्नानं महोत्सवम् । नर्त्तकं गायकञ्चैव सुवेशं पुरुषं शुभम्" ।

विधातृ पु॰ वि+धा-तृच् । १प्रजापतौ ब्रह्मणि अमरः । २कामदेवे मेदि॰ । ३सदिरायां राजनि॰ । ४भृगुसुनिपुत्रभेदे भाग॰ ५विधानकर्त्तरि त्रि॰ स्त्रियां ङीप् सा च ६पिप्पल्यां शब्दर॰ । ७अधर्मे पु॰ "द्वौ धाता च विधाता च पौराणौ जगतां पतौ । द्वौ भ्राजारौ त्रिलोकेऽस्मिन् धर्माधर्मौ प्रकीर्त्तितौ" अग्निपु॰ । [२मरीच्यादौ च ।

विधातृभू पु॰ विधातुर्भवति भू-क्विप् । १भारद्वाजौ त्रिका॰

विधातृवायुस् पु॰विधातुरायुः प्रमाणं यस्मात् । सूर्य्ये शब्दच॰ सूर्य्यक्रियां विना वत्सरादिज्ञानासम्भवात् सूर्य्यस्य तथात्वम् । ६त॰ । तस्य वयःकाले २महाकल्पे च । तदायुःकालश्च आयुस्शब्दे ७६२ पृ॰ दृश्यः ।

विधान न॰ वि+धा ल्युट् । १करणे २कर्म्मणि । ३विधौ, जटा॰ ४गजभक्ष्यान्ने च हारा॰ संज्ञायां कन् । अर्थायां म॰ शब्दर॰ । [त्रे त्रि॰ ।

विधानज्ञ पु॰ विधानं जानाति ज्ञा-क । १पण्डिते । २विधिविधायके त्रि॰ वि+धा-ल्युट् । विधानकर्त्तरि ।

विधि पु॰ वि+धा-कि । १ब्रह्मणि ब्रह्मणि, ३भाग्ये २कर्म्मे अमरः "चिकीर्षाकृतिसाध्यत्वहेत्वधीविषयो विधिः" शब्दर॰ उक्ते प्रवर्त्तनारूपे ४नियोगे तज्जनके पूर्ववाक्ये ५हेमच॰ । ६विष्णौ भूलायु॰ ७कर्म्मणि त्रिका॰ । ८गजभक्ष्यान्ने जटा॰ । ९वैद्ये राजनि॰ । १०अप्राप्तप्रापकरूपे वाक्यभेदे, व्याकरणोक्ते ११सूत्रभेदे । तत्र व्याकरणविधिर्निरूप्यते । "संज्ञा च परिभाषा च विधिर्नियम एव च । अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणमित्युक्तं" षड्विधिभेदाः तत्र "तुल्यास्य प्रयत्नं सवर्णम्" पा॰ सवर्णसंज्ञा परिभाषा तच्छब्दे ४२४६पृ॰ दृश्या । अप्राप्तप्रापको विधिः यथा "अकः सवर्णे दीर्घः" पा॰ इत्यादि । अत्र सवर्णे परे पूर्वस्य दीर्घस्याप्राप्तेस्तत्प्रापकत्वात् तथात्वम् । स च द्विविधः वर्णोत्पादकोऽभावरूपश्च । तत्र वर्णोत्पादक अकः अभावोऽपि द्विविधः लोपरूपो निषेधरूपश्च तत्र "लोपोऽभ्यासस्येति" पा॰ नाशरूपः । "नाभ्यस्ताच्छतुरित्यादौ" निषेधरूपः । सामान्यप्राप्तस्य विशेषावधारको नियमः यथा "रात्रसत्रयोर्वा" पा॰ इत्यादि । अन्यधर्मस्यान्यत्रारोपणविधिरतिदेशविधिः यथा पुंवद्भावादिः । पूर्वसूत्रस्यपदार्थस्यान्यत्रोपस्थितिरधिकारविधिः । स च त्रिविधः "शिरोवलोकितं चैव मण्डूकप्लुतमेव वा । गङ्गाप्रवाहवच्चापि त्रिधाऽधिकारविधिः स्मृतः" । अधिकारशब्दे १२७पृ॰दृश्यम् । विधिश्च विनियोगरूपतया शब्दश॰ प्र॰ निरूपितो यथा

"नेष्ट कृत्यात्मकं विधानम् । आख्यातमात्रस्य तदबोधसमर्थत्वात् किन्तु प्रवर्त्तकचिकीर्षायां यत्प्रकारकज्ञानस्य हेतुत्वं स तथा, तादृशञ्च कृतिसाध्यत्वमिष्टसाधनत्वं बलवदनिष्टानननुबन्धित्वञ्च प्रत्येकमेव, "यागपाकादिधर्मिकतत्तद्विषयादेव यागादिधर्मिकचिकीर्षोत्पत्त्या तत्र प्रवृत्तेः । एवञ्च यजेतेत्यादौ यागः कृतिसाध्यः इष्टसाधनं बलवदनिष्टाननुबन्धी चेत्याकारको बोधः" अधिकं तत्र दृश्यम् । मीमांसकमते विधिस्वरूपभेदादिकं खण्डनभास्करेण दर्शितं यथा

"तत्राम्नातार्थज्ञापको वेदभागो विधिः । स च तादृशप्रयोजनवदर्थविधानेनार्थवान् तादृशं चार्थं प्रमाणान्तरेणाप्राप्तं विधत्ते । यथाग्निहोत्रं जुहुयात् स्वर्गकाम इति विधिर्नानान्तरेणाप्राप्तस्वर्गप्रयोजनयज्ञोहोमं विधत्ते । अग्निहोत्रहोमेन स्वर्गं भावयेदिति वाक्यार्थबोधः" । "यत्र कर्म नानान्तरेण प्राप्तं, तत्र तदङ्गेन गुणमात्रं विधत्ते । यथा दध्ना जुहोतीत्यत्र होमस्याग्निहोत्रं जुहुयादित्यनेन प्राप्तत्वाद्धोमाङ्गेन दध्नो गुणमात्रविधानं दध्ना होमं भावयेदिति । यत्र त्वनयमप्राप्तं तत्र विशिष्टं विधत्ते : यथा सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात् सोमविशिष्टविधानम् । सोमपदे सत्यर्थलक्षणया सोमवता यागेनेष्टं भावयेदिति वाक्यार्थबोधः । न चोभयविधाने वाक्यभेदः प्रत्ये-

कस्तभयस्याविधानात्। न च ज्योतिष्टोमेन स्वर्गकामो यजेतेति विधिप्राप्तोद्देशेन सोमरूपगुणविधानमेवास्तु सोमेन यागं भावयेदिति, किं मत्वर्थलक्षणयेति वाच्यम्। तस्याधिकारविधित्वेनोत्पत्तिविधित्वासम्भवात्। ननूद्भिदा यजेत पशुकाम इत्यत्रैव ज्योतिष्टोमेनेत्यत्राप्युत्पत्त्यधिकारविधित्वमस्तिति चेन्न, दृष्टान्ते उत्पत्तिवाक्यान्तराभावेनान्यथानुपपत्त्या तथात्वाश्रयणात्। किञ्च ज्योतिष्टोमेनेत्यस्योभयविधित्वे तेनैव यागस्तस्य फलसम्बन्धोऽपि बोधनीय इति दृष्टो वाक्यभेदस्तदवस्थ सोमपदे मत्वर्थलक्षणया विशिष्टविधानम्। स च विधिश्चतुर्विधः उत्पत्तिविधिर्विनियोगविधिः, अधिकारविधिः, प्रयोगविधिश्चेति। तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः। यथाग्निहोत्रं जुहोतीति। अत्र च विधौ कर्मणः करणत्वेनान्वयः अग्निहोत्रहोमेनेष्टं भावयेदिति। ननु यागस्य द्वे रूपे द्रव्यं देवता च। तथाच रूपाश्रवणे अग्निहोत्रं जुहोतीति कथमुत्पत्तिविधिः अग्निहोत्रयजस्य तत्प्रख्यन्यायेन नामधेयत्वादिति चेन्न, रूपाश्रवणेऽप्युत्पत्तिविधित्वात्। अन्यथा रूपश्रवणाद्वृथा जुहोतीति अयमेवोत्पत्तिविधिः स्यात्। तथा चाग्निहोत्रं जुहोतीति वाक्यमनर्थकं स्यात्। अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः। यथा दध्ना जुहोतीति। स हि तृतीयया प्रतिपन्नाङ्गभावं दध्ना होमसम्बन्धं विधत्ते दध्ना होमं भावयेदिति। गुणविधौ च धात्वर्थस्य साध्यत्वेनैवान्वयः। क्वचिदाश्रयत्वेनापि यथा दध्नेन्द्रियकामस्य जुह्वादित्वस्य दध्यधिकरणत्वेनेन्द्रियं भावयेत् तत्र किंनिष्ठमित्याकाङ्क्षायां यच्चिधिप्राप्तहोम आश्रयत्वेनान्वेति। एतस्य विधेः षट्कारिभूतानि षट् प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि। एतत्षट्कसंतनेनानेन विधिनाङ्गत्वं परोद्देश्यप्रकृत्तसंतिसाध्यत्वरूपं परार्थापरपर्यायं साध्यते" ततः तत्षट्कारीणि श्रुत्यादीनि निरूपितानि तत्र दृष्टान्तानि "तदेवं निरूपितानि सङ्क्षेपतः श्रुत्यादीनि षट् प्रमाणानि। एतत् षट्कसंतनेन विनियोगविधिना समिदादिभिरुपकृत्य "दर्शपूर्णमासाभ्यां यजेत" इत्येवं रूपेण यानि विनियोज्यन्ते तान्यङ्गानि द्विविधानि सिद्धरूपाणि, क्रियारूपाणि चेति। तत्र सिद्धानि जातिद्रव्यसंज्ञादीनि तानि च दृष्टार्थान्येव। क्रियारूपाणि च द्विविधानि। गुणकर्माणि प्रधानकर्माणि च। एतान्येव यज्ञिपत्योपकारकाणि आरादुपकारकाणीति चोच्यते। कर्मोद्देश्याद्युद्देशेन विधीयमानं कर्म यज्ञिपत्योपकारकम्। यथाऽवघातप्रोक्षणादि। तच्च दृष्टार्थमदृष्टार्थं दृष्टादृष्टार्थं चेति। दृष्टार्थमवघातादि अदृष्टार्थं प्रोक्षणादि। दृष्टादृष्टार्थं पशुपुरोडाशादि। तद्धि द्रव्यत्यागांशेनैवादृष्टं देवतोद्देशेन च देवतास्वत्वं दृष्टं करोति। द्रव्याद्युद्दिश्य केवलं विधीयमानं कर्म त्वाराद्युपकारकम्। यथा प्रयाजादि। आरादुपकारकञ्च परमापूर्वोत्पत्तावेवोपयुज्यते। यज्ञिपत्योपकारकन्तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपेऽप्युपयुज्यते। इदमेव चाम्नयिकमैत्युच्यते। तदेवं निरूपितः सङ्क्षेपतो विनियोगविधिः। प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। स चाङ्गवाक्यैकतापन्नः प्रधानविधिरेव। स हि साङ्गं प्रधानमनुष्ठापयन्विलम्बे प्रमाणाभावादविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते। न च तदविलम्बेऽपि प्रमाणाभाय इति वाच्यं विलम्बे चाङ्गप्रधानविध्येकवाक्यतावगततत्साकाङ्क्षित्वानुपपत्तेः विलम्बेन क्रियमाणयोः पदार्थयोः इदमनेन सहेतनमिति साकाङ्क्षित्वव्यवहाराभावात्। स चाविलम्बो नियते क्रम आश्रियमाणे भवति। अन्यथा हि किमेतदनन्तरमेतत् कर्त्तव्यमेतदनन्तरं वेति प्रयोगविच्छेदापत्तेः। अतः प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते। अतएवाङ्गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्षणम्"।

"तदेवं संक्षेपतो निरूपितः षड्विध क्रमनिरूपणेन प्रयोगविधिः। कर्मजन्यफलस्वाम्यबोधकोविधिरधिकारविधिः। कर्मजन्यफलस्वाम्यं च कर्मजन्यफलभोक्तृत्वम्। स च यजेत स्वर्गकाम इत्यादिरूपः, स्वर्गमुद्दिश्य यागं विदधतानेन स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते "यस्याहिताग्नेरग्निर्गृहान्दहेत्सोऽग्नये क्षामवतेऽष्टाकपालं पुरोडाशं निर्वपेत्" इत्यादिना दाहादौ निमित्ते कर्म विदधता निमित्तवतः कर्मजन्यापत्त्यवरूपफलस्वाम्यं प्रतिपाद्यते। एवम् "अहरहः सन्ध्यामुपासीत" इत्यादिना शुचिविहितकालजीवनः सन्ध्योपासनाजन्यप्रत्यवायपरिहाररूपफलस्वाम्यं बोध्यते। तच्च फलस्वाम्यं तस्यैव योऽधिकारविधिः। अधिकारश्च स एव यद्विधिवाक्ये पुरुषविशेषणत्वेन श्रूयते। यथा काम्ये कर्मणि फलकामना। नैमित्तिके कर्मणि निमित्तनिश्चयः।

नित्ये सन्ध्योपासनादौ शुचिविहितकालजीवित्वम् अत एव "राजा राजसूयेन स्वाराज्यकामोयजेत" इत्यनेन विधिवाक्येन स्वाराज्यमुद्दिश्य राजसूयं विदधता न स्वराज्यकाममात्रस्य फलभोक्तृत्वं प्रतिपाद्यते किन्तु राज्ञः सतः स्वाराज्यकामस्यैव राजसूयस्यापि अधिकारिविशेषणत्वेन श्रवणात् । किञ्चित् तु पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणं यथाध्ययनविधिसिद्धा विद्या क्रतुविधीनामर्थज्ञानापेक्षत्वेनाध्ययनविधिसिद्धार्थज्ञानवन्तं प्रत्येव प्रवर्त्तते: । एवमग्निसाध्यकर्मसु आधानसिद्धाग्निमता अग्निसाध्यकर्मणामन्यथेक्षत्वेन तद्विधीनामाधानसिद्धाग्निमन्तं प्रत्येव प्रवृत्तेः । एवं सामर्थ्यमपि आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति न्यायात् स मर्थं प्रत्येव विधिप्रवृत्तेः । तदेवं निरूपितो विधिः" ।

विधिरयमायने च विधिभेदोऽन्यथा दर्शितो यथा "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते" तत्तच्छब्दे विशेषो द्रष्टव्यः । १२अर्थालङ्कारभेदे च । अलङ्कारशब्दे ४०२पृ० द्रष्टव्यम् ।

विधिज्ञ त्रि० विधिं क्रमं जानाति ज्ञा-क । विधानक्रमज्ञे ।

विधित्सा स्त्री विधातुमिच्छा वि+धा-सन् भावे अ । विधानेच्छायाम् ।

विधिदेशक पु० विधिं विधानं दिशति दिश्+ण्वुल् । विधिदर्शिनि १गुरौ अमरः २गुरौ च ।

विधिवत् अव्य० विधिमर्हति विधि+मतुप् । विध्यनुसारे

विधु पु० व्यध-कु । १चन्द्रे २कर्पूरे ३विष्णौ मेदि० ४ब्रह्मणि शब्दर० । ५शङ्करे ६राक्षसे विश्वः । ७वायौ दर्शे च संक्षिप्तसा० ।

विधुत त्रि० वि+धु-क्त १कम्पिते २त्यक्ते च अमरः ।

विधुनन न० वि+धु-णिच्-ल्युट् च । चालने अटा० ।

विधुन्तुद पु० विधुं तुदति तुद-खश् मुम् च । राहौ अमरः

विधुपिङ्गर पु० विधोः पिङ्गर इव । १खड्गे शब्दर० ।

विधुर त्रि० विगता धूर्यस्य अक्षस्य० । १विश्लिष्टे अमरः । २विकले च मेदि० । विगता धूः । ३वैकल्ये ४विश्लेषे च न० विश्वः । ५रसालायां स्त्री मेदि० ।

विधुवन न० वि+धु-ल्युट् । कम्पने अमरः ।

विधूत त्रि० वि+धू-क्त । १कम्पिते २त्यक्ते च हेमच० । "विधूतपापास्ते यान्ति" ब्रह्मलोकनामयम्" स्मृतिः ।

विधेय त्रि० वि+धा-यत् । १विधातुं योग्ये २वचनस्थे आयत्ते अमरः । ३विधिना बोध्ये च । ४उद्देश्यप्रकारतया ज्ञाप्यमाने विलक्षणविधेयतायुते पदार्थे यथा पर्वतो वह्निमानित्यादौ वह्निर्विधेयः । पचतीत्यादौ पाकक्रतिः आख्यातार्थस्य विधेयतयैव बोधस्वीकारात् । विधेयता तु विलक्षणविधेयता अनुवाद्यभिन्ननिष्ठा "अनुवादमनुक्त्वा च न विधेयमुदीरयेत्" इति शास्त्रैकनियमः । प्रत्यक्षादिप्रमितविशेष्यतावच्छेदकताभिन्ना विशेष्यतानिरूपिता च सैत्यन्ये ।

विधेयाविमर्श पु० विधेयस्याविमर्शो यत्र । अविमृष्टविधेयांशरूपे काव्यदोषभेदे दोषशब्दे ३७६२ पृ० तस्य स्वरूपादिकं दृश्यम् । [४०२ पृ० दृश्यम् ।

विध्याभास पु० अर्थालङ्कारभेदे सा० द० अलङ्कारशब्दे

विध्वंस पु० वि+ध्वंस-घञ् । नाशे ।

विनत त्रि० वि+नम-क्त । १प्रणते २भग्ने ३शिथिते च मेदि० । गरुडमातरि ४कश्यपपत्नीभेदे ५पिटकाभेदे च स्त्री मेदि० । [नतात्मजादयोऽप्यस्यत्र ।

विनतासुत पु० ६त० । १अरुणे २गरुडे च अटा० । वि-

विनद पु० विशेषेण नदति नद-अच् । (छातियान) वृक्षे शब्दच० । [राजनि० ।

विनस्रक न० विशेषेण नस्यमिव दृश्यर्थं कन् । तगरपुष्पे

विनय पु० वि+नी-भावे अच् । १शिक्षायां २प्रणामे ३चलने ४विनयशास्त्रज्ञानजन्यसंस्कारभेदः इन्द्रियसंयमो वा । ५निश्चये, ६शिक्षे, ७जितेन्द्रिये च । ८वणिग्जने पु० अमरः । ९दण्डे व्यव० त० । १०व्याख्याने स्त्री मेदि० ।

विनयग्राहिन् त्रि० विनयं शिक्षां गृह्णाति ग्रह-णिनि । वचनस्थिते आयत्ते अमरः । स्त्रियां ङीप् ।

विनयस्थ त्रि० विनये तिष्ठति स्था-क । वचनग्राहिणि आयत्ते हेमच० ।

विनशन न० वि+नश-ल्युट् । १विनाशे । विनशन्ति अदर्शनं गच्छन्ति सरस्वत्यत्र वि-नश+आधारे ल्युट् । २कुरुक्षेत्रस्थे तीर्थभेदे त्रिका० । "त्रिभवदुविन्ध्ययोर्मध्यं यत् प्राग् विनशनादपि" मनुः । स च सरस्वत्यन्तर्धानदेश एव प्रभासतीर्थसन्निहितनिषादपुरसमीपस्थः यथोक्तं भा० व० १३०अ० ।

"एषा सरस्वती रम्या दिव्या चौघवती नदी । एतद्विनशनं नाम सरस्वत्या विशाम्पते ! । द्वारं निषादराष्ट्रस्य वेषां दोषात् सरस्वती । प्रविष्टा पृथिवीं वीर ! सा निषादा हि

मां विदुः"। "शुक्लपञ्चमम्यां दीक्षा सरस्वतीविसर्जने" काल्या०चौ० २४।५।१०। "सरस्वतीविसर्जने सरस्वती सङ्गमे प्रभासे सारस्वतसत्त्वार्थं दीक्षा भवति" कर्कः "यत्र सरस्वत्यन्तर्भवति तद्धिसर्जनमुच्यते" इत्यग्निस्वामिनः। "सरस्वती नाम नदी प्रत्यक्स्रोता प्रवहति तस्याः प्राग परभागो सर्वलोकप्रत्यक्षो मध्यमस्तु भागो भूम्यन्तर्निमग्नः प्रवहति नासौ केनचिद् दृश्यते तद्धिसर्जनमुच्यते" इति लाट्या० १०।१५।१ माधवाचार्यः।

विनष्ट त्रि० वि+नश-क्त। १विनाशप्राप्तियोग्यनि २पतिते च "विनष्टे वाप्यशरणे पितर्युपरतस्पृहे" नारदः। "विनष्टे पतिते" दायभा०।

विना अव्य०वि+ना। १वर्जने २अन्तरेणेत्यर्थे च। सप्तम्योगे २द्वितीया तृतीया पञ्चमी च। [२रहिते च त्रिका०।

विनाकृत त्रि० विनेति कृतम् विना+कृ-क्त। १त्यक्ते

विनाडिका स्त्री विभक्ता नाडिका यया। "दश गुर्वक्षरः प्राणः षड्भिः प्राणैर्विनाडिका। तत्षष्ट्या तु भवेन्नाडी" ख्यु० सि० उक्ते दण्डषष्टिभागात्मके पलरूपे काले।

विनायक पु० वि+नी-ण्वुल्। १गणेशे २बुद्धे अमरः ३विघ्ने ४गुरौ च। ६त०। ५गरुडे मेदि०। ६गरुडपत्न्यां स्त्री शब्दमा० टाप् कापि अत इत्त्वम्।

विनायकश्च कर्मविघ्नसिद्ध्यर्थमीश्वरेण नियुक्तः देवभेदः यथोक्तं याज्ञवल्क्येन "विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः। गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा" "कर्मणां पुरुषार्थसाधनानां विघ्नसिद्ध्यर्थं स्वरूपफलसाधनत्वविघातसिद्ध्यर्थं नियोजितो नियुक्तः" मिता०। तेनोपरुष्टस्य लक्षणान्याह स एव "तेनोपरुष्टो यस्यास्य लक्षणानि निबोधत। स्वप्नेऽवगाहतेऽत्यर्थं जलं सुरुणद्धि च पश्यति। कषायवाससश्चैव कव्यादांश्चाधिरोहति। अन्यैर्गर्दभैरुष्ट्रैः सङ्गमं चैकत्वावतिष्ठति। अजत्यपि नयात्मानं मन्यतेऽन्यगतं परैः" तस्य प्रत्यक्षलक्षणान्याह स एव "विमना विफलारम्भः संसीदत्यनिमित्ततः। तेनोपरुष्टो लभते न राज्यं राजनन्दनः। कुमारी न च भर्तारमपत्यं गर्भमङ्गना। आचार्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा। वणिग्लाभं न चाप्नोति कृषिञ्चापि कृषीवलः" तन्निवारणविधिश्च तत्रोक्तो दृश्यः। 'विनायका विघ्नकारा महोग्राः' रत्नमालाः।

विनारुहा स्त्री विना मूलं विना रोहति रुह-क। वित्थर्षिकायां राजनि०।

विनाश पु० वि+नश-घञ्। १ध्वंसे २अदर्शने च।

विनाशोन्मुख त्रि० विनाशाय उन्मुख यद्वातः। १मरणप्राये २एके च अमरः। [विधाने शब्दच०।

वि(वी)नाह पु० वि+नह-घञ् वा सपूर्वदीर्घः। क्लीवे०

विनिद्र त्रि०विगता निद्रा यस्य।१प्रकाशिते शब्दमा०।२निद्राहीने च। तस्य भावः। त्व। विनिद्रत्व प्रबोधे न०हेमच०।

विनिपात पु० वि+नि+पत-घञ्। १निपाते २दैवादिकृते व्यसने मेदि० ३अपमाने च हेमच०।

विनिमय पु० वि+नि+मि-अच्। परिवर्त्ते १तुल्यद्रव्यदानेन द्रव्यान्तरग्रहणे शब्दच०। २वस्त्रके च शब्दमा०।

विनियोग पु० वि+नि-युज-घञ्। क्रियासु प्रवर्त्तने "अनेनेदन्तु कर्त्तव्यं विनियोगः प्रकीर्त्तितः इत्युक्ते ३अवश्यानक्रमविधाने च "आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव चेति" योगियाज्ञ०। [देवगणभेदे पु० यजुष्प०।

विनिर्भय त्रि० विनिर्गतं भयं यस्मात्। १भयशून्ये माघ०

विनीत त्रि०वि+नी-क्त। १विनययुक्ते २अवटग्रहे ३शिष्टे अमरः ४अपनीते ५निष्टते च। ६जितेन्द्रिये ७वृद्धे च मेदि०। ८सुशिक्षिताश्वे अमरः। ९अवनद्धे च पु० १०शिक्षितवृषभौ राजनि० ११वणिजि पु० मेदि०।

विनीय पु० वि+नी-क्यप्। १शिक्षके २न्याये च। स्यप् शिक्षयित्वेत्यादार्थे अव्य०।

विनेतृ त्रि० वि+नी-तृच्। १शिक्षके २न्याये पु० मेदि०।

विनेय त्रि० वि+नी-यत्। १शिक्षणीये २प्राप्ये च।

विनोक्ति स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ४०३पृ०दृश्यम्।

विनोद पु० वि+नुद-घञ्। १कौतुकेन छलात्। २क्रीड़ायां ३रतौ च। ४गदभेदे "दीर्घे त्रयोदशकलाः प्रतारस्तौ द्वौ ग्रथितौ। विनोद एव द्वारादि लिंगतकोद्दयं भवेत्" युक्तिक०।

विन्ध्य पु० विध-यत् पृषो० सम् च। १पर्वतभेदे अमरः। २व्याधे च। ३चवर्गीढके स्त्री मेदि०। ४छन्दोनाम्यां हेमच०। ५व्यावन्ये नृपभेदे पु० व्यनुविन्ध्यशब्दे १८५ पृ० दृश्यम्।

विन्ध्यवासिनी स्त्री विन्ध्येऽचले वसति वस-णिनि ङीप्। यशोदागर्भजातायां दुर्गायाम्। "अकृष्णाप्योऽपि तां (यशोदागर्भजकन्याम्) सद्य विन्ध्यं वेगाच्छागमं च। तत्र गत्वा तयोवाच तिरश्चात्र सन्निधने। पूज्यमाना सुरैर्नाम्ना ख्याता त्वं विन्ध्यवासिनी" वामनपु० ५१अ०। "ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी" देवीभा०।

२व्याडिसुतौ पु० द्विवच० । विन्ध्यपर्वतोऽयम् जटा० ।
विन्ध्याचल पु० कर्म० । विन्ध्यपर्वते ।
विन्ध्याटवी स्त्री विन्ध्यस्या अटवी । विन्ध्यपर्वतस्थे वनभेदे ।
विन्ध्यावली स्त्री बाणासुरमातरि त्रिका० ।
विन्न त्रि० विद्–कर्मणि क्त । १विचारिते २प्राप्ते अमरः । ३ज्ञाते ४स्थिते च विश्वः । [यङ्लुच० ।
विन्याक पु० वि+नि+अक–घञ् । विग्रहणे (ज्ञातियान)
विन्यास पु० वि+नि+अस–घञ् । १स्थापने २रचने तन्त्रोक्ते मन्त्रादुच्चारणपूर्वकं हृदयादिषु अङ्गुल्यादीन् न्यसने भेदे च ।
विप क्षेपे चु० उभ० सक० सेट् । वेपयति–ते अवीविपत् त ।
विपक्किम त्रि० विपाकेन निर्वृत्तः वि+पच–क्त्रि मपच् । विपाकाधीनत्वात् "विपक्किमन्नानगतिर्मनस्वी" भट्टिः ।
विपक्ष त्रि०विरुद्धः पक्षो यस्य । १शत्रौ अमरः । २प्रतिकूलपक्षावलम्बिनि च । विरुद्धः पक्षः प्रा० स० । ३प्रतिकूले पक्षे विवादे अर्थिप्रत्युपस्थितपक्षस्य विरुद्धे ४पक्षे च ।
विपञ्ची स्त्री वि+पच–अच् गौरा० ङीष् । १वीणायाम् अमरः । २केतौ मेदि० । स्वार्थे क छप्रत्ययः । विपञ्चिका तत्रैव ।
विपण पु० वि+पण–घञर्थे क । विक्रये अमरः ।
विपणि(णी) पुंस्त्री० वि+पण–इनि स्त्रीत्वपक्षे वा ङीष् । १पण्यविक्रयशालायाम् (हाटचाला) २हट्टे च अमरः । क्रये मेदि० ।
विपणिन् पु० वि+पण–णा०इनि । विक्रेतरि वणिजि जटा०
विपत्ति स्त्री वि+पद–क्तिन् । आपदि अमरः । २नाशे ३यातनायाञ्च मेदि० । "यस्मिन् राज्ञो गते भावो विपत्तिं यान्ति मानवाः" म० त० ।
विपथ पु० विरुद्धः पन्थाः अच्समा० । निन्दितमार्गे अमरः
विपद्(दा) स्त्री वि+पद–सम्प० क्विप् वा टाप् । १विपत्तौ ज्यो० उक्ते जन्मतारातः तृतीयदादशैकविंशतिसंख्याके नक्षत्रे च "विपत्तारे गुडं दद्यात्" ज्यो०त० ।
विपन्न त्रि० वि+पद–क्त । १विपद्युक्ते मेदि० २नष्टे च यज्ञत्र० । ३सर्पे पुंस्त्री० मेदि० स्त्रियां ङीष् ।
विपरीत त्रि०वि+परि+इण–क्त । १प्रतिकूले जटा० । २व्यत्यक्रमे च ३कामशास्त्रोक्तायां स्त्रीनारीणां सुरतायितरूपे यं "सकाकाक्षेण च समं विपरीतरतातुराम्" कर्पूरस्तवः । "पादमेकमूरौ कृत्वा द्वितीयं कटिसंस्थितम् । नारीषु रमते कामी विपरीतस्तु बन्धकः" रतिम० उक्ते ४रतिबन्धभेदे ।
संज्ञायां कन् । "पादमेकमूरौ कृत्वा द्वितीयं जङ्घासंस्थितम् । कामिनीं कामयेत् कामी बन्धः स्यात् विपरीतकः" भरटौपिकोक्ते रतिबन्धभेदे ।
विपर्णक पु० विगतानि पर्णान्यस्य कप् । १पुष्पप्रधाने वलायवृक्षे शब्दच० । २अल्पपत्रके त्रि० ।
विपर्यय पु० वि+परि+इण–अच् । व्यतिक्रमे । २अतस्मिंस्तद्बुद्धौ च । पात० उक्ते ३चित्तवृत्तिभेदे "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" पात० सू० । "संशयस्यापि विपर्ययत्वमतद्रूपप्रतिष्ठानत्वात् तस्य तद्धर्मिकभावाभावगोचरतया एकांशे अतद्रूपप्रतिष्ठत्वात् पायात् । स कस्मात् न प्रमाणम् ? । यतः प्रमाणेन बाध्यते भूतार्थविषयत्वात् प्रमाणस्य, तत्र प्रमाणेन बाध्यमानप्रमाणस्य दृष्टम् । तद्यथा द्विचन्द्रदर्शनं सद्विषयत्वेनैकचन्द्रदर्शनेन बाध्यते" भा० । "स च पञ्चविधः अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः" पात० सू० । इति पञ्च विपर्ययाः । इत्यादि भा० । [इत्ते च
विपर्यस्त त्रि०वि+परि+अस–क्तेपे क्त । १व्यतिक्रान्ते २परावृत्तेपे च । ३विपर्यये भ्रान्तौ च ।
विपर्यास पु० वि+परि+अस–घञ् । १वैपरीत्ये २व्यतिक्रमे ३परावृत्तेपे च । ४विपर्यये भ्रान्तौ च ।
विपल न०विगतं फलं येन प्रा०ब० । फलषष्टिभागे कालभेदे । "लम्बदण्डपलं छिन्नं तत्संख्यं क्रमतः पलम् । विपलं च स्वेभौम्यमेवं कल्पनमस्तभे" ज्यो०त० । [यष्टिहते अमरः ।
विपश्चित् पु० विगतं चेतति वि+प्र+चित–क्विप् पृषो० ।
विपाक पु० वि+पच–भावे घञ् । १पाके २खेदे च । कर्मणि घञ् । २कर्मफलपरिणामे जात्यायुर्भोगरूपे पदार्थे । "सति मूले तद्विपाको जात्यायुर्भोगाः" पात०सू० "सत्सु क्लेशेषु (अविद्यादिषु) कर्माशयो विपाकारम्भी भवति नोच्छिन्नक्लेशमूलोऽपि । यथैव तुषारनद्धाः शालितण्डुलाः अदग्धबीजभावाः प्ररोहसमर्था भवन्ति नापनीतत्तुषादग्धबीजभावा वा तथा क्लेशावनद्धः कर्माशयो विपाकप्ररोही भवति नापनीतक्लेशो न प्रसंख्यानदग्धबीजभावो वेति । स च विपाकस्त्रिविधो जातिरायुर्भोगश्चेति" भा० ।
विपाश्(शा) स्त्री विगतः पाशो यस्याः बहुव्रीहौ अच् । स्वनामख्याते नदीभेदे अमरः । विपाशयति विमुक्तपाशं वशिष्ठं करोति विपाश+णिच–क्विप् । तत्संज्ञे अमरः । तत्संज्ञात्मकथा भा०आ०१७७अ० । "अथ पाशैरात्मानं गाढं बद्ध्वा महानदीं (वशिष्ठः) तस्यां जले महानद्यां निमग्नश्च सुदुःखितः । अथ क्षिप्त्वा नदी पाशांस्तस्मादरिवशङ्कया !।

स्थलस्थं तन्मुखे कृत्वा विपाशं समवाकृजत् । उत्ततार ततः पाशैर्विमुक्तः स महान्मुनिः । विपाशेति च नामास्यानद्याश्चक्रे महामुनिः" "शतद्रोर्विपाशायुजः सिन्धुनद्याः सुशीतं लघु स्वादु सर्वामयघ्नम् । जलं निर्मलं दीपनं पाचनञ्च प्रदत्ते बलं बुद्धिमेधायुषञ्च" राजनि० ।

विपिन न० वप-इनन् पृषो० । वने अमरः ।

विपुल त्रि० वि+पुल-विस्तारे क । १विस्तीर्णे अमरः । २अगाधे ३मेरुपरिस्थसुमेरुभेदे पु० मेदि० ४मेरौ ५हिमाचले च धरणिः । ६आर्याछन्दोभेदे स्त्री ।

"संलक्ष्य गणत्रयमादिमं यकलयोर्द्वयोर्भवति पादः । यस्यान्तां पिङ्गलनागो विपुलामिति समाख्याति" छ० र० । विपुलाचलश्च मेरोर्विष्कम्भपर्वतभेदो यथोक्तम् विष्णुपु० "मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतम् । दृढाहतं महाभाग ! चत्वार उपपर्वताः । विष्कम्भा रचिता मेरोर्योजनायुतसंस्थिताः । पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः । विपुलः पश्चिमे भागे सुपार्श्वश्च तथोत्तरे" तत्र चिह्नवृक्षादिकं तत्रोक्तं यथा "कदम्बास्तेषु जम्बूश्च पिप्पलो३ वट४ एव च । एकादशशतायामाः पादपा गिरिकेतवः । वनं चैत्ररथं१ पूर्वं दक्षिणा गन्धमादनम्२ । वैभ्राजं३ पश्चिमे तद्वदुत्तरे नन्दनं४ स्मृतम् । अरुणोदं१ महाभद्रं२ शितिभेदं३ च मानसम् । सरांस्येव च चत्वारि देवभोग्यानि सर्वदा" । धान्यशैलशब्दे दर्शिते दानार्थं कल्पिते तिलमये ७तन्नामकपर्वते हेमा० दा० ।

विपुलास्रद स्त्री विपुलं रसमास्रवति आ+स्रु-अच् । इक्षुकुमारीवृक्षे राजनि० ।

विपूय पु० वि+पू-करणे नि० क्यप् । खड्गे शब्दर० ।

विप्र पु० वप-रन् पृषो० यत इत्वम् वि+प्रा पूर्त्तौ-क वा । १ब्राह्मणे अमरः "जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्ययायाति विप्रत्वं त्रिभिः श्रोत्रियउच्यते" या-वि० वाक्यम् २अन्वये राजनि० ३विशेषेण पूरके त्रि० ।

विप्रकार पु० वि+प्र+कृ-घञ् । १व्यपकारे अमरः । २तिरस्कारे हेमाद्रि० ।

विप्रकाष्ठ न० विशेषेण प्राति प्रा-क विप्रं पूरकं काष्ठं यस्य । तत्काष्ठे राजनि० ।

विप्रकर्ष पु० वि+प्र+कृष-घञ् । दूरत्वे हला० ।

विप्रकृत त्रि० वि+प्र+कृ-क्त । १उपद्रुते, २तिरस्कृते च "तस्मिन् विप्रकृताः काले" कुमारः । [तत्रैवार्थे अमरः ।

विप्रकृष्ट त्रि० वि+प्र+कृष-क्त । दूरस्थे हला० । स्वार्थे क ।

विप्रकृत्ति पु० वि+प्र+कृत-क्तिच् । दानवभेदे ।

विप्रतिपत्ति स्त्री वि+प्रति+पद-क्तिन् । १विरोधे "परस्परं मनुष्याणां स्वार्थे विप्रतिपत्तिषु" स्मृतिः । २संशयजनके वाक्ये "व्याहतमेकार्थकं विप्रतिपत्तिः" गो० सू० व्याघातो विरोधोऽसद्भाव इति । "आत्माऽस्तीत्येव दर्शनं नास्त्यात्मेत्यपरः" वा० भ० । ३विरुद्धकोटिद्वयोपस्थापके शब्दे च वादिना पर्वतो वह्निमान् प्रतिवादिना च पर्वतो वह्न्यभाववान् इति प्रतिघाते मध्यस्थस्य पर्वतो वह्निमान् नवेति संशयउदेति यतस्तस्य संशयाधायकत्वात्तथात्वम् । स च विरुद्धार्थप्रतिपादकवाक्यद्वयात्मकः पर्वतो वह्निमान्नवेति संशयापादकः । "विपरीतायां निन्दितायां च ४प्रतिपत्तौ ५विकल्पावनूद्ये च "शब्देऽविप्रतिपत्तिः" कात्या० श्रौ० अप्रतिपत्तिरनूद्यः" प्रतिनिधिशब्दे ४४४२पृ० दृश्यम् । [विरोधे च ।

विप्रतिपन्न त्रि० वि+प्रति+पद-क्त । १संदेहयुक्ते २कृतविप्रति(ती)सार पु०वि+प्रति+सृ-घञ् वा दीर्घः । १अनुतापे, अनुशये, २रोषे च मेदि० ।

विप्रयुक्त त्रि०विप्र+युज-क्त । १वियुक्ते, २विरहिणि च ।

विप्रयोग पु० वि+प्र+युज-घञ् । १विप्रलम्भे अमरः । २विरोधे ३विसंवादे ४वियोगे च । ५रागिणोर्विच्छेदे ।

विप्रलब्ध त्रि० वि+प्र+लभ-क्त । वञ्चिते, हेमच० "प्रियः कृत्वाऽपि सङ्केतं यस्या नायाति सन्निधिम् । विप्रलब्धेति सा ज्ञेया" सा० द० उक्तलक्षणे नायिकाभेदे स्त्री ।

विप्रलम्भ पु०वि+प्र+लभ-घञ् सुम् च । १विसंवादे, २वञ्चने, ३विरहे च अमरः । "यूनोरयुक्तयोर्भावो युक्तयोर्वाथ वा मिथः । अभीष्टालिङ्गनादीनामनवाप्तौ प्रकृष्यते । स विप्रलम्भो विज्ञेयः" उज्ज्वलमण्युक्ते ४शृङ्गारावस्थाभेदे ।

विप्रलाप पु० वि+प्र+लप-घञ् । १विरोधोक्तौ परस्परविरुद्धार्थककथने अमरः । २अनर्थकवाक्ये हेमच० ।

विप्रलोभिन् पु० विप्रलोभयति वि+प्र+लुभ+णिच्-णिनि । किंकिरातवृक्षे, अशोकवृक्षे । राजनि० ।

विप्रस्त्रिका स्त्री विशेषेण प्रस्रोयस्याः ५ब० कप् यत इत्वम् । देवदासीनायां स्त्रियाम् अमरः । [धीनतायाम् ।

विप्रसात् अव्य०विप्रसाधीनं करोति विप्र+सात् । विप्रस्वा-

विप्रस्व न० इत० । विप्रस्वामिके धने ।

विप्रिय पु० विरुद्धं प्रियं वि+प्री-क वा । १अपराधे हेमच० । २अप्रिये च "कृतवानसि विप्रियं न मे" कुमारः । आदि० इव० । विगतप्रिये त्रि० ।

विप्रुष् स्त्री० ष० व०वि+प्रुष-क्विप्। १बिन्दुषु २वेदपाठकाले मुखनिर्गतजलबिन्दुषु अमरः।
"पक्षिका विप्रुषच्छाया गौरश्वः सूर्यरश्मयः। रजो भूमि-युरस्मिंश्च सर्वमेध्यानि निर्दिशेत्" शु०त०। आचमनकाले मुखनिःसृतानां तासां नोच्छिष्टदोषजनकता यथाह "नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गं नयन्ति याः। दन्त-वन् दन्तलग्नेषु जिह्वास्पर्शेऽशुचिर्भवेत्" कूर्म०उ० १७अ०।

विप्रोषित त्रि० वि+प्र+वस-क्त। गतप्रवासे।

विप्लव पु० वि+प्लु-अप्। १परमन्तपतिराष्ट्रादितो भये। २राष्ट्रो-पद्रवे च अमरः। [प्लावे च।

विप्लाव पु०वि+प्लु-घञ्। अश्वस्य १गतिभेदे २वेगजन्यात् जल-विप्लुत त्रि०वि+प्लु-क्त। १व्यसनयुक्ते हेमच० २उपद्रुते च "अविप्लुतब्रह्मचर्य्यः" स्मृतिः। [तत्कर्त्री स्त्री० राजनि०।

विफल त्रि०विगतं फलमस्य। १निरर्थके २फलरहिते च ३के०

विबध पु० विगतो वधो हननं गतिर्यस्मात्। मंदडीतधा-न्यतरङ्गुलादौ "निरङ्कुशविषधासारेति" माघः पृषो०। दीर्घः वीबध तत्रार्थे विश्वः। [कारके रोगभेदे अमरः।

विबन्ध पु० विबध्नाति मनस् वि+बन्ध-अच्। मनसश्च-

विबुध पु० वि+बुध-क। १पण्डिते मेदि० २देवे अमरः "विबुधसखः" भट्टिः। ३चन्द्रे च हेमच०।

विभक्त त्रि० वि+भज-क्त। १पृथक्कृते २विभिन्ने कृत-विभागे च ३भावे क्त। ४विभागे ५भेदे न०। "पञ्चनी विभक्ते" पा० यस्य विभागः कृतः ५ताद्धर्थे धने "अविभक्तं स्थावरं यत् सर्वेषामेव तत् भवेत्। विभक्तं स्थावरं ग्राह्यं नान्योदर्य्यैः कथञ्चन" वचनवचनम्। तदस्यास्ति अच्। येन धनस्य विभागःकृतस्तस्मिन् हेतौ तत्। विभक्तधर्मादिकं दायभागादौ दर्शितं यथा

"भ्रातॄणां जीवतोः पित्रोः सहवासी विधीयते। तद भावे विभक्तानां धर्मस्तेषां विधीयते" "विभक्तानां स्व-भावेन वैदिककरणात्तत्कालधर्मत्वेन तदुक्तिः" दाय०त० रघु०। "दानग्रहणसङ्घर्षदृष्टचेष्टापरिग्रहाः। विभक्तानां पृथग् ज्ञेयाः पाकधर्मागमव्ययाः। याज्ञिकत्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च। विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परम्। येषामेताः क्रिया लोके प्रवर्त्तन्ते स्वरिक्थतः। विभक्तानवगच्छेयुर्लक्षणव्य-त्यत्ययेन नान्" नारदः "भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि। प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तद् भवेत्" याज्ञ०। "बन्धूनामविभक्तानां भोगं नैव तदापयेत्" कात्या०। "भ्रातृणामविभक्तानामेको धर्मः प्रवर्त्तते। विभागे सति धर्मोऽपि भवेत् तेषां पृथक् पृथक्" कात्या० "अविभक्ता विभक्ता वा कुर्युः श्राद्धं दैविकम्। मघा-सु च तथान्यत्र नाधिकारः पृथग् विना" श्रा० त० धृत-वचनम्। "बहवः स्युर्यदा पुत्राः पितुरेकत्रवासिनः। सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम्। पूर्व्वेण चाविभक्तेन सर्वैरेव कृतं भवेत्" शु० त०। "अविभक्ता विभक्ता वा सपिण्डाः स्यावरे समाः। एको ह्यनीशः सर्वत्र दानाधमनविक्रये" नारदः। "एतत् दुर्वृत्त-पुरुषविक्रयविषयमिति" दाय०त० रघु०।

विभक्ति स्त्री वि+भज-क्तिन्। १विभागे "संख्यात्वव्याप्य सामान्ये शक्तिमान् प्रत्ययस्तु यः। सा विभक्तिर्द्विधा प्रोक्ता सुप् तिङ् चेति प्रभेदतः" म०म०प०उक्तलक्षणे २प्र-त्ययभेदे च। "सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु" "विशेष्यश्चैव यल्लिङ्गं विभक्तिवचने च। ये तानि सर्वाणि योज्यानि विशेषणपदेष्वपि" व्या० का०।

विभव पु० वि+भू-अच्। १धने २मोक्षे सर्वमूर्त्तसंयोग-रूपे ३ऐश्वर्य्ये मेदि०। षष्टिसंवत्सरमध्ये "सुभिक्षं क्षेम-मारोग्यं सर्वे व्याधिविवर्जिताः। प्रजाता मानवास्तत्र बहुशस्या वसुन्धरा। हृष्टाः पुष्टाः जनाः सर्वे विभवे-ऽब्दे वरानने!" इत्युक्तफलके ४वर्षभेदे पु०।

विभा स्त्री वि+भा-अच्। १किरणे हेमच० २शोभायां ३प्रकाशे च राजनि०।

विभाकर पु० विभां प्रकाशं करोति क-अच्। १सूर्य्ये २अर्कवृक्षे च ३चित्रकवृक्षे अमरः ४अग्नौ मेदि०।

विभाग पु० वि+भज-भावे घञ्। १भागे पूर्वस्वामिस्वत्वना-शोत्तरं तत्सम्बन्धाधीनजातस्वत्वस्य २व्यक्तौ व्यापारभेदे दायभागादि। सामान्यधर्मयुतानां बहूनां परस्परविरु-द्धतद्व्याप्यधर्म प्रकारेण ५प्रतिपादने औक्ष्यः। वैशे-षिकोक्ते ४गुणभेदे तल्लक्षणविभागादि कणा० सू०। उ० दर्शितं यथा

"एतेन विभागो व्याख्यातः" कणा० सू०। "विभागे संयोगोत्पत्तिप्रकारमतिदिशन्नाह संयोगवद्विभागो-ऽप्यन्यतरकर्मज १उभयकर्मजो २विभागजश्च ३त्र्येककर्म-व्याख्यातेनविभागः १संयुक्तयोर्मध्ययोर्मध्यो कर्मभ्यां तदुभयविभागः २सचायं कर्मोत्पत्त्यव्यहितक्षणोत्पत्तिकः अपेक्षणीयान्तराभावात् तदुक्तं "संयोगविभागयोरन-पेक्षकारणं कर्म इति विभागे जननीये कार्य्यः" सं-

योगे च जननीये पूर्वसंयोगनाशापेक्षणीय इति चेन्न क्षोत्पत्तेरनन्तरोत्पत्तिकभावभूतानपेक्षत्वस्य कर्मणो निरपेक्षत्वात्। विभागजस्तु विभागो द्विविधः कारणमात्रविभागजकारणाकारणविभाग१भेदात् कारणाकारणविभागजकार्याकार्यविभाग२भेदाच्च तत्र कारणमात्रविभागात् कारणाकारणविभागो यथा कपालद्वयविभागात् कपालाकाशविभागः १कारणाकारणविभागाच्च कार्याकार्यविभागो २यथाऽङ्गुलीतरुविभागाद्धस्ततरुविभागस्ततः शरीरतरुविभाग इति। नन्वेवं विभाग एव न प्रमाणं संयोगाभाव एव विभागव्यवहारादिति चेन्न संयोगाभावोऽत्यन्ताभावश्चेत् गुणकर्मणोरपि विभागव्यवहारप्रसङ्गात् द्रव्ययोर्वर्त्तमानः संयोगात्यन्ताभावो विभक्तप्रत्ययहेतुरिति चेन्नावयवावयविनोरपि प्रसङ्गात् अकार्यकारणभूतयोर्द्रव्ययोरिति चेत् बिल्वस्थिरवतोरपि स्यात् भवत्येव तत्रेति चेन्न आत्मसु गुणकर्मणोरपि भावात् अभ्रात्मनधिकृत्य व्यवहारस्य चिन्त्यमानत्वात् संयोगविनाशो विभाग इति चेत् एकतरसंयोगिनाशेन नष्टे संयोगे तद्व्यवहारप्रसङ्गात् संयोगिनोर्विद्यमानयोरिति चेत् एकसंयोगनाशानन्तरं पुनः संयुक्तयोः द्रव्यसामान्ययोः संयोगदशायामपि विभक्तप्रत्ययप्रसङ्गात् यावत्संयोगनाशश्चेति चिरेकसंयोगनाशे तद्भावप्रसङ्गात् तत्र यावद्द्रव्यभावात्। तस्मादस्ति विभागोऽर्थान्तरम् स च गुणः विरोधिगुणान्तरनाश्यः विरोधिना समानाधिकरणं गुणमनारभ्य स्वाश्रये गुणनाशानुपपत्तेः कर्मैव संयोगनाशकं स्यादिति चेन्न विरोधिनो गुणस्य गुणनाशकत्वात्। किञ्च यत्राङ्गुलीहस्तभुजशरीराणां स्वस्वकर्मणा तरुसंयोगस्तत्राङ्गुलीमात्रे यत्नतन्त्रेण कर्मणाऽङ्गुलीतरुसंयोगनाशसम्भवेऽपि हस्ततरुभुजतरुशरीरतरुसंयोगानामनाशप्रसङ्गात् हस्तादीनामक्रियत्वात् अङ्गुलीकर्मणश्च व्यधिकरणत्वात् व्यधिकरणस्यापि कर्मणः संयोगनाशकत्वे क्वचिदप्युत्पन्नेन कर्मणा युगपदेव सर्वसंयोगनाशापत्तेः। स्वस्थाने तत्र का गतिरिति चेत् अङ्गुलीतरुविभागेन जनितो हस्ततरुविभागो हस्ततरुसंयोगनाशक इत्यभ्युपगमात्। व्यधिकरणेनाङ्गुलीकर्मणैव हस्ततरुसंयोगनाशोऽस्तु न चातिप्रसङ्गः आद्यया अञ्चितपरम्परासंयोगस्यैव अधिकरणकर्मणानाश्यत्वाभ्युपगमादिति सर्वज्ञेन यदुक्तं तदपि न युक्तं विरोधिनः स्वाश्रयाधिकरणस्यैव सर्वत्र नाशकत्वानुभवात् बाधकमन्तरेण तत्परित्यागानुपपत्तेः। यद्विभागो न विभागकार्यो तत्र विभागस्य यद्द्रव्यसमवायिकारणत्वं न सूत्रकारेण न हि वंशे पाट्यमाने दृष्टे च चरमावयवसंयोगे द्वयारन्तरे चोपरिलभ्यमाणे यः शब्दोत्पद्यते तत्र दलाकाशविभागादन्य दलसमवायिकारणं प्रयुञ्जानाः। न च द्रव्यदग्धदलमानस्फुटदृष्टेषुचीतूलारे विभागातिरिक्तदलसमवायिकारणं पश्यामः। कारणाकारणविभागाच्च कार्याकार्यविभागमनुमन्यामहे कपालन्यायेन स्वस्वकर्मजनितानङ्गुलीतरुसंयोगभुजतरुसंयोगशरीरतरुसंयोगानामङ्गुलीमात्रोत्पन्नकर्मणाऽङ्गुलीतरुविभागे सति अङ्गुलीतरुसंयोगनाशे सत्यपि हस्ततरुसंयोगादीनां नाशः तत्र हि विभागजविभागपरम्परयैव तत्तत्संयोगनाशिकेत्युक्तत्वात् कारणद्रव्यविभागपूर्वके तु कारणाकारणविभागे न संप्रत्ययः यतोवंशदले यदुत्पन्नं कर्म तेन दलान्तरविभाग-यदाकाशादिविभागस्यापि जननसम्भवात् यावद्भिः कर्मभिर्दलं संयुक्तमासीत् तावद्भिस्तत्कर्मणा विभागस्य दर्शनात् नञ्शक्त्यात्मतत्पत्रेन कर्मणाऽङ्गुल्यन्तरविभागयदाकाशादिदेशेभ्योऽपि विभागा न जन्यन्ते। कपालदले क्षोत्पन्नेन कर्मणा दलान्तरविभागवदाकाशादिदेशेभ्यो वा न विभागा आरभ्यन्ते द्रव्यारम्भकसंयोगाविरोधिनः शतमपि विभागानेकं कर्मारभताम्। अस्तु कर्म द्रव्यारम्भकसंयोगविरोधिनं विभागमारभते न तत् द्रव्यारम्भकसंयोगाविरोधिनमपि यत्तु द्रव्यारम्भकसंयोगाविरोधिनं तद् द्रव्यारम्भकसंयोविरोधिनमिति ब्रूमः। कुत एतदिति चेत् कार्यवैचित्र्येण कारणवैचित्र्यानुमानप्रामाण्यात्। नन्वेवं कर्मण्यपि वैचित्र्यमानयन्त्रकं तथाचैकं कर्म द्रव्यारम्भकसंयोगविरोधिनं विभागं जनयत् यथा विकसत् कमलकुड्मलादावपरञ्च द्रव्यारम्भकसंयोगविरोधिनमविरोधिनञ्चोभयमिति मैवं कार्यविरोधो हि कारणवैचित्र्यकल्पनामूलं स च विरोधः एकस्य द्रव्यारम्भकसंयोगप्रतिबन्धित्वेन अपरस्य तु तदप्रतिबन्धित्वेनेति तथैव वैचित्र्यानुपपत्तिकल्पनौचित्यात् तच्चेदं वंशदले वर्त्तमानं कर्म दलद्वयविभागमात्रं जनयति स च विभागोऽन्ये आकाशादिदेशाविभागं द्रव्यारम्भकसंयोगाप्रतिबन्धिनं विभागमारभते तस्य च विरोधित्वस्य विभागजनने कर्मत्वापत्तिरिति द्रव्यनाशविशिष्टं कालमपेक्षते। नन्वेवमपि कर्मैव तज्जनयतु अतीतकालत्वात् विभागजनने कर्मणः क्षोत्पत्त्यनन्तर एव काले नत्वेवं विभागेन जनिते विलम्बान्तरे कर्म

प्रदेशान्तरसंयोगमपि न जनयेत्, न संयोगजनं प्रति कर्मणोऽनतीतकालत्वात् अन्यथा कर्म न नष्येदेव तस्योत्तरसंयोगमात्रनाशत्वात् । सोऽयं विभाग उत्तरसंयोग नाशः क्वचित्क्षयस्थायी क्वचिदाश्रयनाशनाशः तद्यथा तन्तोरवयवेऽग्नौ कर्म तदनन्तरमंशुद्वयविभागस्तदैव तन्त्वन्तरे कर्म ततोऽंशुद्वयविभागेन तन्त्वारम्भकसंयोग-नाशस्तन्तुकर्मणा च विभागस्ततो द्व्यारम्भकसंयोगनाशः पश्चात्तन्तुकर्मणो नाशस्तस्माच्च तन्त्वन्तरकर्मजन्यविभाग-नाशः । नन्वेवं तन्त्वन्तरोत्पन्नस्य कर्मणो न नाशः स्यादिनाशकाभावात्, उत्तरसंयोगेन हि तन्नाशत्वेन विभागे च नष्टे नोत्तरसंयोग इति चेन्न तन्तौ यत् कर्मोत्पन्नं तेन यथा विनष्टावयवस्यतन्तोर्विभागो जनितस्तथा तदंशोरपि विभागो जननीयः सोऽप्यारम्भकसंयोगविरोध्येव तेनांशुतन्तुविभागेन तन्त्वाकाश-विभागस्तेन चोत्तरसंयोगस्तेन ततः कर्मनाशः । यदा-पत्र तन्तौ यदा कर्म तदंशावपि तदैव कर्म तच्च कर्म-विनष्टावयवतन्तुतदवयवाकाशादिदेशादुद्युगपदेव विभा-गानारभते सर्वेषां विभागानामारम्भकसंयोगविरोधि-त्वात् तथा च कारणमंशुरकारणञ्चाकाशादि तद्विभागात् कार्यस्य तन्तोरकार्यमाकाशादिना यो विभाग उत्पन्न-स्तदनन्तरोत्पत्तिकेन संयोगेन तन्तुसमवेतस्य कर्मणो विनाश इति । क्वचिदुभाभ्यां तद्यथा तन्तुवीरणयोः संयोगे सति तन्त्ववयवेऽग्नौ कर्म वीरणे च कर्मैतैकः कालः संयुक्तसंयोगान्तरविभागक्रमेण च संयोगस्य तन्त्वारम्भकस्य विनाशः वीरणकर्मणा च तन्तुवीरण-विभागस्तन्तुवीरणसंयोगनाशस्य तन्त्वारम्भकसंयोगनाशा-नन्तरं तन्तुनाशस्तन्तुवीरणसंयोगनाशानन्तरं वीरणस्य प्रदेशान्तरसंयोगस्ताभ्यामाश्रयनाशसंयोगाभ्यां विभाग-नाशः" उप० वृत्तिः । कर्मणि घञ् । ५क्षये अक्षे च ।

विभाज्य त्रि० विभक्तुमर्हति वि+भज-ण्यर्थे ण्यत् । विभागयोग्ये विभजनीये धनादौ ।

"कुले विनीतविद्यानां स्वातन्त्र्यं पितृतोऽपि वा । शौर्य-प्राप्तं तु यद्वित्तं विभाज्यं तदुदाहृतम्" ।

विभाण्डक पु० ऋष्यशृङ्गपितरि मुनिभेदे रामा० ।

विभाण्डी स्त्री० विभाण्ड+गौरा० ङीष् । आवर्त्तकीलतायां राजनि० ।

विभात न० वि+भा-क्त । प्रभाते शब्दरत्ना० ।

विभाव पु० वि+भू-घञ् । १पदार्थभेदे अलङ्कारोक्ते रस-बोद्दीपके २आलम्बनादौ "रत्यादुद्बोधकालोके विभावाः काव्यनाट्ययोः । आलम्बनोद्दीपनाख्यौ तस्य भेदाविमौ स्मृताः" । ये हि लोके रामादिगतरति-हासादीनामुद्बोधकारणानि शीतादयस्त एव काव्ये नाट्ये च निवेशिताः सन्तः विभाव्यन्ते आस्वादा-ङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिरिति विभावा उच्यन्ते" सा० द० ३प० ।

"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा" सा०३प० ।

विभावना स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ४०४पृ०दृश्यम् ।

विभावरी स्त्री वि+भा-वनिप् ङीप् वनो र च । १रात्रौ अमरः । २हरिद्रायां ३कृष्णत्रिवृत्यां ४यक्षकयोषिति ५वि-वादवस्तुखण्डां भेदि०।६सुखरश्मिवाम् शब्दर०। ७भेदा-हृते च रत्नमा० ।

विभावसु विभायुक्ता वसवोऽस्य । १सूर्ये २अर्कवृक्षे ३वह्नौ चित्रकवृक्षे अमरः । ५चन्द्रे ६हारभेदे च हेमच० ।

विभाषा स्त्री विरुद्धा भाषा वि+भाष-अ वा । व्याकरणोक्ते पाक्षिकप्राप्तिफलके "नवेति विभाषा" इत्युक्तलक्षणे विकल्पविधाने । [भक्ते च ।

विभिन्न त्रि० वि+भिद-क्त । १प्रकाशिते २विदलिते ३वि-

विभीतक पु० विशेषेण भीत इव इवार्थे कन् । (बयड़ा) वृक्षे अमरः । "विभीतकं स्वादुपाकं कषायं कफपित्तनुत् । उष्णवीर्यं हिमस्पर्शं भेदनं कासनाशनम् । रूक्षं नेत्रहितं केश्यं कृमिवैस्वर्यनाशनम् । विभीतफलजा मृद्वर्हि कफवातहरो लघुः । कषायो मदकृच्चाथ धात्री मज्जापि तद्गुणः" भावप्र० । काभावे विभीतोऽप्यत्र ।

विभीषण पु० विशेषेण भीषयते शत्रून् भी-णिच्-सुक् च ल्यु । १रावणभ्रातरि राक्षसे रामा० । २नलतृणे राजनि० । ३भयकारके त्रि० । [खुल् । भयप्रदर्शने

विभीषिका स्त्री वि+भी-णिच्-सुक् च धात्वर्थनिर्देशे

विभु पु० वि+भू-डु । सर्वमूर्त्तसंयुक्ते १काशादौ २महादेवे ३अक्षणि च मेदि० ४भट्टत्वे त्रिका० । ५विष्णौ शब्दमा० व्यापके ७नित्ये ८बहुदेहे हेमच०।९दृढे त्रि०अजयः । १०परमभक्तिवशयुते त्रि०शब्दा० ।

विभूति स्त्री वि+भू-क्तिन् । १अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा । ईशित्वं च वशित्वञ्च तथा कामावसायिता" इत्युक्ते २ऐश्वर्ये च । ऐश्वर्य-शब्दे १५४६ पृ० दृश्यम् ।

विभूषा स्त्री वि+भूष-अ । १शोभायां हेमच० २भूषणे च ।

विभ्रम पु० वि+भ्रम-घञ्। १स्त्रीणां शृङ्गाराङ्गे चेष्टाभेदे "विभ्रमस्त्वरयाऽकाले भूषास्थानविपर्य्ययः" इत्युक्ते २त्वरया भूषास्थानवैपरीत्ये च "यशाप्सारो विभ्रम-मण्डनानाम्" कुमारः। विशेषेण भ्रमोऽनौ मेदि० ४शोभायां ५सन्देहे हेमच०। ७भ्रमणे शब्दरत्ना०। "चित्तहृत्यनवस्थानं शृङ्गारात् विभ्रमो भवेत्" उक्ते ८शृङ्गाराच्चित्तहृत्यनवस्थाने। "क्रोधं स्मितञ्च कुसुमाभरणादि याच्ञा तद्दर्जनञ्च सहसैव विमर्दनञ्च। आत्मीय कान्तवचनं ह्यपनं सखीभिर्निष्कारणोत्थितगतं यद विभ्रमं तत्" इत्युक्ते स्त्रीणां ९चेष्टाभेदे च। भावे घञ्। १बाह्यावस्थायां स्त्री शब्दरत्ना०।

विभ्राज् त्रि० वि+भ्राज-क्विप्। भूषणादिना दीप्ते अमरः

विमत त्रि० वि+मन-क्त। विरुद्धमतियुक्ते १विषमे २सन्दिग्धे च। [व्याकुलचित्ते अमरः।

विमनस्(स्क) त्रि० विक्षिप्तं मनो यस्य वा कप्। चिन्तादिना

विमर्द पु० विशेषेणोऽर्द्यतेऽसौ वि+मृद-घञ्। (कालकाक्षुन्द्रिया) १दृष्टे रत्नमा०। संज्ञायां कन्। चक्रमर्दके राजनि०। भावे घञ्। २मर्दने शकुङ्कुमादिमर्दने च।

विमर्शन न० वि+मृश-ल्युट्। १परामर्शे न्यायोक्ते साध्याव्यापद्देहमत्त्वेन पक्षनिश्चये २वितर्के च हेम०। घञ् विमर्श तत्रैवार्थे पु०।

विमर्ष पु० वि+मृष-घञ्। १विचारे जटा० २नाटकाङ्गसन्धिभेदे च। स च "अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति। मुखं प्रतिमुखं गर्भो विमर्ष उपसंहृतिः। इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते" इति विभज्य "यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः। शापादेः सान्तरायश्च स विमर्ष इति स्मृतः" इति सा० द० लक्षितः। तदङ्गानि च तत्रोक्तानि यथा "अपवादोऽथ सम्फोटो व्यवसायोद्द्योद्भुतिः। शक्तिः-प्रसङ्गखेदश्च प्रतिषेधो विरोधनम्। प्ररोचना प्रहर्षश्चादानं क्षेपणं तथा"।

विमल त्रि० विगतो मलो यस्मात्। १स्वच्छे निर्मले अमरः। विगतो मलो यस्याः ५ब०। (चामकषा) २सप्तलायाम् अमरः। जगन्नाथक्षेत्रस्थे ३देवीभेदे स्त्री तन्त्रसा०। ४दुर्गामूर्त्तिभेदे देवीपु०। ५उपरसभेदे न० राजनि०। ६जिनदेवे पु० ७चाक्षुषे त्रि० शब्दर०। "चेतसा सत्त्वयुक्तेन दानं यद्दु विमलं श्रुतम्" गरुड़पु० उक्ते ८सात्त्विके दानभेदे न०।

विमातृ स्त्री विरुद्धा माता। मातृसपत्न्याम्। "मातुः पितुः कनीयांसं न नमेद्वयसाधिकः। नमस्कुर्य्यात् गुरोः पत्नीं भ्रातृजायां विमातरम्" भ० त० स्मृतिः। तत्रैव ऋत्यर्थसारे "स्त्रियो नमस्या दृद्धाश्च वयसा पत्युरेव ताः"। "यतः पत्युर्वयसा ताः स्त्रियो दृद्धाः यतः कनिष्ठा अपि अपि नमस्याः" म०त०रघु०। [अमरः।

विमातृज पु० विमातुर्जायते जन-ड। सापत्ने भ्रातरि

विमान पुंन० वि+मन-घञ् वि+मा-ल्युट् वा। १देवयाने रथे अमरः। २सार्वभौमगजभेदे च ३यानमात्रे ४अर्णवे पु० मेदि० ५परिमाणे च न०।

विमार्ग पु० विरुद्धो मार्गः। १कुपथे २निन्दिताचारे च।

विमुख त्रि०विरुद्धमननुकूलं मुखमस्य। १वक्रितमुखे २निहते च

विमुद्र त्रि० विगता मुद्रा मुकुलीभावो यस्य। १विकसिते हेमच०। २मुद्रारहिते च।

विम्ब पुंन०। वी+बन्-मुम्हुस्वौ। १दर्पणादौ भासमानप्रतिबिम्बाधारे २कमण्डलौ च संक्षिप्तमा०। ३सूर्य्यादिमण्डले अमरः। ४मकलासे पुंस्त्री०मेदि०स्त्रियां ङीष्। बिम्बायाः फलम् अण् तस्य लुप्। ५बिम्बिकाफले न०।

बिम्बजा स्त्री बिम्बं फलं जायतेऽस्याः जन-ड १बिम्बिकालतायां (तेलाकुचा) शब्दच०।

बिम्बट पु० बिम्बमटति अट-अच् मुक्। सर्षपे शब्दच०।

बिम्बा(म्बी) स्त्री बिम्बमस्त्यस्याः अच् वा गौरा० ङीष्। (तेलाकुचा) १लतामेदे शब्दर० "बिम्बीफलं स्वादु शीतं गुरु पित्तास्रवातजित्। सस्नानं लेखनं रूक्ष्यं विबन्धाध्मानकारकम्" भावप्र०। स्वार्थे क कापि अत इत्वम् तत्रार्थे। सूर्य्यादिमण्डले पुंन० नात इत्वम्।

वियत् न० वि+यम-क्विप् मलोपे तुक्। आकाशे अमरः।

वियद्गङ्गा स्त्री वियत्स्था गङ्गा मुक०। स्वर्गगङ्गायां मन्दाकिन्याम् अमरः।

वियद्भूति स्त्री वियतो भूतिरिव। अभ्रकारे त्रिका०।

वियन्मणि पु० वियतो मणिरिव प्रकाशकत्वात् अभ्रकत्वाद्वा। द्युमणौ सूर्य्ये शब्दार०।

वियम पु० वि+यम-घञ्। १संयमे अमरः। २दुःख क्षीरस्वामी। पक्षे वृद्धिः। वियाम तत्रार्थे।

वियात त्रि० वि+या-क्त याति अच् वा। १भ्रष्टे २निर्लज्जे च अमरः। तस्य भावः ष्यञ्। वैयात्य निर्लज्जत्वे न० "वैयात्यं सुरतेष्वपि" माघः।

वियोग पु० वि+युज-घञ्। १विश्लेषे हेमच० ६त०

२पक्षियोगे च गणितप्रसिद्धे ३राश्योर्व्यवकलने च।

वियोगिन् पु० वि+युज–घिनुण्। १चक्रवाके पक्षिणि शब्दच०। २विच्छेदवति। ३पक्षियोगवति च त्रि०। स्त्रियां ङीप् "वियोगिनीमैक्षत दाडिमीमसौ" नैष०।

विरक्त त्रि० वि+रनृज–क्त। १विच्छिन्ने २व्यनुरक्ते ३दुर्भगायां स्त्रियां स्त्री त्रिका०।

विरङ्ग पु० वि+रनृज–घञ्। कङ्कुष्ठे राजनि०।

विरचित त्रि० वि+रच–क्त। १कृते २निर्मिते च। [अमरः।

विरजस्तमस् त्रि० विगते रजस्तमसी यतः। सत्त्वगुणप्रधाने

विरजस्(स्का) स्त्री विगतं रजो यस्याः वा कप्। १गतार्त्तवायां स्त्रियाम् जटा०। २रजोगुणहीने त्रि०।

विरजा स्त्री विशेषेण रज्यतेऽत्र रनृज–घञर्थे क। १दूर्वायां हारा०गोलोकस्थे २राधासखीभेदे तच्छापाज्जायमाने ३नदीभेदे च ब्रह्मवै० ज० ख० ३५अ०। ४कपित्थानीवृक्षे रत्नमा०। ५ययातिमातरि कूर्मपु० २०अ०। सा च नदी उत्कलदेशस्था जगद्धात्रीसन्निकृष्टा "उत्कले नाभिदेशश्च विरजाक्षेत्र उच्यते। विमलाऽत्र महादेवी जगद्धात्री तु भैरवः" पीठनिर्णयः। तत्र सप्तदिनोपवासो न कार्य्यो "सप्तदिनं चोपवासस्य सर्वत्रैवोक्तत्वं विधिः। वर्जयित्वा गयां गङ्गां विशालां विरजां तथा" प्रा०त०।

विरञ्च(ञ्चि) पु० वि+रच–अच् इञ् वा सम् च। जगत्स्रष्टरि ब्रह्मणि हेम०। [शब्दर०।

विरण न० विशिष्टो रणो मूलमस्य। उशीरे (वेणारमूल)

विरत त्रि० वि+रम–क्त। निवृत्ते। [पारामावे च अमरः।

विरति स्त्री वि+रम–क्तिन्। १निवृत्तौ २विषयसेवायाञ्च व्यञ्जनविशेषे च। ४दंशे न०राजनि०।

विरल त्रि० वि+रा–कलन्। १व्यवकाशे २विच्छिन्ने अमरः।

विरलजानुक त्रि० ६त०। वक्रजानुके हेमच०।

विरलद्रवा स्त्री ६व०। लक्ष्णायां यवागवां जटा०।

विरव पु० वि+रु–घञ्। १शब्दे अमरः। आदि० ६व०।

विरिञ्च पु० वि+रिच–अच् सम् च। १विष्णौ २जगत्स्रष्टरि वेधसि, ३शिवे च शब्दर०। इन् विरिञ्चि तत्त्वार्थे अमरः।

विरुद्ध त्रि० वि+रुध–क्त। विरोधयुक्ते २हेत्वाभासभेदे अनैकान्तो विरुद्धश्चेत्यादिना विभज्य "यः साध्यवति नास्ति स विरुद्ध उदाहृतः" भाषा०लक्षितः। "एवकारेण साध्यवत्त्वावच्छेदेन हेत्वभाव इति सूचितम् तथा च साध्यव्यापकाभावप्रतियोगित्वं तदर्थः सि०मुक्ता०" गौतम १।४७ सू० अन्यथा लक्षिते यथा "सिद्धान्तमभ्युपेत्य

३राग्यशून्ये त्रि०। "विषयेष्वनिवर्त्तनं रागो मानसो मल उच्यते। तेष्वेव तु विरागो हि नैर्मल्यं सतदाहृतम्" भा० व०। वैराग्यशब्दे दृश्यम्।

विराज् पु० विशेषेण राजते क्विप्। १क्षत्रिये ब्रह्माण्डात्मकस्थूलदेहाभिमानिनि २व्यष्टिपुरुषे ३छन्दोभेदे च। वेदे द्वाभ्यामक्षराभ्यां गायत्र्यादीनां समष्ट्यधिकत्वे विराट् छन्दो भवति छन्दःशब्दे २६७८ पृ० कात्यायनवाक्यं दृश्यम्। "समष्टिरूपस्थूलशरीराभिमानी चेतनः विराट्संज्ञो वेदान्तादौ प्रसिद्धः। तस्योत्पत्तिः तद्रूपञ्च भागवतादौ दृश्यम्। अच्। विराजोऽपि समष्टिस्थूलाभिमानिनि चेतने। ४स्वायम्भुवमनौ च। "ततः कालेन महता तस्य पुत्रोऽभवन्मनुः। स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम्" भवद्भ०३अ०। "मानवे तु स्वायम्भुवस्य विराट्पुत्रत्वमभिहितम्। यथा "द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत्। अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभुः। तपस्तप्त्वाऽसृजद्यन्तु स स्वयं पुरुषो विराट्। तं मां वित्तास्य सर्वस्य स्रष्टारं द्विजसत्तमाः!"। [च। भा० विराटपर्वणि दृश्यम्

विराट पु० विशेषो राटो यत्र। १देशभेदे, तद्देशाधिपे २नृपे

विराध पु० राक्षसभेदे। स च तुम्बुरुनामा गन्धर्वः कुबेरशापात् राक्षसत्वमापन्नः रामेण मोचितः तत्कथा वह्निपु० "तुम्बुरुर्नाम गन्धर्वः प्रविष्टो राक्षसीं तनुम्। अभिशापादहं घोरं प्राप्तो वैश्रवणेन वै"।

विराधन न० वि+राध–ल्युट्। पीड़ायाम्। शब्दर०।

विराम पु० वि+रम–घञ्। १व्यवसाने, २विरतौ, ३निवृत्तौ च जटा०। ४मध्ये त्रिका०। ५व्याकरणोक्ते परवर्णाभावे च।

विराल पु स्त्री० वि+डल–घञ् डस्य रः। बिड़ाले पशुभेदे अमरः स्त्रियां ङीष्। [२विगतरवे त्रिका०।

विराव पु० वि+रु–घञ्। १शब्दे अमरः। आदि० ६व०।

विरिञ्च पु० वि+रिच–अच् सम् च। १विष्णौ २जगत्स्रष्टरि वेधसि, ३शिवे च शब्दर०। इन् विरिञ्चि तत्त्वार्थे अमरः।

विरुद्ध त्रि० वि+रुध–क्त। विरोधयुक्ते २हेत्वाभासभेदे अनैकान्तो विरुद्धश्चेत्यादिना विभज्य "यः साध्यवति नास्ति स विरुद्ध उदाहृतः" भाषा०लक्षितः। "एवकारेण साध्यवत्त्वावच्छेदेन हेत्वभाव इति सूचितम् तथा च साध्यव्यापकाभावप्रतियोगित्वं तदर्थः सि०मुक्ता०" गौतम १।४७ सू० अन्यथा लक्षिते यथा "सिद्धान्तमभ्युपेत्य

तद्विरोधी विरुद्धः" "तं (सिद्धान्तं) विरुणद्धीति तद्विरोधी अभ्युपगतं सिद्धान्तं व्याहन्तीति। यथा सोऽयं विकारो व्यक्तेरपैति नित्यत्वप्रतिषेधात् अपेतोऽपीति विनाशप्रतिषेधात् न नित्यो विकार उपपद्यते इत्येव हेतव्यक्तेरपेतोऽपि विकारोऽस्तीत्यनेन स्वसिद्धान्तेन विरुध्यते। कथं? व्यक्तेरात्मलाभः अपायः प्रच्युतिः यदात्मलाभात् प्रच्युतो विकारोऽस्ति नित्यत्वप्रतिषेधो नोपपद्यते यत् व्यक्तेरपेतस्यापि विकारस्यास्तित्वं तत् खलु नित्यत्वमिति। नित्यत्वप्रतिषेधो नाम विकारस्यात्मलाभप्रच्युतेरुपपत्तिः। यद् आत्मलाभात् प्रच्यवते तदनित्यं दृष्टं यदस्ति न तदात्मलाभात् प्रच्यवते। अस्तित्वं आत्मलाभात् प्रच्युतिरिति तद्विरुद्धा वेतौ न सह सम्भवतः। स चायं हेतुर्यद्विरुद्धान्तमाश्रित्य प्रवर्त्तते तमेव व्याहन्तीति" वा० भा०।

इत्थं त्विदमन्यथा व्याख्यातं यथा "क्रमप्राप्तं विरुद्धं लक्षयति सिद्धान्तमिति अत्र च सिद्धान्तं साध्यं प्रतिज्ञायां हि सिद्धस्य पक्षधर्म्मे साध्यमभिधीयते तथा च साध्यमभ्युपेत्य उद्दिश्य प्रयुक्तस्तद्विरोधी साध्याभावव्याप्त इति फलितार्थः। यथा वह्निमान् हृदत्वादिति। अतस्य साध्याभावान्नुमितिसामर्थ्यात्तेन साध्यानुमितिप्रतिबन्धो दूषकतावीजम्। न च स्वप्रतिपक्षाविशेषः तत्र हेत्वन्तरं साध्याभावसाधकम्। इह तु हेतुरेव साध्याभावसाधकः साध्यसाधकत्वेन स्वयोपलब्धत्व इत्यशक्तिविशेषोद्भावकत्वेन विशेषात्" इदञ्च नावद्वीर्यविरुद्धोदाहरणम् व्यभिचारादेः शङ्कात्। किन्तु यथाधेयसङ्करोऽयुधाधेरसङ्करादित्युक्तेरस्य दूषकतावीजत्वात्तदुदाहरणत्वं बोध्यम्।

विरुद्धमतिक्रान्त पु० "विपरीतार्थधर्म्मित्वात् विरुद्धमतिक्रान्तम्" उक्ते काव्यदोषभेदे २७६२५० दृश्यम्। [रिते च मेदि०।

विरूढ त्रि० विशेषेण रोहति वि+रुह-क्त। १जाते २चक्षुः

विरूप त्रि० विकृतं रूपमस्य। १दुष्टरूपयुक्ते २निन्दिते च। ३पिप्पलीमूले न० राजनि०। ४व्यभिचारिषायां, ५दुरालभायाञ्च स्त्री० राजनि०।

विरूपाक्ष पु० विरूपे विकटे अक्षिणी यस्य बहु०। १महादेवे अमरः। २विकटनेत्रे त्रि०।

विरूपिन् त्रि० विकृतं रूपमस्त्यस्य इनि। [कुरूपे त्रिका०। २जाकृष्णजलौ पु० राजनि०। [व्रीहि०। २व्यतिरेके च।

विरेक पु० वि+रिच-घञ्। १मलादेरधोनिःसरणे, ग-

विरेचन न० वि+रिच-णिच्-ल्युट्। १मलादेर्निःसारणे, तद्विधिः भावप्र० उक्तो यथा

"स्निग्धस्विन्नाय दातव्यं स्नेहस्यन्दिरेचनम्। अवान्तस्य स्वधःस्तो यद्यूर्ध्वं हृदयेक्षकः। मन्दाग्नि गौरवं कुर्य्याज्जनयेद् वा प्रवाहिकाम्। अथ वा पाचनैरामं बलासं परिपाचयेत्। कफो वस्ते यदा दृष्टे देहगुप्तौ विरेचयेत्। अन्यदात्ययिके कार्य्ये शोधनं शोधयेद् बुधः"। आत्ययिके प्राणसङ्कटे। "पित्ते विरेचनं युञ्जात्तामोद्भूते गदे मथा। उदरे च तथाध्माने कोष्ठशुद्धौ विशेषतः। दोषाः कदाचित् कुप्यन्ति जिता लङ्घनपाचनैः। शोधनैः शोधिता ये तु न तेषां पुनरुद्भवः। बालो वृद्धो वृथा स्निग्धः क्षतक्षीणो भयान्वितः। आलसृषार्त्तः स्थूलश्च गर्भिणी च नवज्वरी। मदप्रसक्ता नारी च मन्दाग्निश्च मदात्ययी। शल्यार्दितश्च रूक्षश्च न विरेच्या विजानता। जीर्णज्वरी गरव्याधी वातरोगी भगन्दरी। अर्शःपाण्डूदरग्रन्थिकृच्छ्रोगार्च्चिपीड़िताः। योनिरोगप्रमेहार्त्ता गुल्मप्लीहव्रणार्दिताः। विद्रधिच्छर्दिविस्फोटविसूचीकुष्ठसंयुताः। कर्णनासाक्षिरोगक्षुदमेढ्रामयान्विताः। मूर्द्धक्षयोर्ध्वक्षिरोगार्त्ताः क्रिमिचारानिलार्दिताः। सूचिनो मूत्रघातार्त्ता विरेकार्हा नरा मताः। बद्धपित्तो मृदुः कोष्ठो बद्धश्लेष्मा च मध्यमः। बद्धवातः क्रूरकोष्ठो दुर्विरेच्यः स उच्यते। मृदौ मात्रा मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा। क्रूरे तीक्ष्णा मता दुर्व्यैर्मृदुमध्यमतीक्ष्णकैः। मृदुदोषापयश्चूतैलैरपि विरिच्यते। मध्यमस्त्विक्षुतातिक्तारालष्टत्वैर्विरेच्यते। क्रूरः सुकृपयसा क्षेमकीरीदन्तीफलादिभिः"। चञ्चुतैलम् एरण्डतैलम्। राजवृक्षः (वनवेड़ा) क्षेमकीरी (ओल) दन्तीफलम् हरहरदन्तीफलम् अयपालेति प्रसिद्धम् "मात्रोत्तमा विरेकस्य त्रिभिर्वेगैः कफान्तिका। वेगैर्विंशतिभिर्मध्या हीनोक्ता दशवेगिका। त्रिवेगेष्वाक्षात मध्यमं च पलं भवेत्। पलार्द्धञ्च कनीयायां कनीयस्तु विरेचनम्। कफकृमोदकक्षयीणां कर्म्मणां मध्याज्यलेहतः। कर्म्महृद्यं पलं वापि वयोरोगाद्यपेक्षया। पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाकाथादिभिः पिबेत्। त्रिफलाकाथगोमूत्रैः पित्तेष्वेव कफार्दितः। त्रिवृत्तैलैश्चवशुण्ठीनां चूर्णकल्कैः पिबेन्नरः। वातार्दितो विरेकाय स्नेहसाध्यो रसेन वा। एरण्डतैलं त्रिफलाक्वा-

क्वाथेन त्रिगुणेन वा। युक्तं पीतं पयोभिर्वा न विरेचयति विरेच्यते"। औषधमेव विरेचयत इत्यर्थः "त्रिवृता कौटजं बीजं पिप्पलीविश्वभेषजम्। सप्तलीकारसं क्षौद्रं वर्षाकाले विरेचनम्। त्रिवृदुदराजभावुल्लमर्कशेरीषोदीच्यचन्दनम्। द्राक्षाम्बुना सयष्ट्याह्वगोक्षुरश्च घनात्यये"। उदीच्याम्बाला घनात्यये शरदि। "पिप्पलीं नागरं त्रिवृत्तां श्यामां त्रिवृतया सह। त्रिफाक्षौद्रेण शिशिरे वसन्ते च विरेचनम्"। श्यामा (त्रिफासाम्ब) (त्रिवृता शर्करा तुल्या ग्रीष्मकाले विरेचनम्। अभयामरिचं गुडीविड्डाभलकानि च। पिप्पली पिप्पलीमूलं चव्यं सैन्धवमेव च। एतानि समभागानि दन्ती तु त्रिगुणा भवेत्। त्रिवृताद्गुणा ज्ञेया षड्गुणा चात्र शर्करा। मधुना मोदकान् कृत्वा कर्षमात्रान् प्रमाणतः। एकैकं भक्षयेत्प्रातः शीतक्षीरानुपेक्षणम्। तावद्विरेच्यते जन्तुर्यावद्युष्णं न सेवते। पानाहारविहारेषु भवेच्चिर्यन्त्रणः सदा। विषमज्वरमन्दाग्निपाण्डुकास भगन्दरान्। पृथग्दोषोद्भवगदज्वरदरकं जयेत्। स्नेहाभ्यङ्गञ्च रोगं च दिनमेकं सुधीस्त्यजेत्। सततं शीलनादेव पलितानि प्रणाशयेत्। अभया मोदका ह्येते रसायनपराः स्मृताः"। इति अभयादिमोदकः "पीत्वा विरेचनं शीतजलैः संशिष्य चक्षुषी। सुगन्धि किञ्चिदाघ्राय ताम्बूलं शीलयेद् बुधः। निर्वातस्थो न वेगांश्च धारयेच्च यतीन च। शीतास्बु न स्पृशेत् क्वापि कोष्णनीरं पिबेन्मुहुः। वलासौषधपित्तानि वायुर्वान्ते प्रणश्यति। रेकात्तथा रक्तं पित्तं भेषजञ्च कफो ग्रजेत्। दुर्विरिक्तस्य नाशेषु रक्तता कृच्छ्रमूलरुक्। सुरीषवातसङ्गश्च कण्डूमत्स्वलनौरवम्। विदाहोऽक्षिराधानं भ्रमश्चर्दिश्च जायते। न पुनः पाचनैः स्नेहैः पक्वा स्निग्धन्तु रेचयेत्। तेनाशोपद्रवा शान्ति दीप्ताग्नेर्लघुता भवेत्। विरेकस्नातियोगेन मूर्च्छा श्वासो गुदस्य च। भ्रंशः क्षयातियोगः स्यान्मांसधारण सक्षिभम्। मेदोनिभस्रुताभासं रक्तस्रावि विरेचयते। तस्य शीतास्बुभिः सिक्ता शरीरं तरुपल्लवैः। मधुमिश्रैस्तथा शीतैः कारयेद्वमनं मृदु। सक्षारस्वच्छः कलको दत्ता सौवीरकेण वा। पिष्टा माक्षिकयुक्तेन कन्यतीसारसुल्वणम्। सौवीरं तु यवैरामैः पक्वैर्वा मिस्रुतैः कृतैः"। सौवीरं तन्त्रान्तम् "अजाक्षीरं रसाक्षि वैष्किरं कृशिरं तथा। माक्षिकैः पक्वैः स्तुल्यैर्मद्यैरेवापि भोजयेत्। वर्त्तिकालावविकिरकपिञ्जलकतित्तिराः। कक्षोरुक्कुराद्याश्च विष्किराः सप्तदाहृताः"। कपिञ्जल इति ख्यातो लोके कविशतित्तिरः। क्कुरः। (कराट) इति लोके। हरिणस्तास्त्रवर्णः स्मृतः। "प्रीतैः संग्राहिभिर्द्रव्यैः कुर्यात् संमर्दनं भिषक्। स्नायवे मनसस्तुष्टावनुलोमकृतेऽनिले। सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेत्ततः। इन्द्रियाणां बलं बुद्धेः प्रसादो वह्निदीप्तता। धातु स्थैर्यं वयस्थैर्यमवेक्ष्येच्छनसेवनात्। प्रतापसेवां शीताम्बु स्नेहाभ्यङ्गमजीर्णताम्। व्यायामं मैथुनञ्चैव न सेवेत विरेचितः। शालिषष्टिकमुद्गाद्यैर्यवागूमोजयेत् क्रताम्। जङ्गालविष्किराणां वा रसैः शाल्योदनं क्षितम्। राजीवः शृतसञ्चैव जङ्गालाः सरभादयः"। विरेचयति वि+रिच-णिच्-ल्यु। २पीलुवृक्षे पु० राजनि०। ३भेदकमात्रे त्रि०। ण्वुल् विरेचक तत्रार्थे त्रि०।

विरेफ पु० वि+रिफ-घञ्। मद्यमात्रे धनञ्जयः। प्राद्यव० २रकारवर्णशून्ये त्रि०। [२स्यं किरणे पु० ३मेघच०।

विरोक पु० न० वि+रुच-घञ् चस्य कः। १किरणे त्रिका०।

विरोचन पु० वि+रुच-युच्। १सूर्य्ये २अर्कवृक्षे अमरः। ३बलिपितरि प्रह्लादतनयेऽसुरभेदे ४चन्द्रे ५वह्नौ च मेदि०। विरोचयति वि+रुच-णिच्-ल्यु। ६रोहितकवृक्षे ७यवप्रोनाकवृक्षे ८दहनकरञ्जे च पु० राजनि०। ९रुचिकारके त्रि०।

विरोध पु० वि+रुध-घञ्। १वैरे २विरुद्धतायाम् न्यायोक्ते साध्येनासामानाधिकरण्यरूपे २हेत्वदोषे यथा वह्निमान् जलादित्यत्र जलरूपहेतोर्वह्निना सामानाधिकरण्यं नास्ति अतस्तस्य दुष्टत्वम्। ४अर्थालङ्कारभेदे अलङ्कारशब्दे ४०४ पृ० दृश्यम्। ५विपरीतार्थकत्वे च। "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्" जैमि० प्रभादिषु "विप्लवं लभते सर्वं विरोधे भयसंभवम्। विकारः सर्वतोऽपायः" इत्युक्तलक्षणे ६दुर्वभेदे।

विरोधन न० वि+रुध-ल्युट्। वैरे अमरः।

विरोधिन् पु० वि+रुध-णिनि। १रिपौ अमरः। षष्टिसंवत्सरमध्ये "जायते मानुषे कष्टं विरोधिनि न संशयः" इत्युक्तलक्षणे २वत्सरभेदे च। ३विरोधकारके त्रि०।

विरोधाभास पु० विरोधः इवाभासते आ+भास-घञ्। अर्थालङ्कारभेदे अलङ्कारशब्दे ४०४ पृ० दृश्यम्।

विरोधोक्ति स्त्री विरुद्धमिवोधिक्तिरूपे अमरः।

विल स्तृतौ तु० पर० सक० सेट्। विलति अवेलीत्।

विलच पु० वि+लच-कच्। विक्षेपयुक्ते अमरः।

विलक्षण त्रि० विशिष्टं लक्षणमस्य प्रा०ब०। १विभिन्ने जटा० २विशेषणयुक्ते च। ३निष्प्रयोजनस्थितौ च न० भाग्नरिः ४दानार्थं कल्पितकाञ्चनपुरुषमूर्त्तियुतशय्याभेदे स्त्री। "अशोचान्नात् द्वितीयेऽह्नि शय्यां दद्यात् विलक्षणाम्। काञ्चनं पुरुषं तद्वत् फलपुष्पसमन्वितम्। संपूज्य द्विजदाम्पत्यं नानाभरणभूषणैः" गुप्त० मत्स्यपु०।

विलग्न त्रि० विशेषेण लग्नं लस्ज-क्त तस्य नः जस्य गः। १संलग्ने मेदि०। "मध्येन सा वेदि विलग्नमध्या" कुमा० २मध्यभागे हेमच०। ३कटौ अमरः। ४उदितमेषादिराशौ च न० "गोचरे वा विलग्ने वा" इति ज्योतिषम्।

विलम्ब पु० वि+लबि-घञ्। विलम्बने अशीघ्रत्वे प्रतीक्षणीय काले २प्रभवादिषु "तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत्। अर्थो भवति सामान्यो विलम्बे तु भयं महत्" ज्यो० त० उक्तलक्षणे वर्षभेदे।

विलम्बित त्रि० वि+लबि-क्त। १अशीघ्रे, २मन्दे च विलम्बन्ते कण्टकरचरणाद्यः प्रत्येकं प्रदर्शनाय स्वरविशेषज्ञानाय वा यत्र आधारे क्त। मध्यकालेन परिच्छेदे २नृत्ये ४गीते च।५विलम्बयुते त्रि०। तत्र वेदपाठे काञ्चभेदे विलम्बवृत्तिः साङ्गेनोक्ता यथा "द्रुतमध्यमने वृत्तिं प्रयोगार्थं तु मध्यमाम्। शिष्टाचाराप्रबोधार्थं विलम्बितां समाचरेत्"।

विलम्भ पु० वि+लभ-घञ् मुम्। अतिदाने अमरः।

विलय पु० वि+ली-अच्। १प्रलये शब्दर० २नाशे च।

विललना स्त्री० वि+लल-अच्। श्वेतवलायाम् रत्नमा०।

विलाप पु० वि+लप-घञ्। परिदेवनोक्तौ अमरः।

विलास पु० वि+लस-घञ्। "तत्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु" इत्युक्ते १स्त्रीणां शृङ्गारचेष्टाविशेषे २दीप्तौ च। "गतिस्थानासनादीनां मुखनेत्रादिकर्मणाम्। विशेषस्तु विलासः स्यादिष्टसन्दर्शनादिना" उक्ते स्त्रीणां ३स्वाभाविकभावभेदे सा० द०। "यद्रूपं तद्भेदेन स्वरूपेण विराजते। आकृत्यादिभिरन्याद्दक् स तदेकात्मरूपकः। स विलासः स्वांश इति धत्ते भेदद्वयं पुनः। स्वरूपसन्न्याकारं यत्तस्य भाति विलासतः। प्रायेणात्मसमं शक्त्या स विलासो निगद्यते" ४भागवतान्तर्गते पदार्थे

विलासिका स्त्री० उपरूपकरूपे नाटिकाभेदे "शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता। विदूषकविटाभ्याञ्च पीठमर्देन भूषिता। हीना गर्भविमर्शाभ्यां सन्धिभ्यां हीननायका। स्वल्पवृत्ता सुनेपथ्या विख्याता सा विलासिका" सा० द० ६प०।

विलासिनी स्त्री० विलासोऽस्त्यस्या अस्त्यर्थे इनि ङीप्। १नार्य्यां राजनि०। २वेश्यायां धरणिः। ३भोगवति त्रि०।४सर्पे ५लशुने ६वङ्गौ च पु० मेदि० ७चन्द्रे ८अरे० ९महादेवे पु० शब्दर०। [२विशिष्टे ३नष्टे च।

विलीन त्रि० वि-ली-क्त। १प्राप्तद्रवीभावे द्रुतादौ, अमरः।

विलेपन न० विलिप्यतेऽनेन करणे ल्युट्। गात्रानुलेपनद्रव्ये १पिष्ट २घृष्टे वा चन्दनकङ्कुमादौ। कर्मणि ल्युट् ङीप्। ३यवागवां ४सुवेशायां स्त्रियाञ्च स्त्री० मेदि०।

विलेप्य पु० वि+लिप-यत्। १यवागवाम् शब्दर०। २विलेपनीये त्रि०।

विलोचन न० वि+लुच-करणे ल्युट्। १नेत्रे जटा०। भावे ल्युट्। २दर्शने। [डिते त्रि०।

विलोडित न० वि+लोड-क्त। १तक्रे राजनि०। २आलो-

विलोम त्रि० विगतं लोम यत्र व्यधिक०। १विपरीते हेमच० २व्यत्यये ३क्रकुरे पुंस्त्री० स्त्रियां ङीष् ५वरुणे च पु० मेदि०। ६व्यस्तवैराशिकफलज्ञापके क्रियाभेदे "व्यस्तविधिर्विलोमे" लीला०। ७व्युत्क्रमान्विते यथा अकारादिहकारान्तवर्णानां व्युत्क्रमेण हकारादयकारान्ततया जपः। सप्तशतीप्रयोगभेदे मार्कण्डेय उवाचेत्यादिकस्य सावर्णिर्भविता मनुरित्यन्तस्य मानामन्त्रस्य व्युत्क्रमेण पाठः।

विलोमकर्मन् कर्म०। विपरीतकर्मणि "छेदं गुणं गुणं छेदं वर्गं मूलं पदं क्रतिम्। ऋणं स्वं स्वमृणं कुर्य्यात् दृश्ये राशिप्रसिद्धये" लीला० उक्ते व्यक्तराशेर्मानघानार्थे क्रियाभेदे।

विलोमजिह्व पुंस्त्री० विलोमा विपरीता जिह्वा यस्य। सर्पे बिला०स्त्रियां ङीष्। तस्य तथात्वकथा भा०आदि०८५अ० यथा "इत्युक्त्वा तांस्ततो देवाः पुनरेव मरीचिमाम्। परीयुर्ज्वलनस्यार्थे न चाविन्दन् हुताशनम्। अथ तानू द्विरदः कश्चित् सुरेन्द्रद्विरदोपमः। अम्बुमध्योऽग्निरित्येवमाह देवानू भृगूद्वह!। शशाप ज्वलनः सर्वानू द्विरदानू क्रोधमूर्च्छितः। प्रतीपा भवतां जिह्वा भविष्यतीति भृगूद्वह!"।

विलोमवर्ण पु० विलोमजः स्मृत्यनुक्ततया व्युत्क्रमजो वर्णः। प्रतिलोमजाते उत्तमस्त्रियामधमवर्णेन जनिते

सङ्कीर्णे वर्णे। [गौरा० ङीष्। आमलक्याम् मेदि०।
विलोमी स्त्री विगतं लोम केशो यस्याः ५ब० अच्समा०
विलोल त्रि० वि+लुल-अच्। १चञ्चले २विशेषसतृष्णे च।
विवर न० वि+वृ-अच्। १छिद्रे अमरः २दोषे च मेदि०।
विवरण न० वि+वृ-ल्युट्। १व्याख्याने हला० व्याख्यान-ग्रन्थव्याख्याने २ग्रन्थभेदे च। भा० भा० टीकापद्य-पादिकोपरि विवरणम्। पातञ्जलभाष्योपरि वाचस्पत्य विवरणम्। कैयटोपरि नागेशकृत विवरणमित्यादि।
विवरनालिका स्त्री विवरयुक्तं नालमस्त्यस्याः ठन्। वेणौ (बाँश) त्रिका०। [२मलिने च।
विवर्ण त्रि० विरुद्धो वर्णोऽस्य। १अधमे २नीचे च अमरः
विवर्त्त पु० वि+वृत-घञ्। १नृत्ये २समुदाये ३अपवर्त्तने वेदान्तोक्ते कारणात् विषमसत्ताकतया उत्पद्यमाने ४कार्य्ये च। यथा रज्ज्वात् रजतम् ब्रह्मणो जगत्। वेदान्तिभिः विवर्त्त वाद एवाश्रितः। न परिणामवादः।
विवश त्रि० विगता वश आयत्तता यस्य। १अस्वतन्त्रे २व्याकुले ३अरिष्टबुद्धियुते मेदि०।
विवस्वत् पु० वि+वस+क्विप् अस्त्यर्थे मतुप् मस्य वः। १सूर्य्ये २अर्कवृक्षे अमरः। ३अरुणे शब्दर०। ४देवे च मेदि०।
विवाक पु० वि+वच-संज्ञायां कर्त्तरि घञ्। विवेचके प्राड्विवाकशब्दे पृ० दृश्यम्।
विवाद पु० विरुद्धो वादः। "ऋणादिदायकलहे द्वयोर्बलोत्तरस्य वा। विवादो व्यवहारस्य" इत्युक्तलक्षणे व्यवहारे व्यवहारशब्दे दृश्यम्। २कलहे च।
विवाह पु० वि+वह-घञ्। दारपरिग्रहे तज्जनके व्यापारे च। उद्वाहशब्दे उपयमशब्दे च दृश्यम्। "भार्य्यात्वसम्पादकत्वानं विवाहः" इति उद्वा० रघु०। भार्य्यात्वस्योपलक्षणतया निवेशः। तेन नान्योन्याश्रयः "चरमसंस्कारो विजातीयसंस्कारो वा विवाहः" इत्यन्ये।
विवाहित पु० विवाहो जातोऽस्य तारं० इतच्। जात-विवाहे। [वाह्ये च।
विवाह्य त्रि० वि+वह-ण्यत्। १विवाहयोग्ये २विशेषेण
विविक्त त्रि० वि+विच-क्त। १निर्जने २पवित्रे अमरः ३असंयुक्ते च। ४कर्त्तरि-क्त। ५विवेकिनि त्रि० मेदि० ६दुर्भगायां स्त्रियां स्त्री त्रिका०।
विविध त्रि० विभिन्ना विधा यस्य। नानाप्रकारे।
विवीत पु० विशिष्टं वीतं गवादिप्रचारस्थानं यत्र। प्रचुर-तृणघासादियुक्ते देशे। "पथि ग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते" याज्ञवल्क्यस्मृतिव्याख्याने मिताक्षरायाम्।
विवृत त्रि० वि+वृ-क्त। १विस्तृते मेदि० २व्याख्याते च। ३जुहूरुग्भेदे स्त्री मेदि०।
विवृताक्ष पुंस्त्री० विवृते अक्षिणी यस्य बहुव्री०। कुक्कुटे हेमच०। स्त्रियां जातित्वात् ङित्त्वाच्च ङीष्।
विवृति स्त्री वि+वृ-क्तिन्। १विस्तारे मेदि० २व्याख्याने च। "वाक्यस्य शेषाद्विवृतेर्वदन्ति" शक्तिग्राहकमानम्।
विवृत्त त्रि० वि+वृत क्त। १तिर्य्यक्चलिते २प्रकटिते ३चुद्रोगभेदे स्त्री भावप्र०। "विवृत्तास्यां सहादाहां पक्वोडुम्बरसन्निभाम्। विवृत्तामिति तां विद्यात् पित्तोत्थं परिमण्डलम्" परितः शोषयतामिति शेषः"।
विवेक पु० वि+विच-घञ्। १याथार्थ्येन वस्तुस्वरूपावधारणे २प्रकृतिपुरुषयोर्भेदज्ञाने च सटा०। ३अन्योन्यधर्मव्यावर्त्तनेन वस्तुस्वरूपावधारणे। विवेकवू० तत्प्रकारो दृश्यः। ४विचारे ५जलङ्गाख्यायाम् मेदि०। संज्ञायां कर्त्तरि घञ्। ६विचारके च प्राड्विवेकः।
विवेकिन् त्रि० वि+विच-घिनुण्। विवेकशीले भैरवबंश्ये देवसेनपुत्रभेदे पु० आदिपु० ६अ०।
विवोढृ पु० वि+वह-तृच्। १जामातरि २पत्यौ च हेमच०
विव्योक पु० वि+व्या-कु नञ् ओकः स्थानम्। "गर्वाभिमानादिष्टेऽपि विव्योकोऽनादरक्रियाँ इत्युक्तलक्षणे स्त्रीणां प्रद्वारचेष्टाभेदे।
विश प्रवेशे तु० उ० सक० अनिट्। विशति अविक्षत्। अधि+उपवेशने। अभि+नि+मनसः स्थितिहेतुसंयोगभेदे आत्म०एतदर्थं आधारस्य कर्मता धर्ममभिनिविशते अन्यत्रार्थे न कर्मता। "या वा संज्ञा यस्मिन् यस्मिन्नभिनिविशते" भाष्यम्। "कस्मिन्पदार्थविषयेऽयुत्सर्गोऽभिनिविशते" व्या० परिभाषा। उप+आसनादौ स्थितिभेदे। नि+स्थितिभेदे आत्म०"निविशते यदि शूकशिखा पदे"नैष०। निर्+उपभोगे"क्रीडारसं निर्विशतीव बाल्ये"कुमा०"निर्वेशो भृतिभोगयोः" अमरः "निर्विष्टविषयस्नेहः" रघु० प्र+अभ्यन्तरगमने।
विश पु० विश-क्विप्। १मनुजे २वैश्ये च अमरः।
विश न० विश-क। १तृणादौ रायमु०। २प्रवेशकर्त्तरि त्रि०।
विश(ष)(स)कण्ठा स्त्री विशं(षं)(सं) तृणादिमिव कण्ठो-ऽस्याः। बलाकायां राजनि० षत्वशः सत्वशोऽत्र।
विशङ्कट त्रि० वि+शङ्कटच्। विशाले अमरः।

विशद पु० वि+शद-अच्। १शुभ्रवर्णे २तदति त्रि० अमरः। ३विमले हेम०। ४व्यक्ते च त्रि० मेदि०। [मीमांसा।

विशय पु० वि+शी-अच्। संशये "विशयो विशयश्चैवेति"

विशर पु० वि+शृ-अच्। १वधे अमरः। प्रादि०व०। २विगतवाणे त्रि०।

विशल्यक्रत् पु० विशल्यं तत्प्रहारवेदनानिवृत्तिं करोति कृ-क्विप्। (डापरलाजी) १वृक्षे रत्नमा०। २विशल्यकारके त्रि०।

विशल्यकरणी स्त्री विशल्यं क्रियतेऽनया कृ-ल्युट् ङीप्। ओषधिभेदे "पूर्वं त्व कथिता याऽसौ वीर! जाम्बवता तव। दक्षिणे शिखरे जातां तामौषधिमिहानय। विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा। संजीव करणीं वीर! सञ्चानीय्य महौषधिम्" रामा० लङ्का० १०२स०।

विशल्या स्त्री विगतं शल्यं तत्प्रहारवेदना यस्याः ५ब०। १अग्निशिखवृक्षे २दन्तीवृक्षे ३गुडूच्याम् अमरः ४त्रिपुटायाम् ५अजमोदायाञ्च राजनि०।

विशसन न० वि+शस-ल्युट्। १मारणे अमरः। करणे ल्युट्। २खड्गे पु० त्रिका० "असिर्विशसनः खड्गः" खगडपूजामन्त्रः।

विशस्त त्रि० वि+शस-अविनये न क्त अन्यत्र क्ट। क्षते सि० कौ०। क्टि विशस्ति। मारिते त्रि०।

विशस्तृ पु० वि+शस-तृच् न क्ट। चण्डाले संक्षिप्त०।

विशाकर पु० विशाकः विगतशाकः शनू राजते राज-बा० ड। भद्रकूडे (लङ्काविज) शब्दच०। तस्य शाकशून्यत्वात् तथात्वम्।

विशाख पु० विशिष्टा शाखाऽस्य। १कार्त्तिकेये २अग्निना विनष्यत्सराक्षसादावस्थाने अमरः। ३पुनर्नवायां राजनि० ४याचके च मेदि०। ५स्कन्दांशजाते देवभेदे तज्जन्मनिवृत्तिः भा०व०२२६अ० उक्ता यथा "वज्रप्रहारात् स्कन्दस्य संजातः पुरुषोऽपरः। युवा काञ्चनसन्नाहः शक्तिधृग् दिव्यकुण्डलः। यदभ्युक्षणनाज्जातो विशाखस्तेन कीर्त्तितः"। ६स्कन्दात्मजभ्रातरि "अग्नेः पुत्रः कुमारस्तु श्रीमान् शरवनालयः। तस्य शाखो विशाखश्च नैगमेय यश पृष्ठजः" भा० आ० ६६अ०। ७शिवे भा०आ० १७अ०।

विशाखज पु० विशिष्टा शाखा यस्य तथा शनू जायते जनक। नारङ्गे शब्दच० [शब्दमालोक्ते अन्विनामवस्थानभेदे।

विशाखल न० "विशालान्तरविन्यस्ते पादयुग्मे विशाखलम्"

विशाखा स्त्री विशिष्टा शाखा प्रकारो यस्याः। १नक्षत्रभेदे तत्रत्यानां तारकाणां विन्यासविशेषे षोडशे नक्षत्रे अमरः। "विशाखयोर्मध्यगतः सकलपूर्णः इव चन्द्रमा" रामा० प्रयोगात् तस्य द्विवचनान्ततेत्यन्ये। "बहुपुत्रो विशिखासु" भा० आ० ६ उक्तेर्बहुत्वं बहुतारात्मकत्वेनेति बोध्यम्। अस्मिन्नक्षत्रशब्दे ४९७ पृ०दृश्यम्। २कठिल्लके मेदि०।

विशाय पु० वि+शी-घञर्थे अच्। प्रहरिष्यां पर्य्यायेऽयने अमरः।

विशारण न० वि+शृ-स्वार्थे णिच्-ल्युट्। मारणे हेमच०।

विशारद पु० विशालं ददाति दा-क तस्य रः। १सकलशास्त्रे २क्षुद्रदुरालभायां स्त्री राजनि०। ३पण्डिते पु० ४प्रगल्भे त्रि० अमरः ५ज्ञेष्ठे च त्रि० अजयः।

विशाल त्रि० वि+शालच्। १विस्तीर्णे २दृढ़े इति च अमरः। २मृगभेदे ३खगभेदे पुंस्त्री० मेदि० स्त्रियां ङीष्। ४नदभेदे पु० ५वृक्षभेदे शब्दर०। ६इन्द्रवारुण्याम् स्त्री अमरः। ७माहेन्द्रवारुण्याम् दशमोदक्यां च स्त्री राजनि०। ८वज्जविनीनगर्य्यां स्त्री मेदि०। १०नदीभेदे च स्त्री "विशालां विरजां तथा" सप्तर्षिनोपवासपर्युदासः विरजाशब्दे दृश्यः। [२दृढ़े शब्दर०

विशालता स्त्री विशालस्य भावः तल्। १पार्श्वविस्तारे अमरः

विशालतैलगर्भ पु० विशालं विस्तीर्णं तैलं गर्भे फलमध्ये यस्य। अक्षोटवृक्षे राजनि०। [अमरः।

विशालत्वच् पु० विशाला त्वक् यस्य। बहुपत्रवृक्षे।

विशालपत्र पु० विशालं पत्रमस्य। १काशालौ २श्रीतालवृक्षे च राजनि०।

विशालाक्ष पु० विशाले अक्षिणी यस्य षच्समा०। १महादेवे, २गरुडे, ३विष्णौ च ४वृक्षभेदे, त्रि० मेदि०। ५पार्वत्यां ६नागदन्त्यां च स्त्री राजनि० ङीष्। ७शरक्षियां स्त्री विश्वः। ८योगिनीभेदे स्त्री। [राजनि०।

विशाली स्त्री० वि+शालच् गौरा० ङीष्। अजमोदायाम्।

विशिख पु० विशिष्टा विगता वा शिखा यस्य प्रादि० ब०। १शरवृक्षे राजनि०। २बाणे अमरः। ३तोमरे च मेदि०। ४शिखारहिते त्रि०। ५वृक्षनिम्बां ६नाम्निकायाम् ७रथ्यायाञ्च स्त्री० मेदि०।

विशिख न० विश-इखक्। मन्दिरे उणादिको० [युक्ते च।

विशिष्ट त्रि० वि+शिष-क्त। १युक्ते २विलक्षणे ३विशेषवति

विशिष्टबुद्धि स्त्री ६त०। विशेषणवतो विशेष्यस्य ज्ञाने यथा घट इत्यादिकं ज्ञानम् अस्य घटत्वस्य विशेषणतया भाव-

मानस्य घटे विशिष्टे भानम् एतत्कारणस्य विशेषण-ज्ञानं तदुत्तरोपनैव कथं घट इत्यादिप्रत्यक्षमित्यर्थं तत्-कारणस्य घटत्वज्ञानस्य पूर्वं सम्भवार्थं घटघटत्वे इति निर्विकल्पकज्ञानमस्ये भवतीत्युक्तं नैयायिकैः ।

विशिष्टवैशिष्ट्यज्ञान ६त० । विशेषणविशिष्टे वैशिष्ट्यस्य संसर्गस्य ज्ञाने यथा रूपवान् घट इत्यादि ज्ञानं तत्र घटत्वविशिष्टे रूपादेः संसर्गस्य भानम् । तच्च द्विविधम् विशेषणोपस्थितिप्रतियोगिकवैशिष्ट्यावगाहि विशेषणवि-शिष्टप्रतियोगिकवैशिष्ट्यावगाहि च । आद्ये विशेषण ज्ञानमंसर्गयोः कारणता द्वितीये तु विशेषणतावच्छेदक-प्रकारकविशेषणज्ञानस्य कारणता । यथाकारणं च तयो-र्बोधवैलक्षण्यम् । तत्र क्वचित् विशेष्ये यद्विशेषणं तत्रापि विशेषणान्तरस्थिति रीत्या ज्ञानं जायते यथा दण्डवान् पुरुष इति ज्ञानम् अत्र ज्ञाने पुरुषांशे दण्डो दण्डांशे दण्डत्वं विशेषणतया भासते । तत्र द्वितीयोपस्थितिः प्रयोजिका । क्वचिदेकत्र द्वयमिति रीत्या बोधः । यथा दण्डवान् पुरुष इति ज्ञानम् अत्र च ज्ञाने एकस्मिन्व्यक्तौ पुरुषे पुरुषत्वं दण्डश्चेत्युभयं विशेषणतया भासते अत्र विशेषणविशेष्यतावच्छेदकभावेन । क्वचित् विशिष्ट-वैशिष्ट्यावगाहि ज्ञानं भवति यथा दण्डवान् पुरुष इति ज्ञानमत्र च ज्ञाने विशेषणतावच्छेदकप्रकारकं विशेषणज्ञानं कारणम् । तत्र दण्डरूपविशेषणावच्छिन्नप्रतियोगिक-वैशिष्ट्यरूपः संसर्गः पुरुषांशे संसर्गतया भासते । अतएव विशेषणविशिष्टसंसर्गावगाहि तदिति उपस्थितज्ञानात् विशेषः । क्वचिच्च विशिष्टज्ञानं यथा अयं दण्डीति ज्ञानम् अत्र च ज्ञाने इदमर्थे विशेष्ये दण्डात्मक-विशेषणप्रतियोगिकः संसर्गः संसर्गतया भासते उपकल्पके तु न तत्प्रतियोगिकतया संसर्गस्य भानमिति भेदः । विशिष्टवैशिष्ट्यावगाहिबोधे स्वयं भेदः व्युत्पत्तिवैचित्र्येण उद्दे श्यतावच्छेदकविधेयतावच्छेदकयोः पारतन्त्र्येण परस्परं प्रयोज्यप्रयोजकभावेनान्वयः । यथा धनवान् सुखीत्यत्र धनप्रयोज्यत्वस्य सुखे, सुरापः पततीत्यत्र सुरापानस्य पतने प्रयोज्यत्वस्यान्वयः ।

विशिष्टाद्वैत न० रामानुजादयुक्ते प्रकृतिविशिष्टस्य ब्रह्मणो-ऽद्वयत्वे । रामानुजशब्दे दृश्यम् ।

विशिष्टाभाव पु० ६त० । विशेष्यविशिष्टस्याभावे स च क्वचित् विशेष्याभावप्रयुक्तः क्वचिच्च विशिष्टाभावप्र-युक्तः क्वचिदुभयाभावप्रयुक्तः ।

विशीर्ण त्रि० वि+शृ-क्त । १शुष्के, २जरावस्थापन्ने ।

विशीर्णपर्ण पु० विशीर्णं पर्णमस्य । निम्बवृक्षे राज-नि० ।

विशुद्ध त्रि० वि+शुध-क्त । १दोषरहिते, २विशदे च । तन्त्रोक्ते कण्ठस्थे १चक्रभेदे चक्रशब्दे ३८०८पृ०दृश्यम् ।

विशुद्धाद्वैत न० ६त० । वल्लभाचार्यमतप्रसिद्धे दोषरहि-तस्य ब्रह्मणोऽद्वयत्वे ।

विशुद्धि स्त्री० वि+शुध-क्तिन् । १शोधने २दोषराहित्ये च ।

विशुष्कुल त्रि०विगता शुष्कुला पङ्क्तिर्यस्याः । परिपाटीशून्ये

विशेष पु० वि+शिष-घञ् । १प्रभेदे, २प्रकारे, अटा० ३व्यक्तौ ४लेशे च० । ५तिलके, त्रिका० । "अन्योन्यनित्यद्रव्यवृत्तिर्वि-शेषः परिकीर्त्तितः" इति भाषा०उक्ते ६पदार्थभेदे "अन्ते अवसाने तिष्ठतीति अन्त्यः यदपेक्षया विशेषो नास्तीत्यर्थः । घटपटादीनां द्व्यणुकपर्यन्तानां तत्त-द्द्रव्यावयवभेदात् परस्परं भेदः । परमाणूनां भेदको वि-शेष एव स तु स्वत एव व्यावृत्तः तेन तत्र विशेषान्तरा-पेक्षा नास्तीति" सि०मुक्ता० । अयञ्च नित्यद्रव्ये समवायेन तिष्ठति "तेषु ज्ञातेषु सम्बन्धः समवायः प्रकीर्त्तितः" भाषादौ चकारेण नित्यद्रव्येषु विशेषसम्बन्धस्य समवायतायाः व्यवस्थात् । "द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदा-र्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" कणा० सू० उद्दिश्य लक्षितं यथा "अन्यत्रान्त्येभ्यो विशेषेभ्यः" सू० । "अन्त्या विशेषा नित्यद्रव्यवृत्तयो येऽभि-हितास्तान् वर्जयित्वा सामान्यविशेषाभिधानमित्यर्थः । अन्ते अवसाने भवन्तीत्यन्त्याः यतो न व्यावर्त्तकान्तरमस्ती त्यार्थ्याः उत्पादविनाशयोरन्ते अवसाने भवन्तीत्यन्त्यानि नित्यद्रव्याणि तेषु भवन्तीत्यन्त्या विशेषाः इति वृत्तिकृतः ते हि विशेषा एव व्यावृत्तबुद्धिहेतवः न तु सामान्य-वृत्या अपि" उप० सू० । नित्यैकसमवृत्तय इति वृत्ति-तात्पर्यं । "अन्योन्याभावविरोधिसामान्यरहितः समवेतो विशेषः" सर्व०सं० माधवः । दृष्टान्तधर्मे । यथा नीलघटः इत्यादौ घटत्वव्याप्यधर्मः नीलत्वादिविशिष्टघटत्वादिः । ७ऋणोल्कारभेदे च अलङ्कारशब्दे ४०५ पृ० दृश्यम् ।

विशेषक पुंन० विशेषयति वि+शिष-णिच्-ण्वुल् । १ललाट-तिलके अमरः । २विशेषकर्त्तरि त्रि० मेदि० "त्रिभि-र्द्वैयं विशेषकम्" इत्युक्ते एकवाक्यतापन्ने ३श्लोकसमू-ह० । ४तिलकवृक्षे राजनि० ।

विशेषगुण पु० कर्म० । "बुद्ध्यादिषट्के रूपादिचतुष्क

स्नेहभावने । स्वाभाविकद्रवत्वञ्च अद्भ एव च" भाषा० उक्तेषु गुणभेदेषु ।

विशेषण न० विशिष्यतेऽनेन वि+शिष-ल्युट् । भेदकधर्मे गुणक्रियादौ यथा नीलम् उत्पलं चलो गौरित्यादौ गुणक्रियादिभेदकधर्मः ।

विशेषणञ्च त्रिविधं व्यावर्त्तकं विधेयं हेतुगर्भञ्च । तत्राद्यं नीलो घट इत्यादौ नीलः, द्वितीयं पर्वतो वह्निमान् अत्र वह्निर्विधेयविशेषणम् । "त्वत्कारो ह्ययमेव मे यदरयः" इत्यादौ त्वत्कारोविधेयः । तृतीयं यथा सुराः पतन्तीत्यादौ सुरापानं हेतुगर्भविशेषणम् । तस्य भावः तत्त्व । विशेषणतानिरूपितविषयतायाम् । विशेषणतानिरूपकविषयतायाम्

विश्लिष्ट त्रि० वि+श्लिष-क्त। १वियुक्ते २शिथिले च।
विश्लेष पु० वि+श्लिष-घञ्। १वियोगे २शैथिल्ये च मेदि०।
विश्व ० विश-व। १जगति संसारे। २तदभिमानिनि जीवे पु०। अक्षस्यूनदेहे प्रवेशात्तस्य तथात्वम् वेदान्तसारे उक्तम्। ३आदित्यदेवविशेषे पु० व० व०। ४सकले त्रि० अतएवास्य सर्वनामता। आद्यदेवाश्च दशविधाः गणदेवताभेदाः यथाक्रमम् "वसवस्त्वौ क्रतुदक्षौ कालकामौ धुरिः कुरुः। पुरूरवा आर्द्रवाश्च विश्वे देवाः प्रकीर्त्तिताः" देवशब्दे ३७५७ पृ० दृश्यम्। ५नागरे विश्वदेवकन्याभेदे विश्वदेवमातरि स्त्री मत्स्यपु० ५अ०। ७यतिविशायां स्त्री अमरः। ८शतावर्त्यां स्त्री राजनि० ९विंशपलपरिमाणे स्त्री। "गुञ्जाः षण्णवतिः सोमा दशभ्र तत्पलं भवेत्। विश्वा विंशतपलं प्राक्" ज्योतिष्मती। अयं परिमाणभेदः कंसवणिक्प्रसिद्धः। १०विष्णौ न० विष्णुस०। ११देहे न०चक्रशब्दे २८०८पृ०दृश्यम्।
विश्वकटु पु० विश्वं कटुर्यत्र कु-डु। १मृगयाकुशलकुक्कुरे अमरः। २शब्दे पु० ३खले त्रि० मेदि०।
विश्वकर्म्मन् पु० विश्वेषु कर्म व्यापारो यस्य। १सूर्य्ये २देवशिल्पिनि अमरः। ३सृष्टिभेदे मेदि० ४परमेश्वरे च।
विश्वकृत् पु०विश्वं करोति कृ-क्विप्। १विश्वकर्मणि २परमेश्वरे च
विश्वकेतु पु० विश्वे केतवोऽस्य। अग्निरूपे अमरः।
विश्व(श्व)क्सेन विष्णु(ष्णु)वो सेना यस्य। १विष्णौ अमरः २प्रियङ्गुवृक्षे स्त्री ३विष्णोर्निर्माल्यधारके तदीयगणभेदे "निर्माल्यधारी विष्णोस्तु विश्व(श्व)क्सेनश्चतुर्भुजः" कालिकापु० ८२अ०। ४त्रयोदशमनौ मत्स्यपु०९अ०। अमध्यमेषु पा० समासः भरतस्तु अमध्यतामाह तन्मूलं चिन्त्यम्। [च राजनि०।
विश्वगन्ध न० विश्वतो गन्धोऽस्य। १बोले गन्धरसे २पलाशवृक्षे
विश्वगन्धा स्त्री विश्वे सकला गन्धा यस्याम्। पृथिव्याम् शब्दच०। [राजनि०।
विश्वगर्भि स्त्री विश्वतो गर्भिर्यस्याः। कृष्णदोलतायाम्
विश्व(श्व)च् अव्य० विष्व विश्वं वा अञ्चति क्विप् पृषो० विश्वस्य विशः ततः सप्तम्यादयं अचि तस्य लुक्। १सर्वत इत्यर्थे। अवेरभावे। २सर्वतोगामिनि त्रि० स्त्रियां विष्वूची भवे विष्व(ङ्)च् इत्यादि। अदूरागमे विष्वद्रीच् इत्यर्थे। भवे विष्वद्रीच इत्यादि। अमध्यतां भरत आह तन्मूलं चिन्त्यम्।
विश्वचक्र न० हाटके सङ्घाटानभेदे मत्स्यपु० तद्विधिर्यथा "अथातः संप्रवक्ष्यामि सङ्घाटानमनुत्तमम्। विश्वचक्रमितिख्यातं सर्वपातकनाशनम्। तपनीयस्य गुडस्य विश्वचक्रन्तु कारयेत्। श्रेष्ठं पलसहस्रेण तदर्द्धेन तु मध्यमम्। तस्यार्द्धेन कनिष्ठं स्याद्विश्वचक्रमुदाहृतम्। अन्यद्विंशतिपलादूर्द्ध्वमशक्तोऽपि निवेदयेत्। षोडशारं ततश्चक्रं भूमिनेम्यरकाङ्कितम्। नाभिपद्मे स्थितं विष्णुं भोगारूढं चतुर्भुजम्। शङ्खचक्रस्य पार्श्वे तु देव्यष्टकसमाकुलम्। द्वितीयावरणे तद्वत पूर्वतो जलशायिनम्। सनत्कुमारं गुर्वर्थञ्च ब्रह्माणं काश्यपं एव च। मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः। रामो रामश्च रामश्च बुद्धः कल्किी च ते दश। तृतीयावरणे गौरी मातृभिर्वेष्टिता युता। चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च। पञ्चमे पञ्च भूतानि रुद्राश्चैकादशैव तु। लोकपालाष्टकं षष्ठे दिङ्मातङ्गास्तथैव च। सप्तमेऽस्त्राणि सर्वाणि मङ्गल्यानि च कारयेत्। अन्तरान्तरतो देवान् विन्यसेदष्टमे पुनः। तुङ्गापुरुषवत् शेषं समलात् परिकल्पयेत्। छत्रध्वजमयूखसंभारभूषणाच्छादनादिकम्। विश्वचक्रं ततः कुर्यात् कृष्णाजिनतिलोपरि। तथाष्टादश धान्यानि रसाश्च लवणादयः। पूर्णकुम्भाष्टकञ्चैव वस्त्राणि विविधानि च। माल्येन फलरत्नानि वितानं चापि कल्पयेत्। ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो वृत्ती। क्षौमाधिवासनान्ते तु गृहीतकुसुमाञ्जलिः। इमसञ्चारयेन्मन्त्रं त्रिः कृत्वा तु प्रदक्षिणम्। नमो विश्वमयायेति विश्वचक्रात्मने नमः। परमानन्दरूपी त्वं पाहि नः पापकर्दमात्। तेजोमयमिदं यस्मात् सदा पश्यन्ति योगिनः। तस्मिन् तच्चिन्तयानीतं विश्वचक्रं नमाम्यहम्। वासुदेवस्थितञ्चक्रं चक्रमध्ये च माधवम्। अन्योन्याधारकरूपेण प्रणमामि स्थितावुभौ। विश्वचक्रमिदं यस्मात् सर्वपापहरं परम्। आयुधाधिवासञ्च भवादुद्धर मामितः"।
विश्वजित् पु० विश्वं जयति जि-क्विप्। १विष्णौ २सर्वस्वदक्षिणे यज्ञभेदे "विश्वजिता यजेत" श्रुतिः। ३तदधिकारेण अमुतफलत्वे स्वर्गफलकल्पकन्यायभेदे मीमां०।
विश्वदेवा स्त्री विश्वतो दीव्यति दिव-अच्। १क्षुद्रगवेधुकायाम् (गोरचाकुलिया) अटा०। २नागबलायां ३रक्तपुष्पदन्तपत्रे च रत्नमाला। कर्म०। ४विश्वाख्यदेवगणे पु०
विश्वधारिणी स्त्री विश्वं धारयति धृ-णिनि। पृथिव्याम्
विश्वपर्णी स्त्री विश्वतः पर्णान्यस्याः। मुख्यामलक्यां राजनि०
विश्वभुज् पु०विश्वं भुनक्ति भुज-क्विप्। १सर्वं भक्षके वह्नौ

२चन्द्रे हेमच०। २देवे ४विश्वकर्मणि ५भूमौ संज्ञिप्रका० ६ऋग्वे शब्दर०।

विश्वभेषज न० विश्वेषां भेषजम्। १शुण्ठ्याम् अमरः।

विश्वमटा स्त्री विश्वस्य मटो यस्याः। अग्निजिह्वाभेदे शब्दमा०

विश्वम्भर पु० विश्वं बिभर्त्ति भृ-अच् मुम् च। १इन्द्रे अमरः २विष्णौ च। ३पृथिव्यां स्त्री।

विश्वरूपक न० विश्वं रूपमस्य कप्। क्षणायुक्तधि राजनि०

विश्वरेतस् पु० विश्वं रेतोरेतोऽवयवो यस्य। चतुर्मुखे ब्रह्मणि हेमच०। [षधाके त्रिका०।

विश्वरोचन पु० विश्वान् रोचयति रुच-णिच्-ल्यु। नाड़ी-

विश्ववेदस् पु० विश्वं वेत्ति विद-असुन्। १इन्द्रादौ देवे २सर्वज्ञे च। [(फणिमनस) २हृच्चे पु० शब्दच०।

विश्वसार न० विश्वेषां सारम्। १तन्त्रभेदे। संज्ञायां कन्।

विश्वस्रज् पु० विश्वं सृजति सृज-क्विन्। चतुर्मुखे ब्रह्मणि अमरः। कृदादौ कुः विश्वस्रुक् विश्वस्रुग्भ्यामित्यादि

विश्वस्त त्रि० वि+श्वस-क्त। १जातविश्वासे। २विधवायां स्त्रियां स्त्री अमरः। वा ष्टुत्व। विश्वस्थित त्रि०जातविश्वासे

विश्वस्था स्त्री विश्वतः तिष्ठति स्था-क। शतावर्य्याम् राजनि०

विश्वाची स्त्री विश्वमञ्चति अञ्च-क्विप्। १अप्सरोभेदे वङ्गिपु०। २वाङ्मरोगभेदे भावप्र० तल्लक्षणादि० तल्लोक्तं यथा "अथ विश्वाचीलक्षणमाह "तलं ग्रन्थङ्गुलीनां या कण्डरा वाङ्मृष्ठतः। वङ्क्षोः कर्म्मक्षयकरी विश्वाची सा निगद्यते"। कण्डरा महाक्षायुः तलं हस्त स्योपरिभागः तलशब्दोऽत्र उपरिवाचकः यथा भूमितलमिति। तेनायमर्थः वाङ्मृष्ठतः वाङ्मोः पृष्ठं वाङ्मृष्ठमारभ्य तलं प्रतिहस्ततलं यावच्चङ्क्रम्य अङ्गुलीनां काण्डरास्ताः सन्दूष्य वाङ्मोः प्रसारणाकुञ्चनादिकर्म-क्षयकरी भवति सा इह वातव्याधिषु विश्वाचीत्युच्यते वङ्मोरिति द्वित्वं बहुवचनपरम्। एकस्मिन्नपि वाङ्मौ विश्वाची भवति" भावप्र०।

विश्वात्मन् पु० विश्वमात्मा यस्य। विष्णौ विष्णुस०।

विश्वधामन् पु० विश्वं दधाति पालयति धा-असुन् क्विच् पूर्वदीर्घः। देवे त्रि०कौ०।

विश्वानर पु० अग्निजनके विप्रभेदे वैश्वानरशब्दे दृश्यम्।

विश्वामित्र पु० विश्वं मित्रमस्य पूर्वपददीर्घः। गाधिसुते ऋषे ब्रह्मर्षिभेदे हरिवं० २८अ०।

विश्वामित्रप्रिय पु० ६त०। १नारिकेले शब्दर० २औरामे च

विश्वा(श्व)राज् पु० विश्वेषु राजते राज-क्विप्। १विश्वेषां राजनि। २८रुद्रेश्वरे च अस्य फलादावेव तत्तन्मन्त्रेण विश्वराजाविधानादि। [भेदे २रात्रौ स्त्री मेदि०।

विश्वावसु पु० विश्वेषां वसु यस्मात् पृषो० दीर्घः। १गन्धर्व-

विश्वास पु० वि+श्वस-घञ्। दृढमित्थमेवेत्याकारे १चित्त-वृत्तिभेदे प्रत्यये अमरः। २अङ्गायाञ्च "नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम्। विश्वासो नैव कर्त्तव्यः" चाणक्यः

विश्वेदेव पु० ब०व० कर्म० अलुक्स०। "क्रतुर्दक्षो वसुः सत्यः कामः कालस्तथा धुरिः। रोचनोमाद्रवास्चैव तथा चान्यः पुरूरवाः। विश्वे देवा भवन्त्येते दश आद्धेषु पूजिताः" इत्युक्ते आद्धदेवभेदे। २यज्ञे पु० संज्ञिप्र०।

विश्वेश पु० ६त०। शिवे, विश्वेश्वराद्योऽत्र।

विश्वौषध न० विश्वेषु रोगेषु औषधम्। शुण्ठ्याम्। राजनि०

विष व्याप्तौ जु० उभ० सक० अनिट्। वेवेष्टि वेविष्टे इरित् अविषत् अविक्षत् त। विष्णुः।

विष विप्रयोगे क्र्या० पर० अक० अनिट्। विष्णाति अविक्षत्

विष सेचने भ्वा०पर०सक०अनिट्। वेषति अविक्षत्। [पतिः।

विष् स्त्री विष-क्विप्। १विष्ठायाम् अमरः २कन्यायां च विट्

विष न० विष-क। १जले अमरः २पद्मकेशरे, रायस्फुटः। ३गन्धरसे बोले ४वत्सनाभे-विषे च ५गरलमात्रे पुंन० राजनि०। ६हट्टशाले पु० अमरः। गरलरूपविषस्य नाम लक्षणादिकं भावप्र०उक्तं यथा "विषं तु गरलः क्ष्वेड-स्तस्य भेदानुदाहरे। वत्सनाभः सक्तारिष्टः सक्तुः कश्च प्रदीपनः। सौराष्ट्रिकः शृङ्गिकश्च कालकूटस्तथैव च। हालाहलो ब्रह्मपुत्रो विषभेदा अमी नव"। तत्र वत्सनाभस्य स्वरूपनिरूपणम्। "बिन्दुद्वारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा। यत्पार्श्वेन तरोर्दृष्टिर्वत्सनाभः स भाषितः"। अथ हारिद्रस्य स्वरूपनिरूपणम् "हरिद्रातुल्यमूलो यो हारिद्रः स उदाहृतः"। अथ सक्तुकस्य स्वरूपम् "यदभ्यन्तः सक्तुकेनेव पूर्णमध्रः स सक्तुकः"। अथ प्रदीपनस्य स्वरूपम् "वर्णतो लोहितो यः स्याद्दीप्तिमान् दहनप्रभः। महादाहकरः पूर्वैः कथितः स प्रदीपनः"। अथ सौराष्ट्रिकस्य स्वरूपम् "सुराष्ट्रविषये यः स्यात् स सौराष्ट्रिक उच्यते"। अथ शृङ्गिकस्य स्वरूपम् "यस्मिन् गोशृङ्गके वङ्गे दुग्धमभ्रवति लोहितम्। स शृङ्गिक इति प्रोक्तो द्रव्यतत्त्वविशारदैः"। अथ कालकूटस्य स्वरूपम् "दैत्यानुरस्तरणे देवैः क्षीरस्य मथ्यमानस्य। दैत्यस्य रुधिराच्छ्यामस्वरूपस्य सञ्जिभः। निर्यासः कालकूटोऽस्य मुनिभिः परिकी-

र्चितः। सोऽहिक्षेत्रे भृङ्गवेरे कोङ्कणे मलये भवेत्" अथ व्यालाहृतस्य स्वरूपम् "गोसनाभफणो शुक्लव्यालपत्रच्छदप्रभः। तेजसा यस्य दष्टस्ते समीपस्था द्रुमादयः। असौ व्यालाहृतोज्ञेयः किञ्चिन्न्यायां हि-मालये। दक्षिणाब्धितटे देशे कोङ्कणेऽपि च जायते"। अथ ब्रह्मपुत्रस्य स्वरूपम् "वर्णतः कपिलो यः स्यात्तथा भवति सारतः। ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले। ब्राह्मणः पाण्डुरवर्णेषु क्षत्रियो लोहितप्रभः। वैश्यः पीतोऽसितः शूद्रो विष उक्तस्तुविधः। रसायने विषं विप्रं क्षत्रियं देहपुष्टये। वैश्यं कुष्ठविनाशाय शूद्रं दद्यात् वधाय हि"। (एते च स्थावरविषाः) तेषां शोधनविधिः तत्रैव स्थानान्तरे "गोमूत्रे त्रिदिनं स्थाप्यं विषं तेन विशुद्धयति। रक्तसर्षपतैलाक्तं तथा भार्यञ्च वासयेत्। ये गुणा गरले प्रोक्तास्ते सुवर्णेन विशोधनात्। तस्माद्विषं प्रयोगे तु शोधयित्वा प्रयोजयेत्"। अथ विषस्य गुणाः "विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च। आग्नेयं वातकफहृत् योगवाहि महावृषम्"। व्यवायि सकलकायगुणव्यापनपूर्वकपाकगमनशीलम्। विकाशि ओजःशोषणपूर्वकसन्धिबन्धविश्लेषकरणशीलम्। आग्नेयम् अधिकाग्न्यंशम्। योगवाहि संसर्गिगुणग्राहकम्। सदावृक् तमोगुणप्राधान्येन बुद्धिविध्वंसकम्। "तदेव युक्तियुक्तन्तु प्राणदायि रसायनम्। योगवाहि परं वातश्लेष्मजित् सन्निपातहृत्"। अथोपविषाणां निरूपणम् "अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकः। गुञ्जाहिफेनोधत्तूरः सप्तोपविषजातयः"। एतेषां शोधनं चिन्त्यं गुणाश्चात्र तत्र दृश्याः"।

तत्र विषस्य द्वैविध्यमाह "स्थावरं जङ्गमञ्चैव द्विविधं विषमुच्यते। दशाधिष्ठानभेदात्तु द्वितीयं षोड़शाश्रयम्"। स्थावरविषस्य दशाश्रयानाह "मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सारमेव च। निर्यासो धातवः कन्दः स्थावरस्याश्रया दश"। तद्यथा मूलविषं करवीरादि। पत्रविषं विषपत्रिकादि, फलविषं कर्कोटकादि, पुष्पविषं वेत्रादि, त्वक्सारनिर्यासविषाणि करञ्जादीनि क्षीरविषं स्नुह्यादि धातुविषं हरितालादि कन्दविषं वत्सनाभसक्तुकादि। जङ्गमविषस्य षोड़शाश्रयानाह "दंष्ट्रिनिःश्वासदंष्ट्रा च नखमूत्रमलानि च। शुक्रं लालानखस्वेदः सदंशं क्षतमर्दितम्। गुदास्थिपित्तशुक्राणि दश षट् जङ्गमाश्रयाः"। तद्यथा दर्वीनिःश्वासविषाः दिव्याः सर्पाः, दंष्ट्राविषाः भौमसर्पाः दंष्ट्रानखविषा व्याघ्रादयः, मूत्रपुरीषविषाः मण्डूकगोधिकादयः शुक्रविषा मूषिकादयः, लालाविषाः उच्चिटिकादयः, लालास्वेदमूत्रपुरीषार्त्तवशुक्रसन्दंशदंष्ट्रास्वेदमर्दितगुदपुरीषविषाश्चित्रगोधादयः, अस्थिविषाः सर्पादयः, पित्तविषाः शकुलमत्स्यादयः, शूकविषाः भ्रमरादयः। स्थावरविषाणां सामान्यानां कार्य्यमाह। तत्र मूलविषस्य कार्य्यमाह "वह्नेर्दनं मूलविषैर्मोहः प्रलपनं तथा"। पत्रविषस्य कार्य्यमाह "जृम्भणं वेपनं श्वासो नखा पत्रविषैर्भवेत्"। फलविषस्य कार्य्यमाह "शुष्कगोथः फलविषैर्दोहोद्वेषश्च भोजने"। पुष्पविषस्य कार्य्यमाह "भवेत् पुष्पविषैश्छर्दिराध्मानं मूर्च्छनं तथा"। त्वक्सारनिर्य्यासकार्य्यमाह "त्वक्सारनिर्य्यासविषैरुपमुक्तैर्भवन्ति हि। श्वासदौर्गन्ध्यपारुष्यशिरोरुक्कफसंश्रयाः"। क्षीरविषकार्य्यमाह "फेनागमः क्षीरविषैर्विड्भेदो गुरुजिह्वता"। धातुविषकार्य्यमाह "हृत्पीड़नं धातुविषैर्मूर्च्छा दाहश्च तालुनि। प्रायेण कालघातीनि विषाण्येतानि निर्दिशेत्"। एतानि मूलविषादि नव कालघातीनि कालान्तरे मारकाणि। कन्दविषस्य कार्य्यमाह। "कन्दजान्युग्रवीर्य्याणि यान्युक्तानि त्वयोदश। सर्वाण्येतानि कुशलैर्ज्ञेयानि दशभिर्गुणैः। स्थावरं जङ्गमं वापि कृत्रिमं चापि यद्विषम्। सद्यो निहन्ति तत् सर्वं गुणैश्च दशभिर्युतम्"। तान् दशगुणानाह "रूक्षमुष्णं तथा तीक्ष्णं सूक्ष्ममाशु व्यवायि च। विकाशि विशदञ्चैव लघुपाकि च ते दश" तैर्गुणैर्विषस्य कार्य्यमाह "तद्रौक्ष्यात् कोपयेद्वायुमौष्ण्यात्पित्तं सशोणितम्। तैक्ष्ण्यान्मांसं क्षोभयति मर्मबन्धान् क्षिनत्ति हि। शरीरावयवान् सौक्ष्म्यात् प्रविशेद्विकरोति च। आशुत्वादाशु तत् प्रोक्तं व्यवायात् प्रकृतिं हरेत्। विकाशित्वात् क्षपयति दोषान् धातूनजस्रानपि। अतिरिच्यते वैशद्यात् दुश्चिकित्स्यं च लाघवात्। दुर्जरं चाविपाकित्वात् तस्मात् क्लेशयते चिरम्"। विषलिप्तशस्त्रक्षतस्य लक्षणमाह "सद्यः पाकं याति यस्य क्षतं तत् स्रवेद्रक्तं पच्यते चाप्यभीक्ष्णम्। कृष्णीभूतं क्लिन्नमत्यर्थपूतिच्छतान्मांसं शीर्य्यते यस्य वापि। तृष्णातापौ दाहमूर्च्छे च यस्य दिग्धं विद्धं तं मनुष्यं व्यवस्येत्। लिङ्गान्येतान्येव कुर्य्यादमित्रैर्दत्तः क्ष्वेडो वा ब्रणे यस्य चापि"। पच्यते चाप्यभीक्ष्णं पुनः पुनः

पाकमेति तापः बहिःस्थितः, दाहोऽभ्यन्तरे। यः कुर्यादित्यत्र च्वतं कर्तृपदं बोद्धव्यम्। प्रायेण राजादीनामन्नादौ शत्रवो विषं ददति। तेषां ज्ञानार्थं लक्षणमाह "इङ्गितज्ञो मनुष्याणां वाक्चेष्टासुखवैक्लवैः। जानीयाद्विषदातारमेभिर्लिङ्गैश्च बुद्धिमान्। न ददात्युत्तरं पृष्टो विक्लवोऽहमिति च। व्यर्थं बद्ध्वा सङ्कीर्णं भाषते चापि मूढवत्। अङ्गुलीः स्फोटयेद्वापि विलिखेत् महसेदपि। वेपथुश्चास्य भवति तत्तश्चैकैकमीक्षते। विवर्णवक्त्रः श्यामश्च नखैः किञ्चिच्छिनत्ति च। व्यालभेता सकेशान् करेण च शिरोरुहान्। निर्यियासुरपद्वारैः वीक्षते च पुनः पुनः। वर्त्तते विपरीतं च विषदाता विचेतनः"। इङ्गितमभिप्रायसूचकम् आकारं सुखवैक्लवं सुखवैवर्ण्यादि एभिर्लिङ्गैर्व्यज्यमानैः न ददात्युत्तरं पृष्टः स्त्रीयासत्कर्मजनितव्यामोहात् सङ्कीर्णम् अस्फुटं भयजनितपर्यव्यथापनोदायाङ्गुलीः स्फोटयेत् महसेत्। अहेतावपि श्यामः दग्धसमानवर्णः, व्यालभेत स्पृशेत् विपरीतं यथा स्वादेव वर्त्तते। जङ्गमविषाणां सामान्यानां कार्य्याण्याह "निद्रां तन्द्रां क्लमन्द्राहं सम्यक् लोमहर्षणम्। शोथं चैवातिसारं च कुरुते जङ्गमं विषम्"। जङ्गमेषु तीक्ष्णतरेषु सर्पानाह "वातपित्तकफात्मानो भोगिभण्डलराजिलाः। यथाक्रमं समाख्याता द्वन्तरा द्वन्दरूपिणः। फणिनो भोगिनो ज्ञेया मण्डलैर्विविधैश्चिताः पृथवो मन्दगामिनः। षट् ते मण्डलिनो ज्ञेया ज्वलनार्कविषाः स्मृताः। स्निग्धा विविधवर्णाभिश्चित्र्यं गूर्ध्वं च राजिभिः। विचित्रा इव ये भान्ति राजिलास्ते हि तेऽपि षट्"। एते यथाक्रमं वातपित्तकफात्मानः द्वन्तराः द्वे अन्तरे भेदौ येषां ते द्वन्तराः, यथा भोगिनो मण्डलिन्यां जाताः इत्यादि। भोगिप्रभृतिकृतदंशदेशलक्षणमाह "दंशो भोगिकृतः कृष्णः सर्ववातविकारकृत्। पीतो मण्डलिनः शोथो मृदुः पित्तविकारवान्। राजिलोत्थो भवेद्दंशः स्थिरशोथश्च पिच्छिलः। पाण्डुः स्निग्धोऽतिसान्द्रासृक्सर्वश्लेष्मविकारवान्"। देशविशेषे कालविशेषे च दष्टस्यासाध्यत्वमाह "अन्यत्यदेवायतनश्मशानवल्मीकसन्ध्यासु चतुष्पथेषु। याम्ये च पित्र्ये परिवर्जनीया क्षणे नरा मर्मसु ये च दष्टाः"। याम्ये भरण्यां पित्र्ये मघायाम् "दर्वीकराणां विषमाशु हन्ति सर्वाणि शोणे द्विगुणीभवन्ति"। उष्णे उष्णसंयोगे। दर्वीकरलक्षणमाह "रथाङ्गाङ्गलक्ष्मलस्तिकाङ्कुशधारिणः। ज्ञेया दर्वीकराः सर्पा फणिनः शीघ्रगामिनः"। अपरेषु येषु विषमाशु मारकं भवति तानाह "अजीर्णपित्तातपशोषितेषु बालेषु वृद्धेषु बुभुक्षितेषु। क्षीणे क्षते मेहिनि कुष्ठजुष्टे कृशे बले गर्भवतीषु चापि। यस्यक्षते यस्य न रक्तमस्ति राज्यो लताभिश्च न सम्भवन्ति। शीताभिरङ्गिश्च न रोमहर्षो विषाभिभूतं परिवर्जयेत्तम्। जिह्मं मुखं यस्य च केशपातो नासावसादश्च सकण्ठभङ्गः। क्षणश्च रक्तः श्वयथुश्च दंशे हन्वोः स्थिरत्वञ्च विवर्जनीयम्"। केशपातः आकर्षणात्, नासावसादः नासायाः नतत्वं कण्ठभङ्गः ग्रीवाधारणाशक्तिः हन्वोः स्थिरत्वं हनुद्वयस्तम्भः। अपरञ्च "वान्तिर्घना यस्य निरेति वक्त्राद्रक्तं स्रवेद्दुर्मधमश्च यस्य। दंष्ट्रानिपातांश्चतुरश्च पश्येद् यस्यापि वैद्यैः परिवर्जनीयः"। वान्तिः रुधिरस्य, यस्य च नासास्रवलिङ्गमुदादिभ्योरक्तं स्रवेत् "उन्मत्तमत्स्यसुरुहुतं वा हीनस्वरं वाव्यथ वाविवर्णम्। वारिष्टमत्यर्थनवेगनञ्च जह्यान्नरं तत्र न कर्म कुर्यात्"। अत्यर्थसुपद्रुतं वा ज्वरातिसारादिभिरतिशयेनोपद्रुतं हीनस्वरं वक्त्रमत्तमं विवर्णं क्षणवर्णं वारिष्टं नासाभङ्गादिदुष्टम्। अवेगिनं वेगो विषवेगः। (लहरि) इति लोके तद्वर्हितम्। स्थावरं जङ्गमं च विषमेव जीर्णत्वादिभिः कारणैः दूषीविषसंज्ञां लभते तदाह "जीर्णं विषघ्नौषधिदूषितं वा दावाग्निवातातपशोषितं वा। स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति"। जीर्णम् व्यतिपुराणं विषघ्नौषधिदूषितं विषघ्नीभिरौषधीभिर्यैर्यैर्हीनीकृतं स्वभावतो वा गुणविप्रहीनं स्वभावादेव दशानां गुणानां मध्ये एकद्वित्रिचतुर्दशगुणहीनम्। दूषीविषस्य कार्य्यमाह "वीर्य्यालभावात् निपातयेत् तत् कफान्वितं वर्षगणानुबन्धि। तेनार्दितो भिन्नपुरीषवर्णो विगन्धिवैरसयुतः पिपासी। मूर्च्छां भ्रमं गद्गदवाग्विमिश्रं विचेष्टमानोऽरतिमाप्नुयाद्वा"। न निपातयेत् न मारयति कफान्वितं कफेन सन्दीक्षतौषादिगुणं वर्षगणानुबन्धि कफेनाग्नेर्मान्द्यादीर्घत्वपाकाच्चिरस्थायि तथा दूषीविषजदट्टरोक्तवतां भिन्नपुरीषवर्णश्च भिन्नपुरीषोद्भूतमलः भिन्नवर्णो विवर्णः। विचेष्टमानः विरूपां चेष्टां कुर्वन् मूर्च्छादीन् व्याधीन् लभते। स्थानविशेषोत्थिते दूषीविषे लिङ्गविशेषमाह। "श्यामाशयस्थे कफवात-

रोगी पक्वाशयस्थेऽनिलपित्तरोगी। भवेत् ससुदुध्वस्तशिरोऽङ्गरुट्का विलूनपक्षश्च यथा विहङ्गः"। ससुदुध्वस्तशिरोऽङ्गरुट्कः ससुद्वस्ताः शिरोरुहाः केशाः अङ्गरुहः लोमानि यस्य सः एतदपि लिङ्गं पक्वाशयस्थे दूषीविषे बोद्धव्यम् "स्थितं रसादिष्वथ तद्यथोक्तान् करोति धात्वन्तगतान् विकारान्"। तत् दूषीविषं यथोक्तान् सुश्रुते व्याधिसमुद्देशीयोक्तान्। दूषीविषस्य प्रकोपसमयमाह "कोपं तु शीतानिलदुर्दिनेषु वात्याषु पूर्वं शृणु तस्य रूपम्"। कुपितस्य दूषीविषस्य पूर्वरूपमाह "निद्रा गुरुत्वञ्च विजृम्भणञ्च विश्लेषहर्षौ वपथुर्मदः"। विश्लेषः गात्रशैथिल्यं हर्षः रोमाञ्चः। रूपमाह "ततः करोत्यन्नमदाविपाकावरोचकं मण्डलकोठजन्मा। मांसक्षयं पाणिपदाक्षिशोथं मूर्च्छां तथा कृच्छ्रमथातिसारम्। दूषीविषं श्वासहरौ ज्वरांश्च कुर्यात् प्रदृष्टं जठरस्य चापि" अन्नमदः अन्ने सुप्ते पूगफलेनेव मदः। अविपाकः अन्नस्य। दूषीविषभेदेन विकारानाह "तस्मादमन्यज्जनयेत्तथान्यदानाहमन्यत् कृपयेच्च शुक्रम्। गाढ़ग्रमन्यज्जनयेच्च कृच्छ्रं तांस्तान्विकारांश्च बहुप्रकारान्"। अन्यत् दूषीविषं तांस्तान् विकारान् विसर्पविस्फोटादीन्। दूषीविषस्य निरुक्तिमाह "दूषितं देशकालाद्यैर्विषाख्यैरभोज्यगुणैः। यस्मात् संदूषयेद्धातूंस्तस्माद्दूषीविषं स्मृतम्"। देशः अनूपादिः काला दुर्दिनादिः अन्नं कुलत्थतिलमहरादि धातुदूषकत्वाद्दूषीविषम्। दूषीविषस्य साध्यत्वादिकमाह "साध्यमात्मवतः सद्यो याप्यं संवत्सरोत्थितम्। दूषीविषमसाध्यं स्यात् क्षीणस्याहितसेविनः"। कृत्रिमं विषं द्विविधम् एकं सविषं दूषीविषसंज्ञम् अपरमविषं तदेव गरसंज्ञं तथा च काश्यपसंहितायाम् "संयोगजञ्च द्विविधं द्वितीयं विषमुच्यते। दूषीविषं तु सविषमविषञ्चैव उच्यते"। संयोगजं कृत्रिमं विषं द्वितीयं स्वाभाविकं तच्च द्विविधम्। तत्र दूषीविषमभिधाय गरं दर्शयितुमाह "सौभाग्यार्थं स्त्रियः स्नेहरजोनानाङ्गजान् मलान्। शत्रुप्रयुक्तांश्च गरान् प्रयच्छन्त्यन्नमिश्रितान्"। गरकार्यमाह "तैः स्यात् पाण्डुकृशोदरत्वाग्निबलक्षयः रक्तास्रोपजायते। मर्मप्रधमनाध्मानं हृत्प्लीहोः शोथसम्भवः। जठरग्रहणीरोगा वक्षोगुल्मज्वरो ज्वरः"। तैः गरैः स्नेहरजःप्रभृतिभिः ज्वररक्तास्रोपजायत इति शेषात्। मर्मप्रधमनं मर्मक्षया क्षयो धातुक्षयः। लूतानां जन्तुविशेषाणामुत्पत्तिं निरुक्तिं बहुप्रकारत्वाह "यक्ष्मातुनं लक्षणं प्राप्य सूनेः पक्षेदविन्दवः। तेभ्यो जातास्तथा लूता इति ख्यातास्तु षोड़श"। अत्र सुश्रुतः "विश्वमित्रोऽपरः कदाचिदृषिसत्तमम्। वशिष्ठं कोपयामास गत्वाऽश्रमपदं किल। कुपितस्य मुनेस्तस्य ललाटात् स्वेदविन्दवः। अपतन्नग्नावेव ह्यवस्तात्तीव्रतेजसः। लूने हुते महर्षेस्तु धेन्वर्थे समुपेऽपि च। ततो जातास्त्विमे घोरा नानारूपा महाविषाः। तासामष्टौ कष्टसाध्या वर्ज्यास्तावत्य एव हि"। तत्र त्रिमण्डलप्रभृतयोऽष्टौ कष्टसाध्याः सौवर्णिकप्रभृतयोऽष्टावसाध्याः। तासां सामान्यानां दंशलक्षणमाह "तासिदष्टे दंशकोथः प्रदृत्तिः क्षतजस्य च। ज्वरो दाहोऽतिसारश्च मदाः क्षुच्च विदंशजाः। पिड़का विविधाकारा मण्डलानि महान्ति च। शोथा महान्तो सहसा रक्ताः श्यावासितास्तथा। सामान्यं सर्वलूतानामेतद्दंशस्य लक्षणम्"। दंशकोथः दंशमध्ये पूतिभावः। "दंशमध्ये तु यत्कृष्णं श्यावं वा जालकाचितम्। दग्धाकृति सदाहार्तं स्वेदशोथज्वरान्वितम्। दूषीविषाभिलूतामिसृष्टमिति निर्दिशेत्"। सौवर्णिकाद्यष्टावसाध्या प्राणहरास्तासां लक्षणमाह "शोफः श्वेता सिता रक्ता पीता च पिड़का ज्वरः। प्राणान्तिको भवेद्दाहः श्वासहिक्काशिरोग्रहः"। आखुदूषीविषलक्षणमाह "आदंशाच्छोणितं पाण्डुमण्डलानि रोमहर्षः। लोमहर्षश्च दाहश्चाप्याखुदूषीविषार्दिते" प्राणहरमूषकविषकार्यमाह "मूर्च्छाक्लमशोथवैवर्ण्यं क्लेदगन्धश्वासतिज्वराः। शिरोगुरुत्वं वाताश्रुक्लर्दिश्चाप्यमूषकात्। अङ्गशोथोऽल्पमूषकाकारो बोद्धव्य इति। तन्त्रान्तरे कृकलासदष्टस्य लक्षणमाह "शोथस्य कार्ष्ण्यमथ वा नानावर्णत्वमेव च। मोहोऽथ वचसो भेदो दष्टस्य कृकलासकैः"। वृश्चिकविषस्य लक्षणमाह "दहत्यग्निरिवादौ तु भिनत्तीवार्द्धमात्रया च। वृश्चिकस्य विषं याति यस्मात् दंशेऽवतिष्ठते"। असाध्यस्य वृश्चिकदष्टस्य लक्षणमाह "दष्टोऽसाध्यैस्तु हृदुद्घातरसनोपद्रुतो नरः। मांसैः पतद्भिरत्यर्थं वेदनार्तो जहात्यसून्"। असाध्यैर्वृश्चिकैस्तेषामेवानुक्तैः हृदादिषु उपद्रुतः हृदादिकार्यरहितो भवति अत्यर्थं वेदनार्त्त इत्यन्वयः। कणभदष्टस्य लक्षणमाह "विसर्पः श्वयथुः शूलं ज्वरस्कर्दिरथापि वा। लक्षणं कणभैर्दष्टे दंशश्चैवावशीर्यते"। कणभः कीटविशेषः। उच्चिटिङ्गदष्टस्य लक्षणमाह "क्षणशोभोच्चिटिङ्गेन सूक्ष्मलिङ्गो-

भक्षयार्त्तिमान् । दष्टः शीतोदकेनेव सिक्तान्यङ्गानि मन्यते" । कृष्णलोमा अधिकतरकृष्णरोमा ऊर्णिटिङ्ग-(चीटा) कीटविशेषः । सविषमण्डूकदष्टस्य लक्षणमाह "एकदंष्ट्रार्दितः सूनः सहजः पीतकः शटट् । सनिर्द्रम्भ दंशमात् दष्टोमण्डूकैः सविषैर्भवेत्" । एकदंष्ट्रार्दितः स्वभावादेकयैव दंष्ट्रया दष्टो भवति । सर्पविषस्य कार्य्यमाह "सर्पस्तासु सविषा कुर्य्यादंहं शोथं रुजं तथा" । जलौकाविषकार्य्यमाह "वराडूं शोथं ज्वरं मूर्च्छां सविषासु जलौकसः" । कुर्य्युरिति शेषः । गृहगोधिका विषकार्य्यमाह "विदाहं श्वयथुं नोदं प्रस्वेदं गृहगोधिकाः" । कुर्य्युरिति शेषः । शतपदीविषकार्य्यमाह "दंशे खेदं रुजं दाहं कुर्य्याच्छतपदीविषं" शतपदी (गिजाई) इति लोके । मशकविषकार्य्यमाह "कण्डूसान्द्रमशकैरीषच्छोथः सान्द्रवेदनः" । असाध्यमशकलक्षणमाह "असाध्यकीटसदृशमसाध्यं मशकक्षतम्" । असाध्यकीटसदृशं असाध्यैः कीटैर्लूतादिभिः कृतं यत् क्षतं तत् सदृशवेदनम् । मक्षिकादंशलक्षणमाह "सद्यः संस्रावितो घ्राणाद्दाहमूर्च्छाज्वरान्वितः । पिडका मक्षिका दंशे तासान्तु स्यगिका सृहृत्" । तासामित्यादि तासां सुश्रुतोक्तानां षण्णां मक्षिकाणां मध्ये स्यगिकानाम्नी शीघ्रं प्राणं हरतीत्यर्थः । व्याघ्रादिविषाणां कार्य्यमाह "चतुष्पाद्भिर्द्विपाद्भिर्वा नखैर्दन्तैश्च यत् कृतम् । भूयते यच्यते तच्च स्रवति ज्वरयत्यपि" । चतुष्पाद्भिः व्याघ्रादिभिः द्विपाद्भिः वनमनुष्यादिभिः भूयते शूनो भवति । विषोद्भूतस्य लक्षणमाह "प्रसन्नदोषं प्रकृतिस्थदोषं सम्भोगिकाम्लं समसूत्रविट्कम् । प्रसन्नवर्च्चेन्द्रिय चित्तचेष्टं वैद्योऽवगच्छेद्विषं मनुष्यम्" । प्रसन्नदोषं प्रकृतिस्थदोषं शेषं सुगमम्" । [वैद्यकोक्तौ व्याम् राजनि० विषकण्टकिनी स्त्री विषयुक्तं कण्टकमस्त्यस्या इनि । विषकण्ठ पु० विषं कण्ठे यस्य । शिवे । [शब्दच० विषघा स्त्री विषं हन्ति हन-ड नि० कुत्वञ्च । गुडूच्याम् विषघातिन् पु० विषं हन्ति हन-णिनि । शिरीषवृक्षे शब्दमाला । २विषनाशके त्रि० ।

विषघ्न पु०विषं हन्ति हन-टक् ।१शिरीषवृक्षे शब्दच० । २यवासे ३विभीतके राजनि० । ४चक्रमर्दवृक्षे च लटा० । ५छिक्कोचिकायां (छेलेचा) स्त्री ङीप् । ६इन्द्रवारुण्याम् ७वनवर्वराय्याम् ८भूम्यामलक्याम् ९रक्तपुनर्नवायाम् १०हरिद्रायाम् ११वचिकाख्यायाम् १२मदनवृक्षे च १३अ-ङ्कफलायां स्त्री राजनि०ङीप् । १४विषनाशके त्रि० ।

विषजिह्व पु० विषयुक्ता जिह्वेव पत्रमस्याः । देवनाडीवृक्षे रत्नमा० । [शब्दर० । स्त्रियां ङीष् ।

विषज्वर पुंस्त्री० विषमिव प्राणहन्ता ज्वरो यस्य । १अहिभेदे

विषण्ड न० विशेषेण षण्डम् । मृणाले शब्दर० ।

विषतिन्दु पु० विषयुक्तस्तिन्दुः । १कुपीलौ भावप्र० । २कारस्करवृक्षे राजनि० । [वर्षे पु० । ३तद्वति त्रि० अमरटीका ।

विषद् न० वि+षद-क्विप् । १पुष्पकासीसे राजनि० । २शुक्ल-

विषदंष्ट्रा स्त्री विषयुक्ता दंष्ट्रा । १सर्पदंष्ट्रायाम् । विषस्य दंष्ट्रेव नाशकत्वात् । २सर्पकङ्कालीलतायां रत्नमा० ।

विषदन्तक पुंस्त्री० विषं दन्ते यस्य कप् । १सर्पे शब्दच० स्त्रियां ङीष् । [चकोरखगे हेमच० स्त्रियां ङीष् ।

विषदर्शनमृत्यु क पुंस्त्री० विषस्य दर्शनेन मृत्युरस्य कप् ।

विषद्रुम पु० विषयुक्तो द्रुमः । कारस्करवृक्षे राजनि० ।

विषधर पुंस्त्री० विषं धरति धृ-अच् । १सर्पे अमरः स्त्रियां ङीष् । "विषधरविषमं यत्नं भवता" उद्भटः ।

विषधर्म्मन् पु० विषस्येव धर्मोऽस्य अनिच्समा० । (व्याघ्रकुम्भी) लतायाम् शब्दच० । [वृक्षे हारा० । २विषनाशके त्रि० ।

विषनाशन पु० विषं नाशयति नश-णिच्-ल्यु । १शिरीष-

विषनाशिनी स्त्री विषं नाशयति नाशि-णिनि ङीप् । सर्पकङ्कालीलतायां शब्दच० ।

विषनुद् पु० विषं नुदति नुद-क्विप् । क्षेमवाकवृक्षे शब्दच० ।

विषपुष्प न० विषमिव नीलं पुष्पमस्य । १नीलपद्मे अ-मा० २कदम्बवृक्षे (सनफल) रत्नमा० कप् । मदनवृक्षे भावप्र० ।

विषम त्रि० विगतो विरुद्धो वा समः । १असमे २अयुग्मे (विजोड़) ३उच्चतानते ४दारुणे ५सङ्कटे च "भिन्नचिह्न-चतुष्पादं विषमं परिकीर्त्तितम्" इत्युक्ते ६पद्यभेदे न० "ओजोऽथ युग्मं विषमः समस्त्र्य"ज्यो०त०उक्ते ७मेषसिंहधनुरादयसमराशौ पु० । दैत्यभेदे पु० "चतुर्विधः परिक्षेयस्तालः कङ्कणनामकः । पूर्णः१ खण्डः२ समश्चैव विषम४श्चैव कथ्यते । नवतुल्कं गलौ पूर्णे१ खण्डे२ विन्दुद्वयं गुरुः । यगणस्तु समे ज्ञेयस्त्रयश्चगणो विषमे भवेत्" सङ्गीत० । विषमादागतः विषमय, रूप्य, विषमस्य ञ, विषमीय विषमादागते त्रि० वि०कौ० । [च्छदे(छातिम) अमरः ।

विषमच्छद पु०विषमाणि अयुग्मानि सप्त छदाः यस्य । सप्त-

विषमज्वर पु०विषम श्चासौ ज्वरः । ज्वरभेदे । यथोक्तं भावप्र० "तत्र विषमज्वरस्य निदानकथनपूर्विकां संप्राप्तिमाह

"दोषोऽल्पोऽस्थितस्तनुतो ज्वरो हृदस्थ वा पुनः। धातूनन्यतमं प्राप्य करोति विषमज्वरम्"। अयमर्थः ज्वरोत्पत्तेः ज्वरेण लक्षणस्य। सन्निकर्षहेतुमाह। दोषः अल्पः, ज्वरजनकस्य स्वल्पोऽपि। विप्रकर्षहेतुमाह। अस्थितमाहारविहारादि तेन सम्भूतः संपूर्णोजातः अन्यतमत्वात् रसरक्तादिकम् प्राप्य दूषयित्वा पुनर्विषमज्वरं करोति ज्वरोत्पत्तेः वेति वाशब्देनेति बोध्यते। प्रथमतो विरुद्धज्वरो भवति यत उक्तम्। "आरभ्याहिमो यस्तु" इत्यादिकम् रसादिकन्यातं दूषयित्वा कं विषमज्वरं करोति इत्यपेक्षयाह "सन्ततं रसरक्तस्थः सततं रक्तधातुगः। दोषः क्रुद्धो ज्वरं पुंसां सोऽन्येद्युः पित्तसंश्रितः। मेदोगतस्तृतीयेऽह्नि अस्थिमज्जागतः पुनः। कुर्यात्तृतीयकं घोरमन्तकं रोगसङ्करम्"। अन्तकमिव मारकत्वात्। अथ विषमज्वरस्य सामान्यं लक्षणमाह "यः स्यादनियतात् कालात् शीतोष्णाभ्यां तथैव च। वेगतस्यापि विषमोज्वरः स विषमः स्मृतः"। यः स्यादनियतात् कालादित्यस्यायमर्थः। यथा वातिकोज्वरः सप्त दिनानि, पैत्तिको दश दिनानि, श्लैष्मिको द्वादशदिनानि, दोषाणां प्राबल्येवातिकश्चतुर्दशदिनानि, पैत्तिको विंशतिदिनानि, श्लैष्मिकश्चतुर्विंशतिदिनानि स्यात्। तथा विषमज्वरो नियतं कालं व्याप्य न स्यादित्यर्थः। शीतोष्णाभ्यां रुक्षाभ्यां स्यात्। "वेगतस्यापि विषमः कदाचिदतिवेगवान्"। कदाचिदल्पवेगः। विषमज्वरस्य भेदानाह "सन्ततः सततोऽन्येद्युस्तृतीयक चतुर्थकौ"। तत्र सन्ततस्य लक्षणमाह "सप्ताहं वा दशाहं वा द्वादशाहमथापि वा। सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते"। विकल्पो वातिकादिभेदात्। सन्तत्या नैरन्तर्येण अविसर्गी अपरित्यागी। नन्वेवं सन्ततज्वरस्य सप्ताहादिकालावस्थित्वं विषमत्वमिति विषमलक्षणम् तदत्र न घटत इति कथमयं विषमेषु पठ्यते"। घटत एवेति न दोषः। यत उक्तं चरकेण "विसर्गं हादशे कृत्वा दिवसे व्यक्तलक्षणम्। दुर्लभोपशमः कालं दीर्घमेवानुवर्तते" इति। यत्तु खरनादेनोक्तम् "ज्वराः षष्ठ तु ये प्रोक्ताः पूर्वं सन्ततकादयः। कृत्वारः सन्तं हित्वा प्रेयाख्ये विषमज्वराः" इति तच्चिन्त्य त्यागाभिप्रायेण। सततलक्षणमाह "अहोरात्रे सततको द्वौ कालावनुवर्तते"। द्वौ कालौ कफपित्तैककालं रात्रावेककालम्। ततो दोषाशयेऽहोरात्रे प्रत्येकं द्वौ द्वौ प्रकोपकालौ। यत उक्तं वाग्भटेन "त्रयोऽहोरात्रिभुक्तानामन्नमध्यादिकाः क्रमादिति"। अन्येद्युष्कलक्षणमाह। "अन्येद्युष्कस्त्वहोरात्रैककालं प्रवर्त्तते"। एककालं दोषापेक्षया एककालमपि न द्वितीयं, प्रथमकाले हृद्येव दोषस्थितेः। तृतीयकचतुर्थकयोर्लक्षणमाह। "तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः"। तृतीयेऽह्नि इत्यागमनदिनं स्मृत्वा यत उक्तम् "दिनमेकमतिक्रम्य यो भवेत् स तृतीयकः। दिनद्वयमतिक्रम्य यः स्यात् स हि चतुर्थकः" इति। अत्राह हृद्धसुश्रुतः "कफस्थानविभागेन यथास्वङ्गं करोति हि। सततान्येद्युष्कतृतीयाख्य चतुर्थकप्रभेदकान्। अहोरात्रादहोरात्रात् स्थानात् स्थानं प्रपद्यते। दोष आमाशयं प्राप्य करोति विषमज्वरम्"। अयमर्थः आमाशयोरःकण्ठशिरःसन्धयः पञ्च कफस्थानानि एषु तिष्ठन् दोषो यथास्वङ्गं सततादीन् करोति। तत्र आमाशये स्थितो दोषः सततं करोति द्वौ कालौ, अहोरात्रे कालद्वये दोषप्रकोपात्। हृदये स्थितो दोष आमाशयमागत्य अन्येद्युष्कं करोति एककालं नैकघटिकाधिक्येवाहोरात्रे दोष आमाशयमागत्य अन्येद्युष्कं करोति। तत्र द्वौ दोषप्रकोपकालौ एकस्मिन् काले हृदये तिष्ठत्यपरस्मिन्नामाशय इति। कण्ठस्थितो दोषोऽहोरात्रात् हृदयमायाति। तृतीये दिने आमाशयमागत्य स्वप्रकोपकाले तृतीयकं ज्वरं करोति एककालं न तु द्वौ कालौ स्वभावात्। एवमेव शिरःस्थितो दोषः अहोरात्रात् कण्ठमायाति ततः पुनरहोरात्रात् हृदयमायाति चतुर्थे दिने आमाशयमागत्य स्वप्रकोपकाले चतुर्थकं ज्वरं करोति एककालत्वञ्च द्वौ कालौ स्वभावादेव। ननु दोषस्यागमनक्रमेण निजस्थानगमनक्रमात् कथं तृतीयचतुर्थदिवसयोर्ज्वरागमनम्। उच्यते। दोषो हि प्रकोपसमये वेगवत्तया लाघवात् स्वस्थानन्तु वेगहीन एव याति। यत आह "दोषः प्रकोपकाले हि वेगवत्त्वेन लाघवात्। वेगवानेव सर्वत्र स्वस्थानमधिगच्छति"। सन्धिषु स्थितः प्रलेपकं करोति। रूक्षयत्यामाशयेऽपि सन्धिषु स्थितः प्रलेपकं सर्वदा करोति "निहन्तः पुनरायाति विषमो नियते दिने। स्वभावः कारणं तत्र मन्यन्ते सुनिपुणाः"। स्वभावश्च कारणत्वे कफस्थानविभागनियमेच्छाचतुर्थकादिविपर्ययेण अपि ज्वराः स्वस्वकाले प्रभवन्ति "जायमाने यथा भूमिं बीजं काले

प्ररोहति। अधिशेते तथा धातून् दोषः काले प्रकुप्यति"। सुश्रुतोऽप्याह "स चापि विषमं देहं न कदाचित् प्रमुञ्चति। ग्लानिगौरवकार्श्येभ्यः स यस्माच्च प्रमुच्यते। वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते। धातवन्नेषु लीनत्वात् सौक्ष्म्याच्चैवोपलभ्यते"। द्विदोषोल्बणञ्च तृतीयकस्य लक्षणमाह "कफपित्तात् त्रिकग्राही पृथग्द्वातकफात्मकः। वातपित्ताच्छिरोग्राही त्रिविधः स्यात् तृतीयकः"। त्रिकग्राही वेदनया त्रिकं गृह्णातीत्यर्थः। ननु कफपित्तात् त्रिकग्राही वेदनया त्रिकव्यापी त्रिकं तु वातस्थानं तत्कथं तदुद्गृह्णीतः पित्तकफौ अन्यस्थानगत्वेन दुर्बलत्वात् दुर्बलौ च कथं वेगं कुरुतः, दोषाणां स्थाननियमः नतु कुपितानां तथा च सुश्रुतः "कुपितानां हि दोषाणां शरीरे परिधावति। यत्र सङ्गः स वैगुण्यात् व्याधित्वत्वोपजायते"। एवमन्यस्थानगत्वेन चतुर्थको वाच्यः। वातकफात्मकः पृष्ठात् व्यथया पृष्ठं व्याप्य भवतीत्यर्थः। "ल्यब्लोपे कर्मण्यधिकरणे च" या०सूत्रेण पञ्चमी। कफोल्बणस्य वातोल्बणस्य चतुर्थकस्य लक्षणमाह "चतुर्थको दर्शयति स्वभावं द्विविधं ज्वरः। जङ्घाभ्यां श्लैष्मिकः पूर्वं शिरसोऽनिलसम्भवः। मध्यकायन्तु गृह्णाति पूर्वं यस्तु स पित्तजः। विषमज्वर एवान्यश्चतुर्थकविपर्ययः"। श्लैष्मिकः श्लेष्मोल्बणः। तथा अनिलसम्भवो वातोल्बणः सन्ततादीनां त्रिदोषजत्वम्। यत उक्तं चरके "प्रायशः सन्निपातेन एते सुविषमज्वराः" इति। प्रायशोग्रहणादेकदोषजा द्विदोषजा अपि भवन्तीति जैज्जटः। पूर्वं प्रथमं जङ्घाभ्याम् व्यथया जङ्घे व्याप्य पश्चात् सकलं शरीरं व्याप्नोति। एवमुल्बणवातजातः शिरसः पूर्वं व्यथया शिरोव्याप्य सकलं शरीरं व्याप्नोतीत्यर्थः। "विषमज्वर एवान्यश्चातुर्थकविपर्ययः। अस्थिमज्जगतो दोषश्चातुर्थकविपर्ययः। जायते भिषजा ज्ञेयो विषमज्वर एव सः"। अन्यः सन्ततादिपञ्चकादपरः चातुर्थकविपर्ययाख्यो ज्वरः सोऽपि विषमज्वर एव वैद्येन ज्ञातव्यः। स किं धातुस्थ इत्यपेक्षयाह अस्थीत्यादि। तस्य चातुर्थकविपर्ययस्य लक्षणमाह "स मध्ये ज्वरयत्यन्ते आदावन्ते च विसृजति"। चातुर्थकविपर्ययः इत्युपलक्षणम् सन्ततादिविपर्ययोऽपि बोद्धव्यः। यथा अहोरात्रे द्वौ कालौ मुञ्चति शेषं सर्वमहोरात्रं तिष्ठतीति सततविपर्ययः। अहोरात्रे एककालं मुञ्चति शेषं सर्वमहोरात्रं तिष्ठति अन्येद्युष्कविपर्ययः मध्ये एकं दिनं ज्वरयति आदावन्ते च मुञ्चतीति तृतीयकविपर्ययः। एते विषमज्वरोपलक्षकाः अन्ये रात्रिज्वरादयोऽपि विषमज्वरा बोद्धव्याः यथा "समौ वातकफौ यस्य क्षीणपित्तस्य देहिनः। रात्रौ प्रायो ज्वरस्तस्य दिवा क्षीणकफस्य तु"। प्रायोग्रहणात्। सन्ततादीनां शीतपूर्वत्वे दाहपूर्वत्वे च हेतुमाह "त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरम्। तयोः प्रशान्तयोः पित्तसन्तप्तं करोति च"। शीतं शीतसहितम्। प्रशान्तयोः प्रशान्तवेगयोः सतः अभ्यन्तरे। "करोत्यादौ तथा पित्तं त्वक्स्थं दाहसमन्वितम्। तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः"। अन्ततः हस्तपादादितः। शीतादिदाहादिज्वरयोः त्रिदोषजत्वमाह "द्वावेतौ दाहशीतादिज्वरौ संसर्गजौ स्मृतौ। दाहपूर्वस्तयोः कष्टः सुखसाध्यतमोऽपरः"। संसर्गजौ सान्निपातिकौ। कष्टः कष्टसाध्यः। विषमज्वरविशेषमाह "विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते। तेनार्द्धं शीतलं देहमूर्द्धतप्तं प्रजायते"। अन्नरसे विदग्धे व्याहारजे रसे दुष्टे, देहे श्लेष्मपित्ते व्यवस्थिते दुष्टे स्थिते। तेन हेतुना शीतलं कर्त्तेन तप्तं पित्तेन, अर्द्धत्वं चार्द्धनारीश्वराकारेण नरसिंहाकारेण वा। "काये दुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः। तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयोः"। अन्ते हस्तपादौ "काये श्लेष्मा यदा दुष्टः पित्तं चान्ते व्यवस्थितम्। शीतत्वं तेन गात्रे स्यादुष्णत्वं हस्तपादयोः"। विषमज्वरविशेषस्य प्रलेपकस्य लक्षणमाह "प्रलिप्तमिव गात्राणि धर्मेण गौरवेण च। मन्दज्वरविलेपी च स शीतः स्यात् प्रलेपकः"। गौरवेण उपलक्षितः। मन्दज्वरविलेपी मन्दवेगस्य विलेपः सदा सम्बन्धोऽस्यास्तीति मन्दज्वरविलेपी। अयं विषमज्वरः। तथा च सुश्रुतः "प्रलेपकाख्यो विषमः प्रायशः श्लेष्मशोणिताम्। ज्वराश्च विषमाः सर्वे प्रायः श्लेष्मशोणिताम्"।

विषमनयन पु० विषमाणि अयुग्मानि त्रीणि नयनान्यस्य। त्रिनेत्रे शिवे। विषमनेत्रादयोऽप्यत्र।

विषमर्दनी स्त्री विषं मृद्यतेऽनया मृद्-ल्युट् ङीप्। गन्धनाकुल्याम्। स्वार्थे क। विषमर्दनिकातत्रैव राजनि०।

विषमस्थ त्रि० विषमे उन्नतानते कूटे वा तिष्ठति स्था क। १उपदूषणप्राप्ते २मूढदृष्टे ३उन्नतानतदेशस्थे च।

विषमशिष्ट न० विषमं शिष्टं शासनम् । अनुचितशासने ।
विषमायुध पु० विषमाणि अयुग्मानि पञ्च आयुधानि बाणा यस्य । पञ्चशरे कामे हला०विषमेषुत्वादयोऽप्यत्र । [राजनि०
विषमुष्टि पु०विषं मुष्णाति मुष–क्तिच् । क्षुपभेदे (विषदोडि)
विषमृत्यु पु०विषात् विषदर्शनात् मृत्युरस्य । चकोरखगे जटा०
विषय पु० विशिष्यन्ति स्वात्मकतया विषयिणं निरूपयन्ति संबध्नन्ति वा वि+षि–अच् । इन्द्रियगोचरे १शब्दादौ २देशे च अमरः । ३भोगसाधने "विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः" । "सिन्धुहिमादिर्विषयो मतः" । "ग्राम्यादिस्तु महावायुपर्य्यन्तो विषयो मतः" भाषा० । "अत्र विषयः भोगसाधनं सर्वमेव हि कार्य्यमदृष्टाधीनं यच्च कार्य्यं यददृष्टाधीनं तत् तदुपभोगं साक्षात्परम्परया जनयत्येव न हि बीजाग्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति तेन द्व्यणुकादिब्रह्माण्डान्तं सर्वमेव विषयो भवतीत्यर्थः" सि० मुक्ता० । "विशिष्यन्ति विषयिणं बध्नन्ति स्वेन रूपेण निरूपणीयं कुर्वन्तीति विषयाः पृथिव्यादयः सुखाद्यश्च चक्षुरादीनामविषयाश्च तन्मात्रलक्षणाः योगिनामूर्ध्वस्रोतसां च विषयाः" सांख्य०त० कौ० । ४नित्यसेविते अमरः । ५अव्यक्ते ६शुक्रे च अजयपालः । ७कान्तादौ ८उपभोग्ये शब्दरत्ना० दर्शनाभावे "विषयो हि निःश्रेयसार्थैःसिनोतिर्बन्धकर्मार्थकः । विशेषेण सिनोतीति विषयो ऽतो नियामकः" भट्टका० । ९आरोपाश्रये "आरोप्यान्या तु यत्रोक्ता विषयो विषयी तथा । विषयान्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका" काव्यप्र० । १०विचारार्हवाक्ये अधिकरणावयवभेदे "विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् । निर्णयश्चेति सिद्धान्तः शास्त्रेऽधिकरणं स्मृतम्" मीमांसा० । [ज्ञानि० ।
विषयज्ञान न० विषयाणां न ज्ञानं यत्र । तन्द्रायाम् रा०
विषयिन् न० विषयोऽस्यास्य इनि । १ज्ञाने "विषयी यस्य तस्यैव" भाषा० २इन्द्रिये च । ३विषयासक्ते त्रि०मेदि० । ४रात्रौ ५कामदेवे पु० मेदि० । विषयिणो भावः तल् । विषयिता ज्ञाननिष्ठे विषयनिरूपिते पदार्थभेदे स्वरूपसम्बन्धभेदे च स्त्री । सा च त्रिविधा विशेष्यनिरूपिता विशेषिता, विशेषणनिरूपिता प्रकारिता, संसर्गनिरूपिता संसर्गिता इति गदाधरादयः । गदाधरमते विषयितैव प्रतियोगितावच्छेदिका । जगदीशमते विषयतैवेति भेदः ।
विषरूपा स्त्री विषं मूषिकविषं रूपयति अतिक्रामति रूप–क । अतिविषायाम् (आतइच) राजनि० । [राजनि०
विषलता स्त्री विष–व्याप्तौ अच् कर्म्म० । इन्द्रयवृक्षयाम् ।
विषविद्या स्त्री विषाय तन्निवृत्तये विद्या । विषघ्नमन्त्रज्ञाने
विषविधि पु० दिव्यभेदे दिव्यशब्दे २५८६ पृ० दृश्यम् ।
विषवैद्य पु० विषे विषापहारे वैद्यशास्त्रिकः । विषमन्त्रविद्यायुते अमरः । [राजनि० ।
विषशालूक पु० विषस्य सृष्टायाः शालूकः । पद्मकन्दे
विषशृङ्गिन् पु० विषं शृङ्गमिवास्यस्य इनि । शृङ्गरोले हारा० । [हेमच० स्त्रियां ङीष् ।
विषसूचक पुंस्त्री० विषं सूचकं हिंसकमस्य । चकोरखगे
विषसृक्कन् पु० विषं सृक्केव यस्य । शृङ्गरोले त्रिका० ।
विषहन्त्री स्त्री विषं हन्ति हन–तृच् ङीप् । १अपराजितायाम् राजनि० । २विषहारके त्रि० ।
विषहरी स्त्री विषं हरति हृ–अच् गौरा० ङीष् । १मनसादेव्यां शब्दच० । २विद्याभेदे तन्त्रसा० [जनि० ।
विषहा स्त्री विषं हन्ति हन–ड । देवदालीलतायाम् रा०
विषा स्त्री विषं मूषिकविषं नाशयत्वेनास्त्यस्याः अच् । (आतइच) १अतिविषायाम् अमरः २वृद्धौ च उणादि०
विषाण न० विष–शा० कानच् । १पशुशृङ्गे २हस्तिदन्ते ३कुष्ठौषधे मेदि० ४वराहदन्ते हेमच० ५जोरकाकोल्याम् ६अजशृङ्ग्यां स्त्री मेदि० गौरा० ङीष् । सा च ७इक्षुकाण्डे स्त्री राजनि० । ८तिन्तिड्यां स्त्री शब्दच० ।
विषाणिका स्त्री विषाणमस्त्यस्याः ठन् । १मेषशृङ्ग्याम् (गाड़रांगड़ा) रत्नमा० । २कर्कटशृङ्ग्याम् ३आवर्त्तक्यां ४सातलायां राजनि० ।
विषाणिन् पु० विषाणमस्त्यस्य इनि । १शृङ्गिणि २हस्तिनि च अमरः । ३शृङ्गाटके ४चक्रभौषधे च पु० राजनि० ।
विषाद पु०वि+षद–घञ् । १अवसादे हेमच० २जडतायाञ्च ।
विषादनी स्त्री विषाय तन्निवृत्तये अद्यतेऽसौ अद–ल्युट् । पलाशीलतायाम् राजनि० । [२विषहरे त्रि० ।
विषान्तक पु० विषस्यान्तक इव । १शिवे हेमच० ३त० ।
विषापहा स्त्री विषमपहन्ति अप+हन–ड । १सुष्ककन्दे राजनि० । २इन्द्रयवृक्षयां शनिविषायां राजनि० । ३नागदन्त्यां भावप्र० । ४अर्कमूलायाञ्च (इअरमूल) ५सर्पकङ्कालिकायां रत्नमा० । [ङीष् ।
विषार पुंस्त्री० विषमृच्छति ऋ–अण् । सर्षे शब्दच० स्त्रियां
विषारति पु० ६त० । १कृष्णधुस्तूरे राजनि० । २विषनाशके च ।

विषारि पु०ई०त०। १इतरद्वेषे २अहेश्चक्षुःशत्रौ च राजनि०
विषास्य पु० विषमास्ये यस्य। १सर्पे शब्दच० विषाननादयो०
ऽयत्र। विषाक्तनिश्वासत्वात्। २भल्लातके स्त्री शब्दच०।
विषु अव्य०विष-कु। १साम्ये भरतः। २नानारूपे रामाश्रमः
विषुव न० विषु दिनरात्रोः साम्यं वाति वा-क। १समरात्रिदिनकाले अमरः। अयनांशक्रमणे २रवेः तुलामेषराशिसंक्रान्तिभेदे च

"कृशकर्कटसंक्रान्तौ हे ह्रदगद्दिषायने। विषुवती तुलामेषे गोलनध्ये तथापरा" ज्यो०त०। "भचक्रनाभौ विषुवद्दृतियं समसूत्रगम्। अयनद्वितयं चैव यतस्तः प्रथितास्तु ताः" सू० सि०। "भचक्रनाभौ भगोलस्य ध्रुवद्वयाभ्यां तुल्यान्तरेण मध्यभागे विषुवद्दृतियं समसूत्रगं परस्परं व्यासखण्डान्तरितं ध्रुवमध्ये विषुवद्दृत्तस्थानात् तद्दृत्ते क्रान्तिवृत्तभागौ यौ लग्नौ तौ क्रमेण पूर्वापरौ विषुवत्षष्ठ्यौ मेषतुल्याख्यौ चेत्यर्थः" रङ्ग०
कालभेदे विषुवसंक्रमणस्यांशभेदः अयनसंक्रान्तिशब्दे दर्शितः सूर्यसिद्धान्तोक्तं संक्षिप्य कालभेदे विषुवारम्भणादुक्तं यथा "मेषसंक्रमतः पूर्वं पश्चात्तरादिनान्तरे। प्रातिस्वीयेन सायेन विषुवारम्भणं भवेत्। त्रयोदशदिने सौरे चैत्रे नक्षतिथौ १५२०शके। विषुवारम्भणं तत्र यमं मानं दिवानिशोः। ततः प्रतिदिनं वेला षष्टिघट्यात्मिका। वर्द्धते मेषविम्बांशपर्य्यन्तं स्थूलमार्गतः। तथाच्यैष्टान्तपर्य्यन्तं पादोनत्रिपलात्मिका। तादृशाभ्रपर्य्यन्तं पलैकप्रमिता मता। ततः कर्कटविम्बांशपर्य्यन्तं प्रत्यहक्रमात्। षष्टिघट्यात्मकानेन वेला त्रुटति निश्चितम्। तादृग्भाभ्रान्तपर्य्यन्तं पादोनत्रिपलात्मिका। दिवामानं दशघट्यूनं रात्रेः प्रमाणकम्। वैशाखादौ दिवामानं रात्रिमानं तुलादिषु। षट्षष्टिवत्सरानेवं ततः स्यात् द्वादशांशके। पुनस्तद्वत् सरांस्तद्वत् तत एकादशादिके"। [विषुवशब्दार्थे।
विषुवत् न०विषु साम्यं दिवानिशोरत्रास्ति मतुप् मस्य वः।
विषौषधी स्त्री ई०त०। नागदन्त्यां रत्नमा०।
विष्क हिंसायां चु० आ०सक० सेट्। विष्कयते अविविष्कत दर्शने उभ० सेट्। विष्कयति ते अविविष्कत् त।
विष्कम्भ पु० वि+स्कभ्-घञ्। सूर्यचन्द्रयोगजातयोगमध्ये प्रथमे १योगे ज्यो०त० २विस्तारे ३प्रतिबन्धे ४रूपकलाटकाङ्गभेदे "अर्धोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ। चूलिकाङ्कावतारोऽथ स्यादङ्कास्यखलित्यपि। दत्तवर्त्तिभ्याणानां कथांशानां निदर्शकः। संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः। मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः। शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पितः" सा०द०। ५योगिनां बन्धभेदे मेदि० ६वृक्षे अमरः ७अवष्टम्भके अमरः ८कीलकादौ च भरतः। ९पर्वतभेदे विष्कम्भशब्दे दृश्यम्।
विष्कल पुंस्त्री० विषं विषां कलयति कलि-अच् पृषो०। धान्यशूकरे राजनि० स्त्रियां ङीष्।
विष्किर पुंस्त्री० विकिरति वि+कृ-क षुट्च। १विहगे अमरः स्त्रियां ङीष्। २विहगभेदे भावप्र० "वर्त्तकालावविकिरकपिञ्जलकतित्तिराः। कुलिङ्गकुक्कुटाद्याश्च विष्किराः परिकीर्त्तिताः। विकीर्य्य भक्षयन्त्येते यस्मात्तस्माद्धि विष्किराः। कपिञ्जल इति प्राज्ञैः कथितो गौरतित्तिरः"। कुलिङ्गः (कपर) इति लोके। "विष्किरा मधुराः शीताः कषायाः कटुपाकिनः। बल्या दृष्यास्त्रिदोषघ्नाः पथ्यास्ते लघवः स्मृताः"।
विष्टप न० विश-कपन् षट्च। भुवने अमरः।
विष्टब्ध त्रि० वि+स्तभ-क्त। प्रतिरुद्धे अवरुद्धे
विष्टम्भ पु० वि+स्तभ-घञ्। १प्रतिबन्धे २आनाहे रोगभेदे च आनाहशब्दे ७२९ पृ० दृश्यम्। [जनके च।
विष्टम्भिन् त्रि०वि+स्तभ-णिनि। १प्रतिबन्धके २रोगविशेषे
विष्टर पु० वि+स्तृ-अप् षत्वम्। "ऊर्ज्जकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः" इति "वामावर्त्तस्तु विष्टर" इति च स्मृत्युक्ते दर्भलते १आसनभेदे २आसनमात्रे शब्दर्त्न ३कुशस्तम्बे च अमरः। [विष्णौ अमरः।
विष्टरश्रवस् पु० विष्टरः कुशस्तम्बरिव श्रवसी कर्णौ यस्य।
विष्टरुहा स्त्री विष्टा भूमौ प्रविष्टा सती रोहति रुह-क। स्वर्णकेतक्यां राजनि०। [शब्दे २९२८ पृ० दृश्यम्।
विष्टार पु० वि+स्तृ-घञ् षत्वम्। पङ्क्तिच्छन्दोभेदे छन्दः-
विष्टि स्त्री विश-क्तिन् क्तिच् वा। वेतनं विना भारादिवहनजन्ये १क्लेशे अमरः। २वेतने ३कर्मणि ४वर्षर्त्वे ५तिथ्यर्द्धात्मककरणभेदे शब्दर्त्न ६विघ्ने च। ७कर्मकरे भृत्ये ८वेतनं विना कर्मकरे च त्रि० मेदि०।
विष्ठल न०विप्रकृष्टं स्थलम् प्रा०स०। दूरस्थस्थले त्रि०कौ०
विष्ठा स्त्री विविधं तिष्ठति स्था-क षत्वम्। १उच्चरे शब्दमाला २पुरीषे अमरः।
विष्णु स्त्री विश-व्यापने नुक्। १व्यापके परमेश्वरे अमरः

४"यस्मात् विश्वमिदं सर्वं तस्य शक्त्या महात्मनः । तस्मादेवोच्यते विष्णुर्विशधातोः प्रवेशनात्" इत्युक्तेः विश-प्रवेशे नु प्रत्ययः । ५धर्मशास्त्रकारके मुनिभेदे च "मन्वत्रिविष्णुहारीतेति याज्ञ० हेतुहैवते श्रवणनक्षत्रे ज्यो०त० ।

विष्णुकन्द पु० विष्णुप्रियः कन्दः श०त० । मूलभेदे राजनि०

विष्णुक्रान्ता स्त्री ३त० विष्णुरुद्दर्शनैः क्रान्तो वा यया । अपराजितायाम् अमरः तस्याः विष्णुतुल्यवर्णत्वात् विष्णुपादप्रत्यक्तत्वाच्च तथात्वम् ।

विष्णुगुप्त पु० १चाणक्ये मुनौ अयमेव नाम्नाश्रवनत्वेन पञ्चिलत्वेन प्रसिद्धः विका० । ३त० । विष्णुना गुप्ते त्रात्रादौ २देवादौ ३कन्दभेदे राजनि० ।

विष्णुतैल न० वैद्यकप्रसिद्धे तैलभेदे तच्च द्विविधं खल्पहृद्भेदात् तत्तैलपाकप्रकारः भैषज्यरत्ना० उक्तो यथा तैलं खल्पविष्णुतैलम् "शालपर्णी पृश्निपर्णी बलागोरक्षतशुक्लाः । एरण्डस्य च मूलानि हृद्यैः पूतिकस्य च । शतावरी सहचरी पचेदेतैः पलोन्मितैः । तैलप्रस्थं पयोदत्त्वा गव्यं वाऽऽजं चतुर्गुणम् । अस्य तैलस्य चकस्य प्रस्थं पीत्वा पयः पिबेत् । ततः परम् । वातार्त्तो नरनागाश्च पीत्वा हृद्रुतलक्षवः । हृत्पार्श्वशूले वातार्त्ते गलग्रहे । अर्दिते क्षये । शर्कराघृतपाण्डुत्वकामलाह्वांवभेदके । क्षीणेन्द्रियेऽल्पहृदो च जराजर्जरिते हितम् । स्त्रीणामप्रजसां गर्भस्थितिकरं परम् । एतद्वरं तैलं विष्णुना परिकीर्त्तितम् । तण्डुलः गोरक्षतण्डुलः । हृद्रुतौ हृत्तीक्ष्णकाष्ठकार्य्यौ । पूतिकं नाटाकरञ्जः । सहचरी झिण्टी । अत्र क्वाथान्तराभावात् क्षीरस्य चतुर्थं जलं क्वचिद्दाति । "खरसक्षीरमाढ्यैः पाको ज्ञेयः क्वचित् । जलं चतुर्थं तत्र दद्यात्तदर्धावशेषितम् । क्वाथान्तररहिते केवलक्षीरादिसहिततैलादिपाके ज्ञातव्यं क्वाथान्तररहिते केवलक्षीरादिसहितैलादिपाके ज्ञातव्यं स तु सर्वत्र । "श्लक्ष्णचन्दनकुङ्कुमागुरुसुराकक्कोलकांसी घटी श्रीवासच्छदयन्त्यपर्णगजभृत्तौक्षीध्रजोशीरकम् । कस्तूरीनखपूतिशैलजलमुङ्मेथीलवङ्गादिकम् । अन्यद्द्रव्यमिदं प्रदेयमखिलं श्रीविष्णुतैलादिषु" । अथ हृद्रविष्णुतैलम् "जलधरमधुगन्धा जीवकर्षभकौ घटी । काकोली क्षीरकाकोली जीवन्ती मधुयष्टिका । मधूरिका देवदारु पद्मकाश्च सैन्धवम् । मांसी चैला त्वक् कुष्ठं रक्तचन्दनशैलजम् । मज्जिष्ठा नखनामिश्च श्वेतचन्दनकुङ्कुमम् । पर्णी कुन्दुरु खोटिश्च ग्रन्थिकञ्च नखो तथा । एतेषां पालिकैभागैस्तैलस्यापि तथाष्टकम् । शतावरी रसतनं दुग्धस्यापि समं भवेत् । विष्णुतैलवरं श्रेष्ठं सर्ववातविकारनुत् । ऊर्द्ध्ववाते ह्यधोवाते कृच्छ्रविण्मूत्र एव च । शिरोमध्यगता ये च सन्धास्तस्मे गलग्रहे । यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला । ये वात प्रभवारोगा ये च पित्तसमुद्भवाः । सर्वांस्तान्नाशयत्याशु सूर्य्यस्तम इवोदितः" ।

विष्णुदैवत(त्य) त्रि० विष्णुर्दैवतं(त्यं) यस्य । विष्णुदेवताके द्रव्यादौ "गृह्णन्तु सर्वदैवत्यं यदनुक्तं द्विजोत्तमाः ! । तज्ज्ञेयं विष्णुदैवत्यं सर्वं वा विष्णुदैवतम्" शु० त० विष्णु० । २श्रवणनक्षत्रे च ।

विष्णुधर्म्म पु० विष्णुप्रीणनायोग्यो धर्म्मः श० । विष्णूपासनोचिते १नित्यनैमित्तिके उपचारात् तत्प्रतिपादके २ग्रन्थे च

विष्णुधर्मोत्तर न० विष्णुधर्म्म उत्तरः प्रधानः वर्ण्यत्वेन यस्य । संहिताभेदे ।

विष्णुपद न० विष्णोः पदमिव व्यापकत्वात् । १आकाशे अमरः । हेत० । २क्षीरार्णवे मेदि० । ३पद्मे च हेमच० ४विष्णोश्चरणे कर्म्म० । ५विष्णुरूपस्थाने च "तद्विष्णोः परमं पदम्" ऋ० विष्णुसूक्तम् ।

विष्णुपदी स्त्री० विष्णुपदं कारणत्वेनास्त्यस्याः अच् गौरा० ङीष् । १गङ्गायाम् "निर्गता विष्णुपादाब्जात् तेन विष्णुपदी स्मृता" ब्रह्मवै० प्र०१अ० । २तुलसिक्षुद्रशिंशपाकुशाग्रासु रवेः संक्रान्तौ च । "तुलसीक्षुद्रशिंशपासु सिद्धे विष्णुपदी स्मृता" "पुण्यायां विष्णुपद्यां च प्राक्पश्चादपि षोडश" ज्यो०त० । "अयने कोटिगुणितं लक्षं विष्णुपदीषु च" ति०त० "तदन्तरेषु संक्रान्तिहितयं हितयं पुनः । नैरन्तर्यात् तु संक्रान्तेश्चैयं विष्णुपदीद्वयम्" स्मृ०शि० । "तदन्तरेषु विषुवायनान्तरालेषु । अत्रान्तरालानां चतुःस्थाने सङ्ख्याद्वयं बहुवचनम् । संक्रान्तिहितयं हितयं पुनाराश्यादिभागे अहोरात्रसाक्यसमं वारद्वयं भवति तदन्तराले राश्यादिभागौ द्वौ भवत इत्यर्थः । तथा हि मेषाख्यविषुवकर्कायनयोरन्तराले वृषसिंहतुलयोरादौ । कर्कतुलयोरन्तराले सिंहकन्ययोरादौ । तुलामकरयोरन्तराले वृश्चिकधनुषोरादौ । मकरमेषयोरन्तराले कुम्भमीनयोरादौ इति । एवं विषुवान्तरं संक्रमणद्वयमन्तरमयनं तदनन्तरं संक्रान्तिद्वयं तदनन्तरं विषुवमनन्तरं संक्रान्तिद्वयमनन्तरमयनमित्यादि । पौनःपुन्येन

ष्येयमित्यर्थः। संक्रान्तिद्वयमध्ये प्रथमसंक्रान्तौ विशेषमाह। नैरन्तर्यादिति। निरन्तरतया सन्मूतायाः संक्रान्तेः सकाशाद्विष्णुपदीहयं तदन्तराल इत्यर्थः" रङ्ग०

विष्णुपुराण न० व्यासप्रणीते महापुराणभेदे तत्प्रतिपाद्यविषयाश्च दृहन्नारदीये ९३ अ० उक्ता यथा

"शृणु वत्स! प्रवक्ष्यामि पुराणं वैष्णवं महत्। त्रयोविंशतिसाहस्रं सर्वपातकनाशनम्। यत्रादिभागे निर्दिष्टाः षड्वंशाः शक्तृजेन तु। मैत्रेयाद्यादिमे तत्र पुराणस्यावतारिका"। तत्र प्रथमभागस्य प्रथमांशे "सृष्टिकारणसर्गश्च देवादीनाञ्च सम्भवः। मनुवंशनाख्यानं दक्षादीनां कथाश्रयः। ध्रुवस्य चरितं चैव पृथोश्चरितमेव च। प्राचेतसं तथाख्यानं प्रह्लादस्य कथानकम्। पृथुराज्याधिकाराख्यः प्रथमोऽंश इतीरितः। पातालनरकाख्यानं स्वर्गसर्गनिरूपणम्। सूर्यादिचारकथनं पृथग्ज्योतिषसंगतम्। चरितं भरतस्याथ मुक्तिमार्गनिदर्शनम्। निदाघ ऋतुवंशादौ द्वितीयोऽंश उदाहृतः"। प्रथमभागस्य तृतीयांशे "मन्वन्तरसख्यानं वेदव्यासावतारकम्। नरकोद्धारकं कर्म गदितञ्च ततः परम्। सगरस्यौर्वसंवादे सर्वधर्मनिरूपणम्। आह्निकल्पं तयोर्हृद्यं वर्णाश्रमनिबन्धने। सदाचारश्च कथितो मायामोहकथा ततः। तृतीयोऽंशोऽयमुदितः सर्वपापप्रणाशनः"। प्रथमभागस्य चतुर्थांशे "सूर्यवंशकथा पुण्या सोमवंशानुकीर्त्तनम्। चतुर्थेऽंशे मुनिश्रेष्ठ! नानाराजकथाचितम्"। प्रथमभागस्य पञ्चमांशे "कृष्णावतारसम्भ्रमो गोकुलीया कथा ततः। पूतनादिवधो बाल्ये कौमारेऽरिष्टहिंसनम्। कैशोरे कंसहनन माथुरं चरितं तथा। ततस्तु यौवने प्रोक्ता लीला द्वारवतीभवा। सर्वदैत्यवधो यत्र विधाश्च पृथग्विधाः। यत्र स्थित्वा जगन्नाथः कृष्णो योगेश्वरेश्वरः। भूभारहरणं चक्रे परस्परहननादिभिः। ऋष्यशृङ्गीयमाख्यानं पञ्चमोऽंश इतीरितः"। प्रथमभागस्य षष्ठांशे "कल्किजं चरितं प्रोक्तं चातुर्विध्यं लयस्य च। ब्रह्मज्ञानसमुद्देशः खण्डिक्यस्य निरूपितः। केशिध्वजेन चैत्येषः षष्ठोऽंशः परिकीर्त्तितः"। तस्य द्वितीयभागे "अतःपरन्तु सूतेन शौनकादिभिराद्दरात्। पृष्टेन चोदिताः शश्वद्विष्णुधर्मोत्तराह्वयाः। नानाधर्मकथाः पुण्या व्रतानि नियमा यमाः। धर्मशास्त्रं चार्थशास्त्रं वेदाङ्गं ज्योतिषं तथा। सर्गाख्यानं प्रकरणात् सोमाग्नि मनवस्तथा। नानाविद्याश्रयाः प्रोक्ताः सर्वलोकोपकारकाः। एतद्विष्णुपुराणं वै सर्वशास्त्रार्थसंग्रहः" तत्फलश्रुतिः "शरादृकल्पवृत्तान्तं व्यासेन कथितं त्विह। यो नरः पठते भक्त्या यः शृणोति च सादरम्। तावुभौ विष्णुलोकं हि व्रजेतां भक्तभोगकौ। तल्लिखित्वा च यो दद्यादाषाढ्यां हतधेनुना। सहितं विष्णुभक्ताय पुराणार्थविदे द्विज!। स याति वैष्णवं धाम विमानेनार्कवर्चसा। यश्च विष्णुपुराणस्य समनुक्रमणीं द्विज!। कथयेच्छृणुयाद्वापि स पुराणफलं लभेत्"।

विष्णुमाया स्त्री ६त०। विष्णोः परमेश्वरस्य माया। १अघटनघटनपटीयस्याम् दैवस्याविद्याशक्तौ २तदधिष्ठात्र्यां दुर्गायाञ्च।

विष्णुयशस् पु० कल्किपितरि कल्किपु०।

विष्णुरथ पु० विष्णोः रथ इव गतिहेतुत्वात्। १गरुडे अमरः। ६त०। २विष्णोः रथे च।

विष्णुरात पु० विष्णुना रातः विष्णुर्वा रायाज्जीवनमस्य रा-क्त तवा। परीक्षिदाख्ये नृपे च हि गर्भस्थ एव अश्वत्थामास्त्रेण दग्धो मृतः सन् प्रसवानन्तरञ्च विष्णुना पुनर्जीवितः तत्कथा भा० आश्व० ७०अध्याये। तन्नामनिरुक्तिः भाग०१।१२ अ० यथा

"दैवेनाप्रतिघातेन शुके (वंशे) संस्थासुपेयुषि। रातोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना। तस्मान्नाम्ना विष्णुरातो लोके ख्यातिं गमिष्यति"।

विष्णुवल्लभा स्त्री ६त०। १तुलस्याम् राजनि० २अग्निशिखायाञ्च शब्दच०। ३लक्ष्म्याम्।

विष्णुवाहन पु० विष्णुं वाहयति स्थानान्तरं नयति वह-णिच्-ल्यु। गरुडे हेमच०।

विष्णुवाह्य पु० विष्णुर्वाह्योऽस्य। गरुडे शब्दच०।

विष्कार पु० वि+स्कृ-णिच्-अच् अच आतृ वत्वम्। धनुर्गुणाकर्षणशब्दे टङ्कारे अमरः।

विष्ठ त्रि० विशेषेण वध्यः विष+यत्। विशेषेण बध्ये अमरः।

विष्वक्सेनप्रिया स्त्री ६त०। १लक्ष्म्याम् (चामर आतु) २वाराह्याम् अमरः।

विष्वणन न० वि+स्वन-ल्युट् णत्वणत्वे। भोजने जटा०।

विष्वाण पु० वि+स्वन-घञ् णत्वणत्वे। भोजने हेमच०।

विस न० वि+सो-क। मृणाले अमरः। बादित्वमित्यन्ये

विस उत्सर्गे दि०पर०सक०सेट्। विस्यति अवैसीत्।

विसंवाद पु० वि+सम्+वद–घञ्। १विप्रलम्भे अमरः। २अन्यथा स्थितस्य वस्तुनोऽन्यथा कथनादौ च।

विसकुसुम न०विसयुक्तं कुसुमम्। पद्मे राजनि०।

विसकुट पु० विगतः सङ्कटो यस्मात्। १सिंहे शब्दच० २दृढदीक्षे च राजनि०। [समूहे च त्रिका०।

विसनाभि स्त्री विसं नाभिरिव यस्याः। १पद्मिन्याम् २पद्म०

विसर पु०वि+सृ–अप्। १समूहे अमरः। २विस्तारे च मेदि०

विसर्ग पु० वि+सृज–घञ्। १दाने २त्यागे ३मलत्यागे ४विसर्जनीयाख्ये ५वर्णभेदे ६सृष्ट्यध्यायनभेदे ७मोक्षे हला०। ८मलये ९विशेषवृष्टौ शब्दरत्ना० "विसर्गविसर्गादिनवलक्षणलक्षितमिति" श्रीधरः।

विसर्जन न० वि+सृज–ल्युट्। १दाने अमरः २त्यागे च। वि+सृज–णिच् ल्युट्। ३प्रेरणे मेदि०।

वि(वी)सर्प पु० वि+सृप–घञ् वा दीर्घः। रोगभेदे तल्लक्षणादि भावप्र० उक्तं यथा तत्र विसर्पविपक्वनिदानं संख्यां निरुक्तिञ्चाह "लवणाम्लकटूष्णादिसेवनाद्दोषकोपतः। विसर्पः सप्तधा ज्ञेयः सर्वतः परिसर्पणात्" आदिशब्दाच्चरकोक्तकुलिरतीक्ष्णशाकभक्षणाक्रीप्रभृतीनां ग्रहणम्। सप्तधात्वं पिष्टयोति "वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः। चत्वारः एते वीसर्पा वक्ष्यन्ते द्वन्द्वजास्त्रयः। आग्नेयो वातपित्ताभ्यां ग्रन्थिस्थः कफवातजः। यस्तु कर्दमको नाम स पित्तकफसम्भवः"। विसर्पदोषदूष्यादि संग्रहाह "रक्तं त्वसीकात्वङ्मांसं दूष्यं दोषास्त्रयो मलाः। विसर्पाणां समुत्पत्तौ हेतवः सप्त धातवः"। त्रयो मलाः वातपित्तकफाः दोषा दूषका इत्यर्थः। अन्यथा दोषामला इत्यत्र पुनरुक्तिदोषो लक्षिप्यते। वातिकस्य लक्षणमाह "तत्र वातात्परीसर्पो वातज्वरसमव्यथः। शोफस्फुरणनिस्तोदभेदायामार्तिहर्षवान्"। परीसर्पो विसर्पः। वातज्वरसमव्यथः शिरोहृल्लोदरशूलादियुक्तः। भेदः विदारणेनेव व्यथा। आयामः आकर्षणेन व्यथा। पैत्तिकमाह "पित्तात् द्रुतगतिः पित्तज्वरलिङ्गोऽतिक्षोहितः"। द्रुतगतिः शीघ्रप्रसरणशीलः। अय श्लैष्मिकमाह "कफात्कण्डूयुतः स्निग्धः कफज्वरसमानरुक्"। सान्निपातिकमाह "सन्निपातसमुत्थस्तु सर्वरूपसमन्वितः"। वातपैत्तिकमाह "वातपित्ताज्वरच्छर्दिर्मूर्च्छातीसारतृड्भ्रमैः। अक्षिभेदोऽग्निसदनतमसारोचकैर्युतः। करोति सर्वसङ्गे दीप्ताङ्गारावकीर्णवत्। यं यं देशं विसर्पश्च विसर्पति ज्वलेत् तु सः। शीताङ्गारासितो नीलो रक्तो वा सूपपद्यते। अस्मिदग्ध इव स्फोटः शीघ्रगत्वाद् दुस्तरुः। समांसुसारी वीसर्पः स्याद्वातातिबलस्ततः। व्यथेताङ्गं हरेत् संज्ञां निद्रां श्वासमीरयेत्। क्षिप्रात्र स गतोऽवस्थामोदर्शी लभते नरः। क्वचिच्छमोऽरतिग्रस्तो भूमिशय्यासनादिषु। चेष्टमानस्ततः क्लिष्टो मनोदेहसङ्गवान्। दुःप्रबोधोऽभ्युते निद्रां सोऽग्नियीसर्प उच्यते"। स्फोटः स्फुपचीयत इत्यन्वयः। "समांसुसारी उदरहृदयानुसारी हरेत विसर्पं इत्यन्वयः क्षिप्रां क्षिप्रम् हरेयेत् उपर्युपरि प्रेरयेत्। मनोदेहसङ्गवां निद्रां मरणरूपाम्। अश्नुते प्राप्नोति। वातश्लैष्मिकं ग्रन्थिविसर्पमाह "कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम्। रक्तञ्च दूषयित्वा ह दीर्घायुर्दुस्तरूलक्षणात्मनाम्। ग्रन्थीनां कुरुते माला रक्तानां तीव्रदाहरुजम्। श्वासकासातिसारांश्च शोषहिक्काग्निसन्नमैः। क्षीणवैवर्ण्यमूर्क्काङ्गभङ्गाग्निसदनैर्युतः। इत्ययं ग्रन्थिवीसर्पो वातश्लैष्मप्रकोपजः"। कफेन श्लेष्मणा दुष्टेन पवनोऽपि श्लेष्मदुष्टः। तेनायं वातश्लैष्मिकः। तं कफं बहुधा भित्त्वा रक्तं वा दूषयित्वेत्यन्वयः। त्वगादिकमिति रक्तस्य विशेषणम्। अथ पित्तश्लैष्मिकं कर्दमाख्यं विसर्पमाह "कफपित्तज्वरस्तम्भनिद्रातन्द्रिशिरोरुजाः। अङ्गावसादविक्षेपप्रलापारोचकक्लमाः। मूर्च्छाग्निहानिर्मेदोऽस्थां विपक्षेन्द्रियगौरवा। आमोपवेशनं लेपः क्लोतसाञ्च विसर्पति। प्रायेणामाशयं दृष्ट्वा तेन कर्दमं न वातिकम्। पीडकैरवकीर्णोऽतिपीतलोहितपाण्डुरैः। क्षिप्रञ्चोऽसितो मेचकाभो मलिनः शोफवान् गुरुः। गम्भीरपाकः माज्योष्मा स्पृष्टः क्लिष्टोऽवदीर्यते। पङ्क्तयक्षीर्णमांसस्य स्पृष्टस्नायुसिरागणः। अवगन्धी च वीसर्पः कर्दमाख्यमुशन्ति तम्"। स च सर्पति एकदेशमित्यन्वयः। पीडकैः पीडाकारिभिः। अवकीर्णः व्याप्तः। असितः कृष्णः। मेचकः कृष्णवर्णः। माज्योष्मा प्रचुरोष्मा।

क्षुद्रहेतोः शस्त्रप्रहारव्याघदन्तनखाद्यागन्तुहेतोः । श्याववर्णोत्थितं कृष्णवर्णरक्तम् । उपद्रवानाह "ज्वरातिसारौ वमथुस्तम्भांसदरणक्लमाः । अरोचकविपाकौ च विसर्पाः व्याधुपद्रवाः" । साध्यत्वादिकमाह "विक्रान्ति वातकफपित्तकृता विसर्पाः सर्वात्मकः क्षतकृतश्च न विद्धिमेति । पित्तात्मकोऽञ्जनवपुश्च भवेदसाध्यः कृच्छ्राश्च मर्मसु भवन्ति हि सर्व एव" ।

विसर्पण न० वि+सृप-ल्युट् । प्रसारे अमरः ।

विसल न०विस-कलच् । शस्त्रे त्रिका० । [नरः स्त्रियां ङीष् ।

विसार पुंस्त्री० विसरति सर्पति वि+सृ-घ । जलजे अ-

विसारिन् त्रि० वि+सृ-णिनि । १प्रसरणशीले २जलजे पु० ३नागपर्णयां स्त्री राजनि० ङीष् ।

विसिनी स्त्री विसानां समूहः तदुत्तो देशो वा इनि । १पद्मसमूहे २पद्मलतायाञ्च ३क्षुण्णे राजनि० ।

विसूचिका स्त्री विशिष्टा सूचीव इवार्थे कन् । रोगभेदे तस्य निरुक्तिर्यथा "सूचीभिरिव गात्राणि तुदन् सन्तिष्ठतेऽनिलः । यस्माज्जीर्णेन सा वैद्यैर्विसूचीति निगद्यते । तस्य निदानमाह "ये तां परिमिताहारा लभन्ते विदितागमाः । मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः । विदितागमा ज्ञातायुर्वेदाः । तस्यालक्षणमाह "मूर्च्छातिसारो वमथुः पिपासा शूलं भ्रमोद्वेष्टनजृम्भणानि । वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः" । उद्वेष्टनं हस्तपादयोः, शिरोभेदः शिरःशूलम् । तस्या उपद्रवानाह "निद्रानाशोऽरतिः कम्पो मूर्खाशोषौ विसंज्ञता । अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः । अमी उपद्रवा घोराः अमी निद्रानाशादय उपद्रवाः सर्वेषामेव रोगाणां घोराः भयङ्कराः । विसूच्याः पञ्च दारुणाः विसूच्यासु पञ्चापि यदि सुरूढा दारुणाः प्राणभयङ्कराः । तस्या अरिष्टमाह "यः श्यावदन्तोष्ठनखोऽल्पसंज्ञश्छर्दितोऽभ्यन्तरवातनेत्रः । श्वासस्वरः सर्वविसृप्तसन्धिर्मांसाक्षरःसोऽपुनरामयाय" । सर्वविसृप्तसन्धिः सर्वे विसृप्ताः शिथिलीभूताः सन्धयो यस्य सः" भावप्र० ।

विसृत त्रि०वि+सृ-क्त । विस्तीर्णे अमरः । [स्त्रियां ङीष् ।

विसृत्वर त्रि० वि+सृ-क्वरप् । प्रसरणशीले अमरः ।

विसृमर त्रि० वि+सृ-क्मरच् । विसरणशीले अमरः ।

विसृष्ट त्रि० वि+सृज-क्त । १प्रेरिते "रघवे विसृष्टः" इति रघुः । २विक्षिप्ते जटा० ३त्यक्ते च ।

विस्र पुं०न० विस-डत्वर्गे क्त नि० न ट् । १स्वर्णकर्षे २कर्षोन्नितिकापरिमाणे च अमरः ।

विस्तर पु० वि+स्तृ-अप् । १शब्दसमूहे अमरः । २वाक्यप्रबन्धे ३विस्तारे ४प्रणये ५सस्यसमूहे च । आधारे अप् । ६पीठे शब्दरत्ना० ।

विस्तार पु० वि+स्तृ-संज्ञायां कर्त्तरि घञ् । १विटपे भावे घञ् । २विस्तीर्णतायाम् समासवाक्यस्थे ३पदसमूहे च अमरः । ४लम्बे मेदि० ।

विस्तीर्ण त्रि०वि+स्तृ-क्त । १विपुले २विस्तारयुक्ते ३विशाले च जटा० । [शब्दच० ।

विस्तीर्णपर्ण न० विस्तीर्णानि पर्णान्यस्य । कानके कन्दभेदे

विस्तृत त्रि० वि+स्तृ-क्त । विस्तारयुक्ते ।

विस्फुलिङ्ग पु० विस्फुरति वि+स्फुर-डु ताडर्थं लिङ्गमस्य । १वह्निकणे २विषभेदे च हेमच० ।

विस्फोट पु० विस्फोटयति वि+स्फुट-णिच्-अच् । (विस्फोड़ा) व्रणभेदे स्वार्थे क । स्फोटकभेदे "विस्फोटकभयापहा" शीतलास्तोत्रम् । तद्रोगनिदानादि भावप्र० उक्तं यथा "तत्र विस्फोटस्य विप्रकृष्टं निदानपूर्विकां संप्राप्तिमाह "कटूष्णतीक्ष्णोष्णविदाहिरूक्षक्षारैरजीर्णाध्यशनातपैश्च । तथर्तुदोषैश्च विपर्ययेण कुप्यन्ति दोषाः पवनादयस्तु । त्वचमाश्रित्य ते रक्तं मांसास्थीनि प्रदुष्य च । शोथान् कुर्वन्ति विस्फोटान् सर्वान् ज्वरपुरःसरान्" । कटूष्णादिभिर्दोषैः कटूष्णतीक्ष्णशीतोष्णादीनामतियोगेन । विपर्ययेण कटूष्णचिताहारविहारवैपरीत्येन । त्वचमाश्रित्य त्वचि विस्फोटान् कुर्वन्तीत्यर्थः । ज्वरपुरःसरान् ज्वरपूर्वान् । पूर्वरूपमाह "अग्निदग्धा इव स्फोटाः सज्वरा रक्तपित्तजाः । कचित् सर्वत्र वा देहे विस्फोटा इति ते स्मृताः" । रक्तपित्तजाः एतेन सर्वेषु विस्फोटकेषु रक्तपित्तयोः प्राधान्यकारणत्वम् यथा म्लेषु वातस्य, तथा वातानुगतिरपि बोद्धव्या । तथा च भोजः "यदा रक्तञ्च पित्तञ्च वातेनानुगतं त्वचि । अग्निदग्धनिभान् स्फोटान् कुरुतः सर्वदेहगान्" । अथ वातिकमाह "शिरोरुक्शूलभूयिष्ठं ज्वरस्तृट्पर्ववेदनम् । सरुक्षणवर्णता चेति वातविस्फोटलक्षणम्" । शूलं तोदरूपम् । अथ पैत्तिकमाह "ज्वरदाहरुजापाकस्रावतृष्णा समन्वितम् । पीतलोहितवर्णञ्च पित्तविस्फोटलक्षणम्" । श्लैष्मिकमाह "कण्डूरोचकलाघानि करण्डूकाठिन्यपाण्डुता । यस्मिन्नरुक् चिराद्याति पाकः स विस्फोटः कफात्मकः" । जाड्यम् जड़ता-

नाम्। कफपैत्तिकमाह "कण्डूदौर्गन्ध्यकफ्टैरेतैश्च कफपैत्तिकः"। अथ वातपित्तजमाह "वातपित्तकृतोयस्तु तत्र स्यात्तीव्रवेदना"। वातश्लैष्मिकमाह "कण्डूस्तैमित्यगुरुभिर्ज्ञातीयात् कफवातिकम्"। सान्निपातिकमाह "सर्व्वे निम्नोन्नतास्तस्य कठिनः खल्पपाकवान्। दाहरागतृषाभोहच्छर्दिमर्च्छारुजाज्वराः। प्रलापो वेपथुर्मूर्च्छा भोऽसाध्यश्च त्रिदोषजः"। मोहो विपरीतं ज्ञानम् मूर्च्छा सर्व्वथा ज्ञानशून्यता। रक्तजमाह "वेदितव्यास्तु रक्तेन पैत्तिकेन च हेतुना। गुञ्जाफलसमा रक्ता रक्तस्रावा विदाहिनः। न ते सिद्धिं समायान्ति सिद्धैर्योगिशतैरपि"। पैत्तिकेन हेतुना पित्तस्य हेतुना कट्वाटिनारक्तपित्तस्य तुल्यत्वात् सिद्धैर्योगिशतैरपि ते सिद्धिं न समायान्ति। विस्फोटकभेदानाह "एते चाष्टविधा बाह्या आन्तरोऽपि भवेदयम्। तस्मिन्नन्तर्व्यथा तीव्रा ज्वरयुक्ताभिजायते। यस्मिन् बहिर्गते स्वास्थ्यं न वातस्य बहिर्गतिः। तत्र वातिकविस्फोटक्रिया कार्य्या विजानता" एषामुपद्रवानाह "तृट्श्वासमांसमङ्गोचदाहहिक्कामदज्वराः। विसर्पमर्मसंरोधास्तेषामुक्ता उपद्रवाः"। मांसमङ्गोचः मांसस्य शठितम्। मर्मसंरोधो मर्म्मव्यथा। तेषां विस्फोटानां केचिदुपद्रवाणां लक्षणान्तरं पठन्ति "हिक्काश्वासोऽरुचिस्तृष्णा वाङ्मर्म्मा हृदिव्यथा। विसर्पज्वरहृल्लासाः विस्फोटानामुपद्रवाः"। साध्यत्वादिकमाह "एकदोषोत्थितः साध्यः कृच्छ्रसाध्यो द्विदोषजः। सर्व्वरूपान्वितो घोरो ह्यसाध्यो भूर्य्युपद्रवः"। २कुष्ठभेदे "स्फोटाः श्यावारुणाभासा विस्फोटासु तत्तत्वचः" भावप्र०।

विस्मय पु० वि+स्मि-अच्। १आश्चर्य्ये अमरः। २अद्भुतस्थायिभावके रसभेदे सा०द०। "विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु। विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः" सा०द०। ३दर्पे मेदि०४सन्देहे शब्दर०। [अमरः।

विस्मयान्वित त्रि० ६त०। १विस्मययुक्ते २आश्चर्य्ययुक्ते च

विस्मापन पु० वि+स्मि-णिच्-अच-आत् वा पुक् च ल्यु। १कुहके २कामदेवे च। ३गन्धर्व्वपुरे न० मेदि०। आदभावे विस्मायनमप्यत्र।

विस्मित पु० वि+स्मि-क्त। विस्मययुक्ते।

विस्मृत त्रि० वि+स्मृ-क्त। स्मरणाविषये अमरः।

विस्मृति स्त्री वि+स्मृ-क्तिन्। स्मरणाभावे।

विस्र न० विस्र-रक्। आमगन्धौ १चिताधूमादौ २अपक्वमांसगन्धे अमरः। ३आमगन्धे च

विस्रंस पु० वि+स्रंसु-भावे-घञ्। १पतने २ह्रासे च।

विस्रगन्धा स्त्री विस्रो गन्धोऽस्याः। १पुषायाम् राजनि०।

विस्रगन्धि पु० विस्रस्येव गन्धोऽस्य इतसमा०। १हरितालेऽमरः। [च

विस्रम्भ पु० वि+स्रंभु-घञ्। १विश्वासे २प्रत्यये ३परिचये ४प्रणये च।

विस्रम्भिन् त्रि० वि+स्रंभु-णिनि। १विश्वासयुक्ते २प्रणयिनि च।

विस्रसा स्त्री वि+स्रंस-क। जरायाम् अमरः। [जनि०।

विस्रा स्त्री विस्रमामगन्धोऽस्त्यस्याः अच्। १पुषायाम् राजनि०।

विहग पुंस्त्री० विहायसा गच्छति गम-ड नि०। १पक्षिणि अमरः स्त्रियां ङीष्। २बाणे ३सूर्य्ये ४चन्द्रे ५मेघे च पु० शब्दरत्ना०। ६सूर्य्यादिग्रहे पु० धरणिः।

विहङ्गम पुंस्त्री०विहायसा गच्छति गम-खच् नि०। १पक्षिणि अमरः स्त्रियां ङीष्। २भारद्वाजे स्त्री (वँाक) शब्दच०।

विहङ्गराज पु० ६त०अच् समा०। गरुड़े हला० "विहङ्गराजाङ्गरुहैरिवायतैः" माघः। [२क्षिप्तायाञ्च मेदि०।

विहनन न०विहन्यते वि+हन-ल्युट्। १तुलपिञ्जुले २विघ्ने

विहर पु०वि+हृ-अप्। विहारे ल्युट्। विहरण तत्रैव न०।

विहसित न० वि+हस-क्त। मध्यमहास्ये अमरः।

विहस्त त्रि० विगतो हस्तो हस्तावलम्बनं यस्य। १व्याकुले अमरः। २परिछिन्ने मेदि० ३परुषे च पु० शब्दच०। प्रा० ब०। ४हस्तमूल्ये त्रि०।

विहा अव्य० वि+हा-आ। स्वर्गे सि०कौ०।

विहापित न० वि+हा-णिच्-क्त। दाने अमरः।

विहायस् पु०न० वि+हय-असुन् नि० इडभावः। १आकाशे २पक्षिणि पु० अमरः। स्वार्थे अच्। विहायसमप्याकाशे न० खगे पु०। आदन्तमव्ययम् आकाशे हेमच०।

विहार पु० वि+हृ-घञ्। क्रीड़ार्थं पादाभ्यां १गमने अमरः २भ्रमणे ३स्कन्धे ४लीलायां ५बौद्धदेवालये मेदि० ६वैजन्ते च शब्दमा० ७विन्दुरेचकयोगे पुंस्त्री०शब्दच०।

विहित त्रि० वि+धा-क्त। १कृते विधिना २बोधिते च।

विहीन त्रि० वि+हा-क्त। १त्यक्ते २वर्जिते च।

विहृत न० वि+हृ-भावे क्त। १विहारे २स्त्रीणां चेष्टाभेदे हेमचन्द्रे "लीलाविलासो विच्छित्तिर्विव्वोकः किलकिञ्चितम्। मोट्टायितं कुट्टमितं ललितं विहृतं तथा। विभ्रमश्चेत्यलङ्काराः स्त्रीणां स्वाभाविका दश" विहृतमित्येव पाठः" सा०द० स्त्रीणां सात्त्विकस्वाभाविकालङ्कारमध्ये विहृतमित्येव पठित्वा "वल्लभ्यकालेऽप्य-

वधो व्रीड्या विकृतं मतमिति" लक्षितम् विकृतशब्दे ४८६१पृ० दर्शितेन उज्ज्वलमणिधाक्येन लक्षितविकृतस्य तुल्यार्थत्वात् अतस्तत्र विकृतमित्येव पाठो युक्तः।

विहेठन न० वि+हेठ-भावे ल्युट्। १हिंसायां २मर्दने २विडम्बने मेदि० ४विबाधायां त्रिका०। [२विलोने च हेमच०।

विह्वल त्रि० वि+ह्वल-अच्। १भयादिना व्याकुले अमरः। वी कान्तौ जनने च अक० गतौ व्याप्तौ क्षेपे भोजने च सक० अदा० पर० अनिट्। वेति अवैभोत्।

वीक पु० अज-कक् आदेशः। १शायौ २रक्षणे च उज्ज्वल०। ३मनसि संक्षिप्तसा०। [४प्रकाशे च अमरः।

वी(वि)काश पु० वि+काश-घञ् वा दीर्घः। १रश्मौ वीक्षण न० वि+ईक्ष-करणे ल्युट्। १नेत्रे। भावे ल्युट्। २दर्शने।

वीक्षा स्त्री वि+ईक्ष-अच्। १सूक्ष्मदर्शनम्। भावे अ। २गतिभेदे ३स्थले ४अवगतिभेदे ५सन्धौ च शब्दच०।

वीचि(ची) पुंस्त्री० वे-डीचि स्त्रीत्वे वा ङीप्। १तरङ्गे अमरः २अवकाशे ३सुखे मेदि०। ४अल्पे हेमच०। ५किरणे च जटाध०।

वीचितरङ्ग पु० वीचेरिव तरङ्गो यत्र। वीचितो यथा उत्तरोत्तरं तरङ्गजननमेवं स्वजन्यजन्यादिरूपेण प्रमारिविषये न्यायभेदे न्यायशब्दे ४१६८पृ०दृश्यम्। [हेमच०।

वीचिमालिन् पु० वीचीनां मालाऽस्त्यस्य इनि। समुद्रे

वीज व्यजने चुरा० उभय० सक० सेट्। वीजयति ते अविवीजत्-त। "वीज्यते च हि सन्तप्तः" इति कुमारः।

वीज न०वी-क्विप् जन-ड कर्म०। १कारणे २शुक्रे अमरः। ३अङ्कुरे ४तत्त्वावधाने मेदि०। ५मज्जनि राजनि०। ६अव्यक्तगणितभेदे "पूर्वं प्रोक्तं व्यक्तमव्यक्तबीजं प्रायः प्रश्नानो विना व्यक्तयुक्त्या। ज्ञातुं शक्या मन्दधीभिर्निजातं यस्मात्तस्माद् वच्मि बीजक्रियाञ्च। ७मन्त्रभेदे तन्त्रसा०। "बीजन्ते मातरेतत् त्रिपुरहरवधू! त्रिः कृतं ये जपन्ति" कर्पूरस्तवः। ७धान्यादेः फलादौ च।

वीजक पु० वीजेन कायति कै-क। १मातुलुङ्गे जटा० २पीतसारे (विजयासारे) भावप्र०।

वीजकृत् न० वीजं शुक्रवृद्धिं करोति कृ-क्विप्। वाजीकरणे राजनि०। [वराटके अमरः।

वीजकोश पु० वीजानां कोश इवाधारः। पद्मबीजाधारे

वीजगर्भ पु० वीजानि गर्भे यस्य। पटोले राजनि०।

वीजगुप्ति स्त्री वीजानां गुप्तिर्यस्याम्। शिग्रुवृक्षे राजनि०।

वीजन न० वीज-भावे ल्युट्। १व्यजने। करणे ल्युट्। २चामरादौ ३वस्त्रादि पु०४चक्रवाके ५जीवञ्जीवविहगे च पुंस्त्री० शारदतः। स्त्रियां ङीष्।

वीजपादप पु०बीजप्रधानः पादपः। १भल्लातकवृक्षे राजनि० बीजजातः पादपः ष०त०। २बीजजाते बीजप्ररोहिवृक्षे च। [मेदि०।

वीजपुष्प न० बीजात् पुष्पं यस्य। १मधूके २लवणवृक्षे च

वीजपूर पु० पूर्यते पूर+घञ् ३त०। (टाबा लेबु) जम्बीर भेदे वीजपूर्योऽभ्यत्र।

"बीजपूरफलं स्वादु रसेऽम्लं दीपनं लघु। रक्तपित्तहरं कण्ठजिह्वाहृदयशोधकम्। श्वासकासहरं हृद्यं तृष्णाहरं श्रुतम्"। तद्भेदमधुकर्कटी गुणा यथा "बीजपूरोऽपरः प्रोक्तोमधुरा मधुकर्कटी। मधुकर्कटिका स्वादी रोचनी शीतला गुरुः। रक्तपित्तक्षयश्वासकासहिक्कास्रमापहा" भावप्र०।

वीजपेशिका स्त्री बीजस्य शुक्रस्य पेशिकेव। अण्डकोषे राजनि०। [राजनि०।

वीजफलक पु० वीजानि फले यस्य कप्। बीजपूरे जम्बीरे

वीजमातृक स्त्री बीजानां मातेव स्वार्थे कन्। पद्मबीजे हारा०।

वीजरत्न न० बीजं रत्नमिवास्य। माषकलाये हेमच०।

वीजरुह पु० बीजेन रोहति रुह-क। बीजजातजाते धान्यादौ "कुरण्टाद्या अपबीजा मूलजास्तूपलादयः। पर्वयोनय इक्ष्वाद्या स्कन्दजाः शल्लकीमुखाः। शाखादयो बीजरुहाः संमूर्च्छजास्तृणादयः। स्वेदजास्तिक्तपत्रस्य षड्डते मूलजातयः" हेमच०।

वीजरेचन न० बीजं रेचयति रिच-णिच्-ल्युट्। बीजेषु मध्ये रेचके जयपालबीजे राजनि०।

वीजवपन न० बीजानि उप्यन्तेऽत्र वप-आधारे ल्युट्। १क्षेत्रे। भावे ल्युट्। २बीजस्य उत्पादनार्थं क्षेत्रे क्षेपणे च। तद्दिनादि दीपिकायामुक्तं यथा "पूर्वाभिन्नायाम्यर्क्षविपित्र्यशिल्यभेषु रिक्ताष्टमीविगतचन्द्रतिथिं विहाय। द्व्यङ्गात्रिगोवसुदये विभुजार्किवारे शस्तेन्दुयोगकरणेषु फलप्रवाहः। फलप्रवाहवद्बीजवपनस्य विधिः श्रुतः। क्षितायाश्च शुभे केन्द्रे स्थिरर्क्षमनुजोदये। हेमवारि विलिप्तस्य बीजस्योप्तस्य शुचिः। इन्द्रं क्षिते निधायाथ स्वयं सप्तितयं वपेत्। लत्वा धान्योन्मोदसार्द्रं नर्त्तकी हृष्टमानसः। प्राङ्मुखः कलसं रक्ता दूर्वां मन्त्र

सुदीरयेत् । त्वं वै वसुन्धरे ! शीते वसुपुष्पफलप्रदे । नमस्ते मे शुभं नित्यं लक्ष्मिं मेधां शुभे कुरु ! । रोहन्तु सर्वशस्यानि काले देवः प्रवर्षतु । कर्षकास्तु भवन्त्वया धान्येन च धनेन च" । "उक्ता बीजन्तु तत्रैव भोक्तव्यं बान्धवैः सह", पराशरः "वैशाखे वपनं श्रेष्ठं मध्यमं रोहिणीरवौ । अतः परन्निन्द्यधमं न जातु श्रावणे शुभम्" । लक्ष्मिशब्देऽधिकं द्रष्टव्यम् । ज्योतिषे "पूर्वभाद्रपदामूलं रोहिण्युत्तरफल्गुनी । विशाखा यतभिषा वाथ धान्यादिरोपणे वरा । सदोत्ता रजनीं नीलीं पुत्रवित्तैर्वियुज्यते । स्वयंजाते पुनस्ते हे पालयन् नैव दुष्यति । आरामे गृहमध्ये वा मोक्षात् सर्वशमावपेत् । पराभवं रिपुर्याति वसाधनधनक्षयम् । निशा नीली पलाशश्च चित्रा श्वेतापराजिता । कोविदारश्च सर्वत्र सर्वं निघ्नन्ति मङ्गलम्" । निशा हरिद्रा कोविदारको रक्तकाञ्चनः । "हेमाम्भसा हृतबीजं क्षातो मन्त्रेण रोपयेत् । वसुधेति सुधीतेति पुष्पदेति धरेति च । नमस्ते शुभगे ! नित्यं क्षुभोऽयं वर्द्धतामिति" ज्यो॰त॰ "एतेषु स्तुतिवाक्यादितिविशाखोडुनि भौमं विना बीजोप्तिर्गदिता शुभा त्वशुभतोऽष्टाम्नीन्दुरामेन्द्वः । रामेन्द्वग्नियुगाब्यसप्तभकराग्न्यग्नी फलेऽर्कोक्षिता-द्वाद्राभाश्लेषवाष्टभानि मुनिभिः प्रोक्तान्यसत् सन्ति च" इत्यादि॰ । "एतेष्विति । श्रुतिःश्रवणः वारुणं शततारका अदितिः पुनर्वसुः विशाखा प्रसिद्धा एतैरुडुभिर्नक्षत्रैर्विनैतेषु पूर्वोक्तनक्षत्रेषु मूलमघाभुवस्वष्टृदुत्तिप्रधनिष्ठाख्यातीषु पञ्चदशनक्षत्रेषु बीजोप्तिर्जीवपनं शुभम् । उक्तञ्च रत्नमालायाम् "हस्तात्त्रिपुष्योत्तररोहिणीषु, चित्रानुराधाश्वनरेवतीषु । स्वातौ धनिष्ठासु अवास्तु मूले बीजोप्तिरुक्तफलप्रदा" । वसिष्ठेनाप्येतावन्त्येव नक्षत्राण्युक्तानि "धातृद्वये कौणपपैत्रपुष्ये हस्तत्रये त्रयुत्तरमैत्रभेषु । पौष्णे धनिष्ठाद्यवाग्निनीभे बीजोप्तिरुक्तफलप्रदा स्मृतेति" । कौणपो मूलं नारदेनाप्युक्तानि "मृदुध्रुवक्षिप्रभेषु पितृवायुवसुद्रुषु । मूलभेषु बीजोप्तिरत्युक्तफलप्रदा" । कश्यपेनापि "वसुवायुभैर्कत्र्यक्षिप्रध्रुवस्वष्टृद्रुषु । क्षौतां स्वत्वाथ बीजोप्तिरत्युक्तफलप्रदा" । अत्र मघा नोक्ता । अथ भौमो मङ्गलवारो निषिद्धः अर्थात् सूर्यचन्द्रबुधगुरुशुक्रशनीनां वारेषु बीजोप्तिः शुभा । अत्र विनायोगे द्वितीया एवेन्द्वृतिवाक्येषु कुजे बीजोप्तिर्व्यवहारतत्त्वे उक्तत्वात् नेष्टा क्षितिरित्यतो नकारोऽत्रानुवर्त्तते नेष्ट बीजोप्तिर्नेष्टेत्यर्थः । अत्र कालविशेषनिषेधो राजमार्त्तण्डे "रवौ रौद्राद्यपादस्थे भूमेः संजायते रजः । तस्माद्दिनत्रयं तत्र बीजवापं परित्यजेत्" इति । अथ बीजोप्तौ फणिचक्रमुच्यते । अगुभतो न विद्यन्ते गावः क्रिया यस्यावयुः यस्य स्वरूपाभावः तस्य कुतस्तरां क्रियाः ताडशोऽगूराड्डलस्य भं नक्षत्रं तस्मादित्यर्थः । राड्डधिष्ठितनक्षत्रादौ भानि स्वमदमभीचोनानि ततस्त्रीणि शुभानि तत एकमशुभं ततस्त्रीणि शुभानि ततोऽप्येकमशुभं ततस्त्रीणि शुभानि ततोऽप्येकमशुभं ततस्त्रीणि शुभानि ततश्चत्वार्यशुभानि । एवं बीजोप्तौ सप्तविंशतिनक्षत्राणां शुभाशुभत्वमुक्तं उक्तञ्च नारदेन "भवेद्भक्षितयं मूर्द्धि धान्यनाशाय राड्डभात् । गले त्रयं कज्जलाय दग्धै द्वादश चोदरे । निस्तण्डुलत्वं चाङ्गूले भ चतुष्टयमीरितम् । नाभौ बहिःपञ्चके स्याद्बीजोप्तावितिचिन्तयेदिति । राड्डर्क्षात् ऋक्षेऽस्ति तच्चक्षत्रत्रयं मूर्द्धि भक्षके स्याद्यं धान्यनाशकरं भवति । तत्त्रयं गले स्याद्यं कज्जलाय स्वामिकार्षादकं स्यात् । ततो द्वादश भानि बहिर्नक्षत्ररहितानि उदरे स्युर्यानि तानि धान्यदाहे स्युः ततो नक्षत्रचतुष्टयं पुच्छे निस्तण्डुलकरं स्यात् ततोऽवशिष्टं बहिर्नक्षत्रपञ्चकं धान्यनाशकरं स्यात् । रत्नमालायामपि "मूर्द्धि त्रीणि गले त्रयं च जठरे विंशतिश्च द्वादश स्यात् पुच्छे च चतुष्टयं बहिरतो भानां स्थितं पञ्चकम् । क्ष्वेडं कज्जलमन्नदृद्धिरधिकानिस्तण्डुलत्वं क्रमात् आदीतिप्रभवं भयं च फणिभाद्बीजोप्तिकाले स्फुटम्" इति । अत्र केचित् फणिभात् सूर्यनक्षत्रादिति व्याचख्युस्तत्र युक्तिः "सूर्यभादुरगः स्याद्यः" इति स्वरोदयवाक्यैकवाक्यभावात् । तत्र नारदवाक्ये साक्षाद्राड्डभादित्युक्तत्वात् "राड्डधिष्ण्यात् समारभ्य विष्ण्वोर्यत्र निष्फलमिति" ज्ञाप्योक्तेश्च । "सूर्यभादुरगः स्याद्यः" इति तु स्वरोदयवचनं देशभेदव्यवस्थितम् । बीजवापने लग्नशुद्धिमाह वसिष्ठः "भवरिपुसहजे षाष्टिकोणकेन्द्रस्थितैश्च शुभैः । कथितेषु च विष्ण्वोरपि शुभलग्ने बीजवापनं कार्यमिति" धी॰धा॰ ।

बीजवृक्ष पु॰ बीजमात्राज्जातो वृक्षः । अक्षनवृक्षे राजनि॰ ।

बीजसञ्चय पु॰ बीजानां वपनयोग्यधान्यादीनां सञ्चयः सं॰ ष॰ समू॰+चि-अच् । वपनयोग्यधान्यादिसंग्रहे ।

"हस्ताश्विन्यादितिस्वातिरेवत्यां श्रवणद्वये। स्थिरे लग्ने गुरौ शुक्ले वीजं धार्य्यं शुभासरे। माघे वा फाल्गुने वापि सर्ववीजानि वापयेत्। शोषयेत्तापयेद्रात्रौ चोषनिधापयेत्। ततश्च पुटिकां बद्ध्वा शोषयेच्च पुनःपुनः। स्थापयेच्च प्रयत्नेन यथा भूमिञ्च न स्पृशेत्। टोदाग्निना च संस्पृष्टं दृष्ट्वा चोषकृतञ्च यत्। वर्जनीयं तथा वीजं यत् स्यात् कीटसमन्वितम्" ज्यो० त०।

वीजसू पु० वीजं सूते सू-क्विप्। पृथिव्याम् हेमच०।

वीजस्थापन ६त०। धान्यादिस्थापने तन्मुहूर्त्तादिकं ज्यो० त०उक्तम् "यास्याग्निरुद्राहिविधात्रपूर्वमाहेन्द्रपित्र्यैतरभैः शुभाहे। धान्यादिसंस्थापनमेष शस्तं मृगस्थिरद्वयङ्गटक्षोदयेषु। सौम्यादितिमघाज्येष्ठासूत्तरेषु च कारयेत्। भौमे लग्ने शुभे चन्द्रे निधने क्रूरवर्जिते। क्षेप्यं कोष्ठके धान्यं गर्गो वदति सर्वदा"।

वीजाक्त त्रि० वीजेन सह क्तस्य दाच्+क-क्त। वीजेन सह क्ते क्षेत्रे।

वीजाम्ल न० वीजेनाम्लमिव। दृक्षाम्ले राजनि०।

वीजिन् पु० वीजमस्यास्य इनि। १वत्सादके पितरि हेमच० २वीजविशिष्टे त्रि० स्त्रियां ङीप्। [त्रिका०।

वीजोदक न० वीजमिव कठिनत्वादुदकं यत्र। करकायां

वीज्य त्रि०विशेषेण इज्यः वि+यज-क्यप् वा। कुलीने अमरः

वीटि(टी) स्त्री वि+इट-इन् वा ङीप्। (पानेर वीड़ा) मञ्जिततास्बूले। स्वार्थे क। वीटिका तत्रैव। "कङ्कुचिकाग्रन्थो च "तद्वीटिकासंसृष्टि" सा०द०।

वीणा स्त्री व्यज-नक् वीभावः पृषो० णत्वम्। खनामख्याते १वाद्यभेदे अमरः। वाद्यशब्दे दृश्यम्। २विद्युति मेदि०

वीणादण्ड पु० ६त०। वीणावाद्यस्थितालाबूपरिस्थे काष्ठदण्डे अमरः। [वादके अमरः।

वीणावाद त्रि० वीणां वादयति वद-णिच्-अण्। वीणा-

वीत न० वि-इण्-क्त। १युद्धासमर्दे हलायुधादिसैन्ये अमरः २कर्तृकर्मणि मेदि०। ३न्यायादुक्ते अनुमानभेदे च। अवीतशब्दे ४६५ पृ० दृश्यम्। ४शान्ते ५गते च त्रि० हेमच०।

वीतंस पु० वि+तनस्-घञ् दीर्घः। १मृगपक्षिणां बन्धनोपकरणे दामग्रन्थतौ अमरः। २तेषां विश्वासहेतुप्रावरणे मेदि०।

वीतन पु०विशिष्टं तनोति तन-अच पृषो०दीर्घः। ककपार्श्वहृदे "ककस्तु कन्धरा मध्यं ककपार्श्वौ तु वीतनौ" हेमच०।

वीतशोक पु० पु० वीतः विगतः शोको यस्मात् यस्य वा। १अशोकवृक्षे शब्दच०। २शोकहीने त्रि०।

वीति स्त्री वी-क्तिन्। १गतौ २दीप्तौ ३भोजने ४प्रजनने ५धारणे च मेदि०।

वीतिहोत्र पु० वीतये पुरोडाशादिभक्षणाय हूयन्ते देवा यत्र हु-आधारे त्रन्। १वह्नौ अमरः २सूर्य्ये मेदि०।

वीथि(थी) स्त्री विथ-इन् वा ङीप्। १पङ्क्तौ २श्रेणौ ३रङ्गाङ्गे ४वर्त्मनि ५दृश्यकाव्यभेदे च मेदि०।

तल्लक्षणादि सा०द० ६प० उक्तं यथा

"वीथ्यामेको भवेदङ्कः कश्चिदेकोऽत्र कल्प्यते। आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितः। सूचयेद् भूरिशृङ्गारं किञ्चिदन्यान् रसानपि। मुखनिर्वहणे सन्धी अर्थप्रकृतयोऽखिलाः"। कश्चिदित्युक्तौ मध्यमोऽधमो वा। शृङ्गारबहुलत्वाच्चास्याः कैशिकीवृत्तिबहुलत्वम्। "अस्यास्त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः। उद्घात्यकावलगिते प्रपञ्चत्रिगतं छलम्। वाक्केल्यधिबले गण्डमवस्यन्दितनालिके। असत्प्रलापव्याहारमृदवानि च तानि तु"। तत्रोद्घात्यकावलगिते प्रस्तावनाप्रस्तावे सोदाहरणं लक्षिते "मिथो वाक्यसमुद्भूतः प्रपञ्चो हास्यसम्भृतः"। यथा विक्रमोर्वश्याम्। बहुभीष्मविदूषकचेट्योरन्योन्यवचनम् "त्रिगतं स्यादनेकार्थयोजनं सुनिगद्यतः"। यथा तत्रैव राजा "सर्वचित्तिभृतां नाथ! दृष्टा सर्वाङ्गसुन्दरी। रासा रम्ये वनान्तेऽस्मिन् मया विरचिता त्वया"। नेपथ्ये तत्रैव प्रतिशब्दः। राजा कथं दृष्टेत्याह। अत्र प्रश्नशब्दयोरेवोत्तरत्वेन योजनम् "नटादित्रितयविषयमेवेदमिति" कश्चित् "प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य छलनाच्छलम्" यथा वेण्यां "भीमार्जुनौ" "कर्त्ता द्यूतच्छलानां जतुनयशरणोद्दीपनः सोऽभिमानी राजा दुःशासनादेर्युधि करनुजगतस्त्राङ्गराजस्य भित्वम्। कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः काले दुर्योधनोऽसौ कथयतु न कृपा दृष्टमभ्यागतौ वः" "अन्ये स्वाङ्गच्छलं किञ्चित् कार्यसंदिश्य कस्यचित्। उदीर्यते यदन्यस्य वञ्चना छाद्मरोषकृत्"। "वाक्केलिश्छेकसम्बन्धो द्विविधप्रत्युक्तितो भवेत्"। द्वितीयप्रत्युक्तेर्लक्षणं यथा "भिक्षो! मांसनिषेवणं प्रकुरुषे किं तेन मद्यं विना मद्यस्यापि तव प्रियं प्रियसखो वाराङ्गनाभिः सह। वेश्यार्थार्थरुचिः कुतस्तव धनं द्यूतेन चौर्य्येण वा चौर्य्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य

ख्या गतिः"। "केचित् प्रक्रान्तवाक्यस्य साकाङ्क्ष
श्चैव निर्दृत्तिर्यत्रेति निरित्याहुः"। अन्ये च "अनेकस्य
प्रश्नस्यैकमुत्तरम्"। "अन्योन्यवाक्याधिक्योक्तिः सर्वेषा-
मिवत्वं मतम्"। यथा मम प्रभावत्यां यदुनाभः
"यस्य वक्त्रः सुधेनैव निर्मेय गदयानया। लोचनेन्दू
क्षिप्राभि भुवनद्वयमद्य वः"। प्रद्युम्नः। अरेरे यदु-
राजसुत! अलमसुना वदुपन्यासेन मम खलु "यद्य
प्रचण्डभुजदण्डसमर्पितोरुकोदण्डनिर्गलितकाण्डसमूह-
घातैः। ध्वस्तां समस्तदितिजक्षतजोक्षितेयं क्षोणिः
क्षणेन पिशिताशनलोभनीवा"। "गर्वं प्रस्तुतसम्बन्धि
भिन्नार्थं सत्वरं वचः"। यथा वेण्यां "राजा" अध्या-
सितं तव चिराज्जघनस्थलस्य पर्याप्तमेव करभोरु!
ममोरुयुग्मम्"। अनन्तरं प्रविश्य कञ्चुकी। "देव भग्न
भग्नमित्यादि"। अत्र रथकेतनभङ्गार्थं वचनमूरुभङ्गार्थे
सम्बन्धे सम्बद्धम्। "व्याख्यानं स्वरसोक्तस्यान्यथावस्य-
न्दितं भवेत्"। यथा ललितरामे सीता। आट कालं
क्खु अयोज्झाए गन्तव्वं तहिं सो राया विण्णत्त
पणयिट्ठो। लवः। अथ किमाभ्यां राजोपजीविभ्यां
भवितव्यं। सीता। आट सो लक्खणं पिटा। लवः।
किमावयोः पुनपतिः पिता। सीता। साधुं मा अ-
यधा संबधं ण कखु लक्खणं सअलाए ल्लेव पुहवी
ए त्ति"। "प्रहेलिकैव हास्येन युक्ता भवति नाटिका"।
संवरणकार्ष्ण्यं प्रहेलिका। यथा रत्नावल्यां "सव-
त्तता "सहि जस्सु कदे तुमं। यं चित्तफलअस्सु"।
अत्र स्वं रत्नः कृते आगतेत्यर्थः संवृतः। "असत्प्रलापो
यदाक्यमसम्बद्धं तथोत्तरम्। अष्टहृतोऽपि मूर्खस्य पुरो
यच्च हितं वचः"। तत्राद्यं यथा मम प्रभावत्याम्
प्रद्युम्नः सहकारवल्लीमवलोक्य सानन्दम्" अहो
सा कथमिहैव। "कलिकुलमञ्जुलकेयी परिमलबहुला
एसावहा तन्वी। किमसमयेमनसाणिः कोकिलकल-
भाषिणी प्रियतमा मे"। एवमसम्बद्धोत्तरेऽपि। "तृतीयं
यथा वेण्यां दुर्योधनं प्रति गान्धारीवाक्यम्। "व्या-
हारो यत्परस्यार्थे हास्यकोत्करं वचः"। यथा मा-
विकाग्निमित्रे। लास्यप्रयोगावसरे मालविका निर्गन्तु-
मिच्छति। "विदूषकः। भो दाव अप्पेअच्छदु ता गमि-
स्सदि इत्युपक्रमे गण्डासः। विदूषकं प्रति आर्य!
अप्यन्तं यद्यथा क्रमभेदो लक्षितः। विदूषकः। प-
च्चन्तं वअस्स जधा भोदि सा इमाए लक्खिदा। मालविका
इदं वसन्तपूजा भोदि सा इमाए लक्खिदा। मालविका
"जयते" (तत्र इति पाठान्तरम्) इत्यादिना नायकस्य
विप्रलम्भनायिकादर्शनप्रयुक्तेन हास्यकोभकारिणा वचसा
व्याहारः। "दोषा गुणा गुणा दोषा यत्र स्युर्दर्पं
हि तत्"। क्रमेण यथा "प्रियजीवितता क्रौर्यं
निःस्नेहत्वं कृतघ्नता। भूयस्तद्दर्शनादेव ममैते गुणतां
गताः। तस्यास्तद्रूपसौन्दर्यं भूषितं यौवनश्रिया।
सुखैकतायनं जातं दुःखायैव समाधुना"। इति चा-
टूक्तानि नाटकादिषु सम्भवन्त्यपि वीथ्यामवश्यं विधेयानि।
विप्रलम्भतया नाटकादिषु विनिविष्टान्यपीहोदाहृतानि
नानारसानाश्रयात् मालाकृपतया स्थितत्वादीथीयम्"
सा०द० ६प०।

वीथ्यङ्ग पु०वीथ्या इवाङ्गमस्य। १दृश्यकाव्यभेदे। हेत०। २तदङ्गे
वीथिशब्दे दृश्यम्। [संक्षिप्तसा०।

वीध्र त्रि० वि-इनृध-रक्। १निर्मले २नभसि ३वायौ ४अग्नौ
वीनाह पु० वि-नह घञ् दीर्घः। ब्रूपादिसुखबन्धनसाधने
(पाट) ख्याते पदार्थे अमरः।

वीप्सा स्त्री वि+आप-सन्-अच-टित्-अ अभ्यासश्चोपश्च। व्याप्तौ
वीभ गौर्यं अद०चु०अक०सेट्। वीवयते अविवीवत्।
वीभ गौर्यं हेतके उद्यमे विकत्थने च भ्वा०अक०सेट्। व्यदित्
चक्रि न लुङः। वीभते अवीभिष्ट।

वीर न०वीर-अच्। १अङ्गिनि २नडे मेदि० ३अरिचे ४पङ्क-
मूले ५काञ्चिके ६उशीरे ७आरूके राजनि०। ८शौर्यवि-
शिष्टे शूरे त्रि० अमरः। ९जिने १०नटे पु० हेमच०।
११विष्णौ पु० विष्णुस०। तन्त्रोक्ते १२कुलाचारयुते त्रि०
कुलाचारशब्दे पु० दृश्यम्। १३तरुखण्डीये १४वराहकन्दे
१५लताकरञ्जे १६करवीरे १७अर्जुने पु० राजनि०
१८दयाग्नौ भरतः वीरहा। १९उत्तरे २०सुभटे च मेदि०।
२१श्रेष्ठे त्रि० हेमच०। २२पत्नौ २३पुत्रे च "अवीरा
निष्पतिं गता" अमरः। २४रसभेदे "उत्तमप्रकृतिर्वीर
उत्साहस्थायिभावकः। अत्रेन्द्रदैवतो हेमवर्णोऽयं लक्ष-
णोदाहृतः। आलम्बनविभावास्तु विजेतव्यादयो मताः।
विजेतव्यादिचेष्टाद्याः तद्दोहीपनकर्षणः। अनुभावास्तु
तत्र स्युः सहायान्वेषणादयः। सञ्चारिणस्तु धृतिमति-
गर्वस्मृतितर्करोमाञ्चाः। स च दानधर्मयुद्धदैवया च
समन्वितस्त्रिधा स्यात्। स च वीरः। "दानवीरो धर्म-
वीरो दयावीरो युद्धवीरश्चेति चतुर्विधः" सा०द०३प०।

वीरक पु० वि+ईर-ण्वुल्। करवीरे राजनि०।

वीरण न० वि+ईर-ल्यु। उशीरे (वेणारूल) अमरः।

वीरतर न॰ वि+ईर–अच् ततः, वीर+वा तरप्। १वीरत्वे अमरः। २शूरतरे च।

वीरतरु पु॰ वि+ईर–अच् कर्म॰। १अर्जुनवृक्षे अमरः। २कोकिलाक्षे ३भल्लातके (भेला) ४बिल्वभेदे च राजनि॰ वीरद्वयादयोऽप्यत्र।

वीरपत्नी स्त्री वीरः पतिर्यस्याः वा ङीप् च। वीरभार्य्यायाम् अमरः। पक्षे वीरपति तत्रार्थे।

वीरपत्रा स्त्री वीरयति वीर–अच् तथाभूतं पत्रं यस्याः। विजयायाम् भङ्गे राजनि॰।

वीरपान(ण) न॰ वीराणां पानं वा यत्र। युद्धाय युद्धखेदापनुत्तये वा सुरापानादौ अमरः।

वीरभद्र पु॰ वीरो भद्रोऽस्य। १अश्वमेधीयेऽश्वे २वीरेषु भद्रे ३वीरस्थे भेदि॰। ४शिवगणभेदे तदुत्पत्तिकथा काशीख॰ ८६अ॰। "महावीरोऽपि रे भद्र! मम सर्वगणेश्वरः। वीरभद्राख्यया हि त्वं प्रथितं परमं भज। कुरु मे सत्वरं कर्म दक्षयज्ञक्षयं नय"। स्वार्थे क। वीरभद्रक वीरस्थे जटा०।

वीरभार्य्या स्त्री ६त॰। वीरपत्न्याम् अमरः।

वीरमाता स्त्री ६त॰। वीरसूं जनन्याम् अमरः।

वीररजस् न॰ वीर इव रजः रक्तत्वात्। सिन्दूरे राजनि॰।

वीररेणु पु॰ वीरयति वीरो रेणुर्धूलिमर्दनं यस्य। भीमसेने त्रिका॰।

वीरवत् त्रि॰ वीरोऽस्त्यस्य मतुप् मस्य वः। १वीरयुते स्त्रियां ङीप्। "वीरवतो न भूमिः" भट्टिः। वा च २शंसरोहिण्यां भाषा॰।

वीरवत्सा स्त्री वीरो वत्सो यस्याः। वीरमातरि जटा०।

वीरबाहु पु॰ विष्णौ विष्णुस॰।

वीरविश्रावण पु॰ "वीरविश्रावणो जन्तुर्धनैः भूयसमाकृतैः" हेमच॰ उक्ते गूढदरीतधनेन कोमकर्त्तरि।

वीरव्रत पु॰ नित्यकर्म॰। १भल्लातकवृक्षे अमरः। २अर्जुनवृक्षे हेमच॰ ३बिल्वभेदे। राजनि॰ (देधान) ४धान्यभेदे रत्नमाला।

वीरसू स्त्री वीरं सूते सू+क्विप्। वीरमातरि अमरः।

वीरसेन पु॰ वीरा सेना यस्य। १नलराजजनके ऋषभेदे भा॰ व॰ ५२अ॰। २चाक्षुषमन्वन्तरे न॰ राजनि॰।

वीरहन् पु॰ वीरयति शौर्य्यान्वितं करोति वीर+णिच् क्वच्। वीरो यज्ञाग्निस्तं हतवान् हन–क्विप्। नष्टाग्नौ विप्रे अलुक्। २विष्णौ विष्णुस॰।

वीरा स्त्री वि+ईर–अच्, वीर–अच् वा वीर+अस्त्यर्थे अच् वा। १सुरानामगन्धद्रव्ये २क्षीरकोकोल्याम् ३शमलतायाम्। ४एलवालुकायां ५पतिपुत्रवत्यां स्त्रियां ६रास्नायां ७विदार्य्याम् ८दुग्धिकायाम् ९क्षीरविदार्य्यां १०मलपर्णां भेदि०। ११काकोल्यां १२महाशतावर्य्यां १३हस्तकुम्भ्यां १४प्रश्निपर्ण्याम् १५अतिविषायां १६अदिरायाञ्च राजनि०। १७शिंशपावृक्षे (शिशु) रत्नमा०।

वीराम्ल पु॰ वीरयति शौर्य्यान्वितं करोति वीर+णिच् अच् कर्म॰। अम्लवेतसे राजनि०। [भयङ्करे युद्धक्षेत्रे अमरः।

वीराशंसन न॰ वीरैराशस्यतेऽत्र आ+शंस–आधारे ल्युट्।

वीरासन न॰ वीरस्येवासनम्। "एकपादमथैकस्मिन् विन्यसेदूरुसंस्थितम्। इतरस्मिन् तथा पश्चात् वीरासनमिति स्मृतम्" इत्युक्ते आसनभेदे तन्त्रम्। २भित्त्याद्यनवलम्बनेन स्थितौ "रात्रौ वीरासनं वसेत्" मनुव्या॰ कुल्लू॰।

वीरुध(धा) स्त्री वि+रुध–क्विप् दीर्घः वा टाप्। विष्वक् तायां लतायाम् अमरः।

वीरेश्वर त्रि॰ ६त॰। १वीरपतौ काशीस्थे २शिवलिङ्गभेदे पु॰ तदाविर्भवकथा काशीख॰ ८२ अ॰ दृश्या।

वीरोज्झ पु॰ वीरो यज्ञाग्निस्तमुज्झति यथाकालमनदुद्धानेन उज्झ–अण्। प्रातःसायं होमाकर्त्तरि हेमच॰।

वीरोपजीविक पु॰ वीरः यज्ञाग्निस्तत्साध्यमग्निहोत्रादि उपजीविका यस्य। दम्भार्थमग्निहोत्रानुष्ठायिनि हेमच॰

वीर्य्य न॰ वीर–यत्, वीरस्य भावो ष्यञ् वा। १हेतुस्थे चरमधातौ शुक्रे २पराक्रमे ३बले ४प्रभावे अमरः। ५तेजसि मेदि॰ ६दीप्तौ ७द्रव्यनिष्ठे रसविपाकादि शक्तिरूपे प्रभावभेदे सुश्रुतः "वीर्य्यं प्रभावनामेति कर्म्मास्यैतदशेनोऽधकर्मनिष्पत्तेः। इक्षौषधकर्म्मगुडूचीभागोभयभागस्तम्भनसंग्रहणकाग्निदीपनप्रपीडनलेखनतृष्णरसायनवाजीकरणव्यवयुक्तरव्यविलयनदहनदारणसादनप्रमाथनक्लेदविष्यन्दनानि वीर्य्यप्राधान्याद्भवन्ति। तच्च वीर्य्यं द्विविधमुष्णं शीतं चाग्नीषोमीयत्वाज्जगतः। केचिदत्रविधमाहुरुष्णं शीतं स्निग्धं रूक्षं विशदं पिच्छिलं मृदु तीक्ष्णं चेति तानि वीर्य्याणि स्वभावगुणोत्कर्षादूष्मभूयस्त्वकर्म्म कुर्वन्ति यथा भावन्मधुरं पञ्चभूतं रसानां तिक्तानुरसं वातं शमयेदुष्णं वीर्य्यत्वात् तथा कुलत्थः कषायकटुकत्वात्, पलाण्डुः क्षौद्रं भावाच्च मधुरक्षौद्रगुरुभ्यो वातं वर्द्धयति शीतवीर्य्यत्वात्। कटुका पिप्पली पित्तं शमयति मृदुशीतवीर्य्यत्वादम्लाम-

मसकं खरसं वैद्यवश्च । तिक्ता कासमारी पित्तं वर्द्धय-त्युष्णवीर्य्यत्वान्मधुरा वातघ्ना । कटुकं मूलकं श्लेष्माणं वर्द्धयति स्निग्धवीर्य्यत्वात् । कच्छ कपित्थं श्लेष्माणं प्रसवति रूक्षवीर्य्यत्वान्मधुरं लोहघ्न । तदेतद्विदर्शनमात्रसिद्धम् । भवन्ति चात्र ये रसावातप्रसना भवन्ति यदि तेषु वै । रौक्ष्यखरत्वैत्यानि न ते कुर्व्वन्ति शरीरकम् । ये रसाः पित्तप्रसना भवन्ति यदि तेषु वै । तैक्ष्ण्योष्णत्वकृतत्वाच्च न ते तत्कर्मकारिणः । ये रसाः श्लेष्मप्रसना भवन्ति यदि तेषु वै । स्नेहगौरवशैत्यानि स्वकार्यं वर्द्धयन्ति ते" । "तत्रादौर्य्यं प्रधानमिति" । द्रव्यगतवीर्य्यं रसात्मगुणशक्तिविशेषरूपम् तच्च चिन्त्याचिन्त्यक्रियाहेतुत्वेन द्विविधम् । तत्र चिन्त्यक्रियाहेतुः प्रभावापरपर्य्यायो द्रव्याणां रसात्मकशरीरशक्तिः यथोक्तं "भूतप्रभावजातिगुणो द्रव्ये पाके रसे स्थितः । चिन्त्याचिन्त्यक्रियाहेतुर्वीर्य्यं धत्तूत्तरेऽतनम्" चक्रद० । भावप्र० वीर्य्यप्रभावयोर्भेद उक्तो यथा "द्रव्ये रसो गुणो वीर्य्यं विपाकः शक्तिरेव च । प्रदोषाः यच्च निघ्नन्ति यं यं कुर्वन्ति कर्म च" इति वाग्भटात: द्रव्यगतान् यच्च पदार्थानुक्ता रसगुणादुक्ता च "उष्णशीतगुणोत्कर्षात् बुधैर्वीर्य्यं द्विधा स्मृतम् । यत् कर्म्मनिष्पादनीयं दृश्यते भुवनत्रयम्" वाग्भटोक्त्या च "विपाकस्तु दर्शयित्वा प्रभावो बच्चिनो यथा "रसादिसाम्ये यत्कर्म विशिष्टं तत्प्रभावजम् । द्राक्षा रसादिसाम्येऽपि विलक्षणो विरेचनी । मधुकस्य च मृद्वीका घृतं क्षीरस्य दीपनम् । प्रभावस्तु यथा धात्री वृष्यचक्षुष्य रसादिभिः । समापि कुरुते दोषत्रितयस्य विनाशनम् । कश्चित्तु केवलं द्रव्यं कर्म कुर्यात् प्रभावतः । स्थिरोवृक्षा वृक्षदेशीजटा यथा" । तथा नानौषधियोगे सति प्रभाव एवान्वयगामी न तु तत्र रसादिविचारः कर्त्तव्यः यत आह सुश्रुतः "अथो सामान्यविज्ञानानि प्रसिद्धानि स्वभावतः । आगमेनोपयोज्यानि मेषजानि विचक्षणैः । प्रत्यक्षलक्षणफलाः प्रसिद्धाश्च सामान्यतः । औषधीर्हेतुभिश्चान्या परीक्षेत कदाचन । विरुद्धगुणसंयोगे भूयसाञ्च हि जायते । इत्यं विपाकवीर्य्यं प्रभावज्ञानं व्याख्याति" इत्यनेन रसगुणवीर्य्यविपाकवीर्य्यप्रभावलक्षणान्युक्तानि । अनयोर्भेदो युक्तः ।

वीर्यवत् त्रि० वीर्य्यमस्यास्ति मतुप् मस्य वः । विक्रमयति गजे च० । "वीर्यवत्तुङ्गे च वीर्य्यवत्योषधीनाम्" कुमारः ।

वीहार पु० विहियतेऽत्र वि+हृ-आधारे घञ् दीर्घः । १सङ्घ-१ मन्दिरे यज्ञच० ।

वृग योगे भ्वा०पर०सक०सेट् रदित् । वृङ्क्ते अवृङ्क्त ।

वृट वर्त्ते चुरा०उभ०सक०सेट् रदित् । वर्टयति अवृटत् त ।

वृ आवरणे चु० उभ०सक० सेट् । वारयति ते अवीवरत् त ।

वृ सेवायां क्रया०आ०सक०सेट् । वृणीते "वृणीते हि विमृश्यकारिणम्" किरा० । अवरीष्ट अवरिष्ट अवृत ।

वृ वरणे भ्वा०उभ०सक०सेट् । वरति ते अवारीत् अवरि(री)ष्ट

वृ वरणे चादि० क्रया० च उभ०सक० सेट् । वृणोति वृणुते वृणाति वृणीते अवारीत् अवरिष्ट अवरीष्ट अवृत ।

वृंहित न० बृहि-क्त । करिगर्जने अमरः ।

वृक्क आदाने भ्वा०आत्म०सक० सेट् । वर्क्कते अवर्क्किष्ट ।

वृक्क पु० वृक-क । १कुक्कुराकारे कृमिरोगभेदे । (घोष) २काके उणादि० । ३वकवृक्षे यज्ञच० । ४मृगभेदे हारा० । ५क्लीबे पुंक्ली० ६अनेकद्रव्यजन्ये घृते ७वरुण द्रुमे रत्नमा० उदरस्थे दृश्यभेदे वृक्कोदरः । वृक्कस्थायां स्त्रियां वा गौरा० ङीष् । सर्व्वत्र जातौ स्त्रियां ङीष् ।

वृकदंश पुंक्ली० वृकं दशति दंश-अच् । १कुक्कुरे हेमच० । स्त्रियां ङीष् ।

वृकधूप पु० वृक्यते वृक-घञर्थे क कर्म० । नाखाद्यमिश्रिते दशाङ्गे दो धूपे अमरः । २सरलद्रुवे च(टारपिन्) अमरः

वृकधूर्त्त पुंक्ली० वृक इव धूर्त्तः । शृगाले हारा० स्त्रियां ङीष् । [क्षिपति (तेओड़ि) रत्नमा० ।

वृकाक्षी पु० वृकस्येवाक्षि पुष्यस्य मत्व मभा० ङीष् ।

वृकारति पु० ६त० । कुक्कुरे राजनि० वृकरिपादयोऽपि ।

वृकोदर पु० वृकनामाग्निरुदरे यस्य । "यस्य नाम्ना वृको नाम जठरे हव्यवाहनः । मया दत्तः स धर्म्मात्मा तेन चायं वृकोदरः" मत्स्यपु० ६५अ० उक्ते भीमे "न्यग्भूचे वचनं वृकोदरः" किरा० ।

वृक्ण त्रि० व्रश्च-क्त । छिन्ने अमरः ।

वृक्त वरणे भ्वा०आत्म०सक०सेट् । वृक्षते अवृक्षिष्ट ।

वृक्त पु०व्रश्च-क्त । व्रश्चनेऽपि जायमाने द्रुमे । वृक्षार्थे कन् । वृक्तक वृक्षवृक्षे । [स्त्रियां ङीष् ।

वृक्षचर पुंक्ली० वृक्षे चरति चर-ट । वानरे धनञ्जयः

वृक्षच्छाय न० ६त० । वृक्षस्य वृक्षाणां छायायाम् ।

वृक्षधूप पु० वृक्षोऽपि धूपस्तत्साधनम् । सरलद्रुमे राजनि० ।

वृक्षनाथ पु० ६त० । वटवृक्षे यज्ञर० । [गन्धच० ।

वृक्षपाक पु० वृक्षस्य पाकः शिखरिव जटिलत्वात् । वटवृक्षे

वृक्षभवन न० ७त०। वृक्षस्थे कोटरे शब्दरत्नावली।

वृक्षभक्षा स्त्री वृक्षो भक्षो वेष्टकत्वात् भोजनोऽस्य इव यस्याः। वन्द्राय म् (परगाछ) भावप्र०।

वृक्षभेदिन् पु० वृक्षं भिनत्ति भिद्-णिनि। वृक्षभेदके १वल्लभेदे अमरः। २टङ्के हेमच०। [शब्दच०।

वृक्षमृङ् पु० वृक्षस्य मृदि भूमौ भवति भू-क्विप्। जलवेतसे

वृक्षरुहा स्त्री वृक्षे रोहति रुह-क। १वन्द्यायाम् अमरः २अक्षतरुक्षायाञ्च राजनि०।

वृक्षवाटिका स्त्री वृक्षैर्वाटीव वेष्टितत्वात् स्वार्थे कन्। अमात्यगणिकोपसेव्ये गृहसमीपस्थे उपवने अमरः।

वृक्षादन पु० वृक्षमत्ति भिनत्ति अद-ल्यु। १कुठारास्त्रे (नेहानि) अमरः। वृक्षान्तरमत्ति भिनत्ति। २अश्वत्थवृक्षे १मधुच्छत्रे ४कुठारे च मेदि०। ५पियाले धरणिः। ६वृक्षविदारके त्रि० ७वन्द्यायां स्त्री गौरा० ङीष्।

वृक्षाम्ल न० वृक्षजातमम्लम्। (तेतुल) १वृक्षजाताऽम्लप्रधाने वृक्षे अमरः। २चुक्राम्ले च।

"वृक्षाम्लमामलघ्वोष्णं वातघ्नं कफपित्तलम्। पक्वन्तु गुरु संप्राहि कटुकं तुवरं लघु। कट्वोष्णं रोचनं रूक्षं दीपनं कफवातजित्। तृष्णार्शोग्रहणीगुल्मशूलहृद्रोगजन्तुजित्" भावप्र०।

वृक्षार्हा स्त्री० वृक्षेषु अर्हा पूज्या। महामेदायां राजनि०।

वृक्षाशयिन् पु० वृक्षमाश्रयति आ+श्रि-इनि। १खगे २वृक्षौकसि राजनि०।

वृक्षोत्पल पु० वृक्षे वृक्षपलाशिव। कर्णिकारवृक्षे रत्नमा०।

वृज्ज वृतौ रु०पर०सक०-सेट्। वृणक्ति। अवर्जीत्। ईदित् निष्ठा क्यनिट् वृक्तः।

वृज त्यागे अदा०आत्म०सक०सेट् ईदित्। वृङ्क्ते वृङ्क्षाञ्चक्रे नेदित्यवस्। वृक्षे अवर्जिष्ट ईदित् निष्ठा क्यनिट् वृक्तः।

वृज त्यागे वा चु० उभ० पक्षे भ्वा०पर०सक० सेट्। वर्जयति ते वर्जयति। अववर्जत्-अवीवृजत्। अवर्जीत् ईदित्। वर्जितः भ्वा० निष्ठा क्यनिट्। वृक्तः।

वृज वृतौ, त्यागे च रु०पर०सक०सेट्। वृणक्ति। अवर्जीत्। ईदित् निष्ठा क्यनिट्। वृक्तः।

वृजन न० वृज्यतेऽत्र वृज-ल्यु। १यज्ञे उणादि० २आकाशे त्रि०कौ०। ३केशे पु० ४कुटिले त्रि० उणादि०।

वृजिन न० वृज-इनच् किच्च। १यज्ञे अमरः। २शुभ्रे त्रि० हेमच०। ३केशे पु० ४कुटिले त्रि० मेदि०।

वृञ् भजनार्थी तना०उभ०सक० सेट्। वृणोति वृणीते वृणुते अवर्णीत् अवर्णिष्ट। वदित् क्त्वा वेट्। [अववर्त्तत् म।

वृत दीप्तौ चु० उभ० सक० सेट्। वर्त्तयति ते अवीवृतत् म

वृत वर्त्तने भ्वा० आत्म० कुङ्डि लृटि लृङि च उभ० सक० सेट्। वर्त्तते। अवृतत् अवर्त्तिष्ट लृटि लृङि च पर० नेट् वर्त्स्यति वर्त्तिष्यते। सनि च तथा विवर्त्तिषते, विवृत्सति। वदित् क्त्वा वेट्।

वृत संभक्तौ, वरणे च दि० आत्म० सक० सेट्। वृत्यते अवर्त्तिष्ट। वदित् क्त्वा वेट्। [धातुपाठः।

वृत् त्रि० वृत+भूते-क्विप्। वृत्ते व्यतीते "वृत् वृतादि" पा०

वृत त्रि० वृ-क्त। १प्रार्थिते २वर्त्तुले ३कलांदौ प्रार्थनादिना कृतनियोगे ४स्वीकृते च अमरः। [राजनि०।

वृतपत्रा स्त्री वृतमृ आवृतं पत्रं यस्याः। पुत्रदात्र्यां लतायां

वृति स्त्री वृ-क्तिन्। वेष्टने (वेड़)"वृतिञ्च तत्र कुर्व्वीत"याज्ञ०

वृतिङ्कर पु०वृतिङ्करोति कृ-खच्। विकङ्कते (वइचि) शब्दच०

वृत्त न० वृत-भावे क्त। "गुरुपूजा दया शौचं सत्यमिन्द्रियनिग्रहः। प्रवर्त्तनं हितानाञ्च तत्सर्वं वृत्तमुच्यते" इत्युक्ते १चरित्रभेदे २पद्यभेदे "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा। वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्। सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा" छन्दो० ३वृत्तौ च। वृत-कर्त्तरि क्त। ४व्यतीते ५वृद्धे ६वर्त्तुले ७आवरणे च त्रि० भरतः। ८व्यधीते ९वृत्ते मेदि० १०जाते च त्रि० ११क्रूमें पु० राजनि०। १२रेणुकायां १३प्रियङ्गौ १४रोहितकौ १५भिज्जारिष्टलतायां स्त्री राजनि०। तत्र वर्त्तुलाकारवस्तु यथा "वृत्तानि बालनारङ्ग खन्यधर्म्मिल्लमोदकाः। रथ कुलालचक्रकुलालकुम्भकुम्भाण्डकादयः। कर्णयागभुजायागाकृष्टचापघटाननम्। भद्रिकापरिखायोगघटवृत्तारुन्द दयः"कविकल्प० १६गोलाकारे क्षेत्रभेदे न० लीला०क्षेत्रशब्दे २४००पृ० दृश्यम्।

वृत्तगन्धि न० वृत्तस्य पद्यभेदस्य इव गन्धो लेशोऽस्य इव समा०। "भवत्युत्कालिकाप्रायं समानाक्षरं वृत्तगन्धि। वृत्तैकदेशसम्बन्धात् वृत्तगन्धि पुनःस्मृतम्" इत्युक्ते गद्यभेदे

वृत्ततण्डुल पु०वृत्तो वर्त्तुलस्तण्डुलोऽस्य। यावनाले राजनि०

वृत्तनिष्पाविका स्त्री वृत्ता वर्त्तुला निष्पाविका। नवनिष्पाव्यायाम् राजनि०।

वृत्तपर्णी स्त्री वृत्तानि पर्णान्यस्याः ङीष्। १महाश्रवणपुष्पिकायाम् २पाठाय्याञ्च (आकनादि) राजनि०।

वृत्तपुष्प पु० वृत्तानि वर्त्तुलानि पुष्पाण्यस्य। १शिरीषवृक्षे २कदम्बे ३वार्षीरे ४वृक्षके ५वृक्षरे च राजनि०।

वृत्तफलं न० वृत्तं फलमस्य । १मरीचे २दाडिमे ३वदरे च । ४वर्त्तुलाकारे फले च ५श्यामलतायाञ्च स्त्री टाप् राजनि०।

वृत्तमल्लिका स्त्री वृत्ता मल्लिकेव । १श्वेतायां २मोदिन्यां जलायां च राजनि०। [स्त्री राजनि०।

वृत्तबीजं पु० वृत्तानि बीजान्येस्य । १भिण्डायाम् २आडूकायाम्

वृत्तस्थ त्रि० वृत्ते गुरुपूजादौ चरित्रे तिष्ठति स्था-क । वृत्तशब्दोक्तगुरुपूजादिचरितरते ।

वृत्तान्त पु० वृत्तो ज्ञातोऽन्तोनिर्णयो यस्मात् । १संवादे २वार्त्तिकसंदेशे च अमरः । २प्रक्रियायां ३कार्त्तस्न्ये ४प्रलापे च मेदि० । ५अक्षरे ६ज्ञाने ७एकान्ते च विश्वः ।

वृत्ति स्त्री० वृत-क्तिन् । १वर्त्तने २स्थितौ ३विवरणे च मेदि० । करणे क्तिन् ४जीविकायाम् अमरः । ५कौशिकीसात्वतीभारत्यारभट्याख्ये नाटकरचनाभेदे "भृङ्गारे कौशिकी, वीरे सात्वत्यारभटी पुनः । रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती । वृत्तयो ह्येताः सर्वनाट्यस्य मातरः" सा०द० । ६वेदान्तोक्ते अन्तःकरणादेः परिणामभेदे च । अन्तःकरणवृत्तिस्वरूपप्रयोजनादिकं वेदान्तदर्शितं यथा तडागोदकं छिद्रान्निर्गत्य यथा कुल्यानेन केदारान् प्रविश्य तद्वदेव चक्षुरोपाद्याकारं भवति तथा तैजसमन्तःकरणं चक्षुरादि द्वारा घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते स एव परिणामो वृत्तिरित्युच्यते । वस्तुतस्त्वादित्यादौ तु अन्तःकरणस्य न चक्षुरादिदेशगमनं चक्षुरादेश्चक्षुरादयस्थितेः १५० । इन्द्रियजन्यवृत्तिस्तु आवरणभङ्गार्था सम्भवार्था इति मतद्वैधं यथोक्तं तत्रैव ७५० । "सा चान्तःकरणवृत्तिरावरणाभिभवार्थैत्येकं मतम् तथा हि अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटभानप्रसङ्गो घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतन्त्रमवस्थापदवाच्यमभ्युपगन्तव्यम् । एवं सति न सर्वदा घटादेर्भानप्रसङ्गः । अनावृतचैतन्यस्यैव भानप्रयोजकत्वात् तस्य चावरणस्य सदातनत्वे कदाचिदपि घटभानं न स्यादिति तद्भङ्गे वक्तव्ये तद्भङ्गजनकं न चैतन्यमात्रं तद्भासकस्य तदनिवर्त्तकत्वात् नापि वृत्त्युपहितचैतन्यं, परोक्षस्थलेऽपि तत्प्रवृत्त्यापत्तेरिति परोक्षव्यावृत्तवृत्तिविशेषस्य तदुपहितचैतन्यस्य वा आवरणभङ्गकत्वमित्यावरणाभिभवार्था वृत्तिरित्युच्यते । सम्भवार्था वृत्तिरित्यपरं मतम् । तत्राविद्योपाधिकोजीवोऽपरिच्छिन्नः स च घटादिप्रदेशे विद्यमानोऽपि घटाद्यपरोक्षवृत्तिविरहदशायां न घटादिसम्बन्धयति घटादिना सह तस्य सम्बन्धाभावात् तत्तदाकारवृत्तिदशायां तु भासयति तदा सम्बन्धसत्त्वात्" । अतएवोक्तं "बुद्धिवृत्तिभिदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं विना नश्येत् आभासात्तु घटः स्फुरेत्" इदञ्च प्रथमतार्थिप्रायम् अन्तःकरणवृत्तीनां भेदादिकं पातञ्जलादिदर्शितमन्तःकरणशब्दे १६५ पृ० दृश्यम् । "ब्रह्मज्ञानप्रधानानाय हृत्तिव्याप्तिरमेक्षिता" वेदा० । विषयस्य जीविकरूपवृत्तिविशेषे दोषो यथा "स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः । स क्लेशन्नरकं याति फलं तस्य हरन्तु भूमिप ! । यावन्तोरेणवः सिक्ता विप्राणां नेत्रविन्दुभिः । तावद्वर्षसहस्राणि हर्त्तापाके स तिष्ठति । तस्माद्भारत्र मनुष्यं मानञ्च तप्तमूलकम् । तस्माद्भारे च शयनं नाद्याते यमकिङ्करैः । तदन्ते च मनुष्यायौ विष्ठायां जायते कृमिः । षष्टिवर्षसहस्राणि देवमानेन भारते । ततो भूमिविहीनश्च प्रजाहीनश्च मानवः । दरिद्रः कृपणो रोगी शूद्री निन्द्यसुतः शुचिः" ब्रह्मवै० प्र० ४६अ० ।

वृत्तिकर्शित त्रि० वृत्त्या कर्शितः । १विषमस्थे २अल्पमात्रवृत्तिके च । [२अरटे पु० स्त्री राजनि० स्त्रियां ङीष् ।

वृत्तिस्थ त्रि० वृत्तौ तिष्ठति स्था-क । १सत्कर्मानुष्ठायिनि

वृत्र पु० वृत-रक् । १अन्धकारे २रिपौ ३वृष्टिरोधके ४दानवभेदे ५मेघे ६पर्वतभेदे मेदि० । ७इन्द्रे विश्वः । ८अहौ स्त्री-ङीप् ।

वृत्रहन् पु० वृत्रं हतवान् हन-क्विप् । इन्द्रे अमरः ।

वृथा अव्य० वृ-थाच् किच्च । निरर्थके अमरः ।

वृथादान न० कर्म० । १निष्फलदाने स्मृतिप्रदर्शिते देवपित्रर्थमिश्रेषु कार्येषु २दानभेदे च ।

"देवपितृविहीनं यदीश्वरेभ्यः प्रदीयते । दत्तानुकीर्त्तनाच्चैव वेदाग्निव्रततत्त्वागने । अन्यायोपार्जितं दानं व्यर्थं ब्रह्महरे तथा । गुरवेऽहृतवक्त्राय क्लीबाय पतितायाय च । क्लेशावहं च यद्दत्तं सर्वदा ब्रह्मविद्विषे । याजकाय च सर्वस्व हृत्वा:पतये तथा । परिचारकाय भृत्याय सर्वत्र पिशुनाय च । इत्येतानि तु राजेन्द्र ! वृथादानानि षोडश" वह्निपु० । "न्यायमार्गेण यद्दत्तं तत्सम्यविधमपि पुनर्नापहर्त्तव्यं यत् इतरन्यायेन दत्तं तददत्तं षोडशप्रकारमपि प्रत्याहर्त्तव्यमेव इत्यर्थादुक्तं भवति । नारदेन च "दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकम्" इति प्रतिपाद्य दत्ताऽदत्तयोः स्वरूपं विवृतं तथा

"पयस्यल्पं मतिसुद्धा स्नेहात् प्रत्युपकारतः। स्नेहशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः। अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः। तथोत्कोचपरिहासव्यत्यासच्छलयोगतः। बालमूढाध्वतत्त्वार्त्तमत्तोन्मत्तापवर्जितम्। कर्त्ता मनेदं कर्मेति प्रतिलाभेच्छया च यत्। अपात्रे पात्रमिश्रे वा कार्य्ये वा धर्मसंहिते। यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतम्" मिता० अदत्तशब्दे दृश्यम्।

वृथामांस न० वृथाभूतं मांसम् शा०क०। देवाद्यनुद्देशेन हतपशूनां मांसे।

वृद्ध न० वृध-क्त। १शैलजनामगन्धद्रव्ये अमरः। २वृद्धदारके वृद्धे पु० राजनि०। ३वृद्धियुक्ते त्रि० ४गतयौवने वृद्धावस्थायुक्ते। बाल्यादिवयःकालभेदश्च भावप्र० उक्तो यथा "बाल्यादेरवधिमाह सुश्रुतः "वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा। अनषोड़शवर्षस्तु नरो बालो निगद्यते। त्रिविधः सोऽपि दुग्धादो दुग्धान्नादो तथान्नभुक्। दुग्धादो वर्षपर्य्यन्तं दुग्धान्नादी शरद्द्वयम्। तदुत्तरं स्यादन्नादो एवं बालस्त्रिधा मतः। मध्ये षोड़शवर्षत्वोर्मध्यमः कथितो बुधैः। चतुर्थं मध्यमं प्राहुर्युवा द्वात्रिंशतो मतः। चत्वारिंशत् समा यावत्तिष्ठेद्वीर्य्यादिपूरितः। ततः क्रमेण क्षीणः स्याद् यावद् भवति सम्प्रतिः"। वीर्य्यादीत्यादिशब्देन रसादिसर्वधात्विन्द्रियबलोत्साहा उच्यन्ते। क्षीणः सर्वधात्विन्द्रियबलोत्साहेहीनः "ततस्तु सप्ततेरूर्द्धं क्षीणधात्वग्निरस्यादिकः। क्षीयमाणेन्द्रियबलः क्षीणरेता दिने दिने। बलोपचितधात्विन्द्रियुक्तः कर्मसु क्षमः। क्षयश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः। बाल्ये विवर्द्धते श्लेष्मा पित्तं स्यान्मध्यमेऽधिकम्। वार्द्धक्ये वर्द्धते वायुर्विचार्य्यैतदुपक्रमेत्"। उपक्रमेत् चिकित्सेत्। तत्त्वान्तरे तु "वृद्धवृद्धिस्त्रिधा स्मृता ज्ञानवृद्धिः सुकर्मिकी। वृद्धिः कर्मेन्द्रियं चतो जीवितं दयतो सुखेत्"। ५पक्षिभेदे पु० मेदि०।

वृद्धकाक पु० कर्म०। ह्रीषकाके हेमच०।

वृद्धगङ्गा स्त्री कर्म०। नदीभेदे "अस्ति नाटकशैले तु सरोमानसमन्निभम्। यत्र गार्हं शैलसुता जलक्रीड़ां सदा हरः। कुरुते नरशार्दूल! स्वर्णपङ्कजशोभिते। तस्य पश्चान्मध्यपूर्वभागेभ्यश्च सरित्त्रयम्। अवतीर्णं प्रयात्येव दक्षिणं सागरं प्रति। तस्य पश्चिमभागे तु नदी दिक्करिकाह्वया। दिग्गजाः श्वेतवर्णाताः तेन दिक्करिका स्मृता। मध्यभागात् स्रुता या तु गङ्गेव फलदायिनी। या निःसृता पूर्वभागात् तस्माद्गिरिवरात् नदी। स्वर्णश्रोतेति विख्याता सा गङ्गासदृशी फले" कालिकापु० ८२अ०।

वृद्धदारक पु० वृद्धं दारयति वृ-णिच्-ण्वुल्। वीरतरुवृक्षे अम०। वृद्धदार तत्रार्थे राजवल्लभः। "रसायनो वृद्धदारः श्वेतवातमवातजित्"।

वृद्धदारु न० वृद्धं दारयति वृ-णिच्-क्यु। वृद्धदारकवृक्षे राजनि०। "वृद्धदारुद्वयं गौल्य पिच्छिलं कफपातनुत्। बल्यं कालासमेदोघ्नं हितीयं खल्वरीर्यदम्" राजनि० [अमरः।

वृद्धनाभि त्रि० वृद्धा नाभिरस्य। (गाँड़) वृद्धनाभियुक्ते

वृद्धप्रपितामह पु० वृद्धः प्रपितामहात् राज०। प्रपितामहजनके। [महस्य पितरि।

वृद्धप्रमातामह पु० वृद्धः प्रमातामहात् राज०। प्रमातामहजनके।

वृद्धबला स्त्री वृद्धं बलं यस्याः पृ०ब०। महाबलमूलवृक्षे राजनि०। तस्या बलवृद्धिकरत्वात्तथात्वम्।

वृद्धविभीतक पु० वृद्धः विभीतक इव। चाञ्चातके शब्दमा०

वृद्धश्रवस् पु० वृद्धेभ्यः शृणोति श्रु-क्विप्, वृद्धेषु श्रवो यशो यस्येति वा। इन्द्रे अमरः। [हारा०।

वृद्धसूत्रक न० कर्म० संज्ञायां कन्। इन्द्रवृक्षे (वुड़िरसुता)

वृद्धा स्त्री वृध-क्त। १गतयौवनायां स्त्रियाम्। २अर्द्धशब्दच्०। ३महाश्रावणिकायां राजनि०।

स्त्रीणां वयःकालविभागो यथा

"षोड़शाद् भवेद्बाला तरुणी त्रिंशता मता। पञ्चपञ्चाशतः प्रौढ़ा वृद्धा भवति तत्परम्" इति कालिदासः। "बालेति गीयते नारी यावद्वर्षाणि षोड़श। ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि। तदूर्द्धमधिरूढा स्यात् पञ्चाशद्वत्सरावधि। वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्जिता" भावप्र०। तस्याः सम्भोगे दोषो यथा "बाला तु प्राणदा प्रोक्ता युवती प्राणहारिणी। प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत्। निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः। हेमन्ते शिशिरे योग्या न वृद्धा कापि शस्यते। नावांक् तु षोड़शाद्वर्षात् सम्प्राप्या परतो न च। आयुष्कामो नरः स्त्रीभिः सम्भोगं कर्त्तुमर्हति। पञ्चपञ्चाशतो नारी सप्तसप्ततिकः पुमान्। द्वावेतौ न प्रशस्येते प्रशस्येते विपर्य्ययात्" राजवल्लभः। "शुष्कं मांसं स्त्रियो वृद्धा मज्जार्द्रत्वञ्च दधि। प्रभावे

मैथुनं निद्रा सद्यः प्राणहराणि षट्" चाणक्यनीतिसारः

वृद्धि स्त्री वृध–क्तिन् । १समृद्धौ २अभ्युदये मेदि० ३धर्म्मतौ ४अनूढे च । वृध–कर्त्तरि क्तिच् । ५ओषधिविशेषे वृद्धिशब्दे १४४७ पृ० तल्लक्षणादि द्रष्टव्यम् ।

(कोरन्द) हृरोगविशेषे तच्चिदानादि भावप्र० उक्तं यथा "तत्र दृद्धेर्निदानं संख्याञ्चाह "दोषास्त्रमेदोमूत्रान्त्रैः संवृद्धिः सप्तधा गदः । मूत्रान्त्रजावथनिलाद्वेतभेदस्तु केवलः । वृद्धिं करोति कोषस्थः फलकोषाभिवाहिनीम् । रुद्धा वङ्क्षगतिर्वायुर्धमनीः सङ्कगामिनीः" । तत्र वातिकमाह "वातपूर्णदृतिप्रख्यो रुजो वातादहेतुरुक्" । अहेतुरुक् अत्यर्थे नञ् । तेन स्वल्पादपि विप्रकृतात् कारणात् रुक् पीड़ा यत्र सः । अथ पैत्तिकमाह "पक्वोदुम्बरसङ्काशः पित्तादाहोष्मपाकवान्" । दाहः अभ्यन्तरः ऊष्मा वह्नितप्तता । अथ श्लैष्मिकमाह "कफाच्छीतो गुरुःस्निग्धः कण्डूमान् कठिनोऽल्परुक्" । अथ रक्तजमाह "कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्तजः" । कृष्णस्फोटावृत इति पैत्तिकोक्तेः । मेदोजमाह "कफवन्मेदसो वृद्धिर्दुरुत्थानफलोपमः" । नीलवर्णः । मूत्रजमाह "मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः । व्यस्मोभिः पूर्णदृतिवत् क्षोभं याति मरुद्वृतः । मूत्रकृच्छ्रमधः कुर्य्यात् सवृषणं फलकोषयोः" । सवृषणं फलकोषयोरधः मूत्रकृच्छ्रं मूत्रेण व्यथां कुर्य्यादित्यर्थः । अथान्त्रवृद्धिमाह "वातकोपिभिराहारैः शीततोयावगाहनैः । धारणैरणभाराध्वविषमाङ्गप्रवर्त्तनैः । क्षोभणैः क्षोभितोऽन्त्यैश्च क्षुद्रान्त्रावयवं यदा । पवनो विगुणीकृत्य स्वनिवेशादधो नयेत् । कुर्य्याद् वङ्क्षणस्वन्धिस्थो ग्रन्थ्राभं व्यथयुं तदा" । धारणम् उपस्थितस्य वेगस्य प्रेरणम् । तस्य वेगस्य । ईरणम् अनुपस्थितस्य वेगस्य प्रेरणम् । विषमाङ्गप्रवर्त्तनं वक्रत्वेनाङ्गसोटनम् । अन्यानि क्षोभणानि बलवद्विग्रहकठारधनुराकर्षणादीनि तैः क्षोभितः सन्दुष्य सञ्चालितः पवनः यदा क्षुद्रान्त्रावयवं विगुणीकृत्य स्वनिवेशादधो नयेत् । तदावङ्क्षणसन्धिस्थः अन्त्रवृद्धिरोगः । तस्यावस्थामाह । "उपेक्ष्यमाणस्य मरुद्वृद्धिमाध्मानरुक् क्षमानतोन्नतं कुर्य्यात् । प्रपीड्यितोऽन्तःस्वनवान् प्रयाति प्रध्मापयच्चेति पुनस्तु सङ्कम्" । तत्राध्मानसहरुग्दृद्ध्योर्सङ्कयोः क्षमो गात्रे तद्वृत्तां क्रियादित्यर्थः । भोजोऽप्याह "अन्त्रं विगुणमादाय वायो नयति वङ्क्षणम् । वङ्क्षणात् तद्भुजायुक्तं मलकोषं प्रपद्यते" इति । स सुश्रुतवृद्धिरोगः अन्तः उदरे प्रध्मापयन् अगमनमार्गं निरुद्धं कुर्वन् एति आयाति । अथासाध्यमाह स कीटक आदित्याकाङ्क्षयामाह "यस्यान्त्रावयवाश्लेषो सक्थ्योर्वातसञ्चयात् । अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः" । वातवृद्धिसमाकृतिरिति योऽन्त्रवृद्धिरोगः सोऽसाध्या वातवृद्धिसमाकृतिः" । अन्त्रवृद्धिशब्दे २०८ पृ० सश्रुताक्तं द्रष्टव्यम् नीतिशास्त्रादि त्रिवर्गलक्षणे ७वर्गघटकपदार्थे "त्रयः स्थानञ्च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्" अमरः । "क्षविर्वाक्षक् पथोदुर्गं सेतुःकृच्छ्रत्ववस्त्वम् । कार्यकरणवादान सैन्यानाञ्च विनायनम्" एतेषामष्टानामन्यतमस्य क्षयं स्थान वृद्धिश्चेत्यर्थः । एकत्रान्तरे (वृद्) वृद्धिस्वरूपभेदादिकं वोरनि० उक्तं यथा नारदः "वृद्धिश्चतुर्विधा प्रोक्ता पञ्चधाऽन्यैः प्रकीर्त्तिता । षड्विधाऽन्यैः समाख्याता तत्त्वतस्तां निबोधत" इति । षड्विधा मे इति क्वचित् पाठः तत्र मे मते । तान् प्रकारान् स एवाह "कायिका१ कालिका२ चैव चक्रवृद्धिश्चतोऽपरा । कारिता४ सधिश्चाथ५ वृद्धिर्भोगलाभ६स्तथैव चेति" । एतेषां स्वरूपमाह "कायिका कर्मसंयुक्ता मासव्याद्धा तु कालिका । वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना कृता । मत्यर्द्धं दृद्यते या तु त्रिरात्रवृद्धिस्तु सा स्मृता । दृद्धात्तोषः फलं क्षेत्राद्भोगलाभः प्रकीर्त्तितः" इति । कायिका कर्मसंयुक्ता यत्र कर्मकरस्य मासव्याद्देर्दोहनवाहनादिकं कर्म वृद्धित्वेन परिकल्पितं तत्र सा कायिकेत्यर्थः । तथा च व्यासः "दोह्यवाह्यकर्मयुता कायिका मासदाहृतेति" । मदनरत्ने तु भोग्याधितया स्थापितस्य यो दोहनवाहनादिकर्मरूपैर्भोगस्तत्फलिका या वृद्धिः सा कायिकेत्युक्तम् । मासव्याद्धा तु कालिका प्रतिमासं कर्म्या या वृद्धिः सा कालिकेत्यर्थः । "प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका मतेति" नारदवचनात् । वृद्धेर्वृद्धिश्चक्रवृद्धिः वृद्धेरपि प्रतिमासं मूलभावेन पुनर्वृद्धिरित्यर्थः । "वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति" नारदवचनात् । कारिता ऋणिना कृता । ऋणिनाऽधमर्णेन स्वेच्छया कृता वृद्धिः कारितेत्यर्थः । "वृद्धिः स्वयं कारिता नाम यत्किंचिन स्वयं कृतेति" नारदवचनात् । अधमर्णकारितैव वृद्धिर्दैया नोत्तमर्णकारिता तथा च वृद्धस्मृतिः "ऋणिकेन तु या वृद्धिरधिका सम्प्रकल्पिता । आप्तकालकृता नित्यं दातव्या सा तु का-

रिता । अन्यथा कारिता वृद्धिर्न दातव्या कथञ्चनेति" । उत्तमर्णप्रलोभनार्थम् आधत्काले शास्त्रोक्तादधिका स्वयं कल्पिता कारिता वा या वृद्धिर्दातव्या न पुनरनेनविधा धमिकेन कारिता दातव्येत्यर्थः । "शतकृत् शतकृते या तु शिखावृद्धिस्तु सा स्मृता" । प्रतिदिनलब्धाच्छिखासादृश्याच्छिखावृद्धिरिति व्युत्पिपादयिषया इत्यर्थः । किं पुनः शिखासादृश्यं वृद्धेरित्याकाङ्क्षायां वृद्धस्यान्तरेवाह "शिखेव वर्द्धते नित्यं शिरश्छेदाच्च वर्त्तते । मूले दत्ते तथैवैषा शिखावृद्धिस्तु सा स्मृते"ति । प्रलम्बं शतकृत इति चोत्तमर्णप्रतिभुवोर्दिनरंध्यया वृद्धिग्रहणकालोपलक्षणम् । तथा च कात्यायनः "प्रतिकालन्दशब्देन शिखावृद्धिस्तु सा स्मृते"ति । "वृद्धात्तोषः फलं चवादु भोगलाभः प्रकीर्त्तितः" । वस्त्रकीलनाद्वृद्धात्क्षिप्राद्यादिजनितः सन्तोषः । चेलात् शस्यादिफलञ्च भोगलाभाख्यो वृद्धिप्रकार इत्यर्थः । वृद्धचेलयोरुपादानं स्थावरात्मकभोग्याधेरुपलक्षणार्थम् । अतएव कात्यायनः "कार्षेर्भोगस्तथैवो यो वृद्धये परिकल्पितः । प्रयोगे यत्र चैवं स्यादाधिभोगः स उच्यते" इति । यस्मिन् ऋणादानप्रयोगे स्थावराधित्वेन परिकल्पिता या वृद्धिस्तत्र सा वृद्धिराधिभोग इत्युच्यते इत्यर्थः । अपरार्कादौ "वृद्धात् सोमः शतः चेलादिति पाठः" । सोमो भाटक इति कल्पतरौ । शतः शस्यादिफलम् । वृद्धेः परिमाणं दर्शयति मनुः "वसिष्ठविहितां वृद्धिं वृद्धेर्वृद्धिविवर्द्धिनीम् । अशीतिभागं वृद्धीयात् मासाद्धर्षिकः शते" इति । निष्कशते प्रयुक्ते मासस्य यदानिष्कपरिमितां वृद्धिं वार्षुषिको वृद्ध्यर्थं वृद्धीयादित्यर्थः । एतत्सवस्त्रकविषयम् । अतएव याज्ञवल्क्यः "अशीतिभागो वृद्धिः स्यान्नामिसांसि सवस्त्रके । वर्णक्रमाच्छतं द्विचतुःपञ्चकमन्यथेति" । सवस्त्रके प्रयुक्तस्य द्रव्यस्याशीतितमो भागो वृद्धिः पञ्चशते प्रयुक्ते यदादः पणः प्रतिमासं वर्त्तत इत्यर्थः । अन्यथा वस्त्रकरहिते वर्णक्रमात् ब्राह्मणादिवर्णक्रमेण द्विचतुःपञ्चकं शतमत्यर्घं भवति । द्वौ वा त्रयो वा चत्वारो वा इति द्विचतुःपञ्चा अस्मिन् शते वृद्धिर्दीयते इति द्विचतुःपञ्चकं शतम् । "तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते" या० कन् । तथा चायमर्थः । वस्त्रकरहिते पण्यशतं प्रति प्रतिमासं ब्राह्मणात् पणद्वयं क्षत्रियात् पणत्रयं वैश्यात् पञ्चचतुष्टयं शूद्रात् पणपञ्चकं ग्राह्यम् । यत्तु तत्रैवोक्तम् । "द्विकं शतं वा वृद्धीयात् सतान्वर्मणनुरूपतः" तदुत्तमर्णस्थितविकल्पविषयम् । अतएव व्यासः "सवस्त्रे भाग आशीतः शतभागः सवस्त्रके । निराधाने द्विकशतं मासलाभ उदाहृतः" इति । सवस्त्रे आधिरहिते । आशीतः अशीततमः । शतः शतितमः । वस्त्रकः प्रतिभूः । निराधाने वस्त्ररहिते । आधानशब्दश्चं प्रतिभुवोरप्युपलक्षणम् । कल्पतरौ शतभाग इति पठित्वा सवस्त्रके अशीततमो भागः स्त्रीबालवृद्धसहितो मासवृद्धिरित्युक्तम् "द्विकत्रिकचतुष्कञ्च पञ्चकञ्च शतं क्रमम् । मासस्य वृद्धिं वृद्धीयाद्वर्णानामनुपूर्वशः" इति । द्विकं द्वौ वृद्धिर्दीयते यस्मिन्नृणशते तत् तथा । एवं त्रिकादयोऽपि समासात् ग्राह्य नाधिकम् । विष्णुरपि "अशीतभागं शतमर्घकादुद्यद्यादुत्तमर्णं वृद्धीयात् । द्विकत्रिकचतुष्कं पञ्चकं शतं वर्णानुक्रमेण प्रतिमासमिति" । अधमर्णविशेषेऽप्याह याज्ञवल्क्यः "कान्तारभक्षान् दशकं वाहतुर्वा विंशकं शतमिति" । अयं वृद्धीत्वा कान्तारं महावनमतिक्रामतीति कान्तारभक्षः दुर्भक्षसञ्चारो वणिगादिकयकारिणः पण्यशतस्य दशकं प्रतिमासं दद्यात् दद्युरित्युत्तरवाक्यस्थानुषङ्गः । वाहतुर्वाहाः वहतुर्गन्तारः प्रतिमासं विंशकं शतं दद्युरित्यर्थः । कारितायान्तु न नियम इत्याह स एव "दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु" । सर्वे न क्षत्रादयोऽधमर्णाः सवस्त्रकेऽवस्त्रके वा सर्वासु आतिषूत्तमर्णभूतासु स्वयमङ्गीकृतां वृद्धिं दद्युरित्यर्थः । द्रव्यविशेषे वृद्धिविशेषमाह स एव "सप्ततिंसु पयुक्तेषां रसस्याष्टगुणा परा । वस्त्रधान्यहिरण्यानां चतुर्द्विगुणा परेति" । पयुक्तेषां अङ्गीकृतानां वृद्ध्यर्थं प्रयुक्तानामन्तरेव सप्ततिरेव वृद्धिः । रसस्य घृतादेरष्टगुणा । वस्त्रधान्यचतुर्गुणा धान्यानामन्यहिरण्यानां द्विगुणा परेति प्रत्येकं सम्बध्यते । परा परमा । अतःपरमधिका वृद्धिर्नास्तीत्यर्थः । न च सर्वदानाम् ऋणत्वेन दानस्य सम्भवतीति वाच्यम् । तत्तोषादाद्यशब्दस्य तत्पुरुषसमत्वाद्यर्षिणो दानसम्भवात् । अदण्यन्तु क्षीरवाहनसेवार्थिनः । वृद्धयतिरपि "द्विरण्ये द्विगुणा वृद्धिस्त्रिगुणा वस्त्रकुप्यके । धान्ये चतुर्गुणा प्रोक्ता शतयाज्ञवल्क्येषु च । उक्ता वस्तुगुणा वृद्धिर्बीजेक्षौ षड्गुणा स्मृता । लवणस्नेहमद्येषु द्विगुणा मता । गुडे मधुनि चैवोक्ता प्रयुक्ते त्रिकवार्द्धिके"

इति । कुप्यं त्रपुसीसकादिकम् । शदः क्षेत्रफलम् । तच्च गोबलीवर्दन्यायाद्धान्यव्यतिरिक्तं पुष्पमूलफलादिकम् । वाल्लोऽस्त्रादिः । लवो मेषोर्णाचमरीकेशादिः । अत्र चिरकालशब्देन प्रतिश्रुतायाः अशीतिभागायाः वृद्धेर्यस्मिन् समये द्वैगुण्यादिपापकत्वं सम्भवति । ततोऽधिकः कालो गृह्यते । यत् तु "धान्ये शदे लवे वाल्ले इत्यादि-मनुनोक्तं तत्प्रत्यर्पणसमये सकृद्धार्यमर्णविषयम् । षड्गुण्यनिषेधपरमिति मदनरत्ने । यत् तु वसिष्ठवचनम् "द्विगुणं चिरणं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः । पुष्पमूलफलानि च तुलाधृतमष्टगुणमिति" तत्त्रिगुणमेव धान्यादिकं दातव्यमिति यत्र देशे स्थिति स्तद्विषयम् । दरिद्रार्धमर्णविषयं वा एवमन्यत्रापि न्यूनाधिकपरमर्षिप्रतिपादकानि वचनानि देशविशेषविषयतया दरिद्रादिविषयतया वा व्यवस्थापनीयानि । व्यासोऽपि "वदन्त्यष्टगुणान् काले शस्यक्षेरससर्पिषि" क्षेक्षुक्षौद्रादिः । रसः क्षीरादिः । कात्यायनोऽपि "तैलानाञ्चैव सर्वेषां शस्यानां मधुसर्पिषाम् । वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य चेति" । विष्णुरपि "हिरण्यस्य द्विगुणा वृद्धिस्त्रिगुणा यस्य धान्यस्य चतुर्गुणा रसस्याष्टगुणा शस्तिः स्त्रीपशूनामिति" । व्यासोऽपि "शाकपाषाणबीजेषु षड्गुणा परिकीर्त्तिते"ति । वसिष्ठोऽपि "वज्रशुक्तिप्रवालानां हेम्नश्च रजतस्य च । द्विगुणा त्रिंशते वृद्धिः कृतकालानुसारिणीति" । शुक्तिशब्देनात्र शुक्तीफलं लक्ष्यते वज्रसाहचर्य्यात् । अतएव कात्यायनः "मणिशुक्तिप्रवालानां सुवर्णरजतस्य च । तिष्ठतो द्विगुणा वृद्धिः फलकैटाविकस्य चेति" । कैटङ्कीटोङ्गमं पट्टसूत्रादि । चाविकं कम्बलादिकम् । वसिष्ठोऽपि "ताम्रायःकांस्यरीतीनां त्रपुणः सीसकस्य च । त्रिगुणा तिष्ठतो वृद्धिः कालाच्चिरकृतस्य तु" इति । रीतिरारकूटम् । देशभेदेन परां वृद्धिं दर्शयति नारदः "ऋणानां सार्वभौमोऽयं विधिर्वृद्धिकरः स्मृतः । देशाचारस्थितिस्त्वन्या यत्रर्णमवतिष्ठते । द्विगुणं त्रिगुणञ्चैव तथान्यस्मिंश्चतुर्गुणम् । तथाऽष्टगुणमन्यस्मिन् तत्र तु देशेऽवतिष्ठते" इति । यत्र वृद्धिविशेषो न श्रूयते तत्र द्विगुणैव याज्ञेत्याह विष्णुः "अनुक्तानां द्विगुणेति" । अयञ्च द्वैगुण्यादिरूपो वृद्ध्युपरमः सकृत्प्रयोगे सकृदाहरणे वेदितव्यः तथा च मनुः "कुसीदवृद्धिर्द्वैगुण्यं सकृदाहृतेति" । उपचयार्थं प्रयुक्तं द्रव्यं सकृदाहृतेति सकृदाहृतेति । कुसीदं तस्य वृद्धिः कुसीदवृद्धिर्द्वैगुण्यमतिक्रान्तेति नातिक्रामति । यदि सकृदाहृता सकृत् प्रयुक्ता पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणेन तस्मिन्नेव वा पुरुषेरेकसेकाभ्यां प्रयोगान्तरकरणे द्वैगुण्यमतिक्रम्य पूर्ववद्वर्द्धत एवेत्यर्थः । द्वैगुण्यग्रहणं त्रैगुण्यादीनामुपलक्षणम् । सकृदाहृतेति पाठे यदि प्रतिमासं प्रतिवत्सरं वा न गृह्यते किन्तु सकृद् गृह्यते तदा द्वैगुण्यमतिक्रामतीत्यर्थः । गौतमोऽपि "चिरस्थाने द्वैगुण्यं प्रयोगस्येति" । प्रयोगस्येत्येकवचननिर्देशात् प्रयोगान्तरकरणे द्वैगुण्यातिक्रमः चिरस्थान इति निर्देशात् शनैः शनैर्वृद्धिग्रहणे द्वैगुण्यातिक्रमो भवतीति सूचितम् । सकृद्वृद्ध्युपरमस्य क्वचिद् द्रव्यविशेषेऽपवादमाह बृहस्पतिः "हृणकाष्ठेष्टकास्तक्रक्षिप्तचर्मास्थिवर्जनाम् । क्षेत्रिपुष्पफलानाञ्च वृद्धिस्तु न निवर्त्तते" । किण्वं सुरादूष्योपादानकारणभूतो मद्यविशेषः चर्म शरादिनिवारकफलकः वर्म कवचम् । क्षेत्रिरायुधम् । पुष्पफलयोर्वृद्धेरनिवृत्तिः प्रतिदानवेलायामल्पत्वसमर्थार्धमर्णविषया देशविशेषविषया वा वेदितव्या । अन्यथा त्रिगुणवृद्धिप्रतिपादकव्यासवचनविरोधः स्यात् । विष्णुरपि "किण्वकार्पासमद्यवर्मचर्मायुधेष्टकाङ्गारायाचञ्चेयेति" । कार्पासे तु षड्गुणवृद्धिविधायकव्यासवचनविरोधः पूर्ववत्परिहरणीयः । वसिष्ठोऽपि "इत्यचर्मास्थिदृष्टकाणां मृण्मयानान्तथैव च । अन्यथा वृद्धिरेतेषां पुष्पमूलफलस्य च" इति । अन्यथा मूलप्रतिपादनाभावे शतगुणापि वर्द्धत एवेत्यर्थः । शिखावृद्ध्यादीनामनुपरसमाह बृहस्पतिः "शिखावृद्धिर्द्धायिकाश्च भोगलाभं तथैव च । धनी तावत् समादद्याद् यावन्मूलन्न शोधितम्" । न शोधितञ्च प्रतिदत्तस्तृणिकेनेत्यर्थः क्वचिदनङ्गीकृतापि वृद्धिर्भवतीत्याह विष्णुः "यो मृष्टोत्वा ऋणं पूर्णं श्वो दास्यामीति याचकम् । न ददाति ऋणं तस्मात् पश्चात्तद्द्विगुणं वृद्धिमाप्नुयात्" इति । श्व इति प्रतिश्रुतस्य प्रतिदानकालावधेरुपलक्षणम् । समयमेव याचकम् अवधिकमिति यावत् । योऽनुक्तावधिं दिने समयेवाह त्वदीयं धनं पूर्णं समयं दास्यामीति प्रतिज्ञाय ऋणं गृहीत्वा पश्चाद्भोगादिलब्धं कुर्यात् सोऽवधिदिनमारभ्य वृद्धिं दद्यादित्यर्थः । कालावध्यनङ्गीकारेण गृहीतस्य धनस्य षण्मासादूर्ध्वं वृद्धिर्भवतीत्याह नारदः "न वृद्धिः प्रीतिदत्तानां स्वादनाकारिता क्वचित् । अना-

कारितमप्यूर्द्धं वत्सरादृद्धिर्वर्द्धते" इति । अनाकारिता अनङ्गीकृता । प्रीतिदत्तानां प्रतियाचनप्रतिदानादिनानिर्देश्यमूल्यानामिति शेषः । अनाकारितेत्यादेरयमर्थः । वृद्धिमकृत्वा गृहीतमपि प्रणमासादूर्द्धं प्रीतिदत्तं वृद्धिं प्राप्नोतीति । प्रतियाचितस्य प्रीतिदत्तस्याऽदाने वृद्धिविशेषमाह कात्यायनः "प्रीतिदत्तञ्च वर्द्धते यावच्च प्रतियाचितम् । याच्यमानमदत्तञ्चेद्वर्द्धते पञ्चकं शतम्" इति । पञ्चकं पञ्चाधिकम् प्रतियाचनादिनमारभ्य यच्छतस्य प्रणपञ्चकं प्रतिमासं वर्द्धते इत्यर्थः । याचितकं गृहीत्वा अप्रतिदत्त्वैव देशान्तरगमने विशेषमाह कात्यायनः "यो याचितकमादाय तमदत्त्वा दिशं व्रजेत् । ऊर्द्धं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्" इति । एतच्चाप्रतियाचितविषयम् । प्रतियाचिते याचितकमदत्त्वा यदि देशान्तरङ्गच्छति तदा विशेषमाह स एव "कृतोद्धारमदत्त्वा यो याचितञ्तु दिशं व्रजेत् । ऊर्द्धं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयात्" इति । कृतोद्धारं याचितकं गृहीत्वा याचितोऽप्यदत्त्वेत्यन्वयः । देशान्तरगमनाभावे तु याचितकालमारभ्य याचितकस्य वृद्धिविशेषमाह स एव "स्वदेशेऽपि स्थितो यस्तु न दद्यात् याचितः क्वचित् । तं ततो कारितां वृद्धिमनिच्छन्तञ्च दापयेत्" इति । ततः प्रतियाचनकालादारभ्येत्यर्थः । अतत्कस्विदवधिमपरिकल्प्य याच्ञाप्राप्ते ज्ञेयम् । अवधिं स्वीकृत्य यदतिक्रमे त्वतिक्रमदिनमारभ्य तद्धनस्य वृद्धिर्द्विगा । "तदङ्गाद् वृद्धिमाप्नुयादिति" न्यायसाम्यात् । गृहीतपणादौ मूल्यमदत्त्वा देशान्तरगमने वृद्धिविशेषमाह स एव "पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत् । कृतत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयात्" इति । एतच्चाप्रतियाचितविषयम् । प्रतियाचने त्वेतस्य निश्चिप्तवृद्धिशेषस्य तद्दिनमारभ्य प्रतिमासं शते पञ्चकं वर्द्धत इत्यर्थाह स एव "निःक्षिप्तं वृद्धिशेषञ्च क्रयविक्रय एव च । याच्यमानमदत्तञ्चेद्वर्द्धते पञ्चकं शतम्" इति । नन्वकृतायां वृद्धौ परिमाणविशेषस्यानुक्तेः किं परिमाणं ग्राह्यमिति चेत् । अशीतिभागो वृद्धिः सार्द्धित्यादि याज्ञवल्क्यादुक्तपरिमाणं ग्राह्यमिति ब्रूमः । अतएव विष्णुः "वृद्धिं दद्युर्वत्सरातिक्रमे यथाभिहितामिति" । वत्सरातिक्रम इति यत्र यदतिक्रमे वृद्धिरुक्ता तस्योपलक्षणम् । यथाभिहितां धर्म्मशास्त्रे इति शेषः । धर्म्मशास्त्रे यथोक्तां तथाविधामित्यर्थः । नन्वत्र यथाभिहितामित्यस्यार्थिप्रत्यर्थिनोरन्यतरेण मध्यस्थेन वा क्षिप्तां दद्यादित्यर्थः कस्मात्तु भवति व्यतिक्रमदोषापत्तेः । "कृतानुसारादधिका व्यतिरिक्ता न सिद्ध्यति । कुसीदपथमाश्रित्य पञ्चकं शतमर्हतीति मनूक्तेश्च । अस्यार्थः । शास्त्रविधिनियमितशास्त्रकृतवृद्ध्यनुसारी यो वृद्धिग्रहणे लौकिकानां समाचारः तस्मादधिका वृद्धिरुत्तमर्णैरुक्तवद्धौ न सिद्ध्यति यतः सा व्यतिरिक्ता धर्म्मशास्त्रबाह्या । अतएव कुसीदपथमाश्रित्य धर्म्मपथमिति । पञ्चकं शतमर्हतीति प्रतियाचितविषयमिति स्मृतिचन्द्रिकायाम् । पूर्वोक्ताच्छास्त्रानुसारादधिकाऽधमर्णेनाकृता वृद्धिर्न सिध्यति । यतः कुसीदपथमाश्रित्य । यदा तु व्यवहारावष्टम्भादुत्तमर्णोऽधिकमधमर्णेनाकारितं लाभमिच्छति तदा ब्राह्मणे पञ्चकं शतं गृहीत्वमर्हेति न ततोऽधिकमधमर्णाकारितमित्यर्थमाह रत्नाकरः । अकृतवृद्धेरपवादमाह नारदः "पणप्रमूल्यं श्रुतिन्यासो दण्डो यस्य प्रकल्पितः । वृथादानाच्चिकप्षा वर्द्धन्ते नाविवक्षिताः" इति । पणप्रस्य वस्त्रादेर्मूल्यम् । श्रुतिर्वेतनम् । न्यासो निक्षेपः । वृथादानं वेश्यादिभ्यः प्रतिश्रुतम् । चिकप्षो द्यूतद्रव्यम् । अविवक्षिताः । अत्र पणमूल्यस्य वृद्धेरभावोक्तिः प्रवासप्रतियाचनयोरभावे वेदितव्या अन्यथा पूर्वोक्तकात्यायनवचनेन विरोधः स्यात् । न्यासस्य च वृद्ध्यभाववचनं प्रतियाचनाभावे "न वृद्धिः स्त्रीधने लाभे निःक्षिप्ते च यथास्थिते । सन्दिग्धे प्रातिभाव्ये च यदि न स्यात् स्वयं कृतम्" इति संवर्त्तवाक्ये यथास्थितमिति विशेषणोपादानाद् व्यक्तमन्यथाकरणाभावे च ज्ञातव्यम् । तथा च निश्चिप्तं वृद्धिशेषञ्चेत्यादि पूर्वोक्तकात्यायनवचनविरोधो न । कात्यायनोऽपि "वर्षशस्त्रासवद्यूते पण्यमूले च सर्वदा । स्त्रीशुल्केषु न वृद्धिः स्यात् प्रातिभाव्यागतेषु च" इति । सर्वदेत्यनेन प्रतियाचनादेः परतोऽपि वृद्धिरकृता नास्तीत्युक्तम् । यद्यपि सर्वदेति सर्वशब्दत्वात् पणप्रमूल्येऽपि प्रतियाचनादेः परस्तादकृतवृद्ध्युपरमः प्रतिभाति । तथापि पूर्वोक्तकात्यायनवचनविरोधात् न तच्छब्देना सर्वदेत्यस्य । अवश्य पूर्वोक्त एव परिहारः । एवं वर्षशोऽपि वृद्ध्यभावोक्तिः प्रतियाचनाभावे तथा च न तच्छब्देनापि । अवश्य न पूर्वोक्तात्रयवृद्धिप्रतिपादकवसिष्ठादिवचनविरोधः । अन्यत्रापि वृद्ध्यभावं व्यास आह "प्रातिभाव्यमृणं द्यूतमद्यमद्यहृतौ-

तस्य दित्सतः । न वर्धते प्रयत्नस्य दमः शुल्कं प्रतिश्रुतम्" इति । भुक्तवस्त्वभिधानेन स्थापितस्य शुल्लाधर्वस्त्रादेरुपभोगे वृद्धिर्न भवतीत्युक्तम् । अतएव गौतमः "भुक्तापिर्न वर्द्धते वस्त्रान्नङ्गारादिरिति" अगृह्णतश्च दित्सतः प्रतिदातुमिच्छोरधमर्णादुत्तमर्णोवृद्धिलोभादिशब्दान्न यदा गृह्णाति तदा तस्य कृतापि वृद्धिस्तद्दिनादारभ्य न देयेत्यर्थः । तथा च याज्ञवल्क्यः "दीयमानं न गृह्णाति प्रयुक्तं यत् स्वकन्धनम् । मध्यस्थस्थापितं तत्स्याद् वर्द्धते न ततःपरम्" इति । मध्यस्थस्थापितमिति विशेषणेनाधमर्णो यदि स्वनिकटे स्थापयति तदा भवत्येव वृद्धिरिति" । दृधैलेयगत्वद्रव्ये पु० । १०धने च राजनि० ।

वृद्धिका स्त्री वृद्धि+स्वार्थे क । वृद्धिनामकौषधे शब्दच० ।

वृद्धिजीविका स्त्री वृद्धिरूपा जीविका । ऋणदानादिषु प्रयुक्तधनेभ्यो लब्धजीविकायाम् ।

वृद्धिश्राद्ध वृद्ध्यै अभ्युदयाय श्राद्धम् । पुत्रादीनां संस्कारे पार्वणविधिके नान्दीश्राद्धे नान्दीश्राद्धशब्दे दृश्यम्

वृद्धोक्ष पु० कर्म० अच् समा० । जरद्वृषे अमरः ।

वृद्ध्याजीव त्रि० वृद्धिम् अधमर्णतः प्रयुक्तद्रव्याधिकलाभमाजीवति आ+जीव-ण्यण् । वार्द्धुषिके अमरः ।

वृध वीधौ च० उभ० अक० सेट् । वर्द्धयति ते अवीवृधत् त अववर्द्धत् त ।

वृध वृद्धौ भ्वा० आत्म० लुङि ल्रुटि ल्लुङि च उभ० अक० सेट् वृता० । वर्द्धते अवर्दिष्ट अवृधत् अवर्द्धिष्ट वृतवत् वतर्द्धति वर्द्धिष्यते । वर्द्धित्वा वृधित्वा वेट् ।

वृधसान पुंस्त्री० वृध-आन अत्वञ्च । मनुष्ये त्रि०कौ० । स्त्रियां ङीष् । [षण्ढादि० ।

वृधसानु पु० वृध-आनुक् च । १पुरुषे २पक्षे ३क्षतौ च वृन्त न० वृ-क्त नि०तुम् च । (वाँटा)फलपत्रादिबन्धने अमरः

वृन्ताक पुंस्त्री० वृन्तमकति अक-ण्वुल् । वार्त्ताकौ शब्दच० । स्त्री राजनि० स्त्रीत्वे गौरा० ङीष् ।

वृन्तिता स्त्री वृन्तं जातमस्याः तारका० इतच् । कटुकायां शब्दच०

वृन्द न० वृण्यते वृणुते वा-वृञ्-वृत वा दन् नि० । १समूहे अमरः । २दशार्बुदसंख्यायां ज्योति० ३केदारकन्यायां ४तुलस्यां स्त्री शब्दच० । ५राधिकायां स्त्री वृन्दावनम् ।

वृन्दार त्रि० वृन्दं वृन्दं अर्चति अर्च-अण् । मनोहरे शब्दच० ।

वृन्दारक पु० वृन्देन कायति कै-क । १देवे अमरः । स्वार्थे क । २मुख्ये मनोहरे च त्रि० ४यूथपतौ पु०व्याडिः ।

वृन्दावन स्त्री वृन्दायाः तपस्यार्थं तत्क्रीड़ार्थं वा वनम् या० त० । मथुरासन्निकृष्टे वैष्णवे १तीर्थभेदे गोलोकस्थे धामभेदे च "कमलांशा तस्य (केदारस्य) कन्या नाम्ना वृन्दा तपश्चिनीत्युपक्रमे "वृन्दा यत्र तपस्तेपे तत्तु वृन्दावनं स्मृतम् । वृन्दायास्तु लता क्रीड़ा तेन वा मुनिपुङ्गव ! । राधाधोड़शनाम्नां च वृन्दा नाम श्रुतौ श्रुतम् । तस्याः क्रीडा वनं रम्यं तेन वृन्दावनं स्मृतम्" ब्रह्मवै० जन्म० १७अ० । "नित्यं वृन्दावनं धाम ब्रह्माण्डोपरि संस्थितम् । पूर्णब्रह्मसुखैश्वर्यं नित्यमानन्दमव्ययम् । वैकुण्ठादि तटंयांगं स्वयं वृन्दावनं भुवि । गोलोकैश्वर्य्यञ्च यत्किञ्चित् गोकुले तत् प्रकीर्त्तितम् । वैकुण्ठादिवैभवं यत् द्वारकायां प्रकाशयेत् । यद्ब्रह्म परमैश्वर्यं नित्यं वृन्दावनाश्रयम् । तस्मात् त्रैलोक्यमध्ये तु पृथ्वी धन्येति विश्रुता । यत् स्यान्माथुरकं धाम विष्णोरेकान्तवल्लभम् । स्वस्थानमधिकं नाम धेयं माथुरमण्डलम् । निगूढ़ परमं स्थानं पूर्णब्रह्मनरंस्थितम् । सहस्रपत्रकमलाकारं माथुरमण्डलम् । विष्णुचक्रं परिभ्रमद्वारं वैष्णवमद्भुतम् । कर्णिकापत्रविस्तारं रहस्यक्रमभीरितम् । प्रधानं द्वादशारण्यं माहात्म्यं कथितं क्रमात् । भद्रःश्रीश्रलोहशभाण्डीरशमहाःतालहःखदीरकाः७। बहुलंदकुसुदंद काम्यं १०मधु११वृन्दावनं१२तथा । द्वादशैतावने संख्याः कालिन्द्याः सप्त पश्चिमे । पूर्वे पञ्च वनं प्रोक्तं तत्रास्ति गुह्यसुत्तमम् । महावनं गोकुलाख्यं रम्यं मधुवनं तथा । पूर्वं च पञ्च भद्राद्यास्तालाद्याः सप्त पश्चिमे । अन्यच्चोपवनं प्रोक्तं कृष्णक्रीड़ारसस्थलम् । कदम्बखण्डिकं नन्दवनं नन्दीश्वरं तथा । नन्दनानन्दखण्डञ्च पालाशाशोककेतकम् । सुमनस्विमादनं कैलासकृतं भोजनस्थलम् । सुखप्रसाधनं वस्त्रहरणं श्रेयशायनम् । अग्रासपूञ्च दधियामं चक्रभानुपुरं तथा । सङ्केतं विपदञ्चैव बालक्रीड़ञ्च धूसरम् । केसुड़ुमं खरोवीरसुतसुकञ्चापि नन्दनम् । इत्यमेव वने संख्यास्त्रिंशद्वोपवने कृता । पूर्वोक्तं द्वादशारण्यं प्रधानं वनसुत्तमम् । तत्रोत्तरे चतुर्थञ्च वनञ्च समुदाहृतम् । नाना विधरसक्रीडानानालीलामयस्थलम् । दक्षविश्रुत विस्ताररहस्यक्रममीरितम् । सहस्रपत्रकमलं गोकुलाख्यं महत् पदम् । तत्रोपरि स्वर्णपीठे मणिमण्डप मण्डितम् । तत्र तत्र क्रमाद्दिक्षु विदिक्षु दलसीरितम् । यद्दलं दक्षिणे प्रोक्तं परं गुह्योत्तमोत्तमम् । तस्मिन्

दले महापीठं निगमागमदुर्गमम्। योगीन्द्रैरपि दुष्प्राप्यं सर्वात्मा यत्र गोकुले। द्वितीयं दलमाग्नेयं तद्रूपस्य द्विधा तथा। निकुञ्जककुटीवीरकुटीरौ तद्दले स्थितौ। पूर्वदलं तृतीयं यत् प्रधानं स्थानमुच्यते। गङ्गादिसर्वतीर्थानां सकाशात्तत्गुणं भवेत्। चतुर्थदलमैशान्यां सिद्धपीठेऽस्तिमदम्। कामयन्त्रतना गोपी तत्र कृष्णपतिं लभेत्। वस्त्रालङ्कारहरणं तद्दले समुदाहृतम्। उत्तरे पञ्चमं प्रोक्तं दलं सर्वदलोत्तमम्। द्वादशादित्यमत्रैव दलञ्च कर्णिकासमम्। वायव्यन्तु दलं षष्ठं तत्र कालीह्रदः स्मृतः। दलोत्तमोत्तमञ्चैव प्रधानस्थानमुच्यते। सर्वोत्तमदलं श्रेष्ठं पश्चिमे सप्तमं दलम्। यत्रपत्नीगणानाञ्च तदीप्सितवरप्रदम्। अघासुरस्य निर्वाणं चक्रे त्रिदशदर्शितम्। ब्रह्ममोहनमत्रैव दलं ब्रह्महृदावहम्। नैर्ऋत्यान्तु दलं प्रोक्तमष्टमं व्योमघातनम्। शङ्खचूड़वधस्तत्र नानाकेलिरसस्थलम्। श्रुतमष्टदलं प्रोक्तं वृन्दारण्यान्तरस्थितम्। श्रीमद्वृन्दावनं धन्यं यमुनायाः प्रदक्षिणम्। शिवलिङ्गमधिष्ठाता दक्षो गोपीश्वराभिधः। तद्दक्षे षोड़शदलं श्रिया पूर्वं तदोरितम्। सर्वान्तु दिक्षु यत् प्रोक्तं प्रादक्षिण्यात्तु यथाक्रमम्। महत् पदं महद्धाम प्रधानं षोड़शं दलम्। प्रथमैकदलं श्रेष्ठं माहात्म्यं कर्णिकासमम्। तस्मिन् मधुवनं प्रोक्तं तत्र प्रादुरभूत् स्वयम्। चतुर्भुजो महाविष्णुः सर्वकारणकारणम्। तत्राधिष्ठिततद्दृष्टैव सनिश्रेष्ठ! सनातनम्। दलं द्वितीयमाख्यातं किञ्चिल्लीलारसस्थलम्। खदिरारण्यमत्रैव दलञ्च समुदाहृतम्। सर्वश्रेष्ठदलं प्रोक्तं माहात्म्यं कर्णिकासमम्। तत्र गोपर्द्धने रम्ये नित्यानन्दरसाश्रये। कर्णिकायां महालीला तल्लीलारससागरे। यत्र कृष्णो नित्यवृन्दाकाननस्य पतिर्भवेत्। कृष्णो गोविन्दतां प्राप्तः किमन्यैर्बहुभाषितैः। दलं तृतीयमाख्यातं सर्वश्रेष्ठोत्तमोत्तमम्। चतुर्थदलमाख्यातं महाद्भुतरसस्थलम्। हरिर्यत्र पतिः साक्षाच्चित्यं गोवर्द्धनं स्वयम्। कदम्बखण्डो तत्रैव पूर्णानन्दरसाश्रयः। स्निग्धं हृद्यं प्रियं रम्यं दलञ्च समुदाहृतम्। नन्दीश्वरदलं रम्यं तत्र नन्दालयः स्मृतः। कर्णिकादलमाहात्म्यं पञ्चमं दलमुच्यते। अधिष्ठातात्र गोपालो धेनुपालस्ततः परम्। दलं षष्ठं यदाख्यातं तत्र नन्दवनं स्मृतम्। सप्तमं वकुलारण्यं दलं रम्यं प्रकीर्त्तितम्। दलाष्टमं तालवनं तत्र धेनुवधः स्मृतः। नवमं कुमुदारण्यं दलं रम्यं प्रकीर्त्तितम्। काम्यारण्यं दलं हृद्यं दशमं सर्वकारणम्। ब्रह्मप्रमादनं तत्र विष्णुवृन्दं प्रदर्शितम्। कृष्णक्रीड़ारसस्थानं प्रधानं दलमुच्यते। दलमेकादशं प्रोक्तं भक्तानुग्रहकारणम्। निर्वाणं सेतुबन्धस्य नानारससमन्वितम्। भाण्डीरं द्वादशदलं वनं रम्यं मनोहरम्। कृष्णक्रीड़ारसस्तत्र श्रीदामादिभिरावृतः। त्रयोदशदलं श्रेष्ठं तत्र भद्रवनं स्मृतम्। चतुर्दशदलं प्रोक्तं सर्वसिद्धिप्रदं स्थलम्। श्रीवनं तत्र रुचिरं सर्वैश्वर्य्यस्य कारणम्। कृष्णलीलामयदलं श्रीकीर्त्तिकान्तिवर्द्धनम्। पञ्चदशं दलं श्रेष्ठं तत्र लोहवनं स्मृतम्। कथितं षोड़शदलं माहात्म्यं कर्णिकासमम्। महावनं तत्र गीतं तत्रास्ति गुह्यमुत्तमम्। बालक्रीड़ारसस्तत्र वत्सपालैः समावृतः। पूतनादिवधस्तत्र यमलार्জ্জুনभङ्गनम्। अधिष्ठाता तत्र बालगोपालः पञ्चभावदिकः। नाम्ना दामोदरः प्रोक्तः प्रेमानन्दरसार्णवः। दलं प्रसिद्धमाख्यातं सर्वश्रेष्ठदलोत्तमम्। कृष्णक्रीड़ा च किञ्जल्के विहारस्थलमुच्यते। सिद्धिप्रधानं किञ्जल्कं दलञ्च समुदाहृतम्॥ पद्मपु० पा०ख०।

वृन्दिष्ठ त्रि० अतिशयेन वृन्दारको मुख्यः इष्ठन् वृन्दादेशः। अतिशयमुख्ये "वृन्दिष्ठमाचीत् वसुधाधिपानाम्" इति भट्टिः। ईयसुनि वृन्दीयानप्यत्र त्रि० स्त्रियां ङीष्।

वृश्च वृतौ दिवा०पर०सक० सेट्। वृश्यति अवृश्यत् अवश्रीत् पुषादित्वमित्येके तेन अवृश्दित्येव।

वृश्च पु०वृश्च-क। १वासकवृक्षे भरतः। २छन्दूरे पुंस्त्री०शब्दच०—स्त्रियां ङीष्। ३ओषधिभेदे स्त्री रत्नादिः।

वृश्चिक पु० व्रश्च-किकनू। (विछा) १कीटभेदे राजनि०। कीटशब्दे दृश्यम्। २शुककीटे (शुयापोका) अमरः। मेषादितः ३अष्टमे राशौ ज्यो० ४ओषधिभेदे मेदि०। ५मदनवृक्षे ६कर्कटे ७गोमयकीटे च भरतः। दनालिके संचिप्तप्रसारः।

वृश्चिकराशिश्च २१६०० कलात्मकस्य राशिचक्रस्य १२६° कलोपरि १८०० कलात्मकः विशाखाशेषपादानुराधाज्येष्ठानक्षत्रात्मकः स च भौमोदयः श्वेतवर्णः जलराशिः उत्तरदिक्पतिः कफप्रकृतिः जलमयः बहुपुत्रः बहुस्त्रीसङ्गः चिक्कणवर्णः विप्रवर्णः सौम्यः लङ्घनाकृपः समराशिः स्थिरः पुष्करसंज्ञः सरीसृपजातिः रात्र्यः दृहज्जातके दृश्यम्।

वृश्चिकप्रिया स्त्री वृश्चिकस्य शुक्रकीटस्य प्रिया। पूतिकायाम् शब्दच०।

वृश्चिकवर्णी स्त्री वृश्चिकस्य कर्ण इव पर्णं यस्याः। आखुकर्ण्यां राजनि०। [भेदे राजनि०।

वृश्चिका स्त्री वृश्चिकः तत्प्रियमस्त्यस्या अच्। (बिछाती) लुपभेदे रत्नमा०।

वृश्चिकाली स्त्री वृश्चिक इवाचरति पचाद्योति सर्पणे वेदनायां अच् गौरा० ङीष्। (बिछाती) लुपभेदे रत्नमा०।

वृश्चिपत्री स्त्री वृश्चिक इव पर्णं विषाक्तमस्य वृषो० कत्वोपः ङीष्। वृश्चिकाख्यायाम् रत्नमा०।

वृश्चीर पु० वृश्च-कीरच्। श्वेतपुनर्नवायाम् रत्नमा०।

वृष सेचने सक० भ्वा० पर० प्रजननसामर्थ्ये ऐश्वर्ये अक० सेट्। वर्षति अवर्षीत्। चटित् क्त्वा वेट्।

वृष प्रजननसामर्थ्ये ऐश्वर्ये चुरा० आत्म० सक० सेट्। वर्षयते अवीवृषत-अवर्षयत।

वृष पु० वृष-क। १वृषभे पुङ्गवे अमरः २मेषादितो द्वितीये राशौ ज्यो०त०। ३पुरुषभेदे ४एकाटशमन्वन्तरकालीने ५इन्द्रे ६धर्मे गरुडपु० ८अ०। ७शृङ्गिवाल्मे ८मूषिके ९शुक्रे १०वास्तुस्थानभेदे ११वासकवृक्षे मेदि०। १२शतावरीलटा०। १३कामे १४ननयुक्ते त्रि०विश्वः १५क्षुपभनामौषधौ राजनि०। १६मयूरपिच्छे १७श्रीकृष्णे च त्रिका०। वृषराशिश्च २१६०० कलात्मकस्य राशिचक्रस्य १८००कलोपरि १८०० कलात्मकः। कृत्तिकाशेषत्रिपादरोहिणीमृगाद्यार्द्धात्मकः स च सौम्यः अङ्गना खमः स्थिरः पुङ्ग रश्चः चतुष्पाद् निशाचरः याम्य दिवारात्रः क्षुद्रः दक्षिणदिगीशः रात्रिबलः पृष्ठोदयः शीतस्वभावः वातप्रकृतिः सुन्दरमुखामो श्वेतवर्णः वैश्यजातिः मङ्गलकरः मध्यमस्त्रीसङ्गः मध्यमप्रजश्च बृहज्जा० कूर्मं दशमम्। पुरुषविशेषलक्षणञ्च "बहुगुणबहुवस्त्रः शोभनामो नताङ्गः सकलरुचिरदेहः सत्यवादी वृषो नां रतिम० चक्रम। १८अरिष्टाक्षरे च क्षि वृषाकारेण छन्दोवत्ते गोछदने प्रहृतः क्षणेन छतः। ततः कथा हरिव० ७८अ०। वृषस्य शुभाशुभलक्षणं शोभनशब्दे २७१८ पृष्ठादौ दर्शितम्। वृषादि०आद्युदात्तः।

वृषकर्णी स्त्री वृष इव सुदर्शनः कर्णोऽस्या ङीष्। (सुदर्शनलुच) ख्यातायां लतायाम् रत्नमा०।

वृषगन्धा स्त्री वृषस्य गन्धो लेपो यत्र। वस्त्राख्यां राजनि०।

वृषण पु० वृष-क्यु। १अण्डकोषे अमरः। २वीर्यान्विते त्रि०

"स्थूलशिक्षो दरिद्रः स्यात् दुःखे कृच्छ्रवणोभवेत्। विषमे स्त्रीवपनो वै नृपः स्यात् वृषणे समे। प्रलम्ववृषणोऽल्पायुर्निर्द्रव्यो मध्यभिर्भवेत्" गरुड़पु० ६२अ०।

वृषणध्वज पु० कर्म० शक०। कामार्त्तयुक्ते इन्द्रादौ त्रिका०।

वृषणवत् त्रि० वृषन्+मतुप् मस्य वः न नलोपः णत्वम्। वर्षणयुते स्त्रियां ङीप्। [पकरणे रघादौ लटा०।

वृषणस्थ त्रि० वृषा वस्तु यस्य न नलोपः णत्वम्। इन्द्रयोवृषदंशक पुंस्त्री० वृषान् मूषिकान् दशति दंश-ण्वुल्। बिड़ाले अमरः स्त्रियां ङीष्।

वृषध्वज पु०वृषो वृषभो मूषको धर्मोवा ध्वजो यस्य। १शिवे अमरः वृषकेतनादयोऽप्यत्र। २केरले ३पुराणकर्मयुते च विश्वः। [गौरा० ङीष्। नागरमुस्तायाम्।

वृषध्वाङ्क्षी स्त्री वृषो वलवान् ध्वाङ्क्षः काको यस्याः ५त०। वृषन् पु० वृष-कनिन्। १इन्द्रे २कर्णे ३दुःखे ४वेदनाख्याने मेदि०। ५वृषे ६अश्वे च हेमच०।

वृषनाशन पु० वृषान् मूषिकान् नाशयति नश-णिच् ल्यु। १बिड़ाले शब्दमा०। २अरिष्टरूपवृषनाशके श्रीकृष्णे हरिव० ७८अ०।

वृषपर्णी स्त्री वृषस्य मूषिकस्य कर्णइव पर्णमस्याः। (चन्दूरकाकी) १आखुकर्ण्याम् रत्नमा०। २सुदर्शनीवृक्षे राजनि०।

वृषपर्वन् पु० वृषे पर्व यस्यो यस्य। १शिवे २दैत्यभेदे च। वृषं बलकरं पर्व यस्य। ३भृङ्गारदण्डे ४केशरी च विश्वः।

वृषभ पु० वृष-अभच् किच्च। १वृषे २श्रेष्ठे ३वैद्यभेदे रोतिभेदे मेदि०। ४जिनभेदे हेमच०। ५कर्णच्छिद्रे ६क्षुपभनामौषधे च रत्नमा०। [दयोऽप्यत्र।

वृषभगति पु० वृषभेण गतिरस्य। शिवे हरा० वृषभयानादयोऽप्यत्र।

वृषभध्वज पु० वृषभो ध्वजोऽस्य। शिवे वृषभकेतनादयोऽप्यत्र

वृषभाक्षी स्त्री वृषभस्य वृक्षीव पुष्पमस्याः अच् समा०ङीष्। इन्द्राक्षाम् राजनि०।

वृषभानु(न) पु०राधिकायाः पितरि। ब्रह्मवै०ज० १७अ०।

वृषभानु(न)सुता स्त्री वृषभानु+सुता ६त०। राधिकायाम्। [त्रिका०।

वृषभासा स्त्री वृषा इन्द्रेण भासते भास-अच्। अमरावत्याम्

वृषल पु० वृष-कलच्। १म्लेच्छे २शूद्रे ३दुष्टे ४चन्द्रगुप्ते नृपे च मेदि०। ५अधार्मिके लटा०।

वृषली स्त्री "पितृमेधे च नारी रजः पर्य्युषितसंस्कृता। भ्रूणहत्या पितृमत्याः या कन्या वृषली स्मृता" इत्युक्तायां पितृमेधे दुष्टसंस्कारायामनूढायां १कन्यायाम्। वृषल+भावार्थे जातौ वा ङीष्। २वृषलजातिस्त्रियाम्।

शतब्राह्मणाच्च । "ब्रह्महा वृषलीपतिः" इति "वृषली-फेनपीतस्य" इति च मतुः ।

वृषलोचन पु० वृषस्येव लोचनं यस्य । १मूषिके । ६त० । २वृषनेत्रे न० । ६ब० । ३वृषतुल्यनेत्रे त्रि० ।

वृषवाहन पु० वृषो वाहनमस्य । शिवे वृषभवाहनादयोऽप्यत्र

वृषस्कन्धु पु० ६त० । चीत्कणे त्रिका० वृषस्कन्धादयोऽप्यत्र ।

वृषस्यन्ती स्त्री वृषेव जघनमिच्छति वृष+जनाधर्ं क्यच् शतृ-ङीप् । कासक्यां अमरः "लक्ष्मणा सा वृष-स्यन्ती" भट्टिः । [त्र्यां अमरः । २कपिकच्छ्यां हेमच० ।

वृषा स्त्री वृषः मूषिकस्तद्वत् पर्णेऽस्याः अच् । १मूषिकप-

वृषाकपायी स्त्री वृषाकपेः पत्नी ङीष् ऐङ् च । १लक्ष्म्यां २गौर्यां अमरः । ३खाडायां ४गव्यां ५जीवन्त्यां ६वृ-तावर्यां च मेदि० ।

वृषाकपि पु० वृषं धर्मं न कम्पयति न+कपि-इन् नञोपः । १महादेवे २विष्णौ ३अग्नौ मेदि० ४इन्द्रे ऊीरस्वामी ।

वृषाकर पु० वृषस्य सामर्थ्यस्याकरः । माघे राजनि० ।

वृषाङ्क पु० वृषः अङ्कोऽस्य । १शिवे २भल्लातके ३वृक्षे च ४साधौ पुंस्त्यपति च मेदि० ।

वृषाहार पुंस्त्री० वृषो मूषिक आहारो यस्य । विड़ाले हारा०

वृ(वृ)षि(षी) स्त्री वर्ण्यादित्वे ब्रुवन्तोऽस्यां वीदन्ति वृद्-डट् ब्रुवः वृ आदेशः ङीष् पृषो० अन्तःस्थादित्वे वृष-कि वा ङीष् । व्रतिनां कुशमयासनभेदे अमरः ।

वृषोत्सर्ग पु० उत्+सृज-घञ् ६त० । मृताद्युद्देशेन तत्-प्रत्यादिभिः क्रियमाणे विधानेन वृषस्य त्यागे तद्विधिर्यथा शु०त० "कालविवेके ब्रह्मपु० "एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः । प्रेतलोकं परित्यज्य स्वर्गलोकं स गच्छति । आद्यश्राद्धे त्रिपक्षे वाऽब्दे मासि च वत्सरे । वृषोत्सर्गस्य कर्त्तव्यो यावच्च स्यात् सपिण्डता । सपिण्डीकरणादूर्द्धं कालोऽस्यः शास्त्रचोदितः" । यस्य प्रेतस्येति सामान्यश्रुतेः पितृभिन्नस्यापि वृषोत्सर्गः प्रतीयते । त्रिपक्षोऽत्र चान्द्रः आद्धे तथादर्शनात् आद्धप्रदीपे जातू० "ऊर्द्धं त्रिपक्षात् यत् श्राद्धं मृताहन्येव तल्लभेत्" । अत्र पूर्वमृततिथिमादाय त्रिपक्षगणना मासिकानां मृततिथौ विधानात् त्रिपक्षश्राद्धमपि मृताहे कार्य्यम् । अत्र वत्सर इत्युपादानात् विष्णुधर्म्मोत्तरीये मृताहे इति पदं पूर्वसंबन्धात् मृततिथिपरम् । तदयथा वृषोत्सर्गमधिकृत्य विष्णुः "विष्णव वृतये चैव मृताहे बान्धवस्य च । मृताहो यस्य यस्मिन् वा तस्मिन्नहनि कारयेत्" । यस्य बान्धवस्य पित्रादेर्यस्मिन्नहनि मृताहः तस्मिन्नो कर्त्तव्यमित्यर्थः । (तस्मिंश्च प्रथमादिकला ह्रासवृद्ध्यन्यतरक्रियया सजातीयतिथिस्तेन त्रिपक्षश्राद्धे पक्षान्तरत्वेऽपि न क्षतिः) । छन्दोगप० "वृषोत्सर्गविधिं व्याख्यास्यामः "कार्त्तिक्यां पौर्णमास्यां रेवत्यामश्वयुज्यां दशाहे गते संवत्सरेऽतीते वा" । अत्र मृततिथिमादाय वत्सरगणना दशाहवदित्यविरोधः । एकादशाह इति श्राद्धश्राद्ध इति च अशौचान्तद्वितीयदिनपरम् । अशौचान्तात् द्वितीयेऽङ्गोत्सृष्टपक्षे "वृषोत्सर्गश्च कर्त्तव्यो देया च कपिला शुभा" मत्स्यपु० एकवाक्यत्वात् । प्रेतवृषोत्सर्गं वृद्धिश्राद्धं न कार्य्यम् "नावाकं संवत्सरात् वृद्धिर्वृषोत्सर्गं विधीयते । सपिण्डीकरणादूर्द्धं वृद्धिश्राद्धं विधीयते" इत्यनोक्तत्वात् । वृषलक्षणमाह कर्म्मप्र० कात्या० "अव्यङ्गो जीववत्सायाः पयस्विन्याः सुतो बली । एकवर्णो द्विवर्णो वा यो वा स्याद्वृषकाकुदः । ऊनाद्यूनतरो यस्तु स्थूलो वा नीच एव वा । स्वभावतस्तु सप्त परानुवृत्तिकरो वृषः" । अष्टकासुतः अष्टकातिथिषु जातः "वृष एव न मोक्तव्यो न सन्धार्यो गृहे क्वचित्" मत्स्यपु० । वत्सतरी-विशेषणति कात्या० "अथतो लोहिता पत्नी पार्श्वाभ्यां नीलपाण्डुरे । पृष्ठतस्तु भवेत् कृष्णा वृषभस्य च लोचने । चतस्रो वत्सिका भद्रा हे वा सन्धावतोऽपि वा । वृद्धं सर्वाङ्गसम्पूर्णं कन्या सा वत्सिका भवेत्" देवीपु० । अत्र वृषभवत इत्युक्त्या एकयापि वत्सतर्या वृषोत्सर्गः सिध्यति । "अङ्गित्वोत्सृज्यते पूर्वं गार्हपत्यङ्गु सर्वतः । तमेव वामतश्चक्रं याम्ये मूलं समालिखेत् । धातुना हेमतारेण त्र्यायसेनाथवाऽङ्कयेत्" देवीपु० । प्रेतोद्देश्यकवृषोत्सर्गस्य मलमासादावपि कर्त्तव्यः "अशौचान्तेऽपि कर्त्तव्यं वृषो-त्सर्गादिकं बुधैः । मलिम्लुचादिदोषस्तु न श्राद्धस्यैव कर्त्तव्यतानिषेधस्तूपक्रम्य प्रवृत्तः यथा "श्राद्धस्य स्वीकृतिः काम्यवृषोत्सर्गस्य निष्क्रयः" । अत्र काम्यत्वं विशेषणात् नित्यस्य न निषेधः "अशौचान्तात् द्वितीये-ऽङ्गि यस्य नोत्सृज्यते वृषः । न तस्य निष्कृतिर्दृष्टा दृष्टैः श्राद्धशतैरपि" इत्युक्तस्य नित्यत्वम् चन्द्रनर्घेतुग्रन्थे द्रष्टव्यम् ।

वृष्टि स्त्री वृष-क्तिन् । १वर्षणे अमरः । कर्मणि क्तिन् । मेघादिभिः २सिच्यमाने देशे । तत्कारणं यथा "अनुवन्तु परमार्थञ्च किमिन्द्रवृष्टेश्च । छन्दांसि

जायते तोयं तोयात् शस्यानि प्राणिनः। तेभ्योऽन्नानि फलान्येव तेभ्यो जीयन्ति जीविनः। सूर्य्यसत्त्वं नीरत्त्व काले तस्मात् सत्त्वभवः। सूर्य्यो मेघादयः सर्वे विधात्रा ते नियोजिताः। यत्रावदे यो जलधरो गजत्व सागरोभवत्। शस्याधिपो नृपो मन्त्री विधात्रा ते निरूपिताः। जलदकानां शस्यानां नृणानाच्च निरूपितम्। यदृदेऽयदृदेऽस्येव तत् सर्वं कल्पे कल्पे युगे युगे। हस्तो सत्तुद्वादादाय करेण जलमीप्सितम्। दत्त्व हनाय तद्व्याद्वातेन प्रेरितो घनः। स्थाने स्थाने पृथिव्याञ्च काले काले यथोचितम्। ईश्वरोक्षय विभूतं गूर्णं तत्प्रतिबन्धकम्। भूतं भव्यं भविष्यञ्च सर्वत्र क्षुद्रञ्च सध्यमम्। धात्रा निरूपितं कर्म केन तात! निवार्य्यते" ब्रह्मवै० जन्म० २१ अ०। "अग्नौ प्राप्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजा" गीता। "सत्तवृष्टिर्हूषकानि यथा मयूराः सनयित्नूनां शब्देन हृषिता रुतः। केकायन्ति प्रतिनदे सततं वृष्टिलुचकाः। मेघात्सुकानां मधुरध्वानकानां मनोहरः। श्रूयतां मेघमन्त्राणां वृष्टिसंचिधिरुच्यते। गगने यत्रकामेन कृतं मासमतमास्पदम्। धाराधारपरैस्तोयं क्षेत्तुं प्रति यथोद्गतः" कालिकापु० १५ अ०।

वृष्टिघ्नी स्त्री वृष्टिं हन्ति कारणत्वेन हन्ति हन-क ङीप्। हस्त्रौलायाम् शब्दच०।

वृष्टिजीवन त्रि० वृष्टिः वृष्टिजलमेव जीवनं पालनोपायो यस्य। १वृष्टिजलमात्रजीविनि चातके। २देवमातृके देशे हेमच०। [हारा०। २वृष्टिभवे त्रि०।

वृष्टिभू पु० वृष्टौ तदुपलक्षिते काले भवति भू-क्विप्। १मेघे

वृष्टिवैकृत न० हृत०। उपद्रवसूचके वृष्टिविकारे यथोक्तं वृ० सं० ४६ अ०

"दुर्भिक्षमनावृष्ट्याऽतिवृष्ट्या चुद्भयं परचक्रम्। रोगो व्यन्तरुपसर्गा नृपवधोऽनभ्रतायाम्। भीतिर्व्याधिप यो नो सस्यदलेषु च सस्यहन्तेषु। सस्यासाद्रुद्भयं रोगभयं दैवजनितं च। अत्यर्थं सप्ताहं प्रबलवर्षं प्रधानन्तपमरणम्। रक्ते शस्योद्योगो मांसास्थिक्षया टिभिश्चेरकः। धान्यक्षिरण्यत्वक्फलकुसुमादीर्वपितैर्भयं विद्यात्। अङ्गारपांशुवर्षं विनाशमायाति तज्जगत्सम्। उपला विना जलधरैर्विकृता वा प्राणिनो यदा वृष्टाः। क्षिप्रं व्याप्तिवृष्टौ सस्यानामीतिमञ्जननम्। क्षीरक्षतक्षौद्राणां दग्धो रुधिरोष्णयोर्वा वर्षे। देशविनाशो ज्ञेयोऽस्रवर्षे चापि नृपयुद्धम्। यद्यमलेऽर्के छाया न दृश्यते दृश्यते प्रतीपा वा। देशस्य तदा सुमहद्भयमायातं विनिर्दिश्यम्। अभ्रे नभसीन्द्रधनुर्दिवा यदा दृश्यतेऽथ वा रात्रौ। प्राच्यामपरस्यां वा तदा भवेत् चुद्भयं सुमहत्। सूर्य्येन्दुपर्जन्यसमीरणानां योगः स्मृतो वृष्टिविकारकाले। धान्यान्नगोकाञ्चनदक्षिणाश्च देयास्ततः शान्तिमुपैति यागम्"।

वृष्णि पु० वृष-नि किच्च। १यादववंशेऽ नृपभेदे शब्दच०। २श्रीकृष्णे ३मेघे अमरः। ४चक्रे ५प्राकारे च त्रि० शब्दर०।

वृष्णिगर्भ पु०वृष्णिः यादवकुलं गर्भो यस्य। श्रीकृष्णे हारा०

वृष्य पु० वृषाय हितो यत् वृष-क्यप् वा। १माषे हेमच०। २शुक्रवृद्धिकारके त्रि० भावप्र०। ३वाजीकरणे न० ४आमलक्यां ५शतावर्य्यां ६वृषभनामौषधौ च स्त्री राजनि०। ७वृद्धिनामौषधौ रत्नमा०। [राजनि०]

वृष्यकन्दा स्त्री वृष्यः शुक्रवर्द्धकः कन्दो यस्याः। विदार्य्यांम् वृक्षम्। अतिबलायाम् राजनि०। कन्दभावे वृष्यगन्धा हृद्दारके स्त्री शब्दच०। [वृष्यवल्लिका तत्रैव स्त्री।

वृष्यवल्ली स्त्री कर्म०। १विदार्य्यांम् राजनि०। स्वार्थे क हृस्वः। वृह दीप्तौ वा चु० उभ०सक० पक्षे स्वा० पर० दृंहत्। दृंहयति ते अवदृंहत् त। दृंहति अदृंहीत्।

वृह वृद्धौ शब्दे च अक० भ्वा० पर० सक० सेट्। वर्हति दृरित् अवहृत् अवर्हीत्। [दृंहित्। दृंहति अदृंहीत्

वृह ध्वनौ हस्तिध्वनौ वृद्धौ च भ्वा०पर० पर०अक० सेट्। वृह वृद्धौ भ्वा०पर०सक० सेट्। वर्हति अवर्हीत्।

वृह उद्यमे तु०पर०अक०वेट्। वृहति। अवर्हीत्-अवृहत्।

वृह वृद्धौ भ्वा०आत्म० सक० सेट् दृंहित्। दृंहते अदृंहिष्ट।

वृहच्चक्षु पु० वृहती चक्षुरिव मञ्जरी यस्य। महाचक्षुषाके राजनि०। [१फलपूरे शब्दचि०। २उदारचित्तयुते त्रि०।

वृहच्चित्त पु० वृहत् उदारं चित्तं यस्मात् ५ब०यद्वा वृह०।

वृहच्छल्क पु० वृहत् शल्कोऽस्य। चिङ्गटमत्स्ये जटा०।

वृहत् त्रि०वृह-अति। महति अमरः स्त्रियां गौरा०ङीष्।

वृहती स्त्री वृहत्+गौरा० ङीष्। १महत्यां स्त्रियां २क्षुद्रवार्त्ताक्यां राजनि०। ३वारिधान्यां ४वाद्ये ५कण्टिकारिकायाम् मेदि०। हृनव चरणादके छन्दोभेदे वृ०र०। हंस्यां कन् हुस्वः। उत्तरीयवस्त्रे स्त्री अमरः।

बृहतीपति पु० बृहतीनां वाचां पतिः। बृहस्पतौ हेमच०।
बृहत्कन्द पु० बृहत् कन्दो यस्य। १गृञ्जने रत्नमा०। २विष्णुकन्दे च राजनि०।
बृहत्काय पु० कर्म०। (खागड़ा) दृणभेदे हारा०।
बृहत्कालयाक पु० कर्म०। (बड़ कालकासुन्दे) याकभेदे त्रिका०।
बृहत्कुक्षि पु० बृहत् कुक्षिर्यस्य। तुन्दिले (भुँड़े) अमरः।
बृहत्ताल पु० कर्म०। हिन्ताले राजनि०।
बृहत्तिक्ता स्त्री कर्म०। पाठायाम् (आकनादि) राजनि०।
बृहत्तृण पु० बृहत्तृणं यत्र। वंशे शब्दच०।
बृहत्त्वच् पु० बृहती त्वक् यस्य। (छातियान) वृक्षे रत्नमा०
बृहत्पत्र पु० बृहत् पत्रमस्य। १हस्तिकन्दे (छातिकान्दा) राजनि०। २सिंपर्णिकायां स्त्री राजनि०।
बृहत्पाटलि पु० च० पट-अलि कर्म०। धुस्तूरवृक्षे त्रिका०।
बृहत्पाद त्रि० बृहत् पादो मूलमस्य। वटवृक्षे शब्दच०।
बृहत्पालिन् पु० बृहतः पालयति पाल-णिनि। वनजौरके राजनि०।
बृहत्पीलु पु० कर्म०। महापीलौ राजनि०।
बृहत्फला स्त्री बृहत् फलं यस्याः। १कटुतुम्बयाम् २महेन्द्रवारुण्यां ३कुष्माण्ड्यां ४महाजम्बां च राजनि०।
बृहत्साम न० कर्म०। "त्वामिद्धि हवामहे" इत्यृचि गीयमाने साम्नि "बृहत्साम तथा साम्नाम्" गीता।
बृहदङ्ग पुंस्त्री० बृहदङ्गमस्य। गजे शब्दच० स्त्रियां ङीष्।
बृहदम्ल पु० कर्म०। (कामरङ्गा) वृक्षे शब्दच०।
बृहदेला स्त्री कर्म०। स्थूलैलायाम् राजनि०।
बृहद्गुह पु० काश्यदेशे त्रिका०। स च हिमालयस्य पश्चादुत्तरस्यां मालवदेशसन्निकृष्टः।
बृहद्गोल न० कर्म०। (तरमुज) लताफले शब्दच०।
बृहद्दल न० बृहत् दलमस्य। १पट्टिकालोध्रे २हिन्ताले च राजनि०।
बृहद्दल न० कर्म०। महाखाङ्गे त्रिका०।
बृहद्भानु पु० बृहद्भानुः किरणो यस्य। १अग्नौ २चित्रकवृक्षे च अमरः।
बृहद्रथ पु० बृहत् रथोऽस्य। १इन्द्रे २यज्ञपात्रभेदे ३शाकभेदे च।
बृहद्रावित् पु० बृहत् रौति-रु-णिनि। क्षुद्रोलूके राजनि०।
बृहद्वल्क पु० बृहत् वल्कमस्य। पट्टिकालोध्रे राजवल्लभः।
बृहद्वात पु० बृहत् वातो धातुभेदो यस्मात् ५ब०। (देधान) वृक्षे रत्नमाला।
बृहद्वारुणी स्त्री कर्म०। महेन्द्रवारुण्याम् राजनि०।
बृहद्बीज पु० बृहत् बीजमस्य। खासातके शब्दच०।
बृहन्नल पु० बृहत् नलो यस्य। महापोटृशाके मेदि०।
बृहन्नला(डा) पुंस्त्री० बृहत् नलो यस्य वा लस्य डः। अर्जुने हेमच० विराटपर्वणि तत्कथा दृश्या।
बृहस्पति पु० बृहत्याः वाचः पतिः षष्ठी०नि०। १जीवे देवाचार्ये अमरः २यज्ञभेदे स्मृ०त्रि०खगौजश्शब्दे तत्कर्त्तादिमानं तद्रूपादि च यज्ञशब्दे दृश्यम्। बृहस्पतिना च बौद्धधर्मः प्रवर्त्तितो यथोक्तं मत्स्यपु०२४अ० "ततो बृहस्पतिः शक्रमकरोद्बुद्धरूपिणम्। यज्ञश्चाग्निविधानेन पौष्टिकेन च कर्मणा। गत्वाथ मोहयामास रजिपुत्रान् बृहस्पतिः। जिनधर्मं समास्थाय वेदबाह्यं स वेदवित्। वेदत्रयी परिभ्रष्टांश्चकार धिषणाधिपः। वेदबाह्यान् परिज्ञाय हेतुवादसमन्वितान्। जघान शक्रो वज्रेण सर्वधर्मबहिष्कृतान्"। बृहस्पतिसवः यज्ञभेदः।
बृ वरणे क्र्या० पर० उभ० सक० सेट्। वृणाति वृणीते अवारीत् अवरिष्ट-अवरीष्ट अवूर्त्त। वरतः।
वे स्तौ भ्वा०उभ०यजा०सक० अनिट्। वयति ते अवाशीत् अवात या वयादेशः उवाय ऊयतुः ऊयतुः।
वेग पु०विज-घञ्। १प्रवाहे हेमच०। २जवे अमरः ३महाकालफले मेदि० ४रेतसि हेमच०। ५मूलविष्टादिनिःसारक्रियायां न्यायोक्ते संस्कारभेदे च
"स्पर्शादयोऽष्टौ वेगाख्याः संस्कारो जडतो गुणाः"।
"क्षितिर्जलं तथा तेजः पवनो मन एव च। परापरस्मूर्तत्वक्रियावेगाश्रया अमी" भाषा० तस्य क्षित्यादिगुणतोक्ता। "स्वभावतः प्रवृत्तानां मलादीनां जिजीविषुः। न वेगं धारयेद्धीरः कामादीनाञ्च धारयेत्" राजनि०।
वेगसर पुंस्त्री०वेगेन सरति सृ-ट। वेगगामिहये १जवसरे हेमच०। स्त्रियां ङीष्। २वेगगामिमात्रे त्रि० स्त्रियां ङीष्। [२वेगवति त्रि० अमरः स्त्रियां ङीष्।
वेगिन् पु वेग+अस्त्यर्थे इनि। १श्येनविहगे राजनि०।
वेचा स्त्री विच-पृषकत्वे अच। वेतने हेला०।
वेजानी स्त्री विज-अच तमानयति आ-नी-ड गौरा० ङीष् सोमराज्याम् शब्दच०।
वेड न० विड-अच्। १सन्दानिच्छिद्रबन्धने हेमच० २नौकायां स्त्री हेमच०।
वेडमिका स्त्री रोटिकाभेदे भावप्र० कृतान्नशब्दे दृश्यम्।
वेण निशामने वाद्यादाने गतौ ज्ञाने चिन्तायाञ्च भ्वा० उभ०

सक० सेट्। वेष्टति ते। अवेषीत् अवेष्टिष्ट। वर्दित वर्दिन् न छुप्तः।

वेण पु० वेष्-अच्। १वर्णसङ्करजातिभेदे "वैदेहकेन त्व मम्बष्ठ्यामुत्पन्नो वेण उच्यते" मनुः। २पृथुराजपितरि नृपभेदे "सनृपुत्रेण तु ज्ञातेन वेणोऽपि ३नदीभेदे स्त्री। त्रिदिवं ययौ" विष्णुपु०। दन्त्यान्तत्वमस्येत्यन्ये।

वेणि(णी) स्त्री वेष्-इन् वा ङीप्। १केशरचनाभेदे अमरः २जलसमूहे जटा०। ३ततप्रवाहे हेमच०। ४देवताड़म्बरे अमरः। ५नदीभेदे तदुत्पत्तिकथा पद्मोत्तर० १५६अ०। इदमुच्चारणसमये सरस्वतीमेलनस्थाने च। प्रयागशब्दे दृश्यम्।

वेणीर पु० वेण-ईरन्। अरिष्टवृक्षे (निम) शब्दच०।

वेणु पु० वेण-उण्। १वंशे अमरः। २तद्विकारे वंशीवाद्ये च शब्दच०। "मा पूरय वेणुम्" इत्युद्भटः। ३नृपभेदे मेदि०।

वेणुज न० वेणुरिव वेणोर्विकारो वा कन्। तोक्ते हेमच०। (पाचनवाड़ि)।

वेणुकर्कर पु० वेणुरिव कर्करः। करवीरवृक्षे त्रिका०।

वेणुज पु० वेणुतो जायते जन-ड। १वेणुजाते यवाकारे तण्डुले राजनि०। २वंशजाते दण्डादौ त्रि०।

वेणुधा पु० वेणुं वंशीं धमति धा-क। वेणुवादके अमरः।

वेणुन न० वेण-उनन्। मरिचे रत्नमा०।

वेणुपत्री स्त्री वेणोरिव पत्त्रमस्याः। वंशपत्रीवृक्षे रत्नमा०।

वेणुयव पु० वेणुजातो यव इव। १वंशजाते २तण्डुलाकारे पदार्थे राजनि०। [ण्वुल्। वेणुवादक तत्रैव त्रि०।

वेणुवाद त्रि० वेणुं वादयति वद-णिच्-ण्। वेणुवादके

वेणुवीज न० ६त०। वेणुजाते यवाकारे पदार्थे राजनि०।

वेतन न० व्यज-ल्युट् वीभावः। १क्रतकर्मणोभृतौ अमरः। भृतिशब्दे दृश्यम्। २जीवनोपाये हेमच०।

वेतनानपाकर्म्मन् न० ६त०। व्यवहारभेदे सत्यरूपादिके वीरमि० उक्तं यथा नारदः "भृतानां वेतनस्योक्तो दानादानविधिक्रमः। वेतनस्यानपाकर्म तद्विवादपदं स्मृतम्"। वेतनं कर्ममूल्यं तस्यानपाकर्म भृत्याय समर्पणं समर्पितस्य वा पदार्थस्य वर्त्तनम्। तत्र समर्पणे विशेषमाह स एव "भृत्याय वेतनं दद्यात् कर्मस्वामी यथाक्रमम्। आदौ मध्येऽवसाने च कर्मणो यदिनिश्चितम्"। तस्यमेतावद्दद्यं दास्यामीति यद्वेतनं परिभाषातो निश्चितं तच्चिधा विभज्य कर्मण आदिमध्यान्तेषु त्रिषु कालेष्वन्यतमकाले वा दद्यादित्यर्थः। एतच्चैतावद्वेतनं दास्यामीति भाषायाः सत्त्वे। असत्त्वे त्वाह स एव "भृतावनिश्चितायां तु दशभागमवाप्नुयुः। लाभं गोवीर्य्यशस्यानां वणिग्गोपकृषीवलाः" इति। दशभागं दशमभागङ्गोवीर्य्यं पाल्यमानगवादिभवस्यार्थः। यदि कर्मस्वामी भृत्याय दशमभागन्न प्रयच्छति तदाऽसौ राज्ञा दाप्य इत्याह याज्ञवल्क्यः "दाप्यस्तु दशमभागं वाणिज्यपशुगच्छतः। अनिश्चित्य भृतिं वस्तु कारयेत् स नृपोचितां" इति। यस्तु स्वामी वेतनपरिच्छेदमकृत्वैव भृत्यं कर्म कारयति स तस्माद् वाणिज्यपशुगम्यलक्षणात् कर्मणः सकाशाद् यल्लब्धं तस्य दशमं भागं भृत्याय नृपोचितां राज्ञा दापनीय इत्यर्थः। यत् तु "त्रिभागं पञ्चभागं वा गृह्णीयात् मौरवाहृतः" इति बृहस्पतिवचनं तदुच्चायासबाध्यारूढक्षेत्रविषयम्। व्यवस्थितविकल्पस्यायम्। कथमत्र व्यवस्थेत्याकाङ्क्षायामाह स एव "भक्ताच्छादृतः सीरी भागं गृह्णीत पञ्चमम्। जातश्रमात्त्रिभागं तु प्रगृह्णीयाद्धताहृतः" इति। अशनाच्छादनाभ्यां भृतः क्रीतवेतो लाङ्गलविकृष्टक्षेत्रजातश्रमात् पञ्चमभागं गृह्णीयात्। लाभ्यमभृतस्तु तृतीयं भागमित्यर्थः। अथ वा यत्रैतावद्दास्यामीति नास्ति परिभाषा तत्र इदमनुक्तं दृष्टव्यम् "सकृद्दानकृशला देशकालार्थदर्शिनः। नियच्छेयुर्भृतिं यान्तु सा स्यात् प्रागकृता तदा" इति। एतावद्दास्यामीति परिभाषितेऽपि क्वचित्ततो न्यूनमपि स्वामिभाषापरिकल्पितं देयं क्वचित्ततोऽधिकमपि देयमित्याह याज्ञवल्क्यः "देशं कालञ्च योऽतीयाल्लाभं कुर्य्याच्च योऽन्यथा। तत स्यात् स्वामिनश्चान्दोऽधिकं देयं कृतेऽधिके" इति। यो भृत्यः स्वाम्यनुज्ञां विना स्वातन्त्र्येण वाणिज्यादिकर्मणः फलसाधकत्वापादकं देयं कालं चातिक्रामति लाभं वा बहुतरं यत्नेन जन्यं करोति तस्मै पूर्वपरिभाषितभृतिमध्ये स्वामी स्वेच्छानुसारेण किञ्चिदु दद्यात्। यस्तु स्वातन्त्र्येण बहुलाभं करोति तस्मै परिभाषितमूल्यादधिकं किञ्चिद्देयं स्वामिना पारितोषिकमित्यर्थः। अनेकभृत्यसाध्यकर्मणि वेतनार्पणप्रकारमाह स एव "यो यावत् कुरुते कर्म तावत् तस्य तु वेतनम्। उभयोरप्यसाध्यं चेत् साध्ये कुर्याद् यथाश्रुतम्" इति। उभयोरपीत्यपिना बहूनां भृत्यानां मध्येऽपि यदि कृष्यादौ कृते भवतामेतावद्दास्यामीति परिभाषिते द्विषड्भिरारब्धं कर्म यदि व्याध्यादिव-

शाच्च समाप्तितं तदा तेषु यो यावत् कर्म करोति तस्मै तत्कर्मानुसारेण मध्यस्थपरिकल्पितं वेतनं देयम्। न तु स्वाम्येन दानन्न च परिषन्मात्रभावाद्दानम्। यदि तैः समापितं तदा यथा परिभाषितं देयञ्च तु प्रत्येकं कृतन्न दातव्यं नापि कर्मानुसारेण परिकल्प्य दातव्यमित्यर्थः। यस्तु वेतनं गृहीत्वा समर्थोऽपि न कर्म करोति तं प्रत्याह हारीतः "गृहीतवेतनः कर्म न करोति यदा भृतः। समर्थश्चेद्दमन्दाप्यो द्विगुणं तच्च वेतनम्" इति। दमं शक्त्यनुसारेण राज्ञा दाप्यः। गृहीतञ्च वेतनं द्वैगुण्येन स्वामिने दद्यादित्यर्थः। नारदोऽपि "भृतिं गृहीत्वाऽकुर्वाणो द्विगुणां भृतिमावहेद्" इति। याज्ञवल्क्योऽपि "गृहीतवेतनः कर्म त्यजन् द्विगुणमावहेद्" इति। अस्मिन्नेव विषये यावता वेतनेन भृत्यत्वमङ्गीकृतं तावदेव स्वामिने देयञ्च तु राज्ञे दण्ड्यमित्यर्थः। यदाङ्गीकृतां भृतिं दत्त्वा बलात्कारयितव्य इत्याह नारदः "कर्मानुकूर्वन् प्रतिश्रुत्य कार्यो दत्त्वा भृतिं बलाद्" इति। प्रतिश्रुत्येति प्रारम्भस्याप्युपलक्षणार्थम् अतएव कात्यायनः "कर्मारम्भं तु यः कृत्वा द्विस्त्रिरेव तु कारयेत्। बलात्कारयितव्योऽसावकुर्वन् दण्डमर्हति" इति। कियद्द्रव्यं दण्ड्य इत्यपेक्षायामाह बृहस्पतिः मनुश्च "प्रतिश्रुत्य न कुर्याद्यः स कार्यः स्याद्बलादपि। स चेन्न कुर्यात् तत्कर्म प्राप्नुयाद्दिशतं दमम्" इति। द्विशतं कार्षापणद्विशतमित्यर्थः। यत्तु मनुवचनम् "भृतोऽनार्तो न कुर्याद्यो दर्पात् कर्म यथोदितम्। स दण्ड्यः क्षपणत्यक्ष्यो न देयं तस्य वेतनम्" इति। तदल्पदण्डस्वाम्यामार्तिविषयमिति स्मृतिचन्द्रिकायाम्। अर्तुस्त्वकर्मकरत्वविषयमिति भट्टनरत्ने। किञ्चिदूनकर्मकरत्वे त्वाह स एव "यथोक्तमार्तः कृष्णो वा यत्तत्कर्म न कारयेत्। न तस्य वेतनं देयमल्पोनस्यापि कर्मणः" इति। कृष्णो वा कर्म कारयेदिति वदता कृष्णेऽपि स्वयं कर्तृत्वनियमो बाध्यते इति दर्शयति। आर्त्तो यदि स्वार्थ्युपक्षयानन्तरं स्वाङ्गीकृतं कर्म करोति तदार्त्तं दीर्घकालतया कालक्षेपेऽपि भृत्यदोषाभावाद्वेतनसत्वो निर्विवादं भवत इत्याह स एव "आर्त्तस्तु कुर्यात् कृष्णः वत् यथाभाषितमादितः। सुदीर्घस्यापि कालस्य तत्तुल्यमेव वेतनम्" आदितः आदौ यथाभाषितं यथाप्रतिज्ञातं तथा कुर्यादित्यर्थः। सुदीर्घस्यापि कालस्य भृत्यर्थेऽपीति शेषः।

यस्तु कालविशेषावधिकं कर्म प्रतिज्ञाय तत्कालापूर्त्तावेव कर्म त्यजति तं प्रत्याह नारदः "कालेऽपूर्णे त्यजन् कर्म भृतेर्नाशमवाप्नुयाद्" इति। अत्र दण्डमप्याह विष्णुः भृतकस्यापूर्णे काले त्यजन् सकलमेव मूल्यमृच्छात् राज्ञे च पञ्चशतं दद्यादिति"। मूल्यं वेतनम्। स्वामिदोषात्त्यागे तु यावति काले कर्म कृतं तत्कालानुसारेण कल्पितं वेतनं लभत इत्याह नारदः "स्वामिदोषादपक्रामन् यावत् कृतमवाप्नुयाद्" इति। स्वामिदोषो विनापराधं निष्ठुरभाषणादिः। अत्र दण्डमप्याह विष्णुः "स्वामी चेदुभृतकमपूर्णे काले जह्यात् तस्य सर्वमेव मूल्यं दद्यात् पञ्चशतञ्च राजन्यत्र भृतादोषादिति"। स्वामिद्रव्यस्य भृत्यदोषेण नाशे यत् कर्त्तव्यं तदाह स एव। "तद्दोषेण यद्विनश्येत्तत् स्वामिने देयमन्यत्र दैवोपघातादिति"। दैवोपघातोराजकृतस्याप्युपलक्षणम्। स्वामिने देयं मूल्यद्वारेणेति शेषः। अत्र दोषविशेषाद्विशेषमाह बृहस्पतिः "प्रमादाद्दाशितं दाप्यः दमं हि द्रौहिनाशितम्" इति। प्रमादाद्दाशितमनवधानेनाशितं दमेनैव दद्यात्। द्रौहिनाशितं तीव्रप्रयत्नादिना द्रोहेण नाशितं द्विर्दाप्यो द्विगुणं दाप्य इत्यर्थः। भृत्यदोषाभावे यदन्यत्र एव नष्टं तत्र देयमित्याह स एव "न तु दाप्यो धृतच्छत्रैर्दग्धभूतं वलेन वेति"। अत्र नीतत्। यस्तु वाहको वाह्यं द्रव्यं प्रमादाद्दीनत्वादिना स्वदोषेण नाशयति तं प्रत्याह नारदः "भाण्डं व्यसनमागच्छेद्यदि वाहकदोषतः। दाप्यो यत्तत्र नष्टेषु दैवराजकृताहते" इति। भाण्डं वहनीयं द्रव्यं मनुः। कादि व्यसनं नाशम्। अत्र भाण्डवाहकयोर्यत्किञ्चिद्बलीवर्दजीवनयोरुपलक्षणमिति भट्टनरत्ने। अत्रापि "प्रमादाद्दाशितं दाप्यः दमं द्रौहिनाशितमिति" हरदत्तमनूक्तोविशेषोऽवगन्तव्यः। यस्तु वाहको स्वदोषेण प्रस्थानविघ्नं करोति स द्विगुणां भृतिं दाप्य इत्याह कात्यायनः "विघ्नं यो वाहको दाप्यः प्रस्थाने द्विगुणां भृतिम्" इति। विघ्नं करोतीति शेषः। वाहकग्रहणं प्रदर्शनार्थं न तु विवक्षितत्वेनायुधीयादेर्युद्धविघ्नकारिणोऽप्येतदिति मन्तव्यम्। अतएव नारदः "द्विगुणां तु भृतिं दाप्यः प्रस्थाने विघ्नमाचरन्" इति सामान्येनोक्तवान्। याज्ञवल्क्योऽपि "प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम्" इति। एतच्च भृत्यान्तरसम्पादनकालासम्भवविषयम्। अङ्गीकृतकर्मकरत्वस्यापि यदा भृत्या-

यानरोधेन प्रस्थानविघातापादकत्वं तदा त्याज्य इत्यत्र स एव "प्रक्रान्ते सप्तमभागञ्चतुर्थं पथि सत्यजेत्। भृतिमर्द्धपथे सर्वां प्रदाप्यस्त्याजकोऽपि च" इति। प्रक्रान्ते कर्मणि स्वाङ्गीकृतं कर्म त्यजन् सत्यो भृतेः सप्तमभागं दाप्यः। गमने प्रारब्धे पथि त्यजन् भृतेश्चतुर्थं भागम्। अर्द्धपथे त्यजन् सर्वां भृतिमित्यर्थः। त्याजकोऽपि चेत्स्वायमर्थः गमनारम्भानन्तरं स्वामी यदि त्याजयति तदा पूर्वोक्तक्रमेण भृत्याय सप्तमभागादिकं दापनीय इति। एतच्चाव्याधितादिविषयम् व्याधितस्यापराधाभावात्। यच्च स्वामिना त्याजने चतुर्थभागदापनमुक्तं तदविक्रीतभाण्डस्वामिविषयम्। विक्रीतभाण्डस्वामिना यत्कर्त्तव्यं तदाह बृहन्मनुः "पथि विक्रीय तद्भाण्डं वणिक् भृत्यं त्यजेद् यदि। अर्द्धं तस्यापि देयं स्याद् भृतेरर्द्धं कर्मणः" इति। पथि भाण्डस्य चौरादिभिः प्रतिरोधे राजादिभिरपहृते स्वामिनः कर्त्तव्यमाह कात्यायनः "यदा च पथि यद्भाण्डं भारस्खेत छिद्येत वा। यावान्वा गतस्तेन प्राप्नुयात्तावतो धनम्" इति। तेन भारवाहकस्वीकृतेन यानादिना। भाण्डनेतारं प्रत्याह नारदः "अनयन् भाटयित्वा तु भाण्डयेत् यानवाहनम्। दाप्यो भृतिचतुर्भागं सर्वामर्द्धपथे त्यजन्" इति। यानं शकटादि वाहनम् अश्वादि। अयमर्थः यो यानादिना भाण्डनयनं कर्त्तुं परकीयं यानादिकं भाटयित्वा प्राप्यादिकार्यार्द्धपथिकं परिक्रयं कृत्वा तच्च नयति स यानस्वामिने परिकल्पितस्य भाटकस्य चतुर्थांशं दाप्यः। यस्तु तद्भीत्वार्द्धमार्गं त्यजति स सर्वां भृतिं दाप्य इति। यस्तु शकटादिकं भाटयित्वा तमेवोपकारशून्यमादाय देशान्तरं गच्छति भाटकं च न प्रयच्छति तं प्रत्याह बृहन्मनुः "यो भाटयित्वा शकटं भीत्वा वाऽन्यत्र गच्छति। भाटं न दद्याद् दाप्यः स्यादूढस्यापि भाटकम्" इति। अनूढस्यापि कृतोपकारस्यापीत्यर्थः। यस्तु कृते कर्म्मणि समनन्तरं वाहनादेः समर्पणं न करोति तस्य समर्पणपर्य्यन्तभाटकदानमाह कात्यायनः "हस्त्यश्वगोखरोष्ट्रादीन् भाटकेन यः। नार्पयेत् कृतकृत्यः संस्तावद्दाप्यः स भाटकम्। गृहशय्यासनादीनि भाटकेन यः। स्वामिने नार्पयेत् तावत्तावद्दाप्यः स भाटकम्" इति। वारिशब्देन तदाधारभूतं पात्रं लक्ष्यते। नार्पयेत् कृतकृत्यः सन्निति शेषः। परभूमौ गृहनिर्माणाय भाटकदातारं प्रत्याह नारदः "परभूमौ गृहं कृत्वा क्षीणं दत्त्वा वसेत् तु यः। स तद्गृहीत्वा निर्गच्छेत् तृणकाष्ठेष्टकादिकम्" इति। क्षीणभाटकं क्षीणप्रदानेऽप्याह स एव "क्षीणादिना वसित्वा तु परभूभावनिर्मितम्। निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात् कथञ्चन। यान्येव तृणकाष्ठानि स्विष्टका विनिवेशिताः। विनिर्गच्छंस्तु तत् सर्वं भूमिस्वामिने वेदयेत्" इति। स्वामिने निवेदयेदित्यर्थः। अनिश्चितमिति वदता तृणकाष्ठादिग्रहणाग्रहणपरिभाषाविहीनविषयमेतदिति दर्शितम्। परिभाषाविषये तु यथा परिभाषितं कर्त्तव्यम्। भाटके गृहीतानां जलपात्रादीनां भङ्गे नाशे च विशेषमाह स एव "क्षीणवाहीनि भाण्डानि पूर्णकालान्युपानयेत्। गृहीतराद्धरेद्भग्नं नष्टञ्चान्यत्र संभवात्" इति। क्षीणवाहीनि भाटकगृहीतानि पूर्वपरिभाषितभाटकानि तत्स्वामिनं प्रापयेदिति पूर्वार्द्धार्थः। भग्नमेकदेशेन विकृतं, नष्टम् कात्स्न्र्येन विकृतम्। संभवः परस्परसङ्घर्षः तद्भिन्नप्रकारेण यद्भग्ननष्टञ्च तद्भाटकगृहीतुर्भवति। संभवेन तु यद्भग्ननष्टञ्च तद्भाटकदातुः पूर्ववत् कृत्वा मूल्यद्वारेण वा देयमित्यर्थः। व्याधितस्य मृतस्य स्वामिना पथि त्यागे दण्डमाह कात्यायनः "त्यजेत् पथि सहायं यः स्वान्तं रोगार्त्तमेव वा। प्राप्नुयात् साहसं पूर्वं त्यागे त्वर्द्धमपालयन्" इति। स्वाम्यनुज्ञातेन भृत्येनापराधे कृते सोऽपराधः स्वामिन एवेत्याह बृहस्पतिः "प्रभुणा विनियुक्तः सन् भृतको विदधाति यत्। तदर्थमशुभं कर्म स्वामी तत्रापराप्नुयात्" इति। स्वामी कृतकर्मणे भृतकाय यदि न वेतनं ददाति तदासौ राज्ञा दापनीयः इत्याह स एव "कृते कर्मणि यः स्वामी न दद्यादेतनं भृते। राज्ञा दापयितव्यः स्याद् वेतनञ्चानुरूपतः" इति। वेत्यातदुपभोक्तृविषये नारद आह "शुल्कं गृहीत्वा पण्यस्त्री नेच्छन्ती द्विगुणं वहेत्। अनिच्छन् शुल्कदातापि शुल्कहानिमवाप्नुयात्" इति। एतद्व्याधितादिविषयम्। व्याधितादिविषये त्वाह बृहस्पतिः "व्याधिता स्वसमव्यया राजकार्यपरायणा। आमन्त्रिता च नागच्छेद्वाच्या वड्वा हृता" इति। आमन्त्रिता आहूता। वड्वा दासी तद्ग्रहणमत्र पण्यस्त्रीप्रदर्शनार्थम्। उपभोक्तारं प्रत्याह नारदः "अप्रयच्छन्नयो शुल्कमनुभूय गुणान् स्त्रियम्। अक्लेश्य च यद्गच्छेद् घातदन्तनखादिभिः। अयोनौ यः समाक्रा-

मेट् वल्लभिर्वापि वारयेत्। शुल्कं षोऽष्टगुणं दाप्यो विनयं तावदेव तु" इति। वेश्यायास्त्वपराधे दण्डादिकं मत्स्यपुराणे दर्शितम् "गृहीत्वा वेतनं वेश्या योभादन्यत्र गच्छति। तां दमं दापयेद्द्यादितरस्यापि भाटकम्" इति। इतरस्य दत्तशुल्कस्य। तत्रैव विशेषान्तरमुक्तम् "अन्यमुद्दिश्य वेश्यां यो नयेदन्यस्य कारणात्। तस्य दण्डो भवेद्राज्ञः सुवर्णस्य च माषकम्। नीत्वा भोगञ्च यो दद्याद् दाप्यो द्विगुणवेतनम्। राज्ञश्च द्विगुणं दण्डं तथा धर्मो न क्षीयते। बहूनां प्रेजतामेकां सर्वे तद् द्विगुणं धनम्। तस्यै दद्युः पृथक् राज्ञे दण्डञ्च द्विगुणमरम्" इति। अत्र निर्णेतुनाह नारदः "वेश्याःप्रधाना यात्रास्त्र कास्तकाश्चाङ्गीकृताः। तत्समस्तेषु कार्य्येषु निर्णयं संशये विदुः" इति।

वेतस पु० अज-असुन् तक् च धीभावः। (वेत) वृक्षभेदे अमरः। स्त्रीत्वमपि शब्दच० तत्र गौरा० ङीष्।

वेतसास्त्र पु० वेतस एव अस्त्रः। अस्त्रवेतसे अटा०।

वेतस्वत् त्रि० वेतसाः सन्त्यत्र भूम्ना वेतस+इष्वलुप्। बहुवेतसयुक्ते देशे अमरः।

वेताल पु० अज-विच् धीभावः तल-धञ् कर्म०। १मन्त्रविशेषे २भूताधिष्ठितशवभेदे अमरः ३शिवानुचरे भैरवभेदे कालिकापु०। ४द्वारपाले च शब्दर०।

वेतालभट्ट पु० विक्रमादित्यसभास्थे नवरत्नान्तर्गते कविभेदे

वेत्तृ त्रि०विद-तृच्। १ज्ञातरि २बोद्धरि ३लब्धरि च राजनि०

वेत्र पु० अज-त्रल् धीभावः। (वेत) वेतसवृक्षे राजनि०।

वेत्रकीय त्रि०वेत्र+छ-कुक्च। १वेत्रसमूहे २तदयुक्तदेशादौ च स्त्रि० कीष्०। [यष्टिधारमात्रे त्रि०।

वेत्रधर पु० वेत्रं धरति भृ-अच्। १द्वारपाले हेका० २वेत्र-

वेत्र(त्रा)वती स्त्री वेत्रा बाहुल्येन सन्त्यस्याः मतुप् मस्य वः वा दीर्घः। १मालवदेशस्थे नदीभेदे "शरावती वेत्रवती चन्द्रभागा सरस्वती"। २दक्षासुरमातरि वराहपु०।

वेत्रासन न०वेत्रनिर्मितमासनम्। वेत्रनिर्मिते आसने (मोढ़ा)

वेत्रासुर पु० सिन्धुद्वीपात्मजेऽसुरभेदे वराहपु०।

वेध वाचने भ्वा० आत्म० हि० सेट् छन्दसि चङि न ह्रस्वः। वेधते अवेधिष्ट।

वेद पु० विद-अच् घञ् वा। १विष्णौ विष्णुसं०। २ज्ञाने ३यज्ञसाधने तत्साधने धर्मजन्यप्रतिपादके मन्त्रब्राह्मणात्मके ग्रन्थभेदे ४यज्ञोक्ते चरिते च मेदि०। ५यज्ञाङ्गे नानायज्ञा०

६कुशसुष्टिस्थिते पदार्थभेदे "वेदं कृत्वा वेदिं कुर्य्यात्" श्रुतिः वेदयति विद-अच् णिच्-अच् विद-अच् वा। ७ज्ञापके चतुरि च त्रि० "वेदोऽसि येन त्वं देव! वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः" यजु० २।२। "पत्नी वेदं प्रशंसति वेदोऽसीति "हे कुशसुष्टिनिर्मितपदार्थ! त्वं वेदोऽसि यज्ञगात्मकोऽसि यद्वा वेत्तीति वेदः ज्ञातासि। देवेभ्यो देयानां वेदोऽभवः ज्ञापकोऽभूः" कर्क०। तल्लक्षणञ्च अपौरुषेयं वाक्यं वेद इति मीमांसकाः। पौरुषेयत्वे पूर्वपक्षं दूषयित्वाऽपौरुषेयत्वं साधयेनोपन्यस्य समर्थितं यथा "दृष्टप्रबलेन सम्यक्परोक्षानुभवसाधनं वेद इति" वेदलक्षणस्य मन्वादिस्मृत्यादावतिव्याप्तिमाशङ्क्य "अपौरुषेयत्वे सतीति विशेषणाददोष इति चेत् वेदस्यापि परमेश्वरनिर्मितत्वेन पौरुषेयत्वात् शरीरधारिजीवनिर्मितत्वाभावादपौरुषेयत्वमिति चेत् "बहवश्चरणा यस्य इत्यादिश्रुतिभिरीश्वरस्यापि शरीरित्वात्। कर्मफलरूपशरीरधारिजीवनिर्मितत्वाभावमात्रेणापौरुषेयत्वं विवक्षितमिति चेत् न जीवविशेषैरग्निवाय्वादित्यैर्वेदानामुत्पादितत्वात्। "ऋग्वेद एवाग्नेरजायत, यजुर्वेदो वायोः, सामवेद आदित्यादिति श्रुतेः" (ईश्वरस्याग्न्यादिप्रेरकत्वेन निमित्तत्वं दूषयम्)। ततः मन्त्रब्राह्मणात्मकत्वं वेदलक्षणमुक्त्वा "मन्त्रब्राह्मणयोर्वेदनामधेयम्" इत्यापस्तम्बवचनं प्रमाणतयोपन्यस्तं ततश्च मन्त्रलक्षणमुक्त्वा तदितरद् ब्राह्मणमित्युक्तम्। तत्रैवोत्तरत्र नन्वेवमपि वेदस्य पौरुषेयत्वेन विप्रलम्भकवाक्यवदप्रामाण्यं स्यात् पौरुषेयत्वं च १पादे पूर्वपक्षत्वेन जैमिनिरुक्तवत् यथा "वेदांश्चैके सन्निकर्षं पुरुषाख्येति" सू० "एके शाखिनो वेदान् प्रति सन्निकर्षं मन्यन्ते। यथा रघुवंशादयः कालिदासप्रणीता पुराणेतिहासश्च वेदोऽपि न तु वेदा अनादयः अतएव वेदकर्तृत्वेन पुरुषा आख्यायन्ते व्यासिकं भारतं वाल्मीकीयं रामायणमित्यत्र यथा भारतादिकर्तृत्वेन व्यासादय आख्यायन्ते तथा काठकं कौथुमं तैत्तिरीयमित्येवं सत्रहेदशाध्वर्यकर्तृत्वेन कठादीनामाख्यातत्वात् वेदाः पौरुषेयाः। ननु नित्यानामेव सतां वेदानामुपाध्यायसम्प्रदायप्रवर्त्तकत्वेन कठकादिसमाख्या स्यादित्याशङ्क्य युक्त्यन्तरं सूचयति "अनित्यदर्शनाच्चेति" सू० अनित्यानामनेकशरीरधारिणां वेदानां अध्वर्यवः "वसवः प्राचहविरकामयन्त कुतोजयेम वेदाधी. अध्वर्यवो "वसवः प्राचहविरकामयन्त कुतोजयेम

औद्दालकिरकामयतेति" तथा सति वररुचिभ्यः पूर्वमभावादनित्यवेदाः। विमतं वेदशब्दाः पौरुषेयं वाक्यत्वात् कालिदासादिवाक्यवत् इत्यनुमानसूचकश्चकारः" इति पूर्वपक्षे सिद्धान्तयति। "उक्तं तु शब्दपूर्वत्वम्" सू० "तुशब्दो वेदानामनित्यत्वं वारयति। शब्दस्य वेदरूपस्य कठादिपुरुषेभ्यः पूर्वत्वमनादित्वम् प्राचीनैश्च सूत्रैरुक्तम्। "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः" इत्यत्र औत्पत्तिकशब्देन सर्वेषां शब्दानां वेदानां तदर्थानां तदुभयसम्बन्धानां च नित्यत्वं प्रतिज्ञाय उत्तराभ्यां शब्दाधिकरणवाक्याधिकरणाभ्यामुपपादितम। का तर्हि काठकाद्याख्यायां गतिरित्याशङ्क्य संप्रदायप्रवर्त्तनात् ज्ञेयमुपपद्यते" इत्युत्तरसूत्रयति "आख्याः प्रवचनादिति" सू० "अस्मिन्यजाख्यायिकाख्यागतिः (इयं प्रवचनरूपा संप्रदायप्रवर्त्तनेत्यर्थः") वररुच्यनित्यत्वदर्शनं यदुक्तं तस्य किमित्युत्तरमित्याशङ्क्याह "परं तु श्रुतिसामान्यमात्रम्" सू० यत्परं वररुचिकं तत् तच्छब्दसामान्यमेव। न तु मनुष्यो वररुचिनामकोऽत्र विवक्षितः वररुच्यनियुक्तप्रवचनस्मरणस्य सायोरत्र वक्तुमशक्यत्वात्। पूर्वमप्युक्तस्य वाक्यत्वहेतोः पराहृतेः। तस्माद्यास्ति वेदस्य पौरुषेयत्वम्। अत्र संग्राहकश्लोकौ "पौरुषेयं न वा वेदवाक्यं स्यात् पौरुषेयता। काठकादिसमाख्यानात् वाक्यत्वान्यवाक्यवत्। समाख्यानं प्रवचनात् वाक्यत्वं तु पराहृतम्। तत्कर्तृत्वस्मरणेन स्यात्ततोऽपौरुषेयता"। ननु भगवता बादरायणेन वेदस्य ब्रह्मकार्यत्वं सूचितं "शास्त्रयोनित्वादिति"। ऋग्वेदादिशास्त्रकारणत्वात् ब्रह्म सर्वज्ञमिति सूत्रार्थः (तदेतस्य महाभूतस्य निःश्वसितं यदृग्वेदोयजुर्वेद इत्यादि" श्रुतिः "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा" स्मृतिश्चात्र मूलम्) बाढं नैतावता पौरुषेयत्वं भवति मनुष्यनिर्मितत्वाभावात्। ईदृशमपौरुषेयत्वमभिप्रेत्य व्यवहारदशायामाकाशादिवन्नित्यत्वं बादरायणेनैव देवताधिकरणे सूचितम् "अतएव च नित्यत्वमिति"। वेदा०प० पौरुषेयत्वापौरुषेयत्वे अन्यथा निरूप्ते "यथा तु क्षणिकत्वाभावेऽपि विषयादिवदादिमत्त्वेन परमेश्वरकर्तृकतया पौरुषेयत्वादपौरुषेयत्वं वेदानामिति तत्र सिद्धान्तोऽभ्युपेयते चेन्न तावतापुरुषेणोच्चार्यमाणत्वं पौरुषेयत्वं गुरुपतेऽपि पौरुषेयत्वापत्तेः (पाठप्रमाणसिद्धसाधनापत्तेः किन्तु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं तथा च सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदसमानपूर्वकं वेदं विरचितवान् न तु तद्विजातीयं वेदमिति न सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वं वेदस्य, भारतादीनान्तु सजातीयोच्चारणसमनपेक्षोच्चारणमिति तेषां पौरुषेयत्वम्"। यद्यप्यिन्नम्भट्टेनापि वेदलक्षणमन्यथा निरूप्य पौरुषेयत्वमीदृशमेव समर्थितं यथा "अथ वेदः पौरुषेयो वाक्यत्वात् भारतादिवत् इति चेत् कोवेद अनुगतधर्माभावेन तस्य शाखासु नानार्थत्वात् तथा हि न सख्यवेदप्रयोगविषयो वेदः सख्याशोकघनात् नापि शाखासमुदायः तस्य वेदनिरूप्यत्वात् समुदायस्याप्रतिपादकत्वेन वाक्यत्वासिद्धेः। नापि स्वर्गकामो यजेतेत्यादिवाक्यं स्मृतिभारतादेरपि तथात्वात्" इत्यादिवेदलक्षणे पूर्वपक्षसङ्गा पौरुषेयत्वसाध्ये तमाह "पौरुषेयत्वं न तदर्थधीजन्यत्वं तदुच्चारणधीप्रभवत्वं वा अध्यापकाध्येतृधीजन्यत्वेन सिद्धसाधनात् स्वतन्त्रपुरुषप्रणीतजातीयत्वं यदि साध्यं तदाद्यभारते स्मृतौ च वाक्यत्वमनैकान्तिकम्" इत्यादिना। अत्रोत्तरसूत्रं यथा "शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमितित्वविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं वेदत्वम्। ईश्वरप्रमाया अजन्यत्वात् वेदार्थेऽनुमानविषयत्वेऽप्यनुमानादेर्दोषजीवकतया स्मृतीनां भारतादिभागस्य च वेदसमानार्थकत्वेऽपि शब्दजन्यधीजन्यत्वात् वेदादर्थं प्रतीत्यैव तत्प्रमायजनात्" (अग्निर्हिमस्य भेषजमित्यादिवेदवाक्यसंग्रहाय सत्यन्तं लक्षणाप्रविष्टं सत्यन्तं तु अदृष्टार्थकतावाङ्मात्रस्यापनार्थमिति बोध्यम्)। मथुरानाथेनैतद्विहृतं तत्र द्रष्टव्यम्। साध्यं च पौरुषेयत्वं सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वमिति निर्णीतमधिकं तत्र द्रष्टव्यम्।

वेदाश्च चत्वारः तेषां शाखाविभागश्चरणव्यूहे उक्तः तत्र ऋग्वेदशाखाविभागः ऋग्वेदशब्दे ११११४० दर्शितः। "यजुर्वेदस्य बहवोऽतिभेदा भवन्ति। तत्र चरकाणां दशधा भेदा भवन्ति। चरकाः१ आह्वरकाः२ कठाः३ प्राच्यकठाः४ कपिष्ठलकठाः५ औपमन्यवाः६ व्राध्नकठाः७ पारायणीयाः८ पारायणीयाः९ वार्त्तान्तवेयाः१० श्वेताश्वतराः११ (श्वेताश्वेतरा इति वा पाठः)। मैत्रायणीयाः१२ चेति। तत्र मैत्रायणीयानां सप्त भेदा भवन्ति। मानवाः१ दुन्दुभाः२ चैकेयाः३ वाराहाः४ हा०

रिद्वेयाः५ श्यामाः६ शाट्यायनीयाश्चेति। तेषामध्ययनम् अष्टौ यजुःशतानि प्रधीत्य शाखापारगो भवति। त्रीण्येव द्विगुणान्यधीत्य पदपारगो भवति। तान्येव त्रिगुणान्यधीत्य क्रमपारगो भवति। षडङ्गान्यधीत्य षडङ्गविद्भवति। शिक्षा१ कल्पो२ व्याकरणं३ निरुक्तं४ छन्दो५ ज्योतिषं६ मित्यङ्गानि। तत्र प्राच्योदीच्यां नैर्ऋत्यां निर्ऋत्यः। तत्र वाजसनेयानां सप्तदश भेदा भवन्ति। जाबालाः१ बौधेयाः२ काण्वाः३ माध्यन्दिनाः४ शातातपीयाः५ तापायनीयाः६ कापालाः७ पौण्ड्रवत्साः८ आवटिकाः९ पारावटिकाः१० (परमावटिकापि पाठः)। पाराशरीयाः११ वैनेयाः१२ बौधेयाः१३ गालवाः१४ वैजवापाः१५ कात्यायनीयाश्च१७। प्रतिपदमनुपदं छन्दो भाषा धर्मो मीमांसा न्यायतर्क इत्युपाङ्गानि। उपज्योतिषम्। याज्ञवल्क्यशिक्षम्। प्रतिज्ञानवाक्यम्। परिसंख्याचरणम्। याज्ञवल्क्याः। प्रवराध्यायश्च। यज्ञम्। क्रतुः। संख्यानः। आगमः। यज्ञपार्श्वः कौत्सकम्। (पारक्षान्तु कौत्सकमपि पाठः)। पवयः। शुक्लानि। कूर्मलक्षणमित्यष्टादश परिशिष्टानि। हे सहस्रे शते न्यूने मन्त्रे वाजसनेयके। इत्युक्तं परिसंख्यातमेतत् सकलं शुक्लियम्। अस्याश्च परिसंख्याता ब्राह्मणश्च चतुर्थकम्। आदावारभ्य वेदान्तं ब्रह्मव्याकृतिपूर्वकम्। वेदमध्याय एतेषां कौमान्ते तु समारभेत्"। तत्र तैत्तिरीयकाणां द्विभेदा भवन्ति। औक्याः१ (खमध्योऽपि पाठः)। आरुणेयाश्चेति२। तत्र आरुणकेयानां पञ्च भेदा भवन्ति। आपस्तम्बीयाः बौधायनीय२ सत्याषाढीय३ हिरण्यकेशीय४ औण्ड्रवत्साश्चेति५ (औधेयो च पाठः)। तत्र कठानान्तु पठानविशेषाः। चतुश्चत्वारिंशत्प्रपाठकाः। मन्त्रब्राह्मणयोर्वेदस्त्रिगुणो यत्र पठ्यते। यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः"।

सामवेदस्य किल सहस्रभेद आसीत्॥ अमध्याप्यैवधीतानां शतकल्पस्तु चाभिकृताः प्रलुप्ताः। तेषां प्रवक्ष्याम्यासुरायणीया वासुरायणीया वार्षगणेयाः प्राञ्जला कृष्णभेदाः प्राचीनयोग्या नवीनयोग्या राणायनीयाश्चेति तत्र राणायनीयानां नव भेदा भवन्ति। राणायनीयाः शाण्डिल्यानीयाः पाराशर्यायणीयाः खाण्डिकाः। (खल्वडुका इति वा पाठः)। कौथुमाः। (इति तु भाष्ये नास्ति)। कण्डाचार्याः। मशकाश्चरकाः। कौथुमाः जैमिनीयाश्चेति। तेषामध्ययनमष्टौ सामसहस्राणि सामानि च चतुर्दश अष्टौ शतानि दशेति दशसप्तसु बालखिल्याः सप्तपर्णप्रोक्ष्म। एतत् सामगणं स्मृतम्। अथर्ववेदस्य नव भेदा भवन्ति। पैप्पलादाः१। दान्ताः२। प्रदान्ताः३। स्नाताः४। सौताः५। ब्रह्मदावलाः६। शौनकी७। देवदर्शतीय८। चरणविद्याश्चेति। (दाता प्रदाता सौता ब्रह्मदर्शी वेदर्शी इति भाष्ये नामान्तरम्) तेषामध्ययनं पञ्च कल्पानि भवन्ति। नक्षत्रकल्पोविधानकल्पो विधिविधानकल्पः संहिता शान्तिकल्पश्चेति। सर्वेषामेव वेदानामुपवेदा भवन्ति। ऋग्वेदस्यायुर्वेदः। यजुर्वेदस्य धनुर्वेद उपवेदः। सामवेदस्य गान्धर्ववेद उपवेदः। अथर्ववेदस्य शस्त्रशास्त्राणि भवन्ति"। "यजुर्वेदतरोः शाखाः सप्तविंशन्महामतेः। वैशम्पायनमासाद्य व्यासशिष्यप्रसादतः वै। शिष्येभ्यः प्रददौ तास्य शाट्यकुत्थुमयुक्रमात्। याज्ञवल्क्यस्तु तस्याभूद् ब्रह्मदातसुतो द्विजः। शिष्यैः परमधर्मज्ञो गुरुवृत्तिपरः सदा। ऋषिर्योऽयं महामेरोः समाधौ नो मनिष्यति। तस्य वै सप्तशाखस्तु ब्रह्महत्या भविष्यति। पूर्वमेव मुनिश्रेष्ठ समयोऽयं कृतो द्विज!। वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्ततः। सखीयं बालकं सोऽथ पदा स्पृष्टमशातयत्। शिष्यानाह भोः शिष्याः ब्रह्महत्याव्रतम्। चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा। अथाह याज्ञवल्क्यस्तं किमेभिर्भगवन्! द्विजैः। क्षौ शिष्यैरल्पतेजोभिरधिष्ठ्रेऽस्मिन् व्रतम्। ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामतिम्। सत्यतां यत् त्वयाधीतं मत्तो विप्रावमन्य च। निस्तेजसो वदस्वैतान् यत्त्वं ब्राह्मणवृद्धवान्। तेन शिष्येण नार्योऽस्मि समाज्ञाभङ्गकारिणा। याज्ञवल्क्यस्ततः प्राह भक्त्यैतन्मयोदितम्। ममाप्यलं त्वयाधीतं यन्मया तदिदं द्विज!"। श्रीपराशर उवाच "इत्युक्त्वा रुधिराक्तानि यजूंषि सः। छर्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः। यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज। शाट्यकुत्थितितरो भूत्वा तैत्तिरीयास्तु ते ततः। ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितैस्तु यैः। चरकाध्वर्यवस्ते तु चरणानुसृतिक्षमाः!। याज्ञवल्क्योऽपि मैत्रेय! प्राप्तायासपरायणः। तुष्टाव प्रयतः सूर्यं यजूंष्यभिलषंस्ततः"। श्रीयाज्ञवल्क्य उवाच "नमः सवित्रे

दाराय सुक्ष्मेरक्षिततेजसे। ऋग्यजुःसामभूताय त्रयीधामवते नमः"। श्रीपराशर उवाच "इत्येवमादिभिस्तेन स्तूयमानः प्रभो रविः। वाजिरूपधरः प्राह प्रियतामभिवाञ्छितम्। याज्ञवल्क्यस्ततः प्राह प्रणिपत्य दिवाकरम्। यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ" श्रीपराशर उवाच "एवमुक्तो ददौतस्मै यजूंषि भगवान् रविः। व्यातयामसंज्ञानि, यानि वेत्ति न तद्गुरुः। यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम!। वाजिनस्ते समाख्याताः सूर्योऽश्वः सोऽभ्यपद्यत। शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम्। काण्वाद्याः सुमहाभाग! याज्ञवल्क्यप्रवर्त्तिताः" विष्णु० ३अंशे ५अ०। सामवेदस्य संहिता यथा "सामवेदतरोः शाखा व्यास शिष्यैः स जैमिनिः। क्रमेण तेन मैत्रेय! विभेद शृणु तन्नाम। सुमन्तुस्तस्य पुत्रोऽभूत् सुत्वानस्य च वै सुतः। सुकर्मा संहितामेकां संहितां तौ सहस्रिणौ। सहस्रं संहिताभेदं सुकर्मा तत्सुतस्ततः। चकार तस्य तांश्चान्यो जगृहाते महाव्रतौ। हिरण्यनाभः कौशल्यः पौष्यञ्जिश्च द्विजोत्तमः। उदीच्याः सामगाः शिष्याश्चास्य पञ्चशताः स्मृताः। हिरण्यनाभाच्चाबत्यः संहिता वै द्विजोत्तम!। गृहीतास्तेऽपि चोच्चन्ने पञ्चशतैः प्राच्यसामगाः। लोकाक्षिः कुथमिश्चैव कुषीदिर्लाङ्गलिस्तथा। पौष्यञ्जिशिष्याश्चत्वारः संहिता सङ्क्षतीकृताः। हिरण्यनाभशिष्यश्च चतुर्विंशतिसंहिताः। प्रोवाच कृतिनामासौ शिष्येभ्यः सुमन्तुमतिः। तैश्चापि सामवेदोऽसौ शाखाभिर्बहुलीकृतः"। अथर्ववेदस्य संहिता यथा। "अथर्वणामघोवक्त्रे संहितानां समुद्यमम्। अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः। शिष्यत्वमध्यापयामास कबन्धं सोऽपि तं द्विधा। कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवान्। वेददर्शस्य शिष्यास्तु मोदो ब्रह्मबलिस्तथा। शौल्कायनिः पिप्पलादस्तथान्यो मुनिसत्तमः। पथ्यस्यापि त्रयः शिष्याः कृतायेर्द्विज संहिताः। जाजलिः कुमुदादिश्च तृतीयः शौनको द्विज। शौनकस्तूद्विधा कृत्वा ददावेकान्तु बभ्रवे। द्वितीयां संहितां प्रादात् सैन्धवायनसंज्ञिने। सैन्धवो मुञ्जकेशश्च भिन्नन् वेदं द्विधा पुनः। नक्षत्रकल्पो वेदानां संहितानां तथैव च। चतुर्थः स्यादङ्गिरसः शान्तिकल्पश्च पञ्चमः। एताश्चाथर्वणामेते संहितानां विकल्पकाः"। विष्णुपु० ३अंशे ६अ०।

ऋग्वेदे द्वादश० ४वेदपु० ७अ० वेदविभागोक्तयोक्तो यथा "किं वेदरूपं सामस्तु उपाङ्गसंख्याभेदतः। अङ्गानि चैव वेदानां तन्नो ब्रूहि सनातन!"। ब्रह्मोवाच "ओंकारप्रभवा वेदा गायत्री वेदमातृका। षडङ्गास्ते समाख्याता वेदोपाङ्गास्तथैव च। छन्दोलक्षणसंयुक्ता मातृकागर्भजाः स्मृताः। एकस्य भवेद्वेदस्यतुर्वेदः पुनः स्मृतः। शाखार्थभेदयुक्तानां सहस्रायातिविस्तरात् संक्षिप्ता मया वत्स! ऋग्यजुःसामाथर्वकाः। तत्र ऋग्वेदे दश चैव प्रकीर्त्तिताः। आश्वलायाः साङ्ख्यायनाश्च शाकला बाष्कलास्तथा। आरण्यीयाश्चमाधाः षट्क्रमाःषड्नुक्रमाः। दशमाश्चेति समासेन पुनरेकैव धारणा। शाखाश्च त्रिविधा भूप। शाकला-बाष्कलाः। तेषामध्ययनं प्रोक्तं मण्डलानि च सप्ततिः। ऋचां वरसङ्ख्या तु चतुर्विंशच्छतानि च। ऋचां दश सहस्राणि ऋचां पञ्च शतानि च। ऋषामशीतिः पाटश्च एतत् पारणमुच्यते। ऋग्वेदे तु भवेत्संख्या यजुर्वेदस्य शृणुताम्। मण्डलीतिविभेदेन मया भिन्नाः शिवाज्ञया। दशधा चरकास्तत्र करकाहारिद्रवीयाः, कठाः प्राच्यकठश्चैव कपिष्ठलकठास्तथा। नारायणीयाः श्वेताश्च श्वेताश्वतरकैलापयाः। पुनः सप्त विभेदेन मैत्रायणयः प्रकीर्त्तिताः। मानवा दुन्दुभा वाराहाः क्रामेया हारिद्रवीयाः, श्यामाः श्यामायनीयाश्च तेषामध्ययनमुच्यते। अष्टादश सहस्राणि पाठा वेदविदोऽविदन्। द्विगुणं पदपारीयाल्लिखितं क्रमपारगाः। षडङ्गानि यदाभीते स षडङ्गविदुच्यते। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोज्योतिषम्। षडङ्गानि भवन्त्येतान् उपाङ्गानि शृणुष्व भोः। प्रतिपदमनुपदं छन्दो भाषासमन्वितम्। मीमांसा-न्यायतर्कश्च उपाङ्गाः परिकीर्त्तिताः। पुराणं धर्मशास्त्रं च संख्याता अष्टादश शृणुष्व तान्"। यूपलक्षणं क्रागलक्षणं प्रतिष्ठानुवाकसङ्ख्या-चरणव्यूह-आङ्-कल्पसूक्तानि परिशिष्टमृग्यजुर्यज्ञिकपूरणं प्रवराध्यायोक्तशास्त्रं क्रतुसंख्या नियमा यज्ञपार्श्वहोतृकम्। व्रतं प्रसवोत्थानलूमलक्षणसंयुतम्। कथिताः परिशिष्टास्तु ह्यूनविंशतिसंख्यया। कठानां पुनर्व्याख्यास्तु चत्वारिंशच्चतुर्युतान्। प्राच्योदीच्या निरुद्धास्य शाखासंख्यास्तु पञ्च च। दशभेदविभिन्नास्य कृष्णा सुनिशुक्लव!। आम्बाबौधेयाःकाण्वाश्चाध्यन्दिनाश्च माध्येयाः। खण्डायिनः कण्डाख्याः प्रौढवृः रसारविकाः। परमारविकाः धाराग्रहा

ऋङ्नाबौधायनीयाः । अयोध्या अयोधेयाश्च तेषामध्ययनानि च । द्विसहस्रे शतन्यूने वेदे वाजसनेयके । ऋग्गणीयं प्रसंख्यातस्ततोऽन्यानि यजूंषि च''। एतत्प्रमाणं यजुषां हि केवलम् "सखिलं सकियं परिसंख्यातं ब्राह्मणम् । चतुर्णामन्तु जानीयात्तैत्तिरीया द्विधा पुनः । ऋचेयाः खाण्डिकेयाश्च खण्डिकाः पञ्चधा पुनः । काठेया कौथा-यनीया हिरण्यकेशास्तथैव च । भारद्वाजाश्चरकाश्च तेषां भेदाः प्रकीर्त्तिताः । अध्ययनं सौम्निकञ्चैव प्रवचनीयं तथापरम् । सामवेदस्तु विस्तीर्णः सहस्रभेदशः पुरा । अनध्यायेष्वधीयानाः तदा इन्द्रेण धीमता । वज्रेण निहताः शेषांस्तान्वच्छे शृणु सत्तम !। राणायनीयाः कौथुमास्तत्र भेदान् पुनः शृणु । राणायनीयाः सप्तैव कुशाह्मास्तपतांवर । कालवेया सहाकालवेयालाङ्गलवैद्युताः । कौथुमानामपि सप्त असुरावानरायणाः । प्रजाबलैनश्चत्याश्च परियोग्याः परिकायणाः । अध्ययनमपि तेषान्तु यथावत् कथितं शृणु । अष्टौ सामसहस्राणि सामानि च चतुर्दश । अष्टौ शतानि नवतीः दश सवालखिल्यकाः । संहितपर्णाश्च प्रख्याश्च एतं सामगणं विदुः । अथो अथर्ववेदस्य नव भेदा भवन्ति हि । पिप्पलादा वर्त्मदाश्च शौनकी कनखी तथा । जाजला ब्रह्मवेदाश्च शौनकी कनखी तथा । वेदऋषिचौरविद्या तेषामध्ययनं शृणु'' । पञ्चकल्पा भवन्ति "नक्षत्रकल्पोवैतानः संहिताविधिः आङ्गिरसम् । शान्तिकल्पश्च अथर्वणो भवन्ति ह । ऋग्वेदस्यैतेयं गोत्रं वासुदेवं विदुर्बुधाः । काश्यपञ्च यजुर्वेदं रुद्रदेवन्तु तं विदुः । सामवेदोऽपि गौतेन भारद्वाजः पुरन्दरम् । अधिदेवं विजानीयात् वैतानन्तु अथर्वणः" ।

वेदगर्भ पु० वेदोगर्भे यस्य । सर्ववेदस्य प्रथमं ऋत्तरि १हिरण्यगर्भे २विप्रे च हेमच० । ३विष्णौ विष्णुस० ।

वेदन न०विद्-ल्युट् । १ज्ञाने २सुखदुःखाद्यनुभवे ३विवाहे च "वसनस्य दशा प्राह्या मूढयोत्कृष्टवेदने" इति मनुः । युच् । वेदनापि उक्तार्थेषु स्त्री । सा च वैद्यमते स्कन्धपञ्चकान्तर्गतस्कन्धभेदे बौद्धशब्दे दृश्यम् ।

वेदनिन्दक पु० ६त० । १नास्तिके जटा० २बौद्धे च ।

वेदपारग पु० वेदानां पारमन्तं सीमां गच्छति गम-ड । सकलवेदाध्यायिनि । [वेदरक्षकत्वात्तथात्वम् ।

वेदमात स्त्री ६त० । गायत्र्यां मन्त्रभेदे तस्याः सप्तमात्रपाठेन

वेदवत् पु० वेदोऽभ्यस्तत्वेनास्यास्ति मतुप् मस्य वः । १वेदाभ्यासरते द्विजे । २कुशध्वजराजकन्यायां सीतादिरूपेणाभिभूतायां स्त्री । "कृते युगे वेदवती कुशध्वजसुता शुभा । त्रेतायां रामपत्नी सा सीतेति जनकात्मजा । तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा । त्रिरुद्गीर्णेति सा प्रोक्ता विद्यमाना युगत्रये" ब्रह्मवै०प्र०१२अ० ।

वेदवास पु० ६त० । ब्राह्मणे तस्य तत्पाठतदुक्ताचारात्यत्वात् तथात्वम् वेदावासादयोऽप्यत्र । [दक्षे त्रि० ।

वेदविद् पु० वेदं वेत्ति विद-क्विप् । १विष्णौ विष्णुस० २वेदज्ञे त्रि० ।

वेदव्यास पु० वेदान् व्यस्यति विभिन्नशाखत्वेन पृथक् करोति वि+अस-अण् । पराशरपुत्रे सत्यवतीगर्भजे १मुनिभेदे तथा भूतेषु अन्येषु २मुनिषु च ।

युगभेदे तद्भेदाश्च विष्णुपु० ३अं ३अ० उक्ता यथा पराशर उवाच "यस्मिन् मन्वन्तरे व्यासा ये ये तांस्तान् निबोध मे । यथा च भेदः शाखानां व्यासैन क्रियते मुने !! अष्टाविंशतिकृत्वो वै वेदा व्यस्ता महर्षिभिः । वैवस्वतेऽन्तरे त्वस्मिन् द्वापरेषु पुनःपुनः । वेदव्यासा व्यतीता ये अष्टविंशतिसत्तमाः । चतुर्द्धा यैः कृतो वेदो द्वापरेषु पुनःपुनः । द्वापरे प्रथमे व्यस्ताः स्वयं वेदाः स्वयम्भुवा१। द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः२ । तृतीये चोशना३व्यासश्चतुर्थे तु बृहस्पतिः४ । सवितापि५ पञ्चमे व्यासो मृत्यु:६ षष्ठे सुतः प्रभुः । सप्तमे च तथैवेन्द्रो७ वसिष्ठश्चाष्टमे सुतः । सारस्वतश्च नवमे त्रिधामा१० दशमे सुतः । एकादशे च त्रिषभो११ भरद्वाज१२सुतः परम् । त्रयोदशे चान्तरीक्षो१३ धर्मी१४ चापि चतुर्दशे । त्रय्यारुण:१५ पञ्चदशे क्षोडशे तु धनञ्जयः१६ । कृतञ्जयः१७ सप्तदशे ऋणञ्जयो१८ऽष्टादशे सुतः । ततो व्यासो भरद्वाजो१९ भरद्वाजात्तु गौतमः२० । गौतमादुत्तरं व्यासो हर्य्यात्मा२१ योऽभिधीयते । अथ हर्य्यात्मनो वेणः सुतो वाजश्रवास्तु२२ यः । सोमो मुख्यायनस्तस्मात् तृणबिन्दु२३रिति स्मृतः । ऋक्षोऽभूद्भार्गवस्तस्मात् वाल्मीकि२४र्योऽभिधीयते । तस्मादत्रात् पिता शक्तिः२५ व्यासस्तस्मादहं२६ (पराशरः) मुने ! । जातूकर्णो२७ऽभवन्मत्तः (पराशरादनन्तरम्) कृष्णद्वैपायनं२८ ततः । (ततो जातूकर्णात्परम् अष्टाविंशतिमे युगे)''अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः । एकोवेदश्चतुर्द्धा तु तैः कृतो द्वापरादिषु । भविष्ये द्वापरे चैव द्रौणिर्व्यासो भविष्यति । व्यतीते मम पुत्रेऽस्मिन् कृष्णद्वैपायने मुने"!

वेदस् पु० विद-असुन् । वेत्तरि । जातवेदाः विश्ववेदाः ।

वेदाङ्ग न० वेदस्याङ्गमिव । "शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः । ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु" इत्युक्तेषु शिक्षादिषु षट्सु शास्त्रेषु । तेषामङ्गविशेषरूपत्वं शिक्षायामुक्तं यथा

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते । शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्माच्छाङ्गमधीत्यैव ब्रह्मलोके महीयते" ।

वेदादि पु० वेदस्यादिरिव तत्पाठे प्रथमोच्चार्य्यमाणत्वात् । प्रणवे

वेदाधिप पु० ६त० । "ऋग्वेदाधिपतिर्जीवो यजुर्वेदाधिपो भगुः । सामवेदाधिपो भौमः शशिजोऽथर्ववेदपः" इत्युक्तेषु जीवादिषु २विष्णौ च विष्णुस० ।

वेदान्त पु० ६त० । वेदशिरोभागे ब्रह्मप्रतिपादके उपनिषद्रूपे १ग्रन्थभेदे तदुपकारके २शारीरकसूत्रभाष्यादौ च उत्तरामीमांसाशब्दे १०६७पृ० दृश्यम् । शारीरकसूत्रञ्च बहुभिराचार्यैः स्वस्वमतानुसारेण व्याख्यातं तत्र रामानुजपूर्णप्रज्ञशब्दयोस्तत्तन्मतं प्रदर्शितं शाङ्करमतानुसारि मतञ्च सिद्धान्तबिन्दुप्रदर्शितञ्च बङ्गेषोऽत्र प्रदर्श्यते

"वेदान्तिमते सामान्यतः द्विविध एव पदार्थः दृक्दृश्यञ्च तत्रैव सर्वपदार्थान्तर्भावात् । तत्र दृक्पदार्थ आत्मा । स च सर्वदैकरूपोऽप्यौपाधिकभेदात् त्रिविधः ईश्वरः जीवः साक्षी चेति । तत्र कारणीभूताज्ञानोपाधिरीश्वरः । अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानोपहितो जीवः । जीवेश्वरानुगतसर्वानुसंधाट चैतन्यं साक्षी । तत्रेश्वरोऽपि त्रिविधः स्वोपाधिभूताविद्यावृत्तिसत्त्वादिगुणत्रयभेदेन विष्णुब्रह्मरुद्रभेदात् । तत्र कारणीभूतसत्त्वगुणावच्छिन्नो विष्णुः पालयिता । तथा रज उपहितो ब्रह्मा सृष्टा । हिरण्यगर्भस्तु महाभूतकारणाभावाच्च ब्रह्मा । तथापि स्थूलभूतसृष्टत्वेन क्वचिद् ब्रह्मेत्युपचर्य्यते । तथा तम उपहितो रुद्रः संहर्त्ता । एवञ्चैकस्यैव तस्य चतुर्भुजचतुर्मुखाद्याः पुमाकाराः श्रीभारतीभवान्याद्याश्च स्त्र्याकारा मनुष्यकुमार्यादयोऽवतारा जीवयैवाविर्भवन्ति । तथा जीवोऽपि त्रिविधः स्वोपाधिजाग्रदाद्यवस्थात्रयभेदेन विश्वतैजसप्राज्ञभेदात् । तत्राविद्यान्तःकरणस्थूलशरीरावच्छिन्नो जाग्रदभिमानी विश्वः । स एव स्थूलशरीराभिमानरहित उपाधिद्वयोपहितः स्वप्नावस्थाभिमानी तैजसः । अयमेव शरीरद्वयान्तःकरणोपाधिरहितोऽन्तःकरणसंस्कारावच्छिन्नोऽविद्यामात्रोपहितः सुषुप्त्यवस्थाभिमानी प्राज्ञः । साक्षी तु सर्वानुसन्धाता सर्वानुगतस्तुरीयाख्य एकविध एव ।

अविद्यातृष्णात्मकप्रपञ्चो दृश्यपदार्थः तस्यापारमार्थिकत्वेऽपि व्यवहारिकत्वाभ्युपगमात्र स्वप्नादिवदतात्त्विकत्वम् । दृश्योऽपि त्रिविधः अव्याकृतमूर्त्तामूर्त्तभेदात् । तत्र चिदाभासयुक्तिताऽविद्या मूर्त्तामूर्त्तप्रपञ्चस्य बीजशक्तिरनादिरव्याकृतमित्युच्यते । दृश्याव्याकृताख्याऽविद्येश्वरोपाधिः । सा च स्वयं जड़ाप्यजड़ेन चिदाभासेनोज्जीविता पूर्वपूर्वसंस्कारजीवकर्मभ्यां प्रयुक्ता सती शब्दस्पर्शरूपरसगन्धाभ्राकाशवायुतेजोजलपृथिव्यात्मकानि पञ्च सूक्ष्मभूतानि जनयति । तत्र पूर्वपूर्वभूतमात्रापन्नाया एताविद्याया उत्तरोत्तरभूतं प्रतिकारणत्वात् पूर्वपूर्वभूतगुणानामुत्तरोत्तरभूतेऽनुभवे शङ्कानामेकैकवृद्धीभूतगुणशालित्वं तथा चाकाशस्य शब्दो गुणः, वायोः शब्दस्पर्शौ, तेजसः शब्दस्पर्शरूपाणि, जलस्य तानि रसश्च, पृथिव्यास्तानि गन्धश्चेति । आकाशस्यैव दिगव्यवहारजनकत्वेन दिशो न पृथक् पदार्थता । कालस्य चिज्जड़सम्बन्धरूपतया तदाधाराविद्यात्मकतया च न पार्थक्यम् । तानि च सूक्ष्माणि पञ्च भूतानि अमूर्त्ताख्यानि कारणभेदाच्च सत्त्वरजस्तमोगुणात्मकानि सत्त्वरजोऽंशप्राधान्येन ज्ञानक्रियाशक्त्यात्मकमेकं सूक्ष्मद्रव्यं चित्प्रतिबिम्बरूपमिव मिलित्वा जनयन्ति । तच्च समस्तं द्रव्यं ज्ञानशक्तिप्राधान्येऽन्तःकरणं तदपि द्विविधं मनोबुद्धिभेदात् चतुर्विधं मनोबुद्ध्यहङ्कारचित्तभेदादित्यन्ये । तदेव क्रियाशक्तिप्राधान्ये प्राणः । स च पञ्चधा प्राणादिभेदात् । एवमेकैकभूतेभ्योज्ञानक्रियाशक्तिभेदात् प्रत्येकं ज्ञानकर्मेन्द्रियद्वयं जायते । यथाकाशात् श्रोत्रवाचौ, वायोस्त्वक्पाणी, तेजसश्चक्षुःपादौ, जलाद्रसनापायू, पृथिव्या घ्राणोपस्थौ चोत्पद्येते । तत्र शब्दस्पर्शरूपरसगन्धग्राहकाणि श्रोत्रत्वक्चक्षुःरसनाघ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि वचनादानगतिविसर्गानन्दजनकानि वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि । एतच्च सर्वं मिलित्वा सप्तदशकं लिङ्गशरीरम् । तच्च ज्ञानशक्तिप्राधान्येन समष्टौ हिरण्यगर्भ इति क्रियाशक्तिप्राधान्येन समष्टौ सूत्रमिति चोच्यते । अयं मूर्त्तपदार्थः कार्य्यत्वात् । समष्टिव्यष्टिजीवोपाधिसूक्ष्मभूतानि तु भोगायतनं शरीरं भोग्यविषयज्ञानान्तरेण भोगं जनयितुमसमर्थानीति जीवकर्मप्रयुक्तानि तानि स्थूलार्थं प्रज्ञोक्तानि म०

वन्ति। तथा हि सर्वाणि भूतानि स्वस्वार्द्धांशे स्वेतरभूतानां चतुर्णामष्टमांशैश्चतुर्भिर्योजनात् सर्वाण्येव पञ्चात्मकानि। स्वस्वांशाधिक्यात्तत्तदाकाशादिव्यवहारः। तानि च पञ्चीकृतानि महाभूतानि मूर्त्तीख्यानि मिलित्वैकं कार्य्यमिन्द्रियाणामधिष्ठानं जनयन्ति। तदेव स्थूलशरीरमित्युच्यते। तत्र सत्त्वप्रधानं दैवं शरीरं रजःप्रधानं मानवं तमःप्रधानं तिर्य्यगादिस्थावरान्तानाम्। सर्वेषां देहानां पाञ्चभौतिकत्वेऽपि चित्रे रूपाण्यामिव भूतानां क्वचिच्चूनातिरेको न विरुद्ध्यते। विषया अपि चतुर्दशभुवनाख्या घटादयश्च सत्त्वरजस्तमोंऽशतारतम्येन तेभ्य एव भूतेभ्यो जायन्ते। एतच्च सर्वं ब्रह्माण्डं विराडिति चोच्यते। सर्वं च सृष्टिप्रलयादिकं स्वप्नसृष्टिप्रलयवदवास्तवमपि अनादिवासनादाढ्यात् व्यवहारक्षमेति मायिकत्वेऽपि न तुच्छत्वप्रसङ्गः। अन्यदाकरे दृश्यम्।

[शाङ्खत्रे ७टा०।

वेदान्तिन् त्रि० वेदान्तो ज्ञेयत्वेनाऽस्यास्य इनि। वेदान्तवेदाभ्यास पु० ६त०। "वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः। तद्ज्ञानञ्चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा" इत्युक्तेषु वेदपाठविचारानुशीलनतन्मन्त्रजपपाठनेषु।

वेदि न०विद्+इन्। १यज्ञभूमौ (आकनादि) २परिष्कृतायां भूमौ स्त्री अमरः वा ङीप्। "मध्येन सा वेदिरिव स्तनमध्या" कुमारः। ३परिष्कृते पु० ४अङ्गुलिमुद्रायां स्त्री मेदि०। ५पटहस्थितपिण्डाकारस्फुल्लिकास्तूपे च "प्रागुदारवेदिविनिवेशितपूर्णकुम्भः" रघुः। ६भूमिस्थे देशभेदे यथा अन्तर्वेदि उत्तरवेदिः दक्षिणवेदिरित्यादि। वेदिश्च उभयकाकारपरिष्कृतावती पशुबन्धनार्थं होमीयदृव्यादानार्थं वा ज्ञातसंस्कारा परिष्कृता चतुरस्रादिरूपा भूमिः। तत्प्रमाणाद्यङ्गमण्डपस्थवेदिलक्षणं हेमा० दा० उक्तं यथा "मध्यमोत्तमयोर्वेद्यो मण्डपस्य त्रिभागतः। चतुर्हस्तोच्छ्रितिस्तस्याश्चित्रसम्पन्नतोऽपि वा। नवैकादशहस्ता वा दृष्टकाभिः प्रकल्पयेत्"। वैदिककर्मांङ्गवेदिलक्षणादिकं कात्या०श्रौ०२।६।१स्थलादौ उक्तं यथा "अपरेणाहवनीयं वेदिं खनति" कात्या०श्रौ० "त्रयङ्गुलखाताम्" सू० "त्र्यङ्गुलं खातस्यास्याः" कर्क०। "व्यामात्पश्चात्" सू० "अपरस्यां दिशि तिर्य्यक्प्रमाणेन चतुररत्निमात्रां कर्कः। "त्ररत्निं प्राचीम्" सू० "त्ररत्निं प्राचीम् पूर्वापरायतां दीर्घाम्। पुरस्तात् (पूर्वपार्श्वे) तिर्य्यक्प्रमाणं यद्यपि नोक्तम्। तथाप्यरत्निं तयोक्तमेव दर्शनात् कर्कः। "अपरिमितां वा" सू० "अस्मिन् सूत्रे अन्ये द्वावेवापरिमितशब्दौ श्रुतिवाक्यानुसरणादपरिमाणवाचिनौ अपरिमिता वा अपरिमितेष्टका वेति च। अन्ये तु अपरिमितं प्रमाणाङ्गूष्ठ इत्युक्तत्वात् पूर्वोक्तपरिमाणादतिशयेनाधिकपरिमाणवाचकः" कर्क० "प्राक् प्रवणाच्छ्रद्धा" सू० "प्रवन्तेऽस्मिन्नापोऽनेन वेति प्रवणं नीचम् प्रवन्तते वा वनसुदकमस्मिन्निति तदेव निम्नम्" कर्क०। "मध्यसंवहीताम्" सू० "तत्साधनप्रकारश्च परिशिष्टे उक्तः "खानीय रज्जुं पूर्वार्द्धात् पश्चार्द्धं यावदेव तु। द्विगुणीकृत्य तां रज्जुमत्रे तस्यास्तु शङ्कुकौ। क्षिपेत्तेन मानेन तया रज्ज्वाऽभागया। वा पृथुत्वत्तरीयेण भागेनालिखेत्तमुहाविति" कश्चित्। "वेदिश्रोण्यं तयोर्मध्ये तया रज्ज्वाऽभागयेति पाठः" कर्क० "अग्निनभितोऽसौ" सू० "असौ आग्नेयेयानकोणौ आहवनीयसदनयतो भवतः तयोर्मध्ये आहवनीयो भवतीत्यर्थः अतोऽत्रापि वेदेरेवावयवौ श्रोणिवत् खननस्तरणादयश्च वेदिसम्बन्धाः संस्कारारम्भयोरपि प्रवर्त्तन्ते। षड्रत्निं रज्जुं मित्वा द्वितीयारत्न्यन्ते लक्षणं श्रोणशङ्कुनार्थम् ततोऽरत्नेचतुर्थे भागे लक्षणमाकर्षणार्थम् तृतीयारत्न्यन्ते प्राचीप्रान्ताङ्कनार्थम् ततश्चतुर्थभागोने(ऽरत्नौ) अपाङ्कनार्थम् ततः शङ्वे, ऽरत्नौ पाश्च इति अयं च पाशोऽविपर्य्यासेन साधनोपायः विपर्यासपक्षे तु षड्रत्निं रज्जुमुभयतः पाशौ कृत्वा प्रथमं षाड्गारत्न्यन्ते अपाङ्कनार्थम् ततोऽर्धारत्नौ श्रोणिशङ्कुनार्थम् ततोऽरत्नेचतुर्थे भागे आक्रमणार्थम् अरत्निन्यूने च प्राचीप्रान्ताङ्कनार्थमिति। अपरिमितपक्षाश्रयणे च प्राचीप्रमाणं पुरस्तात्तिर्य्यक्प्रमाणं च तुल्यम् पश्चात्तिर्य्यक्प्रमाणं प्राचीपेक्षया तृतीयभागेनाधिकमिति युक्त्या कल्पनीयम्। तत्र च प्राचीप्रमाणं रज्जुं द्विगुणं कृत्वा रज्ज्वोर्मूलात् पुरस्तात्तिर्य्यक्प्रमाणा मूले मूलरज्ज्वात्तिसदृशतृतीयभागस्यादौ आकर्षणार्थं खन्यमिति। अथ खननप्रमाणे पश्चान्नरमाह "आमूलचूडादोषधीनाम्" सू० "प्राक् प्रवणाच्छ्रद्धेत्यस्यात् खलानुमन्यङ्कुतिन्यायेन यावच्छ्रोऽत्रानुवर्त्तते अध्याहियते वा। अस्मिन् पक्ष एव विशेषमाह" कर्क० "ओषधीनां मूलान्युच्छ्रेत्तवै मूयात्" सू० "इमं प्रैषमध्वर्युरग्नीधं प्रति मूयात्। मूलानि च भूमिमध्ये दूरमपि यावत् प्रसरन्ति तावत्पर्य्यन्तम्" कर्क०। "आहार्य्यपरीवां पशुकामस्य" सू० "प्रमलुमार्जनादेः सकाशादाहृत्य उदीचमप-

यार्थान्यत् पुरीषमानीय वेदिमध्ये प्रक्षेपणीयम् एतच्च पुरुषार्थम् प्रणयने कांस्यादिस्तु व्रतस्य विकृतौ न भवति। निष्कासेऽपि वेदिः पुरीषवत्येव कार्या वेदिपुरीषं तत्रैव तिष्ठति न ततो निष्कास्यते वचनाभावात्। स्नाता वेदिः नाङ्गिः स्पृष्टोकरणाया किन्तु पांशुलैव कार्या"कर्कः। "वेदिं परिसमुह्य वितृतीयेऽग्नीदुत्तरत उत्करं करोति" सू० "अन्वाहार्यादिश्रयणानन्तर प्रथमं वेदिमानयध्वर्युः करोति यथोक्तम् "ततोऽग्नीद्धैवेदिमध्वर्युपतिं तृणपुरीषादिसमवायं वेदेरुत्तरतः परिसमूह्य परिस्तरितस्य तृणपुरीषादुत्करं राशिं करोति उत्कीर्य तं दत्त्वोत्करः। वितृतीयं च वेदेः प्रक्रमत्वात्तृतीयमेव गार्हपत्याहवनीयान्तरालं वितृतीयं च शुल्बसूत्रोक्तम् गार्हपत्याहवनीययोरन्तरं षोढा समधा वागन्तुसमं त्रेधा विभज्यापरवितृतीयलक्षणेन दक्षिणावस्य तस्मिन्नग्नि विषयेऽवोत्तरत उत्कर इत्येकः प्रकारः। अपि वान्तर त्रिभागोनया रज्ज्वा पूर्वार्द्धं समचतुरस्रं कृत्वा पोऽक्षाक्षत्रिविषर्यंसोत्तरांस उत्कर इति विषर्यांसवैषम्यं पूर्वतृतीयलक्षणेनोत्तरत आयम्येति प्रथमे प्रकारे गार्हपत्याहवनीययोरन्तरत्रिभागोनया रज्ज्वापरार्द्धं समचतुरस्रं कृत्वा तस्य चतुरस्रस्योत्तरांसे उत्कर इति द्वितीय प्रकारः। चात्वालोत्करावन्तरेण शरः सन्निहितो हि चात्वालोत्करः पूर्वं वितृतीये भवतीति" कर्कः। तत्करण प्रकारस्तत्रैवानुसन्धेयः।

वैदिका स्त्री वेदिरिव स्वार्थे कन्। मङ्गल्यकर्मार्थं गृहद्वारादौ चतुरस्रादिस्तृत्तिकास्तूपाकारेण निर्मिते भूभागे हेमच०। वितर्दौ अमरः।

वैदिजा स्त्री वेद्या होमवेदितो जायते जन-ड। द्रौपद्याम्

वैदित त्रि० विद्-तृच् टच्। ज्ञातरि हेमच०।

वैदिन् पु० विद्-णिनि। १पण्डिते शब्दर०। २स्थिरपुत्रभेदे च। १ज्ञातरि त्रि० स्त्रियां ङीप्।

वैध पु० विध-अञ्। (बेंदा) १वेधने २व्यधने (चाड़ा) "परिधिन्यधयामः शुकधान्येषु वैधः" इति लोला०। विवाहादौ वर्ज्ये बलवद्विरोधिस्थिरधरुवेष्टकृत्तर्यंगे च उपयमपदे व्यो०त० च दृश्यम् "वैधं सर्वत्र वर्जयेत्"।

वैधव पु० विध-अण्। १कर्चूरे त्रिका०। २अक्षतेतरे २धान्यादौ न० राजनि० ३वैधकर्त्तरि त्रि०।

वैधनी स्त्री विध्यतेऽनया विध-ल्युट् ङीप्। (भोमरी) १शस्थिरलोहादिवेधनास्त्रे शब्दभेदे। स्वर्वे क। कलार्थे २मेधिकायां २कृत्तिकर्णवेधनास्त्रे त्रिकाण्डशेषः।

वैधमुख्य पु० ७त०। १कर्चूरे राजनि०। संज्ञायां क। २रिष्टवृक्षे अमरः।

वैधस् पु० वि+धा-असुन् गुणः। १हिरण्यगर्भे जगत्स्रष्टरि २विष्णौ अमरः। ३ब्रह्मणि ४श्वेतार्कवृक्षे शब्दच०। ५पण्डिते विश्वः ६ब्रह्मर्थर्वघृते ऋषभेदे वह्निपु०।

वैधित त्रि० वेधो ज्ञातोऽस्य तारा० इतच्। १विद्धे २छिद्रिते अमरः। [२मेधिकायां राजनि०।

वैधिनी स्त्री विध-णिनि। १जलौकायाम् (जोंक) शब्दर०।

वैत्रा स्त्री वेत्र-न उपधाया इत्त्वं। नदीभेदे "विनदीं पिञ्जलां वेत्रां(त्राम्) तङ्गवेत्रां(त्रां) महानदीम्" भा०भी०६अ०।

वेप कम्पने भ्वा०आत्म०सक०सेट्। वेपते अवेपिष्ट। क्वदित् चङि न ह्रस्वः। द्विर्। वेपथुः।

वेपथु पु० वेप-अथुच्। कम्पे अमरः।

वेपन पु० वेप-ल्युट्। कम्पने शब्दच०।

वेपस् न० वेप-असुन्। अनवद्ये उणादिकोषः।

वेभ पु० वे-भन् न द्वित्वम्। बापदृक्षे शब्दच०। अभिन् न द्वित्वम्। वेभृ अत्रैवार्थे पु०ब० अमरः।

वेर न० व्रज-रन् धोभावः। १देहे २वार्त्ताकौ शब्दरत्ने च अमरः। संज्ञायां कन्। ४कर्चूरे त्रिका०।

वेल चालने भ्वा०पर०अक०सेट्। वेलति अवेलीत्। क्वदित् चङि न ह्रस्वः। [वत्त।

वेल कालोपदेशे च० पु० उ०अक०सेट्। वेलयति ते ऋषिर्वेल न० वेल-अच्। १उपवने हेमच०। २काले समये ३मर्य्यादायां ४समुद्रवृद्धौ च स्त्री "वेलाभङ्गे विभावर्यां परिक्षीणा" भट्टिः। ५चौराकाले कालभेदे "चतुर्विंशति वेलाभिरहोरात्रं प्रचक्षते" ज्योति०। ६समुद्रजलविकारे ७अस्थिरेऽर्थे ८राजे ९ईश्वरभोज्ञाने च मेदि० अस्योच्चादित्वमित्यन्ये व्याख्यातं।

वेलाकूल न० मध्यलिप्रदेशे त्रिका०। [अवेल्लीत्।

वेल्ल चालने भ्वा०पर०अक०सेट् क्वदित् चङि न ह्रस्वः। वेल्लति

वेल्ल पु०न०वेल्ल-अच्। १सिद्धे अमरः। वज्र। २चलने पु०

वेल्लज पु० वेल्ल-अच्-स्वार्थभूतः सन् जायते जन-ड। मरिचे अमरः।

वेल्लन न० वेल्ल-ल्युट्। १चत्वारिंशौ लुण्ठने २काष्ठनिर्मिते पदार्थे (वेलुन) भावप्र० ३माषादिदार्ढ्यां स्त्री राजनि०।

वेल्लन्तर पु० वेल्लं तरति तृ-अच्। कारतरौ "वेल्लन्तरोज्ज्वलति वीरतरुः प्रसिद्धः श्वेताश्मितारुणविलोहितनील०

पुत्रः । ब्राह्मात्तिलल्यकुलजः शमिकक्षपत्रः शातकण्ठकी च जलदेशज एष वृक्षः । वेल्लन्तरो रसे पाके तिक्तस्तृष्णाकफापहः । मूत्राघातः श्रमश्चित्तं याही योनि मूत्रानिलार्त्तिहृत् भावप्र० । [जटा० ।

वेल्लहल पु० वेल्ल ह्लचयति ह्लल-अच्-पृषो० । केतिनागरे वेल्लि स्त्री वेल्ल-इन् । लतायां शब्दर० ।

वेल्लित न० वेल्ल-भावे क्त । १गमने मेदि० । कर्त्तरि क्त । २कम्पिते ३कुटिले च त्रि० अमरः ।

वेल्लि स्त्री) स्त्री वेल्ल-इन् वा ङीप् । लतायाम् शब्दच० । संज्ञायां कन् वेल्लिका । (वेचड) वृक्षे शब्दच० ।

वेवी कान्तौ गतौ व्याप्तौ क्षेपे भोजने च सक० अजनने अक० अदा० आत्म० सेट् जक्षादि० वैदिक एवायम् । वेवीते अवेविष्ट । अस्य कचिदपि गुणवृद्धी न स्तः ।

वेश पु० विश-घञ् । अलङ्कारादिना लतरूपान्तरे १नेपथ्ये च कर्मणि अमरः । २वेश्यान्तरे ३गृहमात्रे मेदि० ४प्रवेशे

वेशधारिन् पु० वेशं धारयति धृ-णिनि । छद्मना रूपान्तरधारिणि १अन्नतपस्विप्रभृतौ शब्दच० । २वेशकारके नटादौ च । आदि० ।

वेशन्त पु० विश-झच् । १क्षुद्रसरोवरे अमरः । २अम्बो ३वेशर पु० वेशं राति रा-क । अश्वतरे त्रिका० ।

वेशमन् न० विश-मनिन् । गृहे अमरः ।

वेशमभू स्त्री ६त० । गृहकरणयोग्ये स्थाने अमरः ।

वेश्य न०विश-यत् वेशाय हितं वा यत् । १वेशप्रायोजने मेदि० २पाठायाम् (आकनादि) ३वारयोषिति च स्त्री अमरः । "पतिव्रता चैकपत्नी द्वितीये कुलटा स्मृता । तृतीये दुश्चली ज्ञेया चतुर्थे पुंश्चली स्मृता । वेश्या च पञ्चमे प्रोक्ते जुङ्गी च सप्तमेऽष्टमे । तत ऊर्द्धं महावेश्या सास्मृता सर्वजातिषु । यो द्विजः कुलटां गच्छे दुश्चलीं पुंश्चलीमपि । जुङ्गीं वेश्यां महावेश्यामवटोदं प्रयाति सः । यतीयुदं कुलटागामी दुश्चलागामी चतुर्थं फलम् । षड्गुणं पुंश्चलीगामी वेश्यागामी गुणाष्टकम् । जुङ्गीगामी दशगुणं वसेत्तत्र न संशयः । महावेश्या गामुकश्च ततः शतगुणं वसेत् । तत्रैव सर्वगामी चेत्येवमाह पितामहः । तत्रैव यातनां भुङ्क्ते यमदूतैस्तु ताडितः । तत तिर्य्यग्गतिः कुलटागामी दुश्चलागामी च वायसः । काकलः पुंश्चलीगामी वेश्यागामी बकस्तथा । जुङ्गीगामी शूकरश्च सम्भवन्ति भवे भवे । महावेश्यागामुकश्च जायते मालभल्लिकः" ब्रह्मवै०प्र०ख०२८अ० ।

वेष पु० विष-अच् घञ् वा । भूषणादिना १रूपान्तरकरणे २वेशप्राजनालये च भरतः ।

वेषण पु० विष-करणे ल्युट् । १कासमर्दे (कालकासुन्दे) हारा० । २धन्याकवृक्षे स्त्री रत्नमा० । [अवि(वे)वेष्टत् त ।

वेष्ट वेष्टने भ्वा०आत्म०सक०सेट् । वेष्टते अवेष्टिष्ट । चङि अ

वेष्ट पु० वेष्ट-घञ् अच् वा । १वेष्टने २श्रीवेष्टे राजनि० ३वस्त्रनिर्यासे च (आटा) वैद्यकम् ।

वेष्टक न०वेष्ट-ण्वुल् । (पागड़ी)१वेष्णीये शब्दर० २कुम्भाग्रके राजनि० ३प्राचीरे धु०हेमच० । ४वेष्टनकारके त्रि० ।

वेष्टन न० वेष्ट-करणे ल्युट् । १कर्णशष्कुल्याम् २वस्त्रीभे ३वस्त्रकृते च ४गुग्गुलौ शब्दच० । भावे ल्युट । ५वृतौ मेदि० ।

वेष्टवंश पु० वेष्ट-अच् कर्म० । (वेड़वाँश) वंशभेदे शब्दच० ।

वेष्टसार पु० वेष्टस्य सारः । श्रीवेष्टे राजनि० ।

वेष्टित त्रि०वेष्ट-क्त । प्राचीरादिना १आवृते अमरः । २कृते ३वासके ४करणान्तरे न० मेदि० । [अवेक्षीत् ।

वेस गतौ भ्वा०पर०सक०सेट् अदित् चङि न हस्वः । वेसति

वेसन न० वेस-ल्युट् । "दालयस्यकानान्तु निस्तुषा यन्त्रपेषिताः । तच्चूर्णं वेसनं प्रोक्तम्" इत्युक्ते १घृष्टादिद्विदलचूर्णे २गमने च ।

वेसर पु० वेस-अरन् । अश्वतरे हेमच० ।

वेसवार पु० वेसं वारयति वृ-अच् । (बाटना) पिष्टधान्यकसंस्कारादौ अमरः । "निरस्थि पिशितं पिष्टं सिद्धं गुडघृतान्वितम् । कृष्णमरिचसंयुक्तं वेसवार इति स्मृतम्" इत्युक्ते २भक्ष्यभेदे अस्य गुणाः "वेसवारो गुरुः स्निग्धो बलोपचयवर्द्धनः" राजवल्लभः । अस्य समध्यत्वं समध्यत्वं वा रायमुकुटे दृष्टम् । [अवेक्षिष्ट ।

वेह्य यत्ने भ्वा० आत्म० अक० सेट् चङि न हस्वः । वेहते

वेहत् स्त्री वि+हन क्विप् नलोपः । गर्भोपघातिन्यां स्त्रियाम् अमरः । जात्या समासे परनि० गोवेहत् त्रि०कौ०

वेहार पु०वि+हृ-घञ् पृषो० । खनामख्याते देशभेदे [हस्व

वेल्ल गतौ भ्वा०पर०अक० सेट् । वेल्लति अवेल्लीत् चङि न

वै शोषे भ्वा०पर०सक० सेट् क्वनिप् । वायति अवासीत् ।

ओदित् निष्ठातस्य नः । वानः निर्वाणः ।

वै अव्य० वा-डै । १पादपूरणे २अनुनये ३सम्बोधने अमरः ।

वैकङ्क न० विशेषेण कङ्कति व्याप्नोति अण् । तिर्य्यक्छन्दोभेदे त्रिष्टुभि छारभेदे हेमच० । वुन् । वैकङ्कक तरति छन्दोवित्साकारेण वृते गाल्वभेदे अमरः ।

वैकङ्कत पु॰विकङ्कत+स्वार्थेऽण् (वैँचि) १वृक्षभेदे। तस्येदमण। २विकङ्कतसम्बन्धिनि त्रि॰। [२पक्षभवे च।

वैकल्पिक त्रि॰विकल्पेन प्राप्तः तत्र भवो वा ठक्। १पक्षप्राप्ते

वैकल्य न॰ विकलस्य भावः ष्यञ्। विकलत्वे।

वैकुण्ठ पु॰ विकुण्ठायां भवः अण् विविधा कुण्ठा माया यस्य स्वार्थेऽण् वा। १विष्णौ २इन्द्रे मेदि०। ३सितार्जके राजनि०

"चातुषस्थान्तरे देवो वैकुण्ठः पुरुषोत्तमः। विकुण्ठाया-मसौ जज्ञे देवतैः सह" विष्णुपु०"विविधा कुण्ठा गतेः प्रतिरुद्धिस्तस्याः कर्त्तां इति वैकुण्ठः। जगदारम्भे विशिष्टानि भूतानि परस्परं संश्लेषयन् तेषां गतिं प्रत्य-वस्थादिति या वैकुण्ठः। "माया संश्लेषिताभूमिरङ्गि-व्योम्ना च वायुना। वायुश्च तेजसा सार्द्धं वैकुण्ठत्वं ततो गमं" भा॰शान्तिप०। विष्णुस॰ भा०। "कुण्ठं जडञ्च विश्वौघं विशिष्टञ्च करोति या। विकुण्ठां प्रकृतिं वेदास्तत्वारञ्च वदन्ति ताम्। गुणाश्रयेण भगवान् तस्यां जातः स्वसृष्टये। परिपूर्णतमं तेन वैकुण्ठञ्च विदु-र्बुधाः"। ४विष्णुधामभेदे "उपरिष्टात् क्षितेरष्टौ कोटयः सप्तभीरितम्। सप्तादुपरि वैकुण्ठो योजनानां प्रमाणतः। भूर्लोकात् परिसंख्यातः कोटिरष्टादश प्रभो!। यत्रास्ते श्रीपतिः साक्षात् सर्वेषामभयप्रदः" पद्मपु॰स्व॰ ६अ०।

वैकृत न॰ विकृतस्य भावः अण्। १विकारे २बीभत्सरसे तदा लक्षणमांसशोणितादौ विकृतित आगतः अण्। ३वि-कृतितो जाते त्रि॰ "वैकृतास्तु तथा देवाः"।

वैक्रान्त न॰ स्वार्थे अण्। मणिभेदे विक्रान्तशब्दे ६७५भाग।

वैखरी स्त्री विशेषेण खं राति रा-क स्वार्थे अण्। अर्थ-बोधके कण्ठादिष्वाद्यार्द्धमाणे वर्णात्मके शब्दविशेषे। वर्ण-शब्दे ४८५॰ पृ॰ दृश्यम।

वैखानस पु॰ वि+खन--ल्यु अन--असुन् कर्म॰ स्वार्थे अण्। वानप्रस्थे तापसभेदे "वैखानसेभ्यः श्रुतरामवार्त्ताः" भट्टिः

वैगुण्य न॰ विगतो विरुद्धो वा गुणोऽस्य तस्य भावः ष्यञ्। यत्र यदुचितं तस्य १रूपान्तरतापादने २अन्यायत्वे ३अ-सम्यक्त्वे च। [त्वयत्वे च।

वैचित्र्य न॰ विचित्रस्य भावः ष्यञ्। १नानारूपत्वे २विल-क्षणत्वे च।

वैजयन्त पु॰ विजयते वि+जि-भ स्वार्थे अण्। १इन्द्रप्रा-साद्रे अमरः। २इन्द्रे मेदि०। ३गृहे शब्दच०। ४इन्द्र-ध्वजे मेदि०। ५अम्लिमन्थवृक्षे राजनि० ६पताकायाम् स्त्री अमरः। ७वैजन्तीवृक्षे च स्त्री मेदि०।

वैजिक न॰ बीजेन निर्वृत्तं ठक्। १शिग्रुतैले मेदि०। बीजाय हितम् स्वार्थे ठक् वा। २कारणे। ३आत्मनि शब्दमा॰ तस्येदं बीजादागतं वा ठञ्। ४सद्योजाता-ङ्कुरे मेदि० ५बीजसम्बन्धिनि त्रि॰।

वैज्ञानिक पु॰ विज्ञानाय साधु ठक्। १निपुणे अमरः। वि-ज्ञानमधिकृत्य कृतो ग्रन्थः ठक्। २बौद्धागमे ३तदध्ये-तरि ४तत्सम्बन्धिनि च त्रि॰।

वैडालव्रत न॰विडालस्येदम् अण् तदिव व्रतम् "यस्य धर्म्म-ध्वजो नित्यं प्रकाशध्वज इवोच्छ्रितः। प्रच्छन्नानि च पा-पानि वैडालं नाम तद्व्रतम्" इत्युक्ते प्रकाशेन धर्म्मा-चरणेन गुप्तपापाचारे।

वैडालव्रतिक पु॰ वैडालव्रतमस्यास्य ठन्। छद्मना धर्मचा-रिणि छद्मतापसे त्रिका०। इनि। वैडालव्रतिन् तत्रार्थे "छद्मना चरितं तच्च व्रतं रजसि गच्छति। अलिङ्गी लिङ्गवेशेन यो लिङ्गमुपजीवति। स लिङ्गिनां हरेत् पापं तिर्य्यग्योनौ च जायते"। वैडालव्रतिनः पापाः सर्वध-र्मविनाशकाः। सद्यः पतन्ति पापेषु कर्मणस्तस्य तत् फलम्" कूर्मपु॰ ५अ०।

वैणव न॰वेणूनां फलम् अण्,तस्य न लुप् तद्धेदं वा अण्। १वेणु-फले वेणुयवे अमरः। २वेणुसम्बन्धिनि त्रि॰स्त्रियां ङीप्।

वैणविक त्रि॰ वेणोर्विकारः ष्यञ् वैणवं वेणुवाद्यं शिल्प-मस्य ठक्। वंशीवादके अमरः। [अमरः।

वैणिक त्रि॰ वीणा तद्वादनं शिल्पमस्य ठक्। वीणावादके

वैणुक न॰ वेणोर्विकारः ठक्। १गजबन्धनार्थे लौहमुखे वंशदण्डे अमरः। वेणुस्तद्वादनं शिल्पमस्य ठक्। २वेणु-वादके त्रि॰ शब्दच०। [रूपभेदे जटा०।

वेण्य त्य) पु॰ वेण(न)स्यापत्यम् यञ्। १वेणुसुते पृथुनामके

वैतंसिक त्रि॰ वितंसेन मृगपक्ष्यादिबन्धनोपायेन चरति ठक्। मांसविक्रयोपजीवके व्याधे अमरः। [अत्यादौ अमरः।

वैतनिक त्रि॰ वेतनेन जीवति ठक्। वेतनोपजीवके कर्मकरे

वैतरणि(णी) स्त्री वितरणेन दानेन लङ्घ्यते अण् ङीप् वा वृषो॰ ह्रस्वः। यमद्वारस्थे नदीभेदे "नदी वैतरणी नाम दुर्गन्धा रुधिरावहा। उष्णतोया अस्थिवेगा अस्थिकेशतरङ्गिणी" प्रा॰वि॰ जमदग्निः। तस्या उत्-पत्त्यादि कालिकापु॰ १८अ॰ उक्तं यथा

"अनैश्वरोऽपि भूतेशमासाद्यान्तर्हितस्ततः। बाष्पवृष्टिं दुराधर्षमवजघ्राह मायया। यदा स नाशकत् बाष्पान् सम्हारयितुमर्कजः। तदा सङ्हारिणी चिन्ता बाष्पास्ते

जलधारके । लोकालोकस्य निकटे जलधाराकृतो गिरिः । पुष्करद्वीपपृष्ठस्थस्तोयसागरपश्चिमे । स तु वर्षप्रमाणेन मेरुपर्वतसन्निभः । तस्मिन् विध्यस्तवान् वाय्वान् न धर्त्तुं शक्तमेवेतः । विदीर्णस्तैस्तु वाय्वोर्वेगैर्मध्योऽभवद्भुतम् । ते वाय्वाः पर्वतं भित्त्वा विविशुस्तोयसागरम् । सागरोऽपि गृहीतं तान् यथाऽऽक्षरानलम् । ततस्तु सागरं मध्ये भित्त्वा वाय्वाः समागताः । तोयधेः प्राग्भवां वेलां सर्वमाक्रम्य विभेद ताम् । विभिद्य वेलां ते वाय्वाः पुष्करद्वीपमध्यगाः । नदी वैतरणी भूत्वा पूर्वसागरगाऽभवत् । जलधारस्य वेगेन संसर्गात् सागरस्य च । लवणाय सौम्यतां किञ्चिद् वाय्वाश्चे नाभिदन् क्षितिम् । तदाप्यव्याकुला पृथ्वी विदीर्णा सा च चेक्लृप्तिः । अवजघ्राह तान् वाय्वान् सोऽपि क्षुब्धोऽभवत्तदा । यत्नैश्चरैश्च तं वोढुमसमर्थेन द्योतकैः । क्षिप्तैर्विदारितः सोऽभ्रो जलधारो महागिरिः । विभिद्य पर्वतं वाय्वोर्व्याप्ते सागरं ययुः । वैवस्वतपुरद्वारे योजनद्वयविस्तृता । अद्यापि तिक्तलवणा क्षरत्तोयकसम्भरा । भित्त्वा वेलां ततः पृथ्वीं विभिद्याशु तरङ्गिणीम् । चक्रुर्वैतरणीं नाम पूर्वसागरगामिनीम् । नानावातविधानेन न क्षोभ्या सन्ततेन च । तच्चुक्रमा या सा नदी तप्ततोया विभीषणा । दुःखेन तां सा पृथिवी बिभर्त्ति महताधुना । सदा ऊर्द्धगतैर्वाष्पैर्विक्षिपन्ति नभश्चरान् । तस्या उपरि नो यान्ति देवा अपि भयाद्वरात् । यमद्वारं समाश्रित्य योजनद्वयविस्तृता । निम्नं वहति संपूर्णा भीषणो जगत्त्रयम्" २पितृकन्याभेदे "अयत्त्वानश्च यज्वानः पितरो ब्रह्मणः सुताः । अग्निष्वात्ता बर्हिषदो द्विधा तेषां व्यवस्थितिः । तेभ्यः स्वधा, स्वधा अस्तु सेनां वैतरणीं तथा" भूमि पु० १२अ० । वितरत्यनया तॄ-करणे ल्युट् ङीप् । आसन्नमृत्युकाले दातव्यायां १गवि च "आसन्नमृत्युना देया गौः सवत्सा च पूर्ववत् । तदभावे च गौरेका नरकोत्तारणाय वै । तदा यदि न शक्नोति दातुं वैतरणीञ्च गाम् । शक्तोऽन्योऽरुक् तदा दत्त्वा श्रेयो दद्यान्मृतस्य च" । पूर्ववत् क्षेमसङ्कल्पादिना अत्र मृतस्य चेति षकारश्चवर्त्वात् एकादशाहेऽपि वैतरणीदानाचारः" शु० त० रघु० । "यमद्वारे महाघोरे तप्ता वैतरणी नदी । तान्तु तर्त्तुं ददाम्येनां कृष्णां वैतरणीञ्च गाम् शु० त० ।

वैतस पु० वेतस एव स्वार्थे अण् । वञ्जुलवेतसे अटा० ।

वैतानिक पु० वितानस्यायम् ठक् । १श्रौतविधिनाऽग्निष्वा-धाने २वितानसम्बन्धिनि च "दाक्षाद्रुद्रं मखौ च स्यात् यस्य वैतानिको विधिः" स्मृतिः । वितानशब्दे ४८६६ पृष्ठम् ।

वैतालिक त्रि० विविधस्तालः मङ्गलगीतादिगद्यरूपेण अस्त्यर्थे ठक् । मङ्गलस्तुतिभिः राज्ञां प्रबोधकारके मागधादौ अमरः ।

वैतालीय पु० मात्राछन्दोभेदे । "षड्विंशतेऽष्टौ यमे कला-श्चत्र यमे स्युर्नौ निरन्तराः । न समाऽत्र परान्तिता कला वैतालीयेऽन्ते रलौ गुरुः" छ० र० ।

वैदग्ध न० स्त्री विदग्धस्य चतुरस्य भावः अण् वा स्त्रियां पक्षे ङीप् । १चातुर्य्ये २भङ्गीषु च । अञ् । वैदग्ध्यमप्यत्र न०

वैदर्भ पु० विदर्भाणां जनपदानां राजा अण् । १विदर्भदेशाधिपे २वाक्यस्य कौटिल्ये न० "साधुर्वक्रोक्तिवैचित्र्यं रचना वक्रितालिका । अवक्रिरक्षुक्तिर्वा वैदर्भी रीतिरुच्यते" इत्युक्ते १काव्यचरणभेदे स्त्री सा० द० ङीप् । विदर्भे भवा अण् । ३नलराजपत्न्यां दमयन्त्याम् स्त्री ङीप् । ५अगस्त्यपत्न्यां ६श्रीकृष्णमहिषीभेदे च स्त्री हरिव० ।

वैदल न० विदलस्य विकारः अण् । १भिक्षुकस्य भिक्षापात्रभेदे अमरः । २पिष्टकभेदे पु० शब्दच० ।

वैदिक पु० वेदं वेत्त्यधीते वा ठञ् । १वेदज्ञे ब्राह्मणे वेदेषु विहितः ठक् । २वेदोक्ते कर्म्मणि त्रि० । स्त्रियां ङीप् "वैदिकी तान्त्रिकी सन्ध्या यस्यानुष्ठानयोगतः" तन्त्रम् ।

वैदुष्य न० विदुषो भावः विद्वस्+ष्यञ् सम्प्र० । पाण्डित्ये ।

वैदूर्य्य न० विदूरे गिरौ भवः ष्यञ् । कृष्णपोतवर्णे विड़ालनेत्रतुल्ये वर्णे मणिभेदे केतरत्ने (लसुनिया) राजनि० । "सङ्काविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादिकम् । मणिरत्नसरं शीतं कषायं स्वादु लेखनम् । चाक्षुष्यं धारणात्तच्च पाषाणस्त्रीविनाशनम्" राजवल्लभः । तच्छायाऽस्त्रियां यथा "एकं नेत्रुपलाश्मकोमलरुचां मायूरकण्ठत्विषां मार्जारेक्षणपिङ्गलच्छविभृतां क्षेयं त्रिधा च्छायया । यद्भासं गुरुतां दधाति नितरां स्निग्धन्तु दीप्तिं दृढं वैदूर्य्यं विगदं वदन्ति सुधियः स्वच्छन्तु तच्छोभनम् । तस्य कृष्णवर्णं यथा "विच्छायं मच्छिलाभमं लघु रूक्षञ्च सञ्चतम् । सत्रासं परुषं कृशं वैदूर्य्यं दूरतो त्यजेत्" । तत्परीक्षा यथा । "इदं यदालना स्वच्छं स्वच्छायां निकषाश्मनि । स्फुटं प्रदर्शयेद्रेतद्वैदूर्य्यं जात्यमुच्यते" । राजनि० "वैदूर्य्यं शुक्लरागाणां कर्कैतभीमके वरे । परीक्षां ब्रह्मणा प्रोक्तां व्यासेन कथितां शिव ! ॥ कृष्णाऽकाक्षक्षुभिताक्षुराक्षिनिभेन्दुकलादिति च्छाया ।

वैदूर्यं सत्पञ्चमनेकवर्णं शोभाभिरामं स्थितिवर्णबीजम्। यदिदूरे विदूरस्य गिरेरुत्पत्तिरोधसः। कामभूतिकबीमान-मतु तस्याकरोऽभवत्। तस्य नादयसत्यत्वादाकरः सम-ग्रगुणः। बभूवुत्तरितो लोके लोकत्रयविभूषणः। तस्यैव दानवपतेर्निनदानुरूपप्राहृट्पयोदरवदर्शितचारु-रूपाः। वैदूर्यरत्नमणयो विविधावभासास्तस्मात् स्फुलि-ङ्गनिवहा इव संबभूवुः। पद्मरागसुखादाय मणिवर्णा हि ये स्थितौ। सर्वांस्तान् वर्णः शोभाभिर्वैदूर्यमनुगच्छति। तेषां प्रधानं गिरिकाख्यनीलं यदा भवेद्दीप्तदृढप्रभ-काशम्। चाषाग्रपक्षप्रतिमश्रियो ये न ते प्रशस्ता मणिशास्त्रविद्भिः। गुणवान् वैदूर्यमणिर्योजयति स्वा-मिनं वरभाव्ये। दोषैर्युक्तोदोषैस्तस्माद् यत्नात्परी-क्षेत। गिरिकाचशिशुपाली काचस्फटिकाश्च भूमि-निर्भिन्नाः। वैदूर्यमणेरेते विजातयः सन्निभाः सन्ति। स्निग्धाभावात् काचं लघुभावाच्छेषुपाकं विद्यात्। गिरिकाचमदीप्तित्वात् स्फटिकं पक्वोज्ज्वलत्वेन। यदि-न्द्रनीलस्य महागुणस्य सुवर्णसंख्याकलितस्य मूल्यम्। तदेव वैदूर्यमणेः प्रदिष्टं पलद्वयोन्मापितं गौरवस्य। जात्यस्य सर्वेऽपि मणेस्तु यादृक् विजातयः सन्ति समान-वर्णाः। तथापि नानाकरत्वात्तुमेयभेदप्रकारः परमः प्र-दिष्टः। सुखोपलभ्यस्य सदा विचार्यो ह्ययं प्रभेदो विदुषा जनेन। श्लेष्मप्रभेदो लघुता मृदुत्वं विजातिसिद्धं खलु वर्जनीयम्। कृत्रिमाकृत्रिमैः प्रयुज्यमानाः प्रतिवर्णाः प्रति-मूर्तिक्रिया प्रयोगैः। गुणदोषसमुद्भवं लभन्ते मणयोऽर्घा-न्तरमूल्यमेव भिन्नाः। क्रमशः समतीतवर्त्तमानाः प्रतिवर्णा मणिबन्धकेन यस्मात्। यदि नाम भवन्ति दोषहीना मणयः षड्गुणमाप्नुवन्ति मूल्यम्। आकरान् समती-तानासुदधेश्चीरसन्निधौ। मूल्यमेतत् खनीनान्तु न सर्वत्र महीतले। सुवर्णो मनुना यस्तु प्रोक्तः षोडशमाषकः। तस्य सप्ततिभागः संज्ञारूपं करिष्यति। माषसप्त-माषमानो माषकः पञ्चकृष्णलः। पलस्य दशमो भागो धरणः परिकीर्त्तितः। इति मानविधिः प्रोक्तो र-त्नानां मूल्यनिर्णये। गारुडे ७१ अ०। "स्निग्धस्य धूमवर्णाभमीषत्कृष्णान्वितं भवेत्। वैदूर्यनाम तद्रत्नं रत्नविद्भिरुदाहृतम्। ब्रह्मक्षत्रियविट्शूद्रजातिभेदा-च्चतुर्विधाः। स्निग्धनीलो भवेद्विप्रः स्निग्धरक्तस्तु रा-जन्यः। पीतनीलस्तु वैश्यः स्यात् नील एव हि शू-द्रकः"। अस्य गुणाः "सप्तारत्नयवपक्वं रसोनप्र-तिमं हि वा। कलिलं निर्मलं व्यङ्गं वैदूर्यं देवभूष-णम्। सुतारं घनमत्यच्छं कलिलं व्यङ्गमेव च। वैदूर्याणां समाख्याता एते पञ्च महागुणाः"। "अङ्गारच्छिन्न दीप्तिं योऽसौ सुतार इतीर्यते। प्र-माणतोऽल्पं गुरु यद् घनमित्यभिधीयते। कलङ्कादि-विहीनं तदत्यच्छमिति कीर्त्तितम्। ब्रह्मणस्तकलाकार-सदृशो यत्र दृश्यते। कलिलं नाम तद्राजः सर्वसम्पत्ति-कारकम्। विस्निग्धाङ्गन्तु वैदूर्यं व्यङ्गमित्यभिधीयते। कर्करं कर्कशं त्रासः कलङ्का देह इत्यपि। एते पञ्च महादोषा वैदूर्याणामुदीरिताः। शर्करायुक्तमिव यत् प्रतिभाति च कर्करम्। सर्वेऽपि यत्नजन्नेया च कर्कशं बन्धुनाशनम्। भिन्नध्वान्तिकरन्त्रासः स कुर्य्यात् कृत्तसं-ज्ञयम्। विरङ्गवर्णो यस्माद्धे कलङ्कः क्षयकारकः। मल-टिन्ध इवाभाति देहो देहविनाशनः। जयति यदि सुवर्णत्यागहीनो यदा वा बहुविधमणिहारो भूपतिं वा यति वा। दधदपि धृतदोषं जातु वैदूर्यरत्नं प्रतिहत-फलरूपः पातमेवाभ्युपैत्यवश्यम्"। युक्तिकल्पतरुः।

वैदेह पु० विशेषेण देहं उपचयो यस्य स्वार्थे प्रज्ञाद्यण् विदेहे भवः अण् वा। १बस्तिगृजने भरतः। शूद्रात् वैश्यजाते २जातिभेदे पुंस्त्री०मेदि० स्त्रियां ङीष्। ठक। वैदेहिकोऽपि वणिजि। विदेहानां राजा अण्। ३विदेहराजे जनके नृपे।

वैदेही स्त्री विदेहेषु मिथिलादेशेषु भवा अण्। १सीतायाम् जनकात्मजायाम् २हरिद्रायाम् ३पिप्पल्यां ४वणिक्स्त्रियाञ्च मेदि०।

वैद्य ०विद्याऽस्यास्य अण्। १पण्डिते "नाविद्वान्तु वैद्येन देयं विद्याधनात् क्वचित्" दायभा०। २भिषजि अमरः। तदुपकारके ३व्याकरणे च शब्दच०। वैद्योत्पत्तिस्तु "वैद्योऽश्विनीकुमारेण जातस्य विप्रयोषितः। वैद्यवी-र्य्येण सूद्रायां बभूवुर्बहवो जनाः। ते च यामगुण-ज्ञाश्च मन्त्रौषधिपरायणाः। तेभ्यश्च जाताः शूद्रायां ते आलयाहिणो भुवि"। शौनक उवाच "कथं ब्र-ह्मणपत्न्यान्तु सूर्यपुत्रोऽश्विनीसुतः। सूत्रो केन विधा-नेन बीर्याधानं चकार सः"। सौतिरुवाच "गच्छन्तीं तीर्थयात्रायां ब्राह्मणीं रविनन्दनः। ददर्श कामुकीं कान्तः पुष्पोद्याने मनोहरे। तया निवारितो यत्नात् बलेन बलवान् सुरः। अतीव सुन्दरीं दृष्ट्वा बीर्याधानं चकार सः। दूतं तत्याज गर्भं सा पुष्पोद्याने मनोरमे

सद्यो बभूव पुत्रश्च तत्प्रकाशनसन्निभः। सपुत्रा स्वामिनो गेहं जगाम व्रीड़िता तदा। स्वामिनं कथयामास यस्माद्दैवादिसङ्गतम्। रविप्रोरोषेण तत्याज तञ्च पुत्रं स्वकामिनीम्। सरिद् बभूव योगेन सा च गोदावरी स्मृता। पुत्रं चिकित्सायास्त्रञ्च पाठयामास यत्नतः। नानाशिल्पञ्च यत्नञ्च स्वयं स रविनन्दनः। विप्रश्च ज्योतिर्गणनात् वेदनाच्च निरन्तरम्। वेदधर्मपरित्यक्तो बभूव गणको भुवि"। ब्रह्मवैपु० १० अ०। नरकभोगान्ते वैद्यजन्म यथा "यः करोत्यपहारञ्च देवब्रह्मस्वयोर्धनम्। पातयित्वा स्वपुरुषान् दश पूर्वान् दशापरान्। स्वयं याति च धूमान्धं धूमध्वान्तसमन्वितम्। धूमलिप्तो धूमभोगी वसेत्तत्र चतुर्युगम्। ततो मूषिकजातिञ्च शतजन्मानि भारते। ततो नानाविधाः पक्षिजातयः कृमिजातयः। ततो नानाविधाः वृक्षजातयश्च ततो नरः। भार्य्याहीनो बंधुहीनः शवरो व्याधिसंयुतः। ततो भवेत् स्वर्णकारः स ततश्चर्मषिक् ततः। ततो जवनसेवी च ब्राह्मणो गणकस्ततः। विप्रो दैवोपजीवी वैद्यजीवी चिकित्सकः"।

"लाक्षालोहादिव्यापारी रसादिविक्रयी च सः। स्यात् नागवेष्टश्च सर्पैर्वेष्टित एव च। वर्षेश्च सप्तमान्नावद् तत्रैव नागदंशितः। ततो भवेत् स गणको वैद्यश्च कर्मजन्मसु। गोपश्च कर्मकारश्च रङ्गकारस्ततः शुचिः"। ब्रह्मवै०पु० २८अ०। राजवैद्यश्च लक्षणं यथा "परं पारङ्गतो यः स्यादष्टाङ्गे तु चिकित्सिते। अमाहार्यः स वैद्यः स्याद्गर्मात्मा च कुलोद्गतः। प्राणाचार्य्यः स विज्ञेयो वचनं तस्य भूभुजः। राजन्! राज्ञा सदा कार्य्यं यत्नाकार्य्यं पृथग्जनैः"। भारते १८६ अ०। "चिकित्सां कुरुते यस्तु स चिकित्सक उच्यते। स च यादृक् समीचीनस्तादृशोऽपि निगद्यते। तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयं कृती। क्षमुक्षस्तः शुचिः शूरः साध्योपस्करभेषजः। प्रत्युत्पन्नमतिर्धीमान् व्यवसायी मितंवदः। सत्यधर्मपरोयश्च वैद्य एदृक् प्रशस्यते"। दृष्टकर्मा दृष्टा परेण कृता चिकित्सा येन सः। स्वयं कृती स्वयं चिकित्साकुशलः। लघुहस्तः क्षिप्रिमदस्तः। निषिद्धवैद्यो यथा "कुचेलः कर्कशः क्लीबः पापीयः स्वप्रशंसकः। पञ्च वैद्या न पूज्यन्ते धन्वन्तरिसमा अपि"। कर्कशः अप्रियवादी। क्लीबः स्त्रीसमानः। पापीयः व्यवहारेऽसत्तरः। अथ वैद्यस्य कर्म आह "ब्राह्मीसत्व-परिज्ञानं वेदनायाश्च निग्रहः। एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः" भावप्र० "सत्ये त्रेतादापरेषु युगेषु ब्राह्मणाः क्षत्रियविट्शूद्रकन्यका उपयेमिरे। तत्र वैश्यसुतायां ये जज्ञिरे तनया अमी। सर्वे ते सुनयाः ख्याता वेदवेदाङ्गपारगाः। तेषां स्वस्रोऽस्मताचार्य्यास्त्र्यम्बस्याकुले हि यत्। अम्बष्ठ इत्यसावुक्तस्ततो जातिप्रवर्त्तनात्। परे सर्वेऽपि चाम्बष्ठा वैश्यब्राह्मणयोषिताः। जननीतो जनुर्लब्धा यच्छास्त्रा वेदसंस्कृतैः। अम्बष्ठास्तेन ते सर्वे द्विजा वैद्याः प्रकीर्त्तिताः। अथ कृत् प्रतिकारित्वाच्छल्यशास्त्रे प्रकीर्त्तिताः। सत्य वैद्याः पितृसुतास्त्रेतायाञ्च तथा स्मृताः। द्वापरे क्षत्रवत्योक्ताः कलौ वैश्योपमाः स्मृताः" कुलच०। आयुर्वेदशब्दे दृश्यम्।

वैद्यक न०वैद्यं चिकित्सकमधिकृत्य कृतो ग्रन्थः कन्। आयुर्वेदे "ऋग्यजुःसामाथर्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः। विचिन्त्य तेषामर्थञ्चैवायुर्वेदं चकार सः। कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः। स्वतन्त्रां संहितां तस्माद् भास्करश्च चकार सः। भास्करस्त्वश्विनेभ्य आयुर्वेदं स्वसंहिताम्। प्रददौ पाठयामास ते चक्रुः संहितास्ततः। तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च। व्याधिप्रशमबीजानि साध्वि! शृणु निगदामि। धन्वन्तरिर्दिवोदासः काशीराजश्च धीमान्। कृतः षड्देवाकौ च वैतरणो जनको बुधः। जाबालो जाजलिः पैलः करथोऽगस्त्य एव च एते वेदाङ्गवेदज्ञाः षोड़श व्याधिनाशकाः। चिकित्सातत्त्वविज्ञानं नाम तन्त्रं मनोरमम्। धन्वन्तरिश्च भगवान्सुश्रुताय प्रदत्तवान्। चिकित्साद्यं नाम दिवोदासश्चकार सः। चिकित्साकौमुदीं दिव्यां काशीराजश्चकार सः। चिकित्साप्रभवतन्त्रञ्च भ्रमन्तं चाश्विनीसुतौ तन्त्रं वैद्यकसर्वस्वं नकुलश्च चकार सः। चकार सहदेवश्च व्याधिसिन्धुविमर्दनम्। ज्ञानार्णवं महातन्त्रं यमराजश्चकार सः। च्यवनो जीवदानञ्च चकार भगवान्मुनिः। चकार जनको योगी वैद्यमन्दोहमञ्जसम्। मर्त्तण्डसारं चन्द्रस्तो जाबालस्तन्त्रसारकम्। वैद्यकुलसारं तन्त्रञ्च चकार जाजलिर्मुनिः। पैलो निदानं कवयश्चकार सर्वधरं परम्। वैद्यनिर्णयतन्त्रञ्च चकार कुलनन्दनः। चिकित्साशास्त्रबीजानि तन्त्राण्येतानि षोड़श। व्याधिप्रशमबीजानि बलधानकराणि च। मथित्वा

ज्ञानमन्यानैरायुर्वेदयो निधिम् । ततऊर्ध्वमायुर्दृष्ट्वा नवनीतानि कोविदाः । एतानि क्रमशो दृष्ट्वा दिव्यां भास्करसंहिताम् । आयुर्वेदसर्ववीजं सर्वं जानासि सुन्दरि !" ब्रह्मवै० पु० १६ अ० ।

वैद्यनाथ पु० देशविशेषे "करवीरे महालक्ष्मीरूमा देवी विनायके । अरोगा वैद्यनाथे तु महाकाले महेश्वरी" मात्स्ये । "वैद्यनाथं समारभ्य भुवनेशान्तगं शिवे !। तावद्भूमभिधो देशो यात्रायां न हि दुष्यति" भक्ति-सङ्गमतन्त्रे ७प० । २भैरवविशेषे "हार्दपीठं वैद्यनाथे वैद्यनाथस्तु भैरवः । देवता जयदुर्गाख्या नेपाले जातुनी मम" तन्त्रचूड़ा० । ३शिवलिङ्गभेदे "हरिद्रानगरे यत्र वैद्यनाथो महेश्वरः । तत्राच्चयो बिल्ववृक्षः स्वर्णवृक्षः प्रदाहृतः" ब्रह्मवैवर्तपु० ११ अ० । "झारखण्डे वैद्यनाथो यत्रके श्वरस्तथैव च । वीरभूमौ सिद्धिनाथो राढ़े च तारकेश्वरः" इति महालिङ्गेश्वरतन्त्रे ।

वैद्यबन्धु पु० ६त० । आरग्वधवृक्षे शब्दर० ।

वैद्यमातृ स्त्री वैद्यस्य मातेव । १वासके अमरः तस्य वैद्यजीविकाप्रयोक्तृकरोगशान्तिकरत्वेन तदुपकारकत्वात् तन्मातृत्वत्वम् ।

वैद्यसिंही स्त्री वैद्यस्य सिंहीव । वासकवृक्षे शब्दच० ।

वैद्या स्त्री वैद्यः पाल्यत्वेनास्त्यस्याः अच् । काकोल्याम् शब्दच० ।

वैध त्रि० विधित आगतः अण् । विधिप्रतिपाद्ये ।

वैधहिंसा स्त्री कर्म० । वेदविहितहिंसायां "या वेदविहिता हिंसा नियताऽस्मिंश्चराचरे । अहिंसामेव तां विद्यात् वेदात् धर्मो हि निर्बभौ" मनुः । अत्र नियतेत्युपादानात् नित्ये पशिष्ट्यादौ हिंसाया अहिंसात्वं न तु काम्येऽपीति सम्प्रदायविदः । पिष्टपशुमीमांसायाञ्च तथैवोक्तं "कुर्यात् घृतपशुं सङ्के कुर्यात् पिष्टपशुं तथा" मनुना सङ्के कामनायां पिष्टपशूनामेव विधानात् । विशेषतः कल्पे "मांसदानं तथा श्राद्धे" "अश्वालम्भं गवालम्भम्" इति च कलिवर्ज्यप्रकरणे काम्यनित्यादि निषेधः । हिंसाया अनर्थसाधनत्वेऽपि वैधहिंसाया अर्थसाधनत्वम् वैद्यकोक्तसंस्कारभेदेन विषघ्नौषधेति बोध्यम् । ति०त०मतभेदेन च वैधहिंसा उभयरूपत्वं निरूपितं यथा "मा हिंस्यात् सर्वभूतानि" इत्यत्र सर्वशब्दस्य व्यापकार्थपरतया एतद्विधिमण्डलक्षत्र "वायव्यं श्वेतमालभेत" इत्यादिविधेर्विषयाप्राप्तेरगत्या वैधातिरिक्तविषयत्वं सर्वा सर्वाणि छन्दांसि वेत्यनेन तत्पदं सिद्धम् । यद्यपि नानादर्शनटीकाकृद्भिर्वाचस्पतिमिश्रैस्तत्त्वकौमुद्यामभिहितं "न च मा हिंस्यात् सर्वा भूतानि" इति सामान्यशास्त्रं विशेषशास्त्रेण "अग्नीषोमीयं पशुमालभेत" इत्यनेन बाध्यते इति वाच्यं विरोधाभावात् विरोधे हि बलीयसा दुर्बलं बाध्यते । न चास्ति विरोधः भिन्नविषयत्वात् । तथा हि मा हिंस्यादिति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न पुनरकृत्वर्थत्वमपि । अग्नीषोमीयं पशुमालभेतेत्यनेन तु पशुहिंसायाः क्रत्वर्थत्वमुच्यते न त्वनर्थहेतुभावस्तथा सति वाक्यभेदप्रसङ्गात् । न चानर्थहेतुत्वकृत्युपकारकत्वयोः कश्चिदस्ति विरोधः । हिंसा हि पुरुषस्य दोषमावच्यति क्रतोश्चोपकरिष्यतीत्यत्रैव, तदपि सांख्यनये । मीमांसकमते तु विरोध एव तथा हि गुरुनये न खलु सर्वभूतहिंसाभावविषयकं कार्यम् इति निषेधविध्यर्थस्य वाक्यं विना अग्नीषोमीयपशुालम्भनविषयकं कार्यमिति भावविध्यर्थ उपपद्यते । भट्टनये तु अङ्गे यथा तथास्तु । न च मुख्यपशुयागे पुरुषार्थपशुहिंसनस्यार्थसाधनत्वमनर्थसाधनत्वञ्चोपपद्यते विरोधात् । वस्तुतस्तु अङ्गेऽपि विरोधोऽस्त्येव कुतो ? विधेरेव स्वभावो यत् स्वविषयस्य साक्षात् परम्परया वा पुरुषार्थसाधनत्वमवगमयति अन्यथाऽङ्गानां प्रधानोपकारकत्वमपि नाङ्गीक्रियेत । अर्थसाधनत्वं बलवदनिष्टाननुबन्धीष्टसाधनत्वम् अनर्थसाधनत्वं बलवदनिष्टसाधनत्वं न चानयोरेकत्र समावेश इति । अतएवोक्तं "तस्मादुभयत्र बधोऽबधः" इति । नन्वेवं "श्येनेनाभिचरन् यजेत" इत्यत्र श्येनस्य खलु वधरूपेष्टसाधनत्वमवगतम "अभिचारो मूलकर्म च" इति मनुना उपपातकगणमध्ये पाठादनिष्टसाधनत्वमवगतम् । तदेतत् कथमुपपद्यतामिति चेन्नैवं "आततायिनमायान्तं हन्यादेवाविचारयन्" इत्येकवाक्यतया आततायित्वस्थले दृष्टसाधनत्वम् अनाततायित्वस्थले तूपपातकत्वेन बलवदनिष्टसाधनत्वमित्यविरोध इति गुरुचरणाः" ।

वैधात्र पु० विधातुरपत्यम् अण् । सनत्कुमारादौ १मुनिभेदे अमरः । २ब्रह्मणां (वामनहाटि) स्त्री राजानि० ।

वैधृति पु० विगता धृतिर्यस्मात् पृषो० इत्तिः । विष्कम्भादिषु मध्ये १अन्तिमे योगे । सूर्यचन्द्रयोः क्रान्तिसाम्येनीते अशुभकृत्ये २वर्जनीये तत्र वैधृतशब्दोऽपि यथोक्तं

ख०सि० "एकायनगतौ धातां सूर्याचन्द्रमसौ यदा। तद्युतं मण्डले ज्ञान्योस्तुल्यत्वे वेष्टनाभिध:"। पातशब्दे ४२८६ पृ० विवरणं द्रष्टव्यः। उपयमशब्दे १२६५ पृ० दृश्यम्। [मूर्खे अमरः।

वैधेय त्रि० विधीयतेऽसौ वि+धा-यत् ततः स्वार्थे अण्। वैधर्म्य न०विरुद्धो धर्मो यस्य तस्य भावः ष्यञ्। १विरुद्धधर्मत्वे २अन्यलक्षणे च। [मसह्यवेदनम्" इति कुमारः।

वैधव्य न० विधवाया भावः ष्यञ्। पतिविरहे "नवैधव्यमसह्यवेदनम्" इति कुमारः।

वैनतेय पु० विनतायाः अपत्यं ढक्। १गरुडे अमरः २अरुणे च मत्स्यपु०। [हेमच०।

वैनयिक त्रि० विनये रतः ठक्। शास्त्रज्ञानादिना विनयरते

वैनायिक पु० विनायं खण्डनमधिकृत्य कृतो ग्रन्थः ठक्। १बौद्धागमे तिका० उपचारात् २तदभिज्ञे त्रि०।

वैनाशिक पु० विनाशमधिकृत्य कृतो ग्रन्थः ठक्। सर्वेषां क्षणभङ्गुरतापतिपादके १बौद्धागमे २तदभिज्ञे त्रि०। विनाशाय हितम् ठक्। ध्यातिभोक्ते ब्रह्मद्वोषक्षये जन्मनक्षत्रावधिवयोविंशे इनक्षत्रे ४क्षणिके ५परतन्त्रे च त्रि० ६पर्वतभेदे पु० मेदि०।

वैनीतक पु०न०। विशेषेण नीतं नयनं तेन कायति कै-क स्वार्थे अण्। परम्परया वाहने शिविकादौ अमरः।

वैपरीत्य न० विपरीतस्य भावः ष्यञ्। १विपर्यये हेमच०। २लज्जालौ लतायां स्त्री राजनि०।

वैभव न० विभोर्भावः अण्। १विभुत्वे २विभूतौ।

वैभ्राज न० विभ्राज इदम् अण्। देवोद्यानभेदे तिका०। तच्च मेरोः पश्चिमविष्कम्भपर्वतस्थं विपुलशब्दे ४६१२ पृ० दृश्यम्। [२तथाभूतभगिन्यां स्त्री ङीप्।

वैमात्र पु० विमातुरपत्यम् अण्। १सापत्ने भ्रातरि अमरः

वैमात्रेय पु० विमातुरपत्यं ढक्। १सापत्ने भ्रातरि अमरः २तथाभूतभगिन्यां स्त्री ङीप्।

वैमुख्य न० विमुखस्य भावः ष्यञ्। विमुखत्वे।

वैमेय पु० वि+मि-यत् स्वार्थे अण्। विनिमये हेमच०।

वैयधिकरण्य न० व्यधिकरणस्य भावः ष्यञ्। असमानाधिकरणत्वे। [भिन्ने।

वैयाकरण त्रि० व्याकरणं वेत्त्यधीते वा अण्। व्याकरणा-

वैयाघ्र पु० व्याघ्रचर्मणा परिवृतो रथः अण्। व्याघ्रचर्मपरिवृते रथे अमरः।

वैयाघ्रपद्य पु० व्याघ्रपदस्यापत्यं यञ्। गोत्रकारके मुनिभेदे "वैय्याघ्रपद्यगालवेति" भीमसेनः।

वैयात्य न० वियातस्य भावः ष्यञ्। निर्लज्जत्वे "वैयात्यं सुरतेष्वपि" माघः। [शुक्रदेवे।

वैयासकि पु० व्यासस्यापत्यम् इञ् कुक्च। व्यासस्यापत्ये वैयासिकी स्त्री व्यासेन प्रोक्ता ठञ् ङीप्। व्यासप्रणीतायां संहितायाम्।

वैर न० वीरस्य भावः अण्। विरोधे विद्वेषे अमरः।

"वैरं पञ्चसमुत्थानं बुद्धिभिः परिकीर्त्तितम्। स्त्रीकृतं वास्तुजं वाग्जं सम्भोगापराधजम्"। तत्र स्त्रीकृतं ब्राह्मणक्षेटिपयोः। वास्तुजं कुरुपाण्डवयोः। वाग्जं द्रौपदीसुदयोः। सम्भोगं नैषधिकसुकिनकुबेरयोः। अपराधजं पूजनीयब्रह्मदत्तयोः।

वैरकर त्रि० वैरं करोति कृ-ट। विरोधकारके।

वैरत्य न० विरक्तस्य भावः ष्यञ्। विरागे।

वैरङ्गिक त्रि० विरङ्गं विरागं नित्यमर्हति ठञ्। विरागार्हे हेमच०। वैरागिक तत्रार्हे त्रि०कौ०।

वैरनिर्यातन न०वैरस्य वैरकृतापकारस्य निर्यातनम् निर्+यत-णिच् ल्युट्। वैरकृतापकारप्रतीकारे अमरः।

वैरप्रतीकार पु० ६त०। वैरकृतापकारस्य तत्सदृशापकारकरणेन तस्य शोधने वैरप्रतिक्रियायाम् स्त्री।

वैरशुद्धि स्त्री ६त०। वैरप्रतीकारे अमरः।

वैराग्य न० विरागस्य भावः ष्यञ्। विषयवासनाराहित्ये ऐहिकामुष्मिकविषयरागराहित्ये च।

वैराग्यस्य मोक्षहेतुत्वादि विवेकचूड़ामणौ दर्शितं यथा "मोक्षस्य हेतुः प्रथमो निगद्यते वैराग्यमत्यन्तमनित्यवस्तुषु। ततः शमश्चापि दमस्तितिक्षा न्यासः प्रसक्ताखिलकर्मणां भृशम्। ततः श्रुतिस्तन्मननं सतत्त्वध्यानं चिरं नित्यनिरन्तरं मुनेः। ततो विकल्यं परमेत्य विद्वानिहैव निर्वाणसुखं समश्नुते। यदुच्यते ब्रह्म तदेतदानीमात्मानात्मविवेचनम्। तदुच्यते मया सम्यक् श्रुत्वा तत्त्वधारय। मज्जास्थिमेदःपलरक्तचर्मनखाख्यैर्धातुभिरेभिरन्वितम्। पादोरुबाहूदरपृष्ठमस्तकैरङ्गैरुपाङ्गैरुपयुक्तमेतत्। अहं ममेति प्रथितं शरीरं मोहास्पदं स्थूलमितीर्यते बुधैः। नभोनभस्वद्दहनाम्बुभूमयः सूक्ष्माणि भूतानि भवन्ति तानि। परस्परांशैर्मिलितानि भूत्वा स्थूलानि च स्थूलशरीरहेतवः। तन्मात्रकाद्दीया विषया भवन्ति शब्दादयः पञ्च सुखाय भोक्तुः। य एषु मूढा विषयेषु बद्धा रागोपतप्ताशयसुदुर्मनस्काः। आयान्ति निर्यान्त्यधः कर्मभिस्वैः स्वकर्मदूतेन, जनेन

मीनाः । शब्दादिभिः पञ्चभिरेव पञ्च पञ्चत्वमापुः ज्ञ-
गुणेन बद्धाः । कुरङ्गमातङ्गपतङ्गमीनभृङ्गा, नरः पञ्च-
भिरन्वितः किम् ? । दोषेण तीव्रा विषयः कृष्णसर्प-
विषादपि । विषं निहन्ति भोक्तारं दृष्टा चक्षुषाप्य-
यम् । विषयाशा महापाशात् यो विमुक्तः सुदुस्त्यजात् ।
स एव कल्पते सुखं नान्यः षट्शास्त्रवेद्यपि । आपात-
वैराग्यवतो मुमुक्षून् भवाब्धिपारं प्रतियातुमुद्यतान् ।
आशाग्रहो मज्जयतेऽन्तराले निगृह्य कण्ठे विनिवर्त्य
वेगात् । विषयाख्यग्रहो येन सुविरक्तासिना हतः ।
स गच्छति भवाम्भोधेः पारं प्रत्यूहवर्जितः । विषम-
विषयमार्गैर्गच्छतो नष्टबुद्धेः प्रतिपदमभियातो मृत्यु-
रथेन सिद्धिः । हितसुजनगुरूक्त्या गच्छतः स्वस्य
युक्त्या प्रभवति फलसिद्धिः सत्यमित्येव विद्धि । मो-
क्षस्य काङ्क्षा यदि वै तवास्ति त्यजातिदूरादविषयान्
विषं यथा । पीयूषवत्तोषदयाक्षमार्जवप्रशान्तिदान्तीर्भज
नित्यमादरात्" ।

वैराट त्रि॰ विराटस्येदम् अण् । १विराटसम्बन्धिनि । वीर इ
वाटति अट-अच् स्वार्थे अण् । २इन्द्रगोपकीटे हेमच॰।

वैरातङ्क पु॰ वीरस्य अर्जुनस्यातङ्काय भङ्गाय साधु-अण् ।
अर्जुनभङ्गे राजनि॰ । [नृरूपकारके २वैरानुगते च ।

वैरानुबन्धिन् त्रि॰ वैरं विद्वेषमनुबध्नाति णिनि । १विद्वेषा

वैरिन् त्रि॰ वैरमस्यास्ति इनि । शत्रौ अमरः ।

वैरूप्य न॰ विरूपस्य भावः ष्यञ् । १विरूपत्वे २अनहङ्-
पत्वे ३अयथाभावे ४वस्तुनोविकारभेदे च ।

वैरोचन(नि) पु॰ विरोचनस्यापत्यम् शिवादित्वात् इञ् वा ।
१अग्निपुत्रे २सूर्यपुत्रे ३बलिराजपुत्रे दानवभेदे च
४बुद्धभेदे ५सिद्धमणौ शब्दर॰ ।

वैलक्षण्य न॰ विलक्षणस्य भावः ष्यञ् । विलक्षणत्वे वैशिष्ट्ये

वैलक्ष्य न॰ विलक्षस्य भावः ष्यञ् । १लज्जायाम् अमरः
२स्वभाववैलक्षण्ये च "वैलक्ष्यहेतोर्गतिमेतदीयाम्" नैष॰।

वै(ब)वधिक त्रि॰ वी(ब)वधेन धान्यादिसंग्रहेण व्यवहरति
ठक् । वार्त्ताविद्धे नैगमे (दोकानि) अमरः ।

वैवर्ण्य न॰ विवर्णस्य भावः ष्यञ् । विवर्णत्वे मालिन्ये ।

वैवस्वत पु॰विवस्वतोऽपत्यम् तस्येदं वा अण् । १यमे अमरः
२अग्नौ ३रुद्रभेदे च जटा॰। ४तत्सम्बन्धिनि त्रि॰ "वैव-
स्वतक्रतुरिव" इत्युद्भटः । ५दक्षिणदिग्भवे स्त्री ङीप् ।
६सप्तमे मन्वन्तरभेदे "मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ।
सप्तमो वर्त्तमानोऽयमदितेरपत्यानि मे शृणु !। इत्यादिकं
भगवतैव दृष्टः प्रयोतिरेव च । नरिष्यन्तोऽथ नाभागः
सप्तमो दिष्ट उच्यते । दृषध्रश्च दशमो वसुमान्
स्मृतः । मनोर्वैवस्वतस्यैते दश पुत्राः परन्तप !। आदित्या
वसवो रुद्रा विश्वे देवा मरुद्गणाः । अश्विनौ दशमौ
राजन् ! इन्द्रस्तेषां पुरन्दरः । कश्यपोऽत्रिर्वसिष्ठश्च
विश्वामित्रश्च गौतमः । जमदग्निर्भरद्वाज इति सप्तर्षयः
स्मृताः । अत्रापि भगवज्जन्म कश्यपाददितेरभूत् । आ-
दित्यानामवरजो विष्णुर्वामनरूपधृक् । संक्षेपतो मयो-
क्तानि सप्त मन्वन्तराणि ते" भाग॰ ८।१३अ०।

वैवाहिक त्रि॰ विवाहाय हितं साधु वा ठक् । १विवा-
हयोग्ये "वैवाहिकीं तिथिं पृच्छाः" इति कुमारः ।
२विवाहेन सम्बद्धे कन्यापुत्रयोः श्वशुरे ३विवाहसम्ब
न्धिनि च त्रि॰ "पञ्चमे सप्तमे वापि येषां वैवाहिकी
क्रिया" स्मृतिः ।

वैशम्पायन पु॰ व्यासशिष्ये भारतवक्तरि मुनिभेदे । स च
व्यासादिष्टः जनमेजयाय भारतं श्रावितवान् यथोक्तं
भा॰आ॰१अ॰"जनमेजयेन पृष्टः सन् ब्राह्मणैश्च सहस्रशः ।
शशास शिष्यमासीनं वैशम्पायनमन्तिके । स सदस्यैः स-
हासीनः श्रावयामास भारतम् । कर्मान्तरेषु यज्ञस्य चो-
द्यमानः पुनःपुनः" । स च यजुर्वेदे तस्य शिष्यः यथाह
"अथ शिष्यान् प्रजग्राह चतुरो वेदपारगान् । जैमि-
निञ्च सुमन्तुञ्च वैशम्पायनमेव च । पैलं तेषां चतुर्थञ्च
पञ्चमं मां महाद्युतिः । ऋग्वेदश्रावकं पैलं जग्राह
स महाद्युते !। यजुर्वेदप्रवक्तारं वैशम्पायनमेव च"
कौर्मपु॰ ४६ अ॰ । [मके च ।

वैशस न॰विशसस्य भावः स्वार्थे वा अण् । १हिंसने २हिं-

वैशाख पु॰ विशाखानक्षत्रयुक्ता पौर्णमासी वैशाखी सा
यत्र मासे पुनः अण् । स्वनामख्याते चैत्रतो द्वितीये
१चान्द्रमासे २गुरुवर्षभेदे च कार्त्तिकशब्दे १६४६ पृ॰
दृश्यम् । चान्द्रवैशाखलक्षणं तु मेषस्थरव्याप्तशुक्ल-
प्रतिपदादिदर्शान्तत्रिंशत्तिथिपत्वम् । मेषस्थरविर्मे २सौर-
तन्मासे "तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम्" । तन्मा-
सस्य ४पौर्णमास्यां स्त्री ङीप् । विशाखा प्रयोज-
नमस्य अञ् । ५मन्थानदण्डे पु॰ ६धनुर्द्धराणामवस्था-
नभेदे न॰अमरः । [वेशग्राभिधक्ते नायकभेदे रसम॰ ।

वैशिक पु॰वेशे वेशग्रालये उपचारात् वेशग्रायां प्रस्तुतः ठक् ।

वैशिष्ट्य न॰ विशिष्टस्य भावः ष्यञ् । विशेषधर्मविशेषण-

सम्बन्धिनि विशिष्टबुद्धिनियामके १सम्बन्धे २भेदे च। **वैशेषिक** न० विशेषं पदार्थभेदमधिकृत्य कृतो ग्रन्थः ठञ्। कणादप्रणीते १शास्त्रभेदे। तदधीते अण्। २कणादशास्त्राभिज्ञे त्रि०। तस्येदम् अण्। ३कणादशास्त्रसम्बन्धिनि त्रि०। [शेषभ्राट्टादः" शा०सू०। **वैशेष्य** न० विशेषस्य भावः ष्यञ्। १वैशिष्ट्ये २भेदे च "वै- **वैश्य** पुंस्त्री विशति उपभुङ्क्ते विश-क्विप् स्वार्थे ष्यञ्। वर्णभेदे ब्रह्मणक्षत्रजाते जातिभेदे अमरः स्त्रियां टाप्। "विशत्याद्यु पशुभ्यश्च कृष्यादानरुचिः शुचिः। वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः" पद्मपु०खं०२६अ०। **वैश्यवृत्ति** स्त्री ६त०। कृषिवाणिज्यादौ

"वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम्। वार्त्तायां नित्ययुक्तः स्यात् पशूनाञ्चैव रक्षणे। प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून्। ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः। न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति। वैश्ये चेच्छति नान्येन रक्षितव्याः कथञ्चन। मणिमुक्तप्रवालानां लोहानां तान्तवस्य च। गन्धानाञ्च रसानाञ्च विद्याद्घर्घबलाबलम्। बीजानामुप्तिविच्च स्यात् क्षेत्रदोषगुणस्य च। मानयोगञ्च जानीयात् तुलायोगांश्च सर्वशः। सारासारञ्च भाण्डानां देशानाञ्च गुणागुणान्। लाभालाभञ्च पण्यानां पशूनां परिवर्द्धनम्। भृत्यानाञ्च भृतिं विद्याद्भाषाश्च विविधास्तथाम्। द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च। धर्मेण च द्रव्यवृद्धावातिष्ठेद्यत्नमुत्तमम्। दद्याच्च सर्वभूतानामन्नमेव प्रयत्नतः" मनुः। "वैश्यस्य च प्रवक्ष्यामि वो धर्मो वेदसम्मतः। दानमध्ययनं यज्ञश्च धनसञ्चयः। पात्रेभ्यश्च पशून् वैश्यः पितृवद्भर्मसर्जयेत्। विकर्म सङ्गवेदन्यत् कर्म यत् स समाचरेत्। रक्षया स हि तेषां वै महत् सुखमवाप्नुयात्। प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे प्रजाः। ब्राह्मणेभ्यश्च राज्ञे च सर्वाः परिददे प्रजाः। तस्य वृत्तिं प्रवक्ष्यामि यस्य तस्योपजीवनम्। यथामेका पिबेत्तोयं यतान्या मिथुनं भवेत्। तस्यात्तु सप्तमं भागं तथा सङ्कीर्णजातिषु। यज्ञानां सर्वबीजानि यथा सांवत्सरी भृतिः" पाद्मखं०२६अ०।

वैश्रवण पु० विश्रवसोऽपत्यम् अण् विश्रवआदेशः। कुबेरे अमरः। [वैश्रवणावासादवोऽप्यत्र।

वैश्रवणालय पु० ६त०। १घटकृत्ये हेमच० २कुबेरपुर्यां च।

वैश्वदेव पु० विश्वेभ्यो देवेभ्यो देवो बलिः अण्। वैश्वदेवेन दीयमाने बलौ।

वैश्वानर पु० विश्वेषां नराणामयम् कुक्षिस्थत्वात् अण् पूर्वदीर्घः। १अग्नौ २चित्रकवृक्षे। ३चेतने च विश्वानरस्यापत्यमण्। अग्निलोकाधिपे ४अग्नौ काशीख०१०अ०तत्कथा दृश्या। सर्वदेहाभिमानिनि ५सर्वात्मयोनिनि परमेश्वरे तदुपासनप्रकारः छान्दो० ६प्र०दर्शितो यथा "स य वैरयिरात्मा वैश्वानरः" इत्युपक्रमे "तान् होवाचैते वै यूयं पृथगिवेममात्मानं वैश्वानरं विद्वांसोऽन्नमत्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति" "तान् यथोक्तवैश्वानरदर्शनवतो ह उवाच। एते यूयं वै खल्वित्यर्थकौ यूयं पृथगिवापृथक् सन्तमिममेकं वैश्वानरं विद्वांसोऽन्नमत्थ परिच्छिन्नात्मबुद्ध्या एतद्बुद्धिदर्शनं हि जात्यन्धाः। यस्त्वेतमेवं यथोक्तावयवैर्द्युमूर्धादिभिर्विशिष्टमेवं प्रादेशमात्रं प्रादेशैर्द्युमूर्धादिभिः पृथिवीपादान्तैरध्यात्मं नीयते गृह्यत इति प्रादेशमात्रम्। सुखादिषु वा करणेष्वकर्तृत्वेन नीयत इति प्रादेशमात्रः। द्युलोकादिपृथिव्यन्तप्रदेशपरिमाणो वा प्रादेशमात्रः। प्रकर्षेण याह्येष्वादिष्वन्त इति प्रादेशा द्युलोकादय एव तत्परिमाणाः प्रादेशमात्रः। शाखान्तरे तु "मूर्धादिभिरवयवैकप्रतिष्ठः इति प्रादेशमात्रं कल्पयन्ति। इह तु न तथाभिप्रेतः। "तस्य ह वा एतस्यात्मनः" इत्यादुपसंहारात्। प्रत्यगात्मतयाऽभिविमीयतेऽवधीयत इत्याभिविमानस्त्वमेतमात्मानं वैश्वानरं विश्वान्नरान्नयति पुरुषापायात्मरूपां गमयति। सर्वात्मैष ईश्वरो वैश्वानरो विश्वो नर एव वा सर्वात्मत्वात्। विश्वैर्वा नरैः प्रत्यगात्मतया प्रविभज्य नीयत इति वैश्वानरः। तमेवोपास्ते यः षोडशमात्रादौ सर्वेषु लोकेषु द्युलोकादिषु सर्वेषु भूतेषु चराचरेषु सर्वेष्वात्मसु शरीरेन्द्रियमनोबुद्धिषु तेषु तेषु आत्मकल्पनाव्यपदेशः प्राच्यनामन्नमत्ति। वैश्वानरवित् सर्वात्मा सन्नन्नमत्ति। न यथाऽसौ पिण्डमात्राभिमानः सन्नित्यर्थः"।

वैषम्य न० विषमस्य भावः ष्यञ्। विषमत्वे वैलक्षण्ये।

वैषयिक त्रि०विषयेण निर्वृत्तः ठक्। विषयनिर्वृत्ते सुखादौ

वैष्टुत न०विष्टुत्या निर्वृत्तम् अण्। १स्तोमभक्तिभेदे च०। २विष्टुतिसाध्ये यागादौ त्रि०। [४विष्णौ च संज्ञिप्रभा०।

वैष्टु न० विष-क्तु णिच्। १पिण्डे उणादि० २अर्गले हलायुधौ

वैष्णव त्रि० विष्णुर्देवताऽस्य तस्येदं वा अण्। १विष्णूपासके २विष्णुसम्बन्धिनि च स्त्रियां ङीप्। ३वैष्णव्यां शक्तौ "वैष्णवो समरे चैनम्" देवीभा०। "सायतो वैष्णवी ह्येषा" स्मृतिः। ४विष्णुधामनि न०। विष्णुमधिकृत्य कृतो ग्रन्थः अण्। ५महापुराणभेदे न० विष्णुपुराणशब्दे ४८२६ पृ० दृश्यम्।

वैसारिण पुंस्त्री० विसरति वि+सृ-णिनि स्वार्थे अण्। मत्स्ये अमरः स्त्रियां जातित्वात् ङीष्।

वैहार्य्य त्रि० विहारं परिहासमर्हति यत्। परिहासार्हे श्यालकादौ "यथा बालेषु नारीषु वैहार्य्येषु तथैव च। सङ्गरेषु निपातेषु तथापद्व्यसनेषु च। अन्तं नोक्तपूर्वं मे" भा०उ० १२१अ०।

वैहासिक पु० विहासेऽभिरतत्वं करोति वा ठक्। नाटकादौ प्रसिद्धे शृङ्गाररसनायकसहचरे १विदूषके हेमच० (भाँड़) इति २ख्याते लोके च।

वोड्र पुंस्त्री० वा-वा० षड्। १गोनसवर्णे (बोडासाप) विश्वप्रकाशादि०। २मत्स्यभेदे मेदि०। स्त्रियां जातित्वात् ङीष्। सा च २पलचतुर्थांशे (बुड़ि) मेदि०। [मन्त्रः।

वोढु पु० वह-तृन्। सुनिभेदे "वोढुः पञ्चमिकस्तथा" तर्पणे

वोढृ त्रि० वह-तृच्। १वाहके २स्थानान्तरप्रापके "भागीरथी निर्झरशीकराणां वोढा" कुमारः। ३पाणिग्राहके पु० "पितृदत्ता वोढरेव ते" स्मृतिः। ४भारवाहके ५मूढे च त्रि० शब्दच०। ६वृषभे पु० राजनि०। ७सुते पु० मेदि०। [अवस्यातोलोपः। आढ्ये त्रिका०।

वोदन त्रि० अवक्षिप्तघटकं यत्र प्रा०ब० घटकस्योदादेशः

वोदाल पुंस्त्री०ओद आर्द्रः सन्नयति अल-अच्। मत्स्यभेदे (वोआयाल) शब्दर० स्त्रियां ङीष्।

वोरक पु०अवनतं लेखनकाले उरो यस्य प्रा०ब०कप् अवस्यातो लोपः पृषो० सलोपः। लेखके त्रिका०। [वृक्षे त्रिका०।

वोरट पु० वोरति रटन्ति भक्षा अत्र रट-घञर्थे क। वृन्दवोरव पु० वा-उर वोरं वाति वा-क। (वोरो) धान्यभेदे "वोरवस्तु बुधैः प्रोक्तस्त्रिदोषस्य प्रकोपणः। मधुरश्चापाकश्च व्रीहिः पित्तकरो गुरुः" राजवल्लभ०।

वोल पु० वा-उलच्। गन्धरसे गन्धद्रव्यभेदे। "वोलस्तु कटुतिक्तोष्णः कषायो रक्तदोषनुत्। कफपित्तामयान् हन्ति प्रदराद्रिव्रणापहः" राजवल्लभः। स्वार्थे क। तत्रार्थे पु० अमरः।

वोल्लाह पुंस्त्री० श्वेतकेशरकाङ्क्षयुते अश्वे हेमच०।

वोशि स्त्री उभयचरशब्दे १२६१पृ० दर्शिते जन्मकाले स्वर्यातहितीयस्थे विचन्द्रयुक्ते। तदपेक्षया द्वादशस्थे तु वेशी।

वौषट् अव्य० वह-डौषट्। देवोद्देशेन हविस्त्यागे अमरः।

व्यंशक पु० विगतोऽंशोऽवयवोऽस्य। पर्वते त्रिका०।

व्यंसक पु० विगतोऽंसः स्कन्धो यस्य कप्। १धूर्ते हेमच० २स्कन्धशून्ये। "मयूरव्यंसकादयश्च" पाणिनिसूत्रम्।

व्यंसित त्रि० वि+अंस-क्त। १वञ्चिते २प्रतारिते त्रिका०।

व्यक्त त्रि०वि+अञ्ज-क्त। १स्फुटे २प्रकाशिते मेदि० ३प्राज्ञे अमरः। ४स्थूले "व्यक्ताव्यक्तज्ञविज्ञानात्" सा० का०। ५विष्णौ पु० विष्णुस०। [साक्षिणि त्रिका०।

व्यक्तदृष्टार्थ पु० व्यक्तं स्फुटं दृष्टोऽर्थो येन। साक्षादुपलब्धरि

व्यक्तरूप पु०व्यक्तानि स्थूलानि भूतान्येव रूपं यस्य। विष्णौ विष्णुस०। तस्य विराड्रूपेण सर्वभूतात्मकत्वात्तथात्वम।

व्यक्ति स्त्री वि+अञ्ज-क्तिन्। १प्रकाशे क्लिच्। २जने हेम०। पृथगात्मतारूपे एकैकविशेषे च अमरः। अभिव्यक्तिशब्दे दृश्यम्। [विगिष्टमद्यं यस्य। २विष्णौ पु० विष्णुस०।

व्यग्र त्रि०विगतमद्यं यस्य। १व्याकुले २व्यासक्ते च अमरः।

व्यङ्ग न०विगतं विकलं वाङ्गं प्रादिकर्म०। १विकलाङ्गे विगतमङ्गं यस्य। २व्यङ्गहीने त्रि० ३भेके पुंस्त्री० मेदि० स्त्रियां ङीष्। ४मुखरोगभेदे तच्चिकित्सादि माधवनिदाने उक्तं यथा "क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः। मुखमागस्य सहसा मण्डलं विसृजत्यतः। नीरुजं तनुकं श्यावं मुखे व्यङ्गं तमादिशेत्"।

व्यङ्ग्य त्रि० वि+अञ्ज-ण्यत्। १व्यञ्जनया वृत्त्या बोध्येऽर्थे "वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः। व्यङ्ग्यो व्यञ्जनया तास्तिस्रः शब्दस्य शक्तयः" सा०द०। २प्रकाश्ये च। [विचौत् विध्याच विविचतुः व्यचाः।

व्यच व्याजे अक०सम्बन्धे सक०तुं०पर०सेट्। विचति व्यचीत्

व्यजन न० वि+अज-ल्युट् नव्यादेशः। तालवृन्तके अमरः। "मक्षीदाक्षिण्यधर्मश्रमतृट् व्यजनानिलः। तालव्यजनजो वायुस्त्रिदोषशमनो लघुः। वंशव्यजनजो वायुरूष्णो वातपित्तकृत्। वेत्रवल्लकैकिपुच्छव्यजनोत्थस्त्रिदोषकृत्। बालव्यजनजो वायुर्मक्षिकादिनिवारकः। तेजस्करोऽसौ विज्ञेयो विद्वद्भिर्भिषजां वरैः" राजव०।

व्यजक पु० वि+अञ्ज-णिच्-ण्वुल्। १कृत्रिमभावादिप्रकाशके अभिनये अमरः। २व्यञ्जनयार्थबोधके शब्दे च सा०द० व्यञ्जनशब्दे दृश्यम्। ३प्रकाशकमात्रे त्रि०।

व्यञ्जन न० विशेषेणाच्यते वि+अञ्ज-ल्युट्। १सूपशाकादौ

ओदनभोजनोपकरणे दा०नि०। "व्यञ्जनं शाकमत्स्याद्यं कृत्यं हव्यञ्च पुष्टिदम्। द्रव्येण येन येनेह व्यञ्जनं जन्यतेऽथवा" दा०व०। वि+अनज्-णिच्-ल्युट्। २चिह्ने २लक्षणे ३अवयवे ४दिने मेदि०। ६उपमर्दे ७वर्णमालाकालेनोच्चार्य्यं हस्ववर्णे च धरणिः "व्यञ्जनं चार्द्धमात्रकम्" शिक्षा०। ८व्यक्तकारप्रसिद्धे यत्नस्य हृत्तिभेदे च युच्। ९लक्षार्थे स्त्री "विरताभिधाद्यात् यथार्थो बोध्यतेऽपरः। सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च। अभिधालक्षणामूलाशब्दस्य व्यञ्जनाद्विधा" सा० द०।

तत्र अभिधामूला तच्छब्दे २६० पृ० दृश्या

"लक्ष्यामूलाद्याह "लक्षणोपाश्रते यस्य क्रते तद्धि प्रयोजनम्। यया प्रत्याय्यते सा स्याद् व्यञ्जना लक्षणाश्रया"। (गङ्गायां घोषः) इत्यादौ जलमयादार्थबोधनादभिधायां विरतायां तटादार्थबोधनाय लक्षणायां विरतायां यया शीतत्वपावनत्वादिप्रतीत्यादिर्बोध्यते सा लक्ष्यामूला व्यञ्जना। एवं शाब्दी व्यञ्जनामुक्ताऽऽर्थी व्यञ्जनाद्याह "वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः। प्रस्तावदेशकालादेः काकोश्चेष्टादिकस्य च। वैशिष्ट्यादर्थमर्थं सा बोधयेत् स्याऽर्थव्यञ्जना"। व्यञ्जनेति सम्बध्यते। तत्र वक्तृवाक्ययोर्लक्षणावैशिष्ट्ये यथा अस्य "काली मधुः कुपित एव च पुष्पधन्वा धीरा वहन्ति रतिखेदहराः समीराः। केलीवनीयमपि वञ्जुलकुञ्जमस्मद्दूरे पतिः कथय किं करणीयमद्य"। अत्रैतं देशं प्रति शीघ्रं प्रच्छन्नकामुकत्वया प्रेषयितारम्" इति वक्तरं प्रति कयाचित् दोत्यते। बोद्धव्यवैशिष्ट्ये यथा "निःश्रेयस्युतचन्द्रनं ललितं निर्द्धूरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि! दूति! दारुणतरस्त्रातपोऽङ्गमेऽवार्षीं स्तावुचितो गतासि न पुनस्तस्याधमस्यान्तिकम्"। अत्र मदन्तिकमेव गतासीति विपरीतलक्षणया लक्ष्यम्। तस्य च रन्तुमिति व्यङ्ग्यं प्रतिपाद्यानुगावैशिष्ट्याद्बोध्यते। अन्यसन्निधिवैशिष्ट्ये यथा "अय णिअअ णिअन्ता णिसिओपन्नसि रेहइ बलाआ। णिन्नन्नअरलअभाअपरिट्ठिआ संझसुत्ति व्व"। अत्र बलाकाया निम्नत्वेन निम्नत्वं तेनास्य देशस्य विलनत्वमतः कुतस्त्यानमेतदिति कयापि सङ्केतितप्रच्छन्नकामुकत्वं प्रत्युच्यते। अत्रैव स्वाभिलषितत्वरूपप्रयोजनार्थवैशिष्ट्यं प्रयोजनम्। "भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते"। इत्युक्तप्रकारायाः काकोर्भेदा आकारादिभ्यो ज्ञातव्याः। एतद्वैशिष्ट्ये यथा "गुरुपरवत्तया वत दूरतरं देशमुद्यतो गन्तुम्। अविकुलकोकिलकलिते नैर्ऋति सखि! घरमिखलयेऽसौ"। अत्र नैर्ऋतिं अपि तु एव्यत्येति काकुर्व्यज्यते। चेष्टावैशिष्ट्ये यथा "अङ्गुलिकालमनसं विटं ज्ञात्वा विदग्धया। हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्"। अत्र सन्ध्या अङ्गुलिकाल इति प्रतिनिमीलनादिचेष्टया कयाचित् द्योत्यते। एवं वक्त्रादीनां व्यस्तसमस्तानां वैशिष्ट्ये बोध्यम्। "त्रैविध्यादिसमर्थानां प्रत्येकं त्रिविधा मता"। अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्वे अर्थनलरोक्ता व्यञ्जनास्त्रिविधाः। तत्र वाच्यार्थस्य व्यञ्जना यथा "काला मधुः" इत्यादि। लक्ष्यार्थस्य यथा "निःश्रेयस्युतचन्द्रनम्" इत्यादि। व्यङ्ग्यार्थस्य यथा "उच्च णिअन्तेत्यादि"। प्रकृतिप्रत्ययार्थव्यञ्जनत्वन्तु प्रपञ्चयिष्यते "शब्दो बोधको व्यञ्जकश्च शब्दोऽर्थयोस्तरात्मयः। एकस्य व्यञ्जकत्वे तटन्यस्य सहकारिता"। यतः शब्दो व्यञ्जकत्वेऽर्थोत्तरमपेक्षते अर्थोऽपि शब्दं, तदेकस्य व्यञ्जकत्वे अन्यस्य सहकारितास्वयमङ्गीकार्या। "अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः। शब्दोऽपि वाचकत्वलक्षकत्वो व्यञ्जकत्वया"। अभिधोपाधिको वाचकः। लक्ष्योपाधिको लक्षकः। व्यञ्जनोपाधिको व्यञ्जकः" सा० द० २प०।

व्यञ्जित त्रि० वि+अनज-णिच्-क्त। १प्रकाशिते "व्यञ्जितदर्शनलक्षणः" कुमारः। २व्यञ्जनावृत्त्या बोधितेऽर्थे च।

व्यञ्जक पुं० वि-अनज्-ण्वुल् विशेषेण न ञ्जकः। एरण्डवृक्षे अमरः। [मेदि०।

व्यतिकर पुं० वि+अति-कृ-अप्। १व्यतिषङ्गे २व्यसने च

व्यतिक्रम पुं० वि+अति+क्रम-घञ् न वृद्धिः। १विपर्य्यये "विषादे च व्यतिक्रमः" उ०त०। २विशेषतोऽतिक्रमे च।

व्यतिरिक्त त्रि० वि+अति+रिच-क्त। भिन्ने "न पृथक्त्वव्यतिरिक्तलक्षणम्" इति कुमारः।

व्यतिरेक पुं० वि+अति+रिच-घञ्। १विशेषेण अतिक्रमे २अभावे ३विनेत्यर्थे ४व्यधौलङ्कारभेदे च अलङ्कारशब्दे ४०४ पृ० दृश्यम्। व्याप्योक्ते हेतुदृष्टे तदुभयरूपे कारणताप्रकृते पदार्थभेदे ऊह्याध्याहार्य्यव्यापकीभूताभावप्रतियोगित्वरूपे ख्या प्रभेदे च।

व्यतिरेकिन् त्रि० वि+अति+रिच-णिनुच्। व्याप्तीक्ते हा-

व्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्याप्तिहेत्वंशे १व्यभिचारभेदे "तच्चानुमानं त्रिविधं केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्" भिन्नभाषिणः। यथा पृथिवीतरभिन्ना गन्धवत्त्वात् इत्यादि। व्यतिरेकिदृष्टान्तश्च यद्यैवं तत्तथेत्यादि। २व्यतिक्रमणे च स्त्रियां ङीप्।

व्यतिषक्त त्रि० वि+अति+सृज-क्त। १मिश्रिते २व्याप्ते च

व्यतिषङ्ग पु० वि+अति+सृज-घञ्। परस्परमेलने।

व्यति ती हार पु० वि+अति+हृ-घञ् वा दीर्घः। परीवर्त्ते क्षेमच०। २परस्परैकजातीयक्रियाकरणे।

व्यतीत त्रि० वि+अति+इण्-क्त। अतीते "व्यतीतकालस्तुमभ्युपेतः" इति रघुः।

व्यतीपात पु० वि+अति+पत-घञ् टीर्घः। १महोत्पातभेदे २अपमाने मेदि० विष्कम्भादिषु भध्ये १योगभेदे ज्यो०त० "श्रवणाश्विधनिष्ठाद्वीगदैवतमस्तके। यदाऽर्का रविवारेण व्यतीपातः स उच्यते" वृद्धमनूक्ते ४तिथ्यादियोगभेदे च पातशब्दे ४२९७पृ० दर्शिते सूर्य्यसि० उक्ते क्रान्तिसाम्यात्मके योगवियोगरूपे पूर्वभेदे

"व्यतीपातत्रयं चारं नक्षत्रान्तरितं तथा। एतद्भमध्यस्थितिमयं सर्वकर्मसु वर्जयेत्" रत्नमा० "व्यतीपातो यदा योगो रविक्रान्त्यन्तरेण च व्यतीपातो विषुवत्सन्निधौ क्रान्तिसाम्यरूपौ द्वौ योगवियोगात्मकौ क्रान्तिसाम्यान्तरेण व्यतीपातक्रियोरेव भेदः न पृथक्। पञ्चाङ्गान्तर्गतयोगान्तर्गत व्यतीपातश्चेति त्रयम्" रत्नमा०। भविष्यपु० "चतुर्दश्यां यदा योगो व्यतीपातेन चार्कया। तदा पुण्यतमः कालो देवानामपि दुर्लभः। तदा यः स्नाति गङ्गायां भक्त्या तत्र फलमाप्नुयात्। यत्र तत्र स्थितो हि मनुजस्तत्फलमाप्नुयात्" प्रा०त० उक्ते ६तिथ्यादियोगभेदे। "निरंशं दिवसं विद्यि व्यतीपातस्य वैधृतिम्। ऐन्द्रं वापि शुभैर्योगैः पापाढ्यमपि वर्जयेत्। परिघस्य त्यजेदर्द्धं शुभकर्म ततःपरम्। गण्डव्याघातयोः षट् च नव वैधृतिवज्रयोः। वैधृति व्यतीपातौ च समस्तं परिवर्जयेत्"। व्यस्य प्रतिषेधमाह भोजराजः "न विष्कम्भो न वा गण्डो न व्यतीपातवैधृती। चन्द्रतारावले प्राप्ते दोषागच्छन्त्यसंशयाः। अवश्यकारको विधिः अनैश्वरदिनं तथा। व्यतीपातो न दुष्यन्ति यस्याकौ दक्षिणे स्थितः। यदि विष्टिव्यतीपातौ हिनं वाप्यशुभं भवेत्। हन्यतेऽहृतयोगेन भास्करेण तमो यथा" ज्यो० त०। [अमरः।

व्यत्यय पु० वि+अति+इण्-अच्। १अतिक्रमे २विपर्य्यये च

व्यत्यास पु० वि+अति+अस-घञ्। विपर्य्यये अमरः।

व्यथ भये चलने दुःखानुभवे च भ्वा०आत्म०अक०सेट्। व्यथते अव्यथिष्ट व्यथित्व घटा०। व्यथयति व्यथित अङ् व्यथा।

व्यथा स्त्री व्यध-भावे अङ्। १पीडायाम् २दुःखे च अमरः।

व्यध ताडने दि०पर०सक०अनिट्। विध्यति अव्यात्सीत्। विव्याध विविधतुः। [२भेदने च

व्यध पु० व्यध-अच्। १वेधे अमरः भावे अप्। २किट्टीकरणे

व्यध्व पु० विरुद्धः अध्वा अच्समा०। कुपथे अमरः।

व्यप क्षये चुरा०उभ०सक०सेट्। व्यापयति-ते अविव्यपत्-त।

व्यपदेश पु०वि+अप+दिश-घञ्। १कथने २संज्ञायां त्रिका०। ३व्याजे क्षेमच०। ४मुख्यव्यवहारे च।

व्यपदेशिन् त्रि० निमित्तसङ्गावाद् विशिष्टोऽपदेशो मुख्यो व्यवहारोऽस्यास्ति इनि। मुख्यव्यवहारविषये पदार्थे "व्यपदेशिवदेकस्मिन्" आ० प०। व्यपदेशेन मुख्य वर्त्तते इति वति। कार्य्यं प्रति एकस्मिन्मुख्यहायेऽपि तत् कार्य्यं कर्त्तव्यमिति तदर्थः। [२व्याजाटने।

व्यपरोपण न० वि+अप+रुह-णिच्-ल्युट् हस्वः पः। १छेदने

व्यपरोपित त्रि० वि+अप+रुह-णिच्-क्त हस्वः पः। १छिन्ने २व्याजाटिते च। [२अस्वीकारे ३निह्नवे च।

व्यपाकृति स्त्री वि+अप+आ+कृ-क्तिन्। १निराकरणे

व्यपाश्रय पु० वि+अप+आ+श्रि-अच्। आश्रये।

व्यपेक्षा स्त्री वि+अप+ईक्ष-अ। अपेक्षायां व्याकरणोक्ते अन्वयव्यापेक्षणे च।

व्यभिचार पु० वि+अभि+चर-घञ्। १निन्दिताचारे २स्त्रियाः परपुरुषसंगे ३पुंसश्च परस्त्रीसङ्गमे न्यायादिप्रसिद्धे ४हेत्वदोषभेदे च।

हेत्वदोषभेदश्च अनैकान्तरूपः। "साधारणासाधारणाकिञ्चित्करविपक्षसपक्षव्यापकत्वानध्यवसायत्वं च अनैकान्तिकत्वम्" सि० मु० "आद्यः साधारणस्तु स्यादन्योऽसाधारणो मतः। तथैवानुपसंहारी त्रिधा नैकान्तिको भवेत्" भाषा०। "साधारणः साध्यवदन्यवृत्तिर्हेतुः। तेन च व्याप्तिपक्षधर्मतान्वयः क्रियते। असाधारणः साध्यावमानधिकरणो हेतुः। तेन साध्यसामानाधिकरण्यपक्षधर्मते प्रतिबध्यते। उपसंहारे तु प्रतिहेतुः साध्याभावसाधकः। अत्र तु हेतुरेवेति विशेषः। साध्याभावसाधक एव साध्यसाधकत्वेन उपन्यस्त इत्यत्रापि विशेषोपलक्षकत्वात् विशेषः। तत्प्रतिपक्षः साध्याभावव्याप्यत्वं पक्षः। अनङ्गीकाराद्यासाधारणकक्षध्वाप्यवत्त्वेनोप-

स्थितिकालीनसाध्याभावव्याप्यत्वेनोपस्थितिविषयकथा इत्यन्ये। यत्र च परस्पराभावव्याप्यवत्ताज्ञानात् परस्परानुमितिप्रतिबन्धः फलम्" सि०मु०। अधिकृता तु साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभावन्मात्रवृत्त्यन्यत्वम्" व्यनैकान्तिकत्वमिति लक्षितम्।

व्यभिचारिन् पु० वि+अभि+चर-णिनि। १अलङ्कारोक्ते रसप्रादुर्भावकृते निर्वेदादौ सञ्चारिभावे तत्कृतभेदादिकं सा०द० दर्शितं यथा "विभावादाभिमुख्येन चरन्तो व्यभिचारिणः। स्थायिन्युन्मग्ननिर्मग्नास्तरङ्गा इव वारिधौ॥ तत्त्रयस्त्रिंशदित्यत्र निर्वेदावेगदैन्यश्रममदरुजा जौग्र्यमौत्सुक्यनिद्रा-विबोधः सुप्तापस्मारगर्वामर्षाऽवहित्थाऽसूयाश्रद्धाचपलतामतिधृतिव्रीडौत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसन्त्रासलज्जा हर्षोग्र्यविषादाः सुप्तिप्रबोधबोधा ग्लानिचिन्तावितर्काः" इति विभज्य लक्षिता यथा "तत्त्वज्ञानादीर्ष्यादिनिर्वेदः। स्वावमानना। दैन्यचिन्तास्रनिश्वासवैवर्ण्यौत्कण्ठ्यादिकृत्। आवेगः। सम्भ्रमत्वत्वरजे पीड़िताङ्गता। उत्पातजे स्तब्धताङ्गे धूमाद्याकुलताग्निजे। राजविद्रवजादिस्तु अस्त्रनाशादियोजनम्। गजादेःस्तम्भकम्पादिः पार्श्वाद्याकुलतानिघातः। दृष्टाद्भ्रांः शुचोऽनिष्टाज्ज्ञेयान्यत्र यथायथम्। दौर्बल्याद्यैरनौजस्यं दैन्यं। मलिनतादिकृत्। खेदोरत्यध्वगत्यादेः श्वासनिद्रादिरुच्छ्रमः। सम्मोहानन्दसम्भेदो मद्यो मद्योपयोगजः। कम्पना चात्तमः यते मध्यो हसति गायति। अधमप्रकृतिस्त्वपि परुषं वक्ति रोदिति। अप्रतिपत्तिर्जड़ताहृ स्यादृष्टानिष्टदर्शनश्रुतिभिः। अनिमिषनयननिरीक्षणस्तब्धीभावादयस्तत्र। शौर्यापराधादिभवं भवेच्छङ्कत्वसुप्तता च। तत्र खेदः शिरःकम्पतज्जनाताड़नादयः। मोहोऽविचित्तता भीतिदुःस्वावेगानुचिन्तनैः। घूर्णनागात्रपतनभ्रमव्याद्यर्शनादिकृत्। निद्रापगमहेतुभ्यो विबोधस्त्वेतनागमः। जृम्भाऽङ्गभङ्गनयनमीलनाङ्गावलोककृत्। स्वप्नोनिद्रासमेतस्य विषयानुभवस्तु यः। कोपावेगभयग्लानिसुखदुःखादिकारकः। मनःक्षेपस्त्वपस्मारो॥ अहङ्कावेशनादिजः। भूपातकम्पप्रस्वेदफेनलालादिकारकः। गर्वोऽहंमदः प्रभावश्रीविद्याश्रुतकुलतादिजः। अवज्ञासविलासाक्षुद्दर्शनाविनयादिकृत्। अरत्यादैरत्यं॥ जीवत्यागोऽङ्गपतनादिकृत्। आलस्यं॥ श्रमगर्भादैर्जाड्यं जृम्भाक्षुतादिकृत्। निन्द्याक्षेपापमानादेरमर्षो॥ अभिनिविष्टता। नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्जनादिकृत्। चेतःसम्मोहनं निद्रा॥ श्रमक्लममदादिजम्। जृम्भाङ्गभङ्गनयनमीलनोच्छ्वासगात्रभङ्गादिकारकम्। भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था॥ व्यापारान्तरसक्तान्यभावप्रेक्षणविलोकनादिकरी। दृष्टानवाप्तौत्सुक्यं॥ कालक्षेपासहिष्णुता। चित्ततापत्वरास्वेददीर्घनिश्वसितादिकृत्। चित्तसम्मोहउन्मादः॥ कामशोकभयादिभिः। अस्थानहासरुदितगीतप्रलपनादिकृत्। परकौशलोत्पादोद्यैः शङ्का॥ नर्थस्य तर्कणम्। वैवर्ण्यकम्पवेक्ष्यपार्श्वालोकास्यशोषकृत्। सदृशज्ञानचिन्तादैर्भ्रूसङ्गस्तन्मनादिकृत्। स्मृतिः॥ पूर्वानुभूतार्थविषयज्ञानस्तच्चयते। नीतिमार्गानुसृत्यादेरर्थनिर्धारणं मतिः॥ स्थैरता धृतिस्तन्तोषौद्धत्यमानस्य तद्भवाः। व्याधि॥ ज्वरादिर्वाताद्यैर्भूमोक्षोत्कम्पनादिकृत्। निर्घातविद्युदुल्कादैस्त्रासः॥ कम्पादिकारकः। धार्ष्ट्याभावो व्रीड़ा॥ वदनानमनादिकृदुराचारात्। हर्ष॥ स्विष्टाव्याप्तेर्मनःप्रसादाऽश्रुगद्गदादिकरः। असूया॥ ऽन्यगुणद्वेषिणामौद्धत्यादसहिष्णुता। दोषोद्घोषभ्रूविभेदावज्ञाक्रोधेङ्गितादिकृत्। उपायाभावजन्मा तु विषादः॥ सत्त्वस्खलत्त्वयः। निःश्वासोच्छ्वासदुःखतापसहायान्वेषणादिकृत्। ज्ञानाभीष्टागमाद्यैस्तु सम्पूर्णस्फुरता धृतिः॥ औचित्यवचनोल्लासहासप्रतिभादिकृत्। मात्सर्यं॥ ष्टेषरागादेरासूयं॥ त्वनवस्थितिः। तत्र भर्तृसेनापरुषप्रस्खलच्छन्दाचरणाद्यः। रत्यायासमनस्तापक्षुत्पिपासादिसम्भवा। ग्लानि॥ र्निष्प्रभताकम्पकार्श्यान्ततृषादिकृत्। ध्यानं चिन्ता॥ हितानाप्तेः शून्यतास्रावसतापकृत्। तर्को॥ ऽविचारः सन्देहाद् भ्रूशिरोऽङ्गुलिनर्त्तकः। रत्यादयोऽप्यनियतरसे शुद्ध्यभिचारिणः। शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः। शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः। इत्याद्यन्यतमसमुच्चेयं स्वयमावितबुद्धिभिः"। न्यायोक्ते ऽव्यभिचाररूपदोषवति हेत्वपदार्थे च। ऽपररुपसर्गाभिन्यां स्त्रियां स्त्री ङीप्। "कृताधिकारां मलिनां पिण्डमात्रोपजीविनीम्। परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम्"। "सोमः शौचं ददौ तासां गन्धर्वश्च शुभां गिरम्। पावकः सर्वभक्षत्वं मेध्या वै योषितो ह्यतः" इति तु स्त्रीसामान्यविषयम्। "व्यभिचाराद्ऋतौ शुद्धिर्गर्भे त्यागो विधीयते। गर्भभर्तृवधे तासां तथा महति पातके" गरुड़े ६५अ०। तस्याः परित्यागादि हेतुमाह हारीतः

"गर्भिणीमधोवर्णां शिष्यसुतगामिनीं पापव्यसनासक्तां धनधान्यक्षयकरीं वर्जयेत्"। यमः "स्वच्छन्दगा हि या नारी तस्यास्त्यागो विधीयते। न चैव स्त्रीवधः कार्य्यो न चैवाङ्गवियोजनम्"। बृहस्पतिः "क्लीनवर्षोपभुक्ता या त्याज्या वध्यापि वा भवेत्"। विशेषयति मिताक्षरायां स्मृतिः "ब्राह्मणक्षत्रियविशां भार्य्याः शूद्रेण संस्कृताः। व्यभिचारादिदुष्टास्ता नित्यं प्रायश्चित्तेन नेतराः"। एतत् बलात्कारविषयम् उद्वा० त०।

व्यय गतौ त्यागे च भ्वा० उभ० सक० सेट्। व्ययति ते अव्ययीत् अव्ययत् त। [व्यथिष्ट अव्ययिष्टम् (ध्वस)।

व्यय गतौ भ्वा० उभ० सक० सेट्। व्ययति ते अव्ययीत् अव्ययत् त।

व्यय नोदे चु० उभ० सक० सेट्। व्याययति ते अविव्ययत् त।

व्यय पु० वि+इण-अच्। १विगमे २धनादेस्त्यागे शब्दर०। ज्योतिषोक्ते लग्नात् १२तमस्थाने च ज्यो०त०।

व्यर्थ त्रि० विगतोऽर्थः प्रयोजनं वाऽस्य। १निष्प्रयोजने २विफले जटा० ३अर्थशून्ये च।

व्यलीक न० वि+कल-ईकक्। १कष्टे २वैलक्ष्ये मेदि० ३अपराधे हेमच० ४अप्रिये ५कलहे च अमरः। ६तद्वति त्रि०। ७प्रतारणायां स्त्री० टाप्। तत्तद्विषयेऽर्थे भरतः।

व्यवकलन न० वि+अव-कल-ल्युट्। १वियोजने हेमच० २विगमने ३हीनतासम्पादने च "व्यवकलनमार्गेऽसि कुशला" लीला०।

व्यवकलित त्रि० वि+अव+कल-क्त। वियोजिते। [क्रिका०।

व्यवच्छिन्न त्रि० वि+अव+छिद-क्त। १छिन्ने २विशेषिते च

व्यवच्छेद पु० वि+अव+छिद-घञ्। १पृथक्करणे २विशेषकरणे ३मोचने च ४वाग्यस्तौ हेमच०।

व्यवधा स्त्री वि+अव+धा-अ। व्यवधाने अमरः।

व्यवधान न० वि+अव+धा-ल्युट्। १तिरोधाने २द्रव्यान्तरेण द्रव्यान्तरस्याच्छादने च हेमच०। [३आच्छादके च

व्यवधायक त्रि० वि+अव+धा-ण्वुल्। १व्यवधानकर्त्तरि

व्यवधि पु० वि+अव+धा-कि। व्यवधाने शब्दच०।

व्यवसाय पु० वि+अव+सो-घञ्। १दृढे "मरणव्यवसायमुत्तिम" कुमारः। २सजीविकायाम् ३व्यवहाने ४व्यवधारणे च "व्यवसायात्मिका बुद्धिः" गीता। ५विष्णौ विष्णुस०।

व्यवस्था स्त्री वि+अव+स्था-क। १शास्त्रविहितत्वेन विषयान्तरपरिहारेण विषयविशिष्टे स्थापने २शास्त्रमर्य्यादायाञ्च

व्यवस्थान न० वि+अव+स्था-ल्युट्। १व्यवसायामृ। कर्त्तरि ल्यु। २विष्णौ पु० विष्णुस०।

व्यवस्थित त्रि० वि+अव+स्था-क्त। विषयान्तरपरिहारेण विषयविशेषे अवस्थिते १शास्त्रविहिते पदार्थे २अवस्थितमात्रे च।

व्यवस्थितविभाषा स्त्री कर्म०। व्याकरणोक्ते विषयान्तरपरिहारेण विषयविशेषेऽवस्थितरूपे विकल्पे।

व्यवहर्त्तृ त्रि० वि+अव+हृ-तृच्। व्यवहारकर्त्तरि।

व्यवहार पु० वि+अव+हृ-घञ्। १अर्थविशेषबोधनाय शब्दविशेषप्रयोगे २ऋणादानादिदुष्टादृष्टेषु विवादेषु ३सदाचरणभोजनादौ च

विवादरूपव्यवहारलक्षणं वीर० मि० उक्तं यथा "अथ कोऽयं व्यवहारः प्रमाणतर्कोपदेष्टव्यः पक्षप्रतिपक्षपरिग्रहः इति चेन्न वादादेरपि तत्त्वापत्तेः। लिखितादिः प्रमाणविशेषः परिगृह्यत इति चेत् सत्यापि तत्प्रवृत्त्यविरोधात्। अनुमानाद्यवहिर्भावाच्च तेषामव्यावर्त्तकत्वात्। अतएवान्यविरोधेन स्वसम्बन्धितया कथनमित्यपि परास्तम्। प्रमाणान्तर्भावेण स्वरूपनिरूपणानौचित्याच्च कथनादेर्व्यवहारपदवाच्यत्वे "व्यवहारो नृपः पश्येदित्याद्यनन्वयाच्च। उच्यते। ऋणादानादिलौकिकार्थविषया कथैव व्यवहारः। कथाव्यपदेशावस्तु शास्त्रीयपदार्थविषयत्वात् अधिकरणादिव्यपदेशो यथा वैदिकार्थविषयककथायान्तर्भावात्व्यवहारव्यपदेशः। अतएव यथायथं हेत्वाभासनिरूपणादियोजनमपि युक्तम्। तच्च तत्र तत्र प्रदर्शयिष्यते। चतुष्पात्त्वमपि तस्य तदविरोधेनैवोपपादयिष्यते। यत्तु गोपालेन तत्त्वनिर्णयेषु कथात्वाद्वादत्वमेवास्येति मिश्रमतत्वेनोपन्यस्य जयभङ्गफलकत्वात् स्थापनावसानत्वाच्च जल्पएवायमिति तन्निरस्तम्। तस्यैकविधत्वमयुक्तम्। शङ्कातत्त्वाभियोगभेदेन उभयरूपत्वस्यैव युक्तत्वात्। वैतण्डिकस्य व्यवहारायोग्यत्वादस्य वितण्डात्वमपरमसम्भवि। अन्यविरोधेन स्वसम्बन्धितया कथनमिति विज्ञानयोगिवचोऽप्येवं सति नायुक्तम्। न च पश्येदित्यनन्वयः निर्णयार्थकथनतया सर्वनिबन्धृभिस्तद्व्याख्यानात्। "ऋत्याचारव्यपेतेन मार्गेणाधर्षितः परैः। आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्" याज्ञवल्क्यवचनं यद्यपि व्यवहारपदान्यृणादानादीनि सामान्येन लक्षयति तथापि तद्व्यवहारसामान्यलक्षणमपि समानशब्दसन्निवेशतया ततः प्रतीयते। तस्माच्चायमर्थः ऋत्याचारादिधर्मप्रमाणातिक्रान्तरीत्याऽन्यैरभिभूतः गुरुशेष-

राजादिभ्यो व्यवहारदर्शिभ्यो यदावेदयति तर्हि तदाऽऽवेद्यमानत्वात्व्यवहारस्य पदं विषयः। दीनि प्रतिबन्धकादानादिलक्ष्यत्वेन मन्वादुक्तलक्षणचिह्नमिति। एवञ्चाधर्णितस्यार्थित्वमाधर्मकस्य प्रत्यर्थित्वन्तयोर्विवादस्य व्यवहार इति प्रतीयते। इदमेव च मिताक्षरायामन्यविरोधेनेत्यादिना निष्कृष्टलक्षणम्। अन्यविरोधेनेत्यनुक्ते प्रश्नोत्तरादिरूपेण स्वसम्बन्धिकथनमपि व्यवहारः स्यात्। स्वसम्बन्धितयेत्युक्ते एकस्वसम्बन्धितया साक्षिणा कथनमन्यविरोधि भवत्येवेत्यस्याप्यर्थित्वापत्तिरतः स्वसम्बन्धितयेति। इदं चोत्तरचतुष्टयेऽप्यनुगतम्। न च सम्प्रतिपत्तावव्याप्तिः तत्रापि साध्यतया वादिना निर्दिष्टस्य सिद्धतया निर्देशे तद्विरोधपर्यवसानात् अन्यथोत्तरत्वभङ्गप्रसङ्गात्। यद्यपि द्वावपि आधावादिनौ तत्रापि परस्परविरोधावश्यम्भावाव्याप्तिः। इदं चाग्रे व्यक्तीभविष्यति। यच्च कात्यायनेनोक्तम् "प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये न्यायविस्तरे। साध्यभूतस्तु यो वादो व्यवहारः स उच्यते" इति एतच्च व्यवहारेऽनुव्यवहारस्वरूपोक्तिपरतया, साधर्म्यवैधर्म्यजात्यादिष्वेव व्याख्यातम् "विच्छिन्नाचरणनिबन्धनजनादिप्रयत्नसाध्ये धर्माख्ये वस्तुनि विच्छिन्ने विप्लुते सतीति व्यवहारेऽनुरुद्धः धर्माधर्मविप्लवस्यैव व्यवहारेऽनुत्वात्। तथा च नारदः "मनुः प्रजापतिर्यस्मिन् काले राज्यमभुञ्जत। धर्मैकताना: पुरुषाश्चादासन् सत्यवादिनः। तदा न व्यवहारोऽभूच्च द्वेषो नापि मत्सरः। नष्टे धर्मे मनुष्येषु व्यवहारः प्रवर्त्तते" इति। बृहस्पतिरपि "धर्मप्रधानाः पुरुषाः पूर्वमासन्न हिंसकाः। लोभहेतुमधिभूतानां व्यवहारः प्रवर्त्तते" इति। न्यायेत्यादिना व्यवहारस्वरूपमुक्तम्। तत्र साधर्म्यवैधर्म्यव्याख्यानम्। न्यायः निष्पक्षपातित्वं लौकिकमाचरणं तस्य विस्तरः इदं युक्तमिदमयुक्तमिति उपपत्तिपुरःसरो निर्णयः। तस्मिन् विषयभूते तत्प्रवर्त्तकोऽर्थिप्रत्यर्थिनोः साध्यभूतः साध्यरूपादानादिपदं तन्मूलस्तद्विषयको यो विवादः स व्यवहार इति। मदनरत्ने तु न्यायः प्रमाणस्य विस्तरः प्रवृत्तिर्यत्र तस्मिन् विषय इति। साध्यभूतेत्यादि तुल्यम्। मदनरत्नाकरस्मृतिचन्द्रिकाकल्पतरुकारैः सर्वमेवेदं वचनं व्यवहारस्वरूपपरतयापि व्याख्यातम्। प्रयत्नसाध्ये कृतसाध्ये परामिमवेन स्वेच्छया भोक्तुमशक्ये सदृश्येत्यादौ सति न्यायः प्रमाणं विच्छिद्यते प्रवर्त्तते यस्मिन् तस्मिन् धर्माधिकरणे सदृशे साध्यभूतेत्यादि पूर्ववत्। तेनापि प्रागुक्तमेव विवक्षितलक्षणलक्ष्यघटकत्वे नानैव यतितव्यम्। वयन्तु सर्वं सम्प्रत्यनुसारानानाधिकरणेन व्याचक्ष्महे। विच्छिन्नाचरणादिगोचरप्रयत्नसाध्ये धर्माख्ये न्यायविस्तरे नीयतेऽर्थोऽनेनेति न्यायः प्रमाणं स्मृतिकृत्यादि विस्तार्यते प्रवर्त्तेतऽस्मिन् स्मृत्यादिप्रमेय इत्यर्थः। विच्छिन्ने प्रमाणापरिज्ञानतात्पर्य्यानवधारणादिना दुर्ज्ञेये सति। यद्वा। धर्म आख्यायतेऽनेनेति धर्माख्यो धर्मप्रतिपादक इति वाक्यम्। न्यायविस्तरे प्रमाणसमूहे स्मृतिकृत्यादौ प्रमादादिना विच्छिन्ने लुप्तप्राये सति साध्यभूतेत्यादि तदर्थमिति। हारीतः "स्वधर्मश्च यथा प्राप्तिः परधर्मश्च वर्जनम्। न्यायेन क्रियते यत्र तु व्यवहारः स उच्यते" इति। न्यायेन प्रमाणेन। इत्यत्रापि पूर्वोक्त एव तात्पर्य्यम्। तन्निरुक्तिभेदास्तत्र दर्शिता यथा "निरुक्तिमपि व्यवहारपदस्याऽनुमेयार्थसमवधायति। यच्च कात्यायनेनोक्तं "विना नार्थेन सन्देहो हरणं हार उच्यते। नानासन्देहहरणाद् व्यवहार इति स्मृत" इति। अथ व्यवहारभेदानाह नारदः "सोत्तरोलुत्तरश्चेति स विज्ञेयो द्विलक्षणः। सोत्तरोऽभ्यधिको यत्र विशेषपूर्वकः पणः" इति। यदि पराजयेऽपि तदा पराजयदण्डाभ्यधिकमेतावद्दास्यामीति यत्र लेखनपूर्वकं प्रतिज्ञायते स सोत्तर इत्यर्थः। तद्भिन्नोऽनुत्तर इत्यर्थादुक्तं भवति। स एव त्रयोदशप्रकारनिबन्धनानवान्तरभेदान्तर्हिप्य विवृतवान् यथा "चतुरङ्ग आह चतुःस्थानश्चतुःसाधन एव च। चतुर्विंशतिवर्गोऽपि चतुष्कारी च कीर्त्तितः। त्रिवर्गोनिर्द्विभियोगश्च द्विदारोद्विगतिस्तथा। अष्टाङ्गोऽष्टादशपदः शतशाखश्च तथैव च। धर्मश्च व्यवहारश्च चरित्रं राजशासनम्। चतुष्पादु व्यवहारोऽयमुत्तरः पूर्वबाधकः। तत्र सत्यं स्थितो धर्मो व्यवहारस्तु साक्षिषु। चरित्रं तु स्त्रीकरणे राजाज्ञायान्तु शासनम्। साम्यादुपायसाध्यत्वाच्चतुःसाधन उच्यते। चतुर्व्यूहोऽपि वर्णानां रक्षणार्थं चतुर्हितः। कर्त्तव्यतो साक्षिणश्च सभ्यान् राजानमेव च। व्याप्नोति तादृशो यस्माच्चतुर्व्यूहोऽपि मतः कृतः। धर्मस्यार्थस्य यशसोलोकयात्रायास्तथैव च। चतुर्व्यूहस्तथैवेह चतुःसारी प्रकीर्त्तितः। कामात् क्रोधाच्च लोभाच्च

त्रिभ्यो यस्मात् प्रवर्त्तते । त्रियोनिः क्रीर्य्यते तेन त्रय-मेतद्विवादकृत् । द्वयभियोगस्तु विज्ञेयः प्रकृतस्वाभि-योगतः । प्रकृताऽसतान्तु संसर्गात्तत्त्वं होडाभिदर्शनात् । पक्षद्वयाभिसम्बन्धात् द्विगतिः समुदाहृतः । पूर्ववाद-स्त्रयोः पक्षः प्रतिपक्षस्तदुत्तरः । भूतज्ञानानुसारित्वात् द्विगतिः समुदाहृतः । भूतनत्त्वार्थसंयुक्तं प्रमाणाभिहितं कृतम् । राजा१ मनुष्यः सभ्यः२ शास्त्रं३ गणकलेख-कौ४ ५ । हिरण्यहेमन्यङ्कटकटसटाङ्कः समुदाहृतः । ऋणादानं १ऋणनिधिः२ समूयोत्थान३मेव च । दत्तस्य पुनरादान४मभ्यूपाऽभ्युपेत्य च । वेतनस्यानपाकर्म५ तथैवास्वामिविक्रयः७। विक्रीयासम्प्रदानंच क्रीत्वानु-शयश्च । समयस्यानपाकर्म१० विवादः चेतज११ स्तथा । स्त्रीपुंसयोश्च सम्बन्धो१२ दायभागो१३ऽथ साह्वयः१४ । वाक्पारुष्यं१५ तथैवोक्तं दण्डपारुष्य१६मेव च । द्यूत१७समाह्वय१८श्चैव त्यष्टादशपदः स्मृतः । क्रियाभेदान्मनुष्याणां शतशोऽयो निगद्यते" इति ।

व्यवहारपद न० ६त० । व्यवहारविषये ।

व्यवहारमातृका स्त्री व्यवहारस्य विवादनिर्णयस्य मातेव पोषकत्वात् परिच्छेदकत्वाद्वा इवार्थे कन् । व्यवहार-निर्णयार्थं प्राङ्न्यायकादिकार्य्ये क्रियासमुदाये

"व्यवहारान्नृपः पश्येत्" इत्युक्तो व्यवहारः सोऽय-मित्थं चतुष्पाच्चतुरंशकल्पनया विवादेषु ऋणादानादि-भूपदर्शितो वर्णितः "तत्र प्रत्यर्थिनोऽग्रतो लेख्यम्" इति भाषापादः प्रथमः । "श्रुतार्थस्योत्तरं लेख्यम्" इत्युत्तर-पादो द्वितीयः । "ततोऽर्थी लेखयेत्सद्य" इति क्रि-यापादस्तृतीयः । "तत्सिद्धौ सिद्धिमाप्नोति" इति सा-ध्यसिद्धिपादश्चतुर्थः । यथोक्तम् "परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु । वाक्यान्न्यायाद्व्यवस्थानं व्यवहार उदाहृतः । भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः । आद्यिमत्तरं वस्तु चतुष्पादमिधीयत" इति । सम्प्रति प्रत्युत्तरे तु साधनानिर्देशाद्भाषार्थस्यासाध्यत्वाच्च न साध्य सिद्धिलक्षणः पादोऽस्तीति द्विपात्त्वमेव । उत्तराभिधाना-नन्तरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रिया स्यादिति परा-मर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वे-नानभिधानात् व्यवहर्तृसम्बन्धाभावाच्च न व्यवहारपाद-त्वमिति स्थितम् इति व्यवहारमातृका । एवं सर्वव्य-वहारोपयोगिनीं व्यवहारमातृकामभिधायाधुना क्वचित् व्यवहारविशेषे कञ्चिद्विशेषं दर्शयितुमाह" मिताः ।

व्यवहारिक त्रि० व्यवहारः प्रयोजनतयाऽस्यास्य ठन् । व्य-वहारयोग्ये लोकप्रसिद्धे घटपटादौ स्त्रियां ङीप् । २दृष्टदृष्टे ३लोकयात्रायां ४सम्बन्धिन्यां स्त्री मेदि० ।

व्यवहारिकसत्ता स्त्री कर्म० । १व्यवहारोपयिके सत्त्वे वे-दान्तकल्पिते ब्रह्मभिन्नपदार्थमात्रस्य वस्तुतोऽसत्त्वेऽपि व्यवहारयोग्ये सत्त्वे येन घटादि व्याह्रियते । तत्का-र्य्यकरणोपयोगित्वेन कल्पिते घटादेरर्थक्रियाकारित्व-लक्षणे २सत्त्वे च ।

व्यवहार्य्य त्रि० वि+अव+हृ-ण्यत् । दृष्टमित्यमेवेत्येवंरूपेण १व्यवहारविषये येन सह भोजनादिकमेकपङ्क्तौ क्रि-यते २तस्मिंश्च जने ।

व्यवहित त्रि० वि+अव+धा-क्त । व्यवधानवति पदार्थे ।

व्यवाय पु०वि+अव+इण-घञ् । १मैथुने अमरः । २व्यवधाने च ३तेजसि न० मेदि० । ४गुग्गुलौ पु० जटा० ।

व्यवायिन् त्रि० वि+अव+इण्-णिनि । मैथुनधर्मकारके स्त्रियां ङीप् ।

व्यसन न० वि+अस-ल्युट् । १विपत्तौ २अन्याये कामजाते कोपजाते च स्त्रीभोगमद्यपानादौ ३दोषे ४दैवादिकृते उपद्रवे च ५पापे ६निष्फलत्वाद्यने मेदि० ।

"व्यसनान्याह मनुः कामजेषु प्रसक्तो हि व्यसनेषु मही-पतिः । विद्युच्चलेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु । मृगया१क्षो२ दिवास्वप्नः३ परीवाद४स्त्रियो५ मदः६ । "तौर्य्यत्रिकं७ वृथाट्या८ दि वृथाख्या१० च कामजो दशकोगणः । पैशुन्यं१ साहसं२ द्रोहः३ ईर्ष्या४ऽसूया५ र्थदूषणम्६ । वाग्दण्डजञ्च पारुष्यं७ क्रोधजोऽपि गणोऽष्टकः" । तौर्य्यत्रिकं नृत्यगीतवाद्यानि स्त्रीणीति दश । पैशु-न्यमविज्ञातपरदोषाविष्करणम् । साहसं साधोर्बन्धना-दिना निग्रहः । द्रोहो जिघांसा । ईर्ष्या अन्यगुणास-हिष्णुता । असूया परगुणेषु दोषाविष्करणम् । अर्थ-दूषणम् अर्थानामपहरणं देयानामदानञ्च । मनु०७षु० ।

व्यसनार्त्त त्रि० व्यसनेनार्त्तः । २दैवाद्युपद्रवयुक्ते ।

व्यसनिन् त्रि० व्यसनमस्यास्ति इनि । १व्यसनयुक्ते कामजा-दिमद्यपानादिरूपदोषयुक्ते २दैवाद्युपद्रुते च हेमच० ।

व्यसु त्रि० विगताः असवो यस्य । १मृते "शेषे जातो भवेद्-व्यसुः" ज्योतिषम् ।

व्यस्त त्रि० वि+अस-क्त । १प्रक्षिप्ते २व्याप्ते मेदि० ३विभक्ते च "व्यस्तरात्रिंदिवस्य ते" कुमारः । ४विपरीते "एतद्-व्यस्तं महाशरम्" ति०त० । "व्यस्तविधिर्विलोमे" लीला० ।

६षष्ठ्यर्थमध्ये एकैकस्मिन्। "एते व्यक्ता समस्ता वा" विश्वामित्रः। ६समस्ताभिन्ने च भवेत्। ७व्यतिक्रमे त्रि०

व्याकरण पु० व्याक्रियन्ते व्युत्पाद्यन्ते अर्थवत्तया प्रतिपाद्यन्ते शब्दा येन वि+आ+कृ-करणे ल्युट्। वेदाङ्गे शब्दसाधुत्वबोधके १शास्त्रभेदे वेदाङ्गोक्ते नामरूपाभ्यां २जगतोविकाशने च

"अथ व्याकरणं वक्ष्ये काश्यायन! समासतः। सिद्धशब्दविवेकाय बालव्युत्पत्तिहेतवे। सुप्तिङन्तं पदं ख्यातं सुपः स्युः सप्त विभक्तयः। स्त्रीलिङ्गः प्रथमा प्रोक्ता सा प्रातिपदिकार्थके। सम्बोधने च सिङ्गादावुक्ते कर्मणि कर्त्तरि। अर्थवत् प्रातिपदिकं धातुप्रत्ययवर्जितम्। अमोट्शसो द्वितीया स्यात् तत्कर्म क्रियते च यत्। द्वितीया कर्मणि प्रोक्ता उक्तानुक्तविभेदतः। टाभ्यांभिस्तृतीया स्यात् करणे कर्त्तरीरिता। येन क्रियते तत्करणं तत्कर्त्ता यः करोति सः। ङेभ्यांभ्यस्चतुर्थी स्यात् सम्प्रदाने च कारके। यस्मै दत्त्वा धारयते रोचते सम्प्रदानकम्। पञ्चमी स्यात् ङसिभ्यांभ्योह्यपादाने च कारके। यतोऽपैति भयादत्ते यदपादानं ध्रुवं यतः। ङसोसामस्च षष्ठी स्यात् स्वामिसम्बन्ध उच्यते। ङ्योस्सुपश्च सप्तमी स्यात् सा चाधिकरणे भवेत्। आधारस्चाधिकरणं रक्षार्थानां प्रयोगतः। ईप्सितं चानीप्सितं यत्तदुपादानकं स्मृतम्। पञ्चमी पर्य्युपाङ् योग इतरत्तेन्यदिङ्मुखे। एनब्योगे द्वितीया स्यात् कर्मप्रवचनीयकैः। लक्षणवीप्सेत्थंभूतेऽभिभागे च परिप्रती। अनुस्तेषु सहार्थे च हीनेऽभूतौ च कीर्त्तितौ। द्वितीया च चतुर्थी स्याच्छेषायां गतिकर्मणि। अप्राणे हि विभक्तौ द्वे सम्यक्कर्मणयनादरे। नमःस्वस्तिस्वधास्वाहालंवषट्योग ईरिता। चतुर्थी चैव तादर्थ्ये तुमर्थाच्चभावावाचिनः। तृतीया सहयोगे स्यात् कुत्सितेऽङ्गे विशेषणे। काले भावे सप्तमी स्यादेतैर्योगे च षष्ठ्यपि। स्वामीश्वराधिपतिभिः साक्षिदायादसूतकैः। निर्द्धारणे द्वे विभक्ती षष्ठी हेतुप्रयोगके। क्त्यर्थकर्मणि तथा करोतेः प्रतियत्नके। हिंसार्थानां प्रयोगे च गति कर्मणि कर्त्तरि। न कर्त्तृकर्मणोः षष्ठी निषादौ प्रतिषेधिता। द्विविधं प्रातिपदिकं प्रातिपदिकमव्ययम्। भुवादिस्वत्तिङो लः स्याल्लकारा दश वै स्मृताः। तिप्तस्झयः प्रथमो मध्यः सिप्थस्थास उत्तमः। मिब्वस्मसः परस्मै तु पदानाम्नात्मनेपदम्। तानितामन्ता प्रथमो मध्यस्सासाथांध्वं तथा। उत्तम इडहिमहिङ् डितः कर्त्तरि धातुतः। नाम्नि प्रयुज्यमानेऽपि प्रथमः पुरुषो भवेत्। मध्यमो युष्मदि प्रोक्त उत्तमः पुरुषोऽस्मदि। भुवाद्या धातवः प्रोक्ताः स्वनादयस्तनादयस्तु धातवः। लडीरितो वर्त्तमाने क्ष्वेलातीते च धातुतः। भूतानद्यतने लिट् च लिङाशिषि च धातुतः। विध्यादावेवानुमतौ लिङ्विधिमन्त्रणे भवेत्। निमन्त्रणाधीष्ट संप्रश्न प्रार्थनेषु तथाऽऽशिषि। लिङतीते परोक्षे स्याल्लङ् लुङ् लृट् लृङ् भविष्यति। श्वोद्यतने लृट् च भविष्यति च धातुतः। धातोर्लृङ्क्रियातिपत्तौ लिङर्थे लोट् प्रकीर्त्तितः। कर्तर्यपि वर्त्तन्ते भावे कर्मणि कर्त्तरि। शतृ शानच् नव्यणवु यदनीयर् क्य तृचादयः" गारुड़े २०९अ०।

व्याकुल त्रि० वि+आ+कुल-क। रोगादिना इतिकर्त्तव्यतानिश्चयविहीने अमरः। [प्रकटीकृते।

व्याकृत त्रि० वि+आ+कृ-क्त। १प्रकाशिते २नामरूपाभ्यां

व्याकृति स्त्री वि+आ+कृ-क्तिन्। १भङ्गौ हला०२प्रकाशने। करणे क्तिन्। ३व्याकरणे च। अ व्याक्रियते तत्तार्थे "व्याक्रियाव्यञ्जनीया वा जातिः कापीह साधुता" हरिका०

व्याकोश(ष) त्रि० वि+आ+कुश(ष) अच् व्यागतः कोशा(षा)त् प्रा०स० वा। १प्रफुल्ले अमरः "व्याकोशे(षे)न्दीवराक्षी" इति तन्त्रम्। [हरूपे १ग्रन्थभेदे २कथने च।

व्याख्या स्त्री वि+आ+ख्या-अच्। विवरणात्मके शब्दसमूहे

व्याख्यात त्रि० वि+आ+ख्या-क्त। १कथिते २विदिते च।

व्याघात त्रि० वि+आ+हन-घञ्। १अन्तराये २प्रहारे मेदि० ३अर्थालङ्कारभेदे अलङ्कारशब्दे ४०५पृ०दृश्यम्। ४प्रतिबन्धे "व्याघातावधिराशङ्का" कुसुमाञ्जलिः। विष्कम्भादिसप्तविंशतियोगमध्ये ५त्रयोदशे योगे च।

व्याघ्र पुंस्त्री० वि+आ+घ्रा-क। १जन्तुभेदे अमरः स्त्रियां ङीष्। २रक्तैरण्डे ३करञ्जे च पु०मेदि०। [व्यच०।

व्याघ्रदल पु० व्याघ्रस्तृपाद इव दलमस्य। एरण्डवृक्षे अ-

व्याघ्रनख न० व्याघ्रस्य नखोऽस्त्रास्य आकारे अच्। १नखीनामगन्धद्रव्ये अमरः। व्याघ्रस्य नख इव दलमस्य। २क्षुद्रोषधे शब्दच०। ३कन्दभेदे। ४नखयुक्ते च मेदि० हेत०। ५व्याघ्रस्य नखे।

व्याघ्रनायक पुंस्त्री० व्याघ्रं नयति स्थानान्तरं प्रापयति पश्चात् क्रोशनेन नी-एवुल्। शृगाले (केचि) राजनि० तस्य पश्चात्क्रोशनेन व्याघ्रस्य स्थानान्तरप्रापकत्वेन तथात्वं स्त्रियां ङीष्।

व्याघ्रपाद(द्) पु॰व्याघ्रस्य पादइव मूलमस्य वा अन्यलोपः। १विकङ्कतवृक्षे अमरः। २मुनिभेदे च शविकङ्कटशब्दे राजनि॰। [अमरः। ६त॰। २अ बहुव्रीहौ च।

व्याघ्रपुच्छ पु॰ व्याघ्रस्य पुच्छइव दलमस्य। १एरण्डवृक्षे

व्याघ्राट पुंस्त्री॰ व्याघ्रं दृष्ट्वाटति अट-अच्। भरद्वाजपक्षिणि अमरः स्त्रियां ङीष्। [याम् अमरः।

व्याघ्रादनी स्त्री व्याघ्रेणादयते अद-ल्युट् ङीप्। त्रिवृता

व्याघ्रास्य पुंस्त्री॰ व्याघ्रस्येवास्यं यस्य। बिड़ाले शब्दच॰। स्त्रियां टाप्।

व्याघ्री स्त्री व्याघ्रस्तत्त्वाकारः कण्टकोऽस्त्यस्याः अच् गौरा॰ ङीष। १कण्टकारिकायाम् अमरः। जातौ ङीष्। २व्याघ्रयोषिति।

व्याज पु॰ वि+अज+घञ् वीभावाभावः। १कपटे वञ्चना फले २अलीकव्यवहारे कारणान्तरेण १प्रवृत्तस्य कारणान्तरत्वेनोद्भावनरूपे अपदेशे च अमरः।

व्याजनिन्दा स्त्री ३त॰। १कपटनिन्दायाम् २अर्थालङ्कारभेदे च अलङ्कारशब्दे ४०४ पृ॰ दृश्यम्।

व्याजस्तुति स्त्री॰ ३त॰। १कपटस्तुतौ २अर्थालङ्कारभेदे च अलङ्कारशब्दे दृश्यम्। [अलङ्कारशब्दे ४०४पृ॰दृश्यम्।

व्याजोक्ति स्त्री ३त॰। १छलेनोक्तौ २अर्थालङ्कारभेदे च

व्याड पु॰ वि+आ+अड-अच्। १मांसभक्षके व्याघ्रादौ पशौ २सर्पे अमरः। ३दुष्टे शब्दच॰। ४यक्षके त्रि॰ रायमु॰।

व्याडायुध न॰ व्याडस्य व्याघ्रस्यायुधं नख इवास्त्यस्य अच्। व्याघ्रनखाख्ये गन्धद्रव्ये अमरः। [च शस्त्रभेदे त्रिका॰।

व्याडि पु॰ व्याकरणस्य संग्रहाख्यग्रन्थकारके १कोशकारके

व्यात्युत्क्री स्त्री वि+अति+उत्क्र-भावे व्यतिरारे अच् स्वार्थे अण् ङीप्। परस्परमेचनरूपे जलक्रीड़ाभेदे।

व्यादिश पु॰ वि+आ+दिश-क। १विष्णौ विष्णुस॰ २विशेषेण आदेशके त्रि॰।

व्याध पुंस्त्री॰ व्यध-घञ्। मृगहिंसके व्रतियात्र सर्वत्रिपत्न्यां जाते १सङ्कीर्णजातिभेदे पुंस्त्री॰ स्त्रियां ङीष्। "नापितात् गोपकन्यायां सर्वस्त्री तस्य योषिति। जज्ञाद् बभूव व्याधस्य बलवान् मृगहिंसकः" ब्रह्मवै॰ब्र॰ १०अ॰। २हिंसके त्रि॰ मेदि॰। भावे घञ्। ३वेधने ४पीड़ने च।

व्याधभीत पुंस्त्री॰ व्याधाद्भीतः भी-क्त। व्याघ्रे शब्दच॰। [वृद्धे हेमच॰। स्त्रियां ङीष्।

व्याधाम पु॰ व्याधेन पीड़नेन अमयति अम-णिच्-अच्।

व्याधि पु॰ वि+आ+धा-कि। १रोगे व्याधिश्च योगान्तराय-भेदः चित्तविक्षेपशब्दे २६४१ पृ॰ दृश्यम्। २दुष्टौ अमरः। ३कामज्वरे नायकयोरवस्थाभेदे सा॰द॰।

व्याधिघात पु॰ व्याधिं हन्ति-हन-अण्। आरग्वधे (सोन्दाल) अमरः। [अमरः

व्याधित त्रि॰ व्याधिर्जातोऽस्य तारा॰ इतच्। व्याधियुक्ते

व्याधिहन्तृ पु॰ व्याधिं हन्ति हन-तृच्। १वाराहीकन्दे राजनि॰ २रोगनाशके त्रि॰ स्त्रियां ङीप्।

व्याधु(धू)त त्रि॰ वि+आ+धु-(धू)-क्त। कम्पिते शब्दर॰।

व्यान पु॰ वि+अन-घञ्। देहस्थे सर्वशरीरव्यापके प्राणादिभेदे पञ्चमे वायुभेदे "विष्वगेतनवान् वायुर्व्यान इत्यभिधीयते" वेदान्तमते "व्यानो व्यानयत्यन्नं सर्वव्याधिप्रकोपनः। सङ्कोचजृम्भणप्रख्यो ज्ञानोपादानकारणम्। कण्ठाच्छिरसि कर्णयोर्मध्ये कक्षां वै गुल्फयोरपि। आपादे गले स्फिगुद्वये तिष्ठत्यत्र निरन्तरम्। स्कन्धयत्यधरं वक्त्रं गात्रनेत्रे प्रकोपनः" पदार्थादर्शः।

व्यापक त्रि॰ विशेषेणाप्नोति वि+आप-ण्वुल्। १अधिकदेशवृत्तौ "व्यापकत्वात् परापि स्यात्" भाषा॰। न्यायोक्ते स्वाधिकरणवृत्त्यभावाप्रतियोगिनि च २पदार्थे ३तन्त्रोक्ते सर्वोत्पत्तिस्थानिनि न्यायभेदे पु॰ "अकुलिङ्गाव्यापकत्वाच्च" तन्त्रसा॰। ४आच्छादके त्रि॰ अमरः। [च अमरः।

व्यापन्न त्रि॰वि+आ+पद-क्त। १नष्टे हेमच॰ २विपद्युक्ते

व्यापाद पु॰ वि+आ+पद-घञ्। १द्वेषेऽचिन्तने हेमच॰।

व्यापादन न॰वि+आ+पद-णिच्-ल्युट्। १मारणे हेमच॰ २परानिष्टचिन्तने अमरः।

व्यापार पु॰ वि+आ+पृ-घञ्। "व्यापारो भावना सैवोत्पादना सैव च क्रिया" हर्यु॰टीकायां १भावयितृव्यापादनक्रियायाम्। वणिजो २व्यवसाये च।

करणजन्ये करणजन्यक्रियाजनके २पदार्थे यथा दात्रकरणकरणजन्यः तज्जन्यच्छेदजनकः छेद्यसंयोगादिः एवमिन्द्रियस्य व्यापारः विषयसंयोगः। "विषयेन्द्रियसंयोगो व्यापारः सोऽपि षड्विधः" भाषा॰। एवं यागादेः व्यापारः षड्विधः। व्यापारवत् कारणं करणमिति। "क्रियायाः परिनिष्पत्तिर्व्यापारादनन्तरम्। विवक्षितो यदा यत्र करणं तत्तदा स्मृतम्" हरिकारिका।

व्यापारिन् त्रि॰ व्यापारोऽस्त्यस्य इनि। १व्यापारवति कर्त्रादौ "न हि व्यापारेण व्यापारिणोऽन्यथा सिद्धिः"। २व्यवसायवति वणिग्जने पु॰। [३विष्णौ पु॰ विष्णुस॰।

व्यापिन् त्रि॰ वि+आप-णिनि। १व्यापके स्त्रियां ङीप्।

व्याकुल त्रि० वि+आ+कुल-क्त। १व्यापारयुक्ते २कर्मसचिवे हेमच०।

व्याप्त त्रि० वि+आप+-क्त। १पूर्णे हेमच०। २समाक्रान्ते २ख्याते च मेदि०। ४स्थापिते ५व्याप्तियुते च "समेन यदि नो व्याप्तः" उदयनाचार्य्यः।

व्याप्ति स्त्री वि+आप-क्तिन्। १ऐश्वर्य्यभेदे न्यायमते तद्भाववति अविद्यमानत्वरूपे २पदार्थे यथा वह्नेरभाववति जलादौ धूमो नास्तीति धूमादौ वह्नेर्व्याप्तिः। "व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः। अथ वा हेतुवह्निविरहाप्रतियोगिना। साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते" भाषा०। प्रमेयत्ववह्निन्यायसिद्धे द्वितीयलक्षणसूत्रम्। प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति द्वितीयलक्षणार्थः। व्याप्तिश्च द्विविधा अन्वयव्याप्तिर्व्यतिरेकव्याप्तिश्च तत्रान्वयव्याप्तिः पूर्वोक्ता। "साध्याभावव्यापकत्वं हेत्वभावस्य यत् भवेत्" भाषा० उक्ता अपरा सा च साध्याभावव्यापकीभूताभावप्रतियोगितारूपा। तत्रान्वयव्याप्तिज्ञाने व्यभिचारज्ञानाभावः सहकारिज्ञानञ्च कारणम्। व्यतिरेकव्याप्तिज्ञाने च साध्याभावे हेत्वभावस्य सहचारज्ञानं व्यभिचारज्ञानाभावश्च कारणम्। "व्यभिचारशङ्कयापि सहचारग्रहस्तथा। हेतुर्व्याप्तिग्रहे, तर्कः कश्चिच्छङ्कानिवर्त्तकः। द्वैविध्यन्तु भवेत् व्याप्तेरन्वयव्यतिरेकतः" भाषा०। धूमो यदि वह्निव्यभिचारी स्यात् तदा वह्निजन्यो न स्यादित्यादितर्केण व्यभिचारशङ्का निवर्त्तते इत्याकरे द्रष्टव्यम्। उपाधिस्तु व्यभिचारोद्भावकतया व्याप्तिज्ञानविघटकतया चानुमितिविरोधी उपाधिशब्दे १२४८ पृ० द्रष्टव्यम्।

व्याप्य त्रि० वि+आप-ण्यत्। १व्याप्ते २अल्पदेशवृत्तौ 'व्याप्यत्वादपराऽपि च" भाषा०। ३अनुमितिसाधने लिङ्गे न० ४साधनमात्रे पुंक्लीबयोर्मतौ च अमरः।

व्याम पु० वि+यम-घञ्। तिर्य्यक्पाणितो विस्तृतयोर्बाह्वोरन्तरालपरिमाणे हेमच०।

व्यायत त्रि० वि+आ+यम-क्त। १दीर्घे २व्यूढे ३दृढे ४अतिशये च मेदि०। भावे-क्त। ५दैर्घ्ये ६आयामे च न० मेदि०।

व्यायाम पु०वि+आ+यम-घञ्। १श्रमे २श्रमसाधने व्यापारे ३पीडने ४दुर्गसंस्कारे ५विषमे मेदि० ६मल्लानां श्रमकारके व्यापारे (कुस्ति) ७व्यायामपरिमाणे च हेमच०।

व्यायोग पु०वि+आ+युज-घञ्। दृश्यकाव्यभेदे सा०द० तल्लक्षणञ्च यथा "ख्यातेतिवृत्तोव्यायोगः स्वल्पस्त्रीजनसंयुतः। हीनोगर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः। एकाङ्क एव भवेदस्मिन्निमित्तसमरोदयः। कौशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः। राजर्षिरथवा दिव्यो भवेद्वीरोद्धतश्च सः। हास्यशृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनो रसाः" यथा सौगन्धिकाहरणधनञ्जयविजयादि।

व्याल पुंस्त्री० वि+अड-घञ् डस्य लः। १सर्पे २हिंसकपशौ अमरः। स्त्रियां ङीष्। ३दुष्टगजे च मेदि० ४चित्रके व्याघ्रे पुंस्त्री० राजनि० स्त्रियां ङीष्। ५पशुरेशः। ६शठे त्रि० अमरः ७भूतेंऽ त्रि०। [राजनि०।

व्यालगन्धा स्त्री व्यालस्येव गन्धो लेशोऽस्याः। नागकेसरे राजनि०। [समङ्गायाम् राजनि०।

व्यालग्राह पु० व्यालान् सर्पान् गृह्णाति ग्रह-अण्। (सापुड़े) सर्पधारिणि भरतः। णिनि। अत्रैव शब्दर०। "व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्" पु०त० काशीख०। [समङ्गायाम् राजनि०।

व्यालजिह्वा स्त्री व्यालस्य सर्पस्य जिह्वेव पत्रमस्याः। मञ्जिष्ठायाम् राजनि०। [लट्वलोऽत्रैव।

व्यालदंष्ट्र पु० व्यालस्य व्याघ्रस्य दंष्ट्रेव कण्ठकमस्य। गोक्षुरे राजनि०।

व्यालनख पु० व्यालस्य व्याघ्रस्य नखइव। गन्धद्रव्यभेदे स्वनामख्याते राजनि०।

व्यालपत्रा स्त्री व्यालस्य व्याघ्रस्य पत्रइव पत्रमस्याः। एवारौ कर्कटीभेदे राजनि०।

व्यालम्ब पु० विशेषेण आलम्बते वि+आ+लबि-अच्। १रक्तैरण्डे वैद्यकम्। विशेषेण २लम्बमाने त्रि०।

व्यालायुध न० व्यालस्य व्याघ्रस्यायुधं नखइव। १नखीनामगन्धद्रव्ये मधुरेशः। २व्यालनखाख्ये गन्धद्रव्ये पु० राजनि०।

व्यावक्रोशी स्त्री वि+अव+क्रुश-णच् स्वार्थे अण् ङीष्। परस्पराक्रोशे। [शिकटके शब्दर०।

व्यावर्त्त पु० विशेषेण आवर्त्तते वि+आ+वृत-अच्। नाभौ।

व्यावहारी स्त्री वि+अव+हृ-णच् स्वार्थे अण् ङीष्। परस्परहरणे। [स्मरहसने।

व्यावहासी स्त्री वि+अव+हस-णच् स्वार्थेऽण् ङीष्। परस्मरहसने।

व्यावृत्त त्रि० वि+आ+वृत-क्त। १वृते हेमच० २निवृत्ते च "व्यावृत्तगतिरुद्याने" कुमारः।

व्यावृत्ति स्त्री वि+आ+वृत-क्तिन्। निवारणे।

व्यास पु० व्यस्यति वेदान् वि+अस-घञ्। १पराशरसुते सत्यवतीगर्भजे कृष्णद्वैपायनभेदे वेदविभागकारके व्यापारे (कुस्ति) ७व्यासपरिमाणे च हेमच०। २नारायणस्य पञ्चकलावतारभेदे यथोक्तं

ब्रह्मवै०पु० ४ख० "व्यासः पुराणसूत्रञ्च प्रश्नञ्च मानुषिकं यदा। मौनीभूतः स चकार त्वामेव जगदम्बिकाम्। तदा चकार सिद्धान्तं त्वद्वरेण हरीश्वरः। संप्राप निर्मलं ज्ञानं भ्रमान्धध्वंसदीपकम्। पुराणसूत्रं श्रुत्वा स व्यासः पद्मकलोद्भवः। त्वां सिषेवे प्रदध्यौ च शतवर्षञ्च पुष्करे। तदा त्वत्तोवरं प्राप्य स कवीन्द्रो बभूव ह। तदा वेदविभागञ्च पुराणञ्च चकार ह"। स च कन्याकाले सत्यवत्यां पराशराज्जातः कालीनगन्धे १८६१पृ०दृश्यम् वेदव्यासशब्दोक्तेषु मुनिभेदेषु च २समासादिसमार्थके विग्रहवाक्ये ४विस्तारे अमरः वृत्तरत्नस्य भ. व्यक्षरटीकायाम् "व्यासे भनन्द्राग्निहते" छन्दो० छेदशब्दे २४०१ पृ० दृश्यम्। "यएवं वाचयेद्विप्रो स ब्रह्मन्! व्यास उच्यते" इत्युक्ते ५पुराणपाठके विप्रे च [ब्रह्मे च। ६ज्ञानभेदे शब्दर०।

व्यासक्त त्रि० वि+आ+सञ्ज-क्त। १आसक्ते तत्परे २संव्यासङ्ग पुंवि+आ+सञ्ज-घञ्। १कार्यान्तरत्यागेनैकपरत्वे [२निषिद्धे च। २आसक्तौ च।

व्यासिद्ध त्रि० वि+आ+सिध-क्त। १राजाज्ञयावरुद्धे मेदि०

व्याहत त्रि० वि+आ+हन-क्त। व्याघातयुक्ते।

व्याहार पु० वि+आ+हृ-घञ्। १वाक्ये २उक्तौ अमर।

व्याहृति स्त्री वि+आ+हृ-क्तिन्। १उक्तौ २भूर्भुवःस्वरादिषु सप्तसु भूभुवःस्वरादिलोकसप्तात्मकेषु सप्तभेदेषु च सप्त लोकाः पुनरेताः सप्त व्याहृतय एवेति योगयाज्ञवल्क्येन प्रतिपादितम् यदाह "भूरादयश्चैव सप्तैता व्याहृतयस्तथा। लोकास्ता एव सप्तैते उपर्युपरिसंस्थिताः"। तथा "सप्त व्याहृतयः प्रोक्ताः पुरा यत्र स्वयम्भुवा। ता एव सप्त छन्दांसि लोकाः सप्त प्रकीर्त्तिताः" यया च वासनया सप्त व्याहृतयः सप्त लोकाः सप्त च वासना योगियाज्ञवल्क्येनैव निरूक्त्या विविच्य प्रतिपादिताः यदाह "भवन्ति चास्मिन् भूतानि स्थावराणि दिवाः चराणि च। तस्मादुपरिति विज्ञेया प्रथमा व्याहृतिः स्मृता। भवन्ति भूयो भूतानि उपभोगाय पुनः। कल्पान्ते उपसंहाराय भुवस्तस्मात् प्रकीर्त्तिता। ज्ञानोपाहृतिजांस्तांश्च जायन्ते तानि वै सदा। जनयः सुकृतोनाञ्च स्वर्लोकः स उदाहृतः। अधरोत्तरलोकेभ्यो महांस्तु परिपालितः। हृदयं सर्वलोकानां महर्लोकेन निगद्यते। कल्पदाहप्रलीनास्तु प्राणिनस्तु पुनः स्मृतेः। जायन्ते तु पुनः सर्गे जनलोकेन निगद्यते। तपा लोकाद्यःविद्वा वे चान्ये ब्रह्मणः सुताः। अधिकार निहत्ताश्च तिष्ठन्त्यधिष्ठितस्तपः। सत्यन्तु सप्तमो लोको ब्रह्मणस्तदनन्तरम्। सर्वेषामेव लोकानां मूर्ध्नि संतिष्ठते सदा। ज्ञानकर्मसु निष्णातां तथा सत्यस्य भाषणात्। प्राप्यते चोपभोगार्थं प्राप्य न च्यवते पुनः। तत्सत्यं सप्तमो लोकस्तस्माद्दुर्गं न विद्यते"। [च हेमच०।

व्युत्क्रम पु०वि+उद्+क्रम-घञ्। १क्रमवैपरीत्ये २अतिक्रमे

व्युत्थान न० वि+उद्+स्था-ल्युट्। १विरोधकरणे २खातकरणे मेदि० ३प्रतिरोधने ४योगशास्त्रोक्ते समाध्यवस्थाप्रत्यये हेमच० ५नृत्यभेदे शब्दच०। ६विशेषेण उत्थाने च। वि+उद्+स्था-क्तिन्। व्युत्थितिरप्यत्र स्त्री।

व्युत्पत्ति स्त्री वि+उद्+पद्-क्तिन्। १विशेषेण उत्पत्तौ शास्त्रजन्ये शब्दार्थज्ञानादिसम्पाद्ये संस्कारभेदे २शब्दानामर्थावबोधकशक्तौ च।

व्युत्पन्न त्रि० वि+उद्+पद्-क्त। १व्युत्पत्तियुक्ते शब्दे तत्संस्कारयुक्ते २पुरुषे च। ३विशेषेणोत्पन्ने च।

व्युदस्त त्रि० वि+उद्+अस-क्त। निराकृते।

व्युदास पु० वि+उद्+अस+घञ्। निराकरणे।

व्युष्ट त्रि० वि+उष-क्त वा० ष्टुत्वाभावः। १दग्धे २पर्युषिते ३प्रभाते च ४फले ५दिवसे च न० हेमच०।

व्युष्टि स्त्री वि+उष-क्तिन्। १समृद्धौ २स्तुतौ ३फले च मेदि० व्युष्टिरात्रं यागभेदः युक्तारोह्यादि।

व्यूढ त्रि०वि+वह-क्त। १निवेशनविशेषेण स्थापिते व्यूहयुक्ते सैन्यादौ "व्यूढां द्रुपदपुत्रेण" गीता। २विन्यस्ते ३सहते अमरः "व्यूढोरस्को वृषस्कन्धः" रघुः। ४पृथुले त्रि० मेदि० ५परिचिते ६विवाहिते च त्रि० "व्यूढा काचन कन्यका" प्रबोधचन्द्रोदयः। [कथने अमरः।

व्यूढकङ्कट त्रि० व्यूढःपरिचितः कङ्कटः वर्म येन। सन्नद्ध-

व्यूत त्रि०वि+वे-क्त। तन्तुभिर्ग्रथिते। [पटार्थे अमरः।

व्यूति स्त्री वि+वे-क्तिन्। १वस्त्रादिवयनकर्म्मणि२तद्धेतने(वानि)

व्यूह पु० वि+ऊह-घञ्। १समूहे २निर्माणे च ३सैन्यकतर्के ४देहे ५सैन्ये ६युद्धार्थं सैन्यसन्निवेशनविशेषे अमरः। "समयस्य तु सैन्यस्य विन्यासः स्थानभेदतः। स व्यूह इति विख्यातो युद्धेषु पृथिवीभुजाम्। व्यूहभेदाश्च चत्वारो दण्डोभोगस्तु भण्डलम्। असंहतस्य निर्णीता भीतिसारादिसम्मताः। अन्येऽपि प्रकृतिव्यूहाः क्रौञ्चचक्रादयः क्वचित्। तिर्य्यग्वृत्तिस्तु दण्डः स्याद् भोगोऽनावृत्तिरेव च। मण्डलं सर्वतो वृत्तिः पृथग्वृत्तिरसं-

कृतः" शब्दर० । शुक्रनीतिसारे तद्भेदादिकमुक्तं यथा "नद्यद्रिवनदुर्गेषु यत्र यत्र भयं भवेत् । सेनापतिस्तत्र तत्र गच्छेद् व्यूहप्रभेदकैः । यायाद् व्यूहेन महता मकरेण पुरोभये । श्येनेनोभयपक्षेण सूच्या वा धीरवक्त्रया । पश्चाद्भये तु शकटं पार्श्वयोर्वज्रसंज्ञकम् । सर्वतः सर्वतोभद्रं चक्रं व्यालमथापि वा । यथादेशं कल्पयेद्वा बलसेनाविभेदकम् । व्यूहरचनसङ्केतान् वाद्यभाषासमीरितान् । स्वसैनिकैर्विना कोऽपि न जानीयात् तथाविधान् । नियोजयेच्च मतिमान् व्यूहान् नानाविधान् सदा । अश्वानाञ्च गजानाञ्च पदातीनां पृथक् पृथक् । उच्चैः संभावयेद् व्यूहसङ्केतान् सैनिकान् नृपः । वामदक्षिणसंस्थो वा मध्यस्थो वाऽग्रसंस्थितः । श्रुत्वा तान् सैनिकैः कार्य्यमनुयिष्टं यथा तथा । सम्मीलनं प्रसरणं परिभ्रमणमेव च । आकुञ्चनं तथा यानं प्रयाणमपवानकम् । पर्य्यायेण च साम्मुख्यं सङ्घस्थानञ्च लुण्ठनम् । संस्थानं चाष्टदलवज्रकमण्डलुतल्यकम् । सूचीतल्पं शकटवद्दण्डचन्द्रसमन्तु वा । पृथग्भवनमल्पाल्पैः पर्य्यायैः पङ्क्तिवेशनम् । शस्त्रास्त्रयोर्धारणञ्च सन्धानं लक्ष्यभेदनम् । मोक्षणञ्च तथाऽस्त्राणां शस्त्राणां परिघातनम् । दूरात् सन्धानं पुनः पातो यद्वो मोक्षः पुनः पुनः । खगूहनं प्रतीघातः शस्त्रास्त्रपदविक्रमैः । द्वाभ्यां त्रिभिश्चतुर्भिर्वा पङ्क्तितो गमनं ततः । तथा प्रागभवनं चापसरणं तूपसर्जनम् । अपसृत्यास्त्रसिद्ध्यर्थमुपसृत्य विमोक्षणम् । प्रागभूत्वा मोचयेदस्त्रं व्यूहस्थः सैनिकः सदा । आसीनः स्वादुविसृष्टास्त्रः प्रागत्वा चापसरेत् पुनः । प्रागासीनं तूपसृतो दृष्ट्वा स्वास्त्रं विमोचयेत् । एकैकशो द्विशो वापि सङ्घशो बोधितो यथा । क्रौञ्चानां खे गतिर्यादृक् पङ्क्तितः सम्प्रजायते । तादृक् सञ्चारयेत् क्रौञ्चव्यूहं देशबलं यथा । सूच्याभोऽग्रं मध्यपृष्ठं स्थूलपक्षन्तु पङ्क्तितः । दृढत्रयं मध्यगलपृष्ठं श्येनं सुखे तनु । चतुष्पात्मकरो दीर्घस्थूलवक्त्रद्विरोष्ठकः । लघ्वी सूच्यसमो दीर्घसमदण्डान्तरन्वयुक् । चक्रव्यूहश्चैकमार्गो द्वाष्टधा कृतबीजतः । चतुर्दिक्षष्टपरिधिः सर्वतोभद्रसंज्ञकः । असमार्गश्चाष्टवलयो गोलकः सर्वतोमुखः । शकटः शकटाकारो व्यालो व्यालाकृतिः सदा । सैन्यबलं दृढद्वापि दृढा मार्गं रणव्यसनम् । व्यूहैर्व्यूहेन व्यूहाभ्यां सङ्करैरपि कल्पयेत्" ।

व्यूहपार्ष्णि पु० ६त० । युद्धार्थमवस्थानविशेषेण स्थितसैन्यानां पश्चाद्भागे अमरः ।

व्यृद्धि स्त्री विरुद्धा ऋद्धिः । विरुद्धसम्पत्तौ तत्वार्थे अव्ययीभा० । दुर्यवनम् यवनानां विरुद्धसम्पत्तौ सि० कौ० ।

व्ये सूतौ दृतौ च भ्वा० उभ०सक० अनिट् यजा० अव्यति ते अव्यासीत् अव्यास्त अविव्याय अविव्यतुः । ऋजतः ।

व्यो अव्य० व्ये-डो । १चौदे व्योकारः २वीजे च ।

व्योकार पु० व्यो+क-अण् । चौदकारके अमरः ।

व्योमकेश पु० व्योमेव केशो यस्य । शिवे महादेवे अमरः ।

व्योमकेशिन् पु० व्योमाकार केशोऽस्यस्य इनि । महादेवे

व्योमचारिन् पु० व्योम्नि चरति चर-णिनि । १विद्याधरे २देवे ३ग्रहनक्षत्रादौ च ४आकाशगामिनि त्रि० व्योमचारिपुरं शोभनगरम् ।

व्योमधूम पु० व्योम्नः धूमइव नीलत्वात् । मेघे त्रिका० ।

व्योमन् न० व्ये-मनिन् पृषो० । १आकाशे अमरः । २अभ्रके (आव) राजनि० । ३जले च ४सूर्य्यांशौ मेदि० ।

व्योममण्डल न० व्योम्नि मण्डलमिव । मण्डलाकारे १आकाशे । व्योम्नो मण्डलमिव । २पताकायाम् शब्दच० ।

व्योममुद्गर पु० व्योम्नोमुद्गर इव आघातहेतुत्वात् । गगनात् अकस्माद्दृश्यते वायोर्निर्घाते हारा० । [अमरः ।

व्योमयान न० ७त० । आकाशगमनयोग्ये वाहने विमाने

व्योष न० वि+उष-अच् । शुण्ठीमरीचपिप्पलीरूपे त्रिकटुनि अमरः ।

व्रज गतौ भ्वा०पर०सक०सेट् । व्रजति अव्राजीत् । [जत् ।

व्रज संस्कारे गतौ च चु०उ०सक०सेट् । व्राजयति ते अविव्रजत्

व्रज पु० व्रज-अर्त्ति क । १समूहे अमरः । २गोष्ठे ३पथि मेदि० मथुरासमीपस्थे देशभेदे च

मात्स्ये "व्रजमण्डलभूगोलं शोभनागफणाम्बरम् । कुमुदाख्यं महाश्रेष्ठं सर्वेषां मध्यसंस्थितम् । तस्योपरिस्थितं लोकं सर्वस्यान्यं महाफलम् । कृष्णलीलाविहारार्थमुत्तमस्थानविराजितम् । चतुरष्टकदशकोशेन परिपूर्णविराजितम् । यस्य प्रदक्षिणां कुर्वन् धनधान्यसुखं लभेत् । दानाज्जपात्तपसो लोको विष्णुलोकमवाप्नुयात् । आवसन् म्रियते चेत्तु पुनर्जन्म न विद्यते । पुण्यं लक्षगुणं लब्ध्वा क्षेत्रेऽस्मिन् व्रजमण्डले । कृष्णेन निर्मितासीधाः सार्द्धद्वयसहस्रकाः" । तत्रादौ वनोपवनप्रतिवनाधिवनान्यष्टचत्वारिंशत् तानि चतुरष्टकोशपरिमाणस्थितानि चतुर्भागशोऽभ्यन्तरस्थितानि क्रमश आह ।

पाद्मे "वनानि द्वादशान्याहुर्यमुनोत्तरदक्षिणे। महावनं१ महाश्रेष्ठं वरं काम्यवनं२ शुभम्। कोकिलाख्यं तृतीयञ्च३ तुर्यं तालवनं४ तथा। पञ्चमं कुमुदाख्यञ्च५ षष्ठं भाण्डीरसंज्ञकम्६। नाम्ना लोहवनं७ श्रेष्ठं सप्तमं परिकीर्त्तितम्। अष्टमं खदिरं प्रोक्तं नवमं कोष्ठजं वनम्९। नाम्ना भद्रवनं१० श्रेष्ठं दशमं बहुपुण्यदम्। एकादशं समाख्यातं बहुलावनसंज्ञकम्११। नाम्ना बिल्ववनं१२ श्रेष्ठं द्वादशं कामनाप्रदम्। इति द्वादशसंज्ञानि वनानि शुभदानि च"। द्वादशोपवनान्याह वाराहे "आदौ ब्रह्मवनं१ नाम द्वितीयं खपुष्पं रोवनम्२। तृतीयं बिल्वलं३ नाम कदम्बाख्यं४ चतुर्थकम्। नाम्ना स्वर्णवनं५ श्रेष्ठं पञ्चमं परिकीर्त्तितम्। सुरभीवननामाख्यं षष्ठमाह्लादवर्द्धनम्। श्रेष्ठं प्रेमवनं७ नाम सप्तमं शुभदं नृणाम्। मयूरवनं नामाष्टमं परिकीर्त्तितम्। मानेङ्गितवनं९ श्रेष्ठं नवमं मानवर्द्धनम्। शेषशायिवनं१० श्रेष्ठं दशमं पापनाशनम्। एकादशं समाख्यातं नारदाख्यं११ शुभोदितम्। द्वादशं परमानन्दवनं१२ सर्वार्थदायकम्। इति द्वादशसंज्ञानि वनान्युपवनानि च"। द्वादशप्रतिवनानि भविष्ये "आदौ रङ्गवनं१ श्रेष्ठं पुरसंज्ञाविराजितम्। वार्त्तावनं२ द्वितीयञ्च३ करहाटं३ तृतीयकम्। चतुर्थं काम्यनामापि४ वनं कामप्रदं नृणाम्। वनमञ्जननामापि५ पञ्चमं स्त्रीशुभप्रदम्। नाम्ना कर्णवनं६ श्रेष्ठं षष्ठं सप्तवरप्रदम्। कृष्णाच्छिपलकं७ नाम वनं सप्तसभीरितम्। नन्दप्रेक्षणकृष्णाख्यं वनं नन्दनदर्शनम्। वनमिन्द्रवनं९ नाम नवमं कृष्णपूजितम्। शिक्षावनं१० शुभं प्रोक्तं दशमं नन्दभाषितम्। चन्द्रावलीवनं११ श्रेष्ठमेकादशसुदाहृतम्। नाम्ना लोहवनं१२ श्रेष्ठं द्वादशं शुभदं नृणाम्। इति प्रतिवनान्याह्नमांगे वामे च दक्षिणे। इति द्वादशसंज्ञानि देवावासफलप्रदाः"। द्वादशाधिवनान्याह विष्णुपु० "मधुरा१ प्रथमं नाम राधाकुण्डं२ द्वितीयकम्। नन्दग्रामस्तृतीयस्तु गोकुलस्थानं४ चतुर्थकम्। पञ्चमं बलितापाख्यं५ सुप्रभाभुपुरं६ तथा। षष्ठं। सप्तमं गोकुलं स्थानं७ मष्टमं बलदेवकम्८। गोवर्द्धनवनं९ श्रेष्ठं नवमं कामनाप्रदम्। वनं जावघटं१० नाम दशमं परिकीर्त्तितम्। सख्यं वृन्दावनं११ श्रेष्ठमेकादशं प्रकीर्त्तितम्। बकुलावटकं१२ स्थानं वनं द्वादशं कीर्त्तितम्। इति द्वादशसंज्ञानि वनान्यधिवनानि च। वनानामधिपाः प्रोक्ता व्रजमण्डलमध्यगाः। एषां नैव विलोकेन वनयात्रा च निष्फला। एषान्तु दर्शनेनैव वनयात्रा शुभप्रदा। आदौ लीलां यदा प्रश्नेद्वनयात्रां ततश्चरेत्। सर्वान् कामानवाप्नोति विष्णुलोकमवाप्नुयात्। सर्वत्र विजयी भूयाद्वनयात्राप्रभावतः"।

व्रजनाथ पु० ६त०। श्रीकृष्णे व्रजपालादयोऽप्यत्र। [श्रीकृष्णे

व्रजमोहन पु० व्रजान् व्रजस्थान् मोहयति मुह-णिच्-ल्यु।

व्रजवर पु० व्रजानां तत्स्थानां वरः प्रार्थनीयः। श्रीकृष्णे।

व्रजवल्लभ पु० ६त०। श्रीकृष्णे।

व्रजाङ्गना स्त्री ६त०। व्रजस्थ स्त्रियां गोप्याम्।

व्रज्या स्त्री व्रज-क्यप्। १पर्य्यटने २गमने ३जिगीषोर्युद्धार्थं प्रयाणे च अमरः।

व्रण शब्दे भ्वा०पर०अक०सेट्। व्रणति अव्राणीत् अव्रणीत्।

व्रण अङ्गक्षतौ अदन्तु०उ०सक०सेट्। व्रणयति ते अवव्रणत् त

व्रण पु०न० तु० व्रण-अच्। क्षते अमरः। तत्स्वरूपनिदानादि भावप्र० उक्तं यथा "व्रणो द्विधा परिज्ञेयो दोषजागन्तुभेदतः। दोषजो दुष्टदोषैः स्यादन्यः शस्त्रादिसम्भवः"। तत्र वातिकस्य लक्षणमाह "स्रव्यः कठिनसंस्पर्शो मन्दस्रावो महारुजः। तदुतः स्फुटितस्रावो व्रणो मारुतसम्भवः"। स्रव्यः अचलः। पैत्तिकमाह "दृष्ट्यामोहज्वरक्लेददाहदुःखवदारणैः। व्रणं पित्तकृतं विद्यात् सावैर्मन्देन पूतिकैः"। क्लेदः आर्द्रता। दुःखं व्यथारूपम्। अवदारणं व्रणे विदारणवत् पीडा। श्लैष्मिकमाह "बहुपिच्छो गुरुः स्निग्धश्चिमितो मन्दवेदनः। पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः"। बहुपिच्छः बहुपिच्छिलः। अल्पसंक्लेदः स्वल्पार्द्रः। रौधिरं द्वन्द्वजं सान्निपातिकमाह "रक्तो रक्तप्रतीरक्ताद्विलिजः स्यात् तदन्वयः"। तदन्वयः द्विलिङ्गविलिङ्गसम्बन्धः। शुद्धव्रणलिङ्गमाह "स्निग्धातताभोऽतिमृदुः स्वच्छः स्निग्धोऽल्पवेदनः। सुव्यक्तो निरुपायः शुद्धव्रण इति स्मृतः। स्निग्धातताभः तत्सदृशोऽत्र स्वरूपार्थः तेन स्निग्धावदृतः। सुव्यक्तः सञ्जातरक्षितः। दुष्टव्रणलिङ्गमाह "पूतिपूयादिदुष्टाक्तक्लाव्यूषसङ्की चिरस्थितिः। दुष्टव्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्ययः"। उष्मसङ्की कोटरवान्। अतिगन्धादिः आदिशब्देन स्रावक्लेदाविवर्णतोदयः संग्रहाल्ये। सरोहिव्रणस्य लिङ्गमाह "कपोतवर्णप्रतिभा यस्यां ताक्लेदवर्जिता:। स्थिराश्च पिडकाश्च

वन्तो रोहन्तीति तमादिशेत्"। कपोतवर्णप्रतिमः पाण्डुधूसरः। स्थिराः विदीर्णतारहिताः। पिडकावन्तः संरोहणार्थां ये मांसाङ्कुरास्तदयुक्ताः। संरूढलिङ्गमाह "रूढवर्त्मानमग्र्यिमसमूलसमरुजं व्रणम्। त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्दिशेत्"। रूढवर्त्मानं संरूढस्रावमार्गम्। समतलं अनिम्नम्। सुखसाध्यत्वादिकमाह "त्वङ्मांसजः सुखे देशे तरुण-स्यानुपद्रवः। धीमतोऽभिनवः काले सुखे साध्यः सुखव्रणः"। सुखे देशे मर्मरहिते। अनुपद्रवः ज्वरतृष्णा-श्वासकासारोचकादिरहितः। धीमतः पथ्यसेविनः। सुखे काले हेमन्ते शिशिरे च। "गुणैरन्यतरैरेभिर्हीनः लक्ष्यो व्रणः स्मृतः। सर्वैर्विहीनो विद्येयस्त्वसाध्यो निरुपक्रमः"। एभिस्त्वङ्मांसजत्वादिभिः। निरुपक्रमः अनुपक्रान्तः चिरमेधित इति यावत्। "वसामेदोऽस्थिमज्जानं मस्तुलिङ्गञ्च यः स्रवेत्। आगन्तुजो व्रणः सिध्येन्न सिध्येद्दोषसम्भवः"। मस्तुलिङ्गं मस्तुक्राभ्यन्तरस्नेहः "कृमिनां विषजुष्टानां गौरिणां मधुमेहिनाम्। व्रणाः कृच्छ्रेण सिध्यन्ति येषां चापि व्रजे व्रणः"। अरिष्टमाह "दह्यन्ते चान्तरत्यर्थं बहिःशीताश्च ये व्रणाः। दह्यन्ते बहिरत्यर्थं भवन्त्यन्तश्च शीतलाः। प्राणमांसक्षयश्वासकासारोचकपीडिताः। प्रद्रवत्पूयरुधिरा व्रणा ये चापि मर्मसु। क्रियाभिः सम्यगारब्धा न सिध्यन्ति च ये व्रणाः। चिकित्सेत्तैव तान् वैद्यः संरक्षन्नात्मनो यशः। मद्यगुर्वन्नसुमनः पद्मचन्दनचम्पकैः। सगन्धा दिव्यगन्धाश्च सुभूर्णां व्रणाः स्मृताः"। मर्मसु पायुनाभिहृदयादिषु। सुमना जातिः। दिव्यगन्धाः पारिजातादिगन्धाः। अथागन्तुव्रणस्य निदानमाह "नानाधारास्त्रखैः शस्त्रैर्नानास्थान निपातितैः। भवन्ति नानाकृतयो व्रणास्तांस्त्रिबोध मे"। नाना धारा स्त्राणि येषां तैः शस्त्रैः खड्गचन्द्र खड्गभल्लकुन्तशूलशरादिभिः। नानाकृतयः षड्विधाकृतयः। ता आकृतीराह "छिन्नं भिन्नं तथा विद्धं क्षतं विस्रुतमेव च। दष्टमाहतमथ तेषां वक्ष्यामि लक्षणम्"। तत्र छिन्नस्य लक्षणमाह "तिर्यक्छिन्नं ऋजुर्वापि यो व्रणस्त्वायतो भवेत्। यातस्य पातनं तद्धि छिन्नमित्यभिधीयते"। यो व्रणः तिर्यक्छिन्नः खड्गादिकृततिर्यक्छेदयुतः। ऋजुर्वापि अथवा खड्गादिकृतदीर्घो व्रणः आयतः दीर्घः। आयत इति तिर्यक्छिन्नस्य ऋजोश्च विशेषणम्। गात्रस्य पातनं गात्रस्यैकदेशस्य छेदेन पृथक्करणं वा छिन्नमित्यभिधीयते। भिन्नमाह "शक्तिकुन्तेषुखड्गाग्रविषाणैराशयो हृतः। यत् किञ्चित् प्रस्रवेत्तद्धि भिन्नमित्यभिधीयते"। आशयः कोष्ठः। कोष्ठभेदस्य लक्षणमाह "स्थानान्यग्निपक्वानां मूत्रस्य रुधिरस्य च। हृदुबस्तिकः फुफ्फुसस्य कोष्ठ इत्यभिधीयते। तस्मिन् भिन्ने रक्तपूर्णे ज्वरोदाहस्य जायते। मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति। मूर्च्छा श्वासस्तृषाध्मानमभक्तच्छन्द एव च। विण्मूत्रवातसङ्गश्च स्वेदश्चाधोऽधिरक्तता। लोहगन्धित्वमास्यस्य गात्रदौर्गन्ध्यमेव च। हृदि शूलं पार्श्वयोश्च विशेषेणाभिधीयते"। तस्मिन् कोष्ठे। भिन्ने शक्त्यादिभिः। रक्तपूर्णे कोष्ठे तस्मादङ्गाद्भिन्नात् छिन्नेन रक्तेन पूर्णे वा ज्वरादयो जायन्ते। आमाशये पक्वाशये च रक्तपूर्णे लक्षणभेदमाह "आमाशयस्थे रुधिरे रुधिरं छर्दयत्यपि। आध्मानमतिमात्रञ्च मूलञ्च भृशदारुणम्। पक्वाशयगते रक्ते रुजा गौरवमेव च। अधःकाये विशेषेण शीतता च भवेद्दिह"। रुजा-शूलम्। गौरवं पक्वाशये। अधःकाये नाभेरधोदेशे विशेषेण गौरवमित्यन्वयः। शीतता च भवेद्दिह इह नाभेरधोदेशे शीतता च स्यात् सा च व्याधिस्वभावात्। विद्धमाह "शल्यास्थ्यभिहतं यद् गत्वाशयं विना। उद्धृतं निर्गतं वा तद्विद्धमिति निर्दिशेत्"। आशयं विना कोष्ठं विना। उद्धृतं अनिर्गतशल्यम्। निर्गतं वा निर्गतशल्यं वा। सशल्यस्य व्रणस्य लक्षणमाह। "श्यावं सशोथं पिडकायुतञ्च सदुर्गन्धशोणितवाहनञ्च। बुद्बुदवत्तल्यमांसं व्रणं सशल्यं सरुजं वदन्ति"। सदुर्गन्धशोणितवाहनं यदा यदा शल्यं चलितं तदा तदा रुधिरं वहति। उद्धृतं उद्धितसशल्यम्। कोष्ठस्थितस्य शल्यस्य लक्षणमाह "त्वचोऽन्तीत्य शिरादीनि भित्त्वाङ्गं परिछद्य वा। कोष्ठे प्रतिष्ठितं शल्यं कुर्याद्दुष्टानुपद्रवान्"। त्वचः सम्प्राप्य अतिक्रम्य उष्टानुपद्रवान् आटोपाहौ व्रणसञ्चेनात्पुरीषदर्शनञ्च। असाध्यस्य कोष्ठस्थरक्तस्य पुरीषस्य लक्षणमाह "कोष्ठान्तर्लोहितं पाण्डु शीतपादकराननम्। शीतोच्छ्वासं रक्तनेत्रमसाध्यञ्च विवर्जयेत्"। असाध्यं असाध्यलक्षणम्। व्रतमाह "नातिच्छिन्नं नातिभिन्नमसंलक्ष्यान्वितम्। विषमं व्रणसङ्के व्रतव्रतं पण्डितो-

त्तितम्"। नातिच्छिन्नं नातिदीर्घघातम्। नातिभिन्नं नातिगम्भीरघातम्। उभयोश्छिन्नभिन्नयोः विषमं व्रणमङ्गे यत् यद्व्रणमङ्गवैषम्यकरम्। पिच्छितमाह "प्रहारपीड़नाभ्यान्तु यदङ्गं पृथुतां गतम्। मांसं तत् पिच्छितं विद्याद्रक्तमज्जपरिप्लुतम्"। प्रहारो मुद्गरादिना। पीड़नं कपाटादिना। पृथुतां चिपिटताम्। दृष्टमाह "घर्षणादपि घाताद्वा यदङ्गं विगतत्वचम्। ऊष्मस्रावान्वितं तत् तु दृष्टमित्यभिधीयते। घर्षणात् कर्कशेष्टिकापाषाणादिभिः। मांसशिरास्नायुसन्ध्यस्थिमर्मसु क्षतेषु सामान्यलक्षणमाह "भ्रमः प्रलापः पतनं प्रमोहो विचेष्टनं ग्लानिरथोष्णता च। स्रस्राङ्गता मूर्च्छनमूर्द्ध्ववातस्तीव्रा रुजो वातकृताश्च तास्ताः। मांसोद्भवं रुधिरञ्च गच्छेत् सर्वेन्द्रियार्थोपरमस्तथैव। दशार्द्धसंख्येष्वथ विक्षतेषु सामान्यतो मर्मसु लिङ्गमुक्तम्"। पतनं भूमौ। विचेष्टनं विरुद्धं चेष्टनं हस्तपादादिप्रक्षेपणादिकम्। मूर्च्छनं इन्द्रियमोहः। प्रमोहो मनोमात्रमोहः। तीव्रा रुजो वातकृताश्च ताः ताः दण्डापतानकादयः। रुधिरञ्च गच्छेत् मेहनभगगुदास्रघाणेभ्यः स्रवेत्। सर्वेन्द्रियार्थोपरमः इन्द्रियाणां कार्य्यनाशः। अथ मर्मसिरास्नायुसन्ध्यस्थां विक्षतानां पृथगलक्षणमाह "सुरेन्द्रगोपप्रतिमं प्रभूतं रक्तं स्रवेत्तत्क्षयजश्च वायुः। करोति रोगान् विविधान् यथोक्तान् सिरासु विद्धासु अथ वा क्षतासु"। सुरेन्द्रगोपो वार्षिकोत्पत्तिकीटविशेषः। (वीरबहूटी) इति लोके प्रसिद्धः। प्रभूतं बहु। रोगान् शिरोभितापान्यतोवक्त्रादीन्। विद्धासु शरादिना। क्षतान् खड्गादिना। "कौब्जं शरीरावयवावसादः क्रियाक्षमशक्तिसुप्तता रुजा च। शिराद्रवो दोषकृति यस्य चापि तं स्नायुविद्धं पुरुषं वदन्ति। कौब्जं विद्धस्याङ्गस्य वक्रता। तत्सुप्ता सक्थती"। "शोथातिरुग्विस्रुतिरक्तजश्च वर्णक्षयः सर्वत्र एव शोथः। क्षतेषु सन्धिक्षतजाबलेषु स्यात् सन्धिकर्मोपरमश्च लिङ्गम्। सर्वत्र एव शोथः सर्वसन्धीन् व्याप्य शोथः। उपरमः नाशः। "घोररुजो यस्य निशादिनेषु सर्वौषधस्यापि न चैति शान्तिम्। शिरन्विपस्निह्यदितार्थक्षत्वक्षस्थिविद्धं पुरुषं वदन्ति"। सर्वौषधस्यापि शयनासनादिकापि। विदितार्थक्षतः ज्ञातशल्यतन्त्रः। अथ मर्मसिरादिविद्धलिङ्गानि पृथगभिधाय मर्मसिरादीनां विद्धानां पृथक्लिङ्गान्यतिदेशेनाह "यथास्वमेतानि विभाषयेच्च लिङ्गानि मर्मस्वपि ताडितेषु"। यथास्वं शिरादीनां विद्धानाम् एतानि लिङ्गानि पृथगुक्तानि लिङ्गानि चकारात् भ्रमप्रलापादीनि च। मर्मस्विव शिरादिषु ताडितेषु विद्धेषु विभाषयेत् जानीयात्। सर्वत्र व्यापित्वपदवाच्यमाह "विसर्पः पक्षघातश्च शिरास्तम्भोऽपतानकः। मोहोन्मादौ व्रणे पीड़ा ज्वरश्चोष्णाहृतुग्रहः। कासश्छर्दिरतीसारो हिक्का श्वासः सवेपथुः। शोफश्चोपद्रवाः प्रोक्ता व्रणानां व्रणचिन्तकैः"। अथाग्निदग्धस्य निदानमाह "तत्राग्निर्द्विविधो स्नेहः स्नेहकृत्रभेदतः। स्नेहस्तत्र तु तैलादि रूक्षं लोहादि रुच्यते"। अग्निदग्धं चतुर्विधमाह "अग्निदग्धं चतुर्धा स्यात् लघु दुर्दग्धमेव च। सम्यग्दग्धं तथातीव्रदग्धञ्च परिकीर्त्तितम्"। तेषां लक्षणमाह "यद्विवर्णमतिलघु तल्लघुमभिधीयते। तीव्रदाहो व्यधावन्तो यत्र स्फोटा भवन्ति हि। चिरेण ते प्रशाम्यन्ति तदुदुर्दग्धमुदाहृतम्। ताम्रवर्णमगम्भीरं दाहपीडासमन्वितम्। सुसंस्थितञ्च कथितं सम्यग्दग्धं भिषग्वरैः। त्वङ्मांसं यत्र दग्धं स्यादिस्रावो बहुस्तथा। शिरास्नाय्वस्थिसन्धीनां तं वदन्त्यतिदग्धकम्। अत्यर्थं वेदनादाहो ज्वरस्तृण्मूर्च्छया सह। स्यात् व्रणस्तु चिराद् रोहेत् रूढ़ो याति विवर्णताम्"। दुष्टव्रणनाड़ी व्रणशब्दयोस्तुल्यौ दृश्यौ। व्रणशब्दनिरुक्तिः सुश्रुते उक्ता यथा "वृणोति यस्माद्दोषोऽपि व्रणवांस्तु न नश्यति। आदेहधारणात्तस्मात् व्रण इत्युच्यते बुधैः"। सुश्रुतोक्ता विशेषाः द्विव्रणशब्दे वृणात्रावशब्दे च दृश्याः।

व्रणकृत् पु० व्रणं करोति कृ-क्विप्। १भल्लातके रत्नमा०। २व्रणकारके त्रि०। [२व्रणघातके त्रि०।

व्रणद्विष् पु० व्रणं द्वेष्टि द्विष-क्विप्। १मालूरवृक्षिकायाम्

व्रणशोथ पु० ६त०। व्रणस्य स्फीतसाकारके रोगभेदे तल्लक्षणादि भावप्र० उक्तं यथा

"पृथक् समस्तदोषोत्था रक्तजागन्तुजौ तथा। व्रणशोथाः प्रदृश्यन्ते सप्तमे सप्त संयुक्ताः शोथलक्षणैः" शोथलक्षणैः पूर्वोक्तैः। विशिष्टं रूपमाह "विषमं पच्यते वातात् पित्तोत्थस्त्वचिरञ्चिरम्। कफजः पित्तवच्छोथो रक्तागन्तुसमुद्भवौ"। अपक्वस्य व्रणशोथस्य लक्षणमाह "मन्दोष्मताऽल्पशोथत्वं काठिन्यं त्वक्सवर्णता। मन्दवेदनया चाऽपि शोथस्यामस्य लक्षणम्"। तस्य पक्वस्यानस्य लक्षणमाह "ई

छते दहनेनैव क्षारेणेव प्रमथ्यते। पिपीलिकागणेनेव दश्यते क्षिद्यते तथा। भिद्यते चैव शस्त्रेण दात्रेनेव च तार्ज्यते। पीड्यते पाणिनेवान्तःस्रुचीभिरिव स्रुच्यते। ऊष्मणो विवर्णैः खादकुल्येवावपीड्यते। आस्रवे भवने स्थाने शोणितं वृश्चिकविद्धवत्। न गच्छेद्वातितः शोथो भवेदाध्मानवच्चिरात्। ज्वरकृष्णाऽरुचिश्चैतत् पच्यमानस्य लक्षणम्। क्षिद्यते द्विधा क्रियत इव। भिद्यते विदार्य्यत इव। ऊष्मोदाहरणः। शोथः पार्श्वाग्निनेव सन्तापः तास्यां युक्तः आततः त्वक्पक्षोपरुद्धितः वर्त्मभूतोपायवर्त्मपुटो वा। पक्वस्य लक्षणमाह "वेदनोपशमः शोथो लोहितोऽल्पो न चोन्नतः। प्रादुर्भावो बलीनाञ्च तोदः कण्डूर्रुजर्दुजः। उपदूषणां प्रथमो निम्नता स्फुटनस्य च। वसाविवास्रुत्सञ्चारः स्राव्यो-ष्ठेऽङ्गुलिपीड्यते। पूयश्च पीड्यमाने च पीड्यते। बुभुक्षा वृक्षशोषश्च भवेत् पक्वस्य लक्षणम्"। वेदनोपशमः दाहादिदुःखोपशमः। अल्पलोहित इत्यनेन। न चोन्नतः पच्यमानापेक्षया। उपदूषणां ज्वरादीनाम्। निम्नता स्वरूपतोऽङ्गुलिपीड़नाद्वा अवनतत्वम्। स्फुटनम् किञ्चिद्विदारत्वम्। वसाविवेत्यादि शोथेऽङ्गुलीपीड़िते यति अङ्गुलिपीड़ितदेशादन्यदेशे अम्बुसञ्चारः किञ्चित्। वस्तौ चर्मपुटके। एवम् अन्यैकदेशे पीड़िते एक मन्तमपरमन्तमापूर्वं पीड़यति। एकदोषारब्धेऽपि शोथे पाककाले सर्वदोषसम्बन्धमाह "कफेऽस्निग्धाम्लौष्ण विना न पित्तं पाकः कफञ्चापि विना न पूयः। तस्मात् सर्वे परिपाककाले पच्यन्ति शोथास्त्रिभिरेव दोषैः"। पच्यन्ति पाकं प्राप्नुवन्ति। एवशब्दोऽवधार्यः अध्यवसानमनेकार्थत्वात्। पाके अवसानान्तरमाह "आशयान्तरे नाभ्युदितन्तु पित्तं ज्ञात्वा वमेद्वातकफौ प्रवृद्धौ। पच्यतेऽतः शोणितमेव पाको मतः परेषां विदुषां हितीयः"। वमेत् ज्ञात्वा क्षीणोऽत्र शोणितं कर्म पूर्वत्र कफात् पूयोऽत्र शोणितात् पूय इति भेदः। गम्भीरपाके शोथे पाकप्रागवस्थान्तरमाह सुश्रुतः "कफजेषु च शोथेषु गम्भीरं पाकमेवच। पक्वलिङ्गं ततः स्पष्टं ततः स्रावोऽवगीयते। त्वक्साववर्ण्यं रुजोऽल्पत्वं घनवर्णत्वमेव च"। कफजेषु च शोथेषु गम्भीरमेवच पाकमेति तत्र कथं पाकप्रागवस्थामाह तत्र ततः पाकात् पक्वलिङ्गं स्पष्टम्। यतः पच्यमानावस्थान्तर्गतदाहादिव्यपगमानन्तरं शोथ शीतादयो भवन्ति। घनवर्णत्वं स्पर्शे व्यापकत्वम्। अनिर्हृतस्य पूयस्य दोषमाह "कण्डूं समाचयं दधेव वह्निर्वातेरितः सन्दहति प्रसह्य। तथैव पूयोऽन्तरिनं सृतमांसं सिराः स्नायुमपीह खादेत्"। कण्डूं तृष्णवत्। शोथस्यामपक्वलक्षणपक्वानाशने भिषजां दुष्टदोषत्वाह "आमं विदह्यमानन्तु सम्यक्पक्वन्तु यो भिषक्। जानीयात् स भवेद्वैद्यः शेषास्तस्करवृत्तयः"। विदह्यमानं विपच्यमानम्। तस्करवृत्तयः तेषां तस्कराणामिव द्रव्यलाभमात्रप्रयोजनं भवति। न तु धर्मयशोमैत्रीलाभः "यन्त्रणशस्त्रक्षाराग्निकर्मसाधनानाद्दुष्टस्य पक्वस्येच्छते। स्वपक्षाविव विद्वेषौ तावनिच्छित्यकारिणौ"।

व्रणास्राव पु० ६त०। सुश्रुतोक्ते व्रणस्य पूयादिस्रवणे। वह्निस्थाने च तत्रोक्तं यथा

"अथातो व्रणास्रावविज्ञानीयमध्यायं व्याख्यास्यामः। "त्वङ्मांसशिरास्नायुस्थिसन्धिकोष्ठमर्म्मणीत्यष्टौ व्रणस्थानानि। अत्र सर्वव्रणसन्निवेशः। तत्रादौकवास्तुसन्धिबन्धो त्वग्भेदी व्रणः सूक्ष्मचरः श्लेष्मा स्वयमवदीर्य्यमाणो दुरुपचारः। तस्मात्तत्परस्तो दृष्टस्त्विपुटक इति व्रणातिक्रमाद्यः। श्लेष्मास्तु विलम्बितत्वो दुरुपक्रमा भवन्ति। सर्व एव व्रणाः क्षिप्रं संरोहन्त्यात्मवतां सुभिषग्भिरोपक्रान्ताः। अनात्मवन्तश्चोपक्रान्ताः प्रदुष्टत्वाद्दोषाणाम्। तत्रातिसंहृतोऽतिविवृतोऽतिकठिनोऽतिमृदुरतृप्तोऽतिस्रुतोऽतिशीतोऽल्पगुणः लक्षणरक्तपीतशुक्लादीनां वर्णानामन्यतमवर्णो भैरवः पूतिपूयमांसशिरास्नायुप्रभूतिपूर्णः पूतिपूयस्राव्युग्र्युपसृष्टक्रमनोपद्रवदर्शनगन्धोऽत्यर्थं वेदनावान् दाहपाकरागकण्डूशोथपिडकोपदुतोऽत्यर्थं दुष्टशोणितास्रावी दीर्घकालानुबन्धी चेति दुष्टव्रणविकल्पानि। तस्य दोषोद्रेकमदृष्टं विभज्य यथास्वं प्रतीकारे प्रयतेत। अत ऊर्द्धं सर्वास्रावान् वक्ष्यामः। तत्र दृष्टास्तु जिह्वाक्ष्णा वा स्वयं क्लोठेषु भिन्नेषु विदारितेषु वा सञ्जिघ्रमक्षाणो भवत्याक्षावः किञ्चिद्विघ्रः पीतावभासश्च। आंसगतः पर्विप्रकाशः श्वान्द्रः श्वेतः पिच्छिलश्च। शिरागतः शुद्धस्निग्धस्तु शिरास्तु रक्तातिप्रवृत्तिः पक्वासु च नीलनाडीभिरिव तोयागमनं पूर्वस्रावस्वभावात् तनुर्विच्छिन्नः पिच्छिलोऽम्लश्च श्लेष्मोऽवश्यावप्रतिमश्च। स्नायुगतः स्निग्धो घनः सिंघाणकप्रतिमः सरक्तश्च। अस्थिगतोऽस्थ्न्यभिहते स्फुटिते भिन्ने दोषावदारिते वा दोष-

च्छितत्वादस्थिनिःसारं शुक्तिधौतमिवाभाति। आशावस्थात् मज्जमिश्रः सरुधिरः स्निग्धश्च। सन्धिगतस्तु पीड्यमानो न प्रवर्त्तते आकुञ्चनप्रसारणोन्नमनविनमनप्रधावनोत्कासनप्रवाहणैश्च स्रवति। आशावस्थात् पिच्छिलोऽवलम्बी सफेनपूयरुधिरोन्मिश्रितश्च। कोष्ठगतोऽन्त्रकृष्णपुरीषपूयोदकानि स्रवति। मर्ममस्त्वगादिष्ववरुद्धत्वान्नाच्यते। तत्र त्वगादिगतानामाशावस्थां यथाक्रमं पारुष्यश्यावस्रावयदधिमस्तुक्षारोदकमांसधावनपुलाकोदकसन्निभत्वानि मारुताद्भवन्ति। पित्ताद्भोमेदोमूत्रभस्मगुडूकषायोदकमाध्वीकतैलसन्निभत्वानि। पित्तवद्रक्तादतिविस्रत्वञ्च। कफाच्चवनीतकासीसमज्जपिष्टतिलनारिकेलोदकवराहवसासन्निभत्वानि। सन्निपाताच्छिलनारिकेलोदकेक्षुरकरसकाञ्जिकवसादारुकोदकप्रियङ्गुफलयकृन्मुद्गयूषसवर्णत्वानीति। "श्लोकौ चात्र भवतः। पक्वाशयादसाध्यस्तु पुलाकोदकसन्निभः। क्षारोदकनिभः स्रावो वक्त्रौ रक्ताशयात्स्रवन्। आमाशयात्कलायाम्भोनिभश्च त्रिकसन्निजः। स्रावानेतान् परीक्ष्यादौ ततः कर्माचरेद्भिषक्"। अत ऊर्द्धं सर्वव्रणवेदना वक्ष्यामः। तोदनभेदनताडनच्छेदनायमनमन्थनविश्लेषणभञ्जनस्फोटनविदारणोत्पाटनकम्पनविविधसूचिविश्लेषणविकिरणपूरणस्तम्भनस्रावकुञ्चनाकुञ्चिकाः सम्भवन्ति। अनिमित्तविविधवेदनाप्रादुर्भावो वा सङ्क्षोभयैतानगच्छन्ति वेदनाविशेषास्तं वातिकमिति विद्यात्। ज्वरधूमायनानि यत्र गात्रमङ्गारावकीर्णमिव पच्यते यत्र चोष्माभिवृद्धिः क्षते क्षारावसिच्यत इव वेदनाविशेषास्तं पैत्तिकमिति विद्यात्। पित्तवदुक्तसंसृष्टं जानीयात्। कण्डूर्गुरुत्वं शुक्लस्रावदर्शनं श्लेष्मवेदनत्वं तन्द्राः शैत्यञ्च यत्र तं श्लैष्मिकमिति विद्यात्। यत्र सर्वेषां वेदनानां सङ्कल्पित्वं सान्निपातिकमिति। अत ऊर्द्धं व्रणवर्णान् वक्ष्यामः। भस्मकपोतास्थिवर्णः परुषोऽरुणः कृष्ण इति मारुतजव्रणाः। नीलः पीतो हरितः शबलः कृष्णो रक्तः कपिल इति रक्तपित्तसंसृष्टत्वयोः। श्वेतः स्निग्धः पाण्डुरिति श्लैष्मिकस्य। सर्ववर्णोपेतः सान्निपातिकस्य इति। भवति चात्र "न केवलं व्रणेष्वेव वेदनावर्णसंग्रहः। सर्वरोगविकारेषु व्रणवल्लक्षयेद्भिषक्"।

व्रणाह पुं० व्रणं हन्ति हन-ड। १एरण्डवृक्षे २गुडूच्यां स्त्री शब्दच०।

व्रणाग्र पुं० व्रणमग्रमिति अच्-अण्। १बोले गन्धरसे २व्रणकण्डूयने च राजनि०।

व्रत न० व्रज-घ जस्य तः। १भक्षणभेदे २यागादिरूपसाधने ३उपवासादिनियमभेदे च

व्रतञ्च सम्यक्सङ्कल्पजनितानुष्ठेयक्रियाविशेषरूपं तच्च प्रवृत्तिनिवृत्त्युभयरूपं तत्र द्रव्यविशेषभोजनपूजादिकं प्रवृत्तिरूपम् उपवासादिकञ्च निवृत्तिरूपं तच्च नित्यं नैमित्तिकं काम्यञ्च। नित्यमेकादश्यादिव्रतम् नैमित्तिकं चान्द्रायणादिव्रतं काम्यं तत्तत्तिथ्युपवासादिरूपं "सम्यक् ससाधनं कर्म कर्त्तव्यमधिकारिणा। निष्कामेण महावीर! काम्यं कामान्वितेन च" भविष्यपु० सम्यक् प्रथमकल्पादिना संसाधनं यथाविहितं साधनं यस्य। अधिकारिणा अर्थिना समर्थेन विदुषा चेत्यर्थः। तत्र व्रतारम्भकालः हेमाद्रौ दर्शितो यथा

अथ व्रतारम्भकालः। तत्र सत्यव्रतः "उदयस्था तिथिर्यां हि न भवेद्विनमध्यभाक्। सा खण्डा न व्रतानां स्यादारम्भे च समापने" इति। एतद्व्रतिरिक्तायां मध्यखण्डायां प्रारम्भमाह हृद्व्रतशिष्टः "अखण्डव्याप्तिमार्त्तण्डा यदखण्डा भवेत्तिथिः। व्रतप्रारम्भणस्तस्यामनष्टगुरुशुक्रयुगिति"। तिथिर्यदनष्टगुरुशुक्रयुक्तं अनस्तमितगुरुशुक्रयुक्ता तस्यां व्रतप्रारम्भणीयमित्यर्थः, इदमुपलक्षणम्। गुरुशुक्रयोर्बाल्ये वार्द्धक्येऽपि व्रतप्रारम्भणीयमित्यर्थः। तथा च हृद्व्रतशिष्टौ "अन्त्याधानं प्रतिष्ठाञ्च यज्ञदानव्रतानि च। वेदव्रतव्रतोत्सर्गचूडाकरणमेखलाः। सामुल्यमभिषेकञ्च मलमासे विवर्जयेत्। बाले वा यदि वा वृद्धे शुक्रे वाक्रान्ते गुरौ। मलमास इवैतानि वर्जयेदु दैवदर्शनम्" इति। गार्ग्योऽपि "नामान्नप्राशनचौड़ं विवाहं मौञ्जिबन्धनम्। निष्क्रमं जातकर्मापि काम्यं हुतविसर्जनम्। अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे। उद्यापनमुपारम्भं व्रतानां नैव कारयेद्" इति। लल्लः "नीचस्थे वक्रसंस्थे व्यतिचरणगते बालवृद्धत्वगे वा संध्यासंस्थे देवयात्राव्रतचरणविधिः कर्णवेधस्तु दीक्षा। मौञ्जीबन्धोऽग्निचूडा परिणयनविधिर्वास्तुदेवप्रतिष्ठा सद्यः कर्त्तुः प्रशस्तात् त्रिदशपतिगुरौ सिंहराशिस्थिते च" इति। नीचत्वञ्चान्तु ज्योतिःशास्त्रे "सूर्यादिसप्तमक्षेत्रे नीचकरा क्रमात् स्युः। स्त्रीकर्किमीनवणिजोस्तगमन्तु नीचम्" इति। उच्चस्थानात् सप्तमं नीचमित्यर्थः। तथा च

नीचस्थे गुरौ मकरगते इत्यर्थः। यौनकः "पुत्रौदार-विवाहयानगमनं क्षौराद्यकर्मव्रयं विद्यादेवविलोकनोपनयनं दीक्षापरीक्षा व्रतम्। स्नानं तीर्थगमं दर्शं पुरश्चरणदानप्रतिष्ठापनम्। सिंहस्थे विबुधार्चिते न शुभदं कर्तुं क्षमा सूर्यजे"। अत्रत्यलक्षणन्तु ब्रह्मसिद्धान्ते "रविक्षारशिरन्ध्रेषां महाव्यासस्य उच्यते। ततोऽर्वाक् वार्द्धकं विद्याद्वृद्धं बाल्यं प्रकीर्त्तितम्" इति। इतयोरवधिः ज्योतिःशास्त्रेऽनेकविधोदर्शितः "बालः शुक्रो दिवसदशकं पञ्चकञ्चैव वृद्धः पञ्चाद्भक्षितयसुदितः षष्ठमौढ्यः क्रमेण। जीवो वृद्धः शिशुरपि सदा पञ्चवर्षैः शिशुर्नो वृद्धौ प्रोक्तौ दिवसदशकञ्चापरैः सप्तरात्रम्" इति। एतेषां पक्षाणां व्यवस्था देशान्तरविषया आपद्विषया वा। तथा च मार्ग्यः "शुक्रो गुरुः प्राक्परार्क् चैव बालो विन्द्येत् दशावलिङ् सप्तरात्रम्। वक्रेषु वृद्धेषु च षट् च पञ्च शेषे च देये त्रिदिनं वदन्ति" इति। वराहमिहिरोऽपि "बहवो दर्शिताः कालाः ये बाल्ये वार्द्धकेऽपि च। कालालाभाधिकाः शेषा देशभेदादुदाहृताः" इति।

व्रतानां मानसादिभेदकथन दर्शितो यथा

वराहपुराणे "अहिंसा सत्यमक्रोधं ब्रह्मचर्यमकल्कनम्। एतानि मानसान्याहुर्व्रतानि व्रतचारिणाम्। स्नानमक्षारलवणव्रताद्यन्तु यत्। तत्तूष्णं कायिकं पुंसां व्रतं भवति नान्यथा"। उपवासोऽल्पाहारोरात्राभोजनम्, आदित्यव्रतादयश्चितादि। तथा "किञ्चिद् व्रतं वा क्रियते पूज्यते यत् त्रिलोचन!! विप्रैरोदीरितं सर्वमेतच्छ्रुतिपरोः फलम्"।

व्रतभेदफलादिकं तत्रोक्तं यथा मत्स्यपुराणे

"तपोगतिर्हि भूतानां तप एव परायणम्। तपसा विजिता लोकास्तपसा निर्वृतिः सताम्। तपसा धूतपाप्मानो निर्वाणं परमृषयः। तपसा परमासुख मालिं वापि तथाश्नुवात्। तपसा विन्दते लोकानविलानपि पूरुषः। तपसा परमृच्छन्ति निर्वाणमपि शाश्वतम्। तपसा चैहिकीं सिद्धिं विपुलामपि विन्दति। ब्रह्मचर्य च सततादीसु तपसा मर्त्यजातयः। ब्रह्मवर्च्चस धनञ्चाक्षयमक्षय्यञ्च नरा भुवि। व्रतोपवासनियमैः शरीरोशोषणन्नयः। अस्थितस्तु दिवा तिष्ठेदुपविष्टस्तथा निशि। अतद्वीरासनं प्रोक्तं महापातकनाशनम्। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन चैतेन यादृच्छकः प्रकीर्त्तितः"। कूर्मपुराणे "व्रतोपवासनियमैर्होमब्रह्मजपार्चनैः। आराधय महायोगेश्वरेशं योगिनां हृदि स्थितम्"। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव द्विजोत्तम!। अर्च्चयन्ति महादेवं यज्ञदानसमाधिभिः। व्रतोपवासनियमैर्होमैः स्वाध्यायतर्पणैः। तेषां वै रुद्रसायुज्यं सामीप्यञ्चातिदुर्लभम्। सलोकता च राजेन्द्र जायते तत्प्रसादतः"। गरुडपुराणे "धुन्धुमारस्तु राजर्षिर्कर्मणा पुत्रतां गतः पुरा। दानेन नियमेनैव तपसा व्रतेन च। सगरो नाम राजर्षिर्दिक्षु सर्वासु विश्रुतः। पुत्रार्थाय तपः प्राप्तं तेन राज्ञा महात्मना। तथा दशरथो राजा व्रतेषु निरतः सदा। यज्ञदानतपोयोगैः सन्तुष्टः पुरुषोत्तमः। स्वयं पुत्रत्वमागेदे तस्य राज्ञो महात्मनः। जनको नाम राजर्षिस्तपोव्रतनिधिः स्वयम्। ऐश्वर्यमतुलं प्राप्य योगिनां गतिमाप्तवान्। एवमेव महाराज! राजानो ब्राह्मणास्तथा। ऐश्वर्यसुखमासाद्य प्राप्नुवन्ति वै व्रतैरवभात्। अतः कुरुष्व सततं तपःसञ्चयमात्मवान्। व्रतोपवासनिरतस्त्रीणि लोकानि नृपसत्तम!"। तथा "विनियम्येन्द्रियाणां कुर्वीत नियमात्मकान्। उपवासजप, ध्यानतीर्थस्नानादिकैरपि। व्रतैर्यज्ञेन दानेन तपसा तीर्थसेवया। अनेकजन्मसंसिद्धिस्ततः पश्यति द्विजः"। व्रतादीनां चातुर्वर्ण्याधारत्वाभिधानात् द्विजग्रहणं, अत्र वर्णमात्रोपलक्षणार्थम्। न चैवं सति शूद्रस्य यज्ञेऽनधिकारादुपवासशब्दविरोध इति वाच्यम्। यज्ञेतरेषां कायिकेन देवतापूजाद्यर्थेनाधिकारात्। "कायिकं मानसञ्चैव वाचिकञ्च त्रिधा व्रतम्। यत्नोदानं तपश्चैव वदतस्तच्छृणुष्व मे। अहिंसा व्रतचर्य्या च तपः कायिकमुच्यते। वाचिकं सत्यवचनं भूतदोषविवर्जितम्। मानसं मनसः शान्तिः सर्ववैराग्यसक्षणम्"। आदित्यपुराणे "व्रतोपवासान् खलु यो विधत्ते दारिद्र्यदुःखं न भिनत्ति तावत्। व्रतोपवासेषु रतस्य पुंसश्चैवापदः शान्तिमुपयन्ति तस्याः" व्रतसामान्यधर्मास्तद्विधारिणश्च तत्र दर्शिता यथा स्कन्दपुराणे "नियमस्थोऽन्नमाचारनिरतः शुद्धमानसः। व्रतेष्वधिकृतो राजन्यथा विकलः श्रमः। अनृतम्यः सत्यवादी च सर्वभूतहिते रतः। व्रतेष्वधिकृतो राजन्यथा विकलः श्रमः। अहावाच्यायभीरुश्च मद्दम्भविवर्जितः। व्रतेष्वधिकृतो राजन्यथा विकलः श्रमः। शमः सर्वेषु भूतेषु शिवभक्तो जितेन्द्रियः। व्रतेष्वधिकृतो राजन्यथा विकलः श्रमः। पूर्वं निशि स्नाह्वार्थं

यथावत् कर्मकारकः । अवेदनिन्दको धीमानधिकारी व्रतादिषु" । महाभारते "श्राद्धकर्म तपश्चैव सत्यमक्रोध एव च । स्वेषु दारेषु सन्तोषः शौचं नित्यानसूयता । आत्मज्ञानं तितिक्षा च धर्मः साधारणो नृप!" देवलोऽपि "व्रतोपवासनियमैः शरीरोत्तापनैस्तथा । वर्णाः सर्वेऽपि सुप्रीते पातकेभ्यो न संशयः" इति । तदेवं वचनसन्दर्भेणोक्तनियमवतां चतुर्णामपि वर्णानां स्त्रीपुंसाधारण्येन व्रतेष्वधिकार इति प्रतिपाद्यते । तथा च भारते(गीता) "मामुपाश्रित्य कौन्तेय ! येऽपि स्युः पापयोनयः । स्त्रियो वैश्यास्तथा शूद्रास्ते ऽपि यान्ति पराङ्गतिम्" इति । तस्मायं परोविशेषो यत् स्त्रीणां भर्तुराज्ञां विना न स्वातन्त्र्येण व्रतादिष्वधिकार इति । तथा च मार्कण्डेयपुराणे "नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् । भर्तुः शुश्रूषयैवैता लोकानिष्टान् व्रजन्ति हि । यद्देवेभ्यो यत्र पित्रादिकेभ्यः कुर्यादुत्तांश्चर्चनं सत्क्रियाश्च । तस्यार्द्धं वै सा फलं नान्यचित्ता नारी भुङ्क्ते भर्तुः शुश्रूषयैव । धर्मार्थकामसंसिद्धौ भवेद्भर्तुः सहायिनी" । आदित्यपुराणे "नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् । पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते । पत्युरभ्यधिकं नारी नोपवासव्रतञ्चरेत् । अनायुष्यं द्विजश्रेष्ठ ! प्रत्युक्तस्यास्तदुच्यते । देवताराधनं कुर्यात् कामं वा ब्राह्मणोत्तमः । नारी पतिव्रता नाम प्राप्यानुज्ञान्तु भर्तृतः । नारी स्वल्पनसुज्ञाता पित्रा भर्त्रा सुतेन वा । विफलं तद्भवेत्तस्या यत्करोत्यौर्द्धदैहिकम्" । पित्रेति कन्यात्वे । भर्त्रेति सौभाग्यदशायाम् । सुतेनेति वैधव्यदशायाम् । और्द्धदैहिकं व्रतादि । "अथ वा सर्वतः तृप्तज्ञ पतिपूजनतत्परा । केशवाराधनं कुर्यात् साध्वी स्त्री पुरुषर्षभ ! । तेनैव स्वर्गमाप्नोति यत् किञ्चिन्मनसेच्छति । अफलं सर्वमेव स्यात् भर्तृतुष्टां विना व्रतम् । केशवाराधनं यच्च तथापि सफलं स्त्रियः" । हरिवंशे "सतीत्वधर्मचरणं यस्या नित्यमखण्डितम् । पुण्यकानां विधिस्तस्याः पुराणे परिकीर्त्तितः । दानोपवासपुण्यानि कृतान्यप्यरुन्धति ! । निःफलान्यसतीनां हि पुण्यकानि तथा शुभे" । पुण्यकानि व्रतानि । "या नार्चयन्ति भर्तारं योनिदुष्टाश्च याः स्त्रियः । योनिदोषात् पुण्यफलं नाश्नन्ति निरयङ्गताः । साध्व्यो जयद्वारयन्ति शीलाः पतिदेवताः । अनन्यधर्मनित्याश्च सतां पन्थानमाश्रिताः । अवाग्दुष्टाः शौचयुक्ताः धृतिमत्यः शुचिव्रताः । सततं साधुवादिन्यो धारयन्ति जगत् त्वयु । व्याधितः पतितो वापि निर्द्धनो वा कथञ्चन । न वक्तव्यः स्त्रिया भर्त्ता धर्म एष सनातनः । अकार्य्यकारिणं वापि निर्गुणं स्त्री पतिं तथा । तारयत्येव साध्वी सा तथात्मानं शुभानने ! । योनिदुष्टस्त्रियो नास्ति प्रायश्चित्तं कृतैव सा । वाग्दुष्टे विहितं सद्भिः प्रायश्चित्तं पुरातनैः । भर्त्तुरुच्छन्देन कर्त्तव्यं व्रतकं सर्वदा स्त्रिया । उपवासोऽपि वा सत्ये ! काङ्क्षन्त्या हि शुभां गतिम् । कल्पान्तरशतेष्वेषु न स्त्री सा लभते गतिम् । तिर्य्ययोनिसहस्रेषु पच्यते यानिविभ्रमात् । यदि स्यान्मानुष्यं स्त्री लभेदसती सती । चण्डालयोनौ दुर्मेधा जायते कुक्कुराननी । भर्त्ता देवः सदा स्त्रीणां स्त्रीभिर्दृष्टः सनातने । यस्या हि तुष्यते भर्त्ता सा सती धर्मचारिणी । कौतुकैरुत्सवैर्हीनान्तु स्त्रीणां लोको न शोभनः । भर्त्तार्य्यैव मनो यासां सद्भावेन व्यवस्थितम् । कर्मणा मनसा वाचा पतिं नातिचरन्ति याः । तासां पुण्यफलं सौम्ये ! पुण्यकैः सप्तदाहृतम् । पुण्यकानां विधिं कृत्स्नं स्वर्लोकं प्रति शोभने ! । निबोध सुहि सर्वो हि दृष्टोऽयं तपसा मया । स्नात्वा स्त्री प्रातरुत्थाय पतिं विज्ञापयेत् सती । उपवासार्थमथ वा व्रतकार्य्यं सुव्रते ! । स्पृष्ट्वा करान्यां चरणौ सततं सत्तमस्य च । गृहीत्वोदुम्बरं पात्रं सकुशं साक्षतं तथा । गोपृष्ठं दक्षिणांश्चैव प्रतिगृह्णीत तज्जलम् । ततो भर्तुः सती दद्यात् स्नातस्य प्रयतस्य च । आत्मनोऽथ निषेक्तव्यं ततः शिरसि तज्जलम् । त्रैलोक्ये सर्वतीर्थेषु स्नानमेतदुदाहृतम् । उपवासेषु कर्त्तव्येष्वेवं व्रतकेषु च । स्नानमेतद्धि सामान्यं स्त्रीणां पुंसाञ्च भामिनि ! । अरुन्धति ! मया दृष्टं तपसा हरतोषकम् । अमूल्यं विद्धि शयनासनञ्च तथाविधम् । स्वयं प्रक्षालनं चापि पादयोरनुगच्छितम्" । अनुगच्छितं व्रतोपयोगितया कथितम् । "अम्बुप्रपातो रोषश्च अलक्तस्य कृतिः सति ! । उपवासात् व्रताद्वापि सद्योभ्रंशयति स्त्रियम् । शुक्लमेव सदा वासः प्रशस्तं चन्द्रसन्निभे ! । अन्तर्वासोऽपरञ्चैव उपवासव्रते तथा । पादुकार्थस्तृणैः कार्य्यः सर्वदा व्रतके सति ! । उपवासेऽपि च विधिरेष एव प्रकीर्त्तितः । अञ्जनं रोचनञ्चापि गन्धान् सुमनसस्तथा । व्रतके चोपवासे च नित्यमेव विवर्जयेत्" । "रोचनं कुङ्कुमादिना, सुखोज्ज्वलीकरणम् । "दन्तकाष्ठं

शिरःस्नानमुद्वर्त्तनमथापि वा। विवर्जितां च्छदं सर्वं शौचार्थन्तु विधीयते। तिलामलफलैर्नित्यं श्रीफलैश्च समाचरेत्। प्रक्षालनञ्च शिरसः सदा मृत्तिकाश्रितैर्जलैः। शिरसोऽभ्यञ्जनं शौच्यं! नैवमेतत् प्रशस्यते। न पादयोर्न मात्रस्य स्नेहेनेति स्थितिः श्रुता। गोयानमुष्ट्रयानञ्च कथञ्चिदपि नाचरेत्। खरयानञ्च सततं व्रते चाप्युपवासके। नदीजलं प्रस्रवजं प्रस्थं वै सोमनन्दिनि!। गुप्ते तड़ागे वाप्यादौ विस्तीर्णे जलजाकुले। गत्वा स्नानं प्रशस्तन्तु सदैव खलु सर्वथा। अलाभे त्ववरुद्धा स्त्री घटस्नानं समाचरेत्। नवैश्च कुम्भैः स्नातव्यं विधिरेष सनातनः। स्नानञ्च कार्य्यं शिरसा तथाफलमवाप्नुयात्"। भविष्यत्पुराणे "क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः। देवपूजाग्निहवनं सन्तोषः स्तेयवर्जनम्। सर्वव्रतेष्वयं धर्मः सामान्यो दशकः स्मृतः"। अत्र क्षमादीनां स्वतन्त्रतया चतुर्वर्गसाधनत्वेन विहितानां व्रताङ्गतयाऽभिधानं खादिरं वीर्य्यकामस्येत्यादिवत् संयोगपृथक्त्वन्यायादुपपन्नम्। मत्स्यपुराणे "तस्मात् व्रतोपवासेन स्नानमभ्यङ्गपूर्वकम्। वर्जनीयं प्रयत्नेन रूपन्नं तत्परं नृप!"। यच्चोक्तं गरुड़पुराणे- "गन्धालङ्कारवस्त्राणि पुष्पमाल्यानुलेपनम्। उपवासे न दुष्यन्ति दन्तधावनमञ्जनम्" इति यच्च व्यासोक्तम् "दन्तधावनपुष्पाणि व्रतेऽपि च दुष्यति"। तदेतत्सम्भूर्कोपवासविषयम्। भविष्यत्पुराणे "अञ्जनञ्च सताम्बूलं सिन्दूरं रक्तवाससी। विभूषयेदुपवासेऽपि सर्वेषव्यकरं परम्। विधवा यतिभार्य्या कुमारी वा यदृच्छया" पद्मपुराणे "गर्भिणी सूतिकादिश्च कुमारी वाथ रोगिणी। यदा शुद्धा तदान्येन कारयेत् प्रयता स्वयम्"। गर्भिण्यादिरूपवासे कर्त्तव्ये नक्तं कुर्य्यात्। सूतकादिभिरशुद्धा अन्येन व्रतं कारयेत्। प्रयता शुद्धा, स्वयं कुर्य्यात्, पूंसोऽप्येष विधिः लिङ्गस्याविवक्षितत्वात् तदेवं स्त्रीणां कन्यादशायां पित्रादेराज्ञया, विवाहानां भर्तुराज्ञया, विधवानां पुत्राद्याज्ञयैव व्रताधिकारोनान्यथेति सिद्धम्"। अग्निपुराणे "व्रीहिमुद्गकङ्गुश्च कलायाः सलिलं पयः। श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः। कूष्माण्डालाबुवार्त्ताकीपालङ्क्यौदुम्बरिकाकलैत्। चरुमैक्ष्यं शक्तुकणाः शाकन्दधि हृतं मधु"। श्यामाकाः शालिनीवारा शाकं मूलफलादिकम्। "हविष्यव्रतनक्तादावग्निकार्य्यादिकं हितम्। मधु मांसं विहायान्यद्व्रते च हितमीरितम्"। दुःखदयादीनामुपवासगुणतयातदङ्गत्वम् एकान्ततो दर्शितं यथा व्रते गुणानाह गौतमः "दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहा चेति"। दयादिलक्षणान्याह वृद्धशातातपः "परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा। आत्मवद्वर्त्तितव्यं हि दयैवैषा प्रकीर्त्तिता"। परे उदासीने। आपत्तु रक्षितव्यैवेति कल्पतरौ पाठः। आत्मवदितिव्यक्तमाह दक्षः "यथैवात्मा परस्तद्वद्द्रष्टव्यः सुखमिच्छता। सुखदुःखानि तुल्यानि यथात्मनि तथा परे"। वृद्धशातातपः "बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित्। न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता। न गुणान् गुणिनो हन्ति स्तौति मन्दगुणानपि। नान्यदोषेषु रमते साऽनसूया प्रकीर्त्तिता। अभक्ष्यपरिहारस्तु संसर्गश्चाप्यनिन्दितैः। स्वधर्मे च व्यवस्थानं शौचमेतत् प्रकीर्त्तितम्। शरीरं पीड्यते येन शुभेनापि कर्मणा। अत्यन्तं तच्च कुर्वीत अनायासः स उच्यते। प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम्। एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः। लोकादपि च दातव्यमदीनेनैव चात्मना। अकृत्यकृति यत् किञ्चिदकार्पण्यं हि तत् स्मृतम्। यथोत्पन्नेन सन्तोषः कर्त्तव्योऽल्पवस्तुना। परस्य चित्तवित्तार्थं सा ऽस्पृहा परिकीर्त्तिता"। देवीपुराणम्। "तज्ज्ञानं तज्जपः स्नानं तत्कथाश्रवणादिकम्। उपवासश्च तो ह्येते गुणा प्रोक्ता मनीषिभिः"।

व्रतकालविवेकेऽत्र विशेष उक्तो यथा "दीर्घकालानुपालनीयत्वादितिकर्त्तव्यताकलापोपहितनियतसङ्कल्पविषयो व्रतमिति व्रतलक्षणम्। व्रतानां सङ्कल्पसम्भवत्वमाह मनुः "सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः। व्रता(पुंस्त्वमार्षम्)नियमधर्माश्च सर्वे सङ्कल्पजाः स्मृताः"। व्रतारम्भप्रतिष्ठाकालमाह ज्योतिषम् "गुरोर्भृगोरस्तबाल्ये वार्द्धक्ये सिंहगे गुरौ। गुर्वादित्ये दशाहे तु वह्निजीवास्तविंशके। दिने, प्राप्ताब्दप्रत्यायातिचारिगुरुवत्सरे। प्राप्तायिगन्तृजीवस्य चातिचारे त्रिपक्षके। कल्पादावृतु सप्ताहे नीचस्थेज्ये मलिम्लुचे। भानतस्तङ्गतेऽर्कसंज्ञे राहुयुते गुरौ। पौषादिकचतुर्मासे चरणाङ्गितवर्षगे। एकेनाङ्गा चैकदिने द्वितीयेन दिनत्रये। तृतीयेन तु सप्ताहे साङ्गत्वानि जिनोविदुः। विद्यारम्भकर्णवेधौ चूड़ोपनयनोद्वाहान्। तीर्थयानसनाङ्गत्वं तथा

नादिसुरेत्तणम् । परीक्षारामयत्नांस्च पुरश्चरणदीक्षणे । व्रतारम्भप्रतिष्ठे च गृहारम्भप्रवेशने । प्रतिष्ठारम्भणे देवकूपादेर्वर्जयन्ति च । द्वात्रिंशद्दिवसस्यान्ते जीवस्य भार्गवस्य च । द्वादशप्रतिमंहत्यस्ते पादास्ते द्वादश क्रमात् । अस्तात् प्राक् परयोः पक्षं गुरोर्बाल्यवार्धके । पक्षं वृद्धो महास्ते तु भृगुबालो दशाहिकः । पादास्ते तु दशाहानि वृद्धो बालो दिनत्रयम्" । सिंहस्य गुरो विशेषस्तु ज्योतिःकौमुद्याम् "गङ्गाया उत्तरे तीरे गिरिराजस्य दक्षिणे । सिंहस्थं मकरस्थञ्च गुरुं यत्नेन वर्जयेत्" इति । अथ व्रतानुष्ठानं तत्र देवलः 'अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः । सूर्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत्" । अत्र प्रातर्व्रतमचारेदित्यन्वयः ततश्चाहारमभुक्त्वा इति पूर्वदिने एकभक्तं कृत्वा इत्यर्धकम् दिवारात्रिभोजनद्वयस्यैकतरनिषेधेनैकतरस्यावशीयमानत्वात् । गृहीतव्रताकरणे छागलेयः "यो गृहीत्वा व्रतं मोहात् नाचरेत् काममोहितः : जीवन् भवति चाण्डालो मृतः श्वा चैव जायते" । अत्र प्रायश्चित्तमाह शाम्बपुराणम् "लोभान्मोहात् प्रमादाद्वा व्रतभङ्गो भवेद्यदि । उपवासत्रयं कुर्यात् कुर्याद्वा क्षपणम् । प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत्" । वाशब्दः यस्तुल्ये तेन क्षपणस्य कृच्छ्रादित्यर्थः । प्रमादात् सकृत्करणे प्रतिप्रसवमाह देवलः "सर्वभूतभयं व्याधिः प्रमादो गुरुशासनम् । अव्रतघ्नानि कथ्यन्ते सकृदेतानि शास्त्रतः" । आरम्भानन्तरमशौचं न प्रतिबन्धकम् "व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे । आरब्धे सूतकं न स्यादनारब्धे तु सूतकम्" विष्णुक्तेः । व्रतारम्भः सङ्कल्प एव तत्रैवोक्तः । आरब्धव्रतस्य समापनं विना मरणे तत्फलप्राप्तिप्रकारमाहाङ्गिराः "योयदर्थं चरेद्धर्मं समाप्य म्रियते यदि । स तत्पुण्यफलं प्रेत्य प्राप्नोति मनुरब्रवीत्" । प्रेत्य परलोके । अयक्तौ अलाभादिने दोषाभावमाह बौधायनः "अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्" । गर्भिण्यादौ विशेषमाह शाम्बपुराणम् "गर्भिणी सूतिका नक्तं कुमारी च रजस्वला । यदा शुद्धा तदान्येन कारयेत् क्रियते तदा" । अशुद्धा पूजादिकं कारयेत् कायिकमुपवासादिकं सदा अशुद्धाशुद्धा वा स्वयं कुर्यात् । उपवासाशक्तौ नक्तं कुर्वीत । "उपवासेऽशक्तानां नक्तं भोजनमिष्यते" इति वचनात् । व्रतदिने वक्ष्यान्याह हारीतः "पतितपाषण्डनास्तिकसम्भाषान्तरभिधानाटिकमुपवासदिने वर्जयेत्" । तथा कूर्मपुराणम् "बहिर्ग्रामान्त्यजं सूतिं पतितञ्च रजस्वलाम् । न स्पृशेदभिभाषेत नेक्षेत क्षरिवासरे" । व्रतानुष्ठानकालस्य तत्तत्तिथिविहितपूजाप्रधानकालपूर्वाह्णे प्राप्तितिथ्यादौ यथा नरसिंहपुराणम् "दैवकृत्यन्तु पूर्वाह्णे मनुष्याणाञ्च मध्यमे । अपराह्णे पितृणाञ्च कार्याण्येतानि यत्नतः" इति तथा स्मृतिरपि पूर्वाह्णो वै देवानां मध्यन्दिनं मनुष्याणामिति" । उभयदिने पूर्वाह्णलाभे विशेषवचनं विना युग्मादिवचनाद्व्यवस्था" । संक्रान्तिनिमित्तं तत्तत्संक्रान्तिपुण्यकाल एव कार्यम् । "त्रुटेः सहस्रभागो यः स कालो रविसंक्रमः" इत्युक्तेः संक्रान्तिकालस्यातिसूक्ष्मत्वेन कर्मानर्हतया संक्रान्तिपदस्य लक्षणया तत्परत्वात् । अत्र तु "वृश्चिकस्थे तु संक्रान्त्यां पुत्रकामा व्रतं चरेत्" इति भविष्यपुराणीयेन कार्त्तिकेयव्रतस्य संक्रान्तिविहितत्वेऽपि "सायंकाले समारोप्य प्रातःकाले विसर्जयेत्" इति भविष्यपुराणीयेन पूजाया रात्रिव्यापकत्वाभिधानात् तदङ्गोपवासस्य चाहोरात्रसाध्यतया पुण्यकाले तदसम्भवात् तदुपलक्षितमहोरात्र एव कर्त्तव्यत्वम् । ततश्च संपूर्णार्द्धरात्रात् परं वृश्चिकसंक्रान्तौ परदिने पूर्वयामद्वयस्य पुण्यकालत्वेन तदुपलक्षितमहोरात्र एव कार्त्तिकेयव्रतं कर्तव्यम् दिवा तदङ्गस्नानादेः व्रतत्वेन प्रातरारम्भार्हत्वात् तदङ्गोपवासस्य प्रातरारम्भार्हत्वाच्च । उक्तान्यव्रतेषु युग्मवचनेन शुक्लपक्षलक्षणयुक्तादिभेदेन वा तिथिविवेकोक्ता व्यवस्थानुसरणीया ।

व्रतप्रतिष्ठाकालस्य पूर्वोक्तेन "गुरोर्ह्यस्तगतस्यापि सिंहगे गुरौ" इत्यादिवचनोक्तगुरुशुक्रास्तमयादिभिन्नः शुद्धसमय एव कालः । तत्र "सर्वेष्वृक्षेषु कर्त्तव्या प्रतिष्ठा विधिना बुधैः । फलार्थिभिरुक्तप्रतिष्ठं यस्मान्निष्फलमुच्यते" इति कृत्यौषधेश्वरोक्तौ यत्र वचने ऽकरणे निष्फलत्वश्रुतेः प्रतिष्ठा नित्या सा च न व्रताङ्गं किन्तु कर्मान्तरम् । "समाप्ते तु व्रते तस्य प्रतिष्ठा तदनन्तरम्" ब्रह्मपुराणात् । इत्यस्य तद्विनेऽप्यौचारौ यथा न व्यक्तानुष्ठानं तथा समयाशुद्धावपि नानुष्ठानम् । यत्तु "समाप्ते तु व्रते तस्य प्रतिष्ठा तदनन्तरम् । न कालनियमस्तस्य तस्मिन्ने परावहिके" इति तत्रोक्तपूर्वदिवसे समयाशुद्धावपि प्रतिष्ठाविधायकं वचनं तत् कामधेनुकल्पतरुकारादिभिरालिखितत्वादनाकरम् । यदेव व्रतं

मासवर्षादिकालविशेषनियन्त्रितं काम्यं तस्यैव प्रतिष्ठा यत् पुनर्नित्यं कालविशेषानियन्त्रितञ्च न तस्य प्रतिष्ठा पूर्वोक्त क्षयशीर्षेये काम्यफलार्थिभिरित्यनेन काम्यस्यैव प्रतिष्ठाविधानात् कालविशेषानियन्त्रितं तदसम्भवात्"।

व्रतभेदाश्च नानापुराणोक्तास्तत्र हेमा० व्र० खण्डोक्ता अकारादिक्षकारान्तक्रमपूर्वकशब्दानुसारेणात्र कर्त्तव्यकालसहिताः प्रदर्श्यन्ते तेषामितिकर्त्तव्यता तु तत्र द्रष्टव्या

अक्षयतृतीयाव्रतं भविष्योत्तरोक्तम्। "वैशाखस्य सितामेकां तृतीयामक्षयां शृणु। तस्यां स्नानं जपो होमः स्वाध्यायः पितृतर्पणम्। दानञ्च क्रियते किञ्चित् तत् सर्वं ह्याक्षयम्। आदिः कृतयुगस्येयं युगादिस्तेन कथ्यते। सर्वपापप्रशमनी सर्वसौख्यप्रदायिनी"।

अक्षयफलावाप्तिफलकाक्षयतृतीयाव्रतं विष्णुधर्मोत्तरोक्तम्। "वैशाखशुक्लपक्षे तु तृतीयायामुपोषितः। अक्षयं फलमाप्नोति सर्वस्य सुकृतस्य तु। सा तथा रोहिणीयोगेन विशेषेण च पूजिता। तत्र दत्तञ्च जप्तञ्च सर्वमक्षयमुच्यते। अक्षया सा तिथिस्तस्मात्तस्यां सुकृतमक्षयम्। अक्षतैः पूजितोविष्णुस्तेन सा चाक्षया स्मृता। अक्षतैस्तु नरः स्नातो विष्णोर्दत्त्वा तथाऽक्षतान्। मक्षून् सुसंस्कृतांस्तैव कृत्वा चैव तथाक्षतान्। विप्रेषु दत्त्वा तानेव तथा मक्षून् सुसंस्कृतान्। पक्वान्नन्तु महाभाग! फलमक्षयमश्नुते। एकामप्युक्तां कृत्वा च तृतीयां शृणुनन्दन!। एतावत्तु तृतीयानां सर्वासान्तु फलं लभेत्"।

अखण्डैकादशीव्रतं वामनपु० उक्तम्। "भाद्रे चाश्वयुजे ह्यज्ञान्! यदा पद्मजसन्निधिः। नाभ्यां नियोजितो जगतामीशितुश्चक्रधारिणः। तस्मिन् रम्ये शुभे काले या शुक्लैकादशी भवेत्। तस्यां सम्यग्यजेद्विष्णुं येन अखण्डं प्रपूर्यते"। येन विष्णुप्रपूजनेन अखण्डसम्पूर्णं धर्मार्थिभिः परिपूर्णमवतीत्यर्थः"।

अग्निचतुर्थीव्रतं विष्णुधर्मोत्तरोक्तम्। "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव।। चतुरात्मा हरिः प्रोक्तश्चत्वारश्च हुताशनाः। आहिताग्निर्द्विजो यस्य विद्यतेऽग्निचतुष्टयम्। सोपवासश्चतुर्थ्यान्तु शुक्लपक्षस्य फाल्गुने। अभ्यर्च्य चतुरात्मानं वासुदेवमतन्द्रितम्। तस्मै दद्याद् द्विजेन्द्राय तिलप्रस्थानि षोडश। सुवर्णञ्च सुवर्णञ्च वस्त्रं हेमतनावपि"। सुवर्णे कर्षान्यूनम् "एवं संवत्सरं कृत्वा व्रतमेतदतन्द्रितः। सर्वकामसमृद्धस्य यज्ञस्यफलमश्नुते"।

अघोराख्यचतुर्दशीव्रतं भविष्योत्तरे "भाद्रे मासि सिते पक्षे अघोराख्याचतुर्दशी। तासुपोष्य नरोयाति शिवलोकमयत्नतः" हि०त०।

अङ्गारकचतुर्थीव्रतं मत्स्यपु० उक्तम्। "चतुर्थ्यङ्गारकदिने यदा भवति भारत!। सदा स्नानं तदा कुर्यात् पञ्चगव्याभिभूषितः। अग्निसूक्तं दिशो मन्त्रं जपंस्तिष्ठेदुदङ्मुखः। गुडस्तुपार्जितं तोषमाढ्ये भोगविवर्जितः"।

अचलासप्तमीव्रतं भविष्योत्तरोक्तम्। "माघस्य सितसप्तम्यां सर्वकामफलप्रदम्। रूपसौभाग्यजननं स्नानं कुरु वरानने!। कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलम्। रात्रौ चाचलयेद्दीपं दत्त्वा शिरसि दीपकम्। माघस्य सितसप्तम्यामचलस्नानितस्य यत्। एकभक्तेन सन्तिष्ठेत् षष्ठ्यां सम्भुज्य भास्करम्। सप्तम्यां तु व्रजेत् प्रातः सुगम्भीरजलाशयम्"।

अदारिद्र्यषष्ठीव्रतं स्कन्दपु० उक्तम्। "षष्ठी नाम तिथिर्ज्ञेया सामान्या दैवतैरपि। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन दानेन तैलाहारविवर्जितः। अयं हि भगवान् देवो भास्करस्य परद्युतिः। येन श्रीर्लभ्यते तद्वृत्तं कथयाम्यहम्। गोपनीयं व्रतं दिव्यमिह लोके फलप्रदम्। यस्मिन् कृते व्रते चेह दरिद्रो न भवेत् क्वचित्। षष्ठीतिथिं समुद्दिश्य ब्राह्मणाय च भोजनम्। मान्योदनञ्च पयसि कृत्वा च शर्करायुतम्। घृतसंयुक्तं वर्षमेकं प्रदापयेत्। कृते तस्यैव ये जाता ये भविष्यन्ति मानवाः। इह तस्यैव ये सन्ति तान् दारिद्र्यं न गच्छति"।

अनघाष्टमीव्रतं भविष्योत्तरोक्तम्। "कृष्णाष्टम्यां मार्गशीर्षे दाम्पत्यं दर्भनिर्मितम्। अनघं चानघीञ्चैव वस्त्रपुष्पैः समन्वितम्। स्थापयित्वा शुभे देशे गोमयेनानुलेपिते। स्नात्वा समर्चयेत् पुष्पैः सुगन्धैश्चानुलेपनैः। अग्नये देवनक्तन्तु मन्त्रैश्च दण्डकं मनसा स्मरन्। अनघं वासुदेवन्तु पत्नीं तस्याश्चसम्भवा। प्रद्युम्नादिसुतवर्गं हरिवंशे यथोदितम्। वर्षमेकं ततः कृत्वा दद्यादनघं व्रतम्"।

अनङ्गत्रयोदशीव्रतं भविष्योत्तरोक्तम्। "अनङ्गो भगवान् शम्भुर्ज्योमूर्त्तिरगोचरः। स एव देवोयेनास्यां तेनानङ्गत्रयोदशी। प्रसिद्धा सकलप्राप्ता नित्या सर्वफलप्रदा। मार्गशीर्षेऽमले पक्षे त्रयोदश्यां समाहितः। स्नानं नद्यां तडागे वा गृहे वा कूपतोऽपि वा। कृत्वाभ्यर्च्य महादेवं विधिनाच्छिद्रषण्मुखम्। लिङ्गं स्वायम्भुवं भूतमभावे

यत्प्रतिष्ठितम् । तदनङ्गमिति प्रोक्तं पूजयेद्भक्तितोव्रती" । एतत् व्रतं तदवधि वर्षसाध्यम् ।

अनङ्गत्रयोदशीव्रतं कालोत्तरोक्तम् । "चैत्रशुक्लत्रयोदश्यामनङ्गं तु पटे लिखेत् । नीलदूर्वाङ्कुरश्यामं हस्तमात्रं प्रमाणतः । रतिप्रीत्युभयोपेतं पौष्पसायकचापधृक् । पटेषु सुस्थितः कार्य्यः सर्वैराभरणैर्गणैः" ।

अनन्तचतुर्दशीव्रतं भविष्योक्तम् "अनन्तव्रतमप्यत्तिष्ठावस्यामनुत्तमम् । सर्वपापहरं नृणां स्त्रीणां चैव युधिष्ठिर ! । शुक्लपक्षे चतुर्दश्यां भाद्रे भाद्रपदे भवेत् । तस्यानुष्ठानमात्रेण सर्वपापाद्व्यपोहति" ।

अनन्ततृतीयाव्रतं पद्मपु० उक्तम् । "शृणुष्वावहिता देवि ! तथैवानन्तपुण्यकृत् । नराणामथ नारीणामाराधनमनुत्तमम् । नभस्ये वाथ वैशाखे मार्गशीर्षेऽथ वा पुनः । शुक्लपक्षे तृतीयायां स्नातः सन् गौरसर्षपैः । गोरोचनाञ्च गोमूत्रं सुस्नागोशकृतं दधि । चन्दनेन च कर्तव्यं तिलकं न्यसेत् । सौभाग्यारोग्यकृद्यस्मात् सदा च त्रिलताप्रियम् । प्रतिपत्ततृतीयायां पुमान् वाथ सुवासिनी । धारयेद्व्रतबन्धानि कृतघ्नानि मितानि च" ।

अनन्तद्वादशीव्रतं विष्णुरहस्योक्तम् । "द्वादश्यां शुक्लपक्षे च मासि भाद्रपदे नरः । नैवेद्यगन्धपुष्पाद्यैरर्चयेल्लक्ष्मणाग्रिणम् । न चाऽऽलपेद्वैकर्मस्थान् पाषण्डान् पतितान्नरान् । स्नात्वा जपन्नन्तेति शतमष्टोत्तरं बुधः । व्रजन्तिष्ठन् स्वपन् भुञ्जन् बुध्यन् प्रस्खलिते क्षुते । वेदवार्त्तः स्मरेच्चित्यमनन्तं मनसा गिरा । व्रतमेतद्विधानेन कुर्य्यात् संवत्सरं नरः" ।

अनन्तपञ्चमीव्रतं स्कन्दप्रभासोक्तम् । "यो नरः पूजयेद् नागं पञ्चम्यां फाल्गुने सिते । पञ्चोपचारविधिना सितालंकारो जितेन्द्रियः । न तं दशन्ति फणिनो दश वर्षाणि पञ्च च । विषं न क्रमते तस्य कुले मातृकुलेऽपि च । तस्मात् तं पूजयेद् यत्नात् पञ्चम्यां च विशेषतः" ।

अनन्तफलसप्तमीव्रतं भविष्योक्तम् । "शुक्लपक्षे तु सप्तम्यां मासि भाद्रपदेऽच्युत ! । प्रणम्य शिरसा देवं पूजयेत् सप्तवाहनम् । पुष्पधूपादिभिर्वीरः कृतपानाश्च तर्पणैः" । कृतघ्नानां, ब्राह्मणादीनाम् । "षाण्मासादिभिरालापमकर्तुश्चित्यतात्मवान् । विप्राय दक्षिणां दत्त्वा नक्तं भुञ्जीत वाग्यतः । तिष्ठन् ब्रुवन् प्रस्थितश्च स्मृतप्रस्खलितादिषु । आदित्यनामस्मरणं कुर्यादुच्चारणं तथा । अनेनैव विधानेन मासान् द्वादश वै क्रमात् । उपोष्य पारणे पूर्णं समभ्यर्च्य जगद्गुरुम् । पुत्रेण श्रवणेनेह प्रणमेत् पुष्टिमाप्नुयात् । एवं यः पुरुषः कुर्यादादित्याराधनं शुचिः । नारी वा खगमस्थेत्य सानन्त्यं फलमश्नुते" ।

अन्नोदनसप्तमीव्रतं भविष्योक्तम् । "शुक्लपक्षे तु वैशाखे सप्तम्यां सत्यमुपोषितः । पूजयेद् भास्करं भक्त्या पुष्पधूपादिलेपनैः । येन तत् पूजयेद्देवं स विधिः कथ्यते तव । तदा वैश्रवणो येन विधिनाऽपूजयन्नृप । दलखाद्यं भवेद् यद्धि तदोदनमिति स्मृतम् । भक्ष्यं चूष्यं तथा लेह्यमोदनन्त्रिः प्रकीर्त्तितम् । तोयं चाऽनोदनं प्रोक्तं तस्मात् तत्परिवर्जयेत् । तत् परिवर्जयेदिति तच्छब्देन ओदनः परामृश्यते तस्मादोदनमेव वर्जयेन्न तु पेयमपि तस्यानोदनत्वात्" । "इत्येषानोदना नाम सप्तमी भरतर्षभ ! । यानुपोष्य नरो भक्त्या धनधान्यमवाप्नुयात्" ।

अपराजितासप्तमीव्रतं भविष्यपु० "मासि भाद्रपदे शुक्ला सप्तमी या गणाधिप ! । अपराजितेति विख्याता सर्वपातकनाशिनी । चतुर्थ्यामेकभक्तन्तु पञ्चम्यां नक्तमाचरेत् । उपवासस्तया षष्ठ्यां सप्तम्यां पारणं भवेत् ! सारणान्यत्र चत्वारि कथितानि मनीषिभिः । पुष्पाणि जतरवीरादि तथा रक्तञ्च चन्दनम् । धूपक्रिया गुग्गुलुना नैवेद्यं गुडपूपकाः । नभस्यादिषु मासेषु विधिरेष प्रकीर्त्तितः" । इदं व्रतं वर्षसाध्यम् ।

अमावास्याव्रतं कूर्मपु० उक्तम् । "अमावास्यामनुप्राप्य य श्राद्धाय कुटुम्बिने । यत् किञ्चित् वेदविदुषे दद्यादुद्दिश्य शङ्करम् । प्रीयतामीश्वरः सोमो महादेवः सनातनः । सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति" ।

अभीष्टसप्तमीव्रतं विष्णुधर्मोत्तरोक्तम् । सप्तम्याम् इत्युक्त्वे "पूजयित्वा सहस्रांशु होपाश्चैव तदा नरः । पातालांश्च महाभाग ! भुवमाप्नोत्यभीप्सिताम्" ।

अशून्यशयनसप्तमीव्रतं भविष्योक्तम् । "भद्रे ! भाद्रपदे मासि सप्तम्यां सलिलाशये । स्नात्वा शिवं मण्डलके लेखयित्वा तथाम्बिकाम् । भक्त्या सम्पूज्य समयं कुर्याद्धेनुं करे गुणम् । यावज्जीवं मयाला तु शिवस्य विनिवेदितः" ।

अरुन्धतीव्रतं स्कन्दपु० उक्तम् । "अरुन्धतीव्रतं वक्ष्ये सदा सौभाग्यदायकम् । येन योगेन वै सद्यः नारी सौभाग्यभाजनम् । जायते रूपसम्पन्ना पुत्रपौत्रसमन्विता । वक्तुन्तु समासाद्य तृतीयायां सुरर्षभ ! । स्नानं कृत्वा

तु विधिवच्चित्ररात्रोपोषिता सती। मिथुनानि च चत्वारि समाहूय यतव्रता। पूजयेत् पुष्पताम्बूलैश्चन्दनैश्च तथाक्षतैः"।

अर्कव्रतं भविष्योक्तम्। "सप्तम्यां च तथा षष्ठ्यां पक्षयोरुभयोरपि। योऽश्नन्नेकं नक्तभोजी नियतात्मा जितेन्द्रियः। यत्पुण्यं परमं प्रोक्तं सततं सत्रयाजिनाम्। सत्यवादिषु यत् पुण्यं यत् पुण्यं स्तुतगामिनाम्। तत्फलं सकलं प्राप्य मम लोकमुपैति सः"।

अर्कसप्तमीव्रतं ब्रह्मपु० उक्तम्। "अर्कसंपुटसंयुक्तसुदकप्रभृतिं पिबेत्। क्रमाद् दृष्ट्वा चतुर्विंशमेवैकं क्षियते पुनः। द्वाभ्यां संवत्सराभ्यां तु समाप्य नियमोभवेत्। सर्वकामप्रदा ह्येषा प्रसीदत्यर्कसप्तमी"।

अर्कसप्तमीव्रतं भविष्यपु० "फाल्गुनामलपक्षस्य षष्ठ्यां रात्र्युपोषितः। पूजयेद्भास्करं मत्वा पुष्पगन्धाक्षतेपनैः। अर्कपुष्पैर्मम प्रीत्यै! गुग्गुलेन सुगन्धिना। घृतेन भोजयन् देवं चन्दनेन दिवाकरम्। गुडौदनञ्च नैवेद्यं पलानां त्रितयं रवेः। एवं पूज्य दिवा भानुं रात्रौ तत्रायतः स्वपेत्"।

अर्कसप्तमीव्रतं भविष्योत्तरोक्तम्। "यदाऽस्यां शुक्लपक्षे रविवारोऽभिजायते। उपोष्या सा प्रयत्नेन तेनैव विधिना नृप!। अर्चयेद्देवदेवेशं सह देव्या महेश्वरम्। विशेष एव एवात्र शिवस्य नयनेक्षितम्। भानुं सम्पूजयेद् भक्त्या गन्धपुष्पाक्षतैः शुभैः। शिवञ्च सितपुष्पैस्तु रक्तपुष्पैस्तथाम्बिकाम्। रत्नैरक्षितैर्दिव्यैर्भक्तिमानर्चयेद्धरिम्। कुङ्कुमेनालभेद्देवीं चन्दनेन महेश्वरम्"।

अर्कश्रावणिकव्रतं ब्रह्मखण्डपु० उक्तम्। "प्राप्ते तु श्रावणे मासि शुक्लपक्षे मनोहरे। संस्थाप्य पार्वतीं देवीं पूजनेऽङ्गैरुपक्रमैः। मासं यावन्नियमतः संस्मरन् पार्वतीं हृदि। श्वेताक्षतैः श्वेतकुसुमैः श्वेतचन्दनकेन च। गन्धैर्धूपैश्च नैवेद्यैर्यथाकालोद्भवैः फलैः। अर्घ्यं दद्यात् फलेनैव कुसुमाक्षतचन्दनैः। नमोऽर्कश्रावणि! देवि! सर्वपापक्षयङ्करि!। गृहाणार्घ्यं हि देवेशि! शङ्करेण समं मम"।

अर्कोदयव्रतं स्कन्दपु० उक्तम्। "माघमासायां व्यतीपात आदित्ये विष्णुदैवते। अर्कोदयं तमित्याहुः सहस्रार्कग्रहैः समम्। पुराकृतं वसिष्ठेन लाभदर्शेन सुव्रत!। सनकादीनृभुश्चैव ब्रह्मभिर्वाहजैरपि। अन्यैः शतसहस्रैश्च दृष्टं भवति कुम्भज!। दानानां व्रततीर्थानां फलं येन कृतं भवेत्। माघमासे कृष्णपक्षे षष्ठ्यां रवेर्दिने। वैष्णवेन च ऋक्षेण व्यतीपाते सुदुर्लभे"। वैष्णवर्क्षं श्रवणम् "पूर्वाह्णे सङ्गमे स्नात्वा शुचिर्भूत्वा समाहितः। सर्वपापविशुध्यर्थं नियमस्थो भवेन्नरः। त्रिदैवत्यं व्रतं देवाः करिष्ये भुक्तिमुक्तिदम्। भवन्तु साक्षिणो मेऽद्य तयोर्देवास्त्रयोऽग्नयः"।

अलवणतृतीयाव्रतं भविष्योक्तम्। "एवंविधा क्रियायुक्ता शुचिरुन्मोजना सती। सोपवासा तृतीयायां लवणं परिवर्जयेत्"। सोपवासेति व्रतारम्भे द्वितीयायां कृतोपवासा तृतीयायां लवणं परिवर्जयेत् "सा संगृह्णीत वै भक्त्या व्रतमामरणान्तिकम्। गौरी ददाति सन्तुष्टा रूपसौभाग्यमेव च। लावण्यलवणं कृत्स्नं स्त्रीणां पुंसां मनोऽनुगम्। पतिं मनोरमं नारी भर्त्तां भार्यां मनोरमाम्। गौरीव्रतेन लभते राजन्! लवणवर्जनात्"।

अविघ्नविनायकचतुर्थीव्रतं वराहपु० "अथ विघ्नहरं राजन्! कथयामि तवानघ!। येन सम्यक् कृतेनेह न विघ्नमुपजायते। चतुर्थ्यां फाल्गुने मासि गृहीतव्यं व्रतान्वदम्। नक्ताहारेण राजेन्द्र! तिलान्नं पारणं स्मृतम्"। पारणं नक्तभोजनम् "तदेव कृष्णे होतव्यं ब्राह्मणाय च तद्देयम्। चतुर्मासव्रतञ्चैव कर्त्तव्यं पञ्चमे तथा। सौवर्णं राजतं वापि कृत्वा विप्राय दापयेत्"।

अवियोगतृतीयाव्रतं कालिकापु० उक्तम्। "अवैधव्यप्रदं स्त्रीणामवियोगव्रतन्त्विदम्। मार्गशीर्षे सिते पक्षे स्नाता शुक्लाम्बरान्विता। दृष्ट्वा चन्द्रं द्वितीयायां नक्तं भुञ्जीत वाग्यतम्। आचम्य च शुचिर्भूत्वा दद्याच्छङ्करमग्रतः। सदान्विता समभ्यर्च्य विप्राय परमेश्वरम्"।

अवियोगद्वादशीव्रतं भविष्यपु० "शुक्ले भाद्रपदे मासि द्वादश्यां समुपोषितः। स्नात्वा जलाशये स्वच्छे शुक्लाम्बरधरः शुचिः। आनीय कलशं कृत्वा गोमयेनातिशोभनम्। गोधूमचूर्णैरुत्कृष्य सलक्ष्मीकं जनार्दनम्। लेखयित्वा हरं गौरीं सावित्रीं ब्रह्मणा सह। राज्ञा (चन्द्रेण) सह रविं राजंस्त्रैलोक्योद्द्योतकारकम्। गन्धपुष्पैस्तथाधूपैर्नैवेद्यैर्भक्तितोऽर्चयेत्। अवियोगव्रतं पार्थ! कर्त्तव्यानेन तत्परः। अवियोगाद् दृढमना शिरस्याधाय केशवम्"।

अशून्यशयनव्रतं भविष्यपु० "शुक्लपक्षे तु सप्तम्यां माद्रपदेऽच्युत!। प्रणम्य शिरसा देवं पूजयेत् सप्तवार्षिकम्। धूपधूपादिभिर्वीर! कृतपानाच्च तर्पणैः।

षाषण्डादिभिरालापमकुर्वन्नियतात्मवान्। विप्राय दक्षिणां दत्त्वा नक्तं भुञ्जीत वाग्यतः। तिष्ठन् ब्रुवन् प्रक्षितश्च क्षुतप्रस्खलितादिषु। आदित्यनामस्मरणं कुर्यादुच्चारणं तथा। अनेनैव विधानेन मासान् द्वादश वै क्रमात्। उपोष्य पारणे पूर्वं समभ्यर्च्य जगद्गुरुम्। पुण्येन श्रवणेनेह प्रथमेत पुष्टिमाप्नुयात्। एवं यः पुरुषः कुर्यादादित्याराधनं शुचिः। नारी वा स्वर्गमभ्येत्य सानन्त्यं फलमश्नुते"। शुक्लपक्षे समभ्यर्च्य पुष्पधूपादिभिः शुचिः। श्रावणे मासि सम्प्राप्ते देवाय सम्प्रवाचनम्। प्राप्येह विपुलं देवं धर्मानन्तरमक्षयम्। अमुत्र लोकमायाति दिव्यं खगपतेः शुभम्"। इत्यादि

अम्बुन्यग्रोधनद्वितीयाव्रतं भविष्यपु० "चातुर्मास्ये भवेद्राजन्! वर्षायां व्रतमुत्तमम्। श्रावणस्य द्वितीयायां कृष्णपक्षे नराधिप!। श्रावणादिकार्त्तिकान्तं कुर्यात्तत् व्रतमुत्तमम्। पुष्पं धूपञ्च नैवेद्यं दीपमाषां विशेषतः"। "ततो भाद्रपदे मासे यवदानं ददाति च। ततश्चाश्विद्वितीयायां शय्यादानं विशेषतः। न तस्य सूत्यं शयनमपुत्रो न भवेन्नरः। ततश्च कार्त्तिके मासि द्वितीयायां नराधिप!। शर्करालड्डुकाद्यानि दधिक्षीरघृतानि च। उपहारं भगवते दद्यात् सर्वं प्रयत्नतः" इत्यादि।

अशोकविरात्रव्रतं भविष्योत्तरोक्तम्। "तच्छृणु त्वमशोकाख्यं विरात्रव्रतमुत्तमम्। मासि मार्गशिरे चैव ज्येष्ठे भाद्रपदे तथा। शुक्लपक्षे पञ्चदश्यामेकभक्तन्तु कारयेत्। ततः प्रातःसमुत्थाय स्नानं कुर्यात् ततो व्रती"।

अशोकपूर्णिमाव्रतं विष्णुधर्मोत्तरोक्तम्। "अशोकपूर्णिमामेतां शृणुष्व गदतो मम। उपोष्याश्वयुजे मासि नरः शोकं नाप्नोति स्त्री तथापि वा। फाल्गुनामलपक्षस्य पौर्णमास्यां नृपोत्तम!। स्नानेन नरः स्नात्वा दत्त्वा घृतं रवेः वै मुदम्। घृतप्राशनं ततः कृत्वा कृत्वा च स्वरिष्यं वै मुदा। पुष्पैर्गन्धैः समभ्यर्च्य भूधरं नाम नामतः। धरणीञ्च तथा देवीमशोकेति च कीर्त्तयेत्। यथा विशोका धरणिः कृतकृत्या जनार्दनात्। तथा मां सर्वशोकेभ्यो मोचयाशेषधारिणि!"।

अशोकप्रतिपद्व्रतं भविष्योत्तरोक्तम् "अश्वयुक्शुक्लपक्षस्य प्रथमेऽह्नि दिनोदये। अशोकं पूजयेत् तत्र प्रह्लदुमपल्लवम्। प्रह्लदैः सप्तधान्यैश्च गुग्गुलैर्मोदकैः शुभैः। फलैः कालोद्भवैर्दिव्यैर्नारिकेलैः सदाडिमैः। धूपदीपादिना तत्र पूजयेत्तरुमुत्तमम्। अशोकं षाण्डवश्चैव शोकं नाप्नोति कुत्रचित्। पितृभ्रातृपतिश्वशूसुत जामातृणां तथा"।

अशोकाष्टमीव्रतं लिङ्गपुराणोक्तम् "अशोककलिकाशाष्टौ ये पिबन्ति पुनर्वसौ। चैत्रे मासि तथाष्टम्यां न ते शोकमवाप्नुयुः"। अत्र पुनर्वसुयोगः प्राशस्त्यार्थः। कूर्मपुराणेऽपि "अशोकस्याष्टकलिका मन्त्रेणोक्तेन भक्षयेत्। शोकं नैवाप्नुयान्नार्त्यो रूपवानपि जायते"। "शुक्लाष्टम्यां तु संप्राप्ते मासि भाद्रपदे तथा। दूर्वांप्रतानं सश्वेतसूत्रराशाभिगामिनम्। पूजयेद्गन्धहेमानीय गन्धमाल्यानुलेपनैः। फलमूलैस्तथा चैव दीपं धूपैर्विसर्जयेत्। अग्निपक्वं तथा सर्वं निवेद्य च कथञ्चन। भोक्तव्यञ्च तथा ब्रह्मन्! वह्निपक्वविवर्जितम्। दूर्वांकुरस्यां सम्पूज्य विधिना यौवने प्रियम्। यौवनं स्थिरमाप्नोति यत्र यत्राभिजायते। अष्टमीषु च सर्वासु पूजनीयाशोकिका। गन्धमाल्यनमस्कारदीपधूपान्नसम्मदा। तद्विच्छिनत्ति या भुङ्क्ते नक्तमिन्दुविवर्जिते। भवत्यशोका विशोका सा यत्र यत्राभिजायते। अष्टमीषु च सर्वासु नचेच्छृणोति वै सुने। प्रोष्टपद्यामतीतायां या स्यात् कृष्णाष्टमी द्विज!। तस्यामवश्यं कर्त्तव्यं देवीं पूज्य यथाविधि"। इदं व्रतान्तरम्।

अहिंसाव्रतं पद्मपु० "वर्जयित्वा पुमान्मांसमश्नन्ने गोप्रदो भवेत्। तदङ्गे मृन्मयं दत्त्वा सोऽश्वमेधफलं लभेत्। अहिंसाव्रतमित्युक्तं कल्पान्ते भूपतिर्भवेत्"।

आग्नेयव्रतं भविष्योत्तरोक्तम्। "सङ्क्रान्त्यां भक्तेन पूजयेद्विघ्नवासिनीम्। पुष्पैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि। पूजयित्वा ततो विद्वान् पञ्जरं शुकसंयुतम्। हेमं विप्राय दद्याद्यः स वाग्मी जायते नरः। सङ्क्रान्तेन नक्तेन अग्निलोकप्रदायकम्"।

आत्मासंक्रान्तिव्रतं स्कन्दपु० "सङ्क्रान्तिदिवसे पुण्ये प्रारभेद्व्रतमिदं व्रते। पद्ममष्टदलं कृत्वा कुङ्कुमेन तु भास्करम्। पूजयेन्मन्त्रसंयुक्तं विधिवद्गुरुसन्निधौ। आत्मा तेजस्करो यत्ते प्रमादोन्नियमस्करः। आत्मा सर्वगतां देव! मम देहि नमोऽस्तु ते। पूज्यैवं कुङ्कुमेनाथ दद्याद्विप्राय भोजनम्। उद्यापने तु चरुकांशुं सौवर्णं रथं तथा। एकचक्रञ्च सप्ताश्वसरुणेन समन्वितम्। यः कुर्यादुविधिनानेन आत्मासंक्रान्तिसुव्रताम्। अथात्मास्खलिता लोके सूर्य्यतस्य जायते"।

आदित्यव्रतं भविष्यपुराणोक्तम् "योऽब्दमेकं प्रकुर्वीत नक्त

हि महिने नरः। ब्रह्मचारी जितक्रोधो समार्चनपरः खग !। संवत्सरानन्तमासाद्य भक्तांश्च द्विजोत्तमान्। भोजयित्वा व्रती ब्रूयात् प्रीयतां मे दिवाकरः। यच्च भक्तिसमायुक्तो मम लोकं स गच्छति। स च भानुव्रतं लोकं ध्रुवं समाप्नुयाच्चरः। ये त्वादित्यदिने प्राप्ते आर्द्रं कुर्वन्ति मानवाः। सप्तजन्मानि ते प्राप्ताः सम्भवन्ति विरोगताम्। वैराग्यमिह वै प्राप्य मम लोकं व्रजन्ति ते। उपवासन्तु कुर्वन्ति ये त्वादित्यव्रते सदा। जपन्ति तु महाश्वेतामीप्सितं लभते फलम्। विशेषादादित्यदिने जपमानो गणाधिपान्। षड्क्षरं महाश्वेतं जपन् वैरोचनं पदम्"।

आदित्यशयनव्रतं आदित्यपु० "आदित्यशयनं नाम यथावच्छृणुरार्चनम्। येषु नक्षत्रयोगोऽत्र पुराणज्ञाः प्रचक्षते। यदा हस्तेन सप्तम्यामादित्यस्य दिनं भवेत्। सूर्यस्य वाथ संक्रान्तौ सा तिथिः सर्वकामिकी। समासहेश्वरख्यां समर्चयेत् सूर्यनामभिः। सूर्यार्चां गन्धसिक्तञ्च सभवं पूजयेत्ततः। उमापते रवेर्वापि न भेदः क्वचिदिष्यते। यस्मात् तस्मात्तृपश्रेष्ठ ! घटे शम्भुं समर्चयेत्" इत्यादि।

आदित्यनन्दाव्रतं भविष्यपु० "द्वादश्यां हस्तभे वारो आदित्यस्य महात्मनः। नन्दो भद्रस्तथा सौख्यः कामदः पुत्रदस्तथा। जयो जयन्तो विजय आदित्यानामुपास्थितः। हृदयो रोगहा चैव महारोगविनाशनम्। मालतीकुसुमानीह श्वेतचन्दनसंयुतम्। धूपं गुग्गुलुसंश्लेषं नैवेद्यं पूपमेव तु। दत्त्वा पूपांस्तु विप्राय ततो भुञ्जीत वाग्यतः"।

आनन्दव्रतं भविष्यपु० "चैत्रादिचतुरो मासान् जले कुर्यादयाचितम्। व्रतान्ते मणिकन्दाज्यवस्त्रसंयुतम्। तिलपात्रं हिरण्यञ्च ब्रह्मलोके महीयते। कल्पान्ते भूपतिर्भूत्वा आनन्दव्रतमुच्यते"।

आनन्दसप्तमीव्रत भविष्यपु० "सप्तमी दयिता राजन् ! नागानां नन्दवर्द्धिनी। सप्तम्याः किल नागानां भवतीत्युत्सवो महान्। वासुकिस्तक्षकश्चैव कालियो मणिभद्रकः। धृतराष्ट्रैरावतः कर्कोटकधनञ्जयौ। एते प्रयच्छन्त्यर्घं प्राणिनां प्राणदाः सदा। सप्तम्यां स्नापयन्तीह नागान् क्षीरेण ये नराः। तेषां कुले प्रयच्छन्ति सभयं प्राणदक्षिणाम्"।

आनन्दनियमीव्रतं भविष्यपु० "आनन्दा नन्दिनी नन्दा महानन्दा च कीर्त्यते !। तथाद्या नवमी पुण्या सप्तमी सहिता। फाल्गुनामलपक्षस्य नवमी या भवेत्तिथे !। आनन्दा सा महापुण्या सर्वपापहरा शुभा। तत्रैकभक्तं पञ्चम्यां षष्ठ्यामक्तं तथा नृप !। क्षपयित्वा तु सप्तम्यामुपवासः परेऽहनि। य एवं पूर्वोक्तायां नवम्यां विधिवन्नृप !। मासोपवासोऽर्चयेद्यु देवीं धूपादिनाऽनघ। तथाक्रमम्। मासेष्वृतुभिरादाय द्वितीय पारणं नृप"। आदौयम् आद्यम् "भोजयेद् विप्रकन्याश्च नवम्यां ब्रह्मणस्त्रियः। मासि मासि महाभागे ! यथा शक्त्या यथाविधि। आषाढे श्रावणे मासि मासि भाद्रपदे तथा। तथाश्वयुजे मासि पूज्या भगवती विभो !। तत्रैकभक्तं पञ्चम्यां षष्ठ्यां नक्तं तथा नृप !। क्षपयित्वा तु सप्तम्यामुपवासः परेऽहनि। सोपवासो नवम्यां तु पूजयेद्विधिवच्छिवाम्। सोऽश्वमेधफलं प्राप्य विष्णुलोके महीयते"।

आयुधव्रतं विष्णुधर्मोत्तरोक्तम्। "वृत्तमद्यत प्रवक्ष्यामि चतुर्मूर्त्तिव्रतन्तव। शङ्खचक्रगदापद्मचतुरात्मा प्रकीर्त्तितः। वासुदेवः स्मृतः शङ्खः चक्रं सङ्कर्षणस्मृतः। प्रद्युम्नश्च गदा पद्ममनिरुद्धो जगद्गुरुः। आषाढादिषु मासेषु वह्निःस्नातस्तु नक्तभुक्। तेषान्तु पूजनं कुर्यात् प्रतिमासमनुक्रमात्। गन्धमाल्यानुलेपैश्च धूपैश्च विविधैरपि। सम्पदा। ततस्तु कार्त्तिकस्यान्ते समाप्ते तु तथा व्रते। ब्राह्मणान् भोजयेद्भक्त्या दद्याच्छक्त्या च दक्षिणाम्। आंस्यपात्रञ्च सघृत सवस्त्रं तथैव च। दत्त्वा व्रतं समाप्नोति लोकं त्रिदशेश्वरस्य। मानुषत्वमाद्य तथैव पश्चात् वसुन्धरेशो भवतीह धीरः"।

आरोग्यव्रतं विष्णुधर्मोत्तरोक्तम्। "प्रोष्ठपद्यामतीतायां प्रतिपत्प्रभृति क्रमात्। यावच्च दिवाऽऽश्वयामनिरुद्धं प्रपूजयेत्। पूर्वोक्तेन विधानेन यावदाश्वयुजी भवेत्"। पूर्वोक्तेन कृपावाप्नुव्रतोक्तेन "द्वादशैरर्चयेद् देवं स्नातो पुष्पादिने दिने", द्वादशैः कमलैः "घृतेन जुहुयाद् वह्निं घृतं दद्याद् द्विजातये। भोजनं गोरसयुतं तथा विप्रांश्च भोजयेत्। विरात्रोपोषितः सम्यगाश्वयुज्यान्ततो नरः"। अपरं वराहपु० "अथापरं प्रवक्ष्यामि व्रतमारोग्यसंज्ञितम्। कथयामि परं पुण्यं सर्वपापप्रणाशनम्। तथैव माघमासस्य सप्तम्यां संयतोपितः। पूजयेद्भास्करं देवं विश्वरूपं सनातनम्। आदित्य ! भास्कर ! रवे ! भानो ! सूर्य ! दिवाकर !। प्रभाकरेति संपूज्यो देवः सर्वेश्वरो विभुः। षष्ठ्यां चैव फलाहारः सप्तम्यामुपवासकृत्। अष्टम्यां चैव भुञ्जीत एष एव विधिः क्रमः। अनेन व्रतचर्यं

पूज्य अनेन विधिना योऽर्चेदृषिम्। तस्यारोग्यं धनं धान्यमिह जन्मनि जायते। परत्र च सुखं स्थानं यत्प्राप्य न निवर्त्तते"।

आरोग्यदशमीव्रतं गरुडपु० "व्रतमेतन्महाबुद्धे! कार्य्यमारोग्यमिच्छता। सर्वकार्य्येष्वमेतद्धि विष्णुना लोकितं पुरा। उपवासस्तु कर्त्तव्यो नवम्यामिह सुव्रत। दशम्यां तु कृतस्नानो मद्भक्तायतनं हरिम्। देवमिन्दिरया सार्द्धं ध्यात्वा च जगतां पतिम्। शङ्खचक्रगदापद्मगाङ्गीषिधरसुत्तमम्"। इन्दिरया लक्ष्म्या "फलैर्धूपैश्च पुष्पैश्च पायसेन समर्चयेत्"।

आयुव्रतं गरुडपु० "व्रतञ्चाप्नोति जननमायुःप्रद्मनाकुलम्। सर्वसौख्यप्रदं भद्रे तादृग्व्रतमिहोच्यते। चतुर्दश्यां शुचिः स्नात्वा दन्तधावनपूर्वकम्। पौर्णमास्यान्तथा कृत्वा देवपूजां समाचरेत्। मण्डलं चतुरस्रन्तु कारयेत् कुसुमाक्षतैः। तस्मिन् श्रीशं श्रियं देवीमर्चयेत् समाहितः"।

आयुःसंक्रान्तिव्रतं स्कन्दपु० "अथान्यां सम्प्रवक्ष्यामि आयुःसंक्रान्तिसुत्तमाम्। संक्रान्तिदिवसे पूज्य पूर्ववच्च दिवाकरम्। कांस्यं क्षीरघृतं दद्यात् सच्चिरण्यं सदक्षिणम्। मन्त्र एव पृथगुक्तो पूजा सैव प्रकीर्त्तिता। सक्षीरं घृतभोज्यञ्च पीयूषसमरूपकम्। आयुरारोग्यमैश्वर्य्यं मम देहि द्विजार्पितम्। अनेन विधिना सम्यक् सर्वं दद्यादतन्द्रितः"।

आषाढादित्यव्रतं स्कन्दपु० "मासमाश्वयुजं प्राप्य यदादित्यदिनं भवेत्। तदा व्रतमिदं ग्राह्यं नरैस्त्रीभिर्विशेषतः। यावत् संवत्सरं तावद्विधिनानेन पुत्रक!। मासेन चित्तो कुर्य्यात् मण्डलं वर्त्तुलं पुनः। रक्तपुष्पैरक्षताद्यैर्घ्यं तत्र प्रदापयेत्। यथाद्य विमलाः सर्वाः हृर्य्य! भास्करभासुभिः। तथाद्यां सफलां मद्य कुरु नित्यं नयार्चितः। एवं यः कुरुते सम्यक् व्रतमेतदनुत्तमम्। आदित्येति विख्यातं तस्य पुण्यफलं महत्। इत्यादि

आषाढव्रतं विष्णुधर्मोत्तरोक्तम्। "दृढमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तदा। चतस्रामत्रपत्ने तु सोपवासो जितेन्द्रियः। चतुर्य्यां वासुदेवस्य कृत्वा संपूजनं शुभम्। आसनं दक्षिणां दद्यात् द्विजाय ब्रह्मचारिणे। तथा चक्रार्च्चं देवं पूजयित्वा जगद्गुरुम्"।

आषाढ्यानि महाभारते "आषाढ्यामेकभक्तेन स्थित्वा समतन्द्रितः। बलवान् बहुधनो बहुपुत्रश्च जायते। आषाढ्यामेकभक्तेन पूजयेद्विष्णुतत्परः"।

इन्द्रौषधीव्रतं भविष्योत्तरोक्तम्। "त्रिंशत्संपूज्य दम्पत्या न्युपवासी विभूषणैः। सौख्यमाप्नोति मोक्षमिन्द्रव्रतादिह"।

ईशानव्रतं कालिकापु० "अथोपोष्य चतुर्दश्यां गुरोर्दिने। पूजयेद्विधिनानेन शिवं सार्द्धं निबोध मे। ब्रह्मणः पश्चिमे भागे वामे शिवस्य वै हरिम्। खखोल्कं दक्षिणे रौद्रमीश्वरं प्रागदिग्स्थितम्"। खखोल्कमर्कम्।

ईश्वरव्रतं भविष्यपु० "ईश्वरस्य चतुर्दश्यां सर्वैश्वर्यसमन्वितः। बहुपुत्रो बहुधनस्तथा स्याच्चात्र संशयः। मूलमन्त्रस्वमंत्राभिरङ्गमन्त्राश्च कीर्त्तिताः। पूर्वोक्तपूजनस्थाः कर्त्तव्यश्च तिथीश्वरः। गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते। पूजाऽयाद्येन पाद्येन कृतापि तु फलप्रदा। आज्यधारासमिद्भिश्च दधिक्षीरान्नसक्तिकैः। पूर्वोक्तफलदो होमः कृतः शान्तेन चेतसा"। एतद्व्रतं वैश्वानरप्रतिपद्व्रतवद्ग्राह्यं।

षट्कसप्तमीव्रतं भविष्यपु० "षट्कसप्तमीव्रतं पीत्वा क्रियते या तु सप्तमी। सा ज्ञेया सुखदा वीर! षट्तोदकसप्तमी"।

उभयद्वादशीव्रतं भविष्योत्तरोक्तम्। "अथ व्रतानां सर्वेषामुभयद्वादशीव्रतम्। तत्तेऽहं संप्रवक्ष्यामि समाहितमनाः शृणु!। ततोऽपराह्णे सत्पर्व्व कृतमध्याह्निकः शुचिः। प्राप्याज्ञां वेदविदुषः पुराणज्ञात् जितेन्द्रियात्। संपूज्य देवदेवेशन्दन्तधावनपूर्वकम्। कृत्वाञ्च नियमं पार्थ गुरुदेवाग्निसन्निधौ। एकादश्यां निराहारः स्थित्वा कृष्णपरेऽहनि। भोक्ष्यामि पुण्डरीकाक्ष! शरणं मे भवाच्युत!। इत्युक्त्वाथ गुरुं नत्वा पूजयित्वा जनार्दनम्। भूमौ स्वपेज्जितक्रोधः शब्दादिविषयो ज्झितः। अनेन विधिना मासि तस्मिन् कृष्णासुपोषयेत्। द्वादशीं पुरुषव्याघ्र! ध्यायन् सङ्कर्षणं विभुम्। प्राग्वत्सर्वं ततः कृत्वा ब्राह्मणाय निवेदयेत्"। इदञ्च व्रतं मार्गशीर्षादिकार्त्तिककालद्वादशमाससाध्यं तच्च उभयपक्षयोः कार्य्यम्।

उभयनवमीव्रतं भविष्यपु० "योऽष्टमीमेकभक्तीयात् नवम्यां नक्तमाचरेत्। इह भोगानवाप्याग्र्यान् परत्र च दिवं व्रजेत्। पौषे मासे च सम्प्राप्ते यः कुर्य्यान्नक्तभोजनम्। जितेन्द्रियः सत्यवादी कामक्रोधविवर्जितः। पक्षयोर्नवमीं यत्नादुपवासेन पालयेत्"। इदं व्रतं वर्षसाध्यम्।

उभयसप्तमीव्रतं भविष्यपु० "पौषे मासे च सप्तम्यां यः कुर्य्यान्नक्तभोजनम्। जितेन्द्रियः सत्यवादी क्षान्तो गोमत्यगोरसैः। पक्षयोः सप्तमीं यत्नादुपवासेन यो नयेत्।

त्रिसन्ध्यमर्चयेद्देवीं शान्तिश्चैवेदयेत्सुव्रत !"। तदवधिवर्षं-यावध्यम्। व्रतान्तरं विष्णुधर्मोत्तरोक्तम् "अनेनैव विधानेन प्रतिमासन्तु यो नरः। सप्तमीहितवं कुर्याद्यावत् संवत्सरं रवेः। सोऽश्वमेधमवाप्नोति सूर्यलोकं च गच्छति। कुलसप्तरते राजन् ! सर्वान् कामानुपाश्नुते"। उमामाहेश्वरतृतीयाव्रतं भविष्योत्तरोक्तम्। "लोके हितार्थं पार्वत्या उमामाहेश्वरव्रतम्। समाख्यातं पुरा पार्थ ! नाद्यापि प्रथितं भुवि। मार्गशीर्षे सिते पक्षे तृतीयायां समाहिता। कृतोपवासा राजेन्द्र ! सर्वभोगविवर्जिता। संवेष्ट्य श्वेतवस्त्रेण शिवं रक्तेन चाम्बिकाम्। पञ्चाङ्गं दक्षेत्तारी भक्तिभावेन भाविता। भोजयेच्छिवभक्तांश्च ब्राह्मणान् वेदपारगान्। भक्तेभ्यो दक्षिणां दद्याद्भक्त्या शास्त्रविनाकृताम्"। कृतोपवासा सङ्कल्पितोपवासा "हैमीमुमां रजतपिण्डमयं सहेशम् रोप्ये शुक्लद्वयभे समुपस्थितौ तौ। संपूज्य रक्तसितवस्त्रयुगोपगूढौ नारी भवत्यविधवा सुतसौख्ययुक्ता। पौर्णमास्यामथावास्यां चतुर्दश्यष्टमीषु च। नक्तमश्नन्तु कुर्वीत हविष्यैर्ब्रह्मचारिणी। उमामहेशप्रतिमां हेम्ना कृत्वा सुशोभनाम्। राजतीं वापि कर्षार्द्धं स्नापयित्वा घृतादिभिः। गन्धपुष्पैरलङ्कृत्य वस्त्रयुग्मैश्च शोभनैः। भक्ष्यभोज्यैरशेषैश्च वितानध्वजचामरैः। भोजयेच्छिवभक्तांश्च दीनानाथान् प्रतर्पयेत्"। व्रतान्तरं शिवधर्मोत्तरोक्तम्। "अष्टम्यां च चतुर्दश्यां नियतब्रह्मचारिणी। वर्षमेकं न भुञ्जीत महीभोगजिगीषया। वर्षान्ते प्रतिमां कृत्वा पूर्ववद्विधिमाचरेत्। स्नानार्घ्यैस्तद्व्रतं प्राप्य पूर्वोक्तांस्तु गुणान् लभेत्"। अत्राप्युमामहेश्वर प्रतिमा कर्त्तव्या। पूर्ववदिति पूर्वव्रतोक्तवदित्यर्थः। देवीपु० व्रतान्तरं "यदीच्छसि शुभत्वारमिह जन्मन्यथापरे। कन्या कुर्यास्त्वमथेह ! विष्णुना कथितं व्रतम्। सर्वपापहरं पुण्यं सर्वकामफलप्रदम्। उमामहेश्वरं नाम कर्त्तव्यं विधिना यथा। प्रोष्ठपदे तथा मासे शुक्ले भाग्ये १२।३ वा शुभे ! मैत्रे १७।शाक्रे १८।३ वा कार्यमष्टम्याश्च शाङ्करे ६। व्रतान्तरं भविसंक्षिप्तोक्तम्। "उमामाहेश्वरं नाम यो व्रतं कुरुते नरः" इत्युपक्रमे "उमामाहेश्वरौ कार्यौ प्रतिमा काञ्चनोद्भवा। त्रिकर्मश्च तदर्द्धस्य कर्मणापि त्रिनक्तश्च। द्रव्यशाठ्यं न कर्त्तव्यं सर्वथा फलकाङ्क्षया। व्याघ्रचर्मोत्तरे श्वेतवस्त्राढ्ये राजते शुभे। व्याघ्राजिने सुविस्तीर्णे संस्थाप्याभ्यर्च्य यत्नतः। सोपवासा च कुर्यात्तु चतुर्दश्यां समाहिता। शैवं साङ्गसकं होमं गौर्य्या होमञ्च यत्नतः। प्राप्ते प्रभातसमये स्नात्वा संपूज्य पूर्ववत्। आहूय वेदविदुषं ब्राह्मणं पूजयेत्ततः !। अर्चयेत् प्रतिमां शम्भोः कर्मदोषापशान्तये। वाक्येन ब्राह्मणं तोष्य ततः पारणमाचरेत्"।

उलूकानवमीव्रतं भविष्योत्तरोक्तम्। "उलूकाख्या नवमी राजन् ! कथयामि निबोध ताम्। या कार्यप्रेण कथिता तारकस्यार्त्तिनाशिनी। आश्वयुक्शुक्लपक्षे या नवमी लोकविश्रुता। नद्यां स्नात्वा समभ्यर्च्य पितृदेवान् यथाविधि। पश्चात् संपूजयेद्देवीं चामुण्डां भैरवप्रियाम्। पुष्पैर्धूपैः सनैवेद्यैः मांसमत्स्यसुरासवैः। पूजयित्वा ततः कुर्यान्मन्त्रेणानेन मानवः"। वीरपु० "व्रतेन येन देवेन्द्र ! प्रसीदत्याशु पार्वती। तच्चोलूकानवमीकल्पं शृणु ! सर्वफलप्रदम्। तस्यां नवम्यां सर्वाणी महिषादीन् महासुरान्। जघान समरे यत्नात् तेन सा नवमी प्रिया। आश्वयुक्शुक्लस्य नवम्यां प्रयतात्मवान्। स्नात्वाभ्यर्च्य पितॄन् देवान् मनुष्यांश्च यथाक्रमम्। जपेत् पश्चान्महादेवीं महिषासुरघातिनीम्। पुष्पैर्धूपैः सनैवेद्यैः पयोदधिफलादिभिः। भक्त्या संपूजयित्वैवं देवीं सम्प्रार्थयेत्ततः"।

कृतव्रतं विष्णुधर्मोत्तरोक्तम्। "अथातः संप्रवक्ष्यामि वृष्णिमूर्त्तेरनं परम्। वसन्ते पूजयेच्चित्यं हौ मासौ सुनिपुङ्गव !। फलैः पुष्पैः कषायैस्तु घीमे मैश्च पूजयेत्। मधुरेण महाराज ! प्रावृट्काले कृतं यजेत्। अनेन पूजयेच्चित्यं शरदं लवणेन च। कटुकेन च हेमन्तं तिक्तेन शिशिरं तथा। नक्ताशनस्तथा तिष्ठेत् पञ्चकं वर्जयेद्रसम्। ब्राह्मणान् भोजयेच्चापि प्रभूतवसनादिभिः। संवत्सरमिदं स्नात्वा व्रतं परमपावनम्। अश्वमेधमवाप्नोति राजसूयञ्च विन्दति। चैत्रे समारभ्य सिते तु पक्षे संपूजयेदुमास्कृतषट्कमेवम्। कृतोपवासः स नरो यथोक्तं लभेत् फलं शाश्वतमेव शीघ्रम्"।

ऋषिपञ्चमीव्रतं ब्रह्मपु० "शृणु राजन् ! प्रवक्ष्यामि व्रतानामुत्तमं व्रतम्। ऋषिपञ्चमीति विख्यातं सर्वपापहरं परम्। नभस्ये शुक्लपक्षे तु यदा भवति पञ्चमी। नद्यादिषु तदा स्नानं कृत्वा नियममेव च। विधायनित्यकर्मादि गत्वा द्वारवतीह्रदान्। स्नापयेद्विधिवद्भक्त्या पञ्चामृतवरैः शुभैः"। द्वारवतीं, अग्निहोत्रशालां धूमनिर्गमद्वारैर्बहुभिर्युक्तत्वात्"। उभयोरप्य सम्प्राप्ते।

एकभक्तव्रतं विष्णुधर्मोक्तम्। "चैत्रं विष्णुपरो मासमेकभक्तेन यः क्षिपेत्। सुवर्णमणिसुक्ताढ्यं गार्हस्थ्यं समवाप्नुयात्। अहिंसः सर्वभूतेषु वासुदेवपरायणः। नमोऽस्तु वासुदेवायेत्यष्टशतं जपेत्। अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात्। यस्तु संवत्सरं पूर्णमेकभक्तो भवेन्नरः। अहिंसः सर्वभूतेषु वासुदेवपरायणः। नमोऽस्तु वासुदेवायेत्यष्टशतं जपेत्। पौण्डरीकस्य यज्ञस्य ततः फलमाप्नुयात्। दश वर्षसहस्राणि स्वर्गलोके महीयते। ततश्चयादिह चागत्य माहात्म्यं प्रतिपद्यते"।

ऐश्वर्यतृतीयाव्रतं विष्णुधर्मोक्तम्। "तृतीयायां तथाभ्यर्च्य ब्रह्मविष्णुमहेश्वरान्। पृथक् पृथक् नाममन्त्रैर्नैवेद्यादि निवेदयेत्। तीव्रं लोकांश्च तदा नाम सम्यक् संपूजयेन्नरः। ऐश्वर्यं महदाप्नोति गतिमग्र्याच्च विन्दति"।

कदलीव्रतं भविष्योत्तरोक्तम्। "शुक्ले पक्षे चतुर्दश्यां माघे भाद्रपदे नृप!। देयमर्घं वरश्रीमिः फलैर्नानाविधैस्तथा। विल्वैः सप्तधान्यैश्च दीपालङ्कारचन्दनैः। दधिदूर्वाक्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः। जातीफलैः पूगफलैर्लवङ्गकदलीफलैः। तच्चिन्तनि दातव्यं श्लोभीरस्याभिरक्षणम्। मन्त्रोऽनेन चैवार्घ्यं तच्छृणुष्व नराधिप!। चिन्तया कदली नित्यं कदली कामदायिनी। शरीरारोग्यालावण्यं देहि देवि! नमोऽस्तु ते"।

कन्दुचतुर्थीव्रतं देवीपु। "माघमासे तु सप्तम्यां चतुर्थीं कन्दुसंयुता। सोपोष्या तु सुरश्रेष्ठ! ततो राज्यं भविष्यति। सर्वोपचारसम्पन्नं सर्वोपस्करमाहरेत्। कन्दुपक्वं फलं शाकं लवणं गुडघृतम्। खण्डं कुसुम्भरी क्षीरं धान्यानि विविधानि च। दातव्यानि रघुश्रेष्ठ! कन्यकानान्तु भक्तितः"।

कपिलाषष्ठीव्रतं स्कन्दपु। "प्रौष्ठपदेऽसिते पक्षे षष्ठी भौमेन संयुता। व्यतीपातेन रोहिण्या सा षष्ठी कपिला स्मृता"। प्रौष्ठपदो, भाद्रपदश्च। चान्द्रमासोपाख्या; रोहिणीयोगश्च तत्रैव सम्भवात्"।

"द्वितीया (अन्या) तु महापुण्या दुर्लभा वृतिनः क्वचित्। षष्ठी संवत्सरस्यान्ते सा पुनश्चैत्रेण संयुता। चैत्रवैशाखयोर्मध्ये सिते पक्षे शुभोदया। वैशाखेऽपि च राजेन्द्र! द्वारवत्यां परा स्मृता। यदि कृष्णे महत्पुण्यं शुक्लदा कार्ष्यं व्रतं बुधैः। अस्यां चैव कृतं दत्तं यत्किञ्चित् प्रतिपादितम्। तच्च सर्वंश्च पुण्यश्च संख्यां वक्तुं न शक्यते। यस्मिन् काले भवेदेतैर्गुणैः षष्ठी युता तदा। पञ्चम्यामेकभक्तन्तु कृत्वोक्तेन विधिना। षष्ठ्यां प्रातः समुत्थाय कृत्वादौ दन्तधावनम्" इत्यादि।

करणव्रतं ब्रह्माण्डपु० "शृणु राजन्! प्रवक्ष्यामि करणव्रतमुत्तमम्। ववाख्यं बालवञ्चैव कौलवन्तैतिलञ्चरम्। वणिजं विष्टिरित्याहुः करणानि पुराविदः। आषाढासिते तु सप्तम्यां शुक्लपक्षे यदा भवेत्। ववाभिधानकरणसम्पन्नदा भवेत्। एवं सप्त विधेयानि ववाख्यान्यथ सप्तमे। बवे तु करणे प्राप्ते पूर्वं पूर्वं समाचरेत्। ब्राह्मणान् भोजयेच्चात्र सप्तसंख्यान् सदक्षिणम्। अथैवं बालवादीनि विष्णुलानि यथाक्रमम्। उक्त्वा सप्त सप्तैव पूर्वोक्तविधिना नृप!। समापयेद्व्रतं भूरिगोभूहेमादिदानतः। एवंव्रते व्रते राजन्! राजसूयाश्वमेधयोः। समग्रं फलमाप्नोति सुखं कीर्तिं महाश्रियम्"।

कमलसप्तमीव्रतं पद्मपु० "अतःपरं प्रवक्ष्यामि व्रतं कमलसप्तमीम्। यस्य संकीर्त्तनादेव तुष्यतीह दिवाकरः। वसन्तमाससप्तम्यां स्नातः मनु गौरसर्षपैः। तिलपात्रे तु सौवर्णं निधाय कमले रविम्। वस्त्रोपवीताभरणगन्धपुष्पैरथार्चयेत्"।

कल्किद्वादशीव्रतं धरणिव्रतोक्तम् "तद्वद्भाद्रपदे मासि शुक्लपक्षे तु द्वादशीम्। समुद्दिश्य विधिना देवमर्चयेत् परमेश्वरम्। नमोऽस्तु कल्किने पादौ हृषीकेशाय वै कटिम्। वक्षोऽग्रध्वंसनायोरु जगन्मूर्त्तिस्तथोदरम्। श्रीवत्साधेति कण्ठन्तु खड्गधारीति वै भुजौ। स्वनाम्ना मस्तकं चक्रे तु विश्वमूर्त्तेस्तथा शिरः। एवमभ्यर्च्य मेधावी प्राग्वत्तस्याग्रतो घटम्। विन्यस्य कल्किनं देवं सौवर्णं तत्र धारयेत्"।

कल्पवृक्षव्रतं पद्मपु० "तत्रैकं पयोदत्ते क्षित्वा काञ्चनं कल्पादपम्। पलाद्दूर्द्धं यथाशक्त्या तण्डुलं सर्पसंस्थितम्"। सूर्यं द्रोणद्वयम् "दत्त्वा ब्रह्मपदं याति कल्पवृक्षव्रतं स्मृतम्"।

कल्याणसप्तमीव्रतं पद्मपु० "सौरधर्मं प्रवक्ष्यामि पार्थ! कल्याणसप्तमीम्। तस्या विधानं वक्ष्यामि यथावद्वृपूर्वकम्। यदा तु शुक्लसप्तम्यामादित्यस्य दिनं भवेत्। सा तु कल्याणिनी नाम विजया च निगद्यते। प्रातर्गत्वा नदीं मनसा स्नानमस्यां समाचरेत्। शुक्लाम्बरधरः पद्मसमेतः परिकल्पयेत्। प्राङ्मुखोऽष्टदलं मध्ये तदुक्तञ्च

सकर्णिकम् । सर्वेष्वपि दलेष्वीशं विन्यसेत् पूर्वतः क्रमात्" इत्यादि ।

काञ्चनपुरीव्रतं गरुडपु० "काञ्चनाख्या पुरी नाम व्रतं त्रैलोक्यपावनम् । शुक्लतृतीया कृष्णा च एकादश्यश्च पूर्णिमा । संक्रान्तिर्वा महाभागे कृष्णा चाष्टमी तिथिः । पर्वस्वेतेषु दातव्या काञ्चनाख्या पुरी शुभा" ।

कामव्रतं भविष्यपु० "पुष्यादितस्रयोदश्यां कृत्वा नक्तं मधौ मधौ । अशोककाञ्चनं दद्यादिन्दुयुक्तं दशाङ्कुलम् । विप्राय वस्त्रसंयुक्तं प्रद्युम्नः प्रीयतामिति । कल्पं विष्णुपुरे स्थित्वा विशोकः स्यात् पुमान् नृप ! । एतत् कामव्रत नाम सदा शोकविनाशनम्" ।

कामदासप्तमीव्रतं भविष्योत्तरोक्तम् । "फाल्गुनामलपक्षस्य सप्तम्यां च घनाघन ! । उपोषितो नरो नारी समभ्यर्च्य तमोपहम् । सूर्यनाम जपन् भक्त्या भावयुक्तो जितेन्द्रियः । तिष्ठन्नुपविशंश्चैव सूर्यमेवानुकीर्त्तयेत् । ततोऽन्यदिवसे प्राप्ते अष्टम्यां नियतो रविम् । स्नात्वा सम्यक् समभ्यर्च्य दद्याद्विप्राय दक्षिणाम्" ।

कामदेवव्रतं विष्णुधर्मोक्तम् । "शुक्लपक्षे महाराज ! त्रयोदश्यामुपोषितः । पूजयेत् कामदेवन्तु वैशाखात् प्रभृति प्रभो ! । गन्धमाल्यानुलेपनधूपदीपान्नसम्पदा । दद्याद् व्रतान्ते विप्राय गन्धवस्त्रयुगं तथा" । "कृत्वा व्रतं वत्सरमेतदिष्टमासाद्य नाकं सुचिरं मनुष्यः । मानुष्यमासाद्य भवत्यरोगः सुखान्वितोरूपसमन्वितश्च" ।

कामधेनुव्रतं वह्निपु० "कार्त्तिकः खलु मासो वै सर्वदेवमयो महान् । कृष्णपक्षे विशेषेण तत्र पञ्च दिनानि तु । पुण्यानि तेषु यद्दत्तमक्षयं सर्वकामिकम्" इत्युपक्रमे व्यभावस्यादिषु तत्र विशेषसञ्ज्ञा "नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा । निर्गता मथ्यमानाब्धौ जयः स्नानं शुभप्रदम्" । कामधेनोराविर्भावभावितस्नेहात् जयः प्रशस्तमित्यर्थः "तत्र स्नात्वा समभ्यर्च्य धेनुं पूज्य प्रयत्नतः । गोदानफलमाप्नोति नरो विगतकल्मषः । एकादश्युपवासोऽथ नरो दिनचतुष्टयम् । कृतेन स्नापयेद्विष्णुं गव्येन पयसापि वा । नक्ताशी गोरसैर्हव्यैः पूजयेन्मधुसूदनम् । गन्धपुष्पैः सुनैवेद्यैर्वस्त्रालङ्कारकुण्डलैः । तस्माच्चमत्रैव च कामधेनुं दद्याः सवत्सिद्धिमत्र तु केशवन्तु । विप्राय वै सर्वगुणाय यत्र कृत्वा व्रतं कृत्स्नमतो हरेत्तु" ।

कामव्रतं पद्मपु० "कामं पूज्य त्रयोदश्यां सुरूपो जायते ध्रुवम् । दृष्टां रूपवतीं भार्यां लभेत् कामांश्च पुष्कलान् । सूत्रमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः" ।

कामषष्ठीव्रतं वराहपु० "कामव्रतं महाराज ! शृणु मे गदतोऽधुना । येन कामाः समृध्यन्ते मनसा चिन्तिता अपि । षष्ठ्यां फलाशनो यस्तु वर्षमेकं व्रतं चरेत् । माघमासे सिते पक्षे पञ्चम्यां नक्तभोजनः । षष्ठ्यान्तु ब्राह्मणेभ्यः ! फलमेकन्तु पार्थिव ! । ततो भुञ्जीत यत्नेन वाग्यतः शुद्धमोदनम् । ब्राह्मणैः सह राजेन्द्र ! अथ वा केवलं फलम् । तमेकं दिवसं स्थित्वा सप्तम्यां पारणं नृप ! । अग्निकार्यं च कुर्वीत शुक्लपक्षेण केशवम् । पूजयित्वा विधानेन वर्षमेकं व्रतं चरेत्" ।

कामावाप्तिव्रतं विष्णुधर्मोत्तरोक्तम् । "कृष्णपक्षे चतुर्दश्यां महाकालमथार्च्चयेत् । तस्मात्कामानवाप्नोति यथेष्टं नात्र संशयः" ।

कार्त्तिकमासव्रतं नारदोक्तम् । "माहात्म्यमभिधास्यामि मासस्यास्य वरानने ! । येन ते जायते भक्तिर्भक्त्या येनार्च्यते हरिः । कार्त्तिके कृष्णपक्षे यः प्राजापत्यरतोऽपि वा । षड्दशाहं पक्षं वा मासं वा वरवर्णिनि ! । क्षपयित्वा नरो याति तद्विष्णोः परमं पदम् । एकभक्तेऽथ वा नक्ते तथा सुभु ! क्षयाचिते । कृते नरेऽराग्निर्भवेद्वै दीपमालया । तस्मात् हरिदिनं पुण्यं तथा वै भीष्मपञ्चकम् । प्रबोधनीं नरः कृत्वा जागरेण समन्वितां । न मातुर्जठरे याति अपि पापान्वितो नरः" ।

कार्त्तिकेयषष्ठीव्रतं भविष्योत्तरम् "मार्गशीर्षे सिते पक्षे षष्ठी भरतसत्तम ! । पुण्या पापहरा ज्ञेया शिवगीता गुहप्रिया । निहत्य तारकं षष्ठ्यां गुहस्तारकराजवत् । रराज तेन दयिता कार्त्तिकेयस्य सा तिथिः । स्नानदानादिके कर्म तस्यामक्षयमुच्यते । येऽस्यां पश्यन्ति गाङ्गेयं दक्षिणाशां समाश्रितम् । ब्रह्महत्यादिपापेभ्यो मुच्यन्ते नात्र संशयः । तस्मादस्यां सोपवासः कुमारपर्वसम्भवम् । राजतञ्च महाराज शृणुष्वयञ्चाथ दारुजम् । कारयित्वार्थसारेण कामाभर्षविवर्जितः । रात्रौ ततः स्नात्वा सम्यगाचम्य बुद्धिमान् । पद्मासनस्थो गाङ्गेयं ध्यायंस्तिष्ठेच्च शक्तितः" ।

कालरात्रिव्रतं कालिकापु० "साधु भक्तोऽसि धर्मज्ञ ! कालरात्रिव्रतं मम । शृणु ! वक्ष्याम्यहन्त्वद्य कर्त्तव्यं विधिवद्व्रथा । माघि चाश्वयुजेऽष्टम्यां शुक्लपक्षे जितेन्द्रियः । सत्यवाक् स्थिरचित्तात्मा निशमस्या

भवेत्सुखी: । कालोव्रतमिदं ख्यातं कर्त्तव्यं सर्वदुःखहृद्भिः" । कालरात्रि काली ।

कालाष्टमीव्रतं वामनपु० "नभस्ये मासि च तथा या स्यात् कृष्णाष्टमी शुभा । युक्ता मृगशिरसैव सा तु कालाष्टमी स्मृता । तस्यां सर्वैकलिङ्गेषु तिथौ स्थितिं शङ्करः । वसन्नसन्निधाने तु तत्र पूजाऽक्षया स्मृता" । इदं व्रतं भाद्रादिवर्षसाध्यम् ।

कीर्त्तिव्रतं पद्मपु० "अश्वत्थं भास्करं गङ्गां प्रणम्यैकत्र वाग्यतः । एकभक्तं नरः कुर्य्यादष्टम्यां वै विमत्सरः । व्रतान्ते विप्रमिथुनं पूजयेद्धेनुसंयुतम् । दद्यात् हिरण्मयं दद्यात् सोऽश्वमेधफलं लभेत् । दिवि देवविमानस्थो गीयतेऽप्सरसाङ्गणैः । एतत्कीर्त्तिव्रतं नाम भूमिकीर्त्तिप्रदायकम्" ।

कुक्कुटीव्रतं भविष्योक्तं २०६३ पृ० ति०त० दृश्यम् ।

कुबेरतृतीयाव्रतं भविष्यपु० "तृतीयायान्तु वित्तेशं वित्ताढ्यो जायते ध्रुवम्" । पूजयित्वेति शेषः "क्रयादिव्यवहारे च लाभो दिव्यगुणो भवेत्" ।

कुमारषष्ठीव्रतं कालोत्तरोक्तम् । "चैत्रशुक्लात् समारभ्य व्रतार्थमधुनोच्यते । उपोष्य विधिना षष्ठीं विशेषात् षण्मुखं यजेत्" ।

कुम्भीव्रतं स्कन्दपु० "एकादश्यां कार्त्तिकस्य शुक्लपक्षे तु कारयेत् । कुम्भादिनरकेभ्यस्तु उद्धरेत् स्वमशेषतः । प्रयत्नात् कार्त्तिके मासि विष्णोरग्रे तु जागरम् । शुक्लैकादशीं रात्रौ विशेषादर्चयन्ति च । चतुरस्रं चतुर्द्वारं गोमयेनोपलिप्य च । चतुर्भिः शालिगोधूमवर्णकैरुपशोभितम् । स्नात्वा नारायणं पूज्य स्थण्डिले प्रतिमासु च । हुत्वा दिशां बलिं दत्त्वा विधानमवधारयेत् । दीपमालान्वितं गन्धपुष्पाद्यैः पूजयेत्ततः । कुम्भौ देवमयौ ध्यात्वा सुव्रते सर्वकिल्बिषैः" ।

कूर्मद्वादशीव्रतं धरणीव्रतोक्तम् "पौषमासस्य या पुण्या द्वादशी शुक्लपक्षतः । तस्यां प्रागिव सङ्कल्पं कुर्यात् स्नानादिकाः क्रियाः । निर्वर्त्त्यैराधयेद्देवं वैकादश्यां जनार्दनम् । पृथङ्मन्त्रैर्द्विजश्रेष्ठ ! देवदेवं जनार्दनम् । कूर्माय पीठं प्रथमन्तु पूज्य नारायणायेति कटिं हरेत्सु । सङ्कर्षणायेत्युदरं हरेत्सु उरो विशोकाय भवाय कण्ठम् । सुवाहवे चैव भुजौ शिरश्च नमो विशालाय मुखम् । सुधूपगन्धैर्नानानिवेदैरथाङ्गशङ्खौ । खनामसन्त्रैश्च सुपूगगन्धैर्नानानिवेदैर्विविधैः फलैश्च । सम्पूज्य देवं कलशं तदग्रे संस्थाप्य माल्यास्तृतदामकण्ठम् । तं रत्नगर्भन्तु पुरेव कृत्वा स्वशक्तितो हेममयञ्च देवम् । समन्दरं कूर्मरूपेण कृत्वा संस्थापयेत्ताम्रपात्रे हृतस्य । पूर्णे घटे पञ्चसु सन्निवेश्याथो ब्राह्मणायैव सर्वं तु दद्यात्" । हृतस्य पूर्णे ताम्रपात्रे समन्दरं कूर्मरूपं निधाय घटोपरि निवेद्य प्रभाते दद्यादित्यर्थः" ।

कृच्छ्रव्रतानि विष्णुरहस्ये "सुपुण्ये कार्त्तिके मासि देवर्षिपितृसेविते । क्रियमाणे व्रते नृणां स्वल्पेऽपि स्यान्महाफलम् । कृत्वा सवत्सरं पुण्यं तत्तन्मासोदयेषु पूजितः । वर्षांयाः कार्त्तिकः पुण्यः कार्त्तिकाङ्गोद्भवं कृच्छ्रम् । नैवेद्यं पुष्पधूपञ्च अर्चनं सुविलेपनम् । दत्त्वैकस्मिन् कार्त्तिके विष्णोः फलं सांवत्सरं लभेत् । यतः कार्त्तिकमासाद्य सदैव शुभकाङ्क्षिभिः । हरिसन्दिग्धं कर्त्तव्यं सुखकृद्भा सुकरं व्रतम् । कार्त्तिकस्यासिते पक्षे वायुभक्षश्चतुर्दशीम् । समुपोष्य नरो भक्त्या पूजयेद्गरुडध्वजम् । उपवासस्तु कर्त्तव्यो वारिमध्ये स्थितेन च । जलकृच्छ्रमिदं कृत्वा विष्णुलोकं व्रजेन्नरः । दशम्यां पञ्चगव्याशी एकादश्यामुपोषितः । अर्चयेच्चाच्युतं देवं नियतश्च व्रतञ्चरेत् । कार्त्तिकस्यासिते कृत्वा नरो देवव्रतञ्चरेत् । दामोदरं समभ्यर्च्य देवो वैमानिको भवेत् । पयः क्षीरं दधि हृतं सप्तम्यादिचतुर्दिनम् । कार्त्तिकस्यासिते पीत्वा एकादश्यामुपोषितः । कृच्छ्रं पैतामहं नाम कुर्वन् संपूजयेद्धरिम् । प्राप्नोति परमं विष्णोः स्थानं त्रैलोक्यपूजितम् । त्रिरात्रं पयसः पानमुपवासपरश्च । षष्ठ्यादौ कार्त्तिके शुक्ले कृच्छ्रो माहेन्द्र उच्यते" इत्यादि ।

कृच्छ्रचतुर्थीव्रतं स्कन्दपु० "मार्गशीर्षे शुभे मासि सिते पक्षे तु षण्मुखम् । चतुर्थ्यां नियतं दृष्ट्वा विघ्नेशं पूज्य भक्तितः । पुष्पैर्गन्धैश्च नैवेद्यैः लड्डुकैश्च सुसंस्कृतैः । पललैस्तिलपिष्टैश्च तथा सोड्डानकैः प्रभुम् । पूजयित्वा विधानेन प्रार्थयेत्तत्र मानवः" ।

कृत्तिकाव्रतं भविष्योत्तरोक्तम् । "कार्त्तिक्यां पौर्णमास्यान्तु दृष्ट्वोदयात् कृत्तिकाव्रतम् । षट् मासांस्तु व्रतं यावदिदं सञ्चिन्त्य चेतसि । पारणे पारणे चापि पुराणज्ञे द्विजोत्तमे । उद्यापनं प्रयच्छेत यथा विभवसारतः । कृत्तिकासु स्वयं सोमः कृत्तिकासु हृदस्थितिः । यदा स्यात् सोमवारेण सा महाकार्त्तिकी स्मृता । ईदृशी बहुभिर्वर्षैर्बहुपुण्यैर्न लभ्यते । लब्धापि न हृता नेया सु-

दीच्छेच्छ्रेय आत्मनः। अन्यापि कार्त्तिकी पार्थ! सप्तपौषत्रा विधानतः। तस्या विधानं राजेन्द्र! शृणुष्वैकाग्रमानसः। कार्त्तिके शुक्लपक्षस्य पौर्णमास्यां दिनोदये। नक्तेन नियमं कुर्याद् दन्तधावनपूर्वकम्। उपवासेन वा शक्त्या ततः स्नात्वा जलाशये" इत्यादि। कृष्णचतुर्दशीव्रतं भविष्यपु० "बालवृद्धातुराणाञ्च भोगिनां स्त्रीषु वालिशे। विधानन्तेषु वक्ष्यामि सुच्यते ते यथा श्रुत!। भूतायां फाल्गुने कुर्यात् कृष्णपक्षेऽतिभक्तितः। दरिद्राणामनाथानामशक्तानाञ्च विशेषतः। सर्वकामप्रदं कृष्णचतुर्दश्यां शिवव्रतम्। रात्रौ विशेषपूजा तु महास्नपनसंयुता। महादीपशतं देयं शतमष्टोत्तरं पुनः। शस्तं गुग्गुलं धूपं शिवं प्रणुपतिं यजेत्। खण्डखाद्यान्यनेकानि भक्ष्याणि विविधानि च। यथा समर्प्ययेत् भक्त्या वित्तशाठ्यं विना श्रुत!। रात्रौ जागरणं कार्य्यं शिवस्याग्रे शिवं जपेत्"। शिवधर्मोक्तम् "नारी चोपवसेद्दृष्टं कृष्णामेकाञ्चतुर्दशीम्। वर्षान्ते प्रतिमां कृत्वा शालिपिष्टमयीं शुभाम्। गीतानुलेपनैर्माल्यैः पीतवस्त्रैस्तु पूजयेत्। पूर्वोक्तमखिलं कृत्वा शिवाय विनिवेदयेत्"। कृष्णद्वादशीव्रतं वराहपु० "एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन दानेन न निर्दारिद्र्यको भवेत्। मार्गशीर्षस्य मासस्य श्रुतं सर्वं त्वया बुध!। अशीयान्मासमासेवं कुर्यात्संवत्सरं व्रती। नामानि देवदेवस्य केशवस्य पृथक् पृथक्। कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दनः। उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः। योगेशः पुण्डरीकाक्षोमाधवोमान्यतुल्यमात्"। विष्णुधर्मोत्तरोक्तम् "माघ्यान्तु समतीतायां द्वादशी या भवेन्नृप!। ततः प्रभृति कर्त्तव्यं व्रतमेतदुपोषिता। द्वादशीषु च कृष्णासु नाम कृष्णस्य कीर्त्तयेत्। तेनैव नाम्ना कर्त्तव्यो जपहोमौ तथैव च। तिलैर्निवेदनं कार्य्यं होमः कार्य्यस्तथा तिलैः। पौषप्रान्तु समतीतायां कृष्णा या द्वादशी भवेत्। तस्यां व्रतावसाने तु तिलान् दद्याद् द्विजातिषु। सुवर्णञ्च महीपाल! रक्तवस्त्रं तथैव च। संवत्सरमिदं कृत्वा व्रतं मनुजपुङ्गव!। तिर्य्यग्योनिं न चाप्नोति स्वर्गलोकञ्च गच्छति। यावज्जीवं व्रतमिदं यः करोति समाहितः। न स दुःखमयाप्नोति नारकं मनुजोत्तम!। यत्र वैतरणी दुर्गा क्षुरधारा सुपर्वता। यातनां यातना यत्र तत्रासौ न गमिष्यति"। कृष्णव्रतं पद्मपु० "एकादश्यां तु नक्ताशी सक्तुकं विनिवेदयेत्। विप्रायेति शेषः "कृत्वा सत्यं च सौवर्णं स विष्णोः पदमाप्नुयात्। एतत् कृष्णव्रतं नाम कल्पान्ते सुखनाशकृत्"। कृष्णषष्ठीव्रतं भविष्योत्तरोक्तम्। "कृष्णषष्ठ्यां प्रयत्नेन कृत्वा नक्तं विधानतः। मासो मार्गशिरस्यादावर्चयेदिति मानवः"। विधिवत् प्राप्य गोमूत्रमनाहारो निशि स्वपेत्। अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः"। इत्यादि तदवधिवर्षसाध्यमिदम्। कृष्णाष्टमीव्रतं देवीपु० "कृष्णाष्टम्यां विधानं वै निखिलं क्रियते यथा। क्रमेण मे तथा ब्रूहि तत् कर्त्तव्यं सुरेश्वर"। ईश्वर उवाच "हेमन्ते त्वथ सम्प्राप्ते मासि मार्गशिरे तथा। नक्तं कृत्वा शुचिर्भूत्वा गोमूत्रं प्राश्येच्छिवे"। नक्तं कृत्वा नक्तमनुकल्पम् "आहरेद्दानं यत्र यथाशक्त्या तथाशयेत्। तेन नक्तं सकृद्दिष्टं प्राशिता प्राशितेन च" इति। तेन नक्तं सकृद्दिष्टं प्राशितेनचेति क्वचित्प्राशितेन क्वचिदप्राशितेनेत्यर्थः। "कृष्णाष्टम्यां विधानं वै शङ्करं पूज्य भक्तितः। अतिरात्रस्य यज्ञस्य फलमश्नुयं भवेत्। स्मरेच्च शाङ्करं नाम सायं रात्रौ दिवा यथा" इत्यादि। तदवधि वर्षसाध्यम् "कृष्णाष्टम्यां चैत्रमासे स्नातो नियतमानसः। कृष्णमभ्यर्च्य पूजाञ्च देवक्यां कुरुतेऽनघः। निराहारो जपन्नाम कृष्णस्य जगतः पतेः। उपविश्य जपन् स्नातः श्रुतप्रस्खलितादिषु। पूजायाञ्चापि कृष्णस्य सप्तवारान् प्रकीर्त्तयेत्। पाषण्डिनो विकर्मस्थान् नालपेच्चैव नास्तिकान्। प्रभाते वाम्बुना स्नातो दद्याद्विप्राय दक्षिणाम्। भुञ्जीत कृतपूजस्य कृष्णस्यैव जगत्पतेः" इत्यादि। इदं तदवधि वर्षसाध्यम्। भविष्योत्तरोक्तम्। "कृष्णाष्टमीव्रतं पार्थ! शृणु पापहरं परम्। धर्मस्य जननं लोके रुद्रप्रीतिकरं परम्। मार्गशीर्षेऽथ वै मासि दन्तधावनपूर्वकम्। उपवासस्य नियमं कुर्वन्नक्तस्य च व्रती"। समर्थासमर्थभेदेन व्यवस्थितो विकल्पः। इत्यादि तदवधि वर्षसाध्यमिदम्। व्रतान्तरं कृष्णाष्टमीशब्दे द्रष्टव्यम्। कृष्णैकादशीव्रतं विष्णुधर्मोत्तरोक्तम्। "एकादशी तथा कृष्णा फाल्गुने मासि भार्गव!। छन्दोदेवस्य कर्त्तव्या पूजा धर्मभृतांवर। पूजनाच्छन्ददेवस्य येनायं गुणवर्द्धितम्। न प्राप्नोति तथा प्रीतिं गुणवन्तं न संशयम्"। कोकिलाव्रतं भविष्योत्तरोक्तम्। "आषाढ़पौर्णमास्यान्तु अन्याकाशे हुपस्थिते। शङ्खध्वनेर्नाशमेकं श्रावणीप्रभृति

क्षकम्। स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती। भोक्ष्यामि नक्तं भूशय्याङ्करिष्ये प्राणिनान्द्यायम्। इति सङ्कल्प्य पुरुषो नारी वा ब्राह्मणान्तिके। प्राप्यानुज्ञान्ततः प्रार्च्य सर्वसामग्रिसंयुतः" इत्यादि।

कोटीश्वरीतृतीयाव्रतं स्कन्दपु० "शृणु भद्रे! परं गुह्यं सर्वकामफलप्रदम्। दुर्भगानाञ्च नारीणां सौभाग्यकरणं परम्। कोटेश्वरीति विख्यातं ततः कोटीश्वरीव्रतम्। तृतीया शुक्लपक्षे तु माघि भाद्रपदे भवेत्। तस्यां व्रतं तु संगृह्य यावद्वर्षचतुष्टयम्। उपवासेन कर्त्तव्यं वर्षे वर्षे तु सुन्दरि!। अक्षतानां तण्डुलानां तिलानां वा सुलोचने!। लक्ष्मीमेकं विरचयेत्राथ लिपेत् पयसि शोभने। क्षीरसंमिश्रितैः कार्या देव्यामूर्त्तिः सुलोचना। कृत्वा तु पुष्पप्राकारं पुष्पमालाभिमण्डितम्। संस्थाप्य पार्वतीं देवीं पूजयेद्भक्तियन्त्रितः" इत्यादि।

कोकिलाव्रतं विष्णुरहस्योक्तम्। "माघि चाश्वयुजे शुक्ल एकादश्यामुपोषितः। कल्पीयात् तु व्रतं श्रेष्ठं कोकिलाख्यं महाफलम्। अहिंसकः शुचिर्भूत्वा धौतवासा जितेन्द्रियः। द्वादश्यामर्चयेत् कृत्वा वासुदेवं जगद्गुरुम्"।

क्षेमव्रतं विष्णुधर्मोत्तरोक्तम्। "यक्षाणां राक्षसानाञ्च चतुर्दश्याञ्च पूजनम्। कृत्वा क्षेममवाप्नोति क्रियायाफलमेव च"।

गणपतिचतुर्थीव्रतं भविष्यपु० "चतुर्थ्यान्तु महाराज! निराहारो व्रतान्वितः। दत्त्वा तिलान्नं भुङ्क्ते यः स्वयं भुङ्क्ते तिलोदकम्"। दिवा निराहारो रात्रौ भुङ्क्ते इति विरोधपरिहारः। वर्षद्वये समाप्तिर्व्रतस्य तु यदा भवेत्। विनायकस्तस्य तुष्टो ददाति फलमीप्सितम्"।

गन्धव्रतं शिवधर्मोक्तम् "पौर्णमास्यामुपवसेदष्टमेकं सुयन्त्रितः। वर्षान्ते सर्वगन्धाढ्यां प्रतिमां विनिवेदयेत्। सुविचित्रैर्मनोज्ञायैर्दिव्यगन्धविभूषितैः। युगकोटिशतं सार्धं शिवलोके महीयते"।

गलन्तिकाव्रतं शिवरहस्योक्तम् "पवित्रतोयपूर्णैर्यः कुम्भैः ग्रीष्मे शिवोपरि गालयेद्तु यः पयोधारां स आप्नुपदमश्नुते"।

गायत्रीव्रतं गरुडपु० "अधोक्तमं परं ब्रह्मत्परं शृणु! भद्रदम्। चतुर्दश्यां महाभाग! सर्वरोगार्त्तिशान्तये। ज्वरशूलप्लीहशूलकुष्ठातिसारसंयुतः। मर्त्यो नित्यमिदं कार्यं तदार्त्तिव्यपशान्तये। स्नात्वा तु धृतसङ्कल्पः सर्वकामविवर्जितः। आदित्यमुपतिष्ठेत गायत्रीञ्च जपन्मुहुः। उदयात् पूर्वमारभ्य यावदस्तं गतो रविः। निराहारो जितक्रोधो तावत्तिष्ठेत् समाहितः। रक्तवस्त्रैस्तु देवमर्चयेत् पुरुषोत्तमम्। उपोष्य विधिवत्! स्नात्वा तथा पर्वणि कुव्रतः"। पर्वणि, पौर्णमास्याम्। एतच्च शुक्लचतुर्दशीव्रतं, पुराणे शुक्लपक्षस्य व्रतप्रकरणे पठितत्वात्।

गुडतृतीयाव्रतं भविष्यपु० "गुडपूपास्तु दातव्या माघि भाद्रपदे तु या। तृतीया पायसेनापि वामदेवस्य प्रीतये"।

गुणावाप्तिव्रतं विष्णुपु० "अतःपरं प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव। द्विधा तु देवदेवस्य मूर्त्तिर्भवति यादव। घोरा सौम्या शिवा चान्या घोरा भवति पावका। शिवा चाग्निपतिर्यस्मादग्नीषोमात्मकं जगत्। द्विधा घोरा विनिर्दिष्टा द्विधा सौम्या ततः पुनः। घोरा वह्निश्च सूर्यश्च सौम्या सोमजलाधिपौ। तेषां च पूजनं कार्यं प्रतिपत्प्रभृति क्रमात्। शुक्लपक्षात् तथारभ्य फाल्गुनस्य द्विजोत्तम!। आदित्यं पूजयेद्राजन्! प्रथमेऽह्नि परः शुचिः। द्वितीयेऽह्नि तथा वह्निं तृतीयेऽह्नि जलाधिपम्। चतुर्थेऽह्नि यथाद्रुद्रं यथावन्मानवोत्तमः"।

गुरुव्रतं भविष्योक्तम् "अनुराधास्वथाचार्यं देवानां पूजयेद्भक्तितः। पूर्वोक्तक्रमयोगेन सप्त नक्तान्यथाचरेत्। हैमं हैमसमे पात्रे स्थापयेच्च हरिस्मृतम्। पीताम्बरयुगच्छन्नं पीतयज्ञोपवीतकम्। पाद्मकाञ्चनसंस्थितं हृदयं सकमण्डलुम्। संपूज्य पुष्पनिकरैर्धूपैर्दीपाक्षतादिभिः। खण्डखाद्योपहारञ्च द्विजाय प्रतिपादयेत्"।

गुर्वष्टमीव्रतं भविष्यपु० "माघि भाद्रपदे राजन्! शुक्लपक्षे यदाष्टमी। गुरुवारेण संयुक्ता सा तिथिर्ह्यर्कवर्द्धनी। सम्पूर्णा सर्वपापघ्नी प्रेतयोनिविनाशनी। कृत्वौदाच्चियसं सम्यक् दन्तधावनपूर्वकम्। एकभक्तेन राजेन्द्र! तस्यां देवी हरिष्यति:। स्नानं नद्यां तडागे वा गृहे वा नियतात्मना। सौवर्णं कारयेच्चौवं राजतं वा नरोत्तम! तस्याभावे यथाशक्त्या श्रीखण्डेनापि कारयेत्"।

गुह्यकद्वादशीव्रतं भविष्योत्तरे "द्वादश्यां गुह्यकानर्च्य पलाशतसंयुतैः। कृत्वा विप्राय वै दद्याद्वासपरायणः। एतद्वै गुह्यकं प्रोक्तं व्रतं पापहरं शुभम्"।

गृहपञ्चमीव्रतं भविष्योत्तरे "सर्वौषध्युदकस्नातः शुक्लायां पूज्य पञ्चमम्। सर्वोपस्करदानञ्च यः करोति गृहाश्रमे। गृहाटोद्भवखण्डं भूर्पं शिखां स्थालीञ्च पञ्चमीम्"।

स्टङ्गाटः पेयश्चयन्मधुदुग्धं धान्यकल्पकम् । "उदङ्मुखश्च पूर्वस्य एतेषामङ्गमस्य यत् । एतानि स्टङ्गिणां भेदे प्रख्याप्य पुरुषोत्तम !। उपस्करोति नारी न शोदति कदाचन । एतद्दुष्टकृतं नाम सर्वसौख्यप्रदायकम्" ।

गोपद्मिरात्रव्रतं भविष्योक्तम् "पार्थ! भाद्रपदे मासि शुक्लपक्षे दिनोदये । तृतीयायां चतुर्थ्यां च अद्वया परिवत्सरम् । उपवासेन स्टङ्गीयात् व्रतं कृत्वा तु गोपदम् । स्नात्वा नरोऽथ नारी वा पुष्पधूपविलेपनैः । दत्त्वा च दक्षिणां चैव पिष्टकैर्वेदमाचार्य वा । अभ्यङ्गवेद्यां स्टङ्गे सप्तधान्ये चैव भारत !। दद्याद्वस्त्रयुग्मं च भक्त्या वासः पुरांपरार्द्धयोः । अनग्निपक्वं भुञ्जीयात् तैलक्षारविवर्जितम्" ।

गोपालनवमीव्रतं गरुडपु० "तथा सप्तदशम्यां नवम्यां स्नानमाचरेत् । शुचौ तत्पुलिने तोये सिकताभिरलङ्कृते । वत्सदेवयुतं विष्णुं गोपीजननिषेवितम् । वनमालाधितोरस्कं वन्यपुष्पैरलङ्कृतम् । बर्हिबर्हकृताबोधं पीतकौशेयवाससम् । समानवेषैरत्यन्तैः क्रीडद्भिरितरेतरम् । हतं गोपकुमारैश्च नीलाकुञ्चितमूर्द्धजम् । ध्यात्वा देवं परं विष्णुं सर्वलोकेश्वरेश्वरम् । वन्यपुष्पैश्च गन्धाद्यैः पूजयित्वा यथाविधि" ।

गोमयादिसप्तमीव्रतं भविष्यपु० "यः क्षिपेद्गोमयाहारः द्वादश्यां सप्तमीः क्रमात् ।राजेन्द्र ! यावकाहारः शीर्णपर्णाशनोऽपि वा । क्षीरान्नी वैकभक्तो वा भिक्षाहारोऽथ वा पुनः । जलाहारोऽथ वा भूत्वा पूजयित्वा दिवाकरम् । पुष्पोपहारैर्विविधैः पञ्चसौगन्धिकोत्पलैः । नानाप्रकारैर्गन्धैस्तु धूपैर्गुग्गुलचन्दनैः । शर्करापायसाद्यैश्च विचित्रैश्च विभूषयैः । अर्चयित्वा नरश्रेष्ठ ! क्षिरण्याद्यातिभिर्नरैः । यथोक्तफलमाप्नोति क्रतुभिर्भूरिदक्षिणैः । तदत्र प्राप्यते वीर ! सप्तम्यां केवलं रवेः" ।

गौरीचतुर्थीव्रतं पद्मपु० "उमाचतुर्थ्यां माघे तु शुक्लायां योगिनीजनैः । प्रागभक्षयित्वा दृष्ट्वा च भूयः स्वाद्भात् स्वकैर्गृहैः । तस्मात् सा तत्र संपूज्या नरैः स्त्रीभिर्विशेषतः । कुन्दपुष्पैः पद्मजेन सम्यग्भक्त्या समाचितैः । कुङ्कुमालक्तकाभ्यां च रक्तसूत्रैः सकज्जलैः । वस्त्रैः पुष्पैस्तथा धूपैर्दीपैर्बलिभिरेव च । गुडार्द्रकाभ्यां पनसफलबीजाभ्यां पायसैः । पूजया स्त्रियश्च विधवास्तथा विप्राश्च योषितः । सौभाग्यवृद्धये पश्चात् भोक्तव्यं तद्भिः सकेति" ।

गौरीव्रतं कालोत्तरोक्तम् "गौरीव्रतमथो वक्ष्ये स्त्रीणां सौभाग्यवर्द्धनम् । चैत्रशुक्लतृतीयायां गौरीव्रतं समाचरेत् । उपोष्य तु प्रयत्नेन विधानमिदमाचरेत्" ।

गोवत्सद्वादशीव्रतं भविष्योत्तरे "संप्राप्ते कार्त्तिके मासि शुक्लपक्षे नृपोत्तम !। द्वादश्यां लवणक्लृप्तः स्नात्वा पूर्वे जलाशये । नरो वा यदि वा नारी नक्तं सङ्कल्प्य चेतसि । ततो मध्याह्नसमये कृत्वा देवार्चनादिकम् । प्रतीक्षेतागतं भक्त्या गवां गोष्ठान्तरस्थः । सवत्सां तुल्यवर्णां च गौरिणीं गां पयस्विनीम् । चन्दनादिभिराचिष्य पुष्पमालाभिरर्चयेत्" ।

गोविन्दद्वादशीव्रतं विष्णुरहस्ये

"द्वादश्यां भोजयेद्विप्रान् तेभ्यो दद्याच्च दक्षिणाम् । प्रतिमासं तिथौ तस्यां क्षीरेभ्यो दद्याद्घृताक्तिकम् । गवां क्षीरेण संयुक्तं दत्त्वा वाऽथ घृतेन वा । कृत्वापाके च लवणमीषदाहारसंयुतं व्रती । संवत्सरमुपोष्यैव गोविन्दद्वादशीं नरः । पुनर्गोभ्यो यथा भक्त्या भूयो दद्याद्घृताक्तिकम् । गोविन्दद्वादशीं वा तु उपोष्य विधिवन्नरः । प्राप्नोति विधिवद्दत्त्वा गोवृषस्य यत् फलम्" ।

चण्डिकाव्रतं भविष्योत्तरोक्तम् "चतुर्थ्यां च चतुर्दश्यां पक्षयोरुभयोरपि । योऽश्नीयेकं न भुञ्जीत चण्डिकाराधने रतः । स याति परमं स्थानं यत्र सा चण्डिका स्थिता" ।

चतुर्दशीजागरव्रतं कालिकापु० "कार्त्तिके शुक्लभूतायां हरं स्नाप्य घृतादिभिः" । शुक्लभूतायां शुक्लचतुर्दश्याम् "समालभ्य न्यमेद्भूयः सौवर्णं वा प्रसूनकम् । सुरभिभिस्ततः पुष्पैरभ्यर्च्य गुग्गुलं दहेत् । नैवेद्यं च पुनर्दत्त्वा बलिं वाह्ये विनिःक्षिपेत् । वितानं दीपमादर्शं वस्त्रयुग्मं ध्वजास्तथा । धूपोत्क्षेपञ्च घण्टाञ्च दत्त्वा देवाय शम्भवे । प्रदक्षिणं ततः कुर्याद्दण्डवद्भूरवस्य हि । ततस्तत्रोपविष्टश्च जागरं परिकल्पयेत्" ।

चतुर्दशीव्रतं भविष्योत्तरे "चतुर्दश्यां निराहारः समभ्यर्च्य त्रिलोचनम् । पुष्पधूपादिनैवेद्यैः रात्रौ जागरणेन च । पञ्चगव्यं निशि प्राश्य स्वपेद्भूमौ विमत्सरः" ।

चतुर्दशव्रतनीलव्रतं भविष्योत्तरे "कृष्ण ! नक्तोपवासस्य विधानं यादवोत्तम !। येन विज्ञानमात्रेण नरो मोक्षमवाप्नुयात् । येषु केषु च मासेषु शुक्लपक्षे चतुर्दशीम् । ब्राह्मणं भोजयित्वा तु प्रारभेत् श्रुतितो व्रतम् । मासि मासि भवन्ति ह्यष्टमी च चतुर्दशी । शिवार्चनरतो भूत्वा शिवध्यानैकमानसः । वसुधां भाजनं कृत्वा भुञ्जीयान्नक्तभोजनम् । उपवासात्परं भैक्ष्यं भैक्ष्या

तृपरनयाचितम् । अयाचितात् परं नक्तं तस्माच्चक्तेन भोजयेत् । देवैश्च भुक्तं पूर्वाह्ण मध्याह्ने मुनिभिस्तथा । अपराह्ण च पितृभिः सन्ध्यायां गुह्यकादिभिः । सर्ववेलामतिक्रम्य नक्तभोजी सदा भवेत् । हविष्यभोजनं ह्यानं सत्यमाहारलाघवम् । अग्निकार्यमधःशय्यां नक्तभोजी सदा भवेत्" ।

चतुर्मासी(चातुर्मास्य) व्रतं भविष्योत्तरे "शृणु पार्थ ! प्रवक्ष्यामि गोविन्दशयनव्रतम् । कटिदानं सप्तम्यानं चतुर्मासीव्रतक्रमम् । मिथुनस्थे सहस्रांशौ स्नापयेन्मधुसूदनम् । तुलां प्राप्ते महाराज ! पुनरुत्थापयेच्च तम् । अधिशयिते च देवे एष एव विधिक्रमः । नान्यथा स्नापयेत् कृष्णं नान्यथोत्थापयेत्तथा । आषाढस्य सिते पक्षे एकादश्यामुपोषितः । स्नापयेत् प्रतिमां विष्णोः शङ्खचक्रगदाधराम् । काञ्चनीं राजतीं ताम्रमयीं पित्तलजां तथा । पीताम्बरधरां सौम्यां पर्यङ्के चाश्विते शुभे । शुक्लवस्त्रपटच्छन्ने सोपधाने सुपूजिते । प्रभावेऽस्य ततो विष्णोः कृताङ्घ्रिपुटस्तथ । चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि । इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत !। स्त्री वा नरो वा मद्भक्तो धर्मार्थं सुदृढव्रतः । गृह्णीयान्नियमानेतान् दन्तधावनपूर्वकान् । तेषां फलानि वक्ष्यामि तत्कर्तॄणां पृथक् पृथक् । मधुस्वरो भवेद्राजा ! पुरुषो गुडवर्जनात् । तैलस्य वर्जनादेव सुन्दराङ्गः प्रजायते । कटुतैलपरित्यागाच्छत्रुनाशमवाप्नुयात् । मधूकतैलत्यागेन सौभाग्यमतुलं लभेत् । योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् । कटुकान्नतिक्तमधुक्षारकषायषड्रसम् । यो वर्जयेत् स वैरूप्यं दौर्भाग्यं नाप्नुयात् क्वचित् । ताम्बूलं वर्जयेत् भोगी रक्तकण्ठश्च जायते । घृतत्यागाच्च लावण्यं सर्वस्निग्धतनुर्भवेत् । फलत्यागाच्च मतिमान् वह्नपुत्रश्च जायते । शाकपत्राशनाद्भोगी क्षपकादमलो भवेत् । पादाभ्यङ्गपरित्यागाच्छिरोऽभ्यङ्गं विवर्जयेत् । दीप्तिमान् दीप्तकाशेन सोऽपि क्षोद्रपतिर्भवेत् । दधिदुग्धैकनियमी गोभक्तो गोपतिर्भवेत् । इन्द्रातिथित्वमाप्नोति स्थालीपाकस्य वर्जनात् । लभते सद्गतिं दीर्घां तैलपक्वस्य वर्जनात् । भूमौ प्रस्तरशायी च विप्रो मुनिवरो भवेत् । सदा मुनिः सदा योगी मधुमांसस्य वर्जनात् । निर्व्याधिर्नीरुगोजस्वी स्त्रीरामर्द्यं विवर्जयन् । एवमादिपरित्यागात् धर्मः स्यात् सुखनन्दन !। एकान्तरोपवासेन ब्रह्मलोके महीयते । धारणाद्वत्सरोन्नाद्य मङ्गलस्नानफलं लभेत् । मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत् । अयं चातुर्मास्यव्रतारम्भो गुर्वस्तमयादावपि कार्यः । यदाह बृहद्गर्गः "न शैशवञ्च मौढ्यञ्च शुक्रगुर्वोर्न वालते" । "खण्डत्वं चिन्तयेन्नादौ चातुर्मास्यविधौ नरः । पादाभिवन्दनाद्विष्णोर्लभेद्दानजं फलम् । भूमौ भुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् । नमोनारायणायेति जपन्नृयज्ञफलं लभेत् । विष्णुपादाब्जसंस्पर्शाद्दिनपापात् प्रमुच्यते । पादोदकाभिषेकाद्वै गङ्गास्नानं दिने दिने । पर्वसु च नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् । नित्यं शास्त्रपुराख्यानान्नाकान् यस्तु प्रबोधयेत् । व्याधस्तुथति तस्याशु विष्णुलोकं स गच्छति । कृत्वा प्रेक्षणकं विष्णोर्लोकमक्षयसं लभेत् । तोयास्नुस्नापनाद्विष्णोर्निर्मलं देहमाप्नुयात् । पञ्चगव्याशनात् पार्थ ! चान्द्रायणफलं लभेत् । अयाचितेन प्राप्नोति पुत्रान् धर्म्यान्नघेषतः । षष्ठान्नकालभोक्ता यः कल्पस्थायी भवेद्दिवि" । षष्ठान्नकालभोक्ता उपवासद्वयान्तरितैकभक्तः "शिलोञ्छलेन भुञ्जानः प्रयागस्नानमाप्नुयात् । विष्णुदेवकुले कुर्यादुपलेपनमार्जने । कल्पस्थायी भवेद्राजा स नरो नात्र संशयः । प्रदक्षिणशतं यस्तु करोति स्तुतिपाठकः । हंसयुक्तविमानेन स तु विष्णुपुरं व्रजेत् । गीतवाद्यकरो विष्णोर्गान्धर्वं लोकमाप्नुयात् । यामद्वयं जलत्यागाच्च रोगैरभिभूयते । गुडवृती नरो दद्याद्धृतं ताम्रभाजनम् । सहिरण्यं नृपश्रेष्ठ ! लवणस्याप्ययं विधिः" ।

चतुर्मूर्त्तिचतुर्थीव्रतं विष्णुधर्मोत्तरोक्तम् "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव । वासुदेवांशकात् जाताः सर्वे देवगणा नृप !। अधिकेन तु लेशेन साध्या जातास्तथा सुराः । तत्रापि चार्धकांशेन चतुरात्मा हरिःस्मृतः । नरो नारायणश्चैव हरिः कृष्णश्च वीर्यवान् । चतुरात्मा हरिर्जातो गृहस्थस्य यादव !। आदित्येषु तु यावुक्तौ मित्रारुणसंज्ञकौ । तावेव नान्यौ जानीहि हरिकृष्णौ च यादव । आदित्येषु यावुक्तौ शक्रविष्णू सुरोत्तमौ । तावेव सिद्धसाध्येषु नरनारायणौ पुनः । चैत्रशुक्लचतुर्थ्यान्तु सोपवासस्तु पूजयेत् । देवेशं चतुरात्मानं चित्तशक्त्या नराधिप !। व्रतमेतच्चरः कृत्वा पूर्णद्वादशवत्सरम् । न दुर्गतिमवाप्नोति मोक्षोपायञ्च विन्दति" ।

चतुर्युगव्रतं विष्णुधर्मोक्तम् "इदमन्यत् प्रवक्ष्यामि चतुर्युगव्रतं तव । कृतादिकं चतुर्युगं पूजयेत् सुसमाहितः । प्रथमे

चैत्रशुक्लस्य दिने पूज्यं व्रतं युगम्। श्वेतेन वस्त्रयुग्मेन गन्धमाल्यादिना तथा। चैत्रशुक्लसमारभ्य अष्टमेऽहनि पूजयेत्। व्रतं शुक्लेन सर्वेण गन्धमाल्यादिना द्विज!। द्वितीयेऽहनि रक्तेन तथा लोकान्तु पूजयेत्। तृतीयेऽहनि पीतेन द्वापरं पूजयेद् बुधः। चतुर्थेऽहनि कृष्णेन त्रिव्रतं संपूजयेद् युगम्। सिद्धार्थकैः कुङ्कुमेन तथैव च हरिद्रया। तथैवामलकैः स्नानमम्बुदैर्वरुक्रमात्। क्षीरेण प्राणयात्रान्तु कुर्यात् प्रत्यहमेव च। कृत्वा व्रतं वत्सरमेतदेकं चतुर्युगं मोदति नाकपृष्ठे। संपूज्य देवं युगमूर्त्तिसंज्ञं चतुर्युगं याति महीं समग्राम्"।

चन्द्रव्रतं वराहपु० "चन्द्रव्रतं पञ्चदश्यां शुक्लायां नक्तभोजनम्। दश पञ्च च वर्षाणि व्रतमेतत् समाचरेत्। अश्वमेधसहस्राणि राजसूयशतानि च। इष्टानि तेन राजेन्द्र! एतद्व्रतं समाचरेत्"। पद्मपु० "चान्द्रायणञ्च यः कृत्वा हैमञ्चन्द्रं निवेदयेत्। चन्द्रव्रतमिदं प्रोक्तं चन्द्रलोकप्रदायकम्"।

चन्द्ररोहिणीशयनव्रतं पद्मपु० "रोहिणीचन्द्रशयनं सोमव्रतमिहोत्तमम्। तत्क्षीरायणसञ्ज्ञांश्चमर्क्षवेदेन्दुनामभिः। यदा सोमदिने युक्ता भवेत्पञ्चदशी क्वचित्। अथ वा ब्रह्मनक्षत्रं पौर्णमास्यां प्रजायते। तदा स्नानं नरः कुर्यात् पञ्चगव्येन सर्वदैः"।

चन्द्रार्कव्रतं विष्णुधर्मोत्तरोक्तम् "श्रावणास्यान्तवेलायां सोपवासो नरोत्तम!। पक्षद्वये पूजयन्ति चन्द्रार्कैकराशिगौ। आदित्यमण्डलके यजेनं सोऽग्नारके। आदित्यं सर्वरक्तेन चन्द्रं शुक्लेन यादव!। माल्यादिना महाभाग! होमयेत् तिलतण्डुलान्। घृतक्षीरयुतान् राजन्! तथार्चयेद्यथाविधि। व्रतान्ते ब्राह्मणेन्द्राय! कनकं प्रतिपादयेत्। रजतं वा महाभाग! यथेच्छेद्भूतिमात्मनः। कृत्वा व्रतं वत्सरमेतदिदं दद्याच्च दीपान् विधिवत् प्रभूतान्। चान्द्रं पदं प्राप्य विवर्त्तते सदा धनान्वितः स्यात् त्रिदिवे दृढैव"।

चम्पाषष्ठीव्रतं स्कन्दपु० "यदि कश्चिद्भवेज्जीवेऽस्मिन् दैवेन नृपसत्तम!। षष्ठी भाद्रपदे शुक्ला दैवतेन समन्विता। विशाखा भौमयोगेन सा चम्पेतीह विश्रुता। देवासुरमनुष्याणां दुर्लभा षष्टिहायनी। कृते त्रेतायां षष्ठ्यब्दायनी द्वापरे पुनः। चत्वारिंशत् कलौ त्रिंशद्वायनी दुर्लभा ततः"।

चान्द्रायणव्रतं ब्रह्मपु० "अथ शुक्लचतुर्दश्यां पौर्णमासे समाहितः। चान्द्रायणव्रतं मासं याचयेत् सर्वपापजित्। पूर्णेन्दुपौर्णमास्यान्तु पूजयेत् पत्यहं जलैः"।

चित्रभानुसप्तमीव्रतं भविष्यपु० "सप्तम्यां पूजयेच्चैत्रे चित्रभानुं दिवाकरम्। रक्तैश्च गन्धकुसुमैर्मन्दारोग्यमाप्नुयात्"।

चैत्रभाद्रमाघतृतीयाव्रतं भविष्योत्तरे "चैत्रे मासि तृतीयायां दन्तधावनपूर्वकम्। उपवासस्य नियमान् गृह्णीयाद्भक्तिभावतः। अक्षतं च सताम्बूलं सिन्दूरं रक्तवासकौ। विभवात् सोपवासापि सर्वसौभाग्यकरं परम्। विधवा गतिमार्गेण कुमारी च यदृच्छया। कुर्यादाद्यांश्च नविधिं श्रूयतामत्र च क्रमः। विधिर्भाद्रपदे ह्येष सर्वसौख्यप्रदायकः। सप्तधान्यविधानेन पूर्वस्यां पूजयेदुमाम्"।

चैत्रशुक्लप्रतिपदादिकृतं तिलकव्रतम् भविष्यपु० "वसन्ते विशुकाशोकशोभिते प्रतिपत्तिथिः। शुक्ला तस्यां प्रकुर्वीत स्नानं नियममास्थितः। नारी नरो वा राजेन्द्र! संतर्प्य पितृदेवताः। नद्यास्तीरे तडागे वा गृहे वा तदलाभतः। पिष्टातकेन विलिखेदुत्तरं पुरुषाकृतिम्। ततः प्रभृत्यनुदिनं तिलकालङ्कृतं कुरुम्। धार्य्यं संवत्सरं यावच्छशिनेव नभस्तलम्। एवं नरो वा नारी वा व्रतमेतत् समाचरेत्। सदैव पुरुषव्याघ्र! भोगान् भुक्त्वेह भुवि भुनक्त्रयी"।

जयन्तीसप्तमीव्रतं भविष्यपु० "माघस्य शुक्लपक्षे तु सप्तमी या सितेक्षणा। जयन्ती नाम सा प्रोक्ता पुण्या पापहरा तथा। उपोष्या येन विधिना शृणु तं पार्थिवोत्तम! पारणानि तु चत्वारि कथितानि च पण्डितैः। परस्यामेकभक्तन्तु षष्ठ्यां नक्तं प्रकीर्त्तितम्। उपवासस्तु सप्तम्यामष्टम्यां पारणं भवेत्" इत्यादि इदं वर्षसाध्यम्।

जयपौर्णमासीव्रतं भविष्यपु० "पौर्णमासी महाराज! सोमस्य दयिता तिथिः पूर्णमासी भवेद् यस्यां पूर्णमासी ततः स्मृता। तस्यां तु होतसि स्नात्वा सन्तर्प्य पितृदेवताः। आलिख्य कमले सोमं नक्षत्रैः परिवेष्टितं विभुम्। पूजयेत् कुसुमैर्धूपैर्नैवेद्यैर्घृतपाचितैः। शुक्लवस्त्रैर्द्विजाभिः पूजयित्वा क्षमापयेत्। आकाङ्क्षारोग्यकल्याणैर्नक्तं भुञ्जीत वाग्यतः" इत्यादि।

जयाषष्ठीव्रतं भविष्यपु० "आषाढस्यसिते पक्षे षष्ठ्यामिह सदैव भारत!। जयेति या च विख्याता व्रतिनां जयदा-

विनो। यस्माज्जया जयाशब्दं कुर्वन्ति व्रतिनो बुधाः। परिपूर्णं व्रतं यस्यां सा ज्ञेया जयपञ्चमी। जया च विजया चैव जयन्ती पापनाशिनी" जया, कार्त्तिकशुक्लपञ्चमी"।

जयावाप्तिव्रतं विष्णुधर्मोत्तरोक्तम् "आश्वयुज्यामतीतायां प्रतिपत्प्रभृतिक्रमात्। पूर्ववत् पूजयेद्देवं लोकनाथं त्रिविक्रमम्"। पूर्ववदिति कृष्णावाप्तिव्रतवत् "त्रिरात्रन्तु तु कार्त्तिक्यां यद्यादु भक्ष्यमुत्तमम्। घृतधेनुं करङ्कृत्वा शक्त्या रत्नैरलङ्कृतम्। कृत्वा व्रतं मासमिदं यथोक्तं प्राप्नोति लोकं सुचिरं नृवीर। ततोऽत्र कालं सुचिरं मनुष्यः प्राप्नोति सर्वत्र जयं त्रिलोक्याम्"।

जयाशुक्लपञ्चमीव्रतं भविष्यपु० "जया च विजया चैव जयन्ती चापराजिता। भद्रा जया च नन्दा च भद्रा वामा प्रकीर्त्तिता। शुक्लपक्षस्य पञ्चम्यां नक्षत्रं यद्भवेत्तारकम्। यदा भवेत् तदा ज्ञेया जयानामेति पञ्चमी"। यद्भतारकमिति रोहिण्यादिनक्षत्रसंयोगमाहात्म्यात्। तस्यां दत्तं हुतं जप्तं तर्पणं देवपूजनम्। सर्वं शतगुणं प्रोक्तं पूजाप्यादि दिवाकर। हंसे हस्तसमारूढे शुक्ला या सप्तमी परा"। हंसः सूर्य्यः "वर्षमेकन्तु कर्त्तव्यं विधिनानेन भास्करम्। सौवर्णं कारयेद्भक्त्या हिभुजं पद्मधारिणम्। पारणन्तितयं तस्यां क्रियते गोपतेः पुरः"। जातित्रिरात्रव्रतं भविष्योत्तरे "ज्येष्ठे मासि च कर्त्तव्यं त्रयोदश्यान्तु पार्थिव!। नियमश्च ग्रहीतव्य आचार्य्यात्तत्रया ततः। कृत्वैकभक्तं द्वादश्यामुपवासत्रयञ्चरेत्। मण्डपं कारयेत्तत्र ध्वजाकं मनोहरम्। तत्र जातिः प्रकर्त्तव्या स्वर्णाद्विभवसारतः। रौप्यपुष्पाणि कार्य्याणि वंशपात्रे निधापयेत्। तत्र देवास्त्रयः पूज्या ब्रह्मविष्णुमहेश्वराः। सपत्नीकाः शुभैः पुष्पैः फलैश्च विविधैस्तथा"। जामदग्न्यद्वादशीव्रतं धरणीव्रतोक्तम् "वैशाखशुक्लपक्षेतु एकस्मिन्तु दिवाकरे। स्नानविधिना नरः। तत्र स्नानं सदा कृत्वा ततो देवालयं व्रजेत्। तत्राराध्य हरिं भक्त्या एभिर्मन्त्रैर्विचक्षणः। जामदग्न्याय पादौ तु उदरं सर्वधारिणे" इत्यादि।

ज्ञानावाप्तिव्रतं विष्णुधर्मोक्तम् "भगवन्! कर्मणा केन कुद्विजयुक्तो भवेन्नरः। एतदेव मनुष्याणां मनुष्यत्वसदाकृतम्"। मार्कण्डेय उवाच। "चैत्रप्राप्ते समतीतायां यावन्मासं दिने दिने। पूर्ववत् पूजयेद्देवं ऋषिसंघसमन्वितम्। पूर्ववदिति चैत्रमासोक्तकृष्णावाप्तिव्रतवत्। "कृतस्य देवभक्तावहितज्ञानभूयस्त्वादिकं कर्त्तव्यमित्यर्थः। "कृतस्य प्रत्यहं कुर्य्यात् तथा सिद्धार्थवैष्णव!। ब्राह्मणान् भोजयेच्चात्र तथा त्रिमधुरं नृप!"। त्रिमधुरं मधुघृतशर्करा: "वैशाख्यां कनकन्दद्यात् विरात्रोपोषितो नरः। शमावाप्तिप्रदत्वेतद्व्रतं बुद्धिविवर्द्धनम्। कृत्वा व्रतं मासमिदं यथोक्तमासाद्य नाकं सुचिरं मनुष्यः। मानुष्यमासाद्य तु बुद्धियुक्तो ज्ञानेन युक्तस्तथा भवेच्च"।

ज्येष्ठव्रतं भविष्योत्तरे "मासे भाद्रपदे शुक्लपक्षे ज्येष्ठा यदा भवेत्। रात्रौ जागरणं कृत्वा गीतवादित्रनिःस्वनैः। एवंविधविधानेन यभिर्मन्त्रैः सुपूजयेत्। एष्ठोहि त्वं महाभागे! सुरासुरनमस्कृते!। ज्येष्ठे त्वं सर्वदेवानां मत्समीपे सदा भव"।

ज्येष्ठव्रतानि महाभारते "ज्येष्ठामूलन्तु वै मासमेकभक्तेन यः क्षिपेत्। ऐश्वर्य्यमतुलं चेह पुमान् स्त्री वाभिजायते"। विष्णुधर्मे "क्षणाधितमना ज्येष्ठमेकभक्तेन यः क्षिपेत्। अहिंसः सर्वभूतेषु वासुदेवपरायणः"।

तपसरणषष्ठीव्रतं भविष्योत्तरे "शृणुष्वावहितो भूत्वा युधिष्ठिर! तपोव्रतम्। मार्गशीर्षादिमासेषु कर्त्तव्यं भूतिमिच्छता। तस्मिन् स्थितो व्रते विप्रो बहूचो वेदपारगः। ब्रह्मवित् कृष्णषष्ठ्यां दद्यादर्घ्यं महीतले। ऋग्वेदवर्गत्रितयं पठित्वा ऋग्यजुषम्" इत्यादि।

तपोव्रतं पद्मपु० "माघे सिताष्टमी स्यात् षष्ठ्यां गोप्रदो भवेत्। स्वर्गलोकमवाप्नोति तपोव्रतमिदोच्यते"।

ताम्बूलसंक्रान्तिव्रतं स्कन्दपु० "अथाम्यां सञ्चयेच्चापि ताम्बूलाख्यामनुत्तमाम्। विधानं पूर्ववत् कृत्वाङ्गाख्यसंक्रान्तिवत्तु तत्। ताम्बूलचन्दनाद्यैश्च प्रत्यहञ्चार्च्चां द्विजोत्तमात्। यावत् संवत्सरं पूर्णं रात्रौ रात्रौ ततः परम्। ताम्बूलं भक्षयेद्विप्रान् कारयेच्चैव नान्तरम्। वत्सरान्ते तु कमलं कृत्वा चैव तु काञ्चनम्। पलकोशञ्च कुर्वीत तथा पूगीफलाश्रयम्" इत्यादि।

तारकद्वादशीव्रतं भविष्योत्तरे "कथं तत्तु क्षण! कर्त्तव्यं तारकद्वादशीव्रतम्। योऽपि कश्चित् प्राप्तो यत्प्रभावात् खगध्वज!"। कृष्ण उवाच "मार्गशीर्षे सिते पक्षे एकादश्यां समाहितः। कृत्वा शौचे जले स्नानमपराह्णे समाचरेत्। प्रणम्य भास्करं भक्त्या वृत्वा देवार्च्चनं तथा"।

तिथिनक्षत्रवारव्रतानि कालोत्तरे "नक्षत्रतिथियोगेन तिथीनां वारयोगतः। पुनरेव प्रवक्ष्यामि व्रतानि तु यथास्थितम्। रोहिण्याद्यष्टमीयोगो यदा भवति सौम्ये विशेषपूजा कर्त्तव्या पुत्रकामेन यत्नतः। पुत्रो

शुक्लचतुर्दश्यां गुरुयोगो यदा भवेत् । अथ वा सोम संयोगो विशेषात् पूज्य शङ्करम् । पायसं घृतसंयुक्तं शिवाय विनिवेदयेत् । धूपदीपोपहाराद्यैः पूर्ववत् पूजयेच्छिवम् । प्राशनन्तु घृत कार्य्यं सर्वकामप्रद व्रतम् । आदित्यरेवतीयोगश्चतुर्दश्यां यदा भवेत् । अष्टम्यां वा मघायोगो शिवं संपूज्य पूर्ववत् । तिलास्तु प्राशने शस्ता आदित्यव्रतमीरितम् । आरोग्यं जायते तस्य पुत्रवन्धुगणैः सह । रोहिणीचन्द्रयोगश्च चतुर्दश्यां यदा भवेत् । अष्टम्यां सोमसंयोगात् तदा चन्द्रव्रतं चरेत् । प्रागुक्तेन विधानेन शिवं संपूज्य यत्नतः । दधि क्षीरन्तु नैवेद्यं प्राशनं क्षीरमेव च । कीर्त्तिमारोग्यमैश्वर्य्यं प्राप्नुयान्नात्र संशयः । अश्विनीभौमसंयोगश्चतुर्दश्यां यदा भवेत् । अष्टम्यां भरणीयोगस्तदा भौमव्रतं चरेत् । संपूज्य परया भक्त्या शिवं पञ्चोपचारतः । रक्तोत्पलप्राशनन्तु साम्राज्यं प्राप्नुयाच्छुभम् । रोहिणीबुधसंयोगश्चतुर्दश्यां यदा भवेत् । अष्टम्यां वा समासेन बुधव्रतं समाचरेत् । शिवं पूज्या विधानेन मध्याह्नस्नानपूरःसरम् । मध्याह्नवर्त्तिसमीपे तु प्राशनं पायसंयुतम् । पुत्रार्थदाराश्च यशो वर्द्धते तस्य नान्यथा । रेवतीगुरुसंयोगश्चतुर्दश्यां यदा भवेत् । अष्टम्यां तिथिसंयोगाद् गुरुव्रतं तदा चरेत् । प्राशनं कपिलाज्यन्तु ब्रह्मचारिसमन्वितम् । वाग्मीशत्वमवाप्नोति व्रतस्यास्य प्रभावतः । श्रवणं भार्गवयुतं चतुर्दश्यां यदा भवेत् । शुक्रव्रतं तदा विद्धि पुत्रवृद्धिकरं यदा । संपूज्य परमेशानं यथाविभवविस्तरैः । प्राशनं मधु चैवात्र कर्त्तव्यं संयतात्मना । महाफलमवाप्नोति व्रतस्यास्य प्रभावतः । भरणीशनियोगस्तु चतुर्दश्यां यदा भवेत् । आर्द्रायोगस्तथाष्टम्यां तदा शनिव्रतं चरेत् । शिवं संपूज्य विधिवत् प्राशनं सक्तुमेव च । शनिरेकादशस्थो हि फलं यच्छति शोभनम् । विरुद्धे नश्यते वत्स ! तदर्थं व्रतमाचरेत् । हेमकृष्णबलाञ्च कम्बलन्तु क्रमेण च । शङ्खञ्च तीक्ष्णलौहञ्च क्रमाद् यत्नेन दापयेत् । यथा सम्भवतो वत्स ! आचार्य्याय प्रयत्नतः" ।

तिथियुगलव्रतं यमकृतौ "द्वेष्टास्यौ तु सामस्य चतुर्दश्यौ तु ते तथा । अमावस्यापौर्णमास्यौ सप्तम्यै-ष्टादशीहयम् । संवत्सरमभुञ्जानः सततञ्च जितेन्द्रियः । ब्रह्मचर्य्यं फलं यच्च यत्फलं सत्रयाजिनाम् । कृतुगामि फलं यच्च तदवाप्नोत्यभोजनात्"

तिन्दुकाष्टमीव्रतं भविष्यपु० "ज्यैष्ठे मासि द्विजश्रेष्ठ ! शुक्लाष्टम्यां तिन्दुकोचनम् । यः पूजयति देवेशमीशलोकं व्रजन्नरः । ज्यैष्ठे मासि तथाषाढ़े श्रावणे च तथा परे । पूजयेच्चतुरोमासान् नीलोत्पलकदम्बकैः । त्रिपुरान्तकरं शम्भुं त्र्यम्बकान्धकसूदनम् । गन्धानाञ्च कदम्बेन पूजयेत् गुग्गुलेन च । टेम्बुरुकफलं विप्र ! प्राशयेत् कायशोधनम्" टेम्बुरुकन्तिन्दुकफलम्" ।

तिलदाहोव्रतं स्कान्दपु० "विधिना केन कर्त्तव्यं तिलदाहोव्रतोत्तमम् । कस्मिन्मासे तिथौ चैव विधिना केन तद्व्रतेत्" श्रीभगवानुवाच "पौषमासे च या कृष्णा तिथिरेकादशी शुभा । तास्तुपोष्य तदा स्नानं कृत्वा नारायणं जपेत्" इत्यादि ।

तिलद्वादशीव्रतं विष्णुधर्मोक्तम् "माघमासे तु सम्प्राप्ते आषाढ़े भवेद् यदि । मूलं वा कृष्णपक्षस्य द्वादश्यां नियतव्रतः । गच्छेद्यात् पुण्यफलदं विधानं तस्य मे शृणु ! । देवदेवं समभ्यर्च्य स्नातः प्रयतः शुचिः । कृष्णनाम्ना तु सम्पूज्य एकादश्यां महामतिः । उपोषितो द्वितीयेऽह्नि पुनः सम्पूज्य केशवम् । संपूजयेन्नाम्ना तेनैव कृष्णाख्येन पुनः पुनः । दद्यात्तिलांस्तु विप्राय कृष्णा मे प्रीयतामिति । स्नानप्राशनयोः शस्तास्तथा कृष्णतिला मुने ! । विष्णुप्रीणनमन्त्रैश्च समाप्ते वर्षपारणे । कृष्णकृष्णास्तिलैः सार्द्धं पक्वान्नेन च संयुताः । कृतोपानद्युगैः सार्द्धं संगीता रत्नगर्भिणः । ब्राह्मणानां प्रदेयास्ते यथावन्नामसंख्यया" इत्यादि । विष्णुधर्मे व्रतान्तरम् "माघ्यान्तु समतीतायां श्रवणेन तु संयुता । द्वादशी या भवेत् कृष्णा प्रोक्ता सा तिलद्वादशी । तिलैः स्नानं तिलैर्होमं नैवेद्यं तिलमोदकैः । दीपैश्च तिलतैलेन तथा देयं तिलोदकम् । तिलाश्च देया विप्रेषु तस्मिन्नहनि पार्थिव ! । उपवासदिने राजन् ! स्नातव्याश्च तथा तिलाः । उपोषितेनापरेऽह्नि होतव्यश्च विशेषतः । इत्थञ्च प्रदातव्यं ब्राह्मणेषु तथा नघ ! । तिलप्रस्थं तदा कृत्वा सोपवासो जितेन्द्रियः । न दुर्गतिमवाप्नोति नात्र कार्या विचारणा" इत्यादि ।

तीव्रव्रत सौरपु० "यथाचरणौ भित्त्वा शिवक्षेत्रे वसेन्नरः । देहान्ते शिवसायुज्यं लभते नात्र संशयः" ।

तुरगसप्तमीव्रतं विष्णुधर्मोत्तरे "चैत्रमासस्य सप्तम्यां शुक्लपक्षे नराधिप ! । सोमयेनोपलिप्ते तु स्थण्डिले तु सुशोभने । तत्राष्टपत्रं कमलं कर्त्तव्यं वर्णकैः शुभैः ।

कृतोपवासस्तन्मध्ये भास्करं पूजयेन्नरः। व्रते समाप्ते दातव्यास्सुरगा ब्राह्मणाय तु। प्राप्नोत्यमेधस्य फलं यथावल्लोकानवाप्नोति पुरन्दरस्य। उषोषत्र राजन्! सचिरञ्च कालं सायुज्यमाप्नोति दिवाकरस्य"।

सप्तमीतृतीयाव्रतं विष्णुधर्मोत्तरे "तृतीया श्रवणे कृष्णा या च श्रवणसंयुता"। श्रावणोऽत्र पौर्णमास्यन्तोमासो ग्राह्यः अतः श्रवणकृष्णतृतीयायाः श्रवणयुक्तत्वं न दुर्घटम्। "तस्यां संपूज्य गोविन्दं सप्तमग्रामवाप्नुयात्"।

तेजःसंक्रान्तिव्रतं स्कान्दे। "अथान्यां सम्प्रवक्ष्यामि तेजःसंक्रान्तिमुत्तमाम्। संक्रान्तिवासरं प्राप्य स्नानं कृत्वा विचक्षणः। भ्रान्तिगर्भसमायुक्तं कारणं कारयेच्छुभम्। तन्मध्ये दीपकं स्थाप्य प्रज्वलन्तं स्वतेजसा। तन्मुखे सादकं स्थाप्य ब्राह्मणाय निवेदयेत्। अर्घ्यञ्च पूर्ववत् कार्य्यमेकभक्तन्तु पूर्ववत्। संवत्सरे तु संपूर्णे कुर्य्यादुद्यापनं बुधः" इत्यादि।

तेयादशव्रतमग्नीषोमे भविष्योत्तरे "भानोर्दिने सिते पक्षे चतीते चोत्तरायणे। सुगोभिर्मिश्रितयवान् सङ्ग साधसङ्गे गोधूमनांसमधुमैथुनकांस्यपात्रैः। अस्यङ्गनाङ्गनशिलातलचूर्णितानि षष्ठीवृती परिहरेदहनोद्भिवैः। देवान् पितॄ सनिगणान् सजलाञ्जलीभिः सन्तर्प्य पूज्य गगनाङ्गनकल्पदीपम्। छत्वानले तिलयवान् वृषगोघृताक्तान् भूमौ स्वपेत् हृदि निधाय दिनेशबिम्बम्। यानि त्रयोदशदिनैरिह वर्जितानि द्रव्याणि तानि परिहृत्य दिने च षष्ठ्याम्। संप्राप्य शुद्धचरणकानिह वर्षमेकं प्राप्नोति भारत! पुमान् मनसेप्सितानि"।

त्रिरात्रिसप्तमीव्रतं भविष्यपु० "यस्यां शुक्लपक्षे तु कालगुह्यां यो यजेन्नरः। जपेद्धुवलीति नाम भक्त्या पुनः पुनः। देवार्चनं वाष्टशतं कृत्वैवं तु जपेच्छुचिः। स्नातः प्रस्थानकाले तु उत्थाने स्खलिते क्षुते। पाषण्डान्! पतितांश्चैव तथैवान्यावसायिनः। नालापयेत् तथा भानुमर्चयेच्छ्रद्धयान्वितः। इदञ्चोच्चारयेद्वानोर्मनसा ध्यानतत्परः। हंस हंस कृपाब्धो! त्वं जगतीनां गतिर्भव। संसारार्णवमग्नानां त्राता भव दिवाकर। एवं प्रभाद्योपवासं कृत्वा नियतमानसः। पूर्वाह्णे एव ब्राह्मणान् भोजयेत्" आर्जुनीयक, गोशकवार्ये शुः शक्रत् ब्राह्मणार्जुनीयकम्" आर्जुनीयक, गोशकौलयत्।

त्रिविक्रमतृतीयाव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे तृतीयायां सोपवासो जितेन्द्रियः। मण्डलत्रितयं कुर्याद्वर्णकेन पृथक् पृथक्। मण्डलं दक्षिणे भागे श्वेतं कुर्यात् ततो नरः। रक्तं मध्ये रवेः कुर्यात् तादृक्श्वेतं ध्रुवस्य तु। विष्णोः पदत्रयं तेषु पूज्यं स्यात् मण्डलेन तु। भूमौ तु प्रथमं पादं द्वितीयं सूर्यमण्डले। तृतीयं तु ध्रुवे देवे पूजयेत् प्रयतः शुचिः"।

वृतान्तरं विष्णुधर्मोत्तरे "हितायच्च प्रवक्ष्यामि शृणु! त्रैविक्रमं व्रतम्। भूमिस्तु प्रथमः पादः अन्तरिक्षं तथा परः। तृतीयो दिवि विज्ञेयो देवदेवस्य चक्रिणः। भूः पतिः पृथ्वी वह्निरन्तरिक्षस्य चानलः। दिशां पतिस्तथा सूर्य्यस्तस्य विष्णोः पदत्रयम्। ज्यैष्ठे शुक्लतृतीयायां सोपवासो जितेन्द्रियः। कल्ये कूपजले स्नातो वाङ्मं संपूजयेन्नरः। एतत् संवत्सरं कृत्वा नरस्त्रैविक्रमं व्रतम्। सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते"।

वृतान्तरं विष्णुधर्मोत्तरे "वक्ष्यामि ते महाभाग! तव त्रैविक्रमव्रतम्। तृतीयं नृपशार्दूल! तन्मे निगदतः शृणु!। ज्यैष्ठे शुक्लतृतीयायां नरः स्नपुपोषितः। भूतः सम्भूजन कुर्याद्धूपमाल्यानुलेपनैः। दीपैः रत्नैश्च विविधैर्दद्याद्विप्रेषु दक्षिणाम्। बीजपूर्णानि पात्राणि सहिरण्यानि भक्तितः। पूजैवमन्तरिक्षस्य माघाषाढे विधीयते। दक्षिणा तत्र दातव्या तथा वासोयुगं द्विजे। दिवः पूजा च कर्त्तव्या सावण प्रोष्ठपदेषु तु। छत्रोपानहं युग्मं दक्षिणां तत्र दापयेत्। एवं मासत्रयेणेह पारणं प्रथमं भवेत्। मासत्रयेण चान्येन ततो मासत्रये पुनः। ततो मासत्रये चान्यदेवमन्यत्तचान्यथा। विज्ञेयमित्थं धर्मस्य पारणानां चतुष्टयम्" इत्यादि।

त्रिविक्रमत्रिरात्रशतव्रतं विष्णुरहस्ये "यत्त्रिरात्रशतं कुर्यात् समुद्दिश्य जनार्दनम्। कुलानां शतमादाय स याति भवनं हरेः। नवम्यादिसिते पक्षे नरोमार्गशिरस्य च। प्रारभेत त्रिरात्राणां शतं तु विधिवत् व्रती। श्रद्धानो जितक्रोधो नित्यस्नायी क्षमान्वितः। अभ्यर्चयेत् सदा विष्णुं कर्मणा मनसा गिरा। अष्टोत्तरसहस्रन्तु शतं वानुदिनं जपेत्। अष्टम्यामेकभक्ताशी दिनत्रयमुपावसेत्। एकादश्यां शुचिः स्नातो वासुदेवार्चने रतः। द्वादश्यां पूजयेद्देवं गन्धमाल्यविलेपनैः। नैवेद्यधूपदीपाद्यैर्गीतनृत्यैश्च केशवम्। अनेन विधिना कृत्वा त्रिरात्राणां शतं नरः। निर्वापयेत् ततो भक्त्या विप्रेषूत्त-

धिना व्रतम्। संप्राप्ते कार्त्तिके मासि व्रतमेतदनुत्तमम्"। प्रतिमासं त्रिरात्रद्वयमिति पञ्चाशता मासैः यतं तच्चाधिमासहतयोगाच्चतुर्भिर्वर्षैरिति कार्त्तिके समाप्तिः।

त्रिविक्रमव्रतं विष्णुधर्मोत्तरे "करोति केशवप्रीत्यै कार्त्तिकं मासमाप्नुयात्। पूर्वं वयसि यत्नेन जानताऽजानताऽपि वा। पापमाचरितं तस्मात् मुच्यते नात्र संशयः। अनेनैव विधानेन मार्गशीर्षेऽपि माधवम्। समर्च्यैकभक्तं वै वर्णिभ्यो यः प्रयच्छति" इत्युपक्रमे। त्रैमासिकं व्रतमिदं यः करोति नरेश्वर!। स विष्णुप्रीणनात् पापैर्मुच्यते परिमुच्यते। द्वितीये वत्सरे राजन्! मुच्यते चोपपातकैः। तदत् तृतीयेऽपि कृतं महापातकनाशनम्। व्रतमेतत्नरैः स्त्रीभिस्त्रिभिर्मासैरनुष्ठितम्। त्रिभिः संवत्सरैश्चैव प्रददाति फलं नृणाम्। त्रिभिर्मासैस्त्रयस्याभिस्त्रिधात् पातकात्नृप!। त्रीणि नामानि देवस्य मोचयन्ति त्रिवार्षिकैः। यतस्ततो व्रतमिदं त्रिविक्रमसुदाहृतम्। सर्वपापप्रशमनं केशवाराधनं परम्"।

सौरत्रिविक्रमव्रतं भविष्योत्तरे "समभ्यर्च्य जगन्नाथं देवमर्कमथापि वा। एकभक्तादि यो भक्तं द्वितीयं ब्राह्मणार्पणम्। करोति भास्करप्रीत्यै कार्त्तिकं मासमाप्नुयात्। पूर्वं वयसि यत्नेन जानताऽजानताऽपि वा। पापमाचरितं तस्मात् मुच्यते नात्र संशयः। व्रतमेतत्नरैस्त्रीभिस्त्रिभिर्मासैरनुष्ठितम्। त्रिभिः संवत्सरैश्चैव प्रददाति फलं नृणाम्। त्रिभिर्मासैस्त्रयस्यास्तु त्रिविधात् पातकात्नृप!। त्रीणि नामानि देवस्य मोचयन्ति त्रिवार्षिकात्। यतस्ततो व्रतमिदं त्रिविक्रमसुदाहृतम्। सर्वभूतप्रशमनं भास्कराराधनं परम्"।

त्र्यम्बकव्रतं पद्मपु० "चतुर्दश्यान्तु नक्ताशी समान्ते गोयुगप्रदः। स यैवं पदमाप्नोति यजन्त्रैयम्बकं व्रतम्"।

दशादित्यव्रतं ब्रह्माण्डपुरा० "वक्ष्ये सौरव्रतं पुण्यं दुर्दशालकरं परं। दशकरं हि भूतानां मनोरथकरं परं। भानुवारे सिते पक्षे दशम्यां चैव नारद!। प्रातः कालेऽथ मध्याह्ने स्नानं कुर्याद्यथाविधि" इत्यादि।

दशावतारव्रतं विष्णुपु० "एकादश्यां निराहारो द्वादश्यां पुरुषोत्तमम्। अर्चयेद् ब्राह्मणमुखे स गच्छेत्परमं पदम्। यथा तिथिर्वैष्णवी स्याद्द्वादशीशुक्लपक्षगा। तस्यामाराधयेद्देवं प्रयत्नेन जनार्दनम्"।

द्वात्रिंशदष्टमीव्रतं भविष्यपु० "कार्त्तिके मासि विप्रेन्द्र! शुक्लाष्टम्यां नरोत्तमे!। अष्टम्यां कृष्णपक्षस्य पूजयेद्विधिवद्विज!। तस्माच्च तां सतीं देवीं विधिवद्ब्रह्मसत्तम!। य एतत्कुरुते भक्त्या उमामहेश्वरं व्रतम्। समैकमेव विप्रेन्द्र! स याति परमां गतिम्"। समैमेकं संवत्सरम् "चतुर्भिः पारणैरेवं समैकमेक कीर्त्तितं बुधैः। प्रथमन्तु त्रिभिर्मासैः पारणं कार्त्तिकादिभिः। कार्त्तिके मार्गशीर्षे तु पौषे मासि तथा परे। उन्मत्तकस्य पुष्पैस्तु फलैर्भक्ष्यैर्नैवेद्यकैः"।

दिवाकरव्रतं भविष्यपु० "आदित्यवारं ऋक्षेण युक्तं यद्यद्भवेत् यागडव!। ततः प्रत्यादित्यदिनं सप्त वारान् प्रपूजयेत्। एकभक्तेन नक्ताशी ब्राह्मणान् पूजयेत् दिवा। दक्षिणां तु यथा शक्त्या दद्यात् विप्राय भक्तितः"

दीप्तिव्रतं पद्मपु० "सन्ध्यादीपप्रदो यस्तु समां तैलञ्च वर्जयेत्। समान्ते दीपकान् दद्याच्चक्रं शूलञ्च काञ्चनम्। वस्त्रयुग्मञ्च विप्राय स तेजस्वी भवेदिह। रुद्रलोकमवाप्नोति दीप्तिव्रतमिदं कृतम्"।

दुर्गान्नवमीभोग्यनाशनत्रयोदशीव्रतं भविष्योत्तरे "ज्यैष्ठे मासि सिते पक्षे त्रयोदश्यां युधिष्ठिर!। स्नात्वा पुष्पनदीतीये पूजयेत्कुभदेशजम्" इत्यादि।

दुर्गानवमीव्रतं भविष्यपु० "नवम्यां तु सिते पक्षे नियतः संयतेन्द्रियः। मासि चाश्वयुजे वीर! कार्त्तिके कार्त्तिकोत्तरे। पुष्पैश्च पूजयेद् दुर्गां जातिपुष्पैर्विधानतः। धूपार्थं गुग्गुलं दद्याच्चैवेद्यं गुडपूपकान्। दुर्गेति नाम जप्तव्यं प्रयतोऽष्टशतं नृप!। माघे च फाल्गुने मासि चैत्रे चैत्रोत्तरे नृप!। शुक्लपक्षे तु कर्त्तव्यास्तूपवासपरायणैः" इत्यादि वर्षसाध्यम्।

दुर्गाव्रतं देवीपु० "देवीव्रतं प्रवक्ष्यामि सर्वकामप्रसाधनम्। श्रावणे शुक्लपक्षे तु अष्टम्यां वायुभोजनः। स्नात्वा सार्द्रपटोभूत्वा जितक्रोधः क्रियान्वितः। देवीं सम्पूज्य नीवेन पुनःक्षीरेण वारिणा। ततो गुग्गुलधूपञ्च सदा कृत्वन्तु दापयेत्" इत्यादि तदवधिवर्षसाध्यम्।

दूर्वागणपतिचतुर्थीव्रतं सौरपु० "चीर्णमेतद् व्रतं सर्वैः पुराकल्पे षडानन!। चतुर्थी या भवेद्भुक्ता नभोमासस्य पुण्यदा। तस्यां व्रतमिदं कुर्यात् कार्त्तिक्यां वा षडानन!। गजाननं चतुर्बाहुमेकदन्तं विपाटिनम्। तथा हैमीमथो दूर्वां तदाधारे व्यवस्थिताम्"। तदाधारे, विघ्नेशासने "संस्थाप्य विघ्नहन्तारं कलशे ताम्रभाजने। वेष्टितं रक्तवस्त्रेण सर्वतो भद्रमण्डले। पूजयेच्छुक्लकुसुमैः पत्रिकामिश्र पञ्चभिः। बिल्वपत्रमयैर्मार्गैः शमी दूर्वा कुरिण्टिका। सोपोष्या तु कुरश्रेष्ठ!

ततो राज्यं भविष्यति । सर्वोपहारसम्पन्नं सर्वोपस्करमाहरेत् । कन्दपक्वं फलं शाकं लवणं गुडशर्करा । दधि दुग्धं घृतं क्षीरं धान्यानि विविधानि च । दास्यानि रघुश्रेष्ठ ! वस्त्रकाञ्चनमेव च ।" ।

दूर्वात्रिरात्रव्रतं पद्मपु० "शृणु ! दूर्वात्रिरात्रस्य विधिं कात्स्न्र्येन सुव्रत ! । आश्विनभाद्रपदे चैव शुक्लपक्षे त्रयोदशीम् । त्रिरात्रं रघुशार्दूल यावत् पूर्णा तिथिर्भवेत् । उमामहेश्वरं देवं सावित्रीं धर्ममेव च । दूर्वाभूले तु संस्थाप्य कलशं कारयेत्ततः" इत्यादि ।

दूर्वाष्टमीव्रतं भविष्यपु० "कृष्ण ! भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः । दूर्वाङ्कुरं भक्षयित्वा यो नरः श्रद्धयान्वितः । स याति परमं स्थानं यत्र देवस्त्रिलोचनः । गणेशं पूजयेद्दूर्वैर्दुर्वा यो हि तं शृणे ! । ततोपवासं कुर्याच्च दुर्वाभिः पूजयेच्छिवम् । दूर्वाभिमेतं विप्रेन्द्र ! दध्यक्षतफलैः शुभैः" । व्रतान्तरं दूर्वाष्टमीशब्दे द्रष्टव्यम् ।

देवमूर्तिव्रतं विष्णुधर्मोत्तरोक्तम् "ईशानस्य तथा वह्नेर्विष्णोश्च सलीरणम् । जानीहि रघुशार्दूल ! देवमूर्तिचतुष्टयम् । तेषान्तु कृपनिर्माणं कृत्वा तानर्चयेद् बुधः । वस्त्रकाञ्चनरत्नाद्यैर्दीनेभ्योऽन्नं ददेत्तदा । चैत्रशुक्ले महाभाग ! प्रतिपद्यारभेन्नरः । कौष-नादेय-ताडाग-काषारैः स्नानमाचरेत् । दर्भा तिलैर्यवैर्दोभो घृतेन च तथा भवेत् । कर्पूरं कुङ्कुमञ्चैव तथैवागुरुचन्दनम् । ब्राह्मणेषु प्रदातव्यं तथा राजन् ! दिनक्रमात् । दिनत्रयं तथाऽश्नीयात् सायं प्रातरयाचितम् । दिनमेकन्तु नाश्नीयात् व्रतचारी नरोत्तमः । एवं संवत्सरं कृत्वा व्रतं पुरुषसत्तम । सर्वकामसमृद्धस्य दत्तस्य फलमश्नुते" ।

देवव्रतं पद्मपु० "स्नानमाचरित्वा तु गवा सार्द्धं कुटुम्बिने । वैष्णवं विष्णुरूपञ्च दद्याद्विप्राय वाससी । प्रणम्य भक्त्या शक्रस्य प्रियतां शिववैष्णवौ । एतद्देवव्रतं नाम महापातकनाशनम् । रघु संवत्सरं पूर्णमेकभक्तो भवेन्नरः । ऋद्धिः सर्वभूतेषु वासुदेवपरायणः । नमोऽस्तु वासुदेवेत्यष्टाक्षरमथं जपेत् । पौण्डरिकस्य यज्ञस्य ततः फलमवाप्नुयात् । दश वर्षसहस्राणि रुद्रलोके महीयते । तदन्ते चागत्य मानुष्यं प्रतिपद्यते" । कालोत्तरे व्रतान्तरं "कृत्तिकर्क्षे रवेर्यत्र रुद्रवर्यां स्यात् यदा भवेत् । उपोष्य पूजयेत्तस्यां देवदेवं महेश्वरम् । महास्नानप्रकारेण सदावर्त्तिपुरःसरम् । अक्षरागसचन्दनेन शुक्लपुष्पैः प्रपूजयेत् । भूयस्तु भक्तो देयः मधुना शर्करान्वितः । सितवस्त्राणि वस्त्रञ्च आचार्याय प्रदापयेत् । जातीफलैः प्राशनञ्च रात्रौ जागरणं हितम् । एतद्देवव्रतं नाम आयुःश्रीकीर्तिवर्द्धनम् ।

देवीव्रतं पद्मपु० "पयोव्रतं पञ्चदश्यां व्रतान्ते गोयुगप्रदैः । लक्ष्मीलोकमवाप्नोति देवीव्रतसदाकृतम्" देवीपु० व्रतान्तरं "क्षीराशी कार्त्तिके यस्तु देव्या भक्तिरतो नरः । शाकपाचकनक्ताशी प्रातःस्नायी शिवारतः । पूजयेत्तिलहोमस्तु मधुक्षीरघृतादिभिः । कार्य्यस्तु देवीमन्त्रेण शृणु पुण्यफलं हरे" इत्यादि ।

द्वादशसप्तमीव्रतं भविष्योत्तरे "माघमासात् समारभ्य शुक्लपक्षे युधिष्ठिर ! । सप्तम्यां क्रतसङ्कल्पो वर्षमेकं व्रती भवेत्" मासभेदे नियमभेदास्तत्रोक्ता द्रष्टव्याः ।

द्वादशसाध्यतृतीयाव्रतं विष्णुधर्मोत्तरे "मनोऽनुमन्ता प्राणश्च नरयानश्च वीर्य्यवान् । विचित्रहयो नयश्चैव हंसो नारायणस्तथा । प्रभवो विष्णुर्विश्वश्च साध्या द्वादश जज्ञिरे । तृतीयायां महाभाग ! पूजयेत्तानुपोषितः" । प्रत्येकतृतीयायां यावद्वर्षं सोपवास इति शेषः ।

द्वादशादित्यव्रतं विष्णुधर्मोत्तरे "धाता मित्रोऽर्यमा पूषा शक्रोऽंशोवरुणोभगः । त्वष्टा विवस्वान् सविता विष्णुर्दादशकस्तथा । पूजयेद् द्वादशादित्यान् शुक्लपक्षे उपोषितः । मार्गशीर्षादिधारभ्य द्वादश्यां नियतव्रतः" ।

द्वादशीव्रतं कूर्मपु० "एकादश्यां निराहारो द्वादश्यां पुरुषोत्तमम् । अर्चयेद्तु ब्राह्मणमुखे च गच्छेत्परमं पदम् । एषा तिथिर्वैष्णवी स्याद्तु द्वादशी शुक्लपक्षगा । तस्मात् राधयेद्देवं प्रयत्नेन जनार्दनम्" ।

द्वीपव्रतं विष्णुधर्मोत्तरे "अथातः संप्रवक्ष्यामि द्वीपव्रतमनुत्तमम् । चैत्रशुक्लात्तथारभ्य प्रत्यहं दिनसप्तकम् । जम्बूप्लाक्षकुशक्रौञ्चशाल्मलिद्वीपसंज्ञितम् । गोमेदं पुष्करञ्चैव प्रत्यहं पूजयेत् क्रमात् । नित्यमेव सदा स्नानं बहिरेव समाचरेत् । अधःशायी भवेच्चित्यं तद्देव दिनसप्तकम्" इत्यादि ।

धनसंक्रान्तिव्रतं स्कन्दपु० "धनसंक्रान्तिमाहात्म्यं शृणु स्कन्द ! विधानतः । यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः । संक्रान्तिवासरं प्राप्य शुचिर्भूत्वा समाहितः । कलशं निर्व्रणं कृत्वा वारिपूर्णं निधापयेत् । सुवर्णयुक्तन्तं कृत्वा प्रतिमाञ्चन्तु दापयेत् । विधिनानेन यज्ञान्ते प्रीयतां मे दिवाकरः" ।

धनावाप्तिव्रतं धर्मोत्तरोक्तम् "नृपतु ! कर्मणा केन धनवान्

पुत्रवान् देवलोकेषु पूज्यो भवति मानवः"। इति प्रश्ने "श्रावण्यां समतीतायां प्रतिपत्प्रभृति क्रमात्। पूर्ववत् पूजयेद्विष्णुं देवं सङ्कर्षणं विभुम्" इत्यादि। धान्यव्रतं वराहपु० "अथातः सम्प्रवक्ष्यामि धान्यव्रतमनुत्तम!। येन सद्यो भवेद्धन्योऽधन्योऽपि हि यो भवेत्। मार्गशीर्षेऽमले पक्षे प्रतिपद् या तिथिर्भवेत्। तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुञ्च पूजयेत्" इत्यादि।

धराव्रतं पद्मपु० "यो विंशतिपलादूर्द्ध्वं भर्त्रे कृत्वा तु काञ्चनीम्। दिनं पयोव्रतं दद्यादुडुलोके महीयते। धराव्रतमिदं प्रोक्तं सप्तकल्पयतानुगम्"। दिनं देवानामुत्तरायणम्। पयोव्रतमित्यनन्तरं कृत्वेत्यनुषङ्गः। रुद्रो देवता धरादानं पारणम्" इत्यादि।

धर्मव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे दशम्यां तु सोपवासस्तु मानवः। धर्मं सम्पूजयेद् देवं सर्वलोकसुखावहम्"।

आत्मव्रतं स्कन्दपु० "अथातः संप्रवक्ष्यामि धान्यव्रतमनुत्तमम्। यत् कृत्वा हि नरो राजन्! सर्वकामानवाप्नुयात्। अयने विषुवे चैव स्नानं कृत्वा विचक्षणः। व्रतस्य नियमं कृत्वात्मानं देवं दिवाकरम्। संपूज्यात्मानमेवं च ततो दद्याद्धान्यप्रस्थं द्विजातये। प्रतिमासं पुनस्तद्वत् पूज्यो देवः सहस्रपात्। एवं सदा प्रदातव्यं धान्यप्रस्थं द्विजन्मने। एवं संवत्सरे पूर्णे कृत्वोद्यापनमित्यपि"।

धान्यसप्तमीव्रतं भविष्यपु० "संपूज्य सितसप्तम्यां भानुं धान्यानि सप्त च। ददाति नक्तभुक् गार्हं सवत्सेन समन्वितम्"। गार्हं गृहस्थोपकरणम् "स तारयति सप्तात्मानं कुल्यानात्मानमेव च। सुत! धान्यव्रतं नाम व्रतं धान्यसमप्रदम्"।

आमलिरात्रव्रतं पद्मपु० "त्रिरात्रोपोषितो दद्यात् कार्त्तिक्यां भवनं शुभम्। आदित्यलोकमाप्नोति धामव्रतमिदं स्मृतम्"।

धाराव्रतं भविष्योत्तरोक्तम् "चैत्रारम्भात् पिबेत्तोयञ्चलधारां प्रपातयेत्। वर्षान्ते घृतसंपूर्णान्दद्याद्धेनुकां नवाम्। एतद्धाराव्रतं नाम सर्वेहेगहरं परम्। कान्तिसौभाग्यजननं सपत्नीदौर्भाग्यनाशनम्"।

ध्वजनवमीव्रतं भविष्योत्तरे "पौषस्य शुक्लपक्षे तु नवमी शुक्लरी स्मृता। तस्यां स्नात्वा शुभैः पुष्पैरर्चनीया हरेः सदा। कुमारी भगवान् देवी सिंहस्कन्दगामिनी। ध्वजान् नानाविधान् कृत्वा पुरतस्तस्य पूजयेत्। नालतीकुसुमैर्दीपैर्गन्धधूपविलेपनैः। बलिभिः पशुभिर्मेध्यैः सुरामांसघृतगन्धनैः। दधिचन्दनसूपैश्च फलैश्चानग्निपाचितैः। देवीं स्वर्णमयीं कृत्वा सिंहारूढां चतुर्भुजाम्। खड्गशक्तिधरां शूलधरां नेत्रत्रयान्विताम्"। (पूजयेत्)

ध्वजव्रतं विष्णुधर्मोत्तरोक्तम् "चैत्रे तु प्रत्यहं मासि गरुडं पूजयेन्नरः। पीतेन गन्धनैवेद्यमाल्यवस्त्रादिना द्विज!। वैशाखे च तथा मासि तालं संपूजयेत्सदा। नीलेन गन्धनैवेद्यमाल्यवस्त्रादिना द्विज!। ज्यैष्ठे च प्रत्यहं मासि मकरं पूजयेत् सदा। श्वेतेन गन्धनैवेद्यमाल्यवस्त्रादिभिर्द्विज!। छत्रं संपूजयेद्देवं मास्याषाढे यथाविधि। रक्तेन गन्धनैवेद्यमाल्यवस्त्रादिना द्विज!। बहिः स्नानं तथा कृत्वाँहङ्गिसंपूजनं तथा। नित्यञ्च कृत्वाँहर्मन्त्र! तथा ब्राह्मणभोजनम्। पारणार्थं तथा कृत्वाँसक्तं तैलविवर्जितम्। अधःशायी तथा चाषाढ ब्रह्मचारी सदा भवेत्। व्रतमेतन्नरः कृत्वाँत् सम्यङ्मास चतुष्टयम्। ब्राह्मणान् पूजयेच्छक्त्या आषाढे चरमेऽहनि। वस्त्राण्युक्तानि धर्मज्ञ! दद्याद्विप्रेषु दक्षिणाम्। कृत्वैकं पारणं राजन्! स्वर्गलोके महीयते। द्वितीयं पारणं कृत्वा यक्षलोके महीयते। तृतीयं पारणं कृत्वा ब्रह्मलोके महीयते। कृत्वा तूर्यं पारणन्तु रुद्रलोके महीयते। विष्णुलोकमवाप्नोति कृत्वा द्वादशपारणम्। ध्वजव्रतं द्वादश वत्सराणि कृत्वा नरा भार्गववंशसुख्य!। सायुज्यमायाति जनार्दनस्य देवस्य विष्णोः परमेश्वरस्य"।

नक्षत्रचतुर्थीव्रतं स्कन्दपु० "विनायकचतुर्थ्याख्यं व्रतं वक्ष्यामि तेऽनघ!। धन्यं यशस्यमायुष्यं समीहितफलप्रदम्। विघ्नापशमनायालं सर्वसिद्धिप्रदायकम्। प्रियं गणपतेर्नित्यमृषिभिश्चाप्युपासितम्। मार्गशुक्लचतुर्थ्यान्तु व्रतमिदं भवेत्। नक्ताहारेण विप्रेन्द्र! तिलान्नं पारणं स्मृतम्। तदेव वक्तव्यं होतव्यं ब्राह्मणाय ददेत् सदा। नद्यां नदे वा नैवेद्यं विघ्नराजाय संयमी। पूजयेत् गणपतिं रात्रौ गन्धैः पुष्पैर्यथाक्रमम्"

नक्षत्रपुरुषव्रतं मत्स्यपु० "नक्षत्रपुरुषं नाम परं नारायणार्चनम्। पादौ हि कृत्वाँहविष्णुनामानि कीर्त्तयेत्। प्रतिमां वासुदेवस्य मूलर्क्षाभिपूजयेत्। चैत्रमासं समासाद्य कृत्वा ब्राह्मणवाचनम्। मूले नमो विश्वधराय पादावनन्तदेवाय च रोहिण्योः। जङ्घे च पूज्ये वरदाय चैव द्वे जानुनी चाश्विकुमारकर्त्ते। पूर्वोत्तराषाढयुगे च पादौ नमः शिवायेत्यभिपूजनीयौ" इत्यादि।

नक्षत्रार्घव्रतं देवीपु० "अतःपरं प्रवक्ष्यामि रूपसौभाग्यकारकम्। नक्षत्रविधिगा वत्स! यथा तुष्यति शङ्करी। मृगादारभ्य मूलेन पादौ जातिसजा पुरा। पूजयेत्सोपवासस्तु नक्षत्रान्ते तु पारणम्। यवाढ्यं हविषा सिद्धं ब्राह्मणे जङ्घे प्रपूजयेत्" इत्यादि।

नदीव्रतं विष्णुधर्मोत्तरे "चैत्रशुक्लादारभ्य प्रत्यहं दिनसप्तकम्। छदिनीं छादिनीञ्चैव पावनीं चैव पूजयेत्। सीतां चेक्षुं तथा सिन्धुं तथा भागीरथीं क्रमात्। वह्निःस्नानं तथा कुर्याच्चित्यं नक्ताशनो भवेत्। जले च जुहुयात् क्षीरं शान्तात्मा च दिने दिने। क्षीरपूर्णाञ्च दातव्या वारिधान्यो द्विजातिषु। क्षीराशनश्च तिष्ठेत तत्तथा दिनसप्तकम्। एवं संवत्सरं कृत्वा पूर्णं संवत्सरे नरः। द्विजातिषु ततो दद्याद्धेनवस्य पलं शुभम्। फाल्गुनस्यासिते पक्षे सप्तम्यां दिवसे क्रमात्। तं लोकमवाप्नोति नरो यत्र पायसकर्दमाः" इत्यादि।

नन्दाव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे महाराजं त्वयोदश्यादुपोषितः। फाल्गुनात्तु समारभ्य नित्यं संपूजयेद्धरः"। महाराजन्तु धनदम्। "गन्धमाल्यनमस्कारदीपधूपाक्षसम्पदा। स्वर्गं ब्राह्मणेन्द्राय व्रतान्ते प्रतिपादयेत्। कृत्वा व्रतं वत्सरमेतदिष्टं पक्षेषु राजन्! शुचिरं भुपोष्य। मानुष्यमासाद्य धनान्वितः स्यात् सौभाग्ययुक्तश्च तथा विरोगः"।

नन्दादित्यव्रतं भविष्योत्तरे "यस्त्वादित्यव्रतेश्रेष्ठ वारो देवस्य सुव्रतः। पूजयेत् स प्रियो नित्यं ख्यातो मोक्षुतिभूषणः (शिवः)। यस्तु संपूजयेच्चित्यं पतङ्गं पन्नगाधिपम्। गन्धपुष्पादिधूपैस्तु स्तोत्रैर्वा विविधैस्तथा। सोपवासो गणश्रेष्ठ! आदित्यव्रतके शुचिः। जपमानो महास्तोत्रं खगाधीशपदाधिपम्। ब्राह्मणान् भोजयित्वा तु ततो भुञ्जीत वाग्यतः। आदित्यव्रतयुक्तो ऽस्मिन् वारे त्रिपुरसूदनः। तत्र कर्म कृतं पुण्यं तत्सर्वं शुभदं भवेत्"।

नन्दाव्रतं देवीपु० "मासे नभसि संप्राप्ते नक्ताहारो जितेन्द्रियः। प्रातःस्नायी सदाध्यायी अग्निकार्यपरायणः। देवीं संपूजयेद्वत्स! बिल्वपुन्नागचम्पकैः। धूपन्तु गुग्गुलं दद्याच्चैवेद्यं हतपाचितम्। क्षीरान्नं दधिभक्तञ्च अथवा शाकयावकम्। जपञ्च कुर्यान्मन्त्रस्य सहस्रमथवा शतम्। देव्यास्तत्र समर्प्यैतत् यावत् पूर्णं व्रतम्भवेत्"।

नन्दासप्तमीव्रतं भविष्योत्तरे "या तु मार्गशिरे मासि शुक्लपक्षे तु सप्तमी। नन्दा सा कथिता वीर! सर्वानन्दकरी शुभा। पञ्चम्यामेकभक्तं तु षष्ठ्यां नक्तं प्रकीर्त्तितम्। सप्तम्यामुपवासञ्च कीर्त्तयन्ति मनीषिणः। मालतीकुसुमानीह सुगन्धं चन्दनं तथा। कर्पूरागुरुसंमिश्रं धूपञ्चात्र विनिर्दिशेत्। दध्योदनं सखण्डञ्च नैवेद्यं भास्करप्रियम्। तदेव दद्याद्विप्रेभ्यो भुञ्जीयाच्च स्वयं यथा"।

नयनप्रदसप्तमीव्रतं भविष्यपु० "यो मार्गशीर्षे सितसप्तमेऽर्क हस्तर्क्षयोगे जगतः प्रसूतिम्। संपूज्य भानुं विधिनोपवासी सुगन्धधूपाक्षतनोपहारैः। घृतीतगव्यं प्रतियत्नपूजादानादियुक्तं व्रतमभूदमेकम्" इत्यादि।

नरकपूर्णिमाव्रतं विष्णुधर्मोत्तरोक्तम् "प्रतिमासन्तु नामानि पञ्चदश्यां जगत्पतेः। कृतोपवासः सञ्जातः पूजयित्वा जगद्गुरुम्। उद्धारयत्यरोयाति सुखेनैव गच्छति। यद्वा मासव्रतं नाम प्रीयतामिति कीर्त्तयेत्। केशवं मार्गशीर्षे तु पौषे नारायणं तथा। माधवं माघमासे तु गोविन्दमपि फाल्गुने। चैत्रे विष्णुञ्च वैशाखे कीर्त्तयेन्मधुसूदनम्। ज्येष्ठे त्रिविक्रमं देवं तथाषाढे च वामनम्। श्रीधरं श्रावणे मासि हृषीकेशं ततः परम्। नाम भाद्रपदे तद्वत् ज्ञायते पुण्यकाङ्क्षिभिः। तद्दामोदरयुजे मासि पद्मनाभेति कीर्त्तयेत्। दामोदरं कार्त्तिके च सर्वान्नरति दुर्गतिम्। एवं माघक्रमेणैव यदि दातुं न शक्यते। तदा संवत्सरान्ते दद्यादेव समागतम्"।

नरसिंहचतुर्दशीव्रतं नरसिंहपु० "वैशाखशुक्लपक्षे तु चतुर्दश्यां समाचरेत्। मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम्। वर्षे वर्षे तु कर्त्तव्यं मम सन्तुष्टिकारकम्। महापुण्यमिदं श्रेष्ठमानुषैर्भवभीरुभिः। तेनैव क्रियमाणेन सहस्रद्वादशीफलम्। जायते मत्सखा वत्स मानुषाणां महात्मनाम्। ज्ञातोनक्षत्रयोगेन अनिवारेण संयुते। सिद्धियोगस्य संयोगे वाणिजे करणे तथा। पुण्यसौभाग्ययोगेन लभ्यते दैवयोगतः। सर्वैरेतेषु संयुक्तं हत्याकोटिविनाशनम्। एतदन्यतरे योगे तद्दिनं प्रापनाशनम्। केवले तत् प्रकर्त्तव्यं महिने व्रतमुत्तमम्। अन्यथा नरकं याति यावच्चन्द्रदिवाकरौ। यथा यथा प्रवृत्तिः स्यात्पातकस्य कलौ युगे। तथा तथा प्रणश्यन्ति तद्व्रतस्य प्रभावतः। मद्व्रतस्य प्रभावेन मतिर्न स्याट् दुरात्मनाम्। विचार्य्यं प्रकर्त्तव्यं माधवे मासि मद्व्रतम्"।

नरसिंहत्रयोदशीव्रतं नरसिंहपु० "गुरुवारे त्रयोदश्यामपराह्णे जलप्लुतः। तर्पयित्वा देवपितॄन् ऋषींश्च तिलतण्डुलैः। नरसिंहं समभ्यर्च्य यः करोत्युपवासकम्। सर्वपापविनिर्मुक्तो विष्णुलोके महीयते"।

नरसिंहव्रतं गरुडपु० "अथाष्टमीव्रतं ब्रह्मन्! प्रोच्यमानमिदं शृणु!। भवविध्वंसनं नृणां सर्वार्त्तिहरणं परम्। राजा वा राजपुत्रो वा यदि चेदृपुनाशनम्। तदाप्नुयान्तु सुस्नातो यवाशञ्च प्रकारयेत्। कुर्यादष्टदलं पद्मं तण्डुलैर्वा प्रसूनकैः। कर्णिकायामधेशानं नरसिंहाकृतिं स्मरेत्" इत्यादि।

नवम्याद्युपवासव्रत मत्स्यपु० "नवमी चाष्टमी चैव पौर्णमासी चतुर्दशी। यो भुङ्क्ते देवि! नैतेषु सुपर्वसु नरः सदा। गार्हपत्यं स लभते निःसपत्नमनिन्दितम्"।

नवरात्रिव्रतं देवीपु० "सौभाग्यार्थं स्त्रिया कार्य्यमाढ्यैश्च धनकाङ्क्षिभिः। महाव्रतं महापुण्यं शङ्करादैरनुष्ठितम्। कर्त्तव्यं देवराजेन्द्र! देवीभक्तिसमन्वितैः। कन्यासंस्थे रवौ शक्र! शुक्लादारभ्य नन्दिकाम्"। नन्दिकाम् प्रतिपदम् "यवाशीत्यथवैकाशी नक्ताशीत्यथ वा पुनः। प्रातःस्नायी जितक्रोधस्त्रिकालं शिवपूजकः। जपहोमसमायुक्तः कन्यका भोजयेत् सदा। अष्टम्यां नवमेऽहनि दारुजानि शुभानि च। एकं वा द्वित्रिभागेन कारयेत् सुरसत्तम!। तस्मिन् देवी प्रकर्त्तव्या त्रैमी वा राजती च वा। युद्धकालक्षणोपेतखड्गशूलेन पूजयेत्। सर्वोपहारसम्पन्नैस्तत्फलादिभिः। कारयेद्वृषदोलादिपूजाश्च बलिदैविकीम्" इत्यादि।

नागदष्टोद्धरणपञ्चमीव्रतं भविष्योत्तरे "उपोष्य पञ्चमीं सम्यक् नागानां बलवर्द्धनम्। सदैकमेकं यावच्च विधानं शृणु भारत!। समैकं संवत्सरम् "भाद्रपदे राजन्! शुक्लपक्षे तु पञ्चमी। सापि पुण्यतमा प्रोक्ता याज्ञवल्क्यगतिकाश्यया। चतुर्थ्यामेकभक्तञ्च तस्यां नक्तं प्रकीर्त्तितम्"। तस्यां पञ्चम्यामुपोष्येति दिवा भोजनवर्जनात् "कृत्वा चान्द्रमसं नागमथ वा कलधौतजम्। अथ दारुमयं भव्यं मृण्मयं वाप्यशक्तितः। चान्द्रमसं सौवर्णं कलधौतजं कृत्वाभयम्। पञ्चम्यामर्चयेद्भक्त्या नागं पञ्चफणन्तथा। करवीरैस्तथा पद्मैः जातीपुष्पैः सुगन्धिभिः। गन्धैर्धूपैः सनैवेद्यैः लाजैः क्षीरादिभिर्नृप!। आह्लाद्यान् भोजयेत्पश्चात् घृतपायसमोदकैः। कृत्वा तं वासुकिं शङ्खं पद्मं कम्बलमेव च। तथा कर्कोटकं नागं नागमश्वतरं नृप!। धृतराष्ट्रं शङ्खपालं कालियं तक्षकं तथा। पिङ्गलञ्च महानागं मासि मासि क्रमाद् यजेत्"।

नागपञ्चमीव्रतं भविष्यपु० "नागानिष्टा तु पञ्चम्यां न विषैरभिभूयते। स्त्रियं च लभते पुत्रं परमां श्रियमाप्नुयात्। अनन्तवासुकिशङ्खपालधार्त्तराष्ट्रकालियतक्षककर्कोटकधनञ्जयाः कीर्त्तिताः। पूर्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः"। तिथीश्वरोऽत्र नागः "गन्धपुष्पादिपञ्चोपचारश्च यथाशक्ति विधीयते। पूजाऽशाठ्येन भावेन कृतापि तु फलप्रदा। अन्यथाराधनमिच्छन्ति दधिक्षीरान्नसाक्षिकैः। पूर्वोक्तफलदो होमो यतः शान्तेन चेतसा। एतद्व्रतं वैश्वानरप्रतिपद्व्रतवद् व्याख्येयम्"।

नागव्रतं कूर्मपु० कार्त्तिकशुक्लपञ्चमपक्षस्य "तिथौ युगाद्यायान्तु समुपोष्य यथाविधि। शङ्खपालादिनागानां शेषस्य च महात्मनः। पूजा कार्य्या पुष्पगन्धक्षीराद्यायनपूर्वकमिति"। युगाद्ययायाञ्चतस्रां प्रातर्मध्याह्नव्यापिन्याञ्च कर्त्तव्यम्" तथा च स्कन्दपुराणे "प्रातर्मध्यन्दिने तत्र तत्रोपोष्य फणीश्वरान्। क्षीरेणाथाद्य पञ्चम्यां पारयेत् प्रयतो नरः। विषाणि तस्य नश्यन्ति न तं हिंसन्ति पन्नगाः"।

नानाफलपूर्णिमाव्रतं विष्णुधर्मोत्तरे "प्राह्य पञ्चदशीं राम! तथा शुक्लाञ्च कार्त्तिकीम्। आरामवृक्षभित्तिं वै उभौ चैव समालिखेत्। तस्य द्वारि वृक्षे चापि नानावर्णैस्तु वर्णिकम्। वृक्षोपकरणं शक्त्या तयोश्चैवाभितो लिखेत्। पीतं यद्वासवाच्छाद्य सकटीसूत्रनासिकम्। ततश्चौ पूजयेच्चारौ स्नात्वा भर्तृपरा शुचिः"।

नामतृतीयाव्रतं भविष्योत्तरे "उपवासस्य नियमं वक्ष्यामि यात् भक्तिभाविता। देवीं संवत्सरं यावत् तृतीयायामुपोषिता। प्रतिमासं करिष्यामि पारणञ्चापरेऽहनि। तद्विघ्नेन मे यातु समाप्तिं व्रतसत्तमम्। शरणं त्वां प्रपन्नास्मि दौर्भाग्याद्दुरितञ्च माम्। एवं सङ्कल्प्य विधिवत् कौन्तेय! कृतनिश्चया। भक्त्या नारी ध्यानपरा स्नानं कृत्वा जितेन्द्रिया। नद्यां तडागे वाप्यां वा वृक्षे वा नियतेन्द्रिया। पूजयेत् पार्वतीं नाम्ना रात्रौ प्राप्य कृशोदकम्। प्रभाते भोजयेत् विप्रान् शिवभक्तान् विशेषतः। पौषे मासे [illegible] गिरिजां नाम पूजयेत्। गोमूत्र प्राशयेद्रात्रौ प्रभाते भोजयेद्वु विप्रान्" इत्यादि। भविष्यपु० व्रतान्तरम् "गौरी

कान्ती२ उमा३ भद्रा४ दुर्गा५ कान्ति:६ सरस्वती७ । मङ्गलाऽवैष्णवी८ लक्ष्मी:१० शिवा११ नारायणी१२ क्रमात् । मार्गतृतीयामारभ्य पूजयेत् स्वर्गभाक् भवेत्" । मार्गशीर्षतृतीयामारभ्य प्रतिमासमेकैकेन नाम्ना पूजयेदित्यर्थः "अर्द्धनारीश्वरं रुद्रमथ वा उमाशङ्करम् । पूजयेद्विधिवच्चारी वियोगमवाप्नुयात्" ।

नामहादशीव्रतं विष्णुरहस्ये "मार्गशीर्षे शुभे मासि शुक्लपक्षे यतव्रतः । प्रथमञ्चैव सञ्जीयात् द्वादशीं विधिवच्चरः । कारयेच्च हरेर्यज्ञमाचार्यादैर्विधानतः । अर्चयित्वा हरिं तत्र लब्धानुज्ञां द्विजन्मनः" इत्यादि ।

नामनवमीव्रतं भविष्यपु० "नवम्यां शुक्लपक्षे तु कृते नक्ते विशेषतः । मासि चाश्वयुजे वीर ! दुर्गादेवीति पूजयेत् । बिल्वपत्रैस्तथाङ्गिश्च द्रोणपुष्पैस्तु सर्वशः । गुग्गुलेनाथ दुग्धेन भक्ष्यभोज्यैरनेकशः । परमान्नेन रत्नेन सर्पिर्भाजैर्विधातितैः । स्त्रीगणन तथा कुर्याद्देव्या वै भक्तिमाचरन् । भोजयित्वा नवम्यां तु ब्राह्मणानां तु कन्यकाः । ब्राह्मणानां सुस्थितस्य यथा भवति शक्तितः । पश्चाद्गव्यं ततः प्राश्य नक्तं भुञ्जीत वाग्यतः । य एवं पूजयेदत्र दुर्गां भक्त्या समन्वितः । सोऽश्वमेधसहस्रस्य फलं प्राप्य दिवं व्रजेत् । कार्य्यमाश्विनवत् सर्वं कार्त्तिकेऽपि हि सत्तम ! । कृत्वोपवासमष्टम्यां मासि मार्गशिरे नृप ! । नवम्यां पूजयेद्दुर्गां भक्त्या भगवतीं बुधः" इत्यादि । वर्षसाध्यमिदम ।

नामसप्तमीव्रतं भविष्योत्तरे "चैत्रात् प्रभृति कर्त्तव्या सर्वदा नामसप्तमी । घातेति मधुमासे तु पूजनीयो दिवाकरः । अर्यमेति च वैशाखे ज्यैष्ठे मित्रः प्रकीर्त्तितः । आषाढे वरुणो ज्ञेय इन्द्रो नभसि कथ्यते । विवस्वांश्च नभस्ये तु पर्जन्योऽश्वयुजि स्मृतः । पूषा कार्त्तिकमासे च मार्गशीर्षे तु कथ्यते । भगः, पौषे विवस्वांश्च त्वष्टा माघे तु कथ्यते । विष्णुस्तु, फाल्गुने मासि पूज्यो वन्द्यश्च भास्करः । सप्तम्यां चैव सप्तम्यां भोजयेद्ब्राह्मणान् बुधः" ।

निम्बार्कसप्तमीव्रतं प्रथमं भविष्यपु० "सूर्यभक्ता तु या नारी सुवं सा पुरुषो भवेत् । स्त्री चैवाप्नुत्तमं नाथं यत् कृत्वा लभते ध्रुवम् । निम्बार्कव्रतं भानोः सदा प्रीतिविवर्द्धनम् । वियोगकरं वीर ! धर्मकामार्थसाधकम् । सप्तम्यामथ षष्ठ्यां वा संक्रान्तौ भानवे दिने । हविष्या हविष्या क्षौमं सोपवासः समाचरेत् । निम्बार्कस्य चैवाग्रां कृत्वा स्वर्णमयीं शुभाम् । रक्तां वाथ वार्चीं वा स्थापयेच्च एतादिभिः" । निम्बः सूर्यपत्नी तथा सहितोऽर्कः । द्वितीयम् "या नार्युपवसेदेवं कृष्णामेकान्तु सप्तमीम् । सा गच्छेत् परमं स्थानं भानोरमिततेजसः । वर्षान्ते प्रतिमां कृत्वा शालिपिष्टमयीं शुभाम् । पीतानुलेपनैर्माल्यैः पीतवस्त्रैः प्रपूजयेत् । पूर्वोक्तं निखिलं कृत्वा भास्कराय निवेदयेत् । सर्वभूमौ सहीपालो धातुचामीकरप्रभः । वर्षकोटिसहस्राणि सूर्यलोके महीयते" । तृतीयम् "सप्तम्यां या निराहारा भवेद्भक्तिनियन्त्रिता । गजं पिष्टमयं कृत्वा वर्षान्ते विनिवेदयेत् । विधाय राजतं पद्मं सुवर्णकृतकर्णिकम् । भक्त्या विन्यस्य तत्पृष्ठे सर्वं पूर्ववदाचरेत् । कामतोऽपि कृतं पापं भ्रूणहत्यादि यद्भवेत् । तत् सर्वं गजदानेन क्षीयते नात्र संशयः" । चतुर्थम् "कृष्णपक्षे तु माघस्य सप्तम्यां या दृढव्रता । वर्षैकमुपवासेन सर्वभोगविवर्जिता । वर्षान्ते सर्वगन्धोत्थं निम्बार्कं निवेदयेत" ।

निर्जलैकादशीव्रतं भविष्योक्तम् "दृषस्थे मिथुनस्थेऽर्के शुक्ला ह्येकादशी भवेत् । ज्यैष्ठे मासि प्रयत्नेन सोपोष्या जलवर्जितैः । स्नाने चाचमने चैव वर्जयित्वोदकं बुधः । उपभुञ्जीत दैवाद्व्रतभङ्गोऽन्यथा भवेत् । उदयादुदयं यावद्वर्जयित्वा जलं बुधः । अप्रयत्नाद्वाप्नोति द्वादश्यां द्वादशीफलः । ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत् । जलं सुवर्णं दत्त्वा तु द्विजातिभ्यो यथाविधि । भुञ्जीत कृतकृत्यस्तु ब्राह्मणैः सहितो बुधः । एवं कृते तु यत् पुण्यं भीमसेन ! शृणुष्व तत् । संवत्सरस्य या मध्ये एकादश्यो भवन्त्युत । तासां फलमवाप्नोति व्रत्र मे नास्ति संशयः" ।

नीराजनद्वादशीव्रतं भविष्योत्तरे "कार्त्तिके शुक्लपक्षस्य द्वादश्यां रजनीमुखे । समुत्थिते विनिद्रे तु देवे दामोदरे तथा । दोषान्ते नरनारीभिरग्र्ये स्त्री वा नरन्तिके । जनयित्वा नवं विष्णुं कृत्वा मन्त्रैर्हि लोकमैः । सार्द्धमानतपुष्पाभिर्दीपिकाभिर्जनार्दनम् । कृत्वा महाजनाः सर्वे हरिं नीराजयेच्छनैः । पुष्पैरभ्यर्चितं देवं समालभ्य च चन्दनैः । बदरैः कर्करैश्चैव तथा पूपैरिक्षुभिस्तथा । गन्धैः पुष्पैरलङ्कारैर्वस्त्रैश्च पूजितैः । तस्यैवानुगतां लक्ष्मीं ब्राह्मणं चणिजकां तथा । आदित्यं शङ्करं गौरीं यज्ञं गणपतिं महान् । मातरः

पितरो गावः सर्वा नीराजयेत् क्रमात्। गवां नीराजनं कुर्यात् सप्तिष्प्रादेश मण्डलम्। भ्रामयेच्चास-येच्छब्दैर्घण्टावादनच्छादनैः"।

ऋषिंहद्वादशीव्रतं धरणीव्रतोक्तम् "तद्वत्तु फाल्गुने मासि कृष्णपक्षे तु द्वादशी। उपोष्या प्रोक्तविधिना हरिमाराधयेद्दु बुधः। नरसिंहाय पादौ तु गोविन्दायोदरं तथा। कटिं विश्वभुजे तद्वदनिरुद्धाय चोदरम्। कण्ठन्तु क्षितिकण्ठाय पिङ्गकेशाय वै शिरः। असुरध्वंसनायेति चक्रबाहुत्मने तथा। शङ्खमित्येव सम्पूज्य गन्धपुष्पफलैस्तथा। रत्नगर्भं घटे स्थाप्य तं संपूज्य विधानतः। द्वादश्यां वेदविदुषे ब्राह्मणाय निवेदयेत्। एवं कृते फलं प्राप्तं यत् पुरा पार्थिवेन च" इत्यादि।

पञ्चसन्धिव्रतं पद्मपु० "प्रतिपद्येकभक्ताशी सामन्ते कपिलाप्रदः। वैश्वानरपुरं याति व्रतं वैश्वानरस्त्विदम्। पृथिवीं भाजनं कृत्वा यो भुङ्क्ते पञ्चसन्धिषु। अहोरात्रेण चैकेनातिरात्रफलमश्नुते"।

पञ्चघटपूर्णिमाव्रतं भविष्योत्तरे "पञ्च पञ्चदशीः स्थित्वा एकभक्तेन मानवः। संपूज्य पूर्णिमां देवीं लिखितां चन्द्रनादिना"। पूर्णिमाप्रतिमा तु परिभाषायां द्रष्टव्या। "ततः पञ्च घटान् पूर्णान् पयोदधिघृतेन च। मधुना सितखण्डेन ब्राह्मणायोपपादयेत्। मनोरथान् पूरयस्व यथा त्वं पूर्णिमा ह्यसि। पञ्चकृत्वःप्रदानेन भूतानां तुष्टिरस्तु मे। द्विजानेवं नमस्कृत्य सर्वान् कामानवाप्नुयात्। एतत् पञ्चघटं नाम व्रतं तुष्टिप्रदायकम्"।

पञ्चपिण्डिकागौरीव्रतं स्कन्दपु० नागरख० "नभस्ये च सिते पक्षे तृतीयादिवसे स्थिते। प्रातरुत्थाय पश्चाच्च भक्षयेत् दन्तधावनम्। ततश्च नियमं कुर्याद्दुपवासमसङ्गवम्। गौरीनाम सदोच्चार्य श्रद्धापूतेन चेतसा। ततो निशागमे प्राप्ते कृत्वा गोरीचतुष्टयम्। मृण्मयं यादृशञ्चैव तद्विधैकमनाः शृणु!। एका गौरी प्रकर्त्तव्या पञ्चपिण्डा यथोचिता॥ प्रहरे प्रहरे प्राप्ते तासु पूजां रेत्"। समाप्त

पञ्चमहापापनाशनद्वादशीव्रतं भविष्यपु० "यत् कृत्वा मुच्यते जन्तुर्महतः पञ्चपातकात्। पञ्चपातकिनः प्रेतान् पितॄंस्तारयते तथा। निशाकरोदयायत्तं पूर्णिमादेवता क्रमाः। जगद्धात्री महीधारी देवेन्द्रो देवकीसुतः। चतुर्भुजो गदापाणिः सुरभीशः सुलोचनः। सर्वजगत्प्रकृतिः सूरसाध्यसुरालकः। श्रीश्च द्वादश

इमा देवताः परिकीर्त्तिताः। स्वाहाकारान्वितैरेतैश्च तुर्य्यन्तैश्च नामभिः। आवणादौ देवतानां पूजां च कुरुते व्रती। आवणादेव कुर्वीत द्वादश्यां परिकीर्त्तिता। पूर्णिमायान्तु देवेभ्यः पायसञ्जुह्वयात्ततः। अमावास्यां देवतानां तिलसङ्गुडोदकम्। पञ्च रत्नानि देयानि पञ्चपातकशान्तये। पञ्चमूर्त्तिं स्वर्णमयीं पञ्चामृतसमन्विताम्। भोजयेद् ब्राह्मणान् राजन्! पञ्चद्वादशसंख्यया"।

पञ्चमहाभूतपञ्चमीव्रतं विष्णुधर्मोक्तम् "अतःपरं प्रवक्ष्यामि पञ्चमूर्त्तेस्तथार्चनम्। पृथिव्यापस्तथातेजो वायुराकाशमेव च। एता वै देवदेवस्य कथिताः पञ्च मूर्त्तयः। चैत्रे तु पञ्चमीं शुक्लां समासाद्य विचक्षणः। सोपवासो हरिं देवं पञ्चात्मानं समर्चयेत्। पञ्चमण्डलकाः कार्याः पञ्चभिर्वर्णकैः पृथक्। पार्थिवं मण्डलं कार्यं नीलवर्णं महीपते!। वारुणञ्च तथा श्वेतं रक्तमाग्नेयमिष्यते। पीतं भवति वायव्यं कृष्णमाकाशदैवतम्। समानवर्णगन्धैश्च पुष्पैस्तानर्चयेत् पृथक्। शक्त्या च धूपदीपाद्यैर्यथालाभमरिन्दम!। यवैर्माषैस्तिलैश्चैव हविषान्नेन च"। तेन

पञ्चमूर्त्तिव्रतं विष्णुधर्मोत्तरे "अथापरं प्रवक्ष्यामि पञ्चमूर्त्तिव्रतं तव। शङ्खचक्रगदापद्मं पृथिवीञ्च महाभुज!। गन्धैर्मण्डलिकां कृत्वा पञ्च पञ्चसु पूजयेत्। चैत्रशुक्लादिमां प्राप्य पञ्चमीप्रभृतिं नरः। सोपवासो बहिःस्नातस्तथा शुक्लाम्बरः शुचिः। गन्धमाल्यनमस्कारदीपधूपाक्षसम्पदा। सर्वेषां पूजनं कृत्वा शुद्धयाज्ञातवेदसि। सर्वेषामेव देवानां नामभिस्तु तथा गृहान्। ब्राह्मणान् भोजयेच्चात्र तदा च सुरभोजनम्। संवत्सरमिदं कृत्वा व्रतान्ते वस्त्रपञ्चकम्। पञ्च वेदविदां दद्यात् पञ्चवर्णं नराधिप!। व्रतेनानेन चोर्णेन राजसूयफलं लभेत्"।

पञ्चाग्निसाधनरम्भातृतीयाव्रतं भविष्योत्तरे "भद्रे कुरुष्व यत्नेन रम्भाव्रतमनुत्तमम्। मनोऽभिलषितं कामं येन प्राप्नोति शङ्करम्। ज्यैष्ठशुक्लतृतीयायां स्नाता नियमतत्परा। कुरु! पार्श्वेषु पञ्चाग्नीन् ज्वालामालाकुलानतीन्। गार्हपत्यं दक्षिणाग्निं सभ्यकाहवनीयकम्। पञ्चमं भास्करं तेज इत्येते पञ्च वह्नयः। इत्येषां मध्यमा भूत्वा तिष्ठ पूर्वसखी सती। चतुर्मुखं ध्यायमानं पङ्कजोपरिसंस्थितम्। मृगाजिनच्छन्नकुचां जटावल्कलधारिणीम्। सर्वाभरणसम्पन्नां देवीमभिमुखं कुरु!"।

पत्रव्रतं भविष्योत्तरे "ताम्बूलभक्षणादौ वा गोरीपत्रं दहति च"। गोरीपत्रं ताम्बूलपत्रम् "पूगचूर्णसमायुक्तं स्त्रियो वा पुरुषस्य वा। वर्षमध्ये तु सौवर्णं कल्पयन्तु राजतम्। मुक्ताफलमयं चूर्णं सम्पूर्णं वा प्रयच्छति। न सा प्राप्नोति दौर्भाग्यं न दौर्मनस्यं कुतश्च वा। एतत्पत्रव्रतं नाम गौरीलोकप्रदायकम्"।

पदार्थव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे दृश्यां तु सोपवासस्तथा नरः। मार्गशीर्षे तथारभ्य यावत् संवत्सरं भवेत्। गन्धमाल्यनमस्कारधूपदीपान्नसम्पदा। द्विजपादपूजनं कुर्यात् स्त्रियां संपूजनं तथा। गां वत्सरान्ते दद्यात्तथैव च पयस्विनीम्। ब्राह्मणाय महाभाग! तथा च मनुजोत्तम!। एतद्व्रतं नरः कृत्वा यत्र कुत्रन गच्छति। तत्रैव काममाप्नोति पुत्रैश्चिरञ्जीवति। वाग्मित्वसुभगत्वं नरः सुस्थितिं याति मत्यान्यां विजीगीषवश्च। विद्याधिनो वा रिपुनाशनं वा स्थितं पदार्थव्रतमेतदिष्टम्"।

पद्मनाभद्वादशीव्रतं "तद्दादश्युषसे मासि द्वादशीं शुक्लपक्षिणीम्। सङ्कल्पाभ्यर्चयेद्देवं पद्मनाभं सनातनम्। पद्मनाभाय पादौ तु ऋतवे वै पद्मयोनये। उदरं सर्वदेवाय पुष्कराक्षाय वै करः। अव्ययाय तथा बाहू प्राग्वदक्षाणि पूजयेत्। प्रभवाय शिरः पूज्य प्राग्वदस्त्रं घटं न्यसेत्। तस्मिन् क्षेमकरं देवं पद्मनाभं तु विन्यसेत्"। पद्मनाभस्तु दक्षिणाधोक्षतादारभ्य सव्येन च शङ्खचक्रगदाचक्रधारी कार्यः"।

पयोव्रत पद्मपु० "वर्षमेकं भवेदुयस्तु पञ्चदश्यां पयोव्रतः"। पञ्चदश्यामित्यमावास्यायां पुराणान्तरसंवादात् "समाप्ते चाह्नि दद्यात् यस्य पञ्च पयस्विनीः। वासांसि च पितृभक्ति जलकुम्भयुतानि च। स याति वैष्णवं लोकं पितृणां तारमेव्ययम्। जन्मान्तरे भवेद्राजा! पयोव्रतमिदं श्रुतम्"।

पर्वनक्तव्रतं भविष्यपु० "योऽष्टम्येकं पक्षयोर्वै नक्तं पर्वणि पर्वणि"। पर्व पञ्चदशी "ब्रह्मचारी जितक्रोधः शिवार्चनरतः सदा। वत्सरान्ते च विप्रेन्द्र! शिवभक्तान् समाहितान्। भोजयित्वा ततो ब्रूयात् प्रीयतां भगवान्हि प्रभुः। एवंविधिसमायुक्तः शिवलोकञ्च गच्छति"।

पर्वभाजनव्रतं पद्मपु० "पृथिवीभाजने भुञ्जन्नित्यं यो वैष्णवो नरः। क्षितिदानफलं देवि! अहोरात्रेण विन्दति"। पृथिवीभाजने भुञ्जानश्च निधायेत्यर्थः शिवोक्तं देवव्रतं"।

पातालव्रतं विष्णुधर्मोत्तरे "चैत्रमासादथारभ्य कृष्णपक्षे दिने दिने। पातालपूजनं कुर्यात् प्रतिपत्प्रभृतेः क्रमात्। रौद्रं भौमं स्त्रिभौमं पातालं नीलसंज्ञितम्। रक्तभौमं पीतभौमं श्वेतभौमन्तदापि। सगन्धैर्गन्धमाल्यैश्च नैवेद्यैश्च च भूरिभिः। एतद्दीपप्रदानेन वस्त्रैश्चन्दनेन च। एवं कृत्वायनः कृत्वा व्रतं संवत्सरं सदा। अवसाने दद्यात्तु दीपकान् द्विजवेश्मसु"।

पाशुव्रतं मरीचिपु० "उपवस्त्रैकादश्यां शुक्लां माघमासेऽथ पूर्णिमाम्। कुर्यादिधिविधिं सम्यक् सदा तस्य व्रजेत्पदम्। तदुद्दिष्टप्रदस्त्वेतद् व्रतं सौभाग्यदायकम्। पुत्रदं वेदवदस्त्वेव विधिना चरितं त्विदम्। व्रतस्यास्य प्रकारं समयुक्तं गुणान्वितम्। पूजयेद्भूमिकामोऽथ पाटकाद्यैः सुभावितः। रुक्मनाज्ययुतस्त्वाथ पात्रं नीलाङ्ग मामपि। अभावे च तथा क्षेम्नः कर्षार्द्धेन तु राजतम्। वस्त्रयुग्मं नवं सूक्ष्मं पुष्पमकरचर्चितम्। आच्छिद्य तत्र तत् पात्रं शुचौ देशे निवेशयेत्। ततो जागरणं कुर्यात् गीतवाद्यादिमङ्गलैः। प्रभाते तु नवे स्थाने क्षरेरायतने महत्। स्नाप्य क्षीरादिभिर्देवं विष्णुं सम्पूज्य वै क्रमम्। निवेदयेत् तु तत्पात्रं प्रीयतामिन्युदीरयेत्"।

पापनाशनीसप्तमीव्रतं भविष्यपु० "शुक्लपक्षस्य सप्तम्यां यदा ऋक्षतरो भवेत्। तदा पुण्यतमा प्रोक्ता सप्तमी पापनाशिनी"। करो, रुक्षः अयं हि योगो बहुले आश्वयुजे मासि सम्भवति। "तस्यां सम्पूज्य देवेशं चित्रभानुसमुद्भवम्। सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः। यश्चोपवासं कुरुते तस्यां नियतमानसः। सर्वपापविनिर्मुक्तः सूर्यलोके महीयते। दानं यद्दीयते किञ्चित् तदुद्दिश्य दिवाकरम्। होमो वा क्रियते तत्र तत् सर्वाक्षयं भवेत्। करुणा सप्तमी कृष्णा तेनोक्ता पापनाशिनी। अस्यां समभ्यर्च्य रविं याति सौमनसं पुरम्"।

पापमोचनव्रतं गौरपु० "बिल्ववृक्षं समाश्रित्य द्वादश्याङ्गमभोजनम्। यः कुर्यात् भ्रूणहात्वं पापान्मुक्तो भवति नारद!"।

पापात्त्राणसङ्क्रान्तिव्रतं स्कन्दपु० "वक्ष्याम्यपापसंक्रान्तिं शृणु स्कन्द! विधानतः। संक्रान्त्यां नियतो भूत्वा निशेः शेषे समन्वितैः। करकं वर्द्धमानञ्च प्रतिमासं निवे

दयेत्" । वर्द्धमानः शराव । "मन्त्रेणानेन तु स्नाप्याङ्गैर्भावसमन्वितः । तिलो मास्मात् पापेभ्यस्त्व देव प्रसादतः । त्वञ्च मां रक्ष देवेश ! वाङ्मनःकायकर्मभात् । उद्यापने च देवस्य सौवर्णमाप्रकोष्ठ तु । द्विभुजा प्रतिमा कार्य्या रजतेनाथ कारयेत्" ।

माघीचतुर्दशीव्रतं भविष्योत्तरे "माघि भाद्रपदे पक्षे शुक्लेभूततिथौ नृप ! । तदा भक्त्या प्रदातव्यं वरुणायार्घ्यमुत्तमम् । ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैः स्त्रीभिस्तथैव च । फलपुष्पैस्तथा वस्त्रैर्दीपालक्तकचन्दनैः । विल्वैः शमीधान्यैश्च दधिपिष्टास्थचन्दनैः । अनग्निपाकसिद्धैस्तैस्तिलतण्डुलमिश्रितैः । खर्जूरैर्नारिकेलैश्च बीजपूर्णाक्षतैस्तथा" । आढकं (आतः) फलविशेषः "दूर्वाद्याडिमपूगैश्च पुष्पैश्चापि प्रपूजयेत् । संरुद्धशुद्धसलिलातिक्तां विधानां पालीमुपेत्य वरुणं सहितं सबुद्धे तेषां गृहे भवति भूतिरनर्घगाधा" ।

पाशुपतव्रतं वह्निपु० "शिवं ये पूजयिष्यन्ति दानं दास्यन्ति सुव्रताः । सर्वपापविनिर्मुक्ता दिवमेष्यन्ति ते द्विजाः । यथा पशुपतिर्नित्यं कृत्वा सर्वमिदं जगत् । न लिप्यते पुनः सोऽपि यो नित्यं व्रतमाचरेत् । दूरं जन्म कृतं पापं पूर्वजन्म कृतञ्चयत् । व्रतं पाशुपतं नाम कृत्वा हन्ति द्विजोत्तम ! द्वादश्यामेकभक्ताशी त्रयोदश्यामयाचितम् । चतुर्दश्यां तथा नक्तं उपवासं परेऽहनि" । कालसंहितोक्तम् "रहस्यं यत् प्रवक्ष्यामि सर्वपापनिकृन्तनम् । व्रतं पाशुपतं श्रेष्ठं मया च शिरसि (वेदे) श्रुतम् । कालश्चैवपौर्णमासी देवः शिवपरिग्रहः ! चैत्रारामादिरन्यो वा प्रशस्तः शुभलक्षणः । तत्र पूर्वत्रयोदश्यां स्नातस्तु कृताह्निकः । व्रतार्थं समाहूय संपूज्य प्रणिपत्य च । पूजां स्वशाखिकीं कृत्वा शुक्लाम्बरधरः स्वयम् । शुक्लयज्ञोपवीती च शुक्लमाल्यानुलेपनम् । दर्भासने समासीनो दर्भमुष्टिं प्रगृह्य च । प्राणायामत्रयं कृत्वा प्राङ्मुखोवाप्युदङ्मुखः । ध्यात्वा देवञ्च देवीञ्च भूतविज्ञानवर्त्मना । व्रतमेतत् करोमीति भवेत्सङ्कल्प्य दीक्षितः । यावत् शरीरपातञ्च द्वादशाब्दमथापि वा । तदर्द्धं वा तदर्द्धं वा मासद्वादशकन्तु वा । तदर्द्धं वा तदर्द्धं वा मासमेकमथापि वा । दिनद्वादशकं वाथ व्रतसङ्कल्पनं विधिः" । व्रतान्तरं लक्ष्यपोहनं लिङ्गपु० "कृत्वा कनीयसं लिङ्गं स्नाप्य चन्दनवारिणा । चैत्रमासादि विप्रेन्द्रा शिवलिङ्गव्रतं शुभम् । कृत्वा हैमं शुभं पद्मं कर्णिकाकेसरान्वितम् । नवरत्नैस्तु खचितमष्टपत्रं यथाविधि । कर्णिकायान्यसेल्लिङ्गं स्फाटिकं पीठसंयुतम् । तत्र भक्त्या यथान्यायमर्चयेदुत्पलपत्रकैः" ।

पिङ्गव्रतं विष्णुधर्मोत्तरे "व्रतं परं प्रवक्ष्यामि सप्तमूर्त्तिव्रतं तव । चैत्रमासादयारभ्य प्रतिपत्प्रभृति क्रमात् । सुभास्करा वह्निदोऽग्निष्वात्तास्तथैव च । क्रव्यादपङ्क्तयश्चैव आज्यपाश्च सुकालिनः । पूजयेत् पत्रकं राजन् ! गन्धमाल्यानुलेपनैः । नैवेद्यं क्षरं कुर्यात् तिलानग्नौ च होमयेत् । क्षरं भोजयेद्विप्रान् तिलान् दद्याच्च दक्षिणाम् । नक्ताशनस्तथा तिष्ठेद्व्रतिष्वाशी नराधिप ! संवत्सरमिदं कृत्वा व्रतं पुरुषसत्तम ! । व्रतावसाने दद्यात्तु रजतस्य फलं द्विजे । व्रतेनानेन चोर्णेन सम्यग्लोकगतिर्भवेत् । त्रिदशैः पूज्यमानस्तु कामचारी विहङ्गमः" । [कार्य्यम् ।

पिपीतकीद्वादशीव्रतं ति० त० उक्तं वैशाखशुक्लद्वादश्यां

पुण्डरीकप्राप्तिव्रतं विष्णुधर्मोत्तरे "द्वादश्यां देवदेवेश पूजयित्वा जलाधिपम् । पुण्डरीकमवाप्नोति वरुणं यादःसाम्पतिम्" ।

पुत्रकामव्रतं पद्मपु० "नभस्यमासस्य तु पौर्णमास्याम् । भार्याद्वितीयः सहसा य एव पुत्रेष्टिमादौ स्वगृहेऽपि कृत्वा । गच्छेत्ततः सर्वसमृद्धियुक्तो होमैः सजाज्यैर्लिना च रुद्रम् । शैलेन्द्रकन्यागजवक्त्रयुक्तम् षड्भावषक्त्रा थथ वार्च्चयित्वा । संपूज्य विप्रानथ देवपूर्वान् कृतोपवासो जितरोषदोषः । ततः सहायानपि भोजयित्वा भार्याञ्च पश्चात् स्वयमत्र भुङ्क्ते । तस्माच्च भार्याञ्च गोपयित्वा प्रदक्षिणीकृत्य गुहां सुगुह्याम् । गृहांस्तु गच्छेत्परिपूर्णकामो हृष्टः प्रहृष्टः कृतभोजनश्च । कार्य्याश्च दिव्यास्त्वथ नन्दिनीश्च भार्य्या ततः आवयोः प्रयुक्ताम् । क्षीरोदनं त्रिदिनं भोजयेच्च बन्ध्याञ्च भार्य्यामपि पुत्रकामाम् । ततो गृहे सर्वसमृद्धिकामः कृतार्थमात्मानं भार्य्यां प्रयतो विधाय । उमां शिवं नन्दिनं चार्चयित्वा ततो भवेत् पुत्रवती च बन्ध्या" । व्रतान्तरं कृत्तिकसंक्रान्त्यां कार्त्तिकपूजारूपम् ।

पुत्रप्राप्तिषष्ठीव्रतं विष्णुधर्मोत्तरे "वैशाखमासादारभ्य पञ्चम्यां य उपोषितः । भवन्तं पूजयेत् षष्ठ्यां संवत्सरमतन्द्रितः । पुत्रार्थी प्राप्नुयात् पुत्रान् धनकामो धनी भवेत् । स्वर्गार्थी प्राप्नुयात् स्वर्गमपि तुष्टो ममात्मजः । स्त्रीषु

च सदोषेण ये क्षोभयन्ति नराः प्रभो ! । क्षोभहेयेऽपि ते कामान् प्राप्नुवन्ति मनःप्रियान् । कुमारश्च तथा स्कन्दो विशाखश्च गुहस्तथा । चतुरात्मा विनिर्दिष्टो भगवान् क्रौञ्चसूदनः । तमभ्यर्च्य नरः षष्ठ्यां पुत्रान् प्राप्नोत्यभीप्सितान्" ।

पुत्रप्राप्तिव्रतं देवीपु० "ब्रह्मणा यो विधिः पक्षे कथितो विजयावहः । जयेति पूर्णिमा तात ! श्रावणस्य शुभावहा" । शक्र उवाच "विजया या समाख्याता सर्वकामप्रसिद्धये । तामहं श्रोतुमिच्छामि तत्त्वतः सुरसत्तम !" । ब्रह्मोवाच "पुत्रार्थं राज्यसिद्ध्यर्थं यशःसौभाग्यतोऽपि वा । विजयार्थं च कामको जयां कुर्वीत पूर्णिमाम् । हैमं वा राजतं वापि ताम्रं वा ऽथ पाटके । प्रतिमां वापि कुर्वीत सर्वलक्षणसंयुताम्" । माद्रुच्यां इति शेषः "तामादाय शुभे क्षेत्रे शुक्लवस्त्रविभूषिताम् । यवशाल्युत्करोपेतां पानपात्रविभूषिताम् । दीपैश्च सुशोभनां वस्त्रैः कल्पयेत्तत्र विन्यसेत्" ।

पुत्रसप्तमीव्रतं वराहपु० "माघे मासि प्रपे शुक्लपक्षे सुरेश्वरः ! । सप्तम्यामुपवासेन पुत्रप्राप्तिप्रदं व्रतम् । अष्ट्यां चैव समंकल्प्य सप्तम्यां पूजयेद्धरिम्" ।

पुत्रीयव्रतं विष्णुधर्मोत्तरे "पौषपञ्चामतीतायां कृष्णपक्षाष्टमी तु या । सोपवासोनरोऽष्टम्यां योविद्धा तनयार्थिनी । स्नाता सरसि धर्मज्ञा तोयेऽवाप्यथ वारसे । पूजनं वासुदेवस्य यथा कृत्यांस्तथा शृणु !" ।

पुत्रीयसप्तमीव्रतं विष्णुधर्मोत्तरे "मार्गशीर्षे शुभे मासि शुक्लपक्षे द्विजोत्तम !। पुत्रीयां सप्तमीं राम ! शृणुयात् प्रयतः शुचिः । अथ वा पुत्रकामस्य विधिना येन तत् शृणु" । पुत्रीयां पुत्रदाम् । "कृत्वाभ्राग्नौ शिरःस्नानं कृत्वा भास्करपूजनम् । अधःशायी द्वितीयेऽह्नि मोहयोदकेन तु । स्नात्वा संलिप्य च तथा शुभे देशे तु मण्डलम् । तत्राष्टपत्रकमलं विन्यसेत् वर्णकैः शुभैः । तस्यैव कर्णिकामध्ये भास्करं चन्दनेन तु । रक्तेन पूजयेद्देवं गन्धमाल्यानुलेपनैः" ।

पुत्रोत्पत्तिव्रतं आदित्यपु० "कृत्वा संवत्सरं स्नानं श्रवणे श्रवणे सुते ! सोऽपि पुत्रानवाप्नोति चकार त्रयान्वितः । पाराशर्यः सुतं लेभे व्रतस्यास्य प्रभावतः । एवमन्योऽपि राजेन्द्रस्तावत् सिद्धिमवाप्नुयात् । पुत्रान् पौत्रांश्च लभते सुखञ्चात्यन्तमश्नुते" ।

पुरंदरषष्ठीव्रतं स्कन्दपु० नागरखण्डे "माघमासे वरे पक्षे मकरस्थे दिवाकरे । षष्ठ्यां सूर्यवारेण व्रतमेतत् समाचरेत् । षाण्मातैः पतितैः सार्द्धं तस्मिन्नहनि वर्त्तयेत् । क्षपयित्वा नृपश्रेष्ठ ! प्रभाते दन्तधावनम् । मन्त्र स्नानेन पानाच्च कर्त्तव्यो नियमो नृप !। पुरंदरगणैस्तात पापात् षष्ठ्यां दिवाधिप !। उपवासं करिष्यामि अद्य त्वं शरणं मम । ततोऽपराह्णसमये स्नात्वा धौताम्बरः शुचिः । प्रतिमां पूजयेद्भक्त्या दिनाधिपसमुद्भवाम् । रक्तैः पुष्पैर्मन्दारैराढकैः सम्पूजयेत्ततः" ।

पुष्पद्वितीयाव्रतं भविष्यपु० "कार्त्तिके शुक्लपक्षे तु द्वितीयायां नराधिप ! पुष्पाहारो वर्षमेकं वसेत् सुनियतात्मवान्" । कार्त्तिकशुक्लपक्षद्वितीयायां व्रतमारभ्यान्यास्वपि शुक्लपक्षद्वितीयास्वेव वर्षपर्यन्तं पुष्पाहारव्रतं कुर्यादित्यर्थः । "कालप्राप्तानि यानि स्युर्विप्रकृष्टफलानि तु । भुञ्जीत तानि दत्त्वा तु ब्राह्मणेभ्यो नराधिप !" । कृषिप्रकृष्टफलानि पुष्पाहारोचि भक्षणे चाविहितानि अश्विनौ स्नात्र नाममन्त्रेण पूजनीयौ तयोः फलदातृत्वेन श्रवणात् । "सुवर्णञ्च च पुष्पाणि गवा सह ददाति यः । व्रतान्ते तस्य सन्तुष्टौ देवौ त्रिभुवनेश्वरौ । दत्तः कामांस्तथा दिव्यान्विमानमपि तेजसम् । सुचिरं देवनारीभिर्लोकं रमयतोऽश्विनौ" ।

पूर्णिमाव्रतं विष्णुधर्मोत्तरे "या प्रेरयति कर्माणि लोकेषु द्विजसत्तम !। तस्याः संपूजनं कार्यं शुक्लपक्षेषु सदा । माल्यानुलेपनैः शुक्लैर्धूपेन च सुगन्धिना । रक्तवस्त्रप्रदानेन दीपदानेन चाथ वा । वैदलेन तथा भक्ष्यैरपूपैश्च तथैव च । पूजयित्वा च तां देवीं भोक्तव्यं निशि भार्गव ! । यदि पक्षेषु सर्वां न शक्नोति कथञ्चन । देव्याः संपूजनं कार्यं चतुर्ष्वपि कार्त्तिके । समाप्ते पूजयेद्वा तु सा तु नारी पतिव्रता । सदा धर्मरता नारी लोके भवति भार्गव !" । वह्निपु० व्रतान्तरम् "श्रावण्यां पौर्णमास्यान्तु सोपवासो जितेन्द्रियः । प्राणायामशतं कृत्वा मुच्यते सर्वकिल्बिषैः" ।

पृथिवीपञ्चमीव्रतं विष्णुधर्मोत्तरे "पञ्चम्यां पृथिवीं शुक्लां देवीं संपूजयेन्नरः । तामवाप्नोति यत्नेन नात्र कार्या विचारणा" ।

पौरन्दरपञ्चमीव्रतं भविष्योत्तरे "तिलपिष्टमयं कृत्वा गजं हैमविभूषितम् । कलाङ्गुष्ठसुतं तद्वद्धारोदकसमन्वितम्" । तद्वदिति अनन्तव्रतोक्तवत् गजरूपं दृष्ट्वा । "नक्षत्रमालासहितं चामरार्पीडधारिणम् । इन्द्राय-

वइनेकं रक्तवस्त्रयुगान्वितम् । ताम्रपात्र्यां कृष्णके वा
ऋतदन्तापमोदकम् । प्रदद्याद् द्विजदम्पत्योः पूज्य गा-
न्वाभिभूषणैः । कर्णाभरणकं दद्यात् वस्त्रञ्च मणवर्जि
तम् । कान्तारतारकं ह्येतत् कथितं हि युधिष्ठिर ! ।
कान्तारगिरिदुर्गेषु तारयत्यपि दुःखितान् । इह
लोके परे चैतद्व्रतं कार्य्यं विचारणा । ये कुर्वन्ति
दिने पुण्ये व्रतं पौरन्दराह्वयम् । तेषां पौरन्दरे लोके
वासः स्यात् सुचिरं नृप !" दिने पुण्ये, पञ्चम्यां
शुक्लपक्षावगात् ।

प्रापतिपुरुषद्वितीयाव्रतं विष्णुधर्मोत्तरे "पुरुषः प्रकृतिश्चोभौ
सृजत् सर्वं प्रकीर्त्तितम् । अन्योन्यमत्सृजं सर्वं तथा
तस्य प्रकीर्त्तितम् । वासुदेवस्य चक्रस्य तावेव परिकी-
र्त्तितौ । चैत्रशुक्लद्वितीयायां सोपवासो जितेन्द्रियः ।
पौरुषेण च सूक्तेन वह्निं संपूजयेत्ततः" । सोपवास
इति प्रतिपदि कृतोपवासो द्वितीयायां वह्निं पूज-
येदित्यर्थः । उपरिष्टाच्च क्षीरहतभोजनञ्च विधि-
सत्वात् "गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । लक्ष्मीञ्च
वरदं देवं पूजयेदुदकं हरिम् । श्रीसूक्तेन च धर्मज्ञ !
तथाचान्नबलोत्तमम्" । हरिरोमौ वह्निं अन्नञ्चास्य
प्रतिष्ठाप्य पुरुषमग्निं वासुदेवञ्चैकोपरि पूजयेत्" इत्यादि ।
प्रजापतिव्रतं "अथ वटोर्व्रतम् इत्युपक्रमे "नेक्षेतोद्य-
न्तमादित्यमित्यादिकसूक्तम्" ।

प्रतिपदृक्षीरपाव्रतं भविष्यपु० "कार्त्तिक्यामथ सप्तम्यां
वैशाख्यां वा युगादिषु । नियतोपवासं प्रथमं भक्षयेत
विधानवित्" । कार्त्तिके वैशाखे वा मासि प्रतिपत्तिथौ
व्रतारम्भः । युगादितिथिव्रतस्य माघवैशाखभाद्र-
पद कार्त्तिकेष्वन्यतमे आरम्भः "या तिथिर्नियतं कर्तुं
शक्या समनुगच्छति । तस्यां तिथौ विधानं तत्तिथि-
बोधं जनाधिप !। नियतोपवासं प्रथमं भोक्तव्येद विधि
वत्तरः । यदा वै प्रतिपद्यादौ दृष्ट्वोदयास्त्रियं नव !।
चतुर्थ्यां कृताहारः सङ्कल्प्य परिकल्पयेत् । अमावास्यां
न भुञ्जीत त्रिकालं स्नानमाचरेत् । पवित्राणि जपेत्तत्र
गायत्रीं शिरसा सह । अर्चयित्वा विधानेन गन्ध-
माल्यैर्द्विजोत्तमान् । पक्त्वा क्षीरं प्रदद्यात् तु ब्रह्मा
मे प्रीयतां विभुः ।, तेनो भुञ्जीत गोक्षीरमनेन विधिना
नृप ।। एष एव विधिः प्रोक्तः स्वोक्तु तिथिषु नृप !",
प्रतिमाव्रतं कालोत्तरे "अधुना तु प्रवक्ष्यामि प्रतिमाव्रत-
मुत्तमम् । महाफलं महाबलिदीपमालाव्रतं तथा ।
विलेपनं कुङ्कुमेन धूपं वै गुग्गुलेन तु । अतेनाष्टोत्तरे-
णैव नैवेद्यं पयसा हृतम् । ताम्रपात्रा चतुर्विंशत् वि-
नेत्रा च चतुर्भुजा । शूलासियुग्मधनुर्बाणा नानाभ-
रणभूषिता । यावद्विघ्नमयो कार्य्या हृष्टपुष्टे च
शोभना । चामरैर्वीज्यमानन्तु शिवं तत्र प्रकल्पयेत् । दर्प
णञ्चैव ताम्बूलं व्यजनं पादुकासनम् । वैजयन्तीध्वजं
यानमाचार्य्याय प्रयत्नतः । मासि मासि प्रकर्त्तव्यं यत्न-
तश्च दिने दिने । कार्त्तिकन्तु समारभ्य यावदाश्वयु-
जावधि । एतद् व्रतोत्तमं नाम प्रतिमाव्रतमीरितम्" ।
प्रदीपव्रतं भविष्यपु० "त्रयोदश्यान्तथा रात्रौ सोपहार
त्रिलोचनम् । दृष्ट्वेमं प्रथमे यामे मुच्यते सर्वपातकैः" ।
प्रभाव्रतं पद्मपु० "पक्षोपवासो यो दद्याद्विप्राय कपिला-
मयम् । ब्रह्मलोकमवाप्नोति देवाप्सरसपूजितः । तद्दत्ते
राजराजः स्यात् प्रभाव्रतमिदं स्मृतम्" ।
प्राजापत्यव्रतं पद्मपु० "कृष्णाश्चे गोयुगं दद्यात् भोजनं
यत्नितः पदम् । विप्राणां शाङ्करं याति प्राजापत्यमिदं
स्मृतम्" शाङ्करं पदं यातीत्यन्वयः । कृष्णशब्दे हृश्यम् ।
प्राग्विव्रतं पद्मपु० "वत्सरं त्वेकभक्ताशी सभक्ष्यफलसञ्चयः ।
शिवलोके वसेत्कल्पं प्राग्विव्रतमिदं स्मृतम्" ।
फलव्रतं पद्मपु० "भक्ष्याफलानि यत्पक्वा चतुर्भ्यां द्विजा-
तये । हैमानि कार्त्तिके दद्याद् गोयुगेन समं नरः ।
सितवस्त्रयुगेनाथ सम्पूज्याज्यहुतेन च । एतत् फलव्रतं
नाम सर्वकामफलप्रदम्" ।
फलसप्तमीव्रतं पद्मपु० प्रभासखं० "फलसप्तमीव्रतं नारी
कुरुते तत्र भाविता । वर्षमेकं सिते पक्षे देवीं पूज्य
विधानतः । फलानि ब्राह्मणे दद्यादभीष्टानि च यानि
तु । फलानि वर्जयेत् नक्तमश्नाति सुरसुन्दरि !।
निष्पावान्नाढकीं शुद्धान् माषांश्चैव कुलत्थिकान् । भक्ष-
यान् राजमाषाश्च गोधूमांश्चिपुटांस्तथा । फलान्
वर्त्तुलान् वापि सुकटान् भक्षितोऽस्ति यः । नरः वा
यदि वा नारी व्रतक्षोरीव्रतं चरेत् । तस्याः पुण्यफलं
वक्ष्ये कथ्यमानं शृणुष्व मे । धनं धान्यं गृहे तस्य
न कदाचित् क्षयं व्रजेत् । दुःखिताः दुर्भगा दीना यदा
जन्मनि नो भवेत् । कथानकञ्च श्रोतव्यं देव्याः माहात्म्य-
संयुतम् । व्रतपातकनाशाय सर्वकामसमृद्धये" ।
फलषष्ठीव्रतं भविष्योत्तरे "अन्यान्यपि प्रवक्ष्यामि फलषष्ठीं
शुभां तथा । यामुपोष्य नरः) याप्तैर्विमुक्तः फलभाग्
भवेत् । मार्गशीर्षे सिते पक्षे षष्ठ्यां नियतमस्थितः ।

कृत्वा दन्तधावनं तु खपेद्रात्रौ जितेन्द्रियः । ततः प्रभाते विमले कारयित्वा तु काञ्चनम् । कमलस्य फलान्येकं स्वशक्त्या यष्टव्यर्जितः । ततस्तु सङ्गमे स्नातो मध्याह्ने कृतनित्यकः । आगत्य भवनं देवं पूजयित्वा जगद्गुरुम् । कृत्वा तु कमलं पात्रे सफलं शर्करान्वितम् । षोडशस्वरे ब्राह्मणे वा यथाशक्त्या नरोत्तम ! । पूजयेत् पुष्पधूपाद्यैर्नैवेद्यैर्विविधैः फलैः" इत्यादि ।

फलसंक्रान्तिव्रतं स्कन्दपु० "अथान्यामपि ते वक्ष्मि फलसंक्रान्तिमुत्तमाम् । संक्रान्तिवासरं प्राप्य स्नानं कृत्वा तु पूर्ववत् । संपूज्य पूर्ववद्भानुं पुष्पधूपादिना तथा । शर्करासहितं पात्रं फलाष्टकसमन्वितम् । संक्रान्तिवासरं प्राप्य ब्राह्मणाय निवेदयेत् । तदन्ते तु रविं कुर्यात् सुवर्णेन च नारद ! । कुम्भस्योपरि संस्थाप्य गन्धपुष्पैः प्रपूजयेत् । फलाष्टकं ततो दद्याद् भक्ष्यभोज्यसमन्वितम्" । फलसप्तमीव्रतं भविष्यपु० "अथ भाद्रपदे मासि सिते पक्षे महीपते ! । कृत्वोपवासं सप्तम्यां विधिवत् पूजयेद्रविम् । माहेश्वरेण विधिना पूजयेदत्र भास्करम् । अष्टम्यां तु पुनः प्रातः पूजयित्वा दिवाकरम् । दद्यात् फलानि विप्रेभ्यो मार्त्तण्डः प्रीयतामिति ! । खर्जूरं नारिकेलञ्च मातुलुङ्गफलानि च । ब्राह्मणान् भोजयित्वा तु फलाहारः स्वयं भवेत् । पूर्वमेकन्तु सम्प्राश्य सुहृद्भ्यः फलादरात् । मन्त्रेण भरतश्रेष्ठ ! ततः शेषाणि भक्षयेत्" । पद्मपु० "अन्यामपि प्रवक्ष्यामि मात्रा तु फलसप्तमीम् । यामुपोष्य नरः पापैर्विमुक्तः स्वर्गभाग्भवेत् । मार्गशीर्षे शुभे मासि पञ्चम्यां नियतव्रतः । षष्ठ्यामुपोष्य कमलं कारयित्वा तु काञ्चनम् । शर्करासंयुतं दद्यात् ब्राह्मणाय कुटुम्बिने । कृत्वन्तु काञ्चनं कृत्वा फलसैकस्थ धर्मवित् । दद्याद्दिवाकरवेलायां भानुर्मे प्रीयतामिति । भक्त्या तु विप्रान् संपूज्य सप्तम्यां क्षीरभोजनम् । कृत्वा कुर्यात् फलत्यागं यावत्स्यात् कृष्णसप्तमी । तासूपोष्य विधिं कुर्यादेनैव क्रमेण तु । तदङ्गमधातं दद्यात् सुवर्णसमन्वितम् । शर्करापात्रसंयुक्तं वस्त्रमाल्यविभूषितम् । संवत्सरमनेनैव विधिनोभयपक्षयोः । उपोष्य दद्यात् क्रमशः सूर्यमन्त्रमुदीरयेत्" इत्यादि ।

फालगुनव्रतं भविष्यपु० "भगवन्तं सोमामेकभक्तेन विशिषेत् । ऐश्वर्यमतुलं श्रेष्ठं पुमान् स्त्री वा प्रपद्यते । स्त्रियो वन्ध्यता यान्ति तस्याश्चैव भवन्ति ते" । विष्णुधर्मे "जपयेदेकभक्तेन शुश्रूषुर्यश्च फाल्गुने" । शुश्रूषुः विष्णुशुश्रूषापरः "सोमाख्यं सृजतानाञ्च सर्वधामेश योजितः । अर्चिः सर्वभूतेषु वासुदेवपरायणः । नमोऽस्तु वासुदेवाय सहस्राक्षशतं जपेत् । अतिरात्रञ्च यज्ञस्य ततः फलमवाप्नुयात्" ।

वाणिज्यव्रतं विष्णुधर्मोत्तरे "काम्यं कर्म समाचक्ष्व वाणिज्यं येन सिध्यति । कर्षिञ्च वदतां श्रेष्ठ कर्मणा केन वाञ्छति" । पुष्कर उवाच "मूलेऽर्कोपोषितः कुर्यादिदं कर्म पुरोहितः । उपोषितस्य धर्मज्ञ ! यजमानस्य निष्फलः । प्राप्तास्तु पूर्वाषाढास्तु प्राङ्मुखं स्नापयेद्गुरम् । युग्मैर्वेतसमूलैश्च बदरीफलैस्तथा । मधुभिश्च यथालाभं कनकेन तथैव च । कलशैस्त्वष्टभिर्भक्त्या नन्दन ! । कृत्वैतत् सिद्धिमाप्नोति वाणिज्ये नात्र संशयः । वसुदैवते च तथा कर्षणे च न सीदति । नीलानि सप्त यानानि दक्षिणा चात्र यच्छते । शङ्खं सुवर्णं कृष्णञ्च तथा सूक्ष्मफलानि च । हृतं कर्म द्विजेभ्यस्तु सर्वमेतद्विधीयते" ।

बुद्धद्वादशीव्रत धरणीव्रते "एवमेव श्रावणे तु मासि संकल्प्य द्वादशीम् । अञ्जयेत्पञ्चमेयानं गन्धपुष्पनिवेदनैः । बुद्धाय पादौ संपूज्य श्रोधरायेति वै कटिम्" । "एवमभ्यर्च्य मेधावी तस्याग्रे पूर्ववद्बुधम् व्यापयेत्तन्न सोपस्कं बुद्धं कृत्वा विचक्षणः" । बुद्धस्वरूपमुक्तं पुराणान्तरे "बुद्धस्तु द्विभुजः कार्य्योध्यानसिमितिलोचनः" इति । "तमभ्यर्च्य तु संपूज्य ब्राह्मणाय निवेदयेत् । अनेन विधिना पूर्वं द्वादशी समुपोषिता । बुद्धोदनेन, बुद्धोऽभूत् स्वयं पुत्रो जनार्दनः । भुक्त्वा राज्यश्रियं सोऽथ गतिं परमिकां गतः" ।

बुधाष्टमीव्रतं भविष्योत्तरे "शृणु पार्थ ! यत्नेन बुधाष्टम्यां विधिं शुभम् । यदा यदा सिताष्टम्यां बुधवारो भवेदादि । तदा तदैव सा प्राह्या एकभक्ताशनैर्नृभिः । स्नात्वा नद्यां तु पूर्वाह्णे गृहीत्वा करकं नवम् । जलपूर्णं सक्षेमं कृत्वा खाद्यैः समन्वितम् । दद्याद्विप्राय तं गत्वा गृहे चैव क्रमेण तु । अष्टम्यष्टविधानेन विचित्रान्नैः पृथक् पृथक् । प्रथमा मोदकैर्भक्ष्यैः द्वितीया घृतकैस्तथा । तृतीया दधिपूपैश्च चतुर्थी वटकैर्नृप ।

पञ्चमी शुभकुसुमैः षष्ठी मोदकनैवेद्यैः शुभैः। अशोकवर्त्तिभिः शुभ्रैः सप्तमी चानिलाशयेत्। अष्टमी कणिनापूपैर्नवमी खण्डवेष्टैर्युधिष्ठिर!। एवं क्रमेण कर्त्तव्याः शुक्लपक्षस्य नवमीः। सदैवास्य स्थितैर्भोज्यं भोक्तव्यं प्रीतिपूर्वकम्। उपाख्यानान्तमाश्राव्य भोजनं सकृदाचरेत्। तावदेव हि भोक्तव्यं यावत् सा कथ्यते कथा। ततोभ्यर्च्य बुधस्यायै आशिषश्च समाप्तितः। विप्राय वेदविदुषे वाचकाय प्रदापयेत्। साज्यं सच्छिद्रगं चाज्यं जाम्बूनदमयं शुभम्। अर्चितं चार्चितं गन्धैः पुष्पैर्धूपैः सुगन्धिभिः। पीतवस्त्रैः समाच्छन्नं वृषं सोमात्मजं तथा। माषकेण सुवर्णस्य तदर्द्धेन वा कृतम्" इत्यादि

ब्रह्मव्रत भविष्यपु० "ब्रह्मचारिणञ्च द्वितीयायां संपूज्य ब्रह्मचारिणम्। भोजयित्वा तु विधिना सर्वाशां पारगो भवेत्। मूलमन्त्राः खसंज्ञाश्चिरुद्धमन्त्राश्च कीर्त्तिताः। पूर्ववत्पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः"। तिथीश्वरो ब्रह्मा।

ब्रह्मकूर्चव्रतं ब्रह्मपु० "उपोषितस्तदर्द्धायां पञ्चदश्यामनन्तरम्। पञ्चगव्यं समश्नीयादविघ्राणी स्वनन्तरम्। ब्रह्मकूर्चमिदं कृत्वादुक्तप्रशमनाय वै। पक्षान्ते स्वयं वा कार्य्यं मासमध्येऽथ वा पुनः। ब्रह्मकूर्चं नरः कुर्य्यात् पौर्णमासीषु यः सदा। तस्य पापं क्षयं याति दुर्भुक्तादि न संशयः। मासेन द्विजैरः कृत्वा ब्रह्मकूर्चं समाहितः। सर्वपापविनिर्मुक्तो यशेषाङ्गतिमाप्नुयात्। ब्रह्मभूतमषाषाढ्यां पौर्णमास्यां तथैव च। योगभूतं परिचरन् केशवं सकृदाप्नुयात्"।

ब्रह्मगयाप्राप्तिव्रतं विष्णुधर्मोत्तरे "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव। शक्रकीनाशवरुणधनाध्यक्षा यदूत्तम!। चतुरात्मा विनिर्दिष्टो वासुदेवो जगत्पतिः। तेषान्तु रूपनिर्माणं कृत्वा सानर्चयेद् बुधः। गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा। आद्येऽह्नि चैत्रशुक्लस्य यजेत त्रिदशेश्वरम्। द्वितीयेऽह्नि यमं देवं तृतीये सलिलाधिपम्। चतुर्थेऽह्नि धनाध्यक्षं प्रत्यहं स्नानमाचरेत्। नदीप्रदेशमासाद्य देवर्षिक्रमवर्त्मनि। यवैस्तिलैस्तथाज्येन होमः स्यात् तिलतण्डुलैः। रक्तं पीतं तथा कृष्णं श्वेतं वस्त्रं दिनक्रमात्। शुभमेतद् व्रतं कृत्वा पूर्णसंवत्सरं नरः। नाकलोकमवाप्नोति यावदाभूतसम्प्लवम्"।

ब्रह्मव्रत पद्मपु० "ब्राह्मणं काञ्चनं कृत्वा तिलराशिसमन्वितम्। ब्रह्महं तिलप्रदो भूत्वा वह्निं सन्तर्प्य च द्विजान्। संपूज्य विप्रदम्पत्यं आत्मवस्त्रविभूषितम्। शक्तितः स्वपनादूर्द्धं विश्वात्मा प्रीयतामिति। पुत्रायेऽङ्गि दद्यात्तम परं ब्रह्म यात्यपुनर्भवम्। एतद् ब्रह्मव्रतं नाम निर्वाणफलदं नृणाम्"।

ब्रह्मसावित्रीव्रत भविष्योत्तरे "श्रूयतां पाण्डवश्रेष्ठ! सावित्रीव्रतमाहरात्। कथयामि यथा पौर्णं तथा सत्या युधिष्ठिर!। इत्युपक्रमे "त्रयोदश्यां भाद्रपदे दत्तधात्रीफलक्रमम्। त्रिरात्रं नियमं कृत्वादुपवासस्य भक्तितः। अजाक्षीरञ्च तत्रोदश्यां नक्तं कृत्वोच्छितेन्द्रिया। चतुर्दश्यां पौर्णमास्यामुपोषणम्। नित्यं स्नात्वा महानद्यां तडागे निर्झरेऽपि वा। विशेषतः पूर्णमास्यां स्नानं सर्षपमृच्छलैः। गृहीत्वा बालुकां पात्रे प्रस्थमात्रां युधिष्ठिर!। अथ वा धान्यमादाय यवशालितिलोद्भवम्। ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टिते। सावित्रीप्रतिमां कृत्वा ब्रह्मणश्चैव शोभनम्। सौवर्णीं राजतीं मृण्मयीं वापि स्वशक्त्या रौप्यनिर्मिताम्। रक्तवस्त्रयुगं दद्यात् सावित्र्या, ब्रह्मणः सितम्। सावित्रीं ब्रह्मणा सार्द्धमेवं भक्त्या प्रपूजयेत्" इत्यादि।

ब्रह्मगयावाप्तिव्रतं प्रभासखं० "ज्येष्ठस्य पौर्णमास्यान्तु दम्पती यस्तु भोजयेत्। परिधाय यथा शक्त्या दौर्भाग्यैर्मुच्यते नरः। गन्धपुष्पोपहारैश्च पौर्णमास्यान्तु योऽर्चयेत्। ब्राह्मण्यं जायते तस्य सप्तजन्मनि सुन्दरि!।

भर्तृप्राप्तिव्रतं भविष्यपु० "वसन्ते शुक्लपक्षस्य द्वादशी या भवेच्छुभा। तस्यामुपोष्य विधिवत् सप्तधेनुं हरिमर्चयेत्। पर्य्यङ्गास्तरणं कृत्वा नानास्तरणसंवृतम्। तस्योपरि लक्ष्म्या युतं देवं रौप्यं कृत्वा निवेदयेत्। ततः पुष्पैर्मण्डपं कारयेद् बुधः। नृत्यवादित्रगीतैश्च जागरं तत्र कारयेत्। एवं कृत्वा प्रभाते तु दापयेत् ब्राह्मणाय तम्। वेदवेदाङ्गयुक्ताय संपूर्णाङ्गाय धीमते। ब्राह्मणांश्च तथा भोज्य व्रतस्यान्ते समाप्यते। व्रतस्यान्ते ततो विष्णुर्भर्त्ता वै भवति ध्रुवम्"।

भद्रकालीव्रतं विष्णुधर्मोत्तरे "नवम्यां सोपवासस्तु भद्रकालीं प्रपूजयेत्। शुक्लपक्षे महाराज। कार्त्तिकात् प्रभृति क्रमात्। गन्धमाल्यनमस्कारधूपदीपान्नसम्पदा। संवत्सरान्ते संपूज्य व्रतान्ते ब्राह्मणाय तु। वस्त्रयुग्मं नरो दत्त्वा यथेष्टं कामवाप्नुयात्। विधिना पूजयेत् कन्यां भद्रकालीं नराधिप!। नवम्यामाश्विने मासि शुक्लपक्षे

नरोत्तम !" । पुष्कर उवाच "पूर्वोत्तरे तु दिग्भागे लिखेत् वास्तुमनोहरे । भद्रकालीं ततश्चण्डां चित्रवस्त्रैरलङ्कृतम् । भद्रकालीं पटे कृत्वा तत्र सम्पूजयेद् द्विज !" । भद्रदृष्टव्रतं भविष्यपु० "शृणु राजन्यवहितो भद्राणां विस्तरं परम् । कथयिष्ये न कथितं यत्पूर्वं कस्यचित् पुरा । शुक्ला मार्गशिरस्यादौ चतस्रस्तिथयो वराः । द्वितीया च तृतीया च चतुर्थी पञ्चमी तथा । एकभक्ताशनक्लिष्टेन प्रतिपदि जितेन्द्रियः । प्रभाते तु द्वितीयायां कृत्वा यत् करणीयकम् । प्रक्षरे वै समधिके गते स्नानं समाचरेत् । शुद्धोऽयं तु संगच्छ मन्त्रैरेभिर्विचक्षणः" । "स्नात्वा चैव ततो नाम द्वितीयादौ चतुर्दिने । नमः कृष्णाच्युतानन्तकेशवेति च क्रमात् । चतुर्दिने द्वितीयादिदेवकम्यर्चयेद् व्रती । प्रथमेऽङ्घ्रि कृता पूजा पादयोरुक्रपाणिनः । नाभिपूजा द्वितीयेऽङ्घ्रि कर्त्तव्या विधिवच्चरैः । पुरद्वितीयतृतीयेऽङ्घ्रि पूजां वक्षसि विन्यसेत् । चतुर्थेऽङ्घ्रि जगद्धातुः पूजां शिरसि विन्यसेत्" इत्यादि । भद्राद्वितीयाव्रतं पद्मपु० "कार्त्तिकादि तृतीयायां प्राप्य गोमूत्रयावकम् । नक्तश्चरेद्दृष्टमेकं तदन्ते गोप्रदो भवेत् । गौरीलोके वसेत् कल्पं ततो राजा भवेदिह । एतद् भद्राव्रतं नाम सर्वकल्याणकारकम्" । भद्रा सप्तमीव्रतं भविष्यपु० "शुक्लपक्षे तु सप्तम्यां नक्षत्रं स्याद्विशुभंवेत् । यदा प्राच्यमशेषेण सदा तां भद्रतां व्रजेत् । सविशनक्षत्रं कृत्वा । "चतुर्थ्यामेकभक्तन्तु पञ्चम्यां नक्तमादिशेत् । षष्ठ्यामयाचितं प्रोक्तं उपवासस्ततः परम् । "अनेन विधिना यस्तु कुर्याद्वै भद्रसप्तमीम् । भद्रा ददाति सप्तम्यां भद्रं तस्य व्रतं भवेत् । तस्य भद्राः सर्व एव गच्छन्ति ज्ञातयः सदा । तदशक्तः फलं तस्यां विधिना केन दीयते । व्योमभद्रमिति प्रोक्तं देवचित्रं मनोरमम् । शालिपिष्टमयं प्रोक्तं चतुःकोणं मनोरमम् । गव्येन सर्पिषा युक्तं खण्डशर्करयान्वितम् । चतुर्जातकचूर्णेन द्राक्षाभिश्च विशेषतः" । भवानीतृतीयाव्रतं पद्मपु० "आलेपनञ्च यः कुर्यात् तृतीयायां शिवाग्रतः । समान्ते धेनुदो याति भवानीव्रतमित्युत" । भवानीव्रतं लिङ्गपु० "पौर्णमास्यामथावस्यां वर्षमेकमतन्द्रिता । उपवासरता नारी नरो वा द्विजसत्तमाः ! । वसन्ते सर्वगन्धाद्यां प्रतिमाञ्च निवेदयेत् । सा भवान्यास्तु सायुज्यं सारूप्यं वाथ शुव्रता । लभते नात्र सन्देहः सत्यं सत्यं मुनीश्वराः !" ।

भाद्रपदव्रतं महाभारते "प्रौष्ठपादन्तु यो मासमेकाहारो भवेन्नरः । धनाढ्यस्फीतमतुलमैश्वर्यं प्रतिपद्यते । राजसूयस्य यज्ञस्य फलं दशगुणं लभेत्" । भानुव्रतं पद्मपु० "सप्तम्यां नक्तभुक् दद्यात्सप्तमासे गां सकाञ्चनाम् । सूर्यलोकमवाप्नोति भानुव्रतमिदं स्मृतम्" । भास्करव्रतं कालिकापु० "कृतोपवासः षष्ठ्यान्तु सप्तम्यां यस्तु मानवः । करोति विधितः स्नात्वा भास्करः प्रीयतामिति । सर्वरोगविनिर्मुक्तः स्वर्गलोकमवाप्नुयात्" । भीमद्वादशीव्रतं पद्मपु० "यद्यष्टम्यां चतुर्दश्यां द्वादश्यां वथ भारत !। अन्येष्वपि दिनर्क्षेषु न शक्तस्त्वमुपोषितुम् । ततः पुण्यामिमां भैमीं सर्वपापप्रणाशनीम् । उपोषय विधिनानेन गच्छ विष्णोः परं पदम् । माघमासस्य द्वादशी यदा शुक्ला भवेत्तदा । कृतनाभ्यञ्जनं कृत्वा तिलैः स्नानं समाचरेत् । तथैव विष्णुमभ्यर्च्य नमो नारायणेति च" इत्यादि । "शृणु राजन् ! प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् । यामुपोष्य न दुःखानां भाजनं भजते जनः । माघमासे सिते पक्षे द्वादशी पावनी स्मृता । तस्यां जलार्द्रवसन उपोष्य सुखभाग् भवेत्" । "भीमाख्या द्वादशी चेति कृतकृत्या नरा यतः । सभा पुलस्त्यमुनिना कथिता कुरुनन्दन !। यश्चैनां कथितां यत्नात् कुर्याद्वा भक्तिभावतः । सर्वपापविनिर्मुक्तो विष्णुलोके महीयते । दरिद्रेणापि वा पार्थ ! वित्तशाठ्यं विवर्जयेत् । विष्णुभक्तेन कर्त्तव्या संसारभयभीरुणा । भीमेन या किल पुरा सकलोपोषितत्वाद्भाग्यैर्गलत्स्थिरसुशीतलवारिधारा । तां द्वादशीं त्रिदशवेद्यसखां स्मरेद् यः सम्यक् समाचरति याति स विष्णुलोकम्" । भीमव्रतं पद्मपु० "माघोपवासो यो दद्याद्धेनुं विप्राय शोभनाम् । सूर्येश्वरपदं याति भीमव्रतमिदं स्मृतम्" । भीष्मपञ्चकव्रतं नारदपु० "प्रवक्ष्यामि महापुण्यं व्रतं व्रतवतां वर !। भीष्मेणैतदृषयः प्राप्तं व्रतं पञ्चदिनात्मकम् । सकाशाद्धरिदेवस्य तेनोक्तं भीष्मपञ्चकम् । व्रतस्यास्य गुणान्वक्तुं कः शक्तः केशवादृते । व्रतञ्चैतन्महापुण्यं महापातकनाशनम् । कृतो नरैः प्रयत्नेन कर्त्तव्यं भीष्मपञ्चकम् । कार्त्तिकस्यामले पक्षे स्नात्वा कृतव्रतव्रतः । एकादश्यान्तु शुक्लायां व्रतं पञ्चदिनात्मकम् । प्रातः स्नात्वा विधानेन मध्याह्ने च तथा व्रती । नद्यां निर्झरगर्त्ते वा समालभ्यञ्च गोमयम् । यवगोधूतिलैः सम्यक

पितॄन् सन्तर्पयेत् क्रमात्। स्नात्वा मौनं ततः कृत्वा धौतवासा दृढव्रतः"। इत्यादि "अर्चयित्वा हृषीकेशमेकादश्यां समाहितः। त्रिःप्राश्य गोमयं सम्यक् एकादश्यामुपावसेत्। गोमूत्रं मन्त्रवद्भूयो द्वादश्यां पूजयेद्धरिम्। क्षीरञ्चैव त्रयोदश्यां चतुर्दश्यां तथा दधि। संप्राश्य कायशुद्ध्यर्थं लङ्घनीयश्चतुर्दिनम्"। प्राशनं होममन्त्रेण। "पञ्चमे तु दिने स्नात्वा विधिवत् पूज्य केशवम्। भोजयेद् ब्राह्मणान् भक्त्या तेभ्यो दद्याच्च दक्षिणाम्। तथोपदेष्टारमपि पूजयेद् वस्त्रभूषणैः। ततो नक्तं समश्नीयात् पञ्चगव्यपुरःसरम्। एवं सम्यक् समाप्यं स्यात् यथोक्तं व्रतसत्तमम्। सर्वपापहरं पुण्यं प्रख्यातं भीष्मपञ्चकम्। जन्मप्रभृति यन्नांसं त्यक्त्वा पुण्यमवाप्नुयात्। तत्फलं समवाप्नोति संत्यज्य भीष्मपञ्चके। भद्रयो यः पिबेन्नद्यं जन्मतोमरणान्तिकम्। तद्भीष्मपञ्चके त्यक्त्वा समाप्नोत्यधिकं फलम्"।

भूभाजनव्रतं पद्मपु० "संवत्सरन्तु यो भुङ्क्ते नित्यमेव ह्यतन्द्रितः। निवेद्य पितृदेवेभ्यः पृथिव्यामेकराड्भवेत्" यो भुङ्क्ते पृथिव्यामित्यन्वयः।

भूमिव्रतं कालोत्तरे "शुक्लपक्षे चतुर्दश्यां यदा तिष्यार्कमङ्गलैः ५ पूजयेत् पूर्वविधिना उपवासेन भूलिनम्"। पूर्वविधिना लिङ्गव्रतोक्तेनेत्यर्थः। "कुङ्कुमेनाङ्गरागन्तु गन्धपुष्पैः प्रपूजयेत्। पायसं घृतसंयुक्तं कृत्वात् प्रस्थप्रमाणतः। भूमिदानं प्रकर्त्तव्यं शिवभक्ताय यत्नतः। अनेन व्रतसुखेन पृथ्वीपालत्वमाप्नुयात्। एतद्भूमिव्रतं नाम पृथ्वीपालस्तु कारयेत्"।

भोगसंक्रान्तिव्रतं स्कन्दपु० "वक्ष्येऽहं भोगसंक्रान्तिं सर्वलोकविवर्द्धनीम्। सक्रान्तिवासरं प्राप्य योषितस्तु समाह्वयेत्। कुङ्कुमं कज्जलञ्चैव सिन्दूरं कुसुमानि च। सुगन्धीनि च सर्वाणि ताम्बूलं शशिसंयुतम्"। शशिसंयुतं कर्पूरसंयुतम् "तण्डुलान् फलसंयुक्तान् प्रदद्याच्च विचक्षणः। अन्यान्यपि हि वस्तूनि भोगसाधनकानि च। दद्यात् प्रहृष्टमनसा मिथुनेभ्यः प्रयत्नतः। भोजयित्वा यथा शक्त्या वस्त्रयुग्मं प्रदापयेत्। एवं संवत्सरस्यान्ते रविं सम्पूज्य पूर्ववत्। स्वर्णपट्टीं रौप्यखुरां सर्वोपस्करसंयुताम्। धेनुं च दक्षिणां दद्यात् सपत्नीकद्विजातये। एवं यः कुरुते भक्त्या भोगसंक्रान्तिमादरात्। याव् षष्ठीं सर्वसत्त्वेषु भोगो जन्मनि जन्मनि"

भोगावाप्तिव्रतं विष्णुधर्मोत्तरे "ज्यैष्ठ्यान्तु समतीतायां प्रतिपत्प्रभृतिक्रमात्। पूर्ववत् पूजयेद्देवं विश्वरूपधरं हरिम्"। यत्रापि पूर्ववदिति रूपावाप्तिव्रतवदित्यर्थः "कृत्वा व्रतान्ते च तथा द्विजाय दत्त्वा सुयुक्तं शयनं द्विजाय। स्वर्लोकमासाद्य चिरं नरेन्द्र! मानुष्यमासाद्य च भोगवान् स्यात्"।

भौमवारव्रतं स्कन्दपु० "भौमोऽयमेकरः पुत्रः पृथिव्यां जनितो महान्। रूपेणैव सदा रम्यो वरदानाद्दिवौकसाम्। यस्यैव दिवसे प्राप्ते ताम्रपात्रं सुशोभनम्। परिपूर्णं गुडेनैव वर्षमेकं प्रदापयेत्"।

भौमव्रतं भविष्योत्तरे "स्नात्वामङ्गारकं दृष्ट्वा क्षपयेन्नक्तभोजनः। सप्तमे त्वथ संप्राप्ते स्थापितं ताम्रभाजने। हैमं रक्ताम्बरच्छन्नं कुङ्कुमेनानुलेपनम्। नैवेद्यं शुभकं सारं पूज्य पुष्पाक्षतादिभिः। मन्त्रेणानेन तं दद्यात् ब्राह्मणाय कुटुम्बिने"। पद्मपु० "यद्दिनामधिपं भौमं पूजयेद्भौमवासरे। मङ्गलो भूमिपुत्रश्च ऋणहर्त्ता धनप्रदः। स्थिरासनो महाकायः सर्वकामार्थसाधकः। लोहितो लोहिताक्षश्च सामगानां कृपाकरः। धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः। अङ्गारको यमश्चैव सर्वरोगापहारकः। वृष्टिकर्त्ता हर्त्ता च सर्वकामफलप्रदः। एतानि कुजनामानि प्रातरुत्थाय यः पठेत्। ऋणं न जायते तस्य धनं प्राप्नोत्यसंशयम्। त्रिकोणञ्च सदा कार्य्यं मध्ये छिद्रं प्रकल्पयेत्। कुङ्कुमेन सदा लेख्यं रक्तचन्दनकेन च। कोणे कोणे प्रकल्प्यानि त्रीणि नामानि भूमिप!। अर्घं दद्यात् भूमिजञ्च रक्तगन्धैश्च पूजयेत्"।

मङ्गलाव्रतं देवीपु० "आश्विने चाथ माघे वा चैत्रे वा आवर्षेऽपि च। कृष्णादारभ्य कर्त्तव्यं व्रतं शुक्लावधिं चरेत्"। शुक्लावधिं शुक्लपक्षावधिम्। एतच्चोक्तमासेष्वेव वक्ष्यमाणप्रकारेण कृष्णाष्टम्यामारभ्य शुक्लाष्टमीं यावत् कर्त्तव्यम् "अष्टमीमाश्विनीं कृष्णामेकभक्तेन कारयेत्। मङ्गलारूपिणीं देवीमथ वा रुद्रघातिनीम्। पूजयेन्नवभेदेन गन्धमाल्यनिवेदनैः। नवभेदेन नवकालो गन्धघर्षणेन। "कन्यका भोजयेद् यत्र! देवीभक्तांश्च मानवान्। अथ वा नवरात्रञ्च संप्राप्तञ्चेत्किं हि या। एकभक्तेन नक्तेनायाचितोपोषितैः क्रमात्"। नवरात्रमेकभक्तेन सम्प्राप्तं नक्तेन पञ्चायाचितेन तिस्र उपवासेनेति क्रमः। अष्टमीमन्ते लात्वा नवादिगन्धं पूर्व-

नाशमर्थयते पश्चात् "जपेतात्रिने शक्र ! यावत्पूजा न अष्टमी। पूजयेन्मङ्गलां तत्र मण्डले विधिवद्व्रते। सर्वसम्भारसम्पन्ने सर्वसिद्धिविधायके। सर्वकामानवाप्नुयात्" इत्यादि।

मङ्गल्यषष्ठीव्रतं गरुडपु० "मङ्गल्यं परमिच्छन्ती मङ्गलाव-तनं हरिम्। अर्चयेद्दिनता देवं षष्ठ्यां सप्तपोषिता। माङ्गल्यं परमिच्छन्ती व्रतेनानेन चाप्नुयात्। पुमानपि यशः कीर्त्तिं बलमायुश्च विन्दति"।

मत्स्यद्वादशीव्रतं धरणीव्रते "मार्गस्य शुक्लपक्षे तु दशम्यां नियतात्मवान्। स्नात्वा देवार्चनं कृत्वा अग्निकार्य्यं यथाविधि। शुचिवासाः प्रयत्नात्मा कृत्वं चात्र सुसंस्कृतम्। भुक्त्वा पञ्चपटं गत्वा पुनः शौचं तु पादयोः। कृत्वाऽष्टाङ्गुलमानन्तु क्षीरद्रुमसमुद्भवम्। अश्वत्थेङ्गुदकाष्ठं वा तत्र चाचम्य यत्नतः। स्मृत्वा खानि तथाङ्घ्रिञ्च चिरं ध्यात्वा जनार्दनम्"। स्वानीन्द्रियाणि "शङ्खचक्रगदापाणिं पीतवस्त्रं किरीटिनम्। प्रसन्नवदनं देवं सर्वलक्षणलक्षितम्। ध्यात्वा जलं समादाय तं भानुरूपं जनार्दनम्। दद्यार्घ्यं दापयेत् पश्चात् करतोयेन मानवः। एवमुच्चार्य्येदार्घं तस्मिन् काले महामुने!। एकादश्यां निराहारो भूत्वाऽहमपरेऽहनि। भोक्ष्यामि पुण्डरीकाक्ष! शरणं मे भवाच्युत!। तेषां मध्ये शुभं पीठं स्थापयेदक्षसंयुतम्। तस्मिंश्च रौप्यं सौवर्णं ताम्रं वा दारवं तथा। अलाभतस्तोयपूर्णं कृत्वा पात्रं ततो न्यसेत्"। अलाभतः सौवर्णादीनामभावे दारवमपि कृत्यादित्यर्थः "सौवर्णं मत्स्यरूपेण कृत्वा देवं जनार्दनम्। वेदवेदाङ्गसंयुक्तं श्रुतिस्मृतिविभूषणम्"। तोयपूर्णं पात्रं कृत्वा तत्र मत्स्यरूपं जनार्दनं न्यसेदित्यन्वयः "तस्मानेकविधैर्भक्ष्यैः फलैः पुष्पैश्च शोभितम्। गन्धैरन्यैश्च धूपैश्च अर्चयित्वा यथाविधि। रसातलगता वेदा यथा देव त्वयाऽऽहृताः। मत्स्यरूपेण तद्वन्मां भवाद्दुस्तरे जले!। एवमुच्चार्य्य तस्मात्रे जागरं तत्र कारयेत्। यथाविभवसारेण प्रभाते विमले तथा। चतुर्भ्यो ब्राह्मणेभ्यश्च चतुरो दापयेत् घटान्"।

मदनद्वादशीव्रतं भविष्यपु० "चैत्रे मासि सिते पक्षे द्वादश्यां नियतव्रतः। स्थापयेद्वर्द्धनं कुम्भं सितवस्त्रयुगावृतम्। नानाफलयुतं तद्वदिक्षुदण्डसमन्वितम्। सितवस्त्रयुगच्छत्रं सितचन्दनचर्चितम्। नानामाल्यरसोपेतं षड्भिरत्नं समन्वितः। ताम्रपात्रं गुडोपेतं तस्योपरि निवेशयेत्। तदभावे कुशं कुर्य्यात् कामदेवमयो नरः। कामनामा हरेर्म्मां स्थापयेद्वुडुधारिणा। शुक्लपुष्पाक्षतैस्तिलैरर्चयेदिति केशवम्। अनेन विधिना सर्वं मासि मासि समाचरेत्। उपवासी त्रयोदश्यामर्चयेद् विष्णुमव्ययम्। फलमेकञ्च सम्भाव्य द्वादश्यां भूतले क्षिपेत्। ततस्त्रयोदशे मासि धेनुयुग्मसमन्विताम्। शय्यां दद्याद् द्विजेन्द्राय सर्वोपस्करसंयुताम्। काञ्चनं कामदेवं च शुक्लां गाञ्च पयस्विनीम्। वासोभिर्विविधाभिस्त्वं पूजय शक्त्या विभूषणैः। सर्वगन्धादिकं दद्यात् प्रीयतामित्युदीरयेत्"।

मधुकृत्तृतीयाव्रतं भविष्योत्तरे "फाल्गुनस्य सिते पक्षे तृतीयायामुपोषिता। स्नाता स्थिता ब्रह्मपथे ततोऽन्यस्मिन् दिने पुनः। व्रजेन्मधुवनं, गौरीं पूजयेत् मधुमानसा। मन्त्रेणानेन ध्यायन्ती पार्वतीप्रतिमां शुभाम्। मृगाजिनाम्बरधरां जटासंकटशोभिताम्। गोधारथगतां देवीं रुद्रध्यानपरायणाम्। पूजयेत् गन्धपुष्पैर्दीपाक्षतचन्दनैः। पर्य्यङ्गुलुञ्चसुखरालिकुलोपगीतं दत्त्वा फलाक्षततयुतं मधुपादपस्य। गौरीव कामसदृशा भवतीह नारी" इत्यादि।

मनोरथद्वादशीव्रतं पद्मपु० "फाल्गुनामलपक्षस्य एकादश्यामुपोषितः। नरो वा यदि वा नारी समभ्यर्च्य जगत्पतिम्। हरेर्नाम जपन् भक्त्या सप्तवारान् जनेश्वर! चक्रिणश्च प्रसादेन हरिमेवाप्नु कीर्त्तयेत्। अतः प्रभाते विमले द्वादश्यां नियतो हरिम्। स्नात्वा सम्यक् समभ्यर्च्य दत्त्वा विप्राय दक्षिणाम्। हरिसन्निध्य चैवाग्नौ हुतशेषं समाचरेत्। फाल्गुनश्चैत्रवैशाखौ ज्यैष्ठमासश्च पार्थिव!। चतुर्भिः पारणं मासैरेभिर्नियादितं भवेत्। रक्तपुष्पैश्च चतुरोमासान् कुर्वीत चार्चनम्। जातीपुष्पादि धूपञ्च गन्धः सर्जरसेन तु। प्राश्य दर्भोदकं चात्र शाल्यन्नं च निवेदयेत्। स्वयमेव तदश्नीयाच्छेषं पूर्ववदाचरेत्। कार्त्तिकादिषु मासेषु गोभूतं कायशोधनम्। सुगन्धं स्वेच्छया धूपं पूजां भक्तारकेण च"। भक्तारको माकन्दः "क्षसरं चात्र नैवेद्यं भुञ्जीयात्तच्च वै स्वयम्। प्रतिमासञ्च विप्राय दातव्या दक्षिणा तथा। प्रीयतां देवदेवस्य पारणे पारणे गते" वर्षसाध्यमिदम्।

मनोरथपूर्णिमाव्रतं विष्णुधर्मोत्तरे "कार्त्तिक्यान्तु तथाऽस्य संपूर्णं शशलक्षणम्। पूजयेदुदये राजन्! सदा नक्ष-

गमो भवेत् । श्रावणं मण्डलं कृत्वा चन्दनेनानुलेपितम् । द्विदिगन्तसंस्थितं ततः सोमन्तु पूजयेत्" । श्रवणं वैष्णवनक्षत्रम् "कृत्तिकारोहिणीयुक्तं आग्नेये मासि पूजयेत् । सौम्यार्द्रासंस्थितं राजन् ! मासि सौम्ये तथैव च । आदित्यपुष्यसंस्थितं मासि पौषे च यादव ! । मघासंयुतं माघे फाल्गुने श्रृणु पार्थिव ! । आर्य्यमणेन उत्र सावित्रैः संस्थितं पूजयेद्विभुम् । चित्रास्वातियुतश्चैत्रे वैशाखे श्रृणु पार्थिव ! । विशाखया च मैत्रेय युतं संपूजयेत्तथा । ज्येष्ठामूलयुतं ज्यैष्ठे आषाढे सलिलोत्तरे । श्रावणे श्रवणोपेतं वारुणेन भविष्यति । तथा भाद्रपदे पौष्णात्र अजाहिबुध्नसंयुतम् । आश्विनी भरणीयुक्तं तथाश्वयुजे विभुम्" इत्यादि ।

मनोरथसंक्रान्तिव्रतं स्कन्दपु० "अतः परं प्रवक्ष्यामि संक्रान्तिञ्च मनोरथाम् । गुडेन पूर्णकलशं सवस्त्रञ्च सदक्षिणम् । मङ्गल्यवासरे दद्याद्ब्राह्मणाय कुटुम्बिने । एवं संवत्सरे पूर्णे जपयज्ञोद्यापनं शुभम् । गुडेन पर्वतं कार्य्यं वस्त्ररत्नैश्च भूषितम् । अयने चोत्तरे दद्यादुत्तराष्ठ्यं न कारयेत् । यं यं प्रार्थयते कामं तं तं प्राप्नोति पुष्कलम् । सर्वपापविनिर्मुक्तः सूर्य्यलोके महीयते" ।

मन्दारसप्तमीव्रतं भविष्योत्तरे "श्रृणु पार्थ ! प्रवक्ष्यामि सर्वपापप्रणाशिनीम् । सर्वकामप्रदां पुण्यां नाम्ना मन्दारसप्तमीम् । माघस्यामलपक्षे तु पञ्चम्यां लघुभक् नरः । दन्तकाष्ठं ततः कृत्वा प्रक्षेत्कूपे जितेन्द्रियः । सर्वभोगविहीनस्तु षष्ठीमुपवसेन्नरः । प्राप्यानुज्ञां द्विजश्रेष्ठात् मन्दारं पार्थयेद्विधि" इत्यादि ।

मन्दारसप्तमीव्रतं पद्मपु० "अथातः सम्प्रवक्ष्यामि सर्वपापप्रणाशिनीम् । सर्वकामप्रदां पुण्यां नाम्ना मन्दारसप्तमीम् । माघस्यामलपक्षे तु पञ्चम्यां लघुभक् नरः । दन्तकाष्ठं ततः कृत्वा षष्ठीमुपवसेन्नरः । विप्रान् सम्यग भोजयित्वा तु मन्दारं प्रार्थयेद्विधि । ततः प्रभाते उत्थाय कृत्वा स्नानं पुनर्द्विजान् । भोजयेच्छक्तितः कृत्वा मन्दारकुसुमाष्टकम्" । मन्दारोद्यानार्कः "सौवर्णं पुरतश्चक्रं पद्मकुसुं कुशोभनम् । पद्मं कृष्णतिलैः कृत्वा ताम्रपात्रे ऽष्टपत्रकम् । हैमं मन्दारकुसुमं स्थाप्य मध्ये च पूजयेत्" इत्यादि वर्षसाध्यम् ।

मरीचसप्तमीव्रतं भविष्यपु० "तथा संपूज्य देवेशं भानुं ज्ञानप्रदं नृप ! । भोजयित्वा यथान्यायं ब्राह्मणांश्च विशेषतः । सप्तम्यां प्राशयेच्चापि मरीचं मनुजाधिप । गृहीत्वा मरीचशतमन्नस्य कुडवं परम् । मरीचं प्राशयेद्राजन् मन्त्रेणानेन या स्मरन्" इत्यादि ।

महत्सप्तमीव्रतं विष्णुधर्मोत्तरे "चैत्रस्य शुक्लपक्षे तु सप्तम्यामुपोषितः । सप्तम्यामर्चनं कृत्वादित्यस्य तत्र च । तत्र श्रेणीगतं सप्तमण्डलं नृप ! कारयेत् । श्रेणी तथा कार्यसमा सप्तमण्डलकान्विता" । इत्यादि वर्षसाध्यम् ।

महाव्रतदीपव्रतं भविष्योत्तरे "महाव्रतैर्विशेषतः कार्य्यैर्जघान्यैरपि भक्तितः । पूजयन्ति क्रमेणैव मासि मासि तनूर्नम । मार्गशीर्षादिभिः पार्थ ! पूजयेन्नामनामभिः । पारणे पारणे दद्यान्नक्तिकानि द्विजातये । गन्धैः पुष्पैर्जयादीपैर्गीतवाद्यैर्मनोहरैः । महाव्रतैश्च विधिवज्जागरं कारयेन्निशि । घृतदानैः क्षीरदानैर्दधिदानैः पृथक् पृथक् । सर्वत्र देवदेवेशः कृष्णो मे प्रीयतामिति । एवमेव विधिः प्रोक्तो मन्त्रदानसमन्वितः । दातव्यं मयाद्यापि क्रियते बलहत्तये । महामां जयदा यस्मान्महादशमिसंज्ञिता । तस्मान्मयैः प्रकर्त्तव्या महाव्रतजयार्थिभिः । अन्येषामपि कौन्तेय ! सर्वार्थजयदायिनी । इमां कृत्वा पापसङ्घैर्मुच्यते नात्र संशयः । भगवीरादपतले लिखितैर्मन्त्रभङ्गैरनाकुलवाङ्मलं नियुक्तैः । सम्मूलितः सपदि यत्र तिथौ ततश्च या द्वादशी भुवि गता बलसङ्गसंज्ञा" ।

महाजयासप्तमीव्रतं भविष्यपु० "शुक्लपक्षे तु सप्तम्यां यदा संक्रमते रविः । महाजया तदा ख्याता वै सप्तमी भास्करप्रिया । स्नानं दानं जपो होमः पितृतर्पणमेव च । सर्वं कोटिगुणं प्रोक्तं तपनेन महौजसा । यत्स्वल्पं मानवो भक्त्या कृतेन स्नापयेद्रविम् । सोऽश्वमेधफलं प्राप्य ततः सूर्यपदं व्रजेत्" ।

महातपोव्रतं महाभारते "मासि मासि नरश्रेष्ठ कृत्वा तु नियतेन्द्रियः । गवाधिपत्यं प्राप्नोति निःसपत्नमनामयम् । यस्तु संवत्सरं पूर्णमेकाहारो भवेन्नरः । आतरस्य यस्य यस्य सर्वं फलमुपाश्नुते । दशवर्षसहस्राणि स्वर्गलोके महीयते । तत्रत्यादिह चागत्य माहात्म्यं प्रतिपद्यते । यस्तु संवत्सरं पूर्णमर्धं भक्तमश्नुते । अहिंसानिरतो नित्यं सत्यवाग्विजितेन्द्रियः । वाजपेयस्य यज्ञस्य स फलं समुपाश्नुते । निर्मन्युरनहङ्कारी मानाँ दिवि मोदते । कृष्णेन तु भक्तेन लोकेषु संपू-

सर नरः । गवां मेधस्य यज्ञस्य फलं प्राप्नोति मानवः । हंसचारसयुक्तेन विमानेन स गच्छति । ब्रह्मायुक्तु सहस्राणि वर्षाणि दिवि मोदते । पक्षे पक्षे गते राजन् ! योऽश्नीयाद्दर्भमेव तु । षण्मासानग्नन्तस्य भगवानङ्गीराब्रवीत् । षष्टिवर्षसहस्राणि दिवमावसते स च । अश्नीयादुद्विजे पक्षे यस्तु सर्वदिनेष्विति । वीणानां वल्लकीनाञ्च वेणूनाञ्च विशाम्पते ! । सुघोषैर्मधुरैः शब्दैः स सुप्तः प्रतिबुध्यते । संवत्सरमिहैकन्तु माघि माघि पिबेत् पयः । फलं विसृजितस्तात ! प्राप्नोति स नरोत्तमः । सिंहव्याघ्रयुक्तेन विमानेन स गच्छति । अप्सराष्टौ सुरकन्या रमयन्ति च तत्सरम् । सप्तजिह्व यज्ञसहस्राणि वर्षाणां दिवि मोदते । मासादूर्ध्वं नरव्याघ्र ! नोपवासो विधीयते" ।

महाफलव्रतादयोव्रतं विष्णुरहस्ये "पौषे कृष्णे विशाखासंयुक्ता चैकादशी भवेत् । तस्यां संपूजयेद्विष्णुमुपोष्य विधिवन्नरः । सुगन्धपुष्पनैवेद्यैर्वस्त्रभूषणसम्पदैः । माघाद्यमासमभ्यर्चयेत् विधिना जगतीपतिम् । प्राशनस्यायुषश्चार्थं कार्यं मासत्रयेण तु । गोभूवस्त्रसुवर्णं वै राघव कामतः परम् । ततोदुर्वादधिक्षीरतिलांश्चैव यवांस्तथा । अलाभे कैरवं दर्भांश्च क्षीरमेव च । द्वादशीं भोजयेद्विप्रान् दधिक्षीरगुडौदनैः । माघक्रमेण विप्रेभ्यो दद्यात्सर्वमुदाहृते । व्रते तिलभोक्तियवसुवर्णसंयुतं घटम् । मोदकैश्च युतं कुम्भमातपत्रन्तु पायसम् । काञ्चितं चन्दनं माला. सुगन्धाश्चेति दक्षिणाः । व्रतमेतन्महापुण्यं दुष्टादुष्टफलप्रदम् । कर्त्तव्यं धर्मनिरतैर्विष्णुपूजनतत्परैः । व्रतमेतत्परः कृत्वा विप्राणां प्रवरे कुले । सुजन्मा जायते धीमान् वेदवेदाङ्गपारगः" ।

महाफलव्रतं भविष्यपु० "शृणु कौरव ! कर्माणि तिथियुक्तानि तु । शृत्वैव पापहानिः स्यात् कृत्वानन्तं फलं लभेत् । क्षीराशनः प्रतिपदि पुष्पाहारो द्वितीयायाम् । फलवर्जितं तृतीयायाम् । तिलाशाशी चतुर्थ्याम् । क्षीराशनः पञ्चम्याम् । फलाशनः षष्ठ्याम् । यावकाशनः सप्तम्याम् । विल्वाहारोऽष्टम्याम् । पिष्टाशनो नवम्याम् । अनभ्यिपकाहारो दशम्याम् । एकादश्यामुपवासः । हृताशनो द्वादश्याम् । यावकाहारश्चतुर्दश्याम् । गोभूवासत्रयोदश्याम् । यावकाहारश्चतुर्दश्याम् । गोभूवासः कृशोदकप्राशनः पौर्णमास्याम् एवं प्राशनविधिः । उक्तानि प्राशनान्येवं विधिपूर्वमुदाहृतम् । क्षीरं प्रतिपदादान्तु वर्षासु च विधीयते" ।

महत्तमव्रतं स्कन्दपु० "वैदिकेन विधानेन व्रतं पुण्यं महत्तमम् । कथिष्यामि तु कर्त्तव्यं विधानं तद्दक्षमे" । स्कन्द उवाच "मासि मासि भाद्रपदे शुक्ले च प्रतिपत्तिथौ । नैवेद्यान्तु पचेन्नौनी षोड्शत्रिगुणानि च । फलानि पिष्टपक्वानि दद्याद्विप्राय षोड्श । देवाय षोड्शैतानि दातव्यानि प्रयत्नतः । भुञ्जते षोड्श तथा व्रतस्य नियमाश्रयात् । कौवेरं कारयेद्देवं यथा यक्षाधिराजमयम्" इत्यादि ।

महाराजव्रतं स्कन्दपु० "यदागस्य ! चतुर्दश्यामाद्रां भाद्रपदाथ वा । सितायामसितायां वा न विशेषो यथा गतिः । तदा लब्धैकभुर्भूत्वा त्रयोदश्यां यथाविधि । सर्ववृतं महाराजं तदा संकल्पयेन्नरः । चतुर्दश्यां ततः कुर्यात्तिलगोभूवृषमयैः । महाघ गन्धगव्येन स्नानं शुद्धाम्बुना ततः । शिवसंकल्पमन्त्रस्य ततो दशशतं पठेत् । शिवसंकल्पमन्त्रो यजुःपठतां दुरितान्यादियंजुःशाखाप्रसिद्धः "पञ्चाक्षरस्तु शूद्रस्य जन्मकोटिकृतैस्ततः" । मुच्यते पातकैः सर्वैस्तत्कृत्वा नात्र संशयः" ।

महालक्ष्मीव्रतं स्कन्दपु० "महाराज ! निबोधेदं महालक्ष्मीव्रतं शुभम् । भद्र ! भाद्रपदे मासि शुक्लाष्टम्यां नरोत्तम !। स्नात्वाभ्यर्च्य महालक्ष्मीमेकभक्तं प्रकल्प्य च । कुङ्कुमाक्तव्रतं सूत्रं षोड्शग्रन्थिसंयुतम् । तन्तुभिस्तत्प्रमाणैश्च बध्नीयात्तु करे गुणम् । दूर्वाक्षतप्रवालानां षोड्शैव तु षोड्श । पुनरेवाश्विने मासि कृष्णाष्टम्यां दिने शुभे । उद्यापनं कारयेद्देव्यास्तूर्यैः पञ्चशतादितम्" ।

महाव्रतं कालिकापु० "महाव्रतमथो वक्ष्ये येनारोहति तत्पदम् । सुरासुरगुरोश्चापि दुर्लभं विधिना शृणु । पर्वण्यश्वयुजस्यान्ते पायसस्य घृतप्लुतम् । नक्तं भुञ्जीत शुद्धात्मा चन्दनस्रग्वान्वितम्" । आश्वयुजस्यान्ते कार्त्तिके । पर्वणि अमावस्यायां कार्त्तिक्यन्त इत्यर्थः । शेषं स्पष्टम् । लिङ्गपु० "अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि । वर्षमेकं ततो भुक्त्वा नक्तं यः पूजयेच्छिवम् । सर्वयज्ञफलं प्राप्य स याति परमाङ्गतिम्" । विष्णुधर्मोत्तरे "योगभूतं हरिं देवं चाश्वयुक्शुक्लपक्षतः । अर्चयेत् पौर्णमास्यान्तु सोऽश्वमेधफलं लभेत्" । योगभूतं सकलम् "अष्टभूतसमावास्यां पूजयेत्तामुपोषितः । राजसूयमवाप्नोति कुलञ्चैवोद्धरति स्वकम्" ।

ब्रह्मभूतं निष्कलम् "ब्रह्मभूतमयाख्यां पौर्णमास्यां तथैव च। योगभूतं परिचरन् केशवं मदमाप्नुयात्। अत्यर्थं प्रीतिमाप्नोति मासपक्षांक्तयोः सदा। पूजितः सोपवासेन भक्त्या देवेश्वरो हरिः। महाव्रतमिदं ख्यातं सर्वकल्मषनाशनम्। संवत्सरमिदं कृत्वा नाकपृष्ठे महीयते" इत्यादि।

महाशमीव्रतं भविष्यपु० "माघस्य शुक्लपक्षे तु पञ्चम्यां तु कुरूद्वह!। एकभक्तं समाख्यातं षष्ठ्यां नक्तसदाहृतम्। सप्तम्यामुपवासञ्च केचिदिच्छन्ति सुव्रत!। षष्ठ्यां केचिदुशन्तीह सप्तम्यां राधनं किल। कृतोपवासः षष्ठ्यान्तु पूजयेद् भास्करं बुधः। रक्तचन्दनमिश्रैस्तु करवीरैः समाहृतैः। गुग्गुलेन महाबाहो! सुगन्धेन च सुव्रत!। पूजयेद्देवदेवेशं महेशं शङ्करं रविम्"। शङ्करं सुखकरमित्यर्थः "एवं हि चतुरोमासान् माघादीन् पूजयेद्रविम्। आत्मनश्चापि शुद्ध्यर्थं प्राशनं गोमयस्य च। स्नानञ्च गोमयेनेह कर्त्तव्यञ्चात्मशुद्धये। ब्राह्मणान् दिव्यभोगांश्च भोजयेच्चापि शक्तितः"। दिवि देवकुले भवा दिव्या इतरे भौमाः। "ज्यैष्ठादिष्वपि मासेषु श्वेतचन्दनमुच्यते। श्वेतानि चापि पुष्पाणि शुभगन्धान्वितानि वै। कृष्णागुरु तथा धूपं नैवेद्यं पायसं स्मृतम्। तेनैव ब्राह्मणान् साधून् भोजयेच्च महामते!। प्राशयेत् पञ्चगव्यन्तु स्नानं तेनैव सुव्रत!। कार्त्तिकादिषु मासेषु अगस्तिकुसुमैः स्मृतम्। पूजनं कुरुशार्दूल! धूपश्चैवापराजितः। नैवेद्यं गुडपूपाश्च तथैवेक्षुरसः स्मृतः। तेनैव ब्राह्मणान् स्नातो भोजयेच्च स्वशक्तितः। कुशोदकं प्राशयेच्च स्नानञ्च कुरु सिद्धये। कृतीयपारणस्यान्ते माघे मासि महामते!। भोजनं तत्र दानञ्च द्विगुणं समुदाहृतम्। देवदेवस्य पूजा च कर्त्तव्या शक्तितो बुधैः। रथस्य चापि दानन्तु रथयात्रा च सुव्रत!। रथस्य प्राप्तिहेतोर्वै कर्त्तव्या विभवे सति। दानं सूर्यरथस्येह यथोक्तं विभवे सति। इत्येषा कथिता पुत्र! रथाङ्गसप्तमी शुभा। सप्तमीति महाख्याता महापुण्या महोदया। वासुपोष्य धनं पुत्रान् कीर्त्तिं विद्यां सुखञ्च ते"।

महेश्वरव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षादथारभ्य फाल्गुनस्य नराधिप!। पूजयेत् तु चतुर्दश्यां सोपवासो महेश्वरम्। गन्धमाल्यनमस्कारदीपधूपाक्षतार्चया। व्रतान्ते गां तथा दत्त्वा वह्निलोकफलं लभेत्। एतदेव व्रतं कृत्वा शुक्लपक्षे तु वत्सरम्। पौण्डरीकमवाप्नोति कुलसङ्घसंयुतः स्वकम्। चतुर्दशीद्वयञ्चैतत् कृत्वा संवत्सरं नरः। मासि मासि यथाशक्त्या सर्वान् कामानवाप्नुते। आस्वाद्य कामांश्च महेश्वरस्य तत्रापि कल्पसुचिरञ्च राजन्!। सायुज्यमायाति महेश्वरस्य सदेश्वरस्यातिबलस्य तस्य"।

महेश्वराष्टमीव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षात्तथारभ्य सौम्यायाष्टम्यां नराधिप!। पूजयेत् सोपवासस्तु देवदेवं त्रिलोचनम्"। सौम्याष्टम्यां मार्गशीर्षाष्टम्याम् "सिते वाप्यथ चाम्भोजे कमले यदि वा स्थले। इतीरयित्वा नियमेनैकेन स्नातेन विधिवेन वा। गन्धमाल्यनमस्कारदीपधूपाक्षतार्चया। गीतेन नृत्यवाद्येन वह्निसन्तर्पणेन च। ब्राह्मणानाञ्च पूजाभिर्यथावन्मनुजोत्तम!। व्रतावसाने दत्त्वा तु तथा धेनुं पयस्विनीम्। पौण्डरीकमवाप्नोति स्वर्गलोकञ्च गच्छति"।

महोत्सवव्रतं स्कन्दपु० "शालिपिष्टमयैर्दीपैः पञ्चभिर्नवभिस्तथा। कुर्य्यादारात्रिकं शम्भोः स्वर्णपात्रैः समुज्ज्वलैः। विचित्रवस्त्रपूजा च कर्त्तव्या महती शिवे। पुष्पमण्डलिकां चित्रां सवितानोज्ज्वलां शुभाम्। महोत्सवेन विधिवत्तेयं तूर्य्यरवेण च। विविधैर्भक्ष्यभोज्यैश्च नैवेद्यञ्चोपकल्पयेत्। सम्यक् सम्पादनीया स्यात् रथयात्रा पिनाकिनः। प्रेक्षणीयैस्तथा नृत्यैर्वाद्यैर्यन्त्रैश्च शोभनैः। पूजयेच्छिवभक्तांश्च विप्रानन्यांश्च भक्तितः। प्रीयतां शिव इत्युक्त्वा नक्तं भुञ्जीत च स्वयम्। वर्षेवर्षे प्रकर्त्तव्यं एतच्चैवोत्सवं महत्। शिवभक्तैस्तथान्यैश्च कीर्त्तिश्रेयोविवृद्धये"।

माघमासव्रतं भविष्योत्तरे "एतस्मात् कारणात् कृष्ण! माघस्नानं विशिष्यते। अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः। त्रिभागस्तु तिलानां हि चतुर्थः शर्करान्वितः। अनभ्यक्तो वरारोहे सर्वं माघं नयेद् व्रती। सूर्यो मे प्रीयतां देवो विष्णुमूर्त्तिर्निरञ्जनः। माघस्नाने शुभे! भद्रे सम्प्रदापयेत्। दम्पत्योर्वैष्णवी युक्ते सप्तधान्यसमन्विते। त्रिंशत्तु मोदका देयाः कृतास्तिलसमुद्भवाः शुभाः। मरिचैर्निर्मिताः स्निग्धाः नारङ्गाणि च दापयेत्"।

माघनवमीव्रतं भविष्योत्तरे "मातरश्चैव संपूज्याः यथाशक्त्या प्रयत्नतः। तद्वत् शिवभक्तांस्तु व्रताचार्य्यं विशेषतः। एवं कृत्वा विधानेन सर्वान् जयति मेदिनीम्।

इत्य पक्रमे मातृनामान्यभिधाय उक्तम् "नवम्यां पूजयेद् यस्तु मासि चाश्वयुजे सदा। अक्षयस्तिष्ठभावस्तु भवने नात्र संशयः"।

मातृव्रतं वराहपु० "मातृणामष्टमी दत्ता ब्रह्मणा तिथिरुत्तमा। एताः क्षमापयेद्भक्त्या निराहारो नरः सदा। तस्य ताः परितुष्टास्तु क्षेमारोग्यं ददत्यपि"।

मार्गशीर्षव्रतं महाभारते "मार्गशीर्षन्तु यो मासमेकभक्तेन संक्षिपेत्। भोजयेत्तु द्विजान् भक्त्या मुच्यते व्याधिकिल्बिषैः। सर्वकल्याणसम्पूर्णः सर्वदुःखविवर्जितः। उपोष्य व्याधिरोहितो वीर्यवानभिजायते। अधिभागी बहुधनो बहुधान्यश्च जायते"।

मार्त्तण्डसप्तमीव्रतं भविष्यपु० "मार्त्तण्डसप्तमीं कृष्ण! शृणुष्वावहितो नृप! पौषमासे सिते पक्षे सप्तम्यां समुपोषितः। सम्यक् संपूज्य मार्त्तण्डं मार्त्तण्ड इति वै जपन्। पूजयेत् कृतपं भक्त्या सवया परवान्वितः"। कृतपः सूर्यः "पुष्पधूपोपहारादैरुपवासैः समाहितः। मार्त्तण्डेति जपन्नाम पुनरुच्चरितमानसः। विप्राय दक्षिणां दद्यात् यथाशक्त्या सुवत्सल। हितीयेऽह्नि पुनर्स्नात! तत्रैवाभ्यर्चनं रवेः। तेनैव नाम्ना संबोध्य दत्त्वा विप्राय दक्षिणाम्। ततो भुञ्जीत गोदोषसमुद्भूतसमन्वितम्। एवमेवाखिलान् मासान् उपोष्य प्रयतः शुचिः। दद्याद्वार्षिकं विद्वान् प्रतिमासञ्च शक्तितः। पारिते च पुनर्वर्षे यथापूर्वं गवाह्निकम्। दत्त्वा परत्रे भूयः पृथु यत् फलमश्नुते। अर्कपुष्पैः सुवर्णेन पद्मरागैः पद्मरागः षड्भिश्च सप्तभिरुरः। प्रतिमासं द्विजातिभ्यो दत्त्वा यत् फलमश्नुते। तदाप्नोत्यखिलं सम्यगुक्तमेतदुपोषितः। नरश्च लोकमवाप्नोति मार्त्तण्डो यत्र तिष्ठति"।

भास्करव्रतं देवीपु० "मार्गे रसोत्तमं दद्याद् घृतं पौषे महाफलम्"। रसोत्तमं लवणम् "तिलान्माघे मुनिश्रेष्ठ! सप्त धान्यानि फाल्गुने। विचित्राणि च वस्त्राणि चैत्रे दद्याद् द्विजातये। वैशाखे द्विज! गोधूमान् ज्येष्ठे गोयष्टिं घटम्। आषाढे चन्दनं देयं सकर्पूरं महाफलम्। नवनीतं नभोमासि क्षत्रं प्रौष्ठपदे मतम्। गुडधेनुं सवत्सान्तु कृष्णकानाश्विने शुने!। दीपदानं महापुण्यं कार्त्तिके यः प्रयच्छति। सर्वकामानवाप्नोति क्रमेण तु उदाहृतम्"।

मासोपवासव्रतं विष्णुधर्मोत्तरे "आश्विनस्यासिते पक्षे एकादश्यामुपोषितः। व्रतमेतत् तु सङ्गृह्णीयाद् यावत् त्रिंशद्दिनानि तु। वासुदेवं समुद्दिश्य कार्त्तिकं सकलं नरः। मासञ्चोपवसेद्यस्तु स मुक्तिफलभाग्भवेत्। अच्युतस्यालये भक्त्या त्रिवारं कुसुमैः शुभैः। मालतीन्दीवरैः पद्मैः कमलैः सुरभिभिः। कुङ्कुमोशीरकर्पूरैर्विधिवत् वरचन्दनैः। नैवेद्यधूपदीपाद्यैरर्चयेत जनार्दनम्" इत्यादि।

मुक्तिहारव्रतं मत्स्यपु० "अश्वमेधादियज्ञानां लक्षकोटिगुणैरपि। तत् फलं लभ्यते पुंसा मुक्तिहारव्रतेन यत्। योगमार्गमनभ्यस्य यतेताचारवानपि। अथ युक्तो व्रतस्थापि व्रतेनानेन मुच्यते। सप्तमीं प्राप्य कृष्णेन दत्तधावनमाचरेत्। नमोक्तोयेत्युदीर्याथ चक्रकाङ्केन भक्तिमान्। अथ वा पुष्य ऋक्षेण जलेनाप्लावनं तथा। कृत्वा पवित्रं देवानां मन्त्रेणाकर्षमित्स्थितम्। रक्तचन्दनपद्मन्तु त्रिस्रोद्भवयवारिणा। प्राङ्मुखे षोडशदलं सगर्भदलकर्णिकम्" इत्यादि।

सुखव्रतं पद्मपु० "सुखवासं परित्यज्य समान्ते गोप्रदो भवेत्। यत्राधिपत्यमाप्नोति सुखव्रतमिहोच्यते"।

सुनिव्रतं विष्णुधर्मोत्तरे "सप्तम्यां सुनिशार्दूल! दत्तानभ्यर्चयेन्मुनीन्। स्वाध्यायफलमाप्नोति तद्वाससफलमश्नुते"।

सुरगीर्षव्रतं पद्मपु० "आषाढे मासि कृष्णे च शङ्करः प्रथमेऽहनि। त्रिपर्वणा त्रिमल्लेन त्रिसुखेन घरेण च। सुखानि लोके त्रिविधे यस्य सञ्जायते नृणाम्। तैः शिरोभिश्चतुष्पत्रं वरः प्राप्तोऽथ शङ्करात्"। त्रिमल्लेन त्रिसुखेन मल्लाख्यपरिसुखेनेत्यर्थः। सुरगर्षिणस्त्रिसुखसुरगर्षिण इत्यर्थः "स्त्रीभिः पूज्यानि तानीति न मन्तव्यैः कदाचन। सुरगीर्षं ततः कृत्वा त्रिकुङ्कारन्तु सूत्रमयम्। शौरेण तपनीयं वै पूजनीयं यथाविधि। अर्घैः पुष्पैश्च धूपैश्च नैवेद्यैर्विविधैरपि। शाकैः शौवर्चलाभिश्च कृतैः पिष्टमयैः शुभैः"। शौवर्चलाभिः सतशोनिम्बपिष्टविकृतिभिः। "कांस्यभाजनवाद्यैश्च पश्चात् कार्यं च भोजनम्"।

मेघपालोहतीयाव्रतं भविष्यपु० "अथ शुक्लपक्षे च हतीयायां युधिष्ठिर!। मेघपालो महातथा भक्त्या स्त्रीभिर्न्मिलिता। अर्चैः विल्वदलैर्गोधूमैः सप्तधान्यसमन्वितैः। तिलतण्डुलमिश्रैश्च दातव्या धर्मचिप्सुभिः"। युधिष्ठिर उवाच "कीदृशी सा भवेद्देवी मेघपालो जनार्दन!। लक्षणं कीदृशं तस्याः को मन्त्र इति मे वद"। श्रीकृष्ण उवाच "ताम्बूलवस्त्रैः पत्रैरक्ता वस्त्रो

समञ्जरी। वाटीषु या न मार्गेषु प्रेक्षिता पर्वतेषु वा। यत्र वा दृश्यते राजन्! शुचौ देशे समुत्थिता। मेघपाली समभ्यर्च्या फलैः पुष्पैस्तथाक्षतैः। खर्जूरैर्नालिकेरैश्च नारङ्गैर्दाडिमैस्तथा। बीजपूरैः कपित्थैश्च सप्तधान्यैर्विरूढकैः"।

मौनव्रतं स्कन्दपु० "नभस्य व्यतिक्रान्ते नभस्ये च प्रवर्त्तिते"। नभाः, श्रावणः, नभस्यो भाद्रपदः तौ चात्र पूर्णिमान्तौ ग्राह्यौ। "एवं कालक्रमेणैव श्रावणी पूर्णिमा गता। तद्दिनं प्राप्य विप्रेणेत्यभेदाभिधानात्। "व्रतमेतत् तु कर्त्तव्यं षोडशैव दिनानि तु। एतच्छ्रुत्वा ततो देवी प्रहृष्टा वाक्यमब्रवीत्"। पार्वत्युवाच "किं विधानं पुरा प्रोक्तं व्रतं मौनव्रतात्मकम्। तत्समग्रं समाचक्ष्व प्रसादं कुरु मे प्रभो!"। ईश्वर उवाच "तद्दिनञ्चैव सम्प्राप्य सभार्य्यः सह बान्धवैः। गत्वा प्रभातसमये स्नानार्थं जलसन्निधौ। तड़ागे वा नदीदेशे गत्वा प्रस्रवणेऽथ वा। स्नानं कार्य्यं तदा सर्वैः शिवध्यानपरायणैः। दूर्वाकाण्डं सुसंगृह्य षोड़शग्रन्थिसंयुतम्। तत्तूलञ्च करे न्यस्य स्त्रिया वामे नटदक्षिणे। एवंविधानं कर्त्तव्यं यावत् स्यात् प्रतिपद्दिनम्। तद्दिने चैव संप्राप्ते समाप्त्यर्थं व्रतस्य तु। मौनेनैवानयेत्तोयं मौनात् गोधूमपेषणम्। मौनेनैव च कर्त्तव्यं नैवेद्यं भोजनादिकम्। सर्वोपस्करमादाय गत्वा च जलसन्निधौ। स्नानं कार्य्यं तदा तत्र नित्यकर्म्म ततः परम्। देवर्षिमनुजानाञ्च पितृणाञ्चैव तर्पणम्। पञ्चाह्नेवाधिदेवेशं मन्त्रैः सम्पूजयेत् ततः"।

यमचतुर्थीव्रतं कूर्मपु० "भरण्यान्तु चतुर्थ्यान्तु शनैश्चरदिने यमम्। पूजयन् सप्तजन्मोत्थैर्मुच्यते पातकैर्नरः"।

यमद्वितीयाव्रतं भविष्योत्तरे "कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर!। यमो यमुनया पूर्वं भोजितः स्वगृहे सदा। द्वितीयायां महोत्सर्गे नारकीयाश्च तर्पिताः। पापेभ्योऽपि विमुक्तास्ते मुक्ताः सर्वनिबन्धनात्। भ्रातृभिस्ताश्चातिसन्तुष्टाः स्थिताः सर्वे यदृच्छया। तेषां महोत्सवो ह्येष यमराष्ट्रसुखावहः। अतो यमद्वितीया सा प्रोक्ता लोके युधिष्ठिर! अस्यां निजगृहे पार्थ! न भोक्तव्यमतोबुधैः। स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम्"।

यमव्रतं भविष्यपु० "दक्षस्य यमराडिष्टः सर्वव्याधिहरो ध्रुवम्। मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः। पूर्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः"। इदं व्रतं वैश्वानरप्रतिपद्व्रतवद्व्याख्येयम्। कूर्मपु० "उपोषितश्चतुर्दश्यां कृष्णपक्षे समाहितः। यमाय धर्मराजाय मृत्यवे चान्तकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। प्रत्येकं तिलसंयुक्तान् दद्यात् सप्तोदकाञ्जलीन्। स्नात्वा नद्याञ्च पूर्वाह्णे मुच्यते सर्वपातकैः"। महाभारते "यजिष्णुः पञ्चमीं षष्ठीं यमान् यो भोजयेद् द्विजान्। अष्टमीमथ कौन्तेय! शुक्लपक्षे चतुर्दशीम्। उपोष्य व्याधिरहितो रूपवानिति जायते"। विष्णुधर्मोत्तरे "यत्र क्वचन नद्याञ्च यत्र कृष्णा चतुर्दशी। अनर्कांभ्युदिते काले देवं सम्पूजयेद् यमम्। धूम्रवर्णं चित्रगुप्तं कालपाशञ्च यादव!। मृत्युं स्वर्गञ्च धर्मञ्च गन्धमाल्यान्नसम्पदा। यमोदधार इत्युक्त्वा तिलांश्च जुहुयात् ततः। नमो यमायेति तथा स्त्रीशूद्रस्य विधीयते। क्षत्रं भोजयेद्विप्रान् यथाशक्ति नरोत्तमः। दद्याद् व्रतान्ते विप्राय तथैव च पयस्विनीम्। कृत्वा व्रतं वत्सरमेतदिष्टं न याति राजन्! नरकं मनुष्यः। पापक्षयं प्राप्य स याति नाकं मानुष्यमासाद्य स धर्मवान् स्यात्"।

यमादर्शनत्रयोदशीव्रतं भविष्योत्तरे "पूर्वाह्णे मार्गशीर्षादौ वर्षमेकं निरन्तरम्। त्रयोदश्यां सौम्यदिने क्षुरीकारकवर्जिते। मम नाम्ना द्विजानष्टौ पञ्च चैव समाह्वयेत्। पुराणवेदतत्त्वज्ञान् स्वाचारांस्तत्त्वदर्शनान्। क्षुरैकशरणात् साधून् सर्वभूतहिते रतान्। शुचौ देशे शुभे पट्टे प्राङ्मुखानुपवेशयेत्। अन्नवस्त्रोपयुक्तान् भक्त्या यत्नेनाभ्यञ्चयेत तान्। त्रयोदश्यां त्रयोदश्यां ये करिष्यन्ति भूतले। एकभक्तेन नक्तेन उपवासेन वा पुनः। यमादर्शनमात्रा वै व्रतं सर्वव्रतोत्तमम्। ते सर्वपापनिर्मुक्ता विमानेनार्कवर्चसा। यास्यन्तीन्द्रपुरीं रम्यामप्सरोगणसंकुलाम्"।

युगादिव्रतम् आदिपु० "वैशाखस्य तृतीयायां श्रीसमेतं जगद्गुरुम्। नारायणं पूजयेथाः पुष्पधूपविलेपनैः। वस्त्रालङ्कारसम्भारैर्नैवेद्यैर्विविधैस्तथा। ततस्तस्याग्रतो मेरुर्लवणस्याढ़केन तु। कार्य्यो कुरुकुलश्रेष्ठ! चतुर्भागेण वत्सकम्। चतुर्भागेण तस्योपरि स्थाप्य कल्पयित्वा विधानतः। शास्त्रोक्तक्रमयोगेन ब्राह्मणायोपपादयेत्। श्रीधरः श्रीपतिः श्रीमान् श्रीशः संप्रीयतामिति। अनेन विधिना दत्त्वा धेनुं विप्राय भारत!। गोसहस्रप्रदानस्य फलं प्राप्नोत्यसंशयम्। तथैव कार्त्तिके मासि नवम्यां

नक्तमुग् नरः। स्नात्वा नद्यां तड़ागे वा देवखातेऽथ वा पुनः। उमासहायं वरदं नीलकण्ठमथार्चयेत्। पुष्पधूपादिभिर्देवं दीपैर्गन्धादिभिस्तथा। धेनुं तिलमयीं दद्यात् पुराणोक्तविधानतः। अष्टमूर्त्तिर्नीलकण्ठः प्रीयतामिति कीर्त्तयेत्। तदनु प्राप्यते पुण्यं पार्थ! न केन वर्ण्यते। दत्त्वा तिलमयीं धेनुं शिवलोकमवाप्नुयात्। त्रयोदश्यां नभस्ये वा पितॄन् तत्र समर्चयेत्। पितॄन् पायसदानेन सुमनोभिर्धृतेन च। भोजयेद् ब्राह्मणान् भक्त्या वेदवेदाङ्गपारगान्। पितॄनुद्दिश्य दातव्या सवत्सा कांस्यदोहना। प्रत्यक्षा गौर्महाभाग! तरुणी सुपयस्विनी। पिता पितामहश्चैव तथैव प्रपितामहः। मातामहश्चतयस्तथैवात्र त्रयो मम। प्रीयन्तामक्षयप्रदानेन इति दत्त्वा विसर्जयेत्। कृतेनानेन राजेन्द्र! यत् पुण्यं प्राप्यते पुनः। तदन्येन न शक्यन्तु वक्तुं वर्षशतैरपि। पुत्रांश्च पौत्रांश्च धनं सर्वं सुमहदीप्सितम्। दृष्टेवाप्नोति पुरुषः परत्र च पराङ्गतिम्। पञ्चदश्यान्तु मासस्य पूजयित्वा पितामहम्। गायत्र्या सहितं देवं वेदवेदाङ्गभूषितम्। नवनीतमयीं धेनुं फलैर्नानाविधैर्युताम्। सहिरण्यां सवत्सान्तु ब्राह्मणाय निवेदयेत्। कीर्त्तयेत् प्रीयतां मेऽद्य ब्रह्मयोनिः पितामहः। यत्स्वर्गे यच्च पाताले यन्मर्त्ये किञ्चिदुर्लभम्। तदवाप्नोत्यसन्दिग्धं पद्मयोनेः प्रसादतः। यानि चान्यानि दानानि दीयन्ते सुबहून्यपि। युगादिषु महाराज! अक्षयाणि भवन्ति हि। वित्तहीनः स्वशक्त्या यो ददाति स्वल्पकं वसु। तदप्यक्षयतां याति नात्र कार्या विचारणा"।

युगावतारव्रतं भविष्यपु० "माघे प्रौष्ठपदे वापि तु कृष्णपक्षे त्रयोदशी। अवतीर्णं युगं तस्यां त्रेतायान्तु समाहित!"। त्रेतायां विनिर्दिष्टायां एतस्यां तिथौ युगमवतीर्णमिति सम्बन्धः। अथवा द्वापरमिति कथ्यते "गोभूवं गोभयं दूर्वां समालभ्य च मृत्तिकाम्। स्नायात्तु तीर्थे तड़ागे वा तिथौ तस्यां समाहितः। कृतघ्नेन भवेच्छ्राद्धं गयायान्तु न संशयः। युगादौ यस्त्रिलोकेशं स्नापयेद्गरुड़ध्वजम्। घृतक्षीरजलैः पुण्यैः सगच्छेद्वैष्णवीं-पुरीम्। स्नापितोऽथ विलिप्तोऽथ पूजितोथ जनार्दनः। युगादौ युगकर्त्ता तु नृणां मुक्तिप्रदो हरिः। कृते त्रेतायुगे सर्वयत्नेन युगादौ जगतीपतिः। पूजनीयो जनैर्भक्त्या सर्वदुःखहरो हरिः"।

योगव्रतं भविष्योत्तरोक्तम् "विष्कुम्भादिषु योगेषु भवेदेकाशनो नरः। यो ददाति क्रमात् पार्थ! घृतधेनुपलैश्चतस्रः। यवगोधूमवरणं निष्पावाक्षालितण्डुलान्। लवणं दधि दुग्धञ्च वस्त्रं कनकमेव च। कम्बलं गोहरं क्षत्रसुपानद्युगलं तथा। कर्पूरं कुङ्कुमञ्चैव चन्दनं कुसुमानि च। लौहं ताम्रञ्च कांस्यञ्च रौप्यञ्चेति सुधिष्ठिर!। स्नातः स्वशक्त्या विधिवत् सर्वपापैः प्रमुच्यते। न वियोगमवाप्नोति योगव्रतमिदं स्मृतम्"।

योगेश्वरद्वादशीव्रतं धरणीव्रते "शृणुष्व भक्तितो राजन्! कार्त्तिकैकादशीं तथा। उपोष्य विधिना येन सर्वान्कामान् प्राप्नुयात् फलम्। प्राग्विधानेन संकल्प्य तद्वत् स्नानं समाचरेत्। विलोमेनार्चयेद्देवं नारायणमकल्मषम्"। रत्नाबन्धनपौर्णमासीव्रतं भविष्योत्तरे "धनाढ्यैरुत्सवे पार्थ! प्राप्ते द्वादशे धरणीतले। संप्राप्ते श्रावणे मासि पौर्णमास्यां दिनोदये। स्नानं कुर्वीत मतिमान् स्मृतिस्मृतिविधानतः। ततो देवान् पितॄंश्चैव तर्पयेत् परमात्मसा। उपाकर्मादि चैवोक्तमृषीणाञ्चैव तर्पणम्। कुर्वीत ब्राह्मणः श्राद्धं वेदानुद्दिश्य व्रत!। शूद्राणां मन्त्ररहितं स्नानं दानञ्च शस्यते। ततोऽपराह्णसमये रत्नापोटलिकां शुभाम्। कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषिताम्। वस्त्रैर्विचित्रैः कार्पासैः क्षौमैर्वा मलवर्जितैः। दूर्वार्वर्णसहितैश्चित्रा दुरितोपशमनाय। उपलिप्ते गृहोद्देशे दत्तचतुष्के न्यसेत् कुम्भम्। पीठं दत्त्वोपरि विशेत् राजामात्यैर्युतश्च सुहृद्वर्गैः। वेश्याजनेन सहितो मङ्गलशब्दैः ससुच्छ्रितैश्चिह्नैः। रत्नाबन्धः कार्यः शान्तिध्वनिना नरेन्द्रस्य। देवद्विजातिशस्त्रागतस्तु रत्नाभिरर्चयेत् प्रथमम्। तदनु पुरोधा नृपतेः रत्नां बध्नीत मन्त्रेण" इत्यादि।

रत्नत्रयीव्रतं भविष्यपु० "कृत्वैवाश्वयुजे मासि कृष्णपक्षे नराधिप!। नवम्यामुपवासन्तु दुर्गादेवीं समर्चयेत्। पुष्पधूपोपहारैस्तु ब्राह्मणानां च तर्पणैः। पूजयित्वा रथं कृत्वा नानावस्त्रोपशोभितम्। शोभितं ध्वजमालाभिः कृतचामरदर्पणैः। नानापुष्पसजाभिश्च सिंहैर्युक्तं मनोरमम्। कृत्वा स्वर्णमयीं दुर्गां महिषासनशोभिताम्। विन्यस्य रथमध्ये तु पूजयेत् कृतलक्षणम्। तं रथं राजमार्गेण शङ्खभेर्यादिनिस्वनैः। नवम्यां भ्रामयित्वा तु नयेत् दुर्गालयं नृप!। तत्र जागरपूर्वन्तु प्रदीपाद्युपशोभितम्। नानाप्रक्षेपकैर्वीर!

श्रद्धयानेन बालकैः। जागरं कारयेत्तत्र पूजयानन्च चण्डिकाम्। प्रभाते स्नपनं कृत्वा तद्भक्तानान्च भोजनम्। रथं शोभासमायुक्तं भगवत्यै निवेदयेत्"।

रथसप्तमीव्रतं भविष्योत्तरे "शुक्लपक्षे तु माघस्य षष्ठ्यामासन्नवृत्तदृक्। स्नानं शुक्लतिलैः कार्यं नद्यभावे तु कूपचित्। विमले सलिले राजन्! विधिवट्टु वर्णधर्मतः। देवादीन् पूजयित्वा तु गत्वा सूर्यालयं ततः। सूर्यं सम्यक् नमस्कृत्य पुष्पधूपाक्षतैः शुभैः। आगत्य भवनं पश्चात् पञ्च यज्ञांश्च निर्वपेत्। संभोज्यातिथिभक्तांश्च बालवृद्धान्वितान् स्वयम्। विद्यमाने दिनेऽन्योद्वाग्यतस्तैलवर्जितम्। रात्रौ विप्रं समाहूय विधिज्ञं वेदपारगम्। संपूज्य नियमं कुर्यात् सूर्यमाधाय चेतसि। सप्तम्यान्तु निराहारो भूत्वा भोगविवर्जितः। भक्ष्येऽह्न्यां जगच्चक्षो निर्विघ्नं तत्र मे कुरु!। इत्युच्चार्य क्षपेच्च! तोयं तोयेषु निक्षिपेत्। ततो विसृज्य तं विप्रं स्वपेद्भूमौ जितेन्द्रियः। ततः प्रातः समुत्थाय कृतावश्यः शुचिर्नरः। कारयित्वा रथं दिव्यं किङ्किणीजालमालिनम्। सर्वोपस्करसंयुक्तं रत्नैः सर्वाङ्गचित्रितम्। काञ्चनं राजतञ्चाथ कृष्णसारथिसंयुतम्। ततो मध्याह्नसमये कृतस्नानादिको व्रती। शुक्लैर्यवैर्व्रीह्यमाणस्तु षाड्यङ्गालापवर्जितम्। शौरस्वरं जगत् प्राप्य समाप्नुयात्तं समाचयम्"।

रथाङ्गसप्तमीव्रतं भविष्यपु० "माघे मासि महादेव! सिते पक्षे जितेन्द्रियः। सप्ताम्बुपोषितो भूत्वा गन्धपुष्पोपहारकैः। पूजयित्वा दिनकरं रात्रौ नक्तव्रतः स्वपेत्। विभुद्धस्तथ सम्यां भक्त्या भानुं समर्चयेत्। ब्राह्मणान् भोजयेद्भक्त्या वित्तशाठ्यं विवर्जयेत्। रक्तचन्दनमौदकैश्च नयनुगुड़पकैः। प्रथमं वत्सरे पूर्वं सप्तम्यां कारयेद्बुधः। देवदत्तं वै यावत् पूर्वोक्तविधिना तथा।" पूर्वोक्तः विधिना नानातिथिभक्तरणान्वितरथयात्राविधिनन्तथैव। "कृष्णपादं व्रतं कुर्याद्रूपाढ्यं रविं तथा। पद्मेनैव जगन्नाथं स याति परमां गतिम्। तृतीयायामेकभक्तं चतुर्थ्यां नक्तमुच्यते। अयाचितन्तु पञ्चम्यां षष्ठ्यान्तैव उपोषितः। सप्तम्यां भास्करं कुर्यात् दद्या देवं रथे स्थितम्। पूजयित्वा च विधिना भक्त्या-ऽब्जं त्रिलोचनम्। मौक्तिकैस्तु रथं कृत्वा तामपात्रो परिस्थितम्। रथमध्ये न्यसेद्देवीं पद्मिनीं कमलैर्युतम्"।

रम्भाविरात्रव्रतं स्कन्दपु० "शुक्लपक्षे त्रयोदश्यां माघज्येष्ठे च सुव्रत!। विरात्रं प्रणयेद्विप्र भक्त्या तां कदलीं शुभाम्। स्नात्वा चैव शुचिर्भूत्वा व्रती स्त्रिभिर्दृढव्रतैः। स्तम्भेन वेष्टयेद्भक्त्या गन्धपुष्पाक्षतादिभिः। रात्रौ कुर्वीत नृत्तं च वत्सरैकं समाहितः। तस्यैव कदलीस्तम्भं नित्यमेव प्रसेचयेत्। ज्येष्ठे मासि ततः प्राप्य द्वादश्यान्तैव सुव्रत!। नद्यां वाथ तडागे वा शिवं संपूज्य चाक्षतैः। स्नात्वा च पूजयेत्तन्तु माहेन्द्रीं धारिणीम्। एकभक्तं ततः कृत्वा निशमं कारयेत् व्रते। भोज्येऽह्नि विप्रिन लक्ष्मीं सम्यगिह्य सर्वदा रोम्। त्वत्प्रसादात् व्रतं मेऽस्तु निर्विघ्नेन महेश्वरि!। रम्भायाः स्तम्भकं कृत्वा विचित्रञ्च सुशोभनम्। रम्भाया निकटे स्थित्वा गीतवाद्यसमन्वितम्। मण्डपं कारयेत्तत्र पुष्पमालाविभूषितम्। वितानेन च संयुक्तं सर्वशोभासमन्वितम्। मध्ये कुर्वीत कदलीं फलं आदि संयुताम्। रात्रौ नीराजनाकारां स्नातरूपसमन्वितम्। वस्त्रयुग्मन्ततो दद्यात् सर्वालङ्कारभूषितम्"।

रविव्रतं भविष्यपु० "माघमासि समुद्युक्तस्त्रिसन्ध्यं योऽर्चयेद्रविम्। भवेत् माघमासिकं पुण्यं मासेनैव न संशयः"!

रथकल्याणिनीतृतीयाव्रतं ब्रह्मपु० "अन्यामपि प्रवक्ष्यामि तृतीयां पापनाशनीम्। रथकल्याणिनीमेतां पुराकल्पविदो विदुः। माघमासे तु सम्प्राप्य तृतीयां शुक्लपक्षतः। प्रातर्गव्येन पयसा तिलैः स्नानं समाचरेत्। स्नापयेन्मधुना देवीं तथैवेक्षुरसेन च। गन्धोदकेन च पुनः पूजनं कृङ्कुमेन यै। दक्षिणाङ्गुष्ठान सम्पूज्य ततो वामानि पूजयेत्"। "अनेन विधिना देवीं माघि मासि सदार्चयेत्। लवणं वर्जयेन्माघे फाल्गुने च गुड़ं पुनः। तवराजं तथा चैत्रे वर्ज्यं वै मधु माधवे। पानकं ज्येष्ठमासे तु तथाऽऽषाढे च क्षीरकम्। श्रावणे वर्जयेत् क्षीरं दधि भाद्रपदे तथा। घृतमाश्वयुजे तद्वदूर्जे वर्ज्यंथ सर्पिका"। अर्चा, काचित्रिं वै। मर्जिका, रसाला लोके शिखरिणीतिख्याता। "धान्यकं मार्गशीर्षे तु पौषे वर्ज्यंथ शर्करा। व्रतान्ते करकं पूर्णमेतेषां मासि मासि च। दद्याद्विकालवेलायां मध्यपात्रेण संयुतम्"।

राजराजद्वादशीव्रतं धरणीव्रते "ज्येष्ठमासेऽब्जेनेत्र मंक्रान्तौ विधिना नरैः। अर्चयेत् परमं देवं पुष्पैर्नानाविधैः शुभैः। नमोरावत्रयेणैव पादौ पूर्वं समर्चयेत्। ग्रथ-

सम्यक्च विधिवत् होतृकर्म प्रकल्पयेत्। प्राग्वद्दक्षयुग्मञ्च सौवर्णी रामलक्ष्मणौ" इत्यादि।

राजराजेश्वरव्रतं कालोत्तरे "बुधस्यात्मात्मिकोयोगो यदा स्यां प्रजायते। उपोषितस्तु विधिना महामानपुरःसरम्। सम्मूजयेद्विरूपाक्षमङ्गरागं चतुःसमम्। महावर्त्तित्रयं दीर्घदीपं साष्टोत्तरं शतम्। लघुकुङ्कुमधूपन्तु सितपुष्पैस्तु पूजयेत्। खण्डखाद्यान्यनेकानि नैवेद्यानि प्रकल्पयेत्। आचार्य्याय शिवस्याग्रे नैवेद्यसकुटादिकम्। रसनाकुण्डले चैव कङ्कणं सद्विकाद्वयम्। वाहनन्तु गजञ्चैव तदभावाद्वयोत्तमम्। सम्पूज्य परया भक्त्या अन्नञ्च शर्करायुतम्। राजराजेश्वरपदं प्राप्नुयाद्रोमसङ्ख्यया। राजराजेश्वरं तेन व्रतमेतत् प्रकाशितम्"।

राज्यतृतीयाव्रतं विष्णुधर्मोत्तरे "ज्यैष्ठे शुक्लतृतीयायां निराहारो नरः शुचिः। त्रिमूर्त्तिपूजनं कृत्वा तृतीयायां यथाविधि"। त्रिमूर्त्तिपूजनं तिसृणां मूर्त्तीनां वायुसूर्य्यचन्द्रमसां पूजनम्। "कूपनदतडागादौर्मिश्रैः प्रातः शुचिजलैः। प्रत्यूषे पूजयेद्वायुमनुलिप्ते शुभस्थले। गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा। होमं कृत्वाग्निवर्णैस्तु स्रुक्स्रुवैस्तु दयाद् द्विजातये। मध्याह्ने पूजयेद्वह्निं तथा सूर्य्यमतन्द्रितः। तिलांश्च जुहुयाद्वह्नौ दद्याद्विप्रेषु काञ्चनम्। सूर्य्यास्तमनवेलायां जले चन्द्रञ्च पूजयेत्"। जले चन्द्रमसमभिध्याय पूजयेदिति। वह्निमभिध्याय मध्याह्ने सूर्य्यं प्रपूजयेदिति वाक्यात् "घृतेन होमं कुर्वीत रजतं दक्षिणा स्मृतम्। नक्तं भुञ्जीत धर्मज्ञः नैलङ्घीनं ततो नरः। पूर्णे संवत्सरे कृत्वा व्रतमेतदतन्द्रितः। स्वर्गलोकमवाप्नोति सहस्रं परिवत्सरम्। मानुष्यमाद्य ततो राजा भवति भूतले। व्रतं कृत्वा महाभाग! पूर्णं संवत्सरत्रयम्। सप्तजन्मसहस्राणि स्वर्गलोके महीयते"।

राज्यदशमीव्रतं धर्म्मे "मृगयाव्यसनितो राजन्! दा-दर्शी राज्यदां शिवाम्। यास्यसीह मरोलोके राज्यमाप्नोत्यकण्टकम्। मार्गशीर्षस्य मासस्य शुक्लपक्षे नराधिप!। दशम्यां प्रयतः शुद्धः स्नानमन्त्रपूर्वकम्। हविष्यभुक् प्राणान्तात्मा दन्तधावनपूर्वकम्। उपवासस्य सङ्कल्पं श्रीभूतस्य च कारयेत्। देवाङ्गणे कृष्णकीर्णामेकवस्त्रोत्तरच्छदाम्। अध्यासीत महीं तत्र तां रात्रीं संयतो नयेत्। द्वितीयेऽह्नि ततः कृत्वादृद्धिं स्नानमतन्द्रितः। पूजनं चैव सर्वस्य सर्वसङ्क्षेपेण कारयेत् इत्यादि।

राज्याग्निदशमीव्रतं विष्णुधर्मोत्तरे "क्रतुर्दत्तो मुनिः सत्र कालः कामोवसुस्तथा। कुरवान् मनुजो द्विजो रोमसारस्य ते दश। विश्वेदेवाः समाख्याता दशाग्ना केशवे बिभुः। तस्य सम्पूजनं कार्य्यं सितपक्षे नराधिप! आरभ्य कार्त्तिकान्मासादशम्यां नृपपुङ्गव!। मण्डलेष्वथ पुरुषेषु यदि वाञ्छसि यादव!। गन्ध,माल्य, नमस्कार दीप, धूपान्न, सम्पदा"! अस्यां प्रतिमा सा च यथासम्भवं सुवर्णादिधातुमयी विधेया "व्रतान्ते कनकं दद्याद् यथाशक्ति द्विजातये। ततः व्रतं केवलमेतदिष्टं प्राप्नोति तेषां सुचिरन्तु लोकान्। तत्रेह लोके पुरुषोत्तमस्य राजा भवेद् ब्राह्मणपुङ्गवो वा"।

रामनवमीव्रतं समस्यसंहितोक्तम् "चैत्रे नवम्यां प्राक्पक्षे दिवा पुष्ये पुनर्वसौ। उदये गुरुगौरांशोः स्वोच्चस्थे ग्रहपञ्चके। मेषे पूषणि सम्प्राप्ते लग्ने कर्कटकाह्वये। आविरासीत् कलया कौशल्यायां परः पुमान्। तस्मिन् दिने तु कर्त्तव्यमुपवासव्रतं सदा। तत्र जागरणं कुर्य्यादूर्घुनाथपरो भवि। प्रातर्दशम्यां कृत्वा तु सन्ध्याद्याः कालिकीः क्रियाः। संपूज्य विधिवद्रामं भक्त्या वित्तानुसारतः। ब्राह्मणान् भोजयेद् भक्त्या दक्षिणाभिश्च तोषयेत्। गोभूतिलहिरण्याद्यैर्वस्त्रालङ्करणैस्तथा। रामभक्तान् प्रयत्नेन प्रीणयेत्परया मुदा। एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतम्। अनेकजन्मसिद्धानि पातकानि बहून्यपि। भक्षीकृत्य भजन्त्येव तद्दिनोः परमं पदम्"।

राशिव्रतं भविष्यपु० "कार्त्तिक्यां नक्तभुक् दद्यान्मेषं क्षेमविनिर्मितम्। मार्गशीर्षे नृपं पश्येन्मिथुनं तद्वदेव हि" इत्यादि। एवं क्रमेण यो दद्याद्धर्मी वस्त्रविभूषिताम्। पौर्णमास्यां पौर्णमास्यां कौन्तेय! वृषदक्षिणम्। एतद्राशिव्रतं नाम ग्रहोपद्रवनाशनम्। सर्वशापूरकं तद्वत्सोमलोकप्रदायकम्"।

कृष्णाष्टमीव्रतं स्कन्दपु० "माघे मार्गशिरे कृष्णपक्षेऽष्टम्यां षडानन!। कृष्णाष्टमीसंज्ञा सा सर्वकामफलप्रदा। तस्यां प्रातः शुचिर्भूत्वा नारी नियमकारिणी। वर्षं च प्रथमे कुर्य्यादेकाहारं व्रतं सदा। व्रतोपकरणं सर्वं तस्यां चिन्त्यं यादरम्। व्रीहीन् सूपप्रकारांश्चैव तादृशं रसांस्तथा। वस्त्रैः काञ्चनसा

दन्तैश्चैव लिखितास्तथा। कार्याः पुत्तलिकास्तत्र तासां नामानि मे शृणु!। कृष्णश्च रुक्मिणी चैव बलदेवश्च रेवती। प्रद्युम्नश्चैव तद्भार्या अनिरुद्ध उषा तथा। देवकोवसुदेवादीन् सर्वांस्तत्र प्रकल्पयेत्। ततोऽनुपूजयेत् सर्वानष्टधूपाक्षतादिभिः। चन्द्रोदये तु सम्प्राप्ते दद्यादर्घ्यं तदिन्दवे। "अर्घ्यं दत्त्वा तु भुञ्जीत मित्रस्वजनबन्धुभिः। ततः प्रभातसमये कुमार्यै तद्गृहं शुभम्। दद्यात् प्रीतेन मनसा सर्ववस्तुप्रपूरितम्। ततो द्वितीये वत्सरे तु कुर्याद्वै द्विजसुखमन्दिरम्। पूर्ववत् पूरितं कृत्वा कुमार्यै विनिवेदयेत्। ततस्तृतीये वत्सरे तु कृत्वा द्विजसुखमन्दिरम्। सम्पूर्णं पूर्ववत् कृत्वा कुमार्यै विनिवेदयेत्। ततश्चतुर्थे वत्सरे तु कृत्वा सुखचतुष्टयम्। पञ्चमेऽब्दे पञ्चद्वारं गृहं षण्णसुखसंयुतम्। कृत्वा दद्यात् प्रयत्नेन कुमार्यै तच्च मन्दिरम्। ततस्तु सप्तमे वर्षे कुर्याद्दद्यात्पनं शुभम्। सप्तद्वारं गृहं कृत्वा सुधाधवलितं महत्। शय्यां तूलीञ्च यानं च छत्रोपानहमेव च। आदर्शं चामरञ्चैव सुशलोलूखलं तथा। कांस्यभाजनपात्राणि नानाभक्ष्यं तु महान्ति च। नानाविधानि वस्त्राणि तथैवाभरणानि च। गृहोपकरणं सर्वं गृहे निक्षिप्य सर्वतः। कृष्णञ्च रुक्मिणीञ्चैव प्रद्युम्नञ्च मनोहरम्। कृत्वा स्वर्णमयान् भक्त्या पीतवस्त्रावगुण्ठितान्। पूजयित्वोपवासेन रात्रिजागरणेन च। ततः प्रभातसमये तद्गृहे समुपागतम्। सपत्नीकं द्विजं पूज्य वस्त्रालङ्कारभूषणैः। तस्मायैतद्गृहं दद्याद्गवाञ्चैवाथ सुशोभिनीम्"।

रुद्रव्रतं पद्मपु० "वस्त्रैकभक्तेन समां क्षिपेद्धेनुं दुग्धान्विताम्। धेनुं तिलमयीं दद्यात् स पदं याति शाङ्करम्। एतद्रुद्रव्रतं नाम पापशोकविनाशनम्"। ज्यैष्ठे पञ्चतपाः सायं हेमधेनुप्रदो दिवम्। वात्सद्यष्टमीचतुर्दश्यौ रुद्रव्रतमिदं स्मृतम्"। अष्टमीचतुर्दश्याविति च चत्वारि दिनानि पञ्चाग्निसाधनं तच्चतुर्थे दिने सायं सुवर्णधेनुं दद्यात्"।

रूपनवमीव्रतं भविष्यपु० "पौषे मासि महाबाहो! चतुर्दश्यां गजं शुभम्। कृत्वा रूक्ममयं भक्त्या न्यस्य पात्रे हिरण्मये। इन्द्राणीं विधिवद्दद्याद्वासोभिर्विभूषितम्। एवं पूजयते भक्त्या इन्द्राणीं विधिवत्ततः। स ऐरावतसारूढः सोमलोके महीयते"।

रूपसप्तमीव्रतं विष्णुधर्मोत्तरोक्तम् "फाल्गुन्यां समतीतायां कृष्णपक्षाष्टमी तु या। समूलां तां तु संप्राप्य व्रतं गृह्णीत मानवः। उपोषितव्यं नक्षत्रं नक्षत्रस्य च दैवतम्। वरुणञ्च तथा चन्द्रं पूजयेद्विधिना नरः। पूजयेद्देवदेवञ्च भगवन्तं जनार्दनम्। उपोषाङ्गानि देवस्य प्रयत्नेन च पूजयेत्। ततोऽग्निहवनं कृत्वा पूजयित्वा तथा गुरुम्। उपवासस्तु कर्त्तव्यो द्वितीयेऽह्नि पार्थिव। उपोषिते च विगते स्नात्वा संपूज्य केशवम्। कृत्वाग्निहवनं शक्त्या पूजयित्वा द्विजोत्तमान्। हविष्यान्नञ्च भोक्तव्यं शृणु चाङ्गक्रमं मम। पादयोः कथितं मूलं प्राजापत्यन्तु जङ्घयोः। अश्विनौ जानुयुगलं ऊरुयुग्मं च पार्थिव!। सर्पिते द्वे तथाषाढे गुह्यञ्च सर्पिते स्मृते। पूर्वोत्तरे च फाल्गुन्यौ कृत्तिका च कटिर्भवेत्। पार्श्वयोः कृत्तियुतयोर्नक्षत्रितयं समम्। उभे प्रोष्ठपदे राजन्! रेवती च तथा भवेत्। उरोऽनुराधासु पृष्ठं धनिष्ठासु प्रकीर्त्तितम्। भुजौ ज्ञेयौ विशाखासु हस्तौ प्रोक्तौ तथा करौ। अङ्गुल्यश्च तथा प्रोक्ता राजसिंह! पुनर्वसौ। अश्लेषायां नखाः प्रोक्ता ज्येष्ठायां नृप! कन्धरः। श्रवणे श्रवणौ ज्ञेयौ मुखं पुष्ये प्रकीर्त्तितम्। दन्ताः स्वातौ शतभिषा हनुः प्रोक्ता तथा नृपः! मघायां नासिके प्रोक्ते मृगशीर्षे च लोचने। चित्रा ललाटे विज्ञेया भरण्याञ्च तथा शिरः। शिरोरुहास्तथाद्रांसु व्रतस्यान्ते नराधिप!। चैत्रशुक्लावसाने तु सर्वं परिसमाप्यते"।

रूपसंक्रान्तिव्रतं स्कन्दपु० "अथान्यदपि ते वक्ष्मि रूपसंक्रान्तिसुत्तमम्। संक्रान्तिवासरे स्नानं तैलं कृत्वा विचक्षणः। हैमपात्रे घृतं कृत्वा हिरण्येन समन्वितम्। स्वरूपं वीक्ष्य तत्पात्रं ब्राह्मणाय निवेदयेत्। एकभक्तं ततः कृत्वा भक्त्या चैव समन्वितम्। व्रतान्ते काञ्चनं दद्याद्घृतधेनुसमन्वितम्। अश्वमेधसहस्राणां फलमाप्नोति मानवः"।

रूपावाप्तिव्रतं विष्णुधर्मोत्तरे "फाल्गुन्यां समतीतायां प्रतिपत्प्रभृति क्रमात्। यावच्चैत्रीं महाराज! तावत्स्नातो दिने दिने। वह्निः संपूजयेद्देवं केशवं भोगशायिनम्। एकभक्ताशनो नित्यमधःशायी तथा भवेत्। त्रिरात्रोपोषितः पूजाञ्चैत्रां कुर्यात्तथैव च। स्वशक्त्या रजतं दद्याद्वस्त्रयुग्मं तथैव च। रूपार्थिनो मयोक्तं व्रतोत्तमं नित्यमदोनसत्त्वम्। कृत्वा तु नाकं मनुजस्त्वबाध्य मानुष्यमासाद्य च रूपवान् स्यात्"।

रोहिणीद्वादशीव्रतं भविष्योत्तरे "प्रक्षते श्रावणे मासि

कृष्णपक्षे समाहितः। एकादश्यां शुचिर्भूत्वा स्नात्वा सर्वौषधीजलैः। मापचूर्णेन राजेन्द्र! कुर्यादिन्दुरिकागतम्। षोडशं तथा पञ्च पृतप्रस्थः कृशैर्मितः। आलोपयोगसंदिग्धं ततो गत्वा जलाशयम्। दुग्धादोविरहितं यज्ञोपेतजलैर्वृतम्। तस्यैव पुरतो रम्ये जलाग्ने गोमयादिना। कृत्वा मण्डलकं दत्तं पिष्टकादिभिरर्चितम्। चर्चितं गन्धकुसुमैर्धूपदीपाक्षतैः शुभैः। तत्र चन्द्रं लिखेत् पार्श्वे रोहिण्या सहितं भुवि। अर्चयेत शुभार्हेण मन्त्रेणानेन भक्तितः। एवमभ्यर्च्य तद् दत्त्वा तच्छलं स्वयमाविशेत्"। "कणद्वान्नं जलक्षीरं वा आनुगुल्फान्नमेव वा। ध्यायते सोमराजञ्च रोहिणीसहितं विभुम्। अक्षय्यमेव भुञ्जीत स्वर्यान्दुरिकागतम्। ये रोहिणी यमिश्रिता विकृता स्थिता च यत् कारणं शृणु नरेन्द्र! निवेदयामि। सर्पिष्मधुरचितेन्दिरिकागतं यद्भुक्तं जले गुडहतेन फलं तदेव"।

कृष्णोद्धृत स्कन्दपु० "रोहिणी जन्मनक्षत्रं वाऽथाद्देवस्य चक्रिणः। नामरूपमयीं कृत्वा पञ्चरत्नेन संयुताम्। स्थापयेद्रत्नयुग्मेन पुष्पधूपैः प्रपूजयेत्। कांक्षोदुम्बरफलैर्दिव्यैर्नैवेद्यैस्तपाचितैः। द्वितीयेऽह्नि समाप्येतद्ब्राह्मणायोपपादयेत्। श्रोत्रियाय सकुटुम्बिने। भिक्षुकाय कुटुम्बिने। स्वयं नक्तेन भुञ्जीत रोहिणीदर्शने सति। एवंविधं व्रतं दिव्यं दिवि देवाश्च चक्रिरे। वर्षे वर्षे समायाते देवाद्यापि कुर्वते। यं यं कामभिध्यायन् तं तमाप्नोत्यसंशयम्।

कृष्णाष्टमीव्रतं मत्स्यपु० "अस्ति वत्स! व्रतश्रेष्ठं तिथिनक्षत्रयोगतः। नभस्ये मासि राजेन्द्र! यदाद्रा जायते तदा। व्रतमेतद्विधातव्यसमाप्तेश्वरं भुवि। आरोग्यैश्वर्यसौभाग्यरूपसम्पत्प्रदायकम्। कारयित्वा यथाशक्ति सौवर्णं मिथुनं तयोः। गौरीगिरिशयोर्भक्त्या नक्तं सङ्कल्प्य पूजयेत्। नभस्ये बहुलाष्टम्यामेवं यः कुरुते व्रतम्। कृष्णाष्टमीतिविख्यातमिदं तस्य फलं शृणु। सर्वपापविशुद्धात्मा सर्वैश्वर्यसमन्वितः। भुक्त्वा भोगान्महेशेन ततः कालविपर्यये। राजा भवति धनिष्ठा वाऽथ सौख्यसमन्वितः। माद्रार्क्षयुताष्टमी भवति या कृष्णा नभस्ये तदा सौवर्णं मिथुनं शिवागिरिजयो रूपं ततो कृष्णैः। पूर्वं पिष्टमयैर्दद्यात् गुरवे सार्द्धं रसैर्भोजनं भुक्त्वा योगहतोत्तरं पदमथो यस्मोर्नलेकाव्रतम्"।

लक्ष्मीनारायणव्रतं विष्णुधर्मोत्तरे "पञ्चदश्यां शुक्लपक्षे फाल्गुनस्य नरोत्तम!। पाषण्डपतितांश्चैव तथैवान्यावसायिनः। नास्तिकान् भिन्नवृत्तांश्च पापिनश्चापि नाक्षमेत्। नारायणे गतमनाः पुरुषो नियतेन्द्रियः। तिष्ठन् भुवन् प्रस्खलंश्च स्मृते वापि जनार्दनम्। कीर्त्तयेत्तत्क्रियाकाले सर्वं क्षमा पुनः पुनः। लक्ष्म्या समन्वितं देवमर्चयेत जनार्दनम्। मध्याह्नपरमे चन्द्रस्वरूपं हरिमीश्वरम्। रात्रिञ्च लक्ष्मीं सञ्चिन्त्य स्वस्वगर्भेण चिन्तयेत्। श्रीर्निशा चन्द्ररूपा त्वं वासुदेव! जगत्पते!। मनोऽभिलषितं देव! पूरयस्व नमोनमः। मन्त्रेणानेन दत्त्वार्घ्यं देवदेवस्य भक्तितः। नक्तं भुञ्जीत मौनेन तैलक्षारविवर्जितम्। तथैव चैत्रवैशाखे ज्यैष्ठे च सुनिश्चितम्!। अर्चयेच्च यथाप्रोक्तं मासि मासि च तद्दिने। निर्व्याहृतं भवेदेकं पारणं दानमस्य! भक्तितः। द्वितीयं तत्र वक्ष्यामि पारणन्तत् निबोध मे। आषाढे श्रावणे मासि भाद्रपदे तथा। तथैवाश्वयुजेऽभ्यर्च्य श्रीधरञ्च श्रिया सह। सम्यक् चन्द्रमसन्दत्त्वा भुञ्जीतार्च्यं यथाविधि। द्वितीयमेतदाख्यातं ततीयं पारणं शृणु। कार्त्तिकादिषु मासेषु तथैवाभ्यर्च्य केशवम्। भूत्वा समन्वितं दद्याच्छय्याङ्घ्रायाढ्यं सिगि। भुञ्जीत च यथाख्यातं ततीयमपि पारणम्। प्रतिपूज्य ततो दद्यात् ब्राह्मणेऽभ्यर्च्य दक्षिणाम्। प्रतिमासं च वक्ष्यामि प्राशनं कायशुद्धये। प्रथमं चतुरो मासान् पञ्चगव्यमुदाहृतम्। कुशोदकं तथैवान्यदुक्तं मासचतुष्टयम्। गोतप्तादिकं रात्रौ तथा कृष्णजलाः शुभाः। कारयेद्देवदेवस्य पारणे पारणे गते। जनार्दनं सलक्ष्मीकमर्चयेत् प्रथमं तथा। सश्रीकं श्रीधरं तद्वत्तृतीयं भूतिकेशवम्। एवं संपूज्य विधिवत् सपत्नीकं जनार्दनम्। नोप्रोतीष्टवियोगार्त्तिं पुमान्नार्य्यपि वा पुनः"।

लक्ष्मीपञ्चमीव्रतं यमपु० "लक्ष्मीमभ्यर्च्य पञ्चम्यामुपवासी भवेन्नृपः। समाने शुक्लपक्षे तु दद्याद्धेनुसमन्वितम्। स वैष्णवं पदं याति लक्ष्मीजेन्मनि जन्मनि। एतल्लक्ष्मीव्रतं नाम दुःखशोकविनाशनम्"।

ललिताद्वितीयाव्रतं भविष्योत्तरे "माघमासे सिते पक्षे तृतीयायां यतव्रतः। पादौ प्रक्षाल्य हस्तौ च सुखश्चैव समाहितः। उपवासञ्च नियमं तत्पश्चात्पूर्वकम्। मध्याह्ने तु नदीं गत्वा तिलैरामलकैः शुभैः। स्नात्वोक्तीर्य जलात् शुक्ले वाससी परिधाय च। सुगन्धैश्च

सुपुष्पैश्च मनोहरैः कुङ्कुमादिभिः। अर्चयीत तथा तथा देवीं त्वां भक्त्या भक्तिवत्सले!" इत्यादि।

ललितात्रतं स्कन्दपु० "शृणु त्वमनवद्याङ्गि! ललिताराधनक्रियाम्। आश्विनस्य सिते पक्षे दशम्यां नक्तभोजनम्। प्रतिमां हेममयीं दिव्यां सर्वालङ्कारभूषिताम्। वापी कार्या शुभे देये तन्मध्ये वेदिका शुभा। हस्तमात्रा विनिर्दिष्टा दशधान्यसमन्विता। वेदीकोणेषु संस्थाप्या रूपमयः पञ्च देवताः। सिक्ता जलेन तन्मध्ये देवी स्थाप्या प्रयत्नतः। अन्नपूर्णं सजलं कुम्भं ताम्रपात्रसमन्वितम्। तत्र स्वर्णमयी देवी स्थाप्या च ललिता शुभा। चन्द्रेन्दु रोहिणीयुक्तं राजतं कारयेत् पुरः। दक्षिणे हीश्वरं स्थाप्य वामतो विघ्ननायकम्। मूलमन्त्रेण गायत्र्या सर्वं तत्र प्रपूजयेत्" इत्यादि।

ललितासप्तमीव्रतं भविष्योत्तरे "भद्रे! भाद्रपदे मासि शुक्ले पक्षे सुसंयता। नारी स्नात्वा प्रभाते च शुक्लमाल्याम्बरप्रिया। सुवेषाभरणोपेता भूत्वा संपूज्य वालुकाः। नवे वेणुमये पात्रे पट्टं गन्धैरलङ्कृतम्। सोपवासा प्रयत्नेन तत्र देवीं प्रपूजयेत्। कृत्वा वस्त्रयुगं रम्यं प्रथमाज्ञाविचिन्तितम्। तत्र संस्थाप्य तां देवीं पुष्पैः सम्पूजयेद्धरिम्"। तां देवीमिति जलान्तरगतां वालुकामानीय वंशपात्रे पञ्चपिण्डात्मिकां वालुकामयीं पूजयेदिति "ध्यात्वा तु ललितां देवीं तपोवननिवासिनीम्। षड्जं करवीरञ्च नेपालीं मालतीं तथा"। नेपालीं पुष्पविशेषं, गृहीत्वा पूजयेदितिशेषः। नीलोत्पलं केतकीञ्च संपूज्य नगरं वरम्। एकैकाष्टयतं पाद्मसप्तविंशतिरेव वा। अक्षताः कलिका गन्धा ताभिर्देवीं समर्चयेत्"।

सावित्र्यावाप्तिव्रतं विष्णुधर्मोत्तरोक्तम् "कार्त्तिक्यां समतीतायां प्रतिपत्प्रभृतिक्रमात्। घटे वा यदि वा भूम्यां प्रद्युम्नं पूजयेद्विभुम्। कृत्वा स्नानं ततः कुर्याद्व्रतसम्पूर्तिकारणम्। एकभक्तं महाराज! हविष्यं प्रयतः सदा। मार्गशीर्षं ततः प्राप्य त्रिरात्रोपोषितः शुचिः। सम्पूज्य देवं प्रद्युम्नं कृत्वाग्नौ हुतमेव च। भोजयेद्ब्राह्मणांश्चात्र भोजनं रसपोत्कटम्। चूर्णितस्य ततः प्रस्थं लवणस्य द्विजातये। अलङ्कृतस्तरुणस्य वस्त्रयुग्मं तथा गुरोः। दद्याच्च कनकं राजन्! कांस्यपात्रं तथैव च। आसेन व्रतयज्ञकरं प्रदिष्टं व्रतोत्तमं नाकगतिप्रदञ्च। न केवलं यादव! सर्वकामान् नरस्य दद्यात्पुरुषप्रधानताम्"।

लोकव्रतं विष्णुधर्मोत्तरोक्तम् "अतःपरं प्रवक्ष्यामि तव लोकव्रतं शुभम्। यास्तु व्याहृतयस्तत्र सप्त लोकाः प्रकीर्त्तिताः। आचरेत् प्रत्यहं स्नानं वह्निर्नित्यमतन्द्रितः। चैत्रशुक्लात्तथारभ्य क्रमेण दिनसप्तकम्। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासस्तु क्रमेणैवं समाचरेत्। महाव्याहृतिभिर्होमस्तिलैः कार्य्यो दिने दिने। संवत्सरान्ते दद्याच्च तथा विप्रेषु दक्षिणाम्। सुवर्णं सुमहद्वासः कांस्यधेनूस्तथैव च। संवत्सरमिदं कृत्वा व्रतं पुरुषसत्तम!। सर्वलोकवरः श्रीमान् स्वेच्छया स्वाद्वराधिपः"।

वटसावित्रीव्रतं स्कन्दपु० धर्मराजवरप्रदानानन्तरं सावित्र्यां वाचं "मदीयन्तु व्रतं देवि! भक्त्या नारी करिष्यति। भर्तुः सौभाग्यसंयुक्ता साध्वी समस्तफलभाजना"। धर्मराज उवाच "नारी वा विधवा वापि सपुत्रा पतिवर्जिता। सभर्तृका सपुत्रा वा कार्यं व्रतमिदं शुभे! ज्येष्ठस्यान्ते तु संप्राप्ते पौर्णमास्यां पतिव्रता। स्नात्वा चैव शुचिर्भूत्वा वटं सिञ्च वरुणकैः। क्षीरेण वारिणा गन्धपुष्पाद्यैश्च शुभैः। नमो वैवस्वतायेति मन्त्रेणानेन वै यत्नो प्रदक्षिणम्। रात्रौ कुर्वीत नक्तञ्च व्रतमेकं समाहिता। नयेत्र वटवृक्षस्तु पत्रे पत्रे च पूजयेत्। संप्राप्ते च पुनर्ज्येष्ठे शुक्लपक्षे त्रयोदशीं नयेत्। दत्त्वानां धारणं कृत्वा नियमं कारयेत्ततः। त्रिरात्रं लङ्घयित्वा च चतुर्थे दिवसे क्षुधम्। चन्द्रायार्घ्यं प्रदत्त्वा च पूजयित्वा द्विजोत्तमान्। मिष्टान्नानि यथाशक्त्या पूजयित्वा द्विजोत्तमान्। भोक्ष्येऽहन्तु जगद्धात्रि! निर्विघ्नं कुरु मे सदा। नियममन्त्रः "कृत्वा वंशमये पात्रे वालुकाप्रस्थमेव च। सप्तधान्यधृतं पात्रं प्रस्थेनैक द्विजोत्तम!। वस्त्रद्वयोपरि स्थाप्य सावित्रीं ब्रह्मणा सह। हैमीं कृत्वा तथा प्रीत्यै त्रिरात्रमुपवासयेत्। न्यग्रोधस्य तले तिष्ठेद्यावच्चैव दिनत्रयम्। सौवर्णीञ्चैव सावित्रीं यत्नेन च कारयेत्। रौप्यपर्यङ्कमारोप्य रथोपरि निवेशयेत्। पलाशैर्यथाशक्त्या रथं रौप्यमयं शुभम्। तथा च काष्ठभारे च वटे चैव सुविस्तरम्। एवञ्च विधिवत् कृत्वा पूजयेद्व्रतमन्वहम्। वर्त्तुलं सप्तरज्जुं कृत्वा गोमयेन तथोधन!। पञ्चाङ्गुलेन रूपेण गन्धपुष्पोदकेन च। चन्दनागुरुकर्पूरैर्माल्यवस्त्राविभूषणैः। संपूज्य तत्र सावित्रीं मण्डले स्थापयेद्बुधः। पीतपिष्टेन पद्मञ्च कृत्वा वा चन्दनेन च। न्यसेच्चैव ततो देवीं कमले कमलासनाम्

अनेन विधिना स्थाप्य पूजयेद्व्रतमुत्तरा" इत्यादि।

वरचतुर्थीव्रतं स्कन्दपु० "चतुर्थ्यां मार्गशीर्षे तु शुक्लपक्षे नृपोत्तम! प्रारभ्य प्रतिमासञ्च चतुर्थ्यां गणनायकम्। संपूज्य विधिना कुर्यादेकभक्तं समाहितः। अक्षारलवणं त्वेवं पूर्णसंवत्सरे ततः। द्वितीये वत्सरे चाथ नक्तं प्रतिचतुर्थि च। कुर्यादनेनमभ्यर्च्य तृतीयेऽयाचितं तथा। एवमेव प्रकुर्वीत चतुर्थं स्वादुपोषणम्। ततश्चतुर्थं संप्राप्य तदुद्यापनमाचरेत्। इदं वरचतुर्थाख्यं व्रतं सर्वार्थसाधकम्"।

वरव्रतं पद्मपु० "सप्तरात्रोषितो दद्यात् एतत्कुम्भं द्विजातये। वरव्रतमिदं प्रोक्तं ब्रह्मलोकप्रदायकम्"।

वराटिकाषष्ठमीव्रतं भविष्यपु० "वा काचित् षष्ठमी प्रोक्ता ततो वक्ष्यामि शोभनम्। वराटिकात्रयक्रीतं यत् किञ्चित् प्राशयेन्नरः। अनेन देहि मूल्येन यत्तुभ्यं तत्त्व भक्ष्यते। अभक्ष्यं वापि भक्ष्यं वा नात्र कार्या विचारणा। अनेन विधिना कार्या वराटाक्षयषष्ठमी"।

वराहद्वादशीव्रतं धरणीव्रते "एवं माघे सिते पक्षे द्वादशी धरणीव्रतः। वराहस्य हृषीकेशान्यां पुण्यां परमधार्मिकः। प्रागुक्तेन विधानेन सङ्कल्प्य स्नानमेव च। कृत्वा देवं समभ्यर्च्य एकादश्यां विचक्षणः। पुष्पैर्नैवेद्यगन्धैश्च पूजयित्वाच्युतं नरः। पश्चात्तस्याग्रतः कुम्भञ्चलपूर्णन्तु विन्यसेत्। एवं विधानतो दत्त्वा फलं तस्य वाराहरूपिणम्। ब्राह्मणाय च तद् दद्यात् फलं तस्य निशामय। इह जन्मनि सौभाग्यं श्रीः कान्तिस्तुष्टिरेव च। ज्ञानवान् वित्तवान् भोगी बहुपुत्रः पुत्रवान् भवेत्"।

वरुणव्रतं पद्मपु० "निशि कृत्वा जले वासं प्रभाते गोप्रदो भवेत्। वारुणे लोकमाप्नोति वरुणव्रतसञ्ज्ञिते"।

वसुव्रतं विष्णुधर्मोत्तरे "ध्रुवोऽध्रुवश्च सोमश्च व्यापश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च अष्टौ ते वसवः स्मृताः। अष्टम्यां पूजयेद्यस्तु सोपवासो नराधिप!। चैत्रमासादथारभ्य शुक्लपक्षाच्च यादव!। मंगलेऽह्यथ वाचांसु जपेच्च मनुजाधिप!। गन्धमाल्यनमस्कारदीपधूपान्नसम्मदा। बह्निः स्नानेन राजेन्द्र! तथार्घोदयनेन च। व्रतान्ते तु सदा दद्याद्धेनुं विप्राय शक्तितः। पद्मपु० "यशोभङ्गसुखीं दद्यात् प्रभूतकनकान्विताम्। दिनं प्रयोव्रती तिष्ठेत् स याति परमं पदम्। एतद्वसुव्रतं नाम पुनरावृत्तिदुर्लभम्"।

वस्त्रविरात्रव्रतं भविष्योत्तरोक्तम् "चैत्रे तु कृसरैर्देवं लिभिः प्रयतमानसः। त्रिरात्रं तत्र नक्ताशी नद्यां स्नात्वा द्विजातये। पयस्विनीरजाः पञ्च प्रदद्यात् च सुवर्णकाः। न जायते पुनस्तस्य जीवलोके कदाचन। एतद्वस्त्रव्रतं प्रोक्तं सर्वव्याधिविनाशनम्"।

वह्निव्रतं विष्णुपु० "कृष्णपक्षे पञ्चदश्यां चैत्रादारभ्य यादव!। वह्निसंपूजनं कृत्वा गन्धमाल्यान्नसम्मदा। तिलहोमस्तथा कुर्यान्नाम्ना वह्नेर्नराधिप!। संवत्सरान्ते दद्याच्च सुवर्णं ब्राह्मणाय च। कृत्वा व्रतं वत्सरमेतदिष्टं प्राप्नोति वित्तं सतत यशश्च। धर्मे मतिश्चोत्तमभुक्तमश्च कामान् यथेष्टान् पुरुषप्रधानः"।

वामनद्वादशीव्रतं धरणीव्रते "एवमेव सुते! माघि चैत्रे संकल्प्य द्वादशीम्। उपोष्य धारयेद्भक्त्या देवदेवं जनार्दनम्। वामनायेति पादौ तु विष्णोः कटिमर्चयेत्। वासुदेवाय जठरं उरः शङ्खधराय च। कण्ठं विश्वभृते पूज्य शिरो वै क्षोमरूपिणे। बाहू विश्वजिते पूज्य स्वनाम्ना शङ्खचक्रके। अनेन विधिनाभ्यर्च्य देवदेवं जनार्दनम्। प्राग्वदेनोदरं कुम्भं सयुग्मं पुरतो न्यसेत्"। युग्मं वस्त्रयुग्मम्। "प्रागुक्तविधिं संस्थाप्य वामनं काञ्चनं बुधः। यथाशक्ति क्रमं कृत्वं सितवस्त्रोपवीतिनम्। कृष्णाजिनं स्थापयेत् पार्श्वे ऋत्विजापादुके तथा। अक्षमालाञ्च संस्थाप्य यष्टिकां च विशेषतः। एतैरुपस्करैर्युक्तं प्रभाते ब्राह्मणाय तु। दापयेत् प्रीयतां विष्णुः कृष्णरूपीति कीर्तयेत्। वासनाम्ना तु तं संयुक्तं प्रादुर्भावाभिधानकम्। प्रीयतामिति सर्वत्र विधिरेष प्रकीर्तितः। वासनाम्ना मार्गशीर्षादिमासेषु केशवादिनाम्ना प्रादुर्भावाभिधानकं मत्स्यरूपी कूर्मरूपीत्येवमादि"।

वायुव्रतं विष्णुधर्मोत्तरे "शुक्लपक्षे चतुर्दश्यां ज्यैष्ठादारभ्य यादव!। वायुं सम्यग्जयेद्दुष्टं सोपवासो जितेन्द्रियः। गन्धमाल्यनमस्कारदीपधूपान्नसम्मदा। संवत्सरान्ते दातव्यं वस्त्रयुग्मं द्विजातये। कृत्वा व्रतं वत्सरमेतदिष्टमासाद्य लोकं सुचिरं मनुष्यः। सुखानि भुक्त्वा सुचिरं महीयो मानुष्यमासाद्य भवेत्पुरोगः"।

वारिव्रतं पद्मपु० "चैत्रादिचतुरो मासान् जले कुम्भादयाचितम्। ज्यैष्ठाषाढे तथा माघे जौघे वा राजसत्तम!। व्रतान्ते मणिकं दद्यादक्षवस्त्रसमन्वितम्। तिलपात्रं

हिरण्यञ्च ब्रह्मलोके महीयते। तद्वत् राजराड् आदृ वारिव्रतमिहोच्यते"।

वासुदेवद्वादशीव्रतं धरण्योक्ते "आषाढेऽभ्येत्य सङ्कल्पं विधिना ततः। अर्चयेत्पुरुषं देवं गन्धपुष्पैर्विधानतः। वासुदेवाय पादौ तु कटिं सङ्कर्षणाय च। प्रद्युम्नायेति जठरमनिरुद्धाय वै उरः। चक्रपाणये च भुजौ कण्ठं भूपतये तथा। स्वनाम्ना मस्तकं तद्वत् पुरुषायेति वै शिरः। एवमभ्यर्च्य मेधावी प्रारब्धस्याग्रतो घटम्। विन्यसेद्वस्त्रयुग्मं तु तदोपरि ततो न्यसेत्। काञ्चनं वासुदेवं तु चतुर्बाहुं सनातनम्। तमभ्यर्च्य विधानेन गन्धपुष्पादिभिः क्रमात्। प्राश्नन्तु ब्राह्मणे दद्याद्वेदवादिनि सुव्रते" इत्यादि।

विजयाद्वादशीव्रतम् आदित्यपु० "पुष्यर्क्षेण युतायुक्ता शुक्ला वै द्वादशी भवेत्। सा प्राक्ता वासुदेवेन सर्वपापप्रणाशिनी। येऽर्चयन्ति नरास्तस्यां भक्त्या देवं जनार्दनम्। समुपोष्य विशुद्धात्मा पापैस्ते मुक्तकल्मषैः। कर्मणा मनसा वाचा यत्पापं समुपार्जितम्। तत् प्रणश्यति गोविन्दस्तिथौ तस्यां समर्चितः। स्नानं जपोऽथ वा होमः समुद्दिश्य जनार्दनम्। नरैर्यत् क्रियते तस्यां तदनन्तफलं भवेत्। यस्मात्प्रायशो जन्तोः पापं जन्मशतोद्भवम्। पुष्यर्क्षैकादशी तस्मात् प्रोक्ता पापप्रणाशिनी। एवमेव पुरा प्राह भानुः सारथिनं प्रति"। भानुरुवाच "द्वादशी या परा ब्रह्म! पुष्यर्क्षेण च संयुता। उपोष्या तु प्रयत्नेन द्वादशी पापनाशनी। पुष्यर्क्षेण द्वादशीयुक्ता शुक्ला वै फाल्गुनस्य च। विजया द्वादशी प्रोक्ता स्वयं सा विष्णुना पुरा। तस्यां दत्तं तपस्तप्तं कोटिकोटिगुणोत्तरम्। एकादश्यां निराहारो द्वादश्यां विष्णुमर्चयेत्। रौप्यसौवर्णपात्रे वा दारुजेऽलाभेऽपि वा। आच्छाद्य पात्रं वासोभिरक्षतैः सपरीक्षितैः। मार्जनैव मेढ्रजेनैव सिद्धिः स्याच्छक्त्युपेक्षया। तिलाढ्रकेन विल्वाद्यैः प्रस्थेन कुटजेन वा। अलाभे चैव गोधूमैः फलं सप्तं तिलैर्भवेत्"। कल्पतरौ "भाद्रपदे शुक्ले पक्षे यदि पुनर्वसुः। बुधवारयुतो योगश्च प्राप्यते तत्र पूजितः। प्रयच्छति सुतान् कामान् वामनो नात्र संशयः। विजया नाम सा प्रोक्ता तिथिः प्रीतिकरी हरेः। सङ्क्रमः सर्वतीर्थानां सङ्क्रमे तत्र जायते। युक्ता भाद्रपदे स्वर्गे श्रवणा कलुषक्षयम्। गङ्गायमुनयोः पुण्ये नर्मदासरितोः सङ्गमे। सरस्वत्यब्धयोश्चैव सङ्गमे पापनाशने। ब्रह्मवल्मीकाभ्याशे कृष्णधारेऽथ वा द्विज!! अन्येषु सङ्गमेष्वेव स्नायाति यामनः। तत्र सम्भूतितोऽयाशौ जायते प्रेतमोचकः। दध्योदनसमायुक्तां वारिधानीं प्रदापयेत्। पूजय त्वं जगन्नाथं वामनः प्रीयतामिति। महापुरुषपदा ह्येषा सङ्गमे विजया तिथिः। सर्वपापक्षयो नूनं जायते च उपोषणात्। स्कन्दित्वा नियमं प्रातर्गत्वा नद्यादिसङ्गमे। सौवर्णं वामनं कृत्वा सौवर्णमासनेऽथ वा। यथा शक्त्या तु विन्यस्य कुम्भोपरि जगत्पतिम्। पूर्णपात्रे व्यापयित्वा गन्धैरेनैः प्रपूजयेत्। एवं कृते तु विजयायामेतस्मिन् विजयादिने। न दुर्लभतरं किञ्चिदिह लोके परत्र च। दुर्लभा विजया नृणां दुर्लभत्वात् सङ्क्रमः"। अग्निपु० "विधानं शृणु राजेन्द्र! यथादृष्टं मनीषिभिः। यथोक्तं नियमं कृत्वैकादश्यामुपोषितः। दन्तकाष्ठं प्रकुर्वीत वाग्यतो नियतेन्द्रियः। अथ द्वादशीयागे समुपोष्य जनार्दनम्। अर्चयित्वा विधानेन अर्घं भोज्ये हरेरहनि। नदीनां सङ्गमे स्नात्वार्चयेत् यत्र वा जलं। सौवर्णं रत्नसंयुक्तं द्वादशाङ्गुलसंस्थितम्। पीतवस्त्रैः शुभैर्युक्तं भृङ्गारं निर्व्रणं नवम्। हिरण्मयेन पात्रेण अर्घ्यपात्रं प्रकल्पयेत्। दध्यक्षतफलैश्चैव सहिरण्यं सचन्दनम्। नमस्ते पद्मनाभाय नमस्ते जलशायिने। लक्ष्मण्यं प्रयच्छानि बालवामनरूपिणे। मायावी वामनः श्रीशः सौम्यात्मा तु जगत्पतिः। एवं सम्भूतियित्वा तु द्वादश्यासदये रवेः। भृङ्गारसहितं पात्रं संवत्सरं प्रपूजयेत्। वामनः प्रतिगृह्णातु वामनोऽहं ददामि तम्। वामनं सर्वतोभद्रं विजयार्थं निवेदयेत्। जलधेनुं तथा दद्यात्पात्रं चैव तु पादुके। सहिरण्यानि वस्त्राणि धेनुं वानुडुहं नृप!। यत्किञ्चिद्दीयते तत्र तदानन्त्याय कल्पते। श्रवणद्वादशीयोगे सम्भूत्य गरुडध्वजम्। दत्त्वा दानं द्विजातिभ्यो विसर्जने पारणं ततः। सिञ्चन्ति तु भार्गवे श्रवणस्थे निशाकरे। श्रवणद्वादशी श्रेया न स्याद् भाद्रपदाहते। दशम्येकादशी यत्र भानुसोमुपोषा भवेत्तिथिः। श्रवणेन तु संयुक्ता सा शुभा सर्वकामदा"। श्रवणेन युक्तायां दशमी माघशोभने। "पारणं तिथिवृद्धौ तु द्वादश्यामुदयात्। वृद्धौ कृत्वोत्तरोदय्यां तत्र दोषो न विद्यते"। द्वादशीतुल्ये नक्षत्रे द्वादश्यां पारणम् अधिके तयोरुदयालिखितम्"।

विजयासप्तमीव्रतं भविष्योत्तरे "शुक्लपक्षे तु सप्तम्यां यदा दिवाटिनं भवेत्। सप्तमी विजया नाम तत्र दत्तं महाफलम्। स्नानं दानं जपो होम उपवासस्तथैव च। सर्वं विजयसप्तम्यां महापातकनाशनम्। प्रदक्षिणं यः कुरुते फलैः पुष्पैर्दिवाकरम्। स सर्वगुणसम्पन्नं पुत्रं प्राप्नोत्यसंशयम्। प्रथमा नारिकेलैस्तु द्वितीया बीजपूरकैः। तृतीया रक्तनारङ्गैस्ततश्चैव कदलीफलैः। पञ्चमी क्षुद्रकुष्माण्डैः षष्ठी पक्वैश्च तेन्दुकैः। दाडिमैः सप्तमी ज्ञेया ततोनाष्टकरेण तु। मौक्तिकैः पद्मरागैस्तु तिलैः कर्कटकैस्तथा। गोमेदैर्जुवैर्दैर्यैः ततोनाष्टाधिकेन तु। इक्षुदण्डैर्वरैर्बिल्वैः करमर्दैः सचिर्भटैः। आम्रातकैस्तु जम्बीरैर्जम्बूकर्कटिकैः फलैः। पुष्पैर्धूपैः फलैः पत्रैर्मोटकैर्दैतपाचितैः। एभिर्विजयसप्तम्यां भानोः कुर्यात् प्रदक्षिणम्। धान्यैः फलैश्च कालोत्थैरखण्डैर्पन्थिवर्जितैः। रवेः प्रदक्षिणं देयं फलेन फलमादिशेत्। नारी वा कुरुते या तु सापि तत्फलभागिनी। नित्यं सङ्गीतलवणप्रतिपादयित्री या सप्तमी सुनियतैः प्रवरा तिथीनाम्। सा भानुपाटकमलार्चनचिन्तकानां पुंसां सदैव विजया विजयं ददाति"। भविष्योत्तरे "माघे मासि सिते पक्षे सप्तम्यां कुरुनन्दन!। निराहारो रविं भक्त्या पूजयेद्विधिना नृप!। पूर्वोक्तेन जपेज्जप्यं देवस्य पुरतः स्थितः। शुद्धैकाग्रमना राजन्! जितक्रोधो जितेन्द्रियः"। इत्यादि "एवं संवत्सरं यावत् कुर्याद् विजयसप्तमीम्। स जयेदखिलाञ्छत्रून् सूर्यलोकं स गच्छति"। भविष्यपु० "शुक्लपक्षस्य सप्तम्यां सूर्यवारो भवेद् यदि। सप्तमी विजया नाम तत्र दत्तं महाफलम्। स्नानं दानं जपो होम उपवासस्तथैव च। सर्वं विजयसप्तम्यां महापातकनाशनम्। पञ्चम्यामेकभक्तं स्यात् षष्ठ्यां नक्तं प्रचक्षते। उपवासस्तु सप्तम्यामष्टम्यां पारणं भवेत्। उपवासपरः षष्ठ्यां खण्डस्य पूजयेद्रविम्"। उपवासपरः विजयसप्तम्यामुपवासं करिष्यन्। "गन्धपुष्पोपहारैश्च भक्त्या श्रद्धासमन्वितः। प्रकल्प्य पूजां भूमौ च देवस्य पुरतः क्षपेत्। जपमानस्तु गायत्रीं घोरघ्नमथापि वा। तत्रस्थं वा भास्करं क्षेत्रं मण्डलगमथापि वा। विधुक्तस्य सप्तम्यां कृत्वा स्नानं गणाधिपम्। पद्मेशं पूजयित्वा तु होमं कृत्वा विधानतः। आज्यान्तं भोजयेत् पश्चाद्भक्त्या च गणनायकम्। घृतौदनमपूपांश्च खण्डखेटांश्च शक्तितः। दत्त्वा तु दक्षिणां शक्त्या ततो विप्रान् विसर्जयेत्। इत्येषा कथिता देव! पुण्या विजयसप्तमी। यामुपोष्य नरो गच्छेत् परं वैरोचनं पदम्।

विजयासप्तमीव्रतं भविष्यपु० "नैमित्तिकानि ततो वक्ष्ये यत्तीर्त्वात्र समाहितः। सप्तम्यां पक्षयोश्चैव संक्रान्तिषु विशेषतः"। नैमित्तिकानि ततो वक्ष्ये इत्यनेन श्लोकेन पक्षयोश्च संक्रान्तिषु साधारण्येन यत्प्रतिष्ठा कृता तत्सप्तमीव्रतं तावदाह शुक्लपक्षस्येत्यादिना "शुक्लपक्षस्य सप्तम्यां हविर्भुक्तैकटा दिवा। सम्यगाचम्य सन्ध्यां वरुणं प्रणिपत्य च"। वरुणोऽत्र सूर्यः "इन्द्रियाणि तु संयम्य स तं ध्यात्वा स्वपेद् बुधः। दर्भशय्यागतो रात्रौ प्रातः स्नातः सुसंयुतः। सर्वस्मादौ तथैवान्ते पूर्ववद्वरुणं यजेत्। जुहुयाद्धृच्चस्वग्निं सूर्याग्निं परिकल्प्य वै। सूर्याग्निकरणं वक्ष्ये तर्पणं च समासतः। कस्मैणोद्धारमुच्चार्य सावित्र्याभ्युच्य वानलं"। कस्मैण कस्मन्त्रेण सावित्र्या सूर्यगायत्र्या एतच्च सर्वं निशुम्भसप्तम्यामेवाभिहितं वेदितव्यम्। "प्रक्षिप्यास्त्रीर्थं दर्भांश्च देशे भूमौ यथेप्सितम्। प्रागग्रैरुदगग्रैश्च पात्राण्यास्तीर्य चक्रवत्। पवित्रं द्विकुशं कृत्वा सूर्यं प्रादेशसम्मितम्। तेन पात्राणि संप्रोक्ष्य मोक्ष्य च विलोक्य च। उदगग्राग्रस्थिते पात्रे साग्निना चोलमुकेन च। पर्य्यग्निकरणं कृत्वा ततश्चोत्पवनं त्रिधा। परिस्तीर्य च तान्दर्भान् दर्भैः सम्प्रोक्षितैश्च तैः। जुहुयात् प्रोक्षिते वह्नौ तत्रार्कं पूर्ववत् यजेत्। भूमौ स्थितेन पात्रेण विस्तरेण तु पाणिना। वामेन यदुशार्दूल। नान्तरिक्षे तु क्षयते"। अन्तरिक्षे शिक्यादौ "दक्षिणेन स्रुचौ स्रुचा जुहुयात्यावकं बुधः। हृदयेन क्रियाः सर्वाः कर्तव्याः पूर्वचोदिताः"। हृदयेन हृदयमन्त्रेण "अनेन हुत्वा सन्नर्घ्यं दद्यात् पूर्णाहुतिं ततः। वरुणायोदरान्माघे सप्तम्यां वरुणं यजेत्। यथा शक्त्या तु विप्रेभ्यः प्रदद्यात् खण्डखेटकात्। तद्याच्च दक्षिणां शक्त्या प्राप्यते यागजं फलम्। फाल्गुने सूर्यं चैत्रे चैवांशुनामिनम्। वैशाखे मासि धातारं इन्द्रं ज्यैष्ठे यजेद्विधिम्। आषाढे श्रावणे मासि भगं भाद्रपदे तथा। आश्विने चापि पर्जन्यं त्वष्टारं कार्त्तिके यजेत्। मार्गशीर्षे तु मित्रञ्च पौषे विष्णुं यजेद् यदि। संवत्सरेण यत् प्रोक्तं फलमिहा दिने दिने। तत् सर्वं प्राप्नुयात् क्षिप्रं भक्त्या श्रद्धा-

समन्वितः। एवं संवत्सरे पूर्णे कृत्वा वै काञ्चनं रथम्। सप्तभिर्वाजिभिर्युक्तं नानारत्नोपशोभितम्। आदित्यप्रतिमां मध्ये युग्मवस्त्रां कृतां शुभाम्। रत्नैरलङ्कृतां कृत्वा हेमपद्मोपरिस्थिताम्। तस्मिन् रथवरे कृत्वा सारथिं चास्यतः स्थितम्। हृतं द्वादशभिर्विप्रैः क्षत्रान्नासादिपात्रभिः। सर्वकल्पसमाचार्यं पूजयित्वा रथाम्बरैः"। मासाधिपाः प्रतिमासोक्ताः स्वयं। अतस्तद्भक्तिभावितैर्द्वादशभिर्विप्रैर्हृतमाचार्यं पूजयेदित्यर्थः।

विद्याप्रतिपद्व्रतं मत्स्यपु० "अथ वं प्रतिपत्कल्पं शृणु सर्वसमृद्धिकरं व्रतम्। यत् कृत्वा नरः श्रियं विन्देदुर्लभं मानुषैरिह। मासितव्रतकुलसंसिद्धे मण्डले चतुरस्रके। श्रीयं श्रियमघावाह्य पूजयेत् सपुरःसरम्। अष्टोत्तरशतैः पद्मैरथवोत्पलैः प्रपूजयेत्"। अष्टोत्तरशतैः विकसितैः "सक्षौद्रैर्वा घृतायोगं पयसा पायसेन च। ततस्तु विधिनाभ्यर्च्य पार्श्वे देवीं सरस्वतीम्। अथातः पूजयेदिन्दुं गुरुं पश्चादनन्तधीः। परिवारनियोगेन तांश्च सत्कारयेदथ"। प्रार्थनामन्त्रः "मम विद्यां प्रदिशतु देवो मानोश्वरो हरिः। विद्याधिदैवतं देवी विद्यां दिशतु मे स्थिराम्। सरस्वती प्रदिशतु वाग्वृद्धिमतिशोभनाम्" इत्यादि। "यस्त्वेवं कुरुते विधिवत् विद्वान् विद्याव्रतमन्वहम्। समस्तविद्यानिपुणो वैष्णवं पदमश्नुते"।

विद्यावाप्तिव्रतं विष्णुधर्मोत्तरे "पौषप्रान्तु समतीतायां प्रतिपत्प्रभृतिक्रमात्। प्राग्वत् पूजयेद्देवं तरङ्गशिरसं हरिम्"। प्राग्वदिति रूपावाप्तिव्रतोक्तविधिवत् तरङ्गशिरसं हयग्रीवम्। "तिलांश्च जुहुयाद् वह्नौ तिलैर्देवं समर्चयेत्। विरात्रोपोषितो मासं तिलान् कनकमेव च। दद्याद् ब्राह्मणसङ्घाय सम्यक्प्रयतमानसः। सङ्ख्यात् यज्ञोपवीतांश्च प्रभूतमपि चन्दनम्। कृत्वा व्रतं मासविदं यथोक्तं विद्यान्वितः स्यात् पुरुषः सदैव। स्वर्लोकमासाद्य सुखानि भुक्त्वा कामानभीष्टान् पुरुषोऽश्नुते च"।

विधानद्वादशसप्तमीव्रतम् आदित्यपु० "निरूक्तसप्तमीनान्तु शृणु नारद! निर्णयम्। यः प्राप्तिमधिगच्छेत् सर्वपापात् सर्वकिल्बिषैः। ज्ञातनां सर्वपापानां ज्ञातनां नमतां विदुः। ततोपवासविधिना धातारं यः उपासते। चैत्रमासे तु सप्तम्यामतिरात्रफलं लभेत्। वैशाखमासे सप्तम्यां पर्जन्यं यस्तु पूजयेत्। ज्यैष्ठमासस्य यत्तस्य फलं प्राप्नोति तत्त्व वै। विभा विभावसोर्देहा भाशब्दो व्याप्तिदीप्तिषु। विभानाम निरूक्तस्य स्वयमेव विभावसोः। सप्तम्यां ज्यैष्ठमासन्तु वरुणं यः समर्चयेत्। आप्नोत्यभिमतज्ञानान्तु फलं विन्दति मानवः। अमृतार्थं यदा देवा जयशब्देन निर्ययुः। पूजयन्ति जयां देवा-मृतमस्याश्च तत् स्मृतम्। आषाढ़मासे सूर्यन्तु सप्तम्यां पूजयेन्नरः। अश्वमेधमवाप्नोति कुलञ्चैव समुद्धरेत्। सप्तम्यां निर्जिता देवैरसुरा दानवास्तथा। समाराध्य सुरैः सेन्द्रैः संग्रामे तारकामये। त्रैलोक्ये विजयप्राप्ते तस्माद्विजयसप्तमी। यः पूजयति मां भक्त्या तस्मिन्नहनि मानवः। स्नात्वा सम्यगुपस्पृश्य शुक्लवासाः कृताञ्जलिः। सदा यज्ञोपवीती च ब्रह्मचारी जितेन्द्रियः। अक्रोधनो ह्यचपलः स्थिरचित्तः समाहितः। ध्यायमानस्तथा मान्य! तत्परः सजितेन्द्रियः" इत्यादि।

विभूतिद्वादशीव्रतं मत्स्यपु० "शृणु राजन्! प्रवक्ष्यामि विष्णोर्व्रतमनुत्तमम्। विभूतिद्वादशी नाम सर्वाभरणभूषिता। कार्त्तिके चाथ वैशाखे मार्गशीर्षेऽथ फाल्गुने! आषाढ़े वा दशम्यान्तु शुक्लायां लघुभुङ्नरः। कृत्वा सायन्तनीं सन्ध्यां शङ्खचक्राङ्कियं बुधः। एकादश्यां निराहार समभ्यर्च्य जनार्दनम्। द्वादश्यां द्विजसंयुक्तः करिष्ये भोजनं ततः। तदविघ्नेन मे यातु व्रतं सफल्यं मधुसूदन!। ततः प्रभाते श्रोत्थाय कृत्वा स्नानञ्च शुचिः। पूजयेत् पुरुषरीकाक्षं शुक्लमाल्यानुलेपनैः"।

वि(बि)ल्वत्रिरात्रव्रतं स्कन्दपु० "ज्यैष्ठे मासि च संप्राप्ते पूर्णमास्यां द्विजोत्तम!। ज्यैष्ठाख्यदिने कुर्यात् सिद्धार्थैः स्नानमुत्तमम्। श्रीवृक्षं सिञ्चयेत् पश्चान्नन्दपुष्पैश्च पूजयेत्। वत्सरन्त्वेकभक्तन्तु हविष्यान्नेन कारयेत्। शूकरखरादीनां दर्शने भोजनं त्यजेत्। अनेन विधिना सम्यक् मासि मासि समाचरेत्। ततः संवत्सरे पूर्णे गत्वा वि(बि)ल्वसमीपतः। शुद्धीत्वा वालुकां पात्रे प्रस्थमात्रं महामुने!। अथ वा धान्यमादाय यवगोधूमतिलादिकम्। ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टयेत्। उमामहेश्वरं हैमं शक्त्या कुर्यात् सुभूषितम्" इत्यादि।

विशोकद्वादशीव्रतं पद्मपु० "पुण्ये चाश्वयुजे मासि विशोकद्वादशीव्रतम्। यत्रोत्थाय शोकदोगत्यभाजनं न नरो भवेत्। दशम्यां लघुभुक् रात्रौ कृत्वा वै दन्तधावनम्। शुद्धस्तुखो प्राङ्मुखो वा वाक्यमेतदुदीरयेत्। एकादश्यां निराहारः समभ्यर्च्य च केशवम्। श्रियं च जगतां मूर्तिं भोक्ष्यामीत्यपरेऽहनि। एवं नियम्य

भास्याय सुधा रात्रौ जितेन्द्रियः । प्रभाते विमले गत्वा मध्याह्ने तु जलाशयम् । स्नानं सर्वौषधैः कुर्यात् पञ्च-गव्यजलेन च । गुडमाल्याम्बरधरः समभ्येत्य गृहं ततः । पूजयेज्जगतां नाथं लक्ष्मीदयितमुत्सवै" इत्यादि ।

त्रिशोकषष्ठीव्रत भविष्योत्तरे "त्रिशोकषष्ठीमधुना वक्ष्यामि मनुजोत्तम ! । यामुपोष्य नरः शोकं न कदाचिदिहाप्नुयात् । माघे कृष्णतिलैः स्नानं पञ्चम्यां शुक्लपक्षतः । कृताहारः कुशरया दन्तधावनपूर्वकम्" । कुशरया, तिलखड्लाक्षेन "उपवासव्रतं कृत्वा ब्रह्मचारी भवेन्निशि । ततः प्रातः समुत्थाय कृतस्नानजपः शुचिः । कृत्वा तु काञ्चनं पद्ममर्कोऽयमिति पूजयेत् । करवीरैश्च रक्तैश्च रक्तवस्त्रयुगेन च । यथा त्रिशोकं भुवनमुदितं त्वयि जायते । तथा त्रिशोकता मे स्यात्त्वद्भक्तेः प्रतिजन्मनि । एवं सम्पूज्य पद्मान्तु द्विजान् भक्त्या प्रपूजयेत् । दत्त्वा संप्राप्य गोमूत्रं समुत्थाय ततः शुचिः । सम्पूज्य विप्रान् दानेन गुडपात्रेण संयुतम् । वस्त्रेणाच्छाद्य गुरवे सर्वमेतन्निवेदयेत्" इत्यादि ।

त्रिशोकसंक्रान्तिव्रत स्कन्दपु० "अतःपरं प्रवक्ष्ये त्रिशोक-संक्रान्तिमुत्तमाम् । अयने विषुवे पुण्ये व्यतीपाते भवेद्-यदि । एकभक्तं नरः कुर्यात्तिलैः स्नानन्तु कारयेत् । काञ्चनं भास्कर कृत्वा यथाविभवशक्तितः । स्थापयेत्तञ्च-गव्येन गन्धपुष्पैः सुपूजयेत् । वेष्टयेद्वस्त्रयुग्माभ्यां ताम्र-पात्रे निधापयेत्" इत्यादि ।

त्रिशोकसप्तमीव्रतं भविष्यपु० "त्रिशोकसप्तमीं तद्वत् वक्ष्यामि सुनिपुङ्गव ! । यामुपोष्य नरः शोकं न कदाचिदिहाप्नुते । माघे कृष्णतिलैः स्नात पञ्चम्यां शुक्लपक्षतः । कृताहारः कुशरया दन्तधावनपूर्वकम् । उपवासव्रतं कृत्वा ब्रह्म-चारी भवेन्निशि । ततः प्रभाते चोत्थाय कृतस्नानजपः शुचिः । कृत्वा तु काञ्चनं पद्ममर्कोऽयमिति पूजयेत् । करवीरैश्च पुष्पैश्च रक्तवस्त्रयुगेन च । यथा त्रिशोकं भुवनं त्वयैवादित्य ! सर्वदा । तथा त्रिशोको मे चास्तु त्वद्भक्तेः प्रतिजन्मनि । एवं संपूज्य पद्मान्तु भक्त्या संपूजयेद् द्विजान् । दत्त्वा संप्राप्य गोमूत्रमुत्थाय कृतनित्यकः । संपूज्य विप्रं यत्नेन गुडपात्रसमन्वितम् । सुवस्त्रं वस्त्रसंयुक्तं ब्राह्मणाय निवेदयेत् । व्यतैलमन्नं भुञ्जीत सप्तम्यां मौनसंयुतः । ततः प्राप्तेऽष्टमीं कर्तव्यं भूतिमिच्छता । अनेन विधिना सर्वमुभयोरपि पक्षयोः । कुर्यात् यावत् पुनर्माघशुक्लपक्षस्य सप्तमीम् ।

व्रतान्ते कलशं दद्यात् सुवर्णकमलान्वितम् ।

विश्वव्रतं भविष्यपु० "एकादश्यां यथोद्दिष्टा विश्वेदेवाः प्र-पूजिताः । प्रजां पशून् धनं धान्यं प्रयच्छन्ति सदौ तथा । मूलमन्त्रः स्वसंज्ञाभिरङ्गमन्त्राः प्रकीर्त्तिताः । पूर्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः । गन्धपुष्पोप-हारैश्च यथाशक्ति विधीयते । पूजाऽग्राह्येण शाल्येन कृतापि तु फलप्रदा । आज्यधारासमंङ्गेण दधिक्षी-राक्तमाक्षिकैः । पूर्वोक्तफलदो होमः कृतः शाल्येन चे-तसा" । एतद्व्रतं वैश्वानरप्रतिपद्व्रतवद्ज्ञेयम्" ।

विश्वरूपव्रतं कालोत्तरे "रेवतीयोगयुक्तासु सितास्वां यदा भवेत् । भूतावां वा महाभाग ! तदा जातमिदं पृथ्वु ! महास्नानं प्रकर्त्तव्यं नित्यकृत्यादनन्तरम् । चन्द्रेशै-वाङ्गरागन्तु रत्नपूजान्तु कल्पयेत् । सितपद्मानि देयानि भूषणानि बहून्यपि । चन्द्रमेवं दहेद्रूपं नैवेद्यं पायस-घृतम् । श्वेताश्वत्थरथं सौम्यं शिवाय विनिवेदयेत् । अश्वाष्टकं कुञ्जरञ्च आचार्याय प्रदापयेत् । ऋग्यजुःसा-मार्थवाणः प्रत्यक्षकुञ्जरं तथा । राज्यार्थी लभते राज्यं यावदाकल्पसम्भवम् । पुत्रार्थी लभते पुत्रान् वायुतुल्यपराक्रमान् । भोगार्थी लभते भोगान् विद्या-तत्त्वेन शाश्वतान् । यान् यान् कामयते कामान् तां-स्तान् कामानवाप्नुयात् । विश्वरूपमनन्तेन व्रतमेतदु-दाहृतम् । कृत्वोदकप्राशनन्तु रात्रौ जागरणं ततः" ।

विष्णुव्रतं भविष्योत्तरे विष्णुरूपसप्तमी "एवमेषा समुत्पन्ना विष्णुरिष्टविनाशिनी । तस्मादेवेह कौन्तेय ! यजनीया फलार्थिना । वेनोपवासविधिना व्रतेन च युधिष्ठिर ! । पूजिता तोषमायाति तदेव कथयामि ते । यस्मिन् दिने भवेच्छ्रद्धा तस्मिंश्चरति भारत ! । उपवासस्य नियम कु-र्याद्धारी नरोऽथ वा । यदि रात्रौ भवेद्विष्टिरेकभक्तं दिनद्वयम् । कार्य्यस्तेनोपवासः स्यादिति पौराणिको विधिः । प्रहरस्योपरि यदा स्याद्विष्टिः प्रहरत्रयम् । उपवासस्तथा कार्य्य एकभक्तमतोऽन्यथा । सर्वौषधि-जलस्नानं सुगन्धामलकैरथ । नद्यान्तडागेऽथ गृहे स्नानं सर्वत्र शस्यते । देवान् पितॄन् समभ्यर्च्य ततो दर्भ-मयीं शुभाम् । विष्टिं कृत्वा पुष्पधूपैर्नैवेद्यादिभिरर्च-येत् । होमन्तु नामभिर्विष्णोः शतमष्टोत्तरं नृप !। भुञ्जीत दत्त्वा विप्राय तिलान् पायसमेव च । सतैलं जागरं भुक्त्वा पश्चाद्भुञ्जीत कामतः । छायासूर्य्यसुते ! देवि ! विष्टिरिष्टार्थनाशिनि ! । पूजिताऽसि यथ शक्त्या

शुक्लव्रतं विष्णुधर्मोत्तरे "आश्वयुज्यां सपूर्वन्तु पौर्णमास्यां नरो भवि। सोपवासः सुरेन्द्रञ्च देवं संपूजयेत्तथा। शचीमैरावतं वज्रं मातलिञ्च नराधिपः। गन्धमाल्यनमस्कारदीपधूपान्नसम्मदा। संवत्सरान्ते कनकञ्च दत्त्वा प्राप्नोति लोकं स पुरन्दरस्य। मानुषत्वमासाद्य नरेन्द्रपूज्यो राजा भवेद् वा द्विजपुङ्गवो वा"। पद्मपु० "आकाशायी समां दद्याद्धेनुमन्ते पयस्विनीम्। शक्रलोकमवाप्नोति शक्रव्रतमिदं स्मृतम्"।

शङ्करनारायणव्रत देवीपु० "कथितं शङ्करोमाख्यं व्रतं मनसि तुष्टिदम्। श्रोतुमिच्छाम्यहन्नात विष्णुशङ्करसंज्ञितम्"। मनुरुवाच "यथा उमेश्वरन्नात तथा कार्य्यमिदं व्रतम्। किन्तु पीतानि वासांसि केशवाय प्रकल्पयेत्। गन्धपुष्पं तथा धूपं सुगन्धञ्च जनार्दने। कार्य्यं पूजनसम्भारे लड्डुकादिरसं दधि। एवन्तौ पूजयित्वा तु प्रतिमास्वण्डलेऽपि वा। आह्वय ब्राह्मणौ वत्स! वेदवेदाङ्गपारगौ। यतौ वा व्रतसम्पन्नौ जटाकाषायधारिणौ। तौ भोजयेद्विधानेन मूलपाणिजनार्दनौ। क्षमाप्य विधिना वत्स! सर्वकामप्रसाधकौ। भूमावं दक्षिणां दिव्यां विष्णवे तदनन्तरं शङ्कराय च। दत्त्वानुव्रजतो लोकौ क्रमाद्वैकुण्ठमेव ततः"।

शङ्करार्कव्रतं कालिकापु० "अथ चानेन मार्गेण शुभां तामेव चाष्टमीम्। सम्पाद्यादित्ययोगेन प्राग्विधानेन वा नरः। किन्तु दक्षिणनेत्रस्थं भास्करञ्चार्चयेद्बुधः। पद्मरागेण हैमेन योज्येदं लेपनं शुभम्। नेत्रे न्यस्य ललाटाधः कुङ्कुमं रक्तचन्दनम्। दत्तन्तु योज्य मध्ये तु हरं पूर्ववदर्चयेत्"। अर्द्धचन्द्राकारं तन्मध्ये दत्तञ्च कृत्वा हेमनिबद्धं पद्मरागं दत्तमध्ये निधाय सूर्यरूपमेनं कुर्य्यादित्यर्थः। "अभावे पद्मरागादेर्हेम वर्त्तन योजयेत्। कर्दमीजं परं पूतं यतस्तच्चैव सर्वदा। शुक्लमाल्याम्बरं वस्त्रं नैवेद्यं च हृतसुतम्। शेषः पूर्वविधानेन कर्त्तव्यो विधिविस्तरः। किन्तूपोष्य प्रकुर्वीत सप्तम्यां विजितेन्द्रियः। शङ्करार्कयुतं पूज्य हृतं भक्ष्यञ्च पारयेत्"।

शनिव्रतं भविष्योत्तरे "अतो यमस्य दिवसे स्नानमभ्यङ्गपूर्वकम्। कार्य्यं देवञ्च विप्राय तैलमभ्यङ्गहेतवे। दत्तु संवत्सरं यावत् प्राप्ते शनिदिने नरः। तैलं ददाति विप्राणां स्वशक्त्यान्यजनस्य तु। ततः संवत्सरस्यान्ते प्राप्ते तस्य दिने पुनः। लौहघटार्पितं सौरिं तैलकुम्भे विनिक्षिपेत्। लौहे वा स्वर्णमये वाथ हृष्णवस्त्रयुगान्वितम्" इत्यादि।

शर्करासप्तमीव्रतं पद्मपु० "शर्करासप्तमीं वक्ष्ये सर्वकल्मषनाशिनीम्। आयुरारोग्यमैश्वर्य्यं यया नन्त्य प्रजायते। माधवस्य सिते पक्षे सप्तम्यां श्रद्धयान्वितः। प्रातःस्नातः शुचिर्भूत्वा शुक्लैः शुक्लमाल्यानुलेपनैः। स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिकम्। तस्मिन्नियमसंयुक्तो घृतं पुष्पं निवेदयेत्। स्थापयेदग्रतः कुम्भं शर्करापात्रसंयुतम्। शुक्लवस्त्रेण संवेष्ट्य शुक्लमाल्यानुलेपनैः। सन्निधाय यथाशक्त्या कन्त्रेणानेन पूजयेत्" इत्यादि।

शाकसप्तमीव्रतं भविष्यपु० "सप्तम्यां सोपवासस्तु रात्रौ भुञ्जीत यो नरः। कृतोपवासः षष्ठ्यां तु पञ्चम्यामेककालभुक्। दत्त्वा तु संस्कृतं शाकं भक्ष्यभोज्यैः सुसंस्कृतम्। देवाय ब्राह्मणेभ्यश्च रात्रौ भुञ्जीत वाग्यतः। यावज्जीवं नरः कश्चिदुव्रतमेतच्चरिष्यति। तस्य श्रीर्विजयश्चैव त्रिवर्गश्च विवर्द्धते। मृतः स्वर्गमवाप्नोति विमानवरमास्थितः"। "शाकं सुसंस्कृतं कृत्वा भक्ष्यभोज्यसमन्वितम्। दत्त्वा विप्रे यथाशक्त्या पश्चाद्भुञ्जीत निश्यव्रती। कार्त्तिके शुक्लपक्षस्य व्याहोऽयं कुरुनन्दन!। चतुर्भिरपि मासैस्तु पारणं प्रथमं स्मृतम्। कुसुमैश्चात्र पूजा कार्य्या विभावसोः"। कार्त्तिकशुक्लसप्तम्यामारभ्य प्रतिमासं कुर्वता पुनर्मासचतुष्टयम् यावत् शुक्लसप्तमी तस्यां तस्याञ्च पारणं कार्य्यम्। एवमेव वर्षे वारत्रयं पारणं भवति एवमेव वर्षान्तरेषु तावद्व्रतं यावज्जीवं कर्त्तव्यम्"।

शान्तिचतुर्थीव्रतं भविष्यत्पु० "माघमासि तथा शुक्ला या चतुर्थी महीपते!। सा सर्वशान्तिदा नित्यं शान्तिं कुर्य्यात् सदैव हि। स्नानं दानं बलिः कर्म सर्वमस्यां व्रतं विभो!। भवेत्सहस्रगुणितं प्रसादादस्य नित्यदा। रात्र्युपवासं यस्तस्यां पूजयेद्विघ्ननायकम्। तस्यां क्षीणादिकं कर्म भवेत्साहस्रिकं नृप!। लवणं गुडपूर्णञ्च घृताक्तं तच्च भारत!। दत्त्वा भक्त्या तु विप्रेभ्यं फलं साहस्रिकं लभेत्"।

शान्तितृतीयाव्रतं गरुडपु० "तृतीयायां महाभाग! कर्त्तव्यञ्च व्रतं शृणु। येनानन्तभवारब्धमेनः क्षपयति द्विज!। अङ्गपीड़ादिकैरन्यैरुपसर्गैः प्रपीड़ितः। प्रकुर्वीत यतवाक्कायमानसः। स्थण्डिलं रचयित्वा तु नरोबीजप्रकल्पकैः। चक्राब्जं मण्डलं कुर्य्यादक्षिणाग्नितः

यणाः। कृत्वा चैवोपवासन्तु गृह्णीत्वा च जलाञ्जलिम्। नमो नारायणायेति चादित्यं चावलोकयेत्। यावन्तो बिन्दवः केचित् पतन्त्यञ्जलितो जलात्। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। तद्वै तस्यां द्वादश्यां कृत्वा कर्म यथाविधि। पादुकैश्चैव पुष्पैस्तु गृहैर्गन्धैश्च धूपनैः। य एवं कारयेद्भूमे! तस्यापि ह्यक्षयां गतिम्" इत्यादि।

विष्णुव्रतं भविष्यपु० "द्वादश्यां विष्णुसिद्धेच सर्वदा विजयी भवेत्। पूज्यश्च सर्वलोकानां यथा गोपतिगोकरः"। गोपतिः सूर्य्यो गोकरो नेत्ररश्मिर्यस्य स गोपतिगोकरो विष्णुः "मूलमन्त्राः स्वकीयाभिरङ्गमन्त्राश्च कीर्त्तिताः। पूर्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः। गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते। पूजाऽशोकेन शोकेन कृतापि तु फलप्रदा। आज्यपायसमिश्रञ्च दधिक्षीरान्नमात्रकैः पूर्वोक्तफलदो होमः कृतः शान्तेन चेतसा"। एतत्तु व्रतं वैश्वानरप्रतिपद्व्रतवद्द्रष्टव्यम्। पद्मपु० "द्वादश द्वादशीर्यस्तु समाप्योपोषणैर्नरः। गोवृषं काञ्चनं विप्रानर्चयेद्भक्तितः। परं पदमवाप्नोति विष्णुव्रतमिदं कृतम्"। विष्णुधर्मोत्तरे "विष्णुव्रतमिति ख्यातं दर्शितं विष्णुना स्वयम्। पौषशुक्लद्वितीयादि कृत्वा मासचतुष्टयम्। मासपारणप्रायं गृह्णीयात् परमं व्रतम्। पूर्वं सिद्धार्थकैः स्नानं ततः कृष्णतिलैः कृतम्। वचयाथ हरीतकैः। ह्यङ्गि सर्वौषध्या ततःपरम्। नाम्ना कृष्णाच्युताख्येन तथा नं तेन पूजयेत्। तथैव च चतुर्थेऽङ्गि कृष्णेनेशं च केशवम्। देवमभ्यर्च्च पुष्पैश्च पत्रैर्धूपानुलेपनैः। पद्मच्छत्रस्य बालेन्दोर्दद्यादर्घ्यं समाहितः। पुष्पैः पत्रैः फलैश्चैव सर्वधान्यैश्च भक्तितः। दिनक्रमेण चैतानि चन्द्रनामानि कीर्त्तयेत्। शशी चन्द्रः शशाङ्कश्च निशापतिरिति क्रमात्। नक्तं भुञ्जीत सततं यावत्तिष्ठति चन्द्रमाः। अस्तङ्गते न भुञ्जीत व्रतभङ्गभयाच्छुभे!। एवं सर्वेषु मासेषु ज्यैष्ठान्तेषु यशस्विनि!। कर्त्तव्यं वै व्रतश्रेष्ठं द्वितीयादिचतुर्दिनम्। विप्राय दक्षिणां दद्यात् पञ्चस्यां च यशस्विनि!। एवं समाप्येन्मासैः षड्भिः प्रथमपारणम्। पारणान्ते च देवस्य प्रीणनं भक्तितः शुभैः। यथाशक्त्या तु कर्त्तव्यं वित्तशाठ्यं विवर्जयेत्। आषाढादिद्वितीयासु षण्मासेन तपोधन!। पारणं वै क्षमाख्यातं वृतस्यास्य शुभप्रदम्।

हृषीव्रतं पद्मपु० "कार्त्तिक्यां यो हृषीकेशं कृत्वा नक्तं समाचरेत्। वैष्णवं पदमवाप्नोति हृषीव्रतमिदं कृतम्"।

वेदव्रतं विष्णुधर्मोत्तरे "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतन्तव। विद्याकामेन यत्कार्य्यं नरेण सुविपश्चिता। बहिःस्नानं नरः कृत्वा कृतऋग्वेदपूजनः। ऋग्वेदं शृणुयाद्वित्तं मासद्वयमतन्द्रितः। चैत्रादारभ्य धर्मज्ञ! नित्यं नक्ताशनो भवेत्। ततो नृपवर! प्राप्ते ज्यैष्ठस्य चरमेऽहनि। वासोयुगं हिरण्यञ्च तथा धेनुं पतस्विनीम्। घृतपूर्णं कांस्यपात्रं सुस्थिरन्तु दक्षिणाम्। आषाढादिषु मासेषु यजुर्वेदव्रतं चरेत्। आश्विनादिषु मासेषु सामवेदव्रतं चरेत्। तथाथर्वव्रतं नाम पौषादिषु विधीयते। सर्वेषु सर्वं कर्त्तव्यमृग्वेदव्रतकौर्त्तितम्। वेदात्मनो वासुदेवस्य पूजां कृत्वा नरो द्वादशवत्सरान्ते। विष्णोर्लोकं याति लोकैर्विशिष्टं यस्मिन् प्राप्ते सर्वदुःखं जहाति"। वेदव्रतेषु वेदव्रतं विधानपा० द्रष्टव्यम्।

वेश्याव्रतं पद्मपु० "अथाधुन्यत् व्रतं सम्यक् उपदेक्ष्यामि तत्त्वतः। ऋविचारेण सर्वैरनुष्ठेयञ्च तत् पुनः। संसारोत्तरणायालमेतद्वेदविदो विदुः। यदा सूर्य्यदिने हस्तः पुष्योऽथ पुनर्वसुः। भवेत् सर्वौषधीस्नानं सम्यङ्नारी समाचरेत्। तदा पद्मशरस्थापि सन्निधानमिहेष्यते। अर्च्चयेत् पुण्डरीकाक्षमनङ्गस्यापि कीर्त्तनम्। तस्मादिमाय दातव्यं हृच्छ्रियः प्रीयतामिति। यथेच्छाहारभुग्नक्तं तमेव द्विजसत्तमम्। रत्यर्थं कामदेवोऽयमिति चित्तेन धारयेत्। यदृयदिच्छति विप्रेन्द्रस्तत्तत् कुर्य्यात् विलासिनी। सर्वौभावेन चात्मानमर्पयेत् क्षितिभाविणी। एवमादित्यवारेण सदा तद्व्रतमाचरेत्। तण्डुलप्रस्थदानादि यावन्मासास्त्रयोदश। ततस्त्रयोदशे मासि संप्राप्ते तस्य कामिनी। विप्रस्योपस्करैर्युक्तां शय्यां दद्यादिलक्षणाम्। सोपधानकविस्तारां स्वास्तरावरणां शुभाम्। दीपकोपानहच्छत्रपादुकासनसंयुताम्। सपत्नीकमलङ्कृत्य हेमसूत्राङ्गुलीयकैः। सूक्ष्मवस्त्रैः सकटकैर्धूपमाल्यानुलेपनैः। कामदेवं सपत्नीकं गुडकुम्भोपरिस्थितम्"। कामदेवव्रतन्तु मदनत्रयोदशीव्रतोक्तं विज्ञेयम्। "ताम्रपात्रासनगतं हैमसूत्रपटावृतम्। सुकांस्यभाजनोपेतमिक्षुदण्डसमन्वितम्। दद्याद्वृषोक्तविधिना तथैकां गां पयस्विनीम्"।

वैतरणीव्रतं भविष्योत्तरे "एकादशी तिथिः कृष्णा मार्गशीर्षगता नृप!। तामासाद्य नरः सम्यक् गृह्णीयात्

यान्वियर्म शुचिः। एकादशी तिथिः कृष्णा नाम्ना वैतरणी शुभा। सा व्रतेन मया कार्या वर्षं नक्तपरायणः। मध्याह्ने तु नरः स्नात्वा नित्यं निर्वर्त्तितक्रियः। रात्रौ सुरभिमानीय कृष्णामर्चेत् यथाविधि। पूर्वाभिमुखयापि धार्या कृष्णा गौर्लिप्तभूतले। अघपादादितः पूज्या पश्चात्पादद्वयावधि। गोपुच्छन्तु समारभ्य कुर्यात् वै पितृतर्पणम्। ततः पूजा प्रकर्त्तव्या शास्त्रदृष्टविधानतः। गात्रैर्व अद्भया शुक्लचन्दनेनानुलेपयेत्। गन्धतोयेन चरणौ प्रक्षाल्य भक्तितः। ततोऽनुपूजयेद्भक्त्या पुष्पैर्गन्धादिवासितैः। मन्त्रैः पुराणसम्प्रोक्तैर्यथास्नानं यथाविधि"। "मार्गशीर्षादिके भक्तं यावन्मासचतुष्टयम्। अन्नमासचतुष्कन्तु यावकाशनमेव च। आषाढादिषु मासेषु चतुर्ष्वाद्यञ्च पायसम्। तदन्नस्य त्रयोभागाः गोगुरुब्राह्मणेषु च। नैवेद्यं हि मया दत्तं सुरभी प्रीयतामिति। द्वितीयं गुरवे दद्यात् तृतीयं स्वयमेव च। मासमासं प्रकुर्वीत मासद्वादशकं व्रतम्। उद्यापनन्ततः कुर्यात् पूर्णे संवत्सरे तदा। शय्या सतूलिका भार्य्यादम्पत्योः परिधानकम्। सवत्सा कृष्णवर्णा तु धेनुः कार्या पयस्विनी। कौशेयीं सुरभीं कृत्वा स्थापयेत् तूलिकोपरि। सुरभीं पूजयेन्मन्त्रैः पूर्वोक्तैर्भक्तिसंयुतैः। ततस्तु गुरवे दद्यात् सर्वं तत्र समापयेत्। नारी वा पुरुषो वापि व्रतस्यास्य प्रभावतः। राज्यं बहुविधं भुक्त्वा स्वर्गलोके महीयते। भारो नोक्षस्य दातव्यः कार्योऽसौ द्रोणसम्मितः। वैतरण्याः समाप्त्यर्थं ब्राह्मणाय कुटुम्बिने"।

वैनायकचतुर्थीव्रतं भविष्योत्तरे "चतुर्थ्यां नक्तभुग्दद्यादृष्टान्ते हेमवारणम्"। वारणः, करी। "व्रतं वैनायकं नाम सर्वविघ्नोपशान्तिदम्"।

वैशाखव्रतानि पद्मपु० "वैशाखे पुष्पसञ्चयं वर्जयित्वा तु गोप्रदः। विष्णुलोकमवाप्नोति ततो राजा भवेदिह"। भविष्यपुराणे "निरन्नरैकभक्तेन वैशाखं यो जितेन्द्रियः। नरो वा यदि वा नारी ज्ञातीनां श्रेष्ठतां व्रजेत्"। विष्णुधर्मोत्तरे "यः क्षिपेदेकभक्तेन वैशाखं पूजयेद्धरिम्। नरो वा यदि वा नारी ज्ञातीनां श्रेष्ठतां व्रजेत्। अहिंस्रः सर्वभूतेषु वासुदेवपरायणः। नमोऽस्तु वासुदेवायेत्यष्टशतं जपेत्। अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात्"।

वैश्वानरप्रतिपद्व्रतं भविष्योत्तरे "अग्निसिद्धा कृता च प्रतिपद्यामिति स्मृतम्। हविषा सर्वधान्यानि प्राप्नुयादृष्टतं धनम्"। दृष्ट्वा पूजयित्वा। प्रतिपद्यां प्रतिपदि। इति स्मृतं कामानुसारेण क्रियत्वरेतस्कतया विदितम्। हविषा घृतेन। सर्वधान्यानि हुतेन्वयः। "मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः। पूर्ववत् पद्मपत्रस्थः कर्त्तव्यश्च तिथीश्वरः"। मूलमन्त्राः प्रधानमन्त्राः अङ्गमन्त्राः परिवारदेवतामन्त्राः अग्नये हृदयाय नम इत्येवमादयः। स्वसंज्ञाभिः ओं अग्नये नम इत्यादिपूजायाम्। ओं अग्नये स्वाहा इत्यादि होमे। पूर्ववत् सूर्य्यव्रतवत्। पद्ममध्यस्थः कर्णिकायां स्वमूर्त्या पत्रेषु परिवारमूर्त्या स्थितः। तिथीश्वरोऽत्र वह्निः। स च शूलस्रुवधारी त्रिलोचनो रक्ताङ्गस्तनवांङ्घः दक्षिणे शूलं तदपरे ज्वाला। वामाङ्गगताया अन्नपात्रहस्तायाः स्वाहायाः स्कन्धे च न्यस्तकरोऽपरो वरः। चत्वारः शुका रथस्य वोढारः। वायुः सारथिरित्येवं विष्णुधर्मोत्तराभिहितो वेदितव्यः। "गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते। पूजाऽऽद्यन्तेन शास्त्रेण व्रतापि तु फलप्रदा। अशास्त्रेण अकृतेन शास्त्रेण व्रतेनेति स्मृतिः। "आज्यधारासमिद्धिश्च दधिक्षीरान्नसाक्तिकैः। पूर्वोक्तफलदो होमो विधिवत् शान्तचेतसा"। आज्यधारादिभिः षड्भिः पृथक्कृतो होमः पूर्वोक्तफलदो धनदः। साक्तिकं मधु। आदौ पूजा ततो हुताक्षधान्यहोमस्ततो आज्यधारादिहोमः"।

वैश्वानरव्रतं पद्मपु० "यस्त्वेतन्नन्दतेदिने वर्षादिचतुरस्त्रकृतं। हुतधेनुप्रदोऽन्ते च स परं ब्रह्म गच्छति। वैश्वानरव्रतं नाम सर्वपापप्रणाशनम्"।

वैष्णवव्रतं पद्मपु० "आषाढादिचतुर्मासान् प्रातः स्नायी भवेन्नरः। विप्राय भोजनं दत्त्वा कार्त्तिक्यां गोप्रदो भवेत्। हुतकुम्भं तथा दद्यात् सर्वकामानवाप्नुयात्। वैष्णवव्रतमित्युक्तं विष्णुलोकप्रदायकम्"।

व्यतीपातव्रतं वराहपु० "शुभे व्यतीपातदिने विगाहेत् स पञ्चगव्येन महानदीजलम्। उपावसेद्वै पवमानजापको जपेत्तु शुक्रो व्यतिपात! ते नमः। क्षादिते ताम्रपात्रे च शर्करापूरिते घटे। काञ्चनाङ्के प्रतिष्ठाप्य हेममण्डितभुजङ्गरम्। अष्टभुजं अष्टादशभुजम् उत्पत्तिवाक्ये व्यतीपातसूत्तैरष्टादशभुजत्वात् उत्पत्तिवाक्यानुसारत्वाच्च विनियोगवाक्यस्थ यथा भगवद्गीतासु "चत्वारोमनवस्तथेति" चत्वारश्चतुर्दश। "मन्त्रपुष्पाक्षतैर्धूपदीपवस्त्रनिवेदनैः।

भक्ष्यैर्भोज्यैः फलैश्चित्रैर्मासि मार्गशिरेऽर्चयेत्। नमस्तेऽस्तु व्यतीपात ! सूर्य सोमसुत ! प्रभा !। यद्दानादि कृतं किञ्चित् तदनन्तमिहास्तु मे। इत्युक्त्वा पञ्चरत्नाढ्यं सपुष्पाक्षतमञ्जलिम्। प्रक्षिप्य तत्क्षणादेव सर्वपापक्षयो भवेत्। यदि द्वितीयेऽपि दिने व्यतीपातो भवेन्महि !। तदा पूर्णोपवासस्तु दद्यात्तत् सकलं गुरोः। पारणं व्यतिपातान्ते कुर्यात् संप्राप्य गोमयम्। अथैकस्मिन्नेव दिने व्यतीपातो भवेद् यदि। तत्रैवाङ्गि तदा दत्त्वा उपवासं समाचरेत्। कुर्यादेवं मासि मासि व्यतीपातस्त्रयोदश। व्यतीपाते तु संप्राप्ते कुर्यादुद्यापनं बुधः। व्यतीपाताय स्वाहेति क्षीरदध्नसमन्वितम्। आज्यक्षौरतिलानाञ्च होतव्यं वै शतं शतम्। नारदीयपु० "व्यतीपातव्रतस्यास्य विधानं शृणु तत्त्वतः। माघे वा फाल्गुने वापि अन्यस्मिन्मासि वा भवेत्। व्यतीपातो दिने यस्मिन् प्रारभेद्व्रतसुत्तमम्। तिलैः पूर्णं घटावञ्च सगुडं गुरवेऽर्पयेत्। एवं द्वितीये दातव्यं तृतीये तु समापयेत्। सघृतं पायसञ्चैव दातव्यं चोत्तरोत्तरम्। एवं संवत्सरस्यान्ते देवस्याग्रान्तु कारयेत्। शङ्खचक्रगदापाणिं पद्महस्तं हिरण्मयम्। वस्त्रयुग्मेन संवेष्ट्य पूजयेद्गरुडध्वजम्। गोक्षीरेण च संपूर्णं कांस्यभाजनमुत्तमम्। स्थापयेद्देवदेवस्य स्थानन्तत्रैव कल्पयेत्। यथा च सन्निधौ तस्य स्थाप्या देवमनुत्तमम्। अनन्तशायिनं देवमनन्तफलदं शुभम्। लक्ष्म्या सहान्वितं विष्णुं भक्त्या संपूजयेद्बुधः। वैदिकैनैव मन्त्रेण जातीपुष्पैः समर्चयेत्। पायसेनैव नैवेद्यं शर्करासंयुतेन च। दत्त्वा निवेद्य देवस्य प्रार्थनं प्रार्थयेद्व्रती"।

व्योमव्रतं भविष्यपु० अगस्त्यार्घ्यदानाऽनन्तरम् "सितचन्दनतोयेन व्योम स्थाप्य विलिप्य च। कर्णिकाकल्पितैः पद्मैः संपूज्य प्रणिपत्य च"। कर्णिकाकल्पितैः कर्णिकामण्डितैः "बकुले विमले सौम्ये निश्छिद्रे पुष्पिते सति"। पुष्पिते विकसिते। "मध्ये केसरजालञ्च व्योम स्थाप्यं सुशोभनम्। चक्षुष्पर्वपात्रन्तु सर्वगन्धसमन्वितम्। अर्घे संस्थापयित्वा च भास्करस्य सुरोत्तम !। पूजयेत् करवीरैस्तु नया रक्तैश्च चन्दनैः। धूपञ्च गुग्गुलं दद्यात् प्रणम्य शिरसा रविम्। कुङ्कुमं पूर्वपात्रे तु दद्याद्व्योम्नः समाहितः। दक्षिणे चायुतं दत्त्वा पश्चिमे चन्दनं सितम्। चतुःसमुद्रोत्तरे तु दद्याद्व्योमविचक्षणः। दद्यान्मध्ये शुभं पुण्यं रक्तचन्दनमादरात्। पूजयेद्विविधैः पुष्पैस्तथा साऽगुरुचन्दनैः। धूपं कृष्णागुरुं दद्यात् सघृतं वापि गुग्गुलुम्। वासांसि च सुसूक्ष्माणि विचेलानि निवेदयेत्। पायसं घृतसंयुक्तं घृतदीपांश्च दापयेत्। सर्वं निवेद्य मन्त्रेण ततो गच्छेत् प्रदक्षिणम्। प्रणम्य शिरसा भानुमित्यायैनं क्षमापयेत्। सर्वोपहारसंयुक्तं बलिं देवाय चाहरेत्। खखोल्केति मन्त्रेण सूर्यायामिततेजसे। अनेन विधिसूद्देवमभ्यर्चयित्वा पुरा रविम्। अहं ब्रह्मत्वमापन्नः प्रसादाद्भास्करस्य तु"।

व्योमषष्ठीव्रतं भविष्यपु० "भाजनं तत्र संपूर्णं मधुना च समन्वितम्। दद्यात् कृष्णतिलानां तु प्रस्थमेकन्तु मागधम्। वितुषं तण्डुलानां च पृथक् प्रस्थं च कारयेत्"। भाजनं प्रस्थचतुष्टयपूरणोर्यं पात्रं त्रिगुणं प्रस्थत्रयम् पृथगिति घृतमधुतिलतण्डुलपात्राणि पृथक् कुर्यात्। "गन्धपुष्पैस्तथा धूपैर्नानाद्यैर्विशेषतः। ततः संपूजयेत् सूर्यं नानाद्यसमन्वितम्। सूर्यं गगनस्थम्। "पूजयेच्च ततो व्योम बलिं दित्वा प्रपूजयेत्। व्याहरेद्विसृष्टे च सर्वभूतानि योजयेत्। व्योमदैवं सृष्टे तत्र यत्र व्योम प्रतिष्ठितम्"। व्योमनिर्माणं विष्णुधर्मोत्तरात् "चतुरस्रं भवेन्मूले तत्र हस्तं सुशोभनम्। ततोऽन्यत् चतुरस्रञ्च प्रथमे संस्थितं शुभम्। भद्रपीठमये श्रोक्तो व्योमभागस्तुरीयकः। स्तम्भो वैश्वानरोऽथास्य मध्यभागः प्रकीर्त्तितः। भद्रपीठवदन्यच्च तत्र पद्मं निवेशयेत्। शुभाष्टपत्रं तन्मध्ये कर्णिकायां दिवाकरः। पत्राष्टके न्यसेत्तस्य दिक्पालान् सूर्यतो दिशम्"। "य एवं कुरुते षष्ठ्यां सन्ध्याकाले बलिं रवेः। स सूर्यलोकमासाद्य मोदते शाश्वतीः समाः"।

व्रतराजव्रतं देवीपु० "तृतीयायान्तु शुक्लायां लिखेद्धेमयुगे शुभे। रोचनासितकर्पूरैः शिवोमां पूजयेत्ततः। हेमरत्नसजैर्वस्त्रैः ! मन्त्रयुग्मसुदीरयेत्। समस्तकामफलदं यत्तत् पूर्वसुदाहृतम्। ततो जपार्चनं होमं कर्त्तव्यं द्विजसत्तम !। अवियोगाय नारीणां व्रतराजं सदा हितम्। सहेमपुष्परत्नाढ्यं सदस्रं दापयेत्तु तम्। महापुण्यं महाभाग्यं सर्वकामप्रदायकम्। सुतभ्रातृवियोगस्तु न भवेत्तेन भो द्विज !। न व्याधिर्नोपसर्गश्च यावत्तन्तुरतो भवेत्। तावत्कालसुभोगैके राजते मोदते चिरम्।

शक्रव्रतं विष्णुधर्मोत्तरे "आश्वयुज्यां सदैवन्तु पौर्णमास्यां नरो भवि। सोपवासः सुरेन्द्रस्य देवं संपूजयेत्तथा। शचीभैरधितं वज्रं मातलिञ्च नराधिपः। गन्धमाल्यनमस्कारदीपधूपाक्षसम्मदा। संवत्सरान्ते कनकञ्च दत्त्वा प्राप्नोति लोकं स पुरन्दरस्य। मानुषत्वमवाप्य नरेन्द्रपूज्यो राजा भवेद् वा द्विजपुङ्गवो वा"। पद्मपु० "अकिंशायी समां दद्याद्धेनुमन्ते पयस्विनीम्। शक्रलोकमवाप्नोति शक्रव्रतमिदं स्मृतम्"।

शङ्करनारायणव्रत देवीपु० "कथितं शङ्करोमाख्यं व्रतं सर्वसि तोष्टदम्। श्रोतुमिच्छाम्यहन्नात विष्णुशङ्करकीर्त्तितम्"। मनुरुवाच "यथा उमेश्वरनात तथा कार्य्यमिदं व्रतम्। किन्तु पीतानि वासांसि केशवाय प्रकल्पयेत्। गन्धपुष्पं तथा धूपं सुगन्धञ्च जनार्दने। कार्य्यं पूजनसम्भारे लड्डुकादिरसं दधि। एवन्तो पूजयित्वा तु प्रतिमास्थण्डिलेऽपि वा। आहूय ब्राह्मणौ वत्स! वेदवेदाङ्गपारगौ। यतौ वा व्रतसम्पन्नौ जटाकाषायधारिणौ। तौ भोजयेद्विधानेन सूपशाकयुतैर्नरः। शक्तये विधिना वत्स! सर्वकामप्रसाधकौ। भूमात्रं दक्षिणां दिव्यां गौरेकं शङ्कराय च। दत्त्वानुव्रजतो लोकौ क्रमाद्देहक्षये ततः"।

शङ्करार्कव्रतं कालिकापु० "अथ चानेन मार्गेण शुभां तामेव चाष्टमीम्। सप्ताम्यादित्ययोगेन प्राग्विधानेन वा नरः। किन्तु दक्षिणनेत्रस्थं भास्करञ्चार्चयेदुधः। पद्मरागेण हैमेन योज्येदं लोचनं शुभम्। नेत्रे न्यस्य ललाटाधः कुङ्कुमं रक्तचन्दनम्। दत्तन्तु योज्य मध्ये तु हरं पूर्ववदर्चयेत्"। अर्द्धचन्द्राकारं तन्मध्ये दत्तञ्च लत्वा हेमनिबद्धं पद्मरागं दत्तमध्ये निधाय सूर्यरूपनेत्रं कुर्य्यादित्यर्थः। "अभावे पद्मरागादेर्हेम सर्वत्र योजयेत्। रक्तवीजं परं पूतं यतस्तच्चैव सर्वदा। रक्तमाल्याम्बरं रक्तं नैवेद्यं च रक्तगुलम्। शेषः पूर्वविधानेन कर्त्तव्यो विधिविस्तरः। किन्तूपोष्य प्रकुर्वीत सप्तम्यां विजितेन्द्रियः। शङ्करार्कयुतं पूज्य व्रतं गच्छञ्च पारयेत्"।

शनिव्रतं भविष्योत्तरे "अतो यमस्य दिवसे स्नानमभ्यङ्गपूर्वकम्। कार्य्यं देयञ्च विप्राय तैलमभ्यङ्गहेतवे। वस्तु संवत्सरं यावत् प्राप्ते शनिदिने नरः। तैलं ददाति विप्राणां सशक्त्यान्यजनस्य तु। ततः संवत्सरस्यान्ते प्राप्ते तस्य दिने पुनः। लौहघटार्पितं मौर्वि तैलकुम्भे विनिक्षिपेत्। लौहे वा कृष्णवस्त्रे वाथ कृष्णकुसुमान्वितम्" इत्यादि।

शर्करासप्तमीव्रतं पद्मपु० "शर्करासप्तमीं वक्ष्ये सर्वकल्मषनाशिनीम्। आयुरारोग्यमैश्वर्यं यशश्चात्र प्रजायते। माघस्य सिते पक्षे सप्तम्यां भक्तयान्वितः। प्रातःस्नातः स्थिलैः शुक्लैः शुक्लमाल्यानुलेपनः। स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिकम्। तस्मिन्नियमः संविन्यसेत् धूपं पुष्पं निवेदयेत्। स्थापयेदग्र्यं कुम्भं शर्करापालसंयुतम्। शुक्लवस्त्रेण संवेष्ट्य शुक्लमाल्यानुलेपनैः। सचिरण्यं यथाशक्त्या कलशोपानेन पूजयेत्" इत्यादि।

शाकसप्तमीव्रतं भविष्यपु० "सप्तम्यां सोपवासस्तु रात्रौ भुक्त्वा तु यो नरः। क्षतोपवासः षष्ठ्यां तु पञ्चम्यामेककालभुक्। दत्त्वा तु संस्कृतं शाकं भक्ष्यभोज्यैः सुसंस्कृतम्। देवाय ब्राह्मणेभ्यश्च रात्रौ भुञ्जीत वाग्यतः। यावज्जीवं नरः कांश्चिदुव्रतमेतच्चरिष्यति। तस्य श्रीर्विजयश्चैव विवर्गश्च विवर्द्धते। मृतः स्वर्गमवाप्नोति विमानवरमास्थितः"। "शाकं कृतसंस्कृतं कृत्वा भक्ष्यभोज्यसमन्वितम्। दत्त्वा विप्रे यथाशक्त्या पश्चाद्भुञ्जीत निशि व्रती। कार्त्तिके शुक्लपक्षस्य माहात्म्यं कुरुनन्दन!। बहुभिरपि मासैस्तु पारणं प्रथमं स्मृतम्। कुसुमैश्चात्र पूजा कार्य्या विभावसोः। कार्त्तिकशुक्लसप्तम्यामारभ्य प्रतिमासं कुर्वता पुनर्यावत्संवत्सरं यावत् शुक्लसप्तमी तस्यां तस्याञ्च पारणं कार्य्यम्। एवं कृते वर्षे पारणत्रयं पारणं भवति एवमेव वर्षान्तरेषु तावत् व्रतं यावज्जीवं कर्त्तव्यम्"।

शान्ताचतुर्थीव्रतं भविष्यत्पु० "माघमासि तथा शुक्ला या चतुर्थी सहोपते!। सा सर्वशान्तिदा नित्यं प्राप्तिं कुर्य्यात् सदैव हि। स्नानं दानं बलिः कर्म सर्वमस्यां कृतं विभो!। भवेत्सहस्रगुणितं प्रयादाद्दानतः सदा। कृत्वोपवासं यत्तस्यां पूजयेद्विघ्ननायकम्। तस्यां होमादिकं कर्म भवेत्साहस्रिकं नृप!। तस्यां गुडपूर्णं कृतं घृताक्तं नृप भारत!। दत्त्वा भक्त्या तु विप्रेभ्यः कर्म साहस्रिकं भवेत्"।

शान्तितृतीयाव्रतं भरद्वपु० "तृतीयायां महाभाग! कर्त्तव्यञ्च व्रतं शृणु। येनाचरितमात्रेण नरः प्राप्नोति वै द्विज!। अङ्गपीड़ाविकारैश्च न कदाचन सः पीड़ितः। प्रकुर्वीत व्रतवाक्यादनन्तरः। स्थण्डिलं मण्डलं कृत्वादिक्षुसंस्थितं नरोवीजप्रकल्पकैः। चक्राब्जं मण्डलं कृत्वादिक्षुसंस्थितं

तण्डुलैः। तत्र चाग्रतश्चतुरं देवं नरसिंहाकृतिं विभम। प्रसन्नमधुराकारवीक्षणाक्षिप्तमानसम्। अशेषभयविध्वंसचतुरं पुरुषं हरिम्। अभयं भयतप्तानां ददतं ददतं वरम्" इत्यादि। "होमाच्च द्विगुणं प्राहुर्जपं तस्य तदुद्विगुणं प्राहुर्जपं एव विधिक्रमः। नियोमारम्भसमये नियमान् प्रतिपालयेत्। नयं चाहरहः कुर्वन् नक्तकालं समाचरेत्"। नियमान् मौनादीन्। नयञ्चाहरहः पूर्वं नक्तकालं समाचरेत्। नियं होमतर्पणजपान् अहरहः प्रतिदिनं संख्या च सङ्ख्यितहोमसंख्यायेज्यया। "हविष्याशी जितक्रोधो यतवाक्कायमानसः। नित्यं त्रिःसवणं स्नायात् सदाचाररतो मुनिः। न चान्ततकथोऽनिन्द्यश्चारी जितश्रमः"। यस्त्वेतत् कुरुते मर्त्यः श्रद्धाभक्ति समन्वितः। स सर्वार्त्तिविनिर्मुक्तो शान्तिमाप्नोति नैष्ठिकीम्"।

शान्तिपञ्चमीव्रतं भविष्यपु०। "तद्वद्भाद्रपदे मासि पञ्चम्यां सङ्गयान्वितः। यत्नाल्लिख्य नरो नागान् कृष्णवर्णादिवर्णकैः। पूजयेद्गन्धपुष्पैस्तु सर्पिर्गुग्गुलधूपैः। तस्य वेश्मनि समायान्ति पन्नगास्तक्षकादयः। व्यालदष्टकुलात्तस्य न भयं नागतो भवेत्। तस्मात् सर्वप्रयत्नेन नागान् संपूजयेद्बुधः। तथैवाश्वयुजे मासि पञ्चम्यां कृष्णनन्दन!। स्नात्वा कृतमयान्नागानिन्द्रागत्या सह पूजयेत्। यस्मात्सा विधिवन्नागान् शुचिर्भक्त्या समन्वितः। पूजयेत् कुरुशार्दूल! तस्य श्रेष्ठादयो नृप!। नागाः प्रीता भवन्त्येव शान्तिमाप्नोति वा विभो!। प्रशान्तिलोकमासाद्य मोदते शाश्वतीः समा"।

शान्तिव्रतं वराहपु०। "शान्तिव्रतं प्रवक्ष्यामि शृणुष्वैकमना नृप!। येन चीर्णेन शान्तिः स्यात् सर्वदा दृष्टमेधिनः। पञ्चम्यां शुक्लपक्षस्य कार्त्तिके मासि पार्थिव!। आरभ्य वर्षमेकन्तु भुञ्जीयादक्षवर्जितम्। नक्तन्तु पूजमेद्देवं हरिं श्रेयोपरिस्थितम्। एवं यः कुरुते भक्त्या व्रतमेतन्नराधिप!। तस्य शान्तिर्भवेच्चित्यं नागेभ्यश्चाभयं तथा। श्रेयश्चाभिजनस्यापि प्रकृतिं संप्रपूज्य च पुरुषं पतगेन्द्रकेतुम्। येनेदमन्तमधुरं सितपञ्चमीषु तेषां न नागजनितं भयमस्ति किञ्चित्"।

शाम्भरायणीव्रतं भविष्योत्तरे "तस्मात् पार्थ! प्रयत्नेन प्रतिमासं समाहितः। मासि मास्यच्युतं पूज्य भवेद्यः शाम्भरायणीव्रतेन यथोक्तेन कृतात्मना। ये शाम्भरायणीकथाचरितव्रतेन यथोक्तेन कृतात्मना। ये शाम्भरायणीकथाचरितव्रतेन यथोक्तेन सम्यग् विधिना सुधियो नयन्ति। ते स्वर्गलोकमभिगम्य कृताधिवासाः कल्पायुतं सुतपसोऽपि न च्यवन्ति"।

शिलाचतुर्थीव्रतं भविष्योत्तरे "नवमीधान्यकैर्युक्तं क्षीरकं घरिवानि च। छिन्नं शृङ्गीं हरिद्रां च सर्वं परिहरेत् तथा। चतुर्थ्यामेकभक्ताशी सकृदु दत्त्वा कुटुम्बिने। गृहेषु सप्त तथा शिलायुक्तानि भारत!। एतच्छिलाव्रतं नाम कर्त्तॄलोकप्रदायकम्"।

शिवचतुर्दशीव्रतं मत्स्यपु०। शृणुष्वावहितो ब्रह्मन् वक्ष्ये माहेश्वरं व्रतम्। त्रिषु लोकेषु विख्यातं नाम्ना शिवचतुर्दशी। मार्गशीर्षे त्रयोदश्यां सितायामेकभोजनः। प्रार्थयेद्देवदेवेशं त्वामहं शरणङ्गतः। चतुर्दश्यां निराहारः समभ्यर्च्च च शङ्करम्। सुवर्णवृषभं कृत्वा शोभनेशानरेऽहनि। एवं नियमकृत् कृत्वा प्रातःकृत्याय मानवः। कृतस्नानजपः पश्चादुमया सह शङ्करम्। पूजयेत् कमलैः शुक्लैः गन्धधूपानुलेपनैः"। "पञ्चदश्यां ततः पूज्य विप्रान् भुञ्जीत वाग्यतः। तद्वत्कृष्णचतुर्दश्यामेतत् सर्वं समाचरेत्। चतुर्दशीषु सर्वासु कुर्यात् पूर्ववदर्चनम्। ये तु मासविशेषास्तु तान्निबोध क्रमादिह। मार्गशीर्षादिमासेषु क्रमादेतदुदीरयेत्"। शाश्विनान्तेष्विति ज्ञेयम् इत्यादि।

शिवनक्तव्रतं भविष्यपु०। "कृष्णाष्टमीं तु नक्तेन कृत्वा कृष्णचतुर्दशीम्। इह भोगानवाप्नोति परत्र शिवसद्गतिं"।

शिवरथव्रतं विष्णुधर्मोत्तरे "कृत्वैकभक्तं हेमन्ते माघमासे तु यत्नितः। माघान्ते च रथं कुर्याच्छिवस्योपशोभितम्। श्वेतैश्चतुर्भिः संयुक्तं वृषभैः समलङ्कृतम्। शोभितं ध्वजमालाभिश्चित्रचामरदर्पणैः। तण्डुलाढकपिष्टेन लिङ्गं कृत्वा सवेटिकम्। विन्यस्य रथमध्ये तु पूजयेत् कृतलक्षणम्। तद्वत्तौ राजमार्गे च शङ्खभेर्यादिभिः स्वनैः। भ्रामयित्वा ततः पश्चाच्छिवायतनमानयेत्। तत्र जागरपूजाभिः प्रदीपादुपशोभितैः। प्रेक्षणीयप्रदानैश्च क्षपयेत शनैर्निशाम्। प्रभाते स्नापनं कृत्वा तद्वत्तानाञ्च भोजनम्। दीनान्धकृपणाभ्यञ्च यथाशक्त्या च दक्षिणाम्। रथं शोभासमायुक्तं शिवाय विनिवेदयेत्। भुक्त्वा च बान्धवैः सार्द्धं प्रणम्यैनं ततो व्रजेत्"।

शिवरात्रिव्रतं स्कन्दपु० नागरखण्डे "माघस्य कृष्णपक्षीय तिथिश्चैव चतुर्दशी। तस्यां रात्रिः समाख्याता शिव-

रात्रिरिति द्विजाः ! । तस्यां सर्वेषु लिङ्गेषु सदा संक्रमते हरः । विशेषादमरैः सर्वैः ख्याता चैव कणेश्वरे । माघनाम्नश्च कृष्णायां चतुर्दश्यां सुरेश्वर ! । यच्चं यास्यामि भूमिष्ठो रात्रौ नैव दिवा कलौ । लिङ्गेषु च समस्तेषु चलेषु स्थावरेषु च । प्रपूजयेत् सम्मदिच्छुः सर्वपापविशुद्धये । तस्यां रात्रौ हि मे पूजां यः करोत्यति मानवः । मन्वन्तरैतैः सुरश्रेष्ठ ! विषयमा स भविष्यति" । स्कन्दपु० "माघनाम्नि तु या कृष्णा फाल्गुनादौ चतुर्दशी । सा तु पुण्या तिथिज्ञेया सर्वपापविनाशिनी । यात्मात्मा क्रोधहीनस्तु तपस्वी ज्ञानसञ्चयकः । तस्मै देयमिदं देवि ! गुरुपादानुगे सदा । अन्यथा यो ददात्येतं स दाता नरकं व्रजेत् । वर्षं वर्षं महादेवि ! नरोनारी पतिव्रता । वीक्षयामि जगत् सर्वं कोमां भक्त्या प्रपूजयेत् । शिवमन्त्रैर्जपं कृत्वा होमार्चनदीपनम् । जागरं शिवरात्र्यान्तु शिवं पश्येत् समाहितः । मम भक्तो नरो देवि ! शिवरात्रेरुपोषकः । गणत्वमक्षयं दिव्यमक्षयम् शिवशासनम् । सर्वं कृत्वा तु भजते भोगानस्तसमन्वान् । एवं द्वादश वर्षाणि शिवरात्रेरुपोषकः । योमां जागरते रात्रिं मनुजः स्वर्गमाप्नुयात् । अकृत्वा मां न जानाति व्रतमेतदुदाहृतम् । शिवञ्च पूजयित्वा यो जागर्त्ति च चतुर्दशीम् । मातुः पयोधररसं न पिबेत् स कदाचन । यदीच्छेच्चाक्षयान् भोगान् दिवि देवसमः पुमान् । आगमोक्तविधिं कृत्वा प्राप्नोति सकलं फलम्" ।

शिवलिङ्गव्रतं शिवधर्मोत्तरे "शितचन्दनतोयेन स्नाप्य लिङ्गं विलेप्य च । श्वेतैर्विकसितैः पद्मैः संपूज्य प्रणिपत्य च । पङ्कजे विमले सौम्ये निच्छिद्रे पुष्पिते घने", सौम्ये रम्ये "मध्ये केसरजालस्य स्थाप्य लिङ्गं कनीयसम् । अङ्गुष्ठमात्रं विधिवत् सर्वगन्धमयं शुभम् । स्थाप्य दक्षिणमूर्ध्नी तु बिल्वपत्रैः समर्चयेत् । एवं योऽर्चयते लिङ्गं पद्मे गन्धमयं शुभम् । सर्वपापविनिर्मुक्तः शिवमेवाभिगच्छति । एतद्व्रतोत्तमं गुह्यं शिवलिङ्गं महाव्रतम् । भक्तस्य ते मयाख्यातं न देयं यस्य कस्यचित्" ।

शिवव्रतं कालोत्तरे "अतःपरं प्रवक्ष्यामि व्रतानान्तु यथाक्रमम् । अष्टम्यान्तु चतुर्दश्यां पक्षयोरुभयोरपि । उपोष्य संयतो भूत्वा त्रिविधेनान्तरात्मना । ततोऽपराह्णे शुचिना विधिवत् पूजयेच्छिवम् । पूर्वोक्तेन विधानेन स्नपनोक्तादिलाञ्छनैः । पूजयेत् परया भक्त्या गुरुवाक्यसाधनाढ्यैः । ततस्तु पञ्चगव्येन प्राशयेच्च लुकत्रयम् । अमत्तश्चोपसंस्थाय हविष्यान्नेन वर्त्तनम् । अनेन विधिना यत्राब्दं यावज्जीवं व्रतं चरेत् । पिता पितामहश्चैव तथैव प्रपितामहः । वसन्ति शिवलोकेषु शिवव्रतप्रभावतः । एतच्छिवव्रतं नाम व्रतानामुत्तमोत्तमम् । तत्रैवान्यत्र "पौषमासे तु सम्प्राप्ते पक्षयोरुभयोः सुत ! । चतुर्दश्यामथाष्टम्यां पौर्णमास्यामथापि वा । नित्यं नैमित्तिकं विधिवत् ततः काम्यं समाचरेत् । विशेषपूजा तत्रैव कर्त्तव्या शुद्धचेतसा । नैवेद्यं यावकप्रस्थं घृतक्षीराज्यमुत्तमम् । रुद्रसंख्यांस्तु वै विप्रान् भोजयेच्चैव दक्षिणाम् । वितस्तिमात्रां प्रकृतिं यावपिष्टेन निर्मिताम् । सुश्लक्ष्णसुरसाङ्गुलुकृतभूषान्तु कारयेत् । शिवाय तु प्रदातव्या कपिला गुरवे ततः । स्वयाचनसमायुक्ता व्रतपुण्यमतः शृणु !" । वर्षसाध्यम् "अनेन विधिना मासि खड्गं पिष्टमयं शिवे । समर्प्य च विधानेन चक्रवर्त्तिपदं लभेत् । फाल्गुने तु तथा चक्रं निवेद्य तत्पदं लभेत् । चैत्रे शिवं पिष्टमयं निवेद्य च शिवाग्रतः । स मुच्यति ब्रह्महत्यां शिवलोकमवाप्नुयात् । वैशाखे मासि दण्डाग्रं शिवस्याग्रे निवेदयेत् । हत्वार्द्धं पिष्टकं कार्यं पूजान्ते तु निवेदयेत् । मुच्यते सर्वपापेभ्यो रुद्रलोके महीयते । ज्यैष्ठे पिष्टमयं खड्गं शिवाय विनिवेदयेत् । मुच्यते तु कृतघ्नत्वाद्रुद्रलोके तु गच्छति । आषाढे पिष्टजं पात्रं शिवाय विनिवेदयेत् । मुच्यते दुष्कृतैः सर्वैरिह जन्मनि सञ्चितैः । ध्वजं पिष्टमयं यस्तु शिवस्याग्रे निवेदयेत् । श्रावणे तु विधानेन सोऽयं मोक्षमाप्नुयात् । मासे भाद्रपदे यस्तु गदां पिष्टमयीं ददेत् । निधीशत्वं स समाप्य शिवलोके महीयते । मासि चाश्वयुजे शूलं दत्त्वार्द्धं पिष्टसम्भवम् । शिवाय गुरवे देयं भ्रूणहत्यां व्यपोहति । कार्त्तिके तु गदाचक्रं शिवस्याग्रे निवेदयेत् । सप्तजन्मकृतं पापं दहत्यग्निरिवेन्धनम् । मासे वै मार्गशीर्षे तु कमलं पिष्टसम्भवम् । शिवाय विधिना देयं सर्वैश्वर्यमवाप्नुयात् । सर्वेषाञ्चैव नक्षत्रे व्रतानां कीर्त्तितं मया । नित्यपूजान्तु निर्वर्त्त्य काम्यपूजान्तु कारयेत्" । तत्रैवान्यत्र "अथ वै मार्गशीर्षे तु वस्तु पिष्टमयं ददेत् । शिवं सम्पूज्य विधिवत् सूर्यलोके महीयते । दिव्यं वर्षसहस्रन्तु तदन्ते स्वान्महीपतिः । पौषे पिष्टमयी दन्ती शिवस्याग्रे निवेद्यते । त्रिःसप्तकुलसंयुक्तः शिवलोके महीयते ।

दिव्यं वर्षसहस्रन्तु तदन्ते स्यान्महीपतिः। चक्रवर्ती महावीरः सर्वैश्वर्यसमन्वितः। माघे चाम्बरघं यस्तु शिवाय विनिवेदयेत्। उद्धरेत्सोऽपि नरकात् स्वपितॄन् रौरवादितः। शिवलोके तु वसति दिव्यवर्षायुतत्रयम्। तदन्ते तु महीं लब्ध्वा न च खण्डां भुनक्ति सः। फाल्गुने वृषयूथन्तु पित्रोत्सं रुद्रसंख्यया। निवेद्य तु शिवस्याग्रे त्रैलोक्याधिपतिर्भवेत्। दिव्यं वर्षसहस्रन्तु तदन्ते स्यान्महीपतिः। चक्रवर्ती महावीरः सर्वैश्वर्यसमन्वितः। चैत्रे घटमिन्दुमयं दासदासीसमन्वितम्। घटोपकरणैर्युक्तं विचित्राङ्गवर्चितम्। पूजान्ते परया भक्त्या शिवाय विनिवेदयेत्। दिव्यवर्षशतान्यष्टौ रुद्रलोके महीयते। जातिस्मरस्तदन्ते तु चक्रवर्त्तित्वमाप्नुयात्। मासि वैशाखसंज्ञे तु सप्तधान्यान्यराव-कान्। शिवाय पुरतो दद्यात् पूजान्ते प्रीतचेतसा। स याति शिवसायुज्यं बन्धुभिः सहितो नरः। पलानां हे घृते यस्तु गुग्गुलन्तु दहेत् सुधीः। ज्येष्ठे मासि शिवस्याग्रे पूजान्ते भक्तिसंयुतः। त्रिःसप्तकुलसंयुक्तः शिवलोके महीयते। तदन्ते पृथिवीं भुङ्क्ते न च खण्डां ससागराम्। बलिमण्डलकं कार्य्यं आषाढे मूलपाणिनः। नानाभक्ष्यैर्विरचितं नानाभक्ष्यसमन्वितम्। नानाचित्रसमाकीर्णं कर्त्तव्यं बलिमण्डलम्। संपूज्य परमेशानं ततस्तस्य निवेदयेत्। पितॄन् पितामहांश्चैव तद्वत्प्रपितामहान्। पुत्रपौत्रसमायुक्तः शिवलोके महीयते। दिव्यवर्षसहस्राणि तदन्ते पृथिवीपतिः। श्रावणे मासि देवस्य विमानं पुष्पसम्भवम्। पूजावसाने दातव्यं विचित्ररचनाकुलम्। वर्षायुतप्रमाणन्तु रुद्रलोके महीयते। योगीशो जायते शान्तो येन मोक्षं व्रजेत्तु सः। मासि भाद्रपदे यस्तु रुद्रपूजां चरेत् तदा। गुग्गुलं प्रथमं धूपं खदिरञ्च ततो दहेत्। बिल्वबीजं हुतं तद्वत् तथा नानाहुतान्वितम्। पञ्चमं ह्यगुरुं दद्याद् धूपं सर्वात्मना विभोः। मासमेकन्दहेद् यस्तु नैरन्तर्येण भक्तितः। याति सायुज्यतां शम्भोः सपुत्रः सहबान्धवः। यस्त्वर्कपत्रपुटकं पूरयेत् क्षीरसर्पिषा। मासभक्तयुजं शम्भोर्नैरन्तर्येण भक्तितः। तस्य पुण्यफलं वक्तुं न शक्तोऽस्मि षडानन!। तत्कुले पतिता ये तु द्विजाद्विजाहृता पुनः। ते यान्ति महाभागा रुद्रलोकं यथासुखम्। वर्षायुतायुतं साग्रं तदन्ते तु नरेश्वराः। जायन्ते शिवभक्ताश्च ज्ञानिनो वीतकल्मषाः। शिवदीक्षां समासाद्य ते यान्ति परमाङ्गतिम्। वस्त्राहृतमिक्षुरसं पुटकन्तु शिवाग्रतः। पूजान्ते दापयेद् यस्तु माघि प्राप्ते च कार्त्तिके। देहान्ते रुद्रलोके तु मोदते सह बान्धवैः। व्रतान्ते चैव संपूज्य शिवभक्तान् यथाविधि। हैमवस्त्रान्नपानैश्च वित्तशाठ्यं विना हृत!"। पद्मपु० "आषाढादिचतुर्मासं वर्जयेच्चक्कलन्नम्। दृत्वाकभक्षणञ्चैव मधुसर्पिर्घटान्वितम्। कार्त्तिक्यान्तु पुनर्हैमं ब्राह्मणाय निवेदयेत्। रुद्रलोकमवाप्नोति शिवव्रतमनुत्तमम्"।

शिवाचतुर्थीव्रतं भविष्यपु० "शिवा शान्ता सुखी राजन्! चतुर्थी त्रिविधा स्मृता। माघि भाद्रपदे शुक्ला शिवा लोकेषु पूजिता। तस्यां स्नानं तथा दानमुपवासोऽजपस्तथा। क्रियमाणं व्रतगुणं प्रसादादेतिनो नृप!। गुडलवणहृतानां दानं शुभकरं स्मृतम्। गुडपूपास्तथा वीर! पुण्यं ब्राह्मणभोजनम्। चतुर्थ्यां नरशार्दूल! पूजयेत सदा स्त्रियः। गुडलवणपूजाभिः श्वश्रूश्वशुरमातरः। ताः सर्वा सुभगा, सुर्वै विघ्नेशस्यानुमोदनात्। कन्यकाश्च विशेषेण विधिनानेन पूजयेत्"। शिवोपवीतव्रतं शिवधर्मोत्तरे "पौर्णमास्यां तथाषाढ्यां शिवं संपूज्य यत्नतः। उपवीतं शिवे दद्याच्छिवभक्तांश्च भोजयेत्। पुनरेव च कार्त्तिक्यां पूज्य शम्भुं क्षमापयेत्। यतीनां दक्षिणां दत्त्वा क्षत्रवस्त्रादिपूर्विकाम्। यः कुर्य्यात् सकृदप्येवं चातुर्मास्यां पवित्रकम्। कल्पकोटिसहस्राणि रुद्रलोके महीयते"। शीलावाप्तितृतीयाव्रतं पद्मपु० "अनग्निपक्वमश्नाति तृतीयायान्तु यो नरः। गां दत्त्वा शिवमभ्येति पुनरावृत्तिदुर्लभम्। हृदानन्दकरं पुंसां शीलव्रतमिदं स्मृतम्"। शीलावाप्तिव्रतं विष्णुधर्मोत्तरे "भगवन्! कर्मणा केन शीलवान् पुरुषो भवेत्। कुलजातिश्रुतेभ्यस्तु शीलमेव विशिष्यते मार्कण्डेय उवाच "आषाढ्यादयतीते तु मासमेकं दिने दिने। पूर्ववत् पूजयेद्देवं वराहमपराजितम्। हृतेन स्नापयेद्देवं हृतेन लुञ्जयाद्धरिम्। हृतं द्विजेभ्यो दद्याच्च हृतमेव निवेदयेत्। त्रिरात्रोपोषितः शीलां हृतपात्रेण च द्विजम्। पूजयेच्च सुवर्णेन यथाशक्ति नराधिप!। कृत्वा व्रतं मासमिदं यथोक्तमाषाढ्य नाकं सुचिरं भुनक्ति। मानुष्यमासाद्य च शीलवान् स्यात् प्राप्नोति पुष्टिं चिरजीवितञ्च"।

शुक्लव्रतं भविष्योत्तरोक्तम् "शुक्लं ज्येष्ठासु संप्राप्य पूजये-

नक्तभोजनः। पूर्वोक्तक्रमयोगेन द्विजसत्कर्मणेन तु। सम्प्राप्ते तथ संप्राप्ते सौवर्णं कारयेत्पात्रम् (शुक्रम्)। रौप्ये वा कांस्यपात्रे वा स्थापयित्वा भगोः सुतम्। संपूज्य परया भक्त्या श्वेतवस्त्रानुलेपनैः। अर्घं तस्य प्रदातव्यं पायसं घृतसंयुतम्"।

शुचिव्रतं वह्निपु० "एवं वा द्वादश मासानुपोष्यैकादशीं नृपः। स यः करोति शुद्धात्मा कृतकृत्यः सुखी भवेत्। सुनामद्वादशी पूज्या नाम्ना द्वादशभिस्तथा। द्वादश धेनवो देया हरिः कामान् प्रयच्छति। दिवि देवाः स देवेन्द्राः कृत्वा कर्मायनेकशः। पश्चादाराधयन्तीह हरिं शुचिव्रतेन हि"।

शुभद्वादशीव्रतं वराहपु० "शृणु राजन्! महाभाग! शुभव्रतमनुत्तमम्। येन सम्प्राप्यते विष्णुः शुभेनैव न संशयः। मासि मार्गशिरे पुण्ये प्रथमाद्वादशे दिने। एकभक्तं क्षिते पक्षे यावत् स्याद्दशमी तिथिः। ततो दशम्यां मध्याह्ने स्नात्वा केशवमर्चयेत्। भुक्त्वा सङ्कल्पतः प्राग्वद्द्वादश्यां शुद्धमानसः। केशवेति हरिं पूज्य दद्यात्तत्प्रीतये तिलान्। सहिरण्यं तथा कृष्णद्वादश्यां प्रयतो नृप!। तामग्नेयेन सुस्थित्वा च यवान् दद्याद्द्विजातये। कृष्णायेति हरिर्वाच्यो दाने होमे तथार्चने। चातुर्मास्यमथैवन्तु कृत्वा राजसत्तम!। चैत्रादिषु पुनस्तद्वदुपोष्य प्रयतः शुचिः। सक्तुपात्राणि विप्राणां सहिरण्यानि दापयेत्। श्रावणादिषु मासेषु तद्वद्गोविन्दमर्चयेत्। त्रिषु मासेषु यावत्तु कार्त्तिकः स्यादिहागतः। तमप्येवं चपयित्वा दशम्यां प्रयतः शुचिः। अर्चयित्वा हरिं भक्त्या मासनाम्ना विचक्षणः"।

शुभसप्तमीव्रतं पद्मपु० "अन्यामपि प्रवक्ष्यामि शोभनां शुभसप्तमीम्। यामुपोष्य नरोरोगात् शोकदुःखात् प्रमुच्यते। शुक्ले चाश्वयुजे मासि कृतस्नानजपः शुचिः। वाचयित्वा द्विजश्रेष्ठानोरेच्छुभसप्तमीम्। कपिलां पूजयेद्भक्त्या गन्धमाल्यानुलेपनैः। नमामि सूर्यं सम्भूतामशेषभुवनालयाम्। त्वामहं सर्वकल्याणशरीरां सर्वसिद्धये। अथाकृत्य तिलप्रस्थं ताम्रपात्रे कृतं नवम्। काञ्चनं वृषभं तद्वद्वस्त्रमाल्यगुडान्वितम्। फलेनानाविधैर्भक्ष्यैः सर्वोपस्करसंयुतैः। दद्यादिकालवेलायामर्घ्यमा प्रीयतामिति। पञ्चगव्यं तु संप्राश्य क्षपेद्भूमौ विकल्मषः। ततः प्रभाते स्नातो भक्त्या सत्कर्मयेद्द्विजान्। अनेन विधिना दद्यात् मासि मासि सदा नरः। वाचयो वृषभं हैमं तद्वच्छन्दोऽम्बुसंयुतम्। वस्त्रान्ते च शयनमिक्षुदण्डगुणान्वितम्। सोपधानकविश्रामभोजनासनसंयुतम्। ताम्रपात्रे तिलप्रस्थं सौवर्णवृषभैर्युतम्। दद्याद्देविदे सर्वं विश्वात्मा प्रीयतामिति"।

शूलदानव्रतं शिवधर्मोत्तरे "अमावस्यां निराहारः सवृषमेकं नियन्त्रितम्। शूलं पिष्टमयं कृत्वा वर्षान्ते विनिवेदयेत्। शिवाय राजतं पद्मं सौवर्णकृतकर्णिकम्। भक्त्या च विन्यसेत् मूर्ध्नि शेषं पूर्ववदाचरेत्। कामतोऽपि कृतं पापं भ्रूणहत्यादिकञ्च यत्। तत् सर्वं शूलदानेन नश्यत्येव न संशयः। महापद्मविमानेन नरो नारीसमन्वितः। युगकोटिशतं सार्धं शिवलोके महीयते"।

शैलव्रतं विष्णुधर्मोत्तरे "अथातः संप्रवक्ष्यामि तव शैलव्रतं शुभम्। महेन्द्रो मलयः सह्यः शुक्तिमान्ऋक्षवानपि। विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः। चैत्रशुक्लप्रसादात् प्रत्यहं दिनसप्तकम्। तेषां संपूजनं कृत्वा बहिःस्नानं समाचरेत्। गन्धमाल्यनमस्कारधूपदीपान्नसम्पदा। यथैहिकं तथा कुर्याद् दद्याद्विप्रे यवानपि। नित्यं यवान्नमश्नीयात् कुर्यात् संवत्सरं व्रतम्। तस्यान्ते दद्यात्तु यवप्रस्थांश्च विंशतिम्। सावचकाय द्विजेन्द्राय सुवर्णं काञ्चनस्य तु"।

शैवनक्तव्रतपुरुषव्रतं विष्णुधर्मोत्तरे "उपवासेष्वशक्तानां नक्तं भोजनमिष्यते। यस्मिन् व्रते तदग्रन्थं शूयतामुच्यं महत्। शिवनक्तव्रतपुरुषं शिवभक्तिमतां नृणाम्। तस्मिन्नक्तव्रतयोगे च पुराणज्ञाः प्रचक्षते। फाल्गुनस्यामले पक्षे यदा हस्तः प्रजायते। तदा प्राह्णं व्रतं चैतन्नक्तेनार्च्यं शूलिनम्। शिवायेति च हस्तेन पादौ संपूजयेद्विभोः"।

शैवसप्तव्रतं विष्णुधर्मोत्तरे "प्रतिमासं प्रवक्ष्यामि शैवव्रतमनुत्तमम्। धर्मकामार्थमोक्षार्थं नरनार्यादिदेहिनाम्। पौषे मासे तु सम्प्राप्ते यः कुर्यान्नक्तभोजनम्। सत्यवादी जितक्रोधः शालिगोधूमगोरसैः। पञ्चयोरष्टमीं यत्नादुपवासेन वर्त्तयेत्। त्रिषन्ध्यमर्चयेदीशमग्निकार्यञ्च भक्तितः"। वर्षसाध्यम् "त्रिस्नानञ्चाग्निहवनं भूशय्या नक्तभोजनम्। पञ्चयोरुपवासेन चतुर्दश्यष्टमीं क्षिपेत्। इत्येवमादिनियमैराचरेत शिवव्रतम्। शिवभक्ता च या नारी भुवं सा पुरुषो भवेत्। स्त्रीत्वमत्युत्तमं सा चेत् काङ्क्षते शृणुयाद् व्रतम्"।

शैवोपवासव्रतं भविष्यपु० "चतुर्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः। योऽश्नीयादेकं न भुञ्जीत शिवार्चनरतो नरः। यत् पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनाम्। तत् पुण्यं सकलं तस्य शिवलोकञ्च गच्छति"।

शौर्य्यव्रतं वराहपु० "अतःपरं प्रवक्ष्यामि शौर्य्यव्रतमनुत्तमम्। येन भीरोरपि भवेत् शौर्य्यं भवति तत्क्षणात्। आश्विने चाश्वयुजे शुक्ला नवमी सप्तपोषिता। सम्पूज्या कृतसङ्कल्पः स्थित्वाष्टम्यां निरोदनः। नवम्यां प्राशयेत् पिष्टं प्रथमं भक्तितो नृप!। ब्राह्मणान् भोजयेद्भक्त्या देवीञ्चैव तु पूजयेत्। दुर्गां देवीं महाभागां महामायां महाप्रभाम्। एवं संवत्सरं यावदुपोष्य विधिवन्नृप!। व्रतान्ते भोजयेद्वीरान् यथाशक्त्या कुमारकान्। हेमवस्त्रादिभिः स्नातान् पूजयित्वा तु भक्तितः। पश्चात् क्षमाप्येत्तान्तु देवी मे प्रीयतामिति। एवं कृत्वा नरराज्योलभेद्राज्यं न संशयः। अविद्यो लभते विद्यां भीरुः शौर्य्यञ्च विन्दति"।

चन्द्राव्रतं पद्मपु० "कृत्वालेपनं शम्भोरयतः केशवस्य च। स सर्वपापनिर्मुक्तः शिवलोके महीयते। राजा भवति सम्भूतः सार्वभौमो महेश्वरः। एतत् चन्द्राव्रतं नाम सर्वकल्याणकारकम्"।

श्रवणद्वादशीव्रतं भविष्योत्तरे "एकादशी यदा शुक्ला श्रवणेन समन्विता। विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा। एकादश्यां सोपवासो रात्रौ संपूजयेद्धरिम्। रौप्यसौवर्णपात्रे वा दारुवंशमयेऽपि वा। आच्छाद्य पात्रं वासोभिरक्षतैः पलसंमितैः। मार्गशीर्षेण गन्धेन भक्त्या वा भक्तप्रमेदया। तिलाढकेन वित्तात्यः प्रस्थेन कुडवेन वा। अलाभे सर्वधान्यैः फलैः शुद्धतिलैर्भवेत्। पुष्पैर्गन्धैः फलैर्धूपैः कालोत्थैरर्चयेद्धरिम्। नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्गुडोदनैः। स्ववित्तानुसारेण सक्षिरण्यञ्च कारयेत्। सन्त्वेव तु शतगुणं भक्त्या लक्षगुणोत्तरम्। भक्तिमन्तगुणोपेतं कोटिकोटिगुणोत्तरम्। एभिर्मन्त्रपदैस्तत्र पूजयेद्गरुडध्वजम्। उपहारैर्नरश्रेष्ठ! शुचिर्भूत्वा समाहितः"। "एषा व्युष्टिः समाख्याता एकादश्यां मया तव। पूर्वमेव समाख्याता द्वादशी श्रवणान्विता। उपोष्यैकादशीं पश्चाद् द्वादशीमपुपोषयेत्। नचात्र विधिलोपः स्यादुमयोर्देवता हरिः"। एकादश्यां द्वादश्यां चान्यतरस्यां वा श्रवणयुक्तायां श्रवणयुक्तोपवासेनैव व्रतद्वयसिद्धिः एकस्मिन् व्रते पूर्वमन्यां तिथिमुपोष्य पश्चादपारयित्वा नान्योपोष्या इति यो विधिलोपः स एकदेवताकत्वेन न सम्भवतीत्यर्थः। "बुधश्रवणसंयुक्ता द्वादशी सङ्गमोदकम्। स्नानं दध्योदनं सम्यगुपवासः परो विधिः। मगरेण कृकुत्स्थेन धनुर्धारेण गाधिना। एतैश्चान्यैश्च राजेन्द्र! कामाच्च द्वादशीव्रतम्। सा द्वादशी बुधयुता श्रवणेन सकं सखे! जयेति कथिता ऋषिभिर्नभस्ये। तामादरेण सम्पोष्य नरोऽमरत्वमाप्नोति पार्थ! ऋषिभादिगुणोपपन्नम्"। विष्णुधर्मोत्तरे "उपवासासमर्थानां किं स्यादेकमुपोषितम्। महाफलं महादेव! तन्ममाचक्ष्व पृच्छतः"। कृष्ण उवाच "शृणु राम! श्रवणोपेता द्वादशी महती तु सा। तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनम्। प्राप्नोत्यतुलात् धर्मज्ञ! द्वादशद्वादशीफलम्। दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे। वस्त्रसंवेष्टितं दत्त्वा छत्रोपानहमेव च। न दुर्गतिमवाप्नोति जातिस्मरत्वञ्च विन्दति। अक्षयं स्थानमाप्नोति नात्र कार्य्या विचारणा। श्रवणद्वादशीयोगे बुधवारो भवेद् यदि। अत्यन्तं महती नाम द्वादशी सा प्रकीर्त्तिता। स्नानं जप्यं तथा दानं होमः श्राद्धं सुरार्चनम्। सर्वमक्षयमाप्नोति तस्यां भरतसत्तम!। तस्मिन् दिने तथा स्नातो यत्र क्वचन सङ्गमे। स्वर्गङ्गास्नानजं राम! फलं प्राप्नोत्यसंशयम्। श्रवणे सङ्गमाः सर्वे परपुष्टिप्रदाः सदा। विशेषात् द्वादशीयुक्ते बुधयुक्ते विशेषतः। तथैव द्वादशी प्रोक्ता बुधश्रवणसंयुता। तृतीया च तथा प्रोक्ता सर्वकामफलप्रदा। तथा तृतीया धर्मज्ञ! तथा पञ्चदशी शुभा"।

श्रीपञ्चमीव्रतं गरुडपु० "यदिन्द्रेण पुरा चीर्णं श्रीवियुक्तेन पार्थिव!। श्रीसम्वर्द्धिकरं तद्वि शृणु श्रीपञ्चमीव्रतम्। मार्गशीर्षे सिते पक्षे पञ्चम्यां पन्नगोत्तमे। उपवासस्तु नियमं कुर्यात् पद्मा करेऽर्चनि। स्वर्णरौप्यां यथा शक्त्या तस्यां मृत्काष्ठजामथ। चित्रपट्टगतां देवीं लक्ष्मीं लक्ष्मापाल! कारयेत्। पद्मासनां पद्महस्तां पद्मां पद्मदलेक्षणाम्। दिग्गजेन्द्रैः स्नाप्यमानां काञ्चनैः कलसैर्नृप!"। लक्ष्मीरूपनिर्माणन्तु विष्णुधर्मोत्तरोक्तं वेदितव्यम्। तद्यथा "समुत्थिता श्रीः कर्त्तव्या शङ्खाम्बुजकरा शुभा। सुखस्थिता महाभाग! पद्मे पद्मकरा शुभा। द्विभुजा चारुसर्वाङ्गी सर्वाभरणभूषणा। द्वौ च मूलकरौ मूल्ये कार्य्यौ विद्याधरौ शुभाविति। ततो

यामलये याते निम्नगाया सदाथ वा। स्नानं कुर्यात्संभ्रान्तः शक्तिमदुपचारतः। देवान् पितॄंश्च सन्तर्प्य ततो देवगृहं व्रजेत्। तत्रस्थां पूजयेद्देवीं पुष्पैस्तत्काल-सम्भवैः। फलानि च यथालाभं विरूढं धान्यसञ्चयम्। ततः सुवासिनी पूज्या कुङ्कुमैः कुसुमेन च। भोजयेन्मधुरान्नेन प्रणिपत्य विसर्जयेत्। ततस्तु तण्डुलप्रस्थं घृतपात्रेण संयुतम्। ब्राह्मणाय प्रदातव्यं वा श्रीर्मे प्रीयतामिति। निर्वर्त्यैतदशेषेण ततो भुञ्जीत वाग्यतः। मासानुमासं कर्त्तव्यं विधिनानेन भारत!। श्रीर्लक्ष्मीः कमला सम्पत् पद्मा नारायणी तथा। पद्मधृतिः स्थितिः पुष्टिस्तुष्टिः सिद्धिः क्षमा क्रमात्। मासानुमासं राजेन्द्र! प्रीयतामिति कीर्त्तयेत्। वस्त्रमण्डपिकां कृत्वा पुष्पगन्धादिवासिताम्। शय्यायां स्थापयेल्लक्ष्मीं सर्वोपस्करसंयुताम्। सौभाग्याष्टकसंयुक्तां नेत्रपट्टावृतस्तनीम्। सप्तधान्यसमोपेतां रसधातुसमन्विताम्। पादुकोपानच्छत्रभाजनासनसंस्कृताम्। देवीं संपूज्य विधिवद्दु ब्राह्मणाय कुटुम्बिने। व्यासाय देवविदुषे यज्ञे वा रोचते स्वयम्। सोपस्करां सवत्सां च धेनुं दत्त्वा क्षमापयेत्। यः पञ्चमीव्रतमिदं शुचिर्भक्त्या समाचरति पुण्यं सनोत्तनूजाम्। राज्यश्रियं स भुवि भव्यजनोपभोग्यं भुक्त्वा प्रयाति भवनं मधुसूदनस्य। माहात्म्यमपि वक्ष्यामि पञ्चम्यास्तव भारत!। जयेति या च विख्याता व्रतिनां जयदायिनी। यस्याञ्जया जयाशब्दं करोति व्रतिनो बुधाः!। परिपूर्णं व्रतं यस्यां सा ज्ञेया जयपञ्चमी। जया च विजया चैव जयन्ती चापराजिता"। जया, कार्त्तिकशुक्लपञ्चमी "श्रवणेन यदा युक्ता शुक्लपक्षे तु पञ्चमी। उत्तराफाल्गुनी यस्यामिन्दुवारसमागमः। चारभेत नरस्तस्यां व्रतं पूर्वमुपोषितः। चतुर्थ्यामेकभक्ताशी ब्रह्मचारी जितेन्द्रियः। धृतिमान् कृतसंकल्पो भवेन्नियमवान्नरः। ततःकल्यं समुत्थाय स्नात्वा नियतमानसः। धृतसङ्कल्पया पत्न्या कुर्याद्दु बिल्वस्य चार्चनम्। बिल्वमूले ततः कुर्याद्दु वेदिं पुष्पाक्षतैर्युताम्। स्थापयेत् कलशानष्टौ तस्यामष्टसु दिक्षु वा। तन्मध्ये बिल्वमूले तु स्थापयेच्च महाघटम्। सौवर्णं राजतं ताम्रं मार्त्तिकं वा शुभान्वितम्" इत्यादि।

श्रीप्राप्तिव्रतं विष्णुधर्मोत्तरोक्तं "श्रीविहीनस्य लोकेऽस्मिन् जीवितस्यापि किं फलम्। तस्माद्व्रतं समाचरेच्च येन स्याच्छ्रीयुतो नरः"। मार्कण्डेय उवाच "तैषाख्यां सप्तमीतायां प्रतिपत्प्रभृति क्रमात्। पूर्ववत् पूजयेद्देवं श्रीसञ्ज्ञं दिने दिने"। पूर्ववदिति चेत्रादिरूपावाप्तिव्रतवत्। "पुष्पमूलैः फलैश्चैव जुह्वदाज्यतानि च। बिल्वांश्च वह्नौ सततं गोरसैर्भोजयेद्दु द्विजान्। विरात्रोपोषितो ज्यैष्ठ्यां कनकं प्रतिपादयेत्। वस्त्रदुग्धञ्च राजेन्द्र! तेन साफल्यमश्नुते। कृत्वा व्रतं मासमिदं यथोक्तमासाद्य मासं शुचिरं मनुष्यः। मनुष्यमासाद्य विशुद्धतेजाः श्रिया युतः स्याज्जगति प्रधानम्"।

श्रीहरिनवमीव्रतं भविष्योत्तरे "तस्माद्भादूपदे चैव शुक्लपक्षे कुरूत्तम!। नवम्यामर्चयेद्भक्त्या देवदेवस्य दोदेवनघ!। श्रीहरिं विविधैरन्नैरनग्निपतितैः फलैः। तिलपिष्टान्नगोधूमैर्दुग्धस्नानुलेपनैः। देवदानुकराक्रान्त! श्रीतरो वै नभस्तले। सन्तर्पणानेन राजेन्द्र! पूजयेद्भक्तिसंयुतः। सम्पूजयित्वतोऽभ्यर्च्य श्रीहरिं प्रणिपत्य च। ब्राह्मणान् भोजयेद्भक्त्या श्रीर्देवी प्रीयतां मम। ततो भुञ्जीत मौनेन तैलाचारविवर्जितम्। अनग्निपक्वं कृत्वात्र दधिधान्यफलं शुभम्। एवं यः कुरुते पार्थ! श्रीहरिभ्यर्चनं नरः। नारी वा दुःखशोकाभ्यां मुच्यते नात्र संशयः"।

श्रीव्रतं विष्णुधर्मोत्तरे "चैत्रशुक्लस्य पञ्चम्यां पूजयित्वा तथा श्रियम्। सङ्कटेभ्यो भवेदेतत् फलं संसृतरोदितम"। "अथातः संप्रवक्ष्यामि श्रीव्रतं नाम ते व्रतम्। चैत्रशुक्लतृतीयायां स्नानमभ्यङ्गपूर्वकम्। कृत्वा शुक्लाम्बरो राजन्शुक्लमाल्यानुलेपनः। तिष्ठेद्दु घृतोदनाहारो भूमौ सुधाचिशं च ताम्। चतुर्थ्यां च तथा स्नानं बहिरेव समाचरेत्। पञ्चम्यां च विशेषेण शुक्लाम्बरधरः शुचिः। लक्ष्मीं संपूजयेत् पद्मैः कृतैरकृतकैरपि वा। शुक्लेन गन्धमाल्येन घृतदीपेन वाग्यत" इत्यादि।

षष्ठीव्रतं ब्रह्मपु० "कृतोपवासः पञ्चम्यां षष्ठ्यां योऽर्चयते रविम्। नियमवतचारी च रवेर्भक्तिसमन्वितः। सप्तम्यां वा महाभाग! सोऽभ्येत्येषफलं लभेत्"। विष्णुधर्मोत्तरे "षष्ठ्यां च शुक्लपक्षस्य ये नरा भौमवासरे। व्रतमुत्तमं यत्नेन तथा तासां पृथक् पृथक्। न तेषां दुर्लभं किञ्चिद् भविष्यति सुरोत्तम!। वियोगे हि सुतं तेषां फलं स्कन्द! भविष्यति। वियोगे पूजनं कृत्वा सामेषु सुरसत्तम!। अक्षयं जायते पुण्यं नात्र कार्या विचारणा"।

संवत्सरव्रतं विष्णुधर्मोत्तरे "कृष्णमन्यत् प्रवक्ष्यामि पञ्च-

मूर्त्तिव्रतं तव। संवत्सरः स्मृतो वह्निस्तथार्कः परिवत्सरः। इदापूर्वस्तथा सोमो ह्यनुपूर्वः प्रजापतिः। चतुर्पूर्वश्च तथा प्रोक्तो देवदेवो महेश्वरः। तेषां मण्डलविन्यासः प्राग्वदेव विधीयते"। प्राग्वदिति नीलस्थेतरकलशैः कृष्णकैः मण्डलविन्यासः कर्त्तव्यः "प्रागवत् प्रपूजनं कार्य्यं होमः कार्य्यो यथाविधि। तिलैर्व्रीहियवैश्चैव घृतेन सितसर्षपैः। तण्डुलैरथ वा मन्त्रैर्होमभिः प्रत्यहं क्रमात्। नक्ताशनस्तथा तिष्ठेत् प्राग्वद्दिवसपञ्चकम्। चैत्रशुक्लं समारभ्य पञ्चमीप्रभृतिक्रमात्। संवत्सराख्ये वर्षेतु व्रतमेतत् समाचरेत्। पूजावसाने दातव्याः सुवर्णाः पञ्च यादव!। चतुर्वेदविदे देयं शाखाभेदेन यादव!। एकैकं पञ्चकं देयं यथाकालमिदं भवेत्। यदेष्टं लोकमाप्नोति कामचारी विहङ्गमः"।

सङ्कटकव्रतं वराहपु० "शृणुष्वैकमना भद्रे! सङ्कटकमिदं व्रतम्। कथयामि महापूर्वं ब्रह्मणा कथितं मम। माघस्य कार्त्तिकस्यापि शुक्लप्रतिपदि व्रतम्। मध्याह्नीयादेकभक्तन्तु कृत्वा दन्तादिशोधनम्। सायं सङ्कल्पमाधाय द्वितीयायामुपवसेत्। तृतीयायामपि तथा चतुर्थ्यां पारणं भवेत्। "शिवं संपूजयेद्भक्त्या सपार्वतीकमेव च। यत्र विघ्नोपचारेण रात्रौ दत्त्वार्घतो भुवि! स्वपेत् प्रातः समुत्थाय कृत्वा देवं समर्चयेत्"।

सन्तानव्रतं भविष्योत्तरोक्तम् "कार्त्तिक्यामुपवासी यः कन्यां दद्यात् स्वलङ्कृताम्। स्वकीयां परकीयां वा नदीसङ्गमके शुभे। एतत् सन्तानं नाम व्रतं सुखतिदायकम्"।

सन्तानाष्टमीव्रतं विष्णुधर्मोत्तरे "कृष्णाष्टम्यां चैत्रमासे स्नातो नियतमानसः। कृष्णमभ्यर्च्य पूजाञ्च देवक्याः कुरुते च यः। निराहारो नरः पश्यात् कृष्णस्य जगतः पतेः। उपोषितो जपन्नाम्नः रात्रौ प्रयतमानसः। पूजायाञ्चापि कृष्णस्य सप्त वारान् प्रकीर्त्तयेत्। प्राघ्रञ्छन्नोविकर्मस्थान् वैडालान् वकनास्तिकान्। प्रभाते च ततः स्नातो दत्त्वा विप्राय दक्षिणाम्। भुञ्जीत व्रतपूजस्तु कृष्णस्यैव जगत्पतेः। वैशाखज्यैष्ठयोश्चैव पारणं द्विजसत्तम!। उपोषितो देवदेवेशं हुतेन स्नापयेद्घृतैः। आषाढे श्रावणे चैव माघि भाद्रपदे तथा। उपोषितो द्वितीयं वै पारणं पूर्ववद्भवेत्। आश्विने कार्त्तिके सौम्ये हृतीयं पारणं तथा। पौषे माघे फाल्गुने च चतुर्थं द्विजसत्तम!। चारणे पारणे पूर्णे हुतेन स्नापयेद्धरिम्। ब्राह्मणेभ्यो हुतं दद्यात्तथैव प्रतिपारणम्। कृत्वा व्रतं नाकमनुप्रयाति मानुष्यमासाद्य च निष्कृतः स्यात्। सन्तानदृद्धिञ्च तथाप्नुतेऽसौ यावन्महीं सागरमेखलान्ताम्।

सप्तर्षिव्रतं विष्णुधर्मोत्तरे "चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम्। मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम्। वशिष्ठञ्च महाभागं पूजयेत् दिवसक्रमात्। कालोद्भवैः फलैः पुष्पैः गोरसैश्च फलान्वितैः। आचरेत् प्रत्यहं स्नानं वह्निर्नक्ताशनो भवेत्। महाव्याहृतिभिर्होम तिलैर्नित्यं समाचरेत्। तर्पयेद्ब्राह्मणांश्चात्र फलमूलैश्च गोरसैः। वारिधान्यञ्च दातव्याः क्षीरपूर्णा द्विजातिषु। एवं संवत्सरं कृत्वा व्रतान्ते चाऽऽज्यहोमतः। दद्यात् कृष्णाजिनं राजन्! यथापूर्वं समेधितम्। व्रतमेतच्चरः कृत्वा भोक्तोपायञ्च विन्दति"।

सप्तसारस्वतव्रतं विष्णुधर्मोत्तरोक्तम् "चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम्। शुभ्रमं काञ्चनाक्षीञ्च विशालां मानसोद्भवाम्। मेघनादां शुवेणुञ्च तथैव विमलोदकाम्। नित्यं संपूजयेद्भक्त्या दधिःस्नानं समाचरेत्। तासाञ्च प्रत्यहं नाम्ना दद्या होमं समाचरेत्। ब्राह्मणान् भोजयेच्चात्र दद्या युक्तं सुभोजनम्। घृतोदनं तथा क्षीरात्सदैव तथा निशि। एवं संवत्सरं कृत्वा व्रतं सारस्वतं नरः। तत्रोषित्र सुचिरं कालं मानुषके जायते यदा" इत्यादि।

सप्तसुन्दरकव्रतं भविष्योत्तरोक्तम् "एकभक्ता च सप्ताहं पौरिणीरत्न भोजयेत्। संपूज्य पार्वतीं भक्त्या सप्तपुष्पविलेपनैः। ताम्बूलसिन्दूरवरैर्नारिकेलफलेन च। प्रीयतां कुसुदा देवी प्रणिपत्य विसर्जयेत्। एकैकां पूजयेद्देवीं सप्ताहं यावदेव तु। पुनश्च सप्तमे प्राप्ते ताः सप्तैव निमन्त्रयेत्। सप्तभ्यः सप्तभोजयित्वाद्यं यथाशक्त्या विभूषणैः। भूषयित्वा माल्यवस्त्रैः कर्णवेष्टाङ्गुलीयकैः। कुसुदा साधवी गौरी भवानी पार्वती सभा। अम्बिका चेति संपूज्या दर्पणं दापयेत् पृथक्। ब्राह्मणं पूजयेच्चैकं वाच्यं सम्पन्नमस्तु के। सप्तसुन्दरकं नाम व्रतं पापहरं शुभम्। कृत्वा प्राप्नोति सौन्दर्य्यं सौभाग्यमतुलं तथा"।

सप्तव्रतं विष्णुधर्मोत्तरे "अथातः संप्रवक्ष्यामि सप्तव्रतमेव ते। चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम्। लवणं क्षीरं सघृतं दधिसक्तुं सुरोदकम्। तथैवेक्षुरसोदञ्च

स्नादुदङ्मैव पूजयेत् । आचरेत् प्रत्यहं स्नानं शुचिर्भूत्वा तथा बहिः । घृतेन होमं कुर्वीत सप्तम्यान्तु प्रदापयेत् हविष्याशी भवेन्नक्तं कुर्यात् संवत्सरं व्रतम् । संवत्सरान्ते दद्याच्च तथा धेनुं पयस्विनीम् । व्रतेनानेन वीर्येण सप्तसागरमेखलाम् । भुनक्ति वसुधां राजा ! सप्तजन्मान्तराणि तु" ।

सम्पूर्णव्रतं भविष्योत्तरे "संपूर्णं नाम तच्चापि व्रतं सम्यक् फलप्रदम् । यच्चीर्णं नरनारीभिर्व्यासेन संपूर्णकालकम् । अवश्यञ्चैव कर्त्तव्यं संपूर्णफलकाङ्क्षिभिः । किञ्चिद्व्रतं प्रमादेन यदुक्तं व्रतिनां भवेत् । तत् संपूर्णं भवेत् सर्वं व्रतेनानेन पाण्डव !! उपद्रवैर्बहुविधैर्मोहाद्वा पार्थिव !! यद्व्रतं किञ्चिदेव स्यात् व्रतं विघ्नविनायकैः । तत् संपूर्णं भवेत् सर्वं सत्यं सत्यं न संशयः । काञ्चनं रौप्यकं रूपं शिल्पिना तु घटापयेत् । सम्पूजयेत्तस्य योदेवस्तत् स्वरूपं सुनिर्मितम् । रूपं स्त्रीपुंसयोर्वापि प्रारब्धं तद्व्रतं किल । न च निष्पादितं किञ्चिद्दैवात् सर्वं तथा स्थितम् । द्विभुजं पङ्कजारूढं सौम्यं प्रहसिताननम्" । द्विभुजादीनि स्त्रीपुंसयोरूपस्य विशेषणम् तच्च रूपमज्ञातेषु व्रतेषु, जन्मान्तरकृतानां विस्मृतानाञ्च ज्ञातत्वे तेष्वपीदं प्रायश्चित्तमिति । "निष्पादितं शिल्पिना च तस्मिन्नेव दिने पुनः । तस्मान्नाशे पुनः प्राप्ते ब्राह्मणो विधिना गृहे । स्नापयेत् पयसा दध्ना घृतक्षीररसाम्बुभिः । गन्धचन्दनपुष्पैस्तु पूजयेत् कुसुमादिना । तोयपूर्णस्य कुम्भस्य मुखे विन्यस्य चन्दनैः । धूपदीपाक्षतैर्वस्त्रैर्नैनाबल्युपहारकैः । अर्घ्यं दद्याच्च तन्नाम्ना मन्त्रेणानेन पाण्डव !! उपवासेन हीनस्य प्रायश्चित्तं कृताञ्जलेः । परत्रञ्च प्रपन्नस्य कुरुष्वाथ दृढं पुनः । परत्र भवभीतस्य भग्नवस्त्रव्रतस्य च । कुरु प्रसादं संपूर्णमस्तु मे त्वत्प्रसादतः" ।

सम्भोगव्रतं भविष्यपु० "द्वे पक्षस्यौ हि मासस्य द्वे च प्रतिपदौ नरः । सोपवासः सुगन्धाद्यः प्रयीत प्रियया सह । खगनिश्चलचित्तस्तु रतिप्रीतिविवर्जितः" । खगनिश्चलचित्तः सूर्य्यध्यानपरः "समस्त सुकृतशीलस्य तस्य पुण्यफलं शृणु । दिव्यं वर्षसहस्रं तु दिव्यं वर्षशतं तथा । ततस्तु भाववत्येनं सहदेवं न संशयः" ।

सर्पपञ्चमीव्रतं भविष्यपु० "पयोव्रतन्तु पञ्चम्यां दत्त्वा नागं द्विजातये । सौवर्णं सर्पजनितं भयं तस्य न जायते । एतत् सर्पव्रतं प्रोक्तं सर्पभैषज्यकरं परम्" ।

सर्पविषापहपञ्चमीव्रतं स्कन्द० प्रभासख० "श्रावणे मासि पञ्चम्यां शुक्लपक्षे वरानने !! आरभ्य भयतो लेख्याः गोमयेन विषोल्बणाः । कृत्वा च कौसुमान्नागाद्विद्वांसं च प्रपूजयेत् । घृतोदकाभ्यां पयसा स्नापयित्वा वरानने !! गोधूमैः पयसा पूज्य लाजाद्यैर्विविधैस्तथा । पूजयेत् विधिवद्देवि ! दधिदूर्वाङ्कुरैः क्रमात् । गन्धपुष्पोपहारैश्च ब्राह्मणानाञ्च तर्पणम् । अथ वा श्रावणे मासि पञ्चम्यां शुक्लवासरे । यस्यालेख्य नरो नागान् कृष्णवर्णादिवर्णकैः । गुरुकल्पात् तथा वीथ्यां स्वगृहे विलिखेत् बुधः । पूजयेन्नवभूपैश्च पयसा पायसेन च । तस्य तुष्टिं समायान्ति पद्मकास्तक्षकादयः । व्यालग्रहात् कुलं तस्य न भयं नागतो भवेत् । प्रजप्यते तत्र मन्त्रो विषस्य प्रतिषेधकः । तस्य प्रजपनात्ते तु न विषं क्रमते सदा" ।

सर्वकामव्रतं विष्णुधर्मोत्तरोक्तम् "अङ्गारकं तथा सूर्य्यं निर्ऋतिं वा खगेश्वरम् । हवनं वेश्वरं मृत्युं कपालकपर्दिकिङ्किणीम् । तत्र चैकादशान् यस्तु देवान् त्रिभुवनेश्वरान् । एकादश्यां सोपवासः सोमं सम्पूजयेत्तथा । गन्धमाल्यनमस्कारदीपधूपान्नसम्पदा । मार्गशीर्षादिमारभ्य यावत् संवत्सरं भवेत् । संवत्सरान्ते दद्याच्च ब्राह्मणाय पयस्विनीम् । कृत्वा व्रतं वत्सरमेतदिष्टं रुद्रत्वमाप्नोति नरस्तु राजन् !! रुद्रेण सार्द्धं सुचिरं वसित्वा कामानवाप्नोति मनोऽभिरामान् । तथा सर्वगतान् रुद्रान् सदा सर्वत्र पूजयेत् । सर्वकामानवाप्नोति सर्वमानपराजितान्" । विष्णुधर्मोत्तरे "माघमासे चतुर्थ्यां कृष्णपक्षे विशेषतः । तथा पितृगणान् राजन् ! क्षीणचन्द्रे च पूजयेत् । सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते । स्नात्वा कृत्वा तथा राजन् ! सर्वकामानवाप्नुयात्" ।

सर्वकामाप्तिव्रतं विष्णुधर्मोत्तरे "कृत्तिकास्वर्चयेद्वै कार्त्तिकीप्रभृतिक्रमात् । यावत् स्यात् कार्त्तिकी पूर्णा नरसिंहसुपोषितः । अनुलेपनपुष्पाद्यैः सर्वरत्नैः सदैव तु । व्रतावसाने दद्याद्तु गां तथा श्वेतां द्विजातये । श्वेतवस्त्रयुतावैव रजतञ्च तथा नृप !! उपोषितः सदा कुर्य्याद्दिवृत्तं स्याच्च सुवर्जितः" ।

सर्वव्रतं सौरपु० "मन्वन्तरयुता पूर्णा शुक्लपक्षे त्रयोदशी । तस्यामुपोष्य विधिवत् सम्पूज्य गिरिजापतिम् । ब्रह्महत्यादिभिः पापैर्मुक्तो भवति मानवः" ।

सर्वाग्निसप्तमीव्रतं भविष्यपु० "कृष्णपक्षे तु माघस्य सर्वाग्नि

सप्तमीं शृणु । यासुपोष्य समाप्नोति सर्वान् कामान् वराधर ! । पाषण्डादिभिरालापमकुर्वन् भानुतत्परः । पूजयेत् प्रणतो देवमेकाग्रमतिरंशुमम् । माघादि पारणं मासैः षड्भिः शुच्यन्तकं स्मृतम्" । शुच्यन्तकम् आषाढ़ान्तकम् । "मार्त्तण्डः प्रथमं नाम द्वितीयोऽर्कः प्रकीर्त्तितः । तृतीयं चित्रभानुस्तु विभावसुरतःपरम् । अगेति पञ्चमो ज्ञेयः षष्ठो हंसः प्रकीर्त्तितः । पूर्वेषु षट्सु मासेषु स्नानप्राशनयोस्त्विलाः । आषाढादिषु मासेषु पञ्चमव्यमुदाहृतम् । स्नाने च प्राशने चैव प्रशस्तं पापनाशनम् । प्रतिमासन्तु देवस्य कृत्वा पूजां यथाविधि । विप्राय दक्षिणां दद्यात् श्रद्दधानः स्वशक्तितः । पारणान्ते च देवस्य भोजनं भक्तिपूर्वकम् । कुर्वीत भक्तया विधिवद्रविं भक्तया दिवस्पतिम्" ।

सर्वोषाग्निव्रतं विष्णुधर्मोत्तरोक्तम् "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतं तव । बलं ज्ञानं तथैश्वर्य्यं शक्तिश्च यदुनन्दन ! । विख्यातं देवदेवस्य तस्य मूर्त्तिचतुष्टयम् । यदेव रूपं कूर्मस्य वत्सस्योक्तं तथैव तु । रूपं ज्ञानस्य ते प्रोक्तं नारसिंहं तथा नृप ! । रुद्ररूपं तथैश्वर्य्यं कथितन्तु मया तव । पूर्वं बलसुखं तस्य वासुदेवसुखं भवेत् । दक्षिणं वदनं ज्ञानं देवं सङ्कर्षणं विदुः । ऐश्वर्य्यं पश्चिमं वक्त्रं रौद्रं पापहरं तथा । वाराहञ्च तथा वक्त्रमनिरुद्धप्रकीर्त्तितम् । विरात्रोपोषितश्चैत्रे पूर्वं संपूजयेन्मुखम् शुक्लपक्षप्रतिपदि वैशाखे मासि दक्षिणम् । ज्यैष्ठे च पश्चिमं वक्त्रमाषाढ़े च तथोत्तरम् । घृतोपयोगि दातव्यं चैत्रे मासे द्विजातये । रथोपयोगि दातव्यं वैशाखे यादवोत्तम ! । योगोपयोगि दातव्यं ज्यैष्ठे मासि द्विजातये । यज्ञोपयोगि दातव्यं माषाषाढ़े तथैव च । व्रतमेतत्तरः कृत्वा पूर्णमासचतुष्टयम् । पारणं प्रथमं कृत्वा स्वर्गलोके महीयते । श्रावणादिषु मासेषु द्वितीयं पारणं भवेत् । दशवर्षसहस्राणि स्वर्गं भुक्त्वा यथोदितम् । सौभाग्यादिषु भोगेषु तृतीयं पारणं भवेत् । तृतीयं पारणं कृत्वा भोजयेद्ब्राह्मणाञ्छुचिः । भोजनं घोरसप्तायं कृत्वीकाशर्करायुतम् । प्राप्ते द्वितीये व्रतपारणे तु प्राप्नोति देवस्य सलोकतां सः । स्वर्गेन्द्रलोके च यथोक्तकालं भुङ्क्ते सुखं सर्वसमृद्धिकामः" ।

सर्वेषसप्तमीव्रतं भविष्यपु० "संपूज्य विधिवद्देवं पुष्पधूपादिभिर्बुधः । यथाशक्ति ततः पश्चाद्वेदां भक्तितो व्यसेत् । शुभ्राणां प्रवरा जातिर्धूपानां विजयः परः । गन्धानां कुङ्कुमं श्रेष्ठं लेपानां रक्तचन्दनम् । दीपदाने घृतं श्रेष्ठं नैवेद्यं मोदकं परम् । एतैस्तुष्यति देवेशः सान्निध्यं चापि गच्छति । एवं संपूज्य विधिवत् कृत्वा चापि प्रदक्षिणम् । प्रणम्य शिरसा देव ! देवदेवं दिवाकरम् । सुखासीनस्ततः पश्येद्देवरभिमुखस्थितः । एवं सिद्धार्थकं कृत्वा हस्ते दानीयसंयुतः" । सिद्धार्थकं पश्येदित्यन्वयः "कामं यथेष्टं हृदये कृत्वा तं वाञ्छितं नरः । पिबेत् सन्तोषयन् विप्रमस्मृधन् दधनैः सकृत्" । रात्रावितिशेषः "द्वितीयायान्तु सप्तम्यां द्वौ गृहीत्वा तु सुव्रत ! । तृतीयायां तु सप्तम्यां पातव्यास्त्रय एव हि । चतुर्थ्यां वापि चत्वारः पञ्चम्यां पञ्च एव च । षट् पिबेच्चापि षष्ठ्यां तु तृतीयं वैदिकी श्रुतिः । सप्तम्यां वारिसंयुक्तां सप्त चैव पिबेन्नरः" । वारिशब्दः द्रववाची पञ्चगव्यस्य वक्ष्यमाणत्वात् "षट्कप्रभृतिं यावत् पञ्चगव्येन सप्तमी । एकं तोयेन सहितं दो वापि घृतसंयुतौ । तृतीयं मधुना सार्द्धं दध्नापि च चतुष्टयम् । युक्तास्तु पयसा पञ्च षट् च गोमयसंयुताः । पञ्चगव्येन वै सप्त पिबेत् सिद्धार्थकान् द्विज ! । अनेन विधिना यस्तु कुर्यात् सर्वपसप्तमीम् । बहुपुत्रो बहुधनः सिद्धार्थस्यापि सर्वदा । इह लोके नरो भूत्वा प्रेत्य याति विभावसुम्" ।

सागरव्रतं विष्णुधर्मोत्तरोक्तम् "इदमन्यत् प्रवक्ष्यामि चतुर्मूर्त्तिव्रतन्तव । नित्यञ्चतुर्षु मासेषु आषाढ्यादिषु यादव ! । चतुःसागरचिह्नानि पूर्णकुम्भांस्तु पूजयेत् । चतुरात्मा हरिर्ज्ञेयः सागरात्मा विचक्षणैः । स्नानं समाचरेद्विप्र नदीतोयेन यादव ! । होमञ्च प्रत्यहं कुर्यात् सततं तैलवर्जितम् । कार्त्तिकस्यावसानाद्धि पूजयित्वा द्विजोत्तमान् । तैलं दत्त्वा तु विप्राय नाकपृष्ठे महीयते । सर्वकामसमृद्धस्य यज्ञस्य लभते फलम्" ।

साध्यव्रतं विष्णुधर्मोत्तरोक्तम् "मनोमनस्तया प्राणो नरो जातश्च वीर्य्यवान् । वीतिर्हविर्भोजनश्चैव हंसो नारायणस्तथा । विभुश्चापि प्रभुश्चैव साध्या द्वादश कीर्त्तिताः । पूजयेच्छुक्लपक्षे तान् द्वादश्यां मार्गशीर्षतः । कृत्वा व्रतं वत्सरमेतदिष्टं प्राप्नोति तेषां तु स सलोकमेव । ततोऽत्र कालं सुचिरं भुक्त्वा राजा भवेद् द्विजपुङ्गवो वा" ।

सावित्रव्रतं पद्मपु० "घृतेन स्नापनं कृत्वा केशवस्य शिवस्य च । ब्रह्मणो भास्करस्यापि गौर्य्या जम्बोदरस्य च । चक्रतैश्च शुभं कुर्यात् पद्मं गोमयमण्डले । समाप्ते होमकर्मणि तिलघेनुसमन्वितम्" । समा वर्षम् । "शुक्लपञ्चम्यां

कुंभं दद्याच्छिवलोके महीयते। साम गायतश्चैतत् सामव्रतमिहोच्यते"।

सारस्वतपञ्चमीव्रतं पद्मपु० "सम्यक् पृष्टं त्वया राजन्! शृणु सारस्वतं व्रतम्। यस्य सङ्कीर्त्तनादेव तुष्यतीह सरस्वती। यो यद्भक्तः पुमान् कुर्य्यादेतद्व्रतमनुत्तमम्। तद्वासरादौ संपूज्य विप्रानेतत् समारभेत्। अथवादित्यवारेण पञ्चताराबलेन च। पायसम्भोजयित्वा तु कुर्य्याद् ब्राह्मणवाचनम्। शुक्लवस्त्राणि दद्याच्च सच्चिरण्यानि शक्तितः। गायत्रीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः। एभिर्मन्त्रपदैः पश्चात् सर्वं कुर्य्यात् कृताञ्जलिः। एवं संपूज्य गायत्रीं वीणाक्षमक्षिधारिणीम्। शुक्लपक्षेऽच्यतैर्भक्त्या सकमण्डलुपुस्तकाम्। मौनव्रतेन भुञ्जीत सायं प्रातश्च धर्मवित्। पञ्चम्यां प्रतिपक्षे च पूजयित्वा सुवासिनीः। तस्यां तु तण्डुलप्रस्थं घृतपात्रेण संयुतम्। क्षीरं दद्यात् हिरण्यञ्च गायत्री प्रीयतामिति। सन्ध्ययोश्च तथा मौनमेतत् कुर्वन् समारभेत्। नान्तरा भोजनं कुर्याद् यावन्नाक्षत्रयोदश। समाप्ते तु व्रते दद्यात् भाजनं शुभतण्डुलैः। पूर्णं सवत्सयुग्मन्तु गां सवत्सां सुशोभनाम्। विप्राय वेदविदुषे। वाचकायाथ पार्थिव! अनेन विधिना यस्तु कुर्य्यात् सारस्वतं व्रतम्। विद्यावान् धनयुक्तश्च रक्तकण्ठश्च जायते। सरस्वत्याः प्रसादेन व्यासवत् स कविर्भवेत्। नारी वा कुरुते या तु सापि तत्फलभागिनी"।

सारस्वतव्रतं पद्मपु० "सन्ध्यासौनं नरः कृत्वा समान्ते घृतकुम्भकम्। वस्त्रयुग्मं तिलान् धेनुं ब्राह्मणाय निवेदयेत्। लोकं सारस्वतं याति पुनरत्रैव जायते। एतत् सारस्वतं नाम रूपविद्याप्रदायकम्"।

सार्वभौमव्रतं वराहपु० "सार्वभौमव्रतं चान्यत् कथयामि समासतः। येन सम्यक्कृतेनाशु सार्वभौमो भवेन्नरः। कार्त्तिकस्य तु मासस्य दशमी शुक्लपक्षगा। तस्यां नक्षत्रयोगेऽस्मिन् शुद्धबलिं हरेत्"। शुद्धबलिः पवित्रद्रव्यैः पूजोपहारः। "विचित्रैर्कुसुमैर्भक्त्यैः पूजयेच्च द्विजांस्तथा। सर्वा भवत्यः सिध्यन्तु मम जन्मनि जन्मनि। एवमुक्त्वा बलिं तासु दत्त्वा शुद्धेन चेतसा। ततोऽन्यपक्षे भुञ्जीत दध्यन्नञ्च सुसंस्कृतम्। सर्वं पशादुपवेष्टञ्च एवं संवत्सरं नृपः। यः करोति नृपोनित्यं तस्य दिग्विजयो भवेत्"।

सितसप्तमीव्रतं विष्णुधर्मोत्तरे "मार्गशीर्षस्य मासस्य शुक्लपक्षे नराधिप!। सोपवासन्तु सप्तम्यां कमलैः पूजयेद्धरिम्। अर्चायां वा स्थले वापि शुक्लैः पुष्पैर्यथाविधि। चन्दनेन तु शुक्लेन वटकैः पूरकेण च"।

सिद्धार्थकादिसप्तमीव्रतं भविष्यपु० "वैनतेय! शृणुष्व त्वं विधानं सप्तमीव्रतम्। एतद्धि परमं गुह्यं रवेराराधनं परम्। सिद्धार्थकैस्तु प्रथमा द्वितीया चार्कसम्भटैः। तृतीया मरिचैः कार्य्या चतुर्थी निम्बसप्तमी। षड्युता पञ्चमी कार्य्या षष्ठी च फलसप्तमी। सप्तम्यनोदना वीर! सप्तमी परिकीर्त्तिता"। षड्युता इति सिद्धार्थकादिभिः प्रकारैर्युता"। इत्येताः सप्तसप्तम्यः कर्त्तव्या भूतिमिच्छता। तथा चानुक्रमेणासाङ्करं कथयाम्यहम्। माघे वा मार्गशीर्षे वा कार्य्या शुक्ला तु सप्तमी। न च स्याच्चियमभ्रंशः पक्षमासकृतो भवेत्"। आर्त्तिवशादन्यस्मिन् मासे पक्षे च कार्य्येत्यर्थः" इत्यादि।

सिद्धिविनायकषष्ठीव्रतं स्कन्दपु० "गजवक्त्रन्तु शुक्लायां षष्ठ्यां पूजयेन्नृप!। यदा वोत्पद्यते भक्तिर्मासे पूज्यो गणाधिपः। प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप!। स्वशक्त्या गणनाथस्य स्वर्णरौप्यां तथाकृतिम्। कृत्वा पूजां प्रयत्नेन स्नाप्य पञ्चामृतैः पृथक्" इत्यादि।

सुकलत्रप्राप्तिव्रतं विष्णुधर्मोत्तरे "यत्नं परिसमास्याद्य नारीह सुखमेधते। दुःशीलेऽपि हि कामार्थी नारी प्राप्नोति भर्त्तरि। अनाहारा जगन्नाथं सर्वलोकेश्वरं हरिम्। कथमाप्नोति चेन्नारी सर्वलोकगुणान्वितम्। सुकलत्रयुतत्वाद्व्रतमच्युततुष्टिदम्। कर्त्तव्यं लक्षणं तस्य शृणुतां वरवर्णिनि!। यच्छीत्वा सर्वनारीणां श्रेयः प्राप्नोत्यसंशयम्। ऐहिकञ्च सुखं प्राप्य मृता स्वर्गसुखान्यपि। अनुज्ञाप्य स्वपितृतो मातृतश्च कुमारिका। पूजयेत्तु जगन्नाथं भक्त्या पापहरं हरिम्। त्रिषु त्रयोदशर्क्षेषु पतिकामा कुमारिका। माधवायेति वै नाम जपेच्चित्तमतन्द्रिता। प्रियङ्गुपुष्पैर्मधुकैः कुसुमैश्चम्पकैस्तथा। समभ्यर्च्याच्युते दद्यात् कुङ्कुमेनानुलेपनम्। सर्वौषधिभिः सुस्नाता तमाराध्य जगत्पतिम्। नमोऽस्तु माधवायेति होमयेन्मधुसर्पिषा। सदैवमुत्तरायोगे समभ्यर्च्य जनार्दनम्। शोभनं पतिमाप्नोति प्रेत्य स्वर्गञ्च गच्छति। अतिदारिद्र्ये च यत्किञ्चित् तया पापमनुष्ठितम्। तस्माद्विमुच्यते पापात् सुखिनी चैव जायते। अवश्यदेनैकेन तत्त्वज्ञि! व्रतं प्राप्य यदिच्छति। तदेव प्राप्नोति

भुयाद्भद्रे ! नारायणपरायणा। षण्मासमेवमेवं कार्य्यं यथाशक्त्या च वै हरेः। पारणान्ते महाभागे ! भोजयेद्दु ब्राह्मणोत्तमान्"।

शुक्लत्रिरात्रव्रतं विष्णुधर्मोत्तरे "अग्रहस्तृतीयं प्राप्य त्रिरात्रोपोषितो नरः। मार्गशीर्षात्तथारभ्य पूजयेत् तु त्रिविक्रमम्। त्रिवर्णैः कुसुमैर्दद्यं त्रिभिः प्रयतमानसः"। त्रिवर्णैः श्वेतपीतरक्तैः "त्रयोऽनुलेपना देयास्त्रिधूपं धूपमेव च"। त्रिधारं गुग्गुलुकृष्णागुरुवेष्टकाः "बलिं त्रिमधुरं दद्यात् त्रींश्च दीपान्नरोत्तम !। यवैस्त्रिभिस्तथा होमः कर्त्तव्यः सर्षपान्वितैः। दद्यात्त्रिलोहञ्च तथा द्विजेभ्यः ताम्रं सुवर्णं रजतञ्च राजन् !। न केवलं शुक्लदं व्रतन्तु यत्तेष्टकामाप्निकरं प्रदिष्टम्"।

शुक्लद्वादशीव्रतं विष्णुधर्मोत्तरे "तथैव द्वादशी शस्ता स्त्रीणां सुव्रतकर्मणाम्। यास्तूपोष्य द्विजश्रेष्ठ ! न याति नरकं नरः। फाल्गुनामलपक्षस्य एकादश्यामुपोषितः द्वादश्यां च द्विजश्रेष्ठ ! पूजयेन्मधुसूदनम्। एकादश्यां समुत्थिस्तु विष्णोर्नामानुकीर्त्तनम्। पूजायां वासुदेवस्य कुर्य्यात् सुसमाहितः"।

शुभव्रतं भविष्यपु० "कृष्णाष्टमीं तु नक्तेन यस्तु कृष्णां च सप्तमीम्"। उपवसेदिति शेषः "इहैव सुखमाप्नोति परत्र च शुभां गतिम्"। विष्णुधर्मोत्तरे "देवानां मानवानां वा तत्पक्षाये तथा परे। तेषां संपूजनं कृत्वा चतुर्दश्यां सुखी भवेत्"। भविष्यपु० चतुर्थीं तु चतुर्थीं तु यदाङ्गारकसंयुता। उपोष्य तत्र तत्रैव प्रदेयो विधिवत् कुजः। उपोष्य नक्तेन विभो ! चतस्रः कुजसंयुताः। चतुर्थ्यन्तु चतुर्थ्यन्तु विधानं शृणु यादृशम्"। एकश्चतुर्थीशब्दः तिथिविशेषवचनः, अपरस्तु संख्यापर इति "दशसौवर्णिके सुरूपं दशार्द्धं मध्यमे वा। वा। सौवर्णपात्रे रौप्ये वा भक्त्या तामपरेऽपि वा। विंशत्पलानि पात्राणि विंशत्यर्द्धपलानि च। विंशत्कर्षाणि वा वीर ! ततोहीनं न कारयेत्। भक्त्या वित्तस्य भक्त्या च पात्रे ताम्रमयेऽपि वा। प्रतिष्ठाप्य कुजपात्रे रक्तवस्त्रेण वेष्टयेत्। पुष्पमण्डपिकां कृत्वा दिव्यैर्धूपैस्तु धूपिताम्। तत्तत्क्षयमर्चयेद्देवं पूर्वमन्त्रैः क्रमेण तु"।

सुखसप्तमीव्रतं विष्णुधर्मोत्तरे "कृष्णायां पूजनं कृत्वा सप्तम्यां सुखमवाप्नुयात्"।

सुखसुप्तिव्रतं आदित्यपु० "अमावास्यान्तु देवाश्च वार्त्तिके मासि केशवम्। अभयं प्राप्य सुप्तास्तु सुखात् को न मानुषः। लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्ता भुजोदरे। चतुर्भुजस्य हस्तान्ते ब्रह्मा सुप्तस्तु पङ्कजे। अतोऽर्धं विधिवत् कार्या मनुष्यैः सुखसुप्तिका। दिवा तत्र न भोक्तव्यमेते बालातुरान् जनान्। प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात्। दीपदत्तास्तु दातव्याः शक्त्या देवगृहेषु च। चतुष्पथे श्मशानेषु नदीपर्वतवेश्मसु। वृक्षमूलेषु गोष्ठेषु चत्वरेषु गुहासु च। वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः। दीपमालापरिक्षिप्ते प्रदेशे तदनन्तरम्। ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षितान्। स्वलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना। स्निग्धैर्सुग्धैर्विदग्धैश्च बान्धवैर्निश्चलैः सह। शङ्करस्तु पुरा द्यूतं ससर्ज सुमनोहरम्। कार्त्तिके शुक्लपक्षे तु प्रथमेऽह्नि सुव्रत !। जितश्च शङ्करस्तत्र जयं लेभे च पार्वती। अतोऽर्थं शङ्करो दुःखी उमा नित्यं सुखोषिता। तस्माद्द्यूतं प्रकर्त्तव्यं प्राभाते तत्र मानवैः। तस्मिन् भवेज्जयोयस्य तस्य संवत्सरं शुभम्। पराजये विरङ्गन्तु लक्ष्मीनाशस्ततो भवेत्। श्रोतव्यं गीतवाद्यादि स्वनुजिघ्रैः सुलङ्कृतैः। विशेषवच्च भोक्तव्यं प्रशस्तैर्बान्धवैः सह। तस्यां निशायां कर्त्तव्यं शय्यास्थानं सुशोभनम्। गन्धपुष्पैस्तथा वस्त्रैरतैर्माल्यैरलङ्कृतम्। दीपमालापरिक्षिप्तं तथा धूपेन धूपितम्। दयिताभिश्च सहितेनैया सा च भवेद्विभा। नवैर्वस्त्रैश्च संपूज्य द्विजसम्बन्धिबान्धवान्" इत्यादि।

सुगतिव्रतं पद्मपु० "नक्ताशी त्वष्टमीषु स्याद् वत्सरान्ते तु गोप्रदः। पौरन्दरपदं याति सुगतिव्रतमुच्यते"।

सुगतिद्वादशीव्रतं विष्णुधर्मोत्तरे "एकादश्यां शुक्लपक्षे फाल्गुने मासि यो नरः। जपन् कृष्णेति देवस्य नाम भक्त्या पुनः पुनः। देवाग्रेनं वाष्टशतं कृत्वैतत्तु जपेच्छुचिः। स्नाने प्रस्थानकाले च उत्थाने स्खलिते क्षये। पापखण्डान् ! पतितांश्चैव तथैवान्यावसायिनः। नालपेत्तु तथा देवमर्चयेच्छ्रद्धयान्वितः। इदञ्चोदाहरेत् सम्यं मनश्चाधाय तत्परः। चैत्रवैशाखयोश्चैवं तद्वदुज्ज्यैष्ठे च पूजयेत्। मर्त्यलोके गतिं श्रेष्ठां दाल्भ्य ! प्राप्नोति वै नरः। उत्क्रान्तिकाले कृष्णस्य स्मरणञ्च तथाप्नुयात्। आषाढे श्रावणे चैव मासि भाद्रपदे तथा। तथैवाश्वयुजे देवमनेन विधिना नरः। उपोष्य संपूज्य तथा

केशवेति च कीर्त्तयेत्। गोमूत्रप्राशनात् पूतः स्वर्गलोके महीयते। आराधितस्य जगतामीश्वरस्य महात्मनः। सत्क्रान्तिकाले स्मरणं केशवस्य तथाप्नुयात्। क्षीरस्य प्राशनं श्रेष्ठं विधिनेदं यथोदितम्। कार्त्तिकादि यथान्यायं कुर्य्यान्मासचतुष्टयम्। तेनैव विधिना ब्रह्मन्! तत्र विष्णुं प्रकीर्त्तयेत्। स याति विष्णुसालोक्यं विष्णुं स्मरति तत्त्वतः। प्रतिमासं द्विजातिभ्यो दद्याद्दानं यथेच्छया। सुगतिद्वादशीमेतां श्रद्दधानश्च यो नरः। उपोष्येति तथा नारी प्राप्नोति त्रिविधां गतिम्"।

सुजन्मद्वादशीव्रतं विष्णुधर्मोत्तरे "पौषे मासि सिते पक्षे द्वादश्यां शक्रदैवते। नक्षत्रयोगे विष्णुं प्रथमं तु समर्चयेत्। ततः प्रभृति विप्रेन्द्र! मासि मासि जनार्दनम्। उपोषितः पूजयेत यावत् संवत्सरं गतम्। मासे च मासे विधिनोदितेन तस्यां तिथौ दानमिति ब्रवीमि। प्राप्यं यथावद्विधिवत् क्रमेण तदुच्यमानं निखिलं निबोध। घृतं तथा व्रीहियवं चिरण्यं यवान्नमक्षयणकान्नपानम्। क्षत्वं पयोऽन्नं गुडफाणिताढ्यं सुचन्दनं वस्त्रमनुक्रमेण। एकैकमासोत्तमथैकदानं गोमूत्रमश्नो घृतमामशाकम्। दूर्वादविव्रीहियवं तिलांश्च सूर्य्यांशुतप्तं जलमम्बु दार्भम्"।

सुजन्माविप्रव्रतं विष्णुधर्मोत्तरे "मेषसंक्रमणे भानोः सोपवासो नरोत्तम!। पूजयेद्भागवं देवं रामं शक्रात्मा यथाविधि। वृषसंक्रमणे प्राप्ते तथा कृष्णञ्च पूजयेत्। तथा मिथुनसंक्रान्तौ पूजयेद्योगशायिनम्। तथा कुलीरसंक्रान्तौ वराहमपराजितम्। नरसिंहं तथा देवं सिंहसंक्रमणे विभुम्। कन्यासंक्रमणे देवं तथाश्वशिरसं यजेत्। तुलासंक्रमणे कूर्मं पूजयेत् भक्तिभावतः। वृश्चिकसंक्रमणे कल्किं देवं संपूजयेत् नरः। धनुःसंक्रमणे बुद्धं देवमभ्यर्चयेत् बुधः। तथा मकरसंक्रान्तौ रामं दशरथात्मजम्। कुम्भसंक्रमणे राजन्! रामं यादवनन्दनम्। मीनसंक्रमणे मत्स्यं वासुदेवन्तु पूजयेत्। पटे वा यदि वा स्त्रीयां गन्धमाल्याक्षसम्पदा। प्रादुर्भावस्य नाम्ना च च होमं कुर्वीत पार्थिव!। व्रतान्ते जलधेनुन्तु क्षत्वोपानत्सहितां। वस्त्रयुग्मयुतां दद्यात् प्रतिमासं सकाञ्चनाम्। रात्रौ तु दीपमालाभिर्देवदेवं प्रपूजयेत्। क्षत्वा व्रतं वत्सरमेतदिष्टं स्त्रीच्छेषु तिर्य्यक्षु न चापि जन्म। प्राप्नोत्यवाप्नोति चिरञ्च नाकं कामत्तथाप्नोति मनोऽभिरामम्"।

सुदर्शनषष्ठीव्रतं गरुड़पु० "अथ षष्ठ्यान्तु राजन्यः सुपोष्य यथाविधि। चक्राब्जमण्डलं क्षत्वा कर्णिकायां सुदर्शनम्। दलेषु लोकपालानामायुधानि समर्चयेत्। चक्राब्जं चक्रनाभिघटिताब्जम्। "खान्यायुधानि पुरतः प्रतिष्ठाप्य प्रपूजकः। रक्तचन्दनसिन्दूरैरक्तपद्माङ्कुरैरपि। रक्तवस्त्रैः सुगन्धाद्यैर्धूपाद्यैरर्चयेत्" इत्यादि।

सुनामद्वादशीव्रतं वह्निपु० "शृणुष्वैकमना भूप! सुनामद्वादशी शुभा। सर्वपापहरा स्वर्ग्या भुक्तिमुक्तिप्रदायिका। मनसा च चिकीर्षन्ति द्वादशीं ये नरोत्तमाः। तेऽपि घोरं न पश्यन्ति पुनः संसारसागरम्। आद्यं सर्वव्रतानां तु वैष्णवानां नृपोत्तम!। नरैस्त्रिभिश्च कर्त्तव्यं विष्णोस्तुष्टिकरं परम्। मार्गशीर्षे शुभे मासि शुक्लपक्षे यतव्रतः। प्रथमञ्चैव गृह्णीयाद् द्वादशीं विधिवन्नरः। मनोवाक्कायचेष्टाभिः सुविशुद्धो जितेन्द्रियः। दशम्यां नियतः स्नात्वा प्रणिपत्य जनार्दनम्। हविष्यान्नकृताहारः शुचिर्भूत्वा भवेद्व्रती। उपलिप्ते शुचौ देशे भक्त्येद्दत्तधावनम्। उपोष्यैकादशीं सम्यक् पूजयित्वा जनार्दनम्। सुनामद्वादशीं देव! त्वां भोक्ष्ये परेऽहनि। एवं सकल्पय्य नियमं प्रणम्य गरुड़ध्वजम्। दशम्यामेकभक्ताशी संयतः संवसेन्निशाम्। एकादश्यां ततः प्रातरेकचित्तः समाहितः। पूर्वं संपूजयेत् सूर्य्यं ततो देवं प्रपूजयेत्" वर्षसाध्यमिदम्।

सुरूपद्वादशीव्रतम् उमामहेश्वरसंवादे "पौषमासं तु संप्राप्य पुष्पार्च्चे तु सुपोषयेत्। तस्यां रात्रौ संयतात्मा ध्यात्वा विष्णुं सनातनम्। श्वेता गौरेकवर्णा च तस्या याह्वा गोमयम्। अन्तरिक्षात् प्रपतितं शुचिर्भूतमवास्थितः। तस्याः क्षत्वाऽऽहुतीनाञ्च शतमष्टोत्तरं तिलैः। प्रतीच्यैकादशीं क्षणाष्टोपवासपरायणैः। भाव्यं नियमसंयुक्तैर्विशेषात् संयतात्मभिः। स्नात्वा नद्यां तड़ागे वा विष्णुमेवाथ चिन्तयेत्। सौवर्णकं हरिं क्षत्वा रौप्यं वासः सशक्तितः। तिलपात्रोपरिस्थं च न्यसेत् कुम्भं सद्रव्यकं" इत्यादि। "एवं यः कुरुते देवि! सुरूपद्वादशीव्रतम्। नरो वा यदि वा नारी तस्य पुण्यं शृणुष्व मे। दौर्भाग्यं नश्यते तस्य व्यपि जन्मान्तराजितम्। व्यपि भुव्यस्य सम्पत्तौ जायते कारणान्तरात्। तस्यापि न भवेद् दुःखं वैरूप्यं तस्य जन्मनि"।

सूर्य्यव्रतं विष्णुधर्मोत्तरे "शिरसोवपनं क्षत्वा योऽर्च्चयेत

दिवाकरम् । तपनस्तोषमायाति वह्निष्टोमञ्च विन्दति । अपूपैः सगुडैर्भक्त्या तथा लवणपाचितैः । सहिरण्यैः समभ्यर्च्य वह्निष्टोमफलं लभेत् । सूर्याह्नि यस्तु नक्तार्थी संपूजयति भास्करम् । इष्टान् कामानवाप्नोति सूर्यलोकञ्च गच्छति" । कालान्तरे "यद्विन्यादित्यवारे तु यदि शुक्ला चतुर्दशी । स्नानं विशेषतः कार्य्यं शिवस्य परमात्मनः । अक्षतरागं रोचनया रक्तपुष्पैः प्रपूजयेत् । घृतपिलाज्यं तथा क्षीरं नैवेद्यं परिकल्पयेत्" । पद्मपु० "माघमासमुषित्वा स्नानं कृत्वा दृढव्रतम् । भोजयित्वा यथाशक्त्या ब्राह्मणक्षत्रियान्वितम् । सौभाग्यपदमाप्नोति यथाशक्त्या ब्राह्मणक्षत्रियान्वितम् । वीरारोग्यसुतत्वम् । सूर्यलोकप्रदं नूनं सूर्यव्रतमिदं कृतम्" । भविष्यपु० "कृष्णैकभक्तं हेमन्ते माघमासमतन्द्रितः । मासान्ते च रथं कृत्वा हिरण्यवस्त्रोपशोभितम् । श्वेतैश्चतुर्भिर्युक्तन्तु तुरगैः समलङ्कृतम् । श्वेतध्वजपताकाभिः कृत्वाभरणदर्पणम् । सपुत्रादक्षिणेन कृत्वा भानुं नराधिप ! । विन्यस्य तं रथप्रस्थे संपूज्य सह भूपते ! तं रात्रौ राजमार्गेण शङ्खभेर्यादिभिः स्वनैः । भ्रामयित्वा ततः पश्चात् सूर्य्यायतनमानयेत् । तत्र चायुषिष्टेन प्रदीपाद्युपशोभितम् । प्रेक्षणीयप्रदानेन जागयित्वा शनैः शनैः । प्रभाते स्नपनङ्कृत्वा पयसा वा दधितेन वा । दीनान्धकृपणानाञ्च यथाशक्त्या च दक्षिणाम् । रथं संधाकृनोमेतं भास्कराय निवेदयेत् । भुक्त्वा च ब्राह्मणैः सार्द्धं प्रणम्यार्कं गृहं व्रजेत" । सौरधर्मोत्तरे "शृणु राजन् ! प्रवक्ष्यामि यद्भुक्त्वा व्रतमुत्तमम् । सर्वकामप्रदं पुंसां कुष्ठादिव्याधिनाशनम् । भानोस्तुष्टिकरं राजन् ! भुक्तिमुक्तिप्रदायकम् । तस्य देवस्य वक्ष्यामि व्रतं राजन् ! यविष्ठरम् । पूजार्घ्यं प्राशनं दानं नैवेद्यं शृणु तत्त्वतः । सर्वतीर्थेषु यत् पुण्यं सर्वयज्ञेषु यत्फलम् । सर्वदानेन तपसा यत् पुण्यं समवाप्यते । प्रातःस्नानेन यत् पुण्यं यत् पुण्यं रविवासरे । मार्गशीर्षादिमासेषु द्वादशस्वपि भूपते !। सूर्यव्रतं करिष्यामि यावदर्कं दिवाकर !। व्रतं संपूर्णतां याति त्वत्प्रसादात् प्रभाकर !" इत्यादि ।

सूर्यनक्षत्रव्रतं भविष्यपु० "तस्मादादित्यवारेण सदा नक्तव्रती भवेत् । यदा हस्तेन संयुक्तमादित्यञ्च न वासरम् । उपवसते यदा भक्तिर्भानोरपरि जायते । तदादित्यदिने कृत्वैकभक्तं विमत्सरः । तदारभ्य सदा कार्य्यं नक्तमादित्यवासरे । नक्तमादित्यवारेण भोजयित्वा द्विजोत्तमान् । ततोऽस्तसमये भानो रक्तचन्दनपङ्कजम् । विलिख्य द्वादशदलं पूज्य सूर्य्येति पूर्वतः" । "इत्यनेन विधानेन वर्षमेकन्तु यो नरः । नक्तमादित्यवारेण कुर्य्यात् स नीरुजो भवेत् । धनधान्यसमायुक्तः पुत्रपौत्रसमन्वितः । भुक्त्वा स्थित्वा चिरं कालं सूर्य्यलोकमवाप्नुयात्" ।

सूर्यषष्ठीव्रतं भविष्योत्तरे "माघे मासि सिते पक्षे षष्ठ्यां भानुदिने भवेत् । दन्तधावनपूर्वन्तु षष्ठ्यामुपवसेन्नरः । गोरसर्षफलेनैव स्नायात् कायविशुद्धये । रोचनालक्ष्मगोमूत्रयुक्तश्चन्दनगोमयैः । दधिकाशाश्मरुचैव ललाटे तिलकं न्यसेत् । शिलारुणदलैश्चैव सौभाग्यारोग्यकृद्यतः । कुजं कुङ्कुमताम्रञ्च सिन्दूरं रक्तवाससी । वितरेत् सोपवासा हि नारी मङ्गल्यवर्द्धनम् । विधवा तु विरक्तानि कुमारी शुक्लवाससी । ततः स्नपने भानुं पूजयेत् शीतलोदकैः । अपराह्णे ततः स्नात्वा सुमौनी नियतव्रतः । प्रतिमां स्वपदेङ्गानोः पद्मगन्धेन वारिणा । रक्तचन्दनपङ्केन कुङ्कुमेन समालभेत् । अगस्त्यकुसुमैरक्तैः करवीरैः प्रपूजयेत्" ।

सूर्यस्वप्नव्रतं विष्णुधर्मोत्तरे "चैत्रे शुक्लस्य पक्षे तु सप्तम्यां षष्ठ्याम्पोजितः । स्वप्नस्यार्चनं कुर्य्याद्देवदेवस्य भूपते !। वह्निःस्नानं नरः कृत्वा गोमयेनोपलेपितः । लेपयेत्स्थण्डिलं सम्यक् ततो गौरसदा स्मृत !। तत्राष्टदलकमलं वर्णकैस्तु समं लिखेत्" इत्यादि ।

सोमद्वितीयाव्रतं पद्मपु० "दद्यात्तिलद्वितीयायां विप्रोद्दिश्य भोजनम् । समाप्ते गोप्रदो याति विप्राय शिवमन्दिरम् विप्राय विप्रोद्दिश्य भोजनं दद्यादित्यन्वयः । सोमश्चात्र देवता सोमव्रतमिदं व्रतमिति सोमस्य देवतात्वं गम्यते । "कल्पान्ते राजराजस्य सोमव्रतमिदं व्रतम्" ।

सोमव्रतं कालोत्तरे "चन्द्रास्त्यां रोहिणी स्पृष्टा चन्द्रव्रतञ्चरेत् । शिवं सम्पूज्य विधिवत् स्नानैः पञ्चामृतादिभिः । विलेपनन्तु चन्द्रेण चन्दनेन तु वा हितम् । शुक्लवस्त्रैस्तथा पुष्पैः पूजयेत् परमेश्वरम् । नैवेद्यं क्षीरकुल्मान्तु सितशर्करया युतम् । प्राशनं चन्दनेनैव रात्रौ जागरणं हितम् । आयुःकामैः सदा कार्य्यं कीर्त्तिश्रीवाधनं हितम् । इति चन्द्रव्रतं नामोदारदानेन जायते" । कालिकापु० "वारे सोमस्य वाऽस्यां पक्षोभौ सोमयेत् । विधिना चन्द्रचूडाङ्के प्राज्याज्ञेन सचन्द्रकम्" । पक्षोभौ शुक्लोभयत्र पक्षे नियमोऽयं सोमवारयोः । अयं

मभावं विचिन्तितं, प्राप्यान्नं आत्मबन्धुसमम् । "दक्षिणार्द्धं हरन्त्यावेहामोर्द्धन्तु हरिं विभुम्" । इत्यादि "अष्टम्यां पितरावर्च्च्य विधिनानेन सुव्रत !" । पितरौ मावेव देवीदेवौ "वत्सरन्तु तदन्ते तु कर्त्तव्यं यत्त्विवोधत । प्राशुक्लविधिना पूज्य स्थितं पीतं युगद्वयम् । दद्यादितानके चैव पताकाघण्टिके तथा । भूषणञ्चारयेच्चापि दीप्यष्टौ सुशोभिनौ" । भविष्यपु० "ताम्रपात्रं पयःपूर्णं कृत्वा तदुपरि न्यसेत् । प्रक्षालितं गन्धपुष्पार्चितं सदृत् । शिवभक्ते द्विजे दद्याद्भोजयित्वा विधानतः । प्राच्यां सप्तर्षिते सोमे प्रतीच्यान्तु रवौ गते । पौर्णमास्यां तु वैशाख्यां घटपात्रं शिवाय तु । प्रीयतां मे महादेवः सोममूर्त्तिर्जगत्पतिः । तस्मै विप्राय तत्पात्रमर्चयेन्नमितः शनैः । एवं सोमव्रतं नाम कृत्वा सोमालिकं व्रजेत्" ।

सोमवारव्रतं भविष्योत्तरे "तद्दक्षिताञ्च संप्राप्य सोमवारं विचक्षणः । नक्तोक्तविधिना सर्वं कुर्य्यात् पूजादिकं विधेः । सप्तमे तु ततः प्राप्ते दत्त्वा ब्राह्मणभोजनम् । कांस्यपात्रे तु संस्थाप्य सोमं रजतसन्निभम्" । सोमरूपन्तु चतुर्दशीसमहाराजव्रतोक्तं वेदितव्यम् "घृते कृत्वा सोमराजं श्वेतवस्त्रैः प्रपूजितम् । पादुकोपानच्छत्रकमाजनार्द्धनसंयुतम् । होमं कृतिलैः कुर्य्यात् सोमनाम्ना तु मन्त्रवित् । समिधोऽष्टोत्तरशतमष्टाविंशतिरेव वा । होतव्या मधुसर्पिर्भ्यां दत्ता चैव गुरवे तु" इत्यादि ।

सोमाष्टमीव्रतं स्कन्दपु० "वारे सोमस्य चाष्टम्यां पक्षयोरुभयोरपि । विधिवच्चन्द्रचूडाभं सोमं सम्पूजयेन्निशि" । सोमं उमासहितम् रूपन्तु लक्ष्मणस्यैव व्याख्यातम् । "तिलसर्षपकल्केन स्नातोऽमलजलाशये । शुद्धे वायतने वापि शिवैकाग्रितमानसः । ब्रह्मकूर्चेन देवेशं प्राशयित्वा ततो व्रती" । ब्रह्मकूर्चं पञ्चगव्यम् "दामादियामसन्धौ च देवं देवीं तथार्चयेत् । चन्दनेनेन्दुयुक्तेन दक्षिणार्द्धं विलेपयेत्" इत्यादि ।

सौख्यव्रतं भविष्यपु० "एकादश्यां माघमासे चतुर्दश्यष्टमीषु च । एकभक्तेन यो दद्यात् चेलकाज्यगुडानि च । उपानद्यौ कम्बलश्च पात्रं घृतं तथोदकम् । करपात्रादिकं वत्स ! यथाशक्त्यार्थिने नृप ! । आर्त्तत्राणपरो नित्यमश्वमेधफलं लभेत् । एतत्सौख्यव्रतं नाम आर्त्तत्राणकरं वरम्" ।

सौगन्ध्यव्रतं पद्मपु० "वर्जयेद्यस्तु पुष्पाणि हेमलम्बिगिरे व्रती । पलत्रयञ्च फाल्गुन्यां कृत्वा गन्धाढ्यं कारुनम् । दद्याद्वैकालवेलायां प्रीयेतां शिवकेशवौ । शिरः सौमन्यजननं, सदानन्दप्रदं नृणाम् । कृत्वा परं पदं याति सौगन्ध्यव्रतमुत्तमम्" ।

सौभाग्यतृतीयाव्रतं वराहपु० "ततः परं महाराज ! सौभाग्यकरणं व्रतम् । शृणु देवासु सौभाग्यं स्त्रीषु सम्भवति जायते । फाल्गुनस्य तु मासस्य तृतीया शुक्लपक्षतः । उपोषितेन नक्तेन शुचिना सत्यभाषिणा । सम्पूजयेच्च हरिं पूज्य रुद्रं वा उमया सह" इत्यादि । गरुडपु० "फाल्गुनादितृतीयायां व्रतं यस्तु वर्जयेत् । समाप्तौ शयनं दद्यात् घृतं सोपस्करान्वितम्" । समाप्ते व्रतवरान्ते "संपूज्य विप्रमिथुनं शयनी प्रीयतामिति । गौरीलोकप्रदं नित्यं सौभाग्यव्रतमुच्यते" ।

सौभाग्यव्रतं भविष्यपु० "पौर्णमास्यां तु यः सोमं पूजयेद्भक्तिसागरः । सौभाग्यञ्च लभेत्तस्य इति मे निश्चिता मतिः । मूलमन्त्राः कर्त्तव्याश्चाभिरक्षन्त्वाद्य कीर्त्तिताः" इत्यादि ।

सौभाग्यशयनव्रतं मत्स्यपु० "तथैवान्यत् प्रवक्ष्यामि सर्वकामफलप्रदम् । सौभाग्यशयनं नाम यत् पुराविदितं विदुः" । इत्युपक्रमे "वसन्तमाधवाद्यां तृतीयायां विदुः" । शुक्लपक्षस्य पूर्वाह्णे तिलैः स्नानं समाचरेत् । तस्मिन्नहनि सा देवी किल विश्वासना सती । पार्थिवैश्चन्द्रकैः मन्त्रैरुदूढा वरयर्षिणी । तया सहैव देवेशं तृतीयायां समर्चयेत्" इत्यादि । "एवं संवत्सरं यावत् तृतीयासां सदा मनो ! । प्राश्नने दानमन्त्रे च विशेषोऽयं निबोध मे । गोघृतक्षीरदध्याद्यं शाकं बैल्वपत्रं शाके गोमयं पुनः । व्यञ्जे मन्दारकुसुमं बिल्वपत्रं घृते हुतम् । शाकखे दधि सम्प्राश्य नक्तञ्च कृतोपवासः । क्षीरमाश्वयुजे मासि शार्करिके पृथुदाज्यं दधिसिक्थं हुतम् "मार्गशीर्षे तु गोशृङ्गं पौषे सम्प्राशयेद्धुतम् । माघे कृष्णतिलांश्चाहुत पञ्चगव्यञ्च फाल्गुने । लक्षिता विजया भद्रा भवानी कुमुदा शिवा । वासुदेवी तथा गौरी भद्रकाली कमला सती । उमा च दानकाले तु प्रीयतामिति कीर्त्तयेत् । मन्त्रकाश्लोकमन्त्रकटमोत्पन्नमालतीम् । कुसुमं करवीरञ्च वाणमल्लानकुङ्कुमम् । सिन्दुवारञ्च सर्वत्र माघेषु क्रमतः हुतम्" इत्यादि ।

सौभाग्यसङ्क्रान्तिव्रत स्कन्दपु० "कथ्यान्यां प्रवक्ष्यामि सौभ

भाग्यसंक्रान्तिसुत्तमाम् । शृणु नारद ! यत्नेन धनैश्वर्यप्रदायिनीम् । अयने विष्णवे युक्ते अतीपातेन भानुना । संक्रान्तिदिवसे कुर्यादेकभक्तं विमत्सरः । पूर्वेद्युरानुभव्यं तथा चैव हुतवाहने । सौभाग्याष्टकसंयुक्तं वस्त्रयुग्मं सयोषिते । विप्राय वेदविदुषे भक्त्या तत् प्रतिपादयेत् । एवं संवत्सरे पूर्णे कृत्वा ब्राह्मणभोजनम् । पर्वतं लवणं कृत्वा यथाविभवसारतः । काञ्चनं कमलं कृत्वा भास्करस्यैव कारयेत् । गन्धपुष्पादिना पूज्य विप्राय प्रतिपादयेत् ।

सौभाग्यावाप्तिव्रतं विष्णुधर्मोत्तरे "माघ्यान्तु समतीतायां प्रतिपत्प्रभृतिक्रमात् । पटे वा यदि वाङ्गुर्यां कृत्वं संपूजयेत् सदा । पूर्वोक्तं सकलं कुर्याद् विधिं चात्र नराधिप !" । पूर्वोक्तमिति चैत्रमासस्वस्तिरूपावाप्तिव्रतोक्तमित्यर्थः । "नित्यं समाचरेत् स्नानं तथा गन्धप्रियङ्गुणा । चरुं प्रियङ्गुणा कुर्यात्तोमं कुर्याद् प्रियङ्गुणा" । प्रियङ्गुः कङ्गुरुटगन्धद्रव्यम् "फालगुन्यान्तु ततो दद्यात् विरामोपोषितो नरः । वस्त्रे च दैवे नृप ! कङ्गुभाक्ते सौहृद्य पात्रञ्च तथैव कांस्यम् । सौभाग्यदं ह्येतदतु समन्ते व्रतं ह्येतत्कथितं त्वयेरितं ।" ।

सौरनक्षत्रव्रतं त्वसिंहपु० "हस्तयुक्ते वार्कदिने सौरनक्षत्रव्रतं चरेत् । स्नात्वाभ्यर्च्य तु विप्रान् वै विरोगो जायते नरः" ।

सौरसप्तमीव्रतं भद्रपु० "यत्रोपमासी सप्तम्यां समाप्ते हेमपङ्कजम् । गावैव शक्तितोदद्याद्वोमान्ते घटसंवृताः । एतत् सौरव्रतं नाम सर्वलोकसदायकम्" ।

स्त्रीपुत्रलाभावाप्तिव्रतं भविष्यपु० "एकभक्तेन या नारी ह्यार्चिकन्तु जपेन्नृप ! । क्षमार्चिंसादिनियमैः सञ्जाता ब्रह्मचारिणी । गुडान्नमिश्रं शाल्यन्नं भास्कराय निवेदयेत् । पुष्पाणि करवीराणि शुक्लानि सान्द्रमादरात् । अग्न्याञ्याथ भक्त्या वा उपवासरतिर्भवेत् । पञ्चयोरुभयोरेव अक्षया परयान्वितः । इन्द्रनीलप्रतीकाशैर्विमानैः सार्वकालिकैः । नारी युगशतं भोग्यं सूर्यलोके महीयते वर्षाण्यष्टसहस्रमिदम् ।

सौख्यव्रतं पद्मपु० "आषाढादिचतुर्मासान्यक्तं वत्सरेश्वरः । पारिते च पुनर्दद्यात्तिलतैलयुतं घटम् । भोजनं पायसान्नेन च याति भवनं विभोः । लोकप्रीतिकरं ह्येतत् सौख्यव्रतमिहोच्यते" ।

हयपञ्चमीव्रतं शालिहोत्रे "अश्वराजस्तताज्ञातो व्रतरंकृा मनोजवः । उच्चैःश्रवाः पूजनीयश्चैवकुश्च पञ्चमी । तत्रैव पूजा मन्त्रास्तुरङ्गाश्चान्तु बान्धवाः । पत्रवाग्धराः केचित् केचिद् पत्रैश्च संयुताः । भौमश्चित्ररथश्चैव विख्यातः सर्वविदयम् । तथा सालिशिराः सौसानू प्रद्युम्नश्च महायशाः । नारदश्च कलिन्दश्च गन्धर्वश्च हाहा हूहूः । सुवाक्सुस्वरुश्चैव तथा चित्ररथः प्रभुः । चित्राङ्गदश्च विख्यातश्चित्रसेनश्च वीर्यवानू । सिद्धपूर्णश्च तदरी पर्णाशश्च महायशाः । ब्रह्मचारी रतिगुणः सुपर्णोऽतिबलश्चयः । विश्वावसुः सुरेन्द्रश्च गन्धर्वोऽतिपराक्रमः । एत्येते पूजनीयाः स्युगीतैरुच्चावचैः शुभैः । मोदकैः पोलिकाभिश्च परमान्नेन चाक्षतैः । दत्वा गुडेन पयसा शालिपिष्टेन भूरिशः । धूपैर्माल्यैस्तथा दीपैर्द्विजानां खलिवाचनैः । एवं हि पूजिताः सम्यक् हरनाथा हि बान्धवाः । बलमायुः प्रयच्छन्ति संग्रामेष्वपराजयम् । आरोग्यं परमा पुष्टिस्तथैव च विधीयते" ।

हरव्रतीयाव्रतं स्कन्दपु० "माघे शुक्लतृतीयायामुपवासन्तु कारयेत् । दाम्पौ हरमाराध्य गौरीयागञ्च मण्डपे । अथ पद्मं लिखेत् पद्मं मण्डपे मुनिपुङ्गव ! । उमामहेश्वरं तत्र पूजयेत् समसाहितः । पूर्वपत्रे न्यसेद् गौरीमाज्येन ललितां न्यसेत् । दक्षिणे तु उमां नाम नैर्ऋत्यां च श्रधां तथा । पश्चिमे वामदेवीन्तु वायव्यां मूलगौरिकाम् । उत्तरे तु सुभगान्तु ऐशान्यां गिरिजां तथा । उमामहेश्वरं मध्ये गन्धपुष्पैः प्रपूजयेत् । भक्ष्कारस्यैव संस्थाप्य तण्डुलैः परिपूरयेत् । एवं कृत्वा विधानेन मुने ! वर्षचतुष्टयम् । आराधनन्तु देव्याश्च सौभाग्यजननं परम् । उद्यापनं ततः कुर्यात् तस्मिन्नेव ततो दिने । उमामहेश्वरं हैमं कारयेत् पद्मके स्थितम् । वस्त्रैर्गन्धैश्च धूपैश्च दीपमालादिभिस्तथा । भक्ष्यैस्तथाविधैः सम्यक् पूजयेद् भक्त्या ततो मुने ! । तदर्द्धं वा समार्थेन पूजयेत् द्विजसत्तमम् । माल्यैश्च गुरवे दद्यात् वस्त्रालङ्कारसंयुताम् । मिथुनानीह चत्वारि भोजयेत् समसाहितः । उमामहेश्वरं हैमं दत्वा भक्त्या उमापयेत् ।

हरव्रतं भविष्यपु० "कृत्वा पूजितो देवी गोप्रतामरथो हरः । स्नानं ददाति विपुलां कान्तिं जातिं बलं तथा" । गोप्रतामरथः चक्षुःश्रवोभूषः शिव इत्यर्थः । "कृत्वा हरः स्नानदश्चैव पापहाः च प्रपूजितः । मूलमन्त्रः जपेन्नामि-

रङ्गमन्त्राश्च कीर्त्तिताः। पूर्ववत् पञ्चपत्रस्थः कर्त्तव्यश्च-तिथोदय। गन्धपुष्पोपहारैश्च यथाशक्ति विधीयते"। हरिव्रतं वराहपु० "त्रैलोक्यगामिनी देवी लक्ष्मीस्तेऽस्तु सदा प्रिया। द्वादशी च तिथिस्तेऽस्तु कामरूपी च जायते"। हरिं प्रतीदं वचनम् "हताशनो भवेद् यस्तु द्वादश्यां तत्परायणः। स स्वर्गवासी भवति पुमान् स्त्री ना विशेषतः"।

हरिकालीव्रतं भविष्योत्तरे "शुक्ले भाद्रपदस्यैवं तृतीयायां समाचरेत्। रत्नधान्यैः सवैदूर्यैः कृत्वा विहितमण्डले। खर्जूरैर्नारिकेलैश्च फलैश्च मधुरैस्तथा। मातुलाङ्गकुसुमैर्धान्यकैर्जम्बुकैस्तथा। गन्धैः पुष्पैः फलैर्धूपैर्नैवेद्यैर्मोदकादिभिः। प्रीणयित्वा समासाद्य पञ्चरात्रेण भाविता। घण्टावाद्यादिभिर्गीतैः शुभैर्दिव्यैः कथानकैः। पूजनीया महाराज! मन्त्रेणानेन भक्तितः। हरेर्नित्यं सुतत्त्वे! हरिकालि! हरिप्रिये!। सर्वदा शङ्खमूर्त्तिस्थे! प्रणतार्त्तिहरे! नमः। इत्थं संपूज्य तां देवीं दद्याद्विप्राय दक्षिणाम्। कृत्वा जागरणं रात्रौ प्रभाते किञ्चिदुद्यते। रात्रौ सुवासिनीभिश्च सा नेया तु जलाशये। ततो जलाशये रम्ये मन्त्रेणैव विसर्जयेत्। अर्चिता च त्वया भक्त्या गच्छ देवि! सुरालयम्। मम दौर्भाग्यनाशाय पुनरागमनाय च। एवं यः पाण्डवश्रेष्ठ! हरिकालीव्रतं चरेत्। प्रतिवर्षं विधानेन नारी वा भक्तितत्परा। नीत्वा यत् फलमाप्नोति तदन्येन न लभ्यते"।

परिशिष्टम्।

आमलकैकादशीव्रतं स्कन्दपु० प्रभासख० "फाल्गुनस्य सिते पक्षे एकादश्यामुपोषितः। स्नात्वा नद्यां तडागे वा वाप्यां कूपे गृहेऽपि वा। गत्वा गिरौ वने वापि यत्र सा प्राप्यते शिवा। क्षीरोदे मथ्यमाने तु यदा वृक्षः समुत्थितः। आमर्दनेवदैत्यानां तेन आमलकी स्मृता। तस्मिन् वृक्षे स्थिता लक्ष्मीः सदा पितृगृहे नृप!। शिवालक्ष्मीस्थितो वृक्षः सेव्यते सुरसत्तमैः। देवैर्ब्रह्मादिभिः सर्वैर्वृक्षोऽसौ वैष्णवः कृतः। तत्र गत्वा हरिः पूज्यो वृक्षमूलेऽथ वा शिवा। पूज्या पुष्पैः शुभैरात्रौ कार्य्यं जागरणं नरैः। अष्टाधिकशतैः कार्य्या फलैस्तस्याः प्रदक्षिणा। प्रदक्षिणीकृत्य ततो भोक्तव्यं तु फलं नरैः। करकं जलपूर्णं तु कर्त्तव्यं पातकंयुतम्। हविष्यान्नन्तु कर्त्तव्यं कथाश्रवणतत्परैः। मुच्यन्ते देहिनः पापैः कलिजैः कायसम्भवैः। देहान्ते ये नराः पूर्वं पूज्यन्ते हरिमन्दिरम्"।

एतानि व्रतानि प्रायेण हेमाद्रिव्रतखण्डोक्तानि प्रसङ्गागतान्यपि कानिचिदुक्तानि। अन्यान्यपि व्रतार्कोदावुक्तानि द्रष्टव्यानि नैमित्तिकानि प्राजापत्यादीनि व्रतानि तु तत्तच्छब्दे उक्तानि द्रष्टव्यानि। [३]विस्तारे च अमरः।

व्रतति स्त्री व्रत-अति पृषो० वा ङीप्। १लतायाम्।

व्रतभिक्षा स्त्री व्रताङ्गं भिक्षा। उपनयनकालविहितभिक्षायां तद्विधिः संस्कारतत्त्वे दर्शितो यथा "अथ भैक्ष्यञ्चरति"। अथ शब्दस्तूष्णीमादित्योपस्थानमग्निप्रदक्षिणञ्च शंसति। "प्रतिगृह्योपसितं दण्डमुपस्थाय च भास्करम्। प्रदक्षिणं परीत्याग्निं चरेद्भैक्ष्यं यथाविधि" इति मनुवचनात्। "भिक्षामटेहं भैक्ष्यं नटरति व्याहरति इत्यर्थः। "मातरमेवाग्रे ये चान्ये वृद्धा वा सन्निहिताः स्युः"। याचते इत्यध्याहार्य्यम्। वृद्धाः स्निग्धहृदयाः स्वादयः तथाच मनुः "मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्। भिक्षेत भिक्षां प्रथमं याचैनं नावमानयेत्"। सन्निहितास्तद्देश्यास्तु प्रतिगृह्य गत्वा। (भवति! भिक्षां देहीति) ब्राह्मणभिक्षा प्रयोगः। तथा च मनुः "भवत्पूर्वं चरेद् भैक्ष्यमुपवीतो द्विजोत्तमः। भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम्"। "आदिमध्यावसानेषु भवच्छब्दोपलक्षिता। ब्राह्मणक्षत्रियविशां भैक्ष्यचर्या यथाक्रमम्" इति याज्ञवल्क्यवचनाच्च। आचार्य्याय भैक्ष्यं प्रणिपत्य वेदयति (समर्पयति) भोरिति"। "आचार्य्याय निवेद्य प्रतिगृह्यीयादिति" वृद्धान्तरवचनात्। भैक्ष्यं भोरिति निवेदनमन्त्रः। भैक्ष्यस्य संस्कारार्थत्वात् आचार्य्याय निवेद्य स्वयं तदेव भुञ्जीत। तथा च मनुः "समाहृत्याथ तद्भैक्ष्यं यावदर्थममायया। निवेद्य गुरवेऽश्नीयात् आचार्य्यः प्राङ्मुखः शुचिः"। आचार्य्यस्य माणवकाय भैक्ष्यं प्रदाय कर्म्मशेषं समापयेत्"।

व्रतसंग्रह पु० ६त०। व्रतस्य कृष्णार्थं लतदीक्षायाम्। हेमच०

व्रतादेश पु० व्रतमादिश्यतेऽत्र आ+दिश आधारे घञ्। उपनयने तत्र हि आचार्य्येण माणवकस्य व्रतमादिश्यते।

व्रतिन् पु० व्रतमस्यास्ति इनि। १व्रतधारके २यजमाने च। अमरः।

व्रश्च छेदे तु०पर०सक०अदित् वेट्। वृश्चति अव्रश्चीत् अव्राक्षीत्।

व्रश्चन पु० वृश्च्यतेऽनेन व्रश्च-ल्युट्। (छेनि) १खर्णादिच्छेदनार्थे शस्त्रभेदे अमरः। भावे ल्युट्। २छेदने न० अमरः।

व्रात पु० वृ-अतच् पृषो०। समूहे अमरः।

व्रातीन त्रि० व्रातेन चरति ख। संघजीविनि। "व्रातीनव्या लटीप्राक्तः" भट्टिः।

व्रात्य पु० व्रातात् समूहात् च्यवति यत्। अव्यवहार्ये, संस्कारहीने, जातिमात्रोपजीविनि, "अत ऊर्द्धं त्रयोऽप्येते यथाकालमसंस्कृताः। सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः" मनुः। तत्र प्रायश्चित्तं मिता०उक्तं यथा तत्र व्रात्यतायां मनुनेदमुक्तम् "येषां द्विजानां सावित्री नानूच्येत यथाविधि। तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेदिति"। यच्च यमेनोक्तम् "सावित्रीपतिता यस्य दृश्यन्ते पञ्च च। सशिखं वपनं कृत्वा व्रतं कुर्य्यात् समाहितः। एकविंशतिरात्रञ्च पिबेत् प्रकृतियावकम्। हविषा भोजयेच्चैव ब्राह्मणान् सप्त पञ्च वा। ततो यावकशुद्धस्य तस्योपनयनं स्मृतम्" इति। तदुभयमपि याज्ञवल्क्यीयमासपयोव्रतविषयम्। यत्तु वशिष्ठेनोक्तम् "पतितसावित्रीक उद्दालकव्रतञ्चरेत्। द्वौ मासौ यावकेन वर्त्तयेन्मासं पयसा पञ्चसामिज्यायाष्टरात्रं घृतेन षड्रात्रमयाचितेन त्रिरात्रमब्भक्षोऽहोरात्रमुपवसेदश्वमेधावभृथस्नायी वा यजेतेति"। तत्रेयं व्यवस्था यस्योपनयने आपद्भावेन तत्कालातिक्रमस्तस्य याज्ञवल्क्यीयव्रतानामन्यतमत् शक्त्यपेक्षया भवति अनापद्यतिक्रमे तु मानवं त्रैमासिकम्। तत्रैव षष्ठदशवर्षादूर्द्धमपि कियत्कालातिक्रमे उद्दालकव्रतम् व्रात्यस्तोमो वेति। येषान्तु पित्रादयोऽप्युपनीतास्तेषामापस्तम्बोक्तम् "यस्य पिता पितामहोवानुपनीतो स्नातान्तस्य संवत्सरं त्रैविद्यकं ब्रह्मचर्य्यम्। यस्य प्रपितामहादिनोपनीतस्मर्यते उपनयनस्य द्वादश वर्षाणि त्रैविद्यकं ब्रह्मचर्य्यमिति"।

व्रात्यस्तोम पु० व्रात्ययोग्यः स्तोमः। यज्ञभेदे "स च यज्ञषष्ठविधः" कात्या० श्रौ० २२।४।१ सूत्रादौ दर्शितो यथा

"व्रात्यस्तोमाश्चत्वारः" सू०"व्रात्यस्तोमसंज्ञकाश्चत्वारः क्रतवो भवन्ति व्रात्याः प्रसिद्धा एव त्रिपुरुषं पतितसावित्रीकाः। प्रायश्चित्तार्थत्वाच्च लौकिकेऽग्नौ भवन्ति न श्रौताग्नौ। तैराधानं प्रयुज्यते अतदङ्गत्वात् तदुक्तमाधानं च व्यपदेशाय" भा०।

व्रीड छेपे दिवा० पर० सक० लज्जायां अक० सेट्। व्रीड्यते

व्रीड पु० व्रीड-घञ्। लज्जायाम्। अ। तत्रैव स्त्री अमरः।

व्रीस वधे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। व्रीसयति ते व्रीसति।

व्रीहि पु० व्री-हि किच्च। १धान्यभेदे २आशुधान्ये च अमरः। तद्भेदादिकं भावप्र० उक्तं यथा

"वार्षिकाः कण्डताः शुक्लाः व्रीहयश्शिरपाकिणः। कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि। शालामुखो जतुमुख इत्याद्याः व्रीहयः स्मृताः। कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतण्डुलः। पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते। कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्डक उच्यते। शालामुखः कृष्णशूकः कृष्णतण्डुल उच्यते। लाक्षावर्णं मुखं यस्य ज्ञेयो जतुमुखस्तु सः। व्रीहयः कथिताः ग्राम्ये मधुरा वीर्य्यतो हिताः। अल्पाभिष्यन्दिनो बद्धवर्च्चस्काः षष्टिकैः समाः। कृष्णव्रीहिवरस्तेषां तस्मादल्पगुणाः परे"। ततः कर्म्मधा० व्रीह्यादिगणः। व्रीहिन् व्रीहिक तद्विशिष्टे त्रि० विक्षा० पुराड्०। अधिके अवयवार्थे अण्। व्रैह तदवयवे।

व्रीहिकाञ्चन पु० व्रीहिषु काञ्चनं तद्रूपमस्यस्य अच्। मसूरे त्रिका०। [पानि) क्षुपभेदे राजनि०।
व्रीहिपर्णी स्त्री व्रीहीणामिव पर्णान्यस्याः ङीष्। (शाल-
व्रीहिभेद पु० ६त०। १धान्यभेदे (चिना) अमरः। २धा-
न्यविशेषे च। [पुरोडाशे। अन्यत्र वित्वा० अण्।
व्रीहिमय पु० व्रीहेर्विकारः पुरोडाशः मयट्। व्रीहिविकारे
व्रीहिराजिका पु० व्रीहिषु राजिकाकारे अस्यस्याः अच्।
कङ्गुधान्ये (काङ्नी) मेदि०।
व्रीहिश्रेष्ठ पु० व्रीहिषु श्रेष्ठः। शालिधान्ये राजनि०।
व्रीह्यगार न० ६त०। धान्यस्थापनस्थाने कुशूले त्रिका०।
व्रीह्यादि पु० विकारार्थे इनिठनूप्रत्ययनिमित्ते पा०ग०सू०
उक्ते शब्दगणे स च "व्रीहि माया शाला शिखा माला
मेखला केका अष्टका पताका चर्मन् कर्मन् वर्मन् दंष्ट्रा
संज्ञा वड़वा कुमारी नौ वीणा बलाका यवखद
नौकुमारी (श्रीषोन्नञ्)" "नौकुमार्योरिकार्थौ गवे द्विधा
पाठः" सि०कौ०। "अत इनिठनौ" व्रीह्यादिभ्यश्च" पा०व्रीहौ
व्रीहिकः। "न च सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते
किं तर्हि शिलासालासंज्ञादिभ्य इनिः यवखदादिभ्यः
ठन्। अन्येभ्य उभयम्" सि०कौ०।
व्रुङ् संवरणे सक० संघाते मज्जने च अक० चु० कुटा०।
पर० सेट्। व्रुङति अव्रुङीत्।
व्रूस वधे वा चु० उभ० पक्षे स्वा० पर० सक० सेट्। व्रूस-
यति ते व्रूसति। [चेत्यादौ।
व्रैहेय त्रि० व्रीहीणां भवनं चेत्रम् ढक्। व्रीहिभवनयोग्ये
व्लौ गतौ इतौ च क्र्यादि० पा० प०सक० अनिट्। (वि)व्लो-
नाति अव्लैषीत्।

परिशिष्टम्।

व्रज्ये पु० सात्यवदप्रसिद्धे यज्ञभेदे सि०कौ०।
व्रिजया स्त्री अच्यादिषु मातृषु मातृभेदे
व्रिजयाभिनन्दन पु० कलियुगीयशककर्त्तृ नृपभेदे शकशब्दे
दृश्यम्।

इति श्रीताराद्यतर्कवाचस्पतिभट्टाचार्य्य संकलिते वाचस्पत्याभिधाने वकारादिशब्दार्थसङ्कलनम्।

श

शकारः जगद्वर्णभेदः। अस्योच्चारणस्थानं तालु। तस्योच्चारणे आभ्यन्तरप्रयत्नः विवृतम्। बाह्यप्रयत्ना विवारः श्वासावोषा महाप्राणश्च। अस्य ध्येयस्वरूपम् "शकारं परमेशानि! शृणु वर्णं शुचिस्मिते!। रक्तवर्णं प्रभाकारं स्वयं परमकुण्डली। चतुर्वर्गप्रदं देवि! शकारं ब्रह्मविग्रहम्। पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं प्रिये। रजःसत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा। त्रिशक्तिसहितं वर्णमात्मादित्तत्त्वसंयुतम्" कामधेनुतन्त्रम्। अस्य वाचकशब्दा योगिनीतन्त्रोक्ता यथा "शः शव्यश्च कामरूपी कामरूपो महानतिः। सौख्यनामा कुमारोऽस्मि श्रीकण्ठो वृषकेतनः। वृषघ्नः शयनं शान्ता सुभगा विस्फुलिङ्गिनी। मृत्युर्देवो महालक्ष्मीर्मेहेन्द्रः कुलकौलिनी। बाडुर्हंसो वियद्वक्त्रं हृदनङ्गोऽङ्कुशः खनः। वामोरुः पुण्डरीकाक्षः कान्तिः कल्याणवाचकः"। मालतीकाव्यासेऽस्य हृदादिदृश्यकरे न्यासुता। काव्यादौ प्रथमप्रयोगे सुखं फलम्। "शः सुखं शस्तुखेदम्" इ० च० टी०। [शब्दर०।
श न० श्री-ड। १मङ्गले त्रिका०। २महादेवे, ३शस्त्रे च पु०
शंयु त्रि० शमस्यस्य शम्+युस्। शुभान्विते त्रिका०।
शंव त्रि० शमस्यस्य शम्+व। १शुभयुक्ते त्रिका०। २मूलवल्कोद्भे ३वज्रे च पु० धरणिः।
शंवर न० शंवृणोति शम्+वृ-अच्। जले अमरः।
शंसा स्त्री शमुस-अ। १वाक्ये। २वाञ्छायां मेदि।
३प्रशंसायाञ्च शब्दर०। [१कथिते ४स्तुते च।
शंसित त्रि० शमुस-क्त। १निश्चिते हला०। २हिंसिते।
शंस्य त्रि० शमुस-ण्यत्। १शंसनीये २स्तुत्ये ३वाच्ये च।
शक त्रासे अक० संशये सक० भ्वा० आ० सेट् इदित्। शङ्कते अशङ्किष्ट।
शक क्षमायां सक० दि० उभ० सेट्। शक्यति ते अशाकीत्-अशकीत् अशकिष्ट "शक्योऽस्य मन्युर्भवता विनेतुम्" रघुः।
शक सामर्थ्ये स्वा० प० अक० इरित् वेट्। शक्नोति अशकत्-अशाक्षीत्। पुषादित्वे के तेन अशकदित्येव।
शक पु० शक-अच्। १जातिभेदे स च ब्रात्यक्षत्रिये १६०७पृ० दृश्यम्। २देशभेदे स्वराज्यावधिवत्सराङ्कप्रवर्त्तके शब्दभेदे ४तदीये वत्सरे च। कलियुगे शककर्त्तृषु शब्दसु युधिष्ठिरः विक्रमादित्यः शालिवाहनश्चेति तथोक्तेः

विजयाभिनन्दनादयस्तयो भविष्यन्ति । तथा हि कलौ षट् शककर्त्तारः तल्लक्षणादि ज्योतिर्वि० १०अ० उक्तं यथा "कलौ भविष्यन्त्यथ भारतावनौ महीभुजो बाह्लमतोऽभ्यनेकशः । शकास्तथैषामभिषेचनादिकं स्थितं यदोदीरितकालसाधितम् । धराधिभूमिस्तुशकादिजातिजस्तदासनस्थोऽभिजनैर्नमस्कृतः । सुतः स राजाधिजनैः प्रतिष्ठितो न सन्तभेदाद्यभिषेचनोचितः । निहन्ति यो भूतलमग्रहले शकान् समस्तकोऽजदलप्रमान् कलौ । स राजपुत्रः शककारको भवेत् नृपाधिराज्ये हृतशाकर्त्तृ हा" । (तत्र शककारकस्य विक्रमादित्यस्य हननात् शालिवाहनस्य शककर्त्तृत्वम्) "युधिष्ठिरो विक्रमशालिवाहनौ नराधिनाथौ विजयाभिनन्दनः । एमेऽतु नागार्जुनभेदिनौविभुर्वलिः क्रमात् षट् शककारकाः कलौ" । तत्प्रवृत्तिकालांस्तत्राह "युधिष्ठिरात् वेदयुगाम्बरानयः (३०४४) कलस्यविन्दे (१२५) ऽम्बरखाष्टभूमयः १८००० । ततोऽयुतं १०००० लक्षचतुष्टयं क्रमात् धराद्रगष्टाविति (८२१) शाकवत्सराः । युधिष्ठिरोऽभूद्भुविभल्लिनापुरे तथाब्जयिन्यां पुरि विक्रमाह्वयः । शालेयभूमोष्टति शालिवाहनः सुचित्रकूटे विजयाभिनन्दनः । नागार्जुनो रोहितके त्रिपौ बलिर्भविष्यतीन्द्रो भद्रुकच्छपत्तने । क्रमप्रवृत्तिस्तदनन्तरं भवेत्तदा भविष्यन्त्यवनीष्टतोऽकैतः" । अत्र युधिष्ठिरात् प्राक् कलौ शककर्त्तन्तराभावात् कलियुगारम्भकालादेव तस्य शककालं उक्तः वराहसंहितायां १२ अ० तु तद्राज्यावधित एव तच्छककाल इत्यभिप्रायेण "आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ । षड्द्विकपञ्चद्वियुतः (२५२६) शककालस्तस्य राज्ञश्च" तेन कलेः (५१८) वर्षेषु गतेषु युधिष्ठिरस्य राज्यप्रवृत्तिः । षट्कर्षवत्सरसमष्टिश

युधि०	३०४४ ।	इति न कलिमानसंख्याविरोधः
विक्र०	१३५	अतएव ज्योतिर्विदाभरणग्रन्थे ग्रन्थ-
शालि०	१८०००	कृतेव "वेदैः सिन्धुरदर्शनाम्बरगुणैः
विजया०	१००००	यातेः कलौ सम्मितैः" इति कलि-
नागा०	४०००००	युगस्यैव ३०६८ वर्षेषु गतेषु ग्रन्थ
बलि०	८२१	करणकृतम् ।
	३२२०००	

शकट पु० न० शक-अटन् । १यानभेदे (गाड़ि) अमरः । २शकुराधिष्ठिते नन्दानक्षत्रे शकटविशेषे शकटसम्भवः ३द्विसहस्रपलपरिमाणे हैमच० स्वार्थे क० । शकटिका तत्रैव स्त्री० ।

शकटहन् पु० शकटमसुराधिष्ठितशकटभेदं हतवान् हन-भूते क्विप् । श्रीकृष्णे तत्कथा हरिवं० ६२अ० ।

शकटाक्षा स्त्री शकटाकारत्वात् तदाक्षा यस्याः । रोहिणीनक्षत्रे तस्याः शकटाकारषट्तारात्मकत्वेन तथात्वम् ।

शकन्धु पु० ईत० शकन्धा० । परनिपातः शकानां कूपे ।

शकल पु० न० शक-कलच् । १खण्डे २एकभागे । ३त्वचि ४वल्कले मेदि० ५शल्के (आँश) च न० ।

शकलिन् पु० शकलं शल्कमस्त्यस्य इनि । सर्पे अमरः ।

शकाब्द पु० शककर्त्तृनृपसम्बन्धी अब्दः । १शकप्रवर्त्तकनृपराज्यावधिवत्सरे २तत्संख्यायाञ्च ।

शकार पु० "सदमूर्खताभिमानी दुष्कृतैश्वर्य्यसंयुक्तः । सोऽयमनुजाभ्राता राज्ञः शत्रुः शकार इति दृष्टः" सा०द० उक्तलक्षणे १राज्ञोऽनुजाभ्यां भ्रातरि । श+स्वरूपे-कार । शब्दरूपे १वर्णे च ।

शकारि पु० शकानां म्लेच्छजातिभेदानामरिः । विक्रमादित्ये

शकुन न० शक-उनन् । १शुभाशुभसूचकनिमित्ते-बाहुलकादन्यत्रापि दृश्यम् २पक्षिमात्रे ३पक्षिभेदे शब्दे च पुंस्त्री० मेदि० ।

शकुनज्ञ त्रि० शकुनं जानाति ज्ञा-क । १निमित्तज्ञानयुक्ते २तज्ज्ञायां स्त्री टिका० ।

शकुनि पु० शक-उनि । १पक्षिमात्रे अमरः । २पक्षिप्रसिद्धे हैमच० । ३सुबलराजपुत्रे दुर्य्योधनमातुले च । ४ग्रामापक्षिणि स्त्री ङीष् राजनि० । ५ववादिषु करणभेदे पु० ६दुःसहनृपपुत्रे पु० मार्कण्डेयपु० । विंशतितमपुत्रभेदे पु० वायुपु० ।

शकुनिप्रिया स्त्री० ईत० । पक्षिणां पानीयशालायाम् हारा० ।

शकुन्त पु० शक-उन्त । १पक्षिमात्रे । २मासपक्षिणि ३कीटभेदे च मेदि० ।

शकुन्तला स्त्री० शकुन्तैः त्रायते त्रा-घञर्थे-क । मेनकाऽप्सरोगर्भजातायां विश्वामित्रसुतायाम् सा च जातमात्रा मातापरित्यक्ता शकुन्तलालिता पश्चात् कण्वमुनिना प्रतिपालिता दुष्मन्तमुपेत्य गान्धर्वविधिना व्यूढेति "निर्जने तु वने यस्मात् शकुन्तैः परिपालिता । शकुन्तलेति नामास्याः कृतं चापि ततो मया" भा० आ० ७२अ० । शकुन्तलानामधिकृत्य कृतो ग्रन्थः । अस्य चाख्यानिकायां तस्य वा लुक् । कालिदासप्रणीते शकुन्तलाधिकारेण कृते २नाटकभेदे च अथोऽस्मिन् तु शाकुन्तल तत्रार्थे नं० ।

शकुन्तलाङ्गज पु० ६त० । शकुन्तलायां भरतरूपे हेमचन्द्र० ।

शकुन्ति पु० शक-उन्ति । १पक्षिमात्रे अमरः । २भासपक्षिणि उणादिकोषः ।

शकुल पुंस्त्री० शक-उलच् । मत्स्यभेदे (शउल) अमरः । स्त्रियां ङीष् । [यामु राजनि० ।

शकुलाक्षी पु० शकुलस्याक्षीव षच् समा० ङीष् । गरुडदूर्वा०

शकुलादनी स्त्री० शकुलैरद्यते अद-ल्युट् (कट्की) शाकभेदे अमरः । २जटामांस्यां, ३जलपिप्पल्यां, कट्फले च विश्वः । [(गडुइ) मत्स्ये । अमरः ।

शकुलार्भक पु० शकुलस्यार्भक इव ह्रस्वत्वात्तदाकारत्वाद्वा ।

शकृत् न० शक-क्वतन् । विष्ठायाम् अमरः ।

शकृत्करि पु० शकृत् किरति कृ-इन् । १गवादीनां २वत्सेऽल्पायां स्त्रियां ङीष् ।

शकृद्द्वार न० ६त० । मलद्वारे अपानस्थाने हेमच० ।

शक्क(क्व)र पु० शक-क्विप् क्व-यच् कर्म० शक-करप् वा । १दधि मेदि० । चतुर्दशाक्षरपादके २छन्दोभेदे । ३नदीभेदे ४मेखलायाञ्च स्त्री ङीष् । ५अङ्गुली त्रि०कौ० । शर्करीत्यपि चतुर्दशाक्षरपादके छन्दसि ।

शक्त त्रि० शक-क्त । समर्थे हेमच० ।

शक्ति स्त्री शक-क्तिन् । १सामर्थ्ये २स्त्रीदेवतायां देवीमूर्त्तौ । न्यायादुक्ते कारणनिष्ठे कार्य्योत्पादनयोग्ये ३धर्मभेदे । ४शब्दनिष्ठे अर्थबोधकतारूपे बोध्यत्वप्रकारकेच्छाविषयत्वरूपे वृत्तिभेदे सर्वज्ञाख्ये ५अस्त्रभेदे च अमरः । मीमांसकमते शक्तिः पदार्थान्तरम् यथोक्तम् अनुमा०चि० "स्यादेतत् ईश्वरवत् कार्य्येणैव शक्तिरध्यनुमीयते तथा हि यादृशादेव करानलसंयोगाद्दाहो जायते तादृशादेव सति प्रतिबन्धके न जायते अतो यदभावात् कार्य्याभावस्तद्दृष्ट्यादावभ्युपेयं तेन विना तदभावात् यत्सद्भावानुपपत्तेर्व्यतिरेकमुखेन शक्तिसिद्धिः" । न्यायमते तच्चिरास्तत्रैव ईश्वरवादग्रन्थे दर्शितो यथा

"तत्रारणिमणिप्रभृत्कारादिव्यक्तीनामानन्त्येन प्रतिव्यक्ति भावहेतुज्ञानस्य शक्तिस्वीकारे गौरवं तावदनन्तव्यक्तिजन्यावान्तरवह्निव्यक्तिषु जातिलाघवकल्पने लाघवमिति तदेव कल्प्यते । न च जातौ योग्यानुपलम्भबाधः गोमयप्रभवदृश्चिकयोर्वा पाटलत्वकपिलत्वव्यङ्ग्यवैजात्यस्य प्रत्यक्षसिद्धत्वात् तत्तज्जन्यनानाव्यक्तिषु तत्तज्जन्यत्वज्ञानानन्तरं तत्तज्जन्यव्यावृत्त्याऽनुगतबुद्धिरूपा जातिविषया । तत्तज्जन्यत्वेनोपाधिनाऽबाधेति चेन्न बाधकं विनानुगतबुद्धेस्तद्व्यङ्ग्यजातिविषयत्वनियमात् । न च गोमयदृश्चिकप्रभवदृश्चिकजातिपरम्परायामनुगतजात्यापत्तिः गोमयजन्यदृश्चिकप्रभवत्वजातेः सत्त्वात् वह्निमात्रे च दाहस्यावान्तरस्य तत्संयोगः सेवनादिश्च कारणानि न तु तत्तदादिकं विनापि, तदुत्पत्तिप्रसङ्गः विशेषसामग्रीमादायैव साध्यसामग्र्याजनकत्वात्" ।

एवमाधेयशक्तिरपि मीमांसकमतेन पूर्वपक्षीकृत्य तत्र निरस्ता यथा तत्र प्रोक्षणप्रतिष्ठाशब्द्योर्दर्शितं मू अधिकं किञ्चिदत्र प्रदर्श्यते यथा

"कामिनीचरणाभिघातदोहदादिभिरशोकपुष्पोत्कर्षदर्शनादपि नाधेयशक्तिः समवयविशेषावच्छिन्नचरणदोहदादिसंयोगध्वंसस्यैव कारणत्वात् चरणाभिघाताऽदृष्टभागान्तजनितदृष्टादेव वा तदुपपत्तिः कालान्तरे पुष्पादुत्पत्तेः । दुःखावयवोपचयावश्यम्भावेन दृष्टभेदावश्यकत्वात् । नापि ताम्रकांस्यादावम्लभस्मसंयोगादिजन्यशुद्धिरूपा आधेयशक्तिः तत्संयोगध्वंसस्य संयोगसमानकालीनस्य मृण्मयसर्वादिप्रतियोगिकयावदनादिसंसर्गाभावसहितस्य शुद्धिपदार्थत्वात् । भस्मादिसंयोगजनितः कांस्यादुपभोक्तृनिष्ठः संस्कार एव शुद्धिरित्यन्ये । अभिमन्त्रितपयःपक्वदादापि समवयविशेषावच्छिन्नाभिमन्त्रणध्वंस एव व्यधाद्यनायकः तत्तन्मन्त्रदेवतासन्निधिरेव वा । कलमबीजादीनामापरमाण्वन्तभङ्गे तत्र तावान्तरजात्यभावे नियतकलमजातीयादिसिद्धिरपि । परमाणुपाकजविशेषादेव कार्य्यद्रव्यरूपादि सजातीयस्य पूर्वरूपादिविजातीयस्य परमाणौ पाकजरूपादेरुभयाविरुद्धत्वात् यथा हि कलमबीजं यवादिजात्या व्याव्रर्त्यते तथा तत्परमाणवोऽपि पाकजैरेव । एवं माषकर्षजनितात् परमाणुपाकपरम्पराविशेषादेव हैमन्तिकयवोत्पत्तिः । एतेन लाक्षारसावसेकादयो व्याख्याताः । निमित्तविशेषजनितपाकजात्तत्फलविशेषः यथा हरीतकांसं हरिद्रानलसाधितसुपयोगात् सद्योव्याधादयति नान्यथा साधितमित्यादि । यत्र च तोयतेजोवायुषु न पाकजोविशेषस्तत्रोद्भवाद्यवयवकठिनत्वादयोविशेषास्तदुपनायकादृष्टविशेषादेव । तण्डुलादौ चाधिवासपूर्वकतण्डुलारोहणसामग्र्यास्तस्य सत्यासत्यप्रतिबन्धसहिता प्राच्येवाधर्माधर्मफलं तज्जयमङ्कुरं जनयति । यद्वा अयं निष्पावः पाववात् वेति तण्डुलारूढाभिमन्त्रणविशेषसहिता सा तथा, तदाह, "तांस्तु देवाः प्रयच्छन्ति स्वस्यैवान्नदुघस्य" इति

अथ वा प्रतिज्ञाशुद्ध्यशुद्धी अपेक्ष्य तया धर्माधर्मौ ज-
न्येते ताभ्याञ्च जयपराजयौ सत्यासत्यप्रत्यभिज्ञाभिश्चस्त-
तुलारोहणस्येदानिष्टफलत्वे नार्थतो विधिनिषेधात्। अ-
भिश्चस्तः सत्यप्रतिज्ञोविजयकामस्तुलामारोहेदित्यसत्यप्र-
तिज्ञो न तुलामारोहेदिति श्रुतेरुभयमात्। यद्वा तया
देवतासन्निधिः क्रियते तास्च कर्मानुरूपलिङ्गमभिव्यञ्ज-
यन्ति"। तत्र च शक्तिपदार्थस्वरूपादिकमुक्तं यथा
"कस्तर्हि शक्तिपदार्थः कारणत्वं तच्च स्वव्याप्येतरस-
कलसंपन्नो कार्य्याभावव्यापकाभावाप्रतियोगित्वम्। अथ
वा यत्र कार्य्याभावव्याप्यता इतराभावावच्छिन्ना तत्का-
रणबीजे अङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते
इतरसमवधाने सति बीजादङ्कुरसत्त्वात्, किन्तु तरा-
भावेनावच्छिद्यते इतराभावावच्छिन्ना तत्कारणबीजे अ-
ङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते इतराभावे
बीजस्याङ्कुराभावनियमात्। शिलाप्रकलेऽङ्कुराभाव-
व्याप्यता शिलात्वेनैवावच्छिद्यते। यद्वा कन्याससमवधाना-
वच्छिन्नकार्य्यानुत्पत्तिव्याप्यत्वं कारणत्वं, रासभादेः का-
र्य्याभावव्याप्यता अन्यासमवधानस्य वैयर्थ्यानावच्छेदक-
त्वात्। अनन्यथासिद्धनियतपूर्ववर्त्तिजातीयत्वं वा तत्त्वम्।
अन्यथासिद्धश्च त्रिधा येन सहैव यस्य यं प्रति पूर्व-
वर्त्तित्वमवगम्यते, यथा घटं प्रति दण्डरूपस्य,(१) अन्यं
प्रति पूर्ववर्त्तित्वे ज्ञाते एव यं प्रति यस्य पूर्ववर्त्तित्व-
मवगम्यते यथा शब्दं प्रति पूर्ववर्त्तित्वे ज्ञात एव ज्ञानं प्र-
त्याकाशस्य(२)। अन्यत्र कृप्तनियतपूर्ववर्त्तिन एव कार्य्य-
सम्भवे तत्सदृशभूतत्वम्(३) यथा गन्धवति गन्धानुत्पादा-
दृगन्धं प्रति तत्प्रागभावस्य नियतपूर्ववर्त्तित्वकल्पनात्
पाकजस्थले गन्धं प्रति रूपादिप्रागभावादीनामप्यन्यथा-
सिद्धत्वम् एतच्चितयव्यतिरेके नियतपूर्ववर्त्तित्वं कारण-
त्वम्। यागपूर्वयोस्तु यागपूर्ववर्त्तित्वेऽवगते न स्वर्गस्य-
त्वम्। यागपूर्वयोस्तु यागपूर्ववर्त्तित्वेऽवगते न स्वर्गस्य-
माने यत्र जन्यस्य पूर्ववर्त्तित्वेऽवगते जनकस्य पूर्वभावो-
ऽवगम्यते तत्र जन्येन जनकस्यान्यथासिद्धिः। यत्र च
जनकस्य तथात्वेऽवगते जन्यस्य पूर्वभावावगतिस्तत्र तद्-
द्वारा तस्य जनकत्वमेव। दण्डसंयोगभ्रमणयोस्तु युग-
पदेव पूर्वभावितत्वमपहः। स्वज्ञानानन्तरोत्पत्तिकसकलसम-
वधाने सत्यपि यस्याभावात् कार्य्यं न जायते सति च
जायते तज्जातीयं प्रति तदनन्यथासिद्धम्। अनन्यथा-
सिद्धनियतपूर्ववर्त्तित्वं कारणत्वमित्यन्ये तत्र ईश्वरतद्-
वुद्ध्यादीनामसंग्रहात् तदुभयव्यतिरेकस्य तत्समवधान-

व्यतिरेकस्य वाऽभावात्। कार्य्यस्यान्यथानुपपद्यमानताव्य-
वस्थाप्यत्वं वाऽनन्यथासिद्धम्। नन्वेवमतिरिक्तशक्तौ
साधकबाधकप्रमाणाभावान्नित्यं संशयः न च साधका-
भावस्य बाधकत्वं बाधकाभावस्य साधकत्वादिति चेन्न
साधकाभावेन वह्न्यावन्यत्र सिध्यतीन्द्रियधर्माभावसाधने
लाघवं बाधकाभावेनातीन्द्रियधर्मसाधने गौरवमिति
साधकाभावात्तदभाव एव सिध्यतीति"।
"इच्छा क्रिया तथा ज्ञानं गौरी ब्राह्मी तु वैष्णवी।
त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति"गोरक्षसं०।
सत्त्वरजस्तमोगुणत्रयाधीने ईश्वरस्य क्रमेण ज्ञानेच्छा-
क्रियारूपे ऽशक्तित्रये। "एषा त्रिशक्तिरुद्दिष्टा नर-
सिद्धान्तगामिनी। एषा श्वेता परा सृष्टिः सात्त्विकी
ब्रह्मसंस्थिता। एषैव रक्ता रजसि वैष्णवी परिकीर्त्तिता।
एषैव कृष्णा तमसि रौद्री देवी प्रकीर्त्तिता। परमात्मा
यथा देव एकएव त्रिधास्थितः। प्रयोजनवशाच्छक्तिरेकैव
त्रिविधाऽभवत्" वराहपु०। प्रकृतिशक्तिश्च ईश्वरस्य
सृष्टिकर्त्तृत्वप्रवर्त्तिका "शिवः शक्त्या युक्तो यदि भवति
शक्तः प्रभवितुम्" आमन्द्र०। तन्त्रोक्ते पूर्वपीठाधिष्ठा-
तृदेवताभेदे देवभेदे पीठशक्तयो भिन्नास्तन्त्रसारादौ उक्ताः।
राज्ञां प्रभावोत्साहमन्त्रजाते ऽसामर्थ्ये च अमरः।
ऽगौर्य्यां मेदि० ऽतन्त्रशब्दे शब्दमा०।
वृत्तिभेदशक्तिश्च अर्थबोधानुकूलः पदपदार्थसम्बन्धः स च
इदं पदमुमर्थं बोधयत्, अस्मात् शब्दादयमर्थो बोद्धव्य
इत्येवंरूपः इच्छात्मकः सङ्केतः, घटादिपदार्थविशेषप्रक
घटादिपदजन्यबोधविषयतानिरूपकेच्छाविषयो वा। मी-
मांसकास्तु अभिधा नाम पदार्थान्तरं सङ्केतयाख्यं शक्ति-
रित्याहुः। पदपदार्थयोः सम्बन्धान्तरं शक्तिरिति शा-
ब्दिकाः। सा च शक्तिस्त्रिविधा रूढियौगः योगरूढिश्चेति
तत्राद्या घटादिपदेषु, द्वितीया पाचकादिपदेषु, तृतीया
पङ्कजादिपदेषु। प्राभाकरमते शक्तिर्द्विविधा अनुभाविका
स्मारिका च तत्राद्या कार्य्यत्वान्विते, द्वितीया तु जातौ।
तत्र गवादिपदानां जात्याकृतिविशिष्टव्यक्तौ शक्तिरिति
नैयायिकाः। व्यक्तावेव शक्तिरिति नव्याः। जात्या-
कृतिव्यक्तिषु तिसृषु शक्तिरिति वैयाकरणाः। जातावेव
शक्तिर्व्यक्तेर्भानं त्वाक्षेपादिति भाट्टादयः। जातौ व्यक्तौ
क्वोभयत्र शक्तिः किन्तु जात्यंशे ज्ञाता व्यक्त्यंशे स्वरूप-
सती प्रत्यायिकेति। कार्य्यान्वितव्यक्तौ शक्तिरिति प्राभा-
कराः। ज्ञातोस्तु फलावच्छिन्नव्यापारे शक्तिरिति

नैयायिकाः। फल एव शक्तिरिति मण्डनादयः। व्यापारे शक्तिरिति रत्नकोषकृत्। आख्यातस्य कृतौ शक्तिरिति नैयायिकाः। कर्त्तरि शक्तिरिति शाब्दिकाः। व्यापारमात्रे शक्तिरिति मीमांसकाः। चतुर्विधविषयत्वात् तस्याश्चातुर्विध्यं शब्दशक्तिप्र० अलङ्कारिसते दर्शितं यथा

"जातिद्रव्यगुणसम्बन्धैर्भेदैः सङ्केतवत्तया। जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः"। गोगव्यादीनां गोत्वादिजात्या, पश्वाद्यादीनां लाङ्गूलधनादिद्रव्येण, धव्यपिशुनादीनां पुरुषद्वेषादिगुणेन चलचपलादीनाञ्च शब्दानां कर्मणावच्छिन्नशक्तिमत्त्वाच्चातुर्विध्यमेव रूढानामिति तदुक्तं दण्ड्याचार्यैः "शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः। चातुर्विध्यादमीषान्तु शब्द उक्तश्चतुर्विधः" इति।

तदेतन्निरासितं तत्रैव "तदेतज्जडमूकमुखादीनामन्यशून्यादीनाञ्च शब्दानामपरिग्रहापत्त्या परित्यक्तमस्माभिः"।

शक्तिग्रह पु० ६त०। शक्तेः अर्थबोधकसाधुपदत्वेज्ञाने।

शक्तिग्राहक पु० शक्तिं गृह्णाति ग्रह-ण्वुल्। १कार्त्तिकेये शक्तिं ग्राहयति बोधयति ग्रह-णिच् ण्वुल्। "शक्तिग्रहं व्याकरणोपमानात् कोषाप्तवाक्यात् व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः" इत्युक्ते शक्तिबोधके २हेतौ। शक्तिग्रहप्रकारश्च शब्दशक्तिप्रकाशिकायां दर्शितो यथा

"सङ्केतस्य ग्रहः पूर्वं वृद्धस्य व्यवहारतः। पश्वादेर्वोपमानादेः शक्तिधीपूर्वकैरसौ"। प्रथमं वृद्धेषु सङ्केतग्रहोवृद्धस्य व्युत्पन्नस्य शब्दाधीनव्यवहारादेव बालानां तथा हि गामानयेति केनचिन्नियुक्तः कश्चन व्युत्पन्नस्तद्वाक्यतोऽर्थं प्रतीत्य गवानयनं करोति तद्दोपलभमानो बालः इदं गवानयनं स्वगोचरप्रवृत्तिजन्यं चेष्टात्वान्मदीयभक्षणपानादिचेष्टावदित्यनुमाय सा गवानयनप्रवृत्तिः स्वविषयधर्मिककार्य्यतात्वज्ञानजन्या प्रवृत्तित्वात्त्रिजप्रवृत्तिवदिति प्रवृत्तेर्गवानयनधर्मिककार्य्यतात्वज्ञानजन्यत्वं प्रसाध्य गवानयनगोचरतज्ज्ञानमसाधारणहेतुकं कार्य्यत्वाद्घटवदित्येवमनुमिन्वानः सन्निधानोपस्थितत्वाल्लाघवाच्च श्रुतं वृद्धवाक्यमेव तदसाधारणकारणत्वेनावधारयति तदनन्तरञ्च गवादिपदानां प्रत्येकमन्वयव्यतिरेकाभ्यां गवादिवृद्धौ जनकत्वमवगत्यानन्तरप्रवृत्तये गवादिसङ्केतस्य तदनुकूलत्वं कल्पयति। पश्चात्तु कचिदुपयोगाच्छक्तिग्रहो यथा गवादिपदशक्तिधीसाचिव्येन गोसादृश्यातिदेशवाक्यात् गवयपदवाच्यत्वबोधोत्तरं गवयत्वजात्यवच्छिन्ने गोसादृश्यग्रहात् गवयो गवयपदवाच्य इत्याकारः। क्वचिच्च व्याकरणात् यथा कर्मणि द्वितीया कर्त्तरि परस्मैपदमित्यानुशासनात् कर्मत्वादौ द्वितीयादेः। क्वचित् कोषादपि यथा "गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति"। "सुशीलः शिशरो जड़ः। चूर्णे चोदः सक्तुपिञ्जौ भक्षशाकुले" इत्यादि कोशेभ्यः शैत्यादौ शुक्लादिशब्दस्य। क्वचिद्विवरणादपि यथा पचति पाकं करोतीति क्रियार्थकवाक्यात् कृत्यादौ तिङादेः। क्वचित् प्रसिद्धार्थशब्दसामानाधिकरण्यादपि यथा नीरूपस्पर्शवान् वायुर्निस्पर्शमूर्त्तिमन्नभ इत्यादौ रूपशून्यस्पर्शवदादिषु वाय्वादिपदस्य। वायुत्वादिजातेरतीन्द्रियत्वेन स्वरूपतस्तदवच्छिन्नस्यानुपस्थित्या तत्र शक्तिग्रहायोगात् यथा वा "सदृक्त्वाच्छकुतां कन्यां टट्टानः कुकुदः स्मृतः" इत्यादावुक्तरीत्या कन्यादात्रादिषु कुकुदादिपदस्य। सहकारतरौ मधुरं रौति पिक इत्यादिकन्तु न युक्तपसुक्तमेव शक्तिग्रहोदाहरणं तिङर्थे धर्मिण्यभेदेन नामार्थान्वयाव्युत्पन्नत्वात् प्रत्यक्षसिद्धकौकिलत्वजात्यवच्छिन्न एव लाघवेन पिकशब्दस्य शक्त्यवच्छेदाच्च। क्वचिद्वाक्यशेषादपि यथा यवपदस्य कङ्गुप्रभृतौ स्तोकानां दीर्घशूके च शिष्टानां व्यवहारादेकमात्रशक्तेः परिच्छेत्तुमशक्यत्वात् गानार्थत्वस्य चान्याय्यत्वात् यवमयश्चरुर्भवतीतिश्रुतौ यवपदस्यार्थसन्देहे "वपन्ते सर्वशस्यानां लायते पलशातनम्। मोदमानास्तु तिष्ठन्ति यवाः कण्डशशालिनः" इति विध्यर्थाकाङ्क्षया प्रवर्त्तमानाद्वाक्यशेषाद्दीर्घशूके एव यवपदस्य शक्तिग्रहः। यथा वा स्वाराज्यकामोऽग्निष्टोमेन यजेतेत्यादिविधिशेषीभूतेभ्यः "यज्ञ दुःखेन सम्भिन्नं न च यत्तदनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्" इत्यादिवाक्येभ्यः स्वरादिपदस्य।

शक्तिधर पु० शक्तिं धरति ध-अच्। १कार्त्तिकेये २शक्तिमात्रधरे त्रि० "शक्तिधरः कुमारः" इति रघुः। भृ-किप् ६त०। शक्तिभृदादयोऽप्यत्र।

शक्तिपर्ण पु० शक्तिरिव पर्णं यस्य। सप्तपर्णे शटा०।

शक्तिपाणि पु० शक्तिः पाणौ यस्य। कार्त्तिकेये कृत्या० शक्तिहस्तादयोऽप्यत्र। [शक्त्या योद्धरि।

शक्तिहेतिक पु० शक्तिर्हेतिः प्रहरणास्त्रं यस्य कप्। श(स)क्तु पु० व०व० श(स)च-क्तन्। (छातु) अवयवादिचूर्णे

अमरः। ज्ञानशब्दे २१८५ पृ० तद्भेदादि दृश्यम्।

शक्तुफला(ली) स्त्री शक्तव इव फलान्यस्याः वा ङीप्। शमीवृक्षे शब्दच०। [भेदे

शक्ति(क्तिघ्र) पु० वशिष्ठसुनेः पुत्रे पराशरस्य पितरि मुनि-

शक्तु त्रि० शक-तु। प्रियभाषिणि अमरः।

शक्य त्रि० शक-यत्। १शक्तियुक्ते २शक्त्या बोध्येऽर्थे। ३समर्थनीये। ४साधयितुं योग्ये च।

शक्यतावच्छेदक त्रि० ६त०। शक्यपदार्थस्याधारणधर्मे येन धर्मेण अर्थस्य शब्दसङ्केतविषयता तस्मिन् धर्मे। यथा घटशब्दः घटत्ववन्तं पदार्थं बोधयति अतस्तदधारणधर्मो घटत्वं घटशब्दस्य शक्यतावच्छेदकम्।

शक्र पु० शक-रक्। १इन्द्रे अमरः। २कुटजवृक्षे ३अर्जुनवृक्षे मेदि०। ४ज्येष्ठानक्षत्रे ५मेषके च। इन्द्रस्य चतुर्दशविधत्वम् मन्वन्तरभेदेन इन्द्रशब्दे दर्शितमतः तत्संख्यासाम्यात् ६चतुर्दशसंख्यायाम्।

शक्रगोप पु० शक्रं शक्रधनुर्गोपायति समवर्णत्वात् गुप-अच्। इन्द्रगोपे कीटे जटा०।

शक्रज पु० शक्रात् जायते जन-ड। १काके त्रिका०। २इन्द्रजन्ये त्रि०। शक्रजातादयोऽप्यत्र।

शक्रजित् पु० शक्रं जितवान् जि-क्विप् तुक् च। १रावणात्मजे मेघनादे राजसे। २इन्द्रजेतरि त्रि०।

शक्रधनुस् न० ६त०। मेघजालच्छन्ने धनुराकारे सूर्य-किरणसम्पर्कजे पदार्थभेदे (रामधनुक) अमरः।

शक्रध्वज पु० ६त०। भाद्रशुक्लद्वादश्यां पूज्ये इन्द्रदैवते ध्वजाकारे पदार्थे। इन्द्रध्वजशब्दे ६४६ पृ० दृश्यम्।

शक्रनन्दन पु० ६त०। अर्जुने जटा०। २इन्द्रनन्दके त्रि०।

शक्रपर्य्याय पु० शक्रस्य पर्य्यायो नाम नाम यस्य मध्यपदलोपः। १कुटजवृक्षे रत्नमाला ६त०। इन्द्रस्य २वाचकशब्दे च।

शक्रपादप पु० ६त०। १देवदारुवृक्षे अमरः। २कुटजवृक्षे राजनि०। [अमरः। स्वार्थे क। तत्रैव रत्नमा०।

शक्रपुष्पी स्त्री शक्रस्येव पुष्पमस्याः ङीप्। अग्निशिखावृक्षे

शक्रभवन न० ६त०। स्वर्गे त्रिका०। शक्रावासादयोऽप्यत्र।

शक्रभूभवा स्त्री शक्रस्य भूमिव भवति भू-अच्। इन्द्रवारुण्याम् शब्दच०। [२इन्द्रजन्यायाम् अदित्याम्।

शक्रमाद स्त्री शक्रस्य मातेव। १भार्य्यायाम् राजनि०। ६त०।

शक्रमूर्द्धन् पु० शक्रस्येव शिखावान् मूर्द्धा यस्य। १वल्मीके त्रिका०। ६त०। २इन्द्रमस्तके। शक्रशीर्षादयोऽप्यत्र।

शक्रवल्ली स्त्री शक्रप्रिया वल्ली। इन्द्रवारुण्याम् राजनि०।

शक्रवाहन पु० शक्रं वाहयति वह-णिच्-ल्यु। मेघे शब्दच० इन्द्रवाहनादयोऽप्यत्र।

शक्रबीज न० शक्रस्य कुटजस्य बीजम्। इन्द्रयवे राजनि०।

शक्रशाखिन् पु० शक्रनामकः शाखी। कुटजवृक्षे भावप्र०।

शक्रसारथि पु० ६त०। इन्द्रमातलौ।

शक्रसुत पु० शक्रस्य सुतः। १वालिनामके वानरराजे ६तत्पुत्रे अर्जुने च।

शक्रसुधा स्त्री शक्रस्य सुधेव। पालङ्क्याम् शब्दच०।

शक्रसृष्टा स्त्री ६त०। हरीतक्याम् त्रिका०।

शक्राख्य पु० शक्रस्येवाख्या यस्य। १मेषके त्रिका०।

शक्राणी स्त्री शक्रस्य पत्नी ङीष् आनुक् च। पुलोमजायामिन्द्रपत्न्याम् शब्दमा०।

शक्राशन न० शक्रेणाश्यते अश-कर्मणि ल्युट्। भङ्गायाम् "शक्राशनन्तु तीक्ष्णोष्णं मोहकृत् कुष्ठनाशनम्। वह्नि-मेधाग्निदं श्लेष्मदोषहारि रसायनम्" राजव०।

शक्राशन पु० शक्रं तत्त्वमश्नुते व्याप्नोति अश-ल्यु। कुटजवृक्षे शब्दच०। [संक्षिप्तसारः।

शक्रि पु० शक-क्रिन्। १मेषे २वह्नौ ३गजे ४पत्रे च

शक्रोत्थान न० शक्रस्य महाध्वजस्य उत्थानम्। भाद्रशुक्लद्वादश्यां कर्त्तव्ये १शक्रध्वजस्योत्थाने, तदुपलक्षिते २उत्सवे च। इन्द्रध्वजशब्दे ६४६ पृ० दृश्यम्।

शक्व पु० शक-वनु। गजे त्रि० को०।

शङ्क पु० शक-अच् वा+सुम्। शकटादिवाहकवृषभे हारा०।

शङ्कर पु० शं करोति कृ-अच्। १महादेवे २कल्याणकरे त्रि० ३शिवत्वात् स्त्री ङीष्। ४सा च मल्लिकायां शब्दच०। ५शम्यां राजनि०। [शुभत्वात्। २कर्पूरे राजनि०।

शङ्करावास पु० ६त०। १कैलासाचले। शङ्करस्यावास इव

शङ्का स्त्री शकि-अ। १त्रासे २वितर्के मेदि० ३संशये च।

शङ्कित त्रि० शङ्का जातास्य तारं० इतच्। १भीते त्रिका० २सन्दिग्धे ३वितर्किते च।

शङ्कु पु० शकि-उण्। १स्थाणौ। २मत्स्यभेदे। ३शल्यास्त्रे अमरः। ४कीलके। ५दशकोटिसंख्यायाम् ६ततः षड्घाते। ७महादेवे। ८कलुषे मेदि०। ९पक्षिशिराजाले १०मेढ्रे हेमच०। ११नखीनामद्रव्ये जटा०। १२क्षेत्रपरिमाणार्थं काष्ठादिनिर्मिते, "अकाङ्गुला तु सूच्यग्रा काष्ठी द्व्यङ्गुलमूलिका। शङ्कुसंज्ञा भवेच्चैव तच्छायां परिकल्पयेत्" इत्युक्ते १३कीलभेदे च ल्यो०त०। १४जनमेजयपुत्रभेदे भा० आ० ९५ अ०। १५नवरत्नान्त-

र्गतत्त्वविभेदे। दिक्साधनार्थं त्रि० शङ्कु च दर्शितो यथा

"शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे। तत्र शङ्कुं कुलैरिष्टैः समं मण्डलमालिखेत्। तन्मध्ये स्थापयेच्छङ्कुं कल्पनादृङ्नादशाङ्गुलम्। तच्छायाग्रं स्पृशेद् यत्र वृत्ते पूर्वापरार्द्धयोः। तत्र बिन्दू विधायोभौ वृत्ते पूर्वापराभिधौ। तन्मध्ये तिसृभिर्ना रेखा कार्त्तव्या दक्षिणोत्तरा। याम्योत्तरदिशोर्मध्या तिसृभिर्ना पूर्वपश्चिमा। दिङ्मध्यसत्त्वैः संसाध्या विदिशस्तद्वदेव हि"। तत्र दिक्साधनोपक्रमे प्रथमसम्बुसंशुद्धे जलवत् समीकृते शिलाप्रदेशे अपि वाथ वा तदभावेऽन्यत्र वज्रलेपे चत्वरादौ घृष्टनादिना समस्थाने कृते शङ्कुकुलैः शङ्कुस्थाङ्गुलविभागसमानष्टहीतैरभीष्टसंख्याकाङ्गुलैर्व्यासार्द्धरूपैर्वृत्तमवक्रमात् लिखेत्। सर्वतः केन्द्राद्वृत्तपरिधिरेखा तुल्या स्यात् तथेत्यर्थः। ततस्तन्मध्ये तस्य वृत्तस्य केन्द्ररूपमध्ये कल्पनया द्वादशसंख्याकाङ्गुलानि तुल्यानि यस्मिंस्तं द्वादशविभागाङ्कितमित्यर्थः। शङ्कुं समतलमस्तकपरिधिकाष्टदण्डं स्थापयेत्। ततः पूर्वापरार्द्धयोर्दिनस्य प्रथमद्वितीयभागयोस्तच्छायाग्रं स्थापितशङ्कोश्छायान्तप्रदेशो मण्डलपरिधौ यस्मिन् विभागे स्पृशेत्। दिनस्य प्रथमविभागेऽनुलक्षणं छायाद्वाद्वृत्ते यत्र प्रविशति दिनस्यापरार्द्धे छायानुलक्षणवृत्तार्द्धं यत्र निर्गच्छतीत्यर्थः। तत्र निर्गमनप्रवेशस्थानयोरुभौ द्वौ बिन्दू पूर्वापरसञ्ज्ञौ क्रमेण वृत्ते परिधिरेखायां कृत्वा तन्मध्ये पूर्वापरबिन्वन्तरमध्ये तिसृभिर्ना सत्सूत्रेण रेखा कार्या सा दक्षिणोत्तररेखा भवति। सत्सूत्रस्तु बिन्वन्तरान्तर्गतत्रिभितेन व्यासार्द्धेन बिन्दुद्वयकेन्द्रकल्पनेन वृत्तद्वयं निष्पाद्य वृत्तद्वयसंयोगाभ्यां वृत्तद्वयपरिधिविभागाभ्यामन्तर्गतं सत्सूत्राकारं स्थानं भवति। तत्रैकः संयोगो मुखं बाह्यवृत्तभागसम्मार्जनेनापरसंयोगस्तु पुच्छमितरवृत्तभागद्वयसम्मार्जनेन मुखपुच्छावध्यूर्ध्वो रेखा दक्षिणोत्तररेखा। तत्र बिन्दोः सव्यं रेखाग्रं दक्षिणा दिक्। पश्चिमबिन्दोः सव्यं रेखाग्रमुत्तरा दिक्। अनन्तरं पूर्ववृत्तं सत्सूत्रेण सम्मार्जनीयः। शङ्कुरपि तत्स्थानान्निष्काश्य इति केवला दक्षिणोत्तररेखा स्थितेति तात्पर्यम्। दक्षिणोत्तरदिशोर्मध्यस्थाने तिसृभिर्ना दक्षिणोत्तररेखासितेन व्यासार्द्धेन दक्षिणोत्तरस्थानाभ्यां पूर्ववत् प्रत्येकं वृत्तं विधाय पूर्ववत् सित्रेण सत्सूत्रेतित्यर्थः। पूर्वपश्चिमा रेखा कार्या। तत्र पूर्वबिन्दोराग्रं रेखाग्रं पूर्वा पश्चिमबिन्दोराग्रं रेखाग्रं पश्चिमेति सत्सूत्रसम्मार्जने केवला पूर्वापररेखापि सिद्धा। अथ रेखासंयोगस्थानात् दिक्साधनोपक्रमोक्तं पूर्ववृत्तमुल्लिखेत्। तद्वृत्तपरिधौ यत्र रेखा लग्ना तत्र दिगिति तद्वृत्तमध्यस्थ दिक्चतुष्टयं वृत्ते सिद्धम्। तद्वत् यथा दक्षिणोत्तराभ्यां पूर्वापरा साधिता तत्प्रकारेणेत्यर्थः। एवकारोऽन्यप्रकारनिरासार्थकः। हि निश्चयेन। विदिशः कोणदिशो दिशां पूर्वादिसिद्धदिशां ये मध्यसूत्रा मध्यवर्त्तिदिग्वृद्यान्तरोत्पन्ना लघवस्तैः संसाध्याः सम्यक्प्रकारेण साध्याः। रेखावृत्तसंयोगस्थत्वेन ज्ञेयाः" रङ्गना०।

छायाशब्दे २६८६ पृ० दृश्यम्।

शङ्कुकर्ण पु० शङ्कुरिव कर्णोऽस्य। १गर्दभे त्रिका०। दानवभेदे हरिवं० ३अ०। ३स्कन्दानुचरभेदे भा० ४७ अ०।

शङ्कुतरु पु० शङ्कुयोग्यस्तरुः। सालवृक्षे शब्दर०। शङ्कुवृक्षादयोऽत्र।

शङ्कुला स्त्री शकि-उलच्। १छत्रलतिकायाम् संज्ञिप्रसा० पुगच्छेदकाख्यभेदे (जाति) शङ्कुलाखण्डः इति सि०कौ०।

शङ्कोच(चि) पु० शकि-उच-(उचि) वा। सत्सूत्रभेदे जटा०।

शङ्कु पु०न० शक-कु। १खनामख्याते वस्तुद्रव्याते पदार्थे अमरः। २ललाटास्थ्नि, ३निधिभेदे, ४नखीनामगन्धद्रव्ये मेदि०, ५कर्णसमीपस्थे-अस्थ्नि, ६नागभेदे, ७हस्तिदन्तमध्ये त्रिका०। दशनिखर्वसंख्यायां, ९ततृसंख्याते च। तस्य शङ्खचूड़ाक्षुराख्यतत्त्रद्रूपचिह्नानि ब्रह्मवै० प्रक्र० १८अ० उक्ता यथा।

"अथ शङ्खहरेः मूलं जगाम दानवं प्रति। दीप्तमध्याह्नमार्त्तण्डसमानरुचितत्तमम्। मूलञ्च भ्रमयित्वा पपात दानवोपरि। चकार भस्मसात्तञ्च सरथञ्चावलीलया। स शिवस्तेन मूलेन दानवस्यास्थिजालकम्। प्रेषणा च प्रेरयामास लवणोदे च सागरे। अस्थिभिः शङ्खचूड़स्य शङ्खजातिर्बभूव ह। नानाप्रकाररूपा च शस्यस्य पूता सुरार्चने। प्रथमं शङ्खतोयञ्च देवानां प्रीतिदं परम्। तीर्थतोयस्वरूपञ्च पवित्रं शङ्खना विना। शङ्खशब्दो भवेद्यत्र तत्र लक्ष्मीश्च तिष्ठति। स स्नातः सर्वतीर्थेषु यः स्नातः शङ्खवारिणा। शङ्खे हरेरधिष्ठानं यतः शङ्खस्ततो हरिः। तत्रैव संततं लक्ष्मीर्दूरीभूतमलक्षणम्। स्त्रीणाञ्च शङ्खवलयिनः

शूद्राणाञ्च विशेषतः । भीता दृष्टा याति लक्ष्मीः स्थलमन्यत् स्थलात्ततः" १०सुद्राभेदे तन्त्रसा० ।

११प्रस्तरभेदे । युक्तिकल्पतरौ तल्लक्षणादि यथा "क्षीरोदकूलेऽपि सुराष्ट्रदेशे तदन्यतोऽपि प्रभवन्ति शङ्खाः । अरुक्तवर्णाः शशिशुभ्रभासः सुरुक्षवक्त्रा गुरवो मनोज्ञाः । ते वामदक्षिणावर्त्तभेदेन द्विविधा मताः । दक्षिणावर्त्तशङ्खस्तु कुर्य्यादायुर्यशोधनम् । तेनैव शिरसा यस्तु शङ्खधानः प्रतीच्छति । वारि क्षित्वा स पापानि सुखमाप्नोति मानवः । दृक्तत्वं स्निग्धताच्छत्वं शङ्खस्येति गुणत्रयम् । आवर्त्तशङ्खदोषो हि हेमयागादिनश्यति । ब्रह्मादिजातिभेदेन स पुनश्चतुर्विधः" ।

"ये स्निग्धसदृशाकारा वृत्तदो लघवस्तथा । ब्राह्मणाः प्रस्तराज्ञेयाः सर्वकर्मसु शोभनाः । ये वृत्ताङ्काः गुरवस्त्रयांशांशविभागिनः । क्षत्रियान्ते याः कर्कशाङ्गास्तथैव च । वृत्तदो गुरवो ये तु ये स्निग्धेनैव रञ्जिताः । ते वैश्याः स्त्रिभक्तांशा युजन्ते सर्वकर्मसु । ये कर्कराहताङ्गाश्च कर्करा वे प्रतिष्ठिताः । येऽत्यन्तगुरवः स्निग्धास्ते शूद्राः प्रस्तराधमाः । इति प्रोक्तलक्षणेन सम्यक् पाषाणलक्षणम् । विचार्य्य मतिमान् कार्य्ये नियोक्तव्यं विचक्षणैः" ।

शङ्क न० शङ्कस्य विकारः वुन् । १शङ्खजाते वलयाकारे पदार्थे मेदिनि० २शिरोरोगे पु० तस्य लक्षणादि यथा "पित्तरक्तानिलादुष्टाः शङ्खदेशे विमूर्च्छिताः । तीव्रदाहरुजं हि शोथं कुर्वन्ति दारुणम् । सशिरोविषवद्वेगाच्छिरध्याशु गलं तथा । त्रिरात्राच्छीवितं हन्ति शङ्खको नाम नामतः । तत्रहाल्लीविषं तस्यैषज्यं प्रत्याख्येयस्य कारयेत्" । पित्तरक्तानिलादुष्टत्यत्र कफोऽपि योज्यः "कृतानुतापः कफपित्तरक्तैरिति" सुश्रुतवचनात् । विमूर्च्छिताः प्रवृद्धाः त्रिरात्रात् त्रिरात्रमध्ये मारयति" भावप्र० ।

शङ्ककार पु० शङ्कं तद्विकारं वलयाकारं पदार्थं करोति कृ-अण् । वर्णसङ्करजातिभेदे (शाँखारी) । स तु शूद्रागर्भे विश्वकर्मतो जातः ब्रह्मवै० । [कायां स्त्रिका० ।

शङ्कचरी स्त्री शङ्के ललाटास्थ्नि चरति चर-ट । ललाटिकायां

शङ्कचर्चा स्त्री शङ्कस्य चर्चा भूषा यत्रः । ललाटिकायां शङ्कर० । [तच्च क्षमिकरं परम्" राजव० ।

शङ्कचूर्ण न० ६त० । शङ्खजाते चूर्णे । "शङ्खचूर्णं कटु क्षारं

शङ्खद्रावक पु० औषधविशेषे । तद्गुणाकादि यथा "अर्कक्षुरी तथा चिञ्चा तिक्षारगुडचित्रकम् । अपामार्गो भक्षसमं वस्त्रपूतं जलं हरेत् । वृद्धमन्ना पचेद्वृत्तु यावद्गुणतोक्षतम् । लवणेन समौ याह्यौ द्वौ क्षारौ टङ्कणं तथा । सप्तदृक्फेनगोदन्तकाशीशं सोरका तथा । द्विगुणं पञ्चलवणं मातुलुङ्गरसेन च । काचकूप्यान्तु सप्ताहं वासयेदम्लयोगतः । शङ्खचूर्णपलं दत्त्वा वारुणी यन्त्रसुद्धरेत् । सर्वधातून् हरेच्छीघ्रं वराटीशङ्खकादिकान् । उदरादिकरोगाणां सद्यो हि नाशकः परः" भैषज्यर० "योगिनीभैरवाख्याच्च वह्निमादौ प्रदापयेत् । पश्चाद् वन्हिञ्च कर्त्तव्यमेवाहं परमेश्वरी । रसः शङ्खद्रवो नाम शम्भुदेवेन भाषितः । गुह्याद् गुह्यतरं गुह्यमिदानीं कथ्यते मया । शङ्खचूर्णं यवक्षारं सर्जिकाक्षारटङ्कणम् । समञ्च पञ्चलवणं स्फटिकारी च्यादरः । काचकूप्यां तदः क्षिप्त्वा वारुणी यन्त्रसुद्धरेत् । यामार्द्धं द्रावयत्येष शङ्खशुक्तिवराटकान् । अर्शांसि नाशयेत् षट् च मूलकच्छाश्मरीं तथा । उदरादष्टविधं हन्ति गुल्मप्लीहोदराणि च । अजीर्णं नाशयेच्छीघ्रं यकृत्प्लीहञ्च विस्फोटिकाम् । भुक्तोपरि च भोक्तव्यो मात्रमात्रोरसोत्तमः । क्षणमात्रादुद्वेत् भक्षं पुनर्भोजनमिच्छति । प्रत्यहं भोजनान्ते च सेव्योऽयं रसोत्तमः । न वक्तव्यां भयं क्वापि सत्यं सत्यं वदाम्यहम् । न देयं यस्य कस्यापि सदा गोप्यञ्च कारयेत् । रसः शङ्खद्रवो नाम वैद्यानामुपकारकः" ।

शङ्खद्राविन् पु० शङ्खं द्रावयति द्रु-णिच्-णिनि । अम्लवेतसे राजनि० ।

शङ्खधरा स्त्री ष-अच् ६त० । छिलमोचिकायाम् रत्नमा० ।

शङ्खध्म पु० शङ्खं धमति धम-क । शङ्खवादके । क्विप् । शङ्खध्मा इत्यपि ।

शङ्खनख पु० शङ्खस्य नख इव । १क्षुद्रशङ्खे (जोङ्गा) अमरः । २नखीनामगन्धद्रव्ये शब्दर० स्त्रीत्वमपि तत्र ङीष् ।

शङ्खपुष्पी स्त्री शङ्खस्य इव पुष्पमस्याः ङीष् । (शङ्खाली) वृक्षे राजनि० । "शङ्खपुष्पी तु तीक्ष्णोष्णा मेध्या कृमिविषापहा" । राजवल्लभः "शङ्खपुष्पी सरा मेध्या कृष्णा मानसरोगनुत् । रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा । दोषापस्मारभूतास्रकुष्ठकृमिविषप्रणुत्" भावप्र० । [हेमच० ।

शङ्खभृत् पु० शङ्खं बिभर्त्ति भृ-क्विप् तुक् च । विष्णौ

शङ्खमुख पुंस्त्री० शङ्ख इव मुखमस्य । कुम्भीरे हेमच० । स्त्रियां ङीष् । [चक्रा) क्षुपभेदे शब्दच० ।

शङ्खिका स्त्री शङ्खस्तदाकारं पुष्पमस्त्यस्याः ठन् । (चोरका-

शङ्खिन् पु०शङ्ख+अस्त्यर्थे इनि । १विष्णौ, २समुद्रे च मेदि० ।

शङ्खिनी स्त्री शङ्खस्तदाकारं पुष्पमस्त्यस्याः इनि । १चोर-पुष्प्राम्, अमरः । २श्वेतपद्मागे शब्दरत्नाव० । ४श्वेतवृक्षायां ५श्वेतचुक्रायां, ६यवतिक्तायां, राजनि० । ७स्त्री-भेदे, ८उपदेवताभेदे:, (शाकचिन्नी) ९शङ्खवत्यां स्त्रियाञ्च । स्त्रीभेदलक्षणं रतिमञ्जर्यामुक्तं यथा

"दीर्घा सुदीर्घनयना वरसुन्दरी या कामोपभोगरसिका गुणशीलयुक्ता । रेखात्रयेण च विभूषितकण्ठदेशा सम्भोगकेलिरसिका किल शङ्खिनी सा" । "शशके पद्मिनी तुष्टा चित्रिणी रमते मृगे । वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हये" । "पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी । शङ्खिनी चारगन्धा स्यात् मृगगन्धा च हस्तिनी" । [राजनि० ।

शङ्खिनीफल पु० शङ्खिन्या इव फलमस्य । शिरीषवृक्षे

शङ्खिनीवास पु० ६त० । शाखोटकवृक्षे शब्दच० ।

शच गतौ स्वा० आत्म०सक० सेट् इदित् । शञ्चते, अशञ्चिष्ट ।

शच वाचि भ्वा० चात्म० सक० सेट् । शचते अशचिष्ट ।

शचि(ची) स्त्री शच-इन् वा ङीप् । १इन्द्रपत्न्याम् अमरः । २करणान्तरे मेदि० ।

शचीपति पु० ६त० । इन्द्रे अमरः । शचीभक्त्यादयोऽस्यत्व ।

शट(ठ) शाघायां चु० आ० सक० सेट् । शाट(ठ)यते अशी-शट(ठ)त । [शटति । अशाटीत् अशटीत् ।

शट शादे अक० रोगजनने गतौ भेदे च सक० पर० भ्वा०

शट पु० शटति रुजति दन्तं शट-क्त्र । १अक्षे त्रि०कौ० । २सिंहकेसरे २जटायाञ्च स्त्री अमरः टाप् ।

शटि(टी) स्त्री शट-इन् वा ङीप् । (वन ब्याद) खनाम-ख्याते ओषधिभेदे

"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका । गन्धा-रिका गन्धवधूर्वधूः प्रसुपलाशिका । भवेद्गन्धपलाशी तु कषाया चाक्षिणी लघुः । तिक्ता तीक्ष्णा च कटु-काऽतुष्णास्यमलनाशिनी । शोषकासश्रमश्वासशूलाध्मान-ज्वरापहा" भावप्र० ।

शटक न० शट-क्विप् टक-अच् कर्मधा० । घृतजलमिश्रित-यवचूर्णे । "यवचूर्णं घृतं तोयं मिश्रितं शटकं विदुः" भावप्र० ।

शठ वधे सक० कैतवे क्लीबे च अक० भ्वा० पर० सेट् । शठति अशाठीत् अशठीत् ।

शठ आलस्ये चु०पर०अक०सेट् । शाठयति ते अशीशठत् त ।

शठ दुष्टवचने चट०चु०उभ०सक०सेट् । शठयति ते अशशठत् त

शठ न० शठ-अच् । १तगरे २कुङ्कुमे ३लौहे च राजनि० । ४धूस्तूरे ५मध्यस्थपुरुषे च पु० । "प्रियं वक्ति पुरो-ऽन्यत्र विप्रियं कुरुते भृशम् । व्यक्तापराधचेष्टस्य शठो-ऽयं कथितो बुधैः" विष्णुपु० उक्ते ६धूर्त्ते त्रि० मेदि० ७नायकभेदे पु० तल्लक्षणं यथा

"शठोऽयमेकत्र वद्धभावो यः । दर्शितबहिरनुरागो विप्रि-यमन्यत्र गूढमाचरति" सा० द० ।

शठता स्त्री शठस्य भावः तल् । शाठ्ये वञ्चनायाञ्च । [राजनि०

शठम्बा स्त्री शठ-अच् अबि-अच् कर्म० शक० । अम्बष्ठायाम्

शड संघाते रोगे च अक० भ्वा० पर० सेट् इदित् । शण्डति अशण्डिष्ट । [शठाख्ये शेषतः ।

शण दाने भ्वा० पर०सक० सेट् । शणति अशाणीत् अशर्णीत्

शण पु० शण-अच् । स्वनामख्याते क्षुपभेदे हेमच० ।

शणघण्टिका स्त्री शणः घण्टेव तत्तुल्यरवफलकत्वात् इवार्थे कन् । घण्टारवतुल्यफलायाम् शणपुष्प्रां राजनि० ।

शणपर्णी स्त्री शणस्येव पर्णान्यस्याः ङीप् । अस्तनपर्णाम् राजनि० । [शणे स्वार्थे क । तत्रैव ।

शणपुष्पी स्त्री शणस्येव पुष्पमस्याः ङीप् । (भाङ्गरे) वन-

शणसूत्र न० शणाज्जातं सूत्रम् । शणजाते जाले अमरः ।

शणालुक पु०शण इवालुकः । आरेवतवृक्षे (शोणालु) शब्दर०

शणिका स्त्री शणस्तत्पुष्पमस्त्यस्याः ठन् । शणपुष्प्रां राजनि०

शण्ड न० शडि-अच् । १पद्मादिसमूहे शब्दर० । २नपुंसके २वृषे च त्रिरूपकोष० । [शण्डापत्यं गर्गा० यञ् शाण्डिल्य ।

शण्डिल पु० शडि-डलच् । शाण्डिल्यस्य पितरि मुनिभेदे

शण्ढ न० शण्ढ-ढ तस्य नेत्त्वम् । १अन्तःपुररक्षके क्लीबे २क्लीबमात्रे भरतः । ३वृषे मेदि० ४बन्ध्यपुरुषे जटा० ५छन्नत्ते धनञ्जयः ।

शत न० एक०व० शो-डतच् । १स्वनामख्यातसंख्यायाम् २बहुसंख्यायां शतृसंख्याते च । स्वार्थे क । तत्रैव न० शतवाचकशब्दाश्च धार्त्तराष्ट्रः१ शतभिषा तारा२ पुरु-षायुषम्३ रावणाङ्गुलिः४ पद्मदलं५ इन्द्रियशक्तिः६ अक्षियो-जनम्७" कविकल्पलता । [अवयवे कनू । २शतसंख्यायां न०।

शतक त्रि० शतं परिमाणमस्य कन् । १शतसंख्यायुक्ते ।

शतकुम्भ पु० शतं कुम्भा यत्र । स्वर्णखनिपर्वतभेदे भरतः ।

शतकोटि पु० शतं कोटयोऽग्राणि यस्य । १वज्रे अमरः । शतगुणिता कोटिः शाक० । २शतगुणितकोटिसंख्यायां स्त्री ।

शतक्रतु पु० शतं क्रतवोऽस्य । इन्द्रे अमरः ।

शतग्रन्थि स्त्री शतं ग्रन्थयोऽस्य । दूर्वायाम् राजनि० ।

शतघ्नी स्त्री शतं हन्ति हन-टक् । १अस्त्रभेदे "अयःकण्टकसंछन्ना शतघ्नी महती शिला" विजयरक्षितः । २दन्तिकाल्यां २करञ्जे च मेदि० ।

शततम त्रि० शतस्य पूरणः तमप् । शतसंख्यापूरणे ।

शततारा स्त्री शतगुणिता तारा: शाक० । शतभिषानक्षत्रे ।

शतदन्तिका स्त्री शतं दन्ता इव सन्त्यस्य ठन् । नागदन्त्याम् राजनि० ।

शतदृ पु० शतधा दृणाति-दृ-क्विप् नि० । नटीभेदे तल्लक्षणमुक्तं यथा "शोके बुद्धिं तदा चक्रे नचैकत्र व्यतिष्ठत । सोऽगच्छत् पर्वतांश्चैव सरितश्च सरांसि च । ब्रह्मा स(वसिष्ठः) पुनरेवर्षिभेदौ हैमवतीं तदा । चण्डवाहवतीं भीमां तस्याः स्रोतस्यपातयत् । सा तमग्निसमं विप्रमनुचिन्त्य सरिद्वरा । शतधा विदृता यस्माच्छतदृरिति विश्रुता । ततः स्वसुतं दृष्ट्वा तत्राध्यात्मानमात्मना । मर्त्तुं न शक्ष्यामीत्युक्त्वा पुनरेवाश्रमं ययौ" भा० व्या० १७७ अ० ।

शतधा स्त्री शतं धान्यानि धत्ते धा-क+टाप् । १दूर्वायाम् । शत+प्रकारे धाच् । २शतप्रकारे अव्य० ।

शतधामन् पु० शतं धामानि यस्य । विष्णौ जटा० ।

शतधार पु० शतं धारा व्याप्तयो यस्य । १वज्रे त्रिका० । २शतधारायुक्ते त्रि० "वसोः पवित्रमसि शतधारम्" यजुर्वेदः १२।४९ । [३स्वर्गे च विश्वः ।

शतधृति पु० शतं धृतयोऽस्य । १इन्द्रे २ब्रह्मणि मेदि० ।

शतपत्र न०शतं बहूनि पत्राणि छदस्यदलान्यस्य । १पद्मे अमरः । २मयूरे ३सारसखगे ४दार्वीवृक्षखगे मेदि० ५राजकीरे हेमच० ।

शतपत्री स्त्री शतं पत्राणि दलान्यस्याः ङीप् । (शेवालि) पुष्पवृक्षभेदे । स्वार्थे क । तत्रैव । [शालाक्यतन्त्रभेदे ।

शतपथ पु० शतं पन्थानो यत्र अच्समा० । यजुर्वेदीयब्राह्मण

शतपथिक त्रि० शतपथं वेत्त्यधीते वा ठन् । शतपथब्राह्मणाध्यायिनि ।

शतपद न० शतं पदानि यत्र । ज्योतिष्योक्ते नक्षत्रपादात्मारेण नामाक्षरस्थोपयोगिप्रथमवर्णसूचके १चक्रभेदे चक्र

शब्दे २८।७ पु० द्वयम् । शतं पादाः यस्याः पादुभावः समा० ङीष् पद्भावः । शतपदी २कीटभेदे (कानखजूरा) स्त्री अमरः । ३शतमूल्यां राजनि० । [रत्नमा० ।

शतपद्म न०शतदलयुक्तं पद्मम् । १शतदलकमले २श्वेतपद्मे च

शतपर्वन् पुं० शतं पर्वाणि ग्रन्थयो यस्य । १वंशे अमरः २इक्षुभेदे च "शतपर्वा भवेत् किञ्चित् कोशकारगुणान्वितः । विशेषात् किञ्चिदुष्णश्च सक्षारः पवनापहः" भावप्र० । ३कटुकायां राजनि० । ४वचायां ५दूर्वायां च स्त्री ङीभाभ्यां भेदि० । ७कोजागरपूर्णिमायां शब्दरत्ना० । कप् । तासु भेदि० द्वयवे शब्दर० ।

शतपाद् स्त्री शतं पादा अस्याः पाद्भावः । कीटभेदे (कानखजूरा) जटा० । [जटा० । २जलौकायां च शब्दर० ।

शतपादिका स्त्री शतं पादा मूलान्यस्याः कप् । १काकोल्यां

शतपुष्पा स्त्री शतं पुष्पाणि यस्याः । (सुलफा) १शाकभेदे (मौरी) २क्षुपभेदे च । कप् । तत्रैव ।

"शतपुष्पा कटुः स्निग्धा तिक्तोष्णा कफवातजित् । रुच्याग्निदीपिका नेत्र्या बल्या विष्टम्भिशुक्रकृत् । संग्राहिशीतला तिक्ता दाहनुत् वातला लघुः" भावप्र० । किरातार्जुनीयव्याख्यानुसारके भारविकवौ पु० त्रिका० । [राजनि० ।

शतप्रसूना स्त्री शतं प्रसूनानि यस्याः । (सुलफा) शाके

शतप्रास पु०शतं प्रासा इव फलानि यस्य । करवीरवृक्षे अमरः

शतभिषज् स्त्री शतं भिषज इव तारा: यत्र । शततारानक्षत्रे अश्विन्यादिषु चतुर्विंशे नक्षत्रे । शतभिषाप्यत्र स्त्री

शतभीरु स्त्री शतं बहवो वियोगिनो भीरवो यस्याः पृषो० । भल्लिकायाम् अमरः तद्दर्शने हि बहुवियोगिनां कामोद्दीपनात् ततो भीरुत्वम् । [२मेचके च ।

शतमख पु० शतं मखा यज्ञा यस्य । १इन्द्रे हलायुधः ।

शतमन्यु पु० शतं मन्यवो यज्ञा यस्य शते दैत्येषु मन्युः क्रोधो वा यस्य । १इन्द्रे अमरः । २मेचके च ।

शतमान पु०न० शतेन मीयते मि-ल्युट् । १रूप्यपले २आढके शतपरिमिते च अमरः । [चिकित्सके ।

शतमारिन् पु० शतं मारयति मृ-णिच्-णिनि । विशिष्ट-

शतमुखी पु० शतं मुखानि यस्याः ङीष् । १संमार्जन्यां २शतमुखयुक्ते त्रि० ।

शतमूला स्त्री शतं मूलान्यस्याः टाप् । १दूर्वायां २स्वनामख्यातायां लतायाञ्च ङीवन्तः अमरः । [भेदे अमरः ।

शतयष्टिक पु० शतं यष्टयो गुच्छा यस्य । शतमुच्छके हार०

शतरुद्रीय न०शतं रुद्राणामधिकृत्य शतो वन्यः छ । १ऋग्यजुर्वेदोक्ते "नमस्ते रुद्र ! मन्यव इत्यादिके रुद्राध्याये ।

शतरूपा स्त्री शतं रूपाण्यस्याः । १ब्रह्मणः पत्न्यां २तत्कन्यायां सावित्र्यां च "ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् । स्त्रीरूपमर्द्धमकरोद्वै पुरुषरूपवत् । शतरूपा च सा ख्याता सावित्री च निगद्यते । सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप । दृष्ट्वा तां व्यथितस्तावत् कामबाणार्दितो विभुः । उपयेमे स विश्वात्मा शतरूपामनिन्दिताम् । ततः कालेन महता ततः पुत्रोऽभवन्मनुः । स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम्" भागवते २अ० ।

शतवीर्य्या स्त्री शतं वीर्य्याणि यस्याः ५ब० । १श्वेतदूर्वायाम् २शतावर्य्यां ३कपिलद्राक्षायां च राजनि० ।

शतवेधिन् पु० शतं विध्यति विध्–णिनि । कक्षवेधके अमरः

शतसहस्र न० शतगुणितं सहस्रं शाक० । लक्षसंख्यायाम् ।

शतसाहस्र त्रि० शतं सहस्राणि परिमाणमस्य अण् उत्तरपदवृद्धिः । लक्षसंख्याते ।

शतह्रदा स्त्री शतं ह्रादाः शब्दायस्याः पृषो० ह्रस्वः । १विद्युति अमरः । २वज्रे मेदि० ३दन्तकन्याभेदे वाक्प्रपु०

शताची स्त्री शतमक्षीण्येव पुष्पाण्यस्याः अच् समा० ङीष् । १रात्रौ २शतपुष्पायाम् । शब्दच० ३दुर्गायाञ्च "भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि । मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा । ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् । कीर्त्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः" देवीमाहात्म्ये । [दक्षे च राजनि० ।

शताङ्ग पु० शतमङ्गान्यवयवायस्य । १रथे अमरः २तिनिशवृक्षे ३शतावयवे त्रि० ।

शतानन्द पु० शतमानन्दयति अच् । गौतमपुत्रे अहल्यागर्भजे १मुनिभेदे । स च जनकराजपुरोहितः । २देवकीनन्दने मेदि० ४ब्रह्मणि हेमच० ५विष्णुरूपे त्रिका० । ६शतजनानन्दके त्रि० ।

शतानीक पु० शतमनीकानि यस्य । १व्यासशिष्ये मुनिभेदे २चन्द्रवंश्ये नृपभेदे मेदि० । ३सदाशवराजपुत्रे भाग० ९।२२ अ० ।

शतार न० शतमराण्यस्य । वज्रे त्रिका० ।

शतारुस् न० शतं अरूंषि यत्र । क्षुद्रभेदे "रक्तं श्यावं सदाक्ष्णि शतारुः स्याद् बहुव्रणम्" भावप्र० ।

शतायुस् त्रि० शतमायुर्वर्षकालोऽस्य । शतवर्षमितवयस्के "शतायुर्वै पुरुषः" श्रुतिः ।

शतावरी स्त्री शतमाष्टणोति आ+वृ–अच् गौरा० ङीष् । १शतमूल्याम् अमरः । "शतावरी गुरुः शीता तिक्ता वृष्या रसायनी । मेधाग्निपुष्टिदा स्निग्धा नेत्रा गुल्मातिसारजित् । शुक्रस्तन्यकरी बल्या वातपित्तास्रशोषजित्" भावप्र० । २इन्द्रभार्य्यायां शब्दच० । ३शच्यां त्रिका० । [वर्त्तते णिनि । तत्रैव । शतावर्त्तिन् ।

शतावर्त्त पु० शतमावर्त्ता यस्य । विष्णौ हेमच० । शतधा

शताह्वा स्त्री शतं शतमूली शतपुष्पा वेति आह्वा यस्याः मध्यपदलोपः । १शतमूल्यां राजनि० २शतपुष्पायाञ्च जटा० ।

शतिक त्रि० शतेन क्रीतः, तस्य विकारः तस्येदं वा ठन् । १शतेन क्रीते पदार्थे । २तद्विकारे शतसम्बन्धिनि च । शतमस्मै वृद्धिः आयः लाभः शुल्कम् उपदा वा दीयते ठन् । ४दृढत्रादिरूपेण शतदानसम्प्रदाने । पक्षे शत अत्र तत्रार्थे । [व्येय क्रीतादौ शतिकशब्दार्थे ।

शत्य त्रि० शतेन क्रीतः शतिकशब्दवत् यत् । शतसंख्यातद्०

शत्रु पु० शद–त्रुन् । १रिपौ राज्ञां २विषयानन्तरस्थे च अमरः ३ज्योतिषोक्ते लग्नावधिकषष्ठस्थाने ४कामादिषु च । ५ज्ञातके त्रि० । [लक्षण्यानुजे २रिपुनाशके त्रि० ।

शत्रुघ्न पु० शत्रून् हन्ति हन–क । दशरथात्मजे सुमित्रागर्भजे

शद शातने शीर्य्यतायां भ्वा०पर०अक०अनिट् वृद्धित् । शीयते अशदत् । शत्स्यति ।

शद गतौ भ्वा०पर०सार्वधातुके आत्म० अक०अनिट् । शीयते

शद पु० शद–अच् । फलमूलादौ सिद्धान्नकौ० ।

शद्रि पु० शद–क्रि । १मेघे २निघ्नौ मेदिनी० ३गजे उणा०

शद्रु त्रि० शद–क्रु १पतनकर्त्तरि २गन्तरि च ।

शनकावलि(ली) स्त्री शनैः कायति कै–क पृषो० तेनावर्त्तियत्र वा ङीष् । मलपिप्पल्यां शब्दच० ।

शनपर्णी स्त्री शणस्येव पर्णान्यस्याः पृषो० अस्य नः । कटुकायाम् शब्दच० ।

शनि पु० शो–अनि किच्च । १सूर्य्यपुत्रे छायागर्भजाते अहर्भेदे "शनिर्विरूक्षोऽनिलवन्मध्यो भ्रूदृङ्मना धातुःस्थूलोस्थिरश्च । क्रूरः प्रसीचीत्तुवरोऽतिदुष्टोऽकरः पित्तवीतदीर्घसुनीलरौक्षम्" । नील० ताज० । "मन्दोऽलसः कपिलकुल्वस्तदीर्घगात्रः स्थूलद्विजः पवनरोषकफोनिलात्मा" वृहज्जा० । २वृक्षाम्बिकादिने च "शनौ बन्ध्यां विजानीयात्" स्मृ० त० । [वारे ।

शनिवार पु० शनिस्वामिकोवारः । रव्यादिवारमध्ये सप्तमे

शनैश्चर पु० शनैश्चरति चर–अच् । शनिग्रहे तस्य यद्यपि मध्ये सर्वोपरिकक्षास्थितत्वात् बहुकालेनैकैकराशिभोगात् [अमरः कदुच्यतित्वम् ।

शनैस् अव्य०शद–डैसि पृषो० हुक् च । मन्दे २कदर्थ्ये

शप्स हिंसायां स्तुतौ कथने च भ्वा० पर० सक० सेट् ह्वा वेट् । शंसति अशंसीत् । [शप्यति ते अशाप्सीत् ।

शप आक्राशे वा भ्वा०पक्षे दिवा०उभ०सक०अनिट् । शपति ते

शपथ पु० शप-अथन् । सत्यताकरणाय दिव्यभेदकरणे यथा एतत् यदि मिथ्या स्यात् तदा मे एतदनिष्टं स्यादित्यादि

शपन पु० शप-ल्युट् । १शपथे अमरः । २शान्तौ त्रिका० ।

शप्त त्रि० शप-क्त । १अभिशापप्राप्ते २उलूपाख्ये तृणभेदे पु० शब्दच० ।

शफ न०शम-अच् पृषो०अस्य फः । १गवादीनां खुरे २वृक्षमूले

शफर पुंक्लीं० शफं दारति रा-क । (पुँठी) मत्स्यभेदे अमरः स्त्रियां ङीष् ।

शफराधिप पु० ६त० । इक्ष्वाकुसमत्स्ये त्रिका० । [शब्दयति ते अशब्दीत् ।

शब्द शब्दकरणे अ०चु०उभ० सक० सेट् । शब्दयति ते अशब्दीत्

शब्द पु० शब्द-घञ् । १ध्वन्यात्मके २वर्णात्मके च श्रोत्रेन्द्रियग्राह्ये आकाशस्य गुणभेदे ।

शब्दग्रह पु० शब्दं गृह्णाति ग्रह-अच् । १श्रोत्रेन्द्रिये घञर्थे अप् ६त० । २शब्दज्ञाने ।

शब्दतन्मात्र न० कर्म० । सांख्यमतसिद्धे आकाशकारणे सूक्ष्मभूतभेदे तन्मात्रशब्दे ३२२६ पृ० दृश्यम् ।

शब्दन त्रि० शब्द-ल्यु । शब्दकारके अमरः ।

शब्दब्रह्मन् न०शब्दात्मकं ब्रह्म । १वेदात्मके २स्फोटात्मके च नित्ये शब्दरूपे ब्रह्मणि । [१बाणभेदे २अर्जुने त्रिका० ।

शब्दभेदिन् पु०शब्दानुसारेण भिनत्ति लक्ष्यम् भिद-णिनि ।

शब्दवेधिन् पु० शब्दानुसारेण विधति लक्ष्यं विध-णिनि । १बाणभेदे २अर्जुने च धनञ्जयः ।

शब्दशक्ति स्त्री ६त० । शब्दानामर्थावबोधकतारूपे अभिधालक्षणादौ वृत्तिरूपे सामर्थ्ये ।

शब्दाधिष्ठान न० ६त० । कर्णे हेमच० ।

शब्दानुशासन न० अनुशिष्यतेऽनेन अनु+शास-ल्युट् ६त० । शब्दसाधुताज्ञापके व्याकरणे । "अथ शब्दानुशासनम्" महाभाष्यम् ।

शब्दालङ्कार पु० शब्दमात्रकृतोऽलङ्कारः । अलङ्कारशास्त्रप्रसिद्धेऽनुप्रासादौ अलङ्कारे । अलङ्कारशब्दे तद्भेदादिकं द्रष्टव्यम् ।

शब्दित त्रि० शब्द-क्त । आहूते ।

शम शान्तौ अक० शान्तीकरणे सक० दि० शमं० पर० सेट् । शाम्यति इरित् अशमत्-अशमीत् । भ्वादौ ह्वा वेट् । शान्तः । शमयति शामयति ।

शम आलोचने चु० उभ० सक० सेट् । शामयति ते शमयति ते अशीशमत् त ।

शम पु० शम-घञ् । १शान्तौ अन्तरिन्द्रियदमने अमरः । २मोक्षे त्रिका० ३यागे रामाश्रमः । ४उपचारे राजनि० ।

शमथ पु० शम-अथच् । १शान्तौ अमरः । २मन्त्रिणि मेदि० ।

शमन पु० शमयति शम-णिच्-ल्यु । लोकानां स्वस्वापुण्यफलदाहत्वेन दण्डकारके १यमे अमरः । शम-णिच्-भावे ल्युट् । २शान्तीकरणे न० । ३यज्ञार्थमपशुघाते अमरः ४चर्वणे धरणिः ५हिंसायां हेमच० ६सूदनभेदे शब्दच० ।

शमनसख स्त्री ६त० । यमुनायाम् अमरः ।

शमल न०शम-कलच् । १विष्ठायाम् अमरः । २पापे संक्षिप्त० ।

शमि(मी) स्त्री शम-इन् वा ङीप् । (शाइ) १वृक्षभेदे "शमी तिक्ता कटुः शीता कषाया रेचनी लघुः । कण्डूकासश्वासकुष्ठार्शःकृमिजित् स्मृता" भावप्र० । २शिम्बायाञ्च (गुँटि) हेमच० । ३वाग्गुजो मेदि० ।

शमिन् त्रि० शाम्यति शम-णिनि । शान्ते ।

शमीक पु०शम-वा० ईक । मुनिभेदे । [२विप्रे च शब्दच० ।

शमीगर्भ पु० शमीगर्भ आधारत्वेनास्यास्य अच् । १वह्नौ

शमीधान्य न० शमी शिम्बैव धान्यम् । शिम्बात्मके माषमुद्गादौ धान्ये अमरः ।

"शमीजाः शिम्बिजाः शिम्बा तराः स्युश्च वैदलाः । वैदलामधुरा रूक्षाः कषायाः कटुपाकिनः । वातलाः कफपित्तघ्ना बद्धमूत्रमला हिमाः । क्षते सूक्ष्मसुराभ्यान्मन्थे त्वाध्मानकारकाः" । सूक्ष्मसुरयोरनाध्मानकारित्वमन्यवैदलापेक्षया न तु सर्वथा एतयोरपि किञ्चिदाध्मानकारित्वदर्शनात् भावप्र० "शूकधान्यं शमीधान्यं सप्तातीतं प्रशस्यते । परतो वातलत्वञ्च प्रायेणाभिनवे गुरु । यवगोधूममाषाश्च तिलाश्चाभिनवा हिताः । पुराणाविरसारूक्षा न तथार्थकरा मताः" राजवल्लभः ।

शमीपत्री स्त्री शम्या इव पत्रमस्याः ङीप् । लक्ष्मणाक्षुपलतायां लटा० ।

शमीर पु० अल्पा शमी अल्पार्थे र "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" इति भाष्योक्तेः पुंस्त्वम् । क्षुद्रायां शम्यां अमरः ।

शम्बा स्त्री शं याति या-क । विद्युति अमरः ।

शम्बाक पुं०शं शिवं याकं फलं वा अस्य । १आरग्वधे अमरः । २विषाके ३श्यामके च हेमच० ।

शम्ब गतौ भ्वा० पर० सक० सेट् । शम्बति अशम्बीत् ।

शम्ब पु० शम्ब-अच्। १वज्रे २मूसलायस्थितलौहे मेदि०। २लौहकाञ्च्यां हेमच०। ४अनुलोमकर्षणे भरतः। ५दरिद्रे च संक्षिप्तसा० ६भाग्यवति त्रि० रामाश्रमः।

शम्बर न० शम्ब-अरन्। १जले २धने ३व्रते रत्नमा०। ४चित्रे च ५बौद्धव्रतभेदे हेमच०। ६रङ्गभेदे ७दैत्यभेदे पु० मेदि० ८मत्स्यभेदे ९पर्वतभेदे १०जिनभेदे पु० विश्वः। ११युद्धे पु० १२म्लेच्छे त्रि० धरणिः १३चित्रकटङ्के १४लोध्रे १५अर्जुनवृक्षे च पु० राजनि०। [राजनि०।

शम्बरकन्दर पु० शम्बरः शत्रुः कन्दो यस्य। वाराहीकन्दे

शम्बरचन्दन न० ष० त०। शम्बरपर्वतजाते चन्दनभेदे राजनि०

शम्बरसूदन पु० शम्बरमसुरं सूदयति क्षिनस्ति चु सूद-ल्यु। कामदेवे हला० तद्धननकथा हरिवं० १६२।१६४ अ० द्रष्टव्या।

शम्बरारि पु० ष० त०। कामदेवे अमरः। शम्बरस्यारिर्यादवोऽत्र।

शम्बरी स्त्री शम्बरं जलं बाहुल्येनास्त्यस्या अच् गौरा० ङीष्। १आखुपर्ण्यां मेदि०। २मायायां शब्दर०।

शम्बल पु० न० शम्ब-कलच्। १कूले २पाथेये ३मत्सरे च मेदि०

शम्बाकृत त्रि० शम्बं जलमत्यनुलोममाकृष्यते शम्ब+कर्म-ण्यर्थे डाच्+कृ-क्त। अनुलोमेन हिराकृष्टे जले चेले अमरः।

शम्बु (म्बू) पुंस्त्री० शम्ब-उनु कूवा। १जलशुक्तौ (शामुक) हेमच० स्वार्थे क। तत्रार्थे। संज्ञायां कन्। गजकुम्भान्तर्भागे च। रामायणप्रसिद्धे सूद्रतापसे, शङ्खे हेमच० दैत्यभेदे च पु०।

शम्भ त्रि० शमस्त्यस्य शम्+भ। कल्याणयुक्ते।

शम्भल पु० शम्भं कल्याणदायकं तीर्थं लाति-ला क। १याम-भेदे यत्र कल्की भविष्यति तन्नाम्नि। २वृक्षिण्यां स्त्री अमरः गौरा० ङीष्।

शम्भु पु० शम्+भू-डु। १महादेवे अमरः। २ब्रह्मणि ३रुद्रे मेदि० ४विष्णौ हला० ५सिद्धे शब्दर०। ६श्वेतार्के शब्दर०। [शम्भुसुतादयोऽत्र।

शम्भुतनय पु० ष० त०। १गणेशे २कार्त्तिकेये च शब्दमा०

शम्भुप्रिया स्त्री ष० त०। १आमलक्यां हेमच० २दुर्गायाञ्च।

शम्भुवल्लभ न० ष० त०। १श्वेतपद्मे राजनि० २महादेवप्रिये च

शम्या स्त्री शम-यत् टाप्। १युगकीलके अमरः। २दक्षहस्त-दत्तालमेदे संगीतदा०। [४निद्रायां ५पणे च विश्वः।

शय पु० शी-अच्। १हस्ते अमरः। २सर्पे ३शय्यायां मेदि०

शयञ्च पु० शी-अयच्। १अजगरसर्पे २मत्स्ये ३निद्रायाञ्च त्रि० हेमच०। ४वराहे ५मत्स्ये च पुंस्त्री०संक्षिप्तसारः।

शयन न० शी-ल्युट्। १निद्रायां २शय्यायाम् अमरः ३सैधुने च मेदि०।

देवभेदे शयनकालभेदादि वामनपु० १६अ० उक्तं यथा "मिथुनाभिगते सूर्ये शुक्लपक्षे तपोधन!। एकादश्यां जगत्स्वामिशयनं परिकल्पयेत्। भोगाभिभोगपर्य्यङ्कं कृत्वा संपूज्य केशवम्। कृत्वोपवीतकञ्चैव सम्यक् संपूजकं च द्विजान्। अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः। लब्ध्वा पीताम्बरधरं स्वस्ति निद्रां समानयेत्। त्रयोदश्यां ततः कामः स्वपते शयने शुभे। कदम्बानां सुगन्धानां कुसुमैः परिकल्पिते। चतुर्दश्यां ततो यज्ञाः स्वपन्ति सुखशीतले। सुवर्णपङ्कजकृते सुखास्तीर्णोपधानके। पौर्णमास्यान्तमानाथः स्वपते चर्मसंस्तरे। वैयाघ्रे च जटाभारं समुद्वह्य व्यान्यचर्मणा। ततो दिवाकरे राशिं संप्रयाति च कर्कटम्। ततोऽमरार्च्यां रजनी भवते दक्षिणायनम्। ब्रह्मा प्रतिपदि तथा नीलोत्पलदलेऽनघ!। तल्पे स्वपिति देवानां मार्गशुक्लमसृ। विश्वकर्मा द्वितीयायां तृतीयायां गिरेः सुता। विनायकश्चतुर्थ्यान्तु पञ्चम्यामपि धर्मराट्। षष्ठ्यां स्कन्दश्च स्वपिति सप्तम्यां भगवान् रविः। कात्यायनी तथाष्टम्यां नवम्यां कमलालया। दशम्यां भुजगेन्द्राश्च स्वपन्ति वायुभोजनाः। एकादश्यान्तु रुद्राद्या साध्या ब्रह्मन् स्वपन्ति हि। एष क्रमस्तु मदितो निशायां शयने शुने!। स्वपतस्तु तेषु देवेषु प्रावृट्कालः समायया"।

अथ लोकानां शयनप्रकारादि प्रदर्श्यते "उपास्य पश्चिमां सन्ध्यां कृत्वाग्नींस्तानुपास्य च। अद्भ्यः परिवृतो मुक्त्वा नानिष्टमोऽथ संविशेत्। शुचिं देशं विविक्तन्तु गोमयेन तु लेपयेत्। प्राग्दक्षिणप्रवणं चैव संस्वपेत सदा बुधः। प्राक्शिराश्च स्वपेन्नित्यं तथा वै दक्षिणाशिराः। स्वपेदुदक्शिरा नैव तथा प्रत्यक्शिरा न च। न चान्तर्वासहीने तु न निर्वस्त्र च कदाचन। शून्यालये श्मशाने तु एकवस्त्रे चतुष्पथे। महादेवगृहे चापि मातरेऽग्नि न स्वपेत्। न यज्ञनागायतने स्कन्दस्यायतने तथा। दर्भेषु च विना दीक्षां न स्वपेच्च कथञ्चन। धान्यगेहे च विप्राणां गुरुणाञ्च तथोपरि। नाग्नौ पर्णकीर्णे तु नाशुचिर्नाशुचिं स्पृशेत्। दिने सन्ध्यौ न नग्नश्च नोत्तरापरमस्तकः।

नाकाशे पर्वते शून्ये न च चैत्यद्रुमे तथा। न तु हारेऽस्थिसाकीर्णे नार्द्रपादस्त्वधावितः। पाताशे शयने नैव वल्मीकरुहते न च। न दग्धे विद्युता चैव वह्निप्लुष्टे जले तथा। न स्वपेत् सन्ध्ययोर्नित्यं न शिवस्याग्रतः कटे। एवं स्वपन् नरो नित्यं सुखमेह परत्र भाक्। अन्यथा च भवेद्दुःखी मृतो नरकमश्नुते" वह्निपु०। यति स्वप्यं यथा न पातनीया सूर्योदयात् पूर्वमुत्तोलनीयेत्याह स्मृतिः "भास्कराद्दष्टशय्यानि नित्यान्यग्निसलिलानि च। सूर्य्यावलोकिदीपानि लक्ष्म्या वेश्मानि भाजनम्। आसनं वसनं शय्या जायापत्यं कमण्डलुः। आत्मनः शुचिरेतानि न परेषां कदाचन"। न कदाचन इत्यनुमतिं विना अन्यथाऽऽतिथ्यानुपपत्तेः दक्षः। व्यासः "शुचौ देशे विविक्ते तु गोमयेनोपलिप्तके। प्रागुदक्प्रवणे चैव संविशेत्तु सदा बुधः। माङ्गल्यं पूर्णकुम्भाश्च शिरस्याने निधापयेत्। वैदिकैर्गारुडैर्मन्त्रैरक्षां कृत्वा स्वपेत्ततः"। गर्गः "स्वर्गे प्राक्शिराः शेते आयुष्ये दक्षिणाशिराः। प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः" मार्कण्डेयपु० "प्राक्शिरःशयने विद्यात् धनमायुश्च दक्षिणे। पश्चिमे प्रबलां चिन्तां हानिं मृत्युं तथोत्तरे" तथा "नमस्कृत्वाव्ययं विष्णुं समाधिस्थः स्वपेद्विभुं" मार्कण्डेयपु० "शून्यागारे श्मशाने च एकवृक्षे चतुष्पथे। महादेवगृहे चापि शर्करालोष्टपांशुषु। धान्यगोविप्रदेवानां गुरुस्थाने तथोपरि। न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम्। नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः। नाकाशे सर्वशून्ये च न च चैत्यद्रुमे तथा"। न स्वपेदित्यर्थः या० त०। "भुक्त्वा च विधिवन्मन्त्रैर्हिंजो भुक्ताऽवशिष्टकम्। मुखहृद्बाह्यवजनः स्वपेत् शुक्लपदो निशि। नोत्तराभिमुखः स्वप्यात् पश्चिमाभिमुखो न च। न चाकाशे न नग्नो वा नाशुचिर्नाशने क्वचित्। न शीर्णायान्तु खट्वायां शून्यागारे न चैव हि। नापि वंश्ये च पाताशे शयने वा कदाचन" कौर्मपु० १८अ० "कृतपादादिशौचश्च भुक्त्वा सायं ततो गृही। गच्छेत् शय्यां शयनाच्च अथवा दारुनिर्मिताम्। शालमलस्य कदम्बस्य नीपमन्दारकस्य च। किंशुकस्य वटस्याथ तथा कुशमयस्य च। आरोहणात् भवेत् पापं तस्मादेषु न च स्वपेत्। प्ररोहशय्यां सुप्ते वा अर्पणे परमेश्वरि!। न शुक्ले नापविद्धे च न दग्धे न च भूतले। तूलिकायां तथा वस्त्रे शय्याभावे स्वपेद्गृही। स्वपेन्न पट्टवस्त्रे च कम्बलेषु च" मत्स्यपु० ४४अ०। "श्वासानलौ सप्तसप्तान्तु दिक्षूदक्पार्श्वे च दक्षिणे। ततस्तद्दक्षिणेनाग्नेः२२ वामे पश्चात् स्वप्यात् यथासुखम्। वामदिग्वायुसनलौ नाभेरूर्ध्वोऽस्ति जन्तूनाम्। तस्मात्तु वामपार्श्वे शयीत भुक्त्वा प्रयाकार्धम्" भावप्र०। [तत्रैव।

शयनीय न० शी-आधारे अनीयर्। शय्यायाम् स्वार्थे क।

शयनैकादशी स्त्री ङीप्। आषाढशुक्लैकादश्याम्।

शयालु त्रि० शी-आलुच्। निद्राशीले अमरः। २अजगरे, ३कुक्कुरे च पु० हारा०। [द्वायां न०।

शयित त्रि० शी-कर्त्तरि क्त। १निद्रिते। भावे-क्त। निशयु पु० शी-उ। १अजगरे सर्पे अमरः। उनन्। शयुनोऽस्यत्र उणादिको०।

शय्या स्त्री शी-आधारे क्यप्। १खट्वायाम् अमरः। भावे क्यप्। २शयने ३गुल्मरोगे मेदि०। "त्रिदोषशमनी खट्वा तूली वातकफापहा। भूशय्या दृंहणी दृष्या काष्ठपट्टी तु शर्करा"। "भूशय्या वातलातीव रूक्षा पित्तास्रनाशिनी। सुशय्याशयनं कृत्वा पुष्टिनिद्राधृतिप्रदम्। अयानिलकरं दृष्यं विपरीत मतोऽन्यथा" भावप्र०। शयनविधानं यथा "कृतपादावशौचश्च भुक्त्वा सायं ततो गृही। गच्छेत् शय्यामस्फुटितामेव दारुमयीं नृप!। नाविशालां न वै भग्नां नासमां मलिनां न च। न च जन्तुमयीं शय्यामधिगच्छेदनास्तृताम्"। विष्णुपु० ३अंशे ११अ०।

शर न० शृ-अच्। १जले २बाणे ३दधिदुग्धाम्बुसारे पु० मेदि० ४दर्भसाधने तृणभेदे पु०। "भद्रमुञ्जः शरो बाणस्तेजनस्तुवेष्टनः। मुञ्जो मुञ्जातको बाण्यः स्थूलदर्भः सुमेधसः। तुङ्गद्रुमस्तु मधुरं तुवरं शिशिरं तथा। दाहतृष्णाविषपित्तश्रमभूतक्षयक्षतरोगजित्। दोषत्रयहरं दृष्यं मेधास्रकृपयुज्यते" भावप्र०। भावे घञ्। ५हिंसायाम्।

शरकाण्ड पु० ६त०। १शरसमूहे २तद्विशिष्टकवाणे च।

शरज न० शरात् दधिदुग्धसाराद् आयते जन-ड। १हैयङ्गवीने हेमच० शरवणे जाते २कार्त्तिकेये पु०। अग्निकुमारशब्दे ५४पृ० दृश्यम्।

शरजन्मन् पु० शरवणे जन्म यस्य। कार्त्तिकेये अमरः।

शरट पु० शृ-अटन्। १झकलासे अमरः २कुलत्थशाके च भरतः

शरण न० शृ-ल्युट्। १गृहे २रक्षके अमरः। ३रक्षणे ४नये

मेदि० । ५घातके शब्दच० । ६प्रसारण्यां स्त्री शब्दर०टाप् ।

शरणागत त्रि० शरणमागतः आ+गम-क्त । शरणापन्ने ।

शरणापन्न त्रि० शरणमापन्नः आ+पद क्त । शरणमागते ।

शरणार्थिन् त्रि० शरणमर्थयते अर्थ-णिनि । शरणकामे ।

श(स)रणि(णी) स्त्री श(स्)-अनि वा ङीप् । १पथि, ङीवन्तस्तु २प्रसारण्यां शब्दर० । ३अजयन्त्याञ्च स्त्री शब्दर० । ४पृथ्व्याम् अजयः ।

शरण्ड पु० श-अण्डच् । १खगे कासके शब्दरत्ना० । २धूर्त्ते ३शरटे ४भक्षणभेदे मेदि० । ५पक्षम्यादि संक्षिप्तसा० ।

शरण्य त्रि० शरणाय साधुः यत् । १शरणागतत्राणकरणयोग्ये २दुर्गायां स्त्री ।

"विश्वाग्निभयघोरेषु शरणं शरणाद्धि यतः । शरण्या तेन सा देवी पुराणे परिपठ्यते" देवीपु० ।

शरण्यु पु० श-अन्यु । १मेघे २व्याते च विश्वः । [शब्दर०

शरत्कामिन् पु० शरदि कामयते कम-णिनि । कुक्कुरे

शरत्पद्म न० शरदि शुभ्रं पद्मम् । श्वेतपद्मे राजनि० ।

शरत्पर्वन् न० ७त० । कोजागरपूर्णिमानिमित्तोत्सवे जटा० ।

शरद् स्त्री शृ-अदि । १वत्सरे, २आश्विनकार्त्तिकमासात्मके ऋतौ च अमरः । तद्गुणा भावप्र० उक्ता यथा "वर्षासु नाभसं वारि सेवेतोद्भिदमेव वा । सर्वं शरदि हेमन्ते तडागं सारसन्तु वा" । शारदं चानभिष्यन्दि लघु तत् परिकीर्त्तितम् । हैमन्तिकलवं स्निग्धं बल्यं हृद्यं हितं गुरु" राजव० । तत्रोत्तरवायुसेवनं हितं यथा "वसन्ते दक्षिणो वातो भवेत् वर्षासु पश्चिमः । उत्तरः शरदे काले पूर्वो हेमन्तशैशिरे" राजनि० । ऋतुशब्दे दृश्यम् । "शरदृतुश्च वैद्यकमते भाद्राश्विनभासात्मकः । तत्र वर्षणीयानि चन्द्रपटुता जलशुष्कता अगस्त्यः हंसः दृश्यः" कविकल्प० ।

शरधि पु० शरा धीयन्तेऽत्र धा-आधारे कि । तूणे हेमच० ।

शरपुङ्खा स्त्री शरस्येव पुङ्खो यस्याः । नीलीवृक्षलतौ कार्यपुङ्खाद्वृक्षे "शरपुङ्खा यकृत्प्लीहगुल्मव्रणविषापहा । तिक्ता कषाया कासास्रज्वरश्वासहरी लघुः" भावप्र० ।

शरभ पु० शृ-अभच् । "अष्टपादुर्द्विनयन आखुं पादचतुष्टयः" इत्युक्तलक्षणे १मृगभेदे अमरः । २करभे, ३वानरभेदे अमरः । ४यज्ञे च जटा० । ५शिशुपालपुत्रभेदे भा० द्रोण० ८१ अ० । ६दानवभेदे भा० आ० ६५ अ० । "अष्टपादुर्द्विनयनः शरभो वनगोचरः । तं सिंहं हन्तुमागच्छन्नुन्नेत्रश्च निवेशनम् । तं सुनिः शरभं चक्रे बलोत्कटमरिन्दमम् । ततः स शरभो बल्गी सुनेः शरभमब्रवीत् । दृष्ट्वा बलिनमत्युग्रं द्रुतं सम्भ्रान्तवान् । स एवं शरभस्थाने संन्यस्तो मुनिना तदा । मुनेः पार्श्वगतो नित्यं शरभः सुखमाप्तवान् । ततः शरभसङ्काशाः सर्वे मृगगणास्तदा । दिशः सम्भ्रान्तवन् राजन् ! भयाच्जीवितकाङ्क्षिणः । शरभोऽथतिसंहृष्टो नित्यं प्राणिवधे रतः । फलमूलाशनं कर्त्तुं नैच्छत् स पिशिताशनः । ततो रुधिरतर्षेण बलिना शरभोऽन्वितः । दृष्ट्वैव तं मुनिं हन्तुमक्षतत्रः स्वयोनिजः । ततस्तेन तपःशक्त्या विदितो ज्ञानचक्षुषा । विज्ञाय स महाप्राज्ञो मुनिःस्वानं तमुक्तवान् । श्वा त्वं द्वीपित्वमापन्नो द्वीपी व्याघ्रत्वमागतः । व्याघ्राद्भागो मदपटुनागः सिंहत्वमागतः । सिंहत्वं बलमापन्नो भूयः शरभतां गतः । मया क्षेपपरीतेन विस्रष्टो नखलाघवः । यस्मादेवमपापं मां पाप ! हिंसितुमिच्छसि । तस्मात् स्वयोनिमापन्नः श्वैव त्वं हि भविष्यसि । ततो मुनिजनद्वेष्टा दुष्टात्मा प्राकृतोऽबुधः । कृपिणा शरभः शप्तस्तद्रूपं पुनरागतवान्" भा० शा० ११७अ० ।

शरभू पु० शरे शरवणे भवति भू-किप् । कार्त्तिकेये हेमच०

शरमय त्रि० शरस्य विकारः मयट् । शरजाते पदार्थे ।

श(स)रयु(यू) स्त्री शृ-(सृ)-अयु वा ङीप् । अयोध्यानगरीनिम्नवाहिन्यां नद्याम् । तस्यां भवः अण् नि० । सा (शा)रव तत्र भवे त्रि० अमरः ।

श(स)रल त्रि० श(स्)-अलच् । १सुगमे, २ऋजुटिलचित्ते (सरल) ३वृक्षभेदे च । [त्रिकाण्डे ।

शरवणोद्भव पु० शरवणम् उद्भवः उत्पत्तिस्थानमस्य । कार्त्तिकेये ।

शरव्य न० शरवे वाणशिक्षायै हितं शरु+यत् । लक्ष्ये, शरेण वेधनायोद्देश्ये अमरः ।

शराटि(ङि)(लि) स्त्री शरमतुलक्ष्यं अटति अट-इन् पृषो० टस्य डो लो वा । (शराल) पक्षिभेदे अमरः ।

शराभ्यास पु० ६त० । बाणमोचनशिक्षायाम् अमरः ।

शराल त्रि० शृ-आल । हिंस्रे अमरः । [अण् । धनुषि जटा०

शरारोप पु० शराः आरोप्यन्तेऽत्र आ+रुह-णिच् ।

शराव पु० शरं दध्यादिसारमवति अव-अच् । १मृण्मये पात्रभेदे, (शरा) अमरः । २कुडवद्वयपरिमाणे च वैद्यकम् ।

शरावती स्त्री शराः सन्त्यस्यां मतप् यस्य वः पूर्वदीर्घश्च । नदीभेदे अमरः ।

शराश्रय पु० ६त० । तूणे हेमच० ।

शरासन पु० शराः अस्यन्तेऽनेन अस-ल्युट्। धनुषि अमरः। शराणामासनम्। २तूणे च।

शरिमन् पु० शृ-उणा० इमनिच्। प्रसवे शि०कौ०।

शरी स्त्री शीर्य्यते शृ-ई। एरकाशब्दे भावप्र०।

शरीर न० शृ-ईरन्। प्रतिक्षणं क्षीयमाणे १देहे।

तस्य अङ्गप्रत्यङ्गभेदा भावप्र० उक्ता यथा "गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकः। प्रकृतिः स-विकारा च तत् सर्वं गर्भसंज्ञकम्। कालेन वर्द्धितो गर्भो यदङ्गोपाङ्गसंयुतः। भवेत्तदा स मुनिभिः शरीरीति निगद्यते"। अङ्गोपाङ्गसंयुतः अङ्गाङ्गोपाङ्गः। "तस्य त्वङ्मान्युपाङ्गानि ज्ञात्वा सुश्रुतशास्त्रतः। अष्टकादभि धीयन्ते शिष्यैः। शृणुत यत्नतः। आद्यमङ्गं शिरः प्रोक्तं तदुपाङ्गानि कुन्तलाः। तस्यान्तर्मस्तुलुङ्गं च ललाटं भ्रूयुगन्तथा। नेत्रद्वयं तयोरन्तर्वर्त्तेते द्वे कनीनिके। दृष्टिद्वयं कृष्णगोलौ श्वेतभागौ च वर्त्मनी। पक्ष्माग्रयपाङ्गौ अक्ष्णौ च कर्णौ तच्छ्रुतीन्द्रियम्। पालिद्वयं कपोलौ च नासिका च प्रकीर्त्तिता। ओष्ठा-धरौ च सक्थिन्यौ सक्थं तालु हनुद्वयम्। दन्ताश्च दन्त-वेष्टाश्च रसना चिबुकङ्गुकः। द्वितीयमङ्गं ग्रीवा तु यथा मूर्द्धा विधार्यते। तृतीयं बाहुयुगलं तदुपाङ्गान्यथ ब्रुवे। तत्रोपरिगतौ स्कन्धौ प्रगण्डौ भवतस्ततः। कफोनि-युग्मं तदधः प्रकोष्ठयुगलन्तथा। मणिबन्धौ तले हस्तौ तयोश्चाङ्गुलयो दश। नखाश्च दश ते ख्याता दश च्छेद्याः प्रकीर्त्तिताः। चतुर्थमङ्गं वक्षस्तु तदुपाङ्गान्यथ ब्रुवे। स्तनौ पुंस्तस्या नार्य्यां विशेष उभयोरयम्। योवना-रामने नार्य्याः पीवरौ भवतः स्तनौ। गर्भधत्र्याः प्रकृता-वास्तावेव क्षीरपूरितौ। हृदयं पुण्डरीकेण सदृशं स्या-दधोमुखम्। जाग्रत्स्वाद्विकसति स्वपतस्तु निमीलति। आशयश्चेतनाख्यश्च जीवस्य चेतनाख्यानमुत्तमम्। अतश्चाख्यं-मनोऽग्रे प्राणिनः प्रसृपन्ति हि"। चेतनाख्यान-मुत्तममित्यस्याभिप्रायः "कैवलोपनिषद्यं च मलं, द्रव्यगुणैर्विना" इत्युक्तवता चरकेण सकलं शरीरं चेतनाख्यानशब्दं तदपेक्षया हृदयं विशेषतश्चेतना-स्थानमिति "कक्षयोर्वक्षसः सन्धी जत्रुणी सप्तदाहृते। अक्षे उभे समाख्याते तयोः स्थानं च वक्ष्यते। उदरं पञ्चमश्चाङ्गं षष्ठं पार्श्वद्वयं मतम्। सप्तपर्वं तु तथा समस्तं सप्तमं स्मृतम्। उपाङ्गानि च कथ्यन्ते तानि जानीहि यत्नतः। शोणिताज्जायते लोहो वामतो हृदयादधः। रक्तवाहिसिराणां स मूलं ख्यातो महर्षिभिः। हृदयाद्वामतोऽधश्च फुप्फुसो रक्तफेनजः। अधो दक्षिणतश्चापि हृदयात् यकृतः स्थितिः। तनु-रक्तजपित्तस्य स्थानं शोणितजं मतम्। अधस्तु दक्षिणे-भागे हृदयात् लोम तिष्ठति। जलवाहिसिरामूलं दृष्याच्छादनलक्षणम्"। लोम तिलकम् एतच्च तिरक्त-जम्। अत्र हृदयागमटः "रक्तादनिलसंसक्तात्कालीय-कसङ्गवं" इति "मेदःशोणितयोः सारादुच्चयोर्यु-गलं भवेत्। तौ तु पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः। उक्ताः षाड्गुल्यो व्यामाः पुंसामन्त्राणि कुक्षिभिः। अर्द्धव्यामेन हीनानि योषितोऽन्त्राणि निर्दिशेत्। वृन्दकश्च कटी चापि त्रिकं वस्तिश्च षड्गुणौ। कण्ड-राणां प्ररोहः स्यात् स्थानं तदु वीर्य्यभृतयोः। स एव गर्भस्याधानं कुर्याद्भार्य्याये स्त्रियाः। शङ्खनाभ्यालति-योनिस्त्रावत्तौ सा च कीर्त्तिता। तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता। द्वयगौ भवतः सारात्कफासृग्भ्यां च मेदसाम्। वीर्य्यवाहिसिराधारौ तौ मतौ योष-णावृषौ। गुदस्य भागं सर्वस्य सार्द्ध-ष्याङ्गुलमन्तरम्। तत्र वृत्तस्तयस्तिस्रः शङ्खावर्त्तनिभास्तु ताः। प्रवाहिणी भवेद् पूर्वा षाड्गुलमिता मता। उत्सर्जनी तु तदधः सा षाड्गुलसम्मिता। तस्याधः सञ्जरणी स्यादेकाङ्गु-लसमा मता। अङ्गुलप्रमाणं तु नृणां दृक्सप्तकं मतम्। मलोत्सर्गस्य मार्गोऽयं पायुर्देहे विनिर्मितः। पुंसः प्रोथौ स्फुटौ यौ तु तौ नितम्बौ च योषितः। तयोःककुन्दरे स्थानं सक्थिनी त्वङ्मांसमम्। तदुपाङ्गानि च भ्रूणो जानुनी पिण्डिकाहृदयम्। अङ्घ्री द्वे पुष्टिके पार्ष्णीतले च प्रपदे तथा। पादावङ्गुलयस्तत्र दश तासां नखा दश"।

शरीरक पु० शरीरं कायति आत्मत्वेनाभिमन्यते कै-क। जीवे। स्वार्थे कन्। शारीरकोऽप्यत्र।

शरीरज पु० शरीरात् जायते जन-ड। १रोगे २कामदेवे ३पुत्रे च धरणिः। ४देहजातमात्रे त्रि०।

शरीरावरण न० शरीरमावृणोति आ+वृ-ल्युट्। देह-व्यापिनि १चर्मणि राजनि०। २देहावरके त्रि०। ल्युट्। ३देहाच्छादने न०। [जटा०।

शरीरिन् पु० शरीरमात्माधिष्ठानत्वेनास्त्यस्य इनि। जीवे

शरु पु० शृ-उन्। १क्रोधे २वज्रे मेदि०। २बाणे हेमच०। ४आयुधे च संक्षिप्तसा०।

शरेष्ट पु० शृणाति क्षणिनं शृ-क्त शरः कामः तस्य इष्ट इव-क। आम्रे जटा०।

शर्करक पु० शर्करायाः रसः अण् हस्वभावः शर्करः रस इव कायति मधुरत्वात् के-क। मधुरसम्बीरे राजनि०।

शर्करजा स्त्री शर्करात् जायते जन-ड। सितास्वण्डे राजनि०

शर्करा स्त्री शृ-करन् कस्य नेत्वम्। खण्डविकारे (चिनि) अमरः। २शर्करखण्डे ३कर्परखण्डे च (खापरा) मेदि०। शर्कराः सन्त्यस्य मतुप् तस्य लुक्। ४वल्कशर्करायुते त्रि अमरः। ५रोगभेदे अश्मरीशब्दे ४९५ पृ० दृश्यम्। ६शकले च मेदि०। शर्कराभेद गुणा राजनि० उक्ता यथा "स्निग्धा पक्वकशर्करा हितकरी चीखे त्वगेरोचके चक्षुष्या बलवर्द्धनी सुमधुरा रुच्या च वंशेलुजा। दृष्या मृग्निबलप्रदा अमरुरा श्यामेलुजा शीतला स्निग्धा कान्तिकरीरक्षालजनिता रक्तेक्षुजा पित्तजित्" "यावनाली स्निग्धोत्पन्ना स्निग्धाली स्निग्धशर्करा। क्षुद्रशर्करिका क्षुद्रा गुड़जा लवबिन्दुजा। स्निग्धा शर्करा गोल्या कोला तिक्ताऽतिमिष्टला। वातघ्नी वारिका रुच्या दाहपित्तास्रदायिनी। "शीतजान्याकर्करजा साध्वी च मधुशर्करा। साच्छिका शर्करा प्रोक्ता सितास्वण्डस्य खण्डकः। सितास्वण्डोऽतिमधुरश्चक्षुष्यस्तर्दिनाशनः। कुष्ठव्रणकफश्वासहिक्कापित्तास्रदोषजित्। यवासशर्करा स्वल्पा सुधासोदकमोदकः। तदराजः खण्डसारः खण्डजा खण्डमोदकः"। "अतःखण्डोक्ताः खण्डसिता गुणश्रेष्ठा यथोत्तरम्। विमलाः शीतलाः स्निग्धाः गुर्व्यः स्वादुतराः वराः। दृष्यास्तृष्णास्रतापोषरक्तपित्तानिलापहाः। मत्स्यण्डी साच्छिकी बल्या कषाया वातजित् गुरुः। खण्डं गुरु सरं रुच्यं वातघ्नं बलपुष्टिदम्। सितोपला वरा गुर्वी वातघ्नी न कफप्रदा"। पथ्यापथ्यविवेकः "शर्करा ज्वरपित्तास्रदाहमूर्च्छाच्छर्दितृष्णापहा। तृष्णाघ्नस्तद्वराजस्तु ज्वरदाहास्रपित्तजित्। मक्षिका क्षौद्रगुडखण्डमत्स्यण्डिकासिताः। निर्मला लघवो ज्ञेयाः शीतवीर्याः यथोत्तरम्। यथा यथैषां वैमल्यं भवेच्छैत्यं तथा तथा" राजवल्लभः। "खण्डन्तु सिकताकारं शुभ्रवर्णं शर्करा सिता। सिता सुमधुरा रुच्या वातपित्तास्रदाहजित्। मूर्च्छाच्छर्दिज्वरान् हन्ति सशीता शुक्लकारिणी। भवेन्मधुसिता शीता रक्तपित्तहरी गुरुः। अर्द्धतोयारतृड्दाहरक्तक्षेत्तुवरा स्निग्धा। यथा यथैषां वैमल्यं मधुरत्वं तथा तथा। खेटकाघवैत्यानि रसत्वञ्च तथा तथा" भावप्र० गुणवर्ग्ये।

शर्कराचल पु० दानार्थं कल्पिते शर्कराक्लृप्ते पर्वते। तद्विधिः हेमा० दा० पद्मपुराणे उक्तो यथा "अथातः संप्रवक्ष्यामि शर्कराचलकल्पनम्। यस्य प्रदानाद्विष्णुर्रुद्रास्तुष्यन्ति सर्वदा। अष्टभिः शर्कराभारैरुत्तमः स्यान्महाचलः। चतुर्भिर्मध्यमः प्रोक्तो भाराद्व्यामधरः स्मृतः। भारेण वार्द्धभारेण कुर्याद्यः स्वल्पवित्तवान्। विष्कम्भपर्वतान् कुर्यात् तुरीयांशेन मानवः। धान्यपर्वतवत्सर्वमाद्यानरसंयुतम्। मेरोरुपरि तद्वच्च स्थाप्य हेमतरुत्रयम्। मन्दारः पारिजातश्च तृतीयः कल्पपादपः। एतद्वृक्षत्रयं मूर्ध्नि सर्वेष्वपि निवेशयेत्। हरिचन्दनसज्ञानौ पूर्ववद्विभागयोः। निवेशयौ सर्वशैलेषु विशेषाच्छर्कराचले। मन्दारे कामदेवश्च प्रत्यक्षः सदा भवेत्। मन्त्रमादनवृक्षे च धनदः स्यादुदङ्मुखः। प्राङ्मुखो वेदमूर्त्तिश्च हंसः स्याद्विपुलाचले। हेमी सुपार्श्वे सुरभौ दक्षिणाभिमुखी भवेत्। धान्यपर्वतवत् सर्वमाद्यानमखादिकम्"।

शर्कराधेनु स्त्री दानार्थं कल्पिते शर्कराक्लृप्ते धेन्वाकारे स्तूपभेदे हेमा० दा० स्कन्दपुराणोक्तविधिर्यथा "तद्वच्च शर्कराधेनुं राजन्! कुर्यात् यथार्थतः। चतुर्हस्तप्रमाणे सद्दीपृष्ठे लक्षणान्विते कुशोत्तरे। धेनुः शर्करया राजन्! सदा भारचतुष्टयम्। तस्या कल्पते यद्वि चतुर्थांशेन वत्सकः। तदर्द्धं मध्यमा प्रोक्ता चतुर्थांशेन कल्पना। तद्वदृतुं प्रकुर्वीत चतुर्थांशेन मानवः। अथ वा धेनुतः कुर्यादंशेन तु वत्सकम्। स्वशक्त्या सारवेद्धेनुं यथात्मानं न पीडयेत्। सर्वबीजानि सौम्यान्याद्य चतुर्दिक्षु समन्ततः। दीपवर्त्तिसहस्राणि घृतपूर्णानि कारयेत्। तिलैर्नवनीतैश्च गुडेन च सुखं काष्ठं स्निग्धं पिष्टमयी तथा। कम्बलं पट्टसूत्रेण यथालाभस्वभूषिता। दुग्धपादा रौप्यखुरा नवनीतमयस्तना। प्रवालपत्रश्रवणा सितचामरभूषिता। पद्मरत्नसमायुक्ता दर्भरोमसमन्विता। कांस्योपदोहना शस्यक् गन्धपुष्पैः समन्विता। हैमकं विधानसंयुक्तां वस्त्रैराच्छादितां तथा। गन्धपुष्पैरलंकृत्य ब्राह्मणाय निवेदयेत्"।

शर्करार्बुद पु० रोगभेदे तल्लक्षणं भावप्र० उक्तं यथा "प्राप्य मांसं सिराः स्नायुं भेदः क्षीणा तथानिलः। ग्रन्थिं करोत्यसौ भिन्नो मधुसर्पिर्वसाभिभम्। स्रवत्यल्पं तस्य वृद्धिं गतोऽनिलः। मांसं विशोष्य

अथितां शर्करां जनयत्यतः । दुर्जरत्वक्लिन्नमत्यर्थं गात्रावयं ततः सिराः । स्रवन्ति सहसा रक्तं तं विन्द्याच्छर्करार्बुदम्" । शर्करा बाहुकाहुल्या" भावप्र० ।

शर्करावत् त्रि० शर्कराः सन्त्यस्मिन् मतुप् मस्य वः । बहुशर्करायुक्तदेशे ।

शर्करासप्तमी स्त्री वैशाखशुक्लपक्षसप्तम्याम् । तद्विधानं मत्स्यपु० ७२ अ० उक्तं यथा "शर्करासप्तमीं वक्ष्ये तद्व्रतं कलुषघ्ननाशिनीम् । आयुरारोग्यमैश्वर्यं यथानन्तं प्रजायते । माधवस्य सिते पक्षे सप्तम्यां शुक्लपक्षतः । प्रातःस्नात्वा तिलैः शुक्लैः शुक्लमाल्यानुलेपनैः । स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिकम् । तस्मै नमः सवित्रे च गन्धपुष्पं निवेदयेत्" इत्यादि ।

शर्करोदक न० शर्करामिश्रितसदकम् । (चिनिर पानी) शर्करामिश्रिते जले तत्करणप्रकारगुणादिकं भावप्र० उक्तं यथा "जलेन शीतलेनैव घोलिता शुभ्रशर्करा । एलाकर्पूरमरिचैश्च सुगन्धिता । शर्करोदकनाम्नैतत् प्रसिद्धं विदुषां मतम् । शर्करोदकमाख्यातं शुक्लं स्थिरं सरम् । बल्यं हृद्यं लघु स्वादु वातपित्तास्रनाशनम् । मूर्च्छाच्छर्दितृषादाह ज्वरशान्तिकरं परम्" भावप्र० ।

शर्करिक त्रि० शर्कराः सन्त्यस्य ठक् । बहुशर्करायुक्तदेशे प्रत्यच् । शर्करिल-तत्रैव उभयत्रामरः ।

शर्द्ध पु० शृध-घञ् । अपानवायूत्सर्गे । ल्युट् । तत्रैव न० ।

शर्द्धञ्जह पु० शर्द्धमपानवायूत्सर्गं जहाति हा-खश् मुमच् । माधे । तद्भोजने हि अपानवायुर्निःसरतीति तस्य तथात्वम् ।

शर्व हिंसायां गतौ च भ्वा०पर०सक०सेट् । शर्वति अशर्वीत् ।

शर्वद त्रि० शर्म ददाति दा-क । १सुखदायके २विष्णौ पु० विष्णुस० ।

शर्वन् पु-अनिन् । १खड्गे २तद्वति त्रि० ३ब्राह्मणोपाधौ पु० "शर्वो देवश्च विप्रस्य वर्मा त्राता च भूभुजः । अतिदंष्ट्रश्च वैश्यस्य दासः शूद्रस्य कारयेत्" यमः । "शर्मान्तं ब्राह्मणस्य स्याद् वर्मान्तं क्षत्रियस्य तु । धनान्तञ्चैव वैश्यस्य दासान्तं चान्त्यजन्मनः" शातातपः ।

शर्वरा स्त्री शर्व-रात्रि-टा-क । १दारुहरिद्रायां २वस्त्रभेदे पु० धरणिः ३सुखदायके त्रि० ।

शर्वरी स्त्री पृ-वनिप् ङीप् वनो र च । १रात्रौ अमरः । शर्वरीशब्दा । २हरिद्रायां विश्वः । [हेमच० ।

शर्वला स्त्री शर्व-वज् शर्वं जाति वा-क । तोमरास्त्रे

शर्वाणी स्त्री शर्वस्य पत्नी ङीप् आनुक् च । दुर्गायां हेमच०

शल चालने भ्वा० आत्म० सक० सेट् । शलते अशलिष्ट । अशलिट्(ध्व)मू भेदे [ज्वादि० शलः शाखः ।

शल गतौ भ्वा० पर० सक० सेट् । शलति अशालीत् ।

शल शाघायां चु० आत्म०सक०सेट् । शालयते अशीशलत ।

शल गतौ भ्वा० पर० सक० सेट् । शलति अशालीत् ।

शल न० शल-अच् । १शल्लकीलोम्नि (सजारुकाँटा) अमरः २शल्लकिभि २क्षेत्रभेदे ४अक्षक्षि च पु० मेदि० ५कुलास्थे त्रिका० ६चट्टे पुंस्त्री० हेमच० स्त्रियां ङीष् ।

शलक पु० शल-वुन् । (माकड़सा) कीटभेदे त्रिका० ।

शलङ्ग पु० शल-अङ्गच् । १लोकपाले २खगभेदे उणादि० ।

शलभ पु० शल-अभच् । कीटभेदे पतङ्गे अमरः ।

शलल न० स्त्री शल-कलच् । शल्लकीलोम्नि (सजारुकाँटा) अमरः । स्त्रीत्वे गौरा० ङीष् ।

शलाका स्त्री शल-आकन् । १शल्ये २मदनवृक्षे (मयना) ३यारिकायां ४शल्लक्यां ५शरे मेदि० ६आलेख्यतूलिकायां हेमच० ७अक्षिणि च शब्दच० । सुश्रुतोक्ते शस्त्रकर्मोपकारके यन्त्रभेदे शस्त्रशब्दे दृश्यम् ।

शलाकापरि अव्य०अव्ययी० । शलाकाक्षालनक्रीडायां परास्तये

शलाकापुरुष पु० हेमचन्द्रोक्ते बौद्धानां त्रिषष्टिदेवपुरुषभेदे

शलाटु त्रि० शल-आटु । १त्वक्फले अमरः । २मूलभेदे उणादि० ३बिल्वे च पु० राजनि० ।

शलालु पु० शल-आलुच् । सुनस्त्रिद्रव्यभेदे वि०कौ० ।

शलालुक त्रि० शलालुना क्रीतं ठन् । शलालुद्रव्ये च क्रीते पदार्थे स्त्रियां ङीष् ।

शल्क न०शल-क कल्क नेत्वम् । १वल्के २वृक्षत्वक्त्वचे अमरः । ३मत्स्यत्वचि च (काँस) कोषालङ्कारे । [त्वचि च वि०कौ०

शल्कल न०शल-कलच् कल्क नेत्वम् । १मत्स्यत्वक्त्वचे २वृक्षत्वचि च अमरः ।

शल्कलिन् पु० शल्कलमस्त्यस्य इनि । मत्स्ये शब्दर० ।

शल्किन् पु० शल्कमस्त्यस्य इनि । मत्स्ये हेमच० ।

शल्यदा स्त्री शल-अच् तादर्थ्यं शल्यं मूलं यस्याः । सेदायामोषधौ राजनि० ।

शल्भ प्रसंसायां भ्वा०प्रा०सक० सेट् । शल्भते अशल्भिष्ट ।

श(शा)ल्मलि पु० शल्ल-मलच् स्वार्थे इन् इञ् वा । शाल्मलिवृक्षे (शिमुल) हिरूपकाप्रः स्त्रीत्वमपि तत्र वा ङीष् तत्रार्थे ।

शल्य न० शल्ल-यत् । १बाणे २तोमरे ३क्षेपके मेदि० ४वंशकविकायां विश्वः । ५दुःखदे ६दुर्वाक्ये शब्दर० ७पापे त्रिका० "शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोष्ट-बालनखपूयास्रावान्तर्गर्भशल्योद्धारणार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधानं व्रणविनिश्चयार्थञ्च" सुश्रुतोक्ते शस्त्रचिकित्साङ्गे यन्त्रभेदे ८वस्थि न्यो०त० । वास्तुभूमिस्थ शल्यज्ञानं प्रश्नाक्षरेण यथा भवति तथोक्तं ज्यो०त०

"सुनिश्चितां मन्दिरभूमिमादौ निखाय तोयावधि यत्नतस्तु । कुर्यादिशल्यामथ वा नष्टमानं खात्वाथ वा प्रश्नवशादिधिज्ञः । दूर्वाप्रवालाञ्चितपुष्पपाणिः शुचिः शुचिं दैवविदं वलेत्य । पृच्छेद्विनीतो मधुरस्वरेण शल्यस्य तत्त्वं भवने तदीयः । ततः प्रश्नादिमो वर्णः सङ्ख्यार्थो यत्नतोऽथ वा । क्रमात् पुष्पाक्षगादेवफलानां ब्रह्मणादिकः । प्रथमो धरणी धारिणी करौ तदनन्तरम् । न भूत्वै नम इत्येष मन्त्रो वह्निप्रियात्मकः" वह्निप्रिया स्वाहा "मन्त्रेणानेन कठिनीनामिमन्त्र्य विभाजयेत् । नवधा खदनक्षेत्रं तया पश्चादिलेखयेत् । एकत्र एकाः शपथा नव चेत् प्रश्नाक्षराणि जायन्ते । प्रागादिकोष्ठनवके वर्णान्ते शल्यमाख्यान्ति । प्रश्ने वकारः पुरतो नरास्थि ब्रूतेति शल्यं मरकप्रदायि । द्वौणीशदण्डोरगकेतुस्तम्भ-प्रदं ककारः खरशल्यमन्त्रौ । यास्यं चकारः शवगास्थिवेश्म प्रभोर्विनाशं प्रकरोति शल्यम् । रक्षोदिशि स्थास्यि शल्यं स्थितानां मङ्गलयं वह्नि सुनिश्चितं तः । एः पार्थिदिग्यस्थि शिशोर्ब्रवीति शल्यं प्रवासाद्व शल्यमेव शल्यम् । क्षोवायुकोणे नरकङ्कमस्थि दारिद्र्यमित्यक्षयकृद्विधत्ते । धनपदिशि शकारः प्राह द्विमास्थि वित्तक्षयकृदथ एकारो वक्ति कृच्छास्थि शस्त्रो । तदिह कुलविनाशं गोधनानाञ्च हानिं वितरति शल्यं नष्टनाशस्यापि शुभस्य देवैः । यो मध्यभागे भसितं कपालं कालायसं चाह कुलक्षयाय । यत्नादपास्यान्यशुना प्रमार्ष्टु सर्वत्र तथ्यं कथयामि शल्ये । कुन्दुरुखोजलेखाने शल्यं सार्द्धकरे कटौ । वक्षःस्थलकुक्षेरेषु पुरुषे मध्यवातयोः" । देवीपु० "पुरुषाधःस्थितं शल्यं न नष्टे दोषदं भवेत् । प्रासादे दोषदं शल्यं भवेत् यावज्जलान्तकम् । नष्टहारस्त्रीतिकरणूतिः स्यात्यक्ते वर्दि जायते । शल्यं त्वपनदेत्तत्र प्राणादे भवनेऽपि वा" । १०मदनवृक्षे ११स्थावविष च पु० अमरः १२नक्षत्रनामतुल्ये महाधिपे नृपभेदे पु०१३बीम्नि १४शलाकायां पु० हेमच० १५बिल्ववृक्षे पु० १६मत्स्यभेदे राजनि० । १७शस्त्रभेदे पु० त्रिका० ।

शल्यक पु० शल्य इव कायति कै-क । १मदनवृक्षे (मयना) शब्दच० । २शल्लकीवृक्षे च पुंस्त्री० स्त्रियां ङीष् राजनि० ।

शल्यलोमन् न० शल्यमिव लोम । शल्लकीलोम्नि राजनि० ।

शल्यारि पु० ६त० । शल्यबन्धुहन्तरि युधिष्ठिरे तद्वननकथा भा० शल्य० दृश्या ।

शल्ल गतौ भ्वा० पर० सक० सेट् । शल्लति अशल्लीत् ।

शल्ल न० शल्ल-अच् । १त्वचि २भेके पु० शब्दच० । स्वार्थे क । त्वचि न० । ३शोणवृक्षे पु० जटा० । (सलाक) ४पक्षिभेदे स्त्री गौरा० ङीष् । सा च ५गजभक्ष्यवृक्षे अमरः ।

शल्लकीद्रव पु० शल्लक्याद्रव इव स्वादुत्वात् । सिल्लके जटा० ।

शल्व पु० शल्ल-व । शाल्वदेशे रघा० । [अशवीत् ।

शव विकारे गतौ च भ्वा०पर०सक० सेट् । शवति-अशावीत्

शव पु०न० शव-अच् । मृतदेहे गतप्राणे १देहे अमरः । २जले न० मेदि० ।

शवकाम्य न० शवः काम्यो यस्य । कुक्कुरे शब्दर० ।

शवयान न० शववाहनं यानम् शाक० । मृतदेहवाहनार्थं तल्पे हारा० ।

शवर न० शव-वरन् । १म्लेच्छजातिभेदे अमरः । २यानीये २शिवे च पु० मेदि० ३तत्पत्न्यां स्त्री ङीष् । ४आरण्यभेदे ५हस्ते पु० कथादिको० मीमांसाभाष्यकारके ६विद्वद्भेदे । [शब्दर० ।

शवरथ पु० शववाहनार्थं रथः शाक० । शववाहनार्थे याने

शवरलोध्र पु० शवरप्रियः लोध्रः । श्वेतलोध्रे रत्नमा० ।

शवरालय पु० ६त० । शवरावासस्थाने अमरः ।

शवल पु० शव-कलन् । १कर्बुरवर्णे २तद्वति त्रि० अमरः । ३तद्वर्णवत्यां धेनौ स्त्री अमरः ।

शवसान पु० शव-आनच् सुक् च । पथिके त्रि०को० ।

शश प्लुतगतौ भ्वा०पर०सक० सेट् । शशति । अशाशीत्-अशशीत्

शश पुंस्त्री० शश-अच् । पशुभेदे (खरगोश) अमरः । स्वार्थे क । तत्रैव ।

"शशः शीतो लघुर्मांही रूक्षः स्वादुः सदा हितः । वह्निकृत् कफपित्तघ्नो वातस्वास्थ्यः स्मृतः । ज्वरा-

तिसारयोर्वात्रस्वासालवहरस्वः" भावप्र० । आर्द्रे तन्मांस दाने क्रमभेदः आ० त० उक्तो यथा "हेयरौरव वाराहशार्ङ्गैर्मांसैर्यथाक्रमम् । मासद्वयप्रीतितृप्ति दत्तेनेह पितामहाः" तन्मांसं विष्णवे देयं यथोक्तं "मार्गं मांसं तथा छागं गव्यं यत्नतो वर्जयेत् । एतानि मे प्रियाणि स्युः प्रयच्छानि वसुन्धरे !"। वराहपु० २चन्द्रा-हृद्रोगे धरणिः । ३बोधे ४बोधे ५नरभेदे मेदि० । लक्षणं यथा "बहुवचनसुशीलः कोमलाङ्गः सुवेशः सकलगुणनिधानं सत्यवादी प्रियोऽयम्" रतिम० ।

अग्रक पुंस्त्री० अग्र--स्वार्थे क । (खरगोश) शशलक्षेषु अक्षे पशुभेदे "अग्रकः शल्की गोधा खड्गी कूर्मश्च पञ्चनखः । अभक्ष्यान् पञ्चनखेष्वाहुरेतद्वांचैकतोदतः" मनुः ।

अग्रधर पु० अग्रं नखभेदं धरति धृ-अच् । १चन्द्रे २कर्पूरे च अमरः । भृ-किप् अग्रभृदादयोऽप्यत्र ।

अग्रलाञ्छन पु० अग्रः नखभेदो लाञ्छनं यस्य । १चन्द्रे २कर्पूरे च अग्राङ्गादयोऽप्यत्र ।

अग्रबिन्दु पु० १राजभेदे २विष्णौ च मेदि० ।

अग्रभिम्बिका स्त्री अग्र इव भिम्बी तया आयति कै-क । जीवन्त्यां राजनि० । [यस्तनयोर्मध्यस्थे देशभेदे बिका० ।

अग्रस्थली स्त्री अग्रवासयोग्या स्थली । अन्तर्वेद्यां गङ्गा-

अग्राङ्गुलि स्त्री अङ्गि--अङ्गि इत्व०धा ङीप् । कर्कटीभेदे रा-जनि० । "अग्राङ्गुली तिक्तकटुष्णा कोलवा कफकृच्छ्रयुक्ता मधुरा कफापहा । पाके तु साम्ला मधुरा विदाहकृत् कफे तु युक्ता रुचिकृत्त्व दीपनी" राजनि० । [ल्यु । तत्रैव ।

अग्राद पु० अग्रमत्ति अद-अण् । ग्रहनिवृक्षे राजनि० ।

अग्रिकला स्त्री इत्व० । १चन्द्रस्य षोड़शभागे "गुरुनिधनमनु-सर्वगुरु अग्रिकला" छन्दोम० उक्तलक्षणे २पञ्चदशाक्ष-रपादके छन्दोभेदे । [मत्ती पु० राजनि० ।

अग्रिकान्त न० अग्नौ कान्तो यस्य । १कुशदे २चन्द्रकान्त-

अग्रिन् पु० अग्नोऽस्त्यस्य इनि । १चन्द्रे २कर्पूरे च शब्दमा० ।

अग्रिप्रभ न० अग्निना प्रभा शोभा वा प्रभा यस्य । १कुशदे २सु-वर्णायां राजनि० । इत्व० ङीप् । [दयोऽप्यत्र ।

अग्रिभूषण पु० अग्नौ भूषणं यस्य । १महादेवे अग्निमणिना-

अग्रिलेखा स्त्री अग्निनो रेखा रक्त इव रक्तः । १चन्द्रकलायां अग्निनो लेखेव रक्तताया-त्वात् । २शुङ्ख्यां मेदि० । "नौ भा यौ चेत् भवेतां सप्ताक्षरैश्चन्द्रलेखा" छन्दोम० उक्तलक्षणे २पञ्चदशाक्षरपादके छन्दोभेदे । [राजनि० ।

अग्रिवाटिका स्त्री अग्नेर्वाटोव इवार्थे कन् । पुनर्नवायां

अग्निशिखर पु० अग्नौ शेखरं यस्य । महादेवे कला० अग्नि-मद्रादयोऽप्यत्र ।

अग्नीर्ष न० इत० । अग्नेश्च ओष्ठि अमरः । [अमरः ।

अग्नेत् अव्य० अग्र-वति । १नैरन्तर्ये २पुनःपुनरित्यर्थे च

अग्न वधे भ्वा० पर० सक० सेट् । अगति अगीत् अगीत् ।

अग्नुल पु० अग्र-कुलच् कस्य नेत्वम् । (डङ्गरकरभचा)

१हस्ते २अग्रपूपभेदे स्त्री शब्दच० गौरा० ङीष् । ३कर्ण-रन्ध्रे "अग्रस्त्रिततर्कुग्रष्कुली" नैष० । ४अस्थ्न-भेदे च भावप्र० दन्त्यमध्योऽयमनार्षे । [मेदि० ।

अग्न्य न० अग्र--यक् । १बालतृणे घासे अमरः २प्रतिभाजाये पु०

अग्रस वधे भ्वा० पर० सक० सेट् उदित् क्ता वेट् । अगसति । अगसीत् अगसीत् ।

अग्रस आभिमुख्ये भ्वा० आत्म० सक० इदित् सेट् । प्रायेणाङ्-पूर्वः । आगंसते आगंसिष्ट ।

अग्रस अग्रे अदा० पर०सक०सेट् इदित् । अंक्ति अगंसत् ।

अग्रसन न० अग्र--वधे ल्युट् । वधार्थं अगुहनने ।

अग्रस्त न० अगृह--क्त । १कल्याणे २तद्विति अमरः । ३स्तुते ४अगस्ते च त्रि०मेदि० । ५देहे न०त्रिका० संज्ञायां अगृ । ६अकुलिताग्रे शब्दच० ।

अग्रस्त न० अग्र--द्रुन् । १ओष्ठे २खड्गादौ अस्त्रे च हेमच० स्वार्थे क । तत्रैव । तत्र शुक्लमस्त्रमसृक्क अस्त्रमिति भेदः गंध--तनू । ३प्रगीते मन्त्रभेदे चिकित्साङ्गस्त्राणां त-त्प्रणादि सुश्रुतोक्तं यथा

"अथातःशस्त्रावचारणीयमध्यायं व्याख्यास्यामः शिष्यतिः शस्त्राणि । तद्यथा मण्डलाग्रकरपत्रवृद्धिपत्रनखशस्त्र-मुद्रिकोत्पलपत्रकार्द्धधारसूचीकुशपत्राटीमुखशरारीमुखा-न्तर्मुखत्रिकूर्चककुठारिकात्रीव्रिहिमुखसारावेतसपत्रकवर्द्धम-नाख्यानि । तत्र मण्डलाग्रकरपत्रे छातां छेदने लेखने च । वृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्र-कार्द्धधाराणि छेदने भेदने च । सूचीकुशपत्राटीमुख-शरारीमुखान्तर्मुखत्रिकूर्चकानि विस्रावणे । कुठारीका-व्रीव्रिहिमुखसारावेतसपत्रकाणि व्यधने सूची च । वर्द्धमो दन्तशङ्कुसंहरणे । एषणयेऽन्ते आनुलोम्ये च । सूच्यः सेवने इत्यष्टविधे कर्मणि उपयोगः शस्त्राणां व्याख्यातः । तेषामथ यथायोगमक्षणसमासोपायः कर्मसु वक्ष्यते । तत्र वृद्धिपत्रं दन्तकलसाधारणे भागे दन्तशोधाङ्गदन्तान्वेषं सर्वाणि । वृद्धिपत्रं मण्डलाग्रञ्च विस्रावणोत्तानपाणिना लेखने मण्डलोऽयमार्द्धं दन्तार्द्धे

विस्रावणानि विशेषेण बालवृद्धस्तुकुमारभीरुनारीणां राज्ञां राजपुत्राणाञ्च तिकूर्चकेन विस्रावयेत्। तत्र प्रच्छादितदन्तमङ्कुशप्रदेशिनीभ्यां व्रीहिमुखम्। कुठारीकां वामहस्तन्यस्तामितरहस्तसंयमाङ्कुशविष्टब्धयाभिहन्यात्। द्वारकरपत्रैषणयो मूले। शेषाणि तु यथायोगं गृह्णीयात्। तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः। तत्र नखशस्त्रैषणावटाङ्कुशे सूच्यो वक्ष्यन्ते। वडिशो दन्तशङ्कुस्थानतायै तीक्ष्णकण्टकप्रायसमवपत्रमुखे। एषणी गण्डूपदाकारमुखी। प्रदेशिन्यग्रपर्वप्रदेशप्रमाणा सुश्लिष्टा। दशाङ्गुला द्वारारीमुखी सा कर्त्तरीति कथ्यते। शेषाणि तु षडङ्गुलानि। तानि सुपक्षाणि सुतीक्ष्णानि सुधाराणि सुरूपाणि सुसमाहितमुखाग्रायकरालानि चेति शस्त्रसप्तकम्। तत्र वक्रं कुण्ठं खण्डं खरधारमतिस्थूलमत्यल्पमतिदीर्घमतिह्रस्वमित्यष्टौ शस्त्रदोषाः। अतो विपरीतगुणमादद्यादन्यत्र करपत्रात्तद्धि खरधारमस्थिच्छेदनार्थम्। तत्र द्वारा भेदनानां माक्षरी। लेखनानामर्द्धमाक्षरी। व्यधनानां विस्रावणानाञ्च कैशिकी। छेदनानामर्द्धकैशिकीति। तेषां पायना त्रिविधा क्षारोदकतैलेषु तत्र क्षारपायितं वरशल्यास्थिच्छेदनेषु। उदकपायितं मांसच्छेदनभेदनपाटनेषु तैलपायितं सिराव्यधनस्नायुच्छेदनेषु। तेषां निशाणार्थं श्लक्ष्णशिला भाभवर्णा। धारासंस्थापनार्थं शालमलीफलकमिति"। भवति चात्र "यदा सुनिशितं शस्त्रं रोमच्छेदि सुसंस्थितम्। सुगृहीतं प्रमाणेन तदा कर्म्मसु योजयेत्"। अनुशस्त्राणि तु त्वक्सारस्फटिकाक्षचक्षुरुत्पलजलौकाग्निक्षारनखगोजीशेफालिकाशाकपत्रकरीरबालाङ्कुलय इति। "शिम्बूनां शस्त्रभीरूणां शस्त्राभावे च योजयेत्। त्वक्सारादि चतुर्वर्गं छेद्ये भेद्ये च बुद्धिमान्। आहार्य्यच्छेद्यभेद्येषु नखं शस्त्रेषु योजयेत्। विधिः प्रवक्ष्यते पश्चात् क्षारवह्निजलौकसाम्। ये स्युर्दुर्गता रोगानेतत्पर्य्यायगताश्च ये। गोजीशेफालिकाशाकपत्रैर्विस्रावयेत्तु तान्। एषणीलाभे तु बालाङ्कुल्यङ्कुरा हिताः। शस्त्राण्येतानि मतिमान् युक्तैक्यायधानि तु। कारयेत्करणैः प्राज्ञं कर्म्मारं कर्म्मकोविदम्। प्रयोगशस्त्र वैद्यस्य सिद्धिर्भवति नित्यशः। तस्मात्परिचयः कार्य्यः शस्त्राणामादितः सदा"। [राजनि०।

शस्त्रकोषतक पु० शस्त्रकोषस्य हितस्तद्वत्। महापिण्डीतक्षे

शस्त्रजीविन् पु० शस्त्रेण जीवति जीव-णिनि। शस्त्रव्यापारेण युद्धादिना वृत्तिमति हेमच०।

शस्त्रपाणि पु० शस्त्रं पाणौ यस्य। १शस्त्रधारके २आततायिभेदे च "शस्त्रपाणिर्धनापहः" इति स्मृतिः।

शस्त्रमार्ज्ज पु० शस्त्रं मार्ष्टि मृज-अण् (शिकलकर) शस्त्रमार्ज्जनकरे शिल्पिभेदे अमरः।

शस्त्रहत त्रि० ३त०। १शस्त्रघातेन मृते "पक्षिपशुसरीसृपैर्न दंष्ट्रिदृङ्नखैर्हताः। पतनानशनप्रायैर्वैजाग्निविषबन्धनैः। मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः" देवीपु० परिभाषिते २खगादिहते च। तस्याशौचादि शुद्धित० उक्तं यथा "शस्त्रघाते त्वप्राप्ताद्वर्षं यदि कश्चित् प्रमीयते। अशौचं प्राकृतं तत्र सर्ववर्णेषु निश्चयः" व्यासः "क्षतेन म्रियते यस्तु तस्याशौचं भवेद्द्विधा। आसप्ताहात् त्रिरात्रं स्यात् दशरात्रमतःपरम्"। अत्र शस्त्रघातपरं क्षतेतरशस्त्रघातपरं पारिभाषिकशस्त्रघातपरञ्च। न च शास्त्रीयव्यवहारेऽन्तरङ्गत्वेन पारिभाषिकस्यैव ग्रहणं युक्तमिति वाच्यम् आद्ये पारिभाषिकापरिभाषिकशस्त्रघातयोरुपलक्षणत्वादपि तथा युक्तत्वात् पारिभाषिकत्वादेव न प्रकरणनियमः" शु० त० रघु०।

शस्त्रहतचतुर्दशी स्त्री शस्त्रहतोद्देश्यकश्राद्धाङ्गं चतुर्दश्यां गोधाश्वनक्षत्रयुक्तायां तत्र कर्त्तव्यं श्राद्धं दर्शितं यथा

"अथ शस्त्रहतचतुर्दशी। विष्णुः युद्धहतानां श्राद्धकर्म्मणि चतुर्दशी प्रशस्ता"।

शस्त्रयुद्धहतानामेवेति न नियमार्थम् ब्रह्मपुराणे "प्रायोऽनशनशस्त्राग्निविषोद्बन्धनिनां तथा। चतुर्दश्यां तु कर्त्तव्यं तत्प्रार्थमिति निश्चयः" प्रायोमरणप्रधानम्। वायुपुराणे "युवानस्तु गृहे यस्य मृतास्तेषान्तु दापयेत्। शस्त्रेण च हता ये वै तेषां दद्याच्चतुर्दशीम्"। युवान एव पुत्रादयो मृता इत्यर्थः। मरीचिः "विषशस्त्राग्निदाक्षित्यैर्गवाह्मणघातिनाम्। चतुर्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता"। ब्राह्मणवधतद्घातोऽस्यास्तीति ब्राह्मणघाती तेषां, ये च ब्राह्मणैर्हताः" इति ब्रह्मपुराणवचनात् न तु कृतब्राह्मणघातस्य पतितत्वात्। अन्येषामु अशस्त्रादिहतानाम् एतच्च शस्त्रहतश्राद्धं विष्णादिभिः सामान्यप्रकरणे लिखनात् सकललक्षणपक्षसाधारण्यम् पित्रादीनामेव पार्वणविधिप्रकरणात् पार्वणविधिना कार्य्यं "सपिण्

श्रद्धीकरणादूर्द्धं यत्र यत्र प्रदीयते। तत्र तत्र तयं कृत्वोदङ्मुखं त्रिवा स्तताङ्गनि" इति शङ्खवचनाच्च। ननु "अन्येषान्तु विगर्हिता" इति श्रवणात् कथं तैपुरुषिकपार्वणविधिः न यस्य पुरुषास्त्रय एव श्रस्तहतास्तस्य तैपुरुषिकविधिरुपपद्यत एव यस्य द्वौ श्रस्तहतौ एको वा तेनापि द्वैपुरुषिकैकपुरुषिकमेव पार्वणं कर्त्तव्यं यथा मनुः "पिता यस्य तु हृत्तः स्याज्जीवेद्वापि पितामहः। पितुः स नाम संकीर्त्य कीर्त्तयेत् प्रपितामहम्" तथा हारीतः "पितामहोऽपि जीवेद्वै पितर्यैव समाप्येत्"। नन्वेकोद्दिष्टमात्रं श्रूयते यथाह गार्ग्यः "सपिण्डीकरणादूर्द्धं मृते क्षणचतुर्दशीम्। प्रतिसंवत्सरादन्यदेकोद्दिष्टं न कारयेत्" यमः "सपिण्डीकरणादूर्द्धं यत् पितृभ्यः प्रदीयते। एकोद्दिष्टविधानेन प्रदेयं श्रस्तघातिने" भविष्यपुराणे "समत्वमागतस्यापि पितुः श्रस्तहृतस्य च। चतुर्दश्यां तु कर्त्तव्यमेकोद्दिष्टं न पार्वणम्। चतुर्दश्यां तु यत् श्राद्धं सपिण्डीकरणे कृते। एकोद्दिष्टविधानेन प्रदेयं श्रस्तघातिने" उच्यते। एषां वचनानामसमूलत्वात् समूलत्वेऽपि पार्वणाशक्तविषयकान्येवैतानि विष्णुादिवचनेषु पार्वणावगतेः। भ्रातृादीनान्तु श्रस्तहृतानाम् एकोद्दिष्टविधिना कार्य्यम्। "अपुत्रा ये मृताः कैश्चित् स्त्रियो वा पुरुषाश्च ये। तेषामपि च दातव्यं स्यादेकोद्दिष्टं न पार्वणम्" इत्यापस्तम्बवचने पार्वणनिषेधात्। तच्च न सकलकृष्णपक्षसाधारणं विष्णुादिवचने श्राद्धशब्दस्य पार्वणपरत्वोक्तेः। किन्त्वाश्विनमासीयकृष्णपक्षविषयम्। ब्रह्मपुराणे "प्रायानशनेत्यादिना सकलकृष्णपक्षसाधारणं श्राद्धमभिधायाग्निपुराणे "तर्पणीयाचतुर्दश्यां लुप्तपिण्डोदकक्रियाः" इति पुनरभिधानं तच्छस्त्रहतभ्रात्रादिविषयम् अतएव तत्रैव "अमावास्यायां पितरः पूज्या नान्दीमुखा अपीति" हृद्यप्रपितामहादीनामपि श्राद्धं दर्शितम्। इदञ्च चतुर्दश्यामश्रस्त्रहतश्राद्धनिन्द्या आश्विनमासीयकृष्णपक्षश्राद्धादिकल्पव्यतिरिक्तसामान्यकृष्णपक्षविहितश्राद्धकाम्यश्राद्धविषया प्रकरणभेदेन श्राद्धकर्मभेदात् सामान्यविशेषन्यायाच्च इतरथा चतुर्दश्यां संक्रान्तिश्राद्धेऽश्रस्त्रहतनिन्द्यात् स्यात् अतएव "कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीमिति" मनुवचनेऽपि चतुर्दशीवर्जनं पक्षश्राद्धादिव्यतिरिक्तविषयम्। ननु श्रस्त्रादिहतानां श्राद्धनिषेधः श्रूयते यथा छागलेयः "श्रस्त्रविप्रहतानाञ्च ग्रहक्षिर्दृष्टिदूषितैः। आत्मनस्त्यागिनाञ्चैव श्राद्धमेषां न कारयेत्"। सत्यं बुद्धिपूर्वकमृतानामेव। प्रमादमृतानाञ्च श्राद्धादिक्रमाह अङ्गिराः "अथ कश्चित् प्रमादेन क्षिप्यते ऽम्न्युदकादिभिः। अशौचं तस्य कर्त्तव्यं कर्त्तव्या चोदकक्रिया"। अबुद्धिपूर्वकमपि श्रङ्गप्रादिभिः क्रीड़ां कुर्वतां मृतानां न कर्त्तव्यम्। ब्रह्मपुराणे "ग्रहक्षिर्दृष्टिनखिव्यालविषवह्निक्षिप्ता जलैः। श्रादरात् परिहर्त्तव्यः कुर्वन् क्रीड़ां मृतस्तु यः"। परिहर्त्तव्यः श्राद्धादौ। शास्त्रानुमत्या बुद्धिपूर्वकमृतानामपि कर्त्तव्यम्। गर्ग्यः "नष्टशौचस्मृतिर्लुप्तपात्राख्यतमिषक्क्रियः। श्रात्मानं घातयेद्यस्तु ह्यग्न्युदकनखनादिभिः। तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः। तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमिष्यते"। एवं क्रीड़ाव्यतिरेकेणाऽबुद्धिपूर्वकमृताः शास्त्रानुमत्या च बुद्धिपूर्वकमृता अपि श्राद्धार्हाः। कथम् लुप्तपिण्डोदकत्वम् इति चेन्नैषमिति ब्रूमः बुद्धिपूर्वकमृते पिण्डोदकक्रियालोपात्"।

श्रस्त्राभ्यास पु० ६त०। श्रस्त्रप्रयोगशिक्षायां क्रिया०। [जनि०।

श्रस्त्रायस श्रस्त्रयोग्यमयः अच्समा०। लोहभेदे (इस्पात) रा०।

श्रस्त्रिन् त्रि० श्रस्त्रमस्त्यस्य इनि। श्रस्त्रविशिष्टे।

श्रस्त्री स्त्री स्त्यं श्रस्त्रं ङीप्। क्षुरिकायाम् मेदि०।

श्रस्थ न० श्रस-घ। बालतृणे घासे अमरे पाठान्तरम्।

श्रस्य न० श्रस-यत्। वृन्ताद्दीनां फले "श्रस्यं चेत्वगतं प्राहुः सत्वं धान्यमुच्यते" इत्युक्ते चेत्यस्ये धान्यादौ च अस्य दन्त्यादित्वमपि नवश्रस्यसम्भोगनक्षत्राणि ज्यो० त० उक्तानि यथा "अनुराधा मृगशिरो रेवती चोत्तरात्रयम्। हस्ता चित्रा यमा पुष्या श्रवणा च पुनर्वसुः। रोहिणी नवश्रस्यादिनवद्रव्याशनादिषु। प्रशस्तं नवपीठादिसम्भोगे ग्रहविदुदीरितं"।

श्रस्यध्वंसिन् पु० श्रस्यं ध्वंसयति ध्वंस-णिच्-णिनि। १वृन्ताद्दीनां (डाँट) शब्दच० २श्रस्यनाशके त्रि०।

श्रस्यमञ्जरी स्त्री ६त०। अभिनवधान्यादिशीर्षे अमरः।

श्रस्यशूक न० धान्यादेः शीर्षे अमरः। [अमरः।

श्रस्यसम्भव पु० श्रस्यं संवृणोति सम्+वृ-अच्। शालवृक्षे

श्रस्यारु पु० श्रस्यमृच्छति रुह-उण्। क्षुद्रश्रमीवृक्षे शब्दच०।

श्राक पु०न० श्रक-घञ्। १पत्रपुष्पादौ अमरः २वृक्षभेदे पु० (सेगुण) वृक्षे च शब्दरत्ना० ४शिरोवृक्षे पु० शब्दरत्ना० पूर्वराज्यावधि वत्सरप्रवर्त्तके राजभेदे हेमादौ वत्सरे च पु० मेदि०। श्रयति सामर्थ्यं श्री-क तस्य नेत्वम्।

"मूलपत्रे करीराये फलकाण्डाधिरूढकम् । त्वक्पुष्पं वल्कयैव शाकं दशविधं स्मृतम्" इत्युक्तेषु ७३८७-दीनां पत्रादिषु न० । तत्र १मूलं मूलकादेः । २पत्रं वास्तूकादेः । ३करीरं वंशादेः । ४फलं बेलादेः । ५फलं कुष्माण्डादेः । ६काण्डं उत्पलादेः । ७अधिरूढं तालादिफलाद्यादेः । ८त्वक् मातुलाङ्गादेः । ९पुष्पं कोविदारादेः । १०वल्कं वृत्तिकादेः । भावप्र० अन्यथोक्तं यथा "यत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा । शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम्" । "प्रायः शाकानि वर्षाणि विष्मीनि गुरूणि च । रूक्षाणि बहुवर्षाणि रूक्षविष्मारुतानि च । शाकं भिनत्ति वपुरस्थि निकृन्ति नेत्रम् वर्षं विनाशयति रक्तमथापि शुक्रम् । प्रज्ञाक्षयं च कुरुते पलितञ्च नूनम् कृन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः" । दक्षोपमेदे मत्स्यपु० १२१ अ० तत्प्रमाणाद्युक्तं यथा

"शाकद्वीपस्य वक्ष्यामि यथावद्दिष्टं निश्चयम् । कथ्यमानं निबोधध्वं शाकं द्वीपं द्विजोत्तमाः ! । जम्बूद्वीपस्य विस्तारद्द्विगुणस्यास्य विस्तरः । विस्तारात् द्विगुणस्यापि परीणाहः समन्ततः । तेनावृतः समुद्रोऽयं द्वितीयो लवणोदकः । तत्र पुण्या जनपदा चिरञ्च जियते जनः । कृत एव च दुर्भिक्षं क्षयातेर्जीयुतेष्विह । तत्राऽपि पर्वताः शुभ्राः सप्तैव कथिभूमिताः । शाकद्वीपादिषु त्वेषु सप्त सप्त नगास्त्विह । रूढ्यायताः प्रतिदिशं निविष्टाः पर्वतोत्तमाः । रत्नाकराद्रिनामानः धातुमन्तो महाश्रिताः । समोदिताः प्रतिदिशं द्वीपविस्तारमानतः । उभयत्रावगाढौ च लवणक्षीरसागरौ । शाकद्वीपे तु वक्ष्यामि सप्त दिव्यान् महाचलान् । देवर्षिगन्धर्वयुतः प्रथमो मेरुरुच्यते । प्रागायतः स कौवर्ण उदयो नाम पर्वतः । तत्र मेघास्तु दृश्यन्ते प्रभवन्त्यपयान्ति च । तस्मात्परेण सुमहान् जलधारो महागिरिः । स वै चन्द्रः समाख्यातः सर्वौषधिसमन्वितः । तस्मात्सिद्धमुपादत्ते वासवः परमम्जलम् । नारदो नाम चैवोक्तो दुर्गशैलो महाश्रितः । तत्राश्रमौ बहुत्वम्स्तौ पूर्वं नारदपर्वतौ । तस्मात्परेण सुमहान् श्यामो नाम महागिरिः । यत्र श्यामत्वमापन्नाः प्रजाः पूर्वसमाः किल । स एव दुन्दुभिर्नाम श्यामपर्वतसन्निभः । यद्दक्षत्यु: पुरा तस्मिन् दुन्दुभिस्वाक्षितः पुरैः । रत्नसानुतरुव्याप्तः शातकौम्भवसानरालकम् । तस्मात्परेण रजतो महानस्तोगिरिः स्मृतः । स वै सोमक इत्युक्तो देवैर्वासवं पुरा । ऋक्षवत्त्वाच्छृतत्वैव मातुरर्थे गरुत्मता । तस्मात्परे चाम्बिकेयः सुमनास्त्वेव स स्मृतः । क्षिरसागरो वराहेण तस्मिन् शैले निसूदितः । आम्बिकेयात् परो रम्यः सर्वौषधिनिषेवितः । विभ्राजस्तु समाख्यातः स्फाटिकस्तु महान् गिरिः । यस्मादिभ्राजते वह्निर्विभ्राजस्तेन स स्मृतः । सैवेह केशवेत्युक्तो यतो वायुः प्रवाति च । तेषां वर्षाणि वक्ष्यामि पर्वतानां द्विजोत्तमाः । सप्तभ्यं नामतस्तानि यथावदनुपूर्वशः । द्विनाम्न्येव वर्षाणि यस्यैव गिरयस्मृता । उदयोदयं वर्षं जलधारेति विश्रुतम् । नाम्ना गतभयं नाम वर्षं तत् प्रथमं स्मृतम् । द्वितीयं जलधारस्य सुकुमारमिति स्मृतम् । तस्यैव शैशिरं नाम वर्षं तत् परिकीर्त्तितम् । नारदस्य च कौमारन्तस्यैव च सुखोदयम् । श्यामपर्वतवर्षं तदनीचकमिति स्मृतम् । आनन्दकमिति प्रोक्तं तस्यैव मुनिभिः शुभम् । सोमकस्य शुभं वर्षं विज्ञेयं कुसुमोत्करम् । तस्यैवाम्बितमित्युक्तं वर्षं सोमकसंज्ञितम् । आम्बिकेयस्य चैनाकं चैलकस्यैव तत् स्मृतम् । तस्यैव ध्रुवमित्युक्तं वर्षं विभ्राजसंज्ञितम् । द्वीपस्य परिशाकस्य हृस्वदीर्घत्वमेव च । जम्बूद्वीपेन संख्यातं तस्य मध्ये वनस्पतिम् । शाको नाम महाद्रुमः प्रजास्तस्य महानुगाः । एतेषु देवगन्धर्वाः सिद्धाश्च सह चारणैः । विहरन्ति रमन्ते च दृश्यन्ते चाप्सरोगणाः तैः सह । तत्र पुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः । तेषु नद्यश्च सप्तैव प्रतिवर्षं समुद्गमाः । द्विनाम्न्या चैव ताः सर्वा गङ्गा सप्तविधा स्मृता । प्रथमा सुकुमारीति गङ्गा शिवजला शुभा । सुनिताप्ता च नाम्नैषा नदी सम्परिकीर्त्तिता । सुकुमारी तपःसिद्धा द्वितीया नामतः स्मृता । नन्दा च पावनी चैव तृतीया परिकीर्त्तिता । शिविका च चतुर्थी स्यात् त्रिविधा च पुनः स्मृता । दक्षुश्च पञ्चमी ज्ञेया तथैव च पुनः क्षुद्रः । वेणुका चारुता चैव षष्ठी सम्परिकीर्त्तिता । सुकृता च गभस्ती च सप्तमी परिकीर्त्तिता । एताः सप्त महाभागाः ! प्रतिवर्षं शिवोदकाः । भावयन्ति जनं सर्वं शाकद्वीपनिवासिनम् । अभिगच्छन्ति ताश्चान्या नद्यश्च सरांसि च । बहुदकसरिद्भावा यतो वर्षन्ति वासवः । तासान्तु नामधेयानि परिमाणं तथैव च । न शक्यं परिसंख्यातुं बहुत्वात्तासां द्विजसत्तमाः ! । ताः पिबन्ति सदा हृष्टा नदीर्जनपदाः

एते शान्तिमयाः प्रोक्ताः प्रमोदाये च वै त्रियाः। आनन्दाश्च सुखाश्चैव क्षेमकाश्च नरैः सह। वर्णाश्रमाचारवृता देशास्ते सप्त विश्रुताः। आरोग्या वह्निनश्चैव सर्वे मरणवर्जिताः। अवर्षणी न तेष्वस्ति तथैवोत् वर्षिणी पुनः। न तत्रास्ति युगावस्था चतुर्युगसता क्वचित्। त्रेतायुगसमः कालस्तथा तत्र प्रवर्त्तते। शाक द्वीपादिषु ज्ञेयं पञ्चखेतेषु सर्वशः। देशस्य तु विचारेण कालः स्वाभाविकः कृतः। न तेषु सङ्करः कश्चित् वर्णाश्रमसतः क्वचित्। धर्मस्य चाल्पमीचारादेकान्तसक्षिनो जनाः। न तेषु माया लोभो वा ईर्ष्यासूया भयं कुतः। विपर्ययो न तेष्वस्ति तद्वै स्वाभाविकं कृतम्। कालो नैव च तेष्वस्ति न दण्डो न च दण्डिकः। स्वधर्मेण च धर्मज्ञास्ते रक्षन्ति परस्परम्"।

शाकवुक्किका स्त्री शाकेषु मध्ये वुक्किका। चिञ्चायां राजनि०।

शाकट न० शकटाय हितम् अण्। १शकटसम्बन्धियुगादौ २शकटयोऽरि च मेदि०। ३क्षोमजातके वृक्षे राजनि०। ४षण्ढवृक्षे च पु० रत्नमा०।

शाकटायन पु० व्याकरणकारके मुनिभेदे "इन्द्रचन्द्रः काशकृत्स्नापिशली शाकटायनः। पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः" कविकल्पद्रुमः।

शाकटिक पु० शकटेन चरति ठञ्। शकटेन गन्तरि।

शाकटीन पु० शकटः परिमाणमस्य खञ्। विंशतितुलापरिमाणे हेमच०। [शाकटलादयोऽत्र।

शाकतरु पु० शाकाख्यः तरुः। (सेगुण) वृक्षे शब्दच०।

शाकपत्त्र पु० शाकस्येव पत्त्रमस्य। शिग्रुवृक्षे राजनि०।

शाकबालेय पु० बल्ये हितम् ढक् शाकप्रधानो बालेयः। नक्षयष्टिकायाम् शब्दच०। [क। तत्रैव लिका०।

शाकबिल्व पु०शाकोऽपि बिल्व इव। वार्त्ताकौ लटा०खार्थे

शाकम्भरी स्त्री शाकैर्बिभर्त्ति भृ-खच् मुम् च। "भरिष्यामि सुराः शाकैरात्मदेहैः प्राणधारकैः। शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि" देवीभा० निरुक्ता० यास् १दुर्गायाम्। २रोमकान्तर्गतशाकम्भरनगर्यां न० तत्र भवं छ। शाकम्भरीय खवणभेदे न० "शाकम्भरीयं कथितं गड़ाख्यं रोमकं तथा। गड़ाख्यं लघुवातघ्नमल्पक्षारं मेदि पित्तलम्। तीक्ष्णं अग्निकृच्छ्वासाभिषग्विद्भिः कटुपाकि च" भावप्र०।

शाकयोग्य पु० शाके तद्भक्षणे योग्यः। धान्यके राजनि०।

शाकराज पु० शाकेषु राजते अच्, शाकानां वा राजा टच् समा०। वास्तूकशाके राजनि०।

शाकल पु० ब०व० शकलेन ऋषिणा प्रोक्तमधीयते अण्। १शकलर्षिप्रोक्तकल्पादिग्रन्थाध्येतृषु। तेषां संघोऽङ्गो घोषो वा पुनरण् वुञ् वा। शाकल शाकलक वा। १तत्समूहे २तदङ्गे ३तद्घोषे च पु०। अङ्गः परम्परा सम्बन्धः" सि०कौ०।

शाकलिक त्रि० शकलखेदं ठक् कालात्० वार्त्ति०। शकलसम्बन्धिनि पक्षे अण् शाकल तत्रार्थे। [शाके लिका०।

शाकवीर पु० शाकेषु वीरः वीर्याधायकत्वात्। १वास्तूकशाके राजनि०। [हुमे राजनि०।

शाकशाकट न० शाकस्य क्षेत्रं शाकटच्। शाकक्षेत्रे। शाकटिनच् शाकशाकटिन अत्रार्थे हेमच०।

शाकश्रेष्ठ पु० शाकेषु श्रेष्ठः। १वास्तूकशाके शब्दर०। २जीवन्त्यां ३वार्त्ताकौ स्त्री हेमच०।

शाकाङ्ग न० शाकस्य तद्भक्षणस्याङ्गसुपयोगि। १मरिचे २डोडीफले राजनि०।

शाकाम्ल न० शाकमेवाम्लम्। वृक्षाम्ले राजनि०।

शाकाम्लभेदन न० शाकरूपम् अम्लं भिनत्ति भिद-ल्यु। १चुक्रे (चुकोपालङ्क) राजनि०। [वृक्षे राजनि०।

शाकालाबु स्त्री शाकप्रधानालाबुः। अलाबुभेदे राजालाबु

शाकाष्टका स्त्री शाकेन कर्त्तव्या अष्टका। गौणकालगुणकर्म्माण्यां अष्टकाशब्दे ५१६ पृ० दृश्यम्।

शाकिनी स्त्री शाकमस्त्यस्याः इतच्पक्षेन इनि। १शाकभक्षणयोग्यायां भूमौ २गृहवाटिकायाम् ३देवीसहचरीभेदे च। "डाकिनी योगिनी चैव खेचरी शाकिनी तथा। दिक्षु पूज्या इमा देव्यः सुसिद्धिफलदायिकाः" कालि०कल्प०। कण्ठदेशस्थे विशुद्धाख्ये चक्रे स्थितायां ४देवीशक्तौ च "विशुद्धाख्ये महाचक्रे षोड़शस्वरसंयुते। सदाशिवं शाकिनीञ्च विन्यसेत् पूर्ववक्त्रतः" तन्त्रसा०।

शाकुण पु० शक-वा० उणन्। परतापके शब्दमा०।

शाकुन पु० शकुनं शुभाशुभसूचकं निमित्तमधिकृत्य कृतो ग्रन्थः अण्। शकुनज्ञानसाधने ग्रन्थे (काकचरित)। "शुभाशुभज्ञानविनिर्णयार्थं हेतुर्निमित्तं यः शकुनः स उक्तः। गतिस्वरालोकनभावचेष्टा संकीर्त्तिता योऽत्र पदादिकानाम्। लोकोऽनया शाकुनसंज्ञकेन ज्ञानेन विज्ञातसमस्तकृत्यः। नापायकूपे पतति प्रसर्पन् शास्त्रं हि दिव्या दृगतीन्द्रियेषु" वसन्तराजः।

शाकुनिक पु० शकुनेन पक्षिवधादिना जीवति ठञ्। पक्षिघातके अमरः।

शाकुन्तलेय पु० शकुन्तलाया अपत्यं ढक्। दुष्मन्तात्मजे शकुन्तलागर्भजे भरते नृपे जटा०।

शाक्त त्रि० शक्तिर्देवताऽस्य अण्। तन्त्रोक्ते शक्तिदेवतोपासके तस्य प्रशंसा मुण्डमालात० २पटले उक्ता "स्वर्गे मर्त्ये च पाताले नास्ति शाक्तात् परः प्रियः। सौराणां गाणपत्यानां वैष्णवानां तथैव च। शैवानां चैव शाक्तस्य क्रमशः क्रमशः प्रिये!" "शाक्ता एव द्विजाः सर्वे न शैवा न च वैष्णवाः। उपासते यतो देवीं गायत्रीं परमाक्षराम्" निर्णयत० २पटले। "अन्याराधनं कृत्वा नान्यस्याराधनं चरेत्। अन्यस्य स्मरणाद्देवि! योगिनी शापमाप्नुयात्" गन्धर्वत०। "तर्जन्या रजतं धार्य्यं स्वर्णं मध्यमनामया। एष एव कृतः शाक्तो न दर्भो वनसम्भवः" श्यामार०। [अमरः।

शाक्तीक पु० शक्तिः प्रहरणमस्य ठक्। शक्त्या योद्धरि

शाक्य पु० शक-घञ् तत्र साधुः यत्। बुद्धे।

शाक्यशब्दनिरुक्तिरन्यथोक्ता यथा

"शाकवृक्षप्रतिच्छन्नं वासं यस्मात् प्रचक्रिरे। तस्मादिक्ष्वाकुवंश्यास्ते भुवि शाक्या इति स्मृताः" भरतधृतवचनम्। इयमाख्यायिका पितृशप्ताः कैचिदिक्ष्वाकुवंश्या गोतमवंशजकपिलमुनेराश्रमे योगाभ्यासाय शाकवृक्षे कृतवासाः शाक्या इति ख्यातिमापन्नाः।

शाक्यमुनि पु० शाक्यो मुनिः। बुद्धभेदे अमरः।

शाक्यसिंह पु० शाक्यवंशे सिंह इव। बुद्धभेदे अमरः।

शाक्र त्रि० शक्रस्येदं वा देवताऽस्य वा अण्। १इन्द्रसम्बन्धिनि २इन्द्रदेवताके हविरादौ। स्त्रियां ङीप्। शक्रस्तत्तुल्यपराक्रमः अस्त्रस्या अण्। २शक्रतत्पराक्रमायां दुर्गायाञ्च "इन्द्राणी इन्द्रजननी शाक्री शक्रपराक्रमा" देवीपु०।

शाकर पु० शक-वरप् स्वार्थे अण्। दध्नि हेमच०।

शाख व्याप्तौ भ्वा० पर० सक० सेट् कृदित् चङि न हृस्वः। शाखति अशाखीत्।

शाख पु० शाख-अच्। क्षत्त्रियापुत्रे स्कन्दानुजे १कुमारानुचरगणभेदे "अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत। तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजाः" मत्स्यपु०५अ०। २अन्यपरिच्छेदे सर्गस्थानीये ग्रन्थांशभेदे शब्दच०। वृक्षस्कांधभेदे (डाल) स्त्री अमरः। ३पक्षान्तरे ४राहौ ५वेदैकदेशे च स्त्री मेदि०। ६अन्तिके विश्वः। ७देहांशभेदे च।

शाखाकण्ट पु० शाखाव्यापी कण्टः कण्टको यस्य। क्षुद्रौ वृक्षे राजनि०। [पुरे अमरः। शाखापुरादवोऽस्य

शाखानगर न० शाखेव नगरम्। मूलनगरसमीपस्थे क्षुद्र-

शाखापित्त पु० शाखासु पित्तं यतः। पाणिपादादिदेशे शाखादाहे राजनि०। [स्त्रियां ङीष्।

शाखामृग पुंस्त्री० शाखास्थो मृगः पशुः। वानरे अमरः।

शाखाल्ला स्त्री शाखास्थल्ला। वृक्षाल्ले राजनि०।

शाखारण्ड पु० शाखायां वेदशाखायां रण्डः तद्विहित कर्मानाचरणात्। स्वशाखात्यागेनापरशाखोक्तकर्मकर्त्तरि हेमच०। [राजनि०।

शाखाल पु० शाखाः बाहुल्येन सन्त्यस्य लच्। वानीरवृक्षे

शाखाशिफा स्त्री शाखारूढा शिफा मूलम् शाक०। वटादीनां शाखाजाते १मूले अमरः। २शिफाशब्दारभ्य शाखायुतायां गुडूच्यादिलतायाम् भरतः।

शाखिन् पु० शाखाऽस्त्यस्य इनि। १वृक्षे अमरः। २वेदैकदेशवति, ३वृत्तभेदे, ४ म्लेच्छभेदे च मेदि०।

शाखोट पु० शाख-व्याप्तौ खोटन् (शाकोड़ा) वृक्षे तिकाण स्वार्थे क। तत्रैव।

शाङ्किक पुंस्त्री० शङ्खस्तद्विकारवलयनिर्माणं शिल्पमस्य ठञ्। जातिभेदे (शाँखारी) अमरः स्त्रियां ङीष्। [रत्नमा०।

शाङ्कुष्ठा स्त्री शपति शो-क शः अङ्कुष्ठ इव यस्याः। गुञ्जायां

शाट पु० शट-घञ्। वस्त्रे अमरः। स्त्रीत्वमपि गौरा०ङीष्।

शाटक पु०न० शट-एवुल्। वस्त्रे अमरः स्त्रीत्वमपि टाप्।

शाट्यायन पु० १मुनिभेदे, तेन प्रोक्तम् अण्। २प्रकृतहोमकर्मणि वैगुण्यसमाधनार्थं विहिते होमभेदे न०भवदेवः।

शाठ्य न० शठस्य भावः ष्यञ्। शठतायाम्। [चञ्चिन्न छुखः।

शाड श्लाघायां श्वा०आ०सक० सेट्। शाडते अशाडिष्ट अशाडिष्ट

शाण न० शणेन निर्वृत्तम् अण्। शणसूत्रनिर्मिते १वस्त्रादौ शण-दाने(तेजने) घञ्। (कष्टिपाथर) २कषणपाषाणे ३अस्त्रादीनां निकषणे तीक्ष्णकरणयन्त्रभेदे मेदि० ४करपत्रे (करात) विश्वः। ५माषचतुष्कमाने भावप्र०।

शाणाजीव पु० शाणमाजीवति आ+जीव-अण्। तीक्ष्णताकारके शिल्पिनि हेमच०।

शाणि पु० शण-इण्। १षट्टवस्त्रे शब्दच०। शणेन निर्वृत्ता इञ् वा ङीप्। २शणनिर्मिते पट्टिकावस्त्रे ३शल्किवस्त्रे च हेमच० ४कलकटाद्यादिसूचनायां शङ्कौ। ५वस्त्रखण्डपे (ताँतु) मेदि०।

शाणित त्रि० शण-दाने (तेजने) णिच्-क्त। तीक्ष्णीकृते।

शाणीर न० शण-वा० ईरण्। शोणनदमध्यस्थतले विश्वः।

शाण्डिल्य त्रि० अण्डिलस्यापत्यम् यञ्। गोत्रप्रवर्त्तके भक्तिशास्त्रकारके ऋषिभेदे मेदि०। भक्तिशब्दे तन्मतं दिग्मात्रं दर्शितम्। तत्प्रियत्वात् २बिल्वे अमरः ३वह्निभेदे च मेदि०।

शात म०धो-क्त। १सुखे २तनूकृति त्रि०अमरः। ३क्षिप्ते ४क्षये त्रि० विश्वः। ५दुर्बले ६निश्चिते च त्रि० मेदि०। ७धूस्तूरे पु०अमरः। [अमरः २धूस्तूरे ३करवीरे च पु० मेदि०।

शातकुम्भ न० शतकुम्भे गिरौ भवः अण्। १हिरण्ये

शातकौम्भ न० शतकुम्भे भवम् अण् द्विपदवृद्धिः। १हिरण्ये २धूस्तूरे च हिङ्गुकोषः।

शातन न० शो-णिच्-ल्यु ट्। १तनूकरणे २विनाशने च "वस्त्रे सर्वशस्त्राणां जायते पत्त्रशातनम्" इति अधिकरणमाला। [चन्द्रप्रभायां शब्दच०।

शातपत्रक पु० शतपत्रमिव कायति के-क स्वार्थे अण्।

शातभीरु पु० शाता दुर्बलाः पान्था भीरवो यस्याः ६ब०। १मल्लिकाभेदे रत्नमाला। [वि०कौ०।

शातमान त्रि० शतमानेन क्रीतम् अण्। शतमानेन क्रीते

शातला स्त्री शातं काश्यं लाति ला-क। (षाणक्षमा) दृष्टे भरतः।

शातातप पु० ऋतिकारके मुनिभेदे। तेन प्रोक्तं कृ। शातातपोक्त तत्प्रोक्ते कर्मविपाकग्रन्थे।

शात्रव पु० शत्रुरेव स्वार्थेऽण्। १रिपौ अमरः। तस्य भावः तेषां संघो वा अण्। २वैरे ३रिपुसमूहे च न०।

शाद पु० शद-घञ्। १कर्दमे २हरिततृणे च अमरः।

शादहरित पु०शादेन हरितसदृशवर्णयुक्तः। शाद्वले देशे अमरः

शाद्वल पु०शादाः सन्त्यत्र शद्वच्। बहुशहरिततृणयुक्ते देशे अमरः। [अमीशांसीत अमीशांसिष्ट।

शान तेजने भ्वा० उभ०सक०सेट् स्वार्थे यङ्। शीशांसति ते

शान पु० शान-घञ् वो निशाने इत्युज्ज्वलदत्तः। अस्त्रादीनां तीक्ष्णताकारके यन्त्रभेदे भरतः।

शानी स्त्री शान-ङीष्। इन्द्रयाकरण्यां शब्दच०।

शान्त त्रि० शम-क्त। १शमयुक्ते २अभियुक्ते च शम-णिच्-क्त नि०। ३शान्तिं गमिते त्रि०। ४निर्वेदस्थायिभावके रसभेदे पु० मेदि०। ५लोभपादराजकन्यायाम्, ऋषभपत्न्यां ६यतीभेदे च स्त्री राजनि०।

शान्तरसनिरूपणं सा०द० ३प० यथा

"शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः। कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः। अनित्यत्वादितात्पर्येष्वस्य निःसारता हृदि वा। परमात्मस्वरूपं वा तत्त्वालम्बनविभावते। पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः। महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः। रोमाञ्चाद्यास्तानुभावास्तथा स्मृतिमतिधारिकाः। निर्वेदहर्षस्मरणमतिभूतदयादयः। निरहङ्कारस्वरूपत्वाद्व्यभिचारिषु नो"। दयावीरादौ हि जीमूतवाहनादौ अनरा मत्सरवत्त्वात्तदनुरागादेरत्ने च विद्याधरचक्रवर्त्तित्वाद्यात्मे दर्शनाहङ्कारोपशमो न दृश्यते। शान्तस्तु सर्वप्रकारेणाहङ्कारप्रशमैकरूपत्वात्र तत्त्वालम्बीभवमर्हति। अतश्च नागानन्दे शान्तरसप्रधानत्वमपास्तम्"। ननु "न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा। रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः" इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मरूपावस्थितिलक्षणायां प्रादुर्भावात् तत्र सञ्चार्यादीनामभावात् कथं रसत्वमित्युच्यते। "युक्तविमुक्तदशायामवस्थितो यः शमः स एव यतः। रसतामेति ततश्चिन्त्य सञ्चार्यादेः स्थितिश्च न विरुद्धा"। यद्यप्येवं सुखाभावोऽप्युक्तस्तु वैषयिकसुखपरत्वान्न विरोधः। उक्तं हि "यच्च कामसुखं लोके यच्च दिव्यं महासुखम्। तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्। सर्वाकारमहङ्काररहितत्वं प्रजल्पन्ति बुधाः। अतश्चात्मीभवमर्हन्ति दयावीरादयस्तदा"। आदिशब्दात् धर्मवीरदानवीरदेवताविषयरतिप्रभृतयः"। [नव" इति तत्तत्पदमञ्जर्यः।

शान्तनव पु० शान्तनोरपत्यम् अण्। भीष्मे "भीष्मः शान्तनवो"

शान्तनु पु० हापरयुगभवे चन्द्रवंश्ये प्रतीपराजपुत्रे नृपभेदे

शान्तम् अव्य० शान्ति+बा० डति। निवारणे मेदि०।

शान्ति स्त्री शम-क्तिन्। १कामक्रोधादिजये २विघ्नेभ्यो मनसो निवारणे अमरः। ३शमदमनिवारणे ४निवारणे च "यत्किञ्चिदस्तु संप्राप्य स्वल्पं वा यदि वा बहु। या तृप्तिर्जायते चित्ते सा शान्तिः कथ्यते बुधैः" पद्मपु० क्रियायोग० उक्ते पुत्रेष्टियागभेदे ६दुर्गायाम् "सर्वज्ञा सर्ववेत्तृत्वात् शान्तित्वाच्छान्तिरुच्यते" देवीपु०। ७पूजाहोमजपादानादिद्वारा गोचरविजयादिरूपदृष्टोत्पादः स्वदुःस्वप्नादिरूपितैर्हिंसादिहेतूपपातनिवृत्तौ च "यथा ग्रहप्रहाराणां कर्त्तव्यं विनिवारणम्। तथा दैवोपघातानां शान्तिर्भवति कारणम्" मत्स्यपुराणवाक्यम्। सा च मत्स्यमासेऽपि कार्य्या नैमित्तिकत्वात् "नैमित्तिकानि काम्यानि नियतानि यथा यथा। तथा तथैव कार्य्याणि

न शान्तेषु विधीयते" इति मल०त० वाक्यात्। अङ्गु-लादिशान्तिश्च हेमाद्रिशान्तिकाग्रे शान्तिशब्दादौ दृश्या।

शान्तिक त्रि० शान्तये हितं ठक्। शान्तिसाधने होमादौ तत्करणसङ्कल्पादिकं मु०चि० उक्तं पी० ध० यथा "शिप्रभ्रुवान्यधरमैत्रमघासु शस्तं स्याच्छान्तिकञ्च वह भङ्गलपौष्टिकाभ्याम्। खेऽर्के विधौ सुखगते तनुगे गुरौ, नोनौत्यादिदुष्टसमये, शुभदं निगदितं"। "अथ शान्तिक-पौष्टिकादिकर्म्मसु सङ्कल्पं वक्तव्यतिक्रमेणाह। शिप्रेति शिप्रादीनि मघान्तानि नक्षत्राणि तेषु पौष्टिकं मङ्गलं विनायकशान्त्यादि शान्तिकं दुष्टफलदमूलनक्षत्रादुत्पन्नशा-न्त्यादि एतानि कर्म्माणि कार्य्याणि उक्तञ्च दीपि-कायाम्। "शिवादित्यमघोत्तराश्वतभिषक्स्वातीवि-शाच्युतस्रवणाधीश्वरपूज्यपौष्णरविषु स्फीते तमारक्षिणि। रिक्तां पर्व विहाय सौम्यदिवसे शस्ते लग्नां भुवे वर्मैः शान्तिकपौष्टिकं निगदितं गर्गादिभिर्निश्चयात्" अथ लग्नशुद्धिः तत्रार्के खस्थे खे दशमे सति विधौ चन्द्रे सुखगते चतुर्थस्थे गुरौ तनुगे लग्नस्थे सति शान्त्यादिकं कर्म कार्य्यं उक्तञ्च रत्नमालायाम्। "पूर्णे चन्द्रे वेश्मग-तेऽर्केऽम्बरा०स्थे लग्ने जीवे, वाक्पतेर्वाम्बरे च। शौमत्या-युष्प्राप्ति कार्य्याणि कार्य्याणीति" नोतच्छान्तिकादि शौक्ले शुक्रशुक्रयोरस्तादिके बाल्यवार्द्धकसिंहस्थगुर्वादिरूपे दुष्ट-समयेऽपि न शुभदम्। तथा निमित्ते कोत्पातदुःस्वप्नदर्शने सति शुभदं उक्तञ्च दीपिकायाम्। शान्तिकर्म्माणि कुनीति-रोगे नैमित्तिके तथा। गुरुभार्गवशौक्रेऽपि दोषस्तत्र न विद्यते"। उक्तञ्चैतत् "यतोऽस्तीदं शान्तिकं नैमित्ति-कम् "अनिमित्तकृता शान्तिर्निमित्तायोपजायते इति स्म-रणात्। तत्र निमित्ते रोगरूपे कोत्पातोल्कातारदर्शन-रूपे च भवति नैमित्तिकं तच्च बहुदिनव्यापके गुरु-शुक्रास्तादिदोषेऽप्यवश्यं विधेयं यतो जन्मान्तरीयदुर-दृष्टबलकल्पितं निमित्तमुत्पन्नं तस्य शान्त्या निरासादशु-भादृष्टस्यापि निरासः। बहुदिनग्राह्ये निर्दुष्टे काले क्रियमाणं शान्तिकं किञ्चिद्दुरदृष्टनाशकं यद्यपि भवति तथापि तावद्भिर्दिनैर्दुरदृष्टस्य प्राबल्याद् दुःखप्राप्तिः यथाल्पोऽग्निरल्पेनैव जलेन शान्तो भवति तथा सकलनगरदाहको बहुभिर्बहुभिर्घटैर्जलैः शान्तो भवति पूर्णघटैरेकेनैवाग्निर्निर्वाप्यते इ-त्यर्थः सर्वथा शौक्रादिदोषं विनैव यथा कथञ्चित्कथित-प्रकारेण दिनशुद्धिमङ्गीकृत्य शान्तिकाद्यवश्यं विधेयम्"।

शाप पु० शप्-घञ्। (अनिट् भूवादित्वेवम्) १आक्रोश-रूपे २शपथे च मेदि०।

शापास्त्र पु० शाप एवास्त्रं यस्य। मुनौ त्रिका०।

शाब्दबोध पु०शब्देन निर्वृत्तः अण् कर्म०। अन्वयबोधे शब्द-ज्ञानजन्ये पदार्थस्मृतिद्वारके ज्ञानभेदे न्यायमतम्। शा-ब्दत्वं स्वसमवेतत्वव्याप्यं जातिभेदः तद्बोधप्रकारादि भाषा० उक्तं यथा "पदज्ञानन्तु करणं द्वारं तत्र पदा-र्थधीः। शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी। लक्षणा यत्र सम्बन्धस्तात्पर्यानुपपत्तितः। आसत्तियो-ग्यताकाङ्क्षातात्पर्य्यज्ञानमिष्यते"। भाषा० सि०मु० विवृत-मेतत् यथा

"शाब्दबोधप्रकारं दर्शयति। पदज्ञानन्विति। न तु न्यायमात्रं पदं करणम् पदाभावेऽपि सौनिश्लोकादौ शाब्दबोधात्। पदार्थधीरिति। पदजन्यपदार्थस्मरणं व्यापारः। अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थो-पस्थितावपि शाब्दबोधापत्तेः। तत्रापि द्वित्या पद-जन्यत्वं बोध्यम्। अन्यथा घटादिपदात् समवायसम्ब-न्धेन यत्राकाशस्मरणं जायते तत्राकाशस्यापि शाब्द-बोधापत्तेः। वृत्तिः शक्तिर्लक्षणान्यतरः सम्बन्धः। अत्रैव शक्तिज्ञानस्योपयोगः। पूर्वं शक्तिग्रहाभावे पद-ज्ञानेऽपि तत्सम्बन्धेन स्मरणानुपपत्तेः। पदज्ञानस्य सम्बन्धिज्ञानविधयार्थस्मारकत्वम्। शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। सा चाकाङ्क्षादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा। आधुनिकैर्नाग्नि शक्तिरस्त्येव। "एकादशेऽहनि पिता नाम कुर्य्यात्" इतीश्वरेच्छायाः सत्त्वात्। आधुनिकैस्तु सङ्केते न शक्तिरिति सम्प्रदायः। लक्ष्यास्तु ईश्वरेच्छा न शक्तिः किन्त्वित्थमेव। तेन आध-निकसङ्केतेऽपि शक्तिरस्तीति वदन्ति"।

शाब्दिक पु० शब्दं शब्दसाधुतात्वापकं शास्त्रं वेत्त्यधीते वा ठक्। व्याकरणशास्त्रभिज्ञे।

शामित्र न० शम-णिच् इत्रच्। १पशुबन्धने। शमितुः कर्म-अण्। यज्ञार्थपशुहननकर्तृभावे २तद्धनने च।

शामीन न०शम-ईनञ्।१भस्मनि २कुथि स्त्री ङीप् सि०कौ०

शाम्बरी स्त्री शम्बरेण निर्वृत्ता अण् ङीप्। मायायाम् इन्द्रजालादौ अमरः। [जटा०।

शाम्बविक त्रि० शम्बूः एवमस्य ठक्। शाम्बूके (गाँखारी)

शाम्बु(म्बू)क पु० श(म्बु)म्बूक+स्वार्थे अण्। शम्बुके (शामुक) भरतः।

शाम्भव पु० शम्भोरयम् अण् । १गुग्गुलौ २कर्पूरे ३शिवभक्तिकायां राजनि० । ४विषभेदे भट्टच० ५शम्भुपुत्रे पु० ६देवदारुणि च न० राजनि० ७शिवसम्बन्धिनि दनदुपासके च त्रि० । ८दुर्गायां स्त्री "शाम्भवी कुपिता नस्येति" तन्त्रम् ।

शा(सा)यक पु० शो(शे) या-ण्वुल् । १बाणे खड्गे च जटा०

शार दौर्बल्ये भ्वा० चु० उभ० सक० सेट् । शारयति-ते अशशारत् त ।

शार न० शार-अच्, पृ-घञ् वा । १कर्बूरवर्णे २तनति त्रि० अमरः ३बाणौ पु० अमरः ४अन्नोपकरणे मेदि० ।

शारङ्ग पुंस्त्री० शारं कर्बुरमङ्गं यस्य अक० । १चातकपक्षिणि २हरिणे ३गजे ४भृङ्गे ५मयूरे च । रायमुकुटः जातित्वात् स्त्रियां ङीष् । ६हिंस्रे ७वाद्ययन्त्रभेदे स्त्री ङीप् शब्दार्थचि० ।

शारद न० शरदि भवम्-कल्यण् । १श्वेतपद्मे राजनि० । २काशे ३वस्त्रे ४हरिन्मृगे च पु० राजनि० ५शरद्भवमात्रे त्रि० स्त्रियां ङीष् । शारदं श्वेतपद्ममस्त्यस्याः अच् । ६सरस्वत्यां स्त्री त्रिका० । ७नूतने दध्यादिमात्रे त्रि० मेदि० । ८शालीने त्रि० विश्वः । १०दुर्गायां स्त्री टाप् "शरत्काले पुरा यस्मात् नवम्यां बोधिता सुरैः । शारदा सा समाख्याता पीठे लोके च नामतः" तिथितत्त्व० । ११वानरभेदे भट्टर० । १२सोमपिप्पल्यां १३सप्तच्छदे स्त्री मेदि० ङीष् एवं १४कोजागरपूर्णिमायां स्त्री भट्टरत्ना० शरत्कालीने पूजादौ त्रि० स्त्रियां ङीप् । "शारदी चण्डिकापूजा त्रिविधा परिकीर्त्तिता । सात्त्विकी राजसी चैव तामसी चेति सा स्मृता" भविष्यपु० । [भवे १आत्मे २शरत्कालजे रोगे पु० शारदिक न० शरदि भवं आत्मे रोगो वा ठञ् । शरत्काले शारदीय त्रि० शरदि भवः छण् । १शरत्काले कर्त्तव्ये उत्सवादौ तथाभूतायां दुर्गापूजायां स्त्री "अद्यैव जगदम्बायाः शारदीयो महोत्सवः" । "शारदीया महापूजा चतुःकर्मसयी शुभा" तिथितत्त्व० ।

शारि(री) स्त्री शृ-इञ् वा ङीष् । १पाशकादिगुटिकायां २अन्नोपकरणे च मेदि० । ३पक्षिभेदे च "शारी चरन्तीं वक्षि ! शारयेति" नैषधम् । ४युद्धार्थगजपर्य्याणे ५व्यवहारभेदे मेदि० । ६कपटे धरणिः । स्वार्थे क । पक्षिभेदे वीणावादने च हेमच० ।

शारिफल पु० न० शारेः फलमिवाधारः । शारिफलके पाशकक्रीड़ासाधने २द्रव्ये (ऊक) अमरः स्वार्थे क । तत्रैव ।

शारिवा स्त्री शारिरिव वनति वन-ड । श्यामालतायाम् अमरः । "एकं वै शारिवामूलं सर्वव्रणविशोषणम्" वैद्यः ।

शारिशृङ्खला स्त्री शारेः शृङ्खलेव । पाशकभेदे तद्भेदाश्च "चक्रुरी तिन्तिड़ी द्यूतं पञ्चमी शारिशृङ्खला । नयः पीठो घाष्टकाद्यो नयः स्याज्जयपुत्रकः । एते पाशकभेदाः सुलयकोलाहलोऽपि च" भट्टरः ।

शारीर त्रि० शरीरस्येदम् अण् । १देहसम्बन्धे सुखदुःखादौ तत्प्रोक्तमस्य पुनः अण् । २दक्षे पु० मेदि० । शरीरमात्मत्वेनाभिमन्यते अण् । ३जीवे । स्वार्थे क । तत्रार्थे । शारीरं जीवं दुःखं वा अधिकृत्य कृतो ग्रन्थः कन् । व्याख्याते वेदान्तशास्त्रे चिकित्साङ्गे सुश्रुतग्रन्थाद्येकदेशे च शारीरश्च दुःखं रोगादिकं यथोक्तं विष्णुपु० ६५अ० । "आध्यात्मिकोऽपि द्विविधः शारीरो मानसस्तथा । शारीरो बहुभिर्भेदैर्भिद्यते भूयताञ्च सः । शिरोरोग प्रतिश्यायज्वरशूलभगन्दरैः । गुल्मार्शःक्षयपुच्छास छर्द्यादिभिरनेकधा । तथाग्निरोगातिसारकुष्ठाङ्गामयसंज्ञकैः । भिद्यते देहिनस्तापो मानसं श्रोतुमर्हसि" सुश्रुतान्तर्गतशारीरकस्थानञ्च तत्र दृश्यम् ।

शारीरिक त्रि० शरीरे भवः ठक् । देहजाते दुःखादौ ।

शारुक त्रि० शृ-उकञ् । हिंसके ।

शार्कर त्रि० शर्करा अस्त्यस्य अण् । १शर्करायुक्ते देशे शर्कराया विकारः अण् । २क्षाणिते २दुग्धफेणे च पु० मेदि० । शर्करीछन्दोऽस्य अण् । शर्करीछन्दोयुक्ते ४सन्धादौ ।

शार्ङ्ग त्रि० शृङ्गस्य विकारः अण् । १शृङ्गजाते पदार्थे । २विष्णुधनुषि ३धनुर्मात्रे च पु० मेदि० ४आर्द्रके न० राजनि० । [त्विमात्रे त्रि० ।

शार्ङ्गिन् पु० शार्ङ्गः अस्त्यस्य इनि । १विष्णौ अमरः । २धनुर्मात्रे ३शार्ङ्गयुक्ते च त्रि० ।

शार्दूल पुंस्त्री० शृ-जसन्त्रञ् दुकच्च । १व्याघ्रभेदे अमरः । २पशुभेदे ३शरभे ४राजसभेदे च मेदि० उत्तरपदस्थः । ५श्रेष्ठार्थे अमरः । ६पक्षिभेदे धरणिः ७चित्रके राजनि० । स्त्रियां सर्वत्र जातित्वे ङीष् ।

शार्दूललालित न० अष्टादशाक्षरपादके छन्दोभेदे तल्लक्षणं यथा "सः सो जः सतसा दिनेशयतिभिः शार्दूललालितम्" छन्दोम० ।

शार्दूलविक्रीड़ित न० जसविंशत्यक्षरपादके छन्दोभेदे तल्लक्षणं यथा "सूर्य्याश्वैर्मसजस्ततास्सगुरवः शार्दूलविक्रीड़ितम्" छन्दोम० ।

शार्व न० शर्व्यां इदं शैषिकोऽण् । १अत्यन्ततमसि ।

२घातके च त्रि० मेदि० । ३रात्रिसम्बन्धिनि त्रि० । "शार्वरस्य तमसो निवृत्तये" किरा० भवार्थे त्र कालाट्ठञ् शार्वरिक इत्येव रात्रिभवे । [अशालिष्ट ।

शाल कथने भ्वा०आत्म०सक० सेट् चङि न ह्रस्वः । शालते

शाल पु० शल-घञ् । १मत्स्यभेदे २प्राकारे स्वनामख्याते ३वृक्षभेदे अमरः । ४वृक्षमात्रे राजनि० दन्त्यादिषु वृक्षमात्रे "रसालः सालः सप्तदशव्रतासना" इति नैषधम् । ५नदभेदे शब्दच० । ६शालिवाहनवृपे विश्वः ।

शालग्राम पु० शालानां वृक्षाणां ग्रामः समूहो यत्र । १पर्वतभेदे तत्र जातः अण् । तत्र जाते २विष्णोर्मूर्त्तिभेदे गण्डकशब्दे २५११ पृ० दर्शिते गण्डक्या एकदेशस्य भेदजाते ३विष्णुदेवचक्रयुक्तशिलाभेदे च तदुत्पत्तिलक्षणभेदेन तन्नामभेदाश्च यथा "कीटयोनिं प्रपद्योथ" इति गण्डक्याः सुतान् प्रतिशापे "तेन कर्मविपाकेन जडा कृष्णा नदी भवेति" देवानां गण्डकीं प्रति शापे च जाते विष्णुना तत्समाधानायोक्तं यथा

"शृणु ब्रह्मन् ! महादेव ! शृणु देव ! गजानन ! । मद्गण्डो ब्राह्मणो याहसातङ्को शापतोऽत्र वै । भविष्यतस्तयोर्मोक्षं भविष्यामि कलेवरम् । शीर्णं भविष्यति यदा तन्मेदोमज्जसंभवाः पाषाणान्तर्गताः कीटा वज्राख्याः प्रभविष्यथ" इति "अद्यैव गण्डकी पुण्या गङ्गातुल्या महानदी । गण्डक्यां गिरिराजस्य दक्षिणे दशयोजनम् । विस्तीर्णं तन्महाक्षेत्रं पुण्यक्षेत्रं महीतले । चक्रतीर्थमिति ख्यातं त्रिषु लोकेषु विश्रुतम् । शालग्रामगता देवा देवो द्वारावती मतः । उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः । सर्वदेवप्रीतिकरा भुक्तिमुक्तिप्रदायिनः । भवन्त्यस्यां तु पाषाणामेतदन्तर्गता सुराः । प्रार्थितं स्वं विना सर्वे वज्रकीटा भवन्त्विति । अनेनैव तु गण्डक्याः पुत्रत्वं भवतामपि । भविष्यति तदन्तस्थ चिह्नं तद्देवतोद्भवम् । विज्ञाय येऽर्चयिष्यन्ति प्रीयतां सा च देवता" इति विष्णुना ब्रह्मणा तल्लक्षणस्य प्रश्ने विष्णूक्तिर्यथा

"स्थूलवर्णा शिला पूज्या ब्राह्मणादेः सुखाप्तये । स्निग्धा शिला मन्त्रसिद्धिं कृष्णाऽसिद्धिं करोति च । मेचका कीर्त्तिहा धौताङ्गारवत् सा यशोहरा । पाण्डुरूपार्थगमनी मलिना पापधीकरी । पीता पुत्रफलं दद्यादारवर्णा सुतान् हरेत् । नीला संदिग्धते लक्ष्मीं धूम्राभा हरते मतिम् । रोगप्रदा रक्तवर्णा सिन्दूराभा महाकलिम् । दारिद्र्यकारिणी वक्रा समा सर्वार्थसाधिका । स्थूला निहन्ति चैवायुः सूक्ष्मा सन्ततिं हरेत् । पूजाफलं लाञ्छितया निष्फला लाञ्छनं विना । कपिला चित्तवैकल्यं नेत्ररोगञ्च कर्बुरा । भग्ना भङ्गकरी ज्ञेया वज्रचक्रापमानदा । लक्ष्मान्तरहीना च देवचक्रा वियोगदा । दृष्टसुखी कलत्रघ्नी दृष्टचक्रा सुतान् हरेत् । संलग्नचक्रा त्वसुखं वज्रचक्रा महागदम् । भग्नचक्रा तु दारिद्र्यं सर्वनाशं त्वधोमुखी । कुठारादिकं व्यालसखी विषमा विविधापदः । विलताबर्त्तनाभिश्च विकारान् कुरुते बहून् । वंशच्छेदो दृष्टस्थानां भवेत् सिंही प्रजायते । रेखाभिर्दुःखदात्री च यथा दृष्टा तथा सुखम् । यथा लिङ्गा तथा लक्ष्मीस्तद्भिदानतः शृणु । लक्ष्मीहरिः१ स विज्ञेयो यत्र पद्मं सचक्रकम् । केवला वनमाला च दृष्टस्थानाभिधेदा । वासुदेवः२ स विज्ञेयो यद्द्वारे चक्रयुग्मकम् । निरन्तरं समं चापि स श्वेतः पापनाशनः । सङ्कर्षणः३ स विज्ञेयः प्राक्पश्चाच्चक्रयुग्मकम् । संलग्नपूर्वभागस्थं महारत्नं सुशोभनम् । प्रद्युम्नः४ सूक्ष्मचक्रं स्याच्छिद्रं दीर्घं सुविस्तरम् । सुस्थिरान्तर्बहिश्छिद्रः पीत दृष्टप्रदायकः । अनिरुद्धस्तु५ नीलाभो वर्तुलश्चातिशोभनः । रेखाद्वयं तु तद्द्वारि दृष्टं पद्मेन लाञ्छितम् । केशवः६ स तु विज्ञेयस्त्वेकं वा द्वयमेव वा । प्राग्वा पश्चाच्च चक्रं स्यात् चतुष्काणः स भाग्यकृत् । नारायणः७ श्यामवर्णो नाभौ चक्रं तथोन्नतम् । दीर्घरेखासमायुक्तं दक्षिणे शुषिरं पृथु । हरिरूपाद शिला सा स्यात् यथा कथितं सुखं भवेत् । हरिवट् दृश्यते द्वारं भुक्तिमुक्तिप्रदा तु सा । परमेष्ठी८ स विज्ञेयः पद्मचक्रान्वितस्तु यः । विलाकृतिश्च शुक्लाभः पृष्ठे च शुषिरं महत् । विष्णुस्तु९ कृष्णवर्णः स्यात् स्थूलचक्रे सुशोभने । द्वारोपरि तथा रेखा दृश्यते मध्यदेशतः । नारसिंहस्तु११ कपिलः पृथुचक्रो दृढन्मुखः । त्रयो वा पञ्च वा यत्र बिन्दवो दृष्टिगा न सन् । कपिलनारसिंहस्तु१२ गुरुडाक्रान्तो भवेत् । स्थूलचक्रद्वयं मध्ये द्वारे रेखा सुशोभना । महालक्ष्मीहरी१३ विज्ञेयः पूर्वोक्तैर्लक्षणैर्युतः । रेखाश्च केशराकारा सुखं दीर्घं भयानकम् । लक्ष्मीनृसिंहो१४ विज्ञेयश्चतुश्चक्रः सबिन्दुकः । पूर्वोक्तलक्षणैर्युक्तो वनमालाविभूषितः । वराहोऽसौ१५ शुक्तिलिङ्गे चक्रे च विषमे तथा । इन्द्रनीलनिभः स्थूलश्चक्रालाञ्छनः

श्छितो भवेत् । पृथ्वीवराहनाम्नी१६ सा या वराहाकृतिः शिला । आभुग्ना चैव रेखैका गतराज्यप्रदायिका । मत्स्याख्या१७ सा शिला ज्ञेया बिन्दुत्रय विभूषिता । कांस्यहारा स्वर्णनिभा दीर्घा सा भुक्तिमुक्तिदा । कूर्माख्या१८ तु शिला पृष्ठे वर्तुला चोन्नता भवेत् । हरितं वर्णमायाता कौस्तुभेन च चिह्निता । शिलाकूर्म१९ स विज्ञेयः कूर्माकारस्तु यो भवेत् । चक्राङ्किता तथा दत्ता पूजिता सा पदप्रदा । हयग्रीवो२० ऽङ्कुशाकारो रेखा चक्रसमीपगा । वज्रबिन्दुसमायुक्तं पृष्ठं नीरदनीलभम् । ज्ञेयः सौम्यहयग्रीवो२१ हयग्रीवासमा शिला । दीर्घया लेखया युक्ता रेखा या तादृशी भवेत् । हयशीर्ष२२ स विज्ञेयो मुखं यस्य हयाकृति । पद्माकृति भवेद्यापि साक्षमालं शिरस्तथा । वैकुण्ठ२३स्त्रिलक्ष्यांऽस्त्रचक्रमेकं तथा ध्वजम् । हारोपरि तथा रेखा पूज्याकारा सुशोभना । श्रीधरस्तु२४ तथा देवश्चिह्नितो वनमालया । कदम्बकुसुमाकारो रेखा पद्मकभूषितः । वामन२५ स तु विज्ञेयो योऽतिह्रस्वश्च वर्तुलः । अतसीकुसुमप्रख्या बिन्दुनोपरिशोभितः । दधिवामननामा२६ तु ऊर्ध्वाधश्चक्रसंयुतः । महाद्युतिरतिह्रस्वः सुभिक्षक्लेशदायकः । सुदर्शन२७स्तथा देवः श्यामवर्णो महाद्युतिः । वामपार्श्वे तथा चक्रं रेखैकैव तु दक्षिणे । सहस्रार्जुननामा२८ऽसौ नानारेखामयो भवेत् । चक्राकारा यन्त्रपङ्क्तिः स नष्टद्रव्यदायकः । स्थूलदामोदरो२९ यस्य मध्ये चक्रं प्रतिष्ठितम् । दुर्लभो हारसंकीर्णः पीतरेखो धनप्रदः । राधादामोदरो३० ज्ञेय ऊर्ध्वाधश्चक्रवद्बिलम् । नातिदीर्घसमं मध्ये लम्बरेखा स भोगदः । दामोदर३१ स विज्ञेयो यश्चक्रद्वयलाञ्छितः । क्षुद्रः भवेच्छावयवं पूजितः सुखदः सदा । अनन्त३२ वज्रवर्णः स्यात्नागभोगेन चिह्नितः । अनेकचक्रसंभिन्नः सर्वकामफलप्रदः । पुरुषोत्तमनामा३३ऽसौ यस्य टिल्लु विटिल्लु च । ऊर्ध्वान्यास्यानि दृश्यन्ते पुरुषार्थफलप्रदः । योगेश्वर३४ स विज्ञेयो लिङ्गं यस्य शिरोगतम् । ब्रह्महत्यादिपापानां नाशको योगसिद्धिदः । पद्मनाभ३५स्तथा रक्तः पङ्कजक्षतसंयुतः । लक्ष्म्या पूजितो नित्यं हरिर्ह्यस्योश्वरोभवेत् । रश्मिजालो हिरण्याभ३६श्चन्द्राभः स्फटिकोपमः । अथ वा श्रूयते नानावर्णरेखाभिरन्वितः । गरुड३७ स तु विज्ञेया मध्ये पञ्चद्वयान्विते । छिद्रा दृश्यते रेखा स सर्पविषनाशकः । जनार्दन३८ स विज्ञेयः केवलानि स्फुटानि च । यशोदरे तु चक्राणि चत्वारि पितृतृप्तिदम् । लक्ष्मीनारायणो३९ ज्ञेयो वनमालाङ्कितोदरः । छत्रद्वारश्छत्रयुक्तो भुक्तिमुक्तिप्रदायकः । हृषीकेश४० स विज्ञेयो योऽर्द्धचन्द्राकृतिर्भवेत् । तमभ्यर्च्य लभेत् स्वर्गं विषयांश्च समीहितान् । लक्ष्मीनरहरि४१ज्ञेयः कृष्णवर्णः सबिन्दुकः । वामपार्श्वे समे चक्रे स्पष्टरेखाभीष्टदायकः । त्रिविक्रमस्तु४२ विज्ञेयः श्यामवर्णो महाद्युतिः । वामपार्श्वे चक्रयुग्ममेकरेखा तु दक्षिणे । कृष्ण४३ ज्ञेयः शिला कृष्णा सचक्रा वा विचक्रिका । प्रदक्षिणावर्त्तकृतवनमालाविभूषिता । चतुर्मुख४४ स विज्ञेयो द्वे चक्रे मध्यरेखतः । चतस्रः पार्श्वगा रेखा वेदशास्त्रागमप्रदः मेरुतः । शिवादिशिलाभेदास्तत्त्वतो वोक्ता यथा शिवोक्तिः "शालग्रामा मत्स्वरूपाः शृणु तेषान्तु लक्षणम् । यत्सेवनाद्भवेद्दिष्टमिह लोके परत्र च । शिवनाभः१ स विज्ञेयः सलिङ्गाकारतां गतः । स्वयम्भुलिङ्गाकृतिमान् मन्त्रसिद्धिविधायकः । त्र्यम्बक२ स तु विज्ञेया बिन्दूत्तरविभूषितः । भूताकारा तथा रेखा गतपुंस्त्वप्रदायकः । धूर्जटि३ स तु विज्ञेयो यत्र रेखा जटासमा । तिस्रो यत्र प्रदृश्यन्ते सोऽर्चितो ज्ञानदायकः । शम्भु४ पाण्डुरा ज्ञेयो बिन्दुः कृष्णस्तु मस्तके । बिल्वमालाधस्त्वेकः पूजितः क्षीणदुष्करः । ईश्वर५ स तु विज्ञेयो रक्तो बिन्दुस्तु मस्तके । एकचक्रो द्विचक्रो वाभ्यन्तरेऽधश्च गोप्रदम् । मृत्युञ्जय६ स विज्ञेयस्त्वमृत्युविनाशकः । अधश्चक्रं तदूर्ध्वं च श्वेता रेखा त्रिशूलवान् । चन्द्रशेखर७नामाऽसावर्द्धचन्द्राकृतिस्तु के । मध्ये चक्रद्वयं तस्य सेवनाद्रोगनाशनम् । रुद्र८ स एव विज्ञेयः कपिलो मूर्ध्नि लक्षितः । चक्रमध्ये भवेद्रेखा मारयेद्रिपुसन्ततिम्" । "शालग्रामानथो वक्ष्ये शक्तिकीटसमुद्भवान् । येषां पूजनतो देवी भवानी सुप्रसीदति । श्रीविद्या१ सा तले चक्रमूर्द्धे छत्रं प्रदृश्यते । बाह्ये घण्टाङ्कितो मूर्ध्नि स्निग्धा श्यामाच्छिलेष्टदा । महाकाली२ तु सा ज्ञेया योनिचिह्नसमन्विता । दंष्ट्राद्वादा सर्वशिला त्रिकोणेनाङ्किता च या । यदायुधाङ्कितश्चोर्ध्वं तां देवीं तत्र निर्दिशेत् । देवीशिला सचक्रा या दक्षमार्गेण तां यजेत् । सार्चिता वामभागेण लोकद्वयसुखावहा । या चक्ररहिता देवीशिलां तां वामतोऽर्चयेत्" ।

"गौरी शिला दुर्लभैव प्रायः कलियुगे पुनः। स्फटिकाभा भवेत् सा तु धर्मं नित्यं विवर्द्धति। नरेशः स तु विज्ञेयः सत्यशुण्डाङ्कितो भवेत्। शुण्डाकारा शिला वापि गजाननसमापि वा। यस्या मध्ये महच्चक्रं क्षुद्रचक्रञ्च यद्दिशि। सा शिला तस्य दिक्पस्य सेव्या वह्निपि राज्यदा। अर्द्धचन्द्राकृतिर्यत्र दृश्यते शकलद्वयम्। सा तु चन्द्रशिला ज्ञेया चक्रयुक्ता भौमशिला मता। बाणाकारेण चिह्नेन ज्ञेया बुधशिला पुरा:!। दीर्घेण चतुरस्रेण युक्ता गुरुशिला मता। पञ्चकोणा तु शुक्रस्य बाणाकारा शनेर्मता। सर्पाकारा तु राहोः स्यात् केतोस्तु ध्वजरूपिणी" मेरुत०।

तुलसीं प्रति भगवदुक्तिः "अहञ्च शैलरूपी च गण्डकीतीरसन्निधौ। अधिष्ठानं करिष्यामि भारते तव शापतः। वज्रकीटाश्च शमयो वज्रदंष्ट्राश्च तत्र वै। तच्छिलाकुहरे चक्रं करिष्यन्ति मदीयकम्। एकद्वारे चतुश्चक्रं वनमालाविभूषितम्। नवीननीरदाकारं लक्ष्मीनारायणाभिधम्१। एकद्वारे चतुश्चक्रं नवीननीरदोपमम्। लक्ष्मीजनार्द्दनं२ ज्ञेयं रहितं वनमालया। द्वारद्वये चतुश्चक्रं गोप्यरेण समन्वितम्। रघुनाथाभिधं३ ज्ञेयं वेष्टितं वनमालया। अतिस्थूलं द्विचक्रञ्च नवीननीरदोपमम्। दधिवामनं४ विज्ञेयं स्फटिकाञ्च सुखप्रदम्। अतिस्थूलं द्विचक्रञ्च वनमालाविभूषितम्। श्रीधरं देवि! विज्ञेयं श्रीपदं स्फटिकां सदा। स्थूलञ्च वर्त्तुलाकारं रहितं वनमालया। द्विचक्रं स्फुटमत्यन्तं ज्ञेयं दामोदराभिधम्६। मध्यमं वर्त्तुलाकारं द्विचक्रं बाणविलक्षितम्। वलराभिधं८ ज्ञेयं शरत्तृणसमन्वितम् स्थूलं चतुर्दलचक्रं नवीनजलदप्रभम्। अनन्ताख्यकं विज्ञेयं चतुर्वर्गफलप्रदम्। मध्यमं सप्तचक्रञ्च शतपत्रसमन्वितम्। राजराजेश्वरं१० ज्ञेयं राजसम्पत्करं नृणाम्। चक्राकारं द्विचक्रञ्च सश्रीकं जलदप्रभम्। सगोप्यदं मध्यमञ्च विज्ञेयं मधुसूदनम्११। सुदर्शनं१२ चैकचक्रं शुभ्रचक्रं गदाधरम्१३। द्विचक्रं हयवक्त्राभं हयग्रीवं१४ प्रकीर्त्तितम्। अतीव विस्तृतास्यञ्च द्विचक्रं विकटं सति!। नरसिंहाभिधं१५ ज्ञेयं सद्यो वैराग्यदं नृणाम्। द्विचक्रं विस्तृतास्यञ्च वनमालासमन्वितम्। लक्ष्मीनृसिंहं१६ विज्ञेयं स्फटिकाभं सदा शुभम्। द्वारदेशे द्विचक्रञ्च सश्रीकञ्च सदं स्फुटम्। वासुदेवञ्च१७ विज्ञेयं सर्वकामफलप्रदम्। प्रद्युम्नं१८ सप्तचक्रञ्च नवीननीरदप्रभम्। शुषिरे छिद्रबहुलं स्फटिकाञ्च सुखप्रदम्। द्वे चक्रे चैकलग्ने तु दृष्टे यत्र तु पुष्कलम्। सङ्कर्षणन्तु१९ विज्ञेयं सुखदं स्फटिकां सदा। अनिरुद्धञ्च२० पीताभं वर्त्तुलमतिशोभनम्। सुखप्रदं स्फटिकाभानां प्रवदन्ति मनीषिणः" ब्रह्मवै० प्र० १८अ०।

"शालग्रामशिलाद्वारगतलग्नद्विचक्रयुक्। शुक्लाभो वासुदेवाख्यः१ सोऽव्यात् यः श्रीगदाधरः। लग्नद्विचक्रोरुकाभः पूर्वभागे तु पुष्कलः। सङ्कर्षणो२ऽथ प्रद्युम्नः३ सूक्ष्मचक्रस्तु पीतकः। सुदीर्घसुषिरच्छिद्रः सोऽनिरुद्धस्तु४ वर्त्तुलः। नीलोद्वारि त्रिरेखश्च अथ नारायणो५ऽसितः। मध्ये गदाङ्कतो रेखा नाभिचक्रमहोन्नतः। पृथुचक्रो नृसिंहो(ऽ)थ कपिलोऽव्यात् त्रिविक्रमः। अथ वा पञ्चबिन्दुस्तत्पूजनं ब्रह्मचारिणाम्। वराहः७ शुभलिङ्गोऽव्यात् विषमस्थद्विचक्रकः। नीलस्त्रिरेखः स्थूलोऽथ कूर्ममूर्त्तिः८ सबिन्दुमान्। कृष्णः स वर्त्तुलावर्त्तः पातु चोन्नतपृष्ठकः। श्रीधरः९ पञ्चरेखोऽव्यात् वनमाली गदान्वितः। वामनो१० वर्त्तुलो हस्वः वामचक्रः सुरेश्वरः। नानावर्णोऽनेकमूर्त्तिर्नागभोगी त्वनन्तकः११। स्थूला दामोदरो१२ नीलो मध्यचक्रः स नीलकः। संकर्षणद्वारकः सोऽव्यादथ ब्रह्मा१३ सुलोहितः। सदीर्घरेखसुषिर एकचक्रास्त्वजः पृथुः। पृथुच्छिद्रः स्थूलचक्रः कृष्णो विष्णुस्तु१४ बिन्दुमान्। हयग्रीवो१५ऽङ्कुशाकारः पञ्चरेखः सकौस्तुभः। वैकुण्ठो१६ मणिरत्नाभः एकचक्राम्बुजोऽसितः। मत्स्यो१७ दीर्घाम्बुजाकारो द्वाररेखश्च पातु वः। वामचक्रो द्वाररेखः श्यामो वोऽव्यात् त्रिविक्रमः१८। यः केन लक्षितो योऽव्यात् गदाधरो सुदर्शनः१९। एकद्वारे चतुश्चक्रं वनमालाविभूषितम्। स्वर्णरेखासमायुक्तं गोप्यदेन विराजितम्। कदम्बकुसुमाकारं लक्ष्मीनारायणं विदुः" गरुड़ पु० ४५अ० पुराणान्तरेऽपि लक्षणान्तराणि दृश्यानि। तत्र लक्षणभेदस्तु विकल्पार्थः। वराहपु० भूमिं प्रति वराहोक्तिः "दृष्टे छिद्रद्वये नार्च्यं शालग्रामद्वयं तथा। द्वे चक्रे द्वारकायास्तु नार्च्यं सूर्यद्वयं तथा। शालग्रामशिला भग्ना पूजनीया सचक्रिका। खण्डिता स्फुटिता वापि शालग्रामशिला शुभा। शालग्रामो न खण्ड्यो हीनवर्णैर्वसुन्धरे!। स्त्रीशूद्रकरसंस्पर्शो वज्रसूचीधिको मतः। लोहात् यः

संस्पृशेत् मूढो योषिद्वापि कदाचन । स पतेद्घोरके घोरे यावदाहूतसंप्लवम् । यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुन्धरे ! । दूरादेवास्य गत्वा पूजां कारयेत् सुसमाहितः" । तत्पूजने तत्स्पर्शे च स्त्रीणां नाधिकार "न जातुचित् स्त्रियाः कार्यं शालग्रामस्य पूजनम् । अर्हदीनाञ्च सुभगा सर्वलोकहितैषया । मेरोर्वा स्पृशेत्तु महिला जन्मशीघ्रप्रणाशिता । स्त्रित्वा पुण्यसमूहं च सत्वरं नरकं व्रजेत्" ब्रह्मवै० या० २०अ० ।

"अभक्ष्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम् । शालग्रामशिलास्पर्शात् पावनं तत् भवेत् सदा" ।

"दद्यात् भक्ताय यो देवि ! शालग्रामशिलां नरः । सुवर्णसहितां, पृथ्वी सपर्वतवनान्विता । सप्तसद्मा भवेद्दत्ता सत्पात्रे च वसुन्धरे ! । शालग्रामशिलादास्तु मूल्यसङ्घाटयेत् क्वचित् । विक्रेता क्रयकर्त्ता वा नरके वै पतेत् ध्रुवम्" वराहपु० ।

तस्याकारादिभेदे फलभेदो यथा

"चक्राकारे भवेद्राज्यं वर्त्तुले च लभेत् श्रियम् । दुःखञ्च शकटाकारे मूलाभे मरणं भवेत् । विकृताग्रे च दारिद्र्यं पिङ्गले हानिरेव च । चक्रचक्रे भवेद्धानिर्विदीर्णे मरणं ध्रुवम्" । तत्स्पर्शेन मिथ्यादिव्यादिकरणादौ दोषो यथा "शालग्रामशिलां स्पृष्ट्वा मिथ्यावाक्यं वदेत्तु च । स याति कूर्मदंष्ट्रञ्च यावद्वै ब्रह्मणो वयः । शालग्रामशिलां स्पृष्ट्वा स्त्रीकारं यो न पालयेत् । स प्रयात्यसिपत्रञ्च यत्रमन्वन्तरावधि । तुलसीपत्रविच्छेदं शालग्रामे करोति यः । तस्य जन्मान्तरे कान्ते ! स्त्रीविच्छेदो भविष्यति । शालग्रामञ्च तुलसीं शङ्खञ्चैकत्र एव च । यो रक्षति स च ज्ञानी स भवेत् श्रीहरिप्रियः" ब्रह्मवै०प्र० १६०अ० । "शालग्रामो हरेर्मूर्त्तिर्जलमध्यस्थ भारतम् । कलेर्दशसहस्रान्ते याति त्यक्त्वा हरेः पदम्" ब्रह्मवै०प्र० ६७अ० । "शालग्रामाः समाः पूज्याः समेषु हितयं न हि । विषमा नैव पूज्याः सुरैरेव विषमेष्वपि" पद्मपु०पा०२०अ० । "शालग्रामशिलारूपी यत्र तिष्ठति केशवः । तत्र देवासुरा यक्षा भुवनानि चतुर्दश" पद्मपु० । "यत्र सर्वसान्निध्यादत्र तेषां पूजा प्रतीयते तत्रावाहनविसर्जने न स्तः "शालग्रामे स्थण्डिले वा नावाहनविसर्जने" इति राघवभट्टधृतवाक्यात्" दीक्षा० रघु० ।

शैलभेदे न० तत्प्रभाकारत्वं वराहपु० उक्तं यथा "अथ दीर्घेण कालेन स(शालङ्कायनः)तुष्टिः संयितव्रतः । तप्यमानो यथान्यायं पश्यते शालसत्तमम् । विस्मयं कुरुते तत्र दृष्टकामोऽथ सां (हरिम्) मुनिः । मायया मम मूढात्मा भक्तो द्रष्टुं न मामभूत् । ततः पूर्वेण पार्श्वेन तस्य शालस्य सुन्दरि ! । वैशाखमासमाहात्म्यां मद्दर्शनमुपागतः । दृष्ट्वा मां तत्र स मुनिस्तपस्वी संयितव्रतः । तुष्टाव वैदिकैः स्तुत्तैः प्रणम्य च पुनःपुनः । ततोऽहं स्तूयमानो वै ऋषिसङ्घेन सुन्दरि ! । प्राप्तोऽस्मि परमां प्रीतिं तमवोचं ततो मुनिम् । व्रतान्तमे महाभाग ! स्थित्वा त्वं तपसां निधे ! । पुत्रेण परमप्रीतो मत्सत्रे मत्समो भव । अन्यच्च गुह्यं वक्ष्यामि शालङ्कायन ! तच्छृणु । तव प्रीत्या प्रवक्ष्यामि येनैतत् क्षेत्रसत्तमम् । शालग्रामगिरिति ख्यातं तच्चिबोध मुने ! शुभम् । योऽयं दृष्टस्त्वया दृष्टः सोऽहमेव न संशयः" वराहपु० ।

शालग्रामगिरि पु० पर्वतभेदे वराहपु० "कथयिष्यामि ते गुह्यं शालग्रामगिरिति श्रुतम् । तस्मिन् क्षेत्रे हरो देवो मत्स्यरूपेण संयुतः । शालग्रामे गिरौ तस्मिन् शिलारूपेण तिष्ठति । अहं तत्रैव तिष्ठामि शिलारूपेण नित्यदा । तस्मिन् शिलाः समग्रास्तु मत्स्यरूपा न संशयः । पूजनीयाः प्रयत्नेन किं पुनश्चक्रलाञ्छिताः । लिङ्गरूपेण तु हरस्तत्र देवालये गिरौ । शिवनामाः शिलास्तत्र चक्रनाभाश्च या शिलाः । सोमेश्वराधिष्ठितस्तु शिवरूपो गिरिः स्मृतः । शालग्रामगिरिर्विष्णुरहं सोमेश्वराभिधः" वराहपु० ।

शालङ्कायन पु० ऋषिभेदे शालग्रामशब्दे दृश्यम् ।

शा(सा)लज पु० शा(सा)लात् जायते जन-ड । सर्जरसे (धुना) शब्दर० ।

शालनिर्य्यास पु० ६त० । सर्जरसे (धुना) रत्नमा० ।

शालपर्णी स्त्री शालस्येव पर्णान्यस्याः ङीष् । (शालपानी) वृक्षभेदे राजनि० । "शालपर्णी गरच्छर्दिज्वरश्वासातिसारजित् । शोषदोषक्षयकरी दंष्ट्रायुक्ता रसायनी । तिक्ता विषकरी स्वादुः कफकासक्रमिप्रणुत्" भावप्र० ।

शालभञ्जिका स्त्री शालेन भञ्ज्यते निर्भीयते भञ्ज-ण्वुल् । १काष्ठनिर्मितपुत्तलिकायां, २वेश्यायाञ्च जटा० ।

शालव पु० शालः तत्सदृशोऽव इव वर्त्तते वर्त्तिर्गच्छति वल-ड । लोभे शब्दर० ।

शालवेष्ट पु० शालस्य वेष्ट इव । सर्जरसे (धुना) त्रिका० ।

शालसार पु० शालस्य सारः । १हिङ्गुनि शालेषु सारः । २वृक्षभेदे त्रिका० ।

शाला स्त्री शाल-अच्। १गृहे अमरः। हस्य २स्कन्धस्यशाखायाञ्च। ३गृहैकदेशे (चाल) मेदि०।

शालाङ्क पु० पाणिनौ मुनौ अटा०। [यवासे हेमच०।

शालाजिर पु० न० शालस्याजिरमिवाकारोऽस्यस्य अच्।

शालाजि पु० शाल इवाञ्चति अनृच-इन्। शाकभेदे (शाजना) शब्दच०।

शालातुरीय पु०शालातुरे भवः। तदधीतवेदयासिनि पाणिनिमुनौ अटा० शालोत्तरीय इति पाठान्तरम्।

शालानी स्त्री शालमानयति आ+नी-ड गौरा० ङीष्। विदार्याम् शब्दच०। [स्त्रियां ङीष्।

शालामृग पुंस्त्री०शालायां गृहे मृग इव। मूषके हारा०।

शालावृक पुंस्त्री० शालायां गृहे, शालायां वा वृक इव वा। १कुक्कुरे २मूषके अमरः। ३विड़ाले ४मूषे राजनि० ५वानरे च शब्दच०। सर्वत्र स्त्रियां ङीष्।

शालि पु० शल+इञ्। कलमादिधान्ये, २षष्टिकादिधान्ये, अमरः। ३गन्धमाञ्जारे च मेदि०। शालिभेदादिकं "कलमेन विना शुक्लाः हेयनाः शालयः स्मृताः" इत्यादि भावप्र० उक्तम्। धान्यशब्दे दृश्यम्।

शालिका स्त्री शालिरिव कायति के-क। विदार्याम्।

शालिञ्च पु०शालिं चिनोति चि-ड पृषो०मुम्। शाकभेदे शब्दर०

शालिनीकरणम् न० शालीनः शालीनः लज्जितः क्रियतेऽनेन शालीन+च्वि-कृ-करणे ल्युट्। तिरस्कारे त्रिका०।

शालिपर्णी स्त्री शालेरिव पर्णान्यस्याः ङीष्। माषपर्ण्याम् राजनि०।

शालिपिष्ट न० शालेः पिष्टमिव शुभ्रत्वात्। स्फटिके त्रिका०

शालिवाहन पु० विक्रमादित्यं हत्वा शकाब्दप्रवर्त्तके नृपभेदे शककर्त्तृशब्दे दृश्यम्।

शालिहोत्र पुंस्त्री० शालयो हूयन्तेऽत्र ड-इत्र। १घोटके त्रिका० स्त्रियां ङीष्। २अश्वशास्त्रप्रवर्त्तके ऋषिभेदे पु० राजनि०।

शाली स्त्री शाल-अच् गौरा० ङीष्। कृष्णजीरके राजनि०

शालीन त्रि० शालामर्हति छ। १गृहे अर्हत्यर्थे, अमरः। २मिश्रेयायां स्त्री राजनि०।

शालु न० शाल-उच्। १शालूके शब्दर०। २कमावदूव्ये, ३चोरनामगन्धद्रव्ये च मेदि०। ४मेके पु० ५गृहे हेमच०। [तन्नामे अमरः। २जातीफले राजनि०।

शालु(लू)क न०शाल-उकञ्। कुमुदादिमूले शब्दर०। ऊकञ्।

शालूर पुंस्त्री० शाल-ऊरच्। १मेके अमरः स्त्रियां ङीष्।

शालेय पु० शालायां भवः ढक्। १मधुरिकायाम् अमरः। २मिश्रेयायां स्त्री राजनि० टाप्।

शालोत्तर पु० ग्रामभेदे। [अटा०।

शालोत्तरीय पु० शालोत्तरे ग्रामे भवः छ। पाणिनिमुनौ

शाल्मल पु० शाल-मलच्। (शिमुल) १वृक्षे शब्दर० २तन्नामद्वीपभेदे च विष्णुपु०

"शाल्मलस्येश्वराधीशो वपुष्मान्नामतस्सुतान्। हृष्णु। हैमान्तु नामसंज्ञाभिः सप्त वर्षाणि तानि वै। श्वेतोऽथ हरितस्तस्य जीमूतो लोहितस्तथा। वैद्युतो मानसश्चैव सुप्रभस्य महामुने!। शाल्मलेन समुद्रोऽसौ द्वीपेनेक्षुरसोदकः। विस्तरो द्विगुणेनास्य पर्वतः संवृतः स्थितः। तत्रापि पर्वताः सप्त विज्ञेया रत्नयोनयः। रत्नाभिव्याप्तकाश्चैव तथा सप्तैव निम्नगाः। कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः। द्रोणो यत्र महौषध्यः स चतुर्थो महीधरः। कङ्कस्तु पञ्चमः षष्ठो महिषः सप्तमस्तथा। कुमुदान् पर्वतवरः सरित्प्रवाणि मे शृणु। योनितो या विहगा च चन्द्रा शुक्ला विलोचनी। निवृत्तिः सप्तमी तासां स्मृताख्याः पापशान्तिदाः। श्वेतस्य लोहितश्चैव जीमूतं हरितं तथा। वैद्युतं मानसश्चैव सुप्रभं नाम सप्तमम्। सप्तैतानि तु वर्षाणि चातुवर्ण्ययुतानि वै। शाल्मलेऽपि च ये वर्षा वसन्त्येते महामुने!। कपिलाश्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक्। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव यजन्ति तम्। भगवन्तं समस्तस्य विष्णुमात्मानमव्ययम्। वायुभूतं मखश्रेष्ठैर्यज्वनो वसुसंस्थितिम्। देवानामत्र सान्निध्यमतश्चैव सुमनोरमे। शाल्मलिश्च महाद्रुमो नाम निर्वृतिकारकः। एष द्वीपः समुद्रेण सुरोदेन समावृतः"।

शाल्मलि(ली) पुंस्त्री० शाल-मलिच् वा ङीत्वे वा ङीष्। (शिमुल) १वृक्षे २मोचरसे हेमच०।

शाल्मलिगुणादिकं भावप्र० उक्तं यथा

"शाल्मली शीतला स्वच्छा रसे पाके रसायनी। शीघ्रा स्निग्धबीजा च हृद्या रक्तप्रसादिनी। शाल्मलीपुष्पशाकन्तु हतसैन्यवसाधितम्। प्रदरं नाशयत्येव दुःसाध्यञ्च न संशयः। रसे पाके च मधुरं कषायं शीतलं गुरु। कफपित्तास्रजित् प्राहि वातलं च प्रकीर्त्तितम्। २नरकभेदे यत्र शाल्मलीकण्टकैर्नारकिणः पीड्यन्ते नरकशब्दे दृश्यम्। [राजनि०।

शाल्मलिक पु० शाल्मलिरिव कायति के-क। रोहितहृक्षे

शाल्मलीकन्द पु० ६त०। तद्वृक्षमूले राजनि०। [राजनि०।
शाल्मलीफल पु० शाल्मल्या इव फलमस्य। तेजःफलवृक्षे
शाल्मलीवेष्ट पु० शाल्मलीं वेष्टयति वेष्ट–अण्। शाल्मली-
निर्य्यासे भोजरत्ने रत्नमा०। ण्वुल्। तत्रैव। [दृश्यम्।
शाल्व पु० शाल–व। १देशभेदे हेमच०। तस्य २नृपे च भारते
शाल्वण पु० "काकोल्यादिः स वातघ्नः सर्वोच्छूषसंयुतः।
शालूपोदकमांसस्तु सर्वोस्त्रैव समन्वितः। स च पोष्णः स्मृत
नवयः शाल्वणः परिकीर्त्तितः" सुश्रुतोक्ते औषधभेदे।
शाव पु० शव–घञ्। १शिशौ शब्दर०। स्वार्थे क। तत्रैव
शावस्येदम् अण्। २शावसम्बन्धे त्रि० "शिरात्रं शावमा-
योषम्" इति स्मृतिः।
शावर पु० शावयति विकारयति शव–णिच् अरन्। १पापे
२अपराधे ३लोभ्रवृक्षे च मेदि०। शवरेण प्रोक्तमण्।
४शवरस्वामिकृते मीमांसाभाष्ये। शवरस्येदम् अण्।
५शवरसम्बन्धिनि त्रि०।
शावरभेदाञ्च न०शावरभेदस्यात्रीव अत्यसमा० स्वार्थे अण्।
ताम्रे हेमच० तस्य तत्तुल्यरक्तवर्णत्वात्तथात्वम्।
शावरी स्त्री शवरस्य प्रिया अण् ङीप्। १शूकशिम्बयां
मेदि०। २विद्याभेदे तन्त्रसा०। [ङीष्।
शाश्वत त्रि० शश्वद् भवः अण्। सतते नित्ये अमरः स्त्रियां
शष्कुल त्रि० शष्कुलमिव शब्दोऽस्य अण्। मांसा-
शिनि हेमच०। [अमरः।
शाष्कुलिक न० शष्कुलीनां समूहः ठञ्। शष्कुलीसमूहे
शास आज्ञैश्वर्य्ये अदा० आत्म० सक० सेट् द्वा वेट्। प्राये-
ण्यङ् पूर्वः। आशास्ते आशासिष्ट "इदं कविभ्यः पू-
र्वेभ्योनमोवाकं प्रशास्महे" उत्तरत्रोक्तेरत्यपूर्वोऽपि।
शास शासने अदा० पर० द्विक० सेट् द्वा वेट्। शास्ति अशासत्
शासन न० शास–ल्युट्। निकटस्थ हितसाधनादौ १प्रवर्त्तने
२राजदत्तभूमौ ३राजलेख्यभेदे ४शास्त्रौ च मेदि०।
शासनहर पु०शासनं हरति हृ–अच्। आज्ञाहारके दूते।
शासिट त्रि० शास–इटच् डिट्। शासनकर्त्तरि।
शास्तृ त्रि० शास–तृच् इडभावः। १शासनकर्त्तरि
त्रिका०। २बुद्धे अमरः ३उपाध्याये ४गुरौ ५पितरि
संक्षिप्तसा०।
शास्त्र न० शिष्यतेऽनेन शास–ष्ट्रन्। १हितानुशासने ग्रन्थे
शास्त्रं च वेदमूलकं सङ्किरादरणीयं नान्यत् यथोक्तं
"यतो वेदविरुद्धार्थशास्त्रोक्तं कर्म संत्यजेत्। स्वबुद्धि-
रचितैः शास्त्रैः प्रतार्य्येत च तान्विधान्। विप्लवन्ति श्रे
यसो मार्गं लोकनाशाय केवलम्। निन्दन्ति देवता
वेदांस्तपो निन्दन्ति सद्विजान्। तेन ते निरयं यान्ति
ह्यसच्छास्त्रनिषेवणात्। स्मृतिसृतिसदाचारविहितं कर्म
शाश्वतम्। स्वं स्वं धर्मं प्रयत्नेन श्रेयोऽर्थीह समा-
चरेत्। स्वबुद्धिरचितैः शास्त्रैर्मोहयित्वा जनं नराः।
तेन ते निरयं यान्ति युगानां सप्तविंशतिम्" पद्मपु०
१७ अ०। "पुराणं भारतं वेदधर्मशास्त्राणि यानि
च। आयुषः क्षपणायैव धर्मतत्त्वेन चाचरेत्। पुत्र-
दारादिसंसारः पुंसां संसृतिहेतवे। विदुषां शास्त्र-
सम्भारः सद्योगाभ्यासविघ्नकृत्। इदं ज्ञेयमिदं ज्ञेयं
यः सर्वं ज्ञातुमिच्छति। अपि वर्षशतेनापि शास्त्रान्तं
नाधिगच्छति। विज्ञायाचरतस्तस्मात् जीवितस्यापि
संशयः। विहाय शास्त्रजालानि पारलौकिकमाच-
रेत्। पण्डितोऽपि हि मूर्खोऽसौ यस्क्रियायुक्तोऽन्यथ-
स्क्रियः। यः संसाराच्च आत्मानं समुत्तारयितुं क्षमः"
सङ्क्षिप्त०। तामसशब्दे २२७१ पृ० दृश्यम्।
"बहुशास्त्रावलोकनेऽपि सारादानं षट्पदवत्" सांख्यप्र०सू०
शास्त्रकृत् पु० शास्त्रं करोति कृ–क्विप्। मन्वादिषु ऋषिषु
त्रिका०।
शास्त्रगत पु० शास्त्रे गत इव। प्रघटादिदि त्रि०।
शास्त्रचारण पु० शास्त्रं चारयति प्रचारयति चर–णिच्–
ल्यु। शास्त्रोक्ताचरणप्रचारकर्त्तरि शब्दर०।
शास्त्रतत्त्वज्ञ त्रि० शास्त्रतत्त्वं जानाति ज्ञा–क। १शास्त्र-
तात्पर्य्यवेत्तरि २ज्योतिषज्ञे शब्दर०।
शास्त्रदर्शिन् त्रि० दृश–णिनि ह्रस्व०। शास्त्रज्ञे शब्दर०।
शास्त्रविदादयोऽत्र।
शास्त्रनिष्णिन् त्रि० शास्त्रं तज्ज्ञानं शिल्पमिवाऽस्यस्य
इनि। १शास्त्रज्ञानोपजीविनि २काश्मीरदेशे पु० त्रिका०।
शास्त्रिन् त्रि० शास्त्रं वेत्त्यधीते वा इनि। शास्त्रज्ञे।
शास्त्रीय त्रि० शास्त्रेण विहितः छ। शास्त्रोक्ते धर्मादौ।
शास्य त्रि० शास–ण्यत्। अनुशासनीये शिष्यादौ।
शि तेजने भ्वा० उभ० सक० अनिट्। शिनोति शिनुते अशैषीत् अशेष्ट।
शिंशपा स्त्री शिंशं पाति पा–क पृषो०। (शिण) वृक्षे अमरः
"शिंशपा कटुका तिक्ता कषाया शोषकारिणी। उष्ण-
वीर्या कफरक्तोदःकुष्ठचित्रवमिकृमीन्। वस्तिव्रणान्
दाहास्रवणाश्मगर्भपातिनी" भावप्र०।
शिक्षु त्रि० शिक्षु–कु कस्य नेत्वम्। अध्यवसायिनि त्रिका०।

शिक्सिक्थ न० शिच-थक् कुक् च पृषो० सस्य शोवा। (भोस) सधूच्छिष्टे अमरः। स्वार्थे क। तत्रैव।

शिक्य न० शि-यत् कुक् च। (सिका) रज्जुकृते पदार्थे शब्दर०

शिक्यित त्रि० शिक्यं शिक्यस्थं करोति शिक्य+णिच्-कर्त्तरि क्त। शिक्याधारे स्थापिते पदार्थे।

शिक्ष अभ्यासे भ्वा० प्या० सक० सेट्। शिक्षते अशिक्षिष्ट।

शिक्षा स्त्री शिक्ष-भावे अ। १अभ्यासे २वर्णोनामुच्चारणप्रदर्शके वेदाङ्गे ३अन्यभेदे अमरः। ४व्योनाकण्ठ्ये शब्दच०।

"वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा तथा च तैत्तिरीया उपनिषदारम्भे समामनन्ति। शिक्षां व्याख्यास्यामः। वर्णः स्वरः मात्रा बलं साम सन्तान इत्युक्तं शिक्षाध्याय इति" ऋ० भा०। "अथ शिक्षां प्रवक्ष्यामि पाणिनीयमतं यथा। मात्रास्वरूपं तद्विद्याद् यथोक्तं लोकवेदयोः। प्रसिद्धमपि शब्दार्थसविज्ञातमबुद्धिभिः। पुनर्व्यक्तीकरिष्यामि वाचः उच्चारणे विधिम्। त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः। प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा। स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः। यादयश्च हृता ह्यष्टौ चत्वारश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च+कपौ चापि पराश्रितौ। ह्रस्वदीर्घप्लुतेति विज्ञेय लृकारः प्लुत एव च। आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्। प्रातःसवनयोर्मन्द्रं छन्दोगायत्रमाश्रितम्। कण्ठे माध्यन्दिनयुतं मध्यमं त्रैष्टुभानुगम्। तारं तार्तीयसवनं शीर्षण्यं जागतानुगम्। सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः। वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः। स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः। इति वर्णविदः प्राहुर्निपुणास्तं निबोधत। उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः। ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अपि। उदात्ते निषादगान्धारावनुदात्ते ऋषभधैवतौ। स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः। अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च। नीभावस्य विवृत्तस्य संवृतस्य प्रकाशकः। जिह्वामूलमुपाध्मानं शृतिरष्टविधोच्यते। यद्योभागप्रसन्नास्यस्तत्कारादि यरं यदम्। स्वरान्तःस्थादयं विद्याद् यदन्यद्व्यञ्जनमूष्मणः। कवर्गं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात् कण्ठ्यमाक्षरसंयुतम्। कण्ठ्यावकारौ चवर्गशात्वा व्योष्ठजावुपू। ष्टुर्मूर्द्धन्या ऋटुरषा-दन्त्या लृ-तु-ल-सा: स्मृताः। जिह्वामूले तु कुः प्रोक्तो दन्त्यौष्ठ्यौ वः स्मृतो बुधैः। एऐ तु कण्ठतालव्यावोकौ कण्ठौष्ठजौ स्मृतौ। अर्द्धमात्रा तु कण्ठ्या ह्रस्वादेकारैकारयोर्भवेत्। ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम्। संवृतं मात्रकं ज्ञेयं विवृतन्तु द्विमात्रकम्। घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः। स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्। तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च। अनुस्वारयमानाच्च नासिका स्थानमुच्यते। अयोगवाहा विज्ञेया आश्रयस्थानभागिनः। अलाबुवीणानिर्घोषो दन्त्यमूष्मस्वरानुगः। अनुस्वारस्तु कर्त्तव्यो नित्यं ह्रस्वेषु दीर्घेषु च। अनुस्वारो विवृत्यस्तु विरामे चाक्षरद्वये। द्विरोष्ठौ तु विवृत्तौ स्यादु यत्रैकारवकारयोः। व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्। भीतापतनमेदाभ्यां तद्वत् वर्णान् प्रयोजयेत्"। "अघोऽस्पर्शयणस्त्रीः पञ्चैकस्मृष्टाः अलक्षणा। शेषाः स्पृष्टाकुलः प्रोक्ता निबोधानुप्रदानतः। यमोऽनुनासिका न ह्रौ नादिनो हकृषः स्मृताः"

"ईषन्नादाय नञ्जस्य श्वासिनश्च ककादयः। ईषच्छ्वासाः स्वरो विद्यात् गोर्द्धमैनद् प्रचक्षते। दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि। छन्दःपादौ तु वेदस्य ह्रस्वौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते"। "मन्त्रोहीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह। स वाग्वज्रं यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्। "अनक्षरं हतायुष्यं विस्वरं व्याधिपीडितम्। अव्यक्तं भस्महुमेण वज्रं पतति मस्तके। हुस्वहीनन्तु योऽधीते स्वरवर्णविवर्जितम्। छन्दोयजुःसामभिर्हीनो वियोनिमधिगच्छति" पाणिनिशिक्षा। नारदशिक्षा व्यासशिक्षादयो अन्याः सन्ति विस्तरभयान्नोक्ताः।

शिक्षाकर पु० शिक्षां करोति क-अच्। १व्याधे शब्दमा० २शिल्पशिक्षाकर्त्तरि।

शिक्षागुरु पु० विद्याहातरि।

शिक्षित त्रि० शिक्षा जाताऽस्य तारं० इतच् शिक्ष-क्त वा। १कृताभ्यासे २निपुणे ३विज्ञे च अमरः।

शिखिताचर्य पु० शिखितान्यचरणि त्रेय। १काले २शिखादातरि गुरौ च त्रिका०।

शिखि गतौ भ्वा०पर०सक०सेट् इदित्। शिङ्खति अशिङ्खीत्।

शिखिण्ड पु० शिखामस्यति अस-ड तस्य नेत्वम्, ह्रस्व०। यज्ञ० वा। १मयूरपिच्छे अमरः। २चूड़ायाञ्च मेदि०।

शिखिण्डक पु० शिखण्ड इव कन्। १काशपक्षे अमरः। (काशगुल्मो) स्त्रीत्वमपि तत्र। टाप् च २चूड़ायाञ्च हेमच०। [स्त्रियां ङीष्।

शिखिण्डिक पुंस्त्री० शिखण्डोऽस्यस्य ठन्। कुक्कुटे हेमच०

शिखिण्डिन् पु० शिखण्डोऽस्यस्य इनि। १मयूरे २द्रुपदराजस्य पुत्रभेदे मेदि०। ३मयूरपुच्छे ४कुक्कुटे ५बाणे च हेमच०। ६वृक्षायां ७अर्द्धर्चिकायां राजनि०। ८विष्णौ विष्णु० ९यूथिकायां स्त्री ङीप् मेदि०।

शिखिर न० शिखा अग्रस्य अरच् आकोपः। १पर्वताग्रे २अन्नभागे च। २द्वयोः पु०न० अमरः। ३पुलके ४गुन्द्रादौ पक्वदाडिमबीजाग्रे ५रत्नभेदे ७अकुशाग्रे मेदि०। ८कोटौ त्रिका०। ९मूर्धायां स्त्री यज्ञ०।

शिखरवासिन् त्रि०शिखरे वसति वस-णिनि ७त०। पर्वतावासिनि स्त्रियां ङीप्। "देवी शिखरवासिनी" दुर्गटी० या च हिमाचलवासिन्यां २दुर्गायां त्रिका०।

शिखरिन् पु० शिखाऽस्यस्य इनि। १पर्वते २वृक्षे ३बाणे मेदि०। ४कोष्ठे ५कोवदो हेमच०। ६चन्द्रमसि ७कुन्दवृक्षे दयावनाख्ये ८वर्णवृत्तभेदे राजनि०। १०रसालायां खाद्यभेदे स्त्री। ११सप्तदशाक्षरपादके छन्दोभेदे स्त्री "रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी" वृ०र० १२वल्लिकायां १३रोमावल्यां १४नारीरत्ने च स्त्री मेदि० वर्णस्य ङीप्। [(कुकुरमुड़ा) क्षुपभेदे रत्नमा०।

शिखलोहित पु०शिखाग्रस्य अत्य तथाभूतः यत् लोहितः।

शिखा स्त्री शी-अच् तस्य नेत्वम् पृषो०। १अग्निज्वालायां २अस्त्रकर्मभेदेऽपि पुंस्त्वे च अमरः। "शस्त्रक्षेप्ता सर्वं गात्राणि रक्षोपस्थशिखां वह्निः" भा०श०। ३ज्वालायां ४वर्हिचूड़ायां ५वाक्प्रवृत्तिकायाम् ६वयसाम्ने ७चूड़ामाले ८मयूरे च मेदि०। ९प्रधाने शिखायां १०दीप्तौ हेमच०। ११स्वरस्वरे यज्ञ०।

"शिखी शिखकी कर्म कुर्यात्" श्रुत्या शिखावत एव कर्मण्यधिकारः तत्रापि बह्वृचस्य कर्मण्यधिकारः न सूत्रकारस्य यथोक्तं "गायत्र्या तु शिखां बद्ध्वा नैर्ऋत्यां दिशमारभ्य" इति। लूटिकाञ्च ततो बद्ध्वा ततः कर्म समारभेत्"। "निबद्धशिख आसीनो द्विज आचमनं चरेत्। कृतोपवीतं सव्येऽंसे वाङ्मनःकायसंयतः"। सूत्रकारस्याचमने दोषो यथा "शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा। अकृता पादयोः शौचमाचान्तोऽशुचिर्भवेत्" आ०त०।

शिखाकन्द न० शिखेव कन्दोऽस्य। रक्तशूने राजनि०।

शिखातरु पु० शिखाया दीपशिखायाश्चरुरिव। दीपवृक्षे (देवको) त्रिका०।

शिखाधर पुंस्त्री० शिखां चूडां धरति धृ-अच्। १मयूरे रत्नमा० स्त्रियां ङीष्। २शिखाधारके त्रि० स्त्रियां टाप्। ३मञ्जुघोषे पु० त्रिका०।

शिखामूल न०शिखेव मूलमस्य। गृञ्जने (गाँजर) राजनि०

शिखालु पु०शिखाऽग्रस्य आलुच्। मयूरशिखावृक्षे राजनि०

शिखावत् पु० शिखा अस्त्यस्याऽस्त्यर्थे मतुप् मस्य वः। १वह्नौ २चित्रकवृक्षे च अमरः। ३वेतसवृक्षे यज्ञ०। ४शिखायुते त्रि०स्त्रियां ङीप्। सा च ५मूर्धायां यज्ञ०

शिखावर पु० शिखां वृणोति वृ-अच्। धनसहृक्षे यज्ञ०

शिखावल पुंस्त्री० शिखाऽग्रस्य वलच्। १मयूरे अमरः। स्त्रियां ङीष्। २मयूरशिखावृक्षे स्त्री राजनि० टाप्।

शिखावृद्धि स्त्री प्रतिदिनमग्रावृद्धौ दृष्टिगुह्ये दृश्यम्।

शिखिकण्ठ न० शिखिनो मयूरस्य कण्ठस्तद्वर्णोऽस्त्यस्य अर्श आद्यच्। तत्र (ह्रस्वे) रत्नमा०।

शिखिग्रीव पु० शिखिनो मयूरस्य ग्रीवा तद्वर्णोऽस्त्यस्य अच्। तत्र (ह्रस्वे) अमरः।

शिखिध्वज शिखिनो वह्नेर्ध्वज इव। १धूमे त्रिका०। शिखी मयूरोध्वजो यस्य। २कार्त्तिकेये यज्ञ०।

शिखिन् पु०शिखा अस्त्यस्य इनि। १मयूरे २वह्नौ ३चित्रकवृक्षे अमरः। ४वेतसवृक्षे ५कुक्कुटे ६दग्धे ७धूमे ८अग्नौ च मेदि०। ९वृक्षे हेमच० १०अलक्तोक्ति रत्नमा० ११पर्वते १२ब्राह्मणे १३सितावरे १४मेथिकायां राजनि० १५शिखायुक्ते त्रि० १६मयूरशिखावृक्षे राजनि०स्त्री ङीप्।

शिखिप्रिय पु०शिखिनं प्रीणयति प्री-क। बृहद्वृक्षे राजनि०।

शिखिमण्डल पु० शिखिनां मण्डलमिव यत्र। वरुणवृक्षे यज्ञ०। [अजमोदायां राजनि०।

शिखिमोदा स्त्री शिखिनः अजलोम्न इव मोदो यस्याः।

शिखियूप पु०शिखी शिखावान् यूप इव। श्रीकारिणि वृक्षे राजनि०। [कुमाण्डे यज्ञ०

शिखिवर्द्धक पु० शिखिनं वर्द्धयति वृध-णिच्-ण्वुल्।

शिखिवाहन पु० शिखो वह्नेर्वाहनं यस्य । कार्त्तिकेये अमरः ।

शिखिव्रत न० "प्रतिपद्येकभक्ताशी वर्षमासे त्रिवासरः । वैश्वानरपदं याति शिखिव्रतमिदं स्मृतम्" गरुडपु० १२९ अ० उक्ते वह्निपदप्राप्तिके व्रतभेदे ।

शिग्रु पु० शि-रुक् गुक् च । (सजिना) १वृक्षे २शोभाञ्जने च अमरः । "शोभाञ्जनो बीजशिग्रुः शीतलगन्धो जनप्रियः । सुखशोदः क्षणशिग्रुस्तुण्डो रुचिराञ्जनः । शोभाञ्जनस्तीक्ष्णकटुः स्वादुपाकः त्रिदोषजित् । जन्तुवातार्त्तिशूलघ्नः शुक्रशिग्रुः परः । श्वेतशिग्रुः सुतीक्ष्णः स्यात्सुरभङ्गः सितास्रवः । रक्तः श्वेतसरिखो रोचनो बहुशिग्रुकः । श्वेतशिग्रुः कटुस्तीक्ष्णः शोफानिलनिबर्हणः । अरुग्व्यथाहरो रुच्यो दीपनो मुखवाद्यतुत् । रक्तको रक्तशिग्रुः स्यान्मधुरो बल्लजच्छदः । सुवर्चिः केसरी सिंहो बलारिश्च प्रकीर्त्तितः । रक्तशिग्रुर्हरीतक्यौ मधुरश्च रसायनः । शोफाध्मानप्लीहार्शःपित्तश्लेष्मोदरहारकः" राजनि० ।

शिग्रुज न० शिग्रुतो जायते जन ड । श्वेतसरिखे शोभाञ्जनबीजे अमरः हृत० । शिग्रुबीजमस्यत्व मत्वर्थीय ठच् ।

शिघ आघ्राणे भ्वा० पर० सक० सेट् इदित् । शिङ्घति अशिङ्घीत् ।

शिङ्घाण न० शिघि-आनच् पृषो० णत्वम् । १काचपात्रे २स्राहमले ३नासिकामले श्लेष्मणि च मेदिः । स्वार्थे क । नासिकामले पु० ।

शिञ्ज अव्यक्तध्वनौ इदित् वा चु० उभ० पक्षे अदा० आत्म० अक०सेट् । शिञ्जयति ते शिञ्जते अशिञ्जित् त अशिञ्जिष्ट । भ्वादिरयं पर० इत्येके तेन शिञ्जति अशिञ्जीत् ।

शिञ्जा स्त्री शिञ्ज-भावे अ । १मधुरध्वनौ मेदिनी० । शिञ्ज-अच् । २धनुर्गुणे हेमच० ।

शिञ्जित न० शिञ्ज-भावे क्त । मधुरध्वनौ अमरः ।

शिञ्जिनी स्त्री शिञ्जति शिञ्ज-णिनि । धनुर्गुणे अमरः । २नूपुरे हेमच० ।

शिट अनादरे भ्वा०पर०सक० सेट् । शेटति अशेटीत् ।

शिण्डाकी स्त्री खाद्यद्रव्यभेदे यथा "शिण्डाकी राजिकायुक्तैः स्याद्भूलकदलूबैः । धर्मथखरमैर्वापि भाजिपिण्डसंयुतैः । शिण्डाकी रोचनी गुर्वी पित्तश्लेष्मकरी स्मृता" राजनि० ।

शित त्रि० शो-क्त । १तीक्ष्णे २शाणिते च भेदिः ३अग्रे विश्वः

शितद्रु पु० शितं द्रवति द्रु-क्विप्-नि० । (शतद्रु) नदीभेदे अमरः । [२शोधमे त्रिका० ।

शितशूक पु० शितशूकीव शूकोऽग्रं यस्य । १यवे अमरः ।

शिति पु० शि-क्तिच् । १भृङ्गपक्षिवृक्षे २शुक्लवर्णे ३कृष्णवर्णे च भेदिः ४तद्वर्णवति त्रि० । ५खारे पुंस्त्री० मेदिनी० ।

शितिकण्ठ पु० शितिः नीलः कण्ठो यस्य । १शिवे अमरः । २दात्यूहविशेषे पुंस्त्री० त्रिका० स्त्रियां ङीष् ।

शितिचार पु० शितिः बहु चरति चर-अण्णायां वर्त्तते घञ् । (झुण्टनि) पक्षिभेदे शब्दर० ।

शितिच्छद पु० शितिः शुक्लः छदो यस्य । हंसे मेदिनी० ।

शितिसारक पु० शितिः शुक्लः सारो यस्य कप् । तिन्दुकवृक्षे राजनि० ।

शिथिल त्रि० श्लथ-किलच् पृषो० । १श्लथे २अदृढे संयोगभेदे १मन्दे च "शिथिलसंयोगस्य प्रचयः । शिथिलाख्यो यः संयोगस्तेन लभ्यते" भाषा० "अयोऽवयवावच्छेदेनावयवान्तरसंयोगित्ववत्वे वर्त्तमानः संयोगः प्रचयः" इति टीकायां दुर्गादासः ।

शिनि पु० शि-निक् । यदुवंश्ये क्षत्रियभेदे यस्य पौत्रः कृतवर्म्मणः

शिपि पु० शो-किप् तां पाति पा-कि पृषो० । १रश्मौ २जले न० "शैत्यात् शयनयोगाच्च शिपि वारि प्रचक्षते । तत्पानाद्रश्मिपानाच्चैव शिपयो रश्मयो मताः । तेषु प्रवेशाद्भगवान् विश्वः शिपिविष्ट उच्यते" व्यासः ।

शिपिविष्ट पु० ७त० । १यज्ञे २दुष्टमांसे च ३महेश्वरे अमरः । ४विष्णौ शिपिषद्धे दृश्यम् । "नैकरूपो बहुरूपः शिपिविष्ट प्रकाशनः" विष्णुस० । पृषो० शिपिविष्ट तत्रार्थे रत्नमालायां दयानिधिः ।

शिप्र पु० शि-रक् पुक् च । १वरोरभेदे २नदीभेदे स्त्री । "एवं विवाह्य विधिवत् सोमवंशे मानसाचले । जलवत्यां वधिरस्तु सोदमाप तया सह । तत्र यत् पतितं तोयं मानसाचलकन्दरे । विवाहावभृतार्थाय ब्राह्मणैर्यत् प्रयोजितम् । धातले । ब्रह्मविष्णुमहादेवपार्षदैः सप्तदोदितम् । तत्तोयं सम्भृता भूत्वा पतितं मानसाचलात् । शिखाद्रेः कन्दरे सानौ सरस्याच्च पृथक् पृथक् । ततोयं पतितं शिप्रे देवभोग्ये सरोवरे । तेन शिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम्" कालिका० २९अ० । "ततो हिमवतः प्रस्थे प्रतीच्यां तत्पुरस्य च । शिप्रं नाम सरः पूर्णं दृष्ट्वा दुर्हृष्टमानसाः । तत्रहुः स्नानमाचार्य्य ब्रह्मयज्ञादयः सुराः । उपविष्टा मुनिश्रेष्ठा

सुरक्षाल मङ्गेश्वरम्। तं शिवसंज्ञकाचारं मनोज्ञं सर्व-देहिनाम्। श्रीतामलजल सर्वैर्गुणैर्मानसमन्वितम्। दृष्ट्वा चणं हरस्तस्मिन् सौवृत्तुक्योऽभूदनेत्तषे। शिवां चाम नदीं तस्माच्छिःस्रुतां दक्षिणोदधिम्। मच्छन्तीञ्च दृशांसो यावयन्तीं समन्ततः"। तत्रैव १६ अ०।

शिफा स्त्री शि-फक्। वृक्षाणां १जटाकारे मूले। (शिकड़) अमरः। २नद्यां ३मांसिकायां ४मातरि मेदि०। ५घृत-पुष्पायां हरिद्रायां राजनि०। ७पद्मकन्दे हेमच०। जटाकारे मूले पु० विद्याविनोदः।

शिफाक पु० शिफेव इवार्थे कन्। पद्ममूले शब्दच०।

शिफाकन्द पु० शिफेव कन्दः। पद्ममूले अमरः।

शिफाधर पु० शिफा अधरा यस्मात्। वाक्षायां शब्दच०।

शिफारुह पु० शिफायां रोहति रुह-क। वटवृक्षे राजनि०

शिमुड़ी स्त्री (चञ्चुधोनि) ख्याते शुपभेदे राजनि०।

शि(सि)म्बा स्त्री शाम्यति शमति वा शम-शम-वा बा० डम्बच् पृषो०। (छिमी) ख्याते १यदार्थे शब्दच०। २चक्र-मर्दे पु० शब्दच०।

शि(सि)म्बी स्त्री शम-बि नि० वा ङीप्। १शिम्बायां (शिम) लतायां हेमच०। "मङ्गल्यावकरी शिम्बी" ति०त० २एरकायाञ्च भावप्र०। स्वार्थे क। तत्रैव।

शिम्बीधान्य न० शिम्बीजातं धान्यं श०त०। सुश्रुतादौ धान्यभेदे भावप्र०। [शब्दर० कप् तत्रैव।

शिम्बीपर्णी स्त्री शिम्बीव पर्णमस्याः ङीप्। सुश्रुतोक्तौ

शिर न० शृ-क। १मस्तके जटा०। "शिरसं दद्यात् गवाशिरे" वायुपु०। २शिग्रुमूले मेदि०। ३यष्टायाम् ४अजगरे च संक्षिप्तसा०।

शिरःफल पु० शिर इव फलमस्य। नारिकेले त्रिका०। [गाछे

शिरःशूल न० शिरसः शूलमिव तापकत्वात्। शूलरोगभेदे

शिरज पु० शिरे जायते जन-ड। केशे शब्दच०।

शिरस् न० शृ-असुन् नि०। १मस्तके २शिखरे अमरः। ३प्रधाने ४सैन्याग्रे मेदि०।

शिरसिज पु० शिरसि जायते जन ड वा अलुक् समा०। केशे जटाध० लुकि शिरोजोऽप्यत्र। [केशे शब्दच०।

शिरसिरुह पु० शिरसि रोहति रुह-क वा अलुक् समा०।

शिरस्क न० शिरसि कायति प्रकाशते कै-क। शिरस्त्राणे हेमच०

शिरस्त्र न० शिरस्त्रायते त्रै-क। शिरोरक्षके उष्णीषे अमरः

शिरस्त्राण न० शिरस्त्रायते अनेन त्रै-शरणे ल्युट्। शिरो-रक्षणे उष्णीषे हेमच०।

शिरस्य पु० शिरसि भवः यत्। १निमेलकेऽपे अमरः २शिरो-भवमात्रे त्रि०। [अस्य दन्त्यादित्वमपीत्यन्ये।

शिरा स्त्री शृ-क। नाड्यां (शिर) मेदि०। शृ-किरच् डिच्च।

शिरापत्र पु० शिरेव पत्रं यस्य। हिन्तालवृक्षे राजनि०।

शिराल न० शिरोऽस्यस्य नच्। १कमेरुके शब्दच०। तत्फलस्य शिरायुक्तत्वात्तथात्वम्। २शिरायुक्ते त्रि०।

शिरालक पु० शिरायामस्यति पर्य्याप्नोति अस-ण्वुल्। (झाड़योड़ा) वृक्षभेदे शब्दच०।

शिरावृत्त न० शिरेव वर्त्तते वृत-क। सोवले राजनि०।

शिरि पु० शृ-कि। १खड्गे २शरे ३क्षिप्ते त्रि० षष्ठादि०। ४शलभे वि०को०।

शिरीष पु० शृ-ईषन् किच्च। वृक्षभेदे अमरः। "शिरीषो मधुरोऽनुष्णस्तिक्तश्च व्रणरो लघुः। दोषशोष विषपित्तः कासव्रणविषापहः" भावप्र०।

शिरीषपत्रिका स्त्री शिरीषस्येव पत्रमस्या कप् टाप् अत इत्वम्। श्वेतकिणीवृक्षे राजनि०।

शिरोगृह न० शिरःस्थमुपरिस्थं गृहम्। (चिलेघर) चन्द्र-शालायां हेमच०।

शिरोग्रह पु० "रक्तमाश्रित्य पवनः कुर्य्यात् सृक्कधराः शिराः। रुजाः सवेदनाः कृष्णाः सोऽसाध्यः स्याच्छिरोग्रहः" भावप्र० उक्ते वातरोगभेदे "सृक्कधरा शीवागताः स पवनः शिरोग्रहः स्यादित्यन्वयः" भावप्र०। [हेमच०।

शिरोधरा स्त्री शिरोमस्तकं धरति धृ-अच् टाप्। ग्रीवायां

शिरोधि स्त्री शिरो धीयतेऽत्र धा-कि। ग्रीवायाम् अमरः

शिरोमणि पुंस्त्री० शिरसि धार्य्योमणिवा० श०त०। शिरोधार्य्य रत्ने चूड़ामणौ शब्दच०। स्त्रीपक्षे वा ङीप्। शिरो-रत्नादयोऽप्यत्र न०।

शिरोमर्म्मन् पु० शिरसि मर्म यस्य। शूकरे हेमच०।

शिरोरुजा स्त्री शिरो रुजति व्यथयति रुज-क। १शिरो-व्यथायुक्ते त्रिका०। हृत०। २मस्तकरोगे च।

शिरोरुह पु० शिरसि रोहति रुह-क। केशे अमरः।

शिरोरोग पु० हृत० सुश्रुतोक्ते मस्तकरोगभेदे तल्लक्षणं यथा "अथातः शिरोरोगविज्ञानीयमध्यायं व्याख्यास्यामः। शिरो रुजति तस्यांनां वातपित्तकफैस्त्रिभिः३। सन्निपा-तेन४ रक्तेन५ क्षयेणच६ क्रिमिभिः७क्षया। सूर्य्यावर्त्तः नवातात्८ष्टौविभेदाश्च१०सप्तकैः११। एकादशप्रकारस्य लक्षणं संप्रवक्ष्यते। यस्यानिमित्तं शिरसो रुजश्च भवन्ति नीरा मिषि वातिकानाम्। मन्दोपतापैश्च भवेदभेद्यैः शिरो-

ऽभिताप: स शमीरसेन३ । यश्चोष्णमङ्गारचितं यथैव भवेच्छिरो धूमवती च नासा । शीतेन रात्रौ च भवेद्दिनेऽपि शिरोऽभिताप: स तु पित्तकोपात्२ । शिरोमलं यस्य कफोपदिग्धं शुक्लं प्रतिष्यन्दयतो हिमस्य । प्लुताक्षिकूटं वदनं च यस्य शिरोऽभिताप: स कफप्रकोपात्३ । शिरोऽभितापे विषयग्रहत्वे४ सर्वाणि लिङ्गानि यथोद्भवन्ति । रक्तात्मक:५ पित्तसमानलिङ्ग: स्यात्सोपदंशं शिरसो भवेच्च । यथायथादोषबलप्रवृत्तां शिरोगतानामभिवृद्धयेत्तु । यथाप्रदिष्ट:६ शिरसोऽभिताप: कष्टो भवेदुच्चकोऽतिमात्रम् । संस्वेदनस्वेदनधूमनस्यैरक्तस्त्रिमोक्षैश्च विद्वद्भिरेति । निस्तुद्यते यस्य शिरोऽतिमात्रं सन्तप्यमानं स्फुरतीव चान्त: । प्राणाञ्च गच्छेत्सुनिलं सरक्तं शिरोऽभिताप: क्षपिभि:७ स घोर: । सूर्योदयं या प्रतिमन्दमन्दमभिष्वृंक् सम्पद्यते सा माठम् । विवर्धते चाप्युभया यदैव सूर्यास्तगो विनिवर्तते च । शीतेन यानि सभये कदाचिदुष्णेन जन्तु: सुखमाप्नुयाच्च । तं भास्करावर्तमुदाहरन्ति सर्वात्मकं कष्टतमं विकारम् । दोषास्तु दुष्टास्त्रय एव कन्धां संपीड्य शाखां सकलां सशीताम् । कुर्वन्ति यान्त्यभ्युदयं यदैते स्थितिं करोत्याशु विशेषतस्तु । गण्डस्य पार्श्वं पुरतो करोति कर्णं कृतघ्नं शोषयजांश्च रोगान् । अवन्तवातं६ तमुदाहरन्ति दोषत्रयोत्थं शिरसोविकारम् । श्लोकसाकार्धमतीव जन्तो: सम्भेदतोदभ्रमसूज्जुषम् । यच्चाहृषाहादथ वाप्यकस्मात्तस्यार्द्धभेदं१०. त्रिदयाहृदयवदन्ति । यद्धान्वितो वायुरुदीर्णवेग: क्षताद्यवात्र: कफपित्तरक्तै: । वक्त्र: सतीव्रा: प्रतनोति मूर्ध्नि विद्धे यतश्चापि हि यद्धयोस्तु । सुकष्टमेनं खलु यद्धकाख्यं११ महर्षयो वेदविद: पुराणा: । व्याधिं वदन्त्युद्धतसत्त्वकल्पं भिषक्षडङ्गैरपि दुर्निवारम्" ।

शिरोवल्ली स्त्री शिरसा वल्लीव । मयूरचूडायां शब्दच० ।

शिरोवृत्त न० शिर इव वृत्तं वर्त्तुलम् । मरिचे राजनि० ।

शिरोवृत्तफल पु० शिरोवृत्तं मरिचमिव फलमस्या: । रक्तापामार्गे भावप्र० । [त्रिका० ङीष् । तत्रैव म० ।

शिरोवेष्ट पु० वेष्ट-घञ् शिरसो वेष्ट: । (पाकड़ी) वृक्षभेदे

शिल उञ्छे कणश आदाने तुदा० पर० सक० सेट् । शिलति अशैलीत् ।

शिल न० शिल-क । अदृष्टपूर्वत्वात् केवलकणशोञ्छयोः दानद्रव्यायां इष्टौ उञ्छशब्दे १०७० पृ० दृश्यम् ।

२पाषाणे इद्वाराघ:स्थितकाष्ठखण्डे च (गोवराट) स्त्री अमर: । ४कस्तूरीभेदे ५घन:शिलायां स्त्री मेदि० ६कर्पूरे राजनि० । [पाषाणभेदवृक्षे स्त्री राजनि०।

शिलगर्भज: पु० शिलाया गर्भे जायते जन-ड । शैलेये गन्धद्रव्ये शब्दच० ।

शिलाकर्णी स्त्री शिलेव कर्णमस्य ङीष् । शल्लकीवृक्षे शब्दच०

शिलाकुट्टक पु० शिलां कुट्टयति कुट्ट-ण्वुल् । १पाषाणभेदवृक्षे अमरभेदे शब्दच० । शिलया कुट्टति विचूर्णीकरोति । २अश्मकुट्टके वानप्रस्थभेदे ।

शिलाज न० शिलातो जायते जन-ड । १शैलेये गन्धद्रव्ये शब्दच० । २लौहे राजनि० ।

शिलाजतु न० शिलाजातं जतु । १पर्वतजाते उपधातुभेदे अमर: । तदुत्पत्त्यादिकं भावप्र० उक्तं यथा

"निदाघे घर्मसन्तप्ता धातुसारन्धराधरा: । निर्यासवत् प्रस्रवन्ति तच्छिलाजतु कीर्त्तितम् । शौवर्णं राजतं ताम्रमायसन्त्वत्रिधम् । शिलाजतुद्विजतु च शैलं त्रिधापि द्वयपि । मेरवमप्रसजञ्चापि गिरिजं शैलधातुजम् । शिलाजं कटु तिक्तोष्णं कटुपाकं रसायनम् । छेदि वीर्यप्रदं कृमि कफमेदोश्मशर्करा: । मूत्रकृच्छ्रं जयं श्वासं वातार्शांसि च पाण्डुताम् । अपस्मारन्तथोन्मादं शोथकुष्ठोदरक्षयान् । शौवर्णन्तु जवापुष्पवर्णं भवति तद्गुणात् । मधुरं कटुतिक्तञ्च शीतलं कटुपाकि च । राजतं पाण्डुरं शीतं कटुकं खाटुपाकि च । ताम्रं मयूरकण्ठाभं तीक्ष्णमण्डञ्च जायते । लौहं कटाभुपत्राभं तत्तिक्तं लवणं भवेत् । त्रिदोषे कटुकं शीतं सर्वरोगहरं सटाकृतम्" । [ङीष् । कालाञ्जनीवृक्षे राजनि०।

शिलाञ्जनी स्त्री शिला अञ्जतेऽनया अञ्ज-करणे-ल्युट्-

शिलाटक पु० शिलेव अटति शिलामटति वा अट-ण्वुल् । १अष्टे २बिल्वे च मेदि० ।

शिलात्मज न० शिलाया आत्मज इव । लौहे राजनि० ।

शिलात्मिका स्त्री शिलेव आत्मा यस्य कप् । (भूमि) भूमायां शब्दच० ।

शिलादृढ पु० शिलाया दृढ़रिव । शैलेये गन्धद्रव्ये राजनि०

शिलाधातु पु० शिलाया धातुरिव धातुरस्य । १श्वेतोपले (खड़ी) त्रिका० । २पीतवर्णे गैरिकभेदे च राजनि० । [प्रस्तरखण्डभेदे शब्दच० ।

शिलापुत्र पु० शिलाया: पुत्र इव । (लोढ़ा) प्रेयसनाधने

शिलापुष्प न०शिलाया: पुष्पमिव । शैलेये गन्धद्रव्ये राजनि०

शिलाभव न०शिलायां भवति भू-अच् ७त०। शैलेये अष्टाङ्ग०

शिलाभेद पु० शिलामपि भिनत्ति भिद-अण् । १पाषाण-भेदिद्रुमे रत्नमा० २पाषाणभेदकाख्ये च ।

शिलारम्भा स्त्री शिलेव रम्भा । कार्शकदल्यां राजनि० ।

शिलावल्का स्त्री शिलेव कठिनः वल्को यस्याः । (शिलाचाक) ख्याते प्रसिद्धे वृक्षभेदे शिलास्वगप्यत्र राजनि० । [त्रिका०।

शिलाव्याधि पु० शिलाया व्याधिरिव । शैलेये गन्धद्रव्ये

शिलासन न०शिला आसनं यस्य । शैलेये गन्धद्रव्ये शब्दर० २शिलानिर्मिते आसने च ।

शिलासार न० शिलायाः सार इव । लोहे क्लेमच० ।

शिलि पु० शिल-कि । १भूर्जपत्रवृक्षे शब्दमा० । धाराधःस्थे २काष्ठे (गोवराट) स्त्री शब्दर० । ३मेक्यां ४कवाक-पुष्पे ५तन्मयोर्षे च मेदि० स्त्री ङीप् ।

शिलिन्ध्र पुंस्त्री० शिलिं ददाति दा-क पृषो० खमामख्याते मत्स्यविशेषे "शिलिन्ध्रः श्लेष्मलो बल्यो विपाके मधुरो गुरुः । आमवातकरो वृष्यो वातपित्तहरो मतः" राजवल्लभः । स्त्रियां ङीष् ।

शिलीन्ध्र न० शिलीं धरति धृ-क पृषो० सम् । १कदली-पुष्पे २कवके च मेदि० ३त्रिपुटायां विश्वः । [हारा०।

शिलीन्ध्रक न० शिलीन्ध्र इव इवार्थे-कन् । गोमयच्छत्राके

शिलीपद पु० शिलो द्वाराधःस्थकाष्ठमिव पदमस्मात् । रोग-भेदे (गोद) शब्दर० पृषो० । श्लीपदमत्र न० भावप्र० । तन्निदानादि भावप्र० उक्तं यथा

"पुराणोदकभूयिष्ठाः सर्वकुण्डु च शीतलाः । ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः" । विशेषत इति वचनेनान्यत्रापि श्लीपदं भवतीति बोध्यते । अथ श्लीपदस्य सामान्यलक्षणमाह "यः सज्वरोवङ्क्षणजो भ्रमार्त्तिः शोथो नृणां पादगतः क्रमेण । तत् श्लीपदं स्यात्करकर्णनेत्रशिश्नोष्ठनासास्वपि केचिदाहुः" । तत्त्रिविधम् वातिकं पैत्तिकं श्लैष्मिकञ्चेति । तत्र तेषां क्रमेण लक्षणान्याह "वातजं कृष्णरुक्षं हि स्फुटितं तीव्रवेदनम् । अनिमित्तरुजाक्रान्तं बहुशो ज्वर एव च । पित्तजं पीतसङ्काशं दाहज्वरयुतं भृशम् । श्लैष्मिकन्तु भवेत् स्निग्धं तथा पाण्डुरमस्थिरम् । श्लीपद्येतानि जानीयात् श्लीपदानि कफात् पुनः । गुरुत्वञ्च महत्त्वञ्च यत्रादौ दृश्यते कफात्" । अथासाध्यमाह "बहुभीकमिव सञ्जातं कष्टकैरुपचीयते । अवृद्धाल्पकमाक्रान्तं तु वर्जनीयं विशेषतः । यत् श्लैष्मिकाहारविहार-जातैर्जातं तथाधूरिकस्य पुंसः । सास्रावमत्युल्बणसर्व-लिङ्गं सकण्डुकञ्चापि विवर्जनीयम्" अधिकितरत्वादिति शेषः । [१युद्धे ४जडीभूते च शब्दर० ।

शिलीमुख पु० शिलीव मुखमस्य । १भ्रमरे २बाणे अमरः ।

शिलोच्चय पु० शिलानामुच्चयो यत्र । पर्वते अमरः ।

शिलोञ्छ पु०शिलेवोञ्छः उञ्छ-घञ् । उपात्तशस्यात् चौत्रात् शेषावचयने ।

शिलोत्थ न० शिलाया उत्तिष्ठति उद्-स्था-क । शैलेये गन्धद्रव्ये राजनि० । शिलोद्भवादयोऽप्यत्र ।

शिल्प न० शिल-पक् । चित्रकलादिकर्मसु अमरः । २चुचि मेदि० । तदारम्भसङ्ख्यः स०चि० उक्तो यथा "मृदुध्रुवक्षिप्रचरे च गुरौ वा खा०लग्नगे । विधौ शुक्रजीववर्गस्थे शिल्पारम्भः प्रशस्यते" ।

शिल्पकारिन् त्रि० शिल्पं चित्रादिकलां करोति कृ-णिनि । चित्रादिकर्तरि ।

शिल्पिका स्त्री शिल्पमिव कायति कै-क । तृणभेदे राजनि०

शिल्पशाला स्त्री ६त० । चित्रकरादीनां चित्रकरणगृहे अमरः

शिल्पशास्त्र न० शिल्पज्ञापनं शास्त्रम् । वास्तुविद्यादिज्ञा-पके शास्त्रे ।

शिल्पिन् त्रि० शिल्पं वेत्त्यधीते वा इनि । १चित्रादिकर्म-करे अमरः । २कोलदलौषधौ स्त्री मेदि० ङीप् ।

शिव न० शो-वन् पृषो० । १मङ्गले अमरः । २सुखे ३जले उणा०ादि० । ४मोक्षे सांसर्गे च ५लवणे ६चेनटङ्के च राजनि० । ७मङ्गलवति त्रि० ८वर्षाहेवे पु० अमरः । एवं ९मोक्षे १०कीलकृक्षे ११बालुके १२गुग्गुलौ १३वेदे १४पुण्डरीकवृक्षे १५कृष्णधुस्तूरे १६पारदे राजनि० । १७देवे शब्दर० १८शङ्करे उणादि० १९विष्ण्वादिषु सप्तसु विंशतितमे योगे च पु० ज्यो०त० । "शिवमहैतं तुरीयं मन्यन्ते" श्रुत्युक्ते २०अद्वैतब्रह्मणि न० ।

शिवक पु० शिव-कुत्व इवार्थे कन् । १कीलके अमरः गवां गात्रकण्डूयनार्थं गोष्ठे निखाते २काष्ठे च भरतः ।

शिवकाञ्ची स्त्री ६त० । पुरीभेदे ।

शिवधर्म्मज शिवधर्म्माज्जायते जन-ड । अङ्गुलवृक्षे

"पुरा दक्षयिनाशाय कुपितस्य त्रिमूर्त्तिनः । अपतत् भीमवक्त्रस्य स्वेदबिन्दुर्ललाटजः" इत्यादिना वीरभद्रोद्-भवोक्तेस्तस्यैव अङ्गुलवृक्षरूपतामाह "शान्तिप्रदानात् सर्वेषां व्याधीनां प्रशमो भव । प्रेक्षिष्यन्ति जनाः पूजां करिष्यन्ति मतं मम । अङ्गुलरक इति ख्यातिं गमिष्यति धरातले" । मत्स्यपु० ६८अ० ।

शिवज्ञान न० मासभेदे दण्डमानेन माहेन्द्रादियोगज्ञापके शास्त्रभेदे "माहेन्द्रे विजयो नित्यमर्हते कार्य्यशोभनम्। वक्रे कार्य्यविलम्बः स्यात् शून्ये च मरणं भवेत्। वैशाखादिश्रावणान्तमेकभावेन संवदेत्। अष्टतादि दिवारात्रौ चतुर्मासं यथाक्रमम्। यामसमं दिवामाने ज्ञेयं सर्वत्र मासके। तत्प्रमाणेन ज्ञातव्यं दण्डमानं विचक्षणैः। रात्रिमानप्रमाणेन ज्ञेयं दण्डप्रमाणकम्। न वारतिथिनक्षत्रं न योगः करणं तथा। शिवज्ञानं समाख्यातं सर्वं सन्निविचारणम्। भादूदिमार्गपर्य्यन्तं समप्रचारे समादिशेत्। शून्यवक्रादियोगं हि पौषादिषैतत्तथा" ज्योति०।

शिवचतुर्दशी स्त्री शिवप्रिया चतुर्दशी। फाल्गुनकृष्णचतुर्दश्याम्। व्रतभेदे शिवचतुर्दशीव्रतं दृश्यम्।

शिवतति स्त्री शिव+तातिल्। मङ्गलपरम्परायां हेमच०

शिवदारु न०शिवो देवस्तदादिकं दारु। देवदारुवृक्षे राजनि०

शिवदूती स्त्री शिवो दूतो यस्याः। १दुर्गामूर्त्तिभेदे तिथ्या० २योगिनीभेदे च "यदा जघान जगतां रक्तबीजं हिताय वै। महादेवी महामाया तदास्याः कायतः स्मृता। दूतं प्रस्थापयामास शिवं शुम्भाय सात्विका। तेन सा शिवदूतीति देवैः सैन्यैः प्रगीयते" कालिकापु० ६०अ०। "यः शिवाविरुतं श्रुत्वा शिवदूतीं शिवप्रदाम्। प्रणमेत् साधको भक्त्या तस्य कामाः करे स्थिताः" तन्त्रैव। "ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा। कौमारी वैष्णवी चैव वाराही पञ्चमी तथा। नारसिंही तथैवेन्द्री शिवदूती तथाष्टमी। एताः पूज्या महाभागाः योगिन्यः कामदाविकाः" तन्त्रैव। "कौशिक्याः हृदयाद्देवी निःसृता ध्यानतो हरेः। शिवदूतीति विख्याता शिवायतनुसंश्रिता" तन्त्रैव।

शिवद्रुम पु०शिवप्रियः द्रुमः। बिल्ववृक्षे राजनि०।

शिवदिष्टा स्त्री ३त०। केतक्यां राजनि०।

शिवधर्म्म न०शिवस्य तदुपासनार्थो धर्मो यत्र। उपपुराणभेदे चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्" कूर्मपु०।

शिवधातु पु० ६त०। पारदे पारदशब्दे दृश्यम्।

शिवनाभि पु०शिवस्य नाभिरिव। शिवलिङ्गभेदे "शिवनाभिमयं लिङ्गं प्रतिपूज्यं महर्षिभिः। श्रेष्ठञ्च सर्वलिङ्गेभ्यस्तस्मात् पूज्यं विधानतः" वीरमि०। अच समा०। शिवनाभः शालग्रामशिलाभेदे शालग्रामशब्दे दृश्यम्।

शिवपुरी स्त्री ६त०। काञ्च्यां क्षेत्रेच० शिवनगर्यादेश्च।

शिवप्रिय न० ६त०। १रुद्राक्षे २महादेवयुक्तमात्रे त्रि०राजनि०। ३बकवृक्षे जटा०। ४धुस्तूरे ५स्फटिके च पु० राजनि०। ६दुर्गायां स्त्री शब्दमा०। [अर्जुनवृक्षे राजनि०।

शिवमल्लक पु०शिवः कल्याणकरः मल्ल इव कायति के-क। शिवमल्ली स्त्री शिवस्य मल्लीव प्रियत्वात्। वकवृक्षे अमरः।

शिवरात्रि स्त्री शिवप्रिया तदुपासनार्था रात्रिः। माघीतः परस्यां कृष्णचतुर्दश्याम्। तद्रात्रौ हि शिवपूजनव्रतादिकं क्रियते इति तस्या रात्रेस्तत्प्रियत्वम्। २तद्दिवसकर्त्तव्ये व्रते च। तद्विधानकालादि तिथ्यतत्त्वे उक्तं यथा कालमाधवीये स्कान्दे नागरखण्डे "माघमासस्य शेषे या प्रथमे फाल्गुनस्य च। कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्त्तिता"। अत्रैकस्यान्यतरस्यां योगित्वफाल्गुनीयत्वे मुख्यगौणवृत्तिभ्यां अविरुद्धे। ततस्तु माघ्यन्तरा चतुर्दशी शिवरात्रिः। अस्यामुपवासः प्रधानम् "न स्नानेन न वस्त्रेण न धूपेन न चार्चया। तुष्यामि न तथा पुष्पैर्यथा तत्रोपवासतः" इति यङ्कारोक्तेः। स्कान्दे "ततो रात्रौ प्रकर्त्तव्यं शिवप्रीणनतत्परैः। प्रहरे प्रहरे स्नानं पूजा चैव विशेषतः"। अत्र वीप्सया प्रहरचतुष्टयसाध्यं प्रतीयते। नरसिंहाचार्य्यधृतेश्वरसंहितायाम् "शैवो वा वैष्णवो वापि यो वा स्यादन्यपूजकः। सर्वं पूजाफलं लभेत्। शिवरात्रिव्रतेनैव नात्र कार्य्या विचारणा"। संवत्सरप्रदीपे "दुग्धेन प्रथमे स्नानं दध्ना चैव द्वितीयके। तृतीये च घृतेनाथ चतुर्थे मधुना तथा"। ईशानसंहितायाम् "माघे कृष्णचतुर्दश्यां रविवारो यदा भवेत्। भौमो वापि भवेद्देवि! कर्त्तव्यं व्रतमुत्तमम्। शिवयोगस्य योगेन तद्व्रतमुत्तमोत्तमम्। शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम्। श्वा चाण्डालजातं मनुष्याणां भुक्तिमुक्तिप्रदायकम्"। नागरखण्डे "उपवासप्रभावेण बलादपि च जागरात्। शिवरात्रेस्तथा तस्य लिङ्गस्यापि प्रपूजया। अक्षयात् लभते लोकान् शिवसायुज्यमाप्नुयात्"। माघे "वर्षे वर्षे महादेवि! नरो नारी पतिव्रता। शिवरात्रौ महादेवं कामं भक्त्या प्रपूजयेत्"। ईशानसंहितायाम् "एवमेव व्रतं कुर्य्यात् प्रतिसंवत्सरं व्रती। द्वादशाब्दिकमेतद्धि चतुर्विंशाब्दिकं तथा। सर्वान् कामानवाप्नोति प्रेत्य चेह च मानवः"। हेमाद्रिधृता स्मृतिः "प्रदोषव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः। प्रदोषस्तु निशामुखः"। प्रदोषमाह वसिष्ठः "प्रदोषोऽस्तमयादूर्द्धं घटि-

काद्यनिष्यते" । ऊर्द्ध मनन्तरम् । वायुपुराणे "त्रयोदश्यन्तगे सूर्ये चतुर्दश्यपि नाऽऽदृष । भूतविद्धा तु या तत्र शिवरात्रिव्रतञ्चरेत्-" । ईशानसंहितायाम् "माघे कृष्णचतुर्दश्यामादिदेवो महानिशि । शिवलिङ्गतयोद्भूतः कोटिसूर्यसमप्रभः । तत्कालव्यापिनी ग्राह्या शिवरात्रि व्रते तिथिः । अर्द्धरात्रादधस्तूर्द्धं युक्ता यत्र चतुर्दशी । व्याप्ता सा दृश्यते यस्यां तस्यां कुर्यात् व्रतं नरः" । यत्र "महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः" इति देवलोक्ता महानिशा ग्राह्या । घटिका एकदण्डः । एवञ्च यर्हिने प्रदोषनिशीथोभयव्यापिनी चतुर्दशी तर्हिने व्रतम् उभयव्याप्त्युत्तरत्वात् । कालमाधवीयोऽप्येवम् । एतेन परदिने उभयव्यापित्वेऽपि पूर्वदिवसीयरात्रिद्वितीययामप्रभृतिचतुर्दशीसत्त्वे बह्वपरव्याप्तित्वेन पूर्वदिन एव व्रतमिति निरस्तम् । यदा तु पूर्वेद्युर्निशीथमात्रव्याप्तिः परेद्युः प्रदोषमात्रव्याप्तिस्तदा पूर्वेद्युर्व्रतं प्रधानकालव्याप्त्युत्तरत्वात् । "पूर्वेद्युरपरेद्युर्वा महानिशि चतुर्दशी । व्याप्ता सा दृश्यते यस्यां तस्यां कुर्यात् व्रतं नरः" इतीशानसंहितावचनाच्च । एतद्विषय एव भविष्यपु० "ऊर्द्धरात्रात् पुरस्ताच्तु जयायोगो भवेद्यदि । पूर्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैः" । विष्णुधर्मोत्तरे "जयन्ती शिवरात्रिश्च कार्य्या भूतजयान्विते । कृत्वोपवासं तिथ्यन्ते तदा कुर्याच्च पारणम्" । तिथ्यन्ते पारणं जयन्तीमात्रपरं तत्र चतुर्दश्यामेव तत् "ब्रह्मा ब्रह्मोदरमध्ये तु यानि तीर्थानि सन्ति वै । पूजितानि भवन्तीह भूतायां पारणे कृते" इति स्कान्दात् । "दिनमानप्रमाणेन या तु रात्रौ चतुर्दशी । शिवरात्रिषु सा ज्ञेया चतुर्दश्यान्तु पारणम्" इति गौतमीयाच्च । यदा तु पूर्वदिने न निशीथव्याप्तिः परदिने प्रदोषमात्रव्यापिनी तदा परा ग्राह्या प्रदोषव्यापिनीति प्रागुक्तत्वात् तिथेरिक्षत्रत्रव्याप्तित्वाच्च । एतद्विषय एव लिङ्गपुराणम् "शिवरात्रिव्रते भूतां कामवित्तां विवर्जयेत् । एकैकोपवासेन ब्रह्महत्यां व्यपोहति" । अत्रामावस्यायामेव पारणम् "शिवाऽघोरा तथा प्रेता सावित्री च चतुर्दशी । कृष्णयुक्तैव कर्त्तव्या कृष्णमेव हि पारणम्" । इति वचनात् । तदयं संक्षेपः । यर्हिने प्रदोषनिशीथोभयव्यापिनी चतुर्दशी तर्हिने व्रतम् । यदा तु पूर्वेद्युर्निशीथव्याप्तिः परेद्युः प्रदोषमात्रव्यापिनी तदा पूर्वेद्युर्व्रतम् । यदा तु न पूर्वेद्युर्निशीथव्याप्तिः परदिने प्रदोषव्यापिनी तदा परदिने । पारणन्तु परदिने चतुर्दशीलाभे चतुर्दश्यां, तदलाभे अमावास्यायाम् तिथितत्त्वम् ।

शिवलिङ्ग न० ६त० । शिवस्य लिङ्गाकारे प्रस्तरादिमये पदार्थे तदाविर्भावपूजाद्यादिकं यथा

"तत्रापि गत्वा सदनो ददर्श हरमेतनम् । दृष्ट्वा प्रहर्तुं कामोऽथ ततः स प्राद्रवद्धरः । ततो दारुवनं घोरं मदनाभिहतो हरः । विवेश ऋषयो यत्र सपत्नीका व्यवस्थिताः । ते चापि ऋषयः सर्वे दृष्ट्वा रूपं नताभवन् । ततश्चान् प्राह भगवान् भिक्षां मे प्रतिदीयताम् । ततस्ते मौनिनस्त्यक्त्वा सर्वे एव महर्षयः । तदाश्चर्याणि पुण्यानि परिचक्राम नारद ! । तं प्रविष्टं तदा दृष्ट्वा भार्गवाद्वेषयोषितः । प्रलोभनगमनं सर्वा रूपेणसत्त्वाः समन्ततः । ब्रुवते त्वरमन्त्यैनेकामनरूपाञ्च भाविनीम् । एताभ्यां भर्तृपूजासु कृतं वै सुस्थिरं मनः । ततः संक्षुभिताः सर्वा यत्र याति महेश्वरः । तत्र प्रयान्ति कामार्त्ता मद्विच्छित्तेन्द्रियाः । त्यक्त्वाश्रमाणि शून्यानि स्वानि तानि मुनियोषितः । अनुजग्मुर्यथा मत्तं करिणम् इव कुञ्जरम् । ततस्तु ऋषयो दृष्ट्वा भार्गवाद्विरहो मुने ! । क्रोधान्विताब्रुवन् सर्वे लिङ्गोऽस्य पततां भुवि । ततः पपात देवस्य लिङ्गं पृथ्वीं विदारयत् । ज्वलद्भीमं जगन्नाथ त्रिशूलो नीललोहितः । ततः स पतितो लिङ्गो विभिद्य वसुधातलम् । रसातलं विवेशाशु ब्रह्माण्डं चोर्द्ध तोऽभिनत् । ततश्चाल पृथिवी गिरयः सरितो नगाः । पातालभुवनाः सर्वे जङ्गमाऽजङ्गमाः स्थिताः । संक्षुब्धान् भुवनान् दृष्ट्वा भूर्लोकादीन् पितामहः । जगाम माधवं द्रष्टुं क्षीराब्धिं नाम सागरम् । तत्र दृष्ट्वा हृषीकेशं प्रणिपत्य च भक्तितः । उवाच देव ! भुवनाः किमर्थं क्षुभिता विभो ! । अथोवाच हरिर्ब्रह्मन् सर्वो लिङ्गो महर्षिभिः । पतितस्तस्य भाराच्च सञ्चचाल वसुन्धरा । ततस्तद्वृत्तमखिलं श्रुत्वा देवः पितामहः । तत्र गच्छामि देवेश एवमाह पुनः पुनः ॥ ततः पितामहो देवः क्षीरस्य जगत्पतिः । आजगाम तदुद्देशं यत्र लिङ्गं भवस्य तत् । ततोऽनन्तं हरिर्लिङ्गं दृष्ट्वारुह्य खगेश्वरम् । पातालं प्रविवेशाथ विष्वग्यात् त्वरितो विभुः । ब्रह्मा पद्मविमानेन ऊर्द्धमाक्रम्य सर्वतः । नैवान्तमलभद् ब्रह्मा विस्मितः पुनरागतः । विष्णुर्गत्वाथ पातालं सप्तलोकपरायणः । चक्रपाणिर्विनिष्क्रान्तो लेभेऽन्तं न महामुने !" इत्युक्त्वा "हर उवाच

नमर्चयन्ति विदधा मम लिङ्गं सुरोत्तमो !। तदेतत् प्रतिगृह्णीयां नान्यथेति कथञ्चन। ततः प्रोवाच भगवानेवमस्त्विति केशवः। ब्रह्मा स्वयञ्च जग्राह लिङ्गं कनकलिङ्गकम्। ततश्चकार भगवांश्चातुर्वर्ण्यं हरार्चने। शास्त्राणि चैषां सुख्यानि नानोक्तिविदितानि च। आद्यं यैवं परिख्यातमन्यत् पाशुपतं स्मृतं !। तृतीयं कालवदनं चतुर्थञ्च कपालिकम्। शैव आसीत् स्वयं शक्तिर्वशिष्ठस्य प्रियः सुतः। तस्य शिष्यो बभूवाथ गोपायन इति स्मृतः। महापाशुपतस्त्वासीद्भारद्वाजस्तपोधनः। तस्य शिष्योऽभवद्राजा क्षुपकः सोमकेश्वरः। कालास्यो भगवानासीदापस्तम्बस्तपोधनः। तस्य शिष्यो बको वैश्यो नाम्ना क्राथेश्वरो मुने। महाव्रती च धनदस्तस्य शिष्यश्च वीर्यवान्। कुन्दोदर इति ख्यातो जाता शूद्रो महातपाः। एवं स भगवान् ब्रह्मा पूजनाय शिवस्य च। कृत्वा तु चातुराश्रम्यं स्वमेव भवनं गतः। ब्रह्मणि सर्वोऽपि ततः संहृत्य तं तदा। लिङ्गं चिन्तयन्, कृच्छ्रं प्रतिष्ठाप्य चचार ह"। वामनपु० ६ अ०। एकदेहे लिङ्गद्वयार्चननिषेधो यथा "नैके लिङ्गद्वयं नार्च्यं शालग्रामद्वयं तथा। द्वे चक्रे द्वारकायास्तु नार्च्ये सूर्यद्वयं तथा"। तन्निर्माल्यभक्षणविधिनिषेधौ यथा "अभक्ष्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम्। शालग्रामशिलायोगात् पावनं तद्भवेत् सदा"। "लिङ्गपूजां विना देवि! अन्यपूजां करोति यः। विफला तस्य पूजा स्यादन्ते नरकमाप्नुयात्। तस्मात्लिङ्गं प्रयत्नेन प्रथमं परिपूजयेत्"। तत्पूजनप्रशंसा यथा "यद्गृहं लिङ्गपूजायां रहितं सततं प्रिये !। तद्गृहं पतितं मन्ये विष्ठाभूमिसमं स्मृतम्"। "ब्रह्मा विट् क्षत्रियो देवि ! यदि लिङ्गं न पूजयेत्। तत्क्षणात् परमेशानि ! स्वयं चाण्डालतां व्रजेत्। शूद्रस्य परमेशानि ! सदा शूकरवत् प्रिये !। पूजयेत् परमेशानि ! चत्वारो ब्रह्मणादयः। शिवार्चनन्तु पूजासु यदुक्तं वर्जितं सदा। विष्ठागर्त्तसमं देवि ! तद्गृहं विद्धि पार्वति !। शाक्तो वा वैष्णवो वापि शैवो वा परमेश्वरि !। आदौ लिङ्गं समभ्यर्च्य बिल्वपत्रैर्वरानने !। पश्चादन्यं महेशानि ! शिवं प्रार्थ्यप्रपूजयेत्। शिवपूजां विना देवि ! अन्यपूजां करोति यः। स एव रसनाहीनः कृमीरो जायते प्रिये !। निर्माय पार्थिवं लिङ्गं रुद्रं संहारकारिणम्। आयुतोर्धं महादेवं शङ्करं हरमव्ययम्। निर्माय पार्थिवं लिङ्गं विधिवत् पूजयेत् शिवम्। शिवपूजा महेशानि ! सदृष्टेह सततं प्रिये !। काशीपुरं महेशानि ! तद्गृहं सुरवर्णिनि !। शिवलिङ्गं प्रपूज्याथ सर्वपूजाफलं लभेत्"। चतुर्विधलिङ्गं यथा "चतुर्धा पार्थिवं लिङ्गं शृतस्नाभेदेन पार्वति !। शुक्लं रक्तं तथा पीतं कृष्णञ्च परमेश्वरि !। शुक्लन्तु ब्राह्मणे शस्तं, क्षत्रिये रक्तमिष्यते। पीतं च वैश्यजातौ तु कृष्णं शूद्रे प्रकीर्त्तितम्। चान्दनञ्च महेशानि ! सर्वजातिषु शस्यते"। लिङ्गार्चनतत्त्वे १।२।३ प०। अस्य पञ्च वक्त्राणि यथा "तत्र सर्वं शृणु चार्वङ्गि पार्थिवस्य सुखं प्रिये !। विभाव्य सुखलक्षं हि शिवस्य वरवर्णिनि !। सद्योजातं वामदेवमघोरञ्च ततः परम्। तत्पुरुषं तथेशानं पञ्चवक्त्रं प्रकीर्त्तितम्। सद्योजातञ्च वै शुक्लं शुद्धस्फटिकसन्निभम्। पीतवर्णं तथा सौम्यं वामदेवं मनोहरम्। कृष्णवर्णमघोरञ्च क्रूरं भीमविवर्द्धनम्। रक्तं तत्पुरुषं देवं दिव्यमूर्त्तिं मनोहरम्। श्यामलञ्च तथेशानं सर्वदेवशिवात्मकम्। चिन्तयेत् पश्चिमे चाद्यं द्वितीयन्तु तथोत्तरे। अघोरं दक्षिणे देवं पूर्वं तत्पुरुषं तथा। ईशानो मध्यतोध्येयं चिन्तयेत् भक्तितत्परः"। तत्रैव हृप्रदेशः। अथ रौद्रलिङ्गलक्षणम्, वीरमित्रोदयधृते "नदीसङ्गवं रौद्रमन्योन्यस्य विघर्षणात्। नदीवेगात् समं स्निग्धं संजातं रौद्रमुच्यते"। समुच्चयेऽपि "सरित्प्रवाहसंस्थानं बाणलिङ्गसमाकृति। तदन्यदपि बोद्धव्यं रौद्रलिङ्गं सुखावहम्। नदीसारनर्मदायां बाणलिङ्गसमाकृति। तदन्यदपि बोद्धव्यं लिङ्गं रौद्रं भवेत्। रौद्रलिङ्गं तथाख्यातं बाणलिङ्गसमाकृति। श्वेतं रक्तं तथा पीतं कृष्णं विप्रादिपूजितम्। स्वभावात् कृष्णवर्णं वा सर्वजातिषु सिद्धिदम्। नर्मदासम्भवं रौद्रं बाणलिङ्गवदीरितम्"। दैवलिङ्गमधिकृत्य शिवरात्रौ शिवे "करसंपुटसंस्थं शूलटङ्केन्दुभूषितम्। रेखाकोटरसंयुक्तं निस्त्रोत्तसमन्वितम्। दीर्घाकारञ्च यल्लिङ्गं ब्रह्मभागादिवर्जितम्"। अथ गोललिङ्गलक्षणम् "लिङ्गं गोलमिति प्रोक्तं गोलकं प्रोच्यतेऽधुना। कृष्णाख्यं फलाकारं नागरङ्गफलोपमम्। काकडिम्बफलाकारं गोललिङ्गमितीरितम्"। अथार्षलिङ्गलक्षणम्। "बालार्कोलफलाकारं ब्रह्मसूत्रविवर्जितम्। मूले स्थूलञ्च यल्लिङ्गं कपित्थफलसन्निभम्। तालस्य वा फलाकारं मध्ये स्थूलञ्च यद्भवेत्। मध्ये स्थूलं वरं लिङ्ग

स्फटिकलिङ्गसंज्ञितम्"। लिङ्गं च द्विविधमकृत्रिमं कृत्रिमञ्च अकृत्रिमं स्वयम्भुबाणलिङ्गादि स्वयम्भूतम्। कृत्रिमं धातुलिङ्गादिनिर्मितम्। सिद्धान्तशेखरे "तल्लिङ्गं द्विविधं ज्ञेयमचलञ्च चलं तथा। प्रत्येकं त्रिविधं ज्ञेयं लिङ्गं तदुभयात्मकम्। प्रासादे स्थापितं लिङ्गमचलं तच्छिलादिजम्। स्थापितमचलं गेहे स्थिरं लिङ्गमयोजिते। पञ्चधा तत स्थितं लिङ्गं स्वयम्भु दैवपालितम्। आर्षञ्च मानसं लिङ्गं तेषां लक्षणमुच्यते। नानाच्छिद्रसमायुक्तं नानावर्णसमन्वितम्। अदृष्टमूलं यल्लिङ्गं कर्कशं भुवि दृश्यते। तल्लिङ्गन्तु स्वयम्भूतमग्र्यं लक्षणमुच्यते। स्वयम्भुलिङ्गमित्युक्तं तच्च नानाविधं मतम्। शङ्खाभमस्तकं लिङ्गं वैष्णवं तदुदाहृतम्। पद्माभमस्तकं ब्राह्मं कृत्वाभं शाक्तमुच्यते। शिरोयुग्मं तथाग्नेयं त्रिपदं याम्यमीरितम्। खड्गाभं नैर्ऋतं लिङ्गं वारुणं कलसाकृति। वायव्यं ध्वजसंलिङ्गं कौबेरन्तु गदान्वितम्। ईशानस्य त्रिशूलाभं लोकपालादि निःसृतम्। स्वयम्भुलिङ्गमाख्यातं सर्वशास्त्रविशारदैः"। मत्स्यसूक्ते "इष्टा लिङ्गं महेशस्य स्वयम्भूतस्य पार्वति!। सर्वपापविनिर्मुक्तः परे ब्रह्मणि लीयते"। एतेषां पूजाफलन्तु तत्रैव "विशेषाच्छैलजं मुक्त्यै भुक्तये चानुषङ्गतः। पार्थिवं भुक्तये प्रोक्तं मुक्तये चानुषङ्गतः। एवं वै दारुजं ज्ञेयं धातुलिङ्गं तथा पुनः। स्थिरलक्ष्मीप्रदं ज्ञेयं हैमं राज्यप्रदञ्च तत्। पुत्रदृद्धिकरं ताम्रं राजयायुःप्रवर्द्धनम्" पद्मपु० "पारदञ्च महाभूत्यै सौभाग्याय च मौक्तिकम्। चान्द्रकान्तं मृत्युजित् स्याद्घाटकं सर्वकामदम्"। वी०मि०धृत कल्पोत्तरेऽपि "सर्वा फलप्रदा भूमिर्मण्यस्तद्वदेव हि। अनन्ताद्याः स्मृता ह्यष्टौ मण्यो विद्युदुज्ज्वलाः। रात्रौ प्रकाशकाः सर्वे विषाद्याघातकारिणः। नानावर्णास्तु विज्ञेया रत्नैर्गन्धैश्च कृपतः। वज्राद्याः स्फाटिकाद्याश्च गुडाद्यादिविनिर्मितम्। सर्वकामप्रदं पुंसां लिङ्गं तात्कालिकं मतम्"। लक्षणसमुच्चये "गान्धं सौभाग्यदं लिङ्गं पौष्पं भुक्तिप्रदायकम्"। तथा "नानागुणोद्भवं लिङ्गं नानाकामप्रदायकम्। सैकतं गुणदं लिङ्गं सौभाग्याय च लावणम्। उच्चाटने तु पालाशं भाक्षं शत्रुक्षयावहम्। तात्कालिकं दरिद्रश्च कृत्वा भक्त्या समर्चयेत्"। तथा "क्षुरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च। कुङ्कुमस्य तथैवैव गुग्गुलेन च चत्वःसमम्। एतद्वै गन्धलिङ्गन्तु कृत्वा संपूज्य भक्तितः। शिवसायुज्यमाप्नोति बन्धुभिः सहितो नरः। कार्यं पुष्पमयं लिङ्गं हृयमन्त्रसमन्वितम्। नवखण्डां धरां भुक्त्वा गणेशोऽधिपतिर्भवेत्। रजोभिर्निर्मितं लिङ्गं यः पूजयति भक्तितः। विद्याधरपदं प्राप्य पश्चात् शिवसमो भवेत्। श्रीकामो गोयुगलिङ्गं कृत्वा भक्त्या प्रपूजयेत्। स्वच्छेन कापिलेनैव गोमयेन प्रकल्पयेत्। कार्यं च षष्टिजं लिङ्गं यवगोधूमशालिजम्। श्रीकामः पुष्टिकामश्च पुत्रकामस्तदर्चयेत्। सिताखण्डमयं लिङ्गं कार्यमारोग्यवर्द्धनम्। वश्ये लवणजं लिङ्गं तले त्रिकटुकान्वितम्। गव्यघृतमयं लिङ्गं संपूज्य बुद्धिवर्द्धनम्। लवणेन च सौभाग्यं पार्थिवं सर्वकामदम्। कामदं तिलपिष्टोत्थं तथोत्थं मारणे स्मृतम्। भक्षोत्थं सर्वफलदं गुडोत्थं प्रीतिवर्द्धनम्। गव्योत्थं गुणदं भूरिशर्करोत्थं सुखप्रदम्। वंशाङ्कुरं वंशकरं गोमयं सर्वरोगदम्। केशास्थिसम्भवं लिङ्गं सर्वशत्रुविनाशनम्। लोभजे मारणे पिष्टसम्भवं लिङ्गमुत्तमम्। दारिद्र्यदं दुग्धोद्भूतं पैष्टं सारस्वतप्रदम्। दधिदुग्धोद्भवं लिङ्गं कीर्तिलक्ष्मीसुखप्रदम्। धान्यदं धान्यजं लिङ्गं फलोत्थं फलदं भवेत्। पुष्पोत्थं दिव्यभोगायुर्लक्ष्म्यै धात्रीफलोद्भवम्। नवनीतोद्भवं लिङ्गं कीर्तिसौभाग्यवर्द्धनम्। दूर्वाकाण्डसमुद्भूतमपमृत्युविनाशनम्। कर्पूरसम्भवं लिङ्गं कलायैर्भुक्तिसिद्धिदम्। व्यायक्तान्तं चतुर्धा तु ज्ञेयं सामान्यसिद्धिषु" गरुडपु०। "सर्वं मणिभवं श्रेष्ठं तत्र वाजमरिच्छिदे। यमलिङ्गं महाभूत्यै सौभाग्याय च मौक्तिकम्। पुष्टिमूलं महानीलं ज्योतिस्तोरससंज्ञकम्। सूर्यकं कुलसम्पत्त्यै तैजसं सूर्यकान्तजम्। चन्द्रापीडं मृत्युजिते स्फाटिकं सर्वकामदम्। शूलाख्यमणिजं शत्रुक्षयार्थं मौक्तिकं तथा। व्यायत्तं हीरकं ज्ञेयं रोगहृन्मौक्तिकोद्भवम्। शुभदृत् पुष्परागं नीलं वैदूर्यं शत्रुदर्पहृत्। नीलं लक्ष्मीप्रदं ज्ञेयं स्फाटिकं सर्वकामदम्"। सारसंग्रहे "महाभुक्तिप्रदं हैमं राजतं मूर्तिवर्द्धनम्। आरकूटं तथा कांस्यं ह्यन्यु सामान्यसुक्तिदम्। त्रपुसीसायसं लिङ्गं शत्रूणां नाशने हितम्। कीर्तिदं कांस्यजं लिङ्गं राजतं पुत्रवर्द्धनम्। पैत्तलं भुक्तिमुक्त्यर्थं मिश्रजं सर्वसिद्धिदम्" कालोत्तरतन्त्रम्। तत्रैव शिवनारदसंवादे "पिष्टजां सुक्तये लिङ्गं पूज्यं रजतसम्भवम्। हैमजं राज्यलोकस्य

प्रये पूजयेत् पुनान्। पूजयेत्तामजं लिङ्गं पुष्टिकामो हि मानवः"। मत्स्यसूक्ते "ताम्रलिङ्गं कलौ नार्च्यं रैत्यस्य सीसकस्य च। रक्तचन्दनलिङ्गस्य शङ्खकांस्यायसं तथा"। मातृकाभेदतन्त्रे १२पटले "पार्थिवे शिवपूजायां सर्वसिद्धियुतो भवेत्। पाषाणे शिवपूजायां द्विगुणं फलमीरितम्। स्वर्णलिङ्गे च पूजायां शतगुणं लाभनं मतम्। सर्वसिद्धीश्वरो रौप्ये फलं तस्माच्चतुर्गुणम्। ताम्रे पुष्टिं विजानीयात् कांस्ये च धनसंचयः। गङ्गायाञ्च लक्षगुणं लाक्षायां रोगवान् भवेत्॥ स्फाटिके सर्वसिद्धिः स्यात् तथा मारकते प्रिये!। नीलिङ्गे रिपोर्नाशं कामदं भक्तलिङ्गकम्। वालुकायां कार्यसिद्धिर्गोमये रिपुक्षयनम्। सर्वलिङ्गस्य माहात्म्यं धर्मकामार्थमोक्षदम्। संस्कारेण विना देवि! पाषाणादौ न पूजयेत्"। "मृत्तिकातोलकं याह्यमथ वा तोलकद्वयम्। एतदन्यन्न कुर्वीत कदाचिदपि पार्वति!" मातृकाभेदतन्त्रे ७प०। "मृत्तिकातोलकं याह्यमथ वा तोलकद्वयम्। लिङ्गस्य प्रमाणेन घटनं कारयेद् बुधः। अङ्गुष्ठपर्वमानन्तु कृत्वा लिङ्गं प्रपूजयेत्" विश्वसारतन्त्रम्। लिङ्गलोकीकरणमुक्तं कालोत्तरे "लिङ्गे वेद्यां तथा पीठे समस्तत्वनिपातनात्। समस्तैव विजानीयात् लिङ्गलीकरणत्विदम्"। ब्राह्मणादीनां मृत्तिकाभेदेन पूजाफलप्रशंसा तत्रोक्ता यथा "शुक्लं हि पार्थिवं लिङ्गं निर्माय यस्तु पूजयेत्। स एव विप्रो देवेशि! त्रिवर्गफलभाग्भवेत्। क्षत्रियस्तु वरारोहे! रक्तं निर्माय पार्थिवम्। पूजयेत् सततं यस्तु त्रिवर्गफलभागभवेत्। पीतं तु पार्थिवं देवि! निर्माय यस्तु पूजयेत्। स च वैश्यो महेशानि! त्रिवर्गफलभाग्भवेत्। कृष्णं हि पार्थिवं लिङ्गं निर्माय यस्तु पूजयेत्। स शूद्रः परमेशानि! त्रिवर्गफलभाग्भवेत्। शिलादौ च महेशानि! स्थूलञ्च फलदायकम्। अङ्गुष्ठमानं देवेशि! यदा हेमादिमानकृत्। क्रमेण देवदेवेशि! फलं बहुविधं श्रुतम्। स्थूलात् स्थूलतरं लिङ्गं रुद्राच्च परमेश्वरि!। पूजनाद्धारणादापि फलं बहुविधं श्रुतम्"। स्थूलतरमिति पार्थिवलिङ्गेतरपरम् मृत्तिकातोलकं याह्यमित्यादिवचनात्। शिलास्फाटिकमरकतादीनां पञ्चत्वलीकरणमुक्तम् लैङ्गे "शिवलिङ्गस्य यन्मानं तन्मानं दक्षव्ययोः। योन्यर्थमपि यन्मानं सदर्धोऽपि तथा भवेत्"। "लिङ्गस्य द्वादशांशेन परिणाहोऽपि तादृशः। लिङ्गस्य त्रिगुणा वेदी योनिस्तदर्द्धसंमिता। कुर्वीताकुण्ठतो लुप्तं न कदाचिदपि क्वचित्। रत्नादिशिवनिर्माणे मानमिच्छावशाद्भवेत्"। तन्त्रान्तरम्। लिङ्गशब्दव्युत्पत्तिर्यथा "आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका। आलयः सर्वदेवानां लयनाल्लिङ्गमुच्यते" स्कन्दपु०।

"एकहस्तेन निर्माय पार्थिवं लिङ्गमर्चयेत्। लक्षलिङ्गपूजनस्य फलमाप्नोत्यसंशयम्। तदेव द्व्यङ्गुलगुणं वामहस्तेन निर्मितम्। बदराहरणवेधादि शोधनञ्चैव पार्थिवम्। "एवं कृते तु सद्विप्रा संसारात् स विमुच्यते। द्व्याधिकैर्विंशतिपलैर्लिङ्गैः श्रेष्ठं प्रयत्नतः। लिङ्गं निर्माय देवेशि! पूजयेद्भक्तिसंयुतः" तन्त्रसारः।

शिवलोक पु० ६त०। कैलासनामके स्थाने।

शिववल्लभ त्रि० ६त०। १महादेवप्रिये २शतपत्त्र्यां स्त्री राजनि०। [२श्रीवृक्षे च राजनि०।

शिववल्ली स्त्री० शिवप्रिया वल्ली श०त०। १लिङ्गिनीलतायां राजनि०। [२शिवस्य शुक्ले च।

शिववाहन न० शिवं वाहयति वह-णिच्-ल्यु। वृषभे

शिववीज न०६त०। १पारदे राजनि०। शिववीर्य्यादयोऽप्यत्र।

शिवशेखर पु० शिवस्य शेखर इव। १धुस्तूरे राजनि०। २वकपुष्पे च जटा०।

शिवसुन्दरी स्त्री ६त०। दुर्गायां तन्त्रसा०।

शिवा स्त्री शो-वनृ नि०। १अङ्गुलवल्यां स्त्रियां २दुर्गायां "शिवा मुक्तिः समाख्याता योगिनां मोक्षदायिनी। शिवायै यां यजेद्देवीं शिवा लोके ततः स्मृता" देवीपु० ४५अ०। ३सप्तौ १शृगाले ५हरीतक्यां ६शमीवृक्षे ७ताम्रलक्ष्म्याम् अमरः। ८श्यामलक्ष्म्यां मेदि०। ९हरिद्रायां १०दूर्वायां ११गोरचनायाञ्च राजनि० १२शृगाल्याम् अमरः। [राजनि०।

शिवाटिका स्त्री शिवायाटति अट-ण्वुल्। कंपपत्त्र्यां

शिवात्मक न० शिवो मङ्गल आत्मा यस्य कप्। १हैमवते लवणे राजनि०। २शिवमये त्रि०।

शिवानी स्त्री शिवं कल्याणमानयति आ+नी-ड गौरा० ङीष्। १जयन्तीवृक्षे शब्दच० २दुर्गायाञ्च।

शिवाप्रिया पु० ६त०। १छागे त्रि० २तस्याः प्रियमात्रे त्रि०।

शिवापीड पु० ६त०। वकवृक्षे राजनि०। [राजनि०।

शिवाफला स्त्री शिवाया इव फलं यस्याः। शमीवृक्षे

शिवाबलि पु० शिवाभ्यो देयो बलिः श०त०। तन्त्रसा-

रविछिते सन्ध्यायां शिवाभ्यो देये मांसादिबलौ तद्विधिस्तन्त्रसारे दृश्यः ।

शिवाराति पु० शिवाया मृगालस्यारातिः । शुनकुरे शब्दमा० २शिवविशिवयोर्हरि घाघरखे च ।

शिवारुत न० ६त० । मृगालीशब्दे दिग्भेदे तस्य शुभाशुभफलं वसन्तराजशाकुने उक्तं यथा

"शोभनं शुभफलाग्निसूचकं कथ्यते त्वविनयं शिवारुतम् । मान्दीप्रकुभां विशेषतो ज्ञानमत्र च सदोपयुज्यते । दग्धा दिगुत्था दिनाधयुक्ता विवस्वताप्ता भवति प्रदीप्ता । सा धूमिता यां सविता प्रयातः शेषा दिगन्ताः किल पश्चयान्ताः । दग्धा दिगैशी ज्वलिता दिगैन्द्री प्रधूमिता चानलदिक्क्रमेण । आद्ये दिनस्य प्रहरे प्रदत्ते भयेशदैवेशदृताग्रदिक्षु । शिवा रटन्ती कुरुते नराणां संवासकायव्ययबन्धनानि । अङ्गो द्वितीये प्रहरस्य भागे सहस्रनेत्रानलकालदिक्षु । शिवा रटन्ती कुरुते इत्यादि । आग्नेये तृतीये प्रहरे दिनस्य दृताग्रदैवेशतयात्तदिक्षु । शिवा रटन्ती कुरुते इत्यादि । समागतेऽङ्गः प्रहरे तुरीये प्रेतेश्वरक्षःपतिपाशिदिक्षु । शिवा रटन्ती कुरुते इत्यादि । आद्ये निशायाः प्रहरे प्रदत्ते रक्षाऽधियादःपतिवातदिक्षु । शिवा रटन्ती कुरुते इत्यादि । ततो द्वितीयप्रहरे रजन्यास्तोयाधिव्राघानिलसोमदिक्षु । शिवा रटन्ती कुरुते इत्यादि । यामेऽतृतीयेऽपि च यामवत्याः समीरदोषाकरशम्भुदिक्षु । शिवा रटन्ती कुरुते इत्यादि । समागते रात्रितुरीययामे निशाकरेशानसुरेशदिक्षु । शिवा रटन्ती कुरुते इत्यादि । इतीरितं दिक्त्रययामयोगात् फलं विरुद्धं विरुतैः शिवायाः । भूमोऽथ दिक्पञ्चकयामयोगात् फलानि पुंसां क्रमतः शुभानि । कृतान्तरक्षोवरुणानिलेन्दुदिक्षाद्ययामे रविजैः मृगाख्याः । आदित्यवात्तांशुतिरित्यसर्वलोभः सभिक्षं प्रियलोकसङ्कुः । रक्षःप्रचेतोऽनिलसोमशम्भुदिक्षु द्वितीये प्रहरे रुतेन । आदित्यवात्तांशुतिरित्यादि । जलेशवातेन्दुशिवामरेशदिक्षारवैश्च प्रहरे तृतीये । आदित्यवात्तांशुतिरित्यादि । समीरसोमेशसुरेशवह्निदिक्षु स्वरैश्च प्रहरे चतुर्थे । आदित्यवात्तांशुतिरित्यादि । यमाङ्गरुद्रेन्द्रदृताग्रकालदिक्षारवैः पञ्चमयामभागे । आदित्यवात्तांशुतिरित्यादि । ईशानयमकाग्निदृतान्तरक्षोदिक्षु स्वरैश्च प्रहरे च षष्ठे । आदित्यवात्तांशुतिरित्यादि । रुद्राग्निकालाम्बुपयःपतिदिक्षारवैः सप्तमयामकाले । आदित्यवात्तांशुतिरित्यादि । अन्तकदैत्यतपाशिवातदिक्षष्टमे च प्रहरे रवेश्च । आदित्यवात्तांशुतिरित्यादि । "एकादिकानां निधनाष्टमानां शिवारुतानामधुना यदर्थम् । प्राच्यादिकाखष्टसु दिक्षुयेषं यदुद्यत् फलं तत्तदुदीरयामः । धनान्यभीष्टाग्निमभोऽलाभं ध्रुवं ततोऽर्थस्य फलं शुभञ्च । भयं प्रवासं सकलञ्च सौख्यमेकादिगजैः कुरुते प्रयान्ते । भयान्यनिष्टस्तुतिरत्नहानिरिष्टैर्वियोगो महती च भीतिः । आदिमहाग्निभैरवस्य टीप्ने त्वेकादिना चेत् कृतसप्तकेन । ऐशां निनादे प्रथमेऽर्थलाभो भवेद्द्वितीये निधिदर्शनञ्च । कन्यां तृतीये लभते चतुर्थे त्वश्वागमं पञ्चमकेऽथ सिद्धिम् । षष्ठे रवे क्रुध्यति भूमिनाथो भीः सप्तमे आदिफलोऽष्टमस्तु । त्वाष्ट्रोऽग्निभागे प्रथमे द्वितीये नराधिपः क्रुध्यति भीस्तृतीये । मातस्तुर्थे नगरस्य यज्ञे शिवाक्रुते पञ्चमके च युद्धम् । वदन्ति तज्ज्ञाः कलहञ्च षष्ठे भीः सप्तमे आदिफलोऽष्टमस्तु । आद्ये शुभं स्यादशुभं द्वितीये याम्ये महाव्याधिभयं तृतीये । स्वरे चतुर्थे स्वजनागमः स्यात् पुत्रो भवेत् पञ्चम फेरुरुतेषु । जायेत कन्या रटिते च षष्ठे भीः सप्तमे आदिफलोऽष्टमस्तु । यानस्य घातो दिशि राक्षसानामाद्ये द्वितीयेऽपि च गोकुलस्य । मृत्युस्तृतीये द्विचतुष्कदानां हानिश्चतुर्थेऽपि च पञ्चमेऽत्र । चौरादुभयं राजभयञ्च षष्ठे भीः सप्तमे आदिफलोऽष्टमस्तु । यक्षे शिवाया वरुणस्य भागे आद्ये भयं हानिरथ द्वितीये । स्याद्दालदूतागमनं तृतीये वादश्चतुर्थे खलु चौरभीतिः । स्यात् पञ्चमे राजभयञ्च षष्ठे भीः सप्तमे आदिफलोऽष्टमस्तु । वायव्यभागे भयमेकयक्षे भयातिरेको भवति द्वितीये । दृष्टिस्तृतीये महती चतुर्थे मेघागमे वर्षति पञ्चमे च । क्रोधं विधत्ते नृपतेश्च षष्ठे भीः सप्तमे आदिफलोऽष्टमस्तु । दिश्युत्तरस्यां विहिते विरावे म्रियेत कश्चित् प्रथमे द्वितीये । महाभयं, विप्रवधस्तृतीये लाभं चतुर्थे खलु कथ्यते च । विट्पञ्चमे वत्सरवे च मूढा भीः सप्तमे आदिफलोऽष्टमस्तु । राज्ञोऽथवा दर्शनमाद्ययक्षे क्रोधो द्वितीये च तथोत्तरेण । उल्काप्रपातस्त्रिषु दुर्दिनञ्च चतुर्षु भद्रं खलु पञ्चमे च । सङ्गो भवेद्वैरिजनैश्च षष्ठे भीः सप्तमे आदिफलोऽष्टमस्तु । आद्ये भवेद्दुर्दिनमोघदेशे दृष्टिर्द्वितीये च रवे शिवायाः । वातस्तृतीये त्वथनिश्चतुर्थे म्रियेत कश्चित् खलु पञ्चमे च । लभेत

पृष्ठीं निनदे च पृष्ठे भीः सम्मने स्यादिफलोऽष्टमस्तु" "क्षेमलाभपुनरागमनानां निश्चयं यमधिगम्य विशङ्कः । येन याति पथिकः परदेशं तं शिवारुतमथ प्रथयामः । यं यं देशं गन्तुमभ्युद्यतानां पुंसां शब्दानुच्चरन्ती शृगाली । शान्तायां सा सिद्धये वाञ्छितानां दीप्तायान्तु स्यादभीष्टक्षयाय । प्राचीं दिशं सम्मुखभानुबिम्बं प्रतिष्ठमानस्य नरस्य यस्य । शब्दं शृगाली पुरतः करोति बन्धं वधं वा प्रकरोति तस्य । प्राचीदिगीशाभिमुखस्य पुंसः प्रस्थानकामस्य शिवा सशब्दा । भिन्नेऽर्थनाशाय च दक्षिणा स्याद्वामा पुनर्वाञ्छितकार्यसिद्धौ । प्रत्यूर्कमाशां चलितस्य पूर्वां शिवा विरावं पुरुषस्य यस्य । करोति पृष्ठे प्रकरोति तस्य सर्वप्रकारामभिलाषसिद्धिम् । प्रस्थायिनो यस्य च दक्षिणाशां शिवा रतं सञ्जति दक्षिणेन । आदित्यदत्ता यदि नो तदानीं भुवं भवेत्तस्य महीपतित्वम् । वैवस्वताशाचलितस्य यस्य दिवाकरक्षिप्तति दक्षिणेन । शिवा च वामा कुरुते विरावं सम्पद्यते तस्य समस्तमिष्टम् । पुमान् यदा याम्यकुलप्रयाणे करोति शब्दं पुरतः शृगाली । आस्ते विवस्वानपि सम्मुखस्थे भवेत् तदानीमचिरेण मृत्युः । नरस्य याम्यां कक्षुभं प्रियासोः शृगालभाषी यदि पृष्ठभागे । फेत्कारमासञ्जति मानवस्य मृत्युस्तु पुत्रेण भवत्यवश्यम् । दिशं प्रतीचीं व्रजतः शृगाली नरस्य यस्याभिमुखी विरौति । शान्तास्थिता शान्तफलप्रदात्री दीप्तास्थिता दीप्तफलं तनोति । प्राचेतसीं सञ्जलितस्य काष्ठां शृगालिका जल्पति दक्षिणेन । यदा यदानीं सुखदुःखनाशं करोति चार्थानपि हन्ति पुंसः । दिशं प्रचेतःपरिपाल्यमानां नरस्य यस्य व्रजतः शृगाली वामा विरावं प्रकरोति शान्ता भवन्त्यभिप्रेतफलानि तस्य । यो वारुणीं याति दिशं मनुष्यः शृण्वन् शिवायारटितानि पृष्ठे । गतस्य तस्याशु कृताशभीतिरसंशयं स्यात् दुरितक्षयश्च । यक्षोत्तराशां चलितस्य पुंसः प्राच्यां शिवा सञ्जति फेत्कृतानि । भानुः प्रतीच्यां विहितस्थितिश्चेदपेक्षितं सिध्यति तत्क्षयेन । सञ्जल्पुदीचीं चलितस्य पृष्ठे शिवा विरावं पुरुषस्य यस्य । आस्ते च मध्ये नभसो विवस्वांस्तस्यार्थहानिर्मरणं प्रदिष्टम् । कुबेरकाष्ठां प्रति यः प्रयाति ज्वालासखी चाभिसखी विरौति । तस्याध्वगस्याभिमतार्थसिद्धिर्भवेच्च सम्यक् पुनरागमश्च । तिष्ठति तीव्रकरो दिशि यस्यां फेत् कुरुते यदि तत्र शृगाली । तद् व्रजतः पथिकस्य भवेतां निश्चयतो धनजीवितनाशौ । दक्षिणतः प्रथमं यदि पश्चात् वामगता पथिकस्य शृगाली । फेत् कुरुते कुरुते तदयश्च क्षेमधनाप्तिगृहागमनानि । अस्थास्य शान्तां ककुभं नरस्य वामा शृगाली यदि वा रटन्ती । तदार्थलाभं वितरत्यवश्यमर्थक्षयं दक्षिणतो रटन्ती । वामा प्रदीप्ते ककुभः प्रदेशेऽलाभं तथानर्थसुपादिशन्ति । शिवा रटन्ती पथि दक्षिणा तु क्षिपत्यनर्थानथसङ्कटेषु । शान्ते दिगन्ते यदि वा प्रदीप्ते पृष्ठे प्रयाणे प्रतिषेधयित्री । शब्दायमाना तु शिवा पुरस्तात् निम्नत्यायदुर्गाधसिद्धौ । वामेऽपसव्ये पुरतोऽथ पृष्ठे पुंसः शिवा जल्पति यत्र तत्र । आयान्ति चौराः प्रथमे विराबे द्वयोर्भवेत्तस्करदर्शनञ्च । रुपादरोऽर्थागमनं द्वतीये तृतीये क्षतिः पञ्चमकेऽर्थलाभः । यात्रिन्यसेवादिफलाय षष्ठे भीः सम्मने स्यादिफलोऽष्टमस्तु । हाहारवं सञ्जति हृष्टभावा हास्यं तु तस्यप्लवदाहरन्ति । क्षयेश्वरा वा पथि या प्रियासोः सा द्विप्रकारापि मनोरथाग्र्या । रुपस्य यात्रासमये पुरस्तात् प्रयाति चेद्वर्त्मनि वेदयन्ती । कार्यार्थिक्षया वैरिपराभवं तज्जयश्रियश्चाभिमतं विद्ध्यात् । कार्यान्तरेष्वप्युपगम्यमाना श्रेयःप्रदा शान्तदिशि प्रदिष्टा । शिवा प्रदीप्ते तु दिशि प्रदीप्ते समारटन्ती महते भयाय । भयोद्गमे दीप्तदिशि प्रदीप्तैर्दैन्यं हन्ति भयानि देवी । महान्ति सर्वाण्यपि, शान्तनादा शान्तस्थिता सर्वभयप्रदात्री । यदा च नक्तुत्तरगा नराणां शब्दं शृगाली कुरुते कदाचित् । तदद्वये तत्परिरक्षणीयं महद्भयं भावि खलेचरेभ्यः" । "स्थानस्थितानामपि योगभाजां नैमित्तिकानामुपदिश्यते तु । शिवाविरावैरशिवं शिवञ्च सुनिश्चितार्थं सुनिसञ्चतेन । करोति फे फे इति सर्वदिक्षु यदा तदा स्यादभिघातयुद्धे । शिवा विधत्ते क्षुधिता त्वसंख्यान् रौद्रान् खरान् सञ्जति चेदुपेक्षाम् । निरन्तरं रौति दिक्षु दिक्षु समन्दकाक्षण्यवराहरा चेत् । अपत्यमोक्षेण यदा शृगाली त्यक्तक्षुधा सा क्षयितेह तज्ज्ञैः । स्थित्वा प्रदीप्ते ककुभो विभागे ज्वालासखी फेत्कृतेऽतिरौद्रम् । ग्रामस्य तस्य प्रकरोति नाशं तस्याथ वा तिष्ठति यस्य मध्ये । ग्रामस्य मध्यं समवाप्य यस्य ज्वालासखी सञ्जति फेत्कृतानि । स शून्यतां गच्छति निश्चयेन लोकस्य वा स्यादसुखं प्रभूतम् । ग्रामान्तिके सप्तदिनानि यावत् महाभयोत्पादितफेत्कृतानि । विरौति चेत्तत् कुरुते शृगाली तद्ग्रामिलोकस्य भयं

भूतम्। मध्यंदिने यावद्दण्डानि पञ्च शिवा समीपे नगरस्य यस्य। विरौति घातं विदधाति तस्य भयञ्च वह्निप्रभवं प्रभूतम्। पञ्चार्द्धरात्राप्यधि कथञ्चिद्देषा क्रूरारवा व्याहरते भयानी। यस्यान्तिके तं बहवो हठेन घ्नन्ति चौरा जनसन्निवेशे। स्थानस्य तस्योपगता समीपं दिनानि पञ्चोच्चरति प्रमाते। स्वरेण रौद्रेण भृगालभार्य्या स्यात्तत्र हानिर्महती नराणाम्। सुरक्षितस्यापि मनुष्यलोकैर्यामस्य मीढ्वं हरणं विधत्ते। त्रयं दिनानां दिवसावसाने शिवा रटन्ती पदमध्वरेच्च। दिक्षारटन्ती सकलास्तु रौद्रं भवत्यधिष्ठा परितः पुरञ्च। भृगालभार्य्या खलु तद्ब्रवीति युद्धं महत्तत्र महाभिघातम्। ज्वालां विसृज्यत्यतिरौद्रनादा समाकुला धावति या वनान्तात्। कौमारकं या जनयत्यकस्मात् कुर्य्याच्छिवा सा युवराजपातम्। रोमोद्गमं या जनयत्यकस्मात् फेरुत्यतिक्रूररवा नराणाम्। मूत्रं पुरीषन्तु तरङ्गमाणां सा सर्वदा स्यादशिवा शिवेह। तरङ्गिणीरोधवि सौम्यरूपांस्त्रीन् पञ्च वा सप्त ति या निनादान्। शिवां शिवां तां व्रजतित्वदालीं वन्देत देवीमभिवन्दनीयाम्। श्मशानभूमौ दिनमध्यभागे मध्ये रजन्याः खण्डहप्रदेशे। या रौति तस्यै बलिमर्घ्यसुक्तं भक्त्या प्रदद्यात्तु यदि भद्रमिच्छेत्। सर्वेषु कार्येषु समुद्यतेषु बलिः शिवाया विनिवेदनीयः। यस्मिन् विषयेऽभ्युपैत्य देवी बलिं जल्पति तत्र सिद्धिम्" कथ्यते बलिविधानमिदानीं शाकुनागममतेन शिवायाः। दिव्यमन्त्रबलिबाधितदोषं साधिताखिलसमुद्यतकार्यम्। शून्यालयं दक्षपटं श्मशानं चतुष्पथं मातृगृहं जलान्तम्। वन्ध्यावनिस्तम्बरमेवभाद्या बलिप्रदानाय मताः प्रदेशाः। तेषाञ्च मध्यादुचितप्रदेशे विशोधितं मण्डलिकं विदध्यात्। पौराणिकश्लोकपरीक्षितव्याः संस्तु गोर्गोमयमन्त्रशोधात्। अत्यन्तशीर्णदेहाया वन्ध्यायाश्च विशेषतः। रोगार्त्तनष्टस्तनाया न गोर्गोमयमाहरेत्। तस्मिन् विचित्रं विततं विदध्यात् पिष्टाक्षतेनाष्टदलं सरोजम्। संपूजयेत् तत्र सुरादिपादीन् क्रमेण सर्वानपि लोकपालान्। मध्ये सुनैः पञ्चभिरभ्युपेता शिवाञ्चिता पिष्टमयी प्रसस्ता। पूजया शिवा लभ्यति भक्तियोगात् प्रभूतपुण्यात्तपूदीपैः। खाद्यगुडौदनमाषकुलत्थैर्वायसपूपलिकामिषमद्यैः। संपूजितस्त्वं नरायनपालं बलिप्रदा बलिकर्मणि काक्षां। प्राप्याष्टमीं वामचतुर्दशीं वा संमन्त्र्य मन्त्रेण च सप्तकृत्वः। बलिं शिवायां निशि निश्चयेन दद्यान्मनुष्यो यदि भद्रमिच्छेत्"।

शिवालय न० शिव आलीयतेऽत्र ली-अच्। १श्मशाने हारा०। हृत०। २रक्ततुलसां शब्दर०। ३महादेवगृहे च पु०।

शिवालु पु० शिवायालति अल-उनृ। १शृगाले राजनि०।

शिवास्मृति स्त्री शिवायाः स्मृतिर्यस्याः ५ब०। जयन्तीवृक्षे शब्दच० तस्यामोच्चारणे हि जयन्तीनामकदुर्गायाः स्मरणमिति तस्यास्तथात्वम्।

शिवाह्वाह पु० शिवमाह्वादयति आ+ह्लाद-णिच्-अण्। १वकवृक्षे राजनि०। हृत०। २तृणसन्तोषे च।

शिवाह्वा स्त्री शिवस्येवाह्वा यस्याः। रुद्रजटावृक्षे राजनि०। हृत०। २महादेवाह्वाने च।

शिवि पु०शि-वि नि० न गुणः। १क्षिप्तपर्णो लिङ्गा०। २भूजंबृक्षे ३उशीनरराजसुते नृपभेदे च मेदि०।

शिविका स्त्री शिवं करोति शिव+णिच्-ण्वुल् अत इत्त्वम्। यानभेदे (डुली) अमरः।

शिविर न० शो+किरच् वुक् च। कटके सैन्यनिवासस्थाने। शिविरलक्षणमुक्तं यथा

"शिविरं परिखायुक्तमुच्चैःप्राकारवेष्टितम्। युक्तद्वादशद्वारञ्च सिंहद्वारपुरस्कृतम्। युक्तं चित्रैर्विचित्रैश्च क्षत्रियैश्च सपाटकैः। निखिलैरुत्तरक्षितं प्रविष्टैश्च पुरस्कृतम्। सुवर्णं चन्द्रवेधं प्राङ्मुखञ्च तथैव च"। तस्य विहितनिखिलत्वादि यथा "आश्रमे नारिकेलस्य कर्त्तव्यात्र धनप्रदः। शिविरस्य यदीशाने पूर्वे पुत्रप्रदस्तरुः। सर्वत्र मङ्गलार्थञ्च तरुराजो मनोहरः। रसालवृक्षः पूर्वस्मिन्नृणां सम्पत्प्रदस्तथा। शुभप्रदश्च सर्वत्र सुरकारो विशामय। बिल्वश्च धनसर्वत्र जम्बीरो बदरी तथा। प्रजाप्रदश्च पूर्वस्मिन् दक्षिणे धनकृत्तथा। सम्पत्प्रदश्च सर्वत्र यतो हि वर्त्तते सदा। जम्बुवृक्षश्च दाक्षिण्यः कदल्याम्रातकस्तथा। वन्यप्रदश्च पूर्वस्मिन् दक्षिणे मित्रदस्तथा। सर्वत्र शुभदश्चैव धनपुत्रशुभप्रदः। हर्षप्रदो शुवाकश्च दक्षिणे पश्चिमे तथा। ईशाने वृक्षदश्चैव सर्वत्रैव विशामय। सर्वत्र चम्पकः शुद्धो भुवि भद्रप्रदस्तथा। अलाबुवृक्षोऽपि कृष्णाख्यः मायाम्बुश सुकासकः। खर्जूरी कर्कटी चापि शिविरे भद्रवप्रदा। वाल्लूकः कारवेल्लश्च वार्ताकुश्च शुभप्रदाः॥ फलाफलञ्च शुभदं सर्वं सर्वत्र निश्चि-

तम्। प्रशस्तं कथितं कारो! निशिद्वञ्च निशामय। वन्यवृक्षो निशिद्वश्च शिविरे नगरेऽपि च। वटो निशिद्वः शिविरे नित्यं चौरभयं ततः। नगरेषु प्रसिद्धश्च दर्शनात् पुण्यदस्तथा। हे कारो! तिन्तिड़ीवृक्षो यत्नात्तं परिवर्जय। शरेण धनहानिः स्यात्. प्रजाहानिर्भवेत् ध्रुवम्। शिविरेऽतितिन्तिड़ीवृक्षश्च नगरे किञ्चिदेव च। न निशिद्धः प्रसिद्धश्च ग्रामेषु नगरेषु च। वृक्षश्च चणकादीनां धान्यञ्च मङ्गलप्रदम्। ग्रामेषु नगरे चापि शिविरे च तथैव। इक्षुवृक्षश्च शुभदः सन्ततं शुभदस्तथा। अशोकश्च शिरीषश्च कदम्बश्च शुभप्रदाः॥ कक्षी हरिद्रा शुभदा शुभदश्चार्द्रकस्तथा। हरीतकी च शुभदा ग्रामेषु नगरेषु च। न वाट्यां भद्रदा नित्यं तथा चामलकी ध्रुवम्। गजानामस्थि शुभदमश्वानाञ्च तथैव च। कल्याणस्त्रैः अवश्यं वास्तौ स्थापनकारिणाम्। न शुभप्रदमन्येषामुच्छ्रयकारणं परम्। वानराणां नराणाञ्च गर्दभानां गवामपि। कुक्कुराणां शृगालानां मार्ज्जाराणामभद्रकम्। भेटकानां सूकराणां सर्वेषाञ्चाशुभप्रदम्। ईशाने चापि पूर्वस्मिन् पश्चिमे च तथोत्तरे। शिविरस्य जलं भद्रमन्यत्राशुभमेव च। दीर्घं प्रस्थे समानञ्च न कुर्यान्मन्दिरं बुधः। चतुरस्रे गृहे कारो! गृहिणां धननाशनम्। दीर्घप्रस्थः परिमितो नेत्राङ्गैरपि संहृतः। शून्येन रहितं भद्रं शून्यं शून्यप्रदं नृणाम्। प्रस्थे हस्तद्वयात् पूर्वं दीर्घं हस्तत्रयं तथा। गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च। न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिके शुभम्। चतुरस्रं चन्द्रकेर्धं शिविरं मङ्गलप्रदम्। अभद्रं सूर्य्यवेधञ्च प्राङ्मुखञ्च तथैव च। शिविराभ्यन्तरे भद्रा स्थापिता तुलसी नृणाम्। धनपुत्रप्रदात्री च पुण्यदा हरिभक्तिदा। प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत्। मालती यूथिका कुन्दोमाधवी केतकी तथा। नागेश्वरं मल्लिका च काञ्चनं वञ्जुलं शुभम्। अपराजिता च शुभदा तेषामुद्यानमीप्सितम्। पूर्वे च दक्षिणे चैव शुभदं नात्र संशयः। अर्द्धं षोड़शहस्तेभ्यो नैवं कुर्याद्गृहं गृही। अर्द्धं विंशतिहस्तेभ्यः प्राकारं न शुभप्रदम्। क्षतधारं तैलकारं स्वर्णकारञ्च क्षौरकम्। वाटीमूले ग्राममध्ये न कुर्यात् स्थायिनं बुधः। ब्राह्मणं क्षत्रियं वैश्यं सच्छूद्रं गणकं शुभम्। भद्रं वैद्यं पुण्यकारं स्थापयेत् शिविरालिके! प्रस्थे च परिखाभानं शतहस्तं प्रशस्तकम्। परितः शिविराणाञ्च गभीरं दशहस्तकम्। सङ्केतपूर्वकञ्चैव परिखाद्वारभीप्सितम्। अघोरगस्य मित्रस्य गस्यनेव सुखेन च। शालमलीनां तिन्तिड़ीनां छिन्नानानां तथैव च। निम्बानां सिन्धुवाराणां उड़म्बराणामभद्रकम्। धुस्तूराणां वटानाञ्चाश्वत्थैरण्डानामवाञ्छितम्। एतेषामतिरिक्तानां शिविरे काष्ठमीप्सितम्। वृक्षञ्च वज्रवृक्षं दूरतो वर्जयेद् बुधः। पुत्रदारधनं हन्यादित्याह कमलोद्भवः" ब्रह्मवै० ख० १०२ अ०।

शिवेष्ट पु० इत०। १वकवृक्षे २टूबांयां स्त्री राजनि०। ३मरुदेवभिदे त्रि०। [याश्रयाने हारा०।

शिवीरथ शिवेर्भुजैर्वृक्षश्च इव शोभा यत्र ताद्शो रथः।

शिशिर न० शश-किरच् नि०। १हिमे माघफाल्गुनसम्भवात्मके २ऋतुभेदे अमरः। तत्र वहतो वर्णादिवर्णनं "करीषः धूमः कुन्दः पद्मदाहः शिशिरोत्कर्षः" कविक०ल० ३शीतले स्पर्शे च न० ३तद्वति त्रि० अमरः। [च।

शिशु पु० शो-कु सन्वद्भावः द्वित्वम्। १बालके अमरः २स्वल्पे

शिशुक पुंस्त्री०शिशुरिव इवार्थे कन्। १जलजन्तुभेदे (सुसुक) राजनि०स्त्रियां ङीष्। २बालके मेदि०। ३वृक्षभेदे हेमच० "जातमात्रः शिशुस्तावत् यावद्दन्तो समा वयः। स हि गर्भसमोज्ञेयो व्यक्तिमात्रप्रदर्शकः। भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथाऽनृते। तस्मिन् काले न दोषः स्यात् स यावन्नोपनीयते" मनुः। [शब्दमा०।

शिशुगन्धा स्त्री शिशुः स्वल्पो गन्धो यस्याः। मल्लिकाभेदे

शिशुचान्द्रायण न० "चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः। चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम्" मनूक्ते व्रते। [ताड्यत्व स्त्री।

शिशुत्व न० इत०। शिशोर्भावः त्व। बाल्ये तल्। शिशु-

शिशुपाल पु० चेदिदेशीयराजभेदे दमघोषात्मजे त्रिका०।

शिशुपालहन् पु० शिशुपालं हतवान् हन्-भूते क्विप्। श्रीकृष्णे हेमच०।

शिशुमार पुंस्त्री०शिशुं मारयति मृ-णिच्। १जलजन्तुभेदे अमरः स्त्रियां ङीष्। गगनस्थे २तारावक्रभेदे च "शिशुमारस्तु यः प्रोक्तः स ध्रुवो यत्र तिष्ठति। सन्निवेशश्च तस्यापि शृणुष्व मुनिसत्तम!। यदङ्गे कुरुते यादृष्टा तद्भिन्नि सुच्यते। तावत्यस्यैव ताराख्याः शिशुमारा-श्रिता दिवि। तावत्येव तु वर्षाणि जीवन्त्यधिकानि च। उत्तानपादस्तस्याश्च विज्ञेयोऽथ्रुवो हृदुः। ध्रुवो

ऽक्षरस्य विन्देयो धर्मो मूर्द्धानमाश्रितः । हृदि नारायणस्याक्ते अश्विनौ पूर्वपादयोः । वरुणस्यार्यमा चैव पश्चिमे तस्य मक्षिणी । शिश्नं संवत्सरस्यस्य मित्रोऽपानं समाश्रितः । पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोऽथ ततो ध्रुवः । तारकाः शिशुमारस्य नाम्नेति चतुष्टयम्" विष्णुपु० २अं १२अ० । भाग० २स्क० अन्यथोक्तं यथा "केचिदेतत् ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योनधारणायामनुवर्णयन्ति । यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति । पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः यस्य दक्षिणावर्त्तकुण्डलीभूतशरीरस्य बाह्यभ्रमणानि दक्षिणपार्श्वे नक्षत्राणि उपकल्पय[illegible] । दक्षिणानि तु सर्व्वे यथा शिशुमारस्य कुण्डलाभोगपक्षिवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति । पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः । पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषा च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामपार्श्वबिम्बे युञ्जीत । तथैव मृगशीर्षोत्तरे भ्रमणानि दक्षिणपार्श्वे प्रातिलोम्येन प्रतियुञ्जीत । यतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् । उत्तराफल्गुनावस्य अधराहनौ यमः मुखे चाङ्गारकः मनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणे मनसि चन्द्रोनाभ्यामश्विनावस्य बुधः प्राणापानयो राहुर्गले केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः । एतद्वै भगवतो विष्णोः सर्वदेवतामयं रूपम् अहरहः सन्ध्यायां प्रयतो वाग्यतोनिरीक्षमाण उपतिष्ठेत" ।

शिशुवाह पुंस्त्री०शिशुं वहति वह-ण्वुल् । वनच्छागे हेमच० स्त्रियां ङीप् । शिशुवाह्यो तत्रार्थे त्रिका०

शिश्न पु० शप-नक् नि० । मेढ्रे पुंचिह्नभेदे अमरः ।

शिश्निदान त्रि० शिश्न-कानच् दित्वम् । पायकारके अमरः

शिष बधे भ्वा० पर० सक० सेट् । शेषति अशेषीत् ।

शिष परिशेषीकरणे वा चु० उभ० पक्षे भ्वा० पर०सक०सेट् । शेषयति ते शेषति अशिशेषत् त अशेषीत् । शेष्टा ।

शिष विशेषे रुधा०पर०सक०अनिट् । शिनष्टि क्षुदित्यशिषत् शिष्ट

शिष्ट त्रि०शास-क्त शिष-क्त वा । १शान्ते २वेदवाक्ये विश्वासयुते ३क्षमे ४धीरे च "न पाणिपादचपलो न नेत्रचपलो मुनिः । न च वाग्भूचपल इति शिष्टस्य लक्षणम्" भा०आश्व० "धर्मो नातिगतोयैस्तु वेदः स परिकीर्त्तितः । ते शिष्टा ब्रह्मणा प्रोक्ता नित्यमात्मगुणान्विताः" कूर्म० उप० २४अ० । "विशेषगद्धनिष्ठस्तु शेषः शिष्टः प्रकीर्त्यते । मन्वन्तरेषु ये शिष्टाः इह तिष्ठन्ति धार्मिकाः । मनुः सप्तर्षयश्चैव लोकसन्तानकारणात् । तिष्ठन्तीह च धर्मार्थं तान् शिष्टान् परिचक्षते । तैः शिष्टैः स्थापितो धर्मः स्थाप्यते वै युगे युगे" मत्स्यपु० १२० अ० । प्रकृतशासने ह्यवशिष्टे च ।

शिष्टाचार पु० शिष्टानामाचारः । सच्चरित्रे "ततः स्मार्त्तः स्मृतो धर्मो वर्णाश्रमविभागशः । एवं वै विविधो धर्मः शिष्टाचारः स उच्यते । त्रयी वार्त्ता दण्डनीतिः प्रजा वर्णाश्रमेज्यया । शिष्टैराचर्य्यते यस्मात् शिष्टाचारः स शाश्वतः । दानं सत्यं तपोऽलोभो विद्येज्या पूजनं दमः । अष्टौ तानि चरित्राणि शिष्टाचारस्य लक्षणम् । शिष्टमस्माच्चरन्त्येनं मनुः सप्तर्षयश्च ये । मन्वन्तरेषु सर्वेषु शिष्टाचारस्ततः स्मृतः । श्रुतिस्मृतिभ्यां विहितो धर्म्मो वर्णाश्रमात्मकः । शिष्टाचारविहस्तु धर्मः स साधुसम्मतः" मत्स्यपु० १२५अ० । "आचारश्चैव साधूनामिति" मनुना तस्य धर्मे प्रामाण्यमुक्तं स च वेदाविरुद्ध एव प्रमाणम् श्रुतिस्मृत्योर्भिन्नविषयत्वे सदाचारेण तत्र धर्मनिर्णयः । श्रुतिविरोधे स्मृतेरप्रामाण्यवत् स्मृतिविरोधे सदाचारस्य न धर्मनिर्णायकत्वम् । तेन दाक्षिणात्यानां मातुलकन्याविवाहस्य शिष्टैराचर्य्यमाणत्वेऽपि न प्रमाणता । तदेतत् "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानं जैमि० सूत्रेण निर्णीतम् । वशिष्ठेनापि "तद्भावे शिष्टाचारः प्रमाणम्" इत्युक्तम् । ततश्च शिष्टाचारेण मूलस्मृतिरनुमीयते यथा श्लोकाद्याचारात् । ततः कृत्वा मूलस्मृतिरनुयातव्येति अधिकरणमाला । अतएव अविगीताशिष्टाचारपरम्पराप्राप्तं कन्याहो मङ्गलाचरणं मङ्गलवादादौ व्यवस्थापितम् ।

शिष्टि स्त्री शास-क्तिन् । १आज्ञायां २शासने अमरः । ३ताडने च "शिष्टिशिष्टिरुभेन" श्रुतिः ।

शिष्य त्रि० शास-क्यप् । १शिक्षणीये २छात्रे अमरः ३उपदेश्ये च । शिष्यलक्षणादि तन्त्रया० उक्तं यथा

"शान्तो विनीतः शुद्धात्मा श्रद्धावान् धारणक्षमः । समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो धनी । एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा । गुरुता शिष्यता वापि तयोर्वृत्तैरवाप्यते" तथा चोक्तं सारसंग्रहे "सद्गु-

गुरुः स्वाश्रितं शिष्यं वर्षमात्रं प्रतीक्षयेत् । वर्षैकेन भवेद्योग्यो विप्रोगुणसमन्वितः । वर्षद्वयेन राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः । चतुर्भिर्वत्सरैः शूद्रः कथिता शिष्ययोग्यता" तत्रैव "रात्रि चामात्यजो दोषः पत्नी पापं स्वभर्त्तरि । तथा शिष्यार्जितं पापं गुरुः प्राप्नोति निश्चितम्" देव्यागमे शिववाक्यं "गुरुशय्यासनं यानं पादुकोपानहं पीठम् । स्नानोदकं तथा छायां चक्षुर्येन्न कदाचन । गुरोरग्रे पृथक् पूजामौद्धत्यञ्च विवर्जयेत् । दीक्षां व्याख्यां प्रभुत्वञ्च गुरोरग्रे परित्यजेत्" ।

अथ निषिद्धशिष्याः अगस्त्यसंहितायामुक्ता यथा

"अलसा मलिनाः क्लिन्नाः दाम्भिकाः कृपणास्तथा । दरिद्रा रोगिणो रुग्णा रागिणो भोगलालसाः । अक्षयामतृसरयस्तास्तथा परुषवादिनः । अन्यायोपार्जितधनाः परदाररताश्च ये । अदृढव्रताश्च ये कष्टदृष्टयः पिशुनाः खलाः । वक्रांगिनः क्रूरचेष्टा दुरात्मानश्च निन्दिताः । इत्येवमादयोऽन्ये पापिष्ठाः पुरुषाधमाः । एवंभूताः परित्यज्या शिष्यत्वेनोपकल्पिताः । पापिने क्रूरचेष्टाय कृपणाय तथैव च । दीनायाचारशून्याय मन्त्रद्वेषकराय च । निन्दकाय च मूर्खाय तीर्थद्वेषकराय च । भक्तिहीनाय देवेशि ! न देया मलिनस्य च" "आचारे शासयेद्यस्तु स आचार्य्य उदाहृतः । य आचार्य्यपराधीनस्तदाख्यं धार्य्यते हृदि । शासने स्थिरदृष्टिश्च शिष्यः सङ्क्षिप्तदाहृतः । एवं लक्षणसंयुक्तं शिष्यं सद्गुणान्वितम् । अध्यापयेद्विधानेन मन्त्ररत्नमनुत्तमम्" पद्मपु० उ० २५ अ० ।

शि(सि)ङ्ग पु० सिंह-अक् नि० सस्य शो वा । (शिलारस) गन्धद्रव्यभेदे शब्दच० । स्वार्थे क । तत्रैव अमरः ।

शी शयने अदा०आत्म०अक० सेट् । शेते शेरते अशयिष्ट । औत् वर्त्तमाने क्त शयितः । शयित्वा ।

शी स्त्री शी-भावे क्विप् । १शयने २शान्तौ च शब्दर० ।

शीक सेके सर्पणे च भ्वा०आत्म० सक० सेट् । शीकते अशीकिष्ट । ऋदित् चङि न हृस्वः ।

शीक आमर्षे सेके च वा चु०उभ०पक्षे भ्वा०पर०सक० सेट् । शीकयति ते शीकति अशीशिकत्-त अशीकीत् ।

शीकर न० शीक-अरन् । १सरलवृक्षे २कायौ पु० मेदि० । ३जलकणे अमरः ।

शीघ्र न० शिचि-रक् पृषो० । १विलम्बाभावे २त्वरिते च अव्ययति त्रि० अमरः । ३दन्तीवृक्षे स्त्री राजनि० ।

शीघ्रचेतन पुंस्त्री० शीघ्रा चेतना यस्य । १कुक्कुरे शब्दमा० स्त्रियां ङीष् । २द्रुतचेतनायुते त्रि० ५ब० । ३अर्कवृक्षे पु० । ४अतिबलायां स्त्री राजनि० । [शब्दच० ।

शीघ्रजन्मन् पु०शीघ्रं जन्म यस्य । करञ्जभेदे (काँटाकरमचा)

शीघ्रपुष्प पु० शीघ्रं पुष्पं यस्य । वकवृक्षे राजनि० ।

शीघ्रवेधिन् पु० शीघ्रं विध्यति विध-णिनि । शीघ्रलक्ष्यवेधनकर्त्तरि हेमच० ।

शीत न०यौ-क्त स्वर्गे सस्य० । १शीतले स्वर्गे २जले शब्दमा० ३स्त्रिमे च अमरः ४त्रिके राजनि० ५वङ्गदारवृक्षे ६वेतसवृक्षे च पु० अमरः । ७व्यसनपर्य्यां शब्दर० । टप्पर्यटे ८निम्बे १०कर्पूरे राजनि० । ११स्त्रिमर्त्तरि च पु० १२शीतस्पर्शयुते त्रि० अमरः । १३अलसे त्रि० मेदि० । १४कथिते शब्दच० ।

शीतक पु०शीतमिव करोति क-क । १दीर्घशूकशिम्बिक्षारस्वहेतुना कार्य्याकरणाय शीतबाधामभिनीय २सञ्चिते मेदि० । शीत+स्वार्थे क । ३शीतपदार्थे ४शीतकाले मेदि० ५वृक्षिके शब्दमा० ६व्यसनपर्य्यां शब्दर० ।

शीतकर पु० शीतः शीतलः करो यस्य । १चन्द्रे २कर्पूरे च शीतकिरणादयोऽप्यत्र त्रि० । शीतं करोति कृ-अच् । ३शीतकारके ।

शीतकाल पु०ष० त० । हिमर्त्तौ मार्गशीर्षमासद्वयात्मके काले

शीतकुम्भ पु० शीतं स्कुम्भाति स्कुभ-अच् नि० । १करवीरे रत्नमा० । २जलजवृक्षभेदे स्त्री राजनि० गौरा० ङीष् ।

शीतक्षुद् पु० "यत्रहं शीतं पिबेत् तोयं तत्रहं शीतं पयः पिबेत् । यत्रहं शीतं हतं शीतं वायुभक्षपरस्यहम्" यमोक्ते व्रते ।

शीतक्षार न० कर्म० । श्वेतटङ्कणे राजनि० ।

शीतगन्ध न०शीतः शीतलः गन्धो यस्य । श्वेतचन्दने राजनि० ।

शीतगु पु० शीता गावः किरणाः यस्य । १चन्द्रे २कर्पूरे च

शीतचम्पक पु०शीतश्चम्पक इव । १दर्पणे २प्रदीपे च मेदि०

शीतपर्णी स्त्री शीतं पर्णं यस्याः ङीष् । अर्कपर्णिकायां रत्नमा० ।

शीतपल्लवा स्त्री शीतः पल्लवो यस्याः । भूम्यामलक्यां रत्नमा०

शीतपाकिनी स्त्री शीते पाकोऽस्त्यस्याः इनि ङीष् । कोल्यां शब्दच० ।

शीतपाकी स्त्री शीतेन पाको यस्याः ङीष् । १वाटयामलके शब्दच० । २काकोल्यां राजनि० ।

शीतपुष्प पु० शीतं शीतवीर्य्यकरं पुष्पं यस्याः । १गिरीषवृक्षे

राजनि०। २अतिवलायां स्त्री टाप्। शैलेये न० अर्क-वृक्षे पु० राजनि०।

शीतप्रभ पु० शीतस्य हिमस्येव प्रभा यस्य। कर्पूरे राजनि०

शीतप्रिय पु० ६त०। पर्पटे राजनि०। [च राजनि०।

शीतफल पु०शीतं शीतवीर्यकरं फलमस्य। १चटुत्वरे २श्वेतौ

शीतबला स्त्री शीतं बलं वीर्यं यस्याः ५ब०। महाबला-क्षायां राजनि०। [च शब्दर०।

शीतभानु पु० शीताः शीतलाभानवोऽस्य। १चन्द्रे २कर्पूरे

शीतभीरु स्त्री ५त०। १मल्लिकायाम् अमरः। २शीतभीते त्रि०

शीतमञ्जरी स्त्री शीतकाले मञ्जरी यस्याः न कप्। शेफा-लिकायां राजनि०।

शीतमयूख पु० शीता मयूखा यस्य। १चन्द्रे २कर्पूरे च मेदि०। शीतमरीच्यादयोऽप्यत्र शब्दर०।

शीतमूलक न० शीतं शीतवीर्यकरं मूलमस्य कप्। १श्वेत-मूलके (वेणारमूल) राजनि०। २शीतलमूलयुते त्रि०।

शीतरश्मि पु०शीतारश्मयोऽस्य। १चन्द्रे २कर्पूरे च ज्यो०त

शीतल पु० शीतं लाति ला-क शीतमस्त्यस्य लच् वा। १शी-तस्पर्शे २तद्वति त्रि०। ३मलयोद्भवे चन्दने न० ४शैलेये-५पुष्पकासीसे च मेदि०। ६पद्मके ७मौक्तिके राजनि०। ८वीरणमूले न० शब्दच०। ९व्यसनपर्ण्यां अमरः। १०व-ङवारवृक्षे ११चम्पके १२राले १३चन्द्रे १४कर्पूरे पु० राजनि०। [पु० राजनि०।

शीतलक न० शीतलमिव इवार्थे कन्। १श्वेतोत्पले २मरुवके

शीतलच्छद पु० शीतलः शीतलस्पर्शवान् छदोऽस्य। १चम्पके-राजनि०। कर्म०। २शीतले पत्रे पु०।

शीतलजल न० शीतलं जलं यस्मात् ५ब०। १उत्पले राजनि०। कर्म०। २शीतले वारिणि न०।

शीतलवातक पु० शीतलोवातो धातुभेदो यस्मात् कप्। अस्यपर्य्यो शब्दच०। तत्सेवने हि वायोः शीतलता।

शीतला स्त्री १देवीभेदे "नमामि शीतलां देवीं रासभस्थां दिगम्बरीम्। मार्जनीकलशोपेतां सूर्पालङ्कृतमस्तकाम्" स्कन्दपु०। सा च विस्फोटकभेदनाशिनी। २जलजवृक्ष-भेदे रत्नमा० तत्र ङीप्। ३कुटुम्बिनीवृक्षे ४आरा-मशीतलायां ५बालुकायां स्त्री राजनि० टाप्।

शीतवल्क पु०शीतः शीतकरः वल्कोऽस्य। वटवृक्षे राजनि०

शीतवीर्य्यक पु० शीतं शीतलकरं वीर्यं यस्मात् ५ब०। कप्। १उत्पले राजनि०। २शीतलवीर्य्यकरे त्रि०।

शीतशिव न०शीतं शीतलमपि शिवम्। १वैक्रान्तलवणे २शैले-यनामगन्धद्रव्ये अमरः। ३भिक्षेशायां ४शमीवृक्षे च स्त्री राजनि० ५सक्षुफलवृक्षे मेदि० ६मधुरिकायां पु०अमरः।

शीतसह पु० शीतं सहते सह-अच। १पीलुवृक्षे शब्दच०। २नीलसिन्धुवारे ३वासन्त्यां स्त्री राजनि० टाप्।

शीता स्त्री शी-क्त सम्प्र०। १लाङ्गलपद्धतौ भरतः २राम-पत्न्यां शब्दच० ३अतिवलायां ४कुटुम्बिन्यां ५दूर्वायां ६शिल्पिकावृक्षे राजनि०।

शीतांशु पु०शीताः अंशवो यस्य। १चन्द्रे २कर्पूरे च राजनि०

शीताङ्गी स्त्री शीतमङ्गमस्याः ङीष्। १हंसपदीवृक्षे रा-जनि० २शीतलदेहयुते त्रि० स्त्रियां ङीष्।

शीताद पु० शीतमादत्ते आ+दा-क। दन्तमूलगते रोगभेदे दन्तरोगशब्दे ३४६६ पृ० दृश्यम्।

शीतार्त्त त्रि० शीतेन ऋतः। शीतालौ जटा०।

शीतालु त्रि०शीत+अस्त्यर्थे आलुच्। शीतबाधायुक्ते जटा०।

शीतावला स्त्री शीतमावलयति आ+वल-णिच्-अच्। महाबलवृक्षायां राजनि०।

शीताश्मन् पु० कर्म०। चन्द्रकान्तमणौ राजनि०।

शीतीभाव पु० शीत+अभूततद्भावे चि-भू-भावे घञ्। मोक्षे त्रिका०। तत्र तापत्रयशून्यत्वात्तथात्वम्।

शीतोत्तम न० शीतमुत्तमं यत्र। जले शब्दच०।

शीत्कार पु० शीदित्यस्य कारः शीत्+क-घञ्। स्त्रीणां रति-काले अव्यक्ते ध्वनिभेदे जटा०। [अमरः।

शी(सी)त्य त्रि०शी(सी)तामर्हति यत्। हलक्षये क्षेत्रादौ

शीधु पु०न०। शी-धुंक्। इक्षुरसजाते मद्यभेदे अमरः।

शीधुगन्ध पु० शीधोरिव गन्धोऽस्य। बकुलवृक्षे त्रिका०।

शीन त्रि० श्यै-क्त सम्प्र० तस्य नः। १घनीभूते घनादौ २मूर्खे ३अजगरे च पु० मेदि०। [शीयते अशीभिष्ट।

शीभ कत्थने श्वा० आत्म०सक० सेट् कदित् चङि न ह्रस्वः।

शीर पुंस्त्री० शी-रक्। अजगरवर्षे शब्दच० स्त्रियां ङीष्।

शीरिन् पु० शीरसदाकारोऽस्त्यस्य। हरिद्रभे राजनि०।

शीर्ण त्रि० शॄ-क्त। १जीर्णे २शुष्कतामाप्ते च मेदि०। ३स्थौ शैथिल्ये भावप्र०।

शीर्णपत्र पु० शीर्णं पत्रमस्य। १कर्णिकारवृक्षे शब्दच०। २निम्बे ३पट्टिकालोध्रे च राजनि० ४विशीर्णपत्रयुक्ते त्रि०। कर्म०। ५विशीर्णे पर्णे न०।

शीर्णपर्ण पु० शीर्णं पर्णमस्य। १निम्बे राजनि० २विशी-र्णपत्रयुक्ते त्रि० कर्म०। ३विशीर्णे पत्रे न०।

शीर्णपाद पु० शीर्णः पादोऽस्य भावप्रधानात्। शनैश्चरे

टिका० तत्कथा छायाशब्दे २६८६ पृ० दृश्या । शीर्णः-ङ्गि पक्षतयोऽप्यत्र ।

शीर्णपुष्पी स्त्री शीर्णं पुष्पमस्याः ङीष् । अवाक्पुष्प्यां शब्दच० वा कप् । शीर्णपुष्पिका तत्रैव ।

शीर्णमाला स्त्री शीर्णानां माला यत्र । १पुष्पपर्ण्यां शब्दच० । कर्म० । २विशीर्णे माल्ये ।

शीर्णवृन्त न०शीर्णं वृन्तमस्य । (तरबुज) फलवृक्षे शब्दच० ।

शीर्वि त्रि० शृ-क्तिन् न वलोपः । १अपकारके २हिंसके च मि०कौ० ।

शीर्ष न० शिरस्+पृषो० शीर्षादेशः शृ-क सुक्च वा । १मस्तके अमरः । २क्षणागुरुणि राजनि० । यसादौ शीर्ष्णः शीर्ष्णा इत्यादि ।

शीर्षक न० शीर्ष कायति कै-क । १शिरस्त्राणे (टोपर) २शिरोऽस्थि राजनि० । ३जयपराजयपत्रज्ञाप्यदण्डभेदे "शीर्षकस्थेऽभियोक्तारं" याज्ञ० स्मृतिः । स्वार्थे क । ४मस्तके न० । तेन कायति कै-क । ५राङ्गण्हे शब्दर० ।

शीर्षच्छेद्य(दिक) त्रि० शीर्षच्छेदमर्हति यत् ठञ् वा । वध्ये "शीर्षच्छेद्यमतोऽहं त्वाम्" भट्टिः ।

शीर्षण्य पु० शीर्षे भवः शीर्ष+यत् शीर्षन्नादेशः । १शिरस्त्राणे अमरः । शीर्षे भवः यत् । २विषदंशे पु०अमरः ३विषदंशयुते त्रि० ।

शीर्षरक्ष न० शीर्षं रक्षति रक्ष-अण् । शिरस्त्राणे ह्वारा० ।

शील समाधौ भ्वा० पर०सक० सेट् । शीलति अशीलीत् । "सरसीः परिशीलितुं मया" नैषधम् । समाधिरत्र सेवा तत्र सक० प्रवृत्तिभेदो वा तत्र अक० जीव वर्त्तमाने च । [शीलयति ते अभिशीलत् त ।

शील अभ्यासे अतिशायने च चुरा० उभ० सक० सेट् ।

शील न० शील-अच् । १स्वभावे २सद्वृत्ते भेदि० ३चरित्रभेदे ४अजगरसर्पे पुंस्त्री०शब्दर० स्त्रियां ङीष् । सद्वृत्तशीलस्त्रियादशविधं हारीतोक्तं यथा "अक्लान्यता१ दैवपितृ-भक्तता२ क्षौम्यता३ अपरोपतापिता४ अनसूयता५ कृतज्ञता६ अप्रमत्तता७ मैत्रताट प्रियवादिता९ कृतज्ञता१० शरणता११ कारुण्यता१२ शान्तिश्चेति १२शीलम् । ४रागद्वेषपरित्यागे मनुटी० गोविन्दराजः । ५कौशिक-स्त्रसंज्ञिपत्न्यां स्त्री ।

शीलन न० शी-ल्युट् । १अभ्यासे २अतिशायने ३प्रवर्त्तने च

शीलित त्रि० शील-क्त । १अभ्यस्ते २चीर्णे च त्रिका० ।

शीलिन् पु० शी-क्विनि । अजगरसर्पे त्रि०को० ।

शुक गतौ भ्वा० पर० सक० सेट् । शोकति अशोकीत् ।

शुक न० शुक-क । १ग्रन्थिपर्णे अमरः । २वस्त्रे ३वस्त्राञ्चले ४शिरस्त्राणे हेमच० । ५व्यासपुत्रे "पराशरकुलोत्पन्नः शुकोनाम महायशाः । व्यासादरण्यां संभूतो विष्णोरंशोऽग्निरिव ज्वलन्" वह्निपु० । (शुवा) इति ख्याते द्विजगभेदे पु० स्त्री स्त्रियां ङीष् । शुकदर्शनशुभादिकं वसन्तराजशाकुने उक्तं यथा "वामं पठन् राजशुकः प्रयाणे शुभं श्रवेद् दक्षिणतः प्रवेशे । वनेचराः काष्ठशुकाः प्रयातः सुसिद्धिदाः संमुखमापतन्तः" । ७रावणमन्त्रभेदे दक्षिणदृष्टे (शेयालकाँटा) दृष्टे रत्नमा० १०कश्यपस्य ताम्रायाः कन्याभेदे स्त्री ङीष् । "काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम् । ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुताः" भा०आ० ६६अ० ।

शुकच्छद न०शुकस्य छदइव छदो दलमस्य । अन्थिपर्णे जटा० ।

शुकजिह्वा स्त्री शुकस्य जिह्वेव पर्णमस्याः । (शुयाठाँटी) [द्वयोऽप्यत्र । दृष्टे रत्नमा० ।

शुकतरु पु० शुकप्रियस्तरुः । शिरीषवृक्षे रत्नमा० । शुकद्रुमा-

शुकदेव पु० व्यासपुत्रे मुनिभेदे । [शुकजिह्वावृक्षे रत्नमा० ।

शुकनामन् पु० शुकः शुकजिह्वा नामास्य मध्यपदलोपः ।

शुकनाशन पु० शुकं नाशयति नश-णिच्-ल्यु । दृष्टघ्ने दृष्टे राजनि० ।

शुकनास पु० शुकस्य नासेव पत्रमस्याः । शत्रोणाकवृक्षे अमरः । २शुकतुल्यनासायुक्ते त्रि० । ३काष्ठस्वरीयमन्त्रिणि तारापीड़स्य मन्त्रिभेदे पु० । [शब्दच० ।

शुकपिण्डी पु० शुकानां प्रिया पिण्डीव । शुकप्रियायां

शुकपुच्छ पु० शुकस्य पुच्छइव । १गन्धके हेमच० । ६त० । [राजनि० ।

२शुकस्य पुच्छे पु० ।

शुकपुष्प पु० शुकइव हरित् पुष्पमस्य । १शिरीषवृक्षे

शुकप्रिय पु० ६त० । १शिरीषवृक्षे भावप्र० । २जम्बां स्त्री राजनि० ।

शुकफल पु०शुकइव फलमस्य । अर्कवृक्षे राजनि० [शब्दच०

शुकबर्हे न० शुकस्येव बर्होऽस्य । गन्धद्रव्यभेदे (गाँटियाला)

शुकवल्लभ पु० ६त० । १दाड़िमवृक्षे राजनि० ६त० । तस्य [शब्दर० ।

२प्रिये त्रि० ।

शुकशि(सि)खी स्त्री शुकइव शि(सि)खी । कपिकच्छ्वां

शुकादन पु० शुकैरद्यते अद-ल्युट् । दाड़िमे शब्दच० ।

शुकानना स्त्री शुकस्याननमिव पत्रमस्याः । (शुयाठाँटी) दृष्टे रत्नमा० ।

शुक्रोदर न० शुक्रस्योदरमिव । १तालीशपत्रे राजनि० । ६त० । २शुक्रस्योदरे च ।

शुक्ल न० शुच–क्त । १मांसे शब्दच० । २काञ्जिके हारा० । ३व्यभिचारिद्रव्यद्रव्यभेदे "कन्दमूलफलादीनि सर्व्वेक्षुलवणानि च । यद्द्रव्ये व्यभिचरन्ति तच्छुक्तमभिधीयते" "शुक्तं तीक्ष्णोष्णलवणं पित्तकृत् कटुकं लघु । रूक्षं क्षयुदरानाहशोथार्शोविषकृच्छ्रनुत्" राजनि० "शुक्तं यन्मधुरं कालवशादम्लत्वमागतम्" इत्युक्ते ४पदार्थे च ।

शुक्तभक्षणनिषेधो यथा "अपूपाश्च करम्भाश्च शाकावटकसक्तवः । शाकं मांसमपूपं च सूपं क्षीरमेव च । यवागूः पायसश्चैव यच्चान्यत् स्नेहसम्भवम् । सर्व्वं पर्युषितं भक्ष्यं शुक्तञ्च परिवर्जयेत्" यमः । तत्प्रतिषेधो यथा "दधि शुक्तेषु भोक्तव्यं सर्व्वञ्च दधिसम्भवम्" मनुः । ६निष्ठुरे त्रि०मेदि० ७पूते ८अम्ले त्रि०विश्वः । ९क्लिष्टे १०निर्जने शब्दच० ११चुक्रिकायां स्त्री शब्दर० ।

शुक्ति स्त्री शुच–क्तिन् । १जलजन्तुभेदे (झिनुक) राजनि० २कपालखण्डे ३शङ्खे ४शङ्खनखे ५नख्याम् ६अर्शोरोगे ७अश्वावर्त्तके मेदि० । ८नेत्ररोगभेदे हेमच० । चक्षूरोगशब्दे २८४४ पृ० द्रव्यम् । ९कर्षद्वयपरिमाणे शब्दमा० १०चतुष्कर्षमाने वैद्यकम् । [२चुक्रियायाञ्च शब्दर० ।

शुक्तिका स्त्री शुक्तिरेव कन् । (झिनुक) १क्षुद्रास्फोटे जटा०

शुक्तिज न० शुक्तौ जायते जन–ड । शुक्तायां हेमच० ।

शुक्तिमत् पु० शुक्तिरस्यास्ति मतुप् । १कुशाचलपर्व्वतभेदे २नदीभेदे स्त्री ङीप् ।

शुक्र न० शुच–रक् नि० कुत्वम् । १मज्जाते २चरमधातौ अमरः । ३नेत्ररोगभेदे २८४४ पृ० द्रव्यम् । ५दैत्यगुरौ ६तद्भेदे अमरः । ७अग्नौ ८चित्रनक्षत्रे ९ज्येष्ठमासे अमरः विष्कम्भादिषु योगेषु मध्ये ६चतुर्विंशे योगे च पु०ज्यो०त० । धातुभेदशुक्रोत्पत्तिकारणस्वरूपादिकं भावप्र० उक्तं यथा "रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते । मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रस्य सम्भवः" ।

"ततः स्थूलो भागो रसो मांसेन तुल्यं शुक्रं स्त्रीणामार्त्तवं शुक्रञ्च भवति । उक्तञ्च सुश्रुते "एवं मांसेन रसः शुक्रो भवति" "स्त्रीणामृतौ" । चकारात् स्त्रीणामपि शुक्रं भवति । अतएवोक्तं सुश्रुते "यामितोऽपि खलु वै शुक्रं पुंसः समागमे । तत्र गर्भस्य किञ्चित्तु करोतीति न चिन्त्यते" । गर्भस्य शुक्रस्य विकृतस्य तु गर्भस्य कारणं तदपि भवति । यत उक्तम् "यदा नार्य्युपेयातां हृष्टमन्यौ कथञ्चन । सृजन्त्यौ शुक्रमन्योन्यमनस्थि तत्र जायते" इति । एतेन स्त्रीणां रजसो धातुरार्त्तवं शुक्रमस्थ इति बोधितम् आयुर्वेदाधिकृतवत् । "स्त्रीणां गर्भोपयोगि स्यादार्त्तवं सर्व्वसम्मतम् । तासामपि बलं वर्णं शुक्रं पुष्टिं करोति हि" । एवं रस एव क्षेदारकुल्यान्यायेन सर्व्वान् धातून् पूरयन् मासेन नवदशोत्तरेण शुक्रमार्त्तवं च भवतीति सिद्धान्तः । एवं सति रसाद्रक्तमिति सङ्गतमेव । ततो मांसन्ततो रक्तोत्पत्तेरनन्तरं मांसं जायते रसादेवेत्यर्थः । मांसान्मेदः प्रजायत इति । मांसादनन्तरं मेदः प्रजायते रसादेवेत्यर्थः । मेदसोऽस्थि जायते रसादेवेत्यर्थः । एवं ततो मज्जा सर्व्वे शुक्रं शुक्रं सम्भवतीत्यर्थः । रसः शरीरे त्रिधा सञ्चरति । तथा चोक्तम् "रसः शरीरे शब्दार्चिर्जलसन्तानवत् त्रिधा । सञ्चरत्यनुरूपोऽयं नित्यमेव हि देहिनाम्" । अस्यायमभिप्रायः । पुरुषाग्नीक्ष्णाग्नयो मध्यमाग्नयो मन्दाग्नयश्च भवन्ति । तत्र तीक्ष्णाग्नीनां रसः शब्दसन्तानवत् शीघ्रं सञ्चरति । मध्यमाग्नीनामर्चिःसन्तानवन्मध्यवेगेन चरति मन्दाग्नीनां जलसन्ताभवन्मन्दं चरति । तेन मासेन रसः शुक्रं भवतीति यदुक्तम् तन्मध्यवेगेन चरति । मन्दाग्नीनां जलसन्तानवन्मन्दं चरति । तेन मासेन रसः शुक्रं भवतीति यदुक्तं तन्मध्यमाग्नीनधिकृत्योक्तम् । दीप्ताग्नीनान्तु रसः किञ्चिन्न्यूनेन मासेन शुक्रं भवति । मन्दाग्नेः किञ्चिदधिकेन मासेनेति सिद्धान्तः । तर्हि वाजीकरणानामोषधीनां किं प्रयोजनमित्याह "वाजीकरणय ओषध्यः स्वप्रभावगुणोच्चयात् । विरेचयन्ति ताः शुक्रं विरेकित्वबृंहणात्" । वाजीकरणयः याभिः ओषधीभिः पुरुषः शुक्राधिक्यात् स्त्रीषु वाजिवत् सामर्थ्यं प्राप्नोति ताः वाजीकरणयः स्वप्रभावगुणोच्चयात् । तत्र काश्चिदोषध्यः स्वप्रभावाधिक्यात्, काश्चित् स्वगुणाधिक्यात्, काश्चित् स्वप्रभावगुणाधिक्यात् । तत्र बङ्गल्यपाढलेपविशिष्टकान्तालशुण्डयः स्वप्रभावाधिक्यात् शुक्रं विरेचयन्ति । क्षतशीरादयः स्वगुणाधिक्यात् । स्निग्धत्वाधिक्यात् माषादयः स्वप्रभावस्निग्धत्वादिगुणाधिक्यात् । वाजीकरणय इति बहुवचनमाद्यापेक्षया तृतीयत्वम् । बल्यं हृद्यं जीवनीयगणादयः तद्बृंहणाद्व्याः । विरेचयन्ति स्वप्रभावगुणाधिक्यात् शीघ्रमेव रसादुत्पादनपूर्व्वकं शुक्रं जनयित्वा प्रवर्त्तयन्ति । यत आह "दुग्धं

आधाय भक्षणात्फलमज्जामलानि च । जनकानि निगद्यन्ते रेचनानि च रेतसः' । ननु बालानां कथं शुक्रं न दृश्यते इत्यत आह "बालानां शुक्रमस्थ्येव किन्तु सौक्ष्म्यान्न दृश्यते । पुंसां सकले गन्धो यथा सर्पपि नाश्यते । तेषां तदेव तारुण्ये पुष्टत्वाद्व्यक्तिमेति हि । कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा । रोमराज्यादयः पुंसां नारीणामपि यौवने । जायतेऽत्र च यो भेदो ज्ञेयो व्याख्यानतः स च" । व्याख्यानं यथा पुंसां रोमोराजीश्मश्रुप्रभृतयः नारीणान्तु रोमराजीस्तनकन्यार्त्तवप्रभृतयः । ननु, अक्षरसा दृढस्य धातुदृष्टिं कथं न करोतीत्याह "बाह्वके वर्द्धमानेन वायुना रसशोषणात् । न तथा धातुदृष्टिः स्यात्तस्मात्तानिलं जयेत्" । अथ शुक्रस्य स्वरूपमाह "शुक्रं सौम्यं सितं स्निग्धं बलपुष्टिकरं ऋतम् । गर्भबीजं वपुःसारो जीवस्याश्रय उत्तमः" । जीवस्याश्रय उत्तम इत्याह "जीवो वसति सर्वस्मिन् देहे तत्र विशेषतः । वीर्य्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणात्" । अथ गर्भसञ्जननशुक्रस्य लक्षणमाह "स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च । शुक्रमिच्छन्ति केचित्तु तैलक्षीरनिभञ्च तत्" । अथ शुक्रस्य स्थानमाह "यथा पयसि सर्पिस्तु गूढश्चेष्टौ रसो यथा । एवं हि सकले काये शुक्रं तिष्ठति देहिनाम्" । अत्र सर्पिर्दृष्टान्तो बहुशुक्रेऽल्पमथनेन सर्पिःशुक्रयोर्लाभात् । इक्षुरसदृष्टान्तस्तु स्वल्पशुक्रे पुंसि अतिपीडनेनेक्षुरसशुक्रयोर्लाभात् । अथ शुक्रस्य चरणमार्गमाह "द्वाङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाधधः । मूलस्रोतपदे शुक्रं पुरुषस्य प्रवर्त्तते" । वङ्गवासभटोऽप्याह "सप्तमी शुक्रधरा द्वाङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाधधोमूत्रमार्गमाश्रिता सकलशरीरव्यापिनी शुक्रं प्रवर्त्तयतीति । सप्तमी कला । अथ शुक्रचरणकारणमाह "कृतघ्नेऽस्मिन् शुक्रं प्रसज्जनमस्तथा । स्त्रीषु व्यायच्छतस्यापि कृपात्तत् सम्प्रवर्त्तते" । स्त्रीषु रतरूपं व्यायामं कुर्वतः । अन्यच्च "शुक्रं कामेन कामिन्या दर्शनात् स्पर्शनादपि । अङ्गसंस्रवणात् ध्यानात् संयोगाच्च प्रवर्त्तते" ।

दैत्यगुरोः शुक्रनामकारणं काशीख० १७अ०उक्तं यथा "नन्दिनाऽपहृते शुक्रे गिलिते च विषादिना" इत्युपक्रमे "तेन शब्देन महता शुक्रः शम्भूदरे स्थितः । छिद्रान्वेषी भ्रमन् सोऽथ विनिर्गतो यथानियम् । सप्त लोकान् सपातालान् ब्रह्मेन्द्रे त्रिलोकयन् । ब्रह्मनारायणेन्द्राणां सादित्याप्सरसां तथा । भुवनानि विचित्राणि युद्धञ्च प्रमथासुरम् । वर्षाणां शतं कृत्वो भस्मप्रेरितो भ्रमन् । ततः स दृष्टवे रन्ध्रं शुचेरन्ध्रं खला यथा । योगेनाथ योगेन शुक्ररूपेण भार्गवः । चक्रन्द च ननामापि ततो देवेन भाषितः । जठराद्विर्गते शुक्रे देवोऽपि सुखदेतराम् । भूयः श्रेयो भवेदुयस्मान्न स्थितो जठरे द्विजः । शुक्रवन्निःसृतो यस्मात्तस्मात्त्वं भृगुवन्दन । कर्मणानेन शुक्रोऽपि मम पुत्रोऽसि गम्यताम्" ।

शुक्रपक्षस्रुवादि दृहच्छातके यज्ञयोन्यध्याये उक्तं द्रव्यम् । तत्कात्यादिमानं खगोलशब्दे २४२९पृ०दृश्यम् ।

शुक्रकर पु०शुक्रं वीर्यं करोति क-अच् । मज्जधातौ हेमच० अशुक्रकरशब्दे ५५८पृ० दृश्यम् । वीर्यकारके त्रि० ।

शुक्रभुज् स्त्री शुक्रं भुङ्क्ते भुज-क्विप् । मयूरजातिस्त्रियां शब्दच० । [अशुक्रकरशब्दे तद्वेक्षता दृश्या ।

शुक्रभू पु०भवत्यस्मात् भू-अपादाने क्विप् । मज्जधातौ शब्दच०

शुक्रला स्त्री शुक्रं लाति ला-क । अश्वटादृक्षे भरतः ।

शुक्रशिष्य पु० हृत० । दैत्ये असुरे अमरः ।

शुक्रिय त्रि० शुक्रोऽधिदेवताऽस्य तस्येदम् या घ । १शुक्रसम्बन्धिनि २तद्दैवते यजुर्वेदीये "अग्नेर्वाचमित्यादिके यजुर्वेदीये शान्त्यध्याये न० ।

शुक्ल न० शुच-लक् कुत्वम् । १रजते मेदि० । २नवनीते शब्दच० । ३अक्षिरोगभेदे चक्षुरोगशब्दे २८४४पृ०दृश्यम् । ४श्वेतवर्णे ५श्वेतवर्णयुते त्रि० अमरः । ६शुद्धे च त्रि० ७विष्कम्भादिषु योगभेदे भेदि० । ८श्वेतैरण्डे राजनि० १०शुक्लपक्षे ज्यो०त० । "तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि । चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः" । षट्त्रिंशन्मतम् । शुक्लवर्णपदार्थास्तु कविकल्पलतायां कतिचित् उक्ता यथा "सुधांशुचैःश्रवाः शम्भुः कीर्त्तिर्जोत्स्नावृक्षा शरद्घनाः । प्रासादसौधतगरमन्दारदुग्धिमादयः । सूर्येन्दुकान्तिकर्पूरकरम्भा रजतं फली । निर्मोकमभ्रहिमडीरचन्दनं करका हिमम् । हारोर्णनाभस्नन्यस्थि स्वर्गङ्गेभरदाश्वकम् । श्वेताहिः शर्करा दुग्धं दधि गङ्गा सुधा जलम् । कृष्णालभिक्षतारूंसवकवैरवचामरम् । रत्नागर्भं पुण्डरीकं केतकीशङ्खनिर्झराः । लोध्रंहिङ्गु ध्वजच्छत्रं चूर्णशुक्तिकपर्दकाः । शुक्लं कुसुमनक्षत्रं दन्तपुण्योषनोगुणाः । कैलासकासकर्पासहंसबलाबला-

केञ्जराः। नारदः पारदः कुन्दस्फटिकास्फटिकादयः"।

शुक्लकण्ठ पुंस्त्री० शुक्लः कण्ठो यस्य। दात्यूहखगे शब्दमाला। स्त्रियां ङीष्।

शुक्लकन्द पु० शुक्लः कन्दो यस्य। १महिषकन्दे २अतिविषायां स्त्री राजनि०। कर्म०। ३श्वेते कन्दे।

शुक्लक्षीरा स्त्री शुक्लं क्षीरं निर्यासो यस्याः। काकोल्यां राजनि०। [जटा०।

शुक्लकर्मन् त्रि० शुक्लं शुद्धं कर्म यस्य। पवित्रे शुभचरित्रे

शुक्लकुष्ठ न० कर्म०। श्वेतकुष्ठे (धवल)। [नियासयुते त्रि०।

शुक्लदुग्ध पु० शुक्लं दुग्धमस्य। १शङ्खाटके शब्दच० २श्वेत-

शुक्लधातु पु० कर्म०। कठिल्यां (खड़ि) हेमच० २श्वेतधातौ च

शुक्लपक्ष पु० कर्म०। १दर्शानुगुणचन्द्रकलाक्रियापञ्चदशकात्मके चान्द्रमासार्द्धे शुक्लेतरपक्षे २वर्णे पुंस्त्री०। स्त्रियां ङीष्।

शुक्लपुष्प पु० शुक्लं पुष्पमस्य। १अगस्त्यवृक्षे २कुन्दवृक्षे ३मरुवके च रत्नमा०। ४श्वेतपुष्पयुते त्रि०। ५नागदन्त्यां ६धौतकुम्भ्यां स्त्री रत्नमा० ङीष्। कर्म०। ७शुभ्रे पुष्पे न०।

शुक्लपृष्ठक पु० शुक्लं पृष्ठमस्य कप्। सिन्धुवृक्षे शब्दच०।

शुक्लयजुस् न० कर्म०। ऊषेत्यादि चत्वारिंशदध्यायात्मके यजुर्वेदभेदे। [२तद्वति त्रि०। ३तथाभूतवृक्षे पु०राजनि०।

शुक्लरोहित पु० वर्णोवर्णेनेति कर्म०। १श्वेतरक्ते वर्णे

शुक्लला स्त्री शुक्लं लाति ला-क। उच्चटायां रत्नमा०।

शुक्लवायस पुंस्त्री० कर्म०। १बके त्रिका० २श्वेतकाके च। स्त्रियां ङीष्।

शुक्लशाल पु० कर्म०। १गिरिनिम्बे राजनि० २श्वेतवर्णवृक्षे च

शुक्ला स्त्री शुक्ल+अर्श आद्यच् टाप्। १सरस्वत्यां त्रिका०। २शर्करायां शब्दच०। ३काकोल्यां ४विदार्य्यां ५क्षुद्रायां राजनि०। ६श्वेतवर्णयुक्तायां स्त्रियाञ्च।

शुक्लाङ्गी स्त्री शुक्लमङ्गमस्याः ङीष्। १श्वेतकण्टिकायां राजनि०। २श्वेताङ्गयुक्ते त्रि०। [स्त्रियां ङीष्।

शुक्लापाङ्ग पुंस्त्री० शुक्लः अपाङ्गो यस्य। मयूरे हेमच०।

शुक्लाम्ल न० कर्म०। अम्लवर्गके राजनि०।

शुक्लार्म्मन् न० नेत्ररोगभेदे भावप्र० ४४२पृ० दृश्यम्।

शुक्लिमन् पु० शुक्लस्य भावः इमनिच्। श्वेतवर्णे।

शुक्लोपला स्त्री कर्म० स अस्त्यस्याः अच्। शर्करायां रत्नमा०

शुङ्ग पु० शम-ग तस्य नेत्वं नि० अत उत्वञ्च। १वटवृक्षे २आम्रातके ३शूके च मेदि०। ४पर्पटीवृक्षे ५धान्यादिशूके च स्त्री राजनि०।

शुङ्गाकर्म्मन् न० शुङ्गैः वटपल्लवैः व्या सम्यक् कर्म० यत्र। गर्भमात्रसंस्कारभेदे "पुंसवने चन्द्रनामा शुङ्गाकर्मणि शोभनः" ति०त०। [३शुङ्गवति त्रि०।

शुङ्गिन् पु० शुङ्गोऽस्त्यस्य इनि। १वटवृक्षे २प्लक्षवृक्षे जटा०

शुच शोके क्लेदे च दिवा० उभ० अक० सेट्। शुच्यति ते इदित् अशुचत्-अशोचीत् अशोचिष्ट इदित् शुक्तः। अनु+किञ्चिदूनेऽर्थे पश्चात्तापे सक०। अनुशोचति।

शुच शोके भ्वा० पर० सक० सेट्। शोचति अशोचीत्।

शुच् स्त्री शुच-क्विप्। शोके अमरः। वा टाप्। तत्रैव।

शुचि पु० शुच-कि। १वह्नौ २चित्रकवृक्षे ३आषाढ़मासे ४शृङ्गारे रसे अमरः। ५ज्यैष्ठमासे मेदि० ६शुद्धाचारयुक्ते ७शुद्धे ८दग्धे तन्त्रोक्ते शुद्धमन्त्रादिके मेदि०। १०अग्निभेदे "पावकः पवमानश्च शुचिरग्निश्च ते त्रयः। निर्मथ्यः पवमानः स्यात् वैद्युतः पावकः स्मृतः। यस्याग्नौ तपते सूर्यः शुचिरग्निस्त्वसौ स्मृतः" कूर्मपु० १२अ०। ११श्वेतवर्णे १२तद्वति त्रि० अमरः। शुचित्वञ्च शौचं शुद्धता वैदिककर्मार्हत्वप्रयोजकः संस्कारविशेषः। "शुचिस्तत्कालजीवी कर्म कुर्य्यात्" स्मृतौ शौचस्य कर्माङ्गत्वं, स च स्नानादिजन्यः पुण्यभेदो वा। १३सूर्य्ये च "तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः" सूर्यशब्दः। १४अर्कवृक्षे १५काश्यपत्यास्तामायाः कन्याभेदे स्त्री "षट्सुताश्च महासत्त्वास्तामायाः परिकीर्त्तिताः। शुकी श्येनी च भासी च सुग्रीवी शुचिरप्रिके" गरुड़पु० ६अ०। १६शुद्धे १७चतुष्पदे त्रि० मेदि०।

शुचिद्रुम पु० कर्म०। अश्वत्थवृक्षे राजनि०।

शुचिमल्लिका स्त्री कर्म०। नवमल्लिकायां राजनि०।

शुच क्षाने अक०अभिषवे मन्थने पीड़ने सन्धाने च सक०भ्वा० पर० सेट् इदित् निष्ठा अशिट्। शुच्यति अशुचीत्।

शुटीर पु० शौटीर+पृषो०। वीरे त्रिका०।

शुठ गतिविघाते भ्वा०पर०सक० सेट्। शोठति अशोठीत्।

शुठ आलस्ये चु०उभ०सक०सेट्। शोठयति ते अशूशुठत् त।

शुठ शोधने वा चु० उभ० पक्षे भ्वा०पर० सक० सेट् इदित्। शुशुठयति ते शुशुठति अशुशुठत् त अशुशुठीत्।

शुण्ठि(ण्ठी) स्त्री शुठि-इन् वा ङीष्। (शुट) शुण्ठ्यादौ "शुण्ठी रुक्षोष्णवातघ्नी पाचनी कटुका लघुः। श्लेष्मोष्णा मधुरा पाके कफवातविबन्धनुत्। हृद्या स्वर्या च निश्वासशूलकासहृदामयान्। हन्ति स्रोपद्रवोषार्शः कोष्ठाङ्गं परिशोधयेत्" भावप्र०।

शुण्ठ न० शठि-बाहु०। शुण्ठ्यादौ शब्दच०।

शुण्ड पु० शुन-ड तस्य नेत्वम् । १मदनिर्झरे हेमच० । २गजहस्ते पुंस्त्री० स्त्रीत्वे टाप् । ३मद्यपानगृहे ४वेशद्वारायां ५छदायां ६जलहस्तिन्यान्तु स्त्री मेदि० । ७नद्यन्तर्गतायां विश्वः । ८कुट्टिन्यान्तु स्त्री शब्दमा० ।

शुण्डापान न० शुण्डा सुरा पीयतेऽत्र पा-आधारे ल्युट् । १मद्यपानगृहे अमरः । ह्रस्वः । २मद्यपाने च ।

शुण्डार पु० शुण्डा अस्त्यर्थे र । १शौण्डिके शब्दच० २हस्तिनि च । अपकर्षे र । ३अपकृष्टशुण्डायाम् स्त्री । ङीष् । शुण्डाल इत्यपि तन्नामयः । [शब्दच० ।

शुण्डिक पु० शुण्डाऽस्त्यस्य इनि । १हस्तिनि २शौण्डिके

शुण्डिमूषिका स्त्री शुण्डिनी मूषिकेव । छुछुन्दर्य्यां (छुँछ) राजनि० । [(छाति शुँड़ा) इत्ते राजनि० ।

शुण्डी स्त्री शुण्डाकारोऽस्त्यस्याः अच् गौरा० ङीष् ।

शुद्ध न० शुध-क्त । १सैन्धवलवणे २मरिचे च राजनि० । ३केवले ४निर्दोषे ५पवित्रे मेदि० । ६शुभ्रे च त्रि० ।

शुद्धशुद्धी शास्त्रान्तरे संस्काररूपे यथोक्ते "शुद्धशुद्धयोः संस्काररूपत्वेन एकपुरुषस्यैकदोभयस्थिति घटते । शुद्धेर्भावरूपत्वे अशुद्धेश्चाभावरूपत्वे नैतत् विरोधात् । अतएव शङ्खः "ततः आद्यमशुद्धौ तु कुर्य्यादेकादशे तथा । कर्तुश्चात्मार्थिकी शुद्धिरशुद्धः पुनरेव सः" अशुद्धौ चतुर्थाहादौ । कथमशुद्धौ आद्यं ? कालाशौचयोरधिकारिविशेषणत्वादत्र आद्य कर्तुश्चात्मार्थिकी शुद्धिरिति । आद्यविधानाच्चेषात् तन्मात्रनिष्ठा शुद्धिः कल्प्यते "स पुनरशुद्धः कर्मान्तरे" आ०वि० शुद्धितत्त्वे च "एवं शुद्धेर्भावरूपत्वे अशौचस्य तदभावरूपत्वे विरोधः तथात्वे अशौचशब्दोऽपि न स्यात् । एकस्मिन् शुद्धभावरूपे अशौचे सत्यपरस्य तद्रूपस्य तदानीं तत्पुरुषीयशुद्धिरूपप्रतियोग्यनुत्पत्तेः । तस्मात् शुद्धशुद्ध्योर्भावरूपत्वम् ।

ब्रह्मपु० उत्त०ख० १६अ० कतिचिदशुद्धा उक्ताः । तच्चिह्नञ्चैव शुद्धता यथा

"जातके मृतकेऽज्ञाते जलौकोभिः क्षते तथा । अपवित्रो द्विजातीनां देहः सन्ध्यादिकर्मसु । अपूततत्त्वकुत्सर्गे नरो मूत्रपुरीषयोः । अस्थ्यभ्यञ्जने चैव ब्रह्मयज्ञजपादिषु । रक्तपाते मद्यघृष्टक्षुरदन्तखड्गादिभिः क्षते । विप्रादेरशुचिः कायः शस्त्रास्त्रैः कण्टकादिभिः । भुक्ता क्षुत्तानलोच्छिष्टेऽपवित्रः क्षतमैथुने । शयने ब्राह्मणादीनां शरीरे क्षुरकर्मणि । क्षुरादिभिश्चतुःसप्तरोगैर्युक्त द्विजन्मनाम् । वसुरप्रयतं पूजादानहोमजपादिषु । धूमोद्गारे वमौ आद्यपतितान्नादिभोजनैः । तथा च रेतःस्खलने मर्त्यदेहाऽपवित्रता । अपवित्रं द्विजातीनां वपुः स्याद्राहुदर्शने । गर्हितदानग्रहणे पतिते पातकादिभिः । अशौचान्तेन शुद्धिः स्यात् जातके मृतकेऽपि च । सर्ववर्णाश्रमाणां तनोः सन्ध्यादिकर्मसु" । मृतकादिभिश्चे स्नानापनेयतेति । अशौचशब्दे द्रव्यशुद्धिशब्दे च दृश्यम् । [ङीष् ।

शुद्धजङ्घ पुंस्त्री शुद्धा जङ्घा यस्य । मर्दभे त्रिका० स्त्रियां

शुद्धमांस न०२१८३पृ० लताशब्ददर्शिते पक्वमांसभेदे [शब्दच० ।

शुद्धवल्ली स्त्री कर्म० । १गुडूच्यां शब्दच० २पवित्रायां लतायाञ्च

शुद्धान्त पु० शुद्धः निर्दोषः अन्तः पर्य्यन्तो यस्य । १स्त्रीणां अन्तःपुरे उपचारात् तत्र स्थितायां २राजयोषिति पुंस्त्री० "शुद्धान्तसञ्चारनिवारणार्थं" इति नैषधम् । शुद्धं शुद्धिं इतः । ३अशौचान्ते ।

शुद्धापह्नुति स्त्री कर्म० । "शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः" चन्द्रालोकोक्ते अर्थालङ्कारभेदे ।

शुद्धि स्त्री शुध-क्तिन् । १मार्जने जटा० २नैर्मल्यसम्पादके ३वैदिककर्मयोग्यतासम्पादकसंस्कारभेदे च । ४दुर्गायां "अरण्यान्निर्गतायापि शोध्यते येन पातकात् । तेन शुद्धि समाख्याता देवी रुद्रतनौ स्थिता" देवीपु०तन्नामनिरुक्तिः

शुद्धोदनसुत पु० बोधभेदे हेमच० ।

शुध शौचे शोधने सक० निःशेषभवने अक० च दि० परस्म० अनिट् । शुध्यति अशुधत् अशुधीत् । "भक्तोदरः शुध्यति षड्गुणः स्यादिति" लोला० ।

शुन गतौ तु० पर० सक० सेट् । शुनति अशोनीत् ।

शुन पु० शुन-क । कुक्कुरे । कि । तत्रैव वाचस्पतिः ।

शुनःशेफ पु० शुनइव शेफोऽस्य बहुव्री० । विश्वामित्रपित्रे मुनिभेदे । [राजनि० ।

शुनक पु० शुनइव कन् । १मुनिभेदे स्वार्थे क । २कुक्कुरे

शुनकचक्षुका स्त्री शुनकस्येव चक्षुः पत्रे यस्याः कप् । क्षुद्रचक्षुःक्षुपभेदे राजनि० ।

शुनकचिल्ली स्त्री शुनकप्रिया चिल्ली । शाकभेदे राजनि० ।

शुनासीर पु० सुष्ठु नासीरं यस्य वृषो० । १इन्द्रे २मेघके च

वृषो० तस्य रूपत्वमस्य द्विरूपकोषे उक्तं यथा

"शुनासीरो हितालभ्यः शुनासीरो दिवस्पतिः । तालव्यादिर्दन्त्यनभ्यः शुनासीरस्य दृश्यते" ।

शुनी स्त्री श्वन्+स्त्रियां ङीष् । १कुक्कुर्यां योषिति अमरः ।

२कन्यायाञ्च लतायां राजनिघण्टुकोषः ।

शुलोर पु० शुलो+संबार्थे र । क्षुद्रकुरीसमूहे त्रिका० ।

शुल्भ शुल्भौ अक० शोधने सक०चु० उभ० सेट् । शुल्भयति ते अशुशुल्भत् त ।

शुल्ब शुल्बौ अक० शुल्बीकरणे सक० भ्वा० उभ० सेट । शुल्बति ते अशुल्बीत् अशुल्बिष्ट । "आपः शुल्बन्तु मैनसः" इति सन्ध्यामन्त्रः ।

शुल्ब्य पु० शुल्ब-युच तस्य न अनादेशः । वायौ उणा० ।

शुल्भ दीप्तौ अक० हिंसने सक० तु० पर० सेट् । शुल्भति अशुल्भीत् "प्र.गप्राग्निशुल्भागाम्बधनुरिति षी०च० ।

शुल्य न०शुलीनां समूहः यत् । १क्षुद्रकुरीसंघे त्रिका० २रिक्ते अटा० । [अशीभीत् ।

शुभ दीप्तौ अक० हिंसने सक० तु० सुचा० पर० सेट् । शुम्भति

शुभ दीप्तौ भ्वा० आ० अक० सेट् । शोभते स्तौदित् अशुभत् शुशुभे

शुभ न०शुभ-क । १मङ्गले २शुभयुक्ते त्रि० अमरः । २पद्मकाष्ठे राजनि० ४विष्कम्भादिषु मध्ये त्रयोविंशयोगे पु० ५खेचरपुरभेदे न० मेदि० । [शुभंयुः" इति भट्टिः ।

शुभंयु त्रि०शुभम्+अस्त्यर्थे युस् । शुभान्विते अमरः "क्षितिपः

शुभगन्धक न०शुभोगन्धोऽस्य कप् । १घोषे राजनि० २शुभगन्धयुते त्रि० । [ग्रहाधिकचन्द्रे पापग्रहयुक्ते बुधे च ।

शुभग्रह पु०शुभः शुभदायकः ग्रहः । १सौम्यग्रहे २गुरौ शुक्रे

शुभङ्कर त्रि०शुभं करोति क-खच् मुम् च । २मङ्गलकारके २दुर्गायां स्त्री शब्दमा० ङीप् । [३मङ्गलदातरि त्रि० ।

शुभद पु० शुभं ददाति दा-क । १अश्वत्थवृक्षे राजनि० ।

शुभदन्ती स्त्री शुभा दन्ता यस्याः ङीष् । १सुदन्तायां स्त्रियां २पुष्पदन्तादिगजयोषिति च मेदि० ।

शुभपत्री स्त्री० शुभानि पक्षाण्यस्याः ङीष् । (शालपान) वृक्षे वा कप् । शुभपत्रिका तत्रार्थे राजनि० ।

शुभम् अव्य० शुभ-कमु । मङ्गले "शुभंयुः" ।

शुभवासन पु० शुभं वासयति सुखम् वासि-ल्यु । सुखवासने द्रव्ये शब्दच० ।

शुभसूचनी स्त्री देवीभेदे (सुवचनी) "रक्ता पद्मचतुर्मुखी त्रिनयना चामीकराभद्युता पीनोत्तुङ्गकुचा दुकूलवसना हंसाधिरूढा परा । ब्रह्मानन्दमयी कमण्डलुकराच्चाभीतिहस्ता शिवा ध्येया सा शुभसूचनी त्रिजगतामन्वाधदुद्वारिणी" । सा च स्त्रीभिः पूज्या ।

शुभा स्त्री शुभ-क । १शोभायां २कान्तौ ३इच्छायां मेदि० । ४रोचनायां ५गोरोचनायां ६यस्यां ७प्रियङ्गौ रक्तेतरदूर्वायां राजनि० । ८देवसभायां शब्दच० १०उमासखीभेदे शब्दच० । [सखीभेदे स्त्री शब्दमा० ।

शुभाचार त्रि०शुभ आचारोऽस्य । १शोभनाचारयुते २उत्तमाचारे च ।

शुभाञ्जन पु० शुभ-क शुभम् अञ्जनं यस्मात् ५ब० । शोभाञ्जनवृक्षे शब्दर० ।

शुभ्र न०शुभ-रक् । १अभ्रके मेदि० २रौप्ये ३कासीसे ४शुभ्रवर्णे राजनि० । ५चन्दने शब्दच० । ६श्वेतवर्णे पु० ७तद्वति त्रि० अमरः ।

शुभ्रकर पु० शुभ्रः करोऽस्य । १चन्द्रे २कर्पूरे च । शुभ्रकिरणशुभ्रांशुप्रभृतयोऽत्र । [जयोषिति अमरः

शुभ्रदन्ती स्त्री शुभ्रो दन्तो यस्याः ङीप् । पुष्पदन्तादिगज-

शुभ्रालु पु० कर्म० । १मूर्च्छपकन्दे राजनि० । २श्वेतालौ च ।

शुभ्रि पु० शुभ-क्रि । चतुर्मुखे ब्रह्मणि त्रि०कौ० ।

शुम्भ पु० शुन्भ-अच् । दानवभेदे । शुम्भस्य प्रह्लादपुत्रविरोचनात्मजगवेष्ठिनः पुत्रः एकः "विरोचनस्य प्रा-

ह्लादिः पञ्च तस्यानुजाः स्मृताः । गवेष्ठी कालनेमिश्च अन्यो वाष्कल एव च । शुम्भश्चैव निशुम्भश्च त्रिशिरश्च सेनो महौजसः । गवेष्ठिनः सुता ह्येते" वह्निपु० । अपरञ्च "कश्यपस्य दनुर्नाम भार्य्यासीत् द्विजसत्तम ! । तस्यास्तु द्वौ सुतावास्तां सङ्घ्लाह्लादबलान्वितौ । ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः" वामनपु० । देवीमाह्मा० अपरोऽपि दैत्यो निहतः । तदन्योऽपि तत्रैव १२अ० "शुम्भो निशुम्भश्चैवान्यावुत्पन्नौ तेऽसुरौ । ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी" इत्युक्तः ।

शुम्भमर्दिनी स्त्री शुम्भं भृशं हन्ति मृद-णिनि । दुर्गायां हेमच० । हन-णिनि । शुम्भघातिनी शब्दच० ।

शुम्भपुरी स्त्री हृत० । (शम्भलपुर) एतच्चक्राख्ये पुरे त्रिका० ।

शुर जारणे शब्दाने च दि०आ०एक०सेट् । शूर्यते अशारिष्ट ।

शुल्क कथने, सर्जने, वर्जने च चु०उभ०सक० सेट् । शुल्कयति ते अशुशुल्कत् त ।

शुल्क पु०न० शुल्क्यते अतिसृज्यते कर्मणि घञ् । १षड्भादिदैये राजकरे मेदि० २राजग्राह्यकरभेदे अमरः । वरपक्षात् कन्यापक्षीयैः ३ग्राह्ये धने ४स्त्रीधनभेदे "भगिनीशुल्कं सोदर्याणाम्" इति स्मृतिः । सम्भोगार्थं स्त्रीभ्यः देये ५धने "अशुल्कोपहृतायास्तु पितृदद्यादृतुत्रयं ते" इति स्मृतिः ६पणे च । [द्रव्यकरादानस्थाने ।

शुल्कस्थान न०हृत० (घाटि) २घट्टे भूयानां क्रयविक्रययोग्य

शुल्ल न० शुल्ल-अच् पृषो० १ताम्रे २रज्जौ च अमरटीका ।

शुल्व माने दाने च भ्वा०उभ०सक०सेट्। शुल्वयति ते अशुशुल्वत् त। [४आचारे ५यज्ञकार्य्ये च मेदि०।

शुल्व न०शुल्व-अच्। १ताम्रे २रज्जौ च अमरः ३जलसमीपे

शुल्वारि पु० ६त०। १गन्धके हेमच० तस्य तापादिजारकत्वात् तथात्वम्।

शुश्रू स्त्री मातरि "शिशोः शुश्रूषणात् शुश्रूः" भा०आ०अ०

शुश्रूषण न० शु-सन्-ल्युट्। १सेवायां शब्दच०। युच्। तत्रैव स्त्री २श्रवणेच्छायाञ्च। [च।

शुश्रूषा स्त्री शु-सन्-च। १श्रवणेच्छायाम् २उपासने ३कथने

शुष शोषणे दि०पर०सक०अनिट्। शुष्यति लृदित् अशुषत्।

शुष पु० शुष-क। १गर्त्ते २बिले च अजयपालः।

शुषि स्त्री शुष-कि। १पाषाणे २बिले च मेदि०।

शुषिर न०शुष-किरच्। १छिद्रे २वंशादिवाद्ये ३सच्छिद्रे त्रि० अमरः ४मूषिके पुंस्त्री० मेदि० स्त्रियां ङीष्। ५अग्नौ पु० विश्वः। ६चित्रकवृक्षे ७नद्यां स्त्री धरणिः। वनलीनामगन्धद्रव्ये स्त्री अमरः। [२शोषणे न०।

शुष्क त्रि०शुष+क्त। आतपादिना १कृतशोषणे। भावे क्त। शुष्कपत्त्र न० शुष्कं पत्त्रमस्य। (नालता) १आकभेदे। "शुष्कपत्त्रं पयोमिश्रं पित्तश्लेष्मज्वरापहम्। तत् शुष्कपत्त्रं जलदोषनाशनं विशेषतः पित्तकफज्वरापहम्। जलञ्च तस्यापि च पित्तहारकम् सुशोषनं व्यञ्जनयोगकारकम्" राजवल्लभः। कर्म०। २शुष्के पर्णे न०

शुष्कमांस न० कर्म०। आतपादिना शुष्कमांसे तद्गुणा भावप्र० उक्ता यथा "स्निग्धोष्णलघु व्याधानुद्धं शुष्कं शूलकरं गुरु" मांसमित्यनुषङ्गः।

शुष्करेवती स्त्री भारतकामेदे "अस्मिन्यज्ञे तथा काली कृष्णा पूर्वं महात्मना। तया तद्रुधिरं पीतमसुकानां महात्मनाम्। सा चास्मिन् कथिता लोके नामतः शुष्करेवती" वह्निपु० १५४अ०।

शुष्कल न० शुष्कं शोषणं लाति ला-क। १शुष्कमांसे। शुष-कलच् किच्च। २आमिषे उणादि०।

शुष्कवृक्ष पु० कर्म०। धववृक्षे राजनि०।

शुष्कवैर न० शुष्कं फलशून्यं वैरम्। उद्देश्यशून्ये कलहे।

शुष्कव्रण पु० कर्म०। (घँटे) किण्वरूपे व्रणे विका०।

शुष्काक्षिपाक पु० नेत्ररोगभेदे तल्लक्षणं भावप्र०उक्तं यथा "यत्तु कुथितं दारुणरूक्षवर्त्म सन्दह्यते चाविलदर्शनं यत्। सुदारुणं तत्प्रतिबोधने च शुष्काक्षिपाकोपहतं तदुक्तं"। कुथितं शुष्कोत्थितं सञ्छिद्रितमिति यावत्। दारुणरूक्षवर्त्म दारुणं विकृतं रूक्षं च वर्त्म यस्य तत्। कटमच्छाविशेषेण सन्दह्यते सदाहं भवति। अविलदर्शनम् अविलस्य अनच्छस्य दर्शनं येन तत्। तत्प्रतिबोधने उद्घाटने, सुदारुणम् अतिशयेन विकृतम्"।

शुष्काङ्ग पु० शुष्कमङ्गमस्य। १धववृक्षे (धगाछ) २शुष्कावयवयुते त्रि०स्त्रियां ङीष्। सा च ३गोधिकायां शब्दच०।

शुष्कार्द्रक न० शुष्कमार्द्रकम्। शुण्ठ्यां (शुँठ) शब्दच०।

शुष्म न० शुष-मन् किच्च। १तेजसि मेदि० २पराक्रमे हेमच०। ३सूर्य्ये पु० मेदि० ४अग्नौ त्रिका० ५चित्रकवृक्षे ६वायौ ७यक्षिणि संक्षिप्तसा० ८ज्वालायां च पु० भरतः।

शुष्मन् न०शुष-ङ्मनिण्। १तेजसि जटा०। २शौर्य्ये हेमच० ३अग्नौ ४चित्रकवृक्षे च पु० अमरः।

शूक पु० न० शू-कक् सम्प्र०। (शुक्रः) १तीक्ष्णाग्रे अमरः। २शिखायां ३दृष्यायां मेदि० ४सर्षपजलजलोद्भवे जन्तुभेदे भावप्र० तद्रोगाधिकारेण तज्जातरोगाश्च दर्शिता यथा "अथ शूकदोषाधिकारः। तत्र शूकदोषस्य निदानमाह "अक्रमाच्छेफसो दृष्टिं योऽभिवाञ्छति मूढधीः। व्याधयस्तस्य जायन्ते दश चाष्टौ च शूकजाः"। अक्रमात् अनुचितदृष्टिक्रमात्। अनुचिता च दृष्टिः मूत्रविकारजनकस्य योगेन शूकजाः शूकोजलशूकः सर्षपो जलजन्तुविशेषः स तु जलमलोद्भवः अलजुशुभृत्यादिकः। तथा शूकप्रधानो लिङ्गदृष्टिकरो वातस्रावनाद्युक्तो रोगः शूक उच्यते"। शूकदोषा दश चाष्टौ च भवन्ति। तेष्वादौ सर्षपिकामाह "गौरसर्षपसंस्थाना शूकदुर्भगहेतुका। पिडका श्लेष्मवाताभ्यां ज्ञेया सर्षपिका बुधैः"। शूकदुर्भगहेतुका शूकदुष्टयोनिनिमित्ता च। तत्र सा। शूकदुर्भगहेतुका शूकदुष्टयोनिनिमित्ता च। यथाष्टौलिकामाह "कठिना विषमैर्भुग्नैर्वायुनाष्टौलिकाह्वया भवेत्"। अष्टीला औदुम्बरस्य भारद्वविशेषः (निहार) इति लोके। तथा कठिनेत्यष्टौलिका विषमैर्भुग्नैरिति वक्ष्यमाणशूकविशेषणम्। विषमैर्हेतुभिर्दोषैः। भुग्नैः वक्रैः। अर्थितमाह "शूकैर्यस्तु पूरितं शब्दवद्व्यथितं च नाम तद्भवेत्"। यत्पिडकं यदा शूकैः पूरितं तदुपधितत्वाद्व्यथितम्। कुम्भिकामाह "कुम्भिका रक्तपित्तात् श्लेष्मास्रवास्थिनिभा सिता" कुम्भिका कुम्भीफलतुल्यत्वात्। अलजीमाह "अलजीषु श्लेष्मणा शोफकृत्पिडका तथा। सा च रक्तान्विता स्फोटाचिता च कथिता बुधैः"। एषा रक्तपित्तनिमित्ता ज्ञेया। बहुदितमाह "बहुतंहु पीडितं यत्तु शरीरं वातकोपतः।

शूकदोषे जाते पीड़ितं सद्यत् संरब्धम् सशोथं भवति तल्लिङ्गं स्तंदितमुच्यते। संमूढपिड़कामाह "पाणिभ्यां स्पृशसंमूढे संमूढपिडका७ भवेत्"। शूकदोषे जाते पाणिभ्यां स्पृशसंमूढे पिशिते लिङ्गे"। अत्रापि वातकोपत इत्यनुवर्त्तते। अथावभग्नमाह "दीर्घा वक्त्रेण पिडका दीर्घन्ते मध्यतस्तु याः। सोऽवभग्नः कफासृग्भ्यां वेदना रोमहर्षकृत्"। दीर्घा दीर्घाङ्कुराः। पुष्करिकामाह "पिड़का पिडकाव्याप्ता पित्तशोणितसम्भवा। पद्मकर्णिकसंस्थानाऽ ज्ञेया पुष्करिकेति सा"। पिडकाव्याप्ता पार्श्वतः क्षुद्रपिडकाव्याप्ता। अतएव पद्मकर्णिकसंस्थाना। स्पर्शहानिमाह "स्पर्शहानिन्तु० जनयेच्छोणितं शूकदूषितम्" अत्र स्पर्शासहत्वमेव लक्षणम्। उत्तमांगमाह "सूक्ष्माशोपमा रक्ता रक्तपित्तोद्भवा च या। एषोत्तमाख्या पिडका११ शूकाजीर्णसमुद्भवा"। अतपोनकमाह "क्षुद्रैरणुसखैर्लिङ्गं चिरं यस्य समन्ततः। वातशोणितजो व्याधिः विज्ञेयः अतपोनकः१२"। अतपोनकवालनी तकुल्यत्वाच्छतपोनकः। त्वक्पाकमाह "वातपित्तकृतो ज्ञेयस्त्वक्पाको१३ ज्वरदाहकृत्"। शोणितार्बुदमाह "कृष्णैः स्फोटैः सरक्ताभिः पिडकाभिर्निपीडितम्। लिङ्गं वास्तुरुजास्रोग्रा ज्ञेयं तच्छोणितार्बुदम्१४"। वास्तुरुजः स्फोटपिड़काधिष्ठानवेदनाः। अथ मांसार्बुदमाह "मांसदुष्टं विजानीयादर्बुदं मांससम्भवम्१५"। मांसपाकमाह "शीर्यन्ते यस्य मांसानि यस्य सर्वाश्च वेदनाः। विद्यात्तं मांसपाकन्तु१६ सर्वदोषकृतं भिषक्"। शीर्यन्ते गलन्ति। सर्वाश्च वेदनाः वातपित्तकफजाः। अथ विद्रधिमाह "विद्रधिः१७ सन्निपातेन यथोक्तमभिनिर्दिशेत्"। यथोक्तं सान्निपातिकं विद्रधिलक्ष्यं कथयेत्। तिलकालकानाह "कृष्णानि चित्राण्यथवा शुक्लानि सविषाणि तु। पतन्ति पातयन्त्याशु मेदं निरवशेषतः। कालानि मृत्वा मांसानि शीर्यन्ते यस्य देहिनः। सन्निपातसमुत्थांस्तान् विद्यात्तिलकालकान्१८"। चित्राणि नानावर्णानि। शुक्लानि शुक्लवर्णानि यद्वाः क्षोभयन्तीति वत्। सविषाणि सविषशूकाख्यजन्तुविशेषभक्षणत्वात्। शीर्यन्ते गलन्ति। कृष्णतिलतुल्यत्वात्तिलकालकाः। अथासाध्यमाह "तत्र मांसार्बुदं यच्च मांसपाकश्च यः कृतः। विद्रधिश्च न सिध्यन्ति ये च स्युस्तिलकालकाः"। [२रसे च मेदि०।

शूकक पु० शूकैः जलजन्तुभेदैः कायति कै-क। १प्रावृट्काले

शूककीट पु० शूकाकाररोमयुक्तः कीटः मा०त० (शूयाघोका) कीटभेदे अमरः। स हि शूकाभरोमवान्।

शूकधान्य न० शूकयुक्तं धान्यम् शाक०। यवादौ धान्ये अमरः। "व्रीह्यादिकं यदिह शूकसमन्वितं स्यात् तत् शूकधान्यमथ सूक्ष्मकुष्ठकादि। शिम्बीनिगूढ़मिति तत् प्रवदन्ति शिम्बीधान्यं तृणोद्भवमथो तृणधान्यमन्यत्। तत्र त्रिदोषशमनं लघु शूकधान्यं तेजोबलातिशयवीर्य्यविवृद्धिदायि। देशे देशे शूकधान्येषु संख्या ज्ञातुं शक्या नो नरैर्दैवतैर्वा" राजनि०। "शूकधान्यं शमीधान्यं समातीतं प्रशस्यते। परतो वातलद्रूक्षं प्रायेणाभिनवं गुरु" राजवल्लभः। [शब्दच०।

शूकपिण्डी स्त्री शूकस्य पिण्डीव। शूकशिम्बां

शूकर पुंस्त्री० शू इत्यव्यक्तं शब्दं करोति क-अच शूक+अस्त्यर्थे र वा। स्वनामख्याते पशौ अमरः स्त्रियां ङीष्।

शूकरकन्द पु० शूकर इव रोमशः कन्दोऽस्य। वाराहीकन्दे राजनि०।

शूकरदंष्ट्रक पु० गुदभ्रंशे क्षुद्रोगभेदे "सदाहो रक्तपर्य्यन्तस्त्वक्पाकी तीव्रवेदनः। कण्डूमान् ज्वरकारी च स स्याच्छूकरदंष्ट्रकः" भावप्र० तल्लक्षणमुक्तम्।

शूकरपादिका स्त्री शूकरस्येव पादाः मूलान्यस्याः कप् अत इत्वम्। कोलशिम्बां राजनि०।

शूकराक्रान्ता स्त्री शूकरेणाक्रम्यते स्म आ+क्रम-क्त ३त०। वराहक्रान्तायां शब्दच०।

शूकरी स्त्री शूकर आक्रामकत्वेनास्त्यस्याः अच् गौरा० ङीष्। १वराहक्रान्तायां शब्दच०। शूकर+जातौ ङीष्। २तज्जातिस्त्रियाञ्च। [द्रव्ये त्रि०।

शूकरेष्ट पु०६त०। १कसेरुनामकन्दे राजनि०। २वराहप्रिय-

शूकवती स्त्री शूकलीक्ष्णमस्त्यस्याः मतुप् मस्य वः ङीप्। १कपिकच्छ्वां शब्दच०। २शूकयुते त्रि० स्त्रियां ङीप्।

शूकशिम्बा स्त्री शूकयुक्ता शिम्बा शाक०। कपिकच्छ्वां शब्दच०।

शूकशिम्बि(स्त्री) पु० शूकयुक्ता शिम्बिः शाक० वा ङीप्। कपिकच्छ्वां शब्दच०।

शूका स्त्री शूकोऽस्त्यस्याः अच्। कपिकच्छ्वां शब्दच०।

शूकापुट पु० रत्नमणिभेदे हारा०। [शब्दर०।

शूतिपर्ण पु० शू-क्तिच् शूति स्फीतं पर्णं यस्य। कारग्वधे

शूद्र पुंस्त्री० शुच-रक् पृषो० चस्य दः दीर्घश्च। १चतुर्थे वर्णे स्त्रियां टाप्। शूद्रा शूद्रजातिस्त्रियाम्। पुंयोगे ङीष्। शूद्री शूद्रभार्य्यायाम्। शुचा द्रवति द्रु-ड पृषो०। २शोकहेतुकगतियुक्ते शूद्रादिकरणशब्दे दृश्यम्।

अथ शूद्रधर्माः "विप्राणामर्चनं नित्यं शूद्रधर्मो विधीयते। तद्वेषो तन्नमस्कारो शूद्रश्चाण्डालतां व्रजेत्। अष्टः कोटिसहस्राणि यतजन्मानि शूकरः। त्रयोदशः यतजन्मानि शूद्रो विप्रधनापहा। यः शूद्रो ब्राह्मणीगामी सातृगामी स पातकी। कुम्भीपाके पच्यते स यावद्वै ब्रह्मणः यतम्। कुम्भीपाके तप्ततैले दग्धः सर्पैरहर्निशम्। शब्दश्च विकृताकारं कुरुते यमताडनात्। ततश्चाण्डालयोनिः स्यात् सप्तजन्मसु पातकी। सप्तजन्मसु सर्पश्च जलौकाः सप्तजन्मसु। जन्मकोटिसहस्रञ्च विष्ठायां जायते कृमिः। योनिकृमिः पुंश्चलीनां स भवेत् सप्तजन्मसु। गवां वधकृमिः स्याच्च पातकी सप्तजन्मसु। योनौ योनौ भ्रमत्वेवं न पुनर्जायते नरः" ब्रह्मवै० पु० ८२अ०। "द्विजानां पादशुश्रूषा शूद्रैः कार्या सदा त्विह। पादप्रक्षालनं गन्धैर्भोज्यमुच्छिष्टमात्रकम्। ते तु चक्रुः सदा चैव तेभ्यो भूयः पितामहः। शुश्रूषार्थं मया यूयं सृष्टा ह्येते सुताः। द्विजानां क्षत्रवर्णानां वैश्यानाञ्च भवद्विधाः। तस्मात् शुश्रूषणं कार्यं सत्यवादीह्युच्यते सदा" पाद्मे सृ०ख० १६अ०। "शुश्रूषैव द्विजातीनां शूद्राणां धर्मसाधनम्। कारुकर्म तथाऽऽजीवः याकयज्ञोऽपि धर्मतः" गारुड़े ४६अ०। "तथा मद्यस्य पानेन ब्राह्मणीगमनेन च। वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेत्" इति शूद्रकमलाकरधृतपराशरवाक्यम्। ब्राह्मणस्य तदन्नभोजननिषेधो यथा "शूद्रान्नं ब्राह्मणोऽश्नन् वै मासं मासार्द्धमेव वा। तद्योनावभिजायेत सत्यमेतद्विदुर्बुधाः। अथोदरस्थशूद्रान्नो मृतः श्वा चैव जायते। द्वादश दश चाष्टौ च गृध्रशूकरपुल्काराः। उदरस्थितशूद्रान्नो ह्याधीयानोऽपि नित्यशः। जुह्वन् वापि जपन् वापि गतिमूर्द्धां न विन्दति। अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम्। वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम्। तस्मात् शूद्रं न भिक्षेयुर्यत्नार्थं सद्द्विजातयः। श्मशानमिव यच्छूद्रस्तस्मात्तं परिवर्जयेत्। कथानामथ वा भिक्षां कुर्य्याच्चातिविकर्षितः। सच्छूद्राणां गृहे कुर्वन् तत्पापेन न लिप्यते। विशुद्धान्वयसंजातो निष्टप्तो मद्यमांसतः। द्विजभक्तो नम्रिवृत्तिः शूद्रः स्यात् परिकीर्त्तितः" इत्पराशरः। शूद्रकृत्यविचारेधृतत्वे मत्स्यपुराणम्

"एवं शूद्रोऽपि सामान्यं द्विजिश्चान्तु सर्वदा। नमस्कारेण मन्त्रेण कुर्य्यादामन्त्रवद्बुधः। दानप्रधानः शूद्रः स्यादित्याह भगवान् प्रभुः। दानेन सर्वकामाप्तिरस्य संजायते यतः"। ततो दानमेवापेक्षितं न तु भोजनमपि। सामान्यं सर्वजनकर्त्तव्यत्वेन प्रतिमाषडक्षरपुराणादिविहितश्राद्धम् आभ्युदयिकश्राद्धञ्च एवं द्विजातिवत् शूद्रोऽपि कुर्यादित्यन्वयः। नमस्कारेण मन्त्रेण न तु पाठितमन्त्रेण। कामान्नवदित्यनेन जलसेकविकिरव्याहृतिः "खिन्नमन्नमुदाहृतम्" इति वचिष्ठेन खिन्नस्यैवान्नत्वाभिधानात् कन्दुपक्वस्य भटत्वं न तु खिन्नत्वं हारीतेन स्वेदनभर्जनयोः पृथक्त्वोक्तं यथा "आदीपनतापनस्वेदनभर्जनपचनादिभिः पञ्चभीति"। अस्यार्थः आदीपनं काष्ठानां, तापनं तोयादेः, स्वेदनं धान्यादेर्भर्जनं यवादेः, पचनं तण्डुलादेः इति पञ्चमी सूना इति कल्पतरुः। अतएव खिन्नधान्येन व्यवहृयते। "कन्दुपक्वानि तैलेन पायसं दधिसक्तवः। द्विजैरेतानि भोज्यानि शूद्रगेहगतान्यपि" इति कूर्मपुराणवचने शूद्रकर्त्तृकं कन्दुपक्वादेर्ब्राह्मणभक्ष्यत्वेन श्राद्धे देयत्वोक्तम्। कन्दुपक्वं जलोपसेकं विना केवलघृतेन यदभ्रिना पक्वम्। पायसं पाकेन काठिन्यविकारापन्नं दुग्धं परमान्नपदत्वे पुंलिङ्गनिर्देशात्तेः तथा चामरः "परमान्नन्तु पायसः" इति। "दिनैतयोर्दये प्राप्ते पाकेन भोजयेद्द्विजान्। अयं विधिः प्रयोक्तव्यः शूद्राणां मन्त्रवर्जितः" इति श्राद्धचिन्तामणिधृतवराहपुराणवचनमपि कन्दुपक्वपरम् एवन्तु एतद्वचनं सच्छूद्रपरं बोधितोक्तं ज्ञेयम्। श्यामश्राद्धेऽपि श्राद्धे देयत्वं श्यामश्राद्धतत्त्वे उक्तमस्यम्। तत्र द्रव्यदेवताप्रकाशार्थं ब्राह्मणेन मन्त्राः पाठ्याः "अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः। अमन्त्रस्तु शूद्रस्य विप्रोमन्त्रेण दीयते" इति वराहपुराणात् अयं श्राद्धेतिकर्त्तव्यताकोविधिः शूद्रकर्त्तृकमन्त्रपाठरहितः शूद्रस्य मन्त्रपाठानधिकारसिद्धौ यदमन्त्रेति पुनर्वचनं तत्स्त्रियाप्यर्थं परिभाषार्थञ्च ततश्च तत्कर्मसम्बन्धिमन्त्रेण विप्रस्तदीयकर्मकारयितृब्राह्मणो दद्यते तेन ब्राह्मणेन तत्र मन्त्रः पठनीय इति तात्पर्य्यं तत्र यजुर्वेदिको मन्त्रः तथा च स्मृतिः "आर्षक्रमेण यः सर्वं शूद्रो वाजसनेयिनः। तस्माच्छूद्रः स्वयं कर्म यजुर्वेदेन कारयेत्"। आर्षक्रमेण स्वयुक्तक्रमेण यजुर्वेदिसम्बन्धिगृह्यादिना "चतुर्णामपि वर्णानां यानि प्रोक्तानि वेधसा। धर्मशास्त्राणि राजेन्द्र! शृणु तानि नृपोत्तम!। विशेषतस्तु शूद्राणां पावनानि मनीषिभिः।

ष्टादश पुराणानि चरितं राघवस्य च। रामस्य कुरुशार्दूल धर्मकामार्थसिद्धये। तथोक्तं भारतं वीर! पाराशर्येण धीमता। वेदार्थं सकलं योज्य धर्मशास्त्राणि च प्रभो!" इति भविष्यपुराणवचनात्तेषां पौराणिकादिविधिः। योज्य योजयित्वा। अत्र च "श्राद्धं वेदमन्त्रवर्जं शूद्रस्य इति वचने वेदेत्युपादानात् श्राद्धे पुराणमन्त्रः शूद्रेण पठनीय इति मैथिलोक्तं तन्न वराहपुराणे शूद्राणां मन्त्रवर्जित इत्यनेन मन्त्रमात्रनिषेधात् मत्स्यपुराणे नमस्कारेण मन्त्रेण इत्युपादानाच्च पौराणिकस्यापि श्राद्धे निषेधः प्रतीयते। एवं स्नानेऽपि "ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते। तूष्णीमेव हि शूद्रस्य नमस्कारकं मतम्" इत्यनेन नमस्कारविधानात् पञ्चयज्ञेऽपि। "शूद्रस्य द्विजशुश्रूषा तया जीवनवान् भवेत्। शिल्पैर्वा विविधैर्जीवेत् द्विजातिहितमाचरन्। भार्यारतिः शुचिर्भृत्यभर्त्ता श्राद्धक्रियारतः। नमस्कारेण मन्त्रेण पञ्च यज्ञान् क्रापयेत्" इति नमस्कारमात्रविधानात् श्राद्धादिषु पौराणिकमन्त्रनिषेधः। ततश्च स्नानश्राद्धतर्पणपञ्चयज्ञेतरत्र शूद्रस्य पौराणिकमन्त्रपाठः प्रतीयते। अत्र "षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले" इति मनुवचनात् "चूडा कार्या यथाकुलम्" इति याज्ञवल्क्यवचनाच्च संस्कारमात्रे कुलधर्मानुरोधेन कालान्तरस्य नामविशेषोच्चारणस्याभिधानाच्च शूद्रादीनां नामकरणे स्त्रीणामादिकपद्धतियुक्तनामकरणस्य च प्रतीतेर्वैदिककर्मणि शूद्राणां पद्धतियुक्तानामाभिधानं क्रियते इति"। शूद्रस्याचमने दैवतीर्थेन ओष्ठे जलं सकृत्स्पृशेत् न खिदेत् तथा च याज्ञवल्क्यः "हृत्कण्ठतालुगाङ्गिस्तु यथासंख्यं द्विजातयः। शुध्येरन् स्त्री च शूद्रश्च सकृत् सृष्टाभिरन्ततः"। अन्ततो हृदयादिसमीपेन ओष्ठेन उत्तरोत्तरमपकर्षात् अतएव सृष्टाभिरित्युक्तं न तु भक्षिताभिरिति "स्त्रीशूद्रः शुध्यते नित्यं ज्ञानान्न करोदकैः" इति ब्रह्मपुराणवचनाच्च। याज्ञवल्क्यः "प्राग्वा ग्राह्येण तीर्थेन द्विजो नित्यमुपस्पृशेत्" अत्र द्विजस्यैवाचमने ब्राह्मतीर्थोपादानात् स्त्रीशूद्रयोर्न तेनाचमनम् इत्यमेव मिताक्षरायां व्यक्तमुक्तं मरीचिना "स्त्रियास्त्वैदृषिकं तीर्थं शूद्रजातेस्तथैव च। सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः" इति। एतदनन्तरम् इन्द्रियादिस्पर्शेनन्तु ब्राह्मणवदेव प्रमाणान्तरन्तु वाजसनेयिप्रातिशाख्यकृतत्वयोर्दृष्टव्यम्" आ०त० रघु०।

शूद्रकर्म्मन् न० शूद्रस्य शास्त्रविहितं कर्म। शूद्रकर्त्तव्ये द्विजसेवादौ शूद्रशब्दादयोऽत्र।

शूद्रप्रिय पु० ६त०। पलाण्डौ राजनि०।

शूद्राधिकरण शूद्रस्य विद्यायामधिकारोऽस्ति नवेति सन्देहे नाधिकार इति निर्णायके शारीरकसूत्रोक्ते अधिकरणभेदे तच्चाधिकरणं तत्र दर्शितं यथा

"शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि" सू० "यथा मनुष्याधिकारनियममपोह्य देवादीनामपि विद्यास्वधिकार उक्तस्तथैव द्विजात्यधिकारनियमापवादेन शूद्रस्याप्यधिकारः स्यादित्येतन्नाशङ्कां निवर्त्तयितुम् इदमधिकरणमारभ्यते। तत्र शूद्रस्याप्यधिकारः स्यादिति तावत् प्राप्तम्, अर्थित्वसामर्थ्ययोः समत्वात्, "तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः" इतिवत् शूद्रो विद्यायामनवक्लृप्त इति निषेधाश्रवणात्। यच्च कर्मस्वनधिकारकारणं शूद्रस्यामनित्वं न तद्विद्यास्वधिकारस्यापवादकम्। न ह्याहवनीयादिरहितेन विद्या वेदितुं न शक्यते। भवति च लिङ्गं शूद्राधिकारस्योपोद्बोलकं, संवर्गविद्यायां हि जानश्रुतिं पौत्रायणं शुश्रूषुं शूद्रशब्देन परामृशति "अह हारे त्वा शूद्र! तवैव सह गोभिरस्तु" इति। विदुरप्रभृतयश्च शूद्रयोनिप्रभवा अपि विशिष्टविज्ञानसम्पन्नाः श्रूयन्ते, तस्मादधिक्रियते शूद्रो विद्यास्वित्येवं प्राप्ते ब्रूमः। न शूद्रस्याधिकारो वेदाध्ययनाभावात्। अधीतवेदो हि विदितवेदार्थो वेदार्थेष्वधिक्रियते, न च शूद्रस्य वेदाध्ययनमस्ति, उपनयनपूर्वकत्वाद्वेदाध्ययनस्य उपनयनस्य च वर्णत्रयविषयत्वात्। यत्त्वर्थित्वं न तदस्ति सामर्थ्यमधिकारकारणं भवति। सामर्थ्यमपि न लौकिकं केवलमधिकारकारणं भवति शास्त्रीयेऽर्थे शास्त्रीयस्य सामर्थ्यस्यापेक्षितत्वात् शास्त्रीयस्य च सामर्थ्यस्याध्ययननिराकरणेन निराकृतत्वात्। यच्चेदं शूद्रो यज्ञेऽनवक्लृप्त इति तत् न्यायपूर्वकत्वाद्विद्यायामनवक्लृप्तत्वं द्योतयति न्यायस्य साधारणत्वात्। यत् पुनः संवर्गविद्यायां शूद्रशब्दश्रवणं लिङ्गं मन्यसे न तल्लिङ्गम्, न्यायाभावात्। न्यायोक्तो हि लिङ्गदर्शनं द्योतकं भवति, न चात्र न्यायोऽस्ति कामस्वाय शूद्रशब्दः संवर्गविद्यायामेवैकस्यां शूद्रमधिकुर्यात् तद्विषयत्वात् न सर्वासु विद्यासु, अर्थवादस्थत्वात् न तु कश्चिदर्थः शूद्राधिकर्तृत्वप्रकाशने। शक्यते चायं शूद्रशब्दोऽधिक्षेपविषये योजयितुम्। कथमित्युच्यते। "अं वर एनमेतत् सन्तं

सयुग्वानमिव रैक्वमात्मेति अस्माद्वं सवाक्यादात्मनोऽनादरं स्तुतवतो जानश्रुतेः पौत्रायणस्य शुश्रुवेदे तादृशी रैक्व शूद्रशब्देनानेन स्तुत्यास्वभूयात्मनः परोक्षज्ञानस्य ख्यापनायेति गम्यते, जातिशूद्रस्यानधिकारात् । कथं पुनः शूद्रशब्देन शुश्रुत्सया स्तुत्यते इति, उच्यते, तदा द्रवणाच्छुचमभिदुद्राव शुचा वाभिदुद्रुवे शुचा वा रैक्वमभिदुद्रावेति शूद्रावयवार्थसम्भवात् रूढ्यर्थस्य चाप्रसम्भवात् । दृश्यते चायमर्थोऽस्माभाख्यायिकायाम्" ।

शूद्रार्त्ता स्त्री शूद्रेणार्त्ता पीड़िता । प्रियव्रतौ शब्दच० ।

शूद्रावेदिन् स्त्री शूद्रां विन्दति विद्-णिनि उप० । शूद्रजातिस्त्रिया विवाहकर्त्तरि । "शूद्रावेदी पतत्यत्रेः" मनुः "कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः । शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते । ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः" इति मनुना कामतस्तासु वैगर्ह्यं विवाहे विहितेऽपि शूद्रावेदीत्यस्याधिकदोषार्थता द्विजातिस्त्रीलाभे शूद्रस्त्रीविवाहनिषेधार्थता च । स च विवाहः युगान्तरविषयः कलौ अनवर्णस्त्रीविवाहनिषेधात् कलिशब्दे १८०२ पृ० दृश्यम् ।

शूद्रान्न न०ष्ठ० । शूद्रस्वामिकान्ने तस्य द्विजैरभक्ष्यत्वं यथा हारीतः "शूद्रान्नेन तु भुक्तेन उदरस्थेन यो मृतः । स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चाधिगच्छति" स्मृ० धृत वाक्यं शूद्रान्नं शूद्रस्वामिकान्नं रघु० । "ग्रामं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते" इति तत्पक्वान्नस्य सर्वथा निषेधादत्र कच्चिन्नमेव शूद्रस्वामिकान्नं गृह्यते । तद्दत्तमपि भोजनकाले तद्गृहस्थस्थितं तदपि शूद्रान्नं तदाहाङ्गिराः "शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि । निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्" तेन शूद्रवेश्मस्थितक्षीरदध्यादिकमपि शूद्रान्नं पारिभाषिकमिति बोध्यम् । निवृत्तेन शूद्रान्नानिवृत्तेन । तदपीति अपिशब्दात् साक्षाद्दत्ततदतरुलादि न तु गृहदत्तकपर्दकादिना क्रीतमपि । स्वगृहागते शूद्रान्ने अङ्गिराः "यथा यतस्ततो ह्यापः शुचिं यान्ति नदीं गताः । शूद्रान्नद्विजगृहेष्वन्नं प्रविष्टन्तु सदा शुचि" प्रविष्टं स्वत्वापादकप्रतिग्रहादिनेति शेषः । अतएव पराशरः "तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः । द्विजातिकरसंस्पृष्टं सर्वं तद्विसृज्यते" । स्पृशति प्रतिगृह्णातीति कल्पतरुः । तच्च संप्रोक्ष्य ग्राह्यमित्याह विष्णुपु० "संप्रोक्ष्य प्रतिगृह्णीयाच्छूद्रान्नं गृहमागतम्" तच्च पात्रान्तरे ग्राह्यमित्याहाङ्गिराः "स्वपात्रे यत्तु विन्यस्तं शूद्रो यच्छति नित्यशः । पात्रान्तरगतं ग्राह्यं दुग्धं स्वगृहमागतम्" । एतेन स्वगृहागतस्यैव शुद्धत्वं प्रतीयते ततश्चैतदपि सुमूर्षुणा शूद्रान्नं सर्वथा न भोक्तव्यम् प्रायुक्तहारीतवचने तच्चिन्द्राश्वरणात्" शुद्धितत्त्व० । "नाद्यात् शूद्रस्य विप्रोऽन्नं भोक्ष्यन्वा यदि वान्यतः । स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि । अपूपमांसान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम् । जीवन्नेव भवेत् शूद्रो मृतः स्वा चाभिजायते । ब्राह्मणक्षत्रियविशां शूद्रस्य च मनीषिणः । यस्मान्नेनोदरस्थेन मृतस्तद्योनिमाप्नुयात्" व्यासवाक्यम् "आर्त्विजः कुलमित्रञ्च गोपालो दासनापितौ । एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् । क्षीवलः कुम्भकारः श्वित्रकर्षक एव च । एते शूद्रेषु भोज्यान्ना दत्त्वा स्वल्पफलं बुधैः । पायसं दध्यपक्वञ्च यावकञ्चैव सक्तवः । पिण्याकञ्चैव तैलञ्च शूद्रान्नं द्विजातिभिः" कूर्मपु० ७उ० भागे १६अ० । "कन्दुपक्वानि तैलेन पायसं दधिसक्तवः । द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि" । "कुलमित्रादीनां भोज्यान्नता तु कलौ तत्परा । शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम् । भोज्यान्नता गृहस्थस्य तीर्थसेवाऽतिदूरतः" पराशरोक्तेः कलौ वर्ज्यत्वोक्तेः शूद्रोऽपि ब्राह्मणद्वारा पक्वान्नेन नैवेद्यं दातुमर्हति इत्युत्सर्गोऽन्नचरुपाकादिवत् तत्रापि तस्याधिकार इति तिथ्यादितत्त्वप्रकरणे रघुनन्दनेन व्यवस्थापितम् तत्र द्रष्टव्यम् ।

शूद्रासुत पु० शूद्रायाः द्विजातिभिः जढायाः सुतः । द्विजातिजाते शूद्रजातिस्त्रियाः सुते पुत्रभेदे ।

शूना स्त्री श्वि-अधिकरणे-क्त यस्य०दीर्घः ।१प्राणिबधस्थाने हिंसा० "पञ्च शूना गृहस्थस्य चुल्ली पेषण्युपस्करः । कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्" मनुः । तद्दोषनिवृत्तये काम्यां मनुना पञ्च यज्ञा विहिता यथा "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् । पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः । स गृहेऽपि वसन्नित्यं शूनादोषैर्न लिप्यते" । (आलजिब) २अधोनिक्षेपायां हारा० ।

शून्य त्रि०शूनायै प्राणिबधाय हितम् गृहस्थस्थानत्वात् यत् । १निर्जनस्थाने मेदि० । २आकाशे शब्दच० । ३बन्धुभार्य्यायां हेमच० । ४अभावे च अमरः । ५असम्भूयै हृष्टने ७तत्त्वे च त्रि० अमरः । [२शून्यमध्युक्तौ त्रि०।

शून्यमध्य पु० शून्यमाकाशो मध्ये यस्य । १नखे राजनि० ।
शून्यवादिन् पु० शून्यमभावमात्रं सर्वकारणतया वदति वद-णिनि । बौद्धभेदे बुद्धशब्दे ४५८१ पृ० दृश्यम् ।
शून्या स्त्री शून्यमस्त्यस्याः अच् । १नद्यां विश्वः । २महाकण्टकिन्याम् । (फणिमनसा) राजनि० । [ईदित् शूर्णः
शूर क्षिप्रे सत्वे च दि०आ०सक०सेट् । शूर्णते अशूरिष्ट ।
शूर विक्रमे भ्वा० चु० उभ० सक० सेट् । शूरयति ते अशुशूरत् त ।
शूर पु० शूर-अच् । १वीरे विक्रमवति अमरः । २वसुदेवनामके यादवे भेदि० । ३त्र्यं त्रिका० ४अर्कवृक्षे ५सिंहे ६शूकरे पुंस्त्री० स्त्रियां ङीष् । ७चित्रकवृक्षे दशाले ८निकुचे १०मस्तरे च पु० राजनि० ।
शूरण पु० शूर-ल्यु । (ओल) १मूलभेदे अमरः "शूरणो दीपनो रूक्षः कषायः कण्डुलत् कटुः । विष्मी विशदो रुच्यः कफार्शःघ्ननो लघुः । विशेषादर्शसे पथ्यः श्लीहगुल्मविनाशनः । सर्वेषां कन्दजातानां शूरणः श्रेष्ठ उच्यते । दद्रूणां रक्तपित्तानां कुष्ठानां न हितो हि सः । सम्यानयोगसंप्राप्तः शूरणो गुणवत्तमः" भावप्र० । २शोभाञ्जनवृक्षे च शब्दमाला । [च ।
शूरसेन पु०शूरा सेना यस्य, यस्य वा । १देशभेदे २मनुभेदे
शूर्प माने चु०उभ० सक० सेट् । शूर्पयति ते अशुशूर्पत् त ।
शूर्प पु०शूर्पते धान्यादिकमनेन शूर्प-घञ् । (कुलो) धान्यादिस्फोटके १शंभयपात्रे २द्रोणद्वयपरिमाणे च शब्दच० ।
शूर्पकर्ण पुंस्त्री० शूर्प इव कर्णौ यस्य । १गजे त्रिका० । स्त्रियां ङीष् । २शूर्पश्रुतिरत्यत्र हारा० ।
शूर्पणखा(खी) स्त्री शूर्प इव नखा अस्याः शत्वम् वा ङीष् । रावणभगिन्यां शब्दमा० । [शब्दच० ।
शूर्पपर्णी स्त्री शूर्प इव पर्णान्यस्याः ङीष् । शिग्रौ भेदे
शूर्पवात पु० ६त० । शूर्पजवायौ फुक्कफाले त्रिका० ।
शू(सू)र्मि पु०सृष्टु ऊर्मिरस्त्रियाः अच् वा पृषो०सस्य शः । ज्योत्स्नप्रतिमायाम् अमरः । [ज्योत्स्नादिप्रतिमायां शब्दच० ।
शू(सू)र्मि(र्मी) स्त्री सृष्टु ऊर्मिः यस्याः वा शत्वम् वा ङीष् ।
शूल रुजायां भ्वा०पर० अक० सेट् । शूलति अशूलीत् ।
शूल पु०न० शूल-क । १रोगभेदे २त्रिशूले च अमरः । ३व्यथायां ४व्यथो ५मुनीक्ष्वे व्ययःकाले धरणिः । ६चिक्के भेदि० । ७मुनिभेदे विष्णुधर्मादिषु दर्शने योगे च पु० । ८विक्रेतव्ये "कटुशूला जनपदाः शिवशूलास्तथैव च । वैश्यशूलाः स्त्रियो राजन् ! भविष्यन्ति युगक्षये" भा०व० १८८ अ० । अट्टशब्दे ६५पृ० दृश्यम् । शूलरोगभेद निदानादिकं भावप्र० उक्तं यथा
"अथ शूलाधिकारः । तत्र शूलस्य सन्निपातं निदानमाह "दोषैः पृथक्समस्तामहन्द्वैः शूलोऽष्टधा भवेत् । सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः(कर्त्ता)" । अथ वातिकस्य विशेषतः निदानं सम्प्राप्तिपूर्वकं लक्षणमाह "व्यायामयानादतिमैथुनाच्च प्रजागराच्छीतजलातिपानात् । कषायतिक्तातिरूक्षोजसश्च विरूढवर्चूरकशुष्कयाकेः । विट्क्षुक्रमूत्रानिलसन्निरोधाच्छोकोपवासादतिरूक्षभोजनात् । वायुः प्रदुष्टो जनयेत्ति शूलं हृत्पृष्ठपार्श्वे त्रिकवस्तिदेशे । जीर्णे प्रदोषे च घनागमे च शीते च कोपं सहसैति गाढम् । सङ्कर्षणक्षोपणभञ्जनोद्भेदैः । संखेदनाभ्यञ्जनमर्दनाद्यैः सिग्धोष्णभोज्यैश्च शमं प्रयाति" । व्यायामो मल्लयुद्धादिः यानं तुरगरथादि मैथुनं स्त्रीसेवा प्रजागरो रात्रौ, एषामतियोगात् शीतजलप्रभृतपानात् कषायस्तिक्तः शाकः तुवरी कोरदूषः कोद्रवः । अतिरूक्षद्रव्यसेवा, अध्ययनं भुक्तस्योपरि भोजनम् अभिघातो लोष्टादिभिः, कषायतिक्तरससेवा विरूढजालम् विरूढमङ्कुरितमन्नम् कषायचणकादि तज्जमन्नं भक्ष्यम् । यत्तूरकं शुष्कशाकम् । तस्य शूलस्य देशमाह हृदादिषु तत्र हृच्छूलस्य पृथगपि लक्षणं पठन्ति "कफपित्तावरुद्धस्तु मारुतो रसवाहितः । हृदिस्थः कुरुते शूलमुच्छ्वासस्यावरोधकम् । स हृच्छूल इति ख्यातो रसमारुतकोपजः" । अथ पार्श्वशूलस्यापि लक्षणमाह "कफं निष्टह्य पवनः कफौकोभिरिव निस्वनः । पार्श्वस्थः पार्श्वयोः शूलं कुर्यादाध्मानसंयुतम् । तेनोच्छ्वसिति वक्त्रेण नरोऽन्नञ्च न काङ्क्षति । निद्राञ्च नाप्नुयादेव पार्श्वशूलः प्रकीर्त्तितः" । वस्तिशूलस्यापि लक्षणमाह "रूक्षोषात् कुपितो वायुर्वस्तिं संश्रित्य तिष्ठति । वस्तेरध्वनि नाड़ीषु ततः शूलोऽस्य जायते । विण्मूत्रवातसंरोधी वस्तिशूलः स उच्यते" । प्रकृतमनुसरति जीर्णे भुक्ते प्रदोषे रात्रिप्रागमे रात्रि शेषे तेन वातप्रकोपात् । घनागमे वर्षासु मेघोदये च तथैव । पैत्तिकमाह "क्षारातितीक्ष्णोष्णविदाहितैलनिष्पावपिण्याककुलत्थयूषैः । कट्वम्लसौवीरसुरादिकारैः क्रोधानलायासरविप्रतापैः । व्याख्यातियोगादथवैर्विदग्धैः पित्तं प्रदुष्याथ करोति शूलम् । तच्छूलोक्त-

दाहार्त्तिकरं हि नाभ्यां संस्वेदमूर्च्छाभ्रमशोषयुक्तम् । मध्यंदिने कुप्यति चार्द्धरात्रे निदाघकाले जलदात्यये च । शीते च शीतैः शमुपैति शान्तिं सुखादुशीतैरति भोजनैश्च" । निष्पावो राजमाषः । सौवीरं सन्धानभेदः । सुराविकारैः "परिपक्वान्नसन्धानसत्मना सुरा मता" । तस्या विकारैः । रविप्रतापः आतपः । व्यायातियोगो मैथुनाधिक्यम् । विदाहीत्युक्तापि अशनैर्विदग्धैरिति बोधयति अविदाह्यन्नभोजिनोऽपि पित्तवशाद्विदाह्यत्वं भवति । जलदात्यये शरदि । शीतैर्वातादिभिः । श्लैष्मिकमाह "व्यायुपवारिजकिलाटपयोविकारैर्मांसेक्षुपिष्टकशरातिलशुक्लभीभिः । अन्यैर्बलासजनकैरपि हेतुभिश्च श्लेष्मा प्रकोपमुपगम्य करोति शूलम् । हृल्लासकासप्रसदानरुचिसमसैकैरामाशये स्तिमितकोष्ठशिरोगुरुत्वैः । भुक्ते सदैव हि रुजं कुरुतेऽतिमात्रम् सूर्योदये च शिशिरे कुसुमागमे च" । व्यानूपं बहुजलदेशजं मध्यम् । वारिजं शालूकादि "पक्वं द्रव्यं सक्षीरं विज्ञेया दधिकूर्चिका । तक्रेण तक्रकूर्ची स्यात्तयोः पिण्डः किलाटकः" । पयोविकारः प्रायसादिः पिष्टं माषादिः । अन्यैः गुर्वादिभिः । स्तिमितमार्द्रपटावगुण्ठितमिव यत्कोष्ठं शिरश्च तयोर्गुरुत्वैः सह । सूर्योदय इति त्रिधा विभक्तदिवस प्रथमभागस्योपलक्षणम् । शिशिरे तत्र कफस्यातिसञ्चयात् । कुसुमागमे वसन्ते । हेत्वजमाह "द्विदोषलक्षणैरेतैर्विद्याच्छूलं द्विदोषजम् । सर्वेषु देशेषु च सर्वलिङ्गं विद्यात्त्रिकं सर्वभवं हि शूलम् । कष्टमेनं विषमज्वरकल्पं विवर्जनीयं प्रवदन्ति तज्ज्ञाः" । सर्वेषु देशेषु हृत्पृष्ठपार्श्वस्तिकवस्तिनाभ्याशयेषु । सर्वं भवं त्रिदोषजम् । व्यामजमाह "व्याटोपहृल्लासवमी गुरुत्वस्तैमित्यमानाहकफप्रसेकैः । कफस्य लिङ्गेन समानलिङ्गमामोद्भवं शूलमुदाहरन्ति" । व्यतामशूले जाते पश्चाद् दोषसम्बन्धः अतएवास्य शूलस्याष्टमत्वमुक्तम् । स च प्रथमसामाशये भवति पश्चाद् सम्बन्धिभिर्दोषैर्वस्तिनाभिहृत्पार्श्वकुक्षिषु भवति यथा दोषसम्बन्धः । व्यामशूलस्य दोषविशेषेण देशविशेषमाह "वातात्मकं वस्तिगतं वदन्ति पित्तात्मकञ्चापि वदन्ति नाभ्याम् । हृत्पार्श्वकुक्षौ कफसन्निविष्टं सर्वेषु देशेषु च सन्निपातात्" । हृत्पार्श्वकुक्षौ हृत्पार्श्वाभ्यां सहिते कुक्षौ । कफसन्निविष्टं कफनाविष्टम् "वक्षो हृत्कटिपार्श्वेषु स शूलः कफवातिकः४ कुक्षौ हृन्नाभिमध्ये तु स शूलः कफपैत्तिकः५ । दाहज्वरकरो घोरो विज्ञेयो वातपैत्तिकः" । तन्त्रान्तरोक्तमामशूलमाह "व्यतिमात्रं यदा भुक्तं पावके मृदुतामुते । स्थिरीभूतन्तु तत्कोष्ठे वायुराहत्य तिष्ठति । यदाऽन्नं न मनं याकं तच्छूलं कुरुते भृशम् । मूर्च्छाध्मानं विदाहांश्च हृत्कुक्षेश्च विलम्बिकम् । कर्म वान्तिमतीसारं प्रसेकं जनयेदपि । अविपाकोद्भवं शूलमेतमाहुर्मनीषिणः" व्यविपाकोद्भवम् व्यामोद्भवमित्यर्थः । व्यथ शूलस्योपद्रवानाह "वेदनातिलषा मूर्च्छा व्यानाहो गौरवारुची । कासः श्वासो वमिर्हिक्का शूलस्योपद्रवाः स्मृताः" । व्यथासाध्यत्वादिकमाह "एकदोषानुगः साध्यः कृच्छ्रसाध्यो द्विदोषजः । सर्वदोषान्वितो घोरस्त्वसाध्यो भूर्युपद्रवः" । व्यथारिष्टमाह "वेदनातिलषा मूर्च्छा व्यानाहो गौरवं ज्वरः । श्वासोरुचिः कृशत्वञ्च बलहानिस्तथैव च । उपद्रवा दशैवैते यस्य शूलेषु, नास्ति सः" । व्यथ शूलस्यैव भेदं परिमाणमाह "स्वैर्निदानैः प्रकुपितो वातः सन्निहितो यदा । कफपित्ते समाहत्य शूलाकारो भवेद्बली । भुक्ते जीर्यति यच्छूलं तदेव परिणामजम्" । स्वैर्निदानैरित्यादिना निदानपूर्विका संप्राप्तिरुक्ता भुक्ते जीर्यतीत्यादिना लक्षणमुक्तम् । समाहत्य व्याप्य । तस्य लक्षणमर्थतस्तत्समासेनाभिधीयते । "व्याध्मानाटोपविण्मूत्रविबन्धानाहवेपनैः । स्निग्धोष्णोपशमप्रायं वातिकं तद्विनिर्दिशेत् । पक्वं । तृष्णादाहारतिस्वेदकटुम्लभ्रमयोत्तरम् । शूलं शीतशमप्रायं पैत्तिकं लक्षयेद् बुधः । छर्द्दिर्हृल्लासमाधुर्य स्वल्परुक् दीर्घसन्ततिः । कटुतिक्तोपशान्तौ च विज्ञेयश्च कफात्मकम् । संसृष्टलक्षणं बुद्ध्वा द्विदोषं परिकल्पयेत् । त्रिदोषजमसाध्यं स्यात् क्षीणमांसबलानलम्" । व्यथाद्यदूषनामानं शूलविशेषमाह "जीर्णे जीर्यति चाध्यर्द्धं यच्छूलमुपजायते । पथ्यापथ्यप्रयोगेण भोजनाभोजनेन वा । न शमं याति नियमात्सोऽन्नद्रव उदाहृतः । भेदं शूलमसाध्यं चिकित्साभिधानात्" ।

व्यथ शूले पथ्यापथ्ये भावप्र० दर्शिते यथा "कलायमयवगोधूमाः श्यामाकाः कोरदूषकाः । राजशाल्याः कुलत्थाः कट्वम्लशाल्यः । दधिलुम्बरसं क्षीरं सर्पिर्गव्यं समाहिषम् । वास्तुकं कारवल्ली च कर्कोटक फलानि च । वर्हिणो हरिणामत्स्या रोहिताद्याः कपिञ्जलाः । एतस्मिन्नामये शस्तामतान्निचिकित्सकैः ।

दधिबुध्नरसं दत्त्वा लुप्तः क्षतो रसो यस्य तत्क्षीरं दधियुक्तं क्षीरमित्यर्थः । "व्यायामं मैथुनं मद्यं लवणं कटुकं रसम् । वेगरोधं शुचं क्रोधं विदलं शूलवान् त्यजेत्" । स च उपघातकचिह्नं यथोक्तं भाता० कर्मवि०

"जलोदरयकृत्प्लीहशूलरोगव्रणानि च । श्वासाजीर्णज्वरच्छर्दिभ्रमगोहगलग्रहाः । रक्तार्बुदविसर्पाद्या उपघातोद्भवा गदाः" ।

शूलक पुंस्त्री० शूल+संज्ञायां कन् । १दुर्विभाग्ये हेमच० स्त्रियां ङीष् । स्वार्थे क । २शूलशब्दार्थे ।

शूलग्रन्थि पु० शूलाकारः ग्रन्थिरस्य । मालादूर्वायां राजनि०

शूलशातन न० शूलं रोगभेदं घातयति हन्-णिच्-ल्यु । मरणूरे शब्दच० ।

शूलहन् पु० शूलं हन्ति हन-क्विप् । तुम्बुरवृक्षे रत्नमा० ।

शूलद्विष पु० इत० । हिङ्गौ रत्नमाला । [शब्दच० ।

शूलधन्वन् पु० शूलं धनुरायुधमस्य अनङ् समा० । शिवे

शूलधर पु०शूलं धारयति धारि-अच् हलः । शिवे शब्दच० भृ-क्विप् । शूलभृदयत्र । [स्त्री ङीप् शब्दच० ।

शूलधारिन् पु० शूलं धरति धृ-णिनि । १शिवे १दुर्गायां

शूलधृष् पु० शूलेन धर्षति दैत्यान् धृष-क्विप् । १शिवे २दुर्गायां स्त्री । धृज-क्विन् । शूलधृज् तत्रार्थे ।

शूलनाशन न० शूलं नाशयति नश-णिच्-ल्यु । सौवर्चललवणे हेमच० । [राजनि० ।

शूलपत्री स्त्री शूलमिव पत्रं यस्याः ङीप् । शूलोद्भवे

शूलपाणि पु०शूलं पाणौ यस्य । शिवे शूलहस्तादयोऽत्र ।

शूलशत्रु पु० शूलस्य रोगस्य शत्रुः । एरण्डवृक्षे शब्दच० ।

शूलहन्त्री स्त्री शूलं रोगं हन्ति हन-ट्रच् ङीप् । यवान्यां राजनि० ।

शूलहृत् पु० शूलं रोगं हरति हृ-क्विप् । हिङ्गुलि त्रिका० ।

शूला स्त्री शूलं तदाकारोऽस्त्रोऽस्य शूलं स्वयौवनविक्रेयतयाऽस्त्रोऽस्या वा अच् । १दुष्टवधूर्थकीलके २वेश्यायाञ्च त्रिका० ।

शूलाकृत त्रि० शूलेन विद्धा कृतं पक्वम् शूल+डाच्+कृ-क्त । लोहादिकीलकेन विद्धा पक्वे मांसे (कावाब) अमरः

शूलिक त्रि० शूलं पाकसाधनत्वेनास्त्रोऽस्य ठन् । १शूलाकृते शब्दच० २शूलके हेमच० ३शूलयुते त्रि० ।

शूलिन् पु० शूलमस्त्रोऽस्य इनि । १शूलरोगयुक्ते २शूलास्त्र धारके त्रि० ३शिवे पु० ४शूलके भावप्र० । हिङ्गे शब्दच० ।

शूलिन पु० शूलं तदाकारं फलमस्त्रोऽस्य इनन् । माणकोरशूली स्त्री शूलं पक्षाकारे अस्त्रोऽस्य अच् गौरा० ङीष् । शूलाकारपक्षयुते स्वनामख्याते तृणभेदे राजनि० ।

शूलोत्खा स्त्री शूलं रोगभेदमुत्खनति उद्+खन-ड । सामराज्यां शब्दच० ।

शूल्य त्रि० शूले संस्कृतं यत् । शूलाकृते मांसे भावप्र० क्षताक्षशब्दे तत्पाकादि २१८१ पृ० दृश्यम् ।

शूष प्रसवे स्वा० पर० सक० सेट् । शूषति अशूषीत् ।

शृङ्गाल पुंस्त्री० अस्रजं लाति ला-क पृषो० । (शेयाल) १पशौ अमरः स्त्रियां ङीष् । २दैत्यभेदे मेदि० । ३वासुदेवे ४निष्ठुरे ५खले च पु० मारस्वताभिधानम् । पृषो० । शृङ्गाल तत्रार्थे शब्दच० । हीरौ अमरार्थकोषः । शृगालशब्दशाकुनं शिवारुतशब्दे दृश्यम् ।

शृगालकण्टक पु० शृगालस्येव कण्टको यस्य । (शेयालकाँटा) क्षुपभेदे शब्दच० ।

शृगालकोलि पु० शृगाल इव कण्टकितः कोलिः । (शेयाकुल) क्षुपभेदे रत्नमाला । [लाञ्छे क्षुपभेदे राजनि० ।

शृगालघण्टी स्त्री शृगाल इव कण्टकिनी घण्टी । कांकि-

शृगालजम्ब स्त्री शृगालप्रिया जम्बुरिव । १गोडुम्बे (गोसुक) २घोण्टाफले मेदि० । [राजनि० ।

शृगालविद्या स्त्री शृगालैर्विद्यते विद-क्त । पृश्निपर्ण्यां

शृगालिका स्त्री शृगालस्य भार्य्या ङीप् स्वार्थे क । १शृगालयोषिति शृगालीव इवार्थे कन् । २भयात् पलायने मेदि० ।

शृगाली स्त्री शृगालस्तत्पलायनं सादृश्येनास्त्रोऽस्य अच् ङीप् । १पलायने त्रिका० । २कोकिलाञ्छे ३विदार्य्यां राजनि० ।

शृङ्खल पु० शृङ्खात् प्राधान्यात् खलत्यतेऽनेन पृषो० । निगडे २लौहमये ३पादबन्धने च हेमच० । ४कक्षाभरणे अमरः ५पुंस्कटीवस्त्रबन्धने मेदि० । तत्रार्थे स्त्रीत्वमपि टाप् ।

शृङ्खलक पुंस्त्री० शृङ्खल इव कायति कै-क । १दुष्टे राजनि० स्त्रियां जातित्वात् ङीष् स्वार्थे क । २शृङ्खलशब्दार्थे ।

शृङ्खलित त्रि० शृङ्खला जाताऽस्य इतच् । बद्धनिगडे धनञ्जयः

शृङ्खली स्त्री शृङ्खलः तदाकारोऽस्त्रोऽस्याः अच् गौरा० ङीष् । १कोकिलाञ्छे वृक्षे २पुंस्कटीवस्त्रबन्धने च राजनि० ।

शृङ्ग न० शृ-गन् पृषो० सुम् ह्रस्वश्च । १पर्वतोपरिभागे शाखौ अमरः । २प्रभुत्वे ३चिह्ने ४जलक्रीड़ार्थयन्त्रभेदे (पिचकारी) ५पश्वादीनां विषाणे (शिङ्गा) ६उत्कर्षे च मेदि० ७ऊर्द्धे तीक्ष्णे ८पक्षे च शब्दर० १०महिष-

शृङ्गनिर्मितवाद्यभेदे (सिङ्गा) ११कामोद्दीपके सा०द० शृङ्गारशब्दे दृश्यम् । १२कूचेर्गीर्षकवृक्षे पु० मेदि० १३सन्निभेदे पु० ।

शृङ्गक पु० शृङ्गमिव कायति कै–क । जीवकवृक्षे जटा० ।

शृङ्गकन्द पु० शृङ्गमिव कन्दोऽस्य । शृङ्गाटके (पानीफल) राजनि० ।

शृङ्गज न० शृङ्गे पर्वताग्रे जायते जन–ड । १शृङ्गुरुचन्दने रत्नमा० । २वाद्यहेतुवृक्षे पु० संक्षिप्तसा० ३शृङ्गजातमात्रे त्रि०

शृङ्गमूल पु० शृङ्गमिव मूलमस्य । शृङ्गाटके राजनि० ।

शृङ्गमोहिन् पु० शृङ्गाय कामोद्रेकाय मोहयति मुह–णिच्–णिनि । धत्तूरे राजनि० ।

शृङ्गला स्त्री शृङ्गं तदाकारफलं लाति ला–क । अजशृङ्ग्यां (गाड़रसिङ्गी) शब्दच० ।

शृङ्गवत् पु० शृङ्गं प्राशस्त्येनास्त्यस्य मतुप् मस्य वः । १सीमापर्वतभेदे तन्नामादिभाग० १५।१६ अ० उक्तं यथा

"उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयः द्विसहस्रयोजनपृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरं दशांशाधिकांशेना दैर्घ्येण एव भवन्ति" । २शृङ्गयुते त्रि० ।

शृङ्गवेर न० शृङ्गमिव वेरमवयवो यस्य । १आर्द्रके अमरः । २गुण्ठ्यां २रामसिल्लगुडकचण्डालपुरे च । स्वार्थे क । आर्द्रके हेमच० । [एरकाद्यत्वे भावप्र० ।

शृङ्गवेराभमूलक पु० शृङ्गवेरेण तुल्यं मूलमस्य कप् ।

शृङ्गाट पु० शृङ्गं प्राधान्यमटति अट–अण् । १उत्तरस्थपर्वतभेदे २चतुष्पथे ३जलकण्टकिवृक्षे च ४ततृफले न० । "शृङ्गाटकं हिमं स्वादु गुरु दृष्यं कषायकम् । याहि शुक्रानिलश्लेष्मपित्तास्रदाहनम्" भावप्र० । स्वार्थे क । तत्र, चतुष्पथे अलङ्कारोक्ते बन्धभेदरूपे शब्दालङ्कारे च । स च पर्वतः कामाख्यादेशस्थः यथोक्तं कालिकापु० ८२अ० यथा

"ह्रीवत्याः पूर्वतस्तु शृङ्गाटो नाम पर्वतः । तत्र भर्गस्य देवस्य लिङ्गमेकं प्रतिष्ठितम् । सरित्तु सिद्धा विख्याता दक्षिणोदधिगामिनी । शृङ्गाटकस्य सततं स्रवन्ती पावनि पातवः । दक्षिणं सागरं याति भर्गस्य प्रियकारिणी । पक्वमांसभेदे तत्पाकविधिर्यथा "शुष्कमांसं तनूकृत्य कर्त्तितं क्षेदितं जले । लवणं हिङ्गुसहितं लवणार्द्रकसंयुतम् । एलाजीरकधन्याकनिम्बूरससमन्वितम् । हते सगन्धे तद्भ्रष्टं पूरणं प्रोच्यते बुधैः । शृङ्गाटकं खण्डितया कृतं पूरणपूरितम् । पुनः सर्पिषि संभृष्टं मांसं शृङ्गाटकं वदेत् । मांसं शृङ्गाटकं रुच्यं दृंहणं बलकृत् गुरु । वातपित्तहरं दृष्यं कफघ्नं वीर्यवर्द्धनम्" भावप्र० ।

शृङ्गार पु० शृङ्गं कामोद्रेकमर्हत्यनेन अर्ह–अण् । १रसभेदे अमरः । २लवङ्गे ३सिन्दूरे ४चूर्णे च मेदि० । शृङ्गं कारणत्वेन कृच्छति अण् । ५कालागुरुणि राजनि० ६आर्द्रके शब्दच० । शृङ्गं प्राधान्यमर्हत्यनेन अण् । ७भूषणे दशभूषणे च । स्वार्थे क । सिन्दूरे "पुंसः स्त्रियां स्त्रियः पुंसि संयोगं प्रति या स्पृहा । सा शृङ्गार इति ख्याता रतिक्रीड़ादिकारणम्" इत्युक्तौ स्त्रीपुंसयोरन्योन्यसंयोगं प्रतीच्छाभेदे च रसभेदलक्षणादिकं सा०द० उक्तं यथा

"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः । उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते । परोढा वर्जयित्वान्या वेश्यास्वानुरागिणीषु । आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः । चन्द्रचन्दनरोलम्बरुतादुद्दीपनं मतम् । भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः । त्र्यौग्र्यमरणालस्यजुगुप्सा व्यभिचारिणः । स्थायी भावो रतिः श्यामवर्णोऽयं विष्णुदैवतः" । "शून्यं वासगृहं सखीमित्यादि" । अत्र उक्तस्वरूपः पतिरुक्तस्वरूपा च बाला आलम्बनविभावौ । शून्यं वासगृहमुद्दीपनविभावः । चुम्बनमनुभावः । लज्जाहासौ व्यभिचारिणौ । एतैरभिव्यक्तः सङ्कुचद्रतिभावः शृङ्गारस्वरूपतां भजते । तद्भेदाश्च । विप्रलम्भोऽथ सम्भोग इत्येष द्विविधो मतः" । तत्र विप्रलम्भो विप्रलम्भशब्दे उक्तः सम्भोगस्तु "दर्शनस्पर्शनादीनि निषेवेते विलासिनौ । यत्तानुरक्तावन्योन्यं सम्भोगोऽयमुदाहृतः" । आदिशब्दादन्योन्याधरपानचुम्बनादयः । यथा "शून्यं वासगृहमित्यादि" । "संख्यातुमशक्यतया चुम्बनपरिरम्भणादिबहुभेदात् । अयमेक एव धीरैः कथितः सम्भोगशृङ्गारः । तत्स्थायिनष्टङ्कं चन्द्रादित्यौ तथालम्बनयोः । जलकेलिवनविहारप्रायमधुपानयामिनीप्रकृतिः । अनुलेपनभूषाद्या वाच्यं शुचि मेध्यमन्यच्च" । तथा च भरतः "यत्किञ्चिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा तत्सर्वं शृङ्गारोपनीयते उपयुज्यते" । किञ्च "कथितश्चतुर्विधोऽसावनन्तभेदात्तु पूर्वरागादेः" । यदुक्तम् "न विना विप्र-

लक्षणेन सम्भोगः पुष्टिमश्नुते । कषायिते हि वस्त्रादौ भूयान्रागो विवर्द्धते" ।

शृङ्गारभूषण न० शृङ्गारे तदर्थं भूषणम् । सिन्दूरे हेमच० ।

शृङ्गारयोनि स्त्री ६त० । कामदेवे त्रिका० ।

शृङ्गारिन् पु० शृङ्गारः उद्दीप्यत्वेनास्त्यस्य इनि । १पूगे तत्फलभक्षणे हि कामोद्रेक इति तस्य तथात्वम् । २गजे मेदि० । ३वेशे त्रि० । ४नाणिक्ये पु० राजनि० ।

शृङ्खिका न० शृङ्ख तदाकारोऽस्त्यस्य ठन् । १विषभेदे २व्यतिविषायां स्त्री शब्दर० । [स्त्रियां ङीष् ।

शृङ्खिण पु० शृङ्खं युद्धसाधनत्वेनास्त्यस्य इनन् । मेघे हेमच०

शृङ्खिन् पु० शृङ्खमस्त्यस्य इनि । १मेघे २कुलाचलभेदे शृङ्खवच्छब्दे दृश्यम् । ३पर्वतमात्रे ४मुनिभेदे ५शङ्खे च । ६शृङ्खयुक्ते त्रि० मेदि० । ७धेन्वां स्त्री ङीष् । दक्षेण ब्रह्मणोदक्षे ६मलिकायां १०ज्योतिष्मत्यां च स्त्री मेदि० । मुनिभेदश्च शमीकर्षिपुत्रः स हि परिक्षितं प्रति तक्षकदंशनशापमदात् इति विष्णुपु० स्थितम् ।

शृङ्खी स्त्री शृङ्खमस्त्यस्या अच् गौरा० ङीष् । १महुरस्य प्रियायाम् अमरः । पुंसोऽपि तत्रार्थे शब्दर० । २व्यतिविषायां २शङ्खपुष्पीवृक्षे अमरः । ४कर्कटशृङ्ख्याम् ५शङ्खे हविषे च राजनि० । ७भूषणस्वर्णे रत्नकोषः "महुरस्यप्रिया शृङ्खी" इत्यमरे महुरस्य शृङ्खीति नामद्वयम् । तेन (शिङ्खी) मत्स्यस्यैवेदं नाम इति भरतः ।

शृङ्खीकनक न० अगि-कि वा० समा० ङीष् शृङ्खी अलङ्कारस्तदर्थं कनकम् । भूषणार्थस्वर्णे अमरः । [भरतः ।

शृ सृ)णि स्त्री शृ-कि वा क्निन् तस्य निः पृषो० । अङ्कुशे अ-

शृत त्रि० शृ-क्त । १पक्वे अमरः २क्वथिते जलादौ च "दृव्याद्दुत्थापितात्तोयात् वह्निना परितापितात् । निःसृतो यो रसः पूतः स शृतः समुदाहृतः" वैद्यकोक्ते शृतद्रव्यकाथजे रसे पु० ।

शृध शब्दे भ्वा० आ० इतो० लुङि लृदित् लृङि च उभ० अक० सेट् क्त्वेट् । शर्द्धते अशृद्धत् शृत्सीति अशर्द्धिष्ट ।

शृध क्षेदने भ्वा० उभ० सक० सेट् क्त्वा वेट् । शर्द्धति ते अशर्द्धीत् अशर्द्धिष्ट ।

शृध प्रसहने चु० उभ० सक० सेट् । शर्द्धयति ते अशशर्द्धत् त ।

शृधु पु० शृध-कु । १वृद्धौ विश्वः । २कुत्सिते २शपाने संक्षिप्तसा०

शृ हिंसने क्र्या० पा० पर० सक० सेट् । शृणाति अशारीत् । शीर्णः ।

शेखर पु० शिखि-गतौ अरन् पृषो० । १शिखायां २मूर्द्धस्थितमाल्ये च अमरः । ३चन्द्रायां स्त्री शब्दर० ङीष् । ४गीताङ्के भ्रुवभेदे पु० तल्लक्षणं यथा

"द्वादशाक्षरपादः स्यात् स चाल्पशुभलक्षणः । हासके च रसे वीरे गीयते शेखरो भ्रुवः । लघुर्गुरुर्भवेद्यत्र स भवेल्लघुशेखरः" संगीतदा० । [त्रि० ।

शेप पु० शी-पन् । १शेफे शिश्ने शब्दच० । २शयनकर्त्तरि

शेपाल पु० शेपः शयित इवालति अल-अच् । शैवाले शब्दर०

शेफ पु० न० । शी-फन् । १शिश्ने अमरः २शयनकर्त्तरि त्रि० । शुक्रपाते सति शेते शी-असि फुक् च शेफोऽस्त्र न० "गोर्लिङ्गं चिह्नशेफसोः" अमरः । शेफश्शेफसी शेफ शेपौ शेपस्यति पचशब्दास्तत्रार्थे तत्र पृषो० साधुरिति भरतः । [ङीप् । शेफालिकायां शब्दमा० ।

शेफालि(ली) स्त्री शेफाः शयनशालिनः अलयो यत्र वा

शेफालिका स्त्री शेरते इति शेपाः अलयो यत्र वा कप् । (शिउलि) वृक्षभेदे अमरः "शेफालिका कटुष्णा च तिक्ता रूक्षा च वातकृत् । कफाङ्गसम्बिशातघ्नी ग्रहवातादिदोषहृत्" राजनि० । [अमरः ।

शेमुषी स्त्री शी-विच् शेः मोक्षस्तं सुष्णाति सुष-क । बुद्धौ

शेल गतौ चालने च भ्वा० पर० सक० सेट् । शेलति अशेलीत् । क्वादित् चाङि न हस्वः ।

शेलु पु० शेल-उच् । वल्लवारवृक्षे अमरः ।

शेव पु० शुक्रपाते सति शेते शी-वन् । पुंचिह्ने २उच्यते २अर्हौ च उणादिकोषः ।

शेवधि पु० शेः धनादिमोक्षस्य अवधिः । "पद्मोऽस्त्रियां महापद्मः शङ्खोमकरकच्छपौ । मुकुन्दकुन्दनीलाश्च निधयो नव शेवधिः" इत्युक्ते नवविधे निधौ अमरटीका ।

शैवल न० शी-विच् तथाभूतः सन् वलते वल-अच् । शैवाले (शेवाला) शब्दच० ।

शैवाल न० शेते विच् शेः-सन् वलते वल-संज्ञायां कर्त्तरि घञ् । १शैवाले शब्दर० । २आकाशमांस्यां स्त्री राजनि० ।

शेष पु० शिष-अच् । १अनन्ते सर्पराजे सर्पभेदे २बलदेवे च मेदि० । ३अवशेषे अमरः । ४गजे ५उपयुक्तेतरवस्तुनि अजयपालः । ६भगवतो कालसंज्ञमूर्त्तौ "एका भगवतो मूर्त्तिस्तामसीत्यपरा शिवाभिधा । वासुदेवाभिधाना सा गुणातीता सुनिष्कला । द्वितीया कालसंज्ञा च तामसी शेषसंज्ञिता । निर्दहन्ति सकलांस्त्रिलोके वैष्णवी परमा तनुः" कूर्मपु० ४८अ० । "शेषे ग्रहो" पा०सू० "उक्तादन्यः

शेषः" भाष्यादयः। परोद्देशेन प्रवर्त्तमाने ऽगुणीभूते अस्य लक्षणविषयादि मीमांसाकृतभाष्यादौ दर्शितं यथा "शेषः परार्थत्वात्" सू० "इह खल्वे शेषस्य लक्षणम्, शेषेण च हेतुना शेषः इत्युच्यते, तदुभयमाख्यायते। यः परस्योपकारे वर्त्तते, स शेषः इत्युच्यते, यथा, ये परार्थाः, ते बह्वारो भवन्ति, शेषभूता वयमिह इति। नन्वयोऽपि प्रधानभूतः सोऽपि कदाचित् परार्थे वर्त्तते, यथा उपाध्यायः प्रधानभूतः शिष्याणां विद्याविनयाधाने वर्त्तते। सत्यं वर्त्तते, यस्तु अत्यन्तं परार्थः, तं वयं शेषः इति ब्रूमः, यथा, गर्भदासः कर्मार्थं एव स्वामिनोऽनड्वांश्च क्रीयते, वक्ष्यति इत्येव। नन्वयं गर्भदासोऽपि स्वामी संविदधानो गुणभावमायात्। न इति ब्रूमः, आत्मन एवासौ संविदधानो गुणभावं गच्छति, नान्तरीयकत्वात् गर्भदासस्योपकरोति, अनड्वाहो वा, यत्त्वत्यन्तं परार्थः, तं वयं शेषः इति ब्रूमः। अथ तत्र किं दृष्टम्? यैस्तु द्रव्यं चिकीर्ष्यते कुशः तत्र प्रतीयेत इति, तत्र अपूर्वार्थता व्यावर्त्तिता, दृष्टप्रयोजनानामाख्यातानाम्। इह तु सर्वेषामेव शेषाणां लक्षणमुच्यते" शब०भा०। तस्य लक्ष्याणि तत्राह "द्रव्यगुणसंस्कारेषु बादरिः" सू०"बादरिराचार्यः अत्र द्रव्यगुणसंस्कारेष्वेव शेषशब्दः इति मेने, न यागफलपुरुषेषु। द्रव्यं क्रियार्थं, यदि प्रयोजनवती क्रिया, व्याप्तं सा द्रव्येण निर्वर्त्तयितव्या, तस्या निर्वृत्तिर्व्याप्ते न भवति इति तन्निर्वर्त्तने द्रव्यमेषितव्यं भवति, तस्मात् क्रियार्थं द्रव्यम्। गुणः शक्नोति विशिष्टं द्रव्यं चोदितं लक्षयितुम्, लक्षितेन च तेन प्रयोजनम्, विशिष्टस्य क्रियासाधनत्वात्, तस्मात् सोऽपि द्रव्यद्वारेण क्रियायाः उपकरोति इति क्रियार्थ एव। संस्कारो नाम स भवति, यस्मिन् जाते पदार्थो भवति योग्यः कस्यचित् अर्थस्य, तेनापि क्रियायां कर्त्तव्यायां प्रयोजनम् इति सोऽपि परार्थः। तस्मात् द्रव्यगुणसंस्काराः परार्थत्वात् शेषभूताः। न तु यागफलपुरुषाः। यागः तावत् कर्त्तव्यः पुरुषस्य, न ह्यं, तस्मिन् निर्वर्त्तिते किञ्चित् अपरमस्ति कर्त्तव्यम्। स हि पुरुषार्थः, यदन्यत् द्रव्यादि, तत् तदर्थं तस्य शेषभूतम्, स तु न किञ्चिदभिनिर्वर्त्तयितव्यम् क्रियते। फलमपि न तेन क्रियते, तस्मिन् तु सति अवश्यमेव तत् भवति। तस्मिन् सति फलवत्त्वं भवति इत्येतावत् गम्यते, नास्ति शब्दो यागेन क्रियते फलमिति। तस्मात् यागो न शेषभूतः कस्यचित् अर्थस्य। फलमपि न पुरुषं प्रत्युपदिश्यते, यः स्वर्गं कामयते, स यागं कुर्यादित्येतावत् शब्देनोपदिश्यते, नात्मनः परस्य वा इति, स्वर्गं प्रतीच्छामात्रेण स्वर्गकामः इति भवति, तस्मात् पुरुषं प्रति गुणभावेन न श्रूयते स्वर्गः, तस्मात् सोऽपि न शेषभूतः। न चेत् फलयागौ गुणभावेन चोद्येते, कस्य पुरुषः प्रधानभूतो भवति? प्रत्यक्षत्वाच्च द्रव्यत्वात् कर्म प्रति गुणभावः। तस्मात् द्रव्यगुणसंस्कारेष्वेव शेषभावं बादरिर्मेने" शब०भा०। "कर्मांगत्वेऽपि जैमिनिः, फलार्थत्वात्" सू० "जैमिनिस्तु खल्वाचार्यः कर्मांगत्वेऽपि शेषभूतानि मन्यते स्म, न बादरिरिवावधारणमनुमेने, स हि ददर्श, न यागः कर्त्तव्यतया चोद्यते, फलकामस्य तु तत्साधनोपादत्वेन इति। एवं श्रुतोऽर्थः परिगृहीतो भवितव्यं, अर्थवांस्त्वेषोपदेशः। एतमेवार्थं षष्ठेऽध्याये स्वतन्त्रैरेव साधयिष्यति। इह तु तत्सिद्धेनैव फलार्थत्वेन शेषभावं यागस्यापादयति स्म। तस्मात् अनवधार्या द्रव्यगुणसंस्काराः शेषभूताः यागोऽपि शेषभूतः फलस्मृति" भा०। "फलं च पुरुषार्थत्वात्" सू०। "फलमपि पुरुषं प्रत्युपदिश्यते, यः, स्वर्गो मे भवेत् इत्येवं कामयते, तस्य यागः न यः स्वर्गः, स आत्मानं लभेत इति। आत्मनेपदप्रयोगात्, कर्त्तृभिप्राये एतत् भवति, क्रियाफलमनुभवेत् कथं पुरुषः? इति यागः प्रयुज्यते। तस्मात् फलं पुरुषार्थं यागात् श्रूयते नात्मनिर्वृत्त्यर्थम्। तस्मात् शेषभूतम् इति" भा०। "पुरुषस्य कर्मार्थत्वात्" सू०। "पुरुषोऽयौदन्यौसम्यानादिषु गुणभूतः श्रूयते। तस्मात् अनवधारणा एषा, द्रव्यगुणसंस्कारेषु शेषत्वं बादरिर्मेने इति"। "अथ इदानीमत्रानुभयवान् दृष्टिकारः परिनिश्चिकाय, द्रव्यगुणसंस्कारेष्वेव नियतो यज्जिस्मृति शेषभावः, आपेक्षिक इतरेषाम्। यागस्य द्रव्यस्मृति प्रधानभावः, फलस्मृति गुणभावः, फलस्य यागस्मृति प्राधान्यम्, पुरुषस्मृति गुणता, पुरुषस्य फलस्मृति प्रधानता, औदुम्बरीस्मृतादि प्रति गुणत्वम् तस्मात् सम्यता अवधार्या, द्रव्यगुणसंस्कारा यागस्मृति नियमतो गुणभूता एव" भा०। क्वचित् शेषस्वलक्षणनिषेधो यथा "द्रव्यशेषं खानिशेषं यत् शेषं तथैव च। पुनःपुनः प्रवर्त्तन्ते तस्मात् शेषं न कारयेत्" गरुडपु०। "प्रसादाच्चिजनिर्मोक्षदाने शेषेति कीर्त्तिता" विष्णोक्ते स्वामिना प्रसादत्ते दासाल्ये स्त्री "तथेति शेषामिव भर्तुराज्ञाम्" कुमारः

शैषराचि स्त्री॰शेषं रात्रेः एकदेशिस॰। रात्रिशेषे शब्दच॰

शैषशयन पु॰ शेषः अनन्तः शयनमस्य। नारायणे तच्छयन॰ प्रकारकालादि कालिकापु॰ २७अ॰ उक्तं यथा "अनन्तस्तत्र गत्वा तु यत्र क्षीरोदसागरः। तत्र स्वयं श्रिया युक्तं सुप्रसन्नं जनार्दनम्। तस्योपधानमकरोदनन्तो दक्षिणं फणाम्। उत्तरां पादयोश्चक्रे उपधानं महाबलः। तालवृन्तं तदा चक्रे स शेषः पश्चिमां फणाम्। स्वयन्तु बीजयामास शेषरूपी जनार्दनम्। शङ्खं चक्रं नन्दकादिमुधौ द्वे महाबलः। ऐशान्या फणया चाथ स दधे गरुडं तदा। गदां पद्मञ्च शार्ङ्गं च तथैव विविधायुधम्। यानि चान्यानि तस्यासन्नान्यैशा फणया दधौ। एवं कृत्वा स्वकं कार्यं शयनीयं तदा हरेः। भूतभव्यजगन्नाथं परापरगतिं हरिम्। दधार शिरसानन्तः स्वयमेव स्वकां तनुम्। एवं ब्रह्मादिनम्रेव प्रसादेन निशां हरिः। सन्ध्यां च समधिप्राप्य शेते नारायणोऽव्ययः"। मनुना "शर्वरी तस्य तावती" इत्युक्तम्। "यदा स देवोजागर्त्ति तदेदं चेष्टते जगत्। यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते" इत्युक्तं तेन प्रलयकाले एव तस्य शयनम्।

शैव पु॰ शिवां तन्त्रमधीते वेत्ति वा अण्। १शिवा-मन्त्राध्यायिनि २तद्वेत्तरि च। वुन्। शिवकोऽप्यत्र।

शैखरिक पु॰ शिखरे प्राचीरादौ भवः ठक्। अपामार्गे अमरः।

शैखरेय पु॰ शिखरे भवः ढक्। अपामार्गे रत्नकोषः।

शैत्य न॰ शीतस्य भावः ष्यञ्। शीतत्वे।

शैथिल्य न॰ शिथिलस्य भावः ष्यञ्। अदृढे संयोगभेदे।

शैनेय पु॰ शिनेर्गोत्रापत्यम् ढक्। सात्यकिनाम्नि यादवे।

शैरीय पु॰ शिरा+छण्। नीलझिण्टिकायां रत्नमा॰। ढकञ् शैरेयक तत्रार्थे।

शैल न॰ शिलायां भवः अण्। १शैलेये गन्धद्रव्यभेदे। २ताक्ष्यशैले मेदि॰। ३शिलाजतुनि च राजनि॰। शिलाः सन्त्यस्य प्रज्ञा॰ अण्। ४पर्वते पु॰ अमरः। [राजनि॰।

शैलगन्ध न॰ शैलस्य शैलजस्येव गन्धोऽस्य। शालरचन्दने

शैलज न॰ शैले पर्वते जायते जन-ड। १स्वनामख्याते गन्धद्रव्यभेदे रत्नमा॰। २शैलजिन्यां स्त्रियां ४दुर्गा-यान्च स्त्री राजनि॰। [देवे त्रिका॰।

शैलधन्वन् पु॰ शैलं गिरितुल्यं धनुरस्य अनङ्स॰। महा-

शैलधर पु॰शैलं गोवर्द्धनं धरति धृ-अच्। श्रीकृष्णे धनञ्जयः।

शैलपत्त्र पु॰शैलमिव सुगन्धि पत्त्रमस्य। विल्ववृक्षे राजनि॰

शैलभित्ति पु॰ शैलं भिनत्ति भिद्-क्तिच्। टङ्के पाषाण-दारणास्त्रे जटा॰। [शैलाधिराजादयोऽप्यत्र।

शैलराज पु॰ शैलानां नगानां राजा टच् समा॰। हिमाचले

शैलराजसुता स्त्री हृत॰। हैमवत्यां पार्वत्यां "जाता शै-लेन्द्रगृहे सा शैलराजसुता ततः" देवीपु॰ ४५अ॰।

शैलवीज पु॰ शिलां तत्सदृशं दूरं धावति अण् शैलं वीजं यस्य। भल्लातके राजनि॰।

शैलशिविर न॰शैलानां नगानां शिविरमिव। मस्तके त्रिका॰।

शैलसार न॰ पु॰न॰शैलस्य सार इव। शिलाजतुनि राजनि॰

शैलसुता स्त्री हृत॰। १पार्वत्याम् २गङ्गायां च।

शैलाग्र न॰ शैलस्याग्रम्। पर्वतशृङ्गे त्रिका॰। [राजनि॰।

शैलाज न॰ शिलायां जायते जन-ड स्वार्थे अण्। शैलजे

शैलाट पुंस्त्री॰ शैलं पर्वतमटति अट-अण्। १सिंहे २किराते च स्त्रियां ङीष्। ३शुक्लवर्णकाचे ४देवले च पु॰ मेदि॰।

शैलादि पु॰ शिलादस्यापत्यम् इञ्। शिवपार्श्वचरे नन्दिनि

शैलालिन् पु॰ ब॰व॰ शिलालिना मुनिना प्रोक्त नटसूत्र-मधीयते त्रिनि। शैलूषेषु नटेषु अमरः।

शैलिक्य पु॰गर्हितं शैलमस्त्रमस्य ठन् शैलिकः स्वार्थे ष्यञ्। सर्वलिङ्गिनि पाषण्डे जटा॰।

शैली स्त्री॰ शैलमेव स्वार्थे ष्यञ् ङीपि वलोपः। १चारित्रे २सङ्केतभेदे च त्रिका॰ "आचार्यांणामियं शैली यतु-सामान्येनाभिधाय विशेषेण विष्टणोतीति" प्राञ्चः।

शैलूष पु॰ शिलूषस्यापत्यम् अण्। १नटे २विल्ववृक्षे अमरः ३धूर्त्ते ४तालधारके च शब्दर॰।

शैलूषिक पु॰ शैलूषं तदुपजीवनमन्वेष्टा ठक्। "वृत्त्यन्वेषी नटानान्तु स तु शैलूषिकः स्मृतः" ब्रह्मवै॰ उक्ते १नट-वृत्त्यन्वेषिणि नटप्रधाने २तत्कन्यायां स्त्री ङीष् "नटीं शैलूषिकीं चैव रजकीं वेणुजीविनीम्। गत्वा चान्द्रा-यणं कुर्यात् तथा चर्मोपजीविनीम्" संवर्त्तः।

शैलेन्द्र पु॰ शैलः इन्द्र इव। हिमालये। हृत॰। शैलेया-दयोऽप्यत्र। [राजनि॰।

शैलेन्द्रस्थ पु॰ शैलेन्द्रे हिमालये तिष्ठति स्था-क। भूर्जवृक्षे

शैलेय न॰ शिलायां भवः ढक्। १शैलजाख्ये गन्धद्रव्यभेदे हेमच॰। "शैलेयं शीतलं वृष्यं कफपित्तहरं लघु। कण्डूकुष्ठास्रदोषविषहृद्गुदरक्तहृत्" भावप्र॰। २पर्वतजातमात्रे त्रि॰। स्त्रियां ङीष्। ३सिंहे ४भृङ्गरे

च पुंस्त्री० शबरः० स्त्रियां ङीष्। ५शिलातुल्ये शब्दर०। ६पार्वत्यां स्त्री ङीप्।

शैलोद्भवा स्त्री शैलं पर्वतमुद्भिद्य भवति उद्+भू-अच्। १चुक्रपाषाणभेदिनि वृक्षे राजनि० २पार्वत्याञ्च।

शैव न० शिवमधिकृत्य कृतो ग्रन्थः अण्। वेदव्यासप्रणीते शिवप्रभाववर्णनात्मके १महापुराणभेदे। शिवो देवताऽस्य अण्। २शिवभक्ते त्रि०। तस्येदमण्। ३शिवसम्बन्धिनि त्रि० ४शैवले न० शब्दच०।

शैवञ्च महापुराणं वायुना प्रोक्तत्वात् वायवीयलक्षणाक्रान्तम् अतएव "अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते। ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा" इत्यादि० भ० विष्णु०"शैवं यद्वायुना प्रोक्तम्" तत्रैव कालिकापु० उक्तम्। हेमाद्रौ० मत्स्यपुराणे तु चतुर्थं वायवीयत्वेन पठित्वा "श्वेतकल्पप्रसङ्गेन धर्मान् वायुरिहाब्रवीत्। तत्र यद्वायवीयं स्याद्वृत्रमाहात्म्यसंयुतम्। चतुर्विंशतिसाहस्रं पुराणं तदिहोच्यते। आवण्यां आवणे मासि गुडधेनुसमन्वितम्। यो दद्याद्विधिसंयुक्तं ब्राह्मणाय कुटुम्बिने। शिवलोके स गूढात्मा कल्पमेकं वसेच्चरः" तथा च शिवमाहात्म्यवेदकत्वाच्छैवमिति तस्य नामान्तरं विष्णु०उक्तम्। वायुना प्रोक्तत्वाच्च वायवीयमिति नामान्तरमिति बोध्यम्। तत्प्रतिपाद्यविषयाश्च नारदीयपु० उक्ता यथा "शृणु वत्स! प्रवक्ष्यामि पुराणं वायवीयकम्। यस्मिन् श्रुते लभेद्ब्रह्म रुद्रस्य परमात्मनः। चतुर्थविंशतिसाहस्रं तत्पुराणं प्रकीर्त्तितम्। श्वेतकल्पप्रसङ्गेन धर्मान् वायुरुवाच ह। तद्वायवीयमुदितं भागद्वयसमाचितम्" तत्र पूर्वभागे "सर्गादिलक्षणं यत्र प्रोक्तं विप्र! सविस्तरम्। मन्वन्तरेषु वंशाश्च राज्ञां ये तत्र कीर्त्तिताः। गयासुरस्य दमनं विस्तरात् यत्र कीर्त्तितम्। भागानां चात्र माहात्म्यं भाद्रशुक्लं फलाधिकम्। दानधर्मा राजधर्मा विस्तरेणोदितास्तथा। भूपातालककुब्व्योमचारिणां तत्र निर्णयः। व्रतादीनां च पूर्व्योक्तं विभागः समुदाहृतः"। उत्तरभागे "उत्तरे तस्य भागे तु नर्मदातीर्थवर्णनम्। शिवस्य संहिताख्या वै विस्तरेण मुनीश्वर!। यो देवः सर्वदेवानां दुर्विज्ञेयः सनातनः। स तु सर्वात्मना यस्मात्क्षीरे तिष्ठति सन्ततम्। इदं ब्रह्मा हरिरिदं साक्षाच्चेदं परो हरः। इदं ब्रह्म निराकारं कैवल्यं नर्मदाजलम्। ध्रुवं लोकहिताथाय शिवेन स्वशरीरतः। अक्षिभ्यां किल हरिरूपा वैष्णवयमवतारिता। ये वसन्त्युत्तरे कूले रुद्रस्यानुचरा हि ते। वसन्ति याम्यतीरे ये लोकं ते यान्ति वैष्णवम्। ओङ्कारेश्वरमारभ्य यावत् पश्चिमसागरम्। सङ्गमाः पञ्च च त्रिंशदेतेषां पापनाशनाः। दशैकसप्तरे तीरे त्रयोविंशतिर्दक्षिणे। पञ्चत्रिंशत्तमः प्रोक्तोरेवासागरसङ्गमः। सङ्गमैः सहितान्येवं रेवातीरद्वयेऽपि च। चतुःशतानि तीर्थानि प्रसिद्धानि च सन्ति हि। सप्ततीर्थसहस्राणि सप्तकोट्यो मुनीश्वर!। सन्ति चान्यानि रेवायाक्षीरयुग्मे पदे पदे। संक्षिप्तेयं महापुण्या शिवस्य परमात्मनः। नर्मदाचरितं यत्र वायुना परिकीर्त्तितम्। लिखित्वेदं पुराणन्तु गुडधेनुसमन्वितम्। श्रावण्यां यो ददेत् भक्त्या ब्राह्मणाय कुटुम्बिने। रुद्रलोके वसेत् सोऽपि यावदिन्द्राश्चतुर्दश। यः श्रावयेद्वा शृणुयात् वायवीयमिदं नरः। नियमेन हविष्याशी स रुद्रो नात्र संशयः"। ५वसुके हृषीकेशूरे पु० राजनि० ७आचारभेदे पु० "अष्टाङ्गयोगसंयुक्तो यजेद्देवीं विधानतः। यावद् ध्यानं समाधिश्च तावत् शैवं प्रचक्षते" आचारभेदतन्त्रम्। तदुपासकभेदाश्च शिवशब्दे वामनपु० उक्ता द्रष्टव्याः।

शैवल न० शी-वलच्। १पद्मकाष्ठे २शैवाले च पु० मेदि०। "वहतो वक्त्रशैवलच्छलताम्" नैषधम्।

शैवलिनी स्त्री शैवलानि सन्त्यस्याः इनि। नद्याम् अमरः

शैवाल न० शी-वालच्। (शेओयाला) जलजाते पदार्थभेदे अमरः। अस्य पृषो० दन्त्यादित्वमपि "सेवालकाङ्क्षन्रलतामधुना बिभर्त्ति" इति श्रीहर्षः।

शैव्य पु० शिबेर्गोत्रापत्यम् ञ्य। १शिबिगोत्रजे राजभेदे "शैव्यश्च नरपुङ्गवः" इति गीता। शिबितोऽधिगतः ञ्य। २घोटकफाले ३श्रीकृष्णस्य घोटके च स्त्रियाम्।

शैशव न० शिशोर्भावः अण्। शिशुकाले अवस्थाभेदे अमरः

शैशिर पुंस्त्री०शिशिरं शिवत्वेनास्त्यस्य अण्। १ग्रामभेदे राजनि० स्त्रियां ङीष्। शिशिरे भवः अण्। २शिशिरजाते त्रि०। स्वार्थे अण्। ३शिशिरे न०। "तत्पक्षपातौ शैशिरादृतुः" श्रुतिः। [ध्यापनायां त्रि०कौ०]

शैष्योपायिका स्त्री शिष्योपाध्याययोः कर्म वुञ्। शिष्यप्रयोजने दि०प०सक०अनिट्। श्यति अशात् अशासीत्।

शो तीक्ष्णीकरणे दि०प०सक०अनिट्।

शोक पु० शुच-घञ्। दुःखातुरे चित्तभेदे अमरः। ल्युट् शोचनसमत्र न०।

शोकनाश पु०शोकं नाशयति नश-णिच्-अच्। १अशोकवृक्षे राजनि०। नश-भावे घञ्। हृत०। २शोकध्वंसे।

शोकहारी स्त्री० शोकं हरति हृ-अण् ङीप्। वनवर्वरिकायां राजनि०।

शोकारि पु० ६त०। कदम्बवृक्षे शब्दच०। [च अमरः।

शोचिष्केश पु० शोचिः केशरत्व यस्य। १वह्नौ २चित्रवृक्षे

शोचिस् न० शुच-इसि। १प्रभायां २रोचिषि च अमरः।

शोच्य त्रि० शुच-ण्यत्। १क्षुद्रे २अवरे शब्दच० ३अनुकम्पनीये च। स्वार्थे क। तत्रैव। [इत्येव पाठः साधुः।

शोटीर्य न० शुटीरस्य भावः यत्। वीर्ये शब्दच०। शौटीर्य

शोठ त्रि० शुठ-आलस्ये स्फोटने वा घञ्। १मूर्खे २अलसे मेदि०। ३धूर्ते ४नीचे ५वाराहवृते पुंस्त्री० शब्दच०। स्त्रियां ङीप्। [ऋदित् चक्रि न शुलः।

शोण गतौ सक०वर्षे अक०आ०पर०सेट्। शोणति अशीशोत्

शोण न० शोण-अच्। १सिन्दूरे २रुधिरे च राजनि०। ३रक्तलोहे ४शोणाकभेदे राजनि०। ५अरुणे अश्वे हेमच० ७चित्रके तदभेदे च च अमरकण्टकहेमगतः पाटलिपुत्रवास्तिशब्दे गङ्गायां निपतः। ६रक्तवर्णे पु० १०सदृति त्रि० मेदि०। ११सप्तदृभेदे धरणिः।

शोणक पु० शोणस्य वायति कै-क। शोणाकवृक्षे अमरः।

शोणभिण्टिका स्त्री कर्म०। १शोणभिण्टायां २रक्तझैरेये राजनि०। [न्याञ्च राजनि०।

शोणभिण्टी स्त्री शोणा भिण्टीव। १कुरुवके २कण्टकि

शोणपक्ष पु० शोणं पक्षमस्य। १रक्तपुनर्नवायां राजनि०। २रक्तपक्षयुते त्रि०। [२रक्तशुकसमन्विते त्रि०।

शोणपुष्पक पु० शोणं पुष्पमस्य कप्। १कोविदारे राजनि०

शोणपुष्पी स्त्री शोणं पुष्पमस्याः ङीप्। सिन्दूरपुष्प्यां राजनि०

शोणरत्न न० कर्म०। पद्मरागमणौ अमरः। [शब्दमा०।

शोणाक्ष न० शोणं रक्तवर्णमक्षति अक्ष्। (शोणा) शुपभेदे।

शोणित न० शोण-इतच्। १रुधिरे तद्वर्णे २रक्तवर्णे पु० २तद्वति त्रि० अमरः। ३शुक्रे न० राजनि०।

शोणितचन्दन न० शोणितं रुधिरमिव चन्दनम्। रक्तचन्दने राजनि०। [लिका०।

शोणितपुर न० शोणितमिव रक्तं पुरम्। बाणासुरनगरे

शोणोपल पु० कर्म०। माणिक्ये मणौ राजनि०।

शोथ इ० शु-घञ्। कफपादादेः स्फीतताकारके रोगभेदे

तस्य लक्षणादिकं भावप्र० उक्तं यथा

"अथ शोथाधिकारः। तत्र शोथस्य विप्रकृष्टं निदानमाह "शुक्रातपव्यायामक्रुधाबलानां वाराङ्गनौष्ठोष्ण गुरूपसेवनात्। दुष्टाम्बुदक्लाकविरोधिपिष्टसरोपसृष्टाम्बुनिषेवणाच्च। अर्शांसचेष्टा वसुधोक्षयुद्धिमर्मोभिघातो विषमा प्रवृत्तिः। मिथ्योपचारः प्रतिकर्मणाञ्च निजस्य हेतुः स्वयथोः प्रदिष्टः"। शुक्रं वक्ष्यमाणविकारेषु। आतपात् पाण्डुरोगादयः। अभक्ष्यं अभोजनम्। आमः अपक्को भुक्तस्य रसः। पिष्टैरोपसृष्टाम्बुम् पिष्टो योगरः संयोगजं विषं तेन संसृष्टमम्बु। वसुधोक्षयुद्धिः शोधनार्हस्य वसुधोऽशोधनम्। मर्मोपघातः दण्डहत एव ज्ञेयः। बाह्यहेतुजस्तु मर्मोपघात आगन्तुजशोथ हेतुरेव। विषमा प्रवृत्तिः आमगर्भपतनादिका। प्रतिकर्मणां वमनादिपञ्चकर्मणाम् मिथ्योपचारः असम्यक्करणम्। स्वयथोः शोथस्य निजस्य आत्मीयस्य वक्ष्यमाणस्य हेतुर्घातादिरुक्तः। अथ शोथस्य संप्राप्तिपूर्वकं सामान्यं लक्षणमाह "रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् बहिःसिराः। नीत्वा रुजगतिस्तैस्तैः कुर्यात्स्वगुणसंश्रयम्। उन्नतिं संहतं शोथं तस्माद्धिनिचयादतः। सगौरवं स्यादमर्दस्तत्वं शोतुर्यथास्वाय सिरातनुत्वम्। सशोमहर्षस्तु विदर्पता च सामान्यलिङ्गं स्वयथोः प्रदिष्टम्"। उन्नतिं उच्चतत्वम्। किंविशिष्टमुन्नतिमत आह पूर्वोक्तात् निचयात् रक्तपित्तकफजातानां सतु दोषात् संहतम् घनम्। तस्योन्नतिं शोथनाङ्गरित्यन्वयः। तस्य शोथस्य किं स्यादित्याकाङ्क्षायामाह। अनवस्थितत्वं स्यात् अनियता स्थितिः स्यादित्यर्थः चिकित्सान्तरेणापि निहन्तेः। तच्चानवस्थितत्वं सगौरवं स्याच्छैरवमप्यनवस्थितं स्यात्। अथ च शोतुः शोथः स्यात्। उन्नतत्वमप्यनवस्थितं स्यादित्यर्थः। वातिकं शोथमाह "खरत्वतुत्वकपरुषोऽरुणोऽसितः प्रसुप्तिरुर्णाकिणतो निमित्ततः। प्रसार्यते प्रोच्चलति प्रपीड़ितो दिवा बली स्यात्स्वयथुः समीरणात्"। खरः अस्थिरः। प्रसुप्तिः सुप्तता। ऊर्णाऽत्र (झिनि झिनी) रोमाञ्चो वा। आर्त्तिः पीड़ा एतद्युतः दिवा बली विकृतिविषमसमवायारब्धत्वात्। अतएवोक्तम् "श्लेष्मोष्मवमनाद्यैर्यः प्रशाम्येत स वातिकः। यथास्वरूपवर्णः स्याच्छ्यावमक्तं प्रशाम्यति"। अथ पैत्तिकमाह "श्वयुः सगन्धोऽसितपीतरागवान् सज्वरस्तृदोषमदान्वितः। य उच्यते सर्षपकोऽल्परागवान् स पित्तशोथो झगदाक्षपाकवान्"। उच्यते लक्ष्यते। झगदाक्षपाकवान् शीघ्रं पाकक्षतयुक्तः। श्लैष्मिकमाह "गुरुः स्थिरः पाण्डुरोचकान्वितः प्रसेकनिद्रावमथक्लमान्वितः। सकण्डु-

लक्षणप्रशमो निपीडितो नचाङ्गमिङ्गावियती कफात्मकः" । द्वन्द्वजमाह "निदानाकृतिसंसर्गात् ज्ञेयः शोथो द्विदोषजः" । सान्निपातिकमाह "सर्वाकृतिः सन्निपाताच्छोथोव्याभिश्चलक्षणः" । व्याभिश्चलक्षण इत्युक्तेः सर्वाकृतिरिति उक्तवातजादिशोथसकललक्षणनियमार्थम् । अथाभिघातजमाह "अभिघातेन शस्त्रादिच्छेदभेदव्यतादिभिः । हिमानिलोदध्यनिलैर्भल्लातकपिकच्छुजैः । रसैः शूकैश्च संसर्गाच्छ्यथुः स्याद्विसर्पवान् । अशोष्ण लोहिताभासः प्रायशः पित्तलक्षणः" । छेदः खड्गादिना भेदः पाषाणादिना । क्षतं शरादिना माड्रीघ्न्यादि च । आदिशब्देन लगुडप्रहारादि गृह्यते । भल्लातजैः रसैः कपिकच्छुजैः शूकैः विसर्पवान् प्रसरणशीलः पित्तलक्षणः पैत्तिकशोथलक्षणः । अथ विषजमाह "विषजः सविषप्राणिपरिसर्पणमूत्रणात् । दंष्ट्रादन्तनखाघातादविषप्राण्यवामपि । विषमूत्रशुक्रोपहतसलिलद्रव्यसङ्करात् । विषदूषीविषस्यांङ्गरयोगावधूननात् । महत्त्वशोऽपलम्बी च शीघ्रो बहूदकाकरः" । परिसर्पणात् शरीरोपरि सञ्चरणात् । दंष्ट्रा हिंस्रपशूनां दन्तावलिः । (चोङ्ग) इति लोके । दन्ताः आस्ये भवाः । आवश्यकाणिनामपीत्यनेन दंष्ट्रादन्तनखानां स्वभावादेव सविषत्वं किन्तु सर्पादिविषं मारकं भवति सविषप्राणिनां दंष्ट्रादिविषं शोथव्यथादिकरं भवतीति विशेषः । विण्मूत्रेत्यादि । विड़ाद्युपहतं मलिनञ्च यद्द्रव्यं तथा सङ्करः सम्पर्कात् । गरयोगावधूननात् गरः संयोगजं विषं तस्य योगो यस्य तेन वस्तुनाऽवधूननात् । अवलम्बी लम्बनात् । अयमर्थागन्तुजस्यापि सामान्यागन्तुजशोथाधिकृतत्वातोऽस्य विशिष्टाधिकृतत्वाभिधानाय पृथक् पठितः । यत्र स्थिता दोषा यत्र शोथं कुर्वन्ति तदाह "दोषाः त्रयश्चर्म हि कुर्वन्त्याशये स्थिताः । पित्ताशयस्य मध्ये तु वर्चःस्थानगतास्त्वधः । अतस्ते देहमुत्प्राप्य द्रुतं सर्वसरं तथा । ऊर्ध्वं उरःप्रदेशत्वूर्ध्वम् । मध्ये उरःपक्वाशयमध्ये । अधः पक्वाशयादधः । उपद्रवानाह "छर्दिस्तृष्णोऽरुचिस्तृष्णा ज्वरोऽतीसार एव च । सम्यक् श्वासदौर्बल्यं शोथ इते उपद्रवाः" । तत्र शोथासाध्यत्वमाह "श्वासः पिपासा छर्दिश्च दौर्बल्यं ज्वर एव च । यस्य चाङ्गे कृच्छ्रात्तिं शोथिनस्तं विवर्जयेत्" । स्वार्थे क । तत्रार्थे शब्दर्थ० ।

शोथघ्नी स्त्री शोथं हन्ति हन-टक् ङीप् । १पुनर्नवायाम् अमरः । २शालपर्ण्यां राजनि० । ३शोथनाशके औषधमात्रे त्रि० ।

शोथजित् पुं० शोथं जयति जि-क्विप् । भल्लातके रत्नमा० । [वायां त्रिका० ।

शोथजिह्म पुं० शोथे जिह्मः विपरीताचरणशाली । पुनर्न-

शोधन न० शुध-णिच्-ल्युट् । १शौचे २विद्यायां शब्दर० । ३कांसीसे राजनि० । ४मलादिविरेचने ५दोषनिवारणे ६क्षपणादिनियंतने च । शुध-णिच्-ल्यु । ७निस्यूके पुं० राजनि० । ८शुद्धिकारके त्रि० । शुध्यत्यनया करणे ल्युट् ङीप् । ९सम्मार्जन्यास् स्त्री अमरः । १०ताम्रमूलवल्लयां ११नील्याञ्च स्त्री ङीप् । १२विहितविहितसमादिविचारणे न० "सूर्यग्रहणकालेन समानो नास्ति कश्चन । यत्र यदुपतं सर्वमनन्तफलदं स्मृतं । न मासतिथिवारादिशोधनं सूर्यपर्वणि" भल०त० । दोषनिवारणस्य धातुविशेषस्य द्रव्यान्तरेण संयोजनम् "पक्वबीजतपत्त्राणि हेम्नो वङ्गो प्रतापयेत् । निक्षिपेत् तप्ततप्तानि तैले तक्रे च कांजिके । शोधयेत् च कृत्वात्यानां कथये तु त्रिधा त्रिधा । एवं हेम्न परित्याज्य धातूनां शोधनं भवेत्" इत्यादिप्रकारेण शास्त्रादीनां दोषनिवारणम् । १३व्रणादेः क्लेदपूयाद्युपसारणे च "व्रणस्य स्रविणुद्वस्य क्वाथः शुद्धिकरः स्मृतः । घटोनिम्बपत्त्रस्य सर्वत्रैव प्रयुज्यते । पातिके दधमूलानां क्षीरिणां पैत्तिके व्रणे । आरग्वधादेः कफजे कथयाः शोधनं मतम्" । १४पाण्डुलेख्यादेर्दोषनिवारणे भाषाशब्दे दृश्यम् । १५भाव्याङ्गत्वे भावकस्य स्मरणे ।

शोधनीबीज न० ६त० । जयपाले राजनि० ।

शोधित त्रि० शुध-णिच्-क्त । मलाद्यपसारणेन १जातसंस्कारे २मार्जिते अमरः ।

शोफ पुं० शु-फन् । शोथे अमरः । शोथशब्दे दृश्यम् ।

शोफघ्नी स्त्री शोफं हन्ति हन-टक् ङीप् । १शालपर्ण्यां २रक्तपुनर्नवायाञ्च राजनि० । [राजनि० ।

शोफनाशन पुं० शोफं नाशयति नश-णिच्-ल्यु । नीलझिण्टे

शोफहृत् पुं० शोफं हरति हृ-क्विप् । भल्लातके भावप्र० ।

शोभन न० शोभते शुभ-ल्यु । १पद्मे शब्दमा० । विष्कम्भादिषु २पञ्चमे योगे पुं० ज्यो०त० । ३शोभायुक्ते त्रि० । ४सुन्दरे त्रि० ५यवे पुं० धरणिः ।

शोभनक पुं० शोभनाय कायति कै-क । शोभाञ्जनवृक्षे शब्दर०

शोभना स्त्री शोभयति लेपनात् शुभ-णिच्-ल्यु । १हरिद्रायां २गोरोचनायाञ्च राजनि० ।

शोभा स्त्री शुभ-अ । १दीप्तौ "सा शोभा रूपभोगाढ्यैर्यत स्यादङ्गविभूषणम् । शोभैव कान्तिराख्याता मन्मथाप्यायनोज्ज्वला" उज्ज्वलनगयुक्तार्थे च २गोपीभेदे ब्रह्मवै०प्र० ६अ० । ३हरिद्रायां ४गोरोचनायां राजनि० ।

शोभाञ्जन पु० शोभायै अञ्जयति अञ्जन-ल्युट् । (सजना) वृक्षे अमरः "तद्वीजं श्वेतमरिचं मधुशिग्रुः स कोचितः । शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः । दीपनो रोचनो रूक्षः कफवित्तो विदाहकृत् । संधानशुक्लो हृद्यः पित्तरक्तप्रकोपणः । चक्षुष्यः कफवातघ्नो विद्रधि स्वघ्नकृमीन् । मेहोदरार्शोविषगुल्मकण्डूव्रणान् हरेत् । श्वेतः शोफघ्नो रक्तो विशेषात् दाहकृत् भवेत् । मूलोद्भवं विद्रधिं हन्ति व्रणघ्नः पित्तरक्तकृत् । रक्तशिग्रुः शोफघ्नो विशेषाद्दीपनः परः । शिग्रुवत्कवयस्त्वाणां खरसः परमार्त्तिकृत् । चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम् । हृद्यं कफवातघ्नं तच्छुष्कं तु गिरोत्तिनुत् । शिग्रुशाकं स्निग्धं स्वादु चक्षुष्यं वातपित्तहृत् । कंचुकं सुकृतं स्निग्धं रूक्षं कटुकमिष्यते । शिग्रोः पुष्पन्तु कटुकं स्निग्धोष्णं स्वादुशोधनम् । कृमिहृत् कफवातघ्नं विद्रधिश्लीपदापहम् । शोभाञ्जनफलं स्वादु कषायं कर्कशं गुरु । मूलकृच्छ्रवयश्वास गुल्महृत् दीपनं परम् भावप्र० । अधिकं शिग्रुशब्दे दृश्यम् ।

शोभी स्त्री शुभ-अच् पृषो० ङीष् । वनहरिद्रायां राजनि० ।

शोष पु० शुष-घञ् । १धातादिना रसाद्यपहारेण कठिनताकरणे । शोषयति शुष-णिच्-अच् । २यक्ष्मरोगे मेदि० ।

शोषण न० शुष-ल्युट् । १रसाकर्षणे क्लेमच० । २शोषयत्यर्थे च शोषयति शुष-णिच्-ल्यु । "उन्मादनः शोषणश्च तापनः स्तम्भनस्तथा । मारणश्चेति विज्ञेयाः कामस्य पञ्च सायकाः" इत्युक्ते स्मरशरभेदे अटा० । ४शोषकर्त्तरि भावप्र० । ५शुण्ठ्यां राजनि० ।

शोषसम्भव न० सम्भवत्यस्मात् सम्+भू-अप् ६त० । पित्तज्वरे राजनि० । [राजनि० । २शोषनाशके त्रि० ।

शोषापहा स्त्री शोषमपहन्ति अप+हन-ड । १क्षीतनके

शौक न० शुकानां समूहः अण् । १शुकसमूहाये अमरः । शुकोऽस्यत्र यः । स्वार्थे २करणभेदे राजनि० ।

शौकर न० शूकरस्य वराहस्येदम् अण् । १शौकरवे तीर्थभेदे वराहपुराणम् । २शूकरसम्बन्धिनि त्रि० स्त्रियां ङीप् ।

शौकरव न० तीर्थभेदे "परं शौकरवं स्थानं सर्वसंसारमोक्षणम् । यत्र संस्था च मे देवि हृद्धृतापि रसातलात् । यत्र भागीरथी गङ्गा मम शौकरवे स्थिता" वराहपु० ।

शौक्तिकेय न० शुक्तिकायां भवम् ढक् । शुक्तायां राजनि० ।

शौक्तेय न० शुक्तौ भवम् ढक् । शुक्तायां राजनि० ।

शौक्ल्य पु० शुक्लस्य भावः ष्यञ् । श्वेततायां श्वेतवर्णे ।

शौच न० शुचेर्भावः अण् । १शुद्धौ पवित्रतायाम् "अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः । स्वधर्मे च व्यवस्थानं शौचमित्यभिधीयते" इति दक्षस्मृक्ते २धर्मविशेषे च "सर्वेषामेव शौचानामर्थशौचं विशिष्यते । योऽर्थेष्वशुचिः शुचिः शौचाच्च सदा वारिणा शुचिः । मृज्जलैः शौचं मनःशौचं शौचमिन्द्रियनिग्रहः । सर्वभूतदया शौचं जलशौचन्तु पञ्चमम् । यस्य सत्यञ्च शौचं च तस्य स्वर्गो न दुर्लभः" गारुडे ११० अ० ।

मृदादिशौचप्रकारस्तु आ०त० दर्शितो यथा देवलः "धर्मविद्वह्निणं दृष्ट्वा शौचे न योजयेत् । सद्यैव वामहस्तेन नाभेरूर्द्धं न शोधयेत् । प्रकृतिस्थितिरेषा स्यात् कारणादुभयक्रिया" । कारणाद्भागादेः । ब्रह्मपुराणे "उद्धृतोदकमादाय मृत्तिकाञ्चैव वाग्यतः । सदङ्गुष्ठो दिवा कुर्यात् रात्रौ चेद्विगणासुखः । सुश्चिर्णिक्ते मृदं दद्यात् मृदन्ते त्वप एव च । दातव्यमृदकं तावद् यावत् स्यात् मृत्तिकात्रयम् । कुर्यात् शौचमिति शेषः । सुनिर्णिक्ते भरद्वाजोक्तचोद्दादिप्रमृदे गुदे । उदकपात्राभावे करेण जलाशयादुदकमुद्धृत्यमाह आदित्यपु० "रात्रिशेषं जलं त्यक्त्वा कुर्यात् शौचमनुद्धृते । पश्चात्र शोधयेत्तीर्थमन्यथा न शुचिर्भवेत्" । वस्तुतः प्रदेशे शौचं कर्त्तव्यं तस्मादरत्निमात्रव्यवच्छिन्नं जलं तत् स्वयमेव तीर्थं जलसमीपत्वात् । विष्णुपु० "वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा । शौचावशिष्टां मेढ्राच्च नाद्यात् लेपसमुद्भवाम् । अन्तःप्राग्ग्रवपद्माच्च हलोत्खातां सकर्दमाम्" । मनुश्च "एका लिङ्गे गुदे तिस्रो दश वामकरे तथा । उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता" । उभयोः करयोः । विष्णुपु० "एकालिङ्गे गुदे तिस्रो दश वामकरे तथा । हस्तद्वये च सप्तास्या मृदः शौचोपपादिकाः" । यमः "लिङ्गे त्वेका गुदे तिस्रो वामहस्ते चतुर्दश । ततः पुनश्चाभ्यासेन दातव्याः सप्त मृत्तिकाः" । पैठीनसिः "मृत्तिकां कण्टस्थ एका

लिङ्गेऽपाने पञ्च एकस्मिन् हस्ते दश उभयोः सप्त" इत्यादि। एतासां संख्यानां दक्षादुक्ताधिक्यं मत्वादनुष्टत्तिमनुरुध्य व्यवस्थेयम्। वामहस्ते दशदानानन्तरं ततृष्टे षड्दानमाह हारीतः "दश मध्ये च षट् पृष्टे इति"। शङ्खदक्षौ "तिस्रस्तु मृत्तिका देयाः कृत्वा नखविशोधनम्। तिस्रस्तु पादयोर्देयाः शुद्धिकामेन नित्यशः"। नखशोधनं हस्तादिना नखान्तर्मलशोधनम्, तिस्र इति हस्तयोरिति शेषः। पादप्रक्षालनं कांस्ये न कर्त्तव्यमित्याह विष्णुधर्मोत्तरम् "दर्वेण भाजनेन पादौ न च कांस्येन धावयेत्"। दक्षः "लिङ्गे तत्र समाख्याता त्रिपवी पूर्यते यया। अर्द्धप्रकृतिमात्रा तु प्रथमा मृत्तिका स्मृता। द्वितीया च तृतीया च तदर्द्धार्द्धं प्रकीर्त्तिता"। यदा तु उक्तप्रमाणया मृदा गन्धलेपक्षयो न भवति तदा अधिकापि ग्राह्या। "गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः" इति याज्ञवल्क्यात्। गुदादन्यत्र परिमाणमाह यमः "मृत्तिका तु वसुहिता त्रिपवी पूर्यते यया"। त्रिपवी तर्जनीमध्यमाग्रसिकानामग्रत्रयम्। मूलमाह स्मृतिः "एका लिङ्गे मृदं दद्यात् वामहस्ते तु सप्तमी। उभयोर्हस्तयोर्दद्यात् मृत्शौचं प्रकीर्त्तितम्"। ब्रह्मपुराणे "पादयोर्द्वे मृदो धृत्वा च सप्रक्षालितपाणिवान्। द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं समाहितः"। पादयोर्द्वे एकैका। इदं मूत्रोत्सर्गे, पुरीषोत्सर्गे तिस्रश्चेति विधानात्। दक्षः "यद्येतदिह शौचं मृदं रात्रौ विधीयते। आतुरे तु तदर्द्धं स्यात्तदर्द्धं तु पथि स्मृतम्"। यद्येतदुक्तप्रमाणमृद्ग्रहणं तदा नियादिपुरस्कारेणैव वाक्यस्याहृदार्थतापत्तेः। आपस्तम्बः "यदि पादस्थं विण्मेध्यं मार्त्तः कुर्यात् यथाकालम्"। एतयोर्विरोधे आर्त्तानार्त्ताभ्यां परिहरणीयः। दक्षशौचाधमौ "देहं कायं तथात्मानं दृष्ट्वा दृष्टप्रयोजनम्। उपपत्तिमवश्यात्तु ज्ञात्वा शौचं प्रकल्पयेत्"। ब्रह्मपुराणे "न ह्यावदुपलीयेत द्विजः मृद्भस्मवारिणा। गन्धलेपक्षयकरं शौचं तेजो विलीयते। प्रमाणं शौचसंख्या वा न शिष्टैरुपदिश्यते। यावत् शुद्धिं न मन्येत तावत् शौचं समाचरेत्। न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता। प्रायश्चित्तं प्रयच्छेत विहितातिक्रमे सति। शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः"। गन्धलेपक्षये सत्यधिकं न कर्त्तव्यं याज्ञवल्क्यविरोधात्। गन्धलेपाभावे त्वधिकसंख्यमपि याज्ञवल्क्यवचनमनुपनीतादिपरं वा। आपस्तम्बः "शौचन्तु द्विविधं प्रोक्तं बाह्यमभ्यन्तरन्तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिरथान्तरम्। मक्षिकातोयेन संस्पर्शेन सूत्रपुरीषैश्च नगोपमैः। आस्रष्टयोः स्रोतसश्चैव भावदुष्टो न शुद्ध्यति"। स्मृतिः "धावन्तञ्च नमस्कुर्य्यात् मूत्रोत्सर्गतनत्यजा। भुञ्जानश्चाचमनार्हञ्च नास्तिकं नाभिभाषयेत्। अन्यप्रभृति यत्किञ्चित् चेतसा धर्ममाचरेत्। सर्वं तत्निष्फलं याति एकस्मिन्नभिभाषणात्"। कूर्म्मपुराणे: "यस्मिन् स्थाने कृतं शौचं वारिणा तन्निशोधयेत्। न शुद्धिस्तु भवेत्तस्य स्मृतिज्ञो यो न शोधयेत्"। आचमनानन्तरं हारीतः "शौचेन स्नात्वा वा कमण्डलुं प्रक्षाल्य पूर्ववदुपस्पृश्य आदित्यं शोधयन्मिं वा वीक्षेत" इति। अत्र मार्जनानन्तरं स्नानमन्यत्र तथा दर्शनात्। आचमनानन्तरं सूर्य्यादिदर्शनं यथास्मृत्यम्"।

शौट सर्वे भ्वा॰पर॰ अक॰ सेट्। शौटति अशौटीत्। क्वादित्वे चङि न ह्रस्वः। [त्रि॰ सि॰कौ॰]

शौटीर पु॰ शौट–ईरन्। १त्यागिनि २वीरे च शब्दरत्नावली

शौटीर्य्य न॰ शौटीरस्य वीरस्य भावः ष्यञ्। १धीर्य्ये २पराक्रमे शब्दरत्नावली च। [शौण्डति अशौण्डीत्।

शौण्ड सर्वे भ्वा॰ पर॰ सक॰ सेट् क्वादित्वे चङि न ह्रस्वः।

शौण्ड त्रि॰ सुराद्यासक्तिरतः अण्। १मत्ते अमरः। २दक्षे च "सप्तमी शौण्डैः" पा॰। ७त॰। दानशौण्ड टानदक्षे।

शौण्डिक पु॰ शुण्डा सुरा पण्यमस्य ठक्। १मद्यविक्रेतरि २जातिभेदे पुंस्त्री अमरः स्त्रियां ङीष्। "ततो मां स्त्रिकस्त्वावां कैवर्त्तादेव शौण्डिकः" पराशरपद्धतिः।

शौण्डिन् त्रि॰ शुण्डा इतरच् अण् शौण्ड तत्पर्य्यायश्च इनि। शौण्डिके शब्दर॰।

शौण्डी स्त्री शुण्डा करिकरसदृशाकारः अस्त्यस्या अच्, गौरा॰ ङीष्। १पद्मे २गजपिप्पल्याञ्च विश्वः।

शौण्डीर पु॰ शुण्डा गर्वोऽस्त्यस्य ईरन् स्वार्थे अण्। गर्वान्विते त्रि॰ धनञ्जयः।

शौद्र पुंस्त्री शुद्रायां द्विजातिभिरुढ़ायां भवः अण्। द्राह्यः प्रकल्पमध्ये शूद्रायाते द्विजातिपुत्रभेदे पारशवाढ्यो ब्रटा॰। स्त्रियां ङीष्। इदमर्थे अण्। २शुद्रसम्बन्धिनि त्रि॰

शौद्रोदनि न॰ शुद्रोदनस्यापत्यम् इञ्। बौद्धमुनिभेदे अमरः

शौधिका स्त्री शोधः शोधनं मलविरेकस्तत्र हितः ठक् रत्नकक्षौ हेमच॰।

शौनक पु० शुनकस्यापत्यम् अण्। मुनिभेदे "नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः" इति भागवतम् १।१।

शौनिक पु० शूना प्राणिवधस्थानं प्रयोजनमस्य ठक्। १मांसविक्रेतरि (कसाइ) हेमच०। २मृगयायां शब्दमा०। ३मृगयाशीले च।

शौभ न० शोभायै हितम् अण्। १द्योमगामिनि पुरभेदे हरिश्चन्द्रपुरे २देवे पु० त्रिका०। ३गुवाके शब्दमा०।

शौभाञ्जन पु० शोभाञ्जनस्येव स्वार्थे अण्। (सजना) वृक्षभेदे द्विरूपकोषः। [शब्दमा०।

शौभिक त्रि० शौभं व्योमपुरं शिल्पमस्य ठक्। इन्द्रजालिके

शौरि पु० शूरस्य यादवभेदस्य वसुदेवस्य सूर्यस्य वा अपत्यम् इञ्। १विष्णौ २शनैश्चरे च अमरः।

शौर्य्य न० शूरस्य भावः ष्यञ्। १वीर्य्ये २शक्तौ ३पराक्रमे च मेदि०। [ठक्। शुल्कादानाधिकृते हेमच०।

शौल्किक पु० शुल्के राजादिदेये करे तदादाने अधिकृतः

शौल्किकेय पु० शुल्किकः देशभेदः तत्र भवः ढक्। विषभेदे अमरः।

शौल्विक पुंस्त्री०शुल्वः ताम्रं तन्मयपात्रादि पण्यमस्य ठक्। कांस्यकारे (कासारी) जातिभेदे अमरः स्त्रियां ङीष्।

शौव न० शुनः सङ्कोचः स्वन्+अण् टिलोपः। शुनः सङ्कोचे अन्यत्र न टिलोपः शौवन इत्येव शुनः सम्बन्धिनि संज्ञिप्रमा०। [भाविदिनस्थायिनि पदार्थे।

शौवस्तिक त्रि० श्वः परदिने भवः श्वस्+ठक्-तुट् च।

शौवापद त्रि० श्वापदस्येदम् अण्। श्वापदसम्बन्धिनि

शौष्कल पु० शुष्कलं शुष्कमांसं पण्यमस्य अण्। १शुष्कमांसविक्रेतरि मेदि०। तद्भक्ष्यमस्य अण्। २शुष्कमांसभक्षके त्रि० अमरः। [तत् अश्नोतीत्।

श्युत क्षरणे भ्वा० पर० अक० सेट्। श्योतति क्षरित् अश्यु

श्युत क्षरणे भ्वा० पर०अक० आसेचने सक० सेट्। श्योतति क्षरित् अश्युतत् अश्योतीत्।

श्योत पु० श्युत-घञ्। समन्तात् सेचने आधारे अमरः।

श्मन् न० शेते शी-मनिन् डिच्च। १पुंसुखे २शवे कालिकापु० अदन्तोऽयम् "सर्वे नान्ताः अदन्ता. स्युरि"त्युक्तेः।

श्मशान न० श्मानः शवाः शेरतेऽत्र शी-आनच् डिच्च। "श्मन् शब्देन शवः प्रोक्तः शानं शयनमुच्यते। निर्वपन्ति श्मशानार्थं मुने! शब्दार्थकोविदाः। महान्त्यपि च भूतानि प्रलये समुपस्थिते। शेरतेऽत्र शवो भूत्वा श्मशानन्तत्तोऽभवत्" महाभूतलयस्थाने महाश्मशाने १कालग्राम कालिकापुराणे ३० अ०। २शवदाहस्थाने अमरः।

श्मशानकाली स्त्री श्मशानस्था काली। कालिकाभेदे।

श्मशानवासिन् पु० श्मशाने वसति वस-णिनि। १महादेवे २बटुकभैरवे च। श्मशानवासकर्त्तरि चण्डालादौ त्रि०।

श्मश्रु न० श्म पुंसुखं श्रूयते लक्ष्यतेऽनेन श्रु-डु। पुरुषमुखस्थे लोमसङ्घे अमरः। "केशश्मश्रुधारयतमग्रा भवति सन्तानः" शु०त०।

श्मश्रुमुखी स्त्री श्मश्रु मुखे यस्याः ङीप्। १पुरुषलक्षणयुक्तायां २लोटाख्यायां स्त्रियां शब्दमा०।

श्मश्रुल पु०श्मश्रु विद्यतेऽस्य लच्। श्मश्रुयुक्ते [क्षुरकर्मकारके।

श्मश्रुवर्द्धक पु० श्मश्रु वर्द्धयति छिनत्ति वृध-ण्वुल्। नापिते

श्मील निमेषणे भ्वा०पर०अक०सेट्। श्मीलति अश्मीलीत्।

श्याव त्रि० श्यै-क। सङ्कोचविशेषप्राप्ते घनीभूते "पश्यश्यावकर्दमान्" रघुः।

श्याम पु० श्यै-मक्। १हरिद्वारकवृक्षे २प्रयागतीर्थस्थे वटे ३कोकिले ४मेघे ५कृष्णवर्णे ६हरिद्वर्णे च। ७तद्वति त्रि० मेदि०। ८धूस्तूरे ९लोलुवृक्षे १०श्यामाके राजनि० ११सरिचे १२सिन्धुजलवर्णे च न० मेदि०। १३दमनकवृक्षे १४गन्धद्रव्ये पु० विश्वः।

ईषच्छ्वेऽपि कृष्णश्यामलोहादीनाममरादौ पर्य्यायता तत्र कृष्णवस्तूनि कतिचित् कविकल्पलतायां दर्शितानि यथा "कृष्णानि केशवः सीरिचीरं चन्द्राङ्कराहवः। विन्ध्याञ्जनाद्रिदृत्ताक्षिवनभैरवराक्षसाः। शिवकण्ठघनद्वैपायनरामधनञ्जयाः। शनिः द्रुपदजा काली कलिकोलयमाङ्गराः। केशकज्जलकस्तूरीराजपट्टद्विदुरजम्। विषकोषकुरङ्गशस्त्रागुरुपापतमोनिशाः। मसीपङ्कमदामोधियमुनाधूमकोकिलाः। गोलाङ्गूलाम्रगुञ्जाश्वे कण्ठः खञ्जनकेकिनोः। शबलं तालतापिञ्जलिलेन्दीवरवल्लयः। रसावङ्कुशटङ्कारौ कटाक्षोऽलिः कनीनिका। नीली जम्बूफलं सुस्रा काकजङ्घाकुकीर्त्तयः। शिम्बक्षाया गजाङ्गारखलान्तःकरणादयः"।

श्यामक न० श्याम+संज्ञायां कन्। १रोहिषतृणे राजनि० २श्यामाके (शामा) धान्यभेदे पु० हेमच०।

श्यामकण्ठ पु० श्यामः कण्ठोऽस्य। १मयूरे हेमच०। २शिवे ३नीलकण्ठविहगे च।

श्यामकन्दा स्त्री श्यामः कन्दोऽस्याः। अतिविषायां राजनि०। [राजनि०।

श्यामकाण्डा स्त्री श्यामः काण्डोऽस्याः। गण्डदूर्व्वायां

श्यामग्रन्थि स्त्री श्यामो ग्रन्थिरस्याः । गण्डदूर्वायां राजनि०

श्यामपत्त्र पु० श्यामानि पत्त्राणि यस्य । तमालवृक्षे शब्दच०

श्यामल पु० श्यामवर्णं लाति ला–क । १पिप्पले २कृष्णवर्णयुते त्रि० मेदि० । ३अश्वगन्धायां ४कटभ्यां ५जम्बां ६कस्तूर्यांञ्च स्त्री राजनि० । ७श्यामवर्णे पु० अमरः ।

श्यामलचूड़ा स्त्री श्यामला चूड़ाऽस्याः । गुञ्जायां राजनि०

श्यामलता स्त्री कर्म० । १खनामख्याते शारिवौषधौ शब्दर० । श्यामलस्य भावः तल् । २कृष्णवर्णे ३हरिद्रवर्णे च

श्यामलिका स्त्री श्यामलोवर्णोऽस्त्यस्याः ठन् । नील्यामौषधौ राजनि० ।

श्यामलेचु पु० कर्म० । (काजला) इक्षुभेदे राजनि० ।

श्यामसुन्दर पु० श्यामोऽपि सुन्दरः । श्रीकृष्णे "श्यामसुन्दर ! ते दास्यः" इति भागवते १०स्क० २२अ० । "ध्यायन्ति योगिनस्तत्त्वं शुद्धं ज्योतिःस्वरूपिणम् । हस्तपादादिरहितं निर्गुणं प्रकृतेः परम् । वैष्णवास्तत्त्व मन्यन्ते तज्ज्ञाः सूक्ष्मदर्शिनः । कुतो बभूव तज्ज्योति रहो तेजस्विनं विना । ज्योतिरभ्यन्तरे नित्यं शरीरं श्यामसुन्दरम्" ब्रह्मवै० गणपतिख० ४१ अ० ।

श्यामा स्त्री श्यै–मन् । १शारिवौषधौ २अप्रसूताङ्गनायां ३प्रियङ्गौ ४यमुनायां ५वायुजौ ६रात्रौ ७कृष्णत्रिवृति दन्त्यौ मेदि० ८गुञ्जायां ९सोमलतायां ११गुन्द्रायां १२कृष्णायाम् १३अम्बिकायां विश्वः । १४गुडूच्यां १५कस्तूर्यां १६वटपत्त्र्यां १७चन्द्रायां १८नीलपुनर्नवायां १९पिप्पल्यां २०हरिद्रायां २१नीलदूर्वायां २२तुलस्यां २३यवबीजे २४गवि २५छायायां २६कृष्णशारिकायां २७शिंशपायां २८पक्षिभेदे (श्यामा) राजनि० । "शीतकाले भवेदुष्णा शीते च सुखशीतला । तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कीर्त्तिता" इत्युक्तलक्षणे २९स्त्रीविशेषे च । ३०हिमालयसुतायां काल्यां च "ततः सा कालिका देवी योगनिद्रा जगन्मयी । पूर्वत्यक्त शरीरेण पार्वती जन्मार्थं मेनकां ययौ । समयज्ञानुरूपेण मेनका जठरे शिवा । समभूय च सप्तम्यां सा लक्ष्मीरिव सागरात् । वसन्तसमये देवी नवम्यां मृगयोगतः । अर्द्धरात्रौ समुत्पन्ना गङ्गेव शशिमण्डलात् । तान्तु दृष्ट्वा यथा जातां नीलोत्पलदलानुगाम् । श्यामां सा मेनका देवी सुदर्शनातिहर्षिता" कालिकापु० ४० अ० ।

श्यामाक पु० श्यामेव कायति कै–क । (श्यामा) धान्यभेदे "श्यामाकः शीतलो रूक्षो वातलः कफपित्तजित्" भावप्र०

श्यामाङ्ग पु० श्यामं हरिद्वर्णमङ्गमस्य । १बुधग्रहे त्रिका० । २कृष्णदेहे त्रि० स्त्रियां ङीष् । "श्यामाङ्गीं विगताम्बरां" तन्त्रम् ।

श्यामाम्बो स्त्री कर्म० । नीलास्त्रीचुपे राजनि० ।

श्यामिका स्त्री श्याम+वा० भावे ठन् । १श्यामत्वे २स्वर्णादिमालिन्ये च "हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा" रघुः ।

श्याल पु० श्यै–कालन् । पत्नीभ्रातरि अमरः । स्वार्थे ठक् । श्यालिकोऽप्यत्र । [पत्नीभगिन्यां शब्दच०।

श्यालिका स्त्री श्यै–कालन् संज्ञायां कन् । अत इत्त्वम् ।

श्याव पु० श्यै–वन् । १कृष्णपीतमिश्रवर्णे २तद्वति त्रि० अमरः

श्यावदत् त्रि० श्यावो दन्तो यस्य दन्तादेशः । श्यामवर्णदन्तयुक्ते स्त्रियां ङीप् ।

श्यावदन्त पु० कर्म० । १स्वभावतः कृष्णवर्णयुक्ते दन्ते ६ब० कप् । २तद्युक्ते त्रि० "सुरापः श्यावदन्तकः" विष्णुसू०

श्येत पु० श्यै–इतच् । १शुक्लवर्णे २तद्वति त्रि० स्त्रियां ङीप् तस्य नश्च । श्येनी । [छारा० स्त्रियां ङीष् ।

श्येतकोलक पुंस्त्री०श्वेतः कोल इव । (पुँटि) मत्स्यभेदे

श्येन पुंस्त्री०श्यै–इनच् । १पक्षिभेदे (बाज) अमरः । २बभ्रुवर्णे च २तद्वति त्रि० मेदि० ।

तत्स्वरूपं शुभाशुभसूचनं यथा "मद्दक्षिणोऽक्षि नरं व्रजन्तो यात्रासु वामेन गताः प्रवेशे । श्येनाः शमस्ताः प्रकृतस्वरास्ते शान्ताः प्रदीप्ता विततस्वरास्ते । श्येनो नृणां दक्षिणवामपृष्ठभागेषु भाग्यैः स्थितिमादधाति । तिष्ठन् पुरस्तान्मृतये करोति युद्धे जयं ध्वस्वरयध्वजस्थः" इति वसन्तराजः । "श्येनेनाभिचरन् यजेत" श्रुतिविहिते २यागभेदे अभिचारशब्दे दृश्यम् ।

श्येनघण्टा स्त्री श्येनी घण्टेव । दन्तीवृक्षे राजनि० ।

श्यै गतौ स्वा०आ०सक० अनिट् । श्यायते अश्यात्त ।

श्यैनम्पाता स्त्री श्यैनस्य पातो वेग अण् ङीप् च । शीघ्रयाये अमरः ।

श्यो(णा)नाक पु० श्यै–ओना(णा)क । (शोणा) क्षुपभेदे । "श्योनाको दीपनः पाके कटुकस्तुवरो हिमः । वातपित्तकफश्लेष्मक्रिमिकासामनाशनः । कटु तस्य फलं वातं रूक्षं वातकफापहम् । हृद्यं कषायं मधुरं रोचनं लघु दीपनम् । गुल्मार्शःक्रिमिहृत् शोफं गुरुवातप्रकोपणम्" भावप्र० ।

श्रक सर्पणे स्वा०आ०सक० सेट् दृब्धि । श्रङ्कते अश्रङ्किष्ट ।

अङ्ग गतौ भ्वा० पर० सक० सेट् इदित्। अङ्गति अङ्गीत्।

अङ्ग दाने भ्वा०पर०सक०सेट्। अङ्गति अङ्गाणीत् अङ्गणीत् मित् घटादि० अङ्गयति।

अङ्ग दाने चु०उभ०सक० सेट्। आङ्गयति ते अजिघ्रङ्गत् त।

अत् अव्य० ओ—डति। अड्डायाम्। [अजिघ्रयत् त।

अथ यत्ने अक० प्रतिहर्षे सक० चु०उभ० सेट्। आथयति ते अजिघ्रथत् त।

अथ दौर्बल्ये अ०चु०उ०अक०सेट्। अथयति ते अजिघ्रथत् त।

अथ वधे भ्वा०पर०सक० सेट्। अथति अथीत् अथीत्।

अथ वध मोक्षे वधे च वा चु० उ० पक्षे भ्वा०पर०सक०सेट्। आथयति ते अथति अजिघ्रथत् त अथीत्-अथीत्।

अथ शैथिल्ये अक० तत्करणे सक० भ्वा० आ०सेट् इदित्। अन्थते अजिघ्रन्थिष्ट।

अथन न० अथ-ल्युट्। १वधे २यत्ने ३प्रतिहर्षे च।

अद्धा स्त्री अत्-धा-अङ्। १आदरे २शुद्धौ शब्दच०। ३गुरुवेदान्तवाक्यादिषु विश्वासे वेदान्तसा० ४अप्रच्छायां ५चित्तप्रसादे "प्रत्ययो धर्मकार्येषु सा श्रद्धेत्यभिधीयते" इति स्मृत्युक्ते धर्मकार्येषु ६प्रत्यये च अमरः। "प्रत्ययो धर्मकार्येषु तथा श्रद्धेत्युदाहृता। नास्ति ह्यश्रद्दधानस्य धर्मलाभे प्रयोजनम्" इति स्मृतिः। सा त्रिविधा प्रयोक्तृ गीतायाम् १७अ०। "त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा। सात्त्विकी राजसी चैव तामसी चेति तां शृणु। सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत!। श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः। यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः। प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः"। "श्रद्धापूर्वा इमे धर्माः श्रद्धा मध्यान्तसंश्रिता। श्रद्धा नित्या प्रतिष्ठा च धर्माः श्रद्धैव कीर्तिताः। श्रुतिमात्रपराः केचित् केचित् प्रधानपुरुषेश्वराः। श्रद्धामात्रेण केचिन्ने न करेण न चक्षुषा। कायक्लेशैर्न बहुभिस्तथैवार्थस्य राशिभिः। धर्मः संप्राप्यते केचित् श्रद्धाहीनैः सुरैरपि। श्रद्धाधर्मः परः केचित् श्रद्धा ज्ञानं श्रुतं तपः। श्रद्धा स्वर्गश्च मोक्षश्च श्रद्धा सर्वमिदं जगत्। अवेक्ष्य जीवितं वापि दत्ता श्रद्धया यदि। नाप्नुयात्तत्फलं किञ्चित् श्रद्धादानं ततो भवेत्। एवं श्रद्धामयाः सर्वे सर्वधर्माः प्रकीर्तिताः। ज्ञेयः श्रद्धा सदा सत्यो ध्येयः पूज्यश्च सर्वदा" वह्निपु०। देवलः "अर्थानासुदिते पात्रे श्रद्धया प्रतिपादनम्। दानमित्यभिनिर्दिष्टं व्याख्यास्यन्नस्य वक्ष्यते। उदिते शास्त्रकथिते। देवलेनाख्याप्युक्ता यथा "सत्कृतिं स्थानसंश्रया च सदा श्रद्धेति कीर्तिता"। अत एव भगवद्गीतासु "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत्। असदित्युच्यते पार्थ! न च तत्प्रेत्य नेह च"। हरिवं० "अश्रद्धया श्राद्धमधीतमव्रतं त्वदक्षिणं यज्ञमृत्विजा हुतम्। अश्रद्धया दत्तमशस्त दक्षिणाः षड़ेते तव दैत्यपुङ्गव!" शु-त०। याज्ञवल्क्यः "श्रद्धाविधिसमायुक्तं कर्म यत् क्रियते नृभिः। क्षुद्रशुद्धेन भावेन तदानन्त्याय कल्पते" यागिया०उक्तेः। "विधिहीनं भवेद्दुष्टं श्रुतमश्रद्धया च यत्। तदुरन्यसुरास्तस्य मूढस्य दुष्कृतात्मनः"

अद्धालु स्त्री अद्धा+आलुच्। १श्रद्धावत्यां स्त्रियां २श्रद्धायुक्ते त्रि०।

अन्थ यन्थने बधे च वा चु० उभ० पक्षे भ्वा०पर०सक० सेट्। अन्थयति-ते अन्थति अजिघ्रन्थत् त अन्थीत्। [न्थीत्

अन्थ याचने प्रतिहर्षे च क्र्या०प०सक०सेट्। अन्थाति अजिघ्रन्थीत्

अन्थ पु० अन्थ-भावे घञ्। १अथने कर्त्तरि अच्। सर्वसोधनकर्त्तरि २विष्णौ त्रिका०।

अन्थन न० अन्थ-ल्युट्। अन्थने।

अन्धित त्रि०चु० आ—क्त-यिच्-युक् च्लिलोप। दृष्टादिभिन्ने पक्षे मांसादौ ऋटा०।

अन्म तपसि, आयासे क्षेदे च सक० भ्वा० शबादि० पर०सेट् उदित् क्त्वा वेट्। आन्यति इदित् अजिघ्रमत् अन्मीत्। आन्त्वा अन्मित्वा आन्तः। [क्त्याम्यासे च हेमच०।

अन्म पु० अन्म-घञ् न दृद्धिः। १तपसि २क्षेदे ३आयासे ४अनशौचे।

अन्मथ पु० अन्म-युच्। १यतिभेदे २भिक्षाजीविनि त्रि०। ३जटामांसां ४सक्थ्नोर्भ्यां ५अवरीभेदे ६सुदर्शनायां स्त्रियां च ङीष् भेदि०।

अन्मिन् त्रि० अन्म-इनि। आनक्षके। [दृक्षके।

अन्ध प्रमादे भ्वा० आ०सक०सेट्। अन्धते अजिघ्रन्धिष्ट। अनृभ

अन्ध पु० अन्ध-अच्। आन्धये। ल्युट्। तत्रैव न० अमरः।

अन्व पु० ऋणोत्यनेन ऋ-अप्। १कर्णे २स्रोतसि च भरतः।

अन्वण न० ऋणोत्यनेन ऋ-करणे ल्युट्। १कर्णे शब्दग्राहकेन्द्रियभेदे अमरः। भावे ल्युट्। २श्रुतौ अ०आन्ध्रादिषु दार्ढ्ये ३नक्षत्रे पुंस्त्री० ङीष्०त० क्लीवत्वमपि "अमाकैपाते भवणं यदि स्यादिति" स्मृतिः। ४सप्तदरिकाहस्ते स्त्री रत्नमा०।

अवणद्वादशी स्त्री अवणेन युक्ता द्वादशी याक०। "यदि भाद्रपदे शुक्ले द्वादशी अवणान्विता" इत्युक्तायां भाद्रशुक्लद्वादश्याम्। अतएव शब्दे दृश्यम्।

श्रवणशीर्षिका स्त्री श्रवणमिव शीर्षमस्याः कप् यत इत्त्वम् । श्रावणीयुक्ते राजनि० । [अस्मि । २कीर्त्तौ ।

श्रवस् न० श्रूयतेऽनेन श्रु-करणे असि । १कर्णे अमरः । कर्मणि

श्रवाय्य पु० श्रु-आय्य । यज्ञियपशौ त्रि०कौ० । शब्दकल्पद्रुमे श्रवाय इति पाठ कल्पनं प्रामादिकमेव ।

श्रविष्ठा स्त्री श्रूयते श्रु-यप् श्रवः प्रसिद्धिरस्त्यस्याः मतुप् ङीप् अतिशयेन श्रववती इष्टनू मतुपो लुक् । १धनिष्ठानक्षत्रे अमरः २श्रवणनक्षत्रे च ।

श्रविष्ठाज पु० श्रविष्ठायां श्रवणनक्षत्रे जायते जन-ड । बुधग्रहे त्रिका० । भगदैवतशब्दे ४६२१पृ० दृश्यम् ।

श्रा विक्लृप्तौ अदा०पर० अनिट् । श्राति अश्रासीत् ।

श्रा पाके अदा०पर०सक० अनिट् घटा० । श्राति अश्रासीत् श्रपयति । [२यवागूवां स्त्री अमरः ।

श्राण त्रि० श्रा-क्त । १इष्टादिभिन्ने पक्के मांसादौ जटा० ।

श्राद्ध न० श्रद्धा-हेतुत्वेनास्त्यस्य अण् । "श्रद्धया दीयते यस्मात् श्राद्धं तेन निगद्यते" इत्युक्ते पित्रादिभ्यः श्रद्धया देये १द्रव्ये । अस्त्यर्थे अण् । २श्रद्धायुक्ते त्रि० ।

श्राद्धलक्षणं तत्प्रयोजनञ्च गयाश्राद्धादिपद्धतौ हेमाद्रि श्राद्धकल्पानुसारेणास्माभिः प्रदर्शितं यथा

"सम्बोधनपदोपेतान् पित्रादीन् चतुर्थ्यन्तपदेनोद्दिश्य पुत्रादिभिर्मन्त्रद्वारा श्रद्धयाद्रव्यादेर्दानं श्राद्धम्" "अथैतन्नित्यं श्राद्धशब्दं कर्म प्रोवाचेति" श्राद्धविवेकधृतापस्तम्बवचनेन श्राद्धशब्दस्य कर्मसामान्यवचनतावगमात् "संस्कृतं व्यञ्जनाढ्यं च पयोदधिघृतान्वितम् । श्रद्धया दीयते यस्मात् तेन श्राद्धं निगद्यते" इति श्राद्धतत्त्वधृतपुलस्त्यवचनेन श्रद्धाहेतुकदानरूपकर्मविशेषस्य श्राद्धपदार्थतावगमाच्च । श्राद्धमिति शब्दो वाचको यस्य तत्कर्मत्यस्य इति श्राद्धविवेकः । तस्मिंश्च कर्मणि यागादाविन्द्रादीनामिव पित्रादेर्देवतात्वं तदुद्देशेन मन्त्रद्वारा द्रव्यत्यागात् । तथा च यागादौ मन्त्राहूता इन्द्रादयः शक्तिमात्रेण तत्तत्स्थले आविर्भूता यजमानत्यक्तद्रव्यदर्शनेन तत्प्रत्यक्षेणाभीष्टफलं यथा साधयन्ति तथा श्राद्धेऽपि मन्त्राहूताः पित्रादयः समागताः पुत्रादित्यक्तद्रव्यभोगेन तृप्तयो विशिष्टफलप्रदा इत्येव कल्पनीयम् । किन्तु सर्वो हि लोकः सफले कर्मण्येव प्रवर्त्तते नाफले । तत्र यज्ञादौ यथा देवानां फलदातृत्वनेव श्राद्धदेवानां पित्रादीनां फलदातृत्वे सम्भवत्येव श्राद्धस्य सफलत्वं भवेत्तदेव नोपपद्यते । तथा हि इन्द्रादयो हि देवायेतना विशिष्टज्ञानक्रियाशक्तिमन्तो मन्त्रसामान्याहूताः शक्तिविशेषेण यज्ञदेशे आविर्भवितुं शक्नुवन्ति आविर्भूय च यत्तद्दत्तद्रव्यदर्शनमात्रेण तृप्यन्तो विशिष्टफलदानाय समर्थाः । नैवं पित्रादयो भवितुमर्हन्ति । ते हि स्वस्वकर्मानुसारेण नानायोनिततया अतिविप्रकृष्टदेशस्थिताः विशिष्टशक्तिरहिताश्च कथं मन्त्रमात्राहूताः श्राद्धदेशे आगच्छेयुः । आगता वा कुतो न दृश्येयुः देवानामिव तेषामतीन्द्रियत्वाभावात् दर्शनमात्रेण तृप्तेरभावाच्च । भोजनेनैव तेषां तृप्तिसम्भवाच्च भोजनमन्तरेण कथं तृप्येयुः । अतृप्ताश्च कुतो वा फलं दद्युः । पश्चादिसत्ता वा कुतो विशिष्टफलप्रदाः स्युः । अपरञ्च दत्तस्य चाक्षादेरचेतनतया नेतृपुरुषाभावेनान्यत्र गमनासम्भवः । श्राद्धदत्तद्रव्यस्य यथापूर्वमवस्थानाच्च भोक्तृदेशगमनमित्यनुभीयते । एवञ्चेह दत्तेनाक्षेनान्यत्र स्थितानां भोजस्तु नैव सम्भवी । पात्रीयब्राह्मणेन श्राद्धस्य भोजनाच्च पित्रादितृप्तिसम्भवः भोक्तृतृप्तोः सामानाधिकरण्यनियमात् । किञ्च देवयोनिगतानामस्मदन्नमात्रमयोग्येनान्नेन कथं तृप्तिः कथं वा पशुयोनिगतानां तृणाहारयोग्यानां तेन तृप्तिः । तेषां पश्वादिभावसाधेदुषां फलदातृत्वासम्भवस्तु विशिष्टशक्तेरभावात् सर्वान्तर्भवसिद्धः । एतेन "यथा गोषु प्रनष्टो वै वत्सो विन्दति मातरम् । एवं श्राद्धेऽन्नमुद्दिष्टं मन्त्रः प्रापयते पितॄन् ।" नाममात्रं पितृप्रापकं हव्यकव्ययोः । नाममन्त्रैरुद्देशो भवान्तरगतानपि । प्राणिनः प्रीणयन्त्येते तदाहारत्वमागताः । देवो यदि पिता जातः शुभकर्मानुसारतः । श्राद्धान्नमश्नुतं भूत्वा देवत्वेऽप्यनुगच्छति । दैत्यत्वे भोग्यरूपेण पशुत्वे च तृणं भवेत् । श्राद्धान्नं वायुरूपेण नागत्वेऽप्यनुगच्छति । पानं भवति यक्षत्वे सदृशत्वे च तथामिषम् । दनुजत्वे तथा मांसं प्रेतत्वे रुधिरोदकम् । मानुषत्वेऽन्नपानादि नानाभोगरसं तथेति च" हेमाद्रिश्राद्धकल्पादिधृतमार्कण्डेयवचनैरिह दत्ताक्षादेरेव मन्त्रशक्त्या विप्रकृष्टदेशनयनं पित्रादिप्रयोनियोग्यान्नतादिरूपेण परिणामश्च कल्प्यते इत्यपि न विचारसहं अचेतनानामपि मन्त्राणां चेतनधर्मकल्पनापि तदैव साधीयसी स्यात् यदि दत्ताक्षादेरिह यथापूर्वमवस्थितिर्न स्यात् स्याच्च पूर्वरूपान्यथाभावः । तथा च एवमादिवचनानां स्तुत्यर्थवादपरतायां अन्ये दर्शयिष्यमाणत्वाच्चाधिककल्पना । किञ्च प्राणि-

ब्रह्मणेन भोगादिना विनष्टस्य वस्तुनः कथं स्थानान्तरनयनं कथं वा तत्तदाकारतारूपेण परिणामः धर्मिणि सत्येव स्थानान्तरगमनादिसम्भवो न विनष्टस्यातः श्राद्धस्य कथं प्रयोजनवत्त्वमित्येवं स्थिते। उच्यते। ब्राह्मणादिसम्प्रदानक्रियाया एव श्राद्धकर्मण एव स्वजन्यपुण्यद्वारा विशिष्टफलजनकता तत्र च कालान्तरभावितत्तत्फलदानाय तत्कर्मणाक्षिप्तः परमेश्वरस्यैव तत्साधनत्वम्। अतएव भगवद्गीतायाम् "यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्यस्याचलां श्रद्धां तामेव विदधाम्यहम्। स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान् मयैव विहितान् हि तान्" इति भक्तानां तत्तदिष्टोत्पादनस्य स्वकर्तृकत्वं भगवतोक्तम्। युक्तश्चैतत् श्रुतिस्मृत्योरीश्वरानुज्ञास्वरूपतया तत्तदर्थानुष्ठानेन तदाज्ञाप्रतिपालने ईश्वरस्य सम्माननारूपा तृप्तिस्तत्साभीष्टलाभः। तथैवोक्तं गीतायाम् "स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः। स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु। यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इति। स्वकर्मणा स्ववर्णाश्रमविहितकर्मानुष्ठानेन, तम् परमेश्वरम् अभ्यर्च्य तदाज्ञाप्रतिपालनेन सम्मान्य तत्सम्मानेन च तत्कृतां सिद्धिम् तत्तदभीष्टसिद्धिं लभते इति तदर्थः। अस्मिन् पक्षे च पित्रादीनां श्राद्धाद्देवौ न स्थानान्तरगमनकल्पना। अथ वा देवदत्तादिशब्दस्य यथा न केवलं देहमात्रं, न वा जीवमात्रमर्थः किन्तु तत्तद्देहाभिमानी जीव एवार्थः। तथा पित्रादिशब्दस्य तत्तदेहाभिमानी केवलं जीवोऽपि नार्थः किन्तु वसुरुद्रादित्यदेवाधिष्ठितताद्दशजीव एवार्थः, "वसवः पितरो ज्ञेया रुद्रा ज्ञेयाः पितामहाः। प्रपितामहास्त्वादित्याः श्रुतिरेषा सनातनी। प्रेतानुद्दिश्य यद् कर्म क्रियते मानुषैरिह। तुष्यन्ति देवतास्तेन न प्रेताः पितरः स्मृताः"। इति श्राद्धकल्पधृतदेवलवचने पित्रादिपदानां पारिभाषिकत्वोक्तेः। प्रेताः स्मृताः न पितरः न केवल पितृपदाभिधेयाः किन्तु तदधिष्ठितवसव एव पितृपदाभिधेयास्त एव तुष्यन्तीत्यर्थः। अतएव श्राद्धकाले पित्रादीनां तेन तेन रूपेण ध्येयतोऽर्चनमानोपपद्यते। एवञ्च वसादिदेवानामिन्द्रादिवत् विशिष्टशक्तिज्ञानस्यत्वतया मन्त्रकालावाहने यागादाविन्द्रादिदेवागमनस्यावश्यकत्वाच्च तत्तद्द्रव्यदर्शनमात्रेण तृप्तिः, "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्तीति" छान्दोग्यवाक्यात्। अतएव भगवद्गीतायाम् "सह यज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्। देवान् भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथेति" प्रजाकृतयज्ञेन तृप्तानां देवानां यजमानफलदातृत्वम् प्रजाः प्रति प्रजापतिवचनत्वेनोक्तम्। अनेन यज्ञेन देवान् भावयत तर्पयत ते च यज्ञतर्पिता देवाः वः युष्मान् भावयन्तु तर्पयन्त्वित्यर्थः। यज्ञपदञ्च कर्मनात्रोपलक्षणम्। एवञ्च यथा कश्चित् गर्भिणी सुहृदा दत्तं दोहदं भुञ्जाना स्वयं तृप्यति स्वाश्रयं गर्भञ्च तर्पयन्ती दोहददातारमप्युपकरोति तथा वस्वादयोऽपि श्राद्धाद्यदर्शनमात्रतृप्ताः स्वाधिष्ठितपित्रादिपुरुषान् तर्पयन्तः श्राद्धकर्तुरपीष्टदातारो भवन्ति। प्रागुक्तवचनजातेष्वपि मन्त्रशक्त्याद्यादेर्देशान्तरनयनकथनस्यापि स्वस्वकर्मानुसारेण पश्वादिभावापन्नपित्रादीनां तदुपभोगयोग्यान्नादितुल्यतृप्तिर्वस्त्रादिलक्षणा तद्देहे भवतीत्येतत्परत्वस्यात्रप्रशंसापरत्वयोः कल्पने न वैयर्थ्यम्। यत्र च काम्यत्वाभिसन्धेन पित्रादीनां सुखत्वम् तत्र वस्त्रादिमात्रस्यैव तृप्तिर्न विशिष्टस्य, विशेषणस्यासत्त्वे विशेष्यस्यैव विशिष्टकारित्वात् कुण्डलविशिष्टस्य नरस्य कुण्डलापगमेऽपि मनुष्यत्वकर्मकारित्वाव्याहृतिवत्। तथा च त एव तृप्ता विशिष्टफलं दद्युरिति सिद्धा श्राद्धसाध्यवत्ता"। श्राद्धभेदाश्च विश्वामित्रोक्ताः प्रा॰वि॰ दर्शिता यथा "नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम्। पार्वणञ्चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमम्। कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम्। यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम्"। एतद्विष्णुपुराणे विस्तृतम्। यथा "श्रद्धान्वितैर्यत् श्राद्धं तच्छ्रेयसमभिधीयते। वैश्वदेवविहीनं तदशास्त्रविदकेन तु। एकोद्दिष्टन्तु यत् श्राद्धं तच्चैकत्तिकमुच्यते। तदप्यदैवं कर्त्तव्यमयुग्मानाशयेद्द्विजान्। कामाय तु हितं काम्यमभिप्रेतार्थसिद्धये। पार्वणेन विधानेन तदप्युक्तं खगाधिप!। वृद्धौ यत् क्रियते श्राद्धं वृद्धिश्राद्धं तदुच्यते। सर्वं प्रदक्षिणं कार्य्यं पूर्वाह्णे तूपवीतिना। गन्धोदकतिलैर्युक्तं कुर्य्यात् पात्रचतुष्टयम्। अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्। ये समाना इति द्वाभ्यामेतज्ज्ञेयं

सपिण्डनम्। नित्येन तुल्यं शेषं स्यादेकोद्दिष्टं स्त्रिया अपि। अमावास्यां यत् क्रियते तत् पार्वणमुदाहृतम्। क्रियते पर्वणि यत्तत् पार्वणमिति च स्थितिः। गोष्ठ्यां यत् क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते। बह्वृनां विदुषां सम्मतसुखार्थं पितृतृप्तये। क्रियते शुद्धये यत्तु ब्राह्मणानान्तु भोजनम्। शुद्ध्यर्थमिति तत् प्रोक्तं वैनतेय! मनीषिभिः। निष्ककाले सोमे च सोमनोत्सवने तथा। क्षेयं पुंसवने चैव श्राद्धं कर्माङ्गमेव च। देवानुद्दिश्य यत् श्राद्धं तदैविकमिहोच्यते। हविषान्नेन विधिना सम्पन्नाद्रिषु यत्नतः। गच्छन् देशान्तरं यत्तु श्राद्धं कुर्यात्तु सर्षिषा। यात्रार्थमिति तत् प्रोक्तं प्रवेशे च न संशयः। शरीरोपचये श्राद्धमङ्गोपचय एव च। पुष्ट्यर्थमेतद्विज्ञेयमौपचारिकमुच्यते"।

हेम० "नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं तथैव च। पार्वणञ्चेति मनुना श्राद्धं पञ्चविधं स्मृतम्"। कूर्मपुराणे "अहन्यहनि नित्यं स्यात् काम्यं नैमित्तिकं पुनः। एकोद्दिष्टञ्च विज्ञेयं वृद्धिश्राद्धञ्च पार्वणम्। एतत् पञ्चविधं श्राद्धं मनुना परिकीर्त्तितम्"। स्वरूपतो द्वादशविधत्वेऽपि पञ्चविधविधानोपाधिभेदात् पञ्चविधत्वं गोष्ठीश्राद्धादीनां पार्वणकाम्यवृद्धिश्राद्धैरर्थाग्विधानात् एतेष्वन्तर्भाव इत्यभिप्रायः। सपिण्डीकरणस्याप्यंशतः पार्वणविधानादंशतश्चैकोद्दिष्टविधेरुभयात्मकत्वात् न पृथक्त्वं नित्यपार्वणात् काम्यस्य देवताभेदात् पृथग्विधानम्। वस्तुतः प्रपञ्चार्थमेव द्वादशविधत्वम्। युगादाद्यादिश्राद्धानामपि सत्त्वात्। यत्तु मत्स्यपुराणे "नित्यं नैमित्तिकं काम्यं त्रिविधं श्राद्धमुच्यते"। इति तत् नित्यपदस्तुत्यर्थमेव नैमित्तिकपदमागन्तुकनिमित्तोत्पन्नत्वेन पार्वणैकोद्दिष्टयोः परिग्रहार्थम्। काम्यपदं दृष्टफलत्वेन तिथिश्राद्धादीनामस्मदुदयस्य च सङ्ग्रहार्थमित्यविरोधः। विष्णुना तु नित्यकाम्यरूपतया द्वैविध्यं वक्ष्यते तत्र नित्यपदमावश्यकतया पार्वणैकोद्दिष्टयोरपि परिग्रहार्थम्। काम्यपदमनावश्यकार्थं सर्वमिदमुपाधिभेदादविरुद्धम्"।

श्राद्धे विहिता देशाः प्रा० वि० दर्शिता यथा तत्र विष्णुः "पुष्करेष्वक्षयं श्राद्धं सपत्नीकस्तपांसि च"। "पुष्करे स्नातमात्रस्तु सर्वपापेभ्यः पूतो भवति" इत्यभिधाय "एवमन्येषु तीर्थेषु सरिद्वरासु सङ्गमेषु प्रभवेषु पुलिनेषु निकुञ्जेषु प्रस्रवणेषु उपवनेषु गोव्रजयेनोपलिप्तेषु वृक्षेषु मनोज्ञेषु च" आह स्म। प्रभवोऽत्र नदीनामुत्पत्तिदेशः सरिद्वरासु सङ्गमेषु चेति प्रस्तुत्य प्रभवेष्वित्यभिधानात्। पुलिनं नदीनोत्थितप्रदेशः। निकुञ्जोलतादिवेष्टितप्रदेशः प्रस्रवणं निर्झरः। उपवनं गृहवाटिका मनोज्ञं रमणीयम्। देवलः "श्राद्धस्य पूजितो देशो गया गङ्गा सरस्वती। कुरुक्षेत्रं प्रयागश्च निम्नगं पुष्कराणि च। नदीतटेषु तीर्थेषु शैलेषु पुलिनेषु च। विविक्तेषु च तृप्यन्ति दत्तेनेह पितामहाः"। विविक्तं विजनम्। वृद्धवसिष्ठः "काङ्क्षन्ति पितरः पुत्रान्नरकापातभीरवः। गयां यास्यति यः कश्चित् सोऽस्मान् सन्तारयिष्यति। करिष्यति दशोत्तरसप्तमिश्राद्धं तस्मै च। पालयिष्यति वार्द्धके श्राद्धं दास्यति चान्नवत्। गयायां धर्मपृष्ठे च सदसि ब्रह्मणस्य। गयाशीर्षेऽक्षयवटे पितृणां दत्तमक्षयम्। धर्मारण्यं धर्मपृष्ठं धेनुकारण्यमेव च। एतानि पितृवार्द्धे वंशान् विंशतिमुद्धरेत्"। गयासम्पादाय गयास्थानविशेषोपन्यासोऽधिकफलार्थः। इह श्राद्धदेशत्वेन कथिता नानादेशीयतीर्थविशेषस्वरूपविशेषास्तत्तद्देशनिवासिभ्योऽवगन्तव्याः। अत्र पुष्करेष्वक्षयं श्राद्धमित्यादिविष्णुवाक्यैः सामान्यतस्तीर्थप्राप्तिनिमित्तेऽमावास्यादिश्राद्धे च प्राप्ते पुष्करादिदेशाख्यगुणफलश्राद्धविधिः "गोदोहेनापः प्रणयेत् पशुकामस्येति" वत् न तु विशिष्टश्राद्धान्तरविधानं विधिगौरवापत्तेः। अगत्या तु "सोमेन यजेतेत्यादौ" तथा। तथा मनुः "शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत्। दक्षिणाप्लवनञ्चैव प्रयत्नेनोपपादयेत्। अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि। विविक्तेषु च तृप्यन्ति दत्तेन पितरः सदा"। अयुग्मविविक्तमदक्षिणाप्लवनं यत्नतः शुचित्वादिना उपपादयेत्। विविक्तं विजनं चोक्षेषु मनोज्ञेषु विविक्तेषु वनादिषु। यमः "दक्षिणाप्लवनं स्निग्धं विविक्तं शुभलक्षणम्। शुचिदेशं परीक्ष्याशु गोमयेनोपलेपयेत्। आगारेषु विविक्तेषु तीर्थेषु च नदीषु च। विविक्तेषु च तृप्यन्ति दत्तेनेह पितरः सदा। पारक्ये भूमिभागे तु पितॄणां निर्वपेत्तु यः। तन्निष्क्रामन्ति पितरः श्राद्धकर्म विहन्यते। तस्मात् श्राद्धानि देयानि पुण्येष्वायतनेषु च। नदीतीरेषु तीर्थेषु क्षेत्रभूमौ तु प्रयत्नतः। उपक्षरनिम्नस्थेषु तथा पर्वतसानुषु। गोमयेनोपलिप्तेषु विविक्तेषु वनेषु च"। स्निग्धं स्निग्धं विविक्तेषु देशेषु स्वभावतो वनादिषु। उपक्षरमम्ल पर्वतान्तिकम्"।

श्राद्धनिन्दितदेशास्तत्रोक्ता यथा विष्णुः "न म्लेच्छविषये

श्राद्धं कुर्यान्न च गच्छेत्तथा । चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते । तं म्लेच्छदेशं जानीयादार्यावर्त्तमतः-परम्" । वायुपुराणे "त्रिशङ्कोर्वैजयेद्देशं सर्वं द्वादशयोजनम् । उत्तरेण महानद्या दक्षिणेन तु कीकटात् । देशस्त्वेषगुणोनाम श्राद्धकर्मणि गर्हितः । पारस्कराः कलिङ्गाश्च सिन्धोरुत्तरमेव च । प्रनष्टाग्निमधर्मांश्च देशान्विद्यात् प्रयत्नतः" । पारस्कारादेशविशेषाः । कीकटोमगधः । सिन्धुर्नदीविशेषः । ब्रह्मपुराणे "परकीय-गृहे यस्तु स्वान् पिण्डान्ददेच्छ्राद्धे । तद्भूमिस्वामिन-स्तस्य हरन्ति पितरो बलात् । अथभागमनन्तस्त्वेष्यो दद्या-न्मूल्यञ्च जीवताम्" । गृह इति भूमागमात्रोपलक्षणं "पारक्ये भूमिभागे च" इति यमवचनात् स्वभूम्यभावे कथं श्राद्धमित्याह अथभागमिति श्राद्धीयद्रव्यस्येति तेभ्यस्तद्भूमिस्वामिपितृभ्य उद्धृत्य देयं जीवतां स्वा-मिनां मूल्यं वा देयम । यमः "अटव्यः पर्वताः पुण्या नद्यस्तीर्थानि यानि च । सर्वेऽस्वस्वामिकान्या-ह्युर्न हि तेषु परिग्रहः" । स्वाम्यभावे हेतुमाह न हि हेतिति । परिग्रहो दानविक्रयणादियथेष्टविनियो-गलक्षणः । तथा "कृत्तं क्लिन्नयुतं क्लिन्नं संकीर्णानिष्ट-गन्धिकम् । देशस्त्वनिष्टशब्दञ्च वर्जयेत् श्राद्धकर्मणि" । कृत्तं धूलियुतं क्लिन्नं पङ्किलम् अनिष्टगन्धम् कुरभि-गन्धम् अनिष्टशब्दं प्रतिकूलशब्दम्" ।

श्राद्धदेव पु० श्राद्धदेयानां पितॄणां देवः राजा० । १यमे अमरः । २वैवस्वतमनौ हरिवं० १५अ० ।

श्राद्धदेवता स्त्री श्राद्धे देवता मुख्यद्रव्यस्योद्देश्या । "पितरः श्राद्धदेवता" इति स्मृत्युक्तेषु पितृषु ।

श्राद्धशाक न० श्राद्धयोग्यं शाकम् । कालशाके भावप्र० ।

श्राद्धिक त्रि० श्राद्धे देयं, श्राद्धं तदुद्दिश्य भक्ष्यत्वेनास्त्यस्य वा ठन् । १श्राद्धदेये भक्ष्ये २श्राद्धदेयद्रव्यभोक्तरि च ।

श्राद्धिन् त्रि० श्राद्धं तदुद्दिश्य भक्ष्यत्वेनास्त्यस्य इनि । श्रा-द्धदेयद्रव्यभोक्तरि त्रि०को० । [हेमच० । भावे क्त । ४श्रमे न०

श्रान्त त्रि० श्रम-क्त । १श्रमयुक्ते २शान्ते ३जितेन्द्रिये च

श्रान्तसंवाह न० श्रान्तस्य श्रमस्य संवाहः दूरीकरणम् । [तत् त । पाद्मासनादिना श्रमनिवारणे ।

श्राम भ्वाच० उभ०सक० सेट् । श्रामयति ते अश्रमत् । श्राम पु० श्रम-घञ् । १काले २श्रमजे ३रोगे च भेदि० ।

श्रावक पु०त्रि० श्रु-ण्वुल् । १श्रवणकर्त्तरि २श्राद्धभुनि-यिनि च मुनिभेदे श्राद्धे पुंस्त्री० त्रिका० ।

श्रावण पु० श्रवणेन युक्ता पौर्णमासी श्रावणी यस्मिन् मासे अण् । वैशाखादिषु चतुर्थे श्रावणीयुक्ते चान्द्रे मासे २तथाभूते पक्षे श्रवणनक्षत्रेण पर्वान्तकाले उदयास्तस्त्व-त्वात् वार्हस्पत्ये ३वर्षभेदे च । गुरुवर्षशब्दे २६१६ पृ० दृश्यम् उपचारात् कर्कटस्थरविके सौरे ४मासे ५दिनसमूहे च मेदि० । श्रवणेन कर्मणा निर्वृत्तः अण् । कर्म-साध्ये प्रत्यक्षभेदे श्रवणनक्षत्रेण युक्ता पौर्णमासी अण् ङीप् । ७चान्द्रश्रावणमासीयपौर्णमास्यां स्त्री । सा च (घुलकुड़ि) दक्षत्तभेदे राजनि० । दध्यालोडिते मेदि० टाप् । १०हरीतकीवृक्षे भावप्र० ङीप् । "श्रावणि-तिका कटुः पाके वीर्योष्णा मधुरा लघुः । मेध्याग्नि-बलापचीक्षुक्रमियोन्यर्त्तिपाण्डुहृत् । श्रीपदारुच्या-प्यस्त्रीवृक्षभेदोगुदार्त्तिहृत् । अक्षतघ्नी च तत्तुल्या गुणैरुक्ता महर्षिभिः" भावप्र० ।

श्रावणिक पु० श्रावणी श्रवणनक्षत्रयुक्ता पूर्णिमाऽस्त्यस्मिन् मासे ठन् । १चान्द्रश्रावणमासे अमरः । २तथाभूते पक्षे

श्रावन्ती स्त्री श्रु-झिच् पृषो० ङीप् । धर्मपत्तनाख्ये नगरी-भेदे त्रिका० ।

श्रि सेवने भ्वा०उभ० सक० सेट् । अयते ते अश्रयिष्ट त ।

श्रित त्रि० श्रि-क्त । १सेविते २आश्रिते च ।

श्रिय दाहे भ्वा०पर०स० सेट् क्ता वेट् । श्रेयति अश्रेयीत् ।

श्री पाके क्रया०उ०सक०वेट् । श्रीणाति-ते अश्रायीत् अश्रीषत

श्री स्त्री श्रि-क्विप् नि० । १लक्ष्म्यां २शुक्लवर्णे अमरः । ३शो-भायां ४वाग्यां ५वेश्यरत्नायां ६घरलतायां ७धर्मार्थका-मेषु दशम्यन्तौ ८प्रकारे १०उपकरणे ११बुद्धौ १२विभूतौ मेदि० । १३सम्पत्तिकारे १४प्रभायां १५कीर्त्तौ धरणिः । १६वृद्धौ १७सिद्धौ शब्दर० १८कमले १९बिल्ववृक्षे २०वृ-द्धिनामौषधौ राजनि० "देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्रा-धिदेवताम् । सिद्धं सिद्धाधिकारांश्च श्रीपूर्वं वसुदोरयेत्" इत्युक्ते देवादीनां २१नामोच्चारणायोपाधिभेदे च "सिद्धाधिकारान् स्वर्गगमित्यादिना सिद्धोऽधिकारो येषां नराणां तान् सिद्धाधिकारान् । तेन जीवतां श्रीशब्दादित्वं न मृतानामिति" संस्कारत० रघु० । २२रागभेदे पु० । श्रीरागश्च सुन्दरपुरुषाकृतिः हेमन्ते ऽपराह्णे गेयः । तस्य पञ्च रागिण्य श्चानश्रीः भारवी धनाश्रीः वसन्तरागिणी आशाचरी संगीतदा० ।

पत्रे श्रीशब्दन्यासंख्याभेदाः पत्रशब्दे ४२२०पृ० दृश्या

श्रीकण्ठ पु०श्रीः शोभा कण्ठेऽस्य । १शिवे अमरः सर्वतः श्वेतस्य

करणे कृष्णवर्णविप्रसन्निकर्षे शोभाधिक्यात्तथात्वम् । २ह-स्तिनापुरस्य उत्तरपश्चिमस्थे कुरुजाङ्गलाख्ये देशे च हेमच०

श्रीकण्ठपदलाञ्छन पु० भवभूतौ शब्दमाला ।

श्रीकन्द स्त्री श्रीः शोभा तया युक्तः कन्दोऽस्याः । वन्ध्या कर्कट्यां राजनि० ।

श्रीकर न०श्रियं शोभां करोति कृ-अच् । १रक्षोत्पले त्रिका० २विष्णौ पु० ३दायनिबन्धभेदकारके पण्डितभेदे च पु० ४शोभाकारके त्रि० । [शब्दच० ।

श्रीकरण न०श्रीयुक्तं क्रियतेऽनेन कृ-करणे ल्युट् । लेखन्यां

श्रीकान्त पु० हृत० । विष्णौ शब्दच० श्रीनाथश्रीपत्यादयोऽप्यत्र । श्रीपतिस्तु भूमिपाले च मेदि० ।

श्रीकारिन् पु०श्रियं करोति कृ-णिनि । जङ्घाले महाजङ्घे १मृगभेदे राजनि० । २शोभाकारिणि त्रि० स्त्रियां ङीप् ।

श्रीखण्ड न०श्रियः शोभायाः खण्ड इव यत्र । चन्दने त्रिका०

श्रीगर्भ पु० श्रीर्गर्भेऽस्य । १विष्णौ त्रिका० २खड्गे च "श्रीगर्भो विजयस्त्वैव" इति खड्गनामाष्टकम् ।

श्रीगृह पु० श्रियः गृह इव यत्र । पक्षिण्यां पानीयशालायां हारा० । [जटा० ।

श्रीघन पु०श्रिया वृद्ध्या घनः । १वृद्धभेदे अमरः । २दृढे न०

श्रीचक्र न० श्रियाः चक्रं यन्त्रभेदः । "बिन्दुत्रिकोणवसु-कोणदशारयुग्मं मन्वस्रनागदशसङ्गतषोडशारम् । वृत्त-त्रयञ्च धरणीसदनत्रयञ्च श्रीचक्रमेतदुदितं परदेवतायाः" इति तन्त्रोक्ते त्रिपुरासुन्दरीपूजाङ्गे यन्त्रभेदे । [यन्त्र ।

श्रीज पु० श्रियो जायते जन-ड । कामदेवे श्रीनन्दनादयोऽ-

श्रीताल पु० श्रीयुक्तस्तालः शाक० । तालवृक्षतुल्ये वृक्षभेदे राजनि० । [दातरि त्रि० ।

श्रीद पु० श्रियं धनं ददाति दा-क । १कुबेरे अमरः २धन-

श्रीधर पु० श्रियं धरति धृ-अच् । १विष्णौ "अतिचुटुं द्वि-चक्रञ्च वनमालाविभूषितम् । श्रीधरं देवि ! विद्धेयम्" इत्युक्ते २शालग्रामभूमिभेदे न० ।

श्रीनिकेतन पु० श्रियं निकेतयति नितरां वासयति नि+कित-णिच्-ल्यु । १विष्णौ शब्दच० हृत० । २श्रीलक्ष्मी निवासे न० । [त्रि० हृत० । २श्रिय आलये च ।

श्रीनिवास पु० निवसत्यस्मिन् नि+वस-घञ् हृत० । १विष्णौ

श्रीपञ्चमी स्त्री श्रियः पूजाङ्गं पञ्चमी शाक० । माघशुक्ल-पञ्चम्याम् । माघोपक्रमे "चतुर्थी वरदा शुक्ला तत्र गौरी सुपूजिता सौभाग्यमतुलं कुर्यात् पञ्चम्यां श्रीरपि श्रियम्" । करवीरपूजादिनेऽनध्यायश्च गौडाचारः । अत्र श्रीपञ्च-म्यामारभ्य प्रतिमासं षड्ऋतुसमाप्यं श्रीपञ्चमीव्रतं स्त्रियः कुर्वन्ति तत्प्रमाणं संवत्सरकौमुदीधृतब्रह्मपु० । [हारा० ।

श्रीपथ पु० श्रीयुक्तः पन्थाः अच् समा० शाक० । राजपथे

श्रीपर्ण न० श्रीर्लक्ष्मीः पर्णे दलेऽस्य । १पद्मे श्रीयुक्तं पर्ण-मस्य । २अग्निमन्थवृक्षे पु० मेदि० ।

श्रीपर्णिका स्त्री श्रीयुक्तं पर्णमस्याः संज्ञायां कन् अत इत्त्वम् । कटफलवृक्षे अमरः ।

श्रीपर्णी स्त्री श्रीयुक्तानि पर्णान्यस्याः ङीप् । १गम्भा-रीवृक्षे अमरः । २कटफलवृक्षे मेदि० । ३शालमलीवृक्षे ४वटवृक्षे हेमच० । ५अग्निमन्थवृक्षे राजनि० ।

श्रीपिष्ट पु० श्रियै शोभायै पिष्यते पिष-क्त । सरलवृक्षे रा-जनि० । [२वृक्षैःश्रयणि अर्थे त्रिका० ३चन्द्रे च ।

श्रीपुत्र पु०हृत० । १कामदेवे श्रियः पुत्रो भ्राता सदृशत्वात् ।

श्रीपुष्प न० श्रीयुक्तं पुष्पम् शाक० । १लवङ्गे राजनि० । २पद्मकाष्ठे रत्नमाला ।

श्रीफल पु० श्रीयुक्तं फलमस्य । १बिल्ववृक्षे अमरः । २रा-जादन्याच्च राजनि० । ३नील्यां ४क्षुद्रकारेल्ल्यां स्त्री राजनि० टाप् । स्वार्थे क अत इत्त्वम् । ५तत्तुल्यार्थे रा-जनि० । ६आमलक्यां मेदि० स्त्री गौरा० ङीष् ।

श्रीभद्रा स्त्री श्रीयुक्तं भद्रमस्याः । भद्रमुस्तके शब्दच० ।

श्रीभागवत न० श्रीमत् भागवतम् शाक० । अष्टादशपुराणेषु मध्ये द्वादशस्कन्धयुक्ते अष्टादशसाहस्रे व्यासप्रणीते पुराणे भागवतशब्द दृश्यम् । श्रीमद्भागवतमध्यत्र "श्रीम-द्भागवते महामुनिकृते" भाग०१।१। [राजनि०२ चन्द्रे च ।

श्रीभ्रात पु० श्रियः लक्ष्म्याः भ्राता अनुजत्वात् । १अर्क

श्रीमत् पु० श्रीरस्त्यस्य मतुप् । १तिलवृक्षे अमरः । २अश्व-त्थवृक्षे राजनि० । ३विष्णौ शब्दर० । ४श्रिये त्रिका० । ५कुबेरे शब्दच० । ६शोभायुक्ते ७अग्निनि च त्रि० स्त्रियां ङीप् । सा च दशाधिकायां चतुश्चत्वारिंशदधिकायाम् नारदपञ्चरात्रम् ।

श्रीमलापहा स्त्री श्रिया शोभया मलमपहन्ति अप+हन-ड । धूम्रवल्लयां लतायां राजनि० ।

श्रीमस्तक पु०श्रीयुक्तं मस्तकमस्य । रसोने (लशुन) राजनि०

श्रीमूर्त्ति स्त्री श्रीपूर्वकमस्या मूर्त्तेः । देवतामूर्तिभायां राजनि० । विष्णोर्मूर्त्तिभेदाश्चतुर्विंशतिः मूर्तिशब्दे दृश्या । श्रीमूर्त्तयश्चाष्टविधाः भाग०११स्कन्धे दर्शिता यथा "शैली दारुमयी लौही लेप्या लेख्या च सैकती । मनो-मयी मणिमयी प्रतिमाष्टविधा मता । चलाचलेति द्वि-

विधा प्रतिष्ठा जीवमन्दिरम् । उद्वासावाहने न स्तः स्थिरायासक्षयार्चने । अस्थिरायां विकल्पः स्यात् स्थण्डिले तु भवेत् द्वयम् । स्नपनं त्वभिलेपावामन्यत्र परिमार्जनम् । गोपालमन्त्राद्दिष्टत्वात् तच्छ्रीमूर्त्तिरपेक्षिता । तथापि वैष्णवप्रीत्यै लेख्याः श्रीमूर्त्तयोऽखिलाः" ।

श्रीरङ्गपत्तन न० श्रिया रङ्गस्य पत्तनमिव । दाक्षिणात्ये देशभेदे

श्रीरस पु० श्रियै रसोऽस्य । श्रीवृक्षे गन्धद्रव्ये राजनि० ।

श्रीराम पु० श्रीशब्दयुक्तो रामः । दशरथात्मजे भगवदवतारभेदे शब्दच० । [च अमरः ।

श्रील त्रि० श्री+अस्त्यर्थे लच् । १शोभायुक्ते २धर्म्मादियुक्ते

श्रीलता स्त्री श्रीयुक्ता लता । महाज्योतिष्मत्यां राजनि० ।

श्रीवत्स पु० वर्द्धति महत्त्वं वृद्ध-स श्रीयुक्तो वत्सः । १वक्षःस्थे महत्त्वलक्षणश्वेतरोमावर्त्तविशेषे । स अस्त्रस्य अच् । २विष्णौ हेमच० । ३सुरङ्गाभेदे त्रिका० ।

श्रीवत्सक पु० श्रीवत्सः चिह्नभेदः तेन कायति कै-क । हृदयस्थश्वेतलोमयुक्ते अश्वभेदे ।

श्रीवत्सभृत् पु० श्रीवत्सं बिभर्त्ति भृ-क्विप् । विष्णौ हेमच०

श्रीवत्सलाञ्छन पु० श्रीवत्सोलाञ्छनं यस्य । विष्णौ अमरः श्रीवत्साङ्कादयोऽप्यत्र । [वराहावतारे त्रिका० ।

श्रीवराह पु० श्रिया युक्तो वराहः । विष्णोर्दशावतारेषु

श्रीवल्ली स्त्री श्रीयुक्ता वल्ली । कण्टकप्रधानवल्लीभेदे राजनि० ।

श्रीवाटी स्त्री श्रिया वाटीव । नागवल्लीभेदे राजनि० ।

श्रीवारक पु० श्रियं वारयति कामयते वृ-ण्वुल् । सितावरशाके राजनि० ।

श्रीवास पु० श्रियै वासयति वस-णिच्-अच् । सरलद्रुतरौ (टारपिन) । "श्रीवासः सरलः पूतिः कुन्दुरुर्धूपिपर्णकम् । सिल्हकः परमाभासो देवदारु सुरा नखी । सर्वेऽप्यमी परमाऽलक्ष्मीरक्षोघ्ना ज्वरनाशनाः" राजव० ।

५तत्० । २पद्मे ३विष्णौ भेदि० ४शिवे शब्दच० ।

श्रीवासस् न० श्रियै वासयति वस-णिच् असि । सरलद्रुद्रव्ये अमरः । [तन्त्रसा० ।

श्रीविद्या स्त्री श्रियै त्रिवर्गाय विद्या । त्रिपुरासुन्दर्य्यां

श्रीवृक्ष पु० श्रियः शोभायाः वृक्ष इव । १छन्दश्च हृदयस्थे श्वेतरोमावर्त्तभेदे २अश्वत्थवृक्षे हेमच० । श्रीनामकोवृक्षः शाक० ३बिल्ववृक्षे "श्रीवृक्षे बोधयामि त्वाम्"ति० त० ।

श्रीवेष्ट पु० श्रियै वेष्टतेऽसौ वेष्ट-कर्मणि घञ् । सरलद्रुनिर्य्यासे (टारपिन) राजनि० । [ज्यत्व ।

श्रीश पु० हृत० । १विष्णौ २श्रीरामे शब्दच० । श्रीश्वरादयोऽस्यत्र ।

श्रीसंज्ञ न० श्रियः संज्ञा संज्ञाऽस्य । लवङ्गे अमरः । [च ।

श्रीसहोदर पु०हृत० । १चन्द्रे २लक्ष्मीःसहचरि अन्ये च ३कर्पूरे

श्रीहस्तिनी स्त्री श्रीयुक्ता हस्तिनीव । (हातिशुँड़ा) द्रव्यभेदे अमरः ।

श्रु गतौ भ्वा० पर० सक० अनिट् । श्रवति अश्रौषीत् ।

श्रु श्रवणे भ्वा०पर०सक०अनिट् । शृणोति अश्रौषीत् । णिनि चङि अशिश्रवत् । णिचि सनि शि(शु)श्रावयिषति ।

श्रुःसुघ्न पु० देशभेदे । [ठन् । सर्जिकाक्षारे रत्नमा० ।

श्रु(सु)घ्निका स्त्री श्रु(चु)घ्नः देशभेदः कारणत्वेनाऽस्त्यस्याः ठाप् ।

श्रुत न० श्रूयते श्रु-क्त । १शास्त्रे अमरः २तज्ज्ञाने च "श्रुतान्वितः" इति भट्टिः । ३श्रवणेन गृहीते त्रि० मेदि० ४अवधृते च ।

श्रुतकीर्त्ति स्त्री १कुशध्वजकन्यायां भतृघ्नपत्न्याम् । श्रुता विख्याता कीर्त्तिरस्य । २विख्यातयशस्के त्रि० ।

श्रुतदेवी स्त्री श्रुतस्य शास्त्रस्य देवी । सरस्वत्यां हेमच० ।

श्रुतबोध पु० श्रुतमात्रं बोधयति बुध-णिच्-अण् । १कालिदासकृते छन्दोग्रन्थभेदे । २मुग्धबोधके अन्ये च ।

श्रुतश्रवस् पु० श्रुतं श्रवो यशोऽस्य । शिशुपालपितरि "निर्वर्त्तितैरारिक्रियया स श्रुतश्रवसः सुतः" इति माघः ।

श्रुतश्रोत्रि स्त्री श्रुता विख्याता श्रोत्रीव । स्वसन्यां भावप्र० ।

श्रुतादान न० हृत० । ब्रह्मचारिहारा० ।

श्रुतायुस् स्वर्गवर्ष्ये नृपभेदे "नाभागस्याम्बरीषोऽभूत् सिन्धुद्वीपस्ततोऽभवत् । ततः श्रुतायुः पुत्रोऽभूत्" मत्स्यपु० ।

श्रुति स्त्री श्रु-कर्मादौ क्तिन् । १वेदे वेदस्य सर्वैः श्रूयमाणत्वात् श्रुतित्वम् । २कर्णे कर्णस्य श्रवणहेतुत्वात् तथात्वम् । ३श्रवणेन्द्रियजन्ये ज्ञाने च । अङ्गुल्याद्योः "त्रिभुजस्येत्यादौ भुजकोट्योः संयुज्यमाने ४रेखाभेदे च लीला० । कर्णस्य शुभाशुभत्वं यथा "रक्तान्तपरुषस्निग्धसुकर्णाः शुभदाः परस्परतः । निर्मांसचिपिटैर्भोगाः कृपणा लुलितकर्णकाः । शङ्कुकर्णाश्च राजानो रोमकर्णाः श्रुतायुषः । दृढत्कर्णाश्च राजानो धनिनः परिकीर्त्तिताः" गरुड़पु० ६६च० । ५श्रवणक्रियायां ६वार्त्तायां मेदि० । ७श्रवणनक्षत्रे शब्दर० । दक्षजरागाद्यारब्धकाव्यवशे शब्दभेदे मल्लिना० "प्रथमं श्रवणाच्छ्रुतिः श्रूयते श्रुतसामकः । सा श्रुतिः स्मरिष्यते या स्वरावयवलक्षणेति" । श्रुतिसंख्यानियमस्तु तत्रैव दर्शितः "चतुश्चतुश्चतुश्चैव षड्जमध्यमपञ्चमाः । द्वे द्वे निषादगान्धारौ त्रिस्त्रिर्ऋषभधैवतौ" । तद्भेदास्तु "नान्दी चालनिका दीप्ता च सुप्तश्री चिता विचित्रा च मातङ्गी

सरस्वती मधुकरी मैत्री शिवा माधवी । बाला शार्ङ्गरवी कला कलरवा भाषा विशाला जया मात्रेति श्रुतयः पुराणकविभिर्द्वाविंशतिः कीर्त्तिताः", "श्रुतिस्थाने स्वरान् वक्तुं नालं ब्रह्माऽपि तत्त्वतः । जले च सुतरां मार्गो मीनानां नोपलभ्यते । गगने पक्षिणां यद्वत् तद्वत् स्वरगता श्रुतिः । श्रुतिर्नादवशा प्रोक्ता तथाऽऽत्रा च कला मता । यथा तैलगतं सर्पिर्यथा काष्ठगतोऽनलः । ज्ञायतेऽनोपदेशेन तथा स्वरगता श्रुतिः । वीणादिषु श्रुतिज्ञानं स्वरज्ञानं तु वंशजम् संगीतदा० । संगीतरत्नाकरे तु षड्जादिभेदे अन्यविधाः श्रुतय उक्ता यथा "तीव्रा कुमुद्वती मन्दा छन्दोवत्यसु षड्जगाः । दयावती रञ्जनी च रतिका मध्यमे स्थिता । रौद्री क्रोधा च गान्धारे वज्रिका च प्रसारिणी । प्रीतिश्च मार्जनीत्येताः श्रुतयो मध्यमाश्रिताः । क्षितिरक्ता च सान्दीपन्यालापी चैव पञ्चमे । मदन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः । उग्रा च क्षोभिणीति द्वे निषादे वसतः श्रुती" ।

श्रुतिकट पुंस्त्री० श्रुतिं कर्णं कटति कट-अच् । १सर्पे तस्य श्रुतिप्रकर्षत्वात् तथात्वम् स्त्रियां ङीष् । २प्राचक्षोहे ३पापशोधने च पु० मेदि० ।

श्रुतिकटु पु० श्रुतौ श्रवणे कटुः कठोरा । अलङ्कारोक्ते कठोरशब्दविशेषरूपे काव्यदोषभेदे २कठोरशब्दे च ।

श्रुतिजीविका स्त्री श्रुतिं जीवयति मूलतयानुसरति जीव-ण्वुट् । स्मृतिशास्त्रे मन्वादौ ।

श्रुतिधर त्रि० श्रुत्या श्रवणमात्रेण धरति धारयति धृ-अच् । श्रवणमात्रेण धारयितरि ।

श्रुतिमूल न० श्रुतिरेव मूलं धर्मप्रामाण्ये कारणम् । १वेदरूपे धर्मबोधनप्रमाणे ६त० । २वेदादौ वेदशास्त्रबोधिते धर्मादौ च ६त० । ३कर्णमूले ।

श्रुतिवर्जित त्रि० श्रुत्या वेदाध्ययनेन कर्णेन्द्रियेण वा वर्जितः १वेदपाठहीने २बधिरे च जटा० ।

श्रुतिविध पु० श्रुतेः कर्णस्य वेधो यत्र । कर्णवेधाख्ये संस्कारभेदे कर्णवेधशब्दे १७१० पृ० दृश्यम् ।

श्रुतिस्फोटा स्त्री श्रुताविव स्फोटो यस्याः । कर्णस्फोटाख्यतायां राजनि० ।

श्रुत्यनुप्रास पु० श्रूयते इति श्रुतिः यद्वर्णसाम्यानुप्रासः । अलङ्कारोक्ते शब्दालङ्कारभेदे अनुप्रासशब्दे १७८पृ० दृश्यम् ।

श्रुत्यर्थ त्रि० श्रुतौ वेदे उक्त विधिष्टः । वेदविहिते धर्मादौ ।

श्रुव पु० श्रूयते यो १यज्ञे जटा० श्रुतिविहितत्वात् तस्य तथात्वम् स्रुक्पात्रभेदे राजनि० ।

श्रुस्रुवा स्त्री स्रु(स्रु) क । यज्ञपात्रभेदे राजनि० । कात्या० श्रौ० १।३।२८ अयं दन्त्यादितया पुंस्त्वेन चोक्तः "अरत्निमात्रः स्रुवोऽङ्गुष्ठपर्ववृत्तपुष्करः" इत्यु० । "अरत्निः प्रमाणमस्यासावरत्निमात्रः स्रुवोऽरत्निप्रमाणो भवति अङ्गुष्ठपर्वणो वृत्तमङ्गुष्ठपर्ववृत्तम् अङ्गुष्ठपर्ववृत्तं पुष्करं यस्य सोऽयमङ्गुष्ठपर्ववृत्तपुष्करः पर्वशब्दः सन्धिवाची सन्धिर्ग्रन्थिः तदुक्तम् "अङ्गुष्ठाङ्गुलिमानं तु यत्र यत्रोपदिश्यते । तत्र तत्र वृत्तपर्व ग्रन्थिभिर्मितं यात् बुधः" । अतोऽङ्गुष्ठस्य वृत्तपर्वग्रन्थिप्रमाणं चतुरस्रं कृत्वा तदेव मण्डलं चतुरस्रं चिकीर्षन्नित्युपायेन वृत्तं विधाय तत्प्रमाणं स्रुवस्य पुष्करं नासिकावत् स्यात् स्यात्" कर्क० । कर्मप्रदीपे कात्या० "खादिरो वाथ पालाशो वितस्तिस्तु स्रुवः स्मृतः । स्रुग्बाहुमात्रा विज्ञेया वृत्तस्रु प्राग्वृत्तयोः । स्रुवाग्रे प्राणवत् स्यातं ह्यङ्गुष्ठपरिमण्डलम्" । [वृत्ते राजनि० ।

श्रुस्रुवावृत्त पु० स्रु(स्रु)-वार्थो वृत्तः । (वँदुचि) चिकङ्कतः

श्रेढी स्त्री श्रेण्यै राशीकरणाय ढौकते ढौक-ड पृषो० गौरा० ङीष् । भिन्नजातीयद्रव्याणां मिश्रकरणाय लीला० उक्ते गणनाङ्कभेदे ।

श्रेढीव्यवहार पु० श्रेढ्या व्यवहारः । श्रेढीगणनार्थे लीलावत्युक्ते उपायभेदे । [अमरः ।

श्रेणि(णी) स्त्री श्रि-णि वा ङीप् । विच्छेदरहितायां षड्क्रो

श्रेयस् न० अतिशयेन प्रशस्यम् इयसु आदेशः । १धर्मे २मोक्षे अमरः । ३शुभे न० ४अतिप्रशस्ते त्रि० मेदि० स्त्रियां ङीष् । सा च ५हरीतक्यां ६पाठायां ७यजनिष्पल्याम् अमरः दराच्चायां विश्वः । ८शुभयुक्ते त्रि० अमरः ।

श्रेष्ठ पु० अतिशयेन प्रशस्यः इष्ठन् आदेशः । १कुबेरे २रुद्रे ३विष्णौ शब्दर० ४विष्णौ विष्णुस० ५गोदुग्धे न० त्रिका० ६अत्यन्तप्रशस्ते त्रि० अमरः । ७स्थलपद्मिन्यां स्त्री दमेदायाञ्च राजनि० ।

श्रेष्ठकाष्ठ पु० श्रेष्ठं काष्ठमस्य । शाकवृक्षे (शेगुण) राजनि० ।

श्रेष्ठाम्ल न० श्रेष्ठमम्लमस्य । वृक्षाम्ले राजनि० ।

श्रेष्ठिन् पु० श्रेष्ठं धनादिकमस्यास्य इनि । १श्रिल्पिवणिजां श्रेष्ठे जटा० "स हि श्रेष्ठित्वरे प्रतिवसतीति" वृक्षकटिकटोक्ता । [घटादि० अपवति ।

श्रै खे स्वा० प० अक० अनिट् । श्रायति अश्रासीत् । विकृतौ

श्रोण संघाते स्वा० पर० अक० सेट् वृदित् चङि न हस्वः । श्रोणति अश्रोणीत् ।

श्रोण पु० श्रोण-अच्। १पङ्गौ अमरः। २कट्यां स्त्री।

श्रोणि(णी) स्त्री श्रोण-इन् वा ङीष्। १कटयाम् अमरः २पथि शब्दर०। [२कटिपार्श्वे।

श्रोणिफलक न० श्रोणिः फलकमिव। १पश्चात्कटौ हेत०।

श्रोणिसूत्र न० श्रोणौ स्थितं सूत्रम्। श्रोणिस्थे खड्गादि बन्धनसूत्रे।

श्रोतस् न० श्रु-असुन् तुट् च। १कर्णे २नदीवेगे अमरः। ३इन्द्रिये हेमच०। अत्रार्थे दन्त्यादित्वमित्यन्ये।

श्रोत्र न० श्रूयतेऽनेन श्रु-करणे ष्ट्रन्। १शब्दज्ञानसाधने इन्द्रियभेदे अमरः। २तदाधारे गोलके च कर्णशब्दे १७०६पृ० दृश्यम्।

श्रोत्रिय पु० छन्दो वेदमधीते वेत्ति वा छन्दस्+घ श्रोत्रादेशः। १वेदाध्ययनानुरते अमरः। "एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च। षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्" इत्युक्ते २विप्रभेदे "जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते। विद्याभ्यासी भवेद्विप्रः श्रोत्रियस्त्रिभिरुच्यते" मनूक्तलक्षणे ३ब्राह्मणभेदे च।

श्रौत त्रि० श्रुतौ विहितमत्र। १वेदविहिते धर्मादौ "श्रौतं कर्म स्वयं कुर्यात्" कात्या० स्मृतिः। २गार्हपत्याहवनीयदक्षिणाग्निषु पु०।

श्रौत्र न० श्रोत्र-स्वार्थे अण्। १कर्णे। श्रोत्रियस्य भावः कर्म वा अण् यलोपः। वैदिकस्य भावे "श्रौत्राहुतीचयैर्गुणयैः" सिद्धान्तकौ०।

श्रौषट् अव्य० श्रु-डौषटि। यज्ञादौ हविर्दाने अमरः।

श्लक सर्पणे भ्वा०आ० सक० सेट् इदित्। श्लक्ते अश्लक्त। श्लक्ष्ण त्रि० श्लिष-अक्ष नि०। १अल्पे अमरः २चिक्कणे। संज्ञायां कन्। ३श्लक्ष्णोहरे उणा० ४घृते राजनि०।

श्लक्ष्णत्वच् पु० राज्ञां त्वगस्य। अश्मन्तकवृक्षे राजनि०।

श्लग गतौ भ्वा० पर० सक० सेट् इदित्। श्लङ्गति अश्लङ्गीत्।

श्लथ दौर्बल्ये भ्वा०चु०उभ०अक०सेट्। श्लथयति ते अशश्लथत त।

श्लथ पु० श्लथ-अच्। १शिथिलसंयोगे शिथिले त्रि०। २दुर्बले च

श्लाघ व्याप्तौ भ्वा०पर० सक० सेट् चदित् चङि न ह्रस्वः। श्लाघति अश्लाघीत्। नि ह्रस्वः। श्लाघते अश्लाघिष्ट।

श्लाघ आत्मगुणाविष्करणे भ्वा०आ० अक० सेट् चदित् चङि

श्लाघा स्त्री श्लाघ-अ। १प्रशंसायां २परिचर्यायाम् ३अभिलाषे च मेदि०। ४निजगुणाविष्करणे।

श्लाघ्य त्रि० श्लाघ-ण्यत्। प्रशस्ते "श्लाघ्यस्त्वत्स्तुत्यवर्णवो-रिति" हेमीमा०।

श्लिकु न० श्लिष-कु नेत्त्वम् पृषो०। ज्योतिःशास्त्रे उणा०।

श्लिकु पु० श्लिष-क्यु नेत्त्वम् पृषो०। १भृत्ये त्रि०कौ० २जारे उणादि०। [श्लेषोत्।

श्लिष दाहे भ्वा०पर०सक०सेट् उदित् क्त्वा वेट्। श्लेषति अश्लिषत्।

श्लिष आलिङ्गने संसर्गे च सक० दि० अनिट्। श्लिष्यति लृदित् अश्लिषत्। आलिङ्गने त अश्लिषत।

श्लिष श्लेषणे चु०उभ०सक०सेट्। श्लेषयति ते अशिश्लेषत् त।

श्लिष्ट त्रि० श्लिष-क्त। १आलिङ्गिते २संसृष्टे ३श्लेषरूपशब्दालङ्कारयुक्ते शब्दे च।

श्लीपद न० श्लीयुक्तं दन्त्ययुक्तं पदमस्मात् पृषो०। (गोद) १रोगभेदे ६ब०। २तद्रोगयुक्ते त्रि० श्लीपदशब्दे ५१११ पृ०दृश्यम्।

श्लीपदप्रभव पु० श्लीपदाय रोगभेदाय प्रभवति प्र+भू-कच्। आम्रवृक्षे शब्दमा०। तत्फलसेवने रससञ्चयात् तद्वृद्धिः।

श्लीपदापह पु० श्लीपदं रोगभेदमपहन्ति अप+हन-ड। पुत्रजीववृक्षे त्रिका०। [तद्विपरीतो हि अश्लीलः।

श्लील त्रि० श्लीरत्नस्य लच् पृषो० रस्य नः। शोभायुक्ते

श्लेष पु० श्लिष-घञ्। १संसर्गे अमरः २दाहे ३आलिङ्गने ४शब्दालङ्कारभेदे च अलङ्कारशब्दे ४०५पृ० दृश्यम्।

श्लेष्मघ्ना स्त्री श्लेष्माणं हन्ति हन-क टाप्। १भल्लिकायां २केतक्यां च विश्वः। ३ज्योतिष्मत्यां जटा० ङीप्। सा च ४भल्लिकायां मेदि० ५त्रिकटुनि शब्दच०।

श्लेष्मण पु० श्लेष्माऽत्रास्य न। कफविशिष्टे अमरः।

श्लेष्मन् पु० श्लिष-मनिन्। कफे अमरः। श्लेष्मस्वरूपादिकं भावप्रकाशादुक्तं कफशब्दे १६७६पृ० दृश्यम्। तत्प्रकृतिफललक्षणम् "गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः। हृष्टो जलाशयाभोगी श्लेष्मप्रकृतिको नरः"। तत्कर्माणि यथा "स्नेहो बन्धः स्थिरत्वञ्च गौरवं दृढ़ता बलम्। जलाधातिरतोभस्य कफकर्माविकारजम्"। श्लेष्मकरद्रव्याणि कफकरशब्दे १६७७पृ० दृश्यानि। अन्यानि यथा "भोजनानन्तरं स्नानं जलपानं विना तृषा। तिलतैलं स्निग्धतैलं स्निग्धसामलकीरसम्। पर्युषितान्न तक्रञ्च पक्वरम्भाफलं दधि। माषान्नशुष्कशाकादीन्यं सुस्निग्धस्थलसेवनम्। नारिकेलोदकं क्षुत्तृष्णा पर्युषितं जलम्। तरुसञ्जातफलानि सुपक्वकर्कटीफलम्। खातस्नानञ्च वर्षासु मूलकं श्लेष्मकारणम्। तच्छत्रं ब्रह्मरन्ध्रे च महावीर्यविनाशनम्"। श्लेष्मनाशकद्रव्याणि कफघ्नीशब्दे १६७७पृ० दृश्यानि। अन्यानि च यथा "बह्निखेदं

भट्टभङ्गं पक्वतैलं विशोषकम् । भ्रमणं शुष्कमद्यञ्च शुष्कपक्वहरीतकी । पिण्डारकमपक्वञ्च रम्भा फलमपक्वकम् । वेशवारसिन्धुवारमनाहारमपानकम् । सहतं रोचनाचूर्णं सहतं शुष्कमर्करम् । मरीचं पिप्पली शुष्कमार्द्रकं जीरकं मधु । द्रव्याण्येतानि गन्धर्व ! सद्यः श्लेष्महराणि च" ब्रह्मवै० ब्रह्म० १६ अ० । [२हत्ते पु० शब्दच० ।

श्लैष्मल त्रि० श्लेष्म+अस्त्यर्थे लच् । १कफयुक्ते (बड्डयार) **श्लैष्महन्** पु० श्लेष्माणं हन्ति हन-ड । १कट्फलवृक्षे शब्दच० २श्लेष्मनाशके त्रि० । कफश्लोशब्दे १६७७ पृ० दृश्यम् ।

श्लैष्मात पु० श्लेष्मणा अतति अत-अच् । श्लेष्मातकवृक्षे शब्दर० **श्लैष्मातक** पु० श्लेष्मणा श्लेषजनजनितकफेन अतति अत-ण्वुल् (बड्डयार) बड्डवारवृक्षे अमरः "बड्डवारस्तु शीतः स्यादुदालो बड्डवारकः । श्लेतुः श्लेष्मातकश्चापि पिच्छिलो भूतवृक्षकः । बड्डवारो विषस्फोटव्रणवीसर्पकुष्ठनुत् । मधुरस्तुवरस्तिक्तः केश्यश्च कफपित्तहृत् । फलमामन्तु विष्टम्भि रूक्षं पित्तकफामजित् । तत् पक्वं लघुरं स्निग्धं श्लेष्मलं शीतलं गुरु" भावप्र० ।

श्लैष्मान्तक पु० श्लेष्मणा श्लेषजनजकफेन अन्तक इव नाशकत्वात् (बड्डयार) वृक्षभेदे राजनि० । [श्लोकते अश्लोकिष्ट ।

श्लोक वर्द्धने संघाते च भ्वा० आ० सक० सेट् कदित् चङि न ह्रस्वः ।

श्लोक पु० श्लोक-अच् । चतुःपदात्मके कविकृते १वाक्यभेदे २यशसि च अमरः "क उत्तमश्लोकगुणानुवादात्" भाग० १।१

श्लोण संघाते भ्वा० पर० सक० सेट् कदित् चङि न ह्रस्वः । श्लोणति अश्लोणीत् ।

श्वःश्रेयस न० श्वः परदिने भाविकाले श्रेयो यस्मात् अच् समा० । १मङ्गले अमरः २सुखे ३परमात्मनि च मेदि० ४कल्याणयुक्ते त्रि० ।

श्वक सर्पणे भ्वा० आ० सक० सेट् कदित् । श्वङ्क्षते अश्वङ्क्षिष्ट ।

श्वच गतौ भ्वा० आ० सक० सेट् । श्वचते अश्वचिष्ट कदित्त्वात् श्वस्

श्वठ गतौ संस्कारे च चु० उभ० सक० सेट् । श्वठयति-ते अशिश्वठत् त । कदित्त्वात् श्वस् अश्वठयति । [ठत् न ।

श्वठ दुर्वचने अद० चु० उभ० सक० सेट् । श्वठयति ते अशश्वठत् त ।

श्वदंष्ट्रक पु० शुनो दंष्ट्रेव कण्टकोऽस्य कप् । गोक्षुरे क्षुपे राजनि० । [अमरः ।

श्वदंष्ट्रा स्त्री शुनो दंष्ट्रेव कण्टकोऽस्तत्वात् । गोक्षुरे क्षुपे

श्वधूर्त्त पु० स्त्री निश्चितो वञ्चनार्थं धूर्त्तः । शृगाले शब्दच० स्त्रियां ङीष् । नी ।

श्वन् पु० श्वि-कनिन् नि० । कुक्कुरे तल्लातिस्त्रियां ङीष्

श्वनिश न० स्त्री शुनां कुक्कुराणां निशा वा ह्रस्वः । कुक्कुरमांसकरावौ ।

श्वपच पुंस्त्री० श्वानं पचति भोजनाय पच-अच् । श्वपाके जातिभेदे । स च अत्यन्तावसायिजन्तुः "चण्डालः श्वपचः क्षत्ता क्षतो वैदेहकस्तथा । नागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः । अन्त्यावसायिनामन्नमश्नीयादु यस्य कामतः । स तु चान्द्रायणं कुर्य्यात् तप्तकृच्छ्रमथापि वा" प्रा० त० व्यक्तिराः ।

श्वपाक पु० श्वानं पचति कर्त्तरि संज्ञायां घञ् । जातिभेदे "चण्डजातिस्तयोर्मायां श्वपाक इति कीर्त्यते" मनुः । तद्धर्म्मश्च चण्डालशब्दे ३८४९ पृ० दृश्यः ।

श्वफल पु० शुनः प्रियं फलमस्य । बीजपूरवृक्षे रत्नमा० ।

श्वफल्क पु० । दक्षिणदेशे अक्रूरपितरि क्षत्रियभेदे विष्णुपु० ।

श्वभीरु पु० श्वभ्यो भीरुः । शृगाले शब्दमा० ।

श्वभ्र गतौ क्षिप्तकरणे सक० दौरित्ये अक० चु० उभ० सेट् । श्वभ्रयति ते अशश्वभ्रत् त ।

श्वभ्र न० श्वभ्र-अच् । छिद्रे अमरः ।

श्वयथु पु० श्वि-इथुच् । शोथे अमरः ।

श्वयीची स्त्री श्वि-ईचि ङीप् । पीड़ायाम् त्रि० कौ० ।

श्वल वेगे भ्वा० पर० अक० सेट् । श्वलति अश्वालीत् ।

श्वल्क भाषणे चु० उ० स० सेट् । श्वल्कयति ते अशश्वल्कत् त ।

श्वल्ल वेगे भ्वा० पर० अक० सेट् । श्वल्लति अश्वल्लीत् ।

श्ववृत्ति स्त्री शुन इव पराधीना वृत्तिः । दास्ये "सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्" मनुः । "दीनवृत्तिर्वन्दनस्तावितज्जननीचक्रियादिधर्म्मयोगात् श्ववृत्त्यभिधीयते" कुल्लू० "न श्ववृत्त्या कदाचन" मनुः । [अटा० ।

श्वव्याघ्र पु० शुनो व्याघ्रः । कुक्कुरघातके व्याघ्रभेदे (चिते)

श्वशुर पु० शु आशु अश्नुते आशु+अश-करच् पृषो० । १पत्नुः पितरि २भार्य्यायाः पितरि च अमरः ।

श्वशुर्य्य पु० श्वशुरस्यापत्यम् यत् । १देवरे २श्यालके च अमरः ।

श्वश्रू स्त्री श्वशुरस्य पत्नी ऊङ् उकारोकारलोपश्च । श्वशुरभार्य्यायाम् अमरः । श्वश्रूस्नुषयोरविश्वासकारणं वराहपु० उक्तं यथा "एकस्त्री स योषन्द्र भ्रमा नारी तदा धरे ! । या कुक्षिभिः सप्त भ्रमा विश्वासो भवेत्तदा क्वचित् । सा च क्षुधा कदाचित् स्याद् या श्वश्रूः जीवतीमिमेत्" । [अमरः ।

श्वस् अव्य० आगामि अहः पृषो० नि० । आगामिनि दिवसे

श्वस जीवने अदा० ऊह्मा० पर० सक० सेट् । श्वसिति अश्व-

कीत्। "न विश्वसेदविश्वस्ते इत्यादौ" तु गणव्यत्ययात् श्वादित्वम् निष्ठा वेट्। श्वसितः श्वस्तः।

श्वस श्वप्ने अदा०प० सक० वैदिकोऽयम्। श्वसिति अश्वसीत्।

श्वसन पु० श्वसित्यनेन श्वस-ल्युट्। १वायौ २मदनवृक्षे च अमरः। भावे ल्युट्। ३निश्वासे न०मेदि०। [स्त्रियां ङीष्

श्वसनाशन पुंस्त्री० श्वसनोवायुरशनमस्य। सर्पे त्रिका०।

श्वसनेश्वर पु० श्वसनो वायुरीश्वरोऽस्य। अर्जुनवृक्षे शब्दच०।

श्वसनोत्सुक पुंस्त्री० ७त०। सर्पे शब्दर०। स्त्रियां ङीष्।

श्वसित न० श्वस-क्त। निश्वासे मुखनासिकाभ्यां बहिर्गमनरूपे हृदयस्थप्राणवायुव्यापारे।

श्वसुन पु० श्वस-उनन्। (ककरशोल्का) दग्धे शब्दमा०।

श्वस्तन त्रि० श्वोभवः श्वस्-ट्युल् तुट् च। भाविदिनस्थायिवस्तुनि स्त्रियां ङीप्।

श्वस्त्य त्रि० श्वोभवः श्वस+ष्यञ्। भाविदिनस्थायिवस्तुनि।

श्वागणिक पु० श्वगणेन चरति ठञ्। कुक्कुरादिना मृगयाकर्त्तरि व्याधे त्रिका०। [युते।

श्वादन्त त्रि०गुण इव दन्तोऽस्य नि०दीर्घः। कुक्कुरतुल्यदशन-

श्वान पुंस्त्री० श्वेव अण् न टिलोपः। कुक्कुरे शब्दमा०। नञ्जातिस्त्रियां ङीष्। [राजनि०।

श्वानचिल्लिका स्त्री श्वान इव चिल्लिका। शुनकचिलुप्रां

श्वापद पु०गुण इवापदत्वात् अचतुमा०। १हिंस्रपशौ हेमच० २व्याघ्रे च शब्दर०।

श्वाविध् पु० शुना श्वाविध्यते आ-व्यध् क्विप् दृत०। शल्यके (गजारु) अमरः। क। श्वाविधोऽप्यत्र पु०।

श्वास पु० श्वस-घञ्। १वायुव्यापारे २रोगभेदे शब्दचोक्ते वर्णोच्चारणार्थे वाह्यायत्नभेदे च।

श्वासरोगस्य निदानादि भावप्र० उक्तं यथा

"श्वासनिदानमाह यैरेव कारणैर्हिक्का देहिनां समुपजायते। तैरेव बहुभिः श्वासो व्याधिर्घोरः प्रजायते"। श्वासस्य भेदानाह "महोर्ध्वछिन्नतमकक्षुद्रभेदैस्तु पञ्चधा। भिद्यते स महाव्याधिः श्वास एको विशेषतः"। तस्य पूर्वरूपमाह "प्राग्रूपं तस्य हृत्पीडा भ्रूललाटाक्षिनेत्रयोः। आनाहो दन्तहर्षश्च मुखनिष्ठीव एव च"। संप्राप्तिमाह "यदा स्रोतांसि संरुध्य मारुतः कफपूर्वकैः। विष्वक् व्रजति संरुद्धस्तदा श्वासं करोति सः"। विष्वक् व्रजति सर्वतो विमार्गान् याति संरुद्धः कफादिना रुद्धमार्गः। महाश्वासस्य लक्षणमाह "ऊर्ध्वयमानवातोयः शब्दवत् क्षुभितो नरः। ऊर्ध्वः श्वसिति शब्दो मर्मरुक् इवा-

निशम्। प्रनष्टज्ञानविज्ञानस्तथा विभ्रान्तलोचनः। विहताक्ष्यानतो बद्धमूत्रवर्चा विशीर्णवाक्। दीनस्य श्वसितस्यास्य दूराद्विज्ञायते भयम्। महाश्वासोपसृष्टस्तु क्षिप्रमेव विपद्यते"१। ऊर्ध्वयमानवातः ऊर्ध्वं नीयमानो वातो यस्य सः शब्दवत् सशब्दं यथा स्यात्। कीदृक् स शब्दस्तदुपाधिद्वारमाह मर्मरुक् इव। ऊर्ध्वः श्वसितीत्यस्यायः। मर्मरुक् आनद्धः आनाहयुक्त इति यावत्। ज्ञानं तत्तदर्थविनिश्चयः। विशीर्णवाक् स्खलितवचनः। दीनः स्रस्तः। मारकत्वाय महाश्वासः। ऊर्ध्वश्वासमाह "ऊर्ध्वं श्वसिति योऽत्यर्थं न च प्रत्याहरत्यधः। श्लेष्माहतस्रोतोरुद्धगन्धवहार्दितः। ऊर्ध्वदृष्टिर्विभ्रान्तो मुह्यन् विभ्रान्तात्र एतस्ततः। प्रसुप्तन् वेदनार्त्तश्च शुष्काक्षो रतिपीडितः ऊर्ध्वश्वासे प्रकुपिते क्षयः श्वासो निरुद्ध्यते। सुप्तस्तास्यतश्चोर्ध्वश्वासस्तस्य निहन्त्यसून्"२। सर्वेषु श्वासेषु ऊर्ध्वश्वासोऽत्र अत्यर्थमिति विशेषः। न च प्रत्याहरत्यधः न श्वासमधः करोति श्लेष्माहतेत्यादिश्लोकार्द्धं यन्मुखं स्रोतांसि च तैः रुद्धो यो गन्धवहस्तेनार्दितः। विपद्यन् एतस्ततो विक्षिप्तं यथा स्यादेवं पश्यन् अधःश्वासो निरुद्ध्यते श्वासो नाधः प्रवर्त्तते" इत्यर्थः। सुप्ततो मोहं प्राप्नुवतस्तास्यतो ग्लानिं प्राप्नुवतश्च ऊर्ध्वश्वासः असून् प्राणान् हन्ति। छिन्नश्वासस्यारिष्टलक्षणमाह "यस्तु श्वसिति विच्छिन्नं सर्वप्राणेन पीडितः। न वा श्वसिति दुःखार्त्तो मर्मच्छेदरुजार्दितः। आनाहस्तेटमूर्च्छार्त्तो दह्यमानेन वह्निना। विप्लुताक्षः परिम्लोचः श्वसन् रक्तैकलोचनः। विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः। छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून्"३। विच्छिन्नं सविच्छेदं सर्वप्राणेन सर्वबलेन मर्मच्छेदरुजार्दितः हृदयशिरश्छेदवेदनयैव पीडितः। दह्यमानेन वह्निना उपलक्षितः। विप्लुताक्षः अस्थिरनेत्रः। विचेताः उद्विग्नचित्तः छिन्नश्वासेन विच्छिन्नः यस्तु श्वसिति विच्छिन्नमित्यादिलक्षणयुक्तो यः स नरः छिन्नश्वासेन विच्छिन्न पीडितो बान्धवैः। मारकत्वाय छिन्नश्वासः। तनकश्वासमाह "प्रतिलोमो यदा वायुः स्रोतांसि प्रतिपद्यते। ग्रीवां शिरश्च संरुध्य श्लेष्माणं बहुदीर्य च। करोति पीनसं तेन कण्ठे घुर्घरकं तथा। अतीव तीव्रवेगश्च श्वासं मार्गप्रपीडकम्। प्रताम्यति च वेगेन तनुते सन्निरुध्यते। प्रमोहं याति मानस्य स गच्छति सुदुर्दृशः। श्लेष्मणा सुप्यमानेन

भयं भवति दुःखितः। तस्यैव च विमोचान्ते सुखं लभते सुखम्। तथास्योद्ध्वंयते कण्ठः लच्छाच्छक्नोति भाषितुम्। न चापि निद्रां लभते शयानः श्वासपीडितः। पार्श्वे तस्यावगृह्णाति शयानस्य समीरणः। आसीनो लभते सौख्यमुष्णञ्चैवाभिनन्दति। उच्छ्वासो ललाटेन स्विद्यता भ्रुवमार्त्तिमान्। विशुष्कास्यो मुहुः श्वासी मुहुश्चैवावधम्यते। सेघाम्बुगीतमाघ्रातैः श्लेष्मलैश्च विवर्द्धते। स यास्यत्तमकः श्वासः साध्यो वा स्याच्चयोत्थितः"४। संदश्य व्यथया बलवदीर्घं वर्द्धयित्वा। पीनसं नासास्रावं तेन श्लेष्मणा घुर्घुरं घुर्घुरशब्दं प्राणप्रपीडकम्। प्रतास्यति तमसि प्रविशतीव वेगेन श्वासवेगेन सञ्चिरुध्यते निश्चेष्टो भवतीति चक्रः। सञ्चिरुध्यते श्वास इति जैज्जटः।। श्लेष्मणा क्षुभ्यमानेन मुखं सुखमिव उद्ध्वंयते व्यथितो भवति। शयानः शयननिचिताङ्गोऽवगृह्णाति पीड्यति च्यावैवाभिनन्दति एतेनेव तमको वातकफारब्ध इति बोद्धव्यः। उच्छ्वासः श्वासः। ललाटेन स्विद्यता उपलक्षितः अवधम्यते गलाद्गृह्यैव सर्वगात्राण्याक्षिपति। तमकस्यैव पित्तानुबन्धजनितज्वरादियोगेन प्रतमकसंज्ञासाह "ज्वरमूर्च्छापरीतस्य विद्यात् प्रतमकं भिषक्"। तस्यैवापरत्वमाह "उद्ववर्त्तरजो जीर्णकल्लिकायनिरोधजः। तमसा वर्द्धतेऽत्यर्थं शीतलैश्च प्रशाम्यति। मज्जतल्लमसोवाच्च विद्यात् प्रतमकन्तु तम्"। उद्ववर्त्तो रोगविशेषः रजो धूलिः अत्यालीर्णमामादिकल्लिन्नं विदग्धं कायनिरोधः अङ्गवेगानां निरोधः तस्मादुत्पन्नः। क्षुद्रश्वासमाह "कृच्छ्रायासोद्भवः कोष्ठे क्षुद्रोवात उदीरयन्। क्षुद्रश्वासो न सोऽत्यर्थदुःखेनाङ्गप्रबाधकः। छिनत्ति न च गात्राणि न च दुःखं प्रयच्छति। न च भोजनपानानां निरुणद्धि गतिम्। नेन्द्रियाणां व्यथाञ्चापि कालिदुत्पादयेद्दुजम्। स साध्य उक्तो बलिनः सर्वं चाव्यक्तलक्षणाः"५। क्षुद्रः अल्पनिदानलिङ्गः उदीरयन् जर्जरं गच्छन् दुःखः दुःखप्रदः। सर्वं महाश्वासादयोऽपि। अव्यक्तलक्षणाः सन्तः साध्याः। श्वासानां साध्यत्वादिक्रमाह "क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते। त्रयः श्वासा न सिध्यन्ति तमको दुर्बलश्च च। कासं प्राणहरा रोगा बहवो न तु ते तथा। यथा श्वासश्च हिक्का च हरतः प्राणमाशु वै"। बहवो ज्वरादयः "तृष्णा यथा श्वासहिक्के हरतो जीवमाशु ते"।

तेषां निदानकर्मविपाकास्तु भगुभार० उक्ता यथा "श्वासरोगो महाघोरो देहिदेहाभिघातकः। कर्मणा येन भवति तन्मे निगदतः शृणु। महोर्ध्वश्छिन्नतमकक्षुद्रा-भेदोऽस्य पञ्चधा। श्वासः संजायते नृणां पृथक् कर्मानुसारतः। यस्तु यत्तं समासाद्य पशुश्वासं निरुध्य च। हन्ति खादन्ति वातश्च महाश्वासेन मुह्यते१। पौराणिक कथा मध्ये यस्तु वाचान्यथा वदेत्। स ऊर्ध्वश्वासमासाद्य दुनोत्यहरहर्नियम्२। निश्चिद्रदानंपतिष्यच्छिन्नश्वासेन मुह्यते३। मर्त्यः शास्त्रार्थनिर्णीतवाक्यं यो दूषयत्यपि। पीड्यते तमकश्वासैः४ क्षुद्रैः पापकृद्विन्नतः५। परत्र कर्मतो देही नरकेषु विपच्यते। नरकान्ते पुनर्व्योन्योनिं शूकरयायसीम्। पृथक् कर्मवशाद् योनौ गत्वा संप्राप्य तप्यते। मानुषत्वमनुप्राप्य पूर्वोक्तैर्नोपगृह्यते"।

श्वासकास पु० श्वासयुक्तः कासः। श्वासयुक्ते कासरोगे "विष्णुनो नरकस्यान्ते जायते श्वासकासवान्। छत्रं तेन प्रदातव्यं सच्छत्रफलसम्मितम्" श्राद्धा० कर्म०।

श्वासकुठार पु० श्वासे कुठार इव। श्वासरोगौषधभेदे "रसो गन्धो विषञ्चापि दृङ्मूलञ्च मनःशिला। एतानि कर्षमात्राणि मरिचञ्चाष्टकर्षकम्। कटुत्रयं कर्षयुग्मं पृथगात्र विनिःक्षिपेत्। रसः श्वासकुठारोऽयं सर्वश्वास निवारकः" भावप्र०। [धारणव्यापारे प्राणवायौ

श्वासधारण न० श्वासः प्राणवायुः ध्रियतेऽनेन। प्राण-

श्वासहेति स्त्री श्वासस्य हेतिरिव। निद्रायां हेमच०।

श्वासारि पु० श्वासस्य रोगभेदस्यारिः नाशकत्वात्। शुष्करमूले राजनि०।

श्वासिन् पु० श्वासयति श्वस-णिच् णिनि। वायौ शब्दच०।

श्वि गतौ सक०इदुदुपधो अक०भ्वा०पर०अनिट्०सेट्। श्वयति अश्वित्-अश्वत्-अश्वयीत्। द्वित्व श्वयथुः कोदित् निष्ठा तस्य नः मूनः। [श्वेतते अश्वितत् अश्वेतिष्ट।

श्वित शुक्लतापादने भ्वा०आ० लृदित् लुङि उभ०सक०सेट्।

श्वित्र न० श्वित-रक। श्वेतकुष्ठभेदे (धवल) अमरः।

तच्चिदानादि भावप्र० उक्तं यथा "कुष्ठैकलक्षणं श्वित्रं किलासं चारुणं भवेत्। निर्दिष्टसपरिस्रावि त्रिधाकृच्छ्रवसंश्रयम्"। कुष्ठैकसम्भवं कुष्ठेन सह समभवो निदानं यस्य तत्। अथ श्वित्रस्य भेदमाह किलासञ्चारुणं भवेत् श्वित्रमेव रक्तमांसाश्रयात्किलासारुणञ्च भवेदित्यर्थः। नन्वत्र कुष्ठात् श्वित्रस्य को भेद

दलत चाह निर्दिष्टमपरिस्रावीति श्वित्रमपरिस्रावि भवति कुष्ठन्तु स्रावि अथ च त्रिधातुदूषसंश्रयमिति श्वित्रम् त्रयोधातवो रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत् । कुष्ठन्तु सान्निपातिकं सर्वधातुगतं भवतीति भेदः । दोषभेदेन लक्षणभेदान्याह "वाताद्रूक्षारुणं पित्तात् ताम्रं कफात्पवं । सदाहं रोमविध्वंसि कफात् श्वेतं घनं गुरु । सकण्डूकं क्रमाद्रक्तमांसमेदःसु चादिशेत् । वर्णनैवेदृशभयं कुष्ठं तच्चोत्तरोत्तरम्" । अरुणमीषल्लोहितम् । कमलपत्रवदित्यनेन मध्ये श्वेतमले लोहितं बोधयति । घनं पुष्टम् । क्रमाद्रक्तमांसमेदःसु चादिशेत् । तथा च चरकः "अरुणं रक्तगे वाते ताम्रं पित्ते प्रदूषिते । श्वेतं श्लेष्मणि मेदःस्थे श्वित्रं कुष्ठं परं परम्" इति । उभयं द्विविधमपि श्वित्रं वर्णेन दृश्यमेव । अरुणं ताम्रं श्वेतञ्च दोषभेदात् । द्विविधं दोषजं त्रणजं च । तथा च भोजः "श्वित्रं तु द्विविधं विद्याद्दोषजं त्रणजं तथा" इति । श्वित्रं साध्यमसाध्यञ्चाह "अगुल्फरीमाबद्धमसङ्गयुक्तमथो नवम् । अनग्निदग्धजं साध्यं श्वित्रं वर्ष्मगतोऽन्यथा" । अवद्धं तनु । अन्यत्र "गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम् । वर्ज्यनीयं विशेषेण किमासं सिद्धिमिच्छता" । गुह्यं मेढ्रवृषणं भगञ्च तल्लक्षणं पदतलं सुश्रुतेनान्ते आत्रेयित आचार्यतो निर्दिष्टत्वात् । अथचिरन्तनम् नवमपि" ।

श्वित्रघ्नी स्त्री श्वित्रं हन्ति हन-टक् ङीप् । पीतपलाशे (विकुती) शब्दच० ।

श्वित्रिन् त्रि० श्वित्रमस्त्यस्य इनि । श्वेतकुष्ठयुक्ते "श्वित्री वस्त्रं स्त्री रसं च चोरी लवणकारकः" वाग्भ० ।

श्विद शुक्लतापादने भ्वा० आत्म०सक० सेट् इदित् । श्विन्दते अश्विन्दीत् ।

श्वेत पु० श्वित-अच् घञ् वा । १हीभेदे २पर्वतभेदे ३कपर्दके हेमच० । ४शुक्लभेदे ५शुभ्राभे शब्दच० । ६यक्षे राजनि० । ७जीवके जटा० । ८शुक्लवर्णे हृतवति त्रि० अमरः स्त्रियां ङीप् तस्य नच श्वेनी । १०कलियुगीयशिवावतारविशेषे यथा "वेदव्यासावताराणि द्वापरे कथितानि तु । महादेवावताराणि कलौ शृणुत सुव्रत !। आद्यो कलियुगे श्वेतो देवदेवो महाद्युतिः । नाम्ना हिताय विप्राणामवतैवस्वतेऽन्तरे । हिमवच्छिखरे रम्ये ऋषभे पर्वतोत्तमे । तस्य शिष्याः शिखायुक्ता बभूवुरमितप्रभाः । श्वेतः श्वेतशिखश्चैव श्वेताक्षः श्वेतलोहितः । चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः । शुभावो दमनश्चाथ सुहोत्रः कङ्कणस्तथा । लोकाक्षिरथ योगीन्द्रो जैगीषव्यस्तु सप्तमे । अष्टमे दधिवाहः स्यान्नवमे ऋषभः प्रभुः । ऋग्वस्तु दशमे प्रोक्तस्तस्माद्युपः परः स्मृतः । हादयेऽग्निः समाख्यातो वाली चाथ त्रयोदये । चतुर्दशे गौतमस्तु वेदशीर्षा ततः परम् । गोकर्णस्याभवत्तस्मात् गुहावासः शिखण्डथ । जटामाल्यट्टहासश्च दारुको लाङ्गली क्रमात् । श्वेतस्तथा परः सूत्री निखण्डो मुण्डी च वै क्रमात् । सहिष्णुः सोमशर्मा च नकुलीशोऽन्तिमे प्रभुः । वैवस्वतेऽन्तरे शम्भोरवतारास्त्रिसप्तकः । अष्टाविंशतिराख्याताश्चान्ते कलियुगे प्रभोः" कौर्म्म ५० अ० । श्वेतपर्वतस्य परिमाणादि यथा "उत्तरोत्तरयोगाद्दशकं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां मर्य्यादागिरयः प्रागायताः उभयतः आष्टोदाधयो द्विसहस्रयोजनपृथव एकैकयः पूर्वस्मात् पूर्वस्मादुत्तरोदग्गाधिकांशेन दैर्घ्ये एव भवन्ति" भाग० ५।१६ । ११राजभेदे वाच० । संज्ञायां कन् । कृत्ये न० राजनि० । कपर्दके पु० । [राजनि० ।

श्वेतकण्टकारी स्त्री कर्म० । शुभ्रवर्णकण्टकारिकायाम् ।

श्वेतकन्दा स्त्री श्वेतः कन्दोऽस्याः । अतिविषायां राजनि० ।

श्वेतकिणिही स्त्री कर्म० । निरिकर्णिकायां क्षुपभेदे राजनि० ।

श्वेतकुञ्जर पु० कर्म० । १ऐरावतगजे मेदि० २श्वेतगजमात्रे च श्वेतगजादयोऽप्यत्र ।

श्वेतकुश पु० कर्म० । शुक्लवर्णे कुशभेदे राजनि० ।

श्वेतकेतु पु० कर्म० । १वास्तुके केतुवत्कर्मभेदे २कान्दीक्ष्यप्रसिद्धे वास्तौ ऋषिभेदे श्रुतौ त्रिका० ।

"श्वेतो ह्यत्र दयाल्वे वास्तुशास्त्रय एव ते । आर्षिः केतुः श्वेतकेतुर्मकेतुस्तनयकः । श्वेतकेतुर्यदा दृष्ट्वा श्वेताक्षिं कुरुते मही । तदा मानुषमांसानि भक्षयन्तीह मानुषाः । क्षुद्भयार्त्ता अमत् क्षत्तृक्षं चक्रवद्भ्रमते तदा" । अपि च "श्वेतः शस्त्राक्षतं कुर्य्यात् लोहितस्त्वग्निजं भयम् । क्षुद्भयं पीतकः कुर्य्यात् कृष्णो दोषमथोल्बणम्" । अन्यच्च "अयन्ती पुष्कारारण्यं यावल्यान्तथापरान् । देशान् क्वचित् क्वचिद्दोषदुर्भिक्षैः परिपीडितान् । श्वेताक्षस्तु जटाकारी शुभ्रालो व्योमविभागगः । निवर्त्ततेऽपसव्येन विभागो कुरुते प्रजाः" इति समयाचारतन्त्रवाक्यम् ।

श्वेतकोल पु० श्वेतः कोल इव वस्तु । १रक्तशिग्रौ जटा० ।

२शुक्लवर्णकेशयुते वृद्धे त्रि० । कर्म० । १शुक्ले केशे पु० ।
श्वेतकोल पुंस्त्री० ६त० । शफरभत्स्ये तिका० स्त्रियां ङीष् ।
श्वेतखदिर पु० कर्म० । शुक्ले खदिरभेदे ।
श्वेतगज पु० कर्म० । १ऐरावते गजे हेमच० २शुभ्रगजे च ।
श्वेतगरुत् पु० श्वेतोगरुदस्य । १हंसे अमरः २शुभ्रपक्षयुक्ते त्रि० पृषो० अदन्तोऽयम् । [२५६पृ० दशभ्रम् ।
श्वेतगुञ्जा स्त्री कर्म० । शुभ्रगुञ्जायां राजनि० । गुञ्जाशब्दे
श्वेतचिल्ली स्त्री कर्म० । शाकभेदे (शादाचिरुट) राजनि० ।
श्वेतच्छद पुंस्त्री० श्वेतः छदः पक्षोऽस्य । १हंसे हेमा० । स्त्रियां ङीष् । २शुभ्रपक्षयुक्ते त्रि० ।
श्वेतजीरक पु० कर्म० । शुक्लजीरके राजनि० ।
श्वेतटङ्कण न० कर्म० । १शुभ्रटङ्कणे २बालतोनदीतीरसम्भवे क्षारभेदे राजनि० ।
श्वेतदूर्वा स्त्री कर्म० । शुभ्रदूर्वायां राजनि० ।
श्वेतद्वीप पु० कर्म० । वैकुण्ठाख्यविष्णुधाम्नि क्षीरोधेरुत्तरस्थे द्वीपभेदे च "क्षीरोदधेरुत्तरतः श्वेतोद्वीपो महाप्रभः । एकान्तिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः" भा० शा० ३३८ अ० ।
श्वेतधातु पु० कर्म० । १खटिकायां २शुभ्रवर्णधातुवृक्षे च ।
श्वेतधामन् पु० श्वेतं धाम यस्य । १चन्द्रे २कर्पूरे ३समुद्रफेने च मेदि० । श्वेतकरादयोऽपि । ४कर्पूरे च ।
श्वेतनील पु० "वर्णोवर्णेन" पा०स० । १श्वेतलक्षणवर्णे २तद्वति त्रि० । ३मेघे शब्दर० । [२शुभ्रपक्षदलभ्यां युक्ते त्रि० ।
श्वेतपक्ष पुंस्त्री० श्वेतं पक्षं पक्षोऽस्य । १हंसे स्त्रियां ङीष्
श्वेतपक्षरथ पु० श्वेतपक्षो हंसो रथ इव वाहनं यस्य । चतुर्भुजे ब्रह्मणि शब्दच० ।
श्वेतपद्म न० कर्म० । सितकमले राजनि० । [जनि०]
श्वेतपर्णी स्त्री श्वेतं पर्णं यस्याः । वारपर्ण्यां (पाना) राश्वेतपर्णास पु० कर्म० । शुभ्रतुलस्यां रत्नमाला ।
श्वेतपाटला स्त्री कर्म० । शुभ्रपाटलावृक्षे (शादापारुल) जटा०
श्वेतपिङ्गल पुंस्त्री० ईषत् श्वेतः जटया पिङ्गलः "वर्णोवर्णेन" पा०स० । १सिंहे त्रिका० स्त्रियां ङीष् । २श्वेतपिङ्गलवर्णे तद्वति त्रि० ।
श्वेतपिण्डीतक पु० कर्म० । बृहत्पिण्डीतकवृक्षे राजनि० ।
श्वेतपुष्प पु० श्वेतं पुष्पमस्य । १सिन्दुवारवृक्षे जटा० २शुभ्रवर्णपुष्पयुक्ते त्रि० कर्म० । ३शुभ्रे पुष्पे न० । ४नागदन्त्यां पुत्रशोकारौ स्त्री राजनि० । ६घोषातक्यां स्त्री रत्नमा० । रुजायां क्लू । ७शुभ्रकरवीरे पु० राजनि० ।
श्वेतपुष्पिका स्त्री श्वेतं पुष्पमस्याः कप् अत इत्वम् । १महाशणवृक्षे २पुत्रदात्र्यां च राजनि० ।
श्वेतप्रसूनक पु० श्वेतं प्रसूनं यस्य कप् । शाकतरौ राजनि०
श्वेतभण्डा स्त्री कर्म० । श्वेतापराजितायां रत्नमा० ।
श्वेतमन्दार पु० कर्म० । शुभ्रमन्दारे राजनि० ।
श्वेतमरिच कर्म० । १शोभाञ्जनबीजे अमरः २शुभ्रमरिचे च
श्वेतरक्त पु० श्वेतो रक्तः "वर्णो वर्णेनेति" पा०स० । १पाटलवर्णे २तद्वति त्रि० अमरः ।
श्वेतरञ्जन न० श्वेतं सितार्थं रज्यतेऽनेन रञ्ज-ल्युट् । सीसके
श्वेतरथ पु० श्वेतो रथो यस्य । १शुक्लपक्षे शब्दच० कर्म० । २शुभ्रे रथे । [ङीष् । चक्रेमर्दायां राजनि० ।
श्वेतराजी स्त्री श्वेतेन वर्णेन राजते राज-क्विप् गौरा०
श्वेतरोचिस् पु० श्वेतं रोचिरस्य । १चन्द्रे २कर्पूरे च हला०
श्वेतरोहित पु० "वर्णोवर्णेन" पा०स० । १पाटलवर्णे २तद्वति त्रि० पुष्पेण श्वेतःफलेन लोहितः । ३शुक्लरोहिते वृक्षभेदे राजनि० ।
श्वेतलोध्र पु० कर्म० । पट्टिकालोध्रे राजनि० ।
श्वेतवचा स्त्री श्वेता वचेव । अतिविषायां (आतइच) राजनि० "पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा । हैमवत्युदिता तद्वच्छुक्लं हन्ति विशेषतः" भावप्र० ।
श्वेतवल्कल पु० श्वेतं वल्कलमस्य । १वटवृक्षवृक्षे जटा० २शुभ्रवल्कलयुते त्रि० ।
श्वेतवाजिन् पु० श्वेतो वाजो यस्य । १चन्द्रे हेमच० २अर्जुने जटा० । श्वेताश्वादयोऽप्यत्र । ३कर्पूरे च ।
श्वेतवासस् पु० श्वेतं वासोऽस्य । १सन्न्यासिभेदे २शुक्लवस्त्रयुक्ते त्रि० ।
श्वेतवाह् पु० श्वेतेन श्वेताश्वेन उह्यते वह-णि । १इन्द्रे २अर्जुने १चन्द्रे च । ४कर्पूरे । अत्र अठ् श्वेतोहः । हलि उसङ् श्वेतवाः श्वेतोभिरित्यादि ।
श्वेतवाहन पु० श्वेतं वाहनं यस्य । १चन्द्रे २इन्द्रे ३अर्जुने च मेदि० । ४कर्पूरे च ।
श्वेतवृक्षा स्त्री कर्म० । वनसिक्थायां रत्नमाला ।
श्वेतवृत्त पु० कर्म० । १बकुलवृक्षे राजनि० २शुभ्रवृत्ते च ।
श्वेतवृहती स्त्री कर्म० । शुभ्रवर्णक्षुद्रवृहत्यां राजनि० ।
श्वेतशिंशपा स्त्री कर्म० । शुभ्रशिंशपायां राजनि० ।
श्वेतशिग्रु पु० कर्म० । सितशोभाञ्जने राजनि० ।
श्वेतशुङ्ग पु० श्वेता शुङ्गाऽस्य । १यवे राजनि० । २शुभ्रवर्णशुङ्गायुक्ते त्रि० ।

श्वेतशूरण पु० कर्म० । वनशूरणे राजनि० ।
श्वेतसर्प पु० श्वेतः सन् सर्पति रूप-अच् । १वरुणवृक्षे जटा० मेदि० । २शुभ्रभुजगे पुंस्त्री० । स्त्रियां ङीष् ।
श्वेतसर्षप पु० कर्म० । गौरसर्षपे ।
श्वेतसार पु० श्वेतः सारोऽस्य । शुभ्रखदिरे जटा० ।
श्वेतसुरसा स्त्री कर्म० । शुभ्रगन्धाख्यिकायाम् अमरः ।
श्वेतस्यन्दा स्त्री श्वेता सती स्यन्दते स्यन्द्-अच् । सितापराजितायां राजनि० ।
श्वेतहय पु० श्वेतोहयः । १शुक्लैःअवयवि कृते त्रिका० २सितवर्णयुक्ते इन्द्रे च । ३वृ० । ४अर्जुने हेमच० । ५इन्द्र च
श्वेता स्त्री श्वित-अच् । १वराटिकायां २काकपाटलायां ३र्श्वङ्गिन्यां मेदि० । ४अतिविषायां रत्नमा० । ५सितापराजितायां ६गुञ्जकवृक्षार्थां ७पाषाणभेदिन्यां ८शुभ्रदूर्वायां ९वंशरोचनायां १०शर्करायां ११शिलावल्लकलतायां १२श्वेतदूर्वायां च राजनि० ।
श्वेतार्क पु० कर्म० । शुभ्रवर्णपुष्पके अर्कवृक्षे राजनि० ।
श्वेतावर पु० श्वेतं श्वेतवर्णमावृणोति आ+वृ-अच् । सितावरणाके राजनि० ।
श्वेताश्वतर पु० वेदव्यासभेदे ।
श्वेतेक्षु पु० कर्म० । शुक्ले इक्षौ राजनि० ।
श्वेतोदर पु० श्वेतमुदरं यस्य । कुबेरे त्रिका० ।
श्वेतोही स्त्री श्वेतोहः पत्नी ङीष् । इन्द्राण्यां शब्दार्थ० ।
श्वैत्य न० श्वेतस्य भावः ष्यञ् । शुभ्रवर्णे ।
श्वोवसीयस न० अतिशयेन वसुः प्रशस्तःश्वो वसीयः निः अच् समा० । १परदिने भाविकाले प्रशस्ते मङ्गले २तद्वति त्रि०

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य-सङ्कलिते वाचस्पत्याभिधाने शकारादि शब्दार्थसङ्कलनम् ।

अशुद्धशोधनम् ।

६००० पृष्ठावधि ६०२४ पृष्ठपर्य्यन्तयत्राङ्के ६०० नवशताङ्काधिकतया: प्रमादात् मुद्रिताः तत्र तत्र पृष्ठेषु नवभिः यतैकत्रिता अङ्कसंख्या बोध्याः ।

ष

षकारः मूर्द्धन्यः ऊष्मवर्णभेदः । अस्योच्चारणस्थानं मूर्द्धा अस्योच्चारणे आभ्यन्तरप्रयत्नः विवृतनामकः कृतश्च, "नेयङ्ङ्ः सवर्णा" शिक्षोक्तेः । बाह्यप्रयत्नाश्च विवारः संवारो-घोषो महाप्राणश्च । अस्यरूपवायुप्रधानत्वादस्य ऊष्मवर्णता । अस्य श्वेतरूपं यथा "षकारं शुद्धं चार्वङ्गं अष्टकोणमयं सदा । रक्तचन्द्रप्रतीकाशं स्वयंपरमकुण्डली । चतुर्वर्गमयं वर्णं सुधानिर्मितविग्रहम् । पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा । रजःसत्त्वतमोयुक्तं त्रिशक्तिसहितं सदा । त्रिबिन्दुसहितं वर्णमाद्यादित्वसंयुतम् । सर्वदेवमयं वर्णं हृदि भावय पार्वति !" कामधेनुतन्त्रम् । अस्याधिष्ठानदेवताध्यानं यथा "चतुर्भुजां चकोराक्षीं चारुचन्दनचर्चिताम् । शुक्लवर्णां त्रिनयनां वरदाञ्च शुचिस्मिताम् । रत्नालङ्कारभूषाढ्यां श्वेतमाल्योपशोभिताम् । देवदन्दैरावन्द्यां सेवितां मोक्षकाङ्क्षिभिः । एवं ध्यात्वा षकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम् । अस्य वाचकशब्दा यथा "षः श्वेतो वासुदेवश्च पिता प्रज्ञा विनायकः । धरमेष्ठी वामबाहुः श्वेतो गर्भविमोचनः । लम्बोदरो यमोऽजेयः कामधुक् कामधूमकः । कुक्षीरूपा दृशो लज्जा मरुद्भ्यः प्रियः शिवः । श्यामात्मा जठरः क्रोधो माता रक्तोद्विदारिणी । जलकण्ठो मध्यभिन्ना युद्धात्मा मरुपूः शिवाः" वर्णाभिधानम् "षकारः श्वेत आख्यातो मूर्द्धन्यो दशसंज्ञकः । पित्तं शक्तिश्च माया च ब्रह्मयोनिः खबिन्दुमत्" अन्याभिधानम् । मातृकान्यासेऽस्य जठरे न्यासता । काव्यादौ प्रयोगेऽस्य फलम् खेदः "षः खेदं यस्तु खेदम्" इ०र०टी० ।

अत्र षादिशब्देषु षादितया ये धातवः पठितास्तेषां प्रयोगकाले दन्त्यसादित्वं सति च निमित्ते पुनः षत्वम् यथा सिध-सेधति निषेधति "भ्राड्वर्गस्तवर्गजः" इत्युक्तेः अस्य प्रयोगकाले सत्वे तन्निमित्तटवर्गश्च तवर्गाविभेदः यथा ष्टु स्तौति । ष्ठा स्था तस्थौ ष्णा स्ना स्नाति । निक्ते सति सत्वे च टुत्वे च प्रतिष्टौति प्रतिष्ठा निष्ठा निष्णाति । तत्र श्वौव्यक्तिशान्तु न सादेशत्वेन श्वायति व्यक्ति शीत्वेनेति भेदः । त्रिषपर्युदासे शीवधातोरपि पर्युदासः ।

ष पु०नो-क षुनो०षत्वम् । १क्लेशे मेदि० २गर्भविमोचने ज्ञानवे च ३सर्वे ४श्वे ५ऽक्षे एकाक्षरकोशः । ६विष्णे च त्रि०मेदि० ।
षकार पु०ष+स्वरूपे कार । षस्वरूपवर्णे कामधेनुतन्त्रे उदा०
षग सेवरणे स्वा० पर० सक० सेट् एदित् सिचि न वृद्धिः ।
षगति अषगीत् सिषग्ध घटादि षगयति । असीषगत् त ।
षघ हिंसायां स्वा०पर० सक० सेट् एदित् सिचि न वृद्धिः ।
सघ्नोति असघीत् असीषघत् त । [षचत् त ।
षच सेचने भ्वा० आत्म० सक० सेट् । सचते असचिष्ट असी-

षच समवाये भ्वा०पर०सक० सेट् । सचति । असचीत्-असाचीत्

षट विभाजने भ्वा०प०सक०सेट् । सटति असटीत् असाटीत्

षट्कर्मन् न० षट्प्रकारं कर्म० । १तन्त्रोक्तेषु शान्तिवशीकरणस्तम्भनविद्वेषोच्चाटनमारणरूपेषु षट्सु प्रयोगभेदेषु तानि च कर्माणि तन्त्रसारादुक्तानि उच्चाटनशब्दे १०६२ पृ० दृश्यानि । तत्तत्भूतमण्डलानि च भूतमण्डलशब्दे ४६८५।८६ पृ० दृश्यानि । २यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहरूपेषु षट्सु विप्रकर्मसु च । षट्कर्माणि यस्य । ३योगादियुक्ते विप्रे पु० । हठयोगाङ्गे ४षट्क्रियाभेदे यथोक्तं घेरण्डसं० १अ० ।

"धौतिर्बस्तिस्तथा नेतिर्नौलिकी त्राटकस्तथा । कपालभातिश्चैतानि षट् कर्माणि समाचरेत् । अन्तर्धौतिर्दन्तधौतिर्हृद्धौतिर्मलशोधनम् । धौत्यश्चतुर्विधाः प्राक्ता घटं (वेहं) कुर्वन्ति निर्मलम् । वातसारं वारिसारं वह्निसारं बहिष्कृतम् । घटस्य निर्मलार्थाय अन्तर्धौतिश्चतुर्विधा" । "काकचञ्चूदास्येन पिबेद्वायुं शनैः शनैः । चालयेदुदरं पश्चाद्वक्त्रेणा रेचयेत् शनै । वातसारं परं गोप्यं देहनिर्मलकारकम् । सर्वरोगक्षयकरं देहानलविवर्द्धकम् । आकण्ठं पूरयेद्वारि मुखेन च पिबेत् शनैः । चालयेदुदरेणैव चोद्गारैश्चयेदधः । वारिसारं परं धौतं देहनिर्मलकारकम् । साधयेद्यः प्रयत्नेन देवदेहं प्रपद्यते । नाभिमग्नजले स्थित्वा शक्तिनाडीं विसर्जयेत् । करास्यां क्षालयेन्नाडीं यावन्मलविसर्जनम् । तावत् प्रक्षाल्य नाडीञ्च उदरे वेशयेत् पुनः । इदं प्रक्षालनं गोप्यं देवानामपि दुर्लभम् । केवलं धौतिमात्रेण देवदेहो भवेत् ध्रुवम् । यामार्द्धधारणात् शक्तिं यावच्च साधयेन्नरः । वह्निष्कृतमहाधौतिस्तावच्चैव न जायते । दन्तमूलं जिह्वामूलं रन्ध्रे च कर्णयुग्मयोः । कपालरन्ध्रं पञ्चैते दन्तधौतिर्विधीयते" । "खादिरेण रसेनाथ कृत्तिकाभिश्च शुद्धिभिः । मार्जयेदुदन्तमूलञ्च यावत् किल्बिषमाहरेत् । दन्तमूलं परं धौतिर्योगिनां योगसाधने । नित्यं कुर्यात् प्रभाते च दन्तरन्ध्राय योगवित् । दन्तमूलं धारणादिकार्येषु योगिनां यतः । अभ्यासः संप्रवक्ष्यामि जिह्वाशोधनकारणम् । जरामरणरोगादि नाशयेत् दोषसञ्चिका । तर्जनीमध्यमानामा अङ्गुलित्रययोगतः । वेशयेदुगलमध्ये तु मार्जयेत् स्वकामलम् । शनैः शनैर्मार्जयित्वा कफदोषं निवारयेत् । मार्जयेत्रवनीतेन देहयेच्च पुनः पुनः । तदयं लौहयत्त्वेण घर्षयित्वा पुनः पुनः । नित्यं कुर्यात् प्रयत्नेन रवेरुदयकेऽस्तके । एवं कृते तु नित्येऽवलम्बिका दीर्घतां गता । तर्जन्यङ्गुल्यकाग्रेण मार्जयेत् कर्णरन्ध्रयोः । नित्यमभ्यासयोगेन कफदोषं निवारयेत् । नाडी निर्मलतां याति दिव्यदृष्टिः प्रजायते । निद्रान्ते भोजनान्ते च दिवान्ते च दिने दिने । हृद्धौतिं त्रिविधां कुर्यात् दण्डवज्जलवाससा । रम्भादण्डं हरिद्दण्डं वेत्रदण्डमथैव च । हृन्मध्ये चालयित्वा तु पुनः प्रत्याहरेत् शनैः । कफपित्तं तथा क्लेदं रेचयेदूर्द्ध्वनालतः । दण्डधौतिविधानेन हृद्रोगं नाशयेत् ध्रुवम् । हरिद्दण्डं (वटाङ्कुरं) भोजनान्ते पिबेद्वारि आकण्ठपूर्णितं सुधीः । जर्द्धदृष्टिं चणं कृत्वा तज्जलं वमयेत् पुनः । नित्यमभ्यासयोगोऽयं कफपित्तं निवारयेत् । चतुरङ्गुलविस्तारं सूक्ष्मवस्त्रं शनैर्ग्रसेत् । पुनः प्रत्याहरेदेतत् प्रोच्यते धौतकर्मकम् । गुल्मञ्जरप्लीहकुष्ठं कफपित्तं विनश्यति । ज्वरोऽग्निं बलपुष्टिञ्च करोति दिने दिने । अपानक्रूरतां तावन्मलं यावन्न शोधयेत् । तस्मात् सर्वप्रयत्नेन मलशोधनमाचरेत् । धौतमूलस्य दण्डेन मध्यमाङ्गुलिनापि वा । यत्नेन क्षालयेद्गुह्यं वारिणा च पुनः पुनः । वारयेत् कोष्ठकाठिन्यं सामाजीर्णं निवारयेत् । कायाग्निदीप्तिपुष्टीश्च दीपयेद्वह्निमण्डलम् । जलवस्तिः शुष्कवस्तिर्वह्नी च द्विविधौ मतौ । जलवस्तिं जले कुर्यात् शुष्कवस्तिं क्षितौ सदा । नाभिमग्नजले पायुं न्यस्तनालोत्कटासनम् । आकुञ्चनं प्रसारञ्च जलवस्तिं समाचरेत् । प्रमेहञ्च उदावर्तं क्रूरवायुं निवारयेत् । भवेत् कन्दर्पदेहश्च कामदेवसमो भवेत्" । न्यस्तनालोत्कटासनम् कक्षदेशे दृढं दत्त्वा शारङ्गवदुदरं कुर्यादित्यर्थः । "शक्तिं पश्चिमतानेन चालयित्वा शनैः शनैः । अश्विनीमुद्रया पायुमाकुञ्चेच्च प्रसारयेत् । एवमभ्यासयोगेन कोष्ठदोषो न विद्यते । वर्द्धयेत् जठराग्निञ्च आमवातं विनाशयेत् । वितस्तिमानं सूक्ष्मवस्त्रं नाभ्यानाभे प्रवेशयेत् । मुखान्निर्गमयेत्

पश्चात् प्रोच्यते नेतिकर्मकम्। साधनाद्वे तिकर्मणः-
खेचरीं सिद्धिमाप्नुयात्। कफदोषा विनश्यन्ति दिव्यदृष्टिश्च
जायते। आनन्दवेगे वृन्दञ्च भ्रामयेदथ पार्श्वयोः।
सर्वरोगाच्छिनत्त्येव देहानन्दविवर्द्धनम्। इति नौलिकी।
"निमेषोन्मेषकं त्यक्त्वा सूक्ष्मलक्ष्यं निरीक्षयेत्। यावदश्रु
निपतति त्राटकं प्रोच्यते बुधैः। एवमभ्यासयोगेन शा-
म्भवी जायते ध्रुवम्। न जायते नेत्ररोगो दिव्यदृष्टि-
प्रदायकम्। शीतक्रमेण शीत्कृत्य वक्त्रेण नासानाडीर्विरेचयेत्।
व्युत्क्रमेण व्युत्क्रमेण शीत्कृमेण विशेषतः। भाखमाति
त्रिधा कुर्यात् कफदोषं निवारयेत्। दक्षया पूरयेद्वायुं
रेचेत् पिङ्गलया पुनः। पिङ्गलया पूरयित्वा पुनरन्ध्रेण
रेचयेत्। पूरकं रेचकं कृत्वा वेगेन न तु धारयेत्।
एवमभ्यासयोगेन कफदोषं निवारयेत्। नासाभ्यां जल
माकृष्य वक्त्रेण रेचयेत् पुनः। पायं पायं प्रकर्त्तव्यं
श्लेष्मदोषं निवारयेत्। न जायते वार्द्धक्यं जरी नैव
प्रजायते"।

षट्कूटा स्त्री भैरवीभेदे तन्त्रसा०।

षट्कोण न० षट् कोणा यस्य। १वज्रे राजनि०। तन्त्रोक्ते
ऊर्द्ध्वाधःस्थे त्रिकोणद्वयरूपे यन्त्रभेदे शब्दार्थचि०
नृसिंहतः षष्ठस्थाने च ज्यो०त०।

षट्चक्र न० षण्णां चक्राणां समाहारः द्वन्द्वादि०। तन्त्रो-
क्तेषु देहस्थेषु सुषुम्णानाड़ीमध्यवर्त्तिषु हृदयचतुर्दला-
दिषु षट्सु पद्मेषु चक्रशब्दे २८०८ पृ० दृश्यम्। तद-
धिकृत्य कृतोग्रन्थः अण् तस्य लुक्। २षट्चक्रपति-
पादिकग्रन्थभेदे। [षड्भेदे १ततृसंख्यान्विते च।

षटचत्वारिंशत् स्त्री षड़धिका चत्वारिंशत्। (छेदयाक्षिय)

षट्चरण पुंस्त्री० षट् चरणा यस्य। १भ्रमरे त्रिका० स्त्रियां
ङीष्। षट् पदादयोऽस्यतं। २यूकायां राजनि०।

षट् निवासे वधे च भ्वा० पर० अक० हिंसायां दाने च सक० चुरा० उभ०
सेट्। षट्टयति ते अषट्टीत् त। षिषट्टयिषति।

षट्तिलिन् पु० षट् तिलाः तिलोदर्त्तनादयः कर्मणोऽस्य।
"तिलाद्वर्त्ती तिलस्नायी तिलकः सो तिलप्रदः। तिल-
भुक् तिलवापी च षट्तिली नामसीदति" इत्युक्ते तिलो-
द्वर्त्तनादिकारिणि। [स्त्रीभेदे २तत्संख्यान्विते च।

षट्त्रिंशत् स्त्री षड़धिका त्रिंशत् शब्दा०। (छेदयाक्षिय) १सं-

षट्त्रिंशदुपचार (छेदयाक्षिय) देवपूजाङ्गेषूपचारेषु "आसना-
भ्यञ्जने तद्वदुर्त्तनविकल्पने। स्नानोज्जनं सर्पिरादि
क्षणनावाहने तथा। पाद्यार्घ्याचमनीयञ्च स्नानीयवसु-
वर्त्तकौ। पुनराचमनीयञ्च वस्त्रयज्ञोपवीतके। अनङ्कारो
गन्धपुष्पे धूपदीपौ तथैव च। ताम्बूलादिकनैवेद्यं पञ्च-
मालां तथैव च। अनुलेपञ्च शय्या च चामरव्यजनं
तथा। आदर्शदर्शनञ्चैव नमस्कारोऽथ नर्त्तनम्।
गीतवाद्ये च दानानि स्तुतिर्होमप्रदक्षिणम्। दण्डकाष्ठ-
प्रदानञ्च ततो देवविसर्जनम्। उपचारा इमे ज्ञेयाः
षट्त्रिंशत् सुरपूजने" एका०त०।

षट्त्रिंशन्मत न० "मनुर्विष्णुर्यमो दक्षो वसिष्ठोऽत्रिर्बृहस्प-
तिः। आपस्तम्बशङ्खलिखौ कात्यायनपराशरौ। वशिष्ठ-
व्याससंवर्त्ता हारीतगौतमावपि। प्रचेताः शङ्खलिखितौ
याज्ञवल्क्यश्च काश्यपः। शातातपो लोमशश्च जमदग्निः
प्रजापतिः। विश्वामित्रपैठीनसी बौधायनपितामहौ।
कात्यायनस्य जाबालो मरीचिर्भृगुः। कश्यपश्चेति
नारदस्य षट्त्रिंशत् स्मृतिकारकाः। एतेषान्तु मतं यत्तु
षट्त्रिंशन्मतमुच्यते" इति शब्दचिन्तामणिधृतेऽत्रिभेदे।

षट्पञ्चाशत् स्त्री षड़धिका पञ्चाशत् मयट्। (छाप्यान्न)
१शङ्खाभेदे २ततत्संख्यान्विते च।

षट्पञ्चाशिका स्त्री षट्पञ्चाशत् परिमाणमस्य ठिन् सं-
ज्ञायां कन्। वराहमिहिरात्मजपृथुयशोविरचिते ज्यो-
ग्रन्थभेदे।

षट्पदप्रिय पु० ह्रस्व०। नागकेशरे शब्दमा०। तस्य हि प्रचु-
रमधूपजत्वात् भ्रमरप्रियत्वम्। [त्रिका०।

षट्पदातिथि पु० षट्पदः अतिथिरिव यस्य। आम्रवृक्षे

षट्पदानन्दवर्द्धन पु० षट्पदानन्दं वर्द्धयति वर्ध-णिच्-
ल्यु उप०। अशोकवृक्षे राजनि०।

षट्पदी स्त्री षट् पादा अस्याः पादस्य पादावः स्त्रीत्वे ङीष्
पादावः। १यूकायां भ्रमरयोषिति च। स० हेमु०। २षट्-
चरणयुक्ते छन्दोभेदे च। ३षट् श्लोकात्मकप्रबन्धसंघाते।

षट्प्रज्ञ पु० षट् च प्रज्ञा यस्य। "धर्मार्थकाममोक्षेषु लोक-
तत्त्वार्थयोरपि। षट् च प्रज्ञा तु यस्यासौ षट्प्रज्ञः
परिकीर्त्तितः" इत्युक्ते १धर्मार्थादिभिन्ने २बौद्धे ३कामुके
त्रिका०।

षड़ङ्ग न० षण्णामङ्गानां समाहारः द्वन्द्वा०। "लङ्के वाङ्गे
शिरो मध्यं षड़ङ्गमिदमुच्यते" इत्युक्ते १देहावयवषट्क-
भेदे यन्त्रच० तन्त्रोक्ते २हृदयादिन्यासावयवभेदे यत्र हृदयादिषु
षट्सु अङ्गेषु मन्त्रविशेषान्यस्यते तत्र। षट् अङ्गानीव
यस्य। "शिक्षाकल्पो व्याकरणं निरुक्तं छन्दसां चितिः।
ज्योतिषामयनञ्चैव षड़ङ्गो वेद इष्यते" इत्युक्ते ३वे

पु० ४जङ्घोत्तरजुषे च पु० राजनि० "गोजलं गोमयं क्षीरं सर्पिर्दधि च रोचना । षड्ङ्गमेतन्माङ्गल्यं पठितं सर्वदा नवाम्" ऋत्यु० रोचनासहिते ५पञ्चगव्ये न० ।

षड़भिज्ञ पु० "दिव्यं चक्षुःश्रोत्रं १ परिचित्तज्ञानं२ पूर्वनिवासानुस्मृतिः३ आत्मज्ञानम्४ वियद्गतिः५ कायव्यूहविद्धि६ श्चेत्येतानि षट् अभिज्ञा अभिज्ञायमानानि यस्य । बोद्धभेदे अमरः । [१।१। कर्त्रयन्तुतिः ।

षड़वक्त्र न० उभयत्र ज्ञानवति वाच्ये यष्ण्यालभेदे ज्ञाप्या०

षड़शीति स्त्री षड़धिका अशीतिः शाक० । (क्वेयाशि) १४ सङ्ख्याभेदे २तत्सङ्ख्यान्विते च । षड़शीतिमुखवनेषु सिद्धवनस्याधनुर्मीनेषु रवेः संक्रान्तौ च "अवनविष्णुपदौ षड़शीतयो विषुवविष्णुपदीषड़शीतयः" इति ज्योतिस्तत्त्वम् ।

षड़शीतिचक्र न० मिथुनकन्याधनुर्मीनराशिस्थरवेः संक्रमे शुभाशुभफलज्ञानार्थं नक्षत्राङ्कनराकारे चक्रे । यथा "मुखे चैकं करे वेदाः पादयुग्मे द्वयं द्वयम् । क्रोड़े वाणस्तथा वेदाः करे शब्देतरेऽपि च । द्वयं द्वयं तथा नेत्रे मस्तके त्रितयं तथा । द्वयञ्चैव तथा गुह्ये षड़शीत्यां क्रमे स्थिते । सुखे दुःखं करे लाभः पादयोर्भ्रमणं भृशम् । कान्ता लाभो वस्त्रलाभो वामे चक्षुषि स्यात् क्षीणमे । अज्ञानो नेत्रयोश्चैव अपमानश्च मस्तके । गुह्ये चैव भवेन्मृत्युः षड़शीतिफलश्रुतिः" ज्यो० त० ।

षड़शीतिमुख न० षड़शीतेः तच्चामसंक्रान्तेर्मुखम् । "तुलादिषड़शीत्यङ्कां षड़शीतिमुखं क्रमात् । तच्चक्रञ्चैव ज्ञात्वा द्विस्वभावेषु राशिषु" "षड़विंशे धनुषो भागे द्वाविंशेऽनिमिषस्य च । मिथुनऽष्टादशे भागे कन्यायास्तु चतुर्दशे" इति ज्योतिस्तत्त्वोक्ते तुलादितः षड़शीतिदिनान्तरितकाले ।

षड़श्रक न० ज्या०त० उक्ते वरकन्ययोः खखराश्यन्तेज्यया परस्परषड़ंशराशिसम्बन्धे उपयमशब्दे पृ० दृश्यम् ।

षड़ानन पु० षट् आननानि यस्य । कार्त्तिकेये अमरः । षड्वदनादयोऽप्यत्र ।

षड़ाम्नाय पु० षड्भिर्युक्तः आम्नायः शाक० । शिवस्य षड्भ्यो विनिर्गते षट्प्रकारतन्त्रभेदे "अथेदानीं प्रवक्ष्यामि आम्नायकथनं पृथक् । पूर्वाम्नायो यदा मन्त्रमहादा प्राच्यां दिशि स्थितः । महाशिवोऽहं भगवानाचारः परिकीर्त्तितः । एवं वै दक्षिणाम्नायो दक्षिणस्यां दिशि स्थितः । एवं हि पश्चिमाम्नायः पश्चिमायां दिशि स्थितः । एवमेवोत्तराम्नाय उत्तरस्यां दिशि स्थितः । ऊर्ध्वमूर्ध्वगतं देवि ! यत् प्रोक्तं तव सन्निधौ । ऊर्ध्वाम्नायस्य कथितो देवानामपि दुर्लभः । यदा चाधोमुखं देवि ! यत् प्रोक्तं गिरिजे ! प्रिये ! । अथ चाम्नाय इत्युक्तः सत्यं सत्यं सुमध्यमे ! । षडाम्नायास्य कथिताश्चोत्पत्तिक्रममागतः । यस्मिन् यस्मिंश्च ये देवाः कथितास्च वरानने ! । तान्देवांश्च प्रवक्ष्यामि साधकानां हिताय वै । श्रीविद्याभेदसहिता तारा च त्रिपुरा तथा । भुवनेशी बालपूर्वा पूर्वाम्नाये प्रकीर्त्तिताः । वगलामुखी च धूमिनी त्वरिता धनदा तथा" । धूमिनी बालभैरवीत्यर्थः "अच्छिन्नी मङ्गलाद्यास्त्रिशाम्नायकीर्त्तिताः । अक्षरस्वरूपा विद्या तथा वाग्वादिनी परा । प्रत्यङ्गिरा भवानी च पश्चिमाम्नायकीर्त्तिताः । कालिका भेदसहिता तारा भेदैश्च संयुता । मातङ्गी भैरवी छिन्ना तथा धूमावती परा । उत्तराम्नायकथिताः कल्पो गोपफलप्रदाः । समस्तभेदसहिताः कालिका याः प्रकीर्त्तिताः । द्वात्रिंशत्प्रकारी तासां दक्षिणाम्नायकीर्त्तिता । एकजटा महाम्नाये महाशोषप्रदायिनी । तत्परा परमा विद्या न विद्यान्तरगोपिता । परप्रधानमन्त्राश्च ऊर्ध्वास्नाये प्रकीर्त्तिताः । ऊर्ध्वाम्नायो ह्यधश्चैव केवलं भोगदो भवेत् । धर्मार्थकामोक्षार्थं आम्नायान्ये प्रकीर्त्तिताः । यथोक्तविधिना भद्रे ! कृत्वा फलमवाप्नुयात् । पूर्वाम्नायादिसर्वेषां विधानं शृणु सुन्दरि ! । कृत्वा येनापि लभते फलं यद्यदुक्तोत्तमम् । षट् कर्म फलदा चक्रा षडाम्नायाः प्रकीर्त्तिताः । उत्तराम्नायो देवेशि ! तेषामापि फलप्रदः" इति समयाचारतन्त्रे २पटले । आम्नायभेदेनाचारभेदं उक्तो यथा "पूर्वाम्नायोदितं कर्म पार्थवं कथितं प्रिये ! । यदुक्तं दक्षिणाम्नाये तदेव पार्थवं स्मृतम् । पश्चिमाम्नायजं कर्म पशुवीरसमन्वितम् । उत्तराम्नायजं कर्म दिव्यवीरान्वितं प्रिये ! । दिव्योऽपि वीरभावेन साधयेत् पिल्वकानने । वीरासनं विना दिव्यः पूजयेत् पिल्वकानने । ऊर्ध्वाम्नायोदितं कर्म दिव्यभावान्वितं प्रिये !" इति निरुत्तरतन्त्रे १पटले ।

षड़ूर्मि पु० षट् ऊर्मयः बुभुक्षादयोऽस्य । जीवे अर्पिषष्ठे १२८२ पृ० दृश्यम् ।

षड़ूषण न० षट्संख्यम् ऊषणम् । कटुद्रव्यभेदे "पञ्चकोलं समरिचं षड़ूषणसमाहृतम् । पञ्चकोलगुणं तच्च कृमिकुष्ठविषापहम्" भावप्र० ।

षड़्या स्त्री "गयागङ्गो गयादित्यो नाभिजो च गदाधरः ।

गया गयासुरश्चैव षड्गया मुक्तिदायिकाः" वायु० पु० । चक्रे गयागजादि षट्के ।

षड्गव त्रि० षड्भिर्गोभिराक्रष्टः शकटः फलो वा अण् । षड्भिर्गोभिराक्रष्टे १फलादौ "अष्टागवं धर्म्यफलं षड्गवं जीविकार्थिनाम्" इति स्मृतिः । अस्यां गवां समाहारः अच्समा० । २षट्सु गोषु न० ।

षड्गुण पु० षड्भिः गुणितो गुणाः शाक० । राज्ञां सन्ध्यादिषु षट्सु गुणेषु षाड्गुण्यशब्दे दृश्यम् ।

षड्ग्रन्था स्त्री षट् ग्रन्थयः सन्त्यस्या अच् । १वचायां भावप्र० २यष्ट्यां १३तन्त्राकरञ्जे ४श्वेतवचायाञ्च राजनि० ।

षड्ग्रन्थि न० षट् ग्रन्थयोऽस्य । १पिप्पलीमूले वैद्यकम् । २षट्पर्वयुक्ते त्रि० । ३वचायां स्त्री वा ङीप् । संज्ञायां कन् टाप् अत इत्त्वम् । यष्ट्यां स्त्री अमरः ।

षड्ज पु० षड्भ्यो नासादिस्थानेभ्यो जायते जन–ड । "नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रितः । षड्भ्यः संजायते यस्मात् तस्मात् षड्ज इति स्मृतः" इत्युक्ते स्वरभेदे "षड्जसंवादिनीः केकाः" इति रघुः ।

"षड्जं रौति मयूरो हि गावो नर्दन्ति चार्षभम् । अजा विरौति गान्धारं क्रौञ्चो नदति मध्यमम्" भरतः ।

षड्दर्शन न० षड्गुणितं दर्शनम् । १आस्तिकमतसिद्धे पूर्वमीमांसावेदान्तसांख्यपातञ्जलन्यायवैशेषिकाख्ये दर्शने शास्त्रभेदे षट्सु २बौद्धदर्शनेषु च ।

षड्दीर्घ पु० षड्भिर्गुणिता दीर्घाः । तन्त्रोक्तेषु आ, ई, ऊ, ऐ, औ, अः इत्येवं रूपेषु षट्सु दीर्घेषु ।

षड्दुर्ग न० षड्गुणितं दुर्गम् । "धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा । नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम्" मनूक्ते दुर्गषट्के ।

षड्धा अव्य० षष्+प्रकारे–धाच् । षट्प्रकारे । [त्रिका० ।

षड्बिन्दु पु० षड्बिन्दवो यत्र । १कीटभेदे मेदि० । २विष्णौ

षड्भुजा स्त्री षट् भुजा इव यस्याः । (खरसज) फलसतामेदे राजनि० । २षड्हस्तयुक्ते त्रि० । ३रौद्रे ज्वरे पु० "श्रीमांस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः" मन्त्रभे० ।

षड्रस न० षण्णां रसानां समाहारः पात्रा० । "मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा" इत्युक्तेषु "मधुरं गौल्यमित्याहुरिक्षादौ स च लक्ष्यते । लवणस्तु कटुः प्रोक्तः सैन्धवादौ स इष्यते । तिक्तस्तु पित्तमदादौ व्यक्तमास्वाद्यते रसः । कषायस्तुवरश्लेष्मा स च पूगीफलादिषु । कटुस्तु तीक्ष्णसंज्ञः स्यात् मरीचादौ स चेष्यते" इत्युक्तास्वादनेषु लक्ष्येषु षट्सु रसेषु । षड्गुणितोरसः । तत्रार्थे पु० । [त्रिका० ।

षड्लवण न० षड्गुणितं लवणम् । सज्जातयुतपञ्चलवणे

षड्वर्ग पु० इत० । १कामक्रोधलोभमोहमदमात्सर्येषु "व्याजेन षड्वर्गमिति" भट्टिः । "क्षेत्रं होराद्रेक्काणो नवांशो द्वादशांशकः । त्रिंशांशकश्च षड्वर्गस्त्र्यादिमाद्या फलप्रदः" ज्योतिषोक्तेषु क्षेत्रादिषु षट्सु । स च ज्यो०त० उक्तो यथा

"कुजशुक्रबुधेन्दुकसौम्यगुरुकावनीभुवाम् । जीवार्किभानुजेज्यानां क्षेत्राण्यि१ स्वरजादयः । विषमर्क्षेषु प्रथमा होराः२ स्युःसमर्क्षगेचिषः । द्वितीयाः शशिनोयुग्मे व्यत्ययाद्गणयेत् सदा । खषट्कुनवमानां ये राशीनामधिपाः षडाः । ते द्रेक्काणाधिपाराशौ द्रेक्काणाश्चैक्य एव हि । मेषकेसरिधनुषां मेषाद्याश्च नवांशकाः४ । मृगकन्याद्यषाणाञ्च मृगाद्यास्तु नवांशकाः । तुलासिथुनकुम्भानां तुलाद्याः समुदाहृताः । कर्किवृश्चिकमीनानां कर्कटाद्या नवांशकाः । चराणां प्रथमे पादे स्थिराणां पञ्चमे तथा । नवमे द्यूनकानाञ्च वर्गोत्तम इति स्मृतः । स्वनवांशस्तु राशीनां वर्गोत्तम इति स्मृतः । सर्वेषां मेषपूर्वाणां क्षत्रांद्या द्वादशांशकाः५ । कुजार्किगुरुसौम्यानां भागाः शुक्रस्य च क्रमात् । पञ्चपञ्चाष्टसप्तेषु त्रेयभोजःसु राशिषु । त्रिपांशाद् व्यत्ययादेते युग्मराशिषु कीर्त्तिताः" । अत्राधिकशुभाशुभप्राप्त्या शुभाशुभत्व इति बोध्यम् ।

षण(न) सम्भक्तौ भ्वा०पर०सक०सेट् अस्य सत्वे णस्य नत्वम् । सनति असनीत् असानीत् । दन्त्यान्तोऽयमित्येके ।

षण(न) दाने तना०उभ० सक० सेट् अस्य सत्वे णस्य नत्वम् उदित् । दन्त्यान्त इत्येके सनोति सनु असनीत्-असानीत् असनिष्ट-असात । सिषांसति सिषांसति इत्येके ।

षण्ड पु० सन–ड डस्य नेत्वम् पृषो० अत्व णत्वं वा । १हिजे अमरः २नपुंसके जटा० । ३पद्मादिसमूहे पु० न० अमरः । [पाठान्तरम् ।

षण्ढ पु० षण–ढ तस्य नेत्वम् पृषो० णः । नपुंसके अमरे

षण्मुख पु० षट् मुखानि यस्य । १कार्त्तिकेये हला० षड्भुजायां स्त्री राजनि० टाप् ।

षद गतौ भ्वा० उभ० सक० सेट् । सादयति ते असीषदत् ।

षद विशरणे ऋकृतीभावे अक०हिंसायां गतौ च सक०लृ०प० अनिट् । सीदति ते अषदत् । ज्वला० सदः सादः ।

षन्च गतौ भ्वा० पर० सक० सेट् । सञ्चति असञ्चीत् ।

षन्ज सङ्गे सम्बन्धे च भ्वा०पर०सक०अनिट् सजति असाङ्क्षीत्

षप सम्बन्धे भ्वा०पर०सक०सेट्। सपति असापीत् असपीत्। असीषपत्। [त। सिषमयिषति।

षम वैकल्ये चुरा० उभ० अक० सेट्। समयति ते असिसमत्

षम्ब सपर्णे भ्वा० पर० सक० सेट्। सम्बति असम्बीत्।

षर्ज्ज सर्जने भ्वा० पर० सक० सेट्। सर्जति असर्ज्जीत्।

षर्व्व(र्व) गतौ भ्वा०प०सक० सेट्। सर्व(र्व)ति असर्वीं(र्वीं)त्।

षर्षपी स्त्री सर्षप+पृषो०। खञ्जनाक्षतो खगभेदे शब्दर०।

षल गतौ भ्वा० पर०सक०सेट्। सलति असालीत् असीषलत्

षष् त्रि० ब० व०। षो-क्विप् पृषो०। (छय) सङ्ख्याभेदे व्याकरणोक्ते १डतिप्रत्ययान्तकत्यादौ प्रान्ते नान्ते सङ्ख्याबाचके च २शब्दे च

"षण्णाः षट्" "डति च" पा०। "षड्भ्यो लुक्" पा० "न षट् स्वादिभ्यः" पा० स्त्रियां न ङीप्। "षट् संख्यका स्त्रिषु समायुगदक्षत्रिङव्ययम्" अमरः। त्रिस्त्रित्यधिकारेण स्त्रिषु समा इति सिद्धे पुनः कथनं स्त्रिषु समानरूपतापतिपादनार्थम्। तथा हि वैयाकरणमते त्रिङः प्रथमान्तसामानाधिकरण्यनियमात् विशेष्यविशेषणयोः समानलिङ्गत्वे प्राप्ते ततः स्त्रियां टाबादिप्रसक्तौ तन्निषेधः तेन स्त्री षचति इत्यादौ एकान्तरत्वात् न ङीप्। स्त्रियः अपचत् इत्यादौ च न ङीप्। स्त्री अपचत इत्यादौ न टाप्। कुत्वं पचते इत्यादौ क्रीवत्वेन न हुल्लः, अव्ययस्य लिङ्गशून्यत्वेऽपि हुल्ल टाबादिशून्यत्वार्थं त्रिषु समानरूपोक्तिः। तेन हाशब्दस्य निन्दनीयपरत्वे हा पापमित्यादौ न हुल्लः। कृत्साध्यपरत्वे अहह संसारपारगतिरित्यादौ न टाप् इति बोध्यम् इत्यन्तस्य कति स्त्रियः इत्यादौ न ङीप्।

षष्टि स्त्री षड्गुणिता दशतिः त्रि०। (साट्) १सङ्ख्याभेदे २ततसङ्ख्यान्विते च।

षष्टिक पु०षष्ट्या अहोभिः पच्यते कन्। (साटिया) १धान्यभेदे अमरः। तत्रार्थे स्त्रीत्वमपि "षष्टिका कालशाकञ्च मूलञ्च केसरोत्तरम्" त्रि०त०। षष्ट्या क्रीतः कन्। २षष्टिसंख्यातद्व्यक्रीते त्रि०।

षष्टिक्य न० षष्टिकधान्यस्य भवनं क्षेत्रम् यत्। षष्टिकधान्योत्पत्तियोग्ये क्षेत्रे अमरः। [तत्रभवः। स्त्रियां ङीप्।

षष्टितम त्रि० षष्टेः पूरणः तमप्। येन षष्टिसङ्ख्या पूर्य्यते

षष्टिमत्त पु०षष्ट्या वर्षैर्मत्तः। अष्टवर्षके गजे शब्दमा० तदुत्सर्गे हि तस्य मत्ततायोग्यत्वात् तथात्वम्।

षष्टिलता स्त्री षष्ट्या लतेव। भ्रमरनार्य्यां राजनि०।

षष्टिसंवत्सर पु० ब० व० षष्टिगुणिता संवत्सराः। ज्योतिषप्रसिद्धेषु १प्रभवादिषु षष्टौ वत्सरेषु। प्रभवादिशब्दे ४७१।४७४ पृ० तदानयनं दृश्यम्। २नारायणादिकेषु षष्टिवर्षेषु गुरुवर्षशब्दे २६२२ पृ० दृश्यम्। षष्ट्यब्दादयोऽप्यत्र।

षष्टिहायन पु०षष्टिर्हायना वयोऽस्य। १षष्टिवर्षवयस्के गजे षष्टिदिनपक्वोहायनो व्रीहिः शाक०। २षष्टिकधान्ये च मेदि०। [पूर्य्यते तन्निष्ठ स्त्रियां ङीप्।

षष्ठ त्रि० षष्ण्यां पूरणः षष्+डट् थुक् च। येन षट्संख्या

षष्ठक त्रि० षष्ठो भागः कन्। षष्ठे भागे।

षष्ठांश पु० कर्म०। रक्षणप्रतिरूपतया प्रजाभ्यो ग्राह्ये उत्पन्नधनस्य षष्ठांशरूपे नृपकरे।

षष्ठान्न त्रि० षष्ठो दिवसस्य षष्ठकालः अन्नस्य तद्भोजनस्य कालो यस्य। दिवसस्य षष्ठभागे अन्नभोजनकालयुते पुरुषे।

षष्ठान्नकाल पु० षष्ठे दिवसे भक्ष्यान्नकालो यत्र। व्रतभेदे।

षष्ठी स्त्री षष्ण्यां पूरणी डट् थुट् ङीप्। चन्द्रमसः षष्ठकलायाञ्छासङ्ख्यिरूपक्रियारूपे १तिथिभेदे स्कन्दभार्य्यारूपे २मातृकाभेदे "मातृकासु पुरोद्भूतमा सा च षष्ठी प्रकीर्त्तिता। शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी। षष्ठांशरूपा प्रकृतेः स्वेन षष्ठी प्रकीर्त्तिता। पुत्रपौत्रप्रदात्री च धात्री शिशुजगतां सती। सुन्दरी युवती रम्या सुव्रतं भर्तृरन्तिके। स्थाने शिशूनां परमा दयारूपा च योगिनी। पूजा दशमासेषु यस्या विश्वेषु सन्ततम्। पूजा च सूतिकागारे पुरा षष्ठदिने शिशोः। एकविंशतिमे चैव पूजा कल्याणहेतुकी। यत्प्रियमिता चैषा नित्या कार्य्या कृतिः परा। मातृरूपा दयारूपा यत्षड्वर्णरूपिणी। जले स्थले चान्तरीक्षे शिशूनां स्वप्नगोचरे" ब्रह्म० वै०प्र० १अ०। "ब्रह्मणो मानसी कन्या देवसेना हरीश्वरी। हरेर्मां मनसा धाता ददौ स्कन्दाय भूमिप। मातृकासु च विख्याता स्कन्दभार्य्या च सुव्रता। विश्वे षष्ठीति विख्याता षष्ठांशात् प्रकृतेर्यतः" ४०अ०। "प्रकृत्या दादशे मासि सम्प्राप्ते पुत्रजन्मनि। सूते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी। वैशाखे चान्द्रनी षष्ठी ज्येष्ठे चारण्यसंज्ञिता। आषाढे कार्त्तिकी श्रेया श्रावणे नृपनन्दनो तथा। भाद्रे चामेटी विख्याता दुर्गाख्यायुजे तथा। नाम्नाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी। पौषे

साम्यरूपा च शीतला तपसि स्मृता। गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता" स्कन्दपु०। षष्ठी-विद्धितकालव्यवस्था तिथिशब्दे दृश्या।

षस स्वप्ने अदा०पर०अक०सेट् वैदिकः। षसति अषसीत् अषसीत्

षस्ज सर्गे भ्वा०पर०सक०सेट्। सज्जति असंज्जीत्। अयमात्मनेपदीत्यन्ये "वचोऽपि परमाक्षरं न च पदेषु संसज्जते" इति शकुन्तला।

षस्त स्वप्ने अदा० स्वप्रा० पर० अक० सेट्। वैदिकः इदित्। संस्ते असंसीत्। [नि सस्तति असीषसत् असस्तीत्।

षह क्षमायां वा घु०भ्वा०पक्षे दि०पर०सक० सेट्। साह्यति षह्यति क्षमायां भ्वा० वा०सक०सेट्। सहते असहिष्ट असहीत्। षुह साढ्वा। "तीषसहेति" पा० तकारादावर्द्धधातुके वा इट्। सोढा सहिता। सहितव्यः सोढव्यः। क्त। सोढ इत्येव। अत्र पक्षे निमित्ते सति न षत्वम् परिसोढ़ा इत्येव पक्षे परिषहितेत्यादौ षत्वम्।

षहसानु पु० षह-आनु उणुक् च पृषो० षत्वम्। १यज्ञे २मयूरे च संज्ञिप्रसारः। [शब्दरत्न०।

षाट् अव्य० षह-खिच्-पृषो० षत्वं टत्वञ्च। सम्बोधने शब्दा-

षाड्व पु० षडवति अव-अच् स्वार्थे अण्। १याने २रसे च मेदि०तयोः तत्संख्यकस्वरादिमत्त्वात् तथात्वम्। ३षट्-स्वरमिलितरागे च "औडवः पञ्चभिः प्रोक्ता षड्भिस्तु षाडवः स्मृतः। सम्पूर्णः सप्तभिर्ज्ञेय एवं रागस्त्रयोदशः" संगीतदर्पणः।

षाड्गुण्य न० षट् गुणा एव स्वार्थे ष्यञ्। राज्ञां सन्धिविग्रहादिषु षट्सु गुणेषु "षाड्गुण्यमुपयुञ्जते" इति माघः। "षाड्गुण्यमिति यत् प्रोक्तं वक्ष्यमाण युधिष्ठिर!। सन्धानासनमित्येव यानासन्धानमेव च। विग्रहासनमित्येव यानं सम्परिग्रहश्च। द्वैधीभावस्तथान्येषां संश्रयोऽथ प्रकृष्य च" भा०शा०६९अ० "सन्धानासनं सन्धिं कृत्वाऽवस्थितिः यानासन्धानं यानम्२। विग्रहं वैरं कृत्वावस्थानं विग्रहः३ यानं सम्परिग्रहासनं यत्नोर्भयप्रदर्शनार्थं यानं प्रदर्श्य स्वस्थानेऽवस्थानं४ द्वैधीभाव उभयत्र सन्धिकरणं५ परस्याऽन्यस्याश्रयोऽ दुर्गादेर्महाराजस्य वा" नी० क०।

"सन्धिञ्च विग्रहं यानमासनादि वदामि ते। बलवद्विग्रहीतेन सन्धिं कुर्याच्छिवाय च। कपाल उपहारश्च सन्तानः सङ्गतस्तथा। उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः। अवहस्तनर आदिश्च आत्मापि सुहृत्-

प्रग्रहः। परिक्रमस्तथा छिन्नस्तथा च परदूषणम्। स्कन्धोपनेयः सन्धिश्च सप्तयः षोड़शेरिताः। परस्परोपकारश्च सैन्यः सम्बन्धकस्तथा। उपहारश्च चत्वारस्तु सख्याश्च सप्तयः। बालो वृद्धो दीर्घरोगस्तथा वस्त्रवृद्धिकृतः। भीरुको भीरुजनको लुब्धो लुब्धजनस्तथा। विरक्तप्रकृतिश्चैव विषयेष्वतिशक्तिमान्। अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः। दैवोपहतकश्चैव दैवनिन्दक एव च। दुर्भिक्षव्यसनोपेतो बलव्यसनसङ्कुलः। खदेशस्थो बहुरिपुर्मुक्तः कालेन यश्च ह। सत्यधर्मव्यपेतश्च विपत्तिः पुरुषा अमी। एतैः सन्धिं न कुर्वीत विपरीतोयतः स केवलम्। परस्परापकारेण पुंसां भवति विग्रहः। आत्मनोऽभ्युदयाकाङ्क्षी पीड्यमानः परेण वा। देशकालबलोपेतः प्रारभेतेह विग्रहम्। राज्यस्थानदेशानां स्थानस्य च बलस्य च। अपहारो महान् मानः पीड़ा वैषयिकी तथा। स्थानात्मशक्तिधर्माणां विघाता दैवमेव च। मित्रार्थस्यापमानश्च तथा बन्धुविनाशनम्। भूतानुग्रहविच्छेदस्तथा मच्छलदूषणम्। एकार्थाभिनिवेशत्वमिति विग्रहयोनयः। सापत्न्यं वासुजं स्त्रीजं वाग्जातमपराधजम्। वैरं पञ्चविधं प्रोक्तं साधनं प्रशमं नयेत्। किञ्चित्फलं निष्फलं वा सन्दिग्धफलमेव च। तदात्वे दोषजननमायत्यां चैव निष्फलम्। आयत्यां तु तदात्वे च दोषसङ्गनं तथा। अपरिज्ञातवीर्यं च परेण स्त्रीजितोऽपि वा। परार्थं स्त्रीनिमित्तञ्च दीर्घकालं द्विजैः सह। अकालदेवयुक्तेन बलोद्वृत्तसखेन च। तदात्वे फलसंयुक्तमायत्यां फलवर्जितम्। आयत्यां फलसंयुक्तं तदात्वे निष्फलं तथा। इतीमं षाड्गुण्यविधिं न कुर्यादेव विग्रहम्। तदात्वायतिसंयुक्तं कर्म राजा समाचरेत्। पुष्टं पुष्टं बलं मत्वा स्फीतोयाद् विपरीतवत्। मित्रमाक्रन्द आसारो यदा मुख्यक्षयः। परस्य विपरीतस्य तदा विग्रहमाचरेत्। विग्रह्य सन्धाय तथा सम्भूयाथ प्रसङ्गतः। उपेक्षया च निपुणैर्यानं पञ्चविधं स्मृतम्। परस्परस्य सामर्थ्यविघातादासनं स्मृतम्। आरेचि विजिगीषोश्च यानवत् पञ्चधा स्मृतम्। बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन्। द्वैधीभावेन तिष्ठेत काकाक्षिवदलक्षितः। उभयोरपि सम्प्राप्ते सेवेत बलवत्तरम्। यदा द्वावपि नेच्छेतां संश्रयं जातसंविदौ। तदोपसर्पेत् तच्छत्रुमधिकं वा स्वयं व्रजेत्। उच्छिद्यमानो बलिना निरुपायप्रतिक्रियः। कुलोद्वृत्तं बलवन्तमार्य-

वेत् बलोत्कटम् । महर्षिनोपास्तिकता नित्यं तद्भावभाविता । मत्कारितप्रश्रयिता दत्तं संश्रयिष्यः श्रुतम्" अग्निपु०२१अ०। अधिकं कामन्द० नीतिशास्त्रे दृश्यम् ।

षाण्मातुर पु० षण्णां मातृणामपत्यम् अण् उदादेशे रपरः। कार्त्तिकेये तस्य कृत्तिकात्वेन, गङ्गा पृथिवी पार्वती चेति षट् मातरः पुराणेषु प्रसिद्धाः । अग्निकुमारशब्दे तस्य षण्मातृऋषिपत्नीनां मातृत्वं दर्शितम् ।

षाण्मासिक त्रि० षण्मासत्वे अधिकृत्य कृतो ग्रन्थः ठक् । षण्मासत्वप्रतिपादके ग्रन्थे स्त्रि० ङीप् ।

षाण्मासिक न० षष्ठे मासे भवः ठञ् । मृतस्य एकादशेन षष्ठमासे कर्त्तव्ये श्राद्धभेदे "आद्यं षाण्मासिके तथेति" स्मृतिः "एकादशेनूनषष्ठमासे तस्य विधानम्" इति०तत्त्वम्

षाध सिद्धौ स्वा० दि० च पर० अक० अनिट् । साध्नोति साध्यति असात्सीत् सिषाधयिषति । [ते असस्रान्वत् न ।

षान्त्व सामयुक्तसम्प्रदाने अदा०चु०उभ०सक० सेट् । सान्त्वयति सिनोति सिनुते सिनाति सिनीते असैषीत् । असेष्ट । [चत् न । सिक्तः

सिच आर्द्रीकरणे तु०उ०उभ०सक०अनिट् । सिञ्चति ते असिक्षीत् असिक्त

सिट अनादरे स्वा० पर०सक० सेट् । सेटति असेटीत् ।

सिड्ग पु० सिट-गन् तस्य नेत्वम् पृषो० । १विटं (लम्पट) २व्यासङ्के हेमच० । [सीत्-असैत्सीत् । सिक्तः ।

सिध माङ्गल्ये अक० गतौ सक० चदित् सेट् । सेधति असेधीत् सेधितः ।

सिध सिद्धौ दिवा० पर० अक० अनिट् क्त्वा सेट् । सिध्यति असैत्सीत् सिषिधे साधयति । सिषाधयिषति ।

आ+राज्ञाज्ञयाऽवरोधे सक० । आसेधः ।

उत्+उच्चतायाम् अक० । उत्सेधः ।

नि+निवारणे सक० । निषेधः ।

परि+निवारणे सक० । परिषेधः ।

प्रति+निवारणे सक० । प्रतिषेधः ।

वि+आ+विशेषेण निषेधे । व्यासेधः ।

वि+प्रति+विरुद्धत्वे व्याघाते । विप्रतिषेधः ।

सिध्म क्षिपणे सक० दीप्तौ अक० भ्वा० पर० सेट् क्त्वा सेट् । सिध्मति असेधीत् ।

सिध्म क्षिपणे स्वा०पर० सक० सेट् । सेध्नोति असेधीत् ।

सिध्म उद्गतयज्ञोपवीतात् कण्ड्वादेराद्दाने तुदा०पर०सक० सेट् । सिध्मति असेधीत् । [धीत् स्यूतः सीवनं सेवनम् ।

सिव तन्तुविस्तारे दि०प०सक०सेट् क्त्वा सेट् । सीव्यति असे

षु प्रसवाद्यवसाने सवने शोभादेः पीड़ने मन्थने च स्वा० उ० सक०ज्ञाने अक०अनिट् कुक्षि पर० सेट् । सुनोति सुनुते असावीत् असोष्ट । सोता

षु गतौ भ्वा०उभ०सक०अनिट् । सवति ते असौषीत् असोष्ट ।

षु प्रसवे ऐश्वर्ये च भ्वा०प०सक०अनिट् । सवति असौषीत् ।

षु ऐश्वर्ये प्रसवे च अदा० पर० सक० सेट् क्षिटि निस्सेट् । सौति असावीत्-असौषीत् । सुषुविव ।

षु पु० सु-वा० डु पूषोत्वम् । गर्भविमोचने प्रसवोऽपि

षुट् अनादरे चु०उभ०सक० सेट् । सुट्टयति ते असुष्टुट्त न ।

षुन्भ दीप्तौ अक०क्षिपणे स०स्वा०प०सेट् । सुम्भति असुम्भीत

षुर दीप्तौ अक० ऐश्वर्ये स०तु०प० सेट् । सुरति असौरीत् ।

षुह दम्भे अक०क्षमायां सक०दि०पर०सेट् । सुह्यति सुष्टुहत् । [सुवै असर्वीत् असोष्ट ।

षू प्रसवे गर्भविमोचने च अदा० आत्म० सक० सेट् । सूते

षू प्रसवे दि०आ०स०सेट् । सूयते असविष्ट-असोष्ट सोदिता सूनः

षूच क्षेपे प्रेरणे च तुदा० पर० सक०सेट् । सूचति असूचीत् ।

षूद निवारणे भ्वा०आ० सक० सेट् । सूदते असूदिष्ट ।

षूद क्षरणे भ्वा० पर० सक० सेट् । सूदति असूदीत् ।

षूद क्षरणे अक० प्रसिद्धायां निरासे च सक० अदा०चु० उभ० सेट् । सूदयति ते असुषूदत् त । [दित् दैदित् दुर्यः ।

षूर क्षये अक० क्षिपणे स० दि०आ०सेट् । सूर्यते असूरिष्ट

षूर्द् अनादरे भ्वा० पर० सक० सेट् । सूर्दति असूर्दीत् ।

षूर्द् दैन्यायां भ्वा० पर० सक० सेट् । सूर्दति असूर्दीत् ।

षूष प्रसवे भ्वा० पर० सक० सेट् । सूषति असूषीत् ।

षृन्भ क्षिपणे भ्वा० पर० सक० सेट् । सृम्भति असृम्भीत ।

षृभ क्षिपणे भ्वा० पर० सक० सेट् । सर्भति असर्भीत ।

षृभ षृभधातु पाणिनीयगणपाठे मूर्छ्यादितया पठितौ । तेन सोपदेशत्वात् सति निमित्ते नत्वम् । कविकल्पद्रुमे तु दन्त्यादितया पठितौ । तेन सति निमित्ते न नत्वम् । तस्मात्तस्य आपाणिनीयत्वादुपेक्ष्यम् ।

सेक सर्पणे स्वा० आत्म० सक०सेट् क्षदित् चङि न छुक्षः । सेकति असेकीत् । [छुक्षः । सेकति असेकीत्

सेल चालने गतौ च भ्वा० पर० सक० सेट् क्षदित् चङि न

सेव आराधने उपभोगे आश्रये च स्वा० उभ०सक०सेट् क्षदित् चङि न छुक्षः । सेवति सेवते असेवीत् असेविष्ट ।

सै क्षये भ्वा० पर० अक० अनिट् । सायति असासीत् ।

सो नाशे दि०पर० अक० सेनिट् । स्यति असात्-असासीत् ।

अव+उपायो अवसानज्ञाने सक० अवसीयते ।

अधि+अव+ उत्साहे अक०निश्चय ज्ञाने सक० अध्यवस्यति। वि+अव+विशेषेण निश्चये सक० उद्यमे अक० व्यवस्यति। अनु+वि+अव ज्ञानज्ञाने अनुव्यवसायः घटमहं जानामीत्यादिरूपः। [षड्दन्तयोग्यवयवरूपे दृषादौ।

षोडत् पु०षट् दन्ता यस्य दन्तस्य दट् षत्वञ्च दस्य टुत्वम्।

षोडशन् त्रि० ब०व० षडधिका दश षत्वञ्च दस्य टुत्वम्। (षोल) १संख्याभेदे २तत्संख्याकान्विते च।

षोडश पु० षोडशानां पूरणः डट्। येन षोडशसङ्ख्या पूर्यते १तस्मिन्। चन्द्रमण्डलस्य २षोडशभागरूपकलायां ३त्रिपुरातन्द्यांच स्त्री ङीप्। "काली तारा महाविद्या षोडशी भुवनेश्वरी" तन्त्रसा०।

षोडशक न० षोडश परिमाणान्यस्य कन्। षोड़शसङ्ख्याते वस्तुनि "भूम्यासनं जलं वस्त्रं प्रदीपोऽन्नं ततः परम्। ताम्बूलच्छत्रगन्धाश्च माल्यं फलमतः परम्। शय्या च पादुका गावः काञ्चनं रजतं तथा। दानमेतत् षोडशकं प्रेतमुद्दिश्य दीयते" गु०त० उक्तेषु प्रेतोद्देशेन दीयमानेषु २षोडशसु भूम्यादिषु "स्वर्णं रौप्यं तथा ताम्रं कांस्यं गावो गजा हयाः। वस्त्रं भूमिर्द्विजो यस्य शय्या चेत्तत्प्रधानकौ। दास्यन्ते पितृयज्ञेषु दानं षोडशकं मतम्" इति वायुपुराणोक्तेषु पितृकृत्येषु देयेषु ३स्वर्णादिषु षोडशसु च।

षोडशभुजा स्त्री षोडश भुजा यस्याः। दुर्गामूर्त्तिभेदे "यदा तु षोडशभुजां महामायां प्रपूजयेत्। दुर्गातन्त्रेण मन्त्रेण विशेषं तत्र वै शृणु। कन्यायां कृष्णपक्षस्य एकादश्यामुपोषितः। द्वादश्यामेकभक्तन्तु नक्तं कुर्यात् परेऽहनि। चतुर्दश्यां महामायां बोधयित्वा विधानतः। गीतवादित्रनिर्घोषैर्नानानैवेद्यवेदनैः। अथार्चितं बुधः कुर्यात् उपवासं परेऽहनि। एवमेव व्रतं कुर्यात् यावद्वै नवमी भवेत्" कालिकापु० ५९अ०।

षोडशमातृका स्त्री ब०व० षोडशसंख्या मातरः स्वार्थे क। "गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः। शान्तिः पुष्टिर्धृतिस्तुष्टिः कुलदेवातदेवता" इत्युक्तासु गौर्यादिषु षोडशसु मातृकासु।

षोडशर्त्विज् पु०कर्म०। होत्रादिषु षोडशसु ऋत्विक्षु ते च यज्ञावाकाध्याये ८५ पृ०दर्शिताः। तत्साध्यश्च यागः षोडशयागादिः सत्रयागश्च।

षोडशाङ्ग पु० षोडश द्रव्याणि अङ्गान्यस्य। "गुग्गुलु सरलं दारु पत्रं मलयजत्वचम्। ह्रीबेरमगुरं कुष्ठं गुडं सर्जरसं घनम्। हरीतकीं नखीं लाक्षां जटामांसीञ्च शैलजम्। षोडशाङ्गं विदुर्धूपं दैवे पैत्रे च कर्मणि" इत्युक्ते गुग्गुल्वादिषोडशद्रव्यरचिते धूपे तन्त्रसा०।

षोडशाद्रि पु०षोडश अद्रयश्चरणा यस्य। कर्कटे हेमच०

षोडशांशु पु० षोडश अंशवो यस्य। शुक्रग्रहे शब्दमा०। षोडशार्चिरप्यत्र।

षोडशार न०षोडश अराः कोणास्त एव वा अस्य। १षोडशदलयुक्ते कमले तन्त्रोक्ते २यन्त्रभेदे च। तत्रादावाद्ये २चक्रभेदे षोडशारचक्रनिर्माणप्रकारस्तु तत्रादावादिपद्धतौ विधानपारिजातादुक्तोऽस्माभिर्दर्शितो यथा "गुरुवेदिमध्ये त्रिरेखदीर्घत्रिकारं चतुरस्रं प्रसाध्य तत्र प्राक्पश्चिमयोर्दक्षिणोत्तरतश्च नव नव रेखाः कृत्वा चतुःषष्टिकोष्ठकं सम्पादयेत्। तत्र च सर्वाणि कोष्ठानि नवाङ्गुलदीर्घायामानि सम्पद्यन्ते। तत्र बाह्यासु षड्रेखासु चतुर्दिक्षु मध्ये पार्श्वयोः द्वे द्वे कोष्ठे परित्यज्य चत्वारि कोष्ठानि मार्जयित्वा चतुःकोष्ठानामेकतां सम्पाद्य स्वस्वलग्नोपान्त्यषड्रेखासु द्वे द्वे मध्यकोष्ठे पार्श्वयोः त्रीणि त्रीणि कोष्ठानि त्यक्त्वा मार्जयेत्तेन चतुर्दिक्षु षट् षट् कोष्ठात्मकानि चत्वारि द्वाराणि जायन्ते। ततो मध्यस्थानि षोडश कोष्ठानि प्रतिदिशं चत्वारि चत्वारि कोष्ठानि परित्यज्य मार्जयेत्। ततो बाह्यषड्रेखासु एकैकं कोष्ठकं कोष्ठसुतृच्छ्य कोणकोष्ठद्वारपीठान्तरालवर्त्तीनि पञ्च पञ्च कोष्ठानि प्रतिदिशं मार्जयेत्। तेन मध्यचतुरस्रपीठस्य पादाः भवन्ति। ततो मध्यपीठमारभ्य क्रमशश्चत्वारि वृत्तानि कुर्यात्। तत्राद्ये चतुरङ्गुलो द्वितीयेऽष्टाङ्गुलस्तृतीये चतुर्विंशत्यङ्गुलः चतुर्थे च षड्विंशत्यङ्गुलो व्यासः। तत्राद्यं चतुरङ्गुलव्यासकं वृत्तं कर्णिकारूपं पीतेन रजसा पूरयित्वा कर्णिकावधि रेखां सितेन रजसा विदध्यात्। तदुपरिष्टादष्टाङ्गुलव्यासे द्वितीयवृत्ते क्रमेण पीतरक्तसितरजोभिः सम्पादितमध्यसूत्राद्याणि कीलय केसराणि कृत्वा केसरावधिरेखां सितेनैव रजसाङ्गुलोन्नतां कुर्यात्। ततस्तदुपरिष्टचतुर्विंशत्यङ्गुलव्यासे तृतीयवृत्ते अष्टसु दिक्षूद्दलपत्राणि सितरजसा विधाय रक्ताग्राणि कुर्यात्। ततो दलान्तरेषु सितेन रजसा रेखां विधाय दलमध्यानि कृष्णेन रजसा पूरयेत्। तदुपरिष्टादेकाङ्गुलान्तरालां बहिर्दृत्तस्य चतुर्थरेखां सितरजसा संपाद्य तृतीयचतुर्थवृत्तद्वयान्तरस्थानेषु

परितोऽष्टदलायतत्रसन्धिषु षोडशभिः पत्रैः षोडशधा विभज्य प्रतिभागं यथाकारान् षोडशारान् श्यामपीतारुणश्वेतरजोभिः कल्पयित्वा तन्मध्यं यथायोगं रजोभिः पूरयेत्। तद्बहिः सितपीतारुणश्यामहरिताः पञ्च रेखाः क्रमशो लिखेत्। तद्बहिः षोडशेतरचतुरस्रं यथायोगं रजोभिरलङ्कृत्य पीठावधिरेखां सितेन रजसा कृत्वा द्वारक्षेत्राणि पूर्ववत्। पीतश्वेतश्यामहरितरजोभिः पूरयेत्। तत आग्नेयादिकोणस्थकोष्ठचतुष्टयं क्रमेण लोहितहरितश्यामधवलैः पूरयित्वा आग्नेयादिपीठपादचतुष्टयं पञ्चकोष्ठात्मकं क्रमात् पितरक्तपीतकृष्णरजोभिः पूरयेत्। ततः सितेन रजसाकुलोद्भवेन बहिश्चतुरस्ररेखां कुर्यात्। ततः प्राच्यां वज्रम्, आग्नेय्यां शक्तिं, दक्षिणे दण्डं, नैर्ऋत्यां खड्गं, पश्चिमायां पाशं, वायव्यां ध्वजं, कौबेर्यां गदाम्, ऐशान्यां शूलं तदग्रे चक्रं, पार्श्वदक्षिणे पद्मञ्च लिखेत्"।

षोड़शिन् पु० षोडश कला विद्यन्तेऽस्य इनि। १षोमे २यज्ञाङ्गे तद्धामसोमरसस्थापनपात्रे च "अतिरात्रे षोडशिनं गृह्णातीति" श्रुतिः "षोडशिनः पात्रं खादिरं चतुरस्रम्" कात्या० श्रौ० १।२ कर्कपद्धतिः।

षोडशोपचार पु० ब० व० षोडशसङ्ख्याता उपचाराः। "आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्। मधुपर्कां-चमस्नानं वसनाभरणानि च। गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा" इत्युक्तेषु षोडशसु पूजाद्रव्येषु।

षोढा अव्य० षट् प्रकाराः धाच् षषश्च षस्य ढत्वम्। षट्सु प्रकारेषु।

षोढान्यास पु० षोढा षट्प्रकारो न्यासः। तन्त्रोक्ते षट्प्रकारन्यासभेदे षोढान्यासप्रकारो यथा वीरतन्त्रे "केवलां मातृकां कृत्वा मातृकां तारसंपुटाम्। मातृकासंपुटितं तारं न्यसेत् साधकसत्तमः। श्रीबीजपुटितां तान्तु मातृकासंपुटितं तु तत्। कामेन पुटितां देवीं ततपुटं कामभेव च। वह्निना च पुटितां देवीं वह्निञ्च ततपुटां न्यसेत्। क्रौं हृन्च पुनर्न्यस्य। वह्निसंपुटञ्च पूर्ववत्। भूतेन पुटितां देवीं ततपुटं मन्त्रमेव च। अनुलोमविलोमेन न्यस्य मन्त्रं यथाविधि। भूतेनाष्टशतं कुर्यात् व्यापकं तदनन्तरम्"। कालीतारादिषोढान्यासाश्चात्र-सारे दृश्याः। [कीत् घटादिः सकर्मकः।

ष्टक प्रतीघाते भ्वा० पर० सक० सेट्। स्टकति अस्टाक्षीत्।

ष्टग संवरणे भ्वा०प०सक० सेट् इदित् सिचि न वृद्धिः घटा०। स्टगति अस्टगीत्। [नीत् अस्तनीत् स्ना(स्त)नयति।

ष्टन शब्दे भ्वा०पर० सक० सेट् वा घटा०। स्टनति अस्टा०

ष्टभ स्तम्भे सक० स्तम्भने सक० भ्वा० आत्म० सेट् इदित्। स्टभते अस्टब्धाष्ट।

ष्टम वैकल्ये अद० चु०उ०स० सेट्। स्टमयति ते अतस्टमत् त

ष्टम वैकल्ये अक० भ्वा० पर० सेट्। स्टमति अस्टमीत्।

ष्टिघ अभियोगे स्वा०आत्म०सक० सेट्। स्टिङ्क्ते अस्टेघिष्ट।

ष्टिप क्षरणे स्वा०आत्म०अक० सेट् इदित् चङि न वृद्धिः। स्टेपते अस्टेपिष्ट। अतिष्टेपत त।

ष्टिम क्लेदे दि०प०अक० सेट्। स्टिम्यति अस्टेमीत् स्टेमनम्

ष्टीम क्लेदे दि०प०अ०सेट्। स्टीम्यति अस्टीमीत् स्टीमनम्।

ष्टु स्तुतौ अदा०उ० सक०अनिट् सिचि सेट् लिटि नित्यसेट् स्तौति स्तवीति स्तुतः स्तुवीतः स्तुते स्तुवीते शि०कौ० सुखबोधमते अर्थिति न वेट् स्तुते इत्येवेति भेदः। अस्तावीत् अस्तोष्ट। तुष्टुवि। तादावर्द्धधातुके वेट्। स्तोता स्तविता। स्तोष्यति स्तुतः।

ष्टुच प्रसादे अक० भ्वा० आत्म० सेट्। स्टोचते अस्टोचिष्ट।

ष्टुभ स्तम्भे अक० स्तम्भने सक० भ्वा०आत्म० सेट् क्ता वेट्। स्टोभते अस्टोभिष्ट। [अतुष्टूपत त स्तूपः।

ष्टूप उच्छाये अद० चु० उभ० अक० सेट्। स्टूपयति ते

ष्टूप उच्छाये दि०पर०अक०सेट्। स्टूप्यति हरित् अस्टूपत् अस्टूपीत्।

ष्टृच गतौ भ्वा०प०स०सेट्। स्टृचति अस्टृचीत् नरीस्टृच्यते

ष्टृह वधे तु०प०सक०वेट्। स्टृहति अस्टर्हीत् अस्टृक्षत्।

ष्टृह वधे तु०आत्म०सक०वेट्। स्टृहते अस्टृहीत् अस्टृक्षत

ष्टेप क्षरणे भ्वा० आ० अक० सेट् ऋदित् चङि न वृद्धिः। स्टेपते अस्टेपिष्ट।

ष्टै वेष्टने सक० भ्वा० पर० अनिट्। स्टायति अस्टासीत्।

ष्ट्यै संहतौ ध्वनौ च अक० भ्वा० पर० अनिट्। स्ट्यायति। अस्ट्यासीत् इत्येके। अस्त्यायति इत्येवेति।

ष्ठग संवरणे भ्वा० पर० सक० सेट् घटा० सिचि न वृद्धिः। स्थगति अस्थगीत्।

ष्ठल स्थितौ भ्वा०प०अक० सेट् चला०। स्थलति अस्थालीत्।

ष्ठस निरासे दि०प०स०सेट्। स्थस्यति अस्थासीत्-अस्थसीत्।

ष्ठा गतिनिवृत्तौ भ्वा०पर० अक० अनिट् तिष्ठति अस्थात्।

अधि+आधारतयावस्थितौ अक०।

अनु+करणे अनुष्ठानम्।

अव+अवसाने अवस्थाने।

ष्वदु+ऊर्ज्जनेष्टायां पा० आसनादुत्तिष्ठति उत्पत्तौ आ० या० मादुत्तिष्ठते (उत्पद्यते)।

ष्वप+सेवने सक० आ० उपतिष्ठते देवम्।

नि+नितरां स्थितौ अक० निलयौ शरणे च निष्ठा।

प्र+गमने सक० प्रस्थानम्।

प्रति+संस्कारभेदे प्रतिष्ठा।

प्रति+अव+प्रतिपन्नतयाऽवस्थाने आत्म० प्रत्यवतिष्ठते।

वि+अव+नियमभेदे आ० व्यवतिष्ठते व्यवस्था।

सम+सम्यक् स्थितौ नाशे च संस्था संस्थितः।

ष्ठिव निरासे (सुखेन श्लेष्मादेर्वमने) भ्वा० पर० सक० सेट्। ष्ठीवति अष्ठेवीत्। ष्ठे(ष्ठी)वनम् उदित् क्त्वा वेट्। अत्रार्थे दिवादित्वमपि ष्ठीव्यति। धोपदेशपर्युदासे हृस्व दीर्घमध्ययोर्ग्रहणम्। [ष्ठीवति अष्ठीवीत् ष्ठीवनम्।

ष्ठीव निरासे (श्लेष्मादेर्मुखेन वमने) भ्वा० पर०सक०सेट्। ष्ठूत त्रि० ष्ठिव—क्त ऊठ्। १निरस्ते २वान्ते च।

ष्णस निरासे दि०पर०सक० सेट् उदित् क्त्वा वेट् वा घटा० लृदित्। स्नस्यति अस्नसत्। स्ना(स्न)सयति।

ष्णा शौचने अदा० पर० सक० अनिट्। स्नाति अस्नासीत्।

ष्णिह प्रीतौ दि० पर० सक० उदित् वेट्। स्निह्यति स्नेदित् अस्नेहत् स्नेहिता-स्नेटा-स्नेग्धा। [अस्निष्णिहत् त।

ष्णिह स्नेहयुक्तभवने चु०उभ० अ० सेट्। स्नेहयति ते।

ष्णु स्तुतौ अदा०उ० सक०सेट्। स्नौति अस्नावीत् अस्नविष्ट।

ष्णुच सेचने भ्वा०आ०सक०सेट्। स्नोचते अस्नोचिष्ट स्नोचिष्ट।

ष्णुस भये दि०प०सक० सेट्। स्नुस्यति अस्नोसीत् स्नुष्णोस।

ष्णुह उद्गारे दि०पर० सक० उदित वेट्। स्नुह्नुति लृदित् अस्नुहत्। स्नोहित स्नुटा।

ष्णै वेष्टे भ्वा०पर०सक० अनिट्। स्नायति अस्नासीत्। ष्णुग्ये इत्येके ष्णुग्यति अस्नुग्यासीत्। सृ(स्ना)पयति उपसृष्टस्य प्रस्नापयति।

ष्मि ईषद्धासे भ्वा०चा०अ०अनिट्। स्मयते अस्मेष्ट स्मिग्धे। कर्त्तृजन्ये विस्मये णिचि दृत्व वृद्धौ पुक्च आ० विस्मापयते तदन्यत्व विस्मापयतीत्येव।

ष्मक वर्षणे भ्वा० आत्म० सक० सेट्। स्मक्ते अस्मक्किष्ट।

ष्मद हर्षे क्षोदने च चु० उभ० सक० सेट्। स्मादयति ते अस्मिष्मदत् त।

ष्मर प्रीतौ लेखने च भ्वा०चा०सक०सेट्। स्मरते अस्मरिष्ट।

ष्मर्ज आलिङ्गने भ्वा०आ०स० अनिट्। स्मर्जते अस्मर्ज्जत।

ष्मुप्र गतौ निद्रायाञ्च अदा०स्वपा०जक्षा०पर०अक०अनिट्। स्मर्पति अस्माप्सीत् सुष्वाप। [यति ते अस्मर्त्तृत त।

ष्मर्त्त गतौ सक० दुःखेन जीवने अक० चु०उ० सेट्। स्मर्त्तयति ते।

ष्मष्क गतौ भ्वा० आत्म० सक० सेट्। स्मष्कते अस्मष्किष्ट। धोपदेश पर्युदासे सक्तवत् स्मष्कस्यापि ग्रहणात् स्मष्कते इत्येवेत्याहुः।

ष्विद मोहे मूर्च्छे च अक० मोचने सक०भ्वा० आ० लुडि उ० सेट्। स्वेदते अस्विदत अस्वेदिष्ट। [अस्विदत।

ष्विद गात्रप्रक्षरणे अक०दि०पर० अनिट्। स्विद्यति लृदित्

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य-सङ्कलिते वाचस्त्यभिधाने षकारादि शब्दार्थसङ्कलनम्।

स

सकार जन्यवर्णभेदः तस्योच्चारणस्थानं दन्तमूलं तस्योच्चारणे आभ्यन्तरप्रयत्नः विवृतं जिह्वाग्रेण अवर्णेनेन घोचार्य्यमाणत्वात् अर्द्धस्पृष्टम्। बाह्यप्रयत्नो विवारश्वासाघोषाः महाप्राणश्च अस्य ध्येयरूपं यथा "सकारं शृणु चार्वङ्गि! शक्तिबीजं परात्परम्। कोटिविद्युल्लताकारं कुण्डलीत्रयसंयुतम्। पञ्चदेवमयं देवि! पञ्चप्राणात्मकं सदा। रजःसत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा" कामधेनुतः। तस्याधिष्ठातृदेवतारूपं यथा "शुक्लाम्बरां शुक्लवर्णां द्विभुजां रक्तलोचनाम्। श्वेतचन्दनलिप्ताङ्गीं शुक्लाहारोपशोभिताम्। गन्धर्वगीयमानाञ्च सदानन्दमयीं पराम्। अष्टसिद्धिप्रदां नित्यां भक्तानन्दविवर्द्धिनीम्। एवं ध्यात्वा सकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतः अस्य वाचकशब्दाः "सोऽहंसः सुधा विष्णुर्भग्वीश्चन्द्रसंज्ञकः। जगद्बीजं शक्तिनामा सोऽहं वेशवतो भगुः। प्रकृतिरीश्वरः शुद्धः प्रभा श्वेता कुलोज्वलः। दक्षपादोऽमृतं ब्राह्मी परमात्मा परोऽव्ययः। शुक्लरूपा च शुभ्रोभो गौः कलकण्ठो शुकोदरी। प्राणाद्या च परा देवी लक्ष्मीः सोमो हिरण्मयः। दुर्गोच्चारणसम्मोहा जीवो मूर्त्तिर्मनोहरः" वर्णाभिधा०। मातृकान्यासे अस्य दक्षपादे न्यासता। काम्यादौ प्रयोगे फलं सुखम् "सः सौख्यं हरतु खेदम्" दु०टी०। धोपदेशधातूनां प्रयोगे दन्त्यादित्वम् "सकारजः षकारस्येत्युक्तेः सति निमित्ते पुनः दन्त्यम्।

स पु० सा-ड। १विष्णौ एकार्थसंग्रहः। २सर्पे ३ईश्वरे शब्दर० ४विहगे पुंस्त्री० एकाक्षरकोषः। समासे पूर्वपदस्यः

प्रमहार्थे इसमानार्थे च यथा संपिक" सरूप इत्यादि। "सोऽन्तगुरुः कथितोऽन्तलघुस्तः" छन्दः शास्त्रोक्ते ७अन्तगुरुके आदिलघुद्वयके दवर्णगणे पु०। सगणोऽष्टम।

संक्षेप पु० सम्+क्षिप-घञ्। भूयसोऽर्थस्यात्यल्पाक्षरादिनाप्रकाशने भरतः। ल्युट्। तत्रार्थे न०। सर्वत्र समः स्थाने झरिपरे वा परसवर्णः पञ्चमवर्णः।

संक्षोभ पु० सम्+क्षुभ-घञ्। चाञ्चल्ये क्षोभे च वा ङ्।

संग्राहिन् पु० सम्+ग्रह-णिनि। १कुटजवृक्षे राजनि०। २सङ्ग्रहकारके ३धारके च। वा ङीष्। सङ्ग्राहीति रूपम्।

संघ पु० सम्+हन-ड नि०। १समूहे २जन्तुसमूहे च अमरः अस्य वा ङः। सङ्घ इति वा रूपम्।

संघट्ट पु० सम्+घट्ट-भावे अच्। १अन्योन्यविमर्दे २गठने च "दृष्टान्तरूपसंघट्ट प्रतिष्ठाज्ञानमेव च" तिं०त०। ३लतायां स्त्री शब्दच०। ल्युट्। तत्रार्थे न०।

संघर्ष पु० सम्+घृष-घञ्। १अन्योन्यघट्टसंयोगे २सङ्घर्षायां ३संमर्दने च शब्दर० वा ङः।

संघ्न न० सम्+हन्-क। १पीतकाष्ठे कालीयके गन्धद्रव्ये शब्दच०। सम्+हन्-क्विप्। २चेतनायां २बुद्धौ ४आख्यायां ५हलादौरधस्तूचने च स्त्री अमरः। ६गायत्र्यां ७सूर्यपत्न्यां च स्त्री मेदि०। वा ञ्। ८संहतजानुके त्रि० साहसाङ्कः।

संज्ञापन सम्+ज्ञा-णिच्-युक् भावे ल्युः ल्युट्। १मारणे अमरः। २ज्ञापने न ल्युः। क्तिन्। संज्ञप्तिरप्यत्र स्त्री हेमच० वा ञ्।

संज्ञासुत पु० संज्ञायाः सूर्यपत्न्याः सुतः। शनैश्चरे।

संज्ञु त्रि० सहते जानुनी यस्य जानुस्थाने भुः। संहतजानुके अमरः। वा ञ्।

संज्वर पु० सम्+ज्वर-अप्। अग्निजाते तापे अमरः वा

संमर्द पु० सम्+मृद-घञ्। अन्योन्यघट्टसंयोगरूपे संघर्षे वा मः

संय पु० स+यम्-ड। कङ्काले शब्दमा०। [यमे च।

संयत त्रि० सम्+यम-क्त। १बद्धे अमरः २व्रतशास्त्रोक्तनि-

संयत् स्त्री संयम्यतेऽत्र सम्+यम-आधारे क्विप् तुक् च। १युद्धे अमरः। कर्त्तरि क्विप्। २संयमनकर्त्तरि त्रि०।

संयत्वर पु० सम्+यम-करप् तुक्च। १जन्तुसमूहे २वाग्यते त्रि० संक्षिप्तसा०।

संयद्वर पु० इत०। नियन्तृणां वरे रूपे उणादि०।

संयद्वाम पु०वामं संयाति सम्+या-शतृ पृषो०पूर्वनिपातः। अक्षिपुरुषे "यत् हि अक्षिणि पुरुषं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वाम न्यभिसंयन्ति" छन्दोग्योप०।

संयन्तृ त्रि० संयच्छति सम्+यम-तृच्। नियन्तरि।

संयाम पु० सम्+यम-घञ् वा वृद्धिः। व्रताङ्गतया पूर्वदिनकर्त्तव्ये १नियमभेदे अमरः २इन्द्रियनिग्रहे ३बन्धने च

संयमन न० सम्+यम-ल्युट्। १बन्धने २व्रतभेदे मेदि० ३रथतुःशाखे रथे च भरतः। यम-णिच्-ल्यु। ४यमे पु० "वैवस्वतः संयमनः" श्रुतिः।

संयमनी स्त्री संयम्यते बध्यतेऽत्र सम्+यम-आधारे ल्युट्। यमाधिकृतपुर्याम् मेदि० "अन्येऽपि ये संयमिनः संयमन्यासुशन्ति ते" काशीखं० ८अ०। यमसभावर्णनं भा०स० ८अ०८श्लो०। संयमननगरपरत्वे न०"एतत् संयमनं पुण्यं यतीनाञ्चैतदर्शनम्" भा०व० १६३अ०।

संयमिन् पु०सम्+यम-णिनि न वृद्धिः। १मुनिभेदे धरणिः २इन्द्रियसंयमयुते त्रि० गीता।

संयाव पु० सम्यक् घृतादिभिर्यूयते निश्रयते गोधूमचूर्णाद्यत्र सम्+यु-आधारे घञ्। "संयावस्तु घृतक्षीरगुडगोधूमपाकजः" इत्युक्ते घृतादिना पक्वगोधूमचूर्णे शब्दच०।

संयुज् त्रि० सम्यक् युनक्ति सम्+युज-क्विप्। १गुणाढ्ये विका० २संयुक्ते च। [रिते हलि वर्णे च पा०।

संयुक्त त्रि० सम्+युज-क्त। १संयोगयुते पदार्थे २अचानन्तरे च

संयुग न० संयुज्यतेऽत्र सम्+युज-क न्यङ्क्वा० ह्रस्वः गः। युद्धे अमरः। तत्र साधु खञ्। सांयुगीन रणसाधौ।

संयुत त्रि० सम्+यु-क्त। संयुक्ते।

संयोग पु० सम्+युज-घञ्। १मेलने क्रियाजन्ये द्रव्याश्रिते गुणभेदे २सम्बन्धमात्रे च "अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः। कीर्त्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः। तथोभयोः कर्मजन्यो भवेत् संयोगजोऽपरः। आदिमः श्येनशैलादिसंयोगः परिकीर्त्तितः। सेनयोः सन्निपातोयः स द्वितीय उदाहृतः। कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः। तृतीयः स्यात् कर्मजोऽपि द्विधैव परिकीर्त्तितः। अभिघातो नोदनञ्च शब्दहेतुरिहादिमः। शब्दाहेतुर्द्वितीयः स्यात्" भाषा० "उदयात् प्राक् त्यक्त्वा स्यात्तु शेषः संयोग उच्यते। उपरिष्टात् प्रवेशस्तु तत्र परिवर्जयेत्" तिं०त० उक्ते उदयात् प्राक्दृश्यत्वशेषे च।

संयोगपृथक्त्व न० संयोगेन फलसम्बन्धभेदेन पृथक्त्वं नानात्वं यत्र। एकस्यैव कर्मणो नित्यानित्यत्वप्रतिपादके मीमांसकोक्ते न्यायभेदे स च तत्त्वबो० दर्शितो यथा

"अग्नीषोमीयपशौ श्रूयते "खादिरे पशुं बध्नाति खादिरं वीर्यकामस्य यूपं कुर्वीत"। अत्र पशुबन्धनाय यूपोविहितः स च नित्यत्वेनावश्यकः यागसाधनत्वात् पशुकामनावतस्तु अन्योयूपोविहितः स च कामनाधीनत्वात्तावश्यकः। अत्र संशयः किं काम्य एव खादिरो नित्येऽपि स्यात् उत एकः खादिरः कृतपुरुषोभयार्थः उत काम्य एव खादिरो नित्यस्त्वन्यकाष्ठनिर्मित इति। तत्र काम्यनित्यप्रयोगाङ्गता न सम्भवति कामनाधीनत्वेन नित्यानावश्यकत्वात् नित्यस्यावश्यकः नह्येकस्यावश्यकत्व मनावश्यकत्वञ्च सम्भवति विरोधात्। तस्मात् काम्य एव खादिरः नित्यस्यान्यकाष्ठनिर्मितः। तदुक्तं शास्त्रदीपिकायाम् एतदधिकरणोपोद्घातरणान्तरे "दध्ना जुहोति दध्नेन्द्रियकामस्येत्यधिकृत्य "पूर्वाधिकरणन्यायात् काम्यत्वेन स्थितं दधि। अनित्यार्थत्वादपादेयमतोऽन्यद्दधित्यभिधत्ताम्"। अन्यद्दध्यान्तरं पूर्वाधिकरणन्यायात् प्रागुक्तात् प्रपञ्चन्यायात्। माधवाचार्योऽपि "नित्येऽग्निहोत्रे पूर्वाधिकरणन्यायेन दधि न प्रयोक्तव्यं किन्तु अन्यदेव किञ्चित् द्रव्यम्" इत्याह। नह्वु नित्येऽपि खादिर एव श्रूयते अतो नित्य एकः खादिरः काम्यश्चान्यः खादिर इति यूपद्वयं विधीयते अन्यथा नित्ये खादिरत्वाभिधानं व्यर्थं स्यात् तथा च न विरोधः येनैकस्योभयार्थत्वे विरोधमाशङ्क्य वक्ष्यमाणमिति चेन्न खादिरेण वीर्यं कुर्यादित्यर्थकत्वपर्यवसन्नं खादिरत्वाभिधानं व्यर्थमिति तस्माद्भिन्ने खादिरोविधानात् काम्य एव खादिरः नित्यस्तु काष्ठान्तरीय इति प्राप्ते आह "एकस्य तूभयत्र संयोगपृथक्त्वम्" छ० संयोगः सम्बन्धः एकस्य खादिरस्य नित्यत्वकाम्यत्वोभयरूपत्वे संयोगस्य पशुबन्धत्वस्य पृथक्त्वं परस्परभिन्नेषु पृथगभिधानं नियामकमिति शेषः। अयमाशयः यदि द्वयोरेकस्य वाक्याङ्गता तदा द्वयोरेकवाक्यता इष्ट तु उभयमेव निराकाङ्क्षं तथा हि नित्यवाक्यं यूपस्य पशुबन्धसम्बन्धे अलौकिकमपि मानमेवते पशुबन्धदृष्टफलत्वात् काम्यवाक्यमनुपन्यस्याभिधानाच्च। काम्यवाक्यमपि आश्रयसम्बन्धकरं किमपि प्रमाणं नापेक्षते खदिरधानादेवाश्रयलाभे हि तथा स्यात् पृथक्पृथक् संयोगस्य निरपेक्षेण वाक्यद्वयेनाभिधानात् कामनायत्ते च खादिरं दृष्टफलद्वारा कृतोपकरिष्यति पुरुषस्य वीर्यमधास्यति। किन्त्वयं विशेषः कामनायत्ते तत्पुरुषकारेण पुरुषार्थेनाङ्गभावेन च कार्यं इति। तदुक्तम् "द्वयोरेकस्य वाक्याङ्गा भवेद् यदि तदोक्तितः। प्रकल्प्यैकवाक्यत्वं निराकाङ्क्षत्वहेतवे" तस्मादुभयार्थो खादिरेति। ननु नित्य एव खादिरोऽस्तु खादिरमिश्राटिनाऽङ्गस्य प्रशंसार्थं फलश्रुत्यर्थवादोऽस्तु यथा यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोतीत्यत्रेति किमेकस्योभयार्थत्वाङ्गीकारेणेति चेन्न तस्य जुहूप्राप्तावपि तद्विशेषादद्रव्यविशेषणाभावात् तत्परिचायकत्वेनैव स्तुत्यर्थवादौचित्यात् न चात्र तथा पूर्ववाक्यत एव खादिरत्वप्राप्तौ पुनः खादिरपदोपन्यासेनान्यस्य वीर्यसामर्थ्यकत्वबोधनेनैकप्रयोजनकत्वात्। एवं दध्ना जुहोति दध्नेन्द्रियकामस्य जुहूयादित्यादावपि उभयार्थता दध्नो बोध्या उभयत्र दध्नः कीर्त्तनात्"।

संयोगविरुद्ध न० संयोगेन विरुद्धम्। द्रव्यान्तरसंयोगेन विरुद्धगुणाश्रये द्रव्यभेदे तच्च राजवल्लभेन दर्शितं यथा "शाकास्तूपलपिण्याककृशरत्यक्तवर्षाभिः। करीरदधिशाल्यैश्च प्रायः शौर्यं विरुध्यते। प्राणहारी तु हारीतो हरिद्राखण्डैः स्मृतः। करीरैलालवैर्भृष्टं विषं मायूरमामिषम्। वराहवसया भृष्टा बलाका तु हरित्यसून्। संयुक्ता सैव वाराह्या कुलत्थाभैश्च विरुध्यते। अविं लवणभृष्टाकैः सत्स्यतैलैः कपिं त्यजेत्। मांसैरिभ्यवराहाणां काञ्जिकैस्तिलशाकुलीम्। कपोतः सार्षपे भृष्टो घृते मांसे दधाह्निकम्। विषं घृतसमं क्षौद्रं मधुना सममाश्वपि च। मूलकं नागरूपेण मधुना च न भक्षयेत्। एकत्र सर्वमांसानि विरुध्यन्ते परस्परम्। रात्रिप्रत्यूषयोर्मध्यदण्डार्धा विस्फोटिकोन्मादभगन्दरादयः। मूर्च्छामदाध्मानगरग्रहार्शांसि पाण्डुभस्माऽऽमविषस्य चैव। किलासकुष्ठग्रहणीगदानां शोथातिसारज्वरपीनसानाम्। अन्नानदोषस्य तथैव सृष्टोर्धिरुद्धस्य प्रवदन्ति हेतुम्। विरुद्धाहारजान् रोगान् विनिहन्ति विरेचनम्। वमनं शमने वापि पूर्वं वा हितसेवनम्"।

संयोजन न० सम्+युज-णिच्-आधारादौ ल्युट्। १मैत्रीकरणे हारा०। २सम्बन्धयोजने च। [स्त्रीत्वे कृतयोजने पदार्थे

संयोजित त्रि० सम्+युज-णिच्-क्त। कृतसंयोजने पदार्थे।

संरम्भ पु० सम्+रभ-घञ्-मुम् च। १कोपे शब्दर० २व्याटोपे त्रिका०। भवृत्साहे मेदि० ४क्रोधे च "उद्दधिर्संरम्भमयाश्रुवाहम्" इति कुमारः। [त्रिलिङ्गे च।

संराधन न० सम्+राध-ल्युट्। १सम्यक् सेवने २सम्यक्

संराव पु० सम्+रु-घञ्। शब्दे अमरः।

संरूढ त्रि० सम्+रुह-क्त । १प्ररोहे २जाताङ्कुरे च मेदि० ।

संरोध पु० सम्+रुध-घञ् । १रोधने २क्षेपे च मेदि० ।

संलग्न त्रि० सम्+लग-क्त । मिलिते ।

संलय पु० संलीयते इन्द्रियव्यापारोऽत्र सम्+ली-आधारे अच् । १निद्रायां हेमच० । भावे अच् । २प्रलये च ।

संलाप पु० सम्+लप-घञ् । १परस्परकथने अमरः । प्रीत्या अन्योन्याक्तिप्रत्युक्तिभ्यां २भाषणे १रहसि कथने च ।

संवत्सर पु० संवसन्ति ऋतवोऽत्र सम्+वस-सरन् । १वत्सरे ज्यातिषोक्ते इदादिषष्ट्यब्दात्मके २वत्सरभेदे च । इदावत्सरशब्दे ६२६पृ०दृश्यम् । [राज्यावधिके तत्प्रवर्त्तितवत्सरे ।

संवत् अव्य० सम्+वय-क्विप् यलोपे तुक् । विक्रमादित्य-

संवदन न० सम्+वद-ल्युट् । १आलोपने २वशीकरणे च मेदि० । सम्+वन-ल्युट् । संवननमत्रास्त्रम: ।

संवर न० सम्+वृ-करणे अप् । १जले । कर्त्तरि अच् । २दैत्यभेदे ३मतृल्लभेदे ४मृगभेदे च पुंस्त्री० ।

संवर्त्त पु० सम्यक् वर्त्त्यते परावर्त्त्यतेऽत्र सम्+वृत-णिच्-आधारे अच् । १प्रलयकाले अमरः । २ऋतिकारकमुनिभेदे ३कर्षफलवृक्षे मेदि० ४मेघे शब्दर० ५मेघनायकभेदे च । "त्रियुते प्राकवर्षे तु चतुर्भिः शेषिते क्रमात् । आवर्त्तः विद्धि संवर्त्तं पुष्करं द्रोणसम्बुटम् । आवर्त्तो निर्जलो मेघः संवर्त्तश्च बृहद्वकः । पुष्करो दुष्करजलो द्रोणः शस्यपूरकः" ज्यो०त० ।

संवर्त्तक न० सम्+वृत-णिच्-ण्वुल् । १बलदेवलाङ्गले २बाडवानले पु० हेमच० । ततः स्वार्थे अच् । ३बलदेवे शब्दर० । [विका० ।

संवर्त्तकिन् पु० संवर्त्तकं लाङ्गलमेदोऽस्त्यस्य इनि । बलरामे

संवर्त्तिका स्त्री सम्यक्वर्त्तिका सम्+वृत-ण्वुल् टापि अत इत्वं वा । १दीपादेः शिखायां २पद्मादेः केसरसमीपस्थे दले अमरः ३नवपत्रे मधुसूदनः ।

संवर्द्धक त्रि० सम्+वृध-णिच्-ण्वुल् । सम्यानकारिणि हेमच० २वृद्धिकारके च ।

संवलित त्रि० सम्+वल-क्त । मिलिते ।

संवसथ पु० संवसत्यस्मिन् सम्+वस-आधारे अथच् । ग्रामे जनसमूहनिवासस्थाने अमरः ।

संवह पु० सम्यक् वहति सम्+वह-अच् । सप्तवायुमध्यवर्त्तिनि वायुभेदे आवहशब्दे १६४पृ० दृश्यम् ।

संवाद पु० सम्+वद-घञ् । शिक्षाग्रन्थोक्ते वर्णोच्चारणार्थे गलबिलसंकोचात्मके वाह्यप्रयत्नभेदे २सङ्गीतघ्ने च ।

संवास पु० संवसत्यत्र सम्+वस-घञ् । १गृहे शब्दच० । पुरवासिनां पुराद्बहिर्वासयोग्ये अट्टादौ २स्थाने जटा० ।

संवाह पु० संवाहयति सम्+वह-णिच्-अच् । अङ्गसंमर्दके भृत्ये जटा० । ण्वुल् । संवाहक तत्रैव ।

संवाहन न० सम्+वह-णिच्-ल्युट् । १भारादेर्वाहने २अङ्गसंमर्दने च मेदि० । [प्राप्रा० भयादिना वा जातोत्कण्ठे ।

संविग्न त्रि० सम्+विज-क्त । १उद्विग्ने दृष्टवस्तुलाभाय तद्-

संवित्ति स्त्री सम्+विद-क्तिन् । १ज्ञाने शब्दमा० २प्रतिपत्तौ ३चेतनायां ४अङ्गीकारे ५बुद्धौ च मेदि० ।

संविद् स्त्री सम्+विद-सम्प० क्विप् । १ज्ञाने २प्रतिपत्तौ मेदि० । ३शपथायां ४बुद्धौ ५क्रियाकरणे ६युद्धे ७अङ्गीकारे च अमरः । ८नाम्नि ऋग्वेदे ९अङ्गुले १०तोषे ११समाधौ च शब्दच० ।

संविदा स्त्री संविद्यतेऽनया सम्+विद-क्विप् टाप् । अङ्गुल्यां (सिद्धि) "संविदासवयोर्भेद्ये संविदैव गरीयसी" तत्त्वम् ।

संविदित त्रि० सम्+विद-क्त । १अङ्गीकृते २सम्यग्ज्ञाते च ।

संविधातिक्रम पु० संविदोऽङ्गीकारस्य व्यतिक्रमो यत्र कृताङ्गीकारस्योल्लङ्घनहेतुके विवादभेदे वीरमित्रोदाहृतपद्यं यथा "तस्य स्वरूपं व्यतिरेकसख्येन दर्शयति नारदः "पाषण्डनैगमादीनां स्थितिः समय उच्यते । समयस्यानपाकर्म तद्विवादपदं स्मृतमिति" । पाषण्डाः वैदिकमार्गद्वेषिणः क्षपणकादयः । नैगमाः सार्थिका वणिज इति भटनरत्ने । नैगमाः वेदप्रामाण्याभ्युपगन्तारः पाशुपतादय इति मिताक्षरायाम् । आदिशब्देन विहङ्गब्रह्मसमूहादीनां ग्रहणम् । समयस्यानपाकर्म व्यतिक्रमः समयापरिपालनमिति यावत् तद्व्यतिक्रमस्यार्थं विवादपदमश्नुवतीत्यर्थः । तदुपयोग्यार्थमाह बृहस्पतिः "वेदविद्याविदो विप्राः तेषां वृत्तिं प्रकल्पयेत्" इति । याज्ञवल्क्योऽपि "राजा कृत्वा पुरे स्थानं ब्राह्मणं न्यस्य तत्र तु । वैविद्यं वृत्तिमद्द्यात् स्वधर्मः पाल्यतामिति" । ब्राह्मणानां समूहो ब्राह्मण्यम् । "ब्राह्मणमानवबाडवाद्यदिति" पा० स्वार्थे यत् । विद्या वेदाः तिसृणां विद्यानां समाहारस्त्रिविद्यम् । त्रिविद्यमधीते इति । तेषां वृत्तिं प्रकल्पयेदित्यस्यार्थं बृहस्पतिनैव विवृतः "अनाच्छेद्यकरालेभ्यः प्रदद्याद् वृत्तभूमिकाः । युक्तभाव्यस्य नृपतिर्लेखयित्वा स्वशासनम्" इति । अनाच्छेद्यकराः अपाहार्यकराः । एतदुक्तम्भवति । आगामिनृपतिभिरपाहार्य-

करास्तेभ्यो विसृष्टकराश्च घटभूमिकाः प्रदद्यादिति। एवं नियुक्तैर्वक्तव्यं तदाह याज्ञवल्क्यः "निजधर्माविरोधेन यस्तु सामयिको भवेत्। सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः" इति। निजधर्माविरोधेन श्रौतस्मार्त्तकर्माविरोधेन सामयिकः समयाच्चिष्पन्नो यो धर्मो गोप्रचारोदकरज्जुगडेश्वरघटहट्टपालनादिरूपः सोऽपि यत्नेन रक्षणीयः। यश्च राज्ञा कृतो निजधर्माविरोधेनैव यः ग्रामदेशको धर्मो यावत्पर्यायकस्याजनन्दियमजादरातिन मुञ्चते तुरगादयो न प्रस्थापनीया इत्येवंरूपः सोऽपि यत्नेन रक्षणीय इत्यर्थः। वृद्धस्मृतिरपि "नित्यं नैमित्तिकं काम्यं शान्तिकम्पौष्टिकन्तथा। पौराणां कर्म कुर्युस्ते तान्दन्द्वे निर्णयं तथेति"। पौराणां पुरवासिनामित्यर्थः। एवं राजनियुक्तसमुदायविशेषस्य कार्यविशेष उक्तः। सर्वसमुदायानाञ्च कार्यमाह स एव "ग्रामसंघिभगणानाञ्च समूहैः समयक्रिया। बाधाकाले तु या कार्या धर्मकार्य्ये तथैव च। चाटचौरभये बाधाः सर्वसाधारणाः स्मृताः। तत्रोपशमनं कार्यं सर्वैश्चैकैक मेवचिट्टिति"। गणानाञ्चेत्यत्र चशब्दः पाषण्डनैगमादीनां समुच्चयार्थः। ततश्च गणपाषण्डनैगमादीनां समयकरणमन्तरेण यदुपद्रवो दुःपरिहरः धर्मकार्य्यं च दुःसाध्यन्तद्वा पारिभाषिको समयक्रियां सर्वे संभूयैतः कार्य्या। चाटोष्टकः। चाटचौरादिभ्यो भये प्राप्ते तदुपशमनं सर्वैः कार्य्यमित्यर्थः। धर्मकार्य्यमपि समूह्य कार्य्यमित्युक्तं तेनैव "सभाप्रपादेवगृहतटाकारामसंस्कृतिः। तथाऽनाथदरिद्राणां संस्कारो यजनक्रिया। कुलायननिरोधश्च कार्यस्माभिरंशतः। यत्रैतल्लिखितं पत्रे धर्म्या सा समयक्रिया। पालनीयाः समस्तैस्तैर्यः समर्थो विसंवदेत्। सर्वस्वहरणं दण्डस्तस्य निर्वासनं पुरादिति"। सभा मण्डपः। प्रपा पानीयशालिका। आरामः उपवनम्। संस्कृतिः जीर्णोद्धारः। संस्कार उपनयनादिकः प्रेतदहनादिकश्च। यजनक्रिया सोमयागादिकर्त्तृभ्यो दानम्। कुलायननिरोधः। कुलायनस्य दुर्भिक्षाद्युपशमपर्यन्तस्य धारणम्। कुल्यायननिरोधश्चेति कल्पतरौ पाठः। कुल्यायननिरोधः कुल्यायाः प्रवर्त्तनप्रतिबन्धश्च। एवं कृता समयक्रिया न केवलं समुदायिभिरेव पालनीया कपि तु राज्ञापि इत्याह नारदः "पाषण्डनैगमश्रेणिपूगव्रातगणादिषु। संरक्षेत् समयं राजा दुर्गे जनपदे तथेति"। पाषण्डा वेदोक्तविहितधारणव्यतिरिक्ताः सर्वे निह्नवः। तेषु विहितभिक्षाचरणाद्याः सन्ति। नैगमाः सार्थिका वणिक्प्रस्तयः। तेषु सकृच्छ्रुकसन्देशहरपुरुषतिरस्कारिणो दण्ड्या इत्येवमादयोवहवः समया विद्यन्ते। अथ वा नैगमाः आम्नायप्रणेतृत्वेन ये वेदप्रामाण्यमिच्छन्ति पाशुपतादयः। श्रेणयः एकशिल्पोपजीविनः। तासामेतदनन्यथैव श्रेण्या विक्रेयमित्येवमादिकाः समया वरीवर्त्तन्ते। पूगा हस्त्यश्वारोहादयः। व्रातगणशब्दयोरर्थमाह कात्यायनः "नानायुधधरा व्राताः समवेतास्तु कीर्त्तिताः। कुलानां हि समूहस्तु गणः सम्यक्कीर्त्तितः" इति। पूगे व्राते वास्त्रमुत्सृज्य समरे न गन्तव्यमित्येवमादयः समया वर्त्तन्ते। गणे तु पञ्चमे दिने पञ्चमे वर्षे वा कर्णवेधः कर्त्तव्य इत्येवमादि समयः समस्ति। गणादीत्यत्रादिशब्देन ब्रह्मपुरीनिविष्टस्य महाजनादेः परिग्रहः। तत्र गुरुदक्षिणाद्यर्थमागता माननीय इत्यादिः समयोऽस्ति। दुर्गे तु धान्यादिकं गृहीत्वा कुत्रचिन्न तद्विक्रेयमित्यादिरस्ति समयः। जनपदे तु क्वचिद्विक्रेयमक्वचिन्नेत्यादिनेकविधः समयो वरीवर्त्तते। तदेवं समयजातं यथा न स्वव्रजति तथा राजा कुर्य्यादित्यर्थः। समूहादिपुरुषविषये विशेषमाह वृद्धस्मृतिः "कोशेन लेख्यक्रियया मध्यस्थैर्वा परस्परम्। विश्वासं कृत्वा यः कुर्युः कार्याणि समनन्तरम्" इति। कोशेन देवताकोशोद्धरणेन। लेख्यक्रियया समयपत्रेण। मध्यस्थैः प्रतिभूभिः कार्याणि समूहकार्याणि। एतदुक्तं भवति। समुदायिभिः परस्परं समयातिक्रमाभावाय कोशादिभिर्विश्वासमुत्पाद्य सामयिककार्याणि कर्त्तव्यानीति। कात्यायनोऽपि "समूहानां तु यो धर्मस्तेन धर्मेण ते सदा। प्रकुर्युः सर्वकार्याणि सधर्मेषु व्यवस्थिताः" इति। सामयिकधर्मनिजधर्मानतिक्रमेण सर्वकार्याणि समुदायिनः कुर्युरित्यर्थः। याज्ञवल्क्योऽपि "निजधर्माविरोधेन यस्तु सामयिको भवेत्। सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः" इति। निजधर्माविरोधेनेत्यनेन निजधर्माविरोधी सामयिको धर्मो यथा सन्ध्यावन्दनवेलायां सर्वैरेव स्वव्यापारपरिहारेण राजभवनं प्रत्यागन्तव्यं यो नायास्यति प्रथमसाहसं दण्ड्यः इति नासौ रक्ष्य इत्यर्थोऽवगम्यः। कात्यायनोऽपि "व्यतिरोधेन धर्मस्य निर्जितं राजशासनम्। तदेवाचरणं पुंसां कर्त्तव्यन्तु न पालयेत्"। धर्मस्य नीतस्यानीति

धर्मश्च लिखितं श्रुतमित्यर्थः "राज्ञा प्रवर्त्तितान् धर्मान् यो नरो नानुपालयेत् । गर्ह्यः स यामी दण्ड्यश्च लोपयन् राजशासनम्" इति । विंशतिबुद्धिभिः षड्भिर्वा त्रिभिरेकैरेकमन्त्रेण कार्य्यकरणासम्भवात् द्वित्राः षड् वा कार्य्यचिन्तकाः कर्त्तव्या इत्याह बृहस्पतिः "द्वौ त्रयः षड् वा कार्य्याः समूहचिन्तवादिनः । कर्त्तव्यं वचनन्तेषां यावत्सैन्यनिवर्त्तनादिति" । कार्य्यचिन्तकेषु हेयोपादेयान्दर्शयति स एव "विद्वेषिणो व्यसनिनः बालीनालसभीरवः । लुब्धातिवृद्धबालाश्च न कार्य्याः कार्य्यचिन्तकाः । शुचयो वेदधर्मज्ञाः दृष्टा दानाः कुलोद्भवाः । सर्वकार्य्यप्रवीणाश्च कर्त्तव्याश्च महत्तमाः" इति । बालीनाः अदृष्टाः कार्य्यचिन्तकाः स उदायकार्य्यसाधकविचारकाः । कार्य्यचिन्तकानामपि समूहचिन्तवादिनां वचनं सर्वैः समूहिभिः कार्य्यमित्याह याज्ञवल्क्यः "कर्त्तव्यं वचनं सर्वैः समूहचिन्तवादिनाम्" इति । समूहप्रतिकूलञ्च प्रबलसाहसं दण्ड्य इत्याह स एव "यत्तत्र विपरीतः स्यात् स दाप्यः प्रथमं दमम्" इति । प्रथमं पूर्वसाहसम् । कात्यायनोऽपि "युक्तियुक्तं वचो ह्यत्र वक्तुर्योऽनवकाशतः । अयुक्तञ्चैव यो ब्रूयात् स दाप्यः पूर्वसाहसम्" इति । बृहस्पतिरपि "अस्तु साधारणं चिह्नात् क्षिप्रमेवविधस्य वा । यच्चिक्रियां विदध्याच्च स निवार्य्यक्षतः पुरात्" इति । साधारणञ्च समुदायव्याप्तं दण्डादि द्रव्यम् । चिह्नात् । दण्डादेः साहाय्यकरणाल्लाभयेत् क्षिपेत् वा तिरस्कुर्य्यादित्यर्थः । समूहनाशमधर्मेण हेत्वादिना कार्य्यकरणे दण्डमाह स एव "बाधां कुर्य्युर्य एकस्य सम्भूता हेतवस्त्रयः । राज्ञा तु विनिवार्य्यास्ते शास्त्रा सैवानवस्थतः" इति । अनवस्थतः विप्रकृतारतम्यानुसारेण । सुख्यानामपराधविशेषे दण्डविशेषाच्च याज्ञवल्क्यः "गणद्रव्यं हरेद्यस्तु न विद्यं भक्षयेच्च यः । सर्वस्वहरणं कृत्वा तं राष्ट्रादिप्रवासयेत्" इति । सुख्य दण्डने समूहस्यैवाधिकारः । अतएव कात्यायनः "चाटश्चौरो भेदकारी च गणद्रव्यविनाशकः । सर्वस्वहरणं कृत्वा सर्व एवैते विवासार्य्यश्च कृत्स्नमुदरिति" । स्वे विवासार्य्य मनोच्छेद्या इत्यर्थः । समूहानाञ्चौ नष्ट दण्डो राज्ञा विधेयः । अतएव मनुः "यो यावत्येयवहारान् कृत्वा कुर्य्येन संविदम् । विंशतेरेकसोमान्तं स दाप्यो विंशतीर्गुणान् । चतुःसुवर्णान् षण्निष्कान्शतमानञ्च राजतम् । एवं दण्डविधिं कुर्य्यात्कार्य्यकृदृषिवोपतिः । आमजातिसमूहेषु समयस्यानिचारिणाम्" इति । एतेषां प्रवासनचतुःसुवर्णषण्निष्कशतमानरूपाणाञ्चतुर्णां दण्डानामवस्थाविद्यागुणाद्यपेक्षया व्यवस्था कल्पनीया । यत्तु कश्चिदेतेषामप्यूर्णां दण्डानां क्रमेण ब्राह्मणादिचतुर्वर्णविषयत्वमित्याह तदज्ञानविजृम्भितम् । एतादृशव्यवस्थायां प्रमाणाभावात् । ब्राह्मणस्य प्रवासनं क्षत्रियादीनाञ्च द्विःसुवर्णादि दण्ड इत्यस्यानुचितत्वाच्च । मर्म्मोद्घाटकादीनां पुराच्चिरवासनमेव दण्ड इत्याह बृहस्पतिः "अरुन्तुदः सूचकश्च भेदज्ञश्चापदो तथा । श्रेणिपूगव्रतस्थैः क्षिप्रं निर्वास्यते ततः" इति । अरुन्तुदः मर्म्मोद्घाटकः । सूचकः पिशुनः । पिशुनौ खलसूचकावित्यभिधानात् । भेदज्ञः समुदायेषु वैमत्यज्ञः । समूहस्यानिष्टमिच्छति समूहेनेति शेषः । न च समूहस्य दण्डकरणेऽनधिकारात् समूहेनेति शेषकरणमयुक्तमिति वक्तव्यम् । पूर्वोक्तकात्यायनवचनेन समूहस्यैव सुख्यदण्डनेऽधिकारस्य प्रतिपादितत्वात् "पूगस्त्रैगण्याध्यक्षाः पुरदुर्गनिवासिनः । वाग्दण्डपरिहाणं प्रकुर्युः पापकारिणम् । तैः कृतं यत् सधर्मेण निग्रहानुग्रहं नृणाम् । तद्राज्ञा मनुतन्त्रं निसृष्टार्थो हि ते मताः" इति बृहस्पतिनाप्यभिधानाच्च । वाग्दण्डः पापिष्ठोऽसीत्यादि भाषणम् । धिग्दण्डोधिक्त्वामिति भाषणम् । परिहाणोऽस्त्यवहार्य्यत्वं करणं निर्वासनं वा । उभयत्रापि लोके परित्यागशब्दप्रयोगदर्शनात् । एतच्चार्थदण्डादेरुपलक्षणार्थम् । नियतानुग्रहमित्यनेन पुनःसाख्येनाभिधानात् निसृष्टार्थो व्याख्यातकार्य्यः । नारदोऽपि "पृथग्गणांस्तु ये भिन्द्युः को विनेया विशेषतः । आवहेयुर्भयं घोरं व्याधिवत्तेऽप्युपेक्षिता" इति । गणान् श्रेण्यादिरूपान् । बृहस्पतिरपि "तत्र भेदमुपेक्षां वा यः कश्चित् कुरुते नरः । चतुःसुवर्णं षण्निष्कांश्चक्ष दण्डो विधीयते" इति । सुवर्णचतुष्टयषण्निष्कयोः प्रकृत्यादितारतम्यानुसारेण गुणवद्गुणवद्विषयत्वेन वा व्यवस्था मन्तव्या । पापकृत्यादिसर्वसमूहेषु राज्ञा यथा यथिनाव्यन्तदण्डः नारदः "यो धर्मः कर्म यच्चैवःसुपकार्य्यकेषिच यः । यच्चैषां प्रत्युपादानमनुमन्येत तच्चेति" । धर्मः सत्यवदनादेः । कर्म प्रातःपर्युत्थितभिक्षाटनादिः । उपकरणविधिः समूहकार्य्यार्थं बृहस्पतिनिगदितकर्म यच्च

पादो मेलनम् । प्रत्युपादानञ्जीवनाय तापसवेषपरिग्रहः । एषां पाषण्डिनामित्यर्थः । अन्यदपि राजकृत्यमाह स एव "प्रतिकूलञ्च यद्राज्ञः प्रकृत्या च मतञ्च यत् । बाधकञ्च यदर्थानां तत्तेभ्योऽपि निवर्त्तयेत्" इति । यद्राज्ञः प्रतिकूलम् "यथा यस्य राज्ञस्तु कुरुते मूढ़ोधर्म विवेचनम् । तस्य प्रक्षुभ्यते राष्ट्रं बलं कोशश्च नश्यति" इति । एवञ्च सार्थिकादिमूढ़विवादे धर्मविवेचनं च यद्राज्ञ इत्युदाहरणमन्वेयम् । प्रकृत्या स्वभावत एव मतम् अवस्थानार्थं पाषण्डादिषु ताम्बूलभक्षणादिकम् । यच्चार्थानां बाधकम्जननाशकचौरादिसबाधादिकं तत्तेभ्योऽपि निवर्त्तयेत् । यथा ते न कुर्वन्ति तथा कुर्य्यादित्यर्थः । अन्यदपि निवर्त्त्यमाह स एव "दोषवत्करणं यत्स्यादनाम्नायप्रकल्पितम् । प्रकृत्तमपि तद्राजा श्रेयस्कामो निवर्त्तयेत्" । लोभादिदोषवत्करणं स्मृतिश्रुतिविरुद्धं विधवादौ वेश्यात्वादिकं पाषण्डादिभिः प्रकल्पितम् । तदुक्तकालप्रवृत्तमपि राज्ञा निवर्त्तनीयमित्यर्थः । त्रैविद्यानां प्रतिपादितं धर्मं श्रेयस्कामो दिवतिदिशति याज्ञवल्क्यः "श्रेणिनैगमपाषण्डिगणानामप्ययं विधिः । भेदञ्चैषां नृपोरक्षेत् पूर्ववृत्तिं च पालयेत्" इति । समूहकार्यार्थभागताय यद्राज्ञा समूह पूजार्थं दत्तन्दुर्यदि समूहायासौ न ददाति तदा तद्दत्तं एकादशगुणं दाप्य इत्याह स एव "समूहकार्य्यं आयातान् सत्कार्यान् विसर्जयेत् । सदानमानसत्कारैः पूजयित्वा महीपतिः । समूहकार्य्यं प्रहिता यत्प्रभेत तदर्पयेत् । एकादशगुणं दाप्यो यदासौ नार्पयेत् स्वयम्" । इति । यत्प्रभेत समूहसम्माननार्थमिति शेषः । यतो राज्ञदत्तं सर्वसाधारणमतो यथांशतो विभागं कृत्वा पाद्यं निबन्धादिभ्यो वा दातव्यमित्याह बृहस्पतिः "ततो लभ्येत यत्किञ्चित् सर्वेषामेव तत्समम् । षण्मासिकं मासिकं वा विभक्तव्यं यथांशतः । देयं वा निःसृष्टब्राह्मस्वीबालातुररोगिषु । सान्तानिकादिषु तथा धर्म एव सतातनः" इति । एकस्य पुरुषस्य षण्मासनिर्वाहाय पर्य्याप्तं कुटुम्बस्य वैकस्य षण्मासनिर्वाहाय पर्य्याप्तं, लब्धं वा यथांशतः स्वस्वांशानुरूपेण विभजनीयमित्यादिभ्यो वा देयमिति तात्पर्यार्थः राजप्रसादलब्धस्यापि सर्वेषां समम्मित्याह स एव "यत्तैः प्राप्तं रक्षितं वा गणार्थं वा कृतं कृतम् । राजप्रसादलब्धञ्च सर्वेषामेव तत्समम्" इति । अयमर्थः । तैः समूहकार्य्यार्थं प्रहितैर्यल्लोभाविवादावधिं क्षेत्रारामादिकं धर्माधिकरणे न्यायतः प्राप्तम् । यच्च परैरपह्नियमाणं रक्षितं यच्च समूहप्रयोजनार्थमुपात्तद्रव्यम्, यच्च राजप्रसादलब्धं तत् सर्वं सर्वेषां समुदायिनां सममिति । गणकृतस्तूणं सर्वेषां समम्मित्यस्य क्वचिदपवादमाह कात्यायनः "गणसृष्टिश्च यत्किञ्चित् कृत्यं भक्तिं भवेत् । आत्मार्थं विनियुक्तं वा देयं तैरेव तद्भवेत्" इति । तैः सृष्टैः । ये तु समुदायानुपकृत्तदभावं प्राप्ताः ये च समुदायत्यागादिना ततो बहिर्भूतास्तान् प्रत्याह स एव "गणानां श्रेणिवर्गाणां गताः सृष्टेऽपि मध्यताम् । प्राक्तस्य धनस्यैव समाप्ताः सर्व एवेति । तथैव भोक्ष्यतेऽभक्ष्यदानधर्मक्रियाश्च । समूहस्योऽशभागी स्यात् प्रागगतस्त्वंशमाहुनत्विति" । [श्रेयनायाञ्च ।

संविधान न० सम्+वि+धा-ल्युट् । १उपाये २आयोजने

संविषा स्त्री संमर्दितं विषं यया प्रा०ब० आतश्च उत्तरपदलोपः । अतिविषायाम् (आतइच्) शब्दच० ।

संवीक्षण न०सम्यग्वीक्ष्यते अन्विष्यते वा सम्+वि+ईक्ष-भावे ल्युट् । १सम्यग्दर्शने २इष्टवस्त्वनोलाभाय अन्वेषणे च ।

संवीत त्रि० सम्+व्येञ्-क्त । १आवृते २रुद्धे च अमरः । सम्+वि+इण-क्त । ३सङ्गते । [वर्णोच्चारणाभ्यन्तयत्ने च

संवृत त्रि० सम्+वृ-क्त । १आवृते २कृतगोपने ३संवात्तरूपे

संवेग पु० सम्+विज-घञ् । १भयादिना त्वरायाम् अमरः २सम्यग् वेगे च । [युच् । संवेदनार्थत्व स्त्री ।

संवेद पुं सम्+विद-घञ् । ज्ञाने अमरः । स्वार्थे णिच-

संवेश पु० सम्यक् विशत्यत्र सम्+विश-आधारे घञ् । १निद्रायाम् अमरः । संपूर्वकस्य तस्य निद्रार्थकत्वात्तथात्वम् । यथा "संविष्टः कुशशयने निशां निनायेति" रघुः । २पीठे हेमच० स्त्रीरतिबन्धभेदे मेदि० ।

संवेशन न० सम्+विश-णिच्-ल्युट् । रतिक्रियायां हेमच० तदुत्तरं हि निद्राधिक्येन तस्या निद्राहेतुत्वात्तथात्वम् ।

संव्यान न० संवीयते सम्+व्येञ्-कर्मणि ल्युट् । १उत्तरीयवस्त्रे अमरः । २वस्त्रमात्रे मेदि० ।

संग्रहक पु० सम्यक् ग्रहमङ्गीकारो यस्य कप् । प्रतिज्ञाय संग्रामादनिवर्त्तिनि सैन्ये नारायणीये सैन्यभेदे च तेषां प्रतिज्ञा यथा "ब्राह्मणांस्तर्पयित्वा च निष्क्रन्दन्त्वा पृथक् पृथक् । गाश्च वासांसि च पुनः समाभाष्य परस्परम् । प्रज्वाल्य कृष्णवर्त्मानमुपगम्य रणे व्रतम् । तस्थिवांसो तदा चक्रुः प्रतिज्ञां दृढ़निश्चयाः ।

हत्वतां सर्वभूतानामुच्चैर्वाचोवभाषिरे। ते च धनञ्जयवधे प्रतिज्ञामपि चक्रिरे। ये वै लोकास्वान्तिनां ये च वै ब्रह्मघातिनाम्। मद्यपस्य च लोका ये गुरुदारस्य च। ब्रह्मस्वहारिणश्चैव राजपिण्डापहारिणः। शरणागतं वा त्यजतो याचमानं तथा भृतः। व्यगारदाहिनाञ्चैव ये च गां निघ्नतामपि। अपकारिणाञ्च ये लोका ये च ब्रह्म दधामपि। स्वभार्यार्थेऽहतकालेषु यो मोहान्नाभिगच्छति। आत्मैमैथुनिकानाञ्च ये चाप्यात्मापकारिणाम्। न्यासापहारिणां ये च श्रुतं नाशयतामपि ये। क्लीवेन युध्यमानानां ये च दीनानुसारिणाम्। नास्तिकानाञ्च ये लोका येऽग्निमातृपरित्यजाम्। तानाप्नुयामहे लोकान् ये च पापकृतामपि। यद्यहत्वा वयं सर्वं निवर्त्तेम धनञ्जयम्। तेन चाभ्यर्दितास्तात्मानुज्ञे मह्यि पराङ्मुखाः। यदि त्वसुकरं लोके कर्म कुर्याम संयुगे। इष्टान् लोकान् प्राप्नुयाम वयमद्य न संशयः। एवमुक्त्वा ततो राजंस्ते ऽभ्यवर्त्तन्त संयुगे। य ह्यवन्तोऽर्जुनं वीराः पितृजुष्टां दिशं प्रति" भा०द्रो० १७अ०।

संशय पु० सम्+शी-अच्। सन्देहे एकस्मिन् धर्मिणि भावाभावयोः, विरुद्धधर्मद्वयस्य वा सन्देहे। यथा पर्वतो वह्निमान् वा, अयं स्थाणुर्वा पुरुषोवेति। "स संशयो भवेद्या धीरेकत्राभावभावयोः। साधारणादिधर्मस्य ज्ञानं संशयकारणम्" भाषा० "एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशयः इत्यर्थः। साधारणेति। उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम्। यथा उच्चैस्त्वं स्थाणुत्वसाधारणं ज्ञात्वा अयं स्थाणुर्न वेति सन्दिग्धे। एवम् असाधारणज्ञानं तत्कारणम्। यथा शब्दत्वं नित्यानित्यव्यावृत्तं शब्दे दृष्ट्वा शब्दो नित्यो न वेति सन्दिग्धे। विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकारणम्। शब्दव्यग्रज्ञानाद्दोनाम् निश्चयमात्रजनकत्वस्वाभाव्यात्। किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते। संशयस्तु तत्र मानस एवेति। एवं ज्ञाने प्रामाण्यसंशयाद् विषयसंशय इति। एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिक बोध्यम्। किन्तु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति" शि०मु०। "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः" न्यायसू० "समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति स्थाणुपुरुषयोः समानं धर्ममारोहपरिणाहौ पश्यन् पूर्वदृष्टञ्च तयोर्विशेषं बुभुत्समानः किंस्विदित्यन्यतरज्ञावधारयति यदनवधारयति तदनवधारणं ज्ञानं संशयः समानयोर्धर्मयोरुपलभे विशेषमन्यतरस्य नोपलभे इत्येषा बुद्धिरपेक्षा संशयस्य प्रवृत्तिका वर्त्तते. तेन विशेषापेक्षो विमर्शः संशयः। अनेकधर्मोपपत्तेरिति समानजातीयासमानजातीयेभ्यो व्यावृत्तेरनेकं तस्यानेकस्य धर्मोपपत्तेर्विशेषस्योभयथा दृष्टत्वात् समानजातीयेभ्योऽसमानजातीयेभ्यश्चार्थाद् विशेष्यन्ते। गन्धवत्त्वात् पृथिवी जलादिभ्यो विशेष्यते गुणकर्मभ्यश्च, अस्ति च शब्दे विभागजत्वं विशेषः, तस्मिन् द्रव्यं गुणः कर्म वेति सन्देहः विशेषस्योभयथा दृष्टत्वात् किं द्रव्यस्य सतो गुणकर्मभ्यो विशेष आहोस्विद्गुणस्य सत इति अथ कर्मणः सत इति विशेषापेक्षा अन्यतरस्य व्यवस्थापकं धर्मज्ञोपलभे इति बुद्धिरिति। विप्रतिपत्तेरिति व्याहतैकार्थदर्शनं विप्रतिपत्तिः व्याघातो विरोधोऽसद्भाव इति। आत्मास्तीत्येकं दर्शनम् नास्त्यात्मेत्यपरम्, न च सद्भावाभावौ सहैकत्र सम्भवतः, न चान्यतरसाधको हेतुरुपलभ्यते तत्र तत्त्वानवधारणं संशय इति। उपलब्ध्यव्यवस्थातः स्वल्पेऽपि सच्चोदकमुपलभ्यते तडागादिषु मरीचिषु वाऽविद्यमानमुदकमिति ततः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यते अथवाऽसदिति संशयो भवति। अनुपलब्ध्यव्यवस्थातः सच्च नोपलभ्यते मूलकीलकोदकादि, असच्चात्यन्तं विरुद्धं वा, ततः क्वचिदनुपलभ्यमाने संशयः किं सच्चोपलभ्यते उतासदिति संशयो भवति विशेषापेक्षो पूर्ववत्, पूर्वः समानोऽनेकश्च धर्मो ज्ञेयः, उपलब्ध्यनुपलब्धी पुनर्ज्ञातस्ये, एतावता विशेषेण पुनर्वचनम्, समानधर्माधिगमात् समानधर्मोपपत्तेर्विशेषस्मृत्यपेक्षो विमर्श इति, स्थानवतो लक्षणवचनमिति समानमन्यत्र भा०। "संशय इति लक्ष्यनिर्देशः विमर्श इत्यत्र विशब्दो विरोधार्थः मर्शिज्ञानार्थः एकस्मिन् धर्मिणीति पूरणीयं तेन एकधर्मिणि विरोधेन भावाभावप्रकारकं ज्ञानं संशयः तत्र कारणमुखेन विशेषलक्षणान्याह समानेत्यादि उपपत्तिज्ञानं तथा च समानस्य विरुद्धकोटिद्वयसाधारणधर्मस्य ज्ञानादित्यर्थः। अनेकधर्मः असाधारणधर्मः तज्ज्ञानादित्यर्थः। तथा च साधारणधर्मवत्त्वनिश्चयजन्योऽसाधारणधर्मवत्त्वनिश्चयजन्य इत्यर्थः, विप्रतिपत्तिर्विरुद्धकोटिद्वयोपस्थापकः शब्दस्पर्शादित्यर्थः यद्यपि शब्दस्य न संशयजनकत्वं तथापि

श्यज्ञात्कोटिद्वयोपस्थितौ मानसः संशय इति वदन्ति। उपलब्धेर्ज्ञानस्य अनुपलब्धेर्व्यतिरेकज्ञानस्य याऽव्यवस्था अविषयकत्वानिश्चयः प्रामाण्यसंशय इति फलितोऽर्थः, अन्ये तु उपलब्ध्यव्यवस्था प्रामाण्यसंशयः अनुपलब्धिर्विरोधिभ्रमः तदव्यवस्था ततः संशय इत्याहुः। वस्तुतस्तु प्रामाण्यसंशयस्य न संशयहेतुत्वं किं त्वदृहीतापामाण्यकज्ञानस्य विरोधितया सति प्रामाण्यसंशये तज्ज्ञानस्याविरोधितया साधारणधर्मदर्शनादित एव संशयोत्पत्तिरिति। उपलब्धीत्यादिकं तादृशस्थले संशयो न भवतीत्येतावन्मात्रपरं चकारो व्याप्यसंशयस्य व्यापकसंशयहेतुत्वं समुच्चिनोतीति वदन्ति. विशेषापेक्षः कोटिस्मरणसापेक्षः। वस्तुतस्तु संशयधारावाहिकत्वं स्वादत आह विशेषेति विशेषं विशेषदर्शनम् अपेक्षते निवर्त्तकत्वेन तथा च विशेषदर्शननिवर्त्यत्वकथनमुखेन विशेषादर्शजन्यसंशय इत्युक्तम्" वृत्तिः। स च संशयो द्विविधः यथोक्तम् "द्विविधः संशया बहिर्विषयकोऽन्तर्विषयकश्च बहिर्विषयकोऽपि दृश्यमानधर्मिकोऽदृश्यमानधर्मिकश्च तत्र दृश्यमानधर्मिको यथा ऊर्द्ध्वत्वविशिष्टस्य धर्मिणो दर्शनात् अयं स्थाणुः पुरुषो वेति। अदृश्यमानधर्मिको यथा अरण्ये भीताद्यान्वितेः गोगवयादिविषाणमात्रदर्शनात् अयं गौर्गवया वेति। वस्तुतस्तत्रापि विषाणधर्मिक एव सन्देहो विषाणमिदं गोसम्बन्धि गवयसम्बन्धि वेति विशेषज्ञानाभावादुद्देश्याभिधानम्। यत् सामान्यं संशयहेतुस्तदनेकत्र दृष्टं संशायकम् एकत्र धर्मिणि वा दृष्टं संशयहेतुरित्यत्र प्रयत्नं विधत्ते" उप० वृत्तिः। "इदन्तु बोध्यं संशयस्य प्रत्यक्षरूपः सन्निकर्षजन्यत्वात् अतएवोक्तं "परोक्षज्ञानमनाहार्यं निश्चयश्चेति विज्ञानात्" इति। संशये च उभयप्रकारतानिरूपिता विशेषवृत्ता एकैव। सप्तभङ्गयां तु विशेषवृत्ताद्वयमिति" तदाशयः।

संशयसम पु० जात्युत्तरभेदे "सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः" न्यायसू०। "अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात् घटवदित्युक्ते हेतौ संशयेन प्रत्यवतिष्ठते सति प्रयत्नानन्तरीयकत्वे च्येवाय नित्येन सामान्येन साधर्म्यमैन्द्रियकत्वमस्ति च अदृष्टेनानित्येन। यतो नित्यानित्यसाधर्म्यादनिवृत्तः संशय इति" वा०भा०।

संशयस्थ त्रि० संशये तिष्ठति स्था-क। संशययुक्ते।

संशयात्मन् पु० संशय आत्मनि यस्य। सन्दिग्धान्तःकरणे "संशयात्मा विनश्यतीति" "संशयात्मा निबध्यते"।

संशयालु त्रि०संशय+अस्त्यर्थे आलुच्। संशययुक्ते हेमच०

संशयित त्रि० सम्+शी-तृच्। संशयकर्त्तरि हेमच०।

संशरण न० संशीर्य्यतेऽनेन सम्+शृ-करणे ल्युट्। रणास्त्रे शब्दमा०। [यत्ते २तहांत त्रि० सि०कौ०।

संशित त्रि०सम+शो-क्त ह्रस्वम्। १सम्यादितव्रतांविशयक-

संशितव्रत त्रि० संशितं सम्यक् सम्पादितं व्रतमनेन। सम्यक्सम्पादितव्रत। [आर्जने च रत्नमा०।

संशुद्धि स्त्री सम+शुध-क्तिन्। १सम्यक्शोधने २देहादि-

संश्लिष्ट त्रि० सम+श्लिष-क्त। १आलिङ्गिते २सम्बद्धे च।

संश्लेष पु० सम्+श्लिष-घञ्। १आलिङ्गने अमरः २सम्बन्धमात्रे च।

संसक्त त्रि० सम्+सञ्ज-क्त। १मिलिते २संबद्धे ३व्यवहिते अमरः ४समन्ताद्विलग्ने च "पात्रेषु संसक्तमेरुशाखमिति" कुमारः। [सभायां अमरः।

संसद् स्त्री सं सीदत्यस्याम् सम्+सद-सम्प० आधारे क्विप्।

संसरण न० सम+सृ-ल्युट्। स्वाभाविकदेहस्वीकाररूपे १संसारे २सम्बाधसेवागमने ३वनद्वारपथे अमरः। ४रणास्त्रे मेदि०। ५सङ्गतौ शब्दर०।

संसर्ग पु० सम+सृज-घञ्। १सम्बन्धे विभागानन्तरं "यत्तयोर्धनं तन्ममेति" कृतसमयेन एकत्रावस्थानरूपे २धनसम्बन्धे च याज्ञिकसंसर्गस्य पापभेदे कालभेदेन प्रतित्यादिजनकत्वं प्र०वि० दर्शितं यथा

"तत्र प्रातकिसंसर्गस्य पापहेतुत्वमाह मनुः "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुः संसर्गोऽपि तैः सह" इति। ननु तैः सहेति निर्देशात् महापातकिसंसर्गस्यैव पापहेतुत्वं लभ्यते न तु पातकान्तरसंसर्गस्य प्रायश्चित्तमपि महापातकिसंसर्ग एव मनुना दर्शितं यथा मनुः "एषां पापकृतामुक्ता जघन्यानामपि निष्कृतिः। पतितैः सम्प्रयुक्तानामिमाः शृणुत निष्कृतीः। यो येन पतितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात् तत्संसर्गविशुद्धये" इति

अत्र चतुर्णामित्यनेन ब्रह्महत्यादिमहापातकचतुष्टय-संपर्कं कृत्वा यो येन पतितेनेत्युक्तं महापातकपरमेव। उच्यते "प्रायश्चित्तीयतां प्राप्य दैवात् पूर्वकृतेन वा। न संसर्गं व्रजेत् सद्भिः प्रायश्चित्तेऽकृते द्विजः। एतैर्विमरनिर्णिक्तैर्नार्थं किञ्चित् समाचरेत्। कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचित्" इति मनुना सामान्यतः पापिष्ठसंसर्गस्य निषिद्धत्वात् निषिद्धाचरणात् पापोत्पत्तेः पापिष्ठसंसर्गे एव दर्शिता प्रायश्चित्तमपि सामान्येन दर्शितम् "यो येन पतितेनैषां संसर्गम्" इति निर्देशात् चतुर्णामिति हिंसाऽभक्ष्यभक्षणाऽगम्यागमनादीनामेव अनुना पूर्वसूक्तत्वात् अपि च संसर्गपापश्रुत्या श्रुतिः कल्प्यमाना पापिष्ठसंसर्गी पापी भवतीति सामान्यश्रुतेरेव कल्पनीया लाघवात्। होलाकाधिकरणन्याय एवात्र लागर्त्ति। विष्णुनापि सामान्येनैव सूत्रितं "यश्च येन पापात्मना सह संसृजेत् स तस्यैव प्रायश्चित्तं कुर्यात्"। गौतमोऽप्याह "ब्रह्महरापगुरुतल्पगमातृपितृयोनिसम्बन्धगस्तेनाभक्ष्यभक्षकनास्तिकनिन्दितकर्माभ्यासपतितानामत्यागाऽपतितत्यागिनः पतिताः पातकसंयोजकाश्च तैस्तावृत्तं समाचरन्"। अत्र पतितानामत्यागेति सामान्येनैव दर्शयति। तैस्तावृत्तं समाचरद्भिरिति द्वितीयसंसर्गिणोऽपि पतितत्वमुक्तम्। नन्वेकग्रामनिवासादिनापि पतितेन संसर्गिणः पतितत्वं स्यात् न संसर्गविशेषाणां निषेधात् निषिद्धपतितसंसर्गात् पततीति श्रुतिः कल्प्या। के ते संसर्गप्रकारा इत्याह वृद्धशातातपः "एकशय्यासनं पङ्क्तिर्भाण्डपक्वान्नमिश्रणम्। याजनाध्यापनं योनिस्तथा च सह भोजनम्। नवधा सङ्करः प्रोक्तो न कर्त्तव्योऽधमैः सह। उत्तमैरुत्तमैर्नित्यं कर्त्तव्यस्तु समेन वा" एकशय्याशयनैकपीठाद्युपवेशनैकपङ्क्तिभोजनपक्वान्नादिसम्बन्धिभाण्डमिश्रणपक्वान्नमिश्राख्याः पञ्च लघुसंसर्गाः। तथा याजनं पतितेन ऋत्विजा यजनं यजमानस्य, पतितयजमानार्त्विज्यकरणमृत्विजश्च। अध्यापनं पतितमाणवकवेदाध्यापनमाचार्यस्य, पतिताचार्याद्वा वेदाध्ययनं माणवकस्य। योनिः योनिसम्बन्धः स च पतितपुरुषसम्भोगः स्त्रियाः, पतितस्त्रीसम्भोगो वा पुरुषस्य, तथा पतितकन्यापरिणयनं वरस्य, पतितवरपरिणयनं वा कन्यायाः। तथा च मनुः "नैतैरपूर्वैर्विधि वदापद्यपि हि कर्हिचित्। ब्रह्मात्मनो यौनांश्च सम्बन्धानाचरत् ब्राह्मणः सह" । जिकनकल्पतरुकारादयस्तु पतितवराय कन्यादानं दातुः, पतितादातुरादानं वा कन्याया वरस्य, सर्वत्र व्यवच्छितयोनिसम्बन्धस्य, योनिसम्बन्धस्य स्त्रीपुरुषमात्रनिष्पाद्यत्वात् नात्र दातृवरयोः साक्षात् योनिसम्बन्धः दानप्रतिग्रहलक्षणोऽयं सम्बन्धो दातृपुरुषदानयोर्योन्यन्तर्भावात् योन इत्युच्यते प्रायश्चित्तगौरवार्थः। किन्त्वयमनार्षः प्रायश्चित्तविधेर्वाक्यशेषात् अनुपादेयश्च पतितजाता कन्या पतितैव स्मृतेत्यादिवचनात् पतितकन्यापरिणयनमेव नात्र व्यवच्छितयोनिसम्बन्धः। सह भोजनं स्वस्यान्यस्य वा एकपात्रे भोजनं नोच्छिष्टभोजनम् उच्छिष्टेन सहोच्छिष्टभोजनात् तस्य लघुत्वात् एते चत्वारो गुरुसंसर्गाभवन्ति एवं मिलित्वा नव संसर्गाः। नन्वेकयानालापमात्रस्पर्शनिश्वासंसहाध्ययनादिकमपि संसर्गान्तरमस्ति तत्कथं नवविधत्वं यथा पराशरः "शयनासनाच्छयनाद्यानात् भाण्डात् सह भोजनात्। संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि"। भाण्डमपि अन्योन्यसंकथनं सहभोजनमेकपङ्क्तिभोजनं लघुसंसर्गसाहचर्यात्। तथा देवलः "कलापस्पर्शनिश्वाससहशय्यासनाशनात्। याजनाध्यापनात् योनात् पापं संक्रमते नृणाम्"। सहाशनमेकपङ्क्तिभोजनम्। तथा लोगाक्षेयः "यानालापात् शयनसंस्पर्शात् निश्वासात् सहभोजनात्। सहशय्यासनाध्यायात् पापं संक्रमते नृणाम्"। सहाध्यायः पतितेन ब्रह्मचारिणा सहैकस्मादगुरोरध्ययनम्। सत्यं नवधेत्यत्र प्रकारवाचिना भाण्डस्थेन प्रकारान्तरं किञ्चित्तत् अन्यथा नवेत्युक्तं स्यात्। तेन तत्तद्भोजनतत्प्रतिग्रहादीनामुपसंग्रहः। नन्वनेकवचनेषु पापसंक्रान्तिः श्रूयते पूर्वदेहत्यागेन देहान्तरसम्बन्धे संक्रान्तिमतश्च सुखित्वात् भूयःपापकर्तुः पापपरिच्छेदे भूते किमर्थं प्रायश्चित्तानुष्ठानमिति। तथा हारीतः "कृत्यादशुद्धः शुद्धस्तु शुद्धोऽशुद्धस्तु शोचयेत्। अशुद्धश्च तनोत्यन्नः शुद्धवासेन शुद्धयति"। तथा च मनुः "अज्ञाते ज्ञापिते पापे ज्ञाप्यो भ्रात्रादिपूर्वकः। गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम्"। भ्रात्रादिरिति प्रोच्छवति संक्रामयतीत्यर्थः। तथा यमः "दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति। यो यस्यान्नमिहाश्नाति स तस्याश्नीति किल्बिषम्"। अन्न

किल्बिषम् क्षयमाति इत्यनेनापि पापाभावो गम्यते। उच्यते न पूर्वपापक्षयोत्तरक्षयत्यागेन व्याश्रयान्तरसम्बन्धः सम्भवति गुणस्य तदुपादर्शनेनायोग्यत्वात् किन्तु तत्तुल्यव्यक्तिसम्बन्धे गौणोऽयं संक्रान्त्यादिशब्दः। तथा च देवलः "बाल्यवोऽपि पृथग् भूत्वा तत्पापं नाप्नुयात् क्वचित्। पृथग्जनोऽपि संयोगात् भजते तुल्यदोषताम्" तत्पापं तज्जातीयं पापमित्यर्थः। तुल्यदोषतां तत्समानपापतामित्यर्थः। "शुद्धोऽशुद्धान्तु शोधयेदिति" यत्तु ब्राह्मणादिसम्पर्क एव पापक्षयहेतुत्वं तत्तु बोद्धव्यम्। यथोशनाः "क्रतुलक्षणैर्दर्शनस्पर्शनसम्भाषणानि वर्जयेत्" इत्युक्त्वा "सम्भाषणे ब्राह्मणसम्भाषणमित्यादि"। क्रतुलक्षणो राज्ञा कृतपापचिह्नः। किन्तु यदि पापिष्ठसाम्यसंसर्गः पापक्षयहेतूक्तदेतरप्रायश्चित्तवदिदमपि कैमापि सूत्रितं प्रायश्चित्तरूपतया पठितः स्यात् प्रत्युत निषेध एव सूच्यते यथा मनुः "प्रायश्चित्तीयतां प्राप्य दैवात् पूर्वकृतेन वा। न संसर्गं व्रजेत् सद्भिः प्रायश्चित्तेऽकृते द्विजः" इति। किञ्च "तिमिश्रलक्षेन सोऽवदान्ते स्वयञ्च पतितो भवेदिति" तिमिश्रवचने चतुष्ट्वान्मूलपापकर्तुरपि पापस्थितिरवगम्यते मूलपापकर्त्ता पतितः स्वयमपि पतति इत्यर्थः। इदानीञ्च कियता कालेन कृतमस्य संसर्गस्य पतितत्वाद्यापादनमिति निरूप्यते। तत्र देवलः "पतितेन सहोषित्वा ज्ञानतः संवत्सरं नरः। तिमिश्रलक्षेन सोऽवदान्ते स्वयञ्च पतितो भवेत्। याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम्। कृत्वा सद्यः पतन्त्येते पतितेन न संशयः"। यानादिलक्षणसर्गैः ज्ञानकृतैः संवत्सरेण पतति याजनादिभिर्युक्तैः सद्यः पतनीत्यर्थः। तथा बौधायनः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद् यौनात् सद्यो न शयनासनात्"। शयनादिना सद्यःपातनिषेधात् सांकाङ्क्षञ्च संवत्सरेण पततीत्यस्य शयनादिना सम्बन्धः। याजनादिपदं सहभोजनमप्युपलक्षयति। विष्णुः "सांवत्सरात् पतति पतितेन सहाचरन्। सह शयनासनाभ्यां यौनात् सौवात् सम्बन्धात् सद्य एव"। यानाशनाभ्यामिति लक्षणसंसर्गयोर्लक्षणम्। यौनात् इत्यादि सहभोजनोपलक्षणम्। भूर्यपुराणे व्यासः "ब्रह्महा सद्यः स्त्रेणो गुरुतल्पग एव च। महापातकिनश्चैते यत्नैः सह संवसेत्। संवत्सरन्तु पतितैः संसर्गं कुरुते नरः। यानशय्यासनैर्नित्यं ना-

ननु वै पतितो भवेत्"। एभिर्वचनैर्याजनादिना सद्यः पातो यानादिना ज्ञानतः संवत्सरेणेत्यवगम्यते। ननु याजनादिना संवत्सरेण पतति न तु यानादिनेत्याह मनुर्विष्णुश्च "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद् यौनात् न तु यानासनाशनात्"। यानासनाशनादुत्पन्नसंयोगमाचरन्नित्यर्थः। तथा पैठीनसिः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनात् यौनात् नत्वेवं शयनासनात्"। अत्र सर्वदेवकल्पतरुकारादयः देवलबौधायनादिवचनैर्याजनादीनां सद्यः पातहेतुत्वादर्शनैः मनुपैठीनसिवचनयोर्नेति मध्यपठितस्य पूर्वेण याजनादिना सम्बन्धो न तु परेण यानादिना, याजनाध्यापनात् न तु संवत्सरेण पतति किन्तु यानादिभिरित्याहुः। तदसङ्गतम् सुमन्तुवचनविरोधात् यथा पतितानभिधायाह सुमन्तुः "यस्त्वेतैर्वैनसौखस्यौवाणां सम्बन्धानामन्यतमेन सह संवत्सरं सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यात्" इत्यादि कृत्वान्ते एतदेवादृश्यवार्षिकव्रतम् इत्यर्थः। अत्र याजनादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते। तथा हारीतः "संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद् यौनादेकपङ्क्त्यैकभोजनात्"। एकभोजनमेकपात्रे कालभेदेन भोजनं जलपानञ्च। तथा बृहस्पतिः "षाण्मासिके तु संयोगे याजनाध्यापनादिना। एकाशनशय्याभिः प्रायश्चित्तार्द्धमाचरेत्। तथा वत्सरसंसर्गे योनियुक्ते विशेषतः। पूर्वोक्तेन विधानेन पतितव्रतमाचरेत्"। अनेन याजनादिना षाण्मासिकसंसर्गे प्रायश्चित्तार्द्धं वदता वत्सरेण सम्पूर्णप्रायश्चित्तमर्थादुक्तम् उत्तरवचने पुनः स्फुटीकृतम्। योनियुक्तपदेन याजनादीनामप्युपसंग्रहः। एकाशनशय्यादिरिति पाठोऽनाकारः राज्ञाऽलिखितत्वात्। जिष्णुनादस्तु यदि पात्रैक्यं विभक्तिनिर्देशात् भोजनं कृत्वा पतति योनिसम्बन्धं कृत्वा पततीति एवं सम्बन्धोऽभिधीयते तदा कृत्वा पततीति पदयोरन्वयाश्रवणात्पञ्चाद्दृष्टिकल्पनायां वाक्यभेदः चत्वारि वाक्यानि स्युः। अतः कृत्वेति पदेन तत्तत्कर्म चतुष्टयमादाय पततीति क्रियायां बोधिते न वाक्यभेदः संवत्सरपदेन पृथगुपनीतानामपि कृत्वेति पदेन तत्तत्कर्मोपनयनात्। दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्याग्नेयादियागघटकानामिव। अत एकवाक्यानुरोधादुयाजनादीनां तत्तत्

समुच्चितोपनीतानां पतनीत्वेन सम्बन्धे बोधिते याजनादीनां समुच्चितानां सद्यः पातहेतुत्वं पूर्वोक्तयुक्त्या दिवचनादेकैकेषां संवत्सरेणैव यतैव संसर्गत्रये चतुर्णां त्रयाणां संसर्गद्वयेऽष्टभिर्मासैर्भोगद्वारेण पातहेतुत्वमूहनीयम् । तत्र कृत्वेति पदस्य याजनादिकर्मत्वेऽशक्यत्वात् किन्त्वन्वयाभिधानलभ्यं तत् तदा च निरपेक्षाणामेवान्वयाभिधानप्राप्तत्वादनुषङ्गाधिकरणन्यायाच्च तन्त्रता सत्यपि तन्त्रतायामिधाने न समुच्चयः सर्वेभ्यो दर्शपौर्णमासावित्यत्रेव समुच्चयबोधकस्य द्वन्द्वसमासादेरभावात् । न वा तन्त्रतायां समुच्चयो नियतः भर्गोभोज्यानां सम्प्रदायाजापत्यात् पशूनालभेदित्यत्र व्यभिचारात् पततीति पाठस्य राज्ञाऽभिखितत्वाच्च कथं पततीति पदाद्वृत्तिः । न च सुमन्तुवचने याजनादीनामन्यतमेन वत्सरेण पातावगमादर्थान्निलितैः सद्यः पात इति कल्पनीयं निरपेक्षस्मृतिविरोधात् वक्ष्यमाणप्रकारेण वचनद्वयसमञ्जस्यसम्भवात् । उच्यते । गुरुलघुभेदेन द्विविधं याजनादिकं भवति तत्र गुरुणा ज्ञानकृतेन याजनादिना एकैकेन सद्यः पात तेनैवाज्ञानकृतेन वारद्वयाभ्यासात् । लघुयाजनादिज्ञानकृते वत्सरेण पातः तस्मिन्नेव ज्ञानकृते वत्सरार्द्धेनेति व्यवस्था । तथा हि याजनं योनिसम्बन्धमित्यत्र देवलवचने पतितेन सहोषित्वा पूर्ववचने जानन्निति पदसम्बन्धाज्ज्ञानकृतत्वं दर्शितम् । गुरुत्वं च देवलवचनेनैव याजनाध्यापनयोरुपसंहारादृर्शितम् । यथा देवलः "आचार्यादुव्रतनियमशुश्रूषादिभिस्त्रयीविद्योपादानमध्ययनं तस्य चाचारान्वयः प्रकृष्टसामर्थ्यभक्तिशीलशुश्रूषोपनताय शिष्याय प्रदानमध्यापनम् । पशुक्षीराज्यपुरोडाशसोमौषधिचरुप्रभृतिभिर्हविर्भिः खदिरपलाशाश्वत्थन्यग्रोधोडुम्बरप्रभृतिभिः समिद्भिः स्रुक्स्रुवोदुखलमुसलकुठारखनित्रयूपदारुचषालदर्भयावपवित्रभाजनादिभिर्द्रव्योपकरणैरुद्गाहक्षौरध्वर्युब्रह्मादिभिर्ऋत्विग्भिः काम्यनैमित्तिकानां पत्न्यादिपूर्वकाणां यथोक्तदक्षिणानां यज्ञानां समापनं याजनम् एतेन याजनं व्याख्यातम्" । प्रकृतः उद्यमः । अत उपनयनपूर्वकमध्यापनं ज्योतिष्टोमादियज्ञानां याजनं च गुरु, तत्साहचर्यादुपनयनरूपं गुरु मन्त्रक्षौमादिसाध्यत्वात्, स्तेयादिना पतिताच्चात्राह्मण्यागमनं वा ब्राह्मणस्य, तद्वेलया पतितस्त्रात्राह्मणीगमनं पतित शूद्रागमनयोर्लघुत्वात् । अत भोजनं पतिताद्यस्य पतितेन सहैकपात्रे भोजनं गुरु । उपनयनं विना वेदाध्ययनम्, कृष्टकादियज्ञयाजनं पतितस्त्रात्राह्मणीगमनं च पतिताद्यस्य पतितेन सहैकपात्रे भोजनं पतिताच्छूद्रभोजनं वा पूर्वोक्तयाजनाद्युपेक्षया लघु । देवलवचने ज्ञानतो गुरुणा याजनादिना संवत्सरेण पतनमिति गम्यते । ज्ञानतः सकृत्कृतेन येन पतनं तेनाज्ञानतो वारद्वयाभ्यासेन । अज्ञानतो वत्सरेण येन पतनं तेन ज्ञानतः षण्मासैरिति वचनद्वयमासङ्गस्यं तथा च लघुयाजनविषये संवर्तः "एभिः संसर्गमायाति यः कश्चित् कामतोऽशितः । षण्मासानवटेमेकं वा ब्रह्महत्याव्रतञ्चरेत्" । कल्पतरुकारस्त्वाह्येष स्वरसः । अतएव कूर्मपुराणे "याजनं योनिसम्बन्धं तथैवाध्यापनं द्विजः । कृत्वा सद्यःपतेत् जानन् सह भोजनमेव च । अज्ञानादथ वा मोहात् कुर्याद्ध्यापनं द्विजः । संवत्सरेण पतति सहाध्ययनमेव च" । अत्र पूर्ववचनं गुरुयाजनादिपरं द्वितीयवचनं लघुयाजनाद्यर्थम् । न च ज्ञानाज्ञानाभ्यामेव सद्योवचनसंवत्सरवचनयोः सामञ्जस्यं भविष्यति किं गुरुलघुव्यवस्थापनेनेति वाच्यं ज्ञानकृतादज्ञानकृतस्यार्द्धेन अज्ञानकृताच्च ज्ञानकृतस्य द्विगुण्यं युक्तं यतः "अज्ञात्कारकृते यत्तद्द्विगुणं बुद्धिपूर्वके" इति वचनात् अत्यन्तविप्रकर्षस्यादृष्टत्वाच्च । देवलेन याजनादिवचनस्य गुरुयाजनादावुपसंहृतत्वान्मनुवचने चाद्यौज्ञलघुयाजनाद्यवगतेस्तस्यादृक्चैव व्यवस्था । अथ गुरुसंसर्गकालं निरूप्याधुना लघुसंसर्गकालो निरूप्यते । तत्र भवदेवेनोक्तं याजनादिभ्यो लघूनां यानासनाध्ययनैकपङ्क्तिभोजनानां चतुर्णां लघुतराणाञ्चालापस्पर्शनिश्वासानां मिलित्वा सप्तानां ज्ञानतो वत्सरेण पातहेतुत्वमज्ञानतो वत्सरद्वयेनेति तदेतत्प्रमाणशून्यं द्वन्द्वनिर्देशादेरभावात् । जिकनस्तु "आसंवत्सरात् पतति पतितेन सहाचरन् । सह यानासनाभ्यामिति" विष्णुवचने द्वयोर्द्वन्द्वनिर्देशात् यानासनादीनामुत्तरेषां सप्तानां मध्यादेकेन केनचित् संसर्गद्वयेन वत्सरेण पात एकैकस्य वत्सरद्वयेन एभ्योऽपि संख्यादेर्लघुत्वात् सद्ययानादेर्द्विगुणकालेन सास्याणादकत्वमेतच्च ज्ञानत "जानन् संवत्सरं नर" इति वचनात् अज्ञानादेतद्द्विगुणकालेनेति । तच्च त्रयाणामपि द्वन्द्वनिर्देशात् । यथा मनुः "संवत्सरेण पतति पतितेन सहाचरन् । याजनाध्यापनाद्यौनात् न तु यानासनाशनात्" । यथा याजनादिना प्रत्येकमज्ञानाद्वत्सरेण पातः तथा न यानादिभिः एभिश्च मिलितैस्तानादित्यर्थः । तथा च

कूर्मपुराणे "ब्रह्महा मद्यपस्तेनो गुरुतल्पग एव च। महापातकिनस्त्वेते यश्च तैः सह संवसेत् संवत्सरन्तु पतितैः ससंगं कुरुते तु यः। यानशय्यासनैर्नित्यं जानन् वै पतितो भवेत्"। तथा बृहस्पतिः "षाण्मासिके च संयोगे याजनाध्यापनादिना। एकत्रासनशय्याभिः प्रायश्चित्तार्द्धमाचरेत्। एकत्रासनशय्यापदेन लघुसंसर्गान्तरं लक्ष्यते अन्यथा बहुवचनानुपपत्तेः। यथा प्रोदुगात्रां भक्ष्यः फलचमसः इत्यत्र प्रोद्गातृशब्दस्य प्रोदुगात्र प्रोदुगातृपरत्वमुक्तम्। यदा त्वेकत्रासनशय्यादिरिति पाठस्तदादिशब्दात् संसर्गान्तरलाभः अयन्त्वपपाठ इति प्राञ्चिखितत्वात्। उच्यते। यानादीनां लघुसंसर्गाणां सकृच्चितानां पातहेतुत्वं बृहन्निर्देशात् त्रयाणां द्वन्द्वनिर्देशो बहुषु वचनेष्वगम्यते। अत्र च यानादीनामनियतत्वस्वरूपात् लाघवात् एभिस्त्रिभिः लघुसंसर्गैर्वत्सरेण पततीत्येकैव स्मृतिः कल्पनीया सकृच्छब्दादेककालत्वमवगम्यते एककाले चैकपोढ्यादुपवेशनं स्पर्शनिश्वासालापलघुतरसंसर्गत्रयनियतमतस्तदर्थादेव गम्यते एभिस्त्रिभिर्लघुतरसंसर्गैरेको लघुसंसर्गः समाजः अनन्तत्वापि लघुसंसर्गत्रयमेव मन्वादिवचनेषु सकृच्छब्दाभावात् कालभेदेन सततपतितोपभुक्तासनाद्युपवेशनं प्राह्मतस्त्रिभिर्लघुसंसर्गैर्वत्सरेण साम्यम् एतच्च ज्ञानतः "जानन् संवत्सरम्" इति देवलवचनात् अज्ञानतो वत्सरद्वयेन एकैकशो ज्ञानाद्वत्सरत्रयेण अज्ञानात् वत्सरषट्केन संध्यापादीनामेकैकयानादिसमानत्वात् ज्ञानतो वत्सरत्रयेण पातः। अज्ञानतो वत्सरषट्केन ज्ञानादेकैकशोऽज्ञानादेकैकशो वत्सरनवकेन। अज्ञानादेकैकशोऽष्टादशभिर्वत्सरैरित्यर्थः। ननु संध्यापादीनां कथं यानादिभ्यो लघुत्वम्। उच्यते लघु प्रायश्चित्तस्मरणात् यथो शनाः "श्रुतलक्षणकैर्दर्शनस्पर्शनसम्भाषणादीनि वर्जयेत् दर्शने ज्योतिषां दर्शनं स्पर्शने क्षुद्दयालम्भनं सम्भाषणे ब्राह्मणसम्भाषणमपां स्पर्शनञ्चेति"। श्रुतलक्षणकैः पतितैः पदादिचिह्नितैः, दर्शनञ्च न संसर्गः प्रकरणेऽपाठात् पतितस्पर्शनमत्र परम्परया ग्राह्यं साक्षात् स्पर्शने ज्ञानस्मरणात् तथा मनुः "दिवाकीर्त्तिमदध्याञ्च पतितं श्रुतिकान्तथा। नैव तत्पश्यतिनं चैव स्पृष्ट्वा ज्ञानेन शुध्यति"। पतितान्नभोजनपतितदृष्यप्रतिग्रहयोश्च प्रत्येकं ज्ञानतः षड्भिर्मासैरज्ञानाद्वर्षेण पतित्वापादकत्वं यथा पतितानभिधायाह संवर्त्तः "एभिः संसर्गमायाति यः कश्चित् काममोहितः। षण्मासानब्दमेकं वा ब्रह्महत्याव्रतञ्चरेत्"। न चास्य ज्ञानाज्ञानकृतयोर्नसंसर्गविषयत्वम् अविशेषश्रुतेर्योगतुल्यत्वादेतयोः तथा च पतितान्नभोजनस्य संवत्सरेण पातहेतुत्वमाह देवलः "संवत्सरेण पतति पतितेन सहाचरन्। भोजनासनशय्यादि कुर्वाणः सार्वकालिकम्"। भोजनं तदन्नभोजनं सार्वकालिकग्रहणवच्छिन्नं भोजने च तथा दर्शनात् प्रतिग्रहेऽपि तथात्वमूहनीयं तयोः समानत्वदर्शनात् साम्ये हेतुमाह बृहस्पतिः "पतितानां गृहं गत्वा भुक्त्वा च प्रतिगृह्य च। मासोपवासं कुर्वीत चान्द्रायणमथापि वा"। मासोपवासो ज्ञानाभ्यासे तत्र च पञ्चदश धेनवः। चान्द्रायणमज्ञानाभ्यासे तत्र सार्द्धसप्त धेनवः। गृहं गत्वेति अनेकसंवत्सरेणेति। तथा मनुः "चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति"। तथा रजकादीनभिधायाह यमः "भुक्त्वा चैषां स्त्रियो गत्वा योत्वापः प्रतिगृह्य च। लक्ष्मनवृतं चरेज्ज्ञानादज्ञानाद्द्वादशम्"। पतितान्नभक्षणप्रायश्चित्तात् पतितस्पृष्टान्नभक्षणप्रायश्चित्तार्द्धेन ह्रासदर्शनात्तार्द्धहानिः तेन ज्ञानतः पतितस्पृष्टान्नभोजने संवत्सरेण साम्यमज्ञानतो वत्सरद्वयेनेति। तथा प्रचेताः "पतितान्नन्तु यो भुङ्क्ते सप्ताहमुदके वसेत्। पानीयपानतश्चैव कृच्छ्रवारि पिबेत्त्रिरहम्"। सप्ताहोदकवासे धेनुद्वयं वक्ष्यते एतत् सकृदज्ञानविषयं सकृज्ज्ञानकृतपतितस्पृष्टान्नभक्षणे यमः "भुक्तोच्छिष्टेऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत्। अर्द्धोच्छिष्टे स्मृतः पादः पाद आमाशने तथा"। "अमेध्यपतितचाण्डालपुक्कशरजस्वलावधूतकुक्षिकुष्ठिकुनखिस्पृष्टानि भुक्त्वा लक्ष्मनाचरेत्"। पातकिस्पृष्टपाकान्नभोजने तु संसर्गस्य किञ्चिदूष्यत्वधानात् पादहानिः तेन ज्ञानतः सपादवत्सरेणाज्ञानतः सार्द्धवत्सरद्वयेन साम्यम्। पातकिसकीर्ण्यपाकान्नभोजने तु ततोऽपि अवच्छित्तत्वात् परपादहानिः। तेनात्र ज्ञानकृते सार्द्धवत्सरेणाज्ञानतो वत्सरत्रयेण साम्यम्। पतितान्नभक्षणे पतितस्पृष्टान्नभक्षणस्य चतुर्थभागः एवं पतितपानीयपानेऽपि चाण्डालान्नभक्षणे तथा दर्शनात्। "यथा विष्णुः चाण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत् शिवान्नं भुक्त्वा पराकः"। इति अत्रान्नभाक्षम् उत्तरत्र शिवान्नदर्शनात् पराके च द्वादशोपवासाः। तथा प्रचेताः "पतितान्नन्तु यो भुङ्क्ते सप्ताहमुदके वसेत्। पानीयपानतश्चैव कृच्छ्रं

पिबेत्" । त्रिरात्रोपवासे चतुर्विंशतिपलमध्यं काञ्चनं देयम् । एतदेव कृच्छ्रत्रितयाने किञ्चिदूनं देयम् । पतितोच्छिष्टभक्षणे तु पतितान्नभक्षणाद्द्वैगुण्येन पापाधिक्यम् । यथाङ्गिराः "चाण्डालपतितादीनामुच्छिष्टान्नस्य भक्षणे । द्विजः शुध्येत् परार्केण शूद्रः कृच्छ्रेण शुध्यति" । एतत् सकृदज्ञानविषयम् । परार्के पञ्च धेनवः । सकृदज्ञानकृतपतितान्नभोजने धेनुद्वयं प्रचेतोवचने व्याख्यातम् । तेन ज्ञानतः पतितोच्छिष्टान्नभक्षणे मासत्रयेण पतितसाम्यम् अज्ञानतो मासषट्केन । उच्छिष्टान्नभक्षणवदुच्छिष्टप्रोक्षणेऽपि व्यवस्था "उच्छिष्टभोजनं चैव तथा तस्य च मार्जनम्" इति देवलवचने साहचर्यदर्शनादिति । अत्र कृतानेकपातकपुरुषसंसर्गादेकैव पापव्यक्तिरुत्पद्यते न भिन्ना कल्पनागौरवापत्तेः । पुरुषापराधस्य च संसर्गलक्षणस्य निमित्तकारणस्य तद्विशिष्टात्मनःसंयोगस्याश्रयसमवायिकारणस्यैकत्वात् । प्रायश्चित्तन्तु गुरुसंसर्गस्यैव करणीयं गुरुणा प्रायश्चित्तेन लघुनः पापस्य क्षयाभिधानात् । तथानेकसकृत्पातकिपुरुषसंसर्गजपापव्यक्तिभेदेऽपि देशकालकर्तृक्ये तन्त्रतायाः उक्तत्वात्तन्त्रेणैव प्रायश्चित्तम् । जिकनस्तु युगपदनेकब्राह्मणवधवदनुगपदेकपातकिसंसर्ग एव तन्त्रता । क्रमकृते तु ब्राह्मणवधवदावृत्तिरेव प्रायश्चित्तस्येति तत्र ब्रह्मवधेऽपि क्रमकृते प्रायश्चित्ततन्त्रतायाः उक्तत्वात् । युगपदनेकब्रह्मवध एव ज्ञानाज्ञानाभ्यां विशिष्टसरण्यावच्छीवव्रतलक्षणप्रायश्चित्तभेदेन तन्त्रताऽभावस्य श्रीमच्छादेवपादैरुक्तत्वात् । इह तु तदत् प्रायश्चित्तवैशिष्ट्ये प्रमाणं नास्ति तथा शूद्रस्यैव महापातकिनोऽपि पातक्यन्तरसंसर्गे पापसत्पद्यते एव आवृत्तब्रह्मवधवदेतोश्च समत्वात् । अन्यथा पातकिनश्चाण्डालान्नभक्षणेऽप्यदोषः स्यात् । तथा प्रतिक्षणं पूर्वपूर्वोत्पन्नपापव्यक्तिसहकृतोत्तरोत्तरसंसर्गादन्त्याया एव पापव्यक्तयो सकृत्य उत्पद्यन्ते पूर्वापूर्वा चोत्पद्यैव विनश्यन्ति वल्गुरेवैव सूनुपापकर्तृपापसमानदुरितापूर्वव्यक्तिरुत्पद्यते । सा च सम्पूर्णनरकफला वल्गुराद्यन्तरङ्गाङ्गनरककालिका अतएव प्रायश्चित्तवाक्यमप्येकम् । न तु भिन्नभिन्नाः सकामाः पापव्यक्तयः सकृदापात् सम्पूर्णनरकं फलन्ति । सम्पूर्णनरकफलस्य ब्रह्मवधादावेकस्यापव्यक्तिफलत्वदर्शनादिति" । अत्रेदं बोध्यम् । महापातकिसंसर्गस्यैव कर्मणो पापहेतुत्वं नान्यपापिसंसर्गस्य यथोक्तं पराशरेण "कृते सम्भाषणात् पापं त्रेतायाञ्चैव स्पर्शनात् । द्वापरे चान्नमादाय कलौ पतति कर्मणा" । कलौ सम्भाषणादिना न पातित्यं किन्तु कर्मणैव कर्मभाक्त्वेनैव पातित्यं न संसर्गमात्रादिना । "व्याल पात्र मात्रसंसर्गादित्यादि" पराशरवचनं महापातकिविषयमिति पराशरभाष्ये माधवाचार्यैः स्पष्टम् ।

संसर्गाभाव पु० संसर्गेण सम्बन्धेनावच्छिन्नप्रतियोगिताको भावः । ध्वंसप्रागभावात्यन्ताभावरूपे भेदभिन्ने १क्रमाभे २सम्बन्धाभावे च "प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च । एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते" भाषा० । संसर्गाभावत्वं च अन्योन्याभावभिन्नाभावत्वं तत्र अन्योन्याभावस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावरूपतया तद्भिन्नस्य संसर्गाभावत्वोक्तेः । तादात्म्यातिरिक्तसंसर्गावच्छिन्नप्रतियोगिताकत्वेन संसर्गाभावस्य यौगिकताऽपि । संसर्गप्रतियोगिकाभावत्वं तु न लक्षणं तथात्वे खण्डनकारोक्तं दूषणमापतेत् तथा हि अभावस्य संसर्गप्रतियोगिकत्वे घटादिप्रतियोगिकत्वं बाध्येत द्रव्यगुणकर्मणां समवायिकारणेषु संसर्गस्य समवायसम्बन्धरूपतया तस्य नित्यत्वेन ध्वंसाधारे तत्संसर्गाभावस्यासम्भवात् । समवायावच्छिन्नप्रतियोगिताकत्वेन बोधने तु प्रतियोग्यनवच्छेदापायां समवायस्य नित्यत्वेन तदनुद्धारसम्भवात् । संसर्गाभावश्च नञादिनिपातेन धात्वर्थाश्च बोध्यते तत्र निपातेन प्रातिपदिकार्थाभावस्य बोधने व्यधिकरणयोगिनि सप्तम्यपेक्षा यथा नेहे घटो नास्तीति । विशेष्यतासंसर्गाभावस्य धात्वर्थादौ बोधने तु नायं नियमः यथा गगनं न पश्यति न कलञ्जं भक्षयेदित्यादौ तत्तद्दर्शने गगनकर्मत्वस्य कलञ्जभक्षणे तत्तदनिष्टसाधनत्वस्य वा संसर्गाभावस्य बोधनात्र तत्र सप्तम्यपेक्षेति विवेकः । कणा० सू० इत्योऽन्योन्याभावोक्तं यथा

"नास्ति घटो गेहे इति सतो घटस्य गेहसंसर्गप्रतिषेधः" कणा० सू० "गेहे घटस्य यः संसर्गः संयोगलक्षणस्य प्रतिषेधः स च यदि कदाचिदपि न घटस्तदात्यन्ताभाव एव भविष्यतः प्रागभावो भूतस्य ध्वंसाभावः, तर्हि घटसंसर्गो गेहे नास्तीति प्रतीत्या भवितव्यमिति चेत् प्रतीत्या भवितव्यमित्यस्य कोऽर्थः यदि तद्विषयया प्रतीत्या भवितव्यमित्यापादनार्थं तदेष्टापत्तिः अथ तद्विशेष्यतेति तदा गेहे इत्यधिकरणोक्तेश्चैव संसर्गोक्तेश्च ध्वंसानाधारत्वस्यैव धर्मसम्बन्धाकारत्वात् तत् किं घटस्यैव ? अस्येति कोऽर्थश्चेत् समवेतः संयुक्तो वा

आद्यः समवेतघटस्य तत्राभावात् न द्वितीयः संयोगस्य निषेधात् नन्वेवं घटादीनां केवलान्वयित्वप्रसङ्गः तत्संयोगसमवायान्यतरस्यैव सर्वत्र निषेधादिति चेन्न तदुभयनिषेधस्यैव घटनिषेधात्मकत्वात् तत् किं घटस्तत्संयोगश्चेत्येकं तत्त्वं येन घटसंयोगनिषेधो घटनिषेधः स्यात् तत् किं घटस्तत्संयोगसमवायावेकं तत्त्वं येन तन्निषेधेव घटविधिः स्यात् न हि तौ यत्र निषेध्येते तत्र घटान्वयो येन केवलान्वयित्वं तस्य स्यात् तथा च यस्य यो विधिस्तन्निषेध एव तन्निषेध इति । यद्वा घटस्य समवायितया गेहेऽत्यन्ताभाव एव स एव गेहे घटो नास्तीति प्रतीतिविषयः कपाले संयोगितयैव । एवं सति केवलान्वयित्वाभावप्रतियोगितया घटोऽसत् स्यादिति चेत् भवेदेवं यदि संयोगित्वसमवायित्वाभ्यां सर्वत्रासत् स्यादिति" ।

संसर्गिन् त्रि० सर्ग+घञ्-णिनि । १संसर्गयुक्ते विभागान्तरम् (यत्तत्र पतं तत्संसर्गीति) क्रतसमयेन एकत्रावस्थानरूपसंसर्गयुक्ते २स्वामादौ ३सम्बन्धे च ।

संसार पु० संसरत्यस्मात् सृ+घञ् । १स्त्रियाञ्जानजन्यसंस्काररूपवासनायां २देहेन्द्रियादिसङ्घातरूपे ३स्वाश्रयोपनिबद्धदेहपरिग्रहे च आधारे घञ् । ४विश्वे । भावे घञ् । ५गमने । संसारगतिप्रकारः भा०स्व०भा० दर्शितो यथा "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्" सू० "पञ्चाग्निविद्यामाश्रित्य संसारगतिभेदः प्रदर्श्यते, वैराग्यहेतोरुक्तत्वाच्च गुणश्रुतिरिति चालं भूयसा । जीवो दुष्प्राणसचिवः इन्द्रियः समनस्को विद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहान्तरं प्रतिपद्यते इत्येतदवसातव्यम् । "अथैनमेते प्राणा अभिसमायन्ति" इत्यादेः "अन्यन्नवतरं कल्याणतरं रूपं कुरुते" इत्यन्तात् संसारप्रकारश्रवणाच्च, धर्माधर्मफलोपभोगसम्भवाच्च । स किं देहबीजैर्भूतसूक्ष्मैरुत्सम्परिष्वक्तो गच्छति आहोस्वित् उत्सम्परिष्वक्त इति चिन्त्यते । किंतावत् प्राप्तं उत्सम्परिष्वक्त इति । कुतः कारणोपादानवदुभयोपादानश्रुतत्वात् । "स एताभ्य एव भूतेभ्यः समुत्थायादानः" इत्यत्र तेजोबन्नलक्षणेन कारणादुपादानं गृह्णीतेयति, वाक्यशेषे चक्षुरादिसङ्कीर्तनात् । नैवम् भूतमात्रोपादानश्रुतिसङ्कीर्तनमस्ति । सूक्ष्माश्च सर्वत्र भूतमात्राः, अत्रैव देहे चारब्धत्वश्रुतेश्च रूपि । तत्र तासां भवनं निष्पत्तिरुत्थानं, तस्मादुत्सम्परिष्वक्तो यातीत्येवं प्राप्ते पठत्याचार्यः "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः" इति । तदनन्तरप्रतिपत्तौ देहबीजैर्भूतसूक्ष्मैः सम्परिष्वक्तो रंहति गच्छतीत्यवगन्तव्यम् । कुतः प्रश्ननिरूपणाभ्याम् । तथा हि प्रश्नः "कैत्य यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति । निरूपणञ्च प्रतिवचनं द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमराजान्नरेतोरूपा आहुतीरुक्त्वा "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति । तस्मादङ्गैः परिवेष्टितो जीवो रंहति व्रजतीति गम्यते" । सां०का० तत्प्रकारो दर्शितो यथा "संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" का० "नन्वस्त्वेतदेव शरीरं भोगायतनं पुरुषस्य, कुतः इत्यत्रोच्यते आधिभौतिकेन शरीरेणोत्पत्तिमत्त्वाच्च संसरतीति व्याख्यातप्रायं आधिभौतिकं शरीरं जहाति छायं छायं चोपादत्ते, कस्मात् ? निरूपभोगं यतः आधिभौतिकं शरीरं विना सूक्ष्मं शरीरं निरूपभोगं, तस्मात् संसरति । नन्वधर्मनिमित्तः संसारः न च सूक्ष्मशरीरस्यास्ति तद्योगः, तत्कथं संसरतीत्यत आह भावैरधिवासितं धर्माधर्मसंज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि भावास्तदन्विता बुद्धिः तदन्वितञ्च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा सुरभिचन्दनकुसुमकोद्वर्त्तं तदामोदवासितमवति तस्माद्भावैरेवाधिवासितत्वात् संसरति । कस्मात् पुनः प्रधानमिव महाप्रलयेऽपि तच्छरीरं न तिष्ठतीत्यत आह लिङ्गम् लयं गच्छतीति लिङ्गं हेतुमत्त्वेन चास्य लिङ्गत्वमिति भावः । स्यादेतदुद्बुद्धिरेव साहङ्कारेन्द्रिया कस्मान्न संसरति क्रतं सूक्ष्मशरीरेणापि वासितेनेत्यत आह" "लिङ्गं यथाश्रयसिद्धे स्थाणुादिभ्योविना यथा छाया । सद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्" का० "लिङ्गमात्रं ज्ञापनात् बुद्ध्यादिर्लिङ्गं तत् अनाश्रितं न तिष्ठति । जन्मप्रयाणान्तराभावे बुद्ध्यादयः प्रत्युत्पन्नशरीराश्रिताः प्रत्युत्पन्नपशुतरुनगस्थाणुत्वे रूपि बुद्ध्यादित्वात् दग्धसानशरीरदग्धिबुद्ध्यादिवत् । विना विशेषैरिति सूक्ष्मैः शरीरैरित्यर्थः । आगमश्चात्र भवति "अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमोबलादिति" । अङ्गुष्ठमात्रत्वेन सूक्ष्मतामुपलक्षयति यावान्यो निष्कर्षकल्पेन सूक्ष्मेण शरीरं पुरुषस्तदपि हि पुरि स्थूलशरीरे शेते" तत्कौ० ।

संसारगुरु पु० ६त० । १कामदेवे त्रिका० २जगद्गुरौ च ।

संसारचक्र न० संसारश्चक्रमिव । पुनःपुनर्जन्ममरणात्मके जीवस्य व्यापारभेदे स्वकर्मणा देहेन्द्रियज्ञानानन्तरं तत्तोपभुज्यमानकर्मणो नाशे मरणं तदनन्तरं च स्वकर्मानुसा-

99 वाचस्पत्य VI

रेषु देवतिर्य्यगादिभावापत्तित्वेन सततगतागतप्रचुरत्वात् संसारस्य चक्रवल्लत्वात् तथात्वम्। तदेतत् विष्णुपु० संसारचक्रनिरूपणे निरूपितं तत्र दृश्यम्।

संसारमार्ग पु० ६त०। योनिद्वारे त्रिका०। तत एव हि वह्निर्निर्गमने मायासुग्धतेति तस्य तथात्वम्।

संसारिन् त्रि० संसरति अदृष्टवशात् देहभेदमनुगच्छति सम्+सृ-णिनि। शरीराभिमानिनि जीवे।

संसिद्ध त्रि० सम्यक् स्वभावेन वा सिद्धः सम्+सिध-क्त। १स्वभावसिद्धे २सम्यग्निष्पन्ने च।

संसिद्धि स्त्री सम्+सिध-क्तिन्। १स्वभावे प्रकृतौ २सम्यग् निष्पत्तौ। सम्यक्सिद्धिर्यत्र। ३मुक्तौ च "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" गीता। [४सङ्गतौ शब्दच०।

संसृति स्त्री सम्+सृ-क्तिन्। १संसारे २प्रवाहे च त्रिका०।

संसृष्ट पु० सम्+सृज-क्त। विभागानन्तरं मैत्र्यात् पुनः स्वस्वधनेषु कृतसंसर्गयुते भ्रात्रादौ "विभक्तो यः पुनः पित्रा भ्राता चैकत्र संस्थितः। पित्र्यैश्चाथ वा प्रीत्या स तु संसृष्ट उच्यते" "दृष्टस्तत्तियदिगधिकत्वतिरिक्तेषु संसर्गकृतो विशेषो नादरणीयः परिगणनानर्थक्यात्" दायभा०। तत्रविभागत्वं दर्शितो यथा "विभक्ताः सह जीवन्तो विभजेरन् पुनर्यदि। समत्वं विभागः स्यात् व्यैषम्यं तत्र न विद्यते" मनुः। "समत्वमेति स्वयमेवात्रसंसर्गाभिप्रायेण ब्राह्मणक्षत्रिययोस्तु पूर्वकृतभागाद्दशारेण भागव्यवस्था बोद्धव्या। पूर्वकृतव्यैषम्यनिषेधमात्रपरं हि समवचनम् अतएव दक्षः "विभक्ता भ्रातरो ये तु संप्रीत्यैकत्र संस्थिताः। पुनर्विभागकरणे तेषां व्यैषम्यं न विद्यते" इति व्यैषम्यमात्रं निषेधति न तु भागसाम्यम्" दायभा०। तत्र भ्रात्रधिकारे विशेषमाह उशना यथा "अन्योदर्य्यस्तु संसृष्टी नान्यदर्थधनं हरेत्। असंसृष्ट्यपि चादद्यात् संसृष्टी नान्यमातृजः" याज्ञ० अस्यायमर्थः। "संसृष्टी पुनरन्योदर्य्यः प्रथमं हरेत् न पुनरन्योदर्य्यत्वात्। प्रथमं च हरन् सोदरं बाधित्वैव वा तेन सह वेत्यपेक्षायामुक्तम् असंसृष्ट्यपि सोदरो दृष्टश्रौयात् सोदरपदमनुवर्त्तते ("सोदरस्य तु सोदरः इति वचनात्)। नान्यमातृज एव संसृष्टी दृष्टश्रौयात् संसृष्टपदमेव वा सोदरमभिधत्ते अतएव दृष्टश्रुत्या०। "सोदरो नान्यमातृजः" इति जितेन्द्रियेण लिखितम्। तथा च पूर्वार्द्धस्य संसृष्टीत्यनुवर्त्तते स च केवलमन्योदर्य्य एव संसृष्टी दृष्टश्रौयात् किन्त्वसंसृष्ट्यपि सोदरो दृष्टश्रौयादित्यर्थः। तेन असंसृष्टिना सोदरेण संसृष्टिना चासोदरेण विभज्य गृहीतव्यमतएवान्यमातृजं प्रयुक्तवान्" दायभा०। "तस्मात् सोदरासोदरभ्रात्रसद्भावे सोदराणामेव। सोदराणामेव मध्ये एकस्य संसृष्टत्वे तस्यैव असंसृष्टसोदरसंसृष्टासोदरसद्भावे च द्वयोरेव मातृमात्रसद्भावे प्रथमं संसृष्टस्य तदभावे चासंसृष्टासोदरस्येति" दायसा०एवं भ्रात्रनुजेऽपि। २दमनादिना संयुक्ते मेदि० ३संयुक्ते च। भावे क्त। ४सम्बन्धे।

संसृष्टि स्त्री सम्+सृज-क्तिन्। १संसर्गे २अलङ्कारभेदे अलङ्कारशब्दे ४०५पृ०दृश्यम्। ["संसृष्टस्य तु संसृष्टी" याज्ञ०।

संसृष्टिन् पु० संसृष्टमनेन दृष्टा० इनि। संसृष्टभ्रात्रादौ

संस्कर्त्तृ त्रि०सम्+कृ-तृच्-सुट् च। १संस्कारकारके २पाचके च "संस्कर्त्ता चोपहर्त्ता च खादते घातकाः स्मृताः" मनुः।

संस्कार पु० सम्+कृ-घञ् सुट् च। धृतोद्गुणान्तराधानरूपे १मतिभेदे यथा अलङ्कारादेरलङ्कार्यादेर्वस्त्वादेश्च उद्दीपननिर्भावनार्जनादयः, दर्पणादेर्निर्मलीकरणादिः आत्मादेश्च यज्ञाङ्गतासम्पादनाय वैदिकमार्गेण प्रोक्षणादिः। स च "संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिषु" कुसुमा० शुक्लेः पुरुषस्यैव धर्मः" न्यायमतम्। प्रोक्षितानि एव प्रोक्षयः पुरोडाशाय कल्पन्ते नाप्रोक्षितानि इति प्रोक्षणादिजन्यसंस्कारोयत्राङ्गपुरोडाशेष्विति द्रव्यधर्मः मीमांसकाः। एवं स्नानाचमनादिजन्याः संस्कारा देहे उत्पद्यमाना अपि तदभिमानिजीवे कल्पन्ते इति वेदान्तिनः। २स्मृतिहेतौ अनुभवजन्ये आत्मवृत्तिगुणभेदे बुद्धिव्यादिचतुष्टयस्थे ३वेगाख्ये गुणे, यत्रावस्थिततयावस्थापनप्रयोजके स्थितिस्थापनाख्ये ४गुणभेदे च

"संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने। मूर्त्तमात्रे तु वेगः स्यात् कर्मजो वेगजः क्वचित्। स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि। अतीन्द्रियः स विज्ञेयः क्वचित् स्यन्देऽपि कारणम्। भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः। उपेक्षानात्मकत्वस्य निश्चयः कारणं भवेत्। स्मरणे प्रत्यभिज्ञायामयमेव हेतुरुच्यते" भाषा० "नित्यः संस्कारो नास्ति वेगस्तु द्विविधः कर्मजवेगजभेदात् तत्र शरादौ नोदनजनितेन कर्मणा वेगो जन्यते तेन च पूर्वकर्मनाशादुत्तरं कर्म एवमुत्तरोत्तरमपि कर्म जायते। वेगं विना कर्मणः कर्मान्तरानुजनकत्वात् पूर्वकर्मनाशे उत्तरकर्मोत्पत्तिश्च न स्यात्। यत्र वेगवता कपालेन जनिते घटे वेगो जन्यते तत्र

वेगजो वेगः। स्थितिस्थापकसंस्कारस्वतीन्द्रियः आकृष्टशाखादीनां परित्यागे यत् पूर्वदेशगमनं तत्र स्थितिस्थापकोहेतुः उपेक्षानाल्पकनिश्चयेन भावनाख्यसंस्कारो जन्यते स च स्मरणे प्रत्यभिज्ञायां च हेतुः जीवद्वृत्तिरतीन्द्रियश्च स च चरमफलनाश्यः क्वचित् रोगादिनाश्यः क्वचित् कालनाश्यः" सि॰सु॰ अन्ये तु समानविषयकं स्मरणमेव संस्कारनाशकम् अतएव "जायते च पुनः-पुनःस्मरणाद्दृढतमसंस्कारः" इति दीधितिकृत् इत्याहुः।

संस्कारार्थं तु न जातिरिति चक्रकादौ व्यवस्थापितम्। मुखात्प्रश्वासजन्यव्युत्पत्तौ, व्याकरणोक्तदिशा शब्दानां ह्येधनप्रकारे, विप्रादीनां वैदिककर्महेतुत्वप्रयोजके उगर्भाधानादौ क्रियाकलापे ८पाके च। विप्रादीनां देहसंस्काराश्च अष्टचत्वारिंशत् नक्षत्रे ५१० पृ॰ दर्शिताः। इदानीन्तनानां तु गर्भाधानाद्यविवाहान्ताः दशविधाः प्रसिद्धाः। तेषां च देहदोषनाशकता यथोक्तं हारीतेन "गर्भाधानवदुपेतो ब्रह्मगर्भं संदहति पुंसवनात् पुंसीकरोति क्षत्रस्थापनात् मातापितृजपाप्रानप्रोक्षति रेतोरक्तयभोपघातः पञ्चमुणो जातकर्मणा प्रथमप्रोक्षति नामकरणेन द्वितीयं प्राशनेन तृतीयं चूड़ाकरणेन चतुर्थं व्रतापनेन पञ्चमभेतैरष्टाभिः संस्कारैर्गर्भोपघातात् पूतो भवति"। "व्रतापनं समावर्त्तनम्" अपनयनस्य वेदपठनार्थत्वम् विवाहस्याग्निसाध्यस्मार्त्तकार्यार्थत्वमितिविवेकः अग्नौ दशविधाः। "गर्भाधानमृतौ पुंसः करणं स्यन्दनात् पुरा। षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म च। षष्ठ्येकादशे नाम चतुर्थे मासि निष्क्रमः। षष्ठेऽन्नप्राशनं मासि चूड़ा कार्या यथाकुलम्। वृषभेनः शमं याति बीजगर्भसमुद्भवम्" याज्ञ॰। अत्र जातकर्मनिष्क्रमायधिकौ संस्कारौ बीजादिदोषनिवारकतयोक्तौ। अग्निस्थापनार्थश्च पञ्चविधः भूसंस्कारः प्रोक्षो दर्शितः ते च भूमूलनसमुल्लेपनसम्मार्जनं सिकतोल्लरणमभ्युक्षणञ्चेति।" दीक्षणीयतात्त्विकयज्ञसंस्काराश्च द्विविधाः दीक्षान्त॰ दर्शिता यथा

भारद्वाजः "मन्त्राणां दश कथ्यन्ते संस्काराः सिद्धिदायिनः। जननं जीवनं पश्चात्ताड़नं बोधनं तथा। अथाभिषेको विमलीकरणाप्यायने तथा। तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः। मन्त्राणां साधकायत्नाद्दुःखारो जननं स्मृतम्। प्रणवान्तरितानु कृत्वा मन्त्रवर्णान् लिखेत् सुधीः। एतच्छीघ्रबोधित्याद्यर्थमन्त्रतन्त्रविशारदाः। मन्त्रवर्णान् समालिख्य ताड़येच्चन्दनाम्भसा। प्रत्येकं वायुना मन्त्री ताड़नं बहुदाहृतम्"। वायुना वायुबीजेन "यमित्यनेन तं मन्त्री प्रक्षुण्णैः करवीरजैः। तन्मन्त्राक्षरसंख्यातैर्हन्याद् यात्नेन बोधनम्४"। यात्नेन रभसेनेति "स्वतन्त्रोक्तविधानेन मन्त्री मन्त्राणां संख्यया। अवश्यपल्लवैर्मन्त्रमभिषिञ्चेद्विशुद्धये। स्वतन्त्रोविधानेन मूर्द्ध्नि तोयेन देशिकः। नमोऽन्तं मन्त्रसंख्यार्द्धं तदन्ते देवताभिधाम्। द्वितीयान्तामहं पश्चादभिषिञ्चामस्येन तु। तोयैरञ्जलिपद्मैर्वाप्यभिषिञ्चेत् स्वमूर्द्धनि"। स्वतन्त्रोक्तविधानेन पुरश्चर्याप्रकरणोक्तविहिताञ्जलिना इत्यभिहितेन "संचिन्त्य मनसा मन्त्रं ज्योतिर्मन्त्रेण निर्दहेत्। मन्त्रे मलत्रयं मन्त्री विमलीकरणाह्वयम्"। मलत्रयं मायिकं कार्मिणं मानसरूपम् "तारव्यामाग्निसप्तयुग्दन्तो ज्योतिर्मनुर्मतः"। तारः प्रणवः व्यामः हकारः अग्नीरेफः सप्तरौकारः तदुयुक्तोदन्तोऽनुस्वारः। तेन ओम् ह्रौं इतिमन्त्रः। "क्षयोदयेन मन्त्रेण प्रत्यर्णं प्रोक्षणं मनोः"। प्रत्यर्णं प्रत्यक्षरम् "तेन मन्त्रेण विधिवदेतदाप्यायनं७ मतम्। मन्त्रेण वारिणा मन्त्रतर्पणं तर्पणं८ मतम्"। मन्त्रेण मूलमन्त्रेण। "मूलमन्त्रं समुच्चार्य तदन्ते देवताभिधाम्। द्वितीयान्तामहं पश्चात्तर्पयामि नमोऽन्तकम्"। इति पुरश्चर्योक्तक्रमेण लिखितमन्त्राधारकुपयन्त्रे। "तारमायारमायोगमनोदीपनदंशयते"। तारः ओम् माया ह्रीं रमा श्रीम् "अध्यमानस्य मन्त्रस्य गोपनं१०न्त्रकायनम्। संस्कारा दशसंख्याताः सर्वतन्त्रेषु गोपिताः। यान् कृत्वा सम्यदायार्हं मन्त्री वाञ्छितमश्नुते"।

देवप्रतिष्ठाङ्गसंस्काराश्च देवताप्रतिष्ठाशब्दे ३७२३पृ॰ दृश्याः। अन्येऽपि तत्तत्कर्त्तव्यसंस्काराश्चतत्तद्ग्रन्थे द्रष्टव्याः।

संस्कारवर्जित त्रि॰ ३त॰। १गर्भाधानादिसंस्कारहीने २शास्त्रादौ व्युत्पत्तिहीने च संस्कारहीनादयोऽत्र।

संस्कृत त्रि॰ सम्+कृ-क्त क्वट् च। १कृतसंस्कारे पदार्थे व्याकरणतत्तत्त्वाधीनसाधनयुक्ते २शब्दे ३पक्के ४भूषिते ५शास्त्रभेदे मेदि॰ ६योषिते जटा॰।

संस्कर पु॰ सम्+कृ-अप्। १यज्ञे २शब्दजन्ये हेमच॰ ३पञ्चभादिरचितग्रन्थायां च "नवपल्लवसंस्करे यथेति" कुमारः

संस्तव पु॰सम्+स्तु-अप्। १परिचये अमरः २सख्यकृस्तुतौ च

संस्राव पु॰ संस्रूयतेऽत्र सम्+स्रु-घञ्। यज्ञार्थं संस्रावकविप्राणां वासभूमौ अमरः।

संसुत त्रि० सम्+सु–क्त । १परिचिते २सम्यक्स्रुते च ।

संस्थाय पु० सम्+स्थै–घञ् । १संघाते २निविड़संयोगरूपे सन्निवेशे अमरः । ३विस्तृतौ ४संस्थाने च मेदि० करणे घञ् । ५गृहे हेमच० ।

संस्थ त्रि० सम्+स्था–क । १अवस्थिते मेदि० २स्थिते शब्दर० ३चरे पु० मेदि० ४निवारके ५व्यवस्थिते ६व्यक्तौ ७क्रतुप्रकारभेदे ८समाप्तौ च हेमच० । ९प्रकारे "नैमित्तिकः प्राकृतिको नित्य आत्यन्तिकोलयः । संस्थेति कविभिः प्रोक्तश्चतुर्धाऽस्य स्वभावतः" इत्युक्ते १०प्रलये च ।

संस्था स्त्री सम्+स्था–अङ् । १न्यायपथावस्थितौ अमरः । २स्थितौ ३नाशे मेदि० ४यज्ञभेदे ५व्यवस्थायां ६व्यक्तौ ७चतुष्टये ८प्रान्ते च ।

संस्थान न० सम्+स्था–ल्युट् । १चतुष्पथे अमरः । २सन्निवेशे मेदि० ३आकारे ४अवयवारम्भकसंयोगभेदे ५स्थित्यौ ६चिह्ने अजयः । ७सम्यक्स्थितौ च ।

संस्थित त्रि० सम्+स्था–क्त । १मृते अमरः २सम्यक्स्थिते च

संस्पर्शा स्त्री संस्पृश्यते सम्+स्पृश–कर्मणि घञ् टाप् । रज्जौ गन्धाढ्ये अमरः ।

संस्फाल पु० सम्यक् स्फालः स्फुरणं यस्य । मेघे त्रिका० ।

संस्फुट त्रि० सम्+स्फुट–क । विकसिते शब्दच० ।

संस्फेट न० सम्+स्फुट–आधारे घञ् पृषो० । युद्धे भरतः

संस्फोट पु० सम्+स्फुट–आधारे घञ् । युद्धे अमरः ।

संहत त्रि० सम्+हन–क्त । १दृढसन्धौ अमरः । २मिलिते ३दृढे मेदि० । ४परार्थं मिलिते "संहतपरार्थत्वादिति" साङ्ख्यसू० । ५दृढसंयोगयुक्ते ६सम्यग्हते च । भावे क्त । ७संघाते न० । [स्तिपाखिदये अमरः ।

संहतल पु० संहतं संहननं सङ्घातं लाति–ला–क । मि-

संहतपुष्पिका स्त्री संहतानि दृढसंयुक्तानि पुष्पाण्यस्याः कप् अत इत्त्वम् । मिश्रेयायां राजनि० ।

संहतजानु त्रि० संहते जानुनी यस्य । लग्नजानुके अमरः वा कप् । तत्रार्थे ।

संहति स्त्री सम्+हन–क्तिन् । १समूहे अमरः । २सम्यग्हनने च । [देहे अमरः २सङ्घाते ३बले च ।

संहनन न० संहन्यते परार्थं संहन्यते सम्+हन–ल्युट् ।

संहर्ष पु० सम्यक् हर्षः प्रा० स० सम्+हृष–घञ् वा । १आनन्दे २सम्भोगाद्य संहृष्यत्यनेन करणे घञ् । ३रोम्णां भेदि० ।

संहार पु० सम्+हृ–घञ् । १प्रलये हेमच० २नाशे ३संक्षेपे ४नरकभेदे अमरः । ५विसर्जने ६कालिकाभैरवभेदे च शटा० । "अस्थिताङ्गोरुजङ्घश्च खड्गः क्रोध उन्मत्त एव च । कपाली भीषणश्चैव संहारश्चाष्ट भैरवाः" तन्त्रसा० ।

संहारमुद्रा स्त्री संहारार्था विसर्जनार्था मुद्रा । तन्त्रोक्ते मुद्राभेदे तल्लक्षणम् "अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकम् । चित्वाङ्गुलीरङ्गुलीभिः संदंश्य परिवर्त्तयेत् । प्रोक्ता संहारमुद्रैवमर्पणे तु प्रयुज्यते" पदार्थो० धृतवाक्यम् । अर्पणे आत्मनि देवार्पणे" ति० त० ।

संहिता स्त्री सम्यक् हितं प्रतिपाद्यं यस्याः । १सन्धादिप्रणीते धर्मशास्त्रे २पुराणे ३इतिहासादौ ४धर्मकाण्डप्रतिपादके वेदभागे च संहितापाठप्रकारस्तु ति० त० सप्तश्लोकोक्तः चण्डीशब्दे २८५० पृ० दर्शितः । "परः सन्निकर्षः संहिता" पा० उक्ते ५पूर्वापरवर्णयोः अत्यन्तसन्निकर्षे तत्र नित्यसविशेषः स्यात् "संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते" । [अमरः ।

संहति स्त्री सम्+हन–क्तिन् । बहुभिः कृते आहानने

संहत त्रि० सम्+हृ–क्त । १क्षतसंहारि २सङ्कुचिते च ।

संहति स्त्री० सम्+हृ–क्तिन् । संहारे ।

संह्राद पु० सम्+ह्लद–घञ् । शब्दभेदे ।

संह्रादिन् त्रि० सम्+ह्लद–णिनि । शब्दायमाने ।

संह्लाद पु० सम्+ह्लद–घञ् । आनन्दभेदे ।

सकण्टक पु०सह कण्टकेन बहुव्री० स० । १करञ्जभेदे (नाटाकरमचा) रत्नमा० । २शैवाले शब्दच० । ३कण्टकयुक्ते त्रि०

सकर्ण त्रि० सह कर्णेन श्रवणेन तद्व्यापारेण वा । १श्रुतिशीले शटा० २कर्णयुक्ते च ।

सकर्मक त्रि० सह कर्मणा सहस्य सः कप् । व्याकरणोक्ते कर्मयुक्तक्रियाबोधके धातौ "फलव्यापारयोरेकनिष्ठतायामकर्मकः । धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः" इत्युक्तदिशा धातोः सकर्मकत्वमवसेयम् ।

सकल त्रि० सह कलया अवयवमात्रया चतुष्षष्ट्या कलाभिर्वा सहस्य सः । १समग्रे २समस्ते अमरः ३कलायुक्ते च

सकारण त्रि० सह कारणेन । कार्य्ये । [अन्तिके समीपे ।

सकाश पु० कशन प्रोक्षणं काशः कश–घञ् सह काशेन ।

सकुरुण्ड पु०सह समानः कुरुण्डेन । वाल्कलवस्त्रे राजनि०

सकुल पुंस्त्री० सह समानं कुलमस्य । १समानकुलमात्रे (शब्द) स्त्रीत्वे ङीप् । २समानमंशे त्रि० ।

सकुल्य त्रि० समाने कुले भवः यत् । अधोक्षजविषये आगम० व्यूहोपलक्षणादप्युक्तम्यास्ते "दशाक्षेण हविष्यस्य सकुल्यानि

मेनस्कृतके । त्रिरात्रेण सकृत्स्नास्तु स्नाता शुध्यन्ति बान्धवाः" हरिः । सपिण्डशब्दे दृश्यम् । [अन्ये ।

सकृत् अव्य० एक+कृ० । १एकवारे अमरः । २विधायां स्त्री

सकृत्प्रज पुंस्त्री० सकृत् एकवारं प्रजायते प्र+जन–ड । १काके अमरः स्त्रियां ङीष् । २एकवारजातापत्ये च ।

सकृत्फला स्त्री सकृत् फलति फल–अच् । कदलीवृक्षे राजनि०

सकृद्गर्भ पु० सकृद् गर्भो यस्य । खेसरे राजनि० एकवार गर्भयत्यां स्त्रियां स्त्री ।

सकृद्वीर पु० कर्म० । एकवीरवृक्षे राजनि० ।

सक्त त्रि० सञ्ज–क्त । १आसक्ते २अविरते च हेमच० ।

सक्तु पु० सञ्ज–क्तु किच्च । भक्ष्यविशेषे (छातु) शब्दच० "मेषाटौ सक्तवो देया वारिपूर्णा च गर्गरी" तिथितः ।

सक्तुफला(ली) स्त्री सक्तव इव क्षुद्राणि फलान्यस्याः वा ङीष् । शमीवृक्षे अमरः ङीवन्तः तत्रार्थे शब्दर० ।

सक्थि न० सञ्ज–क्थिन् । १ऊरौ अमरः २शकटावयवभेदे च वर्गादि० । वहु० खाङ्गे अच्–समा० । सगसक्थ इत्यादि । [इन्द्रियत्वेऽपि त्वादिधर्मः ।

सक्थ्यण्डोपाधि पु० कर्म० । वस्तुपदार्थघटिते धर्मे यथा

सखि त्रि० सह समानं ख्यायते ख्या–डिन् नि० । सौहार्दयुक्ते अमरः । सख्यौ सख्या सख्युरित्यादि ।

सखी स्त्री सखि+स्त्रीत्वे ङीष् । १सहचर्यां हेमच० २वयस्यायाम् अमरः ।

सख्य न० सख्युर्भावः यत् । १मित्रतायां २सौहार्दे च ।

सगन्ध पु० सह गन्धेन लेशेन वा सहस्य सः । १ज्ञातौ त्रिका० २गन्धयुते त्रि० ।

सगर पु० सह गरेण विषेण जातः । १खर्वंशे नृपभेदे "सगरात् सागरोजातः" इति पुराणम् । स च बाहुनामराजतः यादव्यां जातः ततसपत्न्या गरदानेऽपि स न ममार ततकथा "तस्या (और्व्या) अमे च सा गर्भं सुषुवे ज्वलनप्रभम् । व्यजायत महाबाहुगरेणैव सह द्विज ! । सगरो नाम तेनासीत् बालकोऽतिमनोहरः" पद्मपु० १३अ० । २विषयुक्ते त्रि० ।

सगर्भ पु० सह समानो गर्भोऽस्य । १सहोदरे भ्रातरि शब्दर० । सह गर्भेण । २गर्भयुक्ते मध्यवर्त्तिक्षुद्रशस्यपत्रयुक्ते कृष्णदूर्वादौ त्रि० स्त्रियां टाप् । [भ्रातरि ।

सगर्भ्य पु० समाने गर्भे भवः यत् सहस्य सः । सहोदरे

सगोत्र न० सह समानं गोत्रम् सहस्य सः । १कुले शब्दच० सह समं गोत्रमस्य । २ज्ञातौ त्रि० अमरः ।

सङ्घि स्त्री अद्–क्तिन् नि०सह सन्ध्या सहस्य सः । सहभोजने अमरः ।

सङ्कट त्रि० सम्+कटच् सम्+कट–अच् वा । १अल्पावकाशे स्थाने अमरः । २संबाधे २दुःखे "नरोसुच्येत सङ्कटादिति" देवीमा० । ४देवीभेदे स्त्री ज्योतिषोक्ते दशाभेदे च स्त्री टाप् । दशाशब्दे ३४८४पृ० दृश्यम् ।

सङ्कथा स्त्री सम्+कथ–भावे अ । परस्परकथने हेमच० ।

सङ्कटाक्ष पु० सङ्कटं संबाधमक्षति अक्ष–अण् । धववृक्षे त्रिका०

सङ्कर पु० सम्+कृ–कर्मणि अप् । १सम्मार्जन्यादिभिः क्षिप्ते रजसि अमरः । इतरजातिपुरुषेण इतरजातिस्त्रियां २जाते जातिभेदे । भावे अप् । ३मेलने ४परस्परावच्छेदाधिकरण्ये सत्येकाधिकरणवृत्तित्वे च स च जातिबाधकः । "अक्लेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितः । रूपहानिरसंबन्धो जातिबाधकसंग्रहः" सि० मु० । यथा भूतत्वाभावत्वति मनसि मूर्त्तत्वस्य सत्त्वात् मूर्त्तत्वाभावत्वति च गगने भूतत्वस्य सत्त्वात् भूम्यादिभूतचतुष्टये चोभयोः सामानाधिकरण्यात् तयोर्न जातित्वम् । वर्णसङ्करजातिश्च नानाविधा दिङ्मात्रमत्रोच्यते "ब्रह्मक्षे सङ्करजात्यादि इत्युपक्रमे "विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां, विशः स्त्रियाम् । जातोऽम्बष्ठस्तु शूद्रायां निषादः पार्शवोऽपि च" इत्यादि गरु० ६६अ० । "स्त्रीषु प्रलोमासु वर्णेभ्य ! जायते वर्णसङ्करः" गीता । ५अलङ्कारभेदे अलङ्कारशब्दे ४०५पृ० दृश्यम् । ६संसर्गे स्पर्शादिसम्बन्धे चण्डालादिसङ्करे भवनादिदहनादि तत्र च प्रायश्चित्तादि प्रा०वि० उक्तं यथा

"अथ चाण्डालसङ्करप्रायश्चित्तम् । तत्र व्यासः "चाण्डालसङ्करेषु भवनदहनं पूरणं सर्वभाण्डभेदनं दारशाणास्तत्रणं शङ्खशुक्तिरजतचेलानामद्भिः प्रक्षालनं कांस्यताम्रायाणामाकरशुद्धिः सौवीरपयोदधितक्राणां परित्यागः जेघरसवसदृव्यरत्नं गोमूत्रयावकाहारो मासं जपयेत् बालवृद्धस्त्रीणामर्द्धं प्रायश्चित्तम् आमोऽशादूबालः सप्तरात्रं स्थविरः पौर्णं प्रायश्चित्ते ब्राह्मणभोजनं गोशतञ्च दद्यादभावे सर्वस्वम्" । पूरणं पूर्वस्थितिकाकर्षणेन स्थितिकान्तरदानम् तत्रणं क्षारादिनायोजनम् भाण्डभेदनं मृण्मयभाण्डभेदनम् । आकरे अग्नाविति यैः अग्निसंयोगात्तत्क्षारादीनामुत्पत्तेः । जेघरसवसनां लाक्षादीनां यवसदृव्याणां च धान्यानां रत्नम् । तथा च पराशरः "आकरे तु भवेच्छुद्धिरारकूटे सकार्षं

स्के । जलशौचन्तु वस्त्राणां परित्यागस्तु मृण्मये । कुसुम्भगुड़कार्पासलवणं सह सर्पिषा । द्वारि कुर्वीत धान्यानि गृहे दद्याद्धुताशनम् । घृताक्तज्वालासंस्पृष्टं शुचि तन्मनुरब्रवीत्" । तेन रज्जुघृतादीनाम् अग्निज्वालापवित्रीकृतानां कर्त्तव्यम् । एतच्च प्रायश्चित्तं सद्यःपातहेतुयौनादिवर्जितैः संसर्गैर्ज्ञानतो यावता कालेन पातित्यं भवति यज्ञानतस्तावत्कालसंसर्गे सति वेदितव्यम् इति तेन संवत्सरैकचाण्डालसम्बन्धे मासैकगोमूत्रयावकाहारः कर्त्तव्यः । अनेन च द्वादश धेनवो मासोपवासात् पञ्चमभागापकर्षात् । गोशतञ्च दक्षिणा । एतच्च प्रायश्चित्तं ब्राह्मणक्षत्रियविषयं तुल्यमेव । तथा चापस्तम्ब:"अन्यजातिरविज्ञातो निवसेद् यस्य वेश्मनि । स वै ज्ञात्वा तु काले तु कुर्य्यात्तत्र विशोधनम् । चान्द्रायणं पराकं वा द्विजातीनां विशोधनम् । प्राजापत्यन्तु शूद्राणां तथा संसर्गदूषणे । यैस्तत्र भुक्तं पक्वान्नं कृच्छ्रं तेषां विधीयते । तेषामपि च यैर्भुक्तं तदर्द्धं तेषु विद्यते । तेषामपि च यैर्भुक्तं कृच्छ्रपादो विधीयते । कूपैकपानदुष्टानां तथा संसर्गदूषणे । उपवासेन शुद्धिः स्यात् पञ्चगव्येन चैव हि । बालापत्या तथा रोगी गर्भिणी वृद्धएव यः । तेषां नक्तं प्रदातव्यं बालानां प्रहरद्वयम् । अथवा क्रियमाणे तु येषामार्त्तिः प्रदृश्यते । तेषं सम्पादयेत्तेषां विपत्तिर्न भवेत् यथा" । तत्र पूर्वोक्तकालादल्पकालसङ्करे चान्द्रायणम् । स्वल्पतरे पराकः । शूद्रस्य प्राजापत्यम् । कूपैकपानदुष्टानामिति एकस्मिन्नेव कूपे द्विजानां चाण्डालादीनां सहजलपानं कुर्वतां संसर्गदुष्टानां सोपवासपञ्चगव्यं विशोधनमित्यर्थः । संवर्त्तः "चाण्डालसङ्करे विप्रः श्वपाके पुक्कसेऽपि वा । गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति । एतदपि स्वल्पकालसङ्करविषयं मासार्द्धयावकाहारापवृत्तौ षड्धेनवः । स्मृत्यन्तरे "अगम्यागमनस्लेच्छचाण्डालसम्पर्केषु कृच्छ्रत्रयम्" । एतदत्यन्तस्वल्पकालविषयं कृच्छ्रत्रयावृत्तस्य धेनुत्रयम् । तथा "अविज्ञातस्तु चाण्डालो निवसेट् यस्य वेश्मनि । विज्ञाते तूपसंन्यस्य द्विजाः कुर्युरनुपक्रमम्" इत्युपक्रम्याह पराशरः "दधिसर्पिःपयो भुक्तं यदा गोमूत्रयावकम् । भुञ्जीत सह भृत्यैस्तु त्रिरात्र्यवरगाहणम् । भावदुष्टं न भुञ्जीत भोक्तव्यं गोरसन्तु तम् । त्रिपलं क्षीरदोषे च पलमेकन्तु सर्पिषः" । तथा "स पूतां सह भृत्यैश्च कुर्याद्ब्राह्मणभोजनम् । अनड्वत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम्" । दधिसर्पिःपयो भुक्तं यदा गोमूत्रयावकं द्वादशाहं भुञ्जीतेत्यर्थः । तत्र परिमाणमेतेषाम् उक्तयाज्ञवल्क्यादिवचनेषु । चर्मकारादीनामविज्ञाते सङ्करे तु चाण्डालसङ्करप्रायश्चित्तस्य षष्ठो भागः कर्त्तव्यः चाण्डालस्पर्शप्रायश्चित्ताच्चर्मकारादिस्पर्शे प्रायश्चित्तस्य षष्ठभागदर्शनात् । यथा स्वल्पयमः "चाण्डालैः श्वपचैः स्पृष्टो विण्मूत्रे च कृते द्विजः । त्रिरात्रं सम्पुटं कुर्वीत जग्ध्वोच्छिष्टः षडाचरेत्" । चर्मकारादिस्पर्शे तु संवर्त्तः "एतैः स्पृष्टस्तयोच्छिष्ट एकरात्रं पयः पिबेत्" देवलः "चाण्डालसंयोगे जातश्चाण्डाल एव स्यात् ब्रह्महत्यौहिष्टं प्रायश्चित्तं वार्षिकं षाण्मासिकं कृच्छ्रं वा ब्राह्मणस्य । चतुस्त्रिद्व्येकमासाः शेषाणाम्" । अविज्ञातचाण्डालसम्पर्के विद्यमान एव दम्पत्योः संयोगे यो जातो ब्राह्मणः स वार्षिकं ब्रह्महत्याव्रतं प्राजापत्यं वा षाण्मासान् कुर्य्यात् वार्षिकब्रह्महत्याव्रतापवृत्तौ षड्धेनवो देयाः । षाण्मासिकब्रह्महत्याव्रतापवृत्तावर्धोत्यर्धः । अस्पृश्यस्पर्शनप्रायश्चित्तमभिहितमिदानीं स्पर्श एव निरूप्यते । किं मात्रात् स्पर्श एव स्पर्शशब्दस्यार्थः उत परम्परास्पर्शोऽपि न प्रथमः परम्परया चाण्डालस्पर्शे ज्ञानाद्यभावप्रसङ्गात् नापि द्वितीयः संयोगे संयुक्तसंयोगे चैकस्पर्शपदप्रवृत्तिनिमित्ताभावात् आकाशादिद्वारेण सर्वेषामेव तत्सम्भवाच्च किञ्चैवम् "औडुम्बरीं सर्वां वेष्टयितव्यां औडुम्बरीं सृष्ट्वोद्गच्छेत्" इत्यत्र स्पर्शवेष्टनस्पर्शयोरविरोधः स्यात् उपस्पर्शस्यापि स्पर्शशब्दवाच्यत्वात् तथा च विरोधाधिकरणोदाहरणं भाष्यकारस्याप्रसङ्गतं स्यात् । तथा च दक्षयातातपः "अशुचिं संस्पृशेद् यस्तु एक एव स दुष्यति । तत्स्पृष्टोऽन्योन दुष्येत सर्वदूष्येष्वयं विधिः" । "तथा संहतानान्तु पाणां यद्येकस्पहन्यते । तस्यैव शोधनं प्रोक्तं न तत्स्पृष्टिनामपि" । उच्यते । सत्यम् उपस्पर्शो यद्यपि न स्पर्शशब्दार्थस्तथाप्यत्र वचनादेकावयवविदारकपरम्परापि स्पर्शोऽपि चाह्यः । तथा चापस्तम्बः "एकशाखां समारूढश्चाण्डालादिर्यदा भवेत् । ब्राह्मणस्तत्र निवसन् ज्ञानेनाशुचितामियात्" । आदिशब्दादुदक्यादीनां ग्रहणम् । शाखाग्रहणमेकावयवव्युपलक्षणार्थं तेनैकशाखाद्यारूढग्रहणम् । तथा स एव "एकवृक्षं समारूढो चाण्डालो ब्राह्मणो यदि । कथं भक्षयतस्तस्य प्रायश्चित्तं कथं भवेत् । ब्रह्मपानप्रयुक्ताय सवासाः स्नानमाचरेत् । स-

क्षीरालोडितो भूत्वा पञ्चगव्येन शुध्यति" । तथा स एव "एकशाखां समारूढः फलान्यश्नात्यसौ यदि । प्रायश्चित्तं त्रिरात्रं स्यात् पञ्चगव्यं विशोधनम्" । अत्र व्यवधानसन्निधानाभ्यामेकरात्रत्रिरात्रे । ज्ञानविषयं चेतदुभयम् । तथा च ब्रह्मपुराणम् "विप्रश्चाण्डालसहितो यत्रैकस्मिन् वनस्पतौ । अज्ञानात्तु फलं भुङ्क्ते चरेत्तत्रापमर्षणम्" । उपसर्गत्वात् । "पादं आमाशने तथेति" पूर्वोक्तापस्तम्बेन न विरोधः । तथाचापस्तम्बः "मूढः क्षत्तरे वा संसृष्टान् व्यपयतान् प्रयतो मन्येत" । क्षत्तृक्षत्तरादौ चाण्डालादिभिः सहावस्थितोऽपि स्पृष्टान्नपि तान् प्रयतत्वमात्मनो मूढो मन्येत वस्तुतस्तु अशुचिरेवासौ इति पूर्ववाक्योपात्तं ज्ञानमेव कुर्यात् तथा "तृणकाष्ठादिषु निखातेषु च" । संक्रमादौ निखातेषु तृणकाष्ठेषु चाण्डालेन सहावस्थितोऽप्यशुचिरेव तथा "प्रोक्ष्य वास उपयोजयेत्" । न सचेलं स्नानमित्यर्थः । अयमेव विशेषः साक्षात्स्पर्शादस्य । अतोवचनादेकावयविद्वारा परम्परास्पर्शे स्नानादिकमिति । नौकादिषु न दोष इत्याह पराशरः । "रथ्याकर्दमतोयानि नावः पन्यास्तृणानि च । स्पर्शनान्न प्रदुष्यन्ति पङ्क्तेश्चैकचितानि च" । तृणसमूहः पङ्क्तेश्चैकचितानि मठादीनि । नन्वेवं याज्ञवल्क्यवचनविरोधः तदु यथा "उदक्याशौचिभिः स्नायात् संस्पृष्टस्तैरुपस्पृशेत् । अवलिङ्गानि जपेच्चैव गायत्रीं मनसा स्मरन्" । अत्र परम्परयोदक्यया अशुचिभिश्च स्पर्शे आचमनमवगम्यते । तथा "एवं तत्स्पृष्टिनाञ्चैवेति" मनुवचने तत्स्पृष्टीत्यभिधीयते तदनर्थकं स्यात् चाण्डालादिस्पृष्टस्पृष्टिनोरपि स्नानाभ्युपगमात् "अवस्पृश्युपस्पर्शे सर्वौदकस्पर्शाच्छुद्धिरिति" गौतमविरोधः "अवस्पृशं दिवाकीर्त्तिम्" इत्यादि बृहस्पतिवचन "अवस्पृशञ्च स्पृष्ट्वेत्यादिविष्णुवचनाभ्याञ्च विरोधः स्यात् तच्छब्देन सर्वेषामेव चाण्डालादीनां परामर्शात् एषु सर्वेषु अवस्पृष्टित्वाच्च । उच्यते । एकशाखां समारूढ इत्याद्यापस्तम्बवचनं वर्त्तमानाशुचिसंसर्गिस्पर्शविषयं याज्ञवल्क्यादिवचनञ्चातीतसंसर्गिस्पर्शविषयमित्यविरोधः । अतएव "संस्पृश्याशुचिसंसृष्टं तृतीयं वापि मानवः । हस्तौ पादौ च प्रक्षाल्य तोयेनाचम्य शुध्यति" इति देवलवचनमपि वर्त्तमानाशुचिसंसर्गिस्पृष्टौ मूलाभूताशुच्यभेक्षया तृतीयो भवति तं स्पृष्ट्वा आचमनजातं चतुर्थं नेत्यर्थः । अतीतविषये द्वितीयमेव स्पृष्ट्वाचमनमिति व्यवस्थितविकल्पवाचिवाशब्दार्थः । तृतीयस्पर्शे न किञ्चित् । चाण्डालादिस्पर्शविषयञ्चैतत् अतीतान्त्यजस्पर्शविषये तु द्वितीय एव नाचमनम् । तथा च शातातपः "अशुचिं संस्पृशेद्यस्तु एक एव सदुच्यते । तत्स्पृष्टोऽन्योन दुष्येत्तु सर्वद्रव्येष्वयं विधिः" । एतच्चाशुचिद्रव्याधिज्ञौच्छिष्टस्पर्शविषयमपि । अत्रापि वर्त्तमानान्त्यजसंसर्गिस्पर्शे साक्षात्स्पर्शे द्वयोरप्याचमनमेवेति सर्वमुपपन्नम्" ।

पराशरेणात्र कश्चिद्विशेष उक्तो यथा "उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथञ्चन । अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् । मार्जनोपाञ्जनैर्वैश्च प्रोक्षणेन च पुस्तकम् । सम्मार्जनेनाञ्जनेन सेकेनोल्लेखनेन च । दाहेन च भुवः शुद्धिर्वासोनाध्येय वा गवाम्" । अत्रापि लघुगुरुसंसर्गविषयभेदात् व्यवस्था । "नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम् । ब्राह्मणान्तरितं भोज्यमाकराः सर्व एव हि" ।

सङ्करी स्त्री सङ्कीर्य्यते सम्+कृ-कर्मणि च गौरा० ङीष् । नवदूषितकन्यायां मेदि० ।

सङ्करीकरण न० सङ्करः क्रियतेऽनेन च्वि+कृ-करणे ल्युट् । पापभेदे तत्स्वरूपप्रायश्चित्तादिकं प्रा०वि० दर्शितं यथा

"अथ सङ्करीकरणापात्रीकरणमलावहप्रायश्चित्तम् । तत्र मनुः "खरोष्ट्रास्वश्वगेभानामजाविकवधस्तथा । सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च । निन्दितेभ्यो धनादानं वाणिज्यं भृतसेवनम् । अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम् । क्रमिकीटवयोहत्यामद्यानुगतभोजनम् । फलैधःकुसुमस्तेयमधैर्य्यञ्च मलावहम्" । मद्यानुगतभोजनं मद्यपानसमये यदुपस्थापितं फलमूलादि । अधैर्य्यं गौतमश्रवणादि "अल्पेऽप्यचये अत्यन्तवैरक्त्यमिति" कल्पतरुः । "सङ्करापात्रकृत्यासु मासं शोधनमैन्द्रवम् । मलिनीकरणीये तु तप्तः स्यात् यावकस्त्र्यहम्" । तथा विष्णुः "आत्मारण्यानां पशूनां हिंसा सङ्कीर्णकरम् । सङ्कीर्णकरणं कृत्वा मासमश्नीत यावकम् । कृच्छ्रातिकृच्छ्रमथ वा प्रायश्चित्तन्तु कारयेत् । निन्दितेभ्यो धनादानं वाणिज्यं कुशीदजीवनम्" । असत्यं भृतसेवनमित्यपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुद्ध्यति । "अतिकृच्छ्रेण वा भूयोसान्तपनेन वा" । "पक्षिणां जलचराणाञ्च घातनं क्रमिकीटघातनं मद्यानुगतभोजनमिति मलावहानि" "मलिनीकरणीये तु तप्तकृच्छ्रं सु-

आचरेत् । कृच्छ्रातिकृच्छ्रमय वा प्रायश्चित्तं विशोधनम्" । अत्र सङ्करीकरणे सक्रतृकरणे मासयावकम अभ्यासे कृच्छ्रातिकृच्छ्रम् । अत्यन्ताभ्यासे चान्द्रायणम् । अपात्रीकरणे च सक्रतृकरणे तप्तकृच्छ्रं चतुरहसाध्यम् । शीतकृच्छ्रो वा शीतकृच्छ्रे तप्तकृच्छ्रेतिकर्त्तव्यतैव किन्तु तदेव द्रव्यमत्र शीतलमिति विशेषः । अभ्यासे तु महासान्तपनम् अत्यन्ताभ्यासे चान्द्रायणम् । अज्ञानतश्चेत् तु सक्रदाचरणे तप्तकृच्छ्रयावकम् अभ्यासे तु तप्तकृच्छ्रम् अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रमिति यथायोग्यमूह्यम् । एषु च सर्वेषु यत्र यत्र प्रायश्चित्तविशेषो नोक्तस्तत्रैव एष वोढव्यः" ।

सङ्कर्षण पु० संकृष्यते गर्भांत् गर्भान्तरं नीयतेऽसौ सम्+कृष-ल्युट् । १बलदेवे अमरः । तत्कथा हरिवं० ५८अ० "सप्तमो देवकीगर्भः योऽयः सौम्यो ममाग्रजः । स संक्रामयितव्यस्ते सप्तमे मासि रोहिणीम् । सङ्कर्षणात्तु गर्भस्य स तु सङ्कर्षणो युवा । भविष्यत्यग्रजो भ्राता मम शीतांशुदर्शनः" निद्रात्मिकां विष्णुमायां प्रति भगवदुक्तिः । भावे ल्युट् । २आकर्षणे ३स्थानान्तरनयने च न० ।

सङ्कलन न० सम्+कल-ल्युट् । १एकत्रस्थीकरणे २योजने (जिकरैया) लीला० ३संग्रहे च ।

योजनं च नानासङ्ख्याकचकाङ्कानामेकसङ्ख्यापादकाङ्ककरणं तच्च द्विविधं शुद्धसङ्कलनं भिन्नसङ्कलनञ्च तत्र शुद्धसङ्कलनं तु "कार्य्यः क्रमादुत्क्रमतोऽथ वाङ्कयोगो यथास्थानमथान्तरं वा" लीला० उक्त्या यथास्थानम् एकादिस्थाने एकाद्यङ्कयोग एव दशगतादिस्थाने दशगताद्यङ्कयोगः । भिन्नसङ्कलनञ्च छेदसहिताङ्कयोजनम् । तत्रांशसमवर्णनं तत्रोक्तं यथा "अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवम्" ।

न्यासः $\frac{२}{१}\ \frac{१}{५}\ \frac{१}{२}$ समच्छेदे जातम् $\frac{४५}{१५}\ \frac{३}{१५}\ \frac{५}{१५}$

"योगोऽन्तरं तुल्यहरांशकानां कल्प्यो हरो रूपसहार राशेः" इत्युक्तादिशा योजने जातम् ५३/१५ एवं प्रभागभागानुबन्धभागापवाहेषु समच्छेदकरणं तत्र द्रष्टव्यम् ।

सङ्कलित त्रि० सम्+कल-क्त । १योजिते २रेखादिना संहते अमरः । ३संगृहीते च भावे क्त । ४संयोजने न० ।

सङ्कलितैक्य न० ६त० । "सैकपदघ्नपदार्द्धं सयैकाद्यङ्कयुतिः किल सङ्कलितैक्यम्" लीला० उक्ते एकाद्यङ्कानां योगे

सङ्कल्प पु० सम्+कृप-घञ् गुणे रस्य लः । १व्यापारसिद्धये (इदमित्थमेव कार्य्यम्) इत्येवंरूपे मनसोव्यापारभेदे अमरः । २कर्मसाधनाय अभिलाषवाक्ये "सङ्कल्पेन विना राजन् ! यत् किञ्चित् कुरुते नरः । फलस्याल्पाल्पकं तस्य धर्मस्यार्द्धत्रयो भवेत्" ब्रह्मपु० । धर्मस्य अर्द्धत्रयोक्तेः फलस्याल्पाल्पकत्वमप्यर्द्धपरत्वं युक्तं धर्माधीनत्वात् फलस्य । "आशास्य च शुभं कार्यमुद्दिश्य च मनोगतम् अग्न्युपूजने उक्तम् "मनोगतं शुभफलमाशास्य मनसा सङ्कल्प्य, उद्दिश्य वाचा अभिलप्य, कार्यं कर्मणा उपपाद्यम्" ति०त०रघु० । "मनसा सङ्कल्पयति वाचा अभिलपति कर्मणा चोपपादयति" हारीतः । तत्प्रकारो यथा "शुक्तिशङ्खाश्मचर्मस्थैः कांस्यरूप्यादिभिस्तथा । सङ्कल्पो नैव कर्त्तव्यो रूप्यमयेन कदाचन । दृढौ सौदुम्बरं पात्रं वारिपूर्णं गुणान्वितम् । दर्भत्रयं साग्रमूलं फलपुष्पतिलान्वितम् । जलाशयाराम क्षेत्रे सङ्कल्पे पूर्वदिङ्मुखः । साधारणे चोत्तराग्र ऐशान्यां मिश्रितेच्छलनम्" भविष्यपु० । अत्र बोधलक्षणनिषेधस्तु पात्रान्तरसङ्गावविषयः एकलक्षपरो वा एका०त०रघु० । मानससङ्कल्पस्य द्विविधः भावाभावविषयभेदात् तत्राद्यः मयैतत्कर्त्तव्यमित्येवंरूपः द्वितीयः मयैतन्न कर्त्तव्यमित्येवं रूपः । तत्र पूजादिसङ्कल्पोभावविषय उपवासादिसङ्कल्पोऽभावविषय इति भेदः । व्यास । "सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः । व्रतानियमधर्माश्च सर्वे सङ्कल्पजाः स्मृताः" एका०त० ।

सङ्कल्पजन्मन् पु० सङ्कल्पात् जन्म यस्य । १कामदेवे हला० सङ्कल्पजादयोऽप्यत्र । सङ्कल्पजातमात्रे यज्ञादौ च त्रि०

सङ्कल्पयोनि पु० सङ्कल्पोयोनिरुत्पत्तिकारणं यस्य । कामदेवे "सङ्कल्पयोनेरभिमानभूतमिति" कुमारः ।

सङ्कसुक त्रि० सम्+कस-ऊकञ् । १अस्थिरे अमरः । २मन्दे सि०कौ० ३दुर्बले उणादि० । ४सङ्कीर्णे ५अपवादशीले च संक्षिप्तसा० ।

सङ्कार पु० सम्+कृ-कर्मणि वा० घञ् । १सम्मार्ज्जनादिशिम्रधूल्यादौ शब्दर० । २नवदूषितकन्यायां स्त्री मेदि० गौरा० ङीष् । भावे घञ् । ३अग्निचटत्कारे मेदि० ।

सङ्काश त्रि० सम्यक् काशते काश-अच् । १सदृशे "तरुणादित्यसङ्काशमिति" तन्त्रम् । अत्रार्थे निभादिवदस्य नित्यसमासता । २अन्तिके च विश्वः ।

सङ्किल पु० सम्+किल-क । वञ्जुलवृक्षायां त्रिका० ।

सङ्कीर्ण त्रि० सम्+कृ-क्त । बहुजनसङ्घर्षेण निरवकाशे १स्थाने भरतः । २मिलितनानाजातीये उशना० ३व्याप्ते ४मिश्रिते ५सङ्कटे अजयः । एकत्र ६मिलितयोः परस्

स्वरविजातीययोश्च । इतरवर्णेन इतरवर्णस्त्रियां जाते ७जातिभेदे पु० ८अयुग्मे अमरः । ९मिश्रितरागे सङ्गीत०

सङ्कीर्त्तन न० सम्+कीर्त्त-ल्युट् । १स्तुतौ २देवादेर्नामोच्चारणे ३गानेन देवगुणाद्युत्कीर्त्तने च "श्रीकृष्णरससङ्गीतं वीणाध्वनिसमन्वितम् । कुरु वत्सानुनात्रैव भुञ्जन्तु सुनयः सुराः । गोपीनां वस्त्रहरणं परं रासमहोत्सवम् । ताभिः सार्द्धं जलक्रीड़ां हरेरुत्कीर्त्तनं कुरु । कृष्णसङ्कीर्त्तनस्थाने ये च नृत्यन्ति वैष्णवाः । तेषां पादरजःस्पर्शात् सद्यः पूता वसुन्धरा" नारदपञ्चरात्रम् ।

सङ्कुचित त्रि० सम्+कुच-क्त । १क्तसङ्कोचे २संक्षिप्ते ३अप्रफुल्ले च हेमच० । ४सुप्ते राजनि० ।

सङ्कुल न० सम्+कुल-क । १परस्परपराहते "यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता । माता तु मम वन्ध्यैव पुत्रहीनः पितामहः" इत्येवं वाक्ये अमरः । २परस्परहननरूपे युद्धे ३बन्धुजनादिभिः संबाधेन निरवकाशे स्थाने ४सङ्कीर्णे त्रि० अमरः ।

सङ्केत पु० सम्+कित-घञ् । मनोगतभावव्यञ्जनाय कृते हस्तादिचालनरूपे १व्यापारे (इसारा) त्रिका० । "अव्यक्तशब्दादयमर्थोबोध्यः, अयं शब्दः असुमर्थं बोधयतु वा" इत्येवंशब्दनिष्ठे २अर्थबोधनाशक्तिविशेषे सङ्केतश्च जात्यादिचतुष्के इति वैयाकरणाः ।

"शब्देरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः । चातुर्विध्यादमीषान्तु शब्द उक्तश्चतुर्विधः" काव्यादर्शः । "सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च" हरिः "जातिद्रव्यगुणसम्बन्धैर्मैः सङ्केतवत्तया । जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः" वैयाकरणमतम् शब्दश० उक्तम् । "रूढ़ं सङ्केतवज्ञाम सैव संज्ञेति कीर्त्यते" शब्दश० । शक्तिशब्दे ५०७६ पृ० दृश्यम् । ३प्रियसङ्गमार्थे गुप्तस्थाने च ।

सङ्केतित त्रि० सङ्केतो जातोऽस्य तारः० इतच् । सङ्केतयुते वाच्ये अर्थे "साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः" काव्यप्र० ।

सङ्कोच पु० सम्+कुच-घञ् । बहुविषयकवाक्यस्याल्पविषयकतया १व्यवस्थापने सामान्यशब्दस्य २विशेषपरतायाम् आङ्विः ३जड़ीभावे ४बोधे ५बन्धे च मेदि० । सम्+कुच-अच् । ६मतृणभेदे पुंस्त्री० मेदि० स्त्रियां ङीष् । ७कुङ्कुमे न० अमरः । [तायां रत्नमा० ।

सङ्कोचनी स्त्री सम्+कुच-ल्यु-गौरा० ङीष् । लज्जालुलतायां रत्नमा० ।

सङ्क्रन्दन पु० सङ्क्रन्द्यतेऽनेन सम्+क्रन्द-णिच्-ल्युट् । १इन्द्रे अमरः । भावे ल्युट् । २सम्यक्क्रन्दने न० ।

सङ्क्रामक पु० सङ्क्रामत्यनेन सम्+क्रम-घञ् वा वुञ् । १जलबन्धनस्थाने (साँको) अमरः "आत्मानं सङ्क्रमं कृत्वेति" स्मृतिः । भावे घञ् । २रथ्यादेः राष्ट्रान्तरसञ्चारे धरणिः । "त्रुटेः सहस्रभागो यः स कालो रविसंक्रमः" ति०त० । ३ एकस्मिंस्तिष्ठतस्तुनः तत् स्थानत्यागेनान्यत्रगमने च । [राशयन्तरगमने च ।

सङ्क्रमण न० सम्+क्रम-ल्युट् । १सङ्क्रान्तौ २रथ्यादीनां

सङ्क्रान्त त्रि० सङ्क्रान्तिरस्यास्ति अच्, सम्+क्रम-क्त वा । १सङ्क्रान्तियुक्ते २सङ्क्रमणकर्त्तरि ३प्राप्ते दायरूपेण भर्त्रादित आगते स्त्रिया ४प्राप्तधने च । दायभा० मते स्त्रीणां संक्रान्तधने उपभोगमात्रं तन्मरणे स्वपत्यादिदायादानां तद्धनम् "भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्धमाप्नुयुः" कात्या० वचनात् । मिता० मते स्वदायादानामिति विवेकः ।

संक्रान्ति स्त्री सम्+क्रम-भावे क्तिन् । संक्रमणशब्दार्थे संक्रान्तिपदार्थरविसंक्रान्तिनामभेदफलभेदादि शु० चि० पी०धा० निरूपितं यथा

"घोरा१ऽर्कसंक्रमणसम्भवो हि मूढान्, ध्वाङ्क्षी२ विषो, लघुविधौ च चरर्क्षभौमे । चौरान्, महोदरयुता३ नृपतीन्, क्षमैत्रे मन्दाकिनी४ स्थिरगुरौ सुखयेच्च, मन्दा५ विप्रांश्च, मिश्रभगो तु पशूंश्च मिश्रा६ तीक्ष्णार्कजेऽन्त्यजसुखा खलु राक्षसी७ च । त्र्यंशे दिनस्य नृपतीन् प्रथमे निहन्ति नृपे द्विजानपि विशोऽपरके च शूद्रान् । अस्ते निशाप्रहरकेषु पिशाचकादोच्चक्षचरानपि नटान् पशुपालकांश्च । सूर्य्योदये सकलनिङ्गिजनस्य मौख्यायायनं मकरकर्कटयोर्निरुक्तम् । षड़शीत्याननञ्चापल्यमुक्त्यभये भवेत् । तुलाजौ विष्णुं, विष्णुपदं सिंहालिगो घटे । संक्रान्तिकालादुभयत्र नाड़िकाः पुण्या मताः षोड़शषोड़शोष्णगोः । निशीथतोऽर्वागपरत्र संक्रमे पूर्वापराह्णान्तिमपूर्वभागकौ । पुण्ये निशीथे यदि संक्रमः स्याद्दिनद्वयं पुण्यमथोदयात्तात् । पूर्वं परस्मादु यदि व्यसौख्यायने दिने पूर्वपरे तु पुण्ये । सन्ध्या त्रिनाड़ीप्रमितार्कबिम्बादर्वोदितास्तादधऊर्ध्वमत्र । चेदुद्यास्यन्नस्तमेष्यन्नयने क्रमात्तत्र पुण्यौ तदानीं परपूर्वघस्रौ । याम्यायने विष्णुपदे चाद्या मध्यास्तुलाजयोः । षड़शीत्याननेसौम्ये परा नाड़ीऽतिपुण्यदाः" हे० चि० ।

"तत्र यद्दाणां प्राग्यातितोऽपरराशौ संक्रमणं संक्रान्तिरिति संक्रान्तिलक्षणं सा च द्विविधा मध्यमा स्पष्टा च। षट्कर्मसंस्कृतो मध्यमग्रहोराश्यन्तरं यदा संक्रामति सा मध्यमसंक्रान्तिरुच्यते। यदा तु स्पष्टीकृतसंस्कारविशिष्टो यद्दो राश्यन्तरं गच्छेत् सा स्पष्टसंक्रान्तिरुच्यते। तत्र मध्यमानस्य स्पष्टीकरणार्थत्वादेव तच्छ्रुतिसंस्कारानुपयोगादत्र तत्त्यागेन स्पष्टसंक्रान्तिरेव गृह्यते। सापि द्विविधा सायनांशा निरयनांशा चेति। तत्र यदा सिद्धान्तगणनागतायनांशसंस्कृता यद्दाराश्यन्तरगमनमङ्गीकुर्वते सा सायनांशसंक्रान्तिरुच्यते। यदा त्वयनांशसंस्काररहितायद्दाराश्यन्तरगास्तदा निरयनांशा संक्रान्तिरुच्यते। तत्रान्यासां चन्द्रादिसंक्रान्तीनान्तु "देवद्यङ्गर्क्षबोऽष्टौ नाड्योऽङ्गाः खदृपाः क्रमात्"। वक्ष्यति संक्रमणेऽर्कादेः प्रायोऽर्कस्यातिनिन्दिता" इति वर्ज्यघटीत्वमेव विवाहप्रकरणे वक्ष्यति न तु फलकथने आसां संक्रान्तीनां कस्मिदुपयोगः। सूर्यसंक्रान्तीनान्तु नक्षत्रवारयोगभेदेन करणादिकरणभेदेन च शुभाशुभफलकथनयोग्यता पुण्यकालता संक्रान्तिविशेषे वर्ज्यघटीन्यूनाधिकभावस्यात्रोक्तत्वतो बहुवक्तव्यत्वात् स्वतन्त्रमेव सूर्यसंक्रान्तिप्रकरणमारिप्सुर्नक्षत्रवारभेदेन फलं तावत् सार्द्धवसन्ततिलकयाह। घोरेति। यस्मिन् सूर्यस्य संक्रमणं निरयनांशा संक्रान्तिरुग्रवारयुक्तसंज्ञकनक्षत्रे रविवारेऽर्कवारे वा स्यात् तदा घोरानाम्नी सा भूतान् सुखयेत् सुखिन उत्पादयेत्। अत्रार्कसंक्रमणमिति पदोपादानसामर्थ्यात् सूर्यसंक्रान्तिष्वेवायं विचारो नाखिलग्रहसंक्रान्तिष्विति फलितोऽर्थः।

अथ लघुनक्षत्रे बुधे चन्द्रवारे वा सूर्यसंक्रान्तिर्ध्वाङ्क्षीनाम्नी विप्रो वैश्यान् सुखयेत्। चरर्क्षे चरनक्षत्रे औमे मङ्गलवारे वा संक्रान्तिर्मङ्कोदरयुता मङ्कोदरीनाम्नी चोरान् सुखयेत्। क्रमेत्ये बुधे मैत्रसंज्ञकनक्षत्रे वा संक्रान्तिर्मन्दाकिनीनाम्नी नृपतीन् राज्ञः सुखयेत्। स्थिरनक्षत्रे शुक्रवारे वा संक्रान्तिर्मन्दानाम्नी विप्रान् सुखयेत्। मिश्रनक्षत्रे भृगुवारे वा संक्रान्तिर्मिश्रनाम्नी पशून् सुखयेत्। तीक्ष्णनक्षत्रे चर्कजे शनिवारे वा संक्रान्तिः खलु निश्चयेन राक्षसीनाम्नी अन्यजांश्चाण्डालान् सुखयतोत्यन्यजसुखा इत्यर्थः। उदाह कश्यपः "घोराध्वाङ्क्षीमङ्कोदर्यौ मन्दा मन्दाकिनी तथा। मिश्रा राक्षसिका सूर्यसंक्रान्तिश्चर्कवासरात्"। वसिष्ठः "घोरोपर्क्षे ध्वाङ्क्षी लघुभे चरभे मङ्कोदरी मृदुभे। मन्दाकिनी चरर्क्षे मन्दा मिश्रा मिश्रे च राक्षसी तीक्ष्णे"। अत्र छन्दोभङ्गस्त्वार्षः। देवीपुराणे "मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा। क्षिप्रे ध्वाङ्क्षी विजानीया दुष्टे घोरा प्रकीर्तिता। चरे मङ्कोदरी ज्ञेया क्रूरेषु राक्षसी। मिश्रिता चैव विज्ञेया मिश्रकर्क्षेषु संक्रमे" इति। रत्नमालायाम् "उग्रक्षिप्रचरे मित्रध्रुवमिश्राख्यदारुणैः। ऋक्षैः संक्रान्तिरर्कस्य घोराद्या क्रमशो भवेत्"। नारदकश्यपौ "भूदूतस्करवैश्येषु ध्वाङ्क्षेष्वमूपगवां क्रमात्। अनुक्तानाञ्च सर्वेषां घोराद्याः सुखदाः स्मृताः"। ध्वाङ्क्षेवाः ब्राह्मणाः अनुक्तानां चाण्डालादीनाम्। ननूक्तं वक्ष्यमाणं वा शुभाशुभफलं सायनांशसंक्रान्तितः कुतो न विचार्यते इति चेत् उच्यते सायनांशसंक्रान्तेः स्नानदानजपादावेव कार्यं न सर्वत्र यदाह पुलस्त्यः "स्नानदानजपाद्यासु व्रतहोमादिकर्मसु। सुकृतं चलसंक्रान्तावक्षयं पुरुषोऽश्नुते" इति। चलसंक्रान्तिः सायनांशसंक्रान्तिः। अतश्चलसंक्रान्तेः परिगणितस्नानादिकविषयत्वादेव कृत्यान्तरेषु विवाहादिशुभकर्मसु संक्रान्तिमासाङ्गीकारे शुभाशुभफलकथनञ्च नास्या उपयोग इति युक्तमुत्पश्यामः। इदं चात्र सम्यक्तया निर्णीयते"। "अथ दिनरात्रिविभागेन संक्रान्त्यशुभफलमुत्तरायणदक्षिणायनसंज्ञाञ्च सार्द्धवसन्ततिलकयाह। तत्राद्ये इति अत्रार्कसंक्रमणमित्यनुवर्त्तते दिनप्रमाणं त्रिभिर्भक्तं यत्तात्कालिकतृतीयांशो भवति तत्र दिनस्य प्रथमतृतीयेऽर्कसंक्रमणं नृपतीन् हन्ति मध्ये द्वितीयतृतीये द्विजान् ब्राह्मणान् हन्ति अपरके तृतीयतृतीये वैश्यान् इत्येवं सर्वत्र व्याख्येयम्। अन्ते सूर्योदयसमयेऽर्कसंक्रमणं भूदान्। अथ रात्रिसंक्रान्तिफलं तत्र रात्रिप्रथमप्रहरे पिशाचकादीन् आदिशब्देन भूतादीन्। द्वितीयप्रहरे नक्तञ्चरान् राक्षसान्, तृतीयप्रहरे नटान् नर्त्तकान्, चतुर्थप्रहरे पशुपालकान् आभीरान्। सूर्योदयसमयकालेऽर्कसंक्रमणं सकलनिष्क्रिञ्जनं पाखण्डादिकं हन्तीत्यर्थः "पाखण्डाः सकलनिष्क्रिञ्जन" इत्यभिधानात्। यदाह कश्यपनारदकश्यपौ "पूर्वाह्णे नृपतीन् हन्ति विप्रान् मध्यदिने विशः। अपराह्णेऽस्तमे भूदान् प्रदोषे च पिशाचकान्। निशि रात्रिञ्चराक्षाश्वकारानपररात्रिके। गोचारिणश्च सन्ध्यायां लिङ्गिनं रविसंक्रमः" इति। संक्रान्तेः क्रूरसौम्यवारपरत्वेन फलविशेषमाह वसिष्ठः रविरविज-

सौम्यवारे संक्रान्तौ दिनकरस्य तन्नामे। पित्तकफानिलजामयमरपतिकलहस्वदृष्टिस्वे। बुधगुरुभितचन्द्रार्के सति संक्रान्तावनामयं नृणाम्। क्षितिपतिनिकरक्षेमं सस्य विदृद्धिर्विधर्मिणां पीड़ा"। अत्र मेषसंक्रान्तौ विशेषमाह कश्यपः "यदा मेषगतः सूर्य्यो भरण्यादिचतुष्टये। सप्तदृद्धिर्भवेत्तत्र दृद्धिरार्द्राचतुष्टये। मघादिदृशके हानिः क्षेमं चानुत्तमेषु च"। अस्यार्थः। यस्मिन् दिने मेषसंक्रमस्तद्दिने चन्द्रो यदि भरण्यादिनक्षत्रचतुष्टये स्यात् तदा सप्तदृद्धिः एवमग्रेऽपि व्याख्येयम्। अथ जन्मनक्षत्रे संक्रान्तिफलं दीपिकायां "यस्य जन्मर्क्षमासाद्य रविसंक्रमणं भवेत्। तन्मासाद्यन्तरे तस्य रोगः क्लेशो धनक्षयः" इति। तत्र शान्तिकमपि दीपिकायामुक्तम् "तमरसरोरुहपत्रैरञ्जनोसिद्धार्थलोध्रसंयुक्तैः। स्नानं जन्मन्यृक्षे रविसंक्रान्तौ नृणां शुभदमिति"। अथ संक्रान्तिषु दृष्टौ जातायां फलमुक्तम् वसिष्ठेन "अजकन्याझषकर्कीषि संक्रान्तौ यदि भवेद्दर्षम्। अतुलं क्षेमसुभिक्षं नृपसज्जनगोकुलक्षेमम्। घटचापसिंहमिथुनसंक्रान्तौ यदि भवेद्दर्षम्। व्याधयडामरभूभृद्युद्धमनर्घं सदृष्टिस्व। वृषवृश्चिककुलमकरे वृष्टिः स्यात् संक्रमे समये। विस्फोटामयतस्करपीडावृष्टिः कुलानुभयमिति"। अथ सौम्येति मकरकर्कटयोः संक्रान्तिश्चेत् तदा क्रमेण सौम्ययाम्यायनं निरुक्तं कथितं मकरे उत्तरायणं कर्कटे याम्यायनं स्यादित्यर्थः। यदाह नारदः "सौम्ययाम्यायने नूनं भवतो मृगकर्कीषि" इति। अथावशिष्टाष्टसंक्रान्तीनां षडशीतिमुखादिकाः संज्ञा अनुष्टभाह षडशीतीति अनुमिथुनकन्यामीनेषु संक्रान्तिश्चेत् तदा षडशीतिमुखासाम्नी संक्रान्तिः, तुलामेषयोः संक्रान्तिर्विष्णुपदाख्या। सिंहवृश्चिककुम्भेषु संक्रान्तिर्विष्णुपदाख्या। उक्तञ्च नारदेन "स्थिरमेषार्कसंक्रान्तिर्द्वया विष्णुपदाख्या। षडशीतिमुखं ज्ञेयं द्विस्वभावेषु राशिषु। तुलाधराजयोर्ज्ञेयं विषुवं सूर्य्यसंक्रमः"। संज्ञाप्रयोजनञ्च "याम्यायने विष्णुपदे चाद्या मध्यास्तुलाजयोः। षडशीत्यामने सौम्ये परा नाड्योऽतिपुण्यदाः"। इति अन्यत्रोदये वक्ष्यति। अत्र मनुः "संक्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः। तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि। रविसंक्रमणे पुण्ये न स्नायाद् यदि मानवः। सप्तजन्मसु रोगी स्यात् दुःखभागी हि जायते" इति शातातपोक्तेः स्नानदानश्राद्धादिकृत्यस्य संक्रान्तिकालेऽवश्यकर्त्तव्यता प्रतीयते तत्र श्राद्धादेरनेकक्षणसाध्यत्वादनुष्ठानोचितक्षणप्राप्तावप्येतत् संक्रान्तिकालस्यातिसूक्ष्मत्वात् तदुक्तम् देवीपुराणे "सुप्ते नरे सुखासीने यावत् स्पन्दति लोचनम्। तस्य त्रिंशत्तमोभागस्तत्परः परिकीर्तितः। तस्माच्छततमोभागस्त्रुटिरित्यभिधीयते। त्रुटेः सप्तमभागो यः स कालो रविसंक्रमः" इति। देवलोऽपि "संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः" इति पिशितेक्षणैः मनुष्यैः। अतोमुख्यकालानुपलब्धौ गौणकालेऽपि कार्य्यं वचनप्रामाण्यात्। स च गौणकालः प्रतिनिधिरित्यतो गौणकालमुपजातिकाच्छन्दः पूर्वार्द्धेनाह संक्रान्तीति। गणितमार्गेण यः षष्ठ्यंशोः सूर्य्यस्य संक्रान्तिकाल आगतस्तत उभयत्र पूर्वतः परतश्च षोडश नाड्यः पुण्यप्रसम्पादकत्वात् पुण्या मताः सम्मता सूर्य्यसंक्रान्तिसमयात् पूर्वं षोडश पश्चाच्च षोडशघटिकाः पुण्यकाल इति द्वात्रिंशद्घटिका भवन्तीत्यर्थः। तदाह वसिष्ठः "दिनपतिसंक्रमणात् प्राक् षोडश नाड्यश्च पुण्यकालः सः। परतः षोडश नाड्यः सर्वत्र स्नानदानकार्य्येषु। ब्रह्मसिद्धान्तेऽपि "सक्रान्तेः प्राक्परस्ताच्च नाड्यः षोडश नाडिकाः। त्रयस्त्रिंशत् संक्रमस्य पुण्याः सर्वस्य नाडिकाः"। अनेन "संक्रान्तेः पुण्यकालस्तु षोडशोभयतः कलाः" इति स्मृतिवाक्ये "यैः पूर्वतः परतश्चादायी घटिकाः पुण्यकाल इत्येवं षोडशेति व्याख्यातं तदपाकृतं भवति। किञ्चायमर्थोवासनाभिर्ब्रह्मसिद्धान्तेऽभिहितः "अर्कभानकलाः षष्ट्या गुणिता मुक्तिभाजिताः। तदर्वं नाड्यः संक्रान्तेरर्वाक् पुण्यं तथा परे"। सिद्धान्तशिरोमण्यादपि "भक्तिप्तविम्बं षड्भुक्तिभक्तं संक्रान्तिनाड्योऽखिलधर्मकृत्ये। रवेस्तु ताः पुण्यतमा यतः स्युः स्वसंक्रान्तिगोभिस्फलं विधत्ते"। इति वासना चेयं यदि षड्भपरिगतितुल्यकलाभिरहोरात्रानरूपाः षष्टिघटिकाः लभ्यन्ते तदा षड्विम्बकलाभिः किमिति त्रैराशिकेन यद्दे विम्बकलानां षष्टिर्युक्तो षड्भुक्तिभाजको निष्पन्न इत्यर्थः। एवं सर्वत्रापीयमेव संक्रान्तिः स्यात् तदुक्तं सिद्धान्त एव। अत्र तु विस्तरभयादनुपयुक्तत्वाच्च नाक्षाभिरलेखि। अतएव त्रिंशद्भ एकत्रिंशद्भार्द्धद्वात्रिंशद्भयस्त्रिंशद्भादिभेदेन स्मृतिषु पुण्यघटिकाभिधानं सङ्गीकृत्य भेदसंभवाद्भिन्नं तदेव सामान्यतः संक्रान्तिषु द्वात्रिंशद् घटिकारूपः पुण्यकालो निर्णीतः। देवीपुराणे तु सन्ध्यादिसंज्ञाभेदात् पुण्यकाल-

विशेष एवोक्तः" द्विचतुःपञ्चषण्णाष्टनवदादश एव च। क्रमेण घटिकाह्नोतास्तत् पुण्यं पारमार्थिकम्" इति। अस्यार्थः मन्दायामन्तरालवर्त्ति घटिकाद्वयं मन्दाकिन्याञ्चतस्रो घटिकाः ध्वाङ्क्षायां पञ्च, घोरायां षण्, महोदर्यामष्टौ, राक्षस्यां नव, मिश्रायां दश" प्रागभिहितदेवीपुराणोक्तमन्दादिसंज्ञावाक्याच्चतत्रजनितसंज्ञासु मन्दादिष्वयं विचारो न वारप्रयुक्तास्ववचनात् एवं संक्रान्तिषु पुण्यकालमभिधाय इदानीं रात्रिसंक्रान्तौ विशेषमुपजातिकयाह निशीथत इति। निशीथोऽर्द्धरात्रं तस्मादवाक् पूर्वत्र अपरत्र पश्चाच्च संक्रमे संक्रान्तिकाले सति पूर्वापरयोरह्नोः क्रमेणास्तमयपूर्वभागौ पुण्यौ स्यातां भागकाविति स्वार्थे कः। यद्यर्द्धरात्रात् प्राक्संक्रान्तिस्तदा पूर्वदिनस्योत्तरार्द्धं पुण्यं यद्यर्द्धरात्रादुपरि संक्रान्तिस्तदोत्तरदिनस्य पूर्वार्द्धमेव पुण्यमित्यर्थः। उक्तञ्च ब्रह्मसिद्धान्ते "भवनान्तं बिम्बमध्यं रात्रयर्द्धात् प्रागुदेति चेत्। स्नानदानादि मध्याह्नात् कुर्यादूर्ध्वं गते दिने। रात्रयर्द्धादुपरि चेत्तं याति चेदन्यथार्यमा। अह्नः प्रागागामिनि मध्याह्नात् पूर्वं स्नानादि पुण्यदम्"। भवनं राशिः बिम्बमध्यं रविः, चेत्तं राशिः। इदृग्वसिष्ठोऽपि अस्तिसंक्रमणे पुण्यमहः प्रोक्तं प्रकीर्तितम्। रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः। अर्द्धरात्रादधस्तात्स्यात् मध्याह्नस्योपरिक्रिया। अर्द्धं संक्रमणे चोर्ध्वमुदयात् प्रहरद्वयम्" इति। नन्वर्द्धरात्रौ मेषदिनसंक्रान्तौ वा रात्रावपि पुण्यकालसत्त्वात् तदा स्नानादि कुतो न क्रियते यदर्थमयमुद्यम आरब्ध उच्यते "रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः" इति स्मृत्यनुवाक्याद्रात्रौ स्नानाद्यधिकारासत्त्वात्। यत्तु नैमित्तिकं ग्रहणादिप्रयुक्तं तद्व्रत्येव "नैमित्तिकञ्च कुर्वीत स्नानं दानञ्च रात्रिषु" इति स्मृत्यनुवाक्यशेषात् "अर्द्धरात्रसमये संक्रमणे मकरकर्कयोश्च विशेषमुपजातिकयाह। पूर्णे इति। "अर्द्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ" इत्यभिधानादर्द्धरात्रो निशीथशब्दवाच्यः तन्निशीथे पूर्णे रात्रिद्वितीयप्रहरान्तिमकलावच्छिन्ने यदि संक्रमः स्यात् तदा प्रागपरं दिनद्वये पुण्यमहः प्रोक्तम्। उक्तञ्च इदृग्वसिष्ठेन "पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते रविः। प्राह्णः दिनद्वयं पुण्यं प्रोक्तं मकरकर्कटाविति"। ब्रह्मसिद्धान्तेऽपि "यद्यर्द्धरात्र एव स्यात् संपूर्णः संक्रमो रवेः। तदा दिनद्वयं पुण्यं स्नानदानादिकर्मसु"। अत्र प्रोक्तौ मकरकर्कटाविति यत्तत्र मकरकर्कटयोस्तु कथमित्यत आहाथेति यथानन्तरसूदयास्तावुदयात् सूर्योदयात् सूर्यास्ताच्च पूर्वं परस्ताच्च यदि याम्यसौम्ययने कर्कटमकरसंक्रान्ती भवतस्तदा पूर्वपरदिने पुण्ये स्यातां यदि सूर्योदयात् पूर्वं कर्कटसंक्रमणं स्यात् तदा पूर्वदिन एव पुण्यकालो न परदिने। तदाह इदृग्गार्ग्यः "यदास्तमयवेलायां मकरे याति भास्करः प्रदोषे चार्द्धरात्रे वा स्नानं दानं परेऽहनि। अर्द्धरात्रे तदूर्ध्वं वा संक्रान्तौ दक्षिणायने। पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः" इति। अस्तमयवेलाया इति पञ्चम्यन्तं पदं वाशब्द इवार्थे। भविष्योत्तरपुराणेऽपि "कार्ष्ण्यन्तु परित्यज्य स्वगं संक्रमते रविः। प्रदोषे चार्द्धरात्रे वा कुर्यादहनि पूर्वतः" इति। प्रदोषलक्षणं स्कन्दपुराणे "त्रिमुहूर्त्तः प्रदोषः स्याद्रवावस्तं गते सति" इति। अथार्द्धोदयास्तादिति वचनसाध्यवादसिन्द्रवज्राछन्दसाह अर्द्धेति अर्द्धोदितादर्द्धास्ताच्चाध अर्द्धं च क्रमात्त्रिघटिकास्ताभिः प्रमिता सन्ध्यासन्ध्याकालः स्यात् अर्द्धोदितार्कबिम्बात्पूर्वं त्रिघटीप्रमिता प्रातःसन्ध्या तथार्द्धास्तार्कबिम्बादुपरि त्रिनाड़ीप्रमिता सायंसन्ध्येत्यर्थः। तदाह वराहः "अर्द्धोक्तमितादुदितात् सूर्यादस्तर्भं नभो यावत्। तावत् सन्ध्याकालस्त्रिभैरेतैः फलं ब्रूयादिति"। तत्प्रमाणमाह नारदः "अर्द्धास्तमनसन्ध्या हि घटिकात्रयसम्मिता। तथैवार्द्धोदयात् प्रातर्घटिकात्रयसम्मिता" इति। स्कन्दपुराणेऽपि "उदयात् प्राक्तनी सन्ध्या घटिकात्रयमुच्यते। सायंसन्ध्या त्रिघटिका ह्यस्ताद्ऊर्ध्वं परि भास्वतः" इति। अत्र सन्ध्यालक्षणे अर्द्धास्तमितादुदितवाक्यस्य स्कन्दपुराणीयवाक्यस्य च व्रीह्यिववद्विकल्पः। अथ सन्ध्यालक्षणप्रयोजनमाह तत्रेति। अथ सन्ध्यायां प्रातःसन्ध्रायां सायंसन्ध्रायां च क्रमाच्चेद्द याम्यसौम्ये अयने दक्षिणोत्तरायणे तदानीं परपूर्वौ यदा दिवसौ पुण्यौ याम्यसौम्ये अयने स्यातां यदि प्रातःसन्ध्रायां दक्षिणायनप्रवृत्तिस्तदा सूर्योदयादनन्तरं सम्पूर्णमहः पुण्यं तथा यदि सायंसन्ध्रायामुत्तरायणप्रवृत्तिस्तदा सूर्यास्तात्पूर्वं सम्पूर्णमहः पुण्यं स्यादित्यर्थः। यदाह नारदः "सूर्योदयसन्ध्रायां यदि याम्यायनं भवेत्। तदोदयादहःपुण्यपूर्वाह्णः पूर्वतो यदि। सूर्यास्तमनसन्ध्रायां यदि सौम्यायनं भवेत्। तदाहः पुण्यकालः स्यात् परतस्त्वोत्तरेऽहनि" इति। अत्र यदुदयसन्ध्रातः प्राक्कर्कसंक्रम

स्तदा प्रागहिन एव पुण्यकालो नोत्तरदिने । तथा यदा-स्तन्नक्त्रासतिक्रम्य मकरसंक्रान्तिस्तदोत्तरदिन एव पुण्य-कालोनोत्तरदिने इति निष्कृष्टोऽर्थः । अतो वृद्धगार्ग्यादिवाक्यनारदवाक्ययोः प्रदोषसन्नक्त्रापदोषादानेन सामान्य-विशेषभावोऽवगन्तव्यः । यत्तु हेमाद्रौ स्कन्दपुराणीयं वा-क्यम् "धनुर्मीनावतिक्रम्य कन्यां च मिथुनं ततः । पूर्वापर-विभागेन रात्रौ संक्रमते यदा । दिनान्ते पञ्च नाड्यस्तु तदा पुण्यतमाः स्मृताः । उदये च तथा पञ्च दैवे पित्र्ये च कर्मणि" इति । तदपि सन्नक्त्राविषयकमेवेत्याहुरभि-युक्ताः । विष्णवे तु यथाश्रुतम् एवेति, अन्यदपि सन्नक्त्रा-लक्षणप्रयोजनं प्राक्सन्नक्त्रागर्जित इत्यादिषु वक्ष्यति । नन्वयमयनपुण्यकालोक्तो भ्रमः सफलः शास्त्रान्तर-विरुद्धत्वात्तथा हि "यद्यर्क संक्रमणे पुण्यमहः प्रकृत्स्नं प्रकीर्त्तितम् । रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदा-नयोः । अर्द्धरात्रादधस्तस्मिन् मध्याह्नस्योपरिक्रिया । अर्द्धं संक्रमणे चोर्द्धमुदयात् प्रहरद्वयम् । पूर्णे चेद-र्द्धरात्रे च यदा संक्रमते रविः । प्राङ्मध्यदिनहयं पुण्यं शुक्ला मकरकर्कटौ" इति वृद्धवसिष्ठेनायनव्यतिरिक्तेषु दशसु संक्रमेषु रात्रिगतेषु "याया: सन्धिहिता नाड्य स्तास्ताः पुण्यतमाः स्मृताः" इति कश्यपोक्तसामान्यवा-क्याद्रात्रावेवानुष्ठानं प्रसक्तमहः संक्रम इत्यादिनाथेत-देवानुष्ठानं विहितं तस्यापि पर्युदासः क्रियते शुक्ला म-करकर्कटाविति तस्मान् मकरकर्कटयोः संक्रमणे रात्रा-वेवानुष्ठानं कर्त्तव्यमित्युक्तं भवति अतएवाह बाभ्रव-व्यः "रात्रिदर्शनसंक्रान्तिविवाहात्ययश्राद्धेषु । स्नान-दानादिकं कार्यं निशि काम्यव्रतेषु च" इति वसिष्ठोऽपि "सुतजनने संक्रान्ताधपराह्णे चन्द्रसूर्ययोर्ग्रियतम् । रात्रा-वपि कर्त्तव्यं स्नानं दानं विशेषतो नृणामिति" समन्तुश्च "अहनोहाहसंक्रान्तियात्रार्त्तिप्रसवेषु च । श्रवणे चेतिहासस्य रात्रौ दानं प्रशस्यते" इति । एषु वाक्येषु सामान्यवाचिनोऽपि संक्रातिपदस्य मकरकर्कटसंक्रान्ति-परत्वमवसीयते यत्तु "रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः" इति निषेधः स संक्रान्त्यन्तरे व्यवतिष्ठते अत-एवोक्तं कश्यपेन "स्नानं दानं यहण्यवत् सौम्ययाम्या-यनद्वये" इति । तस्मादयनसंक्रमे रात्रौ सत्यां तत्रैव स्नानदानाद्यनुष्ठातव्यमिति । अतोऽन्यत्र शास्त्रद्वयेन तुल्य-बलत्वादिकल्पसिद्धौ तत्तद्देशप्रसिद्धविशेषाचारेण व्यवस्था द्रष्टव्या । तत्र गौर्जरास्तु कश्यपादिवाक्यमस्मदुक्तं रात्रा-वयनसम्भवे सति रात्रौ एव स्नानदानादिकं कुर्वन्ति । दाक्षिणात्यास्तु वृद्धगार्ग्यादिवाक्यमङ्गीकृत्य दिवस एव स्नानदानादि कुर्वन्तीत्यलमतिप्रसङ्गेन । यदा तु दिने क-र्कमकरसंक्रमस्तदा क्रमेण पूर्वोत्तरघटिकानियममाह वृद्ध वसिष्ठः "अतीतानागते पुण्ये हे वृद्धगर्गचिन्तयेत् । त्रिंशत् कर्कटके नाड्यो मकरे विंशतिः स्मृता" इति । उत्त-रायणमतीतं सत् पुण्यं कर्कटायनमागामि पुण्यं तत्र कर्कटसंक्रान्तेः प्राक्त्रिंशत् घटिकाः पुण्याः मकरे तूत्तरविंशतिर्घटिकाः पुण्या इत्यर्थः । अत्र वाक्ये यद्यपि दिनपदानुपादानं तथापि यदास्तमयवेलायामिति रात्रि-परविशेषवाक्यालोचनादिदं दिनपरं प्रतिभाति तथा सति केनापि हेतुना समीपघटीषु श्राद्धादानुष्ठानासम्भवे परमायधित्वेन त्रिंशदादयो घटिका अत्रानुज्ञायन्ते यदा तु प्रतिबन्धस्तदा "याया: सन्धिहिता नाड्यस्तास्ताः पुण्यत-माः स्मृता" इति कश्यपोक्तेः समीपघटिकाश्चैव श्राद्धादि विधेयं 'सन्धिहितपरित्यागे कारणाभावादिति' न्यायच्च" । "अथ पूर्वापराः षोडश घटिकाः पुण्या इति पूर्वं सामान्येनोक्तमिदानीं विष्णुपदादिषु संक्र-मेषु विशेषमनुष्टुभाह याम्येति । याम्यायने कर्कसं-क्रान्तौ तथा विष्णुपदे वृषसिंहवृश्चिककुम्भसंक्रान्तिकाले आद्याः नाड्यः प्रथमाः षोडशघटिकाः अतिपुण्यदाः स्नानदानादावनन्तफलदाज्ञेयाः अग्रिमास्तु न तथेति निष्कृष्टोऽर्थः । तुलाजयोस्तुलामेषयोः मध्या उभयतः षोडश षोडश घटिकाः पुण्याः अथ वा षोडशैव घटिकाः पुण्या । षडशीत्यानमे मिथुनकन्याधनुर्मीनसंक्रान्तिषु तथा सौम्ये मकरसंक्रातौ संक्रान्तिकालात्परा अग्रिमाः षोडश घटिकाः अतिपुण्यदाः प्रथमास्तु न तथेति निष्क-ष्टोऽर्थः । यदाह श्रीपतिः "याम्यायने विष्णुपदे तथादौ दानाद्यनन्तं विषुवे च मध्ये । वदन्त्यतीते षडशीतिवक्त्रे सहस्रयः खल्वयने च सौम्ये" । तत्र कर्के प्रागेव मकर-संक्रान्तौ पश्चादेव पुण्यकाल इति तु प्राङ्निरणायि । विष्णुपदे तु अग्रिमादिघटीनां पुण्यकाले तरतमभावः "पुण्यायां विष्णुपद्यां च प्राक्पश्चादपि षोडशेति" वृद्ध-वसिष्ठोक्तेः । विषुवे तु सामान्यनिर्णय एवेति केचित् दीपिकाटीकाकारस्त्वेवमाह "मेषे तुलायां संक्रान्ति मध्य एव संक्रान्तिकालात्पूर्वमष्टौ घटिकाः परतश्चाष्टौ घटिका पुण्या इति" । युक्तं चैतत् । विषुवे च मध्यपदो-पदानात् मध्ये षोडश घटिकाः पुण्याः इत्युच्यते कस्मात्

कालान् मध्य इत्यपेक्षायां संक्रान्तिकालादेवेत्यतः पूर्व-मर्वौ पश्चाच्चाटौ घटिकाः पुण्या इत्यर्थः। यत्तूक्तं बृह-स्पतिना "वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश" इति। तुलामेषसंक्रान्तिकालात् प्राक्पश्चाच्च पञ्च पञ्च घट्यः पुण्या इत्युक्तम् यदप्युक्तम् आद्यन्तसापेक्षत्वान् मध्यशब्दस्य गणितागतपुण्यकालघटिकानां मध्ये विभागः स्थूलदृशा दशघटिकात्मको भवतीति। "यायाः सन्निहिता नाड्य" इति कश्यपोक्तेः। षडशीतिमुखेऽप्याद्याश्चिमघटीनां पुण्यकाले तरतमभावः। यत्तु षडशीत्यां व्यतीतायां घटि-स्तुल्यास्तु नाडिका" इति बृहद्वसिष्ठवाक्यं तत् प्रागघ-टीषु प्रतिबन्धवशात् आद्यादेरसम्भवे सत्यन्तिमघटीषु आ-द्यादिक्रियाभ्यनुज्ञायाः परमावधिकालेयत्तार्थम्। इदं सर्वं दिनसंक्रान्तिविषयं वेदितव्यम् "व्यक्ति संक्रमणे पुण्यमहः प्रवृत्तं प्रकीर्त्तितम्" इति सामान्यवाक्यस्य सौम्यायने विष्णुपदे इत्यस्य च विशेषवाक्यस्यैकवाक्यता। अतएव "रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः" इति रात्रिपरविशेषस्य सत्त्वाच्च। एवं निर्णीते पुण्यकाले स्नानदानाद्यवश्यं विधेयमिति फलितोऽर्थः। तत्र स्ना-नदानाद्यकुर्वतश्च प्रत्यवायमाह वसिष्ठः "इति सञ्चिन्त्य-विनिर्णयमादेष्टव्यं सदैव दैवज्ञैः। विष्णुवल्ययने महति संक्रान्तौ पुण्यदिवसेऽपि। पिष्टपिण्डं यो न कुरुते दत्त्वा शापं व्रजति तस्य पिता। आगतगतसमयेऽपि च करोति यद्दानजपहोमाद्यम्। जपरवापितबीजं यद्वत् तद्वच्च निष्फलं भवतीति"। अयने अयनप्रवृत्त्याख्ये चल-संक्रमणे आगतसमये निर्णीते पुण्यकालातिक्रमसमये स्नानादि निष्फलमित्यर्थः। संक्रान्तिषु स्नानदानादेः फ-लमाह भरद्वाजः "षडशीत्यां तु यद्दानं विष्णुपदितये तथा। दृश्यते सागरस्यान्तस्तस्यान्तो नैव दृश्यते"। बृह-द्वसिष्ठोऽपि "अयने कोटिः पुण्यानि महत्तं विष्णुपदे फ-लम्। षडशीत्यां महत्तन्तु फलं विष्णुपदेषु च" इत्यल-मतिप्रसङ्गेन। इति सूर्यषडशीतिनिर्णयः। अथ नायं केवलं सूर्यसङ्क्रमण एव पुण्यकालः किन्तु चन्द्रादीनां ग्रहाणां नक्षत्रसङ्क्रमे राशिसङ्क्रमे च पुण्यकालो भवति सोऽपि सोपपत्तिकः प्रसङ्गतः प्रोच्यते अस्माभिः यदाह जैमिनिः "नक्षत्रराशौ रविसङ्क्रमे स्युरर्वाक् परत्रापि रवीन्दुनाड्यः१६। पुण्यास्तथेन्दोस्त्रिघरात्रनैर्ऋ-र्यक् शुभैकनाडी१।१२ त्रिभिः शुभोक्ता। नाड्यस्ततः क्षपलाः कुजस्य४।१ बुधस्य तिस्रो नव: पलानि २।१४। सप्तग्रहिनाड्यः पलसप्तयुक्ता गुरौ च४४।७ शुक्रे सप-लाश्चतस्रः४।१। द्विनागनाड्यः पलसप्तयुक्ताः ८२।७ शनैश्चरस्याभिहिताः सुपुण्याः। आद्यन्तमध्ये जपदा-नहोमं कुर्वन्नवाप्नोति सुरेन्द्रधाम"। अस्यार्थः सूर्यस्य नक्षत्रसंक्रमे राशिसंक्रमे च प्राक्परतश्च षोडश घटिकाः पुण्याः एवं चन्द्रस्यैकघटी त्रयोदश पलानि। भौमस्य चतस्रो घटिका एकं पलम्। बुधस्य तिस्रो घटिकाश्चत-र्दश पलानि, गुरोश्चतुश्चत्वारिंशत्घटिकाः सप्त पलानि शुक्रस्य चतस्रो घटिकाः पलमेकं, शनेर्द्वाशीतिघटिकाः सप्त पलानि चोभयतः पुण्यकाल इत्यर्थः। अत्रोपपत्तिः। भानोर्यतिः खदृग्भागयुतार्द्धिता या विम्बं विधोस्त्रियु-णितायुगशैलभक्ता७४। तिथ्यद्रि७१५हीनशशिभुक्तिरिषु द्वि२५ भक्ता नन्दाब्धि२९ युग्भवति या विधुविम्बमे-वमिति" सिद्धान्तशिरोमण्युक्तप्रकारेण रविचन्द्रयोर्मा-नकला आनेयाः "व्यङ्गोधवः सचरणा हतवह्निभा-गयुक्ताद्रयो नव च सप्तिलवैरवश्च। क्रुर्ध्यमासलवकलाः क्षितिजादिकानां त्रिज्याशुकर्णविवरेण पृथग्विनिघ्ना। इति तत्रैवोक्ताः भौमादीनां मानकलास्तत्र क्रमेण मानकलाः। तत्र "ग्रहिम्बिम्बं ग्रहभुक्तिभक्तं संक्रा-न्तिनाड्योऽखिलधर्मकृत्ये। रवेस्तु ताः पुण्यतमा ग्रहः स्वसंक्रान्तिगोभिस्फलं विधत्ते" इति भास्करोक्तादिशा संक्रान्तिनाड्यः स्युः तत्र ग्रहभुक्त्यस्तैनैवोक्ताः "न-न्द्राब्धिभुजगारवेः शशिगतिः खाकाद्रयः क्ष्माग्नयस्तुङ्ग-खाङ्गकलाः कुवेदखविकलाः पातस्मरामाभवाः। बाहे-यस्य महीगुणारसकरा ग्रस्तेषुसिद्धारदाः पञ्चेज्यस्य वि-तस्य वसुवसिता व्यष्टौ शनेर्द्वे कले" इति बुधशुक्रयोस्तु संक्रान्तिघटिकानयने सूर्यगतिरेव हारः कल्पग्रहगति-तुल्यत्वात्तयोः, वासनाभाष्ये हि बुधशुक्रौ तु रवेरासन्नौ, वेव कदाचिदग्रतः कदाचित् पृष्ठतस्तस्मात्तुल्यावेव सदा-वलनौ दृश्येते। ततस्तयोरपि रविभगणतुल्या एव भगणा इत्युपपन्नमिति भास्करेणाभिहितत्वात्। पश्य-मानागतिस्तच्छीघ्रयोः शीघ्रफलानयनार्थं वासनाभाष्ये-णैव कल्पिता तदेवं ग्रहगतय इत्यन्तिमप्रकारेण सा-धिताः पुण्यकालघटिकाः सूर्यस्य यथा त्रिंशत् घटिका एवं चन्द्रस्य द्वे घटिके षड्विंशतिपलानि भौमस्य नव-घटिकाश्चत्वारिंशत्पलानि बुधस्य षट्घटिकाः विंशतिपलानि गुरोरष्टाशीतिर्घटिका एवं शुक्रस्य नव घटिका अष्टौ पलानि शनेः षष्ट्यधिकं शतं घटिकाः। पूर्वापरकालैः

मिलित्वा पुण्यकाल इत्यर्थः। अत्र वासना प्रागुक्ता एतदर्थं नाड्यः प्राक्परतश्च पुण्याः। अत्र गणितागतघटीपलेषु लिखितजैमिनिवाक्ये च क्वचित् किञ्चित्पलभेदो घटिकाभेदश्च सगतिस्पष्टकृतिवशतः। युक्तं चैतत् आकाशे हि वेधादिना स्पष्टा एव खगा दृग्ग्रन्थे न मध्यमाः "दिनद्वयस्पष्टखगान्तरालकालः स्फुटस्तु स्फुटभुक्तिबिम्बैरिति" स्पष्टगत्यैव बिम्बसंक्रान्तिषड्यानयनसूचितम् उक्तञ्च केशवार्केण "कुजादिकानामपि बिम्बलिप्ताः षड्यागुणाः स्वस्वजवेन भक्ताः। नाड्यादिकः संक्रमणान्तरालकालः स्फुटस्तु स्फुटभुक्तिबिम्बैरिति" अपिशब्दात् सूर्यचन्द्रमसोर्यत्र तथा सति मध्यमाग्रेक्षया स्पष्टगतिबिम्बयोरुपचयापचयाभ्यां साम्यैस्तत्तद्घटिकानामप्युपचयापचयसाम्यातिक्रमेणापतति तेषां चानियतत्वात्पदो उपनिबन्धायोगाज्जीवैर्नियतमध्यगत्या सूर्यादीनां षड्राणां पुण्यकालघटीरानीयोपनिबन्धः कृतः। अत्र मतङ्गतं पद्यम् "नाड्यो रामगुणा३३ रवेरथ विधोः षट्ट्रोः पलैर्युग्दृयं२।२६ भौमस्याब्धिपलैर्युतानवहि४ विदो६।२०युक्ताः पलैः खाब्धिभिः। षष्ठ्याड्योऽष्टगजाष्ट गुरोरथ भृगोर्नेत्राहि८ पलैरष्टभिः पुण्याः स्युः खलपाः शनेर१६ रुभयतो राश्युच्चयोः संक्रमे। अतो यो जैमिनिवाक्ये साङ्गौरसूः पलसप्तयुक्ता गुरोरितिपाठो माधवादिभिरपाठि तथा हेमाद्रिणापि द्विनागनाड्यः इति पदे नागा अष्टौ द्विराकृत्या नागा द्विनागाः षोडशनाडिकाः शनैश्चरसंक्रान्तौ पुण्यकाल इति यत् व्याख्यातवान् तदुभयमपाकृतं भवति तथा रामचन्द्राचार्यैरपि कालनिर्णयदीपिकायां हेमाद्रादिमूलकमसमर्थं स्वपद्धतोपनिबन्धात् अतश्चिन्त्योक्तयोज्ञेयाः। तस्मात्सर्वषड्राणां राशिनक्षत्रयोः संक्रान्तिषु पुण्यकालतास्थिरा। भास्करोऽपि "रवेस्तु ताः पुण्यतमाः" इतिवदंशन्द्रादिसंक्रान्तिषु नाड्यः पुण्या इत्यरूचयत्। अतिशयने तमबिष्ठनाविति पाणिनिवचनात् "षड्यः स्वसंक्रान्तिगोभिश्चफलं विधत्ते" इति। सूर्यादिसंक्रान्तिसाधारणं तत्र सकलसंक्रान्तिषु दिनरात्रिविष्णुपदादिभेदेन सूर्यसंक्रमवच्चिर्णयोध्येयः। एतत्संक्रान्तिमान्यता हि गुर्जरदेशेऽस्तीत्यलं प्रसक्ताप्रसक्तेन। इति सकलषड्यसंक्रान्तिनिर्णयः" पी०धा०

करणभेदेऽर्कसंक्रान्तिफलं तत्रैव

नारदः "निविष्टो वणिजे विष्ट्यां बालवे च बवे गरे। कौलवे शकुनौ भानुः किंस्तुघ्ने चोर्ध्वसंस्थितः। चतुष्पादे तैतिलनागयोश्च सुप्तो रविः संक्रमणं करोति। विष्ट्यां बवाख्ये च गराह्वये च स बालवाख्ये वणिजे निविष्टः। किंस्तुघ्ननाम्नि शकुनावपि कौलवाख्ये चोर्ध्वस्थितस्य खलु संक्रमणं रवेः स्यात्। धान्यार्घहृष्टिषु भवेत् क्रमशस्त्वनिष्टमध्येष्टेति सूनयः प्रवदन्ति पूर्वे" इति। "संक्रान्तौ यद्दृक्षं वा जन्मन्युभयपार्श्वयोः। नेष्टं त्रयं षट्शुभदं पर्यायाच्च पुनःपुनः। हानिर्दृष्टिः स्थानहानिस्तथा प्राप्तिरिति क्रमात्" नारदेनोक्तम्।

संक्रान्तेर्यद्दृक्षं यद्दृक्षनक्षत्रं वा यदि जन्मभं भवेद्यद्वा ताभ्यामुभयपार्श्वगतं जन्मभं भवेत्सदा त्रयमनिष्टमेव नक्षत्रत्रयं निषिद्धं ततो नक्षत्रषट्कं शुभं ततस्त्रिकेऽर्थहानिस्ततः षट्के दृष्टिः ततस्त्रिके स्थानहानिस्ततः षट्सु दृष्टिः षट्सु स्थानप्राप्तिरिति। अतएव पठन्ति दाक्षिणात्याः "संक्रान्त्यधरनक्षत्रादुगण्येष्वजन्मभावधि। त्रिकं षट्कं त्रिकं षट्कं त्रिकं षट्कमिति क्रमात्। पन्थाभोगो व्यया वस्वं हानिश्च विपुलं धनम्" इति त्रिकं शुभं षट्कमशुभमिति फलितोऽर्थः" पी०धा०। अधिकमयनसंक्रान्तिशब्दे २२६५०६३ द्रष्टव्यम्। स्थूलतया मेषादौ रविसंक्रान्तेर्वारदण्डाद्यानयनप्रकारः ज्यो०त० उक्तो यथा

"नवाष्टयक्ष१४८६हीनेन शकाब्दाङ्केन पूरिताः। भूर्वाणचन्द्राब्धिकाग्नौ कुराम्बौ वेदयुग्भके। १।१५।२१।२१।२४ अङ्का अनुपलादेषु षष्ट्या लब्धाङ्कसंश्रिताः। दण्डात् खाग्नौ हृयेषु च ३०।५७ पक्षाद्विहृता ततः पुनः। सम्मार्गशिष्टा वाराः स्युस्ततो दण्डादिकाः परे। मेषसंक्रमणे भानोः सिद्धान्तस्फुटसम्मताः। भुजौ षड्भूरामाग्नी २। ५६।३१ कालोजातिर्गजावनी। ६।२२।१८ रामचन्द्रोऽग्नियुग्मञ्च २।१।२१ तर्कोऽङ्कटक् नवाशुगौ। ६।२६।५८ द्वावङ्कटग् वेदबाणा २।२६।५४ व्यब्धिर्बाणशरौ सुराः। ४।५५।३१ षड्यागवेदौ शून्येन्दू ६।४८।१० एक शैलभुवौ शराः। १।१७।५। द्वौ षड्ङ्गो तथा कालो २।२६। ६ व्यक्षीरामः शरावनी। ४।३।१५। पक्षाग्नीषू तथा रुद्रा ५।५३।११। मेषसंक्रमवारतः। अङ्कैर्योज्या ह्यहादेषु वाराद्याः संक्रमे रवेः"।

राशिभेदे संक्रान्तिनामभेदः तत्संक्रमकाले स्वनक्षत्रस्य पुरुषाख्यसंक्रान्तिचक्रस्थानविशेषस्थितौ फलभेदश्च तत्रोक्तो यथा "मृगकर्कटसंक्रान्तौ द्वे तूदग्दक्षिणायने। विषुवती तुला

मेषे गोलमध्ये तथापराः । धनुर्मिथुनकन्यासु मीने च षड्गीतयः । वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी स्मृता । मूर्ध्नि सप्त मुखे त्रीणि हृदये पञ्च विन्यसेत् । त्रितयं हस्तपादेषु महाविषुवमक्रमात् । मस्तके भूपतेः सौख्यं वदने पटुता शुभे । हृदये च धनाध्यक्षोर्ध्वप्राप्तिर्दक्षिणे करे । वामे करे महद्दुःखं सुखं पादे च दक्षिणे । भ्रमणं वामपादे च कथितं विषुवत् फलम् । षड्मूर्ध्नि वदने पञ्च चत्वारि हृदये तथा । त्रितयं करपादेषु पयोविषुवतः क्रमात् । मानं मूर्ध्नि मुखे वैरं हृदये सुखसम्भवः । दोःपदोर्दक्षयोर्भोगस्त्रासश्च वामयोः स्मृतः" अयनविषुवफलम् । "शीर्षे पञ्च मुखे त्रीणि हस्तयोश्च त्रयं त्रयम् । हृदि पञ्च शशी नाभौ गुह्ये च पादयोरयाः । उत्तरायणमाश्रेयं स्वनक्षत्रस्थितेः फलम् । शीर्षेऽथ लाभो वदने सुखानि दक्षे करेऽङ्गौ हृदये च सौख्यम् । नाभौ शुभं वामकरेऽर्थनाशो गुह्ये भयं वामपदे प्रयासः" उत्तरायणफलम् । "शीर्षे त्रीणि मुखे त्रीणि हृदये पञ्च हस्तयोः । अष्टौ पादद्वयेऽप्यष्टौ दक्षिणायनसंक्रमात् । शीर्षे मानो मुखे विद्या हृदये वित्तसञ्चयः । प्रवासः स्यात् करे वामे भिक्षालाभश्च दक्षिणे । निष्फलं वामपादे च किञ्चिल्लाभश्च दक्षिणे" दक्षिणायनफलम् । "कर्के संक्रमणं यत्र विष्णुपद्यां मुखे तु तत् । चत्वारि दक्षिणे बाहौ त्रीणि त्रीणि पदद्वये । चत्वारि वामबाहौ च हृदये पञ्च निर्दिशेत् । अक्षयोर्द्वयं द्वयं योज्यं मूर्ध्नि द्वे चैककं गुदे" "रोगो भोगस्तथा यानं बन्धनं लाभ एव च । ऐश्वर्यं राजपूजा च अपमृत्युरिति क्रमात्" विष्णुपदीफलम् "मुखे चैकं करे वेदाः पादयुग्मे द्वयं द्वयम् । क्रोडे वामस्तथा वेदाः करे सव्येतरेऽपि च । द्वयं द्वयं तथा नेत्रे मस्तके त्रितयं तथा । द्वयञ्चैव तथा गुह्ये षड्गीत्यां स्वभे स्थिते । सुखे दुःखं करे लाभः पादयोर्भ्रमणं हृदि । कान्ता स्वादुवचनं वामे हस्ते स्वात् स्त्रीयभेक्षणम् । सम्मानो नेत्रयोश्चैव अपमानश्च मस्तके । गुह्ये चैव भवेन्मृत्युः षड्गीतिफलश्रुतिः" षड्गीतिफलम् । गुरुसंक्रान्तिफलञ्च ज्यो० त० यथा "शीर्षे चत्वारि राज्यं जलधिरपि करे दक्षिणे चापि सौख्यं चैकं कण्ठे विभूतिं मदनशरसितं वक्षसि प्रीतिमङ्गम् । पादस्थाः षट् च पीड़ा पुनरपि जलधिर्वामकुक्षौ च मृत्यु नेत्रे त्रीणि प्रदद्युः सुखमथ निजभे द्वादशे संक्रमत्वं" ।

संक्रान्तिपुण्यकालश्चास्या ति०त० संक्षेपतो दर्शिता यथा "तदयं संक्षेपः । दिनसंक्रमणे कर्कसङ्क्रान्तिर्दिनं पुण्यं षड्शीतिः सुखे" इत्यादुक्तं पुण्यतरं मन्दामन्दाकिनीत्यादि रूपेण त्रिचतुरादिघटिकाः पुण्यतमाः । दिनदत्तोत्तरायणादिविहितत्रिंशतिदण्डादीनां रात्रिप्रविष्टभागस्यापि पुण्यत्वं रात्रिसंक्रमणे तु कल्यन्यून ग्रथमार्द्धगते तद्दिवसीयशेषयामद्वयं पुण्यम् । कालद्वयात्मकमध्यरात्रगते तद्दिवसीयनिशेरभेदे तद्दिवसीयशेषयामद्वयं पुण्यं भेदे तु तद्दिवसीयशेषयामद्वयं परदिवसीयाद्ययामद्वयञ्च पुण्यम् । उभयदिने पुण्यकालेऽपि पूर्वदिनाकरण एव परदिने तद्विहितं कार्य्यम् । निशिभेदाभेदयोर्दक्षिणायने तद्दिवसीयशेषयामद्वयम् उत्तरायणे तु परदिवसीयाद्ययामद्वयं पुण्यमिति अध्यरात्रीयकालोत्तरशेषार्द्धरात्रसंक्रमणमात्रे तु परदिनाद्ययामद्वयं पुण्यमिति सन्ध्यासंक्रमणे तु दिनदण्डे दिनस्य रात्रिदण्डे रात्रेर्व्यवस्थितिः" । तत्प्रमाणं ति०त० दृश्यम् । संक्रान्तौ कालाशुद्धिदोषादिकं नास्ति यथोक्तं ति०त०स्कान्दे "एकान्ततो मया प्रोक्ताः कालाः संक्रान्तिसंज्ञकाः । नैतेषु विद्यतेऽनिष्टं यतश्चाक्षयसंज्ञिताः । अश्रद्धयापि यद्दत्तं कुपात्रेभ्योऽपि मानवैः । अकालेऽपि हि तत्पूर्वं सत्यमक्षयतां व्रजेत्" ।

सङ्ख्या न० संख्यायते परस्परनामोच्चारणं क्रियतेऽत्र सम्+ख्या-घञर्थे क । १युद्धे अमरः । षड् । २विचारे स्त्री अमरः । एवं ३सख्यगुणौ राजनि० ४द्रव्याश्रिते एकत्वद्वित्वादौ गुणभेदे च स्त्री टाप् । एकादिसंख्यावाचकस्य संख्यासंख्येयोभयपरता "द्वयेकयोर्द्विवचनैकवचने" इति पा० महाभाष्ये उक्ता । तेन घटानां पञ्चेत्यपि स्यात् "वार्त्ताकुरेका गुणसप्तयुक्ता" इत्यादि वैद्यके संख्यापरतया निर्देशोऽपि साधुः । किन्तु संख्यात्वजातावेव शक्तिः संख्यायुक्ते निरूढलक्षणेति विवेकः । तत्र एकादिदशान्ताः शब्दास्त्रिलिङ्गा विंशत्यादयस्तु नियतस्त्रीलिङ्गादिकाः । तत्रापि विंशत्यादिशब्दानां बहुत्वसंख्यावाचकत्वेऽपि एकवचनान्तत्वं । तदाहुस्तौ बहुवचनान्ता अपि पञ्च विंशतयः षट् शतानीत्यादि । तेषां विशेषसंज्ञा लीला० दर्शिता यथा "एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः । अर्बुदमब्जः (शङ्खः) खर्वनिखर्वौ महापद्मश्च षड्वक्त्रात् । जलधिश्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तराः संज्ञाः संख्याया व्यव-

ङ्कारार्थं कृताः पूर्वैः"। ब्रह्माण्डपु० नामान्तराण्युक्तानि यथा "एकं दश शतं चैव सहस्रमयुतं तथा। लक्षं च नियुतञ्चैव कोटिरर्बुदमेव च। वृन्दः खर्वो निखर्वश्च शङ्खपद्मौ च सागरः। अन्त्यं मध्यं परार्द्धं च दशवृद्ध्या यथोत्तरम्"। संख्या च गणनव्यवहारे हेतुः यथोक्तं "गणनव्यवहारे तु हेतुः सङ्ख्याभिधीयते। नित्येषु नित्यमेकत्वमनित्येऽनित्यमुच्यते। द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजामताः। अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः। अपेक्षाबुद्धिनाशाच्च तेषां नाशो निरूपितः। अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरुच्यते" भाषा० पर्य्याप्तिसम्बन्धेनैव अनेकाश्रिता समवायेन तु प्रत्येकाश्रितेति बोध्यम्।

सङ्ख्यात त्रि० सम्+ख्या-क्त। १कृतसङ्ख्ये २गणिते ३सम्यक्ख्याते च तेन रात्रिशब्दस्य समासे अच् सङ्ख्या०। संख्यान्तरात्तः। [१पण्डिते अमरः। २संख्यायुक्ते त्रि०।

सङ्ख्यावत् पु० संख्या विचारणाऽस्यास्ति मतुप् मस्य वः।

सङ्ख्येय त्रि० संख्यायतेऽसौ सम्+ख्या-यत्। १गणनीये २संख्याकरणयोग्ये।

सङ्ग पु०सृज-भावे घञ्। १मेलने २सम्बन्धे ३विषयादिरागे च "ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते" गीता। ४आसक्तौ ५मैथुने ६तत्कारणे च।

सङ्गणिका सम्+गण-भावे ण्वुच्। व्यभिचारिण्यां स्त्रियां०

सङ्गत न० सम्+गम-भावे क्त। १सौहार्दे २सङ्गतौ च। कर्त्तरि क्त। ३मिलिते त्रि०। ४सङ्गतियुते ५युक्तिसंसिद्धे अमरः।

सङ्गति स्त्री सम्+गम-क्तिन्। १सङ्गमे २मेलने न्यायोक्ते अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषये "सङ्गसङ्गः उपोद्घातो हेतुतावसरस्तथा। निर्वाहकैककार्य्यत्वे धोढा सङ्गतिरिष्यते" इत्युक्ते ३प्रसङ्गादौ पदार्थे च।

सङ्गम पु० सम्+गम-घञ् न ह्रस्वः। १सङ्गतौ २स्त्रीपुंसयोः संभोगे पु०न० अमरः। ३नद्यादेर्नदादियोगस्थाने च "गङ्गासागरसङ्गमः" इति पुराणम्।

सङ्गर पु० सङ्गीर्य्यते सम्+गृ-भावादौ अप्। १आपदि २प्रतिज्ञायां ३युद्धे च अमरः। कर्त्तरि अच्। ४क्रियाकारके ५विप्रे मेदि० ६शमीवृक्षफले न० मेदि०।

सङ्गव पु० सङ्गता गावो दोहनायात्र काले नि०। "प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु" इति दक्षोक्ते प्रातःकालानन्तरं मुहूर्त्तत्रयात्मके कालभेदे।

सङ्गिन् त्रि० सृज-णिनुण्। सङ्गयुक्ते स्त्रियां ङीप्।

सङ्गीत न० सम्+गै-क्त। १दर्शनार्थे नाट्यगीतवाद्यात्मके हेमच०। २तत्प्रतिपादकग्रन्थे च। कर्मणि क्त। ३सम्यग्गीते त्रि०। सङ्गीतशास्त्राणि च नानाविधानि तत्र मूलग्रन्थकर्त्तारश्चत्वारः भरतहनुमत्सोमेश्वरकल्लिनाथाश्चेति हनूमद्ग्रन्थस्यैव लोकेऽधुना बहुलप्रचारः। तद्ग्रन्थस्य च स्वराध्यायः रागाध्यायः तालाध्यायः नृत्याध्यायः भावाध्यायः लोकाध्यायः वाद्याध्यायश्चेति सप्ताध्यायाः। सङ्गीतसारादौ विस्तरो द्रष्टव्यः। [हेला०।

सङ्गीति स्त्री सम्+गै-क्तिन्। १सम्यग्ज्ञाने २आलापे

सङ्गीर्ण त्रि० सम्+गृ-क्त। स्त्रीक्लीबे अमरः।

सङ्ग्रह पु० सम+ग्रह-अप्। १सङ्ग्रये २सङ्क्षेपार्थकवाक्यानामेकत्र सङ्कलने च "विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः। निबन्धोद्धरणं सम्यक् संग्रहं तं विदुर्बुधाः"। ३हरितकी ४वस्तुनि ५ग्रहणे ६संक्षेपे मेदि० ७सङ्कोचे विश्वः ८सङ्कोचे ९सङ्कोचे नामार्थरत्नमा०। १०व्याडिप्रणीते व्याकरणग्रन्थभेदे "सङ्ग्रहेऽनुसमागते" वाक्यपदीयम्।

सङ्ग्रहणी स्त्री सङ्गिता ग्रहणी। ग्रहणीरोगभेदे।

सङ्ग्राम युधे अट०चु०उभ०सक० सेट्। सङ्ग्रामयति ते असिसङ्ग्रामत् त। अस्याफलवत्कर्त्तृकत्वेऽपि क्वा० इत्त्वे

सङ्ग्राम पु० सङ्ग्राम-भावे अच्। युद्धे अमरः।

सङ्ग्रामपटह पु० ६त०। रणवाद्यभेदे त्रिका०।

सङ्ग्राह पु० संगृह्यते सम्+ग्रह-कर्मणि घञ्। फलकस्य सन्धिबन्धनस्थाने अमरः।

सङ्ग्राहिन् पु०सम्यक् गृह्णाति मलम् सम्+ग्रह-णिनि। १कुटजवृक्षे राजनि०। २मलावष्टम्भके ३संग्रहकारके च त्रि०। [अमरः। २संगृहीते त्रि०।

सङ्घ पु० संहतं सर्वम्। १सजातीयजन्तुसमूहे २समूहे च

सङ्घचारिन् पु० सङ्घीभूय चरति चर-णिनि। १मत्स्ये हेमच०। २सङ्घीभूयचारिणि जन्तुमात्रे त्रि० स्त्रियां ङीप्

सङ्घजीविन् पु० सङ्घेन जीवति जीव-णिनि। संघोपजीविनि व्रातीने हेमच०। [च।

सङ्घट्ट पु० सम्+घट्ट-भावे अच्। १परस्परसङ्घर्षणे २गटने कर्त्तरि अच्। ३लतायां शब्दर०। ४चालके त्रि०।

सङ्घट्टन न० सम्+घट्ट-ल्युट्। १मेलने २गठने ३रचनायाञ्च। युच्। तत्रैव स्त्री। [द्वये (योड़हात) अमरः

सङ्घतल पु० सङ्घे संहते मिलिते तले यत्र। संयोजितप्रतलञ्च

सङ्घपुष्पी स्त्री सङ्घानि संहतानि पुष्पाण्यस्याः ङीप्। धातकी पुष्पाम् (धाइ फुल) राजनि०।

सङ्घर्ष पु० सम्+हृष्-घञ्। १परस्परहर्षणे २सङ्घातयां ३संमर्दे च शब्दर०।

सङ्घशस् अव्य० सङ्घ+वीप्सार्थे-शस्। भूरिशः इत्यर्थे।

सङ्घाटिका स्त्री सङ्घटयति सम्+घट-णिच्-ण्वुल्। १युग्मे २कट्टिन्यां ३जलकण्टके मेदि०। ४घ्राणे विश्वः।

सङ्घात पु० सम्+हन-घञ्। १समूहे २नरकभेदे अमरः। ३सम्यग्हनने मेदि० ४दृढसंयोगे ५कफे च राजनि०।

सङ्घातपत्रिका स्त्री सङ्घातयुक्तं पत्रमस्याः कप् यत इत्त्वम्। शतपुष्पायां राजनि०।

सचि(ची) स्त्री सच-इन् वा ङीप्। इन्द्राण्यां रामाश्रमः

सचिलक पु० सह क्लिन्नेन सहस्य सः कप् नि०। क्लिन्ननेत्रे (पिचुडियुक्तनेत्रे) शब्दच०।

सचिव पु० सच-इन् तथा सन् वाति-क। १सहाये २मन्त्रिणि अमरः २२१पृ० द्रष्टव्यम्। ३क्षणधुक्तूरे राजनि०। [रोगभेदे राजनि०।

सचिवामय पु० सचिवः सहाय आमयो यस्य। विसर्पे

सचीनन्दन न० ६त०। वैष्णवसम्प्रदायप्रवर्त्तके नवद्वीपाविर्भूते वैष्णवाचार्य्यभेदे तदाविर्भावस्य "शाके मुनिव्योमयुगेन्दुमाने(१४०७) पुण्ये तिथौ फाल्गुनपौर्णमास्याम्। त्रैलोक्यभाग्योदयपुण्यकीर्त्तिर्देवः सचीनन्दन आविरासीत्" चैतन्यचन्द्रोदयः। अस्य कलौ युगधर्मावतारत्वं वैष्णवामन्यन्ते तत्र न किञ्चित् प्रमाणमुपलभामहे

सचेतन त्रि० सह चेतनया वर्त्तमानस्य सः। विशिष्टज्ञानयुक्ते।

सचेष्ट पु० सञ्चते सच-अच् तथाभूतः सन् इष्टः। १आम्रे शब्दमा०। सह चेष्टया सहस्य सः। २चेष्टान्विते त्रि०।

सचारा स्त्री सन् चारो गात्रानुलेपने विश्वग्गतिरस्याः। हरिद्रायां शब्दच०।

सच्चिदानन्द पु० सन् नित्यः चित् चैतन्यमानन्दः त्रिपद कर्म०। १नित्यज्ञानसुखमये ब्रह्मणि वेदा०। ६त०। २तद्युते ईश्वरादौ त्रि० न्यायमतम्।

सच्छूद्र पु० कर्म०। गोपनापितादौ शूद्रभेदे "सच्छूद्रो गोपनापितावितिः" स्मृतिः। [अमरः।

सजम्बाल त्रि० सह जम्बालेन सहस्य सः। पङ्कयुक्ते देशे

सजाति पु०समाना जातिरस्य समानस्य सः। सवर्णेन सवर्णायां स्त्रियाम् उत्पादिते पुत्रे। २तुल्यजातौ त्रि० "सवर्णेभ्यः सवर्णासु जायन्ते च सजातयः" मिताक्षरा स्मृतिः।

सजातीय त्रि० समानां जातिमर्हति छ समानस्य सः। समानधर्मयुक्ते अमरः।

सजुष् अव्य०सह जुषते क्विप् सहस्य सः। १सहार्थे जुषाद्यादौ र। सजुः चर्य्या०। "सजुःकृत्य रतिं वसेदिति" भट्टिः। २प्रीतियुक्ते ३सेवायुक्ते च त्रि०४तापसे संक्षिप्तसा०

सज्ज त्रि०सस्ज-अच्। १श्वयुक्ते २सन्नद्धे अमरः। ३समर्थे विश्वः ४निश्चिते शब्दर०। भावे अ। ५आयोजने ६वेशे च स्त्री सतीजायते जन-ड। ७साधुजाते त्रि०।

सज्जन न०सस्ज-णिच्-ल्युट्। १रणार्थं सैन्यस्थापने अमरः २घट्टे (घाटी) मेदि०। ३आयोजने। सन् जनः। ४सौजन्यवति जने पु०"निजाचारव्याहिणो ये कुर्वन्ति वेदस्मृतम्। पापाभिलाषरहिताः सज्जनास्ते प्रकीर्त्तिताः" पद्मपु० "कुरु सज्जनरञ्जनमिति" भट्टटः। ५सत्कुलोद्भवे च पु०। सस्ज-णिच्-युच्। ६इन्द्रपादीनामारोहणार्थं गजभूधाकरणादौ स्त्री अमरः।

सज्जित त्रि०सज्जा जातास्य तारं०इतच् सस्ज् णिच्-कर्मणि क्त वा। १कृतवेशे २भूषिते ३सन्नद्धे च। [देवीपु०।

सञ्च सञ्चीयतेऽत्र सम्+चि-ड। लेखनार्थं पत्रभेदे (साँच)।

सञ्चत् त्रि० सम्+चत-क्विप्। प्रतारके त्रिका०।

सञ्चय पु०सम्+चि-अच्। १समूहे अमरः। २संग्रहे च ल्युट्। सञ्चयन। ३सङ्ग्रहे न०। [सीदतीति पुराणम्

सञ्चयिन् पु० सम्+चि-इनि। सङ्ग्रहकारके "सञ्चयी नाम"

सञ्च(ञ्चा)र पु० सञ्चरत्यनेन सम्+चर-घञर्थे करणे क घञ् वा। १सेतौ रत्नमा० २देहे हेमच०। भावे घञ्। ३गमनादेः राज्ञन्तरगमने ४सम्यग्गतौ च।

सञ्चाय्य पु० सञ्चीयतेऽग्निरत्र सम्+चि-ण्यत् नि०। यज्ञभेदे।

सञ्चारिका स्त्री सञ्चारयति नायकयोर्वार्त्तां सम्+चर-णिच्-ण्वुल्। १दूत्यां अमरः। २कट्टिन्यां ३युग्मे ४घ्राणे च मेदि०।

सञ्चारिन् पु० सम्+चर-णिनि। १धूपे त्रिका० २व्यभिचारिणि शब्दच०। अलङ्कारोक्ते शृङ्गारादिरसाद्यनुगुणे ३भावभेदे च भावभेदश्च व्यभिचारिभावः। "नानाभिनयसम्बन्धात् भावयन्ति रसान् यतः। तस्माद्भावा अमी प्रोक्ता स्थायिन्यञ्चारिसात्त्विकाः"। "व्यक्तः सञ्चारिणा तथेति" साद०। ४सञ्चारकारके त्रि० स्त्रियां ङीप्। "सञ्चारिणी दीपशिखेवेति" रघुः। सा च ५हंसपद्यां च राजनि०।

सञ्चाली स्त्री सञ्चलति सम्+चल-ण गौरा० ङीष्। १झाटयां युक्तिकल्पतरुः।

सञ्चिका स्त्री प्रा० स०। मूषिकपर्ण्यां शब्दर० [कर्मभेदे च

सञ्चित त्रि० सम्+चि-क्त। १संगृहीते २धनादिसञ्चयकर्त्तरि

सज्ज पु॰ सम्+जन-ड । चतुर्मुखे १ब्रह्मणि २शिवे च मेदि॰ २ङीप्यां स्त्री त्रिका॰ ।

सञ्जय पु॰ भारतप्रसिद्धे धृतराष्ट्रसारथिभेदे ।

सञ्जवन न॰ सम्+जु-युच् । परस्पराभिमुखतया स्थिते चतुःशाले गृहे अमरः ।

सञ्जीवन न॰ सम्+जीव-ल्युट् । १चतुःशालगृहे शब्दर॰ । २सम्यक्प्राणधारणे च । संजीवयति सम्+जीव-णिच्-ल्युट् । ३ओषधीभेदे स्त्री ङीष् ।

सट न॰ स्त्री षठ-अच् पृषो॰ ठस्य टः । १व्रतिनां केशसङ्घाते २जटायाम् शब्दर॰ । ३शिखायां ४सिंहादेः केशरे च मेदि॰ "सटच्छटाभिश्चयनेनेति" माघः । [ङीष् ।

सटाङ्ग पुंस्त्री॰ सटा अङ्गो यस्य । सिंहे शब्दर॰ स्त्रियां

सटि(टी) स्त्री षठ-इन् वा ङीप् पृषो॰ । १जटायां शब्दरत्ना॰ स्वार्थे क । २गन्धपत्रवृक्षे राजनि॰ । षठ-इन् ङीप् । पृषो॰ । सटीत्यत्र । ठान्तः तत्रार्थे राजनि॰ ।

सट्टा स्त्री षठ-अ पृषो॰ । १पक्षिभेदे २वाद्ये संज्ञिप्तसा॰ ।

सठ स्वार्थे गतौ संस्कारे अकंस्कारे च. चुरा॰ उभ॰ सक॰ सेट् । साठयति ते षोपदेशत्वमेव न्याय्यम् ।

सणसूत्र न॰ शणसूत्र+पृषो॰ । शणसूत्रे रायमुकुटः ।

सण्डिश पु॰ संदंश+पृषो॰ । सन्दंशे (सँड़ासि) "सण्डिशैरपकृष्यन्ते नरैर्यास्यैर्मुखात्ततः" मार्कण्डेयपु॰ १४अ॰ ।

सण्डीन न॰ सम्+डी-क्त । पक्षिणां सङ्कुच्य गमनरूपे गतिभेदे अमरः ।

सत् त्रि॰ अस-शतृ । १सत्ये २साधौ ३पूजिते ४धीरे ५प्रशस्ते ६विद्यमाने च अमरः । स्त्रियां ङीप् । सा च ७पतिव्रतायां स्त्रियां दक्षकन्याभेदे "सती सती योगविसृष्टदेहेति" कुमारः । ८सौराष्ट्रमृदि हेमच॰ ९ब्रह्मणि न॰ "ओंतत्सदितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इति गीता । १०आदरे अव्य॰ "सदसती आदरानादरयोरिति" पाणिनिः उप॰स॰ "सदकृत्य" सि॰कौ॰ । पतिव्रतापरत्वे संज्ञात्वात् तच्छब्दाभावः न "स्वतलोर्गुणवचनस्य" पा॰न हुस्वः सतीत्वम् "तेन नारद ! नारीणां सतीत्वमुपजायते" पुराणम् ।

सतत न॰ सम्+तन-क्त समोऽन्त्यलोपः । १निरन्तरे २सदृशे त्रि॰ अमरः । ["सतत्वतोऽन्यथा प्रथा" वेदा॰प॰ ।

सतत्त्व न॰ सच्च तच्च तत्त्वेन । १स्वभावे हेमच॰ २यथार्थे

सतानन्द पु॰ गौतमपुत्रे अहल्यागर्भजे मुनिभेदे शब्दच॰ ।

सतीन पु॰ सतीं नयति नी-ड । १वंशभेदे शब्दच॰ (चुडुमटर) २कलायभेदे भरतः । स्वार्थे क । तत्रैव अमरः ।

सतीर्थ्य पु॰ समाने तीर्थे गुरौ वसति यत् समानस्य सः । परस्परैकगुरुके छात्रे अमरः । ह्रस्वः । निर्व्यकारोऽव्ययमत्रार्थे । [व्याडिः । २वंशे हारा॰ ३स्त्रियां रायमु॰ ।

सतील पु॰ सतीं लक्षयति लक्ष-ड । (चुडुमटर) १कलाये

सतीलक पु॰ सतीलइव कायति कै-क, सह तिलेन तिलचिह्नेन कप् पृषो॰ दीर्घः । १वंशे (चुडुमटर) २कलायभेदे च अमरः । [दीर्घः । कलायभेदे (तेओड़ा) अमरः ।

सतीला स्त्री सह तिलेन तिलचिह्नेन सहस्य सः पृषो॰

सतेर पु॰ सन-एर तान्तादेशः । सतते संज्ञिप्तसा॰ ।

सत्कदम्ब पु॰ नित्यक॰ । कैलिकदम्बे शब्दच॰ ।

सत्कर्तृ पु॰सत्+कृ-तृच् । १विष्णौ विष्णुस॰ २सत्कारके त्रि॰ ।

सत्कर्म्मन् न॰ कर्म॰ । वेदादिविहिते यागादौ कर्मणि ।

सत्काञ्चनार पु॰कर्म॰ । रक्तकाञ्चने शब्दच॰ । [स्त्रियां ङीष्

सत्काण्ड पुंस्त्री॰सत्काण्डं शब्दव्यापारोऽस्य । चिह्ने शब्दच॰

सत्कार पु॰ सत्+कृ-घञ् उप॰स॰ । १सम्माने २पूजने च ।

सत्कार्य्यवाद पु॰ ६त॰ । कार्यस्य सत्त्वनिर्णायके वादे कथाभेदे स च वादः उत्पत्तिशब्दे ११०८पृ॰ दृश्यः ।

सत्कृत त्रि॰ सत्+कृ-क्त । १पूजिते २कृतसम्माने च ।

सत्क्रिया स्त्री सत्+कृ-श । १सत्कारे २सम्माने ३पूजने च

सत्तम त्रि॰ अतिशयेन सत् तमप् । अतिशयसाधौ अमरः ।

सत्ता स्त्री सतोभावः तल् । १द्रव्यगुणकर्मवृत्तौ २जातिभेदे "द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते" भाषा॰ । जातिशब्दे ३०६१ पृ॰ दृश्यम् । ३विद्यमानतायाञ्च विद्यमानत्वं च कालसम्बन्धः । आत्मधारणानुकूलव्यापार इति शब्दिकाः "आत्मानमात्मना बिभर्त्तीति व्यपदिश्यते । अन्तर्भावाच्च तेनार्थो कर्मणा न सकर्मकः" हरिः । तत्र विद्यमानता च वेदान्तमते त्रिविधा पारमर्थिकी१ ब्रह्मणः त्रैकालिकाबाध्यत्वरूपा व्यावहारिकी२ घटादीनां सा च तत्त्वज्ञाननाश्या प्रातीतिकी३ शुक्तिरजतादेः सा चाधिष्ठानसाक्षात्कारनाश्या । ब्रह्मसत्तयैव सर्वेषां सत्ताव्यवहारः सदुत्पन्नत्वात् इति वेदान्तिनः ।

सत्त्व न॰ सद-ष्ट्रन् । १स्थाने २यज्ञभेदे ३सदादाने ४आच्छादने ५करणग्रे ६कैतवे मेदि॰ ७धने ८गृहे ९दाने १०श्लिष्टानार्थकोषः । सदादानञ्च सदक्षिणं सततान्नदानम् । यज्ञभेदश्च द्वादशाहादिसाध्यः ज्योतिष्टोमादिः यथोक्तं काल्या॰श्रौ॰१२।१।४। स्तवभागादौ "द्वादशाहः सत्त्वं" अहीनश्च सू॰ "सत्त्वरूपः अहीनरूपश्च भवति विविधः ।

आसत उपयन्तीति सत्त्रस्य लिङ्गं यजते इत्यहीनस्य। अत्र विशेषमाह "द्वादशाहस्त्रिरात्रा उपेयुरिति तथा त्रयोदशरात्रमासीरन्निति सत्त्रलिङ्गम् द्वादशाहेन प्रजाकामं याजयेदित्यहीनलिङ्गम्। अस्यानुक्थनप्रयोजनम् सत्त्रे सत्त्रात्मको धर्मो दाढर्त्येन प्रवर्त्तते अहीने चाहीनात्मकः। "उभयतोऽतिरात्रं सत्त्रमुपरिष्टादहीनस्य" सू० उभयत इत्यादावन्तेऽतिरात्रो यस्य तदुभयतोऽतिरात्रम् उपरिष्टात् अन्तएव। "यजमानाः सर्वे सत्त्रेषु" सू०। कर्त्तारो भवन्ति य ऋत्विजस्तो यजमाना इत्यनेनार्त्विजीनान् पदार्थान् लक्षणयानूद्य यजमानाः कर्त्तृत्वेन विधीयन्ते। "अदक्षिणानि च स्वामियोगात्" सू०। सत्त्राणि भवन्ति न हि कश्चिदात्मनैवात्मानं परिक्रीणाति। अत्र हि स्वामिन एवार्त्विज्यम् अनुपपन्नश्चात्मपरिक्रयः "गृहपतियोंजमानमवृक्तत्वात्" सू० याजमानं यत्कर्म तद्गृहपतिः करोति कर्मान्तरे तस्यायुक्तत्वात् इतरेषां चाध्वर्य्वादिषु योगात्। "दर्शनाच्च" सू० दृश्यते चायमर्थः तस्माद् यदि बहवो प्रवच्छेयुरिति। "सर्वे संस्कारान्" सू० यद्यत्संस्कारकं याजमानं यथा वपनादि तत्सर्वं कुर्युः तेन हि यजमानाः संस्क्रियन्ते। "दर्शने वचनात्" सू० यत्तु दर्शनसूक्तम् तद्वचनम् गृहपतये एकस्मै दानसूक्तम् वचनं किमिव न कुर्य्यात्। "अविभवति गृहपत्यन्वारम्भः" सू० न संभवत्यनेककर्तृके पदार्थे वेदवन्यनान्यन्वाधानादौ गृहपतेरन्वारम्भः सर्वैः कर्त्तव्यः। "पदार्थैकैकः कृतत्वात्" सू० यत् पुनः कृत्वभिनिर्वर्त्त्यमेव कर्म यथा पात्रासादनमाज्यावेक्षणं वा तत्रावास्यैव कर्त्तृत्वम् कृतत्वात् पदार्थस्य। परार्थे यजमानकर्त्तृके आज्यावेक्षणादौ एको गृहपतिः कृतः कृतत्वात् एकेनापि कृतः कृत एव यतः। "अग्निं चेत्समाधाः समारोहं गृहपतिर्मध्ये मन्त्यत्वर्षभ इतरे दक्षिणोत्तराः" सू० समारोहतीति च पूर्वकालसामान्ये ल्यबादेशो न समानकर्तृकतायाम्। "गृहपत्याहवनीयेऽङ्गारप्राशनम्" सू०। "तत्र प्राजापत्यः पशुः" सू०। तत्र विहारे प्राजापत्यः पशुर्भवति। पुनर्यत्र ऋणाच्चार्हणीये प्राजापत्यस्य नियमः तथा चात्रमेधे नियमदर्शनं भवति प्राजापत्यबालमेतेति। अत्र साधारणीकृते विहारे। "आज्येन पत्नीसंयाजा गृहपतिवर्जम्" सू०। [त्रार्थे अमरे पाठान्तरम्।

सत्त्रम् अव्य० सद्-त्रक। १स्वार्थे जटा०। त्रा। सत्त्राण-

सत्त्रशाला स्त्री ६त०। अन्नजलादेर्दानार्थे कल्पिते गृहे हेमच०। [श्रीकृष्णश्वशुरे सत्यभामाजनके राजभेदे।

सत्त्राजित् पु० सत्त्रेणाजयति लोकान् या+जि-क्विप्। सत्ति पु० सद्-वा० क्ति। १मेघे २गजे ३जयशीले त्रि० हलादिकोषः। [अमरः २गृहस्थे च।

सत्त्रिन् पु०सत्त्रं गृहं यज्ञो वा विद्यतेऽस्य इनि। १गृहपतौ

सत्त्व न० सतोभावः त्व। १सांख्यसिद्धे प्रकाशादिगुणे प्रकृत्यवयवे पदार्थे प्रकृतिशब्दे दृश्यम् "सत्त्वं लघु प्रकाशकमिष्टम्" सां०का०। अयं द्वितीयकारः पृथो० एकतकारः। २द्रव्ये ३प्राणेषु ४व्यवसाये ५बले ६स्वभावे ७पिशाचादौ शब्दच० ८चित्ते मेदि० "सत्त्वे तथ्यमाने तत्संक्रान्तः पुरुषोऽपि तथ्यत इव" पात० भा०। ९रसे १०आयुषि ११धने। १२आत्मनि च शब्दच० १३सत्तारूपे १४जातिभेदे १५विद्यमानतायाञ्च द्वितीयकारः। १६जन्तुषु पु०ह० अमरः।

सत्पत्त्र न० सत् शोभनं पत्त्रम्। १पद्मस्य नवदले शब्दच०। कर्म०। २सुन्दरदले त्रि०। [विहितोचारे च।

सत्पथ पु० कर्म० अच्समा०। शोभनमार्गे अमरः २वेदादि०

सत्पुत्त्र पु० कर्म०। वेदादिविहितकार्य्यकर्त्तरि सुते "पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः। सुखसन्दर्शनेनापि तदुत्पत्तौ यतेत सः" हरिवंशोक्तनरकतारणाय "कक्षमग्निर्न सत्त्रयति अमृतत्वञ्च विन्दति। पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम्" इति वसिष्ठोक्तोपनयनाय च यत् पश्येदिति नियमविधानं तत्कृतपुत्रकार्य्यपुत्रपरम्। सत्पुत्रस्तु सुखदर्शनं विनापि नरकनिस्तारकः। तथा च विष्णुपु० "सत्पुत्रेण तु जातेन केनोऽपि विधिं ययौ। पुन्नाम्नो नरकात्त्रातः सतेन सुकृतात्मना"। ब्रह्मपुराणेऽपि "सत्सत्पुत्रेण भो विप्राः सत्पुत्रेण महात्मना। त्रातः स (वेनः)पुरुषव्याघ्रः पुन्नाम्नो नरकात्तदा" शु०त०।

सत्प्रतिग्रह पु० सद्भ्यः प्रतिग्रहः। साधुदत्तधनस्य प्रतिग्रहे "सप्त वित्तागमा धर्म्या दायो लाभः क्रयोजयः। विभागः सम्प्रयोगश्च सत्प्रतिग्रह एव च" इति स्मृतिः।

सत्प्रतिपक्ष पु० कर्म०। तुल्यविरोधिनि १प्रतियोगिनि २न्यायोक्ते हेत्वदोषे हेत्वाभासभेदे। स च बाधोपस्थितिसमर्थपरामर्शकालीनसाध्यसिद्धिसमर्थपरामर्शविषयः। यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते सः। यथा शब्दोनित्यः श्रावणत्वाच्छब्दत्ववत्। शब्दोऽनित्यः कार्य्यत्वात्

पटवत्। अन्ये तु अगृहीतग्राहिमानसत्वसाध्यवत्त्वेनोपस्थितिविषय इति वदन्ति। साध्याभावव्याप्यवत्पक्षः। साध्यवदन्यत्वव्याप्यवत्पक्षः। पक्षनिष्ठः साध्याभावव्याप्यः पक्षनिष्ठः साध्यवद्भेदव्याप्यो वा। साध्यवदवृत्तिव्याप्यवत्पक्षः। पक्षनिष्ठः साध्यवदवृत्तिव्याप्यः। पक्षवृत्त्यभावप्रतियोगित्वव्याप्यवत्साध्यम्। साध्यनिष्ठः पक्षवृत्त्यभावप्रतियोगित्वव्याप्यो वा। "विरुद्धयोः परामर्शो हेत्वोः सत्प्रतिपक्षिता" भाषा०। तुल्यबलयोरेव सत्प्रतिपक्षत्वं नातुल्यबलयोः तेनैकतरत्र तर्कादिबलसत्त्वे तस्यैवान्यतरबाधकतेति बाध्यम्।

सत्फल पु० सन्ति शोभनानि फलान्यस्य। १दाड़िमवृक्षे शब्दच०। २रुफलयुते त्रि०।

सत्य न० सते हितं यत्। १सत्ययुगे २शपथे ३याथार्थ्ये च ४तद्वति त्रि० मेदि०। "यथार्थकथनं यच्च सर्वलोकसुखप्रदम्। तत् सत्यमिति विज्ञेयमसत्यं तद्विपर्ययः" पद्मपु० सर्वलोकसुखप्रदमिति न लक्षणघटकं सत्यस्याप्रियत्वे कथननिषेधात् अतएव मनुनोक्तं "सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्"। ५अक्षत्यदृष्टे ६नान्दीमुखश्राद्धीयदेवभेदे च पु०"दृष्टिश्राद्धे कृतदैवः सत्यो नान्दीमुखे वसुः" श्रा०त०धृतवचनम्। ७सिद्धान्ते शब्दर०। शपथरूपसत्यापालने दोषो यथा "कृत्वा शपथरूपं यः सत्यं हन्ति न पालयन्। स कृतघ्नः कालसूत्रे वसेदेव चतुर्युगम्। सप्तजन्मसु काकश्च सप्तजन्मसु श्वेचकः। ततः शूद्रा मङ्क्षाव्याधिः सप्तजन्मसु शुचिः" ब्रह्मवै० प्र० २८अ०। ८परमात्मनि "सत्यं ज्ञानमानन्दं ब्रह्मेति" श्रुतिः। ९श्रीरामे पु० शब्दर०। १०विष्णौ "औत्तमेऽन्तरे विष्णुः सत्यैः सह सुरेश्वरैः। सत्यायामभवत् सत्यः सत्यरूपो जनार्दनः" कूर्मपु० ४८अ०। ११तन्मातरि स्त्री। १२तपोलोकादूर्द्ध्वस्थे लोके सत्यलोकशब्दे दृश्यम्। सन्ति पृथिव्यप्तेजांसि च त्रयो वाय्वाकाशौ च समाहृ० निण्ड समाहृतकारः। १३भूतपञ्चके "सच्च त्यच्च भूतपञ्चकं तत् सत्यमित्याचक्षते" श्रुतिः। सत्यत्वञ्च त्रिकालाबाध्यत्वमिति वेदान्तिनः यथार्थज्ञानविषयत्वं सत्यत्वमिति नैयायिकाः। सन्धिसन्ध्यांशाभ्यां सहितसत्ययुगमानं दैवमानेन १२०० वर्षाः मानुषप्रमानेन १७२८०० वर्षाः।

सत्यङ्कार पु० सत्य+कृ-घञ् नि० सुम्। "सत्येतत् व्यवसायं क्रयमित्येवम्" सत्यकरणे सत्यापने (वायनादिदानेन) अमरः

सत्यतपस् पु० सत्यं तपोऽस्य। मुनिभेदे तस्यैव दुर्वाससो वरेण वेदव्यासरूपेणाविर्भावः तत्कथा वराहपु०।

सत्यधृति पु० शतानन्दपुत्रे ऋषिभेदे मत्स्यपु० ४८अ०।

सत्यनारायण पु० कर्म०। संक्रान्त्यादिषु पूज्ये नारायणमूर्त्तिभेदे स्कन्दपु० रेवा० ४अ० तत्कथा दृश्या।

सत्यपुर न० सत्ययुक्तं पुरम्। विष्णुलोके।

सत्यफल पु० सत्यं सदातनं फलमस्य। बल्लातके राजनि०।

सत्यभामा स्त्री सत्राजितोऽपत्यतायां श्रीकृष्णस्य भार्यांभेदे शब्दच०।

सत्यभारत पु० वेदव्यासे त्रिका०।

सत्यम् अव्य० सत्+यञ्। स्वीकारे।

सत्ययुग न०सत्यप्रधानं युगम् शाक० त०। सत्यप्रचुरे प्रथमे युगे

सत्ययौवन पु०सत्यं यौवनमस्य। विद्याधरे देवयोनिभेदे जटा०

सत्यरत त्रि० ७त०। सत्यवाक्यासक्ते हरिश्चन्द्रनृपपितरि पु० सत्यरूपु० १२अ०।

सत्यलोक पु० सत्यप्रचुरो लोकः। ऊर्द्ध्वस्थसप्तलोकमध्ये सर्वोपरिस्थे तपोलोकादूर्द्ध्वस्थे लोके।

"ब्रह्मणोनेन तपोलोकात् सत्यलोको विराजते। अपुनर्मारका यत्र ब्रह्मलोकाभिधः स्मृतः" विष्णुपु०२अं ७अ०

सत्यवचस् पु० सत्यं वचोऽस्य। १मुनौ अमरः। २सत्यवचनयुक्ते त्रि०। सत्यवचनादयोऽस्यत्र।

सत्यवत् पु० सत्यं विद्यतेऽस्य मतुप् मस्य वः। १सावित्रीपतौ नृपभेदे भा०व०२९३अ०। २मुनिभेदे च। ३सत्ययुक्ते त्रि० स्त्रियां ङीप्। सा च ४व्यासस्य मातरि शब्दर०। ५नारदपत्न्यां ६ऋचीकमुनिपत्न्यां मेदि० कालिकापु० ८४अ०। [शब्दर०।

सत्यवतीसुत पु० ६त०। सत्यगन्धापुत्रे व्यासे मुनिभेदे

सत्यवाच् पु० सत्या वाक् यस्य। १ऋषौ शब्दच०। २काकौ त्रिका०। तस्य शब्देन हि शुभाशुभनिश्चयेन तस्य तथात्वम्। ३सत्यवदनशीले त्रि०। [वक्तरि।

सत्यवादिन् त्रि० सत्यं वदति वद-णिनि। यथार्थवाक्ये

सत्यव्रत पु० सत्यं व्रतमस्य। १त्रिशङ्कुनामके राजभेदे सतृक्षपु० १२अ०। २सत्यतत्परे त्रि०। [२सत्यप्रतिज्ञे त्रि०

सत्यसङ्गर सत्यः सङ्गरः प्रतिज्ञा यस्य। १कुबेरे त्रिका०।

सत्यसन्ध त्रि० सत्या सन्धा सन्धानं यस्य। १सत्याभिसन्धौ सत्यसन्धस्य तत्परपुरुषत्वं छान्दोग्ये दर्शितम्

३श्रीरामे ४तद्वनुजे भरते ५जनमेजयनृपे च पु०शब्दर०।

सत्या स्त्री १रामपत्न्यां २व्यासमातरि सत्यवत्यां शब्दर०। ३दुर्गायां ब्रह्मवै०पु० प्र०। ४द्रौपद्यां शब्दच०।

सत्याकृति स्त्री सत्य+डाच्+कृ-क्तिन्। (अवश्यमेतन्मया-कर्त्तव्यम्) इत्येवं प्रतिज्ञारूपे सत्यकरणे (वायनादेर्व्योवा) अमरः।

सत्याग्नि पु० ६त०। अगस्त्यसुनौ शब्दर०। तज्जठरानलस्य सप्तद्वादिसर्वभक्षणेऽपि अबाधितत्वात् तथात्वम्। [अमरः

सत्यानृत न० सत्यसञ्चितमनृतं यत्र। वणिग्वृत्तौ वाणिज्ये

सत्यापन न० सत्य+णिच्-युक्च ल्युट्। सत्याकृतौ अमरः युच्। सत्यापनाथत्व स्त्री।

सत्योद्य त्रि० सत्यसद्यं यस्य वद्-क्यप्। १सत्यवादिनि शब्द-माला। कर्म०। २सत्यवाक्ये न०।

सद्म सद्मन्ने सन्तौ च सद०चु०आ०सक०सेट्। सद्मयते असद्मत। सत्रापयते इत्यन्ये अनेकाच्कत्वात् अभ्यासदेशत्वेन सति निमित्ते न षत्वम्।

सत्र न० सत्रयते सन्नयते सद-अच् षच्। १बहुदिनसाध्ये यज्ञभेदे २श्रीकृष्णश्वशुरे नृपभेदे च।

सत्राजित् पु० सत्रेणाजयति लोकान् आ+जि-क्विप्। श्रीकृष्णश्वशुरे राजभेदे।

सत्रिजातक न० पक्वमांसभेदे "मांसं बहुदहते अहं सिक्त्वा चोष्णाम्बुना सुदुः। क्षीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते। तदेव एतत्काढ्यं सुस्निग्धं सत्रिजातकम्" शब्दर०। [अमरः।

सत्वर न० सह त्वरया सहस्य सः। १शीघ्रे २त्वरान्विते त्रि०

सत्यूत्कार न० सह यूत्कारेण सहस्य सः। अभ्युज्जते सनिष्ठेवे कथने। [२दंशयुक्ते त्रि०।

सदंशक पु० सह दंशेन सहस्य सः कप्। १कर्कटके राजनि०

सदंशवदन पुंस्त्री सह दंशेन दंशाकारेण सहस्य सः तथा-भूतं वदनमस्य। कङ्कविहगे राजनि० स्त्रियां ङीष्।

सदक्षन न० कर्म०। पुष्पाक्षने रीतिजाते अक्षनभेदे शब्दच०।

सदन न० सीदत्यस्मिन्+सद-आधारे ल्युट्। १गृहे अमरः। २जले मेदि०। भावे ल्युट्। ३स्थितौ न०।

सदय पु० सह दयः कर्म०। १साधुशुभाचरणविधौ। सह दयया। सहस्य सः। २दयान्विते अमरः।

सदस् स्त्री न०। सीदत्यस्याम् सद-असि। सभायाम् अमरः

सदस्य पु० सदसि साधुर्वसति वा यत्। यज्ञादौ न्यूनाति-रिक्तताविपर्य्ययपरिहारार्थं १विधानदर्शिनि अमरः। २सभासदि त्रि० अमरः। [इत्यर्थे अमरः।

सदा अव्य० सर्वस्मिन् काले दाच् सादेशः। सर्वस्मिन् काले

सदागति पु० सदा गतिरस्य। १वायौ २सर्वदागतियुक्ते त्रि० ३सदर्थे ४निर्वाणे ५सदाश्वरे मेदिनिकोषकारः।

सदाचार पु० कर्म० ६त० वा "सरस्वतीदृषद्वत्योर्देवनद्योर्य-दन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते। त-स्मिन् देशे य आचारः पारम्पर्यक्रमागतः। वर्णानां सान्तरालानां स सदाचार उच्यते" इति मनूक्तदेशप्रचलिते आचारे "साधवः क्षीणदोषाश्च सच्छब्दः साधुवाचकः। तेषामाचरणं यत्तु सदाचारः स उच्यते" इत्युक्ते सा-धूनां २शुभाचरणे च। सदाचारनिरूपणम् आचारशब्दे ६१२ पृ० दृश्यम्। विप्रस्य चातुराश्रम्यस्तथा "गार्हस्थ्यं ब्रह्मचर्य्यञ्च वानप्रस्थं तथाश्रमाः। क्षत्रिय-स्यापि गदिता य आचारो द्विजस्य हि। वैखानसत्वं गार्हस्थ्यमाश्रमद्वितयं विशः। गार्हस्थ्यादुत्तमं त्वेकं शूद्रस्य शृणुदाचर!। स्वानि वर्णाश्रमोक्तानि धर्माणीह न हापयेत्। यो हापयति तस्यासौ परिकुप्यति भा-स्करः। कुपितः कुरुते नाशाय देहरोगविवृद्धये। वर्त्मसु पतते तस्य नरस्य शृणुदाचर!। तस्मात् स्वधर्मं न हि सन्त्यजेच्च न हापयेच्चापि तथात्मबन्धम्। यः सन्त्यजे-च्चापि निजं हि धर्मं तस्यै प्रकुप्येत दिवाकरश्च" वाम-नपु० १४अ०। [२नित्ये त्रि० अमरः स्त्रियां ङीप्।

सदातन पु० सदा भवः सदा+ष्युल् तुट्च्। १विष्णौ त्रिका०

सदातोया स्त्री सदा तोयानि पेयानि यस्याम्। १करतोया-नद्याम् २एलापर्ण्यां च शब्दच०। सदानीराशब्दे दृश्यम्

सदात्मन् त्रि०बस् साधुरात्मा चित्तं यस्य। साधुचित्ते।

सदादान पु० सदा दानं मदजलं त्यागो वा यस्य। १ऐरा-वते गजे २गणेशे ३गजे मेदि० ४सर्वदात्यागिनि त्रि०।

सदानन्द पु० सदा आनन्दो यस्य। १सदाशिवे २अनवरता-नन्दयुक्ते त्रि०।

सदानर्त्त पु स्त्री० सदा नृत्यति नृत-अच्। १खञ्जनविहगे शब्दच० स्त्रियां ङीष्। २सदा नृत्ययुते त्रि०।

सदानीरा स्त्री सदा नीरं पेयमस्याः। करतोयानद्याम् अमरः। "अथादौ कर्कटे देवी तत्रैव गङ्गा रजस्वला। सर्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी" स्मृत्युक्ते-तद्दोषजस्य सदापेयत्वात् तथात्वम्।

सदापुष्प पु० सदा पुष्पं यस्य। १नारिकेलवृक्षे शब्दमा०। २रक्तार्के स्त्री रत्नमा० ङीप्। ३सदापुष्पयुक्ते त्रि०।

सदाप्रसून पु० सदा प्रसूनमस्य। १रोहिषकवृक्षे २कर्क-वृक्षे ३कुन्दे च राजनि०।

सदाफल पु० सदा फलमस्य। १नारिकेलवृक्षे २छत्राक-

वृक्षे श्लक्ष्णफलवृक्षे च मेदि० । ४बिल्वे जटा० । ५वार्त्ताकभेदे स्त्री राजनि० टाप् । "सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी । कण्डूकच्छूहरी चैव वार्त्ताकी गुणवत्तमा" राजव० ।

सदाभद्रा स्त्री सदा भद्रमस्याः ५ब० गान्धारीवृक्षे रत्नमा० ।

सदायोगिन् पु० सदा युज्यते युज्-घिनुण् । १विष्णौ त्रिका० २सदायोगयुते त्रि० स्त्रियां ङीप् ।

सदाशिव पु० सदा शिवमस्मात् ५ब० । महादेवे ।

सदुत्तर न० कर्म० । १व्यवहारे प्रतिज्ञापत्त्यानुसारिण्युत्तरे दृष्टस्य २सम्यगुत्तरे च । ६ब० । ३तद्वति त्रि० ।

सदृक्ष त्रि० समानं दर्शनमस्य दृश+क्स समानस्य सादेशः । तुल्यरूपे अमरः । [तुल्यरूपे अमरः ।

सदृश् त्रि० समानं दर्शनमस्य समान+दृश-क्विप् सादेशः ।

सदृश त्रि० समानं दर्शनमस्य समान+दृश-टक् । तुल्यरूपे स्त्रियां ङीप् । [५ब० । निष्पन्दे त्रिका० ।

सदृशस्यन्दन त्रि० दृश-गतौ क सदृशं ऋशं गतं स्यन्दनं यस्मात् ।

सदेश पु० सह देशेन सदृशस्य सः । १निकटे अमरः २देशान्विते त्रि० ।

सद्धेतु पु० कर्म० । न्यायोक्ते हेत्वाभासदोषरहिते हेतौ । पक्षसत्त्वं१ सपक्षसत्त्वं२ विपक्षासत्त्वं३ अबाधितविषयत्वं४ असत्प्रतिपक्षितत्वं५ इति पञ्चरूपोपपन्नो हेतुः सद्धेतुः "व्याप्त्यादिविशिष्टो हेतुः सः" नीलकण्ठः "प्रमितव्याप्तिपक्षताको हेतुः सः" गदा० । २वृत्तिमद्धेतौ च "अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह" दीधितिः । अत्र सद्धेतौ वृत्तिमति हेतावित्यर्थः गगनादेः संयोगेन वृत्तिमत्त्वाभावात् तत्राव्याप्तिर्न सम्भवतीत्युक्तं सदिति ।

सद्भाव पु० सतोभावः, सत् वा भावः । १विद्यमानत्वे २साधुभावे च "सद्भावमागतः" इति भट्टिः ।

सद्भूत न० अस्तं सत् भूतम् सत्+क्वि-भू-क्त । १यथार्थे २तद्वति त्रि० हेमच० । [च मेदि० ।

सद्मन् न० सीदत्यस्मिन् सद्-मनिन् । १गृहे अमरः २जले

सद्यःकृत त्रि० सद्यस्तत्क्षणात् कृतं कृ-क्त । तत्क्षणकृते ।

सद्यःप्राणकर त्रि० सद्योऽधस्तात् प्राणं बलमायुर्वा करोति कृ-अच् । "मद्योमांसं नवान्नं च वार्त्ता स्त्री क्षीरभोजनम् । घृतसृष्णोदकञ्चैव सद्यःप्राणकराणि षट्" इति चाणक्योक्ते द्रव्यसमूहे ।

सद्यःप्राणहर त्रि० सद्यः प्राणमायुर्बलं वा हरति हृ-अच् । शुक्लं मांसं स्त्रियो दुग्धं बालाकैस्तरुणं दधि । प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट्" इति चाणक्योक्ते शुष्कमांसादिद्रव्यसमूहे । [शब्दच० ।

सद्यःशोथा स्त्री सद्यः शोथो यस्याः ५ब० । कपिकच्छ्वाम् ।

सद्यःशौच न० सद्यः शौचमपनेयमशौचम् । १क्षत्युक्ते शौचनाशे अशौचे ६ब० । २तद्वति शिल्पिन्यशौचिन्यादौ त्रि० । अशौचशब्दे ४८८ पृ० दृश्यम् ।

सद्यस् अव्य० सद्यसेऽङ्गि नि० । १तत्क्षणे अमरः । २समानदिवसे एकस्मिन् दिने इत्यर्थे च ।

सद्यस्क त्रि० सद्योभवः कन् कस्का० । सद्योजाते ।

सद्यस्क्री पु० सद्यःक्रीणाति सोमम् यत्र क्री-आधारे क्विप् कस्का० । सद्यःसोमक्रयसाध्ये यागभेदे "एकरात्रोऽतिरात्रः सद्यःक्रीः प्रक्रीरुक्थ्यः" अथर्व० ११।७।१०। नानायज्ञोक्तौ । भावे क्विप् । २सद्यस्क्रये स्त्री । तया साध्यः अण् । सद्यस्क सद्यःसोमक्रयेण एकाहसाध्ये यज्ञभेदे । "सद्यस्क्राच्च षट्" कात्या० श्रौ० २२।२।६। उक्ता यथा "षट् सद्यस्क्राः" सू० "स्वर्गकामपशुकामभ्राट्व्यवतां प्रथमः" सू० १ सद्यस्क्र व्यक्तर्भवति । "दीर्घव्याधिप्रतिष्ठाकामाः सद्यस्कामानां द्वितीयः" सू० । सद्यस्क्रो२ भवति एषामत्राधिकारः । "हीनस्यानुक्रीः" सू० अनुक्रीनांश्च सद्यस्क्रः स हीनस्य भवति यः कर्मणा हीन तस्यासौ भवति । "विश्वजिच्छित्पः" सू० नाम सद्यस्क्रः४ । "श्येनोऽभिचरतः" सू० श्येनो५ नाम सद्यस्क्रः पञ्चमः सोऽभिचरतो भवति । "एकत्रिकः" सू० षष्ठः६ सद्यस्क्रः । तत्र षट् षष्टिशतं दक्षिणा । सद्यःक्रधर्मौ व्याख्यास्यन्त इति सूत्रशेषः । दीक्षादि सद्यः सर्वं क्रियते" भाष्यम् तत्रशब्दा० भाष्ये चोक्तं यथा

अथ सद्यस्क्रा नाम पञ्च एकाहास्तेषु प्रथमद्वितीययोर्दीक्षाप्रभृत्यवभृथान्तं, सर्वमेकस्मिन्नेवाहन्यनुष्ठेयं तृतीयस्य तु एकस्मिन् दिवसे दीक्षा परस्मिन् दिवसे सोमक्रयाद्यवभृथान्तं, चतुर्थपञ्चमयोरप्येवं यद्वा एका दीक्षा सोमक्रयप्रभृति उपवसथान्तं द्वितीयेऽहनि सुत्येति एवं सूत्रकारभतं पञ्चस्वपि सद्यस्क्रान्वयात् सद्य एव एकस्मिन्नेवाहनि दीक्षाद्यवभृथान्तं कर्त्तव्यमिति मतान्तरम् । एतत्सर्वं सद्यस्क्रेण वक्ष्यमाणे महाराजे प्रातराहुतिं जुहोत्यादिना सूत्रकारेण विस्पष्टमुक्तम् । तत्र प्रथमस्य यदुक्तं सर्वं सद्योऽनुष्ठेयमिति तद्विधित्सुराह "आदित्यास्त्रिरात्रस्यादीक्षन्त ते स्वर्गं लोकमस्पर्द्धन्त तेऽङ्गिरस आदित्येभ्यः स्व सुत्यां प्राब्रुवं

स्त्र आदित्या एतमपश्यंस्तं सद्यः परिक्रीयायाङ्गिरसं स्तारं कृत्वा तेन स्तुत्वा स्वर्गं लोकमायन्हीयन्ताङ्गिरसः" ताण्ड्य०ब्रा० १६।१२।१। "पुरा आदित्याश्चाङ्गिरसश्च ऋदीचन्त यज्ञाय दीक्षां कृतवन्तः ते उभे स्वर्गे लोके स्वर्गलोकनिमित्तमस्पर्द्धन्त वयं प्रथमं गमिष्यामो वयं प्रथमं गमिष्याम इति स्पर्द्धां कृतवन्तः एवं स्पर्द्धमानास्तेऽङ्गिरस आदित्येभ्यः पूर्व्वं यः परिक्रीदीक्षानन्तरदिने करिष्यमाणं सोमयागं प्राप्नुवन् प्रोक्तवन्तः अथ ते आदित्या एवं वक्ष्यमाणयज्ञमपश्यन् तं यज्ञं सद्यः एकस्मिन्नेवाहनि परिक्रीय सोमं क्रीत्वा अयाश्च स्तुतस्तोत्रं स्तावयित्वा समापयन् दीक्षाद्यवभृथान्तं सर्वं कर्म एकस्मिन्नेवाहनि अन्वतिष्ठन्नित्यर्थः। यज्ञसमाप्त्यनन्तरमेव ते स्वर्गलोकमायन् प्राप्नुवन् आङ्गिरसस्तु हीयन्त दीक्षानन्तरदिवसे पूर्व्वेति तैरुक्तत्वात् एतस्मिन् दिने दीक्षाद्यवभृथान्तस्य सर्वस्यानुष्ठानेन स्वर्गप्राप्त्यभावात् दीक्षितैरादित्यैः सद्योऽनुष्ठानेन स्वर्गगतैः हीनाः भूमावेव परिक्लृप्ता आसन्" भा०।

सद्योजात पु० सद्योजायते जन–कर्त्तरि क्त। १वह्नौ शब्दच०। २शिवमूर्त्तिभेदे च २आशुजाते त्रि०।

सद्योभाविन् पु० सद्योभवति भू–णिनि। १वह्नौ शब्दच०। २आशुजाते त्रि०। स्त्रियां ङीप्।

सद्रु त्रि० सद–गतौ रु। गन्तरि त्रिकाण्डशे०।

सद्वृत्त न० शोभनं वृत्तं–भावे क्त कर्म०। १साधुस्वभावे जटा० २साधुवर्त्तने। हेम०। ३सच्चरित्रयुते त्रि०। "सद्वृत्तसन्निकर्षो हि त्राणार्द्धमपि शस्यते" इति तिथ्यादितत्त्वम्।

सद्वृत्ति स्त्री कर्म०। १उत्तमचरित्रे २उत्तमव्याख्यानरूपे ग्रन्थे च सती वृत्तिः यस्य। ३सद्वृत्तियुते त्रि० "सद्वृत्तिः सन्निवत्स्यतीति" माघः। [सद्वृत्ते स्त्रियां वा ङीप्।

सधर्म्मन् त्रि० समानो धर्मोऽस्य अनिच् समा० समानस्य सः।

सधर्म्मचारिणी स्त्री सह धर्मं चरति चर–णिनि। सहधर्मकारिण्यां भार्य्यायां हेमा०।

सधर्मिन् त्रि० समानं धर्मं चरति इनि। १तुल्यधर्मचरणकर्त्तरि। स्त्रियां ङीप्। सा च २पत्न्यां हेमच० [जटा०

सधवा स्त्री सह धवेन सहस्य सः। जीवत्पतिकायां स्त्रियां

सधि पु० साधयति साधि–इन् पृषो० हुस्वः। वह्नौ त्रिका०।

सधिस् पु० सह–इसिन् हस्य धश्च। दधने त्रिकाण्डशे०।

सध्रीच् त्रि० सह–अञ्चति अनुच–क्विप् सहस्य सध्रिः। १सहचरे अमरः अत्रे सध्रीचः। स्त्रियां ङीप् सध्रीची। सा च २भार्य्यायां ३सख्यां च हेमच०। [स्फाले शब्दच०।

सन पु० सन–अच्। १धनटापारुलिवृक्षे। २वृक्षिकयोः

सनक पु० सन–वुन्। ब्रह्मणो मानसपुत्रे मुनिभेदे

"भगवद्ध्यानपूतेन मनसाऽन्यांस्ततोऽसृजत्। सनकञ्च सनन्दञ्च सनातनमथात्मभूः। सनत्कुमारञ्च मुनीन् निष्क्रियानूर्द्ध्वरेतसः। तान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः!। तत्त्वैच्छन्मोक्षधर्म्मौ वासुदेवपरायणाः" भाग० ३ १२ अ० "धर्म्मस्य भार्य्या हिंसाख्या तस्यां पुत्रचतुष्टयम्। सम्प्राप्तं मुनिशार्दूलं योगशास्त्रविचारकम्। ज्येष्ठः सनत्कुमारोऽभूत् द्वितीयश्च सनातनः। तृतीयः सनको नाम चतुर्थश्च सनन्दनः" वामनपु० ५७। ५८अ० वक्ते धर्मपुत्रभेदे। [अस्य० रामाश्रमः।

सनत् पु० सम–अति। १चतुर्मुखे ब्रह्मणि त्रिका० २सदेत्यर्थे

सनत्कुमार पु० कृत०। ब्रह्मणः पुत्रे मुनिभेदे अमरः।

तस्य नित्यकुमारत्वादपि तत्त्वमता यथोक्तम्

"वृद्धः पूर्व्वञ्च वयसा यथैव पञ्चहायनः। अचूडोऽनुपवीतश्च वेदसन्ध्याविहीनकः। क्षणेति मन्त्रं जपति यस्य नारायणो गुरुः। अनन्तकालकल्पञ्च भ्रातृभिश्च त्रिभिः सह। वैष्णवानामयञ्चोक्तो ज्ञानिनाञ्च गुरोर्गुरुः" ब्रह्मवै० श्रीकृष्णजन्मख० १२६अ०। [न्द्रयुक्ते त्रि०।

सनन्द पु० सह नन्देन। १सनकशब्दोक्ते मुनिभेदे २आनन्द

सनपर्णी स्त्री सनस्येव पर्णान्यस्याः ङीष्। असनपर्य्यां शब्दच०

सनसूत्र न० शणस्य सूत्रमत्र्थस्य अच् पृषो०। मत्स्यधार्य्यार्थं शणसूत्रकृते जाले अमरे पाठान्तरम्।

सना अव्य० सदा–नि० दस्य नः। सदेत्यर्थे अमरः।

सनातन त्रि० सदा+भवार्थे ञ्युट् तुट् च नि० दस्य नः। १सदाभवे नित्ये वस्तुनि अमरः। २निश्चले विश्वः। स्त्रियां ङीप्। सा च ३दुर्गायां "सर्वकाले सना प्रोक्ता विद्यमाने तनोति च। सर्वत्र सर्वकालेषु विद्यमाना सनातनी" ब्रह्मवै० प्र० ५४अ०। तन्नामनिरुक्तिः। ४सरस्वत्यां ५ब्रह्मणश्च शब्दमा०। ६शिवे ७विष्णौ ८ब्रह्मणि ९दिव्यकल्पे ब्रह्मणोमानसपुत्रभेदे १०पितृगणभेदे च पु० हेमच०।

सनात् पु० सना नित्यमतति अत–क्विप्। विष्णौ विष्णुस० सदेत्यर्थे अव्य० अमरटीकायां रामाश्रमः। [स्त्रियां स्त्री।

सनाथ त्रि० सह नाथेन सहस्य सः। १युक्ते २जी०ङ्गर्हके

सनाभि पु० समाना नाभिर्यस्य। १ज्ञातौ अमरः। तस्य एकदेहोत्पन्नत्वेन तुल्यनाभितया तथात्वम्। २समर्थयुक्ते ३तुल्ये ४तुल्ये च त्रि० मेदि०।

सनामक पु० सना सदा अमयति अम-ण्वुल्। १शोभाञ्जनवृक्षे शब्दच०। तस्य पत्त्रादिभोजनस्य रोगहेतुत्वात्तथात्वम्। सह नाम्ना कप्। २नामयुक्ते त्रि०।

सनि पु० सन-भावे इन्। १पूजायां २दाने च सि०कौ०। ३सत्कारपूर्वकनियोगे पुंस्त्री० अमरः स्त्रियां वा ङीप्। ४ङीवन्तः हस्तिकर्णास्फाले शब्दर०५दिशि स्त्री शब्दमा०

सनित त्रि० सन-क्त० इत। प्रतिपन्ने हेमच०।

सनिष्ठी(ष्टे)व न० सह निष्ठी(ष्ठे)वेन। १सक्तखच्युत्वारिकणे सघूत्कारे अमरः।

सनीड त्रि० समानं नीडं सह नीडेन वा सादेशः। १निकटस्थे अमरः। २नीडयुक्ते त्रि०।

सन्त पु० सन-क्त०। संहतले शब्दर०।

सन्तत न० सम्+तन-क्त। १सतते निरन्तरे। २नैरन्तर्ययुते त्रि० अमरः ३विस्तीर्णे च।

सन्तति स्त्री सन्तन्यते सम्+तन-क्तिच्। १गोत्रे अमरः। २पुत्रे ३कन्यायाञ्च विश्वः। भावे क्तिन्। ४विस्तारे ५पङ्क्तौ ६अविच्छिन्नधारायाञ्च विश्वः।

सन्ततिश्च दैशिकी कालिकी च। तत्र दैशिकी तैलादीनां, कालिकी ज्ञानसुखादीनाम्। तत्र दैशिकसन्ततित्वं स्वाधिकरणदेशीयनानावच्छेदकवृत्तिधर्मत्वं तच्च मूर्त्तानामेव कालिकसन्ततित्वञ्च नानाकालीनकार्य्यमात्रवृत्तिधर्मत्वम्, सङ्क्षिप्तवादे गङ्गेशः तच्च मूर्त्तामूर्त्तयोरतएव दुःखज्ञानादिसन्ततिर्भवतीति यदुक्तं तत्रैव "देवदत्तवृत्तिदुःखत्वं दुःखत्वं वा स्वाश्रयसमानकालीनध्वंसप्रतियोगिवृत्तिकार्य्यमात्रवृत्तिधर्मत्वात् सन्ततित्वादेत्युक्त्वा सन्ततित्वं च नानाकालीनकार्य्यमात्रवृत्तिधर्मत्वमि"त्युक्तम्।

सन्तप्त त्रि० सम्+तप-क्त। १अध्वगत्यादिना परिश्रान्ते २अग्नितप्ते ३तेन विशुद्धे च "सन्तप्तचामीकरवज्रवर्ज"मिति भट्टिः।

सन्तमस न० सन्तं तमः प्रा०स० अच् समा०। १गाढान्धकारे अमरः। २महामोहे च मोहस्य सर्वावरत्वात् तमस्त्वेन महामोहस्य गाढान्धकाररूपत्वात्तथात्वम्।

सन्तर्पण न० सन्तृप्यत्यनेन सम्+तृप-करणे ल्युट्। "द्राक्षा दाड्डिमखर्जूरीशर्करामधुसंयुतम्। लाजाचूर्णन्तु साज्यं यत् तच्च सन्तर्पणं विदुः" राजनि० उक्ते द्राक्षादिभिर्युते लाजाचूर्णे खाद्यभेदे। सम्+तृप-णिच् ल्यु। २सन्तर्पयुक्ते त्रि०। [दृप्ते ३अपत्ये ४विस्तारे च मेदि०।

सन्तान पु० सम्+तन-घञ्। १वंशे अन्वये अमरः। २कल्पवृक्षभेदे ३विस्तारे ४अविच्छेदे ५संवेशे च। ६सम्यक्तायां च।

सन्ताप पु० सम्यक् तापः प्रा०स०। १वह्निजाते तापे अमरः।

सन्तापन पु० सन्तापयति सम्+तप-णिच्-ल्यु। कामदेवस्य १पञ्चशरान्तर्गते शरभेदे त्रिका०। २सन्तापकारके त्रि०।

सन्ति स्त्री सन-क्ति। १दाने २अवसाने च मुग्धबोधटीका।

सन्तोष पु० सम्+तुष-करणादौ घञ्। १धैर्य्ये २स्वास्थ्ये च हेमच०। ३सम्यक्तुष्टौ "सन्तोषमूलं हि सुखम्" मनुः।

सन्दंश पु० सम्+दन्श-अच्। (साँड़ाशी) यन्त्रभेदे हेमच०।

सन्दंशपतित पु० सन्दंशे तन्मध्ये पतित इव। सोनांसकोक्ते न्यायभेदे न्यायशब्दे ४१६९ पृ० दृश्यम्।

सन्दर्भ पु० सम्+दृभ-घञ्। १रचनायां हेला०। २ग्रन्थने ३प्रबन्धे त्रिका० "गूढार्थस्य प्रकाशश्च सारोक्तिः श्लेष्या गिरा। नानार्थवत्त्वं वेदत्वं सन्दर्भः कथ्यते बुधैः" इत्युक्ते ४कथनभेदे ५वक्तृतात्पर्य्यविशेषे च।

सन्दान न० सम्+दो-करणादौ ल्युट्। १दाम्नि २बन्धने अमरः ३सम्यक्खण्डने च। दा-ल्युट्। ४सम्यग्दाने न० ५गजस्याष्टौवतोरधोभागे पु० त्रिका०। [राजनि०।

सन्दानिका स्त्री सन्दानं संखण्डनमस्त्यस्य ठन्। विट्खदिरे

सन्दानित त्रि० सन्दानं जातमस्य तारं० इतच्। बद्धे अमरः "रशनासन्दानितचरणे"ति मालविकाग्निमित्रम्।

सन्दानिनी स्त्री सन्दानं बन्धनं गवामस्त्यस्य वा० इनि ङीप्। गोशालायाम् हेमच०।

सन्दाव पु० सम्+दु-भावे घञ्। पलायने अमरः।

सन्दाह पु० सम्+दह-करणादौ घञ्। १सुखादियोगे राजनि०। २सम्यग्दाहे च।

सन्दिग्ध त्रि० सम्+दिह-कर्त्तरि क्त। १सन्देहयुक्ते। कर्मणि क्त। २सन्देहविषये ३सम्यग्लिप्ते च। भावे क्त। ४सन्देहे ५संलेपे च।

सन्दित त्रि० सम+दो-क्त। बद्धे अमरः।

सन्दिष्ट न० सम्+दिश-भावे क्त। १वाचिकार्थकथने शब्दार्थायाम् शब्दर०। कर्मणि-क्त। २उपदिष्टे त्रि०।

सन्दिहान त्रि० सम्+दिह-शानच्। सन्देहयुक्ते जटा०।

सन्दी स्त्री सम्+दो-ड गौरा० ङीष्। खड्गायां त्रिका०।

सन्दीप्य पु० सन्दीप्यतेऽसौ सम्+दीप-कर्त्तरि ण्य। मयूरशिखाशब्दे शब्दच०।

सन्देश पु० सम्+दिश–घञ्। वार्त्तायाम् अमरः। "सदृशसन्देशहरणालसमन्यरः" नैष०।

सन्देशहर पु० सन्देशं हरति अभीष्टस्थानं कथनाय नयति हृ–अच्। १दूते "तवैव सन्देशहरादिति" रघुः। ण्वुल्। सन्देशहारकोऽप्यत्र।

सन्देह पु० सम्+दिह–घञ्। १संशयशब्दार्थे अमरः। २अलङ्कारभेदे अलङ्कारशब्दे ४०५पृ०दृश्यम्। सन्देहविशेषश्च पक्षतैत्याचार्याः स च प्रकृतपक्षविशेष्यकसाध्यवत्तानिश्चयप्रतिबन्धकतानिरूपितप्रतिरुध्यताश्रालिंगयः।

सन्दोह पु० सम्+दुह–घञ्। १समूहे अमरः। २सम्यग्दोहे कर्मणि घञ्। ३दुग्धे च "सन्दोहक्षाद्दमेऽहनि" मिता०।

सन्द्राव पु० सम्+द्रु–घञ्। पलायने अमरः।

सन्धा स्त्री सम्+धा–अङ्। १स्थितौ २प्रतिज्ञायां मेदि०। ३सन्धाने सुरोत्पादनानुगुणे व्यापारभेदे शब्दर० ४अनुसन्धाने ५सन्धायां वाचस्पतिः।

सन्धान न० सम्+धा–ल्युट्। १सुरादिसम्पादनानुगुणे व्यापारे २सोमरसकरणडनात्मके अभिषवे ३अनुसन्धाने ४सङ्गूढने च मेदि०। सन्धाने स्त्रीत्वमपि तत्र ङीप्। सा च ५क्रियशालायां शब्दर०। संघट्टनं च योजनम्। "यदङ्गैर्विच्छिन्नं भवति कृतसन्धानमिव तत्" शकु०। ५काञ्जिके हला० ६मदिरायाम् ७अवदंशे ८सौराष्ट्रे राजनि० ९धनुषि शरस्य योजने च।

सन्धि पु० सम्+धा–कि। १नृपाणां षड्गुणान्तर्गते मेलनार्थं मैत्रीकरणरूपे व्यापारे

षाड्गुण्यान्तर्गतसन्धिविग्रहादिकं शुक्रनीतिपरि०उक्तं यथा "बलीयसाऽभियुक्तस्तु नृपोऽनन्यप्रतिक्रियः। आपन्नः सन्धिमन्विच्छेत् कुर्वाणः कालयापनम्। एक एवोपकारस्तु सन्धिरेव मतो हितः। उपकारस्य भेदास्तु सर्वेऽन्ये मैत्रवर्जिताः। अभियोक्ता बलीयस्त्वादलब्ध्वा न निवर्त्तते। उपकारादृते यस्मात् सन्धिरेव न विद्यते। शक्तेरवेक्षानुसारेण उपकारं प्रकल्पयेत्। सेवां वापि च स्वीकुर्य्याद् दद्यात् कन्यां भुवं धनम्। स्वसामन्तांश्च सञ्जीवात् सन्धेनान्यजयाय वै। सन्धिः कार्य्योऽन्यनाशेन संप्राप्योत्साद्यते हि नः। संघातवान् यथा वेणुर्निर्विद्धैः कण्टकैर्दृढैः। न शक्यते वशयितुं वेणुः संघातवांस्तथा। सन्धिस्त्रातिबले, युद्धं साध्ये, यानन्तु दुर्बले। तस्मिन् सह रुजायै सर्वे साधारणे यदि"। "आत्मानं गोपयेत् कार्ये दक्षमित्रेषु बुद्धिमान्"। "राजा न गच्छेद्विश्वासं सन्धितोऽपि हि बुद्धिमान्। अद्रोहसमयं कृत्वा हृत्तमिन्द्रः सदाऽवधीत्"। "सन्धायान्यत्र यात्रायां पार्ष्णिग्राहेण शत्रुणा। सन्धाय गमनं प्रोक्तं तज्ज्ञिगीषोः फलार्थिनः"। तद्भेदलक्षणादिकं हितोपदेशे न्यरूपि यथा "कपाल उपहारश्च सन्तानः सङ्गतस्तथा। उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः। अदृष्टनर आदिष्ट आत्मादिष्ट उपग्रहः। परिक्रयस्तथोच्छिन्नस्तथा च परभूषणः। स्कन्धोपनेयः सन्धिश्च षाड्गुण्ये प्रकीर्त्तिताः। इति षोडशकं प्राहुः सन्धिं सन्धिविचक्षणाः। कपालसन्धिरित्युक्तो, केवलं समसंज्ञितः। सम्प्रदानाद्भवति य उपहारः स उच्यते। सन्तानसन्धिरित्युक्तो दारिकादानपूर्वकः। सङ्गिस्तु सङ्गतः सन्धिर्मैत्रीपूर्व उदाहृतः। यावदायुःप्रमाणस्तु समानार्थप्रयोजनः। सम्पत्तौ वा विपत्तौ वा कारणैर्यो न भिद्यते। सङ्गतः सन्धिरेवायं प्रकृष्टत्वात् सुवर्णवत्। तथान्यैः सन्धिकुशलैः काञ्चनः स उदाहृतः। द्रव्यात्मकार्थसिद्धिं तु समुद्दिश्य क्रियेत यः। स उपन्यासकुशलैरुपन्यासः उदाहृतः। मयाऽयोपकृतं पूर्वं ममाप्येष करिष्यति। इति यः क्रियते सन्धिः प्रतीकारः स उच्यते। उपकारं करोम्यस्य ममाप्येष करिष्यति। अयं चापि प्रतीकारो रामसुग्रीवयोरिव। एकार्थां सम्यगुद्दिश्य क्रियां यत्र हि गच्छति। सुसंहितप्रमाणस्तु स च संयोग उच्यते। आवयोर्बाधसख्यैस्तु सदृशः साध्यतामिति। यस्मिन् पणस्तु क्रियते स सन्धिः पुरुषान्तरः। त्वयैकेन मदीयोऽर्थः सम्यक्साध्यस्त्वनाविति। यत्र शत्रुः पणं कुर्यात् सोऽदृष्टपुरुषः स्मृतः। यत्र भूम्येकदेशेन पणेन रिपुवर्जितः। सन्धीयते सन्धिविद्भिः स आदिष्टः स उदाहृतः। स्वसैन्येन तु सन्धानमात्मादिष्टः स उदाहृतः। क्रियते प्राणरक्षार्थं सर्वदानादुपग्रहः। कोशांशेनाङ्गिकोशेन सर्वकोशेन वा पुनः। शिष्टस्य प्रतिरक्षार्थं परिक्रयः स उदाहृतः। भुवां सारवतीनां तु दानादुच्छिन्न उच्यते। भूम्यृक्षफलदानेन सर्वेण परभूषणः। परिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते। स्कन्धोपनेयः स प्राहुः सन्धिं सन्धिविचक्षणाः। परस्परोपकारस्तु मैत्री सम्बन्धकस्तथा। उपहारस्य विच्छेदस्तत्सारश्चैव सन्धयः। एक एवोपहारश्च सन्धिरेव मतो मम। उपहारविभिन्नासु सर्वं मैत्रविवर्जिताः। अभियोक्ता बलीयस्त्वादलब्ध्वा न निवर्त्तते। उपहारादृते तस्मात् सन्धिरन्यो न विद्यते"।

सन्धिलक्षणादिकं युक्तिकल्पतरौ प्रदर्शितं यथा "षण्णवन्धा भवेत् सन्धिः स्वयं क्षीनस्तमाचरेत्। मध्यादोलङ्घनं नास्ति यदि शत्रोरिति स्थितिः। मध्यादोलङ्घनं यत्र शत्रौ संशयितं भवेत्। न तं संशयितं कुर्यादित्युवाच हरिस्सतिः"। षाड्गुण्यशब्दे ५।७६६ पृ०दृश्यम् २संयोगे अमरः। ३अस्थिहृदयसंयोगस्थाने ४चौरादिकृत सुरङ्गायां "सन्धिं कृत्वा तु ये चौर्यमिति" स्मृतिः।५भेदे ६सङ्कटे ७नाटकाङ्गविशेषे ८सन्धिकार्ये मेदि०६व्याकरणोक्ते वर्णद्वयजाते १०वर्णविकारभेदे ११भेदे विश्वः। नाटकाङ्ग सन्धिश्च "अन्तरैकार्थसम्बन्धः सन्धिरेकान्विये सति"। एकार्थेन सम्बन्धः सन्धिः। तल्लक्षणादाह "मुखं प्रतिमुखं गर्भो विमर्ष उपसंहृतिः। इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते" सा०द०। मुखादिलक्षणम् तत्तच्छब्दे द्रष्टव्यम्। १२सत्यादियुगानामाद्यन्तयोः कालयोः सन्ध्याशब्दे द्रष्टव्यम् "ससन्धयस्ते मनवः कल्पे ज्ञेयास्चतुर्दश। कृतप्रमाणः कल्पादौ सन्धिः पञ्चदशः स्मृतः" मनुः। तेन सन्धिसन्ध्यांशसहितं सत्ययुगमानम् ४८०० दैवर्षाः। "कृतावद्दसङ्ख्यान्ते सन्धिः प्रोक्तो जलप्लवः। तत्र युगानामादौ सन्धिः अन्ते सन्ध्यांशः। मन्वन्तराणामादौ सन्धिः कल्पानामन्ते सन्धिरिति भेदः। १३तिथ्यादेराद्यन्तभाग भेदे च उपयमशब्दे १२५८५६ पृ० द्रष्टव्यम्।

सन्धिका स्त्री स्वार्थे क। मद्यसन्धाने शब्दच०।

सन्धिचौर पु० सन्धिना कृतसुरङ्गया चौरः। सन्धिं कृत्वा चौर्यकारके (सिँधेल) शब्दभाषा।

सन्धिजीवक पु०सन्धिना अभिसन्धिना जीवति जीव-ण्वुल् शाठ्येन परार्थहारके त्रिका०। [लिते च।

सन्धित त्रि० सन्धा जाताऽस्य तार०इतच्। १कृतसन्धे २मिलिते च।

सन्धिनी स्त्री सन्धा द्रुमसंयोगस्तल्लक्षणोऽस्त्यस्याः इति ङीप्। १द्रुमसंयोगेन धृतगर्भायां स्त्रीगव्याम् अमरः। २अकालदुग्धायां गवि मेदि०। तद्दुग्धपाननिषेधः "न पिबेत् सन्धिनीक्षीरम्" स्मृतिः।

सन्धिपूजा स्त्री सन्धौ अष्टम्याः शेषे नवम्याश्च आदौ दण्डे पूजा। आश्विनशुक्लाष्टमीनवमीसन्धिकाले विहितपूजायाम् "अष्टमी नवमीसन्धौ तृतीया खलु कथ्यते। तत्र पूज्या त्वया पुत्र! योगिनीगणसंयुता"। ज्योतिषे "अष्टम्यां सन्धियोगे सकलपरिजनैः पूजयेत् सत्यभावैः"। कालरूपीय निबन्धे स्मृतिसागरे च "अष्टम्याः शेषदण्डश्च नवम्याः पूर्व एव च। अत्र या क्रियते पूजा विज्ञेया सा महाफला" मत्स्यसूक्तेऽपि "अष्टमीनवमीयोगो रात्रिभागे विशिष्यते। अर्द्धरात्रे दशगुणं सन्ध्यायां त्रिगुणं भवेत्"। आश्विनाधिकारे "अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता। अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिः"। इति विष्णुधर्मोत्तरीयमपि तद्विषयं न तु महानवमीपूजापरम्। तस्या अष्टम्युपवासपरदिनविधानेन सप्तमीवदुपयोगानादरात्। ततश्च सप्तमीपूजावन्महाष्टम्यादिकृत्यमपि षष्टिदण्डात्मिकायामेव न तु परदिवसीय खण्डतिथौ किन्तु पूर्वोक्तसन्ध्यनुरोधान्निशादाविव खण्डतिथावपि सन्धिपूजेति। एवञ्च यस्मिन् दिने महाष्टमीपूजा तस्मिन् दिन एव उपवासः। न तु सन्धिपूजा दिने अष्टमीत्वेनोपवासविधेः पूर्वसूक्तत्वात्। एवञ्च पूर्वाष्टम्यामष्टमीपूजा तत्परदिने अष्टमीवयस्योः सन्धौ सन्धिपूजा तत्परदिने महानवमीपूजा प्रागुक्तनन्दिकेश्वरपुराणाद्युक्तोदयगामितिथ्यनुरोधात् तत्परदिने दशम्यां विसर्जनं पूजानुरोधेनाधिकदिनलाभात्" ति०त०।

सन्धिबन्ध पु० सन्धिं बध्नाति संयुनक्ति सम्+बन्ध-अच्। १भूमिचम्पके शब्दच०। तल्लेपने हि भग्नसन्धियोजनं वैद्यके प्रसिद्धम्। २नृपाणां सन्ध्यर्थनियमबन्धने च।

सन्धिला स्त्री सन्धिं लाति ला-क। १नद्यां स्वार्थे लच्। २सुरङ्गायां ३मदिरायाञ्च मेदि०।

सन्धिविग्रहाधिकारिन् पु० सन्धिविग्रहेषु अधिकरोति अधि+कृ-णिनि। नृपाणां सन्धिविग्रहाद्यधिकारिणि मन्त्रिभेदे।

सन्धिवेला स्त्री सन्धियुक्ता वेला समयः। अहोरात्रसन्धिसमये। सन्ध्याशब्दे द्रष्टव्यम्। ततः सन्धिवेलादि०भवार्थे अण् नक्षाच्चाट्ठञ्। सान्धिवेल तत्र भवे त्रि०।

सन्धिहारक पु० सन्धिना सुरङ्गया हरति परद्रव्यम् हृ-ण्वुल्। सन्धिचौरे (सिँधेल) हारा०।

सन्धुक्षित त्रि० सम्+धुक्ष-क्त। वर्द्धिते।

सन्धेय त्रि० सन्ध्+धा-यत्। १संयोज्ये २मेलनीये ३सन्धिकरणयोग्ये च

सन्धेया असन्धेयाश्च हितोप० दर्शिता यथा

"सत्यार्थौ धार्मिकौऽनार्यौ भ्रातरङ्गातवान् बलौ। अनेकयुद्धविजयौ सन्धेयाः सप्त कीर्त्तिताः। सत्यो१नुपालयन् सत्यं सन्धितो नैति विक्रियाम्। प्राणनाशेऽपि सत्यक्तमार्यौ२ नायात्यनार्यतां नरः। धार्मिकस्यार्यभक्तस्य सर्व एव हि युज्यते। प्रजानुरागाद्धर्मेच्छुः दुःखक्लेशौ

हि धार्मिकः। सन्धिः कार्योऽध्यनार्येण४ विनाशे सम्प्रस्थिते। विना तस्माच्चयेणान्यःकुर्यान्न कालयापनम्। संहृतत्वादृथा वेणुर्भिक्षुः कण्टकैर्हृतः। न शक्यते समुच्छेत्तुं भ्रातृसङ्घातवांपूस्तथा। वह्निनाऽ सह योद्धव्यमिति नास्ति निदर्शनम्। प्रतिवातं न हि घनः कदाचिदुपसर्पति। अमदग्नेः सुतस्येव सर्वः सर्वत्र सर्वदा। अनेकयुद्धजयिनः७ प्रतापादेव भुज्यते। अनेकयुद्धविजयी सन्धानं यस्य गच्छति। तत्प्रतापेन तस्याशु वशमायान्ति शत्रवः"। "बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः। भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा। विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान्। अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः। दैवोपहतकश्चैव दैवचिन्तक एव च। दुर्भिक्षव्यसनोपेतो बलव्यसनसङ्कुलः। अदेशस्थो बलरिपुर्युक्तः कालेन यश्च न। सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी। एतैः सन्धिं न कुर्वीत विगृह्णीयात् तु केवलम्। एते विगृह्यमाणा हि क्षिप्रं यान्ति रिपोर्वशम्"

सन्ध्या स्त्री सम्+ध्यै–अङ् सन्धौ भवः यत् वा। १एकरूपकालोत्तरभाविपररूपकालयोरवकाशभेदे दिवारात्रस्य २मध्यवर्त्तिकाले अमरः। स च दिवाशेषदण्डसहितरात्रिप्रथमदण्डात्मकःकालः तयोश्चतुर्दण्डात्मकः कालश्च "त्रियामां रजनीं प्राहुस्तत्प्रत्यूषाद्यन्तचतुष्टये। नाडीनां तदुभे सन्ध्रे दिवसाद्यन्तसंज्ञिते" इति स्मृतेः। "अहोरात्रस्य यः सन्धिः सूर्यनक्षत्रवर्जितः। सा च सन्ध्या समाख्यातेति" स्मृतिः। ३सायाह्ने ४सन्ध्याकाले उपास्यदेवताभेदे ५तदुपासनायाम् व्यासः। "सन्ध्यामुपासते ये तु नियतं संशितव्रता" इति स्मृतिः "प्रातः सन्ध्यां ततः कृत्वा सङ्कल्पं बुध आचरेत्" स्मृतिः। "अनर्हः कर्मणां विप्रः सन्ध्याहीनो यतः स्मृतः"। "एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम्। यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते" छन्दोगप०। "अनुगतान्तु यः पूर्वां सादित्याञ्चैव पश्चिमाम्। नोपासीत द्विजः सन्ध्यां स भवेच्छूद्रब्राह्मणः स्मृतः" शाता० अत्र सन्ध्यात्रयस्य नित्यत्वाभिधानात् "सर्वकालमुपस्थानं सन्ध्यायाः पार्थिवेष्यते। अन्यत्र सूतकाशौचविघ्नमातुरभोजितः" इति विष्णुपुराणीये सन्ध्याया इत्येकवचनान्नपाठो धर्मकोषोक्तो युक्तः। एवमेव नव्यवर्द्धमानः। सर्वकालं प्रातर्मध्याह्नसायंरूपकालत्रये। अन्यथा तदुपादानं व्यर्थं स्यात् विघ्नमश्चित्तविक्षेपः। तेन क्षतादावपि मनुष्यग्रामाचरन्ति अतएव याज्ञवल्क्यः "सर्वास्थो

ऽपि यो विप्रः मनुष्यत्रोपासनतत्परः। ब्राह्मण्यान्न हीयते कल्पजन्मशतोऽपि सन्"। सर्वास्थो नित्यं सेवकादिकर्मरतोऽपि। यथोचितमौचित्यमक्रोऽपीति रत्नाकरः। अत्यादावस्थापन्नोऽपीति युक्तम्। सन्ध्यात्रयासाधारणलक्षणमाह याज्ञवल्क्यः "त्रयाणाञ्चैव देवानां ब्रह्मादीनां समागमः। सन्धिः सर्वसुराणाञ्च तेन सन्ध्या प्रकीर्त्तिता" सन्ध्यात्रयकालस्तु अहोरात्रसम्बन्धिमुहूर्त्तात्मकः। तथाच दक्षः "अहोरात्रस्य यः सन्धिः सूर्यनक्षत्रवर्जितः। सा च सन्ध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः" सूर्यनक्षत्रवर्जितः अस्तमितोदितसूर्यमण्डलप्रकृष्टतेजोनक्षत्रवर्जितः। तथा च वराहः "अस्तंगमनात् सन्ध्या व्यक्तीभूता न तारका यावत्। तेजःपरिहानिरूपा भानोरुदयं यावत्"। अत्र आद्यन्तता उक्ता परिमाणमाह दक्षः "रात्र्यन्तकाले नाड्यौ द्वे सन्ध्यादिः काल उच्यते। दर्शनाद्रविरेखायास्तदन्तो मुनिभिः स्मृतः"। नाड़ी दण्डः योगियाज्ञवल्क्यः "ह्रासवृद्धी च सततं दिनरात्र्योर्यथाक्रमम्। सन्ध्या मुहूर्त्तसाख्याता ह्रासवृद्धौ समा स्मृता"। अत्रोपासनाया अपि सन्ध्यात्वमाह व्यासः "उपास्ते सन्धिवेलायां निशाया दिवसस्य च। तामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिणः"। उपास्ते यद्वक्ष्यमाणप्राणायामादिक्रिययेति यावत्। तत्काले उपास्यापि देवता सन्ध्या तथा च याज्ञवल्क्यः "सन्ध्यां सन्ध्यासुपासीत नास्तमेनोदगते रवौ"। उपासनोपक्रममाह संवर्त्तः "प्रातः सन्ध्यां सनक्षत्रामुपासीत यथाविधि। सादित्यां पश्चिमां सन्ध्यामस्तमित भास्कराम्"। सनक्षत्रामित्यनेन तदुयुक्तकाले उपक्रम्य प्रातः सन्ध्यामुपासीत एवमेवास्तमितभास्करारभ्य पश्चिमां सादित्यामित्यनेन तदुयुक्तकाले उपक्रम्य उपासीतेत्यर्थः। मध्याह्नसन्ध्याया अष्टममुहूर्त्ते कालमाह स्मृतिः "पूर्वापरे तथा सन्ध्रे सनक्षत्रे प्रकीर्त्तिते। समस्तूर्ध्वं तु मध्याह्ने मुहूर्त्ते सप्तमोपरि"। शाङ्खायनस्तूह्यम् "अरण्ये समितपाणिः सन्ध्यामुपासीत नित्यं वाग्यत उत्तरापराभिमुखोऽष्टमदिग्मानलक्षदर्शनात् व्यतिक्रान्तायां महाव्याहृतीः सावित्रीं स्वस्ययनादि जप्त्वा एवं प्रातः प्राङ्मुखस्तिष्ठन् व्यस्तदर्शनादिति"। उत्तरापराभिमुखो वायुकोणाभिमुखः कोणं विदध्यादिति अन्वष्टमदिग्मिति। उभयदिगष्टमभाग-

मिति यावत्" श्रा०त०। अधिकं गायत्रीशब्दे दृश्यम्। ६युगसन्धिकाले ७नदीभेदे मेदि०। ८ब्रह्मपत्नीभेदे स्त्री। ९चिन्तायां १०संभवे ११शोभायां १२सन्धाने १३पुष्पभेदे हेमच०"चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्। तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः। इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु। एकापायेन वर्त्तन्ते सहस्राणि शतानि च"मनुः। चत्वार्याहुरिति चत्वारि वर्षसहस्राणि कृतयुगं कालं मन्वादयो वदन्ति। तस्य तावद्वर्षशतानि सन्ध्या सन्ध्यांशश्च भवति युगस्य पूर्वा सन्ध्या उत्तरश्च सन्ध्यांशः। तदुक्तं विष्णुपुराणे "तत्प्रमाणैः शतैः सन्ध्या पूर्वा तत्राभिधीयते। सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरोहि सः। सन्ध्यासन्ध्यांशयोरन्तर्यः कालो मुनिसत्तम!। युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञकः" एकापायेनेति। त्रीणि सहस्राणि त्रेतायुगं त्रीणि शतानि तस्य सन्ध्या सन्ध्यांशश्च। द्वे सहस्रे द्वापरयुगं द्वे शते तस्य सन्ध्या सन्ध्यांशश्च। एकसहस्रं कलियुगमेकशतं तस्य सन्ध्या सन्ध्यांशश्च भवतीत्यर्थः। १४प्रबोधसम्प्रसादयोः सन्धिभवे स्वप्ने "सन्ध्ये सृष्टिराह हि" भा०क्रु० "सन्ध्यमिति स्वप्नस्थानमाचष्टे वेदे प्रयोगदर्शनात् "सन्ध्यं तृतीयं स्वप्नस्थानम्" द्वयोर्लोकस्थानयोः प्रबोधसम्प्रसादस्थानयोः सन्धौ भवतीति सन्ध्यम्" भा०। "तस्मिन् सन्ध्ये स्थाने तिष्ठन्ते उभे स्थाने पश्यति इदञ्च परलोकस्थानञ्च" रत्नप्र० श्रुतिः समूर्णैः सर्वेन्द्रियोपसंहारादेतल्लोकानुभवे सति वासनामात्रेण इमं लोकं स्मरतः कर्मवशात् क्षुद्रये मानसं परलोकस्फूर्त्तिरूपः स्वप्नो भवति सोऽयं लोकद्वयसन्धौ भवतीति सन्ध्यः स्वप्नः" रत्नप्र०।

सन्ध्यांश पु० सन्ध्या तत्प्रमाणः सत्ययुगादेरंशः। सत्ययुगादेरंशभेदे तत्प्रमाणम् सन्ध्याशब्दे मनूक्तम् दृश्यम् "सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युग"मिति मनुः।

सन्ध्याचल पु० "सन्ध्यां वशिष्ठः कृतवान् तत्र यस्मादिमैः श्रुतः। ततः सन्ध्याचलं नाम तस्य गायन्ति देवताः" कालिकापु० ५० अ० निरुक्ते पर्वतभेदे।

सन्ध्यानाटिन् सन्ध्यायां नटति नट-णिनि। १शिवे त्रिका०

सन्ध्यापुष्पी स्त्री सन्ध्यायां पुष्पमस्याः ङीप्। जातिहञ्चे राजनि०।

सन्ध्याबल पु स्त्री०सन्ध्यायां सन्ध्योपलक्षिते रात्रिकाले बलं यस्य। रात्रौ बलयुक्ते राक्षसे त्रिका० स्त्रियां ङीप्।

सन्ध्याभ्र न० सन्ध्याकालीनमभ्रमिव। १सुवर्णमैरिके राजनि०। २सन्ध्याकालीनमेघे च।

सन्ध्याराग पु० सन्ध्याया इव रागोऽस्य। १सिन्दूरे राजनि०। ६त०। सन्ध्याकालीने २रक्तवर्णे च।

सन्ध्याराम पु० सन्ध्यायां तदाख्यभार्यायां रमते रमसंज्ञायां कर्त्तरि घञ्। चतुर्मुखे ब्रह्मणि शब्दमा०।

सन्न पु०सीदति सद-क्त। १पियालवृक्षे भरतः। २अवसन्ने त्रि० स्वार्थे क। खर्वे भरतः। [२खर्जूवृक्षे च।

सन्नकटु पु० सन्न एव सन्नकः कर्म०। १पियालवृक्षे अमरः।

सन्नत त्रि० सम्+नम-क्त। १प्रणते २ध्वनियुते च।

सन्नति स्त्री सम्+नम-क्तिन्। १प्रणामे २ध्वनौ मेदि०। ३नम्रतायाञ्च। ४होमभेदे स च व्यवः ४।५६। एकादिभिरष्टभिर्मन्त्रैर्विधेयः। तैत्तिरीयब्रा०३।८।१८।५ विवृतिश्च।

सन्नद्ध त्रि० सम्+नह-क्त। १कृतसन्नाहे धृतवर्मणि २व्यूहरचनयावस्थिते सैन्यादौ मेदि०। ३आततायिनि रायमुकुटे ४मन्त्रादियुक्ते शब्दर०।

सन्नय पु० सम्+नी-अच्। १समूहे २पृष्ठस्थिते-बले च अमरः

सन्नहन न० सम्+नह-ल्युट्। १वर्म्मग्रहणे २वद्धोगे ३सव्यग्वन्धने च। [हेमच०। भावे घञ्। संबन्धने।

सन्नाह पु०सन्नह्यते सम्+नह-कर्मणि घञ्।(साँजोया)वर्म्मणि

सन्नाह्य पु० सम्+नह-ण्यत्। समरोचिते गजे हेमच०।

सन्निकर्ष पु० सम्+नि-कृष-घञ्। १सान्निध्ये हेमच० "सद्वृत्तसन्निकर्षो हि चणार्द्रमपि भक्षयते"इति पुराणम् न्यायमते २विषयेन्द्रियसम्बन्धे ज्ञानलक्षणासामान्यलक्षणायोगजधर्मविशेषात्मके ३अलौकिकप्रत्यक्षसाधने उपायभेदे च। "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षम्" गौ० सू०। सन्निकर्षो द्विविधः लौकिकालौकिकभेदात् लौकिकोऽपि षड्विधः अलौकिकस्तु त्रिविधः यथोक्तं भाषाप० "सन्निकर्षः षड्विधः हेतुरिन्द्रियं करणं मतम्। विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः। द्रव्यप्रहणे संयोगात्१ संयुक्तसमवायतः२। द्रव्येषु समवेतानां, तथा तत्समवायतः३। तत्रापि समवेतानां, शब्दस्य समवायतः४। तद्वृत्तीनां समवेतसमवायेन५ तु ग्रहः। विशेषणतया६ तद्वदभावानां ग्रहो भवेत्। यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते। प्रत्यक्षं समवायस्य विशेषेणतया भवेत्। अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः। सामान्यलक्षणा१ज्ञानलक्षणा२योगज३स्तथा" भाषा० "यद्यपि विशेषणता नानाविधा तथाहि भूतलादौ घटाभावः

संयुक्तविशेषणतया घटाभावः संयुक्तसमवेतसमवेतविशेषणतया, शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया, रूपादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया। एवं कत्वावच्छिन्नाभावे खत्वाभावादिकं विशेषणविशेषणतया। एवं घटाभावादौ पटाद्यभावः संयुक्तविशेषणविशेषणतया। एवमन्यदप्यूह्यं तथापि विशेषणतावच्छेदकैरेवैव सा गण्यते अन्यथा गौरवा दित्युत्कर्ष इति प्राचां प्रवादो व्याहन्यतेति" सि०मु०।

सन्निकर्षण न० सम्+नि+कृष-ल्युट्। सन्निधाने अमरः।

सन्निकृष्ट त्रि० सम्+नि+कृष-क्त। १निकटस्थे अमरः २इन्द्रियसम्बन्धविषये च। [स्थिते त्रि०।

सन्निधि न० सम्+नि+धा-क। १नैकट्ये सोपाधितः। २समीसन्निधान न० सम्+नि+धा-ल्युट्। १नैकट्ये सामीप्ये हेमच०। २व्याप्तये च।

सन्निधि पु० सम्+नि+धा-कि। १सामीप्ये अमरः कर्मणि कि। २इन्द्रियविषये मेदि० कर्म०। ३साधुनिधौ। ४व्रतं० निधौ। [२स्थिते च।

सन्निपातित त्रि० सम्+नि-पत-क्त। १मिलिते २उपस्थिते

सन्निपात पु० सम्+नि+पत-घञ्। १मेलने "सन्निपातलक्षणो विधिरनित्यस्तद्विघातस्त्वेति" व्या० परि०। २कफादिधातुत्रयस्य वैषम्यरूपत्रिदोषजे ज्वरभेदे ३नाशे ४उपस्थितौ च। ५तालभेदे "एक एव गुरुर्यत्र सन्निपातः स चेष्यते" सङ्गीतदा०।

ज्वरभेदलक्षणनिदानभेदादिकं भावप्र० उक्तं यथा "तत्र सन्निपातज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्विकां रूपाप्तिमाह "त्रिदोषजनकैर्वातपित्तश्लेष्मामयेहगाः। वह्निर्निरस्य कोष्ठाग्निं रसगाज्वरकारिणः"। पूर्वरूपमाह "प्राग्रूपाणि त्रिदोषाणां स्युस्त्रिदोषज्वरे त्वणम्"। अथ सन्निपातज्वरस्य सामान्यानि लक्षणान्याह "त्वचि दाहः त्वचि शीतमस्थिसन्धिशिरोरुजा। सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने। सक्ष्वेडौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः। तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः। परिदग्धा खरस्पर्शा जिह्वा रक्तावृता परा। श्रोत्रं रक्तपित्तस्य कफेनोन्मिश्रितस्य च। शिरसो लोठनं तृष्णा निद्रानाशो हृदिव्यथा। स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः। जयत्वं नातिगात्राणां सततं कण्ठकूजनम्। कोष्ठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम्। मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च। चिरात्पाकश्च दोषाणां सन्निपातज्वरावृतिः।" लोचने सास्रावे सास्रुणी कलुषे रक्ते निर्भुग्ने निर्गते कुटिले च कण्ठः शूकैरिवावृतः धान्याग्रैरिवावृतः। जिह्वा परिदग्धा परिदग्धेव जायते।" अथवा परिदग्धा इव कृष्णा दृश्यते खरत्वाक्रान्ता शिथिलाक्रान्ता। श्रोत्रमित्यादि कफसंयुक्तस्य रक्तस्य श्रोत्रं शिरसो लोठनमित्यत्र तत्र लोठनं क्षयत्वन्नातिगात्राणामिति गात्राणामू अतिशयितं कार्श्यं न व्याधिप्रभावात् सततं निरन्तरं कोठः। "वरटीदष्टसंस्थानं कोठ इत्यभिधीयते" ख्यावः कपिशो वर्णः। मूकत्वमवचनत्वमल्पवचनत्वं वा स्रोतसां कर्णनासादीनामू।

अथ सामान्यसन्निपातज्वरस्य त्रयोदश विशेषानाह "एकोल्वणास्त्रयस्त्रेषु द्व्युल्वणास्तथेति षट्। त्रयुल्वणश्च भवेदेको विज्ञेयः स तु सन्नमः। प्रवृद्धमध्यहीनेषु वातपित्तकफैश्च षट्। सन्निपातज्वरस्त्वेवं सुविशेषास्त्रयोदश"। तत्र प्रवृद्धवातः मध्यपित्तो हीनकफः १ मध्यवातः प्रवृद्धपित्तो हीनकफः २ हीनवातः प्रवृद्धपित्तो मध्यकफः ३ प्रवृद्धवातः हीनपित्तो मध्यकफः ४ मध्यवातः हीनपित्तः प्रवृद्धकफः ५ हीनवातो मध्यपित्तः प्रवृद्धकफः ६ इति षट्। तेषां नामानि क्रमादाह "विस्फारकस्त्वशुकारी कल्पनो दम्भसंज्ञकः। शीघ्रकारी तथाभ्रुः सन्नमः कूटपालकः। संमोहकः पालकश्च याम्यः क्रकच इत्यपि। ततः कर्कटकः प्रोक्तस्तो वैदारिकाभिधः" तन्त्रान्तरे विस्फारक इत्यत्र विस्फोरक इति पाठः। दम्भस्थाने दम्बुरितिपाठः क्वापि बद्ध इति पाठः भभ्रुरित्यत्र फस्रुरिति पाठः याम्य इत्यत्र संघात इति पाठः कर्कटक इत्यत्र कदर्टक इति पाठः। तत्र वातोल्वणस्य लक्षणमाह "श्वासः कासो भ्रमो मूर्च्छा प्रलापो मोहवेपथू। पार्श्वस्थवेदना जृम्भा कषायत्वं मुखस्य च। वातोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। एष विस्फारको नाम्ना सन्निपातः सुदारुणः।" अथ पित्तोल्वणस्य लक्षणमाह "अतिसारो भ्रमो मूर्च्छा मुखपाकस्तथैव च। गात्रे च विन्दवो रक्ता दाहोऽतीव प्रजायते। पित्तोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। भिषग्भिः सन्निपातोऽयमाशुकारी२ प्रकीर्त्तितः"। अथ कफोल्वणस्य लक्षणमाह "जड़ता गद्गदा वाणी रात्रौ निद्रा भवत्यपि। प्रसन्ने नयने चैव मुख-

आधुर्ध्यमेव च। कफोल्बणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। मुनिभिः सन्निपातोऽयमुक्तः कष्टमनसंज्ञकः२"। अथ वातपित्तोल्बणस्य लक्षणमाह "वातपित्ताधिको-ऽयन्तु सन्निपातः प्रकुप्यति। तस्य ज्वरो मदस्तृष्णा सुखशोषः प्रमीलकः। आध्मानारुचितन्द्राश्च कास-श्वासभ्रमश्रमाः। मुनिभिर्वेद्यनामायं३ सन्निपात उदा-हृतः।" अथ वातश्लेष्मोल्बणस्य लक्षणमाह "वा-तश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति। तस्य शीत-ज्वरो मूर्च्छा तृट् तृष्णा पार्श्वनिग्रहः। गूढमस्विद्य-मानस्य तन्द्रा श्वासश्च जायते। असाध्यः सन्निपातोऽयं शीघ्रकारीति४ कथ्यते। नहि जीवत्यहोरात्रमनेना-विष्टविग्रहः।" "अथ पित्तश्लेष्मोल्बणस्य लक्षणमाह "पित्तश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति। अन्तर्दाहो बहिःशीतं तस्य तृष्णा प्रवर्द्धते। तृष्यते दक्षिणे पार्श्वे खरःशीर्षगलग्रहः। क्षीयति श्लेष्मपित्तस्य लक्ष्यात्-कोटश्च जायते। विड्भेदश्वासहिक्काश्च वर्द्धन्ते सप्रमीलकाः। षड्भिर्भवेन्नृणामायं५ सन्निपात उदा-हृतः।" अथ वातपित्तश्लेष्मोल्बणस्य लक्षणमाह "सर्वदोषोल्बणो यस्य सन्निपातः प्रकुप्यति। तयाबा-धिपि दोषाणां तस्य रूपाणि लक्षयेत्। व्याधिभ्यो दारुणश्चैव वज्राशन्यग्निसन्निभः। केवलोच्छ्वासपर-मस्तब्धाक्षः स्तब्धलोचनः। त्रिरात्रात् परमेतस्य जन्तो-र्हरति जीवितम्। तदवस्थन्तु तं दृष्ट्वा मूढो व्याहरते जनः। धर्षितो राक्षसैर्नूनमवेलायां चरन्ति ये। अन्यया ब्रुवते केचिद् यक्षिण्या ब्रह्मराक्षसैः। पिशा-चैर्गुह्यकैश्चैव तथान्यैर्भस्मके हुतम्। कुलदेवार्च्चनाहीनं धर्षितं कुलदेवतैः। नक्षत्रपीड़ामपरे गरकर्मेति चापरे। सन्निपातमिमं प्राज्ञैर्भिषजः कूटपालकम्७।" अथ प्रकृतिमध्यहीनवातादिजनितसन्निपातज्वराणां लक्षणा-न्याह "प्रकृतिमध्यहीनैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः। प्रलापायास-संमोहकम्पमूर्च्छारतिक्षमाः। एकपक्षाभिघातस्य तस्या-क्षेते विशेषतः। एष संमोहको नाम्ना सन्निपातः सुदारुणः।" रोगास्तएवोक्ताः उक्ता एव ते रोगाः व्याधेषपुनिद्रानाशविप्रलापाद्यो वातजाः दाहतृष्णो-ष्मतासेदाद्यः पित्तजाः शीतवाग्निसाम्द्योत्कास-नासिकासुखप्रसेकाद्यः कफजाः। तत्रापि प्रलापाद्यः पञ्च धातूनां विशेषाद्भवन्ति। तत्र वातः प्रकृतः सज्वरं करिष्यति पित्तन्तु मध्यमनमिति यावत् ततकथं ज्वरं करिष्यति यत आह "धातवस्तत्रबला दोषाः क्षुण्णाशया-श्चमारुतौ। समाः सुखाय विज्ञेया बलायोपचयाद्य च।" इति उच्यते। अत्र पित्तं मध्यमपि प्रकृतव-मेव यतोऽप्रकृतयोर्वातश्लेष्मणोरमेलया मध्यं तेन मध्यप्रकृतिमित्यर्थः। नन्तु कफजीर्णः स कथं ज्वरं करिष्यति हीनशक्तित्वात् उच्यते दोषाः क्षीणा अपि व्याधीन् कुर्वन्त्येव यत आह "वातजेऽल्पचेष्टत्वं मन्द-वाक्त्वं विसंज्ञता। पित्तजेऽधिकःश्लेष्मा बह्निमन्दः प्रभाक्षयः।" शिथिलाः सन्धयोमूर्च्छारौक्ष्यं दाहः कफ-क्षये"। इत्यादङ्गादिसङ्गात्वाच्च परत्वापि। "मध्य प्रकृतिहीनैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः। मोहप्रलापमूर्च्छाः स्युर्मन्यास्तम्भः शिरोग्रहः। कासः श्वासो भ्रमस्तन्द्रा संज्ञानाशो हृदिव्यथा। स्रेभ्यो रक्तं विदहति संरक्तं स्तब्धने त्रता। तत्राप्येते विशेषाः स्युर्मूत्रत्वुरसंक्ति त्रिरात्रात्। भिषग्भिः सन्निपातोऽयं कथितः पाकलाभिधः६। हीनप्रकृतिमध्यैस्तु वातपित्तकफैश्च यः। तेन रोगास्त-एवोक्ता यथारोगबलाश्रयाः। हृदयं दह्यते चास्य यकृत्प्लीहान्त्रफुप्फुसाः। प्रच्यन्तेऽत्यर्थमूर्द्धाधःपूय-शोणितनिर्गमः। शीर्णदन्तस्य मृत्युश्च तत्राप्येतद्वि विशेषतः। भिषग्भिः सन्निपातोऽयं याम्यो१० नाम्ना प्रकीर्त्तितः। प्रकृतिहीनमध्यैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः। प्रलापा-यासंमोहाः कम्पमूर्च्छारतिक्षमाः। अन्यास्तस्येन मृत्युः स्यात् तत्राप्येतद्विशेषतः। भिषग्भिः सन्नि-पातोऽयं क्रकचः११ संप्रकीर्त्तितः। मध्यहीनप्रकृतैस्तु वातपित्तकफैश्च यः। तेन रोगास्त एवोक्ता यथादोष बलाश्रयाः। अन्तर्दाहो विशेषोऽत्र न च वक्तुं स शक्यते। रक्तमालक्तकेनेव लक्ष्यते मुखमण्डलम्। पित्तेनाकर्षितः श्लेष्मा हृदयान्न प्रसिच्यते। दूषणे-वाहतं सर्वं स्रुतं खन्यते हृदि। प्रमीलकः श्वास-हिक्का वर्द्धते च दिने दिने। जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवाहतः। विसर्गं नाभिजानाति कूजेच्चापि कपोतवत्। अतीव श्लेष्मणा पूर्णः शुष्कवक्त्रौष्ठतालुकः। तन्द्रानिद्रातियोगार्त्तो हतवाग्निहतद्युतिः। न रतिं लभते नित्यं विपरीतानि चेच्छति। आयस्यते च बह्वशो रक्तं छर्दति चात्यशः। एव कर्कटको१२ नाम्ना

सन्निपातः सुदारुणः। हीनमध्यप्रवृद्धैस्तु वातपित्तकफैश्च यः। तेन रोगास्तएवोक्ता यथादोषबलाश्रयाः। अल्पशूलं कटीतोदो मध्ये दाहो रुजा भ्रमः। भयं क्लमः शिरोवस्तिसन्यास्हृदयवाग्रुजः। प्रलोपकः श्वासकासहिक्का जाड्यं विसंज्ञता। प्रथमोत्पन्नमेतन्तु साधयन्ति कदाचन। एतस्मिन् सन्निपन्ने तु कर्णमूले सुदारुणः। पिड़का जायते जन्तोर्यया कृच्छ्रेण जीवति। स वैदारिकसंज्ञो १२ऽयं सन्निपातः सुदारुणः। चिरत्वात् परमेतस्य व्यर्थमौषधकल्पनम्।" तन्त्रान्तरे वातोल्बणादीनां सन्निपातज्वरविशेषाणां त्रयोदशानां शीताङ्गादीनि त्रयोदश नामान्तराणि लक्षणान्तराणि चाह "शीताङ्गस्तिमितोष्णज्वरगणे तन्द्री प्रलापी ततो रक्तष्ठीवयिता च तत्र गणितः सम्भुग्ननेत्रस्तथा। साभिन्यासकजिह्वकश्च कथितः प्राग्सन्निगोऽथान्त्को रुग्दाहः सहचित्तविभ्रम इह द्वौ कर्णकण्ठग्रहौ।" तन्द्री तन्द्रिका प्रलापी प्रलापकः रक्तष्ठीवयिता रक्तष्ठीवी संभुग्ननेत्रः भुग्ननेत्रः। अभिन्यासकः अभिन्यासः कर्णकण्ठग्रहौ कर्णग्रहः कर्णिकः कण्ठग्रहः कण्ठकुब्जकः। अथ तेषां प्रत्येकं लक्षणानि "हिमाग्निशिरशरीरः सन्निपातज्वरी यः श्वसनकसनहिक्कामोहकम्प्रलापैः। क्लमवद्भकफवाता दाहवम्यङ्गपीड़ाः स्वरविकृतिभिरार्त्ताः शीतगात्रः१ स उक्तः। तन्द्रातोद ततस्तृष्णानिसरणं श्वासोऽधिकः कासरुक् सन्तप्तातितनुर्गले श्वयथुना सार्द्धञ्च कण्ठ्कफम्। घ्राणास्या रसना क्लमः श्रवणयोर्मान्द्यञ्च दाहस्तथा यत्र स्यात्सहि तन्द्रिको२ निगदितो दोषत्रयोत्थो ज्वरः। यत्र ज्वरे निखिलदोषनितान्तरोषजाते प्रलापबहुला सहसोत्थिताश्च। कम्पव्यथापतनदाहविसंज्ञताः स्युर्नाम्ना प्रलापक३ इति प्रथितः पृथिव्याम्। निष्ठीवो रुधिरस्य, रक्तसदृशं क्ष्णं तनौ मण्डलम् लौहित्यं नयने हृषाऽरुचिवमिश्वासाति सारम्भमाः। अध्मानञ्च विसंज्ञता च पतनं हिक्काङ्गपीड़ा भयम्। रक्तष्ठीविनि४ सन्निपातजनिते लिङ्गं ज्वरे जायते। भयं नयनवक्त्रताम्रसनकासतन्द्रा भ्रमम्। प्रलापमदवेपथुश्रवणहानिमोहास्तथा। पुरो निखिलदोषजे भवति यत्र लिङ्गं ज्वरे पुरातनविकित्सकैः स रुक्ष भुग्ननेत्रो५ मतः। दोषास्तीव्रतरा भवन्ति बहिनः सर्वेऽपि यत्र ज्वरे मोहोऽतीव विचेष्टता ह्यकस्मात् श्वासो भयं मूकता। दाहश्चिक्कणमाननञ्च दृहनोमन्थोबलस्य क्षयः सोऽभिन्यास६ इति प्रकीर्त्तितः इह प्राज्ञैर्भिषग्भिः पुरा। त्रिदोषजनिते ज्वरे भवति यत्र जिह्वा भयम् हृता कठिनकण्टकैस्तदनु निर्भरं मूकता। स्मृतिच्युतिबलच्युतिश्वसनकासमन्त्रयः पुरातनभिषग्वरास्तमिह जिह्वकञ्चक्षते। व्यथातिशयिता भवेच्छ्वयथुसंयुता सन्धिषु प्रभूतकफतासुखे विगतनिद्रता कासरुक्। समस्तमिति कीर्त्तितं भवति लक्ष्म यत्र ज्वरे त्रिदोषजनिते बुधैः सहि निगद्यते सन्निगः८। यस्मिन् लक्षणमेदस्ति सकलैर्दोषैरुदीर्णे ज्वरेऽजस्रं भ्रूविधुननं सकसनं सर्वाङ्गपीड़ाधिका। हिक्काश्वासमदाहमोहसहिता देहेऽतिसन्तप्तता वैकल्यञ्च हृषा वचांसि सुनिभिः संकीर्त्तितः षोऽल्पकः९। दाहोऽधिको भवति यत्र तृषा च तीव्रा श्वासप्रलापविरुचिभ्रममोहपीड़ाः। मन्याहनुव्यथनकण्ठरुजः श्रमश्च रुग् दाहसंज्ञ१० उदितस्त्रिभवो ज्वरोऽयम्। गायति नृत्यति हसति प्रलपति विकृतं निरीक्षतेसहसा। सदाहव्यथाभयार्त्तो नरस्तु चित्तभ्रमे११ ज्वरे भवति। दोषत्रयेण जनिता किल कर्णमूले तीव्रा ज्वरे भवति तु श्वयथुर्व्यथा च। कण्ठग्रहो बधिरता श्वसनं प्रलापः प्रस्वेदमोहदहनानि च कर्णिकाख्ये १२। कण्ठः शूककृतावरुद्धवदतिश्वासः प्रलापोऽरुचिर्दाहो देहरुजा तृषापि च हनुस्तम्भः शिरार्त्तिस्तथा। मोहो वेपथुना सहेति सकलं लिङ्गं त्रिदोषज्वरे यत्र स्यात् सहि कण्ठकुब्ज१३ उदितः प्राच्यैश्चिकित्सावुधैः। सन्निगस्तेषु साध्यः स्यात् तन्द्रिकश्चित्तविभ्रमः। कर्णिको जिह्वकः कण्ठकुब्जः पञ्चापि कष्टतः। रुग्दाहस्त्वतिकष्टेन संसाध्यस्त्रिषु भाषितः। रक्तष्ठीवी भुग्ननेत्रः शीतगात्रः प्रलापकः। अभिन्यासोऽत्यन्तकष्टसाध्यः प्रकीर्त्तितः।" अथ तन्त्रान्तरे वातोल्बणादीनां सन्निपातज्वरविशेषाणां त्रयोदशानां कुम्भीपाकादीनि त्रयोदश नामान्तराण्याह "कुम्भीपाकः प्रोर्ष्णुनावः प्रलापी क्षालदोंऽहो दण्डपातोऽन्तकश्च। एषोदाहृतश्च हारिद्रसंज्ञो भेदा एते सन्निपातज्वरस्य। अजघोषभूतहासौ यन्त्रापीड़श्च संज्ञामः। संयोगो च विशेषास्तस्यैवोक्तास्त्रयोदशान्यत्र"। अथैषां लक्षणानि "घोणाविवरभरद्रुबहुशोषासितलोहितं क्रान्द्रम्। विलुठन्मस्तकमभितः कुम्भीपाकेन पीड़ितं विद्यात्। उत्क्षिप्य यः क्षमङ्गं क्षिपत्यधस्ताच्चितान्तसक्थ-

स्थिति। तं प्रोर्णुनाव२ जुष्टं विचित्तवष्टं विजानीयात्। स्वेदभ्रमाङ्गभेदाः कम्पोदवर्त्तमिश्र्या कण्ठे। गात्रञ्च गुर्वतीव प्रलापिश्जुष्टस्य जायते लिङ्गम्। अन्तर्दाहः शैत्यं बहिः, श्वयथुररतिरपि तथा श्वासः। अङ्गमपि दग्धकल्पं षोऽन्तर्दाहाश्र्दितः कथितः। नक्तं दिवा न निद्रामुपैति गच्छति मूढधीर्नभसः। उत्पाय दण्डपातोऽभ्रमातुरः सर्वतो भ्रमति" नभसो गच्छति आकाशात् किञ्चित् ग्रहीतुं करौ प्रसारयतीत्यर्थः। "संपूर्यते शरीरं ग्रन्थिभिरभितस्तथोदरं मरुता। श्वासातुरस्य सततं विचेतनस्यालकार्त्तस्य" । परिधावतीव गात्रे रुक्पात्रे भुजङ्गपतङ्गहरिणगणः। वेपथुमतः सदाहस्यैणीदाहश्उज्वरार्त्तस्य"। रुक्पात्रे पीड़ाभाजने गात्रस्य विशेषणमेतत्। "यस्याऽतिपीतमङ्गं नयने सुतरां मलस्तनोऽप्यधिकम्। दाहोऽतिशीतता बहिरस्य स हारिद्रकोट ज्ञेयः। कुगलकसमानगन्धः स्वस्वरुजावाच्चिरुज गलरनृभ्रः। अजघोषट सन्निपातादातास्याच्चः पुमान् भवति। शब्दादीनधिगच्छति न स्वान्विषयान् यदिन्द्रियग्रामैः। हसति प्रलपति परुषं स ज्ञेयो भूतहासा१०र्त्तः। येन सुदुर्ज्वरवेगात् यन्त्रेणेवावपीड्यते गात्रम्। रक्तं पीतञ्च वमेद्दयन्त्रापीड़ः११ स विज्ञेयः। अतिसरति वमति कूजति गात्राण्यभितश्चिरं नरः क्षिपति। सन्यास१२सन्निपाते प्रलपत्युच्चाश्रिमण्डलो भवति। मेचकवपुरतिमेचकलोचनयुगलो मलोत्सर्गात्। संशोषिणि१३सितपिड़कामण्डलयुक्तो ज्वरे नरो भवति। नारायण एव भिषक् भेषजमेतेषु जाह्नवीनीरम्। नैरुज्यहेतुरेको नित्यं मृत्युञ्जयो ध्येयः।" अथासाध्यस्य सन्निपातज्वरस्य लक्षणमाह "सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः। शोथः संजायते तेन कश्चिदेव प्रमुच्यते।" सुदारुणः मारकत्वात् यतस्तेन शोथेन कश्चिदेव प्रमुच्यते कोऽपि जीवितं त्यजति इत्यर्थः। "सन्निपातज्वरान् कष्टसाध्यानपरे जगुः। दोषे प्रकुपिते नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः। सन्निपातज्वरोऽसाध्यः कष्टसाध्यस्ततोऽन्यथा।" सर्वाणि दाहशोषादीनि सम्पूर्णानि आतुरगतानि प्रोक्तानि यावल्लक्षणानि यस्य सः। ततोऽन्यथा दोषे एके अन्ये दोषे सन्निपातलक्षणकः कष्टसाध्य इत्यर्थः।

सन्निपातज्वर पु० सन्निपातजो ज्वरः। सन्निपातशब्दोक्ते त्रिदोषजविकारजाते ज्वरे।

सन्निपातनुद् पु० सन्निपातं त्रिदोषजविकारं नुदति नुद-क्विप्। नेपालनिम्बे राजनि०।

सन्निबन्धन न० सम्यक् निबन्धनं प्रा०स०। १नानास्थानस्थवाक्यानामेकत्र सङ्कलने २तदुपयोगिग्रन्थभेदे च। ७त०। ३सम्यग्निबन्धनयुते त्रि० "सद्वृत्तिः सन्निबन्धनेति" माघः

सन्निभ त्रि० सम्+नि+भा-क। सदृशे जटा०। निभादिवदस्य नित्यसमासता।

सन्निवेश पु० सम्+नि+विश-आधारे घञ्। १पुराद्येकदेशे विहारार्थं देशे अमरः। भावे घञ्। २सम्यक्स्थितौ।

सन्निहित त्रि० सम्+नि+धा-क्त। १निकटस्थे "सन्निहितं बुद्धिरत्नरङ्गम्" न्यायः "या याः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः" नि०त०। २सम्यक्स्थापिते च। भावे क्त। ३नैकट्ये न०। [त्यागे ३युक्ते ४अर्पिते च।

सन्यस्त त्रि० सम्+नि+अस-क्त। १निक्षिप्ते २कृतसम्यक्-

सन्यास पु० सम्+नि+अस-घञ्। "काम्यानां कर्मणां त्यागं सन्यासं कवयोविदुः" गीतोक्ते विहितकर्मणां विधानेन १सम्यक्त्यागे २तदुपयोगि[illegible]र्याश्रमे आश्रमशब्दे ८४२ पृ० दृश्यम्। ३चैत्रे मासि त्रियादिकर्त्तव्ये पुराणप्रसिद्धे शिवव्रतभेदे च। "चैत्रे शिवोत्सवं कुर्यात् नृत्यगीतमहोत्सवैः। स्नायात् त्रिसन्ध्यं रात्रौ च हविष्याशी जितेन्द्रियः। शिवस्वरूपतां याति शिवप्रीतिकरः परः। त्रियादिषु यो मर्त्यो देहं संपीड्य भक्तितः। अश्वमेधफलं तस्य जायते च पदे पदे। सर्वकर्मपरित्यागी शिवोत्सवपरायणः। भक्तैर्जागरणं कुर्याद्रात्रौ नृत्यकुतूहलैः। नानाविधैर्महावाद्यैर्नृत्यैश्च विविधैरपि। नानावेशधरैर्नृत्यैः प्रीयते शङ्करः प्रभुः। किमत्र भगवति प्रसन्ने नीललोहिते। तस्मात् सर्वप्रयत्नेन तोषणीयो महेश्वरः। शङ्खवाद्यं शङ्खतोयं वर्जयेत् शिवसन्निधौ। यामाद्बहिरिमं शम्भोरुत्सवं कारयेन्नृणा। उपोष्य श्रुत्वा संक्रान्त्यां व्रतमेतत् समाचरेत्" हेमाद्रिधृतभविष्यो० उत्तरख० ४अ०। ४जटामांस्यां शब्दच०।

सन्यासिन् पु० सम्+नि+अस-णिनि। १सन्यासयुते २चतुर्थाश्रमयुते तेषां धर्मभेदेन नामभेदो यथा

"तीर्थाश्रमवनारण्यगिरिपर्वतसागराः। सरस्वती भारती च पुरीति दश कीर्त्तिताः"। तेषां लक्षणानि यथा "त्रिवेणीसङ्गमे तीर्थं तत्त्वमस्यादिलक्षणे। स्नायात्तत्पदार्थभावेन तीर्थनाम्ना स उच्यते। आश्रमश्चतुरो वेदे आशापाशविवर्जितः। यातायातविनिर्मुक्त एतद्वा-

श्रमलक्षणम् २। सुरम्ये निर्झरे देशे वने वासं करोति यः। आशापाशविनिर्मुक्तो वननामाश स उच्यते। सरय्वे संस्थितो नित्यमानन्दनन्दने वने। त्यक्त्वा सर्वमिदं विश्वमरण्यलक्षणं४ किल। वासो गिरिवरे नित्यं गीताभ्यासे हि तत्परः। गम्भीराचलवद्विश्व गिरिनामाप् स उच्यते। वसेत् पर्वतमूलेषु प्रौढो यो ध्यानधारणात्। सारात्सारं विजानाति पर्वतः६ परिकीर्त्तितः। वसेत् सागरगम्भीरो न च रत्नपरिग्रहः। मर्य्यादाश्च न लङ्घते सागरः७ परिकीर्त्तितः। स्वरज्ञानवशो नित्यं स्वरवादी कवीश्वरः। संसारसागरे सारामिच्छो यो हि सरस्वती८। विद्याभारेण सम्पूर्णः सर्वभारं परित्यजेत्। दुःखभारं न जानाति भारतीह परिकीर्त्तिता। ज्ञानतत्त्वेन सम्पूर्णः पूर्णतत्त्वपदे स्थितः। परब्रह्मरतो नित्यं पुरीनामाप० स उच्यते" इति वृहच्छङ्करविजये विद्यारण्यस्वामिधृतम्। २चैले कर्त्तव्यशिवव्रतकर्त्तरि च। [च

सपक्ष पु० समानः पक्षेण। १तुल्यरूपे २निश्चितसाध्यके पक्षे

सपक्षाकरण न० सह ष पक्षेण सपक्षः तथा क्रियते सपक्ष+डाच्+कृ— । पक्षेण सह शरवेधनरूपे अत्यन्तव्यधने। कर्म्मणि क्त। सपक्षाक्षतः। तथा पीडिते त्रि०। [अमरः।

सपत्न पु०सह एकार्थे पतति यतते पत—न सहस्य सः। शत्रौ

सपत्नारि पु०सपत्नस्य अरिरिव। (वेडवाग्न) वंशभेदे शब्दच०।

सपत्नी स्त्री समानः पतिर्यस्याः ङीप् न च। १एकभर्तृकायां स्त्रियाम् २समस्वामिकायां भूम्यादौ च। तत्र सपतिरित्यपि।

सपदि अव्य० सह पद्यते पद—इन् सहस्य सः। तत्क्षणे इत्यर्थे "सपदि सकलिताक्षीमिति" कुमारः। [र्थीत्।

सपर पूजायां कण्ड्वादि० पर०सक० सेट्। सपर्य्यति असपर्य्या स्त्री सपर—यक् च टाप्। पूजायाम् "सोऽहं सपर्याविधिभाजनेनेति" रघुः। [हिते २चतुर्थांशसहिते च।

सपाद स्त्री सह पादेन चरणेन चतुर्थांशेन वा। १पादसहिते त्रि० समानः पिण्डः स्वदेहारब्धकांशभेदः भ्रातृदेयपिण्डौ वा यस्य समानस्य सः। एकदेहारब्धदेहे ज्ञातिभेदे "असपिण्डा च या मातुरिति" स्मृतिः। ज्ञातीनाञ्च सप्तमात् परम्परया अतिपरम्परया वा एकदेहारब्धत्वात्तथात्वम् मिता०। २दातृत्वभोक्तृत्वेनैकपिण्डयुते ट्यधिकः। एतच्च दायग्रहणोपयोगिसापिण्ड्यमिति। सपिण्डता हि विषयभेदेन त्रिविधा अशौचोपयोगिनी विवाहोपयोगिनी दायोपयोगिनी चेति। तत्र समानदेहसम्बन्धे या सपिण्डता साऽशौचग्रहणार्था विवाहार्था च। श्राद्धे देयपिण्डसम्बन्धात् सपिण्डता तु दायग्रहणोपयोगिनीति विवेकः। यथोक्तं शु०त० रघुनन्दनेन "सत्स्यपुराणे "लेपभाजस्त्वतुर्थाद्याः पित्राद्याः पिण्डभागिनः। पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपौरुषम्"। नन्वेवं मात्रादिभिः सह पिण्डतर्पणभोक्तृत्वासम्भवात् कथं सपिण्डत्वमिति चेदुच्यते तेषामपि पिण्डलेपयोः सम्बन्धोऽस्ति तथाच बौधायनः "प्रपितामहः पितामहः पिता स्वयं, सोदर्य्यभ्रातरः सवर्णायाः पुत्रः पौत्रः प्रपौत्रो वा एतानविभक्तदायादान् सपिण्डानाचक्षते। विभक्तदायादान् सकुल्यानाचक्षते सप्त स्वङ्गजेषु तद्गामी ह्यर्षो भवति" इति अस्यार्थः पित्रादिपिण्डत्रयेषु सपिण्डनेन भोक्तृत्वात् पुत्रादिभिश्चतुर्भिः स्वतृपिण्डदानात्। यश्च जीवन् यस्य पिण्डदाता स मृतः सन् सपिण्डनेन तत् पिण्डभोक्ता एवं सति मध्यस्थितः पुरुषः पूर्वेषां जीवन् पिण्डदाता मृतः सन् तत्पिण्डभोक्ताऽपरेषां जीवतां पिण्डसम्प्रदाता आसीत्। मृतश्च तैः सह दौहित्रादिदेयपिण्डभोक्ता अतो येषामयं पिण्डदाता ये चास्य पिण्डभोक्तारस्तेऽविभक्तं पिण्डरूपं दायमश्नन्तीति अविभक्तदायादाः सपिण्डा इति। इदञ्च सपिण्डत्वं सकुल्यत्वञ्च दायग्रहणार्थमशौचाद्यर्थन्तु पिण्डलेपभुजामपि "लेपभाजस्त्वतुर्थाद्याः पित्राद्याः पिण्डभागिनः" इति प्रागुक्तमत्स्यपुराणात्। वक्ष्यमाणकूर्मपुराणशङ्खलिखितवचनाच्च। पिण्डे यथा परस्परं भोक्तृत्वं तथा लेपे तुल्यन्यायात्। हारलतायां कूर्मपुराणम् "सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते। समानोदकभावस्तु जन्मनाम्नोरवेदने। पिता पितामहश्चैव तथैव प्रपितामहः। लेपभाजस्त्वतुर्थाद्याः सापिण्ड्यं सप्तपौरुषम्"। लेपभागिभ्यस्तूर्द्धं यावज्जन्मनाम्नोरवेदनं यावत्सकुलनाम्नोऽज्ञात पूर्वपुरुषादयं जात इति विशेषः श्रयणसात् कुले जात इति सामान्यतो वा ज्ञायते तावत् समानोदकत्वमिति हारलता। अत्र परवचनेनैव सापिण्ड्यसिद्धौ पूर्ववचनपूर्वार्द्धं जीवत्पितृकत्वादिना अधिकपुरुषेषु पिण्डलेपसम्बन्धेऽपि सपिण्डतानिवृत्तिज्ञापनाय। सर्वदेशीयाचारोऽपि तथा"। "अथ यः खलु पिण्डान् दत्त्वैव मृतः परलोकप्राप्तिमात्रः स कथं सपिण्डः। एकपिण्डदातृत्वभोक्तृत्व-

लक्षणसम्बन्धाभावादिति चेत् तदुयोग्यतयेति ब्रूमः। योग्यताप्रयोजकञ्च सामान्यशास्त्रविषयत्वम्। ततश्चात्मत्रिष्वप्रपितामहावधिकाधस्तनानां षण्णां पुंसां प्रत्येकामेक्षया सप्तानामेकगोत्राणां स्वावधिपरतनानां सप्तानाञ्च सापिण्ड्यं पिण्डलेपयोर्दातृत्वभोक्तृत्वसम्बन्धादिति। स्त्रीणान्तु भर्तृसापिण्ड्येन सापिण्ड्यम् "प्रत्तानां भर्तृसापिण्ड्यमिति" वचनात्। नन्वेवं कन्यायाः कथं सपिण्डतेति चेत् आदिपुराणवचनात् त्रैपुरुषं सापिण्ड्यम्। यथा "सपिण्डता तु कन्यानां सवर्णानां त्रिपौरुषी"। अत्र कन्यानामूढानाम् "अप्रत्तानां त्रिपौरुषमिति" वक्ष्यमाणवचनात्। तेन आत्मपञ्चमे इदमपितामहे सापिण्ड्यं निवर्त्तते इति प्रतिपादितम्। अत एव कन्यायाः प्रपितामहभ्रात्रा तत्सन्ततिभिः सह सापिण्ड्याभावात् कन्यामरणजननयोरेषां सपिण्डाशौचं नास्ति किन्तु समानोदकनिमित्तमेवाशौचमिति एवं तेषामपि जननमरणयोः कन्यानामिति स्मृत्यर्थसारसंग्रहोपाध्यायः। यत्तु कूर्मपुराणम् "अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं सप्तपौरुषम्। प्रत्तानां भर्तृसापिण्ड्यं प्राह देवः पितामहः" इति रत्नाकरधृतम्। तद्विवाहे पितृपक्षविषयम्। यथा विष्णुपुराणम् "सप्तमीं पितृपक्षाच्च मातृपक्षाच्च पञ्चमीम्। उद्वहेत द्विजो भार्य्यां न्यायेन विधिना नृप!" सप्तमीं पञ्चमीं हित्वेति शेषः। भर्तृसापिण्ड्यमित्यत्र सप्तपौरुषमित्यनुषज्यते। तेन भर्तृसमानसापिण्ड्यमित्यर्थः। शङ्खलिखितौ "सपिण्डता तु सर्वेषां गोत्रतः सप्तपौरुषी। पिण्डोदकदानञ्च शौचाशौचं तदानुगम्"। गोत्रतः गोत्रैक्ये तेन मातामहकुले कदाचित् षट्पुरुषपर्य्यन्तं पिण्डसम्बन्धेऽपि न सपिण्डता। तान् सप्तपुरुषान् या समनात् पिण्डादिकमनुगच्छतीति तदानुगम्। एतेन "सपिण्डता एकशरीरावयवान्वयेन भवति तथाहि पितुः शरीरावयवान्वयेन पित्रा सह एवं पितामहादिभिरपि पितृद्वारेण तच्छरीरावयवान्वयात्। एवं मातृशरीरावयवान्वयेन भ्रात्रादिभिरिति। एवं पत्या सह पत्न्या एकशरीरारम्भकतया सापिण्ड्यम्। तथाच गर्भोपनिषदि "एतत् षाट्कौशिकं शरीरं त्रीणि पितृतः त्रीणि मातृतः अस्थिस्नायुमज्जानः पितृतः, त्वङ्मांसरुधिराणि मातृतः" इति" तत्र तत्तावयवान्वयप्रतिपादनात्। निर्वाप्यपिण्डान्वये तु सापिण्ड्ये भ्रातृपितृव्यादिसापिण्ड्यं न स्यात्। अतिप्रसङ्गस्तु सप्तान्यतमत्वेन प्रयोगोपाधिना निरसनीयः। यद्येवं मातामहादीनामपि मरणे सपिण्डत्वेन दशाहाशौचं प्राप्नोति, स्यादेतत् यदि मातामहादीनां मरणे "त्रिरात्रं स्यादशौचकम्" इत्यादिविशेषवचनं न स्यात्। यत्र तु विशेषवचनं नास्ति तत्र दशाहमिति मिताक्षरारत्नाकरादिसमयास्तु लेपभाजस्त्वादि वाचनिकेऽर्थे सापिण्ड्ये एकशरीरावयवान्वयरूपस्वकपोलरचितार्थानवकाशात् निर्वाप्यपिण्डसम्बन्धेन स्वावादीनां सापिण्ड्यस्य मत्स्यपुराणबौधायनाभ्यां पूर्वमुक्तत्वात् कामधेनुहारलताकल्पतरुपारिजातकारादिभिस्तथैव व्याख्यातत्वाच्च। रेतःशोणितपरिणामरूपस्वादप्यत्र शरीरस्य भवतु वा तथा पत्या सह पत्न्या एकशरीरारम्भकताया प्रत्यक्षबाधितत्वात् कथं सापिण्ड्यं प्रमातामहादीनां विशेषवचनाभावाच्च सपिण्डत्वेन दशाहाद्यशौचप्रसङ्गाच्च मातामहादौ सापिण्ड्यस्य लोकविरुद्धत्वाच्च। भवतु वा तथा शरीरद्वारा सापिण्ड्यं तथापि वचनात् यथासप्तान्तर्गतत्वं तन्त्रं तथा "गोत्रतः सप्तपौरुषीति" वचनात् गोत्रैक्यमपि प्रागुक्तवचनात् कन्यायास्त्रीपौरुषम् उढायाश्च भर्तृसपिण्डनेन सापिण्ड्यमिति चेत् तदेतन्मतेऽपि व्यवस्थायां न क्षतिरिति अतएव समन्तुवचनाभिहितं यद्दशमपुरुषपर्य्यन्तमशौचं तत् सप्तमपुरुषाभ्यन्तराशौचाद्ऊनं त्रिरात्रं यथा "ब्राह्मणानामेकपिण्डस्वधानामादशमात्तर्मविच्छित्तिर्भवति आसप्तमात् ऋक्थविच्छित्तिर्भवति आतृतीयात् स्वधाविच्छित्तिर्भवति" अन्यथा पिण्डशौचक्रियादुच्छेदात् ब्रह्महत्यातुल्यो भवति" अस्यार्थः। एका समाना पिण्डस्वधा येषां ते तथा यथैकोद्दिष्टस्य पिण्डे तु अनुशब्दो न युज्यते इत्यत्रानुशब्देनानुशब्दयुक्तमन्त्रो लक्ष्यते अनुयुक्तमन्त्रस्तु "ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा" इति तथा पिण्डस्वधाशब्देन पिण्डसम्बन्धिस्वधाशब्दयुक्तमन्त्रकरणकदेयजलं लक्षितम्। तथा च जर्ज्जरीकृतं घृतं पयःकीलालं परिप्लुतं स्वधास्य तर्पयत मे पितॄन्" इत्यनेन पिण्डान् सिञ्चेदित्युक्तम्। ततश्च एकपिण्डस्वधानां समानोदकानामित्यर्थः। अतएव मनुः। "जन्मन्येकोदकानान्तु त्रिरात्रात् शुद्धिरिष्यते"। विष्णुपुराणे "मातृपक्षस्य पिण्डेन सम्बन्धाः ये जलेन वा" मातृपक्षस्य मातामहपक्षस्य ये जलेन सम्बन्धाः समानोदका इति" आह्निकविवेकेऽपि व्याख्यातम्। "असम्बन्धा भवेद्यां तु

पिण्डेनैवोदकेन वा" इति विवाहेऽप्युक्तम्। अत्र पुत्रिकायाः पार्वणे पितृपितामहयोः सम्बन्धात् कन्यामात्रेऽपि तदुयोग्यतायाः सत्त्वात्। कन्या पितृपितामहसम्बन्धोच्यते एतदनुसारादपि तस्याः सपिण्डता बोद्धव्या तस्मादेकपिण्डस्वधानामित्यनेन समानोदकभावः समाख्यातः न तु दशम पर्य्यन्तं, पित्रादिजीवनादिना सापिण्ड्यसम्बन्धेऽपि सापिण्ड्यं विहितं प्रागुक्तयुक्तेः स्वधेत्यस्य तदनुप्रयुक्तत्वेन वैयर्थ्यापत्तेः। अपुत्रधनाधिकारस्तु सन्निहिततराभावे सप्तमपुरुषपर्य्यन्तं मृतपितृकस्य स्वधोपलक्षितश्राद्धाधिकारः पुरुषत्रयपर्य्यन्तमिति अत्र स्वधाशब्दो मन्त्रपरः पितृभक्तपरोऽपि। तथा च गुणविष्णुधृता श्रुतिः "स्वधा वै पितृणामन्नमिति।" दशमपुरुषपर्य्यन्तं समानोदकत्वेऽपि न त्रिरात्रं किन्तु पक्षिण्यादि तथाहि उदकक्रियामधिकृत्य पारस्करः "सर्वे ज्ञातयो भावयन्ति आसप्तमाद्दशमाद्वा समानव्यामवासेन यावत् सम्बन्धमनुस्मरेयुर्वा" इति भावयन्ति निष्पादयन्ति अत्र यावत्सम्बन्धमनुस्मरेयुरेककुलजातावयमिति स्मरणं भवतीत्यनेनैव सर्वेषामुदकदाने प्राप्ते यदु आसप्तमाद्दशमादित्युक्तं तत्सन्निकर्षतारतम्येनार्थौचभेदेऽप्युदककर्मसमानार्थमिति। अर्थौचभेदस्तु सप्तमपर्य्यन्तं सपिण्डत्वाद्दायहः। ततश्च दशमपुरुषपर्य्यन्तं ब्रह्महः। तथाच विष्णुहरीतौ। "दशाहेन सपिण्डास्तु शुध्यन्ति मृतसूतके। त्रिरात्रेण तु कुल्यास्तु ज्ञात्वा शुध्यन्ति गोत्रजाः।" ततश्चतुर्दशपुरुषपर्य्यन्तं पक्षिणी ततश्च जन्मनामस्मृतिपर्य्यन्तमेकाहः। तथाच मिताक्षराविवादचिन्तामण्योर्धृतबृहन्मनुः। "सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते। समानोदकभावस्तु निवर्त्तेताचतुर्दशात्। जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते।" अत्र समानोदकत्वे द्विविधे पूर्वत्र गोतमः "पक्षिणीमसपिण्डे" परत्र हारीतः। "मातामहे त्रिरात्रं स्यादेकाहस्त्वसपिण्डके" इति। अत्रैव गोत्रजानामहः स्मृतमिति जाबालवचनं ततः परं सर्वथा समानोदकतानिवृत्तेः। स्नानमात्रमिति "स्नात्वा शुद्ध्यन्ति गोत्रजाः" इति बृहस्पत्युक्तत्वादिति"।

तथा च गोत्रैक्ये सति पिण्डलेपयोर्दातृत्वभोक्तृत्वान्यतरत्वस्य अर्थौचस्थापिण्ड्यम्। आसप्तमपरम्परया सप्तमपर्य्यन्तदेहसम्बन्धवत्त्वं विवक्षयापिण्ड्यं त्रिपुरुषपर्य्यन्तं देयपिण्डदातृत्वभोक्तृत्वान्यतरत्वं दायग्रहणे सापिण्ड्यमिति विवेकः मिता० मातृसपत्न्या अपि सापिण्ड्यं स्वीकृत्य धनाधिकारोऽभिहितः तन्मते समानदेहसम्बन्धयोग्यतयैव सापिण्ड्यात्। दायभागमते तु श्राद्धे देयपिण्डदातृत्वभोक्तृत्वाभावात् न तस्याः सापिण्ड्यं तद्योग्यत्वेऽपि स्त्रीमात्रस्य विशेषवचनाभावे धनाधिकारपर्युदासात् इति विवेकः एवं स्नुषाया अपि।

सपिण्डीकरण न० सह पिण्डेन सपिण्डः ततः अभूततद्भावे च्वि+कृ-ल्युट्। प्रेतत्वविमोचनाय प्रेतोद्देशेन कर्त्तव्ये पित्रादिपिण्डसमन्वयकरणरूपे श्राद्धभेदे

सपिण्डीकरणप्रकारस्तत्कालादिकं श्रा०त० निरूपितं यथा "अथ सपिण्डीकरणम्। तत्र गोभिलः "पूर्णे संवत्सरे षण्मासे त्रिपक्षे यदहर्वा हृद्विरापद्येत तदहः सत्वार्घ्युदकपात्राणि सतिलगन्धपुष्पोदकानि पूरयित्वा त्रीणि पितृपात्राण्येकं प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिञ्चति। ये समानाः समनसः पितरो यमराज्ये तेषां लोकाः स्वधा नमो यज्ञो देवेषु कल्पताम्। ये समानाः समनसो जीवाजीवेषु मामकाः। तेषां श्रीरमुष्मिं कल्पतामस्मिन् लोके यतं समाः" इति एतेनैव पिण्डो व्याख्यातः" इति। पूर्णे संवत्सरे इति मुख्यः कल्पः। तदशक्तौ नवमो मासः "संवत्सरान्ते विजर्जनं नवमासमित्येके" इति पैठीनसिवचनात्। तदशक्तौ षष्ठो मासः। तदाप्यशक्तौ त्रिपक्षः तदाप्यशक्तौ अर्थौचापगमे प्रथममासस्य द्वादशभिर्दिनैर्द्वादशमासिकानि श्राद्धानि निर्वर्त्त्य त्रयोदशाहः सपिण्डीकरणकालः मूलस्य द्वादशाहो न तु त्रयोदशाह एव "मासिकार्घवत् द्वादशाहश्राद्धं कृत्वा त्रयोदशेऽह्नि वा ततकुर्य्यान्मन्त्रवर्जं हि शूद्राणां द्वादशेऽह्नीति" विष्णुवचनात्। मासिकार्घवदिति मासि मासि क्रियमाणश्राद्धप्रयोजनं प्रेताप्ययनादि तदुयुक्तं द्वादशाहक्रियमाणश्राद्धमित्यर्थः। यत्र त्वेकादशमासाभ्यन्तरेऽधिमासपातस्तत्र त्रयोदशसु दिनेषु त्रयोदश मासिकानि कृत्वा चतुर्दशेऽह्नि सपिण्डनं कार्य्यमिति "संवत्सराभ्यन्तरे यद्यधिमासो भवति तदा मासिकार्घं दिनमेकं वर्जयेत्" इति विष्णुवाक्यात् शूद्रस्य त्रयोदश दिनेषु त्रयोदश मासिकानि त्रयोदशेऽह्नि सपिण्डनं इत्यपरिकल्पनान्यायात्। एवञ्च हृद्विमासेन दिनहृद्विरिति सिद्धोक्तं ज्ञेयम्। तदुक्तं विष्णुस्मृतौ दिनमेकं वर्जयेदिति स्मृतेः। स्वाम्याधिक्यमाह सत्यव्रतः "संवत्सरस्य मध्ये तु यदि स्याद्दर्शमासकः।

तदा त्रयोदशे श्राद्धं कार्य्यमतदधिकं भवेत्" । तत्राद्य-शक्तौ प्रथममासस्यैकाह्न एव द्वादशमासिकसहितसपिण्डीकरणकालः । "मुख्यं श्राद्धं मासिमासि अपर्य्याप्तादृतं प्रति । द्वादशाहेन वा कुर्य्यादेकाहे द्वादशाथ वा" इति मरीचिवचनात् । अपर्य्याप्तो अशक्तो ऋतुर्मासद्वयम् । अत्र कल्पे षष्ठमासिकदिने पञ्चममासिकं कृत्वा प्रथमषाण्मासिकं कार्यं तदाद्युत्कर्षन्यायात् । न तु तत् पूर्वं षाण्मासिकं व्युत्क्रमापत्तेर्न च पञ्चममासिकमपि पूर्वदिने सृततिथ्यभावात् एवमेव वाचस्पतिमिश्रः । अपकर्षनिमित्तमाह व्यासः "आनन्त्यात् कुलधर्माणां पुंसाञ्चैवायुषः क्षयात् । अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते" । एतच्च द्वादशाहपदं शावाशौचान्तृतीयदिनमात्रपरमिति प्राचीनमैथिलाः, अजङ्घलस्वार्थलक्षया स्वजात्युक्ताशौचान्तृतीयदिनमात्रोपलक्षकमिति श्राद्धप्रदीपश्राद्धचिन्तामणी । तदुभयमप्ययुक्तं "द्वादशाहेन वा कुर्य्यात्" इति मरीचिवचन "द्वादशाहे श्राद्धं कृत्वा त्रयोदशेऽह्नि वा कुर्य्यात्" इति विष्णुवचनाभ्यामेकवाक्यतया द्वादशदिनपरत्वात् । कुलधर्माणामिति कुलधर्मज्योतिरागमादिसिद्धानन्तरभाविनाशपरचक्रमणोत्पन्नक्लेशदेशगमनादिभिर्निमित्तैरशौचापगमे द्वादशदिनानि षोडशश्राद्धापकर्षकाल इति मूलपाठ्यपाठ्यायव्याख्यानात् मरीचिनैव "एकाहे द्वादशाथ वेति" सामान्यत एव एकाहविधानाच्च । अतएव एकाहापेक्षया प्राशस्त्यमिधानमपि सङ्गच्छते अतएव प्रथममासस्य एकाह एव द्वादशमासिकसहितसपिण्डीकरणकाल इति श्राद्धविवेकः । अत्र यानि एकाहकर्त्तव्यतया द्वादशमासिकश्राद्धान्युक्तानि तानि मूले यापि श्राद्धमासिकदिन एव कार्य्याणि नत्वाद्यमासिकं कृत्वा तत्परदिने एकादश मासिकानीति ज्ञेयम् । एवञ्च तेषामपकर्षे तन्मध्ये तदुत्तरकाले च कर्त्तव्यतया षण्मासिकद्वयसपिण्डीकरणापकर्षः सिद्ध्यतीति सुधीभिर्भाव्यम् । यदुक्तं हृद्विरिति हृद्विरशाश्वमानं पुंसवनादि । व्यापद्येत अशक्ता भवति तद्दिनेऽपि सपिण्डीकरणम् । तथाहि "प्रागाबर्त्तनादङ्गः कालं विद्यात्" इति गोभिलसूत्रेण पुंसवनादिकल्पहृद्यौमद्वयाभ्यन्तरे विधानात् सपिण्डीकरणस्य चापराह्णे विधानात्तयोः कालयोरबाधाय हृद्विपूर्वदिने अपकर्षः । ननु सपिण्डीकरणस्यापराह्णिकत्वे किं प्रमाणमिति चेत् "अपराह्णे तु पैतृकम्" इत्युत्सर्गवचनम् । किञ्च "यद्यप्यटन्तकः पूषा पैष्टमत्ति सदा चरुम् । ऊर्ध्वोन्द्रेश्वरसाधर्म्यात्तण्डुलोऽत्र विधीयते" इति छन्दोगपरिशिष्टवचने यथा बह्वृनामनुरोधात्तण्डुलचरुर्नैकानुरोधात् पैष्टचरुः "विरुद्धधर्मसद्भावे भूयसां स्यात् सदर्थकत्वम्" इति जैमिनिसूत्रात् । तद्वदापि बह्वृदेवताकपार्वणानुरोधात् "एकोद्दिष्टविधानेन कार्यमत्रापि पार्थिव !" इति विष्णुपुराणीयमेकोद्दिष्टांशे तदितिकर्त्तव्यतापरं न तु तत्कालपरम् । तथा च परिशिष्टप्रकाशधृतम् "श्राद्धद्वयमुपक्रम्य कुर्वीत सहपिण्डताम् । तथा पार्वणवत् पूर्वमेकोद्दिष्टमथापरम्" इति । एवञ्च शुद्धितत्त्वलक्षितलक्षणकोपाख्यानवत् हृद्विं निश्चित्य कृतं सपिण्डीकरणं तदानीं विघ्नेन हृद्व्यभावेऽपि हृद्व्यारम्भकालान्तरं पूर्णसंवत्सरं वा प्राप्य पितृत्वप्राप्तकमिति न सपिण्डनान्तरम् । अत्र "श्वःकर्त्ताऽहीति निश्चित्य दाता विप्रानिमन्त्रयेत् ।" इतिवन्निश्चित्येति षष्ठकटकोटिकसम्भावनोपलक्षणं भविष्यन्निमित्तस्य कर्मणः प्रत्यूहार्हत्वात् । एवञ्च हृद्विश्राद्धं यदर्थं कृतं तत् कर्म चेत् विघ्नात्तद्दिने न क्रियते तदा दिनान्तरे तत् कर्मणि क्रियमाणे तदङ्गत्वात् पुनर्हृद्विश्राद्धं कर्त्तव्यमेव । "प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः । तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत्क्रिया" । इति छन्दोगपरिशिष्टेन साङ्गकरणाभिधानात् । हेमाद्रिधृतं "पूर्णसंवत्सरे श्राद्धं षोडशं परिकीर्त्तितम् । तेनैव च सपिण्डत्वं तेनैवावृत्तिकमिष्यते ।" अत्र पूर्णसंवत्सरक्रियमाणश्राद्धात् यद्योभयनिर्वाहः तथापकृष्टसपिण्डनादप्युभयनिर्वाहात्र पूर्णसंवत्सरे यावद्दिनान्तरं कार्य्यम्" । तत्रायं विशेषः तत्रोक्तो यथा "एवञ्च पार्वणे प्रागुक्तवचनेन शेषद्रव्येण पिण्डविधानात् तद्विलम्बेऽपि सपिण्डीकरणे तन्नियमात् यद्यपि शेषाभावेऽपि पिण्डनिवृत्तिरायाति तथापि "यद्योक्तवस्तुवप्राप्तौ श्राद्धं तदनुकारि यत् । यवानामिव गोधूमा व्रीहीणामिव शालयः" इति छन्दोगपरिशिष्टवचनात् "द्रव्याभावेऽपि प्रतिनिधिः शास्त्रार्थः" इति न्यायाच्च शुद्धाद्यभावे गुडादिप्रक्षेपवत् द्रव्यान्तरेणापि पिण्डदानं शेषद्रव्यनियमस्तु तदसत्त्वे द्रव्यान्तरत्यागाय । अन्यथा तदङ्गाभावे कर्मवैगुण्यं स्यात् "सदपिण्डक्रियायास्" इति मनूक्तेः पिण्डश्च प्रेतपिण्डेन सह मिश्रीकरणं यत्रेति सपिण्डीकरणसमासाश्रयणेन तु तत्र

तथाचरणं प्रतिपत्तिरूपकर्माङ्ग एव प्रतिपाद्याभावे तन्निवृत्तिः पशुयागे "लोहित निरस्यति सक्तञ्चरस्यति" इत्यादावुक्ता। अतएव यज्ञवास्तुरूपप्रतिपत्तियागेऽपि यज्ञो यत्र वसति इति यज्ञवास्तुसमाख्यानुरोधेनाग्नेतत्कृश्यभिनाशेऽपि कृष्यान्तरप्रतिनिधिभङ्गनारायणगोभिलभाष्ये उक्तः "प्राक् स्विष्टकृत आवापः" इति गोभिलसूत्रस्य व्याख्यानेऽपि आहृत्यते इत्यावापः प्रधानहोमः स तु स्विष्टकृद्धोमात् प्राक् न पश्चादित्यर्थः। एवञ्च सुख्यहोमे स्खलते यदि चरुर्नष्टो दुष्टो वा भवति तदान्यः पाच्यः सुख्ये हुते चेन्नाशदुष्टौ तदाज्येनैव स्विष्टकृद्धोम इति मरुता। एतेन शेषनाशे पिण्डनिवृत्तिरिति वाचस्पतिमिश्रोक्तं हेयम्। एतेनार्घ्यदानविधानेन पिण्डमिश्रणप्रकारो व्याख्यात उक्तः"।

"पितरि पूर्वं मृते तद्वर्षाभ्यन्तरे पितामहे प्रपितामहे मृते यथा कर्त्तव्यं तथाह छन्दोगपरिशिष्टे कात्यायनः "पितुः सपिण्डनां कृत्वा कुर्यान्मासानुमासिकम्। असंस्कृतेन संस्कार्यौ पूर्वौ पौत्रप्रपौत्रकैः। पितरं तत्र संस्कुर्यादिति कात्यायनोऽब्रवीत्। पापिष्ठमपि शुद्धेन शुद्धं पापकृतापि वा। पितामहेन पितरं कुर्यादिति विनिश्चयः"। पितुः सपिण्डतां कृत्वा प्रेतीभूतयोरपि पितामहप्रपितामहयोः सत्त्वे प्रतिमासविहितं पार्वणं पितृद्वद्वप्रपितामहातिद्वद्वप्रपितामहानां कर्त्तव्यं न तु तयोः सपिण्डीकरणापेक्षा कार्य्या नतु सपिण्डनेनासंस्कृताभ्यां सह पिण्डैः कथं सपिण्डनाख्यसंस्कारस्यात्तदर्थं तयोः सपिण्डीकरणमपकर्षणीयं पितुरेव वा सपिण्डनमुत्कर्षणीयमित्यत आह असंस्कृतेनेति। उत्कर्षापकर्षौ न कार्य्यौत्यनेन वचनेनोक्तं कथमसंस्कृतेन सह संस्कार इत्यत्राह पापिष्ठमपीति पापिष्ठमकृतसपिण्डीकरणं शुद्धेन कृतसपिण्डीकरणेन पितामहेन पापकृता अकृतसपिण्डीकरणेनापि शुद्धं कुर्यादिति शास्त्रनिश्चयः। अतो वचनबलाद्दोष इति तात्पर्य्यम्। अत्र तु प्रेतीभूत पितामहेन पितुः सपिण्डने पितामहैकोद्दिष्टमेव। "असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत्" इति प्रागुक्तजाबालवचनात्। एवमन्यत्रापि बोध्यं वृद्धप्रपितामहस्य प्रेतत्वेन सह न कार्य्यमिति तात्पर्य्यम्। अत्र मातुः सपिण्डने श्वशुरार्थं श्वशुरयोः पिण्डो कृत्वैराच्छाद्यो। तथा च मार्कण्डेयः "पतिनैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रियाः। ता एता हि मृतैकत्वं कुर्वैरन्यत्र पितृन्। श्वशुरश्चायती यस्माच्छिरःप्रच्छादनक्रिया। पुत्रैर्देवेन सा कार्य्या मातरभ्युदयार्थिभिः"। अन्तरयन्तीत्यर्थे अन्तरयन्तिति लिङ्गव्यत्ययेन पुंस्त्वमिति हलायुधः। परावरं गोभिलभाष्यकृतापि लिखितम्। अतएव प्रव्रजिते पतिते वा पितरि मृतेऽपि न पितामहादिभिर्मातुः सपिण्डीकरणं किन्तु पितामहादिभिरेव। "स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः। एकत्वं सा गता यस्माच्छरुमन्त्राच्छतव्रतैः। तस्मिन् सति सुताः कुर्युः पितामह्या सहैव तु"। इत्यत्र तस्मिन् सतीति श्राद्धानर्हभर्तृपलक्षणम्। अतएव "तस्याश्चैव तु जीवन्त्यां तस्याः श्वश्रूति निश्चयः" इति लघुहारीतेन श्वश्रूजीवने तस्याः श्वश्रूक्तं न तु श्वशुरेणेति क्वचिदुक्तम्। एवं पितामहादिभिर्मातुः सपिण्डीकरणेऽपि सामान्येन "ये चात्र त्वामनुयांश्च त्वमनु तस्मै ते स्वधा" इति मन्त्रो न पाठ्यः मन्त्रलिङ्गविरोधात् अतएव आभ्युदयिके माहपक्षे श्रीदत्तादिभिर्मन्त्रान्तरं लिखितं न तु ये चात्रत्वामिति वस्तुतस्तु आभ्युदयिके छन्दोगानां माहपक्ष एव नास्तीति वक्ष्यते"।

लघुहारीतः "सपिण्डीकरणान्तानि यानि श्राद्धानि षोड़श। पृथङ्नैव सुताः कुर्युः पृथगद्रव्या अपि क्वचित्। प्रेतसंस्कारकर्माणि यानि श्राद्धानि षोड़श। यथाकालन्तु कार्य्याणि नान्यथा सुख्यते ततः"। पृथग्द्रव्या अपि विभक्तधना अपि पृथक् न कुर्युः सुतरामपृथग्धनाः पृथक् न कुर्युः किन्त्वपृथक् कुर्युः अत्र विशेषयति मरीचिः। "मृते पितरि पुत्रेण क्रिया कार्य्या विधानतः। बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः। सर्वेषान्तु मतं कृत्वा ज्येष्ठेनैव तु यत् कृतम्। द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्"। पुत्रेष्वित्यविशेषात् सर्वेषामधिकारे प्राप्ते ज्येष्ठस्य श्रौतात् कर्त्तृव्यतामाह बहव इति। ज्येष्ठेनापि सर्वेषां भ्रातॄणां मतकरणेनैव करणं भवतु इति मतं ज्ञानं कृत्वा विभक्तत्वे द्रव्यसंश्लेषेण च कृतं कर्म सर्वैरेव कृतमेव भवेत्। तदानीं द्रव्यासंश्लेषेण च तस्मात् द्रव्यं प्राप्तव्यमिति कृत्वा कर्त्तव्यम्। यदि तेन तत्र परिशुध्यते तदा स कर्त्ता भवति प्रत्यवायी च भवतीति। न तु तेन श्राद्धान्तरं कर्त्तव्यमिति श्राद्धविवेकोक्तं युक्तम्। "पृथङ्नैव सुताः कुर्युरित्यनेन पृथक्करणस्य पर्य्युदस्तत्वेनानधिकारात्। यथाकालमिति अधौचान्तद्वितीयदिनदादशमासषण्मतिसंवत्सरेषु

ध्येकाऽन्यूनषण्मासद्वितीयसंवत्सरेषु । न च विधानसामर्थ्यादेव तत्तत्कालप्राप्तेरनर्थकमिदमिति वाच्यम् तत्तत्कालानां द्वादशाद्याद्यपेक्षया प्राधान्यबोधनार्थत्वात् अत्र "आनन्त्यात् कुलधर्माणां पुंसाञ्चैवायुषः क्षयात् । अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते" इति व्यासवचनोक्तप्रशस्यत इत्यनेन कुलाचारज्योतिःशास्त्रादिज्ञातभाटितमरणराष्ट्रोपप्लवादिस्थेच्छदेशादिगमनानुसारादेव सपिण्डीकरणापकर्षे द्वादशाद्यापेक्षया प्रागुक्तनवमसप्ताहादिगौणकालपरिग्रहः । अथ वा यथाकालमित्यादेर्यदुक्तं द्वद्भिरापद्येतेत्यनेनावश्यकनामकरणादिद्वयमेवापकर्षो न त्वनावश्यकेऽपूर्त्तावप्यपकर्षः कार्य्य इति तात्पर्य्यम् । अतएव लघुहारीतेन "तथैव कार्य्यं यत् कर्म वत्सरात् प्रथमाद्यते" इत्यनेन कार्य्यस्यापकर्षनिमित्तता नास्तीत्युक्तम् यदि त्वावश्यकद्वद्धिनिमित्तेनापकर्षः कृतस्तदा दृष्टापूर्त्तादि कार्य्यं वत्सरात्यन्तरेऽपि कर्त्तव्यमिति आद्यविवेकोऽप्येवं यद्यपि गोभिलसूत्रादौ सपिण्डीकरणस्यैवापकर्षः प्रागुक्तस्तथापि सपिण्डीकरणापकर्षे तत्पूर्वकर्त्तव्यश्राद्धानामपि तदादितदन्तन्यायादपकर्षः । "सपिण्डीकरणान्ता तु ज्ञेया प्रेतक्रिया बुधैः" इति शातातपवचने प्रेतक्रियायाः सपिण्डीकरणान्तत्वं प्रतीयते । अत्र द्वद्धिनिमित्तं विना सपिण्डनापकर्षे कृते पूर्णसंवत्सरकालं प्राप्य प्रेतत्वपरीहारमाह विष्णुधर्मोत्तरम् "कृते सपिण्डीकरणे नरः संवत्सरात् परम् । प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते" द्वद्धिनिमित्तकसपिण्डीकरणापकर्षे कृते तत्क्षणादेव प्रेतत्वपरीहारः तदर्थएवापकर्षात् एवमन्यनिमित्तापकर्षे द्वद्धिकालं प्राप्य प्रेतत्वपरीहारः तत्कालस्य पूर्णसंवत्सरकालतुल्यत्वात् । "ऊर्ध्वं संवत्सरात् द्वद्धौ पूर्णे संवत्सरेऽपि वा । ये सपिण्डीकृताः प्रेता नेष्यन्ते पृथक्क्रियां" इति शातातपवचनात्" ।

सपिण्डीकृत त्रि० सह पिण्डैः पित्रादिपिण्डैः सपिण्डः ततः च्विकृ-कर्मणि क्त । यदुद्देशेन सपिण्डीकरणं श्राद्धं कृतं तस्मिन् मृते जने "ये सपिण्डीकृताः प्रेताः" इति शाता० स्मृतिः । [द्वोपातकीद्वद्धे राजनि० ।

सपीतक पु० सह समानः पीतकेन सहस्य सः । राजद्वालादीनां सह भोजने शब्दर० । [तकीद्वद्धे राजनि०।

सपीति स्त्री पा-क्तिच् पीतिः पानम् सह एकत्र पीतिः ।

सपीतिका स्त्री सह पीतेन कप् अत इत्वम् । पक्षिद्वोधाद्वासपक्क न० सप्तानामवयवसमू कन् । १सप्तसङ्ख्यायाम् । सप्त प्रकाण्डस्य कन् । २सप्तसङ्ख्यान्विते त्रि० । पूरणे कन् । ३सप्तानां पूरणे च । [खलायाम् अमरः ।

सप्तकी स्त्री सप्तभिः स्वरैरिव कायति शब्दायते कै-क । मेसप्तचत्वारिंशत् स्त्री सप्ताधिका चत्वारिंशत् शाक० । (सातचत्वारिंश) १सङ्ख्यायां २तत्संख्यान्विते च । एवं सप्तदशादयः सप्ताधिकतत्तत्संख्यायां तत्संख्यान्विते च । पूरणे डट् । सप्तचत्वारिंश तत्तत्संख्यापूरणे त्रि० स्त्रियां ङीष् एवं सप्तदशादयोऽपि तत्पूरणे एवं तमप् सप्तचत्वारिंशत्तम तत्पूरणे त्रि० स्त्रियां टाप् ।

सप्तच्छद पु० सप्त सप्त छदाः प्रतिपत्रम् यस्य छत्तौ संख्याशब्दस्य वीप्सार्थता भाव्योक्ता । (छातिम) वृक्षे राजनि० ।

सप्तजिह्व पु० सप्त जिह्वा इव आस्वादसाधनानि अर्चिषो यस्य । वह्नौ त्रिका० । "काली करालो च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा । स्फुलिङ्गिनी विश्वरुचीति सप्त लेलायमाना इति जातवेदसः ॥" इत्युक्तानां सप्तानामग्निज्वालानामेव तज्जिह्वात्वमुक्तम् । यज्ञिजिह्वानां वर्णभेदः अवस्थानदिग्भेदश्च गणेशविसर्जिण्यां दर्शितो यथा "हिरण्या तप्तहेमाभा सूत्तरायां दिशि स्थिता । वैदूर्यवर्णा कनका प्राच्यां दिशि समाश्रिता । तरुणादित्यसङ्काशा रक्ता जिह्वाग्निसंस्थिता । कृष्णा नीलाभ्रसङ्काशा नैर्ऋत्यां दिशि संस्थिता । अतिरक्ता लवाभासा वायव्यां दिशि संस्थिता । बहुरूपा तथा ख्याता दक्षिणोत्तरसंस्थिता" ।

सप्तज्वाल पु० सप्त कालीत्यादयः ज्वाला यस्य । १वह्नौ हेमच० । २सप्तार्चिरादयोऽत्र अमरः । [यज्ञे अमरः ।

सप्ततन्तु सप्तभिः भूरादिभिर्व्याहृतिभिस्तन्यते तन-तुन् ।

सप्तति स्त्री सप्तगुणिता दशतिः नि० । (सत्तर) १संख्यायां २तत्संख्यान्विते च । ततःपूरणे डट् । सप्तत तत्संख्यापूरणे त्रि० स्त्रियां ङीष् ।

सप्ततितम त्रि० सप्ततेः पूरणः तमप् । येन सप्ततिसंख्या पूर्य्यते तस्मिन् अर्थे स्त्रियां टाप् ।

सप्तद्वीपा स्त्री सप्त जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करद्वीपयुतायां पृथिव्याम् । जम्बूद्वीपशब्दे १०४२पृ०दृश्यम्

सप्तधा अव्य० सप्तन्+प्रकारे धाच् । सप्तप्रकारे ।

सप्तधातु पु० ब०व० सप्तगुणिता धातवः । देहस्थेषु "रसाच्च मांसमेदोऽस्थिमज्जानः शुक्रसंयुताः । शरीरस्था इमे ज्ञेयाः पण्डितैः सप्त धातव" इत्युक्तेषु रसादिषु धातुषु राजनि० ।

सप्तन् पु० त्रि० । सप—तनिन् । (सात) १संख्यान्विते २ततत्संख्यायां महाभाष्यम् । [पृ० ६७५म् ।

सप्तनाड़ीचक्र न० दृष्टिज्ञानार्थं चक्रभेदे चक्रशब्दे २८२१

सप्तनामा स्त्री सप्त नामानि यस्याः डाप् । आदित्यभक्तायाम् राजनि० । [राजनि० । २सप्तच्छदवृक्षे च ।

सप्तपत्त्र पु० सप्त सप्त पत्त्राणि प्रतिपत्त्रं यस्य । १सुन्दरवृक्षे

सप्तपदी स्त्री सप्तानां पदानां समाहारः ङीप् । विवाहकाले मण्डलिकासु गन्तव्येषु सप्तसु पदेषु । तत्प्रकारो भवदेवभट्टोक्तो यथा "ततो जामाता प्रागुदीचीं गत्वा वधूं सप्तभिर्मन्त्रैः सप्तसु मण्डलिकासु सप्त पदानि नयेत् । वधूश्च दक्षिणपादं नीत्वा पश्चात् वामपादं मण्डलिकां नयेत् । जामाता च वधूं ब्रूयात् वामेन पादेन दक्षिणं पादमाक्रमयेति" इत्यादि । अस्यैव कर्मणो विवाहनिष्पादकत्वमुक्तं मनुना "पाणिग्रहणिकामन्त्रा नियतं दारलक्षणम् । तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे" ।

सप्तपर्ण पु० सप्त सप्त पर्णान्यस्य प्रतिपर्णम् । (छातिम) वृक्षे अमरः । "सप्तपर्णो ब्रणश्लेष्मशातकुष्ठाखुजित् । दीपनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरः स्मृतः" भावप्र० तद्गुणा उक्ताः । २लक्ष्मालुलतायां स्त्री रत्नमा० ङीप् । "द्राक्षादाड़िमखर्जूरमृदितास्रं सशर्करम् । लालाचूर्णं समभ्यस्यं सप्तपर्णसदाहृतम्" शब्दच० उक्ते ३खाद्यभेदे न० ।

सप्तपाताल न० समाहारद्विगुः पातालादि । "अतलं वितलञ्चैव नितलञ्च गभस्तिमत् । महातलञ्च सुतलं पातालं सप्त कीर्त्तितम्" इत्युक्तेषु सप्तसु भूमेरधःस्थलोकेषु ।

सप्तप्रकृतिविकृति स्त्री ब०व०सप्तसंख्याताः प्रकृतिविकृतयः । सांख्यसिद्धे महदहङ्कारसहितसूक्ष्मपञ्चभूतहेतुशब्दादितन्मात्रात्मके पदार्थसप्तके "महदाद्याः प्रकृतिविकृतयः सप्त" इति सांख्यकारिका । षोडशकपदार्थहेतुत्वात् प्रकृतित्वम् प्रकृतिकार्य्यत्वाच्च विकृतित्वमस्यास्य ।

सप्तभद्र पु० सप्तसु स्थानेषु भद्रमस्य । शिरीषवृक्षे शब्दच० ।

सप्तम त्रि० सप्तानां पूरणः मट् । येन सप्तसंख्या पूर्य्यते तस्मिन्नर्थे स्त्रियां ङीप् । सा च चन्द्रस्य सप्तमकलायां छादनद्विरूपायां तिथौ च तिथिशब्दे ३२८५ पृ० दृश्यम् ।

सप्तरक्त पु० सप्त रक्तानि प्रशस्तान्यस्य । "पाणिपादतले रक्ते नेत्रान्तरनखानि च । तालुकाधरजिह्वाश्च प्रशस्ता सप्तरक्तता" इत्युक्तस्थानेषु रक्ततावति जने ।

सप्तर्षि पु० ब०व० । सप्त ऋषयः संज्ञात्वात् कर्म० । "मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः । वशिष्ठश्च महाभाग ! सप्तैते ब्रह्मणः सुताः" इत्युक्तेषु सप्तसु ऋषिषु । मन्वन्तरभेदे तेषां नामभेदा ऋषिशब्दे उक्ता १४५२ पृ० दृश्या ।

सप्तर्षिमण्डल त्रि० ६त० । आकाशे नित्यं ध्रुवनक्षत्रपरिभ्रामके नक्षत्रसप्तकात्मके नक्षत्रमण्डलभेदे "सप्तर्षिमण्डलं तस्माद्दृश्यते सर्वकोपरीति" पुराणम् । तच्चारादि ऋषिशब्दे १४५२ पृ० दृश्यम् ।

सप्तला स्त्री सप्तधा लाति ला—क । १नवमालिकायाम् अमरः २चर्मकषायां ३गुञ्जायां ४पाटलायाञ्च मेदि० ।

सप्तशती स्त्री सप्तानां शतानां समाहारः । मार्कण्डेयपुराणान्तर्गतसप्तशतमन्त्रसमुदायरूपे देवीमाहात्म्यनामके त्रयोदशाध्यायात्मके ग्रन्थभेदे तन्मन्त्रविभागः चण्डीशब्दे २८५५ पृ० दृश्यः । "मध्ये सप्तशतीं जपेदिति" तत्र दर्शितवाक्यम् ।

सप्तशलाक पु० सप्त शलाकाकारा रेखा यत्र । ज्योतिषोक्ते विवाहादौ वर्ज्यदोषसूचके सप्तशलाकाकारितचक्रभेदे चक्रशब्दे २८१० पृ० दृश्यम् । उपयमशब्दे १२६२ पृ० दृश्यम् ।

सप्तशिरा स्त्री सप्त शिरा अस्याः । ताम्बूलवल्ल्यां राजनि० ।

सप्तसप्ति पु० सप्त सप्तयोऽस्या यस्य । १सूर्य्ये हेमच० २अर्कवृक्षे च । सप्ताश्वादयोऽप्यत्र ।

सप्तसागर पु० ब०व० । सप्तसंख्याताः सागराः । "नवनीतसुरासर्पिर्दधिदुग्धजलान्तकाः" इत्युक्तेषु सप्तसु सागरेषु सप्त घृतादिकल्पिताः सागरा इव ज्ञेयपदार्थाधारत्वात् कर्म० । मत्स्यपुराणोक्ते स्नानाख्याते महादानभेदे मत्स्यपु० २८६अ० तद्विधानं दृश्यम् ।

सप्तांशु पु० सप्त अंशवोज्वालायस्य । सप्तजिह्वशब्दे "कालीकरालीचेत्याद्युक्तसप्तज्वालायुते वह्नौ । [गहे लटा० ।

सप्तांशुपुङ्गव पु० सप्तभिरंशुभिः पुङ्गव इव श्रेष्ठत्वात् । सूर्य्ये

सप्तार्चिस् पु० सप्त अर्चींषि यस्य । १वह्नौ अमरः २चित्रकवृक्षे शब्दनिर्णये हेमच० ४क्रूरनेत्रे त्रि० मेदि० ।

सप्ताश्व पु० सप्त अश्वा अस्य । १सूर्य्ये २अर्कवृक्षे अमरः ।

सप्ताश्ववाहन पु० सप्त अश्वाः वाहनान्यस्य । १सूर्य्ये २अर्कवृक्षे च "शुचिः सप्ताश्ववाहनः" सूर्य्यस्तवः ।

सप्ति पु० सप—ति । अश्वे अमरः ।

सफर पुंस्त्री० सप—अरन् पृषो० पस्य फः । (पुँटी) मत्स्ये स्त्रीत्वे ङीष् । "सफरी चलसफरीविघट्टितोर्मिः" माघः अस्य तालव्यादित्यन्ये ।

सफल त्रि० सह फलेन सहस्य सः। १सप्रयोजने २फलयुक्ते च जटा०।

सबल त्रि० सह बलेन सामर्थ्येन सैन्येन वा सहस्य सः। १सामर्थ्यान्विते २सैन्ययुक्ते ३त्र्यो०उक्तबलाढ्ये "बलेऽनुद्यतनौ स्थे राज्याग्नि सुखकीर्त्तयः" नीलक०।

सब्रह्मचारिन् पु० समानं ब्रह्म वेदमधीयानकालीनं व्रतं चरति चर-णिनि समानस्य सः। एकगुरुसकाशात् वेदाध्ययनकाले तद्विबन्धनसमानव्रताचारयुते अमरः।

सभर्तृका स्त्री सह भर्त्रा पत्या सहस्य सः कप्। विद्यमानपतिकायां स्त्रियाम् अमरः।

सभा स्त्री सह भान्ति अभीष्टनिरूपणार्थमेकत्र यत्र सदे। १वक्तृनां समावेशस्थाने २तदधिष्ठायिजनसमूहे च अमरः "यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः। राज्ञः प्रतिकृतौ विद्वान् ब्राह्मणस्तां सभां विदुः"। विद्वत्संकुलतायामपि सभापर्य्यायपरिषच्छब्दमाह "त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः। त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा" मनुः। इदुते ४सदे भेदि० ५सभूते भेमच०। समूहपरत्वे हृत० न०। दार्वीसभं नृपसभमित्यादि। व्यवहारदर्शनार्थसभास्थानस्य वीरमि० दर्शितं यथा बृहस्पतिः "दुर्गमध्ये सदं कुर्याज्जलसत्प्रान्तिसंयुतं पृथक्। प्राग्दिशि प्राङ्मुखीं तत्र सभां न्यायाङ्गसंयुताम्। प्रतिमालेख्यदेवैश्च युक्तामन्यस्तु ना तथा" इति सभाप्रां वास्तुशास्त्रोक्तलक्षणेन लक्षितम्। अन्यत्र व्युनेति समाहारदत्वः। सभाया धर्माधिकरणत्वं कात्यायन आह "धर्मशास्त्रानुसारेण सर्वशास्त्रविवेचनम्। यत्राधिक्रियते स्थाने धर्माधिकरणं हि तदिति"। तत्र सभ्योपवेशनमाह मनुः "यस्मिन् देशे इत्यादि" प्राग्वत्। नेयं दत्वपक्षलक्षणम् अधिकानामपि श्रुतत्वात्। तत्र वक्ष्यते। अधिकृतो विद्वान् प्राङ्विवाकः अत्र प्रविशेत् सभाम्। सभामेव प्रविश्येत्यादिवचनात् सभा सङ्ख्यव्यवहारदर्शनस्थानम्। अन्यान्यसङ्ख्यानि व्यवहारस्थानानाशाक्यादवगन्तव्यानि। "दश स्थानानि वादानां पक्षं चैवात्रवीद्भृगुः। निर्णयं येन गच्छन्ति विवादं प्राप्य वादिनः। आरण्यास्तु सदैः कार्य्याः सार्थिकाः सार्थिकैस्तथा। सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवासिभिः। उभयानुमतश्चैव सदस्तत्र स्थानमीप्सितम्। कुलिकाः सार्थसङ्घाश्च पुरग्रामनिवासिनः। ग्रामपौरगणश्चैव श्रेण्याद्याश्चार्थिनश्च वर्णिनः। कुलानि कुलिकाश्चैव नियुक्ता नृपतिस्तथा"। इति। सदैरारण्यकैः ग्रामेऽपीत्यपिशब्दाद् ये ग्रामेऽरण्यादौ च निवसन्ति ते उभयवासिभिर्निर्णयं कुर्युः उभयत्रचरत्वाभिप्रायत्वात्तेषाम्। कुलिकाः कुलश्रेष्ठाः। सार्थो ग्रामदेवयात्रादौ सिलितो जनसङ्घः तन्मुख्याः सार्थवाहादयः। पुरं सुरक्षितनगरम् तस्मादर्वाचीनो ग्राम इति पुरग्रामनिवासिनोर्भेदः सार्थकुलिकादीनि पञ्च स्थानानि तानि आरण्यकादीनामेव, ग्रामादीनि दश स्थानानि साधारणानि। आलो ग्रामाकारेणावस्थितोजनः। पौरः पुरवासिनां समूहः "श्रेष्ठी रजकाद्याश्च कीनजातयः। चातुर्विद्याः व्याख्यिक्याद्विविद्याश्चतुष्टयोपेताः वर्गिणो गणमुख्यतयः। राज्ञः सभाप्रवेशस्तत्रैव दर्शितः। तत्र मनुः "व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः। मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम्। तत्रासीनः स्थितो वापि पाणिमुद्यम्य दक्षिणम्। विनीतवेषाभरणः पश्येत् कार्याणि कार्य्यिणाम्। प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः। अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक्। धर्मासनमधिष्ठाय तदङ्गानि समाहितः। प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत्" इति।

सभाज शोभने दर्शने च सक० प्रीतौ च०आत्म० उभ० सेट्। सभाजयति ते अससभाजत्-त। अनेकाचत्वाच्च नोपदेशः

सभाजन न०सभाज-भावे ल्युट्। गमनागमनादिकाले सखानन्दप्रीतिसाधने सम्भाषणे पूजने च अमरः।

सभासद् पु०सभायां सीदति-क्विप्। सामाजिके सभ्ये अमरः तल्लक्षणमाह याज्ञ० "श्रुताध्ययनसम्पन्नाः धर्मज्ञाः सत्यवादिनः। राज्ञा सभासदः कार्य्याः रिपौ मित्रे च ये समाः" इति। श्रुतेन मीमांसाव्याकरणादिश्रवणेन वेदाध्ययनेन च सम्पन्नाः। धर्मज्ञाः सत्यवादिनः सत्यवदनशीलाः रिपौ मित्रे च समाः द्वेषरागशून्याः एवंविधा सभासदः सभायां सदसि यथा सीदन्ति तथा दानमानसत्कारैः राज्ञा कर्त्तव्याः सभ्यत्वेन वरीतव्या इत्यर्थः। अतश्चोपाध्यादित्वात् स्वाध्यायोऽध्येतव्यो यूपं छिनत्ति पुरोहितस्त्वं प्रकृतीरित्यादिवत् सत्यपि कर्मत्वेऽनुहेयत्वात् तद्गतैकत्ववहुत्वं विवक्षितम्। तत्र यद्यपि कपिञ्जलन्यायेन नित्यमालेख्यादि श्रुतार्थं तथापि कात्यायनोक्तबहुत्वविरुद्धपरम्। तथा च बृहस्पतिः "लोकवेदसधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा। यत्रोपविष्टा विप्राः स्युः सा सभा सदती सभा" इति। मनुना तु नव प्रयोक्ताः।

"यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः" इति। अत्र त्रिभ्योऽन्यूनाः सप्तभ्योऽधिकाश्च न कार्य्या इत्यत्र तात्पर्य्यं सङ्ख्याविषयन्तु "भूयोऽल्पविरोधे भूयसां स्यात् सधर्मकत्वमिति न्यायेन विप्रतिपत्तावधिकसङ्ख्यावचनमादरणीयं गुणसाम्यैः। तद्वैषम्ये तु शतमप्यज्ञानाञ्च पश्यतीति न्यायेन गुणवत्तरवचनमेवेति प्रदर्शनार्थम्। "यत्तु चत्वारो धर्मज्ञाः पडङ्गवित्त्रिविद्यमेव वा। सा ज्ञेया सर्वधर्मैः स्यादेको वाऽध्यात्मचिन्तकः" इति योगीश्वरेण विषमसङ्ख्यत्वमपि बहुत्वमपि चानादृतम्। तत्तु पूर्वोक्तानां धर्मप्रकारकज्ञापकहेतूनां सन्देहनिर्णयविषयं प्रक्रमात्। व्यवहारविषये तु मन्वादीनां विषमसङ्ख्यानामेव सभ्यत्वं विशेषविधानादित्यवसेयम्। एते च ब्राह्मणा एव। मनुबृहस्पतिभ्यां विप्रपदोपादानात्। स तु सभ्यैः स्थिरैर्युक्तः प्राज्ञैर्धर्मज्ञैर्द्विजोत्तमैः। धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैरिति" द्विजोत्तमपदस्य च कात्यायनेनोपादानात्। नारदेन "राजा तु धार्मिकान् सभ्यानिच्छुञ्छ्रात् सुपरीक्षितान्। व्यवहारधुरां वोढुं ये शक्ताः पुङ्गवा इव। धर्मशास्त्रेषु कुशलाः कुलीनाः सत्यवादिनः। समाः शत्रौ च मित्रे च नृपतेः स्युः सभासदः" इति। विचार्य्य श्रेणिभिः कार्य्यं कुलैर्यत्र विचारितम्। यथैव श्रेण्यविज्ञातं गणाज्ञातं न्ययुक्तकैः। क्षत्रादिभ्योऽधिकाः सभ्यास्तेभ्योऽध्यक्षोऽधिकः कृतः। सर्वेषामधिको राजा धर्मं यत्नेन निश्चितम्। उत्तमाधममध्यानां विवादानां विचारणात्। उपर्य्युपरि वृद्धीनाञ्चरन्नीश्वरवृद्धयः" वर्णभेदोऽनादृतः।

शुक्रनीतिपरिशिष्टेऽपि तथैवोक्तं यथा

"यद्वर्णजो भवेद्राजा योज्यस्तद्वर्णजः सदा। तद्वर्णा एव गुणिनः प्रायशः बहवन्ति हि। व्यवहारविदः प्राज्ञा वृत्तशीलगुणान्विताः। रिपौ मित्रे समा ये च धर्मज्ञाः सत्यवादिनः। निरालस्या जितक्रोधकामलोभाः प्रियंवदाः। राज्ञा ते च नियोज्याः स्युः सभ्याः सर्वासु जातिषु" "राजा तु धार्मिकान् सभ्यान् नियुञ्छ्रात् सुपरीक्षितान्। व्यवहारधुरां वोढुं ये शक्ताः पुङ्गवा इव। लोकवेदस्मृतिधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा। यत्रोपविष्टा विप्राः स्युः सा वत्तसदृशी सभा। श्रोतारो बहिरङ्गत्व कर्त्तव्याः सुविचक्षणाः। अनियुक्तो नियुक्तो वा धर्मज्ञो वक्तुमर्हति। एकः शास्त्रमधीयानो विन्द्यात्स कार्यनिर्णयम्। तस्माद् बहुागमः कार्य्यो विवादेषु-

क्षमो नृपैः। स ब्रूते यं स धर्मः स्यादेको वाध्यात्मचिन्तकः। एकद्वित्रिचतुर्वारं व्यवहारानुचिन्तनम्। कार्यं पृथक् पृथक् सभ्यै राज्ञा श्रेष्ठोत्तरैः सह। अर्थिप्रत्यर्थिनौ सभ्यान् लेखकप्रेक्षकांश्च यः। धर्मवाक्यैरञ्जयति स सभास्तारतामियात्। नृपोऽधिकृतसभ्याश्च प्रतिगणकलेखकौ। ज्ञेयान्यस्य सदा पुरुषः साधनाङ्गानि वै दश। एतद्दशाङ्गकरणं यस्यास्त्यध्यक्ष पार्थिवः। न्यायान् पश्येत् कृतमतिः सा सभाऽभ्रंलिहा"।

सभापति पु० ष० त०। सभायाः स्वामिके त्रये "सभापतिश्च नृपतिरेव "दुर्गमध्ये गृहं कुर्य्यादित्यादिना वृहस्पत्यादिभिः सभानिर्माणतद्रक्षणादेस्तस्य सभ्योपवेशनादेश्च तस्यैवेव विधानात्" वीरमि०।

सभास्तार पु० सभां स्तृणाति स्तृ—घञ्। १सभ्ये अमरः। "अर्थिप्रत्यर्थिनौ सभ्यान् लेखकप्रेक्षकांश्च यः। धर्मवाक्यैरञ्जयति स सभास्तारतामियात्" शुक्रनीतिपरिः उक्ते २सभ्यभेदे च। [कारके अमरः।

सभिक पु० सभा द्यूतसभा आस्पदत्वेनास्त्यस्य ठन्। द्यूत-

सभीक पु० सभा द्यूतं प्रयोजनमस्य ईक। द्यूतकारे शब्दच०

सभोचित पु० सभा उचिता परिचिता यस्य। १परिचिते धनञ्जयः। २सभायोग्ये त्रि०। [३विश्रब्धे त्रि०जटा०

सभ्य पु० सभायां साधुः यत्। १सामाजिके २द्यूतकारे च

सम् अव्य०सो—वा०कमु। १सम्यगर्थे २प्रकर्षे ३सङ्गतौ ४शोभने शब्दच०। ५सततार्थे हेमच०।

सम त्रि० सम—अच्। १समाने तुल्ये २सर्वे अमरः ३साधौ मेदि०। (योड़) ४युग्मे "समेऽङ्किते वर्गः" इति जोता० सप्ततयाख्यातेषु द्वितीयचतुर्थषष्ठादिषु ५राशिषु च। अतुल्येऽस्य सर्वनामता। गीतवाद्ययोरेककालभवे गायकवृत्तादिचालनरूपे वृत्तालभेदे न० ७शत्रुमित्रभिन्ने मध्ये प्रकृत्या० अभेदे तृतीया। समेन याति समं यातीत्यर्थः।

समक्ष अव्य० अक्ष्णः समीपम् अव्ययी० अच्। १चक्षुःसन्निकर्षे तदस्यास्ति अच्। २प्रत्यक्षविषये त्रि०।

समकोण त्रि० समः कोणो यस्य। रेखागणितोक्ते समकोणयुक्ते त्रिकोणादौ। क्षेत्रशब्दे २१६० पृ० १५अङ्कचिह्निते दृश्यम्।

समकोल पुंस्त्री० ष्ठव०। सर्पे त्रिका० स्त्रियां ङीष्।

समगन्धक पु० समास्तुल्यभागेन निवेशिता गन्धा गन्धयुक्तद्रव्यागत्व कप्। क्षत्रिसधूपभेदे शब्दमा०।

समगन्धिक पु० समः सर्वदा तुल्यरूपः गन्धोऽस्यस्य ठन्।

चशीरे (वेणारमूल) राजनि०। [१सकले अमरः २पूर्णे च
समग्र त्रि० समं सकलं यथा स्यात्तथा गृह्यते अह-ड।
समङ्गा स्त्री समज्यतेऽनया सम्+अनृज-करणे घञ् टाप्।
मञ्जिष्ठायाम् अमरः। [तुल्यदर्शके तत्त्वज्ञानिनि।
समचित्त त्रि० समं सर्वत्र समभावं चित्तं यस्य। सर्वत्र
समज न०समजत्यत्र सम्+अज-आधारे अप् व्यभावः। १वने
मेदि० २समूहे २पशूनां संघे ४मूर्खवृन्दे च अमरः।
समज्ञा स्त्री समज्ञिन् सर्वत्र ज्ञायतेऽनया ज्ञा-क। कीर्त्तौ
अमरः। [अमरः २कीर्त्तौ च रमानाथः।
समज्या स्त्री सम्+अज-क्यप् न वीभावः। १समायाम्
समञ्जस त्रि० सम्यक् अञ्ज औचित्यं यत्र अच् समा०। १उ-
चिते अमरः २युक्ते च। प्रा०स०। २औचित्ये न०।४स-
माधाने त्रिका० ५अत्यन्ते अमरः।
समठ पु० गम्भीरे हारा०। [गुरुत्वे राजनि०।
समत्रय न० समं त्रयं यत्र। समभागयुते हरीतकीनागर-
समदर्शिन् त्रि० समञ्चिन् सर्वत्र ब्रह्मभावेनाऽभिन्नतया
पश्यति दृश-णिनि। सर्वत्र समदर्शके तत्त्वज्ञानिनि।
"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव
श्वपाके च पण्डिताः समदर्शिनः" इति गीता।
समदृष्टि स्त्री कर्म०। १सर्वत्र तुल्यदर्शने। "दुःखे सुखे च
विप्रेन्द्र! या दृष्टिर्वर्त्तते सदा। तथा शत्रौ च मित्रे
च समदृष्टिश्च सा स्मृता" पद्मपु०क्रिया०१६अ०। ६व०।
२समदर्शिनि त्रि०।
समधिक त्रि० सम्यक् अधिकः प्रा०। अत्यन्ताधिके अमरः।
समनियत त्रि० समेन नियतः। व्यापकत्वे सति व्याप्य त्व-
युते गदा०। समव्याप्यादयोऽत्यत्र।
समन्त पु०सम्यक् अन्तः, स यत्र वा।१समगन्ते २सीमायाञ्च
समन्ततस् अव्य० समन्त+तसिल्। सर्वत्र व्याप्तौ अमरः।
समन्तदुग्धा स्त्री समन्ततो दुग्धवत्याः। भुजीहडे अमरः।
समन्तपञ्चक न० समन्तात् पञ्चकं हृदपञ्चकं यत्र। कुरुक्षेत्र
स्थे तीर्थभेदे "त्रिःसप्तकृत्व पृथिवीं कृत्वा निःक्षत्रियां
प्रभुः। समन्तपञ्चके पञ्च चकार रुधिरान् हृदान्। स
तेषु तर्पयामास भृगून् भृगुकुलोद्वहः" भा०व०११७अ०।
"तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च मचक्रुकस्य च।
एतत् कुरुक्षेत्र समन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते"
भा०व० ८३अ०।
समन्तभद्र पु० समन्तात् भद्रमस्य। बुद्धे अमरः।
समन्तभुज् पु०समन्तात् भुङ्क्ते भुज-क्विप्। वह्नौ त्रिका०
समन्तात् अव्य० समन्त+आति। १समन्ततोऽर्थे शब्दमा०
२सर्वत्रव्याप्तौ च।
समन्वित त्रि० सम्+अनु+इण-क्त। सङ्गते।
समपद न० समं पदं यस्मिन्। धन्विनां समपदनिवेशनपू-
र्वके "स्थानानि धन्विनां पञ्च" इत्युपक्रम्य "अन्वर्थं
स्यात् समपदमित्युक्ते अवस्थानभेदे अमरः। २रति-
बन्धभेदे पु०"योषित्पादौ हृदि स्थाप्य कराभ्यां पीडयेत्
स्तनौ। यथेष्टं ताडयेत् योनिं बन्धः समपदः स्मृतः"
रतिमञ्ज०।
समभिव्याहार पु० सम्+अभि+वि+आ+हृ-घञ्। १सा-
हित्ये २पूर्वापरीभावे ३शेषशेषिवाचकयोः सहोच्चारणे च
मीमांसकाः। [२सहोच्चरिते। ३अव्ययसहिते च।
समभिव्याहृत त्रि० सम्+अभि+वि+आ+हृ-क्त। १सहिते
समभिहार पु० सम्+अभि+हृ-घञ्। १पौनःपुन्ये क्रिया
सातत्ये ३शब्दार्थे मेदि० "क्रियासमभिहारेण विरा-
ध्यन्तं सहेत कः" माघः।
समम् अव्य० सम-असुन्। १साहित्ये अमरः। २एकदेश्यर्थे
"सममेव समाक्रान्तं हृदयं द्विरदगामिना" रघुः।
समय पु० सम+इण-अच्। १काले २शपथे ३आचारे
४सिद्धान्ते ५अङ्गीकारे च अमरः। ६क्रियाकारके
७निर्देशे ८सङ्केते ९भाषायां मेदि० १०सम्पदि ११नि-
यमे १२अवसरे हेमच० १३कालविज्ञाने शब्दच०।
१४नियमबन्धे अस्य शब्दस्येदमभिधेयमित्यभिधानाभिधेय-
नियमबन्धे वात्स्या० १५शास्त्रे च।
समया अव्य० सम+इण-क्या। ऐकट्ये २मध्ये च अमरः।
समयाकार पु० समयस्य सङ्केतस्याकारः। सङ्केते त्रिका०।
समयाध्युषित न० समयः अध्युषितो यत्र। सूर्य्यतारा-
रहितकाले "तथा प्रभातसमये नष्टे नक्षत्रमण्डले।
रविर्यावन्न दृश्येत समयाध्युषितञ्च तत्" कर्म०काण्डा०।
"उदितेऽनुदिते चैव समयाध्युषिते तथा" इति स्मृतिः।
समयाशुद्धि स्त्री ६त०। कालाशुद्धौ कालाशुद्धिशब्दे दृश्यम्
समर पु० न० सम्+ऋ-आधारे अप्। युद्धे अमरः।
समरभ रतिबन्धभेदे "खजङ्घाहृदयसंयुक्तं कृत्वा योषित्पद-
द्वयम्। स्तनौ धृत्वा रमेत् कामी बन्धः समरभः स्मृतः"
रतिमञ्ज०।
समरमूर्द्धन् पु० ६त०। समरस्याग्रे।
समर्चन न० सम्यक् अर्चनं प्रा०स०। सम्यक्पूजने।
समर्ण त्रि० सम्+अर्द-क्त। सम्यक्पीडिते।

समर्थ त्रि० सम्+अर्थ-अच्। १शक्ते २स्थिते च अमरः। सम्यगर्थः प्रा० स०। ३प्रशस्ताभीष्टे पु०। सङ्गतोऽर्थो यस्य प्रा०स०। "समर्थः पदविधिः" पा० परिभाषिते सङ्गतार्थे समासादौ सार्थसम्बन्धे ह्यम्।

समर्थन न० सम्+अर्थ-ल्युट्। इदमित्थमेवेति निश्चयहेतूपन्यासेन निश्चायकव्यापारभेदे अमरः। युच्। तत्र, व्यङ्ग्येऽध्यवसाये च स्त्री। [तरि देवादौ अमरः।

समर्द्धक त्रि० समर्द्धयति सम्+ऋध-ण्वुल्। इष्टफलदातरि देवादौ अमरः।

समर्य्याद त्रि० सह मर्य्यादया सहस्य सः। १सीमायुते २समीपे पु० मेदि०।

समल न० सम्यक् मलम्। १विष्ठायां शब्दच०। सह मलेन सहस्य सः। २कलुषे त्रि० त्रिका०। [वतरणसोपाने।

समवतार पु० समवतीर्य्यतेऽनेन सम्+अव+तॄ-घञ्। जला-

समवर्त्तिन् पु० सम वर्त्तते वृत-णिनि। १यमे धर्मराजे अमरः। २सर्वत्र समभावेन वर्त्तिनि त्रि०।

समवकार पु० सम्+अव+कृ-आधारे घञ्। नाटकभेदे सा०द० उक्तो यथा

"वृत्तं समवकारे तु ख्यातं देवासुराश्रयम्। सन्धयो निर्विमर्शास्तु त्रयोऽङ्कास्तत्र चादिमे। सन्धी द्वावन्ययोस्तद्वदेक एको भवेत् पुनः। नायका द्वादशोदात्ताः प्रख्याता देवदानवाः। फलं पृथक् पृथक् तेषां वीरसख्योऽखिलो रसः। वृत्तयो मन्दकौशिक्यो नात्र विन्दुप्रवेशकौ। वीथ्यङ्गानि च तत्र स्युस्त्रयोदश। गायत्र्युष्णिङ्नुखान्यत्र छन्दांसि विविधानि च। त्रिशृङ्गारस्त्रिकपटः काव्यस्यायं त्रिविद्रवः। वस्तु द्वादशनाड्योभिनिष्पाद्यं प्रथमाङ्कगम्। द्वितीयेऽङ्के च तिसृभिर्द्वाभ्यामङ्के तृतीयके"। नाड़िका घटिकाद्वयमुच्यते। विन्दुप्रवेशकौ च नाटकोक्तावपि नेह विधातव्यौ। तत्र धर्मार्थकामैस्त्रिविधः शृङ्गारः कपटः पुनः। स्वाभाविकः कृत्रिमश्च दैवजो विद्रवः पुनः। अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः"। तत्र शास्त्राविरोधेन कृतो धर्मशृङ्गारः अर्थलाभार्थकल्पितः अर्थशृङ्गारः। प्रकृतसंशृङ्गारः कामशृङ्गारः। तत्र कामशृङ्गारः प्रथमाङ्क एव। अन्ययोस्तु न नियम इत्याहुः। चेतनाचेतना गजाश्वयः। समवकीर्य्यन्ते बहवोऽर्था अस्मिन्निति समवकारः। यथा समुद्रमन्थनम्"।

समवाय पु० सम्+अव-अय-घञ्। १समूहे अमरः २मेलने न्यायोक्ते नित्यद्रव्यादिषु जात्यादीनां ३सम्बन्धभेदे च "घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः। तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः" भाषा० "समवायं दर्शयति। घटादीनामिति अवयवावयविनोः जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स स समवायः, समवायत्वं नित्यसम्बन्धत्वं तच्च प्रमाणञ्च गुण क्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वात् इत्यनुमाने संयोगादिबाधात् समवायसिद्धिः। न च स्वरूपसम्बन्धेन सिद्धसाधनम् अर्थान्तरं वा, अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवात् लाघवादेकसमवायसिद्धिः। न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्ध्यनङ्गः तत्र रूपसमवायसत्त्वेऽपि रूपाभावात्। न चैवम् अभावस्य वैशिष्ट्यं सम्बन्धान्तरं सिध्येदिति वाच्यं तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात् घटाभावसम्बन्धस्य तत्र सत्त्वात् तस्य नित्यत्वात् अन्यथा देशान्तरेऽपि तत्प्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्त्वात्, मम तु मते घटे पाकरक्तताद्दशायां श्यामरूपस्य नष्टत्वात्र तद्वत्ताबुद्धिः। वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तवैव गौरवम् इत्यलं तत्तत्कालीनतत्तद्भूतलादिकं तत्तद्भावानां सम्बन्धः"। अयुतसिद्धयोः सम्बन्धः स इति वैशेषिकाः स च सम्बन्धो नाना नित्यश्चेति नव्यनैयायिकाः प्राभाकरास्त्वाहुः। समवायस्य प्रत्यक्षः "प्रत्यक्षं समवायस्य विशेषणतया भवेत्" भाषा०। अतीन्द्रियोऽनुमेयश्चेति वैशेषिकाः, स्वरूपस्यैव सम्बन्धत्वोपपत्तेः समवायो न पदार्थान्तरमिति भाट्टाः।

समवायिजनक न० कारणभेदे "यत् समवेतं कार्य्यं भवति ज्ञेयं तु समवायिजनकं तत्" "समवायिकारणत्वं द्रव्यस्यैव विद्येयम्" भाषा०। इदमेव उपादानकारणमिति सांख्यवेदान्तिनश्चाहुः।

समवायिन् त्रि० समवायोऽस्त्यत्र। समवायसम्बन्धानुयोगिनि यथा घटादीनां कपालादि गुणक्रिययोर्द्रव्यादि।

समवेत त्रि० सम्+अव-इण-क्त। १मिलिते २समूहान्विते न्यायोक्तेन समवायसम्बन्धेन स्थिते च।

समवनीय पु०सम्यगवनाय हितं छ। विवाहोत्तरं दम्पत्योः सम्यगवनाय विहिते स्थालीपाके" तद्धितादि सं० त० गोभिलोक्तं यथा "श्वोभूते वा समवनीयं स्थालीपाकं कुर्वीत" "यदि विवाहे वस्त्रादिना मङ्गलिका भूता तदा तत्परदिने सम्यगवनार्थं क्रियते इति सम्यगवनीयं स्थालीपाकं कुर्वीत" रघु०। तद्धोमविधानादि तत्र द्रष्टव्यम्।

समष्टि स्त्री सम्+अश-व्याप्तौ क्तिन्। १सम्यगव्याप्तौ २समस्तताबोधे। कर्त्तरि क्तिच्। ३संघीभूते समस्ते पदार्थे वेदान्तसा०। "समष्टिरीशः सर्वेषां स्वात्मतादात्म्यभेदभात्। तदभावात्तदन्ये तु ज्ञायन्ते व्यष्टिसंज्ञया" पञ्चद०।

समष्ठिष्ठीला पु० समं तिष्ठति स्था-इलच् पृषो० अत्वं वा दीर्घः। (गुँड़िया) शाके अमरः।

समसन न० सम्+अस-ल्युट्। १समासे २संक्षेपे अमरः।

समभूचपातन्याय पु० न्यायभेदे समतया क्षुरस्य पातने यस्य तत्तुल्यत्वेनेवत्तुपर्य्यवसितानां सङ्घातानां तत्क्षुरसंलग्नैकदेशकालावच्छेदेन सङ्घावस्थानं येन ज्ञाप्यते तादृशे न्याये "परः सन्निकर्षेतु उपर्य्यधोभावापन्नसमक्षुरपातन्यायेन राश्येकांशावच्छेदेन सङ्घावस्थानरूपः" तिन्त० रघु०।

समस्त त्रि० सम्+अस--क्त। १संक्षिप्ते २सकले अमरः। ३व्याकरणोक्ते कृतसमासे शब्दभेदे च।

समस्थ त्रि० समं तिष्ठति स्था-क। समभावेन तुल्यतया स्थिते

समस्थली स्त्री कर्म०। अत्यर्वदिदेशे हेमच०।

समस्या स्त्री समस्यते संक्षिप्यतेऽनया सम्+अस-करणे क्यप्। संक्षेपेण उक्तस्य श्लोकपादादेः परकृतेन स्वकृतेन वा अन्येन भागान्तरेण संघटनार्थं कृते प्रश्ने अमरः।

समा स्त्री समयति विकलयति भागान् सम-अच्-टाप्। वत्सरे अमरकृतास्य नित्यबहुवचनान्तताङ्गीकृता पाणिनिना तु "समांसमां विजायते" इति सूत्रे एकवचनान्तता निर्दिष्टा।

समांसमीना स्त्री समां समां विजायते प्रसूते स्त्री न० अत्र समांसमामित्यत्र कालाधारे द्वितीया। प्रतिवर्षं प्रसूतायां गवि अमरः।

समाकर्षिन् पु०सम्+आ+कृष-णिनि। १अनिदूरगामिनि गन्धे अमर। २सम्यगाकर्षणकर्त्तरि त्रि०स्त्रियां ङीष्।

समाख्या स्त्री समाख्यायतेऽनया सम्+आ+ख्या-अङ्। १कीर्त्तौ अमरः २संज्ञायाञ्च। ३योगेनार्थबोधने "स्यान्क्रमेण योगबला समाख्या" ग खण्डदीपिका।

समाघात पु० सम्याहन्यतेऽत्र सम्+आ+हन-आधारे घञ्। १युद्धे अमरः। भावे घञ्। २सम्यग्घाते च।

समाज पु०सम्+अज-घञ् न वीभावः। पशुभिर्व्रजनात् १समूहे अमरः। २सभायां हेमच० ३हस्तिनि नानार्थकोषः।

समादान न० सम्+आ+दा-भावे ल्युट्। १सम्यगादाने कर्मणि ल्युट्। २बीजानां निजकर्मणि मेदि०।

समाधा स्त्री सम्+आ+धा-अङ्। १निश्चयौ २विवादभञ्जने ३पूर्वपक्षस्य सम्यगुत्तरानुगुणसिद्धान्तानुकूलतर्कादिना समर्थनोपधारणे च। ल्युट्। समाधानसमत्र न०। तद्धि ध्येयवस्तुनि चित्तस्य निरन्तरस्थापनरूपे समाधौ च।

समाधि पु० सम्+आ+धा-कि। १समाधायां ध्येयवस्तुनि एकाग्रतया मनसःस्थापनरूपे २ध्यानभेदे ३बन्धनाभावे ४नियमे च अमरः। ध्यानभेदत्वं समाधिः यथोक्तं पात० सू० "तत्र प्रत्ययैकतानता ध्यानम्" सू० "तस्मिन् देशे ध्येयालम्बनस्य प्रत्ययस्यैकतानता सदृशप्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानम्" भा० "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" सू० "ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात्तदा समाधिरित्युच्यते" भा० "ध्यानसाध्यं समाधिं लक्षयित्वा व्याचष्टे ध्यानमेवेति। ध्येयाकारनिर्भासमिति ध्येयाकारस्य निर्भासो न ध्यानाकारस्येति अतएवाहुः शून्यमिति। ननु शून्यं चेत् कथं ध्येयप्रकाशकं इत्यत आह इवेति। अत्रैव हेतुमाह ध्येयस्वभावावेशादिति। अत्रापि पुराणम् "तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्। मनसा ध्यानमित्याद्यं समाधिः सोऽभिधीयते" इति। ध्येयात् ध्यानस्य भेदकल्पना तद्धीनमित्यर्थः" विवर०।

एकाग्रतात्मकसमाधिलक्षणं पुराणान्तरोक्तं यथा "नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम्। तुरीयमक्षरं ब्रह्म अहमस्मिपरं पदम्। अहंब्रह्मेत्यवस्थानं समाधिरिति गीयते" गारुडे ४४अ०। "हृदयध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः। तुष्यते संयतो मुक्तः समाधिः सोऽभिधीयते। ध्येयमेव हि सर्वत्र ध्याता तन्मयतां गतः। पश्यति ह्येतरद्रिक्तं समाधिः सोऽभिधीयते" २४०अ०। "इमं गुणसमाहारमनात्मत्वेन पश्यतः। अन्तःशीतलता यस्य समाधिरिति कथ्यते" योगवाशिष्ठे उपशमप्रक०। ५अर्थालङ्कारभेदे अलङ्कारशब्दे ४०६ पृ० दृश्यम। ६इन्द्रियनिरोधे शब्दर०। ७काव्यगुणभेदे भेदि० "श्लेषः प्रसादः समता माधुर्यं सुकुमारता। अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः। इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृतः। एषां विपर्य्ययः प्रायो दृश्यते गौडवर्त्मनि" काव्यादर्शे तस्यौजस्यन्तर्भावः सा०द० उक्तो यथा "श्लेषः समाधिर्दार्ढ्यं प्रसाद इति ये पुनः। गुणास्तिरन्तमेवैते ओजस्यन्तर्भवन्ति ते"। समधीरारोहावरोहक्रमेण

आरोह उत्कर्षः । अवरोहोऽपकर्षस्तयोः क्रमो वैरस्यानावहो विन्यासः । यथा "चक्षुङ् जेत्यादि" । अत्र पाटवये क्रमेण वस्तुस्य गाढ़ता । चतुर्थपादे त्वपकर्षः" ।

समाघ्रात त्रि० सम्+आ+घ्रा-क्त । १सम्यग्गर्विते २संयक्कृयद्धिते च ।

समान त्रि० समानयति अन-अच् । १तुल्ये २साधौ ३एकस्मिन्नर्थे "समानतन्त्रसिद्धः" गौत० "यत्समानाधिकरणे"ति चिन्तामणिः । सम्+अन-णिच् । भुक्ताद्यादेः समीकरणे नाभिदेशस्थे प्राणादिपञ्चकान्तर्गते ४वायुभेदे पु०

समानविभक्तिक त्रि० समानाविभक्तिर्यस्मात् कप् । स्वप्रकृतिविभक्तिसजातीयविभक्तिके पदे साजात्यञ्च प्रथमात्वादिना । तेन वेदाः प्रमाणमित्यादौ समानविभक्तिकत्वम् ।

समानविषयक त्रि० समानो विषयो यस्य कप् । तुल्यरूपविशेष्यविशेषणताशालिनि ज्ञाने च समाननिरूप्यनिरूपकभावापन्नविषयताशाली बोधः समानाकारकोऽप्यत्र ।

समानाधिकरण त्रि० समानमेकमधिकरणं यस्य । एकाधिकरणवृत्तिके स्वाधिकरणवृत्तिमति पदार्थे । २विभिन्नविभक्तिराहित्ये सति भेदेनैकार्थबोधजनकत्वयुते पदे च "तटः प्रकृतिवचनप्रथमासमानाधिकरणे" पा० तटोऽपि प्रथमासमानाधिकरणं विभिन्नविभक्तिराहित्यादुबोध्यम् । "समानाधिकरणस्तत्पुरुषः कर्मधारयः" पा० ।

समानौच न० कर्म० । अवहत्तिकालाभ्यां तुल्ये अशौचे यथा सपिण्डजननाशौचतुल्यं सपिण्डान्तरजनाशौचम् एवं त्रिरात्राक्रान्तस्यृत्वसहितसपिण्डमरणाशौचतुल्यं तथाविधसपिण्डान्तरमरणाशौचं, जननमरणाशौचयोर्न तुल्यता नापि स्नानापनेयाक्रान्तस्यृत्वयुक्तपुत्रजननाशौचेन सपिण्डजननाशौचस्य तुल्यता न वा यावदशौचाच्चारलवणाक्रान्तायुक्तमङ्गारुकमरणाशौचस्य सपिण्डमरणाशौचस्य तुल्यता ।

समानोदक पु० समानमेकं तर्पणादौ देयमुदकं यस्य । "समानोदकभावस्तु निवर्त्तेता चतुर्दशात्" इत्युक्ते एकादशाधिकचतुर्दशपुरुषपर्य्यन्ते ज्ञातिभेदे सपिण्डशब्दे दृश्यम् ।

समानोदर्य पु० समाने उदरे भवः यत् वा न साहेयः । १एकोदरजभ्रात्रादौ २अग्नौ स्त्री अमरः । [सि०कौ०]

समाप पु० सम्यक् आपोऽत्र अच् समा० नि० । देवयजनस्थाने

समापन न० सम्+आप-ल्युट् । १समाप्तौ चरमकालसम्बन्धे २परिच्छेदे ३वधे च मेदि० ४समाधानें विश्वः । ५तुल्ये धरणिः ।

समापन्न त्रि० सम्+आ-पद-क्त । १समाप्ते २प्राप्ते ३क्लिष्टे ४वधे च विश्वः । भावे क्त । ५समाप्तौ न० ।

समाप्त त्रि० सम्+आप-क्त । १अवसानप्राप्ते २सम्यक्प्राप्ते च

समाप्तपुनरात्तता स्त्री समाप्ते वाक्यसमाप्तौ पुनरात्तता ग्रहणम् । क्रियान्वयेन निवृत्ताकाङ्क्षस्य विशेषप्रत्ययकपदस्य विशेषणान्तरार्थान्वयार्थं पुनरुच्चारणरूपे काव्यदोषभेदे दोषशब्दे ३७६४पृ० दृश्यम् ।

समाप्ताल पु० समाप्नोति पक्वीभवतीति आप-अच् । पक्वो संचिप्रभा० । [२प्राप्तौ शब्दच० ।

समाप्ति स्त्री सम्+आप-क्तिन् । १अवसाने २समर्थने मेदि० ।

समायोग पु० सम्+आ+युज-घञ् । १संयोगसमवायरूपादिसम्बन्धे "लभेद्दृष्टिसमायोगादिति" पुराणम् । २प्रयोजने मेदि० ।

समालम्बिन् पु० समालम्बते सम्+आ+लबि-णिनि । मूलके राजनि० । २समालम्बनकर्त्तरि त्रि० ।

समालभ पु० सम्+आ+लभ-घञ् समु च । कुङ्कुमादिना गात्रलेपने अमरः । ल्युट् । तत्रैवार्थे न० ।

समावर्त्तन न० समावर्त्तते गुरुकुलादनेन सम्+आ+वृत-करणे ल्युट् । वेदाध्ययनानन्तरं गार्हस्थ्याय गुरुकुलादागमनहेतुके संस्कारभेदे तद्विधिः संस्कारतत्त्वे गोभिलोक्तो दृश्यः ।

समाविष्ट त्रि० सम्+आ+विश-क्त । १युक्ते २मनोऽभिनिवेशयुते अभीष्टकर्त्तव्यकर्मणि चित्तैकाग्र्यविशेषयुक्ते च ।

समाहृत पु० सम्+आ+हृत-क्त । कृतसमावर्त्तनसंस्कारे "अतःपरं समाहृतः कुर्य्याद्दारपरिग्रहम्" याज्ञ० ।

समावेश पु० सम्+आ+विश-घञ् । १बहूनामर्थानामेकत्र वाक्यादौ व्यवस्थापने २कर्त्तव्येऽभिनिवेशे च ।

समावेशित त्रि० सम्+आ+विश-णिच्-क्त । कृतसमावेशने

समास पु० सम्+अस-घञ् । १संक्षेपे २समर्थने मेदि० । ३समासारे ४व्याकरणोक्ते ह्यादिपदानामेकपदतासम्पादके पदसाधुतार्थके ५संस्कारभेदे च यथा "समर्थः पदविधिः" पा० "समर्थः संसृष्टार्थः सङ्गतार्थ इति यावत् । सामर्थ्यञ्च द्विविधम् व्यपेक्षावत्त्वमेकार्थीभावश्च । तत्र स्वार्थवर्त्तमानपदानामाकाङ्क्षादिवशात् यः परस्परं सम्बन्धः सा अपेक्षा । राज्ञः पुरुषइत्यादौ वाक्ये सत्तासाकाङ्क्षायां यो यो यस्मिन् सन्निहितो योग्यश्च स तेन तेन सम्बध्यते यथा राज्ञः पुरुषोऽश्व राज्ञो देवदत्तस्य च पुरुषः कृष्णस्य राज्ञोऽश्वो धनञ्जयस्येत्यादि । इत्थं तु नैवम् इच्छीवा-

मेकार्थीभावात्। एकार्थीभावश्च विशेष्यविशेषणभावाश्रयान्योन्याकाङ्क्षोपस्थितिजनकत्वम्। तथा च राजपुरुषादिशब्देन विशिष्टैकार्थबोधकतया न तदेकदेशे षष्ठ्यादेरन्वयः पुरुषांशे विशेषणतयोपस्थितस्य नाम्न्यादिसम्बन्धिता राजादीनाम् जनितान्वयाच्च निराकाङ्क्षतया न देवदत्तादेः स्वामितया पुरुषादावन्वय इति द्रष्टव्यम्। देवदत्तस्य गुरुकुलमित्यादौ देवदत्तादेस्तु प्रधानीभूतकुलादिनैवान्वयः सम्बन्धस्तूपस्थितगुरुद्वारक एव षष्ठ्यर्थः यथोक्तं हरिणा "समुदायेन सम्बन्धो येषां गुरुकुलादिना। संसृष्टावयवास्ते तु युज्यन्ते तद्वता सह" इति। यद्वा सम्बन्धिशब्दार्थस्य पदार्थैकदेशत्वेऽपि भवत्येव केषाञ्चित् सम्बन्ध्यन्वयः तदुक्तं तेनैव "सम्बन्धिशब्दः सापेक्षो नित्यं सर्वं समश्नुते। वाक्यवत् सा व्यपेक्षापि दृष्टावपि न हीयते"। अतएव वार्त्तिककृता "सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति वक्तव्यमिति" सामान्यतो वृत्तिमतो विशेषणस्य स्वातन्त्र्येण प्रयोगाभावमभिधाय "गुरुकुलपुत्रादीनां वक्तव्यम्" इत्यनेन गुरुकुलगुरुपुत्रादीनां विशेषणत्वेऽपि पृथक्प्रयोगाय नञा पर्युदासः कृतः। समानाधिकरणविशेषणस्य तु "समानाधिकरणसमर्थपञ्चतीत्यनेन सर्वथा स्वातन्त्र्येण सामर्थ्याभावात् प्रयोगाभावो भट्टप्राभिहितः। एतन्मूलकमेव प्राचां भाषा "सापेक्षे प्रत्ययो न स्यात् समासो वा कथञ्चन। सापेक्षं तद्विजानीयादसमस्तविशेषणम्। प्रतियोगिपदाद्यत्वं यदन्यत् कारकादपि। वृत्तिशब्दैकदेशस्य सम्बन्धस्तेन नेष्यते" इति। यत्वासं विशेषः भवति प्रधानस्य सापेक्षत्वेऽपि समास इत्युक्तेः प्रधानस्य कृत्युपस्थाप्यविशेष्यस्य राजपुरुषादेः सुन्दरादिविशेषणापेक्षायामपि समासः। समासे चावयवशक्त्यैव तत्तदर्थपदार्थोपस्थित्या विशेष्यविशेषणभावाद्यभ्युपगमे सापेक्षत्वादौ समासाभावादिकं वाचनिकं कल्प्यम् तथान्याय्याधिककल्पना स्यादतः समुदायशक्तिकल्पनम् यथोक्तं हरिणा "बहूनां वृत्तिधर्माणां वचनैरेव साधने। स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः। अकारादिनिषेधोऽत्र बहुव्युत्पत्तिभञ्जनम्। कर्त्तव्यं ते न्यायसिद्धं त्वाकं तदिति स्थितमिति"। तथाहि इ त्यादिविग्रहवाक्ये अकारादि प्रयुज्यते समस्ते तु न तत्र वचनैरेव तन्निषेधः कल्पनीयः समुदायशक्तिपक्षे तु स्वल्पानामप्रयोग इत्युक्तन्यायादेव सिद्धम्। नामार्थयोरभेदान्वयः कृत्प्रः स च राजपदादुपस्थापितराजादेः पुरुषे स्वस्वामिभावसम्बन्धेनान्वये परित्यक्तः स्यात्। सम्बन्धलक्षणायान्तु किमपराद्धम् विशिष्टलक्षणया। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमिति नियमश्च कृत्प्रः स च प्राप्नानन्दादौ भज्यते आनन्दकर्तृकप्राप्तिकर्मत्वबोधस्योभयसम्मतत्वेन कर्तृविहितक्तान्तार्थस्य कर्तुर्विशेष्यतौचित्येन प्रकृते तदपरीत्यात् आनन्दसम्बन्ध्यादिलक्षणास्वीकारे समुदायशक्तिपक्षे एव प्रवेशः। तथा प्राप्त आनन्दो यमिति विग्रहे आनन्दादौ अत्यन्तादिविशेषणयोगवत् समासे तद्वारणाय वृत्तस्य न विशेषणयोग इति वाचनिकस्वकल्पनाऽधिका एतन्मते न्यायसिद्धा इत्यादि बहुविप्रलापात्तिरतः समुदाये शक्तिरित्यत्र विस्तरः। वार्त्तिककृता तु क्वचित् कस्यचित् नञ्समासस्यासमर्थसमासस्य गमकस्य साधुत्वं वक्तव्यमित्युक्तत्वात् अदृश्यम्-पश्येत्यादौ असमर्थेन नञा बाणेन हतमारीचो राम इत्यादौ बाणादेर्विग्रहार्थस्य गमकत्वात् सापेक्षत्वेऽपि तदर्थबोधकतयैव समास इति द्रष्टव्यम्" मदुक्तमनसरत्ना। "षष्ठ्यन्तो यो विधिः स समर्थाश्रितो बोध्यः" सि०कौ० "षष्ठ्या षष्ठ्योः पदानां वा विधिः षष्ठ्यर्थविधिरिति वचनविशेषस्याविवक्षितत्वं द्योतयन्नाह षष्ठ्यन्तेति। तम षष्ठीति किम् वर्णाश्रये कार्येऽसमर्थेऽपि यथा स्यात् तथा च तिष्ठतु दधि आनयाजमित्यत्र दध्यानयेति षष्ठ्योः सामर्थ्याभावेऽपि वर्णाश्रयं यणादिकं भवत्येव। मूले समर्थपदं साध्यधिकमिति द्योतयन्नाह समर्थाश्रित इति समर्थेति किं पश्यति कृष्णं श्रितो रामेत्यादौ समासो मा भूत् वस्त्रं कृष्णस्य अपत्यं देवदत्तस्येत्यादौ मा भूच्च कृष्णशब्दाटपत्यार्थकतद्धितः। इदञ्च परिभाषा समासकृत्तद्धिताटिवृत्तिमात्रे प्रवर्त्तते इति बोध्यम्" मदुक्तमनसरत्ना। स च समासः षड्विधः।

"सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा। सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः" (सुपां सुपा) पदद्वयमपि सुबन्तम्। राजपुरुष इत्यादिः। (सुपां तिङा)। पूर्वपदं सुबन्तमुत्तरं तिङन्तम्। पर्वभूषयत्। "गतिमतोदात्तवता तिङापि समासः" इति वार्त्तिकात् समासः। (सुपां नाम्ना) कुम्भकार इत्यादि। "उपपदमतिङ्" इति समासः। स च "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेरिति" परिभाषया भवति सुबुत्पत्तेः प्राक्। अतोत्तरपदे सुबुत्पत्तेः प्राग्-

त्यर्थः। अन्यथा चर्मकीतीत्यादौ नञोपानुपपत्तेः। (सुपां धातुना) उत्तरपदं धातुमात्रं न तिङन्तम्। कटप्रूः आयतस्तूः। "क्विब्वचिप्रच्छ्रायतस्तुकटप्रुजुश्रीणां दीर्घश्चेति" वार्त्तिकात् समासः। "तिङां तिङा" एिवतखादता। पचतश्चैत्रेत्यादि। "आख्यातमाख्यातेन क्रियासातत्ये" इति मयूरव्यंसकाद्यन्तर्गणसूत्रत्वात् समासः "तिङां सुबन्तेन" पूर्वपदं तिङन्तमुत्तरं सुबन्तम्। जटिलस्त्वः। "जटिलकर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारस्त्वभि दधातीति" मयूरव्यंसकाद्यन्तर्गणसूत्रत्वात् समासः। अयं षड्विधोऽपि समास, "सह सुपा" इत्यत्र योगविभागेन भाष्ये व्युत्पादितः स्पष्टः शब्दकौस्तुभादौ। स्वयं भाष्यादिसिद्धतद्भेदं व्युत्पाद्य प्राचीनवैयाकरणोक्तविभागस्याव्याप्त्यादिभिस्तल्लक्षणस्य प्रायिकत्वं दर्शयति"।

"समासस्तु चतुर्द्धेति प्रायोवादस्तथाऽपरः। योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च। भूतपूर्व्वात् सोऽपि रेखागवयादिवदास्थितः"। चतुर्धा अव्ययीभावतत्पुरुषबहुव्रीहिभेदात्। अयं प्रायोवादः। भूतपूर्वः कृत्भूः अयतस्तूः वागर्थाविवेत्याद्यसंग्रहात्। तथा पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः सर्वपदार्थप्रधानो द्वन्द्वः। अन्यपदार्थप्रधानो बहुव्रीहिरित्यादि लक्षणमपि प्रायिकम्। उन्मत्तगङ्गं कूपप्रति अर्द्धपिप्पली द्विजाः कुशपलाशमित्यादौ परस्परव्यभिचारात्। तथाहि उन्मत्तगङ्गमित्यव्ययीभावे पूर्वपदार्थप्रधान्याद्बहुव्रीहिलक्षणातिव्याप्तिरव्ययीभावलक्षणाव्याप्तिश्च। "अन्यपदार्थे च संज्ञायामिति" पा० समासः। कूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात् तत्पुरुषलक्षणातिव्याप्तिरव्ययीभावाव्याप्तिश्च। "कूपः प्रतिना आख्यार्थे" पा० समासः। अर्द्धपिप्पलीति तत्पुरुषे पूर्वपदार्थप्राधान्यसत्त्वादव्ययीभावातिव्याप्तितत्पुरुषाव्याप्तिश्च "अर्द्धं नपुंसकमिति" पा० समासः। एवं पूर्वकायकृत्यादौ द्रष्टव्यम्। द्विजा इति बहुव्रीहावुभयपदार्थप्राधान्यात् द्वन्द्वातिव्याप्तिः बहुव्रीह्यव्याप्तिश्च। यवकुशपलाशमित्यादिद्वन्द्वे समाहाराध्यपदार्थप्राधान्याद्बहुव्रीह्यतिव्याप्तिर्द्वन्द्वाव्याप्तिश्च स्यादिति भावः। सिद्धान्ते त्वव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि द्रष्टव्यम्। अत्रस्थत्वस्यैमित्याह भौतपूर्व्वादित्यादि। रेखागवयादिनिष्ठलाक्षणिकत्वेनोक्तलक्षणत्वदोषेतेषामपि न समासलक्षणत्वम्। बोधकता तु तद्वदेव स्यादिति भावः" वैया०।

शब्दशक्तिप्रकाशिकायाम् अन्यथा समासलक्षणादिकसूत्रं यथा "यादृशस्य महावाक्यस्यान्तस्त्वादिर्निजार्थके। यादृशार्थस्य धीहेतुः स समासस्तदर्थकः", "यादृशमहावाक्योत्तरस्त्वतलादिः स्वार्थस्य यादृशार्थावच्छिन्नविषयतायाश्शाब्दिबोधे हेतुस्तादृशं तदाख्यं तथाविधार्थे समासः। पाचकादिकन्तु पाककर्त्रादिवर्त्यर्थकं वाक्यमपि स्वघटकानेकनामजन्यतादृशार्थकत्वविरहान्न महावाक्यं प्रकृत्यर्थमात्रावच्छिन्नप्रत्ययार्थस्यान्वयबोधं प्रत्ययोग्यत्वं वा प्रकृते वाक्यस्य महत्त्वं वाच्यं तेन उपकुम्भादौ नाव्याप्तिर्न वा नीलघटत्वमित्यादौ नीलघटत्वादिभागेऽतिप्रसङ्गः। क्षीरमायोत्यादिकन्तु प्रकृत्यर्थावच्छिन्नक्षत्रदर्थस्यान्वयबोधे समर्थोऽपि न प्रकृत्यर्थमात्रावच्छिन्नस्य ततः पानशीलसामान्यस्याप्रत्ययात्। राजन्येव पुरुषभावः प्रतीयते न तु राजपुरुषस्य भावः तद्धितानां प्रकृत्यर्थमात्रान्वितस्वार्थबोधकत्वादतो राज्ञः पुरुषेत्यादिभागे न प्रसङ्गः। पायं पायमित्यादिषमन्नभागस्तु स्वार्थावच्छिन्नस्य धात्वन्तरार्थस्यैवान्वयबोधको न तु त्वादिप्रत्ययार्थस्य प्रस्थायेत्यादौ समासव्यपदेशोल्यवादिशब्दसंस्कारप्रयोजनको गौणः" विभजते "स चायं षड्विधः कर्मधारयादिभेदतः। यस्योपपदसंज्ञोऽन्यस्तेनासौ सप्तधा मतः। "स चायं निरुक्तसमासः कर्मधारयद्विगुतत्पुरुषाव्ययीभावबहुव्रीहिद्वन्द्वभेदात् षड्विधः यस्य कुम्भकारादिष्युपपदसंज्ञकः समासोऽस्ति तेन सममं समासः सप्तविधः। सङ्घायनिभनीकाधादीनामिव कारादीनामपि शब्दानामुपपदार्थान्वितस्यैव स्वार्थस्य बोधकतया तथाविधनामान्तत्वमेवा चैतस्य समासान्तराद्विशेषः। ननु यदि षड्विधः सप्तविधो वा समासस्तदा पञ्चविधत्वोक्तिः प्राचामसङ्गतेत्यतस्तानुपपादयति"। "पूर्वमध्यान्तसर्वान्यपदप्राधान्यतः पुनः। प्राच्यैः पञ्चविधः प्रोक्तः समासो वामटादिभिः।

कश्चित्समासः पूर्वपदार्थधर्मिकान्वयबोधजनकतया पूर्वपदप्रधान उच्यते यथा प्राप्तजायार्द्धपिप्पलीपूर्वकायादिः कश्चित्तत्पुरुषः यथा वा उपकुम्भाद्व्ययीभावः पुरुषसिंहादिकर्मधारयश्च। कश्चिन्मध्यपदार्थधर्मिकधीजनकतयैव मध्यपदप्रधानो, यथा पटानधिकरणप्रतियोगितानवच्छेदकेत्यादिकस्तत्पुरुषः पटस्य नाधिकरणमित्यादिविग्रहे मध्यपदार्थस्यैव विशेष्यत्वात् बहुपदे बहुव्रीहिरेवेत्यस्य तत्पुरुषादेर्बहुनामगर्भत्वाभावे तात्पर्यमित्यस्ये व्युत्पाद्यत्वात्। कश्चिदन्त्यपदार्थधर्मिकधीहेतुत्वादन्त्यपदप्रधानः

यथा राजपुरुषादिकस्तत्पुरुषो नीलोत्पलादिकः कर्मधारयो दिगाद्यादिरव्ययीभावश्च । कश्चित् सर्वपदार्थधर्मकर्तृत्वहेतुत्वात् सर्वपदप्रधानः यथेतरेतरद्वन्द्वो द्वन्द्वमात्रं वा । कश्चित् स्वघटकान्यपदार्थधर्मिकज्ञानजनकत्वादन्यपदार्थप्रधानः यथा बहुव्रीहिः खलेयवाद्यव्ययीभावश्च । तदेवं पञ्च भेदानादायैव षड्विधत्वं प्राच्यैरुक्तमतो न विरोधः । नित्यानित्यभेदेन समासस्य वैविध्यमप्यस्ति यदुक्तं जयादित्येन "विभक्तिमात्रप्रक्षेपाद्विज्ञानान्तर्गतनामसु । स्वार्थस्यावबोधबोधाभ्यां नित्यानित्यौ समासकाविति ।" स्वान्तर्गतनामसु विभक्तिमात्रप्रक्षेपेण यल्लभ्यार्थस्यावबोधः स नित्यः समासः यथा कृष्णसर्पनिर्मोकासुरादि कृष्णः सर्पो निर्मोकायां निः न सुर इत्यादितस्तल्लभ्यस्य वैजात्यादेरभावात् । यल्लभ्यस्य च बोधः सोऽनित्यो यथा राजपुरुषपूर्वकायादिः तल्लभ्यार्थस्य राज्ञः पुरुषः पूर्वं कायस्येत्यादिवाक्यादपि प्रतीतेः । क्षुरदात्रौ चलत्वैव इत्यादिकः कर्मधारयोऽप्यनित्य एव समासः स्फुरन्नो बाणोत्पादिविग्रहस्य बाणत्वादौ स्फुरदादिविषयकबोधाजनकत्वेऽपि स्फुरदभिन्नबाणत्वादावेकत्वादिबोधकत्वमादायैव तदर्थप्रकाशकत्वात् स्फुरन्नौ बाणोभित्यादिवाक्यस्यैव तत्र विग्रहत्वसम्भवाच्च । विग्रह एव समासलभ्यार्थस्य बोधकत्वं तन्त्रं न तु समासे विग्रहार्थस्य । विग्रहलभ्ययोर्लिङ्गसङ्ख्ययोर्व्यङ्कवैपुल्ये च प्रायशः समासबोध्यत्वात् । अतएव यत्र समासे तयोर्व्यङ्कसङ्गावस्तत्रावगमाऽपि यथा जरतीचित्रगुर्जनः प्रियतिसृ पुंस्क इत्यादौ स्त्रीत्वस्य स्त्रीप्रत्ययतिसृत्वादेश्चोत्तरभिन्नव्यङ्कयोः सत्त्वात् तथा यत्परि प्रियबुवा हस्त्यश्वमित्यादावेकत्वादेः अत्रयलाक्यारेकत्व एवान्ययोभावस्य युष्मदस्मदोर्द्वित्व एव युवाद्यादेशस्य सेनाङ्गानां बहुत्व एव समाहारद्वन्द्वस्य विधानात् । तदुक्तमभियुक्तैः "सङ्ख्या तु व्यङ्काभावाद्व्यक्ता प्रातरादिवत् । यत्र तु व्यङ्कः किञ्चित्तत्र सङ्ख्या प्रकाशते । शलाकापरि हस्त्यश्वं पूर्वकायोऽङ्गेपिप्रक्षीति" । पूर्वादेरङ्गस्य च ङसर्थैकत्वमन्तर्भाव्यैवावयविना तत्पुरुषस्य व्युत्पन्नत्वात् सरसिजादौ कण्ठेकालादौ चानुक्त समासे वपुः सङ्ख्यावगमेऽपि न क्षतिः तत्र व्यङ्कवपुः सत्त्वेऽपि सङ्ख्या न बुध्यते इति समासशक्तिवादिनः पातञ्जलाः", अधिकं तत्र द्रष्टव्यम्

समासक्त त्रि० सम्+आ+सञ्ज-क्त । १संयुक्ते २सम्यगभिनिविष्टे च ।

समासङ्ग पु० सम्+आ+सञ्ज-घञ् । १संयोगे २सम्यगभिनिवेशे च ।

समासवत् पु० समास+अस्त्यर्थे मतुप् मस्य वः । १व्याकरणोक्तसमासयुक्ते शब्दे २सक्षेपयुक्ते त्रि० शब्दच० । समासेन तुल्यं वति । ४समासतुल्यक्रियायां अव्य० । [२निकटस्थिते ३प्राप्ते त्रि० ।

समासादित त्रि० सम्+आ+सद+णिच्-क्त । १सम्यगाहृते

समासान्त पु० ६त० । व्याकरणोक्तसमासस्य शेषभावयवे तत्तत्तोत्तरविहितविधिश्च अनित्यः "समासान्तविधिरनित्यः" परिभा० ।

समासार्था स्त्री समासेन संक्षेपेणार्थोऽभिहितोयस्याः । १समन्वयायाम् अमर । ६त० । २समासबोध्यार्थे पु० ।

समाहार पु० सम्+आ+हृ-घञ् । १समुच्चये अमरः २अनुद्भूतावयवभेदे समूहे समाहारे द्वन्द्वे तु द्विवचनबहुवचनादिनैव समुदस्य बोधात् समुदत्वनैव प्रवृत्तिनिमित्तम् । द्वन्द्वशब्दे ३७९२ पृ० द्विगुशब्दे च ३८१२ पृ० दृश्यम् ।

समाहारद्वन्द्व पु० व्या० उक्ते समासभेदे ३७९२पृ० दृश्यम् ।

समाहारद्विगु पु० व्या० उक्ते समासभेदे द्विगुशब्दे ३८१२पृ० दृश्यम् ।

समाहित त्रि० सम्+आ+धा-क्त । १कृतसमाधौ २व्याक्षिप्ते ३प्रतिज्ञाते मेदि० ४निष्पन्ने धरणिः ५युक्ते शब्दच० । ६कृतसमाधाने । भावे क्त । ६समाधाने न० ।

समाहृत त्रि०सम्+आ+हृ-क्त । १संगृहीते २एकत्रस्थीकृते ।

समाहृति स्त्री सम्+आ+हृ-क्तिन् । १संक्षेपे २कथने अमरः । ३समुच्चये च ।

समाह्वय पु० समाह्वयते सम्+आ+ह्वे-अच् आत्वाभावः । १आह्वाने २प्रार्थिकरणकदूते च "प्रार्थिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः" इति मनुः । ३तदधिकारेण प्रवृत्तविवादभेदे च द्यूतशब्दे ३७७४पृ०दृश्यम् ।

समाह्वा स्त्री समा-आह्वा यस्याः । १गोजिह्वायां शब्दच० । प्रा०स० । २समाख्यायाञ्च । [शब्दर० ।

समिक न० सम्-इण-डि संज्ञायां कन् । गेलाख्ये (वड़शा)

समित् स्त्री समीयतेऽत्र सम्+इण्-आधारे क्विप् । युद्धे अमरः

समिता स्त्री सम्+इण्-क्त । १गोधूमचूर्णभेदे "गोधूमा धवला धौताः कृष्टिताः शोभिताश्चतः । पक्त्रिप्राक्ता विनिष्पिष्टाश्चालिताः समिताः स्मृताः" राजनि० । २एकृते त्रि० ।

समिति स्त्री सम्+इण-आधारे क्तिन् । १सभायाम् अमरः

२युद्धे २सङ्गते च मेदि० व्याहृतकर्तसिद्धे प्राणिपीड़ापरिहारेण सम्यग्गमने सा च पञ्चविधा कर्तृशब्दे ३८५ पृ० दृश्या। [३व्याकृतौ मल्लिप्रभा०।

समिय पु० सम्+इण-अक्। १वङ्गौ २युद्धे च मि०को०।

समिध् स्त्री समिध्यतेऽनया सम्+इन्ध-करणे क्विप्। १काष्ठे २होमीयकाष्ठभेदे च तल्लक्षणं छन्दोग० "नाङ्गुष्ठादधिका नोना मध्यमं स्थूलतया क्वचित्। न निर्ग्रन्थित्वचा चैव न सकोटा न पाटिता। प्रादेशाद्वाधिका नोना न तथा स्यादशाखिका। न सपत्रा न निर्गौर्वा होमेषु च विजानता" इति। तस्य निमित्तलक्षणं यथा "विशीर्णा विटपा शुष्का वक्राः स्थूला द्विधाकृताः। कृमिदष्टाश्च दोषांश्च समिधो नैव कारयेत्" तत्र दोषो यथा "विशीर्णायुःक्षयं कुर्याद्विटपा पुत्रनाशिनी। शुष्का नाशयते पत्नीं वक्रा बन्धुविनाशिनी। कृमिदष्टा रोगकरी विद्वेषकरणी द्विधा। पशून् मारयते दीर्घा स्थूला चार्थविनाशनी" तन्त्रसा०। [त्रिका०।

समिध पु० समिध्यते सम्+इन्ध-क। १काष्ठे २अग्नौ च

समिन्धन पु० सम्+इन्ध-करणे ल्युट्। १काष्ठे शब्दच०। भावे ल्युट्। २सम्यग्दीप्तौ च।

समीक न० सम-ईकक्। युद्धे अमरः।

समीकरण न०असमः समः क्रियतेऽनेन सम-च्वि+कृ ल्युट्। बीजगणितप्रसिद्धे अज्ञातसंख्यानां यावत्तावदादीनामव्यक्तरागीनां संख्या ज्ञानार्थं १प्रक्रियाभेदे २तल्लक्षणापादने च।

समीक्ष न० सम्यगीक्षतेऽनेन घञ्। १साङ्ख्यदर्शने त्रिका०। भावे घञ्। २पर्य्यालोचने ३सम्यग्ज्ञाने च पु०। ब। समीक्षाऽत्र। ४सत्त्वे पुंस्त्री मेदि० ह्रीमांसायाश्च ७यत्ने च स्त्री शब्दच०।

समीक्ष्यकारिन् त्रि०समीक्ष्य पर्य्यालोच्य करोति कृ-णिनि उप०। वस्तुस्वरूपपर्य्यालोचनपूर्वककार्य्यकारके।

समीच पु०सम्+इण-चट् कित् दीर्घश्च। १संयुक्ते २कश्यपस्त्री डीप् उज्ज्वलद०। २बन्दनायां स्त्री-त्रिका०।

समीचीन त्रि० सम्यगञ्चतीति सम्+अञ्च-क्विप् ततः ख समः समिः अञ्चेरकारलोपे पूर्वपददीर्घः। १यथार्थे २साधौ शब्दच०। ३सत्ये न० हेमच०। ४सत्ययुते त्रि०।

समीनिका स्त्री समां प्राप्य पक्षते ख ततः स्वार्थे क। प्रतिवर्षं पक्षतायां समांसलीनायां गवि शब्दच०। [अमरः

समीप त्रि०सङ्गता आपोऽत्र अच् समा०अत ईत्वम्। निकटे

समीर पु० सम्यक् ईरयति गोदयति सम्+ईर-अच्। १वायौ अमरः। २धर्माहृते राजनि०। पृषो०। धुमिरोऽन्यत्र राजनि०। [३पथिके मेदि०। भारे ल्युट्। सत्यङ्कौ न०।

समीरण पु० सम्+ईर-ल्यु। १वायौ २सङ्गतकर्त्तरि अमरः

समीरित त्रि० सम्+ईर-क्त। १कथिते २सञ्चारिते "दत्तसंज्ञसमीरिता" कुमारः।

समीहित त्रि०सम्+ईह-क्त। १अभीष्टे २सम्यक्चेष्टिते न०।

समुख त्रि० सह मुखेन मुखव्यापारेण वा समानस्य सादेशः। १वादकुशले हेमच०। २वाग्मिनि च।

समुचित त्रि० सम्+उच-क्त। सम्यग् उपयुक्ते सभ्यसुखे।

समुच्चय पु०सम्+उद्+चि-अच्। १द्वित्वादीनां राशौ अमरः परस्परमिरपेक्षाणामनेकेषामेकत्रीकरणम् शक्तियादावन्वये च यथा देवदत्तो यज्ञदत्तस्य गच्छतीत्यत्र देवदत्तयज्ञदत्तयोः परस्परसापेक्षतानावेऽपि एकक्रियान्वये समुच्चयः। तद्वाचकस्य प्रादेश्च चकारः क्वचित् तद्धादिशब्दोऽपि। २सङ्घाहारे शब्दच०।

समुचित त्रि० सम्+उद्+चि-क्त। कृतसमुच्चये "समुचितफलकालनानाभिधीत विधिस्वरूपे गदाधरः।

समुच्च(च्चा)र पु० सम्+उद्+चर-णिच् घञ् वा। सम्यगुच्चारणे २सम्यक्त्यागे च। [पाठने च।

समुच्छेद पु० सम्+उद्+छिद-घञ्। १विनाशे २समूलोत्पाटने च।

समुच्छ्(च्छ्रा)य पु० सम्+उद्+श्रि-अच् घञ् वा। १ऊर्ध्वं गतौ २विरोधे ३उत्क्षेपे च मेदि०।

समुच्छ्रित त्रि० सम्+उद्+श्रि-क्त। ऊर्ध्वस्थिते।

समुच्छ्वसित त्रि०सम्यक्+उच्छ्वसितम् सम्+उद्+श्वस्-क्त वा। समन्तात् विस्तीर्णे (हृदयादि) "समुच्छ्वसितहृत्पद्मा गतिः" काव्यप्र०। [युक्ते २पूर्णे ज्योत्स्नितेच।

समुच्छ्वसित त्रि० सम्+उद्+श्वस-क्त। १सम्यगुच्छ्वासयुक्ते

समुच्छ्वास पु० सम्+उद्+श्वस-घञ्। मुखनासिकाभ्यां प्राणवायोर्बहिरागमे। [गुह्यभने।

समुज्झित त्रि० सम्+उज्झ-क्त। त्यक्ते अमरः। [२सम्यक्

समुत्क्रम पु० सम्+उद्+क्रम-घञ् न ह्रस्वः। १ऊर्द्ध्वगमने

समुत्क्रोश पुंस्त्री०सम्यक् समुत्क्रोशति उच्चैः शब्दायते सम्+उद्+क्रुश-अच्। १कुररविहगे शब्दच० स्त्रियां ङीष्। भावे घञ्। २उच्चैःशब्दे [व्युत्पत्तौ २उत्पत्तिते च।

समुत्थ त्रि०सम्यगुत्तिष्ठति सम्+उद्+स्था-क सस्य थः। १सं-

समुत्थान न० सम्+उद्+स्था-करणे ल्युट् सस्य थः। १यत्नयोगे २उच्चोद्यमे ३व्याधिनिर्णये च मेदि०।

समुत्पत्ति स्त्री सम्+उद्+पद्-क्तिन् । सम्यगुद्भवे ।
समुत्पन्न त्रि० सम्+उद्+पद्-क्त । सम्यगुद्भूते ।
समुत्पाट पु० सम्+उद्+च्+पट-घञ् । उन्मूलीकरणे ।
समुत्पाटित त्रि० सम्+उद्+च्-पट-क्त । उन्मूलिते ।
समुत्पिञ्ज त्रि० सम्+उद्+पिञ्ज-अच । १अत्याकुले हेमच० २आकुलसैन्ये पु० अमरः ।
समुत्सर्ग पु० सम्+उद्+सृज-घञ् । सम्यक्त्यागे ।
समुत्सुक त्रि० सम्यगुत्सुकः प्रा०स० । १अत्यन्तोत्सुके इष्टवस्तुलाभाय त्वरान्विते ।
समुत्सृष्ट त्रि० सम्+उद्+सृज-क्त । सम्यक्त्यक्ते ।
समुत्सेध पु० सम्+उद्+सिध-घञ् । १अत्युच्चतौ २अतिस्फीततायाञ्च । [अमरः ।
समुदक्त त्रि० सम्+उद्+अनच-क्त । कूपादेरुद्धृतजलादौ
समुदय पु० सम्+उद्+इण-अच् । १समूहे अमरः २युद्धे ३सङ्गमे मेदि० ४दिवसे शब्दर० । ज्योतिषोक्ते पूजने न० । ३षड्वाडीचक्रस्थे लग्नतारवधिके सप्तदशनक्षत्रे चक्रशब्दे पृ०दृश्यम् । घञन्तः समूहे युद्धे पु०अमरः । पृष्ठस्थमैन्ये अजयः अत्युच्चतौ मेदि० ।
समुदागम पु० सम्+उद्+आ+गम-घञ् न वृद्धिः । सम्यग्ज्ञाने विका० । [विका० । २सम्यगाचारे च ।
समुदाचार पु० सम्+उद्+आ-चर-घञ् । १अभिप्राये
समुदित त्रि० सम्+उद्+इण्-क्त । १प्राप्तसंभूतौ पदार्थे सम+उद्-कर्मणि क्त । २सम्यक्कथिते ।
समुदीरण न० सम्+उद्+ईर-क्त । सम्यक्कथने ।
समुदीरित पु० सम्+उद्+ईर-क्त । सम्यक्कथिते ।
समुद्ग पु० सम्+उद्+गम-ड । १सम्पुटके हेमच० २सङ्गे षकारकदार्थे ३सङ्गेन सहिते । स्वार्थे क । तत्रैव अमरः
समुद्गम पु० सम्+उद्+गम-घञ् न वृद्धिः । १ऊर्द्धगतौ २सङ्गमे च ।
समुद्गीत त्रि० सम्+उद्+गै-क्त । उच्चैर्गीते । [थिते च ।
समुद्गीर्ण त्रि० सम्+उद्+गृ-क्त । १वमिते २उत्तोलिते ३कथिते
समुद्दिष्ट त्रि० सम्यक् उद्दिष्टम् उद्+दिश-क्त । सम्यगुद्देश्यविषये पदार्थे "तत्समुद्दिष्टं कर्मेति" सांख्यप्रवारः ।
समुद्देश पु०सम्यक् उद्देशः उद्+दिश-घञ् । सम्यगभिसन्धौ । २सम्यगुद्देशे च यथा "वाक्यादा जातिसमुद्देशे" मञ्जूषा
समुद्यत त्रि० सम्+उद्+यम-क्त । १अत्यन्तप्रगल्भे अत्यन्तविनीते अमरः २समुद्गीर्णे हेमच० ।
समुद्धरण न० सम्+उद्+हृ-ल्युट् । १उत्तोलने कूपादेर्जलोत्सेचने २भुक्तान्नस्य यमने ३उन्मूलने च । कर्त्तरि ल्युट् । ४वान्ते ५उन्मूलिते च अमरः ।
समुद्धृत त्रि० सम्+उद्+हृ-क्त । १अपनीते २समुत्कीर्णे मेदि० ३उत्तोलिते ४उन्मूलिते च ।
समुद्धर्त्तृ त्रि० सम्+उद्+हृ-तृच् । १वमनकारिणि २उद्धरणकर्त्तरि ३उत्सारके ४हृतद्रव्यस्य पुनरादानकर्त्तरि च
समुद्भव पु० सम्+उद्+भू-अप् । समुत्पत्तौ ।
समुद्भूत त्रि० सम्+उद्+भू-क्त । सम्यगुत्पन्ने ।
समुद्यत त्रि० सम्+उद्+यम-क्त । सम्यगुद्यमयुते ।
समुद्यम त्रि० सम्+उद्+यम-घञ् न वृद्धिः । सम्यगुद्यमे ।
समुद्र पु० सम्+उन्द्-क्रन् क्लेदने रक, सम्+उद्+रा-क वा । १रत्नाकरख्याते प्रचुरजले सागरे अमरः । सह समुद्रया २समुद्रासङ्गिते त्रि० "बभौ मरुत्वान् विकृतः समुद्रः बभौ मरुत्वान् विकृतः समुद्रः" इति भट्टिः । ३अप्सरसि ४अप्सरस्यां स्त्री टाप् राजनि० । सागरस्य ब्रह्मणो मेढ्रात् उद्भवः "आद्याद् वाक्, सिन्धवो रेढ्रात्" भाग० २।१२अ० । स च सप्तविधः "लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः" समुद्रनामनिरुक्तिः तद्भेदादिकारणञ्च मत्स्यपु० १२२अ० उक्तं यथा "अपाञ्चैव समुद्रैकात् समुद्र इति संस्मृतः । उदयतीन्दौ पूर्णे तु समुद्रः पूर्यते सदा । प्रक्षीयमाणे वह्नौ क्षीयतेऽम्भसि च वै । आपूर्यमाणो ह्युदधिरात्मनैवापि पूर्यते । ततो वै क्षीयमाणे तु स्वात्मन्येव क्षयं व्रजेत् । उद्दीप्यन्ते ऽग्निसंयोगा दुच्छ्वासाधो यथा स्वयम् । तथा स्वतः समुद्रोऽपि वर्द्धते शशिनोदये । अन्यूनानतिरिक्तात्वात् वर्द्धत्यापो ह्रसन्ति च । उदयेऽस्तमये चेन्दोः पक्षयोः शुक्लकृष्णयोः । क्षयवृद्धी समुद्रस्य शशिष्टद्विक्षये तथा । दशोत्तराणि पञ्चाङ्गरङ्गुलानां शतानि च । अपां वृद्धिः क्षयो दृष्टः समुद्राणान्तु पर्वसु" ।
समुद्रकफ पु० समुद्रस्य कफ इव । जलधिफेने त्रिका० ।
समुद्रकान्ता स्त्री ६त० । १पृथिव्यां राजनि० । २नद्यां च हेमा० समुद्रप्रियादयोनद्याम् ।
समुद्रगा स्त्री समुद्रं गच्छति गम-ड । १नद्यां हेमच० । "सर्वा नद्यः समुद्रगा" इति पुराणम् । साक्षात् परम्परया वा सर्वासां जलधिगामित्वात् तथात्वम् । साक्षात् समुद्रगा च गङ्गादिः "सर्वा नद्यो रजोयुक्ता वर्जयित्वा समुद्रयाः" इति प्रा० त० । गङ्गाया एव प्रतस्रो धारा; सीतालकनन्दावङ्क्षुभद्राख्यतस्रो ख्याताः

जम्बूद्वीपशब्दे २०४४पृ० दर्शिताः । भारतवर्षस्थाः समुद्रगाश्च "नदीं पिबन्ति विपुलामित्यादिना "वसुनाञ्च महानदीमित्यन्तेन" भा०भी०उक्ताः २०४६ पृ० दर्शिताः । क्षुद्रनदीनामपि महानद्यामिलितानां समुद्रगामित्वं यथोक्तं माघे "सास्रूयाम्भोधिमभ्येति महानद्या न भाषणा" । [त्रिका० ।

समुद्रगृह न० समुद्र इव प्रचुरजलं गृहम् । जलयन्त्रभेदे

समुद्रचुलुक पु० समुद्रस्य चुलुकः गण्डूषजलमितजलमिव अनायासेन पीतत्वादस्य । अगस्त्ये मुनौ त्रिका० ।

समुद्रनवनीत न० समुद्रस्य नवनीतमिव । समुद्रमन्थनोद्भूतसारांशे १अमृते २चन्द्रे च मेदि० ।

समुद्रफल न० ओषधिभेदे "समुद्रनाम प्रथमं पश्चात् फल मुदीरयेत् । समुद्रफलमित्यादि नाम वाच्यं भिषग्वरैः । फलं समुद्रस्य कटूष्णकारि वाताग्रहं भूतनिरोधकारि । त्रिदोषदावानलदोषहारि कफाग्नयम्लान्तिविरोधकारि" राजनि० तद्गुणाः उक्ताः ।

समुद्रफेन पु० ६त० । समुद्रस्य फेने अमरः "समुद्रफेनश्चुल्यो लेखनः शीतलश्च सः । कषायो विषपित्तघ्नः कर्णकण्ठरुजापहः" भावप्र० तद्गुणा उक्ताः ।

समुद्रमेखला स्त्री समुद्रः मेखलेव वेष्टनाकारत्वात् यस्याः । पृथिव्यां त्रिका० । समुद्ररशनादयोऽप्यत्र ।

समुद्रयान न० यायतेऽनेन या-करणे ल्युट् ६त० । पोते समुद्रतरणसाधने नौकाभेदे वराहपु० ।

समुद्रयात्रा स्त्री ६त० । समुद्रस्य तीर्थत्वेन गमने । कल्पो तद्विशेषः कलिशब्दे १८०४ पृ० दृश्यम् ।

समुद्ररमण स्त्री समुद्रः रमण इव वेष्टकत्वात् यस्याः । पृथिव्यां हेला० ।

समुद्रलवण न० समुद्रजलजातं लवणम् । (करकच)सामुद्रे लवणे राजनि० । "सामुद्रं यत्तु लवणमक्षीवं वस्तिरं च तत् । सामुद्रं मधुरं पाके सतिक्तं मधुरं गुरु । नात्युष्णं दीपनं भेदि अक्षीवमविदाहि च । श्लेष्मलं वातनुत्स्निग्धमल्पं नातिशीतलम्" भावप्र० ।

समुद्रवह्नि पु० ६त० । समुद्रस्थे अग्नौ वाड़वानले हेला० ।

समुद्रवेला स्त्री ६त० । समुद्रस्य क्रूले ।

समुद्रसुभगा स्त्री ६त० । गङ्गायां राजनि० ।

समुद्रान्त न० समुद्रस्यान्तः पर्य्यन्तदेशः उत्पत्तिस्थानत्वेनास्त्रास्य अथ समुद्रः अन्तो यस्य वा । १जातीफले शब्दच० २दुरालभायां स्त्री अमरः । ३कार्पासे ४पृक्कायां मेदि० ५यवासे स्त्री राजनि० । ६त० । ७समुद्रपर्य्यन्ते त्रि० ।

समुद्राम्बरा स्त्री समुद्रः अम्बरमिव वेष्टनाकारत्वात् यस्याः । पृथिव्यां त्रिका० । सागराम्बरादयोऽप्यत्र ।

समुद्गार पु० समुद्गच्छति सम्-गम्-कर्त्तरिकरणे वा घञ् । १उद्गारे २मेघवर्षे ३तन्निमित्तजलसमूहे मेदि० । [पदार्थे ।

समुद्रि(द्री)य त्रि० समुद्र+भवार्थे घ क्त वा । समुद्रभवे

समुद्वह त्रि० सम्+उद्+वह-अच् । श्रेष्ठे सम्यगुद्वहनकर्त्तरि च । [अमरः ।

समुन्दन न० सम्+उन्द्-ल्युट् । सम्यगार्द्रीभावे (भिजा)

समुन्न न०सम्+उन्द्-क्त । १क्लिन्ने २आर्द्रे अमरः । [धरणिः

समुन्नत त्रि० सम्+उद्+नम-क्त । १अत्युच्चे २खड्गभेदे पु०

समुन्नति त्रि० सम्+उद्+नम-क्तिन् । १उच्चतायाम् "प्रायः पयोधरसमुन्नतिरत्र हेतुः" इत्युद्भटः । २उच्चपदे स्त्रीनायां जटा० ।

समुन्नद्ध त्रि० सम्+उद्+नह-क्त । १गर्विते २पण्डितमान्ये अमरः । ३प्रभौ अजयः । ४समुद्भूते मेदि० ५उत्क्षिप्य बद्धे हेमच० । ६समुद्भूते च । भावे क्त । ७उच्चोत्थबन्धने न० । [२उत्क्षेपणे ४समुद्भावने च ।

समुन्नय पु० सम्+उद्+नी-अच् । १ऊर्द्धनयने २सम्यग्नीतौ

समुपचित त्रि० सम्यक् उपचितम् उप+चि-क्त । १सुबद्धलोकिते २संवर्द्धिते च । [रामाश्रमः ।

समुपजोषम् अव्य० सम्+उप+जुष-असुन् । अत्यन्तार्थवृत्ते

समुपेयिवस् त्रि० सम्+उप+इण-क्वसु । समीपगते ।

समुपोढ त्रि० सम्+उप+वह-क्त । १सङ्गते २सङ्गाते च ।

समुल्लेख पु० सम्+उद्+लिख-घञ् । पादादिना भूम्यादेः खनने ।

समूढ त्रि० सम्+ऊह+वह-वा क्त । १राशीकृते २अनपसृते "समूढस्य पांसुरे" इति ऋग्वेदः । ३भुग्ने ४सङ्घीभूते मेदि० ५दर्शिते ६कृतविवाहे धरणिः ७शोधिते जटा० । सह ऊढेन । ८समूढसहिते त्रि० ।

समूरु पु०सक्थनो सन्धिहीनत्वात् ऊरू यस्य । मृगभेदे अमरः पृषो० । समूर तत्रार्थे पुंस्त्री० हेमच० स्त्रियां ङीष् ।

समूल त्रि० मूल मूलेन । मूलसहिते "समूले उपपदे कषादिभ्यः असुल् तत्प्रकृतिधातोरनुप्रयोगश्च "समूलकाषं कषः" "समूलघातं न्यवधीत्" इति च भट्टिः ।

समूह पु० सम्+ऊह-घञ् । १समुदये अमरः । समूहत्वञ्च अपेक्षाबुद्धिविषयविषयत्वं त्वित्वादिपर्य्याप्तसंख्याविशेषो वा । २सम्यग् ऊहे तर्के च ।

सम्मूहनी स्त्री सम्मुह्यतेऽनया सम्+ऊह–करणे ल्युट् ङीप्। १संमार्जन्यां हेमच०। भावे ल्युट्। २सम्मार्जने परिसमूहनशब्दे ४२५८ पृ० दृश्यम्। ३सम्यगूहकरणे च न०।

सम्मूहालम्बन त्रि० सम्मूहमालम्बते विषयतया आ+लबि–ल्यु। नानाप्रकारतानिरूपितनानाविशेषतताश्रितिनिघ्राने। तत्र संशये नानाप्रकारतानिरूपितायाः एकविशेषतायाः सत्त्वात् न सम्मूहालम्बनत्वम्। धवखदिरौ हाविल्यादौ दण्डी कुण्डी च देवदत्त इत्यादौ वाक्यजन्यबोधस्यापि सम्मूहालम्बनत्वं तत्रोभयनिरूपितयोः विशेषतयोर्द्वयोरेवाङ्गीकारात् हन्यादिपरभूयमाणशब्दस्य प्रत्येकान्वयनियमेन प्रथमार्थद्वित्वस्य प्रत्येकवृत्तित्वात् तच्च समवायेनैवेति बोध्यम्। अतएव शब्दचिन्तामणौ अग्निकता धवखदिरपलाशांश्छिनत्तीत्यादौ प्रत्येककर्मतायाः एव विभिन्नक्रियायावन्वय इत्युक्तम्। अत उक्तस्थले विशेषतात्रयम्। धवखदिरौ हाविल्यादावपि द्वित्वस्य समवायसम्बन्धेन धवादिवृत्तित्वात् विशेषतात्रयाङ्गीकारेऽपि नक्षत्वभावात्। तेनैव धवखदिरौ न हाविति प्रतीतिवारणसम्भवात्। घटं पटञ्च पश्यतीत्यादौ च दर्शनक्रियायां घटपटयोरन्वयसम्भवे तु न सम्मूहालम्बनमिति भेदः इत्यादिबोध्यम्। यदि च आत्मघटयोर्नित्यत्वमित्यादि प्रयोगसाधुत्वार्थं पर्य्याप्तिसम्बन्धेनैव द्वित्वादेर्बोधोऽङ्गीक्रियते तदा तस्य न सम्मूहालम्बनत्वम्।

सम्मूहिन् त्रि० सम्मूहोऽस्त्यस्य इनि सम्+ऊह–णिनि वा। समूहावयवे प्रत्येकवस्तुनि यथा घटपटसमूहान्तर्गता घटः पटश्च समूही। २सम्यक्तर्कयुते त्रि० स्त्रियां ङीप्

सम्मूह्य पु० सम्+ऊह–ण्यत्। १यज्ञियाग्नौ अमरः २सम्यक् तर्के त्रि० ३यज्ञाग्निसंस्कारभेदे त्रि०कौ०।

सम्मृद्ध त्रि० सम्यक् मृद्धः मृध–क्त। १अधिकसम्पत्तियुक्ते अमरः। २अतिवृद्धे च शब्दमा०।

सम्मृद्धि स्त्री सम्यक् मृद्धिः सम्+मृध–क्तिन् वा। १अतिसम्पत्तौ अमरः २सम्यग्वृद्धौ च "मधुसम्मृद्धिसमेधित या मेधया" माघः।

समेत त्रि० सम्+आ–इण क्त। १समागते २सङ्गते च।

समेधित त्रि० सम्+एध+णिच्–क्त। संवर्द्धिते "मधुसम्मृद्धि समेधितमेधयेति" माघः।

समोदक न० समम् अर्द्धभागेन तुल्यमुदकं यत्र। अर्द्धाम्बु संयोगेन सन्धितदधिज्ञाते १तक्रभेदे हेमच०। सह मोदकेन यद्वा यः। २मोदकसहिते त्रिकाण्डशेषः।

सम्मति स्त्री सम्+पद–क्तिन्। १अतिविभवे अमरः २अनुरूपात्मभावे यस्य यद्भूपता उचिता तस्य तथाभवने च त्रि०कौ० ३विभूतौ मेदि०।

सम्मद् स्त्री सम्+पद–सम्प० भावे क्विप्। १विभवे २सम्पत्तौ च अमरः। ३गुणोत्कर्षे। करणे क्विप्। ४हारभेदे पु० मेदि०। घञर्थे क। सम्पद् तत्रार्थे न० शब्दमा०।

सम्पन्न त्रि० सम्+पद–क्त। १साधिते २सम्पद्युक्ते च मेदि०

सम्पराय पु० सम्+परा+इण–आधारे अच्। १युद्धे २आयति ३उत्तरकाले च अमरः।

सम्परायिक न० सम्परायाय आपदे हितम् ठन्। १युद्धे तदर्थे ठण्। २साम्परायिकमयत्न अमरः। [मेदि०।

सम्पर्क पु० सम्+पृच–घञ्। १सम्बन्धे २रतौ ३मेलके च

सम्पर्किन् त्रि० सम्+पृच–घिनुण्। सम्बन्धयुक्ते।

सम्पा स्त्री सम्यक् पतन्ति पत–ड। विद्युति अमरः।

सम्पाक पु० सम्यक् पाको यस्मात् ५ब०। आरग्वधवृक्षे अमरः तद्भोजने हि भुक्तान्नादेः सम्यक्पाको भवतीति वैद्यके प्रसिद्धम्। २दृष्टे ३तर्कके मेदि० ४सम्पटे ५चतुरे च त्रि० धरणिः।

सम्पात पु० सम्+पत–घञ्। १पक्षिगतिभेदे जटा० २सम्यक्पतने च। ३रेखाक्षुद्वादेः सम्यतने च।

सम्पाति पु० सम्+पत–णिच्–इन्। जटायुषो ज्येष्ठभ्रातरि पक्षिभेदे रामा०। स्वार्थे क। तत्रैव। साम्पतिरिव कायति कै–क। सम्पातिक गरुड़ज्येष्ठतनये शब्दसा०।

सम्पुट पु० सम्+पुट–क। १कुड्मलकवृत्ते अमरः। सम्यक् पुटमिव उभयपार्श्ववर्त्ति यस्य। २एकजातीयपदार्थेन भिन्नजातीयस्य उभयतो व्याप्ते त्रि० "सकामैः सम्पुटोन्नाथः" इति तत्त्वम्।

सम्पुटक पु० सम्पुटयति सम्+पुट–अच् स्वार्थे वुन्। सम्पुटके सञ्चूषाख्ये (पेटारा) पदार्थविशेषे अमरः।

सम्पूर्ण त्रि०सम्+पूर–क्त। १परिपूर्णे २समग्रे च "आदित्यो० दयवेलायाः प्राङ्मूहूर्त्तद्वयान्विता। एकादशी हि सम्पूर्णेति स्मृत्युक्ते ३एकादशीभेदे स्त्री ति०त०। शुक्ले ४षष्टिदण्डात्मकतिथिमात्रे स्त्री तिथिशब्दे ३२८३ पृ०दृश्यम्।

सम्पृक्त त्रि० सम्+पृच–क्त। १मिश्रिते हेमच० २सम्बद्धे च

सम्पणयन न० सम्+प्र+णी–ल्युट्। १सम्यग्वक्ष्यितादेः शोधनाय संस्कारविशेषे २विधाने च। [अमरः।

सम्प्रति अव्य० सम्+प्रति+सप्तम्याद्यन्तः। इदानीमित्यर्थे

सम्प्रतिपत्ति स्त्री सम्+प्रतिपद्यते क्तिन्। १वाद्युक्तार्थवि-

प्रयोजकीकरणे "स्वत्वाभियोगं प्रत्यर्थी यदि तं प्रतिपद्यते। वा तु सम्प्रतिपत्तिः स्यादिति २स्मृत्युक्ते व्यवहारे उत्तरभेदे च "मिथ्या सम्प्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा। प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः" उत्तरशब्दे १०१६ पृ० दृश्यम्।

सम्प्रदाल त्रि०सम्+प्र+दा-क्त। दानकर्त्तरि स्त्रियां ङीप्

सम्प्रदान न० सम्+प्र+दा-भावे ल्युट्। १सम्यक्प्रदाने। सम्प्रदीयतेऽस्मै ल्युट्। "कर्मणा यमभिप्रैति स सम्प्रदानमिति"पाणिन्युक्ते २दानकर्मोद्देश्ये। तच्च त्रिविधम्। "अनिराकरणात्कर्तुस्त्यागाङ्कर्मणेप्सितम्। प्रेरणात्मतिदात्राच्च लभते सम्प्रदानताम्" इत्युक्तेः। तत्र विप्राय वस्त्रं ददातीत्यादौ अनिराकर्तृ सम्प्रदानम्, याचकाय धनं ददातीत्यादौ प्रेरयितृ सम्प्रदानम्, गुरवे धनं ददातीत्यादौ अनुमन्तृ सम्प्रदानम्। गौणमुख्यसाधारणे सम्प्रदाने चतुर्थी पा०। तल्लक्षणं तु शब्दश० प्र० दर्शितं यथा "गत्यादिभिन्ने धात्वर्थे चतुर्थ्या विषयस्यया। यः स्वार्थो बोधनीयस्तत्सम्प्रदानत्वमीरितम्"। "गत्यादिभिन्ने यद्धात्वर्थस्याश्रये यादृशार्थे विषयस्यचतुर्थ्या यः स्वार्थो बोधयितुं शक्यते स तद्धात्वर्थस्याप्यतादृशक्रियायां सम्प्रदानत्वमुच्यते। ब्राह्मणाय दानं धनस्येत्यादौ ददातेः स्वत्वजनकत्यागोऽर्थस्तच्चिष्टे च स्वत्वे ब्राह्मणादेः प्रतियोगित्वं निरूपितत्वं वा चतुर्थ्या बोध्यते इति तदेव तत्र सम्प्रदानत्वं ब्राह्मणप्रतियोगिकं ब्राह्मणनिरूपितं वा यद्यपि स्वत्वं तज्जनकत्यागस्य इत्येवं तत्र प्रत्ययात् धात्वर्थतावच्छेदकीभूतस्वत्वाश्रयत्वेन धनादेर्दानकर्मत्वात्। न चैवं पशुकामनया यागकरणदशायां चैत्रः स्वामित्वे पशुं ददातीत्यपि प्रयोगापत्तिस्तादृशयागस्य चैत्रीयं यत् पशुनिष्ठं स्वत्वं तज्जनकत्यागत्वादिति वाच्यं स्वत्वध्वंसजनकक्रियापर्यवसन्नस्य त्यागस्यैकदेशे स्वत्वध्वंसेऽपि द्वितीयार्थस्वान्वयेन पशुफलकयागे पशुनिष्ठस्य स्वत्वध्वंसस्य जनकत्वविरहादेव तदाक्यस्याप्रमाणत्वात्। ग्रामाय गत इत्यादौ विषयस्यचतुर्थ्या धात्वर्थे बोध्यमपि कर्मत्वं न गत्यादिभिन्ने चतुर्थ्या बोधनीयम्। संवर्द्धयितामित्यादि लुभर्थो न विषयस्येति न तत्र प्रसङ्गः। सम्प्रदानशब्दस्तु स्वाश्रयगोचरत्यागजन्यस्वत्वस्य प्रतियोगित्वे शक्त इति स्वत्वप्रतियोगित्वं सम्प्रदानत्वमित्यादिको न प्रयोगः। न च दानस्य स्वत्वहेतुत्वे प्रमाणाभावः। "यन्न वित्तानया धर्म्या दायो लाभः क्रयो जयः। विभागः सम्प्रयोगश्च सत्प्रतिग्रह एव च" इत्यादिमन्वादिवचनैस्तस्य स्वत्वहेतुत्वप्रतिपादनादिति वाच्यं ब्राह्मणाय त्यक्तायां गवि गौरियं ब्राह्मणस्य नतु ममेत्यादिसर्वजनीनप्रतीतेरेव तत्र प्रमाणत्वात् "प्रदानं स्वाम्यकारणमिति" वचनाच्च। अतएव विदेशस्थं पात्रमुद्दिश्य त्यक्तधने स्वीकारमन्तरेणैव पात्रस्य स्वरूपस्थले पिण्डदायत्वेन तद्धनं पुत्रादिभिर्विभज्य गृह्यते अन्यथा तैरिव उदासीनैरपि तद्धनस्वीकृत्यकुशादेरियोपादाने यज्ञेऽनियोगे च प्रत्यवायो न स्यात्। नन्वेवं दानादेव स्वत्वसिद्धेर्दानवस्तुनि स्वीकारो व्यर्थ इति चेन्न "लब्ध्वा चाष्टगुणं फलम्" इत्यादिस्मृतेः प्रतिगृहीतद्रव्यदानस्य फलविशेषं प्रतिहेतुत्वेन तादृशफलसम्पत्त्यर्थमेव प्रतिग्रहस्योपयोगात् "याजनाध्यापनप्रतिग्रहैर्द्विजो धनमर्जयेदित्यादि" स्मृत्या प्रागुक्तरीत्या च प्रतिग्रहस्यापि स्वत्वहेतुत्वबोधनाच्च स्वत्वजनकव्यापारस्यैवार्जनपदार्थत्वात्। दासाय भक्ष्यं ददाति भृतकाय वेतनं ददातीत्यादावपि स्वत्वजनकत्यागं प्रतिपादयन् ददातिर्मुख्य एव पुण्यजनकन्तु न तादृशं दानमवैधत्वात्। यत्तु स्वीकारजन्यस्य स्वत्वस्य जनकस्यागो दानं मनसा पात्रमुद्दिश्य धनत्यागस्तु न दानं किन्तूत्सर्गमात्रं प्रतिग्रहजन्यस्वत्वं प्रति हेतुभूतवैधत्यागस्यैव तथात्वात्, उदेत्या तु स्वत्वध्वंसमात्रजनकत्यागो न तु तत्र स्वत्वजनकत्वमस्त्येवेति कैश्चिदुक्तं तच्च युक्तं लाघवेन स्वत्वजनकत्यागस्यैव ददात्यर्थत्वात्। तिलानां प्रतियच्छति तुरगमेकं विक्रीणीते इत्यादौ द्रव्यान्तरग्रहणपूर्वकं दानमेव प्रतिदानं मूल्यग्रहणपूर्वकं दानमेव च विक्रय इति तत्रापि सूक्ष्ममेव सम्प्रदानत्वं चतुर्थ्या बोध्यते तिलादिकञ्च न मूल्यं पशुपुराणादेरेव शास्त्रे तथात्वोपदेशात्। अदृष्टार्थं दत्तस्यैव च स्वीकारः प्रतिग्रह इति परेण प्रीतिदत्तस्य विक्रीतस्य वा तिलतुरगादेः स्वीकारो न दोषावहः। मैत्राय रोचते मोदक इत्यत्र चतुर्थ्या धात्वर्थान्वितमाधेयत्वं धातुना च भक्ष्यत्वप्रकारकेच्छोपस्थाप्यते तिङा तु प्रकाशत इत्यादाविव विषयत्वलक्षणं कर्मत्वं तथाच मैत्रनिष्ठाया भक्ष्यत्वप्रकारकेच्छाया विषयतावान्मोदक इत्याकारकस्तत्र बोधः। गुरवे गां धारयते इत्यत्र धृञ् धारणेऽस्मिंस्तीव्रया तदन्वितं कर्मत्वं चतुर्थी च तन्निविष्टस्वत्वान्वितं सम्बन्धित्वमुपस्थाप्यते तेन गोकर्तृकाया गुरुसम्बन्धित्वं बोध्यते

श्लिष्टेरनुकूलव्यापारवानित्याकारकत्वं बोधः धृधात्वर्थ-श्चिचा व्यापारबोधनादिति कालापाः। पाणिनीयास्तु "धारेरुत्तमर्णः" इति सूत्रानुसारेण चैत्राय शतं धारयते इत्यादाविव गुरवे गां धारयते इत्यादावपि क्षणचतुष्टयं धारणं दानत्वञ्च चतुर्थ्यर्थः तथाच गुरुदत्तां गां क्षणत्वेन प्रतिगृह्णातीत्याकारकत्वं वाक्यार्थः प्रसाक्षोध्यत्वेनाङ्गीकृत्य प्रतिग्रहस्य दुरध्यसृणमित्याहुः। पुत्राय राध्यति पुत्रायेष्यते इत्यादौ दैवनिरूपणं धात्वर्थस्तच्चिष्टे च दैवे सु चतुर्थ्यस्य सम्बन्धस्यान्वयस्तेन पुत्रस्य दैवं निरूपयतीत्येवं तत्र बोधः। गुरवे गां प्रतिगृह्णातीत्यादौ गृह्णातेरर्थस्तत्र गोर्विशेष्यत्वेन तदेकदेशे च दाने गुरोरुद्देश्यत्वेनान्वयस्तेन गुरूद्देश्यकदान-कर्मत्वेन गामभ्युपगच्छतीत्येवं तत्र बोधः। क्षोत्रे प्रतिगृह्णातीत्यादौ कर्मानुकूलव्यापारलक्षणं प्रोक्षणं गृह्णातेरर्थस्तदेकदेशे च कर्म क्षोत्रादेरन्वयस्तेन क्षोत्र-निष्ठकर्मानुकूलव्यापारवानित्याकारकत्वं बोधः। चैत्राय क्रुध्यतीत्यादौ धात्वर्थ उत्कटद्वेषस्तत्र विषयित्व-सम्बन्धेन सम्प्रदानत्वं चतुर्थ्या बोध्यते तेन च चैत्रविषय-कोत्कटद्वेषवानित्याकारकत्वं बोधः। पुत्रे कोपो न युज्यते इत्यादौ क्रुधस्य कोपपदस्यैवार्थे पुत्र इत्यस्या-न्वयो न तु धात्वर्थे। पटाय घटते इत्यादावपि धात्वर्थ-कृतो वृषा पटस्य विषयित्वं बोध्यते ततोद्देश्यत्वमेव चतुर्थ्यर्थः कथमन्यथा पटेच्छया तन्तुनिर्माणदशायां पटाय यतते इत्यादिकः प्रयोगः इत्यपि वदन्ति। मित्राय द्रुह्यतीत्यत्र द्विषाचरणं द्रोहस्तेन मित्रस्य द्विष्माचर-णीत्यर्थः। शिष्यायेर्ष्यतीत्यत्रानिष्टानुपेक्षणमीर्ष्या तथाच शिष्यानिष्टं नोपेक्षत इत्यर्थः। पुत्रायासूयतीत्यत्र अ-सूया गुणद्वेषस्तेन पुत्रस्य गुणं द्वेष्टीत्याकारकत्वं बोधः। मित्रं द्रुह्यति शिष्यमीर्ष्यति पुत्रमसूयतीत्यपि प्रयोगात् द्रुहादिकर्मणः सम्प्रदानत्वं वैकल्पिकमित्युच्यते। कोप-पूर्वकस्य द्रोहादेर्द्रुहादिधात्वाच्यत्वे तत्कर्मणः सम्प्र-दानत्वं द्रोहादिभाव्य तथात्वे तु कर्मत्वमेवेति पुनः कोमारा:। सोपसर्गयोस्तु क्रुधद्रुहोः कर्मणः कर्म-त्वमेव न तु सम्प्रदानता अतएव शिष्यस्याभिक्रोद्धा शिष्य-स्याभिद्रोहेत्यादौ क्रुद्योगे कर्मणि षष्ठ्येव प्रमाणम्"।

सम्प्रदाय पु० सम्+प्र+दा-भावे घञ्। १गुरुपरम्परागते सदुपदेशे अमरः। उपचारात् २तदुपदेशयुते जने च। ईश्वरस्यैव सर्वसम्प्रदायप्रद्योतकत्वमिति "निर्माणकाय-मधिष्ठाय सर्वसम्प्रदायप्रद्योतक इति पातञ्जलाः" कुसु०। ईश्वरवादे च मणिकृताऽयञ्च तथैव व्यवस्थापितं यथा "नन्वशरीरात् कथं वेदघटादिशब्दव्यवहारसम्प्रदायः उच्यते सृगादावदृष्टोपगृहीतभूतभेदान्नीलघटोरोत्पत्ता-वदृष्टवदात्मसंयोगादृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा स-कलवेदार्थगोचरज्ञानादुद्विबद्धासङ्कुचितान्नीलकलेवरकण्ठता-ल्वादिक्रियाजन्यसंयोगाद्वेदोत्पत्तिः। एवं कुलालादि-शरीरावच्छेदेनादृष्टसहकृतप्रयत्नवदीश्वरसंयोगात्तदुद्बो-धकासहितचेष्टोत्पन्नो सकलघटानुकूलव्यापारो घटोत्-पत्तिः। एवं प्रयोज्यप्रयोजकज्ञानाय व्यापाराभिमत-शरीरावच्छेदेनापि अदृष्टसहकृतेश्वरज्ञानेच्छाप्रयत्नादेव व्यवहारः, ततस्तत्सुधीको वाचो व्युत्पद्यते सोऽयं भूतावेशन्यायः। यत्तु यथा क्षित्यादिना बौद्धिस्वाकोऽनुमाय पक्ष्यते तथा सर्गान्तरोत्पन्नतत्त्वज्ञानवता भोगार्थं सर्गादावुत्पन्नेन मन्वादिना सर्वज्ञेन, ईश्वराभिप्रायस्यवेदः साक्षात्कृत्यानूद्यते ततोऽग्निसम्प्रदायः स एव कार्यब्रूहं कृत्वा वाग्व्यवहारं करोतीति मतं तच्च प्रतिसर्गाद्यनन्त-सर्वज्ञकल्पनायां गौरवात् तेषामेव क्षित्यादिकर्तृत्वसम्भ-वेन ईश्वरानुगमाच्च। एतेन सर्गादौ सर्गान्तरसिद्ध-योगिन एव क्षितिकर्त्तारः सन्त्विति निरस्तं सर्गादाव-नन्तसर्वज्ञसिद्धिश्च किं प्रमाणान्तरात् क्षित्यादिकर्तृत्वाहु-काद्वा नाद्यस्तदभावात् नान्त्यः अनादिद्व्यणुकादिकार्य-प्रवाहस्य सकर्तृकत्वानुमानात् लाघवसहकृतादेकस्यैव सर्वज्ञस्य सिद्धेः"।

सम्प्रदायप्रवर्त्तकभेदाश्च पद्मपु० उक्ता यथा "श्रीलक्ष्मीनारायणो ब्रह्मा नारदो व्यास एव च। श्रीमध्वः पद्मनाभो हरिर्माधवस्तथा। अक्षोभ्यो जयतीर्थश्च ज्ञानसिन्धुर्दयानिधिः। विद्यानिधिश्च राजेन्द्रो जय-धर्ममुनिस्तथा। पुरुषोत्तमो ब्रह्मण्यो व्यासतीर्थमुनि-स्तथा। श्रीमल्लक्ष्मीपतिः श्रीमान् माधवेन्द्रपुरी तथा। सम्प्रदायविहीना ये मन्त्रास्ते निष्फला मताः। अतः कलौ भविष्यन्ति चत्वारः सम्प्रदायिनः। श्रीब्रह्मरुद्र सनका वैष्णवाः क्षितिपावनाः" पद्मपु०। तन्त्रोक्ता वैष्णवसम्प्रदाया यथा "श्रीश्च ब्रह्मा वैखानसः सात्व-तेदो श्रीराधावल्लभो तथा। गोकुलेशो महेशानि! तथा हरिवंशो भवेत्। पञ्चरात्रः पञ्चसः स्यात् षष्ठः श्रीवीरवैष्णवः। रामानन्दी हरिप्रायो निम्बार्कश्च महेश्वरि!। ततो भागवतो देवि! दश भेदाः प्रकी-

र्तिताः। शिखी सुण्डी जटी चैव द्विदण्डी क्रमेण च। एकदण्डी महेशानि ! वीरशैवस्तथैव च। सप्त पाशुपताः प्रोक्ता दशधा वैष्णवा मताः। एतेषां वासनं देवि ! शृणु यत्नेन शाम्भवि !। वेवेष्टि सर्वं संव्याप्य यस्तिष्ठति च वैष्णवः। वैखानसादिदक्षाद्यैर्भूषितः स्मार्त्तवैष्णवः। श्रीराधावल्लभं देवि ! शृणु यत्नेन शाम्भवि !। वैष्णवाचारनिरतो विष्णुतन्त्रैकपारगः। अनन्यचेताः शान्तात्मा विष्णुचिन्तापरायणः। श्रीराधावल्लभो देवि ! गोकुलेशं शृणु प्रिये !। नानाभूषणसम्पन्नो नानाशुभ्रविभूषितः। गवां कुलं प्रीणयिता कैशिलक्षणलक्षितः। शरीरमर्थं प्राणांश्च संनिवेदनेच्छ यः। अन्तःभक्तिपरो देवि ! बाह्यवैष्णवरूपधृक्। गन्धर्वाचारनिरतो जनावेष्टनतत्परः। सम्प्रदायो गोकुलेशः सर्वसिद्धिकरो भुवि। वृन्दावनाख्यं देवेशि ! शृणु यत्नेन साम्प्रतम्। विरक्ताधः प्रसन्नात्मा विष्णुभक्तिपरायणः। कामिनीसङ्गचपलो वनक्रीड़ाविनोदधृक्। सौगन्धभूषिततनुः स्त्रीध्यानैकपरायणः। विष्णुसारूप्यतत्त्वज्ञः प्रोक्तो वृन्दावनी शिवे !। पाञ्चरात्रो महेशानि तथैव वीरवैष्णवः। पूर्वमेव महेशानि कीर्त्तितः परमेश्वरि !। रा शक्तिरिति विख्याता मः शिवः परिकीर्त्तितः। तदानन्दो शान्तचित्तो प्रसन्नात्मा विचारधृक्। सर्वत्र समरूपा च रामानन्दो प्रकीर्त्तिता। हविष्याशी महेशानि ! यथाशक्त्याचरेत्। पापसंहरणासक्तो विष्णुभक्तो जितेन्द्रियः। यमादिनियमैर्युक्तो भक्ताचारपरायणः। स्वोपयोगफलग्राही परकार्य्यपरायणः। हविष्याशी महेशानि ! शिवभक्तिसरूपधृक्। निम्बार्कांख्यं सम्प्रदायं शृणु यत्नेन साम्प्रतम्। नित्यार्चनक्रमासक्तः स्वतन्त्रैकपरायणः। बाह्यपूजादिनिरतो नान्यभक्तः प्रसन्नधीः। आर्य्यपत्न्वान्वितः स्वच्छः सच्छन्दाचारतत्परः। स्वतन्त्रः स्मार्त्तविद्वेषी निम्बार्को भगवान् हरिः। अथ भागवतं देवि ! कथ्यते शृणु साम्प्रतम्। विष्णुभक्तैकनिपुणो विजितात्मा प्रसन्नधीः। स्मार्त्तगर्वान्वितो देवि ! तदन्याचारतत्परः। आर्य्यपत्न्वान्वितो देवि ! तथा सरूपवेषधृक्। शैवद्वेषी तस्य सङ्गात् पुनः स्नानपरायणः। केवलविष्णुतत्त्वज्ञः प्रोक्तो भागवतः शिवे" शक्तिसङ्गतं०

सम्प्रधारणा स्त्री सम्+प्र+धृ–णिच्–युच्। युक्तायुक्तत्वविवेचनार्थसमर्थने अमरः।

सम्प्रयोग पु० सम्+प्र+युज–घञ्। १इच्छादिलाभेच्छया धनादिविनियोगे "विभागः सम्प्रयोगश्चेति स्मृतिः। २रमणे ३निधुवने ४अन्वये ५अर्थिते त्रि० अमरः ६सन्दिग्धे ७कार्मणे वशीकरणादौ मेदि० ८इन्द्रियविषयसम्बन्धे च

सम्प्रयोगिन् त्रि० सम्+प्र+युज–णिनुण्। १कामुके २कलाकौलिकारके ३सम्यगलाभार्थे धनादिविनियोजके। ४संप्रयोजके त्रि० मेदि०। [दृश्यम्।

सम्प्रसन्न त्रि०। १सम्यक्प्रसन्ने २सुषुप्ते च सम्प्रसादशब्दे

सम्प्रसाद पु०सम्+प्र+षद–करणे–घञ्। १योगादिशास्त्रोक्ते चित्तस्य नैर्मल्यसम्पादके प्रयत्नभेदे। भावे घञ्। २सम्यक्प्रसन्नतायाम्। आधारे घञ्। ३सुषुप्तौ "तदुपलैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं विजानातीति" श्रुतिः। सम्प्रसादशब्दे च सुषुप्तशब्दे दृश्यम्।

सम्प्रसाधन न० सम्+प्र+साध–णिच्करणे ल्युट्। १कटकादौ भूषणे। भावे ल्युट्। २भूषणक्रियायाम्।

सम्प्रसारण न० सम्+प्र+सृ–णिच्–ल्युट्। १सम्यग्विस्तारणे व्याकरणोक्ते यणः स्थाने जायमाने २इक्संज्ञकवर्णे च। "इक् यणः सम्प्रसारणम्" पा०।

सम्प्रहार पु० सम्प्रहियतेऽत्र सम्+प्र+हृ–आधारे घञ्। १युद्धे अमरः। भावे घञ्। २सम्यक्प्रहरणे ३गमने च मेदि०।

सम्प्राप्ति स्त्री सम्+प्र+आप–क्तिन्। १सम्यक्प्राप्तौ २वैद्यकोक्ते रोगोत्पत्तिभेदे च तल्लक्षणं भावप्र० उक्तं यथा "अथ संप्राप्तेर्लक्षणमाह "यथा दुष्टेन दोषेण यथा चानुविसर्पता। उत्पत्तिर्व्याधयश्चापि सम्प्राप्तिस्त्रिविधागतिः"। यथा दुष्टेन दोषेण यथा कारणभेदेन दोषेण यथा चानुविसर्पता अनेकधा दोषाणां विसर्पता मूर्च्छाधिष्ठित्यादिगतिभेदेन तथा च विसर्पता। व्याधयश्च या उत्पत्तिः असौ सम्प्राप्तिः। प्राक्षव्यवहाराय सम्प्राप्तेः पर्य्यायवाच्च जातिरागतिरिति। संप्राप्तिरोपाधिकभेदाच्च "सङ्ख्याविकल्पप्राधान्यबलकालविशेषतः। सा भिद्यते यथात्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति"। सङ्ख्यादिकालविशेषान्तेभ्यः सा संप्राप्तिर्भिद्यते भेदवती क्रियत इत्यर्थः। तत्र सङ्ख्यां विदधाति। यथा ज्वरोऽष्टधा यतोसारः षड्विध इत्यादि विकल्पं विदधाति। 'दोषाणां समवेतानां विकल्पोऽशांश कल्पना" समवेतानां समुदितानां दोषाणाम् अंशांशकल्पनाहीन मध्याधिकभेदेनांशकल्पना विकल्पः। प्राधान्यं विदधाति। "व्याधितन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्"। व्याधेः

स्वातन्त्र्येण प्राधान्यं पारतन्त्र्येणाप्राधान्यञ्च वदेदित्यर्थः। यथा स्वतन्त्रस्य ज्वरस्य प्राधान्यं ज्वराधीनानां श्वासादीनामप्राधान्यम्। बलं विवृणोति "हेत्वादिकार्त्स्न्याद्यपेक्षयैवंबलावलविशेषणम्"। अत्रापि व्याधेरित्यनुवर्त्तते हेत्वादीनां हेतुपूर्वरूपरूपाणाम्। कार्त्स्न्येन साकल्येन अवयवैः एकदेशेन व्याधेर्बलावलयोर्विशेषणम्। विशेषणं बोधः। कालं विवृणोति। "नक्तं टिनर्तुभुक्तांशैर्व्याधिकालो यथामलम्" नक्तमत्रावश्यं रात्रिवाचकम्। अनेनैतदुक्तं यस्मिन्नक्तादिरंशो यस्य दोषस्य प्रकोप उक्तोऽस्ति सोऽंशस्तस्य दोषजस्य व्याधेः काल इत्यर्थः। नक्तादेरंशेषु वातादिप्रकोप उक्तो वाग्भटेन "ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः। वयोऽहोरात्रि भुक्तानामन्तमध्यादिगाः क्रमादिति" ते वातपित्तकफाः। कतुषु वातादिको यथा। "घर्मांशु शिशिरे वायुः, पित्तं शरदि पीयूषे। वसन्ते तु कफः कुप्येदेषा प्रकृतिरार्त्तवी। संप्राप्तिर्व्याधीनां ज्ञानाय हेतुः, यथा मिथ्याहारविहारकुपितवातादयामाशयगमनरसदूषणकोष्ठाग्निबर्हिर्निरसनरूपं ज्वरोत्पत्तिप्रकारं बोधयति। तथा व्याधीनां सङ्घातादोषांशकल्पना प्राधान्यबलकालांश्च बोधयति।

स(म्ये)म्प्रैष पु० सम्+प्र+इष-घञ् वा ह्रस्वः। १नियोगे २विधौ हेमच०। विधिशब्दे ४६०७ पृ० दृश्यम्।

सम्प्रोक्षण न० सम्+प्र+उक्ष-ल्युट्। जलादिसेचनेन संस्कारभेदे अभ्युक्षणशब्दे ११२पृ० दृश्यम्। [स्कारे पदार्थे।

सम्प्रोक्षित त्रि० सम्+प्र+उक्ष-क्त। जलादिसेचनेन कृतसंस्कारे अभ्युक्षणशब्दे ११२पृ० दृश्यम्। [स्कारे पदार्थे।

सम्फाल पु० सम्+फल-ज्वला० ण। मेघे हेमच०।

सम्फुल्ल त्रि० सम्+फुल्ल-अच्। विकसिते। सम्+फल-क्त अत उत्त्वम्। रुम्फुलत इति उकारमध्योऽपि तत्रैव।

सम्ब सर्वणे भ्वा०प०स०सेट्। सम्बति असम्बीत् बोधदेशः साधुः

सम्ब सम्बन्धे चु०उभ०सक०सेट्। सम्बयति ते अममम्बन्त।

सम्ब न०सम्ब-अच्। १कृष्णलेबस्य प्रतिलोमकर्षणे २जले जटा०

सम्बद्ध त्रि० सम्+बन्ध-क्त। १सम्बन्धिनि। भावे क्त। २सम्यग्बन्धने न०।

सम्बन्ध पु० सम्+बन्ध-घञ्। १संयोगादौ २संसर्गे ३सम्बद्धौ अजयः। ४सम्यग्बन्धने पुंस्त्रीणां संसर्गभेदे च। स च सम्बन्धस्त्रिविधः "सम्बन्धस्त्रिविधः पुंसां विप्रेन्द्र! जगतीतले। विद्याजोयोनिजश्चैव प्रीतिजश्च प्रकीर्त्तितः। मैत्रन्तु प्रीतिजं प्रोक्तं न सम्बन्धः सुदुर्लभः" ब्रह्मवै० ब्रह्मख० १०अ०। संसर्गश्च नानाविधः "गेहे षष्ठी पा० महाभाष्ये दर्शितस्तत्रावगन्तव्यः। न्यायमते संयोगसमवायादिरूपः। सम्यग्बन्धो यतः। हृद्धिते त्रि०ऋक्षटः।

सम्बर न० सम्ब-अरन्। १जले अमरः ऋयं तालव्यादि अजयः। २बौद्धव्रतभेदे मेदि०। ३संयमे त्रि० ४सेतौ हेमच० ५दैत्यभेदे हरिवंशभेदे ७जीनभेदे पुंस्त्री० स्त्रियां ङीष्। ८पर्वतभेदे च पु० शब्दर०। ९जैनभेदे १०जिनमतप्रसिद्धपदार्थभेदे। स च आस्रवनिरोधरूपः गुप्तिसमित्यादिः अर्हत्शब्दे ३८४पृ० तद्धेदेशः ३८५पृ० च तद्धक्षणं द्रष्टव्यम्। संवर इत्येव अत्रस्थसमध्यः पाठः तत्रार्थे।

सम्बरारि पु० सम्बरस्य दैत्यविशेषस्य अरिः। कामदेवे अमरः

सम्बरी स्त्री सम्ब-अरन् ङीष्। १मूषिकपर्ण्यां अमरः। २शतावर्य्यां च तालव्यादिरयमिति भरतः।

सम्बल न० सम्ब-कलच् सम्यक्बलं यतो वा। १जले शब्दर० २पाथेये पु० न० अमरः तालव्यादि तत्रार्थे भरतः।

स(श)म्बाकृत त्रि०स(श)म्बेन प्रतिलोमेन कृष्टं क्षेत्रं स(श)म्ब+डाच्-कृ-क्त। १अनुलोमकर्षानन्तरं प्रतिलोमकृष्टे द्विःकृष्टे क्षेत्रादौ अमरः। भावे क्त। २प्रतिलोमकर्षणे न०

सम्बाध न० सम्यक् बाधा यत्र। १नरकवर्त्मभेदे शब्दमा०। सम+बाध-भावे घञ्। २अन्योन्यसंघर्षे पु० ३सङ्कटे ४भगे मेदि०।

सम्बाधन पु० सम्+बाध-ल्यु करणे ल्युट् वा। १द्वारपाले २यूनायें ३मर्दनद्वारे भगे च मेदि०। भावे ल्युट्। ४सम्यग्पीडने। [त्रि०।

सम्बुद्ध पु० प्रा०स०। १बुद्धायतारे त्रिका०। २सम्यग्बोधाश्रये

सम्बुद्धि स्त्री सम्+बुध-क्तिन् सम्यग्बुद्धिर्यत्र वा। १सम्यग्बोधे २सम्बोधनशब्दार्थे च। [अजयः ४सम्यक्ज्ञाने च

सम्बोध पु० सम्+बुध-घञ्। १क्षेपे २बोधने मेदि०। ३नाशे

सम्बोधन न०सम्+बुध-ल्युट्। १सम्यक्ज्ञाने। बुध-णिच-युच्। तत्रार्थे स्त्री भरतः। ल्युट्। २सम्यग्ज्ञापने "स्वितस्त्राभिमुखीभावमात्रे सम्बोधनं विदुः। प्राग्राभिमुख्यः पुरुषः क्रियासु विनियुज्यते" इति व्याकरणोक्ते अन्तरासक्तस्याभिमुखीकरणाय स्वीयक्रियासु विनियोगाय ज्ञापनादिरूपे ३व्यापारभेदे क०

"सम्बोधनपदं यत्र तत् क्रियाया विशेषणम्। अजादि देवदत्तेत्यादौ निघातोऽत्र तथा सति" हरिः। मयाकं वाक्ये एव निघातस्य (अनुदात्तस्य) विधानात्। अजादि देवदत्त इत्यादौ तस्य निघातः। "सम्बोधनान्तं कर्त्तुर्यः कारकं प्रथमो यतिः। धातुसम्बन्धाधिकारविहितस्य-

सक्तनञ्। तथा तस्य च भावेन षष्ठी चेत्युदितं द्वयम्। सम्बन्धशब्दस्यास्य क्रियायैवाधार्यताम्" इत्युक्तेस्तस्य क्रियायामेवान्वयः। सम्बोधनार्थं च द्वयमा।

सम्भली स्त्री सम्यक् भजते सम्+भज-अच् गौरा० ङीष्। कुट्टिन्याम् परपुरुषेण सह अन्यस्त्रिया योजयित्र्याम् अमरः। तालव्यादि तत्वार्थं भरतः।

सम्भव पु० सम्+भू-अप्। १सत्तायां २आधेयस्याधारे समावेशनयोग्यत्वरूपे व्यापारे ३उत्कटकोटिकसन्देहे गदा०। ४सङ्गते। अपादाने अप्। ५हेतौ। कर्त्तरि अच्। ६मेलके त्रि० मेदि०। ७अपाये च अजयः। पौराणिकमतसिद्धे द्वयुद्भिदे ८ततप्रमाणे च तदेतन्मतम् तत्त्वकौमुद्यां प्रदर्श्य "सम्भवस्तु यथा खार्यां द्रोणाढकप्रस्थाद्यवगमः सचानुमानमेव खारीत्वं हि द्रोणाद्यविनाभूतं प्रतीतं खार्यां द्रोणादिसत्त्वमवगमयतीति" अनुमानान्तर्गतया प्रमाणान्तरत्वं दूषितम्। खारीत्वं खारीपरिमाणं महापरिमाणे खार्यान्तरपरिमाणसमावेशानुभवसिद्धः तथा च खारीपरिमाणं द्रोणादिपरिमाणव्याप्यकमिति व्याप्यस्मृतेरावश्यकत्वादनुमानेनैव गतार्थेतत्यर्थः। "न चतदृनैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात्" गौ०सू० भाष्ये "सम्भवोनाम अविनाभाविनोऽर्थस्य सत्त्वग्रहणम्। यथा द्रोणस्य सत्त्वग्रहणात् आढकस्य सत्त्वग्रहणम् एवम् आढकस्य सत्त्वग्रहणात् प्रस्थादिसत्त्वग्रहणम्" उक्तम्। तदुक्तौ च "अविनाभावरूपत्वा च सम्बद्धयोः सदुदायसदुदायिनोः सदुदायेन इतरस्य ग्रहणं सम्भवः सज्ञानुसानमेव" इत्युक्तम्।

सम्भव्य पु० सम्+भू-कर्त्तरि यत्। १कपित्थे शब्दच० २सम्भवयोग्ये त्रि०। [३सम्भूते ४सामर्थ्यां च मेदि०।

सम्भार पु०सम्+भृ-घञ्। १परिपूर्णतायां त्रिका० २सम्भृतौ

सम्भावन न०सम्+भू-णिच्-ल्युट्। १अर्थालङ्कारभेदे अलङ्कारशब्दे ४०७ पृ० दृश्यम्। २व्याकरणोक्ते क्रियासु योग्यताध्यवसाये ३सिद्धार्थभेदे ४उत्कटकोटिकसंशयरूपे ५ज्ञानभेदे च गदाधरः। युच्। सम्भावनापि उक्तार्थे स्त्री

सम्भावित त्रि० सम्+भू-णिच्-क्त। सम्भवयुक्ते पदार्थे।

सम्भाषण न० सम्+भाष-ल्युट्। १सम्यक्कथने २परस्परकथने च।

सम्भिन्न त्रि० सम्+भिद-क्त। १विदलिते २भेदान्विते ३सम्यग्विकसिते च "करैरिवोत्पलस्फुरित इव क्षणिलसुकुलः" इति वर्णविन्यासः।

सम्भूति स्त्री सम्+भू-क्तिन्। १विभवे २ईश्वरैश्वर्यभेदे च "सम्भूतिं च उपासते" इति श्रुतिः।

सम्भूयसमुत्थान न० सम्भूय मिलित्वा समुत्तिष्ठत्यनेन सम्+उद्+स्था-करणे ल्युट्। १मिलित्वा वणिजां वाणिज्यादिकर्मकरणे २तद्विषयके विवादभेदे च तत्स्वरूपादिकं वीरमि० उक्तं यथा

"अथ सम्भूयसमुत्थानाख्यव्यवहारपदम्। तस्य स्वरूपमाह नारदः "वणिक्प्रभृतयो यत्र कर्म सम्भूय कुर्वते। तत् सम्भूयसमुत्थानं व्यवहारपदं स्मृतम्" इति। वणिक्प्रभृतय इत्यनेन ऋत्विक्कुटुम्बिकर्षकादीनां ग्रहणम्। यद्यपि फलभूतस्य स्वर्गस्य ऋत्विग्गामित्वाभावादात्मनेपदस्यानुपपन्नत्वेन प्रकृतिशब्देन ऋत्विग्ग्रहणमनुचितम्। तथापि आत्मनेपदाऽविवक्षायेदमुक्तम् च ऋत्विङ्मात्रे आत्मनेपदाविवक्षणे अन्यांशे च विवक्षणे वैरूप्यप्रसङ्ग इति वाच्यम्। सम्भूयकर्त्तृत्वमात्रस्य लक्षणत्वेनान्यत्र वास्तवतत्सत्त्वेऽपि लक्षणवैयर्थ्यप्रसङ्गात्। न च चिन्तामणिकृता कर्त्राभिप्राय इत्यस्य कर्त्राभिप्रायविषये कर्त्रिच्छाविषये क्रियाफल इति व्याख्यातत्वादत्रिजामपि सफलं यजमानस्य कर्म भवत्विति वेतनोपरागेणेच्छा सम्भवत्येवेत्यात्मनेपदविवक्षायामपि का क्षतिरिति वाच्यम्। कर्त्राभिप्राये कर्तृगामिनीत्यस्यैव व्याख्यानस्य महाभाष्यादावनेकग्रन्थसम्मतत्वेनान्यादृशव्याख्यानस्य महाभाष्यादिविरुद्धत्वात्। अत्र वणिज्यादिकरणे अधिकारिणो दर्शयति हरिस्मृतिः "कुलीनदक्षानलसैः प्राज्ञैर्न्यायकवेदिभिः। व्यायव्ययज्ञैः शुचिभिः शूरैः कुर्यात् सह क्रियाम्" इति। क्रियां कृतकर्मणिशिल्पसेवावाणिज्यरूपाम्। नायकविज्ञानं वाणिज्यक्रियायामुपयुज्यते। व्ययव्ययज्ञानमात्मं कृषिक्रियायाम्। शिल्पिक्रियायां सङ्गीतक्रियायां च प्राज्ञत्वम्। क्रतौ कुलीनत्वप्राज्ञत्वशुचित्वानि। स्तेये तु शूरत्वमात्रमुपयुज्यते। दक्षत्वानलसत्वे सर्वत्रोपयुज्येते। अतएवादक्षादीन्निषेधयति स एव "व्यसनालसरोगार्त्तमन्दभाग्या निराश्रयाः। वाणिज्याद्याः सहैतैस्तु न कर्त्तव्या बुधैः क्रियाः" इति। निराश्रयाः मूलधनरहिताः। ये तु सम्भूय वाणिज्यादिक्रियां कुर्वन्ति ते द्रव्यानुरोधेन लाभादिभाजो भवन्तीत्याह नारदः "समोऽतिरिक्तो हीनो वा तदंशो यस्य यादृशः। व्ययव्ययौ तथा दृष्टिस्तस्य तस्य तथाविधा" इति। हरिस्मृतिरपि

"प्रयोगं कुर्वते ये तु हेमधान्यरसादिना। समन्यूनाधिकैरंशैर्लाभस्तेषां तथाविधः। समो न्यूनोऽधिको वांशो येन चिह्नस्तथैव सः। व्ययं दद्यात् कर्मकुर्व्यांशकं गृह्णीत चैव हि" इति। यत्र पुनरस्य द्वौ भागौ अस्यैक इति संविद् कृता तत्र तदनुरोधेन व्ययलाभौ प्रकल्पयेदित्याह याज्ञवल्क्यः "समवायेन वणिजां लाभार्थं कर्म कुर्वताम्। लाभालाभौ यथादृष्टं यथा वा संविदा कृतौ" इति। सम्भूयकारिणां कर्त्तव्यमाह व्यासः "समक्षमसमक्षं वाऽवञ्चयन्तः परस्परम्। नानाप्रयोगानुसारास्ते प्रकुर्युः क्रयविक्रयौ। अयोपयन्तो भाण्डानि दद्युः शुल्कञ्च तेऽध्वनि। अन्यथा द्विगुणं दाप्याः शुल्कस्थानदुरुक्तिःस्थिताः" इति। नारदोऽपि "भाण्डपिण्डव्ययोद्धारसाराऽसारत्वबोधनम्। कुर्युस्तेऽन्यभिचारेण समये स्वे व्यवस्थिताः" इति। अथ वा अंशानुसारेण सर्वेषां कार्य्यमेक एव कुर्यात्। अतएव वृद्धस्मृतिः "बहूनां समतो यस्तु दद्यादेको धनन्नरः। करणं कारयेद्वापि सर्वेषैव कृतं भवेत्" इति। करणं लेख्यादिकम्। सम्भूयकारिणामन्योन्यविवादे निर्णयप्रकारमाह स एव "परोक्षकाः साक्षिणश्च त एवोक्ताः परस्परम्। सन्दिग्धेऽर्थे वञ्चनाया न चेद् विद्वेषसंयुतः" इति। यदा तु विद्वेषसंयुक्तास्तदाह स एव "यः कश्चिद्वञ्चकस्तेषां विज्ञातः क्रयविक्रये। शपथैः शोधितोऽपि शोध्यः स्यात् सर्वदादेश्यं विधिः" इति। सर्वदादेऽपि वञ्चनारहितवादेऽपि। वञ्चकत्वे सिद्धे सति किं कार्य्यमित्यपेक्षिते आह याज्ञवल्क्यः "जिह्मं त्यजेयुर्निर्लाभम्" इति। जिह्मं वञ्चकत्वं निर्लाभं कृत्वा त्यजेयुर्वेहिः कुर्युरितरे सम्भूयकारिण इत्यर्थः। सम्भूयकारित्वसमर्थं प्रत्याह स एव "अशक्तोऽन्येन कारयेत्" इति। स्वांशानुरूपं कर्मेति शेषः। दैवराजकृतद्रव्यहानिविषये सर्वान् प्रत्याह बृहस्पतिः "द्रव्यहानिर्यदा तत्र दैवराजकृता भवेत्। सर्वेषामेव सा प्रोक्ता कल्पनीया यथांशतः" इति। सम्भूयकारिभिः सर्वैरिति शेषः। क्षयहानिरिति पाठे क्षयायैव हानिः क्षयहानिरित्यपव्यर्थत्वमनिरिक्ता हानिरित्यर्थः। प्रातिस्विकदोषेण द्रव्यनाशे स एवाह "अनिर्दिष्टो व्यर्थमाणः प्रमादाद्यस्तु नाशयेत्। तेनैव तद्भवेद्देयं सर्वेषां समवायिनाम्" इति। अनिर्दिष्टः समवायेनज्ञातः। याज्ञवल्क्योऽपि "प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितम्। स तद् दद्यात्" इति। पालने त्वाह स एव "विप्रकीर्णं रक्षितादृशमांशभाक्" इति। बृहस्पतिरपि "दैवराजभयाद् यस्तु स्वशक्त्या परिपालयेत्। तस्यांशं दशमं दत्त्वा गृह्णीयुस्तेऽवशेषतः परम्" इति। तस्यतस्य दशमंशन्ते समवायिदृश्यमिति शेषः। प्रतिपालयेत् समाहरेत् स्वशक्त्या प्रत्याहरेदित्यर्थः। नारदोऽपि "दैवतस्करराजाग्निव्यसने समुपस्थिते। यत्नात् स्वशक्त्या रक्षेत तस्यांशो दशमः स्मृतः" इति। यस्तु समवायिदृश्यं समवायिभिः सह प्रतियाचनादिना न साधयति तस्य लाभहानिरित्याह बृहस्पतिः "समवेतैस्तु यद्दत्तं प्रार्थनीयं तथैव तत्। न याचते च यः कश्चिल्लाभात् स परिहीयते" इति। "याचनमकरणं येन यत्कर्म स्वांशानुरूपं कर्त्तव्यं तस्याप्युपलक्षणार्थं तेन तत्कर्माकरणेऽपि लाभहानिरित्यस्यादेव वचनात् प्रतिपत्तव्यमिति" स्मृतिचन्द्रिकायाम्। सम्भूयकारिणामृत्विजां कर्त्तव्यमाह मनुः "ऋत्विजः समवेतास्तु यत्र सत्रे निमन्त्रिताः। कुर्युर्यथार्हं तत्कर्म गृह्णीयुर्दक्षिणां तथा" इति। अत्र संभूयशब्दो यत्नमात्रविवक्षया प्रयुक्तो न पुनर्बहुयजमानकर्तृकयज्ञविशेषविवक्षया। तत्र यजमानानामेवाध्वर्यवादिकर्मकारित्वे दक्षिणाऽसंभवात्। तथा कर्मानुसारेण दक्षिणां गृह्णीयुरित्यर्थः। तथा च स एव "सम्भूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः। अनेन कर्मयोगेन कर्त्तव्यांशप्रकल्पना" इति। स्वानि कर्माणि याजमानव्यतिरिक्तानीति शेषः। इयं चांशकल्पना द्वादशशतं गावो दक्षिणेत्येवं क्रतुसम्बन्धिन्येव विधीयमानायां दक्षिणायामेव न ऋत्विग्विशेषोक्ते खलेन विहितायास्तद्विधायकश्रुतिविरोधापत्तेः अतएवाह बृहस्पतौ "रथं हरेदु तथाध्वर्युर्ब्रह्माधाने च वाजिनम्। होता निविदं चाश्वसहस्रगोता चाधानः क्रयं" इति। निविदं निविच्छब्दनलभ्यं वरम्। उद्गातृप्रस्तोतृगणमध्यस्थः सवत्सांगो गृह्णात इति स्मृत्यन्तरे। व्यनः शकटम् क्रये सोमक्रये। दक्षिणांशकल्पनायाः प्रकारमाहतुः मनुबृहस्पती "सर्वेषामर्त्विजो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे। तृतीयिनस्तृतीयांशास्त्वंशांश्च पादिनः" इति। सर्वेषां षोडशानामृत्विजां मध्ये ये मुख्या गण्यास्ताः होतृ ब्रह्माध्वर्यूद्गातारस्तेऽर्द्धिनः चक्रदक्षिणायाः किञ्चित्न्यूनभागं गृह्णीयुः समग्रार्द्धग्रहणे वक्ष्यमाणविभागकल्पनाविरोधः स्यात्। अपरे द्वितीया

मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रशास्तोरसदृङ्नः४ सख्यभागार्द्धनार्द्धिनोऽर्द्धभाजिनः, तृतीयिनोऽच्छावाकाग्नीध्रोन्नेतृप्रतिहर्त्तॄणां सख्यभागस्य तृतीयांश१६भाजः। पादिनोऽन्यान्याक्षोतृपोतृनेष्टृसुब्रह्मण्याख्या सख्यभागस्य चतुर्थांश१२भाजिन इत्यर्थः। सख्यानां चतुर्णां त्रिधाविभागश्च समः एवं द्वितीयादीनामपि स एव विभागः। तथा च गोशतं दक्षिणेति पक्षमाश्रित्य कात्यायनसूत्रम् "द्वादश द्वादश सख्येभ्यः षट्षट् द्वितीयेभ्यश्चतश्चतश्चतृतीयेभ्यश्चित्रिभ्यश्च इतरेभ्यः" इति। कुंडपाय्यनेतदुपाध्यायकारिकायामपि "पञ्चविंशतिधा कृत्वा वर्णैर्धा दक्षिणा क्रमात्। द्वादशैवाथ षट्कं च चतुष्कं च एव चेति" द्वादशाधिकगोशतरूपाया दक्षिणायाः प्रथमचतुरो भागान् कर्त्तव्यान्। तत्रैको भागो होतृवर्गस्यापरो भागो ब्रह्मवर्गस्यापरोऽध्वर्युवर्गस्यापर उद्गातृवर्गस्य। पुनरेकैकस्य भागस्य पञ्चविंशतिर्भागाः कर्त्तव्याः। तेष्वाद्यानां होत्रादीनां द्वादश भागाः, द्वितीयानां षट्, तृतीयानां चतुरश्चतुर्थानां त्रय इत्यर्थः। पशुबन्धादौ तु विषमविभागानभिधानात् "सर्वं स्यादनुतन्त्रादिति" न्यायेन समत्वेनैव विभाग इति मन्तव्यम्। स्वकीयकर्मकलापांशकर्तृषु कृतानुसारेण भागो देय इत्याह मनुः "ऋत्विग्वदति हुतो यज्ञे स्वकर्म परिहापयेत्। तस्य कर्मानुरूपेण देयोंऽशः सह कर्तृभिः" इति। सहकर्तृभिः सम्भूयकारिभिरित्यर्थः। यद्वा कर्तृभिः सह देयः दक्षिणाकाले देयो यजमानेनेत्यर्थः। अथ वा कर्म परित्यक्तं सह कर्तृभिरित्यर्थः। यदा तु ऋत्विक् कर्मैकदेशं दक्षिणादानानन्तरं त्यजति तदाऽवशिष्टं तदङ्गवर्त्तिनां मध्ये यच्चिह्नितेनान्येन कारयेदित्याह स एव "दक्षिणासु च दत्तासु स्वकर्म परिहापयेत्। लभेतांशमन्येनैव च कारयन्" इति। कर्ममध्ये ऋत्विग्मरणे कर्त्तव्यमाह नारदः "ऋत्विजां व्यसनेऽप्येवमन्येन कर्म निरूपयेत्। लभेत दक्षिणादानं स तस्मात् सम्प्रकल्पितम्" इति। अन्येन स्वसङ्गसमभ्यर्त्तिनां मध्ये प्रत्यासन्नेन, येन केनचिदृत्विजा कार्यभागे त्यक्तव्यादि समाख्याव्याधायकेनेति ध्येयम्। यत्तु अङ्गुलिखितवोवचनम् "अथ चेदनुप्राप्ते सवने ऋत्विक् त्रियते तस्य सुतोऽथ शिष्यो वा तत्कार्यमनुपूरयेत्"। अथ चेदव्यवस्थितोऽन्यमृत्विजं वृणुयात्" इति। यच्च वृद्धस्मृतिवचनम्। "एवं क्रियाप्रवृत्तानां यदा कश्चिद्विपद्यते। तदुद्धृत्य क्रिया कार्या सर्वैर्वा सहकारिभिः" इति। तदेकाङ्गगणरहितत्विक्कर्तृकदर्शपौर्णमासादियागविधयश्चित्यभिहितं स्मृतिचन्द्रिकायाम्। जीवत्येव तु ऋत्विजि यजमानेन ऋत्विगन्तरकरणे कश्चिच्चिन्तेति वीक्षायामाह शङ्खः "अथ ऋत्विजि हते पत्न्यन्यं वृणुयात्पूर्वाङ्गस्यैव दक्षिणा पश्चाद्दातव्यः किञ्चिद्भवते" इति। यदा त्वकारणत्यक्तिग् याज्यं त्यजति याज्यो वा ऋत्विजं, तदा तयोर्दण्डमाह मनुः "ऋत्विजं यस्त्यजेद्यज्ञे याज्यो याज्यर्त्विजं त्यजेद्यदि। शतं कर्षमयो दण्ड्यो द्वयोरुत्तमसाहसम्" इति। नारदोऽपि "ऋत्विक् च त्रिविधो दृष्टः पैतृकः स्वयंकृतः। यदृच्छया च यः कुर्यादार्त्विज्यं प्रीतिपूर्वकम्। ऋत्विग्याज्यमदुष्टं यस्त्यजेदनपकारिणम्। अदुष्टर्त्विजं याज्यो विनेयौ तावुभावपीति"। ये ऋषिसाधने स्वसमानास्तैः सह ऋषिकार्य्येत्याह बृहस्पतिः "बान्धवैर्बन्धवीनाद्यैश्चेतोपकरणेन च। ये समानास्तु तैः सार्द्धं ऋषिः कार्यो विजानता" इति। बान्धवाः भ्रातृव्यादिबान्धवकाः बन्धवादयः। कर्षकाः कृषर्थं क्रीकृताः पुरुषाः आदिशब्देन ऋषिसाधनानामन्येषां ग्रहणम्। सम्भूयकारिणां कृषकाणां कर्त्तव्यमाह बृहस्पतिः "पर्वते नगराख्ये च तथा राजपथस्य च। ऊषरं भूषकव्याप्तं क्षेत्रं यत्नेन वर्जयेत्" इति। पर्वते पर्वतसमीपे कल्पतरुक्षता तु विवीत इति पठित्वा विवीतशब्देन यवमात्रार्थं रक्षितः प्रदेश इति व्याख्यातम्। नगराख्ये नगरसमीपे। राजपथस्य समीप इति शेषः। एतदुक्तं भवति पर्वतादासन्नमनासन्नमपि ऊषरं भूषकव्याप्तञ्च क्षेत्रं वर्जयेदिति। बान्धवेष्वपि वर्जनीयानाह स एव "क्रोशातिवृद्धं क्षुद्रञ्च रोगिणं प्रवलाधिनम्। कार्यं खञ्जञ्च नादद्याद्बान्धवं प्राज्ञः कृषीवलः" इति। काणः एकाक्षः खञ्जः भग्नचरणः। क्वचिदत्रैकस्यैव हानिमाह स एव "बान्धवीजात्यवाद्यस्य क्षेत्रहानिः प्रजायते। तेनैव सा प्रदातव्या सर्वेषां ऋषिजीविनामि"ति। सम्भूयकारिणामिति शेषः। बान्धवीजग्रहणं ऋषिसाधनानामुपलक्षणार्थम्। सम्भूयकारिणां शिल्पिनां स्वरूपं दर्शयंस्तेषां लाभविभागेऽपरिकल्पनाप्रकारमाह स एव "छिद्रराद्यकुप्यस्तवाणां काष्ठपाषाणकर्मणाम्। संस्कर्त्ता तत्फलाभिज्ञः शिल्पी प्रोक्तो मनीषिभिः। वैश्यकारादयो

यत्र शिल्पं समूय कुर्वते । कर्मातुरूपं निर्वेशं लभेरंस्ते यथांशतः" इति । कुथं हेमरूप्यव्यतिरिक्तपशोसाटिकम् । हेमरूप्ये इति प्रस्तुत्य ताभ्यां यदन्यत्कुथ्यमित्यमरसिंहेनोक्तत्वात् । निर्वेशो भृतिः । कात्यायनोऽपि "शिल्पकाभिज्ञकुशला आचार्याश्चेति शिल्पिनः । एकद्वित्रिचतुर्भागान् हरेयुस्ते यथोत्तरम्" इति । हर्म्यादिनिर्माणे मध्ये मुख्यस्य भागद्वयमाह बृहस्पतिः "हर्म्यं देवगृहं वापि वाटिकोपस्कराणि च । समूय कुर्वतां तेषां प्रमुख्यो द्वयंशमर्हति" इति । नर्त्तकीष्वपि मुख्यस्यांशद्वयभागित्वमतिदिशन् विशेषान्तरमाह स एव "नर्त्तकानामेष एव धर्मः संकीर्त्तितः । कालज्ञो लभते ऽध्यर्द्धं गायनास्तु समांशिनः" इति । अध्यर्द्धम् अर्द्धाधिकमेकमंशम् । समूयकारिणामीश्वराणां लाभभागेऽंशपरिकल्पनाप्रकारमाह कात्यायनः "परराष्ट्राद्धनं यत् स्वाम्यामात्यैः स्वाम्यात्यया हृतम् । राज्ञे दशांशानुद्धृत्य विभजेरन् यथाविधि । चौराणां मुख्यभूतस्तु चतुरोऽंशांस्ततो हरेत् । शूरोऽंशांस्त्रीन् समर्थौ द्वौ शेषास्त्वेकैकमेव च" इति । एतद्धनं दुर्बलवैरिदेशादाहृतविषयम् प्रबलवैरिदेशादाहृते त्वाह बृहस्पतिः "स्वाम्यामात्यैस्तु यच्चौरैः परदेशात् समाहृतम् । राज्ञे दत्त्वा तु षड्भागान् भजेयुस्ते यथांशतः । चतुरोऽंशान् भजेन्मुख्यः शूरस्त्र्यंशमवाप्नुयात् । समर्थस्तु हरेद् द्व्यंशं शेषास्त्वन्ये समांशिनः" इति । समर्थः शक्तः । एतेषां हानिरप्येवमेवेत्याह कात्यायनः "तेषां चेत् प्रहृतानाञ्च यद्दुःखं समवाप्नुयात् । तन्मोक्षणार्थं यद्दत्तं वहेयुस्ते यथांशतः" इति । इयमंशपरिकल्पना कृत्विग्भिन्नसमूयकारिणां समयाभावविषया कृते तु समये तदनुसारेणैव । अतएव तेनैवोक्तम् "वणिजां कर्षकाणाञ्च चौराणां शिल्पिनामथा । अनियम्यांशकर्तृणां सर्वेषामेष निर्णयः" इति । अनियम्य लाभहान्योः समयेन प्रतिपुरुषमंशसङ्ख्यत्वेत्यर्थः" ।

सम्भृति स्त्री सम्+भृ-क्तिन् । सम्यक् पोषणे ।

सम्भेद पु० संभिद्यते संश्लिष्यतेऽत्र सम्+भिद्-आधारे घञ् । १नद्योः सङ्गमस्थाने अमरः । भावे घञ् । २सङ्गमे ३सम्यग्भेदने ४स्फुटने ५मिलने मेदि० ६ऐकरूप्ये च "सम्भेदे नान्यतरवैयर्थ्यम्" इति मीमांसायां न्यायः ।

सम्भोग पु० सम्+भुज-घञ् । १सम्यग्भोगे २सुरते ३मित्रयाचनभेदे मेदि० ४हर्षे शब्दच० ५केलिनागरे जटा० "दर्शनस्पर्शनादीनि विशेषेते विलासिनौ । यत्रानुरक्तावन्योन्यं सम्भोगः स उदाहृतः" चन्द्रालोके ६रूढ्यलङ्कारस्यावस्थाभेदे सा० द० ।

सम्भ्रम पु० सम्+भ्रम-घञ् न वृद्धिः । १भयादिजनिते वेगे अमरः । २त्वरायां ३सम्भ्रमेतरके ४भये ५आदरे मेदि० । ७अतिशयभ्रमे ७चन्द्रे अजयः ।

सम्मति स्त्री सम्+मन-क्तिन् । १अनुमतौ २अभिलाषे च मेदि० । ३आत्मज्ञाने अजयः । [३हर्षयुक्ते त्रि० ।

सम्मद पु० सम्+मद-घञर्थे क । १हर्षे अमरः । कर्त्तरि अच् ।

सम्मर्द पु० संहृष्यतेऽत्र सम्+मृद्-आधारे घञ् । १युद्धे । भावे घञ् । २अन्योन्यसंघर्षे च ।

सम्मातुर पु० समीच्याः स्वस्या मातुरपत्यम् अण् यत् रपरः वा० न वृद्धिः । सतीतनये भाद्रमातुरे हेमच० ।

सम्मान पु० सम्+मन-घञ् । आदरे । [हृते च ।

सम्मानित स्त्री सम्+मन-णिच्-क्त । १कृतगौरवे २समा-

सम्मार्जन स्त्री सम्+मृज-ल्यु । संशोधने रत्नमा० ।

सम्मार्जनी स्त्री संमृज्यतेऽनया सम्+मृज-करणे ल्युट् ङीप् । धूल्याद्यपसारणार्थे पदार्थे (झाँटा) अमरः । खल् । सम्मार्जक तत्रार्थे पु० शब्दर० ।

सम्मित त्रि०सम्+मा-क्त । १सदृशे २तुल्यपरिमाणे च जटा०

सम्मुख त्रि०सङ्गतं सुखं येन प्रा०ब० । अभिमुखागते त्रिका० ।

सम्मुखीन त्रि० सम्मुखं पतति ख । अभिमुखे पतिनि ।

सम्मूर्च्छज न० सम्मूर्च्छात् जायते जन-ड । तृणादौ हेमच० ।

सम्मूर्च्छन न० सम्+मूर्च्छ-ल्युट् । १सम्यग्विस्तारे अमरः । २उन्नतौ ३ओहे च मेदि० । ४सम्यक्मूर्च्छने स्वरभेदे ।

सम्मूर्जनोद्भव पु० सम्मूर्जनादुद्भवति उद्+भू-अच् ६त० । तृणे हेमच० ।

सम्मृष्ट त्रि० सम्+मृज-क्त । १कृतमार्जने अमरः । मक्षिकाद्यपसारणेन २शोधितेऽन्नादौ च भरतः ।

सम्मोद पु० सम्+मुद-घञ् । १हर्षे २प्रीतौ च शब्दच० ।

सम्यच् अव्य० सम्+अञ्च-क्विप् सम्प्रत्ययः । १शोभने २मङ्गले ३मनोज्ञे च मेदि० । ४सत्यवाक्ये न० भरतः ५तद्वति त्रि० भत्वे समीच इत्यादि । स्त्रियां ङीप् समीची ।

सम्राज् पु० सम्यक् राजते राज-क्विप् नानुस्वारः । कृतराजसूययज्ञे सर्वभूमीश्वरे नृपतौ अमरः ।

सम्यँम पु० सम्+यम-करणे घञ् समो वा परसवर्णोऽनुनासिको यँः पक्षे संयमः । पात०स्व० परिभाषिते धारणाध्यानसमाधित्रये "त्रयमेकत्र संयमः" पात०सू० "तदेतस्य

धारणाध्यानसमाधित्रयस्यैकत्र संयमः एकविषयाणि त्रीणि साधनानि संयम इत्युच्यते तदस्य त्रयस्य तान्त्रिकी परिभाषा संयमः इति" भा० ।

सर न० सरति सृ-अच् । १सरोवरे शब्दच० । २जले जटा० । ३त्रयणे ४बाणे च हेमच० । ५दध्यधे दधिसरौ रत्नमा० । ६तच्छाते नवनीते च । भावे अच् । ७भेदने ८गमने च । कर्त्तरि अच् । ९सारके १०भेदके राजनि० ।

सरक पु०न० सृ-वुन् । १मद्यपानपात्रे भरतः २मद्यपरिवेषणे ३क्षुद्रजलाशये ४तत्पात्रे ५अविरलपथिकपङ्क्तौ च मेदि० ६गतिशीले त्रि० शब्दर० । [कायाम् अमरः ।

सरघा स्त्री सरं मद्यभेदं हन्ति हन-ड नि० । मधुमक्षिकायाम् अमरः ।

सरङ्ग पुस्त्री० सृ-अङ्गच् । १चतुष्पाट्जन्तौ २खगे च संज्ञिप्तसा० स्त्रियां ङीष् ।

सरज न० सरात् जायते जन-ड । नवनीते हारा० ।

सरजस् स्त्री सह रजसा सहस्य सः । १ऋतुमत्यां स्त्रियाम् २रजोयुक्ते त्रि० । अव्ययी० अच् समा० । सरजस्त्व ३रजःसाहित्ये अव्य० अमरः ।

सरट पुंस्त्री० सृ-अटन् । ढौकलासे (काँकलास) अमरः । स्त्रियां ङीष् । देहे तत्प्ररोहणादिफलं यथा "वल्मीकः प्रपाते च फलं सरटस्य प्ररोहणे । श्रीघ्रं राजश्रियोऽवाप्तिर्भाले चैश्वर्य्यमेव च । कर्णयोर्भूषणावाप्तिर्नेत्रयोर्नेत्रदर्शनम् । नासिकायाञ्च सौगन्ध्यं वक्त्रे मिष्टान्नभोजनम् । कण्ठे चैव श्रियोऽवाप्तिर्भुजयोर्विभवो भवेत् । धनलाभो वाहुमूले करयोर्धनसङ्गमः । स्तनमूले च सौभाग्यं हृदि सौख्यविवर्द्धनम् । पृष्ठे नित्यं महालाभः पार्श्वयोर्बन्धुदर्शनम् । कटिदेशे वस्त्रलाभो गुह्ये स्वजनसमागमः । ऊरौ चार्थलाभो नित्यं जङ्घे रोगभयं भवेत् । अर्थोच्च वाहनावाप्तिर्जानुजङ्घेऽर्थसञ्चयः । वामदक्षिणयोः पदोर्भ्रमणं नियतं भवेत् । वल्मीकः प्ररोहणे चैव पतने सरटस्य च । व्यत्यासाच्च फलं चैव तद्वदेवं प्रजायते । वल्मीकः प्ररोहणं रात्रौ सरटस्य प्रपातनम् । निष्फलार्थञ्च भवति व्याधिपीडाविपर्य्ययौ । पतनानन्तरं चैवारोहणं यदि जायते । पतने फलसदृक्षं रोहणेऽन्यत् फलं भवेत् । आरोहणस्योर्द्ध-वक्त्रे अधोवक्त्रौ च पातनम् । भवेदिष्टफलं तस्य तत्फलं जायते ध्रुवम् । स्नात्वालेप्य वा सद्यः सचेलं शयनाविशेत् । पन्नगस्यावलोक्यञ्च मुखादर्शनमेव च" दिवाकरः

सरट् पु० सृ-क्विप् । १वायौ २मेघे च उणादिकोषः ।

सरटि पु० सृ-अटिन् । १वायौ २मेघे च उणादि० ।

सरटु पु० सृ-अटु । ढौकलासे उणादिकोषः ।

सरण न० सृ-ल्युट् । १गमने २लोहलक्षे हेमच० । (गन्धमादन) ३लतायां स्त्री अमरः टाप् । ४त्रिवृतायां शब्दमा० ।

सरणि(णी) स्त्री सृ-अनि वा ङीप् । १पथि २पङ्क्तौ मेदि० २प्रसारण्यां भरतः । ३त्रिवृतायां स्त्री शब्दमा० ।

सरण्ड पु० सृ-अण्डच् । १खगे २कासके शब्दच० ३धूर्त्ते ४सरटे ५भूषणभेदे मेदि० सर्वत्र जातौ स्त्रियां ङीष् ।

सरण्यु सृ-अन्यु । १वायौ २मेघे ३जले शब्दर० ४वसन्ते ५ऋग्नौ उणादिकोषः । [न० शब्दमाला ।

सरत् त्रि० सृ-शतृ । १गन्तरि स्त्रियां ङीप् सरन्ती । २खले

सरलि पु० सह रलिना । रलिशब्दार्थे अमरटीका ।

सरपत्रिका स्त्री सरे जले पत्त्रमस्यस्याः ठन् । १पद्मपत्रे २पद्मे च शब्दच० ।

सरमा स्त्री सह रमते रम-अच् । १कुक्कुरयोषिति २देवशुन्यां ३राक्षसीभेदे विभीषणपत्न्याञ्च मेदि० । ४कश्यपदनुकन्याभेदे "गोलाङ्गूलशुकीरूपे द्वे चान्ये व्याघ्रापत्ये तथैव च । अपत्यं सरमायाश्च शुना वै अमरादयः" वह्निपु० ।

सरयु पु०सृ-अयु । १वायौ त्रिका० । जङ्घ् । २अयोध्यानिकवाहिनदीभेदे स्त्री । तदुत्पत्तिः कालिकापु० २१अ० यथा "एवं विवाह्य विधिवत् सौवर्णे मानसाचले । तत्र यत् पतितं तोयं मानसाचलकन्दरे । तत्तोयं सप्तधा भूत्वा मानसाचलकन्दरात् । हेमाद्रेः कन्दरे यानौ सरस्याञ्च पृथक् पृथक्" इत्युपक्रमे "तेनाभूत् सरयूर्नाम्ना नदी पुण्यतमा शुभा" । तद्भवः अण् त्रि० । सारव तत्र भवे त्रि० अमरः ।

सरल पु० सृ-अलच् । १पीतशाले अमरः "सरलो मधुकत्तिक्त कटुपाकरसो लघुः । स्निग्धोष्णः कर्णकण्ठास्य-रोगरक्तोदरः स्मृतः । कफानिलक्षयश्वासकासमेदोविषापहः" भावप्र० तद्गुणोक्तिः । २धूपकाष्ठभेदे शब्दर० ३सदारे ४ऋजौ च त्रि० मेदि० ५त्रिपुटायां स्त्री अमरः ।

सरलद्रव पु० ह्रस्व० । सरलछत्रनिर्य्यासे (टारपीन) अमरः ।

सरलाङ्ग पु० सरलौ दृक्षोऽङ्गं साधनं यस्य । श्रीवेष्टगन्धद्रव्ये राजनि० ।

सरस् न० सृ-असुन् । १जले रुद्रः । २सरोवरे अमरः । गौरा० ङीष् । ३सरसीत्यर्थत्र स्त्री अमरः "सरसीः परिधीचिरं सया" नैषधम् ।

सरस न०सह रसेन जलेन आस्वादेन च सहत्य सः । १सरोवरे शब्दच० २रसान्विते १स्वादूं च त्रि० । "सरसां सरसां परित्यज्य तनुम्" भट्टिः । ३श्वेतसिंदुवायां स्त्री रायमु० ।

सरसम्मत न० सरसिव नियासं सम्मतनोति सम्+प्र+तन-ड । त्रिकण्टकवृक्षे (तेकाटासिजु) शब्दच० ।

सरसिज न० सरसि जायते जन-ड अलुक् समा० । १पद्मे राजनि० "सरसिजमनुविद्धं शैवलेनापिरम्यम्" शकु० लता । २सारसपक्षिणे पुंस्त्री० स्त्रियां ङीष् । लुकि सरोजमप्यत्र । [स्त्रियां ङीष् ।

सरसीक पुंस्त्री०सरस्यां कायति कै-क । सारसपक्षिणे शब्दर०

सरसीरुह न० सरस्यां सरोवरे रोहति रुह-क । १पद्मे २सारसपक्षिणे च पुंस्त्री० अमरः स्त्रियां ङीष् ।

सरस्वत् पु० सरांसि जलानि सन्त्यस्य मतुप् मस्य वः । १सरोवरे २सागरे ३नदे ४रसिके त्रि० मेदि० ५नद्यां देवीभेदे ६गवि ८स्वीरत्ने स्त्री मेदि० ङीप् । सा च ज्योतिश्चक्रस्थायां १०ब्राह्म्यां शक्तौ राजनि० । ११देवीभेदे मेदि० १२सोमलतायां शब्दच० । १३वृद्धयक्तिभेदे त्रिका० १४दुर्गायाम् "सराः सरणशीलत्वात् मेधाख्ये सप्त कीर्त्तिताः । ख्याति प्रापणदाने वा तेन देवी सरस्वती" देवीपु० ३५ अ० तन्नामनिरुक्तिः । पृषो० । १५वाग्-धिष्ठातृदेव्याम् "आविर्बभूव तत्पश्चात् कुक्षितः परमात्मनः । एषा देवी शुक्लवर्णा वीणापुस्तकधारिणी । वागधिष्ठातृदेवी सा कवीनामिष्टदेवता । शुद्धसत्त्वस्वरूपा च शान्तरूपा सरस्वती" ब्रह्मवै० ब्र०ख० २अ० । तत्रैव गणे० ७०अ० "वागधिष्ठातृदेवी या देवी शास्त्रज्ञानप्रदा सदा । कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती" । "बन्धुजीवञ्च द्रोणञ्च सरस्वत्यै न दापयेत्" मत्स्यसू० तत्पूजादिकं तन्त्रसा० दृश्यम् । १६सन्ध्याकाले उषास्वरूपायां गायत्रीशब्दे २५८२ पृ० दृश्यम् । सरः ब्रह्मसरः उत्पत्तिस्थानत्वेनास्त्यस्याः मतुप् मस्य वः ङीप् । १७नदीभेदे सरस्वतीनद्या तत्रोत्पत्तिकथा च "ब्रह्मणोऽपि मुहूर्ताभागे सरसो ब्रह्मणः पुरा । जानन्ति त्वां सरिच्छ्रेष्ठे मुनयः संशितव्रताः" भा० अ० ५अ० । तस्याश्च सप्तनामत्वं यथा "राजन् ! सप्त सरस्वत्यो यामिर्व्याप्तमिदं जगत् । आहुता ब्रह्मणर्द्धिर्हि तत्र तत्र सरस्वती । सुप्रभा१ काञ्चनाक्षी२ च विशाला३ च मनोरमा४ । सरस्वती५ ओघवती६ सुरेणु७र्विमलोदका" भा०अ० ३६अ० । तासां नामकारणञ्च तत्राध्याये दृश्यम् तस्या माहात्म्यं तत्रैव सौरस्वतोपाख्याने दृश्यम् । त्रिकोणः ।

सरा स्त्री सृ-अच् । १प्रसारणयां राजनि० २निर्झरे हिरु०

सराव पु० सरं जलमवति अव-अण् । १जलाधारे मृण्मये पात्रभेदे(शरा)हिरूपकोषः । सह रावेण । २सशब्दे त्रि०

सरि पुंस्त्री० सृ-इन् स्त्रीत्वपक्षे वा ङीष् । निर्झरे हेमच० ।

सरिका स्त्री सरोऽस्त्यस्याः ठन् सृ-वुन् वा । क्षिद्रपत्रिकायाम् शब्दर० ।

सरित् स्त्री सृ-इति । १नद्याम् अमरः २स्रवे शब्दमा० । "क्रियाकारकरूपत्वात् सरणाच्च सरिन्मता" देवीपु० ४५अ० निरुक्तायां २दुर्गायाम् ।

सरित्पति पु० ६त० ; समुद्रे अमरः । सरिच्छाथादयोऽत्यत्र

सरित्वत् पु०सरित् स्वामित्वेनास्त्यस्य मतुप् मस्य वः तान्तत्वेन पदत्वाभावात् न तस्य दः । समुद्रे ।

सरित्सुत पु० ६त० । गङ्गापुत्रे भीष्मे ।

सरिताम्पति पु० ६त० अलुक् समा० । १समुद्रे शब्दर० । सरितांनाथादयोऽत्यत्र ।

सरिद्वरा स्त्री सरित्सु वरा श्रेष्ठा । गङ्गायाम् हेमच० ।

सरिल न० सृ-इलच् । जले अमरटीकायां भरतः ।

सरिसृप पु० सृ-इसनि । १वायौ २गतौ च उणादि० ।

सरिसृप पु० सर्पप+पृषो० । सर्षपे त्रिका० ।

सरीसृप पुंस्त्री० वक्रं सर्पति सृप-यङो लुक्, अच् । १सर्पे अमरः । २वृश्चिकादौ । ज्योतिश्चक्रोक्तेषु ३मीनवृश्चिककर्कटराशिषु "वृश्चिकराशिर्सर्पनिभः सरीसृपत्वेन निर्दिष्टः" ज्यो०त० । "सृगपतिवशे तिष्ठन्त्येते विहाय सरीसृपान्" ज्यो०त० बहुवचनात् मीनकर्कटयोर्ग्रहणम्

सरु पु० सृ-उन् । खड्गादिवृक्षे सारसुन्दरी ।

सरूप त्रि०समानं रूपमस्य समानस्य सः । तुल्यरूपे सदृशे जटा०

सरोज न० सरसि जले जायते जन-ड । १पद्मे हेमच० । २सारसपक्षिणे पुंस्त्री०स्त्रियां ङीष् । ३सरोजातमात्रे त्रि० ।

सरोजन्मन् न० सरसि जले जन्म यस्य । १पद्मे हेमच० । २सारसपक्षिणे ३तडागजातमात्रे त्रि० ।

सरोजिन् पु० सरोजं विष्णुनाभिपद्मोत्पत्तिस्थानत्वेनास्त्यस्य इनि । चतुर्मुखे ब्रह्मणि त्रिका० ।

सरोजिनी स्त्री सरोजानां समूहः सरित्कूलदेशो वा इनि ङीप् । १पद्मसमूहे रत्नमा० २तदुत्पत्तिस्थरूपायां पद्मलतायाम् ३पद्माधारदीर्घिकायाञ्च मेदि० । [स्त्रियां ङीष् ।

सरोत्सव पुंस्त्री०सरसि जले उत्सवोऽस्य । सारसपक्षिणे शब्दर०

सरोरुह(ह) सरसि रोहति रुह-किप् क वा । १पद्मे

हेमच०। कालस्तत्रार्घे रत्नमा० २सारसखगे च पुंस्त्री०।

सरोरुहासन पु० सरोरुहं पद्ममासनं यस्य। चतुर्मुखे ब्रह्मणि हेमच० तस्य विष्णुनाभिपद्मस्थितत्वात्तथात्वम्। २पद्मापविष्टमात्रे त्रि०।

सरोवर पु० सरोभिर्जलैर्वियतेऽसौ इ-वप्। तडागे शब्दर०। तडागशब्दे २२४०पृ० दृश्यम्। [संक्षिप्तसा०।

सर्क पु० सृ-क तस्य नेत्त्वम्। १वायौ २मनसि ३प्रजापतौ च

सर्ग पु० सृज-घञ्। १स्वभावे २सृष्टौ ३निर्मोचे काव्यादेः ४परिच्छेदे "सर्गोऽयमादिर्गतः" इति नैषधम। ५निश्चये अमरः "वादि सर्ग एषते" इति रभसः। ६मोक्षे ७उत्साहे मेदि० ८अनुमतौ हेमच०।

सृष्टिरूपः सर्गश्च नवविधः भाग० २।१०अ० यथा "सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः। कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः। आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः। द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः। भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान्। चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः। वैकारिको देवसर्गः पञ्चमो यन्मयं मनः। षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः। षडेते प्राकृताः सर्गा वैकृतानपि मे शृणु। रजोभाजो भगवतो लीलेयं हरिमेधसः। सप्तमो मुख्यसर्गस्तु षड्विधस्तस्य पाञ्च यः। वनस्पत्योषधिलतात्वक्सारावीरुधो द्रुमाः। वृक्षोत्तमस्तमःप्राया अन्तःस्पर्शाविशेषिणः। तिरश्चामष्टमः सर्गः सोऽष्टविंशद्विधो मतः। अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः। गोरजो महिषः कृष्णः सूकरो ज्ञवयो रुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम!। खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा। एते चैकशफाः क्षत्तः! शृणु पञ्चनखानपि। श्वा शृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ। सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः। कङ्कगृध्रबकश्येनभासभल्लूकबर्हिणः। हंससारसचक्राङ्गकाकोलूकादयः खगाः। अर्वाक्स्रोतास्तु नवमः क्षत्तरेकविधो नृणाम्। रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः। वैकृतास्त्वय एवैते देवसर्गश्च सत्तम!। वैकारिकस्तु यः प्रोक्त औमारस्त्वमयात्मकः। देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः। गन्धर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः। भूतप्रेतपिशाचाश्च विद्याधाः किन्नरादयः। दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः"।

सर्गबन्ध पु०बन्ध-भावे घञ् सर्गैर्बन्धः ३त०"कदभिहितभावो द्रव्यवत् प्रकाशते" इति न्यायात् सर्गबन्धस्य कर्मपरता न कर्मणि घञ् तथात्वे महाकाव्यविशेषणतया क्लीवतापत्तेः। महाकाव्ये तल्लक्षणं महाकाव्यशब्देऽनुक्तत्वात् अत्र दर्श्यते सा०द० "सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः। सदंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः। एकवंशभवा भूपाः कुलजा बहवोऽपि वा। शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते। अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः। इतिहासोद्भवं वृत्तमन्यदा सज्जनाश्रयम्। चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत्। आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा। क्वचिन्निन्दा खलादीनां सतां च गुणकीर्त्तनम्। एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः। नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह। नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते। सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्। सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः। प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः। सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः। रणप्रयाणोपयममन्त्रपुत्रोदयादयः। वर्ण्यनीया यथायोगं साङ्गोपाङ्गा अमी इह। कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा। नामास्य सर्गोपादेयकथया सर्गनाम तु"।

सर्ज क्वर्जने भ्वा०पर० सक० सेट्। सर्जति असर्जीत् सृष्टिवर्जने सर्जस्यापि वर्जनं तेन क्षोपदेशत्वाभावाच्च क्षत्वम्। तत्र प्रमाणाभावात् क्षोपदेश एव न्याय्यः। [शाले शब्दच०

सर्ज पु०सृज-घञ् १शालवृक्षे अमरः। २तरुसे (धुना) ३क्षीते-

सर्जक पु०सृज-ण्वुल्। १पीतशाले अमरः २शालवृक्षे जटा०

सर्जगन्धा स्त्री सर्जस्येव गन्धो यस्याः। राज्ञायां रत्नमा०।

सर्जन न०सृज-ल्युट्। १सैन्यपश्चाद्भागे शब्दर० २सृष्टौ च।

सर्जनिर्य्यासक पु० सर्जस्य निर्यास इव कायति कै-क। राले (धुना) राजनि०। [रसे त्रिका०।

सर्जमणि पु० सर्जस्य शालवृक्षस्य मणिरिव। (धुना) सर्ज-

सर्जरस पु० ६त०। शालवृक्षरसे (धुना) अमरः।

सर्जि जी स्त्री सृज-इन् वा ङीप्। १नदीभेदे २तत्रजे सर्जिकाक्षारे (साजिमाटि) रत्नमा०।

सर्जिका स्त्री सृज-ण्वुल् टाप् अतइत्त्वम्। १सर्जिकाक्षारे "पाक्यक्षारो यवक्षारो यावशूको यवाग्रजः। सार्जिकोऽपि स्मृतः क्षारः कापोतः कुक्कुटप्रभः। कथितः सर्जिकाभेदो विशेषस्तैः कुवर्षिका। यवक्षारो लघुः

स्निग्धः शुक्लश्चो वह्निदीपनः । निहन्ति शूलं वातास्र-श्लेष्मश्वासगलामयान् । पाण्डुशोथग्रहणीगुल्मानाह शीतकृच्छ्रान्वान् । सर्जिकाक्षारयुक्तो तक्षाद्विशेषाद्गुल्म-शूलहृत् । सुवर्चिका सर्जिकावद् बोद्धव्या गुणतो जनैः" भावप्र० । २नदीभेदे च अटा० ।

सर्जिकाक्षार स्त्री सर्जिकायाः क्षारः । क्षनामख्याते क्षार-भेदे (साजिमाटि) राजनि० ।

सर्जिक्षार पु० ६त० । (साजिमाटि) सर्जिकाक्षारे राजनि० ।

सर्जु पु० सृज–उनु । वह्निसृजने मेदि० ।

सर्जू स्त्री सृज–क्त । १विद्युति मेदि० २अभिसारे शब्दर० ।

सर्ज्य पु० सर्जस्येदं यत् । १सर्जरसे रत्नमा० । सृज–ण्यत् । २सर्जनीये त्रि० ।

सर्प पु० सृप–क्विप् । १नागकेशरे अमा० । २भुजङ्गमे पुंस्त्री० अमरः स्त्रियां ङीष् । ३सर्पदेवते अश्लेषानक्षत्रे ज्यो०त० "सर्पाख्यादभवन् सर्पाः क्षीनत्वादृक्षयः स्मृताः" वह्निपु० तन्नामनिरुक्तिः । भावे घञ् । ४गमने शब्दतोक्तं तद्-भेदादिकम् अस्मिञ्शब्दे ५८१ पृ० द्रष्टव्यम् । तद्दंशने तस्य दंष्ट्रभेदेन विषादिकं च अहिशब्दे पृ० उक्तं यथा

"दष्ट्रा शुक्ला च कृष्णा च रक्ता पीता च दक्षिणा । समासेन तु वक्ष्यामि यथा वै वर्णतः स्मृताः । शुक्ला तु ब्राह्मणी ज्ञेया रक्ता तु क्षत्रिया स्मृता । वैश्या तु पीतिका ज्ञेया कृष्णा शूद्रा तु कथ्यते । अतःपरं प्रव-क्ष्यामि दंष्ट्राणां विषलक्षणम् । दंष्ट्रायान्तु विषं नास्ति नित्यमेव भुजङ्गमे । दक्षिणं नेत्रमाश्रित्य विषं सर्पस्य तिष्ठति । संक्रुद्धस्यैव सर्पस्य विषं गच्छति मस्तके । मस्तकाद्गमनीं याति ततो नाड़ीषु तिष्ठति । नाड़ीभ्यो गच्छते दंष्ट्रे विषं तत्र प्रवर्त्तते । ततस्तु कथयिष्यामि यथावदनुपूर्वशः । चतुर्भिः कारणैः सर्पो दशते नात्र संशयः । आक्रान्तो दशते पूर्वं द्वितीयं पूर्ववैरिणम् । तृतीयं दशते भीतस्तुर्यं मद्दर्पितः । बुभुक्षितः पञ्चमे च विषोल्बणः । कनिष्ठं पुत्रवर्णाभं अष्टमं काश्यचोदितम् । यस्तु सर्पो दशित्वा तु उदरं परिवर्त्त-येत् । बलभ्रमनाकृतिर्दंष्ट्रा आक्रान्तं तं विनिर्दिशेत् । यस्य सर्पेण दष्टस्य गम्भीरं ह्रस्वते व्रणम् । वैरदष्टं विजानीयात् कश्यपस्य वचो यथा । एकदंष्ट्रा पदे यस्य अत्यन्तं न च कोपितम् । भीतदष्टं विजानीयात् वयो-वाच प्रजापतिः । यस्य सर्पेण दष्टस्य रेखा दण्डस्य जा-यते । मदर्दष्टं विजानीयात् कश्यपस्य वचो यथा । द्वे च दंष्ट्रापदे यस्य दृश्येते च सहाक्षतम् । क्षुधार्दितं विजानीयात् दशेच्च प्रजापतिः । द्वे दंष्ट्रे यस्य दश्येते क्वचिद्रुधिरबुद्बुदे । विषोल्बणं विजानीयाद्दंशं तं नात्र संशयः । अपत्यरक्षणार्थाय जानीयान्नात्र संशयः । वक्त्रं काकपदाकारं त्रिभिर्दन्तैर्विचिह्नितम् । मद्दानाग इति प्रोक्तः कालदष्टं विनिर्दिशेत् । द्विविधं दष्टजातेषु लक्षणं समुदाहृतम् । दष्टं दृष्ट्वा तु पीतञ्च दष्टोद्भूतं तथैव च । यस्तु सर्पो दशित्वा तु पिबते तु विचक्षणः । दष्टा तु पीतं विज्ञेयं कश्यपस्य वचो यथा । विषभागो तु सर्पस्य त्रिभागस्तत्र लक्ष्यते । उदरं दर्श-येद् यस्तु उद्भूतं तं विनिर्दिशेत् । छर्दितं विषवेगेन निर्विषः पन्नगो भवेत् । असाध्यश्चापि विज्ञेयस्तदंष्ट्राभि पीड़ितः । ओषधैश्छो भवेत् किञ्चित् संदष्टो विषयो-गतः । आर्द्रश्लेष्मसमायास्यशक्तिकासु विशेषतः । विशाखासु त्रिपूर्वासु मूलाख्यातिशतासके । सर्पदष्टा न जीवन्ति विषं पीतञ्च येऽथवा । शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च । न जीवन्ति नरा दष्टा नक्षत्रे तिथिसंयुते । हतो दंशकृतः शुद्धोव्यत्ययः परिकीर्त्तितः" भविष्यपु० "अतःपरं प्रवक्ष्यामि कालदष्टस्य लक्षणम् । "जिह्वाभङ्गो दृष्टिभङ्गो चक्षुभ्यांञ्च न पश्यति । दंशञ्च दष्टसङ्काशं पक्वजम्बूफलोपमम् । वैवर्ण्यं चैव दन्तानां श्यामो भवति वर्णतः । सर्वेषङ्गेषु शैथिल्यं पुरीषस्य च भेदनम् । भग्नस्कन्धकटिग्रीवो अर्द्धदृष्टिरधोमुखः । दशते वेपते चैव स्वपते च मुहुर्मुहुः । शस्त्रेण छिद्य-मानस्य रुधिरं न प्रवर्त्तते । दण्डेन ताड्यमानस्य दण्ड-राजी न जायते । दंशे काकपदे सुनीलमसकच्छ्यामल-फलाभं घनम् स्पृष्ट्वा रुधिरादुन्मेषकबुद्बुदं कफाद्भि-रोधो भवेत् । चिह्नाग्रासगलग्रहश्च सुमहान् या दुस्त्यजा दश्यते संख्यानं प्रवदन्ति शास्त्रविदुषाञ्च कालदष्टं विदुः । दंशे यस्याथ शोथः प्रचलितवलितं मण्डलं वा सुनीलं पस्फोटो गात्रभेदः स्रवणमथ रुधिरं भानु-मासञ्च लक्ष्येत । दन्तोच्छायो विवर्णो भवति च हृदयं सन्निरोधश्च तीव्रो दिव्यानामेष दंशस्त्रविपुलसयो विद्धि तं कालदष्टम् । दन्तैर्दन्तान् स्पृशति वक्त्रञ्च दृष्टि-रायासश्चिन्ता क्लमो दंष्ट्राः स्रवति रुधिरं शोकरं चतुरेकम् । प्रत्यादिष्टः स्खलति सततं भानुनाशञ्च भावेत् यद्यद्ब्रूते स्खलनगदितं कालदष्टं तमाहुः । वेपते वेदनासु रक्तश्चैव स्रवते । ओषधक्षये लालाभिः

कालदष्टं विनिर्दिशेत्। दर्पणे सलिले वापि आत्मच्छायां न पश्यति। मन्दरश्मिं तथा दीनं तेजोहीनं दिवाकरम्। वेपते वेदनार्तस्तु रक्तनेत्रश्च जायते। स याति निधनं जन्तुः कालदष्टं विनिर्दिशेत्। अष्टम्याञ्च नवम्याञ्च कृष्णपक्षे चतुर्दशीम्। नागपञ्चमीदृष्टानां जीवितस्य च संशयः। आदौ डङ्केषामघायाम्यक्तिकासु विशेषतः। विशाखासु त्रिपूर्वासु मूलास्वातिशतातारके। सर्पदष्टा न जीवन्ति विषं पीतश्च यैस्तथा। शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च। न जीवन्ति नरादष्टा नक्षत्रे तिथिसंयुते। अष्टोत्तरं मर्मशतं प्राणिनां सर्वदाकृतम्। तेषां मध्ये तु मर्माणि दश द्वे चापि कीर्त्तिते। भ्रुवोर्नेत्रे भ्रुवोर्मध्ये वस्तिभ्यां हृषणान्तरे। कक्षे स्कन्धे हृदिमध्ये तालुके चिबुके गुदे। एषु द्वादशकमेषु दष्टः शस्त्रेण वा हतः। न जीवन्ति नरा लोके कालदष्टान् विनिर्दिशेत्"। दूतो वा दण्डहस्तो भवति च युगलं पाशहस्तस्तथा वा रक्तं वस्त्रञ्च कृष्णम् छाग शिरसि गतम् चैकवस्त्रश्च दूतः। तैलाभ्यक्तश्च तद्वत् त्वरितगतियुतो युक्तकेशश्च याति, यः कुर्यात् घोरशब्दं करचरणयुगैः प्राप्तकालस्य दूतः। नागोदयं प्रवक्ष्यामि ईशानेन तु भाषितम्। ब्रह्मणा ह पुरा सृष्टा यहा नागास्त्वनेकशः। अनन्तं वासुकिं विद्यात् तक्षकं भूमिपुत्रन्तु कर्कोटञ्च बुधं विदुः। पद्मं हरिस्मृतिं विद्यान्महापद्मञ्च भार्गवम्। कुलिकः शङ्खपालश्च द्वावेतौ तु शनैश्चरः। पूर्वपादः शङ्खपालो द्वितीयः कुलिकोऽस्य च। नेत्रभागे यमौ दिष्टौ दिनरात्रौ तथैव च। युक्तसोमौ च मध्याह्ने हृदये तु क्षमास्मृतम्। प्राणः प्रागष्टमे भागे दिवासन्ध्याविहोच्यते। यदाश्च भुञ्जते राजन् ! पथि स्वल्पं व्रजत्यधः। अधो गत्वा भवेत् सर्पो निर्विषो नात्र संशयः" भविष्यपु० "भाद्रमाघे तथा ज्येष्ठे प्रमादान्नि भुजङ्गमाः। ततो नागो नागिनी च मैथुनं संप्रपद्यते। चतुरो वार्षिकान् मासान् नागी गर्भमधारयत्। ततः कार्त्तिकमासे तु अण्डकानि प्रसूयते। अण्डकानान्तु विज्ञेयं द्वे शते द्वे च विंशती। तान्येव भक्षयेत् सा तु भागैकं क्षुण्या त्यजेत्। सुवर्णकेवर्णनिभात् पुत्रात् संजायतेऽण्डकात्। तानेव खादते सर्पो अहोरात्राणि विंशतिम्। अर्कोदकसुवर्णाभात् द्वीवैराजीवसन्निभात्। तस्मादुत्पादयेत् स्त्री वै अण्डाद् ब्राह्मणसत्तम !। शिरीषपुष्पवर्णाभादण्डकात्सञ्जायते सकम्। ततो भिनत्ति चाण्डानि षण्मासेन तु गौतम !। ततस्ते प्रीतिसम्बन्धात् स्नेहं बध्नन्ति बालकाः। ततोऽसौ सप्तरात्रेण क्षणो भवति यत्नतः। आयुःप्रमाणं सर्पाणां शतं विंशोत्तरं स्मृतम्। मृत्युश्चाष्टविधो ज्ञेयः शृणुष्वात्र यथाक्रमम्। मयूरात् कालपाशाच्च चकोराक्षोखुरात्तथा। विडालाच्चकुलाच्चैव वराहादुष्ट्रशिकात्तथा। एतेभ्यो यदि मुच्येत जीवेद्विंशोत्तरं शतम्। सप्ताहे तु ततः पूर्णे दंष्ट्राणान्तु विरोहणम्। विषस्यासनं तत्र विच्छेदञ्च पुनः पुनः। एवं ज्ञात्वा तु तत्त्वेन विषकर्म समारभेत्। एकविंशतिरात्रेण विषं दंष्ट्रासु जायते। नासौ पार्श्वसमावर्त्ती बालसर्पस्तु उच्यते। पञ्चविंशतिरात्रस्तु सद्यः प्राणहरो भवेत्। षण्मासाज्जातमात्रस्तु कञ्चुकं वै प्रमुञ्चति। पादानाञ्चापि विज्ञेया द्वे शते द्वे च विंशती। गोलोमसदृशाः पाद्याः प्रविशन्ति क्रमन्ति च। सन्धीनां चास्य विज्ञेयं द्वे शते विंशती तथा। पांशुल्यापि विज्ञेया द्वे शते विंशतिस्तथा। अकालजातां ये सर्पा निर्विषास्ते प्रकीर्त्तिताः। पञ्चसप्तदिवसैश्च आयुस्तेषां प्रकीर्त्तितम्। रक्तपीतशुक्लदन्ता आनीला मन्दवेगिनः। एते स्वल्पायुषो ज्ञेया अल्पाहाराश्च भीरवः। एकशृङ्गस्तु भवेदुष्ट्रो द्वे जिह्वे च प्रकीर्त्तिते। दंष्ट्रायतस्तु विज्ञेया प्रजापतिवचो यथा। प्रथमा ब्रह्मदैवत्या द्वितीया विष्णुदैवता। तृतीया रुद्रदैवत्या चतुर्थी यमदैवता। क्षीणा प्रमाणतः सा तु वामनेत्रं समाश्रिता। नाड्यां मन्त्राः प्रयोक्तव्या नौषधं नैव भेषजम्। वैद्यः पराङ्मुखो याति मृत्युस्तस्या विलेखनात्। चिकित्सा न बुधैः कार्य्या तद्दन्तं तस्य जीवितम्। मकरीं मासिकीं विद्यात् करालीञ्च द्विमासिकीम्। कालरात्री भवेत् तीव्रा चतुरो यमदूतिका। मकरीं शङ्खकं विद्यात् करालो काकपादिका। टङ्ककाकृतिः कालरात्री याम्या कूर्माकृतिः स्मृता। मकरी वालुका ज्ञेया करालो पैप्पिली स्मृता। कफालिका कालरात्री यमदूती त्रिदोषिका। शुक्ला तु मकरी ज्ञेया करालो रक्तसन्निभा। कालरात्री भवेत् पीता कृष्णा च यमदूतिका" भविष्यपु०। कश्यप उवाच "सविषा दंष्ट्रयोर्मध्ये यमदूतो तु चेद्भवेत्। न चिकित्सा बुधैः कार्य्या तं गतासुं विनिर्दिशेत्। प्रहराद्ध दिवारात्रौ एकैकं भुञ्जते स्वहिः। एकस्य च क्षमानाञ्च द्वितीयं प्रोड्यं

तथा। नागोदये य उद्दृष्टो हतो विद्धो विदारितः। काल-दष्टं विजानीयात् कश्यपस्य वचो यथा। यन्मात्रः पतते-बिन्दुर्वालाग्रसन्निभोद्भूतः। तन्मात्रं खवते दंष्ट्राविषं सर्पस्य दारुणम्। ज्वालाग्रते तु संपूर्णे देहे संक्रमते विषम्। यावत् संक्रामयेदूर्ध्वाङ्गं कुत्रिंतं वा प्रसारयेत्। अनेन क्षणमात्रेण विषं गच्छति मस्तके। एवते विष-वेगस्तु पतगोऽथ सकृत्खयः। वर्द्धते रक्तमासाद्य ततो याते शिखी यथा। तैलबिन्दुर्जलं प्राप्य यथा वेगेन वर्द्धते। शिखण्डो आश्रयं प्राप्य मारुतेन समीरितः। ततस्ता-वाग्रतं प्राप्य त्वचास्थानं विचेष्टितम्। त्वचासु द्विगुणं विद्याच्छोणितेषु चतुर्गुणम्। पित्ते तु त्रिगुणं याति श्लेष्मे वै षोड्शं भवेत्। वायौ त्रिंशद्गुणश्चैव मज्जे चाष्टगुणं तथा। प्राणे चैकार्थवीभूते सर्वस्रोतो निरो-धयेत्। आतसा रूक्ष्यमाणेन याति साध्यमसाध्यताम्। ततोऽसौ म्रियते जन्तुर्निश्वासाच्छ्वासवर्जितः। निष्क्रान्ते तु ततो जीवे भूते पञ्चत्वमागते। तानि भूतानि गच्छन्ति यस्य यस्य यथालयम्। पृथिव्यापस्तथा तेजो वायुराकाश-मेव च। इत्येषामेव संघातः शरीरमभिधीयते। पृथिवी पृथिवीं याति आपश्चोमेषु लीयते। तेजो गच्छति चा-दित्यं मारुतो मारुतं व्रजेत्। आकाशश्चैव आकाशे यद्द तेनैव गच्छति। स्वस्थानं ते प्रपद्यन्ते परस्परनि-योजिताः। न जीवेदागतः कश्चिदिह जन्मनि सुव्रत!। विषार्तं न उपेक्षेत त्वरितं तु चिकित्सयेत्। एकमस्ति विषं लोके द्वितीयश्चोपपद्यते। यथा चलविषश्चैव स्था-वरश्च तथैव च। प्रथमे विषवेगे तु रोमहर्षः प्रजायते। द्वितीये विषवेगे तु स्वेदो गात्रेषु जायते। तृतीये विष-वेगे तु कम्पो गात्रेषु जायते। चतुर्थे विषवेगे तु श्रोत्रान्तरनिरोधकृत्। पञ्चमे विषवेगे तु हिक्का गात्रेषु जायते। षष्ठे तु विषवेगे तु ग्रीवाभङ्गस्तु जायते। सप्तमे विषवेगे तु प्राणेभ्यो विमुच्यते। सप्तधातुगता ह्येते वैनतेयेन भाषिताः। त्वचास्थाने विषप्राप्ते तस्य रूपाणि मे शृणु। अङ्गानि तिमिरायन्ते सतन्ते च पुनः पुनः। एतानि यस्य चिह्नानि तस्य त्वचगतं वि-षम्। तस्मादूर्ध्वं प्रवक्ष्यामि येन सम्पद्यते सुखम्। अर्क-मूलप्रमाणं तु प्रियङ्गुं तगरं तथा। एतदाकोड्य दातव्यं ततः सम्पद्यते सुखम् ततस्तस्मिन् हते विप्र! न निवर्त्तेत चेद्विषम्। त्वचःस्थानं ततो भित्त्वा रक्तस्थानं प्रधावति। विषे च रक्तसंप्राप्ते तस्य रूपाणि मे शृणु। दह्यते सुह्यते चैव शीतलं बहुमन्यते। एतानि यस्य रूपाणि तस्य रक्तं गतं विषम्। तस्मादूर्ध्वं प्रवक्ष्यामि येन सम्पद्यते सुखम्। उशीरं चन्दनं कुष्ठसत्वं तगरं तथा। कङ्कालस्य मूलानि बिम्बुवार-वृक्षस्य च। छिङ्गुञ्च मरिचञ्चैव पूर्ववेगे तु दापयेत्। कृष्णा कृष्णिकाली च इन्द्रवारुणिमूलकम्। सर्पगन्धा इतं चैव द्वितीये परिकीर्त्तितम्। बिम्बुवारं तथा छिङ्गु तृतीये कारयेद्बुधः। नस्यं पानञ्च कुर्वीत अञ्जनं लेपनं तथा। एतैर्नैवोपचारेण ततः सम्पद्यते सुखम्। रक्तस्थानं ततो गत्वा पित्तस्थानं प्रधावति। पित्त-स्थानगते विप्र! विषे रूपाणि मे शृणु। उक्लिश्यते नि-पतते दह्यते सुह्यते तथा। मारुतः पीतता स्याद्वै दिवः पश्यति पीतिकाः। धरबाश्च भवेन्मूर्च्छा न चात्मानं विजानते। विषक्रियां तस्य कुर्यात् यथा सम्पद्यते सुखम्। पिप्पलं मधुकं चैव मधुखण्डघृतं तथा। मधुसारमलाबुञ्च आतिशर्करकालुकाम्। इन्द्रवारुणि मूलञ्च गवां मूत्रेण पेषयेत्। नस्यं तस्य प्रयुञ्जीत पान-मालेपमञ्जनम्। एतैर्नैवोपचारेण ततः सम्पद्यते सुखम्। पित्तस्थानमतिक्रम्य श्लेष्मस्थानञ्च गच्छति। श्लेष्मस्थाने ततः प्राप्ते तस्य रूपाणि मे शृणु। गात्राणि तस्य शीदन्ते निश्वासश्च न जायते। जाड्यं च जायते तस्य कण्ठो घुरघुरायते। एतानि यस्य रूपाणि श्लेष्मस्थान-गतं विषम्। तस्मादूर्ध्वं प्रवक्ष्यामि येन सम्पद्यते सुखम्। मरिचकुकं कोशातकी शोभाञ्जनं मधुसारकम्। एतेषां सप्त-भागानि शस्यं मूत्रेण पेषयेत्। नस्यं पानञ्च कुर्वीत अञ्जनं लेपनं तथा। एतैर्नैवोपचारेण ततः सम्पद्यते सुखम्। श्लेष्मस्थानमतिक्रम्य वायुस्थानञ्च गच्छति। तस्य रूपाणि वक्ष्यामि वायुस्थानगते विषे। आध्मायते च जठरं यत्नवांश्च न धीयते। ईदृशं कुरुते रूपं दृष्टि-भङ्गश्च जायते। एतानि यस्य रूपाणि तस्य वायुगतं विषम्। तस्मादूर्ध्वं प्रवक्ष्यामि येन सम्पद्यते सुखम्। शोणमूलं प्रियालञ्च रक्ता च मालतिम्बी। छिङ्गुञ्च पिप्पलीं गुडिकाञ्च कुर्य्याद्दद्याच्च तत्क्षणे पादोनम्। एवा-ऽमदः सर्वविषाणि हन्यात् स्वयम्भुवा देववरेण सृष्टः। अञ्जनञ्चैव नस्यञ्च क्षिप्रं दद्याद्विषान्विते। वायुस्थानं ततो गुह्यं मज्जस्थानं प्रधावति। विषे मज्जगते विप्र! तस्य रूपाणि मे शृणु। दृष्टिश्च क्षीयते तस्य शुक्ल-मण्डलानि सुह्यति। एतानि यस्य रूपाणि तस्य मज्जगतं

विषम्। तस्मादहं प्रवक्ष्यामि येन सम्पद्यते सुखम्। घृतं मधु शर्कराञ्च क्षीरं चन्दनं तथा। एतदालोड्य दातव्यं पानं तस्य च सुव्रत!। ततः प्रणश्यते दुःखं ततः सम्पद्यते सुखम्। यथा तस्मिन् हते योने विषं तस्य निवर्त्तते। अज्जस्थानं ततो गत्वा मर्मस्थानं प्रधावति। विषे च मर्मसंप्राप्ते मृत्युरूपं यथा भवेत्। निश्चेष्टः पतते भूमौ कर्णाभ्यां बधिरो भवेत्। वारिणा सिच्यमानस्य रोमहर्षो न जायते। दण्डेन हन्यमानस्य दण्डराजी न जायते। शस्त्रेण छिद्यमानस्य रुधिरं न प्रवर्त्तते। केशेषु लुच्यमानेषु नैव क्लेशप्रवेदने। यस्य कर्णौ च पार्श्वौ च हनूपादौ च सञ्चयः। शिथिलानि भवन्तीह स गतासुरिति स्मृतिः। एतानि यस्य रूपाणि विपरीतानि गौतम!। मन्त्रन्तु तं विजानीयात् कश्यपस्य वचो यथा। वैद्यास्तस्य न पश्यन्ति ये पश्यन्ति कुशिक्षिताः। विचक्षणास्तु पश्यन्ति मन्त्रौषधिसमन्विताः। तस्मादहं प्रवक्ष्यामि स्वयं दृष्टेन भाषितम्। मयूरपित्तं मार्ज्जारपित्तं नकुलपित्तकम्। सर्पास्थिपित्तञ्च धानालीमूलमेव च। कुङ्कुमं भार्गवं कुष्ठं काश्मरी च त्वचं तथा। सर्पपस्य च किञ्जल्कं पद्मस्य कुसुदस्य च। एतानि समभागानि गोमूत्रेण च पेषयेत्। एषोऽगदो यस्य हृत्ते दष्टेन म्रियते न वै। आशाङ्कितापि दष्टोऽपि क्षिप्रं भवति निर्विषः। क्षिप्रमेव प्रदातव्यं मृतसञ्जीवनौषधम्। अञ्जनञ्चैव नस्यञ्च क्षिप्रं दद्यात् विचक्षणः" भविष्यपु०। कश्यप उवाच "अतःपरं प्रवक्ष्यामि नामानां रूपलक्षणम्। सर्पदष्टस्य च तथा सर्पाणामुद्विजपुङ्गव!। अथ सर्पेण दष्टस्य अक्ष्णी हृष्टिः प्रजायते। सर्पो दष्टस्य च तथा अधोदृष्टिः प्रजायते। नपुंसकेन दष्टस्य अङ्गमदः प्रजायते। क्रूरा दष्टस्य वा सर्पा दृष्टिर्विजवरोत्तम!। कुमारेष्वपि दष्टस्य दृष्टिर्या एव जायते। गुर्विण्या वाथ दष्टस्य तथा खेदश्च जायते। रोमाञ्चः स्यात् स्तूतिकया वेपथुश्चापि जायते। पञ्चमो प्रभवेद्वालो दिवा सर्पो विषाधिकः। नपुंसकस्य सन्ध्यायां कश्यपेन तु भाषितम्। अन्धकारे तु दष्टानामुदके गहने वने। शुक्लश्च वै प्रभातस्य यदि सर्पो न दश्यते। दष्टरूपाण्यजानन् वै कथं वैद्यश्चिकित्सति। चतुर्विधास्तु संप्रोक्ताः पन्नगास्तु महाबलाः। दर्वीकरा मण्डलिनो राजिला व्यन्तरास्तथा। दर्वीकरा वातविषा मण्डलाः पैत्तिकाः स्मृताः। श्लेष्मणा राजिला ज्ञेया व्यन्तराः सान्निपातिकाः। रक्तं परीक्ष्यवेदगाढ़ सर्पाणान्तु पृथक् पृथक्। कृष्णं दर्वीकरागान्तु जायते वातलक्षणम्। रक्तं घनञ्च बहुशः शोणितं भण्डलिक्षते। पिच्छिलं राजिले स्वल्पं महदुव्यन्तरे तथा। ज्ञेयाः सर्पास्तु चत्वारः पञ्चमो नोपलभ्यते। ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव चतुर्थकः। ब्राह्मणे मधुरं दद्यात् तिक्तं दद्यात्तथोत्तरे। वैश्ये कषायलं दद्यात् शूद्रे तिक्तमेव वा। ब्राह्मणेन तु दष्टस्य दाहो मांसेषु जायते। मूर्च्छा च प्रबला स्याद्वै न ज्ञानमभिजायते। ग्रामवर्त्म सुखञ्च स्यान्मन्यास्तम्भश्च जायते। तस्य कुर्यात् प्रतीकारं येन सम्पद्यते सुखम्। अश्वगन्धामयामार्गं सिन्धुवारं सुरालयम्। एतत् सर्पिः समायुक्तं पानं नस्यञ्च दापयेत्। एतैर्योपचारेण सुखी भवति मानवः। क्षत्रियेण तु दष्टस्य कम्पो गात्रेषु जायते। मूर्च्छा मोहसभा स्याद्वै न ज्ञानमभिजायते। जायते वेदना तस्य ऊर्ध्वञ्चैव निरीक्षते। तस्य कुर्यात् प्रतीकारं येन सम्पद्यते सुखम्। अर्कलूनसमायामार्गं प्रियङ्गुनथ वारुणीम्। एतत् सर्पिः समायुक्तं पानं तस्य प्रदापयेत्। एतैर्नैवोपचारेण सुखी भवति मानवः। वैश्येनापि हि दष्टस्य शृणु रूपाणि यानि तु। श्लेष्मकोपो लाला च नवोत्क्लृप्ति वेदना। मूर्च्छा च प्रबला यस्य ज्ञानं नाभिनन्दति। तस्य कुर्यात् प्रतीकारं येन सम्पद्यते सुखम्। अश्वगन्धां स गोमूत्रं शटरूषं सुगुग्गुलम्। शिरीषार्कपलाशञ्च श्येनां च गिरिकर्णिकाम्। गोमूत्रेण समायुक्तं पानं नस्यञ्च दापयेत्। एष वैद्येन दष्टानामगदः परिकीर्त्तितः। शूद्रेणापि हि दष्टस्य शृणु तत्त्वेन गौतम!। कुप्यते वेपते चैव ज्वरः शीतश्च जायते। अङ्गानि चुलुचुलायन्ते शूद्रदष्टस्य लक्षणम्। तस्मादहं प्रवक्ष्यामि येन सम्पद्यते सुखम्। पद्मञ्च लोध्रकञ्चैव खोदं पद्मस्य केसरम्। मधु मधूकारञ्च श्येना च गिरिकर्णिका। एतानि समभागानि पेषयेत् शीतवारिणा। पानं लेपाञ्जनं नस्यं सुखी भवति मानवः। पूर्वाह्णे चरते विषो मध्याह्ने लक्षियश्चरेत्। अपराह्णे चरेद्वैद्यः शूद्रः सन्ध्याचरो भवेत्। आहारश्चात्र शुद्धानि ब्राह्मणानां विदुर्बुधाः। भूमिजा क्षत्रियाणाञ्च आहारो द्विज सत्तम!। वैश्या मरुद्भवस्यात्र शूद्राः सर्वौषधेषया। यथतो दशते विप्रा क्षत्रियो दक्षिणेन तु। [illegible]

सदा वैश्यः पश्चाद्वै शूद्र आदशेत् । मदकाले तु संप्राप्ते भोज्यमाना महाविषाः । अवेलायां दशन्ते वै मैथुनार्ता भुजङ्गमाः । पुष्पगन्धाः स्मृता विप्राः क्षत्रियास्तन्दनावहाः । वैश्याश्च हतगन्धा वै शूद्राः मूर्मस्य गन्धिनः । वासं तेषां प्रवक्ष्यामि यथावदनुपूर्वशः । नदीकूपतडागेषु गिरिप्रस्रवणेषु च । आरामेषु पवित्रेषु शुचिष्वायतनेषु च । वसन्ति ब्राह्मणाः सर्पा ग्रामद्वारे चतुष्पथे । क्षत्रियो वसते नित्यं तोरणेषु सुरेषु च । गोशालास्वश्वशालासु पलालेषु तटेषु च । गोष्ठेषु पथि दग्धेषु विप्र ! वैश्या वसन्ति च । अविविक्तेषु स्थानेषु निर्झरेषु वनेषु च । शून्यागारे श्मशाने च शूद्रा विप्र ! वसन्ति च । श्वेताश्च कपिलाश्चैव ये सर्पास्तनलप्रभाः । मनस्विनः सात्त्विका ये ब्राह्मणास्ते बुधैः स्मृताः । रक्तवर्णसुवर्णाभाः प्रवालमणिसन्निभाः । सूर्यप्रभास्तथा विप्र ! क्षत्रियास्ते भुजङ्गमाः । नानाविचित्रराजीभिरतसीवर्णसन्निभाः । वाणपुष्पसुवर्णाभा वैश्यास्ते च भुजङ्गमाः । काकोदरनिभाः केचित् ये च अञ्जनसन्निभाः । काकवर्णा धूम्रवर्णास्ते शूद्राः परिकीर्त्तिताः । यस्य सर्पेण दष्टस्य दंशमङ्गुष्ठमन्तरम् । बालदष्टं विजानीयात् कश्यपस्य वचो यथा । यस्य सर्पेण दष्टस्य दंशं ह्यङ्गुष्ठमन्तरम् । यौवनस्थेन दष्टस्य एतल्लक्षणम् । यस्य सर्पेण दष्टस्य सार्द्धह्यङ्गुष्ठमन्तरम् । वृद्धदष्टं विजानीयात् कश्यपस्य वचो यथा" भविष्यपु० । "स्थानान्याटौ प्रवक्ष्यामि नद्यां दष्टो न जीवति । चितावल्मीकशैलादौ कूपे च विवरे तरोः । दंशे रेखात्रयं यस्य प्रच्छन्नं स न जीवति । षष्ठ्यां च कर्कटे मेषे मूलाश्लेषा मघादिषु । कक्षाश्रोणिगले सन्धौ शङ्खकर्णोदरादिषु । दण्डी शस्त्रधरो भिक्षुर्नग्नादिः काषदूतकः । वक्त्रो वाहौ च ग्रीवायां पृष्ठे च न हि जीवति । पूर्वं दिनपतिर्भुक्ते सार्द्धयामत्रयं परे । ग्रेषाः पहाः प्रतिदिनं षट्संख्यापरिवर्त्तनैः । नागभोगक्रमो ज्ञेयो रात्रौ वाणविवर्त्तनैः । ग्रेषोऽर्कः फणिप्रवरदृक्षत्रको भौम ईरितः । कर्कोटोऽथो गुरुः पद्मो महापद्मश्च भार्गवः । शङ्खः शनैश्चरो राहुः कुलिकश्चाष्टमो पहाः । रात्रौ दिवा सुरगुरोर्भोगे स्यादमरान्तकः । षड्डोः काजो दिवा राहुः कुलिकेन सह स्थितः । यामार्द्धसन्धिसंस्थः स वेषां कालयतीश्वरेत् । बाणद्विघट्वक्षिवाजियुगभूरेकभागतः । दिवा षड्वेदनेत्रादियमुक्तिवसुखाब्धिकैः । पादाङ्गुष्ठे पादपृष्ठे गुल्फे जानुनि लिङ्गके । नाभौ हृदि स्तनतटे कण्ठे गण्डपुटे क्षणे । कर्णयोश्च भ्रुवोः शङ्खे मस्तके प्रतिपत्क्रमात् । तिष्ठेच्चन्द्रश्च जीवेन पुंसो दक्षिणभागके । कायस्य वामभागे तु स्त्रिया वायुवशक्रमात् । अमवच्चलतो मोक्षो निवर्त्तेत च मर्दनात् गारुडे १६अ० । "आषाढादित्रिमासैः स्याद् गर्भो मासचतुष्टये । अष्टकानां शतं ह्येकं चत्वारिंशत् प्रसूयते । सर्पा यसन्ति स्तनौ तान् विना स्त्रीं, पुंनपुंसकान् । उन्मीलतेऽक्षि सप्ताहात् पूर्णो मासाद्भवेद्दृष्टिः । द्वादशाहात् प्रबोधः स्यात्तासां स्युः सूर्यदर्शनात् । द्वात्रिंशद्दन्तविंशत्या चतस्रश्चतसृषु दंष्ट्रिकाः । करालो मकरी कालरात्री च यमदूतिका । एताश्चाः विषा दंष्ट्रा वामदक्षिणपार्श्वगाः । अष्टानामनुसुप्तते क्षत्तिं जीवेत् षष्टिसमाहयम् । नागाः सूर्यादिवारेशाः सप्त प्रोक्ता दिवानिशि । तेषां षट् प्रतिवारेषु कुलिकः सर्वसन्धिषु । शङ्खेन वा महाङ्गेन सह तस्योदयोऽथ वा । द्वयोश्चैव नाडिकयोरन्तरं कुलिकोदयः । दुष्टः सकालः सर्वत्र सर्वदंशे विनिर्दिशेत् । कृत्तिका भरणी ज्ञातिर्मूलं पूर्वत्रयाश्विनी । विशाखार्द्रा मघाश्लेषा चित्रा श्रवणरोहिणी । रिक्ता अन्धकजो वारो पञ्चमी चाष्टमी तिथिः । षष्ठी रिक्ता शिवा निन्द्या पञ्चमी च चतुर्दशी । सन्ध्याचतुष्टयं दुष्टं दंशयोगश्च रीषयः । एकद्विबहवो दंशा दष्टविद्धं स्वयुक्तम् । अदंशमवगूढं स्यादंशमेवं चतुर्विधम् । त्रयो ह्येकत्रता दंशा वेदना रुधिरं व्रणाः । शङ्खं ह्येकाङ्गिकुसुमाभा दंशाश्च यमचोदिताः । दाढी पिणीलिकाख्यौ कणदंशोपरजान्वितः । ततोऽधो अन्वितो दंशः सविषो न्यस्तनिर्विषः । देवालये शून्यगृहे वल्मीकोद्यानकोटरे । रथ्या सन्ध्या श्मशाने च शुष्कद्रौ सिन्धुसङ्गमे । द्वीपे चतुष्पथे सौधे गृहेऽजे पर्वतान्यतः । बिलद्वारे जीर्णकूपे जीर्णवेश्मनि कुड्यके । शिरीषे शातकुम्भेषु जम्बूडुम्बरकेषु च । वटे च जीर्णप्राकारे शालकृतकजलतृणि । नाभौ शङ्खे गले मूर्द्धि चिबुके नाभिपादयोः । दंशोऽशुभः" अग्निपु० । सुश्रुते तद्दंशलक्षणभेदादिर्दर्शितो यथा

"तत्र सर्वेषां सर्पाणां सामान्यत एव दष्टलक्षणं वक्ष्यामः । किं कारणं विषं हि निशितनिस्त्रिंशाशनिरुग्रतरवेगमस्त्रं सहसा संस्पृशति । न चाप-

कायोऽस्ति वाक् समूहमनुसर्तुम् । प्रत्येकमपि दष्टलक्षणेऽभिहिते सर्वत्र वैविध्यं भवति । तस्मात्तद्वैविध्यमेव वक्ष्यामः । एतद्ज्ञातुरहितमसम्मोहकरञ्च । अपि चात्रैव सर्वसर्पव्यञ्जनावबोधः ।

तत्र दर्वीकरविषेण त्वङ्नयननखदशनमूत्रपुरीषदंशक्ष्णत्वं रौक्ष्यं शिरसो गौरवं सन्धिवेदनाकटीपृष्ठग्रीवादौर्बल्यं जृम्भणं वेपथुः स्वरावसादो घुर्घुरको जडता शुष्कोद्गारः कासश्वासौ हिक्का वायोरूर्ध्वगमनं शूलोद्वेष्टनं क्षुण्णा लालास्रावः फेनागमनं स्रोतोऽवरोधस्तास्तास्च वातवेदना भवन्ति ।

मण्डलिविषेण त्वगादीनां पीतत्वं शीताभिलाषः परिधूपनं दाहस्तृष्णा मदो मूर्च्छा ज्वरः शोणितागमनमूर्ध्वमधश्च मांसानामवघातनं श्वयथुर्दंशकोथः पीतरूपदर्शनमाशुकोपस्तास्तास्च पित्तवेदना भवन्ति ।

राजिमद्विषेण शुक्लत्वं त्वगादीनां शीतज्वरो रोमहर्षस्तब्धत्वं गात्राणामोदंशशोफः सान्द्रकफप्रसेकश्छर्दिरभीक्ष्णमक्ष्णोः कण्डूः कण्ठे श्वयथुर्घुर्घुरक उच्छ्वासनिरोधस्तमःप्रवेशस्तास्तास्च कफवेदना भवन्ति ।

पुरुषाभिदष्ट ऊर्ध्वं प्रेक्षतेऽधस्तात् स्त्रिया शिरांस्योत्तिष्ठन्ति ललाटे । नपुंसकाभिदष्टस्तिर्यक्प्रेक्षी भवति । गर्भिण्या पाण्डुमुखोच्छ्वासश्च । सूतिकया शूलार्त्तो रुधिरं मेहत्युपजिह्विका चास्य भवति । आसार्घिनाद्यं क्रोशति । छद्मेन मन्दो वेगाश्च । बालेनाशु स्तब्धस्य निर्विषेणाविषनिष्क्रमः । अज्ञाहिकेनाज्ञत्वमित्येके । ग्रसनादजगरः शरीरप्राणहरो न विषात् । तस्य यद्यत् प्राणहराहिदंष्टः पतति यच्चाधनिहत इव भूमौ सक्थाङ्गः स्खलति ।

तत्र सर्वेषां सर्पाणां विषस्य सप्त वेगा भवन्ति तत्र दर्वीकराणां प्रथमे वेगे विषं शोणितं दूषयति तत् प्रदुष्टं क्षुण्णासुपैति तेन क्षुण्णां पिपीलिकापरिसर्पणमिव क्षुण्णे भवति । द्वितीये मांसं दूषयति तेनात्यर्थं क्षुण्णता शोफो मन्ययश्च क्षुण्णे भवन्ति । तृतीये मेदो दूषयति तेन दंशक्लेदः शिरोगौरवं स्वेदश्चक्ष्मर्क्षणञ्च । चतुर्थे कोष्ठमनुप्रविश्य कफप्रधानान् दोषान् दूषयति । तेन तन्द्राप्रसेकसन्धिविश्लेषा भवन्ति । पञ्चमेऽस्थीन्यनुप्रविशति प्राणमग्निञ्च दूषयति तेन पर्वभेदो हिक्का दाहश्च भवति । षष्ठे मज्जानमनुप्रविशति यक्ष्मणोऽत्यर्थं दूषयति तेन गात्राणां गौरवमतीसारो मूलोद्वेष्टः मूर्च्छा च भवति । सप्तमे शुक्रमनुप्रविशति व्यानञ्चात्यर्थं कोपयति कफञ्च स्रोतोभ्यः प्रच्यावयति तेन श्लेष्मवर्त्तिप्रादुर्भावः कटीपृष्ठभङ्गश्च सर्वचेष्टाविघातो लालास्रवोदरतिप्रवृत्तिरुच्छ्वासनिरोधश्च भवति ।

तत्र मण्डलिनां प्रथमे वेगे विषं शोणितं दूषयति तत्तत् प्रदुष्टं शीततासुपैति तत्र परिदाहः पीतावभासता चाङ्गानां भवति । द्वितीये मांसं दूषयति तेनात्यर्थं पीतातापरिदाहौ दंशे शूयथुश्च भवति । तृतीये मेदो दूषयति तेन पूर्ववच्चुर्म्क्षणं क्षुण्णा दंशे क्लेदः स्वेदश्च । चतुर्थे कोष्ठमनुप्रविश्य ज्वरमापादयति पञ्चमे परिदाहं सर्वगात्रेषु करोति । षष्ठसप्तमयो पूर्ववत् ।

राजिमतां प्रथमे वेगे विषं शोणितं दूषयति तत्प्रदुष्टं पाण्डुतासुपैति तेन रोमहर्षः शुक्लावभासश्च मुखस्य भवति । द्वितीये मांसं दूषयति तेन पाण्डुतात्यर्थं जाड्यं शिरःशोफश्च भवति । तृतीये मेदो दूषयति तेन चक्षुर्म्क्षणं स्वेदो घ्राणाक्षिस्रावश्च भवति । चतुर्थे कोष्ठमनुप्रविश्य भक्ष्याक्षमं शिरोगौरवं चापादयति । पञ्चमे वाक्सङ्गं शीतज्वरञ्च करोति षष्ठसप्तमयोः पूर्ववदिति ।

भवन्ति चात्र । धात्वन्तरेषु याः सप्त कलाः संपरिकीर्त्तिताः । तास्वेकैकामतिक्रम्य वेगं प्रकुरुते विषम् । नान्तरेण हि कलां कालकल्पं भिनत्ति हि । समीरणोन्नममानं तत्तु वेगान्तरं स्मृतम् । शूनाक्षः प्रथमे वेगे पशुध्यायति दुःखितः । जाड्यास्रावो द्वितीये तु क्षुण्णाङ्गः पीड्यते हृदि । तृतीये च शिरो दुःखं कण्डूयीवच तत्क्षणे । चतुर्थे वेपते मूढः स्खादन् दन्तान् जडात्यसून् । कोचिद्वेगभयं प्राहुरन्यत्रैतेषु तद्विदः । ध्यायति प्रथमे वेगे पञ्चो सञ्जायतः परम् । द्वितीये विच्छिनः प्रोक्तस्तृतीये स्मृत्यसृच्छति । केचिदेकं विच्छेषु विषवेगमुशन्ति हि । मार्ज्जारनकुलादीनां विषं नातिप्रवर्त्तते" । "अथातः सर्पदष्टचिकित्सितकल्पं व्याख्यास्यामः । सर्वैरेवादितः सर्पैः प्राणादस्य देहिनः । दंशस्योपरि बध्नीयादरिष्टा(तामा)-मतरज्जुके । स्रोतश्चर्मान्तवल्कानां स्नदुनाऽन्यतमेन च । न गच्छति विषं देहमविघाभिर्निवारितम् । दष्टेदंशमथोत्कृत्य यत्र रक्तो न जायते । व्याचूषणच्छेदनाद्वा सर्वत्रैव तु पूजिता । प्रतिपूर्यं मुखं वस्त्रैर्हितमाचूषणं भवेत् । स दष्टव्योऽथ वा सर्पो लोष्टो वापि हि तत्क्षणम् । अथ मण्डलिना दष्टं न कथञ्चन दाहयेत् । न पित्तविषबाहुल्याद्धो दाहादिसर्जति । अपिष्टाभि

मन्त्रैश्च बहीयान्मन्त्रकोविदः। सा तु रज्ज्वादिभिर्बद्धा विषप्रतिकरो मता। देवब्रह्मर्षिभिः प्रोक्ता मन्त्राः सत्यतपोमयाः। भवन्ति नाल्पया क्षिप्रं विषं हन्युः सदक्षरम्। विषं तेजोमयैर्मन्त्रैः सत्यब्रह्मतपोमयैः। यथा निवार्यते क्षिप्रं प्रयुक्तैर्न तथौषधैः। मन्त्राणां महणं कार्यं स्त्रीमांसमधुवर्जिना। जिताहारेण शुचिना कुशास्तरणशायिना। गन्धमाल्योपहारैश्च बलिभिश्चापि देवताः। पूजयेन्मन्त्रसिद्ध्यर्थं जपहोमैश्च यत्नतः। मन्त्राश्च सु विधिना प्रोक्ता हीना वा स्वरवर्णतः। यस्मान्न सिद्धिमायान्ति तस्माद् योज्योऽगदंकृमः। समन्ततः शिराटंशादुविद्धेषु कुशलो भिषक्। शाखाये वा ललाटे वा वेध्यास्ता विद्धते विषे। रक्ते निर्ह्रियमाणे तु जलस्थं निर्ह्रियते विषम्। तस्माद्विस्रावयेद्रक्तं सा ह्यस्य परमा क्रिया"।

सर्पकङ्काली स्त्री०-सर्पस्येव कङ्कालमस्त्रविशेषो यस्याः गौरा० ङीष्। सर्पविषघातिन्यां लतायां शब्दच०।

सर्पगन्धा स्त्री सर्पं तद्विषं गन्धयति छिनत्ति गन्ध-अण्। विषहारिण्यां लतायां जटा०। [हरीलतायां रत्नमा०।

सर्पघातिनी स्त्री सर्पं तद्विषं हन्ति हन-णिनि। सर्पविष-

सर्पतृण पुंस्त्री० सर्पस्तृणमिवानायासच्छेद्यो यस्य। नकुले हेमच०।

सर्पदंष्ट्र पु० सर्पस्य दंष्ट्रेव पुष्पमस्य। १नागदन्तीवृक्षे शब्दच०। सर्पस्य दंष्ट्रेव स्वर्गने दुःखदत्वात्। २वृश्चिकालीलतायां स्त्री (विकाति) रत्नमा०। [क्रां राजनि०।

सर्पदंष्ट्रिका स्त्री सर्पदंष्ट्राऽऽकारेऽस्त्र्याः टत्। अजशृङ्ग-

सर्पदण्डी स्त्री सर्पं तद्विषं दण्डयति दण्ड-अण्। मोरवी-वृक्षे राजनि०। [ङीष्। नागदन्तीवृक्षे राजनि०।

सर्पदन्ती स्त्री सर्पस्य दन्ता इव पुष्पमस्यस्या अच् गौरा०

सर्पनामा स्त्री सर्पस्य नामात्र वाचकशब्दे। सर्पकङ्काली-भेदे शब्दच०।

सर्पदमनी स्त्री सर्पान् दमयति अनया दम-णिच्-करणे ल्युट् ङीप्। वन्याकर्कोट्यां राजनि०। [राजनि०।

सर्पपुष्पी स्त्री सर्पः सर्पदन्त इव पुष्पमस्याः। नागदन्त्यां

सर्पफणिज पु० सर्पस्य फणे जायते जन-ड। सर्पफणजाते-मणौ शब्दमा०।

सर्पभुज् पु० सर्पं भुङ्क्ते भुज-क्विप्। १मयूरे हेमच०। [अमरः। २सर्पभक्षके गरुडादौ च।

सर्पराज पु० सर्पाणां राजा टच् समा०। वासुकौ नागभेदे

सर्पलता स्त्री सर्प इव लता। नागवल्ल्यां ताम्बूल्यां राजनि०

सर्पसत्र न० सर्पैरेव होम्यद्रव्येण तन्नाशनार्थं वा सत्रम्। जनमेजयानुष्ठिते महाभारतप्रसिद्धे सर्पनाशनार्थे यज्ञ-भेदे भा०आ० ५१अ०५८अ० तत्कथा दृश्या।

सर्पसहा स्त्री सर्पं सहते सह-अच्। सर्पकङ्कालीलतायां राजनि०। [च।

सर्पहन् पु०सर्पं हन्ति हन-क्विप्। १नकुले हेमच० २गरुडे

सर्पाक्षी स्त्री सर्पस्येवाक्षि पुष्पं यस्याः अच् समा०। १गन्ध-नाकुल्याम् राजनि०। [२वृश्चिकन्दभेदे च राजनि०।

सर्पाख्य पु० सर्पस्याख्याऽऽख्या यस्य। १नागकेशरे रत्नमा०।

सर्पाङ्की स्त्री सर्पस्येवाङ्कः यस्याः ङीष्। १सर्पकङ्कालीलतायां रत्नमा०। २सिंहल्यां राजनि०।

सर्पादनी स्त्री सर्पं सर्पविषमत्त्यनया अद-ल्युट् ङीप्। नाकुल्यां राजनि०। [प्रभृतयोऽत्र।

सर्पारति पु० ६त०। १गरुडे हेमच० २नकुले च सर्पारि-

सर्पावास न० सर्पाणामावासो यत्र। १चन्दनवृक्षे राजनि०। ६त०। २सर्पाणामावासे पु०।

सर्पाशन पुंस्त्री० सर्पमत्ति अश-ल्युट्। १मयूरे हेमा०। स्त्रियां ङीप्। २गरुडे पु०।

सर्पिस् न० सृप-इसि। घृते अमरः।

सर्पिणी स्त्री सृप-णिनि ङीप्। १सर्पयोषिति शब्दर०। २क्षुपभेदे राजनि०। ३गमनकर्त्तरि त्रि० स्त्रियां ङीप्।

सर्पीष्ट न० सर्पीणां भुजगीनामिष्टम्। चन्दने रत्नमा०।

सर्पेष्ट न० सर्पाणामिष्टम्। चन्दने जटा० २सर्पाभीष्टे त्रि०।

सर्ब सर्पणे भ्वा०पर०सक० सेट। सर्बति असर्बीत् अयोपदेशत्वान् न षत्वमित्येके नोपदेश एव न्याय्यः।

सर्व पु० सृ-व तस्य नेच्वम्। १शिवे २विष्णौ च विष्णुस०। "असतश्च सतश्चैव सर्वस्य प्रभवाव्ययौ। सर्वस्य सर्व-दात्तानात् सर्वमेतं प्रचक्षते" विष्णुपु० तन्नामनिरुक्तिः। तथा च सर्वं श्रेयस्त्वेन तत्प्राप्तत्वादिना वाऽस्त्यस्य अच्। ३समग्रे ४सकले च त्रि० अमरः। असंज्ञायामस्य सर्वना-मसंज्ञा तत्कार्य्या। सर्वशब्दार्थस्तु स्वार्थान्वयितावच्छे-दकधर्मव्यापकताद्दशधर्मावच्छिन्नान्वयितावच्छेदकावच्छि-न्नाश्रयप्रत्योगिकधर्मावच्छिन्नः" गा०ध०। "व्यापकत्वाव-च्छिन्नः दिनकरौ। यथा सर्वे घटा रूपवन्त इत्यादौ सर्व-पदार्थः। "बुद्धिविषयत्वादित्वावच्छिन्नसमूहत्वात्" इति शाब्दिका वदन्ति। [२सर्वसोढरि त्रि०।

सर्वसहा स्त्री सर्वं सहते खच् मुम् च। १पृथिव्याम् अमरः

सर्वकर्त्तृ पु० सर्वं करोति कृ-तृच्। १चतुर्मुखे ब्रह्मणि शब्दर०। २परमेश्वरे च।

सर्वकर्मीण त्रि०सर्वकर्मभ्योऽलं ख। सर्वकरणसमर्थे पदार्थे "संग्रामे सर्वकर्मीणाविति भट्टिः। [नटे शब्दर०।

सर्वकेशिन् पु० अभिनेयानां सर्वेषामिव केशोऽस्त्रस्य इनि। नटे मेदि०। ४वायौ ५आत्मनि च पु० शब्दमा०। ६सर्वस्वामिनि त्रि०। ७प्रियङ्गुवृक्षे स्त्री शब्दच० टाप्।

सर्वगन्ध न०सर्वे गन्धा अत्र। "चातुर्जातककर्पूरकक्कोलायुक्तकङ्कुमम्। सवल्कसहितञ्चैव सर्वगन्धं प्रकीर्त्तितम्" भावप्र० पूर्वे १गन्धद्रव्यसमूहभेदे। सर्वान् गन्धयति स्निह्यति नेहारकाले गन्धत्वच् सर्वगन्धा उत्पाद्यतया सन्त्यस्य वा। २परमेश्वरे सर्वनाशकत्वात् सर्वगन्धहेतुत्वादास्य तथात्वम्।

सर्वगन्धिन् पु० सर्वत्र गन्धिरिवात्र। १पिप्पलीमूले राजनि०।

सर्वङ्कष पु० सर्वं कषति कष खच् मुमच। १पापे २सर्वातिरेकिणि त्रि०। [त्रि०कौ०।

सर्वजनीन त्रि० सर्वजनेषु विदितः ख। सर्वत्र विख्याते

सर्वज्ञ पु० सर्वं जानाति ज्ञा-क। १शिवे २बुद्धे अमरः। ३परमेश्वरे च "यः सर्वज्ञः सर्ववित्" श्रुतिः। ४सर्वज्ञानकर्त्तरि त्रि०। ५दुर्गायां स्त्री "सर्वज्ञा सर्ववेत्तृत्वात्" देवीपु० ४८अ०।

सर्वतःशुभा स्त्री सर्वतः शुभं यस्याः। प्रियङ्गुवृक्षे शब्दच०।

सर्वतस् अव्य० सर्व+तसिल्। समन्तत इत्यर्थे अमरः।

सर्वतिक्ता स्त्री सर्वतः तिक्ता। काकमाच्यां राजनि०।

सर्वतोभद्र पु०न० सर्वतो भद्राणि सुखानि यस्य। १चतुर्द्वारयुक्ते १गृहभेदे प्रतिष्ठादौ पूज्यदेवतानां २मण्डलभेदे सर्वतोभद्रमण्डलशब्दे दृश्यम्। ज्योतिषोक्ते ३शुभाशुभज्ञानार्थे चक्रभेदे चक्रशब्दे २८१५ पृ० दृश्यम्। अलङ्कारोक्ते वस्तुभेदात्मके ४चित्रकाव्ये च। अलङ्कारशब्दे ४०७ पृ० दृश्यम् सर्वतो भद्रगत्वात्। ५निम्बवृक्षे पु० अमरः। ६गारुड्यौं ७जटयोषिति च स्त्री मेदि०।

सर्वतोभद्रचक्र न० सर्वतो भद्रं यत्र तादृशं चक्रम्। ज्योतिषोक्ते शुभाशुभज्ञानार्थे चक्रभेदे चक्रशब्दे २८१५ पृ० दृश्यम्। [भेदे अलङ्कारशब्दे ४०७पृ०दृश्यम्।

सर्वतोभद्रबन्ध पु० सर्वतो भद्राकारेण बन्धः। चित्रकाव्य-

सर्वतोभद्रमण्डल न० सर्वतो भद्रनामकं मण्डलम्। प्रारदातिलकादुक्ते प्रतिष्ठादौ —पूज्यदेवतामण्डलभेदे तत्र लेखनप्रकारस्तु हेमाद्रौ स्कान्दे "प्राग्दीच्यां गता रेखाः कुर्य्यादेकोनविंशतिम्। खण्डेन्दुवक्त्रिपात कोणे पृच्छला पञ्चभि पदैः। एकादशपदा वल्ली भद्रन्तु नवभिः पदैः। चतुर्विंशतिपदा वापी परिधिर्विंशत्या पदैः। मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं लिखेत्। श्वेतेन्दुः पृच्छला, कृष्णां वल्लीं नीलेन पूरयेत्। भद्राकृतिः सिता वापी परिधिः पीतवर्णकः। बाह्यान्यष्टदलैः श्वेता कर्णिका पीतवर्णिका। परिध्यावेष्टितं पद्मं बाह्ये सत्वरजस्तमः। तन्मध्ये स्थापयेद्देवान् ब्रह्मादींश्च सुरासुरानिति"। शारदायामन्यथोक्तं यथा "चतुरस्रचतुःकोष्ठे कर्णसूत्रसमन्विते। चतुर्ष्वपि च कोष्ठेषु कोणसूत्रचतुष्टयम्। ततः कोष्ठेषु मध्यस्थेषु सूत्राणि पातयेत्। यावत् शतद्वयं मन्त्री षट्पञ्चाशत् पदान्यपि। तावत्सूत्रैव विधिना तत्र सूत्राणि पातयेत्। षट्त्रिंशता पदैर्मध्ये लिखेत् पद्मं सुलक्षणम्। बाह्यपङ्क्तित्रयं भवेत् पीठं षड्भिर्युग्मैर्न वीथिका। द्वारशोभोपशोभाश्च शिष्टाभ्यां परिकल्पयेत्। शास्त्रोक्तविधिना मन्त्री ततः पद्मं समालिखेत्। पद्मक्षेत्रस्य सन्त्यज्य द्वादशांशं बहिः सुधीः। तन्मध्यं विभजेद्भूतैस्त्रिभिः समविभागतः। आद्यं स्यात् कर्णिकास्थानं केसराणां द्वितीयकम्। तृतीयं पद्मपत्राणां सूत्रांशेन दलाग्रकम्। बाह्यसूत्रान्तरालस्य मानेन विधिना सुधीः। निधाय केसराग्रेषु परितोऽर्द्धनिशाकरान्। लिखित्वा सन्धिसंस्थानि तत्र सूत्राणि पातयेत्। दलाग्राणाञ्च यन्मानं तन्मानाद्वृत्तजालिखेत्। तदन्तरालतन्मध्यसूत्रयोरुभयतः सुधीः। व्यालिखेद्बाह्यसूत्रेण दलाग्राणि समन्ततः। दलमूलेषु युगशः केसराणि प्रकल्पयेत्। एतत् साधारणं प्रोक्तं षड्जं तन्त्रविदिभिः। पदानि तीणि पादार्द्धं पीठकोष्ठेषु मार्जयेत्। अवशिष्टैः पदैर्विद्वान् पीठमात्राणि कल्पयेत्। पदानि वीथिसंस्थानि मार्जयेत् षड्भागभेदतः। दिक्षु द्वाराणि रचयेत् द्विचतुःकोष्ठैकसूत्रतः। पदैस्त्रिभिरधैकेन शोभाः स्युर्द्वारपार्श्वयोः। उपशोभाः स्युरेकेन त्रिभिः कोष्ठैरनन्तरम्। अवशिष्टैः पदैः भद्रमिः कोणानां स्याच्चतुष्टयम्। रक्षयेत् पञ्चभिर्वर्णैर्मण्डलं तन्मनोहरम्। पीतं हरिद्राचूर्णं स्यात् सितं तण्डुलसम्भवम्। कृष्णञ्चूर्णमरुणं कृष्णदग्धपुलाकजम्। बिल्वादिपत्रजं श्यामभित्युक्तं वर्णपञ्चकम्। अङ्गुलोत्सेधविस्तारः शोभारेखा सिताः

शुभाः । कर्णिकां पीतवर्णेन केसरागग्ररुणेन च । शुक्लवर्णानि पत्राणि तत्सन्धीन् श्यामलेन च । रजसा रञ्जयेन्मन्त्री यदा पीतैक कर्णिका । केसराः पीतरक्ताः स्युररुणानि दलान्यपि । सन्धयः कृष्णवर्णाः स्युः सितेनाथ सितेन वा । रञ्जयेत् पीठमार्गांश्च पादाः स्युररुणप्रभाः । गात्राणि तस्य शुक्लानि वीथीषु चतसृष्वपि । आलिखेत् कल्पलतिकादलपुष्पफलान्विताः । वर्णैर्नानाविधैश्चित्राः सर्वदृष्टिमनोहराः । द्वाराणि श्वेतवर्णानि शोभा रक्ताः समीरिताः । उपशोभाः पीतवर्णा कोणान्यसितभानि च । तिस्रो रेखा बाह्यः कार्याः सितरक्तासिताः क्रमात् । मण्डलं सर्वतोभद्रमेतत् साधारणं स्मृतम्" । अपरञ्च "चतुरस्रं भुवं भित्त्वा दिग्भ्यो द्वादशधा सुधीः । पातयेत् तत्र सूत्राणि कोष्ठानां दृश्यते शतम् । चतुश्चत्वारिंशदाढ्यं पश्चात् षट्त्रिंशताम्बुजम् । कोष्ठैः प्रकल्पयेत् पीठं षडङ्क्त्या नैवात्र वीथिकाः । द्वारशोभे यथा पूर्वमुपशोभा न दृश्यते । अवशिष्टैः पदैः कुर्यात् षड्भिः कोष्ठानि तन्त्रवित् । विदध्यात् पूर्ववत् शेषमेवं वा मण्डलं स्मृतम्" । "चतुरस्रे चतुःषष्टिं पदान्यारचयेत् सुधीः । पदैश्चतुर्भिः पङ्क्त्या स्यात् मध्ये तत् पूरितैः पुनः । वीथीशतत्रयं कुर्यात् मण्डलान्तरशालिकाः । दिग्गतेषु चतुष्केषु पङ्कजानि समालिखेत् । विदिग्गतचतुष्कानि भित्त्वा षोड़शधा सुधीः । मार्जयेत् स्वस्तिकाकारं श्वेतपीतारुणासितैः" । मार्जनमाह राघवभट्टधृतम् "विदिग्गतचतुष्कोणान् भित्त्वा षोड़शधा सुधीः । वज्रादिकोष्ठत्रितये मध्योर्ध्वमपि मार्जयेत् । रजोभिः पूरयेत्तानि स्वस्तिकानि त्रिवार्तितः । प्राक् प्रोक्तेनैव मार्गेण शेषमन्यत् समापयेत् । नवनाभमिदं प्रोक्तं मण्डलं सर्वसिद्धिदम् । पञ्चाब्जमण्डलं प्रोक्तमेतत् स्वस्तिकवर्जितम् । दीक्षायां देवपूजायां मण्डलानां चतुष्टयम् । सूत्रतन्त्रानुसारेण प्रोक्तं सर्वसमृद्धिदम्" ।

सर्वतोमुख न० सर्वतोमुखमस्य । १जले अमरः २व्याकाशे मेदि० ३शिवे ४ब्रह्मणि ५परमेश्वरे ६आत्मनि च पु० मेदि० ७ब्राह्मणे शब्दच० ८अग्नौ शब्दमा० । "सर्वतःपाणिपादान्तः सर्वतोऽक्षिशिरोमुखः । विश्वरूपो महानग्निः प्रणीतः सर्वकर्मसु" तिं० उक्तेः [वेत्यर्थे । वञ्छेत्यात्वम् ।

सर्वत्र अव्य० सर्व-त्रल् । सर्वस्मिन् काले देशे सर्वस्यां दिशि

सर्वत्रग पु० सर्वत्र गच्छति गम-ड । १वायौ शब्दर० २सर्वत्रगामिनि त्रि० । [वत्र गन्तरि त्रि० स्त्रियां ङीप् ।

सर्वत्रगामिन् पु० सर्वत्र गच्छति गम-णिनि । १वायौ २सर्व-

सर्वथा अव्य० सर्वप्रकारम् थाल् । १सर्वप्रकारे २भृशे ३प्रतिज्ञायां ४हेतौ च शब्दर० ।

सर्वदम पु० सर्वान् दमयति दम-णिच्-अण् । सर्वदमने शाकुनले भरतनटपे हेमच० ।

सर्वदमन पु० सर्वान् दमयति दम-णिच्-ल्यु । १दुष्यन्तसुते भरतनटपे त्रिका० । २सर्वदमनकर्त्तरि त्रि० ।

सर्वदर्शिन् पु० सर्वं समभावेन पश्यति दृश-णिनि । १बुद्धे २परमेश्वरे च । ३सकलद्रष्टरि त्रि० स्त्रियां ङीप् ।

सर्वदा अव्य०सर्वस्मिन् काले दाच् । सर्वस्मिन् काले शब्दर० ।

सर्वदुःखक्षय पु० सर्वेषामाध्यात्मिकाधिदैविकाधिभौतिकानां दुःखानां क्षयः । आत्यन्तिकदुःखक्षयनिवृत्तौ मोक्षे हेमच० "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" सां० सू० "स्वसमानाधिकरणदुःखासमानकालीनत्वं दुःखध्वंसस्वरूपनिवृत्तेरात्यन्तिकत्वम् ।

सर्वदेवमुख पु० सर्वेषां देवानां मुखं यत्र । अग्नौ रत्नमा० ।

सर्वद्रव्यन्च् त्रि०सर्वमञ्चति पूजयति अनृच-क्विप् अद्भावाभावः न लोपः । सर्वस्य पूजके । भत्वे सर्वद्रव्यङ् इत्यादि । गत्यर्थस्य लोपे सर्वद्रव्यच् इत्येव सर्वगामिनि । भत्वे सर्वद्रीच इति भेदः ।

सर्वधुरावह त्रि० सर्वेषां धुरं वहति वह-अच् । सर्वभारवाहके हृषादौ अमरः ।

सर्वधुरीण त्रि० सर्वां धुरं वहति ख । सकलभारवाहके हृषादौ अमरः ।

सर्वनाम पु० सर्वेषां नाम वाचकं संज्ञात्वेऽपि सुभ्वा० न णत्वम् । व्याकरणोक्ते कार्यविशेषार्थं कृतसंज्ञायुते सर्वादिशब्दभेदे "सर्वादीनि सर्वनामानि" पा०सर्वनामशब्दार्थस्तु वक्तृबुद्धिविषयतावच्छेदकधर्मोपस्थित्यधर्मविशिष्टः ।

सर्वपूर्णत्व न० सर्वैः पूर्णत्वम् । सम्भारे सामग्र्याम् त्रिका० ।

सर्वप्रहरणायुध पु० सर्वेषां प्रहरणानि सर्वाणि वा प्रहरणानि आयुधान्यस्य । विष्णौ "सर्वप्रहरणायुधः" विष्णुस० व्युत्पत्तिद्वययोगात् नामद्वयम् तेन नामसहस्रपूर्त्तिः" भा० । [भक्ते त्रि० १वक्षौ पु० ।

सर्वभक्षा स्त्री भक्ष-अण् टाप् । १अजायां हेमच० २सर्व-

सर्वमङ्गला स्त्री सर्वाणि मङ्गलान्यस्याः ५ब० सर्वाणि मङ्गलानि देयत्वेनास्त्यस्याः अच् वा । दुर्गायाम् अमरः । "सर्वाणि हृदयस्थानि मङ्गलानि शुभानि च । ददाति

चेष्टितानू लोके सा तेन सर्वमङ्गला" देवीपु० ४५ अ०।
सर्वमय त्रि० सर्वात्मकः मयट्। १सर्वात्मके २परमेश्वरे पु०।
सर्वमूल्य न० ६त०। कपर्दके त्रिका०।
सर्वमूषक पु०सर्वं मुष्णाति मुष-वुन् पृषो०। काले श्वेतच०।
सर्वरस पु० सर्वैरसमयः। (धुना) १शालरसे अमरः ७व०। २वीणादिवाद्ये मेदि०। ३परिच्छदे शब्दर० कर्म०। ४लवणे रसे। सर्वाणि रसयति रस-अण्। ५परमेश्वरे सैन्धवघनवदु तस्य सर्वत आनन्दमयत्वात् तथात्वम्।
सर्वरसोत्तम पु० सर्वेषु रसेषु उत्तमः। लवणे रसे श्वेतच०।
सर्वरात्र पु० सर्वा रात्रिः अच् समा०। "रात्राह्नाहाः पुंसीति" पा०पुंस्त्वम्। सकलरात्रौ त्रि०को०। [दिरयम्।
सर्वरी स्त्री सृ-वनिप् ङीष् र च। रात्रौ धरणि तालव्या-
सर्वर्त्तुपरिवर्त्त पु० सर्वर्तूनां परिवर्त्तो यत्र। वत्सरे जटा०
सर्वला(लो) स्त्री सर्वं लाति ला-क वा गौरा० ङीष्। तोमरास्त्रे अमरः।
सर्वलिङ्गिन् पु० सर्वेषां लिङ्गानि सन्त्यस्य इनि। वेद-विरुद्धाचारिणां बौद्धादीनां लिङ्गवत्सु पाषण्डेषु अमरः
सर्वलोह पु० सर्वः लोहमयोऽवयवो यस्य। लौहमये बाणे श्वेतच०। [गाम्भारीवृक्षे जटा०।
सर्ववर्णिका स्त्री सर्वं वर्णयति वर्ण-ण्वुल् अत इत्त्वम्।
सर्वविद् पु० सर्वं वेत्ति विद-क्विप्। १परमेश्वरे २सर्वज्ञातरि त्रि०।
सर्ववेद पु० सर्वो वेदान् अधीते उक्त्या० ठक्। "सर्वादेः मादेश्च लुक् वक्तव्यः" वार्त्ति० तस्य लुक्। १सर्ववेदाध्ययनकर्त्तरि। सर्वं वेत्ति विद-अण् उप०। २सर्वज्ञे त्रि०।
सर्ववेदस् पु० सर्वाणि धनानि वेद्यते लभ्यते पात्राय दक्षिणार्थं ददाति विद-लाभे णिच-असि। सर्वस्वदक्षिणकविश्वजिन्नामकादियागकर्त्तरि अमरः।
सर्ववेदस न०सर्वं वेदः गदे विद्यमानं धनं त्रि० अच्समा०। सर्वस्वे गदे विद्यमाने सर्वधने तद्द विश्वजिद्यागे दक्षिणात्वेन विहितम्। "सहस्रं सर्ववेदसं विश्वजितः" कात्या०श्रौ० २२।१।६ सहस्रसर्ववेदसयोर्विश्वजिति विकल्पः। सर्ववेदसपक्षे इदमुच्यते। "ज्येष्ठं पुत्रमपभ्रंश्य भूमिशूद्रवर्जं योगाविशेषात् सर्वेषाम्" स्मृ०। "ज्येष्ठपुत्रस्य विभागं दत्त्वा भूमिशूद्रवर्जं ददाति कृत एतत् सर्वमनुष्याणां हि भूम्या योगोऽविशिष्टः धारण-षड्क्रमणद्वारेण, शूद्रस्य च शुश्रूषोपनतेति" कर्क। "भूमेर्धारणद्वारेण शयनासनषड्क्रमणादिसम्बन्धः सर्वेषामविशिष्टः यः शूद्रो धर्मार्थं सेवां करोति स सर्वेषामविशिष्ट एव संपद्यते। "शूद्रदानं वा दर्शनाविरोधाभ्याम्" स्मृ० वाशब्दः पक्षव्यावृत्तौ शूद्रस्य दानं च भवति दर्शयति हि शूद्रस्य दानं पुरुषमेधे "सपुरुषं प्राची दिग्घांतुरिति" न च विरोधो गर्भदासस्य। तस्माच्छूद्रो दीयत एव अनेन च न्यायेन भूमेरप्येकदेशदानेनैव न विरोधः "परिमाणे सर्वमविशेषात्" स्मृ०। सर्वस्वपरिमाणे यस्य यावत् स्वं तत्सर्वं गद्यते सर्वं वेदः सर्ववेदसमिति तेन प्रागपि सहस्रात् सर्ववेदसं भवति एवं प्राप्ते आह। सर्वस्वपरिमाणे अपेक्षिते सर्वस्वं यस्य यावद्धनं गदे सुवर्णादि तत्सर्वं देयम् कुतः अविशेषात् न च सर्वस्वं ददानीति (अस्य) वाक्यशेषः स्मृतः येन सहस्रान्न्यूनमतिरिक्तं वेति विशेष आश्रीयते। "अधिकं वा प्रकल्पयेदुपहात्" स्मृ०। "अधिकं वा सहस्रात् सर्ववेदसं प्रकल्पयितव्यम्। प्रकल्प्य हि सर्ववेदसं सहस्रेणानुग्रहं दर्शयति कोऽर्हतीमनुष्यः सर्ववेदसं दातुं तस्मात् सहस्रं देयमिति एतच्च सहस्रादधिकं उपपद्यते नेतरथेति एवं तावदत्र (विश्वजिति) सहस्रादधिकं सर्ववेदसमित्युक्तम्" कर्कः। "सर्वस्वे प्रतिनिधिर्वा" स्मृ० "दीयते अप्रसिद्धत्वादुच्यते" कर्क० "धेन्वनड्वुत्सारधान्यपल्यदासमिथुनमहानसारोहणविमितशयनानि" स्मृ०। "धेन्वादीनि दासमिथुनान्तानि प्रसिद्धानि महानसोपयोगिकं द्रव्यं तास्तत्रवर्तिमहानसशब्देनोच्यते आरोहणं च युग्यं विमितशयने प्रसिद्धे एव। धेनुः प्रसिद्धा अनड्वान्बलीवर्दः सीरं हलम् धान्यं गोधूमादि-पल्यं पलादिमानार्हम्। दासमिथुनं दासीदासौ महानसं तास्तत्रवर्तिद्रव्योपकरणम् आरोहणं हस्त्यश्वं विमितं गदे शयनं खट्वादि एतानि दद्यात्" कर्कः।
सर्ववेशिन् पु० सर्वेषां वेशो धार्य्यत्वेनास्त्यस्य इनि। नटे श्वेतच०। [२सर्वोचिते त्रि०।
सर्वसहा पु० सर्वं सहतसुचितं यस्य। १अष्टिधान्ये शब्दच०
सर्वसंसर्गलवण न० सर्वसंसर्गेण जातं लवणम्। चौरकेलवणे राजनि०।
सर्वसन्नहन न० सर्वेषां सन्नहनं युद्धार्थं सज्जीकरणं यत्र। चतुरङ्गसैन्यसज्जीकरणेन युद्धयात्रायाम् अमरः।
सर्वसह पु० सर्वं सहते अच्। १गुग्गुलौ रत्नमा० २सर्वंसहिष्णौ त्रि०। [२सकलार्थसाधने त्रि०।
सर्वसिद्धि पु० सर्वेषां सिद्धिरस्मात्। १श्रीफले शब्दच०।
सर्वस्व न० कर्म०। सकलधने सर्ववेदसशब्दे दृश्यम्।

सर्वस्वदक्षिण पु० सर्वस्वं दक्षिणा यत्र । विश्वजिद्याजकयागभेदे सर्ववेदसशब्दे दृश्यम् । [२सकलदक्षिणयुते त्रि० ।

सर्वहित न० सर्वेषां हितम् । १मरिचे राजनि० ५ व० ।

सर्वाङ्गसुन्दर पु० औषधभेदे "रसगन्धकतुल्यांशौ द्वौ भागौ टङ्कणस्य च । मौक्तिकं विद्रुमं शङ्खमवनीय समांशतः । हेमभस्मार्द्धभागञ्च सर्वं खल्वे निधापयेत् । निम्बुद्रवस्य योगेन पिष्टिकां कारयेद्भिषक् । पश्चात् गजपुटं दद्यात् शीतलञ्च समुद्धरेत् । हेमभस्ममं तीक्ष्णं तीक्ष्णार्द्धौ द्वरदौ मतः । एकीकृत्य समस्तानि सूक्ष्मचूर्णानि कारयेत् । ततः पूजां प्रकुर्वीत भक्षयेत् दिवसे शुभे । सर्वाङ्गसुन्दरो ह्येष रोगराजनिकृन्तनः । वातपित्तज्वरे घोरे सन्निपाते सुदारुणे । अर्शःसु ग्रहणीरोगे मेहे गुल्मे भगन्दरे । निहन्ति वातजान् रोगान् स्त्रीप्रकांश्च विशेषतः । पिप्पलीमधुसंयुक्तं घृतयुक्तमथापि वा । भक्षयेत् पर्णखण्डेन सितया चार्द्रकेण वा । गुडूचीरस सूक्ष्मितं प्रमेहे च विशेषतः । रसरत्नाकरोक्तः सिद्धयोगो रसोत्तमः । राजिकाक्षिङ्गुतैलाम्लं लवणाद्यं विवर्जयेत्" भैषज्यरत्ना० । अत्र हेमभस्मतः सर्वद्रव्यार्द्धत्वमिति मतान्तरम् ।

सर्वाङ्गीण त्रि० सर्वाण्यङ्गानि व्याप्नोति ख । सर्वावयवव्यापके "सर्वाङ्गीणे तरुत्वचे" इति भट्टिः ।

सर्वाणी स्त्री सर्वेभ्य आनयति नीचं याति-नी-ड पृषोदरादित्वात् णत्वम् । दुर्गायाम् "सर्वान् नीचान् प्रापयति जन्म मृत्युजरादिकम् । चराचरांश्च विश्वस्थान् सर्वाणी तेन कीर्त्तिता" ब्रह्मवै० प्र० ५३ अ० तन्निरुक्तिः ।

सर्वानुकारिणी स्त्री सर्वमनुकरोति अनु+कृ-णिनि ङीप् । १शालपर्णाम् राजनि० २सकलसदृशे त्रि० स्त्रियां ङीप् ।

सर्वानुभूति स्त्री सर्वेषामनुभूतिर्यत्र । १स्वनामख्यातायाम् अमरः २तत्त्वज्ञानिनि त्रि० ३जितमित्रे हेमच० ।

सर्वान्नभोजिन् त्रि० सर्वेषामन्नं सर्वाण्यन्नानि वा भुङ्क्ते भुज-णिनि । सर्वान्नभक्षके अमरः । [भक्षके अमरः

सर्वान्नीन त्रि० सर्वेषामन्नं सर्वमन्नं वा भुङ्क्ते ख । सर्वान्न

सर्वाभिसन्धिन् पु० सर्वत्र आचरणे अभिसन्धास्यत्व इनि । १सर्वत्राभिसन्धियुक्ते जने २कृत्रिमतापसे त्रिका० ।

सर्वाभिसार पु० अभिक्रियते यत्र अभि+सृ-घञ् वृद्धिः । चतुरङ्गसैन्यसङ्घाते युद्धयात्राभेदे ।

सर्वार्थसिद्ध पु० सर्वेषु अर्थेषु सिद्धः । १बुद्धे अमरः ३ब० २सकलाभीष्टसिद्धियुते त्रि० ।

सर्वार्थानुसाधिनी स्त्री "धर्मादीन् चिन्तितान् यस्मात् सर्वलोकेषु यच्छति । ततो देवी समाख्याता सा सर्वार्थानुसाधिनी" देवीपु० ४५ अ० निरुक्तायां दुर्गायाम् ।

सर्वावसर पु० सर्वेषां कर्मणामवसरोऽपहरणं यत्र । अर्द्धरात्रे त्रिका० । [२सकलास्त्रयुते त्रि० ।

सर्वास्त्रा स्त्री सर्वाणि अस्त्राणि यस्याः । १देवीभेदे हेमच०

सर्वाह्ण पु० सर्वमह्नः टच्समा० ह्नादेशः णत्वम् । सकलदिने

सर्वौघ पु० सर्वेषां चतुरङ्गसैन्यानामोघो वृन्दमभिसारे यत्र । अघोभूतसर्वसैन्याभिसारे अमरः कर्म० २सर्वजलवेगे मेदि०

सर्वौषधि स्त्री कर्म० । "कुष्ठमांसीहरिद्राभिर्वचाशैलेयचन्दनैः । सुराचम्पककर्पूरैर्युक्तः सर्वौषधिः स्मृता" इत्युक्ते कुष्ठादिद्रव्यवर्गे राजनि० । हेमाद्रौ कल्पोगपरिशिष्टे "कुष्ठं मांसी हरिद्रे द्वे सुराशैलेयचन्दनम् । वचा चम्पककुस्तञ्च सर्वौषध्यो दश स्मृताः" ता एवोक्ताः । शब्दचन्द्रिकायामेता एव सर्वौषधिगणत्वेनोक्ताः ।

सर्वौषधिगण पु० सर्वासामोषधीनां गणः । "सुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् । षष्ठीचम्पककुस्तञ्च सर्वौषधिगणः स्मृतः" शब्दच० उक्ते द्रव्यगणे ।

सर्षप पु० सृ-अप सुक् च । (सरिषा) १सस्यभेदे अमरः । "सर्षपस्तु रसे पाके कटुर्हृद्यः सतिक्तिकः । तीक्ष्णोष्णः कफवातघ्नो रक्तपित्तास्रवर्द्धनः । रक्तोद्गरोजयेत् कण्डूकुष्ठकोठक्रिमिप्रदात् । यथा रक्तस्तथा गौरः किन्तु गौरोवरो मतः" तच्छाकगुणाः "कटुकं सार्षपं शाकं कण्डूकृमिकफप्रणुत् गुरु । कफपाकं विदाहि स्यादुष्णं रूक्षं त्रिदोषकृत् । सक्षारं लवणं तीक्ष्णं स्वादु शाकेषु विन्दितम् । तीक्ष्णोष्णं सार्षपं नालं वातश्लेष्मव्रणापहम् । कण्डूकृमिहरं हृद्यं कुष्ठघ्नं रुचिकारकम्" भावप्र० । "जालान्तरगते भानौ यच्छाणु दृश्यते रजः । तैस्त्रसरेणुभिः सप्तभिस्त्रिभ्या त्रिभ्यश्च सर्षपः" शब्दच० उक्ते २मानभेदे । ३खड्गनिकायां स्त्री त्रिका० ङीष् ।

सर्षपतैल न० सर्षपस्य स्नेहः सर्षप+स्नेहार्थे-तैलच् । सर्षपस्नेहरूपे तैलभेदे "सर्षपतैलं तिक्तं कटुकं वातकफविकारघ्नम् । पित्तासृग्दोषदं कृमिकुष्ठघ्नं तिलजवच्चक्षुष्यम्" राजनि० ।

सल न० सल-अच् जले अमरः ।

सलिल न० सल-इलच् । १जले अमरः । तद्वैकल्ये फलं जलवैकल्यशब्दे ३०७२ पृ० दृश्यम् । ज्यो० उक्ते २जलरेवतीके उत्तराषाढानक्षत्रे लग्नावधिके ३चतुर्थस्थाने च

सलिलकुन्तल पु० सलिलस्य कुन्तल इव । शैवाले त्रिका० ।

सलिलज न० सलिले जायते जन-ड । १पद्मे राजनि० । २जलजातमात्रे त्रि० ।

सलिलनिलय पु० सलिलं निलयो यस्य । १जलधरे २मीनकर्कटादौ च "सलिलनिलयाभ्या वयाः सरीसृपजातयः" ज्यो०त० ।

सलिलराशि पु० ६त० । समुद्रे सलिलनिष्यादयोऽस्य ।

सलिलेन्धन पु० सलिलमिन्धनमिव दाह्यं यस्य । वडवानले त्रिका० ।

सल्लकी स्त्री शल-कृ ल्युट् ङीष् पृषो० शल्ल: गौरा० ङीष् । शल्लक्यां गजभक्ष्यायाम् अमरे पाठान्तरम् ।

सव पु० सूयते सु-अच् । १यज्ञे अमरः । २स्नाने मेदि० । अच् । ४सूर्ये ४यर्कवृक्षे ५जले न० जटा० ।

सवन न० सु-ल्यु-वा ल्युट् । १यज्ञाङ्गे २स्नाने अमरः । सोमनिष्पीड़ने ३अभिषवे अमरः ४सोमपाने भरतः । ५यज्ञे ६प्रसवे च रभसयज्ञस्याने । यज्ञियसवनानि च तीणि प्रातर्मध्यन्तृतीयभेदात् । "चर्वीधि निर्वपत्यान्नेयमैन्द्रं माध्यन्दिनसवनम्, वैश्वदेवं तृतीयसवनमित्यर्थवादात्" । "प्रातर्मध्यन्दिनापराह्णेषु एकैकं हविर्निर्वपति" कर्कः ।

सवयस् त्रि० समानं वयो यस्य समानस्य सः । वयस्ये अमरः "सवयोभिरन्वितः" इति रघुः ।

सवर्ण पु० समानोवर्णो यस्य । १तुल्यरूपे हेमच० २एकजात्याख्ये यथा विप्रस्य विप्रजातिः क्षत्रियस्य क्षत्रियजातिः "तुल्यास्यप्रयत्नं सवर्णमिति" पा० उक्ते स्थानप्रयत्नाभ्यां १तुल्ये वर्णे च यथा अकारस्य स्थानेन तुल्यो अकारादिः, प्रयत्नाभ्यां न अकारस्य चकारादिः, लकारस्य अकारः अकारस्य अकारः । हकारस्य वर्ग्यांश्चतुर्था वर्णाः । सह वर्णेन । ३सवर्णेऽन्विते त्रि० ।

सवर्णील न० सवर्णं+कृञो विच्-धात्वे ल्युट् । तुल्यरूपता तत्सम्पादने "अंशसवर्णेन क्वात्" लोला० ।

सवर्षा स्त्री सह वर्षेण । विद्धतायां भरतः ।

सवासस् त्रि० सह वाससा । १वस्त्रत्यागविशिष्टस्नानाधमे स्नाने यति "सवासा जलमाप्लवेत्" स्मृतिः ।

सविकल्पक न० सह-विकल्पेन कप् । वेदान्तोक्ते ज्ञातृज्ञेयभेदादिकल्पनासहिते १समाधिभेदे न्यायोक्ते एकस्मिन् धर्मिण्यपरसंसर्गावगाहिनि २ज्ञानभेदे च पात०उक्ते सम्प्रज्ञाते ३समाधिभेदे समग्रज्ञातशब्दे ४७० पृ० दृश्यम् । निर्विकल्पकशब्दे ४१०१पृ० दृश्यम् ।

सविकाश त्रि० सह विकाशेन । १प्रफुल्ले विकसिते २कृतद्वारे च "जगन्ति यस्यां सविकाशमासत" माघः ।

सविचारा स्त्री पात० उक्ते समापत्तिरूपसमाधिभेदे निर्विचारशब्दे ४१०१ पृ० दृश्यम् ।

सवितर्का स्त्री पात० उक्ते समापत्तिरूपसमाधिभेदे "तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः" सू० "तद्यथा गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्यविभागेन विभक्तानामपि ग्रहणं दृष्टं विभज्यमानास्यन्ये शब्दधर्मा अन्ये ऽर्थधर्मा अन्ये विज्ञानधर्मा इत्येतेषां विभक्तः पन्थाः, तत्र समापद्यमान योगिनोयोगबलाद्यः समाधिप्रज्ञायां समारूढः स चेत् शब्दज्ञानविकल्पानुविद्ध एवावर्त्तते सा सङ्कीर्णा समापत्तिः सवितर्केत्युच्यते । यदा पुनः शब्दसङ्केतस्मृतिपरिशुद्धौ श्रुतानुमानज्ञानविकल्पशून्यायां समाधिप्रज्ञायां स्वरूपमात्रेणावस्थितोऽर्थस्तत्स्वरूपाकारमात्रतयैवावभास्यते सा च निर्वितर्का समापत्तिः तत्र योगिनां परं प्रत्यक्षं, तच्च श्रुतानुमानयोर्बीजं ततः श्रुतानुमाने प्रभवतः । न च श्रुतानुमानज्ञानसहभूतं सहदर्शनं तस्मात् सङ्कीर्णं प्रमाणान्तरेण योगिनो निर्वितर्कसमाधिजं दर्शनमिति" भा० ।

सवितृ पु० सू-तृच् । १जगत्सृष्टरि परमेश्वरे "तत्सवितुर्वरेण्यमि"ति श्रुतिः । २सूर्ये ३यर्कवृक्षे अमरः । ४तद्देवताके हवनकाले त्र्यो० । ५मातरि स्त्री हेमच० ङीष् । सवितुरिदं सवितृ तत्सम्बन्धिनि त्रि० । स देवताऽस्य अण् । सावित्र तद्देवताकयज्ञादौ त्रि० स्त्रियां ङीष् ।

सविध त्रि० सह विध्यति विध-क सहस्य सः । १निकटे अमरः "सविधेऽपि न कृत्स्नसाक्षिणी" नैषधम् । सह विधया । २प्रकारयुते ३विधानयुक्ते च त्रि० ।

सविस्मय त्रि० सह विस्मयेन । विस्मयायुक्ते हारा० ।

सवीज पु० पात० उक्ते समाधिभेदे "तावत् सबीजः समाधिः" सू० "तास्तिस्रः समापत्तयो बाह्यास्तु बीजरूपा इति समाधिरपि सबीजः तत्र स्थूलेऽर्थे सवितर्का निर्वितर्के सूक्ष्मेऽर्थे सविचारनिर्विचारे इति चतस्रो सवीजः समाधिरिति" भा० [२वेगान्विते धरणिः ।

सवेश त्रि० विशत्यत्र वेशोदेशः सह वेशेन । १निकटे अमरः

सव्य त्रि० सू-प्रेरणे यत्। १वामे २दक्षिणे च अमरः। ३प्रतिकूले हेमच० ४विष्णौ शब्दमा०।

सव्यभिचार पु० सह व्यभिचारेण सहस्य सः। अनैकान्तिके दुष्टहेत्वभेदे तल्लक्षणं तु "अनैकान्तिकः सव्यभिचारः" गौ०सू० "व्यभिचार एकत्रान्यत्रेत्या सह व्यभिचारेण वर्त्तते इति सव्यभिचारः निर्देशनं नित्यः शब्दोऽस्पर्शत्वात्" वा०भा०। तत्त्वञ्च साध्यवन्नावृत्तित्वान्यत्वे सति साध्याभाववन्नावृत्तित्वम् चिन्ता०। सव्यभिचारोऽन्यदोषित्वादौ दृश्यम्।

सव्यसाचिन् पु० सव्येन वामेनापि सचति सन्दधाति बाणं सच-णिनि। अर्जुने हेमच० "उभौ मे दक्षिणौ पाणी गाण्डीवस्य विकर्षणे। तेन देवमनुष्येषु सव्यसाचीति मां विदुः" भा०वि० ४४अ०।

सव्येष्ठ पु० सव्ये तिष्ठति स्था-क अलुक्स० अम्बष्ठादि० षत्वम्। सारथौ हला०। [सारथौ अमरः।

सव्येष्ठृ पु० सव्ये तिष्ठति स्था-क्वनृ किञ्च अलुक्स० षत्वम्। सारथौ हला०।

सशस्या स्त्री सह शस्येन। १नागदन्त्यां रत्नमा० २शस्ययुक्ते त्रि०। [त्रि० "न सशस्येषु गर्त्तेष्विति मनुः।

ससत्वा स्त्री सह सत्वेन। १गर्भवत्यां स्त्रियां २प्राणियुक्ते

स(श)सन न०स(स)सृ-हिंसने ल्युट्। यज्ञार्थं पशुहनने अमरः

सस्य न०सस-यत्। १वृक्षादीनां फले अमरः २क्षेत्रगते धान्ये च हेमच० "सस्यं क्षेत्रं गतं प्रोक्तम्" स्मृतिः। "सस्यञ्च षष्ठभागतम्" चाणक्यः तालव्यादिरयमित्येके। ३शस्ये ४गुणे विश्वः।

सस्यक पु० सस्यमिव कायति कै-क। "सस्यको नारिकेलान्तःसस्याभो मणिखड्गयोः" मेदि० उक्ते १मणिभेदे २खड्गे च।

सस्यमारिन् पु० सस्यं मारयति मृ-णिच् णिनि। १मूषके राजनि० २सस्यघातके त्रि०। [अमरः।

सस्यसंवर पु० सस्यं संवृणोति सम्+वृ-अच्। शालवृक्षे,

सस्यसंवरण पु० सस्यं संवृणोति सम्+वृ-ल्युट्। कर्णवृक्षे राजनि०। [२धर्मयुक्ते त्रि०।

सस्वेदा स्त्री सह स्वेदेन सहस्य सः। १दूषितकन्यायां शब्दर०

सह अव्य० सह-अच्। १साहित्ये अमरः २साकल्ये ३सादृश्ये ४योगपद्ये ५विद्यमानत्वे ६सहत्वे ७सम्बन्धे मेदि०। ८सामर्थ्ये शब्दमा०। सहशब्दार्थेषु समभिव्याहृतक्रियाकालः स्वक्रियाकालीनक्रिया वा। तत्र गौणक्रियान्वयिनि तृतीया। पुत्रेण सहागता पिता।

सह पु० सहते सह-अच्। १अग्रहायणमासे २मारादिसहिष्णौ त्रि० हेमच० ३गन्धबलवर्णे ४बले पु०न० मेदि०।

सहकार पु० सह युगपत् किरति सौरभम् दूरात् कृ-अण्। अतिदूरगामिसौरभान्विते १आम्रे अमरः। भावे घञ्। २सहकर्मकरणे पु०।

सहकारिन् त्रि० सह समूय करोति कार्य्यं कृ-णिनि। हेतुभेदे स्वभिन्ने स्वकार्य्यकारके हेतौ। [हृगतौ च

सहगमन न०सह+गम-ल्युट्। १पत्याससहपत्यामरणे २स-

सहचर पु० सह चरति चर-अच्। १पीतभिण्टाख्यां २नीलभिण्टाख्ये रत्नमा०। ३यज्ञे ४प्रतिबन्धके ५भिण्टाख्यां हेमच०। ६सहाये ७अनुचरे त्रि० मेदि० "सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः" कुमारः। स्त्रियां ङीप्।

सहचरी स्त्री सह चरति चर-ट ङीप्। १पीतभिण्टाख्यां २सख्यां जटा०। सह चरति धर्मम् चर-ट ङीप्। धर्मपत्न्यां हेमच०। [करणदक्षित्वे।

सहचार पु० सह+चर-घञ्। सामानाधिकरण्ये तदधि-

सहज पु० सह जायते जन-ड। १सहोदरे अमरः २निसर्गजे स्वभावसिद्धे च "सहजप्राकृतावपि" माघः। ३सहोत्थिते त्रि० मेदि० ज्योतिषोक्ते जन्मलग्नात् ४तृतीयस्थाने। तत्र भ्रातुः शुभादिचिन्तनात्तथात्वम्।

सहजमित्र न० सहजं स्वभावसिद्धम् मित्रम्। स्वभावतो मित्रे भागिनेयादौ मिता०।

कतिचित् सहजमित्राणि शुक्रनी०परि० उक्तानि यथा "कश्चित् स्वभावतोऽमित्रामित्राणि सन्ति सर्वदा। माता मातृकुलं चैव पिता तत्पितरौ तथा। पितृपितृव्यात्मकन्या पत्नी तत्कुलमेव हि। पितृमातात्मभगिनी कन्यका सन्ततिस्तथा। प्रजापालो गुरुश्चैव मित्राणि सदृशानि तु"। २विद्यादौ च "विद्या शौर्य्यञ्च दाक्ष्यं च बलं धैर्य्यञ्च पञ्चमम्। मित्राणि सहजान्याहुर्वर्त्तयन्ति हि तैर्बुधाः" शुक्रनीतिपरिशिष्टम्।

सहजारि पु० सहजः स्वभावसिद्धः अरिः। सापत्नभ्रातृपितृव्यपुत्रादौ मिता०।

शुक्रनीतिपरिशिष्टे अन्येऽप्युक्ता यथा "स्वभावतो भवन्त्येतेऽरयो दुर्वृत्त एव च। ऋणकारी पिता शत्रुर्माता स्त्री व्यभिचारिणी। आत्मपितृ भ्रातरश्च तत्स्त्रीपुत्राश्च शत्रवः। क्षुधा श्वश्रू सपत्नी च ननान्दा यातरस्तथा। मूर्खः पुत्रः कुवैद्यश्चारक्षकश्च पतिः प्रभुः। चण्डश्वशुरा प्रजा शत्रुर्दाता धनिकश्च

यः । दुष्टानां भूपतिः शत्रुः कुकटानां पतिव्रता । साधुः खलानां शत्रुः स्यात् मूर्खाणां बोधको रिपुः" ।

सहखण्डक न० पक्वमांसभेदे "छागादेर्मांसमूधांदेः कुट्टितं खण्डितं पुनः । शुद्धमांसविधानेन पचेदेतत् सहखण्डकम्" भावप्र० ।

सहदेव पु० सह दीव्यति दिव–अच् । १माद्रीसुते पाण्डवभेदे मेदि० २वलायां २दण्डोत्पले ४शारिरोषधौ च स्त्री मेदि० टाप् । ५सपांख्यां स्त्री मेदि० ङीष् ङीषन्तः । ६पीतदण्डोत्पलायां रत्नमा० ।

सहदेव्यादि पु० "सहदेवी वला चैव शतमूली शतावरी । कुमारी च गुडूची च सिंही व्याघ्री तथैव च" गरु० पु० ४८अ० प्रतिषाङ्कदेवस्थानीयद्रव्यगणभेदे ।

सहधर्मिणी स्त्री सह समानो वा धर्मोऽस्त्यस्या इनि । १पत्न्यां अमरः "सहधर्मं चरेत्यासाम्" इति मनूक्तेः सहधर्मचारित्वात् "शरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समा" दावभा० उक्तेश्च तस्याः पतिकृतधर्मफलभागित्वाच्च तथात्वम् ।

सहन न० सह–ल्युट् । १क्षमायां तितिक्षायां शीतोष्णादिद्वन्द्वधर्मसहने हेमच० । सह–ल्यु । २सहिष्णौ अमरः ३क्षमाशीले त्रि० मेदि० ।

सहपान न० सह पानम् । एकत्र मद्यादिपाने हेमच० । २एकत्रपाने अमरः । [त्रिका० ।

सहपांशुकिल पु० सह पांशुभिः किलति किल–क । वयस्ये

सहभाविन् त्रि० सह भवति भू–णिनि । सहाये स्त्रियां ङीप् । [अमरः ।

सहभोजन न० सह एकत्र भोजनम् । एकत्रस्थानेऽशनादौ

सहम न० नीलतारा० उक्ते द्विद्वारादिभेदेन परस्परं योगवियोगयुतसहविशेषेण युतेन लग्नादिनानीते पुण्यादि शुभादिचिन्तनस्थाने राशिभेदे तानि च पञ्चाशत् तदानयनं तत्फलानि च तत्रोक्तानि यथा

"पुण्यं गुरुर्ज्ञानयशोऽथ मित्रं साध्यं क्षते यत्र न योग उक्तः । कस्यापि तत्रैव सुतं विचिन्त्यं साहात्म्यसाम्या च समर्थना च । भ्राता ततो गौरवराज्यतातौ माता सुतो जीवितमन्त्यं कर्म । मान्द्यं च मन्त्रयकलौ परतः क्रमोक्ता शास्त्रस्य बन्धुसहमं त्वथ बन्धकस्य । मृत्योश्च रन्ध्रं परदेशधनान्यदारा स्यादन्यकर्म सवणिक् त्वथ कार्यसिद्धिः । उद्वाहसंस्तुतिसलापपञ्चाप्तीर्मित्रं ततः । ज्ञाद्यव्यापारसहमे धानीयपतनं रिपुः । धैर्यौपायदरिद्रत्वं गुरुतास्तुपशाभिधम् । बन्धनं दुश्चितैतानि पञ्चाशत् सहमानि हि । सूर्योनचन्द्रान्वितसङ्गि लग्नं रवीन्दुयुक्तं निशि पुण्यसंज्ञम् १ । शोध्यं तुङ्गाद्यंशयमान्तराले लग्नं न चेत् सैकमेतदुक्तम् । व्यत्यस्तमस्मात् गुरुरविद्ययोऽस्तु संसाधनं पुण्यवियुक् सुरेज्यः । दिवा विलोमं निशि पूर्ववत्तु यशोभिधं४ तत् सहमं वदन्ति । पुण्यसङ्ग गुरुसङ्गतस्त्यजेत् व्ययो निशि सितान्वितं च तत् । सैकतात्तत्त्रवदुक्तरीतितो मित्रज्ञासहमं५ जगुर्बुधाः । पुण्याद्विलोमं शोधयेदुक्तरीत्या साहात्म्यं६ तच्चक्रमस्माद्विलोमम् । शुक्रं मन्दादङ्गि नक्तं विलोमं साशास्यं७ स्यादुक्तवच्छोधमूह्यम् । सामर्थ्यटमारात्तनुपं विशोध्य नक्तं विलोमं तनये कुजे तु । जीवाद्विशुद्धे सतते पुरावत् स्यातोऽर्किहीनात् गुरुतः सदोक्तः । दिने गुरोश्चन्द्रमपास्य नक्तं रविं क्रमादर्कविधू च देयौ । रीत्योक्तया गौरव१०मर्कमार्कैरधास्य वामं निशि राज्यतातौ११।१२ । भ्राते१२न्दुतोऽपास्य सितं विलोमं नक्तं सुतो१३ऽहर्निशमिन्दुभोज्यात् । स्याज्जीवितास्थं१५ गुरुमार्कितोऽङ्गि वामं निशीदं समसन्धयाम्बु१६ । कर्म१७ क्षमाराद्विनि वामसंज्ञं रोगाख्य१८मिन्दुं तनुतः सदैव । स्यान्नाशयो१९ लग्नपमिन्दुतोऽङ्गि वामं निशीन्दुं तनुपं सदार्कात् । कीर्ति२० क्षमे२१स्तो गुरुतो विशुद्धे कुजे विलोमं निशि पूर्ववोक्तया । शास्त्रं२२ दिने गौरिमपास्य जीवात् वामं निशि चैन युते पुरावत् । दिवानिशं चाच्छशिनं विशोध्य बन्धाख्य२३मेतद्विशि बन्धकं२४स्यात् । वास्तं दिवैतत् स्मृति२५रष्टमर्क्षादिन्दुं विशोध्योक्तवदार्कियोगात् । देशान्तराख्यं२६ नवसादिशोध्य धर्मेश्वरं सन्ततसङ्गयत् स्यात् । अहर्निशं वित्तपमर्कभाद्विशोध्य पूर्वोक्तवदर्थसंज्ञम्२७ । सितादपास्यार्कसयान्यदाराङ्गं२८ सदा प्राग्वदथान्यकर्म२९ । चन्द्राच्छनिं वामसयो निशायां शस्यदुवणिज्यं३० दिनेऽन्यकोक्तया । मनेर्दिवार्कं निशि चन्द्रमार्कं विशोध्य सूर्येन्दुमनाथयोमात् । स्यात् कार्यसिद्धिः३१ सततं विशोध्य मन्दं सितात् स्यात्तु विवाहसंज्ञम्३२ । गुरोर्बुधं प्रोह्य भवेत् प्रसूति३३र्वासं निशीन्दुं शनितो विशोध्य । सहं लिपेदुक्तदिशा सदैव सन्तापसङ्गा३४ऽऽरमपास्य शुक्रात् । अङ्गा३५ सदा प्रोक्तदिशाथ पुण्यं विद्याख्यतः प्रोह्य सदा पुरोक्तया । प्रोत्याख्य३६मुक्ते बल३७दे३८ऽ३९ सदा पुरोक्तया । प्रोत्याख्य३६मुक्ते बल३७दे३८ऽ३९ यशस्य४० ज्ञाद्यं सपपास्य सौम्यात् । अनिं विलोमं

निशि चन्द्रयोगात् व्यापार४१ आराज्ञ्यपाश्च यत्नवत्। पानीयपातः४२ शशिनं विशोध्य सौरैर्विलोमं निशि पूर्ववत् स्यात्। मन्दं कुजात् प्रोह्य रिपु४३र्विलोमं रात्रौ भवेद्धौमविहीनपुण्यात्। शौर्यं४४ विलोमं निशि पूर्ववत् स्यादुपाय दृश्यं४५ शनितो विशोध्य। वामं निशि त्वं तु विशोध्य पुण्यात् त्रयुग् विलोमं निशि तद्विरुद्धम्४६। सूर्योच्चतः सूर्यमपास्य नक्तं चन्द्रं तदुच्चात् गुरुता४७ पुरोक्ता। कर्कार्द्धतः शनिं प्रोह्य स्याच्चलश्चा४८न्यथा निशि। पुण्याच्छनिं विशोध्यार्क्षि वामं निशि तु बन्धनम्४९। चन्द्रं सिनादपास्योक्तं सटा कन्याख्य५०सूक्तवत्। पुण्यादर्कमपास्यायं योगो ह्यन्योऽन्यथा निशि। स्वनाथहीनं सप्तमं तदंशाः स्वीयोटयन्त्रा विच्छुतास्त्रिघत्या। तत्सद्मपाको दिवसैर्हि लग्नैः स्यात् तद्दशायां तदसम्भवे वा। अथैषां फलानि। स्वोच्चादिसत्पदगतो यदि लग्नदर्शी वीर्यान्वितः सप्तमपो यदि नेक्षतेऽङ्गम्। नाशौ बली रविशशिन्वितभेशदर्शी पूर्णस्तु लग्नपबलस्य विचारणेयम्। प्रभुग्रहैर्बलेनेनो न दृश्यस्थानमाश्रितः। अवशोऽयं लग्नदर्शी बली खलेऽस्ति चेत् पदे। स्वस्वामिना शुभ ख्यगैः सहितं च दृष्टं स्वामी बली च यदि तत्सप्तमस्य सृष्टिः। यत्स्वामिना शुभखगैस्त्र न युक्तदृष्टं तत्सम्भवो न हि भवेदिति चिन्त्यमादौ। अष्टमाधिपतिना युतेक्षितं पापदृग्युतमथेत्यशानि तैः। सम्भवेऽपि विलयं प्रयाति तत् तेन जन्मनि पुरेदमीक्ष्यताम्। आदौ जन्मनि सर्वेषां सप्तमानां बलाबलम्। विस्तरात्र सम्भवो येषां तानि वर्षे विचारयेत्। सबले पुण्यसप्तमे धर्मसिद्धिर्धनागमः। शुभस्वामीक्षितयुते व्यत्यये व्यत्ययं विदुः। लग्नात् षष्ठारिपुफस्थं धर्मभाग्व्ययशोहरम्। शुभस्वामिदृशा प्राप्ते सुखधर्मादिसम्भवम्। पापयुक् शुभदृष्टं चेद्दृशं प्राक् ततः शुभम्। शुभयुक्तं पापदृष्टमादौ शुभमेव तत् परे। यत्रावदे पुण्यसप्तमे शुभं सोऽवदः शुभावहः। अनिष्टेऽस्मिन् शुभो नेति पुण्यसप्तमादौ विचारयेत्। स्फुटो षष्ठारिपुफस्थसम्बन्धे पापकृत्तं युतम्। पुण्यधर्मार्थसौख्यघ्नं पत्यो दग्धे फलं तथा। सप्तमान्यखलानीत्थं स्फुटो वर्षे च चिन्तयेत्। मान्द्यारिकलिमृत्यूनां व्यत्ययादादिशेत् फलम्। यशोऽभिधाने सप्तमे खलेन युतेक्षिते सद्व्ययसे विनाशः। स्वार्जितस्वायशसोऽस्ति लाभो नष्टौजसि स्यात् कुलकीर्त्तिनाशः। कार्यसिद्धिसप्तमं युतं शुभैर्दृष्टमूर्ध्वगं जयप्रदम्। सङ्करेऽथ शुभपापदृष्टियुक् क्लेशतो जय उदीरितो बुधैः। कलिसद्म मिश्रखगदृष्टसंयुतं यदि पापमूर्धशिलगं कलेर्गतिम्। अथ तत्र सौम्यसहितावलोकिते जयमेति मिश्रदृशितः कलिव्यधौ। विवाहसद्माधिपसौम्यदृष्टं युतं शुभैर्मूर्धशिलं तदाग्निम्। कुर्यात्तदा मिश्रसमेतदृष्टं कष्टादथ क्रूरखतीश्वरैर्न। आधा तदीशश्च षडष्टरिष्फविवर्जितः सौम्ययुतेक्षितश्च। स्वाद्वाञ्छितार्थाम्बरवाहनादिलाभः खलेक्षायुतितोऽतिदुःखम्। मान्द्याधिपः पापयुतेक्षितश्च पापः स्वयं रोगकरो विचिन्त्यः। चेदित्यशाली स्फुटितेन मृत्युस्तदा भवेद्धीनबलेऽतिकष्टात्। स्वस्वामिसौम्येक्षणभाजिमान्द्ये नाशे सवीर्येऽष्टमकृन्त्यवर्जे। रोगस्तदा नैव भवेद्विमिश्रं युतेक्षिते रुग्भयमस्ति किञ्चित्। अथार्क्ष्यं शुभनाथदृष्टसहितं द्रव्यागमात् सौख्यदं पापैर्दृष्टयुतं च वित्तविलयं कुर्यादथो पापयुक्। सदृष्टं च शुभैत्यशालसहितं पूर्वं हि तत्राशनं पश्चाटर्थसङ्गवं च सुखं व्यत्यासतो व्यत्ययः। रिपुदृष्ट्या रिपोर्भीतस्तत्सत्कारादेर्धनक्षयः। मित्रदृष्ट्या मित्रयोगाद्धनलाभो यशः सुखम्। सत्स्वामिदृष्टं युतमात्मजस्य लाभं सुखं यच्छति पुत्रसद्म। पापान्वितं सौख्यखनेत्यशालं प्रागदुःखदं पुत्रसुखाय पश्चात्। पापान्वितं क्रूरखतेश्वराढ्यं नाशाय पुत्रस्य गतौजसीये। स्फुटौ सुतेशः सहमेश्वरोऽब्दे पुत्रस्य लग्नं शुभमित्रदृष्टः। पित्र्यं सदोच्चितयुतं पतिदृष्टयुक्तं तातस्य यच्छति धनाम्बरमानसौख्यम्। पत्यौ गतौजस्यि स्फुटौ खलभरीफे नाशः पितुश्चरंदृष्टे परदेशयानात्। शुभेत्यशाले खलखेटयोगे गदप्रकोपः प्रथमं सहान् स्यात्। पश्चात् सुखं विन्दति पूर्णवीर्ये नाशे ऽपत्यान्नयशोभिवृद्धिः। बन्धनाख्यसप्तमं युतेक्षितं स्वामिना शुभखगैः सुखाप्तये। राजगौरवयशोवराप्तयः पापखेचरयुते पदाश्रुदिः। शुभाशुभैर्दृष्टयुतं खलैश्चेत् क्षतेत्यशालं धनमाननाशम्। पूर्वं विधत्ते चरमे शुभेत्यशाले सुखं वाहनशास्त्रनाभम्। कर्मभावसहमाधिपः शुभैः स्वामिना सूर्यशिलो बलान्वितः। हेमवाञ्छितगजभूमिलाभदः पापदृष्टियुतितोऽशुभप्रदः। दग्धा वक्राः कर्मवैकल्यदास्ते युक्ता दृष्टाः शौरिणा ते विशेषात्। राज्यभ्रंशः कोषनाशश्च राजकर्मेशौ चेत् सूर्यरीफौ खलेन। उपदेष्टा गुरुज्ञानं विद्या शास्त्रं स्मृतिः स्मृतिः। मोक्षो

जाड्यं बलं सैन्यसङ्घं तेजो बलं द्युतिः। पुरुता मण्डले शत्वं गौरवं मानशालिता। नियहानुग्रहविभूराज-चिह्नादिलाञ्छनम्। माहात्म्यं मन्त्रगाम्भीर्यं धृति-र्दुःखाद्यादिशालिता। सामर्थ्यं देहजा शक्तिः शौर्यं तेजो विनिग्रहे। आधेच्छोक्ता मतिर्धर्मे श्रद्धा, वन्द्य, पराभ्ययः। पानीयपतनं दृष्टिर्जलेऽकस्माच्च मज्जनम्। आधिव्याधी तापमान्द्ये सन्धिरुड़ा बन्धवः स्मृताः। सत्यालृतं वणिग्वृत्तिराधानं प्रसवः स्मृतः। दासत्वं परकर्मोक्तमन्यत् स्पष्टं स्वनामतः। निरूप्यापि यथायोगं कुलजातिक्रियोदयतः। शुभयोगेक्षणात् सौख्यं पत्युर्धैर्या-नुस्मरणतः। दारिद्र्यमृतिमान्द्यारिकलिभूक्षो विप-र्ययः। अस्मत्कालेऽपि सहजं विचार्यं दृष्टरिक्षया। सर्वमानुपयोगोऽत्र चित्रं दक्षन्ति यज्ञनाः"।

सहमरण न० सह मृतेन पत्या सह एकचितारोहणेन मरणम्। मृतपतिचितारोहणेन तत्सहितमरणे शुद्धि-तत्त्व "अङ्गिराः "मृते भर्तरि या नारी समारोहेद्धुताशनम्। सा कल्पवतीसमाचारा स्वर्गलोके महीयते। तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानवे। तावन्त्यब्दानि सा स्वर्गे भर्तारं याऽनुगच्छति। व्याल-ग्राही यथाव्यालं बलादुद्धरते बिलात्। तद्वद् भर्तारमादाय तेनैव सह मोदते। मातृकं पैतृकञ्चैव यत्र कन्या प्रदीयते। पुनाति त्रिकुलं नारी भर्तारं याऽनुगच्छति। यत्र सा भर्तृपरमा परा परमलालसा। क्रीड़ते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश"। "ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वापि यो नरः। तं पुनाति च सा नारी इत्याङ्गिरसभाषितम्। साध्वीनामेव नारीणाम-ग्निप्रपतनादृते। नान्यो धर्मो हि विज्ञेयो मृते भर्तरि कर्हिचित्" "या नारीत्युपदानात् सहमरणा-भावपक्षोऽपि सूचितः नान्यो धर्म इति तु सह-मरणस्तुत्यर्थम्। तथाच विष्णुः "मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा" इति। ब्रह्मचर्यं मैथु-नवर्जनं ताम्बूलादिवर्जनञ्च यथा प्रचेताः "ताम्बू लाभ्यञ्जनञ्चैव कांस्यपात्रे च भोजनम्। यतिश्च ब्रह्म-चारी च विधवा च विवर्जयेत्" स्मृतिः "एकाहारः सदा कार्य्यो न द्वितीयः कदाचन। पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम्। गन्धद्रव्यस्य सम्भोगो नैव कार्य्यस्तया पुनः। तर्पणं प्रत्यहं कार्य्यं भर्तु-स्तिलकुशोदकैः"। एतत्तु तर्पणं पुत्रपौत्राद्यभावविषय-मिति मदनपारिजातः। "वैशाखे कार्त्तिके माघे वि-शेषनियमञ्चरेत्। स्नानं दानं तीर्थयात्रां विष्णोर्नाम-ग्रहं सुधीः"। तस्य साध्वीमाह हारीतः। आत्तौर्ध्व सदिता कृष्टे प्रोषिता मलिना कृशा। मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता" इति ऋग्वेदपरिशि-ष्टीयमिति कल्पतरुः। साध्वीप्रसादेन लोकधारण-मथाह सत्यव्र० "तस्मात् साध्व्यः स्त्रियः पूज्याः सततं देववज्जनैः। तासां राज्ञा प्रसादेन धार्य्यते च जग-त्त्रयम्"। महाभारते "अवमत्य च याः पूर्वं पतिं दुष्टेन चेतसा। वर्त्तन्ते वाश्च सततं भर्तॄणां प्रति-कूलतः। भर्तुरनुमरणं काले वाः कुर्वन्ति तथाविधाः। कामात् क्रोधात् भयान् मोहात् सर्वाः पूता भवन्ति ताः"। अत्र चैहिकब्रह्मघ्नपतेर्दोषनिषेधात् जन्मान्तरीयतत्-पापवत एव सहमरणेनोद्धारः" शु०त०। ब्रह्मपु०। "देशा-न्तरस्थे पत्यौ साध्वी तत्पादुकाद्वयम्। निधायोरसि संशुद्धा प्रविशेज्ज्वातवेदसम्। ऋग्वेदवादात् साध्वी स्त्री न भवेदात्मघातिनी। ब्रह्महाशौचे निहते च आर्द्रं प्राप्नोति शास्त्रवत्"। ऋग्वेदवादात् "इमा नारीर-विधवाः" इत्यादिमन्त्रात्। हरिहरदीवे "बालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा। रजस्वला राजसुते! नारोहन्ति चितां शुभे!" राजसुते! इति सगरमाहः सम्बोधनम्। हरिस्मृतिः "बालसम्वर्द्धनं त्यक्त्वा बाला-पत्या न गच्छति। रजस्वला सूतिका च रचेद् गर्भञ्च गर्भिणी। एवमन्यत्रकेषु बालसम्वर्द्धनं स्यात्तदा तस्या व्यधिकारः। व्यासः "दिनैकगम्यदेशस्था साध्वी चेत् कृतनिर्णया। न दहेद् स्वामिनं तस्या यावद्गमनं भ-वेत्। भविष्यपुराणे "तृतीयेऽह्नि तदक्षया मृते भर्तरि वै द्विजाः। तस्यानुमरणाधाय स्थापयेदेकरात्रकम्"। तस्य भर्तुः। तथा "एकां चितां समासाद्य भर्तारं याद्-गच्छति। तद्भर्तुर्वैः क्रियाकर्त्ता स तस्याश्च क्रियाचरेत्। एतच्च पिण्डदानम्"। "एवञ्च अङ्गिरोब्रह्मपुराणवचना-लोचनया ब्राह्मणादिसकलभार्य्याणां स्वगतभर्तृमर-णविशेषार्थिनीनां गर्भवतीबालाऽपत्यादिव्यतिरिक्तानां सहमरणानुमरणयोरधिकारः न चात्र योगसिद्धमरण-विरोधात् सकृच्चितफलसिद्धिरिति वाच्यम्। योगसि-द्ध्यधिकरणे हि "यः पुत्रकामो यः पशुकाम" इत्यादिना यज्ञक्रतूनुपक्रम्य "एकस्मै वा कामायान्ये यज्ञक्रतव आ-हियन्ते सर्वेभ्यो दर्शपौर्णमासौ" इत्युक्तं तत्र तत्तद्विधि-

वाक्येषु निरपेक्षफलश्रुतेः कामनाभेदेन कर्मैक्यं ततश्च यत्पदेन प्रकृतवाचिना निरपेक्षाणामेव पुत्रादिफलानां दर्शपौर्णमासिसम्बन्धेऽवगते प्रयोगभेदादेव भवतु तत्र तत्तत्फलसिद्धिः तथाच तदधिकरणसिद्धान्तसूत्रं "योगसिद्धिर्वा व्यर्थस्योत्पत्त्ययोगित्वात्" जैमि०। अस्यार्थः वाशब्दः सिद्धान्तद्योतनार्थः सर्वेभ्यो दर्शपौर्णमासाविति व्यर्थस्य तत्तत्फलस्य योगेन प्रयोगभेदेन सिद्धिः उत्पत्त्ययोगित्वात् सर्वशब्दात्तत्कर्मणोयानां यः पुत्रकामो यः पशुकाम इत्यादावुत्पत्तिवाक्ये फलानां युगपदसम्बन्धात्। न चार्थस्य नानाविधस्य उत्पत्त्ययोगित्वात् मन्वादितत्तल्लोकवासादीनां एकदोत्पन्नसम्भवादिति व्याख्यानं युक्तमिति वाच्यं तद्वागोत्सर्गादौ एककर्मणः क्रमिकनानाफलोक्तेः"। "तत्रेदापि सर्वनामपदाभावादार्थवादिकफलानि समुच्चितान्येव कामनाविषयो लाघवात् आर्थवादिकसमुच्चितनानाफलविषयकविधिरप्येक एव कल्प्यते लाघवात् न हि निमित्तसाधारण्ये बाधकं विना नैमित्तिकानां पर्य्यायता सम्भवति षड्विंशमीष्टे दाक्षायणयोः पर्य्यायतायाश्चदर्शनात्। तस्मात् सकृदनुष्ठितेन कर्मणा यथैकं फलं निष्पाद्यते तथा बाधकं विना फलान्तरमपि विनिगमकाभावात्। ज्योतिष्टोमादेस्तु षष्टिवर्षावच्छिन्नफलश्रुतेः पृथगनुष्ठानादेव पृथक् फलसिद्धिः अन्यथा षष्टिसंख्याद्यभिधानं व्यर्थं स्यात्। यत्र तु कर्मफले कालविशेषो नोक्तस्तत्रापि तत्कर्मसम्भादकानुरूपेण कालविशेषो बोध्यः "फलस्य कर्मनिष्पत्तेस्तेषां लोकवत् परिमाणतः फलविशेषः स्यादिति" न्यायात्। तेषां कर्मणां लोकवत् क्षयादिवत्। तथाच भवदेवभट्टाः "एकस्मै वा कामायान्ये यज्ञक्रतव आह्रियन्ते" इति संकीर्त्य "सर्वेभ्योदर्शपौर्णमासाविति" प्रयोगभेदविधानादुभवतु तत्र पृथगनुष्ठानसाध्यत्वं ब्रह्मबधप्रायश्चित्ते तथाभूतपृथगनुष्ठानसाध्यत्वादिपादकवचनाभावात् अनेकफलानान्तु तन्त्रेण दर्शहरान्यायेन एककामनाविषयतासम्भवात् तन्त्रत्वम्" इत्याहुः। हरिनाथोपाध्यायास्तु "द्वयोर्वा तत्त्वत्वम्" इत्याहुः। हरिनाथोपाध्यायास्तु "द्वयोर्वा तूत्सर्गफलान्युद्दिश्यैतानि चार्थवादिकफलानि समुच्चितान्येव कामनाविषयः, पुरुषविशेषणत्वस्य कल्प्यत्वात् तथाच मिलितानामेककामनाविषयत्वकल्पना अग्नीषोमयोरिव देवतात्वे लाघवन्यायस्य विनिगमकत्वाद्" इत्याहुः। अथ वा "य एतां रात्रीरधीयीत तस्य पितरो दत्तकुल्याः मधुकुल्याः वा क्षरन्ति" इत्यत्रापि वैकल्पिकान्वयोपगमे ज्ञातेष्टिनयभङ्गप्रसङ्गात् लाघवादिकल्पेऽदोषाच्च एकस्य कार्यस्य नियोज्याकाङ्क्षायां सकलार्थवादोपस्थितफलकामो यथैक एव नियोज्यः स्वीकृतस्तथात्रापीति। अथानुत्पन्नब्रह्महत्यादिपातकायास्तत्पूर्वत्वरूपफलबाधात् तत्तत्कामनाविरहेणानधिकारः स्यादिति चेत् सकृत्प्रयुक्त्या समुच्चितफलसिद्धेरनन्यथासिद्धार्थवादबलेन सन्दिग्धपापकामनया एवाधिकारो मङ्गलवत्। यति जन्मान्तरीये तादृशपातके संसर्गादिहेतौ वा तदुध्वंसोऽपि जायते अयति तु न तथा प्रतियोगिरूपसहकारिविरहात् निर्विघ्नं क्रतवङ्गवत्" शु०त० रघु०। "समुच्चितफलककर्मणोऽपि प्रत्येकफलकामनया करणे तत्तत्कामनासहकारेण प्रत्येकफलजनकत्वम्" विधिरत्ने गदा०। त्रि०।

सहरसा स्त्री सह रसेन। १सहपर्व्यां शब्दर० २रसान्विते

सहर्ष पु० सह हर्षेण समानो वा हर्षो यत्र। १स्यन्दने २हर्षे च त्रिका०। ३हर्षयुक्ते त्रि०।

सहस् न० सह-असि। १बले २ज्योतिषि च शब्दर० ३सार्गर्भीये मासे पु० अमरः। "सहसा सहसा क्रतवेऽधुरिति" माघः।

सहसा अव्य० सह+सो-डा। १हठादित्यर्थे अमरः। २अकस्मादित्यर्थे शब्दर०। ३हाद्ययुते त्रि० "न सहसा सहसा परिरभ्य तम्" माघः।

सहस्य पु० सहसे बलाय हितः यत्। पौषमासे अमरः।

सहस्र न० समानं हसति हस-र। १दशशतसङ्ख्यायां २बहुसंख्यायां शतसंख्यान्विते च हेमच०।

सहस्रसंख्यकाश्च केचित् पदार्थाः कविकल्प० यथा "गङ्गावक्त्रं शेषमूर्द्धा पद्मदलम् रविकरः कार्त्तवीर्य्यबाहुः वेदशास्त्रा शक्रनयनम्"। "तत्र बहुसंख्यत्वे सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपाद्"श्रुतिः। बहुशीर्षादिपरत्वमत्र भाष्यादावुक्तम्। संख्यासंख्ययोः परत्वेऽस्य सर्वदैकवचनत्वम् यथा घटानां सहस्रं सहस्रं घटा इत्यादि आवृत्तौ तु द्विवादिकं यथा द्वे सहस्रे लोष्ठि सहस्राणीति "चत्वार्याढ्यः सहस्राणि" मनुः।

सहस्रकर पु० सहस्रं कराः किरणा अस्य। १सूर्य्ये सहस्रकिरणादयोऽप्यत्र श्लो०। २अर्कवृक्षे च।

सहस्रकाण्डा स्त्री सहस्रं बहवः काण्डा यस्याः। श्वेतदूर्वायां राजनि०।

सहस्रदंष्ट्र पुंस्त्री० सहस्रं बहुसंख्या दंष्ट्रा अस्य। पाठीनरू-

वृक्षे (गोयाल) अमरः स्त्रियां ङीष् । [अत्रौ अन्दर०

सहस्रदंष्ट्रिन् पु० सहस्रं दंष्ट्राः अस्त्यस्य इनि । पाठीन-

सहस्रधारा स्त्री सहस्रसंख्यिता धारा । देवस्नानार्थे बहु

द्रव्यन्यस्तघृतबद्धजलादिधारायाम् ।

सहस्रनयन पु० सहस्रं नयनान्यस्य । १इन्द्रे हेमा० सहस्र-

नेत्रादयोऽप्यत्र । २शिवे च ।

सहस्रपत्र न०सहस्रं बहुसंख्यकानि पत्राण्यत्र यस्य । १पद्मे

अमरः । सहस्रदलादयोऽप्यत्र । २वारणे खगे च ।

सहस्रपाद् पु०सहस्रं बहवः पादा अस्य अन्तलोपः समा० ।

१विष्णौ २परमेश्वरे च "सहस्राक्षः सहस्रपाद्" पुरुषसूक्तम् ।

सहस्रपाद पु० सहस्रं पादाः किरणत्वरणा वा अस्त्यस्य

अच् । १विष्णौ २सूर्ये ३चर्कटजे च । ४कारण्डखगे

पुंस्त्री० मेदि० स्त्रियां ङीष् ।

सहस्रबाहु पु०सहस्रं बाहवोऽस्य । १बाणासुरे "बाणः पुत्र-

शतज्येष्ठो बलेरासीन्महात्मनः । सहस्रबाहुवाद्येन वा-

द्यवेऽतोषयत् शिवम्" भाग०१०।६२अ० २कार्त्तवीर्यार्जुने । ३विष्णौ च "सहस्रबाहो सर्व विश्वमूर्ते" ! गीता०

सहस्रभुज पु० सहस्रं बहवो भुजा अस्य । १विष्णौ २कार्त्त-

वीर्यार्जुने च । ५सहस्रभुजायां स्त्री "यदादशभुजा

पूज्या या सहस्रभुजा स्मृते" मार्कण्डेयपु० ।

सहस्रमूर्द्धन् पु० सहस्रं बहवो मूर्द्धानोऽस्य । १विष्णौ

पुरुषसूक्तम् २सहस्रफणोपेतशेषे । [तायां राजनि० ।

सहस्रमूली स्त्री सहस्रं बहूनि मूलान्यस्या ङीष् । दूर्वा-

सहस्रवीर्या स्त्री सहस्रं बहूनि वीर्याण्यस्याः । १दूर्वायाम्

अमर । २महाशतावर्य्यां च राजनि० । [भेदे राजनि० ।

सहस्रवेध न० सहस्रं बहवो वेधा यस्य । १चक्रे २काङ्क्षिक-

सहस्रवेधिन् न० सहस्रं विध्यति विध-णिनि । १छिद्रौ

२अम्बुवेतसे च मेदि० । ३कर्कूर्यां पु० राजनि० ।

४सहस्रवेधकर्त्तरि त्रि० । [भारवम० ।

सहस्रा स्त्री सहस्रं बहूनि सन्त्यस्याः अच् । अम्बष्ठीयां

सहस्रांशु पु०सहस्रमंशवो यस्य । १सूर्ये २अर्कवृक्षे च अमरः

सहस्राणीक पु० ईव० संज्ञात्वात् अत्वम् । शंतानीकजनमेजय-

राजभेदे वह्निपु० ।

सहस्राक्ष पु० सहस्रमक्षीणि अस्य अच् समा० । १इन्द्रे

२पेचके अमरः । ३विष्णौ पुरुषसू० ४ईश्वरे च ।

सहस्रार न०सहस्रसारा: कोणा यस्य । शिरःस्थिते सुषुम्णा-

नाडीसम्बन्धे सहस्रदलकमले तन्त्रसमा० ।

सहस्रिन् पु० सहस्रं सैन्यादि सन्त्यस्य इनि । १सहस्रसैन्य-

युक्ते नृपादौ अमरः २सहस्रसंख्यापाठीने मत्स्ये च

सहा स्त्री सहते सह-क्यच् । १खड्गपत्न्यां २सहनकर्त्र्यां

अमरः । ३खण्डोत्पलायां ४पृथिव्यां ५नखभेदजे मेदि० ।

६सहनकर्त्रि त्रि० ७सर्षपकल्क्यां शब्दर० दरायां

अर्थशोभायां रत्नमा० १०नारीपुष्पे राजनि० ।

सहाचर पु० सहा सहनकर्त्रीव आचरति आ+चर-अच् ।

पीतझिण्टयां शब्दर० । [अमरः ।

सहाय पु० सह एति दूरं-अच् । १अनुचरे २अनुकूले

सहायता स्त्री सहायानां बन्धूनां समूहः तस्य भावो वा तल् ।

१साहाय्ये २सहायसमूहत्वे च अमरः ।

सहार पु० सह एकदैव हरन्ति दूरं गच्छन्ति शोरभेण

सह-अच् । १सहकारे आम्रे हेमा० हारादिरत्वं सह

हारेण च । २सहहारयुक्ते हारा० । ३हारेण सहिते त्रि० ।

सहारोग्य त्रि० सह आरोग्येण । रोगशून्ये हेमच० ।

सहासन न० सह आसनेऽत्र आस-ल्युट् । एकासने ।

सहित त्रि० सम्यक् हितः समोऽन्त्यलोपः । १सम्यगुचिते

सह-क्त वा इट् सह+इतच् वा । २समभिव्याहृते त्रि०

को० ३हितेन सहिते च । [योढ़ाप्यत्र स्त्रियते ङीप् ।

सहित त्रि० सह-यत् वा इट् । सहनशीले । दृढभक्ते

सहित्र न० सह्यतेऽनेन सह-इत्र । सहनसाधने धर्मभेदे ।

सहिष्णु त्रि० सह-इष्णुच् । सहनशीले अमरः ।

सहिष्णुता स्त्री सहिष्णोर्भावः तल् । १क्षमायाम् २गीतो-

पादिविरुद्धधर्मद्वयसहने ।

सहुरि पु०सह-उरि । १क्रूरे उणादिकोषः । २अश्वतुल्ये च ।

सहृदय त्रि० सह-हृदयेन । १प्रशस्तचित्ते २काव्यार्थभाव-

नाधीनपरिपक्वबुद्धौ साद० "परिष्कर्वन्त्यर्थान् सहृद-

यधुरीणाः कतिपये" रसगङ्गाधरः ।

सहृल्लेख पु० हृदयस्य लेखः कालुष्यकरणं हृल्लेखः सह

हृल्लेखेन । "विचिकित्सा तु हृदये यस्मिन् प्रजा-

यते । सहृल्लेखन्तु विज्ञेयं पुरीषन्तु स्वभावतः" इत्युक्ते

दूषितत्वे मा०वि० । २हृल्लेखा सहिते अन्वे च तन्त्र०

सहोक्ति स्त्री सह उक्तिः । सहत्वगणने १एकोक्तौ सहशब्द-

योक्तिर्यत्र । २अर्थालङ्कारभेदे अलङ्कारशब्दे ४०७पृ०दृश्यम्

सहोटज पुंन० । सहते आतपादीन् सह-अच् कर्म० ।

मुनीनां पर्णशालायाम् हारा० ।

सहोढ पु० सह ऊढवा । "या गर्भिणी संस्क्रियते ज्ञातार-

ज्ञातापि वा पत्यौ । योढुः स गर्भो भवति सहोढ इति

स्मृत्यते" इति स्मृत्युक्ते अज्ञातगर्भायाः परिणीतायाः

स्त्रियाः गर्भे । सहोढे गर्भे । जायते जन–ड । सहोढज तज्जाते पुत्रभेदे ।

सहोदर म० सह समानमुदरं यस्य । एकगर्भजाते भ्रातरि सटा० २भगिन्यां स्त्री एकपितृजाते २भ्रातर्यपि उपचारात् । "देशे देशे कलत्राणि देशे देशे च बान्धवाः । तन्तु देशं न पश्यामि यत्र भ्राता सहोदरः" रामायणे लक्ष्मणंप्रति रामेण तस्य भिन्नोदरत्वातथेऽपि तथोक्तम्

सहोर त्रि० सह-ओर । साधौ रुपाटिकोक्तेः ।

सह्य न० सहायस्य भावः यत् नि० १साहाय्ये "तत्रार्थे सह्यमकरोत्" पुराणम् । सह भावे यत् । २सारोन्ये ३साध्ये ४साधुर्थे च शब्दर० । कर्मणि यत् । ५सोढव्ये त्रि० ६पुनाख्यदेशसरीपस्थे पर्वतभेदे पु० मेदि० । स च पर्वतः भारतवर्षस्थ कुलाचलभेदः "माहेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते वातसंज्ञिताः" मार्कण्डेयपु० ५७अ० । स च अपरान्तदेशस्थ चित्रकूटो लक्षणसद्भावात् क्रियदूरस्थश्च तदतिक्रमेणैव रघौ अपरान्तदेशगमनोक्तेः । "यस्मात्क्रियन्मः सह्यं दूरात्मुक्तसहत्वता । नितम्बस्थित भेदिन्याः स्रस्तांशुकमलङ्घयत् । तस्यानीकैर्विसर्पद्भिः अपरान्तजयोद्यतैः । रामास्त्रोत्सारितोऽप्यासीद् सह्यलग्न इवार्णवः" रघु० । तत्प्रवृत्तपादजा नद्यश्च "ताप्यो पयोष्णी निर्विन्ध्या वापेरी प्रवरा नदी । गोदावरीभीमरथीकृष्णवेण्यादिकास्तथा । सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः" विष्णुध० उक्ताः "गोदावरी भीमरथी कृष्णवेण्यास्तथापरा । तुङ्गभद्रा सुप्रयोगा सह्यात् वापेर्य्यापगाः" मार्कण्डेयपु० ।

सह्यतनया स्त्री सह्यस्य तनयेव तत्प्रभवत्वात् । कावेर्यां हेमच० । सह्यशब्दे दृश्यम् ।

सा स्त्री सो–ड । १गौर्यां २जलधारायां च शब्दर० ।

सांक्रमिक त्रि० संक्रमे साधुः गुड़ा० ठञ् । संक्रमसाधने कुष्ठादिरोगे । वा परसवर्णः । सांक्रमिकरोगाश्च भावप्र० दर्शिता यथा "एकशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात् । क्रकचकूपोपदंशाच्च भूतोन्मादनखज्वराः (वसन्त) औपसर्गिकरोगाश्च संक्रामन्ति नरान्तरम् । श्रूयते यदि कुष्ठेन पुत्रजातस्य तद्वत् । अतो भिन्द्यितरोगोऽयं कुष्ठं कष्टं प्रकीर्त्तितम्" । प्रसङ्गोऽत्र मैथुनस्य भावप्र० ।

सांख्य न० संख्यायतेऽत्र संख्या सम्यग्ज्ञानं साऽस्त्यत्र अण् । १सम्यग्दर्शने "पुमा तेऽभिहिता सांख्ये" इति गीता शब्दा मूलप्रकृत्यादिपदार्थानां गणनात्र प्रवृत्तत्वात् । २कपिलप्रणीते दर्शनशास्त्रभेदे परसवर्णं साङ्ख्यमप्युभयत्र ३संख्याकृत्यागे पु० "प्रथमः कपिलो नाम सिद्धेशः कालविप्लुतम् । प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्" भाग० १स्क० ३अ० । "सांख्यं संख्याकरत्वात्तु कपिलादिभिरुच्यते" मात्स्ये १अ० ।

सांख्यप्रवचन न० सांख्योक्तमर्थं प्रवक्ति विस्तरेण कथयत्यनेन प्र+वच–करणे ल्युट् । तत्त्वसमासाख्यस्तन्त्रार्थस्य विस्तरेण ख्यापके १कपिलप्रणीते २योगशास्त्रप्रणीते ग्रन्थभेदे यथोक्तं सांख्यप्र०भा० यथा

"नन्वेवमपि तत्त्वसमासाख्यस्तन्त्रैः सङ्ख्याः षड्ध्याया: पौनरुक्त्यमिति चेत् । मैवम् । सङ्क्षेपविस्तररुचेयोऽभयोरप्यपौनरुक्त्यात् । अत एवाद्याः षड्ध्याया योगदर्शनस्येव सांख्यप्रवचनसंज्ञा युक्ता । 'तत्त्वसमासाख्यं हि यत् सङ्क्षिप्तं सांख्यदर्शनं तस्यैव प्रकर्षेणाद्यां निर्वचनमिति । विशेषस्त्वयं यत् षड्ध्यायां तत्त्वसमासाख्यात्तन्त्रार्थविस्तरमात्र योगदर्शने त्वाभ्यामप्युपसर्गादप्रतिषिद्धस्यैश्वरस्य निरूपणेन न्यूनतापरिहाराऽपीति" "संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते । चतुर्विंशतितत्त्वानि तेन सांख्याः प्रकीर्त्तिताः" भा०

सांग्रामिक त्रि० संग्रामः प्रयोजनमस्य ठञ् । युद्धसाधने रथादौ । परसवर्णे साङ्ग्रामिक तत्रार्थे ।

सांघातिक त्रि० सङ्घाताय हितम् ठक् । १सङ्घातकारके षड्नाडीचक्रस्थे २जन्मनक्षत्रायधिषोडशनक्षत्रे च "देहकृद्विधनत्रिभानां नाशः सांघातिके यदा" इति ज्योतिषम् । परसवर्णे साङ्घातिकमपि उभयत्र ।

सांदृष्टिक न० संदृष्टं प्रत्यक्षादृष्टमनुसरति ठक् । १दृष्टानुसारिन्यायभेदे संदृष्टं दृष्टमात्रं फलमस्य ठञ् । २तद्व्याप्तफले त्रि० अमरः । परसवर्णे सान्दृष्टिकमप्युभयत्र ।

सांयात्रिक पु० सम्यक् यात्रायै द्वीपान्तरगमनाय साधुः ठञ् । पोतेन वाणिज्यकारके अमरः ।

सांयुगीन त्रि० संयुगे युद्धे साधुः प्रतिजना० खञ् । रङ्गकुशले अमरः । [ष्ठाद्दिक्शब्दाच्छे ।

सांराविण न०सम्+रु-भावे णिनि ततः स्वार्थेऽण् । व्याप्तौ

सांवत्सर पु०संवत्सरं तज्ज्ञानोपयोगिशास्त्रं वेत्ति अधीते वा अण् । ज्योतिर्वेत्तरि १गणके अमरः । २वर्षसञ्ज्ञिनि त्रि०

सांवत्सरिक त्रि०संवत्सरे भवः ठञ् । प्रतिवर्षं भवताकृत्तेर्व्ये श्राद्धभेदे गोभिलः "अत ऊर्द्धं संवत्सरे संवत्सरे वा०

यान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यादिति", "ऊनं वर्षं संपिण्डीकरणान्मासोनमित्यादाद्यसंवत्सरादूर्द्धं संवत्सरे संवत्सरे प्रतिवर्षं यस्मिन्नहनि मृतस्तस्मिन्नहनि मृताय दद्यात्। व्यासः "प्रतिसंवत्सरं चैवमेकोद्दिष्टं मृताहनि" । एतेन संपिण्डीकरणात्पूर्वमेव आद्यसंवत्सरेऽपि मृताहे मासान्तरं कर्त्तव्यमिति मैथिलोक्तं हेयम्। व्यासवाक्ये हेमाद्रिधृतवचनस्य "पूर्णे संवत्सरे मासं षोडशं परिकीर्त्तितम्। तेनैव च संपिण्डत्वं तेनैवाब्दिकमिष्यते"। अत्र पूर्णसंवत्सरक्रियमाणमासाद्यो यथोभयनिर्देशेन संपिण्डीकरणमासादभ्युभयनिर्देशो न पूर्णसंवत्सरे मासादिकालस्य। एवं षण्मासादय आद्येऽभ्युच्चेयम्। मत्स्यपु० "ततः प्रभृतिसंक्रान्त्यादयस्तिथ्यादिपर्वसु। त्रिपिण्डमाचरेत् मासमेकोद्दिष्टं मृताहनि"। ततः प्रेतत्वपरिहारात्, त्रिपिण्डं त्रैपुरुषम्। निरूपदग्धमृताहशब्दः मृतसम्बन्धिमासपक्षतिथिविशेषपरः। उपपदात्तु क्वचित्तिथिविशेषमात्रपरः। यथा मृताहे प्रतिमासं कुर्य्यादित्यादौ। अङ्गः "संपिण्डीकरणादूर्द्धं यत्र यत्र प्रदीयते। तस्य तस्य त्रयं कुर्य्यात् वर्जयित्वा मृताहनि। कृताकृता त्रयो यस्य प्रेतपक्षे ऽथ वा पुनः। संपिण्डीकरणादूर्द्धं तस्योक्तः पार्वणो विधिः" आ० त०। अधिकमेकोद्दिष्टशब्दे १५२१ पृ० पार्वणशब्दे ४११८पृ० च द्रष्टव्यम्।

सांवादिक पु० सम्यग्वादायायं ठञ्। १नैयायिके जटा०। सम्यग्वादातरि च। [अमरः। २संशयविषये च।

सांशयिक त्रि० संशयमापन्नः ठञ्। १सन्दिग्धार्थे संशययुक्ते

सांसारिक त्रि० संसाराय हितम तत्र भवो वा ठक्। १संसारभवे २संसारोपयोगिनि वा पदार्थे।

सांसिद्धिक त्रि०संसिद्धिः स्वभावसिद्धिः तया निर्वृत्तं ठञ्। स्वभावसिद्धे "सांसिद्धिकमुदाहृतम्" भाषाप०।

साकम् अव्य० सह अकति अक-असु आदेशः। १सार्द्धे २सहार्थे अमरः। तद्योगे गौणक्रियान्वयिनि तृतीया।

साकल्य न० सकलस्य भावः ष्यञ्। १समुदाये। स्वार्थे ष्यञ्। २सकले होमार्थं निश्चितेषु ३तिलादिद्रव्येषु च।

साकाङ्क्ष त्रि० सह आकाङ्क्षया वर्त्तते यः। १सापेक्षार्थे यावद्बोधोपयोग्याकाङ्क्षायुक्ते २पदभेदे च। [३सावयवे च।

साकार त्रि०सह आकारेण मूर्त्या। १मूर्त्तिविशिष्टे देवादौ

साकल्लड पु० सकृच्छब्द एव स्वार्थे अण। सकृच्छब्दे (पक्षिकृते इत्ये) राजनि०।

साकेत न० आक्रम्यते आकेतः सङ्केतेन। अयोध्यापुरे अमरः० "अनन्त आसेतनिषादिनकौ" इति रघुः।

सात्विक पु० सत्त्वे स्थितः सुङा० ठञ्। १यमे त्रि०की०। सत्त्वानां समाहारः सत्त्वेदम् वा ठञ्। २सत्त्वगुणयुक्ते न० इतरसम्बन्धिनि च त्रि०।

साक्षात् अव्य० सह अक्षति अक्ष-अति षादेशः, सह अक्ष अक्षति अत-क्विप् वा। १लौकिकप्रत्यक्षे २तुल्ये च अमरः साक्षादा०क्त्रि वा उप०समासः। साक्षात्कृत्य कृत्वा वा। इतरूपे चैतस्मे च "यतसाक्षात् उपरोक्षादुब्रह्म" श्रुतिः।

साक्षात्कार पु० साक्षात्+कृ-घञ् साक्षादि० उप०। लौकिकसन्निकर्षजन्ये प्रत्यक्षे।

साक्षिन् त्रि०अक्ष-अच्चि अक्ष इनि "साक्षाद् द्रष्टरि" पा०इनि वा नि०। १साक्षाद्द्रष्टरि। स्त्रियां ङीप्। २परमेश्वरे पु० "साक्षी चेताः केवलोनिर्गुणश्च" श्रुतिः। अयमेव साक्षिचैतन्यस्येश वेदान्तपरिभाषादौ जीवतोऽनुपदं वक्ष्यते। व्यवहारे साक्षिलक्षणादिकं वीर०मि० निरूपितं यथा "तत्र प्रमाणभेदप्रमाणविषयव्यवस्थे क्रियापादप्रसादे विविक्ते। अधुना साक्ष्यिप्रमाणसामान्यभेदः प्रस्तूयते। तत्र साक्षिलक्षणमाह मनुः "मनसैदंगतं साक्ष्यं अनुक्तान्वै विवक्षतः"। मनसैदंगतस्य साक्ष्यंशस्यैवं साक्षिनिरूपि स्मरति। "साक्षाद् द्रष्टरि संज्ञायामिति"। तच्च श्रुत्यसिद्धमात्मव्यापकत्वात्। श्रुतसाक्षादीनामपि साक्षित्वव्यवहारविषयत्वात्। अतएव अक्षादित्युपलक्षणं प्रमाणमात्रस्य, विवादविषयप्रमाता साक्षीति विवक्षितम्। साक्षिप्रयोजनमाह नारदः "सन्दिग्धेषु तु कार्य्येषु द्वयोर्विवदमानयोः। दृष्टश्रुतानुभूतत्वात्साक्षिभ्यो व्यक्तिदर्शनम्" इति। दृष्टश्रुताभ्यामनुभूतत्वादित्यर्थः। यद्वा दृष्टत्वात् श्रुतत्वादनुभूतत्वाच्चेत्यर्थः। अनुभूतत्वादित्यनेन च गोदृष्टमन्यायेन प्रमाणान्तरजन्योऽनुभवो गृह्यते। व्यक्तिदर्शनं विवेकज्ञानम्। आत्मा-यतः "अर्थिप्रत्यर्थिसाक्षिभ्यादनुभूतन्तु यद्भवेत्। तद्व्यक्तं साक्षिणो वाक्यमन्यथा न हरेत्स्मृतिः" अर्थिप्रत्यर्थिसाक्षिभ्यादनुभूतमिति सूत्रकारः स्मरः। तदपाक्षिष्येऽपि अवधादिना साक्ष्यस्य वचनान्तरैरनुमतत्वात्। तच्च साक्षिभेदनिरूपणे व्यक्तीभविष्यति। गौतमः "विप्रतिपत्तौ साक्षिनिमित्ता व्यवस्थाः"। स च साक्षी प्रथमं द्विविधः कृतोऽकृतश्च। साक्षित्वेनार्थिप्रत्यर्थिव्याक्षिप्तः कृतः। अनाक्षिप्तोऽकृतः। पुनश्च कृतस्य

षड्विधत्वाद्व्रतस्य षड्विधत्वादेकादशविधः। यथाह नारदः "एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः। व्रतः षड्विधस्तेषां षड्विधोऽत्र उच्यते। लिखितः भागितश्चैव यदृच्छाभिज्ञ एव च। गूढश्चोत्तरसाक्षी च साक्षी षड्विधः स्मृतः" इति। षड्व्रतानामपि कात्यायनेन स्वरूपनभिहितम् "अर्थिना स्वयमानीतो यो लेख्ये समर्प्यते। स साक्षी लिखितो नाम भागितः पत्रकादृते" इति। भागितः पत्रकादृते इत्यपि विहितं तेनैव "वस्तु कार्यं प्रतिज्ञार्थं दत्वा कार्यं पुनः पुनः। कार्यते स्वर्थिना साक्षी च भागित दृष्टोच्यते" इति दर्शयिष्येत्तन्नभावितमयुक्तम्। कार्यं व्यवहारपदं दर्शयित्वा प्रमाणस्य कार्यप्रसिद्ध्यर्थं कालान्तरे व्यवहारनिर्णयसिद्ध्यर्थं पुनः पुनः कार्यते कार्यते च विवादनिराकरणाय यः स भागितो नाम साक्षीत्यर्थः। यस्तु यदृच्छया प्रसङ्गादागतत्वेनास्य साक्षी भवेति साक्षित्वेन निरूपितः स यदृच्छाभिज्ञः भागितत्वाच्च पत्रानाहूतत्वेन साक्षेऽपि स्वरूपभेदः स्पष्टोऽपि तेनैव विहितः "प्रयोजनार्थमानीतः प्रसङ्गादागतश्च यः। द्वौ साक्षिणौ स्मृतिस्थितौ पूर्वपक्षस्य साधकौ"। गूढभागतौ "अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं श्रुत्वा। यः आह्यते स्थितो गूढो गूढसाक्षी च उच्यते" इति। उत्तरसाक्षिस्वरूपाच्च "साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते। अवधाक्षावधाद्वापि स साक्ष्युत्तरसंज्ञितः" इति। षड्विधत्वाद्व्रतस्य भेदो नारदेनैव दर्शितः "आनन्दश्च प्राड्विवाकश्च राजा च अवधारिणश्च। कार्यं व्यधिकृतो यः स्यादर्थिना प्रहितश्च यः। कुल्यः कुलविवादेषु विज्ञेयोऽत्रेऽपि साक्षिणः"। प्राड्विवाकपदं लेखकस्योपलक्षणम् "लेखकः प्राड्विवाकश्च सभ्याश्चैवानुपूर्वशः। क्रमे पठन्ति तत्कार्यं साक्षिणः षड्दाहृताः" इति वचनात्। दूतपदन्तु लेखितमधिकृतादावेतानेव द्वादश साक्षिण आह "लिखितो लेखितो गूढः भागितः कुल्यदूतकौ। यादृच्छोत्तरश्चैव कार्यमध्यगतोऽपरः। सपोऽध्यक्षसभा आप्तः साक्षी द्वादशधा स्मृतः" इति। तन्नृष्णाभ्यपि भागितादिपदानि भागितत्वादीन्याह स एव "प्रभेदभेदां षड्भागि यथावदनुपूर्वशः। भागितानामभिलिखितं येन यं चित्रमेव च। निवासश्च न विज्ञेयः साक्षी लिखितवंशजः। अर्थिना च क्रियाभेदैश्च कृत्वा ऋणादिकम्। प्रत्यक्षं लिख्यते वस्तु लेखितः स उदाहृतः। कृत्यावधिकृतो वस्तु आह्यते ऋषिभाषितम्। विनिश्चुते यथाभूतं गूढसाक्षी स कीर्तितः। आह्यते यः स्मृतः साक्षी ऋणन्यासक्रियादिके। आर्यते यो यदृच्छैव भागितः सोऽभिधीयते। विभागदाने विषये भागितर्यत्नोपदिश्यते। द्वयोः समानो धर्मज्ञः स कुल्यः परिकीर्तितः। अर्थिप्रत्यर्थिवचनं श्रुत्वायात् प्रेषितस्तु यः। उभयोः सम्मतः साधुर्दूतकः स उदाहृतः। क्रियमाणे च कर्तव्ये यः कश्चित् स्वयमागतः। अत्र साक्षी तत्स्वाक्षस्थो(?) यादृच्छिकस्तु सः। यस्तु साक्षी दिशं गच्छन् मुमूर्षुर्वा यथाश्रुतम्। अन्यं संज्ञापयेत्तन्तु विद्यादुत्तरसाक्षिणम्। साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते। अवधाक्षावधाद्वापि स साक्ष्युत्तरसंज्ञितः। उभाभ्यां यत्र विज्ञप्तं कार्यं वापि निवेदितम्। गूढचारी स विज्ञेयः कार्यमध्यगतस्तथा। अर्थिप्रत्यर्थिनोर्वाक्यं यच्छ्रुत्वाभूता स्वयम्। स एव तत्र साक्षी स्यादिवादे द्वयोरपि। निर्णीते व्यवहारे तु पुनर्न्यायो यदा भवेत्। सभ्यैः सभ्यसहितः साक्षी स्यात् तत्र नान्यथा। दूषितं भागितं यत्र क्षीणायासु समन्ततः। अकलोऽपि भवेत्साक्षी यावत्तत्र न संशयः" इति। लिखितलेखितयोः अपरलिखनमात्रभेदादेकादशद्वादशसंख्ययोरविरोधः। सर्वे च यथासम्भवं दृष्टश्रुतरूपद्विविधसाक्षिभेदा ज्ञेयाः। क्रियाभेदैर्व्यवहारप्रकारभेदैः, तस्य प्रत्यर्थिनः। ऋणादिकमित्यादिशब्दात् यथासम्भवं सर्वविवादपदनिर्दर्शनम्। कृत्यावधिकृतं अवधायकोपलक्षणम्। विनिश्चुते इति भावे क्विप् निश्चये सम्भावित इति शेषः। उक्त(?) दूतमुक्त दूतीतिशब्दाध्याहारः। दिशं देशान्तरमन्यामित्यर्थः। उभाभ्यामर्थिप्रत्यर्थिभ्यां यत्र विज्ञप्तं यद्दीयो विश्वासः कृत इति सम्बन्धसामान्यविवक्षया षष्ठी, भावेक्त आभ्युपेत्याश्रवेयम्। गूढचारी कार्यमध्यगतश्चेत्यत्रैव संज्ञाद्वयमिति द्वादशत्वाविरोधः। दूतपदं लेखकस्यापि प्रदर्शनार्थं "दूतकः स्थितिकायस्थादिति" हरदत्तमिश्रवचनादुभयपक्षपातिसाक्ष्युपलक्षणम्। येन योऽर्थः प्रेषितत्वात्र साक्षित्वेन प्राङ्निरूपितोऽपि पश्चात् साक्षित्वेन विज्ञायोपन्यस्तः पृष्ठस्य सभायां साक्ष्यं दातुमर्हतीति कश्चितोऽर्थः। इतरथा वेतनादानादिषु लिखितादृष्टत्वे साक्ष्यभावप्रसङ्गः। दृष्टेषामिसम्भाषाच्च मनुः "यत्रानिबन्धो-

ऽधीतेन ह्यनुयादपि किञ्चन । पृष्टस्तावपि तदनुवात् यथादृष्टं यथाश्रुतम्" । अनिबद्धोऽब्रुवन्नः । कल्पतरुमदनरत्नयोरर्थक्रियां क्रियाभेदैरिति पठितं तत्रार्थक्रियायामर्थिव्यवहारक्रियाभेदैः प्रत्यक्षविशेषैराप्तवाक्यादिभिश्च ज्ञात्वा तत्सम्बन्धिनयावधार्य ऋणादिके विवादविषये यः प्रत्यक्षं प्रत्यक्षिदमक्षं लेख्यतेऽर्थिनेत्यर्थात् स तत्र लेखितः साक्षीति व्याख्येयम् । कालावधिरपि साक्ष्ये सार्थते "यदीर्घेणापि कालेन लिखितः सिद्धिमाप्नुयात् । यज्ञानचाक्षुषो लेख्यम्" कुर्यादिति शेषः । अजानन्तं लिख्यनिश्चयात्मानमन्यद्वारा साक्ष्यकमनेति लेखयेत् । स द्विविधोऽपि लिखितः साक्षी चिरकालेनापि सिद्धिक्रियावक्तव्यतामापादयेदित्यर्थः । कात्यायनः "यत्र साक्ष्येनाकृष्टलिखितश्चैकः स एव तु । न चेत् प्रत्यभिज्ञानीयात् तत्सकृत्तैः प्रसाधयेत्" । नारदः "अदृष्टात् वत्सरात् सिद्धिः साक्षिलेख्ये च साक्षिणः । आपञ्चमात् तथा सिद्धिर्यदृच्छोपगतस्य तु । वा तृतीयात् तथा वर्षात् सिद्धिर्गूढस्य साक्षिणः" इति । इदञ्च प्रायोवादेन, यतः स एवाह "अथ वा कालनियमो न दृष्टः साक्षिणः प्रति । सत्यमेवं हि साक्षित्वमाहुः साक्षविदो जनाः । यस्य लोपगता बुद्धिः स्मृतिः श्रोत्रञ्च नित्यशः । सुदीर्घेणापि कालेन स वै साक्षित्वमर्हति" । ते च "साक्षिणः कीर्त्याः कार्य्या व्यवहारेष्वसाक्षिणः । तादृशान् सम्प्रवक्ष्यामि यथा वाच्यकृतञ्च तैः । गृहिणः पुत्रिणो मौलाः क्षत्रविट्शूद्रयोनयः । क्षय्यर्णाः साक्ष्यमर्हन्ति न ये केचिदनापदि । आप्ताः सर्वेषु वर्णेषु कार्य्याः कार्य्येषु साक्षिणः । सर्वधर्मविदो लुब्धा विपरीतांस्तु वर्जयेत्" । मौलाः प्रख्यातकुलोद्भवा इति कल्पतरुः । मूलं पूर्वपुरुषान्वयस्तद्विदन्तीति मौलाः । तदधीते तद्वेदेत्यणि सति मदनरत्ने । यज्ञवल्क्यवाक्यबलबृहस्पतिवचनसंवादात् साक्षित्वेनैव पूर्वपुरुषान्वेदित्वात्तेषामत्रार्थकमौलपदानर्थक्यप्रसङ्गात्र कल्पतरव्याख्यानमेव युक्तम् । रत्नाकरोऽपि "मौलाः कुलीना" इत्येव व्याख्यातवान् । मूलं प्रतिष्ठा यां येषामस्ति ते मौलाः अर्थसंशयमेतत् । साक्षिणस्तु अवार्यं एव अर्तव्यः, यो हि यस्य भवः सोऽपि तच्छ्राद्धीत्यधिकृत्यधिति वदन् मेधातिथिरधीतशब्दमनुषज्यते प्रतिष्ठान्तरस्य साक्षित्वव्यवहारानुपयोगात् । मूलादिप्रतिष्ठायाः पदान्तरैरेवोपादानात् । अत्र जातिवयोदिपरिग्रहणं नात्यन्तिकमाप्तव्यवहारपरं, किन्तु यति सम्भवेऽनेकाध्यापनाग्निहोत्रादिकार्यबाहुल्यस्य तस्य न साक्षित्वं, साक्षान्तराभावे तु तस्यापि साक्षित्वं सम्भवत्येव । अतएव "ब्रूहीति ब्राह्मणं पृच्छेदिति" तस्यापि साक्षित्वेन प्रश्नप्रकारविधिरुपपद्यत इति ध्येयम् । अथ्युक्तः अर्थिना मतेति साक्षिणः सन्तीति निर्दिष्टा न तु अवश्यमेवानेन वदनेन साक्षिणः स्युरिति बहवः । याज्ञवल्क्यः "तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः । धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः । ज्ञातयः साक्षिणो ग्राह्याः श्रौतस्मार्तक्रियापराः । यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः" । ज्ञातयोऽक्षिभ्यो न्यूना न भवन्ति परन्तु यथेष्टं भवन्तीत्यर्थः । आप्तवो मूर्धावसिक्तादवः । वर्णा ब्राह्मणादयः । तथा च मूर्धावसिक्तादीनां मूर्धावसिक्तादयो ब्राह्मणादयो ब्राह्मणादीनां साक्षित्वेनोपादेयाः । अस्मन्मते सर्वे सर्वजातीया सर्वेषु जातीयेषु वादिप्रतिवादिषु साक्षिणो ग्राह्या इत्यर्थः । व्यासः "धर्मज्ञाः पुत्रिणो मौलाः कुलीनाः सत्यवादिनः । श्रौतस्मार्तक्रियायुक्ता विगतद्वेषमत्सराः । श्रोत्रिया सपराधीनाः क्षत्रयज्ञाप्रवासिनः । युवानः साक्षिणः कार्या व्यवहादिषु विज्ञानता" इति । कात्यायनः "प्रख्यातकुलशीलाश्च लोभमोहविवर्जिताः । आप्ताः शिष्टा विबुद्धा ये तेषां वाक्यमसंशयम् । विभाव्यो वादिना वादक् सदयैरेव भाषयेत् । लोभद्वेषाद्यत्र क्वचित्तु साक्षिभिर्भाषयेत् सदा" इति । आप्ताः यथार्थवादिनः । विबुद्धा विवादविषयीभूतार्थज्ञानवन्तः याज्ञवल्क्यज्ञानवन्तश्च "अतिबुद्धिपूजार्थेभ्यश्चेति" पा० कर्मरि क्तः । आदिशब्दश्चेति मदनरत्ने । तेषां वाक्यमसंशयं यथा भवति तथा वादिनो विभाव्योऽङ्गीकारयितव्योऽर्थात् प्रतिवादी । तत्र विशेषमाह वादक् प्रतिवादी तत्सदृशैस्तज्जातीयैरेव भाषयेत् । वादिनेत्युपलक्षणम् । वादिना प्रतिवादिना तज्जातीयैरेव विभाव्यः तथा च नारदः "श्रोत्रीषु श्रोत्रियस्याः श्रोत्रेषु वर्णिनः । ब्रह्मर्षीषु ब्रह्मर्षयः स्त्रीषु स्त्रियः स्त्रीषु च साक्षिणः" इति । पुनरपि "स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशा द्विजाः । शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः । श्रोत्रियस्त्रीणां सत्यपि वर्णित्वे पृथक्निर्देशो गोदमभाष्यादेव । प्रयोजनं चाग्राह्यत्वनिरासबोधनम् । वर्णिनश्च दर्शिताः कात्यायनेन "सिद्धिकः श्रोत्रियपुत्राश्च ब्रह्मचारिगृहस्थाश्च यतयः । सत्यकृत्याश्च ये चान्ये तेषां ज्ञानन्तरीह्यतः ।

टाद्यचारणसङ्घानां कृष्यस्त्रावुधजीविनाम् । प्रत्ये-कैकसङ्घानां नायका वर्गिणः स्मृताः । तेषां दादः स्ववर्गेषु वर्गिणस्तेषु साक्षिणः" । अत्र सर्वत्र न्यूना-धिकविशेषणोपादानञ्च दोषाय अदृतभाषणभीरुत्वसत्य वदनशीलत्वस्य च साक्षित्वप्रयोजकस्योपलक्षणार्थत्वात् तेषाम् । ते च साक्षिणः क्रियतक्कृत्वाः कुत्र चाह्वा स्त्यपेक्षायामाह बृहस्पतिः "नव वप्त पञ्च वा कुलानां स्युः परिग्रहे । दश पञ्च त्रयो वापि साक्षिणः स्युः परिग्रहे" । लिखितादिषु स एवाह "लिखितौ द्वौ तथा मूढौ लिखितुः पञ्च लेखिताः । यदृच्छाः श्रावितास्त्रयो ज्ञेयाः साक्ष्यं तु षोडश" । दूतकः खटिकाग्राही कार्यसम्प्रेषणकृद्यः । एक एव प्रमाणं स्यादृषोऽन्यत्र स्त्रयेव वा । खटिकाग्राही लेखकः एक एवेत्येकवचनो वाद्यपेक्षया "मैकं पुरुषं कदाचन" इत्युक्तेः अनाप्तत्व-कल्पार्थो न नियमार्थोऽदृष्टार्थत्वप्रसङ्गात् । मनुवरास्तु साक्षिणो श्रेया इति योगीश्वरोक्तमेतदभिप्रायकमेव । लिखितादीनामभावानुमतत्वे साक्षात्येकस्यापीत्याह योगी श्वरः "उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित्" । अत्रापि "श्रोतस्मार्त्तक्रियापरा धर्मप्रधाना" इत्यादिविशे-षोपादानात् मनुवराणामपि धर्मवित्त्वं समानत्वापि तेषामुभयानुमतौ न भवत्येव साक्षित्वं, द्वयोरेकस्य लोभसाहसत्वमैवेति भेद इति मिताक्षरा । नारदोऽपि "उभयानुमतो यः स्यादुदयोर्विवदमानयोः । स साक्ष्ये-कोऽपि साक्षित्वं प्रष्टव्यः स्यात्तु संशये" । आप्तत्वेन राजादिभिरवधारितोऽप्येकः साक्षीत्याह व्यासः "शुचि-रक्षियश्च धर्मज्ञः साक्षी यत्तदुभूतवाक् । प्रमाणमेकोऽपि भवेत् साहसेषु विशेषतः" इति । तदुभूता यथार्थत्वेन ज्ञातिमत्तया वाक्यस्येत्यनुभूतवाक् । कात्यायनः "अभ्य-न्तरस्तु निःशेषे साक्ष्यमेकोऽपि वाच्यते । अर्थिना प्र-च्छितः साक्षी भवेदेकोऽपि याचितः" । याचित इति निःशेषविशेषणम् । न्यायतोऽदण्ड्यतापीति वाक्यशक्तिः । अन्तरङ्गकारस्तु याचितं विवाहाद्यर्थं याचितं दृष्टोत-प्राभरणादिकं याचितकमिति यावदित्याह । निःशेषवि-शेषणत्वेऽप्यौदयाचिते तस्मिन्नभ्यन्तरस्यैकस्यासाक्षित्वप्रस-ङ्गादुभयसहितानामप्रसङ्गेनोत्तरेण व्याख्या प्रपञ्चा । कृष्ण ज्ञातिधनविवादे तस्मिन्नेकोऽपि साक्षीत्याह स एव "संक्षेत्रे देव सदने जङ्गमे वा विभावसेत् । एक एव प्रमाणं स विवादे तत्र कीर्त्तितः" । एतच्च जङ्गमा-स्थिरे सत्यवादिनोर्द्वयोरेकस्य वाक्यमितिपदर्शनार्थं न नियमार्थम् । अदृष्टार्थत्वप्रसङ्गादिति ध्येयम् । उक्त-लक्षणयोस्तयोरप्रतिषेधरहितानां याज्ञवल्क्यानां स्मृतिनामर्थसाक्षिणोऽपि स्मृतिभूताः" ।

ते च सभासाक्षिशब्दे ५२६६ पृ० । दर्शिताः ।

साक्षिणो मिथ्याकथने अकथने च दोषो यथा

"दृष्टो हि साक्षी यः साक्ष्यं अतद्वस्त्वन्यथा वदेत् । स पूर्वनाम्नः वक्ष्यते दण्डात्तथा परान् । यत्र कार्यार्थं तत्त्वज्ञो जानन्नपि न भाषते । सोऽपि तेनैव पापेन लिप्यते नात्र संशयः" भा०शा० "ब्रह्मस्वस्यापहारी च मिथ्या च ब्रूयादसंशयः । मित्रद्रोही कृतघ्नश्च समा-स्फलमश्नुते । एते सर्वापातकिनस्त्रिषु लोकेषु नि-न्दिताः । आसप्तमे च नरके पतन्ति ब्रह्मणः मतम्" ब्रह्मवै०ब्रह्म०ख०४४अ० । "मिथ्यासाक्ष्यं यो ददाति का-मात् क्रोधात्तथा भयम् । सभायां पार्षदि वक्ष्ये च वक्तव्यं इति स्मृतः । मिथ्यासाक्ष्यं पार्षदि वा भारते वक्ष्ये वो देव ! । यावदिन्द्र चतुर्दश मन्वन्तरं तावद्दुष्कृतम् । यन्तं वेदितैः सर्वैर्भीतेन अचिन्तया । कुक्कुरे च सर्पविष्मूत्रं भक्षयेत्तेन ताडितः । कृकवाकौ भवेत्सम्य-भारते सप्तजन्मसु । सप्तजन्मसु भवेत्कुष्ठैः विटभिः सप्तभिः सह । ततो भवेच्च शूद्रस्य सङ्कारख्ये च याजकैः । ततो भवेत्सरो मूकस्ततः मूकस्ततः मूषिः" ब्रह्मवै०प०४८अ० ।

साक्षिणो यथा विवादे कर्तृत्वाद्यभाव एवं जीवेश्वर-साक्षिणो कर्तृत्वाभावः ईश्वरसाक्षिशब्दे १०४८पृ०दृश्यम् तयोर्हृत्पद्मादिप्रकाशकत्वात् तथात्वम् अन्तःकरणमायया-र्जडत्वेन विषयावभासकत्वाभावेन चैतन्योपाधित्वमेव न तु विशेषणत्वं विषयावभासकत्वे तदधीनायोगात् । अत-एव जीवोपाधिर्लिङ्गशरीरमुक्तादेरेवावभासकत्वाच्चा-तिप्रसङ्गः इति वेदान्तपरिभाषाप्रत्यक्षप्रदि० दृश्यम् ।

सांख्य० भाष्ययोस्तत्रत्य साक्षित्व सूत्रयित्वा यथा "नन्वेवं साक्षित्वसामान्यात् पुरुषाणां कथं बहैकत्वं तत्राह "साक्षात्सम्बन्धात् साक्षित्वम्" स्त्र० पुरुषस्य यत् साक्षित्वमुक्तं तत् साक्षात्सम्बन्धमात्रात् न तु परि-शामत इत्यर्थः । साक्षात्सम्बन्धेन बुद्धिमात्रसाक्षितावं-गम्यते "साक्षाद्दृष्टरि संज्ञायामिति" पा०साक्षिशब्दस्यु-त्पादात् । साक्षाद्दृष्टृत्वं चाव्यवधानेन दृष्टृत्वम् । पुरुषे च साक्षात्सम्बन्धः स्वबुद्धिवृत्तेरेव भवति । अतो बुद्धे-रेव साक्षी पुरुषोऽन्येषां तु दृष्टृत्वमिति साक्षीत्वौ

विभागः। ज्ञाननियामकज्ञाधीकारतास्थानीयः प्रतिबिम्बरूप एव सम्बन्धो न तु संयोगमात्रमतिप्रसङ्गादित्यसङ्कटावेदितम्। विष्णोः सर्वसाक्षित्वं त्विन्द्रियादिव्यवधानाभावमात्रेण गौणम्। अत्तसम्बन्धात् साक्षित्वमिति पाठे त्वत्तमत्वबुद्धिः करणत्वसामान्यात्। तस्या यथोक्तात् प्रतिबिम्बरूपात् सम्बन्धादित्यर्थः" भा०। तत्रैव अन्यत्र "सुषुप्त्राद्यसाक्षित्वम्" सुषुप्त्राद्यवस्थात्रयस्य बुद्धिनिष्ठस्य साक्षित्वमेव पुंसीत्यर्थः। तदुक्तम् "जायत् स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः। तासां विलक्षणो जीवः साक्षित्वेन व्यवस्थितः"। इति तासां बुद्धिवृत्तीनां साक्षित्वेन तद्विलक्षणो जाग्रदाद्यवस्थारहितो निर्णीत इत्यर्थः। तत्र जाग्रन्नाभावास्थेन्द्रियद्वारा बुद्धेर्विषयाकारः परिणामः। स्वप्नावस्था च संस्कारमात्रजन्यस्तादृशः परिणामः। सुषुप्त्रवस्था च द्विविधार्द्धसमग्रलयभेदेन। तत्रार्द्धलये विषयाकारा वृत्तिर्न भवति। किन्तु स्वगतसुखदुःखमोहाकारैव बुद्धिवृत्तिर्भवति अन्यथोत्थितस्य सुखमहमस्वाप्समित्यादिरूपसुषुप्तिकालीनसुखादिस्मरणानुपपत्तेः। तदुक्तं व्यासस्मृतेन "सुग्रेऽर्द्धसम्पत्तिः परिशेषादिति"। समग्रलये तु बुद्धेर्वृत्तिसामान्याभावो मरणादाविव भवति। अन्यथा समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपतेत्यागापत्तेरिति। सा च समग्रसुषुप्तिर्वृत्त्यभावरूपेति पुरुषस्तत्साक्षी न भवति पुरुषस्य वृत्तिमात्रसाक्षित्वात्। अन्यथा संस्कारादेरपि धर्मस्य साक्षिभास्यतापत्तेः। सुषुप्त्रादिसाक्षित्वं तु तादृशबुद्धिवृत्तीनां प्रकाशनमिति वक्ष्यामः"। [वेदान्तप०।

साक्षिभाष्य त्रि० ३त०। साक्षिमात्रप्रकाश्ये बुद्धिवृत्त्रादौ

साक्ष्य न० साक्षिणो भावः कर्म वा यञ्। १व्यवहारविषयवृत्तवृत्तान्तकथनरूपे साक्षिकर्मणि २तद्भावे च "समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति" मनुः।

सागर पु० सगरेण निर्वृत्तः अण्। १समुद्रे अमरः २सङ्गभेदे पुंस्त्वेऽपि शब्दच०। ३संख्याभेदे संख्याशब्दे दृश्यम्।

सागरगामिनी स्त्री सागरं गच्छति गम्+णिनि न ङीषम्। १नद्यां २वृक्षभेदायाञ्च राजनि०।

सागरनेमि स्त्री सागरः नेमिरिव वेष्टनाकारो यस्याः। पृथिव्यां हेमच०। [हेमच०।

सागरमेखला स्त्री सागरो मेखलेव यस्याः। पृथिव्यां

सागरालय पु० सागर आलयो यस्य। १रत्ने शब्दच०।

सागरोत्थ न० सागरात् उत्तिष्ठति उद्+स्था क। सागरोद्भवे राजनि०।

साग्नि(क) पु० सहाग्निना अग्निहोत्रेण वा कप्। १श्रौतस्मार्त्ताग्नियुक्ते २अग्निहोत्रिणि द्विजे।।

साङ्कर्य न० सङ्करस्य भावः ष्यञ्। १परस्पराभावसामानाधिकरण्ये सत्येकाधिकरणवृत्तित्वरूपे न्यायोक्ते जातिबाधके दोषभेदे सङ्करशब्दे ५१८१ पृ० दृश्यम् २सङ्करस्य धर्मे च। [शि०कौ०।

साङ्कल त्रि० सङ्कलेन निर्वृत्तः सङ्कला अण्। सङ्कलनजाते

साङ्कृति पु० वैयाघ्रपद्यगोत्रस्य प्रवरे मुनिभेदे "वैयाघ्रपद्यगोत्राय साङ्कृति प्रवराय च" भाग्नतर्षणमन्त्र।

साङ्ग त्रि० सहाङ्गेन। अङ्गयुक्ते "तज्जातं साङ्गमधीत्यैव" "साङ्गं तत् क्रियते पुनः" इति च स्मृतिः।

साङ्गतिक त्रि० सङ्गत्या निर्वृत्तः ठक्। सङ्गतिसिद्धे युक्ते।

साचि अव्य० सच-इण्। १वक्रे २तिर्य्यगर्थे च अमरः।

साचिवाटिका स्त्री साचि यथा तथा वटति वट-ण्वुल्। १श्वेतपुनर्नवायां रत्नमा०।

साचीकृत त्रि० अञ्चि साचि क्रियते अञ्चि-कृ-क्त दीर्घः। वक्रीकृते त्रि०कौ०"साचीकृता चारुतरेण तस्थौ" कुमा०

साट प्रकाशने अद०चु०उ०स०सेट्। साटयति ते असिसाटत् त।

साटोप त्रि०सहाटोपेन सहस्य सः। १सगर्वे २विकटे च।

सात दुःखे उपादाने अद० चु० उभ० अक० सेट्। सातयति ते असिसातत् त। अयं सौत्र इत्येके। [३नष्टे च।

सात न० सात-अच्। १सुखे अमरः। सन-क्त। २दत्ते

सातला स्त्री सातं सुखं लाति ला क। १चर्मकषायाम् अमरः। २मेदुरवृक्षभेदे राजनि०। [अमरः।

सातवाहन पु० शालिवाहनरूपे हेमच०।

साति स्त्री सन-क्तिन्। १व्यवसाने २दाने ३तीव्रपीड़ायाञ्च

सातीन(ल)क पु० सतीन(ल)एव स्वार्थे कन्। सतीन(ल) कदले (चुड़मटर) रायमुकुटः।

सात्यकि पु० सत्यकस्य वृष्णिवंश्यभेदस्यापत्यम् अण्। शिनेर्नप्तरि स्वनामख्याते वृष्णिवंश्ये क्षत्रियभेदे त्रिका०।

सात्यवत पु० सत्यवत्यां मत्स्यगन्धायां भवः अण्। १वेदव्यासे त्रिका०। २सत्यवतः सम्बन्धिनि च। [कृष्णे।

सात्यवतेय पु० सत्यवत्या अपत्यम् ढक्। सत्यवतीसुते व्यासे

सात्वत् पु० सातयति सुखयति सात-क्विप् सात् परमेश्वरः स उपास्यत्वेनास्त्यस्य मतुप् मस्य वः। विष्णुपासके "भगवान् सात्वतां पतिः" भागवतम्। श्रीधरेऽस्य

सङ्घे यण् सात्वतः विष्णुरूपाङ्गत्वेनास्त्रस्य सत्वपि च्नोऽस्त्रान्दसः इत्युक्तम् ।

सात्वत त्रि० सत्त्वमेव सात्त्वं तत्तनोति तन–ड । १विष्णौ त्रिका० यदुवंश्ये श्वंशुपुत्रे २नृपभेदे "अथांशोः सात्वतो नाम विष्णुभक्तः प्रतापवान्" भूमपु० २२ अ० । तद्वंशजे ३बलरामे हेमच० । "सत्त्वं सत्त्वाश्रयं सत्त्वगुणं सेवेत केशवम् । योऽनन्यत्वेन मनसा सात्वतः स उदाहृतः" इत्युक्ते ४विष्णुभक्तभेदे । ५सात्वतन्त्रपाधिष्ठितदेशे सोऽभिजनोऽस्य अण् । पित्रादिक्रमेण हृतद्देशवासिनि च त्रिका० । यदुवंशप्रोतपत्त्वेन ७शिशुपालमातरि स्त्रीत्वे ङीप् । "न दूये सात्वतीसूनुः" माघः । सा च नाटकस्य दशवृत्तिभेदे च । तस्या लक्षणादि सा०द०उक्तं यथा "सात्वती बहुला सत्त्वशौर्य्यत्यागदयार्जवैः । सङ्घर्षोत्थापकैर्हास्यैरङ्गैर्युक्ता तथा स्त्रियाम् । उत्थापकोऽथ संघात्यः संलाप परिवर्त्तकः । विशेष इति चत्वारः सात्वत्या परिकीर्त्तिताः । उत्तेजनकरो वाक्यैरुत्थापक उच्यते । सन्ध्यर्थदैवयुक्तादेः संघात्यः सङ्घभेदनम् । संलापः स्यादु गभीरोक्तिर्नानाभावसमाश्रयः । प्रारब्धादन्यकार्य्याणां करणं परिवर्त्तकः" । तत्रोभे एकलक्षणकरोऽपि । दशातिभेदे पुंस्त्वो० सुधन्वाचार्य्यशब्दे दृश्यम् ।

सात्त्विक पु० सत्त्वात् सत्त्वगुणप्रधानात् विष्णोर्भवति ठञ् । १चतुर्मुखे ब्रह्मणि हेमच० । तस्य विष्णुनाभिकमलजत्वात् तथात्वम् । सत्त्वमेव सात्त्वमस्यास्य ठन् । २विष्णौ । सत्त्वगुणेन तत्कार्य्येण मनसा वा निर्वृत्तः ठञ् । ३सत्त्वगुणजाते ४सत्त्वप्रधानेमनोविशेषजाते च । ५शृङ्गारादिरसानुगुणे भावभेदे सा०द०

"उक्ता स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः । तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि । विकाराः सत्त्वसम्भूताः सात्त्विकाः परिकीर्त्तिताः । सत्त्वमात्मोद्भवत्वात्ते भिन्ना अप्यनुभावतः । स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः" । एतेषां लक्षणानि तत्तच्छब्दे दृश्यानि । स्त्रीणां यौवने सत्त्वजाते ६अलङ्कारभेदे सा०द० "यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः" । अलङ्कारशब्दे ४८ पृष्ठे दृश्यम् । ७सत्त्वप्रधाने त्रि० । तद्देवीपूजाभेदे स्त्री "सात्त्विकी चण्डिकापूजा त्रिविधा परिकीर्त्तिता । सात्त्विकी जपराजसी चैव तामसी चेति तां शृणु । सात्त्विकी जपयज्ञेषु नैवेद्यैश्च निरामिषैः" तिं त० । ८भावभेदे पु० "सत्त्वोत्कटे मनसि ये प्रभवन्ति भावास्ते सात्त्विका इति विदुर्मुनिपुङ्गवास्तु" सर्वान० । १०सत्त्वप्रधाने पुराणभेदे "वैष्णवं नारदीयञ्च तथा भागवतं शुभम् । गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने !। सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै । सात्त्विकेषु पुराणेषु विष्णुमाहात्म्यवर्णनम्" उपपुराणशब्दे दृश्यम् । ११स्मृतिभेदे स्त्री "वासिष्ठं चैव हारीतं व्यासं पाराशरं तथा । भारद्वाजं काश्यपञ्च सात्त्विक्यो स्मृतिदाः शुभाः" पद्मपु० उत्त० ४२अ० । १२दुर्गायां स्त्री ङीप् । १३गीतोक्तेषु श्रद्धादिभेदेषु यथायथं त्रि० यथा "सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत !। श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः । यजन्ते सात्त्विका देवान्" (श्रद्धा) "आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः । यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु" इत्युपक्रमे "आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः । रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः" (आहारः) "अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्त्विकः" (यज्ञः) "श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः । अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते" (कायिकादि त्रिविधं तपः) "दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्" (दानम्) "सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्" (ज्ञानम्) "नियतं सङ्गरहितमरागद्वेषतः कृतम् । अफलप्रेप्सुना कर्म यत्तत् सात्त्विकमुच्यते" (कर्म) "मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः । सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते" (कर्त्ता) "प्रवृत्तिं च निवृत्तिं च कार्य्याकार्य्ये भयाभये । बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ ! सात्त्विकी" (बुद्धिः) "धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ ! सात्त्विकी" (धृतिः) "यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्" (सुखम्) "कार्य्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन !। सङ्गं त्यक्त्वाफलं चैव स त्यागः सात्त्विको मतः" (त्यागः) । तत्र सात्त्विकाहारस्य चित्तशुद्धौ हेतुत्वं छान्दो० उक्तं यथा "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः" । सत्त्वं मनः । "अन्नमयं हि सोम्य ! मनः इत्यादिना" तस्य

110 भाग ६

अङ्गमयत्वञ्च तत्रोक्तेरयात्वम्। सांख्यमतसिद्धे सत्त्वप्रधाने १४महत्तत्त्वे १५अहङ्कारतत्त्वे च "सात्त्विको राजसश्चैव तामसश्च त्रिधा महान्" सां०प्र० धृतवाक्यम्। "सात्त्विकमेकादशकं प्रवर्त्तते वैकृतादहङ्कारात्" सां०का० एकादशानां पूरणमेकादशकं मनः षोडशात्मगणमध्ये सात्त्विकम्। अतश्चादैकृतात् सात्त्विकाहङ्कारान्मनो जायत इत्यर्थः। "वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा। अहङ्कारतत्त्वादिकुर्वाणान्मनो वैकारिकादभूत्। वैकारिकाश्च ये देवा अर्थाभिध्यङ्गं यतः" सा०प्र०भ० वाक्यम्। १६अध्यवसायादौ च "अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्। सात्त्विकमेतद्रूपं तामसमस्मादिपर्य्यस्तम्" सां०का०। "सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्। भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्" सां०का० "प्रकाशलाघवशालिनेकादशक इन्द्रियगणः सात्त्विको वैकृतात् सात्त्विकादहङ्कारात् प्रवर्त्तते" तत्त्वकौ०।

साद्नी स्त्री सादयन्ते रोगा अनया सद्-णिच्-करणे ल्युट्-ङीप्। कटुक्यां राजनि०।

सादि पु० सद्-इञ्। १सारथौ हेमच० २योद्धरि उज्ज्वलदि० ३अश्वसज्जे त्रि० ४वायौ पु० संक्षिप्तसारः।

सादिन् पु० सद्-णिनि। १अश्वारोहकर्त्तरि अमरः। २गजारोहिणि ३रथारोहिणि च मेदि०। ४अश्वसज्जे त्रि० स्त्रियां ङीप्।

सादृश्य न० सदृशस्य भावः ष्यञ्। तद्भिन्नत्वे सति तद्गतभूयोधर्मरूपे उपमानधर्म्मे। तत्र सादृश्यं सप्तपदार्थातिरिक्तः पदार्थ इति मीमांसकाः। तन्मतमुक्तं तत्त्वचिन्तायां "सादृश्यमतिरिक्तः पदार्थ इति मीमांसकाः"। तन्मतञ्च उपमानचिन्तामणौ विस्तरतस्तु उपमानशब्दे १२३५ दर्शयिष्यते। सादृश्यवाचका इवादिनिपाताः सदृशादि शब्दाश्च तत्र इवादिभिः निपातैः सादृश्याभिधाने प्रतियोग्यनुयोगिनोः समानविभक्तिकत्वं, गौरिव गवय इत्यत्र चन्द्रवित्र मुखं पद्मवीत्यादि। अन्ये तु सदादिशब्दा एव सोपदेशे काक्वाक्षिप्ताः इवादिशब्दाश्चेवलक्षणायां सादृश्यार्थाश्रिता इत्याहुः तत्रोपमानविशिष्टज्ञानात् तस्याभिधाने प्रतियोगिनि तृतीया षष्ठी च। तृतीयायां योगे तु षष्ठ्येव। सादृश्ये च एकस्य प्रतियोगिताऽन्यस्यानुयोगिता तत्र प्रतियोगिन उपमानत्वमनुयोगिन उपमेयत्वमिति। उपमानोपमेयभावश्च द्वयोः समयेऽपि प्रविष्टस्यैवोपमानता। तत्र काव्ये केषाञ्चिदुपमानतया वर्णनं युक्तं तद्विपरीतं कविकुलचतुरतायां यथा "वेणवः सपादिपङ्क्तयः केशपाशस्य चामरः। नीलकण्ठकलापोऽपि, धम्मिल्लस्य विधुन्तुदः। सीमन्तस्य चाध्वदण्डो ललाटस्याष्टमी विधुः। भ्रूकरश्च, कपोलस्य चन्द्रः स्यात् भ्रुकुरः स्त्रियाः। भ्रुवोः खड्गलतायुग्मे रेखापल्लवपल्लवयः। दृशश्चकोरहरिणमीनखञ्जनाञ्जनम्। कुवलं नीलमम्भोजं, श्रुतेर्दोषः सपाशकः। नासायाः शुकतुण्डश्रीरधरस्य नवपल्लवः। बिम्बोफलं प्रवालं च, दन्तानां मौक्तिकावलिः। कुन्दद्राडिमबीजानि हीरकाश्च, स्मितस्य च। स्नातस्या पुण्यायाः गाङ्गम्, स्वासस्याम्भोजसौरभम्। जिह्वायाश्चोडुगोले च वाचां भङ्गुपिकध्वनी। वीणावाद्यं मधु सुधा, सुखस्य चन्द्रमा कथा। अम्भोजदर्पणौ चापि चिबुके दर्पकायकम्। कण्ठस्य कम्बुरम्भस्य कुम्भौ वाङ्गासु वल्लरी। बाहवः कलभकरीशशाषाशाः, पाणिपल्लवस्य तु। पद्मरागाङ्गुलीनां तु पद्मबोऽम्भोजपल्लवम्। दीपो नवदलं चैव चम्पकं, नखसन्ततेः। रत्नतारेन्दुपुष्पाणि, स्तनयोः कुम्भनौ घटौ। कुम्भिकुम्भौ गिरी चक्रौ बिल्वे, सम्भ्रमस्य वेदिका। सिंहमध्यं वज्रमध्यं क्षीणदृश्यञ्च कथ्यते। उपमानानि रोमाल्याः रेखायेवानयत्रयः। नीलकान्तमणीधूमलताहिरदृश्यखण्डकाः। नाभेरम्भोजमावर्त्तो ह्रदो विवरकूपकौ। त्रिवल्या वीचिसोपानानिम्नश्रेण्यो, जघनस्य तु। पुलिनं पीठफलके, नितम्बस्य स्थलं पुनः। पर्वतः पृथिवी स्थूलोपलं वस्तु च यन्महत्। ऊर्वोः कदलिकाण्डस्तम्भकरौ करभस्तथा। जङ्घाहयस्य खण्डस्य वादस्य नवपल्लवः। कम्भोजं च गतेर्हंसखञ्जनहिरतां गतिः। इत्यान्यान्यपि स्त्रीणां पुंसामपि समानि तु। पुंसां रूपोपमानानां विशेषः कोऽपि कथ्यते। स्तम्बस्य वाजिद्विपस्तम्भौ बाहोरीश्वरः। हस्तिहस्तसमा खड्गा, वक्षसः। शिलाफलकपाटे च प्रमत्तोत्तुङ्गगतिर्गतेः। यशसः कुन्दचन्द्राद्याः शुभ्रवस्तुसमा मताः। प्रतापस्याग्निसूर्य्यौ च वाडवाग्नी रवेः करः। अवाणुपादयश्चैव रक्तवर्णपदार्थकाः। पुरुषस्य गौर्द्यवीजं संस्कारोऽङ्कुर एव च। शुक्लवर्णाः पदार्था ये तेऽप्यत्र परिकीर्त्तिताः। सामर्थ्यस्य महद्वस्तु पर्व्वतादिकमादिकम्। नीतेर्लतादिः साध्वीस्त्री ज्वाला दीपस्य कीर्त्तिता। सादृश्योत्कटे त्यादिर्वेदवाक्यं गुरोर्वचः। सामस्य स्थिरार्थेषु प्रारब्धकर्म कीर्त्तितम्। सादृश्य

कर्दमोऽकीर्त्तिः कलङ्कः कृष्णवर्णकः। अन्धकारः केशकर्मोलम्बतिश्चोपमानकम्। अकीर्त्तेः कृष्णवस्तूनि मालिन्यं तमसां ततिः। कस्तूरिकाया भ्रमरो नीलकान्तमणिर्घनः। सुगन्धिद्रव्यदाहोत्थधूमः कज्जलकं तथा। कृष्णपुष्पाम्भृतयः कामाकीर्त्तिः स्खलान्तरे। कामिनोरयशवद्दत कज्जलस्यापि तानि च। कर्पूरस्य तथा चन्द्रः यशाङ्किरणस्तथा। यूथिकाकुन्दकुसुमं विरञ्चिगण्डफलतथा। हिमखण्डोरपिण्डः प्रथित उपमानतया भवि। मनोरथस्य विज्ञेयः फलपुष्पादियुक्तरुः। कविबुद्धिफलना स्यादानन्दस्य सुधार्णवः। ब्रह्मसाक्षात्कृतिरुद्दत, कामिनीदर्शनस्य तु। अतिप्रियतमप्राप्तिर्ब्रह्मसाक्षात्कृतिस्तथा। सुधारसो नित्यसुखसाक्षात्कारस्तया मतः। पूर्णचन्द्रादिकस्यापि साक्षात्कारः प्रकीर्त्तितः। अमृतस्य तु सत्काव्यं कामिन्यधरपानकम्। ब्रह्मसाक्षात्कृतिस्तद्वत, विषस्याथ प्रकीर्त्यते। साध्वीस्त्री विरहः पापं मलिनं दुःखदं च यत्। शीताग्निः शीतकालीनशीतोदं परिकीर्त्तितम्। व्यभिचारिणी च स्त्री नारी सापि तद्वत प्रकीर्त्तिता। विरहस्याग्निराग्निश्च यातना च पदोनिधिः। दुःखदानि च वस्तूनि तत्तानि कथितानि च। पुष्पाणां कामिनी चन्द्रः कर्पूरश्च यशस्तथा। चन्द्रस्य प्रमदावक्त्रमतिशुभ्रश्च यद्भवेत्। यशः पुष्पादिकं वस्तु चोपमानतयेष्यते। सूर्यस्य शिवनेत्राग्निः काञ्चनच्छारुहस्तथा। वाडवाग्निर्जवापुष्पं वसन्तोत्पलाशकः। पद्मस्य कामिनीवक्त्रं पाटल रक्तवस्तु च। इन्दीवरस्य कस्तूरी नीलकान्तमणिस्तथा। कामिनीनयनं तद्वत कैरवस्य तु चन्द्रमाः। कुन्दादिपुष्पमन्यच्च शुभ्रवर्णस्य यद्भवेत्। राज्ञ इन्द्रः कुबेरश्च चन्द्रमा भास्करस्तथा। नलप्रभृतयो ये तु प्रसिद्धाश्चक्रवर्त्तिनः। मेघस्य काली कृष्णस्य नीलपाथोजसंहतिः। इन्दीवरं वनं दाता कृष्णार्थी अम्बरादयः। शम्भोश्च चन्द्रादिशुक्लवर्णपदार्थकाः। कन्दर्पस्य नलचन्द्र व्याह्निौ च पुरूरवाः। दीपस्यग्निश्चमत्कारश्च प्रतापः शाल्मकं तथा। वायोः शीघ्रगवस्तूनि कीर्त्तितानि पुरातनैः। अश्वस्य वायुर्हरिणो मनश्च हस्तिनो गिरिः। मेघश्यामलदलस्य तमसाञ्च समुच्चयः। सौधश्वेतैरवाश्चन्द्रः कैलासैरावतौ मतौ। शिवस्य सौधवत् सर्वं कृष्णस्य मलजो घनः। तमालदलो अम्बरस्येन्दीवरकं नभः। नीलकान्तमणिर्नीलपद्मं रामस्य पूर्ववत्। नवदूर्वादलं इन्द्रपद्मं चाधिकं पुनः। लक्ष्मणास्तु पार्वती चन्द्रकान्तिः सीता रतिस्तथा। द्रौपदी पद्मकान्तिश्च पुराणैः परिकीर्त्तिता। सरस्वत्याश्चन्द्रकला कैलासाचलकान्तयः। शुक्लवर्णपदार्थाश्च, विषयेषु सदृक्षकः। ब्रह्मणश्च खण्डितकनकसभा नारायणोदरम्। सदृशस्य च सिद्धादि वस्तु कृष्णं च यद्भवेत्। विदूरच्छा भारतस्य तथापस्कारिरोगवत्। पुरश्च स्वर्गः कैलासो यत् इदृत् स्यात् मनोरमम्। रथश्च पृथ्वी वैकुण्ठपुरी पोतश्च पुष्पकम्। कामिन्यास्तु तड़िल्लता स्वर्णवर्णा च केतकी। उपमानतया स्वर्णलतापि परिकीर्त्तिता। नायकस्य तु कन्दर्प ऐलचन्द्रोऽश्विनौ तथा। सभायास्तु सुधर्मा स्यात् गङ्गा स्वर्गस्य मण्डनम्। गरुडकी पर्वतो मेरुरुपमानतया मतः। सखिदृतस्य भराचार्य्य ऋषिः शुक्रः सरस्वती। श्रीरामस्तु विरञ्चिगः शिवोऽजो दुःखितो जनः। उन्मत्तस्यन्दनतरुः शिवशेखरचन्द्रमाः। वाड़वाग्नियुताब्धिश्च वल्मीकोऽद्रीन्दुरेखकः। दाहः कर्मः कलङ्कः कामधेनुदशीनरः। रोद्रवीडब्धिरुद्रश्च जैमिनिश्च सुधिरः। वसन्तर्त्तौमतं सद्यस्कादौ मलयानिलः। यमोऽग्निर्विषयौ च स स्यात् विरञ्चिं प्रति। ग्रीष्मर्त्तौरग्निरुद्रोऽद्रिनिश्वासस्तथा पुनः। विरञ्चिश्वासश्च निश्वास उपमानतया मतः। वर्षर्त्तौरजनी व्योम नारायणसदृक्षाः। शरदः काशपुष्पादिरूपशोभांशुचामाराः। ऐरावतगजा ज्ञेया उपमानतया बुधैः। शीतर्त्तौरूपमानं स्यात् राज्यभूस्तु भूपतिः। तथापस्मार रोगाद्यो विद्वद्भिः परिकीर्त्तितः। शिशिरर्त्तौस्तु गुणिनः सदृशोऽर्द्धेरश्विनौ। राजागमनकालश्च मदनोऽपि मतो विदामृ। सचिवस्योपमानं तु भराचार्य्यः प्रकीर्त्तितः"।

साधक त्रि॰साध-ण्वुल्, सिध-णिच्-ण्वुल् साधादेशः वा। १साधनकर्त्तरि २कारके तन्त्रोक्ते ३मन्त्रादिसिद्धिकारके शिवे च "साधकः सिद्धिभाग्भवेत्" इति तन्त्रम्। स्त्रियां टाप् अत इत्त्वम्। साधिका सा च ४दुर्गायां "साधनात् सिद्धिरित्युक्ता साधिका वाऽथ ईश्वरी" देवीपु॰४५ अ॰। ५जन्मतारावधिकेषु सप्तपञ्चदशचतुर्विंशनक्षत्रेषु पु॰ "जन्मर्क्षमद्रिविपत् क्षेम प्रत्वरिः साधको वधः। मित्रं परमनिष्टञ्च जन्मर्क्षात् गणयेत् त्रिधा" ज्यो॰त॰। ६अनुलोमके त्रि॰।

साधकतम न०अतिशयेन साधकं तमप् "साधकतमं करणम्" पा० परिभाषिते करणे कारकभेदे ।

साधन न० सिध-णिच्-साधादेशे ल्युट् कर्त्तरि ल्यु वा । १करणरूपे कारकभेदे २मारणे ३मृतसंस्कारे ४अग्निदाने ५गतौ ६द्रव्ये ७धने ८अर्थदापने ९निष्पादने १०हस्त्यश्वादियुद्धसामग्र्याम् ११अनुगमने अमरः । १२सैन्ये १३उपाये १४सिद्धौषधे १५मेदृ मेदि० १६मैत्रे १७ऊर्ध्वसि १८सिद्धौ धरणिः । १९कारके २०प्रमाणे हेमच० २१व्याये त्रिका० २२मोक्षने २३जवे अजयः २४ब्रह्मविद्याहेतौ नित्यानित्य वस्तुविवेकवैराग्यशमादिषट्कमोक्षेच्छात्वरूपे च । युच् । साधनाऽपि उपासनायां निष्पादनायाञ्च स्त्री ।

साधनाप्रसिद्धि स्त्री हेत्वदोषभेदे सा च साधने साधनता वच्छेदकधर्माभावरूपा यथा "पर्वतो वह्निमान् काञ्चनधूमादित्यादौ धूमनिष्ठः काञ्चनत्वाभावः साधनाप्रसिद्धिः ।

साधर्म्य न० सधर्मस्य समानधर्मस्य भावः ष्यञ् । १स्वकीयसाधारणधर्मरूपे लक्षणे २अनुगतधर्मे "यदुक्तं यस्य साधर्म्यम्" भाषा० । समानो धर्मो यस्य तस्य भावः ष्यञ् । ३समानधर्मे यथा पद्मसिव सुन्दरं मुखमित्यादौ सौन्दर्य्यसभयोः समानधर्मः ।

साधर्म्यसम पु० साधर्म्येण समः । स्थापनाहेतुदुष्टके जात्युत्तरभेदे "साधर्म्येणोपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यसमः" गौ० "वादिनाऽन्वयेन व्यतिरेकेण वा साध्ये साधिते प्रतिवादिना साधर्म्यमात्रप्रवृत्तहेतुना तदभावस्योपादनम् यथा शब्दोऽनित्यः कृतकत्वाद् घटवत् व्यतिरेकेण वा व्योमवदित्युपसंहृते नैतदेवं यदनित्यघटसाधर्म्यात् नित्याकाशवैधर्म्याद्वाऽनित्यः स्यात् नित्याकाशसाधर्म्यादमूर्त्तत्वात् नित्यः स्यात् विशेषो वा वक्तव्यः" इत्तिः भाष्ये तु निदर्शनान्तरमुक्त्वा व्याख्यातं यथा "क्रियावानात्मा द्रव्यस्य क्रियाहेतुगुणयोगात् द्रव्यं लोष्टः क्रियाहेतुगुणयुक्तः क्रियावान् तथा चात्मा तस्मात् क्रियावानिति एवमुपसंहृते परः साधर्म्येणैव प्रत्यवतिष्ठते । निष्क्रिय आत्मा विभुनो द्रव्यस्य निष्क्रियत्वात् विभु चाकाशं निष्क्रियं च तथा चात्मा तस्मान्निष्क्रिय इति न चास्ति विशेषहेतुः क्रियावत्साधर्म्यात् क्रियावता भवितव्यं न पुनरक्रियसाधर्म्यात् निष्क्रियेणेति विशेषहेत्वभावात् साधर्म्यसमः प्रतिषेधो भवति" ।

साधारण त्रि० सह धारणया स्वार्थेऽण् । १सदृशे अमरः । २अनेकस्वत्वत्वेकस्मिन् श्वने "साधारणं समाश्रित्य यत्किञ्चिद्दाहनादिकम्" स्मृतिः । स्त्रियां गौरा० ङीष् । सा च शुक्तिकायां ४वेश्यादिनायिकायाञ्च "यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः" भाषा० उक्ते ५हेत्वाभासभेदे पु० । यथा वह्निमान् द्रव्यत्वादित्यादौ द्रव्यत्वहेतुः सपक्षे पर्वते विपक्षे ह्रदादौ च वर्त्तते इति साधारणः । स चानैकान्तिकभेदः "आद्यः साधारणस्तु स्यादन्योऽसाधारणो मतः । तथैवानुपसंहारी त्रिधाऽनैकान्तिको मतः" भाषा० ।

साधारणधर्म्म पु० कर्म० । "अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः । दानं दमो भूतदया क्षमा धर्मं साधारणं विदुः" इत्युक्ते अहिंसादौ सर्ववर्णासमतुल्ये १धर्मे । न्यायादुक्ते २संशयहेतौ समानधर्मे च तथाहि रङ्गं रजतं नवेति संशये रङ्गरजतयोः साधारण्यधर्मस्वाकचिक्यशुक्लत्वादिर्हेतुः । ३प्रजार्जनरूपे जन्तुसाधारणधर्मे च "प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थञ्च मानवाः । तस्मात् साधारणोधर्मः श्रुतौ पत्न्या सहोदितः" मनुः । स च धर्मः सर्वेषां जन्तूनां साधारण इति मानवं इत्युपलक्षणम् ।

साधारणस्त्री स्त्री कर्म० । वेश्यायां हेमच० । सा च नायिकाभेदः । "अस्य नायिका त्रिविधा स्वाऽन्या साधारणस्त्रीति" सा० द० नायिकाशब्दे ४०४२ पृ० तल्लक्षणं द्रष्टव्यम । सामान्यस्त्रीशब्दतयोऽप्यत्र ।

साधारणी स्त्री साधयति साधा ल्युण्वीव । १कुञ्जिकायां हेमच० साधारणस्वत्वाश्रये स्त्रीशब्दतौ स्त्री ङीष् स्वार्थे ष्यञ् । साधारणस्य कुञ्जिकायां न० । भावे ष्यञ् । साधर्म्यान्यधर्मे च ।

साधिका स्त्री साधयति समयति सर्वोपशमम् गम-णिच्-साधादेशः ण्वुल् । १सुधुनौ हेमच० सिध-णिच् ण्वुल् । २कार्य्यसाधिकायां क्रियायाञ्च ।

साधित त्रि० सिध-णिच्-क्त । १दापिते अमरः २प्रमाणादिना उद्भाविते च "साधितात् दृषकं शतमिति" स्मृतिः ३निष्पादिते ४बोधिते च ।

साधिदैव त्रि० सह अधिदैवेन स्वार्थे अण् त्रिपदबहुव्रीहिः । अधिदैवतासहिते । साधिभूतसाधियज्ञावपि परमेश्वरे ।

साधिष्ठ त्रि० अतिशयेन साधुः वाढो वा इष्ठन् साधादेशः टिलोपो वा । १अत्यन्तदक्षे अमरः २अतिसाधौ इष्टतिशोभने च । ४कृत्यार्थे मेदि० ५न्याय्ये हेमच० ।

साधिष्ठान त्रि० सह अधिष्ठानेन । १सहाधिष्ठिते तन्त्रोक्ते दुर्गाचक्रमध्ये सुषुम्णामध्यस्थे चक्रभेदे न० चक्रशब्दे २८०८ पृ० दृश्यम् ।

साधीयस् त्रि० अतिशयेन साधुः साढो वा टिलोपः साधादेशो वा । १साधुतरे च २अत्यन्तदृढे अमरः । ३न्याय्ये हेमच० स्त्रियां ङीप् ।

साधु त्रि० साध-उन् । १उत्तमकुलजाते अमरः । २सुन्दरे ३उचिते च । स्त्रियां वा ङीप् । ४मुनौ ५जिने च पु० हेमच० "न प्रहृष्यति सम्माने नापमाने च कुप्यति । न क्रुद्धः पुरुषं ब्रूयादेतद्धि साधुलक्षणम्" गरुडपु० उक्तधर्मयुते ६जने ७वार्द्धुषिके ८मनोहरे मेदि० । साधुलक्षणान्तरं यथा "यथालब्धेऽपि सन्तुष्टः समचित्तो जितेन्द्रियः । हरिपादाम्बुजे लोके विप्रः साधुरनिन्दकः । निर्वैरः सदयः शान्तो दम्भाहङ्कारवर्जितः । निरपेक्षो मुनिर्वीतरागः साधुरिहोच्यते । लोभमोहमदक्रोधकामादिरहितः सुखी । कृष्णाङ्घ्रिशरणः साधुः सहिष्णुः समदर्शनः" पद्मोत्त०खं० ६६अ० "त्यक्तात्मसुखभोगेच्छाः सर्वसत्त्वसुखैषिणः । भवन्ति परदुःखेन साधवो नित्यदुःखिताः । परदुःखातुरा नित्यं स्वसुखानि महान्त्यपि । नापेक्षन्ते महात्मानः सर्वभूतहिते रताः । परार्थसुद्यताः सन्तः सन्तः किं किं न कुर्वते । तादृगप्यम्बुधेर्वारि जलदैस्तत् प्रदीयते । एक एव सतां मार्गो यदङ्गीकृतपालनम् । दहन्नमकरोत् क्रोडे पावकं यदपांपतिः । आत्मानं पीडयित्वापि साधुः सुखयते परम् । हृदयब्रह्मिताम् दृष्ट्वा दुःखञ्च सहते स्वयम्" वह्निपु० ।

२व्याकरणव्यङ्ग्यसाधुतालाक्षण्ये शब्दे "अनपभ्रंशताऽनादिर्यद्वाऽभ्युदयोग्यता । व्याक्रियाव्यञ्जनीया वा जातिः कापीह साधुता" हरिः । तथा च अपभ्रंशभिन्नत्वमनादित्वम् अभ्युदयसाधनप्रयोगविषयत्वं व्याकरणव्यङ्ग्यजातिर्वा साधुता इति तदर्थः । स च ईश्वरसङ्केताश्रयः शब्द इति नैयायिकाः । तथा च यः शब्दो यस्मिन्नर्थे ईश्वरेण सङ्केतितः स शब्दस्तदर्थे साधुः । वैयाकरणमते यः शब्दः यस्मिन्नर्थे व्याकरणे व्युत्पादितः स शब्दस्तत्र साधुः यथा "कर्मणि द्वितीया"या०द्वितीया कर्मार्थे साधुः ।

साधुज त्रि० साधो सत्कुले जायते जन-ड । उत्तमकुलोद्भवे शब्दर० ।

साधुधी स्त्री ६त० । १शुभा धारा० । २सुन्दरबुद्धियुते त्रि० । कर्म० । ३साधवश्च ते धीश्च । ४साधुबुद्धौ स्त्री । [२उत्तमकुलभे ।

साधुपुष्प न० साधु पुष्पं यस्य । १स्वनामख्याते शब्दमा० । कर्म० ।

साधुवाह पु० कर्म० । विनीते सुशिक्षिते घोटके हेमच० ।

साधुवाहिन् पु० साधु यथा तथा वहति णिनि । १विनीतेऽश्वे अमरः २सुन्दरवहनकर्त्तरि त्रि० ।

साधुवृत्त पु० नित्यकर्म०, १कटस्थवृत्ते शब्दमा० । २वरुणवृत्ते राजनि० । ३शोभनवृत्तमात्रे च ।

साधृत न० सहार्धृतेन सहस्य सः । १आशुपत्रे २सदृशसमूहे ३पर्णवीध्याञ्च अजयः ।

साध्य पु० सिध-णिच्-यत् । "मनोमन्ता ब्रह्मा प्राणो भरोऽपानश्च वीर्य्यवान् । निर्मयो नरकश्चैव दंशो नारायणो हरः । प्रभुश्चेति समाख्याताः साध्या द्वादश देवताः" इत्युक्ते द्वादशसंख्यके १गणदेवतामेदे ज्यो० उक्ते दिक्कन्यादिषु योगेषु २एकविंशे योगे च । ३साधनीये त्रि० मेदि० । ४अष्टादशविवादेषु प्रमाणादिना बोद्धव्ये पदार्थे "प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम् । निश्चितं लोकसिद्धञ्च तत्त्वं तत्त्वविदोविदुः" इत्युक्ते व्यवहारे साधनार्हे प्रतिज्ञैवे ४पक्षे पु० "ऋणादिषु विवादेषु स्थिरप्रायेषु निश्चितम् । उक्ते साध्यधिके चार्थे प्रोक्तं साध्यं न सिध्यति" कात्या० । ५अनुमित्या साधनीये वह्न्यादौ च यथा वह्निमान् धूमादित्यादौ सिषाधयिषितो वह्निः साध्यः । साध्यमस्यास्ति अर्श आद्यच् । ६साध्यवति पक्षे पु० "साध्यनिर्देशः प्रतिज्ञेति गौ०" स्मृतम् । साध्यवत्तया पक्षनिर्देश इति दीधितिकारः नन्वुक्ते ७अनन्तमात्रे ग्राह्यत्वस्य स्वानुकूलतायाश्चके १८पृ०उक्ते अकथहचक्रस्थे द्वितीयपञ्चमादिकोष्ठस्थाद्यक्षरके "सिद्धः साध्यः सुसिद्धोऽरिः क्रमात् ज्ञेया मनीषिभिः" इत्युक्ते ८नवमभेदे । १०देवभाते मेदि० । व्याकरणोक्ते लिङ्गसंख्यानन्वयिक्रियाभेदे क्रियाशब्दे २३१७पृ० दृश्यम् । "साध्यरूपा क्रिया तत्र धातुरूपनिबन्धना" हरिः । "साध्यस्य साधनाकाङ्क्षा" हरिः ।

साध्यता स्त्री साध्यस्यानुमितिविधेयस्य भावः तल् । अनुमितिविधेयतारूपे न्यायोक्ते १विषयताभेदे । २इच्छाविषयतामेदे च । यथा घटोजायतामित्यत्र घटीया साध्यताख्या विषयता ।

साध्यताघटकसम्बन्ध पु०६त० । कर्म० । येन सम्बन्धेन-साध्यस्य अनुमेयता तादृशे सम्बन्धे यथा पर्वतः संयोगेन वह्निमान् धूमात् इत्यादौ संयोगः ।

साध्यतावच्छेदक पु०साध्यतामवच्छिनत्ति विशेषयति अव+

छिद्-क्यप्। येन छेदेन सम्बन्धेन वा यस्य साध्यतारूपा विषयता। तच्छिन्न १सम्बन्धे २धर्मे। यथा वह्निमान् धूमादित्यत्र वह्निः साध्यः तस्य साध्यतां वह्नित्वमवच्छिनत्तीति वह्नित्वं साध्यतावच्छेदकम्। एवं संयोगसम्बन्धोऽपि।

साध्यसम पु०१हेत्वाभासभेदे "साध्याविशिष्टः साध्यत्वात् साध्यसमः" गौ०सू०। "द्रव्यं क्रियेति साध्यम्। गतिमत्त्वादिति हेतुः। साध्येनाविशिष्टः साधनीयत्वात् साध्यसमः। क्रियमाणसिद्धत्वात् साध्यवत् प्रतिज्ञापयितव्यः। साध्यं तावदेतत् किं पुरुषवच्छायापि गच्छति? आहोस्विदावरकद्रव्ये संघर्षात्यावरणसंतानादसंनिधिसंतानोऽयं तेजसो गच्छत इति? सर्पता खलु द्रव्येण यो यत्तेजोभाग आक्रियते तस्य तस्यासंनिधिरेवावच्छिन्नो गच्छत इति। आवरणं तु प्राप्तिप्रतिषेधः" वात्स्या० २जात्युत्तरभेदे "उभयसाध्यत्वात् साध्यसमः" गौ० सू० "हेत्वाद्ववयवसामर्थ्ययोगी धर्मः साध्यः। तं दृष्टान्ते प्रसजतः साध्यसमः। यदि यथा लोष्टक्रियात्मा क्रियावत्तर्हि यथात्मा तथा लोष्ट इति। साध्यसाधनात्मा क्रियावानिति कामं लोष्टोऽपि साध्यः। अथ नैवम्। न तर्हि यथा लोष्टक्रियात्मा" वात्स्या०। तच्च "पक्षदृष्टान्तादेः प्रकृतसाध्यतुल्यतापादनम्" गौ० वृ० दृष्टान्तस्य पक्षतुल्यताकथनम्। यथा, आत्मा सक्रियः क्रियाहेतुगुणवत्त्वादित्यादौ यदि यथा लोष्टक्रियात्मेति त्वयोच्यते तदा यथात्मा तथा लोष्ट इत्यापादनम्। तथा च यदात्मनि क्रियावत्त्वं साध्यते। तर्हि लोष्टेऽपि तत्साधनीयम्। नेति चेत्तर्हि यथा लोष्टक्रियात्मेति न वाच्यम्। लोष्टदृष्ट आत्मात्मदृष्टो लोष्ट इत्यत्र नियामकाभावादिति" नीलकण्ठः।

साध्यसिद्धि स्त्री साध्यस्य सिद्धिः विनिर्णयः। साध्यस्य वक्ष्यादेः अनुमित्यादिना साधनाधीने १निर्णये २तच्छिब्दात्तौ। साध्यस्य प्रतिज्ञेयार्थस्य सिद्धिर्निर्णयो यत्र। व्यवहारे प्रतिज्ञातार्थस्य प्राड्विवाकादिभिः विनिर्णयरूपे ३व्यवहारपादभेदे च।

साध्याप्रसिद्धि स्त्री ६त० साध्ये साध्यतावच्छेदकस्याभावरूपे हेत्वाभासभेदे। यथा पर्वतः काञ्चनमयवह्निमान् धूमादित्यादौ वह्निनिष्ठः काञ्चनमयत्वाभावः साध्याप्रसिद्धिः।

साध्वस न० साधु+अस्यति अस-अच्। भये अमरः।

साध्वी स्त्री साधु-ङीष्। १मेदायां राजनि० "आत्तांर्ते सुदिता हृष्टे प्रोषिते मलिना क्षया। मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता" उक्तलक्षणायां स्त्रियां तत्रार्थे संज्ञात्वात् न पुंवद्भावः। साधुतायुक्ते स्त्रीमात्रे च। तत्रार्थे पुंवद्भाव इति भेदः।

सानन्द त्रि० सह आनन्देन। १आनन्दसहिते "सानन्दं नन्दिहस्ताहतसुरजरवाह्लत्कौमारवर्हि" मालतीमा०। २ध्रुवकभेदे "अष्टादशाक्षरैर्युक्तो यगोऽष्टप्रभुर्ध्रुवः। कहस्कषड्भके ताले सानन्दो वोरके रसे" सङ्गीतदा०। ३गुच्छकरञ्जे पु० राजनि०।

सानन्दूर पु० तीर्थविशेषे "सानन्दूरेति विख्यातं भूमेः! गुह्यं परं मम। उत्तरे तु समुद्रस्य मलयस्य च दक्षिणे। तत्र तिष्ठामि वसुधे! चतुर्थी दिशमाश्रितः। प्रतिमा वै मदीयास्ति नात्युच्चा नातिनीचका। आयसीं तां वदन्त्येके अन्ये ताम्रमयीं तथा। कांस्यां रीतिमयीमन्ये केचित् सीसकनिर्मिताम्। शिलामयीमित्यपरे महाश्चर्यस्वरूपिणीम्" वराहपु०।

सानसि पु० सन क्विप् अनुक्च। सुवर्णे उणादिकोषः।

सानिका स्त्री सन-ण्वुल् टाप् अत इत्वम्। वंश्यां शब्दच०।

सानु पुं० सन-उनु। १पर्वतस्थे समभूमिदेशे प्रस्थे अमरः २वने ३वातसमूहे ४पथि ५अग्रे ६कोविदे ७अर्के मेदि०। ८पल्लवे च जटा०।

सानुज न० सानौ जायते जन-ड। १प्रपौण्डरीके राजनि० २तत्सदृशे पु०राजनि०। सहानुजेन। ३अनुजसहिते त्रि०

सानुमत् पु० शोभनोऽस्यास्ति मतुप्। पर्वते हेमच०।

सानेयी स्त्री सह आनेयेन स्वरेण सहस्य सः गौरा० ङीष्। वंश्यां शब्दर०। स्वार्थे क ह्रस्वः। सानेयिकाऽप्यत्र।

सान्तपन न० सन्तापयति सम्+तप०णिच् ल्युट्-स्वार्थेऽण्, सन्तपनाय साधु अण्-वा।

"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सान्तपनं विदुः" मनूक्ते द्वादशाहे साध्ये व्रतभेदे एकादिने गोमूत्रादिषट्कमात्रपानं परदिने उपवास इति द्वादशाहसाध्यताऽस्य।

सान्तर न० सह अन्तरेण सहस्य सादेशः। १विरले जटा० २व्यवधानसहिते त्रि०। [नसाधने विधानभेदे।

सान्तानिक त्रि०सन्तानः प्रयोजनमस्य सन्तना० ठक्। सन्ता०

सान्त्व आनुकूल्यकरणे अद० चु० उभ० सक० सेट्। सान्त्यति ते अससान्त्वत् त सान्त्वापयतीत्यत्र अनेकचकत्वादेर्न प्रयोदेशः।

सान्त्व न० सान्त्व-अच्। १अत्यर्थमधरे २आत्मकृत्ये मेदि०। ३प्रीतिमनःप्रीतिदवाक्ये प्रियवाक्यादिना क्रोधोपशमनरूपे सामनि च अमरः।

सान्त्वन न० सान्त्व-ल्युट्। १आत्मकृत्यकरणे प्रियवादादिना क्रोधाद्युपशमने च। युच्। अत्रैव स्त्री।

सान्दीपनि पु० सन्दीपनस्यापत्यम् इञ्। रामलक्ष्मणयोराचार्ये अवन्तिपुरवासिनि मुनिभेदे।

"विदितासिलविज्ञानौ तत्त्वज्ञानमवाप्य। शिष्याचार्यक्रमं वीरौ ख्यापयन्तौ बभूवतुः। ततः सान्दीपनिं काश्यमवन्तिपुरवासिनम्। अस्त्रार्थं जग्मतुर्वीरौ बलदेव जनार्दनौ" विष्णु० ५अंशे २अ०।

सान्द्र त्रि० अर्द-रक् सह अन्द्रेण। १निविड़े अमरः २स्नेहे मेदि०। ३स्निग्धे ४मनोज्ञे शब्दर०। ५वने न० मेदि०।

सान्द्रपुष्प पु० सान्द्रं पुष्पमस्य। विभीतकवृक्षे शब्दर०।

सान्द्रस्निग्ध त्रि० सान्द्रं स्निग्धः। १अतिस्निग्धे शब्दर०। २अतिमनोहरे च।

सान्धिक पु० सन्धां शराच्छादनं शिल्पं वेत्ति ठक्। १शौण्डिके शब्दमा०। सन्धिः प्रयोजनमस्य ठञ्। २सन्धिकर्त्तरि त्रि०। [सन्ध्याकालिके।

सान्ध्य त्रि० सन्ध्यायां भवः सन्धिवेला० अण् न ठञ्।

सान्ध्यकुसुमा स्त्री ह्रस्व०। त्रिपत्रिपुष्पवृक्षे राजनि०।

सान्नाय्य न० सन्नीयते सम्+नी-ण्यत् नि०। सन्नादिना संस्कार्ये घृतादौ अमरः। [कल्पय" आश्वा०नमन्त्रः।

सान्निध्य न० सन्निधिरेव ष्यञ्। नैकट्ये "सान्निध्यमिह

सान्निपातिक त्रि० सन्निपातात् त्रिदोषविकारात् आगतः तेन निर्वृत्तो वा ठञ्। सान्निपातान्नाते रोगे सन्निपातशब्दे ५२१६ पृ० दृश्यम् "विकारे सन्निपातके" कुमारः।

सान्यासिक पु० सन्यासः प्रयोजनमस्य ठञ्। सन्यासिनि हेमच०

सापत्न पु० सपत्न एव स्वार्थे अण्। १शत्रौ अमरः, सपत्न्यां भवः नञ्सा अपत्य वा यञ्। १सपत्नीपुत्रे। अण्। सापत्नोऽप्यभवत्।

सापिण्ड्य न० सपिण्डस्य भावः ष्यञ्। दायशौचग्रहणाद्युपयोगिनि ज्ञातिधर्मभेदे "सापिण्ड्यं सप्तपौरुषमिति स्मृतिः। सपिण्डशब्दे ५२२० पृ० दृश्यम्।

सापत्पदीन न० सप्तभिः पदैः उच्चारितैर्निर्वृत्तम् खञ्। सख्ये सौहार्दे अमरः "सापपदीनं सख्यम् पा०।

सापपौरुष त्रि० सप्त पुरुषान् व्याप्नोति अण् उभयपदवृद्धिः। सप्तपुरुषव्यापके।

साफल्य न० सफलस्य भावः ष्यञ्। सामर्थ्ये सम्पूर्णतायाञ्च

साम सान्त्वने चुरा० उभ० सक० सेट्। सामयति ते असमासत त अनेकाच्कत्वात् न ओपदेवः।

सा(षा)म सान्त्वे चु० उभ० सक० सेट्। सामयति अयं ओपदेव एव न्यायः दुर्गादीनेन दन्त्यादित्वमस्योक्तमप्रमाणम्।

सामक पु० साम-स्वार्थे कन्। तर्जनीवृक्षे त्रिका०। सुमकमेव स्वार्थे अण्। २हरिद्रहिते मूलभावे क्षुपे मिता०।

सामग पु० साम तदुवेदं गायति। सामवेदाध्यायिनि जटा०।

सामगर्भ पु० साम गर्भे यस्य। विष्णौ शब्दर०।

सामग्री स्त्री समग्रस्य भावः ष्यञ् स्त्रीत्वपक्षे ङीष् ङीषि यलोपः। १समस्ततायाम्। स्त्रीत्वाभावपक्षे सामग्र्य तत्रार्थे न०। "प्रायेण सामग्र्यविधौ गुणानाम्" कुमारः। स्वार्थे अण्। २करणसमूहे २द्रव्ये च स्त्री।

सामज पुंस्त्री० साम्नो वेदभेदात् जायते जन-ड। १गजे। स्त्रियां ङीष्। तस्य तज्जन्यकथा पालकाव्ये उक्ता तच्च सामयोनिशब्दे दृश्यम्। २सामगाठजे खरादौ त्रि० मेदि०

सामञ्जस्य न० समञ्जसस्य भावः ष्यञ्। औचित्ये।

सामन् न० सो-मनिन्। "अग्ने आया हि" इत्यादिके १वेदभेदे तत्रोत्पन्नऋचमधिकृत्य गेये २गानभेदे "ऋचश्चूढं साम गीयते" छान्दोग्यापo। साम्नो गानरूपत्वं गानशब्दे २५७२ पृ० दृश्यम् तद्भेदादिकं वेदगाने ऊहगानादौ मूलग्रन्थे च दृश्यं सामवेदस्य विभागादि चरणव्यूहे दृश्यम्। तच्छाखाभेदाः वेदशब्दे ४८१४ पृ० दृश्याः। राज्ञां "सामभेदकथा दानो दण्डस्तेषु क्रमेण च" उपायभेदे तस्य विधयादिकं मत्स्यपु० २२१अ० उक्तं यथा

मत्स्य उवाच "सामभेदस्तथा दानो दण्डश्च मनुजेश्वर!। उपेक्षा च तथा माया इन्द्रजालञ्च पार्थिव!। प्रयोगाः कथिताः सप्त तेषु निगदतः शृणु। द्विविधं कथ्यते साम तथ्यञ्चातथ्यमेव च। तत्राप्यतथ्यं साधूनामाक्रोशायैव जायते। तत्र साधुः प्रयत्नेन सामसाध्यो नरोत्तम!। अदाम्भिकाना ऋजवो धर्मनित्या जितेन्द्रियाः। सामसाध्या न चातथ्यैस्तेषु साम प्रयोजयेत्। तथ्यं साम च कर्त्तव्यं कुलशीलादिवर्णनम्। तथा तत्प्रचाराणां कृतानाञ्चैव वर्णनम्। अनयैव तथा युक्त्या कृतज्ञाख्यापनं सकम्। एवं साम्ना च कर्त्तव्या वशगाः धर्मतत्परा। साम्ना यद्यपि रक्षांसि शक्यन्तीति पराशृतिः। तथाप्येतत्साधूनां प्रयुक्तं नोपकारकम्। अतिशङ्कितमित्येवं पुरुषं सामवादिनम्। असाधवो

विजानन्ति तस्मात्तेषु वर्त्तयेत् । ये शुद्धवंशा ऋजवः प्रणीता धर्मे स्थिताः सत्यपरा विनीताः । ते साम-साध्याः पुरुषाः प्रदिष्टा मानोन्नता ये सततञ्च राजन्" । तत्र मित्रादिसामप्रकारः शुक्रनीतिपरिशिष्टे तत्र विशेष-श्लोको यथा

"त्वत्समस्तु मम नास्ति मित्रे साम इदं कृतम् । परस्परमनिष्टं न चिन्तनीयं त्वया मया । सुखा-हार्य्यं च कर्त्तव्यं शत्रौ साम प्रकीर्त्तितम्" । विषय-भेदेनोपायभेदालम्बनं तत्रोक्तं यथा "सर्वोपायै-स्त्वया कुर्य्यान्नीतिज्ञः पृथिवीपतिः । यथा स्वाभ्यधिका न स्युर्मित्रोदासीनशत्रवः । सामैव प्रथमं श्रेष्ठं दानस्तु तदनन्तरम् । सर्वदा भेदनं शत्रोर्दण्डनं प्राणरक्षये । प्रबलेऽरौ सामदानौ साम भेदोऽधिके कृतौ । भेददण्डौ समे कार्य्यौ दण्डः पूज्यः प्रहीणके । मित्रे च सामदानौ स्तो न क्वचित् भेददण्डने । रिपोः प्रजानां सर्व्वेषां पीडनं स्वजयाय वै । रिपुप्रपीड़िताद्यं च स्वात्मा दानेन संग्रहः । स्वप्रजानां न भेदेन नैव दण्डेन पालनम् । कुर्वीत सामदानाभ्यां सर्वदा यत्नमास्थितः" ।

४शत्रुवशीकरणोपायभेदे ५प्रियवाक्यादिना सान्त्वने च । ५पशुबन्धनरज्ज्वां स्त्री ङीप् ।

सामन्त पु० संश्लिष्टोऽन्तः एकदेशो यस्य समन्तस्येश्वरः अण् । स्वविषयानन्तरवर्त्तिदेशाधिपे १नृपे अमरः । समन्ताज्जातः अण् टिलोपः । २श्रेष्ठप्रजायाम् (मनुस्मृतौ) "यं परम्परया लोकाः सामन्तायेति समागतम्" स्मृतिः ।

सामयिक त्रि० समये काले नियमे वा भवः उचितो वा ठञ् । १समयभवे २समयोचिते ३नियमबद्धे च "नि-जधर्माविरोधेन यस्तु सामयिको भवेत्" स्मृतिः ।

सामयिकाभाव पु० अत्यन्ताभावे न० दी० । केचित्तु, अत्या-दिनाशशीलोऽत्यन्ताभावादतिरिक्तोऽन्यसभाव इत्याहुः ।

सामयोनि पु० साम सामगानं योनिरुत्पत्तिस्थानं यस्य । इन्द्रनि, तेषाञ्च सामयोनित्वमुक्तं बालकाण्डे "स्वर्ग-खण्डकपाले द्वे समानीय प्रजापतिः । इन्द्राभ्यां परि-गृह्याथ सप्त सामान्यगायत । गायतो ब्रह्मणस्तस्मात् सप्तस्वेतेषु जज्ञिरे"इति । इन्द्र० १चतुर्ष्वेषु ब्रह्मर्षि स्त्री ।

सामर्थ्य न० समर्थस्य भावः ष्यञ् । "१देहेऽक्षे बले २शक्तौ ३योग्यतायां मेदि० । ४सङ्गतार्थतायाञ्च । समासशब्दे ५२३२ पृष्ठे दृश्यम् । योग्यता च कार्य्यजनयोग्यत्वं यथा परार्थ-स्वानुमितियोग्यत्वम् । ५आकाङ्क्षायोग्यत्वादिरूपत्वे गौ० इ० यथा आप्तोक्तस्य वचनस्य । सङ्गतार्थतारूपं च सामर्थ्यं द्विविधम् व्यपेक्षारूपम् एकार्थीभावश्चेति" वैयाक० । तत्राद्यं राज्ञः पुरुष इत्यादिवाक्ये ह्युपयुज्यते । द्वितीयं राजपुरुष इत्यादि इत्यावुपयुज्यते" ।

सामवायिक पु० समवाये प्रभवतः ठञ् । १मल्लिनाथे हेमच० तस्येदम् ठञ् । २समवायसम्बन्धिनि त्रि० ।

सामाजिक पु० समाजः सभावेशनं प्रयोजनमस्य । १सभ्ये अमरः । २समाजसम्बन्धिनि त्रि० ।

सामानाधिकरण्य न० समानाधिकरणस्य भावः ष्यञ् । १तदधिकरणवृत्तित्व २तद्वदनुयोगिकप्रतियोगिकत्वे सिद्धा-न्तलक्षणे गदा० यथा वह्निधूमयोः सामानाधिकरण्यम् । स्वावच्छेदकीभूतो यः कालस्तदवच्छिन्ना या स्वनिरूपि-निरूपिता यत्किञ्चिद्वृत्तिनिष्ठाऽऽधेयता सा । यथा यदा सिषाधयिषा नासीत् परं तु सिद्धिरासीत्तदा सिद्धि-सिषाधयिषाविरहयोः सामानाधिकरण्यम् । २भेदा-न्वयबोधकत्वे । यथा नीलोघट इत्यादौ नीलपटघटपदयोः सामानाधिकरण्यम् ३धर्मितावच्छेदकयत्किञ्चिद्वृत्ति-विषयकत्वे यथा पर्वतो वह्निमान् इत्यादौ यत्किञ्चित्पर्वत-व्यक्तिविषयिकानुमितिः सामानाधिकरण्येनानुमितिः ।

सामान्य न० समानस्य भावः ष्यञ् । १साधारण्यप्रयोजकधर्मे यथा मुखं पद्ममिव सुन्दरमित्यादौ सौन्दर्य्यादि । समा-नमेव स्वार्थे ष्यञ् । द्रव्यगुणकर्मसु तुल्यतया स्थितायां २जातौ भाषा० । जातिशब्दे ३०६२ दृश्यम् ।

सामान्यञ्च द्विविधं सखण्डमखण्डञ्च सामान्यलक्षणा-शब्दे दीधितिकृक्तिः । "सामान्यं विषम इति वुल्पत्तेश्च" कणा० । अनुगतधर्मत्वम् सामान्यमिति तल्लक्षणं तेन ३अनु-गतधर्मस्वरूपं यथा प्रतियोगितासामान्ये यत्वमवच्छेद-त्वादीति दीधितिः । ४अधिकविषयकत्वे यथा ब्राह्मणाय दधि दीयतां कौण्डिन्याय तक्रम् इत्यादौ दधिदानस्या-धिकब्राह्मणविषयकता । सामान्यविषयकशास्त्रञ्च विशेष-शास्त्रेण बाध्यते यथा "मा हिंस्यात् सर्वाभूतानीति" हिंसानिषेधः सर्वविषयः "वायव्यं श्वेतमालभेत"इत्यादि विशेषः हिंसाशास्त्रं तेन सामान्यशास्त्रं वैधेतरविषयेव प्रसरति । ५अर्थालङ्कारभेदे ४०७ पृ० दृश्यम् ।

सामान्यच्छल न० छलभेदे "सम्भवतोऽर्थस्यातिसामान्ययोगा-दसम्भूतार्थकल्पना" गौ०सू० "अहो खल्वसौ ब्राह्मणो विद्याचरणसम्पन्न इत्युक्ते कश्चिदाह । सम्भवति हि ब्राह्मणे विद्याचरणसम्पदित्यस्य वचनस्य विद्यातोऽर्थ-

विकल्पोपपत्त्या समूलार्थकल्पनया क्रियते। यदि ब्राह्मणे विद्याचरणसम्पत् सम्भवति। बाल्येऽपि सम्भवेत्। बाल्योऽपि ब्राह्मणः सोऽप्यस्तु विद्याचरणसम्पन्न इति। सामान्यनिमित्तं कृतं सामान्यच्छलमिति" वात्स्या०। "सामान्यविशिष्टसम्भवदर्थाभिप्रायेणोक्तस्यार्थ सामान्ययोगादसम्भवदर्थकत्वकल्पनया दूषणाभिधानम्। यथा ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसम्पदं साधयति इति कल्पयित्वा परो वदति। कुतो ब्राह्मणत्वेन विद्याचरणसम्पत्? बाल्येऽभिचारात्" इति।

सामान्यतोदृष्ट न० सामान्यतः सामान्यस्य सामान्यात् वा दृष्टं दर्शनम्। १अनुमानभेदे "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टञ्च" गौ०सू०। "पूर्ववदिति यत्र कारणेन कार्य्यमनुमीयते यथा मेघोन्नत्या भविष्यति वृष्टिरिति शेषवत्तत् यत्र कार्य्येण कारणमनुमीयते पूर्वोदकविपरीतकसदकं नद्याः पूर्णत्वं शीघ्रत्वञ्च दृष्ट्वा स्रोतोऽनुमीयते भूता वृष्टिरिति। सामान्यतो दृष्टम् अज्ञातपूर्वकमन्यत्र दृष्टस्यान्यत्र दर्शनमिति। तथा चादित्यस्य। तस्मादस्यप्रत्यक्षाभावादित्यस्य अज्ञेयत्वे" अथ वा यत्राप्रत्यक्षे लिङ्गलिङ्गिनोः सम्बन्धे केनचिद्धर्मेण लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यते। यथेच्छादिभिरात्मा। इच्छादयो गुणाः, गुणाश्च द्रव्यसंस्थानाः, तद् यदेषां स्थानं स आत्मेति" वात्स्या०। २कार्य्यकारणभिन्नलिङ्गके अनुमानभेदे यथा पृथिवीत्वेन द्रव्यत्वानुमानम्। ३अन्वयव्यतिरेक्यनुमाने च। यथा वह्निमान् धूमादित्यादि उभयव्याप्तिसम्भवेन अत्रोभयानुमानसम्भवात् गौ०सू०टी०।

सामान्यप्रत्यासत्ति सामान्यं तज्ज्ञानं वा प्रत्यासत्तिः। अलौकिकप्रत्यक्षसन्निकर्षभेदे सामान्यलक्षणाशब्दे दृश्यम्।

सामान्यलक्षणा स्त्री सामान्यं साधारणधर्मः लक्षणं यस्याः। न्यायोक्ते अलौकिकप्रत्यक्षसाधने उपायभेदे सन्निकर्षशब्दे दृश्यम्। यथा एकघटज्ञाने घटत्वरूपसामान्यधर्मज्ञानात् सकलस्य घटत्ववतो ज्ञानम्।

तस्याः प्रत्यासत्तित्वं मणिकृता व्यवस्थापितं यथा "व्याप्यग्रहश्च सामान्यलक्षणाप्रत्यासत्त्या सकलधूमादिविषयकः कथमन्यथा पर्वतीयधूमे व्याप्यग्रहे तत्सादृश्यमितिः सा चेन्द्रियसम्बद्धविशेषणतातिरिक्तैव वा तद्विशेष्यकप्रत्यक्षे तदिन्द्रियसन्निकर्षस्य हेतुत्वेनागतादौ संयोगादेरभावादिति वदन्ति"।

तस्याः अप्रत्यासत्तित्वमाशङ्क्य सिद्धान्तितं तत्रैव चिन्तमणिकृता "उच्यते यदि सामान्यलक्षणा नास्ति तदाधिकूपतटकादिकं विना धूमादौ व्यभिचारसंशयो न स्यात् प्रसिद्धधूमे वह्निसम्बन्धावगमात् कालान्तरीयदेशान्तरीयधूमस्य ज्ञानाभावेनाज्ञानात् सामान्येन तु सकलधूमोपस्थितौ धूमान्तरे विशेषादर्शनेन संशयो युज्यते"।

अत्र दीधितिः "अत्र च सामान्यं लक्षणं स्वरूपं यस्या इत्यर्थे सामान्यमेव प्रत्यासत्तिः सामान्यं लक्षणं निरूपकं यस्या इत्यर्थे तु तज्ज्ञानम्। तत्राद्यमाह सा चेन्द्रियेति इन्द्रियेण सम्बद्धं धूमादि तस्य विशेषणं तद्विशेष्यकज्ञानप्रकारो धूमत्वादिरित्यर्थः। विशेषणतेत्यत्र भावार्थो न विवक्षितः तत्र विशेषणत्वं यस्या इति बहुव्रीहिर्वा सम्बद्धपदस्यैव वा परम्परासम्बन्धकृतसम्बन्धविशेष्यकज्ञानप्रकारोऽर्थः तथाच सैव विशेषणतेत्यर्थः। अत्र च बहिरिन्द्रियस्य लौकिकः सम्बन्धो ज्ञानस्य तदिन्द्रियजन्यत्वञ्च नियामकम् एवञ्चाणुत्वेन यत्किञ्चिदणूपस्थितावपि सकलाणुगोचरो मानसो बोध इति वदन्ति ततेन धूलीपटले धूमभ्रमे तत्र च वह्निव्याप्यग्रहे तत्सादृश्यं धूमत्वेन धूमेषु व्याप्यग्रहाद्धूमदर्शनाहङ्कारानुमितिर्न स्यात् हेत्वभावेन परामर्शानुत्पादात् किञ्च धर्मिण्यि दोषवशात्तयनेनाल्पमात्रेण स्मरणप्रकारौभवता सामान्येन लक्षणेन वा लौकिकसन्निकर्षविरहेऽपि चाक्षुषज्ञानापत्तिरिति परास्तम्। सामान्यञ्च सखण्डाखण्डभेदेन द्वेधा सखण्डे चाखण्डेव परम्परया सम्बन्धं प्रत्यासत्तिः येन सम्बन्धेन चेन्द्रियसम्बद्धे सामान्यं ज्ञायते तेन सम्बन्धेनाधिकरणानां प्रत्यासत्तिरिति"।

दीधितिकृता तु स्वमते सामान्यलक्षणायाः प्रत्यासत्तित्वं निराकृतं तत्र द्रष्टव्यम्। तच्च विस्तरभयादिह नोक्तम्।

सामान्या स्त्री समानैव स्वार्थे यञ् अजा० टाप्। साधारणस्त्रियां वेश्यायाम् "धनमात्रलाभार्थं सकलपुरुषाभिलाषा। सा त्रिधा। अन्यसम्भोगदुःखिता मानवती वक्रोक्तिगर्विता च सापि द्विविधा। प्रेमगर्विता सौन्दर्यगर्विता च" रसमञ्जरी। [२निन्द्यायाञ्च अमरः।

सामि अव्य० साम-इन्। १अर्द्धे "सामिचटिता" नैषधम्।

सामिधेनी स्त्री सम्-इन्ध-करणे ल्युट् नि०। अग्निसमिन्धनसाधने १छन्दोभेदे अमरः। २समित्काष्ठे मेदि०। सामिधेनीशब्दनिरुक्तिश्च शत० ब्रा० ११।२।६।१ "समिन्धो सामधेनीभिर्हीता तस्मात् सामिधेन्योनाम"। "इध्मेनाग्नि-

सन्निधानहेतुभूताः सामिधेनीर्विधास्यन् तासां नाम निर्वक्ति सामिधेनीभिः प्रवो वाजा इत्यादिभिर्ऋग्भिः" भा० तात्पर्यटी० आश्व० श्रौ०१।२।७। "अथ सामिधेन्यः प्रवो वाजा अभिद्यवोऽग्न आयाहि वीतये गृणानः२ हव्यदातये नमस्यवस्तिरोऽहमग्निं दूतं वृणीमहे४ समिध्यमानो अध्वरेऽग्निर्होता अग्न आयाहीतीति६।७ द्वे।

सामीप्य न० समीपस्य भावः स्वार्थे वा ष्यञ्। १नैकट्ये २निकटे च "सामीप्यात्ते धविष्यन्तीत्यत्राधारसप्तमीविधेः" सुग्रव० व्याकरणम्। [२समुद्रभवे त्रि०।

सामुद्र न० समुद्रे भवः अण्। (करकच) १लवणे हेमच०।

सामुद्रक न०समुद्रेणर्षिणा प्रोक्तम् वुञ्। हस्तादिरेखादिना स्त्रीपुरुषशुभाशुभलक्षणज्ञापके समुद्रर्षिकृते १ग्रन्थभेदे "वामभागे तु नारीणां दक्षिणे पुरुषस्य च। निर्दिष्टं लक्षणं तेषां समुद्रेण यथोदितम्" "इति सामुद्रकसारसङ्ग्रहे" नैष०। सामुद्र स्वार्थे क। २समुद्रलवणे राजनि०

सामुद्रिक त्रि० समुद्रेण प्रोक्तं वेत्त्यधीते वा ठञ्। १स्त्रीपुरुषशुभाशुभलक्षणज्ञापकग्रन्थाध्येतरि २तद्वेत्तरि च।

साम्परायिक न० सम्परायाय आपदे परलोकाय वा हितम् ठक्। १युद्धे अमरः २परलोकसाधने त्रि०।

साम्प्रतम् अव्य०सम्+प्र+तन-डप्र। युक्ते। १उचिते २इदानीमित्यर्थे अमरः।

सा म्बा)ध्व सम्बन्धे चु० उभ०सक० सेट्। साम्बयति ते असम्बान्धीत् त। अयं धापदेशएव न्यायः। [राजनि०।

साम्बर न० सम्बरदेशे भवम् अण्। सम्बरदेशोद्भवे लवणे

साम्भवी स्त्री सम्भवः अस्त्यस्य प्रज्ञादित्वात् अण् गौरा० ङीष्। रक्तलोध्रे शब्दच०। [धर्मे।

साम्य न० समस्य भावः ष्यञ्। तुल्यत्वप्रयोजके साधारण-

साम्राज्य न० सम्राजो भावः ष्यञ्। १सार्वभौमत्वे "भेजे साम्राज्यदीक्षितम्" रघुः "सप्ताधिपत्यं राज्यं स्यात् साम्राज्यं दशलक्षके" इत्युक्ते २दशलक्षग्रामाधिपत्ये च

साय पु० सो-घञ्। १दिनान्ते अमरः। २बाणे मेदि०।

सायंसन्ध्या स्त्री सायम् दिनान्ते सन्ध्या, तत्र सन्ध्यायते सम्+ध्यै-घञर्थे क वा। १दिनान्तसन्ध्यायाम् अमरः। २दिनान्ते उपास्यदेवताभेदे च। भावे अङ्। ३तत्तोपासनायाम्।

सायक पु० सो-ण्वुल्। १बाणे २अस्त्रे च अमरः।

सायकपुङ्खा स्त्री सायकस्य पुङ्खो यस्याः ब०व०। शरपुङ्खावृक्षे राजनि०।

सायन्तन त्रि०सायमभवः सायम्+ट्युल् तुट् च। दिनान्तभवे। स्त्रियां ङीप्। "सायन्तनीं तिथिप्रान्त्यः" इति भट्टिः। "सन्ध्यां सायन्तनीं कृत्यात् द्वादशग्रादिष्वपि प्रिये!। अकुर्वन्निरयं याति यतो नित्यागमक्रिया" हरिवंशतन्त्रे १पटले।

सायिका स्त्री सो-ण्वुल् टाप्। क्रमस्थितौ शब्दर०।

सायम् अव्य० सो-असुन्। दिनान्ते "सायं सस्मात वर्त्तते" इत्यङ्गटः।

सायाह्न पु०सायोऽह्नः एक०त०टच् समा० अह्नादेशः। १दिनान्ते "सायाह्न स्तमुहूर्त्तः स्यात् सार्द्धं तत्र न कारयेत्" दक्षोक्ते पञ्चधाविभक्तदिनस्य त्रिमुहूर्त्तात्मके पञ्चमे २भेदेऽंशे च।

सायुज्य न० सह युनक्ति-युज-क्विप् सादेशः सयुङ् तस्य भावः ष्यञ्। १सहयोगे पञ्चविधमुक्तिमध्ये २एकत्वरूपे मुक्तिभेदे च "सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत। दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" भाग० श्रुक्०२९अ०। [रत्नं त अनेकाच्कत्वाच्च नोपदेशः

सार दौर्बल्ये अद० चु०उभ०सक० सेट्। सारयति ते असस्मार्

सार न० सृ-घञ्, सार-अच् वा। १जले २धने ३न्याय्ये त्रि० मेदि०। ४नवनीते न०राजनि०। ५लौहे भावप्र०। ६यने शब्दर०। ७बले ८स्थिरांशे हेमाद्रौ पु० अमरः। १०सर्जक्षारे ११वायौ जटा०। १२रोगे धरणिः १३अतिवृद्धे १४प्राणके पु० शब्दर० १५दध्यये पु० हेमच० १६श्रेष्ठे १७वरे च त्रि० अमरः। १८परमेश्वरे "एकं शिवं शान्तमनन्तमच्युतं परात्परं ज्ञानमयं विभेदम्। अद्वैतं सत्यमचिन्त्यरूपं सारन्त्वेकं नास्ति सारं ततोऽन्यत्। यस्मादेतज्जायते विश्वमग्र्यं यस्मिन् लीनं याति पश्चात् तिष्ठतच्च। आकाशवन्नित्यजालञ्च कृत्स्नं यद्विश्वं वै धियते तच्च सारम्। अष्टाङ्गयोगैर्यदवाप्तुमिच्छन् योगी युनक्त्यात्मरूपं सदैव। निवर्त्तते प्राप्य यन्नेह लोके तद्वै सारं सारमन्यन्न चास्ति" कालिकापु० २७अ०।

सारक पु० सारयति रेचयति सृ-णिच्-ण्वुल्। १जयपाले राजनि०। २रेचकद्रव्यमात्रे त्रि०।

सारखदिर पु० कर्म०, विटखदिरे राजनि०।

सारगन्ध पु० सारःन्यक्षोगन्धो यस्य। चन्दने शब्दच०।

सारघ न० सरसाधिर्निर्वृत्तम् अण्। मधुनि क्षौद्रे जटा०।

सारङ्ग पुंस्त्री० सृ-अङ्गच्। १चातकखगे अमरः। २हरिणे ३गजे मेदि०। ४अङ्गे पुष्पभेदे विश्वः। ६कृष्णे ७राजहंसे

दन्तिवस्तुनि दृढात्मभेदे १०वस्त्रे शब्दर० ११नानावर्णे १२मयूरे १३कामदेवे १४चापे १५केशे १६स्वर्णे १७आभरणे १८पद्मे १९पङ्के २०चन्दने २१कर्पूरे २२पुष्पे २३कोकिले २४नेत्रे २५भिक्षे २६रात्रौ २७भूम्नि २८दीप्तौ च नानार्थकोषः । शारङ्गस्यापत्यं शक्त्रा० शारङ्गोऽपि चित्रमृगादौ । चित्रवर्णे त्रि०अमरः । सर्वत्र जातौ स्त्रियां ङीष् ।

सारङ्गिक पु० सारङ्गं मृगं हन्ति ठक् । व्याधे त्रि०को० ।

सारज न० सारात् दध्यादात् जायते जन-ड । नवनीते शब्दच० ।

सारण न० सृ-णिच्-ल्यु । १गन्धद्रव्ये धरणिः । २अतीसाररोगे ३रावणसचिवभेदे च हेमच० । ४भद्रबलायां धरणिः ५आख्यातके शब्दच० ।

सारणि(णी) स्त्री सृ-णिच्-अनि वा ङीप् । १क्षुद्रनद्यां २प्रसारिण्यास् उणादि० सृ-णेरेणाडुभेदे सूचितग्रहगत्यादिबोधके ज्योतिषग्रन्थभेदे च ।

सारण्ड पु०सृ-णिच् घा०अण्ड । सर्पाण्डे जटा० [श्रयः ।

सारतरु पु० सारप्रधानः तरुप्रधानस्तरुः । कदलीवृक्षे धन-

सारथि पु० सृ-अथिण्, षच्च रथेन सरथः घोटकः तस्य नियुक्तः दृश्य वा । रथादिवाहनप्रेरके नियन्तरि अमरः । तल्लक्षणं मात्स्ये १८६ अ० यथा "निमित्तशकुनज्ञो रथयोद्धाविशारदः । हयायुर्वेदतत्त्वज्ञो भूमिभागविशेषवित् । अग्निभक्तो महोत्साही सर्वेषां च प्रियंवदः । शूरश्च कृतविद्यश्च सारथिः परिकीर्त्तितः" ।

सारदा स्त्री सारं ददाति दा-क । १सरस्वत्याम् शब्दर० । "लिखति यदि गृहीत्वा सारदा सर्वकालम्" शिवस्वरः । २सारदातरि त्रि० ।

सारद्रुम पु० सारप्रधानो द्रुमः । खदिरवृक्षे राजनि० ।

सारपादप पु०सारयति सारः निश्चयः । धात्रीनिम्बवृक्षे रत्नमा०

सारभाण्ड न० कर्म० । १अस्त्रिक्षेपणे २त्रोटपाशे च ।

सारमिति पु० सारं यथार्थं मिनोत्यनेन मा-करणे क्त्रिच् । १मेघे हेमच० भावे क्त्रिच् । २सारज्ञाने स्त्री ।

सारमूषिका स्त्री सारे मूषिकेवापहारकत्वात् । देवदालीवृक्षे राजनि० । [१कङ्कुरे २नदीयोषिति स्त्री ङीप् ।

सारमेय पुंस्त्री सरमायाः कुक्कुरप्रसूत्याः अपत्यम् ढक् ।

सारलौह न० लौहेषु सारः राज० । लौहसारे (इस्पात)

सारव त्रि० सरस्यां भवः अण् त्रि० । सरसूनदोषभवे अमरः

सारस न० सरो नियतमस्त्यतिरिक्त अण् । १पद्मे अमरः २वृद्धासुरभेदे च । षच्च रथेन युक्तेऽर्थे अण् । ३चन्द्रे ४स्वनामख्याते पक्षिणि पुंस्त्रीः स्त्रियां ङीष् । सरस इदम् अण् । ५सरोवरसम्बन्धिनि त्रि० । "नद्याः शैलवराच्चाम्भो यत्र संस्रुत्य तिष्ठति । तत्सरोजं जलं लघ्वं सारसं परिकीर्त्तितम्" भावप्र० उक्ते ६जलभेदे "सारसं सलिलं वल्यं वृष्यान्नं मधुरं लघु । रोचनं तुवरं रूक्षं वह्निमारुतकृत्स्मृतम्" तत्रोक्तास्तद्गुणाः ।

सारसन न० सारं सनोति सन-क्त्रच् । १स्त्रीकट्याभरणे काञ्च्यां कक्षुकदाद्यार्थे मध्यकाये निबद्धे २पङ्क्तिकादौ च अमरः ।

सारस्वत पु० सरस्वती देवताऽस्य, सरस्वत्या इदं वा अण् । १वत्सदृग्वृक्षे २देशभेदे हेमच० । पद्मगौडमध्ये श्रेष्ठब्राह्मणभेदे ४सरस्वतीप्रतिपादितसुनिभेदे ५ब्राह्मादिनवरूपे कल्पभेदे च "सारस्वतस्य कल्पस्येति" मत्स्यपुराणम् ६सरस्वतीसम्बन्धिनि त्रि० "तस्यां पूर्वाह्णसमये कुर्यात् सारस्वतोत्सवम्" नि०त० । ७सरस्वतीदेवताके च त्रि० । "तत्पावनाय निर्वाप्यश्चरुः सारस्वतोद्विजैरिति" स्मृतिः । सुनिभेदजन्मकथा च भा०श०५२अ० "ब्रह्मर्षे ! (दधीच !) तव पुत्रोऽयं त्वद्वक्त्रा धारितो मया । दृष्ट्वा तेऽप्सरसं रूपं यत् स्खलं प्रागलम्बुषाम् । तत् कुक्षिणा वै ब्रह्मर्षे ! त्वद्वक्त्रा धृतवत्यहम्" इत्युपक्रमे "तस्मात् सारस्वतः पुत्रो महांस्ते वरवर्णिनि ! । तवैव नाम्ना प्रथितः पुत्रस्ते लोकभावनः । सारस्वत इति ख्यातो भविष्यति यथातथः । एष द्वादश वार्षिक्यामनावृष्ट्यां द्विजन्मनाम् । सारस्वतो महाभागो वेदानध्यापयिष्यति" इति सरस्वतीं प्रति दधीचोक्तिः तस्य वेदाध्यापनकथा च तत्रैव अध्यायशेषे "अनावृष्टिरनुप्राप्ता राजन् द्वादशवार्षिकी । तस्यां द्वादशवार्षिक्यामनावृष्टौ महर्षयः । इत्यर्थं प्राद्रवन्राजन् ! क्षुधार्त्ताः सर्वतो दिशम् । दिग्भ्यस्तान् प्रद्रुतान् दृष्ट्वा मुनिः सारस्वतस्तदा । गमनाय मतिञ्चक्रे तमुवाच सरस्वती । न गन्तव्यमितः पुत्र ! तवाहारमहं सदा । दास्यामि मत्स्यप्रवरानमृतानिव भारत !" ततः सहस्रमत्स्याहारेण प्राणधारयत् वेदाधारयत् क्षतीतायामनावृष्टौ अक्षमाभावेन नष्टवेदा अन्ये मुनयस्तो वेदान् लेभिरे तत्कथा "तस्माद्देवानुग्राह्य पुनर्वेदं प्रचक्रिरे । महर्षिनिमुखाच्चापि शिष्यैर्वेदं प्रतिग्रहिरे । सारस्वतस्य विप्रर्षेर्वेदाध्यापकारकात् । देशभेदश्च "मध्ये सारस्वता मत्स्याः शूरसेनाः सपार्श्वकाः । पाञ्चालाश्चेदिमत्स्याश्च कुरुजाङ्गलकाश्च ये"

इत्युक्तेर्मध्यदेशभेदः सोऽभिजनोऽस्य अण्। ततस्तेश-वर्त्तिनि। ततस्तत्ब्राह्मणभेदश्च "सारस्वता कान्यकुब्जा गौडमैथिलकोत्कलाः। पञ्च गौड़ा इति ख्याता विन्ध्य-स्योत्तरवासिनः" पुराणान्तरम्।

सारस्वतकल्प पु० कर्म०। १तन्त्रोक्ते सरस्वत्या उपासना-त्मके विधानभेदे २तत्प्रकाशके ब्रह्मादिग्रन्थे च। कल्पशब्दे १८१६ पृ० दृश्यम्। [शब्दर० २दुर्वायांस्त्री अमरः च०।

सारा स्त्री सारयति सृ-णिच्-अच्। १क्षणविहतायाम्

साराल पु० सारमालाति आ+ला-क। तिलवृक्षे शब्दर०।

सारि(री) पुंस्त्री० सृ-इण् स्त्रीत्वपक्षे वा ङीष्। १पाशके-"सारीं चरन्तीं सखि! सारयेति" नैषधम्। २पक्षि-भेदे च (शालिक) शब्दच०। ङीषन्तः ३सप्तलायां राजनि०

सारिका स्त्री सरति गच्छति सृ-ण्वुल्। पक्षिभेदे(शालिक) अमरः।

सारिणी स्त्री सृ-णिनि। १सहदेवीलतायां २काष्ठांशां ३दरालभायां ४कपिलणिशपायां ५प्रसारिण्यां ६रक्त-पुनर्णवायाञ्च राजनि०।

सारिवा स्त्री सारिरिव वाति वा-क। (अनन्तमूल)लताभेदे सा च द्वयङ्गभां जन्ववत्पत्रां सुगन्धा च। सा च कृष्णशुक्लभेदात् द्विविधा "सारिवासुगलं स्वादु स्निग्धं शुक्रकरं गुरु। वह्निमान्द्याक्षिरोगासृक्कासास्रविषनाशनम्। दोषत्रयास्रप्रदरज्वरातीसारनाशनम्" भावप्र०। [भवः ठक्। विषभेदे अमरः।

सारोष्ट्रिक पु० सारः श्रेष्ठ उष्ट्रो यत्र सारोष्ट्रः देशभेदस्तत्र

सार्थ पु० सृ-थन् स्वार्थे अण्। १समूहे २जन्तुसमूहे अमरः "स जयत्यरिसार्थसार्थकोत्कतनाना" नैषधम्। सह अर्थेन वाच्येन वा। ३वणिक्समूहे मेदि०। ४धनिनि त्रि०। कप्। सार्थक। ५अर्थसहिते त्रि० ६शब्दे पु० "सार्थकः स्वार्थबोधकादिति" शब्दशक्तिप्रकाशिका।

सार्थवाह पु० सार्थं वहति वह-अण्। वणिग्जने अमरः

सार्द्ध त्रि० सह अर्द्धेन। अर्द्धनायुक्ते अमरः।

सार्द्धम् अव्य० सह+ऋध-असु। १सहार्थे अमरः। सह अर्द्धेन सार्द्धं २अर्द्धयुक्ते त्रि०।

सार्प न० सर्पदेवतास्य अण्। अश्लेषानक्षत्रे।

सार्पिष्क त्रि० सर्पिषा संस्कृतम् ठक्। घृतसंस्कृते व्यञ्-जनादौ हेमच०। [विदिते।

सार्वजनीन त्रि० सर्वेषु जनेषु विदितः खञ्। सर्वलोक-

सार्वत्रिक त्रि० सर्वत्र भवः ठक्। सर्वस्मिन् कालादौ भवे।

सार्वधातुक न० सर्वधातून् व्याप्नोति ठक्। व्याकरणोक्ते सर्वधातुप्रकृतिके लट् लोट लङ् विधिलिङ् इत्याख्यके। चतुर्लकारे [स्त्रियां ङीष्।

सार्वभूतिक त्रि० सर्वाणि भूतानि व्याप्नोति ठञ् द्विपद-

सार्वभौम पु० सर्वस्या भूमेरीश्वरः सर्वास्मिन् भूमिषु विदितो वा अण् द्विपदवृद्धिः। १चक्रवर्त्तिनि नृपे २उत्तरदिक्स्थे गजे च अमरः। ३विदुरधनुषपुत्रे पु० भा० उ० १२८अ० ४सकलभूमिसम्बन्धे त्रि०।

सार्वलौकिक त्रि० सर्वेषु लोकेषु विदितः ठञ् द्विपदवृद्धिः। सर्वलोकेषु विदिते "स राजा सार्वलौकिकः" भट्टिः।

सार्वविभक्तिक त्रि० सर्वासु विभक्तिषु तदर्थे भवः-ठञ्। सर्वविभक्त्यर्थे विहिते तसिलादौ प्रत्यये पा० ।

सार्षप त्रि० सर्षपस्य विकारः अण्। सर्षपविकारतैलादौ "अदुष्टं सार्षपं तैलम्" स्मृतिः।

साल पु० सल-घञ्। १वृक्षभेदे "रसालसालः समदृश्य-ताद्वना" नैषधम्। २खनामख्याते वृक्षभेदे "सालस्तु सर्ज-कार्य्यश्चकर्णकः मधुद्रुमः। अश्वकर्णः कषायः स्याद्व्रणरक्तैककफक्रमीन्। अक्षविद्रुधिबाधिर्य्ययोनिकर्णगदान् हरेत्। सर्जकोऽन्योऽजकर्णः स्यात् सालो मरिच पत्रकः। अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति। कफपाण्डुस्मृतिगदान् मेहकुष्ठविषव्रणान्" भावप्र०। एतत्परत्वे तालव्यादितोऽपि। ३प्राकारे मेदि० ४साल-वृक्षे भरतः ५राले राजनि०।

सालन पु० सालः कारणत्वेनाऽस्त्यस्य प्राणादितत्वात् न। सालनिर्य्यासे (धुना) रत्नमा०।

सालनिर्य्यास पु० ६त०। सर्जरसे (धुना) रत्नमा०।

सालपर्णी स्त्री सालस्येव पर्णान्यस्याः ङीष्। (शालपानि) वृक्षे शब्दर०।

सालपुष्प न० सालस्येव पुष्पं यस्य। स्थलपद्मे शब्दर०।

सालभञ्जिका स्त्री सालं भनक्ति भञ्ज-ण्वुल्। १काष्ठादि निर्म्मिते स्त्रियमक्रीड़ासाधने पुत्तलिकाभेदे २वेश्यायाञ्च जटा०।

सालरस पु० ६त०। (धुना) राले राजनि०।

सालवेष्ट पु० सालं वेष्टयति वेष्ट-अण्। राले (धुना) राजनि०

सा(शा)ला स्त्री सालः प्राकारोऽस्त्यस्याः अच्। वृक्षे भरतः

सा(शा)लाटुक पुंस्त्री० सालायां वृक्षे इव। कुक्कुरे। स्त्रियां ङीष्। [शब्दर० स्त्रियां ङीष्।

सा(शा)लूर पुंस्त्री० सृ(शृ)ल-ऊरच् णिच्च। भेदे अमरः

सा(शा)लेय पु०सा(शा)लायां भवःढक्। मधुरिकायाम् अमरः

सालोक्य न० समानोलोकोऽस्य तस्य भावः ष्यञ्। सायुज्य शब्दोक्ते पञ्चविधमुक्तिमध्ये एकलोकसहवासरूपे मुक्तिभेदे।

सा शा ल्व पु० ब०व० सौवीरदेशे। तेषां राजा अण्। तद्देशादिषु न्यूनभेदे स च श्रीकृष्णेन हतः भा० द्रो० १४अ० द्रष्टव्यम्। [हेमच०।

सा(शा)ल्वहन् पु० शाल्वं नृपं हतवान् हन-क्विप्। विष्णौ

सावधान त्रि०सह अवधानेन। १सचेतने सतर्के २मनोभिनिवेशयुक्ते च।

सावन न०सवनं यागाङ्गं स्नानं सोमनिष्पीडनं वा तत्रेदमण्। "अहोरात्रेण चैकेन सावनो दिवसः स्मृतः" ब्रह्मसिद्धान्तोक्ते १अहोरात्रात्मके दिवसे, सवनत्रयस्य अहोरात्रसाध्यत्वादहस्तत्सम्बन्धित्वम्। तत्त्रिंशद्दिवसात्मके २मासभेदे च पु० "चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः" विष्णुध०"सावने च तथा मासि त्रिंशत्सूर्य्योदयाः स्मृताः" म० त०। "स्तकादिपरिच्छेदो दिनमासाब्दसंस्थया। मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तितः" इति सूर्य्यसिद्धान्तः। सावनमासलक्षणानि च विशेषतः क्वचित् म०त० पितामहेनोक्तानि "विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः" "व्याप्तिदेन सवत्सरतिथ्युद्वाहप्रायश्चित्तायुर्दायार्थौर्ध्वदैहिकेषु सवनसोमन्तोन्नयननामकरणान्नप्राशननिष्क्रमणचूडादिषूपयुज्यम्" म० त० रघु०। एषु सावनेन मानेनैव सर्वत्र गणना "सवनाद्युपाख्यान्यत्र सावनेन लोकयात्रायां सवनव्यवहारकर्म विष्णुध० इत्यंशभेदे "सौरेणाब्दस्तु मानेन यदा भवति गर्भवः। सावनेन च मानेन दिनषट्कं प्रपूर्यते"। "सौरवर्षे दिनषट्काधिकसावनवर्षो भवतीति रघु०। दिनषट्कमिति प्रायिकम् सौरवर्षे सावनस्य ५।१५।२१।३०।२४ दिनाद्याधिक्यस्यैव सिद्धान्तोक्तेः। ४यज्ञान्ते ५यजमाने ६वरुणे च पु० मेदि०।

सा(शा)वर पु० स(श)वरस्य निर्वृत्तः अण्। १पाशे २अपवादे च विश्वः। ३लोभे शब्दच०।

सावर्ण पु० सवर्णायां छन्दस्यां संज्ञायां भवः अण्। सवर्णागर्भजे सूर्य्यजे अष्टमे मनौ द्रुज्। सावर्णिरयम् "सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः" "छायायस्तु समासाद्य सावर्णिर्भविता मनुः" देवीभा०। "छायायस्तु सुतो योऽयौ द्वितीयः कथितो मनुः। पूर्वजस्य सवर्णोऽसौ सावर्णस्तेन कथ्यते" देवीभाग० तन्नामनिरुक्तञ्चान्तरशब्दे दृश्यम्

"विवस्वतश्च ते भार्य्ये विश्वकर्मसुते उभे। संज्ञा छाया च राजेन्द्र! वे प्राग्व्याहृते तव। तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः। यमोयमी श्राद्धदेवश्छायायाश्च सुतान् शृणु। सावर्णिस्तपती कन्या भार्य्या संवरणस्य या। शनैश्चरस्तृतीयोऽभूत् अश्विनौ वडवात्मजौ। कल्पभेदादविरोधः।

सावित्र पु० सविता देवताऽस्य अण्। १विप्रे हेमच०। २ऋग्विशेषे स्त्री ङीप्। "सावित्रीमात्रसारोऽयमिति" मनुः। सा च ३सत्यवतीभार्य्यायाम् स्त्री ४सवितृदेवताके सर्वार्दौ त्रि०। ५यज्ञोपवीते न० शब्दच०। स्वार्थे अण्। ६सूर्य्ये पु० शब्दच०। तत्रेदम् अण्। ७ब्रह्मादेवे ८वासौ च पु० मेदि०। ९गर्भे शब्द० १०ब्रह्मपत्न्यां स्त्री ११दुर्गायां च स्त्री मेदि। तन्नामनिरुक्तिः देवीपु० ४४अ० "त्रिदशैरर्चिता देवी वेदभागेषु पूजिता। आदावुच्चरिता तु सावित्री तेन सा स्मृता" ब्रह्मपु०। अन्या निरुक्तिः "सर्वलोकप्रसवनात् सविता स तु कीर्त्यते। यतस्तद्देवता देवी सावित्रीत्युच्यते ततः। वेदप्रसवनाच्चापि सावित्री प्रोच्यते बुधैः"। ब्रह्मपत्नी च यतरूपा "ततः संजपतस्तस्य भित्त्वा देहमकल्मषम्। स्त्रीरूपमर्द्धमकरोद्द्वे पुरुषरूपवत्। यतरूपा च सा ख्याता सावित्री च निगद्यते। सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप!" मत्स्यपु० १३अ०। गायत्रीशब्दे दृश्यम्।

सावित्रीव्रत न० सावित्रीपूजनमुद्दिश्य कर्त्तव्यं व्रतम्। ज्यैष्ठकृष्णचतुर्दश्यां सावित्रीपूजनार्थे व्रते तद्विधिर्यथा "शिवाऽघोरा तथा प्रेता सावित्री च चतुर्दशी। कुहूयुक्तैव कर्त्तव्या कुहूमेव हि पारणम्" तिथितत्त्वधृतवचनम् यथा: "दत्त्वा जलाञ्जलीन् सप्त कृष्णपक्षे चतुर्दशीम्। धर्मराजं समुद्दिश्य सर्वपापैः प्रमुच्यते"। हिङ्गुपुराणे तथैवाषाढचतुर्दश्यां महापातकनाशकः"। पराशरः "ज्येष्ठे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत्"। तां चतुर्दशीम् "ज्यैष्ठे कृष्णचतुर्दश्यां सावित्रीमर्चयन्ति याः। वटमूले सोपवासा न ता वैधव्यमाप्नुयुः"। राजमार्त्तण्डकल्पतरुचिन्तामण्योः "ज्यैष्ठे मासि चतुर्दश्यां सावित्रीव्रतमुत्तमम्। अवैधव्याय कुर्वन्ति स्त्रियः श्रद्धासमन्विताः"। व्रतमात्रे तु अमान्तज्येष्ठतृतीयान्ततोऽमावास्यान्तरे कल्पनान्यायात् तदुक्तं मत्स्यपुराणे "गर्भिणी-प्रसूतिका नक्तं कुमारी च रजस्वला। यदाऽशुद्धा तदा-

न्येन कारयेत् क्रियते यदा" । उपवासाशक्तौ नक्त भोजनं कुर्य्यात् "उपवासे स्वशक्तानां नक्तं भोजनमिष्यते" इति तद्भूतवचनान्तरात् । अशक्तौ चेत् पूजां कारयेत् । कायिकस्योपवासादिकं यदा शक्तया अशक्तया च स्वयं क्रियते । एवं स्मृतिपरिभाषिकायां वर्द्धमानोपाध्यायाः । नारदः "दिवाभागे त्रयोदश्यां यदा चतुर्दशी भवेत् । तत्र पूज्या महाश्वेती देवी-फलवता सदा" । 'दिवाभागे दण्डद्वयमात्रसत्त्वेऽपि अतएव प्रदोषे व्रतमाचरन्ति । पूर्वोक्ते तद्विधत्वेऽपि । पराह्णे त्रिमुहूर्त्तव्यापित्वे पराह्ण एव त्रिमुहूर्त्तव्यापि नीति वचनात् । यदा तु पूर्वपरयोर्न तथाविधा तदापि पराह्ण एव यथा ज्योतिषे "चतुर्दशग्राममात्रा यदा भवति नारद ! । उपोष्या पूजनीया सा चतुर्दश्यां विधानतः" । या सावित्री । ततश्चासावाख्यायां सावित्रीव्रतविधानं शिवाचोरेति वचनञ्चैतत्परम् । पराशरः "सावित्रीमर्चयित्वा तु फलाहारा परेऽहनि । सतस्त्रविधवा नारी विघ्नसंयोगात् लभेत सा" ।

सावित्रीसूत्र न० सावित्र्यादीज्याकालिकं सूत्रम् शाक० । यज्ञोपवीते पञ्चच० ।

सास्रुधी स्त्री० सस्रु ध्यायति ध्यै-क्विप् अस्य० । स्यस्रु सिका० ।

सास्ना स्त्री० सस-न णिच्च । गोगलस्थिते लोलचर्म्मघाता-त्मके कम्बले अमरः ।

साह्य त्रि० सह ण्यत् । चतुर्जनान्विते ।

साक्षितार्द्धार्द्ध न० साक्षि अक्षिसहितं ताच्चार्द्धं यत्र । कार्य्ये त्रिका० तस्य रज्जुसहितताच्चार्द्धजातत्वात् तथात्वम् साक्षितार्द्धार्द्ध इत्येव पाठः सम्यक् अक्षिनांगो रज्जुः

साहचर्य्य न० सहचरस्य भावः ष्यञ् । १समभिव्याहारे, २साक्षित्वे १श्यामनाधिकरणे च ।

साहस न० सहसा बलेन निर्वृत्तम् अण् । १बलेन कृते चौर्य्य स्त्रीसंग्रहादौ दुष्कर्म्मणि, "सहसा क्रियते यत्तु तत् साहसमिति स्मृतम्" स्मृतिः । सहसेति: वीरमि० "तस्य स्वरूपमाह नारदः "सहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः । तत्साहसमिति प्रोक्तं सहो-बलमिहोच्यते" इति । तस्य चातुर्विध्यमाह बृह-स्पतिः "मनुष्यमारणस्त्रीणां परदाराभिमर्शनम् । पारुष्यमुभयञ्चेति साहसं स्मृतविधम्" इति । उभयं पारुष्यं वागूदण्डपारुष्ये । तस्य त्रैविध्यमाह नारदः "तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमन्तथा । उत्तमञ्चेति शास्त्रेषु तस्याक्तं लक्षणं पृथग्" इति । एतेषां स्वरूपमाह स एव "फलमूल तृणादीनां क्षेत्रोपस्करणस्य च । भक्षणक्षेपणोपमर्दाद्यैः प्रथमं साहसं स्मृतम् । वासःपशुयानानां गृहोपकरणस्य च । एतेनैव प्रकारेण मध्यमं साहसं स्मृतम् । व्यापादो विषशस्त्राद्यैः परदारादिमर्शनम् । प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसम्" इति । भक्षणं फलादि स्वरूपनाशनम् । आक्षेप आक्षोभः वाक्तिरस्करणमिति यावत् । उपमर्दः स्वरूपावयवेन पीडनम् । एतेनैवं प्रकारेणेत्यर्थः । त्रिविधेऽपि साहसे दण्डमाह नारदः 'तत्र दण्डः क्रियापेक्षः प्रथमस्य शतावरः । मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्चशतावरः । उत्तमे साहसे दण्डः सहस्रावर इष्यते । वधः सर्वस्वहरणं पुराद्विरासनञ्चाङ्कने । तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे" इति । ब्राह्मणस्य तु महत्यपराधे शारीरदण्डाभावमाह स एव "अविशेषेण सर्वेषामेष दण्डविधिः स्मृतः । वधादते ब्राह्मणस्य न वधं ब्राह्मणोऽर्हतीति" । यमोऽपि "न शारीरो ब्राह्मणस्य दण्डो भवति कस्यचित्" इति । महत्यपराधे ब्राह्मणस्य दण्डमाह स एव "चित्वा तु वस्त्रते वृषा राजा भक्तं प्रदापयेत्" इति । नारदोऽपि "शिरसोमुण्डनं दण्डस्य निर्वासनं पुरात् । ललाटे चाभिभङ्गाङ्कः प्रवाच्यश्चङ्गभेन च" इति । परदूष्यापहरणरूपसाहसरूपं तत्र च दण्डमाह याज्ञवल्क्यः "सामान्यद्रव्यसम्हरणं साहसं स्मृतम् । तन्मूल्याद् द्विगुणो दण्डो निक्षेपे तु चतुर्गुणः इति । बलाभिभवेन प्रहरादिकालक्रमेण च रक्ष्यमाणस्य द्रव्यस्य बलात्कारेण हरणं साहसरूपं स्तेयमिति पूर्वोक्तार्थः । तन्मूल्यादपहृतद्रव्यमूल्यात् । निक्षेपे उपनिधौ । यः साहसं करोति तद्द्विगुणदण्डम् । यस्तु साहसं कृत्वा निह्नुते स चतुर्गुणदण्ड्य इत्युत्तरार्द्धार्थः । साहसिकस्य प्रयोजयितारं प्रत्याह स एव "यः साहसं कारयति स दाप्यो द्विगुणदण्डम् । यश्चैवमुक्त्वाहन्दाता कारयेत्तत्र चतुर्गुणम्" इति । द्विगुणदण्डं साहसिकस्य द्विगुणं दण्डम् । साहसिकविशेषं प्रत्याह स एव "अध्यक्षोपातिक्रमकद्वाहभार्य्याप्रहारदः । संदिष्टस्यापदाता च षड्दण्डभाग्यथाक्रमम्" । सामन्तकुलिकादीनामपकारस्य कारकः । षड्भेदकृत् । साहसान्तर्गतिकादण्डः एवान्यैरुक्त विनिश्चयः । अकृद्दण्ड

विधवागामी विष्णुरेनमिधावतः । अक्षारलवणं विक्रीणन् श्राद्धान्नशौचमाप्नुयात् । मूढप्रव्रजितानाञ्च दैवे पित्र्ये च भोजनः । न्यायतः धनं कर्जयन् अयोग्यो योग्यकर्मजन् । दुष्टस्त्रीपुत्रभृत्यानाञ्च पुंश्चल्या प्रतिषेधनकृत् । साधारणश्राद्धकारी दासीनर्भविनाशकृत् । पितृव्यभ्रातृव्यश्वशुरमातुलाचार्यशिष्यर्त्विजः । एषामपतितानान्तु श्राद्धं स्वामी च यत्नतः कुर्यात्" इति । "अज्ञानकृते साकृत्विके पित्रादिनाम्नैव । प्रेत्या राजपुरुषैः सामादिभिरुपक्रमैः । विद्वेषोऽसाधुसंसर्गाच्छिष्टेर्दण्डेन वा नरैः । एवोदिता घातकामान्त्यस्कराणान्तु भावना । अकृतः बहुधा वस्तु न तत्कार्यं प्रयत्नतः । प्रयत्नेनाप्यवोद्धव्यः सर्वथादेयं विधिः" इति । चिह्नं रज्जुवेणादि कृष्णोत्तमस्य धनादिकम् । ज्ञानाज्ञानकर्तृकमाह व्यासः "ज्ञात्वा तु घातकं यस्तु दण्डयित्वा यथाविधम् । कृत्वाग्निमन्त्रधोपायैर्दहेज्जलकरैर्नरैः" इति । हरीतः "अज्ञानघातका ये तु तथा चोपांशुघातकाः । ज्ञात्वा यस्यस्य कृत्वा कृत्स्ना विविधैर्वधैः" इति । अत्र ज्ञानं क्षत्रियादिविषयमेतत् । यत आह गौतमः "क्षत्रियादीनां ब्राह्मणस्य वधे वधः सर्वस्वहरणञ्च तेषामेव तुल्यापराधे यथावर्णमनुकूलं दण्डस्य कल्पयेदिति" तेषां क्षत्रियादीनामनुल्यापराधे स्वजातीयज्ञानजातीयवधे दण्डं मानीरदण्डम् । एकघातार्धमुक्तानां बहूनान्तु घातनरूपं दण्डमाह शातातपः "एकस्मे दुष्टवो हन्युः संहताः पुरुषवराः । सर्वघातो तु दातव्यो न घातक इति स्मृतः" । यो सर्वघातकः स एव वधापराधदण्डभागित्यर्थः । स एव "आरम्भकृत्पडाद्यः शस्त्रास्त्रोद्देशकः । आश्रयः प्राक्प्रदाता च भक्तदायी विकर्मिणाम् । युद्धोपदेष्टकश्चैव तद्विनाशप्रवर्त्तकः । उपेक्षाकार्य्ययुक्तश्च दोषवक्तानुमोदकः । अनिषेद्धा क्षमो यः स्यात् सर्वे ते कार्य्यकारिणः । यथापराधदण्डन्तु दण्डयेयुर्नृपाज्ञया" इति । हरीतोऽपि "एकस्य दण्डबहवो यत्र प्रहरन्ति दुर्मतयः । सर्वप्रहारकः यस्तु घातकः स उदाहृतः । सर्वघाती तु यस्तेषां वधोक्तं घातयेद्दण्डम् । आरम्भकृत्सहायश्च होनभागी तदर्द्धतः । अतस्त्राणमकृत्वस्तु सर्वस्वानञ्च यत्नतः । आमर्त्यघातकस्तस्तु ज्ञात्वा चिह्नैः प्रघातयेत्" इति । विष्णुरविशेषे बहुप्रहारकर्तृकेऽपि दोषाभावमहसंवर्त्तश्चाह स्मृतः "एकं द्विजातिनिर्दोषं धर्मो यत्रोपहन्यते । द्विजातीनाञ्च वर्णानां विप्लवे ज्ञानकारिते । आत्मनश्च परित्राणे दक्षिणानाञ्च सङ्गरे । स्त्रीविप्राभ्युपपत्तौ च नैनं धर्मेण योजयेत्" इति । यत्र देवे काले च धर्मसेतुकादिदूषणोद्देशेनैक्यमुपहन्यते तथा भूदेवतरवर्णसङ्करे परदाराक्रमणादिदूषे राजाभावज्ञानकारिते । तथात्मनः परतः प्राणसंशये । तथा दक्षिणानां सङ्करे गोधनहरणनिमित्ते युद्धे । तथा स्त्रीविप्राभ्युपपत्तौ दुर्वृत्तस्त्रीनिवारणे । धर्मान्नैनोधर्मेण न दुष्यति यतः । अतस्तत्र द्विजातिभिः सत्रधर्मोपयुक्तैरपि सर्वैः शस्त्रं शास्त्रमित्यर्थः अत्र द्विजातिग्रहणं ब्राह्मणैक्यविषयम् । प्रजापालनार्थं क्षत्रियस्य वचनान्तरेणैव शस्त्रग्रहणञ्च प्राप्तवादित्यभिसन्धायैव बौधायन आह "ब्राह्मणार्थे गवार्थे च स्त्रीणां बालेऽपि सङ्करे । सद्यो-यातां विप्लविनी सद्यः धर्मेणातिक्रमेदिति । यत्तु "परोक्षार्थमपि ब्राह्मण आयुधमादद्दीत इत्यापस्तम्बवचनम् । यच्च बौधायनवचनम् "कार्यार्थमपि ब्राह्मण आयुधं बाढदीतेति तदुद्यतमपि धर्मोपरोधादिभिन्नविषयम् । शाङ्खस्तेयञ्च क्रोधलोभजतत्वमाह हरीतः "शास्त्रं शास्त्रस्तेयं सूयतां क्रोधलोभजम्" इति । लोकंयकृत्याक्षस्त्रीशस्त्रकृत्यमाह स एव "अनिच्छन्त्या यत् क्रियते सुप्तोन्मत्तप्रमत्तया । प्रसह्य वा रक्षसि बलात्कारजन्तु तत्" इति । अनिच्छन्त्या परप्रेष्येण दुष्टेति शेषः । अनिच्छन्त्या यानि चिह्नानि तस्याः कर्त्तव्यं राजकृत्यं आह संवर्त्तः "नेच्छन्त्या यानि चिह्नानि बलात्कारजतानि च । परुषैः प्रहरैः पुंभिः नारीणान्तानि दूषणैः । मद्यदूनजघनस्तनाभोगकृच्छ्रश्वासोच्छ्रिता । सद्यो निश्वासिता नारी बलात्कारेण दूषिता । ऊर्ध्वविक्षोभयन्ती च रुदन्ती लोकमक्षिणी । तस्य नामवदनी च यथाकन्येव दूषिता । श्लोचेदैर्विधैर्निर्भुग्नजघनस्तनपयोधरा । चिह्नालङ्कारकेशैश्च आक्रान्तोत्तरलोचना । राज्ञा सभ्यैः सभां नीत्वा शपथमन्विष्य तत्त्वतः । यद् ब्रूयात् सदृशं तस्य तत् कार्यं प्रयत्नतः । विवादे साक्षिणामत्र प्रमाणीति परिग्रहः । प्रार्थनादभियुक्तस्य न दिव्यं दातुमर्हति" इति । अत्र दण्डमाह यमः "दण्ड्यं ब्राह्मणो दण्ड्यो क्षियं गुप्तां बलादृतम् इति । गुप्तां अनिच्छयेन रक्षितामू । अनिच्छादिविशेषविषये दण्डमाह हरीतः "बलेना

कामयेद् यस्तु धनलाखिलं हरेत् । उत्कृत्य लिङ्ग-वृषणौ भ्रामयेद् गर्दभेन तु" इति । कामयेत् परस्त्रियङ्गच्छेत् । अयमेव दण्डोऽनुलोमप्रतिलोमजात्योः स्वजातीयपरभार्य्यागमने वेदितव्य इति भटनरत्ने । हीनजातीयपुरस्त्रीगमने ब्राह्मणादिश्चेतदर्द्धपरिमितो दण्डः । उत्कृष्टजातीयपरदारगमने अयमेव दण्डो वधसहितः कार्य्य इत्याह स एव "दमोनेयः समायान्तु हीनायामधिकस्ततः । पुंसः कार्योऽधिकायान्तु गमने सप्रमापणम्" इति । दमः सहसा कामयेदिति वाक्योक्तः । नयः प्रापणीयः । यत्तु वधमात्राभिधायकं कात्यायनवचनम् "स्त्रीषु क्रीतोपभोगः स्यात् प्रसह्य पुरुषो यदा । वधे तत्र प्रवर्त्तेत कार्य्यातिक्रमणं हि तत्" इति । तन्निर्गुणस्य भार्य्यागमने वेदितव्यम्" । सहसा अविवेकेन कृतं कर्म । २अविमृष्यप्रकृतकर्मणि, त्रि० । "तेन साहसमनुष्ठितं पुनः" काव्यप्र० ३साहसमनुसरति यण् । ञ्यन्तु ४दण्डविशेषे पु० "साशीतिपणमाहुस्तोदण्ड उत्तमसाहसः । तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृतः" स्मृतिः । "पाकयज्ञे तु साहस" इत्युक्ते ४अग्निभेदे च पु० ।

साहसिक त्रि० साहसे प्रकृतः ठक् । १मनुष्यप्रमारणादिभिरते २चोरे ३पारदारिके ४परुषकारिणि च ।

साहस्र न० सहस्राणां समूहः अण् । १सहस्रसमूहे । स्वार्थे अण् । २सहस्रसङ्ख्यायाम् न० । सहस्रं परिमाणमस्य अण् । ३सहस्रसंख्यान्विते त्रि० । ४सहस्रसंख्यकगजसमूहे पु० अमरः ।

साहायक न० सहायस्य भावः वुञ् । साहाय्ये ।

साहाय्य न० सहायस्य भावः ष्यञ् । सहायतायाम् ।

साहित्य न० सहितस्य भावः ष्यञ् । १मेलने २परस्परसापेक्षाणां तुल्यरूपाणामेकक्रियान्वयित्वे आलङ्कारिक० ३तुल्यवदेकक्रियान्वयित्वे ४एकक्रियान्वयित्वमात्रे ५बुद्धिविशेषविषयत्वे शब्दप्र० ६पद्यात्मके काव्ये च ।

साह्य न० सहस्य भावः ष्यञ् सह-ण्यत् वा । १सहत्वे २मेलने धरणिः ३सहनीये त्रि० ।

साह्वय पु० सह आह्वयेनाभिधानेन । १अभिधानसहिते "जगाम गजसाह्वयम्" भारतम् । सेनादग्राणिकरणदूतरूपे सहाह्वये च शब्दर० ।

सिंह पुंस्त्री० हिनस्ति-अच् पृषो० "सिंहो वर्णविपर्य्ययात्" इत्युक्तेः वर्णविपर्य्ययः । ज्ञानसख्याते १पशुभेदे अमरः स्त्रियां ङीष् । गुहाशयशब्दे सिंहभांसगुणा दृश्याः । २रक्तगोभाञ्जने राजनि० ३मेषादितः पञ्चमे राशौ ज्यो० सिंहराशिश्च २१६०० कलात्मकराशिचक्रस्य ७२०० कलोपरि १८०० शतकलात्मकः मघापूर्वफल्गुन्युत्तरफल्गुन्याद्यपादात्मकः । "पुमान् स्त्रियोऽग्निदिनपित्तरुक्षपीनोष्णपूर्वेण दृङ्मुखात्" । सप्तोदयो दीर्घरवोऽल्पसङ्घजो हरिः शैलन्यपोऽथ धूकः" नील० ता० तत्सखभावादि शब्दम् । तस्य स्वामी सूर्य्यः । ४जिनभेदे हेमच० । ५उत्तरपदस्थः पुंश्रेष्ठार्थे अमरः । अत्र सिंह इवेति विग्रहे "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" पा० उपमितसमासे नरसिंहादिशब्दात् सिंहतुल्यशौर्य्यादियुक्तो नर इति बोधात् नरस्य श्रेष्ठत्वं द्योत्यते इति बोध्यम् । ६नाड्यां स्त्री राजनि० ७आषाढभेदे देवीपु० शब्दे २६८१ पृ० दृश्यम् ८सिंहासनभेदे तच्छब्दे द्रष्टव्यम्

सिंहकेलि पु० सिंहस्येव केलिरस्य । भङ्गुरोष्ठे त्रिका० ।

सिंहकेशर पु० सिंहस्येव केशरोऽस्य । बकुले त्रिका० ।

सिंहतल पु० सिंहतल+पृषो० । करद्वयमेलनरूपे अञ्जलौ । रामाश्रमः । [राजनि०।

सिंहतुण्ड पु० सिंहस्येव तुण्डः पुष्पमस्य । 'सेऽङ्खण्डवृक्षे

सिंहद्वार न० सिंहचिह्नितं द्वारम् मध्य० । पुरप्रवेशनयोग्ये द्वारे हेमच० ।

सिंहध्वनि पु० सिंहस्येव ध्वनिः । १सिंहतुल्यनादे सिंहनादादयोऽप्यत्र अमरः । हृत० । २सिंहस्य शब्दे ।

सिंहनर्दिका पु० सिंह इव नर्दति नर्द-ण्वुल् । (सिङ्गा) वाद्यभेदे हारा० ।

सिंहनादिका स्त्री सिंहमपि नादयति नद-णिच्-ण्वुल् । १दुरालभायाम् शब्दच० । २सिंहनर्दिकायां हारा० ।

सिंहपर्णी स्त्री सिंहस्य पुच्छ इव पर्णमस्या ङीप् । वासकलते अटा० ।

सिंहपुच्छिका स्त्री सिंहस्य पुच्छ इव पत्त्राण्यस्याः-कप्, अत इत्वम् । चित्रपर्णिकायां (चुइचाकुले) हलं रत्नमा०

सिंहपुच्छी स्त्री सिंहस्य पुच्छ इव पुष्पाणि पर्णानि वास्याः ङीप् । १चित्रपर्ण्यां २पृश्निपर्ण्यांच अमरः ३माषपर्ण्यांच रत्नमा० । [पर्ण्याम् राजनि० ।

सिंहपुष्पी स्त्री सिंहस्य पुच्छ इव पुष्पाण्यस्याः ङीष् । पृश्निपर्ण्याम् ।

सिंहमुखी स्त्री सिंहस्य मुखं मुखस्यदन्त इव पुष्पमस्याः ङीप् । वासके राजनि० ।

सिंहयाना स्त्री सिंहो यानं वाहनं यस्याः । दुर्गायाम् हेमच० सिंहवाहनादयोऽप्यत्र ।

सिंहल पु० सिंहोऽस्त्यत्र अच्। देशभेदे। तद्देशप्रभवत्वात् २रङ्गे धातौ हेमच०। ३रीतौ ४त्वचे च न० राजनि०। सिंहलदेशश्च कूर्मविभागशब्दे २१६८ पृ० दक्षिणस्यामुक्तः। [तायां राजनि०।

सिंहलस्था स्त्री सिंहले तिष्ठति स्था-क। सिंहल्यां ख

सिंहलास्थान पु० सिंहल आस्थानं यस्य। तालसदृशे वृक्षभेदे शब्दर०।

सिंहलील पु० रतिबन्धभेदे "लिङ्गोपरि स्थिता नारी भूमौ दत्त्वा पदद्वयम्। हृदये दत्तहस्ता चेत् सिंहलीलः प्रकीर्त्तितः"। लिङ्गोपरि स्थिता नारी कान्तोरुस्थपदद्वया। हृदये दत्तहस्ता चेत् सिंहलीलोऽयमावधि" रतिम०।

सिंहवाहिनी स्त्री सिंहरूपो वाहो विद्यतेऽस्या इनि। दुर्गायाम् "सिंहमारुह्य कल्यान्ते निहतो महिषो यतः। महिषघ्नी ततो देवी तथा वै सिंहवाहिनी" देवीपु० ४५ अ०।

सिंहविक्रान्त पुंस्त्री० सिंह इव विक्रान्तः। १शूरे हारा० स्त्रियां ङीष् २सिंहतुल्यविक्रमे त्रि०। [राजनि०।

सिंहविद्या स्त्री सिंह इव विद्या विद-क। मायायाम्

सिंहसंहनन त्रि० सिंहस्येव संहननमङ्गमस्य। १वराङ्गयुक्ते अमरः २सिंहतुल्यदृढाङ्गे च। "सिंहसंहननो युवा" रघुः।

सिंहा(ङ्घा)न न० सिंघि-आनच् पृषो०। १लौहमले अमरः। २नासिकामले (सिकनी) शब्दर०।

सिंहावलोक पु० न्यायभेदे न्यायशब्दे ३११६ पृ० दृश्यम्।

सिंहासन न० सिंहचिह्नितमासनम्। १राजासनभेदे तल्लक्षणं युक्तिकल्पतरौ दर्शितं यथा

"राज्ञो वरासनं नाम श्रीसिंहासनमुच्यते। शुभे मूहूर्त्ते शुभमासवर्षे शुक्रारवेलातिथिचन्द्रयोगे। काले निरुत्पातनिरीतिभावे सिंहासनावस्थविधिं वदन्ति। स्थिरराशिस्थिते भानौ चन्द्रे च स्थिरभोदिते। आसनारम्भनिच्छन्ति दृष्टारम्भोऽपि येषु च"। एतेन दृष्टारम्भसिंहासनयोरारम्भ एक एव कालः। तत्र क्रमः "वाणवेदाग्निपक्षाणि षोडशानि युगैः क्रमात्। चत्वारिंशत्तथा त्रिंशत् विंशतिः षोडशैव च। सिंहान्वितानि ज्ञेयानि चरणानि युगैः क्रमात्। पद्मः शङ्खो गजो हंसः सिंहो भद्रो मृगो हयः। अष्टौ सिंहासनानीति नीतिशास्त्रविदो विदुः। आदित्यादि दशानानां भूपतीनां यथाक्रमम्। राज्ञः सहस्रैरभिरायामपरिणाहयोः। राजपालमिदं नाम सोपानं पुरुषोन्नतम्। तदर्द्धानं तन्मध्ये राजासनमुदाहृतम्। अर्द्धोन्नतमिदं रम्यं प्रोक्तं कलिमहीभुजाम्। दिगष्टवर्त्तुलिकोणः स्यात् ब्रह्मादीनां यथाक्रमम्"। अथाष्टानां लक्षणानि "गजारोकाष्ठघटितः पद्मरागोपचित्रितः। पद्मरागविचित्राङ्गः शुद्धः काञ्चनसंवृतः। चरणाग्रे पद्मकोषात् पद्मरागविचित्रिताः। दिक्षष्टौ पुत्रिका राजदादशाङ्गुलिसम्मिताः। राजासनं चतस्रश्च एवं द्वादशपुत्रिकाः। रत्नैश्च नवभिः कार्य्यं निर्माणं चान्तरान्तरा। रक्तवस्त्रावृतं श्वेततूलपद्मसिंहासनं मतम्। अत्रोपित्वा नरपतिः प्रतापमति विन्दति। भद्रेन्द्रकाष्ठघटितः शङ्खमालोपशोभितः। शुद्धस्फटिकचित्राङ्गः शुद्धरूप्योपशोभितः। चरणाग्रे शङ्खनाभ्यः पुत्रिकाः सप्तविंशतिः। स्थाने स्थाने विधातव्याः शुद्धस्फटिकसंयुताः। शुक्लपट्टावृतं श्वेततूलशङ्खसिंहासनं२ मतम्। धनसेनोपघटितो गजमालोपशोभितः। विद्रुमैरपि वैदूर्यैः काञ्चनेनापि शोभितः। चरणाग्रे गजशिरःपुच्छादेकैकपुत्रिका। माणिक्यरचितारक्तवस्त्रादिकविभूषणम्। गजसिंहासनं३ नाम साम्राज्यफलदायकम्। शालकाष्ठेन घटितो हंसमालोपशोभितः। पुष्परागैः काञ्चनेन कुरुविन्दैश्च चित्रितः। चरणाग्रे हंसरूपाः पुत्रिकास्त्वेकविंशतिः। गोमेदकोपघटिताः पीतवस्त्रविभूषणम्। हंससिंहासनं४ नाम सर्वारिष्टविनाशनम्। चन्दनेनोपघटितः सिंहमालोपभूषितः। शुद्धहीरकचित्राङ्गः शुद्धकाञ्चननिर्मितः। चरणानां सिंहलेखाः पुत्रिकास्त्वेकविंशतिः। मुक्ताशुक्तिशिरन्ध्रैश्च निर्मलैरेव भूषणम्। शुद्धशुक्लावृतं श्वेततूलसिंहासनं५ मतम्। अत्रोपित्वा नरपतिः क्षत्त्रां साधयति क्षितिम्। भद्रमालोपशोभितं शुद्धचम्पककल्पितम्। शुद्धैर्मरकतैर्युक्तं पादाग्रे पद्मकोषिकाः। द्वाविंशतिः पुत्रिकास्तु नीलवस्त्रादिभूषणम्। भद्रसिंहासनं६ नाम शत्रुक्षयप्रदम्। निम्बकाष्ठेन घटितं मृगमालोपशोभितम्। शुद्धनीलैर्मणिनीलैः काञ्चनेनापि चित्रितम्। चरणाग्रे मृगशिरश्चत्वारिंशच्च पुत्रिकाः। नीलवस्त्रादिभूषणन्तु मृगसिंहासनं७ मतम्। लक्ष्मीविजयसम्पत्तिर्लक्ष्यपदसुत्तमम्। केशरेणोपघटितं हयमालोपशोभितम्। सप्तवस्त्रैर्भूषाद्याः पुत्रिकाः पञ्चषष्टिः। चरणाग्रे हयशिरश्चित्रवस्त्रादिभूषणम्। हयसिंहासनं८ नाम लक्ष्मी

विजयवर्द्धनम् । इत्येतत् कथितं सारं महासिंहासनाष्टकम् । यथा भोजेन कथितं यथा चान्यैश्च पण्डितैः । एतस्यातिक्रमं दम्भाद् यः कुर्यात् पृथिवीपतिः । अचिराद्देव कुरुते तस्य मृत्युरतिक्रमम् । पराजनस्यो यो राजा यो राजा च निरासनः । स परैर्हन्यते सिंहैरिव मत्तगजाधिपः" । चतुरङ्गक्रीडायां २जयभेदे चतुरङ्गशब्दे २८६१ पृ० दृश्यम् । ३योगासनभेदे च तल्लक्षणं यथा

"गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् । दक्षिणे सव्यगुल्फन्तु दक्षगुल्फन्तु सव्यके । हस्तौ च जान्वोः संस्थाप्य जानुनोः सम्प्रसार्य च । आत्मवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः । सिंहासनं भवेदेतत् पूजितं योगिभिः सदा । व्याधयस्य सन्त्रासं कुरुते नासमोत्तमम्" इति हठप्रदीपः । ४रतिबन्धभेदे पु० "स्वजङ्घादक्षबाहुं च कृत्वा योषाच्छदक्षके । स्तनौ धृत्वा रमेत् कामी बन्धः सिंहासनो मतः" । इति रतिमञ्जरी ५चक्रभेदे चक्रशब्दे २८१९ पृ० दृश्यम् ।

सिंहास्य पु० सिंहस्यास्यमास्यवदन इव मुखं यस्य । वासके अमरः ।

सिंहिका स्त्री० काश्यपपत्न्यां राक्षसमातरि । "अथ पुत्रौ व्यदितिषी तु सिंहिका राक्षसान्सुतनयावजीजनत् । पूर्वजो हरिनिलयकन्धरो दैवतैरवरजो निपातितः" वास्तुयागतः । [२वास्तुपुरुषे च ।

सिंहिकासुत पु० ६त० । १राहौ सिंहिकापुत्रादयोऽस्य ।

सिंही स्त्री सिनस्ति रोगान् सिंह-अच् पृषो० । वार्ताक्यां अमरः २कण्टकारिकायां ३वासके मेदि० ४दुरालभायां राजनि० ५राक्षसमातरि विश्वः ६मुखपत्रयोः सिंह+जातौ ङीष् । ७सिंहयोषिति ।

सिंहीलता स्त्री कर्म० । दुरालभायां भावप्र० ।

सिक क्षेपणे चौरा० पर० अक० सेट् । सेकति असिकीत् । पर्युदासात् न ओदयेदयः ।

सिकता स्त्री ब०व० । सिच-अतच् किच्च । बालुकायाम् मेदि० । सिकताः सन्त्यस्य अच् तस्य लुप् । २सिकतायुक्तदेशे स्त्री अमरः । [अमरः ।

सिकतामय त्रि० सिकता+मयट् । बालुकामये तटादौ

सिकतावत् त्रि० सिकताः सन्त्यस्य मतुप् मस्य वः । बालुकायुक्तदेशे अमरः । [भरतः ।

सिकतिल त्रि० सिकताः सन्त्यस्य इलच् । बालुकायुक्तदेशे

सिक्थ न० सिच-थक् । १मधूच्छिष्टे (मोम) २नीलाङ्गे हेमच० । स्वार्थे क । मत्तार्थे भक्तपुञ्जके आशे च पु० मेदि० मधूच्छिष्टे न० अमरः ।

सिक्य न० सिक-यत् । (सिके) रज्जुनिर्मिते पटार्धे ।

सिच् त्रि० सिच-क्विप् । १सेचनकर्त्तरि कर्मणि क्विप् । २यज्ञे हेमच० । [त्रिका० ।

सिचय पु० सिच-अयच् किच्च । १वस्त्रे हेमच० २जीर्णवस्त्रे

सिञ्चिता स्त्री सिच-इतच् पृषो० । पिप्पल्याम् शब्दच० ।

सित न० सो-क्त । १रौप्ये २कुष्ठके राजनि० ३चन्दने रत्नमा० ४शरे ५शुक्लवर्णे ६शुक्लवर्णे च पु० अमर० । ७तनोति दक्षमाम्र दक्षे १०ज्ञाते च त्रि०विश्वः । [उणा० ।

सितकण्ठ पुंस्त्री० सितः कण्ठोऽस्य । टाट्टूके खगे स्त्रियां

सितकर पु० सितः करः किरणो यस्य । १चन्द्रे २कर्पूरे च राजनि० सितमयूखादयोऽस्य । [राजनि० ।

सितकर्णी स्त्री सितः कर्ण इव पुष्पमस्याः ङीष् । वासके

सितकुञ्जर पु० सितः कुञ्जरोऽस्य । १चन्द्रे कर्म० २ऐरावतगजे

सितगुञ्जा स्त्री कर्म० । श्वेतगुञ्जायाम् राजनि० । [अमरः

सितच्छत्रा स्त्री सितं छत्रमिव पुष्पमस्याः । श्वेतपुष्पजातौ

सितच्छद पुंस्त्री० सितच्छदः पक्षो यस्य । १हंसे हेमच० स्त्रियां ङीष् । २श्वेतदूर्वायाम् स्त्री राजनि० टाप् ।

सितदर्भ पु० कर्म० । श्वेतकुशे राजनि० ।

सितदीप्य पु० दीप्यत्यस्मिन् दीप-क्विप्-कर्मणि यत् कर्म० । श्वेतजीरके राजनि० ।

सितदूर्वा स्त्री कर्म० । श्वेतदूर्वायाम् रत्नमा० ।

सितद्रु पु० कर्म० । १क्षीरटभेदे रत्नमा० २शुक्लवर्णवृक्षे च ।

सितधातु पु० कर्म० । १कठिन्याम् (खड़ी) राजनि० २श्वेतधातौ रौप्यादौ च ।

सितपक्ष पुंस्त्री० सितः पक्षोऽस्य । १हंसे शब्दर० स्त्रियां ङीष् । कर्म० । चन्द्रस्य हरिकारके यमदूतनिष्पादके २शुक्ले पक्षे । [हरे रत्नमा० ।

सितपर्णी स्त्री सितानि पर्णान्यस्याः ङीष् । अर्कपुष्पिकायाम्

सितपाटलिका स्त्री कर्म० । (श्वेतपाटला) वृक्षे राजनि०

सितपुङ्खा स्त्री सितः पुङ्खोऽस्याः । श्वेतशरपुङ्खवृक्षे राजनि०

सितपुष्प न० सितानि पुष्पाण्यस्य । १केवलीमुलके नटा० २तगरवृक्षे पु० शब्दर० ३काशे ४श्वेतरोहितकवृक्षे च पु० राजनि० ५श्वेतापराजितायां स्त्री ङीष् । ६मल्लिकायां स्त्री टाप् । कर्म० । ७श्वेते पुष्पे न० ।

सितपुनर्नव न० कर्म० । शुक्लपुनर्नवे राजनि० ।

सितमाष पु० नित्यक० । राजमाषे (बरबटी) हारा० ।
सितरञ्जन पु० सितमपि रञ्जयति रञ्ज-णिच्-ल्युट् । १पीतवर्णे हेमच० २तद्वति त्रि० ।
सितवर्षाभू स्त्री वर्षासु भवति भू-क्विप् कर्म० । श्वेतपुनर्नवायाम् राजनि० । [शरपुङ्खाख्ये राजनि० ।
सितशिखिक पु० सिता शिखिर्यस्य कप् । गोधूमे हेमच०
सितशूक पु० सितः शुभ्रः शूको यस्य । यवे भरतः ।
सितशूरण पु० कर्म० । वनशूरणे (वनओल) राजनि० ।
सितसर्षप पु० कर्म० । गौरसर्षपे राजनि० ।
सितसार(क) पु० सितः सारो निर्यासो यस्य वा कप् । शालिच्छायाके राजनि० ।
सितसिन्धु स्त्री नित्यक० । गङ्गायां शब्दर० ।
सिता स्त्री सो-क्त । १शर्करायाम् ।
"खण्डन्तु सिक्थताक्रान्तं सुश्वेतं शर्करा सिता । सिता सुमधुरा रूक्षा वातपित्तास्रदाहजित् । मूर्च्छाच्छर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी" राजव० । २मल्लिकायां शब्दर० ३श्वेतकण्टकारिकायां ४वाकुच्यां ५विदार्यां ६श्वेतदूर्वायां ७चन्द्रिकायां ८कट्वङ्गिन्यां ९हरीतक्यां १०पिङ्गायां ११त्रायमाणलतायां १२तेजन्यां राजनि १३श्वेतजातापराजितायां रत्नमा० ।
सिताखण्ड पु० सितायाः इव खण्डः । मधुजातशर्करायाम् "मधुजा शर्करा रूक्षा कफपित्तहरी गुरुः । छर्द्यतीसारहृद्दोषरक्तदुत् लघुरा स्निग्धा । यथा यथाऽस्या नैर्मल्यं मधुरत्वं तथा तथा । स्नेहाधिक्यशैत्यादि वरत्वं तथा तथा" भावप्र० ।
सिताग्र पु० सि(शि)तमग्रं यस्य । कपोते हारा० ।
सिताङ्ग पुस्त्री० सिता सिकता अङ्गो यस्य । वालुकागुडे (बेचिया) भवे० हारा० स्त्रियां ङीष् ।
सिताङ्ग पु० सितमङ्गं यस्य । श्वेतरोहिषे राजनि० ।
सिताद्रि पु० सितायाः आदिः कारणम् । गुडे राजनि० ।
सिताधाङ्ग पुंस्त्री० सितमधाङ्गं यस्य । मयूरे त्रिका० [ज्यत्व । स्त्रियां ङीष् ।
सिताब्ज न० कर्म० । श्वेतकमले राजनि० सिताम्भोजादयोऽप्यत्र ।
सिताभ पु० सिता आभा यस्य । १कर्पूरे रायमुकुटः २चन्द्रे च ३तके स्त्री राजनि० ।
सिताभ्र पु० अभ्र इव सितः शुभ्रः राज० । कर्पूरे अमरः ।
सिताभ्रक न० अभ्रकमिव सितम् राज० । कर्पूरे राजनि० ।
सिताम्बर पु० सितमम्बरं यस्य । १श्वेतवस्त्रधारिणि व्रतिनि हला० २श्वेतवस्त्रधारिमात्रे त्रि० ।
सितार्जक पु० नित्यकर्म० । श्वेतवनस्थाम् राजनि० ।
सितालक पु० आलयति भूष्यते अल-णिच्-ण्वुल् नित्यकर्म० । श्वेतमन्दारे राजनि० । [श्वेतदूर्वायाम् रत्नमा०
सितालता स्त्री सिता सती चासौ लता आ+लत-अच् ।
सितालिकटभी स्त्री सितेन शुभ्रवर्णेन कलति अल-इनि कर्म० । श्वेतकिणिहीहट्टे राजनि० ।
सितावर पु० सितं श्वेततामावृणोति वा+वृ-अच् (सहुनि) १शाकभेदे २वाकुच्यां स्त्री राजनि० ङीष् । "चाङ्गेरीसदृशः पत्रैश्चतुर्दल इतीरितः । शाको लक्ष्मीवते देये भक्तमक्षीति सोच्यते" भावप्र० । [२मङ्गल्यलतयोः स्त्री हि०व०
सितासित पु० वर्णेन सितः कृष्णेनासितः । १बलदेवे राजनि०
सिताह्वय पु० सितमाह्वयते आ+ह्वे-अच् । १श्वेतशिग्रौ २श्वेतरोहितके च राजनि० । [त्रि० रायमु०
सिति पु० सो-क्तिच् । १शुक्लवर्णे २कृष्णवर्णे च । २तद्वति
सितिमन् पु० सितस्य भावः इमनिच् । शुभतायाम् । "सितं सितिम्ना सुतरां सनेवपुः" माघः ।
सितिवार पु० सितिं श्वेततां वृणोति वृ-अच् । सुनिषण्णके (सहुनि) शाके भावप्र० ।
सितिवासस् पु० सितिं कृष्णं वासोऽस्य । बलदेवे ।
सितेतर पु० सिताद्भिन्नः । १ग्रामशाल्यौ २कृष्णत्वे च ३शुभेतरवर्णे ४तद्वति त्रि० । [वृक्षो हला० ।
सितेतरगति पु० सितेतरा कृष्णा गतिरस्य । कृष्णवर्त्मनि
सितोदर पु० सितसुदरमस्य । कुबेरे हेमच० ।
सितोपल पु० कर्म० । १स्फटिके राजनि० कठिन्यां न० त्रिका० । २शर्करायां स्त्री हेमच० ।
सिद्ध न० सिध-क्त । १सैन्धवलवणे राजनि० अकृत्रिमत्वात्कृत्यात्वम् २निष्पन्ने ३पक्के ४नित्ये च त्रि० शब्दर० । सिद्धिरस्यास्य अच् । ५व्यासादौ मुनौ ६देवयोनिभेदे च पु० अमरः तल्लोकश्च चन्द्रलोकादधःस्थो व्यासस्थितः यथाह स्म० शि० "मन्दाकारज्यभूपुत्रशुक्रेन्दुजेन्द्रवः । परिभ्रमन्त्यधोऽधःस्थाः सिद्धविद्याधरा घनाः" ७निश्चिते त्रि० दविष्कृतादिषु मध्ये द्वाविंशयोगे ज्यो० ८गुडे १०कृष्णधुस्तूरे पु० राजनि० । ११पक्के त्रि० हेमच० १२व्यापारे पु० शब्दर० ज्योतिषोक्ते १३योगिनीदशासध्ये सप्तम्यां दशायां स्त्री । दशाशब्दे २५०५ पृ० दृश्यम् । तन्त्रोक्ते अकथहचक्रस्थे साधक-

नामाद्याक्षरयुक्तकोष्ठस्थाद्याक्षरयुक्ते १४मन्त्रभेदे पु० अकथहशब्दे २८५० दृश्यम् । १५यजादिसाध्ये क्रियाभेदे स्त्री १६सिद्धियुते मन्त्रे पु० "मन्त्रसिद्धेरुपायश्च गौतमीये "पुनः सोऽनुष्ठितो मन्त्रो यदि सिद्धो न जायते । उपायास्तत्र कर्त्तव्याः षण्ण शङ्करभाषिताः । भ्रामणं रोधनं वश्यं पीड़नं पोषशोषणम् । दहनान्तं क्रमात् कुर्य्यात् ततः सिद्धो भवेन्मनुः । भ्रामणं वायुबीजेन यथानुक्रमयोगतः । तन्मन्त्रं यन्त्र आलिख्य सिन्दूरकर्पूरकुङ्कुमैः । क्षीरचन्दनाभ्यान्तु मन्त्रं संपथितं लिखेत् । क्षीराज्यमधुतोयानां मध्ये तल्लिखितं भवेत् । पूजनाज्जपनाद्धोमात् भ्रामितः सिद्धिदो भवेत् । भ्रामितो यदि नो सिद्धो रोधनं तस्य कारयेत् । सारस्वतेन बीजेन संपुटीकृत्य संजपेत् । एवं कृते भवेत् सिद्धो न चेदेतद्यीकुरु । अलक्तचन्दनं कुष्ठं हरिद्रामाहनं पिबा । एतैस्तु मन्त्रमालिख्य भूर्जपत्रे शुभोभने । धार्य्यं कण्ठे भवेत् सिद्धः पीड़नं वाक्यकारयेत् । अधरोत्तरयोगेन पदानि परिजप्य वै । ध्यायेच्च देवतां तद्वत् अधरोत्तररूपिणीम् । विद्यामादित्यदुग्धेन लिखित्वाक्ष्य चाक्षुषा । तथाभूतेन मन्त्रेण होमः कार्य्यो दिने दिने । पीड़तो बल्वयाविष्टः सिद्धः स्यादथ पोषयेत् । बालाया स्वतयं बीजमाद्यन्ते तस्य योजयेत् । गोक्षीरमधुनालिख्य विद्यां पाणौ विभावयेत् । पोषितोऽयं भवेत् सिद्धो न चेत् कुर्वीतशोधयम् । द्वाभ्यान्तु वायुबीजाभ्यां मन्त्रं कुर्य्याद्विदर्भितम् । यथा विद्या गले धार्य्या लिखित्वा वरकञ्चना । शोषितोऽपि न सिद्धः स्यात् दहनीयोऽग्निबीजतः । आग्नेयेन तु बीजेन मन्त्रस्यैकैकमक्षरम् । आद्यन्तमथ मध्यञ्च योजयेद्दाहकर्मणि । मन्त्रोद्धारस्य तेनैव मन्त्रमालिख्य धारयेत् । कण्ठदेशे ततो मन्त्रः सिद्धः स्याच्छङ्करोदितम् । इत्येतदुक्तं यत्नेन केवलं तव भक्तितः । एकेनैव कृतार्थः स्याद् बहुभिः किमु सम्प्रते !" तन्त्रसारः । [च राजनि०]

सिद्धक पु० सिद्ध इव इवार्थे कन् । १सिन्दुवारे २शालपर्णे

सिद्धगङ्गा स्त्री सिद्धानामाकाशस्था गङ्गा यत्र० । मन्दाकिन्याम् ३जटा० । [अत्र सिद्धनदादयोऽध्येय ।

सिद्धजल न० सिद्धं पक्वं जलमत्र । १काञ्जिके कर्म० । २पक्वे

सिद्धदेव पु० सिद्धानां पूज्यः देवः । महादेवे शब्दर० ।

सिद्धधातु पु० सिद्धः प्रसिद्धो धातुः । पारदे त्रिका० ।

सिद्धपीठ पुंन० कर्म० । "जातो यत्रावनिर्यत्र होमो वा कोटिसङ्ख्यकः । महाविद्याजपाः कोट्यः सिद्धपीठः प्रकीर्त्तितः" इति तन्त्रोक्ते १स्थानभेदे पीठशब्दे ४३४२ पृ० दर्शिते २स्थानभेदे च ।

सिद्धपुर न० कर्म० । "लङ्का कुमध्ये यमकोटिरस्याः प्राक्, पश्चिमे रोमकपत्तनञ्च । अधोगतं सिद्धपुरञ्च सिंगिचक्रे भूगोलस्थेषु भूवृत्तपादान्तरितदेशस्थेषु चतुर्षु देवनिर्मितेषु पुरेषु मध्ये लङ्काधोभागस्थे पुरभेदे ।

सिद्धपुष्प पु० सिद्धप्रियं पुष्पं यस्य । करवीरवृक्षे राजनि० ।

सिद्धप्रयोजन पु० सिद्धं प्रयोजनं यस्मात् ५ब० । सौरसर्षपे राजनि० । २सिद्धार्थशाके न० ।

सिद्धमोदक पु० तवराजोक्तवल्लखण्डे राजनि० ।

सिद्धरस पु० सिद्धः प्रसिद्धो रसः । १पारदे अमरः सिद्धो रसोऽत्र । २धातुमात्रे त्रि० मेदि० ।

सिद्धविद्या स्त्री सिद्धा स्वतःसिद्धा विद्या मन्त्रो यस्याः । "काली तारा महाविद्या षोड़शी भुवनेश्वरी । भैरवी छिन्नमस्ता च विद्या धूमावती तथा । वगला सिद्धविद्या च मातङ्गी कमलात्मिका । एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः" इति तन्त्रोक्तासु दशसु कालीप्रभृतिषु देवीषु ।

सिद्धसाधन न० सिद्धस्य निश्चितस्य साधनमनुमानम् । १न्यायोक्ते सिषाधयिषाविरहकाले साध्यत्वेन निश्चितस्य पुनरनुमानरूपे दोषे । सिद्धं साधयति ल्युट् । २श्वेतसर्षपे पु० राजनि० । सिषाधयिषाविरहे तु सिद्धस्यापि अनुमानं भवत्येव, "प्रत्यक्षपरिकल्पितमर्थमनुमानेन बुभुत्सते तर्करसिका" इति वाचस्पत्युक्तेः । तदभावे तु नाप्रवृत्तिः "न हि करिणि दृष्टे चित्रकारेण तमतुलिखितेऽनुमानारः" इति तस्यैव वचनान्तरात् । सिद्धेश्च यथाऽनुमितिविरोधित्वम् तथा सिद्धिशब्दे वक्ष्यते । संशयपक्षतावादिमते निश्चयेन संशयस्य प्रतिरोधात् पक्षताऽसम्भवेन नानुमितिरिति बाध्यम् । सिद्धसाधनञ्च पक्षताविघटकत्वेनाभ्युपगम्यमानं भवतीति निष्कर्षस्तत्रान्तरालिखितः ।

सिद्धसाध्य पु० अकथहशब्दोक्ते साधकनामाद्याक्षरयुक्तकोष्ठस्थितीयाद्याक्षरयुक्ते मन्त्रोक्ते मन्त्रभेदे अकथहशब्दे दृश्यम् ।

सिद्धसिद्ध पु० तन्त्रोक्ते अकथहशब्दोक्ते साधकनामाद्याक्षरयुक्तकोष्ठस्थिताद्याक्षरयुक्ते मन्त्रभेदे अकथहशब्दे दृश्यम्

सिद्धसिन्धु स्त्री ६त० । गङ्गायाम् त्रिका० सिद्धनद्यादयोऽध्येय

सिद्धसुसिद्ध पु० तन्त्रोक्ते अन्धभेदे अकथङ्कारग्रन्थे दृश्यम्।

सिद्धान्त पु० सिद्धः सिद्धितोऽन्तो यस्मात्। प्रमाणादुपन्यासेन पूर्वपक्षनिरासके सिद्धपक्षस्य स्थापनरूपे १वाक्यशेषे २ज्योतिःशास्त्रभेदे च स च सर्वसिद्धान्तः सोमसिद्धान्तादिः "तन्त्र्यादिप्रत्ययान्तकालकथनानामप्रभेदः क्रमाच्चारस्य युगादां द्विधा च गणितं प्रसाधनं चोत्तरा:। भूधिष्ण्यसंस्थितेश्च कथनं यन्त्रादि यदुच्यते सिद्धान्तः स चतुर्धाकृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः" सि० शि०। गौ० स्तुतौ क्तसिद्धान्तलक्षणभेदो यथा "तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः" सू०। "सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्" सू०। "सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः" सू०। "समानतन्त्रसिद्धः परतन्त्राविरुद्धः प्रतितन्त्रसिद्धान्तः" सू०। "यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः" सू०। "अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः" सू०।

"तन्त्रं शास्त्रं तदेवाधिकरणं ज्ञापकतया यस्य, तादृशस्य योऽभ्युपगमस्तस्य समीचीनतयाऽसंशयरूपतया स्थितिस्तथाच शास्त्रितार्थनिश्चयः सिद्धान्तः अत्र चाभ्युपगम्यमानोऽर्थः सिद्धान्त इति भाष्यम् "अभ्युपगमः सिद्धान्त इति वार्त्तिकटीका" न चात्र विरोधः शङ्कनीयः आचार्यैः परिष्कृतत्वात् तथाच विस्तरो निबन्धः अर्थाभ्युपगमयोर्ज्ञापकज्ञानभावस्य विवक्षातन्त्रत्वादर्थाभ्युपगमोऽभ्युपगम्यमानो वार्थः सिद्धान्तलक्षेन भाष्यवार्त्तिकटीकासु न विरोधः। अत्र च भाष्यानुसारात् सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसिद्धान्तान्यतमः सिद्धान्त इति स्तुत्यर्थ इति तु न युक्तं व्यभिमतत्वानुत्थानापत्तेः तन्त्रसिद्धान्तत्वेन द्वयमनुगमश्च तन्त्राधिकरणाभ्युपगमान्यतमः सिद्धान्त इति कश्चित्। विभजते। स चतुर्विध इति शेषः सर्वतन्त्रादिसंस्थितीनामर्थान्तरभावात् भेदादित्यर्थः। सर्वतन्त्रसिद्धान्तं लक्षयति। सर्वतन्त्राविरुद्धः सर्वशास्त्राभ्युपगत इति बहवः। वस्तुतो यथाश्रुत एवार्थः अन्यथा तन्त्रेऽधिकृत इत्यस्य वैयर्थ्यापत्तेरतएव च जात्यादेरसदुत्तरत्वमपि सर्वतन्त्रसिद्धान्तः न च तन्त्रेऽधिकृत इति स्मृत्यर्थं लक्षणे तु न देयमेवेति वाच्यं मनस इन्द्रियत्वस्यापि सर्वतन्त्रसिद्धान्ततापत्तेः लक्ष्यास्तु स्तुत्यर्थोपलक्षणमात्रत्वादादिप्रतिषादाभ्युपगतः कथानुकूलोऽर्थः स इति वदन्ति। प्रतितन्त्रसिद्धान्तं लक्षयति। समानशब्द एकार्थकल्पनैकतन्त्रसिद्ध इत्यर्थः स्वतन्त्र सिद्ध इति पर्यवसितोऽर्थः तथाच वादिप्रतिवाद्येकतरमात्राभ्युपगतस्यैकतरस्य प्रतितन्त्रसिद्धान्त इति फलितार्थः यथा मीमांसकानां शब्दनित्यत्वम्। अधिकरणसिद्धान्तं लक्षयति "यस्मिन्नर्थे सिद्धे ज्ञायमानायामेवान्यस्य प्रकरणस्य प्रस्तुतस्य सिद्धिर्भवति सोऽधिकरणसिद्धान्त इत्यर्थः यथा तदु द्व्यणुकादिकपालोत्पादनगोचरापरोक्षज्ञानचिकीर्षोत्पत्तिमज्ज्ञन्यत्वे साध्यमाने सर्वज्ञत्वसौलभ्यस्य, एवं हेतुबलादपि यथा दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिन्द्रियाद्यतिरिक्त आत्मनि साधिते इन्द्रियनानात्वं तथा च यदर्थसिद्धिं विना योऽर्थः शब्दादनुमानाद्वा न सिध्यति सोऽधिकरणसिद्धान्त इति। वस्तुतस्तु शाब्दत्वमनुमानत्वं चाविवक्षितं प्रमाणसामान्यभेक्षितम् अतएव प्रत्यक्षेण स्थूलत्वसाधनानन्तरसूक्ष्मात्मतत्त्वविवेके "योऽयमधिकरणसिद्धान्तन्यायेन स्थूलत्वसिद्धौ अणवश्चलभङ्ग इति" तत्र च वाक्यार्थसिद्धौ तदनुषङ्गी योयः सोऽधिकरणसिद्धान्त इति वार्त्तिककक्षिकां विस्तरेण केनापि प्रमाणेन वाक्यार्थसिद्धौ जन्यमानायां योऽन्यार्थः सिध्यति स तथेत्यर्थः इति व्याख्यातं टीकाधिस्तारा। एवं हेतुरीदृशः पक्षस्य वाक्यार्थ इति टीकावचने च उपलक्षणमेतदित्युक्तं तत्र तत्र विधिरत्रैव लक्षणं कार्यम्। यत्तु जनकीभूतव्यापकतापाने व्यापककोटावेव विषयः पक्षतानुमित्या व्यापककोटौ विषयीकृतः शब्दजनकपदार्थज्ञानविषयत्वे सति शाब्दविषयत्वे सति द्वयमधिकरणसिद्धान्त इति तन्न इन्द्रियनानात्वादौ भाष्यादुदाहृतेऽव्याप्तेरिति। अभ्युपगमसिद्धान्तं लक्षयति। अपरीक्षितस्य शास्त्रादस्तितस्य विशेषपरीक्षणं विशेषधर्मकथनम्। अभ्युपगमादिति ज्ञापकत्वे पञ्चमी अभ्युपगमस्य ज्ञापकमित्यर्थः विशेषपरीक्षाज्ज्ञायते स्थूलत्वादेरभ्युपगतमिदमिति तथाच शास्त्रादस्तितस्याभ्युपगमोऽभ्युपगमसिद्धान्तः यथा मनस इन्द्रियत्वमिति दर्शितः। तथाच सिद्धान्तः संस्थितिः सिद्धान्तः संस्थितिश्च इत्यवधारणयया। तत्र तन्त्रसंस्थितिस्तन्त्रार्थसंस्थितिः। अधिकरणसंस्थितिरधिकरणानुपक्षाणसंस्थितिः। अभ्युपगमसंस्थितिरनवधारितार्थपरित्यागे तद्विशेषपरीक्षणायाभ्युपगमसिद्धान्तः वात्स्या० भाष्ये दृश्यम्। प्रामाण्यकित्वेनाभ्युपगतोऽर्थः सिद्धान्त इत्यर्थे। मीमांसकोक्ते पञ्चावयवयुक्ताधिकरणरूपे ईश्वरेऽङ्गे अधिकरणशब्दे १२६ पृ० दृश्यम्।

सिद्धान्ताचार पु० "आत्मानं देवतां मत्वा यजेद्देवञ्च मानवैः। सदा शुद्धः सदा शान्तः सिद्धान्ताचार उच्यते" तन्त्रोक्ते आचारभेदे।

सिद्धारि पु० तन्त्रोक्ते साधकनामाद्याक्षरयुक्तकोऽवधिचतुर्थकोष्ठस्याद्याक्षरयुक्ते मन्त्रभेदे अकथहचक्रे १८पृ०दृश्यम्।

सिद्धार्थ(क) पु० सिद्धः अर्थो यस्मात् ५ब० वा कप्। १श्वेतसर्षपे अमरः। २वटीवृक्षे च राजनि०। ६ब०। ३प्रसिद्धार्थे त्रि०। "सिद्धार्थं सिद्धसम्बन्धम्" इति प्राचः। ४शाक्यसिंहे पु० मेदि० ५जिनभेदमातरि स्त्री हेमच०।

सिद्धि स्त्री सिध-क्तिन्। १ऋद्धिनामौषधे अमरः। २योगभेदे ३व्यवहारे ४निष्पत्तौ ५पाके ६पादुकायाम् ७दक्षौ मेदि० ८मोक्षे हेमच० ९सम्पत्तौ धरणिः १०अणिमाद्यष्टविधैश्वर्ये ११बुद्धौ शब्दच० १२साध्यवस्तुया निश्चये च।

१३सांख्योक्ते ऊहादिके सिद्धिहेतुभेदे

"ऊहादिभिः सिद्धिः" सां०सू०। "ऊहादिभेदैः सिद्धिरष्टधा भवतीत्यर्थः। इदमपि सूत्रं कारिकया व्याख्यातम्। "ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः। दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः" इति। "अस्या अयमर्थः। त्रयाध्यात्मिकादिदुःखत्रयप्रतियोगिकत्वात् त्रयो दुःखविघातास्तुल्यसिद्धयः। इतरास्तु तत्साधनत्वाद्गौणाः सिद्धयः। तत्रोहो यथा उपदेशादिकं विनैव प्राग्भवीयाभ्यासवशात् तत्त्वस्य स्वयमूहनमिति। शब्दस्तु यथा शब्दादीयपाठमाकर्ण्य स्वयं वा शास्त्रमाकलय्य यज्ज्ञानं जायते तदिति। अध्ययनं यथा शिष्याचार्यभावेन शास्त्राध्ययनाज्ज्ञानमिति। सुहृत्प्राप्तिर्यथा। स्वयमुपदेशार्थं सुहृदागतात् परमकारुणिकाज्ज्ञानलाभ इति। दानं यथा धनादिदानेन परितोषिताज्ज्ञानलाभ इति। एषु च पूर्वस्त्रिविध ऊहशब्दाध्ययनरूपो मुख्यसिद्धेरङ्कुश इव चालकः। सुहृत्प्राप्तिदानयोरूहादित्रयापेक्षया मन्दसाधनत्वप्रतिपादनायेदमुक्तम्। कस्मिंश्चेतासामष्टसिद्धीनामङ्कुशो निवारकः पूर्वस्त्रिविधो विपर्ययाशक्तितुष्टिरूपो भवति बन्धकत्वादिति व्याचष्टे तत्र। तत्र आवश्यकतया बाधिर्यादिवत् सिद्धिविरोधितालाभेन तयोस्त्रयाणां सिद्धिविरोधित्वासम्भवात्। ननूहादिभिरेव कथं सिद्धिरुच्यते मन्त्रतपःसमाध्यादिभिरप्यणिमाद्यष्टसिद्धेः। सर्वशास्त्रसिद्धत्वादिति तत्राहुः"भा०। "नेतरादितरहानेन विना"सू०। "इतराद्दुःखमादिपञ्चकमभिप्रेत्य। तप आदेस्तात्त्विकी न सिद्धिः कुत इतरहानेन विना यतः सा सिद्धिरितरस्य विपर्ययस्य हानं विनैव भवत्यतः संसारापरिपन्थित्वात् सा सिद्धाभास एव न तु तात्त्विकी सिद्धिरित्यर्थः। तथा चोक्तं योगसूत्रेषु। "ते समाधावुपसर्गाव्युत्थाने सिद्धयः" इति प्र०भाष्यम्।

पात० सू० भाष्यप्रयोश्च एकत्र विषयविशेषे धारणाध्यानसमाधित्रयरूपसंयमविशेषात् कतिचित् सिद्धयो दर्शिताः यथा "परिणामत्रयसंयमादतीतानागतज्ञानम्" सू०। "धर्मलक्षणावस्थापरिणामेषु संयमात् योगिनां भवत्यतीतानागतज्ञानं धारणाध्यानसमाधित्रयमेकत्र संयम उक्तस्तेन परिणामत्रयं साक्षात्क्रियमाणमतीतानागतज्ञानं सम्पादयति" भा०। "शब्दार्थप्रत्ययानामितरेतराध्यासात् सङ्करस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम्" सू०। "संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्" सू०। "प्रत्ययस्य परचित्तज्ञानम्" सू०। "कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंप्रयोगेऽन्तर्धानम्" सू०। "सोपक्रमं निरुपक्रमञ्च कर्म ततसंयमादपरान्तज्ञानमरिष्टेभ्यो वा" सू०। "मैत्र्यादिषु बलानि" सू०। "बलेषु हस्तिबलादीनि" सू०। "प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्" सू०। "भुवनज्ञानं सूर्ये संयमात्" सू०। "चन्द्रे ताराव्यूहज्ञानम्" सू०। "ध्रुवे तद्गतिज्ञानम्" सू०। "नाभिचक्रे कायव्यूहज्ञानम्" सू०। "कण्ठकूपे क्षुत्पिपासानिवृत्तिः" सू०। "कूर्मनाड्यां स्थैर्यम्" सू०। "मूर्ध्नि ज्योतिषि सिद्धदर्शनम्" सू०। "प्रातिभाद्वा सर्वम्" सू०। "हृदये चित्तसंवित्" सू०। "सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषोभोगः परार्थत्वात् स्वार्थसंयमात् पुरुषज्ञानम्" सू०। "ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते" सू०। "ते समाधावुपसर्गाव्युत्थाने सिद्धयः" सू०। "बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः" सू०। "उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च" सू०। "समानजयाज्ज्वलनम्" सू०। "श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम्" सू०। "कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम्" सू०। "बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः" सू०। "स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः" सू०। "ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्मानभिघातश्च" सू०। "रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत्" सू०। "ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः" सू०। "ततो मनोजवित्वं विकरणभावः प्रधानजयश्च" सू०। "सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वञ्च" सू०। "तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्" सू०। "स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्" सू०। "क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम्" सू०। "जातिलक्षणदेशैरन्यतानवच्छेदात् तुल्ययोस्ततः प्रतिपत्तिः" सू०। "तारकं सर्वविषयं सर्वथाविषयमक्रमञ्चेति विवेकजं ज्ञानम्" सू०। "सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम्" सू०। "पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति" सू०।

ज्ञार्थवस्तुसंबन्धाद्विच्छिन्नवस्तुः" कू०। "ततो मनोजवित्वं विकरणभावः प्रधानजयश्च" कू०।

"परिव्राजकस्य सप्तमादतीतानागतज्ञानम्" इत्यादिकैः "ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते" इत्यन्तसूत्रैरुक्तानां सिद्धीनां समाधावुपसर्गत्वं व्युत्थाने सिद्धित्वमाह "ते समाधावुपसर्गा व्युत्थाने सिद्धयः" सां०। ते प्रातिभाद्यः समाहितचित्तस्योत्पद्यमानाः उपसर्गाः लक्ष्यदर्शनमनोजवत्वात्। व्युत्थितचित्तस्योत्पद्यमानाः सिद्धयः" भा०। एवमग्रे वक्ष्यमाणाः ततोऽणिमादिप्रादुर्भावः रजास्तमोऽपि सिद्धयो व्युत्थानदशायामेव समाधौ तूपसर्गा एव हेतोरविशेषात्। एवमन्या अपि सिद्धयः कैवल्यपादे दर्शिता यथा "जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः" सू०। "ईप्सान्तरिता जन्मना सिद्धिः ओषधिमिरन्तरभवने रसायनेनेत्येवमादि। जन्मेश्वराणामनभिभाविनादिनाभः तपसा सङ्कल्पसिद्धिः कामरूपो यत्र तत्र कामग दृश्येत्यादि समाधिजाः सिद्धयोः व्याख्याताः" भा०। तासां तु समाध्यपरिपन्थित्वेतरत्वं तथा परस्परतश्च स्वयमूह्यम्।

तन्त्रोक्तमन्त्रसिद्धिस्वरूपं च तन्त्रसा० उक्तं यथा "मनोरथानामलक्ष्यः सिद्धिरुत्तमलक्षणा। मन्त्रोऽयं फलदं तत्तद् देवताहर्शनं तथा। प्रणवेनाङ्गमेतेषां सिद्धिः सिद्धेषु सर्वथा परम्। परमाक्षरमन्त्रेण प्रणवेनेति तथा। ऊर्ध्वोत्क्रमण एवं हि चराचरपरं गतिः। खेचरीमेलनं चैव तत्कथाश्रवणादिकम्। भूमिष्ठानि प्रपश्येत् तद्दूरस्थमलक्षणम्। ख्यातिर्वाक्चतुर्भूतादिलाभः सुचिरजीवनम्। भूतानां तद्गुणानाञ्च वशीकरणमुत्तमम्। सर्वत्र सर्वलोकेषु चमत्कारकरी सुधीः। रोगोपहरणं दृष्ट्वा विषापहरणं तथा। पाण्डित्यं लभते मन्त्री चतुर्विधमसंशयः। कैराग्यञ्च समुत्पन्नं त्यागिता सर्वसङ्गताम्। अष्टाङ्गयोगाभ्यासं भोगेच्छापरिवर्जनम्। सर्वभूतेष्वनुकम्पा चार्षप्रज्ञादिगुणोदयः। इत्यादि गुणसम्पत्तिर्मध्यसिद्धेषु लक्षणम्। अहंमम्यं धनित्वं च पुत्रदारादिसम्पदः। अधमाः सिद्धयः प्रोक्ता मन्त्रज्ञानादधोगमाः। सिद्धलक्षणमेतद्यः ज्ञात्वा न सिद्धो भवेत् स मूढः।

ज्ञानसाधनानिच्छत्वरूपसिद्धिस्तु अवस्थात्रयानुवर्तिनीच्छाया ज्ञानिनोऽज्ञानादिनाश अनुवर्तेः पुरुष प्रतिबन्धिका। अनुवर्तनमूला च तत्तत्सिद्धिका। "विनाधिषिद्धा मूर्खा सिद्धिर्वत्र न विद्यते। स पशुस्तत्र हस्तित्वज्ञानादनुवर्तिभेत्" भाषा०। सिद्धिश्च पशुतावच्छेदकसामान्याभावाश्रिनी पशुतावच्छेदकावच्छिन्नस्वरूपसिद्धिर्भावाश्रिनी च तत्तावच्छेदकावच्छेदेनानुवर्तिं प्रति अवच्छेदावच्छेदेन सिद्धिर्विरोधिनी न सामानाधिकरण्येन सिद्धिः। समानाधिकरण्येनानुवर्तिं प्रति तु सिद्धित्वं विरोधीति विवेकः। संशयपशुतावादिमते पशुतावच्छेदकत्वेन सिद्धेर्विरोधितेति विशेषः। १४दण्डकन्यासभेदे वसिष्ठपु०। [लि०।

सिद्धिद पं० सिद्धिं ददाति दा-क। वटुकभैरवे। २सिद्धिदातरि

सिद्धियोग पु० "शुक्ले नन्दा बुधे भद्रा यदौ रिक्ता कुजे जया। शनौ पूर्णा च संयुक्ता सिद्धियोगः प्रकीर्तितः। ज्योतिषोक्ते शुक्रादिवारयुक्तनन्दादितिथौ।

सिद्धिस्थान नव तीर्थभेदे। "अतःपरं प्रवक्ष्यामि सिद्धिस्थानानि यानि तु। यत्रिसन्नाराधिता देवी क्षिप्रं भवति सिद्धिदा। हङ्कारं यत्र हङ्कस्य सिद्धं पर्वत तथा विन्ध्या गङ्गा सरिद्वरा यत्र रेवातीरमथापि वा। पद्माक्षी क्षुराख्या तु अथ वा मल्लकेश्वरे। शङ्करेश्वरनामेऽथवा क्षमरेश्वरे। वेत्रवत्यास्तटे रम्ये हरिश्चन्द्रे तथा पुरे। सरस्वतीतटे पुण्ये सुगन्धायतनेऽपि वा। स्थानेष्वेषु प्रयं कुर्यात् नन्दाङ्के जितमानसः। भैरवं मुखभेदञ्च चण्डीं लिङ्गरान्तकम्। षट्चक्रं चक्रोच्चासं कपालाट्टासनामकम्। अजाविकं क्षुराख्यं स्थानान्येतानि वर्जयेत्" देवीपु०।

सिद्धेश्वरी स्त्री० देवीविशेषे। "सिद्धां सिद्धेश्वरीं सिद्ध विद्याधरार्चितान्। मन्त्रसिद्धिप्रदां योनिसिद्धिदां सिद्धयोगिनाम्" सङ्केतमालाव० ११ पटले। "लक्षण बलभद्रेण गोपैः कंसबलिघांसुभिः। सङ्केतकं कृतं तत्र मन्त्रनिर्णयकारकम्। तदा सङ्केतकैः सार्द्धं च सिद्धा देवी प्रतिष्ठिता। सिद्धिप्रदा भोगदा च तेन सिद्धेश्वरी स्मृता। सङ्केतकेश्वरीत्येव ह्यतो सिद्धिमवाप्नुयात्" इति वाराहे पु०।

सिद्धौघ पु०ह्रस्वं०। तारादेव्याः पूजान्ते पूज्ये गणभेदे "सिद्धौघाः सिद्धिदा यत्र। सिद्धौघांस्तु पृथक् यजेत्। यत्रिसः सुमनाश्च सोमनाथो महेश्वरः। कुरिनाथो, मानवोचारू पृथक् पूज्याश्चि तद्गुरुन" तन्त्रसा०।

सिध न० षिध-भावे किप्। सिद्धावरोधे हेमच०।

सिधन् न० षिध-भावे किप्। १सिद्धावरोधे अमरः। २०५५ पृ० सिद्धान्तलक्षणादि दृश्यम्।

सिध्मल त्रि० सिध्मन्+मत्वर्थे मच्। १सिध्मरोगवति अमरः। २मीनविकारे स्त्री हेमच०। [पृषो०नस्य लः अमरः

सिध्य पु० कार्ष्ण बाधूयति सिध-सिच्-कर्त्तरि यत् नि०।

सिध्र पु० सिध-रक्। १खाधौ २वृक्षे च अमा०।

सिध्रक पु० सेधति रोगान् सिध-रक् आर्दे क। वृक्षभेदे "वनांगर्यो:" पा० इत्यादिसूत्रेण सिध्रशब्दस्य पाणिनिना टीषत्व विधानात् पुंस्त्वमेवास्य वृक्षस्य अमरोक्तं स्त्रीत्वन्त्वयाश्चिन्त्यम्। [सिध्मा०।

सिध्रकावण न० सिध्रकप्रधानं वनं षत्वम् दीर्घत्व। देवोद्याने

सिन पु० सीयते बध्यते सि-क्त यादे नस्य नः। १यादे नस्य बहुत्वात्सत्वात्वम्। [ज्ञाद्धि०

सिनी स्त्री सिन+ङीप् तस्य नत्व। शुक्लवर्णयुतरात्रियाम्

सिनीवाली स्त्री सिनी श्वेता चन्द्रकला वलति धारयति वल-अच् ङीप्। १चतुर्दशीयुक्तायाममावास्यायाम् अमरः। कृष्णपक्षे २१६२ पृ०दण्डम्। २दुर्गायां मेदि०।

सिन्दुरिन्धु क पु० स्यन्दते स्यन्द-ड संप्रसारणञ्च दुर्धो० दस्य वा धः स्वार्थे वा क। सिन्धुवारवृक्षे अमरः (सिन्धु)अध्यक्षत्वार्थे शब्दर०।

सिन्दु(न्धु)वार पु० सिन्धुं गजमदं वारयति निवृत्तयति वृ-अच्। १(निर्गुण्डी) वृक्षे अमरः "कृष्णाकृष्णाधोक्षजसिन्धुवारम्" कुमारः। तस्य च श्वेतपुष्पत्वात् कृष्णाद्यत्वम्। पृषो० सुमध्यक्षत्वार्थं रत्नमो० २कृष्णोक्तमे सिद्धा०।

सिन्दूर न० स्यन्द-ऊरन् संप्रसारणञ्च। आनाय्यत्वात् रक्तवर्णे १चूर्णभेदे अमरः २वृक्षभेदे पु० मेदि०।

"शोषोपधातः सिन्दूरं गुणैस्तत् शोषवत्तमम्। संयोगजत्वधात्वेन तत्साध्यत्वे गुणाः स्मृताः। सिन्दूरवृक्षं शोषघ्नकृष्णकण्डूविषापहम्। अम्लत्वग्रामलजननं ग्रन्थशोफव्रणापहम्" "दुष्टव्रणोगतत्वस्य विषुद्धिर्नहितो मुधेः" भावप०। अर्थरागवृद्धये रसधवया सहारक्तत्वात्सकता वर्णोक्तं जाधो० ३क्त०। "करिदूं कुङ्कुमं चैव सिन्दूरं जलजं तथा। कुवीलवस्तु ताम्बूलं वाङ्मलाभरणं शुभम्। शेषस्त्वाहजमरोधरकर्णविभूषणम्। अर्थरागप्रतिच्छन्नो दूरवेश्च पतिव्रता"।

सिन्दूरकारण न०६त०। शोषके हेमच०।

सिन्दूरतिलक पुंक्लीवे० सिन्दूरवर्णोज्वलकुसुमवृक्षभेदे मत्व। १ हस्तिनि मेदि० स्त्रियां ङीप्। २मधवालाम् स्त्री।

सिन्दूरी स्त्री सिन्दूरं सदृशोऽस्त्यस्याः अच् गौरा० ङीष्। १ गेचन्या २ धातक्याञ्च मेदि०।

सिन्धु पु० स्यन्द-उ संप्रसारणं टस्य धत्व। १वृक्षे अमरः २रक्तरेविद्धतायां १गजभेदे मेदि० ४गजमदे हेमच०। ५सिन्धुवारवृक्षे शब्दच०। ६स्यंदनदीवृक्षे राजनि०। ७रागभेदे सङ्गीत०। ८नद्यां स्त्री मेदि० ९नदीभेदे राजनि०। "यतश्चोर्विपाधायुजः सिन्धुनद्याः सुपीतं शुचु स्वादु सर्वौषधगुणम्। लघु निर्मलं दीपनं पाचनञ्च प्रदत्ते बलं वृष्यमेधायुषञ्च" राजनि० तल्लक्षणयुक्ताः। १०नैर्ऋतीकोणे देशभेदे पु० भूर्जविशालशब्दे २१६८पृ०दृश्यम्। सोऽभिजनोऽस्य तत्र राजा वा अण्। सैन्धव पित्तादिक्रमेण तद्देशवासिनि तत्रभे च। बहुषु लुप्तो लुक्।

सिन्धुकफ पु० सिन्धोः कफ इव। लवणक्षेत्रे शब्दर०।

सिन्धुकर न० सिन्धुदेशे क्रीयते क्रियते वा क-कर्मणि अच्। श्वेतवृक्षे राजनि०। [शब्दर०।

सिन्धुखेल पु० सिन्धुवभीये खेलति खेल-अच्। सिन्धुदेशे

सिन्धुज न० सिन्धुदेशे भवत्वे वा जायते जन-ड। १सैन्धवलवणे अमरः २चन्द्रे ३कर्पूरे पु०। ४नद्यां स्त्री अटा० ङीष्। जातादयोऽस्य।

सिन्धुमन्थ पु० ६त०। १चन्द्रे २कर्पूरे त्रिका०। सिन्धुजातादयोऽस्य। ३नद्यां स्त्री। [मन्थ०।

सिन्धुपुष्प पु० सिन्धौ पुष्पमस्य विकाशते पुष्प-अच्। वृक्षे

सिन्धुसम्भव न० सिन्धुसम्बन्धात् जायते जन-ड। १सैन्धवलवणे रत्नमा० २जस्ते च।

सिन्धुर पुंस्त्री० सिन्धुमंडलमस्यास्ति र। हस्तिनि हेमच० स्त्रियां ङीष् "मदान्धसिन्धुरघटा" गङ्गाश्लोकः।

सिन्धुलवण न० सिन्धुदेशजातं लवणम्। सैन्धवलवणे रत्नमा०

सिन्धुवारित पु० सिन्धुः मदजलं वारितस्तिरस्कृतो येन यतितस्तत्वात्। सिन्धुवारवृक्षे। (निर्गुण्डी) शब्दर०।

सिन्धुविषण पु० सिध-क्यु ६त०। आम्भारीवृक्षे शब्दच०।

सिन्धुसङ्गम पु० सिन्धवोः नद्योः नदीवसुद्वयोर्वा सङ्गमः। १नद्याः नदीवसुद्वयोर्वा मेलने अमरः। ४ यत्र। २तदाधारदेशे त्रि०।

सिन्धूद्भव न० सिन्धोः भवत्यत्र भू-अच् ६त०। सैन्धवलवणे रत्नमा० २वसुदूजातमात्रे त्रि०। [स्त्रीवसिन्धुजे।

सिन्धूपल पु० सिन्धोरुपल इव। १सैन्धवलवणे शारा०।

सिप्र पु० सप-रक् पृषो०। १सरोवरभेदे २चन्द्रे त्रिका० ३निदाघजले ४धर्मे च पु० मेदि०। ५उज्जयिनीसमीपस्थे नदीभेदे स्त्री मेदि० "सिप्रातरङ्गानिलकम्पितासु रघुः। वनिष्ठकल्पद्रुमपल्लवेषु विनयरश्मि मेदुरात्

सिसाप्रादुर्भावो यथा "तत्तोयं सप्तधा भूत्वा पतितं मानसाच्चलात्। हेमाद्रेः कन्दरे सानौ सरस्याञ्च पृथक् पृथक्। तत्तोयं पतितं सिप्रे देवभोग्ये सरोवरे। तेन सिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम्" कालिपु० २३अ०। [नामता।

सिम पु० सि-मन् किच्च। सर्वस्मिन् इत्यर्थे। तदर्थेऽस्य सर्व०

सिम्बा(म्बि) स्त्री शाम्यति दृष्टिरनया शम-अच् इत्वं वा पृषो०। (छुटि) १शिम्बायाम् द्विरूपको० इनन्त०। २नखीनामगन्धद्रव्ये राजनि० वा ङीप्। ङीबन्तः। ३निष्पाव्यां भावप्र०। [धान्ये कलायादौ भावप्र०।

सि(शि)म्बिजा स्त्री सि(शि)म्बेर्जायते जन-ड। शमी-

सिर पु० सि-रक्। १पिप्पलीमूले हेमच०। २नाड्याम् ३अम्बुवाहिन्याञ्च स्त्री हेमच०। [सल्लकीवृक्षे भरतः।

सिल्लकी स्त्री सि-क्विप् लक-अच् गौरा० ङीष् कर्म०।

सिवर पुंस्त्री० सि-करण्। गजे जटा० स्त्रियां ङीष्।

सिहुण्ड पु० सो-कि सिः छेदस्तं डयते कण्टकाद्यतत्वात् डाड-अच्। स्नुहीवृक्षे शब्दर०। [स्वार्थे क तत्रैव।

सिह्ल पु० सिह-लक् पृषो०। इक्षुधूपाख्ये गन्धद्रव्ये अमरः

सिह्लकी स्त्री सिह-लकक् पृषो० गौरा० ङीष्। सल्लकीवृक्षे शब्दर०। [शब्दर०।

सिह्लभूमि स्त्री सिह्लस्य गन्धद्रव्यस्य भूमिः। सल्लकीवृक्षे

सीक सेचने भ्वा० आ० सक० सेट्। सीकते असेकिष्ट। क्वादित्वाद्ङित्वं न गुणः। पर्य्युदासेन न षोपदेशः।

सीक सर्वे वा चु० उभ० पक्षे भ्वा० प० सक० सेट्। सीकयति ते सीकति असीसिकत् त असीकीत्। पर्य्युदासान्न षोपदेशः। [भरतः।

सीकर पु० सीक्यते सिच्यतेऽनेन सीक-अरन्। जलकणे

सीता स्त्री सि-त पृषो० दीर्घः। १लाङ्गलपद्धतौ अमरः २जनकराजदुहितरि ३भद्राश्ववर्षस्थितगङ्गायाञ्च।

"अथ मे कर्षतः क्षेत्रं लाङ्गलादुत्थिता ततः। क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता। भूतलादुत्थिता सा तु व्यवर्द्धत ममात्मजा" रामा० बाल० "अथ लोकेश्वरी लक्ष्मीर्जनकस्य पुरे स्वतः। भुवश्चक्रे हलोत्खाते तारे चोत्तरफाल्गुने। अयोनिजा पद्मकरा बालार्कसदृशप्रभा। सीतासुखे सखत्पन्ना बालभावेन सुन्दरी। सीतासुखोद्भवात् सीता इत्यस्या नाम चाकरोत्" पद्मपु०। भद्राश्ववर्षनदीभेदस्य स्वर्गगङ्गाया धारा० भेदः जम्बुद्वीपशब्दे २०४६ पृ० दृश्यः। ४लक्ष्म्याम् ५उमायां ६सस्याधिदेवतायां नानार्थमञ्जरी। ७भट्टिरायां राजनि०।

सीतापति पु० ६त०। श्रीरामे शब्दर०।

सीतायाःपति पु० ६त० अनुक्तसमा०। श्रीरामे शब्दर०। "सीतायाः पतये नमः" इति पुराणम् असमस्तत्वे पत्यै इत्येव स्यात्।

सीत्कार पु० सीदित्यव्यक्तस्य कारः सीत्+क-घञ्। अनुरागजे शब्दे। [शब्दे हेमच०।

सीत्कृत न० सीत्+क-भावे क्त। १सीत्कारे २अनुरागज-

सीत्य न० सीतया लाङ्गलपद्धत्या निर्वृत्तं यत्। १धान्ये हेमच०। सीतामर्हति यत्। २हलकर्षणयोग्ये क्षेत्रादौ त्रि०

सीधु पु० सिध-उ पृषो०। १मद्ये २मद्यभेदे च "इक्षोः पक्वैरसैः स्निग्धः सीधुः पक्वरसश्च सः। आमैस्तैरेव यः सीधुः (सेरका) स च शीतरसः स्मृतः। सीधुः पक्वरसः श्रेष्ठः खराग्निबलवर्णकृत्। वातपित्तकरो हृद्यः क्लेदनो रोचनो हरेत्। विबन्धमेदशोफार्शःशोफोदरकफामयान्। तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः" राजनि०। [शब्दर०।

सीधुगन्ध पु० सीधोरिव गन्धोऽस्य वा न इत्समा०। बकुले

सीधुपुष्प पु० सीधुगन्धयुक्तं पुष्पमस्य। १कदम्बे २बकुले च ३धातक्यां स्त्री राजनि० ङीप्।

सीधुरस पु० सीधोरिव रस आस्वादोऽस्य। आम्रवृक्षे राजनि०

सीमन्त पु० सीम्नोऽन्तः शक०। १केशान्तर्गतवर्त्माकारे पदार्थे (सिँति) हेमच० २केशरचनाभेदे। "षष्ठेऽष्टमे वा सीमन्त" इत्युक्ते गर्भाधिके षष्ठे अष्टमे वा मासि कर्त्तव्ये द्विगर्भसंस्कारभेदे च सीमन्तोन्नयनशब्दे दृश्यम्।

सीमन्तक न० सीमन्ते कायति कै-क। १सिन्दूरे राजनि०

सीमन्तिनी स्त्री सीमन्त+अस्त्यर्थे इनि। नार्य्याम् अमरः।

सीमन्तोन्नयन न० सीमन्तस्य केशरचनाभेदस्य उन्नयनम् उत्तोलनमत्र। खनामख्याते गर्भसंस्कारभेदे।

तत्कालादि संस्कारतः दर्शितं यथा

"यदि पुंसवनं न कृतं तदा तस्मिन्नेव दिने प्रायश्चित्तात्मकमङ्गल्यहुतिहोमं कृत्वा पुंसवनं कृत्वा सीमन्तोन्नयनं कार्य्यम्। तथा च जातूकर्णः "शेषास्तु न कृताः पूर्वं संस्कारविषयः क्रमात्। कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनात्। अविद्यमाने पितरि स्वांशादुद्धृत्य वा पुनः। अवश्यप्रकार्य्याः संस्काराश्चाहभिः पूर्वसंस्कृतैः"। क्रमात् भ्रातॄणां संस्काराणाञ्च पौर्वापौर्य्यक्रमात् स्यात्-

क्रमस्तु सोदरविषयः विवाहे तथा दर्शनात्। छन्दोगपरिशिष्टम् "देवतानां विपर्य्यासे जुहोतिषु कथं भवेत्। सर्वं प्रायश्चित्तं कृत्वा क्रमेण जुहुयात् पुनः। संस्कारा व्यतिपत्तेरनृ स्वकालाच्च कथञ्चन। ०ङ्क्त्वैतदेव कुर्वीत ये तूपनयनादधः"। एतदित्यनेन सर्वं प्रायश्चित्तमनुकृष्टं तच्च प्रागेव विवृतम्। उद्वाहकरण्डे तन्त्रेणैव मातृकापूजादि "गण्यगः स्त्रियमार्षे तु मातृभ्यः पूजनं सकृत्। सकृदेव भवेत् श्राद्धादौ न पृथगादिषु" इति छन्दोगपरिशिष्टात्। गोभिलः "अथ सीमन्तकरणं प्रथमे गर्भे चतुर्थे वाष्टमे ऽष्टमे वा"। अथ पुंसवनानन्तरं सीमन्तः केशरचनाविशेषः। वाग्ग्रहणाच्च चतुर्थादिमासानां तुल्यवद्विकल्पः किन्तु पूर्वः पूर्वः कालः प्रशस्तः "समर्थस्य क्षेपायोगादिति" न्यायात्। ततो नवमासादौ प्रायश्चित्तं कृत्वैव कर्त्तव्यम् प्रथमगर्भे तूत्पादानात् यदि कथञ्चिदत्र एतस्मिन् संस्कारे गर्भनाशे पुनर्गर्भोत्पत्तौ अयं कालनियमो न किन्तु "गर्भस्यन्दने सीमन्तोन्नयनं यावन्न जातवत्सः" इति षष्ठ्यन्तिथितोऽत्रकालो ग्राह्यः। हरिहरभाष्यार्त्तण्डे "या कार्य्यं तत्सीमन्ता प्रकृते च कथञ्चन। अकृते निधाय तं बालं पुनः संस्कारमर्हति"। "अष्टे मासेऽष्टमेऽङ्गीज्यकुजदिनकृतां नन्दभद्रे तिथौ च मैत्रे१७ मूले स्वगाङ्गेषु करा१२ थितृ१०पवने१५ सौम्य२७विष्णु२२वियुग्मे ११।१२।२०। २१।२५।२६। पुष्याद्यादित्यत्रयरौद्रे दुर्युवतिहरिभसंज्ञके हरिके वापि लग्ने चन्द्रे तारालग्ने शुभसमियतं स्याच्च सीमन्तकर्म। स्वतारास्थिते लग्ने नवांशे पुंसश्च च। केचिदत्रि सीमन्तं तत्तारिक्तेतरे तिथौ"। अथ सीमन्तसूत्रं "नमस्ते रुद्र मन्यव" इत्यादिभिर्मन्त्रैरुक्तार्थता।

सीमन् स्त्री सि-इमनि पृषो० न गुणो दीर्घश्च। १मर्य्यादायाम् अमरः जटा० २स्त्रियां ३क्षेत्रे ४षण्ढकोषे मेदि०। "सीम्नि पुंस्त्रक्कोहतः" शि०को० भूवेलायाञ्च विश्वः।

सीमा स्त्री+सीमन्+या टाप्। १मर्य्यादायां २ग्रामादेरन्तभागे ३सीमवृक्षश्चार्थे च।

सीमाविवाद पु० सीमायां विवादः। अष्टादशसु विवादेषु मध्ये स्वनामख्याते विवादभेदे

तत्स्वरूपादिकं वीरमि० दर्शितं यथा

"अथ सीमाविवादाख्यव्यवहारपदम् तत्स्वरूपमाह नारदः "क्षेत्रकेदारमर्य्यादाविच्छेदाज्जनिश्चयः। क्षेत्राधिकारो यत्र स्याद् विवादः क्षेत्रजस्तु सः"। अस्यार्थः क्षेत्रजलप्रवाहजन्यः। केदारः क्षेत्रम्। मर्य्यादा सीमा। विच्छेदो ग्राम्यजलप्रवृतो देशः अन्यैरन्यदृष्टितः एतेषां निश्चयो यत्र विवादे स्यात् स क्षेत्राधिकारः क्षेत्रविषयको विवादः क्षेत्रज उच्यत इति। अयं विवादः षड्विधः तथा च कात्यायनः "आधिक्यं न्यूनता चार्थे अस्तिनास्तित्वमेव च। अभोगभुक्तिः सीमा च षड् भूवादस्य हेतवः"। यत्रैषाधिका भूरत्युक्तेति विवाद आधिक्यविवादः। एतावती भूरत्र नेत्युक्ते यत्रैतावतीति यो विवादः स न्यूनताविवादः यत्र मदीयोऽस्तीत्युक्ते यो विवादः सोऽस्तित्वविवादः यत्र तवेयो नास्तीत्युक्ते यत्र विद्यते इत्येवंविधो विवादो नास्तित्वविवादः। सीमाविवाद इति षड्विधो विवाद इत्यर्थः। तत्र सीमा चतुर्विधा। देशसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति। तस्याश्चतुर्विधाया अपि यथायथत्वं पञ्चविधत्वमाह नारदः "ध्वजिनी मत्स्यिनी चैव नैधानी वृक्षवर्जिता। राजशासननीता च सीमा पञ्चविधा स्मृता"। ध्वजिनी इत्यादिचिह्निता इत्यर्थः। तदाह मनुः "सीमावृक्षांस्तु कुर्वीत न्यग्रोधाश्वत्थकिंशुकान्। शालमलीन् शालतालांश्च क्षीरिण्यश्चैव पादपान्" इति। मत्स्यिनी जलचिह्निता। नैधानी निखाततुषाङ्गारादिचिह्निता। वृक्षवर्जिता अर्थिप्रत्यर्थिपरस्परसम्मतिपत्तिनिर्मिता। तथा च व्यासः "ग्रामयोरुभयोः सीम्नि वृक्षा यत्र समुच्छ्रिताः। समुच्छ्रिता ध्वजाकारा ध्वजिनी सा प्रकीर्त्तिता। स्वच्छन्दगा बहुजला ह्रस्वकूर्मसमन्विता। नित्यप्रवाहिणी यत्र सीमा सा मत्स्यिनी मता। तुषाङ्गारकपालैस्तु कृत्स्नैरायतनैस्तथा। सीमा प्रचिह्निता कार्या नैधानी सा निगद्यते" इति। नित्यप्रवाहिणीत्यनेन कूपवाप्यादीनि प्रकाशचिह्नान्युपलक्ष्यन्ते। तानि च हरिस्वामिना दर्शितानि "वापीकूपतडागानि दैत्यारामसुराश्रयाः। स्वयं निखं नदीस्रोतः शरगुल्मनगादयः। प्रकाशचिह्नान्येतानि सीमायां कारयेत् सदा। निहितानि तथान्यानि यानि भूमिर्न भक्षयेत्। अङ्गारोऽस्थीनि गोबालांस्तुषान् भस्मकपालिकाः। करीषशिष्टकाङ्गारशर्करावालुकास्तथा। तानि सन्धिषु सीमायां अप्रकाशानि कारयेत्"। चैत्यं इष्टकादिभिः रचितस्तम्भरादिकम्। स्वयम् स्वजनः भूमिदेयः। निम्नं परिखा। तृणा अश्वत्थादयो वृक्षाः। आदिशब्देन

आर्तादीनां कार्यसंसीमानाञ्च पदम्यम् । अस्थीनि पशुमनुष्यादयस्थीनि । तथाङ्गारकपालैरिति करीषादीनामन्येषां चिह्नानामप्युपलक्षणम् । तानि निबन्धेन "तत्र योगन्तु वाक्यानां प्रयत्नेन प्रदर्शयेत् । वार्द्धके च चिह्नानाम् दर्शयेयुस्तथैव च । एवं परम्परागाने सीमाभ्रान्तिर्न जायते" इति । प्रदर्शयेदित्यत्र आन्दसं बहुत्वे एवकवचनम् । एतेषां चिह्नानां कथञ्चिदभावे निश्चयोपायमाह नारदः "निम्नगापहृतोत्सृष्टनष्टचिह्नासु भूमिषु । तत्प्रदेशानुमानैश्च प्रमाणैर्भोगदर्शनैः" । निम्नगाया नद्या अपहृतेन अपहरणेन उत्सृष्टानि स्वस्थानात्त्यक्तानि चिह्नानि यावान्तावत्तोक्ताः । प्रमाणैः साक्षिसामन्तादिभिः एवं निरूपितैश्चिह्नैर्निर्णयं कुर्यादित्याह मनुः "एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः । यदि संशय एव स्याल्लिङ्गानामपि दर्शने । साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः" । साक्षिप्रत्ययः साक्षिविषयकः । चिह्नाभावपक्षपरिग्रहार्थोऽपिशब्दः ते च साक्षिणः सीमाविषयाः सीमाचिह्नविषया वा । साक्षिषु विशेषमाह बृहस्पतिः "आगमं च प्रमाणं च भोगकालञ्च नाम च । भूभागलक्षणञ्चैव ये विदुस्तेऽत्र साक्षिणः" प्रमाणमित्यस्य । उभयेषामपि साक्षिणामभावे सामन्तवशान्निर्णयं कुर्यादित्याह मनुः "साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः । सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ" । यदा पुनर्लिङ्गानि न सन्ति वर्त्तमानानि वा सन्दिग्धानि तदा निश्चयोपायमाह याज्ञवल्क्यः "सामन्ता वा समग्रामास्तत्प्रत्यन्तनिवासिनः । दद्युरेषां परिच्छेदं" । सामन्ताः सन्निहितग्रामक्षेत्रादयः । समग्रामाः समस्तग्रामाः । तत्प्रत्यन्तनिवासिनः सीमासन्धेयुः स्थिरीकुर्युः

सीमासन्निहितदेशकर्षकाणामसत्त्वे विज्ञेयम्। अतएवोक्तं नारदेन "सीमासु च बहिर्ग्रामे ग्रुग्रेऽपि तत्कुलीविनः। गोपाः शाकुनिका व्याधा ये चान्ये वनगोचराः" इति। अत्र च सर्वत्र स्थावरविवादे मेत्वादिविवादे च सामन्तादयो निर्णायकाः तथा च कात्यायनः "तेषामभावे सामन्ता मौलहड्डोद्भूतादयः। स्थावरे षट्प्रकारेऽपि कार्या नात्र विचारणा। क्षेत्रवास्तुतडागेषु चारामवनसेतुषु। मेत्वभावात् सामन्तैः कुर्यादत्र विनिर्णयम्। ग्रामसीमासु च तथा नद्यन्नगरदेशयोः"। तेषां साक्षिणाम्। याज्ञवल्क्योऽपि "चारामायतनग्रामनिपानोद्यानवेश्मसु। एष एव विधिर्ज्ञेयो वर्त्मस्वप्रवहादिषु"। आयतनं चैत्यम्, वेश्म निपानं पानीयस्थानं वर्त्मस्वप्रवहो दृष्टश्चिरन्तन जलप्रवाहः। पुनः कात्यायनोऽपि "क्षेत्रकूपतडागानां केदाराराममयोरपि। गृहप्रसादावसथदेवगृहेषु च"। केदारः क्षुद्रसेतुयुक्तः क्षेत्रविशेषः। गोवर्धीवर्दन्यायेन भित्त्योक्तिः प्रसदः प्रासादः। बृहस्पतिरपि "सर्वत्र स्थावरे वादे विधिरेष प्रकीर्त्तितः"। राज्ञा ग्रामीणानां वादिप्रतिवादिनोश्च समक्षं सामन्तादयः प्रष्टव्याः तैर्यदुक्तं तत्पत्रे लेखनीयमित्याह मनुः "ग्रामीयककुलानान्तु समक्षं सीम्नि साक्षिणः। प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः। ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निर्णयम्। निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः"। साक्ष्यभिप्रायेण सीमलिङ्गानीत्युक्तम्। सीमासाक्षिणस्तु सीमां ब्रूयुः। तथा च बृहस्पतिः "ग्रामपैः ग्रापिताः स्वैः स्वैर्ब्रूयुः सीमाविनिर्णयम्। दर्शयेयुश्च लिङ्गानि तत्प्रमाण्यमिति स्थितिः"। स्वैः स्वैः। "सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः" इत्यादिनोक्तव्यवस्थानतिक्रमेणेत्यर्थः। यदा तु सीमालिङ्गसाक्षिणः सीमासाक्षिणि दर्शयितुञ्च शक्नुवन्ति केवलं सीमामात्रं जानन्ति तदा ते कथं ब्रूयुरित्याकाङ्क्षायामाह मनुः "शिरोभिस्ते गृहीत्वोर्वीं कृत्विणो रक्तवाससः। सहिताः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसम्" इति। उर्वीं भूमिम्। सीमाक्रमणमाणा इति शेषः। नयेयुरिदं द्वयोर्निरासार्थं बहुवचनञ्चैकस्य, नारदेन "एकश्चेदुच्चरेत् सीमां लोपवासः समुच्चरेत्। रक्तमाल्याम्बरधरो भूमिमादाय मूर्द्धनि" इति एकस्याभ्युच्चारणात्। बृहस्पतिरपि "क्वाचिच्चैर्विना साक्षैरेकोऽप्युभयसम्मतः। रक्तमाल्याम्बरधरो मृदमादाय मूर्द्धनि। सत्यव्रतः सोपवासः सीमां तां दर्शयेन्नरः"। क्वाचिच्चैर्विना सीमायाः ज्ञातॄणां लिङ्गानाञ्चासत्त्वे। ननु कथमेकस्य सीमानिर्णायकत्वम् "नैकः सत्तत्त्वयेत् सीमाञ्चरः प्रत्ययवानपि। गुरुत्वादस्य कार्यस्य क्रियैषा बहुषु स्थिता" इत्येकस्य नारदेन निषेधादिति चेन्नैवम् स उभयानुमतधर्मविहितव्यतिरिक्तविषय इति न काप्यनुपपत्तिः। अयञ्च निर्णयः सीमाक्रमणादिनादारभ्य पञ्चत्वप्राप्तिपर्य्यन्तं साक्षिसामन्तादीनान्दैविकराजिकोपद्रवाभावे अवसेयः न तु सीमाक्रमणाद्यवच्छिन्नोत्तरमेव। तथा च कात्यायनः "सीमाचङ्क्रमणे क्रोशे षाटस्थे तत्रैव च। त्रिपञ्चपक्षसम्प्राप्तं दैवराजिकमिष्यते"। यथासङ्ख्यमिति शेषः। यदा तु साक्ष्यादीनां पञ्चत्वप्राप्त्यभ्यन्तरे दैविकराजिकोपद्रवः अन्यथा वा मिथ्यावादित्वनिश्चयस्तदा ते पणशतद्वयं दण्डं प्रत्येकं दाप्याः। तथा च मनुः "यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः। विपरीतन्नयन्तस्तु दाप्याः स्युर्द्विशतं दमम्"। यथोक्तेन शिरोभिस्ते गृहीत्वोर्वीमित्यादिनोक्तप्रकारेण नयन्तो निर्णयं कुर्वन्तः यथाभूतेनार्थेनेति शेषः। द्विशतं पणशतद्वयम् प्रत्येकम् दाप्या इत्यर्थः। सामन्तानां मिथ्यावादित्वे राज्ञा ते मध्यमसाहसाख्येन दण्डेन दण्डनीयाः। तथा चाह याज्ञवल्क्यः "अन्यते तु पृथक् दण्ड्याः राज्ञा मध्यमसाहसम्"। सामन्ता यद्यन्यतं मिथ्याभूतं सीमानिर्णयं कुर्युः तदा मध्यमसाहसं कार्षापणानां चत्वारिंशदधिकानि पञ्च शतानि दण्डनीयाः। नारदोऽपि "अथ चेदन्यतं ब्रूयुः सामन्ताः सीम्नि निर्णये। सर्वे पृथक् पृथक् दण्ड्या राज्ञा मध्यमसाहसम्"। सामन्तव्यतिरिक्तानां तत्सम्बन्धादीनां मिथ्यावादित्वे पूर्वसाहसाख्येन दण्डेन प्रत्येकं ते दण्डनीयाः। तथा च नारदः "शेषास्त्वन्यतं ब्रूयुर्नियुक्ता भूमिकर्मणि। प्रत्येकन्तु जनन्यास्ते विज्ञेयाः पूर्वसाहसम्" इति। मौलादीनामन्यतवादित्वे तमेव दण्डं स एवाह "मौलहड्डादयश्चान्ये दण्डनीयाः पृथक् पृथक्। विज्ञेयाः प्रथमेनैव साहसेनान्यते स्थिताः" इति। आदिशब्देन गोपशाकुनिकादिवनगोचराणां ग्रहणम्। दण्डनीयाः मिथ्यावादित्वेन दण्डयितुमर्हाः मौलहड्डादयः पृथक् पृथक् प्रथमेन साहसेन विनेया दण्ड्या इत्यर्थः।

यद्यपि सामन्तादीनां साक्ष्यभेदया दण्डाल्पत्वसङ्ग सथापि तेषां वाचनिकं दण्डाधिक्यमिति न कोऽपि दोषः। यद्यपि शाकुनिकादयो बहुधा पापरतत्वात् लिङ्ग प्रदर्शनोपयोगेनान्यथा सिद्धा न साक्षात् सीमानिर्णये उपयुज्यन्ते तथापि वृक्षादिलिङ्गप्रदर्शन एव सिध्याभाषित्वसम्भवात्तदभिप्रायेणैव दण्डविधानम्। लोभादिना भेदेनोक्तौ अनुक्तौ च साक्ष्यादीनां दण्डमाह कात्यायनः "बहूनान्तु गृहीतानां न सर्वे निर्णयं यदि। कुर्युर्भयाद्वा लोभाद्वा दाप्यास्तूत्तमसाहसम्"। एवमज्ञानादिना अन्यतरवचने साक्ष्यादीन् दण्डयित्वा पुनः सीमाविचारः प्रवर्त्तयितव्यः तथा च स एवाह "अज्ञानोक्तौ दण्डयित्वा पुनः सीमां विचारयेत्। कौक्तिते यदि भेदः स्यादुदण्ड्यास्तूत्तमसाहसम्"। साक्ष्यादीनां सर्वेषाम् अज्ञानोक्तौ भेदेनोक्तौ च पुनर्विचारणं लेख्यप्रमाणेन कर्त्तव्यम्। अतएव शङ्खलिखितावपि "सामन्तविरोधे लेख्यप्रत्ययः" इति। यदा पुनः सामन्तप्रभृतयो ज्ञातारश्चिह्नानि च न सन्ति तदा राजा स्वेच्छया निर्णयं कुर्य्यात् तथा च याज्ञवल्क्यः "अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्त्तिता"। ज्ञातृणां सामन्तादीनां चिह्नादीनाञ्च वृक्षादीनामभावे राजैव स्वातन्त्र्येण सीमानं प्रवर्त्तयेत्। नारदोऽपि "यदा च न स्युर्ज्ञातारः सीमाया न च लक्षणम्। तदा राजा द्वयोः सीमासुत्तयेदिष्टः स्वयम्"। दृष्टः दृक्छया सर्वविभक्तिकस्तसिः। ग्रामद्वयमध्यवर्त्तिनौ विवादास्पदीभूताभ्रुवं सस्यं प्रविभज्यास्येयमभूरित्युभयोः समर्थं तन्मध्ये सीमालिङ्गानि कुर्य्यात्। यदा तस्यां भूमावुपकारातिशयो यत्र दृश्यते तदा तत्रैव सा सकला भूर्योजनीया न तूभयत्र। तथा च मनुः "सीमायामविषह्यायां स्वयं राजैव धर्मवित्। प्रदिशेद्भूमिमेतेषामुपकारादिति स्थितिः" इति। अविषह्यायां ज्ञातृचिह्नरहितायाम्। प्रदिशेत् प्रवेशयेदित्यर्थः। अयञ्च निर्णयो राज्ञा निर्णयान्तरवदव्यवहितोत्तरमेव न कर्त्तव्यः किन्तु सीमालिङ्गानि यदा आवरकाद्यभावात् स्फुटं दृश्यन्ते तदा कर्त्तव्यः। तथा च मनुः "सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः। ज्यैष्ठे मासि नयेत् सीमां सुप्रकाशेषु सेतुषु"। द्वयोर्ग्रामाधिपयोर्विवादे सीमां प्रतिसमुत्पन्ने ज्यैष्ठे मासीत्युपलक्षणं मासान्तरेऽपि सेतुवृक्षादिषु सीमालिङ्गेषु व्यक्तेषु विवादाध्यासितां सीमाम् निर्णयेदित्यर्थः। ग्रामग्रहणं नगरादेरुपलक्षणार्थम्। अतएव कात्यायनः "सामन्ताश्चेत्तु सामन्तैः कुर्य्यात् क्षेत्रादिनिर्णयम्। ग्रामसीमादिषु तथा तद्वन्नगरदेशयोः" इति। यदा पुनः ग्रामादीनां सीमात्वेन परिकल्पिता नदी कदाचित् ग्रामान्तरं भित्त्वा प्रवहन्ती दक्षिणभागे स्थितां पूर्वं काञ्चिद् भूमिं वामभागनिविष्टां करोति तथा तत्रैकग्रामसम्बन्धिनी भूरन्यत्र राज्ञा योज्यते तत्रैव निर्णयोपायमाह बृहस्पतिः "अन्यग्रामात् समाहृत्य दत्ताऽन्यस्य यदा मही। महानद्यथ राज्ञा च कथन्तत्र विचारणा। नद्योत्सृष्टा राजदत्ता यस्य तस्यैव सा मही। अन्यथा न भवेल्लाभो नराणां राजदैविकः। क्षयोदयौ जीवनञ्च दैवराजवशाच्छ्रुवम्। तस्मात् सर्वेषु कार्य्येषु तत्कृतन्तत्र विचालयेत्"। न च नदीकृतस्य दैवकृतत्वाभावः शङ्कनीयः दैवशब्दस्य भाग्यवाचित्वाच्चदीकृतमपि दैवकृतं भवत्येव। तथा चाह स एव "ग्रामयोरुभयोर्यत्र मर्य्यादा कल्पिता नदी। कुरुते दानहरणं भाग्याभाग्यवशाच्छ्रुवम्। एकत्र कूलपातन्तु भूमेरन्यत्र संस्थितिम्। नदी तीरे प्रकुरुते तस्य तत्र विचालयेत्"। तस्य नदीवशात् प्राप्तभूमिकस्य तां प्राप्तां भूमिन्न विचालयेत् नान्यथा कुर्य्यात् पूर्वस्वामी नाप्नुयादित्यर्थः। एतदनुप्लवतीरविषयम्। उप्लवविषये पुनः स एवाह "क्षेत्रं सशस्यमुल्लङ्घ्य भूमिमुल्का यदा भवेत्। नदीस्रोतःप्रवाहेण पूर्वस्वामी लभेत ताम्"। तां सशस्यां भूमिं पूर्वस्वामी यावदुत्पन्नस्य शस्यफलप्राप्तिस्तावल्लभेतेत्यर्थः। फलप्राप्तेरूर्द्धं पुनः पूर्ववचनविषय समानता। राजदत्तविषये क्वचित् प्रतिप्रसवमाह स एव "या राज्ञा क्रोधलोभेन छलन्यायेन वा हृता। अदत्ताऽन्यस्य दुष्टेन न सा सिद्धिमवाप्नुयात्"। स्वत्वहेतुप्रतिग्रहादिलक्षणविषयमेतत्। स्वत्वहेतुप्रतिग्रहादिप्रमाणाभावे पुनः स एवाह "प्रमाणरहितां भूमिं भुञ्जानो यस्य या हृता। गुणाधिकाय वै दत्ता तस्य तत्र विचालयेत्"। प्रमाणरहितां स्वत्वहेतुप्रतिग्रहादिप्रमाणरहिताम्। गृहादिविषयकं निर्णयमाह स एव "निवेशकालादारभ्य गृहचर्य्यापणादिकम्। येन यावद्यथा भुक्तं तस्य तत्र विचालयेत्"। येन स्वामिना यावत् प्रचारभूम्यादियुक्तं तथा येन पूर्वादिदिगभिमुखद्वारादियुक्तत्वादिरूपेणोपभुक्तं तत्तस्य स्वामिनः सकाशात्र विचालयेत् नान्यथा कुर्य्यादित्यर्थः।

अत्र निवेशकालादारभ्येत्यभिधानान्मध्ये कृतायां व्यवस्थायां निवर्त्यत्वं दर्शितम्। निवेशकालादारभ्य स्थितानि गवाक्षादिकानि प्रातिवेशिकाद्यनिष्टकारीण्यपि न निवर्त्यन्ते इत्युक्तं शैवेव "वातायनं प्रणाली च तथा निर्यूहवेदिकाम्। चतुःशालस्य सन्धिकां प्राङ्निविष्टां न चालयेत्"। वातायनं गवाक्षः। प्रणाली पाषाणादिनिर्मित जलनिर्गमोपायः। निर्यूहो द्वारनिर्गतकाष्ठविशेष इति ज्ञानकल्पतरौ। निर्यूहो गृहकोण इति स्मृतिचन्द्रिकायाम्। वेदिका रथ्यादिप्रदेशे संस्कृतोत्तरा भूमिः। चतुःशालस्य शालानां समाहारः चतुश्शालम्। तस्यात् सन्धिका दृष्टिजलनिपातः। कात्यायनोऽपि "नेक्षणाच्चमनिष्क्रामणसाच्छालोपरोधयेत्। प्रणाली गृहवास्तुभ्य पीडयन् दुष्टजलात्भवेत्"। नेक्षणात् गृहवस्तुसम्बन्धः। मनोजलनिर्गमः। विष्णुधर्म्मे दृष्ट्यादिभिस्तिसृ निर्गतं काष्ठादिनिर्मितलघुप्रणालिकाप्रवेशनस्थानम्। नोपरोधयेत् न निरुन्ध्यात्। गृहवास्तुः वासभूमिः। पूर्वनिष्क्रामणाः पूर्वनिष्क्रारिण इति न कर्त्तव्या इत्यभ्याह स एव "निवेशनस्थादुर्वृक्षैते योज्याः कदाचन। दृष्टिपातं प्रणालीञ्च न कुर्य्यात् परवेश्मसु"। दृष्टिपातो गवाक्षः। परवेश्मसु परवेश्मामिसम्बन्धेन। परभूमिनिकटे पुरीषोत्सर्जनादिकमपि न कर्त्तव्यम् तथा च हारीतः "वर्चःस्थानं वह्निं चयङ्गर्त्तोच्छिष्टाम्बुसेचनम्। अत्यारात् परभूम्यस्य न कर्त्तव्यं कदाचन"। वर्चःस्थानम् पुरीषोत्सर्गस्थानम्। अत्यारादतिसमीपे अरक्षितहृदयसञ्ज्ञितप्रदेशे इत्यर्थः। तथा च कात्यायनः "विण्मूत्रोदकसेकञ्च वह्निश्वभ्रनिवेशनम्। अरक्षितहृदयतृणञ्च परभूम्यान्निवेशयेत्"। संसरणशब्दार्थनिर्वचनपुरःसरन्तत्स्थानिरोद्धव्यत्वमाह हारीतः "यान्ति यान्ति जना येन यत्र वस्त्रानिवारिताः। तदुच्यते संसरणं संसरन्तु कथञ्चित्"। तथा च वस्त्रनिवारितं सरन्त्यस्मिन्निति संसरणनिर्वचनमित्यर्थः। चतुष्पथादयोऽपि न निरोद्धव्याः तथा च नारदः "अवस्करस्थलस्नानवस्त्रसन्धिकाद्विभिः। चतुष्पथसुरास्थानराजमार्गांश्च रोधयेत्"। अवस्करः पुरीषम्। गृहादिशोधनार्थं पांशुसमूह इति हरिहरादयः। स्नानं वेदिका स्नानकुर्च्चः। वस्त्रं जलनिर्गमार्गः। सन्धिका पटलमालः। अन्यत्रापि आदिशब्देन तादृशं ग्राह्यम्। रथ्यामार्गो राजमार्गो न तु चतुष्पथ इति कल्पतरुः। न च चतुष्पथराजमार्गयोरभेद इति शङ्कनीयं तयोर्भेदात्। तथा च कात्यायनः "सर्वे जनाः सदा येन प्रयान्ति स चतुष्पथः। अनिषिद्धा, यथाकालं राजमार्गः स उच्यते"। अनिषिद्धा इत्यस्य पूर्वेणान्वयः। यत्र राजकीयैरकाले गमनं प्रतिषिध्यते स राजमार्ग इत्यर्थः। क्षेत्रस्य समीपे मध्ये वा यस्य सर्वदा मार्गोऽस्ति तत्र निरोधो न कर्त्तव्यः। तथा च शङ्खलिखितौ "मार्गक्षेत्रे पथि विसर्गो राजमार्गे रथस्य परिवर्त्तनमिति" पथिविसर्गः पथोविसर्गः। राजमार्गे यावता प्रदेशेन रथैः परिवर्त्तते तावान् प्रदेशस्यक्तव्य इत्यर्थः। संसरणानावरोधकारिण्यन्तु दग्धो माग्नेको दाघः यथाह हारीतः "वस्त्रात् सप्तकरं स्थानं दग्धारोपणमेव च। कामात् पुरीषं कुर्य्याच्च तस्य दण्डस्तु षोडशः"। सप्तकरोऽत्र शकटादिसप्तहस्तोच्छ्रायादानं लतादीनामप्युपलक्षकम्। षोडशोऽत्र साक्षिकः, दण्डस्य अपराधानुसारेण कल्पयितुमुचितत्वात्। ये तु राजमार्गे पुरीषोत्सर्गादिकं कुर्वते तेषामधिको दण्डः तथा च मनुः "मूत्रवर्च्चोजलाद्यानमार्गे यस्त्वमेध्यमुत्सृजेत्। स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत्"। आपद्गतादिषु तु दण्डनैवोक्तः "आपद्गतस्तथा वृद्धो गर्भिणी बाल एव च। परिभाषणमर्हन्ति तत्र शोध्यमिति स्थितिः"। परिभाषणं क्रूरभाषणम्। लेढ्यादौ ततोऽधिको दण्डः। तथा च कात्यायनः "तडागोद्यानतीर्थानि योऽलेष्यैन विनाशयेत्। अमेध्यं शोधयित्वा तु दण्डयेत् पूर्वसाहसम्"। ये पुनर्लिखितवस्त्रप्रक्षालनादितीर्थानि दूषयन्ति तत्राप्ययमेव दण्ड इत्याह स एव "दूषयेत् सिद्धतीर्थानि स्नायितानि सकृत्सकृत्। पुण्यानि यावनीयानि प्राप्नुयात् पूर्वसाहसम्"। मध्यमो दाप्रभेदनादौ दण्डमाह याज्ञवल्क्यः "मध्यमोदाया: प्रभेदे तु सीमातिक्रमणे तथा। क्षेत्रस्य हरणे दण्डाः क्रमोत्तममध्यमाः"। अनेकक्षेत्रव्यवच्छेदिका साधारणी भूमिर्मर्यादा सीमा तस्याः प्रकर्षेण भेदने सीमातिक्रमणे सीमातिसङ्क्रमे कर्षणे क्षेत्रस्य च भयादिप्रदर्शनेन हरणे यथाक्रमेणोत्तममध्यमसाहसदण्डा वेदितव्याः। यत्तु विष्णुवचनम् "सीमाभेत्तारमुत्तमसाहसं दण्डयित्वा पुनः सीमां कारयेदिति"। तत्र हि सीमातिसङ्क्रमकर्षणतः पुनः सीमाकरणं पुनश्च क्रमणक्षाकरणमि-

त्येवं व्याख्येयम् । तेन न पूर्ववचनविरोधः क्षेत्रमक्षणं दृष्टादुपलक्षणार्थम् । अज्ञानात् क्षेत्रादिहरणेऽधम एव यथाह मनुः "दृष्टं तडागमारामं क्षेत्रं वा भोगया हरन् । यतानि पञ्च दण्ड्यः स्यादज्ञानाद्दिशतो दमः" । दृष्टमनुः "स्थापितां चैव मर्यादां सेतुभेदे च भेदने । अतिक्रामन्ति ये लोभात्ते दण्ड्या द्विशतं दमम्" । अपहियमाणक्षेत्रादिमूल्ये उत्तमोऽपि दण्डः प्रयोक्तव्यः "वधः सर्वस्वहरणं पुराच्चिर्वासनाङ्कने । तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसम्" इति स्मरणात् । यत्तु मनुलिखिताभ्याम् सीमातिक्रमणे दण्डाधिक्यमुक्तम् "सीमाव्यतिक्रमे त्वष्टशतकृष्णलमिति" तत् सम्पूर्णसीमातिक्रमविषयम् । सीमासन्धिभूतपञ्चहलादिफलं नैवैकेन ग्राह्यं यथाह कात्यायनः "सीमासन्धे तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः । फलं पुष्पञ्च सामान्यं क्षेत्रस्वामिषु निर्दिशेत्" । सामान्यं साधारणं क्षेत्रयोः स्वामिषु क्षेत्रस्वामिषु । तथा चान्यतरस्यैव तदुद्दीयफलादिग्रहणे तदनुरूपेण दण्ड इति ध्वनितम् । यदा पुनरन्यक्षेत्रे दृक्षादिरुत्पन्नोऽन्यक्षेत्रे शाखाः प्रसृताः तत्र कः स्वामीत्याकाङ्क्षायां स एवाह "अन्यक्षेत्रे तु जातानां शाखा यत्रान्वसंस्थिताः । स्वामिनं तं विजानीयाद्यस्य क्षेत्रे तु संश्रिताः । संश्रिताः प्रविष्ठाः । परक्षेत्रे प्रार्थनया क्रियमाणं सेतुकूपादिकं क्षेत्रस्वामिना न निषेद्धव्यं तथाह याज्ञवल्क्यः "न निषेध्योऽल्पबाधस्तु सेतु कल्याणकारकः । परभूमिं हरन् कूपः स्वल्पक्षेत्रो बहूदकः" । अल्पबाधः अल्पपीड़ाकरः कल्याणकारको बहूपकारकः । स्वल्पक्षेत्रः अल्पक्षेत्रवर्त्ती आभ्यां विशेषणाभ्यां यः सेतु क्षेत्रमध्यवर्त्तितया बहुपीड़ाकरस्तदा दिशु वर्त्तिक्षेत्रवर्त्तितया अल्पोपकारको वा तदा निषेद्धव्य इति दर्शितम् । तत्र नारदोऽपि "परक्षेत्रस्य मध्ये तु सेतुर्न प्रतिषिध्यते । बहुगुणोऽल्पदोषश्चेद् इष्टिरिष्टा क्षये सति" क्षये अल्पक्षेत्रक्षये सत्यपि इष्टिर्यत इष्टा, यतो बहुगुणः स्वक्षेत्रेऽपि उपकारकरोऽल्पदोषश्चेदा न प्रतिषेद्धव्य इत्यर्थः । अन्यक्षेत्रे सेतुकूपादिप्रवर्त्तनं तदुत्पन्नवृक्षादीनां लक्ष्यं । कर्त्तव्यमित्याह याज्ञवल्क्यः "स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत् । उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः" । यस्तु क्षेत्रस्वामिनं तदुत्पन्नं तदभावे राजानं वा प्रार्थ्य अर्थादानेन वा तत्क्षेत्रे सेत्वादिकं करोति स सेत्वादुत्पन्नफलोपभोगं दृष्टमदृष्टं वा न लभते किन्तु तत्स्वाम्येव तल्लभते तदभावे राजा । अतस्तदाज्ञां गृहीत्वा सेत्वादिकं कर्त्तव्यमित्यर्थः । जीर्णानामन्यदीयसेत्वादीनामुद्धारोऽपि तत्स्वाम्याद्याज्ञां गृहीत्वा कार्य्य इत्याह नारदः "पूर्वप्रवृत्तसेत्वम्भसृष्टा स्वामिनन्तु यः । सेतुं प्रवर्त्तयेद्यस्तु न स तत्फलभाग्भवेत् । मृते तु स्वामिनि पुनस्तद्दद्यो वापि मानवे । राजानमासाद्य ततः कुर्य्यात् सेतुप्रवर्त्तनम् । अतोऽन्यथा क्षेत्रभावान्मृगव्याधनिदर्शनात्" । मृगव्याधदृष्टान्तः स्मृतीकृतस्तैव, "दृष्टवस्तस्य नश्यन्ति यो विघ्नमनुविध्यति" । तत्र मृगव्याधस्य । कात्यायनोऽपि "अस्वाम्यनुमतेनैव संस्कारं कुरुते तु यः । वृद्धोद्यानतडागानां संस्कर्त्ता लभते न तु । देयं स्वामिनि चायाते तद्विद्धि नृपे यदि । अथावेद्य प्रयुक्तस्तु तद्दतं लभते व्ययम्" । नृपे अनावेद्य कृतं यत्तडागादिसंस्कारार्थं व्ययत्वं स्वामिनि यामान्तराद्यागते तेन देयमपि न प्राप्नोति । नृपे निवेद्य संस्करणे तदर्थं व्ययं प्राप्नोति । फलन्तु स्वाम्यनुमत्यलाभे न प्राप्नोतीत्यर्थः । यः परक्षेत्रमक्षणिदं जलाभीलूरीलत्य पश्चात् न लभते नाधन्येन कर्षयति तं प्रत्याह याज्ञवल्क्यः "क्षालाहृतमपि क्षेत्रं यो न कुर्य्यात् कारयेत् । स प्रदाप्यः फलं क्षेत्रमन्येन कारयेत्" । यद्यपि क्षालाहृतं किञ्चिद् हलेन विदारितं सस्यबीजापयोग्यं न भवति तथाप्यक्षतक्षेत्रस्य फलं यावत् तत्रोत्पत्तियोग्यं शमलादिक्लिप्तं तावदसौ स्वामिने दापनीयः तच्च पूर्वकर्षकादाच्छिद्याऽपरेण कारयेत् । व्यासोऽपि "क्षेत्रं गृहीत्वा यः कश्चिन्न कुर्य्याच्च कारयेत् । स्वामिने स तदं दाप्यो राज्ञे दण्डञ्च तत्समम्" । तदं क्षेत्रफलम् । तत्समं तदनुरूपमित्यर्थः । स्वामिप्राप्यं क्षेत्रफलमपि कियदित्याकाङ्क्षायां स एवाह "चिरावसन्ने दशमं लक्षयेत्तथाऽक्षतम् । सुसंस्कृतेऽपि षष्ठं स्यात् परिकल्प्यं यथास्थिति" इति । चिरावसन्ने चिरकालमकृते क्षेत्रेऽक्षतमिदं लक्षाभीलूरीलत्योपेक्षिते सामन्तैर्व्यवस्थितिं क्षेत्रस्थित्यनुसारेणैतावदवोढुं योग्यमिति परिकल्प्यं क्षेत्रस्वामिने तस्य दशमभागं, लक्षणाये क्षिप्तरावन्ने क्षीलत्यानुपेक्षिते तु षष्ठं भागं सुसंस्कृते नृपेक्षिते षष्ठं भागं दाप्य इत्यर्थः । यस्तु क्षेत्रस्वामिनः

सामर्थ्यवैकल्यादिनाऽर्द्धखिलायस्यां प्राप्ते क्षेत्रे स्वाम्यनिवारितः सन् स्वयमेव तत्कर्षणादिकं करोति तदा स क्षेत्रस्वामिने फलं न दापनीयः। किन्तु तस्य फलं स्वयमेव गृह्णीयादित्याह नारदः "अशक्तप्रेतनष्टेषु क्षेत्रिकेष्वनिवारितः। क्षेत्रं चेद्विलखेत् कश्चिदृश्नुवीत स तत्फलम्"। प्रेता मृताः नष्टाः कुत्रचिद्गता इति चिरमपरिचिताः। क्षेत्रिकेषु क्षेत्रस्वामिषु तेन क्षेत्रस्वामिना तत्पुत्रादिना वा समागतेनैवं विधाय कर्षादिखिलभञ्जनार्थं व्ययं दत्त्वैव स्वीयं क्षेत्रं ग्राह्यमिति स एवाह "विलख्यमाणे क्षेत्रे तु क्षेत्रिकः पुनरानयेत् खिलोपचारं तत्तु सर्वं दत्त्वा क्षेत्रमवाप्नुयात्"। अर्द्धखिलाद्यवस्था कदा क्षेत्रस्य भवतीत्याकाङ्क्षायां स एवाह "संवत्सरेणार्द्धखिलमीहितं वत्सरैस्त्रिभिः। पञ्चवर्षं वसन्नान्तु क्षेत्रं स्यादटवीसमम्"। कर्षणरहितं संवरेणार्द्धखिलं भवति यत्सुसाध्यं भवति वर्षत्रये तु ईहितं खिलं महायत्नसाध्यं भवति। वर्षपञ्चके न ईहितं क्षेत्रम् अटवीतुल्यं स्यात् अतिदुष्कर्षं भवेदित्यर्थः। खिलभञ्जनार्थं व्ययदानासामर्थ्ये क्षेत्रस्वामिनः क्षेत्रफलस्याष्टमो भागः कर्षकेण वर्षाष्टकं स्वामिने देयः अवशिष्टं सर्वं स्वयमेव ग्राह्यम्। क्षेत्रं च वर्षाष्टकानन्तरन्तत्स्वामिने देयम्। तथा च कात्यायनः "अशक्तितो न दद्याच्च खिलार्थे यः कृतो व्ययः। तदष्टभागहीनन्तु कर्षकः फलमाप्नुयात्" इति। "वर्षाण्यष्टौ स भोक्ता स्यात्परतः स्वामिने तु तत्" इति"।

सीर पु० सि-रक् पृषो०। १सूर्ये मेदि० २अर्कवृक्षे ३हले च अमरः संज्ञायां कन्। ४शिशुसारे शब्दमा०। [२जनकक्षेपे।

सीरध्वज पु० सीरोहलः तच्चिह्नितो ध्वजो यस्य। चन्द्रवंश्ये

सीरपाणि पु० सीरः हलः पाणौ यस्य। बलदेवे अमरः।

सीरिन् पु०सीरोहलोऽस्यास्यायुधत्वेन इनि। बलरामे हला०

सीलन्द पु० मत्स्यभेदे (सीलिन्दा) "सीलन्दः श्लेष्मलो वृष्यो विपाके मधुरो गुरुः। वातपित्तहरो रूक्ष्य श्लेष्मवातकरस्त्रयः" भावप्र०।

सी(से)वन न० सिव-ल्युट् नि० वा दीर्घः। सीवने तन्तुसन्ताने (सेयोयान) अमरः २लिङ्गमण्डलस्थचर्मणि स्त्री केचिच्च ङीप्।

सीस न० सि-किप् पृषो० सो-क कर्म०। (सीसे) धातुभेदे केचिच्च नागशब्दे ४००६ पृ० तद्गुणादि दृश्यम्। स्वार्थे क। तत्रार्थे अमरः।

सीहुण्ड पु० सिंहगण्ड+पृषो० दीर्घः। क्षुद्रौषधे राजनि०।

सु अव्य० सु-डु। १पूजायाम् २अतिशये अमरः। ३कल्याणे ४अनुमतौ ५सम्पदो मेदि० ६अनायासे च सनेकार्थको०। पूजायामस्य नोपसर्गत्वम् तेन सुस्तुतमित्यादौ न षत्वम्। अतिशयादौ तु सुष्टुत इत्यादि। गणरत्नेऽर्थविशेषानुक्तक्रमेणोदाहृतस्य यथा "सु प्रशंसानुमतिपूजाभद्रकल्याणेषु। सुरूपः सुकृतं सुसाधुः सुतप्तः सुदुष्करं सुगन्धिः"।

सुकण्टका स्त्री सुष्ठु कण्टकोऽस्याः। हस्तिमार्यांम् राजनि०

सुकण्डु स्त्री सु+कण्डु+यक् डु। कण्डूरोगे (चुलकाना) शब्दर०।

सुकन्द पु० शोभनः कन्दोऽस्य। १कशेरौ राजनि० २शोभनकन्दयुक्ते त्रि० संज्ञायां क। ३पलाण्डौ अमरः। ४वाराहीकन्दे ५धरणीकन्दे राजनि०।

सुकन्दिन् पु० शोभनः हितकरः कन्दोऽस्यास्य इनि। सूरणे (ओल) राजनि०। [६।२ अ०।

सुकन्यका स्त्री शर्य्यातिनृपकन्यायां च्यवनर्षिपत्न्याम् भाग०

सुकरा स्त्री सुखेन क्रियते दुह्यते वा सु+कृ-खल्। १सुधोलायां गवि अमरः २सुखसाध्ये त्रि०।

सुकर्णक पु० सुष्ठु कर्ण इव कन्दोऽस्य कप्। १हस्तिकन्दे राजनि० २शोभनकर्णयुक्ते त्रि०।

सुकर्णिका स्त्री सुष्ठु-कर्णाविव पर्णान्यस्याः कप् अत इत्त्वम्। मूषिकपर्ण्यांम् शब्दर०।

सुकर्णी स्त्री सुष्ठु कर्णाविव पत्त्राण्यस्याः ङीप्। इन्द्रवारुण्याम् (राखालशशा) राजनि०।

सुकर्म्मन् पु० सुष्ठु कर्म यस्मात् ५ब०। १विष्कम्भादिषु मध्ये सप्तमे योगे ज्यो० २शोभनकृत्ययुते त्रि० ३विश्वकर्मणि पु० मेदि०। प्रा०स०। ५शोभने कृत्ये न०।

सुकल पु०सुष्ठु कल्यते ख्याप्यतेऽसौ सु+कलि+अच्। दाक्षत्वभोजयित्वादिना १विख्याते जने अमरः। प्रा०ब०। २सुन्दरमधुराव्यक्तशब्दयुक्ते त्रि०। प्रा०स०। सुन्दरे कलशब्दे पु०।

सुकाण्ड पु० सुष्ठु काण्डोऽस्य। १कारवेल्ले राजनि० २सुन्दरकाण्डयुक्ते वृक्षे च ३काण्डीरलतायां स्त्री ङीप्। स्वार्थे क अत इत्त्वम्। तत्रैव।

सुकाण्डिन् पु० सुकाण्ड+अस्त्यर्थे इनि। भ्रमरे राजनि०।

सुकामा स्त्री सुष्ठु काम्यतेऽसौ सु+कम-कर्मणि घञ्। १त्रायमाणालतायाम् राजनि०। २शोभनकामविषये त्रि०।

सुकालुका स्त्री सु+कल-उण् स्वार्थे क। डोडीचुपे राजनि०

सुकाष्ठ न० सुष्ठु काष्ठं यस्य प्रा०ब०। १देवदारुकाष्ठे २काष्ठकदल्यां ३कट्क्यां च स्त्री राजनि०। प्रा०म०। ४शोभने काष्ठे च।

सुकुन्दक पु० सु+कुंद-ण्वुल्। पलाण्डौ शब्दर०।

सुकुन्दन स्त्री० सु+कुंद-ल्यु। वर्बरे राजनि०।

सुकुमार न० सु+कुमार-अच्। १जातीफले २नवमालिकायाम् ३कदल्यां ४वृक्षायां ५मालत्यां च राजनि०। ६अतिकोमले त्रि०। प्रा० स०। ७सुन्दरकुमारावस्थान्विते त्रि०स्त्रियां ङीष्। ८नवमालिकायां ९पुण्ड्रेक्षौ पु०मेदि० १०यवचूर्णके ११क्षवे १२श्यामाके च पु० राजनि०संज्ञायां कन्। सुकुमारक तमालपत्रे न०। शालौ पु०राजनि०।

सुकृत् त्रि० सु+कृ-क्विप्। १पुण्यकारके जटा० २धार्मिके जने त्रिका०।

सुकृत न० सु+कृ-क्त। १पुण्ये धर्मे अमरः २शुभे २सुविहिते त्रि० मेदि० ३सुकर्मणि न०।

सुकृति स्त्री सु+कृ-क्तिन्। १पुण्ये २मङ्गले २सत्कर्मणि च

सुकृतिन् त्रि० सुकृतमनेन इष्टा० इनि। १पुण्यशीले अमरः २शुभयुक्ते मेदि०। ३सत्कर्मयुते च स्त्रियां ङीष्।

सुकेसर पु० सुष्ठु केसरो जङ्घा। बीजपूरे राजनि०।

सुकोली स्त्री प्रा०ब०। क्षीरकाकोल्यां रत्नमा०।

सुकोषक पु० सुष्ठु कोषोऽस्य कप्। कोषाम्रे राजनि०।

सुख सुखसम्पादने चुरा० उभ० सक० सेट्। सुखयति-ते असुसुखत्-त। अनेकाच्कत्वेन न क्त्वोपदेशः।

सुख न० सुख-अच्। १पुण्यजन्ये आनन्दे गुणभेदे अमरः २अनुकूलवेदनीये यदनुभवाय चित्तमनुकूलं भवति तत्तिन् अर्थे तत्र आत्मधर्मे इति नैयायिकादयः। चित्तधर्म इति साङ्ख्यादयः। सुखयतीति अच्, सुखमस्यास्ति अच् वा। ३सुखकारके ४सुखिनि च त्रि०। ५वरुणपूज्यां स्त्री ६स्वर्गे मेदि०। "यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्" मुख्या दुःखासम्भिन्नसुखस्यैव स्वर्गपदार्थत्वेनाभिधानात् तस्य सुखविशेषात्मकत्वात् तथात्वम्। ७हरिद्रानामोषधौ राजनि०। सुखत्वं तु जातिभेदः तच्च चयन्तु कार्य्यभावत्वम् अन्ये ज्ञानधीनज्ञाविषयत्वे सति भावत्वमिति यावत् दुःखाभावस्य कार्य्यत्वेऽपि तस्य भावत्वाभावाच्चातिव्याप्तिः। "सुखं तु जगतामेव कार्य्यं धर्मेण जन्यते" भाषा०। तथाच धर्मासमवायिकारणजन्यगुणत्वं तल्लक्षणमिति फलितोऽर्थः। सुखदुःखयोः परस्परभिन्नत्वे कारणादिकं कणा०सू० इत्युद्देशिनं तथा "इष्टानिष्टकारणविशेषादिरोधाच्च स्थितः सुखदुःखोत्पत्तिभावः" कणा० सू०। "आत्मगुणानां कारणतोभेदव्युत्पादनं दशमाध्यायार्थः, तत्र "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" इति गौतमीये प्रमेयविभागसूत्रे सुखस्यानभिधानात् दुःखाभिन्नमेव सुखमिति भ्रमनिरासार्थं सुखदुःखयोरेव प्रथमं भेदमाह, "सुखदुःखयोर्विषयः परस्परमर्थान्तरभावोभेदो वैजात्यमिति यावत् कुत इत्यत आह इष्टानिष्टकारणविशेषात् इष्टं इष्टसाधनं स्रक्चन्दनवनितादि, अनिष्टमनिष्टसाधनसर्पिकण्टकादि, तद्रूपं इत्थं कारणं तस्य विशेषाद्भेदेन कारणवैजात्याधीनं कार्य्यवैजात्यमावश्यकं यतः, भेदकालत्वमाह विरोधात् सहानवस्थानलक्षणात् नहि एककालिकाभ्यां सुखदुःखयोरनुभवः। चकाराद्भिन्नयोः कार्य्यभेदं भेदक समुच्चिनोति, तथा हि अनुपहताभिप्रेतजनयत्नसाध्यादि सुखस्य, दैन्यसुप्तभाविन्यादि दुःखस्य कार्य्यमिति ततोऽनयोर्भेदः। तदुक्तं प्रशस्तभाष्यैः "अनुपक्रमलक्षणं सुखं स्वाद्यभिप्रेतविषयसान्निध्ये सति इष्टोत्पत्तधीन्द्रियार्थसन्निकर्षाङ्गमोद्यप्रेक्षादात्ममनसोः संयोगाद्यदनुपहतभिष्वङ्गजनयनाद्यभिप्रसादजनकमुत्पद्यते तत् सुखम्" इति। तद्विपरीतेषु स्रक्चन्दनादिषु स्त्रीसम्भोगागतेषु सङ्गजम्। गौतमीये सूत्रे सुखापरिगणनं वैराग्याय सुखमपि दुःखत्वेन भावयतो वैराग्यं स्यादेतदर्थमिति" उप० वृत्तिः। "तत्र सुखं चतुर्विधं वैषयिकमाभिमानिकं मानोरथिकम् आभ्यासिकञ्चेति" उप० वृत्तिः। आद्यं विषयेन्द्रियसाक्षात्कारजन्यं, द्वितीयं राज्याधिपत्यप्राप्तिलक्षणबोधजन्यं, तृतीयं विषयध्यानजन्यम् चतुर्थं स्वर्यादिनमस्कारायासादिजन्यं लाघवरूपमिति"।

पात० सू० वैषयिकसुखानां परिणामदुःखत्वादिभिः दुःखत्वं व्यवस्थापितं वैराग्यार्थं यथा "परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" सू०। "सर्वस्यायं रागानुविद्धस्वेतनसाधनाधीनसुखानुभव इति तत्राप्ति रागजः कर्माशयः तथा च द्वेष्टि दुःखसाधनानि सुहृति चेति द्वेषमोहकृतोऽप्यस्ति। तथा चोक्तम् "नानुपहत्य भूतान्युपभोगः सम्भवतीति" क्षिप्तोऽप्यस्ति शारीरः कर्माशय इति विषयसुखं चाविद्यैवानुशेते। "या भोगे-

न्द्रियाणां तृष्णोपशान्तिः तत् सुखं या कौस्याद्-सुखशान्तिस्तद् दुःखम् । न चेन्द्रियाणां भोगाभ्यासेन वैतृष्ण्यं कर्तुं शक्यं कस्माद् यतो भोगाभ्यास-मनुविवर्धन्ते रागाः कौशलानि चेन्द्रियाणामिति तस्मादनुपायः सुखस्य भोगाभ्यास इति स खल्वयं दृष्टिकविषमीत इवाशीविषेण दष्टो यः सुखार्थी विष-यानभ्यवसितो भवति दुःखपङ्के मग्न इति । एषा परिणामदुःखता नाम प्रतिकूला सुखावस्थायामपि यो-गिनमेव क्लिनाति । अथ का तापदुःखता सर्वस्य द्वे-षानुविद्धस्वेतनाचेतनसाधनाधीनस्वापानुभव इति । त-स्माच्चि दैवजः कर्माशयः सुखसाधनानि च प्रार्थ-मानः कायेन वाचा मनसा च परिक्लन्दते ततः पर-मनुग्रहात्मुपकुर्वन्ति चेति परानुपक्रपीडाभ्यां धर्मा-धर्मानुपचिनोति स कर्माशयो लोभान्मोहाच्च भवती-त्येषा तापदुःखतोच्यते । का पुनः संस्कारदुःखता । सुखानुभवात् सुखसंस्काराशयो दुःखानुभवादपि दुःख-संस्काराशय इति एवं कर्मभ्यो विपाकेऽनुभूयमाने सुखे दुःखे वा पुनः कर्माशयप्रचय इति एवमिदमनादिदुःख-स्रोतोविप्रसृतं योगिनमेव प्रतिकूलात्मकत्वाद्दुनेक्ति क्लिनाति कस्मात् क्लिष्टपक्षकल्पो हि विद्वानिति यथोर्णातन्तु-रक्षिप्तो न्यस्तः स्वर्गेण दुःखयति नान्येषु गात्रावय-वेषु एवमेतानि दुःखानि क्लिष्टपक्षकल्पं योगिन-मेव क्लिनन्ति नेतरम् इतरन्तु खलु पुनः प्रसृतं दुःखमुपा-त्तमुपात्तं त्वलन्तं त्वङ्गं त्वङ्गमुपादानमू अनादिवा-सनाविचित्रया चित्तदृत्त्या सुखतोऽनुविद्धविषाविद्ध-वयः हातव्य एवाहङ्कारममकारानुपातितं जातं जातं बाह्याध्यात्मिकोभयनिमित्तक्षिप्यमाणस्तापा अनु-शेरते तदेवमनादिदुःखस्रोतसा व्यूह्यमानमात्मानं भूतग्रामञ्च दृष्ट्वा योगी सर्वदुःखक्षयकारिणं सम्यग्दर्शनं शरणं प्रपद्यत इति गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः । प्रख्याप्रवृत्तिस्थितिरूपा बुद्धिगुणाः अरजस्कानुपप्लवसत्त्वभूताः शान्तं घोरं मूढं वा प्रत्ययं स्त्रिगुणमेव प्रारभन्ते चलञ्च गुणवृत्तमिति क्षिप्तपरि-क्षायि चित्तसत्त्वरूपातिशयादुद्रिक्तत्वातिशयाच्च परस्परेण विरुध्यन्ते शान्तान्यपि तु अतिशयैः घोरं प्रवर्तन्ते एव-मेते गुणा इतरेतराश्रयेणोपार्जितसुखदुःखमोहप्रत्यया इति सर्वं सर्वरूपा भवन्ति गुणप्रधानभावस्तत्रतत्रोप-लभ्यत इति तस्मात् दुःखमेव सर्वं विवेकिनं आ० ।

"तच्च सुखं नित्यं जन्यञ्चेति वेदान्तिनः । तत्र विषय-संपर्कात् वैषयिकं सुखं जन्यम्, ब्रह्मस्वरूपं सुखं नित्यमिति तदेतन्मतं सङ्क्षिप्यादे सविस्तरं निराक्रियते यथा

"न च नित्यसुखाभिव्यक्तिर्मुक्तिः । सा हि न नित्या मुक्तशरीरिन्द्रियविषयापातात् नोत्पाद्या तद्धेतुशरी-रादभावात् ज्ञानमात्रे सुखमात्रे वा तद्धेतुत्वावधा-रणात् निःसंसारदशायां तद्धेतुसामान्ये बाधकाभा-वात् । अतएव समाधौ शरीरकल्पना । किं वा तज्ज्ञ-नकं न तावदात्मनः संयोगः तस्यादृष्टादिनिरपेक्षस्यजन-कत्वात् विषयमात्रापेक्षणे तु संसारदशायामपि तद-भिव्यक्तिप्रसङ्गः नापि योगजोधर्मः शरीरकारी तस्योत्पत्ति-भावत्वेन विनाशित्वेऽपरत्र निष्फलत्वापत्तेः न च तज्ज-न्याभिव्यक्तिरनन्ता तस्या अपि तत एव नाशात् । अथ तत्त्वज्ञानात् सकलमिथ्याज्ञाननाशे दोषाभावेन प्रव-त्त्यादभावात्तन्मूलधर्माधर्मयोरनुत्पादे प्राचीनधर्माधर्मक्षयादु-दुःखसाधनशरीरादिनाश एव तस्य हेतुः अतएव तस्या-नन्त्येनाभिव्यक्तिप्रवाहोऽप्यनन्त इति चेन्न शरीरं विना तद्धेतुत्पत्तेः तस्य तद्धेतुत्वे मानाभावाच्च । न च मोक्षादि-प्रवृत्तिरेव मानं दुःखज्ञानार्थितया तदुपपत्तेः । न च नित्ये सुखे मानमस्ति "नित्यं विज्ञानमानन्दं ब्रह्म" "आनन्दं ब्रह्मणोरूपं तच्च मोक्षे प्रतिष्ठितमित्यादि" श्रुतिमानमिति चेन्न उपक्रमनिगमयोस्तत्रानुसुखयो-रत्रं ज्ञानाश्रयं सुखमिति व्यभिचारेणानुभूयमानया-र्ब्रह्मभेदबोधने प्रत्यक्षबाधात् । अथ सुखस्य ब्रह्म-भेदबोधनादेवायोग्यतयाऽनित्यं सुखं विहाय वाक्यार्थ-त्वेन नित्यसुखसिद्धिः स्वर्गवत् न तु नित्यसुखे सिद्धे तदभेदबोधनं येनान्योन्याश्रयः, यद्वा नित्यं सुखं बोध-यित्वा तदभिन्नं बोध्यते न च वाक्यभेदः वाक्यैक-वाक्यत्वादिति चेन्न आत्मनोऽनुभूयमानत्वेन तदभि-न्नस्य नित्यसुखस्याप्यनुभवप्रसङ्गात् सुखमात्रस्य स्वगो-चरसाक्षात्कारजनकत्वनियमात् तदनुभवे बालस्योऽप्य-नुभवो न स्यात् । अथात्माभिन्नं नित्यसुखमनुभूयत एव सुखत्वं तु तस्य नानुभूयत इति चेन्न सुखानुभव-सामग्र्या एव सुखत्वानुभावकत्वात् तस्मादानन्दं ब्रह्मेति मत्वर्थीयाच्प्रत्ययान्तत्वेनानन्दं बोध्यते नाभेदः, अन्यथा नपुंसकत्वानुपपत्तेः । एतेन ब्रह्माहैतत्त्वसाक्षात्कारा-दविद्यानिवृत्तौ विज्ञानसुखात्मकः केवल आत्मावशेषं वर्त्तत इति वेदान्तिमतमपास्तम् स्वप्रकाशसुखात्मक-

क्षणो नित्यत्वे मुक्तसंसारिणोरविशेषप्रसङ्गात् पुरुषप्रयत्नं विना तस्य सत्त्वाट्टपुरुषार्थत्वाच्च अविद्यानिवृत्तिः प्रयत्नसाध्येति चेत् अविद्या यदि मिथ्याज्ञानमर्थान्तरं वा उभयथापि सुखदुःखाभावसाधनेतरत्वेन तन्निवृत्तेरपुरुषार्थत्वात्" ।

तत्र दुःखाभावस्यैव परमप्रयोजनत्वं न सुखस्येति व्यवस्थापितं यया

"ननु दुःखाभावो न पुरुषार्थः सुखस्यापि हानिस्तुल्यव्ययत्वात् न च बहुतरदुःखानुविद्धतया सुखस्यापि हेयावश्यत्वम् आवश्यकत्वेन दुःखस्येव हेयत्वात् दुःखस्य निरूपधीच्छाविषयत्वात् अन्यथा दुःखानुविद्धतया तथात्वेन पुरुषार्थत्वविरोधादिति चेन्न सुखमनुद्दिश्यापि दुःखभीरूणां दुःखाभावदशायां सुखमस्तीत्युद्दिश्य दुःखाभावार्थं प्रवृत्तेः वैपरीत्यस्यापि सम्भवे सुखस्यापुरुषार्थतापत्तेः यतो दुःखाभावदशायां सुखं नास्तीति ज्ञानं न दुःखाभावार्थिप्रवृत्तिप्रतिबन्धकं तस्मादविवेकिनः सुखमात्रविप्सवो बहुतरदुःखानुविद्धमपि सुखमुद्दिश्य "शिरोमटीयं यदि यात यातिति, कृत्वा परदारेष्वपि प्रवर्त्तमानाः "वरं वृन्दावनेऽरण्ये" इत्यादि वटलोनात्वाधिकारिणः । ये च विवेकिनोऽपि तु संसारापारकान्तारे कियन्ति दुःखदुर्दिनानि कियती सुखखद्योतिका कुपितकृष्णफणामणण्डलच्छायाप्रतिमामिदमिति मन्यमानाः सुखमपि हातुमिच्छन्ति तेऽत्राधिकारिणः । न च भोगार्थिनामप्रवृत्तौ पुरुषार्थो हीयते कस्यचिदप्रवृत्तावपि चिकित्सादेः पुरुषार्थत्वात् । अथवा "दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते । न हि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते धीः, पुरुषार्थत्वं सुखवत्तायमानं नियमात् न च सुखिज्ञानं क्षमावतीति न हि दुःखाभावं जानीयामित्युद्दिश्य प्रवृत्तिः किन्तु दुःखं मे मा भूदित्युद्दिश्य ततो दुःखाभाव एव पुरुषार्थः तस्य ज्ञानन्तु स्वकार्यार्थीनं न तु पुरुषार्थतोपयोगि सुखी स्यामित्युद्दिश्य प्रवर्त्तते न तु सुखं जानीयामिति सुखमेव तथास्तु न तदुपगमः तज्ज्ञानावश्यकत्वेनान्यथासिद्धत्वात् गौरवाच्च । किञ्च बहुतरदुःखजर्जरकलेवरादुःखाभावमुद्दिश्य मरणेऽपि प्रवर्त्तमाना दृश्यन्ते न च मरणे तस्य ज्ञानमस्ति न ते विवेकिन इति चेन्न पुरुषार्थत्वे विवेकान्वयानात्"

तच्च सुखं चित्तधर्मोऽपि अध्यस्ततया प्रतिबिम्बरूपेण वा आत्मनि वर्त्तते इति सांख्या वेदान्तिनश्च । आत्मगुण इति नैयायिकाः । दुःखाभावे । भारवाहकस्य भारापगमे सुखी संवृत्तोऽहमिति प्रत्ययस्य दुःखाभावविषयतयोपपत्तेश्च ।

सुखडुरी स्त्री सुखडुरीति-क्रू-खच् सुम् च ङीए् । १जीवन्तीवृक्षे राजनि० । २सुखकारके त्रि० ।

सुखडुण पु० घुण क-सुम् । शिवखट्वाङ्गे त्रिका० ।

सुखचार पु०सुख सुखकारक चारो यस्य । उत्तमाश्वे शब्दमा०

सुखजात त्रि० जातं सुखमस्य परनिपातः । जातानन्दे "सुखजातः सुरापीत" भट्टिः ।

सुखद पु०सुख ददाति दा-क । १विष्णौ विष्णुस० । "विंशत्यक्षरसंयुक्तो मन्त्रः सुखदसंज्ञकः । षट्शृङ्गारवीरयोर्नेयो गुरुणैकेन भक्षितः" स०गो०चक्रे २भुवभेदे । ३सुखदातरि त्रि० ४स्वर्गवेश्यायां स्त्री शब्दरत्ना० । ५शमीवृक्षे स्त्री राजनि० ।

सुखदोह्या स्त्री सुखेन दोह्या दुह-ण्यत् । क्लेशं विना दोहनीयायां गवि हेमच० सुखसंदोह्यायत्र ।

सुखभाज् त्रि०सुखं भजते भज-क्विप् । सुखयुक्ते । [राजनि०

सुखमोदा स्त्री सुखः सुखकरो मादो यस्याः । सल्लकीवृक्षे

सुखरात्रि स्त्री सुखा सुखकरी रात्रिर्यस्याम् । व्याधिनाशाधास्थायाञ्च दीपान्विताभावास्थायाम् । चतुर्दश्यां १३७१ पृ० दृश्यम् ।

सुखरात्रिका स्त्री सुखा रात्रिर्यस्याः ५त०कप् । दीपान्विताभावास्थायां पूज्यायां लक्ष्म्याम् दीपान्वितासुपक्रम्य "पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका" ज्योतिर्वचनम् । कदाभावे सुखरात्रिरघत्र "आख्याता भूतले देवि ! सुखरात्रि ! नमोऽस्तु ते" इति दीपान्विताभावस्थायां लक्ष्मीपूजनमन्त्रः ।

सुखवर्चक पु० सुख वर्चयति वर्च-णिच्-ण्वुल् । सर्जिकाक्षारे (साजिमाटी) अमरः ।

सुखवर्चस् पु० सुखं सुखकरं वर्चो यस्य । सर्जिकाक्षारे (साजिमाटि) राजनि० । [फलप्रधानवृक्षे रत्नमा० ।

सुखवास पु० सुखः सुखकरो वासो गन्धो यस्य । (तरसज)

सुखवासन पु० सुख सुखकरं वासनं गन्धो यस्य । सुखवासनगन्धद्रव्ये शब्दर० । [सुखकरावासे ।

सुखावार पु० सुखानामावारः । स्वर्गे शब्दर० । कर्म० ।

सुखायत पु०सुखेनायस्यते आ+यस-क्त । विनीताश्वे शब्दमा०

सुखायन पु०सुखेनायते ऽनेन कय-ल्युट् । सुविनीताश्वे शब्दर०

सुखावह त्रि० सुखमावहति जनयति आ+वह–अच्। सुखजनके।

सुखाश पु० सुखा सुखकरी आशा यस्य। १वरुणे सुखेनाश्यते अश–घञ्। २राजतिनिशे वृक्षे ३सुखभोज्ये त्रि० मेदि० भावे घञ्। सुखभोजने स्वार्थे क। सुखाशने, (शशा) राजतिनिशवृक्षे च पु०। [प्रधाने वृक्षे शब्दच०

सुखाशन पु० सुखेनाश्यते अश–कर्मणि ल्युट्। (शशा) फल

सुखोत्सव पु०सुखस्तत्कर उत्सवो यस्मात् ५च०। १पत्यौ त्रिका० कर्म०। २आनन्दकारके उत्सवे पु०।

सुखोदक न० कर्म०। सुखकरे उष्णोदके रत्नमा०।

सुखोर्जिक पु० सुखस्य ऊर्जः वृद्धिरस्यास्य ठन्। सर्जिकाक्षारे (साजिमाटि) राजनि०। [२सुगमे त्रि०

सुग न० सुष्ठु गच्छति निर्याति गम–ड। १शिवायाम् शब्दच०

सुगत पु० सुष्ठु गच्छति जानाति गम–कर्त्तरि–क्त। १बुद्धे अमरः। २सुगतियुते त्रि०।

सुगन्ध पु० सुष्ठु गन्धोऽस्य न वृतः। १गन्धवृणे २चतुर्जीरके रत्नमा० ३नीलोत्पले ४चन्दने राजनि० भावप्र०। ५पन्थिपर्णे ६रक्तशिग्रौ ७गन्धके ८चणके ९भूवृणे च पु० राजनि०। १०सद्गन्धद्रव्ययुक्ते आपणादौ त्रि०। "गन्धस्येत्वं तद्वैवान्यत्रेष्यात्" वक्तेः समवायेनैव गन्धवत्त्वे वृत् आपणस्य च गन्धयुक्तद्रव्याधारत्वात् तत्र न वृत्"ति०को०।

सुगन्धक न० सुष्ठु गन्धोऽस्य कप्। १रक्ततुलस्याम् २गन्धके रत्नमा० ३नागरङ्गे त्रिका० ४ककेटग्रावणि राजनि०।

सुगन्धपत्रा स्त्री सुगन्धं पत्रमस्याः। रुद्रजटायाम् राजनि०

सुगन्धभूतृण न० कर्म०। गन्धवृणे राजनि०।

सुगन्धमूला स्त्री सुगन्धं मूलं यस्याः। १स्थलपद्मिन्याम् २रास्नायाञ्च राजनि०।

सुगन्धा स्त्री सुष्ठु गन्धोऽस्त्यस्याः अच्। १रास्नायां अमरः २शठ्यां शब्दर० ३वन्याककोटग्रावणि ४रुद्रजटायां ५नाकुल्यां ६जतपुष्पायां ७नवमालिकायां ८स्वर्णयूथिकायां ९पृक्कायां १०सक्कयां गन्धपत्रायाम् १२साधव्यां राजनि० १३अनन्तायां १४तुलस्यां १५मातुलुङ्गके च रत्नमा०।

सुगन्धामलक न० सुगन्धैः सर्वौषधिगणैर्युक्तमामलकम्। "सर्वौषधिसमायुक्ताः शुष्कास्त्वामलकत्वचः। यदा तदायं योगः स्यात् सुगन्धामलकाभिधः" राजनि० उक्ते सर्वौषधियुक्ते शुष्के आमलकवल्कले।

सुगन्धि पु० सुष्ठु गन्धः अस्य वा इतच्। १वृद्धदारुके अमरः। २सुगन्धयुक्ते अमरः ३एकवालुके ४सुक्षायां ५कशेरौ ६गन्धवृणे ७धान्यके ८पिप्पलीमूले च राजनि०। स्वार्थे क। कट्टारे शब्दर० गोरक्षणे पुष्करमूले सुरपर्णे उशीरे राजनि०। महाशालौ हेमच०। गन्धके तुरक्षे च पु० राजनि०।

सुगन्धिकुसुम पु० सुगन्धि कुसुमं यस्य। १पीतकरवीरे राजनि० २सद्गन्धयुक्तपुष्पयुते त्रि० ३पृक्षायां स्त्री जटा० कर्म०। ४सुगन्धिके पुष्पे न०।

सुगन्धित्रिफला स्त्री त्रयाणां त्रिफलानां या फलं त्रिफलं सुगन्धं त्रिफलासदृश्याः सादृश्येन अच्। जातीफले २पूगफले ३लवङ्गकोलकाफले च राजनि०।

सुगन्धिमूल न० सुगन्धं मूलमस्य। उशीरे (वना) राजनि०

सुगन्धिमूषिका स्त्री सुगन्धं विरोधिलक्षणया दुर्गन्धिः मूषिका। छछुन्दर्यां (छुछ) राजनि०।

सुगहन त्रि० प्रा०स०। १अतिनिविडे कक्षायां स्त्री रमानाथः।

सुगहनावृति स्त्री कर्म०। यत्नस्थाने श्रादिदर्शनवारणाय निविड़े वहने कक्षायाम् अमरः।

सुगृह पुंस्त्री सुष्ठु गृहं यस्य। १चतुःशालकक्षणे (बाड़ि) हेमच० स्त्री ङीष् कर्म०। २सुन्दरे गृहे न०।

सुगृहीतनामन् पु० सुगृहीते प्रातः काले स्मरणीयं नाम यस्य। प्रातःस्मरणीयनामके पुण्यकीर्त्तौ जने त्रिका०।

सुग्रन्थि पु० सुष्ठु ग्रन्थिर्यस्य। १शोरकवृक्षे राजनि० २सुन्दरग्रन्थियुते त्रि०।

सुग्रीव पु० सुष्ठु ग्रीवाऽस्य। १श्रीकृष्णसख्ये २सूर्य्यपुत्रे वानरेश्वरे च मेदि०। ३सुन्दरग्रीवायुते त्रि० स्त्रियां ङीष् ४कश्यपस्य पत्नीभेदे गरुडपु०।

सुग्रीवेश पु० ६त०। श्रीरामचन्द्रे शब्दरत्ना०।

सुचक्षुस् पु० सुष्ठु चक्षुरिव फलमस्य। १चक्षुःश्रवे जटा० २शोभनलोचनयुक्ते त्रि० प्रा०स०। ३शोभने नेत्रे न०।

सुचक्षुका स्त्री सुष्ठु चक्षुरिव शिखा यस्याः कप्। महाचक्षुःशाके राजनि०।

सुचरित्रा स्त्री सुष्ठु चरित्रं यस्याः। पतिव्रतायां स्त्रियाम् अमरः २सच्चरित्रयुते त्रि० प्रा० स०। ३सच्चरित्रे न०।

सुचर्मन् पु० सुष्ठु चर्मेव वल्कलमस्य। १भूर्जवृक्षे राजनि० २सुन्दरचर्मयुते त्रि०। प्रा०स०। ३सुन्दरे चर्मणि न०।

सुचिल्लका पुंस्त्री सुचिल्लेन कायति कै–क। सुष्ठु चिल्लवर्णो यस्य कप् वा। १सप्तच्छदवृक्षे २चिल्लवर्णे च शब्दर० स्त्रियां ङीष्। ३सुचिल्लवर्णयुते त्रि० स्त्रियां टाप्। [राजनि०

सुचिल्लबीजा स्त्री सुचिल्लं विचिल्लं बीजं यस्याः। विड़ङ्गायां

सुचिरा स्त्री प्रा०स०। १चिर्भटायां राजनि०।२विचिर्ते त्रि०

सुचिर न० प्रा०स०। १अत्यन्तचिरकाले २बहुकाले च २बहुकालभवे त्रि०। [२बहुकालजीविनि त्रि०।

सुचिरायुस् पु० सुचिरं बहुकालिकमायुर्यस्य। १देवे शब्दर०

सुचेलक पु० प्रा०स०। १क्षुच्छवस्त्रे अमरः। सुष्ठु चेलोऽस्य कप्। २क्षुच्छवस्त्रधरे त्रि०। [क०।२सुन्दरे जले न०।

सुजल न० शोभनं जलं यस्मात् ५ब०। १कमले राजनि० प्रा०

सुजल्प पु० "यत्राजवात सगान्धीर्यं कदैन्यं मरुचापलम्। सोत्कराटश्च हरिः स्मृतः स सुजल्पो निगद्यते" उच्चवलभणितलक्षिते वाक्यभेदे।

सुजाता स्त्री सु+जन-क्त। १सुवर्ण्यां राजनि० २मनोज्ञे त्रि०

सुजीवन्ती स्त्री प्रा०स०। स्वर्णजीवन्त्याम् राजनि०।

सु(षु)ट्ट अनादरे चु० उ० सक० सेट्। सुट्टयति ते असुसुट्टत्। षोपदेश एव न्यायः।

सुत पुंस्त्री० सु-क्त। १पुत्रे २तनयायां स्त्री अमरः। सा च २दुरालभायां शब्दच० ४अत्यन्ने ५सञ्जाते ६निष्पीड़िते च त्रि० ७पार्थिवे पु० मेदि०।

सु(सू)तक न० सु-(सु)-भावे क्त सु(सु)तं जननं तस्मादागतम् कन्। १जननाशौचे २अशौचमात्रे च "सुतके मृतके तथा" "मातुश्च सूतकं तत् स्यात्" इति च स्मृतिः।

सुतजीवक पु० सुतं जीवयति सेवनात् जीव-णिच्-ण्वुल्। पुत्रजीवकवृक्षे राजनि०।

सुतनु (नू) पुंस्त्री० सुष्ठु तनुर्यस्याः वा ऊङ्। १नार्य्यां राजनि० "सुतनु! त्यजमनङ्कुरणाय तं" माघः प्रा०ब०। २सुन्दरकायवति त्रि०। प्रा० स०। ३सुन्दरे काये स्त्री ह्रस्वान्तः। ४अत्यन्तसूक्ष्मे त्रि० स्त्रियां वा ङीष्।

सुतपस् पु० सुष्ठु तपति सु+तप-क्विप्। १सूर्य्ये सि०कौ० २अर्कवृक्षे सुष्ठु तपोऽस्य। २मुनौ पु०। ३सुन्दरतपोयुक्ते त्रि०। प्रा०स०। ४सुन्दरे तपसि न०।

सुतपादिका सुताः संहताः पादाः मूलान्यस्याः कप् कापि अत इत्वम्। क्षेमपदीलतायां राजनि०।

सुतराम् अव्य०सु+अतिशयेऽर्थे तरप्-आमु। अवधारितार्थस्य अतिशयौचित्ये "धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः" रघुः। अत्र कातराक्ष्या धेन्वा दृश्यमानत्वेन दयालुत्वस्य अतिशयौचित्यम्।

सुतर्कारी स्त्री सुतर्कं सुच्छ्रुति क्त-अण् ङीष्। देवदालीलतायाम् राजनि०।

सुतर्द्दन पुंस्त्री० सुष्ठु तर्दति रवेण विरुद्धियम् सु+तृद-ल्यु। कोकिले त्रिका० स्त्रियां जातित्वात् ङीष्।

सुतल पुंन० सुष्ठु तलं यत्र। १पातालभेदे पातालशब्दे ४२६६ पृ० दृश्यम्। २अट्टालिकाबन्धभेदे पु० मेदि०।

सुतवत्करा स्त्री सुता वत्करा इव बहुत्वात् यस्याः। रुद्रपुत्रप्रसविन्याम् स्त्रियां त्रिका०।

सुतश्येणी स्त्री सुता निष्पीड़िता श्येणीव। १मूषकपर्णाम् अमरः हेम०। २पुत्रपङक्तौ च।

सुतहिवुकयोग पु० "सुतहिवुकविवर्द्धिलग्नधर्मेष्वमरगुरुर्यदि दानवार्चितो वा। यदशुभखपयाति तच्छुभं स्यात्" ज्यो० उक्ते वैवाहिकलग्नात् सुतपहिवुकाष्टस्थिते ग्रहभेदरूपे योगे। [१शौत्रे ४दौहित्रे च पु०।

सुतात्मजा स्त्री हेम०। १पौत्र्यां २दौहित्र्याञ्च अमरः

सुतिक्त पु० प्रा०स०। १पर्पटे (क्षेतपापड़ा) राजनि० २अत्यन्ततिक्ते त्रि० ३कोषातक्यां स्त्री राजनि० संज्ञायां कन्। पारिभद्रे जटा० निम्बे भूनिम्बे पु० शब्दमा०।

सुतीक्ष्ण पु० प्रा०स०।१शोभाञ्जनवृक्षे जटा०। २श्वेतशोभाञ्जने राजनि०। ३मुनिभेदे च "सुतीक्ष्णमुनिकेतनम्" भट्टिः। ४अत्युग्रे त्रि०।

सुतुङ्ग पु० प्रा०स०। १नारिकेलवृक्षे हारा० ज्योतिषोक्ते ग्रहाणाम् उच्चराशिस्थेषु २अंशभेदेषु च उच्चशब्दे १०५८ पृ० दृश्यम्। २अतिशयोच्चे त्रि०।

सुतेजन पु० सु+तिज-ल्यु। १धन्विनि वृक्षे भावप्र०।

सुतेजस् पु० सुष्ठु तेजोऽस्य। १आदित्यभक्तायाम् राजनि०। २शोभनतेजोयुक्ते त्रि०। ३जैनभेदे पु० हेमच०।

सुतेला स्त्री सुष्ठु तैलं यस्याम् ७ब०। महाज्योतिष्मतीलतायाम् राजनि०। [अमरः। दीर्घादि तलार्थे रुद्रः।

सु(सू)त्रामन् पु० सुष्ठु त्रायते सु+त्रै-मनिन् धृषो०। इन्द्रे

सुत्वन् पु० सुनोति स्म सु-भूते क्वनिप्। १कृताभिषेके कृतयज्ञार्घस्नाने अमरः २कृतसोमनिष्पीड़ने च।

सुद्द शोभायां सौ० प० सक० सेट् इदित्। सुन्दति असुन्दीत्। औदित्वेन न षोपदेशः। [राजनि०।

सुदम्भिका पु० सुष्ठु दम्भं दाढ्योऽस्यास्य ठन्। दम्भानामवृक्षे

सुदण्ड पु० सुष्ठु दण्डो यस्मात् ५ब०। वेत्रे राजनि०।

सुदण्डिका स्त्री सुदण्डयति रोगान् सु+दण्ड+ण्वुल्। १गोरक्ष्याम्। (गोरक्षचाकुले) राजनि० २सुदण्डयुतायां स्त्रियाञ्च।

सुदत् पु० सुष्ठु दन्तोऽस्य वयसि दन्तादेशः। १शोभनदन्तयुक्तवयस्के गजादौ २युवत्यां स्त्री ङीष्। "सुदती-

जनमज्जनार्पितैः" नैष० । वयोभिश्चे त्व सुदत्त इत्येव सुन्दरदत्तवृते नटादौ त्रि० कौ० ।

सुदर्भा स्त्री सु+दभ-कर्मणि घञ् । १इक्षुदर्भाढ्ये राजनि० । सुष्ठु दर्भा यत्र । २सुन्दरकुशयुक्ते त्रि० ।

सुदर्शन पु० सुष्ठु दृश्यते खलर्थे युच् । १विष्णुचक्रे २मेरौ ३जम्बुवृक्षे मेदि० । (पद्मगुलुञ्च) ४नलाभेदे स्त्री रत्नमा० ५न्यग्रोधायाम् ६व्योषधिभेदे च स्त्री ७इन्द्रपुरे न० मेदि० ८अमरावत्यां विश्वः स्त्री ङीप् । ९जिनभेदे हेमच० । सुदर्शनचक्रं च सर्वदेवतेजोभिः शिवेन निर्मांय विष्णवे दत्तं यथोक्तं पद्मपु० उत्तरख० १४५ अ० । "अथ विष्णुसुखा देवाः स्वतेजांसि ददुस्तदा । तान्यैक्यं वै गतानीशो दृष्ट्वा रूक्षान्वचन्मुहुः । तेनाकरोन्महादेवः सहसा शस्त्रमुत्तमम् । चक्रं सुदर्शनं नाम ज्वालामालातिभीषणम् । "ततः प्रीतः प्रभुः प्रादात् विष्णवे प्रवरं वरम् । प्रत्यक्षं तैजसं श्रीमान् दिव्यं चक्रं सुदर्शनम्" वामनपु० ७६ अ० ।

सुदर्शनचूर्ण न० चूर्णरूपौषधभेदे

"त्रिफला रजनीयुग्मं कण्टकारीयुगं घटी । त्रिकटु व्योषिकं मूर्वा गुडूची धन्वयासकः । कटुका पर्पटो मुस्तं त्रायमाणा च वालुकम् । निम्बं पुष्करमूलञ्च मधुयष्टी च वत्सकः । यवानीन्द्रयवो भार्गी शिग्रुबीजं सुराह्वया । वचा त्वक् पद्मकोशीरचन्दनातिविषा बला । शालिपर्णी पृश्निपर्णी विड्ङ्गं तगरं तथा । चित्रकं देवकाष्ठञ्च चव्यं पत्रं पटोलजम् । जीवकर्षभकौ चैव जीवन्तं वंशलोचना । पुण्डरीकञ्च काकोली पत्रकं जाति पत्रकम् । तालीशपत्रमेतानि समभागानि चूर्णयेत् । चूर्णांशं सर्वचूर्णेभ्य क्षिरातं प्रक्षिपेत् सुधीः । एतत् सुदर्शनं नाम चूर्णं दोषत्रयापहम् । ज्वरांश्च निखिलान् हन्यात्तात्र कार्या विचारणा । पृथग्द्वन्द्वागन्तुजांश्च धातुस्थान् विषमज्वरान् । सन्निपातोद्भवांस्यापि मानसानपि नाशयेत् । पीतादीनपि दाहादीन् मोहं तन्द्रां भ्रमं श्रमम् । कासं श्वासञ्च पाण्डुञ्च हृद्रोगं कामलां तथा । त्रिकपृष्ठकटीजानुपार्श्वशूलञ्च नाशयेत् । शीताम्बुना पिबेदेतत्सर्वज्वरनिवृत्तये । सुदर्शनं यथा चक्रं दानवानां विनाशनम् । तद्वज्ज्वराणां सर्वेषां चूर्णमेतत् प्रणाशनम्" । पुष्करमूलाभावे कुष्ठमपि दद्यात् । भार्ग्यभावे कण्टकारीमूलम् । सौराष्ट्रभावे स्फटिकां दद्यात् । तगरालाभे कुष्ठं देयम् । जीवकर्षभयोरभावे विदारीकन्दस्य भागद्वयं दद्यात् । पुण्डरीकं श्वेतकमलम् । काकोल्यभावे अश्वगन्धमूलं दद्यात् । तालीशपत्रकाभावे स्वर्णतालीं प्रदीयते" भावप्र० ।

सुदल पु० सुष्ठु दलान्यस्य । क्षीरमोरटाढ्ये रत्नमा० २शालपर्ण्यां स्त्री राजनि० ।

सुदाम्न् पु० सुष्ठु ददाति दा-मनिन् । १मेघे २पर्वतभेदे (इरावत् पर्वत) मेदि० । सुदाम्नैकादिक् अण् ङीप् सौदामनी तडिति अमरः । २गोपभेदे ४समुद्रे शब्दर० ५ऐरावते गजे त्रिका० पुराणप्रसिद्धे श्रीकृष्णमित्रे ६विप्रभेदे च ७शोभनदातरि त्रि० । राजगृहसमीपस्थे पुनदीभेदे स्त्री रामा० अयो० ७० सर्गः । तत्र वा ङीप् डाप् च । सुदाम्नी सुदामा वा ।

सुदाय पु० सुष्ठु दीयते सु+दा-कर्मणि घञ् । १यौतुकपसादादिना स्त्रियै देये धने । सोदायिकशब्दे दृश्यम् । सुष्ठु दायो यस्य । २पितृप्रभृतौ ज्ञातौ ।

सुदारु पु० सुष्ठु दारु यत्र । पारियात्रपर्वते त्रिका० । [रसा

सुदि अव्य० स्वरा० सुष्ठु दीव्यति सु+दिव-ड । शुक्लपक्षे मनो-

सुदिन न० प्रा० स० । १प्रशस्तदिवसे । २प्रशस्ते त्रि० । [सि० कौ०

सुदिनाह न० सुदिनं प्रशस्तमहः टच्समा० । प्रशस्तदिवसे

सुदीर्घधर्मा स्त्री सुदीर्घः अतिविस्तीर्णो धर्मो गुणविशेषो यस्याः केवलत्वाभावाच्चानिच्समा० डाप् । अस्तमस्तो' शब्दच० सुदीर्घो धर्मो यस्याः । सुदीर्घधर्मेति पाठान्तरं तत्रार्थे । [दृक्षम् । वार्त्ताकुभेदे रत्नमा० ।

सुदीर्घफलिका स्त्री सुदीर्घं फलं यस्याः कप् कापि अत

सुदीर्घा स्त्री प्रा० स० । चीनाकर्कट्याम् राजनि० ।

सुदूर त्रि० प्रा० स० । अतिदूरे अमरः ।

सुद्युम्न पु० वैवस्वतमनुपुत्रे इडाशब्दे ६२१ पृ० दृश्यम् ।

सुधन्वन् त्रि० सुष्ठु धनुर्यस्य अनङ्समा० । १सुन्दरधनुर्तरे । २मान्धातृवंश्ये नृपभेदे हरिवं० १२ अ० । ३आङ्गिरसे मुनिभेदे भा० स० ६६ अ० । ४अनन्ते नागे ५विश्वकर्मणि च पु० मेदि० ।

सुधन्वाचार्य्य पु० "वैश्यान्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च । कारुषश्च विजन्मा च मैत्रः सात्वत एव च" मनूक्ते व्रात्यवैश्यप्रातृसवर्णजाते जातिभेदे । [पु० ङीप् ।

सुधर्मन् स्त्री सु+धृ-मनिन् । १देवसभायाम् २कुटुम्बिनि च

सुधर्मा स्त्री सुष्ठु धर्मो यस्याः अनिच्समा० वा डाप् । देवसभायाम् अमरः । गौरादित्वात् ङीष् सुधर्मीत्यपि तत्र । अमरटीका

सुधा स्त्री सुष्ठु धीयते पीयते अद्यते वा धे धा-वा क । १चूडते अमरः २लेपनद्रव्ये (कलिचुन) ३मूर्वायाम्

द्यु.ह्यां ५ गङ्गायाम् ६ इष्टकायां मेदि० ७ विद्युति ८ रसे ९ जले १० धातुद्राव्ये नानार्थको० ११ हरीतक्याम् १२ सधुनि शब्दच० १३ शालपर्णायाञ्च राजनि० ।

सुधांशु पु० सुधेवाह्लादकाः अंशवोऽस्य । १ चन्द्रे २ कर्पूरे च अमरः । सुधाकरादयोऽप्यत्र । [वासिते तैले राजनि० ।

सुधांशुतैल न० सुधांशुना कर्पूरेण वासितं तैलम् । कर्पूर-

सुधांशुरत्न न० ६त० । मौक्तिके राजनि० तस्य चन्द्रप्रियत्वात्तथात्वम् । अहयन्नशब्दे २७६३ पृ० दृश्यम् ।

सुधाङ्ग पु० सुधेवाप्यायनसङ्गमस्य । १ चन्द्रे त्रिका० २ कर्पूरे च

सुधाजीविन् पु० सुधां लेपनद्रव्यमाजीवति चा+जीव-णिनि पन्नगखण्डे लेपके (राज) त्रिका० । [पात्रे च ।

सुधाधार पु० ६त० । १ चन्द्रे शब्दर० २ कर्पूरे ३ कृष्णतोधारः

सुधानिधि पु० सुधा निधीयतेऽत्र नि+धा-आधारे कि ६त० । १ चन्द्रे शब्दर० २ कर्पूरे च । [द्यु.ह्रीढ्ये ।

सुधापयस् पु०सुधा लेपनद्रव्यमिव शुभ्रं पयो निर्यासोऽस्य ।

सुधाभुज् पु० सुधां भुक्तवान् भुज-भूते क्विप् । देवे हेमच० ।

सुधाभृ(सू)ति पु० सुधा भ्रियते पुष्यते स्रूयते वाऽनेन भृ-सू-वा क्तिच् । १ यज्ञे २ चन्द्रे मेदि० ३ कर्पूरे च ।

सुधामय न० सुधात्मकं लेपनद्रव्यात्मकं वा प्राचुर्य्ये मयट् । २ राजभवने गौडे शब्दर० । अस्तवद्वाह्लादकवाक्यादौ त्रि० स्त्रियां ङीप् ।

सुधामोदक पु० सुधेव मोदयति मुद-णिच-ण्वुल् । १ यवागू-शर्करायाम् २ कर्पूरे च राजनि० ।

सुधावर्षिन् पु० सुधां वर्षति वृष-णिनि । १ चन्द्रे २ कर्पूरे ३ ब्रह्मणि च शब्दर० ४ बुद्धभेदे त्रिका० ।

सुधावास पु० ६त० । १ चन्द्रे २ कर्पूरे च । सुधावा इव वासो गन्धो यस्याः । त्रपुष्पायाम् राजनि० ।

सुधासिन्धु पु० सुधामयः सिन्धुः । अस्तवसमुद्रे राजनि० ।

सुधास्रवा स्त्री सुधां स्रवति स्रु-अच् । १ रुद्रजोटायाम् राजनि० २ उपजिह्वायाञ्च (आलजिभ) त्रिका० ।

सुधाहर पु० सुधां हरति हृ-अच । गरुडे शब्दर० भा० आ० १२ अ० दृश्यम् । सुधाहारकादयोऽप्यत्र । [राघव० ।

सुधिति पुंस्त्री० सु+धा-क्तिच् नं धादेशः । १ कुठारे स्त्रियाँ

सुधी पु० सुष्ठु धीर्यस्य । १ पण्डिते । सुष्ठु धीः प्रा० स० । २ सुन्दरबुद्धौ स्त्री । सुष्ठु ध्यायति सु+ध्यै क्विप् नि० । ३ सुबुद्धियुक्ते त्रि० । [राजनि० ।

सुधूम पु० सुष्ठु धूमः सेनापो यस्य । स्वादुनासगन्धद्रव्ये

सुधोद्भव पु०सुधया सह सुधावा वा उद्भवति उद्+भू-क्विप् । १ धन्वन्तरौ वैद्यराजे समुद्रमन्थने हि तस्य दुग्धाब्धिमथनोद्भूत-सहिततयोपत्तेस्तथात्वम् । २ हरितक्यां स्त्री त्रिका० "पपात बिन्दुर्मेदिन्यामिन्द्रस्य पिबतोऽमृतम् । ततो दिव्या समुत्पन्ना सप्तजातिर्हरीतकी" भावप्र० उक्तेस्तस्याः सुधा-बिन्दुजातत्वात् तथात्वम् ।

सुनन्द न० सुष्ठु नन्दयति सु+नन्द-अच् । बलरामसुखले शब्द-मा० २ श्रीकृष्णपार्श्वचरभेदे भाग० १० । ८६ अ० ३ राजगृह-भेदे च । ४ अत्यानन्दयुक्ते त्रि० शब्दर० ५ गोरोचनायाम्, ६ उमायाम् स्त्री मेदि० एवम् ७ उमासखीभेदे शब्दमा० ८ नार्य्याम् विश्वः ९ अर्कपत्रोद्भवे च (इक्षेरमूच) स्त्री रत्नमा० ।

सुनयन पुंस्त्री० सुष्ठु नयने अस्य । १ मृगे शब्दच० स्त्रियां जातित्वात् ङीष् । २ नार्य्यां स्त्री टाप् । ३ शोभननेत्रयुक्ते त्रि० स्त्रियां बहुचकत्वात् टाप् । [शब्दच० ।

सुनाकृत पु० सुष्ठु न अकृतः नञो नलोपाभावः । कर्पूरके

सुनाभ पु० सुष्ठु नाभिरस्य अच्समा० । मैनाकपर्वते त्रिका० ।

सुनामव्रतदशमी स्त्री व्रतभेदे व्रतशब्दे ५०६६ पृ० दृश्यम् ।

सुनार पु० सुष्ठु नालमस्य लस्य रः । १ सर्षपखण्डे शुनीसन्ये २ कलम्बिङ्गे खगे पुंस्त्री० मेदि० स्त्रियां ङीष् ।

सुनालक पु०सुष्ठु नालेन कायति कै-क । १ वकपुष्पे शब्दच० २ सुन्दरनालयुक्ते त्रि० ।

सुनासिका स्त्री सुष्ठु नासाऽस्यस्य ठन् । १ काकनासायाम् राजनि० । प्रा० स० । २ सुन्दरनासिकायाम् स्त्री ।

सुनासी शी र पु० सुष्ठु नासी(शी)रः चक्षुःसैन्यं यस्य । इन्द्रे अमरः ।

सुनासी शी र्य्य पु० सुना(शी)सीरो देवताऽस्य यत् । यज्ञ-भेदे । क्लु । सुना(शी)सीरीयोऽप्यत्र । स च चातुर्मास्य-यागपर्वभेदः कात्या० श्रौ० ५ । १६ कण्डिकायामुक्तः । कात्यायनशब्दे १८२० पृ० दृश्यम् । "न वैश्वदेवीये न सुनासीर्य्ये" स्मृतिः । [शाके त्रिका० कप् तत्रैव अमरः ।

सुनिष्पन्न न० सुष्ठु निष्पन्नं खञो यस्मात् ५ ब० । (सुसुनि)

सुनिष्टप्त त्रि० सु+निस्+तप-क्त षत्वम् । अत्यन्तोद्दीप्ते

सुनीति स्त्री सुष्ठु नीतिः यस्याः । उत्तानपादस्य पत्नीभेदे १ ध्रुवमातरि । २ सुन्दरनीतियुक्ते त्रि० । प्रा० स० । ३ शोभनायां नीतौ स्त्री । [संक्षिप्त०

सुनीथ त्रि० सु+नी-थक् । १ धर्मशीले उणादिको० २ विप्रे

सुनील न० प्रा० स० । १ मणिभेदे (नीलम) २ दाडिमे राजनि० ३ सुन्दरनीलवर्णे पु० । ४ तद्वति त्रि० । ५ अ०

नस्याम इक्षुपराजितायां ७जरतीवृक्षे च स्त्री राजनि०

सुनीलक पु० सुनील इव कायति कै-क। १नीलभृङ्गराजे २नीलवर्णमात्रे ३नीलवस्त्रे च राजनि०।

सुन्द पु० १दैत्यभेदे उपसुन्दशब्दे १३१७ पृ०दृश्यम्। २वानरभेदे रामा०कि०४७स०। ३राजसभेदे रामा०बा०२०स०।

सुन्दर त्रि० सु+उन्द-अरन्-शक०। १मनोहरे अमरः स्त्रियां ङीप् सा च २उत्तमस्त्रियां शतिपुरसुन्दर्यां देव्याञ्च। ४कामदेवे ५वृक्षभेदे च (सुन्दरि) पु० मेदि० ६योगिनीभेदे स्त्री तन्त्रम्"अयुजोर्यदि सौ जगौ, युजोः। सभरा लगौ यदि सुन्दरी तदाँ छन्दो० उक्ते ७अर्द्धसमे वृत्तभेदे स्त्री। ८०र० तु दृश्यं वियोगिनीशब्दे।

सुपक्व पु० सुन्दरं पच्यते सु+पच-क्त तस्य वः। १शोभनपक्वे शब्दच०। २सुन्दरपरिणते त्रि०। [पाके दृश्यमाते।

सुपक्व त्रि०भुक्तं सत् सुखेन पच्यते पच-कर्मणि खल्। लघु-

सुपत्र न० सुष्ठु पत्रमस्य। १तेजपत्रे शब्दच० २आदित्यपत्रे पु०। ३पक्षिवाहितत्वे राजनि० ४सुन्दरपत्रयुक्ते त्रि०। ५रुद्रजटायां ६शतावर्य्यां ७पाचक्षां दशम्यां ८शालपर्णीञ्च स्त्री राजनि०।

सुपत्रक पु० सुष्ठु पत्रं पत्रोऽस्य कप्। १शोभाञ्जनवृक्षे २कतुकायां स्त्री राजनि० व्यत इत्वम्।

सुपथ पु०सुष्ठु पन्थाः प्रा०स०वा अच्समा०। १सद्धर्मणि २सदाचारे च सुष्ठु पन्था यत्र अच्समा०। ३सुन्दरपथयुक्ते त्रि०।

सुपथिन् पु० प्रा० स० वा समासान्ताभावः। सत्पथे शब्दर० सुपन्थाः। [त्रि०।

सुपथ्या स्त्री प्रा०स०। १श्वेतचिञ्चीवृक्षे राजनि० २शोभनपथ्ये

सुपद्मा स्त्री सुष्ठु पद्यते पद-म। १वचायाम् शब्दच०। प्रा०ब०। २पद्मिन्यां स्त्री।

सुपर्ण पु० सुष्ठु पर्णं पत्रं पक्षो वा यस्य। १गरुडे अमरः २सुन्दरपर्णयुक्ते त्रि० ३स्वर्णचूडवृक्षे पुंस्त्री० स्त्रियां ङीष्। ४कृतमालवृक्षे पु०मेदि०५नागकेशरे पु०त्रिका०। कप् सुपर्णक। आरग्वधे वृक्षे वज्रकवृक्षे जटा० गरुडे च हेमच०। शालपर्ण्यां रेणुकायां पलाश्यां स्वर्णजीवन्त्यां वाकच्यां स्त्री कापि व्यत इत्वम्।

सुपर्णकेतु पु० सुपर्णो गरुडः केतुर्यस्य। विष्णौ त्रिका०।

सुपर्णी स्त्री सुष्ठु पर्णान्यस्याः गौरा०ङीष्। १पक्षिण्यां सुपर्णो गरुडोऽस्त्यस्या अच् गौरा०ङीष्। २गरुडमातरि च मेदि०

सुपर्णीतनय पु० वृत०। गरुडे त्रिका०।

सुपर्वन् पु० सुष्ठ पर्व यस्य। १देवे अमरः २बाणे ३वंशे ४धूमे च मेदि०। प्रा०स०। ५सुन्दरे पर्वणि न०। [राजनि०।

सुपर्वा स्त्री सुष्ठु पर्व अस्त्यस्याः अच् टाप्। श्वेतदूर्वायाम्

सुपाक्य न० सुपाकाय हितम् यत्। १विडलवणे राजनि०।

सुपार्श्व पु० सुष्ठु पार्श्वोऽस्य। १प्लक्षवृक्षे (पाकुड) वृक्षभेदे २सम्पातिपुत्रे विहगभेदे च राजनि० ३सुन्दरपार्श्वान्विते त्रि०।४मेरोरुत्तरस्थदिक्कस्थपर्वते पु०धान्यशैलशब्दे २८८२ पृ०दृश्यम्। संज्ञायां कन्। १गर्दभाण्डवृक्षे पु०अमरः।

सुपिङ्गला स्त्री प्रा०स०। १ज्योतिष्मत्यां २जीवन्त्याञ्च राजनि०

सुपीत न० प्रा० स०। १गर्जरे (गाँजर) राजनि०। २सुन्दरपीतवर्णे पु० ३तद्वति त्रि०। [राजनि०।

सुपुट पु० सुष्ठु पुटमस्य। १कोलकन्दे २विष्णुकन्दे च

सुपुत्रिका स्त्री सुष्ठु पुत्र इव पत्रः यस्याः कप् व्यत इत्वम्। जतुकायाम् (तेलोपोका) राजनि०। [राजनि०।

सुपुष्करा स्त्री सुष्ठु पुष्करमस्याः अच्। स्थलपद्मिन्याम्

सुपुष्प न० प्रा० स०। १जवङ्गकुसुमे शब्दच० २प्रपौण्डरीके ३चाङ्गेरे ४तूले राजनि० ५स्त्रीणां रजसि च "सुपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो" इत्यामालवः। सुष्ठु पुष्पमस्य कप्। (पालताजान्दार) वृक्षे। पाटलायां स्त्री राजनि० व्यत इत्वम्।

सुपुष्पी स्त्री सुष्ठु पुष्पमस्याः ङीष्। १श्वेतापराजितायां २व्रतपुष्पायाम् ३मित्रेयायां ४द्रोणपुष्प्यां ५जीर्णफल्ग्वां राजनि०। ६कदल्यां शब्दच०।

सुपूर पु० सुष्ठु पूर्यते सु+पूर-क। बीजपूरे राजनि०।

सुपूरक पु० सुष्ठु पूरयति पूर-ण्वुल्। वकवृक्षे रत्नमा०।

सुप् स्त्री व्याकरणपरिभाषिते सुप्रभृतौ सुप्पर्य्यन्ते प्रत्ययभेदे।

सुप्त न० स्वप-भावे क्त संप्रसारणम्। १निद्रायां २शयने च ३सुप्तौ हेमच० कर्त्तरि क्त। ४निद्रिते त्रि०।

"क्षुधितस्तृषितः कामी विद्यार्थी द्वारपालकः। भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत्। मक्षिका अमरः सर्पो राजा वै बालकस्तथा। परस्त्रीऽपि च मूर्खश्च सप्त सुप्तान्न बोधयेत्" नीतिसारः।

सुप्ताघातक त्रि० हेत०। हिंसे त्रिका०।

सुप्तजन पु० सुप्तो जनो यत्र। १अर्द्धरात्रे जटा०। कर्म०। २निद्रिते लोके च।

सुप्ति स्त्री स्वप-क्तिन्। १शयने २निद्रायाम् ३क्लृप्ते च "करोति सुप्तिर्जनदर्शनातिथिम्" नैष०। ४स्पर्शतायां ५विस्मये मेदि०।

सुप्रतिभा स्त्री सुष्ठु प्रतिभा यस्याः ५व०। १सुरायाम् प्रा०

स० । २उज्ज्वलायां बुद्धौ । ईव० । ३तद्वति त्रि० ।

सुप्रतिष्ठा स्त्री प्रा०स० । १प्रशंसायाम् । ईच० २तद्वति त्रि० । ३पञ्चाक्षरपादके छन्दोभेदे स्त्री । "प्रतिष्ठान्या सुपूर्विका" इ०र० । [राजनि० । २प्रशंसिते त्रि० ।

सुप्रतिष्ठित पु० सु+प्रति+स्था-क्त षत्वटुत्वे । १चतुष्पथरहिते

सुप्रतीक पु० शुष्ठु प्रतीकं यस्य । ईशानकोणस्थिते दिग्गजे अमरः । २शिवे ३कामे च ४सुन्दराङ्गे त्रि० । प्रा०स० । ४सुन्दरे अङ्गे न० ।

सुप्रभा स्त्री सुष्ठु प्रभा यस्याः । १अग्निजिह्वाभेदे तन्त्र० २वाकुच्यां राजनि० । ३सुन्दरदीप्तियुते त्रि० । प्रा० स० । ४शोभनायां दीप्तौ स्त्री ५शुक्लवर्णे हेमच० । ६सरस्वतीनदीभेदे स्त्री सरस्वतीशब्दे ५२४६ पृ० दृश्यम् ।

सुप्रभात न० प्रा० स० । १शुभसूचकप्रातःकाले २तत्र पाठ्यमाङ्गल्यवाक्ये च । [व्यासपाटवयुक्ते हेमच० ।

सुप्रयुक्तशर पु०सुप्रयुक्तः शरो येन । शीघ्रहस्ते बाणमोचनकुशले

सुप्रयोगविशिख पु० सुष्ठु प्रयोगो निक्षेपो यस्य तादृशो विशिखो यस्य । शीघ्रहस्ते बाणमोक्षणशीघ्रतारूपपाटवयुक्ते भरतः ।

सुप्रलाप पु० सु+प्र+लप-घञ् । सुवचने अमरः ।

सुप्रसन्न पु० सु+प्र+सद-क्त । १कुबेरे शब्दच० २अतिप्रसादयुक्ते त्रि० । संज्ञायां कन् । कृष्णार्जके पु० राजनि० ।

सुप्रसरा स्त्री सु+प्र+सृ-अच् । १प्रसारिण्यां लतायाम् राजनि० । २विस्तारयुक्ते त्रि० ।

सुप्रसाद पु० सुखेनानायासेन प्रसादो यस्य । १शिवे त्रिका० प्रा०स० । २सुन्दरप्रसन्नतायाम् ।

सुफल पु० सुष्ठु फलमस्य । १दाडिमे २बदरे ३सूरे ४कर्णिकारे राजनि० ५कपित्थे शब्दच० ६सुन्दरफलयुते त्रि० ७इन्द्रवारुण्यां ८कुष्माण्ड्यां ९कदल्यां १०कपिलद्राक्षायां ११काश्मर्य्यां च स्त्री राजनि० ।

सुफेन न० प्रा० स० । सुष्ठुफेने राजनि० ।

सुबन्ध पु० सुखेन बध्यतेऽसौ बन्ध-घञ् । तिलवृक्षे शब्दच० ।

सुभग पु० सुष्ठु भगः माहात्म्यादिः यस्य । १चन्द्रमसि २शोभने ३रक्ताक्षाने ४टङ्कणे च राजनि० ५सुदृश्ये ६प्रियदर्शने त्रि० । ७शोभनैश्वर्य्ययुक्ते च त्रि० । ८कैवर्त्तीमुस्तायां ९श्यामलतायाम् १०हरिद्रायां ११नीलदूर्वायां १२तुलस्यां १३प्रियङ्गौ १४कस्तूर्य्यां १५स्वर्णकदल्यां स्त्री राजनि० १६वनमल्लिकायां शब्दर० १७पतिप्रियायां स्त्रियां च स्त्री । सुभगाया अपत्यं ढक् ढिनङ्च । सौभागिनेय तदपत्ये पुंस्त्री०

सुभगम्भावुक त्रि० अतिशयेन सुभगः सुभगो भवति भू-ण्वुल् सुक् च सुम् च । प्रियम्भविष्णौ त्रि०कौ० । [अमरः ।

सुभगासुत पु० सुभगायाः पतिप्रियायाः सुतः । सौभागिनेये

सुभङ्ग पु० सुखेनानायासेन भज्यते निःसारत्वात् सु+भञ्ज-कर्मणि घञ् । नारिकेलवृक्षे अटा० ।

सुभट पु० प्रा०स० । सुन्दरयोद्धरि ।

सुभद्र पु० शुष्ठु भद्रं यस्मात् । १विष्णौ शब्दमा० । ईव० । २राजभेदे हेमच० ३शोभनमङ्गलयुते त्रि० । ४श्यामालतायाम् स्त्री शब्दच० । ५श्रीकृष्णस्य भगिन्यां च स्त्री । कप् । सुभद्रक देवरथे शब्दर० बिल्ववृक्षे च पु०शब्दच० ।

सुभद्राणी स्त्री सुभद्रं सुमङ्गलमानयति या+नी-ड गौरा० ङीष् यत्वम् । लायन्तीलतायाम् रत्नमा० ।

सुभद्रेश पु० ईत० । अर्जुने हेमच० । सुभद्रापत्यादयोऽप्यत्र ।

सुभाञ्जन पु० सुष्ठु भाति भा-क कर्म० । शोभाञ्जनवृक्षे द्विरूपकोषः । [प्रचुरराज्ञयुते देशकालादौ ।

सुभिक्ष त्रि० सुखेन लभ्या भिक्षा यत्र प्रभौप्राचुर्यात् ।

सुभिक्षा स्त्री शुष्ठु भिक्ष्यते याच्यतेऽसौ सु+भिक्ष-अ । धान्यपुष्पिकायाम् (धाँइफुल) अमरः ।

सुभीरक पु० सुष्ठु भीः सुभीः तामीरयति विरचिषम् ईर-ण्वुल् । पलाशवृक्षे त्रिका० ।

सुभूति पु० सुष्ठु भवति सु+भू-क्तिच् । १पर्वतभेदे प्रा०स० । २सुन्दरविभूतौ स्त्री । ईव० । ३तद्वति त्रि० कप् । ४शिल्पवृत्तौ [चक्रवर्त्तिभेदे हेमच० । पु० राजनि० ।

सुभूम पु० सुष्ठु भूमिरस्य बंचसमा० । कार्त्तवीर्य्ये जिनान्तरे

सुभृश न० सुष्ठु भृशम् । १अतिशये दार्ढ्ये । २तद्वति त्रि० ।

सुभ्रु(भ्रू) स्त्री सुष्ठु भ्रुर्यस्याः वा ङीष् । १नार्य्याम् २सुन्दरभ्रुयुक्ते त्रि० ।

सुम न० सुष्ठु मीयतेऽदः सु-मा-घञर्थे क । १पुष्पे भरतः । सु-मक् । २चन्द्रे ३कर्पूरे ४नभसि च पु० धरणः ।

सुमङ्गला स्त्री सुष्ठु मङ्गलं यस्याः ५बहु० । (माकड़कांता) वृक्षे रत्नमा० । २सुमङ्गलयुक्ते त्रि० स्त्रियां ङीष् । "सुमङ्गलीरियं वधूः" इति श्रुतिः ।

सुमति त्रि०सुष्ठु मतिर्यस्य । १शोभनबुद्धियुते २कल्किभार्य्यां विष्णुयशसः पत्न्यां स्त्री । ३कर्कन्मातरि च स्त्री हेमच० प्रा०ब० । ४इन्द्रायां बुद्धौ स्त्री । [वृक्षे त्रिका०

सुमदन पु०सुष्ठु मदयति कोकिलान् मद-णिच्-ल्यु । आम्रवृक्षे

सुमदात्मजा स्त्री सुमद आत्मज इवाच्छा० । आम्रमञ्जरीमु त्रिका०

सुमधुर न० प्रा०स० । १अत्यन्तप्रियवाक्ये अमरः २सान्त्वने

वाक्ये च । २ऋतिमधुररसे २तद्युक्ते त्रि०४जीवशाके पु० राजनि० । [शब्दमा० ३मनोहरे त्रि० शब्दर०।

सुमन पु० सुष्ठु मन्यते मन-अप् । १गोधूमे अमरः । २धुस्तूरे

सुमनःपत्रिका स्त्री सुमनसः जात्या इव पत्रमस्याः कप् अत इत्त्वम् । जातीपत्रिकायाम् राजनि० ।

सुमनःफल पु० सुष्ठु मनो यस्मात् तादृक् फलमस्य । १कपित्थे शब्दच० । ६त०। २जातीफले न०।

सुमनस् न० सुष्ठु मनो यस्मात् यस्य वा । १पुष्पे अमरः । ब०व०इत्यन्ये "किं सेव्यते सुमनसां मनसापि गन्धः" इति रघुगङ्गाधरः । २मालत्यां स्त्री अमरः ३प्रशस्तचित्तयुक्ते त्रि०। प्रा० ब० । ४प्रशान्ते मनसि न० । ६ब० । ५देवे पु०अमरः ।६पण्डिते मेदि० ७धूतिकरञ्जे शब्दमा० ८निम्बे ९महाकरञ्जे १०गोधूमे ११यतपत्त्रां स्त्री राजनि० ।

सुमना स्त्री सुष्ठु मन्यते मन-अप् । मालतीवृक्षे शब्दर० ।

सुमनोरजस् न० ६त० । पुष्पधूलौ परागे अमरः ।

सुमन्तु पु० सु+मन+तुन् । १सथर्ववेदाध्यायिनि व्यासशिष्ये मुनिभेदे "अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः" भाग० १।४च०। अतिशयितो मन्तुरपराधोऽस्य । २अत्यन्तापराधयुते त्रि० । २दशरथसारथौ राजा०। ४कश्यपकिरेवस्य ज्येष्ठभ्रातरि कश्यपिमु० ।

सुमित्रा स्त्री १लक्ष्मणमातरि दशरथपत्नीभेदे । २सुन्दरमित्रयुक्ते त्रि० । ३अर्कवृक्षे पु० हेमच०। ४सूरथराजपुत्रे रूपभेदे विष्णुपु० । ४अ०२२च० ।

सुमुख पु० सुष्ठु सुखमस्मात् अस्य वा । १शाकभेदे २मन्त्रिभेदे ३नागभेदे ४गरुडपुत्रभेदे च शब्दर०। ६चित्राङ्गदे ७वर्करे वनवर्बरिकायाञ्च राजनि० । ८सुप्रसन्नवदने १०मनोहरे च त्रि० । स्त्रियां ङीप् । ११नक्षत्रभेदे शब्दर० ।

सुमुष्टि पु० सु+मुष्-कर्त्तरि क्तिच् । विषमुष्टिद्यूते राजनि०।

सुमूल पु०सुष्ठु मूलमस्य । १श्वेतशोभाञ्जने राजनि०।२शालपर्ण्यां ३पृश्निपर्ण्यां च स्त्री राजनि० टाप् । ४सुन्दरमूलयुक्ते त्रि० । संज्ञायां कन् । गर्जरे न० राजनि० ।

सुमेखल पु० सुष्ठु मेखला यस्मात् ५ब० । १मुञ्जतृणे राजनि० ६ब० । २सुन्दरमेखलान्विते त्रि० ।

सुमेधस् स्त्री सुष्ठु मेधा यस्याः ५ब०असिच्समा०। १ज्योतिष्मत्यां लतायाम् । ६ब०। २सुन्दरमेधायुक्ते त्रि०मेदि०।

सुमेरु पु० प्रा० स० । १पर्वतभेदे अमरः । जम्बुद्वीपशब्दे ३०४६ पृ० दृश्यम् । २ऋषभाद्यौषधिस्थगुटिकायाञ्च तन्त्रम् ।

सुल्वलुण्ठ पु० कर्पूरके शब्दच० । [वाग्मिनि पु० ब०व० ।

सुम्भ(ह्म) पु० शुम्भ-अच् पृषो० । १देशभेदे शब्दर० २तद्देशभ-

सुयासुन पु० यस्यायां इदम् सुष्ठु, यासुनं प्रियत्वेनास्त्यस्य अच् । १विष्णौ २शत्रुराज ३प्रासादविशेषे ४पर्वतभेदे हेमच० । ५मेघभेदे च मेदि० ।

सुयोधन पु० सुखेन युध्यतेऽसौ सु+युध-युच् । धृतराष्ट्रराजपुत्रभेदे दुर्योधने त्रिका०। [२सुखेन १शोभनं युध्यते च ।

सुर पु० सुष्ठु राति ददात्यभीष्टं सु+रा-क । १देवे अमरः ।

सुरकृता स्त्री ३त० । १गुडूच्याम् राजनि० २देवनिर्मिते त्रि०

सुरक्तक पु० सुरक्त इव कायति के-क । १कोशाम्बे २रक्तगैरिके च राजनि० ।

सुरगुरु पु० ६त० । बृहस्पतौ त्रिका० ।

सुरग्रामणी पु० सुराणां ग्रामणीः नेता । इन्द्रे त्रिका० ।

सुरङ्ग न० सुष्ठु रङ्गो यस्मात् ५ब० । १किङ्किले २पत्तङ्गे (वर्णकमाटि)प्रा०ब०।३नागरङ्गे ४गर्त्तभेदे (खिँध) च पु० राजनि० । [राजनि०।

सुरङ्गधातु पु० सुष्ठु रङ्गो रञ्जनं यस्मात् ५ब० कर्म०। गैरिके

सुरङ्गा स्त्री सु-अङ्गच् नि० (खिँध) सञ्ज्ञौ टाप् । २कैवर्त्तिकायाम् राजनि० ।

सुरङ्गिका स्त्री सुष्ठु रङ्गो रञ्जनं यस्याः ५ब० कप् अत इत्त्वम् । १कूर्वायाम् राजनि० ।

सुरङ्गी स्त्री सुष्ठु रङ्गो यस्याः ५ब० गौरा० ङीष् । १काकनासायाम् राजनि० । २रक्तगोभाञ्जने रत्नमा० ।

सुरज्येष्ठ पु० ७त० । बृहस्पतौ ब्रह्मणि अमरः ।

सुरञ्जन पु० सुरञ्जयति सु+रञ्ज-णिच्-ल्यु । सुधाके त्रिका०

सुरत न० सु+रम-भावे क्त । १स्त्रीपुंसयोः सङ्गमरूपे रमणभेदे मेदि० सु-रम-कर्त्तरि क्त । २अत्यन्तरते त्रि० ३दयायाञ्च वारसुन्दरी ।

सुरततालौ स्त्री सुरतं तालयति तल-णिच्-ण्वुल् गौरा० ङीष् । १दूत्यां २शिरःस्थलि च मेदि० ।

सुरता स्त्री सुराणां समूहो भावो वा तल । १देवसमूहे २देवत्वे च मेदि० सु+रम-क्त । ३अत्यन्तरतायां स्त्रियां स्त्री ।

सुरताङ्ग पु० सुरतस्याङ्गमत्र । सुरतप्रस्तावे राजनि०।

सुरतोषक पु० ६त० । १कौसुम्भशाके शब्दर० । २देवतोषके त्रि०

सुरथ पु० सुष्ठु रथोऽस्य । चन्द्रवंश्ये नृपभेदे "सुरथो नाम राजाऽभूत्" देवीभा०। २सुन्दररथयुक्ते त्रि० ।

सुरदारु न० सुरप्रियं सुरलोकपर्व्वतस्थशुष्कितं वा तच्छब्दात् दारु । देवदारुवृक्षे रत्नमा०।

सुरदीर्घिका स्त्री सुराणां दीर्घिकेव । गङ्गायाम् अमरः सुरवाप्यादयोऽप्यत्र ।

सुरदुन्दुभी स्त्री सुराणां दुन्दुभीवाह्लादकत्वात् । तत्तस्याम् राजनि० । [राजनि० ।

सुरद्रुम पु० सुरप्रियो द्रुमः । १देवदारुणि २देवतरौ च

सुरद्विष् पु० सुरान् द्वेष्टि द्विष-क्विप् । १असुरे अमरः २देवद्वेष्टरि त्रि० ।

सुरधनुस् न० ६त० । इन्द्रधनुषि जटाधरः ।

सुरधूप पु० सुरप्रिया धूपः । राले (धुना) राजनि० । [ऽप्यत्र

सुरन(ण)दी स्त्री ६त०वा णत्वम् । गङ्गायां सुरधुन्यादयोऽप्यत्र ।

सुरनन्दा स्त्री नदीभेदे शब्दर० ।

सुरनाल पु० सुरप्रियं नालमस्य । देवतरुवृक्षे राजनि० ।

सुरनिम्नगा स्त्री ६त० । गङ्गायाम अमरः ।

सुरनिर्गन्ध न० सुरेषु निर्गन्धम् । पलके राजनि० ।

सुरपति पु० ६त० । इन्द्रे अमरः सुरेशादयोऽप्यत्र ।

सुरपथ पु० सुराणां पन्था इव गत्याधारत्वात् । आकाशे हेमच० । [राजनि० ।

सुरपर्ण न० सुरप्रियं पर्णमस्य । सुगन्धिके ओषधिभेदे

सुरपर्णिक पु० सुरप्रियं पर्ण यस्य कः । तदस्यास्य ठक् । १सुरपुन्नागे राजनि० २पुन्नागे स्त्री हेमच० । [राजनि०

सुरपर्णी स्त्री सुरप्रियं पर्ण यस्याः ङीष् । पलाशीवृक्षे

सुरपादप पु० ६त० । कल्पवृक्षे सुरवृक्षादयोऽप्यत्र ।

सुरपुन्नाग पु० सुरप्रियः पुन्नागः । पुन्नागभेदे राजनि० ।

सुरपुरी स्त्री ६त० । अमरावत्यां त्रिका० सुरनगर्यादयोऽप्यत्र

सुरप्रिय पु० ६त० । १अगस्त्यवृक्षे राजनि० । २बृहस्पतौ ३इन्द्रे च । ४जात्यां ५स्वर्णकदल्यां च स्त्री राजनि० ।

सुरभि न० सु+रभ-इन् । १स्वर्गे २गन्धद्रव्ये च शब्दर० ३सुन्दरे ४साधुगन्धे पु० धरणिः ५सुगन्धे अमरः ६चम्पके ७जातीफले ८वसन्ते स्त्री तो मेदि० "स सुरभिं सुरभिं सुमनोभरैरिति" माघः । ९यमीवृक्षे १०कदम्बे ११कक्षगुग्गुलौ १२गन्धवृक्षे १३वकुलवृक्षे १४राले राजनि० १५चैत्रे मासि १६प्रियङ्गौ धरणिः १७गन्धफले पु० शब्दर० । १८शल्लक्यां १९रुद्रजटायां २०मातृकाभेदे २१गवि २२सु(सु)रायां स्त्री मेदि० २३यवमालिकायां २४तुलस्यां २५द्राक्षायां स्त्री राजनि० २६पृथिव्यां २७गवां मातरि च स्त्री वा ङीष् । २८सङ्गन्धयुक्ते २९मनोहरे त्रि० मेदि० ३०विख्याते ३१धीरे च त्रि० धरणिः । सुरभिश्च कश्यपपत्नीभेदः । "सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा" हरिवं० ३अ० कश्यपपत्नीकथने । तस्याश्च द्वे कन्ये रोहिणी गन्धर्वी च तथा दुहितरौ राजन् ! सुरभिर्वै व्यजायत । रोहिणी चैव भद्रं ते गन्धर्वी च रजस्वलाम् । रोहिण्यां जज्ञिरे गावः गन्धर्व्यां वाजिनः सुराः" भा० आ० ६६अ० तस्याश्च रोहिणीरूपयोर्महाजननात् गोमातृत्वेन । ब्रह्मवै० प्र० ४४अ० "गवामधिष्ठातृदेवो गवामाद्या गवां प्रसूः । गवां प्रधाना सुरभी गोलोके सा समुद्भवा" इति गवाद्यात्वसूक्तम् । सर्वतः स्त्रियां वा ङीष् । [कदल्यां वृक्षे राजनि० ।

सुरभिका स्त्री सुरभि+स्वार्थे क । (चाँपाकला) स्वर्णचम्पके ।

सुरभित्वच् स्त्री सुरभिः त्वक् यस्याः । स्थूलैलायां राजनि०

सुरभिदारु पु० सुरभि दारु यस्य । सरलवृक्षे राजनि० ।

सुरभिपत्रा स्त्री सुरभि पत्रमस्याः । १जम्बूवृक्षे २राजजम्बूवृक्षे च राजनि० । [चिनि) शब्दर० ।

सुरभिवल्कल न० सुरभि वल्कलमस्य । १गुडत्वचि (दारुसुरभिस्रवा स्त्री सुरभिः स्रवो निष्यन्दो यस्याः । यष्ट्यां राजनि० सुरभिरसाप्यत्र ।

सुरभूरुह पु० सुरप्रियः भूरुहः देवदारुवृक्षे भावप्र० ।

सुरमृत्तिका स्त्री सुरप्रिया मृत्तिका । तत्तस्यां (वर्णकमाटि) राजनि० ।

सुरमेदा स्त्री सुरप्रियो मेदोऽस्याः । महामेदायाम् राजनि०

सुरर्षि पु० सुरप्रियः ऋषिः । नारदादिषु ऋषिषु अमरः । ऋषिशब्द १४५२ पृ० दृश्यम् ।

सुरलता स्त्री सुरप्रिया लता । महाज्योतिष्मत्याम् राजनि०

सुरला स्त्री सुरान् लाति सेवकत्वेन ला-क । १गङ्गायां हारा० । २सुरलाख्ये नदीभेदे शब्दर० ।

सुरलोक पु० सुराणां लोकः वासस्थानादिः । १स्वर्गे अमरः । सुरभुवनादयोऽप्यत्र । [अमरः ।

सुरवर्त्मन् न० सुराणां वर्त्मेव गत्याधारत्वात् । आकाशे

सुरवल्लभा स्त्री ६त० । श्वेतदूर्वायाम् राजनि० ।

सुरवल्ली स्त्री सुरप्रिया वल्ली । तत्तस्याम् राजनि० ।

सुरवैरिन् स्त्री ६त० । १असुरे शब्दर० । २सुरविरोधिनि त्रि० सुररिपुशब्दतयोऽप्यत्र ।

सुरशत्रु पु० ६त० । असुरे हला० ।

सुरशाखिन् पु० ६त० । कल्पवृक्षे जटा० ।

सुरश्रेष्ठा स्त्री सुरेषु श्रेष्ठा । ब्राह्म्यां राजनि० ।

सुरस न० सुखेन रस्यते सु+रस-घञर्थे कर्मणि क । १क्षीरे २रसे ३गन्धतृणे ४सिन्धुवारे पु० शब्दर० । ५मोचरसे

राजनि० । मा० स० । ६स्वादौ रसे । ६ब० । ७सुस्वादुरसयुक्ते त्रि० । ८तुलस्यां पुंस्त्री० । ९राज्ञायां १०नागमातरि स्त्री मेदि० । ११मिश्रेयायां शब्दच० । १२ब्राह्मयां रत्नमा० । १३सङ्घाशतावर्य्यां च स्त्री राजनि० । नागमाता च कश्यपपत्नीभेदः । "अदितिर्दितिर्दनुश्चैव कालिष्टा सुरसा खसा" तत्पत्नीकथने हरिवं० २अ० । "सुरसायाः सहस्रन्तु सर्पाणामसितोजसाम् । अनेकशिरसां तस्यां खेचराणां महात्मनाम्" । तत्राध्याये तस्या नागमातृत्वमुक्तम् । "सुरसाजनयच्चागान् कद्रूः पुत्रांश्च पन्नगान्" भा० आ० ६६अ० । तेनानेकशिरः नागप्रसूत्वं सुरसायाः कद्रूस्तु सर्पमातृत्वमिति भेदः ।

सुरसाष्ट पु० सुरसाभिरष्टः व्याप्तः अश-व्याप्तौ कर्मणि क्त । "निर्गुण्डी तुलसी ब्राह्मी वृहती कण्टकारिका । पुनर्नवेति सुनिभिः सुरसाष्टः प्रकीर्त्तितः" शब्दचन्द्रिकोक्ते वृक्षभेदव्याप्ते औषधभेदे । [गिनीभेदे तन्त्रसा० ।

सुरसुन्दरी स्त्री सुरप्रिया सुन्दरी । १मेनकाख्यप्सरःसु २योषित्सु ।

सुरा स्त्री सुर-क सु-रक् वा । १मद्ये २चषके च मेदि० । सुरा च मद्यभेदः मद्यशब्दे ४७२६ पृ० दृश्यम् । सोत्रामणीशब्दे वैदिकमार्गेण तदभिषवप्रकारादिर्दृश्यः ।

सुराकर पु० सुराया आकरः । मद्योत्पत्तिस्थाने ।

सुराचार्य्य पु० वृत्तः । बृहस्पतौ अमरः ।

सुराजक सुष्ठु राजते राज-ण्वुल् । १भृङ्गराजे शब्दच० । वृक० कप् । सुन्दरराजान्विते त्रि० ।

सुराजन् पु० सुष्ठु पूजितो राजा न तत्समा० । १सुन्दरे राजनि० वृक० । २सुन्दरराजस्वामिके देशे त्रि० ।

सुराजीविन् पु० सुरां सुराविक्रयमाजीवति आ+जीव णिनि । शौण्डिके हेमच० ।

सुराप त्रि० सुरां पिबति पा-क । २मद्यपानकारके "सुरापः श्यावदन्तकः" इति भाग० । [दयोऽप्यत्र

सुरापगा स्त्री वृत्त० । गङ्गायाम् जटा० । सुरतरङ्गिण्यादयोऽप्यत्र

सुरापान(ण) न० सुरा पीयतेऽनेन पा-करणे ल्युट् वा णत्वम् । १अवदंशे (चाटनी) सुरायाः पानं येषां णत्वम् । २पाच्यदेशस्थे जने पु०शब्दच० । भावे ल्युट् । ३तत्पाने न० वा णत्वम् । [सुराद्यभागोऽप्यत्र

सुराभाग पु०सुराया भागः षष्ठभागः । सुराषष्ठे शब्दच० ।

सुराभ्रगड पु० वृत्त० । सुराया षष्ठभागे अमरः

सुरारि पु० वृत्त० । असुरे शब्दर० ।

सुरारिहन्तृ पु० सुराणामरिं हन्ति हन-तृच् । विष्णौ ।

सुरार्हं न० सुरान् देवानर्हति अर्ह-अण् । हरिचन्दने राजनि० ।

सुरालय पु० वृत० । १सुमेरुपर्वते अमरः । २स्वर्गस्थाने च ।

सुराष्ट्र पु० वृव० । देशभेदे (सुरट) । सोऽभिजनोऽस्य तस्य राज्ञो वा अण् । सौराष्ट्र पित्रादिक्रमेण तद्देशवासिनि जने तद्भूमे च बहुषु अर्थो लुक् । तत्र भवः अण् । तद्देशभवे त्रि० स्त्रियां ङीप् ।

सुराष्ट्रज न० स्त्री० सुराष्ट्रदेशे जायते जन-ड । १सुवरिकायाम्अमरः २कृष्णसुक्ते राजनि० । ३विषभेदे च पु० शब्दच० । ४तद्देशजातमात्रे त्रि० ।

सुराह्व पु० सुरपूर्विका आह्वा यस्य सुरान् आह्वयति गन्धेन वा आ+ह्वे-क वा । १देवदारुवृक्षे शब्दर० । २भद्रबले ३हरिद्रावृक्षे च राजनि० ।

सुरुङ्ग पु० सु+रुज-कङ्गच् पृषो० । १शोभाञ्जनवृक्षे शब्दर० । २सुरङ्गायां (सिँध) स्त्री जटा० ।

सुरुङ्गाहि पु० सुरङ्गायामहिरिव । सन्धिचोरे शब्दर० ।

सुरूप न० सुन्दरं रूपमस्य । १तुले राजनि० । २सुन्दररूपयुते त्रि० सुरूपाश्च प्रसिद्धतया कतिचित् कविक० उक्ता यथा "सुरूपाश्चैव विख्याता नकुलश्च पुरूरवाः । कामदेवश्च शाम्बश्च विख्याता वाग्मिनौ तथा । नलकूबरः सुरूपेषु लोकेषु हि मता इमे"३पर्य्यायेषु पु०जटा० । ४शालपर्ण्यां ५भाषायांम् च स्त्री राजनि० प्रा०स० । ६सुन्दरे रूपे न० ।

सुरूहक पु० सु+रुह-कुन् पृषो० । गर्दभाण्डे हेमच० ।

सुरेज्य पु० इज्यते पूज्यते यज-क्यप् वृत० । १बृहस्पतौ २वत्सरस्यां स्त्री राजनि० ।

सुरेन्द्र पु० सुरेषु इन्द्र ऐश्वर्य्ययुतः । शूरराजे इन्द्रे ।

सुरेन्द्रजित् पु० सुरेन्द्रं जितवान् जि-भूते क्विप् । मेघनादे कला० तत्कथा भा० आ० २२अ० दृश्या ।

सुरेभ न० सु+रेभ-अच् । रङ्गे धातौ (राँग) त्रिका० ।

सुरेवट पु० सुष्ठु रेवटः सु+रेव-अटन् वा । रामपूगे त्रिका० ।

सुरेश्वर पु० सुराणामीश्वरः । १रुद्रे जटा० २इन्द्रे च । ३स्वर्गगङ्गायां स्त्री शब्दर० ४दुर्गायाञ्च ङीप् ।

सुरेष्ट पु० वृत० । १शाले वृक्षे २रुरुपुन्नागे ३शिवमल्लिकायाम् ४नक्षत्रायां स्त्री राजनि० ।

सुरोत्तम पु० सुरेषूत्तमः । १सूर्य्ये २देवश्रेष्ठे त्रि० ।

सुरोत्तर पु० सुरेषु तत्पूजनेष्वुत्तरः श्रेष्ठः । चन्दने शब्दच० ।

सुरोद पु० सुरेव उदकमस्य उदादेशः । सुराषष्ठे जटा० ।

सुलभ त्रि० सुखेन लभ्यते सु+लभ-कर्मणि । १अना-

यासलभ्ये २माषपर्णाञ्च ३धूमपत्रायाञ्च स्त्री राजनि० ।

सुलोचन पुं स्त्री०सुष्ठु लोचनमस्य । १हरिणे राजनि० स्त्रियां ङीष् । २सुन्दरनेत्रयुक्ते त्रि०स्त्रियां बह्वृचकत्वात् टाप् ।

सुलोमशा स्त्री सुलोमानि सन्त्यस्याः श । काकजङ्घाद्वये राजनि० । २सुलोमयुक्ते त्रि० ।

सुलोमा स्त्री सुष्ठु लोमान्यस्याः डाप् । १ताम्रवल्ल्याम् २मांसच्छदायाञ्च राजनि० ।

सुलोहक न० प्रा०स० । पित्तले हेमच० ।

सुलोहिता स्त्री प्रा०स० । १अग्निजिह्वाद्वये शब्दमा० २सुरक्तवर्णे पु० ३तद्वति त्रि० स्त्रियां ङीष् तस्य नत्वञ्च ।

सुवक्त्र पु०सुष्ठु वक्त्रं सेवनात् यस्मात् । १वनवर्ब्यायाम् राजनि० ह्रस्व० २सुन्दराननयुक्ते त्रि० प्रा०स० । ३मनोहरे मुखे न० ।

सुवचन न० सु+वच-भावे ल्युट् । १सुप्रलापे शोभनोक्तौ अमरः । सुच्यतेऽनौ सु+वच-कर्मणि ल्युट् ङीप् । २शुभस्तुत्याम् देवीभेदे स्त्री । [सुन्दरवचने न० ।

सुवचस् त्रि० सुष्ठु वचोऽस्य । १वाग्मिनि जटा० । प्रा०स० ।

सुवन पु० सु-क्यु । १सूर्य्ये २वङ्गे च उणादिको० प्रा०स० । ३रम्ये वने न० । [चारे राजनि० ।

सुवर्चक पु०सुष्ठु वर्चयति सु+वर्च-णिच्-ण्वुल् । सर्जिकाक्षारे

सुवर्चला स्त्री सुष्ठु वर्चयति सु+वर्च-णिच-कनच् । १सूर्य्यभार्य्यायाम् त्रिका० २जतूकायाम् रत्नमा० ३आदित्यभक्तायां ४ब्राह्मण्याञ्च राजनि० कच् । सुवर्च देशभेदे पु०

सुवर्चिक पु० सुवर्चः देशभेदः अस्त्यस्याकरत्वेन ठन् । १सर्जिकाक्षारे २जतूकायां स्त्री राजनि० ।

सुवर्चिन् पु० सु+वर्च-णिच्-णिनि । सर्जिकाक्षारे राजनि०

सुवर्ण न० सुष्ठु वर्णोऽस्य । १स्वनामख्याते धातुभेदे अमरः २हरिचन्दने मेदि० ३स्वर्णगैरिके रत्नमा० ४धने हेमच० ५नागकेसरे राजनि० । "कर्षं सुवर्णस्य सुवर्णमंज्ञम्" इत्युक्ते कर्षमिते ६काञ्चने पु०नीला० ७यज्ञभेदे दधस्तूरे ८कणगुग्गुलौ च पु० राजनि० । सुष्ठु वर्णो रूपमक्षरं वाऽस्य । १०सुरूपे ११सुन्दराक्षरयुक्ते च त्रि० । "न सुवर्णमयी लङ्का नूनं वासपि तादृशी तथा" नैष० । १२कर्षपरिमाणे वैद्यक० ।

अग्निरेतस् शब्दे ५६ पृ० कनकशब्दे च १६४४ पृ० सुवर्णधातूत्पत्तिगुणादिकं दृश्यम् ।

तस्य शोधनमारणप्रकारादिकं भावप्र० उक्तं यथा

"तत्र मारणाय योग्यं सुवर्णमाह "दाहे रक्तं सितं क्लेदे निकषे कृष्णषण्णभम् । तारशुल्वोत्थितं स्निग्धं कोमलं गुरु हेम सत्" (सत् उत्तमम्) "क्लेदे तु कठिनं रूक्षं विवर्णं सलवं दलम् । दाहे क्लेदेऽसितं श्वेतं कषे त्वाज्यं स्फुटं बधु । दलं (दोयत) इति लोके स्फुटं यदु घनाहतं स्फुटति । शोधनविधिः "पत्तच्छेदोक्तपत्राणि हेम्नो वह्नौ प्रतापयेत् । निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके । गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा । एवं हेम्नः परेषाञ्च धातूनां शोधनं भवेत्" । अथामृतस्य दोषः "वङ्गं सवीर्यं हरते नराणां रोगव्रजं शोधयतीह काये । अशोधितं कार्यमेव सदा सुवर्णमप्युत्तममेतदारभ्य कुर्य्यात् । सुवर्णस्य मारणविधिः "सुवर्णस्य द्विगुणं क्षुतक्षान्तेन मर्दयेत् । तद्गोलकसमं गन्धं निदध्यादधरोत्तरम्" । सुवर्णं अतितनूकृतपत्रस्य । गन्धम् गन्धकचूर्णम् । "गोलकञ्च ततो कृत्वा शरावसंपुटे । क्षिपेद्वदनोपलैर्दद्यात् पुटान्येव चतुर्दश । निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः" । कृत्वा सप्तपुटकृतक्षिप्तकक्षमृत्तिकया वदनोपलैः (गोवठाः इति लोके) निरुत्थं यत् पुनर्न जीवति । अथान्यप्रकारः "काञ्चने गलिते गन्धं षोडशांशेन निःक्षिपेत् । चूर्णयित्वा तथाक्षेन हत्वा कृत्वा तु गोलकम् । गोलकेन समं गन्धं दत्त्वा चैवाधरोत्तरम् । शरावसंपुटे धृत्वा पुटेच्चिंशद्वदनोपलैः । एवं सप्तपुटैर्हेम निरुत्थं भस्म जायते" । अत्रापि पूर्ववदुपसंहारः । अन्यच्च "काञ्चनारत्वचश्चूर्णं हत्वा समशुल्वकरसयोः । कल्कौ हेमपत्राणि लेपयेत् समया तया' । समया हेमपत्रं समया "काञ्चनारत्वचः कल्कैर्मूषायुग्मं प्रकल्पयेत् । धृत्वा तदेकसम्पुटे गोलं क्षिप्त्वाऽपरसम्पुटे च तत् । निधाय सन्धिरोधञ्च कृत्वा संशोष्य गोलकम् । वह्निं खरतरं कुर्य्यादेवं दत्त्वा पुटत्रयम् । निरुत्थं जायते भस्म सर्वकर्मसु योजयेत् । काञ्चनारप्रकारेण काञ्चनी क्षिप्ति काञ्चनम्" । काञ्चनी (करिहारी) "उच्चाशाखी तथा क्षीरात् तथा क्षिप्ति मनःशिला । शिलासिन्दूरयोश्चूर्णं समयोरर्कदुग्धकैः । सप्तधा भावनात् दद्याच्छोधयेच्च पुनः पुनः । ततस्तु गलिते हेम्नि कल्कोऽयं दीयते समः । पुनर्भेदितरां यथा कल्को विलीयते । एवं वेत्तालयं दद्यात् कनकं हेमसम्मितम्" । एवं मारितस्य सुवर्णस्य गुणाः "सुवर्णं शीतलं हृद्यं वल्यं गुरु रसायनम् । स्वादु तिक्तं च लघुरं पाके च स्वादु पिच्छिलम् । पवित्रं दृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम् । कृमिप्रमेहकुष्ठास्रकान्तिवाग्विशुद्धिस्थिरत्वकृत् । विषदुष्टक्षयोन्मादत्रिदोष-

ज्वरशोषजित्" । द्रव्यं द्रवाय कासकाय हितम् । "वस्यड्मारितं स्वर्णं बलं वीर्यञ्च नाशयेत् । करोति रोगान्मृत्युञ्च तद्वन्यात् यत्नतस्ततः" ।

तद्भेदादिकं राजनि० उक्तं यथा

"द्राक्षेऽतिरक्तमथ यच्च सितं छिद्रायां काश्मीरकान्ति च बिभर्ति निकाषघट्टे । स्निग्धञ्च गौरवमुपैति च यत्नजायां जानीत देवकनकं खदु रक्तपीतम् । तत्रैकं रसबेधजं तदपरं जातं स्वयंभूभिज किञ्चान्यदुवच्चनोद्भवकुरभवं चेति त्रिधा काञ्चनम् । तत्राद्यं किल पीतरक्तमपरं रक्तं ततोऽन्यत् यथा गौरार्भं तदिति क्रमेण गदितं स्यात् पूर्वपूर्वोत्तमम्" । तत्र रसबेधजस्य करणप्रकारः "आनीय पारदं देवि ! स्थापयेत् प्रस्तरोपरि । तस्योपरि जपेन्मन्त्रं सर्वलक्षमयात्मकम् । साष्टसहस्रं देवेशि ! प्रजपेत् साधकाग्रणीः । स्वयम्भूपुष्पसंयुक्ते वस्त्रे चारुणसन्निभे । संस्थाप्य पारदं देवि ! मृत्पात्रयुगले शिवे ! । पुष्पयुक्तेन स्वल्पेन बध्नीयात् वस्त्रयत्नतः । मृत्तिकया रजेनैव धान्यस्य परमेश्वरि ! । लेपयेदुवस्त्रयत्नेन रौद्रे शुष्काणि कारयेत् । पुनश्च लेपयेद्धीमान् ततो वह्नौ विनिःक्षिपेत् । अष्टमीनवमीरात्रौ क्षिपेच्चैव सुरेश्वरि ! । अथ वा परमेशानि ! मृत्पात्रे स्थापयेद्रसम् । वह्नीरसेन तद्द्रव्यं शोधयेद् वस्त्रयत्नतः । छागनारीरसेनैव तथैव शोधनं चरेत् । एवं कृते तु गुटिका यदि स्यात् दृढबन्धना । धुस्तूरञ्च समानीय मध्ये शून्यञ्च कारयेत् । कृष्णास्थ्यतसीयोगे तथा हतकुमारिका । एवं कृते वह्नियोगे भस्मसात् जायते ध्रुवम् । भस्मयोगे भवेत् स्वर्णं धनदायाः प्रसादतः । विवर्णं जायते द्रव्यं यदि पूजां न चाचरेत्" मन्त्रकाभेदतन्त्रे ५ प० । वज्रलोहसङ्करभवस्य करचविधिः गारुडे १८८अ० । "सुवर्णकरणं शृणु" इत्युपक्रमे "पोतं धुस्तूरपुष्पञ्च सीसकञ्च पलोन्मितम् । पाठालाङ्गलधाखा च मूलमावर्त्य नाडिवेत्" । सुवर्णं चाग्नौ दह्यमानं न क्षीयते यथोक्तं याज्ञ० "अग्नौ सुवर्णमक्षीणम्" । कर्षमितब्राह्मणस्वामिकाज्ञानकृतसुवर्णहरणं महापातकम् । महापातकनिरूपणे प्रायश्चित्तविवेकः ।

सुवर्णक न० सुवर्णमिव कायति कै-क । १पित्तले हेमच० । सुष्ठु वर्णोऽस्य कप् । २सुन्दरवर्णयुक्ते त्रि० ।

सुवर्णकदली स्त्री सुष्ठु वर्णो यस्याः कर्म० । स्वर्णवर्णकदल्याम् । (चाँपाकला) राजनि० ।

सुवर्णकार पु० सुवर्णं सुवर्णमयभूषणादि करोति कृ-अण् । (सेकरा) स्वर्णकारे जातिभेदे चन्द्रा० ।

सुवर्णगणित न० सुवर्णस्य वर्णादिज्ञानार्थं गणितभेदे तत्प्रकारो गणित० उक्तो यथा

"अथ सुवर्णगणिते करणसूत्रं वृत्तम् । सुवर्णवर्णाहति योगराधौ स्वर्णैक्यभक्ते कनकैक्यवर्णः । वर्णो भवेच्छोधितहेमभक्ते वर्णोद्धृते शोधितहेमसङ्ख्या । उदाहरणानि । विश्व कुरुद्वयवर्णसुवर्णभागाः दिगब्धेदलोचनयुगप्रमिताः क्रमेण । आवर्त्तितेषु यद येषु सुवर्णवर्णस्तूर्णं सुवर्णगणितज्ञ ! वणिग् ! भवेत् कः । ते शोधने यदि च विंशतिरुक्तभागाः स्युः षोड्श द्रविणवर्णमितिस्तदा का । तच्छोधितं भवति षोडशवर्णहेम ते विंशतिः कति भवन्ति तदा तु भागाः ।

न्यासः १२ १२ ११ १०
१० ४ २ ४

आता आवर्त्तिते सुवर्णमितिः १२ । एत एव यदि शोधिताः स्युः षोड्शभागाः भवन्ति तदा वर्णः १५ । यदि तदेव शोधितं षोड्शवर्णं स्वर्णं भवति तदा पञ्चदशभागाः भवन्ति । अथ वर्णज्ञानाय करणसूत्रं वृत्तम् । स्वर्णैक्यविन्यासयुतिजातवर्णात् सुवर्णतद्वर्णवधैक्यहीनात् । अज्ञातवर्णाग्निजसङ्ख्ययाप्तमज्ञातवर्णस्य भवेत्प्रमाणम् । उदाहरणम् । दशेश्वर्णा वसुनेत्रभागा अज्ञातवर्णस्य षडेतदैक्ये । जातं संखे द्वादशकं सुवर्णमज्ञातवर्णस्य यद प्रमाणम् ।

न्यासः १० ११ ०
८ २ ६

लब्धमज्ञातवर्णमानम् १५ । सुवर्णज्ञानाय करणसूत्रं वृत्तम् । स्वर्णैक्यविन्यासयुतिजातवर्णः स्वर्णैक्यवर्णैक्यवियोजितश्च । अज्ञेयवर्णोऽग्निजयोगशेषसंज्ञेयभक्ता विदितास्निजं स्यात् । उदाहरणम् "दशेन्द्रवर्णा गुणचन्द्रभागाः किञ्चित्तथा षोड्शकस्य तेषाम् । जातं युतौ द्वादशकं सुवर्णं कतीह ते षोड्शवर्णभागाः ।

न्यासः १० १४ १६
२ १

लब्धं भागमानम् १ । सुवर्णज्ञानायान्यत्करणसूत्रं वृत्तम् । साध्येनोनोऽल्पवर्णो विधेयः साध्यो वर्णः स्वल्पवर्णोनितश्च । इष्टघ्नोऽग्नेयभक्ते स्वर्णमाने स्यातां स्वल्पाल्पयोर्वर्णयोक्ते । उदाहरणम् "हाटकगुटिके

षोडशदशवर्णे तद्युतौ सखे! जातम्। द्वादशवर्णं सुवर्णं भूरि तयोः स्वर्णभाने मे।

न्यासः १६ १०
० ०

साध्यो वर्णः १२ कल्पितमिष्टम्।

सर्वे सुवर्णभाने १६ १०
२ ४

अथवा द्विकेनेष्टेन १६ १०
४ ८

अङ्केनेष्टेन वा १६ १०
१ २

सुवर्णगैरिक सुवर्णमिव पीतं गैरिकम्। (वर्णकमाटि) गैरिकभेदे राजनि०। "गैरिकं मधुरं पीतं कषायं व्रणरोपणम्। विस्फोटार्शोऽग्निदाहघ्नं वरं स्वर्णादिकं गुणैः" राजनि० तद्गुणा उक्ताः।

सुवर्णजीविक पुंस्त्री० सुवर्णं तत्क्रयविक्रयौ जीविका यस्य। सुवर्णवणिजि जातिभेदे स्त्रियां ङीष्। तल्लक्षणं यथा "गान्धिकः शाङ्किकश्चैव कांस्यको मणिकारकः। सुवर्णजीविकश्चैव पञ्चैते वणिजः स्मृताः"। "अम्बष्ठात् रजपुत्रायां जायते गान्धिको वणिक्। गन्धचन्दनधूपादिक्रयविक्रयकारकः। गान्धिक्यां रजपुत्रायां संजातः शाङ्किको वणिक्। शङ्खं दत्त्वा सुनेः पत्न्यै शङ्खजीवी प्रकीर्त्तितः। शाङ्किक्यां गान्धिकाज्जातस्ताम्रकांस्योपजीविकः। शाङ्किकात् कांस्यकन्यायां मणिकारः प्रजायते। कांस्यकाराच्च माणिक्यां सुवर्णजीविको ऽभवत्" पराशरजातिमाला। तस्य पातित्यकारणं ब्रह्मवै० ब्रह्मख० १०अ० उक्तं यथा "कश्चिद् वणिग्विशेषस्य संसर्गात् स्वर्णकारिणः। स्वर्णचौर्यादिदोषेण पतितो ब्रह्मशापतः"। [शब्दार्थ राजनि०।

सुवर्णनकुली स्त्री सुवर्णमिव पीता नकुली। महाज्योतिष्मत्यां लतायाम् राजनि०।

सुवर्णपुष्प पु० सुवर्णमिव पुष्पमस्य। राजतरुणीक्षुपे राजनि०।

सुवर्णप्रसर न०सुवर्णस्य प्रसर इव यत्र। एकवालुके वैद्यक०।

सुवर्णवणिज् पु० सुवर्णस्य वणिक् क्रयविक्रयवादिकर्त्ता। जातिभेदे (सोनारवेणे)। स्वर्णवणिक्शब्दतयोऽयत्र। सुवर्णजीविकशब्दे दृश्यम्।

सुवर्णबिन्दु पु० सुवर्णस्य बिन्दुरिव। विष्णौ त्रिका०।

सुवर्णयूथी स्त्री सुवर्णमिव पीता यूथी। पीतवर्णयूथिकायाम् राजनि०। "यूथिका मणिकाख्या सा पीता त्रिदलपुष्पिका। यूथीयुगं हिमं तिक्तं कटुपाकं सरं लघु मधुरं तुवरं हृद्यं पित्तघ्नं कफवातजित्। व्रणास्रसक्तदन्ताक्षिशिरोरोगविषापहम्" भावप्र०।

सुवर्णवर्णा स्त्री सुवर्णस्येव वर्णो यस्याः। १हरिद्रायाम् शब्दच०। २स्वर्णतुल्यवर्णयुक्ते त्रि०। ३विष्णौ पु० विष्णुस०। "तस्याप्रमेयत्वात् सर्वमेव सुवर्णमिति" श्रुतेस्तथात्वम्। ६त०। स्वर्णस्य मूल्यभेदकस्तबके ४वर्णे पु० सुवर्णगणितशब्दे दृश्यम्।

सुवर्णा स्त्री सुष्ठु वर्णो यस्याः। १कालानुसार्य्याम् मेदि०। २वाद्यालके शब्दमा०। ३स्वर्णचौर्य्यां ४हरिद्रायाम् राजनि०/५चाक्षुकगर्त्तां स्त्री राजनि० गौ०ङीष्।

सुवयस् स्त्री सुष्ठु वयोऽस्याः। प्रौढायां स्त्रियाम् राजनि०।

सुवल्लि(ली) स्त्री प्रा०स०। सोमराजीलतायाम् अमरः।

सुवसन्त पु० प्रा०स०। चैत्राबल्यां त्रिका०।

सुवसन्तक पु० सुवसन्तेन कायति कै-क। माधवीलतायां २मदनोत्सवे च मेदि०।

सुवहा स्त्री सुखेन वह्यते वायुनाऽसौ सु+वह-खञ्। १शेफालिकायां २रास्नायां ३माधापद्याम् ४बलापर्णयाम् अमरः ५शङ्खपुष्प्यां ६वीणायां मेदि०। ७लिङ्गतायाम् शब्दच०। ८रुद्रजटायां ९हंसपद्यां १०गन्धनाकुल्यां ११सुसख्यां १२नीलसिन्धुवारे च राजनि०। १३सुखवाह्ये त्रि० मेदि०। सम्यग् वहति सु+वह-क्विप्। १४सम्यग्वाहके त्रि०हेमच०

सुवास पु० सुष्ठु वासः। १सद्गन्धे २सुखनिवासे च। ३क्लीवे। ४सद्गन्धयुक्ते ५सद्गिवासान्विते च त्रि०।

सुवासिनी स्त्री सुखेन पित्राद्यवियोगेन वसति सु+वस-णिनि ङीप्। चिरएट्यां चिरं पितृकुलवासिन्यां स्त्रियाम् अमरः

सुविद पु० सुष्ठु वेत्ति सु+विद-क्विप्। १पण्डिते। सुष्ठु विद्यते लभ्यते सु+विद-लाभे क्विप्। २गुणाढ्यायां स्त्रियां स्त्री रामाश्रमः।

सुविद पु० सु+विद-क। १कञ्चुकिनि रायमु० २मन्त्रिणि भरतः।

सुविदत् पु० सुविदं गुणाढ्यां स्त्रियमतति व्रत-क्विप्। मन्त्रिणि रायमु०।

सुविदत्र त्रि० सु+विद कत्रच्। कुटुम्बे उणादि०।

सुविदल्ल पु० सुविदन्तं राजानं लाति ला-क। १मन्त्रान्तःपुराधिकारे कञ्चुकिनि अमरः। सुविदता राज्ञा लीयते ला-क। २अन्तःपुरस्थनार्य्याम् स्त्री रायमुकुटः।

सुविनीता स्त्री सु+वि+नी-क्त। १सुशीलायां गवि शब्दर० २सुविनययुक्ते त्रि०।

सुबीज पु० सुष्ठु बीज्यतेऽसौ बीज-क। (खमखस) वृक्षभेदे राजनि० हव०। २सुन्दरबीजयुते त्रि०। ब्रा० ब०। ३सुन्दरे बीजे न०।

सुवीरक न० सु+वीर-खुल्। सौवीराञ्जने शब्दच०।

सुवीरास्त्र न० सुवीरयति सुवीर्यान्वितं करोति सु+वीर-कच् तादृशोऽस्त्रोऽस्य। काम्पिल्ले अटा०।

सुवीर्य्य न० सुष्ठु वीर्य्यं यस्मात् ५ब०। १वटरोफले २वनकार्पास्यां स्त्री शब्दर०। ब्रा०स०। ३उत्तमे वीर्य्ये न०।

सुवृत्त पु० सुष्ठु वृत्तः वर्त्तुलः। १भूरुहे (ओल) राजनि० २सुन्दरवृत्तान्विते त्रि० ३शतपत्त्र्यां ४काकोल्यां ५टङ्कायाञ्च स्त्री राजनि० ६सुवर्त्तुले त्रि०।

सुवेगा स्त्री सुष्ठु वेगो वायुनिःसारणवेगो यस्याः ५त०। १महाज्योतिष्मत्याम् राजनि०। २उत्तमवेगान्विते त्रि०।

सुवेल पु० सुगता वेला यस्मादूर्द्ध्वं यत्र प्रा० ब०। १त्रिकूटपर्वते हेमच० सुष्ठु वेला मर्य्यादा स्थितिः यस्य। २यामे ३प्रणते च त्रि० मेदि०।

सुवेश पु० सुखेन विद्यते उपभुज्यते सु+विश-कर्मणि घञ्। १श्वेतौषो राजनि० ब्रा०ब०। २सुन्दरवेशयुक्ते त्रि०।

सुव्रता स्त्री सुष्ठु व्रतं नियमो यस्याः। १सुशीलायां गवि अमरः। २सुन्दरव्रतयुक्ते त्रि०। ३जिनभेदे पु० हेमच०।

सुशर्म्मन् पु० शृ-मनिन् सुष्ठु शर्म सुखं यस्य। १ऋषभेदे हरिवंशे मन्वन्तरपुत्रे भा०आ०१८अ०। २सुन्दरसुखयुते त्रि०। ३तृतीयमनुपुत्रभेदे पु०हरिवं०७अ०। ४कुत्सितब्राह्मणभेदे "सुशर्मा नाम दुर्बुद्धिः सोमा पापात्मनामभूत्। अनाम्नायविदां वंशे विप्राणां क्रूरकर्मणाम्" पाद्मो०स्व०८०अ०

सुशल्य पु० सुष्ठु दृढं शल्यं यस्मात् ५ब०। खदिरे राजनि०।

सुशवी स्त्री सु+शव-अच् गौरा० ङीष्। १कारवेल्ले २क्षणजीरके च भरतः।

सुशाक न० सुष्ठु शाको यस्मात् ५ब०। १आर्द्रके राजनि०। शाके तत्संयोगे हि शाकस्य सुखादुता। सुष्ठु शाको यस्य। २शस्यशाके ३शतपुष्पीये (सटेशाक) ४भिण्डायां पु० राजनि०

सुशिख पु० सुन्दरी शिखा यस्य। १वह्नौ जटा० २शिवदूते च। ३शोभनशिखायुक्ते त्रि० ४मयूरशिखायां स्त्री राजनि०। [२तदिति त्रि०। ३सुवर्णवर्णे पु०राजनि०।

सुशीत न० ब्रा०स०। १शीतचन्दने शब्दच० २अतिशीतलस्पर्शे

सुशीतल न० ब्रा०स०। १गन्धद्रव्ये रत्नमा०। २अतिशीतगुणयुक्ते त्रि०। [वत्यां स्त्रियां च।

सुशीता स्त्री ब्रा०स०। १शतावर्य्याम् राजनि०। २शीतगुण-

सुशीम पु० शु+श्यै मक् सम्प्रसारणञ्च। १शोभनस्पर्शे २तद्वति त्रि० अमरः।

सुशील पु० सुन्दरं-शीलमस्य। विष्णुपार्षदचरभेदे राजनि०। २शोभनचरितान्विते त्रि० ३लगाद्यष्टषष्ठांशभेदे स्त्री पद्मपु० उत्तरख० ६८अ०। [स्त्रीयुक्ते त्रि०।

सुशीक स्त्री सुन्दरी शीरस्य केप्। १सस्यकीटके २सुन्दर-

सुश्रुत पु० सुश्रूयत सु+श्रु-कर्मणि क्त। १विश्वामित्रसुतभेदे चिकित्साशास्त्रकर्त्तरि मुनिभेदे आयुर्वेदशब्दे ७८० पृ० दृश्यम्। २सत्कृतग्रन्थे च। ३सुन्दरश्रुते त्रि०। "देवाकर्णय सुश्रुतेन चरकश्लोकेन जानेऽखिलम्" नैष०। [ब।

सुश्लिष्ट त्रि० सु+श्लिष-क्त। १सुसंयुक्ते २दृढ़निश्चिते। ३सुपक्वे

सुषम पु० सुन्दरः समः ब्रा०स० सुशब्दस्य षत्वम्। १शोभने त्रिषु २परमायां शोभायां स्त्री अमरः।

सुषवी स्त्री सु+सु-अच् गौरा० ङीष्। १कारवेल्ले अमरः। २क्षुद्रकारवेल्ले राजनि० ३जीरके ४क्षणजीरके च मेदि०।

सुषामन् त्रि० शुभ्रं साम यस्य सुषामादि०षत्वम्। सुषामशब्दे स्त्रियां वा ङीप् ङीष् च।

सुषि स्त्री सुष-इन् पृषो० षस्य सः। शुषौ छिद्रे भरतः।

सुषिर न० सुष-किरच् पृषो० षस्य सः। छिद्रे भरतः।

सुषीम पु० सुशीम+पृषो०। १शीतस्पर्शे २तद्वति अमरः। ३मनोज्ञे त्रि० मेदि०।

सुषुप्त न० सु+स्वप-भावे क्त। "यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तमिति" श्रुतौ १ज्ञानशून्यायवस्थाभेदे। कर्त्तरि क्त २तदवस्थान्विते त्रि०

सुषुप्ति स्त्री सु+स्वप-क्तिन्। पुरीतति नाड्यां सनसः संज्ञोयरूपे १सर्वज्ञानशून्ये जीवावस्थाभेदे वेदान्तोक्ते २सर्वपदार्थशून्ये लये च।

सुषुम्णा स्त्री सुषु रसयत्यत्र शब्दं गायति यत्र गै-क। तन्त्रोक्ते मेरुदण्डवाह्यस्थे इडापिङ्गलानाड्योर्मध्यस्थे सूक्ष्मे नाड़ीभेदे। "मेरोर्बाह्यप्रदेशे शशिसिहिरावरे बध्यदण्डे निषण्णे मध्ये नाड़ी सुषुम्णा त्रितयगुणमयी चन्द्रसूर्य्याग्निरूपा" षट्चक्रभेदतन्त्रम्। तस्या उद्भवकथनभेदो यथा "शृणु वामे भगे दक्षे यदा वहति मारुतः। सुषुम्णा सा च विज्ञेया सर्वकार्य्यकराऽशुभा। तस्यां नाड्यां स्थितो यश्चिज्जीवनाशस्तदैव हि। विषमं तं विजानीयात् सर्वकार्य्यविनाशनम्।" यदाऽऽक्रमस्तदा तस्यां नाड्यां हर्षं वहेत्। तदा तत्र विजानीयादशुभं समुपस्थितम्" इति ब्रह्मवामलम्।

"मेरुबाह्ये इडा नाड़ी पिङ्गलया समन्विता। सुषुम्णा मानुमार्गेण ब्रह्मद्वारावधि स्थिता" योगस्वरोदयः।

सुषेण पु० सुष्ठु-सेनयति सेनां करोति अच् षत्वम्। १कर्मर्दके (करमचा) अमरः २वेतसे राजनि० ३चिकित्सके वानरभेदे। ४विष्णौ च मेदि० ५त्रिवृति स्त्री राजनि० ङीष्। स्वार्थे क अत इत्वम्। कृष्णत्रिवृति स्त्री अमरः।

सुषोमा स्त्री नदीभेदे भाग० ५।१९ अ०।

सुष्ठु अव्य० सु+स्था-कु। १प्रशंसायाम् २अतिशये अमरः। ३सत्ये च संक्षिप्तसा०।

सुष्म न० सु-मक् सुक् च। रज्ज्वां क्षीरस्वामी।

सुसंस्कृत त्रि० सु+सम्+कृ-क्त सुम् च। १प्रयत्नेन कृतादिनाद्रव्येण पक्वे व्यञ्जनादौ अमरः २उत्तमसंस्कारयुते त्रि०।

सुसत्या स्त्री जनकराजभार्य्यायाम् कालिकापु० ३७ अ०।

सुसम्पद् स्त्री प्रा०स०। १सौभाग्ये त्रिका० सुष्ठु सम्पद् यस्य। २शुभसम्पन्ने त्रि०। [सारयुते त्रि०।

सुसार पु० सुष्ठु सारोऽस्य। १रक्तखदिरे राजनि०। २अति-

सुसारवत् न० सुष्ठु सारोऽस्यास्य मतुप् मस्य वः। स्फटिके त्रिका०। [कायाम् ब० व०।

सुसिकता स्त्री प्रा०स०। शर्करायाम् राजनि०। २उत्तमवालु-

सुस्थ त्रि० सुखेन तिष्ठति सु+स्था-क। १आरोग्येण युक्ते २सुखिनि च।

सुस्ना पु० सु+स्नै-किप्। (खँसारी) शमीधान्यभेदे राजनि० "सुस्ना दूर्णदलो रूक्षः कषायो विशदो गुरुः" राजनि०।

सुस्नात त्रि०सुष्ठु स्नातः सु+स्नै-क्त। मङ्गलद्रव्येण कृतस्नाने।

सुस्मिता स्त्री सुष्ठु स्मितमस्य। नारीभेदे हेमच०

सुहित त्रि०सु+धा-क्त। १हृष्टे २विच्छिन्ने च विश्वः। प्रा०स०। ३सुन्दरच्छिन्ने न०। ५त्र०। ४अग्निजिह्वाभेदे स्त्री जटा०।

सुहृट् पु० सुष्ठु हृदयं यस्य मित्रार्थे हृदादेशः। १मित्रे २ज्योतिषोक्ते लग्नाच्चतुर्थस्थाने च। [२सुचित्ते न०।

सुहृदय त्रि०सुष्ठु हृदयं यस्य। १प्रशस्तमनस्के अमरः। प्रा०स०।

सुहृद्दल न० सुहृदेव दलम्। मित्ररूपे सैन्ये।

सुहोत्र पु०। चन्द्रवंशीयसुहृदिधुराजपुत्रे। "सुहृदिधोश्च दायादः सुहोत्रो नाम धार्मिकः। सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह" हरिवं० २० अ०।

सू स्त्री सु-किप्। १सुतौ २प्रसवे ३क्षेपे ४प्रेरणे च।

सूक न० सू-प्रेरणे किप् संज्ञायां कन्। १शस्ये २बाणे ३वाते च मेदि०।

सूकर पुंस्त्री० सू-इत्यव्यक्तं शब्दं करोति क-अच्। १वराहे २कुम्भकारे ३मृगभेदे च शब्दर० स्त्रियां ङीष्। ङीषन्तः ४वराहाक्रान्तायां शब्दमा०।

सूक्त न० सु+वच-भावे क्त। १सुन्दरकथने २विशिष्टैकार्थप्रतिपादके एकदैवत्ये वेदमन्त्रसमुदाये च यथा श्रीसूक्तं पुरुषसूक्तमित्यादि। तानि च वेदे बहूनि सन्ति तत्र महादानोपयोगीनि कति चित् सूक्तानि तुलादानादि पद्धतौ अस्माभिः उद्धृतानि तानि च तत्र द्रष्टव्यानि। "जप्यानि सूक्तानि तथैव चैषाम्" वह्निपुराणम्। ३शारिकायां स्त्री त्रिका०। क्लिन्। सूक्ति सुष्ठूक्तौ स्त्री।

सूक्ष्म न० सूच-मन् सुक्च नेट्। १कैतवे २अध्यात्मपदार्थभेदि० ३अर्थालङ्कारभेदे अलङ्कारशब्दे ४०७पृ० दृश्यम्। ४कतकवृक्षे पु० शब्दर०। ५अणुपरिमाणयुते द्रव्ये च त्रि०। [जम्बूवृक्षे रत्नमा०।

सूक्ष्मकृष्णफला स्त्री सूक्ष्मं कृष्णं फलं यस्याः। मध्यम-

सूक्ष्मतण्डुल पु० सूक्ष्मस्तण्डुलोऽस्य। (खसखस) इति ख्याते १वृक्षे २पिप्पल्यां स्त्री राजनि०। [कुधान्यीयबुद्धौ।

सूक्ष्मदर्शिन् त्रि० सूक्ष्मं पश्यति दृश-णिनि। अत्यन्तसूक्ष्मबुद्धौ

सूक्ष्मपत्त्र पु० सूक्ष्मं पत्त्रमस्य। १धान्यके २वनजीरके ३देवसर्षपे ४लघुवदरे ५सुरपर्णे ६लोहितेक्षौ च राजनि०। ७अनवर्य्यां द्रवावन्तवृक्षे शब्दर०। कप् अत इत्वम्। सूक्ष्मपत्रिका शतपुष्पायां शतावर्य्यां लघुव्राह्म्यां दुरालभायाम् व्याकाशमांस्याञ्च स्त्री राजनि०।

सूक्ष्मपिप्पली स्त्री कर्म०। वनपिप्पल्याम् राजनि०।

सूक्ष्मपुष्पी स्त्री सूक्ष्माणि पुष्पाण्यस्याः ङीष्। यवतिक्तायाम् राजनि०। [२भूकर्बुदारे राजनि०।

सूक्ष्मफला स्त्री सूक्ष्मं फलमस्याः। १भूम्यामलक्याम् रत्नमा०

सूक्ष्मबदरी स्त्री कर्म०। भूमिबदर्य्याम् राजनि०।

सूक्ष्मभूत न० कर्म०। वेदान्तसिद्धे अपञ्चीकृते भूम्यादीनां पञ्चानां भूतानां सूक्ष्मांशभेदे। [सत्त्वके राजनि०।

सूक्ष्ममक्षिक पु० सूक्ष्मा मक्षिका तदाकारोऽस्यस्य अच्।

सूक्ष्ममूला स्त्री सूक्ष्मं मूलमस्याः। अजशृङ्ग्याम् राजनि०।

सूक्ष्मवल्ली स्त्री कर्म०। १तास्रवल्ल्यां २जलकाकाञ्च राजनि०।

सूक्ष्मवीज पु० सूक्ष्मं बीजमस्य। (खसखस) ख्याते वृक्षे राजनि०।

सूक्ष्मशर्करा स्त्री कर्म०। वालुकायाम् राजनि०।

सूक्ष्मशाख पु० सूक्ष्मा शाखाऽस्य। जलदवृक्षे राजनि०।

सूक्ष्मशालि पु० कर्म०। अणुधान्ये श्यामाकादौ राजनि०।

सूक्ष्मषट्चरण पु० सूक्ष्मः षट्चरण इव । पक्षियूके राजनि०

सूक्ष्मा स्त्री सूच-मनृ सुकूच नेट् टाप् । १यूथिकायां शब्दच० । २क्षुद्रैलायां ३कणायां ४वालुकायाञ्च राजनि० ।

सूक्ष्माङ्ग न० कर्म० । "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" वेदान्तोक्ते भोगसाधने लोकद्वयगामिनि लिङ्गदेहे । सूक्ष्मशरीरादयोऽप्यत्र । सांख्यमते त्वन्यान्यविधसप्तदशावयवत्वं यथोक्तं सां० का० तत्त्वकौ० । "सूक्ष्माश्चैषां नियता मातापितृजा निवर्त्तन्ते" का० "सूक्ष्मादेहाः परिकल्पिता" तत्त्वकौ० । "परिकल्पिता व्यतिरिक्ता परलोके कर्मफलभोगः सूक्ष्मदेहं विनाऽनुपपन्नः भोगत्वात् स्थूलदेहारब्धव्यादिजनितस्य सञ्चस्य स्वदेहेनैव भोगवत् स्वदेहारब्धकर्मादिफलं यत्तत् स्वदेहेनैव भोग्यम् नेतरेण अन्यथा कृतहानाकृताभ्यागमप्रसङ्ग इत्यादिस्तर्कसत्वानुसन्धेयः । "पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्य्यन्तम् । संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" का० । "प्रधानेनादिसर्गे प्रतिपुरुषमेकैकसृत्यादितम् । यस(य)क्तमव्याहतं शिलाभस्तनुविशति नियतम् आद्यादिसर्गात् आ च महाप्रलयाद्वर्त्तिष्ठते महदादिसूक्ष्मपर्य्यन्तं महदङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्य्यन्तम् एषां समुदायः सूक्ष्मशरीरं शान्तघोरमूढैरिन्द्रियैरन्वितत्वाद्विशेषः" कौ० ।

सूक्ष्मैला स्त्री कर्म० । क्षुद्रैलायाम् (गुजराटी एलाच) रत्नमा०

सूच पैशून्ये (अन्तर्द्दोहे) अद० चु० उभ० सक० सेट् । सूचयति ते असूसूचत त । वच्चुकत्वाच्च षोपदेशः ।

सूचक त्रि० सूचयति अन्तर्द्दोहं करोति सूच-ण्वुल् । १पिशुने अमरः अन्तर्द्दोहवति २बोधके च । २काके ४कुक्कुरे ५विडाले पुंस्त्री० मेदि० स्त्रियां ङीष् । ६पिशाचे ७सिद्धगणे दमुदे शब्दर० । ८नाटकप्रसिद्धे सूत्रधाराख्ये प्रधाननटे १०कपर्दके हेमच० ११सूक्ष्मगालौ पु० राजनि० १२सीवनसाधनद्रव्ये पु० मेदि० ।

सूचन न० सूच-भावे ल्युट् । १क्षिंषने २ज्ञापने च । युच् । तत्र दृष्टौ पीड़ायाम् अभिनये च स्त्री विश्वः ।

सूचि(ची) स्त्री सूच-इन् वा ङीष् । १सीवनसाधने सूचीनामख्याते लौहमयपदार्थे अमरः २शिखायां ३नृत्यभेदे रत्नकौ० [लौविनि (दरजि) शब्दर० ।

सूचिक त्रि० सूचिः तया सीवनं शिल्पमस्यस्य ठन् । सूच्या-

सूचिका स्त्री सूचि+स्वार्थे क । १सूच्याम् । सूचिरिव कायति कै-क । २क्षुद्रशुण्डायाम् । सूचिकाधरः ।

सूचिकाधर पुंस्त्री० सूचिकां शुण्डां धरति धृ-अच् । गजे शब्दर० स्त्रियां ङीष् ।

सूचिकाभरण न० वैद्यकोक्ते औषधभेदे तत्पाकादि यथा "विषं पलमितं क्षतः शाणकञ्चूर्णयेद् द्वयम् । तच्चूर्णं संपुटे क्षिप्त्वा काचलिप्तशरावयोः । सुद्रां कृत्वाथ संशोष्य ततश्चूल्यां निवेशयेत् । वह्निं मनैः मनैः कुर्य्यात् प्रहरद्वयसङ्ख्यया । तत उद्घाट्य तन्मुद्रासुपरिस्थशरावकात् । संलग्नो यो भवेद्भूमस्तं टङ्कोद्याच्छनैः मनैः । वायुस्पर्शो यथा न स्यात्ततः कूप्यां निवेशयेत् । यावत् सूच्या मुखे लग्नं कृत्वा निर्याति भेषजम् । तावन्मात्रो रसो देयो मूर्च्छिते सन्निपातिनि । क्षुरेण प्रच्यते मूर्द्धं तत्वाङ्गुल्या च घर्षयेत् । रक्तभेषजसम्पर्कात् मूर्च्छितोऽपि हि जीवति । तथैव सर्पदष्टोऽपि मृतावस्थोऽपि जीवति । यदा तापो भवेत्तस्य मधुरं तत्र दीयते" भैषज्यरत्ना० । "विषं पलं रसं शाणं तच्चूर्णं काचलेपिते । मृत्संपुटे च संरुध्य चूल्यां संस्थाप्य पाचयेत् । मनैर्यामद्वयं पक्त्वा तं मृद्वाह्ये शीतलम् । ऊर्ध्वपात्रगतं धूमं गृहीत्वाऽऽस्यं दृढं मारुतम् । यावत् सूच्या मुखे लग्नं कृत्वा व्रजति भेषजम् । क्षुरेण प्रच्यते मूर्द्धं तत्वाङ्गुल्या च घर्षयेत् । त्रिदोषे मूर्च्छितो जीवो रक्तभेषजसङ्गमात् । सर्पदष्टो मृतावस्थः सोऽपि जीवति तत्क्षणात् । दद्याच्च मधुरं तोयं सूचिकाभरणे रसे" इति रसप्रदीपः ।

सूचिकामुख पु० सूचिकेव क्रमसूक्ष्मं मुखमस्य । १शङ्खे हारा० इत० । २सूच्यामुखे न० ।

सूचि(ची)क्षेत्र न० सूच्याकारं क्षेत्रम् । लीलावतीप्रसिद्धे सूच्याकारके क्षेत्रभेदे क्षेत्रशब्दे २४०० पृ० दृश्यम् ।

सूचित त्रि० सूच-क्त । १कथिते २बोधिते ३हिंसिते च ।

सूचिपत्रक पु० सूचिरिव पत्रमस्य कप् । सितावरशाके राजनि० । सूचीदलादयोऽप्यत्र ।

सूचिपुष्प पु० सूच्याकारं पुष्पं पुष्पाख्यं यस्य । केतकवृक्षे जटा० । सूचीपुष्पादयोऽप्यत्र ।

सूचिरोमन् पु० सूचिरिव रोमाऽस्य । वराहे हारा० सूचीरोमन् तत्रार्थे त्रिका० । [वः । गरुड़े शब्दर० ।

सूचिवत् पु० सूचिरिव तदाकारचञ्चुरस्यस्य मतुप् वस०मस्य

सूचिवदन पुंस्त्री० सूचिरिव वदनं यस्य । १नकुले स्त्रियां जातित्वात् ङीष । २मशके पु० राजनि० ।

सूचिशालि पु० कर्म० । सूक्ष्मधान्ये श्यामाकादौ राजनि० ।

सूचीकटाह पु० न्यायभेदे न्यायशब्दे ४१७० पृ० दृश्यम् ।

सूचीपत्रा स्त्री सूचीव पत्रमस्याः । गण्डदूर्वायाम् राजनि०

सूचीमुख सूचीव मुखमस्य । १सितकृमौ राजनि० । २हीरके न० हेमच० । ३तृणे । ४सूच्याकारमुखे न० ।

सूच्यग्रस्थूलक पु० सूच्यग्रमिव स्थूलः स्वार्थे क । (छलुखड़) तृणभेदे रत्नमा० ।

सूच्यास्य पुंस्त्री० सूचीव आस्यमस्य । १मूषिके हेमच० स्त्रियां योपधत्वात् टाप् । ३तृण० । २सूच्या अग्रे न० ।

सूचाह्व पु० सूच्या आह्वा आह्वा यस्य । सितावरके हेमच०।

सूत पु० सू-प्रसवे प्रेरणे ऐश्वर्ये वा क्त । १सूर्ये अनेकार्थको०।२सकेदृक्षे ३क्षत्रियजाते ब्राह्मणीगर्भजे वर्णसङ्करभेदे ४त्वष्टरि ५सारथौ ७वन्दिनि मेदि० ७मागधे ८पारदे पुंन०अमरः । ९प्रसूते १०प्रेरिते च त्रि० ११लोमहर्षण्याख्ये पुराणवक्तरि च तदुत्पत्तिकथा

"सत्रान्ते सूतमासीना मुनयो भूरिवर्चसः । पुराणसंहितां पुण्यां पप्रच्छुर्लोमहर्षणम् । त्वया सूत ! महाबुद्धे भगवान् ब्रह्मवित्तमः । इतिहासं पुराणार्थं व्यासः सम्यगुपार्जितः । तस्य ते सर्वरोमाणि वचसा हृषितानि यत् । द्वैपायनस्य भगवांस्ततो वै रोमहर्षणः । भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः । मुनीनां संहितां वक्तुं व्यासः पौराणिकीं पुरा । त्वं हि स्वायम्भुवे यज्ञे सूत्याहे वितते सति । संभूतः संहितां वक्तुं क्षत्रेण पुरुषोत्तम !" कोर्म १अ० । "ब्रह्मणः पौष्करे यज्ञे सूत्याहे वितते सति । पुण्याहवाचने सूतः पौराणिको द्विजः । वक्ता वेदादिशास्त्राणां त्रिकालामलतत्त्ववित् । तीर्थयात्राप्रसङ्गेन नैमिषारण्यमागमत्" वह्निपु० १अ० ।

जातिभेदसूतोत्पत्तिकथा "क्षत्रे तु दक्षिणे चक्रं दृष्ट्वा तस्य पिताप्रहः । विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ । तस्य वै जातमात्रस्य यज्ञे वैतामहे शुभे । सूतः सूत्यां सप्तदश्यां सौत्ये ऽहनि महामते !। तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञश्च मागधः । प्रीतौ तदा सुनिवरैस्तावुभौ सूतमागधौ । स्तूयतामेष नृपतिः पृथुर्वैन्यः प्रतापवान्" विष्णुपु० १अंशे १३अ । "एतस्मिन्नेव काले तु यज्ञे वैतामहे शुभे । सूतः सूत्यां सप्तदश्यां सौत्येऽहनि पुराणवित् । तेषां यज्ञे पुनस्त्वेवसप्तदश्यौ सूतमागधौ । पृथोःस्तवार्थं तौ तत्र समाहूतौ महर्षिभिः । न ऊचुश्च यथः सर्वं स्तूयतामेष पार्थिवः । तैर्नियुक्तौ० ऽस्य कर्माणि पृथोर्यानि महात्मनः । तुष्टुवांस्तानि सर्वाणि आशीर्वादांस्ततः परान् । तयोस्तत्रान्ते सुप्रीतः पृथुः प्रादात् जनेश्वरः" वह्निपु० । "क्षत्रियादिप्रकन्यायां सूतो भवति जातितः" । "सूतानामश्वसारथ्यमश्वशानां चिकित्सितम्" मनुः ।

सूततनय पु० सूतस्य तनयः । भारतप्रसिद्धे राधेये कर्णे हेमच० । सूतपुत्रादयोऽप्यत्र । तस्य सूतपालितत्वात्तथात्वम्

सूति स्त्री सू+क्तिन् । १प्रसवे "प्रसवैः सूतिभारतैः" स्मृतिः सूयते करणेन सोमोऽत्र सू-आधारे क्तिन् । २सोमाभिषवभूमौ श्रीधरः ।

सूतिका स्त्री सू-क्त स्वार्थे क कत इत्वम् । नवप्रसूतायां स्त्रियाम् "उदक्यां सूतिकां विना" इति स्मृतिः ।

सूतिकागार न० सूतिकाया निवासयोग्यमगारम् । सूतिकागृहे हरिः । सूतिकागृहादयोऽप्यत्र ।

तत्करणप्रकारस्तद्दिनादिकं पीयू० उक्तं यथा

"उक्तश्च श्रीपतिना "पुनर्वसौ च सूतिकागृहस्य निर्मितिः शुभा । विरञ्चिविष्णुभान्तरे प्रवेशनं हितं भवेत्" इति । विरञ्चिरभिजिन्नक्षत्रम् अन्तरे मध्ये विरञ्चिविष्णुतारयोरित्येव सप्तम्या अधिकरणत्वे बोधिते अन्तरपदाक्तिः स्वरूपार्था । तदेतत्ब्राह्मणव्यतिरिक्तवर्णत्रयविषयम् । यदाह लल्लः "पुनर्वसौ नृपादीनां कर्त्तव्यं सूतिकागृहम् । अश्वयाभिजितोर्मध्ये प्रवेशं तत्र कारयेत्" इति । आवश्यकत्वे तु अश्वयाभिजितोर्मुहूर्त्तत्रदुदयो वाह्यः वा इत्यर्थः । ब्राह्मणस्य तु प्रागुक्तनक्षत्रेष्वेव सूतिकागृहनिर्माणप्रवेशौ तत्र सूतिकागृहं नैर्ऋत्यां कार्यम् । यदाह सङ्ग्रहकृत्: "ऐन्द्र्यां तु विक्रमस्थानमाग्नेय्यां पचनालयः । वारुण्यां भोजनगृहं नैर्ऋत्यां सूतिकागृहम् । याम्यायां शयनस्थानं वायव्यां पशुमन्दिरम् । कौबेर्यां तु धनस्थानम् ऐशान्यां देवतालयः" इति । सूतिभास्करे गर्गः "वारेऽनुकूले राशौ तु दिने दोषविवर्जिते । वास्तुकुड्यदिशि प्रोक्तं सूतिकाभवनं बुधैः" इति । कालनिर्णये वृद्धो रत्नकोशे "व्यासप्रसवे मासि कुर्याच्चैव विशेषतः । तदेव प्रसवकाले स्यादिति शास्त्रेषु निश्चयः" इति । वराहेणात्मानेऽनन्तत्वात्तस्याभिधानं कृतं यथा "कृत्वादित्यशशाङ्कतिष्यपवनप्राज्येशमित्रोत्तराचित्राश्विश्रवणेषु हस्तिकघटौ हित्वा विरिक्तो तिथौ । शुक्राचार्यगजेश्वरत्रशिनां वारेऽनुकूले विधौ सद्भिर्दृष्टनि सूतिकागृहविधिः क्षेमङ्करः कीर्त्यते" इति । वह्निनि चतुर्थस्थाने

सङ्गिः शुभग्रहैः। सूतिकागृहप्रवेशे कालविशेषमाह ज्योतिर्वशिष्ठः "अथातः सम्प्रवक्ष्यामि सूतिकागारवेशनम्। मासे तु नवमे प्राप्ते पूर्वपक्षे शुभे दिने। प्रसूतिसम्भवे काले सद्य एव प्रवेशयेत्" इति। पूर्वपक्षे शुक्लपक्षे नक्षत्रादीन्याह गर्गः "रोहिणत्रैन्द्रवौष्णेषु स्वातीशाक्रणयोरपि। पुष्ये पुनर्वसौ हस्तधनिष्ठा त्रुत्तरासु च" इति। "मैत्रत्वाष्ट्रे तथाश्विन्यां सूतिकागारवेशनम्। सर्वे शुभग्रहाः केन्द्रे पापाश्च त्रिषड्गायगाः। शुभांशे शुभसंदृष्टौ सूतिकागारवेशनमिति"।

तदाकारमाह भावप्र० "अष्टहस्तायतं चारु चतुर्हस्तविशालकम्। प्राचीद्वारमुदग्द्वारं विदध्यात् सूतिकागृहम्"।

सूतिकारोग पु० ६त०। भावप्र० उक्ते रोगभेदे तन्निदानादि यथा "मिथ्योपचारात् संक्लेशात् विषमालोर्णभोजनात्। सूतिकायास्तु ये रोगा जायन्ते दारुणास्तु ते"। मिथ्योपचारात् अनुचिताचरणात् प्रवातादिसेवनात्। संक्लेशात् संक्लिश्यन्ते दोषा अनेन इति संक्लेशः दोषजनकमन्नं तस्मात्। दारुणाः कष्टसाध्याः। के ते व्याधय इत्याकाङ्क्षायामाह "अङ्गमर्दो ज्वरः कासः पिपासा गुरुगात्रता। शोथः शूलातिसारौ च सूतिकारोगलक्षणम्। एतेऽङ्गमर्दादयः प्रायेण सूतिकाया भवन्तः सूतिकारोगत्वेन लक्ष्यन्ते। ज्वरादीनां रोगविशेषाणां निदानविशेषमाह "ज्वरातीसारशोथाश्च शूलानाहवलक्षयाः। तन्द्रारुचिप्रसेकाद्या वातश्लेष्मसमुद्भवाः। कृच्छ्रसाध्या हि ते रोगाः क्षीणमांसबलाश्रिताः। ते सर्वे सूतिकानाम्ना रोगाश्चाप्युपद्रवाः" सूतिकाभवत्वेन सूतिकानाम्ना ते रोगाः आश्रयाश्रितयोरभेदोपचारात् ते चाप्युपद्रवा इति त एव ज्वरादयः उक्तानां रोगाणामन्यतमं प्रधानीकृत्योपद्रवाश्च"।

सूतिकाषष्ठी स्त्री सूतिकाष्टहे पूज्या षष्ठी शाक्त०। सूतिकागारे प्रसवावधि षष्ठे दिवसे पूज्यायां षष्ठीदेव्याम्। यथाह "विष्णुधर्मोत्तरे "सूतिकागारनिलया जन्मदा नाम देवताः। तासां यागनिमित्तार्थं शुद्धिर्जन्मनि कीर्त्तिता। षष्ठेऽह्नि रात्रियागन्तु जन्मदानाञ्च कारयेत्। रक्षणीया सदा षष्ठी निशां तत्र विशेषतः। राम! जागरणं कार्य्यं जन्मदानां तथा बलिः"। रामेति सम्बोधनम्। तथा शौचान्तरदोषोऽपि नास्ति। "अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्त्तुर्ज्ञातृकालिकी शुद्धिः पूर्वाशौचादिशुध्यति" इति प्रजापतिवचनात्। पुत्रजन्मेति अवणात् पितुरेवाशौचाभावः न तु मातुः कर्त्तुरिति पुंलिङ्गनिर्देशाच्च। कारयेदिति अन्यगोत्रजाभिप्रायेण। तत्रादौ विनायकादिसहितषोड़शमातृकापूजनम्। तथा च कृत्यचिन्तामणौ "जागरजागरणं कार्य्यं खड्गो धार्य्यः समीपतः। आवाह्य पूजयेद्देवीं गणेशं मातृका गिरिम्"। देवीं षष्ठीम्। गिरिं सन्यानदण्डम्। भोजराजः "गणेशश्चैव नन्दा च पूतना सुखसण्डिका। विशाखा शकुनिका शुष्कनन्दा च जम्भिका। आचार्य्यका रेवती च पिलिपिच्छा ततः परम्। स्कन्दा च द्वादशैतेऽस्याः रक्षार्थं मातृका मताः" ज्यो०त०। [ऊमरः।

सूत्थान त्रि० सुष्ठु उत्थानम् उद्योगो यस्य। चतुरे कर्मकुशले

सूत्पर न० सु+उत्+पॄ—अप्। सुरासव्याने शब्दच०।

सूत्या स्त्री सू-क्यप् निं०। यज्ञाङ्गस्नानभेदे २अभिषवे सोमरसनिष्पीड़ने च अमरः।

सूत्याशौच न० सूतिनिमित्तकमाशौचम्। जननाशौचे "शावाशौचं न कर्त्तव्यं सूत्याशौचं विधीयते" स्मृतिः।

सूत्र ग्रन्थने वेष्टने च चुरु०उभ०सक०सेट्। सूत्रयति ते असूसूत्रत् त। बहुचकत्वात् न ओपदेवः।

सूत्र न० सूत्र-अच्। १यज्ञसाधने तन्त्रौ २व्यवस्थायां शनाटकोपकरणे प्रस्तावे "सूत्राचरमसन्दिग्धं सारवत् विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः" इत्युक्ते शास्त्रवाक्यभेदे च।

सूत्रकण्ठ पु० सूत्रं यज्ञसूत्रं तद्वि वा कण्ठे यस्य। १विप्रे २कपोते ३खञ्जरीटे च मेदि०। [तत्रार्थे स्त्रियां०।

सूत्रकोण पु० सूत्रवद्वः कोणोऽस्य। डमरौ हारा० कप्।

सूत्रगण्डिका स्त्री सूत्रं गण्डयति गण्ड-ण्वुल्। तन्तुवायोपकरणभेदे एषण्यां शब्दच०।

सूत्रतन्तु पु० सूत्रमेव तन्तुः। सूत्राकारे तन्तौ हेमच०।

सूत्रतर्कुटी स्त्री सूत्रखचिता तर्कुटी। (टेको) पदार्थे जटा०

सूत्रधार पु० सूत्रं नाट्यसाधनं धारयति धृ-णिच्-अण्। नाट्याङ्गसाधनयुक्ते नाटकप्रस्तावके १प्रधानभेदे। "नाट्योपकरणादीनि सूत्रमित्यभिधीयते। सूत्रं धारयतीत्यर्थे सूत्रधारो मतो बुधैः" इति तल्लक्षणं "पूर्वरङ्गं विधायैवं सूत्रधारो निवर्त्तते" सा० द०। "सूत्रधारेण सहिताः संलापं यत्र कुर्वते" दशरूपकम्। २इन्द्रे ३शिल्पिभेदे (छुतार) च। शिल्पभेदसूत्रधारश्च मुद्रागर्भे विश्वकर्म्मणा जातो जातिभेदः ब्रह्मवै०ब्रह्मख०१०अ०।

सूत्रपुष्प पु० सूत्रवर्णं पुष्पं यस्य। कार्पासे त्रिका०।

सूत्रभिद् पु० सूत्रं भिनत्ति सूच्या, भिद-क्विप्। सूच्याजीवे (दरजी) शब्दर०। [शब्दच०।

सूत्रमध्यभू पु० सूत्रमध्यमिव भवति भू-क्विप्। यज्ञधूपे

सूत्रयन्त्र न०सूत्रवापनं यन्त्रम् शाक्त०। (ताँत) सूत्रवापनयन्त्रे शब्दमा०। [हारा०।

सूत्रला स्त्री सूत्रं लाति-ला-क। तर्कुटयाम् (टेको)

सूत्रवीणा स्त्री सूत्रबद्धा वीणा शाक०। वीणाभेदे हारा०।

सूत्रवेष्टन न० सूत्रं वेष्ट्यतेऽनेन वेष्ट-करणे ल्युट्। तन्तुवायोपकरणभेदे त्वसरे (तासनी) अमरः।

सूत्रात्मन् पु० सूत्रमिव सर्वानुस्यूत आत्मा स्वरूपं यस्य। समष्ट्युपहितचैतन्ये हिरण्यगर्भे वेदा०सा०। [पत्तिः।

सूत्रामन् पु० इन्द्रे अमरे पाठान्तरम्। सुत्रामन् शब्दे व्युत्

सूत्राली स्त्री ङीप्त०। १सूत्रश्रेणौ २गलमेखलायां हारा०।

सूत्रिन् त्रि० सूत्र+अस्त्यर्थे इनि। १सूत्रविशिष्टे स्त्रियां ङीप्। २काके पु० त्रिका०।

सूद पु० सूदयति पचादीन् पाकार्थं सूद-घञ्। १भूपकारके २व्यञ्जनभेदे सूपे अमरः। ३सारल्ये ४अपराधे ५क्रोधे ६पापे च अजयः। [च।

सूदन न०सूद-भावे ल्युट्। १हिंसने २निःक्षेपे ३अङ्गीकारे

सूदशाला स्त्री सूदाधिष्ठिता शाला शाक०। पाकशालायाम् पाचकशब्दे ४२४६ पृ० विवरणम्।

सूदाध्यक्ष पु० ६त०। पाकशालाध्यक्षे तल्लक्षणं यथा "अनाढ्यः शुचिर्दक्षश्चिकित्सितविदांवरः। सूदशास्त्रविशेषज्ञः सूदाध्यक्षः प्रशस्यते" पाचकशब्दे तल्लक्षणादि ४२८६ पृ० दृश्यम्।

सून न० सू-क्त तस्य नः। १पुष्पे २प्रसवे च। कर्त्तरि-क्त। ३विकसिते त्रि० मेदि० ४जाते च।

सूना स्त्री सू-क्त तस्य नः। प्राणिवध स्थाने "पञ्च सूना गृहस्थस्य चुल्ली पेषञ्युपस्करः। कण्डनी चोदकुम्भश्च" मनुः ३तनयायां ३मज्जगुग्वायां मेदि० ४मांसविक्रये च सांख्यप्रसा०। [५कन्यायां स्त्री वा ऊङ् हेमच०।

सूनु पु० सू-नुक्। १पुत्रे २अपत्ये ३सूर्य्ये मेदि० ४अर्कवृक्षे च।

सूनृत न० सुष्ठ्वति अनेन सु-ऋत-घञर्थे क। १सत्ये प्रिये वाक्ये अमरः। २मङ्गले च ३तद्वति त्रि० अमरः।

सूप पु० सुखेन पीयते सु+पा-घञर्थे क पृषो०। (दालि) व्यञ्जनभेदे क्षत्रजशब्दे २१८१ पृ० दृश्यम्। सुष्ठु अपति सु+अप-सूत्रवि० क। ३सूपकारे पाचके मेदि०। आधारे क। ३भाण्डे। सूद-करणे क पृषो०। ४सायके शब्दर०।

सूपकार त्रि०सूपं करोति कृ-अण्। पाचके अमरः। पाचकशब्दे ४२८६ पृ० दृश्यम्।

सूपधूपन न० सूपो धूप्यतेऽनेन धूप-करणे ल्युट्। १हिङ्गौ त्रिका० सूपपाके हि हिङ्गुधूपदानं पाकशास्त्रे प्रसिद्धम्।

सूपपर्णी स्त्री सूपसाधनस्य मुद्गस्येव पर्णमस्याः ङीप्। मुद्गपर्ण्याम् रत्नमा०।

सूपश्रेष्ठ पु० सूपेषु तत्साधनेषु श्रेष्ठः। मुद्गे राजनि०।

सूपाङ्ग न० सूपस्य तत्संस्कारकमङ्गमुपकरणम्। हिङ्गौ राजनि०।

सूम न० सू-मक्। १आकाशे २क्षीरे मेदि० ३जले शब्दर०।

सूर पु० सरति प्रेरयति कर्म्मणि लोकानुदयेन सृ-क्रन्। १सूर्य्ये २अर्कवृक्षे च अमरः। सूर-क। ३पण्डिते ४राजनभेदे पु० हेमच०। "सूर्य्योदयं विना नैव स्नानदानादिका क्रिया" सत्यु क्तेऽरुणोदयेन लोकानां सर्वकर्मप्रवर्त्तकत्वात्तथात्वम्।

सूरण पु० सूर-ल्युट्। सूरणे (ओल) शब्दरत्ना०। "सकरे सूलकञ्चैव सिंहे चालावुकं तथा। कार्ष्णिके (कृ)सूरणञ्चैव सप्तौ गोमांसभक्षणम्" कर्मलो०।

सूरत त्रि० सु+रम-क्त पृषो०। दक्षौ अमरः।

सूरसूत पु० ६त०। अरुणे गरुड़ाग्रजे सूर्य्यसारथौ अमरः। अनूरुशब्दे १६१ पृ० दृश्यम्।

सूरि पु० सू-क्रिन्। १सूर्य्ये २अर्कवृक्षे ३अर्कत्वभेदे ४पण्डिते च अमरः "यदा पश्यन्ति सूरयः" इति श्रुतिः। ४राजसर्षपे स्त्री ङीप् रत्नमा०।

सूरिन् पु० सूर-णिनि। पण्डिते शब्दर०।

सूर्च्छ(र्च्छ्) (र्च्छ्यौ) अनादरे भ्वा०पर०सक०सेट्। सूर्च्छ(र्च्छ्)ति अमूर्च्छीत्(र्च्छ्यौत्) धोपदेश एव न्यायः।

सूर्च्छ पु० सूर्च्छ-कर्म्मणि घञ्। माषे (कलाई) शब्दर०।

सूर्च्छ(र्च्छ्य)ण न० सूर्च्छ(र्च्छ्य) भावे ल्युट्। अनादरे।

सूर्प पुंन०। सूर्प-पृषो० शस्य षः। १सूर्पशब्दार्थे शब्दर०। २कुम्भपरिमाणे ३द्रोणपरिमाणे च वैद्यकम्।

सूर्पणखा स्त्री सूर्प इव नखा अस्याः पृषो० शस्य षः णत्वम्। रावणभगिन्याम्।

सूर्म्मि स्त्री सूर्म्मि+पृषो० शस्य षः। सूर्म्मिशब्दार्थे वा ङीप्।

सूर्य्य पु० सृ-क्यप् नि०। १दिवाकरे २अर्कवृक्षे च अमरः। ३दानवभेदे वह्निपु० ४अर्कपर्णवृक्षे मेदि०।

सूर्य्यग्रहकक्षादिकं खगोलशब्दे २४२५ पृ० दृश्यम्। तस्य प्रकृतिस्वरूपादिकं सर्वार्थचि० उक्तं यथा

"भानुर्गात्राङ्कितरेखरक्तः श्यामान्वितः पिङ्गलनेत्रकान्तिः। पित्तात्मकोऽयं समगात्रयष्टिः प्रतापयुक्तत्त्वगुणोऽल्परोमा। सञ्चारयुक् सङ्कुचितार्थवाक्यः खल्वप्रजो दैविकबुद्धियुक्तः"। स च प्राच्या दिशः स्वामी। प्रभवः क्षत्रियजातीयः क्षत्रियवारः देवस्यलेगश्च। दृष्टज्ञातके तद्दोकायाञ्च मूलं दृश्यम्। यहयशब्दे तन्मन्त्रजपादिकं दृश्यम्। जन्मकाले लग्नादिकस्थस्य तस्य फलं जातकपद्धतावुक्तं यथा

"लग्ने१ सूर्ये खलकेशः प्रचण्डो मानी क्रोधी नेत्ररुक् निष्ठुरश्च। शूरोऽज्ञानस्वजनैः कर्कशाङ्गो नीचे निःस्वो भूपजोऽर्थच्छिदोनः। धने२ दिनेशे वक्तृवित्तभृत्यचतुष्पदाढ्योऽपि नरो भवेत् सः। विनष्टसौभाग्यसुखो व्यालेचोरेर्हृतार्थो सुतरोगदुःखी। सहस्रदण्डो सहज३ वन्धाढ्यो धीविक्रमैर्लोकमनोभिरामः। विनष्टबन्धोदरजो नरः स्याद्दृष्टारिपक्षस्य विनायकश्च। मित्रे मित्रे४वन्धुभवोऽहनैः स्याद्धीनः सौख्यैर्मानसोत्थैश्च हीनः। तातास्वादेर्नाशकारी नरो वै सेवाकारो भूपतेः कृत्सितस्य। भूनौ५ भानौ सूनुसौख्यस्वहीना दुर्गारण्यपर्व्वताधारेष्वपरक्तः। मेधायुक्तो मन्त्रसम्प्राप्तसम्पत्सत्त्वाढ्यो जायते मानवोऽयम्। कुसदगदनयत्नौ शत्रुभावेऽप्रपञ्चे भवति नरपतिर्वा दण्डनेता धनाढ्यः। प्रबलजठरवह्निर्भूरिकामो गुणी वै बलरिपुसहितः स्यात् पूरुषः क्वचिदेवम्। भार्य्याभावे७ भास्करे चाभिभूतो भार्य्याभिर्वै हीनकान्तीरुगाढ्यः। भूपाद्वन्धै पीडितोऽसाध्यरोगी सुखीहीनो मानवः क्षीणहीनः। निधनगे८ गगनस्थिते नरो नयनयोर्विकलत्वयुतो भवेत्। तनुधनात्मजजीवितसौख्यभागभिमतेन जनेन वियोजितः। धर्मस्थिते धर्मकरे धनेन धनेन युक्तो बहुमित्रपुत्रः। सुरेज्यसुन्दरकसुन्दभक्तिः पितृप्रियो वैरकरः सदृद्वः। गगन१०गे गगनस्थ मणौ नरो मतिधनात्मजवैभवशौर्ययुक्। रतिबलसुतकार्य्यसद्धिभाग् भवति वाहनवान् नृपसद्गुणः। प्राप्ति११स्थाने सप्तसप्तौ नरः स्यात् प्राप्ता वित्तस्याथ दृष्ट्वा समेतः। मन्त्री हेयः सबलः सिद्धकर्मा क्रूरो कान्तानिजितो बन्धभृत्यः। व्यये१२ सूर्ये नरः काणः पितृद्वेषी बन्धोश्चितः। बन्ध्यापतिर्भिन्नलाङ्गः क्षुद्रस्तु पतितो भवेत्"। मेषादिस्थस्य तस्य फलं जातकग्रन्थे २०८८ पृ० दृश्यम्।

सूर्य्यकान्त पु० सूर्यस्य कान्तः प्रियः। १स्फटिकमणौ हला० २सूर्यसम्बन्धि यत्कान्तिमत्त्वमस्मिन् (आतपे) मणौ च हेमच०।

सूर्य्यकान्ति पु० सूर्येण कान्तिर्यस्य। श्वेतपुष्पप्रभेदवृक्षविशेषे शब्दच०। हृत०। २सूर्यस्य च दीप्तौ स्त्री।

सूर्य्यकाल पु० सूर्योपलक्षितः कालः शाक०। दिवसे शब्दच०।

सूर्य्यग्रहण न० सूर्यस्य राहुणा तदाक्रान्तभूच्छायया ग्रहणमाक्रमणम्। ज्योतिषोक्ते राहुपरिवेषभूमिच्छायया सूर्यमण्डलस्य आक्रमणरूपे खगे सूर्यग्रहादयोऽस्यत्र। उपरागशब्दे १२८८ पृ० दृश्यम्।

सूर्य्यज पु० सूर्यात् जायते जन-ड। १शनिग्रहे २यमे ३वैवस्वते मनौ ४सुग्रीववानरे च अटा०। सूर्यपुत्रादयोऽस्यत्र। ५यमुनायां स्त्री हेमच०। ६कर्णे पु०।

सूर्य्यपत्र पु० सूर्य इव रक्तं पत्रमस्य। आदित्यपत्रे राजनि०।

सूर्य्यभक्त पु० सूर्यस्य भक्त इव प्रियः। १वन्धूकवृक्षे। हृत०। २सूर्यभक्तियुक्ते त्रि० मेदि०। [२पुष्पभेदे शब्दच०।

सूर्य्यमणि पु० सूर्यप्रियः मणिः। १सूर्यकान्तमणौ हेमच०।

सूर्य्यलता स्त्री सूर्यभक्ता लता। आदित्यभक्तायाम् राजनि०।

सूर्य्यवल्ली स्त्री सूर्यतुल्यपुष्पिता वल्ली। अर्कपुष्पिकावृक्षे रत्न०

सूर्य्यसारथि पु० हृत०। अरुणे गरुड़ाग्रजे शब्दच०। सूर्यसूतादयोऽस्यत्र।

सूर्य्या स्त्री सूर्यस्य भार्य्या टाप्। १स्वमानुषीं संज्ञानाम्नीं सूर्यभार्य्यायाम्। मानुषीं कृत्यान्तु ङीपि। सूरीत्यपि।

सूर्य्यालोक पु० हृत०। आतपे रौद्रे राजनि०।

सूर्य्यावर्त्त पु० सूर्य इवावर्त्तते वा+वृत-घञ्। (ऊड़ुङ्ड़िया) २तुपभेदे (सुनफिया) २यवके च रत्नमा०। ३आदित्यभक्तायां स्त्री राजनि०।

सूर्य्याश्मन् पु० सूर्यप्रियः अश्मा। सूर्यकान्तमणौ हेमच०।

सूर्य्याह्व पु० सूर्यमाह्वयते सद्भते वर्णेन आ+ह्वे-क। १ताम्रे त्रिका०। सूर्यस्य आह्वाऽऽह्वायश्च। २अर्कवृक्षे पु० राजनि०। [स्त्रियाम् अमरः २तयोर्मेलने च।

सूर्य्येन्दुसङ्गम पु० सूर्यस्य इन्दोश्च सङ्गमः कालः। १अमा-

सूर्य्योढ पु० सूर्य ऊढोऽस्मगतो यत्र। १सूर्यास्तसमयकाले हेमच०। "दिवातिथौ तु विमुखे गते यत् पातकं भवेत्। तदेवाष्टगुणं विद्यात् सूर्य्योढे विमुखे गते" आ० त०। सूर्य्येण सूर्यास्तकालेन ऊढः प्राप्तितः वह-क्त। २तत्कालागतातिथौ "सूर्य्योढस्तु स संप्राप्तो यः सूर्यास्तं गतेऽतिथिः" हेमच०। [दासाश्च शोपदेशः।

सृ गतौ स्थिता चु० उभ० सक० सेट्। सारयति ते पर्यु-

सृ गतौ भ्वादि० परस्मै० सक० अनिट् सरति । असरत् असा-र्षीत् पर्युदासाच्च ओपदेशः । "नाज्ञानं करिणां सखे" च रघुप्रयोगात् आत्म० । [साच्च ओपदेशः ।

सृ गतौ जु० वैदिकः पर०सक०सेट् । ससर्त्ति असरत् पर्युदा-

सृक पु० सृ-कक् । १कैरवे २वाणे उणा० । ३पद्मे ४वायौ च मि० कौ० ।

सृकण्डु पु० सृ-क्विप् पृषो० कर्म० कण्डुरोगे शब्दर० ।

सृकाल पु० सृ-कालन् कस्य नेत्वम् मृगाले शब्दच० ।

सृक(न्) न० सृज-कन् कनिन् वा कस्य नेत्वम् । ओष्ठप्रान्त-भागे "सृक्कणी परिलेढि च" स्मृतिः । "महासृक्काय ओभितो नृसिंहवदिति" श्लेषात् कान्तताप्यस्य ।

सृक्कन् न० सृज-कनिप् । ओष्ठप्रान्तभागे अमरः । पृषो० । सृकिन् अपत्ये अरुणः । सृक्किणो तत्वार्थं स्त्री राजनि०

सृग पु० सृ-गक् गस्य नेत्वम् । भिन्दिपालास्त्रे अमरः ।

सृगाल पुंस्त्री० सृ-गालन् गस्य नेत्वम् । १जम्बुके (शेयाल) शब्दर० । स्त्रियां ङीष् । २दैत्यभेदे हरिवं० ।

सृज विसर्गे त्यागे दिवा० आत्म० अनिट् सक० । सृज्यते असृष्ट । पर्युदासाच्च ओपदेशः ।

सृज विसर्गे तु० पर०सक०अनिट् सृजति असाक्षीत् ससर्जिथ सस्रष्ट स्रष्टा स्रक्ष्यति । पर्युदासाच्च ओपदेशः ।

सृजकाचार पु० सृजति वर्चस्त्वं सृज-क ततः स्वार्थे क सृजका सर्जिका तया कर्म० । सर्जिकाचारे दृश्यताम् ।

सृणि पु० सृ-निक् । १अङ्कुशे शब्दमा० । २यवसूकशास्त्रे स्त्री अमरः । तत्र वा ङीष् । सृणीत्यपि ।

सृणि(णी का स्त्री सृणि+कन् ईकन् वा । याचायाम् अमरः

सृति स्त्री सृ-भावे क्तिन् । १गमने । करणे क्तिन् । २पथि च मेदि० । [संक्षिप्त०]

सृत्वन् पु० सृ-क्वनिप् । १प्रजापतौ उज्ज्वल० । २विसर्पे १हड्डौ

सृत्वर त्रि० सृ-क्वरप् । १गमनकर्त्तरि स्त्रियां ङीष् । सा च २मातरि संक्षिप्तसा० ।

सृदर पु० सृ-अरक् दुक् च सर्पे मि० कौ० ।

सृदाकु पु० सृ-काक दुक् च । १वायौ २वज्रे ३अग्नौ ४प्रति-सूर्य्यके मेदि० । ५मृगे संक्षिप्त० । नद्यां स्त्री उणा० ।

सृप गतौ भ्वा० पर० सक० अनिट् । सर्पति असृपत् । पर्युदासाच्च ओपदेशः ।

सृपाट संज्ञौ० सृप-काटन् । १परिमाणभेदे २रक्तधारायां गोवर्द्धनः । स्त्रियां ङीष् । स्वार्थे क तत्र ह्रस्वश्च । सृ-पाटिका । अन्यौ हेमच० ।

सृप्र पु० सृप-क्रन् । चन्द्रे उणा० । [२गमनशीले त्रि० ।

सृमर पुंस्त्री० सृ-क्मरच् । १मृगभेदे अमरः । स्त्रियां ङीष् ।

सृष्ट त्रि० सृज-क्त । १निर्मिते २युक्ते ३निक्षिप्ते ४वर्द्धिते मेदि० । ५भूषिते अजयः । ह्रस्वश्च ।

सृष्टि स्त्री सृज-क्तिन् । १निर्माणे २स्वभावे च मेदि० कर्मणि क्तिन् । ३सृज्यमाने "या सृष्टिः स्रष्टुराद्येति शङ्करोक्ता० ४निर्गुणे शब्दर० ।

ब्रह्माण्डसृष्टिप्रकारः नानापुराणेषूक्तः तत्र मत्स्यपु-क्तः प्रकारो यथा

"महाप्रलयकालान्ते एतदासीत्तमोमयम् । प्रसुप्तमिव चात्यर्थमज्ञातमलक्षणम् । अविज्ञेयमविज्ञातं जगत् स्याच्च चराचरम् । ततः स्वयम्भूरव्यक्तः प्रभवः पुरुष-कर्मणाम् । व्यञ्जयन्नेतदखिलं प्रादुरासीत्तमानुदः । योऽतीन्द्रियः परो व्यक्तादणुर्ज्ञेयानन्तः सनातनः । नारा-यण इति ख्यातः स एकः स्वयमुद्बभौ । यः शरीरा-दभिध्याय विसृजन्विविधं जगत् । आपश्चैव ससर्जादौ तासु बीजमवासृजत् । तदेवाण्डं समभवद्धैमं रूप्यमयं महत् । संवत्सरसहस्रेण स्वयांयुतसमप्रभम् । प्रकि-ञ्चान्तर्महातेजाः स्वयमेवात्मसम्भवः । प्रभावाद्यपि स्रष्टुर्व्याप्ता विष्णुत्वसम्भवः पुनः । तदन्तर्भगवानेष सूर्य्यः समभवत् पुरा । आदित्यत्वादिभूतत्वात् ब्रह्मा ब्रह्म षडात्मभूत् । दिवं भूमिं समकरोत्तदण्डशकलद्वयम् । स चाकरोद्दिशः सर्वा मध्ये व्योम च शाश्वतम् । जरा-युर्मेरुसख्यास्य शैलास्तस्याभवंस्तदा । यदुल्बलदभून्मेघ-स्तडित्सङ्घातसङ्कुलम् । नद्योऽण्डनाड्यः समभूनाः पितरो मनवस्तथा । सप्त येऽम्भो वसुद्वास्य तेऽपि चान्त-र्जलोद्भवाः । लवणेक्षुसुराद्यास्य नानारत्नसमन्विताः । स सिसृक्षुरभूदेवः प्रजापतिरनिन्दम ! । तत्तेजसस्य त-तैव मातरण्डः समजायत । सृतेऽण्डे जायते यस्मा-न्मार्त्तण्डस्तेन स स्मृतः । रजोगुणमयं यत्तद्रूपं तस्य महात्मनः । चतुर्मुखः स भगवानभूत्तोकपितामहः । येन सृष्टं जगत्सर्वं स देवासुरमानुषम् । तमवेहि रजोरूपं महत्सत्त्वसमाश्रयम्" । मनुरुवाच "चतुर्मुख-स्त्वमगमस्त कथं लोकपितामहः । कथं तु लोकानसृ-जत् ब्रह्मा ब्रह्मविदांवरः" । मत्स्य उवाच "तपश्चचार प्रथममसराणां पितामहः । आविर्भूतास्ततो वेदा मुखेभ्यस्तस्य पद्मजाः । पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् । नित्यं शब्दमयं पुण्यं शतकोटिप्रवि

स्मरन् । अनन्तरञ्च ब्रह्मभ्यो वेदास्तस्य विनिःसृताः । मीमांसा न्यायविद्याश्च प्रमाणाष्टकसंयुताः । वेदाभ्य सरतस्याश्च प्रजाकामस्य मानसाः । मनसा पूर्वसृष्टा वै जाता यस्मेन मानसाः । मरीचिरभवत् पूर्वं ततोऽत्रिर्ब्रह्मणात् सुधीः । अङ्गिराश्चाभवत्पश्चात् पुलस्त्यस्तदनन्तरम् । ततः पुलहनामा वै ततः क्रतुरजायत । प्रचेताश्च ततः पुत्रो वसिष्ठश्चाभवत् पुनः । पुत्रो भृगुरभूत्तस्माद्दक्षोऽप्यचिरादभूत् । दशेमान् मानसान् ब्रह्मा सुतान् पुत्रानजीजनत् । शरीरानथ वक्ष्यामि मतॄंस्तेषां प्रजापतेः । ब्रह्मणोऽङ्गुष्ठादक्षिणाद्दक्षः प्रजापतिरजायत । धर्मः स्तनान्नादभवत् हृदयात् कुसुमायुधः । भ्रूमध्यादभवत् क्रोधो लोभश्चाधरदन्नतः । मुखे मोहः समभवदहङ्कारादभून्मदः । प्रमोदश्चाभवत् कण्ठान् मृत्युर्लोचनतो नृप ! । भरतः करमध्यात्तु ब्रह्मसूनुरभूत्ततः । एते नव ! सुता राजन् ! कन्या च दशमी पुनः । अङ्गजा इति विख्याता दशमी ब्रह्मणः सुता । मनुरुवाच "मुखे मोहः समभवदिति यत्परिकीर्त्तितम् । अहङ्कारः स्मृतः क्रोधो बुद्धिर्नाम किमुच्यते" । मत्स्य उवाच "रुक्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम् । साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता । केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः । एतदेव प्रजासृष्टिं करोति विकरोति च । गुणेभ्यः क्षोभमाप्तेभ्यस्त्रयो देवा विभेजिरे । एका मूर्त्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः । सर्गविकारात् प्रधानात्तु महत्तत्त्वं प्रजायते । महानिति यतः ख्यातिर्लोकानां जायते सदा । अहङ्कारस्य महतो जायते मानवर्धनः । इन्द्रियाणि ततः पञ्च ज्ञेयान्यु बुद्धिवशानि तु । प्रादुर्भवन्ति चान्यानि तथा कर्मवशानि तु । श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका च यथाक्रमम् । वाक्पाणिपादपायूपस्थं चेतीन्द्रियसंग्रहः । शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः । तत्सर्गानन्दनादानगत्यालापास्तत्क्रियाः । मन एकादशं तेषां कर्मबुद्धिगुणान्वितम् । इन्द्रियाणां वयस्त्वक्सारस्य मूर्तिं मनीषिणः । श्रयन्ति यस्मात्तन्मात्राः शरीरं तेन संस्मृतम् । शरीरयोगाज्जीवोऽपि शरीरी गद्यते बुधैः । मनः सृष्टिं विकुरुते चोद्यमानं विशेषतः । आकाशं शब्दतन्मात्रा दभूच्छब्दगुणात्मकम् । आकाशाच्छ्वसनोवायुः शब्दस्पर्शगुणोऽभवत् । वायोश्च स्पर्शतन्मात्रात्तेजश्चाविरभूत्ततः । त्रिगुणं तद्विकारेण तच्छब्दस्पर्शरूपवत् । तेजो विकारादभवद्वारि राजंस्तद्गुणम् । रसतन्मात्रसम्भूतं प्रायो रसगुणात्मकम् । भूमिस्तु गन्धतन्मात्रादभूत् पञ्चगुणान्विता । प्रायो गन्धगुणा सा तु बुद्धिरेषा गरीयसी । एभिः सम्पादितं भुङ्क्ते पुरुषः पञ्चविंशकः । ईश्वरेच्छावशः सोऽपि जीवात्मा कथ्यते बुधैः । एवं षड्विंशकं प्रोक्तं शरीरं इह मानवे । सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते । एतत्तत्त्वात्मकं कृत्वा जगद्वेधा व्यजीजनत् । सावित्रीं लोकसृष्ट्यर्थं सृष्टिं कृत्वा समाश्रितः । ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् । स्त्रीरूपमर्द्धमकरोद्दक्षं पुरुषरूपवत् । शतरूपा च सा ख्याता सावित्री च निगद्यते । सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप ! । ततः स्वदेहसम्भूतामात्मजामित्यकल्मषम् । दृष्ट्वा तां व्यथितस्तत्कामबाणार्दितो विभुः । व्यहो रूपमहोरूपमिति चारु प्रजापतिः । ततो वसिष्ठप्रमुखाः भगिनीमिति चुक्रुशुः । ब्रह्मा न किञ्चिदूचे तन्मुखालोकनादृते । व्यहो रूपमहोरूपमिति प्राह पुनः पुनः । ततः प्रधावमानन्तां पुनरेवाभ्यलोकयत् । व्यथ प्रदक्षिणं चक्रे सा पितुर्वरवर्णिनी । पुत्रेभ्यो लज्जितस्यास्य नष्टं पालोकनेच्छया । आविर्भूतं ततो ब्रह्मं दक्षिणं पार्श्वमुत्तमम् । विस्मयस्मेरदोषञ्च पार्श्वात्सुदमाजनतः । चतुर्थमभवत्पश्चाद्वामं कामशरातुरम् । ततोऽन्यदभवत्तस्य कामातुरतया तथा । चलत्तन्व्यास्तदाकारव्यालोकनकुतूहलात् । सृष्ट्यर्थं यत् कृतं तेन तपः परमदारुणम् । तत्सर्वं नाशमगमत् स्वतोपगमेच्छया । तेनोर्ध्वं वक्त्रमभवत्तस्य धीमतः । आविर्भूताभिस्तदा तस्य ततस्तानब्रवीत् ब्रह्मा पुत्रानात्मसमुद्भवान् । प्रजाः सृजध्वमखिलाः सदेवासुरमानुषीः । एवमुक्तास्ततः सर्वे सृष्टवन्तः प्रजाः पृथक् । ततेषु तेषु सृष्ट्यर्थं प्रणामायनतामिमाम् । उपयेमे स विश्वात्मा शतरूपामनिन्दिताम् । सम्बभूव तया सार्द्धमतिकामातुरो विभुः । सलज्जाञ्चकसे देवः कमलोदरमन्दिरे । यावद्वर्षशतं दिव्यं यथान्यः प्राकृतो जनः । ततः कालेन महता तस्यां पुत्रोऽभवन्मनुः । साऽभूव इति ख्यातः स विराडिति नः श्रुतम् । य तु तद्रूपसामान्यादधिपुरुष उच्यते । वैराजा यत्र ते जाता बहवः प्रथितव्रताः । स्वारोचिषे वा महाभागाः सप्त सप्त तथा परे । स्वारोचिषप्रमुखाः सर्वे ते ब्रह्मतुल्यस्वरूपिणः । कौत्सिषप्रमुखा

सदृदुवेषान्वं सप्तमोऽधुना" । सर्गशब्दे ५२५० पृ० तस्यानवधित्वं दृश्यम् । [गर्भदात्रीत्युपे राज्ञि० ।

सृष्टिप्रदा स्त्री सृष्टिं तद्धेतुं गर्भं प्रददाति प्र+दा-क । सृ (षृ)।ङ्क्षायां क्रया० पर० स० सक० सेट् । स्रष्णाति असारीत् सीर्ष्टः सीर्ष्णिः । षोपदेश एव न्यायः ।

सेक गतौ भ्वा० आ० सक० सेट् । सेकते असेकिष्ट पर्युदासाच्च षोपदेशः । क्वदित् चङि न ह्रस्वः ।

सेक पु० सिच-घञ् । सेचने जलादिना आर्द्रीकरणे हेमच० ।

सेकपात्र न० सिच्यतेऽनेन सिच-करणे घञ् कर्म० । (सेचनी) सेचनपात्रभेदे अमरः ।

सेकिम न० सेकेन निर्वृत्तम् सेक-वा ठिम । मूलके हेमच० ।

सेतृ पु० सिञ्चति रेतः सिच-तृच् । १पत्यौ हेमच० । २सेचके त्रि० स्त्रियां ङीप् ।

सेक्त्र न० सिच-करणे ष्ट्रन् । सेकपात्रे त्रि० कौ० ।

सेचक पु० सिञ्चति तोयेन पृथिवीम् सिच-ण्वुल् । १मेघे २सेककर्त्तरि त्रि० मेदि० ।

सेचन न० सिच-भावे ल्युट् । १जलादिना आर्द्रीकरणे २क्षरणे । करणे ल्युट् । ३सेचन्यां क्षुद्रसेकपात्र्यां स्त्री ङीष् मेदि० ।

सेटु पु० सिट-उन् । (तरसज) वृक्षे त्रिका० ।

सेतु पु० सि-तुन् । १क्षेत्रादेर्जलधारणार्थे (आल) (जाङ्गाल) पदार्थे अमरः । २वरुणवृक्षे मेदि० । मन्त्रजपाङ्गे ३प्रणवात्मके मन्त्रे च स्वार्थे क । सेतुक वरुणवृक्षे शब्दर० । "सेतुप्रदानादिन्द्रस्य लोकमाप्नोति मानवः" मठादि० त० । सेतुभेदश्च । सीमाविवादशब्दे ५३०० पृ० उक्तः ।

"सेतुश्च द्विविधः प्रोक्तः खेयो बन्ध्यस्तथाऽपरः । तोयप्रवर्त्तनात् खेयो बन्ध्यस्तु तन्निवर्त्तनात्" नारदः ।

मन्त्रजपाङ्गसेतुश्च कालिकापु० ५५ अ० उक्तो यथा "मन्त्राणां प्रणवः सेतुस्तत्सेतुः प्रणवः स्मृतः । स्वयमेवोच्चरेत् पूर्वं परस्तान्न विधीर्यते । नमस्कारो महामन्त्रो देव इत्युच्यते सुरैः । द्विजातीनामयं मन्त्रः शूद्राणां सर्वकर्मणि । अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः । वेदत्रयात् समुद्धृत्य प्रणवं निरमे पुरा । स उदात्तो द्विजातीनां राज्ञां स्यादनुदात्तकः । स्वरितस्त्वोरुजातानां मनसापि तथा चरेत् । चतुर्दशस्वरो योऽसौ सेतुरोकारसंज्ञकः । स चातुस्वारचन्द्राभ्यां शूद्राणां सेतुरुच्यते । निःसेतुकं यथा तोयं क्षणाच्छिन्नं प्रसर्पति । मन्त्रस्तथैव निःसेतुः क्षणाद् धरति यज्वनाम् । तस्मात् सर्वेषु मन्त्रेषु चतुर्वर्णा द्विजादयः । पार्श्वयोः सेतुमाधाय जपकर्म समारभेत् । शूद्राणामादिसेतुर्वा द्विसेतुर्वा यथेच्छतः । द्विसेतवः समाख्याता सर्वदैव द्विजातयः" ।

सेतुबन्ध पु० ६त० । लङ्कागमनार्थं श्रीरामेण नलकपिद्वारा कारिते समुद्रोपरि १आलीबन्धे २क्षेत्रादेरालीबन्धे च ।

"ततोऽब्रवीद्रघुश्रेष्ठं सागरो विनयान्वितः । नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्मणः । सुतो धीमान् समर्थोऽस्मिन् कार्ये लब्धवरो हरिः । कीर्त्तिं गायन्तु ते लोकाः सर्वलोकमलापहाम् । इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम् । ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः । नलमाज्ञापयच्छीघ्रं वानरैः सेतुबन्धनात् । ततोऽतिहृष्टः प्लवगेन्द्रयूथपैर्महाबलैर्मेरुसमानविग्रहैः । बबन्ध सेतुं शतयोजनायतं सुविस्तरं पर्वतपादपैर्दृढम्" अध्यात्मरा० ३ अ० । "सेतुमारभमाणस्तु तत्र रामेश्वरं शिवम् । सङ्कल्पनियतो गत्वा पुरीं वाराणसीं नरः । आनीय गङ्गासलिलं रामेशमभिषिच्य च । क्षिप्रा समुद्रे तद्वारि ब्रह्म प्राप्नोत्यसंशयः । कृतानि प्रथमेनाह्ना योजनानां चतुर्दश । द्वितीयेन तथा चाह्ना योजनानाञ्च विंशतिः । तृतीयेन तथा चाह्ना योजनान्येकविंशतिः । चतुर्थेन तथा चाह्ना द्वाविंशतिः तथा कृतम् । पञ्चमेन त्रयोविंशद् योजनानां समन्ततः । बबन्ध सागरे सेतुं नलो वानरसत्तमः । तेनैव जग्मुः कपयो योजनानां शतं द्रुतम् । असंख्याताः सुवेलाद्रिं रुरुहुः प्लवगोत्तमाः" ४अ० ।

सेतुभेदिन् पु० सेतुं भिनत्ति भिद-णिनि । दन्तीवृक्षे शब्दर० ।

सेतुवृक्ष पु० सेतुनामको वृक्षः । वरुणवृक्षे शब्दर० । २सेतूपरिस्थे वृक्षे च ।

सेत्र न० सि-बन्धने ष्ट्रन् । (बेड़ि) निगड़े त्रि० कौ० ।

सेना स्त्री सि-न, सह एनेन प्रभुणा वा । १सैन्ये अमरः । २जिनानां १माहभेदे हेमच० । [३सेनाया उपकरणे च ।

सेनाङ्ग न० ६त० । १रथस्थरथपदातिसंघाते अमरः ।

सेनाचर पु० सेनायां चरति चर-ट । सेनानुगामिनि "सेनाचरीभवदिभाननेति" नैष० । [कैये २सेनापतौ च अमरः

सेनानी पु० सेनां देवसेनां वा नयति नी-क्विप् । १कार्त्तिकेये २सेन्याध्यक्षे च मेदि० ।

सेनापति पु० ६त० । १कार्त्तिकेये २सैन्याध्यक्षे च मेदि० ।

"कुलीनः शीलसम्पन्नो धनुर्वेदविशारदः । क्षत्रियश्चाश्वयुजासु कुशलः क्षत्रभाषितः । निमित्ते शकुने ज्ञाता वेत्ता चैव चिकित्सिते । कृतज्ञः कर्मणां शूरस्तथा

117 भाग ६

लोभसङ्ग ऋजुः। व्यूढतत्त्वविधानज्ञः फलयुगारविशेषवित्। राज्ञा सेनापतिः कार्यो ब्राह्मणः क्षत्रियोऽथ वा" मत्स्यपु० १८६ अ०।

सेनामुख न० ६त०। १सैन्याग्रे संख्याविशेषयुते हस्त्यश्वादौ हस्तिनः त्रयः रथाः त्रयः अश्वा नव पत्तयः पञ्चदश एतत्सप्तदावे अमरः। [त्रिके सैन्ये अमरः।

सेनारक्ष पु० सेनां रक्षति रक्ष-अण्। सेनारक्षाकारके यो०।

सेफ पु० सि-फ। शेफे पुंसोऽसाधारण्यलिङ्गे जटा०।

सेमल्ली स्त्री सिम-भिदि गौ० ङीष्। (सेंवाँती) पुष्पभेदे।

सेर पु० "पादोनगद्यानकतुल्यटङ्कैर्द्विसप्तत्यैस्तुल्यैः कथितोऽत्र सेरः। मणाभिधानं खयगैश्च सेरैर्धान्यादितौल्येषु सुरुक्मदत्तः १। १द्रव्यहेन्दु १६२। सङ्ख्यैर्घटकैश्च सेरैस्तैः पञ्चभिः स्याद्वटिका च ताभिः। मणोऽष्टभिस्त्वालमगीरशाहक्षितौ तं वा निजराजधान्याम्" लीला० उक्ते मानभेदे।

सेरराह पुंस्त्री०। श्वेताश्वे हेमच० स्त्रियां ङीष्।

सेरु त्रि० सि-वन्धने रु। बन्धनकर्त्तरि व्या०।

सेलु पु० सि-लु। श्लेष्मातकवृक्षे हिङ्गुपत्रको०।

सेव न० सेव-कर्मणि घञर्थे क। सेविफले (सेंधो) राजनि०

सेवक पु० सीव्यति सिव-ण्वुल्। १सीवनकर्त्तरि (दरजी) सेव-ण्वुल्। २भृत्ये २दासे ३बन्धुचरे च त्रि० मेदि०।

सेवकालु पु० सेवं सेविफलमिव कायति कै-क कर्म०। निशाभङ्गवृक्षे (दुग्धफेया) शब्दच०। [निधौ भरतः।

सेवधि पु० सेवं सेवनं दधाति धा-कि। शङ्खप्रस्थतो

सेवन न० सिव-सेव-वा ल्युट्। १खड्यादिना वस्त्रादेर्योजने अमरः। २आश्रयणे ३उपभोगे ४बन्धने ५पूजने ६भजने च मेदि०। सेव्यतेऽनया ल्युट्। ७सूच्यां स्त्री ङीप् हेमच०।

सेवा स्त्री सेव-अ। १भजने २आराधने ३उपभोगे ४आश्रयणे च। सेवापराधाश्च अपराधशब्दे २१२ पृ० दर्शिताः वाराहेऽत्रान्यथोक्ता यथा "कर्मणा मनसा वाचा ये पापरूपा जनाः। मद्यं दन्तकाष्ठस्य राजान्नस्य तु भोजनम्। मैथुनं शवसंस्पर्शः पुरीषोत्सर्ग एव च। मूत्रत्यूदक्यास्पर्शनं सर्शनं मोहनं तथा। अभाक्ष्यभक्षणं कोपं पिण्याकस्य च भक्षणम्। रक्तपारक्यमलिननीलजाम्बरधारणम्। गुरोश्चालोकनिर्बन्धः पतितानाञ्च भक्षणम्। अभक्ष्यभक्षणञ्चैव तथाकुलीयविभीतकम्। आहानं तु वराहस्य जालपादवराकयोः। भक्षणं देवतागारे सोपानत्कोपसर्पणम्। तथैव देवपूजायां निषिद्धकुसुमार्चनम्। अनुक्तार्थं च निर्माल्य पूजा जोर्ध्वान्धकारयोः। पानं सुरायाः देवस्य अन्धकारे प्रबोधनम्। पातकर्मार्चने विष्णोरनमस्करणं तथा। अपराधास्त्वयस्त्रिंशत् समाख्याता मया धरे!। एभिर्युक्तस्तु पुरुषो विष्णुं नैव प्रपद्यते। दूरस्थो न नमस्कारं कुर्यात् पूजां तु राजनी"।

सेवि न० सेव-कर्मणि इन्। फलभेदे (सेंधो) राजनि०।

सेविका स्त्री एकाङ्गभेदे छन्दोऽङ्गशब्दे २१२१ पृ० दृश्यम्।

सेवित त्रि० सेव-क्त। १आराधिते शब्दर०। २आश्रिते ३उपयुक्ते च ४वेश्यिफले न० राजनि०।

सेव्य न० सेव-ण्यत्। १वीरणमूले अमरः। २अश्वत्थे पु० राजनि०। ३हिङ्गुलक्षवृक्षे पु० शब्दर०। ४सेवार्हे त्रि०। ५वन्दाह्वे स्त्री हेमच०। [राजनि०।

सैंहली स्त्री सिंहले देशे भवा अण् ङीप्। सिंहलीपिप्पल्याम्

सैंहिक पु० सिंहिकायां भवः ठक। १राहौ शब्दर०। तस्याः अपत्यम् ठक्। सैंहिकेयोऽप्यत्र अमरः।

सैकत न० सिकताः सन्त्यत्र अण्। वालुकाप्रचुरे नद्यादितटे अमरः। २सिकताप्रचुरदेशे त्रि० राजनि०।

सैकतिक पु० बहु एकतया सैकतं तदस्यास्ति ठन्। १संन्यस्ते २अपणके ३सन्देहजीविनि त्रि० मेदि०। ४मालयालायां ५मङ्गलस्तम्भके न० मेदि०। [२सैकतप्रिये त्रि०।

सैकतेष्ट न० सैकतं स्थानमिष्टं यस्य। १चार्द्रके राजनि०।

सैतवाहिनी स्त्री सितायाः शर्करायाः अयम् अण् सैतो मधुरस्तं वहति वह-णिनि। वाहदायां नद्याम् अमरः।

सैद्धान्तिक पु० सिद्धान्तं वेत्ति सिद्धान्त+ठक्। सिद्धान्ताभिज्ञे हेमच०। [२तत्कर्मणि च "सैनापत्यलुपेत्य वः" कुमारः।

सैनापत्य न० सेनापतेर्भावः कर्म वा ष्यञ्। १सेनापतिधर्मे,

सैनिक पु० सेनायां वसत्यति ठक्। १भृतिके वृत्त्यश्वादौ अमरः। प्राणिवधनियुक्ते भाग०५।६६अ० ति०त०रघु०। वस्तुतस्तु मौनिका एव श्रुतिनेत्यैव तत्र पाठः साधुः २सेनासम्बन्धिनि त्रि०।

सैन्धव न० सिन्धुनदीसमीपे देशे भवम् अण्। १लवणभेदे अमरः "सैन्धवं लवणं स्वादु दीपनं पाचनं लघु। स्निग्धं रुच्यं हिमं वृष्यं स्रोतसां नेत्र्यं त्रिदोषहृत्" भावप्र०। सिन्धोरदूरभवः अण्। २घोटकभेदे पुंस्त्री० अमरः तत्र बहुदूषणोपेतसिन्धुदेशस्यारब्धदेशाङ्गत्वात् तथात्वम्। स्त्रियां ङीप्।

सैन्धवखिल न० सैन्धवमेव खिलम् । सैन्धवशिलाशकलमये चिदानन्दस्वरूपे परमेश्वरे "स यथा सैन्धवखिलोऽनन्तरोऽबाह्यः कृत्स्नो रसघनः" बृत०ब्रा०१४।७।१।१२ ।

सैन्धी स्त्री तालाहिनियांसे राजनि० ।

सैन्य पु० सेनायां समवैति अण् । १मिलिते हस्त्यश्वादौ अमरः । सेनानां समूहः ष्यञ् । २सेनासमुदाये न० ।

सैरन्ध्री स्त्री सीरं हलं धरति भृ-मूल० क ङीष् च सीरन्ध्रः छेदकस्तस्येदं शिल्पकर्म अण् तदस्यास्ति अच् गौरा० ङीष् । परगृहस्थे स्वामिशिल्पकारिणि स्त्रीभेदे हेमच० पृथ्वी० सैरिन्ध्रीत्यपत्ये अमरः ।

सैरिक पु० सीरेण नाङ्गलेन खनति भूमिं सीरं वहति वा ठक् । १छत्रके छात्रिके अमरः । २लाङ्गलयोढरि वृषे (हालेर गरु) अमरः ।

सैरिभ पुंस्त्री० सीरे हले तद्वहने इभ इव गुरुत्वात् शाक० ततः स्वार्थेऽण् । १महिषे अमरः स्त्रियां ङीष् । "ओं ओं सैरिभमर्दिनीभिह महालक्ष्मीम्" महालक्ष्मीध्यानम् । २स्वर्गे त्रिका० । [भिरण्ट्राम् शब्दर० स्वार्थे क तत्रैव ।

सैरीय पु० सीरस्येदम् छ यण् सैरं हलाकारमर्हति ढक् ।

सैरेय पु० सैरं सीराकारमर्हति ढक् । १भिरण्ट्राम् शब्दर० ढकञ् । सैरेयकोऽप्यत्र राजनि० ।

सैवाल न० सेवायै सानादीनामुपभोगाय अलति पर्याप्नोति अच् सेवालं ततः स्वार्थे अण् । शैवाले स्वार्थे क । तत्रैव "या पांशुपाण्डुरवपुर्विरसा पुरासीत् सैवाद्यकाङ्क्षुरुचितामधुना बिभर्त्ति उद्भटपटी श्लथतां दधाति

सोढ़ त्रि० सह-क्त ढत्वभावः । १क्षान्ते तितिक्षिते अमरः कर्त्तरि क्त । २द्योतादिसहनशीले त्रि० । [शीले मेदि० ।

सोढृ त्रि० सह-तृच् वा ढत्वभावः । १सहनकर्त्तरि २क्षमाशीले च ।

सोत्कण्ठ त्रि० सह उत्कण्ठया सहस्य सः । औत्सुक्यान्विते अभीष्टलाभेच्छया विलम्बासहिष्णुत्वयुक्ते जटा० ।

सोत्प्रास न० उद्+प्र-श्वस-घञ् सह उत्प्रासेन सहस्य सः सोल्लुण्ठने अन्यार्थकस्य वाक्यस्य अन्यार्थकत्वकल्पनया तदुत्तरार्थके १वाक्ये २प्रियवाक्ये च शब्दर० ३सप्रश्वासेन सहिते त्रि० ।

सोदय त्रि० सह उदयेन प्रादुर्भावेण वृद्ध्या वा सहस्य सः १प्रादुर्भूते २वृद्धि(वृद्ध)युक्ते ३लाभयुक्ते च व्यय दृश्यञ्च सोदयम् स्मृतिः । [भ्रातरि २तादृशभगिन्यां स्त्री शब्दर०

सोदर पु० समानमुदरं यस्य समानस्य सः । १एकोदरभवे

सौदर्य पु० समाने उदरे भवितरि यत् सादेशः । १एकोदरजाते भ्रातरि । २तादृशभगिन्यां स्त्री अमरः ।

सोनह न०सु-विच् सुष्ठु नह्यते नह घञर्थे क । लशुने शब्दर०

सोन्माद पु० सह उन्मादेन सादेशः । उन्मत्ते उन्मादिणि ।

सोपप्लव पु० सह उपप्लवेन सादेशः । समाक्रान्तभूच्छायेन राहुणा योगरूपोपप्लवसहिते १चन्द्रे तथाभूतचन्द्रच्छायायोगयुक्ते २सूर्य्ये च अमरः । ३उपद्रवयुते त्रि० ।

चन्द्रार्कयोर्यासकारणमुपरागशब्दे प्रायेणोक्तं देवीपुराणोक्तमधिकमत्रोच्यते ।

"ब्रह्मोवाच "यदयं वदते लोको वालिशत्वान्महामते ! । तदहं संप्रवक्ष्यामि चन्द्रसूर्य्योपरागिकम् । यदि सत्यमयं यत्तत्तेजोराशिर्दिवाकरः । तत्कथं नोदरस्थेन राहुणा भस्मसात् कृतः । अथ वा राहुणाक्रम्य निजवक्त्रं प्रवेशितः । तत्कथं दर्शनेनोच्चैः शतधा न विखण्डितः । विमुक्तश्च पुनर्दृष्टस्तथैवाखण्डमण्डलः । न चास्यापहृतं तेजो न स्यादपसारितः । यदि वा ग्रस्त निष्पीतः कथं दीप्ततरोऽभवत् । तस्माच्च तेजसां राशौ राहोर्वक्त्रं गमिष्यति । भक्ष्यार्थं सर्वदेवानां सोमः सृष्टः स्वयम्भुवा । तत्स्थमप्यमृतञ्चापि सम्भृतं सूर्य्यतेजसा । पिबन्त्यमुमयं देवाः पितरश्च सुधाऽमृतम् । त्रयश्च त्रिंशतश्चैव त्रयस्त्रिंशत्तथैव च । त्रयश्च त्रिंशदाद्याश्च देवाः सोमं पिबन्ति ये । राहोरप्यमृतं भागः पुरा सृष्टः स्वयम्भुवा । तस्माच्छन्द्राङ्गरागत्वं पातुमिच्छति पर्वसु । उद्भूत्य पार्थिवीं छायामभ्राकारां तमोमयः । पातुमिच्छन् ततश्चेन्दुमाच्छादयति छायया । शुक्ले च चन्द्रमस्येति लक्षणे पर्वणि भास्करम् । सूर्य्यमण्डलसंस्थस्तु चन्द्रमेव लिहंस्तथा । तस्मात् पिबति तं राहुस्तनुच्छद्मा विनाशयन् । अविच्छिन्नं यथा एनं पिबति भ्रमरो मधु । चन्द्रस्यमृतं तद्वदेष्टाङ्गुरभ्युते । चन्द्रकान्तो मणिर्यद्वत्तुच्छिनं चरते क्षणात् । चरन्नपि न क्षीयेत तेजसा नैव मुच्यते । यथा सूर्य्यमणिः सूर्य्यादुत्पाद्य पावकं शुभम् । न भवत्यङ्गहीनोऽपि तेजसा नैव मुच्यते । एवं चन्द्रश्च सूर्य्यश्च क्षादितावपि राहुणा । स्वतेजसा न मुच्येते नाङ्गहीनौ बभूवतुः । पर्वस्थश्च च चन्द्रस्तु भाषिक्यकनकाकृतिः । सोमो दैवतसंयोगात् छाया योगाच्च पार्थिवात् । राहोश्च वरलब्ध्या वै प्रच्छन्नेऽमृतं गते । स्वदोषकाले सम्प्राप्ते वत्सं दृष्ट्वा च गौर्यथा । स्वाङ्गादेव चरेत् क्षीरं तथेन्दुः चरतेऽमृतम् । पितेव सूर्य्यो देवानां सोमो मातेव लक्ष्यते । यथा मातुः स्तनं

पीत्वा जीवन्ति सर्वजन्तवः । पीत्वाऽमृतं तथा सोमात् हृष्यन्ते सर्वदेवताः । सम्भृतं सर्वयज्ञेषु तथाय चरते शशी । तं चरन्तं यथाभागमुपजीवन्ति देवताः । तस्मिन् काले समभ्येति राहुरभ्यवकर्षति । सर्वमर्द्धं तिभागञ्च पादं पादार्द्धमेव च । व्याक्रम्य पार्थिवीं छायां यावत् चन्द्रमण्डलम् । ग्रसतः स भागो राहोस्तु देवभागास्तु शेषकाः । तस्मिं विधाय देवानां राहोः पर्वगतस्य च । चन्द्रो न च्यवमायाति तेजसा नैव मुच्यते । तिथिभागास्तु यावन्तः पुनस्त्यर्कं प्रमाणतः । पर्वच्छायास्थितः कालस्तावानेव प्रकीर्त्तितः । अतो राहुभुजः सोमः सोमर्द्धिर्दिवाकरात् । पर्वकाले स्थितिस्त्वेवं विपरीता पुनः पुनः । अतश्छादयते राहुरभ्रवच्छशिभास्करौ । राहुरभ्रकसस्थानः सोममाच्छाद्य तिष्ठति । छादयित्वा पार्थिवीं छायां भूममेघ इवोत्थितः । चन्द्रस्य यदवष्टब्धं राहुणा भास्करस्य च । तन्नावखण्डितं तस्य केवलं श्यामलौकिकम् । कर्दमेन यथा वस्त्रं शुक्लमप्युपलभ्यते । एकदेशोऽस्य सर्वं वा राहुणा चन्द्रमास्तथा । प्रक्षालितं तदेवेह पुनः शुक्लतरं भवेत् । राहुत्यक्तं भवेच्चन्द्रं निर्मलं चन्द्रमण्डलम् । राहुणा च्छादितौ वापि दृश्यौ चन्द्रदिवाकरौ । विप्राः शान्तिपरा भूत्वा पुनराप्याययन्ति तम् । एवं न गृह्यते सूर्यचन्द्रमास्तत्र गृह्यते । अबुधास्तं न पश्यन्ति मानुषा मांसचक्षुषः । जगतस्मोहनञ्चैतत् ग्रहणं चन्द्रसूर्ययोः" ।

सोपाधिक सह उपाधिना वा कप् सादेशः । उपाधियुक्ते प्रातिलोम्यया कृतदानादौ ।

सोपान न० उप-आन-भावे घञ् सह विद्यमानः उपानः उपरि गतिरनेन । आरोहणसाधने काष्ठादिनिर्म्मिता (पैठा) प्रभृतौ पदार्थे अमरः ।

सोभाञ्जन पु० शोभाञ्जन+पृषो० । (शजना) वृक्षे भरतः ।

सोम पु० सु-मन् । १चन्द्रे २कर्पूरे अमरः । ३कुबेरे ४यमे ५वायौ ६वसुभेदे ७जले ८सोमलतौषधौ ९वानरे मेदि० १०सोऽरमे हेमच० ११कवृक्षे १२दीधितौ उणा० । सह च(क)मया । १३शिवे १४वानरेशे त्रिकाण्डशे च ।

सोमस्य ग्रहभेदः तत्कक्षाप्रमाणादिकं खगोलशब्दे ४२२९ पृ०दृश्यम् । तत्प्रलयादिकं यथा

"चन्द्रः सिताङ्गसलिलात्मयष्टिर्व्योम्नो परिभ्रङ्गविवेकयुक्तः । क्वचित् क्वचिः शीतलरोचिषा युक्तः सच्चाश्रयो वातकफानिलात्मा सर्वार्थचि० । स च वाग्व्या वैश्यः वैश्यजातिः स्त्रीग्रहः नवग्रहसङ्गणितो नक्षत्रानाधीशः । ग्रहयज्ञशब्दे तन्मन्त्रादिकं दृश्यम् । तस्य जन्मकाले मेषादिराशिषु स्थितिभेदे फलभेदः बृहज्जातकोक्तः १०८७ पृ० जातकशब्दे उक्तः । लग्नादिस्थस्य तस्य फलं जातकपद्धतावुक्तं यथा

"चन्द्रे स्वभाजहृषगे तनुगे गुणाढ्यो दाक्षिण्यरूपधनवाक्सकले विधेयात् । अन्येषु वेषु तनुगे विकलश्च शूरः प्रोन्मत्तनीचवधिरः क्षयभाग्यवर्ज्यः । कृष्णस्थिते कैरवाणामधीशे भवेत् पतत्रिसिद्धार्थसौख्यैः समृद्धः । नरः पूर्णदेहे तु हीने विलोमं स्वजनद्वाक् च बोध्यं फलं तारतम्यात् । द्विजाधिराजे सहजेऽतिशोभः कफोद्भवान् संजनयेत्तनुश्च नीचः । कृशान्वितो भ्रातृजनाश्रयश्च प्रकाङ्क्षितः स्यात् मनुजोऽतिहिंस्रः । पातालसंस्थे सति शीतलांशौ जलप्रयाणाभिरतिर्नरः स्यात् । दाता सुहृद्वाहनसेवकाढ्यः सुखी सुखोत्कर्षयुतः सुमूर्धः । सुतेऽसमृद्धस्य सुते प्रभूतौ धीमित्रपुत्रैर्बहुभिः समेतः । शूरो नरः स्याद् बहुधान्यमित्रसमाढ्यकः क्षीणतरः सुखाढ्यः । शत्रौऽशत्रौ पद्मिनीनां स्थिते वा शत्रुघ्नातैः संयुतो दारुणश्च । सारान्वितश्यामलकाभ्याञ्च युक्तोऽनल्पालस्यः स्याच्च नीरोदराढ्यः । अग्निनि अग्निसुखीनिकेतनस्थे भवति सुखी सदनातुरः सुदेहः । अतिरनसूयकोऽपुष्टो गलिततनो बहुरोगदैन्यतप्तः । स्त्यौदुम्बराङ्गे मतिमान्नरः स्यादोजस्विताढ्योऽपि च बन्धनाद्यैः । सुक्षीणदेहः सति हीनदेहे तस्मिन् भवेदल्पकजीवितश्च । निजाधिनाथे नवमालयस्थे धीपुत्रमित्रद्रविणोपपन्नः । सौभाग्यसौख्यैः सुकृतैर्युतः स्याद् कान्ताजनेष्टोमनुजो दयावान् । दशमेऽग्नि सुधीतलः धामनि द्रविणधीसुकृतैः सहितः शुचिः । भवति कर्मपरोऽपि च सिद्धिभाङ्नरवरो न विलाटकरो भवेत् । स्यायेऽयाते यामिनीनायके ना मित्रक्षेत्रद्रव्यपुत्रायुक्तः । ख्यातः शूरो दारुणस्वाभिमानी शिष्टैर्भृत्यैरन्वितो बुद्धिमान् स्यात् । शीतांशौ द्वादशे १२ वेऽप्यो हीनाङ्गे नेत्ररोगवान् । पतितः परमः क्षुद्रः परिभूतो नरो भवेत् ।

सोमलता च ओषधिभेदः सोमशब्दोक्ता ओषधिशब्दे १५६४ पृ० सुश्रुतवाक्ये तच्छब्दादि दृश्यम् । सोमेन यजेतादि श्रुत्युक्ते १५यागभेदे पु० । सोमयागोपक्रमकल्पतादि कात्या०श्रौ० २५ अ० । १०क्रियाकल्पादौ दृश्यम् । कात्यायनशब्दे १८७६ पृ० तत्प्रतिनिधिद्रव्यादि दर्शितम् ।

सोमगर्भ पु० सोमस्य तद्रात्मकामृतरूपसोमस्य गर्भः स्थानम्। विष्णौ त्रिका०।

सोमज न० सोमात् तत्तुल्यैर्तौषधिस्थरसपानात् जायते जन-ड। १दुग्धे हेमच०। २चन्द्रजाते त्रि०। ३बुधे पु०।

सोमतीर्थ न० सोमेन तपस्तप्त्वा कृतं तीर्थम् शाक०। प्रभास-तीर्थे त्रिका०। "यत्र तप्तं तपस्तेन सोमेन सुमहात्मना। पञ्च वर्षसहस्राणि तथैवार्द्धं सुखः स्थितः। एवम्भूतः पुनः पञ्च पञ्च सौम्यव्रतस्तथा। तथैवैकेन पादेन दश पञ्च च तिष्ठता। एवमुग्रं तपः कृत्वा कान्तिमानभवच्च सः। क्षमापराधान् सुरुचश्च ब्राह्मणानां पतिस्तथा" वराहपु०।

सोमधारा स्त्री सोमस्य धारेव। चाकाशे त्रिका०।

सोमप पु० सोमं तद्रसं पिबति पा-क। १यज्ञे सोमरसपान-कर्त्तरि २पितृगणभेदे व०व०। पा-क्विप् सोमपाथत्र।

सोमपत्र पु० सोमस्य ओषधिविशेषस्येव पत्रमस्य। (छलुखड़) तृणभेदे शब्दच०।

सोमपीति(थि)न् पु० पीतमनेन इनि सोमं पीतो पृषो० वा तस्य थः। यज्ञे सोमरसपायिनि अमरः। पा-क्विप् सोमपोवाथत्र।

सोमबन्धु पु० सोमस्य बन्धुः, सोमो बन्धुरस्य वा। १मूर्ख्ये तद्रसद्विकरत्वात् तस्य तथात्वम्। २चन्द्रजे बुधे पु० ज्यो० २कुसुदे न०। [वैश्ये क्षत्रिये च शत्रिजनराजभेदे हेम०।

सोमभू पु० सोम एव भूरुत्पत्तिस्थानं यस्य। १बुधग्रहे २चन्द्र-

सोमयाग पु० सोमनामको यागः। त्रिवर्षसाध्ये सोमरस-पानाङ्गके यागभेदे।

"नारद उवाच "सोमयागविधानञ्च ब्रूहि मां सुनि-सत्तम!। कथं तं कारयामास गुरुश्च किं फलं परम्"। नारायण उवाच "ब्रह्महत्याप्रशमनं सोमयागफलं सुने!। वर्षं सोमलतापानं यतमानः करोति च। वर्षमेकं फलं भुङ्क्ते वर्षमेकं जलं सदा। त्रैवार्षिकमिदं यागं सर्वपापप्रणाशनम्। यस्य त्रैवार्षिकं धान्यं निहितं भूतिवृद्धये। व्यधिकं वापि विद्येत स सोमं पातुमर्हति। महाराजश्च देवो वा यागं कर्तुमलं सुने!। न सर्वसाध्यो यज्ञोऽयं ब्रह्मघ्नो वज्रदक्षिणः" ब्रह्मवै० श्रीकृष्णज० ६० अ०। सोमशब्दे दृश्यम्।

सोमयाजिन् पु० सोमेन यजते यज-णिनि। सोमयाग-कर्त्तरि। तस्य सौत्रामणयामधिकारः सौत्रामणीशब्दे दृश्यम्।

सोमयोनि न० सोमः योनिरस्य। चन्दनभेदे शब्दच०।

सोमराजी स्त्री सोमेन राजते राज-क्विप् गौरा० ङीष्। (सोमराज) १ओषधिभेदे। २वाकुच्यां भावप्र०।

"अवल्गुजा वाकुची स्यात् सोमराजी सुपर्णिका" इत्युपक्रमे "वाकुची मधुरा तिक्ता कटुपाका रसायनी। विष्मृक्कृष्टुष्टिमा रुच्या वरा श्लेष्मास्रपित्तनुत्। रूक्ष्या हृद्या श्वासकुष्ठमेहज्वररक्तमिप्रणुत्। तत्फलं पित्तलं कुष्ठ-कफानिलहरं कटु। केश्यं त्वच्यं कृमिश्वासकासशोथाम-पाण्डुहृत्" भावप्र०। स्वार्थे क। सोमराजिकाप्यत्र। राज-णिनि। सोमराजिन्यप्यत्र पु०अमरः। [राजनि०

सोमलता स्त्री सू-मन् कर्म०। खनामख्यातायां लतायाम्

सोमलतिका स्त्री सोमलतेव इवार्थे कन् अत इत्त्वम्। १गुडूच्याम् राजनि०। स्वार्थे क। २सोमलतायाञ्च।

सोमवंश पु० सोमस्य वंशः। १चन्द्रवंशे २चन्द्रावधिके गोत्र-परम्परालाते क्षत्रिये भागं० स्कन्धे दृश्यम्।

सोमवल्क पु० सोमस्येव वल्कोस्य। १करञ्जे जटा०। २रोठा-करञ्जे राजनि० ३श्वेतखदिरे ४कटफले च मेदि०।

सोमवल्लिका स्त्री सोमवल्लीव कायति कै-क। सोमराज्याम् अमरः। स्वार्थे क। २सोमलतायाम्। सोमवल्लरीत्यप्यत्र।

सोमवल्ली स्त्री सोमायाहृताय वल्ली। १गुडूच्याम् अमरः। सोमरूपा वल्ली। २सोमलतायाम् भरतः। ३सोमराज्यां शब्दर०। ४ब्राह्म्यां ५सुदर्शनायां ६पातालगरुड्यां राजनि०। "सोमवल्ली महागुल्मा यज्ञश्रेष्ठा धनुर्लता। सोमाह्वा गुल्मवल्ली च यज्ञवल्ली द्विजप्रिया। सोमचीरा च सोमा च यज्ञाङ्गा रुद्रसंख्यया। सोमवल्ली कटुः शीता मधुरा पित्तदाहहृत्। कृष्णा विशेषात् शमनी पावनी यज्ञसाधनी" राजनि०।

सोमवामिन् पु० सोमं तद्रसं वमति वम-णिनि। सोमरस-पानाधिक्ये सुखेन सोमवमनकर्त्तरि तस्य सौत्रामण्यामधिकारः सौत्रामणीशब्दे दृश्यम्।

सोमवार पु० सोमस्वामिको वारः। चन्द्रस्वामिके दिने।

सोमविक्रयिन् पु०सोमं विक्रीणाति वि+क्री-णिनि। सोम-लतायाः विक्रेतरि "यागो हि सोमविक्रयी" श्रुतिः।

सोमवृक्ष पु० सोम इव वृक्षः। १कटफलवृक्षे रत्नमा० २श्वेत-खदिरे च राजनि०। [राजनि०।

सोमसार पु० सोम इव सुखः सारोऽस्य। श्वेतखदिरे

सोमसिद्धान्त पु० सोमकृतः सिद्धान्तः। चन्द्रोक्ते ज्यो-तिषसिद्धान्तग्रन्थभेदे जटा०। [त्रिका०।

सोमसिन्धु पु० सोमस्यामृतस्य सिन्धुरिव आधारः। विष्णौ

सोमसुत् पु० सोमं सुतवान् सु–भूते क्विप्। यज्ञार्थं कृत-सोमलतानिष्पीडने त्रि० कौ०।

सोमसुता स्त्री ६त०। नर्मदानद्याम् राजनि०। २बुधे पु० सामोद्भवादयोऽप्यत्र यथायथम् पुंस्त्री०। [वाह्निपुराणे

सोमसुत्वन् पु० सोमं सुतवान् सु–भूते क्वनिप्। कृतसोमरस-

सोमसूत्र न०सोमस्य जलस्य सूत्रमिव प्रणाली। १जलनिर्गम प्रणाल्याम् शिवलिङ्गस्यगौरीपट्टस्य २जलनिर्गमस्थाने च "सोमसूत्रं न लङ्घयेत्" तत्त्वम्। [रत्नकैरवे रत्नमा०।

सोमाख्य न० सोमं लताभेदमाख्यातिवर्णेन ख्या+ख्या-क। [सोमलता

सोमातिपूत पु० सोमोऽतिपूतो वान्तो सुखभिन्नबहिष्टेन येन अति+पू-कर्मणि क्त। क्षते सोमरसपाने आधिक्याद् सुखभिन्नानाविधादिबहिष्टैः सोमरसवमनकर्त्तरि तस्य सौत्रामण्यामधिकारः सौत्रामणीशब्दे दृश्यः।

सोल्लुण्ठ त्रि० सह उल्लुण्ठेन सादेशः। भूमौ पार्श्वपरिवर्त्तादियुक्ते १अस्वादौ हला० २स्तुते निन्दापरतया निन्दाया वा स्तुतिपरतया युक्ते श्लाघ्ये च।

सोल्लुण्ठन न सह उल्लुण्ठेन सादेशः। अन्यथास्थितस्य अन्यरूपेण परिवर्त्तनसहिते वाक्ये (स्तुतिपरस्य निन्दापरता निन्दापरस्य च स्तुतिपरता इत्येवं कथने वाक्ये)।

सोष्यन्तीहोम पु० सोष्यन्तीं सूचापद्मामाख्यप्रसवां ज्ञात्वा कार्य्यः होमः। सोष्यन्त्या आख्यप्रसवाया हिनाय कर्त्तव्ये होमभेदे तत्प्रकारः सं० त० दृश्यः।

सौकर्य्य न० सुकरस्य भावः कर्म वा ष्यञ्। १सुकरतायाम् माध्यत्वे भट्टा०। २सुकरस्य कर्मणि च।

सौखसुप्तिक त्रि० सुखसुप्तिं सुखेन शयनं प्रच्छति ठञ्। प्रातःकाले सुखशयनप्रच्छके वैतालिकादौ हेमच०।

सौखिक त्रि० सुखं प्रयोजनमस्य ठक्। सुखाभिलाषिणि (सौखिन)।

सौख्य न० सुखमेव स्वार्थे ष्यञ्। सुखे हेमच०।

सौगत पु० सुगत एव अण्। १सुगते बुद्धभेदे हेमच० तस्येदमण्। २सुगतसम्बन्धिनि त्रि०। सुगतमत मधीते अण्। ३सुगतमतानुयायिनि त्रि०। [शब्दर०।

सौगन्ध न० सुष्ठु गन्धोऽस्य स्वार्थे अण्। कृष्णे रामठपूरे

सौगन्धिक न० सुष्ठु गन्धः सुगन्धः सोऽस्यास्य ठञ् स्वार्थे अण्। १कह्लारे अमरः। २सुगन्धे पु०अमरः। सुगन्धेन व्यवहरति ठक्। (गन्धी) ३सुगन्धद्रव्यव्यवहर्त्तरि त्रि०मेदि०। ४पद्मभेदे भा० ब० सौगन्धिकाहरणपर्व। [२सुगन्धी।

सौगन्ध्य न० सुगन्धस्य भावः ष्यञ्। १सुगन्धे। स्वार्थे ष्यञ्।

सौचिक पु० सूचीं तत्कर्मसीवनमुपजीवति ठञ्। (दरजी) सीवनकारके अमरः। इञ्। सौचि तयार्थे शब्दर०।

सौजन्य न० सुजनस्य भावः ष्यञ्। १सुजनतायां २सद्व्यवहारे च "सौजन्यजन्यं यशः" सङ्किलाथः।

सौण्डी स्त्री गुण्डा तदाकारोऽस्त्यस्याः अण् ङीप् पृषो० यस्य सः। गलपिण्डाख्यां शब्दच०।

सौत्र पु० पाणिन्यादिभिः सूत्रेण कर्मविशेषाय पठितः अण्। भ्वाद्यादिदशगणीयभिन्नेषु सूत्रमात्रे कार्य्यभेदार्थं पठितेषु १धातुषु। "सूत्रं यज्ञसूत्रमर्हति अण्। २विप्रे हेमच०।

सौत्रामणी स्त्री सूत्रामा इन्द्रो देवताऽस्य अण् मपूर्वत्वाभावे न टिलोपः यत्वम्। दृष्टिभेदे तत्र हि सुरापानं विधीयते विचित्रम्। "सौत्रामण्यां सुरां पिबेत्" श्रुतिः। स च यज्ञः ऋद्धिकामस्य ब्राह्मणस्यैव कर्त्तव्यः तत्राधिकारिविशेषः कात्या०श्रौ०१९ १ क० चक्रः। "ब्राह्मणस्यैव सौत्रामण्यृद्धिकामस्य" सू०। "ब्राह्मणग्रहणं क्षत्रियवैश्ययोर्निवृत्त्यर्थम्" कर्कः। "अग्निचित्सोमयाजिसोमातिपूत-सोमयाजिनाम्" सू० "एभिश्च निमित्तैः सौत्रामणी भवति। तत्राग्निचित्सोमयाजीति यज्ञक्रमम् अग्निमतः सोमयाङ्गं यथा स्यादिति च हि फलवान् विधिरुद्देशोऽग्निमतिति एवं च सत्यग्निमतसोमयागान्ते सौत्रामणी भवति। ननु चानग्निमतोऽपि सोमस्याङ्गत्वेन सौत्रामणी श्रूयते "गोमेनेष्ट्वा सौत्रामण्या यजेतेति नैतदेवम् अग्निं चित्वा सौत्रामण्या यजेतेत्यस्य वाक्यस्याग्निप्रकरणे श्रुतत्वात् तदङ्गता युक्ता यस्य प्रकरणम तस्यान्यद्विधीयमानं तदङ्गमेव भवतीति न्यायम्। गोमेनेष्ट्वा सौत्रामण्या यजेतेति सौत्रामणीप्रकरणे पाठः तेन प्रस्तुतविपरिवृत्त्या सोमस्यैव सौत्रामणाङ्गता भवति न सौत्रामण्याः सोमाङ्गता यथा "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति" वाजपेयं प्रकृत्य विधानात् वाजपेयाङ्गता बृहस्पतिसवस्य, तस्मान्नाग्निमति सोमे सौत्रामणी "गोमेनेष्ट्वा सौत्रामण्या यजेतेति किमर्थमुक्तिः पाठः अग्निमत सोमस्याङ्गवादोऽयमित्यदोषः। यद्वाऽग्निं चित्वेत्यस्यैव शेषोऽयम् अग्निमता सोमेनेष्ट्वेत्तदङ्गं भवति। सोमातिपूतसोमवाजिनोस्तु सौत्रामणी भवति शास्त्रान्तरस्थत्वात् सोमातिपूतः सोमवान्ती च ब्राह्मण एव न हि क्षत्रियवैश्ययोरेतद्विशेषणमिति नन्न च सोमकार्य्ये त्रयोरपि न्यायोपविधानम् तेन तदतिपवने ब्रह्मणे च क्षिप्यति न भवति नैतदेवं यदि नाम कार्य्यापत्त्या धूर्त्तमाह्मणेति न

चार्यं सोमधर्मः, किं तर्हि तदभिषवने यागान्तरविधानमिति। अग्निचितस्तु वर्णत्रयस्यापि भवति अग्निसंयोगविधानात्। अग्निचितः तथा सोमयाजिनः तथा सोमातिपूतस्य तथा सोमवाजिनः सुखव्यतिरिक्तेभ्यो नाक्षिकाकर्णगुदादिच्छिद्रेभ्यः यस्य सोमः स्रवति स सोमातिपूत इत्युच्यते सुखेन यः सोमं वमति स सोमवामी" इं०भा०। "रात्रौऽपरुद्धस्य च सौत्रामणी भवति" सू०। "दृष्टरोहणौ सायनो रुद्र आसेति तद्विधानात्। स्वराज्यात् प्राच्यावितस्य राज्ञः स्वराज्यप्राप्त्यर्थम्" कर्कः। "अवभृथोदयोः" सू०। "सौत्रामणी भवति पशुयोग्यः सनूयो नाम पशुञ्च विन्दते सोऽलम्पशुरपशुः" कर्कः।

तत्र सुराप्रक्षवणप्रकारः तत्रैवोक्तः

"दक्षिणेन क्षूत्वा नग्नहुचूर्णानि कृत्वा तांश्च व्रीहिश्यामाकौदनयोः पृथगाचामे निषिक्त चूर्णैः संसृज्य निदधाति तन्नासरम्" सू०। "दक्षिणेन द्वारेण प्रवेश्यान्यागारम् नग्नहुचूर्णादि कृत्वा नग्नहुः किण्व उच्यते तांश्च यवादींश्चूर्णयित्वा व्रीहिश्यामाकौदनयोः पृथगाचामे निषिक्त चूर्णैः संसृज्य निदधाति तन्नासरमुच्यते व्रीहिश्यामाकाभ्यां च सुरा निष्पाद्यते सा च यागसाधनम्। तेन सा तद्धर्मैरभिषवध्यते अतस्तयोस्तत्तद्विकल्पपूर्वकम् पृथगौदनौ निष्पाद्येते" कर्कः। "नग्नहुचूर्णानि कृत्वा नग्नहुशब्दार्थमाह "सर्ज्जत्वक् त्रिफला चैव गुग्गुलो चैव पुनर्नवा। वसुजातकसंयुक्ता पिप्पली गजपिप्पली। वंशोऽवका हरिद्रा च चित्रकं चेन्द्रवारुणी। अश्वगन्धां शतमूलां शतान्येतानि निर्दिशेत्। धान्यकं च यवानीं च जीरकं कणजीरकम्। हे हरिद्रे यथा चैव विहृढा व्रीहयो यवाः" इति। क्रयणानन्तरं तानि यवादीन्यादाय दक्षिणेन क्षूत्वान्यद्वारं प्रवेश्य पूर्वं नग्नहुचूर्णानि कृत्वा सर्ज्जत्वगादीन्यपि तूष्णीं पिष्ट्वा तान् यवतोकलाजान् चूर्णीकृत्य दर्भपूर्णभाण्डमध्ये पात्राघाटनादि यवाश्यामाकतत्तद्विकल्पपूर्वकं फलीकरणान्तं यवन्तकं कृत्वा बहुतरोदके पृथक् पृथक् षड् पञ्चा क्षुताक्षयणानन्तरं व्रीहिश्यामाकौदनयोः पृथगाचामे निषिच्य पृथग्भिन्नयोः पात्रयोस्तन्मध्यादतिरिक्तसुखोदकवमाद्य तदुदकं नग्नहुप्रकृतिभिस्तत्तद्भिन्नचूर्णैः संसृज्य निदधाति स्रावयति तन्नासरम्। तच्च चूर्णसंसृष्टश्यामाकस्य नासरमिति संज्ञा सं०भा०"ओदनौ चूर्णनासरैः संसृज्य खादीं त्वा खादु नेति मन्त्राभ्यां कुक्ष्यां प्रक्षिपति क्षित्वा च विराजं निधेहि सुरा" कर्कः। "एवमाचामयोश्चूर्णसंसर्गानन्तरमोदनौ चतुर्भिश्चूर्णैः संसृज्य खादीं त्वा खादु नेति यजु० १९।१ "अग्नये त्वा यजु० २०।२७ ह्याभ्यां मन्त्राभ्यामेकैकम् सङ्क्षति पात्रे चूर्णसंसृष्टावोदनौ मासराभ्यां च संसृज्य विराजं निदधाति सुगुप्ते देशे स्थापयति शालाया नैर्ऋतकोणे गर्तं कृत्वा तत्र स्थापयतीति जीर्णः समुदायः" तिसो रात्रीस्तादिभुतः "एकस्याः पयसाप्लुतेनाक्षिणेव परिषिञ्चति परीतोषिञ्चतेति" सू०। सुरां परिषिञ्चति "एकस्यै० परिषिञ्चतीति वचनात्। अस्मिन्नाकृष्टिश्याणाकरणं कर्त्तव्यम् तच्छापूर्वत्वादप्रधानत्वाच्च प्रथमः अस्मिन्यामप्याकरोमीति गोस्वर्गनन्नामेवेति समुदायः। अपरे तु धर्मस्वदाहरणमिच्छन्ति" कर्कः "शष्पचूर्णानि चावपति" सू० "चषकद्वात् सुरायाम्" कर्कः। "सारस्वतेन दयोः प्रातः" सू०। "प्रातःशब्देन च द्वितीयमहरभिधीयते तत्रापि च रात्रावेवाभिषेकः प्रथमां रात्रिं परिषिञ्चतीति प्रकृत्य "द्वयोर्दुग्धेन द्वितीयामित्याह द्वितीयाम् रात्रिमिति गम्यते" कर्कः। "प्रातःशब्देन स्वोऽभिधीयते" सं०भा०। "तोक्मचूर्णानि च सू०। "आवपति" ऐन्द्रे चोत्तमे इति तिसृणाम् सू० "गवां दुग्धेनैन्द्रे च परिषिञ्चति" कर्कः उत्तमे द्वितीयेऽहनि संज्ञा। "लाजचूर्णानि च" सू० "आवपति अस्य चूर्णानां पयसश्च संस्कारकत्वम् साधनं तु व्रीहिश्यामाकावेव अतस्तयोरेव देवसोढ्येन चरुणम्" कर्कः। यजु० १९अ० वेददीपे तु तदङ्गसुराप्रक्षवणप्रकारः स्पष्टः दर्शितो यथा "अथ सोत्रामणीमन्त्रास्त्रिभिरध्यायैः। व्याहिकान्याग्निचितो सुखेतरच्छिद्रसोमवाजिनो सुखेन सोमवाजिनो राज्ञश्चुतस्य पशुकामस्य च सौत्रामण्ययोगः। अन्तःपात्यस्थाने गोचर्मणि एतानि स्थापयेत् सोमं सुराविक्रयिणः क्रीत्वाहा क्रीत्वा सोमेन सोमं क्रीत्वा ऋषभसोक्षाणं क्रीत्वेव राजानं केनचिद्द्रव्येण नग्नहुम् विहृढा व्रीहयः यवम् विहृढा यवाव्रीह्याः षड्व्रीहयो राजाः सर्ज्जत्वक्त्रिफलागुग्गुलो पुनर्नवावसुजातकपिप्पलीगजवंशावकाहरिद्राचित्रकेन्द्रवारुण्यश्वगन्धा धान्यकयवानीजीरकद्वयहरिद्राद्वयविहृढयवव्रीहय एकीकृता नग्नहुः। यवतोकलाजनम्तु दक्षिणद्वारेणाग्निगृहं नीत्वा चूर्णं

दर्शपौर्णमासधर्मेण व्रीहियवाभाकयोश्चरुं बहुजले पक्त्वा मृदालम्भनानन्तरं तयोश्चरोर्निःस्रावमुष्णं पृथक्पात्रयोरादाय शष्पादिचतुर्णां चूर्णैः संसृज्य स्थापयेत् इयं चूर्णाभामरूपं मासराख्यम्"। "ओदनौ चूर्णमासरैः संसृज्य स्वाहौं त्वा अंशुनात इति त्रिरात्रं निदधाति"का० एवमाभामयोश्चूर्णसंसर्गं मासरत्वनिष्पादनानन्तरमोदनौ व्रीहियवाभाकरुं चतुर्भिश्चूर्णैः संसृज्य स्वाहौं त्वेति मन्त्रेण अंशुना ते इति विंशाध्यायसप्तविंशया ऋचा चैकस्मिन् पात्रे चूर्णसंसृष्टावोदनौ मासराभ्यां संसृज्य त्रिरात्रं शालानैर्ऋतकोणे गर्त्तं कृत्वा तत्र स्थापयेत्। अयमर्थः चरु उद्वास्य द्वयोः पृथगाभामयरुणम् ततः शष्पतोकमलाजचूर्णानां पृथग् त्रिधा कृतानां तृतीयांशं द्वेधा कृत्वाभामयोः क्षिपेत् ततो नग्नरुचूर्णं द्वेधा कृत्वैकमर्धं द्विधा विभज्याभामयोः क्षिपेत्। एवं चूर्णसंसृष्टाभामयोर्मासरसंज्ञा। ततः शष्पतोकमलाजचूर्णानां द्वितीयं तृतीयांशं द्विधा कृत्वैकैकं भागमोदनयोः क्षिपेत् नग्नरुचूर्णद्वितीयार्द्धं द्वेधा कृत्वोदनयोः क्षिपेत् तत ओदनावेकपात्रे कृत्वा तत्राभामौ क्षिपेत् ततः "स्वाहौं त्वा" "अंशुना ते" इति मन्त्राभ्यां चूर्णमासरैः सरुौदनयोराड्वालनेन संसर्गः कार्य्यः ततस्त्रिरात्रनिधानम् शष्पतोकमलाजचूर्णं तृतीयांशानां प्रतिदिनं सुरायां निवापार्थं रक्षणमिति। एकस्या पयस्यायाः कृतेनाग्निनेन परिषिञ्चति परीतो षिञ्चतेति शष्पचूर्णानि चावपति स्वारस्वतेन द्वयोः प्रातस्तोकचूर्णानि चैन्द्रोणोत्तमे तिसृणां लाजचूर्णानि च। सायं चोभाभ्यामश्विभ्यामभाकरोमीति करेण गां स्पृष्ट्वा एकां तां दुग्ध्वा तत्पयसाध्वर्युः सुरां सिञ्चति परीत इति मन्त्रेण। रक्षितं शष्पचूर्णानां तृतीयांशं सुराभाण्डे क्षिपेत्। द्वितीयेऽह्नि निधान्ते सरस्वत्या अंपाकरोमीति गावौ स्पृष्ट्वा दोहितेन तयोर्दुग्धेन तेनैव मन्त्रेण सुरां सिञ्चति तोकमचूर्णतृतीयांशक्षेपश्च। तृतीयेऽह्नि रात्रौ इन्द्राय सुत्यासूर्येऽपाकरोमीति तिस्रो गाः स्पृष्ट्वा ता दुग्धैकीकृत तत्पयसा सुरां सिञ्चति तेनैव मन्त्रेण तत्र लाजचूर्णतृतीयांशक्षेपश्चेति"। (आचामोभक्षणखण्डः)

सौदामनी स्त्री सुदामा पर्वतमेदस्तेनैका दिक् तत्प्रान्तभवत्वात् अण्। १विद्युति अमरः। सा हि स्फाटिकमयस्य सुदाम्नः पर्वतस्यैकदेशे जाता। २अप्सरोभेदे च हेमच०। सुदामा ऐरावतगजस्य पत्नी ङीप्। ३ऐरावतयोषिति शब्दर०। तत्र ङीपि स्त्रीत्वेऽप्लोभे सौदामन्यपि शब्दर०।

सौदायिक न० सुदायात बन्धुकुलात् आगतः ठञ्। "जदृया कन्यया वापि पत्युः पितृष्टहेऽथ वा। भर्तुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम्" कात्या० स्मृत्युक्ते स्त्रीधनभेदे "सौदायिकं धनं प्राप्य स्वातन्त्र्यं परिकीर्त्तितम्" स्मृतेः। स्त्रीधनशब्दे दृश्यम्।

सौदास पु० सूर्य्यवंश्ये कल्माषपादे नृपतौ।

सौध पुंन० सुधया लेपनद्रव्येण रक्तम् अण्। १राजसदनभेदे अमरः। सुधां तद्वर्णमर्हति अण्। २रूप्ये न० ३सुधापाषाणे पु० राजनि०। ४सुधासम्बन्धिनि त्रि०।

सौनन्द न० सुनन्द+स्वार्थे अण्। बलदेवमुसले हेमच०।

सौनिक पु० सूना वध्यस्थानं तदुपलक्षितमांसादि पण्यमस्य ठण्। मांसक्रयविक्रयोपजीविनि व्याधे (कसाइ)। हेमच० सैनिकशब्दे उदा० दृश्यम्।

सौन्दर्य्य न० सुन्दरस्य भावः ष्यञ्। १चारुतायां "अङ्गप्रत्यङ्गकानां यः सन्निवेशो यथोचितम्। सुश्लिष्टः सन्धिबन्धः स्यात् तत्सौन्दर्य्यमुदाहृतम्" चन्द्रालोकस्योक्ते २अङ्गादीनां सन्निवेशभेदे।

सौपर्ण न० सुपर्णं गरुडं तद्वर्णमर्हति अण्। १मरकतमणौ २शुण्ठ्यां राजनि०। सुपर्णमधिकृत्य कृतो ग्रन्थः अण्। भा०आ० २०अध्यायादौ २४अध्यायपर्य्यन्ते ३अवान्तरपर्वभेदे न० ४पातालगरुडोक्तायां स्त्री राजनि० ङीष्। तस्येदमण् ५गरुडसम्बन्धिनि त्रि०।

सौपर्णेय पु० सुपर्णां विनतायाः अपत्यम् ढक्। १गरुडे हेमच० २गायत्र्यादिछन्दसि "गायत्र्यादीनि छन्दांसि सौपर्णेयानि पाक्षिणः" वह्निपु०।

सौप्तिक त्रि० सुप्तिकाले रात्रौ भवम् ठञ्। १रात्रियुद्धे जटा०। सुप्तानधिकृत्य कृतो ग्रन्थः ठञ्। २महाभारतान्तर्गते पर्वभेदे।

सौभ न० सुष्ठु भवत्यत्र लोके भाति भा-क स्वार्थे अण्। १कामचारिणि पुरे २हरिश्चन्द्रनृपपुरे जटा०। तस्य राजा अण्। ३राजभेदे स च वासुदेवेन निहतः तत्कथा भा० व० १४अ० अवधि २२अ० पर्य्यन्ते दृश्या।

सौभद्र पु० सुभद्रायां भवः अण्। १सुभद्रापुत्रे अभिमन्यौ गीता। सुभद्राय हितः अण्। २विभीतकवृक्षे शब्दच०।

सौभद्रेय पु० सुभद्रायाः अपत्यम् ढक्। सुभद्रासुते अभिमन्यौ

सौभरि पु० मुनिविशेषे भाग० १०।१७ अ० ज्यो०त०।

सौभागिनेय पु० सुभगाया अपत्यम् ढक् ढस्य च द्विपद वृद्धिः। १सुभगापुत्रे। २तत्कन्यायां स्त्री ङीप्।

सौभाग्य न०सुभगाया भावः ष्यञ् द्विपदवृद्धिः।१पतिप्रियत्वे तदर्थं व्रतं सौभाग्यव्रत व्रतशब्दे ५०६८ पृ०दृश्यम। सुभगाये सुभगाय वा हितं यत्। २सिन्दूरे २टङ्कुषे च राजनि०। विष्कम्भादिषु मध्ये ४षष्ठे योगे पु०ज्यो०त०।

सौभाग्यचिन्तामणि पु०औषधभेदे। तल्लक्षणं सारको०उक्तं यथा "सौभाग्यास्फतजीरपञ्चलवणव्योषाऽभयाजानलानिशुन्द्राभ्रकगुडगन्धकरसानेकीकृतान् भावयेत्। निर्गुण्डीयुग्भृङ्गराजकट्वाघामार्गपत्रोल्लसत् प्रत्येकं स्वरसेन खिञ्जवटिका भ्रान्ति विदोषोदयम्। येषां शीतमतीव देहमखिलं खेदद्वाटीकितं निद्रा घोरतरा समस्तकरणव्यामोहमूढं मनः। शूलश्वासबलासकासखचितं मूर्च्छाहिक्कं लड्ज्वरं तेषां वै परिहृत्य जीवितमसौ यच्छति स्मृत्योर्मुखात्"। [ऐन्द्रजालिके द्वारा०।

सौभिक पु० सौभं कामचारिपुरं तद्भिमांसं शिल्पमस्य ठक्।

सौमनस्य न० सुमनसो भावः ष्यञ्। प्रसन्नचित्तत्वे तत्प्रीतिं कर्त्तुं यच्छति दत्तस्य पुष्पस्य प्रसादयुक्तचित्तसाधनत्वे "सौमनस्यमस्तु" श्राद्धमन्त्रः।

सौमनस्यायनी स्त्री सौमनस्यमयतेऽनया अय-ल्युट् ङीप् ह्रस्व०। १मालत्याम् २तत्कलिकायाञ्च स्त्रियां०।

सौमिकी स्त्री सोमलतादीक्षा प्रयोजनमस्य ठक् ङीप्। सोमयागार्थदीक्षणीयेष्टौ क्षेमच०। [लक्ष्मणे शब्दच०।

सौमित्र(त्रि) पु० सुमित्रायां भवः अण् बाह्वादि० वृद्धि वा

सौमेधिक पु० सुमेधया निर्वृत्तः ठक्। १विद्वियुते द्वारा०। २शोभनमेधायुते च त्रि०।

सौम्य त्रि० सोमो देवताऽस्य तत्रेदं वा यञ्। १सोमदेवताके २हविरादौ। ततस्तत्सम्बन्धिनि। टित्वात् स्त्रियां ङीप्। सोम इव आकृत्यादित्वात् य स्वार्थे अण्। ३मनोहरे ४प्रियदर्शने ५सुखिते च त्रि० मेदि० ६बुधे पु० अमरः। ततः स्वार्थिकाण्प्रत्ययाभावे सोमस्याऽप्युभयत्व। "अहरेव सौम्यदैवत्य आसीत्" इति श्रुतिः। ज्योतिषोक्ते ७शुभयोगे दक्षादिसप्तराशौ च ६सप्तस्वरान्विते राजनि०। १०भास्करे त्रि० धरणिः। ११सोमयाजिनि विप्रे पु०शब्दमा०। अष्टादशद्वीपमध्ये १२द्वीपभेदे पु० "गन्धर्वो वरुणः सौम्यः वरुणः कङ्क एव च। कुशदत्त कमेरुश्च नामो भङ्गारकस्तथा। चन्द्रेन्द्रमलयाः शङ्खयवाङ्गकगर्भस्तिमाङ्। ताम्र कुश कुमादो च तत्र द्वीपा दशाष्टभिः" शब्दमा०। १३सौम्यलक्षे व्रतभेदे। "अतिलक्षः पर्वलक्षः सौम्यः लक्षोऽतिलक्षश्चः" प्रा० त०। सौम्यलक्षशब्दे दृश्यम्।

सौम्यलक्ष पु० कर्म० सोमदेवताके लक्षसाध्ये व्रतभेदे। "पिण्याकाचा यतक्काम्बुसक्तूनां प्रतिवासरम्। एकैकवृद्धवासस्य लक्षः सौम्योऽवसच्यते" वाग्भ०। पिण्याकः खलिः आचामः भक्तमण्डः। एष लक्षकृच्छ्राः भा०वि०।

सौम्यगन्धी स्त्री सौम्यः सुरभिः गन्धो यस्याः गौरा० ङीष्। यतपत्त्रायाम् राजनि०।

सौम्यग्रह पु० कर्म०। ज्योतिषोक्ते पूर्वफल्गुनीपाशुपतबुधगुरुशुक्रकल्पे शुभग्रहे "लग्नेनेन्दुर्कजौरागाः यामाः सौम्याश्चयाऽपरे। पापशुक्रो बुधः यामो रात्रुक्षेत्रे च पापको" ज्यो० त०। [तत्यामत्व।

सौम्यधातु पु० कर्म०। रूपे राजनि० तस्य सोमलारत्वात्

सौम्या स्त्री सोमो देवताऽस्य यत् सोम ह्रस्व यामां० य स्वार्थे अण् वा। १दुर्गायां देवीभा०। २मघेन्द्वाश्वयुक्तायां ३रुद्रजटायां ४मघाज्योतिष्मत्यां ५भरिण्यवस्त्रा ६मृगशिरा ७आर्द्रापुनर्वसुपुष्याश्लेषा ८मघा ९पूर्वफल्गुन्यां च राजनि० हस्तमृगशिरोनक्षत्रगिरःस्यात्तु पञ्चतारास्तु विश्वः।

सौर पु० सूरस्य इदम् सूरो देवताऽस्य वा अण्। १सूर्यपुत्रे शनैश्चरे २यमे च। ३सूर्यदेवताके त्रि० स्त्रियां ङीप्। सूरेण निर्वृत्तः अण्। ४सूर्यराशौ तद्भोगेषु वा सूर्यगतिसाध्ये ५दिनमासादौ त्रि०। "अध्यायनञ्च यदुच्चारकर्म सौरेण मानेन सदाऽध्यसेत" ज्यो०त०। "विवाहादौ स्मृतः सौरः" इति स्मृतिः। ६उडुस्वरहन्ते पु०राजनि० ७सूर्योपासके त्रि०७गुरुभेदे "गौड़ाः सारस्वतो ब्रह्मा सौराः मागधाः कोकुणास्तथा। शोभनाश्च दशाख्याश्च गुरवः षट्च मध्यमाः" तन्त्रसा०।

सौरज पु० सूरस्यायम् अण् सौर आलोकस्तं जायते जन-ड। तण्डुलहन्ते राजनि०।

सौरभ न० सुरभेर्भावः अण। १सुरभित्वे सौरभमस्यास्ति अण् सुरभिरस्यास्ति अण् वा। कङ्कुले त्रिका० २वासे च राजनि०।

सौरभेय पु० सुरभेरपत्यम् ढक्। १गवि स्त्रियां ङीष्। "सौरभेयीभ्य एव च" गोदानमन्त्रः। तस्या इदम् ढक्। २सुरभिसम्बन्धिनि त्रि०।

सौरसेय पु० सुरसाया अपत्यम् ढक्। सर्पे शब्दमा०।

सौराष्ट्र पु० सुष्ठु राष्ट्रमस्यास्ति प्रज्ञा० अण्। (सुरठ) १देशभेदे जटा०। सुराष्ट्रे भवः अण्। २सुराष्ट्रदेशभवे त्रि

शकन्दूरजे पु० राजनि० ४सांसे न० ५तुवर्यां स्त्री राजनि० टाप् । सुगन्धिसृत्तिकाभेदे स्त्री रत्नमा० ङीप् संज्ञायां कन् । सौराष्ट्रिक पक्षुचौहे न० हेमच० ।

सौराष्ट्रिक न० सुराष्ट्रेश भवः ठक् । विप्रभेदे शब्दर० ।

सौरि पु० सूरस्यापत्यम् इञ् । १शनैश्चरे "सौरिवारेऽस्तता-नीति" ज्यो०त० । २यमे शकर्ण ४सुग्रीवे च पु० । ५अयन-शब्दे शआदित्यभक्तायां राजनि० ।

सौरिक पु० सुरायां देवानामधिवासाय हितः ठक् । १स्वर्गे स्वार्थे क । २सूर्यांपत्ये शनैश्चरादौ ।

सौरिरत्न न० सौरिप्रियं रत्नम् शाक० । नीलके मणौ राजनि०

सौरेय पु० सुरायै हितम् ठक् । शुक्लभिण्टाम् स्वार्थे क तत्रैव । "सौरेयः कुडवातासकफकण्डूविषापहः । तिक्तोष्णो मधुरो दन्त्यः सुरभिः केशरञ्जनः" भावप्र० ।

सौल्विक त्रि० सुल्वं ताम्रपात्रादिनिर्माणं शिल्पमस्य ठक् । ताम्रमयपात्रनिर्माणकर्त्तरि (कासारि) । वणिग्भेदे

सौव त्रि० स्वस्येदम् स्वौ इदम् अण् अव्ययटिलोपो न वृद्धिः वातूपूर्वौत् । १आत्मसम्बन्धिनि २स्वनसम्बन्धिनि ।

सौवयामिक त्रि० स्वयामे भवः ठक् न वृद्धिः वातूपूर्व मौत् । स्वयामभवे पदार्थे ।

सौवर्चल पु० सुवर्चलदेशे भवम् अण् । क्षारलवणे अमरः ।

सौवर्णमेदिनी स्त्री सुवर्णस्य विकारः अण् सौवर्णमिव मिनत्ति प्रकाशते भिद-णिनि । प्रियङ्गौ शब्दर० ।

सौवस्तिक पु० स्वस्तिकरणे कुशलः ठक् न वृद्धिः वातूपूर्व मौत् । पुरोहिते हेमच० । [रज्जौ अमरः ।

सौविद पु० सुवेत्ति सु+विद-क स्वार्थेऽण् । अन्तःपुर-

सौविदल्ल पु०सुष्ठु विदन्ति नरः तं लाति ला-क स्वार्थेऽण् । अन्तःपुररक्षके अमरः ।

सौवीर न० सुष्ठु वीरो यत्र सुवीरो देशभेदः तत्र भवः अण् । १खातोऽञ्जने २वदरफले "सौवीरन्तु यवैरासैः पक्वैर्वा निस्तुषैः कृतम् । गोधूमैरपि सौवीरम्" इत्या-युक्ते शक्तिके अमरः "सौवीरन्तु मधूत्थैः कफघ्नं भेदि दीपनम् । वटाश्वत्थोडुम्बरास्यिङ्गुदाम्लेषु शस्यते" भावप्र० । वदरवृक्षे पु० राजनि० ।

सौवीरसार पुंन० कर्म० । सौतोऽञ्जने राजनि० ।

सौवीराञ्जन न० सौवीराख्यमञ्जनम् । अञ्जनभेदे अमरः स्वार्थे क । काञ्जिकभेदे न० ।

सौष्ठव न० सुष्ठु भद्रं तस्य भावः अण् न टिलोपः । आति-शय्ये "स सौष्ठवोदार्यविशेषशालिनीम्" किरा० ।

सौहार्द न० सुहृदो भावः अण् हृदादेशश्च । १स्नेहे २मित्रत्वे हेमच० । [सौहित्यमाचरेत्" स्मृतिः ।

सौहित्य न० सुहितस्य तृप्तस्य भावः यञ् । तृप्तौ "नाति-

सौहृद न० सुहृदो भावः अण् । मित्रत्वे वस्तुतायाम् हेम०

स्कद उत्प्लुत्य गतौ भक० उद्भूतौ व्याप्तौ च सक० भा० आ० सेट् इदित् । स्कन्दते अस्कन्दिष्ट । [स्कन्दत् त ।

स्कन्द् समाहारे भ्वा०चु०उभ०सक०सेट् । स्कन्दयति ते अच-

स्कन्द गतौ शोषणे च भ्वा० पर० सक० अनिट् । स्कन्दति इदित् अस्कदत् अस्कान्त्सीत् चस्कन्द । आ+आक्रमणे

स्कन्द पु०स्कन्दते उत्प्लुत्य गच्छति अच् । कार्त्तिकेये अमरः अग्निकुमारशब्दे ५४ पृ०तस्योत्पत्तिरुक्ता । स्कन्दगुप्त-स्कन्दापस्मारौ शब्दे २७४५ पृ०सुश्रुतोक्तौ दर्शितौ । २नटपतौ जटा० ३हेडे त्रिका० ४पारदे राजनि० ५बाल-ग्रहभेदे सुश्रुतः । [४शोषणे च ।

स्कन्दन न० स्कन्द-ल्युट् । १रेचने त्रिका० २क्षरणे ३गतौ

स्कन्दांशक पु०स्कन्दस्यांश एवांशो यस्य कप् । पारदे । तयोः शिववीर्य्यजत्वादेकांशत्वम् ।

स्कन्ध पु० स्कन्द्यते आरुह्यतेऽसौ सुखेन शाखया वा कर्मणि घञ् पृषो० । १अंसे (कांध) २हस्तस्य काण्डे (गुँड़ि) अमरः । ३नये ४युद्धे ५समूहे ६काये ७महादौ टङ्कन्दो-भेदे मेदि० सौगतमतसिद्धेषु ६विज्ञानादिषु पञ्चसङ्खेषु "सङ्काङ्स्कन्धपञ्चकम्" भाषः ।१०पथि शब्दर० ११ग्रन्थ-परिच्छेदे च । "स्कन्धैर्दशभिर्युक्तम्" इति भागवत-विशेषणम् । १२वृक्षे हेमचन्द्र [विडङ्गिकायां हारा० ।

स्कन्धचाप पु० स्कन्धे चाप इव । वंशादिनिर्मितशिक्याधारे

स्कन्धज पु० स्कन्धात् जायते जन-ड । स्कन्धाद्रूढे सप्तक्यादौ "एवंयोनय एत्याद्याः स्कन्धजाः सप्तकीसखाः" हेमच० ।

स्कन्धतरु पु० स्कन्धप्रधानः तरुः । नारिकेलवृक्षे राजनि० ।

स्कन्धफल पु० स्कन्धे फलमस्य । १नारिकेलवृक्षे राजनि० [अम्रच० । २उडुम्बरवृक्षे च शब्दच० ।

स्कन्धबन्धना स्त्री स्कन्धे बन्धनमिवास्याः । मधूरिकायाम्

स्कन्धरुह पु० स्कन्धात् रोहति रुह-क । वटवृक्षे राजनि० ।

स्कन्धवाह पु० स्कन्धेन वाहयति वह-णिच-अच् । स्कन्धेन शकटादिवाहके वृषादौ हारा० एवुल् । स्कन्धवाहक तत्रैव हेमच० । [शाखायाम् अमरः ।

स्कन्धशाखा स्त्री स्कन्धात् प्रभवति शाखा । वृक्षस्य प्रधान-

स्कन्धशृङ्ग पुंस्त्री० स्कन्धपर्वतं शृङ्गमस्य । महिषे स्त्रियां ङीष् ।

स्कन्धाग्नि पु०स्कन्धजानोऽग्निः । दृढतृकाष्ठजाते वह्नौ जटा०।
स्कन्धावार पु० स्कन्धार्धमावारः आ+इ-घञ् । युद्धार्थे सदुःसैन्यानां १स्थापने २तदाधारे कटके च ३राजधान्यां शब्दच० । [दृषादौ हेमच०
स्कन्धिक पु० स्कन्धवहेन वहनमस्यास्य ठन् । स्कन्धवाहके
स्कन्धिन् पु० स्कन्धवहेन वहनमस्यास्य इनि । स्कन्धेन वाहके दृषादौ रत्नमा० ।
स्कन्न त्रि० स्कन्द्-क्त । १च्युते अमरः २गलिते ३चरिते ४शुष्के ५गते च । भावे क्त । ६चरणे न० ।
स्कन्भ प्रतिबाते क्रया० स्वा० उ० सक० सेट् । स्कभ्नाति स्कभ्नीते स्कभ्नोति स्कभ्नुते । अस्कम्नीत् अस्कम्भीत् । चस्कम्भ चस्कभ्(म)से । [म्भिद् ।
स्कभ स्तम्भे भ्वा० आ० सक०सेट् इदित् । सस्कम्भते असस्कभ्
स्कु उद्गतौ आप्लावने च क्रया० स्वा०उ०सक० अनिट् । स्कुनाति स्कुनीते स्कुनोति स्कुनुते । अस्कौषीत् अस्कोष्ट । चुस्कुाव चुस्कुवे । [स्कुन्दते अस्कुन्दिष्ट ।
स्कुद आप्लावने उद्गतौ च भ्वा० आ० सक० सेट् इदित् ।
स्कुन्भ रोधने सौ० क्रया० स्वादि० कार्यभागी प० सक० सेट् स्कुम्नाति स्कुभ्नोति । अस्कुम्नीत् । उदित् क्त्वा वेट् ।
स्खद् विदारे दि० आ० सक० सेट् । स्खद्यते अस्खदिष्ट घटादि० स्खदयति । [स्खलयति स्खालयति ।
स्खल चले भ्वा० प०अक०सेट् । स्खलति अस्खालीत् वा घटा०
स्खलन न० स्खल-भावे ल्युट् । १चलने २पतने अमरः ।
स्खलित न० स्खल-भावे क्त । १कूटयुद्धादौ प्रहत्या वीरमर्य्यादातः १पतने २स्खलनमात्रे च अमरः । कर्त्तरि क्त । ३चलिते त्रि० ।
स्तन मेघशब्दे चद० चु० उभ० सक० सेट् । स्तनयति ते अतस्तनत् त । वह्नुचकृत्वात् नोपदेशः ।
स्तन पु०स्तन-अच् । (माइ) स्त्रीणामङ्गभेदे पयोधरे अमरः । "चरोमशौ स्तनौ पीनौ घनावविषमौ शुभौ" स्तनयोः शुभलक्षणं गारुडे २६अ० । [शब्दे च मेदि० ।
स्तनन न० स्तन-ल्युट् । १ध्वनिमात्रे २मेघशब्दे ३कृत्यन०
स्तनन्धय पुंस्त्री० स्तनं धयति धे-अच् सुम् च । अतिशिशौ पेटिष्टित्वात् स्त्रियां ङीप् । [अमरः । स्त्रियां टाप् ।
स्तनप पुंस्त्री० स्तनं पिबति पा-क । अतिशिशौ बालके
स्तनभर पु० ह्रस्व० । १स्थूलस्तनभारे २तदाभोगे च त्रिका०।
स्तनयित्नु पु० स्तन-इत्नु । १मेघे २शुल्के अमरः ३मेघशब्दे मेदि० ४विद्युति शब्दर० । ५रुजायां ६रोगे च हेमच० ।
स्तनवृन्त पु० स्तनस्य वृन्त इवाग्रम् । १स्तनाग्रे चूचुके हेमच० स्तनसुखशिखादयोऽप्यत्र हेमच० । [च ।
स्तनान्तर न० स्तनयोरन्तरम् । १छुटये हेमच० २स्तनमध्ये
स्तनाभोग पु० ह्रस्व० । स्तनस्य परिपूर्णतायाम् त्रिका० ।
स्तनित न० स्तन-भावे क्त । १मेघशब्दे अमरः । २क्षरतादिशब्दे च । कर्त्तरि-क्त । ३शब्दिते त्रि० ।
स्तनितफल पु० स्तनिते मेघशब्दे फलति फल-अच् । विकङ्कतवृक्षे राजनि० ।
स्तन्भ रोधने क्रया० स्वा० प० सक० सेट् उदित् क्त्वा वेट् । स्तभ्नाति स्तम्भीति इदित् अस्तभत् अस्तम्भीत् । इदित्त्वे नोपदेश एव न्यायः सौत्रोऽयमित्यत्रे तेन न नोपदेशः ।
स्तन्य न०स्तने भवम् यत् । स्तनजाते दुग्धे हेमच० [भूते च
स्तब्ध त्रि०स्तम्भ-कर्मणि कर्त्तरि वा क्त । १जडीकृते २जडीरोमन् पु० स्तब्धं रोमास्य । १शूकरे अमरः जडीकृतरोमणि त्रि० स्त्रियां वा ङीप् ङीष् च ।
स्तम्ब पु० स्था-अम्बच् किच्च पृषो० । काण्डरहिते भिण्टकादौ वृक्षे २तृणमुल्मे ३तृणादेः गुच्छे च अमरः ।
स्तम्बकरि पु० स्तम्बं गुच्छं करोति क-इन् । व्रीहिधान्ये अमरः । [मूलके खनिलादौ अमरः ।
स्तम्बघन पु० स्तम्बो हन्यतेऽनेन हन-क नि० । स्तम्बो-
स्तम्बघ्न त्रि० स्तम्बो हन्यतेऽनेन हन-घञर्थे क । स्तम्बो-न्मूलके खनिलादौ अमरः । स्तम्बहननमस्यत्र ।
स्तम्बपुर स्त्री स्तम्बप्रधाना पूः न समासान्तः । ताम्रलिप्ते पुरभेदे हेमच० ।
स्तम्बेरम पुंस्त्री० स्तम्बे वृक्षादीनां काण्डे गुच्छे गुल्मे वा रमते रम-अच बहुलक्स० । गजे अमरः स्त्रियां ङीष् ।
स्तम्भ पु० स्तम्भ-अच् । (थाम) १स्थूणायाम् अमरः । भावे घञ् । २जडीभावे पु० ।
स्तम्भन पु० स्तम्भयति स्तम्भ-णिच् ल्यु । कन्दर्पस्य पञ्चसु बाणेषु मध्ये १बाणभेदे जटा० । भ्वादेः ल्युट् । २जडीकरणे न० । करणे ल्युट् । षट्कर्मान्तर्गते तन्त्रोक्ते ३अभिचारकर्मभेदे
स्तम्भित त्रि० स्तम्भ आत्मने क्विप्-कर्मणि क्त । जडीकृते
स्तरिमन् पु० स्तृ-कर्मणि इमनिच् । तल्पे उणा० ।
स्तरी स्त्री स्तृ-कर्मणि ई । घृते हेमच० ।
स्तव पु० स्तु-अप् । १प्रशंसायाम् २स्तुतौ च ।
स्तवक पु० स्तु-वुल् स्था-अवक पृषो० वा । गुच्छे अमरः । २अन्यपरिच्छेदे ३समूहे च मेदि० ।
स्तवेय्य पु० स्तु-एय्य । इन्द्रे उणा० ।

स्तावक त्रि० स्तु-ण्वुल्। स्तुतिकारके प्रशंसाकारके।

स्तिमित न० स्तिम-भावे क्त। १आर्द्रतायाम् अमरः। २अचाञ्चल्ये च मेदि० कर्त्तरि क्त। ३अचञ्चले ४आर्द्रे च त्रि०।

स्तिमि पु० स्तिम-इनुन् भुक् च। १मत्स्ये २वायौ च उणा०।

स्तीर्वि पु० स्तृ-क्विनृ न वेरित्त्वम्। १आकाशे २रुधिरे ३तृणजातौ ४अध्वर्यौ ५प्रयधि ६शकटौ संक्षिप्तसा०।

स्तुत पु० स्तु-कर्मणि क्त। स्तुतिकर्मणि अमरः।

स्तुति स्त्री स्तु-क्तिन्। स्तवे अमरः। [अमरः

स्तुतिपाठक पु० स्तुतिं पठति पठ-ण्वुल्। राजादेर्बन्दिनि

स्तुन्भ रोधने सौ० क्र्या० स्वा० कार्य्यभागी पर० सक० सेट् चदित् क्त्वावेट्। स्तुम्नोति स्तुम्नाति। अस्तुम्नीत्। सौत्रत्वादषोपदेश इत्यन्ये।

स्तुतिव्रत पु०स्तुतौ व्रतमस्य। स्तुतिपाठके जटा०। ३६६पृ०दृश्यम्

स्तुत्यर्थवाद पु० ३त०। प्रशंसया अर्थवादभेदे अर्थवादशब्दे

स्तुनक पुंस्त्री० स्तु-नकक्। छागे शब्दच० स्त्रियां ङीष्।

स्तुभ पुंस्त्री० स्तुभ-मूलं०क। छागे भरतः स्त्रियां ङीष्।

स्तूप उच्छ्राये अद० चु० सक० उभ० सेट्। स्तूपयति ते अतुस्तूपत् त। बहुच्कत्वात् अषोपदेश एव। ५।७२ पृष्ठे ष्टूप इति धातुः षोपदेशतया प्रमादात् लिखितः।

स्तूप पु० स्तु-पक् पृषो० स्तूप-अच् वा। १राशीकृते मृत्तिकादौ २संघाते ३बले ४निष्प्रयोजने च संक्षिप्त०।

स्तृ विस्तारे स्वा० उ० सक० अनिट्। स्तृणोति स्तृणुते अस्तारीत् अस्तृत अस्तरिष्ट। पर्युदासान्न षोपदेशः।

स्तृ प्रीतौ अक० रक्षणे सक० स्वा० प० अनिट्। स्तृणोति अस्तारीत्। पर्युदासेन अषोपदेश एव।

स्तृ आच्छादने क्र्या० प्रा० उ० सक० सेट्। स्तृणाति स्तृणीते अस्तारीत् अस्तरिष्ट अस्तरीष्ट अस्तीर्त। अयं षोपदेश एव न्याय्यः।

स्तेन चौर्य्ये अद० चु० उभ० सक० सेट्। स्तेनयति-ते अतिस्तेनत्-त। बहुच्कत्वात् अषोपदेशः।

स्तेन न० स्तेन-भावे अच्। १चौर्य्ये। कर्त्तरि क्वच्। २चोरे त्रि० अमरः।

स्तेप(ष्टेप) क्षेपे चु० उभ० सक० सेट्। स्तेपयति-ते अतिस्तिपत्-त। अषोपदेशत्वे मूलं चिन्त्यम्।

स्तेम पु० स्तिम-घञ् १आर्द्रीभावे २स्नेहे च अमरः।

स्तेय न० स्तेनस्य भावः यत् नलोपः। १चौर्य्ये अमरः।

"प्रत्यक्षं वा परोक्षं वा रात्रौ वा यदि वा दिवा। यत् परद्रव्यहरणं स्तेयं तत्परिकीर्त्तितम्" इत्युक्तेः परद्रव्यापहारः स्तेयं तच्च अष्टादशविवादान्तर्गतविवादपदभेदः तत्स्वरूपादिकं वीरमि० उक्तं चोरशब्दे २६६६ पृष्ठादौ दृश्यम्। [ङीष्।

स्तेयिन् त्रि० स्तेयमस्यास्य इनि। परद्रव्यापहारके स्त्रियां

स्तैन्य न० स्तेनस्य भावः ष्यञ्, ष्यञ् वा। १चौर्य्ये परद्रव्यापहरणे। स्तेन एव स्वार्थे ष्यञ्। २चोरे त्रि०भरतः।

स्तैमित्य न० स्तिमितस्य भावः ष्यञ्। १जाड्ये २स्नेहे ३आर्द्रीभावे च। [२जलबिन्दौ अकल्के त्रि० अमरः।

स्तोक पुंस्त्री० स्तुच-घञ् १घातके मेदि० स्त्रियां ङीष्।

स्तोकक पुंस्त्री० स्तोकाय जलबिन्दवे कायति शब्दायते कै-क। घातके अमरः स्त्रियां ङीष्।

स्तोत्र न० स्तु-ष्ट्रन्। १स्तवे-गुणकथनादिभिः प्रशंसने अमरः। "द्रव्यस्तोत्रं कर्मस्तोत्रं विधिस्तोत्रं तथैव च। तथैवाभिजनस्तोत्रं स्तोत्रमेतत्त्रिविधम्" अत्रिपु० १२१ अ० द्रव्यादुपाधिकतया जातस्य चातुर्विध्यमुक्तम्। २स्तुतिसाधने वाक्ये स्तुत्यस्य गुणिनमुपसर्जनीकृत्य तद्गुणानां गुणानां प्राधान्येन कथनरूपा ऋग्वेदभाष्ये लक्षिता। यथा यो देवदत्तः स चतुर्वेदाधिक इत्युक्ते सर्वे जनाः स्तुत्यमिच्छन्ति यद्यपि ष्टुञ् स्तुतौ अनयोः स्तुत्यस्तोत्रयोर्भेदः तथापि प्रतिगीतसन्नद्धसाध्यं स्तोत्रस्य अप्रतिगीतसन्नद्धसाध्यं शस्त्रमिति तयोर्विवेक इति च तत्रोक्ते प्रतिगीतसन्नद्धसाध्ये स्तवने गुणकथने च। शस्त्रशब्दे प्रतिगीतसन्नद्धे इति यदुक्तं तस्य अप्रगीतसन्नद्धे इत्येव बोध्यम्। प्रगीतमृग्जातं शस्त्रमिति ह० उ० भाष्ये टीकायामानन्दगिरिणोक्ते ४प्रगीते ऋग्जाते च।

स्तोत्रिय त्रि० स्तोत्राय हितं य। स्तोत्रसाधने ऋगादौ "कत्ययस्तृतायाश्चिन यज्ञे स्तोत्रियाः स्तोष्यन्तीति तिस्र इति कतमाकात्रिचः इति पुरोऽनुवाक्या च याज्या शस्यैव च तृतीया इति" ह० उ०। "स्तोत्रिया नाम ऋक्सामसमुदायः" भा० भा०। "स्तोत्रिया नाम गीतिविशेषाः ऋग्ज्ञातयः" शत० ब्रा० १४।६।११।२ वाक्यव्याख्यायां सायणभाष्यम्। "यथोक्तस्य स्तोत्रं स्तोत्रियां वर्चं साम वा अनुवोऽवदत्यत् स्तवा यजेत" कात्या० श्रौ० २५।७।२० "एकां स्तोत्रियामेका ऋचमन्यां कुर्यात्" कर्कः।

स्तोभ पु० स्तुभ-घञ्। १अर्थशून्ये गानादिस्वरपरिपूरणार्थे शब्दभेदे यथा स्वागतभेदे इङा फोट प्रयोगः। २स्तम्भने च हेम च०।

स्तोभच्चणादिकं गानशब्दे २५७२ पृ० दृश्यम्। तच्च लक्षणं वर्णभाषास्तोभस्य। वाक्यस्तोभस्य तु नव विधाः भवन्ति तदुक्तं "आगास्तिः स्तुतिसंख्यासे प्रणवः परिदेवनम्। वेषमन्वेषणञ्चैव स्तुतिरास्थानमेव च" एते तु वाक्यस्तोभाः पदस्तोभाश्च पञ्चदश गानग्रन्थेषु दर्शितास्तत एवावगन्तव्याः।

स्तोम आत्मगुणाविष्करणे अद० चु० उभ० अक० सेट्। स्तोषति-ते अतुस्तोमत्-त। वच्चुचकत्वात् न प्रापदेशः।

स्तोम पु० स्तोम-अच् सु-मन् वा। १समूहे अमरः। २यज्ञे हेमच०। ३स्तवे ४स्तुतिभेदे ५मस्तके ६धने ७शब्दे ८लौहादिपट्टके च न० ९वक्रे त्रि०। "नारावंशेन स्तोमेन" यजु०३।५३ "अयं स्तोमान् पपाच्छ ऋ०१।१४।९ स्थान न० स्थै-भावे ल्युट् तस्य नः। १स्तैर्ये २घनत्वे ३संहतौ ४आलस्ये ५प्रतिशब्दे च विश्वः। कर्त्तरि ल्युट्। ६संहतिकारके ७ध्वनिकारके च त्रि०।

स्त्यैन पु० स्त्यै-ल्युट्। १चौरे अन्ते च उणा०।

स्त्यै संहतौ ध्वनौ च भ्वा० अक० अनिट्। स्त्यायति अस्त्यासीत् पर्य्युदासान्न प्रापदेशः।

स्त्री स्त्यै सु-ङीष्। योषिति नार्य्याम् अमरः।

तद्भेदादिकं रतिम० उक्तं यथा

"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा। प्रथो मृगाद्यो ऽस्य स्त्रीषु सोज्ज्वलिलक्षणम्। भवति कमलनेत्रा नासिकाऽतुङ्गा अविरलकुचयुग्मा चारुकेशी कृशाङ्गी। मृदुवचनसुशीला गीतवाद्यानुरक्ता सकलतनुसुवेशा पद्मिनी पद्मगन्धा। भवति रतिरभङ्गा नातिखर्वा न दीर्घा तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी। घनकठिनकुचाढ्या सुन्दरी वल्गुनीला सकलगुणसमेता चित्रिणी चित्रवक्त्रा। दीर्घातिदीर्घनयना वरसुन्दरी या कामोपभोगरसिका सुरतशीलयुक्ता। रेखात्रयेण च विभूषितकण्ठदेशा सम्भोगकेलिरसिका किल शङ्खिनी सा। स्थूलाधरा स्थूलनितम्बभागा स्थूलाङ्गुली स्थूलकुचा सुशीला। कामोत्सुका गाढरतिप्रिया या नितम्बखर्वा करिणी ऽमता सा। प्रथमे पद्मिनी तृतीया चित्रिणी रमते सुखे। तृतीये शङ्खिनी तृतीया हस्तिनी रमते हये। पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी। शङ्खिनी चारुगन्धा च मृगगन्धा च हस्तिनी। बाला च तरुणी प्रौढा वृद्धा भवति नायिका। गुणयोगेन रन्तव्या नारी वशगा भवेत् तदा। आ षोड़शाद् भवेद् बाला तरुणी त्रिंशका मता। पञ्चपञ्चाशका प्रौढा भवेद्वृद्धा ततः परम्। फलमूलादिभिर्बाला तरुणी रतियोगतः। प्रेमदानादिभिः प्रौढा वृद्धा च दृढ़ताड़नात्। बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी। प्रौढ़ा करोति दृढ़त्वं वृद्धा मरणमादिशेत्। अङ्गुष्ठे चरणे च गुल्फजानुयुगे जानुद्वये वस्तिके नाभौ वक्षसि जङ्घयोर्निगदिता करठे कपोलेऽधरे। नेत्रे कर्णयुगे ललाटफलके मौलौ च वामभ्रुवामूर्द्धचलनक्रमेण कथिता चान्द्री कला षण्णयोः। सीमन्ते नयनेऽधरे च गलके वक्षस्तटे चूचुके नाभौ श्रोणितटे मनोभवगृहे जङ्घातटे गण्डके। गुल्फे पादतले तदङ्गुलितटेऽङ्गुष्ठे च तिष्ठत्यसौ दृङ्निशीथतया तमं प्रथिकला पञ्चद्वयोर्वोषिताम्। शुक्लपक्षे वसेद्वामे पादाङ्गुष्ठिकनिष्ठके। शुक्लप्रतिपदादौ च कृष्णे चाधः प्रलम्बते। पुंसः सव्ये स्त्रियोऽवामे शुक्ले, कृष्णे विपर्य्ययः। एतानि कामस्थानानि ज्ञेयानि नागरैः सदा। वक्रयुक्ता यदा नारी विपरीतरतिर्भवेत्। सञ्चाल्य तु कलास्थानं रन्तव्या कामिनी तदा। नेत्रे कर्णे कपोले च हृदि पार्श्वहृदेऽपि च। ग्रीवायां नाभिदेशे च कामी चुम्बति कामिनीम्। रुचे जङ्घे नितम्बे च जघने स्तनान्तरे। स्तनयुग्मे सदा प्रीतः कामी चुम्बति कामिनीम्। प्रेम्णा स्त्रियं समालिङ्ग्य शीत्कारं सुखचुम्बनम्। कण्ठासक्तां पुनः कृत्वा गाढ़ालिङ्गनमाचरेत्। विधृत्य हस्तौ जघनोपविष्टः शीतकृत्य वक्त्रं च सदा प्रचुम्बेत्। भगे च लिङ्गं स्तनमर्दनञ्च दत्त्वापि कृत्वा परमेच्च कामी। कृतक्षतनखं कृत्वा नखांस्त्रीन् पञ्च चैव वा। पृष्ठे च जघने योनौ दत्त्वा कामी रमेत् स्त्रियम्। नखरोमाङ्कितं कृत्वा दन्तैर्नाधरपीड़नम्। ग्रीवामालक्ष्य यत्नेन योनौ लिङ्गेन ताड़नम्। लिङ्गप्रवेशनं कृत्वा कृत्वा गाढ़प्रयोगतः। पार्श्वद्वयेन सम्पीड्य निस्सृतं ताड़येद्भगम्। समालिङ्ग्य स्त्रियं गाढ़ं स्तनयुग्मे च मर्दनम्। योनौ नाभौ च संमर्द्य निष्ठुरं लिङ्गताड़नम्। केशं करेण संगृह्य दृढ़ं सन्ताड़येद्भगम्। वदने चुम्बनं कृत्वा भगं हस्तेन मर्दयेत्। कुचं करेण संमर्द्य पीड़येदधरं दृढ़म्। रवेन पद्मवर्ण्येन पद्मिनीरतिमादिशेत्। शीत्कारं चुम्बनं पीड़ा गले हस्तो च चुम्बनम्। त्वगे त्वगे स्तने हस्तं चित्रिणीरति-

दादिभेत्। स्त्रीपुंसयोरन्यान्योन्यं भर्त्रे भिक्षुं च शुश्रूषणम्। रमयन्तु तथा गाढं भर्त्तृभक्तौ रतिप्रदे। केशं करेण संगृह्य तदं गजबन्धनम्। भगं करेण बध्नाश्च कक्षिणीरतिमादिशेत्। भूमंपृष्ठं भजस्कन्धं पद्मगन्धं सुनम्बि यत्। अक्षोभकं दृढस्त्रीघं यश्चैतद् भगमुत्तमम्। शीतलं विरूक्षमत्युष्णं मोजिष्ठाषट्कं परम्। इत्युक्तं कामशास्त्रेभैनद्दोषचतुष्टयम्"। स्त्रीशुभाशुभलक्षणन्तु उपरिभागे १२७८पृष्ठादौ द्रष्टव्यम्

स्त्रीगवी स्त्री० स्त्री चासौ गौश्च कर्म्म०। (गाभि) रोहिणायाम्।

स्त्रीचित्तहारिन् पु० स्त्रियाश्चित्तं हरति हृ-णिनि। १शोभाञ्जने त्रिका०। २स्त्रीमनोहारके त्रि०।

स्त्रीचिह्न न० स्त्रिया अवयवारूढं चिह्नम्। १योनौ शटा०। २स्त्रिया अवयवारूढे चिह्ने कक्षादौ २स्त्रीलक्षणे च।

स्त्रीचोर पु० स्त्रिया चोर इव। कामुके त्रिका०।

स्त्रीजित पु० स्त्रिया जितः जि-क्त। स्त्रीवश्ये।

"स्त्रीजितस्यैवमात्मेव सर्व्वं पुत्र्यं प्रणश्यति। नन्भूभौ पातकी पापात् पापिनां स्त्रीजितात् परः" ब्रह्मवै० ब्र० ४अ० तस्य निन्दोक्ता।

स्त्रीधन न० ६त०। स्त्रीस्वत्वाश्रये द्रव्यमात्रे इति मिताक्षरादयः। "अध्यग्न्यध्यावाहनिकं भर्तृदायस्तथैव च। आद्दत्तं पितृमात्राच्च षड्विधं स्त्रीधनं स्मृतम्" नारदपरिगणिते स्त्रीस्वत्वाश्रये धने इति दायभागादयः। स्त्रीधनस्वरूपादिकं मिताक्षरामतानुसारेण वीरमित्रोक्तं यथा

"अथ स्त्रीधनविधानं वक्तुमनूद्यस्वरूपं तावल्लक्ष्यते तत्र मनुः "अध्यग्न्यध्यावाहनिकमित्यत्र प्रीतिदानेऽपि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमिति" षड्विधमित्यनूद्यसंख्याव्यवच्छेदपरत्वादधिकानिरासाय। अत एव योगीश्वरेण "पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितम, इत्याद्यशब्द उपात्तः। विष्णुनापि षडधिकानि स्त्रीधनान्युक्तानि। स चैवाह "पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकं यच्च दत्तं श्वश्रूकुलाच्च यत्किञ्चित स्त्रीधनम्" इति। नारदः "अध्यग्न्यध्यावाहनिकमन्वाधेयं तथैव च। भ्रातृदत्तं पितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमिति"। भ्रातृप्राप्तं मातृव्यतिरेक आह्येयम्। स्त्रीधनशब्दार्थं कौलिकः स्त्रीत्वाश्रितत्वमिति न तु वाहिभाषिकः योगक्षेमे परिभाषाया अव्याप्तत्वात्। अत एव योगीश्वरेण रिक्थक्रयादिसाधारणस्वत्वापायसंकोचायत्वं प्रयुक्तम्। यत्तु च क्वचित् स्त्रीत्वनिमित्तोऽप्युपचारः स्त्रीधनं भवति स्यात्। न हि स्त्रीत्वाश्रितत्वं तत्र निषेद्धुं शक्यते बाधात्। यत्तूक्तं कात्यायनः "तत्र स्त्रीयधि यद्दत्तं यच्च स्त्रीत्वेन वा। पित्रा भ्रात्रा वा पत्या न तत् स्त्रीधनमुच्यते इति। उपधिरूपत्वादावेद्यं यथा दत्तं त्वया धार्य्यमलङ्कारादिनाम्नेति निबन्धस्तत्पूर्वकं दत्तं स्त्रीयधि स्त्रीत्वेन दायादानां कक्षादौ दत्तमित्यनूद्यं विधास्यमिति। विधेयमात्रं यत्कात्यादिभिः स्त्रीत्वा प्राप्तमपि न स्त्रीधनं निबन्धाच्च स एव "यत्तं पितृभ्यां यत्किञ्चित्स्त्रीत्वा चैव यदृच्छतः। भर्तुः स्वाम्यनुज्ञा तत्र भवेत्तु स्त्रीधनं स्मृतम्" इति। याज्ञवल्क्यादिभिरपि स्त्रीत्वाश्रितत्वेन प्राप्तं स्त्रीधनं प्रतिषिध्यते। तेनैतत्स्त्रीत्वनिमित्तं विधास्यमानं दत्तं विधास्यमानं वा स्त्रीधनमिति परिभाष्यते इति चेत्। उच्यते। नाम स्त्रीत्वनिमित्तोऽपि निषेधः। किन्तु तत्तत्कार्य्यं विधास्यादि निषेधः। अत एवोत्तरश्लोके तत्र भर्तुः स्वाम्यधिकृतम्। भर्तुरनुमतियोगे स्वामित्वस्य स्त्रिया इत्यर्थः। पञ्चमश्लोके च स्त्रीत्वनिमित्तोऽपि व्यपदिशति उपधियोगपदयोरुपादानात्। तत्रादाने च स्वत्वाभावस्य प्रसिद्धत्वात्। "योगाधमनविक्रीतं योगदानप्रतिग्रहम्। मत्त चाप्युपधिग्रस्तैस्त्वं निवर्त्तयेदिति" मनुवचनात् "भार्य्यां पुत्रश्च दासश्च प्रेष्यश्च भ्रातरः स्मृताः। यत्ते समधिगच्छन्ति यस्य ते तस्य तन्धनमिति" पञ्चमश्लोकोपनिबन्धे विधास्यमानविषये विधास्यमानपरमेव श्वश्रूकुलस्वत्वाश्रितत्वात्। अध्यग्न्यादिस्त्रीधनविधिं वक्ष्यामः "विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ। तदध्यग्न्यागतं प्राहुः स्त्रीधनं परिकीर्त्तितम्। यत्पुनर्लभते नारी बान्धवाभ्यां पितुर्गृहात्। अध्यावाहनिकन्नाम स्त्रीधनन्तदुदाहृतम्। प्रीत्या दत्तं च यत्तस्यै पितृभ्यां वा मातुरेव वा। भ्रातृदत्तमिदन्तस्यै प्रीतिदत्तमुदाहृतम्। विवाहात्परतो यत्तु यत्तं भर्तृकुलात् स्त्रिया। अन्वाधेयन्तु तत्प्रोक्तं यत्तं श्वशुरतोऽपि वा। स्त्रीधनप्रकारवाचानां दायभागकर्मणाम्। मूलं यत्तु यदिच्छन्तु यत्किञ्चित्स्त्रीत्वकं परिकीर्त्तितम्। यत्तया वापि यद्दत्तं पितृभ्यां वा। भ्रातृभ्यां विशेषो यत्तं स्त्रीदायित्वं स्मृतम्। भर्तुः

खकाशादिति कल्पतरौ पाठः। अध्यग्न्यादिशब्दास्तु योगरूढ़ास्तादृशस्त्रीधनादावेव प्रयोगात्। गृहोपस्कराद्यादीनां यन्मूल्यं कन्यार्पणापाधित्वेन वरादिभ्यः कन्याभरणरूपेण गृह्यते तच्छुल्कमिति मदनरत्ने व्याख्यातम्। मिताक्षरायां तु यद्गृहीत्वा कन्या दीयते तच्छुल्कमित्युक्तम्। उभयत्रापि पित्रादीनां कन्याया इदमित्युद्देशो विवक्षितः अन्यथा तत्स्वत्वाभावेन स्त्रीधनत्वव्यपदेशस्यानुपपत्तेः। जीमूतवाहनेन तु कर्मण्यामिति पठित्वा गृहादिकर्मभिः शिल्पिभिस्तत्कर्मकरणे भर्त्रादिप्रेरणार्थं स्त्रियै यद्गृह्योपटानं तच्छुल्कं तदेव मूल्यं प्रकल्पार्थत्वादिति व्याख्यातम्। पुनस्तूक्तम् "यदानेतुं भर्तृगृहे शुल्कत्वत्परिकीर्त्तितमिति" व्यासोक्तं वा। भर्तृगृहगमनार्थसत्कारादि यद्दत्तं तच्छुल्कमित्यर्थ इति। तदुभयमपि स्त्रीस्वामिकं भवत्येव तस्या एव दत्तत्वादिति तत्र स्त्रीधनत्वव्यपदेशोऽन्यस्त्रीधनवत् सुगम एव। आधिवेदनिकं स्वान्तरविवाहकाले पूर्वभार्यायै यद्दीयते। यदाह याज्ञवल्क्यः "अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम्। न दत्तं स्त्रीधनं यासां दत्ते तद्धि प्रकल्पयेत्" इति। पित्रादिभिर्जीवनाद्यर्थं स्त्रीभ्यो धनदाने विशेषमाह कात्यायनः "पितृमातृपतिभ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै। यथाशक्त्याहिसाहृस्राद्दातव्यं स्यादरोदते"। स्यादरेतरद्धनं यथार्थज्ञाकाशार्पणसहस्रहृदयपर्य्यन्तं देयमित्यर्थः। व्यासोऽपि "द्विसहस्रः परो दायः स्त्रियै देयो धनस्य तु"। आहिसहस्रादिति कात्यायनेन, पर इति च व्यासेनोक्तेरिनोऽधिकमिति यदिनापि न स्त्रीभ्यो देयमिति दर्शितम्। अयञ्च नियमः प्रतिवत्सरमसकृदर्पणे ज्ञेयस्तेनानेकवत्सरेषु जीवनार्थं दीयमानमितोऽधिकमपि भवति चेन्न दोषः। जीवनार्थत्वादानस्य यावज्जीवञ्च हिसाहस्रमात्रेण तन्निर्वाहासम्भवात्। स्त्रीधनेऽपि भर्त्रनुमतिमन्तरेण स्त्रीणान्न स्वातन्त्र्यमित्याह मनुः "न निर्हारं स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात्। स्वकादपि च वित्तात्स्वस्य भर्त्तुरनाज्ञया" इति निर्हारो व्ययः। कचित्तु स्त्रीधने तासां स्वातन्त्र्यमस्ति यदाह बौधायनस्तत्रभवान् कात्यायनः "यौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते। यस्मात्तद्दानभोगार्थं तैर्दत्तमुपजीवनम्। यौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्। विक्रये चैव दाने च यत्रेष्टं स्यादरेष्वपि"। भर्त्तृदत्ते तु स्यादरेतरत्रैव स्वातन्त्र्यमित्याह नारदः "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्। सा यथा कामयीतास्मिंस्तथा स्यादरोदते"। स्यादरे भर्तृदत्ते स्त्रियास्तस्य निवासादुपभोगमात्रं न दानविक्रयादिकमित्यर्थः। अपुत्रा शयनं भर्तुरित्यादि कात्यायनवचोऽपि भर्तृदत्तस्यादरविषयमेव नारदैकवाक्यतयेति केचित्। अस्माभिस्तु पत्नी दुहितर इति व्याख्यानावसरेऽस्य विषयः प्रपञ्चितः। पुरुषाणामपि कस्मिंश्चिदपि स्त्रीधने न स्वातन्त्र्यं स्वाम्याभावादित्याह कात्यायनः "न भर्त्ता नैव च सुतो न पिता भ्रातरो न च। आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः। यदि त्वेकतरोऽप्येषां स्त्रीधनं भक्षयेद्बलात्। सदृद्धिकं स दाप्यः स्याद्दण्डञ्चैव समाप्नुयात्। तदेव यदनुज्ञाप्य भक्षयेत् प्रीतिपूर्वकम्। मूलमेव तदा दाप्यो यदा स धनवान् भवेत्। अथ चेत् स हि भार्य्यः स्याद्भ च तां भजते पुनः। प्रोत्या विसृष्टमपि चेत् प्रतिदाप्यः स तद्धनात्। व्यासाच्छादनवासानामुच्छेदो यत्र योषितः। तत्र स्वमाददीत स्त्री विभागं रिक्थिनान्यथा"। स्त्रिया धनं गृहीत्वा यदापरभार्य्यया सह वसत्येनाञ्चावमन्यते तदा गृहीतं तद्धनं राज्ञा बलाद्दाप्यः। भक्ताच्छादननिवासान् यदि भर्त्ता न ददाति तदा तेऽपि स्त्रिया बलादुग्राह्या इत्यर्थात्। यं धनं वा याहुरिति श्लोकद्वयस्यार्थः। इदमपि तस्या दौस्थराहित्ये बोध्यं दुष्टा पुनः किमपि स्त्रीधनं न लभते इत्याह स एव "अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिका। व्यभिचाररता या च स्त्रीधनं न तु सार्हति"। नार्हतीत्यनेन तया लब्धमपाच्छिद्य याहुरिति सूचितम्। अपकारक्रियायुक्ता सदा भर्तृप्रतिकूलाचरणपरा "निर्लज्यार्थनाशिका" इत्यपि पाठः। देवलः "हृद्विराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत्। भुङ्क्ते तत् स्वयमेवेदं पतिनार्हत्यनापदि। हृत्वा भोक्ते च भोगे च स्त्रियै दद्यात् सदृद्धिकम्" इति। हृद्विर्वेर्जनार्थं पित्रादिना दत्तमिति स्मृतिचन्द्रिकायाम्। मदनरत्ने तु हृत्तिरिति पठितम्। हृत्तिर्जीवनार्थं पित्रादिभिर्दत्तमिति व्याख्यातञ्च। लाभो गौर्य्यादिप्रीत्यर्थं यल्लभ्यते कुतश्चित्। हृत्वा आपदन्तरेण।

मोत्सर्गो दानमिति यावत्। अननुज्ञातत्यागभोग-विषयमेतत्। तदनुज्ञया त्वनापद्यपि न दोषः "स्वयमेवेत्येवकारः स्वापत्यानां व्युदासार्थः। भर्तृव्युदासस्य पतिनार्हतीत्यनेनाभिधानात्। भर्तृव्युदासे ततो बहिरङ्गानां भ्रात्रादीनां व्युदासस्यापि दण्डापूपिकया सिद्धत्वात्। अनापदीत्यभिधानादापदि न दोषः। अतएव "पुत्रार्त्तिहरणे चापि स्त्रीधनं भोक्तुमर्हतीति" तस्यैव वाक्यशेषः। पतिरित्यनुषङ्गः। पुत्रग्रहणं बन्धुस्त्रीपरिग्रहार्थं तस्यार्त्तिर्भक्ष्याद्यभावनिमित्ता पीडा तस्या हरणे। चशब्दादन्यत्रापि धनाभावनिमित्ते सङ्कटे स्त्रीधनमननुज्ञातमपि पतिस्वयं भोक्तुमर्हतीत्यर्थः। ननु परधने त्यागभोगयोः स्वाम्यनुज्ञया विना कथमर्हता बाधिताऽनेन बोध्यते। अनुज्ञायान्त्वनापद्यपि न विरोधः। उच्यते। वचनबलात्तादृशविषये व्यये स्वत्वमेव तस्य तत्रेत्यदोषः। अतएव योगीश्वरोऽपि "दुर्भिक्षे धर्मकार्ये च व्याधौ सम्प्रतिरोधके। गृहीतं स्त्रीधनं भर्त्रा नाकामो दातुमर्हति"। धर्मकार्ये व्यावश्यके नित्ये नैमित्तिके च सम्प्रतिरोधके दण्डाद्यर्थं राज्ञावरोधे कृते। वाचस्पतिस्तु सम्प्रतिरोधक इति व्याधिविशेषणं कार्यानुष्ठानबाधके इति च तदर्थं इत्याह। नाकामो दातुमर्हतीत्यपि दारिद्र्यादिकृतदानासामर्थ्ये दुर्भिक्षादिगृहीतमध्यवश्यं देयमेतावतैव वचनोपपत्तौ सामर्थ्येऽसत्यदानमिच्छयेत्यस्य कल्पयितुमनर्हत्वात्। पतिग्रहणादापद्यपि पत्युरेव पत्नीधनस्यग्रहणाधिकारः पतिदानञ्चेच्छया नान्यस्येति ज्ञेयम्। भर्त्रा दातुं प्रतिश्रुतं भार्यायै तस्मिन् मृते पुत्रादिभिरस्यै देयमित्यप्याह स एव "भर्त्रा प्रतिश्रुतं देयमृणवत् स्त्रीधनं सुतैरिति"। सुतग्रहणं पौत्रप्रपौत्रयोरुपलक्षणमृणवदित्यभिधानात्। अनेन स्त्रीधने जीवत्यामस्यां मृतायां जन्मना स्वत्वेऽपि नास्ति विभाग इति गम्यते। एवं स्त्रीधनमुक्तम्। दायभागमतं पारिभाषिकपरत्वपक्ष एव। अनयोर्युक्तायुक्तत्वं सुधीभिर्भाव्यम्। उत्तराधिकारिशब्दे ११०१ पृ० च तद्विभागो दृश्यः।

स्त्रीधव पु० स्त्रियं धुनाति धु-अच्। पुरुषे जटा०।

स्त्रीधर्म्म पु० इत०। क्षतौ नारीकुसुमविकारे रजसि हेमच०

स्त्रीधर्म्मिणी स्त्री स्त्रीधर्मोऽस्त्यस्या इनि। ऋतुमत्यां स्त्रियाम् अमरः।

स्त्रीपण्योपजीविन् पु० स्त्रीरूपेण पण्येन जीवति जीविनि। धनं गृहीत्वा सम्भोगार्थमन्यस्मै स्त्रियं दत्त्वा तल्लब्धधनोपजीविनि।

स्त्रीपुंधर्म्म पु० स्त्रियाः पुंसश्च धर्मः तमधिकृत्य व्यवहारो वा। स्त्रीपुंसयोः यथाशास्त्राचाररूपे धर्मे तद्विषयके व्यवहारपदवाच्ये विवादपदेषु मध्ये विवादपदभेदे स्त्रीपुंसयोगोऽत्र। वीर० तत् व्यरूपि यथा "तत्स्वरूपमाह नारदः "विवाहादिविधिः स्त्रीणां यत्र पुंसाञ्च कीर्त्यते। स्त्रीपुंसयोगसंज्ञं तद्विवादपदमुच्यते" इति। विवाहादिशब्देन स्त्रीपुंधर्मा गृह्यन्ते। अतएव मनुर्व्यवहारपदोद्देशकाले स्त्रीपुंधर्मौविभागस्येत्युद्दिश्य प्रतिज्ञापूर्वकं तेषां निरूपणं चकार "पुरुषस्य स्त्रियाञ्चैव धर्म्ये वर्त्मनि तिष्ठतोः। संयोगे विप्रयोगे च धर्मान् वक्ष्यामि शाश्वतान्" इत्यादिना संयोगे अन्योन्यसन्निधाने विप्रयोगे देशतः कालतो वा व्यवधाने। शाश्वतान्नित्यान् अवश्यानुष्ठेयानिति यावत्। के ते धर्मा इत्याकाङ्क्षायामाह स एव "अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम्। विषयेषु च सज्जन्त्यः संस्थाप्या ह्यात्मनो वशे" इत्यादि। पुरुषैः भर्त्रादिपुरुषैः। विषये दण्डहेतुभूतचाञ्चल्यादिविषये। नारदोऽपि "स्वातन्त्र्यादिप्रणश्यन्ति कुले जाता अपि स्त्रियः। यस्मात्तस्मान्नतन्त्रास्तां प्रजापतिरकल्पयत्" इति। अतोऽन्यैरपि स्वस्त्रीणामस्वातन्त्र्यं यथा भवति तथा कर्त्तव्यमित्याशयः। पुरुषेण स्वस्त्री व्यभिचारादवश्यं रक्षणीया। तथा च हारीतः "एकव्रतसकृत्सङ्गभावात् परेन्द्रियोपहतत्वाच्च दुष्टाः कुलसङ्करकारिण्यो भवन्ति जीवति जारजः कृण्डोऽस्ते भर्तरि गोलकस्तस्माद्धेतोपाघाताच्छायां रक्षेच्छायाभर्तरि कुलनाशः कुलनाशे तन्तु नाशस्तन्तुनाशे देवपितृयज्ञनाशो देवपितृयज्ञनाशे आत्मनाशः आत्मनाशे सर्वस्वनाशः" इति। एकव्रतसकृत्सङ्गभावात् स्त्रीणां एकभर्त्रेति नियमनाशात्। परेन्द्रियोपहतत्वात् परस्त्रियां पुंसि इन्द्रियस्य मनसोरागादिना उपहतत्वात्। कालसङ्करकारिण्यस्तत्त्वातिरिक्तभावानुगत प्रजोत्पादनेन कुलसाङ्कर्यकारिण्यः। अतएव यङ्लुलिखितौ "यस्मिन् भावीङ्गितः स्त्रीणामाकूते ताहशं तस्मुञ्जन्तीति"। तन्तुः पुत्रादिसन्ततिः। मनुरपि "रक्षेत्कन्यां पितृभ्योऽपि पतिभ्यः स्त्रियो रक्षेत्ता विशेषतः। द्वयोर्हि

क्षत्रियो शोकभावहेयुररक्षिताः । दृष्टं हि सर्ववर्णानां पश्यतो धर्मसङ्कटम् । यत्ने रक्षितं भार्यां भर्तारो दुर्बला अपि । स्वां प्रसूतिं चरित्रञ्च कुलमात्मानमेव च । सुधर्मं हि प्रयत्नेन जायां रक्षन् हि रक्षितः" इति । द्वयोः कुलयोः भर्तृपितृकुलयोः । अनेन कुलद्वयदण्डैरपि रक्षा इति शोककथनमुखेन दर्शितम । अतएव बृहस्पतिः "सुरक्षाभ्योऽपि प्रयत्नेभ्यो नित्यां स्त्री स्वबन्धुभिः । स्वधर्मादिभिः पालनीया गुरुस्त्रीभिर्दिवानिशम्" । मनुरपि "कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः । मृते भर्तरि पुत्रस्तु वाच्यो मातुररक्षिता" इति । काले कन्यादानयोग्ये काले । वाच्योनिन्द्यः । अनुपयन् अननुभञ्जन् । स एव "पिता रक्षति कौमारे भर्त्ता रक्षति यौवने । पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति" । याज्ञवल्क्योऽपि "रक्षेत्कन्यां पिता, विद्यां पतिः, पुत्रस्तु वार्द्धके । अभावे ज्ञातयस्तेषाञ्च स्वातन्त्र्यं क्वचित् स्त्रियाः" इति । विद्या विवाहिता । पतिपुत्रविहीनायान्तु रक्षणं पतिपक्षान्तर्गतेन प्रत्यासन्नेन कार्यम् । तथा च नारदः "मृते भर्त्तरि पुत्राया पतिपक्षः प्रभुः स्त्रियः । विनियोगात्तु रक्षायां भरणेषु च ईश्वरः । परित्यक्ते पतिकुले निर्मनुष्ये निराश्रये । तत्सपिण्डेषु वासत्सु पितृपक्षः प्रभुः स्त्रियः" । पितृपक्षाभावे स एवाह "पञ्चहायनवसाने तु राजा भर्त्ता मृतः स्त्रियः । स तस्या भरणं कुर्याच्चिष्टस्त्रीयात्पतञ्च ताम्" इति । विनियोगः कर्मणि नियोजनम् । भर्त्ता पोषकः स्त्रीस्वभावं दर्शयति हारीतः "अलीकादत्यं स्त्रियः सर्वा भूषणाच्छादनादनैः । तुष्टिताऽपि लता नित्यं पुरुषं दूषयत्यसौ । अलीकादत्यं रक्षणादत्ते केवलं सा तपस्विनी । इतरा तु धनस्यक्तं मांसं वीर्यं बलं सुखम् । सापत्न्या दाक्षभावे तु यौवनेऽभिसखी भवेत् । मृत्यवन्नश्यते नारी दुष्टभावे स्वकर्मतिम् । स्वकार्ये वर्त्तमाना सा क्षेत्राद्वा च निवारिता । अपथ्या तु भवेत् पश्चाद् यथा व्याधिरुपेक्षितः" इति । तुष्टिता तृप्ता । अतापीत्यन्वयः । अपकर्षति ततमात्रामात्रं करोति स्वकार्ये क्षेत्रादाम् । अपथ्या अत्यन्ताहितहेतुभूता । मनुरपि "नेता सूनं प्रतीच्छन्ते नाशां वयसि संस्थितिः । सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते । यौवनाश्रयचित्तत्वात् नैःस्नेह्याच्च स्वभावतः । रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्वते । अन्यासनमलङ्कारं कामं क्रोधमनार्जवम् । द्रोहभावं कुचर्यां च स्त्रीभ्योमनुरकल्पयत् । नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्मो व्यवस्थितः । निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः । तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि । स्त्रीलक्षणपरीचार्थन्तासां श्रुत निष्कृतीः । यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता । तन्मे रेतः पिता वृङ्क्तामित्यृक्तैतस्मिदर्शनम् । ध्यायत्यनिष्टं यत्किञ्चित्यार्थिव्याहृत चेतसा । तस्यैव व्यभिचारस्य निष्कृतः सम्यगुच्यते । एवं स्वभावं ज्ञात्वास्याः स्वाभाविकमेवापनिवर्हणम् । परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति" इति । निरिन्द्रिया निर्वीर्या धैर्यप्रज्ञादिरहिता इति यावत् । स्त्रियोऽनृतमिति मायमोऽनृतवदनशीलत्वादुच्यन्ते । श्रुतयः श्रुतिवाक्यानि । निगमेष वेदेष स्त्रीलक्षणं स्वरूपं तासां श्रुतीनामध्ये या निष्कृतिरूपा व्यभिचारप्रायश्चित्तरूपाश्चाः श्रुतीः श्रुत स्त्रीस्वभावज्ञानार्थमित्यर्थः । महाभारतेऽपि "कुलीना रूपवत्यश्च नार्यश्च योषितः । मर्यादासु न तिष्ठन्ति स दोषः स्त्रीषु नारद ! । अनर्थेष्वानुबन्धश्च भयात्परिजनस्य च । मर्यादायामसंयोगः स्त्रियस्तिष्ठन्ति भर्तृषु । यौवने वर्त्तमानानां रूपाभरणशालिनाम् । नारीणां स्वैरवृत्तीनां भृत्यन्ति कुलस्त्रियः । यदि पुंसामतिस्नेहः ! कथञ्चिन्नोपपद्यते । अन्योन्यञ्च प्रवर्त्तन्ते न च तिष्ठन्ति भर्तृषु । अलाभात् पुरुषाणाञ्च भयात्परिजनस्य च । बधबन्धभयाच्चैव स्वयं गुप्ता भवन्ति ताः । नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः । नान्तकः सर्वभूतानाम् पुंसां वामलोचना । कामानामपि दातारं दातारं मानसास्रयोः । रक्षितारञ्च रक्षन्ति भर्तारं यत्नतः स्त्रियः" इति । औशनसेऽपि "नैवाकृतिर्न चारित्रं नापि हेष्वोऽस्ति कथन । सर्वमेवावलम्बन्ते छता मत्तेभवा इवेति" । अत्र रक्षणप्रकारः । तत्र मनुः "न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम् । एतैरुपाययोगैस्तु शक्याताः परिरक्षितुम्" इति । प्रसह्य आक्रम्य अवरोधेनेति यावत् । अस्याश्चावरोधेन शरीरव्यभिचारादुक्तत्वं शक्यन्तत्रापि मानसव्यभिचारादुक्तत्वमशक्यमित्याशयेन मनुना न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुमित्युक्तम् । न च मानसव्यभिचारादुक्तत्वमनर्थकमन्यबलत्वाभावेन प्रजाविशुद्धिविधातासंभवादिति वक्तव्यम् । यत आह य

एव "दारुणं भजते स्त्री हि सुतं सूते तथाविधम् । तस्मात् प्रजाविशुद्ध्यर्थं स्त्रियो रक्षेत् प्रयत्नतः" इति । यादृशं पुरुषसूतुकाले स्त्री मनसा भजते तत्सदृशशीलं पुत्रं जनयतीति पूर्वार्द्धार्थः । अतएवाङ्गिरसः अङ्गुष्ठिखितौ "यस्मिन् भावोऽर्पितः स्त्रीणामार्त्तवे तच्छीलं जनयन्तीति" । मानसव्यभिचारादपि स्त्रिय रक्षेदिति शेषः । तथा च मनुना तस्मादित्यादिनोक्त राजैनायमेवार्थो दर्शितः । परिरक्षणोपायानाह मनुरेव "अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् । शौचे धर्मे च पक्त्र्याञ्च पारिणाह्यस्य चेक्षणे" इति । अर्थस्य संग्रहे स्वेन समानीतार्थसंविधाने । व्यये स्वेनोक्तव्यये । शौचे गृहादिशुद्धिकरसंमार्जनोपलेपनादौ । धर्मे अग्निहोत्रादावनुकूलौकिकव्यापारे । पक्त्र्यां पाकव्यापारे । पारिणाह्यं पीठादि गृहोपकरणं तस्य ईक्षणे विचारणे । निरन्तरगृहव्यापारनियोजनात् पुरुषान्तरचिन्ताराहित्यं यथा भवति भार्यायाः तथा कुर्यादिति तात्पर्यार्थः । हरीतस्मृतिरपि "आयव्ययेऽथ संस्कारे गृहोपस्करक्षणे । शौचाग्निकार्य्ये संयोज्याः स्त्रीणां शुद्धिरियं स्मृता" इति । एवंविधव्यापारासक्तचित्ततया साध्वय इति व्यपदिशन्ति इत्याह मनुः "आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः" इति । आत्मना गृहव्यापारासक्तेनान्तःकरणेन सुरक्षिताः साध्वयः । आप्तपुरुषरक्षितास्तु स्त्रियो न सम्यग्रक्षिता इत्याह स एव "सुरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः" इति । आप्तकारिभिः पुरुषैः गृहे रुद्धा इत्यन्वयः । आप्ताश्च ते कारिणश्चाप्तकारिणः । सुरक्षिताः सम्यग्रक्षाविहीना इत्यर्थः । भर्तुर्दुर्भगत्वेऽपि स्त्रीणां रक्षणोपाय इति दर्शयितुं स एवाह "यादृग्गुणेन भर्त्रा स्त्री संयुज्यते यथाविधि । तादृग्गुणा सा भवति समुद्रेणेव निम्नगा । अक्षमाला वसिष्ठेन संयुक्ताऽधमयोनिजा । शार्ङ्गी मन्दपालेन जगामाभ्यर्हणीयताम्" इति । भार्यायां भरणमपाकरणीयमित्याह स एव "देवदत्तां पतिर्भार्यां विन्दतेऽनेच्छयात्मनः । तां साध्वीं बिभ्रयाच्चित्यं देवानां प्रिय आचरन्" । देवैर्दत्ता देवदत्ता दैवसमादायातेति यावत् । तां भार्यां स्वयंवरे पतिर्विन्दते । तत्र स्वव्यापाराभावाद्देवदत्तामित्यनेन विवाहलक्षणस्य स्त्रीपुंसयोः सम्बन्धस्य न स्वाधीनत्वं किन्तर्हि दैवदत्तत्वमिति दर्शितम् । देवदत्तत्वञ्च स्त्रीणाम् "सोमोऽददद्गन्धर्वाय गन्धर्वो दददग्नये । रयिञ्च पुत्रांश्चाददग्निर्मह्यमथो इमाम्" इत्यादिभ्यः श्रुतिवाक्येभ्योऽवगम्यते । तेन देवैर्दत्ताया अमरणेन दातुर्यां देवानां द्राक् आयत्यत इत्यर्थवाद इत्युक्तं सदनरत्ने । न च साध्वीमित्यस्य पतिव्रतामित्यर्थपरत्वेन व्यभिचारिण्या भरणमनावश्यकमिति वक्तव्यम् । तस्या अपि कदन्नादिनाऽवश्यभरणीयत्वात् । तथा च नारदः "व्यभिचारे स्त्रियाश्चौरवद्भुमधःशयनमेव च । कदन्नञ्च कुवासश्च कर्म चावस्करोज्झनम्" इति । स्त्रियास्त्वयं व्यभिचारे जाते मुण्डनमधःशयनञ्च साध्येत । कदन्नं कुवासश्च भरणार्थं दद्यात् । अमेध्यशोधनरूपं कर्म कारयेदित्यर्थः । दोषरहितायाः भार्यायाः परित्यागिनं प्रत्याह नारदः "अनुकूलामवाग्दुष्टां दत्तां साध्वीं प्रजावतीम् । त्यजन् भार्यामवस्थाप्य राज्ञा दण्डेन भूयसा" इति । विष्णुरपि "निर्दोषां परित्यजन् पत्नीमिति" चौरवच्छास्त्र इत्यनुषङ्गः । निर्दोषा न्यागहेतुभूतदोषरहिताम् । दण्डेन स्थापयितव्यमित्यत्र योगीश्वरः "आत्मासम्भाविनीं दत्तां वीरसूं प्रियवादिनीम् । त्यजन् दाप्यस्तृतीयांशमद्रव्योभरणं स्त्रियः" इति । तृतीयांशस्तृतीयांशम् । राज्ञा भार्यया दाप्यः । अल्पधनः भरणमात्रपर्य्याप्तं धनं दाप्य इत्यर्थः" । (स्त्रीपुरुषयोः ।

स्त्रीपुंस प० द्वि० स्त्री च पुमांश्च अच्समा० । मिलितयोः

स्त्रीपुंसलक्षण स्त्री स्त्रीपुंसयोर्लक्षणमस्याम् । स्तनभगशुक्रार्त्तवादिस्त्रीपुरुषचिह्नधारिण्यां स्त्रियाम् पीठायाम् अमरः

स्त्रीप्रिय पु० ६त० १आम्रवृक्षे त्रिका० २नारीप्रियमात्रे त्रि०

स्त्रीमुखप पु० स्त्रीसुखं पाति पा—क । दोहदजनकवृक्षे राजनि० ।

स्त्रीरोग पु० ६त० । स्त्रीणां रोगे योनिरोगादौ सुश्रुत ।

स्त्रीलिङ्ग पु० स्त्रिया इव लिङ्गं तत्कार्य्यं यस्य । स्त्रीनिङ्गविधिचिह्ने स्तनादौ न० । ६त० स्त्रीप्रत्ययचिह्ने टाबादौ न० ।

स्त्रीवश पु० ६त० । स्त्रीवशीभूते ।

स्त्रीविधेय पु० ६त० । स्त्रीवशीभूते ।

स्त्रीसंग्रहण न० स्त्रियाः सम्यग्रहणं यत्र । परस्त्रीहरणरूपे विवादपदभेदे । तत्स्वरूपादिकं वीरमि० दर्शितं यथा "अथ स्त्रीसंग्रहणाख्यं व्यवहारपदम् । तत्र त्रैविध्यमाह बृहस्पतिः "त्रिप्रकारं संग्रहणं तिरश्चां

निर्देशत । बलोपधिकृते हे तु तृतीयमनुरागजम्" इति । एतेषां स्वरूपं दर्शयति स एव "अनिच्छन्त्या यत् क्रियते सत्तोन्मत्तप्रमत्तया । विलपन्त्या वा रहसि बलात्कारकृतन्तु तत् । छद्मना घटमानीय दत्त्वा स्वं घटकारणम् । संयोगः क्रियते यत्र तद्बूपधिकृतं विदुः । अन्योन्यचक्षुरागेण दूतीसंप्रेषणेन वा । कृतं रूपार्थलोभेन ज्ञेयं तदनुरागजम्" इति । अनुरागज संग्रहस्य त्रिविधत्वं दर्शयति स एव "तत्पुनस्त्रिविधं प्रोक्तं प्रथमं मध्यमोत्तमम्" इति । व्यासोऽपि "संग्रहस्त्रिविधोज्ञेयः प्रथमोमध्यमस्तथा । उत्तमश्चेति शास्त्रेषु लक्षणं च पृथक् पृथक्" इति । एतेषां स्वरूपमाह तुर्यांसवृहस्पती "कटाक्षावेक्षणं हास्यं दूतीसंप्रेषणं तथा । स्वयोग्यवस्त्राणां प्रथमः संग्रहः स्मृतः । प्रेषणं गन्धमाल्यानां क्षणभूषाम्बरस्य च । सम्भाषणञ्च रहसि मध्यमं संग्रहं विदुः । एकशय्यासनं क्रीड़ा चुम्बनालिङ्गनं तथा । एतत् संग्रहणं प्रोक्तमुत्तमं शास्त्रवेदिभिः" इति । स्त्रीसंग्रहणस्य ज्ञानोपायमाह याज्ञवल्क्यः "पुमान् संग्रहणे याह्यः केशाकेशि परस्त्रिया । सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ दयोस्तथा" इति । परभार्यया सह केशाकेशि क्रीड़नेन सद्यः अभिनवैः कामजैः करजदशनादिकृतव्रणादिलिङ्गैर्द्वयोः सम्प्रतिपत्तौ सत्यां स्त्रीसंग्रहणवान् इति प्रतिपत्तव्य इत्यर्थः । उपायान्तरमाह स एव "नीवीस्तनप्रावरणसक्थिकेशावमर्शनम् । अदेशकाल सम्भाषः सङ्केतस्थानमेव च" इति । कर्षणं इति शेषः । सक्थि ऊरुः । मनुरपि "स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत् तथा । परस्परस्यानुमते सर्वं संग्रहणं स्मृतम्" । यस्तु दर्पादिना मद्यं भुङ्क्ते वदति सोऽपि तथाविधत्वेन याज्ञ इत्याचक्षुर्मनुनारदौ "दर्पाद्वा कामयेद्यस्तु मद्यं वदेत् । पूर्वं मद्यं यदि वा सोऽतात् स्नाघया वा स्वयं वदेत् । पूर्वं मद्यं भुङ्क्ते नञ्च संग्रहणं स्मृतम्" इति । बलात्कारकृतस्य स्त्रीसंग्रहणस्य साहसान्तर्भूतत्वेन तत्रैव दर्शितत्वादुपधिकृते दण्डमाह वृहस्पतिः "दर्पाद्वा कामयेद्यस्तु तस्य सर्वहरोदमः । कर्त्तयित्वा भगाङ्केन पुराद्विर्वासयेत्ततः" इति । सर्वहरः सर्वस्वहरः एतत् सजातीय विषयम् । हीनोत्कृष्टागमने तु क्रमेणार्द्धं धनं सर्वस्वहरणरूपो वधसहितसर्वस्वहरणरूपो वा दण्डोऽवगन्तव्यः । "दमानेयः समायान्ति" साहसवादनिरूपणे दर्शितवचनात् । तत्र वचने पुरुषस्यापकर्षे भार्ये वृको दण्डो न स्त्रिया इति नोक्तस्त्र्याः दण्डः, तेन साहस स्त्रीसंग्रहणवत् प्रकृतेऽपि सजातीयापभुक्तायाः संव्यवहार्यायाः प्रायश्चित्ताचरणानन्तर पुनरपि तेनोपभुक्ताया इति ज्ञातव्यमित्युक्तं सदनन्तरे । अनुरागजत्रिविध संग्रहणे दण्डमाह स एव "त्रयाणामपि चैतेषां प्रथमो मध्यमोत्तमौ । विनयः कल्पनीयः स्यादधिकोद्वेषणाधिकः" इति । अधिकः प्रथमसाहसादिभ्योऽधिकः । सम्भोगे दण्डमाह याज्ञवल्क्यः "स्वजातावुत्तमा दण्ड्य अनुलोम्ये तु मध्यमः । प्रातिलोम्ये बधः पुंसो नार्याः कर्णादिकर्त्तनम्" इति । चतुर्णामपि वर्णानां बलात्कारेण सजातीयपरभार्यागमने साधीतिपणसहस्रो दण्डः । यदा त्वानुलोम्येन हीनजातीयागमनं तदा मध्यमसाहसः । उत्कृष्टजातीयागमने गन्तुर्वधः । तस्याः कर्णादिकर्त्तनमित्यर्थः । एतच्चानुरागजग्रहणविषयं स्त्रिया अपि दण्डाभिधानात् । बलात्कारोपधिकृतयोस्तु स्त्रिया अनपराधित्वेन दण्डाभावात् । अस्मादेव प्रातिलोम्येन गमने पुरुषस्य वधं विधाय स्त्रियास्तदर्द्धतुल्यकर्णनासादिकर्त्तनविधानात् सजातीयागमने पुरुषस्य याज्ञवल्क्योक्तमध्यमसाहसो दण्डो तदर्द्धं स्त्रियादण्ड इति सूचितम् । अतएव कात्यायनः "सर्वेषु चापराधेषु पुंसोऽर्द्धदमत्तया । तदर्द्धं योषितो दद्युर्वधे पुंसोऽङ्गकर्त्तनम्" । इति । स्त्रिया इति शेषः । यदा पुनः सवर्णांमगुप्तां अनुलोम्येन गुप्तां वा व्रजति तदा विशेषमाह मनुः "सहस्रं ब्राह्मणो दण्ड्योऽगुप्तां विप्रां बलाद् व्रजन् । शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः । सहस्रं ब्राह्मणो दण्ड्यो गुप्ते तु ते व्रजन् । मूद्रायां क्षत्रियविशोः सहस्रन्तु भवेद्दमः" इति । ते क्षत्रियवैश्ये । एतच्च गुरुसखिभार्यादिव्यतिरिक्तविषयम् । तत्र दण्डान्तरविधानात् । तदाह नारदः "माता भ्रातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा । पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा । दुहिता चार्यभार्या च सगोत्रा गुरुणागता । राज्ञो प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या । शिश्नस्योत्कर्त्तनान्नास्त्र नान्योदण्डो विधीयते" इति । यत्तु प्रातिलोम्येन गमने क्षत्रियादेः पुरुषस्य वध इत्युक्तं योगीश्वरवचने । तदनुरागविषयमन्यथाऽयदण्डः । तथा च मनुः "उभावपि हि तावेव ब्रा-

ज्ञाया गुप्तया सह । विप्रो शूद्रदण्डो दण्डव्यो वा कटाग्निना । ब्राह्मणो यद्यगुप्तान्तु सेवेतां वैश्यपार्थिवौ । वैश्यस्यशतं कुर्यात् क्षत्रियन्तु सहस्रिणम्" इति । पञ्चशतमस्यशतपञ्चकदण्डभाजमित्यर्थः । एव सहस्रिण्यभिधानाच्च । क्षत्रियस्य गुप्तवैश्यागमने वैश्यस्य च गुप्तक्षत्रियागमने क्रमेण शतसहस्रशतपञ्चकं तयोर्दण्ड इत्याह स एव "वैश्यव्रजेत् क्षत्रियाङ्गुप्तां वैश्यां वा क्षत्रियो व्रजेत् । यो ब्राह्मणायागुप्तायान्तावुभौ दण्डमर्हतः" इति । शूद्रस्यागुप्तेऽदण्डस्त्रीगमने लिङ्गच्छेदनसर्वस्वापहरणे गुप्तागमने तु वधसर्वस्वापहारौ । तथा च स एव "शूद्रो गुप्तमगुप्तं वा द्वेजातं वर्यमाचरन् । अगुप्तैकाङ्गसर्वस्वो गुप्तौ सर्वंस्व हीयते" इति । व्यध बधाद्युपदेशः प्रजापालनाधिकाराद्राज्ञ एव न द्विजातिमात्रस्य । "ब्राह्मणः परीक्षार्थमपि शस्त्रं नादद्दीतेति" शस्त्रग्रहणस्य निषिद्धत्वात् । यदा तु राज्ञो निवेदने कालविलम्बेन कार्यातिपातस्तदा द्विजातिमात्रस्यापि शस्त्रग्रहणेऽधिकारोऽस्त्येव "शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते । आततायिवधे दोषो हन्तुर्भवति कश्चन । प्रच्छन्नं वा प्रकाशं वा मन्युस्तं मन्युरृच्छति" इति शस्त्रग्रहणाभ्यनुज्ञानात् । परस्त्रिया सह सम्भाषणं कर्तुं दण्डमाह मनुः "परस्य पत्न्या पुरुषः संभाषं योजयेत् सह । पूर्वमाक्षारितो दोषैः प्राप्नुयात् पूर्वसाहसम्" इति । आक्षारितः अभिशस्तः । दोषैः नानारूपोपभोगवाञ्छाभिः । पापबुद्ध्या यः सम्भाषणं करोति तद्विषयमेतत् । अतएव "अस्तमाक्षारितः पूर्वमभिभाषेत कारणात् । न दोषं प्राप्नुयात् किञ्चित् हि तस्य व्यतिक्रमः" इति । मनुसाहसस्य क्रूरपूर्वसाहसमध्यमसाहसयोरुत्तमसजातीयासम्भाषणादिविषयत्वेन व्यवस्था परिकल्पनीया । परपुरुषेण सह पित्रादिभिर्निषिद्धं सम्भाषणं वा करोति सा पणशतं दण्ड्या परस्त्रिया सह पित्रादिभिर्निषिद्धसम्भाषणं यः पुरुषः करोति पणशतद्वयं दण्डनीयः । द्वयोरपि निषिद्धपरस्परसम्भाषणादि कुर्वतोः सम्भोगे यो दण्डः स एव दण्ड इत्याह याज्ञवल्क्यः "स्त्री निषेधे शतं दद्याद् द्विशतन्तु टमं पुमान् । प्रतिषेधे तयोर्दण्डो यथा अहसे तथा" इति । निषिद्धत इति निषेधः कर्मणि घञ्यिति वक्ष्यति । चारणादिस्त्रीव्यतिरिक्तविषयमेतत् "वेश्य चारणदारेषु विधिनोपयुञ्जीविषु । सञ्चरन्ति हि ते नारीर्निगूढाचारयन्ति च" इति मनुस्मरणात् नटाः स्त्रीलोपजीविनः वेशोपजीविनः । एतेषां दारेषु एष विधिर्न । अभिभाषणादिनिमित्तकदण्डविधिर्न । परन्तरे नारीः स्वस्याः सञ्चरयन्ति पुरुषान्तर संयोजन्ति प्रच्छन्नीकृत्य कारयन्ति वेत्यर्थः । साधारणस्त्रीगमने दण्डमाह याज्ञवल्क्यः "अवरुद्धासु दासीषु भुजिष्यासु तथैव च । गम्यास्वपि पुमान्दाप्यः पञ्च शतमिति स्थितिः" इति । स्वामिना या शुश्रूषार्थं रक्षे एव स्थातव्यमित्येवं पुरुषान्तरोपभोगतो निरुद्धास्ताः अवरुद्धाः । पुरुषान्तरेष्वावरुध्य भुज्यमाना भुजिष्याः या दासीः भुजिष्या अवरुद्धा वा तासु सर्वपुरुषगम्यास्वपि गमने पञ्चाशत्पणं दण्ड्यः तासामस्वपरिरक्षितत्वेन परस्त्रीतुल्यत्वात् । चपरुद्धाद्येस्त्रैरिणीनामपि यद्यपि सर्वपुरुषसाधारणीषु परपरिरक्षितासु गमनेऽयमेव दण्ड इति मन्तव्यम् । एतदभिप्रेत्याह नारदोऽपि "स्त्रैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च या । गम्याः क्षुरानुलोम्येन स्त्रियो न प्रतिलोमतः । क्षत्रेव तु भुजिष्यासु दोषः स्यात्परदारवत् । गम्यास्वपि हि लोभेयाद्यत्ताः परपरिग्रहाः" इति । अब्राह्मणीति स्त्रैरिण्यापि विशेषणम् । स्त्रैरिणी स्वतन्त्रा पुंश्चली । निष्कासिनी कुटुम्बात्तिर्यतेति मदनरत्ने । स्वामिनवरुद्धा दासीति विज्ञानेश्वरमाधवाचार्यप्रभृतयः । भुजिष्या स्वेति सम्बन्धः । व्यासोऽपि "परोपरुद्धागमने पञ्चाशत्पणिको दमः । प्रसह्य वेश्यागमने दण्डो दशपणः स्मृतः" इति । प्रसह्य वेतनदानं विना बलात्कारेण । दासीषु वेश्यादिषु गम्यत्वाभिधानञ्च पापाभावप्रतिपादनार्थं किन्तु राजदण्डाभावप्रतिपादनार्थम् । "प्रायश्चित्तं चरेत्" इत्यादिवचनैः प्रायश्चित्तश्रवणात् । बलात्कारेण अनवरुद्धदास्यभिगमने दण्डमाह याज्ञवल्क्यः "प्रसह्य दासीभिगमे दण्डो दशपणः स्मृतः । बहूनां यद्यकामानां चत्वारिंशत्पृथक्" इति । पुरुषसम्भोगजीविकासु दासीषु स्वैरिण्यादिषु शुल्कदानमन्तरेण बलात्कारेणाभिगच्छतो दशपणो दण्डः । यद्यनिच्छन्तीमेकास्त्रीबलात्कारेण बहवो गच्छन्ति तर्हि प्रत्येकं चतुर्विंशतिपणात्मको दण्ड इत्यर्थः । यदि पुनः सा स्वेच्छया भाटकं गृहीत्वा पश्चाच्छेते तदा बलाद्व्रजतामपि बहूनामदोषः आह

तया व्याध्याद्यभिभवो न भवेत्। अतएव नारदः "व्याधिता सत्त्रमा व्यया राजकर्मपरायणा। आमन्त्रिता चेन्नागच्छेद्दण्ड्या दण्ड्या स्मृता" इति। पारदार्य प्रसङ्गात् कन्यायामपि दण्डमाह याज्ञवल्क्यः "अलङ्कृतां हरन् कन्यामुत्तमं त्वन्यथाऽधमम्। दण्डं दद्यात् सवर्णासु प्रतिलोम्ये वधः स्मृतः" इति। अनलङ्कृतां विवाहाभिमुखीं तां सवर्णां कन्यामपहरन् उत्तमं साहसं दण्डनीयः। तदनभिमुखीं हरन् प्रथमसाहसम्। उत्कृष्टवर्णजातां हरतः क्षत्रियादेर्वध इत्यर्थः। अनुलोम्येन सकामाहरणे न दण्डस्तथा च स एव "सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः" इति। कन्यादूषणे दण्डमाह स एव "दूषणे तु करच्छेद उत्तमायां वधः स्मृतः। शतं स्त्रीदूषणे दद्यात् द्वे तु मिथ्याभिशंसने" इति। "पन्थानं गच्छन् शतं दाप्यो हीनां स्त्रीक्षाञ्च मध्यमम्" इति। यदाकामां कन्यामुत्कृष्टजातिना प्रसह्य दूषयति तदा करच्छेदः। यदा तु अङ्गुलि प्रक्षेपेण तामेव योनिच्छिद्रतां कुर्वन् दूषयति तदा विशेषमाह मनुः "अभिषह्य तु यः कन्यां कुर्यादूर्षेण मानवः। तस्याशु कर्त्यं अङ्गुल्यौ दण्डञ्चार्हति षट्शतम्" इति। सकामदूषणेऽप्याह स एव "सकामां दूषयन् कन्यां नाङ्गुलिच्छेदमर्हति। द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये" इति। यदा कन्या विटधात्री वा कन्यां दूषयति तदाप्याह स एव "कन्यैव कन्यां या कुर्यात्तस्यास्तु द्विशतो दमः। सा तु कन्यां प्रकुर्यात् स्त्री सा सद्यो मौण्ड्यमर्हति। अङ्गुल्योरेव वा छेदः खरेणोद्वहनन्तथा" इति कुर्यात् योनिच्छद्मवतीमिति शेषः। यदा पुनरुत्कृष्टजातीयां कन्यां सकामामकामां वाभिगच्छति तदा हीनस्य क्षत्रियादेर्वधः। यदा सकामां सवर्णामभिगच्छति तदा शुल्कं गोमिथुनं तत्पित्रे दद्यात्। अनिच्छति तस्मिन् दण्डरूपेण राज्ञे दद्यात्। सवर्णामकामामुच्छतो वध एव। तदाह मनुः "उत्तमां सेवमानस्तु जघन्योवधमर्हति। शुल्कं दद्यात् समामिच्छेत् पिता यदि। योऽकामां दूषयेत् कन्यां स सद्यो वधमर्हति। सकामां दूषयं स्तुल्यो न वधं प्राप्नुयान्नरः" इति। चाण्डालादिगमने दण्डमाह याज्ञवल्क्यः "अन्त्याभिगमने त्वङ्गं कुर्वर्णेन प्रवासयेत्। शूद्रस्त्वन्त्य एव स्यादन्त्यस्त्रीयोनिगमे वधः" इति। कन्या चाण्डाली तद्गमने त्रैवर्णिकान् प्रायश्चित्तमभिदधत् "सहस्रं त्वन्त्यजस्त्रियमिति" मनुवचनानुसारेण पणसहस्रं दण्डयित्वा कृतसितवर्णेन भगाकारेणाङ्कयित्वा स्वराष्ट्रान्निर्वासयेत्। शूद्रः पुनश्चाण्डालीङ्कच्छवण्डाल एव। अङ्क्त्र एवेति माधवीये पाठः। चाण्डालस्य तूत्कृष्टजातिस्त्र्यभिगमने वध एवेत्यर्थः। योनिव्यतिरिक्तस्थले गच्छतो दण्डमाह स एव "अयोनौ गच्छतो योषां पुरुषं वाऽभिमेहतः। चतुर्विंशतिको दण्डस्तथा प्रव्रजितागमे" इति। यस्तु योषां सक्थादावभिगच्छति पुरुषं वाभिसक्थं मेहति तथा प्रव्रजितां वा गच्छति अयौ चतुर्विंशतिपणा दण्डनीय इत्यर्थः। स्त्रीकृते संग्रहणे दण्डमाह वृद्धशातातपः "घटमागत्य या नारी प्रलोभ्य स्वर्णवादिना। कामयेत तत्र सा दण्ड्या नरस्याङ्गदमः स्मृतः" इति वचसा स्त्रियं प्रलोभ्य गच्छतः पुरुषस्य यो दण्डस्तदर्धं दण्ड्या"।

स्त्रीसभ न॰ स्त्रीणां सभा लोपः। स्त्रीसमाजे।

स्त्रीसेवा स्त्री ६त॰। स्त्रीसम्भोगे छवायमधर्मेण नारीसेवने

स्त्रीस्वभाव पु॰ स्त्रिया इव स्वभावो यस्य। १अन्तःपुररक्षके मङ्गल्के शब्दसा॰ ६त॰। २स्त्रीणां शीले च। स्त्रीपुंधर्मशब्दे दृश्यम्।

स्त्रैण न॰ स्त्रिया इदम् अण् नञ्। १स्त्रीस्वभावे "स्त्रैणेन नीता विकृतिं लघिम्ना" भट्टिः। २स्त्रीविषये स्त्रिया अपत्यं स्त्रीणां समूहो वा अण्। ३स्त्र्यपत्ये स्त्रीसमूहे न॰।

स्थ त्रि॰ स्था-क। १स्थितिशीले प्रायेण उत्तरपदस्थित एवायं प्रयुज्यते यथा पदस्थः मार्गस्थः। २स्थले पु॰ शब्दर॰।

स्थग संवरणे भ्वा॰ पर॰ सक॰ सेट् घटा॰ सिचि न वृद्धिः। स्थगति अस्थगीत्। अयोपदेशत्वमस्य चिन्त्यमूलम्।

स्थग त्रि॰ स्थग-अच्। धूर्त्ते शब्दर॰।

स्थगन न॰ स्थग-ल्युट्। आच्छादने हेमच॰।

स्थगित त्रि॰ स्थग-क्त। १आवृते २तिरोहिते हेमच॰।

स्थगी स्त्री स्थग्यतेऽनया घञर्थे क गौरा॰ ङीष् ताम्बूलपात्रे करङ्के हेमच॰।

स्थगु न॰ स्थग-उनृ। गड्डौ (कुज) "तदेव स्थगु यद्दोर्घं रथघोणसिवायतम्। लक्ष्यार्थां च प्रतीतां च लेपयिष्यामि ते स्थगु" रामा॰ बा॰ ६स॰।

स्थण्डिल न॰ स्थग-इलच् नुक् लस्य डः। १उत्तरे उच्चत्वरनतिशून्ये समीकृते प्रदेशे अमरः। "निशेषुमी स्थण्डिल एव शेषते" कुमारः। २यज्ञार्थं परिष्कृतस्थाने शब्दर॰

श्रौमार्थं कुण्डप्रांतनिधित्वेन बालुकादिभिः कर्त्तव्ये मण्डनभेदे च "नित्यं नैमित्तिकं कर्म स्थण्डिले वा समाचरेत । हस्तमात्रं तु तत् कुर्यात् बालुकाभिः समन्ततः"शा०ति० "अथ वापि सदा सुवर्णभासा करमात्रं चतुरङ्गुलोच्छ्रायम् । हवने विदधीत बालुकोच्चं विबुधः स्थण्डिलमेववेदकोणम्"कुण्डोद्धातः। अथ वा कुण्ड करणाशक्तौ, तन्त्रान्तरे च "सदा सुवर्णभासा वा सुश्लक्ष्णबालुकयाऽपि वा अङ्गुलोच्छ्रयेण वेदाङ्गुलोच्चं स्थण्डिलं विदुः । चतुःकोणसुटङ्कं चोल्लूखलसमोच्छ्रितं शुभम् । पञ्चाङ्गुलोच्छ्रयं वा स्यं त्र्यङ्गुलसुश्रुतम् । तस्मात् सम्यक् परीक्ष्यैव कर्त्तव्यं शुभवेदिकम् । हस्तमात्रं स्थण्डिलं वा सर्वत्रिष्ठे होमकर्मणि"। वसिष्ठः "कुण्डमेवंविधं न स्यात् स्थण्डिलं वा समाश्रयेत्" क्रियासारे । तत्करण-प्रकारादि सं० त०द्रष्टव्यम् ।

स्थण्डिलशायिन् पु० स्थण्डिले चत्वरे शेते व्रतत्वात् शो-णिनि । व्रतार्थं चत्वरे शयितरि अमरः । "स्थण्डिलशायिनश्च" भट्टिः । [चत्वरे शयितरि शब्दर०।

स्थण्डिलेशय पु० स्थण्डिले शेते अच् अलुक्समा० । व्रतार्थं

स्थपति पु० स्था-क तस्य पतिः।१कञ्चुकिनि मेदि० २शिल्पिभेदे (छुतार) अमरः ३कुबेरे अजयः ४अधीशे ५बृहस्पतिसवनाख्ययागकर्त्तरि च अमरः।६सूत्रधरे त्रि०मेदि० तत्र ऋषीशपरत्वे "निषादस्थपतिगांवेधुकेऽधिकृतः" कात्या० श्रौ० १।१।१२ "निषादस्थपतिगांवेधुके चरावधिकृतः अधिकारी भवति"। एवं हि श्रूयते "यस्य रुद्रः प्रजाः शमयेत् स वास्तुमध्ये रौद्रं गावेधुकम् चरुं निर्वपेत्" इत्येतामिष्टिं प्रकृत्य श्रुतम् "एतया निषादस्थपतिं याजयेदिति" निषादस्थपतिर्यजतेत्यर्थः । तत्रायं सन्देहः किमत्र षष्ठीसमासः निषादस्य स्थपतिर्निषादस्थपतिरिति निषादस्थौ स्थपतिश्च निषादस्थपतिरिति कर्मधारयो वा । तत्र यदि षष्ठीसमासः तदा यो द्विजातिरेव विद्वान्निषादानामाधिपत्यं करोति तस्यात्राधिकारः यदि च कर्मधारयः तदा निषाद एव यः स्थपतिस्तस्यात्राधिकार इति । तत्र त्रैवर्णिकस्यैव समर्थत्वाद्विद्वत्त्वाद्ग्निमत्त्वाच्चात्राधिकारो युज्यते अन्तजातीयस्य निषादस्याविद्वत्त्वेनाग्निमत्त्वेन चासमर्थत्वात्, तस्मात् षष्ठीसमास एवायमिति पूर्वपक्षः । सिद्धान्तस्तु कर्मधारयोऽयम् निषादस्थौ स्थपतिश्चेति श्रुतः ? षष्ठीसमासपक्षे निषादशब्दे लक्षणाप्रसक्तेः न ह्यत्र षष्ठी श्रूयते यतः सम्बन्धः प्रतीयेत । अतो निषादपदेनैव षष्ठ्यर्थौ लक्षणीयः इतरस्मिंस्तु पक्षे द्वयोरपि पदयोर्लक्ष्यार्थतैव न लक्षणा तस्मान्निषाद एव स्थपतिरत्राधिकारी स्मृतिबलात् अविद्वानग्निमानपीति सिद्धम् । अपि चात्र निषादहव्यं दक्षिणा श्रूयेत कूटं दक्षिणा काणो वा गर्दभ इति कूटं हि निषादानामेवोपकारकम् नार्याणामिति" कर्क० । बृहस्पतिसवकर्त्तरि तु "स्थपतिरित्येनं ब्रूयुः" कात्या० श्रौ० २२।५।२८ सू०। "सराजानो ब्राह्मणा यं पुरस्कुर्वीरन् एतेन यजेत" "बृहस्पतिसवेन"सू०। राज्ञा सहिता ब्राह्मणा यं ब्राह्मणं धर्मस्थापकत्वेन चाङ्गीकुर्वीरन् "एतेन स एतेन यजेत बृहस्पतिसवेन"सं०व्या०। बृहस्पतिसवकर्त्तृत्वं गोसवकर्त्तृत्वेऽपि यथोक्तं "स्थपतिरित्येनं ब्रूयुः" कात्या० श्रौ० २२।११।११सू०। "गोसवयाजिनं जनाः" । राज्ञा सहिता विशः प्रजाः सर्वे पुरुषा यं पुरस्कुर्वीरन् (सख्यत्वेनाङ्गीकुर्वीरन्)स गोसवेन यजेत २२।११।८कर्क० "कारुभेदस्य लक्षणं यथा "वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः । दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्त्तितः" ।

स्थपुट त्रि० तिष्ठति स्था-क स्थं पुटं यत्र । १विषमोन्नतप्रदेशे हेमच० । "स्थपुटगतमपि क्रव्यमव्यग्रमत्तीति" मालतीमा० । २विषमस्थाने-सञ्चारिणि-जीवे पु० त्रिका० ।

स्थल स्थाने भ्वा० पर० अक० सेट् ज्वला० । स्थलति अस्थालीत् । धलधातुनैवायं गतार्थ इत्यन्ये ।

स्थल न०स्त्री०स्थल-अच् । जलशून्ये अकृत्रिमे भूभागे अमरः स्त्रीत्वपक्षे ङीप् । "वनस्थलीमर्मरपत्त्रमोक्षाः"कुमारः । २कृत्रिमाकृत्रिमप्रदेशमात्रे ३कृत्रिमभूभागे ल न० ।

स्थलकन्द पु०स्थलजः कन्दः । (वनशोल) अप्राप्यकन्दे रत्नमा०

स्थलकमल न० स्थलजात कमलम् । स्थलपद्मे भावप्र० ।

स्थलकुमुद पु० स्थले कुमुदमस्यस्य साहश्येन अच् । करवीरे राजनि० ।

स्थलपद्म न० स्थलजातं पद्मं शाक० । स्थलनामख्याते पुष्पप्रधानवृक्षे त्रि० स्थलजं पद्ममिव । २मानके पु० रत्नमा०

स्थलपद्मिनी स्त्री स्थलपद्मानां समूहः तेषां सन्निकृष्टदेशो वा इनि ङीप् । १स्थलपद्मसमूहे २तद्युक्तदेशे च । "ददर्श दूनः स्थलपद्मिनीं नलः" नैष० ।

स्थलमञ्जरी स्त्री स्थलज्य मञ्जरीव । अपामार्गे रत्नमा० ।

स्थलशृङ्गाट पु० स्थलजातः शृङ्गाटः शाक०।१गोक्षुरे रत्नमा० तस्य कण्टकाद्युक्तत्वात् तथात्वम् ।

स्थलेरुहा स्त्री स्थले रोहति रुह–क चलुक्ष०। १छत्राकुमाख्यायाम् २दग्धवृक्षे च राजनि०।

स्थलेशय पु० स्थले शेते शी–अच् चलुक्ष०। वराहरूपप्रभृतौ पशौ राजनि०। २स्थलशायिनि त्रि०।

स्थवि पु० स्था कि वेर्नेच्च। १तन्तुवाये उज्ज्वलद०। २स्वर्गे ३जङ्घामे च संक्षिप्त०।

स्थविर न० स्था–किरच् स्वार्थेऽः। १शैलेये गन्धद्रव्ये राजनि० २चतुर्दशे ब्रह्मर्षौ पु० हेमच०। ३अचले ४स्थिरे त्रि० उणा० ५वृद्धे च त्रि० अमरः। ६महाश्रावण्यां स्त्री राजनि०।

स्थविष्ठ त्रि०अतिशयेन स्थूलः इष्ठन् लोपे गुणः। अतिवृद्धे अमरः। इयसुन् स्थवीयानपि अविवृद्धे त्रि०स्त्रियां ङीप्।

स्थाणु पु० स्था नु पृषो० णत्वम्। १शिवे २शाखाशून्यवृक्षे च अमरः ३आयुधभेदे पु०नीलक०। ४वृद्धे त्रि० धरणिः शिवस्य स्थाणुशब्दवाच्यत्वे कारणमुक्तं वामनपु०४६अ०। यथा "असृक्तिष्ठन् जलात्तस्मात् प्रजास्ताः सृष्टवानहम्। ततोऽहं ताः प्रजा दृष्ट्वा रक्षिता एव तेजसा। क्रोधेन महता युक्तो लिङ्गमुत्पाटयं चात्मनः। उत्क्षिप्तं सरसो मध्ये ऊर्द्ध्वमेव यदा स्थितम्। तदाप्रभृति लोकेषु स्थाणुरित्येव विश्रुतम्"।

स्थाणुतीर्थ न० शैवे तीर्थभेदे वामनपु० १२अ०।

स्थाण्डिल पु० स्थण्डिले शेतेऽण्। व्रतार्थं स्थण्डिले शयितरि अमरः।

स्थाण्वाश्रम पुंन० इत०। हिमाचलस्थिते शिवस्य तपश्चरणाश्रमभेदे "स्थाण्वाश्रमं हैमवतं जगाम" कुमारः।

स्थाण्वीश्वर पु० शिवलिङ्गभेदे "स्थाणुर्नाम्ना हि लोकेषु पूजनीयो दिवौकसाम्। स्थाणोरीशः स्थितो यस्मात् स्थाण्वीश्वरतः स्मृतः" वामने ४२अ० तन्माहात्म्यादिकम्। तत्र दृश्यम्।

स्थान न० स्था–ल्युट्। १स्थितौ २सन्निवेशे ३वसतौ हेमच० ४सन्निवेशे ५वसतौ हेमच० ६व्यन्यश्चौ त्रिका० ७भाजने वृक्षा० ८निकटे ९व्याकरणोक्ते प्रवृत्तौ आदिश्यमानस्य यणादेः कारणभूते इगादौ। १० नीतिवेदिनाञ्चपचयापचयहीने कार्य्यावस्थाने च अमरः। उपचयापचयौ च षड्वर्गशब्दोक्तौ क्रमादेवं भरतः। वसतिश्च लोकभेदः। स्वस्ववर्त्तिनां स्वस्वधर्मानुष्ठायिनां जनानां लोकविशेषात्मकं स्थानञ्च अग्निपु० उक्तं यथा "प्राजापत्यं ब्राह्मणानां मृतं स्थानं क्रियावताम्। क्षत्रियाणां तथा चेन्द्रं संग्रामेष्वनुवर्त्तिनाम्। गान्धर्वं शूद्रजातीनां परिचर्यानुकारिणाम्। अष्टाशीतिसहस्राणां यतीनामूर्द्ध्वरेतसाम्। मृतं तेषान्तु यत् स्थानं तदेव गुरुवासिनाम्। सप्तर्षीणान्तु यत् स्थानं मृतं तद्वत् वनौकसाम्। प्राजापत्यं गृहस्थानां गृहधर्मानुवर्त्तिनाम्। न्यासिनान्तु परं ब्रह्म योगिनाममृतं मृतम्। एकान्तवादिनां ब्रह्मध्यायिनां परमं पदम्। तामिस्रमन्धतामिस्रमहारौरव रौरवम्। असिपत्रवनं घोरं कालसूत्रमयोचिषम्। वेदस्य निन्दकानान्तु यज्ञव्याघातकारिणाम्। स्थानमेतत् समाख्यातं स्वधर्मविनिवर्त्तिनाम्" श्रुतिलिङ्गाधिकरणोक्ते ११क्रमे मीमां०। "स्थानं क्रमो योगबलं समाख्या पार्थसारथिः। १२ज्ञापके नित्यहस्थानमित्यादि।

स्थानक न० स्वार्थे क। १स्थानशब्दार्थे। स्थाने कं जलमत्र। २आलवाले हेमच०।

स्थानचञ्चला स्त्री स्थाने स्थितावपि चञ्चला। १वर्वरीवृक्षे शब्दच०। अल्पवातेन चञ्चलत्वात्तस्यास्तथात्वम्।

स्थानच्युत त्रि० स्थानात् स्वस्थानात् च्युतः। पदच्युते "स्थानस्थितस्य पद्मस्य मित्रे वरुणभास्करौ। स्थानच्युतस्य तस्यैव क्लेदशोषकरौ" गरुड़पु० ११५ अ०। स्थानभ्रष्टादयोऽप्यत्र। "स्थानस्थिताश्च पूज्यन्ते पूज्यन्ते च पदस्थिताः। स्थानभ्रष्टा न पूज्यन्ते केशा दन्ता नखा नराः" गरुड़पु० ११५अ०।

स्थानाध्यक्ष त्रि० स्थाने अध्यक्षः। स्थानरक्षके हेमच०।

स्थानिक त्रि० स्थानेऽधिकृतः ठक्। स्थानाध्यक्षे हेमच०।

स्थानिन् त्रि० स्थानमस्यास्ति रत्वेन इनि। १स्थानरक्षके स्थानं प्रसक्तः अस्यर्थे इनि। व्याकरणोक्ते आदिश्यमानस्य यणादेः कारणे इगादौ "स्थानिवदादेशोऽनल्विधाविति" पाणिनिः।

स्थानीय न० स्थीयतेऽस्मिन् स्था–आधारे अनीयर्। १नगरे अमरः। स्थानं साहस्र्यं वासं वाऽर्हति स्थानस्थेदम् वा क। २वासयोग्ये देशे ३सदृशे ४स्थानसम्बन्धिनि च त्रि०।

स्थाने अव्य० स्था–ने। १योग्यत्वे २औचित्ये च "स्थाने भवानेकनराधिपः शंसति" रघुः। ३सत्ये ४सादृश्ये ५करणार्थे च शब्दर०।

स्थापत्य पु० स्थपतिरेव स्वार्थे ष्यञ्। १अन्तःपुररक्षके कञ्चुकिप्रभृतौ अमरः। तस्य भावः ष्यञ्। २स्थपतिधर्म न०

स्थापक त्रि० स्थापयति स्था–णिच्–ण्वुल्। यथावत्स्थानरुचितं तथः निवेशके। स्थितिस्थापकः।

स्थापन न॰ स्था-णिच्-युक् ल्युट्। १आरोपणे २पुंसवनाख्ये गर्भसंस्कारे च मेदि०। ३समाधौ। युच्। स्थापनाप्यत्र स्त्री सा च निवेशने वाद्ये भावप्रत्ये प्रमाणादिना व्यवस्थापने च। [ङीप्। पाठाद्वा॰ अमरः।

स्थापनी स्त्री स्थाप्यतेऽनया स्था-णिच्-युक् करणे ल्युट्

स्थापित त्रि॰ स्था-णिच्-युक् क्त। १निश्चिते २निवेशिते ३न्यस्ते च मेदि०।

स्थामन् न॰ स्था-मनिन्। १सामर्थ्ये अमरः २बले च।

स्थायिन् त्रि॰ स्था-णिनि। १स्थितिशीले अलङ्कारोक्ते रसानुकूले रत्यादिभावे पु०। "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा। रसतामेति रत्यादिः स्थायी भावः सचेतसाम्" "अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः आस्वादाङ्कुरकन्दोऽसौ भावः स्यायीति सम्मतः"। "रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेत्यष्टौ प्रोक्ताः शमोऽपि च" सा॰द०। एते च क्रमेण शृङ्गारादीनां स्थाविभावाः। [अमरः।

स्थायुक त्रि॰ स्था-उकञ्। १स्थितिशीले २एकस्थानाधिकृते पु॰

स्थाल न॰ स्थलति तिष्ठत्यत्राद्यत्र आधारे घञ्। (थाल) १अन्नपात्रभेदे। २पाकपात्रे (हाँड़ि) स्त्री अमरः गौरा॰ ङीष्।

स्थालीपाक पु॰ स्थाल्यां पाकः। गव्यदुग्धेन स्थाल्यां क्रते १पाकभेदे। स्थाल्यां पच्यतेऽसौ पच-कर्मणि घञ् २चरौ तत्पाकप्रकारः चरुशब्दे दृष्टान्तमुक्तः गोभिलोक्तप्रकारः सं॰त॰ दर्शितो यथा

तत्र गोभिलः "अथोदुखलमुसले प्रक्षाल्य स्रुवं च पवित्रे: प्रागग्रान् कुशानास्तीर्य उपसादयति अथ स्फ्यिनिर्वपेदिति। व्रीहीन् यवान् वा कांस्येन चरुस्थाल्या वा यवस्त्वा युष्टं निर्वपामीति देवतानामोद्देशः सकृदुयजुषा द्विस्त्रूणीम् अथ पश्चादवघ्नन्नुपक्रमते दक्षिणोत्तराभ्यां पाणिभ्यां त्रिःफलीकृतांस्तण्डुलां स्त्रिर्देवताभ्यः प्रक्षालयेत् द्विर्मनुष्येभ्यः सकृत् पितृभ्य इति। "पवित्रान्तर्हितांस्तण्डुलानावपेत् कुशलघृतमिव स्थालीपाकं स्थापयेत् प्रदक्षिणमुदायुवन् घृतमभिघार्य्य उद्गुद्वास्य प्रत्यभिघारयेदिति" रु०। अस्यार्थः उपसादयति स्थापयति देवतानामोद्देशं देवतानामोच्चारणं यथा स्यात्तथा यवस्त्वा जुष्टं निर्वपामीत्यनेन तण्डुलोपरि व्रीहीन् कांस्यादिना सकृत्क्षिपेत्। अत्राकृष्णा इत्यत्र चतुर्थ्यन्तनामोच्चारणम्। अतएव कात्यायनः "यवा-

वितिं नाम गृह्णाति"। नारायणीयेऽपि "यदः पदं हि यद्रूपं यत्र मन्त्रे हि दृश्यते। साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत्"। यतोऽदः पद एव नामोद्देशो नतु विरूपाच्छजपादाविदमित्यादौ। एवञ्चाग्नये त्वा जुष्टं निर्वपामीति सामगानाम् यजुःपदयोगो गोभिले निर्वपमात्रस्तुतेः यजुर्वदिकसमन्त्रकयज्ञप्रयोजने सामगेन न कार्य्यः। यजुःपरिभाषासाच्च जैमिनिः "शेषे यजुःशब्दः इति। शेषे समाप्तिमति मन्त्रजाते। ततश्च यन्मन्त्रजातं प्रसिद्धपठितं गानपदभेदरहितं तद्यजुरिति। बहुदैवत्ये च बहुदेवतानामभिः प्रत्येकं निर्वापः। अत्रनिर्वापो मन्त्रेणैव होमोऽपि पृथक्। निर्वापपरिमाणन्तु होमसंख्याविशेषस्थित्यनुसारेणेत्याह छन्दोगपरिशिष्टम् "देवतासंख्ययाऽत्रैव निर्वापांश्च पृथक् क्रथक्। तूष्णीं द्विरेव गृह्णीयाद्धोमस्यापि पृथक् पृथक्। यावता होमनिर्वृत्तिर्भवेद्वा यत्र कीर्त्तिता। शेषस्त्रैव भवेत् किञ्चित्तावन्तं निर्वपेच्चरुम्"। यद्यपि देवतासंख्येति वचनं चरुसमवनीययोः द्व्युपक्रम्य पठितं तथाप्याद्धायाचार्यवेन चरुसामान्यपरमिति। चरुविधौ तु विद्याकरवाजपेयी "यत्र प्रयोजनाभावनिश्चयस्तत्रैव तदुपादानादिलोपः। यत्रानुष्ठानवेलायामेव पुरुषदोषेण प्रयोजनाभावो ज्ञायते तदा प्राक् तन्निश्चयात् प्राक्प्राप्तिः पदार्थो नियमापूर्वमात्रार्थमनुष्ठेय" इति। अतएव यदा स्थालस्थादिना व्रीह्यादिस्थाने तण्डुला गृह्यन्ते तदापि अवघातादि समाचरन्ति याज्ञिकाः पठन्ति च। "क्षते न्यूने तथा क्लिन्ने साद्याय्ये मान्त्रिके तथा। यत्रैते मन्त्राः प्रयोक्तव्यामन्त्रायत्तार्थसाधकाः"। मान्त्रिके मन्त्रसाध्ये अवघातादौ। न्यूने तत्काले मन्त्रपाठाभावेऽपि यत्काले मन्त्राः पाठ्याः। अक्षिप्तु मन्त्रार्थज्ञानस्य नास्त्युपयोगः। चरुस्थालीयपरिमाणमाह छन्दोगपरिशिष्टम्। "तिर्य्यगूर्द्धसमिन्मात्रा दृढा नातिदृढन्मृदी। मृण्मय्यौडुम्बरी वापि चरुस्थाली प्रशस्यते"। गर्भप्रसार दीर्घाभ्यां प्रादेशप्रमाणा चरुस्थाली औडुम्बरी ताम्रमती एषा पायसचरावपि न निषिद्धा "पयोनुद्धृतसारञ्च ताम्रपात्रे न दुष्यति" स्मृतिसागरधृतवचनात्। अतएव शारदातिलके "ततश्च संस्कृते वह्नौ गोघृतेन चरुं पचेत्। मन्त्रेण क्षालिते पात्रे नवे ताम्रमयादिके"। दक्षिणोत्तराभ्यामिति दक्षिण उत्तर उपरि यथोः पाणयोस्ताभ्यां मुसलं गृहीत्वा इति शेषः। त्रिःफलीकृतान्

क्षिप्त्वा विलुलोडनात् कण्डूयनप्रक्षोटनाभ्यामिति शेषः। पविस्तान्तर्चितान् पविस्तम् अन्तर्हितं अवचितं येषां तान्। तेन चरुस्थाल्यासुत्तराग्रं प्रविश्य निःक्षिप्य तण्डुलान् निक्षिपेत्। दृषत्तप्टतमिति दृषत्तेन पाकनिपुणेन प्टतं यथा न दग्धं नातिक्लिन्नं न मन्दपक्वं यथा स्यात्तथा स्थालीपार्श्वं श्रपयेत्। अतएव छन्दोगपरिशिष्टम्। "स्थाल्यास्तोन्नता चटः स्निग्धोच्छ्रदग्धोऽकठिनः शुभः। न चातिस्निग्धिलः पाको न च वीतरसो भवेत्"। वीतरसोऽनाकलितसरसः। प्रदक्षिणमुदायुवन्निति प्रदक्षिणावर्तं यथा स्यात्तथा मेक्षणेन जुहूं मीमन्निश्रयन्। यु मिश्रणे दृत्यस्य रूपमेतत्। प्टतमित्यभिधार्येति स्फुटितम्। चरुमाज्यस्रुवेणाज्याद्य प्रदग्धेनोत्तरस्याम् उत्तार्धं प्रत्यभिघारयेत् पुनर्प्टतेन तथा सेचयेत्। दृषोत्सर्गे तु अभिघारणद्वयात् पूर्वं उल्मुकाङ्गारेण विद्योतनद्वयमाह छन्दोगपरिशिष्टम् "अधिश्रुतस्रवद्दोत्र प्टतमाभिघारयेत्। प्टतेन सेचयेत् पश्चात् पुनरेवाभिघारयेत्"। मेक्षणादीन्याह छन्दोगपरिशिष्टम् "दक्षिणातोऽग्निधार्द्रप्रमाणं मेक्षणं भवेत्। प्टत्तं वार्क्षं पृथ्वग्रसवदानक्रियाक्षमम्"। दक्षार्द्रप्रमाणं प्रादेशद्वयमिश्रस्य प्रमाणं परिकल्पितमिति तदर्द्धमु एवैव दर्वी विशेषस्तु मदाह्नवे। "दर्वी द्वादङ्गुलप्रख्या तरीवेष तु मेक्षणम्। सुवलोदूखले वार्क्षे स्रावयते हविर्द्रवे तथा। दृक्षाग्रमाणे भवतः स्रुवौ वैष्णवमेव च"। अत्र तिर्यग्गुर्वित्यादि वैष्णवमेव चेत्यन्तेन चर्वङ्गमभिधाय भूमिजपरिसमूहनकुशविन्यासं कृत्यादित्युक्तम्"।

स्थाल्यां पाकपात्रे पाकः पच्यमानः। इपाकभाजने पच्यमाने। चातुर्मास्यादौ तत्स्थाने फलं ति० त० दर्शितं "लभते चन्नितं दीर्घां स्थालीपाकमभक्षयन्"।

स्थालीपुलाक पु० स्थाल्याः पुलाकास्तण्डुलाः तत्पक्व एकधर्मतोन्नायकत्वेन कच्। मीमांसकोक्ते "स्थाल्यास्तण्डुला एते सर्वे विकृतिभागिनः। समकालाग्निसंयोगभागित्वात् प्रतिपन्नवत्" इत्यनुमानकल्पके न्यायभेदे यथा एकस्य पाकदर्शनेन अन्येषां पाकज्ञानम् एवं एकरूपाणां सर्वेषामेकधर्मोन्नायकत्वमित्येवंरूपोद्भावनम्।

स्थालीबिल न० ६त०। स्थालीस्थे शून्यभागे तदर्हति छ यत् वा। स्थालीबिलीय (ल्य) तण्डुलादौ त्रि० वि०कौ०।

स्थालीवृत्त पु० स्थाल्यै-वृत्तः। १अश्वत्थाकारे स्थालीनिर्माणे २वृक्षभेदे। "स्थालीवृक्षो लघुः स्वादुस्तुवरश्चाम्लकः। कटुपाकरसः स्वादी विषपित्तकफापहृत्" भावप्र०

स्थावर त्रि० स्था-वरच्। १अचले २स्थिरे ३वृक्षादौ स्त्रीत्वे ङीष्। "स्थावरं जङ्गमश्चैव यद्यपि स्वयमाजतम्" स्मृतिः। इपर्वते पु० ३धनुर्गुणे न०मेदिनी०। स्थावरप्रभेदश्च सप्तविधः सर्गशब्दे ५२५० पृ० दृश्यः। स्थावरधनं च सांसर्गिके क्रेतरि सति असांसर्गिकाय न विक्रेयं यथोक्तं सङ्ग्रहनिबं० १२ प० "स्थावरं धनमसन्तत्यै क्षिते सांसर्ग्यवर्त्तिनि। योग्ये क्रेतरि विक्रेयं न कृच्छ्रे व्याधरादिषु। सांसर्ग्यवर्त्तिनां ज्ञातिः सम्बन्धी वा निरूप्यते। तयोरभावे सुहृदो विक्रेतिच्छा गरीयसी। निर्दोषमूल्ये धनेन स्थावरस्य क्रयादाने। तन्मूल्येऽहेत यजीवयो रात्रि क्रेता न चापरः। मूल्यं दातुमशक्तश्चेत् सप्ततो विक्रयेऽपि वा। सन्धिश्चिरप्रसादान्यत्रं सदृशो यश्चोति विक्रये। क्रीतक्षेत स्थावरं देवि! परोक्षे प्रतिवासिनः अवगादेव तन्मूल्यं दत्त्वाऽसौ प्राप्तुमर्हति। क्रेता सत्र सदाचारान् विनिमांसि भुनक्ति वा। मूल्यं दत्त्वाऽपि नाप्नोति स्थावरं सन्धिधिस्थितः। "स्थावरे विक्रयो नास्ति कृत्यादाधिमनुष्यया" स्मृतिः। स्थावरस्य केवलविक्रयनिषेधात् विक्रयेऽपि कर्त्तव्ये सांसर्गिकमसदृशं दृष्ट्वा तत्रैवेण विक्रयः कर्त्तव्य इति" मिता०। "एकोऽपि स्थावरं कुर्यात् दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थे धर्मार्थं च विशेषतः" स्मृतिः। "संविभागक्रयप्राप्तं पित्र्यं लक्ष्यञ्च अन्यतः। स्थावरं स्थिरमाप्नोति भुक्त्वा, स्थानिरूपेक्षया"। "दोदासिके सदा स्थाप्यं स्थानत्वं परिकीर्त्तितम्। विक्रये चैव दाने च यत्नेन स्थावरेष्वपि" कात्या०। "भक्त्या प्रीतेन यद्दत्तं स्त्रियै तस्मिन् कृतेऽपि च। सा यथाकामसर्वस्वं दद्याद्वा स्थावरादृते" नारदः। "अविभक्तं स्थावरं यत् सर्वेषामेव तद्भवेत्। विभक्तं स्थावरं स्त्रीणां स्वान्मोदर्यैः कथञ्चन" यमः। "सर्वेषां तुल्यरूपाणां सोदराणोदराणामिति" श्रीकृष्णः। [राजनि० २स्थावरप्रभृतौ त्रि०]

स्थावरादि पुंन० स्थावरमादिर्हेतुर्यस्य। १वस्तुस्वभावभिदे

स्थाविर न० स्थविरस्य भावः अण्। वृद्धत्वे अमरः। तच्च सप्ततिवर्षोपगमे भवति "आमोडशात् भवेद्बालस्तारुण्यन्तत उच्यते। वृद्धः स्यात् सप्ततेरूर्ध्वं वर्षीयान् नवतेः परम्" स्मृतिः। [अमरः २जलवुद्बुदे च मेदि०]

स्थासक पु० स्था-अच-स्वार्थे क। १अलङ्कारे २चार्चिक्ये

स्थास्नु त्रि० स्था-स्नु। स्थितिशीले अमरः "ध्रुवादिवः स्था-

स्तुरिवाविरप्रभा" भट्टिः। २शाखते भरतः। ३वृक्षे मेदिनीधरः

स्थित त्रि० स्था-क्त। १ऊर्द्ध स्थतया दण्डायमाने "स्थिताया स्थानमाचरेः" रघुः। २निश्चले ३प्रतिज्ञायुक्ते मेदि०। ४स्थितिशालिनि च।

स्थिति स्त्री स्था-क्तिन्। १मर्य्यादायां मेदि० २न्यायप्राप्तावस्थाने अमरः। ३स्थाने च। स्थानभेदे स्थितिनिषेधो यथा "नास्थिभस्मकपालानि न केशान् वा कथञ्चन। लङ्घयेदङ्गारकविष्ठाद्यं नाधितिष्ठेत् कदाचन" कौर्मपु०१५अ०।

स्थितिस्थापक स्थितिं स्थापयति स्था-णिच्-ण्वुल्। न्यायोक्ते संस्कारविशेषे "संस्कारभेदा वेगोऽथ स्थितिस्थापकभावने" "स्थितिस्थापकसंस्कारः क्षितौ केचिच्च तद्वयेपि। अतीन्द्रियोऽसौ विज्ञेयः क्वचित् स्पन्देऽपि कारणम्" भाषाप०।

तल्लक्षणं पृथिवीमात्रसमवेतसंस्कारत्वव्याप्यजातिमत्त्वम्। संस्कारत्वव्याजातित्वे तु तद्व्याप्यधर्मवत्त्वम्। तथा च पूर्वसंयोगजन्यसंयोगनाशकत्वे सति पूर्वसंयोगजातीयसंयोगजनकत्वं तत्त्वम्। स च क्रियाविशेषजन्यः क्रियाविशेषजनकः स्वजन्यक्रियानाशको गुणविशेषः। अन्यथाऽतस्य पुनस्तदस्यतया स्थापकः गुणविशेष इत्यन्ये। यथाऽऽकृष्टशाखादीनां त्यागे पुनस्तथावस्थिततया अव स्थापकः। स च अतीन्द्रियः।

स्थिर पु० स्था-किरच्। १पर्वते २देवे ३वृक्षे ४कार्त्तिकेये शब्दर०। ५घनौ ६मोक्षे मेदि०। ७वृक्षे राजनि०। ८अवट्टक्षे भावप्र०। ज्योतिषोक्तेषु ध्रुवसिंहवृश्चिककुम्भराशिषु च। १०कठिने ११निश्चले च त्रि०। १२शालमलौ स्त्री शब्दच० एवं १३काकोल्यां जटा०१४पृथिव्यां १५शालपर्णीञ्च स्त्री अमरः। पृथिव्याः स्थिरत्वं मतभेदेन अचलशब्दे ८२पृ० दर्शितम्। स्थिरतया वरत्वात् षट्यां कविकल्पद्रुमे यथा युद्धे प्रधानभटः माध्वीयनः सज्जनमनः। धर्माधर्मौ मनः भोगा सम्पादनभावे तयोर्वस्तुकालस्थितत्वात् स्थिरत्वम्।

स्थिरगन्ध पु० स्थिरा गन्धा यस्य। १चम्पकवृक्षे २पाटलायां ३केतक्याञ्च स्त्री राजनि०। ४स्थिरगन्धयुक्ते द्रव्यभावे त्रि०

स्थिरच्छद पु० स्थिरश्छदा यस्य। भूर्जपत्रवृक्षे रत्नमा०।

स्थिरच्छाय पु० स्थिरानियताच्छाया यस्य। १वृक्षमात्रे शब्दमा० २छायाप्रधाने वटादौ त्रिका०।

स्थिरजिह्व पु०स्थिरा अचञ्चला जिह्वा यस्य। अतसे हेमच०।

स्थिरजीविता स्त्री स्थिरं जीवितमायुष्यं यस्याः। १शालमलीवृक्षे शब्दर०। २चिरञ्जीविनि त्रि०।

स्थिरतर त्रि० अतिशयेन स्थिरः तरप्। १अत्यन्तस्थिरे अमरः २ईश्वरे पु०।

स्थिरदंष्ट्र पुंस्त्री० स्थिरा दंष्ट्रा यस्य। १सर्पे स्त्रियां ङीष् २वराहाकृतिविष्णौ पु० मेदि० ३ध्वनौ अजयः।

स्थिरपत्र पु० स्थिराणि पत्राण्यस्य। छिन्नाले राजनि०।

स्थिरपुष्प पु० स्थिरं पुष्पमस्य। १चम्पकवृक्षे २वकुलवृक्षे च राजनि०। [कवृक्षे राजनि०।

स्थिरपुष्पिन् पु० स्थिरं पुष्पमस्त्यस्य बाहुलकात् इनि। तिल-

स्थिरमति स्त्री स्थिरा-मतिः। १स्थिरबुद्धौ स्थिरा मतिर्यस्य। २स्थिरबुद्धियुक्ते त्रि०। "व्यभिचैतः स्थिरमतिः" गीता।

स्थिरयौवन न०पु० स्थिरं यौवनमस्य। १विद्याधरादौ देवयोनिभेदे त्रिका० २चिरस्थायियौवनयुक्ते त्रि०।

स्थिररङ्गा स्त्री स्थिरो रङ्गो रागो यस्याः। नीलयाम् राजनि०। [द्रियाम् राजनि०। २निश्चलरागयुते त्रि०।

स्थिररागा स्त्री स्थिरो रागो रञ्जनं यस्याः। १दारुहरिद्रायाम् राजनि०। २चिरस्थायिरागयुक्ते त्रि०।

स्थिरसाधनक पु० स्थिरं साधयति ल्यु ततः स्वार्थे क। सिन्दुवारवृक्षे राजनि०।

स्थिरसार पु०स्थिरः सारो यस्य। (सेगुण) शाकवृक्षे राजनि०

स्थिराङ्घ्रिप पु० कर्म०। छिन्नालवृक्षे राजनि०।

स्थिरायुस् पु० स्थिरमस्य युर्यस्य। १शालमलिवृक्षे अमरः दीर्घकालस्थायित्वात्तस्य तथात्वम्। २चिरञ्जीविनि त्रि०।

स्थुड वरणे तुदा० कुटा० परः सकः सेट्। स्थुडति अस्थुडीत् तुस्थोड। धोपदेश एव न्यायः।

स्थूणा स्त्री स्था-नक् ऊदित्वादेशः धृषो०। (खुँटी) १गृहस्तम्भे 'स्थूणावशाय गृहम्' साहि० २लोहपतिमायाञ्च अमरः

स्थूलानिखननन्याय पु०न्यायशब्दोक्ते ४१७ पृ०न्यायभेदे।

स्थूर पु० स्था-ऊरन् किच्च। १वृक्षे संक्षिप्तसा०। २मनुष्ये सि० कौ०।

स्थूरिन् पु० स्था-ऊरन् किच्च स्थूरो वृषादिर्भारवाहकः स्थूरोऽस्यास्त्यस्य वाहकेऽश्वे खरे च स्थूरस्य भावः ष्यञ् स्थौरं तद्वाहिन्यां इनि स्थौरीत्यत्र अमरः।

स्थूल वृंहणे चुरा० उभ० अक० सेट्। स्थूलयति-ते अतस्थूलत्-त। बहुचकत्वान्न धोपदेशः।

स्थूल त्रि० स्थूल-अच्। १मोटे (मोटा) अमरः २क्षुद्रे ३अपसे पु० मेदि०। ४पनसे पु० राजनि०। ५गजभिन्नाभे स्त्री शब्दच०। एवं ६एरण्डे राजनि०। ७वृक्षदलायाञ्च रत्नमा० स्वार्थे क। मोटे त्रि०।

संज्ञायां कन् (ओलुड्) वृक्षभेदे पु० रत्नमालाकोषः ।

स्थूलकङ्गु पु० कर्म० । वरकधान्ये (मोरधान) राजनि० ।

स्थूलकण स्त्री कर्म० । १स्थूलजीरके राजनि० ६व० । २स्थूलकणयुते त्रि० ।

स्थूलकण्टक पु० स्थूलः कण्टकोऽस्य । जालवर्दूरे राजनि० कप् यत दृश्यम् । स्थूलकण्टकिका शालूकशोटके स्त्री ।

स्थूलकण्टा स्त्री स्थूलः कण्टः कण्टकोऽस्याः । वृहत्यां राजनि० ।

स्थूलकन्द पु० स्थूलः कन्दोऽस्य । १रक्तलशुने २शूरणे ३वृन्ताकन्दे ४मालके च राजनि० ।

स्थूलच्छेड पु० स्थूलः छेडो यत्र । वाणे त्रिका० ।

स्थूलचञ्चु पु० स्थूला चञ्चुरिव शिखाऽस्य । १कङ्कपक्षिणि राजनि० २वृहच्चञ्चुयुते त्रि० ।

स्थूलजीरक पु० कर्म० । जीरकभेदे (काजलिरा) भावप्र० ।

स्थूलताल पु० कर्म० । छिन्नाले राजनि० ।

स्थूलत्वचा स्त्री स्थूला त्वचा यस्य । काश्मर्य्यां राजनि० ।

स्थूलदण्ड पु० स्थूलो दण्डोऽस्य । देवनले राजनि० । स्थूल नाड्योऽत्र । [राजनि० ।

स्थूलदर्भ पु० स्थूलं दृढं दृभ्यतेऽनेन दृभ-घञ् । सुञ्जे (सुज) राजनि० ।

स्थूलदला स्त्री स्थूलानि दलानि यस्याः । वृतकुमार्य्यां राजनि० ।

स्थूलनास पुंस्त्री० स्थूला नासाऽस्य । १शूकरे हेमच० स्त्रियां ङीष् । २वृहन्नासायुते त्रि० स्त्रियां ङीष् । स्त्रियां टाप् स्थूलनासिकोऽत्र ।

स्थूलपट्ट पु० स्थूलं पट्टं यस्मात् । कार्पासे शब्दर० तत्तुल्यत्व पट्टस्य स्थूलत्वात्तथात्वम् । पृषो० स्थूलपट्टक तत्रार्थे पु० शब्दर० ।

स्थूलपाद पुंस्त्री० स्थूलाः पीनाः पादा यस्य नान्त्यलोपः समा० । १गजे शब्दना० स्त्रियां ङीष् । ७त० । २श्लीपदरोगे च ।

स्थूलपुष्प पु० स्थूलं पुष्पं यस्य । १वकवृक्षे २पर्वतजातापरालितायां स्त्री रत्नमा० । ३यवतिक्तायां स्त्री राजनि० ङीप् ।

स्थूलफल पु० स्थूलं फलमस्य । १शालमलीवृक्षे राजनि० । २वृहत्फलान्विते त्रि० । ३शणपुष्प्यां स्त्री राजनि० ।

स्थूलभूत न० कर्म० । वेदान्तोक्ते प्रत्येकं पञ्चात्मकतामापन्ने पृथिव्यादौ भूते ।

स्थूलमरिच न० नित्यकर्म० । कङ्कोले राजनि० ।

स्थूलमूल न० । ६त० । वाणक्षुपमूले राजनि० ।

स्थूललक्ष(च्य) त्रि० स्थूलं लक्षयति दानाय संकल्पते यक्ष-कण् स्थूलंलक्ष्यं वाऽस्य । वक्तृदातरि अमरः ।

स्थूलवर्त्मकृत् पु० स्थूलं वर्त्म करोति कृ-क्विप् । ब्राह्मण-यष्टिकायाम् शब्दर० । [२स्थूलवर्त्मयुक्ते त्रि० ।

स्थूलवल्कल पु० स्थूलं वल्कलमस्य । १रक्तलोध्रे शटा० ।

स्थूलवृक्षफल पु० स्थूलस्य वृक्षस्येव फलमस्य । बिम्बपिण्डीतकवृक्षभेदे (मयना) राजनि० । [राजनि० ।

स्थूलवैदेही स्त्री विदेहे भवा अण् कर्म० । गजपिप्पल्याम्

स्थूलशाटक पु० कर्म० । स्थूलवस्त्रे अमरः स्थूलशाटिका-दयोऽप्यत्र स्त्री शटा० ।

स्थूलशालि पु० कर्म० । महाशाली राजनि० ।

स्थूलशीर्षिका स्त्री स्थूलं शीर्षं यस्याः कप् यत इत्वम् । क्षुद्रपिप्पलिकायाम् हेमच० । २वृहन्मस्तकयुते त्रि० ।

स्थूलषट्पद पु० षट्पद इव स्थूलः राज० । वरोलायाम्

स्थूलस्कन्ध पु० स्थूलः स्कन्धोऽस्य । लकुचे (मान्दार) राजनि० ।

स्थूलहस्त न० स्थूलः हस्त इवाकारोऽस्य । गजशुण्डे त्रिका०

स्थूलांशा स्त्री स्थूलः अंशोऽवयवोऽस्याः । १गन्धपलायाम् राजनि० २स्थूलावयवे त्रि० ।

स्थूलाम्र पु० कर्म० । आम्रभेदे राजनि० ।

स्थूलास्य पुंस्त्री० स्थूलमास्यं यस्य । १सर्पे शब्दच० स्त्रियां जातित्वेऽपि योषधत्वात् टाप् । २वृहन्मुखयुते त्रि० ।

स्थूलैरण्ड पु० कर्म० । वृहदैरण्डवृक्षे राजनि० ।

स्थूलैला स्त्री कर्म० । वृहदैलायाम् (वड़ एलाइच) राजनि० ।

स्थूलोच्चय पु० स्थूलानामुपलानामुच्चयो यत्र । १गण्डशैले स्थूलस्य गजस्य उच्चयः । २गजमध्यगतौ ३वरण्डे ४व्यूहा कल्पे मेदि० ५गजदन्तच्छिद्रे च शब्दमा० ।

स्थेय पु० स्थीयते विवादनिर्णायकतयाधौ स्था-कर्मणि यत् । विवादे १संशयनिर्णायके (जुरी) २पुरोहिते च मेदि० ३स्थिरे त्रि० हेमच० ।

स्थेयस् त्रि० अतिशयेन स्थिरः ईयसुन् स्थादेशः । १स्थिरतरे २शाश्वते त्रि० भरतः । स्त्रियां ङीप् । वृद्धत्व स्थेवोऽप्यत्र त्रि

स्थैर्य न० स्थिरस्य भावः ष्यञ् । स्थिरतायाम् ।

स्थौणेय क) पु० स्थूणायां तत्पचनोपे भवः ढक् ढकञ् वा । अन्यिपक्षनामगन्धद्रव्ये (गाँठियाला) अमरः । "स्थौणेयकं बर्हिवहं शुकवर्हञ्च कुक्कुरम् । शीर्षं रोमशुकं प्राहुः पिच्छं शुकपुष्पं शुकच्छदम् । स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं विदाहनुत् । मेधाशुक्रकरं त्वच्यं रक्तोऽभीक्ष्णरजन्तुजित् । कृमि कुष्ठास्रवद्वाहृद्रोगेभ्यतिबलाबलकात् ।

अन्विपर्णश्चैव भेदो, भण्डि उर इति मेपालदेशे भवति। निशाचरो धनहरः कितवो गणहासकः। रोचको मधुरस्तिक्तः कटुः पाके कटुर्लघुः। तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफानिलान्। रक्तोऽग्नीखेद-मेदोऽस्रज्वरगरश्वित्रव्रणान्" भावप्र०।

स्थौल्य न० स्थूलस्य भावः ष्यञ्। मोटापे।

स्नपन पु० स्ना-णिच्-ल्युट्। जलादिनाऽभिषेककरणे

स्नव पु० स्नु-भावे अप्। १स्रवणे २क्षरणे च अमरः।

स्नसा स्त्री स्रंस-निरासे अच्। स्नायौ हेमच०।

स्नातक पु० स्ना-भावे क्त स्नानं वेदाध्ययनानन्तरं समावर्त्तना-ङ्गस्नानं तदस्यास्ति कन्, कर्त्तरि क्त स्वार्थे क वा। वेदा-ध्ययनानन्तरं गार्हस्थ्याय कृतसमावर्त्तनाङ्गस्नाने गृहस्थ-भेदे तच्च व्रतं मिता० आचराध्याये दर्शितं यथा

"स्नानादारभ्य ब्राह्मणस्यावश्यं कर्त्तव्यानि विधिप्रति-षेधकालकानि मानससंकल्पकृपाणि स्नातकव्रतान्याह "न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः। न विरुद्ध-प्रसङ्गेन सन्तोषी च भवेत् सदा" याज्ञ०। ब्राह्मणस्य प्रति-ग्रहादयोऽर्थप्राप्त्युपाया दर्शिताः। अत्र विशेष उच्यते। स्वाध्यायविरुद्धमर्थमप्रतिषिद्धमपि नेहेत नान्विच्छेत्। न यतस्ततो न यतः कुतश्चिदविदिताचारात्, न विरुद्धप्रसङ्गेन विरुद्धोऽध्याप्ययाजनादिप्रसङ्गो नृत्यगीतादि विरुद्धं वा तत्र प्रसङ्गस्य विरुद्धप्रसङ्गः तेन नार्थमीहेत इति सम्बध्यते। तत्र याज्ञिकैः प्रत्येकं पर्युदासार्थो। सर्वत्राप्यस्मिन् स्नातकप्रकरणे नञ्शब्दः पर्युदासार्थ एव। किञ्च "अर्थलाभेऽपि सन्तोषी परिवृढो भवेत्। चकारात् संय-तस्य "सन्तोषं परमास्थाय सुखार्थी संयतो भवेत्" इति मनुस्मरणात्। कुतस्तर्हि धनमन्विच्छेदित्यत आह" मिता० "राजानं वासियाज्ज्येष्ठैः सीदन्निच्छेन्न तु क्षुधा। दम्भि हैतुकपाषण्डवकवृत्तींश्च वर्जयेत्" याज्ञ०। "क्षुधा सीदन् पी-ड्यमानः स्नातको राज्ञो विदितवृत्तान्ताद्वान्धवादेर्वासिनो वक्ष्य-माणसत्तमाद्याज्याद्याजनाद्वाँश्च धनमाददीत। क्षुधा सीदन्नित्यनेन विभवादिप्राप्तकुटुम्बपोषणपर्याप्तधनो न कश्चिदर्थमन्विच्छेदिति मन्यते। किञ्च। दम्भिहैतुकादीन् सकलकार्येषु लौकिकशास्त्रीयेषु वर्जयेत्। लोकरञ्जनार्थमेव कर्मानुष्ठायी दम्भी युक्तिबलेन सर्वत्र संशयकारी हैतुकः त्रैविद्यवृद्धापरिवृढौतान्यभिषः पाषण्डिनः। बकवदस्य वर्त्तनमिति बकवृत्तिः। यथाह मनुः "अधो दृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः। शठो मिथ्याविनी-तश्च बकव्रतचरो द्विजः" इति। प्रतिषिद्धसेविनो विकर्मस्थाः विड्वालमार्जारस्तस्य स्वभावो व्रतं यस्यासौ वैड़ाल-व्रतिकः "धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदाम्भिकः। वैड़ालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः" इति मनु-स्मरणात्। चकाराद्विकर्मस्थवैड़ालव्रतिकशठान् यथाह मनुः "पाषण्डिनो विकर्मस्थान् वैड़ालव्रतिकान् शठान्। हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्" इति। शठः सर्वत्र वक्रः। एतैः संसर्गनिषेधादेव स्वयं एवंविधो न भवेदिति गम्यते" मिता०। किञ्च "शुक्लाम्बर धरोनीचकेशश्मश्रुनखः शुचिः। न भाष्यादर्शनेऽश्नीया-दैकवासा न संस्थितः" याज्ञ०। "शुक्ले धौते वस्त्रे वासश्च धारयतीति शुक्लाम्बरधरः। केशाश्च श्मश्रूणि च नखाश्च केशश्मश्रुनखं तच्चीचं कृत्तं केशश्मश्रुनखं यस्यासौ तथोक्तः शुचिरन्तर्बहिश्च स्नानानुलेपधूपपुष्पादिभिः सुगन्धिश्च भवेत्। यथाह गौतमः "स्नातको नित्यं शुचिः सु-गन्धिः स्नानशीलः" इति। सुगन्धवक्त्वविधानादेव निर्गन्ध-माल्यस्य निषेधः। तथा च गोभिलः "नागन्ध्यां स्रजं-न्यारयेदन्यत्र हिरण्यरत्नस्रजः" इति। "सदा स्नातक एवम्भूतो भवेत्" एतच्च मति सम्भवे "न जीर्णमलवद्वासा भवेच्च विभवे सतीति" मनुस्मरणात्। न च भार्यायां दर्शने तस्यां पुरतोऽवस्थितायां नाश्नीयादवीर्यवदपत्योत्पत्तिभ-यात् तथा च स्मृतिः "जायाया अग्ने नाश्नीयादवीर्य-वदपत्यं भवति" इत्यतस्तया सह भोजनं दूरादेव निरस्तम्। न चैकवासाः। नापि संस्थितः स्थितः अश्नीयादिति संबध्यते मिता०। "न संशयं प्रपद्येत नाक्षाद्यप्रियं वदेत्। नाहितं नाशुभं चैव न स्तेनः स्यान्न वार्द्धुषी" याज्ञ०। "कदाचिदपि संशयं प्राणविपत्तिसंशयावहं कर्म न प्रप-द्येत न कुर्यात्। यथा व्याघ्रचौराद्युपहतदेशाद्गमना-दि। अक्षाद्अक्षिकारणं क्रिञ्चिदपि यत्किमप्रियमु-द्वेगकारि वाक्यं न वदेत्। न चाहितमशुभं वा प्रिय-मपि। चकारादस्य बीभत्सकरस्याक्षाच्च वदेदिति सं-बध्यते। एतच्च परिहासादिव्यतिरेकेण "गुरुणापि सभं हास्यं कर्त्तव्यं कुटिलं विना" इति स्मरणात्। न च स्तेनः अन्यदीयस्यादत्तस्य ग्रहीता स्यात् न वार्द्धुषी स्यात् प्रतिषिद्धवृद्ध्युपजीवी वार्द्धुषी न स्यात्" मिता०। "दाक्षायणी ब्रह्मचर्यं वेणुसारं यत्किमयज्ञियं प्रदक्षिणं देवब्राह्मणविप्रवनस्पतीनं" याज्ञ०। दाक्षायणं सुवर्णं तदस्यास्तीति दाक्षायणी। ब्रह्मचर्यं ब्राह्मणपवित्रं यज्ञि-

क्तीति ब्रह्मचारी वैणवयष्टिमान् कमण्डलुमान् स्यादिति सर्वत्र सम्बध्नीयम्। अत्र ब्रह्मचारिप्रकरणोक्तस्यापि यज्ञोपवीतस्य पुनर्वचनं द्वितीयप्राप्त्यर्थम्। यथाह वसिष्ठः "स्नातकानां द्वितीयं स्यादन्तर्वासश्चोत्तरम्। यज्ञोपवीते द्वे यष्टिः सोदकञ्च कमण्डलुः" इति। बल्व च दाक्षायणीति सामान्याभिधानेऽपि कृष्णजधारणमेव कार्यम् "वैणवीं धारयेद् यष्टिं सोदकञ्च कमण्डलुम्। यज्ञोपवीतं वेदञ्च शुभे रौक्मे च कुण्डले" इति मनुस्मरणात्। देवं देवप्रतिमां स्पृदङ्मृत्ताम्। गां ब्राह्मणं वनस्पतिं चाश्वत्थादिकं प्रदक्षिणं कुर्यात् एतान् दक्षिणतः कृत्वा व्रजेत्। एवञ्चण्डप्रचण्डादीनपि "स्पृष्टं गां दैवतं विप्रं घृतं मधु चतुष्पथम्। प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन्" इति मनुस्मरणात् मिता०। "न तु मेहेच्चतीच्छायावर्त्मगोष्ठाम्बुभस्मसु। न प्रत्यग्न्यर्कगोसोमसन्ध्याम्बुस्त्रीद्विजन्मनः" याज्ञ०। "नद्यादिषु न मेहेत् न मूत्रपुरीषोत्सर्गं कुर्यात्। एवं श्मशानादावपि यथाह भगवान्: "न गोसवजलोष्णाद्बलचितिश्मशानवर्त्मखलपर्वतपुलिनेषु मेहेत् भूताधारत्वादिति"। तथाग्न्यादीन् प्रति बल्नग्न्यादीनामभिमुखं न मेहेत्। नाप्येतान् पश्यन् यथाह गौतमः "न वाय्वग्निविप्रादित्यापोदेवतागाश्च प्रति पश्यन् वा मूत्रपुरीषमेध्यानि कुर्यान्न देवताः प्रति पादौ प्रसारयेत्"। एतद्देशव्यतिरेकेण भूमिमयज्ञियैस्तृणैरन्तर्धाय मूत्रपुरीषे कुर्यादिति यथाह वसिष्ठः "परिवेष्टितशिरा भूमिमयज्ञियैस्तृणैरन्तर्धाय मूत्रपुरीषे कुर्यादिति" मिता०। "नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनाम्। न च मूत्रं पुरीषञ्च नाशुचीरुडुतारकाः" याज्ञ०। "नैवार्कमीक्षेतेति यद्यपिसामान्येनोक्तं तथापि दृश्यत्वमयराङ्मुखोदकप्रतिबिम्बमध्याह्नवर्त्तिन एवादित्यस्यावेक्षणं निषिध्यते न सर्वदा। यथोक्तं मनुना "नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन। नोपरक्तं न वारिस्थं न मध्यं नभसो गतम्" इति। उपभोगादन्यत्र नग्नां स्त्रियं नेक्षेत "न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनात्" इत्याश्वलायनः। संसृष्टं मैथुनां कृतोपभोगाम्। उपभोगान्ते त्वनग्नामपि नेक्षेत। चकाराज्जोजनादिकमाचरन्तीम्। तथा च मनुः "नाश्नीयाद् भार्य्यया सार्द्धं नैनामीक्षेत चाश्नतीम्। क्षुवन्तीं जृम्भमाणाञ्च न चासीनां यथासुखम्। नाञ्जयन्तीं स्वके नेत्रे न चान्यस्यानिवेदिताम्। न पश्येत् प्रसवन्तीं च श्रेयस्कामो द्विजोत्तमः" इति। मूत्रपुरीषे च न पश्येत्। तथा यमुनिः सन् राहुतारकाश्च न पश्येत्। चकारादुदके स्वप्रतिबिम्बम्। "न चोदके निरीक्षेत स्वरूपमिति धारणा" इति वचनात् मिता०। "अयं मे वज्र इत्येवं सर्वं मन्त्रमुदीरयन्। वर्षत्यप्राहतो गच्छेत् स्रोतेत् प्रत्यक्शिरा न च" याज्ञ०। वर्षति सति अयं मे वज्रः पाप्मानमपहन्त्विति मन्त्रमुच्चारयन् कृताहतोऽनाच्छादितो न गच्छेन्न धावेत् "न प्रधावेच्च वर्षतीति" प्रतिषेधात्। न च प्रत्यक्शिराः स्यात्। चकाराद्वल्मो न शयीत। एकस्त्वन्यत्रेति। "न च नग्नः शयीतेति" "नैकः स्यात् शून्यगृहे" इति मनुस्मरणात् मिता० "जीवनाद्यक् प्रहन्मूत्रतरंतांस्तृणेषु न निक्षिपेत्। पादौ प्रतापयेन्नाग्नौ न चैनमभिलङ्घयेत्" याज्ञ०। जीवनमुदकम्। यक्तृत्यक्तम्। शकृत् पुरीषं श्लेष्म प्रसिद्धम्। एतान्यन्यत्तृणेषु न निक्षिपेत्। नाधः पादेन ताडयेत्। एवन्तुषादीनपि। यथाह भगवान्: "तुषकेशकरीषभस्मास्थिकेशकपालखलोमान्यप्सु न निक्षिपेत्। न पादेन पाणिना वा जलमभिहन्यादिति"। अग्नौ च पादौ न प्रतापयेत्। नाप्यग्निं लङ्घयेत्। चकारात् जीवनाद्यग्नौ न क्षिपेत्। मुखोपधमनादि चाग्नेर्न कुर्यात् तथा च मनुः "नाग्निं मुखेनोपधमेन्नाग्नं नेक्षेत च क्षियम्। नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्। न चैनं पादतः कुर्यान्न प्राणबाधमाचरेत्" इति मिता०। "जलं पिबेच्चाञ्जलिना न शयानं प्रबोधयेत्। नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैर्वा न संविशेत्" याज्ञ०। "जलमञ्जलिना संहताभ्यां पाणिभ्यां न पिबेत्। जलमकृष्णं मेघमालोपलक्षणम्। विद्यादिभिरात्मनोऽधिकं शयानं न प्रबोधयेत् नोत्थापयेत् "श्रेयांसञ्च प्रबोधयेदिति" विशेषात्। अक्षादिभिर्न क्रीडेत्। धर्मघ्नैः पशुलङ्घनादिभिः कर्मभिर्न क्रीडेत्। व्याधितैर्व्याध्याभिभूतैरेकत्र न संविशेत् न शयीत" मिता०। "विरुद्धं वर्जयेत् कर्म प्रेतधूमं नदीतरम्। केशभस्मतुषाङ्गारकपालेषु च संस्थितिम्" याज्ञ०। "जनपदकुलाचारग्रामविरुद्धञ्च कर्म वर्जयेत्। प्रेतधूमं वाहुभ्यां नदीतरणञ्च वर्जयेदिति संबध्यते। केशादिषु संस्थितिं वर्जयेत्। चकारादस्थिकार्पासमेध्येषु च" मिता०। "नाश्नीत शयानां गां नाहारेण विसृजेत् क्वचित्। न रात्रेः प्रतिगृह्णीयात्तुषस्थोच्छ्रयवर्त्तिनः" याज्ञ०। "परस्य चौरादि पिबन्तीं गां परस्मै नाचक्षीत न च निवर्त्तयेत्।

व्यवहारेण कार्पण्येन क्वचिदपि नगरे ग्रामे मन्दिरे वा न प्रविशेत् । न कृपणस्य याच्ञातिक्रमकारिणो राज्ञः सकाशात् प्रतिगृह्णीयात्" मिता०। "प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः। दृष्टा दशगुणं पूर्वात् पूर्वादेते यथाक्रमम्" याज्ञ०। प्रतिग्रहेषु साध्येषु सून्यादयः पञ्च पूर्वस्मात् पूर्वस्मात् परःपरो दशगुणं दुष्टाः। सूना प्राण्यहिंसा सा यस्याऽस्तीति सूनी प्राण्यहिंसापरः चक्री तैलिकः। ध्वजी सुराविक्रयी। वेश्या पण्यस्त्री। नराधिपः व्यवहारोक्तः" मिता०।

"देवत्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियाः। नाक्रमेदुक्तविण्मूत्रछीवनोद्वर्त्तनादि च" याज्ञ०। "देवानां ऋत्विक् स्नातकाचार्यराज्ञां परस्त्रियास्य छायां नाक्रामेत् नाधितिष्ठेन्न लङ्घयेद् बुद्धिपूर्वम् यथाह मनुः "देवतानां गुरौ राज्ञः स्नातकाचार्ययोरपि। नाक्रामेत् कामतश्छायां वह्नेर्गोर्ब्राह्मणस्य च" इति। वह्नेर्नक्षत्रवर्णस्य यज्ञ कञ्च चिन्नारम्भश्च वा सोमादेर्वह्नेश्च इति नपुंसकलिङ्गनिर्देशात्। रक्षादीनि च नाधितिष्ठेत्। आदिग्रहणात् मानोदकादेर्ग्रहणम् "उद्वर्त्तनमपःस्नानं विण्मूत्रं रक्तमेव च। श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत कामतः" इति मिता०। "विप्राद्विज्ञातियाज्ञानो नावज्ञेयाः कदाचन। व्यङ्गयोः स्त्रियमाक्रुष्टे न कञ्चिन्मर्म्मणि स्पृशेत्" याज्ञ०। "विप्रा बहुश्रुतोऽद्विः सर्वैः क्षत्रियो नृपतिः। एते कदाचिदपि नावमन्तव्या आत्मा च स्वयं नावमन्तव्यः। आक्रुष्योर्यावज्जीवं स्त्रियमिच्छेच्च कञ्चिन्मर्म्मणि स्पृशेन्न कञ्चिदपि मर्म दुश्चरितं प्रकाशयेत्" मिता०। "दूरादुच्छिष्टविण्मूत्रपादाम्भांसि सप्तसृजत्। स्मृतिञ्चयुदितं सम्यक् नित्यमाचारमाचरेत्" याज्ञ०। "भोजनादुच्छिष्टं विण्मूत्रे पादप्रक्षालनजलञ्च दृष्ट्वा दूरात् सप्तसृजत्। स्मृतं स्नार्त्तं चाचारं नित्यं सम्यगनुतिष्ठेत्" मिता०। "गोब्राह्मणानलास्यानि नोच्छिष्टो न पदा स्पृशेत्। न निन्दताडने कुर्यात् पुत्रं शिष्यं च ताडयेत्" याज्ञ०। गां ब्राह्मणमग्निमस्यपदनीयं विशेषतः यत्नमनुच्चिन्न स्पृशेत्। पादेन त्वनुच्छिष्टोऽपि "यदा पुनः प्रमादात् स्पृशति तदाचमनोत्तरकार्यं मनूक्तं कार्य्यम् "स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्। गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु" इति एवं प्राणादीनुपस्पृशेत्। कस्यचिदपि निन्दताडने न कुर्य्यात्। एतज्ज्ञानपकारिणः "क्रुध्यमानस्योत्सादय ब्राह्मणस्याक्रुशतः। दुःखं क्षुभद्दाप्नोति प्रेत्यापाक्षतया नरः" इति। पुत्रशिष्यौ शिक्षार्थमेव ताडयेत्। चकाराद् दासादीनपि। ताडनञ्च रज्ज्वादिनोत्तमाङ्गव्यतिरेकेण कार्य्यम् "शिष्यर्त्विग्वरवेनाप्तौ रज्जुवेणुदलाभ्यां तनुभ्यामन्येन वा गुरुः राज्ञा भाग्यः" इति गौतमवचनात्। "पृष्टस्तु धर्मशास्त्रेण नोन्मार्गे कथयेत्क्वचन" इति मनुवचनात्" मिता०। "कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्। अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु" याज्ञ०। कर्मणा कायेन यथाशक्ति धर्ममनुतिष्ठेत्। तमेव मनसा ध्यायेत्। वाचा वदेत्। धर्मं विहितमपि लोकविद्विष्टं लोकाभिशङ्कितजनकं मधुपर्के गोवधादिकं नाचरेत्। यस्मादस्वर्ग्यमनोघोषणीयवत् स्वर्गसाधनं न भवति" मिता०। "मातृपितृतिथिभ्रातृजामिसम्बन्धिभागिनैः। वृद्धबालातुराचार्य्य वैद्यसंश्रितबान्धवैः। ऋत्विक्पुरोहितापत्यभार्य्यादासजनाभिधिः। विवादं वर्जयित्वा तु सर्वाँल्लोकाञ्जयेद् गृही" याज्ञ०। माता जननी। पिता जनकः। अतिथिरध्वनीनः। भ्रातरो भिन्नोदरा अपि। जामयो विद्यमानभर्त्तृकाः स्त्रियः। सम्बन्धिनो वैवाहाः। मातुला मातृभ्रातरः। वृद्धः सप्तत्युत्तरवयस्कः। बालः षोडशाद्वर्षात्। आतुरो रोगी। आचार्य्य उपनेता। वैद्यो विद्वान् भिषग्वा। संश्रित उपजीव्यो। बान्धवाः पितृपक्षा मातृपक्षाश्च। मातुलस्य पृथगुपादानम् आदरार्थम्। ऋत्विग्याजकः। पुरोहितः शान्त्यादेः कर्त्ता। अपत्यं पुत्रादि। भार्य्या सहधर्मचारिणी। दासः कर्मकरः। सनाभयः सोदराः भ्रातृव्याः पृथगुपादानं अजामिभगिनीप्राप्त्यर्थम्। एतैर्मात्रादिभिः सह वाक्कलहं परित्यज्य सर्वान् प्राजापत्यादीन् लोकान् प्राप्नोति"। "पञ्चपिण्डानुद्धृत्य न स्नायात् परवारिणि। स्नायाच्चेदेवखातेषु प्रस्रवणेषु च" याज्ञ०। परवारिषु परसम्बन्धिषु सर्वस्वत्वोद्देशेन त्यक्तेषु तडागादिषु पञ्चपिण्डानुद्धृत्य न स्नायात्। अनेनात्मीयोत्सृष्टाभ्यनुज्ञातेषु पिण्डोद्धरमन्तरेणापि स्नानमभ्यनुज्ञातम्। नद्यादिषु कथं तर्हीत्याह स्नायाच्चेदिति। साक्षात् परम्परया वा सप्तदुर्गाः स्रवन्त्यो नद्यः। देवखातं देवनिर्मितं पुष्करादि। उदकप्रवाहाभिघातकृतजलो महानिम्नप्रदेशो ह्रदः। पर्वताद्युच्चप्रदेशात् प्रस्रुतम् उदकं प्रस्रवणं एतेषु पञ्चपिण्डानुद्धरणमेव स्नायात्। एतच्च नित्यस्नानविषयम् इति स्मृत्यै

"नदीषु देवखातेषु तडागेषु सरःसु च । स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च" इति नारदस्मरणात् । शौचाद्यर्थन्तु यथासम्भवं परकीयेषु पिण्डानुद्धरणेऽपि सर्वस्य न निषेधः" मिता० । "परशय्यासनोद्यानवृक्षयानानि वर्जयेत् । अदत्तान्यग्निहोत्रस्य नाश्नमद्यादनापदि" याज्ञ० । शय्या कपिपुः । आसनं पीठादि । उद्यानमाम्रवणादि । वृक्षं प्रसिद्धम् । यानं रथादि परसम्बन्ध्यन्यदत्तान्यननुज्ञातानि वर्जयेन्नोपभुञ्जीत : अभोज्यान्नान्याह । अग्निहोत्रस्येति । श्रौतस्मार्त्ताग्न्यधिकाररहितस्य शूद्रस्य प्रतिलोमजस्य वाधिकारवतोऽप्यग्निरहितस्यान्नमनापदि न भुञ्जीत न प्रतिगृह्णीयाच्च । "तस्मात् प्रशस्तानां स्वकर्मणा शूद्रजातीनां ब्राह्मणो भुञ्जीत गृह्णीयाच्चेति" गौतमवचनात् मिता० । "कदर्यबद्धचौराणां क्लीवरङ्गावतारिणाम् । वैणाभिशस्तवार्द्धुष्यगणिकागणदोषिणाम्" याज्ञ । कदर्यो लुब्धः "आत्मानं धर्मशास्त्रञ्च पुत्रदारांश्च पीडयेत् । लोभाद् यः पितरौ म्रियान् स कदर्य इति स्मृतः" इत्युक्तः । बद्धो निगडादिना वाचा सञ्चिरुद्धश्च । चौरो ब्राह्मणसुवर्णव्यतिरिक्तपरस्वापहारी । क्लीवो नपुंसकः । रङ्गावतारो नटचारणमल्लादिः । वेणुच्छेदजीवो वैणः । अभिशस्तः पतनीयैः कर्मभिरभियुक्तः । वार्द्धुषो निषिद्धद्युपजीवी । गणिका पण्यस्त्री गणदीक्षो बहुयाजकः । एतेषामन्नं नाश्नीयादित्यनुवर्त्तते मिता० । "चिकित्सकात्तुरक्कुपुंश्चलीभक्तविद्विषाम् । क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनाम्" याज्ञ० । "चिकित्सकोभिषगुच्यते यजीवी । आतुरा महारोगोपसृष्टः । "वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः । अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्त्तिताः" इति । क्रुद्धः कुपितः । पुंश्चली व्यभिचारिणी । मत्तो विद्यादिना गर्वितः । विहिट् धातुः । क्रूरो दृढ़ाभ्यन्तरकोपः । वाक्कायव्यापारेणोद्वेजकः । व्रात्यः पतितसावित्रीकः । दाम्भिको वञ्चकः । उच्छिष्टभोजी परभुक्तोज्झितभोजी । एतेषाञ्चिकित्सकादीनामन्नं नाश्नीयात्" मिता० । "अवीरास्त्रीसुवर्णकारस्त्रीजितयामयाजिनाम् । अस्त्रविक्रयकर्मारतन्तुवायस्यवृत्तिनाम्" याज्ञ० । "अवीरास्त्री स्वतन्त्रा व्यभिचारमन्तरेणापि । पतिपुत्ररहितेत्यन्ये । सुवर्णकारः सुवर्णस्य विकारान्तरकृत् । स्त्रीजितः सर्वत्र स्त्रीवश्यवर्त्ती । यामयाजी यामस्य याज्यादिकर्त्ता बहुना-

पनेता च । अस्त्रविक्रयी शस्त्रविक्रयोपजीवी । कर्मारो लोहकारः तक्षादिश्च । तन्तुवायः सूचीशिल्पोपजीवी । अभिशप्तं जीवनमस्यास्तीति अष्टत्तो । एतेषामन्नं नाश्नीयात्" मिता० । "नटगंसराजरजकक्षत्तृवधजीविनाम् । चैद्यधावसुराजीवसङ्घोपपतिवेश्मसाम् । पिशुनान्तेवसोश्चैव तथा चाक्रिकवन्दिनाम् । एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा" याज्ञ० । "नटगंसो निन्द्यः । राजा भूपतिः । क्षत्ता चर्म्मान्तपुरोहितश्च । यथाह शङ्खः "भीतावगीतरुदिताक्रन्दितावधूतजुष्टक्षुधितपरिभुक्तविक्षितोन्मत्तावधूतराजपुराहितान्नानि वर्जयेत्" । रजको वस्त्रादीनां नीलादिरागकारकः । क्षत्ता उपक्षत्तृस्त्रिया । वधजीवी प्राणिनां वधेन वर्त्तकः । सुराजीवो मद्यविक्रयजीवी । उपपतिर्जारः सङ्घोपपतिना वेश्म यस्यासौ सङ्घोपपतिवेश्मा । पिशुनः परदोषस्य ख्यापकः । अन्तेवसी मिथ्यावादी । चाक्रिकस्तैलिकः । शाकटिकश्चेत्येके "अभिशप्तपतितचाक्रिकतैलिक" इति भेदेनाभिधानात् । वन्दिनः स्तावकाः सोमविक्रयी सोमलताया विक्रेता । एतेषामन्नं न भोक्तव्यम् । सर्वे चैते कदर्यादयो द्विजा एव कदर्यत्वादिदोषदुष्टा अभोज्यान्ना इतरेषां प्राप्तप्रायत्वात् प्राप्तिपूर्वकत्वाच्च प्रतिषेधस्य । अग्निहोत्रस्य नाश्नमद्यादनापदीत्यत्र शूद्रस्याभोज्यान्नत्वमुक्तम् । तत्र प्रतिप्रसवमाह" मिता० । "शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः । भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्" याज्ञ० । "दासगर्भदासादयः गोपालो गवां पालकः गवां पालनेन यो जीवति । कुलमित्रं पितृपितामहादिक्रमागतः । अर्द्धसीरी हलपर्य्याय सीरोपलक्षितकृषिफलभागग्राही । नापितः वृत्तव्यापारकारयिता नापितश्च । यश्च वाङ्मनःकायकर्म्मभिरात्मानं निवेदयति तवाहमिति । एते दासादयः शूद्राणां मध्ये भोज्यान्नाः । चकारात् कुम्भकारश्च । "गोपनापितकुम्भकारकुलमित्रार्द्धकृषिनिवेदितात्मानो भोज्यान्ना" इति वचनात् ।

स्नातकश्च त्रिविधः व्रतस्नातकः विद्यास्नातकः उभयस्नातकश्चेतिभेदात् । तत्र विहितकालपर्य्यन्तं ब्रह्मचर्य्यं कृत्वा वेदमसमाप्यैव व्रतकालोत्तरं कृतसमावर्त्तन आद्यः । विहितकालमध्येऽपि वेदविद्यां लब्ध्वा स्नातो द्वितीयः । विहितकालपर्य्यन्तं ब्रह्मचर्य्यं कृत्वा वेदमलब्ध्वा तं लब्ध्वैव तत्कालोत्तरं कृतस्नानस्तृतीयः ।

स्नातकव्रत न० हृत० । स्नातककर्त्तव्ये स्मृत्युक्ते व्रतभेदे

"अस्नाभे चैव कन्यायाः स्नातकव्रतमाचरेत्" स्मृतिः ।

स्नान न० स्ना-भावे ल्युट् । १शोधने २अवगाहने ३सज्जने च तच्च मन्त्रादिकारणभेदादष्टविधं या० त० तत्प्रकारभेदादिकं च दर्शितं यथा

"ऋचः "चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् । तिलपुष्पकुशादीनि स्नानार्थञ्चाहरेज्जले" । कुर्य्यादिति शेषः । तथा च "अस्नात्वा चाप्यहुत्वा च भुङ्क्ते-ऽदत्त्वा च यो नरः । देवादीनामृणी भूत्वा नरकं प्रतिपद्यते" । "अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चन । लालाखेदसमाकीर्णः शयनादुत्थितः पुमान् । अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः । सर्वस्मृत्येव दिवारात्रौ प्रातःस्नानं विशोधनम् । प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टफलं हि तत् । सर्वमर्हति पूतात्मा प्रातःस्नायी जपादिकम् । अस्नानाद् यदि वा मोहात् रात्रौ दुश्चरितं कृतम् । प्रातःस्नानेन तत् सर्वं शोधयन्ति द्विजातयः" । दृष्टं मलापकर्षादि अदृष्टं प्रत्यवायपरीहारादि। प्रातः सूर्य्योदयात् प्राक्कालः "प्रातः स्नाय्यरुचकिरणग्रस्तां प्राचीमवलोक्य स्नायात्" इति विष्णूक्तेः । प्रातःस्नाने मध्याह्नस्नानधर्मातिदेशमाह कात्यायनः "यथाह्नि तथाप्रातर्नित्यं स्नायादनातुरः । दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत्" । यथा तथेतिकर्त्तव्यतया । सा च "आचरेदुषसि स्नानं तर्पयेद्देवमानुषान्" इति जाबाल्युक्ता । वैदिके कर्म्मणि वामहस्ते बहुतरकुशान् दक्षिणेन पवित्रं धारयेत् । तथा च छन्दोगपरिशिष्टम् "हस्ताः प्रचरणीयाः स्युः कुशा दीर्घाश्च बर्हिषः । दर्भाः पवित्रमित्युक्तमतः सन्ध्यादिकर्मसु । सव्यः सोपग्रहः कार्य्यो दक्षिणः सपवित्रकः" । प्रचरणीयाः पार्वणपञ्चयज्ञादिकर्मानुष्ठानार्हाः । बर्हिषः यज्ञाद्यास्तरणार्थाः । यतश्चैतत्कर्मसु कुशविशेषा उक्ताः। अतः सन्ध्यादिकर्मसु व्यवस्थाविशेषशून्याः कुशाः पवित्रम् । सोपग्रहः बहुतरकुशयुक्तः सपवित्रको विशिष्टद्विदलयुक्तः । विशेषमाह स एव "अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्" । अनन्तर्गर्भिणं अन्तर्गर्भशून्यम् । तथा च शौनकः "अनन्तस्थरुणौ यौ तु कुशौ प्रादेशसम्मितौ । अनस्रक्छेदिनौ साग्रौ तौ पवित्राभिधायकौ" । "एतदभावे कुशपत्रचतुष्टयं त्रयं वा मन्त्रकरणकवचनात् । तद् यथा "चतुर्भिर्दर्भपत्रैश्च त्रिभिर्वाभ्यासयापि वा । पवित्रं कारयेन्नित्यं प्रशस्तं सर्वकर्मसु" । विद्याकरवाजपेयिधृतम् "पवित्रन्तु द्विजः कुर्य्यात् कुशपत्रद्वयेन वा । पत्रत्रयेण वा कार्य्यं नैकपत्रेण कुत्रचित्" । एतद्दर्शनात् दर्भाःपवित्रमित्यत्रैवमपि व्याख्येयम् मार्कण्डेयः "सर्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः । श्लोकार्द्धः सर्वदा स्नानं कुर्वीतामलकैर्नरः । सप्तमीं नवमीञ्चैव पर्वकालञ्च वर्जयेत्" । विष्णुधर्मोत्तरे "त्वराक्रोधौ तथा दर्पौ दैवकर्माणि वर्जयेत्" । इक्षुराजः पयश्चैव ताम्बूलं फलमौषधम् । भक्षयित्वा तु कर्त्तव्याः स्नानदानादिकाः क्रियाः" । भविष्योत्तरे "स्नातस्य वरुणस्तेजो जुह्वतोऽग्निः श्रियं हरेत् । भुञ्जानस्य यमस्त्वायुस्तस्मात्त्रीण्याचरेत्त्रिषु" । स्नातुः स्नानं कुर्वतः । अशुचेरवगाहनानन्तरं स्नानमाह योगियाज्ञवल्क्यः "तूष्णीमेवावगाहेत यदा चेदशुचिर्नरः । आचम्य तु ततः पश्चात् स्नानं विधिवदाचरेत्" । वामनपुराणम् "नाभिमात्रजले गत्वा स्नात्वा केशान् द्विधा द्विजः । निरुध्य कर्णौ नासाञ्च त्रिःस्नात्वा सज्जनं ततः" । तत्रैव हारीतयाज्ञवल्क्यः "स्रोतसां संस्रवो रुच्चेत् यत्रापः प्रवहन्ति वै । स्थावरेषु गृहे चैव स्नायं कुर्य्यान्मुखं स्मरेत्" । हारीतः "नातुरो न भुक्त्वा न जीर्णवासा न बद्धवासा न नग्नो नाम्नि नावसक्थिको नालङ्कृतो नालङ्कर्त्ता नाज्ञाते जले नाकुले नाशुचौ न प्रभूतजले न नाभेरल्पजले न चत्वरे नोपद्वारे न सन्ध्यायां न निशायां स्नायादिति" । चत्वरे काकादिबलिस्थले इति श्रीदत्तः । उपद्वारे द्वारसमीपे । अत्रैकेन मुनिना नग्नबद्धवाससोर्निषेधस्याभिधानात् स्नाने द्विवाससः एवाधिकारः प्रतीयते । एकवस्त्रस्नाने दोषमाह बहुद्रुकरधृतभविष्ये सोमः "एकवस्त्रेण यत्स्नानं मूढ्या विद्वेन चैव हि । तस्य स्नातस्तु न भवेत् शुद्धः स्त्रिया च परिहीयते" । अतएव "स्नानं तर्पणपर्य्यन्तं कुर्य्यादेकेन वाससा" इति यदि मूलं तदा प्रेततर्पणपरमिति "तत्रैकवस्त्रा स्नातयः" इत्यादिना एकवस्त्रत्वविधानात् "एकेन एकजातीयेन" इति वाचस्पतिमिश्राः । "येन वाससा स्नानं कृतं जलस्यस्य तेनैव तर्पणम्" इति कृत्यतत्त्वार्णवः । न च "स्नानशाट्यान्तु दातव्या मृद्भिस्तो विशुद्धये । जलमध्ये तु यः कश्चित् द्विजातिर्ज्ञानदुर्बलः । निष्पीड्यति यद्वस्त्रं स्नानं तस्य हृथा भवेत्" इति वशिष्ठवचने स्नानशाट्यामिति बहुवस्त्रमिति एकवचननिर्देशेन च स्नानेऽप्येकवस्त्रत्वमिति

वाच्यम् यत्र विशुद्धय इत्यभिधानेनाधोधृतवस्त्रस्यैव सत्त्वेन प्रक्षालनं नतूत्तरीयस्य एतदर्थमेकवचनम्। अतएव "सत्त्वेनाधरीयवस्त्र" प्रक्षाल्यं वशिष्ठवचनैकवाक्यतया। इत्याह्निकचिन्तामणिः। "मातो नाङ्गानि निर्घृष्यात् स्नानशाट्या न पाणिना" इति विष्णुपुराणीयेनाधरीयवस्त्रेणैव गात्रमार्जनं निषिध्यते। "एतेन निर्मार्ज्य मानवस्त्रमिति" कात्यायनवचने एकत्वनविवक्षितमिति निरस्तम्। अतएव सर्वत्रैकत्वं निर्दिष्टम्। शिष्टानामप्याचारोऽपि तथा इति। "नाजस्रमिति पुनः पुनः स्नाननिषेधः रागप्राप्तस्नानविषयो दृष्टार्थकत्वात्। एवञ्चैकस्मिन् दिने नानातीर्थादिनिमित्तप्राप्तस्नानाद्यावृत्तिर्भवत्येव वैधत्वात्। अत्रापि तन्त्रप्रसङ्गयोः सत्त्वे सकृदेवेति। अशक्तः स्नानप्रधानकालमाह दक्षः "चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्। तिलपुष्पकुशादीनि सायङ्कृत्यानि चाचरेत्"। विष्णुः "कुशाभावे कुशस्थाने काशदूर्वा वा दद्यादिति विद्याकरधृतम् "तर्जनीकुथसंयुक्ता हेमयुक्तात्वनामिका। सैव युक्ता तु दर्भेण कार्या विप्रेण सर्वदा"। मत्स्यसूक्ते "अस्नाः स्नात्वा दर्भांश्च शुच्छेन चाधिकं फलम्। सव्यः गोपथसूत्रः कार्यो दक्षिणः कपर्दिवत्कः" इति योगियाज्ञवल्क्यादिस्मृतेरपि न दोषावेत्याह रत्नाकरे बृहस्पतिः "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च स्पृष्टास्पृष्टिं न दुष्यति। आपद्यपि च कष्टायां कृच्छ्रमेवं समाचरेत्। मातापित्रोर्गुरोश्चैव निदेशे वर्त्तने तथा। स्पृष्टास्पृष्टीत्यव्ययम क्रियाव्यतिहारे। तथेति न दुष्यतीत्यर्थः। गारुडे "सर्वतीर्थाभिषेकाद्धि पवित्रं विदुषां वचः। धर्मश्रवणवेलायां विप्रो व्याससमः स्मृतः"। तथाविधाहरं प्रति जाबालः "अशिरस्कं भवेत् स्नानं स्नानशक्तौ तु कारयेत्। आर्द्रेण वाससा वापि दैवकं मार्जनं स्मृतम्" कर्मिणाम् "शिरः स्नातस्तु कुर्वीत देवं पैत्र्यमथापि वा" इति मार्कण्डेयपुराणोक्तकर्म चिकीर्षूणां मार्जनमिहप्रोच्यते, योगियाज्ञवल्क्यः "असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया। मान्त्रमानादितः स्नप्त केचिदिच्छन्ति सूरयः। मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसञ्चैव स्नप्त स्नानं प्रकीर्तितम्। "आपो हिष्ठेति" वै मान्त्रं मृदालभ्यासु पार्थिवम्। आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्। यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते। वारुणञ्चावगाह्यञ्च मानसं विष्णुचिन्तनम्। समस्तं स्नानमुद्दिष्टं मन्त्रस्नानक्रमेण तु। कालदोषादसामर्थ्यात् सर्वं तस्य फलं स्मृतम्"। आपो हिष्ठेति आपो हिष्ठादि कृकृत्रयमत्र विवक्षितम्। एवञ्च "कालदोषादसामर्थ्यात् न शक्नोति यदाचरेत्। तदा ज्ञात्वा तु ऋषिभिर्मन्त्रैर्दद्यन्तु मार्जनम्। अत्र आपस्तुः दुष्टदाः आपो हिष्टाऽघमर्षणम्४। एभिस्तुर्भिर्वर्गुमन्त्रैर्मन्त्रस्नानमुदाहृतम्। इति योगियाज्ञवल्क्योक्तं मन्त्रस्नानान्तरं तत् प्राधान्यख्यापनाय। अतएव पितृदयितायां सन्ध्यातः पूर्वं तल्लिखितम्। मृदालभ्यासु गङ्गामृत्तिकातिलकरूपः। भस्मना संस्कृतभस्मना इति छन्दोगाङ्गिकः। अवगाह्यं मन्त्राङ्गशून्यावगाहनमात्रं विवक्षितम् अतो मुख्यावगाहनरूपस्नानानुकल्पत्वमध्युक्तम्। कालदोषोऽतिवृद्धादिः असामर्थ्यं शरीरापाटवहेतुः अल्पत्वेन सम्पूर्णवारुणस्नानविधिकालायोग्यत्वं वेति। एतन्मूलकं "गेहे चेत्तदमन्त्रवदिति" छन्दोगपरिशिष्टीयं प्रागुक्तम् अन्यथा मूलभूतस्नानान्तरकल्पनापत्तेः सामर्थ्ये तूक्तवज्जलेनापि सकृन्मन्त्रकस्नानमाह पराशरभाष्ये व्यासः "शीतास्त्वपो निषेव्योष्णा मन्त्रसंस्कारसंस्कृताः। गेहेऽपि भक्षते स्नानं तद्दीनसमफलं स्मृतम्"। पद्मपुराणम् "नैर्मल्यं भावशुद्धिश्च विना स्नानं न जायते। तस्मान्मनोविशुद्ध्यर्थं स्नानमादौ विधीयते। अनुद्धृतैरुद्धृतैर्वा जलैः स्नानं सदाचरेत्। तीर्थं प्रकल्पयेद्विद्वान् मूलमन्त्रेण मन्त्रवित्। नमो नारायणायेति मूलमन्त्रः सदाहृतः। दर्भपाणिस्तु विधिना आचान्तः प्रयतः शुचिः। पठन्नेकमनायुक्तं पवमानं समन्ततः। प्रकल्प्यावाहयेद्देवगङ्गां गर्भिन्त्रैर्विचक्षणः"। काशीख० मन्त्रप्रकारो दर्शितो यथा

"प्रातःस्नानं चरित्वाथ शुद्धे तीर्थे विशेषतः। प्रातःस्नानाद्धि यतः शुद्धेत् कायोऽयं मलिनः सदा। छिद्रितो नवभिश्छिद्रैः स्रवत्येव दिवानिशम्। चतुराश्रमेषाश्रयत्वमस्यैतत्प्रवर्त्तकम्। मनःप्रसत्तिहेतुः प्रातःस्नानं विशिष्यते। प्रस्वेदलालाद्याक्लिन्नो निद्रालीनो यतो नरः। प्रातःस्नानात्ततोऽर्हः स्यात्सन्ध्योपासनादिषु। प्रातः प्रातस्तु यः स्नानं कुर्जाते चारुणोदये। प्राजापत्यस्य प्राप्नोति फलमाघविघातकृत्। प्रातःस्नानं हरेत् पापमलक्ष्मीं ग्लानिमेव च। अनुचित्वञ्च दुःस्वप्नं तुष्टिं पुष्टिं प्रयच्छति। नोपसर्पन्ति वै दुष्टाः प्रातःस्नायिजनं क्वचित्। दृष्टादृष्टफलं तस्मात् प्रातः-

429 HT S

स्नानं समाचरेत् । प्रवक्ष्यतः स्नानविधिं वक्ष्यामि जनमेजय ! । विधिस्नानं यतः प्राहुः स्नानाच्छतगुणोत्तरम् । विगुद्धां मृदमादाय वर्हीषि तिलगोमयम् । शुचौ देशे परिस्थाप्य चाचम्य स्नानमाचरेत् । उपस्पृशो वह्निशिखो जलमध्ये समाविशेत् । उद्धृताहीति मन्त्रेण तोय-मावर्त्य दृष्टितः । ये ते शतं ततो जप्यात् तोयस्या मन्त्रणाय च । शुम्भित्वायानो मन्त्रेण पूर्वं कृत्वा जलाञ्जलिम् । क्षिपेद् देवं समुद्दिश्य जपन् दुर्गेतिया इति । इदं विष्णुरिदं जप्त्वा निष्पेदङ्गानि कृतमया । मृदैकया शिरः कार्य्यं द्वाभ्यां नाभेस्तथोपरि । नाभे-रधस्तु तिसृभिः पादौ षड्भिर्विशोधयेत् । मन्त्रेण प्रया-क्षाभिमुख आपो अस्मानिति जपन् । उदित्याभ्यः शुचि रिति मन्त्र उन्मज्जने मतः । मानस्तोकेति जप्त्वा निष्पेदङ्गावाणि गोमयैः । इमं मे वरुणेत्यादिमन्त्रैः स्नानाभिषेचनम् । तत्त्वा यामि तथा त्वन्नः सत्त्वत्वाप्यु-दुत्तमम् । धाम्नाधाम्नस्तथामापो ओषधीरिति संजपेत् । यदा दुरुक्तं सुत्वन्तु सेतिभावस्तनेति च । अष्टावेता इमे मन्त्राः प्रोक्ताः स्नानाभिषेचने । प्रणवेन ततो विप्रो महाव्याहृतिभिस्ततः । आत्मानं पावयेद्विद्वान् गायत्र्या च ततः क्रती । आपो हिष्ठेति तिसृभिः प्रत्यृचं पावनं स्मृतम् । एते वै पावना मन्त्रा इदमप्रोक्षणी । देवीरापो देवा द्रुपदादिवसंस्मृतः । शन्नो देवी रपो देवीरप्यश्च वरमित्यपि । पुनर्नैमेति च नव पावमान्याः प्रकीर्त्तिताः । ततोऽघमर्षणं जप्त्वा द्रुपदां च ततो जपेत् । प्राणायामं च विधिवदथ वाल्लजं जपेत् । प्रणवं त्रिर्नमेदापि विष्णुं वा संस्मरेत् सुधीः । स्नायेत्थं वक्ष्य-मापोद्य दृष्ट्वोयाद्गोतवाससो" ।

स्नानलक्षण न० स्नानार्थं लक्षणम् । क्षणे शब्दर० ।

स्नानीय त्रि० स्नानाय हितम् छ । स्नानसाधने तैलोद्वर्त्तनादौ

स्नायु स्त्री स्नाति-शुध्यति दोषोऽनया स्ना उण् । शरीरादि-बन्धननाड़ीभेदे तत्स्वरूपसंख्यादि भावप्र० उक्तं यथा "तत्र स्नायोः स्वरूपमाह । मेदसः स्नेहमादाय शिरा स्नायुत्वमाप्नुयात् । शिराणां हि मृदुः पाकः स्नायू-नान्तु ततः खरः । स्नायवो बन्धनानि स्युर्देहसंधारणेऽपि मेदसाम् । बन्धनानामपि यतास्तु शिरास्यः मृदवः स्मृताः । जीर्यंधा फलकाकारा बन्धने बन्धभिर्युता । निर्लक्षणाऽसाधनत्वेन भवेद्वारसहा मृगम् । एवमेव शरीरेऽस्मिन् यावन्तः बन्धनाः स्मृताः । स्नायुभिर्बन्धनैर्बद्धा स्नेन भारसहा नराः" । फलके काष्ठकैः सङ्गीर्णा व्याप्ताः "शतानि नव जायन्ते शरीरे स्नायवो नृणाम् । तासां विस्तरणं ब्रूमः शिष्याः शृणुत यत्नतः । शाखासु षट्शतानि स्युः कोष्ठे त्रिंशत् शतद्वयम् । ग्रीवायां मूर्द्धदेशे च सप्तयुतां सप्ततिः स्मृताः" । तत्र शाखागताः प्राह । एकैकस्यां पदाङ्गुल्यां षट् षट् तास्त्रिंशत् । तावन्त्य एव तलकूर्चगुल्फेषु । तावन्त्य एव जङ्घायां दश जानुनि । चत्वारिंशदूरौ । दंश वङ्क्षणे । एवं सार्द्धशतमेकस्मिन् सक्थिनि भवन्ति । एतेनेतरसक्थ्यि बाहू च व्याख्यातौ । अथ कोष्ठगताः प्राह घटिः कटयां तावन्त्य एव पार्श्वयोः । अशीतिः षट्त्रिंशदुरसि । अथ ग्रीवोर्द्धगताः प्राह षट् त्रिंशद् ग्रीवायाम् । चतु-स्त्रिंशत् मूर्द्धनि एवं स्नायूनां नवशतानि भवन्ति" ।

स्नायुरोग पु० ६त० । स्नायुस्थे रोगभेदे तन्निदानादि भावप्र० उक्तं यथा

"तत्र स्नायुरोगस्य विप्रलब्धं सामान्यलक्षणमाह "शा-खासु कुपितो दोषः शोथं कृत्वा विसर्पवत् । निरुणद्धि तं च याते तत्र सोऽनांसि विशोष्य च । कुर्य्यात्तन्तुनिभं स्तब्धं तत्पिण्डैस्तत्कृतैर्जनैः । शनैः शनैः चताद्धि याति छेदात्तत्कोपमावहेत् । तत्मातात्कोपशान्तिः स्यात् पुनः स्थानान्तरे भवेत् । स्नायुरोग इतिख्यातः क्रियोक्तात्र विसर्पवत् । वाक्शोर्यादि प्रभेदेन त्रुट्यते जङ्घयोरपि । सङ्कोचं खञ्जताञ्चापि क्षिप्रो नूनं करोत्यसौ" ।

स्नायुर्मन् न० नेत्ररोगभेदे "स्थिरं प्रसारिसांसाद्यं शुष्कं स्नायुर्मन् पञ्चमम्" माधवनिदानम् ।

स्निग्ध त्रि० स्निह्-क्त । स्नेहयुक्ते वस्तुनि २मसृणे चिक्कणे अमरः । ३रक्तैरण्डे ४सरलवृक्षे च पु० राजनि० ५मत्स्य-भेदे न० ६मेदायां स्त्री राजनि० ।

स्निग्धतण्डुल पु० ष० । यवधान्ये राजनि० । [शब्दर० ।

स्निग्धता स्त्री स्निग्धस्य भावः । १मसृणे राजनि० २प्रियत्वे च

स्निग्धदारु पु० स्निग्धं दारु काष्ठमस्य । १सरलवृक्षे जटा० २देवदारुवृक्षे च राजनि० ।

स्निग्धपत्रक पु० स्निग्धं पत्रमस्य कप् । १हस्तकरञ्जे २गुच्छ-करञ्जे ३गजकरञ्जे च राजनि० ४वर्द्धमानलतायां स्त्री जटा० । ५पालक्यां ६काश्मर्य्यां च स्त्री राजनि० । [च राजनि० ।

स्निग्धपिण्डीतक पु० कर्म० । १मदनवृक्षभेदे २पिण्डीतकवृक्षे

स्निग्धफला स्त्री स्निग्धं फलमस्याः । नागबलायाम् राजनि० ।

स्निट क्ष्वेडे भ्वा० पर० सक० सेट् । स्नेटयति-अस्निस्निटत्-

त। दन्त्यान्तसादितयायं षोपदेश एव न्यायः।

स्नु पु० स्नात+स्नु, आदेशः स्ना-डु वा। १पर्वतस्य समभूभागे अमरः २स्नायौ च। "त्विष्टुप् सांसात् स्नुतोऽनुष्टुप्" भाग०। १२स्क०। "स्नुतः स्नायुतः" इति श्रीधरः।

स्नुक्छद् पु० स्नुहति स्नुह-क्विप् कुत्वम् स्नुक् छदोऽस्य। क्षीरकाकोलीवृक्षे रत्नमा०।

स्नुत पु० स्नु-क्त। क्षरिते जलादौ अमरः। [शब्दर०]

स्नुषा स्त्री स्नु-षक्। १पुत्रवध्वाम् अमरः २स्नुहीवृक्षे च

स्नुह्(हा) स्त्री स्नुह-क्विप् वा टाप्। स्नुहीवृक्षे अमरः।

स्नुहि(ही) स्नुह-इन् वा ङीप्। (मनसासिजु) वृक्षे अमरः "स्नुहीविटपसंश्रिताम्" तिं० तं० देवीपु०।

स्नेह पु० स्निह-घञ्। १प्रेमणि अमरः २तैलादिरसभेदे न्यायोक्ते गुणभेदे च यदुक्तम् दाहानुकूलम्। स च गुणः जलस्य चूर्णादिपिण्डीभावहेतुः। "जले मधुरशीतलौ। स्नेहवत्त्व द्रव्यत्वन्तु सांसिद्धिकमदाहृतम्" भाषा०। "घृतादावपि तदन्तर्वर्त्तिजलस्यैव स्नेहः जलस्य स्नेहसमवायिकारणत्वात् तेन जल एव स्नेह इति मन्तव्यम्" उक्ता०। "स्नेहो जले स नित्योऽप्यावनित्योऽप्यविन्यसौ। तैजसान्तरे तत्प्रकर्षात् दहनस्यानुकूलता" भाषा०। "नन्तु पृथिव्यामपि तैले स्नेह उपलभ्यते न चासौ जलीयः तथा सति दहनप्रातिकूल्यं स्यादत आह तैजसान्तरे इति तत्प्रकर्षात् स्नेहप्रकर्षात्। तैले उपलभ्यमानः स्नेहोऽपि जलीय एव तस्य प्रकर्षोदग्नेरानुकूल्यम्। अपरस्नेहं हि जलं वह्निं नाशयतीति भावः" उक्ता०। प्रमाणमस्नेहस्य वस्तुनोरसस्य स्थायिभावः स च रसः भरतवाक्यात्। साहि० उक्तो यथा "स्मृतं चमत्कारितया वस्तुनस्तु रसं विदुः। स्थायी वस्तुगता स्नेहः पुत्राद्यालम्बनं मतम्। उद्दीपनानि तत्रेष्टविद्याशौर्यादयो दयः। आलिङ्गनाङ्गसंसर्गशिरश्चुम्बनमीक्षणम्। पुलकानन्दाश्रुप्रभृतयो अनुभावाः प्रकीर्त्तिताः। सञ्चारिणोऽनिष्टशङ्कादैन्यमदाद्या मताः। पद्मगर्भच्छविर्वर्णो दैवतं क्षीरलोकमातरः"। "अमेद्यत्वे न च स्नेहं न पात्रं न दयालुत्वम्। परोपकारनिरतामणिदीपा इवोत्तमाः" उद्भ०। न्तरम्। परोपकारनिरतामणिदीपा इवोत्तमाः" उद्भ०।

स्नेहन पु० स्निह कनिन् नि० गुणरामभेदे उणा०।

स्नेहन न० स्निह-णिच्-ल्युट्। १तैलादिमर्दने अभ्यङ्गे राजनि० २मूलधनसाधने क्रियाभेदे भावप्र० ततप्रकार उक्तो यथा "स्नेहनविधिः "स्नेहस्तुर्विधः प्रोक्तो घृतं तैलं वसा तथा। मज्जा च तत्र पित्तेऽल्पैः क्लिन्नेऽभ्युदिते रवौ। स्थावरो जङ्गमश्चैव द्विधोनिः स्नेह उच्यते। तिक्ततैलं स्थावरेषु जङ्गमेषु घृतं वरम्। द्राभ्यां त्रिभिश्चतुर्भिर्वा यमकस्निग्ध उत्तमः"। अस्यायमर्थः द्राभ्यां स्नेहाभ्यां घृततैलाभ्यां यमकाख्यः स्नेहः स्यात्। त्रिभिः स्नेहैः घृततैलवसारूपैः स्निग्धाख्यः स्यात्। चतुर्भिर्घृततैलवसामज्जाभिर्महास्नेहः स्यादित्यर्थः। "पिबेत् त्रयहं चतुरहं पञ्चाहं षड्हानि वा"। मृदुमध्यक्रूरकोष्ठापेक्षया त्रयहं चतुरहं पञ्चाहं षड्हानि चेति। यदुक्तम् "मृदुकोष्ठस्त्रिरात्रेण स्निग्धमेवोप सेवया। मध्यकोष्ठश्चतुर्भिश्च दिवसैः स्निह्यति ध्रुवम्। पञ्चभिर्वाथ षड्भिर्वा दिनैः क्रूरो विशुद्ध्यति। सप्तरात्रात्परं स्नेहः सात्म्यीभवति सेवितः"। मृदुमध्यक्रूरकोष्ठानां सर्वेषां सप्तरात्रात्परं सात्म्यीभवति वातानुलोम्याङ्गदीप्तिकोष्ठशुद्धिस्निग्धाङ्गतास्वरवचनाङ्गबलायुष्टुष्टिहिजदार्ढ्यनिर्जरतावलवर्णकारो भवति। न तु मलद्रवो वातानुलोम्यादीन् करोति। "दोषकालबलौषधिवन्ह्यालोक्य योजयेत्। हीनाल्प मध्यमां ज्येष्ठां मात्रां स्नेहस्य बुद्धिमान्। अमात्रया तथाऽकाले मिथ्याहारविहारतः। स्नेहः करोति रोगार्थस्तन्द्रानिद्राविसंज्ञिताः। हेया दीप्ताग्नये मात्रा स्नेहस्यैकपलोन्मिता। मध्यमाय त्रिकर्षा स्याज्जघन्याय द्विकार्षिकी"। मध्यमाय मध्यमाग्नये जघन्याय हीनाग्नये "अथ वा स्नेहमात्राः स्युस्तिस्रोऽन्याः सर्वसम्मताः। अहोरात्रेण महती जीर्यत्यद्भि तु मध्यमा। जीर्यत्यर्धदिनार्द्धेन सा विज्ञेया सुखावहा"। अयमर्थः अहोरात्रेण जीर्यति सा मात्रा महती। एवं मध्यमा कनिष्ठा च ज्ञेया "अत्रा स्यादु दीपनी हृद्या स्वल्पदोषे प्रपूजिता। मध्यमा स्नेहनी ज्ञेया दृंहणी मलहारिणी। ज्येष्ठा कृच्छ्रविषोन्मादग्रहापस्मारनाशिनी"। सुश्रुतः पुनरेवमाह "या मात्रा प्रथमे यामे गते जीर्यति वासरे। सा मात्रा दीपयत्यग्निमल्पदोषे च पूजिता। या मात्रा वासरस्यार्द्धं व्यतीते परिजीर्यति। सा हृद्या दृंहणी च स्यान्मध्यदोषे प्रपूजिता। या मात्रा चरमे यामे स्थितेऽह्नि परिजीर्यति। सा मात्रा स्नेहनी ज्ञेया बहुदोषेषु पूजिता। केवलं पैत्तिके सर्पिर्वातिके लवणान्वितम्। देयं वसुकफे वह्निव्योषक्षारसमन्वितम्। क्षतक्षतविषात्तानां वातपित्तविकारिणाम्। हीनमेधाकृतीनाञ्च सर्पिःपानं प्रश-

स्यते। वातिकोष्णानिलाविष्टाः प्रदुष्टकफमेदसः। पिबेयुस्तैलसत्त्वाभे तैलं दार्ढ्यार्थिनस्तु ये। व्यायामाकर्षिताः शुष्करेतोरक्तामहारुजाः"। क्रूराशयाः क्रूरकोष्ठाः सर्वतः सर्वकालात् स्नेहात्। "शीतकाले दिवा स्नेहं उष्णकाले पिबेन्निशि। वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा। नस्याभ्यञ्जनगण्डूषमूर्द्धकर्णोचितर्पणे। तैलं हृतं वा युञ्जीत हृद्वा दोषबलाबलम्। हृते कोष्णं जलं पेयं तैले यूषः प्रशस्यते। वसामज्ज्ञे पिबेन्मण्ड मनुपानं सुखावहम्। स्नेहद्विषः शिशून् वृद्धान् क्षुकुमारान् क्षतानपि। कृष्णालुकानुष्णकाले सह भक्तेन पाययेत्। घर्मिण्यतौ बहुतिला यवागूः स्वल्पतण्डुला। हृत्कोष्णा सेव्यमाना तु सद्यः स्नेहनकारिणी। शर्करा-चूर्णसंयुक्ते दोहनस्थे घृते तु गाम्। दुग्ध्वा क्षीरं पिबेद्गृष्टः सद्यः स्नेहनमुत्तमम्। मिथ्याचाराद्बहुत्वाच्च यस्य स्नेहो न जीर्यति। विरूक्षो वापि जीर्यंत वारिणोष्णेन वामयेत्। स्नेहस्याजीर्णशङ्कायां पिबेदुष्णोदकं नरः। तद्दोषारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा। स्नेहेन पैत्तिकस्याग्निर्यदा नीक्ष्णतरीकृतः। तदास्योदीर्यते तृष्णा विषमा तस्य पाययेत्। शीतलं पायसं, तेन तृष्णा तस्य प्रशाम्यति। दुर्बलोऽरोचकी स्थूलो मृच्छीलुर्स्नेहपीडितः। दत्तवस्तिर्विरिक्तश्च वान्तस्तृष्णाश्मसान्वितः। अकालप्रसवा नारी दुर्दिने च विवर्जयेत्। स्नेद्यस्वेदोध्यन्द्यस्त्रीव्यायामासक्तचित्तकाः। वृद्धबालकृशा रूक्षाः क्षीणास्राः क्षीणरेतसः। वातार्त्तास्तिमिरार्त्ता ये तेषां स्नेहनमुत्तमम्। वातानुलोम्य दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम्। सदुस्निग्धाङ्गता स्निग्धे स्नेहेऽोऽथ लाघवम्। विमलेन्द्रियता कस्यक् स्निग्धे रूक्षे विपर्ययः। भक्तद्वेषो मुखस्रावो गुदे दाहः प्रवाहिका। तन्द्रातीसारसदनं भृशं स्निग्धस्य लक्षणम्। रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य रूक्षणम्। श्यामाकचणकाद्यैश्च तिलपिण्याकसक्तुभिः। दीप्ताग्निः शुद्धकोष्ठश्च एतधातुर्दृढेन्द्रियः। निर्जरो बलवर्णाढ्यः स्नेहसेवी भवेन्नरः। स्नेहे व्यायामशीतेभ्योघात प्रजागरात्। दिवास्वप्नमभिष्यन्द रूक्षान्नञ्च विवर्जयेत्"। करणे-ल्युट्। स्नेहसाधने त्रि०। स्त्रियां ङीप्। उदा० क्षत्रेव इत्यम्।

स्नेहप्रिय पु० स्नेहः तैलादिः प्रियोऽस्य। प्रदीपे हेमच०।

स्नेहभू स्त्री ६त०। १श्लेष्माख्ये देहस्थे धातुभेदे हेमच० २स्नेहपात्रे च शब्दर०। [शब्दच०।

स्नेहरङ्ग पु० स्नेहेन रज्यते रञ्ज-कर्मणि घञ्। तिले

स्नेहवत् त्रि० स्नेहोऽस्यास्य मतुप् मस्य वः। १स्नेहयुक्ते स्त्रियां ङीप्। सा च २मेदायां पुंस्त्री० राजनि०।

स्नेहविड्ग न० स्नेहेन विड्गम्। देवदारुणि जटा०।

स्नेहवस्ति स्त्री स्नेहपूरिता वस्तिः। तैलादिस्नेहयुतद्रव्यपूरिते अनुवासनाख्ये पदार्थे (पिचकारी) वस्तिशब्दे ४८६४ पृ० दृश्यम्। [६त०। २स्नेहकारणे न०।

स्नेहवीज पु० स्नेहाद्यं बीजमस्य। पियालवृक्षे राजनि०।

स्नेहाग्र पु० स्नेहमश्नाति अश-क्वन्। प्रदीपे त्रिका०।

स्नेहिन् पु० स्निह-णिनि। १वृक्षे वन्धौ त्रिका०। २स्नेहयुक्ते त्रि० स्त्रियां ङीप्।

स्नेहु पु० स्निह-उनु। रोगभेदे उणा०कोο २चन्द्रे संक्षिप्त०

स्पद ईषत्कम्पे भ्वा० पा० अक० सेट् इदित्। स्पन्दते अस्पन्दिष्ट स्पन्दितम्।

स्पन्द पु० स्पदि-घञ्। १ईषच्चलने ईषत्कम्पे २क्रियाभेदे च। ल्युट्। तत्रार्थे न० नेत्रस्पन्दादौ शुभाशुभविवेचनं मत्स्यपु० २४१ अ० उक्तं यथा

"ब्रूहि मे त्वं निमित्तानि अशुभानि शुभानि च। सर्वधर्मज्ञतां श्रेष्ठ! त्वं हि सर्वविदुच्यसे" मत्स्य उवा च "वक्षुर्दक्षिणभागे तु भक्तं प्रस्फुरणं भवेत्। अथाभक्तं तथा वामे पृष्ठस्य हृदयस्य च"। मनुरुवा च "अङ्गानां स्पन्दनञ्चैव शुभाशुभविचेष्टितम्। तन्मे विस्तरतो ब्रूहि येन स्यान्निर्हृतो भुवि"। मत्स्य उवा च "पृथ्वीलाभो भवेन्मूर्ध्नि ललाटे रविनन्दन!। स्थानं विवृद्धिमायाति भ्रूनसोः प्रियसङ्गमः। भल्लजन्मिश्रयाच्चिदेशे दृगुपान्ते धनागमः। उत्तरोष्ठोपागमो मध्ये दृष्टराजन्! विचक्षणैः। दृग्जन्मने सङ्गरे च जयं शीघ्रमवाप्नुयात्। योषिद्भोगोऽपाङ्गदेशे श्रवणान्ते प्रियाश्रुतिः। नासिकायां प्रीतिसौख्यं प्रजाशिरधरोष्ठजे। कण्ठे तु भोगलाभः स्याद्धनागमहृदिरांसयोः। बाहुस्थां हस्ते चैव धनागमः। पृष्ठे पराजयः सद्योऽजयो वक्षःस्थले भवेत्। कुक्षिस्थां प्रीतिरुद्दिष्टा स्त्रियाः संजननं त्वने। स्यान्भंगो नाभिदेशे वस्तौ चैव धनागमः। जानुसन्धौ जातसन्धिर्बलवद्भिर्जयुतः। दिशेत्कदेशनाशोऽथ जङ्घायां रविनन्दन!। वस्त्रं स्थानमाप्नोति पद्भ्यां प्रस्फुरणान्नृप!। मलाभक्षाध्वगमनं भवेत् पादतले नृप!। लोष्ठनं पिटकश्चैव स्नेहं स्फुट

रणवत्तया । विपर्ययेण विहिता सर्वस्त्रीणां फलागमः । दक्षिणेऽपि प्रशस्तेऽङ्गे प्रशस्तं स्याद्विपर्ययतः । अतोऽन्यथा सिद्धिप्रजल्पनात्तु फलस्य शास्त्रस्य च निन्दितस्य । अनिष्टचिह्नोपशमे द्विजानां कार्यं सुवर्णेन हुतार्पणं स्यात्" । [स्पर्द्धते अस्पर्द्धिष्ट ।

स्पर्द्ध संहर्षे (पराभिभवेच्छायाम्) भ्वा० आत्म० अक० सेट् ।

स्पर्द्धा स्त्री स्पर्द्ध-अ । १संहर्षे २पराभिभवेच्छायां ३स्पर्द्धायां ४क्रमोन्नतौ च मेदि० । [स्पर्शते ।

स्पर्श स्पर्शने क्षये च चु० आ० सक० सेट् । स्पर्शयते अपस्पर्शत् ।

स्पर्श पु० स्पर्श-स्पृश-वा अच् घञ् वा । न्यायोक्ते १त्वगिन्द्रियग्राह्ये गुणभेदे २स्पर्शने "मात्रास्पर्शास्तु कौन्तेय" गीता । ३रोगे ४युद्धे ५गुप्तचरे मेदि० ६चपतप्रेअमरः । ७वायौ पु० ८स्पर्शके त्रि० मेदि० । स्पृश-णिच्-अच् । ९दाने मेदि० स्पृश्यते वायुना जिह्वाग्रादय उच्चारणाय घञ् । १०कादिषु मावसानेषु दर्शनीयवर्णेषु पु० कादयोमावसानाः स्पर्शाः त्रि० कौ० । "स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः । अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः । काठिन्यादिः क्षितावेव नित्यतादि च पूर्ववत् । एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित् । तथापि परमाणौ स्यात् पाको वैशेषिके नये । नैयायिकानान्तु नये द्व्यणुकादावपीष्यते" "स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः । अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः । काठिन्यादिः क्षितावेव नित्यतादि च पूर्ववत् । एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित् । तथापि परमाणौ स्यात् पाको वैशेषिके नये । नैयायिकानान्तु नये द्व्यणुकादावपीष्यते" भाषा० । "उपकारक इति स्पर्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः । अनुष्णाशीतेति । पृथिव्या वायोश्च स्पर्शोऽनुष्णाशीतः । जलस्य शीतः । तेजस उष्णः । काठिन्येति । कठिनसुकुमारस्पर्शौ पृथिव्या एवेत्यर्थः । कठिनत्वादिकन्तु न संयोगनिष्ठो जातिविशेषः चक्षुर्ग्राह्यतापत्तेः । पूर्ववदिति । जलतेजोवायुपरमाणूनां स्पर्शो नित्यो द्व्यणुकादेस्त्वनित्य इत्यर्थः । एतेषामिति । एतेषां रूपरसगन्धस्पर्शानाम् । नान्यत्रेति । पृथिव्या हि रूपरसगन्धस्पर्शपरावृत्तिः पावकसंयोगादुपलभ्यते । न हि श्रुतधार्मि भ्रियमाणे जलादौ रूपादिकं परावर्त्तते । नीरे क्षीरमौष्ण्यञ्च अन्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत् । तत्रापि पृथिवीष्वपि मध्ये परमाणावेव पाक इति वैशेषिकादयः । तेषामयमाशयः । अवयवविनाशेष्वेवावयविषु पाको न सम्भवति । परन्तु वह्निसंयोगेनावयवेषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः । पुनश्च पक्वपरमाणुसंयोगाद्द्व्यणुकादिक्रमेण पुनर्महावयवविपर्य्यन्तोत्पत्तिः तेजसातिशयितवेगवशात् पूर्वव्यूहनाशो झटिति व्यूहान्तरोत्पत्तिश्चेति । अथ द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पत्त्या रूपादिमद्भवतीति शिष्यबुद्धिवैशद्याय प्रक्रिया । "तत्र संयोगविभागयोरनपेक्षकारणं कर्म" इति वैशेषिकसूत्रम् । क्षोत्तरवृत्तिभावान्तरानपेक्षत्वं तस्यार्थः । अन्यथा कर्मणाऽप्युत्तरसंयोगस्य जनने पूर्वसंयोगनाशापेक्षणाद्व्याप्तिः स्यादिति । तत्र विभागजविभागानङ्गीकारे नव क्षणाः । तदङ्गीकारेऽपि विभागः क्षितृसापेक्षो विभागं जनयेत् निरपेक्षस्य तत्त्वे कर्मत्वं स्यात् । तत्र यदि द्व्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात् तदा दश क्षणाः । अथ द्व्यनाशविशिष्टं कालमवयवं चापेक्ष्य विभागजविभागः स्यात् तदा एकादश क्षणाः । तथा हि वह्निसंयोगात् परमाणौ कर्म । ततः परमाण्वन्तरेण विभागः । तत आरम्भकसंयोगनाशः । ततो द्व्यणुकनाशः१। ततः परमाणौ श्यामादिनाशः२। ततो रक्तादुत्पत्तिः३। ततो द्व्यारम्भानुगुणक्रियाः४। ततो विभागः५। ततः पूर्वसंयोगनाशः६ । तत आरम्भकसंयोगः७ । ततो द्व्यणुकोत्पत्तिः८। ततो रक्तादुत्पत्तिः९ । ननु श्यामादिनाशजन्ये रक्तोत्पत्तिक्षणे वा परमाणौ द्व्यारम्भानुगुणक्रियाऽस्त्विति चेत् । न । अग्निसंयुक्ते परमाणौ यत् कर्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च तत्र परमाणौ क्रियान्तराभावात् कर्मवति कर्मोत्पत्तेः निर्गुणे द्व्ये द्व्यारम्भानुगुणक्रियानुपपत्तेश्च । तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्तादुत्पत्तिः स्यादिति चेत् न । पूर्वरूपादिध्वंसस्य रूपान्तरे हेतुत्वात् । इति नव क्षणाः । अथ दश क्षणाः । सा च आरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागस्य जनने इति स्यात् । तथा हि वह्निसंयोगाद् द्व्यणुकारम्भके परमाणौ क्रिया । ततो विभागः । ततः आरम्भकसंयोगनाशः । ततो द्व्यणुकनाशविभागजविभागौ१। ततः श्यामनाशपूर्वसंयोगनाशौ२ । ततो रक्तोत्पत्त्युत्तरसंयोगौ३। ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः४।

ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणक्रिया५ । ततो विभाग:६ । ततः पूर्वसंयोगनाश: ७। तत आरम्भकसंयोग:८ । ततो द्व्यणुकोत्पत्ति:९। ततो रक्तादुत्पत्ति:१०। अथैकादश क्षणा: । वह्निसंयोगात् परमाणौ कर्म । ततो विभाग: । ततो द्व्यारम्भकसंयोगनाश: । ततो द्व्यणुकनाश:विशिष्टं कालमेक्ष्य विभागजविभाग:२ । ततः पूर्वसंयोगनाश:२ । तत उत्तरसंयोग:४। ततः परमाणुकर्मनाश:५। ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणक्रिया६। ततो विभाग:७। ततः पूर्वसंयोगनाश:८। ततो द्व्यारम्भकसंयोग:९। ततो द्व्यणुकम्१०।ततो रक्तादि११। षष्ठ्यमशब्दवदेकस्मादग्निसंयोगाच्च रूपनाशरक्तोत्पादौ । तावत्कालमेकस्यान्त्यस्यास्थिरत्वात् । किञ्च यदुत्पादको नाशकस्तदा नष्टे रूपादावग्निनाशे नीरूपस्थिरं परमाणु: स्यात् । नाशकस्त्वुत्पादकस्तदा रक्तोत्पत्तौ तदग्निना रक्तता न स्यात् । एवं परमाण्वन्तरे कर्मचिन्तनात् पञ्च-आदिक्षणेऽपि गुणोत्पत्ति: । तथा हि एकत्र परमाणौ कर्म । ततो विभाग: । तत आरम्भकसंयोगनाश-परमाण्वन्तरकर्मणी । ततस्तु द्व्यणुकनाश: । परमाण्वन्तरकर्मजश्च विभाग इत्येक: काल:१ । ततः द्व्यारम्भकनाश: विभागश्च पूर्वसंयोगनाश इत्येक: काल:२ । ततो रक्तोत्पत्तिर्द्व्यारम्भकसंयोगश्चेत्येक: काल:३ । अथ द्व्यणुकोत्पत्ति:४ । अथ रक्तोत्पत्तिरिति५ पञ्च क्षणा: । द्व्यणुकनाशसमकालं परमाण्वन्तरे कर्मचिन्तनात् अष्ट गुणोत्पत्ति: । तथा हि परमाणुकर्मणा पर-माण्वन्तरविभाग: । तत आरम्भकसंयोगनाश: । अथ द्व्यणुकनाशपरमाण्वन्तरकर्मणी१ । अथ द्व्यारम्भकनाश: पर-माण्वन्तरकर्मजश्च विभाग:२ । ततो रक्तोत्पत्ति: पर-माण्वन्तरे पूर्वसंयोगनाश:३ । तत: परमाण्वन्तरसं-योग:४ । ततो द्व्यणुकोत्पत्ति:५। अथ रक्तोत्पत्तिरिति६। एवं षट्क्षणनाशक्षणे परमाण्वन्तरे कर्मचिन्तनात् सप्त क्षणा: । रक्तोत्पत्तिसमकालं परमाण्वन्तरे कर्मचिन्त-नात् अष्ट क्षणा:" इति । नैयायिकानामिति । नैया-यिकानां मते द्व्यणुकादौ अवयविन्यपि पाको भवति । तेषामयमाशय: । अवयविनां सच्छिद्रत्वाद्रन्ध्रै: रन्ध्रा-वयवैरन्तःप्रविष्टैरवयवेष्वतिसूक्ष्मेष्वपि पाको न विरुध्यते । वैशेषिकमते ऽनन्तावयवतन्त्वाद्यकल्पने गौरवात् । इत्यञ्च सोऽयं घट इत्यादिप्रत्यभिज्ञाऽपि सङ्गच्छते । यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोऽपि स्वीक्रियते" मुक्ता०।

स्पर्शश्च बहुप्रकारता भा० आ० १८। च० उक्ता यथा "वायव्यश्च गुण:स्पर्श स्पर्शश्च बहुधा स्मृत: । उष्ण:१ शीत:२ सुखो३ दुःख:४ स्निग्धो५ विशद६ एव च । तथा खरो७ मृदुश्च कृच्छ्रोऽलघु१०र्गुरुतरो११ऽपि च" । कठिनश्चाप्यु पलक्षणमिदं यथोक्तं भा० आ० ५ अ० । "वायोश्चापि गुण: स्पर्श: स्पर्शश्च बहुधा स्मृत: । रूक्ष:१ शीत२स्तथैवोष्ण:३ स्निग्धो४ विशद:५ खर६ एव च । कठिन७श्चिक्कण:८ श्लक्ष्ण:९ पिच्छिलो१० दारुणो११ मृदु: १२। एवं द्वादशविस्तारो वायव्या गुण एव च" । इकादिमावसानवर्णोनासुत्पादके आभ्यन्तरप्रयत्ने सि०कौ०।

स्पर्शतन्मात्र न० सांख्यमतसिद्धे वायूपादानकारणे स्पर्शमात्र-गुणके सूक्ष्मभूतभेदे तन्मात्रशब्दे पृ० दृश्यम् ।

स्पर्शन न० स्पर्श-स्पृश-वा ल्युट् । १अक्षणे २स्पर्शे च । णिच् ल्युट् । ३दाने च मेदि० । स्पृश-कर्त्तरि ल्यु । ४वायौ पु० अमर: । [नच्छालुष्टचे शब्दर० ।

स्पर्शलज्जा स्त्री स्पर्शमात्रेण लज्जते सङ्कोचात् लज्ज-कच् । टाप् ।

स्पर्शशुद्धा स्त्री स्पर्शे शुद्धा । मतभेदात्मे शब्दच० ।

स्पर्शा स्त्री स्पर्श अक्षणे-कर्मणि घञ् । कुलटायां धरणि: तस्या: सर्वेषां स्पर्शमात्रेणात्तत्वात्तथात्वम् । [अस्त । स्पृशाप्यत्र ३

स्पर्शाज्ञता स्त्री त्वक्शून्यत्वाख्ये वातरोगभेदे "स्पृशत्यभीक्ष्णं त्वचा या तु शीतोष्णं मृदु कर्कशम् । न जानाति बुधै: सा तु त्वक्शून्यत्वेति परिकीर्त्तिता" माधव० ।

स्पर्ष्टृ त्रि० स्पृश-तृच् । १उपतापयितरि स्त्रियां ङीष् । २रोगे पु० भरत: । बहुतोरम् स्पृष्टृ तत्रार्थे त्रि० ।

स्पश बन्धे बाधने च भ्वा० उभ० सक० सेट् । अस्पशति-ते अस्पशीत्-अस्पाशीत् । अस्पशिष्ट ।

स्पश पु० स्पश-अच् । १चरमात्रे २अभिसरे (युद्धे) ३गुप्तचरे च अमर: "राजनीतिरपस्पशा" माघ: ।

स्पष्ट त्रि० स्पश-क्त नि० षढभाव: । १व्यक्ते २स्फुटे अमर: ३ प्रीतौ अक० प्रीणने रक्षणे पालने च सक० क्रया० पर० अनिट् । स्पृणोति अस्पार्षीत् ।

स्पृक्का स्त्री स्पृश-कक् पृषो० शस्य क: । पृक्कायाम् भरत: ।

स्पृश स्पर्शे तु० पर० सक० अनिट् । स्पृशति अस्पृक्षीत् अस्पार्क्षीत् अस्पृक्षत् । पस्पर्श ।

स्पृशा स्त्री स्पृश-क । १सर्षपजातिनीछत्रे (कङ्कालिका) शब्दर० २कराटकार्य्यां स्त्री अमर: गौरा० ङीष् ।

स्पृष्ट त्रि० स्पृश-क्त । १कृतस्पर्शे । भावे क्त । २स्पर्शे न० । इकादिमावसानवर्णोत्पादके आभ्यन्तरप्रयत्ने न०।

सृष्टांसृष्ट न० सृष्टेन वा सम्यक् सृष्टम् । परस्परसर्गने
सृष्टासृष्टि न० सृज-भावे-क्त कार्मव्यतिहारे इच्समा० पूर्वपददीर्घः । परस्परसर्जने "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे । नगरग्रामदाहे च सृष्टासृष्टि न दुष्यति । आपद्यपि च कष्टायां रुग्भये पीड़िते तथा । मातापित्रोर्गुरोश्चैव निदेशवर्त्तने तथा" हरिस्वामिः ।

सृष्टि स्त्री सृज-क्तिन् । सर्गे अमरः । [अपसृष्टवत् ।

सृह इच्छायां अट०चुरा० उभ० सक० सेट् । सृहयति-ते

सृहणीय त्रि० सृह-अनीयर् । १वाञ्छनीये २श्लाघ्ये च "अहो बतासि सृहणीयवीर्य्यः" कुमारः ।

सृहयालु त्रि० सृह-आलुच् । सृहाशीले ।

सृहा स्त्री सृह-अङ् । इच्छायाम् अमरः । "मिथुने सृहावती" कुमारः ।
वर्णभेदे विषयभेदे सृहौचित्यं यथा
"तपोधनं ब्राह्मणानां तपः कल्पतरुस्तथा । तपस्या कामधेनुश्च सन्तं तपसि सृहा । ऐश्वर्यं क्षत्रियाणाञ्च वाणिज्ये च तथा विशाम् । शूद्राणां विप्रसेवायां सृहा वेदेष्वनिन्दिता । क्षत्रियाणाञ्च तपसि सृहातीव प्रशंसिता । ब्राह्मणानां विवादेषु सृहातीव विनिन्दिता । क्षत्रियाणां रणो धर्मो रणे सृयुर्न गर्हितः । रणे सृहा ब्राह्मणानां लोके वेदे विडम्बना । ब्रह्मवै० [नीयेति० ।
ग० ख० २५अ० ।

सृह्य पु०सृह-कर्मणि यत् १मातुलङ्गकट्फले उणा०२षाञ्छ

स्फट विशीर्णतायाम् चक० भ्वा० पर० सेट् । स्फटति अस्फटीत्-अस्फाटीत् । इदित्युक्तार्थे स्फण्टति अस्फण्टीत् ।

स्फट पुंस्त्री० स्फट-अच् । सर्पफणायाम् अमरटीका ।

स्फटि(टी) स्त्री स्फट-इन् वा ङीप् । (फट्किरी) वणिग्द्रव्यभेदे भावप्र० । स्वार्थे क । तत्रार्थे "स्फटिका तु कषायोष्णा वातपित्तकफव्रणान् । निहन्ति श्वित्रवीसर्पान् योनिसङ्कोचकारिणी" भावप्र० ।

स्फटि(टी)क पु० स्फटि(टी)रिव कायति कै-क । १रत्ननामख्याते मणौ हला० स्वार्थे क वा ह्रस्वः । २स्फटिप्रभावप्र० । स्वार्थेऽण् । स्फाटिकमप्यत्र न०गन्धर० । "स्फटिकः समवीर्य्यश्च पित्तदाहार्त्तिदोषजुत् । तस्यात्त मालां जपतां दत्ते कोटिगुणं फलम्" । तत्परीक्षा यथा "यदुगङ्गाजोयविन्दुच्छविविमलतमं निस्तुषं नेत्रहृद्यं स्निग्धं गुञ्जान्तरालं मधुरमतिहिमं पित्तदाहास्रहारि । पाषाणे यन्निघृष्टं स्फुटितमपि निजां स्वच्छतां नैव जह्यात् तज्ज्ञात्यं ज्ञातु भव्यं शुभसुपचिनुते यैव रत्नञ्च रत्नम्" राजनि० ।
"सत्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादिकम् । मणिरत्नं सरं शीतं कषायं स्वादु लेखनम् । चक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम्" राजवल्लभः । तस्य उत्पत्तिकथादिकं यथा "कावेरीविन्ध्यवदनचीननेपालभूमिषु । ब्राह्मणो व्यक्तिरन्ध्रोदो दानवस्य प्रयत्नतः । आकाशशुद्धं तैलाख्यं सत्यं स्फटिकं ततः । मृणालगन्धधवलं किञ्चिद्वर्णान्तरान्वितम् । न तत्तुल्यं हि रत्नानामथ वा पापनाशनम् । संस्कृतं शिल्पिना सद्यो मूल्यं किञ्चिन्नभेत्ततः" गारुड़े ७६अ० । तथा "हिमाचये सिंहले च विन्ध्याटवितटे तथा । स्फटिकं जायते चैव नानारूपं समप्रभम् । हिमाद्रौ चन्द्रसङ्काशं स्फटिकं तत् द्विधा भवेत् । सूर्य्यकान्तञ्च तत्रैकं चन्द्रकान्तं तथाऽपरम् । सूर्य्यांशुस्पर्शमात्रेण वह्निं वमति यत् क्षणात् । सूर्य्यकान्तं तदाख्यातं स्फटिकं रत्नवेदिभिः । पूर्णेन्दुकरसंस्पर्शात्स्रवति क्षणात् । चन्द्रकान्तं तदाख्यातं दुर्लभं तत् कलौ युगे । अशोकपल्लवच्छायं दाडिमीबीजसन्निभम् । विन्ध्याटवीतटे देशे जायते मन्दकान्तिकम् । सिंहले जायते कृष्णसागरे गन्धनीलके । पद्मरागभवस्थाने विविधं स्फटिकं भवेत् । अत्यन्तनिर्मलं स्वच्छं स्रवतीव जलं शुचि । ज्योतिश्चक्रं लसन्मास्निष्टं शुक्राज्योतीरसं द्विज ! । तदेव लोहिताकारं राजावर्त्तसमोद्भवम् । यानीलं तत्तु पाषाणं प्रोक्तं राजमयं शुभम् । ब्रह्मस्तत्समयं यत्तु प्रोक्तं ब्रह्ममयं द्विज !" युक्तिकल्प० ।

स्फटिकाचल पु०स्फटिक इव शुभ्रत्वात् अचलः । १कैलासपर्वते २स्फाटिकमयपर्वते च । स्फटिकाद्रि प्रभृतयोऽप्यत्र

स्फटिकाद्रिभिद् (द्) पु० स्फटिकाद्रिं स्फटिकपर्वतं भिनत्ति भिद-क्विप् क वा । कर्पूरे राजनि० ।

स्फटिकाभ्र पु० स्फटिकवर्णः अभ्र इव । कर्पूरे राजनि० ।

स्फटिकारि पु० ६त० । (फट्किरि) वणिग्द्रव्यभेदे तस्य स्फाटिकतुल्यदीप्तिमत्त्वात्तथात्वम् रत्नमा० ।

स्फण्ड परिक्षेपे चु० उभ० सक० सेट् इदित् । स्फण्डयति-ते अपस्फण्डत्-त । [रोत् ।

स्फर चले स्फूर्त्तौ च तुदा० प० अक० सेट् । स्फरति अस्फा-

स्फरण न० स्फर-भावे ल्युट् । स्फुरणे । [अस्फालीत् ।

स्फल चले स्फूर्त्तौ च तुदा० पर० अक० सेट् । स्फलति

स्फाटिकोपल पु० स्फटिकमेव उपलः । स्फाटिके त्रिका० ।

स्फाति स्त्री स्फाय-भावे क्तिन् यलोप। वृद्धौ अमरः।

स्फाय वृद्धौ भ्वा० आ० अक० सेट्। स्फायते अस्फायि-अस्फायिष्ट। निष्ठायामनिट् यलोपे ईत् स्फीतः।

स्फार पु० स्फाय-रक्। १खर्णवृद्धुदे २विपुले ३विकटे मेदि० ४प्रचुरे च त्रि० संक्षिप्त०।

स्फारण न० स्फुर-णिच्-स्फारादेशः ल्युट्। विकाशने।

स्फाल पु० स्फल-घञ्। स्फूर्त्तौ। [कट फले शब्दच०।

स्फिग्घातन पु० स्फिगं घातयति हन-स्वार्थे णिच्-ल्यु।

स्फिच् स्त्री स्फाय-डिच्। १कटिप्रोथे अमरः उपचारात् तद्स्थे वातजे २रोगभेदे च। [यति ते अधिस्फटत् त।

स्फिट छर्दौ हिंसे अनादरे च चु० उभ० सक० सेट्। स्फेटयति ते अपुस्फिटत् त।

स्फिर त्रि० स्फाय किरच्। १प्रचुरे अमरः २वृद्धे च।

स्फीत त्रि० स्फाय-क्त स्फीभावः। १वृद्धे २समृद्धे च।

स्फुट भेदे चु० उभ० सक० सेट्। स्फोटयति ते अपुस्फुटत् त।

स्फुट विकाशे भ्वा० प० अक० सेट्। स्फोटति इरित् अस्फुटत् अस्फोटीत्। [पुस्फोट।

स्फुट विकाशे तु० कुटा० प० अक० सेट्। स्फुटति अस्फुटीत्

स्फुट विदलने भ्वा० आत्म० अक० सेट्। स्फोटते अस्फोटिष्ट। [ते अपुस्फुटत् त।

स्फुट परीहासे चुरा० उभ० अक० सेट् इदित्। स्फुण्टयति

स्फुट हिंसे चु० उभ० सक० सेट् आवेशाङ्पूर्वः। आस्फोटयति ते आपुस्फुटत् त। [अपुस्फुटत् त।

स्फुट विकाशे अद० चु० उभ० सक० सेट्। स्फुटयति ते

स्फुट त्रि० स्फुट-क। १विकशिते २व्यक्ते मेदि० ३भिन्ने ४शुक्ले च अजयः। ५ज्योतिषोक्तेषु मेषादिराशिषु अंशविशेषस्थितेषु सूर्य्यादिग्रहेषु पु० तेषां स्फुटत्वदंशकलादिषु गतौ स्त्री। ७उत्प्रेक्षायां द्योतने न०। दर्पफणायां स्त्री रामाश्रयः ग्रहाणां स्फुटताकरणप्रयोजनं सि०शि० उक्तं यथा "यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलं स्फुटत्वम्। स्यात् प्रोच्यते तेन नभश्चराणां स्फुटक्रियादृग्गणितैक्यकृद् वा" इत्युपक्रमे स्पष्टाधिकारे प्रपञ्चितं ग्रहाणां मृदुत्वादिकमुक्तोत्तम् "मृदुत्वेन हीनो ग्रहो मन्दकेन्द्रं चलोच्चं ग्रहोनं भवेच्छीघ्रकेन्द्रम्। तुलाजादिकेन्द्रे फलं स्वर्णमेवं मृदु ज्ञेयमस्माद्विलोमं च शीघ्रम्। त्रिभिर्भैः षट् तानि चत्वारि चक्रे क्रमात् स्यादयुक् युग्मसंज्ञा च तेषाम्। अयुग्मे षट् यातभेष्यं तु युग्मे भुजो बाह्वहीनं त्रिभं कोटिरुक्ता" इत्युक्ता भुजकोटिफलादिकमुक्त्वा। "स्यात् संस्कृतो मध्यफलेन मध्यो मन्दस्फुटः स्याच्चलकेन्द्रसंस्कृतम्। विधाय शैघ्रेण फलेन चैवं खेटः स्फुटः स्यादसकृत् फलाभ्याम्। दलीकृताभ्यां प्रथमं फलाभ्यां ततोऽखिलं भ्यस्मसकृत् कुजस्तु। स्फुटो रवीन्दू मृदुनैव वेद्यौ शीघ्राख्यतद्वस्य तयोरभावात्" सि० शि०। आदौ यद्वस्य मन्दफलमानीय तेन संस्कृतोऽसौ मन्दस्फुटः स्यात्। तं शीघ्रोच्चाद्विशोध्य शीघ्रकेन्द्रं कृत्वा ततः शीघ्रफलम्। तेन संस्कृतो मन्दस्फुटो ग्रहः स्यात्। तस्मात् स्फुटान्मध्याच्च विशोध्य मन्दमानीय तेन गणितागतो मध्यसंस्कृतो मन्दस्फुटः स्यात्। तेन पुनश्चलकेन्द्रं ततश्चलफलं तेन मन्दस्फुटसंस्कृतः स्फुटः स्यात् एवमसकृत् यावदविशेषः। तत्तु दलीकृताभ्यां प्रथमं फलाभ्यामित्यादिना कुजस्य विशेष उक्तस्तत्रोपपत्तिरेव वासना" प्रमिता०। ग्रहाणां तत्रोक्तः स्पष्टगत्यानयनप्रकारस्तु खगोलशब्दे २४३२ पृ० दृश्यः।

स्फुटन न० स्फुट-ल्युट्। १विकशने अमरः २विदलीभावे च।

स्फुटबन्धनी स्त्री स्फुटं बन्धनं यस्याः गौरा० ङीष्। कपोतपद्याम् रत्नमा०।

स्फुटित त्रि० स्फुट-क्त। १विकशिते हेमच० १भिन्ने "दग्धे वा स्फुटितेऽथ वा" पुराणम्। २व्यक्तीकृते ४परिहासिते च

स्फुटि(टी) स्त्री स्फुट इन् वा ङीप्। १पादस्फोटरोगे (फोड़ा) २कर्कटीफले च (फुट) शब्दर०। [इत् त।

स्फुट्ट अनादरे चु० उ० सक० सेट्। स्फुट्टयति ते अपुस्फुट्

स्फुड वरणे तु० कु० पर० सक० सेट्। स्फुडति अस्फुडीत् पुस्फोड। [अस्फुण्डिष्ट।

स्फुड विकाशे भ्वा० आत्म० अक० सेट् इदित्। स्फुण्डते

स्फुड परिहासे चु० उ० सक० सेट् इदित्। स्फुण्डयति ते अपुस्फुण्डत् त। [शब्दच०।

स्फुत्कार पु० स्फुदित्यव्यक्तं शब्दं करोति कृ-अच्। अग्नौ

स्फुर स्फूर्त्तौ तु० कुटा० प० अक० सेट्। स्फुरति अस्फुरीत् पुस्फोर। "चारु पुस्फोर बाहुः" भट्टिः। णिचि-स्फारयति। [२स्फुरणे अमरः।

स्फुर पु० स्फुर-क। फलके हेमच०। १भावे घञ्।

स्फुरण न० स्फुर-ल्युट्। ईषत्स्यन्दने अमरः। युच्। तत्रैव स्त्री। अङ्गभेदे स्फुरफलसूक्तं यथा "भ्रूनेत्रबाहूरुकटीस्फुरितस्य सम्यक् प्रत्येकमव्यक्तफलप्रभावम्। सर्वत्र यत्रावगते स्वदेहाद्युत्पद्यते कर्मविपाकसंवित्। मूर्ध्नि स्फुरत्यायुरुधिष्ण्यवाप्तिः स्थानप्रहृद्विश्व

ललाटदेशे । भ्रू घ्राणमध्ये प्रियसङ्गमः स्यात् नासान्तिमध्ये च महायलाभः । दृगन्तमध्यस्फुरणेऽर्थलाभोत्कण्ठे क्रमाद्दिस्फुरिते दृगादौ । जयो दृशाधःस्फुरणे रणः स्यात् प्रियच्युतिः स्यात् स्फुरिते च कर्णे । योषित्सस्तुतिः स्फुरिते च गण्डे घ्राणे तु सौख्यसुदौ भवेताम् । ओष्ठोत्तमङ्गावधरोर्द्ध्वयोश्च स्कन्धे गले भोगविवृद्धिलाभौ । स्पन्दो भुजस्योत्तमसाहसाय स्पन्दः करस्य द्रविणाप्तिहेतुः । स्पन्दस्तु पृष्ठस्य पराजयाय स्पन्दो जयायोरसि मानवानाम् । पार्श्वप्रकम्पे विषयस्य लाभः कटिप्रकम्पे तु बलप्रमोदौ । नाभिप्रकम्पे निजदेशनाशः धनर्द्धिबन्धुत्वभृवि प्रकम्पे । दुखं धनान्तं हृदयस्य कम्पे स्फिक्पायुकम्पेऽपि च वाहनाप्तिः । वराङ्गकम्पे वरयोषिदाप्तिर्वृष्के सकम्पे तनयस्य जन्म । वस्तौ स कम्पे युवतिप्रवृत्तिः दोषस्य कम्पे पुनरुरुपुष्टे । ऊरःप्रकम्पे सुमहायलाभः स्याज्जानुकम्पे त्वचिरेण सिद्धिः । जङ्घाप्रकम्पे निजदेशनाशः स्यानाप्तिरुच्चा चरणस्य कम्पे । यात्रा बलाभाङ्घितलप्रकम्पे पुंसां सदा दक्षिणदेहभागे । स्त्रीणाञ्च वामावयवे प्रजातः । स्पन्दः फलानि प्रदिशत्यवश्यम् वसन्तराजशाकुने ४थंप० ।

स्फुर्च्छ् विस्मरणे भ्वा० प० सक० सेट् । स्फूर्च्छति अस्फूर्च्छीत् आदित् स्फूर्च्छितं स्फूर्च्छम् ।

स्फुर्ज वज्रशब्दे भ्वा० प० अक० सेट् । स्फूर्जति अस्फूर्जीत् द्वित्व स्फूर्जेथुः । आदित् स्फूर्जितं स्फूर्ज्यम् ।

स्फुर्जथु पु० स्फुर्ज-अथु नि० म दीर्घः । वज्रनिर्घोषे प्रभरटीका ।

स्फुल स्फूर्त्तौ चले च अक० सचये सक० तुदा० क्षुटा० प० सेट् । स्फुलति अस्फुलीत् । पुस्फोल । [युते त्रि० ।

स्फुल न० स्फुल-क । १वस्त्रागारे (ताँबु) शब्दर० । २स्फूर्त्तिः

स्फुलन न० स्फुल-भावे ल्युट् । स्फुरणे नीलकण्ठः ।

स्फुलिङ्ग पुंस्त्री० स्फुल-इङ्गच् , स्फुल इतच्वक्तः शब्दो लिङ्गति गच्छति यस्मात् लिगि-अच् पृषो० वा । अग्निकणे अमरः ।

स्फुलिङ्गिनी स्त्री स्फुलिङ्ग-अस्त्यर्थे इनि । १अग्निज्वालायाम् शटा० २स्फुलिङ्गयुक्ते त्रि० ।

स्फूर्जक पु० स्फूर्ज-ण्वुल् । तिन्दुकवृक्षे अमरः ।

स्फूर्जथु पु० स्फूर्ज-अथु । वज्रपातशब्दे अमरः ।

स्फूर्त्ति स्त्री स्फूर्च्छ-स्फुर-वा क्तिन् । १स्फुरणे २विकसने ३प्रतिभायाञ्च रमानाथः ।

स्फूर्त्तिमत् पु० स्फूर्त्तिरस्यास्ति मतुप् । १पाशुपतास्त्रे शैवभेदे

त्रिका० । २प्रतिभायुक्ते ३विकाशयुक्ते च त्रि० स्त्रियां ङीप् ।

स्फेयस् त्रि० अतिशयेन स्फिरः, प्रचुरः इयसुन् स्फादेशः । अतिप्रचुरे, स्त्रियां ङीप् । द्रष्टुम् । स्फेयोऽत्यत्र त्रि० ।

स्फोट पु० स्फुटत्यर्थोऽनेन स्फुट-करणे घञ् । व्याकरणोक्ते वर्णातिरिक्ते पूर्वपूर्ववर्णानुभवसंस्कृतचरमवर्णानुभवग्राह्ये अर्थप्रत्यायके अखण्डे शब्दभेदे स्वार्थे क तत्रार्थे । व्याकरणमते वर्णसमुदायानां नार्थबोधकत्वं किन्तु स्फोटस्यैवेति प्रपञ्चितमस्माभिः शब्दार्थरत्ने यथा

"तत्र वर्णानां प्रत्युच्चारणमन्यथाप्रतीयमानतया अनित्यत्वेन आशुविनाशिनाश्च तेषां मेलनासम्भवेन तत्समुदायस्यापि समवेतित्वाभावेन प्रत्येकं वर्णेषु वृत्तौ व्यभिचारेण च पूर्वपूर्ववर्णानुभवाहितसंस्कारसहितेषु अन्त्यवर्णजनितपरिपाकशालिनि हृदये झटिति समुदीयमानस्य स्फोटरूपस्यैव शब्दस्य नित्यतया तत्रैव नित्यसम्बन्धस्य योग्यतया वृत्तिमत्त्वमुचितमित्याकरे स्पष्टम् । तथाहि । वर्णा यदि वाचकाः स्युः स्वादेव तेभ्यो व्यस्तेभ्योऽर्थावगतिः । न च तथा । प्रत्येकं वृत्तिपक्षाभावेन तत्समुदायस्य वृत्तिमत्त्वं सुदूरपराहतम् । आशुविनाशिनां वर्णानां मेलनासम्भवेन तत्समुदायासिद्धेः पूर्वपूर्ववर्णानुभवाहितसंस्कारसहितस्य चरमवर्णस्य वाचकत्वन्तु सम्भावितमपि द्वितान्तरीयतादृशसंस्कारानादाय वर्त्तमानचरमवर्णमात्रानुभवेन अर्थावगत्यापत्त्या निरासितम् । अन्त्यवर्णपर्य्यन्तानामनुभवानन्तरं समुदायानां संस्कारोद्बोधकल्पनया पुनः समुदितवर्णानां चरमात्मकज्ञानतोऽर्थावगतिरित्यपि न शङ्कितं जारात्राजेत्यादाविवविशेषेण तत्तद्वर्णसंस्कारसङ्गावादुभयवैलक्षण्यानुपपत्तेः । अतोऽवश्यं वर्णातिरिक्तोऽन्त्यवर्णानुभवव्यङ्ग्यः स्फोटनामा शब्दः स्वीकार्यः स्फुटति प्रकाशतेऽर्थोऽनेनेति व्युत्पत्त्या च तस्य सार्थकनामता बोध्या समर्थितमेव एष पक्षः पातञ्जलभाष्ये व्याघरणैः "तदेतेषामर्थमङ्गैतेलावच्छिन्नानामुपदं हृतध्वनिक्रमाणां य एको बुद्धिनिर्भासस्तत्पदं वाचकं वाच्यस्य संकेत्यते तदेकं पदमेकबुद्धिविषय एकप्रयत्नाभिव्यङ्ग्यमभागमक्रमवर्णं बोद्धमन्त्यवर्णप्रत्ययोपस्थापितं प्रतीयते इत्यलम्" । अस्य चानेकवर्णानां शक्तावच्छेदकतायामेकस्यैव व्यक्तिरूपस्फोटत्वस्य शक्तावच्छेदकत्वकल्पने लाघवमपि द्रष्टव्यम् । उक्तञ्च शब्दकौस्तुभे नागेशैश्चरणैः "अत्यन्त एव शक्तत्वे जातेर्लाघवमीक्ष्यताम् । औपाधिको वा

मेदोऽस्तु वर्णानां तारमन्द्रत्वादिति" । तथा "ध्वनोति य इमं स्फोटं सप्तं श्रोत्रे च मूलतः येन वाक् व्यज्यते यस्य व्यक्तिराकाश आत्मनः" इति भर्तृहरिधृतभागवतवचने स्फोटात्मकशब्दश्रवणस्यालिङ्गतोक्त्या स्फोटरूप शब्दोऽर्थात् इत्यवगम्यम् । हरिवंशेऽपि "अन्तराणामकारत्वं स्फोटत्वं वर्णसंश्रयः" इति स्फोटस्य व्यङ्ग्यवर्णाश्रयत्वमभिहितम् । एतन्मताभिप्रायेणैव "स्फोट इत्याहेति" शारीरकभाष्ये स्फोटव्युत्पादनम् "वर्ण एव तु शब्द इति भगवानुपवर्ष इति" निराकरणञ्च उपवर्षवचनात् तन्मताभिप्रायेण । "न स्फोटः प्रतीत्यप्रतीतिभ्यामिति" सांख्यसूत्रेऽपि स्फोटखण्डन-मुपलक्षणतामभिप्रायेणेति सर्वं सुस्थम् । स च स्फोटवर्णपदादिभेदेन अनेकविधो बाहुल्यभयात् न प्रपञ्चितः । तत्र स्फोटस्याभिव्यक्तौ प्राक्तनस्य ध्वनेः कारणत्वं चिरचिरतरस्थितौ तु प्राक्तनध्वनिजातवैजात्यध्वनेरिति विवेकः । तथा च वाक्यपदीये "स्फोटस्य ग्रहणे हेतुः प्राक्तनो ध्वनिरिष्यते" इति । "स्थितिभेदे निमित्तत्वं वैजात्यं प्रतिपद्यते" इति च स्थितिभेदे चिरचिरतरकालस्थितौ ध्वनिस्तु पूर्वसञ्चितः । तत्र च स्फोटस्य नित्यतया ध्वनिजातस्य ह्रस्वदीर्घादिभेदेन व्यवहारोपयोगिकालस्य तत्तोपचारः । प्रतिपादितञ्च तथैव वाक्यपदीये "स्फोटस्याभिव्यक्तौ प्राक्तनस्य ध्वनेः कालानुपातिनः । स्वभावतस्तु नित्यत्वात् ह्रस्वदीर्घप्लुतादिषु । प्राक्तनस्य ध्वनेः कालः शब्दस्येत्युपचर्यते" शब्दस्य स्फोटस्य नित्यतया अभिव्यक्तिकालस्य ह्रस्वदीर्घादिषु प्राक्तनध्वनेः कालः तारत्वादिधीहेतुरुपचर्यते इति तदर्थः । एकस्तु विलम्बितोच्चारणस्थले तत्तद्वर्णानां तद्बोधजनितसंस्कारानां वा बहुक्षणपर्यन्तस्थायित्वकल्पनामपेक्ष्य एकस्यैव शब्दस्याभिव्यक्तनन्तरं जायमानेन वैजात्येन ध्वनिना बहुकालस्थितिकल्पने लाघवमस्त्यपि द्रष्टव्यम् । भेरीशब्दादौ च ध्वन्यभिव्यक्तनन्तरं जायमानप्राक्तनध्वनेर्बहुकालस्थायित्वदर्शनेन अत्रापि तथाकल्पनौचित्यात् । अतएव च महाभाष्ये "एवं तर्हि स्फोटः शब्दो ध्वनिः शब्दगुणः" इत्यादिनाऽभिव्यक्तनुपकारकत्वेन ध्वनेः स्फोटरूपशब्दगुणत्वमभिहितमभिहितञ्च ध्वनेर्ह्रस्वदीर्घत्वेनापि भानञ्च यथा "ध्वनिः स्फोटस्य शब्दानां ध्वनिस्तु खलु लक्ष्यते । ह्रस्वो मकारः केषाञ्चित् स्वयं नैव स्वभावतः" इति न स्वभावतश्शब्दरूपेण स्फोटोलक्ष्यत इत्यर्थः । ध्वनिविकारे च वायुसंयोगविशेषस्य हेतुत्वं तस्य बहुक्षणस्थायित्वे विलम्बितत्वमल्पक्षणस्थायित्वे द्रुतत्वमिति विवेकः । एवं बहुविधेषु स्फोटेषु वाक्यस्फोटस्यैव सिद्धान्ते निष्कृष्टतया तस्यैव बोधकत्वं तदटकपदानान्तु पदसंध्यवर्त्तिवर्णवत् निरर्थकत्वं विशिष्टार्थद्योतनायैव तेषां प्रयोगात् । तथा च "ब्राह्मणार्थो यथा नास्ति कस्यिद् ब्राह्मणकत्वले । वेदवाक्यार्थवाक्ये तथैव स्युर्निरर्थकाः" इति । "पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च । वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चनेति" च वाक्यपदीये पदात्मकत्वाव दर्शयति । तथा "वाक्यस्फोटोऽनिर्निष्कर्षं तिष्ठतीति मतस्थितिरिति" हरिकारिकायां सिद्धान्ते वाक्यस्फोटस्यैव सिद्धिरिति प्रतिपादितम् ।

२व्रणभेदे च (फोड़) राजनि० ।

स्फोटक पु० स्फुट-एवुल् । (फोड़ा) १व्रणभेदे हेमच० २विदारके च ।

स्फोटन न० स्फुट-ल्युट् । १विदारणे २विकाशने च भरतः

स्फोटनी स्त्री स्फुटनेन स्फुट-ल्युट् ङीप् । मक्षिकाबन्धनकरण यन्त्रभेदे (भोमरा) हिरूपकोष० ।

स्फोटबीजक पु० स्फोटस्य व्रणभेदस्य बीजम् ततः स्वार्थे क । भल्लातके राजनि० । तत्फलनिर्यादर्शनयोगात् व्रणोत्पत्तिर्लोकसंज्ञा ।

स्फोटायन पु० स्फोट एवायनं अर्थबोधकतयाश्रयणं यस्य । अबोधकत्वेन स्फोटमभ्युपगन्तरि वैयाकरणे मुनिभेदे "अवङ् स्फोटायनस्य" पाणिनि । [टिका० ।

स्फोटिका स्त्री स्फुट-एवुल् टाप् अत इत्त्वम् हलायुधकोषे

स्फय - स्फाय-यत् नि० । खड्गाकारे यज्ञार्थे काष्ठभेदे ति० त०

स्फयास्फिष्टेज्याधिकरण न० अधिकरणभेदे ति० त०

"स्फयास्फिष्टेज्याधिकरणस्य स्फयस्य खड्गाकारकाष्ठस्य भक्षास्फेषनिमित्तकेज्यायामिष्टित्वेन प्रकृतसदृक्षतिरित्यभिदेशेन दर्शात्मकप्रकृतिधर्माणां प्राप्तौ पूर्वदिनप्रातःकालीनं फेवनीयदेवताबाहनमपि प्राप्तं तच्च तदानीं न विधीयते नैमित्तिके निमित्तनिश्चयवतोऽधिकारितया प्रकृते स्वाभाविकभक्षास्फेषरूपनिमित्तसंशयेन प्रधानानधिकारिणोऽङ्गानधिकाराच्चतुरहदिने च निमित्तनिश्चये तदधिकारसिद्धावपि नाबाहनानुष्ठानम् आबाहनस्य पूर्वदिनप्रातःकालनैयत्यादितीज्याया आबाहनं विनैवानुष्ठानम्"

स्म अव्य० स्मि-ड । १अतीते २पादपूरणे च अमरः ।

स्मय पु० स्मि-अच् । १गर्वे २अद्भुतरसस्थायिभावे च मेदिo ।

स्मर पु० स्मरति प्रियजनेन स्मृ-करणे अप्। १कामदेवे अमरः। भावे अप्। २स्मरणे। [त्रिका०।

स्मरकूपक पु० स्मरस्य कूप इव कायति कै-क। कामदृष्टे

स्मरगृह न० स्मरस्य गृहमिव। १स्त्रीचिह्नभेदे भगे जटा० स्मरमन्दिरादयोऽप्यत्र।

स्मरचक्र पु० "धृत्वा वामकरेणोरुं स्वपादस्योपरिस्थितम्। दृढञ्च रमते कामी स्मरचक्रः प्रकीर्त्तितः" स्मरदीपकोक्ते रतिबन्धभेदे।

स्मरण न० स्मृ-ल्युट्। ज्ञातवस्तुनोऽनुभवाधीनसंस्कारजन्ये उद्बोधकसहकारेण जायमाने १ज्ञानभेदे स्मृतिशब्दे दृश्यम्। आध्याने हेमच०। २चिन्तने जटा०। ३अर्थालङ्कारभेदे सा० द०। अलङ्कारशब्दे ४०७ पृ० दृश्यम्।

स्मरदशा स्त्री स्मरजता दशा। कामिनां स्मरजतासु अङ्गालोष्ठवादिषु दशसु दशासु।

"अक्ष्णोश्चसौष्ठवं तापः पाण्डुता क्षयताऽरुचिः। अस्थितिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छनाः। स्मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा इह। असौष्ठवं मलापत्तिस्तापस्तु विरहज्वरः। अरुचिर्वस्तुवैराग्यं सर्वत्रारागिताऽस्थितिः। अनालम्बनता चापि शून्यता मनसः स्मृता। तन्मय तत्प्रकाशो हि बाह्याभ्यन्तरतस्तथा। रसविच्छेदहेतुत्व न मरणं नैव वर्ण्यते। वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरतः" इति सा०द०।

स्मरध्वज न० ६त०। स्त्रीचिह्ने शब्दर०। २वाद्ये पु०हेमच०

स्मरप्रिया स्त्री ६त०। स्मरमाद्यायां रतौ जटा०।

स्मरलेखनी स्त्री स्मरस्य लेखनीव। स्मरेण कामोद्दीपके शारिकाख्ये शब्दर०। [याम् राजनि०।

स्मरवीथिका स्त्री स्मरस्य वीथिकेव प्राप्तिहेतुत्वात्। वेश्या-

स्मरवृद्धि पु० स्मरस्य वृद्धिर्यस्मात्। १कामवृद्धिजुषे राजनि० ६त०। २कामवृद्धौ स्त्री। [शब्दर०।

स्मरस्तम्भ पु० स्मरस्य तद्व्यापारस्य स्तम्भ इव। उपस्थे

स्मरसर्य पु० स्मरः सर्यो यस्य। गदंभे त्रिका०।

स्मरहर पुं० स्मरं हरति नाशयति हृ-अच्। १महादेवे अमरः। स्मरमर्दनादयोऽप्यत्र।

स्मराङ्कुश पु० स्मरं तत्कार्य्यं अङ्कुश इव उत्तेजकत्वात्। नखे शब्दर० नखाघातेन हि स्त्रीणां स्मरोद्दीपनं प्रसङ्गतः।

स्मराम्र पु० स्मरप्रिय आम्रः। राजाम्रे राजनि०।

स्मरासव पु० स्मरोद्दीपक आसव इव। खजायाम् त्रिका० कामिनां तत्पाने हि स्मरोद्दीपनात्तस्यास्तथात्वम्।

स्मार्त्त त्रि० स्मृतौ विहितः, स्मृतिं वेत्त्यधीते वा अण्। १स्मृतिविहिते दानादौ "अन्योऽपि स्मार्त्तमाचरेत्" इति "स्मार्त्तं वैदिकवत् चरेत्" च स्मृतिः। २स्मृतिशास्त्राभिज्ञे च

स्मि (ष्मि) अनादरे सक०विस्मये अक०चु० आ० सेट्। स्माययते अस्मिष्मयत। अयं भ्वादिरपि अनिट्। स्मयते अस्मिष्ट। स्मिङ्ये भोपदेशत्वात् षत्वम्। [ते अस्मिष्टत त

स्मिट अनादरे सक० स्मेडे अक० चु० उभ० सेट्। स्मेटयति।

स्मित न० स्मि-भावे क्त। १ईषद्धास्ये अमरः "सुखं विकसितस्मितम्" मालतीमाधवम्। कर्त्तरि क्त। २विकसिते ईषद्धास्यान्विते च त्रि०।

स्मील निमेषणे भ्वा०पर०सक० सेट्। स्मीलति अस्मीलीत्।

स्मृ स्मरणे भ्वा० प० अनिट्। स्मरति अस्मार्षीत् सस्मार स्मर्त्ता। अभोपदेशत्वात् न षत्वम्। एतद्योगे कर्म्मणि षष्ठी। अयमौत्सर्गिके सक० चटा० स्मरयति।

स्मृत त्रि० स्मृ-क्त। १ज्ञातस्मरणे २स्मृतिविषये च।

स्मृति स्त्री स्मृ-क्तिन्। अनुभूतवस्तुन उद्बोधकसहकारेण संस्काराधीने १ज्ञानभेदे। स्मर्य्यते वेदधर्म्मोऽनेन करणे क्तिन्। २धर्म्मशासनशास्त्रे वेदार्थानुभवजन्ये वेदार्थानुवादके स्मृतिप्रणीते वाक्यरूपे शास्त्रे। "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्" मनुः।

ज्ञानभेदस्मृतिरूपलक्षणादिकं पात० स्मृ० भा० विवरणेऽस्माभिरुक्तं यथा

"अनुभूतविषयाऽसम्प्रमोषः स्मृतिः" सू०। "किं प्रत्ययस्य चित्तं स्मरति। आहोस्वित् विषयस्येति। ग्राह्यग्रहणात्मकाः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासः तथाजातीयकं संस्कारमारभते स संस्कारः स्वयञ्जकाञ्जनं तदाकारमेव ग्राह्यग्रहणोभयात्मिकां स्मृतिञ्जनयति। तत्र ग्रहणाकारपूर्वा बुद्धिः ग्राह्याकारपूर्वा स्मृतिः। सा च द्वयी, भावितस्मर्त्तव्या चाभावितस्मर्त्तव्या च स्वप्ने भावितस्मर्त्तव्या जाग्रत्समये त्वभावितस्मर्त्तव्येति। सर्वाः स्मृतयः प्रमाणविपर्य्ययविकल्पनिद्रास्मृतीनामनुभवात् प्रभवन्ति" भा०। "अनुभूतविषयाऽसम्प्रमोषः स्मृतिः प्रमाणादिभिरनुभूते विषयेऽसम्प्रमोषः अवगन्तव्यः सा स्मृतिः संस्कारमात्रजन्यस्य हि ज्ञानस्य संस्कारकारणानुभवभाषितो विषय एवावगन्तव्यस्तदधिकविषयपरिग्रहस्तु सम्प्रमोषः ज्ञेयः, फलात् साङ्गग्रात्। सम्प्रमोषस्य ज्ञेय इत्यस्मात् सम्प्रमोषपदस्योक्तेः। एतदुक्तं भवति।

र्वं प्रमाणादयोऽनधिगतमर्थं सामान्यतः प्रकारतो वाधिगमयन्ति, स्मृतिः पुनर्न पूर्वानुभवसमयोदासंतिक्रामति तद्विषया तदूनविषया वा न तु तदधिकविषया सोऽयं कृत्यन्तरादिभेदः स्मृतेरिति। विस्मयति किंप्रत्ययस्येति ग्राह्यप्रवणत्वात् अनुभवस्य स्वानुभवात्तज्ज्ञः संस्कारो ग्राह्यमेव स्मारयतीति। प्रतिभासयति अनुभवमात्रजनितत्वाच्चानुभवमेवेति। विस्मयोपपत्तिं उभयस्मरणमवधारयति ग्राह्यप्रवणतया ग्राह्योपरक्तः परमार्थतस्तु ग्राह्यग्रहणे एव उभयं तयोराकारं स्वरूपं निर्भासयति प्रकाशयति। स्मृत्यङ्कं कारणमञ्जनमाकारो यस्य स तथोक्तः। स्वकारणाकार इत्यर्थः। व्यङ्ग्यस्मृद्बोधकं तेनाञ्जनं फलाभिमुखीकरणं यस्येति वेत्यर्थः। ननु यदि कारणविचारेण बुद्धिस्मरणयोः सारूप्यं कस्मान्हि भेद इत्यत आह तत्र ग्रहणेति। ग्रहणमुपादानं न च गृहीतस्योपादानं सम्भवति तदनेनानधिगतबोधनं बुद्धेरित्युक्तं ग्रहणाकारो ग्रहणरूपं पूर्वं प्रधानं यस्याः सा तथोक्ता विकल्पितत्वायम् अभेदेऽपि गुणप्रधानभाव इति ग्राह्याकारः पूर्वः प्रथमो यस्याः सा तथोक्ता, इदमेव च ग्राह्याकारस्य ग्राह्यस्य पूर्वत्वं यदन्यान्तरविषयीकृतत्वमर्थस्य तदनेन वृत्त्यन्तरविषयीकृतगोचरा स्मृतिरित्युक्तं भवति सोऽयमसम्मोष इति। ननु अस्ति स्मृतेरपि सम्मोषः दर्शयति हि पित्राद्देरतीतस्य देशकालान्तरानुभूतस्यानुभूतचरदेशकालान्तरसम्बन्धं स्वप्ने इत्यत आह सा च द्वयीति भावितः कल्पितः स्मर्त्तव्यतया सा तथोक्ता। अभावितोऽकल्पितः पारमार्थिक इति यावत्। नेयं स्मृतिरपि तु विपर्य्ययस्मृत्युपपत्तत्वात् स्मृत्याभासतया तु स्मृतिरुक्ता प्रमाणाभासमेवेति भावः। कस्मात् पुनरन्ये स्मृतेरुपन्यास इत्यत आह। स्मृतिः स्मृतय इति अनुभवप्राप्तिपूर्वा वृत्तिः स्मृतिस्ततः स्मृतीनामन्ये निवेश इत्यर्थः"।

धर्म्मेण स्वशब्दे स्मृतिभेदादिकं १८६२ पृ० दृश्यम्।

स्मृतिहेतु पु० ६त०। १संस्कारे वासनारूपे गुणभेदे जटा०।

स्मेर त्रि० स्मि-रन्। १विकसिते हेमच० २ईषद्धास्यान्विते च संक्षिप्त० "महाजनः स्मेरमुखो भविष्यति"कुमारः।

स्यद् पु० स्यन्द-घञर्थे क। वेगे अमरः।

स्यन्द स्रवणे भ्वा० आ० लुङि, लृटि, लृङि च उभ० अक० अदित् वेट्। स्यन्दते स्यदिष्यते अस्यदत अस्यन्दिष्ट अस्यन्त। अधोपदेशत्वेऽपि विधिबलाच्छिषन्द्रते इत्यादौ षत्वम्।

स्यन्द पु० स्यन्द-भावे घञ्। द्रुतद्रुतगमने प्रस्रवे।

स्यन्दन न० स्यन्द-भावे ल्युट्। १चरणे। "स्यन्दनश्च मन्दिरदेशश्च द्रुतद्रुतस्य च संयोगानुकूलो व्यापारः गमनत्वव्याप्यजातिभेदो वा "भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च। तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते" भाषा०। कर्त्तरि ल्यु। २जले न०। ३रथे मेदि०। ४तिनिशवृक्षे च पु० अमरः।

स्यन्दनद्रुम पु० कर्म्म०। तिनिशवृक्षे शब्दर०।

स्यन्दनारोह पु० स्यन्दनमारोहति युद्धायेति, आ+रुह घञ्। रथारोहेण योद्धरि अमरः। [स्त्रियां स्त्री अमरः।

स्यन्दनि पु० स्यन्द-अनि। तिनिशवृक्षे रत्नमा० ङीप्।

स्यन्दिन् त्रि० स्यन्द+णिनि। १प्रस्रविणि। २स्त्रियां स्त्री अमरः ङीप्।

स्यन्न त्रि० स्यन्द-क्त। स्रुते जलादौ अमरः।

स्यन्नवीण त्रि० स्यन्ना वीणा यस्य। स्रुते हेमच०।

स्यम ध्वनने भ्वा० पर० अक० सेट् क्वा वेट् फणादि०। स्यमति अस्यमीत् स्येमतु सस्यमतः।

स्यम वितर्के चु० उ० सक० सेट्। स्यामयति ते अस्यिस्यमत त।

स्यम ध्याने अद० चु० उभ० सक० सेट्। स्यमयति अस्यिस्यमत त।

स्यमन्तक पु० स्यम-झच् संज्ञायां कन्। १श्रीकृष्णस्य हृद्यस्यमणिभेदे हेमच०। २दृक्षभेदे पु० मेदि०। ३सूर्य्यदत्ते सत्राजिते मणिभेदे तत्कथा भाग० १० ५६ अ०। "आसीत् सत्राजितः सूर्य्यो भक्तस्य परमः सखा। प्रीतस्तस्मै मणिं प्रादात् स च तुष्टः स्यमन्तकम्" इति। "दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो!। दुर्भिक्षमार्य्यरिष्टानि सर्पाधिव्याधयोऽशुभाः। न सन्ति यन्निधानस्थे यस्मिन्नेऽभ्यर्चितो मणिः" एतदुपाख्यानं स्यमन्तकोपाख्यानं तच्च सौरभाद्रचतुर्थीचन्द्रदर्शने श्राव्यम् तिथितत्त्वरघुः।

स्यमीका स्त्री स्यम-ईकक्। १वल्मीके २काशे ३मेघे च पु० ४नीलोपधौ स्त्री मेदि०।

स्यूत त्रि० सिव-कर्म्मणि क्त। १सूच्यादिना ग्रथिते वस्त्रादौ अमरः। सूत्रखचितपात्रे (थोकड़ी) पु० अमरः। पृषो० ओत्। ओतोऽप्यत्र भरतः

स्यूति स्त्री सिव-भावे क्तिन्। सूच्यादिना वस्त्रादिसीवने।

स्यून पु० सिव-नक्। १सूत्रे २किरणे मेदि० ३सूच्यादिस्यूतखण्डवस्त्रनिर्म्मिते पदार्थे (थुकड़ी) च शब्दर०।

स्यूम न० सिव-मक्। १जले २किरणे संक्षिप्त०किरणे पु० उणा०

स्रोण पु० स्रुण+पृषो० । १धौतकटे (धुकड़ी) अमरटी०भरतः २कट्यां ३करभे मेदि० । ४शुक्ले नि०घरट० । ५शुष्ककरे त्रि० "स्रोणा पृथिवी नोभवान्तरि" यजु० ३५अ० २१ ।

स्रंसन न० स्रंस्-ल्युट् । अधुवगतस्रावोनयने पतने युच् । स्रंसनावयव स्त्री । [२पीलुवृक्षे पु०अमरः ।

स्रंसिन् त्रि० स्रंस्-णिनि । १अधःपतनशीले स्त्रियां ङीप् ।

स्रंसिफल पु० स्रंसि फलमस्य । शिरीषवृक्षे शब्दमा० ।

स्रक गतौ भ्वा० आत्म० सक० सेट् इदित् । स्रक्षते अस्रक्षिष्ट

स्रग्वत् त्रि० स्रक् माल्यमस्त्यस्य मतुप् मस्य वः कुत्वम् । माल्यवति । विनि । स्रग्वीत्यत्र । उभयत्र स्त्रियां ङीप् ।

स्रज् स्त्री स्रज्यते स्रज-क्विन् नि० माल्ये अमरः ।

स्रज्वा स्त्री स्रज-वा नेत्त्वम् नि० । १प्रजापतौ २तन्तुसंघाते ३रज्ज्वाम् संज्ञिप्रसारः ।

स्रम्भ् शब्दने स्वा० आत्म० लुङि उ० अक० सेट् उदित् क्ता वेट् । स्रंभते दरित् अस्रम्भत अस्रंभिष्ट । "नास्रम्भत करिष्यां अवैमम्" रघुः । [शते अस्रंभिष्ट ।

स्रन्स ध्वंसे भ्वा० आ० अक० सेट् उदित् क्ता वेट् । स्रंसते अस्रंसत अस्रंसिष्ट ।

स्रम्भ विश्वासे स्वा० आत्म० लुदित् लुङि उ०अक०सेट् उदित् क्ता वेट् । स्रम्भते अस्रम्भत अस्रम्भिष्ट ।

स्र(स्रा)व पु० स्रु-अप् घञ् वा । १क्षरणे अमरः । कर्त्तरि अच् २निर्झरे हेमच० । [भावे ल्युट् । २क्षरणे ।

स्रवण न० स्रु-ल्यु । १मूत्रजन्ये राजनि० २कर्णे च शब्दर० ।

स्रवद्गर्भा स्त्री स्रवन् गर्भो यस्याः । १दैवयोगात् पतितगर्भायां गवि अमरः । २तथाभूतस्त्रियाञ्च ।

स्रवद्वृङ्ग पु० स्रवन् वृङ्गो यत्र । पथ्यन्नौ (छट्टे) हारा० ।

स्रवन्ती स्त्री स्रु-झिच् ङीप् । १नद्याम् अमरः । २ओषधिभेदे ३गुडूच्याम् च मेदि० । अत । स्रवविशिष्टे त्रि० । स्त्रियां ङीप् ।

स्रवा स्त्री स्रु-अच् । १भूवांयाम् रायमुकु० २क्षरणयुते त्रि०

स्रष्टृ पु० सृज-तृच् नित्यमस्य । १जगत्कर्त्तरि चतुर्मुखे अमरः २शिवे भला० । ३सर्जनकर्त्तरि त्रि० स्त्रियां ङीप् ।

स्रस त्रि० स्रंस-क्त । च्युते पतिते अमरः ।

स्रस्तर पु० स्रंस-तरच् किच्च । आसने भू०तं० रघु० ।

स्राक् अव्य० स्रु-डाक् । त्वरिते क्षिप्रमित्यर्थे अमरः ।

स्रावक न० स्रावयति स्रु-णिच्-ण्वुल् । १क्षरिते शब्दच० [अभिस्रावे ।

२निःस्रावके त्रि० ।

स्रिभ हिंसे भ्वा० प० सक० सेट् उदित् क्ता वेट् । स्रिम्भति अस्रेभीत् ।

स्रिव शोषे अक० दिवा०प० गतौ सक० सेट् उदित् क्ता वेट् । स्रीव्यते अस्रेवीत् । [स्रुवत् ।

सु गतौ सक० अरणे अक० भ्वा० प० अनिट् । सुवति असुषाव ।

सुग्दारु न० यज्ञपात्राय दारु यस्य । विकङ्कतवृक्षे जटा० ।

सुघ्न पु०१देशभेदे । स उत्पत्तिस्थानत्वेनास्त्यस्याः अच् गौरा० ङीष् । २सर्जिकाक्षारे स्त्री हेमच० ।

सुच् चा) स्त्री सु-क्विप् चिट् च वा टाप् । वटपलाशतौ विकङ्कतकाष्ठजे बाहुमात्रे यज्ञपात्रभेदे शब्दच० । [स्त्री शब्दच०

सुत त्रि० सु-क्त । १क्षरिते जलादौ २गते च । ३छिन्नकुशपत्रां

सुप पुंस्त्री० सु-क । १खदिरकाष्ठमये छत्राकृतिके यज्ञपात्रभेदे यज्ञपात्रशब्दे दृश्यम् । २सप्तम्यान्तशब्दपूर्वायाञ्च स्त्री मेदि०

सुवाहृच्च पु० स्रुवायाः साधनं हृत्वः । विकङ्कतवृक्षे (बँइचि) अमरः ।

सू स्त्री सु-क्विप् नि० । १यज्ञपात्रभेदे २निर्झरे च हेमच० ।

सै शिक्षौ-भ्वा० पर० अक०-अनिट् । स्रायति अस्रासीत् ।

स्रोत न० स्रु-तन् । स्रोतसि वेगेन स्रतोजलनिःसरणे भरतः

स्रोतस् न० स्रु-तसि । १वेगेन स्रतो जलनिःसरणे अमरः । २रंतसि च छन्दसि स्रोताः । ३देहस्थच्छिद्रे च ।

स्रोतईश पु० ६त० । समुद्रे हेमच० ।

स्रोतस्वत् त्रि० स्रोतोऽस्त्यस्य मतुप् मस्य वः । १स्रोतोयुक्ते २नद्यां स्त्री अमरः ङीप् । [२स्रोतोयुक्ते त्रि० ।

स्रोतस्विनी स्रोतस्+अस्त्यर्थे विनि ङीप् । १नद्याम्

स्रोतोऽञ्जन न० स्रोतांसि यस्मान्नाडीतो जलसंज्ञकदोषवीरदेशे भवम् अञ्जनम् । सौवीरदेशजेऽञ्जने अमरः ।

"वल्मीकशिखराकारं भिन्नं नीलाञ्जनप्रभम् । दृष्टे च गौरकावर्णं श्रेष्ठं स्रोतोऽञ्जनञ्च तत्" राजनि० ।

"स्रोतोऽञ्जनं तत्र श्रेष्ठं विशुद्धं सिन्धुसम्भवम् । दृष्टेः कफूमलहरं दाहक्लेदरुजापहम् । अक्ष्णो रूपावहञ्चैव सद्यते भास्करातपौ । नेत्ररोगा न जायन्ते तस्मादञ्जनमाचरेत्" । "अञ्जनं यामुनञ्चापि कापोताञ्जनमित्यपि । तत्र स्रोतोऽञ्जनं कृष्णं सौवीरं स्रोतसोरितम् । स्रोतोऽञ्जनसमं ज्ञेयं सौवीरं नत्तु पाण्डुरम् । स्रोतोऽञ्जनं भवेत् स्निग्धं चक्षुष्यं कफपित्तजित् । रूक्षाम्लं लेखनं स्निग्धं श्लक्ष्णं विषापहम् । सिन्धुजन्यासृजन्तु गीतं सेवनीयं सदा बुधैः । स्रोतोऽञ्जनगुणाः सर्वे सौवीरेऽपि मता बुधैः । किन्तु द्वयोरञ्जनयोः श्रेष्ठं स्रोतोऽञ्जनं स्मृतम्" भावप्र० । [जटा०

स्रोतोवहा स्त्री स्रोतसा वहति वहति वह-अच् । नद्याम्

स्व न० स्वन–ड । १धने अमरः । २स्वात्मनि ३ज्ञातौ च पु० अमरः । ४स्वात्मीये त्रि० । स्वात्मनि स्वात्मीये चार्थेऽस्य सर्वनामता ।

स्वकम्मन पु० स्वेनैव परान्प्रयुज्यमान एव कम्यते कमि–युच् । वायौ शब्दर० । [सदा" गीता

स्वकर्म्मन् न० स्वस्य कर्म । स्वस्यौचिते कर्त्तव्ये "स्वकर्मनिरतः

स्वकीय त्रि० स्वस्येदम् छ कुक् च । स्वात्मीये । यत्र नित्यमेव कुक्, अकुक्युक्तप्रयोगस्तु अपाणिनीयः ।

स्वग सर्पणे भ्वा० प० सक०सेट् इदित् । स्वङ्गति अस्वङ्गीत् ।

स्वगत त्रि० स्वस्मिन् मनसि आत्मनि वा गतम् गम–क्त । १मनोगते २आत्मगते च । नाटकाभिनये प्रतिपाद्यपुरुषाश्रये इकभूमिस्थसामाजिकजनश्रवणयोग्ये वाक्ये न० । "सम्राव्यं स्वगतं मतम्" सा०द० ।

स्वगुप्ता स्त्री स्वेनैव गुप्ता । १भूकुष्माण्डयाम् शब्दर० । २स्वप्नालुलतायाञ्च राजनि० ।

स्वग्रह पुंस्त्री० स्वकृतं ग्रहं यस्य । १कलिकारवृक्षे जटा० ङीप् । २निजगृहे ३निजराशौ च ज्यो० ।

स्वच्छ त्रि० छुष् स्वच्छः प्रा० । १अतिनिर्मले कालुष्यरहिते २सत्तायां ३स्फटिके च पु० राजनि० । ४श्वेतदूर्व्वायाम् स्त्री राजनि० । ५विमलोपरसे न० हरीतक्यां त्रि० शब्दर० । ७शुक्ले च । [अमरः ।

स्वच्छन्द त्रि० स्वस्य छन्दोऽभिप्रायः स्वतन्त्रे यस्य । स्वाधीने

स्वच्छपत्त्र न० स्वच्छं पत्त्रं यस्य । अम्लके हेमच० ।

स्वच्छमणि पु० कर्म० । स्फाटिके मणौ राजनि० ।

स्वच्छबालुक न०स्वच्छा बालुकेव यत्र । विमलोपरसे राजनि०

स्वज न० स्वस्मात् देहात् आत्मनो वा जायते । १रुधिरे मेदि० २पुत्रे पु० ४कन्यायां स्त्री मेदि० । ५आत्मजाते त्रि० ।

स्वजन पु०स्वस्येव जनो जननमेककुले यस्य । १ज्ञातौ अमरः । हेत० । २आत्मसम्बन्धिलोके । [यति–ते असिस्वठत्–त ।

स्वठ गतौ संस्कारेऽसंस्कारे च भ्वा० उ० सक० सेट् । स्वठति

स्वतन्त्र त्रि० स्वस्य तन्त्रं वशीकारः सूत्रत्वे यस्य । १स्वाधीने अपराधीने अमरः । तत्त्वञ्च इतरव्यापारानधीनव्यापारवत्त्वम् । २कर्त्तरि च सहि समभिव्याहृतक्रियाकारकान्तरानधीनव्यापारवान् इति शाब्दिकाः "स्वतन्त्रः कर्त्ता" पा० कर्त्तृशब्दे १७१६ पृ० दृश्यम् ।

स्वतस् अव्य० स्व+तसिल् । आत्मतः इत्यर्थे ।

स्वता स्त्री स्वस्य स्वकीयस्य भावः तल् । स्वकीयत्वे "कामः स्वतां पश्यति" शङ्करलहरी ।

स्वतोग्राह्य न० स्वस्माद्यत्स्वामग्रीग्राह्यं ज्ञानप्रामाण्ये वेदान्तादिमते "प्रामाण्यं न स्वतोग्राह्यं संशयानुपपत्तितः" भाषा० उक्तेर्न तत् स्वतोग्राह्यमिति न्यायमतम् ।

स्वत्व न० स्वस्य भावः त्व । द्रव्याणां यथेष्टक्रयविक्रयादिक्रियात्व विनियोजके १धर्म्मभेदे २स्वामित्वे च, तच्च सम्बन्धभेदेन द्रव्यगतमात्मगतञ्च । स्वत्वपदार्थस्तु दायभा०टीकायां श्रीकृष्णतर्कालङ्कारेण निरूपितो यथा

"स्वत्वञ्च यथेष्टविनियोगार्हत्वेन शास्त्रतोधीतत्वमिति प्राचः । अतिरिक्तः पदार्थ इति शिरोमणिः । स्वामित्वञ्च तन्निरूपकत्वं निरूपकतया तदेव वा तच्च द्रव्यगतं गुणगतञ्च द्रव्यस्य दानादिश्रुतेः नीलं वा वस्त्रमुत्पद्यतेत्यादौ लौहित्यादिगुणविशिष्टपरिभाषिकनीलद्रव्योत्पत्तेश्च । वस्तुतस्तु आत्मसमवेतं स्वामित्वमतिरिक्तः पदार्थः विक्रयदानादीनां तत्साधकत्वे तज्जन्यत्वे च सम्बन्धबाधात् तदेव निरूपकतया स्वत्वव्यवहारहेतुः विषयतया ज्ञाततावत् । अतएव नियन्त्रादौ भाविन्यपि स्वत्वम् अन्यथा प्रतिमासं प्रतिवर्षं वा देयत्वेन प्रतिश्रुतस्य धान्यादिरूपस्य भावित्वेन तत्र तदुत्पत्त्यनुपपत्तेरिति चूडामणिसम्मतोलोलावतोरहस्यविदः समीचीनः पन्थाः ।

तच्च स्वत्वं लौकिकमिति मिता० व्यवस्थापितं यथा

"स्वत्वमेव तावन्निरूप्यते किं शास्त्रैकसमधिगम्यं स्वत्वमुत प्रमाणान्तरसमधिगम्यमिति । तत्र शास्त्रैकसमधिगम्यमिति तावदयुक्तं गौतमवचनात् । "स्वामी स्वक्रयक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्ध्वा क्षत्रियस्य विजितं निर्दिष्टं वैश्यशूद्रयोरिति" प्रमाणान्तरगम्ये स्वत्वे नेदं वचनम् । तथा स्मृत्यतिदेशे मनुः "योऽदत्तादायिनो हस्तात्किञ्चिदिच्छेत ब्राह्मणो धनम् । याजनाध्यापनेनापि यथा स्मृत्यैव तद्वयः" इत्यदत्तादायिनः शास्त्रात् याजनादिकरणेन द्रव्यमर्जयतां दण्डविधानमनुपपन्नं स्यात् स्वत्वस्य लौकिकत्वे । अपि च । लौकिकं चेत् स्वत्वं मम स्वमपहृतमनेनेति न ब्रूयात् अपहर्त्तुरेव स्वत्वादथान्यस्य स्वत्वेनापहृतमिति नापहर्त्तुः स्यम् । एवं तर्हि सुवर्णरजतादिस्वरूपवदस्य वा स्वमन्यस्य वा स्वमिति सम्बन्धो न स्यात् तस्माच्छास्त्रैकसमधिगम्यं स्वत्वमिति । अत्रोच्यते । लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वात् ब्रीह्यादिवत् । शास्त्रवनीयादीनां हि शास्त्रगम्यानां न लौकिकक्रियासाध-

नत्वमस्ति। नन्वाहवनीयादीनामपि पाकादिसाधनत्व मस्त्येव। नैतत्। न हि तत्राहवनीयादिरूपेण पाकादिसाधनत्वं किं तर्हि प्रत्यक्षादिपरिदृश्यमानान्यादिरूपेण। इह तु सुवर्णादिरूपेण न क्रयादिसाधनत्वमपि तु स्वत्वेनैव। न हि यस्य यत्स्वं न भवति तत्तस्य क्रयाद्यर्थक्रियां साधयति। अपि च प्रत्यन्तवासिनामप्यदृष्टशास्त्रव्यवहाराणां स्वत्वव्यवहारो दृश्यते क्रयविक्रयादिदर्शनात्। किञ्च। नियतोपायकं स्वत्वं लोकसिद्धमेवेति न्यायविदो मन्यन्ते। तथा हि लिपिशास्त्रे तृतीयवर्णके द्रव्यार्जननियमानां क्रत्वर्थत्वे स्वत्वमेव न स्यात् स्वत्वस्यालौकिकत्वादिति पूर्वपक्षाक्षमत्वमाशङ्क्य द्रव्यार्जनस्य प्रतिग्रहादिना स्वत्वसाधनत्वं लोकसिद्धमिति पूर्वपक्षः समर्थितो गुरुणा। नन्वेवं द्रव्यार्जनस्य क्रत्वर्थत्वे स्वमेव न भवतीति याग एव न संभवेत्। प्रलपितमिदङ्केनापि अर्जनं स्वं नापादयतीति विप्रतिषिद्धमिति वदता। तथा सिद्धान्तेऽपि स्वत्वस्य लौकिकत्वमङ्गीकृत्यैव विचारप्रयोजनमुक्तम्। अतो नियमातिक्रमः पुरुषस्य न क्रतोरिति। अस्य चार्थ एवं विदुषः। यदा द्रव्यार्जननियमानां क्रत्वर्थत्वं तदा नियमार्जितेनैव द्रव्येण क्रतुसिद्धिः। नियमातिक्रमार्जितेन द्रव्येण न क्रतुसिद्धिरिति न पुरुषस्य नियमातिक्रमदोषः पूर्वपक्षे। सिद्धान्ते तु अर्जननियमस्य पुरुषार्थत्वात्तदतिक्रमेणार्जितेनापि द्रव्येण क्रतुसिद्धिर्भवति। पुरुषस्यैव नियमातिक्रमाद्दोष इति नियमातिक्रमार्जितस्यापि स्वत्वमङ्गीकृतम् अन्यथा क्रतुसिद्ध्यभावात् न चैतावता चौर्यादिप्राप्तस्यापि स्वं स्यादिति मन्तव्यम् लोके तत्र स्वत्वप्रसिद्ध्यभावात् व्यवहारविसंवादाच्च। एवं प्रतिग्रहाद्युपायके स्वत्वे लौकिके स्थिते ब्राह्मणस्य प्रतिग्रहादय उपायाः। क्षत्रियस्य विजितादय उपायाः वैश्यस्य क्रयाद्यः शूद्रस्य शुश्रूषादय इत्यदृष्टार्था नियमाः। ऋक्थादयस्तु सर्वदाधारणाः "स्वामी ऋक्थक्रयसंविभागपरिग्रहाधिगमेष्वित्युक्ताः। तत्राप्रतिबन्धो दायो रिक्थम्। क्रयः प्रसिद्धः संविभागः समप्रतिबन्धो दायः। परिग्रहोऽनन्यपूर्वस्य जलसप्तमाष्टाङ्गः स्वीकारः। अधिगमो निध्यादेः प्राप्तिः। एतेषु निमित्तेषु सत्सु स्वामी भवति। ज्ञातेषु ज्ञायते स्वामी। ब्राह्मणस्याधिकं लब्धमिति ब्राह्मणस्य प्रतिग्रहादिनालब्धं तदधिकलब्धाधारणम्। क्षत्रियस्य विजितमित्यत्राधिकमित्यनुवर्तते क्षत्रियस्य विजयदण्डादिलब्धमसाधारणम्। निर्दिष्टं वैश्यशूद्रयोरिति। अत्राप्यधिकमित्यनुवर्तते वैश्यस्य कृषिगोरक्षादिलब्धमनिर्दिष्टं तदसाधारणं शूद्रस्य द्विजशुश्रूषादिना श्रुतिरूपेण यल्लब्धं तदसाधारणमेवमनुलोमजानां प्रतिलोमजानां च लोकप्रसिद्धेषु स्वत्वहेतुषु यद्यदसाधारणमुक्तम् "स्वतानामनुसारेण"इत्यादि तत्तत् सर्वं निर्दिष्टशब्देनोच्यते सर्वस्यापि श्रुतिरूपत्वात् "निर्देशो श्रुतिभोगयोरिति" विकाण्डोऽरणात्। तत्तदसाधारणं वेदितव्यम्। यदपि पत्नीदुहितरश्चेत्यादिकारणम्। तत्रापि स्वामिसम्बन्धितया बन्धुषु दायविभागितया प्राप्तेषु लोकप्रसिद्धेऽपि स्वत्वे व्यामोहनिवृत्त्यर्थं स्मरणमिति सर्वमनवद्यम्"।

तच्च स्वत्वं जन्मनैवेति मिताक्षरादयः। पित्रादिमरणादिनैवेति दायभागादयः। तत्रापि सकृद्दायद्रव्ये स्वत्वमिति मिताक्षरादयः। प्रदेयभेदे इति दायभागादयः। तत्तदन्यत्र विस्तरो द्रष्टव्यः। [तुद् अदनम्। २सुभक्षणे हेमच०।

स्वदन न०स्वद-भावे ल्युट्। १आस्वादे २भोजने च राजनि०।

स्वधर्म्म पु० स्वस्य वेदादिविहितो धर्मः। स्वानुरूपे वेदाद्युक्ते आचारादिधर्मे। "यो यस्य विहितो धर्मः स तच्छ्रोत्रियः प्रकीर्त्तितः। तस्मात् स्वधर्मं कुर्याच्च द्विजो नित्यमनापदि" नरसिंहपु०। "श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः" गीता।

स्वधा अव्य० स्वद-आ पृषो० दस्य धः। १पितृदेवोद्देशेन हविस्त्यागे अमरः। स्वेन धीयते धे-क आप्। २मातृकामधेनौ स्त्री "नमःस्वधायै स्वाहायै" इति पितृगाथा। "निपातस्वधायोगे त्यागोद्देश्यप्रदात्यर्थे षष्ठ्यर्थे पितृभ्यः स्वधेत्यादौ पितृप्रदेशप्रकल्प्यत्याग इति बोधः। तदर्थस्य विषयतया अत्र दायन्यायी तस्य निपातत्वेन तदर्थस्य भेदान्वयस्य व्युत्पत्तिसिद्धत्वात्। इदमन्नं पित्रे स्वधेत्यादौ पितृप्रदेशकत्यागविषय इदमन्नमित्यादि बोधः। मातृभेदस्वधा च तत्कन्याब्रह्मणो मानसी कन्या च पितृपत्नी। तन्नामोच्चारणे पित्रादिश्राद्धकरणरूपोऽस्यावरो ब्रह्मणा दत्तः। "ब्रह्मा च मानसीं कन्यां ससृजे तां मनोहराम्" "स्वधाभिधानां सुदतीं लक्ष्मीलक्षणसंयुताम्" "पितृभ्यस्तां ददौ ब्रह्मा तुष्टेभ्यस्तुष्टरूपिणीम्। ब्राह्मणानामुपदेशं चकार लोकनायकः। स्वधान्तं मन्त्रमुच्चार्य पितृभ्यो देहि चेति च। क्रमेण तेन विप्राश्च पित्रे दानं ददुः पुरा" ब्रह्मवै० प्र०

स्वधानामकस्वधाशब्दस्यापि पितृदाने विनियोग इति बोध्यम् ।

स्वधाप्रिय पु० स्वधायिनां प्रियः शाक० । १क्षणतिले शब्दर० २स्वधोपलक्षितश्राद्धादिप्रिये पित्रादौ च । स्वधा प्रिया यस्य । ३पितृलोके स्वधाशब्दे मूलं द्रष्टव्यम् । [गणे २देवे च

स्वधाभुज् स्वधेत्यनेन त्यक्तव्यं भुङ्क्ते भुज-क्विप् । १पितृ-

स्वधि(ती)ति स्त्री स्वेन धीयते धा-क्तिच् वा ङीप् । कुठारे परश्वधे अमरः पृषो० । स्वधितिरप्यत्र ।

स्वन शब्दे भ्वा० पर० अक० सेट् । स्वनति अस्वनीत् अस्वानीत् । फणा०स्वेनतुः सस्वनतुः । अयं भूषणे वा चटा० (स्वा)स्वनयति । [स्वनत्-त ।

स्वन ध्वाने अद० चु० पभ० अक० सेट् । स्वनयति-ते अस-

स्वन पु० स्वन+अप् । शब्दे अमरः ।

स्वनि पु० स्वन+इन् । शब्दे हेमच० ।

स्वनित त्रि० स्वन-कर्त्तरि-क्त । १शब्दिते अमरः । भावे क्त । २शब्दे ३मेघगर्जिते च न० हेमच० ।

स्वनिताह्वय पु० स्वनितमाह्वयते आ+ह्वे श । तण्डुलीय-शाके राजनि० । [स्त्रियां ङीष् ।

स्वनीतमाह पुंस्त्री० स्वने उत्तमाहौ यस्य । गरुडके शब्दर०

स्वपन न० स्वप-ल्युट् । १शयने २निद्रायाञ्च शब्दर० ।

स्वपिच्छा स्त्री स्वेव पिच्छः पिच्छाकारोऽस्यस्याः अच् । पिच्छवर्ज्यायाम् राजनि० ।

स्वप्न पु० स्वप-भावे नङ् । १निद्रायाम अमरः २शयने ३मानसिकज्ञानभेदे ४दर्शने च मेदि० आर्द्धे न० । स्वप्नदृष्टपदार्थस्य मायामात्रत्वं शा० सू० भाष्ययोर्व्यवस्थापितं यथा "सन्ध्ये सृष्टिराह हि" सू० ।

"अतिक्रान्ते पादे पञ्चाग्निविद्यासुद्दिश्य जीवस्य संसारगतिप्रभेदः प्रपञ्चितः, इदानीं तस्यैवावस्थाभेदः प्रपञ्च्यते । इदमामनन्ति "स यत्र प्रस्वपिति" इत्युपक्रम्य "न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते" इत्यादि । तत्र संशयः किं प्रबोध इव स्वप्नेऽपि पारमार्थिकी सृष्टिराहोस्विन्मायामयीति । तत्र तावत् प्रतिपद्यते । सन्ध्ये सृष्टिरिति । सन्ध्यमिति स्वप्नस्थानमाचष्टे वेदे प्रयोगदर्शनात् "सन्ध्यं तृतीयं स्वप्नस्थानम्" इति । द्वयोर्जाग्रत्स्वप्नयोः प्रबोध सन्ध्यस्थानयोर्वा सन्धौ भवतीति सन्ध्यं तस्मिन् सन्ध्ये स्थाने तथारूपैव सृष्टिर्भवितुमर्हति । कुतः, यतः प्रमाणभूता श्रुतिरेवमाह "अथ रथान् रथयोगान् पथः सृजते" इत्यादि । स हि कर्त्तेति चोपसंहारादेवमेवावगच्छते" भा० । "निर्मातारं चैके पुत्रादयश्च" सू० "अपि चैके शाखिनोऽस्मिन्नेव सन्ध्ये स्थाने कामानां निर्मातारमात्मानमामनन्ति "य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः" इति । पुत्रादयश्च तत्र कामा अभिप्रेयन्ते काम्यन्त इति । ननु कामशब्देनेच्छाविशेषा एवोच्येरन्, न, "शतायुषः पुत्रपौत्रान् वृणीष्व" इति प्रकृत्य "अन्ते कामानान्त्सा कामभाजं करोमि" इति प्रकृतेषु तत्र पुत्रादिषु कामशब्दस्य प्रयुक्तत्वात् । प्राज्ञं चैनं निर्मातारं प्रकरणवाक्यशेषाभ्यां प्रतीमः । प्राज्ञस्य ह्येतं प्रकरणम् "अन्यत्र धर्मादन्यत्राधर्मात्" इत्यादि । तद्विषय एव च वाक्यशेषोऽपि-"तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते । तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन" । इति प्राज्ञकर्तृका च सृष्टिरुच्यरूपा समधिगता यथा जागरितान्यया तथा स्वप्नान्ययापि सृष्टिर्भवितुमर्हति । तथा च श्रुतिः "अथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत् पश्यति तानि सुप्तः" इति स्वप्नजागरितयोः समानन्यायतां आवयति । तस्मात् तथारूपैव सन्ध्ये सृष्टिरित्येवं प्राप्ते प्रत्याह । "मायामात्रन्तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्" सू० । "तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति यदुक्तं सन्ध्ये सृष्टिः पारमार्थिकीति । मायामय्येव सन्ध्ये सृष्टिर्न परमार्थतोऽस्ति । कुतः कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात् । न हि कात्स्न्र्येन परमार्थवस्तुधर्मैरभिव्यक्तस्वरूपः स्वप्नः । किं पुनरत्र कात्स्न्र्यमभिप्रेतं, देशकालनिमित्तसम्बन्धिरबाधश्च । न हि परमार्थवस्तुविषयाणि देशकालनिमित्तानि अबाधश्च स्वप्ने रथादीनामुचितो देशः सम्भवति, न तावत् संहते देहदेशे रथादयोऽवकाशं लभेरन् । स्यादेतत्, बहिर्देहात् स्वप्नं दृश्यति देशान्तरितद्रव्यग्रहणात् । दूरं दैहात् स्वप्नं दृश्यति देशान्तरितद्रव्यग्रहणात् । दूरं यति च स्मृतिः बहिर्देहात् स्वप्नं "बहिःकुलायादयति च स्मृतिः बहिर्देहात् स्वप्नं "बहिःकुलायादेतत्वरित्वा स हि यते यत्रकामम्" इति । स्थितिगतिप्रत्ययभेदश्च नानिरुक्तान्ते जन्तौ सामञ्जस्यमनुपपन्नमिति । नेत्युच्यते, न हि सुप्तस्य जन्तोः स्वप्नान्तेन योजनशतान्तरितं देशं पश्येत् विपश्येत्तश्च ततः सामर्थ्यं अस्य व्यते । कश्चिच्च प्रत्यागमनसमर्थजनितं स्वप्नं आवयति "कुरुष्वेह मय्यायां मयानो निद्रयाभिभूतः स्वप्ने पञ्चाज्ञानभिमतस्थाञ्जनान् प्रतिबुद्धस्य" इति । ईक्षा-

क्षेदपेयात् पञ्चालेष्वेव प्रतिबुध्येत तानसावभिगत इति कुरुष्वेव तु प्रतिबुध्यते। येन चायं देहेन देशान्तरमश्नुवानो मन्यते तमन्ये पार्श्वस्थाः शयनदेश एव पश्यन्ति। यथाभूतानि चायं देशान्तराणि स्वप्ने पश्यति न तानि तथाभूतान्येव भवन्ति, परिधावंश्चेत् पश्येच्छाग्रद्वस्तुभूतमर्थमाकलयेत्। दर्शयति च श्रुतिः "अन्तरेव देहे स्वप्नं स यत्रैतत् स्वप्न्याचरति" इत्युपक्रम्य "स्वे शरीरे यथाकामं परिवर्त्तते" इति। अतश्च श्रुत्युपपत्तिविरोधाद्बर्हिःकुलायश्रुतिर्गौणी व्याख्यातव्या बहिरिव कुलायादसतश्चरित्वात्, इति यो हि यस्मिन्नपि शरीरे न तेन प्रयोजनं करोति स बहिरिव शरीराद्भवति इति। स्थितिगतिप्रत्ययभेदोऽप्येवं सति विप्रलम्भ एव द्रष्टव्यः, कालविसंवादोऽपि च स्वप्ने भवति रजन्यां सुप्तो वासरं भारते वर्षे मन्यते तथा मुहूर्तमात्रप्रवृत्तिनि स्वप्ने कदाचिद् बहून् वर्षपूगानतिवाहयति। निमित्तान्यपि च स्वप्ने न बुद्धये कर्मणे वोचितानि विद्यन्ते. अरण्योपसंहाराद्धि नास्य रथादिग्रहणाय चक्षुरादीनि सन्ति, रथादिनिर्वर्त्तनेऽपि कुतोऽस्य निमेषमात्रेण सामर्थ्यं दारुणि वा। बाध्यन्ते चैते रथादयः स्वप्नदृष्टाः प्रबोधे, स्वप्न एव चैते मुहूर्तबाधा भवन्ति व्याप्तयोर्व्यभिचारदर्शनात्, रथोऽयमिति हि कदाचित् स्वप्ने निर्द्धारितः क्षणेन मनुष्यः सम्पद्यते, मनुष्योऽयमिति वा निर्द्धारितः क्षणेन द्रुमः। सदृक्षाभावं रथादीनां स्वप्ने आचष्टे शास्त्रम् "न तत्र रथा न रथयोगा न पन्थानो भवन्ति" इत्यादि। तस्मान्मायामात्रं स्वप्नदर्शनम्"भा०। "दहरुत्तरेभ्यः" सू०। "मायामात्रत्वात् तर्हि न कश्चित् स्वप्ने परमार्थगन्ध इति, नेत्युच्यते। दहरुत्तर हि स्वप्नो भवति भविष्यतोः साध्वसाधुनोः। तथा हि श्रूयते "इष्टा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने" इत्येवमादिभिः स्वप्नैरचिरजीवित्वभावेदात इति आवेदयति। आचक्षते च स्वप्नाध्यायविदः "कुञ्जरारोहणादीनि स्वप्ने धन्यानि खरयानादीन्यधन्यानि" इति। सन्त्वदेवतादृव्यविशेषनिमित्तानि केचित् स्वप्नाः सत्यार्थगन्धिनो भवन्तीति मन्यन्ते। तत्रापि भवतु नाम सत्यमानस्य वस्तुनः सत्यत्वं, दहरुत्तरस्य तु स्वोदर्शनादेर्भक्त्यैव वैतथ्यं बाध्यमानत्वादित्यभिप्रायः। तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वम्। यदुक्तमाह हीति तदेवं सति भाक्तं व्याख्यातव्यं यथा लाक्षणं गवादीनुद्दहतीति निमित्तमात्रत्वादेवमुच्यते न तु प्रत्यक्षमेव लाक्षणं गवादीनुद्दहति, एवं निमित्तमात्रत्वात् सुप्तो रथादीन् सृजते स हि कर्त्तेति चोच्यते न तु प्रत्यक्षमेव सुप्तो रथादीन् सृजति। निमित्तवन्त्वस्य रथादिप्रतिभाननिमित्तोदयादर्शनात् तन्निमित्तभूतयोः सुकृतदुष्कृतयोः कर्त्तृत्वेनेति पक्षद्वयम्। अपि च जागरिते विषयेन्द्रियसंयोगादादित्यादिज्योतिर्व्यतिरेकात्मनः स्वयं ज्योतिष्ट्वं द्रष्टुर्दुर्विवेचनमिति तद्विवेचनाय स्वप्न उपन्यस्तः, तत्र यदि रथादिसृष्टिवचनं श्रुत्या नीयेत स्वयं ज्योतिष्ट्वं न निर्णीतं स्यात्। तस्मादृथाद्यभाववचनश्रुत्या रथादिसृष्टिवचनं भाक्तमिति व्याख्येयम्। एतेन निर्माणश्रवणं व्याख्यातम्। यदप्युक्तम् "प्राज्ञमेनं निर्मातारमामनन्ति" इति, तदप्यसत् श्रुत्यन्तरे स्वयं विश्लिष्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति" इति जीवव्यापारश्रवणात्। इहापि च "य एष सुप्तेषु जागर्त्ति" इति प्रसिद्धानुवादाज्जीव एवायं कामानां निर्माता सङ्कीर्त्यते, तस्य तु वाक्यशेषेण "तदेव शुक्रन्दद्ब्रह्मेति" जीवभावं व्यावर्त्य ब्रह्मभाव उपदिश्यते, "तत्त्वमसि" इत्यादिवदिति न ब्रह्मप्रकरणत्वं विरुध्यते। न चास्माभिः स्वप्नेऽपि प्राज्ञव्यापारः प्रतिषिध्यते, तस्य सर्वेश्वरत्वात् सर्वस्रष्टृत्वस्यासुधिष्ठातृत्वोपपत्तेः। पारमार्थिकस्तु नायं सन्न्यास्याश्रयः सर्गो वियदादिसर्गवदित्येतावत् प्रतिपाद्यते। न च वियदादिसर्गस्यात्यन्तिकं सत्यत्वमस्ति, प्रतिपादितं हि "तदनन्यत्वमारम्भणशब्दादिभ्यः, इत्यत्र समस्तस्य मायामात्रत्वम्। प्राक् च ब्रह्मात्मदर्शनात् वियदादिप्रपञ्चो व्यवस्थितरूपो भवति, सन्न्यास्याश्रयस्तु प्रपञ्चः प्रतिदिनं बाध्यत इत्यतो वैकल्पिकं सन्न्यस्य मायामात्रत्वसृष्टितन्त्रं भा०। "परामिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" सू०। "अथापि स्यात् परस्यैव तावदात्मनोऽंशो जीवोऽग्नेरिव विस्फुलिङ्गः। तत्रैवं सति यथाऽग्निविस्फुलिङ्गयोः समाने दहनप्रकाशनशक्ती भवतः एवं जीवेश्वरयोरपि ज्ञानैश्वर्यशक्ती, ततश्च जीवस्यैश्वर्यवशात् सार्ष्टिकल्पिकी स्वप्ने रथादिसृष्टिर्भविष्यतीति, चत्युच्यते। सत्यपि जीवेश्वरयोरंशांशिभावे प्रत्यक्षमेव जीवेश्वरविपरीतधर्मत्वं, किं पुनर्जी-

ब्रह्मेश्वरसमानधर्मत्वं नाप्नोति न वा नाप्नोति, विद्यमानमपि तु तत् तिरोहितं, अविद्यादिव्यवधानात्। तत् पुनस्तिरोहितं सत् परमेश्वरमभिध्यायतो यतमानस्य जन्तोर्विधूतध्वान्तस्य तिमिरतिरस्कृतस्येव दृक्शक्तिरौषधवीर्यादिवेश्वरप्रसादात् संसिद्धस्य कस्यचिदेवाविर्भवति न स्वभावत एव सर्वेषां जन्तूनां, कुतस्ततो हि ईश्वराद्धेतोरस्य जीवस्य बन्धमोक्षौ भवतः, ईश्वरस्य स्वरूपापरिज्ञानाद् बन्धः तत्स्वरूपपरिज्ञानात्तु मोक्षः। तथा च स्मृतिः "ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः"। तस्याभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः" इत्येवमाद्या"भा०। "देहयोगाद्वा सोऽपि"सू०। "कस्मात् पुनर्जीवः परमात्मांश एव सन् तिरस्कृतज्ञानैश्वर्यो भवति युक्तन्तु ज्ञानैश्वर्ययोरतिरस्कृतत्वं विस्फुलिङ्गस्येव दहनप्रकाशयोरिति। उच्यते सत्यमेवैतत्, सोऽपि तु जीवस्य ज्ञानैश्वर्यतिरोभावो देहयोगाद्देहेन्द्रियमनोबुद्धिविषयवेदनादियोगाद्भवति। अस्ति चात्रोपमा यथाग्नेर्दहनप्रकाशनसमन्वितस्याप्यग्नेर्दहनप्रकाशने तिरोभवतः, यथा वा भस्मनाच्छन्नस्य, एवमविद्याप्रत्युपस्थापितनानारूपकृतदेहाद्युपाधियोगात् तदविवेकब्रह्मकृतो जीवस्य ज्ञानैश्वर्यतिरोभावः। वाशब्दो जीवेश्वरयोरन्यत्वाशङ्काव्यावृत्त्यर्थः। मन्वन्य एव जीव ईश्वरादस्तु तिरस्कृतज्ञानैश्वर्यत्वात् किं देहयोगकल्पनया। नेत्युच्यते, न ह्यन्यत्वं जीवस्येश्वरादुपपद्यते "सेयं देवतैक्षत" इत्युपक्रम्य "अनेन जीवेनात्मनानुप्रविश्य" इत्यात्मशब्देन जीवस्य परामर्शात्। "तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इति च जीवस्योपदिशतीश्वरात्मत्वम्, अतोऽनन्य एवेश्वरात् जीवः सन् देहयोगात् तिरोहितज्ञानैश्वर्यो भवति, अतश्च न साङ्कल्पिको जीवस्य स्वप्ने रथादिसृष्टिसिद्धिर्घटते। यदि च साङ्कल्पिकी स्वप्ने सृष्टिसिद्धिः स्यात् नैवानिष्टं कश्चित् स्वप्नं पश्येत्। न हि कश्चिदनिष्टं सङ्कल्पयते। यत् पुनरुक्तं जागरितदेशश्रुतिः स्वप्नस्य सत्यत्वं ख्यापयतीति न तदस्यावचनं सत्यत्वाभिप्रायं स्वयंज्योतिष्ट्वविरोधात्, श्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वात्, जागरितप्रभववासनानिमित्तत्वात् तु स्वप्नस्य तत्तुल्यनिर्भासत्वाभिप्रायं तत्। तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वम्"।

स्वप्नभेदस्य शुभाशुभसूचकत्वं नानापुराणेषूक्तं तत्र हि॰ मात्स्ये मत्स्यपुराणे २४२ अध्याये उक्तमत्र प्रदर्श्यते यथा "इदानीं कथयिष्यामि निमित्तं स्वप्नदर्शने। नाभिं विनान्यगात्रेषु हृष्टत्वमसुखावहः। चूर्णनं मूर्ध्नि कांस्यानां खड्गेन नग्नता तथा। अजिनाम्बरधारित्वमभ्यङ्गः पङ्कदिग्धता। उच्चात् प्रपतनञ्चैव दोलारोहणमेव च। अञ्जनं पक्वलोहानां क्षयाणामपि स्मरणम्। रक्तपुष्पद्रुमाणाञ्च मण्डलस्य तथैव च। वराहर्क्षखरोष्ट्राणां तथा च रोहणक्रिया। भक्षणं पक्वमांसानां तैलस्य क्षुमरस्य च। नर्त्तनं हसनञ्चैव विवाहो गीतमेव च। तन्त्रीवाद्यविभिन्नानां वाद्यानामभिवादनम्। स्रोतोऽवगाहगमनं स्नानं गोमयवारिणा। पङ्कोदकेन च तथा मही तोयेन चाप्लुत। मातुः प्रवेशो जठरे चितारोहणमेव च। शक्रध्वजाभिपतनं पतनं शशिसूर्ययोः। दिव्यान्तरिक्षभौमानामुत्पातानाञ्च दर्शनम्। देवद्विजातिभूपालगुरूणां क्रोध एव च। आलिङ्गनं कुमारीणां पुरुषाणाञ्च मैथुनम्। हानिश्चैव स्वगात्राणां विरेकक्वमनक्रिया। दक्षिणाधाभिगमनं व्याधिनाभिभवस्तथा। फलापहानिश्च तथा पुष्पहानिस्तथैव च। गृहाणाञ्चैव पातश्च गृहसम्मार्जनन्तथा। क्रीड़ा पिशाचक्रव्यादवानरैर्नरैरपि। पराभिभवश्चैव तस्माच्च व्यसनोद्भवः। काषायवस्त्रधारित्वं तद्वत् स्त्रीक्रीड़नन्तथा। स्नेहपानावगाहौ च रक्तमाल्यानुलेपनम्। एवमादीनि चान्यानि दुःस्वप्नानि विनिर्दिशेत्। एषां सङ्कथनं धन्यं भूयः प्रस्वपनं तथा। कलुषस्नानं तिलैर्होमो ब्राह्मणानाञ्च पूजनम्। स्तुतिश्च वासुदेवस्य तथा तस्यैव पूजनम्। नागेन्द्रमोक्षश्रवणं ज्ञेयं दुःस्वप्ननाशनम्। स्वप्नेषु प्रथमे यामे संवत्सरविपाकिनः। षड्भिर्मासैर्द्वितीये तु त्रिभिर्मासैस्तृतीयके। चतुर्थे मासमात्रेण पञ्चमे नात्र संशयः। अरुणोदयवेलायां दशाहेन फलं भवेत्। एकस्यां यदि वा रात्रौ शुभं वा यदि वा शुभम्। पश्चाद् दृष्टेषु यस्तत्र तस्य पाकं विनिर्दिशेत्। तस्माच्छोभनके स्वप्ने पश्चात् स्वप्नं न पश्यति। शैलप्रासादनागस्कन्धारोहणं हितम्। द्रुमाणां श्वेतपुष्पाणां गमने च तथा द्विज!। द्रुमतृणोद्भवो नाभौ तथैव वल्लवाकृता। तथैव वल्लरीवित्वं फलितोद्भव एव च। सुशुक्लमाल्यधारित्वं सुशुक्लाम्बरधारिता। चन्द्रार्कतारयग्रहणं परिमार्जनमेव च। शक्रध्वजालिङ्गनञ्च तद्वच्छायक्रिया तथा। भूम्यरुहीनां भक्षणं प्रलम्बाच्च

वधक्रिया। जयो विवादे द्यूते च संग्रामे च तथा द्विज !। भक्षणञ्चार्द्रमांसानां मत्स्यानां पायसस्य च। दर्शनं रुधिरस्यापि स्नानं वा रुधिरेण च। सुराऽरुधिरमद्यानां पानं क्षीरस्य चाथ वा। अन्धैर्वा वेष्टनं भूमौ निर्मलं गमनं तथा। दुःखेन दोहनं शस्तं महिषीणां तथा गवाम्। सिंहीनां हस्तिनीनाञ्च वडवानां तथैव च। प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा शुभः। अम्भसा त्वभिषेकस्तु गवां शृङ्गाम्बितेन वा। चन्द्राद्रु भवनं वा राजन् ! श्रेयो राज्यप्रदो हि सः। राज्याभिषेकश्च तथाच्छेदनं शिरसस्तथा। मरणं वह्निदाहश्च वह्निदाहो गृहादिषु। लब्धिश्च राज्यलिङ्गानां तन्त्रीवाद्याभिवादनम्। तथोष्ट्राणां तरणं तथा विषमजङ्घनम्। हस्तिनीवडवानाञ्च गवाञ्च प्रसवो गृहे। आरोहणमश्वानां रोदनञ्च तथाशुभम्। वरस्त्रीणां तथालाभस्तथालिङ्गनमेव च। निगडैर्बन्धनं धन्यं तथा विष्ठानुलेपनम्। जीवतां भूमिपालानां सुहृदामपि दर्शनम्। दर्शनं देवतानाञ्च विमलानां तथात्मनाम्। शुभान्येतानि नरस्तु दृष्ट्वा प्राप्नोत्यचिरादु ध्रुवमर्थलाभम्। स्वप्नानि वै धर्मरतां वरिष्ठ ! व्याधेर्विमोक्षञ्च तथातुरोऽपि" आर्द्रं नः।

स्वप्नकृत् न० स्वप्नं निद्रां करोति कृ-क्विप्। (धुस्तूरे) शाके शब्दच०।

स्वप्नज त्रि० स्वप्न-नञिङ्। शयनशीले अमरः।

स्वभाव पु० स्वस्य भावः। १निसर्गे अजन्ये स्वतःसिद्धे भावे च अमरः। "बह्निर्हेतनमेघो तु स्वभावोऽग्नौ प्रकीर्त्तितः। निसर्गस्य स्वभावस्य इत्येष भवति द्विधा। निसर्गः सहज्यासजन्यः संस्कार उच्यते। अजन्यस्तु स्वः सिद्धः स्वरूपो भाव उच्यते" उज्ज्वलदः।

स्वभावोक्ति स्त्री स्वभावस्योक्तिरत्र। १अर्थालङ्कारभेदे अलङ्कारशब्दे ४०८ पृ० दृश्यम् ६त०। २स्वभावस्य कथने।

स्वभू पु० स्वेनैव एधति भू-क्विप्। १ब्रह्मणि मेदि० २विष्णौ अमरः। ३शिवे ४ईश्वरे ५कामे च।

स्वयंवर पु० स्वयमात्मना वरो वरणम्। कन्ययात्मनैव स्वपतेर्वरणे "सदसि स्वयंवरः" नैष०। स्वयं वृणुते पतिम्। वृ-अच्। आत्मनैव पतिवरणकर्त्र्यां २कन्यकायां स्त्री।

स्वयंहारिका स्त्री ब्रह्मणो मानसपुत्रस्य दुःसहस्य निमांश्यां भार्य्यायामुत्पन्ने कन्याभेदे मार्कण्डेयपु०। तत्कन्याश्चाष्टौ नियोजिकादयः तासां कर्माणि तत्रोक्तानि तत्र "एतासां कर्म वक्ष्यामि दृष्टप्रसवनञ्च यत्" इत्युपक्रमे "धान्यं क्षालात् गृहात् गोष्ठात् पयःसर्पिस्तथा वरा। सद्यस्तिमृद्विवृद्धयमपहन्ति च कन्यका। या स्वयंहारिकेत्युक्ता सदालङ्कारभूषिता" इति तद्धाः कर्मोक्तम्।

स्वयङ्कृत पु० स्वयमात्मना कृतः। १कृत्रिमे पुत्रे "माता पितृविहीनस्तु कृत्रिमः स्यात् स्वयंकृता सुतः। २आत्मकृते त्रि०। "पूर्वजुष्टः स्वयंकृतः" (पुरोहितः) स्मृतिः।

स्वयङ्गुप्ता स्त्री स्वयमात्मनैव गुप्ता। शूकशिम्बयाम् शब्दच०।

स्वयन्दत्त पु० स्वयमात्मनैव न तु पितृमातृभ्यां दत्तः उपनतः दत्तात्मदे पुत्रभेदे "दत्तात्मा तु स्वयन्दत्तः" याज्ञ०। "दत्तात्मा तु पुत्रो मातापितृविहीनस्ताभ्यां विसृष्टो वा तवाहं पुत्रो भवामीति स्वयंदत्त उपनतः" मिता०।

स्वयम् अव्य० स्व+अय-असुन्। आत्मनेत्यर्थे अमरः।

स्वयम्भु पु० स्वयम्+भू-डु। ब्रह्मणि हिरूप०। [राजनि०।

स्वयम्भुवा पु० स्वयम्भवति भू-मूलवि० क। भूचम्पकवृक्षे रत्नमा०।

स्वयम्भू पु० स्वयं भवति भू-क्विप्। १चतुर्मुखे ब्रह्मणि अमरः। २कुबेरे च। ३काले शब्दर० ४कामदेवे ५विष्णौ ६शिवे च। ७मार्कण्डेयपुराणोक्तायां दक्षिकन्यायां राजनि०। ८जिनभेदे हेमच०। १०परमेश्वरे "ततः स्वयम्भूर्भगवान्" मनुः। [असस्वरत्-न।

स्वर आक्षेपे भ्वा० चुरा० उभ० सक० सेट्। स्वरयति-ते

स्वर अव्य० स्व्-विच्। १स्वर्गे अमरः "यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम्" इत्युक्ते दुःखासंभिन्ने २सुखसन्ताने ३परलोके ४आकाशे ५शोभने च शब्दच०। दुःखासंभिन्नत्वं च स्वावच्छेदकशरीरावच्छिन्नत्वं तेन दुःखासमानकालीने सुखे नातिव्याप्तिः।

स्वर पु० स्वर-अच् स्व्-अप् वा। १उदात्तानुदात्तस्वरितरूपे वर्णोच्चारणप्रयत्नभेदे ताद्दशस्वरवत्त्वाच्च २व्यञ्जनभिन्नवर्णेषु अकारादिषु शिक्षा। तन्त्रोक्ते ३प्राणादिवायोष्ठौष्ठ्यादिप्रयोगभेदे ४काकादिकृते वर्णोच्चारणध्वनिविशेषे ५निषादादिषु तन्त्रोक्तकण्ठोत्थेषु गानजध्वनिषु च अमरः।

"उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः" शिक्षा० अकारादीनां स्वयंराजमानत्वात् स्वरत्वाच्च स्वरशब्दाभिधेयता, "अचः स्वयं विराजन्ते हलस्तु परगामिनः" इत्युक्तेः "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः। ह्रस्वो दीर्घः प्लुतश्चेति कालतो नियता अपि" शिक्षोक्तेश्च। निषादादिस्वराणां प्राणसेवरत्वमुक्त्वा नारदेनोक्तो यथा "ब्रह्मजं रौति मयूरो हि ऋषो नर्दति चर्षभम्। अजा

विरौति गान्धारं क्रौञ्चो नर्दति मध्यमम्। पुष्पसाधारणे काले कोकिलो रौति पञ्चमम्। अश्वस्तु धैवतं रौति निषादं रौति कुञ्जरः" इति। "अश्वस्तु धैवतं सोऽपि सप्तः पञ्चमसंज्ञकम्। निषादन्तु गजो गर्जत्युन्दोऽसौ सपञ्चमम्" इति। भरतोऽप्याह "षड्जञ्च पञ्चमञ्चैति मयूरो नदति द्विधा। अश्वाद्या धैवतादीश्च प्राङ्मन्द्राश्च पञ्चमम्" इति। निषादादिशब्दनिरुक्तिश्च "निषीदन्ति स्वरा अस्मिन्निषादस्तेन हेतुना। अशेषसन्विविधयं स हि व्याप्यावतिष्ठते"। "वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः। नदद्वृषभवद् यस्मात्तेनैष ऋषभः स्मृतः" "वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः। नानागन्धवहः पुष्टो गान्धारस्तेन हेतुना। "नासां कण्ठमुरस्तालुजिह्वां दन्तांश्च संस्पृशन्। षड्भ्यः संजायते यस्मात्तस्मात् षड्ज इति स्मृतः"। "तद्वदेवोत्थितो वायुरुरःकण्ठसमाहतः। नाभिप्राप्तो मंद्रनादो मध्यमस्तेन स स्मृतः"। "अभिसन्धयते यस्मात् स्वरांस्तेनैष धैवतः। स तु तावत् प्रधानत्वात् ललाटे व्यवतिष्ठते। "वायुः समुद्गतो नाभेरुरोहृत्कण्ठमूर्द्धसु। विचरन् पञ्चमस्थानप्राप्तत्वा पञ्चम उच्यते"। "स स्वरो यः श्रुतिस्थाने स्वरन् हृदयरञ्जकः। षड्ज ऋषभगान्धारा मध्यमः पञ्चमस्तथा। धैवतश्च निषादश्च स्वराः सप्त प्रकीर्त्तिताः" भरतः।

बालादिस्वराश्च चक्रशब्दे २८११ पृ० दृश्याः।

स्वरघ्न पुं० स्वरं हन्ति हन-क। गलरोगभेदे "अष्टादशगलरोगोपक्रमे" "यस्त्यस्यमानः श्वसिति प्रसक्तं भिन्नस्वरः शुष्कविसृष्टकण्ठः। कफोपदुष्टेष्वनिलायनेषु ज्ञेयः स्वरोघः श्वसनात् स्वरघ्नः"। त्यस्यमानः तमः प्रश्नन् शुष्को विसृष्टोऽस्वाधीनकण्ठो यस्य सः अस्वाधीनता भक्तं गिलितुमशक्यत्वात् अनिलायनेषु वातवर्त्मसु श्वसनाद्धानात्" भावप्र०

स्वरचक्र न० स्वरोदयोक्ते चक्रभेदे चक्रशब्दे २८१० पृ० दृश्यम्।

स्वरपत्तन न० स्वराणां निषादादीनां गानध्वनिविशेषाणां पत्तनमाश्रयः। ग्रामभेदे त्रिका०।

स्वरभङ्ग पुं० स्वरस्य कण्ठध्वनिभेदस्य भङ्गो यस्मात्। रोगभेदे स्वरभेदोऽप्यत्र तल्लक्षणादि सुश्रु० उक्तं यथा "अथातः स्वरभेदप्रतिषेधमध्यायं व्याख्यास्यामः। अत्युच्चभाषणविषाध्ययनाभिघातशीतादिभिः प्रकुपिताः पवनादयस्तु। ते शब्दवाहिधमनीषु गताः प्रतिहन्युः स्वरं भवति चापि हि षड्विधः सः। वातेन श्लेष्मणश्च नाननमूत्रवर्च्चो भिन्नं शनैर्वदति गद्गदवत्स्वरञ्च। पित्तेन पीतवदनाक्षिपुरीषमूत्रो ब्रूयाद्वलेन च विदाहसमन्वितेन। श्लेष्मात्मकेन सततं कफरुद्धकण्ठो मन्दं शनैर्वदति वापि दिवा विशेषात्। सर्वात्मके भवति सर्वविकारसम्भवव्यक्तक्रमा च वचसस्तमसाध्यमाहुः। धूपेत वाक्च्यवते क्षयमाप्नुयाच्च वागेष वापि हतवाक् परिवर्जनीयः। अन्तर्गतस्वरमलक्ष्यपदं चिरेण मेदोऽन्ववाहदति दिग्धगलोष्ठतालुः। क्षीणस्य दुष्टस्य क्षयस्य चापि चिरोत्थितो वक्त्र समुपजातः। मेदस्विनः सर्वसमुद्भवश्च स्वरामयो यो न स सिद्धिमेति। स्निग्धात् स्वरातुरनरानपकल्पदोषान् संयोजयेद्वमनरेचनवस्तिभिश्च। नस्यावपीडकवखधावनधूमलेहैः सस्नादयेच्च विविधैः कवलग्रहैश्च"।

स्वरमण्डलिका स्वराणां मण्डलमस्त्यस्य ठन्। वीणायाम् हेत०। २स्वरसमूहे।

स्वरलासिका स्त्री स्वरैः निषादादिभिः लसति नृत्यतीव लस-ण्वुल्। १वीणायां २वंशग्राह्य शब्दर०।

स्वरस पुं० स्वेन स्वभावेन रसः आस्वाद्यः। १शिलाजिष्कलुकभेदे शब्दर० २क्वाथभेदे च। "श्रद्धाः क्षुण्णादार्द्रद्रव्याद्वस्त्रयन्त्रादिपीडनात्। यो रसस्त्वभिनिर्याति स्वरसः सः प्रकीर्त्तितः" वैद्यक०। स्वस्य रसः रागः। २स्वाभिप्राये ३स्वतात्पर्य्ये ४वाक्यादौ रचनाभङ्गीभेदे च।

स्वरसन्धि पुं० स्वरनिमित्तकः सन्धिः। व्याकरणोक्ते स्वरनिमित्तके दीर्घादौ कार्य्ये। [शब्दे २५६४ पृ०दृश्यम्।

स्वरसामन् पुं० गवामयनस्य षष्ठे माघीयदिनभेदे गवामयनशब्दे २५६४ पृ० दृश्यम्।

स्वरा स्त्री ब्रह्मणः प्रथमपत्न्यां पद्मपु०।

स्वरापगा स्त्री स्वः स्वर्गस्यापगा। गङ्गायाम् हेमच०। स्वर्गापगादयोऽप्यत्र।

स्वरालु पुं० स्वराय अलति पर्य्याप्नोति अल-उण्। वचायां शब्दच० तत्सेवने हि स्वरस्योत्तेजनात्तस्यास्याख्यात्वम्।

स्वराज् पुं० स्वेनैव राजते राज-क्विप्। ईश्वरे "अर्थेष्वभिज्ञः स्वराडिति" भागवतम् १।१।१।

स्वरित पुं० स्वरो जातोऽस्य इतच्। १जातस्वरे २उदात्तसमाहारस्वरूपे स्वरभेदे पा० "उच्चैरुदात्तः" "नीचैरनुदात्तः"। "समाहारः स्वरितः" पा० "उदात्तानुदात्तत्वे वर्णधर्मौ समाक्षिप्येते यस्मिन्नोऽच स्वरितसंज्ञः स्यात्" सि० कौ०। "तस्मादित उदात्तमर्द्धह्रस्वम्" पा० "हस्वपरिमाणमतन्त्रम् स्वरितस्यादितोऽर्द्धमुदात्तस्योध्वम् उत्तरार्द्धन्तु परिमाणादनुदात्तम्। तस्य

षोदात्तस्वरितपरत्वे अयमं स्वरम् सि॰कौ॰। स्वरिताः शब्दाश्च पाणिनिना फिट्सूत्रेण च अनुशिष्टा यथा। "तित् स्वरितम्" पा॰ तकारेत् प्रत्ययः स्वरितः स्यात्। "विल्वतिल्वयोः स्वरितो वा" फिट्सू॰ १पादः। "अनयोरन्तः स्वरितो वा पञ्चे उदात्तः" सि॰कौ॰। "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य" पा॰ "उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यात्। अग्नयेऽत्र इह। स्वरितस्य यणः। खल्व्याशा। अस्य स्वरितस्य तैपादिकत्वेनासिद्धत्वाच्छे पनिघातो न" सि॰कौ॰ "स्वरितो वाऽनुदात्ते पदादौ" पा॰ "अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा स्यात्। पक्षे पूर्वसूत्रेणोदात्तः। वीदं ज्योतिर्हृदये। अस्य श्लोको दिश्यते। व्यवस्थितविभाषात्वादिकारयोः स्वरितः दीर्घप्लुते प्लुतोदात्तः। किन्तु एङः पदान्तादिति पूर्वरूपे स्वरित एव। तेऽवदन्। सोऽयमागात्। उक्तञ्च प्रातिशाख्ये "प्लुतप्रगृह्या अचि नित्यम्" इति सि॰कौ॰। "उदात्तादनुदात्तस्य स्वरितः" पा॰ "उदात्तात् परस्यानुदात्तस्य स्वरितः स्यात्। अग्निमीळे"। असाध्यसिद्धत्वाच्छेषनिघातो न। "तमीशानासः" सि॰कौ॰। "नोदात्तस्वरितपरोऽगार्ग्यकाश्यपगालवानाम्" पा॰ उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात्। गार्ग्यादिमते तु स्यादेव। प्रय आरुः। क्व वोऽश्वाः ३। क्वा ३ अत्रवः" सि॰कौ॰। "न्यङ्खरौ स्वरितौ" फि॰ "एतौ स्वरितौ। न्यङ्कुसानः। व्यचत्वयत् सः" सि॰कौ॰। "न्यर्बुदव्यल्कयोरादिः" फि॰। स्वरितः स्यात्। "तिल्यशिक्यताश्वर्यधान्यकन्याराजन्यामनुष्याणामन्तः" फि॰। स्वरितः स्यात्। "तिलानां भवनं क्षेत्रं तिल्यम्। यतो ऽनाद्य इति प्राप्ते" सि॰कौ॰। "बिल्वभल्ल्यौर्याणि छन्दसि" फि॰ ४र्थपादः। "अन्तस्वरितानि" सि॰कौ॰। "सरितेनाधिकारः" पा॰ "सरितत्वयुक्तशब्दसरूपमधिकृतं बोध्यम्" सि॰कौ॰ "सरितेनेति इत्थंभावे तृतीया सरितत्वज्ञाप्योऽधिकार इत्यर्थः सरितत्वञ्च दीर्घविधेयजन्यमज्झन्साधारण्यासयम् अधिक्रियमाणषट्घटकाजाश्रितं वा बोध्यम्। तच्चानुनासिकत्ववत् प्रतिज्ञयैव निश्चीयते अधिकारस्य क्रियदूरमित्यत्रानति बाधके व्याख्यानमेव शरणम्" शब्देन्दु०। "स्वरितञित आत्मनेपदं कर्त्रभिप्राये क्रियाफले" पा॰ स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्त्रभिप्राये क्रियाफले" सि॰ कौ॰। स्वर-क्त। ४स्वरयुक्ते त्रि॰।

स्वरु पु॰ स्वृ-उ। १यज्ञे अमरः २यूपखण्डे ३वाद्ये ४यज्ञे मेदि॰। ५छत्र्यां किरणे हेमाद्रिकमेदे च उणा॰।

स्वरुचि त्रि॰ स्वस्यैव रुचेः प्रवर्त्तिका स्वजत्वे यस्य। १स्वतन्त्रे ऐश्वर्य॰ हेम॰। २स्वस्याभिलाषे स्त्री।

स्वरूप न॰ स्वस्य रूपम्। १स्वभावे अमरः। स्वमेव रूपम्। २स्वात्मके पदार्थे। स्वं यद्यत् स्वं रूपयति रूप-क्विप्। ३यथास्वरूपाभिज्ञे पण्डिते पु॰ अमरः। स्वेन स्वभावेनैव रूपमस्य। ४मनोज्ञे त्रि॰ अमरः।

स्वरूपसंबन्ध पु॰ स्वरूप सम्बन्धः स्वरूपयोर्वा सम्बन्धः। न्यायोक्ते स्वात्मके सम्बन्धे षट्पदार्थातिरिक्ते षदार्थभेदे यथा प्रतियोगित्वम् विषयत्वमित्यादि।

स्वरोदय पु॰ स्वरस्योदयो शुभादिसूचकतया यत्र। स्वरस्य श्वासविशेषस्य शुभाशुभत्वज्ञानसाधने तत्प्रतिपादके शास्त्रभेदे चक्रशब्दे २८६७ पृ॰दृश्यम्।

स्वर्ग पु॰ स्वरिति गीयते गै-क सु+ऋज-घञ् वा। १दुःखासम्भिन्ने सुखे २देवानामावासस्थाने च अमरः। स्वर्गकारणस्वरूपादिकं मा॰ व॰ २६॰ अ॰ उक्तं यथा "उपरिष्टाच्च खर्लोको योऽयं स्वरिति संज्ञितः। ऊर्द्ध्वगः सप्तपथः सप्तर्षिवयानचरो मुने!। नातप्ततपसः पुंसो नामखायज्वशालिनः। नान्दता नास्तिकाश्चैव तत्र गच्छन्ति सुव्रत!। धर्मात्मानो जितात्मानः शान्ता दान्ता विमत्सराः। दानधर्मरताः लोका शूराश्चाहवलक्षणाः। तत्र गच्छन्ति धर्मौघं कृत्वा शुभतमात्मकम्। लोकान् पुण्यकृतान् ब्रह्मन्! सप्तर्षिभिरुदाहृतान्। देवाः साध्यास्तथा विश्वे तथैव च महर्षयः। यामा धामाश्च मौकुल्य! गन्धर्वाप्सरसस्तथा। एषां देवनिकायानां पृथक् पृथगनेकशः। भासन्तः कामरूपेण लोकास्ते लोकयोः शुभाः। त्रयस्त्रिंशत्सहस्राणि योजनानि हिरण्मयः। मेरुः पर्वतराट् यत्र दिव्योद्यानानि सुव्रत!। नन्दनादीनि पुण्यानि विहाराः पुण्यकर्मणाम्। न क्षुत्पिपासे न ग्लानिर्न शीतोष्णे भयं तथा। बीभत्सममुखं वाऽपि तत्र किञ्चित्र विद्यते। अनोजाः सर्वतो गन्धाः सुखस्पर्शश्च सर्वशः। मनोज्ञाः श्रुतिमनोग्राह्याः सर्वतस्तत्र वै मुने!। न शोको न जरा तत्र नायासपरिदेवने। दैहयः स मुने! लोकः स्वकर्मफलहेतुकः। सुकृतैस्तत्र पुरुषाः कल्पवल्यात्मकर्मभिः। तैजसानि शरीराणि भवन्त्यलोपपद्यताम्। कर्मजान्येव सौदृश्यं। न मातृपितृजान्युत। न स्वेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव च

च। तेषां न च रजो वस्त्रं बाधते तत्र वै सुने !। न स्नायन्ति सजस्तेषां दिव्यगन्धा मनोरमाः। संयुज्यन्ते विमानैश्च ब्रह्मन्नेवंविधैश्च ते। दैवांगोकल्पमासेता मोहमात्सर्य्यवर्जिताः। सुखं स्वर्गजितस्तत्र वर्त्तयन्ते महामुने !। तेषां तथाविधानान्तु लोकानां मुनिपुङ्गव !। उपर्य्युपरि लोकस्य लोका दिव्या गुणान्विताः। पुरस्ताद् ब्रह्मणस्तत्र लोकास्तेजोमयाः शुभाः। यत्र यान्त्यृषयो ब्रह्मन् ! पूताः स्वैः कर्म्मभिः शुभैः। ऋभवो नाम तत्रान्ये देवानामपि देवताः। तेषां लोकाः परतरे यान् यजन्तीह देवताः। स्वयम्प्रभास्ते भासन्तो लोकाः कामदुघाः परे। न तेषां स्त्रीकृतस्तापो न लोकैश्वर्य्यमत्सरः। न वर्त्तयन्त्यरतिभिस्तेनाप्यमृतभोजनाः। तथा दिव्यशरीरास्ते न च विग्रहमूर्च्छयः। न दुःखे सुखकामास्ते देवदेवाः सनातनाः। न कल्पपरिवर्त्तेषु परिवर्त्तन्ति ते तथा। जरा मृत्युः कुतस्तेषां हर्षः प्रीतिसुखं न च। न दुःखं न सुखञ्चापि रागद्वेषौ कुतो मुने !। देवानामपि सौदुर्गत्य ! काङ्क्षिता या गतिः परा। दुष्प्रापा परमा सिद्धिरगम्या कामगोचरैः। त्रयस्त्रिंशदिमे देवा येषां लोका मनीषिभिः। गम्यन्ते नियमैः श्रेष्ठैर्दानैर्वा विधिपूर्वकैः। सेयं दानकृता व्युष्टिरनुप्राप्ता सुखं त्वया। तां भुङ्क्ष्व सुकृतैर्लब्धां तपसाद्योतितप्रभः। एतत् स्वर्गसुखं विप्र ! लोकानां नानाविधास्तथा। गुणाः स्वर्गस्य प्रोक्तास्ते दोषानपि निबोध मे। कृतस्य कर्मणस्तत्र भुज्यते यत् फलं दिवि। न चान्यत् क्रियते कर्म मूलच्छेदेन भुज्यते। सोऽत्र दोषो मम मतस्तस्मात्ते पतनञ्च यत्। सुखव्यायामनष्टानां पतनं यच्च सुव्रत !। व्यसन्तोषः परीतापो दृष्ट्वा दीप्ततराः स्त्रियः। यद्भवत्यपरे स्थाने स्थितानां तत् सुदुष्करम्। संज्ञा मोहश्च पततां रजसा च प्रधर्षणम्। प्रस्खलनेषु च सर्वेषु ततः पिपतिषोर्भयम्। अब्रह्मभवनादेते दोषा मौदुगल्य ! दारुणाः। नाकलोके सुकृतिनां गुणास्त्वयुतशो मया। अयं त्वन्यो गुणः श्रेष्ठश्च्युतानां स्वर्गतो मुने !। शुभानुशययोगेन मनुष्येषूपजायते। तत्रापि स महाभागः सुखभाग्यभिजायते। न चेत् सम्भुज्यते तत्र यच्छल्पधमतां ततः। इह यत् क्रियते कर्म तत् परत्रोपभुज्यते। कर्म्मभूमिरियं ब्रह्मन् ! फलभूमिरसौ मतः"। स च लोको भूरादिषु ऊर्द्ध्वस्तृतीयः।

स्वर्गङ्गा स्त्री ६त०। मन्दाकिन्यां शब्दर०।

स्वर्गनाथ पु० ६त०। इन्द्रे स्वर्गपत्यादयोऽप्यत्र हेमच०।

स्वर्गवधू स्त्री ६त०। अप्सरःसु हेमच०।

स्वर्गाचल पु० स्वर्गलोकस्योऽचलः। सुमेरुपर्वते स्वर्गमित्यादयोऽप्यत्र हेमच०।

स्वर्गिन् पु० स्वर्गोऽस्त्यस्य भोग्यत्वेन इनि। १देवे त्रि० २देवलोकगामिनि च त्रि० स्वर्गगामित्वस्तुचकगुणभेदा गरुड़ पु० उक्ता यथा "समाभूतेषु संवादः परलोकं प्रति क्रिया। सतां परिचितः योक्तिर्वेदमार्गस्यदर्शनम्। गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः। सत्क्रियाव्यसनं मैत्री स्वर्गिणां लक्षणं विदुः"।

स्वर्गीकस् पु० स्वर्ग ओको यस्य। देवे त्रिका०।

स्वर्जिक पु० सु+अर्ज-घञ् ततः अस्त्यर्थे ठन्। सर्जिकाक्षारे राजनि० २यवक्षारे स्त्री भावप्र०।

"कथितः स्वर्जिकाभेदः विशेषैः सुवर्चिका। यवक्षारो लघुः स्निग्धः सुरुच्यो वह्निदीपनः। निहन्ति शूलं वातामश्लेष्मश्वासगलामयान्। स्वर्जिकाक्षगुणा तस्मात् विशेषात् शूलमशूलहृत्" भावप्र०। कर्म०स्वर्जिकाक्षारोऽपि तत्रार्थे राजनि० णिनि स्वर्जिन् तत्रार्थे राजनि०।

स्वर्ण न० सुष्ठु अर्णो वर्णो यस्य। १कार्श्वने २धुस्तूरे अमरः ३नागकेशरे ४गौरवर्णशाके च राजनि०। सुवर्णशब्दे दृश्यम्। [राजनि०] ६त० २सुवर्णश्च लेखे पु०।

स्वर्णकण न० स्वर्णमिव पीतत्वात् कणोऽस्य। १कक्षयुगगुञ्जौ

स्वर्णकदली स्त्री स्वर्णमिव कदली (चाँपाकला)कदलीभेदे।

स्वर्णकाय पु० स्वर्णमिव पीतत्वात् कायोऽस्य। १गरुड़े हेमच०। २स्वर्णवर्णदेहयुते त्रि०।

स्वर्णकार पु० स्वर्णं स्वर्णमयमलङ्कारादि करोति कृ-अण्। (सेकरा) जातिभेदे। "विश्वकर्मा तं गुहायां वीर्याधानं चकार सः। ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः। मालाकारः कर्मकारः शङ्खकारः कुविन्दकः। कुम्भकारः कंसकारः षडेते शिल्पिनां वराः। सूत्रधारस्थपतिकरः स्वर्णकारस्तथैव च। पतितास्ते ब्रह्मशापात् त्यज्या वर्णसङ्कराः। स्वर्णकारः स्वर्णचौर्य्यात् ब्रह्मणानां द्विजोत्तम ! बभूव सद्यः पतितो ब्रह्मशापेन कर्मणा" ब्रह्मवै० ब्र०ख० १०अ०। "तैलचौरस्तैलकीटो मूषिकोटस्त्विजन्मकम्। ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः" ब्रह्मवै०जन्मख०८५अ०। तज्जातिलक्षणकर्म।

स्वर्णकृत् पु० स्वर्णं तन्मयभूषादिकं करोति कृ-क्विप्। स्वर्णकारे शब्दमा०।

स्वर्णकेतकी स्त्री स्वर्णमिव पीतत्वात् केतकी। पीतकेतक्याम् राजनि०। तत्पुष्पादिगुणाः "केतकीकुसुमं वर्ण्यं केश-दौर्गन्ध्यनाशनम्। हेमाभं मदनोन्मादबुद्धिल्यकौख्य कारि च। तस्याः स्तनोऽतिशिशिरः कटुः पित्तकफा-पहः। रसायनकरो वर्ण्यो देहदार्ढ्यकरः परः" राजनि०।

स्वर्णक्षीरी स्त्री स्वर्णमिव पीतत्वात् क्षीरं निर्यासो यस्याः गौरा० ङीष्। ओषधिभेदे सा च हिमालये जायते। "हेमवर्णो रसस्तस्या हिमवद्भूमिसम्भवा। सा नाग-जिह्विकाकारा तन्मूलं वाणजौषधम्। स्वर्णक्षीरी हिमा तिक्ता कृमिपित्तकफापहा। मूलच्छाल्पसरी भाषदाहस्वरहरा परा" राजनि०।

स्वर्णगैरिक न० स्वर्णमिव पीतं गैरिकम्। (वर्णकमाटि) पदार्थभेदे राजनि०।

स्वर्णग्रीवा स्त्री नदीभेदे। "या निःसृता पूर्वभागात् तस्मात् गिरिवरात् (नाटकशैलात्) नदी। स्वर्णग्रीवेति विख्याता सा गङ्गाकटगीफले" कालिकापु० ८२अ०।

स्वर्णचूड पुंस्त्री० स्वर्णमिव पीतत्वात् चूडा यस्य। चाष-पक्षिणि जटा० स्त्रियां ङीष्। [जातमात्रे त्रि०।

स्वर्णज न० स्वर्णात् जायते जन-ड। १स्वर्णे हेमच० २स्वर्ण-

स्वर्णजीवन्ती स्त्री० स्वर्णमिव पीतत्वात् जीवन्ती। पीत-पुष्पजीवन्त्याम् राजनि०।

स्वर्णदी स्त्री स्वर्णं द्यति अपसारयति तुल्यवर्णत्वात् दो-क गौरा०ङीष्। १हरिद्रायाम् राजनि०। २तत्र० यत्वम्। अमरः। [२चित्रकवृक्षे च त्रिका०। ३गङ्गायाम्

स्वर्णदीधिति पु०स्वर्णमिव भास्वरा दीधितिरस्य। १अग्नौ,

स्वर्णद्रु पु०स्वर्णमिव पुष्पे पीते द्रुः। आरग्वधे राजनि०।

स्वर्णपत्र पु० स्वर्णमिव पीतः पत्रोऽस्य। गरुडे त्रिका०।

स्वर्णपाटक पु०स्वर्णं पाटयति पट-णिच्-ण्वुल्। टङ्कणे (सोहागा) शब्दर०।

स्वर्णपुष्प पु० स्वर्णमिव पीतं पुष्पमस्य। १चम्पके २आरग्वधे पुंस्त्री० राजनि० स्त्रीत्वे ङीप्। सा च १स्वर्णकेत-क्याञ्च राजनि०। ४शातलायाम् ५कलिकारी स्त्री राज-नि० टाप्। [सुवर्णकदल्याम् राजनि०।

स्वर्णफला स्त्री स्वर्णमिव पीतं फलमस्याः। (आंपाफला)

स्वर्णबणिज् पु० ६त०। सुवर्णवणिजि जातिभेदे।

स्वर्णभृङ्गार पु० स्वर्णमिव स्वर्णमयो वा भृङ्गारः। १पीत-भृङ्गराजे राजनि०। २स्वर्णमयकलशभेदे च।

स्वर्णमाक्षिक न० स्वर्णमिव पीतं माक्षिकम्। खनिजख्याते उपधातुभेदे "किञ्चित् सुवर्णमाक्षिक्यात् स्वर्णमाक्षिक-मीरितम्। उपधातुः सुवर्णस्य किञ्चित्स्वर्णगुणान्वितम्। तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम्। किन्तु तस्यानुकल्पत्वात् किञ्चिद्धीनगुणास्ततः। न केवलं स्वर्ण-गुणा वर्त्तन्ते स्वर्णमाक्षिके। द्रव्यान्तरस्य संसर्गात् सन्त्य-न्येऽपि गुणास्ततः। सुवर्णमाक्षिकं स्वादु तिक्तं दृष्यं रसायनम्। चतुर्थं वस्तिरुक्कुष्ठपाण्डुमेहविषोदरम्। अर्शःशोथं विषं कण्डुं त्रिदोषमपि नाशयेत्" । अगुड-स्वर्णमाक्षिकस्य दोषमाह "सन्दानलत्वं बलहानिसृग्यां विष्मिर्तां नेत्रगदान् सकुष्ठान्। भालां तथैव व्रण-पूर्विकाञ्च कुर्यादगुडं खलु माक्षिकञ्च"। तद्दोषशान्त्यर्थं शोधनमाह "माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च। मातुलुङ्गद्रवैर्याम जम्बीरस्य द्रवैः पचेत्। चालयेल्लोहजे पात्रे यावत् पात्रं सुशोहितम्। भवेत्तत्तु संशुद्धं स्वर्णमाक्षिकमीरितम्"। तन्मारणं यथा "कुक्कुटस्य कषा-येण पिष्ट्वा तैलेन वा पुटेत्, तैलेनैवाजमूत्रेण म्रियते स्वर्णमाक्षिकम्" भावप्र०।

स्वर्णयूथी स्त्री स्वर्णमिव पीता यूथी। पीतयूथिकायाम् शब्दच०

स्वर्णलता स्त्री स्वर्णमिव पीता लता। ज्योतिष्मत्याम् राजनि०

स्वर्णवर्णा स्त्री स्वर्णमिव वर्णोऽस्याः। १हरिद्रायाम् राजनि०। २सुवर्णवर्णे त्रि० ३हेममूल्यज्ञापके वर्णे च।

स्वर्णवल्कल पु० स्वर्णमिव पीतं वल्कलमस्य। सोनाकटचे शब्दच०।

स्वर्णवल्ली स्त्री स्वर्णमिव पीता वल्ली। लताभेदे "स्वर्णवल्ली रक्तफला काकायुः काकवल्लयपि। शिरः-पीड़ा त्रिदोषघ्नी दुग्धदात्री तु सा मता" राजनि०।

स्वर्णशेफालिका स्त्री स्वर्णमिव पीता शेफालिका। १पीत-शेफालिकायाम्। २आरग्वधे राजनि०।

स्वर्णाङ्ग पु० स्वर्णमिवाङ्गं पुष्पं यस्य। १आरग्वधे राजनि० २पीतवर्णदेहयुते त्रि० स्त्रियां ङीष्।

सुवर्णारि पु० ६त०। गन्धके तस्य स्वर्णमारकत्वात्तथात्वम्।

स्वर्णुली स्त्री स्वर्णं तद्वर्णं लीयते पुष्पेऽत्र ली-आधारे क्विप् पृषो०। स्वर्णुली हेमपुष्पी च स्वर्णपुष्पाध्वजा तथा। सा कषाया कटुः पीता व्रणहा परिकीर्त्तिता" राजनि० उक्ते लतायाम्। [यति ते कक्षस्वर्त्तम्।

सुर्त्त गतौ सक० दु सेन जीवने अक० चु० उ०सेट्। स्वर्त्त-

सुर्द प्रीतौ अक० प्रीणने लेखने च सक० भ्वा०आत्म० सेट्।

स्वर्हते अस्वर्हिष्ट। [गोमेदमणौ राजनि०।

सुर्भानव पु० निरुभानो राहोः प्रियः अण् नि०नादिष्टत्वम्।

सुर्भानु पु० स्वः स्वर्गे भानुर्दीप्तिरस्य। राहौ अमरः। तस्य भूमिच्छायारूपतया भूमिस्थैर्भानुमत्त्वेनादर्शनात् दिवि दीप्तिमत्त्वात्तथात्वम्। [लोके शब्दच०।

सुर्लोक पु०स्वरेव लोकः भुवनम्। १स्वर्गे हेत०। २स्वर्गस्थे

सुर्वापी स्त्री स्वः स्वर्गस्य वापीव। १गङ्गायाम् हेमच०।

सुर्वेश्या स्त्री स्वः स्वर्गस्य वेश्या। मेनकाद्यप्सरसु अमरः।

स्वर्वैद्य पु० द्वि०व०। स्वः स्वर्गस्य वैद्यौ। अश्विनीकुमारयोः अमरः। आयुर्वेदशब्दे ७७६पृ० दृश्यम्।

स्वलीन पु० दानवभेदे वह्निपु०।

सुल्प त्रि० सुष्ठु, अल्पम् प्रा० स०। अत्यल्पे क्षुद्रे।

स्वल्पकेशरिन् पु०स्वल्पः केशरो नित्यमस्यास्य इनि। कोविदारवृक्षे राजनि०।

स्वल्पकेशिन् त्रि० स्वल्पः केशो नित्यमस्यास्य। १अत्यल्पकेशयुते स्त्रियां ङीप्। २पिशाचभेदे पु०शब्दच०। [रत्नमा०

सुल्पपत्रक पु० स्वल्पं पत्रमस्य कप्। गौरशाके मधूकभेदे

स्वल्पफला स्त्री स्वल्पं फलं यस्याः। क्षुपसाभेदे राजनि०।

सुवासिनी स्त्री स्वस्मिन् पितृगृहे वसति वस-णिनि ङीप्। चिरं पितृगृहादिवासिन्यामूढायामनूढायां वा स्त्रियाम्। सुवासिनीत्यस्य स्थाने अमरे पाठान्तरम्।

स्वबीज पु० स्वमेव बीजं यस्य। १आत्मनि शब्दर०। २पुत्रे ३कन्यायां स्त्री हेत०। ४निजकारणे न० ५स्वस्य वीर्ये च न०।

स्वसृ स्त्री सु+अस-ऋन्। भगिन्याम् अमरः।

स्वस्क गतौ व्या० आ० सक०सेट्। स्वस्कते अस्वस्किष्ट।

स्वस्ति अव्य० सु-अस-क्तिच्, अस्तीति विभक्तिप्रतिरूपकम् अव्ययं प्रादि०वा। १क्षेमे २आशिषि ३पुण्यादौ अमरः ४स्वीकारसूचने च। एतद्योगे क्षेमादिसम्बन्धिनि चतुर्थी।

स्वस्तिक पुंन०। स्वस्ति शुभाय हितम् ठन्। "स्वस्तिकं प्राङ्मुखं यत्तु स्यादलिन्द्यानुगतं भवेत्। तत्पार्श्वानुगतौ चान्यौ सत्यर्थन्नगतोऽपरः" इत्युक्तलक्षणे गृहभेदे वास्तुः। २षितावरणाके पु० राजनि० ३आसनभेदे तल्लक्षणम् आसनशब्दे ८८६ पृ० दृश्यम्। ४तण्डुलचूर्णनिर्मिते त्रिकोणाकारे द्रव्यभेदे च "हृतं स्वस्तिकसिन्दूरम्' इत्यधिवासनद्रव्यज्ञापकवाक्यम् ५चक्षुष्यभेदे पु० मेदि०। ६जिनध्वजभेदे हेमच०। ७रततालिके विम्बः

स्वस्तिमुख पु० स्वस्ति सुखे वक्त्रे आदौ वा यस्य। १लेखे पत्रादौ २विप्रे पु० ३स्वस्तिवाचकादिनि त्रि० मेदि०।

स्वस्तिवाचन न० स्वस्ति शुभस्य विप्रद्वारा वाचनम्। कर्मारम्भे विघ्नोपशान्तये ब्राह्मणद्वारा कर्त्तव्यकर्मणां शुभतावाचने। "संपूज्य गन्धपुष्पाद्यैर्ब्राह्मणान् स्वस्ति वाचयेत्। धर्म्ये कर्मणि माङ्गल्ये संघ मेऽभ्युदयदर्शने" व्यासः।

स्वस्तिवाचनिक त्रि० स्वस्तिवाचनाय हितं तत आगतम् तत्र भवं वा ठक्। १स्वस्तिवाचनसाधने २तदुक्तिलब्धे ३तत्सम्बन्धिनि च।

स्वस्त्ययन न० स्वस्ति शुभस्यायनं लाभो यस्मात्। शुभार्थं क्रियमाणे वेदादिविहिते ग्रहयागादौ।

स्वस्थ त्रि० स्वः परलोके तिष्ठति स्वेन स्वभावेन सुखेन, वा वा तिष्ठति स्था-क वा विसर्गलोपः। स्वभावस्थे २स्वर्गस्थिते ३विनायासेन सुखेनावस्थिते च। "स्वस्था भवन्तु मयि जीवति पार्त्तराष्ट्राः" वेणीसं०।

स्वस्रीय पु० स्वसुरपत्यम् छ। १भागिनेये अमरः २भागिनेय्यां स्त्री टाप्।

स्वागत न० सुखेन आगतम् सु+आ+गम्-भावे क्त। १कुशलागमने "स्वागतं स्वानधीकारात्" कुमारः तदस्यास्ति अच्। २कुशले ३कुशलप्रश्ने हारा०।

स्वागतञ्च षोड़शोपचारमध्ये द्वितीयोपचारः आसनं स्वागतं पाद्यमित्यादि। उपचारशब्दे दृश्यम्।

स्वाङ्किक पु० माङ्गमर्हति ठक्। १स्तुतिके २तद्वादके शब्दर०।

स्वाच्छन्द्य न० स्वच्छन्दस्य भावः ष्यञ्। १स्वाधीनत्वे २स्वास्थ्ये च।

स्वातन्त्र्य न० स्वतन्त्रस्य भावः ष्यञ्। १स्वाधीनत्वे २परानधीनत्वे। व्या० उक्ते इतरव्यापारानधीनव्यापारवत्त्वरूपे कर्त्तृत्वे कर्त्तृशब्दे १७१६ पृ० दृश्यम्।

स्वाति(ती) पुंस्त्री० स्वेनैव अतति अत-इन् स्त्रीत्वपक्षे वा ङीप्। १अश्विन्यादिषु पञ्चदशे नक्षत्रे अमरः "स्वातिः अवणा अक्लीबे" तिथ्या० उक्ते उभयलिङ्गनाम्नि। २सूर्य्यपत्नीभेदे स्त्री त्रिका० ३खगे धरणिः। स्वातिनक्षत्राधिष्ठातृदेवयोगतारास्वरूपादिकम् ऋक्षशब्दे ४६७ पृ० दृश्यम्।

स्वातियोग पु०आषाढशुक्लपक्षे कन्यां तिथौ तिथौ माघकृष्णपञ्चमसप्तम्यां तिथौ च स्वातिनक्षत्रस्थचन्द्रस्य शुभफलादिज्ञापके योगभेदे यथोक्तं ह० सं० २५अ०

"यद्रोहिण्यीयोगफलं तदेव स्वातावषाढासहिते च चन्द्रे।

च चन्द्रे । स्वाधारशुक्ले निखिलं विचिन्त्यं योऽस्मिन् विशेषमन्त्रमहं प्रवक्ष्ये । स्वातौ निशांशे प्रथमेऽभिहृष्टे शस्यानि सर्वाण्यु पयान्ति वृद्धिम् । भागे द्वितीये तिलसूक्ष्ममाषा यैश्यं तृतीयेऽस्ति न शस्यदानि । हृष्टेऽस्मि भागे प्रथमे सुहृष्टि-स्तदर्द्धितीये तु सकीटसंपा । हृष्टिस्तु मध्यापरभागहृष्टे निश्छिद्रवृष्टिर्दुनिशं प्रहृष्टे । समधुत्तरेण तारा चित्राया: कीर्त्यते शुभांस्त्वः । तस्मात्तत्रे चन्द्रे स्वाते-र्योगः शिवो भवति । सप्तम्यां स्वातियोगे यदि पतति हिमं माघमासान्धकारे वायुर्वा चण्डवेगः सजलजल-धरो वापि गर्जत्यजस्रम् । विद्युन्माला कुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं विद्येया प्राहुडेषा सुदित-जनपदा सर्वशस्यैरुमेता । तथैव फाल्गुने चैत्रे वैशा-खस्थासितेऽपि वा । स्वातियोगं विजानीयादाषाढे च विशेषतः" । [मिट् । स्वादते आस्वादिष्ट ।

स्वाद प्रीतौ भक्ष० प्रीणने लेहने च सक० भ्वा० आ० सेट् । स्वादते आस्वादिष्ट ।

स्वाद पु० स्वद-स्वाद-वा घञ् । १रसानुभवे २प्रीतौ ३प्रीणने ४लेहने च । ल्युट् । स्वादनमप्यत्र न० । रसानुभवप्रकार: स० द० उक्तो यथा

"न जायते तदास्वादो विना रत्यादिवासनाम्" वासना चेटानीलनी प्राक्तनी च रसास्वादहेतव: । तस्मा यदि स्याद्या न स्याच्छ्वित्रियजरन्मांसकादीनामपि सा स्यात् । यदि द्वितीया न स्यादु यद्वागणामपि कोषाद्विदूरस्वादुबोधो न दृश्यते तन्न स्यात् । भक्तस्य धर्म-दत्तेन "नवासनानां सभ्यानां रसस्यास्वादनं भवेत् । निर्वासितास्तु रङ्गान्तःकाष्ठकुड्यप्रभासमाः" ।

स्वादिष्ठ त्रि० अतिशयेन स्वादु: । इष्ठन् ष्ठित । अस्मिन्मधुरे ई तुन् स्वादोयस् तत्रार्थे त्रि० स्त्रियां ङीप् ।

स्वादु पु० स्वद-उच् । १मधुररसे हेमच० २गुडे त्रिका० ३जोषकौशधौ जटा० । ४रटे ५मधुरे द्वयोस्त्रि० मेदि० स्त्रियां वा ङीप् । सा च ७द्वाराया अमर: ८त्र्यूषणकारे मध्यद्वये पु० राजनि० ।

स्वादुकण्टक पु० स्वादु: कण्टकोऽस्य । विकङ्कतवृक्षे राजनि०

स्वादुकन्दा स्त्री स्वादु: कन्दोऽस्या: । विदार्य्याम् राजनि०

स्वादुका स्त्री स्वादुना मधुररसेन कायति कै-क । नाग-दन्त्याम् राजनि० ।मधुरे भागे ।

स्वादुखण्ड पु० स्वादु: खण्ड: अवयवोऽस्य । गुडे शब्दर० कर्म० ।

स्वादुगन्धा स्त्री स्वादुरिष्टो गन्धोऽस्या: । १रक्तगोभाञ्जने रत्नमा० । २भूमिकुष्माण्डे शब्दर० जटा० ।

स्वादुपर्णी स्त्री स्वादूनि पर्णान्यस्या: ङीप् । द्राक्षायाम् राजनि० ।

स्वादुपाका स्त्री स्वादु: पाकोऽस्या: । काकमाच्याम् राजनि०

स्वादुपिण्डा स्त्री स्वादु: पिण्ड: पिण्डाकारफलमस्या: । पिण्डखर्ज्जूर्याम् राजनि० ।

स्वादुफला स्त्री स्वादु फलमस्या: । १बदरीफले शब्दर० कर्म० । २मिष्टे फले न० । ३क्रोष्टौ स्त्री शब्दर० टाप् ।

स्वादुमज्जन् पु० स्वादु: मज्जा यस्य । पर्वतजे पीलौ जटा०

स्वादुमांसी स्त्री स्वादु मांसमिव फलमस्या: गौरा० ङीष् । काकोल्याम् राजनि० ।

स्वादुमूल न० स्वादु मूलमस्य । गर्जरे (गाँजर) राजनि० ।

स्वादुरसा स्त्री स्वादु: रसो यस्या: । १काकोल्याम् अमर: २मदिरायाम् हेमच० ३शतावर्य्याम् ४द्राक्षायाम् ५च्याव-तके च शब्दर० ।

स्वादुलता स्त्री स्वादी लता । विदार्य्याम् राजनि० ।

स्वादुपुष्प पु० स्वादु पुष्पं यस्य । कटभ्यां राजनि० ।

स्वादूदक पु० स्वादु उदकं यस्य । समुद्रभेदे त्रि० शि० ।

स्वाद्वन्न पु० स्वादु: अन्नम् । दाडिमे त्रिका० ।

स्वाधिष्ठान न० लिङ्गमूलस्थे सुषुम्नाऽन्तर्गते षड्दलपद्मभेदे । "षड्दले वेद्युतनिभे स्वाधिष्ठानेऽनलस्त्विषि । बभ्रुभिर्वर्णैर्युक्ते वर्णैः षड्भिश्च वृत्रत !" तन्त्रसा० । "सिन्दूरपूर-रुचिरारुणपद्ममन्यत्सौषुम्णमध्यघटितं ध्वजमूलदेशे । षड्भिश्चटै: परिहृतं तडितामवर्णैर्बालैः सविन्दुललितैश्च पुरन्दरान्तैः (न्तैः)। तस्यान्तरे प्रविलसद्विशदप्रकाशम-म्भोजमण्डलमयो वरुणस्य तस्य । यद्वेन्दुरुपलसितं शर-दिन्दुशुभ्रं वह्नेरबीजमतुलं मकराधिरूढम् । तस्माद्भवेच्च ललिता हरिरेव साक्षाच्चीत्रप्रकाशरुचिरस्त्रियमादधानः । पीताम्बरः प्रथमयौवनगर्वधारी श्रीवत्सकौस्तुभधरो धृतवेदबाहुः । तत्रैव भाति सततं खलु राकिणी सा नीलाम्बुजद्युतिसहोदरकान्तिशोभा । नानायुधोद्यतकरै-र्ललिताङ्गलक्ष्मीर्दिव्याम्बराभरणभूषितमस्मरन्ती । स्वाधि-ष्ठानाख्यमेतत् सरसिजमतुलं चिन्तयेद्यो सुनोन्द्रस्या-हङ्कारदोषादिकमलरिपुः क्षीयते तत्क्षणेन" पूर्णानन्द-षट्चक्रम् ।

स्वाधीन त्रि० स्वस्याधीन: । स्वायत्ते स्वतन्त्रे ।

स्वाधीनपतिका स्त्री स्वाधीन: पतिर्यस्या: कप् । नायि-काभेदे स्वाधीनभर्तृकादयोऽत्र ।

"कान्तो रतिगुणाक्षिप्तो न जहाति यदन्तिकम् । वि-

विप्रविप्रमा मुग्धा सा स्यात् स्वाधीनभर्तृका" सा०द० । सा च षड्विधा "मुग्धा मध्या प्रौढ़ा स्वकीया सामान्या चेति" रसमञ्जरी ।

स्वाध्याय पु० स्वः स्वकीयत्वेन विहित अध्यायः द्विजानाम्, अधि+इङ्-कर्मणि घञ् । १द्विजैः पाठ्ये वेदभागभेदे "स्वाध्यायोऽध्येतव्यः" इति श्रुतिः । सु+आ+अधि इङ् भावे घञ् । २अवश्यपाठ्यवेदाध्ययने "स्वाध्यायो जप इत्युक्तो वेदाध्ययनकर्मणोः" स्मृतिः ।

स्वान्त न० स्वन-क्त । १मनसि अमरः २गह्वरे मेदि० ३शुद्धिते त्रि० । [४स्वर्गोन्नतायां च मेदि०

स्वाप पु० स्वप-घञ् । निद्रायाम् अमरः । २शयने ३शयनाने

स्वापतेय न० स्वपतेरागतः ढञ् । धने अमरः ।

स्वाभाविक त्रि० स्वभावादागतः ठञ् । स्वभावसिद्धे स्त्रियां ङीप् (स्वाभाविकी" स्वच्छतेलुब्गटः) ।

स्वामिन् पु० स्व+अस्त्यर्थे इनि दीर्घः । १भर्तरि पत्यौ धरणिः । २कार्त्तिकेये मेदि० ३राजनि अमरः ।४विभौ ५हरे ६हरौ च शब्दर० । ७वातघ्नावनस्पतौ त्रिका० । ८अधिपतौ त्रि० अमरः । ९जैवभेदे पु० शब्दच० । १०परिव्राजकोपाधिभेदे पु० । तस्य भावः त्व स्वामित्व स्वत्वनिरूपिते क्रयाद्यधीने आत्मवृत्तौ पदार्थभेदे स्वत्वशब्दे द्रष्टव्यम् ।

स्वामिपालविवाद पु० स्वामी च पालौ च तयोर्विवादः विवादभेदे तत्स्वरूपादिकं वीरमि०उक्तं यथा "अथ स्वामिपालविवादाख्यव्यवहारपदम् । तत्र मनुस्तदभिधानप्रतिज्ञां करोति । "पशुषु स्वामिनां चैव पालानाञ्च व्यतिक्रमे । विवादं संप्रवक्ष्यामि यथावद्धर्म तत्त्वतः" इति । स्वामिपालयोः प्रतिदिनकृत्यमाह नारदः "उपानयेद्वा गोपाय प्रत्यहं रजनीक्षये । चीर्णाः पीताश्च ता गोपः सायाह्ने प्रत्युपानयेत्" इति । चीर्णा कृष्यादिकं भक्षितवतीः । पीताः पीतवतीः । स्वामिना प्रातर्यावत्यः सकर्षितास्तावत्यो गोपालेन सायं प्रत्यर्पणीया इत्यर्थः । गोग्रहणं पशुमात्रोपलक्षणार्थम् । तथा च याज्ञवल्क्यः "यथार्पितान् पशून् गोपः सायं प्रत्यर्पयेत् तथा" इति । गवादिपरिपालकस्य भृतिपरिमाणमाह नारदः "गवां शतादल्पतरी धेनुः स्याद् द्विशताद् भृतिः । प्रतिसंवत्सरं गोपे वन्द्योऽष्टाष्टमेऽहनि" इति । प्रतिसंवत्सरं संवत्सरे संवत्सरे गोशतपरिपालने वत्सतरी द्विहायनी भृतिः । द्विशतपरिपालने धेनुर्दोग्ध्री सवत्सेति यावत् । अष्टमे दिवसे वन्द्योऽहा सर्वासां गवान्दोहस्य भृतित्वेन कल्पनीय इत्यर्थः । हारीतिरपि "तथा धेनुशतः क्षीरं जग्धेताष्टमेऽहनि" इति । धेनुशतः धेन्वाशतः द्विशतपालक इत्यर्थः । तथा च वन्द्योहो धेन्वा सवत्सयेति न वत्सतर्यपीति मदनरत्ने । कल्पतरौ तु धेनुशतो गोपाल इति व्याख्यातत्वेन वत्सतर्यपि सवत्सेति गम्यते । गोग्रहणं महिष्यादीनामुपलक्षणम् । न्यूनाधिकपरिपालने तु तदनुसारेण भृतिकल्पना द्रष्टव्या । इयञ्च वत्सतर्यादिभृतिकल्पना परिभाषितभृत्यभावविषया । परिभाषिते तु परिभाषालङ्घनमेवैव देया । अनुक्तु प्रकारान्तरेण भृतिपरिमाणमाह "गोपः क्षीरभृतो यस्तु स दुग्धादृणतो वराम् । गोस्वाम्यनुमतो भृत्यः सा स्यात् पालेऽभृते भृतिः" इति । दशानान्दोग्ध्रीणां मध्ये वराञ्चतुरश्चतस्रो वत्सतरीरभृतो भृत्यो गोपः दशदोग्ध्रीपालनलब्धदुग्धोयाद् भृत्यर्थम् । सैषा भृतिः पूर्वं द्रव्यान्तरेणाभृते ज्ञेया । यस्तु द्रव्यान्तरेण भृतः तस्य तदेव भृतिरित्यर्थः । यस्तु भृतिं गृहीत्वा पशूनुत्सारयेत् विनाशयति वा तं प्रत्याह याज्ञवल्क्यः "प्रमादस्खलनञ्चैव प्रदाप्यः क्षतवेतनः" इति । प्रमादपदेन प्रत्युपालकदोषोपलक्षणार्थेन मनुना प्रमादनाशः सूचितः "नष्टं विनष्टं कर्मभिः सूचत विप्लवे हृतम् । दानं प्रकृतकारेण प्रदाप्यः स्यात् पाल एव तु" इति । सूचनम् गुप्ता हृतम् । विप्लवे दुर्गमप्रदेशे । पुरुषकारः पुरुषप्रयत्नः । यत् पुरुषप्रयत्नेन हीनं सद्भाण्डादिकं प्राप्तं तद्दातव्यमित्यर्थः । पुरुषकारश्च दृढस्मृतिना दर्शितः "क्षमिचौरव्याघ्रभयाद्धरीश्वराच्च पालयेत् । व्याघ्रेच्छक्तितः क्रोशे स्वामिने सा निवेदयेत्" इति । व्याघ्रेत्व व्यसनाभावाय यतेतेत्यर्थः । चौरैर्बलात्कारेणापहृते न दाप्य इत्याह मनुः "विप्लुत्य तु हृतश्चौरैर्न पालोदातुमर्हति । यदि देशे च काले च स्वामिनः स्वस्य शंसति" इति । विप्लुत्य अरक्षकादिभिर्दोषं कृत्वा । देशे स्वाम्यवस्थानदेशे । काले अरक्षणकालाव्यवच्छिनकाले । विषयविशेषे पशुपालस्य अपहरणकालाव्यवच्छिनकाले । दण्डमाह व्यासः "दृष्टहीनमूल्यो गोपालस्वांश्यक्षा निर्जने वने । आसन्नारी न्यूनैर्वाध्यः शक्तो च वनेचरः" इति । शक्तो नापित इति कल्पतरौ । पुरुषेण प्रयत्नाकरणे दण्डमाह नारदः "स्याच्चेद्गोप्यसनं गोपो व्याघ्रेक्षेत तस्य शक्तितः । अथालक्ष्यं गमस्य स्वामिने वा न निवेदयेत्" । अव्याघ्रक्षविक्रोशनं स्वामिने वा

निनेदयेत् । वोढुमर्हति गोपस्तं विनयञ्चैव राजनि" इति । तक्रवादिकम् । पशूनां दैवात् मरणे पालकस्य दोषाभावज्ञानोपायमाह व्यासः "मृतेषु च विशुद्धः स्याद् बालग्रहणादिदर्शनात्" । आदिशब्देन कर्णादीनां ग्रहणम् । तथा च मनुः "कर्णौ चर्म च बालांश्च वस्तिं स्नायुञ्च रोचनाम् । पशुषु स्वामिनां दद्यान्मृतेष्वङ्गानि दर्शयेत्" इति । अङ्गादि दर्शयेदिति क्वचित् पाठः । अङ्गैः ग्रहणकर्णादिरूपचिह्नैः । आदिशब्दः साकल्यसंग्रहार्थः । पशुषु मृतेष्वङ्गादिकं स्वामिने दर्शयेत् । रोचनादिकं यत्प्रयोजनं तत् तस्मै दद्यादित्यर्थः । नष्टगवादिदानञ्च तत्स्वामिने मूल्यद्वारेण ज्ञातव्यम् । अतएव विष्णुः "दिवा पशूनां हृकाद्युपघाते पालेऽत्वनायति पालकदोषो विनष्टपशूनां मूल्यं स्वामिने दद्यादिति" । अनायति अनागच्छति । विनयद्व्यप्रकरणमाह याज्ञवल्क्यः "पालदोषविनाशे तु पाले दण्डो विधीयते । अर्द्धत्रयोदशपणः स्वामिनो दृश्यमेव च" इति । अर्द्धत्रयोदशपणः अर्द्धरहितत्रयोदशपणः । सार्द्धद्वादशपण इति यावत् । उत्तरपदलोपी कर्मधारयः । यत्तु केनचिदर्द्धाधिकत्रयोदशपणो दण्ड इति व्याख्यातं तत् सार्द्धद्विमात्रादिषु अर्द्धत्रिमात्रादि महाभाष्यकारशब्दप्रयोगदर्शनादुपेक्ष्यम् । पालदोषमाह मनुः "अजाविकं तु सरुद्धे हृकैः पाले त्वनायति । यां प्रसह्य हृको हन्यात् पाले तत् किल्बिषं भवेत्" इति । अनायति उपद्रवनिवारणाय अनागच्छतीत्यर्थः । यां अजाविकजातीयाम् । दुर्गमस्थलस्थविषये त्वाह स एव "तासां क्षेत्रवरुद्धानां चरन्तीनां मिथोवने । यां तत्र मुल्य हृको हन्याच्च पालस्तत्र किल्बिषी" इति । अवरुद्धानां पालकेन स्थापितानामित्यर्थः । गवादिप्रचारणार्थं भूमिमाह याज्ञवल्क्यः "ग्राम्येच्छया गोप्रचारो भूमीराजवशेन वा" । ग्राम्येच्छया ग्रामीणजनवशेन राजेच्छया वा । गोप्रचारो गवां तृणादिभक्षणार्थं क्रियानपि भूभागोऽभिप्रेतः परिकल्पनीय इत्यर्थः । गवां स्थानासनसौकर्य्याय ग्रामक्षेत्रयोरन्तरञ्च स एव "मनुः शतपरीणाहो ग्रामक्षेत्रान्तरं भवेत् । द्विगुणं खर्वटस्य स्याद्गवां यत्र चतुःशतम्" इति परीणाहशब्देनात्र सर्वासु दिक्षु शतमप्रस्तुतस्थलं ज्ञाप्यते । एतादृशं धनुः शतं परिमितं ग्रामक्षेत्रयोरन्तरं कार्य्यम् । खर्वटस्य शतद्वयपरिमितमित्यर्थः । खर्वटः अनेककारुकुटीवनयुक्तो ग्राम इति मदनरत्ने । माधवाचार्य्यैस्तु प्रचुरकण्डकमलानो ग्राम इति व्याख्यातम् । तत्र शस्योत्पत्तेः प्रागेवावरणं कार्य्यमित्याह कात्यायनः "अजातेष्वेव शस्येषु कुर्य्यादावरणं महत् । दुःखेन विनिवार्य्यन्ते लब्धस्वादरसा मृगाः" इति । एवं पशुनिवारणार्थं कृतेऽप्यावरणे तमतिक्रम्य पशुभिः शस्यादिविनाशे कृते कर्त्तव्यमाह मनुः "पथिक्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः । स पालः शतदण्डार्हो विपालं वारयेत् पशुम्" इति । पथिक्षेत्रे मार्गसमीपे क्षेत्रे । ग्रामान्तीये ग्रामसमीपवर्त्तिनि । सपालः पशुः पणशतदण्डार्हः तत्पशुपालः पणशतं दण्डनीय इत्यर्थः । अयञ्च दण्डः पशुपालने समर्थेन सता पशावनिवार्य्यभागे वेदितव्यः । अतएव नारदः "उत्क्रम्य तु वृतिं यः स्याच्छस्यघातो गवादिभिः । पालः शास्यो भवेत् तत्र न चेच्छक्तो निवारयेत्" इति । आवरणाभावेनापरिहार्य्ये शस्योपघातेऽपि न पालस्य दण्डः । तथा च मनुः "तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि । न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम्" इति । अनेनाहतक्षेत्रशस्योपघाते पशुरक्षिणां दण्ड इत्यर्थादुक्तं भवति । अदीर्घकालप्रचारविषयमेतत् । दीर्घकालप्रचारे तु अपरिवृतेऽपि पशुपालो दण्डार्हो भवति । अतएवाल्पकालप्रचारे दोषाभावं दर्शयति विष्णुः "पथि ग्रामविवीतान्ते न दोषोऽल्पकालमिति" । पशुविशेषे दण्डपरिमाणमाह याज्ञवल्क्यः "ग्रामान्तेषु तु महिषी शस्यघातस्य कारिणी । दण्डनीया तदर्द्धं तु गोस्तदर्द्धमजाविकम् । भक्षयित्वोपविष्टानां यथोक्तादु द्विगुणो दमः । समेषां विवीतेऽपि खरोष्ट्रं महिषीसमम्" इति । परशस्यघातकारिण्या महिष्याः स्वामी अष्टौ माषान् दण्ड्यः । गोः स्वामी चतुरः । छागस्वामी मेषस्वामी च द्वौ । एतेषां पशूनां शस्यभक्षणादारभ्य तत्रैव उपविष्टानां स्वामी यथोक्तदण्डाद् द्विगुणं प्राह्यः । विवीतस्यतृणाद्युपघातेऽपि शस्योपघातवद्दण्डनीयः । खरस्वाम्युष्ट्रस्वामी च महिषीस्वामिवद्दण्डनीयः । अत्र पशुस्वामिनो दण्ड इत्यभिधातव्ये महिष्यादिग्रहणं प्रतिपशुदण्डप्राप्त्यर्थम् । भक्षयित्वोपविष्टपशुविषये यथोक्तात्चतुर्गुणो दण्डः । तथा च स्मृत्यन्तरम् "पशूनां द्विगुणः प्रोक्तः सस्यानां चतुर्गुणः" इति । अत्रापराधानुसारेण दण्डनार्थं तात्त्विकमाघो ग्राह्यः न पुनः

मौद्गलो राजतो वेति स्मृतिचन्द्रिकायाम् । तात्त्विकमाह्य कर्षपरिमाणितस्य षोड्शो भागो भवति । तयमेव "पणस्तं पञ्च वापि प्रकीर्त्तिताः इति याज्ञवल्क्योक्तपञ्चकृष्णपरिमितरूपके पणचतुर्थांशस्य विंशतिमाषात्मकस्य माषस्य "माषो विंशतिमोभागः पणस्य परिकीर्त्तितः" इति नारदोक्तो विंशो भागोऽपि भवति । एतेन स्मृतिचन्द्रिकायाम् अपराधानुसारेण दण्डनार्थं माषो "विंशतिमो भागः पणस्य परिकीर्त्तित" इति नारदोक्तो माषः कैश्चित् स्वीकृत इत्येकीयमतत्वेनोपन्यस्य "सङ्ग्रामे राजसूयेऽश्वमेधे मौनाभ्यासमुदाहृता । कार्षापणान्ता सा दिव्ये नियोज्या विनये तथा" इति बृहस्पतिवचनविरोधेन दूषितं तदभयथाप्यर्थभेदाभावेन विरोधाभावान्निरस्तं मन्तव्यम् । यत् तु, मनूक्तस्य "सपादं पणमर्हतीति"तत् स्वामिनो मतिपूर्वं पशुव्यतिक्रमविषयम् । याज्ञवल्क्यवचनन्त्वबुद्धिपूर्वविषयमिति न तयोर्विरोधः । यत् तु "पणस्य पादो द्वौ मान्तु द्विगुणं मार्हषं तथा । तथाजाविकवत्सानां पादो दण्डः प्रकीर्त्तित" इति स्मृत्यन्तरं तदुभयत्वविशेषितगवादिविषयम् । यत् पुनर्नारदेनाभिहितम् "माषमङ्गं दाययेद्दु दण्डं द्वौ माषौ महिषीं तथा । तथाजाविकवत्सानां दण्डः स्याद्द्वौ मार्षिकः" इति । तन्मूलोन्मादभक्षणविषयम् अतएवाहतः शङ्खलिखितौ । "नातौ चरन्तौ गोः पञ्चमाषां दिवा तीक्ष्णौ माषं व्यासे त्वदण्डमिति" । व्यासे त्वदण्ड इत्यस्यायमर्थः । मर्हिष्यादिभिः परक्षेत्रेषु कवलमात्रभक्षणे कथञ्चित् ज्ञाते पालकस्य स्वामिनो वा स्वल्पोऽपि दण्डो नास्तीति । व्यालपशुविषये बहुभक्षणाभ्यासेष्वेवमेव दण्डाभावप्रतिपादनमुखेनाह नारदः "रज्जुच्छिन्नो वृक्षतो वा वज्राशनिहतोऽपि वा । व्यस्य सर्वेण दग्धो वा दष्ट्वा दु वा पतितो भवेत् । व्याघ्रादिभिर्हतो वापि व्याधिभिर्वापि पीडितः । न तत्र दोषः पालस्य न च दोषोऽस्ति गोस्वामिनः" इति । गोस्वामिनां गोस्वामिनाम् । व्यालराणामनिवार्यत्वादित्यभिप्रायः । अनालराणामपि केषाञ्चित् पशूनां दण्डाभावसाह स एव "गौः प्रसूता दशाहात् तु सद्योजा बालिकुञ्जराः । न निवार्याः प्रयत्नेन तेषां स्वामी न दण्डभाक्" इति । दशदिनपर्य्यन्तं प्रसूतायाः निरोद्धुमशक्यत्वान्न स्वामी दण्डभाक् । सद्योजस्य सर्वासाङ्गभोधालार्थं सर्वदा बन्धनायोगात् तत्स्वामी न दण्डभाक् । बालिकुञ्जराणां स्वामिनोऽदण्डभागित्वे हेतुमाहोशनाः "अदण्ड्या हस्तिनो ह्याश्वा प्रजापालाहि ते स्मृताः" स्वामिग्रहणं पालकस्याप्युपलक्षणार्थम् । यदाह मनुः "अनिर्दशाहां गां स्मृतां दुष्टान् देवपशूंस्तथा । सपालान् वा विपालान् वा अदण्ड्यान्मनुरब्रवीत्" इति । दुष्टाः सङ्घाताः । यद्वा दुष्टोत्सर्गविधानेनोत्सृष्टाः । देवपशवः देवालयेषु देवोपभोगार्थं स्थापिताः पशवः । याज्ञवल्क्योऽपि "सङ्घोत्सृष्टपशवः स्मृतिकागन्तुकादयः । पालोपेक्षान्न ते मोक्षा दैवराजपरिश्रुताः" । अनिर्दशाहा आगन्तुकः स यूथात्परि भ्रष्टः सन् देशान्तरात् समागतः । येषां पालो नास्ति तेऽपि दैवराजोपहृताः शस्त्रादिनाशकारिणो न दण्ड्या इत्यर्थः । आदिशब्देन स्मृतवत्सादीनां ग्रहणम् । स्मृतवत्सोधनाः "अदण्ड्या स्मृतवत्सा च संज्ञा रोगवती क्षया । अदण्ड्याः काणकूटाश्च दृप्ताश्च क्षतलक्षणाः । अदण्ड्यागन्तुका गौश्च स्मृतिका चाभिसारिणी" इति । कूटः एकशृङ्गः । क्षतलक्षणः प्रतप्तायसेन क्षतलक्ष्मवान् । अभिसारिणी स्वयूथात् प्रच्युता पुनः स्वयूथगामिनी । परशस्त्रविनाशे न केवलं पशुस्वामी दण्डनीयः सदमपि दापनीय इत्याह बृहस्पतिः "शस्त्राच्चिवारयेद्गास्तु चीर्णे दोषो द्वयोर्भवेत् । स्वामी सदस्य दाप्यः पालस्ताडनमर्हति" इति । सदश्च दमश्च सदस्यम् । समूलशस्त्रनाशविषयमेतत् । अतएव नारदः "समूलशस्त्रनाशे तु तत्स्वामी प्राप्नुयात् सदम् । वधेन गौर्योंसच्येव दण्डं स्वामिनि पातयेत्" इति । तत्स्वामी शस्त्रस्वामी सदं प्राप्नुयात् । पशुस्वामिनः सकाशादिति शेषः । वधोऽत्र कशादिना ताडनम् । न प्राणच्छेदः । पालस्ताडनमर्हतीति वचनात् । सदश्च शासनादिभिः परिकल्पितो देयः । अतएव स एवाह "गोभिस्तु भक्षितं शस्यं यो नरः प्रतियाचते । शासनात् तु समं देयं धान्यं यत् तत्र याचितम्" इति । यत् तु सदयाचननिषेधनम् "गोभिर्विनाशितं धान्यं यो नरः प्रतियाचते । पितरस्तस्य नाश्नन्ति न वापि त्रिदिवौकसः" इत्यशनोवचनन्तु व्यालादिसमीपस्थानाहृतत्वेत्विषयमिति साधवाचार्याः । श्राद्धकाले दौ गोभक्षितविषयमिति सदनरत्नकृतः । सर्वासाङ्गवासुतसवे श्राद्धविशेषादस्त्वात्मसाह स एव "अदण्ड्या सोत्सवे मायः श्राद्धकाले तथैव च" इति । गोभिः श्राद्धकालादौ भुक्तमतिश्रेयस्करत्वित्याशयेनाह । व्यासः "श्राद्धस्य च द्विजेभुक्तं परिक्षीणस्य बान्धवैः । गोभिश्च नरशार्दूल !

वाजपेयादिशिष्यते" इति एतत्पदसुपसंहरति मनुः "एतद्विधानमातिष्ठेद्वार्धिकः पृथिवीपतिः। ज्ञातिभिश्च पशूनाञ्च पाल्यानाञ्च व्यतिक्रमे"।

स्वायम्भुव पु० स्वयंभुवोऽपत्यम्, तस्येदम् वा अण् ओरो-दिति वक्तव्ये ओर्गुण इत्युक्त्या संज्ञापूर्वकविधेरनित्यत्वज्ञापनाच्च गुणः उवङ्। १स्वयम्भूपुत्रे मनौ २स्वयम्भुसम्बन्धिनि त्रि० "धाम स्वायम्भुवं ययुः" भुवारः। स्त्रियां ङीप्। सा च १ब्राह्म्याम्। "भार्गवी नारदोक्ता च वार्हस्पत्याङ्गिरस्यपि। स्वायम्भुवस्य शास्त्रस्य चतस्रः संहिता मताः" इति तदुक्तधर्मशास्त्रसंहिताचतुष्टयम्। तदुत्पत्त्यादिकं यथा

"ततः कालेन महता तस्याः पुत्रोऽभवन् मनुः। स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम्। तद्वंशगुणसामान्यादधिपूरुष उच्यते। वैराजा यत्र ते जाता महर्षयः संशितव्रताः। स्वायम्भुवान् महाभागान् सप्त सप्त तथापरे। स्वारोचिषाद्या ते सर्वे ब्रह्मतत्त्वस्वरूपिणः। औत्तमिप्रमुखास्तद्वद् येषान्वंशप्रभोऽधुना" मत्स्यपु० ४अ०। "ऋषीन्तेषां प्रवक्ष्यामि पुत्रान् देवगणांस्तथा। मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः। पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः। उत्तरस्यां दिशि तथा राजन्! ब्रह्मर्षयः स्थिताः। यामा नाम तथा देवास्तेषां स्वायम्भुवेऽन्तरे। आग्नीध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्वसुः। ज्योतिष्मान् द्युतिमान् हव्यः सवनः पुत्र एव च। मनोः स्वायम्भुवस्यैते दश पुत्रा महौजसः। एतत्ते प्रथमं राजन्! मन्वन्तरमुदाहृतम्" हरिवं०७अ०।

स्वाराज् पु० स्व स्वर्गे राजते राज-क्विप्। इन्द्रे अमरः।

स्वाराज्य न०स्वराजः भावः ष्यञ्। ब्रह्मत्वे स्वाराज्यसिद्धिः।

स्वारोचिष पु० द्वितीये मनौ। "ओर्वो वशिष्ठपुत्रश्च सवनः काश्यप एव च। प्राणो दत्तात्रितिश्चैव दत्तो निधिपवन कथा। एते महर्षयस्तात! वायुप्रोक्ता महाव्रताः। देवाश्च तुषिता नाम सुताः स्वारोचिषेऽन्तरे। ऋषिभिः सुकनिर्ज्योतिरापो मूर्त्तिरजस्यः। प्रथितश्च नभश्चैव ऋषभश्चैव च। स्वारोचिषस्य पुत्रास्ते मनोर्जात महात्मनः। कीर्त्तिताः पृथिवीपाल! महावीर्य्यपराक्रमाः। द्वितीयमेतत् कथितं तव मन्वन्तरं मया" हरिवं०७अ०।

स्वार्थ पु० स्वस्य अर्थः प्रयोजनम् अभिधेयो वा। १स्वप्रयोजने २स्वाभिधेये च "स्वार्थकः स्वार्थबोधकश्चेति" भट्टभ०

स्वार्थिक त्रि० स्वार्थे विहितः ठण्। स्वार्थविहिते व्याकरणोक्ते प्रत्यये। "स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" महाभाष्यम् यथा बडगुडोढ्रा वा "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" महाभाष्यम्। देवता अपक्रटगुण्डा गुण्डोर इत्यादि।

स्वास्थ्य न०स्वस्थस्य भावः ष्यञ्। १आरोग्ये २स्वन्तोषे अमरः।

स्वाहा अव्य० सु+आ+हे-डा। १देवोद्देशेन हविस्त्यागे अमरः। २अग्निभार्य्यायां स्त्री "स्वाहेयं हविर्भुजम्" रघुः। ३मातृकाभेदे च स्त्री "नमः स्वधायै स्वाहायै इति पितृगाथा। "प्रकृतेः कलया चैव सर्वशक्तिर्भुवेश्वरी। बभूव दाहिका यस्याग्नेः स्वाहा स्वकामिनी। ग्रीष्ममध्याह्नमार्त्तण्डप्रभाच्छादनकारिणी। त्वमग्नेर्दाहिका शक्तिर्भवपत्नी च सुन्दरी। दग्धुं न शक्तस्त्वदृते ऽसुराश्च त्वया विना। त्वन्नामोच्चार्य्य मन्त्रान्ते यो दास्यति हविर्नरः। सुरेभ्यस्तत्प्रापयन्ति सुराः स्यानन्दपूर्वकम्। अग्नेः सम्यक्स्वरूपा च शीघ्रपा सा हविर्भुजः। देवानां पूजिता यस्मात् सदादीनां भवाम्बिके!" ब्रह्मवै० प्र० २७अ०। ४दुर्गाशक्तिभेदे "दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते" दुर्गापूजामन्त्रः।

स्वाहाप्रिय पु० ६त०। अग्नौ हवा०स्वाहापत्यादयोऽप्यत्र।

स्वाहाभुज् पु०स्वाहेतिमन्त्रेण त्यक्तहव्यं भुङ्क्ते भुज-क्विप्। देवे अमरः। [च मेदि०

स्विद् अव्य० स्विद-क्विप्। १पक्षे २वितर्के अमरः ३पादपूरणे

स्विन्न त्रि० स्विद-क्त। १घर्मयुक्ते २स्वेदान्विते च ३पक्के "स्विन्नमक्षुण्णदाक्षुतम्" भूरिः। [अङ्गीकारे।

स्वीकार पु० अक्षस्य स्वस्य कारः करणं स्व+च्वि+कृ-घञ्।

स्वीय त्रि० स्वस्येदम् छ अपत्यिनीयैरञ् च कुत्सिते मन्यते। १निजसम्बन्धिनि २नायिकाभेदे स्त्री नायिकाशब्दे दृश्यम्। [आदित् स्वूर्णं सूर्च्छितम्।

स्वुर्च्छ विस्तृतौ भ्वा० प० सक० सेट्। स्वूर्च्छति अस्वूर्छीत्

स्वृ शब्दे अक० उपतापे सक० भ्वा० प० सेट्। स्वरति अस्वारीत् अस्वार्षीत्।

स्वृ हिंसने क्र्या० प० अक० सेट्। स्वृणाति अस्वारीत्। **स्वेक** गतौ भ्वादि० आत्म० अक० सेट् आदित् अक्ति न स्वेकः। स्वेकते अस्वेकिष्ट।

स्वेच्छा स्त्री ६त०। स्वाभिलाषे केवल०। [धीनस्त्वयुक्ते त्रि०।

स्वेच्छामृत्यु पु०स्वेच्छया मृत्युर्यस्य। १भीष्मे त्रिका० २स्वेच्छा०

स्वेद पु० स्विद-भावे घञ्। १घर्मजे (सेका) २घर्मनिर्गमादिहेतौ जलादेः निष्क्रान्तने। णिच् भावे अच्।

धर्मनिरूपणे तत्प्रकारादिकं चरकेणाभिहितं यथा "अतः स्वेदाः प्रवक्ष्यन्ते यैर्यथावत् प्रयोजितैः। स्वेदसाध्याः प्रशाम्यन्ति गदा वातकफात्मकाः। स्नेहपूर्वं प्रयुक्तेन स्वेदेनावर्जितेऽनिले। पुरीषमूत्ररेतांसि न सज्जन्ति कथञ्चन। शुष्काण्यपि हि काष्ठानि स्नेदं स्वेदोपपादनैः। गमयन्ति यथान्यायं किं पुनर्जीवतो नरान्। रोगार्त्तव्याधितामेद्योनात्युष्णोऽतिस्तदुर्न च। द्रव्यवान् कल्पितो देशे स्वेदः कार्य्यकरो मतः। व्याधौ शीते शरीरे च महान् स्वेदो महाबले। दुर्बले दुर्बलः स्वेदो मध्यमे मध्यमो हितः। वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते। स्निग्धरूक्षस्तथा स्निग्धोरूक्षश्चाप्युपकल्पितः। आमाशयगते वाते कफे पक्वाशयाश्रिते। रूक्षपूर्वो हितः स्वेदः स्नेहपूर्वस्तयैव च। हृषणो हृदयं दृष्टी स्वेदयेत् मृदुनैव वा। मध्यमं बलवृद्धयर्थं श्लेष्मसङ्घातविलयनमिष्यते। सुखैर्नक्तकैः पिण्डैर्गोधूमानामथापि वा। पद्मोत्पलपलाशैर्वा स्वेद्यः संहत्य चक्षुषी। शुक्लावर्त्तोभिः शीताभिः शीतलैर्भोजनैरपि। लालाद्यैर्जलजैर्हृद्यैः स्विद्यतो हृदयं स्पृशेत्। शीतमूलव्यपरमे स्तब्धगौरवनिग्रहे। सञ्जाते मार्दवे स्वेदे स्वेदनाद्विरतिर्मता। पित्तप्रकोपो मूर्च्छा च शरीरस्य च तृष्णा। दाहः स्वेदाङ्गदौर्बल्यमतिस्निग्धस्य लक्षणम्। उक्तं शास्त्राश्रितीये यो वैधिकः सर्वतो विधिः। सोऽतिस्निग्धस्य कर्त्तव्यो मधुरः स्निग्धशीतलः। कषायमद्यनित्यानां गर्भिण्या रक्तपित्तिनाम्। पित्तिनां सातिसाराणां रूक्षाणां मधुमेहिनाम्। विदग्धस्वल्पनाड़ीनां विषमद्यविकारिणाम्। श्रान्तानां नष्टसंज्ञानां स्थूलानां पित्तमेहिनाम्। तृषार्त्तानां क्षुधितानाञ्च क्षुद्राणां शोचतामपि। कामलाभ्युदरिणाञ्चैव क्षतानामाशुरोगिणाम्। दुर्बलातिविशुष्काणामसृपक्षीणौजसां तथा। भिषक् तैमिरिकाणाञ्च न स्वेदमवतारयेत्। प्रतिश्याये च कासे च हिक्कास्वासेष्वलाघवे। कर्णमन्याशिरःशूले स्वरभेदे गलग्रहे। वर्द्धितैकाङ्गसर्वाङ्गपक्षाघाते विनामके। कोष्ठानाहविबन्धेषु शुक्राघाते विजृम्भके। पार्श्वपृष्ठकटीकुक्षिसंग्रहे गुदभ्रंशेषु च। मूत्रकृच्छ्रे महत्त्वे च सुक्ष्मौदरकृमिदर्के। पादोरुजानुजङ्घार्त्तिसंग्रहे व्रणयोरपि। खल्लीषालेषु गीते च वेपथौ वातकण्टके। सङ्कोचायामस्तब्धेषु स्तब्धगौरवसुप्तिषु। सर्वाङ्गेषु विकारेषु स्वेदनं हितमुच्यते। तिलमाषकुलत्थास्नुहतैलाभिघातनैः। पायसैः क्षीरमांसैः पिण्डस्वेदं प्रयोजयेत्। गोखरोष्ट्रवराहाश्वगवां हृद्यैः सतुषैर्यवैः। सिकतापांशुपाषाणकरीषायसपुटकैः। स्नैग्धिकान् स्वेदयेत् पूर्वैर्बाधितान् सक्तपाचरेत्। द्रव्याण्यतानि शस्यन्ते यथास्वं प्रस्तरेष्वपि। भूस्तृणेषु च जेन्ताकैरण्डगर्भस्तृणेषु च। विधूमाङ्गारतप्तेष्वभ्यक्तः स्विद्यति नाऽसुखम्। व्याख्यानूपोदकं मांसं पयोवस्तशिरस्तथा। वराहमध्यपित्तास्रकस्तूर्वल्लितण्डुलान्। इत्येतानि समस्तकाव्य नाड़ीस्वेदं प्रयोजयेत्। देशकालविभागज्ञो युक्तप्रेक्षी भिषक्क्रमः। वारणाष्टकैरण्डशिग्रुमूलकसर्षपैः। वासावंशकरञ्जार्कपत्रैरण्डस्य च। शोभाञ्जनकशेरीयमालतीसुरसार्जकैः। पत्रैरुत्काथ्य सलिलं नाड़ीस्वेदं प्रयोजयेत्। भूतीकपञ्चमूलाभ्यां सुरया दधिकस्तुना। पत्रैरस्तैश्च सस्नेहैर्नाड़ीस्वेदं प्रयोजयेत्। अतएव च निर्यूहाः प्रयोज्या जास्तकोष्टके। स्वेदनार्थं घृतक्षीरतैलकोष्णांश्च कारयेत्। गोचूर्णशकलैश्चूर्णैर्यवानामस्तसंयुतैः। सस्नेहकिण्वलवणैरुपनाहः प्रशस्यते। गन्धैः सुरायाः किण्वेन जीवन्त्या शतपुष्पया। उभया कृष्णतैलाभ्यां युक्तया चोपनाहयेत्। चर्मभिश्चोपनद्धव्यः सचोर्मभिरपूतिभिः। एषणीयैरथाभे तु कौशेयाविकशाटकैः। रात्रौ बद्धं दिवा मुञ्चेत् मुञ्चेद्वात्रौ दिवाऽक्तम्। विद्याद्विपरिहारार्थं स्यात् प्रकर्षस्तु शीतले। सङ्करः१ प्रस्तरो२ नाड़ी३ परिषेको४ऽवगाहनम्५। जेन्ताको६ऽभ्रमघनः७ कर्षुः८ कुटीह्रदः१० कुम्भिकैव११ च। कूपो१२ दालाक१३ इत्येते स्वेदयन्ति त्रयोदश। तान् यथावत् प्रवक्ष्यामि सर्वानेवानुपूर्वशः" इति। तत्र वस्त्रोन्तरितैरवस्त्रान्तरितैर्वा पिण्डैर्यथोक्तैरुपस्वेदनं सङ्करस्वेदः इति विद्यात्। शूकधान्यपुलाकानां वेशवाराया सक्तुशरोत्कारिकादीनां वा प्रस्तरे कौशेयाविकोत्तरच्छदे पञ्चाङ्गुलोरुवूकार्कपत्रच्छदे वा स्वभ्यक्तसर्वगात्रस्य शयानस्योपरि स्वेदनं प्रस्तरस्वेदः इति विद्यात्। स्वेदनद्रव्याणां पुनर्मूलफलपत्रभङ्गादीनां मृगशकुनपिशितशिरस्कादीनामुष्णस्वभावानां वा यथार्हमस्तलवणस्नेहोपसंहितानां मूलक्षीरादीनां वा कुम्भ्यां वाष्पमुदमन्थासुत्कथितानां नाड्या शरेणोकादंशदलकरञ्जार्कपत्राद्यतमकृतया गजाग्रहस्तसंस्थानया व्यामदीर्घया व्यामार्द्धदीर्घया वा व्यामचतुर्भागाष्टभागमूलाग्यपरिणाहस्रोतसा सर्वतो वातहरपत्रसंहतच्छिद्रया द्विस्त्र्यां विनाः

मितया वातहरसिद्धस्नेहाभ्यक्तगात्रो वाष्पमवहरेत्। वाष्पो ह्यनूर्द्धगामी विहतघनद्रवेगस्वेदमार्दवहृत् सुखं स्वेदयतीति नाड़ीस्वेदः१। वातिकोत्तरवातिकानां पुनर्मूषादीनामुक्तकाष्ठैः सुखोष्णैः कुम्भीवोर्धुलिकाः प्रनाड़ीवां-पूरयित्वा यथार्हंसिद्धस्नेहाभ्यक्तगात्रं वस्त्रावच्छन्नं परिषेचयेदिति परिषेकः४। वातहरोत्क्वाथक्षीरतैलघृतपिण्डितनरसोष्णसलिलकोष्ठकावगाहस्तु यथोक्त एवावगाहः"५। "अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत इत्यादि"।

(जेन्ताकशब्दे ११४४ पृ० अस्य लक्षणादुक्तप्रायम्६।)

"शयनस्य प्रमाणेन घनामश्लक्ष्णमयीं शिलाम्। तापयित्वाग्नितप्तैर्दारुभिः सम्प्रदीपितैः। व्यपोह्याग्रं सर्वानङ्गारान् प्रोक्ष्य चैवोष्णवारिणा। तां शिलामथ कुर्वीत कौशेयाविकसंस्तराम्। तस्यां स्वभ्यक्तसर्वाङ्गः शयानः स्विद्यते सुखम्। रौरवाजिनकौशेयप्रावाराद्यैः सुसंवृतः। इत्युक्तोऽमुघनस्वेदः७। कर्षूस्वेदः प्रवक्ष्यते। खानयेच्छयनस्याधः कर्षूं स्थानविभागवित्। दीप्तैरधूमैरङ्गारैस्तां कर्षूं पूरयेत् ततः। तस्यामुपरि शय्यायां स्वपन् स्विद्यति ना सुखम्८। घनत्वत्मेधविस्तारां वृत्ताकारामलोचनाम्। वनभित्तिं कुटीं कृत्वा कुड्याद्यैः सम्प्रलेपयेत्। कुटीमध्ये भिषक् शय्यां स्वास्तीर्णाङ्गोपकल्पयेत्। प्रावाराजिनकौशेयकृत्स्नकम्बलगोलकैः। कृमिनिकाभिरङ्गारपूर्णाभिस्तासु सर्वतः। परिवार्याग्निरारोहेदभ्यक्तः स्विद्यते सुखम्९। य एवाघ्रक्षस्वेदविधिर्भूमौ स एव तु। प्रशस्तायां निवातायां समायामुपदिश्यते१०। कुम्भीं वातहरक्वाथपूर्णां भूमौ निखातयेत्। चतुर्भागं त्रिभागं वा शयनं तत्र चोपरि। स्थापयेदासनं वापि नातिमान्द्रपरिच्छदम्। अथ कुम्भ्रां सुमत्प्रान् प्रक्षिपेदयसोगुड़ान्। पाषाणान् वोष्मणा तेन ततस्यः स्विद्यति ना सुखम्११। सुसंवृताङ्गः स्वभ्यङ्गः स्वेदैरनिलनाशनैः। कूपं शयनविस्तारं द्विगुणञ्चापि वेधतः। देशे निवाते शक्ते च मुख्यादन्तः सुमार्जितम्। कृत्स्नमृगोष्ट्रगोखरोष्ट्राणां करीषैर्दग्धपूरिते। स्वच्छन्नः सुसंस्तीर्णेऽभ्यक्तः स्विद्यति ना सुखम्१२। वीथीकान्तु करीषाणां यथोक्तानां प्रदीपयेत्। शयनान्तः प्रमाणेन शय्यामुपरि तत्र च। मृदग्भायां विधूमायां यथोक्तामुपकल्पयेत्। स्वच्छन्नः स्वसंस्तवाभ्यक्तः स्विद्यति ना सुखम्। दोलाकस्वेद१३ इत्येष सुखः प्रोक्तो मनर्हिषेति"। इति त्रयोदशविधः स्वेदोऽग्निगुणसंश्रयः। व्यायाम उष्णसदनं गुरुपावरणं क्षुधा। वस्त्रपानं भयक्रोधावमानाहर्षा" तपाः। स्वेदयन्ति दशैतानि नरमग्निगुणाहते। इत्युक्तो द्विविधः स्वेदः संयुक्तोऽग्निगुणैर्न च। एकाङ्गसर्वाङ्गगतः स्निग्धो रूक्षस्तथैव च। इत्येतत् त्रिविधं द्वन्द्व स्वेदमुद्दिश्य कीर्त्तितम्। स्निग्धः स्वेदैरुपक्रम्यः स्विन्नः पथ्यागणो भवेत्। तद्दुः स्विन्नगात्रस्तु व्यायामं वर्जयेन्नरः" इति। तत्र श्लोकाः "स्वेदो यथा कार्य्यकरोक्तितो येभ्यश्च यद्विधः। यत्र देशे यथायोग्यो देशो रूक्षस्य यो यथा। स्विन्नातिस्विन्नरूपाणि तथातिस्विन्नभेषजम्। अस्वेद्याः स्वेदयोग्याश्च स्वेदद्रव्याणि कल्पना। त्रयोदशविधः स्वेदो विना दशविधोऽग्निना। संग्रहेण च षट्स्वेदाः स्वेदाध्याये निदर्शिताः। स्वेदाधिकारे यदाख्यमुक्तमेतन्मुनर्षिणा। शिष्यैस्तु प्रतिपत्तव्यमुपदेष्टा पुनर्वसुरिति"।

स्वेदज पु० स्वेदाज्जायते जन-ड। १स्वेदजाते दंशादिजन्तौ अमरः २स्वेदजातमात्रे त्रि०।

"संस्वेदजविकाराश्च यथा येभ्यो भवन्ति च। मानुषस्वेदमलजा मक्षिकाद्या भवन्ति च। नवमेघप्रसिक्तायां पिण्याकादिगणादयः। संस्वेदजास्तु विज्ञेया दृक्षगोपशुजन्तवः। समिदुभ्या आमसुदृशेभ्यः फलेभ्यस्तथैव जन्तवः। जायन्ते क्रिमयो विप्राः! काष्ठेभ्यो घुणकादयः। तथा शुक्तविकारेभ्यः पूतिकाः प्रभवन्ति च। संस्वेदजाश्च जायन्ते वृश्चिकाः शुष्कगोमयात्। गाभ्यो हि महिषेभ्यश्च मानुषेभ्यश्च जन्तवः। मत्कुणादिभ्यश्च विविधा यन्त्रःकृच्छ्रा विशेषतः। अधान्यानि च सूक्ष्माणि क्षुद्रयूकास्तथैव च। गोभ्योऽश्वेभ्यश्च वै चटादयः किनीनकाः। माक्षिकाणां विकाराश्च चतस्रश्चोदकर्दमैः। शरावति विकाराश्च करीषेभ्यो भवन्ति हि। एवमादिरसंख्यातो गणः संस्वेदजो मया। सर्वोऽत्रान्तर्हितो ह्येष प्राक्कर्मवशजः स्मृतः" वह्निपु०।

स्वेदन न० स्विद-णिच् ल्युट्। गात्रादितो घर्मादेर्निःसारणव्यापारे (भापरा)। स्वेदशब्दे दृश्यम्।

स्वेदनी स्त्री स्विद्यते पच्यतेऽनया स्विद-ल्युट्। लौहपात्रभेदे (तावोया) अमरः। संज्ञायां कन् टापि ह्रस्वः। स्वेदनिका कन्दुरूपे पात्रे हेमच० भर्जनपात्रे शब्दमा०।

स्वैर न० स्वस्य ईरम् ईर-अच् वृद्धिः। १स्वेच्छायाम् २तद्वति ३मन्दे च त्रि० मेदि०।

स्वैरिन् त्रि० स्वेनैव ईरयितुं शीलमस्य ईर-णिनि वृद्धिः। १स्वेच्छाचारिणि स्वतन्त्रे। २व्यभिचारिस्त्रियां स्त्री

स्त्रीप् । श्वशुरपुरुषचतुष्कमात्रिण्यां स्त्रियां च। "मातश्चतुर्थं प्रवदन्मातृस्त्रपि वदन्त्युत। अतःपरं स्त्रैरिणी स्यात् बन्धकी पञ्चमे भवेत्" भा० आ० १२१अ०।

स्त्रोपार्जित त्रि० स्त्रेन स्वयमर्जितम्। स्वयमर्जिते धनादौ। तस्य विभागो दायभागे दर्शितो यथा

"सम्मति विभाज्यमविभाज्यञ्चोच्यते। तत्र कात्यायनः "पैतामहञ्च पित्र्यञ्च यच्चान्यत् स्वयमर्जितम्। दायादानां विभागे तु सर्वमेतद्विभज्यते"। "यच्चान्यदिति चकारः स्वयमित्यनेन संबध्यते स्वयञ्चार्जितमिति चकाराद्यन्यस्यापि तदर्जनं साधारणधनद्वारेणेत्यर्थः। अनुपघातोपात्तमविभाज्यमाह बृहस्पतिर्विष्णू "अनुपघ्नन् पितृद्रव्यं स्वेन यदुपार्जयेत्। स्वयमीहितलब्धं तच्चाकामो दातुमर्हति"। पितृद्रव्योपघाताभावेन द्रव्यद्वारेण नेतरेषां व्यापारः, स्वचेष्टालब्धत्वेन शारीरोऽपि व्यापारो नेतरेषामिति स्वार्जकस्यैव तदसाधारणं स्वयमीहितलब्धं तदिति हेतुत्वेनोपन्यासात्। तथा च व्यासः "अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति, यद्धनम्। दायादेभ्यो न तद्दद्याद्विद्यालब्धन्तु यद्भवेत्"। स्वशक्तिमात्रेण यत् प्राप्नुयादिति सामान्येनाभिधानात् सर्वमेवंविधं स्त्रोपसाधारणं द्रष्टव्यम्। स्वशक्तिप्राप्तस्यापि विद्याधनस्य समाधिकविद्यैः साधारणत्वात् न्यूनविद्याविद्यनिराकरणार्थं विद्यालब्धपदम्। तथा याज्ञवल्क्यः "पितृद्रव्याविरोधेन यदन्यत् स्वयमर्जितम्। मैत्रौद्वाहिकञ्चैव दायादानां न तद्भवेत्"। मैत्रादिग्रहणं प्रदर्शनार्थं, एवमादिषु प्रायेणानुपघातसम्भवात्। तथा मनुः "विद्याधनन्तु यद्यस्य तत्तस्यैव धनं भवेत्। मैत्रौद्वाहिकञ्चैव माधुपर्किकमेव च"। तथा व्यासः "विद्याप्राप्तं शौर्यधनं यच्च यौदायिकं भवेत्। विभागकाले तत्तस्य नान्वेष्यं स्मरिक्थिभिः"। पितृपितृव्यादिभ्यः सुदायसम्बन्धिभ्यः प्रसादादिना लब्धं यौदायिकम्। तथा नारदः "शौर्यभाग्यधनं हित्वा, यच्च विद्याधनं भवेत्। त्रीण्येतान्यविभाज्यानि प्रसादो यच्च पैतृकः"। भाग्योपार्जिते लब्धं भाग्यधनम् औद्वाहिकमित्यर्थः, एतानि वर्जयित्वा अन्यद्विभजेदित्यनुवर्त्तते वाक्यान्तरीयम्। तदेवमादिभिः शौर्यादिधनस्वमविभाज्यत्वे कारणं नोच्यते शौर्यार्जितस्यापि विभागश्रुतेः। तथा च व्यासः "साधारणं समाश्रित्य यत् किञ्चिदुपनायुधम्। शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः। तस्य भागद्वयं देयं ज्येष्ठास्तु समभागिनः। साधारणद्रव्येणार्जितस्य धनस्य विभागं वदति। तथा नारदः "कुटुम्बं बिभ्रयाद् भ्रातुर्यो विद्यामधिगच्छतः। भागं विद्याधनात्तस्मात् स चैवेतरतोऽपि वा"। विभ्रयादित्येकवचननिर्देशात् यदि विद्यासभ्यस्यतो भ्रातुः कुटुम्बभरो भ्राता स्वधनव्ययशरीरायासाभ्यां संवर्द्धयति तदा तद्विद्योपार्जितधने तस्याप्यधिकारः। तथा "वैद्योऽविद्याय नाज्ञप्तो दद्यादंशं स्वतो धनात्। पित्र्यं द्रव्यं समाश्रित्य न चेत्तेन तदर्जितम्"। पत्रपदं साधारणधनपरं तदनाश्रित्यार्जितं वैद्योऽविद्याय अनिच्छन्न दद्यात् वैद्याय विदुषे पुनः साधारणमन्तरेणार्जितं दद्यादेव। तथा च गौतमः "स्वयमर्जितमवैद्येभ्यो वैद्यः कामं न दद्यात्"। असाधारणधनशरीरव्यापारार्जितं स्वयमर्जितं अविद्वद्भ्यो दातुमनिच्छन् न दद्यात् विद्वद्भ्यः पुनर्दद्यादेव। एतच्च विद्याधनमात्रविषयम्। तदाह कात्यायनः "नाविद्यानान्तु वैदुषे देयं विद्याधनं क्वचित्। समविद्याधिकानान्तु देयं वैदुषे तद्धनम्"। तन्नोच्चरितविद्यापदम् उभाभ्यां समाधिकपदाभ्यां संबध्यते तेन समविद्याधिकविद्यानां दातव्यं न्यूनविद्याविद्ययोः पुनरनधिकारः। "तदेवमादिवनैर्विद्याशौर्यादिधनेष्वपि साधारणधनोपघातानुपघाताभ्यां विभागाविभागयोरयमर्थः तत्रैव प्रयोजकत्वात् तत्पदवत्त्वेव श्रुतिः कल्पनीया, उपघातार्जितं विभजेदिति, न पुनः शौर्यादिपदवत्त्वेऽपि, अवश्यकल्पनीयसामान्यश्रुतिकल्पनयैवोपपत्तेः। ज्ञेयाधिकरणन्यायस्यायमेव विषयः। यद्वा न्यायप्राप्त एषोऽयमर्थः, यदुद्यमेनार्जितं तत् तस्मिन् जीवति तस्यैव, असति विशेषवचने, अत्र पुनः साधारणधनमात्रोपक्रम्य व्यापारोऽपरस्य धनशरीराभ्यां तत्रैकस्यैको भागोऽपरस्य भागद्वयं न्यायावगतमेवं सिद्धम्। एतेन चैतदपि सिध्यति, यत् साधारणधनोपघाते सति यस्य यावतोंऽशस्य स्वल्पस्य महतोवोपघातः, तस्य तदनुसारेण भागकल्पना कार्या। किञ्च कात्यायनवचनम् "विभक्ताः पितृवित्ताच्चेदेकत्र प्रतिवासिनः। विभजेयुः पुनर्द्रव्यं स्वल्पमेतोदयो यतः"।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यसङ्कलिते वाचस्पत्ये सकारादिशब्दार्थसङ्कलनम्।

ह

हकारः व्यञ्जनेषु ऊष्मवर्णभेदः। कण्ठस्थानोच्चार्यः। "हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरसं तं विजानीयात् कण्ठप्रसाङ्गसंयुतम् शिवोक्तेः पञ्चमादिवर्णसंयोगे चरमोच्चार्यश्च। तच्चोच्चारणे आभ्यन्तरप्रयत्नः शिक्षाग्रेण कण्ठस्थानस्य अर्द्धसंवारः। "अधोऽस्य दीर्घयणक्लीषङ्गेभस्मृदाः शलत्सहेति" शिवोक्तेः। बाह्यप्रयत्नास्तु घोषसंवारनादा महाप्राणश्च। अस्य ध्येयत्वं कामधेनुतन्त्रोक्तं यथा "हकारं शृणु चार्वङ्गि! चतुर्दलसमद्भवकम्। कुण्डलीद्वयसंयुक्तं रक्तविद्युल्लतोपमम्। रजःसत्त्वसमोयुक्तं पञ्चदेवमयं सदा। पञ्चप्राणात्मकं वर्णं त्रिगुणसहितं सदा। बिन्दुसहितं वर्णं हृदि भावय पार्वति!"। अस्याधिष्ठातृदेवताध्यानमुक्तं वर्णोद्धारतन्त्रे यथा "करवीरभूषिताश्च चतुर्हस्तां दिगम्बराम्। अक्षिमाल्याभयभुजां वरदाभुजेक्षणाम्। नागेन्द्रहारभूषाढ्यां जटामुकुटमण्डिताम्। सर्वसिद्धिप्रदां नित्यां धर्मकामार्थमोक्षदाम्। एवं ध्यात्वा हकारन्तु तन्मन्त्रं दशधा जपेत्"। मातृकान्यासेऽस्य दन्तपादेन्यस्यता काव्यं दौ प्रथमप्रयोगे खेटःफलं दृ०र०टीकायामुक्तं यथा "सः सौख्यं हन्तु खेटस्य विनयमपि च लं नः सम्पदं करोति"। अकारादिवर्णानां प्रयोगे फलादिकं यत्र भवतीति तत्रैवोक्तं यथा "पद्यादौ गद्यवक्त्रे वचसि च सकले प्राकृतादौ समोऽयम्" इति। एतेषां फलाधारनिरूपणमप्याकारे "नायको वर्ण्यते यत्र फलं तस्य समादिशेत्। अन्यथा तु कृते काव्ये कवेर्दोषावहं फलम्" तस्य प्रतिप्रसवो यथा "देवता वर्ण्यते यत्र काव्ये कवीश्वरैः। मित्रामित्रविचारो वा न तत्र फलकल्पना। देवतावाचकाः शब्दा ये च भद्रादिवाचकाः। ते सर्वे मैव निन्द्याः स्युर्लिखितो गणतोपि वा"। अस्य वाचकशब्दास्तन्मोक्षा यथा "हः शिवो गगनं हंसो नागलोकोऽब्धिकापतिः। नकुलीशो जगत्प्राणः प्राणेशः कपिलामलः। परमात्मात्मलो जीवः वराकः भ्रान्तिदोऽकलः। खगोऽभयोऽक्षणःस्थाणुः कुटकूपनिवारकाः। लक्ष्मीर्हरिहरः शम्भुः प्राणसन्धिर्ललाटजः। खकोपधारणः स्थूली चैतन्यं पादपूरणम्। महालक्ष्मीः परं नादो मेघनादो विमर्दनः। विन्दुर्दुर्गा प्रिया देवी मेघश्यामः महेश्वरः। दशपादः सदा शम्भुः घ्राणो यः सोममण्डलम्" वर्णाभिधानम्। "शुक्लश्चाथ हकारोऽंशुः प्राणः शान्तः शिवो वियत्। अकलो नकुलीशश्च हंसः शून्यश्च डाकिनी। अनन्तो नकुली जीवः परमात्मा ललाटजः" इति बीजवर्णाभिधानम्। "हकारो नकुलीशोऽपि हंसः प्राणोऽङ्कुशः प्रिये। महेशो नकुली चैव वराको गगनं रविः। लिङ्गं शून्यो-महाशून्यः प्राणश्च परमेश्वरि!" इदूयामले दशटले।

हृ अव्य० हृ-ड। १पादपूरणे अमरः २सम्बोधने ३नियोगे ४क्षेपे ५निश्चये ६निन्दायां मेदि० ७प्रसिद्धौ च। दशिवे पु० ९जले १०शून्ये १२आकाशे १३रन्ध्रे १४स्वर्गे १५धारणे पु० मेदि०। १६पापहरणे १८चन्द्रे शब्दर० १९सकोपवारणे २०शुष्के च एकाक्षरकोषः।

हंस पुंस्त्री० हस-अच्-पृषो० वर्णागमः। स्वनामख्याते १पक्षिभेदे अमरः स्त्रियां ङीष् २निर्लोभन्यासे ३विष्णौ ४सूर्ये ५परमात्मनि "हंसं तनौ सन्निहितं चरन्तम्" नैष०। ६मतृसरे ७यतिभेदे दशन्यासभेदे ८देहस्थवायुभेदे १०अश्वभेदे मेदि० ११गुरौ १२पर्वते शब्दर०। १३शिवे अमरः १४अर्थस्थिते १५श्वेते हेमच०। १६विष्णुके अमरः। १७अजपामन्त्ररूपे वर्णे च "हंकारेण बहिर्याति सकारेण विशेत् पुनः। हंसेति सततं मन्त्रं जीवो जपति सर्वदा" इति तन्त्रम्। अजपाशब्दे ८६ पृ० दृश्यम्।

हंसस्वरूपं भेदाः तन्मांसगुणाश्च यथा "हंसाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः। वातश्लेष्मप्रदाश्चापि बलशुक्रकरा मताः" भावप्र० तद्डिम्बगुणाः "हंसडिम्बं परं बल्यं दृंहणं वातनाशनम्। पाके लघुतरं प्रोक्तं सर्वामयविनाशनम्" राजनि०। अस्य दर्शनादेः शुभाशुभत्वं वक्तव्यराजशाकुने उक्तं यथा "काष्ठासु सर्वासपि दर्शनेन हंसस्य शब्दस्य तु सर्वसिद्धिः। नामानि हंसस्य शृणोति यस्तु प्रयान्ति नाशं दुरितानि तस्य। चौरैः सुखं दर्शनमात्रशब्दे निर्धिर्हितीयेऽस्य भयं तृतीये। युद्धं चतुर्थे नृपतिप्रसादः स्यात् पञ्चमे हंसरवे नराणाम्। यतिभेदहंसलक्षणं परमहंसशब्दे ४२३७ पृ० दृश्यम्। प्राणस्य हंसपदार्थत्वे हेतुरुक्तः पदार्थादर्शे "उच्छ्वासे चैव श्वासे च हंस इत्यक्षरद्वयम्। तस्मात् प्राणस्तु हंसाख्य आत्माकारेण संस्थितः। नाभेरुच्छ्वासनिश्वासात् हृदयाग्रेऽवस्थितिः"।

हंसक पु० हंस इव कायति कै-क। १पादकटके नूपुरादौ

125 M 6

अमरः । संज्ञायां कन् । २राजहंसे शब्दच० । स्वार्थे क० । ३हंसशब्दार्थे "लघुर्गुरुर्लघुर्यत्र स ताले हंसकः स्मृतः" संगीतदा० उक्ते ४तालभेदे ।

हंसकीलक पु० "नारीं पादद्वयं कृत्वा कान्तस्कन्धयुगोपरि । कटिमान्दोलयेत् यत्र बन्धोऽयं हंसकीलकः" स्मरदीपि० कीर्त्ते रतिबन्धभेदे । [भाषिण्यां स्त्रियां त्रिका० ।

हंसगद्गदा स्त्री हंसस्येव गद्गदः स्वरो यस्याः । मधुर

हंसगामिनी स्त्री हंस इव मृदु गच्छति गम-णिनि । १हंसतुल्यमृदुगामिन्यां स्त्रियाम् । हंसेन गच्छति णिनि ङीप् । २ब्रह्माण्याम् । ३हंसेन गन्तरि त्रि० ।

हंसदाहन न० हंस इव श्रेष्ठं सुरभित्वात् दाहनमस्य । अगुरुचन्दने शब्दच० ।

हंसनादिनी स्त्री "गजेन्द्रगमना तन्वी कोकिलालापसंयुता । नितम्बे गुर्विणी या स्यात् सा स्मृता हंसनादिनी" इत्युक्तलक्षणायां नार्य्याम् शब्दमाला ।

हंसपदी स्त्री हंसस्येव पादाः मूलान्यस्याः पाद्मादे स्त्रियां ङीपि पद्मादः । गोधापदीलतायाम् राजनि० । [हला० ।

हंसपाद न० हंसस्य पादः तद्वर्णोऽस्त्यस्य अच् । स्फटिके

हंसपादिका स्त्री हंसस्येव पादाः मूलान्यस्य कप् कापि अत इत्त्वम् । हंसपदीलतायां राजनि० ।

हंसपादी स्त्री हंसस्येव पादा मूलानि सन्त्यस्याः अच् गौरा० ङीष् । हंसपदीलतायां रत्नमा० ।

हंसमाला स्त्री ६त० । षड्भ्रूप्राकारेण स्थिते १हंससमूहे २कादम्बे हंसे च शब्दच० । [भाषपगण्डाम् राजनि० ।

हंसमाषा स्त्री हंसा विशुद्धः माषः तदाकारः पर्णेऽस्याः ।

हंसरथ पु० हंसः रथो वाहनं यस्य । १चतुर्मुखे ब्रह्मणि त्रिका०, हंसवाहनादयोऽप्यत्र । [उपधातौ राजनि० ।

हंसलोमन् न० हंस इव लोमशं लोमयुक्तम् । कासीसे

हंसलोहक न० हंस इव लोहकम् । पित्तले धातौ हेमच०,

हंसवती स्त्री हंसस्तत्पादाकारः मूले अस्त्यस्याः मतुप् मस्य वः ङीप् । २हंसपदीग्राम् जटा० । ३हंसयुक्ते त्रि० ।

हंसवीज न० हंसस्य वीजमत्र । हंसडिम्बे राजनि० ।

हंसाङ्घ्रि पु० हंसस्याङ्घ्रिरिव लोहितत्वात् । स्फटिके ।

हंसारूढ पु० हंसमारूढः आ+रुह-क्त० । १ब्रह्मणि २तच्छक्त्यां ब्रह्माण्यां स्त्री हंसाधिरूढ उभयत्र सरस्वत्यां स्त्री । [हेमच०

हंसाभिख्य न० हंसस्येवाभिख्या शुभ्रत्वात् यस्य । रूप्ये

हंसी स्त्री हंसस्य भार्या ङीप् । १हंसयोषिति शब्दर० द्वात्रिंशत्यक्षरपादके २छन्दोभेदे च "नौ गौ नाश्वत्वारो गो गो वसुभुवनयतिरिह भवति हंसी" छन्दो० । ३हंसजातिस्त्रियाञ्च ।

हंसोदक न० । "नादेयं नवस्तदुघटेषु निहितं सन्तप्तकां शुभः यामिन्याञ्च निविड्मिन्दुकिरणैर्मन्दानिलान्दोलितम् । एलाद्यैः परिवासितं त्रिदशरं पित्तोष्णदाहे विषे मूर्च्छारक्तमदात्ययेषु च हितं शंसन्ति हंसोदकम्" राजनि० उक्ते जलभेदे ।

हंहो अव्य० हंसित्यव्यक्तं जहाति हा-डो । १सम्बोधने "हंहो चिन्मयचित्तचन्द्रमणयः" चन्द्रालोकः । २दर्पे ३दम्भे ४प्रश्ने च शब्दर० ।

हक्क पु० हक् इत्यव्यक्तं कायति कै-क । गजसमाह्वाने जटा०

हञ्जे(ञ्जा) अव्य० हंसित्यव्यक्तं जप्यतेऽत्र जप-डे डा वा । नाटप्रक्रियायां नटाभिनेयकृते चेटीसम्बोधने अमरः टावन्तस्तत्रार्थे भरतः आदन्तोऽप्यव्ययम् वसन्तराजः ।

हञ्जि पु० हंसित्यव्यक्तं जयति जि-डि । क्षुधायां जटा० ।

हञ्जिका स्त्री हञ्जौ क्षुधायां कायति शब्दयते कै क संज्ञायां कन् । भार्य्यां भावप्र० क्षुधाहेतुत्वात्तस्यास्तथात्वम् ।

हट दीप्तौ भ्वा० प० अक० सेट् । हटति अहटीत्-अहाटीत्

हटपर्णि न० हटं दीप्तं पर्णमस्य ब० । शैवाले शब्दर० ।

हट्ट पु० हट-ट टस्य नेत्त्वम् । क्रयविक्रयस्थाने (हाट) अमरः । "प्रतिहट्टपथे घरट्टजादिति" नैष० ।

हट्टचौरक पु० हट्टे प्रकाशिते स्थाने एव चौरः स्वार्थे क । (हाटचोर) चौरभेदे शब्दर० ।

हट्टविलासिनी स्त्री हट्टं विलासयति वि+लस-णिच्-णिनि ङीप् । १गन्धद्रव्यभेदे अमरः । २हरिद्रायाञ्च भावप्र० । [हठति । अहाठीत्-अहठीत् ।

हठ कीलबन्धे सक० वल त्कारे स्तुतौ च अक० भ्वा० पर० सेट् ।

हठ पु० हठ-अच् । बलात्कारे अमरः २प्रश्नाग्रे मेदि० ।

हठपर्णी स्त्री हठते प्लवते हठ-अच् हठं प्लवमानं पर्णं यस्याः ङीप् । १शैवाले त्रिका० २कुम्भिकायाञ्च ।

हठयोग पु० हठेन बलात्कारेण योगः । प्राणायामादिक्रियाभ्यासजे राजयोगं विनैव परमात्मसाक्षात्काररूपे चित्तवृत्तिरोधात्मके योगे ।

योगश्च द्विविधः हठयोगः राजयोगश्च । तत्र हठयोगः क्रियाविशेषसाध्यः हठदीपिकादावुक्तप्रकारः । राजयोगस्तु भावनाविशेषसाध्यः पातञ्जलादावुक्तः । स च पतञ्जलिशब्दे ४२०४ पृ० दर्शितः । हठयोगोऽत्र साङ्गोऽभिधीयते तत्साधनमंशादिः उभययोगयोरपि परस्परसापेक्षतया

एककार्यकरत्वम्। "हठं विना सिध्यति राजयोगो नर्ते हठाच्चापि न राजयोगः। तदाभ्यसेत् पूर्वमतः सुनिष्पन्नत्वं हठं सद्गुरूक्तोऽभिलक्ष्यम्। अभ्यासेन विना दृढेन सुचिरं साङ्गस्य योगस्य वा योगी याति न राजयोगपदवीं मध्येऽन्तरालेयुंताम्। दृढो वा तरुणः सरुक् च मनकैर्योगेऽस्ततन्द्रः क्रियायुक्तः सिद्धिमुपैति यास्मत्पठनाद्धो योगसिद्धिर्भवेत्। यो नास्तिकोऽभ्यासविहीन आप्तसङ्गप्रियो वै बद्धभाषितो यः। अपथ्यभोजोऽमितभुग्दरिद्रो न योगसिद्धिं लभते कदाचित्। योगस्य बीजं परमं क्रियैव क्रियैव योगस्य फलप्रदात्री। सङ्केतविद्योगगुरोः प्रलभ्या सुधीरतो योगपरस्य नान्यत्। स्यात् सङ्गः सिद्धतीर्थैर्यदि सुकृतवशात् प्राग्भवाभ्यासजोऽयं यद्द्वारा पथिमेन त्वरितमिह फलं ह्यश्नुते कापि लोके। तत्सर्वं नान्य नाड्या शिरसि परिगतेनानिलेनेप्सितेऽदृष्टपूर्वाद्भ्यास एव त्वरितलघुभिद्दायोगतत्त्वोपलब्धात्। अदृष्टपूर्वात्मनि शान्तयाङ्गसख्यादनार्थं मनसः प्रयत्नः। अभ्यास एवं चिरकालः सेवितः सत्कारवान् स्याद् दृढभूमिरेष। जितो भवति मारुतोऽभ्यसनभूरिदार्ढ्यान्ततः क्रमानुरभिवर्द्धते सततकुम्भकाभ्यासतः। गते श्रुतभुजोद्गतामथनमेति पाकं सुखं रसादिकसुधातपः स्फुरतु याति देहो बलम्। सहाभ्यासबन्धो बलात् सहसा तदा जारणं स्याच्च दोषा अशेषाः। विशुष्यन्ति विण्मूत्ररोगादयो वै नृणां कोटिजन्मार्जितव्याधयश्च। नाड्योविशुद्धिर्हठसिद्धिलक्ष्णं विना ह्यापाथो चिरकुम्भसंभृतिः। गुरूक्ततो युक्तिविशेषतो भृतेऽनिले सुषुम्णा कुरुतेऽग्निदीपनम्। प्रत्याहारात् प्राग्जिताश्चौघवृत्तियोगीन्द्राश्चो चालयेत् कथञ्चनीं स्वाम्। सिद्धपाणाभ्यासतस्त्वालिताऽसावल्पुच्चैर्दुकं ब्रह्म रन्ध्रान्तरे स्यात्" हठस०।

योगद्वेषमेदास्तत्रैव "सुविप्रे शुभधार्मिकभूपतेर्वसुभिक्षवतीतभये शुचौ। सुजनयाज्ञिनि मालिनि वेभवैर्मनसि योगविधौ मतिमाश्रयेत्। अतिनिगूढपदं मथकोज्झितं सुचिततापविवर्जितमन्तरा। उपरकण्टकशुष्कदनोज्झितं विगतमैथुनगोभृते मलम्। वल्मीकसञ्चयचतुष्पथवर्जमन्यास्योज्झितं विगतसर्वभयं विजन्तु। वाल्याभिघातरहित गतभूतरक्षो योगार्थमेवमवलंक्य मठो विधेयः। धनुःप्रमाणपरहृते शिलाग्निजलवर्जिते। एकान्तमठिका मध्ये स्थातव्यं हठयोगिना" हठसङ्केतः। "अल्पद्वारमरन्ध्रगर्तविटपं नात्युच्चनीचायतं सम्यग्गोमयसान्द्रनिग्नमयनं निःशेषजन्तूज्झितम्। बाह्ये प्राङ्मण्डपकूपवेदिरुचिरं प्राकारसंवेष्टितं प्रोक्तं योगमठस्य लक्षणमिदं सिद्धैर्हठाभ्यासिभिः" हठप्रदीपिका। "द्वारं स्फुरत योगमठस्य हस्तं व्यायामतस्तत्तुरङ्गमार्थम्। विस्तारतस्त्वापि रवीन्दुभूपाङ्गुलं सुरम्यं रमणीयमध्यम्। निर्वातमूनन्दिरमक्षुमात्मदोषापहं मारुतदोषशोषि। विशोध्य नाड़ीमलमङ्गमन्तर्दत्ते विकाशं हृदि सुस्थिरे च" हठस०।

तत्रोचितकालः "एकाह्ने वाऽथ द्विकालं त्रिकालं प्राणायामं मध्यरात्रे भजेत। यामे रात्रेः पश्चिमे पूर्व एव पूर्वाह्णे वाङ्गस्य मध्ये प्रदोषे" हठस०।

निषिद्धावस्थादि "न शीते मात्युष्णे श्रमविकलदेहे न हि तथा क्षुधायामाध्माने विकलवपुषाऽक्षेतमनसा। अजीर्णोद्गारे न च विहितयात्रावतिरुते प्रभुक्तौ व्यासङ्गाकुलहृदि न युक्ताऽनिलधृतिः। चिन्ताक्रान्तो मूनफलपदूषितोऽभ्यासं न योगस्य कदापि कुर्यात्। कार्यान्तिरसक्तौ रतिकार्यतत्परो नानेकरोगाधियुतो जनाले। रथ्यान्तरे सिन्धुपरिष्टलान्तरे चिरन्तने वेश्मनि चैत्यदेशे। योगं विदध्यान्न कदापि साधकः सुदौर्मनस्यादि भवेत् कृतेऽस्य। अनादृत्य यः साधको देशकालौ प्रयुङ्क्ते योगं हि दोषास्तु तस्य। प्रजृम्भन्ति देहेऽन्तराया दवोच्चैर्जड़त्व स्वभूकत्वबाधिर्य्यमुख्याः। स्मृतिभ्रंशो जड़ता च विभूकता बधिरतान्धमूकादृक्तज्वराः। कुविभ्रंशसमये परियुक्तता बधुमि योगमभी नव दोषकाः" हठस०।

वर्ज्यमानसदोषाः "कामोभयं स्वप्नमनीव लोभः प्राग् योगदोषानतिकोपयुक्तान्। विहाय युक्तः सुसमाहितात्मा युञ्जीत योगं मनसा स्थिरेण" हठस०।

तद्दोषजयोपायाः "निद्रां सत्त्वनिषेवणेन दृश्येद्भृत्या च शिश्नोदरे रक्षेद् दोषचयौ दृशा श्रुतिहृशौ चित्तेन चेतो गिरौ। रक्षेत् सद्धिषणा प्रमादत एतस्त्रासं तुदन्तं धिया सङ्कल्पञ्च जयेन्न कामभिति वै त्रीन् योगदोषान् जयेत्" हठस०।

वर्ज्यसेव्ये "अत्याहारः प्रयासश्च प्रजल्पो नियमाग्रहः। जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति। "उत्साहात्साहसाद्धैर्यात् तत्त्वज्ञानाच्च निश्चयात्। जनसङ्गपरित्यागात् षड्भिर्योगश्च सिध्यति। अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमा धृतिः। दयार्जवमिताहाराः शौचं चैव यमा दश। तपःसन्तोष आस्तिक्यं दानमीश्वरपूज-

नम्। सिद्धान्नत्रयञ्चैव स्त्रीजैतिन्त्र तथोच्यते" हठप०।

आहारः "आहारगुप्तौ सत्त्वशुद्धिरिति श्रुतेः मिताहारस्य योगाङ्गत्वात्च योगाद्वाहारो यथा "न जीवनं देहधृतिश्च जन्मिनाञ्चेऽन्नपानं न सर्वैर्विना वनम्। योगे तदर्थं मलजिद्बलप्रदं भक्ष्याद्यदुग्धं मितमत्र सेवयेत्। न कन्दमूलानि गुरूणि शीतोष्णान्यत्र यानानि बलप्रदानि। सत्त्वप्रदायुर्बलरश्मिदानि मूतानि च त्रीणि हितानि योगे। हठप्रदीपिकादिभिः सुपथ्यवर्ग ईरितः। सुनाड़िशोधनादत्र भजेन्नित्यं पुरा शुभम्" हठप०। च च वर्गो यथा "गोधूमयाशियवषष्टिकशोभनान्नं क्षीराज्यखण्डनवनीतसितामधूनि। शुण्ठीपटोलफलकानि च पञ्चशाकं सुमृदादि चाल्पसुटकं च सुनीन्द्रपथ्यम्। क्षीरपर्णी च जैवन्ती मत्स्याक्षी च पुनर्नवा। मेघनादी च पञ्चैते शाकवर्गः प्रकीर्त्तितः। मिष्टं सुमधुरं स्निग्धं पथ्यं धातुप्रपोषणम्। मनोऽभिलषितं योग्यं योगीभोजनमाचरेत्" सुस्निग्धं हृतं क्षीरमिति हृद्यं स्यात् नाड़ीविशुद्धावथ मूलबन्धे। योगो बलं ह्यग्निमतीव धत्ते सत्त्वान्नतोऽन्नःस्थितनाड़िशुद्धिः" हठप०। "कन्दं च शाकादिकमूलभक्ष्यं विहाय दध्यक्तकषायतिक्तम्। हतौ तनक्षीरसपूरितोदरं यमी च गोधूमविकारमाश्रयेत्" हठप०। अन्यान्तरे "पीत्वा क्षीरं पयोभिश्च योगी बलमवाप्नुयात्। सितांशयुक् च पक्वं च हितं क्षीरं न केवलम्। गोधूमे च हविष्यान्नं भुक्त्वाभ्यासं समाचरेत्। एवं वाढं भजेदन्नाद्यन्नेऽस्मिन् बलबोधनम्।

निरूपणकर्त्तव्यवर्गः "सक्षेत्र ईक्षुवरीजमूपः क्षारो ह्यम्ल लवणिता क्षान्वला। क्षीरोषधाद्याऽलवणा हिताल्पा हविष्यभुक्तं यतिनिक्षपथ्यम्। व्यवस्थके सैन्धवमल्पमुक्तं सदार्द्रकं केऽपि वदन्ति भक्ते। क्षाल्लालवक्त्रुः सहितान्यदुग्धं पयोऽथ वा केवलमग्निपक्वम्" हठप०।

वर्ज्याहारः "स्निग्धं भजं वाऽभ्यशनेव रूक्षं क्षीरमभूनाच्च मिश्रोपरूक्षेद्यः। दृष्ट्वा च तक्रेण कलाद्यदन्नमम्लं च भूयोऽन्यमपथ्यमुक्तम्।। पुंस्त्वापहाः क्षुधणका अपथ्या व्यायाम वल्या कफपित्तदोषाः। मितान्नियोगः कथितस्तु नेष्टो गुरुर्विकारी सह फाणितेन। अत्यल्पमिष्टान्नमतो न योगः स्यात् साधकस्यान्नबलस्य नूनम्। योगानुगुण्येन ततोऽन्नमिष्टमितोदितान्नात्तरां न भूरिः" हठप०। "कटूष्णतीक्ष्णलवणोष्णहरिच्च शाकं क्षौद्वीरसैलतिलसर्षपमत्स्यमद्यम्। आजाविमांसदधिसक्तुकुलत्थकोलपिण्याकदिङ्कुचणनाद्यमपथ्यमाहुः। भोजनमहितं विद्यात् पुनरुष्णीकृतं तथा रूक्षम्। अतिलवणादिकयुक्तं कटधनशाकोत्कटं वर्ज्यम्" हठप०।

वर्ज्यानि "वर्जयेद्दुर्जनप्रीतिं बह्वित्रीपथसेवनम्। प्रातःस्नानोपवासादिकायक्लेशादिकं तथा" हठप०।

"मद्यं गर्भाशपानं सुतल्पतिष्टहारामयाश्लिष्टवेदशास्त्रालोकः सुगीतं सततमतिकृशं क्षेत्रकृष्याम्बराणि। स्त्यराज्ये च सङ्गः कुसुममलयजे बध्यदः स्फोतिशोर्ये ताम्बूलं चेति सर्वं विषयसुखमयाद्यन्मिकं यत्त्यजेत्तत्। नित्यज्ञानाद्यौ व्रतं शौचसक्लिष्यानं ध्येयं मन्त्रजाप्यं च दानम्। नेहारामाद्यास्तथा कल्पना वै धर्मा एते योगविघ्नः प्रदिष्टाः" हठप०।

आहारमानम् "स्वाच्छानिसक्तादिकसक्तिहस्तं प्राक् प्राक्पूर्णोदरकेऽशनस्य। ह्रासो विधेयो ह्यतु साधकेन दुग्धाद्यभावे क्रमकुल्यावृद्ध्या" हठप०। अत्र ह्रासक्रमेण स्वल्पाहारः प्राणायामे विधेयः। यथोक्तं सनातनसिद्धान्ते "अभावे घृतदुग्धादिभोजनं सक्तिहस्तयम्। ततो ह्रासः घनैः कुर्यात् प्राणे पूर्णे तथोदरे" अस्यार्थः अभावे घृतदुग्धयोरभावे सितभोजने कुल्याकल्पक्लिन्नमात्रूपः मन्दमन्दमगन्धश्च उचितः। न हि प्रथमाभ्यासे यथा यथा कुल्याकल्पद्धिर्भवति तथा तथा कुल्याकपूर्णोदरत्वात् कुल्याजाग्निना क्रमजितवायुवेगतया जिताग्निर्भवति तथा तथाऽशनह्रासः। साधकस्य योगानुसारेणानुकूलः आरोग्यौजसुतत्त्वाद्यवर्द्धीजःप्रकृतिकरश्च भवति न प्रथमम्" हठप०। अन्यत्र "आहारं त्रिपदेद्योगी क्षीणपक्षे कलाक्रमात्। शुक्लपक्षे यथा चन्द्रस्तथा कुर्योऽस्य वर्द्धते"। योगसारसङ्ग्रहे। "तनौ येन केनाप्युपायेन पित्तं सदाभ्यासिना प्राक्तनीयं प्रयत्नात्। विशुद्धो हि यश्चित्तबोधोद्गतः एषः शुभो ज्ञानवह्निस्वरूपः प्रकाशी। सूर्यप्रवेशे पवनेऽशनं सचन्द्रप्रवेशे शयनं त्वनुपानम्। इत्यादि चान्यत् स्वधिया विचार्यं पथ्यानि योगाभ्यसने हितानि"।

योगनिषेधावस्थादि "मलाः सदूषाः पुरितस्त्वाय विशिष्य सक्थ्नोदरे गौरवं चालसत्वम्। यदैतदुभवेद् विपक्षे साधकेन तदा प्राचरोधोऽस्मिन् तस्मिन्न कार्यः" हठप०।

योगारम्भकालः "अन्तर्हृता: सान्द्रतना विशुष्का अपक्वधाः पक्वसलाद्ययोऽपि। अभ्यासिनां प्राणनिरोध एष तद्दा विज्ञेयः शुभयोगसिद्धिदः" हठप०।

नित्यकर्मव्याकर्त्तव्ये। "न लालयेन्नो करणं निपीड़येत् भृशं मितार्शी मितनिद्रयोक्तिः। प्रातःशिरःस्नानमथो न रोचयेदाकृदयेगोऽपि कदापि योगी। आवश्यके तृष्णजलैर्विधेयं स्नानं न कार्य्यं क्रियमारिया तत्। स्नानं प्रगेऽनिष्टमिदन्तु कण्ठस्नानं स्मृतं दैरिह मध्यसेऽह्नि। व्यायसमात्परुषं भृशमैत्यदेशमत्यम्बु पानमतिविस्मरणं च-दैव। निद्रां दिवा निशि च जागरणं च चिन्तां क्लेशावहं यदखिलं तदिहापि जह्यात्। यत् स्वस्यान्यस्य दुःखा-वहमपि न भजेत् तदुगिरा मानसेन कायेनापीषदग्ने नैहि न हि वनितायाश्च सेवां विदध्यात्। क्रियां हेयं तथाकृतिमशनमतिं प्राणिपीड़ां वियोगं भिन्नाभिन्नत्व-बुद्धिं ह्यनशनमसतां सङ्गमिं संत्यजेच्च। आयासजन्यस्य ततोऽङ्गमर्दनं कुर्यादु वरिष्टोत्तरसाधकस्य। स्यादङ्गमर्दनेन तथा मृदुत्वं वायोर्जयो देहदृढोः समाप्तिः। पानाशने कर्म सुखावहं यदुयोगस्य विघ्नो न हि तेन किञ्चित्। सेव्यं तदेकं परमार्थवर्य्यैर्हेयं मनःक्लेशकरं कुमाजत्। अभ्या-सिना भूमिगृहे मठे वा न तैलदीपः प्रविधेय ईक्षणे। व्यक्तिन् उच्चलत्येत्य मुकुन्मितो दूक् प्राणो विमार्गं दूषतीत्यसुं त्यजेत्"। अतो योगमठे घृतदीप एवोप युज्यते" हठप०। "उत्थाय ब्राह्ममाले रहसि च परितः साधकः प्राणरोधस्याभ्यासं प्रातरुद्यैर्मितघटिकमधो पीठमुदादि कुर्यात्। व्यायामं चात्तु सार्द्धप्रहरयुगलकान्तं ततः पथ्यमल्पं भुञ्जीयादम्लतीक्ष्णोषणलवणविदाह्यु-ज्झितं चाज्यदुग्धम्। प्राणायाममथाचरेत् प्रथमके यामे निशः साधको यामैकं शयनं भजेदनुक्रमी प्राणाव-रोधं श्रयेत्। शौचाद्यं घटशोधनादिकमथो यामे त्रिभागे श्रयेत्तुर्यं नाडिविशोधनं त्वतिदृढोऽभ्यासस्तु षण्मा-सकः। मध्ये मध्ये चित्तविभ्रान्तिहेतोः साध्वं शश्वत् संभजेदासनञ्च। अभ्यासान्तेऽभ्यासिना खल्पमल्पं संभो-क्तव्यं भूरिवारं त्यक्तव्यम्। मध्ये मध्ये चारणं मेरु वालमभ्यासादौ संभजेतावियुक्तः। सर्वाङ्गीणा नाडिका दोषपूर्णा आद्यां सृष्ट्वा: सुसंरुन्ध्यमास्ताः" हठप०। (आद्यां चारणमेरुचालनाभ्यां दोषा दुष्टाक्षरसमलाः)

गजकरणी, "दृढं त्वाटकाभ्यासतः कूर्मवायोर्जये मूलबन्धेन चापानसिद्धिः। लये स्यादुदानस्य जालन्धरेण समानस्य चालेन च प्राणयायोः। भवेत् गजकरण्येषा समानोदा-नयोर्जयम्। पक्वामाशयगाजीर्णनाड्याद्यखिलशोधिनी। कोष्ठकृत्कफरुग्संदृङ्मापित्तकफबाधनी। वाग्मं बलं कृत्प्र-शस्तं वह्निदीप्तिं करोत्यलम्। धत्ते लाघवमङ्गेषु प्राणस्य सुखवाहिताम्। कृमिकण्ठकोष्ठसंशुद्धा शूलार्शोगदि-रोगहृत्। हन्ति गजकरण्येषा नाभेरूर्ध्वमधोमलान्। पक्वापक्वान् रोगहेतून् बहिः प्रक्षाल्य पातयेत्। कोष्ठ-गुदादागलान्तं गलान्तं क्षालयेत् भृशम्। आभ्यां वि-शुद्धकोष्ठो यः समाणापानयोर्गतिम्। ऊर्ध्वां देह-सञ्चरितां लूतिकागतियतसुधीः वेत्तीषिकासमां चित्ते कोष्ठान्तः परिसर्पतोः। नाड़ीसञ्चारविज्ञानमनयोः स-कलं यया। जानाति साधकः शुद्धो नाडीसंस्थान-संविदम्। (एवं धौत्यामपि नास्त्यूर्ध्वसङ्गं क्षेयम्) "महाचक्रमादौ विरुध्यात्तु सम्यग् भजेदूर्ध्वसङ्गामधो खेचरीं च। ततो वारिपानं प्रकुर्य्यात् सुधांशोः सुधां साधमेयां प्रयागे सुतिञ्च। विना ग्रन्थिभेदं विना चक्र-भेदं विना ब्रह्मरन्ध्रप्रवेशं जितस्य। खगस्यात्मना कायसिद्धिं विनास्तो न सिद्धिर्न योगो न शून्यत्व-लाभः" हठप०।

आसनफलम् "संप्राप्तबीजभावो यमनियमाभ्यासयं योगः। प्राणायामासनकैरङ्गुरवात् साधकस्य भवेत्। आदासने स्थैर्यमरोगितामङ्गे लघुत्वं दुःखक्षुष्णशीतैः। द्वन्द्वै-र्जितेऽखिलमभिभूयते नाऽनन्ते समापत्तिरतो यमा-भ्याम्। साधनत्रयमिदं मरुव्जये प्रोदितं प्रमितजग्धि-रिष्टदा। भक्तिचालनथ साधनद्वयम् नाभिवायुधृतिनाडि-चालनम्"। नियमेन यमैर्विनापि रोगाः प्रविनश्यन्ति सुसंयतस्य पीठैः। चिरकालपदान्तरा अबाध्याः यमिनः साधुजितासनस्य पुंस" हठप०। (यमाभ्यां यमनियमाभ्याम्)

कुक्कुटासनम् "संस्थाप्य पद्मासनमत्र सम्यक् करौ तु जानू-रुयुगान्तरे दृढम्। निवेश्य संस्थाप्य तले धरायां व्यो-मस्थ उक्तं स्थिति कुक्कुटासनम्" हठप०।

उत्तानकूर्मकम् "कुक्कुटासनबन्धस्थो दोर्भ्यां संबध्य कन्धरे। भवेत् कूर्मवदुत्तान एतदुत्तानकूर्मकम्" हठप०।

धनुरासनम् "पादाङ्गुष्ठौ पाणियुग्मेन धृत्वा कर्णावाभ्या-कर्षेत् खस्थ धनुवत्। कुर्य्याच्चापाकर्षणं प्रोक्तमेतदासनञ्च दोर्बलिनां प्रीतिवृद्ध्यै" हठप०।

मत्स्येन्द्रासनम् "वामोरुमूलार्पितदक्षपादं जान्वोर्बहिर्वेष्टित-वामदोष्णा। प्रगृह्य तिष्ठेत् परिवर्त्तिताङ्गो मत्स्येन्द्र-माज्ञोदितमासनं स्यात्। मत्स्येन्द्रपीठे जठरं प्रदीप्तं प्रचण्डरुग्मण्डलखण्डनाच्च। अभ्यासतः कुण्डलिनी प्रबोधं दत्ते स्थिरत्वं हि ददाति पुंसाम्" हठप०।

पश्चिमतानासनम् "प्रसार्य्य पादौ भुवि दण्डरूपौ दोर्भ्यां च पादद्वितयं गृहीत्वा । जानूपरि न्यस्तललाटदेशोऽभ्यसेदिदं पश्चिमतानमाहुः । इति पश्चिमतानमासनाख्यं पवनं पश्चिमवाहिनं करोति । उदयं जठराग्नेस्तनुत्वं उदरे कार्शमरोगतां च पुंसाम्" हठप्र० ।

मयूरासनम् "धरामवष्टभ्य करद्वयेन तत्कूर्परे स्थापितनाभिपार्श्वं । उच्चासने दण्डवदुत्थितस्य मयूरमेतत् प्रवदन्ति पीठम् । हरति सकलरोगानाशु गुल्मोदरादीनभिभवति च दोषानासनं वै मयूरम् । वह्निकदशनभुक्तं भस्म कुर्यादशेषं जनयति जठराग्निं जारयेत् कालकूटम्" हठप्र० ।

शवासनम् "उत्तानशववद्भूमौ शयनं तु शवासनम् । शवासनं श्रान्तिहरं चित्तविश्रान्तिकारकम्" हठप्र० ।

सिंहासनम् "गुल्फौ च दृषणस्याधः सीवन्याःपार्श्वयोः क्षिपेत् । दक्षिणे सव्यगुल्फं तु दक्षगुल्फं तु सव्यके । हस्तौ तु जानुनोः स्थाप्य स्वाङ्गुलीः संप्रसार्य्य च । व्यात्तवक्त्रो निरीक्षेत नासाग्रे न्यस्तलोचनः । सिंहासनं भवेदेतत् पूजितं योगिभिः सदा । बन्धत्रयस्य सन्धानं कुरुते चासनोत्तमम्" हठप्र० ।

भद्रासनम् व्यासनशब्दे ८८६पृ० दृश्यम् तत्फलम् "भद्रं कफक्लेशसमीरहारि" हठप्र० ।

कूर्मासनम् "गुल्फद्वयेनापरिपीड्य पायुं जानुद्वयं भूमितले निधाय । कूर्मासनं स्यादिति योगिवर्य्यैरुदीरितं तात्त्वमयत्वहारि प्रोक्तम्" हठप्र० ।

बद्धपद्मासनम् "स्थित्वा समं वरसिजे कृतवङ्क्षणोर्वोरङ्घ्रिपद्मे रधःस्थकूर्परकौ विधाय । बद्धोर्ध्वपाणितलयुग्म तदुत्तमाङ्गमृगशृङ्गलक्ष्म कलयेदुपरि प्रकामम् । उत्तान एव चिबुकं हृदयेऽर्प्य तिष्ठेत् कुर्वन् समीरणनिरोधनमेकचित्तः । काये यदोदर उदेति च भूरिदाहोऽधोवायुनिःसृतिरुदेति तदा क्रमेण । संमोचनीयमिदमासनमार्य्यधीभिर्मन्दं विनाशयति घोरतरज्वरार्त्तिम् । सन्दीपने हुतवहस्य च वल्गुरीति संचं प्रभुक्तपरिपाचनमासनं स्यात्" हठप्र० ।

हस्तिकासनम् "धरामवष्टभ्य करद्वयेनोरः पार्श्वयोः स्थापितत स्यकूर्परः । हस्तीव पुच्छप्रतिमाङ्घ्रिपाणीं धृत्वाऽस्य शीर्षे चिबुकं विधाय । यत्नेति सन्तिष्ठति साधकस्तत् विख्यातं हस्तिकसंज्ञमासनम्" हठप्र० ।

मूलबन्धासनम् "वामाङ्घ्रिपाष्णर्या तदुच्चकैर्युदाननान्तरं भुवि निपीड्य साधकः । व्यस्तं विधायाग्रपदं सुगुल्फतोऽधो दक्षपादं लघु वामजानुनि । विन्यस्य बद्धा गलकैरनुज्ञालब्धरं समं स्थापितसर्वगात्रः । मत्स्याशवत्स्थाणुरनल्पचेता भ्रूमध्यदृग् दोर्युगशुद्धतोरुः । इदं मूलबन्धासनं योगसिद्धिप्रदं दीपनं जाठराग्नेरतीव । ध्रुवं शक्तिसन्दीपनं मूत्रवर्चोजिदर्शोपहृत्यामयानां विनाशि । समस्तनाडीषु मारुतस्य विदधात्यूर्द्धगतिं जयं च सिद्धेः । विहिते किल बिन्दुरेत्र पायौ मरुतौ वह्निशिखा सदोपयाति । भुजगी परिजागराद्यवस्था विबुधैरूर्ध्वगतिस्त्वपानवायोः" हठस० ।

गोमुखासनम् "सव्ये कृत्वा दक्षगुल्फं तु पार्श्वे यत्र स्थाप्यते सव्यमेव्य । दत्त्वा वामं गुल्फकं पृष्ठपार्श्वे तत् पीठं स्यात् गोमुखं गोमुखाभम् । व्यपानसिद्धिं विदधाति मूलबन्धाग्निहन्त्येव भगन्दरार्शः । धौत्याश्च नोलेर्वितनोति सिद्धिं सुसाधकस्यासनमेतदग्र्यम्" हठप्र० ।

कुक्कुटासनम् "किञ्चिन् तिर्यक् साम्यमास्थाय जानुमूर्द्धे धृत्वा संपरावर्त्तितेन । कृत्वा मूले पादमाधाय तिष्ठेदेतत् पीठं कुक्कुटं वर्ह्निकारि" हठप्र० ।

पार्श्वोपधानासनम् "समानभूमौ शयनं विधायोत्तानौ करौ पार्श्वयुगान्तराले । पृष्ठे मिथः साधु निबध्य यत्न पार्श्वोपधानासनमुक्तसत्तमैः" हठप्र० ।

उत्कटासनम् "युजा स्फिचोः स्थीयत जर्जानुर्यत्रासने पादतलद्वयोपरि । स्फिग्भ्यां मनागुत्कटकं धरित्रीमस्पृश्य पीठं स्मृतमुत्कटाख्यम्" हठप्र० ।

पद्मासनम् "वामोरुपरि दक्षिणं च चरणं संस्थाप्य वामं तथा दक्षोरुपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम् । अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकयेदेतद्व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते" हठप्र० ।

प्राणायामाङ्गपद्मासनम् "उत्तानौ चरणौ विधाय विधिवत् संस्थितौ योगिर ङुत्तानौ सकरौ विधाय च भिषो जङ्घे समाक्रम्य च । नासाग्रे दृशमाविधाय चिबुकं चोरस्य वक्त्रस्थलं मूले साधु सरन्नयाऽभिकलयेदेतत् सरोजस्य सत् । व्यपानसंज्ञस्य मनैः स्वशक्तितः प्राणं समाकृष्य च कुम्भकं चरेत् । धृत्वा यथ शक्त्यनुरेचयेच्छनैर्वायुं गदघ्नं स्मृतमब्जासनम् । समस्तदोषज्वरदाहमोहपित्तामयघ्नं सकलं सुखावहम् । प्राणः समोऽस्मिंश्चलति क्षणेन सुनेरनुष्ठानविधौ सरोरुहे" हठस० ।

करसंपुटपद्मासनम् "कृत्वा संपुटितौ करौ दृढतरं बद्धा तु पद्मासनम् । गाढं वक्षसि संविधाय चिबुकं ध्यानञ्च

तच्चेनसि । वारंवारमपानमूर्ध्वमनिलं प्रोच्चारयन् पूरयन् सञ्चरन् प्राणसुपैति रोधमतुलं शक्तिप्रभावादतः" हठयोगः ।

सिद्धासनम् "योनिस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं विन्यसेन्मेढ्रे पादमथैकमेव हृदये कृत्वा हनुं विन्यसम् । स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्येद् भ्रुवोरन्तरं चैतन्मोक्षकपाटभेदजनकं सिद्धासनं प्रोच्यते" घेरण्डसंहितायां ।

वीरासनभद्रासनस्वस्तिकासनानि आसनशब्दे दृष्टव्यानि

सुखासनम् "येन केन प्रकारेण सुखं स्थैर्यं च जायते । तत् सुखासनमित्युक्तमशक्तस्तत् समाश्रयेत्" शिवसंहिता । इदमेव "स्थिरसुखमासनमिति" पात० सूत्रितम् ।

षट्कर्मोपक्रमः "अथासने दृढे योगी वशी हितमिताशनः । गुरूपदेशमार्गेण प्राणायामं समभ्यसेत् । यावद्वायुः स्थितो देहे तावज्जीवितमुच्यते । मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत् । चले वाते चलं चित्तं निश्चले निश्चलं तथा । योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत् । मलाकुलासु नाड़ीषु मारुतो नैव मध्यगः । कथं स्यादुन्मनीभावः कार्यसिद्धिः कथं भवेत् । शुद्धिमेति यदा सर्वं नाड़ीचक्रमनाकुलम् । तदैव जायते योगी प्राणसंग्रहणे क्षमः" इत्युपक्रम्य "यदा तु नाड़ीशुद्धिः स्यात्तदा चिह्नानि बाह्यतः । कायस्य कृशता कान्तिस्तथा जायेत निश्चितम् । यथेष्टं धारणं वायोरनलस्य च दीपनम् । नादाभिव्यक्तिरारोग्यं जायते नाड़िशोधनात् । मेदश्लेष्मादिनाशार्थं षट्कर्माणि समाचरेत् । अन्यथा नाचरेत्तानि दोषाणां समभावतः । धौतौ वस्ती तथा नेती त्राटकं नौलिकं तथा । कपालभातिश्चैतानि षट्कर्माणि प्रचक्षते । कर्मषट्कमिदं गोप्यं घटशोधनकारकम् । विचित्रगुणसन्धायि पूज्यते योगिपुङ्गवैः" हठा० ।

धौती "चतुरङ्गुलविस्तारं हस्तपञ्चदशायतम् । गुरूपदिष्टमार्गेण सिक्तं वस्त्रं शनैर्ग्रसेत् । पुनः प्रत्याहरेच्चैतदुदितं धौतिकर्मणि । कासश्वासप्लीहकुष्ठं कफरोगाश्च विंशतिः । धौतीकर्मप्रभावेण प्रयान्त्येव न संशयः" हठप्र० "विंशद्धोःप्रमितं च पञ्चदशदोर्मानं च विस्तारतस्तत्तार्थ्यरङ्गुलविस्तृतं सुमृदुलं सिक्तं सुवस्त्रं ततु । स्थित्वा गोसुखविष्टरे सुजनकैरेतत् यथेत् साधको मन्दं चातु विनिर्हरेत् कफगदश्वासेषु धौती हिता" हठस० ।

वस्ती "नाभिदघ्ने जले पायुन्यस्तनालोत्कटासनः । आधारात् कुञ्चनं कुर्यादपानं वस्तिकर्मविदु । गुल्मप्लीहोदरं चापि वातपित्तकफोद्भवम् । वस्तिकर्मप्रभावेण क्षीयन्ते सकलामयाः । धात्विन्द्रियान्तःकरणप्रसादं दद्याच्च कान्तिं दहनप्रदीप्तिम् । अशेषदोषोपचयं हि हन्यात् अभ्यस्यमानं जलवस्तिकर्म" हठप्र० ।

"जलं पायुविन्यस्तनालस्य मार्गात् जले नाभिदघ्ने समाकृष्य चार्द्रम् । चलत्युत्कटे विष्टरेऽपानकोषात् जलं याति तुन्देऽम्बुना वस्तिकर्म" (नालं वंशादिच्छिद्रस्निग्धनालिका) । आदावुत्कटविष्टरे परिगतः प्रोत्थाप्य सव्यंगुष्ठं पायुदरविकाशकोचविधिना वायूर्ध्वमाकर्षयेत् । आपूर्यं हृतिवत्तु तुन्दमखितो नौल्या प्रचाल्यानिलं कृत्वाऽधोमलसङ्गहृजेत् सकलिलं योगी बहिःकोष्ठगम् । अत्र वस्तिकर्मणि गोसुखमेव प्रशस्तमनुभूतमिति सङ्केतः । अत्र सर्वकोष्ठमलानां कोष्ठत्वालनपूर्वकदूरत्वेन बहिःक्षतिर्यथा भवति । तदुपायसङ्केतेन वस्तिकर्म-कर्त्तव्यम् । पूर्वोक्तविधिना गोसुखे चोत्कटासने स्थित्वाऽपानद्वारोर्ध्वमनलजलं किञ्चिदुत्कर्षेत् । तदूर्ध्वं स्वस्तिकासने स्थित्वा समाकृष्य नाभेरुपरि हृदयान्तं कर्त्तव्यम् । पुनरुत्कटासनेन जलं गृहीत्वा प्राग्वन्नाभौ विधेयं स्वस्तिकेन स्थेयं विधेयम् । एवं वस्तौ स्वस्तिकेन स्थेयं सर्वं कोष्ठं जलपूर्णं कृत्वाऽभितः कोष्ठं विभाव्यान्वन्विगतमन्त्रादिक्षीणपक्वापक्वसद्घनमलादि द्रवीकृत्य पश्चाद्बहिस्तज्जलं कुर्यात् क्रमेण न त्वरयेत् । तदाऽनेन विधिना कोष्ठः प्रक्षालितवस्त्रवद्दोऽपाक्तदोषो भवति" हठस० ।

नेती "सूत्रं वितस्ति सुस्निग्धं नासानाले प्रवेशयेत् । मुखाच्निर्गमयेत् सा हि नेती सिद्धैर्निगद्यते । कपालशोधनी कार्या दिव्यदृष्टिप्रदायिनी । जत्रूर्ध्वजातरोगौघं नेतिराशु निहन्ति च" हठप्र० ।

"आखुपुच्छसदृशं सुनिर्मलं षड्विनस्तिमितसूत्रमङ्गुलम् । संप्रवेश्य लघु नासिकाबिले वक्त्रतो रहसि निर्गमयेच्च तत् । नेतीति कर्मोदितमेतदार्ये जत्रूर्ध्वजातखिलरोगहारि । कपालसंशोधनकारि कार्यं दिव्यदृशञ्च परमं" हठस० ।

त्राटकम् "निरीक्षेत् निश्चलदृशा सूक्ष्मलक्ष्यं समाहितः । अश्रुसंपातपर्यन्तमाचार्यैस्त्राटकं स्मृतम् । एतोटकं नेत्ररोगाणां तन्द्रादीनां कपाटकम् । प्रयत्नात् त्राटकं गोप्यं यथा हाटकपेटकम्" हठा० । अस्य फलान्तरं हठस०-उक्तं

यथा "सिद्धेऽस्मिन् नासिकायेचणचततनुरुक्लेशवान् साधकः स्याद् खभ्रूमध्यं च क्रमेणाकलयति सतताभ्यासतः खेचरीञ्च। दिव्यां दृष्टिञ्च धत्ते जनयति यमिनो योगनिष्पत्तिसिद्धिं मूर्ध्वस्थाम्नोरुहे वै पवनहृदयोरक्रमेणानुलोम्यम्" प्रकारान्तरं यथा "प्रातः समुत्थाय कृत्वासने गतः समभ्यसेत् त्राटकमेक एव। प्रसार्य्य दृष्टिं ननु लक्ष्यमीक्षेत् समुज्ज्वलं तत् रहसीतचिन्तः। अभ्यासतोऽस्खात् स्थिरतां समेयुतः समीरनेत्रे इति लक्ष्यदीक्षा। विधाय किञ्चित् समये विलोचने संमुद्रय पश्चात् झटिति प्रसार्य्य। पश्येत् परोनिश्चलमेकधीः खं पश्यन्तु यावत् पुरतोऽर्कबिम्बम्। समभ्यसेत्तावदिमां क्रियां चेत् सुनिर्मला दृष्टिरनेन वै स्यात्" हठस०।

नौलीकर्म तच्च द्विविधं वाह्यमाभ्यन्तरं च तत्र वाह्यं यथा "द्व्यापसव्यं लघु नालिकाभिर्व्यावर्त्य वेगैः कृतदोर्युगः कौ। कृत्वा भ्रमं सर्वतिक आनतांसस्तुन्दस्यनाकोत्थितिमेवमीक्षेत" हठस०। "अमन्दानन्दवेगेन तुन्दं सव्यापसव्ययोः। अतश्चो भ्रामवेदेष नौलीयोगः प्रचक्षते। मन्दाग्निसन्दीपनपाचकाग्निसन्धानमानन्दकरी सदैव। अशेषदोषामयशोषणी च हठक्रियाऽसौ जयतीह नौली" हठप्र०। आभ्यन्तरमुक्तं हठरत्नावल्यां यथा "इडयावर्त्य वेगेन तथा पिङ्गलया पुनः। उभाभ्यां भ्रामवेदेषा इत्यान्तरा कीर्त्तिता मया"।

कपालभाती "लोहकारस्य भस्त्रावत् क्रियांत् सव्यापसव्यतः। कपालभाती विख्याता कफामयविशोधिनी" हठप्र०। "सल्लोहकारधमनीव च संपूर्य्यैकं नासिकापुटमरं सुविरेचयञ्च। योगी द्वितीयमिति भस्त्रिकयेव शश्वत् सव्यापसव्यपरिचालनमत्र कार्य्यम्" हठस०।

चक्रीकर्म "सुस्निग्धं मसृणेन वा लुहविषा मध्याङ्गुलीयुग्मकं सार्द्धं लूनखं प्रसार्य्य शनकैः वायुं हृदन्ते क्रियात्। ऊर्द्धं सर्वमिहाभितोऽस्य नलकाद्यं आमयेदन्तरे यावत् प्रायुविकाश उद्भवति संप्रोक्तेति चक्री बुधैः। कृत्वेति चक्रीविधिमादरेण प्रक्षालयेत्तद्विषयं ततो दृढम्। आमादिदोषान्लभिति प्रकुर्य्यात् यथा शुदास्यं सुखविस्रंसं भवेत्। तथाङ्गुलीनां त्रिचतुःक्रमेण संभ्रामयेत् प्रायुविकाशनावधि। नलान्तगाढ़ाहुतिदुर्मलान्तः स्यान्नूनचक्रस्य विकाशनं च" हठस०। "प्रायुवक्त्रं प्रसार्य्यान्तरङ्गुल्यौ भ्रामयेत् सुधीः। यावद् शुद्धविकाशः स्यात् चक्रीकर्म निगद्यते। शूलव्याधिगुल्मरोगो नश्यत्यत्र न संशयः। सलशुद्धिर्दीपनं च जायते चक्रिकर्मणि" हठरत्नावली।

गिलिकर्म "यदुघण्टिकामस्तकयोः पिधानमधो नलन्ती कथितोपजिह्वा। तदग्रकं तर्जनीमध्यमाभ्यां संमन्थयेद् शो सुङ्गराकलय्य। गलीति कर्मोदितमार्य्यवर्य्यैः सन्धिप्रलीनामकफौघहारि" हठस०।

गजकरणीकर्म "उदरगतपदार्थानुद्वमेदेव नित्यं पवनगमनमार्गात्कण्ठनालप्रवेशात्। क्रमपरिचयवशो वायुमार्गो भवेद्वै गजकरणमितीव प्राहुरार्याहठज्ञाः। (अपानवायोरूर्द्धकरणात्। पवनोर्द्धकरणेनवा। पाश्वाकर्षणेन यद्भक्षितं वस्तु तदुद्वमेत्। कण्ठनालप्रवेशात्। कण्ठे नालस्य प्रवेश एरण्डनालस्य प्रवेशस्तस्मात्। तदा क्रमपरिचयक्रमेण वस्तुपरिचयः स्यादित्यर्थः) हठस०। "प्राक् स्थित्वोत्कटविष्टरे समतनुर्नौल्यानलोत्थापनं कृत्वाऽपानमनूर्ध्वमीरणपथा गल्यौ विधायोद्वमेत्। यत् प्राग्भक्षितमन्नपानमथ वा नालप्रवेशाङ्गले तत् पश्चादखिलं वमेदनुविधिः प्रोक्तो हठज्ञैरिह। आसने गोरुखे स्थित्वा कृत्वा भूमौ करौ दृढम्। नम्र ऊर्ध्वं वायुकृष्टिं नाभेरुत्थाप्य चाचरेत्। वक्त्राग्रमेवं विकृते दोषोभक्षितसंयुतः। एवं गजकरण्युक्ता भक्षितोद्वमनक्रियेति"। वायुकृष्टिम् अपानेन सह प्राणस्य प्रकाममूर्ध्वाकर्षणम्। नालोत्थानसमकालं कुर्य्यादिति भावः। अस्यार्थः उत्कटे आसनेस्थित्वा बाहुयुगलं वक्षसिष्टं जानुद्वयोपरि संस्थाप्यानुन्नताधोमुखः आनम्रकटिपृष्ठ आक्षिप्ताङ्गोनालोत्थानं कृत्वाऽनु पश्चादायुमूर्ध्वं विधाय सोदरवेगैरक्षितमुद्वमेत्। यदि कदाचिद्भोर्ध्वमक्षितं याति तदोत्थायानम्रकटिपृष्ठो जानुद्वयं तिष्ठन् दोर्भ्यां धृत्वा प्राग्वदुद्वमेत्" हठस०।

शङ्खप्रक्षालनम् "नासापुटेन सलिलं परिपीय वक्त्रमार्गेण तदुद्वहिरहो कलयेत् सुधीरः। पीत्वैकवेन पुटवेन च नासिकाया इत्थेन वारि शनकैर्बहिरुद्वमेद्वा। शङ्खप्रक्षालनमिदं कफपित्तहरं परम्" हठस०।

वायुसाधनम् "इदानीं क्लेशहानार्थं कर्त्तव्यं वायुसाधनम्। येन संसारचक्रेऽस्मिन् रोगहीनो भवेद्ध्रुवम्"। शिवसंहिता "राजदन्तयुगलान्तमस्यगतं सन्निधाय रसनां तदन्तिके दिक (काक) चञ्चुपुटमाकृतं पिबेत् प्राणसंयमनमेतदुत्तमम्"। "जिह्वां कृत्वाऽनाकुलभ्रूलुभूले दन्तैर्दन्तान्, गाढमापीड्य वक्त्रः। मन्दं मन्दं यः पिबेद् गव्यवाहं सोऽसौ पूरैः साकलन्तः स्ववह्निः" त्रिपुरा-

सारहसङ्ग्रहे। एतदभ्यासप्रकारः "नलिकामष्टवर्णां काकं विधाय पूरयेत् तया। स्वयं कुम्भयेन्नाद्या रेचयेत् काकचञ्चुकम्" कुम्भकपद्धतिः। "हिक(काक) चञ्चुवदास्येन वायुं परिपूर्यास्तु निरोधयेद्धि वायुम्। रसनाग्रपरिभ्रुवं विधायास्तधारां पिबतीह यः सुखी सः। अतं रेचयेद् प्राच्य-नासपुटेन सूता शीतली काकचञ्चाख्य एषः। सकृद्दिनद्वयोगप्रवीणोऽस्य मर्त्यो भवेदेव संसाधनात् सुक्तिभाग् द्राक्" कुम्भकपद्धतिः। आसने स्थिरीभूते प्राणायामं कुर्यात् तत्प्रकारः प्राणायामशब्दे ४५१५ पृ० उक्तप्रायः अधिकमत्रोच्यते।

"मात्राप्रमाणयुक्तात् प्राणायामोऽयमीरितात्। सेव्यः प्राणापानावूर्ध्वमधः सन्निरुध्य यत्नेन। प्राणायामे पद्मपीठे स्वनासाकुहरेनाटौ सन्निरुध्येन्नाडीम्। वायुं नातिद्रुतं मनैर्नातियुक्त्या व्यालश्योर्ध्वं पूरयेत् स्वोदरान्ते। यथा स्वशक्त्या लघु धारयित्वा नाड्या ततः पिङ्गलया विरेचयेत्। निरोधहीनं विपरीतसंज्ञं हृदास्थिरेणाभ्यसनं सुनिश्चरेत्। येन त्यजेत् तेन निरोधहीनं कृत्वा पुरान्येन विरेचयेत् मनैः। यान्त्येवमभ्यासरतस्य पुंसः स्थितिं स्वकक्ष्ये चलचित्तहरयः। यथाशक्त्याकृष्य स्वाङ्गं पूरयेदुदरं मनैः। यथाशक्त्याकृष्य पश्चाद्रेचयेदविरोधतः"। कठयोगे "प्राणं चेड़िकया पिबेच्चियन्तं भूयोऽन्यया रेचयेत्। पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेदन्यया। सूर्यां चन्द्रमसोरनेन विधिनाऽभ्यासं समातन्वतां शुद्धा नाड़िगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः" कठस०।

"तत्र भूतशुद्धिप्राणायामं कृत्वा तदङ्गेऽभ्यासार्थमुक्तसंख्यासहितकुम्भकयथाशक्तिप्रणवजपध्यानाभ्यां सार्द्धमांसत्रयं कुक्षिस्थाग्नेयोपपातकपातकसहितपापपुरुषनिरासनद्वारा मनोवहनाड़ीसमानसकामक्रोधादिमलशुद्धये यथोक्तपथ्यैकान्तसेवापूर्वकं विधायात्र शारीरनाड़ीगणशुद्धिः षण्मासं विधेया" कठस०। समातनसिद्धान्ते "निरालम्बमनाभूत्वा प्राणायामं समभ्यसेत्। मनसैव ततपर्यन्तं चतुर्वारं समभ्यसेत्। प्रातःसायञ्च मध्याह्ने चार्द्धरात्रौ विशेषतः। यावन्मात्रं यदा पूर्णं भवेदभ्यासयोगतः। एकवारं प्रकुर्वीत तदा योगीन्द्रसत्तमः। षड्भिर्मासैश्च यतैकस्तु प्राणायामांश्च निश्चयः। 'षण्मास भ्यन्तरंयैव शुद्धा नाड़ीगणास्तथा। ततो वृद्धिक्रमेणैव प्रणवेन च धीरधीः। सङ्ख्यार्थं गुटिका कार्या सूक्ष्मछिद्रा अतिशोभना। ततो नाड़िगणः शुध्येत् वरं भवति लक्षणम्। चन्द्रं पिबति सूर्येण सूर्यं चन्द्रमसा पिबेत्। अयं हि कालाभावेन लोकेदा चन्द्रतारकम्"। तदङ्गासनमुक्तं समातनसिद्धान्ते "चतुरस्रं द्विहस्तञ्च चतुरङ्गुलम्। चेलोर्णकुशचर्मादि वासनं सर्वसौख्यदम्"।

नाड़ीशुद्धेर्लक्षणं "नाड़ीविशुद्धावास्तसिरामलो यदा तदा समर्थोऽनिलधारणे चिरम्। स्यात् कोष्ठगतस्यमलोपकर्षणसमर्थोऽग्निरिद्धः क तनौ रुजां जनिः। सिद्ध्यापानादजसन्धिं भित्त्वोर्ध्वं सर्पताऽग्निना। सुनेस्तदा प्राणयुतोद्भवाख्येऽनाहतध्वनिः। नाड़ीमध्यमलक्ष्येऽलक्षयनं भूत्वं विड्लैनसः पुंसः स्वल्पभरोगता न क्लमयो लोला न घर्मोरतिः। दुस्सेऽग्निलपित्तश्लान्तिरमलः कायो भवेत् सुन्दरस्तावत्कालभयं कुभाजनियमाद्य भजेदल्पभुक्। योगाराम्भाद्यङ्गमुक्तं हि नाड़ीशुद्धिर्देहे शौर्यमाद्यं यथाङ्गे। यावत् सिद्धेर्या कठाङ्गं न दृश्यं तावद्योगः साधकस्य व्यलीकः। नाड़ीविशुद्धेर्मरुतो जयः स्यात् जितेऽनिले याति मनः स्वयं क्षयम्। क्षीणे मनस्यस्तमितैहिकार्थं ज्ञानप्रकाशः स्फुटमैति निर्मले। पूते विधानाड़िविशुद्धितः स्यादारभ्यकाले कठदृढ़त्वचिह्नम्। क्लेशेन कस्मादजिताऽनिलानुरूपं हि घर्मान्तरमभ्युदेति। सगर्भकायासविनिर्गतांडा सुनिस्तदारम्भ इहेति सिद्धिभूः। यद्यड़िशुद्धेः परिणाम एषः संप्राप्यते सद्गुरुणा विना नो" कठस०।

प्राणायामलक्षणं मार्कण्डेयपु० "शृणुष्व च महीपाल प्राणायामस्य लक्षणम्। युञ्जतश्च सदा योगं यादृग्विहितमासनम्। पद्मं सिद्धासनं वापि तथा स्वस्तिकमासनम्। आस्थाय योगी युञ्जीत कृत्वा च प्रणवं हृदि। समः समासनो भूत्वा संहृत्य चरणावुभौ। संवृतास्यस्तथैवोरू सम्यक्सव्यस्य चाग्रतः। संपश्यन्नासिकाग्रं स्वन्दिशश्चानवलोकयन्। इत्थं योगी समाहारः प्राणायामपरायणः"। "यथा तोयाग्निलोयं यन्त्रनालादिभिः मनैः। आपिबेद्युक्तया वायुं पिबेद्योगी जितश्रमः। सूदुत्वं सेव्यमानासु सिंहशार्दूलकुञ्जराः। यथा यान्ति तथा प्राणो वश्यो भवति योगिनः। विश्वासतां यथेच्छातो नागं नयति कृत्स्नशः। तथैव योगी स्वच्छन्दं प्राणं नयति शोधितम्। यथा हि साधितः सिंहो मृगान् हन्ति न मानवान्। तद्वत्सिद्धः पवनः किल्बिषं न हन्यां तत्तम्। तस्माद्युक्तं सदा

योगी प्राणायामपरो भवेत्" इति योगचन्द्रिकायाम्। "प्राणायामाश्चरः षष्टिं कृत्वादिवमहर्मुखे। चत्वारिंशच्च मध्याह्ने सन्ध्यायां विंशतिर्भवेत्। अर्द्धरात्रे विंशतिः स्यादेवं प्राणविनिग्रहः" इति। "इड़या वायुमाकृष्य पूरयित्वोदरस्थितम्। शनैः षोड़शमात्राभिरकारं तत्र संस्मरेत्। पूरितं धारयेत् पश्चात्तुरीयच्छा तु मात्रया। उकारमूर्त्तिमत्रापि संस्मरन् प्रणवं जपेत्। यावद्वा शक्यते तावद्धारयन् जपसंस्थितः। पूरितं रेचयेत् पश्चात् मकारेणानिलं बुधः। शनैः पिङ्गलया विप्र! हात्रिंशत्या जप्तया पुनः। प्राणायामो भवेदेष ततश्चैनं समभ्यसेत्। प्रस्वेदजनको यस्तु प्राणायामेषु षोड़शः। कम्पनं मध्यमं विद्यादुत्थानं चोत्तमं तथा। पूर्वं पूर्वं प्रकुर्वीत यावदुत्तमसम्भवः। उत्तमे तु सुनिश्चिंते प्राणायामे सुखी भवेत्। प्राणो जयति तेनैव देहस्यान्तस्ततोऽधिकः। देहश्चोत्तिष्ठते तेन कृतासनपरिग्रहः"। योगसारावल्याम्। "सरेचपूरैरनिलस्य कुम्भैः सर्वासु नाड़ीषु विशोधितासु। अनाहताख्यो बहुभिः प्रकारैरन्तः प्रवर्त्तते सदा निनादः" इति। "अक्षिभ्रूनासिकास्यानाद्धृते प्राणनाड़ीं कृत्वा मनः स्थिरम्। निर्भयं साधकः कुम्भमुड्डाभ्यासमाश्रयेत्। ध्यायेन्मूले कर्णिकान्तः कुण्डलीरूपमीश्वरम्। नाड़ासंक्रमणं शान्तं शिवध्याने क्रमक्रमात्। मूर्त्तिध्यानानन्दपीने नादानन्दे प्रलीयते। यथा यथा मनः शुद्धं लीयते ध्याननादयोः। तथा तथा वायुजयं सिद्धिकृत् कुम्भ एधते। अड़ोराक्षमिति ध्यायन्नादाकृष्टमतिर्मुनिः। दृढ़ाभ्यासपरः शीघ्रं योगसिद्धिमवाप्नुयात्। यावच्च शूयते नादस्तावच्चित्तमिदं चलम्। नादे लीनं मनो ध्याने विना यत्नं हि युज्यते। स्वेदनिद्राक्षुमोटाद्याः क्षयं यान्ति साधके। सपादघटिकोर्द्धं स्यात् कम्पो जन्मनमेव च। आनन्दः स्यात् सदाभ्यासादारभ्य कुम्भकाग्निना। शुष्के नाड़ीजले दग्धे क्षुद्विकारे जयाग्निना। मूलस्थितिपटोर्भेदे शुष्यत्यम्बुविलयोऽधमे। अपाने ऊर्द्धं क्रमशः प्राणेना कृष्यते यदा। मूलाख्यपृथिवीभेदेऽपाने जाड्यतमो बलम्। क्षणं ततोर्द्धमाकृष्टावपानस्याधराङ्गकम्। उत्तिष्ठन्ति निरालम्बं लघुतूलवदम्बरे। तदासनोत्थानमुक्तं वायोर्विजयलक्षणम्। एतत् सकलसिद्धाद्यः स्थितिचक्रविभेदने। वक्ष्यमाणाभ्यासमतिं कुर्य्यात् योऽधानमारुतम्। उद्भत्युन्मुखलक्षणसृष्टवाक्षविधिते-

षया। पृष्ठवंशान्तरगतसुषुम्णार्द्धस्थले पदम्। त्रिकोणं दहनस्थानं तदधः स्थितिरित्यसौ। अभ्यासेन जितापानं प्राणेनोर्द्धं सुखीकृते। पूर्ववाहं निराकर्त्तुं प्रतीचीपथमुत्तमम्। समवाहेन सुमतिर्नेतुं स्थितिसुखान्तरे। स्थित्यारभेदभ्यसनं कुर्य्यात् सद्गुरूक्तोदितम्। विधिपद्मप्रभेदेन सर्वा आरम्भसिद्धयः। तावत्कालं साधकस्य योगोक्तनियमग्रहः। स्वाधिष्ठानं विभिद्योर्द्धमपानः प्रगतः स्वयम्। तिर्य्यग्गतेन प्राणेन निरावरस्य ऊर्द्धगः। अधः स्थितः सन्भ्रमति त्रिकोणं वह्निमण्डलम्। भ्रान्तो भस्त्येव दहनो दृढ़ाभ्यासो सुनेर्हि सः। क्रमेण दीप्तो भवति सुषुम्णास्थमलं क्षति। कुण्डलीं तापयत्येष चालितां प्राणवायुना। उत्कर्षप्राणायामेन शक्तिचालेन चाल्यताम्। ततः परिचयावस्थाशक्तिबोधकरी भवेत्। टीप्पोनलोऽधानजाड्यं शिष्टं दहति वैश्वतम्। प्रकाशावरणे नाड्यो दग्धेऽङ्गे कल्मषो मलाः। ज्ञानाग्निः स तदा सत्त्वप्रकाशक उपाधिहा। तथा योगाग्निना दग्धो देहो योगिवरस्य हि। न ह्रियते योगिदेहो देवैरपि महाबलः। इच्छामृत्युवशता योगिदेहः स्यादजरामरः। सुषुम्णाचक्रनिलया प्राणापानौ समेद्यदा। तदा केवलकुम्भः स्याद्यावन्नेक्ष्यैलोक्यसिद्धिकृत्। जलूका रुधिरं यद्वत्सादाकर्षेद्धु ध्रुवम्। ब्रह्मनाड़ी तथा धातून् सततास्यासयोगतः। तदा नद्यः पुष्कराद्यानदाः शुष्यन्ति पुङ्गले क्व दोषाः क्षुत्पिपासाद्या सर्वे नश्यन्ति योगिनः"। हठस०

प्राणायामकालमानम् "अथ प्रमाणक्रमेतेषां रेचकस्यापि कथ्यते चतुरष्टद्वादशभिः क्रमादाद्याः पलैस्त्रयः। ततः षष्ठदशोन्मानपलैरष्टादशोन्मितः। परस्तत्सप्तविंशतिपलैरुत्तमरेचितः। निसर्गादुद्वादशगुणाः प्रत्याहारस्ततः परम्" हठस०।

निसर्गप्राणायामकालः कुम्भकपञ्चतो "पञ्चगुर्वक्षरैर्युक्तः कालः पलमितो हि यः। निसर्गतः कुम्भकोऽयमतोऽर्द्धं रेचकः स्मृतः। अर्द्धः पूरक इत्युक्तो मात्राकुम्भविशारदैः। पञ्चविंशतिभिः प्रोक्तः पलैर्द्वादशमात्रिकः"। अयमेव नाड़ीशोधनोऽभ्यासप्राणायामः। "पञ्चाशद्भिर्द्वितीयस्तु सपादोद्वयधिकोन्मितः। तृतीय इति निर्दिष्टो दत्तात्रेयमतं यथा"। तदयं संक्षेपः "कनिष्ठे प्राणायामे एककिनः कालमानं चत्वारि पलानि भवन्ति तदा द्वादशप्राणायामे सर्वकालमानं ४८ पलानि यस्तौ प्रथम उद्घातः स्वेद

कुम्भककालः। एवं द्वितीये मध्यमेरौ कालमानमष्टौ ८ पलानि तदा द्वादशभिः ९६ पलानि। अत्र सर्वकालः १।२६ घटिकादि मध्यमेरौ कालः। तीव्रमेरौ कालमानं १२ पलादि तदा द्वादशभिः १४४ पलानि २.२४घटयादि एवमुत्तमोत्तमो वायुजयकालो ज्ञेयः" हठस०। तत्र अधमसाधके स्वेदातिरिक्तकम्पाद्यभावः। उत्तमसाधके श्रमादिगुणसम्पत्तौ कामसंकल्पाद्युपाये कम्पासनोत्थानादिसंभवसम्भवः। चिह्नानि योगिनो देहे दृश्यन्ते नाडिशुद्धितः" इत्युपक्रमे "बलीयसि भवेत् स्वेदोऽङ्गे तस्य प्रथमोद्यमे। यदा संजायते स्वेदो मर्दनं कारयेत्तदा। विभूय सह मिश्रेण श्रमजाताम्बुनाऽमुना। स्नानेन विग्रहादायुर्नष्टो भवति योगिनः। दृढता लघुता ङ्गे स्यात् श्रमजाम्बुक्षमर्दनात्। क्रमो द्वितीये भवति दार्दुरी मध्यमे ततः"। (दार्दुरी दर्दुरो भेकस्तस्येव यत्प्लुतोत्प्लुत्य गतिः)। ततोऽधिकतराभ्यासाद् गगने साधको हि सः। योगी पद्मासनस्थोऽपि भुवमुत्सृज्य वर्त्तते। वायुसिद्धिस्तदा ज्ञेया संसारध्वान्तनाशिनी" कुम्भकपञ्चकं "एवं नाडीविवेकेन चतुःकालेषु विंशतिम्। कुम्भकान् यदि कुर्वीत नाडीशुद्धिस्तदोच्यते। मीनमध्यंदिनार्कांभं नाभौ सर्विदमण्डलम्। मूर्ध्वनाड्या क्षते कुम्भे ध्यात्वा शुध्यन्ति नाडिकाः। चन्द्रेण पित्तदोषाग्निमितरेषां परेण तु। नाडीशुद्धिस्तना भूयात्त्रिभागैर्न संशयः। नादस्फुटिर्वपुःकाश्यं मारोग्यं वह्निदीपनम्। नैर्मल्यमल्पमूत्रादिवर्तनप्रभवो बिन्दुनिर्जयः। हिक्काप्रतिश्यकासाद्या नाडीनां मलशोषणम्। अथैर्यं धारणं वायोर्विकाराभाव एव च" हठस०

मात्राकुम्भकः "मात्राः षोडश पूरे स्युतः प्रदिक्षु कुम्भके। द्वात्रिंशद्वैचके प्रोक्ताः मात्राकुम्भः समीरितः। मात्राकुम्भो हृदिक्षतः शोषकः संप्रकीर्त्तितः। स्वाधिष्ठानात्समुत्थाय प्लावनोऽमृतसेचनः। दाहनो नाभिसंस्थानो मात्राकुम्भः प्रकीर्त्तितः। मूलाधारे क्षतस्थायं कठिनीकरणो मतः। पुनः कण्ठान्तगो यश्च व्यूहनः स्यात् स कुम्भकः। अन्यस्थाने नियोगेन सुक्तिदः परिकीर्त्तितः"। अयमाशयः। पूर्वाभ्यासे स्थानायलोकनचिन्तनाभ्यां मनसा दृग्भ्यां तादात्म्येन नासाग्रनाभिभ्रूमध्याङ्गुष्ठहृदयकण्ठादिनिश्चितशरीरान्तर्गतप्रदेशेषु स्थानात् स्थानान्तरं साधकेन कुम्भतस्य वायोर्यथानयनं स्यादनं च पुनस्ततः तस्मिंतस्य वायोः प्रदेशान्तरे नयनमिति क्षतसाध्यस्य प्राणस्य चालनं कर्त्तव्यं गुरूपदेशेनेति मात्राकुम्भः। सूर्यांश कृदि कुम्भनात् तदूर्ध्वं रसवहानां नाड़ीनां रसशोषणं भवति। एवं नाभौ सर्वशिरामूलत्वात् सूर्यमण्डलपदत्वात् अग्नेयंगादत्योष्णमत्र नाडिगतमनदाहः। एवं स्वाधिष्ठाने स्थितौ तस्य सौम्यापानचन्द्रपदत्वात् अन्तरसंचनक्षतत्पार्थिवांशतमोऽपायहारा प्लावनो भवति। कठिनीकरणं मृदुतापिधानं देहेन्द्रियेषु" हठस०।

मात्रामानम् "प्रदक्षिणीकृत्य जानुं नातिद्रुतविलम्बितम्। अङ्गुलीस्फिकतो मात्रा स्फोटिकाकरणाद् भवेत्"।

"मात्रा नवविधा प्रोक्ता योगिभिस्तत्त्वदर्शिभिः। निमेषोन्मेषणं मात्रा कालो ह्यक्षरोच्चितः। गोदोहवत्सपानेषुक्षेपघण्टारवोन्मिताः। चतस्रो ह्यतिमात्राः स्युस्ताश्च सेव्याः शनैः शनैः। देशकालानुसारेण प्राङ्मुखोमीश्वराः पुरा। पूरकुम्भकरेचेषु निसर्गजनितेषु यः। कालः स मात्रासंज्ञः स्यात् सर्वमात्राः क्रमादिमाः। अथवा इति तास्त्रेधा महामात्राः पुरादिताः। जानुं प्रदक्षिणीकृत्य त्रिवारं स्फोटिकामतु। करणात् ह्रस्वमात्रैषा मध्यैषा षड्भिरीरिता। जान्वोः प्रदक्षिणक्रान्तिर्नवधारमसौ वरैति" हठस०।

घटस्थस्य प्राणायामकालः "सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह। त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते" गीता। अयञ्च पापशुद्धये घटस्थैः योगसिद्धये च योगिभिश्च कार्यः। तादृशसंघटायस्य त्रिजपे पलत्रयं भवतीति तस्य कुम्भकालसंख्यावेदकत्वं बोध्यम्। योगदीपिकायाम्" हठस०।

प्राणस्वरूपम् "समस्तेन्द्रियवृत्तिश्च प्राणो वायुः प्रकीर्त्तितः। तच्जयादिन्द्रियाणयेव विजितानि भवन्ति हि। अतः प्राणमनःस्पन्दयोः सहभावित्वात् प्राणनिग्रहे मनो निग्रहीतं" हठस। योगवासिष्ठे "बाह्याभ्यान्तरस्पन्दश्चित्तजो वातजोऽथ वा। न यस्य विद्यते तस्य दूरस्थो विजितेन्द्रियो"। अयं भावः प्राणायामोपायोपेतस्य इतरस्मादल्पः श्वासप्रश्वासो भवति यथा खननच्छेदनादिषु व्याप्रियमाणस्य पर्वतमारोहतः शीघ्रं धावतो वा श्वासवेगो यावान् भवति न तावान् स्थितस्यासीनस्य वा भवति। यथा दुष्टैरश्वैरुपेतो रथो मर्मत्यक्त्वा क्वापि नीयते स च सारथिना दृढाकृष्टवल्गाकृतः ऋजुमार्गे पुनर्धार्यते तथेन्द्रियैर्वासनादिभिरितस्ततो नीय-

मानं चित्तं प्राणरक्षणौ दृढधारिताया खात्मतत्त्वे भाव्यते" इत्येवं चित्तविकारप्राणक्षयौ प्रकृतेऽभिप्रेतौ" हठस०।

अभ्यासक्रमः "प्रथमे दिवसे कार्यं कुम्भकानां चतुष्टयम्। प्रत्येकं दशसंख्याकं द्वितीये षड्भिः सदा। विंशतिं च तृतीयेऽह्नि षड्विधा दिने दिने" योगदीपिका।

प्राणायामफलं हठयोगे गोरक्षनाथः। "द्वाराणां नवकं निरुध्य मरुतं पीत्वामृतं धारित नीत्वाकाशजपानवह्निसहितं धृत्वा समुच्चालितम्। आत्मध्यानयुतो ह्यनेन विधिना विन्यस्य मूर्ध्नि ध्रुवं यावत्तिष्ठति तावदेव महताऽसङ्गेन संयुज्यते"।

प्राणायामप्रकारः "प्राणायामं ततः कुर्यान्नित्य सहितकुम्भया। यथा सुषुम्णान्तरस्थामलाः शोषं प्रयान्ति च। वहत्यापूरणो योगी प्राणं चन्द्रेण पूरयेत्। धारयित्वा यथाशक्ति भूयः सूर्येण रेचयेत्। प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः। विधिवत् कुम्भकं कृत्वा पुनश्चन्द्रेण रेचयेत्। येन त्यजेत् तेन पूर्यं धारयेत्तु निरोधतः। रेचयेच्च ततोऽन्येन शनैः प्रकृतवेगतः। प्राणं चेदिडया पिबेच्छियमितं भूयोऽन्यया रेचयेत् पीत्वा पिङ्गलया शनैरशक्तिमतो बध्वा त्यजेदन्यया। सूर्याचन्द्रमसोरनेन विधिना विम्बद्वयं ध्यायतान्नाड्यः शुद्धा नाड़िगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः। कार्श्यं देहे वायवग्नेर्विवृद्धिर्नादाभिव्यक्तिः प्रजायते कुम्भकात्। शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत्। दृढ़यापि च षोड़शभिः प्रकृतं कुम्भकत्रयमन्तरम्। त्यज पिङ्गलया यमकैः शनकैः दशभिर्दिवसैर्भवेद्विधिकैः। क्षयमेति यदा खेदः कम्पो भवति मध्यमे। उत्तिष्ठत्युत्तमे प्राणो ब्रह्मद्वारे पद्मासने दृढे। ततोऽधिकतराभ्यासाद्भवतः खेचरीमनौ। ततोऽधिकतराभ्यासाद्दारुणी जायते भृशम्। यथैव दारुणो रोगश्छेदनभ्रूयोत्थितस्तथा भूतले। पद्मासनस्थितो योगी तथा गच्छति भूतले। लक्षेण सकलान् तेन नाड़ीभेदनमाचरेत्। दृढता लघुता चापि तेन गात्रस्य जायते। अभ्यासकाले प्रथमे शस्तं क्षीराज्य भोजनम्। ततोऽभ्यासे दृढीभूते न तादृक् नियमाग्रहः। यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैः शनैः। तथैव सेवितो वायुरन्यथा हन्ति साधकम्। प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत्। अयुक्ताभ्यासयोगेन सर्वरोगसमुद्भवः। हिक्का श्वासस्तथा कासः शिरःकर्णाक्षिवेदनाः। भवन्ति विविधारोगाः पवनस्य प्रकोपतात्। युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तञ्च पूरयेत्" हठप्रदीपिकाग्रन्थे।

प्राणायामाभ्यासफलम् "एवमासनबन्धस्थो योगीन्द्रो विगतभ्रमः। अभ्यसेन्नाड़िशुद्धिं च सुष्ठ्वादिपवनक्रियाम्" हठस०। "क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथं भवेत्। क्रियैव कारणं सिद्धेः सत्यमेतन्न संशयः। न शास्त्रपाठमात्रेण योगसिद्धिः प्रजायते। प्राणायामैरेव सर्वं प्रयुञ्जीत मनीषिणः। आचार्यैरन्यदप्येतत्कर्म न त्यज्यतम्। षट्कर्मयोगसाम्प्रोक्ति पवनाभ्यासतत्परः। अभ्यस्यान्तकविक्षत्यात्पवनमभ्यसेत्। ब्रह्मादयोऽपि विदधाः प्राणाभ्यासतत्परः। सर्वसिद्धिं गताः सर्वे तस्मात् पवनमभ्यसेत्। यावद्वायौ भवद्देहे तावत् चिन्ता निराकुला। यावद्दृष्टिर्भ्रुवोर्मध्ये तावत्कालभयं कुतः। विधिवत् प्राणसंयामैर्नाड़ीचक्रे विशोधिते। सुषुम्णा वदनं भित्त्वा सुखाद्विशति मारुतः। मारुते मध्यसञ्चारे मनः स्थैर्यं प्रजायते। यो मनःसुस्थिरीभावः सैवावस्था मनोन्मनी। ततश्चित्तस्य विधानमाशित्वान् कुर्वन्ति कुम्भकान्। विचित्रकुम्भकाभ्यासाद्धु विचित्रा सिद्धिमाप्नुयात्। सूर्यभेदनसञ्चायी तथा शीतकरः शनैः। भस्त्रिका भ्रमरी मूर्च्छा केवलान्ताष्टकुम्भकाः। पूरकान्ते तु कर्त्तव्यो बन्धो जालन्धराभिधः। कुम्भकान्ते रेचकादौ कर्त्तव्यस्तूड्डियानकः। अधोजात कुञ्चनेनैव कण्ठसङ्कोचने कृते। मध्यपश्चिमतानेन व्यात् प्राणो मध्यना ड़गः। अपानमूर्ध्वमुत्थाप्य प्राणं जयदधो नयेत्। योगी जरामृत्युहरो षोड़शो वयसा भवेत्" हठप्र०।

सूर्यभेदनम् "अधासनं सुखादेव बद्ध्वा सुष्ठु यथासनतः। दक्षनाड्या समाकृष्य बहिःस्थं पवनं शनैः। आकेशाग्रं नखाग्रं च शिरोभावधिरुन्धकम्। ततः शनैः त्यजेन्नाड्या रेचयेत् पवनं पुनः। कपालशोधनं वातदोषघ्नं कृमिनाशनम्। पुनः पुनरिदं कुर्यात् सूर्यभेदनमुत्तमम्" हठ०।

सञ्चायी "मुखं संयम्य नासाभ्यामाकृष्य पवनं शनैः। यथा लगति कण्ठान्तं हृदयन्तावितर्जनम्। पूर्ववत् कुम्भकं कृत्वा रेचयेदिड़या ततः। श्लेष्मादोषहरं कण्ठे दावानलविवर्द्धनम्। नाड़ीजलोदरधातुगतदोषविनाशनम्। गच्छता तिष्ठता कार्यं सुखायाख्यं च कुम्भकम्" हठप्र०।

अथ शीतकारः "कुम्भं कुर्यात् सदा पद्मौ प्राणेनैव विसर्जयेत्। एवमभ्यासयोगेन कामदेवो द्वितीयकः।

योगिनीचक्रसामान्यसृष्टिसंहारकारकः। न क्षुधा न तृषा निद्रा नैवालस्यं प्रजायते। भवेत् स्वच्छन्ददेहस्तु सर्वोपद्रववर्जितः। अनेन विधिना सत्यं योगीन्द्रो भूमिमण्डले। स भवेत् सर्वसिद्धीनां भाजनं नात्र संशयः। नासिकाभ्यन्तरन्यस्तेन यः प्राणं सततं पिबेत्। स भवेत् सर्वसिद्धीनां भाजनं नात्र संशयः। रसनातालुमूलेन यः प्राणं सततं पिबेत्। अर्धदण्डेन भवेत्तस्य सर्वरोगपरिक्षयः" हठप्र०।

शीतलीकुम्भकः "जिह्वया वायुमालप्य पूर्ववत् कुम्भसाधनम्। शनैस्तु घ्राणरन्ध्राभ्यां रेचयेदनिलं सुधीः। गुल्मप्लीहोदरं चापि ज्वरपित्तं क्षुधां तृषाम्। एतानि शीतली नाम कुम्भकोऽयं निहन्ति च" हठप्र०।

भस्त्रिका "जानूपरि संस्थाप्य उभे पादतले तथा। पद्मासनं भवेत् सम्यक् सर्वपापप्रणाशनम्। सम्यक् पद्मासनं बद्ध्वा समग्रीवोदरः सुधीः। मुख्यं संयम्य यत्नेन प्राणं घ्राणेन रेचयेत्। यथा लगति हृत्कण्ठे कपालावधि पूरयेत्। वेगेन पूरयेत् सम्यक् हृत्पद्मावधि मारुतम्। पुनर्विरेचयेत् तद्वत् पूरयित्वा पुनः पुनः। यथैव लोहकारेण भस्त्रा वेगेन चाल्यते। तथैव स्वशरीरस्थं चाल्यते पवनो बलात्। यदा श्रमो भवेद्देहे तदा सूर्येण तेजयेत्। घर्मोदरे भवेत् पूर्णं पवनेन यथा लघुः। धारयेद्वायुमाकाशमध्ये तज्जनीभ्यां तथा दृढम्। कुम्भकं पूर्ववत् कृत्वा रेचयेदिडयाऽनिलम्। वातपित्तश्लेष्महरं शरीराग्निविवर्द्धनम्। कुण्डलीबोधनं कुम्भे रोगघ्नं घटसंभवं शुभम्। ब्रह्मनाडीमुखे संस्थकपाटोद्घाटनाशनम्। सम्यग्भस्त्रा समुद्भूता ग्रन्थित्रयविभेदिका। विशेषेणैव कर्त्तव्यं भस्त्राख्यं कुम्भकं त्विदम्" हठप्र०।

भ्रमरीकुम्भकम् "त्रिशोद्घोषं पूरकं भृङ्गनादं भृङ्गीनादं रेचकं मन्दमन्दम्। योगीन्द्राणां नित्यमभ्यासयोगाच्चित्ते जाता काचिदानन्दलीला" हठप्र०।

मूर्च्छाकुम्भकः "पूरकान्ते बद्धतरं बद्ध्वा जालन्धरं शनैः। रेचयेन् मूर्च्छनाख्योऽयं मनोमूर्च्छासुखप्रदा। अन्तः-प्रवर्त्तिताधारशक्तापूरितोदरः। साद्यात्मयोगाभ्यासे च विभ्रमेत् पद्मपत्रवत्" हठप्र०।

संहितकुम्भकः "प्राणायामास्त्रिधा प्रोक्तो रेचपूरककुम्भकैः। संहितः केवलेति कुम्भको द्विविधो मतः। रेचकं पूरकं मुक्त्वा यत्सुखं वायुधारणम्। स वै संहितकुम्भकः। यावत् केवलसिद्धिः स्यात् तावत् संहितमभ्यसेत्" हठप्र०।

केवलकुम्भकः "रेचकं पूरकं त्यक्त्वा सुखाद्वायुनिरोधनम्। प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः। केवले कुम्भके सिद्धे रेचपूरविवर्जिते। न तस्य दुर्लभं किञ्चित्रिषु लोकेषु विद्यते। शुद्धकेवलकुम्भोऽयं यत्रेष्टं वायुधारणम्। राजयोगपदं चैव लभते नात्र संशयः। आहारः क्षीयते योगे क्षयपक्षे यथा शशी। शुक्लपक्षे यथा चन्द्रस्तथा श्वासोऽस्तुतोपमः। हठं विना राजयोगो राजयोगं विना हठः। न सिध्यति ततो युग्मनिष्पत्त्यै च समभ्यसेत्। कुम्भकप्राणरोधान्ते कुर्याच्चित्तं निराश्रयम्। एवमभ्यासयोगेन राजयोगपदं व्रजेत्। कुम्भकात् कुण्डलीबोधः कुण्डलीबोधतो भवेत्। अनर्गला सुषुम्णा च हठसिद्धिश्च जायते। वपुःकृशत्वं वदने प्रसन्नता नादस्फुटत्वं नयने सुनिर्मले। आरोग्यता बिन्दुजयोऽग्निदीपनं नाड़ीविशुद्धिर्हठयोगलक्षणम्" हठप्र०।

उपदेशः "सर्वेषामेव तन्त्राणां यथाधारोऽहिनायकः। सर्वेषां योगतन्त्राणां तथाधारोहि कुण्डली। सुप्ता गुरूपदेशेन बोधिता सुखदा भवेत्। तदा सर्वाणि पद्मानि भिद्यन्ते ग्रन्थयस्तथा। प्राणस्य शून्यपदवी तदा राजपथायते। तदा चित्तं निरालम्बं तदा कालस्य वञ्चनम्। सुषुम्णा शून्यपदवी ब्रह्मरन्ध्रं महापथम्। अनामयं शाम्भवी मध्यमार्गश्चैत्येकवाचकाः। तस्मात् सर्वप्रयत्नेन प्रबोधयितुमीश्वरीम्। ब्रह्मद्वारमुखे सुप्तां मुद्राभ्यासेन बोधयेत्" हठप्र०।

दशमुद्रोद्देशः "महामुद्रा महाबन्धो महाभेदश्च खेचरी। उड्डियानं मूलबन्धो बन्धो जालन्धराभिधः। करणी विपरीताख्या वज्रोली शक्तिचालनम्। इदं हि मुद्रादशकं जरामरणनाशनम्। आदिनाथोदितं सर्वसिद्धानां दुर्लभं महतामपि। गोपनीयं प्रयत्नेन यथा रत्नकरण्डकम्। कस्यचित् नैव वक्तव्यं कुलस्त्रीसुरतं यथा। वज्रोली सहजोली च सहजोली त्रिधा मता। एतेषां लक्षणं वक्ष्ये कर्त्तव्यञ्च विशेषतः"।

महामुद्रा "वामेन योनिं संपीड्य दक्षिणम्। पादं प्रसारितं कृत्वा कराभ्यां धारयेदृढम्। कण्ठे बन्धं समारोप्य धारयेद्वायुमूर्द्धनि। यथा दण्डहतः सर्पो दण्डाकारः प्रजायते। ऋजुर्भूत्वा तथा शक्तिः कुण्डली सहसा भवेत्। तदाधो मरणावस्थां हरते क्षिप्रता-

श्रिता। ततः शनैः शनैरेव रेचयेन्न च वेगतः। इदं खलु महामुद्रा महासिद्धैः प्रशस्यते। महाक्लेशादयो दोषाः क्षीयन्ते मरणादयः। महामुद्रां तेनैव वदन्ति विबुधोत्तमाः। चन्द्राङ्गे च समभ्यस्य सूर्याङ्गे पुनरभ्यसेत्। यावत्तुल्या भवेत् संख्या ततो मुद्रां विसर्जयेत्। न हि पथ्यमपथ्यं वा रसाः सर्वेऽपि नीरसाः। अपि भुक्तं विषं घोरं पीयूषमिव जीर्यति। क्षयकुष्ठगुदावर्त्तगुल्मामाजीर्णपुरोगमाः। दोषाः सर्वे क्षयं यान्ति महामुद्रां च योऽभ्यसेत्। कथितेयं महामुद्रा महासिद्धिकरी नृणाम्। गोपनीया प्रयत्नेन न देया यस्य कस्यचित्" इठप्र०।

महाबन्धः २ "पार्ष्णिं वामस्य पादस्य योनिस्थाने निवेशयेत्। वामोरूपरि संस्थाप्य दक्षिणं चरणं तथा। पूरयित्वा सखे वायुं हृदये चिबुकं दृढम्। निष्पीड्य योनिमाकुञ्च्य मनोमध्ये नियोजयेत्। धारयित्वा यथाशक्ति रेचयेदनिलं शनैः। सव्याङ्गे पूरकभ्यस्य दक्षाङ्गे पुनरभ्यसेत्। मतान्तरं तु केषाञ्चित् कण्ठबन्धं विवर्जयेत्। राजदन्तस्य जिह्वायां बन्धः श्रेष्ठो भवेदिति। अयं खलु महाबन्धो महासिद्धिप्रदायकः। कालपाशमहाबन्धविमोचनविचक्षणः। अयं च सर्वनाड़ीनामूर्ध्वगमनरोधकः। निःक्षेपोभयभुवं धत्ते क्षेदारं प्रापयेन्मनः। रूपलावण्ययुक्तस्त्री यथा स्त्रीपुरुषं विना। महामुद्रामहाबन्धौ निष्फलौ वेधवर्जितौ" इठप्र०।

महावेधः ३ "महावेधे स्थितो योगी कृत्वा पूरकमेकधीः। वायुना गतिमाकुञ्च्य निभृतं कण्ठसङ्गया। समहस्तयुगे भूमौ स्फिजौ सन्ताड़येत् शनैः। पुटद्वयं समाक्रम्य वायुः स्फुरति मध्यगः। सोमसूर्याग्निसम्बन्धात् जायते च स्थिरक्षयः। मृतावस्था समुत्पन्ना ततो मृत्युभयं कुतः। महावेधोऽयमभ्यासान्महासिद्धिप्रदायकः। वलीपलितनिर्मुक्तैः सेव्यते साधकोत्तमैः। एतत् त्रयं महामुद्रा जराक्षत्युविनाशिनी। वपुष्टार्ढ्यकरत्वेवमणिमादिगुणप्रदम्। अष्टधा क्रियते चैव यामे यामे दिने दिने। पुण्यवन्तारभन्त्यादौ पापौघभिदुरं सदा। सम्यक् शिक्षा सतामेव खलु प्रथमसाधनम्। वपुस्त्रीपशुसेवाना मादौ वर्जनमाचरेत्" इठप्र०।

खेचरी ४ "छेदचालनदोहैः जिह्वां क्रमेण वर्द्धयेत्तावत्। यावद्भ्रूमध्यं स्पृशति तदा च खेचरीसिद्धिः। छेदोपलनिभं शस्त्रं स्निग्धतीक्ष्णं सुनिर्मलम्। समादाय ततस्तेन रोममात्रं समुत्कृत्तेत्। कृत्वा सैन्धवपथ्यादिचूर्णं ताभ्यां प्रघर्षयेत्। पुनः सप्तदिने प्राप्ते रोममात्रं समुत्कृत्तेत्। एवं क्रमेण षण्मासं नित्ययुक्तः समाचरेत्। षण्मासाद् रसनामूलनाड़ीबन्धो विनश्यति। अथ वागीश्वरीधाम शिरोवक्त्रेण वेष्टयेत्। शनैरुत्कर्षयेद्योगी कालवेलाविधानवित्। वितस्तिप्रमितं दैर्घ्ये विस्तारे चतुरङ्गुलम्। मृदुलं धवलं शस्तं वेष्टिताम्बरलक्षणम्। पुनः षण्मासमात्रेण पुनः सङ्क्रमणात् प्रिये!। भ्रूमध्यावधि वर्द्धेत तिर्यक् कर्णविलावधि। अधस्तात् चिबुकं मूलं याति क्रमकारिता। केशादूर्द्धं च क्रामति तिर्यक्कपालावधि प्रिये!। पुनः संवत्सरादूर्द्धं! द्वितीया चैव जीवया। ब्रह्मरन्ध्रान्तमाहत्य तिष्ठत्यमरवन्दिते!। स्वतालुमूलं सङ्कुच्य सप्तवासरमात्रतः। स्वयुक्तप्रकारेण मलं सर्वं विशोधयेत्। अङ्गुल्यग्रेण सङ्कुच्य जिह्वां तत्र निवेशयेत्। शनैः शनैश्चकाच्च महाव्रजे कपाटभेत्। पूर्ववीर्ययुतां विद्यां व्याख्यातामतिदुर्लभाम्। यस्याः सङ्कल्पमात्रेण पापराशिः प्रणश्यति। खे निरालम्बसकलक्रियाक्रमा चित्ततत्परति शाम्भवोदये। सा शिवस्य समवायुकारिणी खेचरी च भवखेदहारिणी। क्रमेणैव प्रकर्त्तव्याऽभ्यासेन वरवर्णिनि!। युगच्छेदयते तस्य शरीरं विलयं व्रजेत्। तस्मात् शनैः शनैः कार्याभ्यासेन युगवत् प्रिये!। एवं वर्त्तत्रयं कृत्वा ब्रह्मद्वारं विभेदयेत्। षट्चक्राणि विभिद्य शक्तिभुजगीं प्रोत्थाप्य मूलस्थितां भित्त्वा ग्रन्थिपुटं च पश्चिमसिरापाकारन्ध्रं संस्पृशेत्। नीत्वा प्राणमतः सिराविलसनं निर्भिद्य चित्तेन तत् लिङ्गं यः पिबतीन्दुमण्डलगलत् सुक्तः स साक्षात् शिवः"। "तीक्ष्णकं हरते व्याधिं कटुकं कृमिनाशनम्। घृतस्वादुसमं चैवाऽमरत्वं लभते ध्रुवम्। मधुस्वादुसमं चैव श्लेष्मपित्तादिकं वहेत्। लड्डुस्वगुडकं पानानि पक्वान्नानि स्वेनेकशः। दिव्यकल्पं क्रीड़ेच्चित्य सुतल्पगो जायते ध्रुवम्। तन्मयत्वमवाप्नोति कीटकारीव कीटकः। कपालकुहरे जिह्वा प्रविष्टा विपरीतगा। भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी। काकचञ्चुविधानेन शीतलं सलिलं पिबेत्। प्राणायामप्रयोगेण च योगी भवति निर्जरः। कलां पराङ्मुखीं कृत्वा विषये परिवर्त्तयेत्। सा भवेत् खेचरी मुद्रा व्योमचक्रं तदुच्यते। रसनामूर्ध्वगां कृत्वा क्षणार्द्धं यदि तिष्ठति। विषमैर्मुच्यते योगी व्याधिमृत्युजरादिभिः। न रोगो

मरणं तस्य न निद्रा न क्षुधा तृषा। न च मूर्च्छा भवेत् तस्य यो मुद्रां वेत्ति खेचरीम्। पीड्यते न च रोगेण न लिप्यते च कर्मणा। बाध्यते न च कालेन यो मुद्रां वेत्ति खेचरीम्। चित्तं चरति खे यस्मात् जिह्वा चरति खे गता। तेनेयं खेचरी मुद्रा सर्वसिद्धैर्नमस्कृता। खेचर्यां मुद्रितं येन विवरं लम्बिकोर्ध्वतः। तस्य नाक्षरते बिन्दुः कामिन्यालिङ्गितस्य च। चलितोऽपि यदा बिन्दुः संप्राप्त हुतवहनम्। व्रजत्यूर्ध्वं हठयक्त्या निरुद्धो योनिमुद्रया। कपालकुहरे जिह्वा प्रविष्टा विपरीतगा। भ्रुवोरन्तर्गता दृष्टिरेषा योनिः प्रकीर्तिता। योनिमुद्रा परा गोप्या विधिज्ञेन प्रयत्नतः। तस्यां संजायते सिद्धिः सत्यं सत्यं वरानने। तस्मादियं प्रयत्नेन गोपनीया पतिव्रतेव हि। कुलीनेव महाभागा योनिमुद्रा शुभप्रदा। अनया सदृशी मुद्रा नास्ति तुल्या चराचरे। गोपनीया प्रयत्नेन न देया यस्य कस्यचित्। अस्या प्रसादमात्रेण ईश्वरोऽहं न संशयः

खिलकमलतश्च्युतं तद्विन्दुं पिबति पाति बन्धमेव धत्ते' विपरीतकरणोऽ "यत्किञ्चित् स्रवते चन्द्रादमृतं दिव्यरूपि च । ततसर्वं ग्रसते सूर्यस्तेन पिण्डो विनश्यति । तत्रास्ति कारणं दिव्यं सूर्यस्य मुखबन्धनम् । गुरूपदेशतो ज्ञेयं न तु शास्त्रार्थकोटिभिः । ऊर्ध्वपादोऽन्यधो मस्तकः स्यात् क्षणं वासरेऽयादिसेऽभ्यासदक्षौ भवेत् । एवमभ्यासतो यामभात्रं सदा मृत्युजित् स्याच्छराब्धिञ्च प्रणमासतः । आरोप्य भूमाविति मस्तकं यो यामत्रयं तिष्ठति चोर्ध्वपादः । विध्युक्तकर्मरुद्धसमीरवेगो मासत्रयात् स्याद्धि तदाऽमरः सः । ऊर्ध्वं सोमकलाजनं सुषिमलं कण्ठस्थनाद्धूर्ध्वतो नासान्ते सुषिरे नयेच्च गगनद्वारं ततः सर्वतः । ऊर्ध्वोष्ठो भुवि सन्निधत्य नितरासुत्तानपादः पिबेदेवं यः कुरुते जितेन्द्रियपथो नैवास्ति तस्य क्षयः । नित्याभ्यासादस्य हि कुठराग्निर्वह्निमायाति । आहारोऽतस्तस्मै सम्पाद्यः साधकाय भूरिभिः । जितेन्द्रियो यत्नलब्धित्तत्त्या प्राणावरोधेन कृतेष्टचिन्तनः विनिश्चलो ऽङ्गोद्भिद्युगस्तु तूष्णीं योगं भजत्येव तदाऽमरो भवेत् । वलितं पलितं चास्य प्रणमासाच्चैव दृश्यते । यामत्रयाभ्यासतोऽयं कालजित् स्यादिति क्रमः" हठप० ।

वस्तिका हठसङ्केते प्रसङ्गादत्रैव वस्तिकादिविधिर्दर्शितः तत्रादौ जिह्वयालम्बनाय विधिर्यथा

"तालुमूलगतां यत्नात् जिह्वयाक्रम्य घण्टिकाम् । ऊर्ध्वरन्ध्रगते वायौ प्राणस्यन्दो निरुध्यते" तत्करणप्रकारादि "त्रसुदुग्धवेत्तालुमूलं रसज्ञासिरामूलसञ्चैव सप्राहचेतैः । सिराच्छिन्नतीक्ष्णैः सचैवङ्गवीनैर्मलं सर्वमाशोधयेत् तत्समत्वम्" हठप० ।

छेदनम् "मकराटवज्रो लघुवृत्तपत्रनिभं सुतीक्ष्णं भवतीक्ष्ण धारम् । अङ्गुष्ठपर्वोर्ध्वसुविस्तृतं तदर्धेन्दुतुल्यं विमलं कृत्तम् । दण्डस्तु कार्योऽस्य कड्डुलोऽथ्वे सस्वच्छदृक्चेन च रोलमात्रम् । ऊर्ध्वगतोतृसंप्रतिबन्धहेतोर्भ्रूमध्यागमंस्यस्य कृत्तमेणोऽस्याः । अधोध्वतल्पप्रसरक्रमाभ्यो बन्धः कलाया असिताभनाड्याः । मध्ये गतस्योद्भव पीठतोऽस्य छिन्द्यात् यवार्धोपरि नित्यमेव । संछेदनात् प्रागनुलोमचूर्णनाघर्षवेज्जो रसनातलस्थम् । घटीद्वयं गाढमिति विधारं संछेदनादूर्ध्वमतन्द्र आचरेत् । संछेदकर्मोचरमस्ततन्द्र मज्ञानं दोहनमाविदध्यात् । अक्लेदनिभं तदगतचित्तवृत्तिः कार्याः घटीनोकणास्तु भेदे । दीर्घं वितस्तिप्रमितं च विस्तृतं वेदाङ्गुलं स्यान्मृदुलं सितञ्च । सूक्ष्मं कलावेष्टनवस्त्रलक्षणं प्रोक्तं पुराणे रसनाभिचालने । आदौ च चानेन कलां सुयुक्त्या संवेद्य चाङ्गुष्ठकतर्जनीभ्याम् । दोष्णोः सदाकर्षणचालनेन स्वभ्यासमालक्ष्य बलं विदध्यात् । एवं दृढाभ्यासत एव जिह्वा लम्बा भवेद् भ्रूकुला सुपक्वला । आकर्षणेनैव वदेत् किञ्चित् सुसाधकः सुस्थिर एकमानसः" हठप० ।

"जिह्वां समाकृष्य मधूग्रगन्धचोदेन सञ्चालनदोहने सदा । कार्या रसज्ञा विधिनेति शीघ्रं स्यात् खेचरी साधकपुङ्गवस्य । संछेदसंचालनदोहनानां प्रणमासक्रमस्यासयुतः सदैव । नश्येत् कलामूलसिरोग्रबन्धो नासार्द्धसञ्चै रसना स्रवेत् खम् । छिन्नं कलामूलमलं यदाखिलं छिन्द्यात् क्रमेणात्र मनैरुदान्तिके । सिद्धे पिण्डीनारुग्यवर्णके हे युक्त्या सदा च्छेदनयुक्तितो बुधः । यदा लम्बिका कर्णेषि खं रसज्ञा स्पृशेत् नासिकार्द्धं तदा साधकस्य । खलं लम्बिकाकर्मणोऽतु खमेषा कला प्रत्यहं छिन्नमूलेति दैर्घ्यम्" हठप० । "छेदनचालनदोहैः क्रमशः कलां वर्द्धयेत्सावत् । सा यावद् भ्रूमध्यं विशति तदा खेचरी सिद्धिः । एवं कृतेऽस्य रसना प्रयात्यनुस्रूतान्तविलम् । तिर्यक् कर्णावधि हि चिच्छकावधि सा स्वयं याति । व्यत्यास इति वक्त्रमयमत्र कृतस्तदा रसज्ञेयम् । ब्रह्मद्वारं प्रविशति भित्त्वा भ्रूमध्यमूर्ध्वं गता" हठप० ।

वज्रोली ह "प्राग्पानाध्वनोर्ध्वं समाकुञ्चनं सुन्दरं सुन्दरी वाभ्रमेत् सूक्ष्मः । याति वज्रोखिकासिद्धिमत्यं वायसिद्धेः प्रश्नं विन्दुसिद्धिर्यथा । शलाकया धातुमणालरोत्थया कनीनिकान्तः परिस्रुत्रयाल्पकम् । रन्ध्रे स्वलिङ्गस्य शनैः प्रवेशनाभ्यासक्रमाद्वायुगतिञ्चमश्नुते" । अस्यार्थः आदौ मूत्ररोधौषधेन दुष्पूतिक्षयितौष्ण्यभेदोक्तिं विशुद्धसाधनं विधाय ततस्तदल्पविलमल्पाभ्यन्तरं द्वादशाङ्गुलां कनीनिकाग्रसमां सरलां विशुद्धसीसकस्य पत्तलां शलाकां शनैर्लघुक्षणेन लिङ्गद्वारे क्रमेण समाहितः सततं विधाय तया तद्द्वारं वायुगतागतक्षमं गुदापान इव कृत्वा प्रथमाभ्यासे पात्रनिहितक्षीराक्षिसूर्ध्वनिलाकर्षणविधिना क्षीरं क्षीरं मन्दमूर्ध्वमाचरेत्" हठप० ।

"इति क्रमाभ्यासवशेन वीर्यपाने बलाख्यतः । दृढे तु कामिनीयोनिपुष्पार्कर्षणमभ्यसेत् । स्थानात् संचलितं विन्दुमूर्ध्वमाकर्षयेदिति । अभ्यसेत् साधकः सम्यक् या-

वत स्थिरपदं भवेत् । यन्त्रितः शरनालेन फूत्कारं वज्रकन्दरे । शनैः शनैः प्रकुर्वीत युक्तस्कारकारणात् व्यक्तावमाशयः । "षोडशाङ्गुलमानां तु प्रकुर्यात् वंशनालिकाम् । कृत्स्नायमूलां तां लिङ्गमुखे दत्त्वास्य तन्मुखम् । धृत्वा फूत्कारमन्त्रेऽस्याः कुर्यात् यादृङ् मुखर्मुखः । प्रत्यहं तेन विहृतं लिङ्गद्वारं क्रमाञ्जयेत् । ततो नाल्याऽनया तोयमल्पं फूत्कारतोऽन्तरे । लिङ्गरन्ध्रेण पट्टीयात् क्रमवृद्ध्या सुखावहः । लिङ्गच्छिद्रेऽथ विहृते क्षीराकृष्टिं ततो भजेत्" वज्रकन्दरे लिङ्गद्वारे । "अपानमाकुञ्चय ततो वह्नेरोर्ध्वं दुग्धनाकृष्टिविधिक्रमेण । समभ्यसेन्निश्चलमल्पमल्पं भगे पतद्विन्दुमधोर्ध्वमाहरेत्" हठप्र० ।

लङ्गेटः मट्टजोली "अथ हि कुहमितायां पुष्पमूर्ध्वं समूर्ध्वं क्रमेण उपरि कुर्यात् कुत्सितात् लिङ्गनालात् । निज उपगतविन्दुं बध्नीयानुकुर्यात् सुरतरसनिमग्नो लिङ्गसञ्चालनानि । विन्दुः पाण्डुर एष चन्द्र उदितः सूर्यो भवेदार्त्तवं सिन्दूरप्रतिमं रवेः पदगतं शुक्रं शशिस्थानके । ऐक्यं साधनयोः स्वयं न्यथा नो जायतेऽतो मतिरन्योन्यं व्यधुरते निजमहिम्नैक्यं द्वयोर्विपक्षे । अभ्यासपाटवतया विदधाति योषिदेवं तदूर्ध्वपरिकर्मणतः शुक्रविन्दुम् । यद्यार्त्तवं समभिरक्षति योगिनी सा वज्रोलिनैत्यखिलसिद्धिपदं प्रयाति । मक्षीरजो विन्दुरयं मदेशो द्वयोः सुयोगात् परिजय्यतेऽखिलम् । वीर्यं निजम् स्वार्त्तवमेतदौसनावैक्यं हि वज्रोल्युदिता सुसिद्धिदा । मट्टजोली सहजोली वज्रोल्या भेदतो मतः । विन्दुं देहे विधत्ते येन च येन प्रकारेण । वज्रोली मिथुनोत्सर नरवधूत्या स्वाङ्गसंलेपनात् संदग्धाङ्गगणोत्थाम्बुहृतवा भूत्वा तयं संस्थितिः । सैषोक्ता सहजोलिका सुरतुतैराद्यादिनाथैः सुगा वज्रोलीति मत्या वनोति नियतं भोगेऽतिभुक्तेऽमृतम् । आकुञ्चोर्ध्वं मूत्रमल्पात्यकं तद्वारंवारं संहजेन्मूत्रनालात् । आकुञ्चोर्ध्वं वायुना यो दृढेन नित्यं धत्ते विन्दुसिद्धिं स याति । इति षण्मासाभ्यासनाद् गुरूक्तपथेन सन्तं योगी । शान्तिं गतः संयोगेन तस्य विन्दुः जयं व्रजति" हठप्र० ।

शक्तिचालनम्ः "कुटिलाङ्गी कुण्डलिनी भुजङ्गी शक्तिरीश्वरी । कुटिलाऽलकवती दैवीशब्दाः पर्यायवाचकाः । कन्दोर्ध्वं कुण्डली शक्तिरष्टधा कुण्डलाकृतिः । ब्रह्मद्वारमुखं नित्यं सुखेनाच्छाद्य तिष्ठति । येन मार्गेण गन्तव्यं ब्रह्मस्थानं निरामयम् । मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी । उद्घाटयेत् कपाटं तु यथा कुञ्चिक्रया हठात् कुण्डलिन्या तथा योगी मोक्षद्वारं विभेदयेत् । कन्दोर्ध्वं कुण्डलीशक्तिर्बुद्धा मोक्षाय योगिनाम् । बन्धनाय च मूढानां यस्तां वेत्ति स योगवित् । अग्नीषोमीयपीठानामाधारः शेषकुण्डली । अग्नीषोमीयतत्त्वानामाधारः कुण्डली तथा । कुण्डली कुटिलाकारा सर्पवत् परिकीर्त्तिता । सा शक्तिश्चालिता येन स मुक्तो नात्र संशयः । गङ्गायमुनयोर्मध्ये बालरण्डा तपस्विनी । बलात्कारेण गृह्णीयात् तद्विष्णोः परमं पदम् । इडा भगवती गङ्गा पिङ्गला यमुना नदी । इडापिङ्गलयोर्मध्ये बालरण्डा सरस्वती । पुच्छं प्रगृह्य भुजगीं सुप्तामुद्बोधयेच्च ताम् । निद्रां विहाय सा ऋज्वी मूर्द्धमुत्तिष्ठते हठात् । परिस्थिता चैव फणावती सा प्रातश्च सायं प्रहरार्द्धमात्रम् । प्रपूर्य सौषुम्नं परिधानयुक्ता प्रगृह्य निर्यात्यतिचालिता सा । वितस्तिप्रमितं दीर्घं विस्तारं चतुरङ्गुलम् । मृदुलं धवलं प्रोक्तं वेष्टनाम्बरलक्षणम् । वज्रासनस्थितो योगी चालयित्वा तु कुण्डलीम्" हठप्र० ।

तदङ्गसूर्यभेदनम् सूर्यांदनन्तरं भस्त्रा कुण्डलीमाशु बोधयेत् । भानाराकुञ्चनं कुर्यात् कुण्डलीं चालयेत्ततः । मृत्युबद्धगतस्यापि तस्य मृत्युभयं कुतः । नासादक्षिणमार्गवाहिपवनात् प्राणोऽतिदीर्घीकृतः चन्द्रान्तः परिपूरितास्ततस्तु प्राग्वच्छिष्टकामस्तका । भिस्त्वत् कालविशालवह्निप्रज्वलमानं शूरन्मण्डोगणान् तत्कार्यं कुरुते पुनर्नवरं जीर्णेऽमृक्तन्वयत् । कुण्डलीं चालयित्वा तु कुर्याज्जन्तां विशेषतः । एवमभ्यासतो नित्यं यमिनः शुद्धते यमाः । सदाभ्यसेत् सूर्यभेदमुज्जायीं चापि शीतलीम् । एवमभ्यासयुक्तस्य यमस्तु यमिनः कृतः । कुम्भकं हि यथेष्टं निर्भरं चालनादसौ । सर्वमाक्रम्यते किञ्चित् सुमुखागतकुण्डली । सुहूर्त्तद्वयपर्यन्तं निर्भरं चालनादसौ । ब्रह्मचर्यं प्रतिष्ठैव नित्यं स्थितमिताशनैः" हठप्र० ।

समाधिक्रमः "अथेदानीं प्रवक्ष्यामि समाधिक्रमलक्षणम् । मृत्युघ्नं च सुखोपायं ब्रह्मानन्दकरं परम् । शून्ये चैतन्यं यदत् साम्यं भजति योगतः । तत्समानसयोरैक्यं समाधिः सोऽभिधीयते । राजयोगस्य साफल्यं कोवा जानाति तत्त्वतः । ज्ञानान्मुक्तिस्थितेः सिद्धिः गुरुवाक्येन लभ्यते । दुर्लभो विषयत्यागो

दुर्लभं तत्त्वदर्शनम् । दुर्लभा सहजावस्था सद्गुरोः कृपां विना । विविधैरासनैः कुम्भैर्विचित्रकरणैरपि । प्रबुद्धायामादिशक्तौ प्राणः शून्ये विलीयते । एतत्तु शक्तिबोधस्य लक्षणनिःशेषकर्मणः । योगिनः सहजावस्था स्वयमेव प्रकाशते । सुषुम्णावाहिनि प्राणे शून्ये विशति मारुते । तदा समस्तकर्माणि निर्मूलयति कर्मवित् । अमनो निर्मनः शून्यं जगदेतच्चराचरम् । चित्ते समत्वमापन्ने वायुं व्रजति मध्यमे । एषाऽमरोली च जोली सहजोली मताऽपि च । ज्ञानं कृतो मनसि जीवति देवि ! तावत् प्राणेऽपि जीवति मनो म्रियते न तावत् । प्राणमनोद्वयमिदं विलयं प्रयाति मोक्षं स गच्छति नरो न कथञ्चिदन्यः । रसस्य मनसश्चैव चञ्चलत्वं स्वभावतः । रसो बद्धो मनो बद्धं किं न सिध्यति भूतले । मूर्च्छितो हरते व्याधिं मृतो जीवयति स्वयम् । वद्धः खेचरतां धत्ते रसो वायुश्च भैरवि ! । इन्द्रियाणां मनो नाथो मनोनाथश्च मारुतः । मारुतस्य लयो नाथः स लयो नादमाश्रितः । लयमेव तु मोक्षाख्यो वस्तु वापि मतान्तरे । मनःप्राणलयौ नादमेकीकृत्य प्रवर्त्तते । प्रनष्टोच्छ्वासनिःश्वासप्रध्वस्तविषयग्रहः । निश्चेष्टो निर्विकाराश्च लयं यान्ति च योगिनः । उच्छिन्नसर्वसङ्कल्पो निःशेषाशेषचेष्टितः । स्वाधारस्थो लयः कोऽपि मनोवाचामगोचरः । यत्र दृष्टिर्लयस्तत्र भूतेन्द्रिय मनातनी । स्यात् शक्तिः सर्वभूतानां दृष्टिर्लक्ष्ये न सङ्गता । वेदशास्त्रपुराणाद्याः सामान्यगणिका इव । एकैव शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता । अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जिता । एषा तु शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता । अन्तर्लक्ष्यविलीनचित्त पवनो योगी यदा वर्त्तते दृश्या निश्चलतारया बहिरसौ पश्यन्नपश्यवपि । मुद्रेयं खलु शाम्भवी भवति सा युष्मत्प्रसादाद्गुरोः शून्याशून्यविवर्जितं स्फुरति यत्तत्त्व पदं शाम्भवम् । अर्द्धोन्मीलितलोचनः स्थिरमना नासाग्रदत्तेक्षणः । चन्द्रार्कावनिसंयोगनासोपनयोत्तमभ्रन्द्भावान्तरे । ज्योतीरूपमनश्वरादरहितं देदीप्यमानं परम् तत्त्वं तत्पदमेव वस्तु परमं वाच्यं किमत्राधिकम् । श्रीशाम्भव्याः खेचर्याश्च अवस्थाचलभेदतः । तारे ज्योतिःषु संयोज्य किञ्चिदुन्मीलयेद् भ्रुवौ । पूर्वयोगश्च मार्गोऽयमुन्मनीकारलक्षणः । केचिद्रागमजालेन केचिच्छास्त्रसङ्कुलाः । केचित्तर्केण सङ्कान्ति नैव जानन्ति तारकम् । पातालाद्यद्वितीयशिखरे मेरुमूले तदक्षितत्त्वं चैतत् प्रवदन्ति सुधीः सन्मुखं निम्नगानाम् । चन्द्रात् सारः स्रवति वपुषस्तेन मृत्युर्नराणां बली यात् स्वकरणमिदं नान्यथा कायसिद्धिः । दिवा न पूजयेल्लिङ्गं रात्रौ नैव प्रपूजयेत् । सततं पूजयेल्लिङ्गं दिवारात्रौ च पूजयेत् । सुचिरं ज्ञानजनकपञ्चस्रोतःसमन्वितम् । तिष्ठते खेचरी सुद्रा तस्मिन् स्थाने न संशयः । चित्तं चरति खे यस्माज्जिह्वा चरति खे गता । तेनैव खेचरी नाम सुद्रा सिद्धैर्निगद्यते । इडापिङ्गलयोर्योगे शून्ये चैवानिलं गमेत् । तिष्ठते खेचरी सुद्रा तत्र मत्यं पुनः पुनः । सूर्याचन्द्रमसोर्मध्ये निरालम्बे तले पुनः । संस्थिता व्योमचक्रेयं सा सुद्रा नाम खेचरी । सा मयोद्भेदिता बाला साक्षाच्छ्रि शिववल्लभा । पूरयेन्नभसंभूतं दिव्यं सुषुम्णापार्श्वगे सुखे । पुरस्ताच्चैव पूर्यते निचिता खेचरी भवेत् । अभ्यसेत् खेचरीसुद्रासुमनसी सा प्रजायते । अभ्यसेत् खेचरीं तावद्यावत् स्याद्भ्रुवोर्गतिर्द्वितः । कुम्भप्राणवियोगनिद्रस्य कालो नास्ति कदाचन । भ्रुवोर्मध्ये शिवस्थानं मनस्तत्र विलीयते । ज्ञातव्यं तत्पदं तुर्यं तत्र कालो न विद्यते । चन्द्रसूर्यद्वयोर्मध्ये सुद्रां दद्याच्च खेचरीम् । निरालम्बे सदाशून्ये व्योमचक्रे व्यवस्थिताम् । निरालम्बं मनः कृत्वा न किञ्चिदपि चिन्तयेत् । सबाह्यान्तरे व्योम्नि घटवत् तिष्ठति भ्रुवम् । बाह्यवायुर्यथा जीवः खस्य मध्ये न संशयः । खस्थानं गच्छति प्राणः खयोनौ पवने तथा । एतदभ्यसमानस्य वायुमार्गे दिवानिशम् । अभ्यासाज्जीर्यते वायुर्मनस्तत्रैव लीयते । अस्तं ज्ञानमेहेत्यमादितत्त्वसमत्वकम् । सिध्यते च सदाभ्यासी सहजावस्थपरात्मकः । शक्तिमध्ये मनः कृत्वा मनः शक्तिं तु मध्यगम् । मनसा चित्तमालोक्य धारयेत् परम पदम् । खमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु ! । आत्मानं खमयं कृत्वा न किञ्चिदपि चिन्तयेत् । बाह्यचिन्ता न कर्त्तव्या तथैवान्तरचिन्तनम् । सर्वचिन्तां परित्यज्य न किञ्चिदपि चिन्तयेत् । सङ्कल्पमात्रकरणाज्जगत् सर्वं सङ्कल्पमात्रकरणान्मनोविलोपनम् । सङ्कल्पमात्रमिदमुत्सृज निर्विकल्पमाश्रित्य निश्चलमवाप्नुहि परात्मपदम् । कर्पूरं ज्वलिते यद्वत् सैन्धवं सलिले यथा । तथा संलीयमानं च मनः तत्त्वे विलीयते । ज्ञेयं सर्वमनोनाशं ज्ञानञ्च मन उच्यते । ज्ञानं ज्ञेयं मनश्चैव नान्यः पन्था द्वितीयतः । मनो

दृश्यमिदं सर्वं यत्किञ्चित् सचराचरम् । मनसोऽुन्मनीभावे द्वैतभावः प्रणश्यति । ज्ञेयवस्तुपरित्यागाद्विलयं याति मानसम् । मानसे विलयं याते कैवल्यमाप कल्पते । लयो लय इति प्राहुः कीदृशं लयलक्षणम् । स पुनर्द्विविधोत्यानो लक्ष्योलक्ष्यविभेदतः । एवं नानाविधोपायाः सम्यक्ज्ञानुभवान्विताः । समाधिमार्गाः कथिताः पूर्वाचार्यैर्महात्मभिः । सुषुम्णायै कुण्डलिन्यै सुप्तायै चन्द्रजन्मने । मनोन्मन्यै नमस्तुभ्यं महाशक्त्यै चिदात्मने । आसक्ततत्त्वबोधानां मूढनामग्र सन्मतम् । प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते" हठप्र० ।

नादानुसन्धानप्रशंसा श्री आदिनाथेन यथादक्कोटिप्रकाराः कथिता लयन्ति । नादानुसन्धानकमेव कार्यं मन्यामहे नान्यतमं लयानाम् । प्रक्षासनस्थितो योगी सुद्वां सम्भाय शाम्भवीम् । शृण्वन्बाह्यिणे कर्णे नादमेकान्तके सुधीः । काष्ठैः प्रवर्त्तितो वह्निः काष्ठेन सह शाम्यति । नादे प्रवर्त्तितं चित्तं नादेन सह लीयते । श्रवणसुखनयननासादिनिरोधनेनैव कर्त्तव्यः । सुषुम्णामार्गेण स्फुटयमनः श्रूयते नादः" हठप्र० ।

"आरम्भश्च घटश्चैव तथा परिचयस्तथा । निष्पत्तिश्चेति योगेषु नादस्यावस्थचतुष्टयम् । विसृज्य सकलं बाह्यं नादे दुग्धाम्बुवत्तरः । एकीभूयाथ सहसा चिदाकाशे विलीयते । औदासीन्यपरो भूत्वा सदाभ्यासेन संयमी । उन्मनीकरणं सद्यो नादमेवावधारयेत्" । शीतकाले चोपटी वा कटी वा पद्मासने गोपदे वा पद्मे वा भक्ष्ये भिक्षान्नमाहारयेत्परं कन्दं पाणौ द्रोणीकरं भोज्य पात्रम् । सर्वचिन्तां परित्यज्य सर्वकाले च सर्वदा । नादमेवानुसन्धत्ते नादि चित्तं विलीयते" हठप्र० ।

आरम्भावस्था "ब्रह्मग्रन्थिभवेद्भिन्न आनन्दः शून्यसम्भवः । विचित्रश्चाधिको देहे श्रूयतेऽनाहतो ध्वनिः । सम्पूर्णहृदये शून्ये आरम्भो योगवान् भवेत्" हठप्र० ।

घटावस्था "द्वितीयायां घटीकृत्य वायुर्भवति मध्यमः । दृढासनो भवेद्योगी प्राणो देवसमस्तथा । विष्णुग्रन्थिर्यदाभिन्नः परमानन्दसूचकः । अतिशून्यविभेदश्च भेरीशब्दस्तदा भवेत्" हठप्र० ।

परिचयावस्था "तृतीयग्रन्थिभेदे तु जायते मर्दलध्वनिः । महाशून्यं तथा याति सर्वसिद्धिसमाश्रयम् । चित्तानन्दं ततो जित्वा सहजानन्दसम्भवः । दोषदुःखक्षुधानिद्रालस्यादिविवर्जितः । ब्रह्मग्रन्थिं ततो भित्त्वा सर्वपीठगतोऽनिलः" हठप्र० ।

निष्पत्त्यवस्था "निष्पत्तौ वैष्णवः शब्दः क्वणदीणाक्वणो भवेत् । एकीभूतं तथा चित्तं राजयोगाभिधायकम् । रुद्रग्रन्थिं ततो भित्त्वा सर्वाधारकमोचनात् । योगीश्वरसमा भवेत् । अस्तु वा नास्तु वा सिद्धिरत्रैवाखण्डितं भवेत् । लयास्तत्रमिदं सौख्यं राजयोगादवाप्यते । राजयोगपदं प्राप्तं सुखोपायश्च चेतसाम् । हठं विना राजयोगो राजयोगं विना हठः । सद्यः प्रत्ययसन्धायी जायते नादजो लयः" हठप्र० ।

नादानुसन्धानं तत्फलञ्च "नादानुसन्धानसमाधिभाजां योगीश्वराणां हृदये प्रविष्टम् । आनन्दमेकं वचसामवाच्यं जानाति तत्त्वं गुरुनाथ एव । कर्णौ विधाय हस्ताभ्यां यं शृणोति ध्वनिं सुनिः । तत्र चित्तं स्थिरीकुर्याद्यावत् स्थिरपदं व्रजेत् । सर्वचिन्तां परित्यज्य सावधानेन चेतसा । नादमेवानुसन्धत्ते योगसाम्राज्यमिच्छता । अकरन्दं पिबन् भृङ्गो गन्धान्नापेक्षते यथा । नादासक्तं तथा चित्तं विषयान्न हि काङ्क्षति । नादश्रवणतश्चित्तमन्तरङ्गभुजङ्गमः । विसृज्य सर्वमेकाग्र्यं कुत्रचिन्न हि धावति । मनोमत्तगजेन्द्रस्य विषयोद्यानचारिणः । नियामनकशो नादो निशिताङ्कुशः । नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते । अन्तरङ्गतुरङ्गस्य रोधे बाधायतेऽपि च । अन्तरङ्गस्य सविनो वाजिनः परिधायते । नादोपासिरतो नित्यमवधार्योपि योगिनः । अभ्यस्यमानो नादोऽयं बाह्यमावर्त्तयेद्ध्वनिम् । पक्षद्विक्षेपमखिलं जित्वा योगी सुखी भवेत् । श्रूयते प्रथमाभ्यासे नादो नानाविधो महान् । वर्द्धमाने ततोऽभ्यासे श्रूयते सूक्ष्मसूक्ष्मतः । आदौ जलधिजीमूतभेरीनिर्झरनिस्वनः । मध्ये मर्दलशङ्खोत्थघण्टाकाहलजस्तथा । अन्ते तु किङ्किणीवंशवीणाभ्रमरनिस्वनः । इति नानाविधो नादः श्रूयते देहमध्यतः । महति श्रूयमाणेऽपि मेघभेर्यादिके ध्वनौ । तत्र सूक्ष्मतरं ध्यानं नादमेव परामृशेत् । यत्र कुत्रापि वा नादे लगति प्रथमं मनः । तत्रैव तत् स्थिरीभूय तेन सार्द्धं विलीयते । यथा तथानिनादस्तु शङ्खान्तःकरणस्य तु । अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः । ध्वनेरन्तर्गतं ज्योतिर्ज्योतिषश्चान्तर्गतं मनः । तन्मनो विलयं याति तद्विष्णोः परमं पदम् । तावदाकाशसङ्कल्पो यावत् शब्दः प्रवर्त्तते । निःशब्दं तत्परं ब्रह्म परमात्मा प्रसीदति । यत् किञ्चि-

चामरूपेण प्लुवते शक्तिरेव सा। यस्तच्छ्रोता निराकारः स एव परमेश्वरः। नादः शक्तिरिति ज्ञेयं नादज्ञानं सदाशिवः। ज्ञेयज्ञाने विलीने च सोन्मन्येवावशिष्यते। नादोयावान् मनस्तावदुन्मनी। मनश्च कथितं व्योम्नि निःशब्दं ब्रह्म कथ्यते। यदा नादानुसन्धानात् संक्षीणाः सर्ववासनाः। निरञ्जने विलीयन्ते निश्चितं मारुतात्मनः। नादकोटिसहस्राणि विन्दुकोटिशतानि च। सर्वं तत्र लयं यान्ति यत्र देवो निरञ्जनः" हठप्र०।

हठयोगफलम् ईश्वरजीवसंवादे "यदा परिचये शक्तिश्चलितोर्ध्वं सुपैति खम्। षट्चक्राणि क्रमाद्भित्त्वा तदा शून्यादित्रयादयः। पुरा यन्थित्रयं भित्त्वा वायूर्ध्वं सहतो रयी। स्फुटन्ति पृथ्वंशास्त्रियन्तयो योगिनस्तदा। वायुस्तदैव सर्वाङ्गे नीनोभवति सञ्चितः। धीरैः केवलकुम्भः स उच्यते सर्वसिद्धिदः। मूलाधारं यदाऽपानो भित्त्वोर्ध्वं याति वेगतः। तदातीतानागतज्ञो योगी भवति सत्त्वधीः। स्थितिं भित्त्वाऽर्ध्वगाऽपानक्षोभिता व्याद्यदोरगी। तदा नादोत्पत्तिरस्य जायते योगिनो हृदि। अहदाख्यनादोत्पत्तिस्तु मणिपूरभिदा भवेत्। अनाहतविभेदेन घण्टाध्वनिरुदीरितः। विशुद्धचक्रभेदेन यत्र नादः प्रजायते। यदा त्वाज्ञाचक्रभेदस्तदोपैति मनोलयम्। षट्चक्रपद्मकमलं वायुना शक्तिरान्नयेत्। यदा तदा सुनिष्पत्तिर्भवेत्कालस्य सञ्जेऽव्ययम्" । पवनयोगसंयुक्ते "सहजसहजं समभ्यस्य सहजावस्थमतः परम्। सहजावेधश्च नियत प्रत्याख्यात्रिचक्रासनम्। आसनं सुदृढं बद्ध्वा मूलबन्धं विधाय च। ऊर्ध्ववानं तथा बन्धं ततो जालन्धराभिधम्"। "अभ्यासेदिति सम्बन्धः।

"प्राणे सुषुम्णां सम्प्राप्ते नादोऽन्तः श्रूयतेऽनघा। घण्टादुन्दुभिशङ्खाब्धिमेघवेणुवीणानवत्। तत्रूपात्तद्विनाशारातारेणतपनोपमम्। ब्रह्मनाडीगते प्राणे विश्वरूपं प्रकाशते। तथाच विश्वरूपाचार्याः "यदा संक्षीयते प्राणो मानसं च प्रलीयते। तदा सचरसत्वं तत्समाधिः सोऽभिधीयते। मनश्चैतन्यं स्थिरौ वायुस्ततो विन्दुः स्थिरो भवेत्। विन्दुस्थैर्यात्सदा सत्यं पिण्डस्थैर्यं प्रजायते"। सैषा निष्पत्तिदशा सामान्यस्य राजयोगारूढ इति तथा च हठप्रदीपिकायाम्। "प्रनष्टोच्छ्वासनिःश्वासःप्रध्वस्तविषयग्रहः। निश्चेष्टो निर्विकारश्च लयो लयति योगिनः। तथा चोक्तं ग्रन्थान्तरे "शुष्के सले तु वायौ च कार्ष्ण्यं स्खलिता ततः। अधोगतिं विहायाशु भवत्यूर्ध्वसुखक्षतः। अपानस्त्वूर्ध्वगो भूत्वा वह्निना सह गच्छति। प्राणस्थानं ततो वह्निः प्राणापानौ च सत्वरम्। मिलित्वा कुण्डलीं नीत्वा प्रसृतां कुण्डलीं पुनः। प्रयाति विशतिस्थानं सुषुम्णा वह्नगन्धिकम्। ब्रह्मग्रन्थिं ततो भित्त्वा रजोगुणसमुद्भवम्। सुषुम्णा वदनस्थासा प्रयात्यूर्ध्वं च सत्वरम्। विष्णुग्रन्थिं प्रयात्युच्चैः सत्वजं हृदि संस्थितम्। वेगेन महता गच्छेद्विष्णुग्रन्थिं विभिद्य सा। ऊर्ध्वं गच्छति वत्सास्ते रुद्रग्रन्थिसमीपगः। तत ऊर्ध्वं सुषुम्णायां याति शीतांशुसङ्गमम्। आकुलाख्यं तु तच्चक्रं दलैः षोडशभिर्युतम्। तत्र शीतांशुसम्भूतं द्रावं श्रोतयतेऽनिशम्। चलिता प्राणवेगेन रक्तपिञ्जरवेष्टितम्" हठप्र०।

"योगिनः कालवञ्चनोपायो यथा "ज्ञात्वा कालं निजं योगी लयस्थानं समाश्रितः। युञ्जीत योगं कालस्य वञ्चनाय यथाक्रमम्। ब्रह्मसिद्धासने देहं प्रणवेन प्राणवायुना। कृत्वा दृढस्थिरं बुद्धा दश द्वाराणि रोधयेत्। बद्ध्वा च खेचरीं मुद्रां शोधयाच्च जालन्धरीम्। अपाने मूलबन्धञ्च ऊड्डियानं तथोदरे। कृत्वाथ भुजगीं शक्तिं मूलाधाराम्बुजस्थिताम्। सुषुम्णान्तर्गतां पद्मचक्राणां भेदिनीं शिवाम्। जीवं हृदाश्रयं नीत्वा वह्निं बुद्धिमनोयुताम्। षट्चक्रकमलस्थानि शोधयेत्। ततः सुधाकरोद्भूतममृतं तेन मूलतः। विप्लुतीं सकलं देहं भावयेत्तीं विचिन्तयेत्। तया सार्द्धं ततो योगी शिवेनैकात्मतां व्रजेत्। परानन्दमयो भूत्वा चिद्वृत्तिमपि संत्यजेत्। ततोऽलक्ष्यमनाभासमरूपभावविवर्जितम्। सर्वोपकल्पनातीतं कथं कालो निरूपयेत्तम्। य एव कालः सर्वेषः सर्ववं नाश्यतःपरः। का केन कथ्यते तत्र म्रियते नापि कश्चन। ततो व्यतीते समये कालस्य भ्रान्तिरूपिणि। योगी सुप्तोत्थित इव प्रतिबोधे प्रबोधितः। एवं सिद्धो भवेद्योगी वञ्चयित्वा विधानतः। कालं कल्पितसंसारपौरुषेणाद्भुतं हि तम्। तस्मिन्भुवने योगी विचरत्येक एव सः। यथाप्नु संसारवैचित्र्यं स्वेच्छया निरहङ्कृतिः" हठप्र०।

हठात् पु० हठः प्रवर्त्तमानः आतुरिव। कुत्सितकायात्। (पाना) शब्दच०। [धरणिः।

हठी स्त्री हठ-अच् गौरा० ङीष्। वारिपर्ण्याम् (पाना)

हड्डि पुं० हठ-इन् पृषो०। पशुमारणसाधने काष्ठयन्त्रभेदे (हाड़िकाठ) शब्दर०। [शब्दमा० स्त्रियां ङीष्।

हड्डिक पुंस्त्री० हठ-इकक् पृषो०। नीचजातिभेदे (हाड़ि) स्त्रियां ङीष्।

हड्ड न० हठ-ड डस्य नेत्त्वम् पृषो०। अस्थि (हाड़) संज्ञायां कन्। नीचजातिभेदे (हाड़ि) शब्दमा०। इन् हड्डिरप्यत्र। [शब्दच०।

हड्डज न० हड्डात् जायते जन-ड। अस्थिसारे मज्जायां

हड्डिक पुं० हड्डिक-स्वार्थे क। (हाड़ि) जातिभेदे स्त्रियां जातित्वात् ङीष्। स च यथाः "सद्यस्नाताऽतिकन्यायां नेटवीर्य्येण शौनक!। बभूवतुस्तौ द्वौ पुत्रौ हड्डिकः शौण्डिकस्तथा" ब्रह्मवै० ब्रः खं० १०अ०।

हड्डा स्त्री हन-डा डस्य नेत्त्वम्। १हठति सत्पात्रभेदे (हाँड़ा) नाटयोक्तौ नीचसम्बोधने अव्य०। हड्डावत् व्याबलोऽपि शेषार्थे स्त्री भरतः।

हड्डिका स्त्री क्षुद्रा हड्डा कन्। क्षुद्रे मृत्पात्रे (हाड़ि)।

हड्डिकासुत पुं० हड्डिकायाः सुत इव। क्षुद्रे मृण्मये हड्डिकाकारे (हाँड़ि) त्रिका०। [अमरः।

हड्डे अव्य०हन-डे डस्य नेत्त्वम्। नाटयोक्तौ नीचसम्बोधने

हत त्रि० हन-क्त। १नाशिते २प्रतिहते ३प्रतिबद्धे ४आशारहिते अमरः ५दुःखिते च। भावे क्त। ६हनने ७गुणने च न०।

हतक त्रि० हत इव नष्टप्रायत्वात् कन्। नष्टप्राये (मड़ा)।

हताश त्रि० हता आशा यस्य। १आशाशून्ये २निर्दये ३विघ्ने च मेदि० ४अवश्ये शब्दर०।

हति स्त्री हन-भावे क्तिन्। १हनने २मारणे ३व्याघाते ४अपकर्षे ५गुणने च।

हतु पुं० हन-कतु। १व्याधौ २अस्त्रे च उणा०।

हत्या स्त्री हन-भावे क्यप्। १मारणे वधे प्राणवियोगानुकूलव्यापारे "ब्रह्महत्या सुरापानम्" स्मृतिः २हनने च।

हत्थ त्रि० हन-कथ। विघ्ने उणादि०।

हद्द विशेषसर्गे भ्वा० आ० अक० अनिट्। हद्दते अहत्त।

हद्दा स्त्री राजोक्ते पञ्चवर्गविज्ञानयोपयोगिनि षष्ठभेदस्वामिकराशिभेदरूपांशभेदे यथोक्तं नीलक०ता०

"मेषेऽङ्गतकौजनरेषभागा जीवास्फुजित्सारशनैश्चराणाम्। वृषेऽष्टषड्भागशरानलांशाः शुक्रस्य जीवार्किकुजेशहद्दाः। युग्मे षडङ्के पुनगाङ्कभागाः सौम्यास्फुजिज्जीवकुजार्किहद्दाः। कर्केऽहितर्कांङ्कखगाब्धिभागाः कुजास्फुजिज्जीव्यशनैश्चराणाम्। सिंहेऽङ्कभूताद्रि रसाङ्कभागाः शेषेज्यशुक्रार्किबुधारहद्दाः। स्त्रियां नगाग्न्यब्धिनगाब्धिभागाः सौम्योशनोजोऽर्कजार्किनाथाः। तुले रसाष्टाद्रिनगाब्धिभागाः कोणस्थजीवास्फुजिदारनाथाः। कीटे नगाब्ध्यष्टशराङ्कभागाः सौम्यास्फुजिज्जीव्यशनैश्चराणाम्। चापे रवीज्यस्फुजिच्छेदा जीवास्फुजिज्जारशनैश्चराणाम्। मृगे नगाष्टद्युगखण्डतीनां सौम्ये व्ययुक्तार्किकुजेशहद्दाः। कुम्भे नगाङ्काद्रिशरेषुभागाश्चरणुक्रजीवारशनैश्चराणाम्। मीनेऽर्कवेदानलनन्दपक्षाः क्षितेव्ययौम्यारशनैश्चराणाम्। त्रिंशत्तुल्ये विंशतिरुक्षमेखे हद्दे ऽक्षि५चन्द्राटगकंद्रिकाणे"।

हन वधे गतौ च श्वा० प०सक० अनिट्। हन्ति प्रणिहन्ति प्रहन्ति (खः) जहि अवधीत्। जघान कर्मणि अघानि अवधि। णिच् घातयति निर्घांसात जघन्यते "कञ्चं हन्ति कृशोदरि" इत्यादावालङ्कारिकाः गतौ निहतार्थतामाहुः।

अभि+आघातभेदे केनचित् पदार्थेन संयोगभेदे अभिघातः। अव+नुणाद्यपसरणार्थव्यापारभेदे व्रीव्हीनवहन्ति। घातः। आ+केनचित् पदार्थेन संयोगानुकूलव्यापारे आहन्ति आस्वाङ्गकर्मणि अकर्मत्वे च आत्म० यज्ञ आहते।

प्रति आ+प्रत्याघाते प्रतिबन्धे प्रत्याहन्ति। [व्याघ नः

वि+आ परस्परेण विरोधे विशेषेण ताडिते च व्याहन्ति

उद्+ऊर्ध्वं गतौ उत्क्षेपे हनने च।

उप+उद्+आरम्भे उपोद्घातः आरम्भार्थः षड्गतिभेदः।

नि+निशेषेण हनने खरान्तरघातेन उटाक्षरसम्पाटने च

निर्+निःशेषेण हनने वज्रादिशब्दे च। "निर्घातो भूमिषसने मनुः।

परा+प्रतिबन्धे निरोधे।

प्रति+प्रतिरोधे प्रतिकूलगतौ च। [न्ति योधाः।

वि+अति+परस्परहनने व्यतिहारेऽपि न आत्म०। व्यतसम्+सम्यक् हनने समूहभावे अक०।

हन् अव्य०हन-भावे क्विप्। १रूपाख्यौ २अनुनये च मेदि०। कर्त्तरि क्विप्। २हननकर्त्तरि त्रि० हतवृत्रो हन्नहा।

हन त्रि० हन कर्त्तरि अच्। हननकर्त्तरि त्रि० को०।

हनन न० हन-भावे ल्युट् "आत् माणविच्छेदकहव्यापारो हननं स्मृतम्" इत्युक्तो १व्यापारभेदे २गुणने च। [रत्नमा०।

हनीन पुं०हन-इन् डीप् हन्यां लीयते ली-ड। कर्णशष्कुल्यां

हनु(नू) पुंस्त्री०हन-उन् स्त्रीत्वे वा-ऊङ्। १कपोलाधोवयवविशेषे मुखभागभेदे २हेडाबिलादिन्यां स्त्री अमरः।

२रोगे ४अस्त्रभेदे पूतनौ च स्त्री जटाधरकोषः ।

हनुग्रह पु० हनुजाते रोगभेदे तद्विदानादि "जिह्वां निर्लेखनाच्छुष्कभक्षणादभिघाततः । कुपितो हनुमूलस्थः संश्रयित्वाऽनिलो हनुम् । करोति विवृताख्यत्वमथ वा संवृताख्यताम् । हनुग्रहः स तेन स्यात् कृच्छ्रं वर्णभाषणम्" । संश्रयित्वा अधःकृत्वा विवृताख्यत्वं व्यातमुखत्वम् । निर्लेखनं कर्षणम् शुष्कं चणकादि संवृताख्यत्वं दन्तनग्नताम्" भावप्र० हनुस्तम्भाऽप्यत्र ।

हनुमत् पु० हनु(नू)+अस्त्यर्थे मतुप् । रामस्य अनुचरे वायुनागर्भजाते पवनतनये वानरभेदे त्रिका० ।

हनूष पुंस्त्री० हन-ऊषन् । राजमे त्रिका० स्त्रियां ङीष् ।

हन्त अव्य० हन-त । १हर्षे २अनुकम्पायां ३विषादे अमरः । ४वाक्यारम्भे ५आर्त्तौ ६याचे ७अभ्युपगमे शब्दच० । दुःखे मेदि० ८अलंकरणे च अजयपालः ।

हन्तकार पु० हन्तेत्यस्य कारः करणं उच्चारणम् वा ६त-पञ्च० । १अतिभये अभयदाने २हन्तशब्दप्रयोगे च ।

हन्तु पु० हन-तुन् । १मृत्यौ २दुःखे च ।

हन्तृ त्रि० हन-तृच् । १हननकर्त्तरि २सततहननानुशीलयितरि च स्त्रियां ङीप् । "अहिघातुरहन्त्र्याश्च प्रतिष्ठा दक्षिणायने" देवप्र०त० ।

हन्न त्रि० हद-क्त । क्षतपुरीषोत्सर्गे अमरः ।

हपुषा स्त्री हेति पुष्यति पुष-क । मरीचदन्तवद्दीर्घकृष्णवर्णवस्तुनि वैद्यगरुड्व्यविशेषे । पृषो० अस्य षः तत्रार्थे । "हपुषा हपुषा विश्वा पराऽश्वत्थफला स्मृता । मत्स्यगन्धा स्त्रीहन्त्री विश्वघ्नी धाङ्गनाशिनी । हपुषा दीपनी तिक्ता स्मृदुष्णा लघुरा गुरुः । पित्तोदरप्रमेहार्शो व्रणशोथगुल्मशूलहृत् । परार्थ्येतद्गुणा प्रोक्ता रूपभेदो द्वयोरपि" भावप्र० ।

हम् अव्य० हा-डम । १रुषोक्तौ २अनुनये च मेदि० ।

हम्भा(भ्भा) स्त्री हम्+भा-हम्भ-अङ् वा । गवां ध्वनौ त्रिका० पृषो० । हम्बाप्यत्र हेमच० ।

हम्म गतौ भ्वा० प० सक० सेट् । हम्मति । अहम्मीत् ।

हय गतौ सक० क्लान्तौ अक० भ्वा० प० सेट् । हयति अहयीत् ।

हय पुंस्त्री० हय-हि- वा अच् । १घोटके अमरः स्त्रियां ओषधत्वेऽपि हयगवेत्यादिना ङीष् । अश्वशब्दे दृश्यम् । तत्र वर्ण्यपदार्थाः कविश० उक्ता यथा "औन्नत्यं वेगलत्वञ्च तथा सत्त्वसमन्वितिः । खुरोलूखातरजो रूपं जातिर्गतिर्विचित्रता" । तस्य शकुनाद्युक्तं यथा राजशाकुने यथा "हेषारवं सुचति वामतोयः क्षुरं च तिर्दक्षिणपादघाते । करण्डूयते दक्षिणमङ्गभागं तुरङ्गः स पदं ददाति" ।

हयकातरा स्त्री हयः कातरो यस्याः ५त० । अश्वकातराख्यवृक्षे "कातरा हयपर्य्यायैः कातरान्वैः प्रकीर्त्तिता । अश्वकातरिका तिक्ता वातघ्नी दीपनी परा" राजनि० ।

हयगन्ध पु० हयस्येव गन्धोऽस्य । १काचजवले २अश्वगन्धायाम् ३अश्वमोदायाञ्च स्त्री राजनि० ।

हयग्रीव पु० हयस्येव ग्रीवाऽस्य । १विष्णोरवतारभेदे २दैत्यभेदे च "हयग्रीवेण युयुधे तत्र देवो जगत्पतिः । हयग्रीवं यत्र हत्वा मणिकूटं तथागमत्" कालिपु० ८२अ० । २दुर्गायां स्त्री तन्मूर्त्तिलक्षणं अश्वशिरस् शब्दे ५१४पृ० दृश्यम् । ४राजभेदे "यद्वृत्तं पूर्वराजर्षेर्हयग्रीवस्य पाण्डव !" भा० शा० २४अ० ।

हयग्रीवहन् पु० हयग्रीवाख्यं दैत्यं हतवान् हन-क्विप् विष्णौ हेमच० ।

हयङ्कष पु० हयस्यैःअयसं कषति कष-खच् । १मातलौ इन्द्रसारथौ त्रिका० । २अश्वचालके च ।

हयन न० हि-गतौ करणे ल्युट् । कर्षीरघे अमरः ।

हयपुच्छी स्त्री हयस्य पुच्छाकारोऽस्त्यस्याः अच् गौरा० ङीष् । माषपर्ण्याम् अमरः ।

हयप्रिय पु० ६त० । १यवे हेमच० । २अश्वगन्धायां ३शङ्खपुष्प्यां च स्त्री राजनि० ४अश्वबन्धके त्रि० । हयेष्टादयोऽप्यत्र

हयमार पु० हयं मारयति निघेधणात् मृ-णिच्-अण् । करवीरे राजनि० एयुल् । तत्रैव अमरः । [शब्दच०]

हयमारण पु० हयं मारयति मृ-णिच्-ल्यु । अश्वत्थवृक्षे हेमच० ।

हयवाहन पु० हयो वाहनमस्य सूर्य्यपुत्रे रेवन्ते हेमच० । २अश्ववाहनयुक्ते त्रि० । ६त० । ३अश्वस्य चालने न० ।

हयवाहनसङ्कर पु० हयस्य वाहनं चालनं सङ्किरति सम्+कृ-अच् । रक्तकाञ्चने शब्दच० ।

हयशाला स्त्री ६त० । अश्वशालायां तत्करणप्रकारादि मत्स्यपु० १९१अ० उक्तं यथा "गवां स्थानं तथैवात्र तुरगाणां तथैव च । उत्तराभिमुखी श्रेणी तुरगाणां विधीयते । दक्षिणाभिमुखी वाथ परिग्रिष्टासु गर्हिताः । तुरगासु तथा धार्य्याः प्रदीपैः सार्वरात्रिके । कुक्कुटान् वानरांश्चैव मर्कटांश्च नराधिप ! । धारयेदश्वशालायां सर्वदुःखं धेनुश्चैव च अजाश्च धार्य्या यत्नत

तुरगाणां क्षितैषिणा । गोगजाश्वादिशालाश्च तत्पुरो-
पक्ष निर्गमम् । अस्तं याते न कुर्वीत देवदेवे दिवाकरे ।
अर्धिकमश्वशालाशब्दे ५२४ पृ० अश्वशब्दे च दृश्यम् ।

हयशीर्ष पु० हयस्येव शीर्षमस्य । १विष्णुमूर्त्तिभेदे हयशीर्षे
पञ्चरात्रे तत्पूजादिकं दृश्यम् । २शालग्राममूर्त्तिभेदे
शालग्रामशब्दे ६०७३ पृष्ठ दृश्यम् ।

हया स्त्री हयः हयगन्धोऽस्त्यस्याः अच् । अश्वगन्धायाम्
राजनि० । घोटक्यां तु हयीत्येव ।

हयाध्यक्ष पु० हयेषु तद्रक्षणेषु अध्यक्षः । अश्वरक्षणाधिकृते

हयानन्द पु० हयमानन्दयति आ+नन्द-णिच्-अण् ।
खड्गे राजनि० ।

हयारि पु० ६त० । करवीरे रत्नमा० ।

हयाशना स्त्री हयैरश्यते अश-ल्युट् । सल्लकीवृक्षे शब्दच०

हयोत्तम पु० हयेषु उत्तमः । अश्वरत्ने आजानेयेऽश्वे त्रिका०

हर पु० हृ-अच् । १रुद्रे अमरः २अग्नौ ३गर्दभे ४विभाजके
च "अन्योन्यहाराभिहतौ हरांशाविति" लीला० ।
हृ-भावे अप् । ५हरणे ६विभाजने च ।

हरगौरी स्त्री हरश्चार्द्धहरा गौरी या० त० । अर्द्धनारी-
श्वररूपे १शिवपार्वत्योर्मूर्त्तिभेदे तल्लक्षणम् । ३७०१ पृ०
दृश्यम् । द्वन्द्व० । २शिवपार्वत्योः द्वि० व० ।

हरचूडामणि पु० हरस्य चूडामणिरिव । चन्द्रे ।

हरण न० हृ-भावे ल्युट् । १स्थानान्तरकरणे २विभाजने च
कर्मणि ल्युट् । ३यौतुकादौ देये धने भा० आ० हरणा-
हरणपर्व्व २२१अ० । ४भुजे मेदि० ।

हरतेजस् न० ६त० । १पारदे राजनि० २शिववीर्य्ये च ।
हरबीजादयोऽप्यत्र । [शङ्कायां हेमच० ।

हरशेखरा स्त्री हरस्य शेखरमाशयत्येकारुयस्याः अच् ।

हरि पु० हृ-इन् । १विष्णौ २सिंहे ३सूर्य्ये ४वानरे ५भेके
६शुकपक्षिणि अमरः । ७चन्द्रे ८सूर्य्ये ९वायौ १०अश्वे
११यमे १२हरे १३ब्रह्मणि १४किरणे जम्बुद्वीपस्य
१५वर्षभेदे १६इन्द्रे च मेदि० १७मयूरे १८कोकिले
१९हंसे २०सर्पे शब्दर० । भर्त्तृहरिनामके वाक्यप्रदीय
ग्रन्थकारके २१पण्डिते त्रिका० २२पिङ्गलवर्णे २३हरि-
द्वर्णे हेमच० २४गतौ त्रि० । "हरिं विदित्वा हरि-
मिव वाजिभिः" रघु । २५पीते अनेकार्थको० ।

हरिक पु० हरि+कन्यायां कप् । पीतहरिद्वर्णाश्वे हेमच०

हरिकेलीय पु० हरिकेलिमर्हति छ । वङ्गदेशे हेमच० ।

हरिकेश पु० हरिः पिङ्गलः केशोऽस्य । १शिवे २शिवभक्त-
यक्षभेदे च । ४ एव तत्प्रसादात् काश्यां दण्डपाणित्व-
मवाप्तवान् इति काशीखण्डे २२अ० स्थितम् । मत्स्यपु०
१५८अ० दृश्यम् । [याम् अपराजितायां राजनि० ।

हरिक्रान्ता स्त्री हरिस्तद्वर्णः क्रान्तो येन । विष्णुक्रान्ता-

हरिगृह न० ६त० हरेर्विष्णुमूर्त्तेर्गृहम् । १हरिमूर्त्तिगृहे
२एकचक्रपुरीभेदे च त्रिका० ।

हरिचन्दन न० हरेरिन्द्रस्य प्रियं चन्दनम् चन्द्यते
चोंद-ल्यु ६त० वा । १देवतरुभेदे अमरः । हरेर्विष्णोः
प्रियं चन्दनम् । २श्वेतचन्दने ३गोशीर्षनामके मलयोत्प-
न्नदेशजाते चन्दनभेदे ४ज्योत्स्नायां ५कुङ्कुमे मेदि० ।
६पद्मकेशरे हला० ७सुन्दराङ्गे च न० शब्दर० । "हरि च-
न्दनन्तु दिव्यं स्निग्धं तदिह दुर्लभं मनुजैः । पित्तार्त्ति-
विषोपिवमथुश्वासोपशमान्यभेदं हरेत्" राजनि० । "दृष्ट
च तत्सदीकाष्ठं कर्पूरागुरुयोगतः । अथ वा केश-
रैर्योज्यं हरिचन्दनमुच्यते" पद्मपु० पा० ख० १२अ०
उक्ते दशसंयुक्तद्रव्यगणे च ।

हरिण पुंस्त्री० हृ-इनन् । स्वनामख्याते १पशौ अमरः
स्त्रियां ङीष् । २शिवे ३विष्णौ ४रुद्रे ५शुक्लवर्णे ६पाण्डु-
वर्णे च । ७तद्वति त्रि० अमरः । "हरिणः शीतलो बद्धः
विषमूलो दीपनो लघुः । रसे पाके च मधुरः स्निग्धः
सन्निपातहा" राजव० तन्मांसगुणाः । "हरिणस्यापि
विज्ञेयः पञ्चभेदोऽत्र भैरव ! । कृष्णः खड्गो रुरुश्चैव
पृषतश्च मृगस्तथा । एते बलिप्रदानेषु वर्जनीया
प्रकीर्त्तिताः" कालिकापु० ६६अ० । [शब्दर० ।

हरिणनर्त्तक पु० हरिण इव नृत्यति नृत-ण्वुल् । किन्नरे

हरिणहृदय पु० हरिणस्येव भीतं हृदयमस्य । भीरौ शब्दर०

हरिणाक्षी स्त्री हरिणस्येवाक्षि यस्याः ५त० ङीप् वा पक्षे
समा० ङीष् । १कुट्टिलासिनीनामगन्धद्रव्ये शब्दच० ।
२हरिणतुल्यनेत्रयुते त्रि० स्त्रियां ङीष् । "हरिणाक्षि !
कटाक्षेण आत्मानमवलोकय" इत्युद्भटः ।

हरिणाङ्क पु० हरिणः शशनामको मृगोऽङ्के यस्य बहु०
क्रोडे वा अच् । १चन्द्रे शब्दर० २कर्पूरे च ।

हरिणी स्त्री हरितवर्णा स्त्री ङीष् तस्य नः । १हरितद्व-
र्णायां स्त्रियां मेदि० २स्वर्णप्रतिमायाम् अमरः । ३स्वर्ण-
युथ्यां ४सञ्ज्ञिकायां राजनि० । ५तरुण्यां हृद्यरश्मिटां
शब्दर० "वसुयुगहयैर्नभौ म्नौ म्नौ गो यदा हरिणी
तदा" वृ० र० उक्तलक्षणके ७वसुदशाक्षरपादके छन्दो-
भेदे हरिणप्लुत स्त्री ङीष् । दक्षयज्ञे हयग्रीवभेदे ।

"चरतः किल दुश्चरं तपः कृष्णविन्दोः परिशङ्कितः पुरा। प्रायुङ्क्त समाधिमेदिनीं हरिरक्षै हरिणीं सुराङ्गनाम्" रघुः।

हरित् पु० हृ-इति। १नीलपीतमिश्रितवर्णे (पातारङ्ग पलाशवर्णे च अमरः २तद्वति त्रि०। ३सूर्य्याश्वे त्रिका० ४सद्यगे हेमच०। ५सिंहे ६सूर्य्ये ७विष्णौ च पु०दर्दिशि स्त्री अमरः। ८हरिद्रायां राजनि० १०तृणे न० मेदि०।

हरित्पर्ण न० हरित् पर्णमस्य। मूलके राजनि०।

हरित पु० हृ-इतच्। १सिंहे २मन्थानतृणे राजनि० ३हरिद्वर्णे ४तद्वति त्रि० अमरः स्त्रियां ङीष् तस्य नत्वं। ५दूर्वायां मेदि० ६जयन्त्यां ७हरिद्रायां ८कपिलद्राक्षायां ९पाट्यां १०नीलदूर्वायाञ्च स्त्री राजनि० टाप्। ११स्रोषधेयके न० राजनि०। [शाके न० राजनि०

हरितक न० हरितेन वर्णेन कायति प्रकाशते कै-क।

हरितपत्रिका स्त्री हरितं पत्रं यस्याः कप् कापि अत इत्वम्। पाट्यां राजनि०।

हरितशाक पु० हरितं शाकमस्य। शोभाञ्जने राजनि०।

हरिताल न० हरिवर्णस्य पीतवर्णस्य तालः प्रतिष्ठा यत्र। १पीतवर्णे उपधातुभेदे "च हरितालसमाननवर्णशुकः" माघः। २पीतवर्णपाषाणभेदे पुंस्त्री० राजनि०। स्त्रियां ङीष्। स्वार्थे क। हरितालके न० अमरः।

"हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम्। तयोरद्य गुणैः श्रेष्ठं ततो हीनगुणं परम्। स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत्। पत्राख्यं तालकं विद्याद् गुणाढ्यं तक्षकायनम्। स्निग्धं पिण्डसदृशं स्वल्पसत्वं तथा गुरु। स्त्रीपुष्पहारकं स्वल्पगुणं तत् पिण्डतालकम्। हरति च हरितालमुक्तां देहजातां स्फुरति च बलतापामङ्गसङ्कोचपीडाम्। पित्तरोगं कफवातौ कुष्ठरोगं विदध्यादिदमधिकमशुद्धं मारितञ्चाप्यसम्यक्"। "तालकं कणयः क्वाथे तद्भूर्णं कार्ष्णिके पचेत्। दोलायन्त्रेण यत्नेन ततः कूष्माण्डजद्रवैः। तिलतैले पचेद्दुग्धे यामञ्च त्रिफलाजले। एवं यन्त्रे चतुर्थांशं पक्वं शुद्धति तालकम्"। अथ तालस्य मारणविधिः "सदलं तालकं शुद्धं पौनर्नवरसेन तु। खल्वे विमर्दयेदेकं दिनं पश्चाद्विशोषयेत्। ततः पुनर्नवाक्षारैः स्यात्यामूर्द्धं प्रपूरयेत्। तत्र तद्गोलकं कृत्वा पुनस्तेनैव पूरयेत्। शरावद्वयसम्पुटं तिल्यं विधानं पाचयेन्मृदे। स्थालीं चुल्यां समारोप्य क्रमाद्वह्निं विवर्द्धयेत्। दिनान्यष्टौ रक्षणीयानि पञ्च वह्निं प्रदापयेत्। एवं तनूभवेत् तालं भावा तस्यैकरक्तिका। अनुपानान्यनेकानि यथायोग्यं प्रयोजयेत्"। एवं शोधितस्य मारितस्य तालकस्य गुणाः। "हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम्। कण्डू कुष्ठास्रदोषार्शःकफपित्तक्षतव्रणान्"। "तालकं हरते रोगान् कुष्ठमृत्युज्वरापहम्। शोधितं कुरुते कान्तिं वीर्य्यवृद्धिं तथायुषम्" भावप्र०।

हरितालस्य भ्रमांशगुणाः "हरितालोऽल्पविट्कः स्यात् कषायो मधुरो लघुः। रक्तपित्तश्रमनस्तृष्णाघ्नो वातकोपनः" राजनि०।

हरितालिका स्त्री हरेस्तालो इवतालो यस्यां कप् अत इत्वम्। १सौराष्ट्रशुक्लचतुर्थ्यां हरितवर्णोऽयं व्रतेति पर्य्यायोक्ते व्रत-ण्वुल्। २दूर्वायाम् त्रिका०। अण् ङीष्। हरितानी दूर्वायाम् सा च आकाशरेखायां मेदि० खड्गलतायाम् हरितालिकायाञ्च।

"भाद्रे मासि सिते पक्षे वह्निदैवतसंयुता। हरितालीव्रतं नाम चतुर्थी स्यात् सर्वकामप्रीतिदा सदा। भाद्रे मासि सिते पक्षे चतुर्थ्यां स्त्र्याभियोगतः। ददाति किल्बिषं घोरं दृष्ट्वेन्दुं न संशयः। करचित्रानलर्क्षेषु हरौ स्वर्यं चतुर्थिका। हरितालीव्रतं नाम्ना कथितं सर्वकामदा" राजमार्त्तण्डः

हरिताश्म न० हरितवर्णमश्म अश्मेव वा अच्समा० (पेरोजः) १मणिभेदे २तत्वे (तुँत) उपधातुभेदे च राजनि०।

हरिदर्भ पु० हरिर्हरिद्वर्णो दर्भः। हरिद्वर्णे कुशे अमरः।

हरिदश्व पु० हरिन्नामकोऽश्वो यस्य। १सूर्य्ये २अर्कवृक्षे च अमरः।

हरिदेव पु० हरिर्देवोऽधिष्ठाता अस्य। अवष्णानक्षत्रे।

हरिद्गर्भ पु० हरिद्वर्णो गर्भो यस्य। हरिद्वर्णे कुशे राजनि०।

"दर्भौ द्वौ च गुणे तुल्यौ तथापि च सितोऽधिकः। यदि श्वेतकुशाभावस्तत्परं योजयेद्बुधैः" राजनि०। "दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं स्थिरम्। मूत्रकृच्छ्राश्मरीरोगवस्तिरुक् प्रदरानिलित्" भावप्र०। तन्मूलगुणाः "कुशमूलं स्थिरं रूक्षं मधुरं पित्तनाशनम्। रक्तब्वरत्रयश्वासकासशूलादोषमोक्षकृत्" राजनि०।

हरिद्रुम पु० हरिवर्णः पिङ्गलवर्णो द्रुम इव। नागकेशरवृक्षे त्रि०।

हरिद्रा स्त्री हरिं पीतवर्णं द्रवति द्रु-गतौ ड। स्वनामख्याते ओषधिभेदे।

'हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत् । वर्ण्या त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा' । (वनहरिद्रा) "अरण्यकन्दुकन्दः कुष्ठघातासृनाशनः" । (कर्पूर हरिद्रा) "दार्वी भेदास्त्रगन्धा च सुरभिश्चारुदारु च । कर्पूरा पद्मपत्रा स्यात् सुरभिः सुरनायिका । आम्रगन्धि-हरिद्रा या सा पीता वातला मता । पित्तघ्नमधुरा-तिक्ता सर्वकण्डूविनाशिनी" भावप्र० ।

हरिद्रागणेश पु० हरिद्रावर्णयुक्तो गणेशः । पीतवर्णे गणेशभेदे तन्त्रसारः । [स्त्रियां ङीष् ।

हरिद्राङ्ग पुंस्त्री० हरिद्रेव अङ्गमस्य । हरितालखगे शब्दच०

हरिद्राभ पु० हरिद्रेव आभाति आ+भा-क । १पीतसाले (पियासाल) २कर्बुरके ३पीतवर्णे च । ४तद्वति त्रि० अमरः ।

हरिद्रारागा त्रि० हरिद्राया इव रागः रञ्जनमस्तुरागः । अस्थिरानुरागे सौहृदे । "क्षणमात्रानुरागश्च हरिद्रा राग उच्यते" हेमा० ।

हरिद्रु पु० हरिः हरिद्वर्णो दवादिद्वारा द्रुः । १दृक्षमात्रे हेमच० । २दारुहरिद्रायाञ्च अमरः । [तीर्थभेदे

हरिद्वार न० हरेरिदमुपाम्नेः द्वारं सेवनात् । प्रसिद्धतीर्थे

हरिनामन् न० हरेर्नाम तदाख्यान वा । १विष्णुनामनि २तदाख्याने च हरेरिव नामास्य । ३क्षुद्रगे पु० त्रिका० ।

हरिनेत्र न० हरेर्नेत्रमिव । १श्वेतपद्मे राजनि० । २त्रि० । २विष्णोर्लोचने । हरेः सिंहस्येव नेत्रमस्य दीर्घत्वात् । ३मेचके पुंस्त्री० त्रिका० स्त्रियां ङीष् ।

हरिन्मणि पु० हरिद्वर्णो मणिः । मरकते मणौ अमरः ।

हरिन्मुद्ग पु० हरिद्वर्णो मुद्गः । वरटि पक्के मुद्गे राजनि० ।

हरिप्रिय न० हरेर्विष्णोः प्रियम् । १कालीयके चन्दने शब्दच० । २वर्णारे राजनि० । ३कदम्बे पु० शब्दच० । ४पीतभृङ्गराजे ५विष्णुकन्दे ६करवीरे ७शङ्खे ८वन्यूके पु० राजनि० । ९स्त्रिये २०वास्तुके च पु० । ११लक्ष्म्यां स्त्री १२तुलस्यां १३पृथिव्यां १४द्वादश्यां तिथौ च स्त्री । १५हरिवल्लभे त्रि० । [अमरः ।

हरिबालुक न० हरेर्विष्णोः प्रिया बालुकाश्च । एलवालुके

हरिभक्त त्रि० हरौ विष्णौ भक्तः । १विष्णुभक्तियुते "सर्व जीवेषु यो विष्णु भावयेत् समभावतः । हरौ करोति भक्तिञ्च हरिभक्तः स च स्मृतः" ब्रह्मवै० २५ अ० उक्ते २सर्वत्रसमदृष्टिपूर्वकहरिसेवके पु० । [शब्दर० ।

हरिभद्र न० हरिं भद्रयति सन्तर्पयति अच् । हरिबालुके

हरिभुज् पु० हरिं मेरुं भुङ्क्ते भुज-क्विप् । सर्पे शब्दच० ।

हरिमन्थ पु० मथ्यते मन्थ हरिर्मन्थ एकदेशो यस्य । १वृक्षके राजनि० तस्य बहुमन्थनेऽपि पीतत्वानपायात्तथात्वम् । हरिं सर्पं मथ्नाति मन्थ-अण् । २गणिकारिकायाम् शब्दच० । ३देशभेदे पु० भरतः । [१वृक्षके भरतः ।

हरिमन्थक पु० हरिः पीतो मन्थ एकखण्डो यस्य कप् ।

हरिमन्थज पु० हरिमन्थे देशभेदे जायते जन-ड । वृक्षके अमरः । २कृष्णसुद्गे च हेमच० । [हेमच० ।

हरिय पु० हरिं हरिवर्णं याति या-क । पीतवर्णघटके

हरिलोचन पुंस्त्री० हरेरिव लोचनमस्य । १कर्कटे (केँकड़) त्रिका० । २मेचके ।

हरिवंश पु० इतः । १विष्णुवंशे हरेर्वंशो वर्ण्यत्वेनास्त्यत्र अच् । महाभारतान्तर्गते खिलरूपे व्यासकृते २अन्यभेदे । तत्प्रतिपाद्यविषयाश्च हरिवं० ३२५ अ० उक्ता यथा "हरिवंशेऽत्र दृष्टान्ताः कीर्त्यन्ते क्रमयोगिनः । तत्रा-द्यमादिसर्गस्तु मनुसर्गस्ततः परः । पृथोर्वैन्यस्य चा-ख्यानं मनूनां कीर्त्तनं तथा । वैवस्वतकृतोत्पत्तिर्द्रुह्यस्य सारकथा तथा । गान्धर्योत्पत्तिरिक्ष्वाकुवंशश्चायतकी-र्त्तनम् । पितृकल्पस्तथोत्पत्तिः सोमस्य च बुधस्य । ऋषिसारस्वतस्य कीर्त्तनं कीर्त्तिवर्द्धनम् । द्युतिप्रतिष्ठे शक्रस्य प्रसवः क्षत्रवृद्धिजः । दिग्दोषप्रतिघा च तिमङ्गोः क्षत्रियस्य च । ययातिचरितञ्चैव पुरुवंशस्य कीर्त्तनम् । कीर्त्तनं क्षणशर्म्मणेः स्वर्गलक्ष्मणेस्तथा । संक्षेपात् कीर्त्तिता विष्णोः प्रादुर्भावास्ततः परम् । तारकामययुद्धञ्च ब्रह्मलोकस्य वर्णनम् । योगनिद्राप्रसु-प्तस्य विष्णोर्वाक्यञ्च वेधसः । पृथ्वीदोहस्य देवानामंशा-वतरणं तथा । ततो नारदवाक्यञ्च स्वप्नगर्भविधिस्तथा । आर्ष्टिषेणः पुनः कृष्णप्रसूत्पत्तिः प्रपञ्चतः । गोव्रजे गमनं विष्णोः शकटस्य निवर्त्तनम् । पूतनायाः वधो बालो यमलार्जुनयोरपि । हयकेसंदलनञ्चैव वृन्दावन-निवेशनम् । गोष्ठयो वर्णनञ्चापि यमुनाह्रददर्शनम् । कालियस्यापि दमनं धेनुकस्य वधस्तथा । प्रलम्बनिधनं-चैव अरिष्टवृषभस्य च । गिरिवर्षप्रहरिणं गोवर्द्धन-विधारणम् । गोपिन्द्राभिषेकस्य गोपीसंक्रीडनं तथा । अन्यस्य च वधाख्यानि केशिनो निधनं तथा । अक्रूरागमनञ्चैव नागलोकस्य दर्शनम् । धनुर्भङ्गस्य कथनं कंस-वाक्यतः परम् । कुवलयापीडवधश्चाणूरमुष्टिवधस्तथा । कंसस्य निधनञ्चापि विलापः कंसयोषिताम् । उग्रसेना-

भिषेकश्च यादवास्त्रावणं तथा। प्रत्यागतिर्मुरुक्षुला-दयोक्ता रामकृष्णयोः। मथुरायाश्चोपरोधो जरासन्ध-निवर्त्तनम्। विकट्टवाक्यं रामस्य दर्शनं भाषणं तथा। गोमन्तारोहणञ्चापि जरासन्धगतिस्तथा। गोमन्तस्य गिरेर्दाहः करवीरपुरे गतिः। दृग्गाजस्य वधश्चास्य मथु-रागमनं ततः। यमुनाकर्षणञ्चैव मथुरापक्रमक्रिया। उपायेन वधः कालयवनस्य प्रकीर्त्तितः। निर्माणं द्वार-वत्यास्तु रुक्मिणीहरणं तथा। विवाहश्चैव रुक्मिण्या रुक्मिणो निधनं तथा। बलदेवाङ्किं पुण्यं बलमाहा-त्म्यमेव च। नरकस्य वधः पारिजातस्य हरणं तथा। निकुम्भस्य वधाख्यानं प्रद्युम्नेनैव कीर्त्तितम्। प्रभावत्याश्च हरणं वज्रनाभवधस्तथा। द्वारवत्या विशेषेण पुनर्नि-र्माणकीर्त्तनम्। द्वारकायां प्रवेशश्च यमायाश्च प्रवेशनम्। नारदस्य च वाक्यानि दृष्णिवंशानुकीर्त्तनम्। षट्पुरस्य वधाख्यानमन्धकस्य निबर्हणम्। बभ्रुद्यात्रा कृष्णस्य जलक्रीड़ाकुतूहलम्। तथा भैरवरोधाय मधुपान-प्रवर्त्तनम्। ततश्चाक्षिक्रियागार्ग्यवसुदाहरणं हरेः। भानोश्च दुहितुर्भानुमत्या हरणकीर्त्तनम्। अम्बरस्य वधश्चैव धन्योपाख्यानमेव च। बाभ्रवेयस्य माहात्म्यं बाणयुद्धं प्रदक्षिणम्। भविष्यं पुष्करञ्चैव प्रद्युम्नेनैव कीर्त्तितम्। वाराहं नारसिंहञ्च वामनं बहुविस्तरम्। कैलासयात्रा कृष्णस्य पौण्ड्रकस्य वधस्ततः। कंसस्य डि-म्भकस्यैव वधश्चैव प्रकीर्त्तितः। पुरत्रयस्य संहार इति हरिवंशसंग्रहः। कथितो नृपशार्दूल! सर्वपापप्रणाशनः। इत्थं हरेश्चरित्रञ्च यः पठेत् सुसमाहितः। स याति वैष्णवं धाम यत्रास्ते मधुसूदनः॥ धन्यं यशस्य मायुष्यं मुक्तिमुक्तिफलप्रदम्"।

हरिवल्लभा स्त्री। १जयायां २तुलस्यां राजनि० ३लक्ष्म्याञ्च।

हरिवात् पु० हरिणा घोटकेन उच्चैःश्रवसा वाति गच्छति वा-भक्त। इन्द्रे डलायुधः।

हरिवर्ष न० हरिनामकं वर्षम्। जम्बुद्वीपस्य नवमवर्षमध्ये वर्षभेदे त्रिका०।

"एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा सौम्यादयोऽयुतयोजनोत्सेधा हरि-वर्षकिंपुरुषभारतानां यथासंख्यम्" भाग ५स्क०१६अ०

हरिवासर न० हरिप्रियं वासरम्। १एकादशीतिथौ २द्वा-दशीप्रथमपादे च। "सर्वपापानि तिष्ठन्ति हरिवासरे" इति। "द्वादश्याः प्रथमः पादो हरि-वासरसंज्ञकः" इति च एकादशीतत्त्वे विष्णुधर्मो०।

हरिवाहन पु० हरिं वाहयति स्वात्मानं नयति वह+ णिच्ल्यु। १गरुड़े हारा०। २तत्०। २हरिवाहनसप्तम्यां न०।

हरिवीज न०हरेर्बीजमुत्पत्तिकारणत्वेनास्यास्य अच्। हरि-तालं "हरितालं हरेर्बीजं वज्रमाक्षीकं मनःशिला" इति वैद्यकम्।

हरिशयन न०हरेः शयनं निद्रा। १विष्णुनिद्रायाम्। हरेः शयनं यत्र। २तदुपलक्षिते काले। स च "मेषादुपादे स्वपितीह विष्णुः" इत्युपक्रम्य "प्रबुध्यते कार्त्तिकशुक्ल-पक्षस्य" इत्यनेन दर्शितः आषाढस्य शुक्लद्वादश्यवधिकार्त्तिकशुक्ल-द्वादशीपर्य्यन्तकालो मासचतुष्टयात्मकः। तत्यानैकादशी-शब्दे १०७पृ० दृश्यम्।

हरिश्चन्द्र पु० हरिः चन्द्र इव कर्म्मा यस्य। १सूर्य्यवंशजे त्रिशङ्कुपुत्रे नृपभेदे। ऋषिभिन्ने तु न पुंस्। हरि-श्चन्द्र एव।

हरिश्चन्द्रपुर न० ६तत्०। सौभनगरे त्रिका०।

हरिषेण पु०जिनचक्रवर्त्तिविशेषे हेमच०। हरिस्तुतोऽत्र।

हरिसङ्कीर्त्तन न० हरेर्हरिनाम्नः संकीर्त्तनं श्रवणम्। श्रीविष्णोर्नामोच्चारणे "सकलं निष्फलं राजन्! हरि-सङ्कीर्त्तनं विना" इति कर्म्मनाशनम्।

हरिहय पु० हरिनामा हरिवर्णो वा हयो यस्य। इन्द्रे अमरः "हरिं विदित्वा हरिभिश्च वाजिभिः" इति रघौ तस्य हरिवर्णतुरगत्वसूक्तम्।

हरिहर पु० हरियुक्तो हरः। हरिहरयोः संश्लिष्टार्द्ध-देहतया स्थिते मूर्त्तिभेदे देवप्रतिमाशब्दे ९७०। तन्मूर्त्ति-लक्षणं दृश्यम्। द्व०। श्रीविष्णुमहादेवयोः द्वि० व०।

हरिहरक्षेत्र न० हरिहरयोः प्रिय क्षेत्रम्। गङ्गागण्डकी-सङ्गमान्तिकदेशस्थे पाटलिपुत्रादुत्तरस्यां दिशि स्थिते तीर्थभेदे।

हरिहरात्मक पु० १गरुड़े २शिवद्वेषे च अजटर०।

हरीतकी न० हरिं पीतवर्णं कालहारा हृता प्राप्ता दृष्ट-वा संज्ञायां कप् गौरा० ङीष्। १प्रसिद्धाभयाते वृक्षे तस्याः फलम् अण् तस्य लुप्। २हरीतकीफले स्त्री अमरः। "कदाचित् कुपिता माता बोटस्या हरीतकीं" इति वैद्यकम्। चेतकीशब्दे २६६२ पृ० दृश्यम्।

हरेणु स्त्री हृ-ऐनु। १रेणुकालाकामगन्धद्रव्ये अमरः। २कुल-स्त्रियां। ३खनीत्रे (मटर) पु० मेदि०। स्वार्थे क तत्रैव।

हर्त्तृ त्रि० हृ-तृच्। १हरणकारिणि २चोरे ३छलके च पु०

हर्मन् न०हृ+मनिन् । जृम्भणे (हाइतोला) शब्दरत्नाव० ।
हर्मित त्रि० हर्मन्+तारा० इतच् । १जातजृम्भणे शब्दर० २दग्धे ३ क्षिप्ते च मेदि० ।
हर्म्य न० हृ-यत ह्रट् च । इष्टकाकाष्ठादिरचिते धनिनां गृहभेदे अमरः "रम्यं हर्म्यतलम्" इति प्रबोधः ।
हर्य्य क्रमे अक० गतौ सक० भ्वा० पर० सेट् । हर्यति अहर्यीत् । [अमरः । स्त्रियां ङीष् २कुबेरे च शब्दर० ।
हर्य्यक्ष पुंस्त्री० हरि पिङ्गलमक्षि यस्य बहुव्री० । १सिंहे
हर्य्यश्व पु० हरिनामा हरिवर्णो वाऽश्वोऽस्य । इन्द्रे ।
हर्ष पु० हृष-घञ् । १सुखे अमरः २इष्टाधिगमजन्यानन्दे । ३कन्दर्पपितरि "पुलस्त्य उवाच । "कन्दर्पो हर्षतनयो योऽसौ कामो निगद्यते । स शङ्करेण संदग्धो ह्यनङ्गत्वमुपागतः । वामनपु० ५अ० ४कश्यपगोत्रजभेदे हर्ष चरिते तत्कथा दृश्या । [शब्दमा० ।
हर्षक त्रि० हृष-णिच् ण्वुल् । १हर्षकारके । २पर्वतविशेषे
हर्षण पु० हर्षयति अभीष्टदानात् हृष-णिच्-ल्यु । १विष्कम्भादिमध्ये चतुर्दशे योगे ज्यो० । २हर्षकारके त्रि० । ३नेत्ररोगभेदे ४आह्लभेदे ५आह्लदेवभेदे पु० शब्दच० । हृष-भावे ल्युट् । ६हर्षे न० ।
हर्षपद न० ६त० । नीच० ताजकोक्ते ग्रहविशेषस्य लग्नादिस्थानभेदे । यथोक्तम् "नन्दत्रिषड्लग्नगभर्क्षपुत्रव्यया दलाद्धर्षपदं स्वभोक्षम् । त्रिभं त्रिभं लग्नभतः क्रमेण स्त्रीणां नृणां रात्रिदिनेषु तेषु" । हर्षस्थानाद्ययोऽत्र । "न हर्षस्थानमाश्रितः" नीलक० ।
हर्षमाण पु० हृष-ताच्छील्ये चानश् । हृष्टचित्ते अमरः ।
हर्षयित्नु पु० हृष णिच्-इत्नु । १पुन्नागे २हर्षे न० मेदि० । ३हर्षयशीले त्रि० । [२हर्षकारके त्रि० ।
हर्षिणी स्त्री हृष-णिच्-णिनि ङीप् । १विजयायाम्
हर्षित त्रि० हर्षो जातोऽस्य इतच् । १जातानन्दे । २हर्षस्थानगते ग्रहे च ।
हर्षुल पुंस्त्री० हृष+उलच् । १सुखे स्त्रियां ङीष् । २कामुके त्रि०वि०को० । ३हर्षयशीले त्रि० । [आदि० हल्लः हालः
हल विलेखे भ्वा०पर०सक० सेट् । हलति अहालीत् ज्व-
हल न० हल्यते लक्ष्यतेऽनेन हल-घञर्थे करणे क । काष्ठभेदे अमरः । लक्षिशब्दे २१६८पृ० दृश्यम् ।
हलद्दी स्त्री हल-गद-हलन्तं क्लमकमपि दायति शोधयति दै-क गौरा०ङीष् । हरिद्रायाम् राजनि० ।
हलधर पु० हलं धरति आयुधत्वेन लक्षिसाधनत्वेन वा धृ-अच् । १बलरामे शब्दर० । २लाङ्गले त्रि० "उन्मूलिता हलधरेण पदावघातैः" भट्टिः ।
हलभृति स्त्री हलेन हलसाध्या भृतिः । लक्षिवृत्तौ शब्दर०
हलभृत् पु० हलं बिभर्त्ति भृ-क्विप् । १मत्तदेवे त्रिकाण्ड० २लाङ्गलधारके च । [३लक्षिकाव्ये च ।
हलभृति पु० उपपदे १सुनिभेदे त्रिका० । २हलस्य धारणे
हला अव्य० हेति लीयते ला-क । नाटयोक्तौ ।सखीसम्बोधने अमरः । २सख्यां जटा० ३पृथिव्यां स्त्री ४जले च स्त्री अजयपालः ।
हलायुध पु०हलेन आयुध्यति आ+युध क । १बलदेवे अमरः २ब्राह्मणसर्वस्वादिग्रन्थकारके विद्वद्भेदे च ।
हलाह पुंस्त्री० । चित्रितायां हेमच० स्त्रियां ङीष् ।
हलाहल पु०हलेनेव आह्लति विलिखति आ+हल-अच् । १विषभेदे २ब्रह्मराक्षसे ३कश्यपनायां मेदि० ४वत्सभेदे त्रिका० ।
हलिङ्ग पु० हल-इन् । हृष्टपुष्टे शब्दर० ।
हलिन् पु० हलोऽस्यास्त्रायुधत्वेन लक्षिसाधनत्वेन वा इनि । १बलरामे अमरः २शूद्रके त्रि० । हलस्य आकारो विद्यते यस्या ङीप् हलिनी (विघलाकुला) ३लाङ्गलीवृक्षे रत्नमा० इनि । हलानां समूहः ङीप् ४हलसमूहे स्त्री । [राजनि० ।
हलिप्रिय पु० ६त० । १कदम्बवृक्षे अमरः । २मदिरायां स्त्री
हली स्त्री हल-इन् ङीप् । कलिकारीवृक्षे राजनि० ।
हलीन पु० हलाय हितः ख । शाकवृक्षे (शेगुन) शब्दच० ।
हलीम(क)सक पु० पाण्डुरोगभेदे "यदा तु पाण्डोर्वर्णः स्याद्धरित श्यावपीतकः । बलोत्साहः क्षयस्तन्द्रामन्दाग्नित्वं मरुज्वरः । क्लीबत्वनोऽङ्गमर्दश्च श्वासतृष्णाऽरुचिभ्रमाः । हलीम(क)सं तदा तस्य विद्यादनिलपित्ततः" भावप्र० ।
हलीषा स्त्री हलस्य ईषा शक० । लाङ्गलदण्डे ।
हल्य त्रि० हलं हलकर्षणमर्हति तदर्हं वा यत् । १हलकर्षणयोग्ये क्षेत्रादौ अमरः । २हलमर्हत्यनि च । हलानां समूहः यत् । ३हलसमूहे स्त्री अमरः । [अहल्लीत् ।
हल्ल विक्षेपे भ्वा० पर०सक० सेट् भानुदीक्षितः । हल्लति
हल्लक न० हल्ल-ण्वुल् भानुदीक्षितः । हल-सम्प०भावे क्विप् हलं लाति ला-क । संज्ञायां कन् वा । रक्तकह्लारे (हेला) अमरः ।
हल्लीष न० हल-क्विप् लष-अच् पृषो० कर्म० । स्त्रीणां मण्डलिकाकारनृत्ये । ततः स्वार्थे क । तत्रैव । "मण्डलेन तु यन्नृत्तं स्त्रीणां हल्लीषकन्तु तत्" हेमच

२रासक्रीड़ायाञ्च तल्लक्षणं यथा "पृथुं सुवृत्तं मसृणं वितस्तिमात्रोच्छ्रितं कौ विनिखन्य शङ्कुम्। आक्रम्य पङ्क्त्यामितरेतरन्तु हस्तैर्भ्रमोऽयं खलु रासगोष्ठी" हरिवं० टी० नीलकण्ठः। [३होमे ४आह्वाने च अमरः।

हव पु० हु-अप् ह्वे-अप् संप्र० पृषो० वा। १यज्ञे २आह्वायां

हवन न० हु-भावे ल्युट्। होमे देवाद्युद्देशेन मन्त्रपूर्वकं वह्नौ हविःप्रक्षेपे शब्दच०। [त्रिका०

हवनी स्त्री ह्रियतेऽस्यां हु-आधारे ल्युट् ङीप्। यज्ञकुण्डे

हवनीय त्रि० हु-कर्मणि अनीयर्। होमीयद्रव्ये।

हवा अव्य० ह च वा च द्वन्द्व०। प्रसिद्ध्यर्थे।

हविरशन पु० हविरश्नाति अश-युच्। १वह्नौ हेमच०। २चित्रकवृक्षे च। भावे ल्युट्। ३हुतभोजने न०। [राजनि०]

हविर्गन्धा स्त्री हविषो गन्धो यस्याम्। भम्यां (गाँड़)

हविर्गेह न० हविषो गेहम्। यज्ञसम्बन्धपर्णचित्रकवृक्षस्थे हवनीयद्रव्यस्थापनार्थे गेहभेदे हेमच०। [कारीवृक्षे रत्नमा०।

हविर्मन्थ पु० हविषे मन्थतेऽसौ मन्थ-कर्मणि घञ्। गणि०

हविष्य न० हविषे हितम् यत्। १घृते हेमच०। स्मृत्युक्ते हैमन्तिकादावन्ने च "चेरुर्हविष्यं भुञ्जानाः" भाग० १०। "नारिकेलफलञ्चैव कदलीं लवणीं तथा। आम्रमामलकञ्चैव पनसञ्च हरीतकीम्। प्रतान्तरप्रयुक्तञ्च हविष्यं मनवे विदुः" ति० त० अग्न्यसंहिता।

हविष्यान्न न० कर्म०। "हैमन्तिकं सिताऽक्षिन्नं धान्य सुप्रक्षालिता यवाः। फलायकङ्गुनीवारा वास्तूकं हिञ्जलोचिका। षष्टिका कालशाकञ्च मूलकं केसुकेतरत्। लवणे सिन्धुसम्भूते गव्ये च दधिसर्पिषी। पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी। तिन्तिड़ी जीरकञ्चैव नागरङ्गञ्च पिप्पली। कदली लवली धात्री फलान्यगुडमैक्षवम्। घृतेनपक्वं लवणं हविष्यान्नं प्रचक्षते" इत्युक्ते व्रतादौ भक्ष्यद्रव्यभेदे।

हविस् न० ह्रियते हु-कर्मणि असुन्। १घृते अमरः २हवनीयद्रव्यमात्रे च "यवाया मेदसो हविषोऽनुब्रूहीति" श्रुतिः। "सुन्यञ्जानि पयः सोमो मांसं यज्ञालुपक्रमम्। अक्षारलवणञ्चैव प्रकृया हविरुच्यते" श्रा० त० उक्ते ३द्रव्यभेदे। भावे असुन्। ४होमे।

हव्य न० हु-कर्मणि यत्। १देवयोग्यान्ने अमरः। २हवनीयद्रव्ये त्रि०। भावे यत्। ३होमे न०।

हव्यपाक पु० हव्याय होमाय पाको यस्य। होमार्थं दुग्धघृतादिभिःसिद्धे अन्ने चरौ अमरः।

हव्यवाह पु० हव्यं वहति देवान् वह-अण्। १अग्नौ रत्नमा० २चित्रकवृक्षे च। [अमरः। २चित्रकवृक्षे च।

व्यहवाहन पु० हव्यं वाहयति वह-णिच्-ल्यु। १वह्नौ

हव्याश पु० हव्यमश्नाति अश-अण्। १वह्नौ शब्दर० २चित्रकवृक्षे। ल्यु। हव्याशनोऽप्युभयत्र पु० हेमच०।

हस हासे भ्वा० प० अक० सेट् एदित् सिचि न वृद्धिः। हसति अहसीत्। दोषदर्शनपूर्वकहासे तु सकर्मकः "स्त्रियावहसेव पुरं सघोनः" इति भट्टिः। [अमरः।

हंहास पु० हस-अप् घञ् वा। हास्ये सम्भ्रमविकाशनभेदे

हसन न० हस-भावे ल्युट्। प्रीत्याद्यभिव्यञ्जकोष्ठादेर्विकाशने हास्ये

हसन्ती स्त्री हस-झ ङीप्। अङ्क रधानिकायां अमरः। २सन्निकाशभेदे ३शाकिनीभेदे च मेदि०। हस-शतृ-ङीप्। हसत् ४हास्यशिनि त्रि० स्त्रियाम् ङीप्।

हसित न० हस-भावे क्त। १हास्ये कर्तरि क्त। २कृतहास्ये ३विकसिते च त्रि०। हास्यशब्दे दृश्यम्।

हस्त पु० हस-तन् न वृद्धिः। १देहावयवभेदे (हात) अमरः। २चतुर्विंशत्यङ्गुलपरिमाणे "यवोदरैरङ्गुलसंख्यैर्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः" लीला०। ३हस्तिशुण्डे च। ४अश्विन्यादिषु त्रयोदशे नक्षत्रे पुंस्त्री० मेदि० अस्य शब्दे पृ० दृश्यम्। "जाह्नवी हस्तयोगे" इति पुराणम्। "पुष्या हस्ता तथा स्वातिः" ज्यो० कोष्ठवाचकात् परः। ५वृक्षमूले। कोशहस्तः।

"हस्तदत्तास्च ये स्तेहा लवणं व्यञ्जनानि च। दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते तु किल्बिषम्। तस्मादुत्तरितं कृत्वा पर्णेनाथ तृणेन वा। प्रदद्यात् न तु हस्तेन नायसेन कदाचन" श्रा० त०। [हस्ते रात्रिनि०।

हस्तजोड़ि पु० हस्त जुड़ति जुड़ क्विप्। (हातजोड़ा)

हस्तपुच्छ न० ६त०। हस्तावयवभेदे (हातेर पोँछा)। त्रिका०

हस्तवारण न० ३त०। मारणोद्यतस्य निवारणे अमरः।

हस्तविम्ब न० हस्तस्य बिम्बं यत्र। स्नानके चन्दनादिना देहविलेपनविशेषे हेमच०। [श्रीधरः।

हस्तसिद्धि स्त्री हस्तस्य तत्कर्मणः सिद्धिर्यतः। वेतने

हस्तसूत्र न० हस्तस्य सूत्रमिव। वलये हेमच०।

हस्तामलक न० हस्तस्थितमामलकम् आमलक्याः फलं तदिव वा। १करावस्थितामलकफले तद्वत् २अनायासलभ्ये पदार्थे च करामलकादयोऽप्यत्र। ३वेदान्तप्रसिद्धग्रन्थभेदे च।

हस्तिक न० हस्तिनां समूहः कन्। हस्तिसमूहे शब्दर०।

हस्तिकन्द पु० हस्ती तत्पदमिव कन्दोऽस्य । स्वनामख्याते कन्दभेदे (ओलकँटा) राजनि० ।

हस्तिकरञ्ज पु० हस्तीव करञ्जः । महाकरञ्जे राजनि०

हस्तिकर्ण पु० हस्तिनः कर्ण इव पर्णमस्य अच् । १एरण्डवृक्षे २पलाशभेदे ३गन्धरेवतामेदे मेदि० । ४हस्तिकन्दे ५रास्नैरण्डे च राजनि० । स्वार्थे क तत्रार्थे । हृत० । हस्तिनश्च कर्णे । [अमरः ।

हस्तिकर्णदल पु० हस्तिनः कर्ण इव दलमस्य । पलाशभेदे

हस्तिकोलि पु० हस्तीव कोलिः । बदरीभेदे रत्नमा० ।

हस्तिघोषा स्त्री हस्तीव हृष्टवी घोषा । हृष्टहृाघायाम् भटनघोषाः । [घोषायाम् रत्नमा०।

हस्तिघोषातकी स्त्री हस्तीव हृष्टवी घोषातकी । हस्ति-

हस्तिचारिणी स्त्री हस्तीव चरति चर-णिनि ङीप् । महाकरञ्जे राजनि० ।

हस्तिदन्त पु० हृत० । १करिदन्ते । तदाकारोऽस्यास्य अच् । २मूलके न० राजनि० तत्रार्थे पु० शब्दर० । ३वृक्षभित्तिनिखातार्द्धं काष्ठनिर्मितशल्लिकाकारे घटार्धे नामदन्तादयोऽप्यत्र । [ककटीभेदे राजनि० ।

हस्तिदन्तफला स्त्री हस्तिदन्त इव फलमस्याः । एवारौ

हस्तिन् पु० हस्तः शुण्डादण्डोऽस्त्यस्य । १गजे २चन्द्रवंशजे नृपभेदे च ।

"हस्तोऽस्यापि दायादो हस्ती नाम बभूव ह । तेनेदं निर्मितं पूर्वं पुरैव हस्तिनापुरम् । हस्तिनश्चैव दायादास्त्रयः परमधार्मिकाः । अजमीढो द्विमीढश्च पुरुमीढस्तथैव च" हरिवं० २० अ० ।

हस्तिनख पु० हस्तिनो नख इव हस्तिना न अस्यते नञ्+खन-ड वा । १पुरद्वारस्थे क्षुद्रकूटे अमरः । २दुर्गद्वारावरोधनार्थं निस्रोक्षते स्थानोद्धृते क्षुद्राशौ च भरतः ।

हस्तिनापुर न० हस्तिना तदाख्यस्तपेण चिह्नितं तत्कृतत्वात् पुरम् अलुक्स० । (दिल्ली) पुरभेदे ।

हस्तिनी स्त्री हस्तिनः योषा ङीप् । १करिण्याम् गजयोषिति चतुर्विधस्त्रीमध्ये २स्त्रीविशेषे तल्लक्षणं यथा "स्थूलाधरा स्थूलनितम्बभागा स्थूलाङ्गुली स्थूलकुचा सशीला । कामोत्सुका गाढरतिप्रिया च नितम्बखर्वा खलु हस्तिनी स्यात्" "कृशे हृष्टा च हस्तिनी" रतिमञ्जरी । ३वृत्तविशेषे स्त्रियां शब्दच० । [स्वार्थे क तत्रैव ।

हस्तिप पु० हस्तिनं पाति पा-क । हस्त्यारोहे अमरः ।

हस्तिपत्र पु० हस्ती तत्कर्ण इव पत्रमस्य । हस्तिकन्दवृक्षे राजनि० । [हस्तम् । राजकोशातक्याम् राजनि० ।

हस्तिपर्णिका स्त्री हस्ती तत्कर्ण इव पर्णमस्याः कप् अत

हस्तिपर्णी स्त्री हस्ती तत्कर्ण इव पर्णमस्या ङीष् । १क्षीरटालतायां रत्नमा० । २कर्कटशृङ्ग्यां राजनि० ।

हस्तिमद पु० हृत० । १करिकरनिःसृतमदजले । स इव । २गन्धद्रव्यभेदे च राजनि० ।

हस्तिमल्ल पु० हस्तिषु मल्लः । १ऐरावतगजे । २गणेशे ३शङ्खे ४नागे च मेदि० । [राजनि०।

हस्तिरोहणक पु० हस्तीव रोहते रुह् स्वार्थे क । महाकरञ्जे

हस्तिलोध्रक पु० हस्तीव लोध्रः स्वार्थे क । लोध्रभेदे राजनि०

हस्तिविषाणी स्त्री हस्तिविषाणं गजदन्तस्तदाकारः मध्यभागः (घोड़) वयाः गौरा० ङीष् । १कटल्याम् राजनि० ।

हस्तिशुण्डा(ण्डी) स्त्री हस्तिशुण्डस्तदाकारोऽस्त्यस्याः अच् वा गौरा० ङीष् । (हाँतिशुड़ा) वृक्षे राजनि० ।

हस्तिश्यामाक पु० हस्तीव स्थूलः श्यामाकः । स्थूलश्यामाके राजनि० । [कल्प कल्पा वा ।

हस्ते अव्य० हस्त+ए । १पाणौ दत्यर्थे २स्वीकारे च हस्ते-

हस्त्य त्रि० हस्तेन गृहीतः दत्तः क्रतो वा यत् । १हस्तगृहीते २पाणिदत्ते ३पाणिकृते त्रि० कौ० ।

हस्त्यध्यक्ष पु० ७त० । गजाध्यक्षे गजरक्षणादौ नियुक्ते "हस्तिविद्याविधानज्ञो वन्यजातिविचारदः । क्लेशक्षमस्तथा राज्ञो गजाध्यक्षः प्रशस्यते" मत्स्यपु० १८६अ० ।

हस्त्यारोह पु० हस्तिनमारोहति आ+रुह अण् । हस्तिपके अमरः ।

हस्र त्रि० हस-कर्मणि र । मूर्खे शब्दा० । [शब्दच० ।

हहल अव्य० हेति हलति । हाहाहूहू स्यावरविषभेदे

हहा पु० हेति शब्दं जहाति हा-क्विप् । गन्धर्वभेदे शब्दभा०

हा त्यागे जु० प० स० अनिट् । जहाति जहति जहौ अहासीत् हीयते ओदित् निष्ठातस्य नः हीनः हानिः ।

हा गतौ जु० आ० स० अनिट् ओदित् निष्ठातस्य नः । जिहीते अहाषिष्ट जहे हानम् ।

हा अव्य० हा-का । १विषादे २शोके ३पीड़ायाम् अमरः ४शुक्लायाञ्च मेदि० । हाशब्दस्य निन्द्यापरत्वे तद्योगे षष्ठ्यर्थे द्वितीया "हा लोकं लोकबन्धविम्" बोपदेवः । निन्द्यत्वपरत्वे न, "हा पितः! क्वासि वैदेहि!

हाङ्कार पुंस्त्री हा विषादाय पीड़ायै वा अङ्कं राति रा-क । स्वनामख्याते जलजन्तुभेदे शब्दच० स्त्रियां ङीष् ।

हाटक न० हट-ण्वुल् । १देशभेदे २तत्रजे स्वर्णे तद्वाच०

नामके धुस्तुरे च अमरकोषः। ४स्वर्णनिर्मिते त्रिलिङ्गः।

हाटकेश्वर पु०गोदावरीतीरस्थे शिवलिङ्गभेदे यथा "एतस्मिन्नन्तरे प्राप्ताः सर्वे एवर्षिपार्थिवाः। द्रष्टुं त्रैलोक्यभर्त्तारं सत्रम्बकं हाटकेश्वरम्। ततः कपिवरः प्राप्तो दृताच्या सह सुन्दरि!। स्नात्वा गोदावरीतीर्थं दिदृक्षुर्हाटकेश्वरम्" वामनपु० ६२अ०।

हात न० हा-करणे क्त। वेतने त्रि० कौ०। पृषो०। हान्त्र। भरणे उणादि०। [क्तवन्" भट्टिः।

हान न० हा-भावे ल्युट्। परित्यागे "हिंसहानकृता न कृता

हानि स्त्री हा-क्तिन् तस्य निः। १क्षतौ २अपचये च जटाध०।

हापुषी स्त्री हा इति रवः पुष्पाय यस्याः ङीष्। पक्षिभेदे हारा०। स्वार्थे क हापुषः। तत्रार्थे त्रिका०।

हायन पु० अन्धु जहाति हा-ल्युट्-नि०। १व्रीहौ भावे जहाति हा-ल्युट्-नि०। २वत्सरे पुंस्त्री० अमरः। ३अग्निशिखायां स्त्री मेदि०।

हार पु० हृ-कर्मणि घञ्। १मुक्ताभालाभेदे अमरः "हारो नारोपितः कण्ठे" इति गीतावाक्यम्। २युद्धे मेदि०। हरतीति कर्त्तरि घञ् वा। ३भाजके "अन्योन्य हाराभिहतौ हरांशौ" इति लीला०।

हारिका स्त्री जृम्भायां (हाइतोला) हारा०।

हारक न० हृ-ण्वुल्। १चोरे २कितवे ३गन्धभेदे ४विज्ञानभेदे मेदि०। ५शाखोटकभेदे शब्दच०। ६भाजकाङ्के च। ७हरणकर्त्तरि त्रि०। [कपिलद्राक्षायाम् राजनि०.

हारहारा स्त्री हार इव हरति आच्छादनात् हृ-ण। हारहूरा स्त्री हृ-क्विप् हूः हार इव छवं राति रा-क। १द्राक्षायाम् हला०। २मद्ये पु० मेदि०।

हाराबली स्त्री हार इवावली। मुक्तावल्यां "एकहारावली" इति शब्दरत्नावलिः। २पुष्पोत्तमलते कोषभेदे च।

हारि(री) स्त्री हृ-णिच्-इन् वा ङीष्। १द्यूतादिभङ्गे २तत्सम्बन्धिनि ३पथिकसमूहे च मेदि०। ङीषन्तः ४सक्तायां स्त्री शब्दर०। [कोकिले मेदि० स्त्रियां ङीष्।

हारिकण्ठ पुंस्त्री० हारी मनोहरः कण्ठस्तद्वत् यस्य। **हारित** पुंस्त्री० हृ-णिच्-क्त। हारीते पक्षिभेदे जटा० स्त्रियां ङीष्। हरिदेव स्वार्थे अण्। हारिद्रवे पु०।

हारितक न०हारितेन हरिद्वर्णेन कायति कै-क। शाके शब्दर०

हारिद्र पु० हरिद्रया रक्तः अण्। १कदम्बवृक्षे मनुष्यस्य पीतमायत्वात् तथात्वम्। २हरिद्रया रक्ते त्रि०मेदि०।

हारिन् त्रि० हारोऽस्यास्ति इनि हृ-णिनि वा। १हारके २हारविशिष्टे ३मनोहारिणि च। "हारीणवबलानां हारीणवबलानाम्" भट्टिः। स्त्रियां ङीप्।

हारिल पुंस्त्री० हृ-णिच् इलच्। खनामख्याते खगभेदे राजनि० स्त्रियां जातित्वात् ङीष्।

हारीत पु० हृ-णिच्वा०-इतच्। स्मृतिकर्त्तरि मुनिभेदे। २पक्षिभेदे ३कितवे च मेदि०। स्वार्थे क। हारिलशब्दे (हरेल) राजनि०।

हार्द न० हृदयस्य कर्म युवा० अण् हृदादेशः। १स्नेहे २प्रेमणि अमरः। हृदि भवः विदितो वा अण्। ३हृदयस्थे ४हृदयभेद्ये च त्रि० हार्दविद्या श्रा०भा०।

हार्य्य पु० ह्रियतेऽसौ हृ-ण्यत्। १तिमीतकवृक्षे २हरणीये त्रि० मेदि०।

हाल पु० हलोऽस्यास्त्र अण् हल एव वा अण्। १बलरामे त्रिका०। २हले च मेदि०। ३शालिवाहनवंशे हेमच०।

हालक पु०हाल+संज्ञायां कन्। पीतहरितवर्णाश्वे हेमच०।

हालह(हा,ल न०हलाहल पृषो०। हालाहलविषे शब्दर०

हाला स्त्री हल-घञ्। १मद्ये अमरः २तालरसजे (ताड़) मद्ये च राजनि०।

हालाहल पुंन०हालेव हलति हल-अण्। १स्थावरविषभेदे शब्दर०। २कोटभेदे च पु० राजनि०। ३मद्ये स्त्री तत्र ङीष् राजनि०। "गोक्षनामफलो शुक्लस्तालपत्रश्चदच्छधा। तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः। अयो हालाहलो ज्ञेयः किञ्चिन्न्यायां स्त्रियामपि। दक्षिणाब्धितटे देशे कोङ्कणेऽपि च जायते" भावप्र०।

हालिक त्रि० हलेन खनति हलः प्रहरणमस्य तस्येदं वा ठक् ठञ् वा। १हलकर्षके २हलेन योगरि ३हलसम्बन्धिनि च अमरः।

हालिनी स्त्री हल-इनि ङीप्। स्थूलपलायां हेमच०।

हालु पु० हल-उण्। दन्ते त्रिका०।

हाव पु० हृ-भावे घञ् नि०सम्प्र०-करणे घञ्। १आह्वाने २स्त्रीणां शृङ्गारभावजे चेष्टाभेदे च अमरः। "वृषानोऽनेन ह्रियन्ते नारीभिर्मदनातुरे। अतो निरुच्यते हावस्ते विलासादयो मताः" भरतधृतवाक्यम्। "भ्रूनेत्रवदनैरेषां संयुक्तो भ्रूनेत्रादिविकाशजः। भावादीषत्प्रकाशो यः स हाव इति कथ्यते" उज्ज्वलमणिः।

हास पु०हस-भावे घञ्। हास्यस्थायिभावके रसभेदे तद्वरूपं

शा० द० "विलताकारवाग्वेशचेष्टादेः कुहकाङ्गवेत् । हास्यो हास्यस्थायिभावः श्वेतः प्रमथदैवतः । विलताकारवाक् चेष्टं यदालोक्य हसेज्जनः । तदत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम् । अनुभावोऽक्षिसङ्कोचवदनरागतादिकः । निद्रालस्यावहित्थाद्या अत्र स्युर्व्यभिचारिणः" ।

हासस् पु० हस-णिच् असुन् । चन्द्रे वेदनि० ।

हासिका स्त्री हस-भावे ण्वुल् । हास्ये हेमच० ।

हास्तिक न० हस्तिनां समूहः वुञ् । १हस्तिसमूहे अमरः । हस्तिनमारोहति ठक् । २हस्त्यारोहे ।

हास्तिन न० हस्तिना न्यूनेन निर्वृत्तम् नगरम् अण् संयो गपरत्वादिनो नटिलोपः । हस्तिनापुरे त्रिका० ।

हास्तिना इदं हस्तिनः परिमाणं वा अण् । २हस्तिसम्बन्धिनि २हस्तिपरिमाणे च त्रि० ।

हास्य न० हस-ण्यत् । १हासे हसने अमरः २अलङ्कारोक्ते रसभेदे च । "अकस्मं हसितं श्रेष्ठं मौलितास्य मथापहम् । अस्मदुहसितं ह्युक्तं तत् स्मितादस्य नैकधा" साहि० ६ परि० ।

"व्यङ्गानां स्मितहसिते मध्यानां विहसितावहसिते च नीचानामपहसितं तथाऽतिहसितञ्च षड्भेदाः" । "ईषद्विकासि नयनं स्मितं स्यात् सन्दिताधरम् । किञ्चित् लक्ष्यदशनं तत्र हसितं कथितं बुधैः । मधुरस्वरं विहसितमास्यैरःकम्पवत्यहसितम् । अपहसितं साश्रुं विच्छिन्नाङ्गं भवत्यतिहसितम्" सा० द० ।

हाहा पु० हेति शब्दं जहाति त्यजति क्विप् । १देवगन्धर्वभेदे अमरः । अस्यैव हाहस् शब्दोऽपि तत्रार्थे भरतः । हा-हिंसायां २विस्मयशब्दे ३शोकशब्दे च अव्य० मेदि० ।

हाहाकार पु० हाहा इत्यस्य कारः कृ-भावे घञ् । १युद्धशब्दे २शोकध्वनौ च । [लिघाय ।

हि वर्द्धने गतौ च स्वा० पर० सक० अनिट् । हिनोति अहैषीत् ।

हि अव्य० हा-हि-वा डि । १हेतौ २अवधारणे अमरः । ३विशेषे ४प्रश्ने ५सम्भ्रमे ६हेतूपदेशे ७अनुनयायां च मेदि० ८पादपूरणे ९शोके च शब्दर० ।

हिंसक पु० हिंस-ण्वुल् । १व्याघ्रादौ हिंस्रे पशौ २शत्रौ च २आथर्वणे विप्रे ४हिंसाकारके त्रि० शब्दर० । "शोकानुभन्ना संरक्ता क्रयविक्रयिहिंसकाः । उपहर्त्ता घातयिता हिंसकाश्चाप्यधा मताः" याज्ञवल्क्य० ।

हिंसा स्त्री हिंस-अ । १वधे मेदि० । २चौर्यादिकर्मणि च अमरः । "हिंसा चैव न कर्त्तव्या वैधहिंसा हि राजसी। ब्राह्मणैः स न कर्त्तव्या यतस्ते सात्त्विका मताः" दक्षस्मृतिः । वैधहिंसाशब्दे ४६७५ पृ० दृश्यम् ।

हिंसारु पु० हिंस-आरु । व्याघ्रे त्रिका० ।

हिंसालु पु० हिंसा+अस्त्यर्थे आलु । १हिंसाशीले त्रिका० । २कुक्कुरे पु० हारा० ।

हिंसीर पु० हिंसा-ईरन् । १व्याघ्रे २खगे च त्रिका० ।

हिंस्र त्रि० हिंस-र । १हिंसाशीले अमरः । २घोरे ३भये ४भीमसेने ५हरे पु० त्रिका० । हिंसांसां ७काकादन्यां टजटासांस्यास् ८एलुवालुकायां १०गवेधुकायां ११शिरायाम् १२नाड्यां च स्त्री शब्दर० । [अक्किकिट ।

हिक्क कूजने भ्वा० उ० अ० सेट् । हिक्कति ते अहिक्कीत् ।

हिक्क हिंसायां चु० आ० सक० सेट् । हिक्कयते अजिहिक्कत ।

हिक्का स्त्री हिगिति शब्दं करोतीति पृषो०, रोगभेदे (हेचकी) अमरः ।

माधवादिकं भावप्र० उक्तं यथा

"अथ हिक्काधिकारः । तत्र हिक्कायाः विप्रकृष्टं निदानमाह "विदाहिगुरुविष्टम्भिरूक्षाभिष्यन्दिभोजनैः । शीतपानाशनस्नानरजोधूमातपाऽनिलैः । व्यायामकर्मभाराध्ववेगाघातापतर्पणैः । हिक्का श्वासश्च कायस्य त्रयां सम्पजायते" । अपतर्पणमनशनादि । संप्राप्तिमाह "वायुः कफेनानुगतः पञ्च हिक्काः करोति हि । अन्नजा यमला क्षुद्रा गम्भीरा महती तथा" । साधारणलक्षणमाह "शब्दं क्षुद्रं वायुरेति सस्वनः सलतस्तिस्रो हान्त्राणि सुखादिवाक्षिपन् । सदोषाणामु हिनस्त्य शून्यतस्तस्तु हिक्केत्यभिधीयते बुधैः" । वायुरत्र सोदानः प्राणो बोद्धव्यः । सदेति ऊर्द्धं याति । सस्वनः शब्दवान् । ऊर्द्धगमनविशिनष्टि यस्मादित्यादि स्निग्ध इति शब्दोऽत्रापि दीर्घत्वनिर्देशात् । सुखादिति स्वभावतो न पञ्चमी तेन यस्मात्स्निग्धोहान्त्राणि सुखमात्रीव आक्षिपन् निःसारयन् इत्येवार्थः । वायुः दोषवान् दोषोऽत्र कफः तद्वान् वायुः कफेनानुगत इति सम्प्राप्तिः । हिनस्तीति हिक्का पृषोदरादित्वाद्रूपसिद्धिः हिंगिति शब्दं करोतीति वा । पूर्वरूपमाह "कण्ठोरसोर्ध्वकृत्यञ्च वदनस्य कषायता । हिक्कानां पूर्वरूपाणि कुक्षेराटोप एव च" । वदनस्य कषायता वातात् । अन्नजान्यलक्षणमाह "पानान्नैरतिसंयुक्तैः सहसा पीडितोऽनलः । हिक्कायत्यूर्द्धगो भूत्वा तां विद्यादन्नजां भिषक्" अनिलः प्राणो वायुः । यमलामाह "चिरेण यम-

लैर्वेगैर्या हिक्का सम्भवन्ति । कम्पयन्ती शिरोग्रीवां यमलां तां विनिर्दिशेत्" । जङ्घासाह "विलष्टकालैर्या वेगैर्मन्दैः समभिवर्त्तते । चुद्रिका नाम सा हिक्का जन्तुर्मूलं प्रधावति" । विलष्टकालैः चिरेण । जन्तुः कफो रक्षोः सन्धिः । गम्भीरामाह "नाभिप्रदृत्ता या हिक्का घोरा गम्भीरनादिनी । अनेकोपद्रववती गम्भीरा नाम सा स्मृता" । अनेकोपद्रववती तृष्णाज्वरादियुक्ता । महतीमाह "मर्माणि पीड़यन्तीव सततं वा प्रवर्त्तते । महाहिक्केति सा ज्ञेया सर्वगात्रप्रकम्पिनी" । मर्माणि वस्तिहृदयशिरःप्रभृतीनि । असाध्यत्वमाह "क्षीयमाणे हिक्किते यस्य देहो दृष्टिश्चोर्द्धं ताड्यते नित्यमेव । क्षीणोऽन्नद्विट् क्षौति यश्चातिमात्रं तौ द्वौ चान्त्यौ वर्जयेद्धिक्कमानौ । क्षीयमाणे विक्षार्य्यत इव तौ द्वाविति क्षीयमाण इत्यादिना नित्यमेवेत्यन्तेनैको हिक्कमानः । क्षीण इत्यादिनाऽतिमात्रमित्यन्तेनापरः । तौ द्वौ अन्त्यौ च गम्भीरया महतीहिक्कया हिक्कमानौ वर्जयेत् । अपरञ्च "अतिव्यश्नितदोषस्य भक्तद्वेषस्य च । व्याधिभिः क्षीणदेहस्य दृष्टस्यातिव्यवायिनः । आयासाच्च बलस्थस्य हिक्का हन्त्यासु जीवितम् । यमिका च प्रजापार्त्तिमोहतृष्णासमन्विता" । साध्यत्वमाह "अक्षीणस्याग्निदोषस्य स्थिरधात्विन्द्रियस्य च । तस्य साधयितुं शक्या यमिका हन्यतोऽन्यथा" ।

हिङ्गु न० हिङ्गं गच्छति गम-डु नि० । (हिङ्ग) रामठदेशोद्भवे वृक्षे अमरः यस्य निर्य्यासो हिङ्गुद्रव्यम् ।
"हिङ्गूष्णं पाचनं रुच्यं तीक्ष्णं वातबलासहृत् । रसे पाके च कटुकं स्निग्धञ्च वह्निदीपनम् । शूलगुल्मोदरानाहकृमिघ्नं पित्तवर्द्धनम्" भावप्र० । "हिङ्गु तीक्ष्णं कटुरसं शूलाजीर्णविबन्धजित् । लघूष्णं पाचनं स्निग्धं दीपनं कफवातजित्" राजव० २वंशपत्रे भावप्र०

हिङ्गुनाडिका स्त्री हिङ्गुन नाड़ी इव नाड़ी यस्याः कप् । नाड्यौहिङ्गौ राजनि० ।

हिङ्गुनिर्य्यास पु० हिङ्गुन इव निर्य्यासोऽस्य । १निम्बवृक्षे अमरः ६व० । २हिङ्गुवृक्षनिर्य्यासे च (हिङ्ग्) ।

हिङ्गुपत्र पु० हिङ्गुन इव पत्रमस्य । १वृक्षदीपवृक्षे राजनि० (हिङ्गुपात्र) २वृक्षभेदे स्त्री ङीप् भरतः ।

हिङ्गुपर्णी । हिङ्गुन इव पर्णमस्याः गौरा० ङीष् । वंशपत्र्याम् रत्नमाला ।

हिङ्गुल पुंन० हिङ्गु तद्वर्णं लाति ला-क । रक्तवर्णे वर्णकद्रव्यभेदे अमरः २वार्त्ताक्यां २वृक्षद्याञ्च स्त्री ङीष् वर्णकभेदे तस्य शोधनादिकं भावप्र० उक्तं यथा
"मेषीक्षीरेण दरदमल्लवर्गेण भावितम् । सप्त वारान् प्रयत्नेन शुद्धिमायाति निश्चितम्" । एवं शोधितस्य हिङ्गुलस्य गुणाः । "तिक्तं क्षयार्यं कटु हिङ्गुलं स्यात् क्षेत्रामयघ्नं कफपित्तहारि । कृमिश्वासकण्डूज्वरकामलांश्च श्लीपदवातौ च गरं निहन्ति" । अथ हिङ्गुलाद्रसाकर्षणविधिः "निम्बूरसैर्निम्बपत्ररसैर्वा श्यामलाम्लकम् । दत्त्वा दरदमूर्च्छन्तु जातयेत् क्षुतवृद्धिवत् । तत्कोर्द्धपिठरीयन्त्रं दृढ्योद्रसमुद्धरेत् । शुद्धमेव हितं क्षुतं सर्वकर्मसु योजयेत्" । तन्त्रान्तरं दरदशब्दे ३४७१पृ० दृश्यम् । यतीदेहब्रह्मरन्ध्रपातस्थाने ४देवविशेषे स्त्री (हिङ्गुलाट्) "ब्रह्मरन्ध्रं हिङ्गुलाख्यां देवतां भीमलोचनाम् । कोटवी वा महामाया त्रिगुणा या त्रिगम्बरी" पीठमा० ।

हिङ्गुलु पुंन० हिङ्गु तद्वर्णं लाति ला-डु । (हिङ्गुल) वर्णकद्रव्ये अमरः ।

हिङ्गुसिराटिका स्त्री हिङ्गुन इव सिरां पत्रसिरामटति अट-एवुल् अत इत्त्वम् । वंश्यपत्र्याम् रत्नमा० ।

हिङ्गूल न० हिङ्गु+पृषो० । मधुरमूले (आलु) शब्दच० ।

हिञ्ज पु० हिनोति हि-किप् तथा सन् जायते जन-ड कर्म० । हिञ्जलवृक्षे शब्दर० । [भेदे (हिजल) जटा०

हिञ्जल पु० हि-किप् हिञ् हितकारि जलं यस्य । हिज्जलवृक्षे शब्दर० । [अहिञ्जिलट ।

हिञ्जीर पु० हिञ्जिलाटवत्वे ईषत्व० ।

हिञ्ज गतौ भ्वनयो भ्वा० आ० सक०सेट् इदित् । हिञ्जते

हिडिम्ब पु०१राक्षसभेदे स हि भीमेन हतः २तद्भगिन्यां स्त्री

हिडिम्बजित् हिडिम्बं राक्षसभेदं जितवान् जि-किप् । भीमसेने हिडिम्बजित्प्रभृतयोऽत्र । [भार० आ०।

हिडिम्बापति पु० ६त० । १हनुमति शब्दर० २भीमसेने

हिण्डन न० हिडि-ल्युट् । १भ्रमणे २रमणे मेदि० ३लेखने च विश्वः । [वाच्यं हारा०

हिण्डिक पु० हिडि-इन् हिण्डौ कायति कै-क । जङ्घा-

हिण्डि(ण्डी)र पु० हिडि-इरन् डीरन् वा । १पक्षिदूतभेदे अमरः । २वार्त्ताकौ ३पुरुषे मेदि० ४कृपके च उणा० ।

हिण्डी स्त्री हिडि-इन् ङीप् । दुर्गायां निघ० ।

हिण्डीप्रियतम पु० ६त० । शिवे शब्दर० हिण्डीपत्या-दयोऽत्र । [४भङ्गे च ।

हित त्रि० धा-क्त हि-क्त वा । १गते २पथ्ये ३दृष्टसाधने

हितक पु० हित+स्वार्थे क । शिग्रौ राजनि० ।

हितकारिन् त्रि० हितं करोति कृ-णिनि। शुभकारके।
हितप्रणी पु० हितं प्रणयति प्र+णी किप्। चारे शब्दर०।
हितावली स्त्री हितम् आवहयति आ+वह-इन् ङीप्। ओषधिभेदे अमरः। [कारिञि स्त्रियां ङीप्।
हितैषिन् त्रि० हितमिच्छति इष-णिनि। हितेच्छा-
हितोपदेश पु० हितस्य इष्टसाधनस्य उपदेशः। १हितस्य उपदेशे विष्णुशर्मकृते २नीतिग्रन्थभेदे च।
हिन्ताल पु० हीनस्तालो यस्मात् पृषो०। (हेँताल) वृक्षे अमरः "हिन्तालो मधुरास्तुरश्च कफकृत् पित्तदाहनुत्। श्रम श्वापहारी च शिशिरो वातदोषकृत्" राजनि०।
हिन्दोल पु० हिल्लोल+घञ् पृषो०। १आवणशुक्लपञ्चदिवसे दोलनबन्धेन भगवतो दोलनरूपे २उत्सवभेदे ३रागभेदे च सङ्गीतद०। ४दोलायां स्त्री स्वार्थे क। यानभेदे जटा०।
हिन्दु पु० हीनं दूषयति दुष+डु पृषो०। जातिभेदे। "पश्चिमाम्नायमन्त्राणु प्रोक्ताः पारसभाषया। ओङ्कारपदतागीतिर्येषां संसाधनात् कलौ। पञ्च स्नानाः सप्तशीरा नव शाक्ता महाबलाः। हिन्दुधर्मप्रचोत्पारो जायन्ते चक्रवर्त्तिनः। हीनञ्च दूषयत्येव हिन्दुरित्युच्यते प्रिये!। पूर्वाम्नाये नवशतं षड्शीतिः प्रकीर्त्तिताः। फिरिङ्गभाषया मन्त्राणेषां संसाधनात् कलौ। अधिपा मद्रकानाञ्च संग्रामेष्वपराजिताः। इत्येता नवभट्पञ्च लक्षं लाचापि भाविनः" मेरुतन्त्रे २१प०। अप्रमाणमिदम्।
हिम न० हि-मक्। १आकाशप्रभृते जलकणे २शीतलवस्तुमात्रे त्रि० अमरः। ४कच्छ्यां ५रेवत्यां ६भद्रसुतायाम् ७नागरसुतायां ८पृक्कायां ९वर्षिकायां च स्त्री राजनि०। १०अयनद्वयपौषमासात्मके ऋतुभेदे ११चन्द्रमण्डले पु० हेमच० १२कर्पूरे पु० राजनि०।
हिमक पु० हिमेन आयति कै-क विकल्पितदीर्घे राजनि०।
हिमकर पु० हिमः करः किरणो यस्य हिमं करोति निषेधात् कृ-अच् वा। १चन्द्रे २कर्पूरे च राजनि०। हिमंकिरणादयोऽस्त्रियाम्।
हिमकूट पु० हिमस्य कूट यत्र। १शिशिरर्त्तौ राजनि० हिमप्रचुरं कूटमस्य। २हिमगिरौ हिमालयपर्वते।
हिमगिरि पु० हिममयो गिरिः हिमप्रधानो वा गिरिः। हिमालयपर्वते हिमपर्वतादयोऽस्त्रियाम्।
हिमज पु० हिमात् हिमालयात् जायते जन-ड। १मैनाकपर्वते। २पार्वत्यां ३शठ्यां स्त्री मेदि०। हिमे हिमकाले जायते जन-ड। ४ओषध्यां लतायां स्त्री राजनि०।
हिमभक्षिट पु० भक्षि दृन् इत०। कुज्झटौ हारा०।
हिमतैल पु० हिमवीर्य्यं तैलम्। कर्पूरजाते तैले राजनि०।
हिमदुग्धा स्त्री हिमवीर्य्यकरं दुग्धमस्याः। ओषध्याम् राजनि०।
हिमदुर्दिन न० हिमहेतुकं दुर्दिनम् शाक०। हिमपातेन दुःखकरे दिने कुज्झटिकायुक्तदिने त्रिका०। [राजनि०
हिमद्रुम पु० हिमप्रधाने जायमानः द्रुमः। निम्बवृक्षे
हिमप्रस्थ पु० हिमः शीतलः प्रस्थो यस्य। हिमालयपर्वते हेमच०। [राजनि०।
हिमबालुक पु० हिममयो बालुकेव अंशो यस्य। कर्पूरे
हिमबालुका स्त्री हिमस्य बालुकेव। कर्पूरे अमरः।
हिमवत् पु० हिमानि प्राचुर्य्येण सन्त्यस्य मतुप् मस्य वः। हिमालयपर्वते हेमच०।
हिमवत्सुत पु० इत०। १मैनाकपर्वते २गङ्गायाम् ३उमायाञ्च स्त्री। "गङ्गा हिमवतो जज्ञे सर्वलोकैकपावनी। स योगाग्निबलाद्देहं लेभे पुत्रीं महेश्वरीम्" देवीपु०१२अ०।
हिमशर्करा पु० हिमप्रधाना शर्करा शा०त०। खण्डनाख्ये राजनि०।
हिमशैल पु० हिमप्रधानः शैलः। हिमालये।
हिमशैलजा स्त्री हिमशैलाज्जायते जन-ड। १उमायां शब्दर० २गङ्गायाम्। [(बरफ) पदार्थे च अमरः।
हिमसंहति स्त्री इत०। १हिमसमूहे २हिमेन कृतसङ्घाते
हिमहासक पु० हिमं हसति शीतवीर्य्यत्वात् हस-ण्वुल्। हिमालयवृक्षे जटा०। [राजनि०।
हिमांशु पु० हिमा अंशवोऽस्य। १चन्द्रे अमरः २कर्पूरे च
हिमांश्वभिख्य न० हिमांशोरिवाभिख्या शोभा यस्य। रौप्ये हेमच०। तस्य द्युतिशुभ्रत्वात् तथात्वम्।
हिमागम पु० हिमस्यागमो यत्र। हेमन्ते अयनद्वयपौषमासात्मके ऋतौ राजनि०।
हिमाद्रिजा स्त्री हिमाद्रौ हेमाद्रेर्वा जायते जन-ड। १शोरिण्यां राजनि०। २पार्वत्यां ३गङ्गायाञ्च।
हिमाद्रितनया स्त्री इत०। १दुर्गायां २गङ्गायाञ्च हिमाद्रिसुतादयोऽस्त्रियाम्। ३मैनाके पु०।
हिमानी स्त्री हिमानां संहतिः हिम+ङीप् आनुक् च। हिमसमूहे अमरः "आगता वत जरेव हिमानी" भट्टिः
हिमारति पु० इत०। १सूर्य्ये २वह्नौ मेदि० ३अर्कवृक्षे ४चित्रकवृक्षे च।

हिमालय पु० हिमानामालयः। १हिमवत्पर्वते त्रिका०। हिमप्रधान आलयो यस्य। २शुक्लखदिरे शब्दच०। ३भव्यानामलयत्वात् स्त्री राजनि०। स च नगः भारतवर्षस्य सीमापर्वतः। जम्बुद्वीपशब्दे दृश्यम्। [राजनि०।

हिमाज न० हिमकाले व्यूत्-जायते जन-ड। चन्दने

हिमावती स्त्री हिमं हिमवीर्य्यं विद्यतेऽस्य सेवने मतुप् मस्य वः संज्ञायां दीर्घः। स्वर्णक्षीर्य्याम् अमरः।

हिमाह्वया स्त्री हिमं हिमवीर्य्यमाह्वयति या+ह्वे-अच्। स्वर्णजीवन्त्याम् राजनि०। [कपिकच्छ्वाख्यायाम् राजनि०।

हिमोत्तरा स्त्री हिमसुत्तरं यस्याः सेवने शीतवीर्य्यकरत्वात्।

हिमोत्पन्ना स्त्री हिमे उत्पन्ना। यावनाल्याम् राजनि०।

हिमोद्भवा स्त्री हिमे तत्प्रधानस्थाने उद्भवति भू-भू-अच्। शठ्याम् राजनि०। [मेदि०।

हिरण न० हृ-ल्युट् नि०। १रेतसि २स्वर्णे ३वराटके च

हिरण्मय त्रि० हिरण्यात्मकम् मयट् नि०। १हिरण्यात्मके स्त्रियां ङीप्। "हिरण्मयी शालवतेव लक्ष्मा" भट्टिः। जम्बुद्वीपे नववर्षमध्ये २वर्षभेदे न० त्रिका०। "उत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजन पृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरोत्तरं दशांशाधिकांशेन दैर्घ्ये एव भवन्ति" भाग० ५।१६अ०।

हिरण्य न० हिरण्यमेव स्वार्थे यत्। १सुवर्णे २धुस्तूरे अमरः। ३रेतसि शब्दर०। ४द्रव्ये ५वराटके ६शब्दे ७मानभेदे ८कलायभेदे मेदि० ९रजते १०धने च।

हिरण्यकशिपु पु० दैत्यविशेषे। स तु कश्यपात् दित्यां जातः "दित्याः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतम्। हिरण्याक्षस्य दुर्बुद्धे हिरण्यकशिपुस्तथा" "हिरण्यकशिपु दैत्यश्चचार परमं तपः। ततो वर्षसहस्राणि निराहारो ह्यधःशिराः। तं ब्रह्मा छन्दयामास दैत्यं तुष्टो वरेण तु। सर्वेश्वरत्वं वव्रे स यत्तत्स्थैर्येण दिवा निशम्। अहं सर्वं विनिर्जित्य सर्वदेवत्वमाप्नुयतः। ब्राह्मणादिगुणैश्वर्य्यमेव मे दीयतां वरः। तेनैवमुक्तो ब्रह्मा तु तस्मै दत्त्वा यथेप्सितम्। दत्त्वा चास्य सभां दिव्यां तत्रैवान्तरधीयत। हिरण्यकशिपुर्दैत्यः श्लोकैर्गीतः पुरातनैः। राजा हिरण्यकशिपुर्दैत्यो यां यां निषेवते। तस्यां तस्यां नवश्चक्रुर्देवता ऋषिभिः सह। एवंप्रभावो दैत्योऽभूत् हिरण्यकशिपुः पुरा। स्वयमग्निश्च चन्द्रश्च वायुरिन्द्रो जलं स्वयम्। भूत्वा चकार राज्यं स मन्वन्तरषट्कम्। तस्याभीत नरसिंहस्तु स्वल्पचिह्नः पुरा किल। नखैस्तेन विनिर्भिन्नो नार्द्रशुष्का नखाः स्मृताः" वह्निपु०।

हिरण्यकशिपुहन् पु० हन-क्विप् तुट्। विष्णौ।

हिरण्यकामधेनु स्त्री विधानेन हिरण्यप्रचिता कामधेनुः। तुलादिषोडशमहादानमध्ये दानार्थं हिरण्मयेन कल्पितायाम् १धेनौ उपचारात् २तद्दाने च। तद्दानविधिः "अथातः संप्रवक्ष्यामि कामधेनुविधिं परम्। सर्वकामप्रदं नृणां सद्यःपातकनाशनम्। लोकेशावाहनं तद्वोमः कार्य्योऽधिवासनम्। तत्रापुरुषसूक्तं कुर्य्यात् कुण्डमण्डपवेदिकाः। स्रुक्स्रुवे कारयेत् कुर्य्यात् गुरुरेव समाहितः"। कुण्डमण्डपवेदिका इत्युपलक्षणम्। दृष्टं हि दैवकालदृष्ट्यास्त्राग्निषादिपूजाग्राह्मणवाचनगुरुऋत्विग्वरणमधुपर्कदानवेदिकोपरिचक्रलेखनचतुर्वर्णितानतोरणपताकादिकं सर्वं सत्स्वपुराणोक्तवापुरुषदानविधिवत् वेदितव्यम्। स्रुक्स्रुवे कारयेदिति, एकाग्निमत्करणं व्याख्यातम्। "काञ्चनस्यातिशुद्धस्य धेनुं वत्सञ्च कारयेत्। उत्तमा पलसाहस्रैरुत्तमैर्न तु मध्यमा। कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता। अस्तिसङ्ख्यपलादूर्द्धमशक्तोऽपीह कारयेत्"। अत्र यद्यपि वत्सपरिमाणमनुक्तं तथापि कामधेनुविधानवत् तत्काञ्चनचतुर्थांशेन वत्सः कल्पनीयः। समस्तधेनुपरिकल्पनिष्कृष्टवत्सनिर्माणव्यामिश्रदर्शनादिहापि धेनुदानत्वाविशेषात् तथैव निश्चीयते। तथा च गुरुधेन्वादिषु "तस्य तुर्य्यांशेन वत्सः स्यादिति" तत्र तत्र वक्ष्यते। "वेद्यां कृष्णाजिनं न्यस्य गुडप्रस्थसमन्वितम्। न्यसेदुपरि तां धेनुं सहारत्नैरलङ्कृताम्। कुम्भाष्टकसमोपेतां नानाफलसमन्विताम्"। कल्पतरुदाने, प्रस्थो व्याख्यातः। "सहारत्नानि पद्मरागप्रभृतीनि, "वत्सं दत्त्वा तु विन्यसेदिति" क्वचित्पाठः, नानाफलानि मागधबार्ताकस्त्रीपुरुषप्रभृतीनि शोभनानि कल्पतरुदानोक्तानि। "तथाष्टादश धान्यानि समन्तात् परिकल्पयेत्। दद्यादष्टौ एकं तदन्नानाफलसमन्वितम्। भाजनं चासनं तद्वत् साच्छादनकं तथा"। अष्टादश धान्यानि परिभाषायां दृष्टव्यानि नानाफलानि मातुलिङ्गादीनि। "कौशेयवस्त्रद्वयसम्युक्ताम् दीपातपत्राभरणाभिरामाम्। सचामरां कृष्णजिनीं सघण्टां गायत्रिकामाहुकरौप्यदोह्याम्।

रत्नैश्च सर्वैः परितोऽभिजुष्टां हरिद्वा पुष्पफलैरनेकैः। व्रीव्राजिकुसुम्भकुशर्करोभिः वितानकं चोपरि पञ्च-वर्णम्। स्नातस्ततो मङ्गलवेदघोषैः प्रदक्षिणीकृत्य चतुष्पथस्थः। व्याहारयेत् ताक्ष्यड़घेनुमन्त्रैः द्विजाय दद्यादथ दर्भपाणिः" हेमा० दा०मत्स्यपु०। [हेमच०।

हिरण्यकोष पु० हिरण्यस्य कोष इव। कृताकृतस्वर्णरौप्ये

हिरण्यगर्भ पु० हिरण्यं स्वर्णमयाण्डं गर्भ उत्पत्तिस्थानमस्य। १चतुर्मुखे ब्रह्मणि तस्य हैमाण्डप्रभवत्वात्तथात्वम् "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः" मनुः। तुलादिषोड़श-महादानमध्ये दानार्थं स्वर्णादिना कल्पिते २हिरण्यगर्भाख्ये पात्रे ३उपचारात्तद्दाने ४शालग्राममूर्त्तिभेदे च शालग्रामशब्दे दृश्यम्। तस्य दानविधिश्च हेमा०दा०मत्स्यपु० "अथातः संप्रवक्ष्यामि महादानमनुत्तमम्। हैम्ना हिरण्यगर्भाख्यं महापातकनाशनम्। पुण्यं दिनमथासाद्य तुलापुरुषदानवत्। कृत्विग्मण्डपसम्भारभूषणाच्छादनादिकम्। कुर्यादुपोषितस्तद्वल्लोकेशावाहनं बुधः। पुण्याहवाचनं कृत्वा तद्वत् कृत्वाधिवासनम्"। अत्र देशकालौ तद्विधाङ्गधिवादिपूजा ब्राह्मणवाचनगुरुकृत्विग्वरणमधुपर्कदानकुण्डमण्डपवेदिसम्भारहोमाधिवासनादि-सर्वं हिरण्यगर्भादिषोड़शमहादानप्रकृतिभूतं मत्स्यपुराणोक्ततुलापुरुषदानविधिना वेदितव्यम्। "ब्राह्मणैरानयेत् कुण्डं तपनीयमयं शुभम्। द्रोणप्रत्यङ्गुलोच्छ्रायं हैमपङ्कजगर्भवत्। त्रिभागहीनविस्तारं प्रशस्तं सुरजाकृति"। कुण्डमिति, हिरण्यगर्भाख्यं पात्रं, तपनीयमयं, स्वर्णमयं हैमपङ्कजम् तदेव नाभिशब्दवाच्यं, त्रिभागहीनविस्तारमिति, अष्टाचत्वारिंशदङ्गुलविस्तारमित्यर्थः। सुरजाकृति, षट्कृताकृति। घाज्यक्षीरातिपूरितमिति क्वचित्पाठः। तत्र घृतक्षीरे तुल्यपरिमाणे, यद्यपि घातिपूरितमित्युच्यते तथापि यजमानप्रवेशेन यथा तन्न बहिरुच्छ्रयति तथा पूरणीयम्। "दशान्नानि सरत्नानि दात्रं स्रुचौ तथैव च। हैमनालं सपिटकं बर्हिरादित्यसंयुतम्। तथैवावरणं नाभेरुपवीतञ्च काञ्चनम्। पार्श्वतः स्थापयेत् तद्वद्धैमदण्डं कमण्डलुम्"। दशान्नानि, दशखण्डानि, अभ्राणीति क्वचित्पाठः। तानि काञ्चनानि अभ्राकारतया, अभ्राणीति। अभ्रं खनिलमिति केचित्, रत्नानि पञ्च प्रसिद्धानि, सपिटकं, अक्षतान्वितं बर्हिरिति। हैमकुण्डाद् बाह्यप्रदेशे पार्श्वतः स्थापयेदित्यनेन सम्बन्धः। बर्हिभास्करसंयुतमिति च पाठान्तरम् "बर्हिभास्करयोर्मध्यं ब्रह्माण्डदाने वक्ष्यते। बर्हिभाग्यसंयुतमिति, वा पाठ तदा भाग्यपः वरुणः"। तद्भ-च्चणमपि तदैव, नाभेरावरणमिति, नाभ्यावरणार्थं सौवर्णं वस्त्रं दात्रादीन्यपि सुवर्णमयान्येव कार्याणि। "पद्माकारं विधानं स्यात् समन्तादङ्गुलाधिकम्। सच्छालो-समोपेतं पद्मरागदलान्वितम्। तिलद्रोणोपरिगतं वेदी-मध्ये ततोऽर्चयेत्"। द्रोणः परिभाषायां व्याख्यातः। इह खलु हिरण्यगर्भनिर्माणसुवर्णपरिमाणज्ञानान्नानात् यावता यजमानस्य प्रवेशावारणोपयिकं कुण्डं भवति तावता घटनीयं, तच्च वेदिकामध्ये लिखितचक्रस्योपरि तिलद्रोणं निधाय तदुपरि संस्थाप्य पूजयेत्। अथ तुलापुरुषदानतद्विधिवासनदिनादन्येद्युर्ब्राह्मणवाचनं विधाय पूर्णाहुतिप्रभृतिकर्मशेषसमाप्तिं कुर्यात्। ततश्च कुण्डसमीपवर्त्तिकलशजलैः पूर्ववदभिषेकः, तदुच्यते। "ततो मङ्गलशब्देन ब्रह्मघोषरवेण च। सर्वौषध्योदक-स्नानं स्नापितो वेदपुङ्गवैः"। सर्वौषध्यः, व्याख्याताः, "शुक्लमाल्याम्बरधरः सर्वाभरणभूषितः। दक्षसञ्चारवे-न्नान्तं गृहीतकुसुमाञ्जलिः। नमो हिरण्यगर्भाय हि-रण्यकवचाय च। सप्तलोकगुरोऽध्यक्ष! जगद्धात्रे नमो नमः। भूर्लोकप्रमुखा लोकास्तव गर्भे व्यवस्थिताः। ब्रह्मा-दयस्तथा देवा नमस्ते विश्वधारिणे। नमस्ते भुवनाधार! नमस्ते भुवनाश्रय!। नमो हिरण्यगर्भाय गर्भे यस्य पितामहः। यतस्त्वमेव भूतात्मा भूतेभूते व्यव-स्थितः। तस्मात् मामुद्धरार्तेशदुःखसंसारसागरात्। एवमामन्त्र्य तन्मध्यमाविश्याऽऽस्ते षड्ङ्गसुखः। सृष्टिन्यां परिसंघट्ट्य धर्मराजचतुर्मुखौ। जानुमध्ये शिरः कृत्वा तिष्ठेदुत्तानपङ्कजम्"। धर्मराजोऽत्र सुवर्णमयः, तच्च-त्वारश्च तुलापुरुषेऽभिहितं चतुर्मुखोऽपि सौवर्णः, तच्च-त्वारं ब्रह्माण्डदाने वक्ष्यते। तत्र दक्षिणसुतौ धर्मराजः, वामसुतौ चतुर्मुख इति। "गर्भाधानं पुंसवनं सीमन्तो-ज्जयनं तथा। कुर्यात् हिरण्यगर्भस्य ततस्ते द्विजपुङ्गवाः"। अवलोकनमत्र विधेयं, एतेषु, गर्भादानादिषु वक्ष्य-माणेषु जातकर्मादिषु, मन्त्रयुक्तमनुध्यानमात्रमाचरणीयम् "गीतमङ्गलघोषेण गुरुं सन्तोषयेत् ततः। जात कर्मादिकाः कुर्यात् क्रियाः षोड़श चापराः"। ताश्चा-भिधीयन्ते। जातकर्म१ नामकरणं२ निष्क्रमणं३ अन्न-प्राशनं४ चूड़ाकर्म५ उपनयनं६ गोदानं७ पाणिग्रहणं८ ऐन्द्रं

आग्नेयंऽ सौम्यं१०इति,चत्वारि४ वेदव्रतानि सोदानं१५ केशान्ता१६श्चेति द्वादश,पूर्वोक्तत्रय इत्युक्तेषु षोडशत्वम् । "कृत्वोदकञ्च गुरवे दत्त्वा सम्यक् समाहितः । नमो हिरण्यगर्भाय विश्वगर्भाय ते नमः । चराचरस्य जगतो बीजभूताय वै नमः । मन्त्रोऽयं जनितः पूर्वं सर्व्वधर्म्मा-द्विजोत्तमैः । स्नानमन्त्रवारेण दिव्यदेहो भवाम्यहम् । चतुर्भिः कलशैर्भूयस्तत्ते द्विजपुङ्गवाः । स्नानं कुर्य्युः प्रसन्नाश्च सर्व्वाभरणभूषिताः" । कलशैः कुण्डसमीप-स्थितैरेव, स्नानं कुर्य्युर्यजमानस्येति शेषः "देवस्यत्वेति मन्त्रेण स्थितस्य कनकासने । यद्य जातस्य तेऽङ्गानि अभिषेच्यामहे वयम् । दिव्येनानेन वपुषा चिरञ्जीव सुखी भव । ततो हिरण्यगर्भं तं तेभ्यो दद्याद्विचक्षणः" ।

हिरण्यनाभ पु० हिरण्यं नाभौ यस्य अच्समा० । मैनाक-पर्व्वते हेमच० ।

हिरण्मय हिरण्यस्य विकारः तदात्मकं वा मयट् वेदे निपा-तात् मलोपः । १हिरण्यात्मके २सुवर्णविकारे च "हिर-ण्मयेन सविता रथेना" यजु० । ४१अ० सूर्य्यमन्त्रः "अथ य एष हिरण्मयः पुरुषो दृश्यते" छान्दो० उ० ।

हिरण्यरेतस् पु० हिरण्यं रेतो यस्य । १वह्नौ २चित्रक-वृक्षे च अमरः । आग्नेयरेतसशब्दे दृश्यम् । ३सुवर्णे मेदि० ४सुवर्णवृक्षे पृषो० टाप् ।

वह्नेस्तन्नामकारणं यथा "यत्पीतं वीतिहोत्रेण वीर्य्यं त्यक्तं पिनाकिना । तेनाक्रान्तोऽभवत् ब्रह्मन् ! मन्तेजा हुताशनः" । "हुताशनोऽपि च मयाद्य यत्र तत्र परि-भ्रमन् । पञ्च वर्षसहस्राणि क्षय्यासं हव्यभुक् ततः । मांसमस्योनि रक्तानि मेदोमज्जत्वचस्तथा । रोमाणि चास्थिकेशाद्याः सर्व्वे जाता हिरण्यवयाः । हिरण्य-रेता लोकेऽस्मिन् विख्यातः पावकस्ततः" वामनपु० ५४अ० ।

हिरण्यवर्णा स्त्री हिरण्यस्येव वर्णो यस्याः । १नदीभेदे हेमच० २त्रैभक्तुन्यवर्णयुते त्रि० "हिरण्यवर्णां हरिणीम्" श्रीसू० ।

हिरण्यवाह(हु) हिरण्यं वाहयति प्रापयति भक्तान् हिरण्यवर्णो वाहुरिव वा यस्य । १अग्नौ २शोणे नदभेदे च अमरः ।

हिरण्याक्ष पु० कश्यपस्य पुत्रे दैत्यभेदे । हिरण्यकशिपुशब्दे दृश्यम् । स च वराहरूपेण विष्णुना हतः । "हतो हिरण्यकशिपुः हरिणा सिंहरूपिणा । हिरण्याक्षो धराद्वारे विस्तृता शौकरं वपुः" भाग० ७।१अ० ।

हिरण्याण्ड पु० हिरण्यमण्डनिर्म्मितोऽण्डः । तुलादिषोडशमहा-दानमध्ये दानार्थं स्वर्णादिना १कल्पितेऽण्डे २तद्दाने च । "अथातः संप्रवक्ष्यामि हिरण्याण्डविधिं परम् । यस्य प्र-साद्दुःखमनन्तफलमश्नुते । पुण्यं तिथेऽथ सदा कृत्वा ब्राह्मणयाचनम् । लोकेशावाहनं कुर्य्यात् तत्पुरुष-दानवत् । कृत्विगमण्डपसम्भारभूषणाच्छादनादिकम् । कल्पयेत्कारयेत्कुर्य्याद्वा मवाजिभक्ष बुधः" इत्यादि-शब्देन देशकालहविष्यान्नशिवादिपूजा गुरुकृत्यस्वरूप-मधुपर्कदानवेदिकोपरिचक्रलेखनवितानतोरणपताकाधि-वासनादि मत्स्यपुराणोक्ततुलापुरुषदानविधिना कर्त्तव्यते, कल्पयेत्कारयेदिति, व्याख्यातं, "स्थापयेद्वेदिमध्ये तु कृष्णाजिनतिलोपरि" कृष्णाजिननिक्षिप्तद्रोणपरिमित-तिलोपरीति विज्ञेयम् । "कौशेयवस्त्रसंवीतं कारयेद्वे-मवाजिनम् । शक्तितस्त्रिपलादूर्द्धं यावद्दशपलाद्बुधः । पादुकोपानच्छत्रचामरासनभाजनैः । पूर्णशय्याष्टको-पेतं माल्यैश्चन्दनसंयुतम् । शय्यां सोपस्करान्तर्हेमार्त्त-रूपसंयुतम्" । शय्योपस्करा विविधास्तरणोपधानवस्त्र-फलपुष्पकुङ्कुमकर्पूरागुरुचन्दनताम्रोलदर्पणकङ्कतिकाचा-मरव्यजनासनपतदुष्णहस्थितपात्रासिसुद्रिकोपानद्युगल-ताम्रघटिकादिजलपात्रदीपिकावितानादयः । मार्त्तरूप-संयुतानिति,शय्योपस्करस्य" सौवर्णत्वं कुर्य्यादित्यर्थः । कृत्यकल्पतरुकं ब्रह्माण्डदाने "ततः सर्व्वौषधि-स्नानस्नापितो वेदपुङ्गवैः । इममुच्चारयेन्मन्त्रं गृहीत-कुशमञ्जलिः" । इहापि पूर्वेद्युरधिवासनं विधाय द्वितीयदिवसे पूर्ववत् पुण्याहवाचनादिपूर्णाहुतिपर्य्यन्तं कर्म, गुरुः समापयेत् । अथ सर्व्वौषधिजलस्नातः शुक्ला-म्बरो यजमानस्त्रिःप्रदक्षिणीकृत्य वक्ष्यमाणमन्त्रमुदी-रयेत् । "नमस्ते सर्व्वदेवेश ! वेदाहरणसम्भव ! । वासिरू-पेण मामस्मात् पाहि संसारसागरात् । त्वमेव सप्तधा भूत्वा छन्दोरूपेण भास्करम् । यस्मात् भासयसे लो-कानतः पाहि सनातन ! । एवमुच्चार्य्य गुरवे तमस्मै विनिवेदयेत् । दत्त्वा पापक्षयाद्ब्रह्मलोकमभ्येति शाश्व-तम् । गोभिर्विभवतः सर्व्वानृत्विजश्चाभिपूजयेत् । सर्व-धान्योपकरणं गुरवे विनिवेदयेत् । सर्वं शय्यादिकं दत्त्वा मुक्तीतात्मैव हि । पुराणश्रवणं तद्वत् कार-येद्ब्रह्मलोकानादत्त" । दानवाक्यञ्च पूर्ववदनुसन्धेयम्, अनु-त्तदक्षिणेषु सुवर्णं दक्षिणेति, यथाशक्ति सुवर्णदक्षिणा, विभवतः स्वविभवानुसारेण सर्वान् सदस्यादीनृत्विजश्च गोभिः पूजयेत्, सर्वधान्योपकरणञ्चेति विनियोगात्

पूर्वं धान्यासादने गम्यते, गुरवे निवेदयेदिति, स्वल्प द्रव्यदाने व्याख्यायैव स्वयं प्रदाय ऋत्विग्भ्यो यथाशक्ति सुवर्णादि दद्यात्। सङ्कल्पवाक्यादिद्रव्यदाने तु प्रकृतिवद्व्यवस्था, स्वस्वतरेष्वेकाग्निष्वेतेऽपि द्रष्टव्या" हेना० दा०

हिरण्याश्वरथ पु० हिरण्येन निर्मितः अश्वः तद्युक्तरथः। तुलादिषोड़शमहादानमध्ये दानार्थं सुवर्णादिना १कल्पिते सुवर्णमयाश्वयुक्तरथे २तद्दाने न०। तद्विधिर्यथा "अथातः संप्रवक्ष्यामि महादानमनुत्तमम्। हिरण्याश्वरथं नाम महापातकनाशनम्। पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम्। वेदेशवाहनं कृत्वा तुलापुरुषदानवत्। ऋत्विग्भ्यश्चोपसम्भारभूषणाच्छादनादिकम्"। तुलापुरुषदानवदिति, वत्सपुराणोक्ततुलापुरुषदानवदेवेतिकर्त्तव्यम्, आदिशब्दात्रापि पूर्ववदेव व्याख्या "कृष्णाजिने तिलान् कृत्वा कार्त्तनं कारयेद्बुधम्। अष्टाश्रं चतुरश्रं वा चतुरश्रं सकूबरम्। इन्द्रनीलेन कुम्भेन ध्वजरूपेण संयुतम्। लोकपालाष्टकोपेतं पद्मरागदलान्वितम्"। अत्र तिलानां रथस्य च परिमाणापेक्षायां पुरुषेच्छया नियमः प्रकृतौ परिमाणाश्रवणात्, केचित् तु सन्निधानात् हेमहस्तिरथादिदानस्थितं तिलानां द्रोणपरिमाणत्वमिह वदन्ति। कूबरं युगाधारकाष्ठम्। ध्वजो दण्डः, स च रथस्य सौवर्णत्वात् सौवर्ण एव तथा चोपरिस्थितेन इन्द्रनीलमणिमयेन कलशेन युक्तः कर्त्तव्यः। लोकपालाश्चाष्टौ अस्त्रशस्त्रोद्यतकराः कर्त्तव्याः। "चत्वारः पूर्णकलशा धान्यान्यष्टौ दशैव तु। कौशेयवस्त्रसंयुक्तस्तरिष्टादितानकम्। माल्येक्षुकलशंयुक्तं पुरुषेण समन्वितम्। यो यद्ब्रूयात् पुमान् कुर्यात् स तद्भ्यो धिवासनम्"। तिलानवत् पञ्चधर्त्तं, पुरुष इष्टदेवताकारः सौवर्णरथे स्थापनीयः। यस्तोपानत्पादुकाच्छत्रं। "मोक्षार्थिभिर्नवतः सार्द्धं दद्याच्च शयनासनम्। आभारान्तिवासादूर्द्धं शक्तितः कारयेद्बुधः"। भारः पञ्चसहस्रद्वयम्, एतच्च सुवर्णमानं ध्वजपुरुषलोकपालाश्वचक्ररत्नकलशस्थितस्य वेदितव्यम्। "षष्टिभिरथसंयुक्तं चतुर्भिश्च वाजिभिः। द्वाभ्यामथ युतं दद्याद्वेसिंहध्वजान्वितम्", हेसेन सिंहाङ्कितेन युक्तमिति षडश्वपक्षे, चतुरश्वपक्षे च इन्द्रनीलमयकुम्भो ध्वजे कार्य्यः, अश्वद्वयपक्षे हेमसिंह इति व्यवस्था। "चक्रं रत्नाख्यमो तस्य तुरगस्यावधारिणौ। पुण्यं कालं ततः प्राप्य पूर्ववत् स्थापितो द्विजैः। शुक्लपक्षेश्वरो दद्यादिमं मन्त्रमुदीरयेत्"। हेमा० दा० मत्स्यपुराणोक्तम्।

हिरुक् अव्य० हि-रा०उकिक् रुट् च। १वर्जने २त्यागे नञो० २विनार्थे ३मध्यार्थे ४सामीप्ये च अमरः। ५स्वयमे शब्दच०

हिल भावकरणे तु०प०अक०सेट्। हिलति अहेलीत्।

हिलमोचि(ची) स्त्री हिल-क सच-इत् कर्म० वा ङीष् (हेलेञ्चा) शाके शब्दर० स्वार्थे क तत्रैव शब्दच०। "शोथ कुष्ठं कफं पित्तं हरते हिलमोचिका" भावप्र०।

हिल्ल पुंस्त्री० हिल-लक्। भरद्वारिखगे शब्दच०। स्त्रियां ङीष्

हिल्लोल दोलने चुरा०उभ०सक० सेट्। हिल्लोलयति ते अजिहिल्लोलत् त।

हिल्लोल पु० हिल्लोल-अच्। १तरङ्गे "हृष्टिं कृत्वा स्त्रियः पादौ करास्यां धारयेत् करौ। यदेष ताड़येद्योनिं बन्धो हिल्लोलसंज्ञकः" रतिम० उक्ते २रतिबन्धभेदे। घञ्। ३दोलने।

हिल्लिला स्त्री हल्लिला+पृषो०। मृगशिरानक्षत्रशिरोदेशस्थे पञ्चतारात्मके मृगव्याधे शब्दर०। [त्वोत्।

हिव प्रीणने स्वा० प० सक० सेट् इदित्। हिन्वति अहिन्वीत्।

हिवुक न० हिव-उकक् नि०। लम्बाक्षतुर्थे स्थाने ज्यो०।

हिंस बधे वा चु० उ० पक्षे रुधा० प० सक० सेट् इदित्। हिनस्ति हिंसयति ते अजिहिंसत् त।

ही अव्य० हि-डी। १विस्मये अमरः। २दुःखे ३विषादे ४हेतौ मेदि०। ५शोके च शब्दर०।

हीन त्रि० हा-क्त तस्य नः ईत्वम्। १ऊने २निन्द्ये अमरः। ३अधमे त्रि०। व्यवहारे ४प्रतिवादिभेदे पु० जटा० "अन्यवादी क्रियादेषी नोपस्थायी निरुत्तरः आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः" नारदः

हीनवादिन् पु० कर्म०। "पूर्ववादं परित्यज्य यो ऽन्यवादमुपाश्रयेत्। पुनः। वादमेकमथालम्ब्येत्यो हीनवादी स वै नरः" स्मृत्युक्ते व्यवहारे १थादिभेदे। २मूर्के हेमच०

हीनाङ्ग त्रि० हीनमङ्गं यस्य। स्वभावतो न्यूनाङ्गयुते "हीनाङ्गं विकलाङ्गं च" इति स्मृतिः। स्त्रियां ङीप् सा च। २कटुरोहिण्यां हेमच०। [ताज] भावतः।

हीम्माल पु० हीनस्तालो यस्मात् पृषो०। हिन्तालवृक्षे (हेँ-

हीर न० हृ-क नि०। १वज्रे २हीरके च २अग्नौ ३सर्पे पु० हेमच० ४हारे ५सिंहे च पु० हलायुधः ७तैलाख्ये स्त्री मेदि०। ८पिण्डीनिकायां हेमच० ९काञ्जीकायां तु स्त्री १ जटि० स्वार्थे क। हीरक (हीरा) मणिभेदे शब्दर०। वज्रशब्दे ८४४१ पृ० दृश्यम्।

हीराङ्क पु० हीरमिव दृढमङ्कमस्य । इन्द्रस्य वज्रे शब्दमा० ।
हील न० हो-विस्रंस नाति ना-क । शुक्रे धातौ रेतसि ।
हीलुक न० हिल-उक पृषो० । गौड़ोक्तौ शब्दच० ।
हीही अव्य० ही+हित्वम् । १विस्मये २हास्ये च मेदि० ।
हुड दाहीने अदने च जु० प०सक० अनिट् । जुहोति अहौषीत् जुहाव । प्रीणने च । "जुहुधीह यावकम्" किरा० ।
हुङ्कार पु० हु(ङ्)मित्यव्यक्तशब्दस्य कारः क-घञ् । हुंमित्यव्यक्तस्य प्रतिषेधसूचकशब्दस्योच्चारणे । "मौनव्रतं भङ्गकरं हु(ङ्)कारेणापि नश्यति" इति पुराणम् टीचेमध्योऽपि ।
हुड राशीकरणे सक० मज्जने संघाते च चक० तु० क० प० सेट् । हुड़ति अहुड़ीत् जुहोड़ कदित् चाङि न हुस्वः ।
हुड राशीकरणे भ्वा० आ० सक० सेट् कदित् । हुण्डते अहुण्डिष्ट । [होडते अहोडिष्ट ।
हुड गतौ भ्वा० आ० सक० सेट् कदित् चाङि न हुस्वः
हुड पु० हुड-क । १मेषे हेमच० । चौरनिवारणार्थं भूमौ निखाते २लौहकीलके च ३सेनाव्यूहस्थाने ४रथोपरि विण्मूत्रत्यागार्थस्थानपट्टके च "पुरी समन्तादिहिता सपताका मनोरमा । सचक्रा सहुड़ा चैव सयन्त्रधनका तथा" भा० व० १५ अ० । "चक्राणि योधगम्याः हुडाकटाद्यभस्थानानि भाषायां (बुरुज)संज्ञानि । अन्ये तु विण्मूत्रोत्सर्जनस्थानपट्टकाश्च हुड़ा इत्याहुः । यदाहरन्ति च । "कल्पान्ते हुडपट्टकाश्च रथस्योपरि स्थिरभिः विण्मूत्रस्यर्गुह्यर्थकराटिस्पर्शं यदातः इति" नीलक०
हुडुक्क पु०कु० हुड़-बा०उक्क । १वाद्यभेदे २टाल्यूहस्थे ३मद्यभेदे मेदि० (हुड़क) इति ख्याते ४कपाटदण्डे शब्दर० ।
हुडुत् न०कु०हुड़-उति । १हुडशब्दे २अव्यक्ते शब्दे कामीखो ।
हुडुम्ब पु० कु० हुड-उम्ब । अपचिपिटे शब्दमा० ।
हुण्ड पुंस्त्री०हुड़ि-अच् । १व्याघ्रे २व्याघ्रमुष्करे ३राक्षसे च स्त्रियां ङीष् । ४सूर्खे त्रि० । [अमरः । भावे क । २होमे न० हुत त्रि० हु-क । देवोद्देशेन मन्त्रद्वाराऽग्नौ प्रक्षिप्ते हुतादौ
हुतभुज् पु० हुतं मन्त्रेण प्रक्षिप्तं हुतादि भुङ्क्ते भुज-क्विप् । १अग्नौ २चित्रकवृक्षे च अमरः ।
हुतवह पु० हुतं हुतादिकं वहति प्रापयति देवान् प्रीत्यर्थम् वह-अच् । १अग्नौ हेमच० २चित्रकवृक्षे च अमरः ।
हुताश पु० हुतमश्नाति अश-अण् । १वह्नौ शब्दर० २चित्रकवृक्षे च । ल्यु हुताशनोऽप्यत्र । स च कर्मविशेषविहितयज्ञौ च । "कोटिहोमे हुताशनः" ति० त० ।
हुताशनी स्त्री हुताशनस्तद्दीपनमस्त्यस्या अच् गौ० ङीष् । फाल्गुनपूर्णिमायां होलाकाशब्दे द्रष्टव्यम् ।
हुम् अव्य० हु-डुमि । १स्मरणे २प्रश्ने ३अनुज्ञायां च ४निवारणे मेदि० । "गुरुं हुङ्कृत्य तूष्णीं स्थितः" स्मृतिः ।
हुर्च्छ कौटिल्ये भ्वा० प० सक० सेट् । हुर्च्छति अहुर्च्छीत् हुरुपाटवशात् किपि छन्दोवे हूः हुरो हुर इत्यादि ।
हुल क्षतौ संवरणे च भ्वा० प० सक० सेट् । होलति अहोलीत् ज्वला० हुलः होलः ।
हुलहुली स्त्री हुल-क आभीक्ष्ण्ये द्वित्वम् गौरा० ङीष् । स्त्रीणां मङ्गलध्वनिभेदे (उलुध्वनि) । त्रिका० ।
हुहु(ङ्) क्ष्वे-डु नि० । गन्धर्वभेदे पृषो० ह्रस्वश्च ।
हुङ्कार पु० हुम्+क-घञ् । अवज्ञाहेतुके शब्दभेदे "हुङ्कारेणैव तं भस्म सा चकारास्त्रिका ततः" देवीमा० ।
हुड गतौ भ्वा० आ० सक० सेट् कदित् चाङि न हुस्वः । हुड़ते अहुण्डिष्ट ।
हृत त्रि० हृ-क संप्रसारणम् । आहृते आनीते ।
हृति स्त्री हृ-क्तिन् संप्रसारणम् । आहृतौ अमरः ।
हृन पु० हृ-नक् सम्प्रसारणं च । १म्लेच्छजातिभेदे २तद्वासस्थानभेदे च "हृनवङ्गखसेष्वेव नान्यदेशे कदाचन" व्यो० । ३तत्र प्रचलिते स्वर्णमुद्राभेदे इत्यर्थे । "यवाश्च तुरुष्कस्तु हृनो यवन इत्यपि । लोकवाह्यस्तु यो वालिगवाग्राचारवर्जितः । म्लेच्छः किरात यवर पुलिन्दाद्यास्तु तद्विदा" जटाध० ।
हृम् अव्य० हु-वा०डूमि । १प्रश्ने २वितर्के अमरः ३समतौ ४क्रोधे ५भये निन्दायाम् अवज्ञायाञ्च चक्रवर्त्ती ।
हृर्च्छन न० हुर्च्छ-ल्युट् । कौटिल्ये । [ङीष् ।
हृरु पुंस्त्री० हृ इति रवो यस्य । शृगाले हेमच० स्त्रियां
हृहु(ङ्) पु० गन्धर्वविशेषे शब्दर० ।
हृ हरणे भ्वा०उ०द्वि०अनिट् । हरति ते अहार्षीत् अहृत जहार जह्रे हरिष्यति ते । सख्ये कर्मणि लकारादि । ह्रियते अहारि अहारिषाताम् अहृषाताम् जिहीर्षति ते
अनु+सदृशीकरणे आ० अनुहरते पैलकमस्यः ।
अप+दूरीकरणे अपहरति अपसारयतीत्यर्थः चौर्ये च ।
अभि+आभिमुख्येन हरणे ।
आम्+अभि+पौनः पुन्येन सम्पादने ।
अभि+अव भोजने अभ्यवहरति भुङ्क्ते इत्यर्थः ।
समु+अभि+वि+आ+नैकट्यसम्बन्धसम्पादने ।
अव+दूरीकरणे सैन्यावहारः ।

वि+यम विवादे शयनभोजनादिना संसर्ग उपभोगे च।
आ+भोजने आहारः। नानास्थानस्थितानामेकत्वसङ्कल्पने च
अधि+आ+तर्के अन्यत्रस्थुतपदस्यान्वयार्थमाकर्षणे च।
अभि+आ+आभिमुख्येनाहरणे।
उद्+आ+दृष्टान्ततयोपन्यासे कथने च।
प्रति+उद्+आ=प्रतिरूपतया उपन्यासे।
परि+आ+परित आहरणे [विषयेभ्यो मनसो निवारणे च
प्रति+आ+तन्त्रेण पठितानामेकैकस्य ग्रहणे प्रत्याहारः
वि+आ=कथने शब्दोत्पादकव्यापारे।
सम्+आ=संग्रहे नानास्थानस्थितानामेकत्रोपन्यासे संघाते च
उद्+उत्तोलने उत्क्षेपणे च।
अभि+उद्+आभिमुख्येन उद्धरणे। अभितो वा उत्क्षेपणे।
प्रति+उद्+प्रतिकूलतया प्रातिरूप्येण वा उद्धरणे।
उप+सामीप्येन ज्ञानतीकरणार्थं दाने उपढौकने।
प्रति+उप+प्रतिरूपतया उपढौकने।
नि+नितरां हरणे हिंसानिरूपणे च।
निस्+(र)बहिष्करणे अपसारणे च।
परि+दोषादिनिवारणे।
प्र+ताडने निघाते।
प्रति+प्र+प्रतिरूपतया ताडने।
प्रति+प्रत्येकहरणे प्रतिरूपतया हरणे च।
वि+देशविशेषेण गत्यादिना सन्तोषकरणार्थव्यापारे विहारः।
वि+अति परस्परमेकजातीयक्रियाकरणे आ०।
सम्+आरणे ताडने च। [योजने यथा गुणोपसंहारः।
उप+सम्+एकरणपठितस्य समापने अन्यत्र पठितस्यान्यत्रा

हृ वनात्कारहरणे भ्वा०पर०सक० अनिट् वैदिकः। अहर्त्ति अहार्षीत्। [दयस्थिते वि०।

हृच्छय पु० हृदि शेते शी-अच्। १कामदेवे हेमा०। २हृद्रोगे।

हृच्छूल न० ६त०। शूलरोगभेदे वैद्यकम्।

हृणी लज्जायां कण्ड्वा०आत्म०अक०सेट्। हृणीयते अहृणीयिष्ट "हृणीयते वीरवती न भूमिः" भट्टिः।

हृणीया स्त्री हृणीय-भावे अ। निन्दायाम् अमरः।

हृत्(द्) वि० हृ-क्विप् तुक् च। १हारिणि। पृषो०तस्य दः, हृदयस्य हृदादेशो वा। २हृदये ३ज्ञानसे च न० अमरः।

हृत्कर्म्म पु० ६त०। अभ्यादिहेतुके हृदयकर्म्मणि।

हृत त्रि० हृ-क्त। १अपहृते २स्थानान्तरं गमिते च ३विभक्ते

हृदय न०हृ-कयन् दुक् च। १मनसि २वक्षसि च त्रिका०। हृद एति इण-अच्। परब्रह्मणि "हृदयं तच्चाङ्गृदयम्" ब्रा०उ०

हृदयग्रन्थि पु० हृदयस्य ग्रन्थिरिव। अविद्यास्मितारूपे संसारबन्धे "भिद्यते हृदयग्रन्थिः" इति भागवतम्।

हृदयङ्गम त्रि० हृदयं गच्छति गम-ख मुम् च। १युक्तियुक्ते २मनोहरे त्रि० अमरः "हृदयङ्गमयुक्तिस्तु" भट्टिः।

हृदयस्थान न०हृदयस्य मनसः स्थानम् हृदयरूपं वा स्थानम् वक्षःस्थले हेमच०। [इनि। हृदयिन् तत्रार्थे जटा०

हृदयिक त्रि० हृदयं प्रशस्तं मनोऽस्यास्य ठन्। प्रशस्तचित्ते

हृदयेश पु० ६त०। १भर्त्तरि २भार्य्यायां स्त्री हेमच०।

हृदावर्त्त पु० हृदिस्थ आवर्त्तः। अस्थस्य हृदयस्थे आवर्त्ताकारे रोमावर्त्तभेदे त्रिका०। [हरिव०१६८अ०।

हृदिक पु० स्वयम्भोजात्मजे कृतवर्म्मपितरि यादवभेदे

हृदिकात्मज पु० ६त०। कृतवर्म्मणि यादवे।

हृदिस्पृश् त्रि० हृदि-हृदये स्पृश्यतेऽसौ कर्म्मणि क्विन् अलुक्स०। १हृद्ये मनोज्ञे। कर्त्तरि क्विन्। २मर्म्मस्पृशि दुःखदे च। [क्रमेण तद्देशवासिनि त्रि० कौ०।

हृद्गोल पु०पर्वतभेदे सोऽस्मिञ्जोऽस्य ल। हृद्गोलीय त्रिकाण्डि०

हृद्ग्रन्थ पु० हृद्द ग्रथ्नाति ग्रन्थ-अच्। हृद्ग्रन्थे राजनि०

हृद्य न० हृदि स्पृश्यते मनोज्ञत्वात् हृद्+यत्। १गुडत्वचि (दारचिनि) शब्दर०। २मनोज्ञे त्रि०अमरः। ३हृद्विनाशोषधौ स्त्री। ४वशलक्षान्तभेदे पु० मेदि०।

हृद्यगन्ध न०हृद्यो गन्धोऽस्य। चुकुन्दीरके हेमच०। २बिल्ववृक्षे पु० जटा०। ३जात्यां स्त्री राजनि०। ४तृणभा०। हृद्यगन्धीत्यपि ४चुकुन्दीरके न० राजनि०।

हृद्रोग पु० ६त०। हृदयस्य रोगभेदे हृदामयोऽप्यत्र। भावप्र० तस्य निदानादि तल्लक्षणं चोक्तं यथा "हृद्रोगस्य विप्रकृष्टनिदानमाह "अत्युष्णगुर्वम्ल कषायतिक्तव्यवायाभिघाताध्यशनप्रसङ्गै। वेगविधारणैश्च हृदामयः पञ्चविधः प्रदिष्टः"। प्रसङ्गः सततं सेवा। वेगविधारणञ्च अतिचिन्ता राजभयादिभिरिति। हृदामयः स च पञ्चविधः वातिकः पैत्तिकः श्लैष्मिकः सान्निपातिकः क्रिमिजश्चेति। तस्य संप्राप्तिपूर्वकं लक्षणमाह। "दूषयित्वा रसं दोषा विगुणा हृदयङ्गताः। हृदि बाधां प्रकुर्वन्ति हृद्रोगास्तं प्रचक्षते"। विगुणाः दुष्टाः बाधां दोषभेदेन नानाविधां व्यथाम्। भरतस्त्वौड्रामिति गणदासः। वातिकं हृद्रोगमाह "आयम्यते भारुसजे हृदयन्तुद्यते तथा। निर्भिद्यते दीर्य्यते च स्फोट्यते पाट्यतेऽपि वा"। भारुसजे हृद्रोग इति शेषः। आयम्यते व्यथया विस्तार्य्यते इव। तु-

द्यते सूचीभिरिव विध्यते। निर्मथ्यते मथनेनेव दीर्य्यते करपत्रेण द्विधाक्रियत इव। स्फोट्यते अस्त्रेणेव पाट्यते कुठारेण वृक्षवाक्रियत इव। अथ पैत्तिकमाह हरणोष्मदाहधोषाः स्युः पैत्तिके हृदये क्लमः। धूमायनञ्च मूर्च्छा च स्वेदः शोषो मुखस्य च"। उष्मा शीतगात्रस्यैव शीतवातामिलाषहेतुः किञ्चिदिवोष्णम्। दाहः पार्श्वस्थेन वह्निनेव दुःखहेतुर्गात्रस्य सन्तापः। धोषः कूणनेनेव पीड़ा। हृदये क्लमः हृदयाकुलत्वं ग्लानिर्वा तत्त्वयः। धूमायनम् कण्ठाद्धूमनिर्गमः। क्लेदः किञ्चिदुर्द्रत्वं घटित इव। वातश्लैष्मिकमाह "गौरवं कफसंस्रावोऽरुचिस्तन्द्रोऽग्निमार्दवम्। माधुर्यमपि चास्य बलासायतते हृदि"। बलासायतते हृदि कुपित कफस्थाने गौरवं हृदयस्य। स्तब्धो जड़ता। माधुर्य्यं जलभृतस्येव माधुर्य्यं सुखे। त्रिदोषजमाह "विद्यात्त्रिदोषमप्येवं सर्वलिङ्गसमुदायम्"। क्रिमिजमाह क्रिमयो जायन्ते अस्मिनिति क्रिमिज इति निरुक्तिः। तस्य विप्रकृष्टनिदानपूर्विकां सम्प्राप्तिमाह "त्रिदोषहेतुहृद्रोगे यो दुरात्मा निषेवते। तिलक्षीरगुड़ादींश्च ग्रन्थिस्तस्योपजायते। मर्म्मैकदेशे संक्लेदं रसस्याप्युपगच्छति। संक्लेदात् क्रमयस्तास्य पतन्त्युपहतात्मनः"। मर्म्मैकदेशे हृदयैकदेशे संक्लेदं घटितत्वं रस उपगच्छति। संक्लेदात् रसस्य घटितत्वात् उपहतात्मनः तिलादिहिताहारेण। तस्य लक्षणमाह "उत्क्लेदः क्षीवनस्तोदः मूर्च्छा हृल्लासकस्तमः। अरुचिः ष्ठीवनेत्वं शोषश्च क्रमिजे भवेत्"। उत्क्लेदः वमनमिवोपस्थितम्। शोषो यच्च। हृद्रोगस्योपद्रवानाह "क्लोमसादो भ्रमः शोषो ज्ञेयास्तेषामुपद्रवाः। क्रमिजे तु क्रमीणां ये श्लैष्मिकाणां हि ते मताः"। क्लोम्नः पिपासास्थानस्य सादः शोषः। शोषो मुखस्य। तेषां हृद्रोगाणां, क्रिमिजे तु हृद्रोगे श्लैष्मिकाणां क्रमीणाम् ये उपद्रवा हृल्लासात् स्वयमान्ता विपाकादयस्ते मताः" २कुमारसंभवे मल्लिनाथीयटीका।

हृद्रोगवैरिन् पु० ६त०। अर्जुनवृक्षे शब्दर०।

हृद्वण्टक पु० ६त०। हृदयस्य विभाजके जठरे शब्दर०।

हृल्लास पु० हृदयस्य लासो यत्र हृदादेशः। हिक्कारोगे हेमच०। तेन हि हृदयस्य स्फूर्त्तिरिव भवति।

हृल्लेख पु० हृदयं लिखति स्पृशति लिख-अ हृदादेशः। १ज्ञाने राजनि०। २तर्के त्रिका०। ३तन्त्रोक्ते मन्त्रभेदे च। ४औषधक्वे स्त्री इला०। [चर्दित हृषित्वा हृष्ट्वा हृष्टः।

हृष चित्तोत्साहे भ्वा० पर० अक० सेट्। हर्षति अहर्षीत्।

हृष हर्षे चित्तोल्लासे दि० प० अ० सेट्। हृष्यति हरित् अहृषत् अहर्षीत् ओत् हृष्टोऽस्ति। [हर्षति अहर्षीत्।

हृष मिथ्याकरणे भ्वा० पर० सक० सेट् चदित् क्त्वा वेट्।

हृषित त्रि० हृष-क्त वा० इट्। १प्रीते २विस्मिते ३प्रहृते ४जातरोमाञ्चे च मेदि०। [अमरः।

हृषीक न० हृष-ईकक्। विषयग्राहके चक्षुरादौ इन्द्रिये

हृषीकेश पु० ६त०। विष्णौ अमरः। अन्तर्यामिब्राह्मणे तस्य सर्वेनियन्तृत्वोक्तेः सर्वेन्द्रियप्रवर्त्तकत्वादीश्वरत्वम्।

हृष्ट त्रि० हृष-क्त। १प्रीते २जातहर्षे अमरः। ३जातरोमाञ्चे ४विस्मिते च मेदि०।

हृष्टमानस त्रि० हृष्टं प्रीतं मानसमस्य। हृष्टचित्ते शब्दर०

हृष्टरोमन् त्रि० हृष्टमिव जाताङ्कुरं रोम यस्य। जातरोमाञ्चे पुलकिते त्रिका०। [धरणिः।

हृष्टि स्त्री हृष-क्तिन्। १आनन्दे २हर्षे ३ज्ञाने च

हे अव्य० हा-डे। १सम्बोधने २आह्वाने ३खेदादौ च मेदि०

हेक्का स्त्री हिक्क+पृषो०। हिक्कारोगे हेमच०।

हेठ विघाते भ्वा० प० सक० सेट्। हेठति अहेठीत्।

हेठ भूतौ उत्सृतौ च अक० पवित्रीकरणे सक० तु०प० सेट्। हेठति अहेठीत्। [हेठते अहेठिष्ट।

हेठ बाधने भ्वा० आ० सक० सेट् कदित् चङि न ह्रस्वः।

हेठ पु० हेठ-घञ्। १बाधायाम् २विघाते च मेदि०।

हेड अनादरे भ्वा०आ०सक० सेट् कदित् चङि न ह्रस्वः हेडते अहेडिष्ट।

हेड वेष्टने भ्वा० प० सक० सेट् घटा०। हेडति अहेडीत्।

हेड़ाबुक पु० अश्वविक्रयकारके त्रिका०।

हेति स्त्री हन-करणे क्तिन् नि०। १अस्त्रे २अग्निशिखायां ३शस्त्रक्रिरणे अमरः। ४तेजोमात्रे भरतः ५साधने च श्रीधरः।

हेतु पु० हि-तुन्। १कारणे अमरः २अनुमितिसाधने व्याप्ये ३फले च। हेतुत्वन्तु उत्पादकत्वापकान्यतरत्वम्। मृद्घटो जायते इत्यादौ उत्पादकत्वं पर्वतो वह्निमान् धूमादित्यादौ ज्ञापकत्वं तत्र ज्ञापकमेव लिङ्गशब्देन व्यवह्रियते। ४न्यायावयवभेदे तच्च लिङ्गपरामर्शादकृतीयान्तपञ्चम्यन्तपदस्वार्थं तल्लक्षणन्तु अनुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्यविषयकशाब्दबोधजनकहेतुविभक्तिमच्छब्दत्वम्। हेतु

स्वप्रतिघाटकविभक्तिमध्यायावयवत्वं वा । यदाकारणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा । साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा । प्रतिज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्तिमद्वाक्यत्वं वा" चिन्तामणिः । ४अलङ्कारभेदे अलङ्कारशब्दे ४०८ पृ० दृश्यम् ।

हेतुता स्त्री हेतोर्भावः तल् । १हेतुत्वे कार्य्यात्व्यवहितपूर्वक्षणे नियतकार्य्याधिकरणवृत्तित्वरूपे कारणत्वे २मङ्गतिविशेषे च "हेतुतावच्छेदकस्तथा" इति प्राञ्चः ।

हेतुमत् त्रि० हेतुरस्यास्य मतुप् । कार्य्ये स्त्रियां ङीप् ।

हेत्वपह्नुति अलङ्कारभेदे अलङ्कारशब्दे ४०८ पृ० दृश्यम् ।

हेत्वन्तर गौतमोक्ते निग्रहस्थानभेदे । "अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम्" गौ०सू०तल्लक्षणसूत्रं "पराक्तदूषणोद्दीर्घया तत्रैव हेतौ पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टवचनम् । यथा शब्दोऽनित्यो बाह्येन्द्रियग्राह्यत्वात्घटवदित्युक्ते सामान्येनैकान्तिकत्वेन च पक्षीकृते सामान्यवत्त्वे सतीति विशेषणम् । प्राञ्चस्तु, हेतौ विशेषणदान एव हेत्वन्तरमित्याहुः" गौ०सू०

हेत्वसिद्धि स्त्री असिद्धिभेदे स्वरूपासिद्धिरूपहेत्वाभासभेदे

हेत्वाभास पु० हेतुरिव आभासते आ+भास-घञ्, हेतोर्वा आभासः आ+भास-घञ् । न्यायोक्ते १दुष्टे हेतौ २हेतुदोषे च । स च दोषः पञ्चविधः व्यभिचारः विरुद्धता असिद्धिः सत्प्रतिपक्षता बाधश्च । तादृशदोषेषु सत्सु अनुमितिर्नोदेति । यस्य हि ज्ञानमनुमितिप्रतिबन्धकं स हेत्वाभासः । अत्र हेतुनामाभास इति व्युत्पत्त्या हेत्वाभासपदस्य हेतुदोषपरत्वम् । तल्लक्षणञ्च हेत्वाभासत्वम् तच्च अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् । यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिविरोधित्वं तत्त्वम् । क्वायमानं खलु यदनुमितिप्रतिबन्धकं तत्त्वम् । यादृशकनिश्चयस्य विरोधिविषयतानुयोगित्वेनानुमितावनाकाङ्क्षत्वं मानसज्ञाने वा पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्टहेतुमत्त्वावगाहित्वस्य च द्वयोर्व्यतिरेकस्तत्त्वम् । केचित्तु, यादृशपक्षकयादृशसाध्यकयादृशहेतौ यावन्तो दोषाः सम्भवन्ति तावदन्यान्यत्वमिति प्राहुः" दीधि० । हेतुलक्षणाभावाद्हेतुहेतुसामान्याद्वा तादृशाभासमानः' वा० तत्रा० "पक्षरूपोपपन्नत्वाभावे सति तद्रूपेण भासमानः" मो० दृ० । "पक्षधर्मत्वादीनां पञ्चानां रूपाणां मध्ये एकेनापि रूपेण हीनोहेतुः । सोऽपि कतिपयहेतुरूपयोगाद्हेतुवदवभासमानः" त० भा० । असाधको हेतुत्वेनाभिमतः । यथा वायुर्मेयत्वात् घटादित्यादौ घटो हेत्वाभासः । स च हेत्वाभासः । पञ्चधा सव्यभिचारः । विरुद्धः । प्रकरणसमः । साध्यसमः अतीतकालः" गौ० सू० पर्य्यायान्तरेण हेत्वाभासः पञ्चधा "असिद्धः विरुद्धः । अनैकान्तिकः । प्रकरणसमः । कालात्ययापदिष्टः । पर्य्यायान्तरेणापि हेत्वाभासः पञ्चधा । सव्यभिचारः । विरुद्धः । असिद्धः । सत्प्रतिपक्षितः बाधितः इति ।

हेम न० हि-मन् । १स्वर्णे २धुस्तूरे अमरः ३नागकेशरे राजनि० । ४माषकपरिमाणे च पु०विश्वः ५कृष्णवर्णाश्वे । हृषुधत्ते च पु० ज्यो० ।

हेमकन्दल पु० हेमवर्णं कन्दं लाति ला-क । प्रवाले हेमच०

हेमकान्ति स्त्री हेम्न इव कान्तिरस्याः । दारुहरिद्रायाम् राजनि० । २स्वर्णतुल्यद्युतियुक्ते त्रि० हृत० । ३स्वर्णस्य टीप्पौ स्त्री ।

हेमकार पु० हेम तन्नाम्नं भूषणं करोति क-अण् । स्वर्णकारे वर्णसङ्करजातिभेदे (सेकरा) । [राजनि० ।

हेमकिञ्जल्क न० हेमेव पीतं किञ्जल्कं यस्य । नागकेशरे

हेमकूट पु० हेममयः कूटो यस्य । किंपुरुषवर्षस्थे हिमालयादुत्तरस्थे पर्वतभेदे अमरः । [राजनि० ।

हेमकेतकी स्त्री हेमेव पीतकेतकी । स्वर्णकेतक्याम्

हेमकेलि पु० १अग्नौ शब्दमा० । २चित्रकवृक्षे च [राजनि०

हेमक्षीरी स्त्री हेम इव पीतं क्षीरं यस्याः । स्वर्णक्षीर्याम्

हेमगन्धिनी स्त्री हेम्नः नागकेशरस्येव गन्धोऽस्त्यस्याः इनि ङीप् । रेणुकायाम् गन्धदूव्ये रत्नमा० ।

हेमगिरि पु०हेममयो गिरिः १सुमेरुपर्वते २नैर्ऋतस्थे देशभेदे ब०स० कूर्मविभागशब्दे २१६८ पृ० दृश्यम् ।

हेमगौर पु० हेमेव गौरः पीतः पुष्पेण । १अशोकवृक्षे राजनि० २स्वर्णतुल्यपीते त्रि० [वृक्षे च

हेमज्वाल पु० हेमेव ज्वालायस्य । १अग्नौ शब्दमा० । २चि-

हेमतार न० हेम तारयति उत्कृष्टं करोति तॄ-णिच्-अण् । तत्ये हेमच० ।

हेमदुग्धक पु० हेमवर्णं दुग्धं निर्य्यासोऽस्य कप् । १धुस्तूरे वृक्षे अमरः । २स्वर्णक्षीर्यां स्त्री जटा० ङीष्

भावे तत्वार्थे स्त्री ञटा०टाप् । ङीष् राजनि० ।

हैमदुग्धिन् पु० हेमवर्णं दुग्धं निर्यासोऽस्यास्य इनि । उडुम्बरे वृक्षे शब्दर० [क्षीरे राजनि०४हिमे च माधवः

हैमन न०हि-मनिन् । १स्वर्णे धातौ २शुद्धरे त्रिषरः ३नाग-

हैमन्त पुंन० । हि-झ सुट् च । अग्रहायणपौषमासात्मके ऋतौ कालभेदे अमरः । कथिते शब्दच० ।

हैमन्तनाथ पु० हेमन्ते नाथ्यते याच्यते नाथ-कर्मणि घञ् ।

हैमपुष्प न० हेमेव पीतं पुष्पमस्य । १अशोकवृक्षे २जवापुष्पे च मेदि० । २चम्पकवृक्षे पु० कप् । तत्र लाघे च शब्दच०

हैमपुष्पी स्त्री हेमेव पीतं पुष्पमस्या० ङीप् । १सक्षिप्तायाम् शब्दर० । २स्वर्णजीवन्त्याम् २इन्द्रवारुण्याम् ४सुवल्याम् ५कण्टकार्य्याञ्च राजनि० । संज्ञायां कन् हस्वः । स्वर्ण-यूथिकायाम् स्त्री । [(चँपाकला) राजनि० ।

हैमफला स्त्री हेमेव पीतं पक्वफलमस्याः । स्वर्णकदल्याम्

हैममालिन् पु० हेमेव किरणानां मालाऽस्यास्य इनि । १सूर्य्ये ति० त० । २अर्कवृक्षे च [राजनि०]

हैमयूथिका स्त्री हेमेव योता यूथिका । स्वर्णयूथिकायाम्

हैमरागिणी स्त्री हेम इव रागोऽस्यस्या इनि ङीप् । हरिद्रायाम् त्रिका० ।

हैमल पु० हेम तदर्थं निर्मेयत्वेनाऽस्त्यस्मात्, तद्वर्णं वा लाति ला-क । १कलादे स्वर्णकारे २कषपाषाणे ३कलासे पुंस्त्री० मेदि० स्त्रियां ङीष् ।

हैमलता स्त्री हेमेव पीता लता । स्वर्णजीवन्त्याम् राजनि०।

हैमवल न० हेम्ना वलते शोभते वल-अच् । लौकिके राजनि० हिमवलमित्यपि पाठान्तरं तत्रार्थे हिमहल्य-शुभत्वात्तथात्वम् ।

हैमशुङ्ग पु० हेमेव शुचिः शङ्खोऽस्य । विष्णौ त्रिका० ।

हैमशिखा स्त्री हेमेव पीता शिखा यस्याः । स्वर्णचीर्य्याम् शब्दर० । [तुल्ये रसच० ।

हैमसार न० हेम सारयति निर्मलीकरोति सृ-णिच-अण् ।

हैमहस्तिरथ पु० हेमनिर्मितहस्तियुक्तो रथः । तुलापुरु-षादिषोडशमहादानमध्ये दानार्थं कल्पिते १स्वर्णमय-हस्तियुक्ते हेममयरथे २तद्दाने न० । तद्विधिः हेमा०दा० "अथातः संप्रवक्ष्यामि हेमहस्तिरथं शुभम् । यस्य प्रदानाद्भवनं वैष्णवं याति मानवः । पुण्यत्वं तिथिमथा साद्य तुलापुरुषदानवत् । विप्रवाचनकं कुर्य्याल्लोकेशावा-हनं बुधः । कल्पिरमण्डपसंस्कारभूषणाच्छादनादि-कम् । अनाथ्यु पोषितस्तद्वद् ब्राह्मणैः सह भोजनम्" । इष्टाद्यादिशब्देन देशकालदृष्ट्याद्यादिसङ्ग्रहः कृतः अत्र पुराणोक्ततुलापुरुषस्थितं वेदितव्यम् । उपोषित इति, उपवासाशक्तौ नक्तमपि वेदितव्यम् । "कुर्य्यात् पुष्प-रथाकारं काञ्चनं मणिमण्डितम् । वलभीभिर्विचित्रा-भिश्चतुश्चक्रसमन्वितम् । लोकपालाष्टकोपेतं शिवार्कब्रह्म-संयुतम् । मध्ये नारायणोपेतं लक्ष्मीपद्मसमन्वितम् । पुष्परथः, क्रीड़ार्थो रथः, स च चतुष्काकारेणोपर्य्याच्छा-दितो भवति वलभ्यो लोकपाला अष्टौ । लोकपालब्रह्म-शिवार्कैश्चरणसमं ब्रह्माण्डदाने । मध्यशब्दः पूर्वापरयोर्यो-जयति, शिवादीनामपि स्वस्वोपेजायान्तेनैव निर्देशः । नारायणादिनक्षत्रं पञ्चरात्रात् "नारायणश्चतु-र्बाहुः शङ्खं चक्रं तथोत्तरे । दक्षिणे तु गदापद्म नीलश्रीसूतसन्निभे । वामे श्रीवत्सकौस्तुभा पुष्टिः पद्म-करा परा" इति । "कृष्णाजिने तिलद्रोणं कृत्वा संस्थापयेद्बुधः । तथाष्टादश धान्यानि भाजनाशनच-न्दनैः । दीपिकोपानच्छत्रवृषादुकादर्पणान्वितम् । ध्वजं तु गरुड़ं कुर्य्यात् कूबराग्रे विनायकम् । नानाफल-समायुक्तं उपरिष्टाद्वितानकम् । कौशेयं पञ्चवर्णं च वस्त्रानकुसुमान्वितम् । चतुर्भिः कलशैः सार्द्धं गोभि-रष्टाभिरन्वितम् । चतुर्भिर्हेमसातकुम्भैर्लक्षादामविभू-षितैः । खरूपतः करिभ्याञ्च युक्तं कृत्वा निवेदयेत् । कुर्य्यात् पञ्चपलाद्ध्वं भाराद्यपि शक्तितः" । ध्वजं तु गरुड़ं कुर्य्यादित्यादि, ध्वजो दण्डः । गरुड़लक्षण-मुक्तं नारदीये "उपेन्द्रस्यायतः पक्षौ गुड़ाकेशः कृताञ्जलिः । सव्यजानुनतो भूमौ भृङ्गी च क्षणिक-स्थितः । पक्षिजङ्घो नरश्यावस्थूलनासो नराङ्कः । द्विभुजः पञ्चयुक्तस्य कर्त्तव्यो विनतासुतः" । अथ विना-यकस्य "चतुर्भुजस्त्रिनेत्रस्य कर्त्तव्योऽत्र गजाननः । नागयज्ञोपवीतस्य शशाङ्ककृतशेखरः । दन्तं दक्षकरे दद्याद् दुहितीये चाक्षसूत्रकम् । तृतीये परशुं दद्याच्चतुर्थं मोदकं तथा" । उपर्य्युपरि तयोर्दानादि, देयमिति, कू-बरो व्याख्यातः । वस्त्रानकुसुमं, पुष्पविशेषः कू-र्यौ गरुडमपहरतोतिन्यायात् महाभरेति प्रसिद्धमेव गदन्ते । भारो व्याख्यातः । ध्वजगतदेवताश्च पञ्चपला-दिपरिमितेन रथवत्कृतसुवर्णेनैव निष्पादनीयाः एवं सस्भारानुपकल्प्य पूर्ववदधिवासनं विधाय परदिने पुण्याहवाचनादि सकलं कर्मकाण्डं समाप्य सर्वौषधि-जलैराचार्य्यो यजमानञ्च स्नापनं कुर्य्यात् । "ततो मङ्गल

शब्देन स्थापितो वेदपुङ्गवैः । त्रिःप्रदक्षिणमाहृत्य दण्डौ-तकृतमाञ्जलिः । इममुच्चारयेन्मन्त्रं ब्राह्मणेभ्यो निवेदयेत् । नमो नमः शङ्करपद्मजार्कलोकेशविद्याधरवासुदेवैः । त्वं मेव्यमे देव ! पुराण ! यज्ञतेजोमय सन्दन ! पाहि यस्मात् । यत् तत्परं गुह्यतमं सुरारेरानन्दहेतुर्गुणरूपमन्तः । योगैकमानसदृशोमुनयः समाधौ पश्यन्ति तत्त्वमसि नाथ ! रथेऽधिरूढ ! यस्मात्त्वमेव भवसागरसंभ्रितानामानन्दभाण्डमृतमध्वरपानपात्रम् । तस्मादघौघशमनेन कुरु प्रसादं चामीकरेभरथसाधनसम्प्रदानात्" । मन्त्रेणानेन प्रणम्य यथाशक्ति सुवर्णदक्षिणामुपकल्प्य पूर्ववत् प्रयोगसङ्ख्यं तं गजरथं प्रत्यक्षगजाभ्यां संयुतं ब्राह्मणेभ्यः प्रतिपादयेत्, व्याचार्य्यादीनामर्द्धचतुर्भागादिव्यवस्था तदनुज्ञया चान्येभ्योऽपि दानं, दीनानाथपूरणं चेति, प्रकृतियदाचरणीयं ततः पुण्याहवाचने कृते यजमानो वेदिममीप गत्वा देवतापूजां विदध्यात् । आचार्यस्तु आहृतदेवान् विसर्जयेच्च" ।

हेमाङ्ग पु० हेमेव पीतमङ्गं यस्य । १गरुडे २सिंहे ३सुमेरौ ४ब्रह्मणि मेदि०।५चम्पकवृक्षे शब्दर०। ६विष्णौ च विष्णु स० ७स्वर्णवर्णाङ्गयुक्ते त्रि०। कर्म०। हेमवल्लोऽङ्गे न०।

हेमाद्रि पु० हेममयोऽद्रिः । १सुमेरौ पर्वते अमरः । चतुर्वर्गचिन्तामणिशुक्लाफलादिग्रन्थकारके २विद्वद्भेदे ।

हेमाद्रिजरण पु० हेमाद्रौ जीर्य्यति जॄ-ल्यु । स्वर्णचौर्य्याम् रत्नमा० । हेममारणयोग्ये त्रि० ।

हेमाह्व पु० हेम तद्वर्णमाह्वयते स्पर्द्धते स्ववर्णेन आ+ह्वे-क । १धनचम्पके राजनि० । हेम्न आह्वा आह्वा यस्य । २धुस्तूरे ३नागकेशरे च अमरः ४स्वर्णजीवन्त्यां स्त्री राजनि० ।

हेय त्रि० हा-यत् । त्याज्ये "हेयं दुःखमनागतम्" पात०सू० ।

हेर न० हि-रन् । १हरिद्रायाम् २सुकुटभेदे च ।

हेरम्ब पु० हे शिव रम्बति रबि-अच् अलुक्समा० । १गणेशे अमरः २सिंहे ३शौर्य्यगर्विते त्रि० मेदि० ४बुद्धभेदे पु०त्रिका० ।

हेरम्बजननी स्त्री ६त० । दुर्गायाम् शब्दर० ।

हेरम्बहट्ट पु० दक्षिणस्थे देशभेदे शब्दर० ।

हेरिक पु० हि-इक रुट् च । चरे हेमच० ।

हेरुक पु० हि-उक रुट् च । १बुद्धभेदे २महाकालगणे भेद० ३कामाख्यापीठस्थे शिवलिङ्गभेदे "शिवलिङ्गञ्च तत्रास्ति शिलायां हेरुकाह्वयम् । नदीदक्षिणपूर्वायां नायकं तन्तु पूजयेत्" कालिकापु० ८अ० ।

हेलञ्जी स्त्री हिल-घञ् हेलं क्षिपोति क्षि-ड पृषो० गौरा० ङीष् । हिलमोचिकायाम् शब्दच० ।

हेलन न० हिल-ल्युट् । अवज्ञायाम् शब्दर० ।

हेला स्त्री हेड-अनादरे भावे अ डस्य लः । १अनादरे स्त्रीणां हुङ्कारभावजे "प्रौढ़ेच्छा याऽतिरूढ़ानां नारीणां सुरतोत्सवे । हुङ्कारशास्त्रतत्त्वज्ञैः हेला सापरिकीर्त्तिता" इत्युक्ते २चेष्टाविशेषे । "देहात्मकं भवेत् सत्त्व सत्त्वात् भावः समुत्थितः । भावात् समुत्थितो हावो हावात् हेला समुत्थिता" हाव एव भवेद्धेला व्यक्तं हुङ्कारलक्षकः" चन्द्रच० ३ज्योत्स्नायाञ्च ।

हेलावुक पु० अवविक्रयापजीविनि हारा० ।

हेलि पु० हिल-इन् । १सूर्य्ये २अर्कवृक्षे च ३अवज्ञायां हुडुचन्द्रः ४सूर्य्ये ज्यो०त०णिनि हेलिन् सूर्य्ये ज्यो० ।

हेष अश्वशब्दे भ्वा०आ० अ० सेट् कृदित् चङि न ह्रस्वः । हेषते अहेषिष्ट ।

हेषा स्त्री हेष-भावे अ । घोटकानां शब्दे अमरः ।

हेषिन् पु० हेष-णिनि । अश्वे त्रिका० ।

हेहै अव्य० हेच हैच द्व० । १सम्बोधने २आह्वाने मेदि० ।

हे अव्य० हा-कै । १सम्बोधने २आह्वाने च मेदि० ।

हैतुक त्रि० हेतौ प्रभवतः ठक् । हेतुवादरते सयुक्तिकवाक्यशीलिनि "त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः" पर्षल्लक्षणे मनुः ।

हैम त्रि० हिमे भवम् अण् । १हिमजातमात्रे २प्रातःकालीनहिमजाते जले न० राजनि० । ३भूनिम्बे पु०राजनि० । हेम्नो विकारः अण् टिलोपः । ४स्वर्णविकारे ५स्वर्णमयपदार्थे च त्रि० ।

हैमन पु० हेमन्त एव हेमन्ते भवो वा अण् तलोपः । १हेमन्ते काले शब्दर० । २तत्र जाते त्रि० । हेम्न इदमण् न टिलोपः । स्वर्णसम्बन्धिनि त्रि० स्त्रियां ङीष् ।

हैमन्तिक त्रि० हेमन्ते काले भवः ठञ् । हेमन्तकालभवे शालिधान्यभेदे (आमनधान) "हैमन्तिकं सिताऽस्वल्पं धान्य मुद्गाश्चिलाः यवाः" हविष्याद्योक्तौ तिन्त० ।

हैमल पु० हिमल एव स्वार्थे अण् । हेमन्ते ऋतौ शब्दर० ।

हैमवत न० हिमवतोऽदूरभवो देशः तस्येदं वा अण् । १भारतवर्षस्य वर्षभेदे त्रिका० । "एतद्धैमवतं वर्षं भारतो यत्र सन्ततिः" विष्णुपु० । २हिमालयसम्बन्धिनि त्रि० ३विषभेदे पु० हेमच० । तस्यापत्यं तत्र भवो वा अण् । ४पार्वत्यां ५हरीतक्यां अमरः स्त्री ङीप् । ७स्वर्णलोम्नां

टस्येतवचायाञ्च स्त्री मेदि० ङीप् ह्रस्वश्च। १०रेणुकायां स्त्री धरणिः ङीप्। [स्वर्णयूथिकायां शब्दर०।

हैमा मी) स्त्री हेम तद्यौऽस्त्रस्य अण् वा ङीप्।

हैयङ्गवीन न० ह्योगोदोहाद् भवम् ह्यस्+गो+ख निः। १नवनीते रत्नमा० पूर्वदिनदुग्धोद्भवे २घृते च अमरः।

हैरिक पु० हिर् र हेरः तत्र प्रहृतः ठक्। चौरे धरणिः।

हैहय पु० पश्चिमस्थे देशविशेषे तु०स० भूमेर्विभाग २१६८ पृ० हयम् तेषां राजा अण्। २क्षत्रियेश्वरे क्षात्रवीर्य्यं हैहयश्च० पृथा० हैहेय तत्रार्थे शब्दर०।

हो अव्य० हे-डो निः। १सम्बोधने २आह्वाने च मेदि०।

होड गतौ अनादरे च भ्वा० आ० सक० सेट् क्वादित्व चडि न ह्रस्वः। होडते अहोडिष्ट।

होड पु० होड्-अच् छुड-अच् वा। १क्षुद्रनौकाभेदे (छुड़ि) त्रिका० २चौरपक्षे च मिता०।

होत्र पु० हु-ष्ट्रन्। १होमे हेमच०। २हविषि घृतादौ च त्रिका० ३स्तुतौ स्त्री टाप्।

होत्रीय न० होत्राय हितम् होत्रऋदि वा छ। १हविर्द्रव्ये हेमच०। २होत्रसम्बन्धिनि त्रि०।

होम पु०हु-मन्। देवतोद्देशेन वह्नौ मन्त्रद्वारा घृतादित्यागरूपे कर्मणि नित्यं गृहस्थकर्त्तव्येषु पञ्चसु यज्ञेषु मध्ये २देवयज्ञे अमरः। ३आहवनीयविप्रमाणौ आहवनीयभागस्य मन्त्रेण दाने च आ० त०।

होमकुण्ड पुंन० होमार्थं कुण्डम्। होमार्थे कुण्डे त्रिका०

होमधान्य न० होमोपयुक्तं धान्यम्। १तिले २यवे च राजनि०।

होमधूम पु० होमजः धूमः। होमाग्निजाते धूमे हेमच०

होमभस्मन् न० होमजं भस्म। हुतद्रव्यजाते भस्मनि हेमच०

होमाग्नि पु० हुतः। यज्ञियाग्नौ हेमच०।

होमि पु० हु-इन् सुट् च। १अग्नौ २घृते च मेदि० ३जले शब्दर०। ४क्षिप्तकर्त्तरि।

होमिन् पु० होमोऽस्त्रस्य इनि। होमकर्त्तरि। [राजनि०

होम्य त्रि० होमाय हितम् यत्। होमोपयुक्ते घृतादौ

होरा स्त्री हु-रन्। ज्योतिषोक्ते १लग्ने २राश्यर्द्धभागे ३होराशास्त्रकथास्त्रभेदे ४रेखायाञ्च मेदि०।

'विषमर्क्षेषु प्रथमा होराः सूर्यस्य रोचिषः। द्वितीयाः सोमिनो युक्ता व्यत्ययाद्दुग्धयेत् सदा" ज्यो० त०।

"चतुर्विंशतिवेलाभिरहोरात्रं प्रचक्षते। पश्चिमादर्क्ष-रात्रादि होराणां विद्यते क्रमः" वह्निपु०।

होलक पु० हु-विच् लकति लक-अच् कर्म०। "अर्द्धपक्वे यवीधान्यैस्तृणपक्वैश्च होलकः" इत्युक्ते तथाविधे अर्द्धपक्वे यवीधान्ये "होलकोऽल्पानिलो मेदःकफदोषश्रमापहः। भवेद् यो होलको यस्य स च तत्तद्गुणो भवेत्" भावप्र०।

होलाक पु० खेदविशेषार्थव्यापारभेदे चरकः तत्र टोलाक इत्यत्र होलाक पाठान्तरम्।

होलाका स्त्री हु-विच् तं खाति ला-क संज्ञायां कन्। १वसन्तोत्सवभेदे उपचारात् तत्काले फाल्गुनपौर्ण-मास्याञ्च। पृषो० होली होलिका होलकाऽपत्र। होलाकाविधिश्च आचारप्राप्त इति माधवाचार्यः। पुराणादिप्रसङ्गः शास्त्रमूलोऽयम् आचार इति हेमाद्रि-निर्णयप्रभृतयः। तद्विधिकालौ निर्णि० उक्तौ यथा "फाल्गुनपौर्णमासी होलिका सा च सायाह्नव्यापिनी ग्राह्या "सायाह्ने होलिकां कुर्य्यात् पूर्वाह्णे क्रीडनं गवामिति" वचनादिति निर्णयामृते उक्तम्। ज्योतिर्नि-बन्धे तु "प्रतिपद्भूतभद्रासु यार्चिता होलिका दिवा। संवत्सरञ्च तद्राष्ट्रं पुरं दहति सात्युत। प्रदोषव्यापिनी ग्राह्या पूर्णिमा फाल्गुनी सदा। तस्यां भद्रामुखं त्यक्त्वा पूज्या होला निशामुखे" इति नारदवचनात् प्रदोष-व्यापिनीत्युक्तम्। हेमाद्रौ भद्रनरत्ने च भविष्ये "अस्यां निशागमे पार्थ! संरक्ष्याः शिशवो गृहे। गोमयेनोप-लिप्ते च सचत्वरे गृहाङ्गणे" इत्यादिना तत्रैव तद्वि-धानाच्च। तेनेयं पूर्वविद्धा "आवणी दुर्गनवमी दूर्वा चैव ह्युताशनी। पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम्" इति हरिव्यसनच्छलेनैवोक्तेश्च। दिनद्वये प्रदोषव्याप्तौ परैव पूर्वदिने भद्रासत्त्वात् तत्र च होलिकानिषेधात् तदुक्तं निर्णयामृते भद्रनरत्ने च पुरःप्रसक्तये "भ-द्रायां दीपिता होली राष्ट्रभङ्गं करोति वै। नगरस्य च नैवेद्या तस्मात् तां परिवर्जयेत्"। तथा "भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी"। तथा "दिनार्द्धेन पर-तोऽपि स्यात् फाल्गुनी पूर्णिमा यदि। रात्रौ भद्रा-वसाने तु होलिका दीप्यते तदा" इति। यदा तु पूर्वदिने चतुर्दशी प्रदोषव्यापिनी परदिने च त्रयवधात् सायाह्नात् प्रागेव पूर्णिमा समाप्यते तदा पूर्वदिने संपूर्ण

रात्रौ भद्रासत्त्वात् तत्र च तन्निषेधात् परेऽह्नि प्रतिपद्येव कुर्यात्। "सार्द्धयामत्रयं वा स्याद्यदि द्वितीयदिवसे यदा। प्रतिपद्वर्द्धमाना तु तदा सा होलिका स्मृता" इति भविष्यवचनादिति निर्णयामृतकारः। मदनरत्नेऽप्येवम्। यत्तु "वह्नौ वह्निं परित्यजेदिति" भविष्यम्। वह्नौ होलिकायां वह्निं प्रतिपदं वर्जयेदित्यर्थः तदुक्तभिन्नविषयमिति तत्रैवोक्तम्। अन्ये तु तस्यां भद्रामुखं त्यक्त्वा कार्य्या। "प्रदोषव्यापिनी चेत् स्याद्यदा पूर्वदिने तथा। भद्रामुखं वर्जयित्वा होलिकायाः प्रदीपनम्" इति नारदवचनात्। "निशागमे प्रपूज्येत होलिका सर्वदा बुधैः। न दिवा पूजयेद्धोलां पूजिता दुःखदा भवेत्" इति दिवोदासीयवचनात्। "यामत्रयोर्द्ध्वयुक्ता चेत् प्रतिपत्तु भवेत्तिथिः। भद्रामुखं परित्यज्य कार्य्या होला मनीषिभिः" इति विद्याविनोदेऽभिधानाच्च। भद्रामुखं विहाय पूर्वदिने एव कार्य्येत्याहुः। भद्रामुखन्तु नाड्यास्तु पञ्चदण्डं गणकास्त्वेके" इति रत्नमालोक्तं त्वेयम्। निष्टाचारोऽप्येवमेव। अत्र चेच्चन्द्रग्रहणं तदा ततोऽर्वाङ्निशि भद्रावर्जं पौर्णमास्यां होलिकादीपनम्। अथ परेऽह्निप्रदोषोदयस्तदा पूर्वदिने भद्रावर्जं रात्रौ चतुर्थयामे विद्धपुञ्जे वा होलिका कार्य्या। परोत्तरं प्रतिपत्सत्त्वात् तत्पूर्वत्र दिवा होलानिषेधादिति टिवोटाषचन्द्रप्रकाशौ। वस्तुतस्तु परदिने प्रदोषे पौर्णमासीसत्त्वे कर्मकालत्वेन चतुर्थयामादि गौणकालग्रहणे मानाभावाद्दूढाभावाच्च ग्रहणकाल एव होला कार्य्या। न च "सर्वेषामेव वर्णानां मृतके राहुदर्शने। स्नात्वा कर्मणि कुर्वीत मृतसूतकविवर्जवेदिति" निषेधात् कथं मृतके होजेति वाच्यम् तस्योत्तरार्द्धनिषेधत्वात्। पूजामन्त्रस्तु "अट्टट्टहासनिरते भूतसङ्घसमन्विते। बालिशैः। अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव" इति। यत्तु वार्त्तिककारैर्होलिका आचारप्राप्त्युक्तम्। तत्र हेमाद्रावुशनोवचनान्यखिलानि लिखित्वा चिन्त्या ज्ञेया आर्य्याधिकरणवत्। "मृताशनी मलमासे च भवति" नि०शि०।

होलाकाधिकरण न० जैमि० प्रथमस्य द्वितीयपादे दर्शिते न्यायभेदे तच्च तत्त्वबोधन्यायशब्देन दर्शितं यथा "होलाका प्राच्याधिमानिभिरनुष्ठीयते होलाका चतुर्दश्योत्सवविशेषः श्रुत्योतिप्रसिद्धः। एवमादीनेतत्कादिकं दृष्टिपाठैः, आदीनेतत्कं खलु लोकगतं करस्नाकादिस्थावरदेवतापूजादिकं तद्देशप्रसिद्धम्। उदृष्टसमयज्ञादिकमुदीच्यैः क्रियते उदृष्टसमयज्ञस्य ज्यौषस्य पौर्णमास्यां बलोवर्दानस्यर्च्यं धारयन्ति यत् सः तद्देशप्रसिद्धः एवं हारीतादयुक्तस्मृतयोऽपि कासुचित् कस्मिंश्चिद्देशविशेषे दृश्यन्ते ऽटहोक्तकर्माणि तत्तच्छाखोक्तकर्तृकानीत्येषां मूलभूताः स्मृतयः कल्पनीयाः। तासु किं प्राच्यैर्होलाका कर्त्तव्येत्यादिरूपा प्राच्यादिपदघटिता व्यवस्थितविषया उतहोलाका कर्त्तव्या इति तत्तत्पदाघटिता सामान्यविषया इति संशयः तत्र प्राच्यादिपदघटितैव कल्प्या देशविशेषाणामाचारदर्शनात् लिङ्गव्यवस्थया हि लिङ्गमनुमीयते यथा यत्र धूमोऽवगतस्तत्रैव वह्निरनुमीयते नान्यत्र तथा च सूत्रम् "अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात्" अस्यार्थः। अनुमानव्यवस्थानात् धूमादिव्यवस्थया वह्न्याद्यनुमानव्यवस्थादर्शनात् तत्संयुक्तं प्राच्यादिपदघटितम् अनुमेयस्मृतिवाक्यं प्रमाणं स्यादिति प्राप्ते राद्धान्तायोक्तम् "विशेषाभावमात्रेण प्रसिध्येत् सर्वधर्मता। विशेषस्यात् व्यवस्था स्यात् तच्च नेहोपपद्यते"। अस्यार्थः विशेषाभावमात्रेण हारीतस्मृतिगोभिलगटादौ प्राच्यविशेषप्रतिपादकपदाभावेन तत्तत्कर्तृकस्य सर्वधर्मता सर्वसाधारण्यो कर्त्तव्यता प्रसिध्येत्। तथा हि छन्दोगोक्ति गोभिलादिः स्वशिष्यानध्यापयामास तेऽध्यन्यान् छन्दोगानेवमन्यत्रापि ऽटहोक्तमित्यादिकमुक्तमूलम् अतस्तत्तच्छाखिनस्तत्तच्छाखोक्तमाचरन्ति इति श्रुतिवाक्यानुसारिणी श्रुतिः कल्पनीया। आचारे त्वाह विशेषणात् प्राच्यादीनां विशेषव्यवहारदर्शनेनानुमेयस्मृतौ प्राच्यादिविशेषणघटकाभावात् व्यवस्था स्यात् प्राच्यादीनामेव तदाचरणमिति विधानव्यवस्था स्यात् तच्च नेहोपपद्यते। अयमाशयः सर्वाचरितत्वमनुगतस्य अनाचरितत्वस्य व्यावृत्तस्य आकृतिव्यक्तिगुणादिकं किञ्चित् विशेषणं न सम्भवति यदुपादाय होलाकाद्यधिकरणं स्यात्। न च प्राचीभवत्वादिरूपप्राच्यादिपदघटिता तथेति वाच्यं तद्देशभवानामपि केषाञ्चिदनाचरणात् चिरविनष्टस्य तत्तद्देशीयस्य पुत्रपौत्राणां समाख्यायामसत्यामपि होलाका कर्त्तव्येति सामान्यश्रुत्यैवोपपत्तौ प्राच्यादिपदघटितस्मृतिकल्पनमनन्याय्यं गौरवात् न चाप्राच्यानामनुष्ठानार्थं प्राच्यादिपदवती कल्पनीया अनाचरणरूपस्यानुष्ठानस्यास्मृतिकल्पकत्वात् तस्येच्छाविरहेणैव सम्भवात्। न हि यदि स्मृतिर्विहितं स्यात् तदा अप्राच्यैरपि अ-

लुप्तितं स्यादिति वक्तुं शक्यते होलाकाया नित्यत्वे मानाभावेन काम्यत्वात् । न हि सर्वमेव श्रुतिविहितं काम्यं सर्वैः सङ्करनुष्ठीयते न वैकस्य कर्त्तुर्विधानमन्यस्य तद्विधेधयति येनाप्राच्यानां निषिद्धाचरणेनानिष्टजनकताज्ञापनार्थं तत्प्रदर्शकवत् स्यात् । अत्र च शास्त्रदीपिकाधिकरणमाचादायभागप्रभृतिषु प्राच्यानामिति पाठः । प्राच्यास्तात्र शास्त्रीयाः ते च सुमेरुलङ्कयोर्मध्ये या रेखा ज्योतिः शास्त्रादौ प्रसिद्धा तस्याः पूर्वदेशीयाः प्राच्याः न तु गौड़देशावधिकपूर्वदेशीयाः । तस्याः पश्चिमदेशीयास्तु पाश्चात्याः । एतेन प्रतीच्यानां तथाचरणमिति स्वदेशाभिप्रायेणैव गौड़ीयेनोदीच्येन लिखितं तल्लेखं गौड़ीयानामेव श्रुतिकल्पनम् अप्रत्यक्षवेदानां तथा चाव्यवस्थितश्रुतिकल्पना स्यात् न चायमपि दोषः विशेषकल्पने भविष्यति तथा सति प्रार्थसारथिमिश्रादिभिर्निबन्धृभिरयमप्युल्लाबितः स्यात् न चैवम् । तस्माच्छ्रोतिरादिशास्त्रप्रसिद्धप्राच्यादिमादायैवेयमाशङ्कते" ।

ह्रो अव्य० ह्रे–डो नि० । १सम्बोधने २आह्वाने च मेदि० ।

ह्रोड़ अनादरे गतौ च भ्वा० आ० सक० सेट् क्वादित् चक्रि न ह्रुडः । ह्रोडते अह्रौडिष्ट ।

ह्रौत्र त्रि० ह्रोत्रुरिदम् ह्रुङा० अण् । तस्य भावः कर्म वा युवा० अण् वा । १होत्रसम्बन्धिनि २तत्कर्मादौ न० ।

ह्रु चौर्ये चुरा० आत्म० सक० अनिट् । ह्रुते अह्रोष्ट ।

ह्रुल चलने भ्वा० प० अक० सेट् । ह्रुलति अह्रुलीत् । घटा० । प्रह्रुलयति अनुपसर्गस्य वा ह्रुलः ।

ह्रस् अव्य० गतेऽह्नि नि० । गतदिवसे अमरः ।

ह्रस्तन त्रि० ह्रस्+भवार्थे ट्यु ल् ह्रुट् च । गतदिवसभवे त्यप् । ह्रस्त्योऽप्यत्र त्रि० । [ह्रुङ्भिः । ह्रुणति अह्रुणीत् ।

ह्रुग संवरणे भ्वा० पर० सक० सेट् घटा० एदित् सिचि न

ह्रुद् पु० ह्रुाद–अच् नि० । १अगाधजलाशये अमरः । २किरणे रामाश्रमः । "ह्रुद्वारि वह्निजननं मधुरं कफवातहारि पथ्यञ्च" राजनि० तज्जलगुणा उक्ताः ।

ह्रुद्दिनी स्त्री ह्रुदोऽस्त्यस्याम् इनि । नद्याम् अमरः ।

ह्रुप भाषणे चु० उ० सक० सेट् । ह्रोपयति ते अजिह्रुपत् त ।

ह्रुस रवे भ्वा० प० सक० सेट् । ह्रुसति अह्रुसीत् अह्रासीत्

ह्रुस्मिमन् पु० ह्रुस्वस्य भावः इमनिच् ह्रुस्वादेशः । ह्रुस्वतायाम्

ह्रुस्मिष्ठ त्रि० अतिशयेन ह्रुस्वः इष्ठन् ह्रुस्वादेशः । अतिह्रुस्वे

ह्रुस्मीयस् त्रि० अतिशयेन ह्रुस्वः ईयसुन् ह्रुस्वादेशः । अतिह्रुस्वे । स्त्रियां ङीप् ।

ह्रस्व न० ह्रुस–वन् । १परिमाणभेदे २तद्वति २खर्वे च त्रि० अमरः । एकमात्राकालोच्चार्य्य ४अक्षरवर्णे पु० राजनि० । ५सङ्गपर्य्यां ६नागवल्लायां भूमिजम्बूवृक्षे स्त्री राजनि० ।

ह्रस्वकुश पु० नित्यकर्म० । श्वेतकुशे राजनि० ।

ह्रस्वगर्भ पु० ह्रस्वो गर्भो यस्य । कुशे रत्नमा० ।

ह्रस्वगवेधुका स्त्री नि० कर्म० । नागवल्लायाम् अमरः ।

ह्रस्वजम्बू स्त्री कर्म० । क्षुद्रजम्बूवृक्षे रत्नमा० ।

ह्रस्वदर्भ पु० नित्यकर्म० । श्वेतकुशे राजनि० । [क्याम् राजनि०

ह्रस्वदा स्त्री ह्रस्वैरपि दीयते क्रियते दो–खण्डने क । अल्प०

ह्रस्वपत्रक पु० ह्रस्वं पत्रमस्य कप् । १नगजमधूके (ओक) २अश्वत्थाम् स्त्री राजनि० कापि अत इत्त्वम् ।

ह्रस्वफला स्त्री ह्रस्वं फलमस्याः । भूमिजम्बूवृक्षे राजनि०

ह्रस्वमूल पु० ह्रस्वं मूलमस्य । रक्तेक्षौ राजनि० । [अमरः ।

ह्रस्वशाखाश्मि पु० ह्रस्वा शाखा श्मिका च यस्य । क्षुपे

ह्रस्वाग्नि पु० ह्रस्वः अग्निरस्मात् ५ब० । अर्कवृक्षे शब्दच० ।

ह्रस्वाङ्ग पु० ह्रस्वमङ्गमस्मात् ५ब० । १जीवकौषधे अमरः । ६ब० । वामने २खर्वे त्रि० । कर्म० । ह्रस्वे अङ्गे न० ।

ह्राद स्वने भ्वा० आ० अक० सेट् । ह्रादते अह्राद्दिष्ट ।

ह्राद पु० ह्राद–भावे घञ् । १शब्दे हेमच० अच् । २शब्दकारके त्रि० ३स्थिरगत्यकश्मिपुपुलभेदे पु० पुराणम् ।

ह्रादिनी स्त्री ह्राद–णिनि ङीप् । १विद्युति २यज्ञे अमरः ३नद्याम् राजनि० ४शक्तिक्याञ्च शब्दर० ५ह्रादविशिष्टे त्रि०

ह्रास पु० ह्रस–घञ् । १शब्दे त्रि० २अपचये च ।

ह्रिणी लज्जायाम् कण्ड्वा० आ० अक० सेट् । ह्रिणीयते अह्रिणीयिष्ट ।

ह्रिणीया स्त्री ह्रिणी–यक् भावे अ । लज्जायाम् अमरः । पृषो० ह्रिणिया इत्यपि तत्रार्थे भरतः । [ह्रेषयति ते ।

ह्री लज्जायां जु० प० अक० अनिट् । जिह्रेति अह्रैषीत् । णिचि

ह्री स्त्री ह्री–मस्य० भावे क्विप् । लज्जायाम् अमरः ।

ह्रीका स्त्री ह्री–कक । १लज्जायां उणा० । २लज्जायां स्त्री० कीवा रस्य लः तत्रार्थे ।

ह्रीकु त्रि० ह्री–उनु कुक्च । १लज्जिते । २मज्जने ४जलुके ५लघुनि च उणा० । वा रस्य लः । [क्षात् ।

ह्रीच्छ लज्जायाम् भ्वा० प० अक० सेट् । ह्रीच्छति अह्रीच्छीत्

ह्रीजित त्रि० ३त० । लज्जाशीले घटा० ।

ह्री(त)ण त्रि० ह्री–क्त वा तस्य नः । लज्जिते अमरः ।

ह्रीवेर(ल) न० ह्रिये लज्जाये वेरमङ्गमस्य क्षुद्रत्वात् पृषो० वा रस्य लः (वाला) तृणभेदे पृषो० । ह्रिवेर तत्रार्थे रस्य

स: कृतीवेत्र तत्रार्थे अमरटीकायामाह स भरत: ।

क्रुड गतौ भ्वा० आ० सक० सेट् क्रादित् चङि न ह्रस्व: । क्रोडते अक्रोडिष्ट । [क्रुडति अक्रूडिष्ट

क्रूड गतौ भ्वा० आ० सक० सेट् क्रादित् चङि न ह्रस्व: ।

क्रेप गतौ भ्वा० आ०सक० सेट् । क्रादित् चङि न ह्रस्व: । क्रेपते अक्रेपिष्ट ।

क्रेप अवयवे सक० वर्णने सक० भ्वा० आ० सेट् क्रादित् चङि न ह्रस्व: । क्रेपते अक्रेपिष्ट ।

क्रेपा स्त्री क्रेप-भावे घ । अवयवे अमर: ।

क्रोड गतौ भ्वा० आ० सक० सेट् क्रादित् चङि न ह्रस्व: । क्रोडते अक्रोडिष्ट । [क्रुडि: । क्रुगति अक्रुगीत ।

क्लग संवरणे भ्वा० प० सक० सेट् चटा० दादित् विधि न

क्लप भाषणे चु०उ०द्विक०सेट् । क्लापयति ते अजिक्लपत् त ।

क्लम रवे भ्वा० प० अ० सेट् । क्लमति अक्लमीत् अक्लामीत् ।

क्लाद शब्दे भ्वा० आत्म० अक०मोदने सक० सेड् इदित् निष्ठायामनिट् । क्लादते अक्लादिष्ट । क्लद: ।

आ+आनन्दे सक० आक्लाद: ।

क्लादिनी स्त्री क्लाद-णिनि ङीप् । १विद्युति २रम्भे अमर: पाठान्तरम् ३ईश्वरशक्तिभेदे च श्रीधर: ४क्लादविशिष्टे त्रि०

क्लल चलने भ्वा० प० अक० सेट् । क्ललति अक्लालीत् । घटा० प्रक्लवयति अनुपसर्गस्य वा क्लल: क्ललयति क्लालयति ।

क्लान न० क्लै-ल्युट् । आक्लाने । [अक्लरत: ।

क्लृ कटिनीकरणे भ्वा०प०सक०अनिट् । क्लरति अक्लारीत् ।

क्लै सङ्घाते शब्दे च अक० आक्लानार्थे सक०भ्वा० चभ०यक्ष० अनिट् । क्लायति अक्लत्-अक्लत अक्लास्त अस्म०नु-क्लाव आक्लतः आक्लतिः ।

आ+सङ्घाते आत्म० अस्यु आक्लयते । शिवम् ।

ओं तत्सत् ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते वाचस्पत्ये हकारादिशब्दार्थसङ्कलनम् ।

ग्रन्थकर्तृवंशादि ।

राढ़ीयश्रेणीविख्यातकें जिडिग्रामिक: किल । यशोहरप्रदेशस्यसारलावसथे स्थित: ॥
सार्वभौमोपाधियुक्त: कमलाकान्तसंज्ञक: । सक्षोत्रिय: क्षितौ ख्यातो वात्स्यवंश्यावतंसक: ॥
मुकुन्दरामनामासीत् तदन्वयसमुद्भव: । तत्प्रदेशस्यवैचक्षीग्रामवासी स्वकार्य्यत: ॥
तर्कसिद्धान्तोपनामा रामरामस्तदात्मज: । सदा शिवशिवेत्युक्त्या प्राप्त: शिवशिवाभिधाम् ॥
नानाविद्याधरत्वेन प्राप विद्याधराह्वयम् । भागीरथीतीरवासी भवत्यजिहीर्षया ॥
वर्द्धमानप्रदेशस्याम्बिकायामेऽवसच्चिरम् । अन्ते कार्शीं समासाद्य पञ्चत्वं प्राप्य मुक्तिभाक् ॥
अम्बिकावासकालेऽस्य जातौ वंशधरौ सुतौ । तर्कपञ्चाननोपाधिर्दुर्गादासस्तु मध्यम: ॥
सार्वभौमोपाधियुत: कनीयांस्तु तदात्मज: । कालिदासाभिधो नानाशास्त्रविद्याविशारद: ॥
तस्याहं प्रथम: पुत्रस्तारानाथाह्वयो द्विज: । तर्कवाचस्पत्युपाधिं गुरुतो लब्धवान् स्वत: ॥
नगरे कलिकाताख्ये गवर्मेण्टनिवेशिते । संस्कृतपाठशालाख्ये मठे पूर्वमधीतवान् ॥
काव्यादिनानाख्यानेषु लब्धविद्यस्तत: क्रमात् । तत्रैव पाठशालायां तदध्यक्षेण पूर्वत: ॥
पाणिन्यादिव्याकरणपाठनायै नियोजित: । पश्चात् दर्शनशास्त्रस्याध्यापनायापि योजित: ॥
प्रायश्चित्तग्रहत्सरात्त तत्कर्मानुष्ठितं मया । सिद्धान्तकौमुदीव्याख्या सरलाख्या तदा कृता ॥
तदैव तत्कौमुद्या व्याख्याऽपि यत्नत: कृता । सिद्धान्तबिन्दुसारोऽपि ग्रन्थसाममहानिधि: ॥

आशुबोधं व्याकरणं शब्दार्थरत्ननामकः । धातुरूपादर्शनामा ग्रन्थोऽपि रचितो मया ॥
गायत्र्यर्थो विनिर्णीतः गयाश्राद्धादिपद्धतिः । वादो बहुविवाहस्य तुलादानादिपद्धतिः ॥
राजप्रशस्ती रचिता कादम्बर्याश्च टिप्पनी । वेणीसंहारमुख्येषु विवृतिर्नाटकेषु च ॥
एते ग्रन्था विनिर्माय मुद्रिता बहुयत्नतः । गवर्मेण्टानुकूल्यञ्च क्वचिदेषु च मुद्रणे ॥
तत्प्रदापसृतेनापि गवर्मेण्टप्रकल्पिताम् । अर्द्धवृत्तिं समासाद्य वाचस्पत्यं समापितम् ॥
मुद्रणे व्ययबाहुल्यात् गवर्मेण्टे निवेदिते । तद्दत्तव्ययसाहाय्यं लब्ध्वेदं मुद्रितं मया ॥
अष्टादशभिरानाब्दे वर्षैः पूर्तिं मयाधुना । शब्दरत्नमयः कोषो मोषदोषविवर्जितः ।
नानाधातुरव्ययाढ्यो नानार्थोऽयं विराजताम् । वाचस्पत्याभिधो नानाशास्त्रार्थानां प्रदर्शकः
वाचस्पत्युपनाम्नायं श्रीतारानाथशर्म्मणा । निरमायि प्रयत्नेन मुद्रायन्त्रैश्च मुद्रितः ॥
वाणशून्यदन्तिचन्द्रविमिते शकवत्सरे । सौरपौषे षोड़श्यांशे मुद्रा तस्य समापिता ॥
यदत्र स्खलितं किञ्चित् प्रमादेन भ्रमेण वा । तत्सर्वं शोधयन्त्वार्याः कस्य न स्खलितं मनः ।
बहुच्छिद्रं परित्यज्य गुणलेशजिघृक्षया । परिगृह्णन्त्वदोविज्ञा ऋजवो दम्भवर्जिताः ॥

एतस्य मुद्रणविधौ परिशोधनार्थं यत्ने कृतेऽपि बहुले भ्रमतः प्रमादात् ।
दृष्टेर्विकारवशतो यदशुद्धमस्ति संशोधयन्तु सुधियो नतियाचितास्तत् ॥

अनुद्घोषादिस्मृता ये शब्दाः केचित् प्रमादतः । परिशिष्टे प्रकाश्यास्ते इत्याशा पूरको विभुः ॥
ये शब्दाम्बुधिपारमापुरमलप्रज्ञातरीवैभवात् तानुद्दिश्य नमस्क्रियैव सततं तेभ्यो न चैषा क्रिया ।
ये शास्त्रेऽकृतबुद्धयो निजधिया व्युत्पित्सवो मानवाः नानाकोषनिरीक्षणे श्रमभियस्तेभ्यो श्रमैषा क्रिया ॥
यदानुशासने रतं मुनित्रयं हृदा नतम् । तदस्य भूमनण्डले करोतु सुप्रचारणम् ॥ शिवम् ।

ओं तत्सत् ।

इति कलिकातास्थगवर्नमेण्टसंस्कृतपाठशालीयदर्शनव्याकरणाध्यापकचर श्रीतारानाथतर्कवाचस्पति-
भट्टाचार्येण विरचितं वाचस्पत्याभिधसभिधानं समाप्तम् ।

१८०५ शालिवाहन वत्सरे, १९४० विक्रमादित्यसंवत्सरे, १८८४ खृीष्टाब्दे ·
कलिकातानगरे मुद्रितमभूत् ।